COLLECTIO EDITIONUM RARIORUM ORIENTALUM

NOVITER IMPRESSARUM

III

THE WHITE YAJURVEDA

EDITED

BY

DR. ALBRECHT WEBER

DOCENT OF THE SANSCRIT-LANGUAGE AT THE UNIVERSITY OF BERLIN, MEMBER OF THE ROYAL BAVARIAN ACADEMY OF SCIENCES IN MUNICH AND OF THE GERMAN ORIENTAL SOCIETY, ASSOCIATED MEMBER OF THE ASIATIC SOCIETY IN PARIS, CORRESPONDING MEMBER OF THE AMERICAN ORIENTAL SOCIETY.

IN THREE PARTS

PART I. The Vâjasaneyi-Sanhitâ in the Mâdhyandina- an the Kâṇva-Çakhâ with the commentary of Mahîdhara.

PART II. The Çatapatha-Brâhmaṇa in the Mâdhyandina-Câkhâ with extracts from the commentaries of Sâyaṇa, Harisvâmin and Dvivedaganga.

PART III. The Çrauta-sûtra of Kátyâyana with extracts from the commentaries of Karka and Yâjnikadeva.

LEIPZIG

OTTO HARRASSOWITZ

1924

THE ÇATAPATHA-BRÂHMAṆA

IN THE

MÂDHYANDINA-ÇÂKHÂ WITH EXTRACTS FROM THE
COMMENTARIES OF SÂYAṆA, HARISVÂMIN
AND DVIVEDAGANGA

EDITED BY

DR. ALBRECHT WEBER.

श्रीशुक्लयजुर्वेदे
शतपथब्राह्मणम्
माध्यन्दिनीयां शाखामनुसृत्य
श्रीमत्सायणाचार्यहरिस्वामिद्विवेदगङ्गकृतभाष्येभ्यः सारमुद्धृत्य
अल्बेर्तेन वेबेरेण शोधितम्
प्रुष्यनाम्नि जनपदे बेर्लीनाख्यायां राजधान्यां मुद्रितम्
संवत्सरे १८५५.

REPRINT OF THE EDITION: BERLIN 1855

LEIPZIG
OTTO HARRASSOWITZ
1924

Manuldruck der Spamerschen Buchdruckerei in Leipzig.

TO HIS EXCELLENCY

THE CHEVALIER Dr. C. C. J. BUNSEN

THE NOBLE FRIEND AND PATRON OF LINGUISTIC STUDIES,
ALIKE CELEBRATED AS SCHOLAR AND AS STATESMAN,

WITH PROFOUND RESPECT

DEDICATED

BY THE GRATEFUL EDITOR.

This edition of the Brâhmanas of the white Yajurveda is destined only to comprehend the text. An introductory essay, a glossary, a partial translation and deeper researches into all the materials, treasured up here and in the sûtras of *Kâtyâyana*, shall follow in a separate work on the Yajur-Vedic ceremonies. Therefore I shall here content myself with enumerating the critical apparatus, extant in Europe, and giving a short explanation of the accents. —

A. I Manuscripts of the text of the *Çatapatha Brâhmaṇa*: *a.* in the *Mâdhyandina-Çâkhâ*: —

There is extant a very great number of old as well as recent copies of it: Those, which chiefly (with the exception only of the first bock and part of the thirteenth) furnished the text for this edition, exist in the *Chambers-Collection* and I take this opportunity to congratulate the Royal Library of *Berlin* upon this splendid donation made to it by the present *King of Prussia* through the care of the Chevalier *Bunsen.* Next to these manuscripts in value stands the copy (= M) of the Rev. Dr. *Mill,* now added to the *Bodleian* library, the greater part of which, viz. the books I-V and VII.-XIII is written Samvat 1705-7 in *çrîvṛiddhanagara* by *Dâmodara* son of *Purushottama* and accented forty years after by *Vidyâdhara.* I shall now proceed to notice the single books with their respective manuscripts. (*) —

I. *Haviryajna*: begins व्रतमुपैष्यन्नन्तरेणाहवनीयम् (7 prapâṭhaka, 9 adhyâya, 37 brâhmana, 837 kaṇḍikâ). M foll 117. — Bodlei. Wils. 363 (= B.). Samvat 1709. foll. 152 (ten leaves are wanting from 8, 2, 10 - 9, 1, 12 incl.). nr. 368 (= C.) S. 1654. foll. 123. nr. 67. nr. 71. — E. I. H. 2143 (= I.). — Paris Bibl. Nationale D 161. —

(*) All the copies are accented with the exception of Bodlei. Wils. 67 (1-3). 63 (4-8). 62 (9-14). 71 (1-3. 7. 13 twice). 70 (6. 14. 4. 11. 9. 12. 8. 5). E. I. H. 2143 (1-7). 309 (8-14). 1277 (2. 3). and partly of Chamb. No. 39 (10 twice. 2-5. 7-9. written in Benares S. 1851. Çâke 1716 krodhananâmasamvatsare). *These* copies are recently written and very incorrect.

II. *Ekapâdikâ* begins स यद्वाऽइतश्चेतश्च (5 prap. 6 adhy. 24 brâhm. 549 kaṇḍ.) Chamb. 3 written S. 1681 in Kâçî by Gangârâmamicra. foll. 116. nr. 39. — M. foll. 84. — Bodl. Wils. 366 foll. 62. nr. 67. nr. 71. — E. I. H. 2143. nr. 1277 nr. 583. foll. 27. — Paris D 147. —

III. *Adhvara* begins देवयजनं जोषयन्ते (7 prap. 9 adhy. 37 brâhm. 859 kaṇḍ.) Chamb 1. foll. 181 written by the same scribe as nr. 3. - nr. 39. — M. foll. 125. — Bodl. Wils. 359 S. 1585 foll. 116. nr. 383. S. 1688. foll. 333. nr. 67. nr. 71. — E. I. H. 1277. 2143. —

IV. *Graha* begins प्राणो ह वाऽअस्योपांशुः (5 prap. 6 adhy. 39 br. 649 k.) Chamb. 5. foll. 240. S. 1689. Çake 1554. angiránâmasamvatsare written in Benares âbhîrajnâtîyarânâranganâthasutanâmâjikena. nr. 39. — M. foll. 90 accented S. 1745 by Someçvara. — Bodl. W. 365. nr. 63. nr. 70. — E. I. H. 2143. — Paris D 162. —

V. *Sava* begins देवाश्च वाऽअसुराश्च (4 pr. 5 adhy. 25 br. 471 k.) Chamb. 6. foll. 109. S. 1683. written by the same scribe as nr. 1 and 3. nr. 16. foll. 89. S. 1648. nr. 21. foll. 59. S. 1572. nr. 39 (till to ३.१.८.). — M foll. 68. accented S. 1713 by Laghunâtha. — Bodl. W. 452. foll. 113. S. 1610. nr. 63. nr. 70. — E. I. H. 2143. — Paris D. 144. —

VI. Û*shasambharaṇa* begins असद्वाऽइदमग्रऽआसीत् (5 pr. 8 adhy. 27 br. 540 k.) Chamb. 7. foll. 170. nr. 17. foll. 108. S. 1545. Câke 1461 written çrîmat hansapurapattane revâçrînarmadâyâ daxine tate on the order of Modhajnâtîya Bhattakeçava. nr. 19. foll. 60. — M foll. 139 written S. 1628 and accented by Mahâdeva. — Bodl. W. 454. foll. 165. S. 1610. nr. 457. S. 1688. foll. 211. nr. 63. nr. 70. — E. I. H. 2143. — Paris D. 148. 173. —

VII. *Hastishaṭ nâma kâṇḍam* (*) begins गार्हपत्यं चेष्यन् (4 pr. 5 adhy. 12 br. 398 k.) Chamb. 9. foll. 115. nr. 39. — M. foll. 60. — Bodl. W. 462. foll. 114. S. 1571. nr. 63. nr. 71. — E. I. H. 268. 2143. — Paris D. 196. —

VIII. *Citi* begins प्राणभृत उपदधाति (4 pr. 7 adhy. 27 br. 437 k.) Chamb. nr. 20. foll. 86. S. 1739. nr. 39. — M. foll. 72. — Bodl. W. 363. foll. 96. nr. 63. nr. 70. — E. I. H. 268. 309. — Paris D. 195. —

IX. *Samciti* begins अथातः शतरुद्रियम् (4 pr. 5 adhy. 15 br. 401 k.) Chamb

(*) The name of this kâṇḍa is rather questionable: the one above mentioned is taken from M. as the best authority. The other manuscripts in the Mâdhyandina as well as the Kânva Çâkhâ call it Hastighata. Is hastin = one? hastishat = seven? See A. W. v. Schlegel Réflexions sur l'étude des langues asiatiques p. 197 - 199.

14. foll. 103. S. 1586. nr. 18. foll. 61. S. 1671. nr. 39. — M. foll. 66. — Bodl. W. 363, 3. foll. 75. S. 1692. nr. 389. nr. 62. nr. 70. — E. I. H. 309. —

X. *Agnirahasya* begins अग्निर्वाऽएष पुरस्ताच्चीयते (4 pr. 6 adhy. 31 br. 369 k.) Chamb. 11. foll. 60. S. 1485 (A. D. 1428). nr. 39. twice. — M. foll. 58. accented S. 1715. by Krishnaputra Prabhûjika (?). — Bodl. W. 461. foll. 99. S. 1655. nr. 62. — E. I. H. 309. —

XI. *Ashṭâdhyâyi* begins संवत्सरो वै यज्ञः (4 pr. 8 adhy. 42 br. 437 k.) Chamb. 12. foll. 116. — M. foll. 59. — Bodl. W. 369, 1. S. 1645. foll. 86. nr. 62. nr. 70. — E. I. H. 309. — Paris D. 146. —

XII. *Madhyama* begins अयं वै यज्ञो योऽयं पवते (4 pr. 9 adhy. 29 br. 459 k.) Chamb. 13. foll. 69. — M. foll. 62. — Bodl. W. 62. nr. 70. — E. I. H. 309. — Paris D. 159. —

XIII. *Açvamedha* begins ब्रह्मौदनं पचति (4 pr. 8 adhy. 43 br. 430 k.) Chamb. 22. foll. 7. a fragment beginning from 8, 1, 1. — M. foll. 60. — Bodl. W. 365 (= B.). foll. 78. S. 1691. nr. 453 (= C.). foll. 81. S. 1808. nr. 62. nr. 71. — E. I. H. 268. 309. — Paris D. 160. —

XIV. *Âraṇyakam* begins देवा ह वै सत्रं निषेदुः (7 pr. 9 adhy. 50 br. 796 k.) Chamb. 15. foll. 173. S. 1583. — M. foll. 167. written by Pîtâmbara in Benares. — E. I. H. 309. —

Detached from this kâṇḍa is the *Vṛihad-Âraṇyakam*, beginning with the thirth prapâṭhaka: द्वया ह प्राजापत्या देवाश्चासुराश्च. Bodl. W. 365. foll. 75. unaccented. nr. 62. nr. 70. — E. I. H. 309. 1471. — Paris D. 163. 59g. —

b. in the *Kâṇva-Çâkhâ*. — Not having yet discovered a complete and correct copy of this Çâkhâ — three books are still wanting and some of the manuscripts of the other 14 books are rather incorrect — I could not venture to give in my edition also the text of this Çâkhâ, especially as its differences from the Mâdhyandina-Çâkhâ are so very numerous and important, you may look at »the readings of almost every passage«, as well at the single words and their orthography or even accentuation as at the whole kaṇḍikâs and their number or distribution. The best copy extant in Europe is in the collection of the Rev. Dr. Mill, now deposited in the Bodleian library: it contains eleven kâṇḍas written and accented by three different scribes (I. withont any date by the one: IV. V. XIV. foll. 1-23a. Samvat 1651 by an other: II. VI. VII. X. XII. XIV. from foll 23, b-48. XV. XVII. Samvat 1875 by the thirth). Other copies are extant only (with the exception of the kâṇḍas I. and XVII.) in Paris. Bibl. Nat. D. 167-

2

172. 180-187 (=P.), which I am sorry to say I could not for want of time sufficiently examine. From a list written on the reverse of the first leaf of the fourth book and of the 48th leaf of the fourteenth in M. I take the names and the number of verses of the different kâṇḍas. —

I. *Ekapâdikâ* begins स वै सम्भारान्त्सम्भरति (6 adhy. 22 brâhm. 367 kaṇḍikâs). M. foll. 100. — E. I. H. 1560. see Colebrooke miscell. ess. I, 60 not. — P. 180. —

II. *Haviryajna* begins स वै व्रतमुपैष्यन् (8 adhy. 32 br. 572 k.) M. foll. 59. — P. 181. —

III. *Uddhâri* (124 k.) is wanting. —

IV. *Adhvara* begins तद्धै देवयजनमीळन्ते (628 k.) M. foll. 49. contains only the prathana *ança* in 4 adhy. 16 br. 272 k. — P. 184 b. —

V. *Graha* begins प्राणो ह वाऽअस्योपांशुः (8 adhy. 38 br. 475 k.) M. foll. 82. — P. 183. —

VI. *Vâjapeya* begins देवाश्च ह वाऽअसुराश्चोभये (2 adhy. 6 br. 100 k.) M. foll. 12. — P. 185 a. —

VII. *Râjasûya* begins स वै पूर्णाहुतिं जुहोति (5 adhy. 19 br. 288 k.) M. foll. 28. — P. 185 b. —

VIII. *Ûshasambharaṇa* begins असद्वाऽइदमग्रऽआसीत् (8 adhy. 27 br. 525 k. [509 in the list]) P. 167. the first 82 leaves are written by the same scribe as P. 168 and 169., foll. 83-85 are dated S. 1806. —

IX. *Hastighaṭa* (see Wilson Sanskrit dictionary: घट *an elephants frontal sinus*) begins अथातो नैर्ऋतीर्हरन्ति (5 adhy. 16 br. 261 k. [257 the list]) P. 168. S. 1649. foll. 51 (=A.). nr. 172 (=B.) most likely a copy of the preceding, written S. 1852. Çâke 1717. foll. 46. —

X. *Citi* begins प्राणभृत उपदधाति (5 adhy. 20 br. 241 k) M. foll. 25. — P. 186 a. —

XI. *Samciti* begins नाकसद उपदधाति (7 adhy. 20 br. 441 k.) P. 169. S. 1651. nr. 171 a copy thereof. —

XII. *Agnirahasya* begins अग्निरेष पुरस्ताच्चीयते (6 adhy. 28 br. 286 k.) M. foll. 39. — P. 186 b. —

XIII. *Ashṭâdhyâyi* (252 k.) is wanting. —

XIV. *Madhyama* begins अयं वै यज्ञो योऽयं पवते (8 adhy. 29 br. 382 k.) M. foll. 48. — P. 187 a. —

XV. *Açvamedha* begins ब्रह्मौदनं पचति (7 adhy. 40 br. 308 k.) M. foll. 29. — P. 187b. —

XVI. *Pravargya* begins (?) अथास्मै श्मशानं कुर्वन्ति (180 k.) is wanting. —

XVII. *Upanishad* begins उषा वाऽअश्वस्य मेध्यस्य (6 adhy. 47 br. 446 k.) M. foll. 53. — Bodl. W. 369. foll. 73. a recent copy. nr. 485 a. a fragment. — P. 182. — Chamb. 122 twice. 1., foll. 99. S. 1840. 2., foll. 85. nr. 395 fragments. — Edited by *Poley* 1844 Bonn. —

II. Manuscripts of the commentaries on the *Çatapatha-Brâhmaṇa*. —

1. *Sâyaṇâcârya's Mâdhavîya Vedârthaprakâça*: when quoted in the commentaries on the Kâtyâyanasûtra — and this happens very rarely —, this commentary is quoted by इति माधवः. The copies thereof, extant in the E. I. H. and in the Wilson-Collection of the Bodleian library, are very modern, incorrect and defective: and as all of them, with the only exception of E. I. H. 613, partake of the same blunders and interruptions, they have most likely been copied from the *same* manuscript: they contain the explanation of only eight books, viz: *kâṇḍa I* as far as the end of the third brâhmana in the seventh adhyâya. E. I. H. 657 (A.) foll. 67. nr. 1509 (B.) foll. 123. Bodl. Wils. 2 (C.) foll. 87. — *kâṇḍa II* E. I. H. 657. foll. 64. — *kâṇḍa III* ibid. (A.) foll. 69. Bodl. W. 3 (B.) foll. 129. — *kâṇḍa V* E. I. H. 657 (A.) foll. 66. Bodl. W. 3 (B.) foll. 64. — *kâṇḍa VII* E. I. H. 149 (A.) foll. 66. Bodl. W. 4 (B.) foll. 65. — *kâṇḍa IX* in the same numbers A. foll. 44. B. foll. 58. — *kâṇḍa X* E. I. H. 149 (A.). most defective fragments. foll. 39. nr. 613 (B.). S. 1610. foll. 185. — *kâṇḍa XI* E. I. H. 1071 (A.) foll. 67. Bodl. W. 4 (B.). foll. 104. —

2. Âcârya-*Harisvâminaḥ* kritau Catapathabhâshyam: quoted throughout the commentaries on Kâtyâyana by: इति हरिस्वामिनः. The copies of this commentary are even more defective and incorrect then those of the Mâdhavîyabhâshya: they are bound together with these and written by the same scribes (*): they contain the explanation of only three *kâṇḍas*, viz: of *kâṇḍa II*. Bodl. W.

(*) There are four scribes of the three copies 149. 657. 1071 of the E. I. H. *kâṇḍa* I and *k.* II as far as fol. 16 have been written by the one, *kâṇḍa* II from fol. 17 and the *kâṇḍas* III. VII. IX. XI by another, the *kâṇḍas* V. VIII. X. XIII as far as fol. 19 by a third, and *kâṇḍa* XIII foll. 20-24. by a fourth. — Three scribes are to be discerned in the three copies 2-4 of the Bodl. Wils. Coll. The *kâṇḍas* I. VII. IX have been copied by the one, the *kâṇḍas* II. V by another, the *kâṇḍas* III. XI by a third. —

2. foll. 54. — *kâṇḍa VIII* E. I. H. 657. foll. 36. — *kâṇḍa XIII* E. I. H. 149. foll. 24: and partly of a fourth, viz: of *the first kâṇḍa* from the *fourth brâhmaṇa* of the *seventh* adhyâya (where the common copy of the *Mâdhavîyabhâshya* failed) as far as the end (in B. only as far as VIII, 3, 14), occupying 12 leaves in A. nine in B. and sixteen in C. —

3. Dvivedaçrînârâyanasûnu *Dviveda Ganga's* commentary of the *Mâdhyandina Âraṇyaka*: a very excellent copy (= M.) in the collection of the Rev. Dr. Mill, since added to the Bodleian library: foll. 322. —

There are extant in Europe several copies of commentaries on the *Vrihad-Aranyaka* in the *Kâṇvaçâkhâ*, but as they have been already published by Dr. Roer in the Bibliotheca Indica nro. 6. Calcutta 1848, I do not think it necessary to notice them here.

III. *Rishitarpaṇam.* Cham 606 b. 735. foll. 11. a sort of *anukramaṇî* of the *Mâdhyandina Çatapatha Brâhmaṇa,* enumerating *a.* the *beginning* words (*pratîkâni*) 1) of each *adhyâya.* 2) of each *hundred* of (the 7624) *kaṇḍikâs* (2800-5400 are enumerated twice differently). 3) of each *prapâṭhaka.* 4) of the *last* kaṇḍikâ of each kâṇḍa: *b.* the closing words of each kâṇḍa. —

B. The accentuation in the manuscripts of the Çatapatha Brâhmaṇa is rather strange, as there only *one* sign is made use of, an horizontal stroke beneath the line, for denoting the *udâtta* as well as the *svarita.* The udâtta has the stroke beneath itself: नृषदम्, the svarita beneath the preceding syllable: वीर्यम्. To avoid this ambiguity I have denoted the svarita in this edition by *two* horizontal strokes beneath the preceding syllable: वीर्यम्. — Before a following *accented* syllable the preceding *udâtta* loses its denotation: 1) before an *udâtta*: केतपूः केतम् instead of °पूः केतम्, मह्वो ये धनम् i. of मह्वो ये धनम्, पर्णां न वेरनु i. of पर्णां न वेरनु, अग्निर्ह्दि वै धूरथ i. of अग्निर्ह्दि वै धूरथ (१.१.२.९.), but रथवाह्वी सा ह्दि न स्त्री न पुमान् i. of °ह्वी सा ह्दि न स्त्री न पुमान् (५.५.४.३५.), as there would be wanting too many signs. A *seeming* exception only is यं-यमसुराणाम् १.६.३.२८, as the second यम् is not accented: see पाणिनिसू° ८.१.३. 2) before a *svarita*: नेद्व्यृद्धम् १.७.२.९., मानुषं नेद्व्यृद्धम्, यज्ञो वै स्वः, देवा वै स्वः. — The preceding *svarita* on the contrary retains its denotation be-

fore a following accented syllable: 1) before an *udâtta*: यज्ञो वै स्वर्हः, देवा वै स्वर्गन्म, एवैतत्. 2) before a *svarita*: वोदानीतान् ॥५॥ सोऽभ्युद्धति (*) ५. १.४.६., इति सैषैतम् १.४.१.२६., देवाः सैषैतम् — The *udâtta* changes into the *svarita* (and the original *svarita* remains unaltered: अनुवाक्येयम् १.७.२.११.) in *all* cases of crasis with a following *unaccented* vowel, see my *Vâjasaneyasanhitae specimen* II p.7 follow. (Berlin 1847 Asher) and *Roth* in his edition of *Yâska's Nirukta* I p. LX. (Göttingen 1848 Dieterich). The only continual exception is made by the praepositions आ and प्र, which remain *udâtta*: एह्हि ५.२.१.१०. प्राह्, प्राधन्वन् १.५.१.२०., प्रारोचत १.६.२.८.: besides the *udâtta* is occasionally retained (against पाणि° ८.२.४.) in the declension, but alternating *even in the same words* with the *svarita*: दशम्या and दशम्या Instr. of दशमी. — The *udâtta* is regular in all cases of crasis with a following *accented* vowel: एवाङ्कृतिम्, एवेति instead of एव आ इति १.४.१.५., आघ्येऽध्यूह्हति i. of आघ्ये अध्यूह्हति १.५.३.२०., सुप्वेति i. of सुप्वा इति १.७.१.१६., याज्याथ i. of याज्या अथ १.७.२.७. —

(*) The denotation and the reciprocal influence of the accents does in general not undergo any alteration from the divisions of the *pratîkas*, the *kandikâs* or the *brâhmanas*, with the only exception that the underlineal stroke is changed into three dots in the manuscripts: तत् ॥१॥ स, and in this edition respectively also into six of them, if the following svarita is denoted: तत् ॥१॥ सोऽभि°.

Berlin March 1849.

The Editor.

ओम् । नमो गणेशाय ॥ व्रतमुपैष्यन् । अन्तरेणाहवनीयं च गार्हपत्यं च प्राङ्तिष्ठन्नप उपस्पृशति तद्यदप उपस्पृशत्यमेध्यो वै पुरुषो यदनृतं वदति तेन पूतिरन्तरतो मेध्या वाऽआपो मेध्यो भूत्वा व्रतमुपायानीति पवित्रं वाऽआपः पवित्रपूतो व्रतमुपायानीति तस्माद्वाऽअप उपस्पृशति ॥ १ ॥ सोऽग्निमेवाभीक्षमाणो व्रतमुपैति । अग्ने व्रतपते व्रतं चरिष्यामि तच्छकेयं तन्मे राध्यतामित्यग्निर्वै देवानां व्रतपतिस्तस्माऽएवैतत्प्राह व्रतं चरिष्यामि तच्छकेयं तन्मे राध्यतामिति नात्र तिरोहितमिवास्ति ॥ २ ॥ अथ सꣳस्थिते विसृजते । अग्ने व्रतपते व्रतमचारिषं तदशकं तन्मेऽराधीत्यशकद्ध्येतद्यो यज्ञस्य सꣳस्थामगन्नराधि ह्यस्मै यो यज्ञस्य सꣳस्थामगन्नेतेन न्वेव भूयिष्ठा-इव व्रतमुपयन्त्यनेन त्वेवोपेयात् ॥ ३ ॥ द्वयं वाऽइदं न तृतीयमस्ति । सत्यं चैवानृतं च सत्यमेव देवा अनृतं मनुष्या इदमहमनृतात्सत्यमुपैमीति तन्मनुष्येभ्यो देवानुपैति ॥ ४ ॥ स वै सत्यमेव वदेत् । एतद्ध वै देवा व्रतं चरन्ति यत्सत्यं तस्मात्ते यशो यशो ह भवति य एवं विद्वांत्सत्यं वदति ॥ ५ ॥ अथ सꣳस्थिते विसृजते । इदमहं य एवास्मि सोऽस्मीत्यमानुषऽइव वाऽएतद्भवति यद्व्रतमुपैति न हि तदवकल्पते यद्ब्रूयादिदमहꣳ सत्यादनृतमुपैमीति तदु खलु पुनर्मानुषो भवति तस्मादिदमहं य एवास्मि सोऽस्मीत्येवं व्रतं विसृजेत ॥ ६ ॥ अथातोऽशनानशनस्यैव । तदु हाषाढः सावयसोऽनशनमेव व्रतं मेने मनो ह वै देवा मनुष्यस्याजानन्ति तऽएनमेतद्व्रतमुपयन्तं विदुः प्रातर्नो यक्ष्यत

ऽइति तेऽस्य विश्वे देवा गृहानागच्छन्ति तेऽस्य गृहेषूपवसन्ति स उपवसथः ॥७॥ तन्न्वेवानवक्लृप्तम् । यो मनुष्येष्वनश्नत्सु पूर्वोऽश्नीयादथ किमु यो देवेष्वनश्नत्सु पूर्वोऽश्नीयात्तस्मादु नैवाश्नीयात् ॥८॥ तदु होवाच याज्ञवल्क्यः । यदि नाश्नाति पितृदेवत्यो भवति यद्यु अश्नाति देवानत्यश्नातीति स यदेवाशितमनशितं तदश्नीयादिति यस्य वै हविर्न गृह्णन्ति तदशितमनशितꣳ स यदश्नाति तेनापितृदेवत्यो भवति यद्यु तदश्नाति यस्य हविर्न गृह्णन्ति तेनो देवान्नात्यश्नाति ॥९॥ स वाऽआरण्यमेवाश्नीयात् । या वारण्या ओषधयो यद्वा वृक्ष्यं तदु ह स्माहापि बर्कुर्वार्ष्णो माषान्मे पचत न वाऽएतेषाꣳ हविर्गृह्णन्तीति तदु तथा न कुर्याद्व्रीहियवयोर्वाऽएतदुपजं यच्छमीधान्यं तद्व्रीहियवावेवैतेन भूयाꣳसौ करोति तस्मादारण्यमेवाश्नीयात् ॥१०॥ स आहवनीयागारे वैताꣳ रात्रिꣳ शयीत । गार्हपत्यागारे वा देवान्वाऽएष उपावर्तते यो व्रतमुपैति स यानेवोपावर्त्तते तेषामेवैतन्मध्ये शेतेऽधः शयीताधस्तादिव हि श्रेयस उपचारः ॥११॥ स वै प्रातरप एव । प्रथमेन कर्मणाभिपद्यतेऽपः प्रणयति यज्ञो वाऽआपो यज्ञमेवैतत्प्रथमेन कर्मणाभिपद्यते ताः प्रणयति यज्ञमेवैतद्वितनोति ॥१२॥ स प्रणयति । कस्त्वा युनक्ति स त्वा युनक्ति कस्मै त्वा युनक्ति तस्मै त्वा युनक्तीत्येताभिरनिरुक्ताभिर्व्याहृतिभिरनिरुक्तो वै प्रजापतिः प्रजापतिर्यज्ञस्तत्प्रजापतिमेवैतद्यज्ञं युनक्ति ॥१३॥ यद्वेवापः प्रणयति । अद्भिर्वाऽइदꣳ सर्वमाप्तं तत्प्रथमेनैवैतत्कर्मणा सर्वमाप्नोति ॥१४॥ यद्वेवास्यात्र । होता वाध्वर्युर्वा ब्रह्मा वाग्नीध्रो वा स्वयं वा यजमानो नाभ्यापयति तदेवास्यैतेन सर्वमाप्तं भवति ॥१५॥ यद्वेवापः प्रणयति । देवान्ह वै यज्ञेन यजमानांस्तानसुररक्षसानि ररक्षुर्न यक्ष्यध्व इति तद्यदरक्षंस्तस्माद्रक्षाꣳसि ॥१६॥ ततो देवा एतं वज्रं ददृशुः । यदपो वज्रो वाऽआपो वज्रो हि वाऽआपस्तस्माद्येनैता यन्ति निम्नं कुर्वन्ति यत्रोपतिष्ठन्ते निर्दहन्ति तत एतं वज्रमुदयच्छंस्तस्याभये

ऽनाष्ट्रे निवाते यज्ञमतन्वत तथो एवैष एतं वज्रमुद्यछति तस्याभयेऽनाष्ट्रे निवाते यज्ञं तनुते तस्मादपः प्रणयति ॥१७॥ ता उत्तरेणोत्तरेण गार्हपत्यꣳ सादयति । योषा वाऽआपो वृषाग्निर्गृहा वै गार्हपत्यस्तद्गृहेष्वेवैतन्मिथुनं प्रजननं क्रियते वज्रं वाऽएष उद्यछति यो ऽपः प्रणयति यो वाऽअप्रतिष्ठितो वज्रमुद्यछति नैनꣳ शक्नोत्युद्यन्तुꣳ सꣳ हैनꣳ शृणाति ॥१८॥ स यद्गार्हपत्ये सादयति । गृहा वै गार्हपत्यो गृहा वै प्रतिष्ठा तद्गृहेष्वेवैतत्प्रतिष्ठायां प्रतितिष्ठति तथो हैनमेष वज्रो न हिनस्ति तस्माद्गार्हपत्ये सादयति ॥१९॥ ता उत्तरेणाहवनीयं प्रणयति । योषा वाऽआपो वृषाग्निर्मिथुनमेवैतत्प्रजननं क्रियतऽएवमिव हि मिथुनं कॢप्तमुत्तरतो हि स्त्री पुमाꣳसमुपशेते ॥२०॥ ता नान्तरेण संचरेयुः । नेन्मिथुनं चर्यमाणमन्तरेण संचरानिति ता नातिहृत्य सादयेन्नोऽअनाप्ताः सादयेत्स यदतिहृत्य सादयेदस्ति वाऽअग्नेश्चापां च विभ्रातृव्यमिव स यथेव ह तदग्नेर्भवति यत्रास्याप उपस्पृशन्त्यग्नौ हाधि भ्रातृव्यं वर्धयेद्यदतिहृत्य सादयेद्यद्यऽअनाप्ताः सादयेन्नो हाभिस्तं काममभ्यापयेद्यस्मै कामाय प्रणीयन्ते तस्मादु सम्प्रत्येवोत्तरेणाहवनीयं प्रणयति ॥२१॥ अथ तृणैः परिस्तृणाति । द्वन्द्वं पात्राण्युदाहरति शूर्पं चाग्निहोत्रहवणीं च स्फ्यं च कपालानि च शम्यां च कृष्णाजिनं चोलूखलमुसले दृषदुपले तद्दश दशाक्षरा वै विराड्विराड्वै यज्ञस्तद्विराजमेवैतद्यज्ञमभिसम्पादयत्यथ यद्द्वन्द्वं द्वन्द्वं वै वीर्यं यदा वै द्वौ सꣳरभेतेऽअथ तद्वीर्यं भवति द्वन्द्वं वै मिथुनं प्रजननं मिथुनमेवैतत्प्रजननं क्रियते ॥२२॥ ब्राह्मणम् ॥१॥

अथ शूर्पं चाग्निहोत्रहवणीं चादत्ते । कर्मणे वां वेषाय वामिति यज्ञो वै कर्म यज्ञाय हि तस्मादाह कर्मणे वामिति वेषाय वामिति वेवेष्टीव हि यज्ञम् ॥१॥ अथ वाचं यछति । वाग्वै यज्ञोऽविक्षुब्धो यज्ञं तनवाऽइत्यथ प्रतपति प्रत्युष्टꣳ रक्षः प्रत्युष्टा अरातयो निष्टप्तꣳ रक्षो निष्टप्ता अरातय इति वा ॥२॥ देवा ह वै

यज्ञं तन्वानाः । ते ऽसुररक्षसेभ्य आसंगाद्बिभयांचक्रुस्तद्यज्ञमुखादेवैतन्नाष्ट्रा रक्षा७-
स्यतो ऽपहन्ति ॥३॥ अथ प्रैति । उर्वन्तरिक्षमन्वेमीत्यन्तरिक्षं वा ऽअनु रक्षश्चर-
त्यमूलमुभयतः परिच्छिन्नं यथायं पुरुषो ऽमूल उभयतः परिच्छिन्नो ऽन्तरिक्षमनुच-
रति तद्ब्रह्मणैवैतदन्तरिक्षमभयमनाष्ट्रं कुरुते ॥४॥ स वा ऽअनस एव गृह्णीयात् ।
अनो ह वा ऽअग्रे पश्चेव वा ऽइदं यच्छाल७ स यदेवाग्रे तत्करवाणीति तस्मा-
दनस एव गृह्णीयात् ॥५॥ भूमा वा ऽअनः । भूमा हि वा ऽअनस्तस्माद्यदा बहु
भवत्यनोवाह्यमभूदित्याहुस्तद्भूमानमेवैतदुपैति तस्मादनस एव गृह्णीयात् ॥६॥
यज्ञो वा ऽअनः । यज्ञो हि वा ऽअनस्तस्मादनस एव यजू७षि सन्ति न कोष्ठस्य
न कुम्भ्यै भस्त्रायै ह स्मर्षयो गृह्णन्ति तदृषीन्प्रति भस्त्रायै यजू७ष्यासुस्तान्येतर्हि
प्राकृतानि यज्ञाद्यज्ञं निर्मिमा ऽइति तस्मादनस एवगृह्णीयात् ॥७॥ उतो पात्र्यै
गृह्णन्ति । अनन्तरायमु तर्हि यजू७षि जपेत्स्फ्यमु तर्ह्येवस्तदुपोह्य गृह्णीयाद्यतो यु-
नज्ञाम ततो विमुञ्चामेति यतो ह्येव युञ्जन्ति ततो विमुञ्चन्ति ॥८॥ तस्य वा
ऽएतस्यानसः । अग्निरेव धूरग्निर्हि वै धूरथ य एनद्वहन्त्यग्निदग्धमिवैषां वहं भव-
त्यथ यज्जघनेन कस्तम्भीं प्रउगं वेदिरेवास्य सा नीड एव हविर्धानम् ॥९॥
स धुरमभिमृशति । धूरसि धूर्व धूर्वन्तं धूर्व तं यो ऽस्मान्धूर्वति तं धूर्व यं वयं
धूर्वाम इत्यग्निर्वा ऽएष धुर्यस्तमेतदत्येष्यन्भवति हविर्ग्रहीष्यंस्तस्मा ऽएवैतान्नि-
ह्नुते तथो हैतमेषो ऽतियन्तमग्निर्धुर्यो न हिनस्ति ॥१०॥ तद्ध स्मैतदारुणिराह ।
अर्धमासशो वा ऽअह७ सपत्नान्धूर्वामीत्येतद्ध स्म स तदभ्याह ॥११॥ अथ जघ-
नेन कस्तम्भीमीषामभिमृश्य जपति । देवानामसि वह्नितम७ सस्नितमं पप्रितमं जु-
ष्टतमं देवहूतमम् । अह्रुतमसि हविर्धानं दृ७हस्व मा ह्वारित्यन एवैतदुपस्तौ-
त्युपस्तुताद्रातमनसो हविर्गृह्णानीति मा ते यज्ञपतिर्ह्वार्षीदिति यजमानो वै यज्ञ-
पतिस्तद्यजमानायैवैतदह्रुलामाशास्ते ॥१२॥ अथाक्रमते । विष्णुस्त्वा क्रमतामिति

यज्ञो वै विष्णुः स देवेभ्य इमां विक्रान्तिं विचक्रमे यैषामियं विक्रान्तिरिदमेव प्रथ-
मेन पदेन पस्पाराथेदमन्तरिक्षं द्वितीयेन दिवमुत्तमेनैतामेवैष एतस्मै विष्णुर्यज्ञो
विक्रान्तिं विक्रमते ॥१३॥ अथ प्रेक्षते । उरु वातायेति प्राणो वै वातस्तद्ब्रह्मणै-
वैतत्प्राणाय वातायोरुगायं कुरुते ॥१४॥ अथापास्यति । अपहतꣳ रक्ष इति य-
द्वत्र किंचिदापन्नं भवति यद्वु नाश्येव मृशेत्तन्नाष्ट्रा एवैतद्रक्षाꣳस्यतोऽपहन्ति
॥१५॥ अथाभिपद्यते । यच्छन्तां पञ्चेति पञ्च वाऽइमा अङ्गुलयः पाङ्क्तो वै यज्ञस्त-
यज्ञमेवैतदत्र दधाति ॥१६॥ अथ गृह्णाति । देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बा-
हुभ्यां पूष्णो हस्ताभ्यामग्नये जुष्टं गृह्णामीति सविता वै देवानां प्रसविता तत्स-
वितृप्रसूत एवैतद्गृह्णात्यश्विनोर्बाहुभ्यामित्यश्विनावध्वर्यू पूष्णो हस्ताभ्यामिति पूषा
भागदुघोऽशनं पाणिभ्यामुपनिधाता सत्यं देवा अनृतं मनुष्यास्तत्सत्येनैवैतद्गृह्णा-
ति ॥१७॥ अथ देवतायाऽआदिशति । सर्वा ह वै देवता अध्वर्युꣳ हविर्ग्रहीष्यन्त-
मुपतिष्ठन्ते मम नाम ग्रहीष्यति मम नाम ग्रहीष्यतीति ताभ्य एवैतत्सह सती-
भ्योऽसमदं करोति ॥१८॥ यद्वेव देवतायाऽआदिशति । यावतीभ्यो ह वै देव-
ताभ्यो हवीꣳषि गृह्यन्तऽऋणमु हैव तास्तेन मन्यन्ते यदस्मै तं कामꣳ समर्ध-
येयुर्यत्काम्या गृह्णाति तस्माद्वै देवतायाऽआदिशत्येवमेव यथापूर्वꣳ हवीꣳषि गृ-
हीत्वा ॥१९॥ अथाभिमृशति । भूताय त्वा नारातयऽइति तद्यत एव गृह्णाति
तदेवैतत्पुनराप्याययति ॥२०॥ अथ प्राङ्प्रेक्षते । स्वरभिविख्येषमिति परिवृतमिव
वाऽएतदनो भवति तदस्यैतच्चक्षुः पाप्मगृहीतमिव भवति यज्ञो वै स्वरहर्देवाः
सूर्यस्तत्स्वरेवैतदतोऽभिविपश्यति ॥२१॥ अथावरोहति । दृꣳहन्तां दुर्याः पृथि-
व्यामिति गृहा वै दुर्यास्ते हेत ईश्वरो गृहा यजमानस्य योऽस्यैषोऽध्वर्युर्यज्ञेन
चरति तं प्रयन्तमनु प्रच्योतोस्तस्येश्वरः कुलं विक्षोब्धोस्तानेवैतदस्यां पृथिव्यां दृꣳ-
हति तथा नानुप्रच्यवन्ते तथा न विक्षोभन्ते तस्मादाह दृꣳहन्तां दुर्याः पृथिव्या-

मित्यथ प्रैत्युर्वन्तरिक्षमन्वेमीति सोऽसावेव बन्धुः ॥२२॥ स यस्य गार्हपत्ये ह-
वीꣳषि श्रपयन्ति । गार्हपत्ये तस्य पात्राणि सꣳसादयन्ति जघनेनो तर्हि गार्हपत्यꣳ
सादयेद्यस्याहवनीये हवीꣳषि श्रपयन्त्याहवनीये तस्य पात्राणि सꣳसादयन्ति जघ-
नेनो तर्ह्याहवनीयꣳ सादयेत्पृथिव्यास्त्वा नाभौ सादयामीति मध्यं वै नाभिर्मध्य-
मभयं तस्मादाह पृथिव्यास्त्वा नाभौ सादयामीत्यदित्याऽउपस्थऽइत्युपस्थऽइवै-
नदभार्षुरिति वाऽआहुर्यत्सुगुप्तं गोपायन्ति तस्मादाहादित्याऽउपस्थऽइत्यग्ने हव्यꣳ
रक्षेति तदग्नये चैवैतद्धविः परिददाति गुप्त्याऽअस्यै च पृथिव्यै तस्मादाहाग्ने हव्यꣳ
रक्षेति ॥२३॥ ब्राह्मणम् ॥२॥

पवित्रे करोति । पवित्रे स्थो वैष्णव्याविति यज्ञो वै विष्णुर्यज्ञिये स्थ इत्येवै-
तदाह ॥१॥ ते वै द्वे भवतः । अयं वै पवित्रं योऽयं पवते सोऽयमेक-इवैव
पवते सोऽयं पुरुषेऽन्तः प्रविष्टः प्राङ् प्रत्यङ् ताविमौ प्राणोदानौ तदेतस्यैवानु
मात्रां तस्माद्द्वे भवतः ॥२॥ अथोऽअपि त्रीणि स्युः । व्यानो हि तृतीयो द्वे त्वेव
भवतस्ताभ्यामेताः प्रोक्षणीरुत्पूय ताभिः प्रोक्षति तद्यदेताभ्यामुत्पुनाति ॥३॥ वृ-
त्रो ह वाऽइदꣳ सर्वं वृत्वा शिश्ये । यदिदमन्तरेण द्यावापृथिवी स यदिदꣳ सर्वं
वृत्वा शिश्ये तस्माद्वृत्रो नाम ॥४॥ तमिन्द्रो जघान । स हतः पूतिः सर्वत एवा-
पोऽभिप्र सुस्राव सर्वतइव ह्ययꣳ समुद्रस्तस्मादु हैका आपो बीभत्साञ्चक्रिरे ता
उपर्युपर्यतिपुप्रुविरेऽत इमे दर्भास्ता हैता अनापूयिता आपोऽस्ति वाऽइत-
रासु सꣳसृष्टमिव यदेना वृत्रः पूतिरभिप्रास्रवत्तदेवासामेताभ्यां पवित्राभ्यामपहन्त्यथ
मेध्याभिरेवाद्भिः प्रोक्षति तस्माद्वाऽएताभ्यामुत्पुनाति ॥५॥ स उत्पुनाति । स-
वितुर्वः प्रसवऽउत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिरिति सविता वै देवा-
नां प्रसविता तत्सवितृप्रसूत एवैतदुत्पुनात्यच्छिद्रेण पवित्रेणेति यो वाऽअयं प-
वतऽएषोऽच्छिद्रं पवित्रमेतेनैतदाह सूर्यस्य रश्मिभिरित्येते वाऽउत्पवितारो

यत्सूर्यस्य रश्मयस्तस्मादाह सूर्यस्य रश्मिभिरिति ॥६॥ ताः सव्ये पाणौ कृत्वा । दक्षिणेनोदिङ्गयत्युपस्तौत्येवैना एतन्महयत्येव देवीरापोऽअग्रेगुवोऽअग्रेपुव इति देव्यो ह्यापस्तस्मादाह देवीराप इत्यग्रेगुव इति ता यत्समुद्रं गच्छन्ति तेनाग्रेगुवो ऽग्रेपुव इति ता यत्प्रथमाः सोमस्य राज्ञो भक्षयन्ति तेनाग्रेपुवोऽग्रऽइममद्य यज्ञं नयताग्रे यज्ञपतिꣳ सुधातुं यज्ञपतिं देवयुवमिति साधु यज्ञꣳ साधु यजमानमित्येवैत-दाह ॥७॥ युष्मा इन्द्रोऽवृणीत वृत्रतूर्यऽइति । एता उ हीन्द्रोऽवृणीत वृ-त्रेण स्पर्धमान एताभिर्ह्येनमहंस्तस्मादाह युष्मा इन्द्रोऽवृणीत वृत्रतूर्यऽइति ॥८॥ यूयमिन्द्रमवृणीध्वं वृत्रतूर्यऽइति । एता उ हीन्द्रमवृणत वृत्रेण स्पर्धमान-मेताभिर्ह्येनमहंस्तस्मादाह यूयमिन्द्रमवृणीध्वं वृत्रतूर्यऽइति ॥९॥ प्रोक्षिता स्थेति । तद्देताभ्यो निह्नुते ऽथ हविः प्रोक्षत्येको वै प्रोक्षणस्य बन्धुर्मेध्यमेवैतत्करोति ॥१०॥ स प्रोक्षति अग्नये त्वा जुष्टं प्रोक्षामीति तद्यस्यै देवतायै हविर्भवति तस्यै मेध्यं क-रोत्येवमेव यथापूर्वꣳ हवीꣳषि प्रोक्ष्य ॥११॥ अथ यज्ञपात्राणि प्रोक्षति । दैव्याय कर्मणे शुन्धध्वं देवयज्यायाऽइति दैव्याय हि कर्मणे शुन्धति देवयज्यायै यद्वो ऽशुद्धाः पराजघ्नुरिदं वस्तच्छुन्धामीति तद्यदेवैषामत्राशुद्धस्तक्षा वान्यो वामेध्यः क-श्चित्पराहन्ति तदेवैषामेतदद्भिर्मेध्यं करोति तस्मादाह यद्वोऽशुद्धाः पराजघ्नुरिदं वस्तच्छुन्धामीति ॥१२॥ ब्राह्मणम् ॥३॥

अथ कृष्णाजिनमादत्ते । यज्ञस्यैव सर्वत्वाय यज्ञो ह देवेभ्योऽपचक्राम स कृष्णो भूत्वा चचार तस्य देवा अनुविद्य त्वचमेवावच्छायाजह्रुः ॥१॥ तस्य यानि शुक्लानि च कृष्णानि च लोमानि । तान्यृचां च साम्नां च रूपं यानि शुक्लानि तानि साम्नाꣳ रूपं यानि कृष्णानि तान्यृचां यदि वेतरथा यान्येव कृष्णानि तानि साम्नाꣳ रूपं यानि शुक्लानि तान्यृचां यान्येव बभ्रूणीव हरीणि तानि यजुषाꣳ रूपम् ॥२॥ सैषा त्रयी विद्या यज्ञः । तस्या एतच्छिल्पमेष वर्णस्तद्यत्कृष्णाजिनं भवति यज्ञस्यैव

सर्वत्वाय तस्मात्कृष्णाजिनमधि दीक्षन्ते यज्ञस्यैव सर्वत्वाय तस्मादध्यवहननमधिषवणं भवत्यस्कन्नꣳ हविरसदिति तद्यदेवात्र तण्डुलो वा पिष्टं वा स्कन्दात्तद्यज्ञे यज्ञः प्रतितिष्ठादिति तस्मादध्यवहननमधिषवणं भवति ॥३॥ अथ कृष्णाजिनमादत्ते । शर्मासीति चर्म वाऽएतत्कृष्णस्य तदस्य तन्मानुषꣳ शर्म देवत्रा तस्मादाह शर्मासीति तदवधूनोत्यवधूतꣳ रक्षोऽवधूता अरातय इति तन्नाष्ट्रा एवैतद्रक्षाꣳस्यतोऽपहन्त्यतिनन्त्येव पात्राण्यवधूनोति यद्यस्याममेध्यमभूत्तदस्यैतदवधूनोति ॥४॥ तत्प्रतीचीनग्रीवमुपस्तृणाति । अदित्यास्त्वगसि प्रति त्वादितिर्वेत्त्विति इयं वै पृथिव्यदितिस्तस्या अस्यै त्वग्यदिदमस्यामधि किंच तस्मादाहादित्यास्त्वगसीति प्रति त्वादितिर्वेत्त्विति प्रति हि स्वः संजानीते तत्संज्ञामेवैतत्कृष्णाजिनाय च वदति नेदन्योऽन्यꣳ हिनसातऽइत्यभिनिहितमेव सव्येन पाणिना भवति ॥५॥ अथ दक्षिणेनोलूखलमाहरति । नेदिह पुरा नाष्ट्रा रक्षाꣳस्याविशानिति ब्राह्मणो हि रक्षसामपहन्ता तस्मादभिनिहितमेव सव्येन पाणिना भवति ॥६॥ अथोलूखलं निदधाति । अद्रिरसि वानस्पत्यो ग्रावासि पृथुबुध्न इति वा तद्यथैवादः सोमꣳ राजानं ग्रावभिरभिषुण्वन्त्येवमेवैतदुलूखलमुसलाभ्यां दृषदुपलाभ्याꣳ हविर्यज्ञमभिषुणोत्यद्रय इति वै तेषामेकं नाम तस्मादाहाद्रिरसीति वानस्पत्य इति वानस्पत्यो ह्येष ग्रावासि पृथुबुध्न इति ग्रावा ह्येष पृथुबुध्नो ह्येष प्रति त्वादित्यास्त्वग्वेत्त्विति तत्संज्ञामेवैतत्कृष्णाजिनाय च वदति नेदन्योऽन्यꣳ हिनसातऽइति ॥७॥ अथ हविरावपति । अग्नेस्तनूरसि वाचो विसर्जनमिति यज्ञो हि तेनाग्नेस्तनूर्वाचो विसर्जनमिति यां वाऽअमूꣳ हविर्ग्रहीष्यन्वाचं यच्छत्यत्र वै तां विसृजते तद्यदेतामत्र वाचं विसृजतऽएष हि यज्ञ उलूखले प्रत्यष्ठादेष हि प्रासारि तस्मादाह वाचो विसर्जनमिति ॥८॥ स यदिदं पुरा मानुषीं वाचं व्याहरेत् । तत्रो वैष्णवीमृचं वा यजुर्वा जपेद्यज्ञो वै विष्णुस्तद्यज्ञं पुनरारभते तस्यो

ह्येषा प्रायश्चित्तिर्देववीतये वा गृह्णामीति देवानवदित्यु हि हविर्गृह्यते ॥ ९॥ अथ मुसलमादत्ते । बृहद्ग्रावासि वानस्पत्य इति बृहद्ग्रावा ह्येष वानस्पत्यो ह्येष तदवदधाति स इदं देवेभ्यो हविः शमीष्व सुशमि शमीष्वेति स इदं देवेभ्यो हविः सꣳस्कुरु साधुसꣳस्कृतꣳ सꣳस्कुर्वित्येवैतदाह ॥१०॥ अथ हविष्कृतमुद्वादयति । हविष्कृदेहि हविष्कृदेहीति वाग्वै हविष्कृद्वाचमेवैतद्विसृजते वागु वै यज्ञस्तद्यज्ञमेवैतत्पुनरुपह्वयते ॥११॥ तानि वाऽएतानि । चत्वारि वाच एहीति ब्राह्मणस्यागह्याद्रवेति वैश्यस्य च राजन्यबन्धोश्चाधावेति शूद्रस्य स यदेव ब्राह्मणस्य तदाहैतद्धि यज्ञियतममेतदु ह वै वाचः शान्ततमं यदेहीति तस्मादेहीत्येव ब्रूयात् ॥१२॥ तद्ध स्मैतत्पुरा । जायैव हविष्कृदुपोत्तिष्ठति तदिदमप्येतर्हि य एव कश्चोपोत्तिष्ठति स यत्रैष हविष्कृतमुद्वादयति तदेको दृषदुपले समाहन्ति तद्यदेतामत्र वाचं प्रत्युद्वादयन्ति ॥१३॥ मनोर्ह वाऽऋषभ आस । तस्मिन्नसुरघ्नी सपत्नघ्नी वाक्प्रविष्टास तस्य ह स्म श्वसथाद्रवथादसुररक्षसानि मृद्यमानानि यन्ति ते हासुराः समूदिरे पापं वत नोऽयमृषभः सचते कथं न्विमं दभ्नुयामेति किलाताकुली ऽइति हासुरब्रह्मावासतुः ॥१४॥ तौ होचतुः । श्रद्धादेवो वै मनुरावं नु वेदावेति तौ हागत्योचतुर्मनो याजयाव त्वेति केनेत्यनेनर्षभेणेति तथेति तस्यालब्धस्य सा वागपचक्राम ॥१५॥ सा मनोरेव जायां मनावीं प्रविवेश । तस्यै ह स्म यत्र वदन्त्यै शृण्वन्ति ततो ह स्मैवासुररक्षसानि मृद्यमानानि यन्ति ते हासुराः समूदिर ऽइतो वै नः पापीयः सचते भूयो हि मानुषी वाग्वदतीति किलाताकुली हैवोचतुः श्रद्धादेवो वै मनुरावं न्वेव वेदावेति तौ हागत्योचतुर्मनो याजयाव त्वेति केनेत्यनयैव जाययेति तथेति तस्याऽआलब्धायै सा वागपचक्राम ॥१६॥ सा यज्ञमेव यज्ञपात्राणि प्रविवेश । ततो हैनां न शेकतुर्निर्हन्तुꣳ सैषासुरघ्नी वागुद्वदति स यस्य हैवं विदुष एतामत्र वाचं प्रत्युद्वादयन्ति पापीयाꣳसो हैवास्य सपत्ना भव-

न्ति ॥१७॥ स समाहन्ति । कुक्कुटोऽसि मधुजिह्व इति मधुजिह्वो वै स देवेभ्य
आसीद्विषजिह्वोऽसुरेभ्यः स यो देवेभ्य आसीः स न एधीत्येवैतदाहेषमूर्जमावद
त्वया वयꣳ संघातꣳसंघातं जेष्मेति नात्र तिरोहितमिवास्ति ॥१८॥ अथ शूर्पमा-
दत्ते । वर्षवृद्धमसीति वर्षवृद्धꣳ ह्येतद्यदि नडानां यदि वेणूनां यदीषीकाणां वर्ष-
मु ह्येवैता वर्धयति ॥१९॥ अथ हविर्निर्वपति । प्रति त्वा वर्षवृद्धं वेत्त्विति वर्ष-
वृद्धा उ ह्येवैते यदि व्रीहयो यदि यवा वर्षमु ह्येवैतान्वर्धयति तत्संज्ञामेवैतच्छूर्पाय
च वदति नेदन्योऽन्यꣳ हिनसातऽइति ॥२०॥ अथ निष्पुनाति । परापूतꣳ रक्षः
परापूता अरातय इत्यथ तुषान्प्रहन्त्यपहतꣳ रक्ष इति तन्नाष्ट्रा एवैतद्रक्षाꣳस्यतो
ऽपहन्ति ॥२१॥ अथापविनक्ति । वायुर्वो विविनक्त्वित्ययं वै वायुर्योऽयं पवत
ऽएष वाऽइदꣳ सर्वं विविनक्ति यदिदं किंच विविच्यते तदेनानेष एवैतद्विविनक्ति
स यदेतऽएतत्प्राप्नुवन्ति यत्रैनानध्यपविनक्ति ॥२२॥ अथानुमन्त्रयते । देवो वः स-
विता हिरण्यपाणिः प्रतिगृभ्णात्वच्छिद्रेण पाणिना सुप्रतिगृहीता असन्नित्यथ त्रिः
फलीकरोति त्रिवृद्धि यज्ञः ॥२३॥ तद्धैके देवेभ्यः शुन्धध्वं देवेभ्यः शुन्धध्वमिति फ-
लीकुर्वन्ति तदु तथा न कुर्यादादिष्टं वाऽएतद्देवतायै हविर्भवत्यथैतद्वैश्वदेवं करो-
ति यदाह देवेभ्यः शुन्धध्वमिति तत्समदं करोति तस्मादु तूष्णीमेव फलीकुर्यात्
॥२४॥ ब्राह्मणम् ॥४॥ अध्यायः ॥१॥

स वै कपालान्येवान्यतर उपदधाति । दृषदुपलेऽअन्यतरस्तद्वाऽएतदुभयꣳ सह
क्रियते तद्यदेतदुभयꣳ सह क्रियते ॥१॥ शिरो ह वाऽएतद्यज्ञस्य यत्पुरोडाशः स
यान्येवेमानि शीर्ष्णः कपालान्येतान्येवास्य कपालानि मस्तिष्कऽएव पिष्टानि त-
द्वाऽएतदेकमङ्गमेकꣳ सह करवाव समानं करवावेति तस्माद्वाऽएतदुभयꣳ सह क्रि-
यते ॥२॥ स यः कपालान्युपदधाति । स उपवेषमादत्ते धृष्टिरसीति स यदेनेना-
ग्निं धृष्णिवोपचरति तेन धृष्टिरथ यदेनेन यज्ञ उपालभत उपेव वाऽएनेनैतद्वेविष्टि

तस्मादुपवेषो नाम ॥३॥ तेन प्राचोऽङ्गारानुदूहति । अपाग्ने अग्निमामादं जहि
निष्क्रव्यादꣳ सेधेत्ययं वाऽआमादेनेदं मनुष्याः पक्वमश्नन्त्यथ येन पुरुषं दहन्ति स
क्रव्यादेतावेवैतदुभावतोऽपहन्ति ॥४॥ अथाङ्गारमास्कौति । आ देवयजं वहेति
यो देवयाडस्मिन्हवीꣳषि अपचाम तस्मिन्यज्ञं तनवामहाऽइति तस्माद्वाऽआस्कौ-
ति ॥५॥ तं मध्यमेन कपालेनाभ्युपदधाति । देवा ह वै यज्ञं तन्वानास्तेऽसुरर-
क्षसेभ्य आसङ्गाद्बिभयांचक्रुर्नेन्नोऽधस्तान्नाष्ट्रा रक्षाꣳस्युपोत्तिष्ठानित्यग्निर्हि रक्षसाम-
पहन्ता तस्मादेवमुपदधाति तद्यदेष एव भवति नान्य एष हि यजुष्कृतो मेध्यस्त-
स्मान्मध्यमेन कपालेनाभ्युपदधाति ॥६॥ स उपदधाति । ध्रुवमसि पृथिवीं दृꣳहेति
पृथिव्या एव रूपेणैतदेव दृꣳहत्येतेनैव द्विषन्तं भ्रातृव्यमवबाधते ब्रह्मवनि त्वा
क्षत्रवनि सजातवन्युपदधामि भ्रातृव्यस्य वधायेति बह्वी वै यजुःष्वाशीस्तद्ब्रह्म च
क्षत्रं चाशास्तेऽउभे वीर्ये सजातवनीति भूमा वै सजातास्तद्भूमानमाशास्तऽउपदधा-
मि भ्रातृव्यस्य वधायेति यदि नाभिचरेद्यद्यु अभिचरेदमुष्य वधायेति ब्रूयादभिनि-
हितमेव सव्यस्य पाणेरङ्गुल्या भवति ॥७॥ अथाङ्गारमास्कौति । नेदिह पुरा
नाष्ट्रा रक्षाꣳस्याविशानिति ब्राह्मणो हि रक्षसामपहन्ता तस्मादभिनिहितमेव स-
व्यस्य पाणेरङ्गुल्या भवति ॥८॥ अथाङ्गारमध्यूहति । अग्ने ब्रह्म गृभ्णीष्वेति ने-
दिह पुरा नाष्ट्रा रक्षाꣳस्याविशानित्यग्निर्हि रक्षसामपहन्ता तस्मादेनमध्यूहति
॥९॥ अथ यत्पश्चात्तदुपदधाति । धरुणमस्यन्तरिक्षं दृꣳहेत्यन्तरिक्षस्यैव रूपेणैतदेव
दृꣳहत्येतेनैव द्विषन्तं भ्रातृव्यमवबाधते ब्रह्मवनि त्वा क्षत्रवनि सजातवन्युपदधा-
मि भ्रातृव्यस्य वधायेति ॥१०॥ अथ यत्पुरस्तात्तदुपदधाति । धर्त्रमसि दिवं दृꣳहे-
ति दिव एव रूपेणैतदेव दृꣳहत्येतेनैव - - वधायेति ॥११॥ अथ यद्दक्षिणतस्तदुप-
पधाति । विश्वाभ्यस्त्वाशाभ्य उपदधामीति स यदिमांल्लोकानति चतुर्थमस्ति वा न
वा तेनैवैतद्द्विषन्तं भ्रातृव्यमवबाधतेऽनद्धा वै तद्यदिमांल्लोकानति चतुर्थमस्ति वा

न वानड्वो तद्यद्दिश्या आशास्तस्मादाह विश्वाभ्यस्त्वाशाभ्य उपदधामीति तूष्णीं वे-
वेतराणि कपालान्युपदधाति चित स्थोर्ध्वचित इति वा ॥ १२ ॥ अथाङ्गारैरभ्यूहति।
भृगूणामङ्गिरसां तपसा तप्यध्वमित्येतद्धि तेजिष्ठं तेजो यद्भृग्वङ्गिरसां सुतप्ता-
न्यसन्निति तस्मादेनमभ्यूहति ॥ १३ ॥ अथ यो दृषदुपले उपदधाति। स कृष्णाजि-
नमादत्ते शर्मासीति तदवधूनोत्यवधूतं रक्षोऽवधूता अरातय इति सोऽसावेव
बन्धुस्तत्प्रतीचीनग्रीवमुपस्तृणात्यदित्यास्त्वगसि प्रति त्वादितिर्वेत्त्विति सोऽसावेव
बन्धुः ॥ १४ ॥ अथ दृषदमुपदधाति। धिषणासि पर्वती प्रति त्वादित्यास्त्वग्वेत्त्विति
धिषणा हि पर्वती हि प्रति त्वादित्यास्त्वग्वेत्त्विति तत्संज्ञामेवैतत्कृष्णाजिनाय च
वदति नेदन्योऽन्यं हिनसाव इतीयमेवैषा पृथिवी रूपेण ॥ १५ ॥ अथ शम्यामु-
दीचीनाग्रामुपदधाति। दिव स्कम्भनीरसीत्यन्तरिक्षमेव रूपेणान्तरिक्षेण हीमे द्या-
वापृथिवी विष्टब्धे तस्मादाह दिव स्कम्भनीरसीति ॥ १६ ॥ अथोपलामुपदधाति।
धिषणासि पार्वतेयी प्रति त्वा पर्वती वेत्त्विति कनीयसी ह्येषा दुहितेव भवति
तस्मादाह पार्वतेयीति प्रति त्वा पर्वती वेत्त्विति प्रति हि स्वः संजानीते तत्संज्ञा-
मेवैतद्दृषदुपलाभ्यां वदति नेदन्योऽन्यं हिनसात इति द्यौरेवैषा रूपेण हनू
एव दृषदुपले जिह्वैव शम्या तस्माच्छम्यया समाहन्ति जिह्वया हि वदति ॥ १७ ॥
अथ हविरधिवपति। धान्यमसि धिनुहि देवानिति धान्यं हि देवान्धिनवदित्यु
हि हविर्गृह्यते ॥ १८ ॥ अथ पिनष्टि। प्राणाय त्वोदानाय त्वा व्यानाय त्वा दीर्घा-
मनु प्रसितिमायुषे धामिति प्रोक्षति देवो वः सविता हिरण्यपाणिः प्रतिगृभ्णात्व-
छिद्रेण पाणिना चक्षुषे त्वेति ॥ १९ ॥ ॥ शतम् १०० ॥ ॥ तद्यदेवं पिनष्टि। जीवं
वै देवानां हविरमृतममृतानामथैतदुलूखलमुसलाभ्यां दृषदुपलाभ्यां हविर्यज्ञं
घ्नन्ति ॥ २० ॥ स यदाह। प्राणाय त्वोदानाय त्वेति तत्प्राणोदानौ दधाति व्यानाय
त्वेति तद्व्यानं दधाति दीर्घामनु प्रसितिमायुषे धामिति तदायुर्दधाति देवो वः स-

विता हिरण्यपाणिः प्रतिगृभ्णात्वच्छिद्रेण पाणिना सुप्रतिगृहीतान्यसन्निति चक्षुषे त्वेति तच्चक्षुर्दधात्येतानि वै जीवतो भवन्त्येवमु हैतज्जीवमेव देवानाᳪ हविर्भवत्यमृतममृतानां तस्मादेवं पिनष्टि पिᳪषन्ति पिष्टान्यभीन्धते कपालानि ॥२१॥ अथैक आज्यं निर्वपति । यद्वाऽआदिष्टं देवतायै हविर्गृह्यते यावद्देवत्यं तद्भवति तदितरेण यजुषा गृह्णाति न वाऽएतत्कस्यै चन देवतायै हविर्गृह्णन्नादिशति यदाज्यं तस्मादनिरुक्तेन यजुषा गृह्णाति महीनां पयोऽसीति मह्य इति ह वाऽएतासामेकं नाम यद्गवां तासां वाऽएतत्पयो भवति तस्मादाह महीनां पयोऽसीत्येवमु हास्यैतत्खलु यजुषैव गृहीतं भवति तस्माद्वेवाह महीनां पयोऽसीति ॥२२॥ ब्राह्मणम् ॥ ५ [२. १.] ॥

पवित्रवति संवपति । पात्र्यां पवित्रेऽअवधाय देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याᳪ संवपामीति सोऽसावेवैतस्य यजुषो बन्धुः ॥१॥ अथान्तर्वेद्युपविशति । अथैक उपसर्जनीभिरिति ता आनयति ताः पवित्राभ्यां प्रतिगृह्णाति समाप ओषधीभिरिति सᳪ ह्येतदाप ओषधिभिरेताभिः पिष्टाभिः संगच्छन्ते समोषधयो रसेनेति सᳪ ह्येतदोषधयो रसेनैताः पिष्टा अद्भिः संगच्छन्तऽआपो ह्येतासाᳪ रसः सᳪ रेवतीर्जगतीभिः पृच्यन्तामिति रेवत्य आपो जगत्य ओषधयस्ता उ ह्येतदुभय्यः संपृच्यन्ते सं मधुमतीर्मधुमतीभिः पृच्यन्तामिति सᳪ रसवत्यो रसवतीभिः पृच्यन्तामित्येवैतदाह ॥२॥ अथ संयौति । जनयत्यै त्वा संयौमीति यथा श्रियेऽन्नाद्यायेमाः प्रजा यजमानाय यद्धेदेवं वै तत्संयौत्यधिवर्द्धयन्नु वै संयौति यथा वाऽअधिवृक्णोऽग्नेरधि जायेतैवं वै तत्संयौति ॥३॥ अथ द्वेधा करोति । यदि द्वे हविषी भवतः पौर्णमास्यां वै द्वे हविषी भवतः स यत्र पुनर्न सᳪहरिष्यंत्स्यात्तदभिमृशतीदमग्नेरिदमग्नीषोमयोरिति नाना वाऽएतदग्रे हविर्गृह्णन्ति तत्सहावघ्नन्ति तत्सह पिᳪषन्ति तत्पुनर्नाना करोति तस्मादेवमभिमृशत्यधिवृणक्त्येवैष पु-

रोडाशमधिश्रयत्यसावाज्यम् ॥४॥ तद्वाऽएतत् । उभयꣳ सह क्रियते तद्यदेतदुभयꣳ सह क्रियतेऽर्धो ह वाऽएष आत्मनो यज्ञस्य यदाज्यमर्धो यद्धविर्भवति स यथासावर्धो य उ चायमर्धस्तावुभावग्निं गमयावेति तस्माद्वाऽएतदुभयꣳ सह क्रियतऽएवमु ह्येष आत्मा यज्ञस्य संधीयते ॥५॥ सोऽसावाज्यमधिश्रयति । इषे त्वेति वृष्ट्यै तदाह यदाहेषे त्वेति तत्पुनरुद्वासयत्यूर्जे त्वेति यो वृष्टादूर्ग्रसो जायते तस्मै तदाह ॥६॥ अथ पुरोडाशमधिवृणक्ति । घर्मोऽसीति यज्ञमेवैतत्करोति यथा घर्मं प्रवृञ्ज्यादेवं प्रवृणक्ति विश्वायुरिति तदायुर्दधाति ॥७॥ तं प्रथयति । उरुप्रथा उरु प्रथस्वेति प्रथयत्येवैनमेतदुरु ते यज्ञपतिः प्रथतामिति यजमानो वै यज्ञपतिस्तद्यजमानायैवैतदाशिषमाशास्ते ॥८॥ तं न सत्रा पृथुं कुर्यात् । मानुषꣳ ह कुर्याद्यत्पृथुं कुर्याद्व्यृद्धं वै तद्यज्ञस्य यन्मानुषं नेद्व्यृद्धं यज्ञे करवाणीति तस्मान्न सत्रा पृथुं कुर्यात् ॥९॥ अश्वशफमात्रं कुर्यादित्यु हैकऽआहुः । कस्तद्वेद यावानश्वशफो यावन्तमेव स्वयं मनसा न सत्रा पृथुं मन्येतैवं कुर्यात् ॥१०॥ तमद्भिरभिमृशति । सकृद्वा त्रिर्वा तद्यदेवास्यात्रावघ्नन्तो वा पिꣳषन्तो वा क्षिण्वन्ति वा वि वा वृहन्ति शान्तिरापस्तदद्भिः शान्त्या शमयति तदद्भिः संदधाति तस्माददद्भिरभिमृशति ॥११॥ सोऽभिमृशति । अग्निष्टे त्वचं मा हिꣳसीदित्यग्निना वाऽएनमेतदभितपस्यन्भवत्येष ते त्वचं मा हिꣳसीदित्येवैतदाह ॥१२॥ तं पर्यग्निं करोति । अच्छिन्नमेवैनमेतदग्निना परिगृह्णाति नेदेनं नाष्ट्रा रक्षाꣳसि प्रमृशानित्यग्निर्हि रक्षसामपहन्ता तस्मात्पर्यग्निं करोति ॥१३॥ तꣳ श्रपयति । देवस्त्वा सविता श्रपयत्विति न वाऽएतस्य मनुष्यः श्रपयिता देवो ह्येष तदेनं देव एव सविता श्रपयति वर्षिष्ठेऽधि नाकऽइति देवत्रो एतदाह यदाह वर्षिष्ठेऽधि नाकऽइति तमभिमृशति शृतं वेदानीति तस्माद्वाऽअभिमृशति ॥१४॥ सोऽभिमृशति । मा भेर्मा संविक्था इति मा त्वं भेषीर्मा संविक्था यद्वाहममानुषꣳ सन्तं मानुषोऽभिमृशामीत्येवैत

दाह ॥१५॥ यदा शृतोऽथाभिवासयति । नेदेनमुपरिष्टान्नाष्ट्रा रक्षाᳪस्यवपश्यानि-
ति नेद्वेव नग्न-इव मुषित-इव शयाताऽइत्यु चैव तस्माद्वाऽअभिवासयति ॥१६॥
सोऽभिवासयति । अतमेरुर्यज्ञोऽतमेरुर्यजमानस्य प्रजा भूयादिति नेदेतदनु यज्ञो
वा यजमानो वा ताम्याद्यदिदमभिवासयामीति तस्मादेवमभिवासयति ॥१७॥ अथ
पात्रीनिर्णेजनम् । अङ्गुलिप्रणेजनमाप्त्येभ्यो निनयति तद्यदाप्त्येभ्यो निनयति ॥१८॥
ब्राह्मणम् ॥ ६ [२.२.]॥ प्रथमः प्रपाठकः ॥ कण्डिकासंख्या १२१ ॥

चतुर्धाविहितो ह वाऽअग्रेऽग्निरास । स यमग्रेऽग्निᳪ होत्राय प्रावृणत स प्रा-
धन्वद्यं द्वितीयं प्रावृणत स प्रैवाधन्वद्यं तृतीयं प्रावृणत स प्रैवाधन्वदथ योऽय-
मेतर्ह्यग्निः स भीषा निलिल्ये सोऽपः प्रविवेश तं देवा अनुविद्य सहसैवाद्भ्य
आनिन्युः सोऽपोऽभितिष्ठिवावष्ठ्यूता स्थ या अप्रपदनᳪ स्थ याभ्यो वो मामकामं
नयन्तीति तत आप्त्याः सम्बभूवुस्त्रितो द्वित एकतः ॥१॥ तऽइन्द्रेण सह चेरुः ।
यथेदं ब्राह्मणो राजानमनुचरति स यत्र त्रिशीर्षाणं त्वाष्ट्रं विश्वरूपं जघान तस्य
हैतेऽपि बध्यस्य विदाञ्चक्रुः शश्वद्धैनं त्रित एव जघानात्यह तदिन्द्रोऽमुच्यत दे-
वो हि सः ॥२॥ त उ हैतऽऊचुः । उपैवेमऽएनो गच्छतु येऽस्य बध्यस्याविदिषु-
रिति किमिति यज्ञ एवैषु मृष्टामिति तदेष्वेतद्यज्ञो मृष्टे यदेभ्यः पात्रीनिर्णेजनमङ्गु
लिप्रणेजनं निनयन्ति ॥३॥ तऽउ हाप्त्या ऊचुः । अत्येव वयमिदमस्मत्परो नया-
मेति कमभीति य एवादक्षिणेन हविषा यजाताऽइति तस्मान्नादक्षिणेन हविषा
यजेताप्त्येषु ह यज्ञो मृष्ट आप्त्या उ ह तस्मिन्मृजते योऽदक्षिणेन हविषा यजते
॥४॥ ततो देवाः । एतां दर्शपूर्णमासयोर्दक्षिणामकल्पयन्यदन्वाहार्यं नेददक्षिणᳪ
हविरसदिति तन्नाना निनयति तथैभ्योऽसमदं करोति तदभितपति तथैषाᳪ शृतं
भवति स निनयति त्रिताय त्वा द्विताय त्वैकताय त्वेति पशुर्ह वाऽएष आलभ्यते
यत्पुरोडाशः ॥५॥ पुरुषᳪ ह वै देवाः । अग्रे पशुमालेभिरे तस्यालब्धस्य मेधो

ऽपचक्राम सोऽश्वं प्रविवेश तेऽश्वमालभन्त तस्यालब्धस्य मेधोऽपचक्राम स गां प्रविवेश ते गामा° सोऽविं प्रविवेश तेऽविमा°--°म सोऽजं प्रविवेश तेऽजमालभन्त तस्यालब्धस्य मेधोऽपचक्राम ॥ ६॥ स इमां पृथिवीं प्रविवेश । तं खनन्त-इवान्वीषुस्तमन्वविन्दंस्ताविमौ व्रीहियवौ तस्मादप्येतावेतर्हि खनन्त-इवैवानुविन्दन्ति स यावद्वीर्यवद्ध वाऽअस्यैते सर्वे पशव आलब्धाः स्युस्तावद्वीर्यवद्धास्य हविरेव भवति य एवमेतद्वेदात्रो सा सम्पद्यदाहुः पाङ्क्तः पशुरिति ॥ ७॥ यदा पिष्टान्यथ लोमानि भवन्ति । यदाप आनयत्यथ त्वग्भवति यदा संयौत्यथ माꣳसं भवति संतत-इव हि स तर्हि भवति संततमिव हि माꣳसं यदा शृतोऽथास्थि भवति दारुण-इव हि स तर्हि भवति दारुणमित्यस्थ्यथ यदुद्वासयिष्यन्नभिघारयति तं मज्जानं दधात्येषो सा सम्पद्यदाहुः पाङ्क्तः पशुरिति ॥ ८॥ स यं पुरुषमालभन्त । स किम्पुरुषोऽभवद्यावश्वं च गां च तौ गौरश्च गवयश्चाभवतां यमविमालभन्त स उष्ट्रोऽभवद्यमजमालभन्त स शरभोऽभवत्तस्मादेतेषां पशूनां नाशितव्यमपक्रान्तमेधा ह्येते पशवः ॥ ९॥ ब्राह्मणम् ॥ १ [२. ३.]॥

इन्द्रो ह यत्र वृत्राय वज्रं प्रजहार । स प्रहृतश्चतुर्धाऽभवत्तस्य स्फ्यस्तृतीयं वा यावद्वा यूपस्तृतीयं वा यावद्वा रथस्तृतीयं वा यावद्वाथ यत्र प्राहरत्तच्छकलोऽशीर्यत स पतित्वा शरोऽभवत्तस्माच्छरो नाम यदशीर्यतैवमु स चतुर्धा वज्रोऽभवत् ॥ १॥ ततो द्वाभ्यां ब्राह्मणा यज्ञे चरन्ति द्वाभ्याꣳ राजन्यबन्धवः संव्याधे यूपेन च स्फ्येन च ब्राह्मणा रथेन च शरेण च राजन्यबन्धवः ॥ २॥ स यत्स्फ्यमादत्ते । यथैव तदिन्द्रो वृत्राय वज्रमुदयच्छदेवमेवैष एतं पाप्मने द्विषते भ्रातृव्याय वज्रमुद्यच्छति तस्माद्वै स्फ्यमादत्ते ॥ ३॥ तमादत्ते । देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददेऽध्वरकृतं देवेभ्य इति सविता वै देवानां प्रसविता तत्सवितृप्रसूत एवैनमेतदादत्तेऽश्विनोर्बाहुभ्यामित्यश्विनावध्वर्यू तत्तयोरेव बाहुभ्या-

मादत्ते न स्वाभ्यां वज्रो वा ऽएष तस्य न मनुष्यो भर्ता तमेताभिर्देवताभिरादत्ते
॥४॥ आददेऽध्वरकृतं देवेभ्य इति । अध्वरो वै यज्ञो यज्ञकृतं देवेभ्य इत्येवैतदाह
तꣳ सव्ये पाणौ कृत्वा दक्षिणेनाभिमृश्य जपति सꣳश्यत्येवैनमेतद्यज्जपति ॥५॥
स जपति । इन्द्रस्य बाहुरसि दक्षिण इत्येष वै वीर्यवत्तमो य इन्द्रस्य बाहुर्द-
क्षिणस्तस्मादाहेन्द्रस्य बाहुरसि दक्षिण इति सहस्रभृष्टिः शततेजा इति सहस्रभृ-
ष्टिर्वै स वज्र आसीच्छततेजा यं तं वृत्राय प्राहरत्तमेवैतत्करोति ॥६॥ वायुरसि
तिग्मतेजा इति । एतद्वै तेजिष्ठं तेजो यदयं योऽयं पवत ऽएष हीमांल्लोकांस्तिर्यङ्ङ-
नुपवते सꣳश्यत्येवैनमेतद्द्विषतो बध इति यदि नाभिचरेद्यद्यु ऽअभिचरेदमुष्य बध
इति ब्रूयात्तेन सꣳशितेन नात्मानमुपस्पृशति न पृथिवीं नेदनेन वज्रेण सꣳशि-
तेनात्मानं वा पृथिवीं वा हिनसानीति तस्मान्नात्मानमुपस्पृशति न पृथिवीम्
॥७॥ देवाश्च वा ऽअसुराश्च । उभये प्राजापत्याः पस्पृधिरे ते ह स्म यद्देवा असुरा-
ञ्जयन्ति ततो ह स्मैवैनान्पुनरुपोत्तिष्ठन्ति ॥८॥ ते ह देवा ऊचुः । जयामो वा
ऽअसुरांस्ततस्त्वेव नः पुनरुपोत्तिष्ठन्ति कथं न्वेनाननपजय्यं जयेमेति ॥९॥ स हा-
ग्निरुवाच । उदञ्चो वै नः पलाय्य मुच्यन्त ऽइत्युदञ्चो ह स्मैवैषां पलाय्य मुच्यन्ते
॥१०॥ स हाग्निरुवाच । अहमुत्तरतः पर्येष्याम्यथ यूयमित उपसꣳरोत्स्यथ ता-
न्त्सꣳरुध्यैभिश्च लोकैरभिनिधास्यामो यदु चेमांल्लोकानति चतुर्थं ततः पुनर्न सꣳ-
हास्यन्त ऽइति ॥११॥ सोऽग्निरुत्तरतः पर्यैत् । अथेम ऽइत उपसमरुन्धंस्तान्त्सꣳरु-
ध्यैभिश्च लोकैरभिन्यदधुर्यदु चेमांल्लोकानति चतुर्थं ततः पुनर्न समजिहत तदेत-
न्निदानेन यत्स्तम्बयजुः ॥१२॥ स योऽसावग्नीदुत्तरतः पर्येति । अग्निरेवैष निदा-
नेन तानध्वर्युरेवेत उपसꣳरुणद्धि तान्त्सꣳरुध्यैभिश्च लोकैरभिनिदधाति यदु चेमां-
ल्लोकानति चतुर्थं ततः पुनर्न संजिहते तस्मादप्येतर्ह्यसुरा न संजिहते येन ह्ये-
वैनान्देवा अवाबाधन्त तेनैवैनानप्येतर्हि ब्राह्मणा यज्ञेऽवबाधन्ते ॥१३॥ य उ ऽएव

यजमानायारातीयति । यश्चैनं द्वेष्टि तमेवैतदेभिश्च लोकैरभिनिदधाति यदु चेमां-ल्लोकानति चतुर्थमस्या एव सर्वꣳ हरत्यस्याꣳ हीमे सर्वे लोकाः प्रतिष्ठिताः किꣳ हि हरेद्यदन्तरिक्षꣳ हरामि दिवꣳ हरामीति हरेत्तस्मादस्या एव सर्वꣳ हरति ॥१४॥ अथ तृणमन्तर्धाय प्रहरति । नेदनेन वज्रेण सꣳशितेन पृथिवीꣳ हिनसानीति तस्मात्तृणमन्तर्धाय प्रहरति ॥१५॥ स प्रहरति । पृथिवि देवयजन्योषध्यास्ते मूलं मा हिꣳसिषमित्युत्तरमूलामिव वा ऽ एनामेतत्करोत्याददानस्तामेतदाहौषधीनां ते मूलानि मा हिꣳसिषमिति व्रजं गच्छ गोष्ठानमित्यभिनिधास्यन्नेवैतदनपक्रामि कुरुते तद्यनपक्रामि यद्व्रजे ऽन्तस्तस्मादाह व्रजं गच्छ गोष्ठानमिति वर्षतु ते द्यौरिति यत्र वा ऽ अस्यै खनन्तः क्रूरीकुर्वन्त्यपघ्नन्ति शान्तिरापस्तदद्भिः शान्त्या शमयति तदद्भिः संदधाति तस्मादाह वर्षतु ते द्यौरिति बधान देव सवितः परमस्यां पृथिव्यामिति देवमेवैतत्सवितारमाहान्धे तमसि बधानेति यदाह परमस्यां पृथिव्यामिति शतेन पाशैरित्यमुचे तदाह यो ऽस्मान्द्वेष्टि यं च वयं द्विष्मस्तमतो मा मौगिति यदि नाभिचरेद्यद्यु ऽ अभिचरेदमुमतो मा मौगिति ब्रूयात् ॥१६॥ अथ द्वितीयं प्रहरति । अपाररुं पृथिव्यै देवयजनाद्वध्यासमित्यररुर्ह वै नामासुररक्षसमास तं देवा अस्या अपाघ्नत तथो ऽ एवैनमेतदेषो ऽस्या अपहते व्रजं गच्छ गोष्ठानं वर्षतु ते द्यौर्बधान देव सवितः परमस्यां पृथिव्याꣳ शतेन पाशैर्यो ऽस्मान्द्वेष्टि यं च वयं द्विष्मस्तमतो मा मौगिति ॥१७॥ तमग्नीदभिनिदधाति । अररो दिवं मा पप्त इति यत्र वै देवा अररुमसुररक्षसमपाघ्नत स दिवमपिपतिषत्तमग्निरभिन्यदधादररो दिवं मा पप्त इति स न दिवमपत्तथो ऽ एवैनमेतदध्वर्युरेवास्माल्लोकादन्तरेति दिवो ऽग्नीत्तस्मादेवं करोति ॥१८॥ अथ तृतीयं प्रहरति । द्रप्सस्ते द्यां मा स्कन्नित्ययं वा ऽ अस्यै द्रप्सो यमस्या इमꣳ रस प्रजा उपजीवन्त्येष ते दिवं मा पतदित्येवैतदाह व्रजं गच्छ गो० -- मौगिति ॥१९॥ स वै त्रिर्यजुषा हरति । त्रयो वा ऽ इमे लोका एभिरेवैनमेतल्लोकैरभिनिदधात्यद्धा वै तद्यदिमे

लोका अद्धो तद्यद्यजुस्तस्मात्तिर्यग्यजुषा हरति ॥२०॥ तूष्णीं चतुर्थम् । स यदिमां-ल्लोकानति चतुर्थमस्ति वा न वा तेनैवैतद्विषन्तं भ्रातृव्यमवबाधतेऽनद्धा वै तद्य-दिमांल्लोकानति चतुर्थमस्ति वा न वानद्धो तद्यत्तूष्णीं तस्मात्तूष्णीं चतुर्थम् ॥२१॥ ब्राह्मणम् ॥२[४.]॥

देवाश्च वाऽअसुराश्च । उभये प्राजापत्याः पस्पृधिरे ततो देवा अनुव्यमिवा-सुरथ हासुरा मेनिरेऽस्माकमेवेदं खलु भुवनमिति ॥१॥ ते होचुः । हन्तेमां पृ-थिवीं विभजामहै तां विभज्योपजीवामेति तामौक्ष्णैश्चर्मभिः पश्चात्प्राञ्चो विभज-माना अभीयुः ॥२॥ तद्वै देवाः शुश्रुवुः । विभजन्ते ह वाऽइमामसुराः पृथिवीं प्रेत तदेष्यामो यत्रेमामसुरा विभजन्ते के ततः स्याम यदस्यै न भजेमहीति ते यज्ञमेव विष्णुं पुरस्कृत्येयुः ॥३॥ ते होचुः । अनु नोऽस्यां पृथिव्यामाभजतास्त्वेव नोऽप्यस्यां भाग इति ते हासुरा असूयन्त-इवोचुर्यावदेवैष विष्णुरभिशेते तावद्वो दद्म इति ॥४॥ वामनो ह विष्णुरास । तद्देवा न जिहीडिरे महद्वै नोऽदुर्ये नो यज्ञसंमितमदुरिति ॥५॥ ते प्राञ्चं विष्णुं निपाद्य । छन्दोभिरभितः पर्यगृह्णन्गायत्रेण त्वा छन्दसा परिगृह्णामीति दक्षिणतस्त्रैष्टुभेन त्वा छन्दसा परिगृह्णामीति पश्चाज्जा-गतेन त्वा छन्दसा परिगृह्णामीत्युत्तरतः ॥६॥ तं छन्दोभिरभितः परिगृह्य । अग्निं पुरस्तात्समाधाय तेनार्चन्तः श्राम्यन्तश्चेरुस्तेनेमाꣳ सर्वां पृथिवीꣳ समविन्दन्त तद्य-देनेनेमाꣳ सर्वाꣳ समविन्दन्त तस्माद्वेदिर्नाम तस्मादाहुर्यावती वेदिस्तावती पृथि-वीत्येतया हीमाꣳ सर्वाꣳ समविन्दन्तैवꣳ ह वाऽइमाꣳ सर्वाꣳ सपत्नानाꣳ संवृङ्क्ते निर्भजत्यस्यै सपत्नान्य एवमेतद्वेद ॥७॥ सोऽयं विष्णुर्ग्लानः । छन्दोभिरभितः प-रिगृहीतोऽग्निः पुरस्तान्नापक्रमणमास स तत एवौषधीनां मूलान्युपमुम्लोच ॥८॥ ते ह देवा ऊचुः । क्व नु विष्णुरभूत्क्व नु यज्ञोऽभूदिति ते होचुश्छन्दोभिरभितः परिगृहीतोऽग्निः पुरस्तान्नापक्रमणमस्त्यत्रैवान्विच्छतेति तं खनन्त-इवान्वीषुस्तं

त्र्यङ्गुलेऽन्वविन्दंस्तस्मात्त्र्यङ्गुला वेदिः स्यात्तदु हापि पाञ्चिस्त्र्यङ्गुलामिव सौम्यस्याध्वरस्य वेदिं चक्रे ॥९॥ तदु तथा न कुर्यात् । ओषधीनां वै स मूलान्युपाम्लोचत्तस्मादोषधीनामिव मूलान्युच्छेत्तवै ब्रूयाद्यन्त्वेवात्र विष्णुमन्वविन्दंस्तस्माद्वेदिर्नाम ॥१०॥ तमनुविद्योत्तरेण परिग्रहेण पर्यगृह्णन् । सुक्ष्मा चासि शिवा चासीति दक्षिणत इमामेवैतत्पृथिवीꣳ संविद्य सुक्ष्माꣳ शिवामकुर्वत स्योना चासि सुषदा चासीति पश्चादिमामेवैतत्पृथिवीꣳ संविद्य स्योनाꣳ सुषदामकुर्वतोर्जस्वती चासि पयस्वती चेत्युत्तरत इमामेवैतत्पृथिवीꣳ संविद्य रसवतीमुपजीवनीयामकुर्वत ॥११॥ स वै त्रिः पूर्वं परिग्रहं परिगृह्णाति । त्रिरुत्तरं तत्षट् कृत्वः षड्वा ऽऋतवः संवत्सरस्य सवत्सरो यज्ञः प्रजापतिः स यावानेव यज्ञो यावत्यस्य मात्रा तावतमेवैतत्परिगृह्णाति ॥१२॥ षड्भिर्व्याहृतिभिः । पूर्वं परिग्रहं परिगृह्णाति षड्भिरुत्तरं तद्द्वादश कृत्वो द्वादश वै मासाः संवत्सरस्य संवत्सरो यज्ञः प्रजापतिः स यावानेव यज्ञो यावत्यस्य मात्रा तावतमेवैतत्परिगृह्णाति ॥१३॥ व्याममात्री पश्चात्स्यादित्याहुः । एतावान्वै पुरुषः पुरुषसंमिता हि त्र्यरत्निः प्राची त्रिवृद्धि यज्ञो नात्र मात्रास्ति यावतीमेव स्वयं मनसा मन्येत तावतीं कुर्यात् ॥१४॥ अभितोऽग्निमꣳसाऽउन्नयति । योषा वै वेदिर्वृषाग्निः परिगृह्य वै योषा वृषाणꣳ शेते मिथुनमेवैतत्प्रजननं क्रियते तस्मादभितोऽग्निमꣳसाऽउन्नयति ॥१५॥ सा वै पश्चाद्वरीयसी स्यात् । मध्ये सꣳह्वारिता पुनः पुरस्तादुर्व्येवमिव हि योषां प्रशꣳसन्ति पृथुश्रोणिर्विमृष्टान्तराꣳसा मध्ये संग्राह्येति जुष्टामेवैनामेतद्देवेभ्यः करोति ॥१६॥ सा वै प्राक्प्रवणा स्यात् । प्राची हि देवानां दिगथोऽउदक्प्रवणोदीची हि मनुष्याणां दिग्दक्षिणतः पुरीषं प्रत्युदूहत्येषा वै दिक्पितृणाꣳ सा यद्दक्षिणाप्रवणा स्यात् क्षिप्रे ह यजमानोऽमुं लोकमियात्तथो ह यजमानो ज्योग्जीवति तस्माद्दक्षिणतः पुरीषं प्रत्युदूहति पुरीषवतीं कुर्वीत पशवो वै पुरीषं पशुमतीमेवैना-

मेतत्कुरुते ॥१७॥ तां प्रतिमार्ष्टि । देवा ह वै संग्रामꣳ संनिधास्यन्तस्ते होचुर्हन्त
यदस्यै पृथिव्याऽअनामृतं देवयजनं तच्चन्द्रमसि निदधामहै स यदि नऽइतोऽसुरा
जयेयुस्तत एवार्चन्तः श्राम्यन्तः पुनरभिभवेमेति स यदस्यै पृथिव्याऽअनामृतं देव-
यजनमासीत्तच्चन्द्रमसि न्यदधत तदेतच्चन्द्रमसि कृष्णं तस्मादाहुश्चन्द्रमस्यस्यै पृथिव्यै
देवयजनमित्यपि ह वाऽअस्यैतस्मिन्देवयजनऽइष्टं भवति तस्माद्वै प्रतिमार्ष्टि
॥१८॥ स प्रतिमार्ष्टि । पुरा क्रूरस्य विसृपो विरप्शिन्निति संग्रामो वै क्रूरꣳ सं-
ग्रामे हि क्रूरं क्रियते हतः पुरुषो हतोऽश्वः शेते पुरा ह्येतत्संग्रामान्न्यदधत त-
स्मादाह पुरा क्रूरस्य विसृपो विरप्शिन्नित्युदादाय पृथिवीं जीवदानुमित्युदादाय हि
यदस्यै पृथिव्यै जीवमासीत्तच्चन्द्रमसि न्यदधत तस्मादाहोदादाय पृथिवीं जीवदा-
नुमिति यामैरयꣳश्चन्द्रमसि स्वधाभिरिति यां चन्द्रमसि ब्रह्मणादधुरित्येवैतदाह
तामु धीरासोऽअनुदिश्य यजन्तऽइत्येतेनो ह तामनुदिश्य यजन्तेऽपि ह वाऽअस्यै-
तस्मिन्देवयजनऽइष्टं भवति य एवमेतद्वेद ॥१९॥ अथाह प्रोक्षणीरासादयेति ।
वज्रो वै स्फ्यो ब्राह्मणश्चेमं पुरा यज्ञमभ्यजूगुपतां वज्रो वाऽआपस्तद्वज्रमेवैतदभि-
गुप्त्याऽआसादयति स वाऽउपर्युपर्येव प्रोक्षणीषु धार्यमाणास्वथ स्फ्यमुद्यच्छत्यथ
यन्निहितऽएव स्फ्ये प्रोक्षणीरासादयेद्वज्रौ ह समृच्छेयातां तथो ह वज्रौ न समृच्छेते
तस्मादुपर्युपर्येव प्रोक्षणीषु धार्यमाणास्वथ स्फ्यमुद्यच्छति ॥२०॥ अथैतां वाचं वद-
ति । प्रोक्षणीरासादयेध्मं बर्हिरुपसादय स्रुचः संमृड्ढि पत्नीꣳ संनह्याज्येनोदेह्येति
संप्रैष एवैष स यदि कामयेत ब्रूयादेतद्यद्यु कामयेतापि नाद्रियेत स्वयमु ह्येवैत-
द्वेदेदमतः कर्म कर्तव्यमिति ॥२१॥ अथोदञ्चꣳ स्फ्यं प्रहरति । अमुष्मै त्वा वज्रं
प्रहरामीति यद्यभिचरेद्वज्रो वै स्फ्य स्तृणुते हैवैनेन ॥२२॥ अथ पाणीऽअ-
वनेनिक्ते । यद्वस्यै क्रूरमभूत्तद्वस्याऽएतदहार्षीत्तस्मात्पाणीऽअवनेनिक्ते ॥२३॥
स ये हाग्रऽईजिरे । ते ह स्मावमर्शं यजन्ते ते पापीयाꣳस आसुरथ ये ने-

जिरे ते श्रेयाꣳस आसुस्ततोऽश्रद्धा मनुष्यान्विवेद ये यजन्ते पापीयाꣳसस्ते भवन्ति यऽउ न यजन्ते श्रेयाꣳसस्ते भवन्तीति तत इतो देवान्हविर्न जगामेतः प्रदानाद्धि देवा उपजीवन्ति ॥२४॥ ते ह देवा ऊचुः । बृहस्पतिमाङ्गिरसमश्रद्धा वै मनुष्यानविदत्तेभ्यो विधेहि यज्ञमिति स हेत्योवाच बृहस्पतिराङ्गिरसः कथा न यजध्वऽइति ते होचुः किंकाम्या यजेमहि ये यजन्ते पापीयाꣳसस्ते भवन्ति यऽउ न यजन्ते श्रेयाꣳसस्ते भवन्तीति ॥२५॥ स होवाच । बृहस्पतिराङ्गिरसो यद्वै शुश्रुम देवानां परिषूतं तदेष यज्ञो भवति यत्कृतानि हवीꣳषि क्लृप्ता वेदिस्तेनावमर्शमचारिष्ट तस्मात्पापीयाꣳसोऽभूत तेनानवमर्शं यजध्वं तथा श्रेयाꣳसो भविष्यथेत्या कियत इत्या बर्हिष स्तरणादिति बर्हिषा ह वै खल्वेषा शाम्यति स यदि पुरा बर्हिष स्तरणात्किंचिदापद्येत बर्हिरेव तत्स्तृणन्नपास्येदथ यदा बर्हि स्तृणन्त्यपि पदाभितिष्ठन्ति स यो हैवं विद्वाननवमर्शं यजते श्रेयान्हैव भवति तस्मादनवमर्शमिव यजेत ॥२६॥ ब्राह्मणम् ॥३ [५.]॥ अध्यायः ॥२॥

स वै स्रुचः संमार्ष्टि । तद्यत्स्रुचः संमार्ष्टि यथा वै देवानां चरणं तद्वाऽअनु मनुष्याणां तस्माद्यदा मनुष्याणां परिवेषणमुपक्लृप्तं भवति ॥१॥ अथ पात्राणि निर्णेनिजति । तैर्निर्णिज्य परिविविषत्येवं वाऽएष देवानां यज्ञो भवति यत्कृतानि हवीꣳषि क्लृप्ता वेदिस्तेषमेतान्येव पात्राणि यत्स्रुचः ॥२॥ स यत्संमार्ष्टि । निर्णेनिज्म्येवैना एतन्निर्णिक्ताभिः प्रचराणीति तद्वै द्वयेनैव देवेभ्यो निर्णेनिजन्त्येकेन मनुष्येभ्योऽद्भिश्च ब्रह्मणा च देवेभ्यऽआपो हि कुशा ब्रह्म यजुरेकेनैव मनुष्येभ्योऽद्भिरेवैवम्वेतन्नाना भवति ॥३॥ अथ स्रुवमादत्ते । तं प्रतपति प्रत्युष्टꣳ रक्षः प्रत्युष्टाऽअरातयो निष्टप्तꣳ रक्षो निष्टप्ता अरातय इति वा ॥४॥ देवा ह वै यज्ञं तन्वानाः । तेऽसुररक्षसेभ्य आसंगाद्बिभयांचक्रुस्तद्यज्ञमुखाद्वैतन्नाष्ट्रा रक्षाꣳस्यतोऽपहन्ति ॥५॥ स वाऽइत्यग्रैरन्तरतः संमार्ष्टि । अनिशितोऽसि सपत्नक्षिदिति य-

थानुपरतो यजमानस्य सपत्नान्क्षिणुयादेवमेतदाह वाजिनं त्वा वाजेध्यायै संमार्ज्मीति यज्ञियं त्वा यज्ञाय संमार्ज्मीत्येवैतदाहेतेनैव सर्वाः स्रुचः संमार्ष्टि वाजिनीं त्वेति स्रुचं तूष्णीं प्राशित्रहरणं ॥ ६॥ स वाऽइत्यग्रैरन्तरतः संमार्ष्टीति । मूलैर्बाह्यतऽइतीव वाऽअयं प्राण इतीवोदानः प्राणोदानावेवैतद्दधाति तस्मादितीवेमानि लोमानीतीवेमानि ॥७॥ स वै संमृज्य-संमृज्य प्रतप्य-प्रतप्य प्रयच्छति । यथावमर्शं निर्णिज्यानवमर्शमुत्तमं परिक्षालयेदेवं तत्तस्मात्प्रतप्य-प्रतप्य प्रयच्छति ॥८॥ स वै स्रुवमेवाग्रे संमार्ष्टि । अथेतराः स्रुचो योषा वै स्रुग्वृषा स्रुवस्तस्माद्यद्यपि बह्व्य-इव स्त्रियः सार्धं यन्ति य एव तास्वपि कुमारक-इव पुमान्भवति स एव तत्र प्रथम एत्यनूच्य इतरास्तस्मात्स्रुवमेवाग्रे संमार्ष्ट्यथेतराः स्रुचः ॥९॥ स वै तथैव संमृज्यात् । यथाग्निं नाभिव्युक्षेद्यथा यस्माऽअशनमाहरिष्यन्त्स्यात्तं पात्रनिर्णेजनेनाभिव्युक्षेदेवं तत्तस्मादु तथैव संमृज्याद्यथाग्निं नाभिव्युक्षेत्प्राङिवैवोत्क्रम्य ॥१०॥ तद्धैके । स्रुक्संमार्जनान्यग्नावभ्यादधति वेदस्याहाभूवन्त्स्रुच एभिः सममार्जिषुरिदं वै किंचिद्यज्ञस्य नेदिदं बहिर्धा यज्ञाद्भवदिति तदु तथा न कुर्याद्यथा यस्माऽअशनमाहरेत्तं पात्रनिर्णेजनं पाययेदेवं तत्तस्मादु परास्येदेवैतानि ॥११॥ अथ पत्नीं संनह्यति । जघनार्धो वाऽएष यज्ञस्य यत्पत्नी प्राङ्मे यज्ञस्तायमानो यादिति युनक्त्येवैनामेतद्युक्ता मे यज्ञमन्वासाताऽइति ॥१२॥ योक्त्रेण संनह्यति । योक्त्रेण हि योग्यं युञ्जन्त्यस्ति वै पत्न्या अमेध्यं यदवाचीनं नाभेरथैतदाज्यमवेक्षिष्यमाणा भवति तदेवास्या एतद्योक्त्रेणान्तर्दधात्यथ मेध्येनैवोत्तरार्धेनाज्यमवेक्षते तस्मात्पत्नीं संनह्यति ॥१३॥ स वाऽअभिवासः संनह्यति । ओषधयो वै वासो वरुण्या रज्जुस्तदोषधीरेवैतदन्तर्दधाति तथो हैनामेषा वरुण्या रज्जुर्न हिनस्ति तस्मादभिवासः संनह्यति ॥१४॥ स संनह्यति । अदित्यै रास्नासीतीयं वै पृथिव्यदितिः सेयं देवानां पत्न्येषा वाऽएतस्य पत्नी भवति तदस्या

एतद्रास्नामिव करोति न रज्जुं ह्विरो वै रास्ना तामेवास्या एतत्करोति ॥१५॥ स वै न ग्रन्थिं कुर्यात् । वरुण्यो वै ग्रन्थिर्वरुणो ह पत्नीं गृह्णीयाद्यद्ग्रन्थिं कुर्यात्तस्मान्न ग्रन्थिं करोति ॥१६॥ ऊर्ध्वमेवोद्गूहति । विष्णोर्वेष्योऽसीति सा वै न पश्चात्प्राची देवानां यज्ञमन्वासीतेयं वै पृथिव्यदितिः सेयं देवानां पत्नी सा पश्चात्प्राची देवानां यज्ञमन्वास्ते तद्धेमामभ्यारोहेत्सा पत्नी क्षिप्रेऽमुं लोकमियात्तथो ह पत्नी ज्योग्जीवति तदस्याऽएवैतन्निह्नुते तथो हैनामियं न हिनस्ति तस्माद्ध दक्षिणत-इवैवान्वासीत ॥१७॥ अथाज्यमवेक्षते । योषा वै पत्नी रेत आज्यं मिथुनमेवैतत्प्रजननं क्रियते तस्मादाज्यमवेक्षते ॥१८॥ सावेक्षते । ऽदब्धेन त्वा चक्षुषावपश्यामीत्यनार्त्तेन त्वा चक्षुषावपश्यामीत्येवैतदाहाग्नेर्जिह्वासीति यदा वाऽएतदग्नौ जुह्वत्यथाग्नेर्जिह्वा-इवोत्तिष्ठन्ति तस्मादाहाग्नेर्जिह्वासीति सुहूर्देवेभ्य इति साधु देवेभ्य इत्येवैतदाह धाम्ने-धाम्ने मे भव यजुषे-यजुषऽइति सर्वस्मै मे यज्ञायेधीत्येवैतदाह ॥१९॥ अथाज्यमादाय प्राङुदाहरति । तदाहवनीयेऽधिश्रयति यस्याहवनीये हवींषि श्रपयन्ति सर्वो मे यज्ञ आहवनीये शृतोऽसदित्यथ यदमुत्राग्रेऽधिश्रयति पत्नींह्यवकाशयिष्यन्भवति न हि तदवकल्पते यत्सामि प्रत्यगहरेत्पत्नीमवकाशयिष्यामीत्यथ यत्पत्नीं नावकाशयेदन्तरियाद्ध यज्ञात्पत्नीं तथो ह यज्ञात्पत्नीं नान्तरेति तस्माद्ध सार्धमेव विलाप्य प्रागुदाहरत्यवकाश्य पत्नीं यस्यो पत्नी न भवत्यग्रऽएव तस्याहवनीयेऽधिश्रयति तत्तत आदत्ते तदन्तर्वेद्यासादयति ॥२०॥ तदाहुः । नान्तर्वेद्यासादयेदतो वै देवानां पत्नीः संयाजयन्त्यवसभा अह देवानां पत्नीः करोति परःपुंसो हास्य पत्नी भवतीति तदु होवाच याज्ञवल्क्यो यथादिष्टं पत्न्या अस्तु कस्तदाद्रियेत यत्परःपुंसा वा पत्नी स्याद्यथा वा यज्ञो वेदिर्यज्ञ आज्यं यज्ञाद्यज्ञं निर्मिमाऽइति तस्मादन्तर्वेद्येवासादयेत् ॥२१॥ प्रोक्षणीषु पवित्रे भवतः । ते तत आदत्ते ताभ्यामाज्यमुत्पुनात्येको वाऽउत्पवनस्य बन्धुर्मेध्यमेवैतत्करोति ॥२२॥ स उत्पुनाति । सवितुस्त्वा प्रसवऽउत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मि-

भिरिति सोऽसावेव बन्धुः ॥२३॥ ॥ शतम् २०० ॥ ॥ अथाज्यलिप्ताभ्यां पवित्रा-
भ्याम् । प्रोक्षणीरुत्पुनाति सवितुर्वः प्रसवऽउत्पु॰ -- बन्धुः ॥२४॥ तद्यदाज्यलिप्ता-
भ्यां पवित्राभ्याम् । प्रोक्षणीरुत्पुनाति तदप्सु पयो दधाति तदिदमप्सु पयो हितमिदꣳ
हि यदा वर्षत्यथौषधयो जायन्तऽओषधीर्जग्ध्वापः पीत्वा तत एष रसः संभवति त-
स्मादु रसस्यो चैव सर्वत्वाय ॥२५॥ अथाज्यमवेक्षते । तद्धैके यजमानमवख्यापयन्ति
तदु होवाच याज्ञवल्क्यः कथं नु न स्वयमध्वर्यवो भवन्ति कथꣳ स्वयं नान्वाहुर्य-
त्र भूयस्य-इवाशिषः क्रियन्ते कथं न्वेषामत्रैव श्रद्धा भवतीति यां वै कां च यज्ञऽऋ-
त्विज आशिषमाशासते यजमानस्यैव सा तस्मादध्वर्युरेवावेक्षेत ॥२६॥ सोऽवेक्षते ।
सत्यं वै चक्षुः सत्यꣳ हि वै चक्षुस्तस्माद्यदिदानीं द्वौ विवदमानावेयातामहमदर्शम-
हमश्रौषमिति य एव ब्रूयादहमदर्शमिति तस्माऽएव श्रद्दध्याम तत्सत्येनैवैतत्समर्धय
ति ॥२७॥ सोऽवेक्षते । तेजोऽसि शुक्रमस्यमृतमसीति स एष सत्य एव मन्त्रस्तेजो
ह्येतच्छुक्रꣳ ह्येतदमृतꣳ ह्येतत्तत्सत्येनैवैतत्समर्धयति ॥२८॥ ब्राह्मणम् ॥४. [३. १.] ॥

पुरुषो वै यज्ञः । पुरुषस्तेन यज्ञो यदेनं पुरुषस्तनुतऽएष वै तायमानो
यावानेव पुरुषस्तावान्विधीयते तस्मात्पुरुषो यज्ञः ॥१॥ तस्येयमेव जुहू ।
रियमुपभृदात्मैव ध्रुवा तद्वाऽआत्मन एवेमानि सर्वाण्यङ्गानि प्रभवन्ति तस्मादु
ध्रुवाया एव सर्वो यज्ञः प्रभवति ॥२॥ प्राण एव स्रुवः । सोऽयं प्राणः सर्वा-
ण्यङ्गान्यनुसंचरति तस्मादु स्रुवः सर्वा अनु स्रुचः संचरति ॥३॥ तस्यासावेव
द्यौर्जुहूः । अथेदमन्तरिक्षमुपभृदियमेव ध्रुवा तद्वाऽअस्या एवेमे सर्वे लोकाः
प्रभवन्ति तस्मादु ध्रुवाया एव सर्वो यज्ञः प्रभवति ॥४॥ अयमेव स्रुवो यो-
ऽयं पवते । सोऽयमिमांत्सर्वांल्लोकाननुपवते तस्मादु स्रुवः सर्वा अनु स्रुचः
संचरति ॥५॥ स एष यज्ञस्तायमानो । देवेभ्यस्तायतऽऋतुभ्यश्छन्दोभ्यो यद्धवि-
स्तद्देवानां यत्सोमो राजा यत्पुरोडाशस्तत्तदादिश्य गृह्णात्यमुष्मै त्वा जुष्टं गृह्णामी-

त्यैवमु हैतेषाम् ॥६॥ अथ यान्याज्यानि गृह्यन्ते । ऋतुभ्यश्चैव तानि छन्दोभ्यश्च गृह्यन्ते तत्तदनादिश्यान्यस्यैव रूपेण गृह्णाति स वै चतुर्जुह्वां गृह्णात्यष्टौ कृत्व उपभृति ॥७॥ स यच्चतुर्जुह्वां गृह्णाति । ऋतुभ्यस्तद्गृह्णाति प्रयाजेभ्यो हि तद्गृह्णात्यृतवो हि प्रयाजास्तत्तदनादिश्यान्यस्यैव रूपेण गृह्णात्यजामितायै जामि ह कुर्याद्वसन्ताय त्वा ग्रीष्माय त्वेति गृह्णीयात्तस्मादनादिश्यान्यस्यैव रूपेण गृह्णाति ॥८॥ अथ यदष्टौ कृत्व उपभृति गृह्णाति । छन्दोभ्यस्तद्गृह्णात्यनुयाजेभ्यो हि तद्गृह्णाति छन्दांसि ह्यनुयाजास्तत्तदनादिश्यान्यस्यैव रूपेण गृह्णात्यजामितायै जामि ह कुर्याद्गायत्र्यै त्वा त्रिष्टुभे त्वेति गृह्णीयात्तस्मादनादिश्यान्यस्यैव रूपेण गृह्णाति ॥९॥ अथ यच्चतुर्ध्रुवायां गृह्णाति । सर्वस्मै तद्यज्ञाय गृह्णाति तत्तदनादिश्यान्यस्यैव रूपेण गृह्णाति कस्माऽउ ह्यादिशेद्यतः सर्वाभ्य एव देवताभ्योऽवद्यति तस्मादनादिश्यान्यस्यैव रूपेण गृह्णाति ॥१०॥ यजमान एव जुह्वमनु । योऽस्माऽअरातीयति स उपभृतमन्वत्तैव जुह्वमन्वाद्य उपभृतमन्वत्तैव जुह्वराद्य उपभृत्स वै चतुर्जुह्वां गृह्णात्यष्टौ कृत्व उपभृति ॥११॥ स यच्चतुर्जुह्वां गृह्णाति । अत्तारमेवैतत्परिमिततरं कनीयांसं करोत्यथ यदष्टौ कृत्व उपभृति गृह्णात्याद्यमेवैतदपरिमिततरं भूयांसं करोति तद्धि समृद्धं यत्रात्ता कनीयानाद्यो भूयान् ॥१२॥ स वै चतुर्जुह्वां गृह्णन् । भूय आज्यं गृह्णात्यष्टौ कृत्व उपभृति गृह्णन्कनीय आज्यं गृह्णाति ॥१३॥ स यच्चतुर्जुह्वां गृह्णन् । भूय आज्यं गृह्णात्यत्तारमेवैतत्परिमिततरं कनीयांसं कुर्वंस्तस्मिन्वीर्यं बलं दधात्यथ यदष्टौ कृत्व उपभृति गृह्णन्कनीय आज्यं गृह्णात्याद्यमेवैतदपरिमिततरं भूयांसं कुर्वंस्तमवीर्यमबलीयांसं करोति तस्मादुत राजापरां विशं प्रावसायाप्येकवेश्मनैव जिनाति यद्यथा यत्कामयते तथा सचतऽएतेनो ह तद्वीर्येण यज्जुह्वां भूय आज्यं गृह्णाति स यज्जुह्वां गृह्णाति जुह्वैव तज्जुहोति यदुपभृति गृह्णाति जुह्वैव तज्जुहोति ॥१४॥ तदाहुः । कस्माऽउ तर्ह्युपभृति गृह्णीयाद्यदुप-

भृता न जुहोतीति स यद्धोपभृता जुहुयात्पृथग्घैवेमाः प्रजाः स्युर्नैवात्ता स्यान्नाद्यः स्यादथ यत्तज्जुह्वैव समानीय जुहोति तस्मादिमा विशः क्षत्रियाय बलिꣳ हरन्त्यथ यदुपभृति गृह्णाति तस्मादु क्षत्रियस्यैव वशे सति वैश्यं पशव उपतिष्ठन्तेऽथ यत्तज्जुह्वैव समानीय जुहोति तस्माद्यदोत क्षत्रियः कामयतेऽथाह वैश्य मयि यत्ते परो निहितं तदाहरेति तं जिनाति यद्यथा यत्कामयते तथा सचतऽएतेनो ह तद्वीर्येण ॥१५॥ तानि वाऽएतानि । छन्दोभ्य आज्यानि गृह्यन्ते स यच्चतुर्जुह्वां गृह्णाति गायत्र्यै तद्गृह्णात्यथ यदष्टौ कृत्व उपभृति गृह्णाति त्रिष्टुब्जगतीभ्यां तद्गृह्णात्यथ यच्चतुर्ध्रुवायां गृह्णात्यनुष्टुभे तद्गृह्णाति वाग्वाऽअनुष्टुब्वाचो वाऽइदꣳ सर्वं प्रभवति तस्मादु ध्रुवाया एव सर्वो यज्ञः प्रभवतीयं वाऽअनुष्टुबस्यै वाऽइदꣳ सर्वं प्रभवति तस्मादु ध्रुवाया एव सर्वो यज्ञः प्रभवति ॥१६॥ स गृह्णाति । धाम नामासि प्रियं देवानामित्येतद्वै देवानां प्रियतमं धाम यदाज्यं तस्मादाह धाम नामासि प्रियं देवानामित्यनाधृष्टं देवयजनमसीति वज्रो ह्याज्यं तस्मादाहानाधृष्टं देवयजनमसीति ॥१७॥ स एतेन यजुषा । सकृज्जुह्वां गृह्णाति त्रिस्तूष्णीमेतेनैव यजुषा सकृदुपभृति गृह्णाति सप्त कृत्वस्तूष्णीमेतेनैव यजुषा सकृद्ध्रुवायां गृह्णाति त्रिस्तूष्णीं तदाहुस्त्रिस्त्रिरेव यजुषा गृह्णीयात्त्रिवृद्धि यज्ञ इति तदु नु सकृत्सकृदेवात्रो ह्येव त्रिर्गृहीतꣳ संपद्यते ॥१८॥ ब्राह्मणम् ॥५ [३. २]॥

प्रोक्षणीरध्वर्युरादत्ते । स इध्ममेवाग्रे प्रोक्षति कृष्णोऽस्याखरेष्ठोऽग्नये त्वा जुष्टं प्रोक्षामीति तन्मेध्यमेवैतदग्नये करोति ॥१॥ अथ वेदिं प्रोक्षति । वेदिरसि बर्हिषे त्वा जुष्टां प्रोक्षामि तन्मेध्यामेवैतद्बर्हिषे करोति ॥२॥ अथास्मै बर्हिः प्रयच्छति । तत्पुरस्ताद्ग्रन्थ्यासादयति तत्प्रोक्षति बर्हिरसि स्रुग्भ्यस्त्वा जुष्टं प्रोक्षामि तन्मेध्यमेवैतत्स्रुग्भ्यः करोति ॥३॥ अथ याः प्रोक्षण्यः परिशिष्यन्ते । ताभिरोषधीनां मूलान्युपनिनयत्यदित्यै व्युन्दनमसीतीयं वै पृथिव्यदितिस्तदस्या एवैतदोषधीनां

मूलान्युपोनत्ति ता इमा आर्द्रमूला ओषधयस्तस्माद्यद्यपि शुष्काण्यग्राणि भवन्त्या-
र्द्राण्येव मूलानि भवन्ति ॥४॥ अथ विस्रꣳस्य ग्रन्थिम् । पुरस्तात्प्रस्तरं गृह्णाति
विष्णो स्तुपोऽसीति यज्ञो वै विष्णुस्तस्येयमेव शिखा स्तुप एतामेवास्मिन्नेतद्दधाति
पुरस्ताद्गृह्णाति पुरस्ताद्ध्ययꣳ स्तुपस्तस्मात्पुरस्ताद्गृह्णाति ॥५॥ अथ संनहनं विस्रꣳ-
सयति । प्रक्लृप्तꣳ ह्येवास्य स्त्री विजायतऽइति तस्मात्संनहनं विस्रꣳसयति तद्द-
क्षिणायाꣳ श्रोणौ निदधाति नीविर्ह्येवास्यैषा दक्षिणत-इव ह्ययं नीविस्तस्माद्द-
क्षिणायाꣳ श्रोणौ निदधाति तत्पुनरभिच्छादयत्यभिच्छन्नेव ह्ययं नीविस्तस्मात्पुनर-
भिच्छादयति ॥६॥ अथ बर्हिः स्तृणाति । अयं वै स्तुपः प्रस्तरोऽथ यान्यवाञ्चि
लोमानि तान्येवास्य यदितरं बर्हिस्तान्येवास्मिन्नेतद्दधाति तस्माद्बर्हिः स्तृणाति
॥७॥ योषा वै वेदिः । तामेतद्देवाश्च पर्यासते ये चेमे ब्राह्मणाः शुश्रुवाꣳसोऽनू-
चानास्तैर्ह्येवैनामेतत्पर्यासीनैरनग्नां करोत्यनग्नतायाऽएव तस्माद्बर्हिः स्तृणाति
॥८॥ यावती वै वेदिः । तावती पृथिव्योषधयो बर्हिस्तदस्यामेवैतत्पृथिव्यामोष-
धीर्दधाति ता इमा अस्यां पृथिव्यामोषधयः प्रतिष्ठितास्तस्माद्बर्हिः स्तृणाति ॥९॥
तद्ध बहुलꣳ स्तृणीयादित्याहुः । यत्र वाऽअस्यै बहुलतमा ओषधयस्तदस्या उप-
जीवनीयतमं तस्माद्बहुलꣳ स्तृणीयादिति तद्ध तदावर्तयैवाधि त्रिवृत्स्तृणाति त्रि-
वृद्धि यज्ञोऽथोऽअपि प्रवर्हꣳ स्तृणीयात्स्तृणन्ति बर्हिरानुषगिति ह्यृषिणाभ्यनूक्त-
मधरमूलꣳ स्तृणात्यधरमूला-इव ह्यीमा अस्यां पृथिव्यामोषधयः प्रतिष्ठितास्तस्मा-
दधरमूलꣳ स्तृणाति ॥१०॥ स स्तृणाति । ऊर्णम्रदसं त्वा स्तृणामि स्वासस्थां दे-
वेभ्यऽइति साध्वीं देवेभ्य इत्येवैतदाह यदाहोर्णम्रदसं त्वेति स्वासस्थां देवेभ्य इति
स्वासदां देवेभ्य इत्येवैतदाह ॥११॥ अथाग्निं कल्पयति । शिरो वै यज्ञस्याहव-
नीयः पूर्वार्धो वै शिरः पूर्वार्धमेवैतद्यज्ञस्य कल्पयत्युपर्युपरि प्रस्तरं धारयन्कल्प-
यत्ययं वै स्तुपः प्रस्तर एतमेवास्मिन्नेतत्प्रतिदधाति तस्मादुपर्युपरि प्रस्तरं धारय-

न्कल्पयति ॥१२॥ अथ परिधीन्परिदधाति । तद्यत्परिधीन्परिदधाति यत्र वै देवा अग्रेऽग्निꣳ होत्राय प्रावृणत तद्धोवाच न वाऽअहमिदमुत्सहे यद्वो होता स्यां यद्वो हव्यं वहेयं त्रीन्पूर्वान्प्रावृढ्वं ते प्राधन्विषुस्तान्नु मेऽवकल्पयताथ वाऽअह-मेतदुत्साह्ये यद्वो होता स्यां यद्वो हव्यं वहेयमिति तथेति तानस्माऽएतानवा-कल्पयंस्तऽएते परिधयः ॥१३॥ स होवाच । वज्रो वै तान्वषट्कारः प्रावृणग्व-ज्राद्धि वषट्काराद्बिभेमि यन्मा वज्रो वषट्कारो न प्रवृञ्ज्यादेतैरेव मा परिधत्त तथा मा वज्रो वषट्कारो न प्रवर्क्ष्यतीति तथेति तमेतैः पर्यदधुस्तं न वज्रो वषट्कारः प्रा-वृणक्तद्वस्मै वैतदग्नये नह्यति यदेतैः परिदधाति ॥१४॥ तऽउ हैतऽऊचुः । इदमु चे-दस्मान्यज्ञे युङ्क्थास्त्वेवास्माकमपि यज्ञे भागऽइति ॥१५॥ तथेति देवा अब्रुवन् । यद्बहिष्परिधि स्कन्त्स्यति तद्युष्मासु हुतमथ यद्व उपर्युपरि होष्यन्ति तद्वोऽविष्य-तीति स यदग्नौ जुह्वति तदेनानवत्यथ यदेनानुपर्युपरि जुह्वति तदेनानव-त्यथ यद्बहिष्परिधि स्कन्दति तदेतेषु हुतं तस्मादु ह नागऽइव स्कन्नꣳ स्यादि-मां वै ते प्राविशन्यद्वाऽइदं किंच स्कन्दत्यस्यामेव तत्सर्वं प्रतितिष्ठति ॥१६॥ स स्कन्नमभिमृशति । भुवपतये स्वाहा भुवनपतये स्वाहा भूतानां पतये स्वाहेत्ये-तानि वै तेषामग्नीनां नामानि यद्भुवपतिर्भुवनपतिर्भूतानां पतिस्तद्यथा वषट्कृतꣳ हुतमेवमस्यैतेष्वग्निषु भवति ॥१७॥ तद्धैके । इध्मस्यैवैतान्परिधीन्परिदधति तदु तथा न कुर्यादनवक्लृप्ता ह तस्यैते भवन्ति यानिध्मस्य परिदधात्यभ्याधानाय ह्ये-वेध्मः क्रियते तस्यो हैवैतेऽवक्लृप्ता भवन्ति यस्यैतानन्यानाहरन्ति परिधयऽइति तस्मादन्यानेवाहरेयुः ॥१८॥ ते वै पालाशाः स्युः । ब्रह्म वै पलाशो ब्रह्माग्नि-रग्नयो हि तस्मात्पालाशाः स्युः ॥१९॥ यदि पालाशान्न विन्देत् । अथोऽअपि वैकङ्कता स्युर्यदि वैकङ्कतान्न विन्देदथोऽअपि कार्ष्मर्यमयाः स्युर्यदि कार्ष्मर्यमयान्न विन्देदथोऽअपि वैल्वाः स्युरथो खादिरा अथोऽऔदुम्बरा एते हि वृक्षा यज्ञिया-

स्तस्मादेतेषां वृक्षाणां भवन्ति ॥२०॥ ब्राह्मणम् ॥ ६ [३. ३.] ॥ ॥ द्वितीयः प्रपाठकः ॥ ॥ कण्डिकासंख्या १२२ ॥ ॥

ते वाऽआर्द्राः स्युः । एतद्ध्येषां जीवमेतेन सतेजस एतेन वीर्यवन्तस्तस्मादार्द्राः स्युः ॥१॥ स मध्यममेवाग्रे । परिधिं परिदधाति गन्धर्वस्त्वा विश्वावसुः परिदधातु विश्वस्यारिष्ट्यै यजमानस्य परिधिरस्यग्निरिड ईडित इति ॥२॥ अथ दक्षिणं परिदधाति । इन्द्रस्य बाहुरसि दक्षिणो विश्वस्यारिष्ट्यै यजमानस्य परिधिरस्यग्निरिड ईडित इति ॥३॥ अथोत्तरं परिदधाति । मित्रावरुणौ त्वोत्तरतः परिधत्तां ध्रुवेण धर्मणा विश्वस्यारिष्ट्यै यजमानस्य परिधिरस्यग्निरिड ईडित इत्यग्नयो हि तस्मादाहाग्निरिड ईडित इति ॥४॥ अथ समिधमभ्यादधाति । स मध्यममेवाग्रे परिधिमुपस्पृशति तेनैतानग्रे समिन्धेऽथाग्नावभ्यादधाति तेनोऽअग्निं प्रत्यक्षᳬ समिन्धे ॥५॥ सोऽभ्यादधाति । वीतिहोत्रं त्वा कवे द्युमन्तᳬ समिधीमहि । अग्ने बृहन्तमध्वरऽइत्येतया गायत्र्या गायत्रीमेवैतत्समिन्धे सा गायत्री समिद्धान्यानि छन्दाᳬसि समिन्धे छन्दाᳬसि समिद्धानि देवेभ्यो यज्ञं वहन्ति ॥६॥ अथ यां द्वितीयाᳬ समिधमभ्यादधाति । वसन्तमेव तया समिन्धे स वसन्तः समिद्धोऽन्यानृतून्त्समिन्धऽऋतवः समिद्धाः प्रजाश्च प्रजनयन्त्योषधीश्च पचन्ति सोऽभ्यादधाति समिदसीति समिद्धि वसन्तः ॥७॥ अथाभ्याधाय जपति । सूर्यस्त्वा पुरस्तात्पातु कस्याश्चिदभिशस्त्याऽइति गुप्त्यै वाऽअभितः परिधयो भवन्त्यथैतत्सूर्यमेव पुरस्ताद्गोप्तारं करोति नेत्पुरस्तान्नाष्ट्रा रक्षाᳬस्यन्ववचरानिति सूर्यो हि नाष्ट्राणाᳬ रक्षसामपहन्ता ॥८॥ अथ यामित्थामुं तृतीयाᳬ समिधमभ्यादधाति । अनुयाजेषु ब्राह्मणमेव तया समिन्धे स ब्राह्मणः समिद्धो देवेभ्यो यज्ञं वहति ॥९॥ अथ स्तीर्णां वेदिमुपावर्त्तते । स द्वे तृणेऽआदाय तिरश्ची निदधाति सवितुर्बाहू स्थ इत्ययं वै स्तुपः प्रस्तरोऽथास्यैते भुजाविव तिरश्ची निदधाति तस्मादिमे तिरश्चौ भुजौ क्षत्रं वै प्रस्तरो विशऽइतरं बर्हिः क्ष-

त्रस्य चैव विशश्च विधृत्यै तस्मात्तिरश्ची निदधाति तस्मादेव विधृती नाम ॥१०॥ तत्प्रस्तरꣳ स्तृणाति । ऊर्णम्रदसं त्वा स्तृणामि स्वासस्थं देवेभ्य इति साधुं देवेभ्य इत्येवैतदाह यदाहोर्णम्रदसं त्वेति स्वासस्थं देवेभ्य इति स्वासदं देवेभ्य इत्येवैतदाह ॥११॥ तमभिनिदधाति । आ त्वा वसवो रुद्रा आदित्याः सदन्त्वित्येते वै त्रया देवा यद्वसवो रुद्रा आदित्या एते त्वासीदन्त्वित्येवैतदाहाभिनिहित एव सव्येन पाणिना भवति ॥१२॥ अथ दक्षिणेन जुहूं प्रतिगृह्णाति । नेदिह पुरा नाष्ट्रा रक्षाꣳस्याविशानिति ब्राह्मणो हि रक्षसामपहन्ता तस्मादभिनिहित एव सव्येन पाणिना भवति ॥१३॥ अथ जुहूं प्रतिगृह्णाति । घृताच्यसि जुहूर्नाम्नेति घृताची हि जुहूर्हि नाम्ना सेदं प्रियेण धाम्ना प्रियꣳ सद आसीदेति घृताच्यस्युपभृन्नाम्नेत्युपभृतं घृताची ह्युपभृद्धि नाम्ना सेदं प्रियेण धाम्ना प्रियꣳ सद आसीदेति घृताच्यसि ध्रुवा नाम्नेति ध्रुवां घृताची हि ध्रुवा हि नाम्ना सेदं प्रियेण धाम्ना प्रियꣳ सद आसीदेति प्रियेण धाम्ना प्रियꣳ सद आसीदेति यदन्यद्धविः ॥१४॥ स वाऽउपरि जुहूꣳ सादयति । अध इतराः स्रुचः क्षत्रं वै जुहूर्विश इतराः स्रुचः क्षत्रमेवैतद्विश उत्तरं करोति तस्मादुपर्यासीनं क्षत्रियमधस्तादिमाः प्रजा उपासते तस्मादुपरि जुहूꣳ सादयत्यध इतराः स्रुचः ॥१५॥ सोऽभिमृशति । ध्रुवा असदन्निति ध्रुवा ह्यसदन्नृतस्य योनाविति यज्ञो वाऽऋतस्य योनिर्यज्ञे ह्यसदंस्ता विष्णो पाहि पाहि यज्ञं पाहि यज्ञपतिमिति तद्यजमानमाह पाहि मां यज्ञन्यमिति तदस्यात्मानं यज्ञान्नान्तरेति यज्ञो वै विष्णुस्तद्यज्ञायैवैतत्सर्वं परिददाति गुप्त्यै तस्मादाह ता विष्णो पाहीति ॥१६॥ ब्राह्मणम् ॥१ [४.]॥

इन्धे ह वा एतदध्वर्युः । इध्मेनाग्निं तस्मादिध्मो नाम समिन्धे सामिधेनीभिर्होता तस्मात्सामिधेन्यो नाम ॥१॥ स आह । अग्नये समिध्यमानायानुब्रूहीत्यग्नये ह्येतत्समिध्यमानायान्वाह ॥२॥ तदु हैकऽआहुः । अग्नये समिध्यमानाय होतर-

नुब्रूहीति तदु तथा न ब्रूयादहोता वाऽएष पुरा भवति यदैवैनं प्रवृणीतेऽथ होता तस्मादु ब्रूयादग्नये समिध्यमानायानुब्रूहीत्येव ॥३॥ आग्नेयीरन्वाह । स्वयैवैनमेतद्देवतया समिन्धे गायत्रीरन्वाह गायत्रं वाऽअग्नेश्छन्दः स्वेनैवैनमेतच्छन्दसा समिन्धे वीर्यं गायत्री ब्रह्म गायत्री वीर्येणैवैनमेतत्समिन्धे ॥४॥ एकादशान्वाह । एकादशाक्षरा वै त्रिष्टुब्ब्रह्म गायत्री क्षत्रं त्रिष्टुबेताभ्यामेवैनमेतदुभाभ्यां वीर्याभ्याꣳ समिन्धे तस्मादेकादशान्वाह ॥५॥ स वै त्रिः प्रथमामन्वाह । त्रिरुत्तमां त्रिवृत्प्रायणा हि यज्ञास्त्रिवृदुदयनास्तस्मात्त्रिः प्रथमामन्वाह त्रिरुत्तमाम् ॥६॥ ताः पञ्चदश सामिधेन्यः संपद्यन्ते । पञ्चदशो वै वज्रो वीर्यं वज्रो वीर्यमेवैतत्सामिधेनीरभिसंपादयति तस्मादेतास्वनूच्यमानासु यं द्विष्यात्तमङ्गुष्ठाभ्यामवबाधेतेदमहममुमवबाधऽइति तदेनमेतेन वज्रेणावबाधते ॥७॥ पञ्चदश वा अर्धमासस्य रात्रयः । अर्धमासशो वै संवत्सरो भवन्निति तद्रात्रीराप्नोति ॥८॥ पञ्चदशानामु वै गायत्रीणाम् । त्रीणि च शतानि षष्टिश्चाक्षराणि त्रीणि च वै शतानि षष्टिश्च संवत्सरस्याहानि तदहान्याप्नोति तद्वेव संवत्सरमाप्नोति ॥९॥ सप्तदश सामिधेनीः । इष्ट्याऽअनुब्रूयादुपाꣳशु तस्यै देवतायै यजति यस्याऽइष्टिं निर्वपति द्वादश वै मासाः संवत्सरस्य पञ्चर्तव एष एव प्रजापतिः सप्तदशः सर्वं वै प्रजापतिस्तत्सर्वेणैव तं काममनपराधꣳ राध्नोति यस्मै कामायेष्टिं निर्वपत्युपाꣳशु देवतां यजत्यनिरुक्तं वाऽउपाꣳशु सर्वं वाऽअनिरुक्तं तत्सर्वेणैव तं काममनपराधꣳ राध्नोति यस्मै कामायेष्टिं निर्वपत्येष इष्टेरुपचारः ॥१०॥ एकविꣳशतिꣳ सामिधेनीः अपि दर्शपूर्णमासयोरनुब्रूयादित्याहुर्द्वादश वै मासाः संवत्सरस्य पञ्चर्तवस्त्रयो लोकास्तद्विꣳशतिरेषऽएवैकविꣳशो य एष तपति सैषा गतिरेषा प्रतिष्ठा तदेतां गतिमेतां प्रतिष्ठां गच्छति तस्मादेकविꣳशतिमनुब्रूयात् ॥११॥ ता हैता गतश्रीरेवानुब्रूयात् । य इच्छेन्न श्रेयांस्स्यां न पापीयानिति यादृशाय हैव सतेऽन्वाहुस्तादृङ्

हैव भवति पापीयान्वा यस्यैवं विदुष एता अन्वाहुः सोऽएषा मीमाꣳसैव न
त्वेवैता अनूच्यन्ते ॥१२॥ त्रिरेव प्रथमां त्रिरुत्तमामनवानन्ननुब्रूयात् । त्रयो वा
ऽइमे लोकास्तदिमानेवैतल्लोकान्त्संतनोतीमांल्लोकान्त्स्पृणुते त्रय इमे पुरुषे प्राणा
एतमेवास्मिन्नेतत्संततमव्यवच्छिन्नं दधात्येतदनुवचनꣳ ॥१३॥ स यावदस्य वचः
स्यात् । एवमेवानुविवक्षेत्तस्यैतस्य परिचक्षीत साम्यवान्यादनवानन्ननुविवक्षंस्त-
त्कर्म विवृह्येत सा परिचक्षा ॥१४॥ स यद्येतन्नोदाशꣳसेत । अप्येकैकामेवान-
वानन्ननुब्रूयात्तदेकैकयैवेमांल्लोकान्त्संतनोत्येकैकयेमांल्लोकान्त्स्पृणुतेऽथ यत्प्राणं द-
धाति गायत्री वै प्राणः स यत्कृत्स्नां गायत्रीमन्वाह तत्कृत्स्नं प्राणं दधाति तस्मा-
देकैकामेवानवानन्ननुब्रूयात् ॥१५॥ ता वै संतता अव्यवच्छिन्ना अन्वाह । संव-
त्सरस्यैवैतदहोरात्राणि संतनोति तानीमानि संवत्सरस्याहोरात्राणि संततान्यव्य-
वच्छिन्नानि परिप्लवन्ते द्विषतऽउ चैवैतद्भ्रातृव्याय नोपस्थानं करोत्युपस्थानꣳ ह
कुर्याद्यदसंतता अनुब्रूयात्तस्माद्धि संतता अव्यवच्छिन्ना अन्वाह ॥१६॥ ब्राह्मणम्
॥२[५.]॥ अध्यायः ॥३॥ ॥

हिंकृत्यान्वाह । नासामा यज्ञोऽस्तीति वाऽआहुर्न वाऽअहिंकृत्य साम गी-
यते स यद्धिंकरोति तद्धिंकारस्य रूपं क्रियते प्रणवेनैव साम्नो रूपमुपगच्छत्यो३म्
ओ३मित्येतेनो हास्यैष सर्व एव ससामा यज्ञो भवति ॥१॥ यद्वेव हिंकरोति ।
प्राणो वै हिंकारः प्राणो हि वै हिंकारस्तस्मादपिगृह्य नासिके न हिंकर्तुꣳ श-
क्नोति वाचा वाऽऋचमन्वाह वाक्च वै प्राणश्च मिथुनं तदेतत्पुरस्तान्मिथुनं प्रज-
ननं क्रियते सामिधेनीनां तस्माद्धि हिंकृत्यान्वाह ॥२॥ स वाऽउपाꣳशु हिंकरो-
ति । अथ यदुच्चैर्हिंकुर्यादन्यतरदेव कुर्याद्वाचमेव तस्मादुपाꣳशु हिंकरोति ॥३॥
स वाऽएति च प्रेति चान्वाह । गायत्रीमेवैतदर्वाचीं च पराचीं च युनक्ति परा-
च्यह देवेभ्यो यज्ञं वहत्यर्वाची मनुष्यानवति तस्माद्वाऽएति च प्रेति चान्वाह

॥४॥ यद्वेवेति च प्रेति चान्वाह । प्रेति वै प्राण एत्युदानः प्राणोदानावेवैतद्द-
धाति तस्माद्वाऽएति च प्रेति चान्वाह ॥५॥ यद्वेवेति च प्रेति चान्वाह । प्रेति
वै रेतः सिच्यतऽएति प्रजायते प्रेति पशवो वितिष्ठन्तऽएति समावर्तन्ते सर्वं वा
ऽइदमेति च प्रेति च तस्माद्वाऽएति च प्रेति चान्वाह ॥६॥ सोऽन्वाह । प्र वो
वाजा अभिद्यव इति तन्नु प्रेति भवत्यग्नऽआयाहि वीतयऽइति तद्वेति भवति
॥७॥ तदु हैकऽआहुः । उभयं वाऽएतत्प्रेति संपद्यतऽइति तदु तदातिविज्ञान्य-
मिव प्र वो वाजा अभिद्यवऽइति तन्नु प्रेत्यग्नऽआयाहि वीतयऽइति तद्वेति ॥८॥
सोऽन्वाह । प्र वो वाजा अभिद्यव इति तन्नु प्रेति भवति वाजा इत्यन्नं वै वा-
जा अन्नमेवैतदभ्यनूक्तमभिद्यव इत्यर्धमासा वाऽअभिद्यवोऽर्धमासानेवैतदभ्यनूक्तꣳ
हविष्मन्त इति पशवो वै हविष्मन्तः पशूनेवैतदभ्यनूक्तम् ॥९॥ घृताच्येति । वि-
देघो ह माथवोऽग्निं वैश्वानरं मुखे बभार तस्य गोतमो राहूगण ऋषिः पुरो-
हित आस तस्मै ह स्मामन्त्र्यमाणो न प्रतिशृणोति नेन्मेऽग्निर्वैश्वानरो मुखान्नि-
ष्पद्याताऽइति ॥१०॥ तमृग्भिर्ह्वयितुं दध्रे । वीतिहोत्रं त्वा कवे द्युमन्तꣳ समिधी-
महि । अग्ने बृहन्तमध्वरे विदेघेति ॥११॥ स न प्रतिशुश्राव । उदग्ने शुचयस्तव
शुक्रा भ्राजन्त ईरते । तव ज्योतीꣳष्यर्चयो विदेघा३इति ॥१२॥ स ह नैव प्रति-
शुश्राव । तं त्वा घृतस्नवीमहऽइत्येवाभिव्याहरदथास्य घृतकीर्तावेवाग्निर्वैश्वानरो
मुखादुज्जज्वाल तं न शशाक धारयितुꣳ सोऽस्य मुखान्निष्पेदे स इमां पृथिवीं
प्रापादः ॥१३॥ तर्हि विदेघो माथव आस । सरस्वत्याꣳ स तत एव प्राङ्दहन्न-
भीयायेमां पृथिवीं तं गोतमश्च राहूगणो विदेघश्च माथवः पश्चाद्दहन्तमन्वीयतुः
स इमाः सर्वा नदीरतिददाह सदानीरेत्युत्तराद्गिरेर्निर्घावति ताꣳ हैव नातिददाह
ताꣳ ह स्म तां पुरा ब्राह्मणा न तरन्त्यनतिदग्धाग्निना वैश्वानरेणेति ॥१४॥ तत
एतर्हि । प्राचीनं बहवो ब्राह्मणास्तद्धाक्षेत्रतरमिवास स्रावितरमिवास्वदितमग्नि-

ना वैश्वानरेणेति ॥१५॥ तद्ध हैतर्हि । क्षेत्रतरमिव ब्राह्मणा उ हि नूनमेनद्य-
ज्ञैरसिष्वदंत्सापि जघन्ये नैदाघे समिवैव कोपयति तावच्छीतानतिदग्धा ह्यग्निना
वैश्वानरेण ॥१६॥ स होवाच । विदेघो माथवः क्वाहं भवानीत्यत एव ते प्रा-
चीनं भुवनमिति होवाच सैषाप्येतर्हि कोसलविदेहानां मर्यादा ते हि माथवाः
॥१७॥ अथ होवाच । गोतमो राहूगणः कथं नु नऽआमन्त्र्यमाणो न प्रत्यश्रौ-
षीरिति स होवाचाग्निर्मे वैश्वानरो मुखेऽभूत्स नेन्मे मुखान्निष्पद्याति तस्मात्ते न
प्रत्यश्रौषमिति ॥१८॥ तद्ध कथमभूदिति । यत्रैव त्वं घृतस्नवीमहऽइत्यभिव्याहा-
र्षीस्तदेव मे घृतकीर्तावग्निर्वैश्वानरो मुखादुदज्वालीत्तं नाशकं धारयितुꣳ स मे
मुखान्निरपादीति ॥१९॥ स यत्सामिधेनीषु घृतवत् । सामिधेनमेव तत्समेवैनं
तेनेन्धे वीर्यमेवास्मिन्दधाति ॥२०॥ तद्ध घृताच्येति । देवान्जिगाति सुम्नयुरिति
यजमानो वै सुम्नयुः स हि देवान्जिगीषति स हि देवान्जिघाꣳसति तस्मादाह
देवान्जिगाति सुम्नयुरिति सैषाग्नेयी सत्यनिरुक्ता सर्वं वाऽअनिरुक्तꣳ सर्वेणैवैत-
त्प्रतिपद्यते ॥२१॥ अग्नऽआयाहि वीतयऽइति । तद्वेति भवति वीतयऽइति स-
न्तिकमिव ह वाऽइमेऽग्रे लोका आसुरित्युन्मृश्या हैव द्यौरास ॥२२॥ ते देवा
अकामयन्त । कथं नु न इमे लोका वितराꣳ स्युः कथं न इदं वरीय-इव स्या-
दिति तानेतैरेव त्रिभिरक्षरैर्व्यनयन्वीतयऽइति तऽइमे विदूरं लोकास्ततो देवे-
भ्यो वरीयोऽभवद्वरीयो ह वाऽअस्य भवति यस्यैवं विदुष एतामन्वाहुर्वीतय
ऽइति ॥२३॥ गृणानो हव्यदातयऽइति । यजमानो वै हव्यदातिर्गृणानो यजमा-
नायेत्येवैतदाह नि होता सत्सि बर्हिषीत्यग्निर्वै होतायं लोको बर्हिरस्मिन्नेवै-
तल्लोकेऽग्निं दधाति सोऽयमस्मिंल्लोकेऽग्निर्हितः सैषैममेव लोकमभ्यनूक्तेममेवैत-
या लोकं जयति यस्यैवं विदुष एतामन्वाहुः ॥२४॥ तं त्वा समिद्भिरङ्गिर इति ।
समिद्भिर्ह्येतमङ्गिरस ऐन्धताङ्गिर इत्यङ्गिरा उ ह्यग्निर्घृतेन वर्धयामसीति तत्सामि-

धेनं पदꣳ समेवैनं तेनेन्धे वीर्यमेवास्मिन्दधाति ॥२५॥ ॥ शतम् ३०० ॥ ॥ बृहच्छोचा यविष्ठ्येति । बृहद्धि ह्येष शोचति समिद्धो यविष्ठ्येति यविष्ठो ह्यग्निस्तस्मादाह यविष्ठ्येति सैषैतमेव लोकमभ्यनूक्तान्तरिक्षलोकमेव तस्मादाग्नेयी सत्यनिरुक्तानिरुक्तो ह्येष लोक एतमेवैतया लोकं जयति यस्यैवं विदुष एतामन्वाहुः ॥२६॥ स नः पृथु श्रवाय्यमिति । असौ वै पृथु यस्मिन्देवा एतच्छ्रवाय्यं यस्मिन्देवा अच्छा देव विवाससीत्यच्छ देव विवासस्येतन्नो गमयेत्येवैतदाह ॥२७॥ बृहदग्ने सुवीर्यमिति । असौ वै बृहद्यस्मिन्देवा एतत्सुवीर्यं यस्मिन्देवाः सैषैतमेव लोकमभ्यनूक्ता दिवमेवैतमेवैतया लोकं जयति यस्यैवं विदुष एतामन्वाहुः ॥२८॥ सोऽन्वाह । ईडेन्यो नमस्य इतीडेन्यो ह्येष नमस्यो ह्येष तिरस्तमाꣳसि दर्शत इति तिर-इव ह्येष तमाꣳसि समिद्धो ददृशे समग्निरिध्यते वृषेति सꣳ हीध्यते वृषा वृषोऽअग्निः समिध्यतऽइति सꣳ हीध्यते ॥२९॥ अश्वो न देववाहन इति । अश्वो ह वाऽएष भूत्वा देवेभ्यो यज्ञं वहति यद्ध नेत्यृच्योमिति तत्तस्मादाहाश्वो न देववाहन इति ॥३०॥ तꣳ हविष्मन्त ईडतऽइति । हविष्मन्तो ह्येतं मनुष्या ईडते तस्मादाह तꣳ हविष्मन्त ईडतऽइति ॥३१॥ वृषणं त्वा वयं वृषन्वृषणः समिधीमहीति । सꣳ ह्येनमिन्धतेऽग्ने दीद्यतं बृहदिति दीदयेव ह्येष बृहत्समिद्धः ॥३२॥ तं त्राऽएतम् । वृषण्वन्तं त्रिचमन्वाहाग्नेय्यो वाऽएताः सर्वाः सामिधेन्यो भवन्तीन्द्रो वै यज्ञस्य देवतेन्द्रो वृषैतेनो हास्यैताः सेन्द्राः सामिधेन्यो भवन्ति तस्माद्वृषण्वन्तं त्रिचमन्वाह ॥३३॥ सोऽन्वाह । अग्निं दूतं वृणीमहऽइति देवाश्च वाऽअसुराश्चोभये प्राजापत्याः पस्पृधिरे तान्स्पर्धमानान्गायत्र्यन्तरा तस्थौ या वै सा गायत्र्यासीदियं वै सा पृथिवीयꣳ हैव तदन्तरा तस्थौ तऽउभयऽएव विदां चक्रुर्यतरान्वै न इयमुपावर्त्स्यति ते भविष्यन्ति परेतरे भविष्यन्तीति तामुभयऽएवोपमन्त्रयां चक्रिरेऽग्निरेव देवानां दूत आस सहरक्षा इत्यसुररक्षसमसुराणाꣳ

साग्निमेवानुप्रेयाय तस्मादन्वाहाग्निं दूतं वृणीमहऽइति स हि देवानां दूत आसीद्धोतारं विश्ववेदसमिति ॥३४॥ तदु हैकेऽन्वाहुः । होता यो विश्ववेदस इति नेदरमित्यात्मान ब्रवाणीति तदु तथा न ब्रूयान्मानुषꣳ ह ते यज्ञे कुर्वन्ति व्यृद्धं वै तद्यज्ञस्य यन्मानुषं नेद्व्यृद्धं यज्ञे करवाणीति तस्माद्यथैवर्चानूक्तमेवानुब्रूयाद्धोतारं विश्ववेदसमित्येवास्य यज्ञस्य सुक्रतुमित्येष हि यज्ञस्य सुक्रतुर्यदग्निस्तस्मादाहास्य यज्ञस्य सुक्रतुमिति सेयं देवानुपाववर्त ततो देवा अभवन्परासुरा भवति ह वाऽआत्मना परास्य सपत्ना भवन्ति यस्यैवं विदुष एतामन्वाहु ॥३५॥ तां वाऽअष्टमीमनुब्रूयात् । गायत्री वाऽएषा निदानेनाष्टाक्षरा वै गायत्री तस्मादष्टमीमनुब्रूयात् ॥३६॥ तद्धैके । पुरस्ताद्धाय्ये दधत्यन्नं धाय्ये मुखतऽइदमन्नाद्यं दध्म इति वदन्तस्तदु तथा न कुर्यादनवक्लृप्ता तस्यैषा भवति यः पुरस्ताद्धाय्ये दधाति दशमी वा हि तर्ह्येकादशी वा संपद्यते तस्यो हैवैषावक्लृप्ता भवति यस्यैतामष्टमीमन्वाहुस्तस्मादुपरिष्टादेव धाय्ये दध्यात् ॥३७॥ समिध्यमानोऽअध्वरऽइति । अध्वरो वै यज्ञः समिध्यमानो यज्ञऽइत्येवैतदाहाग्निः पावक ईड्य इति पावको ह्येष ईड्यो ह्येष शोचिष्केशस्तमीमहऽइति शोचन्तीव ह्येतस्य केशाः समिद्धस्य समिद्धोऽअग्नऽआहुतेत्यतः प्राचीनꣳ सर्वमिध्ममभ्यादध्याद्यदन्यत्समिधोऽपवृङ्क्तऽइव ह्येतद्धोता यद्वाऽअन्यत्समिध इध्मस्यातिरिच्यतेऽतिरिक्तं तद्यद्वै यज्ञस्यातिरिक्तं द्विषन्तꣳ हास्य तद्भ्रातृव्यमभ्यतिरिच्यते तस्मादतः प्राचीनꣳ सर्वमिध्ममभ्यादध्याद्यदन्यत्समिधः ॥३८॥ देवान्यक्षि स्वध्वरेति । अध्वरो वै यज्ञो देवान्यक्षि सुयज्ञियेत्येवैतदाह त्वꣳ हि हव्यवाडसीत्येष हि हव्यवाड्यदग्निस्तस्मादाह त्वꣳ हि हव्यवाडसीत्या जुहोता दुवस्यताग्निं प्रयत्यध्वरे । वृणीध्वꣳ हव्यवाहनमिति संप्रेष्यत्येवैतयाजुहुत च यजत च यस्मै कामाय समैन्धिढ्वं तत्कुरुतेत्येवैतदाहाग्निं प्रयत्यध्वरऽइत्यध्वरो वै यज्ञोऽग्निं प्रयति यज्ञऽइत्येवैतदाह वृणीध्वꣳ हव्यवाहनमित्येष हि

हव्यवाहनो यदग्निस्तस्मादाह वृणीध्वꣳ हव्यवाहनमिति ॥३९॥ तं वा ऽएतम् । अध्वरवत्तं त्रिचमन्वाह देवान्ह वै यज्ञेन यजमानांत्सपत्ना असुरा दुधूर्षां चक्रुस्ते दुधूर्षन्त एव न शेकुर्धूर्वितुं ते पराबभूवुस्तस्माद्यज्ञो ऽध्वरो नाम दुधूर्षन्ह वा ऽएनꣳ सपत्नः पराभवति यस्यैवं विदुषो ऽध्वरवत्तं त्रिचमन्वाहुर्यावद्धैव सौम्येनाध्वरेणेष्ट्वा जयति तावज्जयति ॥४०॥ ब्राह्मणम् ॥३ [४. १.]॥

एतद्ध वै देवा अग्निं गरिष्ठे ऽयुञ्जन् । यद्धोतृव ऽइदं नो हव्यं वहेति तमेतद्गरिष्ठे युक्तोपामदन्वीर्यवान्वै त्वमस्यलं वै त्वमेतस्मा ऽअसीति वीर्यं समादधतो यथेदमप्येतर्हि ज्ञातीनां यं गरिष्ठे युञ्जन्ति तमुपमदन्ति वीर्यवान्वै त्वमस्यलं वै त्वमेतस्मा ऽअसीति वीर्यं समादधतः स यदत ऊर्ध्वमन्वाहोपस्तौत्येवैनमेतद्वीर्यमेवास्मिन्दधाति ॥१॥ अग्ने महाँ२॥ ऽअसि ब्राह्मण भारतेति । ब्रह्म ह्यग्निस्तस्मादाह ब्राह्मणेति भारतेत्येष हि देवेभ्यो हव्यं भरति तस्माद्भरतो ऽग्निरित्याहुरेष उ वा ऽइमाः प्रजाः प्राणो भूत्वा बिभर्ति तस्माद्वेवाह भारतेति ॥२॥ अथार्षेयं प्रवृणीते । ऋषिभ्यश्चैवैनमेतद्देवेभ्यश्च निवेदयत्ययं महावीर्यो यो यज्ञं प्रापदिति तस्मादार्षेयं प्रवृणीते ॥३॥ परस्तादर्वाक्प्रवृणीते । परस्ताद्ध्यर्वाच्यः प्रजाः प्रजायन्ते ज्यायसस्पतय ऽउ चैवैतं निह्नुत ऽइदꣳ हि पितैवाग्रे ऽथ पुत्रो ऽथ पौत्रस्तस्मात्परस्तादर्वाक्प्रवृणीते ॥४॥ स आर्षेयमुक्त्वाह । देवेद्धो मन्विद्ध इति देवा ह्येतमग्र ऽऐन्धत तस्मादाह देवेद्ध इति मन्विद्ध इति मनुर्ह्येतमग्र ऽऐन्द्ध तस्मादाह मन्विद्ध इति ॥५॥ ऋषिष्टुत इति । ऋषयो ह्येतमग्रे ऽस्तुवंस्तस्मादाहर्षिष्टुत इति ॥६॥ विप्रानुमदित इति । एते वै विप्रा यदृषय एते ह्येतमन्वमदंस्तस्मादाह विप्रानुमदित इति ॥७॥ कविशस्त इति । एते वै कवयो यदृषय एते ह्येतमशꣳसंस्तस्मादाह कविशस्त इति ॥८॥ ब्रह्मसꣳशित इति । ब्रह्मसꣳशितो ह्येष घृताहवन इति घृताहवनो ह्येषः ॥९॥ प्रणीर्यज्ञानाꣳ रथीरध्वराणामिति । एतेन

वै सर्वान्यज्ञान्प्रणयन्ति ये च पाकयज्ञा ये चेतरे तस्मादाह प्रणीर्यज्ञानामिति
॥१०॥ रथीरध्वराणामिति । रथो ह वाऽएष भूत्वा देवेभ्यो यज्ञं वहति तस्मादाह
रथीरध्वराणामिति ॥११॥ अतूर्तो होता तूर्णिर्हव्यवाडिति । न ह्येतꣳ रक्षाꣳसि
तरन्ति तस्मादाहातूर्तो होतेति तूर्णिर्हव्यवाडिति सर्वꣳ ह्येष पाप्मानं तरति
तस्मादाह तूर्णिर्हव्यवाडिति ॥१२॥ आस्पात्रं जुहूर्देवानामिति । देवपात्रं वाऽएष
यदग्निस्तस्मादग्नौ सर्वेभ्यो देवेभ्यो जुह्वति देवपात्रꣳ ह्येष प्राप्नोति ह वै तस्य
पात्रं यस्य पात्रं प्रेप्स्यति य एवमेतद्वेद ॥१३॥ चमसो देवपान इति । चमसेन
ह वाऽएतेन भूतेन देवा भक्षयन्ति तस्मादाह चमसो देवपान इति ॥१४॥ अ-
राꣳ॥ऽइवाग्ने नेमिर्देवांस्त्वं परिभूरसीति । यथारान्नेमिः सर्वतः परिभूरेवं त्वं देवां-
त्सर्वतः परिभूरसीत्येवैतदाह ॥१५॥ आवह देवान्यजमानायेति । तदस्मै यज्ञाय
देवानावोढवाऽआहाग्निमग्नऽआवहेति तदाग्नेयायाज्यभागायाग्निमावोढवाऽआह
सोममावहेति तत्सौम्यायाज्यभागाय सोममावोढवाऽआहाग्निमावहेति तद्य एष
उभयत्राच्युत आग्नेयः पुरोडाशो भवति तस्माऽअग्निमावोढवाऽआह ॥१६॥ अथ
यथादेवतम् । देवाꣳ॥ऽआज्यपाꣳ॥ऽआवहेति तत्प्रयाजानुयाजानावोढवाऽआह प्र-
याजानुयाजा वै देवा आज्यपा अग्निꣳ होत्रायावहेति तदग्निꣳ होत्रायावोढवा
ऽआह स्वं महिमानमावहेति तत्स्वं महिमानमावोढवाऽआह वाग्वाऽअस्य स्वो
महिमा तद्वाचमावोढवाऽआहा च वह जातवेदः सुयजा च यजेति तद्या एवैतद्दे-
वता आवोढवाऽआह ता एवैतदाहा चैना वहानुष्ठ्या च यजेति यदाह सुयजा
च यजेति ॥१७॥ स वै तिष्ठन्नन्वाह । अन्वाह ह्येतदसौ ह्यनुवाक्या तदसावे-
वैतद्भूत्वान्वाह तस्मात्तिष्ठन्नन्वाह ॥१८॥ आसीनो याज्यां यजति । इयꣳ हि या-
ज्या तस्मान्न कश्चन तिष्ठन्याज्यां यजतीयꣳ हि याज्या तदियमेवैतद्भूत्वा यजति त-
स्मादासीना याज्यां यजति ॥१९॥ ॥ ब्राह्मणम् ॥४ [४. २.]॥ ॥

यो ह वाऽअग्निः सामिधेनीभिः समिद्धः । अतितराꣳ ह वै स इतरस्मादग्ने-
स्तपत्यनवधृष्यो हि भवत्यनवमृश्यः ॥ १ ॥ स यथा हैवाग्निः । सामिधेनीभिः स-
मिद्धस्तपत्येवꣳ हैव ब्राह्मणः सामिधेनीर्विद्वाननुब्रुवंस्तपत्यनवधृष्यो हि भवत्य-
नवमृश्यः ॥ २ ॥ सोऽन्वाह । प्रव इति प्राणो वै प्रवान्प्राणमेवैतया समिन्द्धेऽग्न
ऽआयाहि वीतयऽइत्यपानो वाऽएतवानपानमेवैतया समिन्द्धे बृहच्छोचा यवि-
ष्ठ्येत्युदानो वै बृहच्छोचा उदानमेवैतया समिन्द्धे ॥ ३ ॥ स नः पृथु श्रवाय्यमिति ।
श्रोत्रं वै पृथु श्रवाय्यꣳ श्रोत्रेण हीदमुरु पृथु शृणोति श्रोत्रमेवैतया समिन्द्धे ॥ ४ ॥
ईडेन्यो नमस्य इति । वाग्वाऽईडेन्या वाग्घीदꣳ सर्वमीट्टे वाचेदꣳ सर्वमीडितं
वाचमेवैतया समिन्द्धे ॥ ५ ॥ अश्वो न देववाहन इति । मनो वै देववाहनं मनो
हीदं मनस्विनं भूयिष्ठं वनीवाह्यते मन एवैतया समिन्द्धे ॥ ६ ॥ अग्ने दीद्यतं बृ-
हदिति । चक्षुर्वै दीदयेव चक्षुरेवैतया समिन्द्धे ॥ ७ ॥ अग्निं दूतं वृणीमहऽइति ।
य एवायं मध्यमः प्राण एतमेवैतया समिन्द्धे स हैषान्तस्था प्राणानामतो ह्यन्य
ऽऊर्ध्वाः प्राणा अतोऽन्येऽवाञ्चोऽन्तस्था ह भवत्यन्तस्थामिनं मन्यन्ते यऽएवमेताम-
न्तस्थां प्राणानां वेद ॥ ८ ॥ शोचिष्केशस्तमीमहऽइति । शिश्नं वै शोचिष्केशꣳ
शिश्नꣳ हीदꣳ शिश्निनं भूयिष्ठꣳ शोचयति शिश्नमेवैतया समिन्द्धे ॥ ९ ॥ समिद्धो
ऽअग्नऽआहुतेति । य एवायमवाङ्प्राण एतमेवैतया समिन्द्धऽआ जुहोता दुवस्य-
तेति सर्वमात्मानꣳ समिन्द्धऽआ नखेभ्योऽथो लोमभ्यः ॥ १० ॥ स यद्येनं प्रथमा-
याꣳ सामिधेन्यामनुव्याहरेत् । तं प्रति ब्रूयात्प्राणं वाऽएतदात्मनोऽग्नावाधाः प्रा-
णेनात्मन आर्त्तिमारिष्यसीति तथा हैव स्यात् ॥ ११ ॥ यदि द्वितीयस्यामनुव्याह-
रेत् । तं प्रति ब्रूयादपानं वाऽएतदात्मनोऽग्नावाधा अपानेनात्मन आर्त्तिमारिष्य-
सीति तथा हैव स्यात् ॥ १२ ॥ यदि तृतीयस्यामनुव्याहरेत् । तं प्रति ब्रूयादुदानं
वाऽ - - उदानेना॰ - - स्यात् ॥ १३ ॥ यदि चतुर्थ्यामनुव्याहरेत् । तं प्रतिब्रूयाच्छ्रोत्रं

वा ऽ एतदात्मनोऽग्नावाधाः श्रोत्रेणात्मन आर्त्तिमारिष्यसि बधिरो भविष्यसीति त-
था हैव स्यात् ॥१४॥ यदि पञ्चम्यामनुव्याहरेत् । तं प्रति ब्रूयाद्वाचं वा ऽ एतदा-
त्मनोऽग्नावाधा वाचात्मन आर्त्तिमारिष्यसि मूको भवि॰ - - स्यात् ॥१५॥ यदि ष-
ष्ठ्यामनुव्याहरेत् । तं प्रति ब्रूयान्मनो वा ऽ एतदात्मनोऽग्नावाधा मनसात्मन आ-
र्त्तिमारिष्यसि मनोमुषिगृहीतो मोमुघश्चरिष्यसीति तथा हैव स्यात् ॥१६॥ यदि
सप्तम्याम॰ - । - ॰याच्चक्षुर्वा ऽ एतदात्मनोऽग्नावाधाश्चक्षुषात्मन आर्त्तिमारिष्यस्यन्धो भ-
वि॰ - - स्यात् ॥१७॥ यद्यष्टम्याम॰ - । - ॰यान्मध्यं वा ऽ एतत्प्राणमात्मनोऽग्नावाधा
मध्येन प्राणेनात्मन आर्त्तिमारिष्यस्युद्ध्माय मरिष्यसीति तथा हैव स्यात् ॥१८॥
यदि नवम्याम॰ - । - ॰याच्छिश्नं वा ऽ एतदात्मनोऽग्नावाधाः शिश्नेनात्मन आर्त्तिमारि-
ष्यसि क्लीबो भवि॰ - - स्यात् ॥१९॥ यदि दशम्यामनु॰ - । - ॰यादवाञ्चं वा ऽ एत-
त्प्राणमात्मनोऽग्नावाधा अवाचा प्राणेनात्मन आर्त्तिमारिष्यस्यपिनद्धो मरिष्यसी-
ति तथा हैव स्यात् ॥२०॥ यद्येकादश्याम॰ - । - ॰यात्सर्वं वा ऽ एतदात्मानमग्नावा-
धाः सर्वेणात्मनार्त्तिमारिष्यसि क्षिप्रेऽमुं लोकमेष्यसीति तथा हैव स्यात् ॥२१॥
स यथा हैवाग्निꣳ । सामिधेनीभिः समिद्धमापद्यार्त्तिं न्येत्येवꣳ हैव ब्राह्मणꣳ सा-
मिधेनीर्विद्वाꣳसꣳ समनुब्रुवन्तमनुव्याहृत्यार्त्तिं न्येति ॥२२॥ ब्राह्मणम् ॥५ [४.३.]॥

तं वा ऽ एतमग्निꣳ समैन्धिषत । समिद्धे देवेभ्यो जुहवामेति तस्मिन्नेते ऽ एव प्र-
थमे ऽ आहुती जुहोति मनसे चैव वाचे च मनश्च हैव वाक्च युजौ देवेभ्यो यज्ञं
वहतः ॥१॥ स यदुपाꣳशु क्रियते । तन्मनो देवेभ्यो यज्ञं वहत्यथ यद्वाचा निरु-
क्तं क्रियते तद्वाग्देवेभ्यो यज्ञं वहत्येतद्वा ऽ इदं द्वयं क्रियते तदेते ऽ एवैतत्संतर्पयति
तृप्ते प्रीते देवेभ्यो यज्ञं वहात इति ॥२॥ स्रुवेण तमाघारयति । यं मनस ऽ आघा-
रयति वृषा हि मनो वृषा हि स्रुवः ॥३॥ स्रुचा तमाघारयति । यं वाच ऽ आघा-
रयति योषा हि वाग्योषा हि स्रुक् ॥४॥ तूष्णीं तमाघारयति । यं मनस ऽ आघा-

रयति न स्वाहेति चनानिरुक्तꣳ हि मनोऽनिरुक्तꣳ ह्येतद्यत्तूष्णीम् ॥५॥ मन्त्रेण तमाघारयति । यं वाचऽआघारयति निरुक्ता हि वाङ्निरुक्तो हि मन्त्रः ॥६॥ आसीनस्तमाघारयति । यं मनसऽआघारयति तिष्ठंस्तं यं वाचे मनश्च ह वै वाक्च युजौ देवेभ्यो यज्ञं वहतो यतरो वै युजोर्ह्रसीयान्भवत्युपवर्हं वै तस्मै कुर्वन्ति वाग्वै मनसो ह्रसीयस्यपरिमिततरमिव हि मनः परिमिततरेव हि वाक्तद्वाचऽएवैतदुपवर्हं करोति ते सयुजौ देवेभ्यो यज्ञं वहतस्तस्मात्तिष्ठन्वाचऽआघारयति ॥७॥ देवा ह वै यज्ञं तन्वानाः । तेऽसुररक्षसेभ्य आसङ्गाद्बिभयां चक्रुस्तऽएतद्दक्षिणतः प्रत्युदश्रयन्नुच्छ्रितमिव हि वीर्यं तस्माद्दक्षिणतस्तिष्ठन्नाघारयति स यदुभयत आघारयति तस्मादिदं मनश्च वाक्च समानमेव सन्नानेव शिरो ह वै यज्ञस्यैतयोरन्यतर आघारयोर्मूलमन्यतरः ॥८॥ स्रुवेण तमाघारयति । यो मूलं यज्ञस्य स्रुचा तमाघारयति यः शिरो यज्ञस्य ॥९॥ तूष्णीं तमाघारयति । यो मूलं यज्ञस्य तूष्णीमिव हीदं मूलं नो ह्यत्र वाग्वदति ॥१०॥ मन्त्रेण तमाघारयति । यः शिरो यज्ञस्य वाग्घि मन्त्रः शीर्ष्णो ह्ययमधि वाग्वदति ॥११॥ आसीनस्तमाघारयति । यो मूलं यज्ञस्य निषण्णमिव हीदं मूलं तिष्ठंस्तमाघारयति यः शिरो यज्ञस्य तिष्ठतीव हीदꣳ शिरः ॥१२॥ स स्रुवेण पूर्वमाघारमाघार्याह । अग्निमग्नीत्सम्मृड्ढीति यथा धुरमध्यूहेदेवं तद्यत्पूर्वमाघारमाघारयत्यध्युह्य हि धुरं युञ्जन्ति ॥१३॥ अथ सम्मार्ष्टि । युनक्त्येवैनमेतद्युक्तो देवेभ्यो यज्ञं वहादिति तस्मात्सम्मार्ष्टि परिक्रामꣳ सम्मार्ष्टि परिक्रामꣳ हि योग्यं युञ्जन्ति त्रिस्त्रिः सम्मार्ष्टि त्रिवृद्धि यज्ञः ॥१४॥ स सम्मार्ष्टि । अग्ने वाजजिद्वाजं त्वा सरिष्यन्तं त्वा वाजजितꣳ सम्मार्ज्मीति यज्ञं त्वा वक्ष्यन्तं यज्ञियꣳ सम्मार्ज्मीत्येवैतदाहाथोपरिष्टात्तूष्णीं त्रिस्तद्यथा युक्त्वा प्राजेत्प्रेहि वहेत्येवमेवैतत्कशयोपक्षिपति प्रेहि देवेभ्यो यज्ञं वहेति तस्मादुपरिष्टात्तूष्णीं त्रिस्तद्यदेतदन्तरेण कर्म क्रियते तस्मादिदं मनश्च वाक्च समानमेव सन्ना-

नेव ॥१५॥ ब्राह्मणम् ॥ ६ [४.४.] ॥ ॥ तृतीयः प्रपाठकः ॥ ॥ कण्डिकासंख्या १२०॥ ॥

स स्रुचोत्तरमाघारमाघारयिष्यन् । पूर्वेण स्रुचावञ्जलिं निदधाति नमो देवेभ्यः स्वधा पितृभ्य इति तद्देवेभ्यश्चैवैतत्पितृभ्यश्चार्त्विज्यं करिष्यन्निह्नुते सुयमे मे भूयास्तमिति स्रुचावादत्ते सुभरे मे भूयास्तं भर्तुं वाꣳ शकेयमित्येवैतदाहास्कन्नमद्य देवेभ्य आज्यꣳ सम्भ्रियासमित्यविक्षुब्धमद्य देवेभ्यो यज्ञं तनवाऽइत्येवैतदाह ॥१॥ अङ्घ्रिणा विष्णो मा त्वावक्रमिषमिति । यज्ञो वै विष्णुस्तस्माऽएवैतन्निह्नुते मा त्वावक्रमिषमिति वसुमतीमग्ने ते छायामुपस्थेषमिति साध्वीमग्ने ते छायामुपस्थेषमित्येवैतदाह ॥२॥ विष्णो स्थानमसीति । यज्ञो वै विष्णुस्तस्यैव ह्येतदन्तिके तिष्ठति तस्मादाह विष्णो स्थानमसीतीत इन्द्रो वीर्यमकृणोदित्यतो ह्येन्द्रस्तिष्ठन्दक्षिणतो नाष्ट्रा रक्षाꣳस्यपाहꣳस्तस्मादाहेत इन्द्रो वीर्यमकृणोदित्यूर्ध्वोऽध्वर आस्थादित्यध्वरो वै यज्ञ ऊर्ध्वो यज्ञ आस्थादित्येवैतदाह ॥३॥ अग्ने वेर्होत्रं वेर्दूत्यमिति । उभयं वाऽएतदग्निर्देवानाꣳ होता च दूतश्च तदुभयं विद्धि यद्देवानामसीत्येवैतदाहावतां त्वां द्यावापृथिवीऽअव त्वं द्यावापृथिवीऽइति नात्र तिरोहितमिवास्ति स्विष्टकृद्देवेभ्य इन्द्र आज्येन हविषाभूत्स्वाहेतीन्द्रो वै यज्ञस्य देवता तस्मादाहेन्द्र आज्येनेति वाचे वाऽएतमाघारमाघारयतीन्द्रो वागित्यु वाऽआहुस्तस्माद्वेवाहेन्द्र आज्येनेति ॥४॥ अथासꣳस्पर्शयन्स्रुचौ पर्येत्य । ध्रुवया समनक्ति शिरो वै यज्ञस्योत्तर आघार आत्मा वै ध्रुवा तदात्मन्येवैतच्छिरः प्रतिदधाति शिरो वै यज्ञस्योत्तर आघारः श्रीर्वै शिरः श्रीर्हि वै शिरस्तस्माद्योऽर्धस्य श्रेष्ठो भवत्यसावमुष्यार्धस्य शिर इत्याहुः ॥५॥ यजमान एव ध्रुवामनु । योऽस्माऽअरातीयति स उपभृतमनु स यद्धोपभृता समञ्ज्याद्यो यजमानायारातीयति तस्मिञ्छ्रियं दध्यात्तद्यजमानऽएवैतच्छ्रियं दधाति तस्माद्ध्रुवया समनक्ति ॥६॥ स समनक्ति । सं ज्योतिषा

ज्योतिरिति ज्योतिर्वा ऽइतरस्यामाज्यं भवति ज्योतिरितरस्यां ते ह्येतदुभे ज्योति-
षी संगृह्णीते तस्मादेवꣳ समनक्ति ॥७॥ अथातो मनसश्चैव वाचश्च । अहम्भद्र
ऽउदितं मनश्च ह वै वाक्चाहम्भद्र ऽऊदाते ॥८॥ तद्ध मन उवाच । अहमेव त्व-
च्छ्रेयोऽस्मि न वै मया त्वं किं चनानभिगतं वदसि सा यन्मम त्वं कृतानुकरानुव-
र्त्मास्यहमेव त्वच्छ्रेयोऽस्मीति ॥९॥ अथ ह वागुवाच । अहमेव त्वच्छ्रेयस्यस्मि यद्वै
त्वं वेत्थाहं तद्विज्ञपयाम्यहꣳ संज्ञपयामीति ॥१०॥ ते प्रजापतिं प्रतिप्रश्नमीयतुः ।
स प्रजापतिर्मनस ऽएवानूवाच मन एव त्वच्छ्रेयो मनसो वै त्वं कृतानुकरानुवर्त्मा-
सि श्रेयसो वै पापीयान्कृतानुकरोऽनुवर्त्मा भवतीति ॥११॥ सा ह वाक्परोक्ता
विसिष्मिये । तस्यै गर्भः पपात सा ह वाक्प्रजापतिमुवाचाहव्यवाडेवाहं तुभ्यं
भूयासं यां मा परावोच इति तस्माद्यत्किं च प्राजापत्यं यज्ञे क्रियत ऽउपाꣳश्वेव त-
त्क्रियतेऽहव्यवाड्धि वाक्प्रजापतय ऽआसीत् ॥१२॥ तद्धैतद्देवाः । रेतश्चर्मन्वा य-
स्मिन्वा बभ्रुस्तद्ध स्म पृच्छन्त्यत्रैव त्या३दिति ततोऽत्रिः सम्बभूव तस्मादप्यात्रेय्या
योषितैनस्व्येतस्यै हि योषायै वाचो देवताया एते सम्भूताः ॥१३॥ ब्राह्मणम्
॥१ [४.५.]॥ अध्यायः ॥४॥ ॥

स वै प्रवरायाश्रावयति । तद्यत्प्रवरायाश्रावयति यज्ञो वाऽआश्रावणं यज्ञम-
भिव्याहृत्याथ होतारं प्रवृणा ऽइति तस्मात्प्रवरायाश्रावयति ॥१॥ स इध्मसंनह-
नान्येवाभिपद्याश्रावयति । स यद्धानारभ्य यज्ञमध्वर्युराश्रावयेद्वेपनो वा ह स्यादन्यां
वार्त्तिमार्छेत् ॥२॥ तद्वेके । वेदे स्तीर्णायै बर्हिरभिपद्याश्रावयन्तीध्मस्य वा शक-
लमपछिद्याभिपद्याश्रावयन्तीदं वै किंचिद्यज्ञस्येदं यज्ञमभिपद्याश्रावयाम इति वद-
न्तस्तदु तथा न कुर्यादेतद्वै किंचिद्यज्ञस्य यैरिध्मः संनद्धो भवत्यग्निꣳ सम्मृजन्ति तद्वै
खलु यज्ञमभिपद्याश्रावयति तस्मादिध्मसंनहनान्येवाभिपद्याश्रावयेत् ॥३॥ स आ-
श्राव्य । य एव देवानाꣳ होता तमेवाग्रे प्रवृणीतेऽग्निमेव तदग्नये चैवैतद्देवेभ्यश्च

निह्नुते यदहाग्नेऽग्निं प्रवृणीते तदग्नये निह्नुतेऽथ यो देवानाᳫं होता तमग्ने प्र-
वृणीते तदु देवेभ्यो निह्नुते ॥४॥ स आह । अग्निर्देवो दैव्यो होतेत्यग्निर्हि
देवानाᳫं होता तस्मादाहाग्निर्देवो दैव्यो होतेति तदग्नये चैव देवेभ्यश्च निह्नुते
यदहाग्नेऽग्निमाह तदग्नये निह्नुतेऽथ यो देवानाᳫं होता तमग्रऽआह तदु देवे-
भ्यो निह्नुते ॥५॥ देवान्यक्षद्विद्वांश्चिकित्वानिति । एष वै देवाननुविद्वान्यदग्निः स
एनाननुविद्वाननुष्ठ्या यक्षदित्येवैतदाह ॥६॥ मनुष्वद्भरतवदिति । मनुर्ह वाऽअग्रे
यज्ञेनेजे तदनुकृत्येमाः प्रजा यजन्ते तस्मादाह मनुष्वदिति मनोर्यज्ञऽइत्यु वाऽआ-
हुस्तस्माद्वेवाह मनुष्वदिति ॥७॥ भरतवदिति । एष हि देवेभ्यो हव्यं भरति त-
स्माद्भरतोऽग्निरित्याहुरेष उ वाऽइमाः प्रजाः प्राणो भूत्वा बिभर्ति तस्माद्वेवाह
भरतवदिति ॥८॥ अथार्षेयं प्रवृणीते । ऋषिभ्यश्चैवैनमेतद्देवेभ्यश्च निवेदयत्ययं
महावीर्यो यो यज्ञं प्रापदिति तस्मादार्षेयं प्रवृणीते ॥९॥ परस्तादर्वाक्प्रवृणीते ।
परस्ताद्ध्यर्वाच्यः प्रजाः प्रजायन्ते ज्यायसस्पतयऽउ चैवैतन्निह्नुतऽइदᳫं हि पितैवाग्रे
ऽथ पुत्रोऽथ पौत्रस्तस्मात्परस्तादर्वाक्प्रवृणीते ॥१०॥ स आर्षेयमुक्त्वाह । ब्रह्म-
ण्वदिति ब्रह्म ह्यग्निस्तस्मादाह ब्रह्मण्वदित्या च वक्षदिति तद्या एवैतद्देवता
आवोᳫंवाऽआह ता एवैतदाहा च वक्षदिति ॥११॥ ब्राह्मणा अस्य यज्ञस्य प्रा-
वितार इति । एते वै ब्राह्मणा यज्ञस्य प्रावितारो येऽनूचाना एते ह्येनं तन्वत
ऽएतऽएनं जनयन्ति तदु तेभ्यो निह्नुते तस्मादाह ब्राह्मणा अस्य यज्ञस्य प्रावितार
इति ॥१२॥ असौ मानुष इति । तदिमं मानुषᳫं होतारं प्रवृणीतेऽहोता ह्येष
पुराथैतर्हि होता ॥१३॥ स प्रवृतो होता जपति । देवता उपधावति यथानुष्ठ्या
देवेभ्यो वषट्कुर्याद्यथानुष्ठ्या देवेभ्यो हव्यं वहेद्यथा न ह्वलेदेवं देवता उपधा-
वति ॥१४॥ तत्र जपति । एतत्त्वा देव सवितर्वृणतऽइति तत्सवितारं प्रसवायो-
पधावति स हि देवानां प्रसविताग्निᳫं होत्रायेति तदग्नये चैवैतद्देवेभ्यश्च निह्नुते

यदाहाग्नेऽग्निमावह तदग्नये निह्नुतेऽथ यो देवानाꣳ होता तमग्रऽआह तदु देवेभ्यो निह्नुते ॥१५॥ सह पित्रा वैश्वानरेणेति । संवत्सरो वै पिता वैश्वानरः प्रजापतिस्तत्संवत्सरायैवैतत्प्रजापतये निह्नुतेऽग्ने पूषन्बृहस्पते प्र च वद प्र च यजेत्यनुवक्ष्यन्वाऽएतद्यक्ष्यन्भवति तदेताभ्य एवैतद्देवताभ्यो निह्नुते यूयमनुब्रूत यूयं यजतेति ॥१६॥ ॥ शतम् ॥४००॥ ॥ वसूनाꣳ रातौ स्याम । रुद्राणामुर्व्यायाꣳ स्वादित्या अदितये स्यामानेहस इत्येते वै त्रया देवा यद्वसवो रुद्रा आदित्या एतेषामभिगुप्तौ स्यामेत्येवैतदाह ॥१७॥ जुष्टामद्य देवेभ्यो वाचमुद्यासमिति । जुष्टमद्य देवेभ्योऽनूच्यासमित्येवैतदाह तद्धि समृद्धं यो जुष्टं देवेभ्योऽनुब्रवत् ॥१८॥ जुष्टां ब्रह्मभ्य इति । जुष्टमद्य ब्राह्मणेभ्योऽनूच्यासमित्येवैतदाह तद्धि समृद्धं यो जुष्टं ब्राह्मणेभ्योऽनुब्रवत् ॥१९॥ जुष्टां नराशꣳसायेति । प्रजा वै नरस्तत्सर्वाभ्यः प्रजाभ्य आह तद्धि समृद्धं यश्च वेद यश्च न साध्वन्ववोचत्साध्वन्ववोचदित्येव विसृज्यन्ते यदस्य होतृवर्ये जिह्मं चक्षुः परापतत् अग्निष्टत्पुनराभ्रियाज्जातवेदा विचर्षणिरिति यथा यानग्नेऽग्नीन्होत्राय प्रावृणत ते प्राधन्वन्नेवं यन्मेऽत्र प्रवरेणामायि तन्मे पुनराप्याययेत्येवैतदाह तथो हास्यैतत्पुनराप्यायते ॥२०॥ अथाध्वर्युं चाग्नीधं च सम्मृशति । मनो वाऽअध्वर्युर्वाग्घोता तन्मनश्चैवैतद्वाचं च संदधाति ॥२१॥ तत्र जपति । षण्मोर्वीरꣳहसस्पान्त्वग्निश्च पृथिवी चापश्च वाजश्चाहश्च रात्रिश्चेत्येता मा देवता आर्त्तेर्गोपायन्त्वित्येवैतदाह तस्यो हि न ह्वलास्ति यमेता देवता आर्त्तेर्गोपायेयुः ॥२२॥ अथ होतृषदनमुपावर्तते । स होतृषदनादेकं तृणं निरस्यति निरस्तः परावसुरिति परावसुर्ह वै नामासुराणाꣳ होता स तमेवैतद्धोतृषदनान्निरस्यति ॥२३॥ अथ होतृषदनऽउपविशति । इदमहमर्वावसोः सदने सीदामीत्यर्वावसुर्वै नाम देवानाꣳ होता तस्यैवैतत्सदने सीदति ॥२४॥ तत्र जपति । विश्वकर्मंस्तनूपा असि मा मो दोषिष्टं मा मा हिꣳसिष्टमेष वां लोक इत्यु-

दङ्ङ्जत्यन्तरा वाऽएतदाहवनीयं च गार्हपत्यं चास्ते तद्ध ताभ्यां निह्नुते मा मो दोषिष्टं मा मा हिंसिष्टमिति तथा हैनमेतौ न हिंस्तः ॥२५॥ अथाग्निमीक्षमाणो जपति । विश्वे देवाः शास्तन मा यथेह होता वृतो मनवै यन्निषद्य । प्र मे ब्रूत भागधेयं यथा वो येन पथा हव्यमा वो वहानीति यथा येभ्यः पक्तं स्यात्तान्ब्रूयादनु मा शास्त यथा व आहरिष्यामि यथा वः परिवेक्ष्यामीत्येवमेवैतद्देवेषु प्रशासनमिच्छतेऽनु मा शास्त यथा वोऽनुष्ठ्या वषट्कुर्यामनुष्ठ्या हव्यं वहेयमिति तस्मादेवं जपति ॥२६॥ ब्राह्मणम् ॥२[५.१.]॥ ॥

अग्निर्होता वेत्त्वग्नेर्होत्रमिति । अग्निरिदं होता वेत्त्वित्येवैतदाहाग्नेर्होत्रमिति तस्यो हि होत्रं वेत्तु प्रावित्रमिति यज्ञो वै प्रावित्रं वेत्तु यज्ञमित्येवैतदाह साधु ते यजमान देवतेति साधु ते यजमान देवता यस्य तेऽग्निर्होतेत्येवैतदाह घृतवतीमध्वर्यो स्रुचमास्यस्वेति तदध्वर्युं प्रसौति स यदेकामिवाह ॥१॥ यजमान एव जुहूमनु । योऽस्माऽअरातीयति स उपभृतमनु स यद्धेऽइव ब्रूयाद्यजमानाय द्विषन्तं भ्रातृव्यं प्रत्युद्यामिनं कुर्याद्धैव जुहूमन्वाद्य उपभृतमनु स यद्धेऽइव ब्रूयाद्धाऽआद्यं प्रत्युद्यामिनं कुर्यात्तस्मादेकामिवेवाह ॥२॥ देवयुवं विश्ववारामिति । उपस्तौत्येवैनामेतन्महयत्येव यदाह देवयुवं विश्ववारामितीडामहै देवाँ२॥ऽईडेन्यान्नमस्याम नमस्यान्यजाम यज्ञियानितीडामहै तान्देवान्यऽईडेन्या नमस्याम तान्ये नमस्या यजाम यज्ञियानिति मनुष्या वाऽईडेन्याः पितरो नमस्या देवा यज्ञियाः ॥३॥ या वै प्रजा यज्ञेऽनन्वाभक्ताः । पराभूता वै ता एवमेवैतद्या इमाः प्रजा अपराभूतास्ता यज्ञऽआभजति मनुष्याननु पशवो देवाननु वयांस्योषधयो वनस्पतयो यदिदं किंचेवमु तत्सर्वं यज्ञऽआभक्तम् ॥४॥ ता वाऽएताः । नव व्याहृतयो भवन्ति नवेमे पुरुषे प्राणा एतानेवास्मिन्नेतद्दधाति तस्मान्नव व्याहृतयो भवन्ति ॥५॥ यज्ञो ह देवेभ्योऽपचक्राम । तं देवा अन्वमन्त्रयन्त नः शृणुप न

आवर्तस्वेति सोऽस्तु तथेत्येव देवानुपाववर्त तेनोपावृत्तेन देवा अयजन्त तेनेष्ट्वेदमभवन्यदिदं देवाः ॥६॥ स यदाश्रावयति । यज्ञमेवैतदनुमन्त्रयतऽआ नः शृणूप न आवर्तस्वेत्यथ यत्प्रत्याश्रावयति यज्ञ एवैतदुपावर्ततेऽस्तु तथेति तेनोपावृत्तेन रेतसा भूतेनऽर्त्विजः संप्रदायं चरन्ति यजमानेन परोऽक्षं यथा पूर्णपात्रेण संप्रदायं चरेयुरेवमनेनऽर्त्विजः संप्रदायं चरन्ति तद्वाचैवैतत्संप्रदायं चरन्ति वाग्घि यज्ञो वागु हि रेतस्तदेतेनैवैतत्संप्रदायं चरन्ति ॥७॥ सोऽनुब्रूहीत्येवोक्त्वाध्वर्युः । नापव्याहरेन्नोऽएव होतापव्याहरेदाश्रावयत्यध्वर्युस्तदग्नीधं यज्ञ उपावर्तते ॥८॥ सोऽग्नीन्नापव्याहरेत् । आ प्रत्याश्रावणात्प्रत्याश्रावयत्यग्नीत्तत्पुनरध्वर्युं यज्ञ उपावर्तते ॥९॥ ॥ काण्डस्यार्द्धम् ॥४११॥ ॥ सोऽध्वर्युर्नापव्याहरेत् । आ यजेति वक्तोर्यजेत्येवाध्वर्युर्होत्रे यज्ञं संप्रयच्छति ॥१०॥ स होता नापव्याहरेत् । आ वषट्कारात्तं वषट्कारेणाग्नाविव योनौ रेतो भूतं सिञ्चत्यग्निर्वै योनिर्यज्ञस्य स ततः प्रजायतऽइति नु हविर्यज्ञेऽथ सौम्येऽध्वरे ॥११॥ स वै ग्रहं गृहीत्वाध्वर्युः । नापव्याहरेदोपाकरणादुपावर्तध्वमित्येवाध्वर्युरुद्गातृभ्यो यज्ञं संप्रयच्छति ॥१२॥ तऽउद्गातारो नापव्याहरेयुः । ओत्तमाया एषोत्तमेत्येवोद्गातारो होत्रे यज्ञं संप्रयच्छन्ति ॥१३॥ स होता नापव्याहरेत् । आ वषट्कारात्तं वषट्कारेणाग्नाविव योनौ रेतो भूतं सिञ्चत्यग्निर्वै योनिर्यज्ञस्य स ततः प्रजायते ॥१४॥ स यद्ध सोऽपव्याहरेत् । यं यज्ञ उपावर्तते यथा पूर्णपात्रं परासिञ्चेदेवं ह स यजमानं परासिञ्चेत्स यत्र हैवमृत्विजः संविदाना यज्ञेन चरन्ति सर्वमेव तत्र कल्पते न मुह्यति तस्मादेवमेव यज्ञो भर्तव्यः ॥१५॥ ता वाऽएताः । पञ्च व्याहृतयो भवन्त्यो श्रावयास्तु श्रौषड्यज ये यजामहे वौषडिति पाङ्क्तो यज्ञः पाङ्क्तः पशुः पञ्चऽर्तवः संवत्सरस्यैषैका यज्ञस्य मात्रैषा सम्पत् ॥१६॥ तासां सप्तदशाक्षराणि । सप्तदशो वै प्रजापतिः प्रजापतिर्यज्ञ एषैका यज्ञस्य मात्रैषा सम्पत् ॥१७॥ ओ श्रावयेति वै देवाः । पु-

रोवातꣳ ससृजिरेऽस्तु श्रौषडित्यभ्राणि समप्लावयन्यजेति विद्युतं ये यजामहऽइति स्तनयित्नुं वषट्कारेणैव प्रावर्षयन् ॥१८॥ स यदि वृष्टिकामः स्यात् । यदीष्ट्या वा यजेत दर्शपूर्णमासयोर्वैव ब्रूयाद्वृष्टिकामो वाऽअस्मीति तत्रोऽअध्वर्युं ब्रूयात्पुरोवातं च विद्युतं च मनसा ध्यायेत्यभ्राणि मनसा ध्यायेत्यग्नीधꣳ स्तनयित्नुं च वर्षं च मनसा ध्यायेति होतारꣳ सर्वाण्येतानि मनसा ध्यायेति ब्रह्माणं वर्षति हैव तत्र यत्रैवमृत्विजः संविदाना यज्ञेन चरन्ति ॥१९॥ ओ श्रावयेति वै देवाः । विराजमभ्यानुक्कुवुरस्तु श्रौषडिति वत्समुपावासृजन्यजेत्युदजयन्ये यजामहऽइत्युपासीदन्वषट्कारेणैव विराजमदुहन्तेयं वै विराडस्यै वाऽएष दोह एवꣳ ह वाऽअस्माऽइयं विराट्सर्वान्कामान्दुहे य एवमेतं विराजो दोहं वेद ॥२०॥ ब्राह्मणम् ॥३ [५.२.]॥ ॥

ऋतवो ह वै प्रयाजाः । तस्मात्पञ्च भवन्ति पञ्च ह्यृतवः ॥१॥ देवाश्च वाऽअसुराश्च । उभये प्राजापत्याः पस्पृधिरऽएतस्मिन्यज्ञे प्रजापतौ पितरि संवत्सरेऽस्माकमयं भविष्यत्यस्माकमयं भविष्यतीति ॥२॥ ततो देवाः । अर्चन्तः श्राम्यन्तश्चेरुस्तऽएतान्प्रयाजान्ददृशुस्तैरयजन्त तैर्ऋतून्त्संवत्सरं प्राजयन्नृतुभ्यः संवत्सरात्सपत्नानन्तरायंस्तस्मात्प्रजयाः प्रजया ह वै नामैतद्यत्प्रयाजा इति तथोऽएवैष एतैर्ऋतून्त्संवत्सरं प्रजयत्यृतुभ्यः संवत्सरात्सपत्नानन्तरेति तस्मात्प्रयाजैर्यजते ॥३॥ ते वाऽआज्यहविषो भवन्ति । वज्रो वाऽआज्यमेतेन वै देवा वज्रेणाज्येनऽर्तून्त्संवत्सरं प्राजयन्नृतुभ्यः संवत्सरात्सपत्नानन्तरायंस्तथोऽएवैष एतेन वज्रेणाज्येनऽर्तून्त्संवत्सरं प्रजयत्यृतुभ्यः संवत्सरात्सपत्नानन्तरेति तस्मादाज्यहविषो भवन्ति ॥४॥ एतद्धि संवत्सरस्य स्वं पयः । यदाज्यं तत्स्वेनैवैनमेतत्पयसा देवाः स्वीकुर्वत तथोऽएवैनमेष एतत्स्वेनैव पयसा स्वीकुरुते तस्मादाज्यहविषो भवन्ति ॥५॥ स यत्रैव तिष्ठन्प्रयाजेभ्य आश्रावयेत् । तत एव नापक्रामेत्संग्रामो वाऽएष संनिधीयते यः प्रयाजैर्यजते यतरो वै संयत्तयोः पराजयतेऽप वै संक्रामत्यभितरामु वै जयन्क्रामति

तस्मादभितरामभितरामेव क्रामेदभितरामभितरामाहुतीर्जुहुयात् ॥६॥ तदु तथा न
कुर्यात् ॥ यत्रैव तिष्ठन्प्रयाजेभ्य आश्रावयेत्तत एव नापक्रामेद्यत्रोऽएव समिद्धतमं
मन्येत तदाहुतीर्जुहुयात्समिद्धहोमेन ह्येव समृद्धा आहुतयः ॥७॥ स आश्रा-
व्याह । समिधो यजेति तद्वसन्तꣳ समिन्द्धे स वसन्तः समिद्धोऽन्यानृतून्त्समिन्द्ध
ऽऋतवः समिद्धाः प्रजाश्च प्रजनयन्त्योषधीश्च पचन्ति तद्वेव खलु सर्वानृतून्निराहाथ
यजयजेत्येवोत्तरानाहाजामितायै जामि ह कुर्याद्यत्तनूनपातं यजेडो यजेति ब्रूयात्त-
स्माद्यजयजेत्येवोत्तरानाह ॥८॥ स वै समिधो यजति । वसन्तो वै समिद्वसन्तमे-
व तद्देवा अवृञ्जत वसन्तात्सपत्नानन्तरायन्वसन्तमेवैष एतद्वृङ्क्ते वसन्तात्सपत्नान-
न्तरेति तस्मात्समिधो यजति ॥९॥ अथ तनूनपातं यजति । ग्रीष्मो वै तनूनपा-
द्ग्रीष्मो ह्यासां प्रजानां तनूस्तपति ग्रीष्ममेव तद्देवा अवृञ्जत ग्रीष्मात्सपत्नानन्त-
रायन्ग्रीष्ममेवैष एतद्वृङ्क्ते ग्रीष्मात्सपत्नानन्तरेति तस्मात्तनूनपातं यजति ॥१०॥ अ-
थेडो यजति । वर्षा वाऽइड इति हि वर्षा इडो यदिदं क्षुद्रꣳ सरीसृपं ग्रीष्महे-
मन्ताभ्यां नित्यक्तं भवति तद्वर्षा ईडितमिवान्नमिच्छमानं चरति तस्माद्वर्षा इडो
वर्षा एव तद्देवा अवृञ्जत वर्षाभ्यः सपत्नानन्तरायन्वर्षा उऽएवैष एतद्वृङ्क्ते वर्षा-
भ्यः सपत्नानन्तरेति तस्मादिडो यजति ॥११॥ अथ बर्हिर्यजति । शरद्वै बर्हिरिति
हि शरद्बर्हिर्या इमा ओषधयो ग्रीष्महेमन्ताभ्यां नित्यक्ता भवन्ति ता वर्षा वर्धन्ते
ताः शरदि बर्हिषो रूपं प्रस्तीर्णाः शेरे तस्माच्छरद्बर्हिः शरदमेव तद्देवा अवृञ्जत
शरदः सपत्नान्तरायंश्छरदमेवैष एतद्वृङ्क्ते शरदः सपत्नानन्तरेति तस्माद्बर्हिर्यजति ॥१२॥
अथ स्वाहास्वाहेति यजति । अन्तो वै यज्ञस्य स्वाहाकारोऽन्त ऋतूनाꣳ हेमन्तो
वसन्ताद्धि परार्ध्योऽन्तेनैव तदन्तं देवा अवृञ्जतान्तेनान्तात्सपत्नानन्तरायन्नन्तेनोऽए-
वैष एतदन्तं वृङ्क्तेऽन्तेनान्तात्सपत्नानन्तरेति तस्मात्स्वाहास्वाहेति यजति ॥१३॥
तद्वाऽएतत् । वसन्त एव हेमन्तात्पुनरसुरेतस्माद्ध्येष पुनर्भवति पुनर्ह वाऽअस्मिं-

लोके भवति य एवमेतद्वेद ॥१४॥ स वै व्यन्तु वेत्विति यजति । अजामितायै जामि ह कुर्याद्यद्व्यन्तु व्यन्त्विति वैव यजेद्वेतु वेत्विति वा व्यन्त्विति वै योषा वेत्विति वृषा मिथुनमेवैतत्प्रजननं क्रियते तस्माद्व्यन्तु वेत्विति यजति ॥१५॥ अथ चतुर्थे प्रयाजे समानयति बर्हिषि । प्रजा वै बर्ही रेत आज्यं तत्प्रजास्वेवैतद्रेतः सिच्यते तेन रेतसा सिक्तेनेमाः प्रजाः पुनरभ्यावर्तं प्रजायन्ते तस्माच्चतुर्थे प्रयाजे समानयति बर्हिषि ॥१६॥ संग्रामो वा एष संनिधीयते । यः प्रयाजैर्यजते यतरं वै संयत्तयोर्मित्रमागच्छति स जयति तदेतदुपभृतो ऽधि जुहूं मित्रमागच्छति तेन प्रजयति तस्माच्चतुर्थे प्रयाजे समानयति बर्हिषि ॥१७॥ यजमान एव जुहूमनु । यो ऽस्मा अरातीयति स उपभृतमनु यजमानायैवैतद्द्विषन्तं भ्रातृव्यं बलिं हारयत्यत्तेव जुहूमन्वाद्य उपभृतमन्वत्त्र एवैतदाद्यं बलिं हारयति तस्माच्चतुर्थे प्रयाजे समानयति ॥१८॥ स वा अनवमृशन्त्समानयति । स यद्धावमृशेद्यजमानं द्विषता भ्रातृव्येनावमृशेदत्तारमाद्येनावमृशेत्तस्मादनवमृशन्त्समानयति ॥१९॥ अथोत्तरां जुहूमध्यूहति । यजमानमेवैतद्द्विषति भ्रातृव्ये ऽध्यूहत्यत्तारमाद्ये ऽध्यूहति तस्मादुत्तरां जुहूमध्यूहति ॥२०॥ देवा ह वा ऊचुः । हन्त विजितमेवानु सर्वं यज्ञं संस्थापयाम यदि नो ऽसुररक्षसान्यासजेयुः संस्थित एव नो यज्ञः स्यादिति ॥२१॥ त उत्तमे प्रयाजे । स्वाहाकारेणैव सर्वं यज्ञं समस्थापयन्त्स्वाहाग्निमिति तदाग्नेयमाज्यभागं समस्थापयन्त्स्वाहा सोममिति तत्सौम्यमाज्यभागं समस्थापयन्त्स्वाहाग्निमिति तद्य एष उभयत्राच्युत आग्नेयः पुरोडाशो भवति तं समस्थापयन् ॥२२॥ अथ यथादेवतं । स्वाहा देवा आज्यपा इति तत्प्रयाजानुयाजान्त्समस्थापयन्प्रयाजानुयाजा वै देवा आज्यपा जुषाणो ऽग्निराज्यस्य वेत्विति तदग्निं स्विष्टकृतं समस्थापयन्नग्निर्हि स्विष्टकृत्स एषो ऽप्येतर्हि तथैव यज्ञः संतिष्ठते यथैवैनं देवाः समस्थापयंस्तस्मादुत्तमे प्रयाजे स्वाहास्वाहेति यजति यावन्ति हवींषि भवन्ति

विज्ञितमेवैतदनु सर्वं यज्ञꣳ सꣳस्थापयति तस्माद्यदत ऊर्ध्वं विलोम यज्ञे क्रियेत न तदाद्रियेत सꣳस्थितो मे यज्ञ इति ह विद्यात्स ह्येष यज्ञो यातयामेवास यथा वषट्कृतꣳ हुतꣳ स्वाहाकृतम् ॥ २३ ॥ ते देवा अकामयन्त । कथं न्विमं यज्ञं पुनराप्याययेमायातयामानं कुर्याम तेनायातयाम्ना प्रचरेमेति ॥ २४ ॥ स यज्जुह्वामाज्यं परिशिष्टमासीत् । येन यज्ञꣳ समस्थापयंस्तेनैव यथापूर्वꣳ हवीꣳष्यभ्यघारयन्पुनरेवैनानि तदाप्याययन्नयातयामान्यकुर्वन्नयातयाम ह्याज्यं तस्मादुत्तमं प्रयाजमिष्ट्वा यथापूर्वꣳ हवीꣳष्यभिघारयति पुनरेवैनानि तदाप्याययत्ययातयामानि करोत्ययातयाम ह्याज्यं तस्माद्यस्य कस्य च हविषोऽवद्यति पुनरेव तदभिघारयति स्विष्टकृतऽएव तत्पुनराप्यायत्ययातयाम करोत्यथ यदा स्विष्टकृतेऽवद्यति न ततः पुनरभिघारयति नो हि ततः कां चन हविषोऽग्नावाहुतिꣳ होष्यन्भवति ॥ २५ ॥
ब्राह्मणम् ॥ ४ [५. ३.] ॥ ॥

स वै समिधो यजति । प्राणा वै समिधः प्राणानेवैतत्समिन्द्धे प्राणैर्ह्ययं पुरुषः समिद्धस्तस्मादभिमृशेति ब्रूयाद्यद्युपतापी स्यात्स यद्युष्णः स्यादेव तावदाशꣳसेत समिद्धो हि स तावद्भवति यद्यु शीतः स्यान्नाशꣳसेत तत्प्राणानेवास्मिन्नेतद्दधाति तस्मात्समिधो यजति ॥ १ ॥ अथ तनूनपातं यजति । रेतो वै तनूनपाद्रेत एवैतत्सिञ्चति तस्मात्तनूनपातं यजति ॥ २ ॥ अथेडो यजति । प्रजा वाऽइडो यदा वै रेतः सिक्तं प्रजायतेऽथ तदीडितमिवान्नमिच्छमानं चरति तत्प्रैवैतज्जनयति तस्मादिडो यजति ॥ ३ ॥ अथ बर्हिर्यजति । भूमा वै बर्हिर्भूमानमेवैतत्प्रजनयति तस्माद्बर्हिर्यजति ॥ ४ ॥ अथ स्वाहास्वाहेति यजति । हेमन्तो वाऽऋतूनाꣳ स्वाहाकारो हेमन्तो हीमाः प्रजाः स्वं वशमुपनयते तस्माद्धेमन्म्लायन्त्योषधयः प्र वनस्पतीनां पलाशानि मुच्यन्ते प्रतितरामिव वयाꣳसि भवन्त्यधस्तरामिव वयाꣳसि पतन्ति विपतितलोमेव पापः पुरुषो भवति हेमन्तो हीमाः प्रजाः स्वं वशमुपनयते स्वी

ह वै तमर्धं कुरुते श्रियेऽन्नाद्याय यस्मिन्नर्धे भवति य एवमेतद्वेद ॥५॥ देवाश्च वाऽअसुराश्च । उभये प्राजापत्याः पस्पृधिरे ते दण्डैर्धनुर्भिर्न व्यजयन्त ते हाविज-यमाना ऊचुर्हन्त वाच्येव ब्रह्मन्विजिगीषामहै स यो नो वाचं व्याहृतां मिथुने-न नानुनिक्रामात्स सर्वं पराजयाताऽअथ सर्वमितरे जयानिति तथेति देवा अब्रु-वंस्ते देवा इन्द्रमब्रुवन्व्याहरेति ॥६॥ स इन्द्रोऽब्रवीत् । एको ममेत्यथास्माक-मेकेतीतरेऽब्रुवंस्तदु तन्मिथुनमेवाविन्दन्मिथुनꣳ ह्येकश्चैका च ॥७॥ द्वौ ममेती-न्द्रोऽब्रवीत् । अथास्माकं द्वेऽइतीतरेऽब्रुवंस्तदु तन्मिथुनमेवाविन्दन्मिथुनꣳ हि द्वौ च द्वे च ॥८॥ त्रयो ममेतीन्द्रोऽब्रवीत् । अथास्माकं तिस्र इतीतरेऽब्रुवंस्तदु तन्मिथुनमेवाविन्दन्मिथुनꣳ हि त्रयश्च तिस्रश्च ॥९॥ चत्वारो ममेतीन्द्रोऽब्रवीत् । अथास्माकं चतस्र इतीतरेऽब्रुवंस्तदु तन्मिथुनमेवाविन्दन्मिथुनꣳ हि चत्वारश्च च-तस्रश्च ॥१०॥ पञ्च ममेतीन्द्रोऽब्रवीत् । तत इतरे मिथुनं नाविन्दन्नो ह्यत ऊर्ध्वं मिथुनमस्ति पञ्च पञ्चेति ह्येवैतदुभयं भवति ततोऽसुराः सर्वं पराजयन्त सर्वस्मा-द्देवाऽअसुरानजयन्त्सर्वस्मात्सपत्नानसुरान्निरभजन् ॥११॥ तस्मात्प्रथमे प्रयाजऽइष्टे ब्रूयात् । एको ममेत्येका तस्य यमहं द्वेष्मीति यद्यु न द्विष्याद्योऽस्मान्द्वेष्टि यं च वयं द्विष्म इति ब्रूयात् ॥१२॥ द्वौ ममेति द्वितीये प्रयाजे । द्वे तस्य योऽस्मान्द्वे-ष्टि यं च वयं द्विष्म इति ॥१३॥ त्रयो ममेति तृतीये प्रयाजे । तिस्रस्तस्य यो ऽस्मान्द्वेष्टि यं च वयं द्विष्म इति ॥१४॥ चत्वारो ममेति चतुर्थे प्रयाजे । चतस्र-स्तस्य योऽस्मान्द्वेष्टि यं च वयं द्विष्म इति ॥१५॥ पञ्च ममेति पञ्चमे प्रयाजे । न तस्य किं चन योऽस्मान्द्वेष्टि यं च वयं द्विष्म इति स पञ्च पञ्चेत्येव भवन्पराभ-वति तथास्य सर्वꣳ संवृङ्क्ते सर्वस्मात्सपत्नान्निर्भजति य एवमेतद्वेद ॥१६॥ ब्राह्म-णम् ॥५[५.४.]॥ ॥ अध्यायः ॥५॥ ॥

ऋतवो ह वै देवेषु यज्ञे भागमीषिरे । आ नो यज्ञे भजत मा नो यज्ञादन्तर्ग-

तास्त्वेव नोऽपि यज्ञे भाग इति ॥१॥ तद्ध देवा न जज्ञुः । तऽऋतवो देवेष्वजानत्सूसुरानुपावर्तन्ताप्रियान्देवानां द्विषतो भ्रातृव्यान् ॥२॥ ते हैतामेधतुमेधां चक्रिरे । यामेषामेतामनुशृण्वन्ति कृषन्तो ह स्मैव पूर्वे वपन्तो यन्ति लुनन्तोऽपरे मृणन्तः शश्वद्धैभ्योऽकृष्टपच्या एवौषधयः पेचिरे ॥३॥ तद्ध देवानामाग आस । कनीय इन्नूतो द्विषन्द्विषतेऽरातीयति किम्नूतावन्मात्रमुपजानीत यथेदमितोऽन्यथासदिति ॥४॥ ते होचुः । ऋतूनेवानुमन्त्रयामहाऽइति केनेति प्रथमानेवैनान्यज्ञे यजामेति ॥५॥ स हाग्निरुवाच । अथ यन्मां पुरा प्रथमं यजथ क्वाहं भवानीति न त्वामायतनाच्च्यावयाम इति ते यदृतूनभिह्वयमाना अथाग्निमायतनान्नाच्यावयंस्तस्मादग्निरच्युतो न ह वाऽआयतनाच्च्यवते यस्मिन्नायतने भवति य एवमेतमग्निमच्युतं वेद ॥६॥ ते देवा अग्निमब्रुवन् । परेह्येनांस्त्वमेवानुमन्त्रयस्वेति स हेत्याग्निरुवाचर्तवोऽविदं वै वो देवेषु यज्ञे भागमिति कथं नोऽविद इति प्रथमानेव वो यज्ञे यक्ष्यन्तीति ॥७॥ तऽऋतवोऽग्निमब्रुवन् । आ वयं त्वामस्मासु भजामो यो नो देवेषु यज्ञे भागमविद इति स एषोऽग्निर्ऋतुष्वाभक्तः समिधोऽअग्ने तनूनपादग्नऽइडोऽअग्ने बर्हिरग्ने स्वाहाग्निमित्याभक्तो ह वै तस्यां पुण्यकृत्यायां भवति यामस्य समानो ब्रुवाणः करोत्यग्निमते ह वाऽअस्माऽअग्निमन्त ऋतव ओषधीः पचन्तीदꣳ सर्वं य एवमेतमग्निमृतुष्वाभक्तं वेद ॥८॥ तदाहुः । यदुत्तमान्प्रयाजानात्वाहयन्त्यथ कस्मादेनान्प्रथमान्यजन्तीत्युत्तमान्ह्येनान्यज्ञेऽवाकल्पयन्प्रथमान्वो यक्ष्यामीत्यब्रुवंस्तस्मादुत्तमानावाहयन्ति प्रथमान्यजन्ति ॥९॥ चतुर्थेन वै प्रयाजेन देवाः । यज्ञमाप्नुवंस्तं पञ्चमेन समस्थापयन्नथ यदत ऊर्ध्वमसꣳस्थितं यज्ञस्य स्वर्गमिव तेन लोकꣳ समाश्नुवत ॥१०॥ ते स्वर्गं लोकं यन्तः । असुररक्षसेभ्य आसङ्गाद्बिभयां चक्रुस्तेऽग्निं पुरस्तादकुर्वत रक्षोहणꣳ रक्षसामपहन्तारमग्निं मध्यतोऽकुर्वत रक्षोहणꣳ रक्षसामपहन्तारमग्निं पश्चादकुर्वत रक्षोहणꣳ रक्षसामपहन्तारꣳ ॥११॥

स यद्येनान्पुरस्तात् । असुररक्षसान्यासिसंक्षन्नग्निरेव तान्यपाघ्नन्रक्षोहा रक्षसाम-
पहन्ता यदि मध्यत आसिसंक्षन्नग्निरेव तान्यपाघ्नन्रक्षोहा रक्षसामपहन्ता यदि प-
श्चादासिसंक्षन्नग्निरेव तान्यपाघ्नन्रक्षोहा रक्षसामपहन्तात एवꣳ सर्वतोऽग्निभिर्गु-
प्यमानाः स्वर्गं लोकꣳ समाश्नुवत ॥१२॥ तथोऽएवैष एतत् । चतुर्थेनैव प्रया-
जेन यज्ञमाप्नोति तं पञ्चमेन सꣳस्थापयत्यथ यदत ऊर्ध्वमसꣳस्थितं यज्ञस्य स्वर्गमि-
व तेन लोकꣳ समश्नुते ॥१३॥ स यदाग्नेयमाज्यभागं यजति । अग्निमेवैतत्पुरस्ता-
त्कुरुते रक्षोहणꣳ रक्षसामपहन्तारमथ यदाग्नेयः पुरोडाशो भवत्यग्निमेवैतन्मध्यतः
कुरुते रक्षोहणꣳ रक्षसामपहन्तारमथ यदग्निꣳ स्विष्टकृतं यजत्यग्निमेवैतत्पश्चात्कु-
रुते रक्षोहणꣳ रक्षसामपहन्तारꣳ ॥१४॥ स यद्येनं पुरस्तात् । असुररक्षसान्या-
सिसंक्षन्त्यग्निरेव तान्यपहन्ति रक्षोहा रक्षसामपहन्ता यदि मध्यत असुररक्षसा-
न्यासिसंक्षन्त्यग्निरेव तान्यपहन्ति रक्षोहा रक्षसामपहन्ता यदि पश्चादसुररक्षसा-
न्यासिसंक्षन्त्यग्निरेव तान्यपहन्ति रक्षोहा रक्षसामपहन्ता स एवꣳ सर्वतोऽग्निभि-
र्गुप्यमानः स्वर्गं लोकꣳ समश्नुते ॥१५॥ स यद्येनं पुरस्तात् । यज्ञस्यानुव्याहरेत्तं
प्रति ब्रूयान्मुख्यामार्त्तिमारिष्यस्यन्धो वा बधिरो वा भविष्यसीत्येता वै मुख्या आ-
र्त्तयस्तथा हैव स्यात् ॥१६॥ यदि मध्यतो यज्ञस्यानुव्याहरेत् । तं प्रति ब्रूयादप्र-
जा अपशुर्भविष्यसीति प्रजा वै पशवो मध्यं तथा हैव स्यात् ॥१७॥ यद्यन्ततो
यज्ञस्यानुव्याहरेत् । तं प्रति ब्रूयादप्रतिष्ठितो दरिद्रः क्षिप्रेऽमुं लोकमेष्यसीति त-
था हैव स्यात्तस्मादु ह नानुव्याहारीव स्यादुत ह्येवंवित्परो भवति ॥१८॥ संव-
त्सरꣳ ह वै प्रयन्निर्जयञ्जयति । स ह न्वेवैनं जयति योऽस्य द्वाराणि वेद किꣳ
हि स तैर्गृहैः कुर्याद्यानन्तरतो न व्यवविध्याद्यथास्य ते भवन्ति तस्य वसन्त एव
द्वारꣳ हेमन्तो द्वारं तं वाऽएतꣳ संवत्सरꣳ स्वर्गं लोकं प्रपद्यते सर्वं वै संवत्स-
रः सर्वं वाऽअक्षय्यमेतेन हास्याक्षय्यꣳ सुकृतं भवत्यक्षय्यो लोकः ॥१९॥ तदा-

कुः । किंदेवत्यान्याज्यानीति प्राजापत्यानीति ह ब्रूयादनिरुक्तो वै प्रजापतिरनिरुक्तान्याज्यानि तानि हैतानि यजमानदेवत्यान्येव यजमानो ह्येव स्वे यज्ञे प्रजापतिस्तेन ह्युक्ता ऋत्विजस्तन्वते तं जनयन्ति ॥२०॥ स आज्यस्योपस्तीर्य । द्विर्हविषोऽवदायाथोपरिष्टादाज्यस्याभिघारयति सैषाज्येन मिश्राहुतिर्हूयते यजमानेन हैवैषैतन्मिश्रा हूयते यदि ह वाऽअपि दूरे सन्यजते यद्यन्तिके यथा हैवान्ते सत इष्टꣳ स्यादेवꣳ हैवैवं विदुष इष्टं भवति यद्यु ह्यपि बह्विव पापं करोति नो हैव बहिर्धा यज्ञाद्भवति य एवमेतद्वेद ॥२१॥ ब्राह्मणम् ॥ ६ [६. १.] ॥ ॥ चतुर्थः प्रपाठकः ॥ कण्डिकासंख्या १२१ ॥ ॥

यज्ञेन वै देवाः । इमां जितिं जिग्युर्यैषामियं जितिस्ते होचुः कथं न इदं मनुष्यैरनभ्यारोह्यꣳ स्यादिति ते यज्ञस्य रसं धीत्वा यथा मधु मधुकृतो निर्धयेयुर्विदुह्य यज्ञं यूपेन योपयित्वा तिरोऽभवन्नथ यदेनेनायोपयंस्तस्माद्यूपो नाम तद्वाऽऋषीणामनुश्रुतमास ॥१॥ यज्ञेन ह वै देवाः । इमां जितिं जिग्युर्यैषामियं जितिस्ते होचुः कथं न इदं मनुष्यैरनभ्यारोह्यꣳ स्यादिति ते यज्ञस्य रसं धीत्वा यथा मधु मधुकृतो निर्धयेयुर्विदुह्य यज्ञं यूपेन योपयित्वा तिरोऽभवन्निति तमन्वेष्टुं दध्रिरे ॥२॥ तेऽर्चन्तः श्राम्यन्तश्चेरुः । श्रमेण ह स्म वै तद्देवा जयन्ति यदेषां जय्यमासऽर्षयश्च तेभ्यो देवा वैव प्ररोचयां चक्रुः स्वयं वैव दध्रिरे प्रेत तदेष्यामो यतो देवाः स्वर्गं लोकꣳ समाश्नुवतेति ते किं प्ररोचते किं प्ररोचतऽइति चेरुरेतत्पुरोडाशमेव कूर्मं भूत्वा सर्पन्तं ते ह सर्वऽएव मेनिरेऽयं वै यज्ञ इति ॥३॥ ते होचुः । अश्विभ्यां तिष्ठ सरस्वत्यै तिष्ठेन्द्राय तिष्ठेति स ससर्पैवाग्नये तिष्ठेति ततस्तस्थावग्नये वाऽअस्थादिति तमग्नावेव परिगृह्य सर्वहुतमजुहवुराहुतिर्हि देवानां तत एभ्यो यज्ञः प्रारोचत तमसृजन्त तमतन्वत सोऽयं परोऽवरं यज्ञोऽनूच्यते पितेव पुत्राय ब्रह्मचारिणे ॥४॥ स वाऽएभ्यस्तत्पुरोऽदाशयत् । य एभ्यो यज्ञं प्रारोचयत्तस्मा-

त्पुरोडाशः पुरोडाशो ह वै नामैतद्यत्पुरोडाश इति स एष उभयत्राच्युत आग्नेयो
ऽष्टाकपालः पुरोडाशो भवति ॥५॥ स न पौर्णमासꣳ हविः । नामावास्यमग्नी-
षोमीय एव पौर्णमासꣳ हविः सांनाय्यमामावास्यं यन्न ह्येवैष उभयत्रावक्लृप्तो ने-
च्छन्नादयानीति न्वेव पुरस्तात्पौर्णमासस्य क्रियतऽएवम्वामावास्यस्यैतन्नु तद्यस्मा-
दत्र क्रियते ॥६॥ यद्युऽएनमुपधावेत् । इष्ट्या मा याजयेत्यैतयैव याजयेद्यत्कामा
वाऽएतमृषयोऽजुहवुः स एभ्यः कामः समर्ध्यत यत्कामो ह वाऽएतेन यज्ञेन य-
जते सोऽस्मै कामः समृध्यते यस्यै वै कस्यै च देवतायै हविर्गृह्यतेऽग्नौ वै तस्यै
जुह्वत्यग्नाऽउ चेद्धोपधत्स्यात्किमन्यस्यै देवतायाऽआदिशेत्तस्मादग्नयऽएव ॥७॥ अ-
ग्निर्वै सर्वा देवताः । अग्नौ हि सर्वाभ्यो देवताभ्यो जुह्वति तद्यथा सर्वा देवता
उपधावेदेवं तत्तस्मादग्नयऽएव ॥८॥ ॥ शतम् ५०० ॥ ॥ अग्निर्वै देवानामद्धा
तमाम् । यं वाऽअद्धातमां मन्येत तमुपधावेत्तस्मादग्नयऽएव ॥९॥ अग्निर्वै देवानां
मृदुहृदयतमः । यं वै मृदुहृदयतमं मन्येत तमुपधावेत्तस्मादग्नयऽएव ॥१०॥ अ-
ग्निर्वै देवानां नेदिष्ठम् । यं वै नेदिष्ठमुपसर्तव्यानां मन्येत तमुपधावेत्तस्मादग्नय
ऽएव ॥११॥ स यदीष्टिं कुर्वीत । सप्तदश सामिधेनीरनुब्रूयादुपांꣳशु देवतां यज-
ति तद्धीष्टिरूपं मूर्धन्वत्यौ याज्यानुवाक्ये स्यातां वार्त्रघ्नावाज्यभागौ विराजौ सं-
याज्ये ॥१२॥ ब्राह्मणम् ॥१ [६.२.]॥ ॥

त्वष्टुर्ह वै पुत्रः । त्रिशीर्षा षडक्ष आस तस्य त्रीण्येव मुखान्यासुस्तद्यदेवꣳरूप
आस तस्माद्विश्वरूपो नाम ॥१॥ तस्य सोमपानमेवैकं मुखमास । सुरापाणमेक-
मन्यस्माऽअशनायैकं तमिन्द्रो दिद्वेष तस्य तानि शीर्षाणि प्रचिच्छेद ॥२॥ स य-
त्सोमपानमास । ततः कपिञ्जलः समभवत्तस्मात्स बभ्रुक-इव बभ्रुरिव हि सो-
मो राजा ॥३॥ अथ यत्सुरापाणमास । ततः कलविङ्कः समभवत्तस्मात्सोऽभिमा-
द्यत्क-इव वदत्यभिमाद्यन्निव हि सुरां पीत्वा वदति ॥४॥ अथ यदन्यस्माऽअश-

नायास । ततस्तित्तिरिः समभवत्तस्मात्स विश्वरूपतम-इव सन्त्येव घृतस्तोका-इव
त्वन्मधुस्तोका-इव त्वत्पर्णेष्वाश्चुतिता एवꣳरूपꣳ हि स तेनाशनमावयत् ॥ ५ ॥ स
त्वष्टा चुक्रोध । कुविन्मे पुत्रमवधीदिति सोऽपेन्द्रमेव सोममाजह्रे स यथायꣳ सो-
मः प्रसुत एवमपेन्द्र एवास ॥ ६ ॥ इन्द्रो ह वाऽईक्षां चक्रे । इदं वै मा सोमा-
दन्तर्यन्तीति स यथा बलीयानबलीयस एवमनुपहूत एव यो द्रोणकलशे शुक्र
आस तं भक्षयां चकार स हैनं जिहिꣳस सोऽस्य विष्वङ्ङेव प्राणेभ्यो दुद्राव मु-
खाद्धैवास्य न दुद्रावाथ सर्वेभ्योऽन्येभ्यः प्राणेभ्योऽद्रवत्तदद्: सौत्रामणीतीष्टिस्त-
स्यां तद्व्याप्यायते यथैनं देवा अभिषज्यन् ॥ ७ ॥ स त्वष्टा चुक्रोध । कुविन्मेऽनुप-
हूतः सोममबभक्षदिति स स्वयमेव यज्ञवेशसं चक्रे स यो द्रोणकलशे शुक्रः प-
रिशिष्ट आस त प्रवर्तयां चकारेन्द्रशत्रुर्वर्धस्वेति सोऽग्निमेव प्राप्य सम्बभूवान्तरैव
सम्बभूवेत्यु हैकऽआहुः सोऽग्नीषोमावेवाभिसम्बभूव सर्वा विद्याः सर्वं यशः सर्व-
मन्नाद्यꣳ सर्वाꣳ श्रीꣳ ॥ ८ ॥ स यद्वर्तमानः समभवत् । तस्माद्वृत्रोऽथ यदपात्सम-
भवत्तस्मादहिस्तं दनुश्च दनायूश्च मातेव च पितेव च परिजगृहतुस्तस्माद्दानव इ-
त्याहुः ॥ ९ ॥ अथ यदब्रवीदिन्द्रशत्रुर्वर्धस्वेति । तस्मादु हैनमिन्द्र एव जघानाथ
यद्ध शश्वदवक्ष्यदिन्द्रस्य शत्रुर्वर्धस्वेति शश्वदु ह स एवेन्द्रमहनिष्यत् ॥ १० ॥ अथ
यदब्रवीद्वर्धस्वेति । तस्मादु ह स्मेषुमात्रमेव तिर्यङ्वर्धतऽइषुमात्रं प्राङ्क्सोऽवैवा-
वरꣳ समुद्रं दधावव पूर्वꣳ स यावत्स आस सहैव तावदन्नाद आस ॥ ११ ॥ तस्मै
ह स्म पूर्वाह्णे देवाः । अशनमभिहरन्ति मध्यन्दिने मनुष्या अपराह्णे पितरः ॥ १२ ॥
स वाऽइन्द्रस्तथैव नुत्तश्चरन् । अग्नीषोमाऽउपमन्त्रयां चक्रेऽग्नीषोमौ युवं वै मम
स्थो युवयोरहमस्मि न युवयोरेष किं चन कं मऽइमं दस्युं वर्धयथ उप मावर्ते-
थामिति ॥ १३ ॥ तौ होचतुः । किमावयोस्ततः स्यादिति ताभ्यामेतमग्नीषोमीयमे-
कादशकपालं पुरोडाशं निरवपत्तस्मादग्नीषोमीय एकादशकपालः पुरोडाशो भ-

वति ॥१४॥ तावेनमुपाववृततुः । तावनु सर्वे देवाः प्रेयुः सर्वा विद्याः सर्वं यशः सर्वमन्नाद्यꣳ सर्वा श्रीस्तेनेष्ट्वेन्द्र एतदभवद्यदिदमिन्द्र एष उ पौर्णमासस्य बन्धुः स यो हैवं विद्वान्पौर्णमासेन यजत एताꣳ हैव श्रियं गच्छत्येवं यशो भवत्येवमन्नादो भवति ॥१५॥ तद्धैव खलु हतो वृत्रः । स यथा दृतिर्निष्पीत एवꣳ संलीनः शिश्ये यथा निर्धूतसक्तुर्भस्त्रैवꣳ संलीनः शिश्ये तमिन्द्रोऽभ्यादुद्राव हनिष्यन् ॥१६॥ स होवाच । मा नु मे प्रहार्षीस्त्वं वै तदेतर्ह्यसि यदहं व्येव मा कुरु मामुया भूवमिति स वै मेऽन्नमेधीति तथेति तं द्वेधान्वभिनत्तस्य यत्सौम्यं न्यक्तमास तं चन्द्रमसं चकाराथ यदस्यासुर्यमास तेनेमाः प्रजा उदरेणाविध्यत्तस्मादाहुर्वृत्र एव तर्ह्यन्नाद आसीद्वृत्र एतर्हीतीदꣳ हि यदसावापूर्यतेऽस्मादेवैतल्लोकादाप्यायतेऽथ यदिमाः प्रजा अशनमिच्छन्तेऽस्मा एवैतद्वृत्रायोदराय बलिꣳ हरन्ति स यो हैवमेतं वृत्रमन्नादं वेदान्नादो हैव भवति ॥१७॥ ता उ हैता देवता ऊचुः । या इमा अग्नीषोमावन्वाजग्मुरग्नीषोमौ युवं वै नो भूयिष्ठभाजौ स्थो ययोर्वामिदं युवयोरस्मानन्वाभजतमिति ॥१८॥ तौ होचतुः । किमावयोस्ततः स्यादिति यस्यै कस्यै च देवतायै हविर्निर्वपांस्तद्वां पुरस्तादाज्यस्य यजानिति तस्माद्यस्यै कस्यै च देवतायै हविर्निर्वपन्ति तत्पुरस्तादाज्यभागावग्नीषोमाभ्यां यजन्ति तन्न सौम्येऽध्वरे न पशौ यस्यै कस्यै च देवतायै निर्वपानिति ह्यब्रुवन् ॥१९॥ स हाग्निरुवाच । मय्येव वः सर्वेभ्यो जुह्वतु तद्वोऽहं मय्याभजामीति तस्मादग्नौ सर्वेभ्यो देवेभ्यो जुह्वति तस्मादाहुरग्निः सर्वा देवता इति ॥२०॥ अथ ह सोम उवाच । मामेव वः सर्वेभ्यो जुह्वतु तद्वोऽहं मय्याभजामीति तस्मात्सोमꣳ सर्वेभ्यो देवेभ्यो जुह्वति तस्मादाहुः सोमः सर्वा देवता इति ॥२१॥ अथ यदिन्द्रे सर्वे देवास्तस्थानाः । तस्मादाहुरिन्द्रः सर्वा देवता इन्द्रश्रेष्ठा देवा इत्येतद्ध वै देवास्त्रेधैकदेवत्या अभवन्त्स यो हैवमेतद्वेदैकधा हैव स्वानाꣳ श्रेष्ठो भवति ॥२२॥ द्वयं वा इदं न तृ-

तीयमस्ति । आर्द्रं चैव शुष्कं च यच्छुष्कं तदाग्नेयं यदार्द्रं तत्सौम्यमथ यदिदं द्वयमेवास्य किमेतावत्क्रियतऽइत्यग्नीषोमयोरेवाज्यभागावग्नीषोमयोरुपाꣳशुयाजोऽग्नीषोमयोः पुरोडाशो यदेत एकतमेनैवेदꣳ सर्वमाप्नोत्यथ किमेतावत्क्रियतऽइत्यग्नीषोमयोर्ह्येवैतावती विभूतिः प्रजातिः ॥ २३ ॥ सूर्य एवाग्नेयः । चन्द्रमाः सौम्योऽहरेवाग्नेयꣳ रात्रिः सौम्या य एवापूर्यतेऽर्धमासः स आग्नेयो योऽपक्षीयते स सौम्यः ॥ २४ ॥ आज्यभागाभ्यामेव । सूर्याचन्द्रमसावाप्नोत्युपाꣳशुयाजेनैवाहोरात्रेऽआप्नोति पुरोडाशेनैवार्धमासावाप्नोतीत्यु हैकऽआहुः ॥ २५ ॥ तदु होवाचासुरिः । आज्यभागाभ्यामेवातो यतमे वा यतमे वा द्वेऽआप्नोत्युपाꣳशुयाजेनैवातोऽहोरात्रेऽआप्नोति पुरोडाशेनैवातोऽर्धमासावाप्नोति सर्वं मऽआप्तमसत्सर्वं जितꣳ सर्वेण वृत्रꣳ हनानि सर्वेण द्विषन्तं भ्रातृव्यꣳ हनानीति तस्माद्वाऽएतावत्क्रियतऽइति ॥ २६ ॥ तदाहुः । किमिदं जामि क्रियतेऽग्नीषोमयोरेवाज्यस्याग्नीषोमयोः पुरोडाशस्य यदन्तर्हितं तेन जामीत्यनेन ह त्वेवाजाम्याज्यस्येतरं पुरोडाशस्येतरं तदन्यदिवेतरमन्यदिवेतरं भवत्यृचमनूच्य जुषाणेन यजत्यृचमनूच्यर्चा यजति तदन्यदिवेतरमन्यदिवेतरं भवत्यनेन ह त्वेवाजाम्युपाꣳश्वाज्यस्य यजत्युच्चैः पुरोडाशस्य स यदुपाꣳशु तत्प्राजापत्यꣳ रूपं तस्मात्तस्यानुष्टुभमनुवाक्यामन्वाह वाग्घ्यनुष्टुब्वाग्घि प्रजापतिः ॥ २७ ॥ एतेन वै देवाः । उपाꣳशुयाजेन यमसुराणामकामयन्त तमुपत्सर्य वज्रेण वषट्कारेणाघ्नंस्तथोऽएवैष एतेनोपाꣳशुयाजेन पाप्मानं द्विषन्तं भ्रातृव्यमुपत्सर्य वज्रेण वषट्कारेण हन्ति तस्मादुपाꣳशुयाजं यजति ॥ २८ ॥ स वाऽऋचमनूच्य जुषाणेन यजति तदन्विमा अन्यतरतोदताः प्रजाः प्रजायन्तेऽस्थि ह्यृगस्थि हि दन्तोऽन्यतरतो ह्येतदस्थि करोति ॥ २९ ॥ अथर्चमनूच्यर्चा यजति । तदन्विमा उभयतोदताः प्रजाः प्रजायन्तेऽस्थि ह्यृगस्थि हि दन्त उभयतो ह्येतदस्थि करोत्येता वाऽइमा द्वय्यः प्रजा अन्यतरतोदताश्चैवोभयतोदताश्च स यो हैवं विद्वानग्नी-

षोमयोः प्रजातिं यजति बहुर्हैव प्रजया पशुभिर्भवति ॥३०॥ स वै पौर्णमासेनोपवत्स्यन् । न सत्रा सुहित-इव स्यात्तेनेदमुदरमसुर्यं व्लिनात्याहुतिभिः प्रातर्दैवमेष उ पौर्णमासस्योपचारः ॥३१॥ स वै संप्रत्येवोपवसेत् । संप्रति वृत्रꣳ हनानि संप्रति द्विषन्तं भ्रातृव्यꣳ हनानीति ॥३२॥ स वाऽउत्तरामेवोपवसेत् । समिव वाऽएष क्रमते यः संप्रत्युपवसत्यनड्वा वै संक्रान्तयोर्यदीतरो वेतरमभिभवतीतरो वेतरमथ य उत्तरामुपवसति यथा पराञ्चमावृत्तꣳ संपिꣳष्यादप्रत्यालभमानꣳ सोऽन्यतोघात्येव स्यादेवं तद्य उत्तरामुपवसति ॥३३॥ स वै संप्रत्येवोपवसेत् । यथा वाऽअन्यस्य हतꣳ संपिꣳष्यादेवं तद्य उत्तरामुपवसति सोऽन्यस्यैव कृतानुकरोऽन्यस्योपावसायी भवति तस्माडु संप्रत्येवोपवसेत् ॥३४॥ प्रजापतेर्ह वै प्रजाः ससृजानस्य । पर्वाणि विसस्रꣳसुः स वै संवत्सर एव प्रजापतिस्तस्यैतानि पर्वाण्यहोरात्रयोः संधी पौर्णमासी चामावास्या चर्तुमुखानि ॥३५॥ स विस्रस्तैः पर्वभिः । न शशाक सꣳहातुं तमेतैर्हविर्यज्ञैर्देवा अभिषज्यन्नग्निहोत्रेणैवाहोरात्रयोः संधी तत्पर्वाभिषज्यंस्तत्समदधुः पौर्णमासेन चैवामावास्येन च पौर्णमासीं चामावास्यां च तत्पर्वाभिषज्यंस्तत्समदधुश्चातुर्मास्यैरेवर्तुमुखानि तत्पर्वाभिषज्यंस्तत्समदधुः ॥३६॥ स सꣳहितैः पर्वभिः । इदमन्नाद्यमभ्युत्तस्थौ यदिदं प्रजापतेरन्नाद्यꣳ स यो हैवं विद्वान्त्संप्रत्युपवसति संप्रति हैव प्रजापतेः पर्व भिषज्यत्यवति हैनं प्रजापतिः स एवमेवान्नादो भवति य एवं विद्वान्त्संप्रत्युपवसति तस्माडु संप्रत्येवोपवसेत् ॥३७॥ चक्षुषी ह वाऽएते यज्ञस्य यदाज्यभागौ । तस्मात्पुरस्ताज्जुहोति पुरस्ताद्धीमे चक्षुषी तत्पुरस्तादेवैतच्चक्षुषी दधाति तस्मादिमे पुरस्ताच्चक्षुषी ॥३८॥ उत्तरार्धपूर्वार्धे हैके । आग्नेयमाज्यभागं जुह्वति दक्षिणार्धपूर्वार्धे सौम्यमाज्यभागमेतत्पुरस्ताच्चक्षुषी दध्म इति वदन्तस्तदु तदाविज्ञान्यमिव हवीꣳषि ह वाऽआत्मा यज्ञस्य स यदेव पुरस्ताद्धविषां जुहोति तत्पुरस्ताच्चक्षुषी दधाति यत्रो

ऽएव समिद्धतमं मन्येत तदाहुतीर्जुहुयात्समिद्धहोमेन ह्येव समृद्धा आहुतयः ॥३९॥ स वाऽऋचमनूच्य जुषाणेन यजति । तस्मादिमेऽअस्थन्वत्सत्यनस्थिके चक्षुषीऽआश्लिष्टेऽअथ यदृचमनूच्यर्चा यजेदस्थि हैव कुर्यान्न चक्षुः ॥४०॥ ते वाऽएते । अग्नीषोमयोरेव रूपमन्वायत्ते यच्छुक्लं तदाग्नेयं यत्कृष्णं तत्सौम्यं यदि वेतरथा यदेव कृष्णं तदाग्नेयं यच्छुक्लं तत्सौम्यं यदेव वीक्षते तदाग्नेयꣳ रूपꣳ शुष्के-ऽइव हि वीक्षमाणस्याक्षिणी भवतः शुष्कमिव ह्याग्नेयं यदेव स्वपिति तत्सौम्यꣳ रूपमार्द्रे-ऽइव हि सुषुपुषोऽक्षिणी भवत आर्द्र-इव हि सोम आजरसꣳ ह वाऽअस्मिंल्लोके चक्षुष्मान्भवति सचक्षुरमुष्मिंल्लोके संभवति य एवमेतौ चक्षुषीऽआज्यभागौ वेद ॥४१॥ ॥ ब्राह्मणम् ॥२[६.३.]॥ ॥

इन्द्रो ह यत्र वृत्राय वज्रं प्रजहार । सोऽबलीयान्मन्यमानो नास्तृणीतीव बिभ्यन्निलयां चक्रे स पराः परावतो जगाम देवा ह वै विदां चक्रुर्हतो वै वृत्रोऽथेन्द्रो न्यलेष्टेति ॥१॥ तमन्वेष्टुं दध्रिरे । अग्निर्देवतानाꣳ हिरण्यस्तूप ऋषीणां बृहती छन्दसां तमग्निरनुविवेद तेनैताꣳ रात्रिꣳ सहाजगाम स वै देवानां वसुर्वीरो ह्येषाम् ॥२॥ ते देवा अब्रुवन् । अमा वै नोऽद्य वसुर्वसति यो नः प्रावात्सीदिति ताभ्यामेतद्यथा ज्ञातिभ्यां वा सखिभ्यां वा सहागताभ्याꣳ समानमोदनं पचेदजं वा तदह मानुषꣳ हविर्देवानामेवमाभ्यामेतत्समानꣳ हविर्निरवपन्नैन्द्राग्नं द्वादशकपालं पुरोडाशं तस्मादैन्द्राग्नो द्वादशकपालः पुरोडाशो भवति ॥३॥ स इन्द्रोऽब्रवीत् । यत्र वै वृत्राय वज्रं प्राहरं तद्यस्मये स कृश-इवास्मि न वै मेदं धिनोति यन्मा धिनवत्तन्मे कुरुतेति तथेति देवा अब्रुवन् ॥४॥ ते देवा अब्रुवन् । न वाऽइममन्यत्सोमाद्धिनुयात्सोममेवास्मै संभरामेति तस्मै सोमꣳ समभरन्नेष वै सोमो राजा देवानामन्नं यच्चन्द्रमाः स यत्रैष एताꣳ रात्रिं न पुरस्तान्न पश्चाद्ददृशे तदिमं लोकमागच्छति स इहैवापश्चौषधीश्च प्रविशति स वै देवानां

वसवन्ँ ह्येषां तद्यदेष एताँ रात्रिमिहामा वसति तस्मादमावास्या नाम ॥५॥
तं गोभिरनुविद्याप्य समभरन् । यदोषधीराश्नंस्तदोषधिभ्यो यदपोऽपिबंस्तदद्भ्यस्त-
मेवँ संभृत्यातच्य तीव्रीकृत्य तमस्मै प्रायच्छन् ॥६॥ सोऽब्रवीत् । धिनोत्येव मे-
दं नेव तु मयि श्रयते यथेद मयि श्रयाते तथोपजानीतेति तँ शृतेनैवाश्रयन्
॥७॥ तद्वाऽएतत् । समानमेव सत्पय एव सदिन्द्रस्यैव सत्तत्पुनर्नानेवाचक्षते
यदब्रवीद्धिनोति मेति तस्माद्दध्यथ यदेनँ शृतेनैवाश्रयंस्तस्माच्छृतँ ॥८॥ स य-
थाँशुराप्यायेत । एवमाप्यायताप पाप्मानँ हरिमाणमहतैष उऽअमावास्यस्य
बन्धुः स यो हैवं विद्वान्त्संनयत्येवँ हैव प्रजया पशुभिराप्यायतेऽप पाप्मानँ
हते तस्माद्धि संनयेत् ॥९॥ तदाहुः । नासोमयाजी संनयेत्सोमाहुतिर्वाऽएषा सा-
नवरुद्धासोमयाजिनस्तस्मान्नासोमयाजी संनयेदिति ॥१०॥ तद्व समेव नयेत् । न-
न्वन्नान्तरेण शुश्रुम सोमेन नु मा याजयताथ मऽएतदाप्यायनँ संभरिष्यथेत्यब्र-
वीदिति न वै मेदं धिनोति यन्मा धिनवत्तन्मे कुरुतेति तस्माऽएतदाप्यायनँ स-
मभरंस्तस्मादप्यसोमयाजी समेव नयेत् ॥११॥ वार्त्रघ्नं वै पौर्णमासम् । इन्द्रो ह्ये-
तेन वृत्रमहन्नथैतदेव वृत्रहत्यं यदामावास्यं वृत्रँ ह्यस्माऽएतज्जघ्नुषऽआप्यायन-
मकुर्वन् ॥१२॥ तद्वाऽएतदेव वार्त्रघ्नम् । यत्पौर्णमासमथैष एव वृत्रो यच्चन्द्रमाः
स यत्रैष एतां रात्रिं न पुरस्तान्न पश्चाद्ददृशे तदेनमेतेन सर्वँ हन्ति नास्य किं
चन परिशिनष्टि सर्वँ ह वै पाप्मानँ हन्ति न पाप्मनः किं चन परिशिनष्टि
य एवमेतद्वेद ॥१३॥ तद्वैके । दृष्ट्वोपवसन्ति श्वो नोदेतेत्यदो ह्येव देवानामवि-
क्षीणमन्नं भवत्यथैभ्यो वयमित उपप्रदास्याम इति तद्धि समृद्धं यदक्षीणऽएव पूर्व-
स्मिन्नन्नेऽथापरमन्नमागच्छति स ह बह्वन्न एव भवत्यसोमयाजी तु क्षीरयाज्यदो ह्येव
सोमो राजा भवति ॥१४॥ अथ यथैव पुरा । केवलीरोषधीरश्नन्ति केवलीरपः
पिबन्ति ताः केवलमेव पयो दुह्रऽएव तदेष वै सोमो राजा देवानामन्नं यच्चन्द्र-

माः स यत्रैष एताꣳ रात्रिं न पुरस्तान्न पश्चाद्ददृशे तदिमं लोकमागच्छति स इहा-
पश्चौषधीश्च प्रविशति तदेनमद्भ्य ओषधिभ्यः संभृत्याहुतिभ्यो ऽधि जनयति स एष
आहुतिभ्यो जातः पश्चाद्ददृशे ॥ १५॥ तद्वा ऽएतत् । अविक्षीणमिव देवानामन्नाद्यं
परिप्लवते ऽविक्षीणꣳ ह वा ऽअस्यास्मिंल्लोके ऽन्नं भवत्यक्षय्यममुष्मिंल्लोके सुकृतं य
एवमेतद्वेद ॥ १६॥ तद्वा ऽएताꣳ रात्रिम् । देवेभ्यो ऽन्नाद्यं प्रच्यवते तदिमं लोकमा-
गच्छति ते देवा अकामयन्त कथं नु न इदं पुनरागच्छेत्कथं न ऽइदं परागेव न प्र-
णश्येदिति तद्य ऽएव संनयन्ति तेषामाशꣳसन्त ऽएत ऽएव नः संभृत्य प्रदास्यन्तीत्या ह
वा ऽअस्मिन्त्स्वाश्च निष्ठाश्च शꣳसन्ते य एवमेतद्वेद यो वै परमतां गच्छति तस्मि-
न्नाशꣳसन्ते ॥ १७॥ तद्वा ऽएष एवेन्द्रः । य एष तपत्यथैष एव वृत्रो यच्चन्द्रमाः
सो ऽस्यैष भ्रातृव्यजन्मेव तस्माद्यद्यपि पुरा विदूरमिवोदितो ऽथैनमेताꣳ रात्रिमुपैव
न्याप्लवते सो ऽस्य व्यात्तमापद्यते ॥ १८॥ तं ग्रसित्वोदेति । स न पुरस्तान्न पश्चा-
द्ददृशे ग्रसते ह वै द्विषन्तं भ्रातृव्यमयमेवास्ति नास्य सपत्नाः सन्तीत्याहुर्य एवमे-
तद्वेद ॥ १९॥ तं निर्धीय निरस्यति । स एष धीतः पश्चाद्ददृशे स पुनराप्यायते स
एतस्यैवान्नाद्याय पुनराप्यायते यदि ह वा ऽअस्य द्विषन्भ्रातृव्यो वणिज्यया वा
केनचिद्वा संभवत्येतस्य हैवान्नाद्याय पुनः संभवति य एवमेतद्वेद ॥ २०॥ तद्वैके ।
महेन्द्रायेति कुर्वन्तीन्द्रो वा ऽएष पुरा वृत्रस्य बधादथ वृत्रꣳ हत्वा यथा महाराजो
विजिग्यान एवं महेन्द्रो ऽभवत्तस्मान्महेन्द्रायेति तद्विन्द्रायेत्येव कुर्यादिन्द्रो वा
ऽएष पुरा वृत्रस्य बधादिन्द्रो वृत्रं जघ्निवांस्तस्माद्विन्द्रायेत्येव कुर्यात् ॥ २१॥ ब्रा-
ह्मणम् ॥ ३ [६. ४.]॥ अध्यायः ॥ ६॥ ॥

स वै पर्णशाखया वत्सानपाकरोति । तद्यत्पर्णशाखया वत्सानपाकरोति यत्र
वै गायत्री सोममच्छापतत्तदस्या ऽआहरन्त्या ऽअपादस्ताभ्यायत्य पर्णं प्रचिच्छेद गायत्र्यै
वा सोमस्य वा राज्ञस्तत्पतित्वा पर्णो ऽभवत्तस्मात्पर्णो नाम तद्यदेवात्र सोमस्य

न्यक्तं तदिहाप्यसदिति तस्मात्पर्णशाखया वत्सानपाकरोति ॥ १ ॥ तमाछिनत्ति । इषे त्वोर्जे त्वेति वृष्ट्यै तदाह यदाहेषे त्वेत्यूर्जे त्वेति यो वृष्टादूर्ग्रसो जायते तस्मै तदाह ॥ २ ॥ अथ मातृभिर्वत्सान्त्समवार्जति । स वत्सꣳ शाखयोपस्पृशति वायव स्थेत्ययं वै वायुर्योऽयं पवतऽएष वाऽइदꣳ सर्वं प्रप्याययति यदिदं किं च वर्षत्येष वाऽएतासां प्रप्याययिता तस्मादाह वायव स्थेत्युपायव स्थेत्यु हैकऽआहुरुप हि द्वितीयोऽयतीति तदु तथा न ब्रूयात् ॥ ३ ॥ अथ मातृणामेकाꣳ शाखयोपस्पृशति । वत्सेन व्याकृत्य देवो वः सविता प्रार्पयत्विति सविता वै देवानां प्रसविता सवितृप्रसूता यज्ञꣳ संभरानिति तस्मादाह देवो वः सविता प्रार्पयत्विति ॥ ४ ॥ श्रेष्ठतमाय कर्मणऽइति । यज्ञो वै श्रेष्ठतमं कर्म यज्ञाय हि तस्मादाह श्रेष्ठतमाय कर्मणऽइति ॥ ५ ॥ आप्यायध्वमघ्न्या इन्द्राय भागमिति । तद्यथैवादो देवतायै हविर्गृह्णन्नादिशत्येवमेवैतद्देवतायाऽआदिशति यदाहाप्यायध्वमघ्न्या इन्द्राय भागमिति ॥ ६ ॥ प्रजावतीरनमीवा अयक्ष्मा इति । नात्र तिरोहितमिवास्ति मा व स्तेन ईशत माघशꣳस इति मा वो नाष्ट्रा रक्षाꣳसीशतेत्येवैतदाह ध्रुवा अस्मिन्गोपतौ स्यात बह्वीरित्यनपक्रमिण्योऽस्मिन्यजमाने बह्व्यः स्यातेत्येवैतदाह ॥ ७ ॥ अथाहवनीयागारस्य वा पुरस्तात् । गार्हपत्यागारस्य वा शाखामुपगूहति यजमानस्य पशून्पाहीति तद्ब्रह्मणैवैतद्यजमानस्य पशून्परिददाति गुप्त्यै ॥ ८ ॥ तस्यां पवित्रं करोति । वसोः पवित्रमसीति यज्ञो वै वसुस्तस्मादाह वसोः पवित्रमसीति ॥ ९ ॥ अथ यवाग्वैताꣳ रात्रिमग्निहोत्रं जुहोति । आदिष्टं वाऽएतद्देवतायै हविर्भवति यत्पयः स यत्पयसा जुहुयाद्यथान्यस्यै देवतायै हविर्गृहीतं तदन्यस्यै जुहुयादेवं तत्तस्माद्यवाग्वैताꣳ रात्रिमग्निहोत्रं जुहोति जुह्वत्यग्निहोत्रमुपकॢप्तोखा भवत्यथाहोपसृष्टां प्रब्रूतादिति यदा प्राहोपसृष्टेति ॥ १० ॥ अथोखामादत्ते । द्यौरसि पृथिव्यसीत्युपस्तौत्येवैनामेतन्महयत्येव यदाह द्यौरसि पृथिव्यसी-

ति मातरिश्वनो घर्मोऽसीति यज्ञमेवैतत्करोति यथा घर्मं प्रवृञ्ज्यादेवं प्रवृणक्ति वि-
श्वधा असि परमेण धाम्ना दृꣳहस्व मा ह्वारिति दृꣳहत्येवैनामेतदशिथिलां करो-
ति मा ते यज्ञपतिर्ह्वार्षीदिति यजमानो वै यज्ञपतिस्तद्यजमानायैवैतदह्वलामा-
शास्ते ॥ ११ ॥ अथ पवित्रं निदधाति । तद्ध प्राङ्निदध्यात्प्राची हि देवानां दिगथो
ऽउदगुदीची हि मनुष्याणां दिगयं वै पवित्रं योऽयं पवते सोऽयमिमांल्लोकांस्ति-
र्यङ्ङनुपवते तस्मादुदङ्निदध्यात् ॥ १२ ॥ तद्यथैवादः । सोमꣳ राजानं पवित्रेण संपा-
वयन्त्येवमेवैतत्संपावयत्युदीचीनदशं वै तत्पवित्रं भवति येन तत्सोमꣳ राजानꣳ
संपावयन्ति तस्मादुदङ्निदध्यात् ॥ १३ ॥ तन्निदधाति । वसोः पवित्रमसीति यज्ञो वै
वसुस्तस्मादाह वसोः पवित्रमसीति शतधारꣳ सहस्रधारमित्युपस्तौत्येवैनदेतन्म-
हयत्येव यदाह शतधारꣳ सहस्रधारमिति ॥ १४ ॥ अथ वाचंयमो भवति । आ
तिसृणां दोग्धोर्वाग्वै यज्ञोऽविक्षुब्धो यज्ञं तनवाऽइति ॥ १५ ॥ तदानीयमानमभि-
मन्त्रयते । देवस्त्वा सविता पुनातु वसोः पवित्रेण शतधारेण सुप्वेति तद्यथैवादः
सोमꣳ राजानं पवित्रेण संपावयन्त्येवमेवैतत्संपावयति ॥ १६ ॥ अथाह कामधुक्ष
इति । अमूमिति सा विश्वायुरित्यथ द्वितीयां पृच्छति कामधुक्ष इत्यमूमिति सा वि-
श्वकर्मेत्यथ तृतीयां पृच्छति कामधुक्ष इत्यमूमिति सा विश्वधाया इति तद्यत्पृच्छति
वीर्याण्येवास्वेतद्दधाति तिस्रो दोग्धि त्रयो वाऽइमे लोका एभ्य एवैनदेतल्लोके-
भ्यः संभरत्यथ कामं वदति ॥ १७ ॥ अथोत्तमां दोहयित्वा । येन दोहयति पात्रेण
तस्मिन्नुदस्तोकमानीय पल्यङ्ग्य प्रत्यानयति यदत्र पयसोऽह्वायि तदिहाप्यसदिति
रसस्यो चैव सर्वत्वायेदꣳ हि यदा वर्षत्यथौषधयो जायन्तऽओषधीर्जग्ध्वापः पीत्वा
तत एष रसः संभवति तस्मादु रसस्यो चैव सर्वत्वाय तदुद्वास्यातनक्ति तीव्रीक-
रोत्येवैनदेतत्तस्मादुद्वास्यातनक्ति ॥ १८ ॥ स आतनक्ति । इन्द्रस्य त्वा भागꣳ सो-
मेनातनच्मीति तद्यथैवादो देवतायै हविर्गृह्णन्नादिशत्येवमेवैतद्देवतायाऽआदिश-

ति यदाहेन्द्रस्य त्वा भागमिति सोमेनातनच्मीति स्वदयत्येवैनदेतद्देवेभ्यः ॥१९॥ अथोदकवतोत्तानेन पात्रेणापिदधाति । नेदेनदुपरिष्टान्नाष्ट्रा रक्षाꣳस्यवमृशानिति वज्रो वा ऽआपस्तद्वज्रेणैवैतन्नाष्ट्रा रक्षाꣳस्यतो ऽपहन्ति तस्मादुदकवतोत्तानेन पात्रेणापिदधाति ॥२०॥ सो ऽपिदधाति । विष्णो हव्यꣳ रक्षेति यज्ञो वै विष्णुस्तद्यज्ञायैवैतद्धविः परिददाति गुप्त्यै तस्मादाह विष्णो हव्यꣳ रक्षेति ॥२१॥ ब्राह्मणम् ॥४ [७. १.]॥ ॥

ऋणꣳ ह वै जायते यो ऽस्ति । स जायमान एव देवेभ्य ऋषिभ्यः पितृभ्यो मनुष्येभ्यः ॥१॥ स यदेव यजेत । तेन देवेभ्य ऋणं जायते तद्येभ्य एतत्करोति यदेनान्यजते यदेभ्यो जुहोति ॥२॥ अथ यदेवानुब्रुवीत । तेनर्षिभ्य ऋणं जायते तद्येभ्य एतत्करोत्यृषीणां निधिगोप इति ह्यनूचानमाहुः ॥३॥ अथ यदेव प्रजामिच्छेत । तेन पितृभ्य ऋणं जायते तद्येभ्य एतत्करोति यदेषाꣳ संतताव्यवच्छिन्ना प्रजा भवति ॥४॥ अथ यदेव वासयेत । तेन मनुष्येभ्य ऋणं जायते तद्येभ्य एतत्करोति यदेनान्वासयते यदेभ्यो ऽशनं ददाति स य एतानि सर्वाणि करोति स कृतकर्मा तस्य सर्वमाप्तꣳ सर्वं जितꣳ ॥५॥ स येन देवेभ्य ऋणं जायते । तदेनांस्तदवदयते यद्यजते ऽथ यदग्नौ जुहोति तदेनांस्तदवदयते तस्माद्यत्किं चाग्नौ जुह्वति तदवदानं नाम ॥६॥ तद्वै चतुरवत्तं भवति । इदं वा ऽअनुवाक्याथ याज्याथ वषट्कारो ऽथ सा देवता चतुर्थी यस्यै देवतायै हविर्भवत्येवꣳ हि देवता अवदानान्यन्वायत्ता अवदानानि वा देवता अन्वायत्तान्यतिरिक्तꣳ ह तदवदानं यत्पञ्चमं कस्मा ऽउ हि तदवद्येत्तस्माच्चतुरवत्तं भवति ॥७॥ उतो पञ्चावत्तमेव भवति । पाङ्क्तो यज्ञः पाङ्क्तः पशुः पञ्चर्तवः संवत्सरस्यैषो पञ्चावत्तस्य संपद्बहुर्हैव प्रजया पशुभिर्भवति यस्यैवं विदुषः पञ्चावत्तं क्रियत ऽएतद्ध न्वेव प्रज्ञातं कौरुपाञ्चालं यच्चतुरवत्तं तस्माच्चतुरवत्तं भवति ॥८॥ स वै यावन्मात्रमिवैवावद्येत् ।

मानुषꣳ ह कुर्याद्यन्मद्ददेवयज्ञे व्यृद्धं वै तद्यज्ञस्य यन्मानुषं नेद्व्यृद्धं यज्ञे करवाणीति तस्माद्यावन्मात्रमिवैवावद्येत् ॥९॥ स आज्यस्योपस्तीर्य । द्विर्हविषोऽवदायाथोपरिष्टादाज्यस्याभिघारयति द्वे वाऽआहुती सोमाहुतिरेवान्याज्याहुतिरन्या तत एषा केवली यत्सोमाहुतिरथैषाज्याहुतिर्यद्धविर्यज्ञो यत्पशुस्तदाज्यमेवैतत्करोति तस्मादुभयत आज्यं भवत्येतद्धि जुष्टं देवानां यदाज्यं तज्जुष्टमेवैतद्देवेभ्यः करोति तस्मादुभयत आज्यं भवति ॥१०॥ असौ वाऽअनुवाक्येयं याज्या । तेऽउभे योषे तयोर्मिथुनमस्ति वषट्कार एव तद्वाऽएष एव वषट्कारो य एष तपति स उद्यन्नेवामूमध्येद्रवत्यस्तं यन्निमामधिद्रवति तदेतेन वृष्णेमां प्रजातिं प्रजायेते यैनयोरियं प्रजातिः ॥११॥ सोऽनुवाक्यामनूच्य । याज्यामनुद्रुत्य पश्चाद्वषट्करोति पश्चाद्धि परीत्य वृषा योषामधिद्रवति तदेनेऽउभे पुरस्तात्कृत्वा वृष्णा वषट्कारेणाधिद्रावयति तस्माद्ध सह वैव वषट्कारेण जुहुयाद्वषट्कृते वा ॥१२॥ देवपात्रं वाऽएष यद्वषट्कारः । तद्यथा पात्रऽउद्धृत्य प्रयच्छेदेवं तदथ यत्पुरा वषट्काराज्जुहुयाद्यथाधो भूमौ निदिग्धं तदमुया स्यादेवं तत्तस्माद्ध सह वैव वषट्कारेण जुहुयाद्वषट्कृते वा ॥१३॥ ॥ शतम् ६०० ॥ ॥ तद्यथा योनौ रेतः सिञ्चेत् । एवं तदथ यत्पुरा वषट्काराज्जुहुयाद्यथा योनौ रेतः सिक्तं तदमुया स्यादेवं तत्तस्माद्ध सह वैव वषट्कारेण जुहुयाद्वषट्कृते वा ॥१४॥ असौ वाऽअनुवाक्येयं याज्या । सा वै गायत्रीयं त्रिष्टुबसौ स वै गायत्रीमन्वाह तदमूमनुब्रुवन्नसौ ह्यनुवाक्येमामन्वाहेयꣳ हि गायत्री ॥१५॥ अथ त्रिष्टुभा यजति । तदनया यजन्नियꣳ हि याज्यामुष्या अधि वषट्करोत्यसाऽउ हि त्रिष्टुप्तदेने सयुजौ करोति तस्मादिमे संभुञ्जातेऽअनयोरनु संभोगमिमाः सर्वाः प्रजा अनु संभुञ्जते ॥१६॥ स वाऽअङ्ग्यन्निवैवानुवाक्यामनुब्रूयात् । असौ ह्यनुवाक्या बृहद्ध्यसौ बार्हतꣳ हि तद्रूपं क्षिप्रऽएव याज्यया वरेतेयꣳ हि याज्या रथन्तरꣳ हीयꣳ राथन्तरꣳ हि तद्रूपꣳ ह्वयति वाऽअनुवाक्यया

प्रयच्छति याज्यया तस्मादनुवाक्यायै रूपꣳ हुवे हवामहऽआगच्छेदं बर्हिः सीदेति यद्ध्वयति हि तया प्रयच्छति याज्यया तस्माद्याज्यायै रूपं वीहि हविर्जुषस्व हविरावृषाय स्वाद्धि पिब प्रेति यत्प्र हि तया यच्छति ॥१७॥ सा या पुरस्ताल्लक्षणा । सानुवाक्या स्यादसौ ह्यनुवाक्या तस्या अमुष्या अवस्ताल्लक्ष्म चन्द्रमा नक्षत्राणि सूर्यः ॥१८॥ अथ योपरिष्टाल्लक्षणा । सा याज्या स्यादियꣳ हि याज्या तस्या अस्या उपरिष्टाल्लक्ष्मौषधयो वनस्पतय आपोऽग्निरिमाः प्रजाः ॥१९॥ सा ह त्वेव समृद्धानुवाक्या । यस्यै प्रथमात्पदाद्देवतामभिव्याहरति सोऽएव समृद्धा याज्या यस्या ऽउत्तमात्पदाद्देवताया अधि वषट्करोति वीर्यं वै देवतऽर्चस्तदुभयत एवैतद्वीर्येण परिगृह्य यस्यै देवतायै हविर्भवति तस्यै प्रयच्छति ॥२०॥ स वै वौगिति करोति । वाग्वै वषट्कारो वाग्रेतो रेत एवैतत्सिञ्चति षडित्यृतवो वै षडृतुष्वेवैतद्रेतः सिच्यते तदृतवो रेतः सिक्तमिमाः प्रजाः प्रजनयन्ति तस्मादेवं वषट्करोति ॥२१॥ देवाश्च वाऽअसुराश्च । उभये प्राजापत्याः प्रजापतेः पितुर्दायमुपेयुरेतावेवार्धमासौ य एवापूर्यते तं देवा उपायन्योऽपक्षीयते तमसुराः ॥२२॥ ते देवा अकामयन्त । कथं न्विममपि संवृञ्जीमहि योऽयमसुराणामिति तेऽर्चन्तः श्राम्यन्तश्चेरुस्तऽएतꣳ हविर्यज्ञं ददृशुर्यद्दर्शपूर्णमासौ ताभ्यामयजन्त ताभ्यामिष्ट्वैतमपि समवृञ्जत ॥२३॥ य एषोऽसुराणामासीत् । यदा वाऽएताऽउभौ परिप्लवेतेऽथ मासो भवति मासशः संवत्सरः सर्वं वै संवत्सरः सर्वमेव तद्देवा असुराणाꣳ समवृञ्जत सर्वस्मात्सपत्नानसुरान्निरभजन्त्सर्वम्वेवैष एतत्सपत्नानाꣳ संवृङ्क्ते सर्वस्मात्सपत्नान्निर्भजति य एवमेतद्वेद ॥२४॥ स यो देवानामासीत् । स यवायुवत हि तेन देवा योऽसुराणाꣳ सोऽयवा न हि तेनासुरा अयुवत ॥२५॥ अथोऽइतरथाहुः । य एव देवानामासीत्सोऽयवा न हि तमसुरा अयुवत योऽसुराणाꣳ स यवायुवत हि तं देवाः सब्दमहः सगरा रात्रिर्यव्या मासाः सुमेकः संवत्सरः स्वेको ह वै

नामेतद्यत्सुमेक इति यवा च हि वाऽअयवा यवेतीवाथ येनैतेषाᳫं होता भवति तद्याविद्धोत्रमित्याचक्षते ॥२६॥ ब्राह्मणम् ॥५[७.२.]॥ ॥ पञ्चमः प्रपाठकः ॥

॥ कण्डिकासंख्या १२१ ॥ ॥

यज्ञेन वै देवाः । दिवमुपोदक्रामन्नथ योऽयं देवः पशूनामीष्टे स इहाहीयत तस्माद्वास्तव्य इत्याहुर्वास्तौ हि तदहीयत ॥१॥ स येनैव देवा दिवमुपोदक्रामन् । तेनोऽएवार्चन्तः श्राम्यन्तश्चेरुरथ योऽयं देवः पशूनामीष्टे य इहाहीयत ॥२॥ स ऐक्षत । अहास्य ह्यान्तर्यन्त्यु मा यज्ञादिति सोऽनूच्चक्राम स आयतयोत्तरत उपोत्पेदे स एष स्विष्टकृतः कालः ॥३॥ ते देवा अब्रुवन् । मा विस्राक्षीरिति ते वै मा यज्ञान्मान्तर्गताहुतिं मे कल्पयतेति तथेति स समवृहत्स नास्यत्स न कं चनाहिनत् ॥४॥ ते देवा अब्रुवन् । यावन्ति नो हवीᳫंषि गृहीतान्यभूवन्त्सर्वेषां तेषाᳫं हुतमुपजानीत यथास्माऽआहुतिं कल्पयामेति ॥५॥ तेऽध्वर्युमब्रुवन् । यथापूर्वᳫं हवीᳫंष्यभिघारयैकस्माऽअवदानाय पुनराप्याययायातयामानि कुरु तत एकैकमवदानमवद्येति ॥६॥ सोऽध्वर्युः । यथापूर्वᳫं हवीᳫंष्यभ्यघारयदेकस्माऽअवदानाय पुनराप्याययदयातयामान्यकरोत्तत एकैकमवदानमवाद्यत्तस्माद्वास्तव्य इत्याहुर्वास्तु हि तद्यज्ञस्य यद्धुतेषु हविःषु तस्माद्यस्यै कस्यै च देवतायै हविर्गृह्यते सर्वत्रैव स्विष्टकृदन्वाभक्तः सर्वत्र ह्येवैनं देवा अन्वाभजन् ॥७॥ तद्वाऽअग्नयऽइति क्रियते । अग्निर्वै स देवस्तस्यैतानि नामानि शर्व इति यथा प्राच्या आचक्षते भव इति यथा बाहीकाः पशूनां पती रुद्रोऽग्निरिति तान्यस्याशान्तान्येवेतराणि नामान्यग्निरित्येव शान्ततमं तस्मादग्नयऽइति क्रियते स्विष्टकृतऽइति ॥८॥ ते होचुः । यत्त्वय्यमुत्र सत्ययद्माद्धि तन्नः स्विष्टं कुर्विति तदेभ्यः स्विष्टमकरोत्तस्मात्स्विष्टकृतऽइति ॥९॥ सोऽनुवाक्यामनूच्य संपश्यति । ये तथाग्निᳫं स्विष्टकृतमयाडग्निरग्नेः प्रिया धामानीति तदाग्नेयमाज्यभागमाहायाट्सोमस्य

प्रिया धामानीति तत्सौम्यमाज्यभागमाहाथाऽग्नेः प्रिया धामानीति तस्य एष उभ-
यत्राच्युत आग्नेयः पुरोडाशो भवति तमाह ॥१०॥ अथ यथादेवतम् । अयाड्दे-
वानामाज्यपानां प्रिया धामानीति तत्प्रयाजानुयाजानाह प्रयाजानुयाजा वै देवा
आज्यपा यक्षदग्नेर्होतुः प्रिया धामानीति तदग्निꣳ होतारमाह तदस्माऽएतां देवा
आकुतिं कल्पयित्वाथैनेनैतद्भूयः समशाम्यन्प्रियऽएनं धामन्नुपाह्वयन्त तस्मादेवꣳ सं-
पश्यति ॥११॥ तद्धैके । देवतां पूर्वां कुर्वन्त्ययाट्कारादग्नेरयाट्सोमस्यायाडिति तदु
तथा न कुर्याद्विलोम ह ते यज्ञं कुर्वन्ति ये देवतां पूर्वां कुर्वन्त्ययाट्कारादिदꣳ हि
प्रथममभिव्याहरन्नयाट्कारमेवाभिव्याहरति तस्मादयाट्कारमेव पूर्वं कुर्यात् ॥१२॥
यक्षत्स्वं महिमानमिति । यत्र वाऽअदो देवता आवाहयति तदपि स्वं महिमा-
नमावाहयति तदतः प्राङ्नेव किं चन स्वाय महिम्नऽइति क्रियते तदत्र तं प्रीणा-
ति तथो हास्यैषोऽमोघायावाहितो भवति तस्मादाह यक्षत्स्वं महिमानमिति
॥१३॥ आ यजतामेज्या इष इति । प्रजा वाऽइषस्ता एवैतद्यायजूकाः करोति ता
इमाः प्रजा यजमाना अर्चन्त्यः श्राम्यन्त्यश्चरन्ति ॥१४॥ सोऽअध्वरा जातवेदा जुष-
ताꣳ हविरिति । तद्यज्ञस्यैवैतत्समृद्धिमाशास्ते यद्धि देवा हविर्जुषन्ते तेन हि म-
हज्जयति तस्मादाह जुषताꣳ हविरिति ॥१५॥ तद्यदेतेऽअत्र । याज्यानुवाक्ये
ऽअवक्लृप्ततमे भवतस्तृतीयसवनं वै स्विष्टकृद्वैश्वदेवं वै तृतीयसवनं पिप्रीहि दे-
वाँ२॥ऽउशतो यविष्ठेति तदनुवाक्यायै वैश्वदेवमग्ने यदद्य विशोऽअध्वरस्य होत-
रिति तद्याज्यायै वैश्वदेवं तद्यदेतेऽएवꣳरूपे भवतस्तेनोऽएते तृतीयसवनस्य रूपं
तस्माद्वाऽएतेऽअत्र याज्यानुवाक्येऽअवक्लृप्ततमे भवतः ॥१६॥ ते वै त्रिष्टुभौ भ-
वतः । वास्तु वाऽएतद्यज्ञस्य यत्स्विष्टकृद्वीर्यं वै वास्त्विन्द्रियं वीर्यं त्रिष्टुबिन्द्रि-
यमेवैतद्वीर्यं वास्तौ स्विष्टकृति दधाति तस्मात्त्रिष्टुभौ भवतः ॥१७॥ उतोऽअनु-
ष्टुभाविव भवतः । वास्त्वनुष्टुब्वास्तु स्विष्टकृद्वास्तावेवैतद्वास्तु दधाति पशुकं वै

वास्तु पिस्यति ह प्रजया पशुभिर्यस्यैवं विदुषोऽनुष्टुभौ भवतः ॥१८॥ तद्ध ह भाल्लवेयः । अनुष्टुभमनुवाक्यां चक्रे त्रिष्टुभं याज्यामेतदुभयं परिगृह्णामीति स रथात्पपात स पतित्वा बाहुमपि शश्रे स परिममृशे यत्किमकरं तस्मादिदमापदिति स हैतदेव मेने यद्विलोम यज्ञेऽकरमिति तस्मान्न विलोम कुर्यात्सहच्छन्दसावेव स्यातामुभे वैवानुष्टुभाऽउभे वा त्रिष्टुभौ ॥१९॥ स वाऽउत्तरार्धादवद्यति । उत्तरार्धे जुहोत्येषा ह्येतस्य देवस्य दिक्तस्मादुत्तरार्धादवद्यत्युत्तरार्धे जुहोत्येतस्यै वै दिश उदपद्यत तं तत एवाशमयंस्तस्मादुत्तरार्धादवद्यत्युत्तरार्धे जुहोति ॥२०॥ स वाऽअभ्यर्धऽ-इवेतराभ्य आहुतिभ्यो जुहोति । इतरा आहुतीः पशवोऽनुप्रजायन्ते रुद्रियः स्विष्टकृद्रुद्रियेण पशून्प्रसजेद्यदितराभिराहुतिभिः सꣳसृजेत्तेऽस्य गृह्याः पशव उपमूर्यमाणा ईयुस्तस्मादभ्यर्धऽ-इवेतराभ्य आहुतिभ्यो जुहोति ॥२१॥ एष वै सयज्ञः । येन तद्देवा दिवमुपोदक्रामन्नेष आहवनीयोऽथ य इहाहीयत स गार्हपत्यस्तस्मादेतं गार्हपत्यात्प्राञ्चमुद्धरन्ति ॥२२॥ तं वाऽअष्टासु विक्रमेष्वादधीत । अष्टाक्षरा वै गायत्री गायत्र्यैवैतद्दिवमुपोत्क्रामति ॥२३॥ एकादशस्वादधीत । एकादशाक्षरा वै त्रिष्टुप्त्रिष्टुभैवैतद्दिवमुपोत्क्रामति ॥२४॥ द्वादशस्वादधीत । द्वादशाक्षरा वै जगती जगत्यैवैतद्दिवमुपोत्क्रामति नात्र मात्रास्ति यत्रैव स्वयं मनसा मन्येत तदादधीत स यद्याऽअप्यल्पकमिव प्राञ्चमुद्धरति तेनैव दिवमुपोत्क्रामति ॥२५॥ तदाहुः । आहवनीये हवीꣳषि श्रपयेयुरतो वै देवा दिवमुपोदक्रामंस्तेनोऽएवार्चन्तः श्राम्यन्तश्चेरुस्तस्मिन्हवीꣳषि श्रपयाम तस्मिन्यज्ञं तनवामहाऽइत्यपस्खल-इव ह स हविषां यद्गार्हपत्ये श्रपयेयुर्यज्ञ आहवनीयो यज्ञे यज्ञं तनवामहाऽइति ॥२६॥ उतो गार्हपत्यऽएव श्रपयन्ति । आहवनीयो वाऽएष न वाऽएष तस्मै यदस्मिन्नशृतꣳ श्रपयेयुस्तस्मै वाऽएष यदस्मिꣳहुतं जुहुयुरित्यतो यतरथा कामयेत तथा कुर्यात् ॥२७॥ स हैष यज्ञ उवाच । नग्नताया वै बिभेमीति

का तेऽनम्नेत्यभित एव मा परिस्तृणीयुरिति तस्मादेतदग्निमभितः परिस्तृणन्ति तृष्णाया वै बिभेमीति का ते तृप्तिरिति ब्राह्मणस्यैव तृप्तिमनुतृप्येयमिति तस्मात्सꣳस्थिते यज्ञे ब्राह्मणं तर्पयितवै ब्रूयाद्यज्ञमेवैतत्तर्पयति ॥२८॥ ॥ ब्राह्मणम् ॥ १ [७. ३.] ॥ ॥

प्रजापतिर्ह वै स्वां दुहितरमभिदध्यौ । दिवं वोषसं वा मिथुन्येनया स्यामिति ताꣳ संबभूव ॥१॥ तद्वै देवानामाग आस । य इत्थꣳ स्वां दुहितरमस्माकꣳ स्वसारं करोतीति ॥२॥ ते ह देवा ऊचुः । योऽयं देवः पशूनामीष्टेऽतिसंधं वाऽअयं चरति य इत्थꣳ स्वां दुहितरमस्माकꣳ स्वसारं करोति विध्येममिति तꣳ रुद्रोऽभ्यायत्य विव्याध तस्य सामि रेतः प्रचस्कन्द तथेन्नूनं तदास ॥३॥ तस्मादेतदृषिणाभ्यनूक्तम् । पिता यत्स्वां दुहितरमधिष्कन् क्ष्मया रेतः संजग्मानो निषिञ्चदिति तदाग्निमारुतमित्युक्थं तस्मिंस्तद्व्याख्यायते यथा तद्देवा रेतः प्राजनयंस्तेषां यदा देवानां क्रोधो व्यैदथ प्रजापतिमभिषज्यंस्तस्य तꣳ शल्यं निरकृन्तन्स वै यज्ञ एव प्रजापतिः ॥४॥ ते होचुः । उपजानीत यथेदं नामुयासत्कनीयो ह्याहुतेर्यथेदꣳ स्यादिति ॥५॥ ते होचुः । भगायैनद्दक्षिणत आसीनाय परिहरत तद्भगः प्राशिष्यति तद्यथाहुतमेवं भविष्यतीति तद्भगाय दक्षिणत आसीनाय पर्याजह्रुस्तद्भगोऽवेक्षां चक्रे तस्याक्षिणी निर्ददाह तथेन्नूनं तदास तस्मादाहुरन्धो भग इति ॥६॥ ते होचुः । नो न्वेवात्राशमत्पूष्णऽएनत्परिहरतेति तत्पूष्णे पर्याजह्रुस्तत्पूषा प्राश तस्य दतो निर्जघान तथेन्नूनं तदास तस्मादाहुरदन्तकः पूषेति तस्माद्यं पूष्णे चरुं कुर्वन्ति प्रपिष्टानामेव कुर्वन्ति यथादन्तकायैवम् ॥७॥ ते होचुः । नो न्वेवात्राशमद्बृहस्पतयऽएनत्परिहरतेति तद्बृहस्पतये पर्याजह्रुः स बृहस्पतिः सवितारमेव प्रसवायोपाधावत्सविता वै देवानां प्रसवितेदं मे प्रसुवेति तदस्मै सविता प्रसविता प्रासुवत्तदेनꣳ सवितृप्रसूतं नाहिनत्ततोऽर्वाचीनꣳ शान्तं तदेतन्निदानेन

यत्प्राशित्रꣳ ॥८॥ स यत्प्राशित्रमवद्यति । यदेवात्राविद्धं यज्ञस्य यद्रुद्रियं तदेवैतन्निर्मिमीतेऽथाप उपस्पृशति शान्तिरापस्तदद्भिः शमयत्यथेडां पशूंत्समवद्यति ॥९॥ स वै यावन्मात्रमिवैवावद्येत् । तथा शल्यः प्रच्यवते तस्माद्यावन्मात्रमिवैवावद्येदन्यतरतऽआज्यं कुर्यादधस्ताद्वोपरिष्टाद्वा तथा स्वदन्निःसरणवद्भवति तथा निस्रवति तस्मादन्यतरत आज्यं कुर्यादधस्ताद्वोपरिष्टाद्वा ॥१०॥ स आज्यस्योपस्तीर्य । द्विर्हविषोऽवदायाथोपरिष्टादाज्यस्याभिघारयति तद्यथैव यज्ञस्यावदानमेवमेतत् ॥११॥ तन्न पूर्वेण परिहरेत् । पूर्वेण हैके परिहरन्ति पुरस्ताद्धि प्रत्यञ्चो यजमानं पशव उपतिष्ठन्ते रुद्रियेण ह पशून्प्रसजेद्यत्पूर्वेण परिहरेत्तेऽस्य गृह्याः पशव उपमूर्यमाणा ईयुस्तस्मादित्येव तिर्यक्प्रजिह्वीत तथा ह रुद्रियेण पशून्न प्रसजति तिर्यगेवैनं निर्मिमीते ॥१२॥ तत्प्रतिगृह्णाति । देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रतिगृह्णामीति ॥१३॥ तद्यथैवादो बृहस्पतिः । सवितारं प्रसवायोपाधावत्सविता वै देवाना प्रसवितेदं मे प्रसुवेति तदस्मै सविता प्रसविता प्रासुवत्तदेनꣳ सवितृप्रसूतं नाहिनदेवमेवैष एतत्सवितारमेव प्रसवायोपधावति सविता वै देवानां प्रसवितेदं मे प्रसुवेति तदस्मै सविता प्रसविता प्रसौति तदेनꣳ सवितृप्रसूतं न हिनस्ति ॥१४॥ तत्प्राश्नाति । अग्नेष्ट्वास्येन प्राश्नामीति न वाऽअग्निं किं चन हिनस्ति तथो हैनमेतन्न हिनस्ति ॥१५॥ तन्न दद्भिः खादेत् । नेन्मऽइदꣳ रुद्रियं दतो हिनसदिति तस्मान्न दद्भिः खादेत् ॥१६॥ अथाप आचामति । शान्तिरापस्तदद्भिः शान्त्या शमयतेऽथ परिक्षाल्य पात्रम् ॥१७॥ अथास्मै ब्रह्मभागं पर्याहरन्ति । ब्रह्मा वै यज्ञस्य दक्षिणत आस्तेऽभिगोप्ता स एतं भागं प्रतिविदान आस्ते यत्प्राशित्रं तदस्मै पर्याहार्षुस्तत्प्राशीदथ यमस्मै ब्रह्मभागं पर्याहरन्ति तेन भागी स यदत ऊर्ध्वमसꣳस्थितं यज्ञस्य तदभिगोपायति तस्माद्वाऽअस्मै ब्रह्मभागं पर्याहरन्ति ॥१८॥ स वै वाचंयम एव स्यात् । ब्रह्मन्प्रस्थास्या-

मीत्येतस्माद्वचसो विवृहन्ति वाऽएते यज्ञं ज्ञण्वन्ति ये मध्ये यज्ञस्य पाकयज्ञियये-डया चरन्ति ब्रह्मा वाऽऋत्विजां भिषक्तमस्तद्ब्रह्मा संदधाति न ह संदध्याद्यद्वावद्यमान आसीत तस्माद्वाचंयम एव स्यात् ॥१९॥ स यदि पुरा मानुषीं वाचं व्याहरेत् । तत्रो वैष्णवीमृचं वा यजुर्वा जपेद्यज्ञो वै विष्णुस्तद्यज्ञं पुनरारभते तस्यो हैषा प्रायश्चित्तिः ॥२०॥ स यत्राह ब्रह्मन्प्रस्थास्यामीति तद्ब्रह्मा जपत्येतं ते देव सवितर्यज्ञं प्राहुरिति तत्सवितारं प्रसवायोपधावति स हि देवानां प्रसविता बृहस्पतये ब्रह्मणऽइति बृहस्पतिर्वै देवानां ब्रह्मा तद्य एव देवानां ब्रह्मा तस्माऽएवैतत्प्राह तस्मादाह बृहस्पतये ब्रह्मणऽइति तेन यज्ञमव तेन यज्ञपतिं तेन मामवेति नात्र तिरोहितमिवास्ति ॥२१॥ मनो जूतिर्जुषतामाज्यस्येति । मनसा वाऽइदꣳ सर्वमाप्तं तन्मनसैवैतत्सर्वमाप्नोति बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं यज्ञꣳ समिमं दधात्विति यद्विवृढं तत्संदधाति विश्वे देवास इह मादयन्तामिति सर्वं वै विश्वे देवाः सर्वेणैवैतत्संदधाति स यदि कामयेत ब्रूयात्प्रतिष्ठेति यद्यु कामयेतापि नाद्रियेत ॥२२॥ ब्राह्मणम् ॥ २. [७. ४.] ॥ अध्यायः ॥ ७॥ ॥

मनवे ह वै प्रातः । अवनेग्यमुदकमाजह्रुर्यथेदं पाणिभ्यामवनेजनायाहरन्त्येवं तस्यावनेनिजानस्य मत्स्यः पाणीऽआपेदे ॥१॥ स हास्मै वाचमुवाद । बिभृहि मा पारयिष्यामि त्वेति कस्मान्मा पारयिष्यसीत्यौघ इमाः सर्वाः प्रजा निर्वोढा ततस्त्वा पारयितास्मीति कथं ते भृतिरिति ॥२॥ स होवाच । यावद्वै क्षुल्लका भवामो बह्वी वै नस्तावन्नाष्ट्रा भवत्युत मत्स्य एव मत्स्यं गिलति कुम्भ्यां माग्रे बिभरासि स यदा तामतिवर्धाऽअथ कर्षूं खात्वा तस्यां मा बिभरासि स यदा तामतिवर्धाऽअथ मा समुद्रमभ्यवहरासि तर्हि वाऽअतिनाष्ट्रो भवितास्मीति ॥३॥ शश्वद्ध झष आस । स हि ज्येष्ठं वर्धतेऽथेतिथीꣳ समां तदौघ आगन्ता तन्मा नावमुपकल्प्योपासासै स औघऽउत्थिते नावमापद्यासै ततस्त्वा पारयितास्मीति ॥४॥

तमेवं भृत्वा समुद्रमभ्यवजहार । स यतिथीं तत्समां परिदिदेश ततिथीꣳ समां नावमुपकल्प्योपासां चक्रे स औघऽउत्थिते नावमापेदे तꣳ स मत्स्य उपन्यापुप्लुवे तस्य शृङ्गे नावः पाशं प्रतिमुमोच तेनैतमुत्तरं गिरिमतिदुद्राव ॥५॥ स होवाच । अपीपरं वै त्वा वृक्षे नावं प्रतिबध्नीष्व तं तु त्वा मा गिरौ सन्तमुदकमन्तश्छैत्सीद्यावदुदकꣳ समवायात्तावत्तावदन्ववसर्पासीति स ह तावत्तावदेवान्ववससर्प तदप्येतदुत्तरस्य गिरेर्मनोरवसर्पणमित्यौघो ह ताः सर्वाः प्रजा निरुवाहाथेह मनुरेवैकः परिशिशिषे ॥६॥ सोऽर्चञ्छ्राम्यंश्चचार प्रजाकामः । तत्रापि पाकयज्ञेनेजे स घृतं दधि मस्त्वामिक्षामित्यप्सु जुहवां चकार ततः संवत्सरे योषित्सम्बभूव सा ह पिब्दमानेवोदियाय तस्यै ह स्म घृतं पदे संतिष्ठते तया मित्रावरुणौ संजग्माते ॥७॥ ताꣳ होचतुः कासीति । मनोर्दुहितेत्यावयोर्ब्रूष्वेति नेति होवाच य एव मामजीजनत तस्यैवाहमस्मीति तस्यामपित्वमीषाते तद्वा जज्ञौ तद्वा न जज्ञावति त्वेवेयाय सा मनुमाजगाम ॥८॥ ताꣳ ह मनुरुवाच कासीति । तव दुहितेति कथं भगवति मम दुहितेति या अमूरप्स्वाहुतीरहौषीर्घृतं दधि मस्त्वामिक्षां ततो मामजीजनथाः साशीरस्मि तां मा यज्ञेऽवकल्पय यज्ञे चेद्वै मावकल्पयिष्यसि बहुः प्रजया पशुभिर्भविष्यसि याममुया कां चाशिषमाशासिष्यसे सा ते सर्वा समर्धिष्यतऽइति तामेतन्मध्ये यज्ञस्यावाकल्पयन्मध्यꣳ ह्येतद्यज्ञस्य यदन्तरा प्रयाजानुयाजान् ॥९॥ तयार्चञ्छ्राम्यंश्चचार प्रजाकामः । तयेमां प्रजातिं प्रजज्ञे येयं मनोः प्रजातिर्याम्वेनया कां चाशिषमाशास्त सास्मै सर्वा समार्ध्यत ॥१०॥ सैषा निदानेन यदिडा । स यो हैवं विद्वानिडया चरत्येताꣳ हैव प्रजातिं प्रजायते यां मनुः प्राजायत याम्वेनया कां चाशिषमाशास्ते सास्मै सर्वा समृध्यते ॥११॥ सा वै पञ्चावत्ता भवति । पशवो वाऽइडा पाङ्क्ता वै पशवस्तस्मात्पञ्चावत्ता भवति ॥१२॥ स समवदायेडाम् । पूर्वार्धं पुरोडाशस्य प्रशीर्य पुरस्ताद्ध्रुवायै निदधाति ताꣳ होत्रे

प्रदाय दक्षिणात्येति ॥१३॥ स होतुरिड निलिम्पति । तद्धोतौष्ठयोर्निलिम्पते मनसस्पतिना ते हुतस्याश्नामीषे प्राणायेति ॥१४॥ अथ होतुरिड निलिम्पति । तद्धोतौष्ठयोर्निलिम्पते वाचस्पतिना ते हुतस्याश्नाम्यूर्जऽउदानायेति ॥१५॥ एतद्ध वै मनुर्बिभयां चकार । इदं वै मे तनिष्ठं यज्ञस्य यदियमिडा पाकयज्ञिया यद्वै मऽइह रक्षाꣳसि यज्ञं न हिꣳस्युरिति तामेतत्पुरा रक्षोभ्यः पुरा रक्षोभ्य इत्येव प्रापयत तथोऽएवैनामेष एतत्पुरा रक्षोभ्यः पुरा रक्षोभ्य इत्येव प्रापयतेऽथ यत्प्रत्यक्षं न प्राश्नाति नेदनुपहूतां प्राश्नामीत्येतदेवैनां प्रापयते यदोष्ठयोर्निलिम्पते ॥१६॥ अथ होतुः पाणौ समवद्यति । समवत्तामेव सतीं तदेनां प्रत्यक्षꣳ होतरि श्रयति तयात्मंकृतया होता यजमानायाशिषमाशास्ते तस्माद्धोतुः पाणौ समवद्यति ॥१७॥ अथोपाꣳशूपह्वयते । एतद्ध वै मनुर्बिभयां चकारेदं वै मे तनिष्ठं यज्ञस्य यदियमिडा पाकयज्ञिया यद्वै मऽइह रक्षाꣳसि यज्ञं न हन्युरिति तामेतत्पुरा रक्षोभ्यः पुरा रक्षोभ्य इत्येवोपाꣳशूपाह्वयत तथोऽएवैनामेष एतत्पुरा रक्षोभ्यः पुरा रक्षोभ्य इत्येवोपाꣳशूपह्वयते ॥१८॥ स उपह्वयते । उपहूतꣳ रथन्तरꣳ सह पृथिव्योप माꣳ रथन्तरꣳ सह पृथिव्या ह्वयतामुपहूतं वामदेव्यꣳ सहान्तरिक्षेणोप मां वामदेव्यꣳ सहान्तरिक्षेण ह्वयतामुपहूतं बृहत्सह दिवोप मां बृहत्सह दिवा ह्वयतामिति तदेतामेवैतदुपह्वयमान इमांश्च लोकानुपह्वयतऽएतानि च सामानि ॥१९॥ उपहूता गावः सहऽर्षभा इति । पशवो वाऽइडा तदेनां परोऽक्षमुपह्वयते सहऽर्षभा इति समिथुनामेवैनामेतदुपह्वयते ॥२०॥ उपहूता सप्तहोत्रेति । तदेनाꣳ सप्तहोत्रा सौम्येनाधरेणोपह्वयते ॥२१॥ उपहूतेडा ततुरिरिति । तदेनां प्रत्यक्षमुपह्वयते ततुरिरिति सर्वꣳ ह्येषा पाप्मानं तरति तस्मादाह ततुरिरिति ॥२२॥ उपहूतः सखा भक्ष इति । प्राणो वै सखा भक्षस्तत्प्राणमुपह्वयतऽउपहूतꣳ हेगिति तच्छरीरमुपह्वयते तत्सर्वामुपह्वयते ॥२३॥ अथ प्र-

तिपद्यते । इडोपहूतोपहूतेडोपो३ऽअस्माँ२॥ऽइडा ह्वयतामिडोपहूतेति तदुपहूतामेवैनामेतत्सतीं प्रत्यक्षमुपह्वयते या वै सासीद्गौर्वै सासीच्चतुष्पदी वै गौस्तस्माच्चतुरुपह्वयते ॥२४॥ स वै चतुरुपह्वयमानः । अथ नानेवोपह्वयतेऽजामितायै जामि ह कुर्याद्यदिडोपहूतेडोपहूतेत्येवोपह्वयेतोपहूतेडेति वेडोपहूतेति तदर्वाचीमुपह्वयतऽउपहूतेडेति तत्पराचीमुपो३ऽअस्माँ२॥ऽइडा ह्वयतामिति तदात्मानं चैवैनन्नान्तरेत्यन्यथेव च भवतीडोपहूतेति तत्पुनरर्वाचीमुपह्वयते तदर्वाचीं चैवैनामेतत्पराचीं चोपह्वयते ॥२५॥ मानवी घृतपदीति । मनुर्ह्येतामग्रेऽजनयत तस्मादाह मानवीति घृतपदीति यद्वास्यै घृतं पदे समतिष्ठत तस्मादाह घृतपदीति ॥२६॥ उत मैत्रावरुणीति । यदेव मित्रावरुणाभ्याᳪं समगच्छत स एव मैत्रावरुणो न्यङ्गो ब्रह्म देवकृतोपहूतेति ब्रह्म ह्येषां देवकृतोपहूतोपहूता दैव्या अध्वर्यव उपहूता मनुष्या इति तद्दैवांश्चैवाध्वर्यूनुपह्वयते ये च मानुषा वत्सा वै दैव्या अध्वर्यवोऽथ यऽइतरे ते मानुषाः ॥२७॥ यऽइमं यज्ञमवान्ये च यज्ञपतिं वर्धानिति । एते वै यज्ञमवन्ति ये ब्राह्मणाः शुश्रुवाᳪंसोऽनूचाना एते ह्येनं तन्वतऽएतऽएनं जनयन्ति तदु तेभ्यो निह्नुते वत्सा उ वै यज्ञपतिं वर्धन्ति यस्य ह्येते भूयिष्ठा भवन्ति स हि यज्ञपतिर्वर्धते तस्मादाह ये च यज्ञपतिं वर्धानिति ॥२८॥ उपहूते द्यावापृथिवी पूर्वजेऽऋतावरी देवी देवपुत्रेऽइति । तदिमे द्यावापृथिवीऽउपह्वयते ययोरिदᳪं सर्वमध्युपहूतोऽयं यजमान इति तद्यजमानमुपह्वयते तद्यदत्र नाम न गृह्णाति परोऽक्षᳪं ह्यत्राशीर्यदिडायां मानुषᳪं ह कुर्याद्यन्नाम गृह्णीयाद्व्यृद्धं वै तद्यज्ञस्य यन्मानुषं नेद्व्यृद्धं यज्ञे करवाणीति तस्मान्न नाम गृह्णाति ॥२९॥ उत्तरस्यां देवयज्यायामुपहूत इति । तदस्माऽएतज्जीवातुमेव परोऽक्षमाशास्ते जीवन्हि पूर्वमिष्ट्वाथापरं यजते ॥३०॥ तदस्मा एतत्प्रजामेव परोऽक्षमाशास्ते । यस्य हि प्रजा भवत्यमुं लोकमात्मनैत्यथास्मिँल्लोके प्रजा यजते

तस्मात्प्रजोत्तरा देवपत्न्या ॥३१॥ तदस्माऽएतत्पशूनेव परोऽक्षमाशास्ते । यस्य हि पशवो भवन्ति स पूर्वमिष्ट्वाथापरं यजते ॥३२॥ भूयसि हविष्करणऽउपह्वत इति । तदस्मा एतज्जीवातुमेव परोऽक्षमाशास्ते जीवन्हि पूर्वमिष्ट्वाथ भूयो-भूय एव हविष्करोति ॥३३॥ तदस्माऽएतत्प्रजामेव परोऽक्षमाशास्ते । यस्य हि प्रजा भवत्येक आत्मना भवत्यथोत दशधा प्रजया हविष्क्रियते तस्मात्प्रजा भूयो हविष्करणम् ॥३४॥ तदस्मा एतत्पशूनेव परोऽक्षमाशास्ते । यस्य हि पशवो भवन्ति स पूर्वमिष्ट्वाथ भूयो-भूय एव हविष्करोति ॥३५॥ एषा वा आशीः । जीवेयं प्रजा मे स्याच्छ्रियं गच्छेयमिति तद्यत्पशूनाशास्ते तच्छ्रियमाशास्ते श्रीर्हि पशवस्तदेताभ्यामेवैतदाशीर्भ्यां सर्वमाप्तं तस्माद्वाऽएतेऽअत्र द्वेऽआशिषौ क्रियेते ॥३६॥ देवा मऽइदं हविर्जुषन्तामिति । तस्मिन्नुपह्वत इति तद्यज्ञस्यैवैतत्समृद्धिमाशास्ते यद्धि देवा हविर्जुषन्ते तेन हि महज्जयति तस्मादाह जुषन्तामिति ॥३७॥ ॥ शतम् ७०० ॥ ॥ तां वै प्राश्नन्त्येव । नाग्नौ जुह्वति पशवो वाऽइडा नेत्पशूनग्नौ प्रवृणजामिति तस्मान्नाग्नौ जुह्वति ॥३८॥ प्राणेष्वेव हूयते । होतरि त्वद्यजमाने त्वदध्वर्यौ त्वदथ यत्पूर्वार्धं पुरोडाशस्य प्रशीर्य पुरस्ताद्ध्रुवायै निदधाति यजमानो वै ध्रुवा तद्यजमानस्य प्राशितं भवत्यथ यत्प्रत्यक्षं न प्राश्नाति नेदसंस्थिते यज्ञे प्राश्नानीत्येतदेवास्य प्राशितं भवति सर्वे प्राश्नन्ति सर्वेषु मे हुतासदिति पञ्च प्राश्नन्ति पशवो वाऽइडा पाङ्क्ता वै पशवस्तस्मात्पञ्च प्राश्नन्ति ॥३९॥ अथ यत्र प्रतिपद्यते । तच्चतुर्धा पुरोडाशं कृत्वा बर्हिषदं करोति तदत्र पितॄणां भाजनेन चतस्रो वाऽअवान्तरदिशोऽवान्तरदिशो वै पितरस्तस्माच्चतुर्धा पुरोडाशं कृत्वा बर्हिषदं करोति ॥४०॥ अथ यत्राहोपह्वते द्यावापृथिवीऽइति । तदग्नीधऽआदधाति तदग्नीत्प्राश्नात्युपह्वता पृथिवी मातोप मां पृथिवी माता ह्वयतामग्निराग्नीध्रात्स्वाहोपह्वतो द्यौष्पितोप मां द्यौष्पिता ह्वयतामग्निराग्नीध्रात्स्वाहेति द्यावापृथिव्यो वा

ऽएष यदाग्नीध्रस्तस्मादेवं प्राश्नाति ॥४१॥ अथ यत्राशिषमाशास्ते । तज्जपति मयीदमिन्द्र इन्द्रियं दधात्वस्मान्रायो मघवानः सचन्ताम् अस्माकꣳ सन्त्वाशिषः सत्या नः सन्त्वाशिष इत्याशिषामेवैष प्रतिग्रहस्तथ्या एवात्रऽर्त्विजो यजमानायाशिष आशासते ता एवैतत्प्रतिगृह्यात्मन्कुरुते ॥४२॥ अथ पवित्रयोर्मार्जयन्ते । पाकयज्ञियेयेव वाऽएतदिडयाचारिषुः पवित्रपूता यदत ऊर्ध्वमसꣳस्थितं यज्ञस्य तत्तनवामहाऽइति तस्मात्पवित्रयोर्मार्जयन्ते ॥४३॥ अथ ते पवित्रे प्रस्तरेऽपिसृजति । यजमानो वै प्रस्तरः प्राणोदानौ पवित्रे यजमाने तत्प्राणोदानौ दधाति तस्मात्ते पवित्रे प्रस्तरेऽपिसृजति ॥४४॥ ब्राह्मणम् ॥३ [८. १.]॥ ॥

ते वाऽएतेऽउल्मुकेऽउदूहन्ति । अनुयाजेभ्यो यातयामेव वाऽएतदग्निर्भवति देवेभ्यो हि यज्ञमूहिवान्भवत्ययातयाम्न्यनुयाजांस्तनवामहाऽइति तस्माद्वाऽएते ऽउल्मुकेऽउदूहन्ति ॥१॥ ते पुनरनुसꣳस्पर्शयन्ति । पुनरेवैतदग्निमाप्याययन्त्ययातयामानं कुर्वन्त्ययातयाम्नि यदत ऊर्ध्वमसꣳस्थितं यज्ञस्य तत्तनवामहाऽइति तस्मात्पुनरनुसꣳस्पर्शयन्ति ॥२॥ अथ समिधमभ्यादधाति । समिन्द्धऽएवैनमेतत्समिद्धे यदत ऊर्ध्वमसꣳस्थितं यज्ञस्य तत्तनवामहाऽइति तस्मात्समिधमभ्यादधाति ॥३॥ ताꣳ होतानुमन्त्रयते । एषा तेऽअग्ने समित्तया वर्धस्व चा च प्यायस्व वर्धिषीमहि च वयमा च प्यासिषीमहीति तद्यथैवादः समिध्यमानायान्वाहैवमेवैतदन्वाह तदेतद्धोतुः कर्म स यदि मन्येत न होता वेदेत्यपि स्वयमेव यजमानोऽनुमन्त्रयेत ॥४॥ अथ संमार्ष्टि । युनक्त्येवैनमेतद्युक्तो यदत ऊर्ध्वमसꣳस्थितं यज्ञस्य तद्वहादिति तस्मात्संमार्ष्टि सकृत्सकृत्संमार्ष्टि त्रिस्त्रिर्वाऽअग्रे देवेभ्यः संमृजन्ति नेत्तथा करवाम यथा देवेभ्य इति तस्मात्सकृत्सकृत्संमार्ष्ट्यजामितायै जामि ह कुर्याद्यत्त्रिः पूर्वं त्रिरपरं तस्मात्सकृत्सकृत्संमार्ष्टि ॥५॥ स संमार्ष्टि । अग्ने वाजजिद्वाजं त्वा ससृवाꣳसं वाजजितꣳ संमार्ज्मीति सरिष्यन्तमिति वाऽअग्रऽआह सरिष्यन्निव

हि तर्हि भवत्यथात्र ससृवाꣳसमिति ससृवेव ह्यत्र भवति तस्मादाह ससृवाꣳसमिति ॥ ६॥ अथानुयाजान्यजति । या वाऽएतेन यज्ञेन देवता ह्वयति याभ्य एष यज्ञस्तायते सर्वा वै तत्ता इष्टा भवन्ति तद्यत्तासु सर्वास्विष्टास्वथैतत्पश्चेवानुयजन्ति तस्मादनुयाजा नाम ॥ ७॥ अथ यदनुयाजान्यजति । छन्दाꣳसि वाऽअनुयाजाः पशवो वै देवानां छन्दाꣳसि तद्यथेदं पशवो युक्ता मनुष्येभ्यो वहन्त्येवं छन्दाꣳसि युक्तानि देवेभ्यो यज्ञं वहन्ति तद्यत्र छन्दाꣳसि देवान्त्समतर्पयन्नथ छन्दाꣳसि देवाः समतर्पयंस्तदतस्तत्प्रागभूद्यच्छन्दाꣳसि युक्तानि देवेभ्यो यज्ञमवाक्षुर्यदेनान्त्समतीतृपन् ॥ ८॥ अथ यदनुयाजान्यजति । छन्दाꣳसि वाऽअनुयाजाश्छन्दाꣳस्येवैतत्संतर्पयति तस्मादनुयाजान्यजति तस्माद्येन वाहनेन धावयेत्तद्विमुच्य ब्रूयात्पाययतैनत्सुहितं कुरुतेत्येष उ वाहनस्यापह्नवः ॥ ९॥ स वै खलु बर्हिः प्रथमं यजति । तद्ध कनिष्ठं छन्दः सद्गायत्री प्रथमा छन्दसां युज्यते तदु तद्वीर्येणैव यद्येनो भूत्वा दिवः सोममाहरत्तदयथायथं मन्यन्ते यत्कनिष्ठं छन्दः सद्गायत्री प्रथमा छन्दसां युज्यतेऽथात्र यथायथं देवाश्छन्दाꣳस्यकल्पयन्ननुयाजेषु नेत्पापवस्यसमसदिति ॥ १०॥ स वै खलु बर्हिः प्रथमं यजति । अयं वै लोको बर्हिरोषधयो बर्हिरस्मिन्नेवैतल्लोकऽओषधीर्दधाति ता इमा अस्मिंल्लोकऽओषधयः प्रतिष्ठितास्तदिदꣳ सर्वं जगदस्यां तेनेयं जगती तज्जगतीं प्रथमामकुर्वन् ॥ ११॥ अथ नराशꣳसं द्वितीयं यजति । अन्तरिक्षं वै नराशꣳसः प्रजा वै नरस्ता इमा अन्तरिक्षमनु वावद्यमानाः प्रजाश्चरन्ति यद्ध वदति शꣳसतीति वै तदाहुस्तस्मादन्तरिक्षं नराशꣳसोऽन्तरिक्षमु वै त्रिष्टुप्तत्त्रिष्टुभं द्वितीयामकुर्वन् ॥ १२॥ अथाग्निरुत्तमः । गायत्री वाऽअग्निस्तद्गायत्रीमुत्तमामकुर्वन्नेवं यथायथेन क्लृप्तेन छन्दाꣳसि प्रत्यतिष्ठंस्तस्मादिदमपापवस्यसम् ॥ १३॥ देवान्यजेत्येवाध्वर्युराह । देवं-देवमिति सर्वेषु होता देवानां वै देवाः सन्ति छन्दाꣳस्येव पशवो ह्येषां गृहा हि पशवः प्रतिष्ठो हि गृहाश्छन्दाꣳसि वाऽअनु-

याज्ञास्तस्माद्दिवान्यजत्येवाध्वर्युराह देवं देवमिति सर्वेषु होता ॥१४॥ वसुवने व-
सुधेयस्येति । देवताया ऽएव वषट्क्रियते देवतायै हूयते न वा ऽअत्र देवतास्त्य-
नुयाजेषु देवं बर्हिरिति तन्न नाग्निर्नेन्द्रो न सोमो देवो नराशꣳस इति नात
एकं चन यो वा ऽअत्राग्निर्गायत्री स निदानेन ॥१५॥ अथ यद्वसुवने वसुधेयस्येति
यजति । अग्निर्वै वसुवनिरिन्द्रो वसुधेयोऽस्ति वै छन्दसां देवतेन्द्राग्नीऽएवैवमु
हैतद्देवताया ऽएव वषट्क्रियते देवतायै हूयते ॥१६॥ अथोत्तममनुयाजमिष्ट्वा स-
मानीय जुहोति । प्रयाजानुयाजा वा ऽएते तद्यथैवादः प्रयाजेषु यजमानाय द्विषन्तं
भ्रातृव्यं बलिꣳ हारयत्यत्त्र ऽआद्यं बलिꣳ हारयत्येवमेवैतदनुयाजेषु बलिꣳ हार-
यति ॥१७॥ ब्राह्मणम् ॥४[८.२.]॥ षष्ठः प्रपाठकः ॥ कण्डिकासंख्या १११ ॥ ॥

स वै स्रुचौ व्यूहति । अग्नीषोमयोरुज्जितिमनूज्जेषं वाजस्य मा प्रसवेन प्रो-
हामीति जुहूं प्राचीं दक्षिणेन पाणिनाग्नीषोमौ तमपनुदतां योऽस्मान्द्वेष्टि यं च
वयं द्विष्मो वाजस्यैनं प्रसवेनापोहामीत्युपभृतं प्रतीचीꣳ सव्येन पाणिना यदि
स्वयं यजमानः ॥१॥ यद्यु ऽअध्वर्युः । अग्नीषोमयोरुज्जितिमनूज्जयत्वयं यजमानो वा-
जस्यैनं प्रसवेन प्रोहाम्यग्नीषोमौ तमपनुदतां यमयं यजमानो द्वेष्टि यश्चैनं द्वेष्टि
वाजस्यैनं प्रसवेनापोहामीति पौर्णमास्यामग्नीषोमीयꣳ हि पौर्णमासꣳ हविर्भवति
॥२॥ अथामावास्यायाम् । इन्द्राग्न्योरुज्जितिमनूज्जेषं वाजस्य मा प्रसवेन प्रोहा-
मीन्द्राग्नी तमपनुदतां योऽस्मान्द्वेष्टि यं च वयं द्विष्मो वाजस्यैनं प्रसवेनापोहा-
मीति यदि स्वयं यजमानः ॥३॥ यद्यु ऽअध्वर्युः । इन्द्राग्न्योरुज्जितिमनूज्जयत्वयं य-
जमानो वाजस्यैनं प्रसवेन प्रोहामीन्द्राग्नी तमपनुदतां यमयं यजमानो द्वेष्टि यश्चैनं
द्वेष्टि वाजस्यैनं प्रसवेनापोहामीत्यमावास्यायामैन्द्राग्नꣳ ह्यमावास्यꣳ हविर्भवत्ये-
वं यथादेवतं व्यूहति तद्यदेवं व्यूहति ॥४॥ यजमान एव जुहूमनु । योऽस्मा
ऽअरातीयति स उपभृतमनु प्राञ्चमेवैतद्यजमानमुदूहत्यपाञ्चं तमपोहति योऽस्मा

ऽअरातीयत्यत्तैव जुहूमन्वाद्य उपभृतमनु प्राञ्चमेवैतदत्तारमुदूहत्यपाञ्चमाद्यमपोहति ॥५॥ तद्वाऽएतत् । समानऽएव कर्मन्व्याक्रियते तस्मादु समानादेव पुरुषादत्ता चाद्यश्च जायतेऽइदꣳ हि चतुर्थे पुरुषे तृतीये संगच्छामहऽइति विदेवं दीव्यमाना जात्या आसतऽएतस्मादु तत् ॥६॥ अथ जुह्वा परिधीन्त्समनक्ति । यथा देवेभ्योऽहौषीद्यया यज्ञꣳ समतिष्ठिपत्तयैवैतत्परिधीन्प्रीणाति तस्माज्जुह्वा परिधीन्त्समनक्ति ॥७॥ स समनक्ति । वसुभ्यस्त्वा रुद्रेभ्यस्त्वादित्येभ्यस्त्वेत्येते वै त्रया देवा यद्वसवो रुद्रा आदित्या एतेभ्यस्त्वेत्येवैतदाह ॥८॥ अथ परिधिमभिपद्याश्रावयति । परिधिभ्यो ह्येतदाश्रावयति यज्ञो वाऽआश्रावणं यज्ञेनैवैतत्प्रत्यक्षं परिधीन्प्रीणाति तस्मात्परिधिमभिपद्याश्रावयति ॥९॥ स आश्राव्याह । इषिता दैव्या होतार इति दैव्या वाऽएते होतारो यत्परिधयोऽग्नयो होष्टा दैव्या होतार इत्येवैतदाह यदाहेषिता दैव्या होतार इति भद्रवाच्यायेति स्वयं वाऽएतस्मै देवा युक्ता भवन्ति यत्साधु वदेयुर्यत्साधु कुर्युस्तस्मादाह भद्रवाच्यायेति प्रेषितो मानुषः सूक्तवाकायेति तदिमं मानुषꣳ होतारꣳ सूक्तवाकाय प्रसौति ॥१०॥ अथ प्रस्तरमादत्ते । यजमानो वै प्रस्तरस्तद्यत्रास्य यज्ञोऽगंस्तद्वैतद्यजमानꣳ स्वगाकरोति देवलोकं वाऽअस्य यज्ञोऽगन्देवलोकमेवैतद्यजमानमपिनयति ॥११॥ स यदि वृष्टिकामः स्यात् । एतेनैवाददीत संजानाथां द्यावापृथिवीऽइति यदा वै द्यावापृथिवी संजानायेऽअथ वर्षति तस्मादाह संजानाथां द्यावापृथिवीऽइति मित्रावरुणौ त्वा वृष्ट्यावतामिति तद्यो वर्षस्येष्टे स त्वा वृष्ट्यावत्वित्येवैतदाहायं वै वर्षस्येष्टे योऽयं पवते सोऽयमेकऽइवैव पवते सोऽयं पुरुषेऽन्तः प्रविष्टः प्राङ् प्रत्यङ् ताविमौ प्राणोदानौ प्राणोदानौ वै मित्रावरुणौ तद्य एव वर्षस्येष्टे स त्वा वृष्ट्यावत्वित्येवैतदाह तमेतेनैवाददीत यदा ह्येव कदा च वृष्टिः समिव तमनक्त्याकूतिमेवैतत्करोत्याकूतिर्भूत्वा देवलोकं गच्छादिति ॥१२॥ स वाऽअग्रं जुह्वामनक्ति । मध्य-

मुपभृति मूलं ध्रुवायामग्रमिव हि जुहूर्मध्यमिवोपभृन्मूलमिव ध्रुवा ॥१३॥ सो
ऽनक्ति । व्यन्तु वयोऽक्तꣳ रिहाणा इति वय एवैनमेतद्भूतमस्मान्मनुष्यलोकाद्दे-
वलोकमभ्युत्पातयति तन्नीचैरिव हरति द्वयं तद्यस्मान्नीचैरिव हरेद्यजमानो वै
प्रस्तरोऽस्या एवैनमेतत्प्रतिष्ठायै नोद्धत्तीद्धोऽएव वृष्टिं नियच्छति ॥१४॥ स हर-
ति । मरुतां पृषतीर्गच्छेति देवलोकं गच्छेत्येवैतदाह यदाह मरुतां पृषतीर्गच्छेति
वशा पृश्निर्भूत्वा दिवं गच्छ ततो नो वृष्टिमावहेतीयं वै वशा पृश्निर्यदिदमस्यां मू-
लि चामूलं चान्नाद्यं प्रतिष्ठितं तेनेयं वशा पृश्निरियं भूत्वा दिवं गच्छेत्येवैतदाह
ततो नो वृष्टिमावहेति वृष्टाद्वाऽऊर्ग्रसः सुभूतं जायते तस्मादाह ततो नो वृ-
ष्टिमावहेति ॥१५॥ अथैकं तृणमपगृह्णाति । यजमानो वै प्रस्तरः स यत्कृत्स्नं प्र-
स्तरमनुप्रहरेत्क्षिप्रे ह यजमानोऽमुं लोकमियात्तथो ह यजमानो ज्योग्जीवति
यावद्धेवास्येह मानुषमायुस्तस्मा एवैतदपगृह्णाति ॥१६॥ तन्मुहूर्तं धारयित्वानुप्र-
हरति । तद्यत्रास्येतर आत्मागंस्तद्वास्यैतद्गमयत्यथ यन्नानुप्रहरेदन्तरियाद्ध यज-
मानं लोकात्तथो ह यजमानं लोकान्नान्तरेति ॥१७॥ तं प्राञ्चमनुसमस्यति । प्रा-
ची हि देवानां दिगथोऽउदञ्चमुदीची हि मनुष्याणां दिक्तमङ्गुलिभिरिव योयुप्येरन्न
काष्ठैर्दारुभिर्वाऽइतरꣳ शवं व्युषन्ति नेत्तथा करवाम यथेतरꣳ शवमिति तस्मा-
दङ्गुलिभिरिव योयुप्येरन्न काष्ठैर्यदा होता सूक्तवाकमाह ॥१८॥ अथाग्नीदाहानुप्र-
हरेति । तद्यत्रास्येतर आत्मागंस्तद्वास्यैतद्गमयेत्येवैतदाह तूष्णीमेवानुप्रहृत्य च-
क्षुष्पा अग्नेऽसि चक्षुर्मे पाहीत्यात्मानमुपस्पृशति तेनोऽआत्मानं नानुप्रवृणक्ति
॥१९॥ अथाह संवदस्वेति । संवादयैनं देवैरित्येवैतदाहागानग्नीदित्यगन्खल्वित्ये-
वैतदाहागन्नितीतरः प्रत्याह श्रावयेति तं वै देवैः श्रावय तमनुबोधयेत्येवैतदाह
श्रौषडिति विदुर्वाऽएनमनु वाऽएनमभुत्सतेत्येवैतदाहैवमध्वर्युश्चाग्नीच्च देवलोकं
यजमानमपिनयतः ॥२०॥ अथाह स्वगा दैव्या होतृभ्य इति दैव्या वाऽएते हो-

तारो यत्परिधयोऽग्नयो हि तानेवैतत्स्वगाकरोति तस्मादाह स्वगा दैव्या हो-
तृभ्य इति स्वस्तिर्मानुषेभ्य इति तदस्मै मानुषाय होत्रेऽहलामाशास्ते ॥२१॥
अथ परिधीननुप्रहरति स मध्यममेवाग्रे परिधिमनुप्रहरति यं परिधिं पर्यधत्था अग्ने
देव पणिभिर्गुह्यमानः तं त ऽएतमनु जोषं भराम्येष नेत्त्वदपचेतयाताऽइत्यग्नेः
प्रियं पाथोऽपीतमितीतरावनुसमस्यति ॥२२॥ अथ जुहूं चोपभृतं च संप्रगृह्णाति ।
अदो हैवाहुतिं करोति यदनन्वाहुतिर्भूत्वा देवलोकं गच्छादिति तस्माज्जुहूं चोप-
भृतं च संप्रगृह्णाति ॥२३॥ स वै विश्वेभ्यो देवेभ्यः संप्रगृह्णाति । यद्वाऽअनादिष्टं
देवतायै हविर्गृह्यते सर्वा वै तस्मिन्देवता अपित्विन्यो मन्यन्ते न वाऽएतत्कस्यै
चन देवतायै हविर्गृह्णन्नादिशति यदाज्यं तस्माद्विश्वेभ्यो देवेभ्यः संप्रगृह्णात्येतदु
वैश्वदेवꣳ हविर्यज्ञे ॥२४॥ स संप्रगृह्णाति ॥ सꣳस्रवभागा स्थेषा बृहन्त इति सꣳ-
स्रवो ह्येव खलु परिशिष्टो भवति प्रस्तरेष्ठाः परिधेयाश्च देवा इति प्रस्तरश्च हि
परिधयश्चानुप्रहृता भवन्तीमां वाचमभि विश्वे गृणन्त इत्येतदु वैश्वदेवं करोत्यास-
द्यास्मिन्बर्हिषि मादयध्वꣳ स्वाहा वाडिति तद्यथा वषट्कृतꣳ हुतमेवमस्यैतद्भव-
ति ॥२५॥ स यस्यानसो हविर्गृह्णन्ति । अनसस्तस्य धुरि विमुञ्चन्ति यतो युनज्ञाम
ततो विमुञ्चामेति यतो ह्येव युञ्जन्ति ततो विमुञ्चन्ति यस्यो पात्र्यै स्फ्ये तस्य
यतो युनज्ञाम ततो विमुञ्चामेति यतो ह्येवं युञ्जन्ति ततो विमुञ्चन्ति ॥२६॥ युक्तौ
ह वाऽएते यज्ञस्य यत्स्रुचौ । तेऽएतद्युक्ते यत्प्रचरति स यं निधायावस्येद्यथा वा-
हनमवार्च्छेदेवं तत्तेऽएतत्स्विष्टकृति विमोचनमागच्छतस्ते तत्सादयति तद्विमुञ्चति
तेऽएतत्पुनः प्रयुङ्क्तेऽनुयाजेषु सोऽनुयाजैश्चरित्वैतद्विमोचनमागच्छति ते तत्सादयति
तद्विमुञ्चति तेऽएतत्पुनः प्रयुङ्क्ते यत्संप्रगृह्णाति तद्यां गतिमभियुङ्क्ते तां गतिं गत्वा
विमुञ्चते यज्ञं वाऽअनु प्रजास्तस्मादद्य पुरुषो युङ्क्तेऽथ विमुञ्चतेऽथ युङ्क्ते तद्यां ग-
तिमभियुङ्क्ते तां गतिं गत्वान्ततो विमुञ्चते स सादयति घृताची स्थो धुर्यौ पातꣳ

सुम्ने स्थः सुम्ने मा धत्तमिति साध्व्यौ स्थः साधौ मा धत्तमित्येवैतदाह ॥२७॥
ब्राह्मणम् ॥१[८.३.]॥ ॥ अध्यायः ॥८॥ ॥

स यत्राह । इषिता दैव्या होतारो भद्रवाच्याय प्रेषितो मानुषः सूक्तवाकायेति यदतो होतान्वाह सूक्तऽइव तदाह यजमानायैवैतदाशिषमाशास्ते तद्वाऽएतदुपरिष्टाद्यज्ञस्याशिषमाशास्ते द्वयं तद्यस्मादुपरिष्टाद्यज्ञस्याशिषमाशास्ते ॥१॥ यज्ञं वाऽएष जनयति । यो यजतऽएतेन ह्युक्ता ऋत्विजस्तन्वते तं जनयन्त्यथाशिषमाशास्ते तामस्मै यज्ञ आशिषꣳ संनमयति यामाशिषमाशास्ते यो माजीजनतेति तस्माद्वाऽउपरिष्टाद्यज्ञस्याशिषमाशास्ते ॥२॥ देवान्वाऽएष प्रीणाति । यो यजतऽएतेन यज्ञेनऽर्ग्भिरिव त्वद्यजुर्भिरिव त्वदाहुतिभिरिव त्वत्स देवान्प्रीत्वा तेष्वपित्वी भवति तेष्वपित्वी भूत्वाथाशिषमाशास्ते तामस्मै देवा आशिषꣳ संनमयन्ति यामाशिषमाशास्ते यो नोऽप्रैषीदिति तस्माद्वाऽउपरिष्टाद्यज्ञस्याशिषमाशास्ते ॥३॥ अथ प्रतिपद्यते । इदं द्यावापृथिवी भद्रमभूदिति भद्रꣳ ह्यभूद्यो यज्ञस्य सꣳस्थामगन्नार्ध्म सूक्तवाकमुत नमोवाकमित्युभयं वाऽएतद्यज्ञ एव यत्सूक्तवाकश्च नमोवाकश्चारात्स्म यज्ञमविदाम यज्ञमित्येवैतदाहाग्ने त्वꣳ सूक्तवागस्युपश्रुती दिवस्पृथिव्योरित्यग्निमेवैतदाह त्वꣳ सूक्तवागस्युपशृण्वत्योरनयोर्द्यावापृथिव्योरित्योमन्वती तेऽस्मिन्यज्ञे यजमान द्यावापृथिवी स्तामित्यन्नवत्यौ तेऽस्मिन्यज्ञे यजमान द्यावापृथिवी स्तामित्येवैतदाह ॥४॥ शंगवी जीवदानूऽइति । शंगवी ते जीवदानू स्तामित्येवैतदाहात्रस्नूऽअप्रवेदेऽइति माह कस्माच्चन प्रत्रासीर्मो तऽइदं पुष्टं कश्चन प्रविदतेत्येवैतदाह ॥५॥ उरुगव्यूतीऽअभयंकृताविति । उरुगव्यूती तेऽभये स्तामित्येवैतदाह वृष्टिद्यावा रीत्यापेति वृष्टिमत्यौ ते स्तामित्येवैतदाह ॥६॥ शम्भुवौ मयोभुवाविति । शम्भुवौ ते मयोभुवौ स्तामित्येवैतदाहोर्जस्वती च पयस्वती चेति रसवत्यौ तऽउपजीवनीये स्तामित्येवैतदाह ॥७॥ सूपचरणा च स्वधिचरणा

चेति । सूपचरणाद्ध ते ऽसावस्तु यामधस्तादुपचरसि स्वधिचरणो त ऽइयमस्तु या-
मुपरिष्टादधिचरसीत्येवैतदाह तयोराविदीति तयोरनुमन्यमानयोरित्येवैतदाह ॥८॥
अग्निरिदᳪ हविः । अजुषतावीवृधत महो ज्यायोऽकृतेति तदाग्नेयमाज्यभागमाह
सोम इदᳪ हविरजुषतावीवृधत महो ज्यायोऽकृतेति तत्सौम्यमाज्यभागमाहाग्नि-
रिदᳪ हविरजुषतावीवृधत महो ज्यायोऽकृतेति तद्य एष उभयत्राच्युत आग्नेयः
पुरोडाशो भवति तमाह ॥९॥ अथ यथादेवतम् । देवा आज्यपा आज्यमजुषन्ता-
वीवृधन्त महो ज्यायोऽक्रतेति तत्प्रयाजानुयाजानाह प्रयाजानुयाजा वै देवा आ-
ज्यपा अग्निर्होत्रेणेदᳪ हविरजुषतावीवृधत महो ज्यायोऽकृतेति तदग्निᳪ होत्रे-
णाहाजुषतेत्येवं या इष्टा देवता भवन्ति ताः संपश्यत्यसौ हविरजुषतासौ हवि-
रजुषतेति तद्यजमानस्यैवैतत्समृद्धिमाशास्ते यद्धि देवा हविर्जुषन्ते तेन हि महज्जयति
तस्मादाहाजुषतेत्यवीवृधतेति यद्वै देवा हविर्जोषयन्ते तदपि गिरिमात्रं कुर्वते त-
स्मादाहावीवृधतेति ॥१०॥ महो ज्यायोऽक्रतेति । यजमानो वै देवानां महस्तᳪ ह्ये-
तज्ज्यायाᳪसमिव कुर्वते तस्मादाह महो ज्यायोऽक्रतेति ॥११॥ अस्यामृधेद्धोत्रायां
देवंगमायामिति । अस्याᳪ राध्नोतु होत्रायां देवंगमायामित्येवैतदाहाशास्तेऽयं य-
जमानोऽसाविति नाम गृह्णाति तदेनं प्रत्यक्षमाशिषा संपादयति ॥१२॥ दीर्घायु-
त्वमाशास्तऽइति । सा यामुत्रोत्तरा देवयज्या तदिह प्रत्यक्षं दीर्घायुत्वᳪ ॥१३॥
सुप्रजास्त्वमाशास्तऽइति । तद्यदमुत्र भूयो हविष्करणं तदिह प्रत्यक्षᳪ सुप्रजास्त्वं
प्रशासनᳪ स कुर्याद्य एवं कुर्यादुत्तरां देवयज्यामाशास्तऽइति त्वेव ब्रूयात्तदेव जी-
वातुं तत्प्रजां तत्पशून् ॥१४॥ भूयो हविष्करणमाशास्तऽइति तद्वेव तत्सजात-
वनस्यामाशास्तऽइति प्राणा वै सजाताः प्राणैर्हि सह जायते तत्प्राणानाशास्ते
॥१५॥ दिव्यं धामाशास्तऽइति । देवलोके मेऽप्यसदिति वै यजते यो यजते तद्दे-
वलोकऽएवैनमेतदपित्विनं करोति यदनेन हविषाशास्ते तदश्यात्तदृध्यादिति यद-

नेन हविषाशास्ते तदस्मै सर्वꣳ समृध्यतामित्येवैतदाह ॥१६॥ ता वा एताः ।
पञ्चाशिषः करोति तिस्र इडायां ता अष्टावष्टाक्षरा वै गायत्री वीर्यं गायत्री वी-
र्यमेवैतदाशिषोऽभिसंपादयति ॥१७॥ नातो भूयसीः कुर्यात् । अतिरिक्तꣳ ह कु-
र्याद्यदतो भूयसीः कुर्याद्यद्वै यज्ञस्यातिरिक्तं द्विषन्तꣳ हास्य तद्भ्रातृव्यमभ्यतिरिच्यते
तस्मान्नातो भूयसीः कुर्यात् ॥१८॥ अपीद्धि कनीयसीः सप्त । तदस्मै देवा रासन्ता-
मिति तदस्मै देवा अनुमन्यन्तामित्येवैतदाह तदग्निर्देवो देवेभ्यो वनुतां वयमग्नेः
परि मानुषा इति तदग्निर्देवो देवेभ्यो वनुतां वयमग्नेरध्यस्मा एतद्वनवामहा इ-
त्येवैतदाह ॥१९॥ इष्टं च वित्तं चेति । एषिषुरिव वा एतद्यज्ञं तमविदंस्तस्मा-
दाहेष्टं च वित्तं चेत्युभे चैनं द्यावापृथिवी अꣳहसस्पातामित्युभे चैनं द्यावापृथि-
वी आर्त्तेर्गोपायतामित्येवैतदाह ॥२०॥ तद्ध हैक आहुः । उभे च मेति तथा
होताशिष आत्मानं नान्तरेतीति तदु तथा न ब्रूयाद्यजमानस्य वै यज्ञ आशीः
किं नु तत्रर्त्विजां यां वै कां च यज्ञ ऋत्विज आशिषमाशासते यजमानस्यैव सा
न ह स एतां क्व चनाशिषं प्रतिष्ठापयति य आहोभे च मेति तस्मादु ब्रूयादुभे
चैनमित्येव ॥२१॥ इह गतिर्वामस्येति । तद्यदेव यज्ञस्य साधु तदेवास्मिन्नेतद्दधा-
ति तस्मादाहेह गतिर्वामस्येति ॥२२॥ इदं च नमो देवेभ्य इति तद्यज्ञस्यैवैत-
त्सꣳस्थां गवा नमो देवेभ्यः करोति तस्मादाहेदं च नमो देवेभ्य इति ॥२३॥ अथ
शम्योराह । शम्युर्ह वै बार्हस्पत्योऽञ्जसा यज्ञस्य सꣳस्थां विदां चकार स देव-
लोकमपीयाय तत्तदन्तर्हितमिव मनुष्येभ्य आस ॥२४॥ तद्वा ऋषीणामनुश्रुतमा-
स । शम्युर्ह वै बार्हस्पत्योऽञ्जसा यज्ञस्य सꣳस्थां विदां चकार स देवलोकमपी-
यायेति ते तामिव यज्ञस्य सꣳस्थामुपायन्याꣳ शम्युर्बार्हस्पत्योऽवेद्यच्छम्योरब्रुवंस्ता-
म्वेवैष एतद्यज्ञस्य सꣳस्थामुपैति याꣳ शम्युर्बार्हस्पत्योऽवेद्यच्छम्योराह तस्माद्धि श-
म्योराह ॥२५॥ स प्रतिपद्यते । तच्छम्योरावृणीमह इति तां यज्ञस्य सꣳस्थामावृ-

णीमहे याꣳ शम्युर्बार्हस्पत्योऽवेदित्येवैतदाह ॥२६॥ गातुं यज्ञाय गातुं यज्ञपतय
ऽइति । गातुꣳ ह्येष यज्ञायेच्छति गातुं यज्ञपतये यो यज्ञस्य सꣳस्थां देवी स्वस्ति-
रस्तु नः स्वस्तिर्मानुषेभ्य इति स्वस्ति नो देवत्रास्तु स्वस्ति मनुष्यत्रेत्येवैतदा-
होर्ध्वं जिगातु भेषजमित्यूर्ध्वं नोऽयं यज्ञो देवलोकं जयत्वित्येवैतदाह ॥२७॥ शं
नोऽअस्तु द्विपदे शं चतुष्पदऽइति । एतावद्वाऽइदꣳ सर्वं यावद्द्विपाच्चैव चतुष्पा-
च्च तस्माऽएवैतद्यज्ञस्य सꣳस्थां गत्वा शं करोति तस्मादाह शं नोऽअस्तु द्विपदे
शं चतुष्पदऽइति ॥२८॥ अथानयेत्युपस्पृशति । अमानुष-इव वाऽएतद्भवति य-
दार्विज्ये प्रवृत इयं वै पृथिवी प्रतिष्ठा तदस्यामेवैतत्प्रतिष्ठायां प्रतितिष्ठति तदु
खलु पुनर्मानुषो भवति तस्मादनयेत्युपस्पृशति ॥२९॥ ब्राह्मणम् ॥२[१.१.]॥ ॥

ते वै पत्नीः संयाजयिष्यन्तः प्रतिपरायन्ति । जुहूं च स्रुवं चाध्वर्युरादत्ते वेदꣳ
होताज्यविलापनीमग्नीत् ॥१॥ तद्धैकेषामध्वर्युः । पूर्वेणाहवनीयं पर्येति तदु त-
था न कुर्याद्बहिर्धा ह यज्ञात्स्याद्यत्तेनेयात् ॥२॥ जघनेनो हैव पत्नीम् । एकेषाम-
ध्वर्युरेति नोऽएव तथा कुर्यात्पूर्वार्धो वै यज्ञस्याध्वर्युर्जघनार्धः पत्नी यथा भसत्तः
शिरः प्रतिदध्यादेवं तद्बहिर्धा हैव यज्ञात्स्याद्यत्तेनेयात् ॥३॥ अन्तरेणो हैव प-
त्नीम् । एकेषामध्वर्युरेति नोऽएव तथा कुर्यादन्तरियाद्ध यज्ञात्पत्नीं यत्तेनेयात्तस्मा-
दु पूर्वेणैव गार्हपत्यमन्तरेणाहवनीयं चेति तथा ह न बहिर्धा यज्ञाद्भवति यथो
ऽएवादः प्रचरन्नन्तरेण संचरति स उऽएवास्यैष संचरो भवति ॥४॥ अथ पत्नीः
संयाजयन्ति । यज्ञाद्धि प्रजाः प्रजायन्ते यज्ञात्प्रजायमाना मिथुनात्प्रजायन्ते मिथुनात्प्र-
जायमाना अन्ततो यज्ञस्य प्रजायन्ते तदेना एतदन्ततो यज्ञस्य मिथुनात्प्रजननात्प्र-
जनयति तस्मान्मिथुनात्प्रजननादन्ततो यज्ञस्येमाः प्रजाः प्रजायन्ते तस्मात्पत्नीः सं-
याजयन्ति ॥५॥ चतस्रो देवता यजति । चतस्रो वै मिथुनं द्वन्द्वं वै मिथुनं द्वे-द्वे
हि खलु भवतो मिथुनमेवैतत्प्रजननं क्रियते तस्माच्चतस्रो देवता यजति ॥६॥

ता वाऽग्राज्यहविषो भवन्ति । रेतो वाऽग्राज्यꣳ रेत एवैतत्सिञ्चति तस्मादाज्य-
हविषो भवन्ति ॥७॥ तेनोपाꣳशु चरन्ति । तिर-इव वै मिथुनेन चर्यते तिर-इ-
वैतद्यदुपाꣳशु तस्मादुपाꣳशु चरन्ति ॥८॥ अथ सोमं यजति । रेतो वै सोमो रेत
एवैतत्सिञ्चति तस्मात्सोमं यजति ॥९॥ अथ त्वष्टारं यजति । त्वष्टा वै सिक्तꣳ
रेतो विकरोति तस्मात्त्वष्टारं यजति ॥१०॥ अथ देवानां पत्नीर्यजति । पत्नीषु वै
योनौ रेतः प्रतिष्ठितं तत्ततः प्रजायते तत्पत्नीष्वेवैतद्योनौ रेतः सिक्तं प्रतिष्ठापय-
ति तत्ततः प्रजायते तस्माद्देवानां पत्नीर्यजति ॥११॥ स यत्र देवानां पत्नीर्यजति ।
तत्पुरस्तात्तिरः करोत्युप ह वै तावद्देवता आसते यावन्न समिष्टयजुर्जुह्वतीदं नु
नो जुह्वतीति ताभ्य एवैतत्तिरः करोति तस्मादिमा मानुष्यः स्त्रियस्तिर-इवैव पुꣳ-
सो जिघत्सन्ति या-इव तु ता-इवेति ह स्माह याज्ञवल्क्यः ॥१२॥ अथाग्निं गृह-
पतिं यजति । अयं वाऽअग्निर्लोक इममेवैतल्लोकमिमाः प्रजा अभिप्रजनयति ता
इमं लोकमिमाः प्रजा अभिप्रजायन्ते तस्मादग्निं गृहपतिं यजति ॥१३॥ तदिडान्तं
भवति । न ह्यत्र परिधयो भवन्ति न प्रस्तरो यत्र वाऽअदः प्रस्तरेण यजमानꣳ
स्वगाकरोति पतिं वाऽअनु जाया तदेवास्यापि पत्नी स्वगाकृता भवतीयसि तꣳ
ह कुर्याद्यत्प्रस्तरस्य रूपं कुर्यात्तस्मादिडान्तमेव स्यादुतो प्रस्तरस्यैव रूपं क्रियते
॥१४॥ स यदि प्रस्तरस्य रूपं कुर्यात् । यथैवादः प्रस्तरेण यजमानꣳ स्वगाकरो-
त्येवमेवैतत्पत्नीꣳ स्वगाकरोति ॥१५॥ स यदि प्रस्तरस्य रूपं कुर्यात् । वेदस्यैकं
तृणमाच्छिद्याग्रं जुह्वामनक्ति मध्यꣳ स्रुवे बुध्नꣳ स्थाल्याम् ॥१६॥ अथाग्नीदाहानुप्र-
हरेति । तूष्णीमिवानुप्रहृत्य चक्षुष्पा अग्नेऽसि चक्षुर्मे पाहीत्यात्मानमुपस्पृशति
तेनोऽअस्यात्मानं नानुप्रवृणक्ति ॥१७॥ अथाह संवदस्वेति । अगानग्नीदगञ्छ्रावय
श्रौषट् स्वगा दैव्या होतृभ्यः स्वस्तिर्मानुषेभ्यः शम्योर्ब्रूहीति ॥१८॥ अथ जुहूं च
स्रुवं च संप्रगृह्णाति । अदो ह्येवाहुतिं करोति यदनक्त्याहुतिर्भूत्वा देवलोकं गच्छा-

दिति तस्माज्जुहूं च स्रुवं च संप्रगृह्णाति ॥१९॥ स वाऽअग्नये संप्रगृह्णाति । अग्ने
ऽदब्धायोऽशीतमेत्यमृतो ह्यग्निस्तस्मादाहादब्धायवित्यशीतमेत्यशिष्ठो ह्यग्निस्त-
स्मादाहाशीतमेति पाहि मा दिद्योः पाहि प्रसित्यै पाहि दुरिष्ट्यै पाहि दुरद्मन्या
ऽइति सर्वाभ्यो मार्त्तिभ्यो गोपायेत्येवैतदाहाविषं नः पितुं कृण्वित्यन्नं वै पितुर-
नमीवं न इदमकिल्बिषमन्नं कुर्वित्येवैतदाह सुषदा योनावित्यात्मन्येतदाह स्वा-
हा वाडिति तद्यथा वषट्कृतꣳ हुतमेवमस्यैतद्भवति ॥२०॥ अथ वेदं पत्नी वि-
स्रꣳसयति । योषा वै वेदिर्वृषा वेदो मिथुनाय वै वेदः क्रियतेऽथ यदेनेन यज्ञ
ऽउपालभते मिथुनमेवैतत्प्रजननं क्रियते ॥२१॥ अथ यत्पत्नी विस्रꣳसयति । यो-
षा वै पत्नी वृषा वेदो मिथुनमेवैतत्प्रजननं क्रियते तस्माद्वेदं पत्नी विस्रꣳसयति
॥२२॥ सा विस्रꣳसयति । वेदोऽसि येन त्वं देव वेद देवेभ्यो वेदोऽभवस्तेन म-
ह्यं वेदो भूया इति यदि यजुषा चिकीर्षेदेतेनैव कुर्यात् ॥२३॥ तमा वेदेः सꣳ-
स्तृणाति । योषा वै वेदिर्वृषा वेदः पश्चाद्धि परीत्य वृषा योषामधिद्रवति पश्चादे-
वैनामेतत्परीत्य वृष्णा वेदेनाधिद्रावयति तस्मादा वेदेः सꣳस्तृणाति ॥२४॥ अथ
समिष्टयजुर्जुहोति । प्राङ्मे यज्ञोऽनुसंतिष्ठाताऽइत्यथ यद्धुत्वा समिष्टयजुः पत्नीः सं-
याजयेत्प्रत्यङ्ङु हैवास्यैष यज्ञः संतिष्ठेत तस्माद्वाऽएतर्हि समिष्टयजुर्जुहोति प्राङ्मे
यज्ञोऽनुसंतिष्ठाताऽइति ॥२५॥ अथ यस्मात्समिष्टयजुर्नाम । या वाऽएतेन यज्ञेन
देवता ह्वयति याभ्य एष यज्ञस्तायते सर्वा वै तत्ताः समिष्टा भवन्ति तद्यत्तासु
सर्वासु समिष्टास्वथैतज्जुहोति तस्मात्समिष्टयजुर्नाम ॥२६॥ अथ यस्मात्समिष्टयजु-
र्जुहोति । या वाऽएतेन यज्ञेन देवता ह्वयति याभ्य एष यज्ञस्तायतऽउप ह वै
ता आसते यावन्न समिष्टयजुर्जुह्वतीदं नु नो जुह्वविति ता एवैतद्यथायथं व्यव-
सृजति यत्र-यत्रासां चरणं तदनु यज्ञं वाऽएतदजीजनत यदेनमतत तं जनयित्वा य-
त्रास्य प्रतिष्ठा तत्प्रतिष्ठापयति तस्मात्समिष्टयजुर्जुहोति ॥२७॥ स जुहोति । देवा

गातुविद इति गातुविदो हि देवा गातुं वित्त्वेति यज्ञं वित्त्वेत्येवैतदाह गातुमिते-
ति तदेतेन यथायथं व्यवसृजति मनसस्पतऽइमं देव यज्ञꣳ स्वाहा वाते धाऽइत्य-
यं वै यज्ञो योऽयं पवते तदिमं यज्ञꣳ सम्भृत्यैतस्मिन्यज्ञे प्रतिष्ठापयति यज्ञेन यज्ञꣳ
संदधाति तस्मादाह स्वाहा वाते धा इति ॥२८॥ अथ बर्हिर्जुहोति । अयं वै
लोको बर्हिरोषधयो बर्हिरस्मिन्नेवैतल्लोकऽओषधीर्दधाति ता इमा अस्मिंल्लोक
ऽओषधयः प्रतिष्ठितास्तस्माद्बर्हिर्जुहोति ॥२९॥ तां वाऽअतिरिक्तां जुहोति । स-
मिष्टयजुर्ह्यवान्तो यज्ञस्य यदूर्ध्वꣳ समिष्टयजुषोऽतिरिक्तं तद्यदा हि समिष्टयजुर्जु-
होत्यथैताभ्यो जुहोति तस्मादिमा अतिरिक्ता असंमिता ओषधयः प्रजायन्ते ॥३०॥
स जुहोति । सं बर्हिरङ्क्ताꣳ हविषा घृतेन समादित्यैर्वसुभिः सं मरुद्भिः समिन्द्रो
विश्वदेवेभिरङ्क्तां दिव्यं नभो गच्छतु यत्स्वाहेति ॥३१॥ अथ प्रणीता दक्षिणतः प-
रीत्य निनयति । युङ्क्ते वाऽएतद्यज्ञं यदेनं तनुते स यन्न निनयेत्पराङ् हाविमुक्त
एव यज्ञो यजमानं प्रक्षिणीयात्तथो ह यज्ञो यजमानं न प्रक्षिणाति तस्मात्प्रणी-
ता दक्षिणतः परीत्य निनयति ॥३२॥ स निनयति । कस्त्वा विमुञ्चति स त्वा
विमुञ्चति कस्मै त्वा विमुञ्चति तस्मै त्वा विमुञ्चति पोषायेति तत्पुष्टिमुत्तमां यज-
मानाय निराह स येनैव प्रणयति तेन निनयति येन ह्येव योग्यं युञ्जन्ति तेन
विमुञ्चन्ति योक्त्रेण हि योग्यं युञ्जन्ति योक्त्रेण विमुञ्चन्त्यथ फलीकरणान्कपालेना-
धोऽधः कृष्णाजिनमुपास्यति रक्षसां भागोऽसीति ॥३३॥ देवाश्च वाऽअसुराश्च ।
उभये प्राजापत्याः पस्पृधिरऽएतस्मिन्यज्ञे प्रजापतौ पितरि संवत्सरेऽस्माकमयं भ-
विष्यत्यस्माकमयं भविष्यतीति ॥३४॥ ततो देवाः । सर्वं यज्ञꣳ संवृज्याथ यत्पा-
पिष्ठं यज्ञस्य भागधेयमासीत्तेनैनान्निरभजन्नस्ना पशोः फलीकरणैर्हविर्यज्ञात्सुनिर्भ-
क्ता असन्नित्येष वै सुनिर्भक्तो यं भागिनं निर्भजन्त्यथ यमभागं निर्भजन्त्येव स ता-
वच्छꣳसतऽउत हि वशे लब्धाह किं मा बभक्थेति स यमेवैभ्यो देवा भागमक-

ल्पयंस्तमेवैभ्य एष एतद्भागं करोत्यथ यदधोऽधः कृष्णाजिनमुपास्यत्यनग्नावेवैभ्य एतदन्धे तमसि प्रवेशयति तथोऽएवासृक्पशो रक्षसां भागोऽसीत्यनग्नावन्धे तमसि प्रवेशयति तस्मात्पशोस्तेदनीं न कुर्वन्ति रक्षसाꣳ हि स भागः ॥ ३५ ॥ ब्राह्मणम् ॥ ३ [१. २.] ॥ ॥

सꣳस्थिते यज्ञे । दक्षिणतः परीत्य पूर्णपात्रं निनयति तथा ह्युदग्भवति तस्माद्दक्षिणतः परीत्य पूर्णपात्रं निनयति देवलोके मेऽप्यसदिति वै यजते यो यजते सोऽस्यैष यज्ञो देवलोकमेवाभिप्रैति तदनूची दक्षिणा यां ददाति सैति दक्षिणामन्वारभ्य यजमानः ॥ १ ॥ स एष देवयानो वा पितृयाणो वा पन्थाः । तदुभयतोऽग्निशिखे समोषन्त्यौ तिष्ठतः प्रति तमोषतो यः प्रत्युष्योऽत्यु तꣳ सृजेते यो ऽतिसृज्यः शान्तिरापस्तदेतमेवैतत्पन्थानꣳ शमयति ॥ २ ॥ पूर्णं निनयति । सर्वं वै पूर्णꣳ सर्वेणैवैनमेतच्छमयति संततमव्यवच्छिन्नं निनयति संततेनैवैनमेतदव्यवच्छिन्नेन शमयति ॥ ३ ॥ यद्वेव पूर्णपात्रं निनयति । यद्वै यज्ञस्य मिथ्या क्रियते व्यस्य तद्वहन्ति क्षण्वन्ति शान्तिरापस्तदद्भिः शान्त्या शमयति तदद्भिः संदधाति ॥ ४ ॥ पूर्णं निनयति । सर्वं वै पूर्णꣳ सर्वेणैवैतत्संदधाति संततमव्यवच्छिन्नं निनयति संततेनैवैतदव्यवच्छिन्नेन संदधाति ॥ ५ ॥ तदञ्जलिना प्रतिगृह्णाति । सं वर्चसा पयसा सं तनूभिरगन्महि मनसा सꣳ शिवेन त्वष्टा सुदत्रो विदधातु रायोऽनुमार्ष्टु तन्वो यद्विलिष्टमिति यद्विवृढं तत्संदधाति ॥ ६ ॥ अथ मुखमुपस्पृशते । इदं तद्यस्मान्मुखमुपस्पृशतेऽमृतं वाऽआपोऽमृतेनैवैतत्सꣳस्पृशतऽएतदु चैवैतत्कर्मात्मन्कुरुते तस्मान्मुखमुपस्पृशते ॥ ७ ॥ अथ विष्णुक्रमान्क्रमते । देवान्वाऽएष प्रीणाति यो यजतऽएतेन यज्ञेनऽर्ग्भिरिव त्वद्यजुर्भिरिव त्वदाहुतिभिरिव त्वत्स देवान्प्रीत्वा तेष्वपित्वी भवति तेष्वपित्वी भूत्वा तानेवाभिप्रक्रामति ॥ ८ ॥ यद्वेव विष्णुक्रमान्क्रमते । यज्ञो वै विष्णुः स देवेभ्य इमां विक्रान्तिं विचक्रमे यैषामियं विक्रान्तिरिदमेव प्र-

थमेन पदेन पस्पाराथेदमन्तरिक्षं द्वितीयेन दिवमुत्तमेनैताम्वेवैष एतस्मै विष्णुर्यज्ञो विक्रान्तिं विक्रमते तस्माद्विष्णुक्रमान्क्रमते तद्वाऽइत एव पराचीनं भूयिष्ठा-इव क्रमन्ते ॥ ९ ॥ तद्व तत्पृथिव्यां विष्णुर्व्यक्रꣳस्त । गायत्रेण छन्दसा ततो निर्भक्तो योऽस्मान्द्वेष्टि यं च वयं द्विष्मोऽन्तरिक्षे विष्णुर्व्यक्रꣳस्त त्रैष्टुभेन छन्दसा ततो निर्भक्तो योऽस्मान्द्वेष्टि यं च वयं द्विष्मो दिवि विष्णुर्व्यक्रꣳस्त जागतेन छन्दसा ततो निर्भक्तो योऽस्मान्द्वेष्टि यं च वयं द्विष्म इत्येवमिमांल्लोकान्त्समारुह्याथैषा गतिरेषा प्रतिष्ठा य एष तपति तस्य ये रश्मयस्ते सुकृतोऽथ यत्परं भाः प्रजापतिर्वा स स्वर्गो वा लोकस्तदेवमिमांल्लोकान्त्समारुह्याथैतां गतिमेतां प्रतिष्ठां गच्छति परस्ताद्वेवार्वाङ् क्रमेत य इतोऽनुशासनं चिकीर्षेद्द्वयं तद्यस्मात्परस्तादर्वाङ् क्रमते ॥ १० ॥ अपसरणतो ह वाऽअग्रे देवा जयन्तोऽजयन् । दिवमेवाग्रेऽथेदमन्तरिक्षमथेतोऽनपसरणात्सपत्नाननुदन्त तथोऽएवैष एतदपसरणत एवाग्रे जयञ्जयति दिवमेवाग्रेऽथेदमन्तरिक्षमथेतोऽनपसरणात्सपत्नाननुदतऽइयं वै पृथिवी प्रतिष्ठा तदस्यामेवैतत्प्रतिष्ठायां प्रतितिष्ठति ॥ ११ ॥ तद्व तद्दिवि विष्णुर्व्यक्रꣳस्त । जागतेन छन्दसा ततो निर्भक्तो योऽस्मान्द्वेष्टि यं च वयं द्विष्मोऽन्तरिक्षे विष्णुर्व्यक्रꣳस्त त्रैष्टुभेन छन्दसा ततो निर्भक्तो योऽस्मान्द्वेष्टि यं च वयं द्विष्मः पृथिव्यां विष्णुर्व्यक्रꣳस्त गायत्रेण छन्दसा ततो निर्भक्तो योऽस्मान्द्वेष्टि यं च वयं द्विष्मोऽस्मादन्नादस्यै प्रतिष्ठायाऽइत्यस्याꣳ हीदꣳ सर्वमन्नाद्यं प्रतिष्ठित तस्मादाहास्मादन्नादस्यै प्रतिष्ठायाऽइति ॥ १२ ॥ अथ प्राङ् प्रेक्षते । प्राची हि देवानां दिक्तस्मात्प्राङ् प्रेक्षते ॥ १३ ॥ स प्रेक्षते । अगन्म स्वरिति देवा वै स्वरगन्म देवानित्येवैतदाह सं ज्योतिषाभूमेति सं देवैरभूमेत्येवैतदाह ॥ १४ ॥ अथ सूर्यमुदीक्षते । सैषा गतिरेषाप्रतिष्ठा तदेतां गतिमेतां प्रतिष्ठां गच्छति तस्मात्सूर्यमुदीक्षते ॥ १५ ॥ स उदीक्षते । स्वयम्भूरसि श्रेष्ठो रश्मिरित्येष वै श्रेष्ठो रश्मिर्यत्सूर्यस्तस्मादाह स्वयम्भूरसि श्रेष्ठो र-

श्मिरिति वर्चोदा असि वर्चो मे देहीति त्वेवाहं ब्रवीमीति ह स्माह याज्ञव-
ल्क्यस्तद्ध्येव ब्राह्मणेनैष्टव्यं यद्ब्रह्मवर्चसी स्यादित्युतो ह स्माहौपोदितेय एष वाव
मह्यं गा दास्यति गोदा गा मे देहीत्येवं यं कामं कामयते सोऽस्मै कामः समृ-
ध्यते ॥ १६॥ अथावर्तते । सूर्यस्यावृतमन्वावर्तऽइति तदेतां गतिमेतां प्रतिष्ठां गत्वै-
तस्यैवावृतमन्वावर्तते ॥ १७॥ अथ गार्हपत्यमुपतिष्ठते । द्वयं तद्यस्माद्गार्हपत्यमु-
पतिष्ठते गृहा वै गार्हपत्यो गृहा वै प्रतिष्ठा तद्गृहेष्वेवैतत्प्रतिष्ठायां प्रतितिष्ठति
यावद्ध्वास्येह मानुषमायुस्तस्माऽएवैतदुपतिष्ठते तस्माद्गार्हपत्यमुपतिष्ठते ॥ १८॥
स उपतिष्ठते । अग्ने गृहपते सुगृहपतिस्त्वयाग्नेऽहं गृहपतिना भूयासꣳ सुगृहप-
तिस्त्वं मयाग्ने गृहपतिना भूया इति नात्र तिरोहितमिवास्त्यस्थूरि णौ गार्हप-
त्यानि सन्त्वित्यनार्त्तानि नौ गार्हपत्यानि सन्त्वित्येवैतदाह शतꣳ हिमा इति
शतं वर्षाणि जीव्यासमित्येवैतदाह तदप्येतद्ब्रुवन्नाद्रियेतापि हि भूयाꣳसि शता-
द्वर्षेभ्यः पुरुषो जीवति तस्मादप्येतद्ब्रुवन्नाद्रियेत ॥ १९॥ अथावर्तते । सूर्यस्यावृत-
मन्वावर्तऽइति तदेतां गतिमेतां प्रतिष्ठां गत्वैतस्यैवावृतमन्वावर्तते ॥ २०॥ अथ
पुत्रस्य नाम गृह्णाति । इदं मेऽयं वीर्यं पुत्रोऽनुसंतनवदिति यदि पुत्रो न स्याद-
प्यात्मन एव नाम गृह्णीयात् ॥ २१॥ अथाहवनीयमुपतिष्ठते । प्राञ्चि यज्ञोऽनुसं-
तिष्ठाताऽइति तूष्णीमुपतिष्ठते ॥ २२॥ अथ व्रतं विसृजते । इदमहं य एवास्मि सो-
ऽस्मीत्यमानुष इव वाऽएतद्भवति यद्व्रतमुपैति न हि तदवकल्पते यद्ब्रूयादिदमहꣳ
सत्यादनृतमुपैमीति तद्ध खलु पुनर्मानुषो भवति तस्मादिदमहं य एवास्मि सो-
ऽस्मीत्येवं व्रतं विसृजेत ॥ २३॥ ॥ ब्राह्मणम् ॥ ४ [१. ३.]॥ ॥ सप्तमः प्रपाठकः ॥
कण्डिकासंख्या ११४ ॥ ॥ नवमोऽध्यायः ॥ ॥ अस्मिन्काण्डे कण्डिकासंख्या ८३७ ॥ ॥

इति माध्यन्दिनीये शतपथब्राह्मणे श्रीहविर्यज्ञनाम प्रथमं काण्डं समाप्तम् ॥ ॥

EXTRACTS MADE FROM THE COMMENTARIES OF SÂYAṆÂCÂRYA AND HARISVÂMIN.

अन्याधानेऽग्नयः पवमानेष्टिभिर्निष्पाद्याः पवमानेष्टयश्च दर्शपूर्णमासविकृतितया तदधिगमसापेक्षज्ञाना इति प्रथमे काण्डे दर्शपूर्णमासौ प्रतिपद्येते । तदनुष्ठानारम्भश्च पूर्णमासपूर्वकः अतश्च तस्य पूर्णमासस्य प्रथमं यदङ्गं व्रतोपायनं तदङ्गत्वेनापामुपस्पर्शनं विधत्ते व्रतमुपैष्यन्निति । अग्निप्रणयनं तत्प्रबलीकरणरूपमन्वाधानं चार्थसिद्धत्वादनुक्तमित्युच्यमानाङ्गमध्ये व्रतोपायनस्य प्राथम्यमविरुद्धम् ॥१॥ इदानीमग्निदर्शनलक्षणेनाङ्गान्तरेण सहितं समन्त्रकं व्रतोपायनं विधत्ते स इति । स यजमानः अग्निमाहवनीयम् व्रतमनृतवदनत्यागादिरूपम् राध्यतां समृद्धं भवतु तिरोहितमविस्पष्टार्थं पदम् ॥२॥ स्वीकृतस्य व्रतस्य यागसमाप्तिपर्यन्ततामाहाथेति । संस्थिते यागे पर्यवसिते ॥ अत्र व्रतोपायने मन्त्रांतरं विधातुं पूर्वमन्त्रान्तस्यैव विशेषमाह यत एतेन वक्ष्यमाणेनेदमहमित्यादिना बहवो व्रतमुपयन्त्यतस्तु हेतोरनेनैवोपेयात् एवकारेणैष मन्त्रः प्रशस्यते न तु पूर्वो निषिध्यते अत एव कात्यायनो [२. १. ११.] द्वयमप्याहाग्ने व्रतपतऽइदमहमिति वेति ॥३॥ यदिदं जगत्तत्सर्वमनृतं सत्यं वेति कोटिद्वयमेव न तृतीया कोटिरस्ति ॥४॥ अनेन मन्त्रेण व्रतमुपेयुषो नियममाह स इति । स इत्थं कृतव्रतोपायनः सत्यमेवेत्येवकारकरणादनृतं न वदेदित्यर्थः । असत्येवकारे यद्यत्सत्यं तत्तदवश्यं वक्तव्यं स्यात् अनृतवदनं चाप्रतिषिद्धं स्यात् इष्यते च तन्निषेधः ॥५॥ प्रसङ्गाद्विसर्जनमाह see १. ३. २३. । व्रतोपायनात्प्राग्य अहमेव मनुष्योऽस्मि व्रतमुक्त्वा स एव मनुष्यः इदमस्मिन्ननुव्रतसमये इदमिति क्रियाविशेषणत्वान्नपुंसकत्वम् नन्वसौ मनुष्यो व्रतसमयेऽपि मनुष्य एव तत्किमुच्यते य एव मनुष्योऽस्मि स एवेदमस्मीति । तत्राहामानुष-इवेति मनुष्योऽपि हि तदा [स]त्यात्मकत्वात्सत्यवदनाद्वा देव इत्युक्तम् व्रतत्यागे कृते व्रतारम्भात्प्रागिव स्वभावसिद्धं मनुष्यत्वमेवेति ॥ ननु यथा व्रतोपायने अनृतात्सत्यमुपैमीत्युक्तम् एवं तत्त्यागे सत्यादनृतमुपैमीति किं नोक्तमित्यत आह न हीति । महत उत्कृष्टाद्देवत्वात्प्रच्युतेनात्यन्तनिकृष्टमानुषत्वप्राप्तिकथनस्यानवकल्पनम् ॥६॥ व्रतप्रसङ्गादागतं तद्विसर्जनं समाप्य पूर्वेद्युर्यजमानेन व्रतानन्तरं यत्कर्तव्यं तद्वक्तव्यं प्रतिजानीतें अथेति । यतो व्रतानन्तरमशनानशनापरनामकमारण्याद्यशनमेव यजमानेन कर्तव्यम् अतस्तदनन्तरमेव तस्य निरूपणं क्रियतऽइत्यर्थः ॥ प्रतिज्ञातस्याशनानशनपक्षस्य प्रशंसार्थं केवलानशनपक्षं निरसितुमुपन्यस्यति तदु हेति । तत्तस्मिन्नशनानशनविषये अनशनं सर्वात्मन अशनत्यागम् ॥ उपवसथनामनिर्वचनेन देवानामागमनं द्योतयति तेऽस्येति उप समीपे यजमानस्य वसन्ति देवा अस्मिन्निति पर्वदिवस उपवसथनामक इत्यर्थः ॥७॥ गृहे मनुष्येष्वागतेष्वनश्नत्सु यः कश्चिद्यजमानः स्वयं पूर्वं भुञ्जीतेति यत्तदेवानुचितं तर्कयामः अथ यः कश्चिद्देवेष्वनश्नत्सु पूर्वोऽश्नीयादिति यत्तस्यानवक्लृप्तिः किमु वक्तव्या आषाढेन चेन्मुनिना निर्णीतोऽनशनपक्षः तर्हि स एव परमार्थः ॥८॥ कथमशनानशनपक्ष इति चेत् अस्यापि मुनिनैव याज्ञवल्क्येन सोपपत्तिना नीतत्वादित्याह तदिति । अशनानशनलक्षणस्वमतसमर्थनाय प्रत्येकपक्षौ दूषयति

यदीति । दैविके हि कर्मणि देवान्प्रत्युद्दिष्टस्यैव हविषः प्रथममनुपयोगः काममन्यस्य पित्र्ये पुनरतिनियमाद्विशेषोऽन्यदपि अनुपयोज्यमिति पितृदेवत्यतामापादयति याज्ञवल्क्यस्याशयः । तत्किं दैविके कर्मणि प्रागपि भोक्तव्यमिति यस्तमाशयमजानानः शङ्कते तमाह यद्यु इति यदि तु अश्नाति तदा अशिशिषतो देवानतिक्रम्य स्वयं भुक्तवान् स्यात् ॥ अशनानशनपक्षयोरुभयोरपि दोषश्चेत्का गतिरिति यद्द्रव्यमशितमप्यनशितवद्भवति तदश्नीयात् । यस्य द्रव्यस्य संबन्ध्यन्नं हविर्हि न देवा न गृह्णन्ति तदशितमपि सदनशितवद्भवति । तथा च यथोदीरितदोषद्वयाभावमाह स यदिति ॥९॥ आरण्यग्रहणं प्राकृतदर्शपूर्णमासहविर्व्यतिरिक्तोपलक्षणम् वृक्ष्यं वृक्षोद्भवं फलम् । वृषा नाम कश्चित्तस्य पुत्रो वार्ष्णस्तस्य मुनेर्मतमपवदति तद्ध तथेति । शमीधान्यं तिलमाषादि । उपचिनोतीत्युपचम् अल्पेनापि माषपिष्टेन मिश्रितं व्रीहिपिष्टं तृचतुरान्माशाबपितं (!शाङ्कपि A.C.!) उपचितं बहु भवति इति प्रसिद्धं तदाह व्रीहियवाविति अतो माषोपयोगे व्रीहियवावेव यत उपयुक्तौ स्याताम् अतस्तथा न कुर्यात् अतो युक्तमारण्यमेवाश्नीयादिति ॥१०॥ स प्रसिद्धोऽध्वर्युः अप एवाभिमुख्येन प्राप्नोति । एतच्चापां प्रणयनमथ संयौतीति [२.२.३.] वक्ष्यमाणसंयवनार्थम् अतः संयवनात्प्राक्प्रणीतानां नाशे पुनः प्रणयनं कार्यम् कृते तु संयवने तन्नाशेऽपि प्रयोजनस्य जातत्वान्न पुनः प्रणेतव्यम् ॥ उक्तं प्रणयनं प्रशंसति यज्ञो वाऽइति । अपां यज्ञसाधनतया यज्ञरूपत्वात्तद्विस्तारात्मकस्य प्रणयनस्य यज्ञविस्ताररूपत्वात्प्राशस्त्यम् ॥१२॥ व्याहृतयस्तऽइति व्याहृतयो मन्त्राः दुर्ज्ञानत्वाभिधानाच्च [°त्वानि° A.B.] अनिश्चित्य वचनादनिरुक्ताः ॥१३॥ अनियोग एवकारः । व्याप्नुवन्ति सकलं जगदित्यापः ॥१४॥ अथवास्य कर्मणो यदेवाङ्गं प्रापयितव्यमध्वर्य्वादयः प्रमादान्न प्रापयन्ति तद्वैकल्यमुदकाचमनप्रोक्षणादिना परिहरन्त आपयन्ति ॥१५॥ अपां वज्रत्वमेता आपो वज्रीभूवेत्यादिप्रसिद्धं श्रुत्यन्तरे वज्रो वाऽइति । न केवलं प्रसिद्धिबलादुच्यत्वम् उपपत्तिबलाच्चेत्याह वज्रो हीति । उपपत्तेः प्रसिद्धिं वैशब्द आह । तां प्रसिद्धामुपपत्तिं दर्शयति तस्मादिति । यस्मादापो वज्रः तस्माद्येन पथा गच्छन्ति तं पन्थानं निम्नं गर्तं कुर्वन्ति गत्वा वा यत्र तृणं गुल्मं वा उपतिष्ठन्ते निर्दहन्ति निःसारं कुर्वन्ति ॥ देवा एतमुदकलक्षणं वज्रमुदयक्तनुक्तप्रकारप्रणयनात्मकमुद्यमनं तस्य कृतवन्त इत्यर्थः तस्य वज्रस्य सम्बन्धिन्यभये [ति]न वज्रेण परिहितभये अनाष्ट्रे नाशयन्तीति नाष्ट्राण्यसुररक्षसानि तद्रहिते निवाते तत्संस्पृष्टेन वातेनापि रहिते स्थाने यथा देवाः कृतवन्तः तथैवैषामध्वर्युः ॥१७॥ प्रणयनप्रकारमाह ता इति । चमसादिपात्रस्योपरि सिक्ता पूरयित्वा न पुनः कुतश्चिज्जलाशयादुद्धृत्य गार्हपत्यस्योत्तरभागे स्थापयेत् आपस्तम्बस्तु स्थापितपात्रस्य समन्त्रकं पूरणमाह इह तु ब्राह्मणे पूरितस्य स्थापनम् ॥ उदपात्रस्थापनं प्रयोजनान्तरेण स्तौति वज्रं वाऽइति । संशृणाति हिनस्ति । अतो हिंसापरिहाराय स्वयं संनद्ध एवोद्यच्छेत ॥१८॥ उद्यन्तुः प्रतिष्ठामुक्त्वा उद्यन्तव्यस्यापि प्रतिष्ठामाह स इति ॥१९॥ सादितानामपां प्रणयनमाह ता इति । आहवनीयस्य संनिहितोत्तरभागे प्रणयति नोत्वासादयति ॥२०॥ अन्तरेणेति बलादग्निमिति लभ्यते । संचरान् संचरेयुः लिङर्थे लेट् ॥ साक्षादुत्तरभागे आहवनीयप्रणयनं विवक्षितमिति दर्शयितुं ततः प्राक्प्रत्यगासादनं निषेधति अतिहृत्य उत्तरभागमतीत्य प्राग्भागे अनाप्ता उत्तरभागमप्राप्ताः प्रत्यगेव नासादयेत् । तत्र दोषं वक्तुमुपोद्धातमाह । व्यन् सपत्नऽइति [पा° ४.१.१४५] स्मृतेर्भ्रातृव्यः तस्य भावो भ्रा-

तृव्यं शात्रवम् युवादिबाह्मावे [पा° ५. १. १३०] अण् विशिष्टं भ्रातृव्यम् महद्वैरम् तदद्भिः सह अग्नेर्यथा भवति तथा सोऽतिहरन्नध्वर्युः कुर्यादित्यर्थः । यत्र कर्मण्यस्य प्रणयनपात्रस्य सम्बन्धिनीरप उपस्पृशन्त्यृत्विग्यजमानाः तत्रोपस्पर्शनमग्नौ भ्रातृव्यं शत्रुमुदकलक्षणं वर्धयेदुन्नेञ्जयेत । अतिहरणस्य वैरकारणसंबन्धार्थः प्रथमोऽनुवादः चरमस्तु भ्रातृव्यवर्धनसमर्थनार्थ इत्यपौनरुक्त्यम् ॥ संप्रति सम्यक् ॥२१॥ प्रणीताप्रणयनानन्तरं परिस्तरणं पात्रासादनं चाहायेति ॥ विराजश्छन्दसोऽक्षरेषु दशत्वमस्ति । प्रथमश्च यज्ञो ज्योतिष्टोमः एष वाव प्रथमो यज्ञो यज्ञानां यज्ज्योतिष्टोम इति श्रुतेः तत्र च नवत्युत्तरशतसंख्याकाः स्तोत्रियाः तास्वेकोनविंशतिसंख्यया विभज्यमानासु दश लभ्यन्त इत्यस्ति तत्रापि दशसंख्या अतो दशसंख्यायोगाद्विराड्यज्ञयोरेकत्वादिह दशसंख्यासंपत्त्या विराडात्मको यज्ञ इह साकल्येन संपादितो भवति ॥ रभ राभस्ये राभस्यं कार्योपक्रमः किमपि कार्यं कर्तुमुपक्रमेते ॥२२॥ १ ॥१॥

आदानं हविर्निर्वापार्थम् यज्ञाय हि तदादानम् इज्यतेऽनेनेति यज्ञो हविः तदिह निर्वापकाले व्रीहिरूपम् तदग्निहोत्रहवण्या शूर्पे निर्वपन्वेवेष्टीव परिवेषणं करोतीव विष्लृ व्याप्तौ निजां त्रयाणां गुणः श्लाविति [पा° ७. ४. ७५.] अभ्यासस्य गुणः ॥१॥ वाङ्नियमे हि चित्तविक्षिप्तहेतोर्वाग्व्यवहारस्याभावात्तदैकाग्र्ये सति अविकलो यज्ञो यतः संपद्यते । लुभेरुदात्तोपदेशत्वेऽप्यागमानुशासनस्यानित्यत्वादिडभावः लुब्धस्वान्तेति [पा° ७. २. १८.] ज्ञापकात्लुब्ध इति निपातितम् ॥ शूर्पं चाग्निहोत्रहवणीं च प्रतपति ॥२॥ नाशयन्तीति नाष्ट्रा आसुर्यः प्रजाः । तत्तेन तपनेन यज्ञमुखाद्यज्ञप्रारम्भात् एतदिति क्रियाविशेषणम् ॥३॥ शूर्पप्रतपनानन्तरमुर्विति मन्त्रेण हविर्निर्वापार्थं शकटसमीपं प्रगच्छेत् ॥ यथा वृक्षो मूलैः पृथिवीमनुप्रविष्टस्तिष्ठत्येव न गच्छति यथा व्याघ्रादिरभितः पाशाभ्यां बद्धा म्रियमाणः नैवं पुरुषो मूलवान्नाप्युभयतः केनचित्संसर्गिणा प्रतिबद्धः किं तु परिच्छिन्नः प्रतिबन्धकासंसृष्टः सन्नन्तरिक्षे विश्रम्भं चरति तथैव निर्वप्स्यमानहविरादानार्थं रक्षोऽप्युक्तविशेषणविशिष्टं सर्वं निर्वप्स्यन्तं पुरुषमनुगच्छेत् अतस्तदेतत्पुरुषेण गम्यमानमन्तरिक्षं ब्रह्मणा उर्वित्येनेनैव मन्त्रेणानाष्ट्रं हिंसाकरहितमत एवाभयं कुरुते । उरु विस्तीर्णं प्रतिबन्धकरक्षोलक्षणमूर्तद्रव्यविरहादिति हि मन्त्रार्थः ॥४॥ अनस एव न शालायाः सकाशाद्ग्रहणे कारणमाह स इति । अन एव हि प्रथमं धान्यस्याधिकरणम् अनसः सकाशान्नीयमानं धान्यं पश्चादेव किं ततः पश्चालं (यच्चालं!) एतत (B. पतते A. C.!!) शालागतं भवति शालाशब्दाच्छान्दसत्वेन ङस्य विकल्पितत्वादण् ॥ यदग्रे गृहप्रवेशात्प्रागनसि स्थितमत एव गृहिणामाशय अनुपहतं तदेव यज्ञसाधनं करवाणीति ॥५॥ बहोर्भावो भूमा । अनोवाश्चमनसा वोढुमर्हम् ॥६॥ वैशब्दस्तस्य विधिश्रुतिसिद्धं यज्ञसाधनत्वं स्तोतुं स्मारयति । न केवलं श्रुतिसिद्धं तस्य तत्साधनत्वम् प्रत्यक्षादिप्रमाणैरपि तस्य साधनत्वं सिद्धमित्याह यज्ञो हीति (see १. १. १७.) । यस्मादनस एव ग्रहणं तस्माद्ग्रहणमन्त्रा धूरसीत्यादय अनोऽवयवलिङ्गा दृश्यन्ते न पुनः कोष्ठगतस्य कुम्भीगतस्य वा धान्यस्य कुम्भीशब्दस्तन्निष्ठं धान्यं लक्षयति ॥ ऋषिमतमाह भस्त्राया इति । षष्ठ्यर्थे चतुर्थी । तस्मिन्पक्षे भस्त्रायाः के मन्त्रा इत्याह तद्वृषीनिति । उस्त्वर्थे । तदा तु तान्येव यज्ञभस्त्रायाः प्रतिपादिकानि स्युरिति हे भस्त्रे या त्वं धूरसि इत्येव भस्त्रापक्षे विशेषः । यानि यजूंषि प्रकृतावनस्यासन् तान्येव भस्त्रायामपि स्युः । निर्ममे [°मे AC.] अनुतिष्ठानि ॥७॥

पात्रीतो ग्रहणे धर्मविशेषमाह । तस्मिन्पात्रीपक्षे तस्या अधस्तात्स्फ्यमुपोह्य उपनिधाय see कात्या° २.३.२८.२९. । अनसो ग्रहणे स्फ्योपहितपात्रीतो ग्रहणेऽतिशयितं प्रयोजनमाह यत इति । यतो यं स्फ्यमाश्रित्य युनज्राम यत्नेन योगं प्राप्नवाम ततस्तस्मिन्नेव स्फ्ये विमुञ्चाम वियोगमपि करवाम । अनसो निर्वापपक्षे हि युगप्रभृतौ शकटस्य धुरोर्निदध्यात् पात्रीतः पुनर्निर्वापे तदाधारभूते स्फ्ये तयोर्निधानं विमोकः see कात्या° ३.६.१९.२०. ॥८॥ अथ धुरः समन्वकमभिमर्शनं विधास्यंस्तदुपोद्धातत्वेन देवतासूयतां तस्याः प्रतिपादयति तस्येति । एतद्युक्तमनसो योगे खलु ये बलीवर्दा वहन्ति एषां वहं वहनसाधनं स्कन्धरूपमङ्गमग्निदग्धमिव दृश्यते अतो वोढव्या धूरग्न्यात्मिकेत्यवसीयते ॥ शकटनिर्वापस्य प्राशस्त्यातिशयं द्योतयितुं तस्मिन्वेदिहविर्धानयोः संपत्तिमाहाथ यदिति । शकटस्याधःपतनं वारयितुमोषादण्डाग्रोत्तम्भनार्थौ मेथी कस्तम्भी ईषाद्वयं यत्र संसृतं ततः प्रत्यग्भागः तयोरीषयोर्मध्यदेशः प्रउगम् तच्च पश्चाद्विस्तृतम् पुरस्ताद्ध्रसीयः वेदिरपि तथाविधा त्रिंशत्पदानि पश्चात्तिरश्ची भवति चतुर्विंशतिं पुरस्तात्तिरश्चीति श्रुतेः अतस्तत्सारूप्यात्प्रउगस्य वेदित्वव्यपदेशः । धान्यनिधानाय परिश्रितप्रदेशो नीडः हविर्धानमपि परिश्रितम् परिश्रयणसाम्यान्नीडस्य हविर्धानत्वम् ॥९॥ धुरि भवोऽग्निर्धुर्यः । हविर्ग्रहणाय शकटस्य परिश्रितप्रदेशं पश्चाद्भागं यास्यंस्तं धुर्यमग्निमतिक्रमिष्यन्भवति तदवगमे च स क्रुध्येत् तस्य प्रसादनायैतत् धूरसीति मन्त्रोच्चारणेन तस्मा एवाग्नये निह्नुतेऽपनयति अतिक्रमजनितं स्वापराधं प्रशंस्य प्रसादयति स चाग्निरतिक्रामन्तमप्यध्वर्युं न बाधते ॥१०॥ तन्मन्त्रोच्चारणेन शत्रुहिंसनं महर्षिव्यवहारेण संवादयति तदिति । अर्धमासशः पौर्णमास्यां दर्शे च ॥११॥ ध्रातं तृप्तं देवानां तृप्तिजनने पर्याप्तमित्यर्थः । ध्रै तृप्ताविति [धा° २२.११.] भौवादिको धातुः । मा ह्वार्षीत्कुटिलगतिर्मा भवतु । ह्वारनिषेध एवाह्वलाशब्दार्थः ॥१२॥ शकटस्यारोहणं विधत्तेऽथेति । पस्पार पालयामास स्पृ प्रीतिपालनयोः [धा° २७.१३.] See १.३.१. ॥१३॥ पुरोडाशीयानां व्रीहीणां समन्त्रकमवेक्षणं विधत्तेऽथेति । वायुः प्राणो भूत्वा नासिके प्राविशदिति श्रुतेः प्राणवातयोरेकत्वम् तथा सति मन्त्रेणैव प्राणात्मकाय वाताय तद्रूभवनकीर्तनं कुरुते ॥१४॥ यदि तु तत्र तृणादिकं न भवेत्तदा पुरोडाशीयं व्रीहिसमूहमेवानेन मन्त्रेणाभिमृशेत् ॥१५॥ अभिपद्यते आलभते स्पृशति । यज्ञो धानाकरम्भादिपञ्चहविष्क इति पञ्चसंख्यायोगसाम्यात्पाङ्क्तः । तत्तथा सत्येतदेतेन पञ्चशब्दोपेतमन्त्रोच्चारणेनात्रास्मिंश्छकटे पाङ्क्तयज्ञमेव धारयति ॥१६॥ भागं दोग्धीति भागदुघो भागप्रदः दुहः कब्घश्चेति [पा° ३.२.७०.] । तादृशः पूषा पाणितलाभ्यां सर्वस्य जनस्याशनं भोज्यमन्नमुपनिधाता उपनिधातुमुपस्थापयितुं शीलवान् ताच्छीलिकस्तृन् न लोकेति [पा° २.३.६९.] कर्मणि षष्ठ्याः प्रतिषेधः ॥१७॥ असमदमकलहं परस्परमविरोधम् ॥१८॥ स्वस्वनामोद्देशेन गृहीतं हविः ऋणमेव ताः सर्वा देवता मन्यन्ते । यत्काम्या यस्य फलस्येच्छया । काम्यच्चेति [पा° ३.१.९.] यच्छब्दादिच्छार्थे काम्यच् तस्माद्देवतानामावश्यमादेष्टव्यम् । आग्नेयवद्यथाक्रममग्नीषोमीयादीनि हवींषि गृह्णीयात् ॥१९॥ निरुप्तशेषस्याभिमर्शनं विधत्तेऽथेति । तत्तत्र शकटे यस्मादेव स्थानाद्गृह्णाति तत्स्थानं वर्धयति ॥२०॥ परिवेष्टितमेव खल्वनो भवति धान्यनिधानार्थं तन्मध्येऽवस्थितस्याध्वर्योश्चक्षुः पाप्मगृहीतमिव काचकामलादिदोषदूषितमिव द्रष्टुं न समर्थं भवति कथं तस्य दर्शनोपाय इति तदुच्यते ॥ तत्तथा

सति एतन्मन्त्रकरणकेन प्रेक्षणेन स्वःशब्दप्रतिपादितं यज्ञादिचतुष्टयमर्थजातं प्राच्यां दिशि प्रथमत उपलभ्यमानमतोऽस्माच्छकटस्थानादवलोकयति ॥२१॥ तं शकटस्थानात्प्रगच्छन्तमनुसृत्य इतोऽस्माल्लोकात्प्रच्यावयितुं तस्य च यजमानस्य कुलं विक्षोभयितुं समर्थाः ईश्वरऽइति [पा° ३.४.१३.] तोसुन्प्रत्ययः । दृंहति दृढीकरोति ॥ निरुप्तेन हविषा सहाग्निसमीपगमनं विधत्तेऽथेति । उर्विति मन्त्रस्य प्रागाम्नातं ब्राह्मणमतिदिशति सोऽसाविति । अन्तरिक्षं वाऽअनु रक्षश्चरतीत्यादिको (see k.४.) यो वाक्यशेषः सोऽसावेवात्राम्नातस्यापि तस्य मन्त्रस्य बन्धुरनुकूलः ॥२२॥ गार्हपत्ये आहवनीये वा यस्मिन्नग्नौ श्रपणं तस्य पश्चात्पात्रासादनम् निरुप्तस्य हविषः सादनं च कर्तव्यम् ॥२३॥ २ ॥१॥

इडापिङ्गलादिनाडीद्वारा बहिर्निर्गच्छन्प्राणः प्राङित्युच्यते तयैव द्वारा पुनरन्तः प्रविशन्प्रत्यङ्ङिति तावेतौ वृत्तिभेदौ प्राणोदानावित्युच्येते तत्र प्राङ् संचरन्प्राणः उत् ऊर्ध्वदेशादानयति अन्तः प्रवेशयानुगुणं चेष्टतऽइत्युदानः तस्य च शब्देन प्रत्यङ्मुखोऽपानो विवक्षितः । एवं द्विधाभिन्नस्यैतस्य वायूवाख्यस्य पवित्रस्य परिमाणमनुसृत्य तत्पवित्रयोर्द्वित्वम् ॥२॥ द्वित्वपक्षमेव निगमयति द्वेऽइति अथ यः प्राणापानयोः संधिः स व्यान इति श्रुतेर्व्यानस्य संधिरूपतया तदुभयानतिरिक्तत्वाद्द्वित्वपक्ष एव श्रेयान् ॥ प्रोक्षत्याभिरिति प्रोक्षण्य आपः ॥३॥ आवृत्य शयनं कृतवान् वरणाद्वृत्र इति नाम ॥४॥ पूतिर्दुर्गन्धिः । बीभत्सां चक्रिरे जुगुप्सन्ते स्म मान्बधेति [पा° ३.१.६.] इति बधेर्वैरूप्ये सन्प्रत्ययः । तत्संस्पर्शं परिहर्तुमुपर्युपरि वर्तमाना अतिपप्लुविरे जलाशयमतिक्रम्य तीरदेशं प्राप्ता आसन् प्लुङ्गताविति धातुः [धा° २२.६२.] प्रुताश्च (प्लु° C.) ता आपो दर्भात्मना परिणताः । अनापूयिता इति आ समन्तात्पूर्वं दौर्गन्ध्यं प्राप्ताः आपूयिताः पूयी विशरणे दुर्गन्धे च [धा° १४.१३.] कर्तरि निष्ठा छान्दस इट् । इतरासु दर्भात्मना परिणतजलव्यतिरिक्तास्वमेध्यत्वापादकं किंचित्संसृष्टमिव भवति । एवमनापूयिताब्विकारदर्भमयाभ्यां पवित्राभ्यामासामपामुत्पवनं पूयसंसर्गकृतं तदमेध्यत्वमपहन्ति ततश्च विधास्यमानं प्रोक्षणं मेध्याभिर्मेधार्हाभिः शुद्धाभिरेवाद्भिः कृतं भविष्यतीत्यर्थः ॥५॥ अग्निहोत्रहवण्या पात्रेण साकं प्रोक्षणीरपः । उदिङ्गयति ऊर्ध्वं सेचनेन चालयति । अग्रे पुरतो वर्तमानं समुद्रं गच्छन्तीत्यग्रेगुवः । अग्रेपुवः आपः खल्वभिषवार्थमासिच्यमाना यष्टव्यदेवताभ्यः पूर्वं सोमरसमास्वादयन्ति तेन सोमपानेनाग्रे प्रथमं स्वात्मानं पुनन्तीति । अग्रे प्रशस्ते अद्यास्मिन्काले ॥७॥ प्रोक्षणपात्रगतेनैवोदकेन तत्पात्रगतमुदकं प्रोक्षयित्वा तत्तेन मन्त्रपाठेन प्रोक्षणजनितमपराधमेताभ्यो प्रोक्षणीभ्यो निह्नुतेऽपनयति । एवं संस्कृताभिरद्भिर्हविषः प्रोक्षणं विधत्तेऽथेति । बन्धुरनुकूलं स्तावकमर्थवादवाक्यं सर्वस्यापि प्रोक्षणस्यैकविधमेव अतस्तत्सर्वत्र योजनीयमिति भावः ॥१०॥ तक्षा वर्धकिः ॥१२॥ ३ ॥१॥

अथ निरुप्तव्रीहियवावहननार्थं कृष्णाजिनादानं विधत्तेऽथेति । अवच्छायापच्छिद्य छो छेदने [धा° २६.३७.] ॥१॥ कृष्णाजिनस्य यज्ञरूपत्वं वक्तुं त्रयीमयत्वं प्रतिपादयति तस्येति । बभ्रूणि पिङ्गलवर्णानि हरीणि हरितवर्णानि ॥२॥ शिल्पं चित्रं रूपम् see वाजस° ना° ४.१. । सोमाङ्गभूता दीक्षापि कृष्णाजिनस्योपरि क्रियते । यदि भूम्यामेवावहननादिकं कुर्यात्तदा तस्य हविषोऽवश्यं स्कन्नदोष इत्यभिप्रायः ॥३॥ कृष्णाजिनवत्प्रसक्तमवधूननं पात्राणां निषेधति अतिनत्येवेति । न कवलं रक्षांसि निरस्यति तत्संपर्कादयज्ञियमपि अपास्यति यद्वीति

॥४॥ The explanation of the conclusion of k.5., of k.6. and of the beginning of k.7. is wanting in ABC. तदिति कृष्णाजिनोलूखलयोरन्योऽन्यं हिंसा मा भूदिति पृथिवीकृष्णाजिनयोरविकमत्यप्रार्थनं वदतीत्यर्थः ॥७॥ यज्ञो यज्ञसाधनं हविरुलूखले प्रत्यष्ठात्प्रतिष्ठितमभूत् प्रासारि प्रसारितो विस्तारितोऽभूत् ॥८॥ अवदवतु तर्पयतु ॥९॥ निर्वापादौ मन्त्ररूपाया वाचो हविःकरणसाधनवाद्वागेव हविःकृत् ॥११॥ हविःकृदाह्वानमन्त्रे विशेषमाह तानीति । राजन्यबन्धोः क्षत्रियजातेः । आपस्तम्बस्तु राजन्यवैश्ययोर्विपरीत्येनासूत्रयत ॥१२॥ पुरा खल्वेतदाह्वानानन्तरं जाया हविष्कृदुपोत्तिष्ठति अतस्तदानीं जायैव हविःकृदभूत्तत्स्मादिदानीमप्येतदाह्वानानन्तरं जाया वान्यः कोऽपि ऋत्विग्वा उपोत्तिष्ठति स एव हविःकृदित्यर्थः ॥ हविःकृदाह्वानसमये दृषदुपले शम्यया समाहन्ति ॥१३॥ समाहननजनिताया वाचो यज्ञविघातकासुरराक्षसादिनिवृत्तिहेतुतामुपपादयितुमितिहासमुदाहरति मनोरिति । पापं निकर्ष पराजयं सचते प्रापयति ॥१४॥ श्रद्धैव देवो यस्य स श्रद्धादेवः श्रद्धालुः । आवमिति ह्रस्वोच्चारणम् ॥१५॥ मनोरौ वेति [पा° ४.१.३८.] मनावी । वदन्त्यै षष्ठ्यर्थे चतुर्थी यत्र यस्मिन्देशे वदन्त्यास्तस्याः शब्दं शृण्वन्ति । इदानीं मनुष्यशरीरान्निर्गतवाचः श्रवणादस्माकं पापीयः अतिशयितं पापं पराजयः प्राप्नोति ॥१६॥ स खल्वृषभः देवानां मधुरवागासीत् ॥१८॥ नलादीनि द्रव्याणि शूर्पस्योपादानभूतानि ॥१९॥ उलूखलान्निःकृष्यावहतान्व्रीहीन् शूर्पे प्रक्षिपति ॥ चशब्दाज्जविर्ये च संज्ञां संज्ञानं समानज्ञानवम् ॥२०॥ तुषाणां राक्षसभागत्वात्तन्निरसनं विधत्ते ॥२१॥ वितुषीकृतानां तण्डुलानां व्रीहाणां च पृथक्करणं विधत्तेऽथेति ॥ यदा यस्मिन्काले एते व्रीहितण्डुलाः एतद्विवेचनं प्राप्नुवन्ति तस्मिन्त्समये यत्र यस्यां पात्र्यामधि उपर्येनानपविनक्ति ॥२२॥ तत्पात्रीगतं हविरनुमन्त्रयते ॥२३॥ तस्मिन्फलीकरणे शाखान्तरीयं मन्त्रविधिमनुवदति तदेति । तं निषेधति तदु तथेति ॥२४॥ ४ ॥१॥

कपालोपधानपेषणयोर्युगपदनुष्ठानं विधत्ते स इति । आग्नीध्रः कपालानामुपधाताध्वर्युः पेषणार्थं दृषदुपले उपदध्यात् ॥१॥ शिरःकपालान्तर्गतं मांसं मस्तिष्कः ॥२॥ अङ्गारविभजनार्थं काष्ठमुपवेषः । धृष्णोत्यनेनेति धृष्टिः । अथ यज्ञे एनेन काष्ठेन तदङ्गारादिकमुपालभते प्राप्नोति ॥३॥ अग्निगताशुद्धांशस्य निरसनं विधत्ते तेनेति ॥४॥ शुद्धादग्नेः पुरोडाशश्रपणार्थमङ्गाराहरणं विधत्तेऽथेति । आस्कौति विभजति स्कुञ् आप्रवणे [A. °वणे B. C. see धा° ३१. ६.] । योऽग्निर्देवान्यजति ॥५॥ नेन्नोऽस्माकं हविषो भागेनैव राक्षसादय उपोत्तिष्ठेयुरित्यनेनाभिप्रायेणाङ्गारस्योपरि कपालोपधानं कृतवन्तः ॥ यजुषा आ देवयजमिति मन्त्रेण संस्कृतत्वादेष एव हि कपालोपधाने मुख्यो नान्य इत्यर्थः ॥६॥ समानं जायन्तऽइति सजाता ज्ञातयः ॥७॥ दक्षिणहस्तेनान्यस्याङ्गारस्याहरणं विधत्तेऽथेति । नेदिहेत्यादि यदि सव्यपाण्यङ्गुल्या अभिनिधानं न कुर्यात्तदा इहास्मिन्कपाले उपर्यङ्गारनिधानात्पुरस्तादेव राक्षसाः प्रविशेयुः अतः कपालस्योपर्यङ्गाराध्यूहनपर्यन्तमङ्गुल्याभिनिहितमेव भवेत् ॥८॥ पुरा पुरोडाशाधिश्रयणात्प्राक् ॥९॥ मध्यमकपालात्पूर्वदेशे स्थाप्यस्य कपालस्योपधानं विधत्ते ॥११॥ लोकत्रयातिवर्तिनश्चतुर्थस्य सद्भावोऽसद्भावश्च अनद्धा वै अस्माकमप्रत्यक्ष एव लोकत्रयवत्प्रसिद्धभावात् ॥१२॥ कपालानि ॥१३॥ अवहननवत्पेषणम् see १.४.४. ॥१४॥ कृष्णाजिनस्योपरि । पेषणीयतण्डुलानां धारणाद्धिषणा पर्वतावयवत्वात्पर्वतीति एतदुभयं प्रसिद्धमिति हिशब्दयो-

र्थः । पार्थिवेन धारणाख्येन रूपेण योगादेषा दृषदियमेव पृथिवीति स्तुतिः ॥१५॥ दृषदः पश्चाद्भागे शम्यामु° । विष्टब्धे विविधमधस्तादुपरिष्टाच्च धारिते ॥१६॥ दृषद उपरि । उपलातिशयेन दृषदः सकाशादल्पपरिमाणा । १.४.१३. इति यत्नयोः समाहननं विहितं तत्र दृषदुपलयोरुभयत्रावस्थानाज्जनूत्वम् तन्मध्येऽवस्थानाज्जिह्वाया: जिह्वात्वम् ॥१७॥ पेषणार्थं दृषद उपरि तण्डुलान्प्रक्षिपति । धिनवत्प्रीणयेत् धिवि प्रीणनार्थः [धा° १५.८४.] ॥१८॥ नासिकाभ्यां बहिर्निर्गच्छन् श्वासरूपो वायुः प्राणः ताभ्यां देहे पुनः प्रविशन्नुदानः अन्नपानादिरसं विविधं सर्वासु नाडीषु अनिति प्रेरयतीति मध्यवृत्तिर्वायुर्व्यानः ॥ प्रोहति कृष्णाजिने प्रक्षिपति ॥१९॥ हविः देवानां जीवं प्राणधारणयुक्तमेव सदमरणसाधनं भवति अथैवं सत्येतद्यज्ञसाधनं हविरवहननपेषणाभ्यामृत्विजो मारयन्ति ॥२०॥ तथा सति निर्जीवत्वात्तस्यामृतत्वसाधनत्वं न युक्तमिति भावः मन्त्रप्रयोगेन तस्य निर्जीवत्वं परिहरन्प्राणादीनेव पुनरस्मिन्हविषि स्थापयति ॥ पिंषन्तीति एवं समन्त्रकमध्वर्युणा पेषणे कृते सति यजमानपरिचारका अवशिष्टं सर्वं चूर्णीकुर्युः तथा उपहितानि च कपालानि अङ्गारैः प्रदीप्तानि कुर्युः ॥२१॥ यदैवाध्वर्युः पिनष्टि अथ तस्मिन्नेव समये एकोऽन्य आग्नीध्रादिः आज्यं निर्वपति तच्च सर्वदेवतासाधारणमिति देवतादेशेन रहितेनैव यजुषा गृह्णीयात् । देवतानाम निःशेषोक्तं यस्मिन् तन्निरुक्तं तद्विलक्षणमनिरुक्तं तादृशं च महीनामित्यादि यजुः तत्रप्रसिद्धदेवतावाचिपदस्यानुपलम्भात् । मन्यन्ते पूज्यन्ते मन्यः ॥२२॥ १ ॥२॥

पिष्टानां पिण्डकरणार्थं पात्र्यां संवापं विधत्ते । पवित्रयुक्ते पात्रे । see १.२.१७. ॥१॥ वेदिमध्ये । उपसृजत्याभिरिति पिष्टसंसर्जनार्था आप उपसर्जन्यः ताभिः सहागच्छेत् ताश्चानीताः पिष्टानामुपरि पवित्राभ्यां प्रतिगृह्णीयात् ॥२॥ संयौति सम्यग्मिश्रीकरोति । जनयत्यै जननाय अधिवर्जनं पुरोडाशस्याग्नावधिश्रयणं करिष्यन्खलु संयौति यथा खल्वधिवृक्तः पुरोडाशोऽग्नेः सकाशाज्जायेत ॥३॥ स खल्वध्वर्युर्यस्मिन्काले तस्य हविर्द्वयस्य पुनः संहरणमेकीकरणं करिष्यन्न भवेत्तदानीमिदमग्नेरित्येकं भागमभिमृशतीदमग्नीषोमयोरित्यपरं तावेतौ यथासंख्यमाग्नेयाग्नीषोमीयपुरोडाशौ ॥ पुरोडाशकपालस्याज्यस्य चाग्नेरुपरि अधिश्रयणस्य समानकालतां विवक्षिषुः कर्तृभेदमाह । एष अध्वर्युः । आग्नीध्रः २.१.२२. इत्यतः अदःशब्देन परामृश्यते ॥४॥ आज्यं यज्ञशरीरस्यार्धभागः उपस्तरणाभिघारयोः प्रयाजादीनां च तत्साध्यत्वात् इतरोऽर्धः पुरोडाशादिहविः । सहाधिश्रयणेन तदर्धद्वयमेकीकृत्य अग्निं प्रापयावेत्यध्वर्योराग्नीध्रस्य चाभिप्रायः ॥५॥ अधिवृणक्ति अग्नावुपरि वृणक्ति वर्जयति अपणार्थं स्थापयति । घर्मस्य सोमयागाङ्गस्य यत्प्रवृञ्जनं सोमे तत्सदृशमेवैतत्पुरोडाशप्रवृञ्जनम् ॥७॥ उपहितेषु कपालेषु तं विस्तारयति ॥८॥ सत्रेति निपातोऽनेकार्थत्वादत्रातिशयवाची सत्रा पृथुं अतिपृथुम् । व्यृद्धं विगतर्द्धिकम् ॥९॥ पश्चात्तरमपवदति कस्तदिति । यं देवतासौविष्टकृतैडाद्यवदानपर्याप्तमेव मन्येत तत्परिमाणविशिष्टं ॥१०॥ क्षिण्वन्ति हिंसन्ति विवृहन्ति विश्लेषयन्ति क्षिणु हिंसायाम् [धा° ३०.४.] ॥११॥ तं पुरोडाशम् परितोऽग्निर्यस्य स पर्यग्निः ॥१३॥ शृतं पक्वम् श्रा पाके [धा° २४.४५.] निष्ठायां शृतं पाकऽइति [पा° ६.१.२७.] निपातितम् ॥१४॥ अभिवासयति साङ्गारेण भस्मना छादयति । नग्नः स्वभावतो विवसनः मुषितः चोरादिभिरपहृतवसनः ॥१६॥ इज्यते

ऽनेनेति यज्ञः पुरोडाशः स म्लानिरहितोऽभूत् ॥१७॥ निर्णिज्यते शोध्यतेऽनेनेति निर्णेजनमुदकम् ॥१८॥ २॥२॥

यं होतृकर्मणि प्रावृणत ते देवा इत्यर्थः । प्राधन्वत्प्रागद्रवदम्रियत धवि गमने [धा° १५.८८.] । भीषा पूर्वाग्निवन्मरणभयेन निलीनोऽन्तर्हितो बभूव । ष्ठिवु निरसने [धा° १५.५२.] । अप्रपदनमनाशयभूताः । वः पञ्चम्यर्थे चतुर्थी युष्मत्सकाशात् । ततो निष्ठीवनलक्षणवीर्यधारणात्ताभ्योऽद्भ्यः सकाशात् ॥१॥ यथेदानीं ब्राह्मणः पुरोहितः । तं बध्यं बधार्हं ज्ञातवन्तः । अनन्तरं चैनं विश्वरूपं त्रित एवेन्द्रसहाय्यार्थं जघान इन्द्रश्च तज्जननजनितात्पापादतिमुक्तोऽभवत् यस्मात्स इन्द्रो देवः अतोऽस्मिन्पापसंश्लेषो न युक्त इत्यर्थः ॥२॥ ते लौकिका जना विश्वरूपहननानन्तरमेतदूचुः । एषु त्रितादिषु यद्विश्वरूपबधजनितमेनस्तद्यज्ञो मृजीत शोषयेदिति अत एतत् एतेन पात्रीनिर्णेजनादिनिनयनेन एषु तदेनो यज्ञः संशोषयति तस्मादवहननपेषणादिजनितस्यैनसो रूपं पात्र्यादिनिर्णेजनमाप्त्येभ्यो निनेतव्यमित्यर्थः ॥३॥ वयमपीदमेनः परः परस्तादन्यत्राधारान्तरे अन्यत्रास्मत्तो नयाम ॥४॥ अन्वाहरति यज्ञसंबन्धि दोषजातं परिहरत्यनेनेति अन्वाहार्यो नाम ऋत्विग्भ्यो देय ओदनः ॥ निनीतमुदकमङ्गारेण प्रतपति ॥ एवं संस्कृतं पुरोडाशं पशुवेन स्तौति ॥५॥ यज्ञियः सारांशो मेधः ॥६॥ अस्य यजमानस्य ते एते पुरुषादयः आलब्धाः सन्तो यत्परिमाणविशिष्टवीर्यवद्धविः स्युः अस्य व्रीहियवयोः सर्वपशुसारत्वं विदुषो यजमानस्य तन्निष्पादितं पुरोडाशादिकं हविः तावद्वीर्यवद्धविरेव भवति एवं च पशुरूपमेव संस्क्रियते । लोमत्वगादिपञ्चावयवयोगाच्च या पशौ पाङ्क्तसंपदभिज्ञैरुच्यते सात्रापि पुरोडाशे विद्यते ॥७॥ लोमवत्पिष्टानां सूक्ष्मत्वाद्बहुत्वाच्च । त्वचीव श्लक्ष्णीभावदर्शनात् । दारुणः कठिनः । अस्थ्यन्तर्गतो धातुर्मज्जा । एषो एषा उ ॥८॥ अशितव्यं भक्षितव्यम् ॥१॥ ३॥२॥

वेदिकरणार्थं स्फ्यादानं विधित्सुः स्फ्यस्य वज्ररूपत्वं वक्तुमितिहासं व्याचष्टे इन्द्र इति । न्यूनाधिकराहित्येन तृतीयांशवज्ञानं दुर्लभमित्यभिप्रेत्य पक्षान्तरमाह यावद्वेति तृतीयाद्भागान्न्यूनमधिकं वा यावदेव किंचित्तावानेव स्फ्यः । चतुर्थभागस्य परिणामप्रकारमाहाथ यत्रेति तत्तत्र देशे प्रहृतः स वज्रः शकलो भूत्वा शीर्णोऽभूत् ॥१॥ संव्याधे युद्धे ॥२॥ संश्यति सम्यक्तनूकरोति तीक्ष्णीकरोति ॥५॥ स्तम्बयजुर्हरणं विधित्सुः तस्यासुरनिर्हरणलक्षणं प्रयोजनं वक्तुमाख्यायिकामाह देवा इति । यद्यदा खलु । ततोऽनन्तरक्षणम् ॥८॥ अनपजय्यं न जेतुं शक्यं पुनरुत्थानरहितम् see पा° ६.१.८०. ॥९॥ पलाय्य अय गतौ [धा° १४.१.] क्त्वो ल्यप् see पा° ८.२.१९. ॥१०॥ इतोऽस्माद्वेदिलक्षणात्स्थानादुपसंरुद्धान्प्रतिबद्धगतीनसुरान्करिष्यथ । अभिनिधास्यामः अभितः सर्वतो निरुद्धगतीन्निहितान्करिष्यामः । यच्चतुर्थं लोकजातमस्ति अस्माकमप्रत्यक्षं तेनापि वाजितान्करिष्यामः । ततोऽनन्तरं पुनः संगता न भविष्यन्ति विशीर्णा बाधिता एव भवेयुः ॥११॥ यदत्र स्तम्बयजुर्हरणं करिष्यते एतन्निदानेन मूलकारणेन निरूप्यमाणं सत् देवैः कृतं तदसुरनिरसनमतो यज्ञविघातकासुरनिर्हरणार्थं स्तम्बयजुर्हरणमिति विधिरुन्नेयः ॥१२॥ वेदेरुत्तरतः परीत्य वर्तते ॥१३॥ शत्रुनिर्हरणमपि तत्प्रयोजनम् ॥ अध्वर्युरस्याः पृथिव्या एव सकाशात्सर्वं स्तम्बयजुर्हरति नान्तरिक्षादे. अन्तरिक्षद्युलोकयोर्हर्त-

व्यस्य स्तम्बस्याभावात् न तत्र तज्जरणं संभवति ॥१४॥ स्तम्बयजुर्हरणार्थं स्फ्येन तृणस्योपरि प्रहरणम् ॥१५॥ स्फ्यमाददानोऽध्वर्युरेनां पृथिवीमुपरिभागावस्थितमूलयुक्तामिव खल्वेतत्करोति अत उत्तरमूलत्वेन प्रहरणात्तद्धिंसाशंकायां तदभावोऽनेन प्रार्थ्यते ॥ प्रहरणनिष्पन्नस्य सतृणस्य पांसोरादानमन्त्रमनूद्य व्याचष्टे व्रजं गच्छेति । अभितो निक्षेप्स्यन्खल्वध्वर्युरेतदसुरजातमपक्रमणरहितमितस्ततोगमनरहितं कुरुते ॥ वेदिप्रेक्षणमन्त्रमनूद्य तात्पर्यमाह वर्षत्विति । अस्यै अस्याः पृथिव्याः संबन्धिनि यत्र स्थाने वेद्यर्थं खनन्तः क्रूरं निष्ठुरं कुर्वन्ति तेन च तां पृथिवीमपघ्नन्ति हिंसन्ति ॥ उत्करे निधानमन्त्रस्याभिप्रायमाविष्करोति देवमिति । अन्धे सर्वप्रकाशरहितेऽतिशयिते तमसि यस्मिन्बद्धो न पुनरावर्तते ॥ अमुचे अमोचनाय ॥१६॥ स्तम्बयजुरुत्करे निवपन्नुपरि हस्तनिधानेनाधस्तात्क्षिपति ॥१८॥ हे पृथिवि ॥१९॥ अभिनिदधाति अभितो निक्षिपति बाधते । एतत् हरणसाधनं यजुरपि प्रत्यक्षमेवानुष्ठेयार्थस्य साक्षात्प्रतिपादकत्वात् ॥२०॥ अनद्धा अप्रत्यक्षमेव ॥२१॥ ४ ॥२॥

वेदिपरिग्रहं वक्तुमितिहासमुपन्यस्यति । अनुव्यमनुगमन न्यग्भूतिं प्राप्ता इव बभूवुः ॥१॥ उक्ष्णोऽनडुहः संबन्धिभिः । पश्चात्प्रतीचीं दिशमारभ्य प्राङ्मुखा अभिजग्मुः ॥२॥ यदि अस्यै अस्याः सम्बन्धि स्थानं न प्राप्नुयामः ॥३॥ अन्वाभजत संयोजयत ॥४॥ वामनः खर्वः । हेडृ अनादरे [धा° ८.३२.] ॥५॥ पूर्वस्यां दिशि आहवनीयाख्यमग्निं प्रज्वाल्य तेन विष्णवात्मकेन यज्ञेनार्चन्तः पूजयन्तः श्राम्यन्तः कर्मानुष्ठानजनितं श्रमं प्राप्नुवन्तश्चेरुः चरित्वा च तेन यज्ञात्मकस्य विष्णोराधारभूतेन स्थानेन सर्वां पृथिवीं सम्यगलभन्त अतो विद्यते लभ्यतेऽनेनेति यज्ञस्थानस्य वेदिनामत्वम् यतो वेदिपरिग्रहाद्देवा असुरसकाशात्कृत्स्नां पृथिवीमपहृतवन्तः तस्माद्गायत्रेणेत्यादिभिर्मन्त्रैः स्फ्येन वेदिं दक्षिणतः पश्चादुत्तरतश्च रेखया परिगृह्णीयात् ॥७॥ वेदेः खननं विधित्सुरितिहासशेषमाह । इतस्ततश्चलितुमशक्यत्वेन श्रान्तः सन् मूलान्युपेत्य भूम्यन्तर्गतः सन्मुम्लोचास्तंगतोऽदृश्यो बभूव ॥८॥ पांक्तिः सोमयागस्यापि वेदिं त्र्यङ्गुलखातामेव मेने ॥९॥ वेदिनामनिर्वचनान्तरमाह ॥१०॥ गायत्रेण त्वेत्यादिभिः प्राक्कृतः पूर्वः परिग्रहः तदपेक्षयास्योत्तरत्वं तस्य स्वरूपमाह सुक्ष्मेति । वेदिं दक्षिणस्यां दिशि तेन यजुषा स्फ्येन लेखया परिगृह्णीयात् ॥११॥ पूर्वोत्तरपरिग्रहयोः संख्यां समुचित्य प्रशंसति । प्रजापतिः संवत्सरात्मकः संवत्सरकालभरणेन जातत्वात् यज्ञश्च ओ श्रावयेत्यादिना [१.५.२.१६.] प्राजापत्यात्मकः ॥१२॥ व्याहृतयो मन्त्रावयवाः । पूर्वे परिग्रहे त्वात्वास्त्रयः गृह्णाम्यन्तास्त्रयः उत्तरपरिग्रहे अस्यन्ताः षट् ॥१३॥ गार्हपत्याहवनीययोर्मध्ये सा वेदिः कार्या । व्यामः प्रसारितकरद्वयान्तरालालक्षणः । सवनत्रयादिरूपेण यज्ञस्य त्रिवृत्त्वम् । पक्षान्तरमाह नात्रेति ॥१४॥ वेद्यंसयोराहवनीयस्य स्पर्शं विधत्ते ॥१५॥ श्रोणितो विमृष्टं न्यूनमन्तरमवकाशो ययोः तथाविधावंसौ यस्याः सा । हस्तेन संगृहीतुं शक्या कृशोदरा ॥१६॥ प्राच्यां दिशि प्रवणं निम्नं यस्याः सा । अथो इति पक्षान्तरं द्योत्यते ॥ वेदेर्दक्षिणभागस्योत्खातैः पांसुभिरौन्नत्यकरणं । नाद्भिः श्लक्ष्णीकरणम् । पुरीषं खातं पांसुम् । तदा तत्र सिक्तोदकवद्दक्षिणतोऽवस्थितं पितृलोकं क्षिप्रमियात् ज्योक् चिरम् ॥१७॥ वेदिमार्जनप्रशंसार्थमितिहासमाह । आ समन्तान्मृतं सर्वदा नश्वरमामृतं तद्विपरीतं यद्देवयागाधिकरणभूतं स्थानम् इतोऽस्मात्स्थानात् तदा वयमेतत्स्थानं परित्यज्य तत एव चन्द्रमसि निहिते तस्मिन्नेव स्थाने पुनर्यज्ञं

कुर्वाणास्तेन यज्ञेनासुरान्पुनरभिभवेम । ईदृग्विधोपायजनितहर्षद्योतको हन्तशब्दः ॥१८॥ वेदिकरणानन्तरं वज्ररूपाणां [see १. १. १७.] प्रोक्षणीनामासादनं यज्ञरक्षार्थं विधित्सुः प्रोक्षणीरित्यादिकं संप्रैषं विधत्ते । गुपू रक्षणे see पा° ३. १. ५०. । अथानन्तरमासादनसमकालमेवाग्नीध्रः स्फ्यमुद्यच्छन्विधारयति तदकृत्वा पूर्वं वेदिमध्ये निहितस्य स्फ्यस्योपरि सादनेऽस्फ्यलक्षणा वज्रौ संगतौ भवेतां तेन च यजमानस्य बाधः स्यात् समो गम्यृच्छिभ्यामिति [पा° १. ३. २९.] आत्मनेपदम् ॥२०॥ प्रतीकग्रहणेन विहितं संप्रैषमन्त्रं साकल्येनानुवदति । यजमानस्य पत्नीं योक्त्रेण संनह्य यत्प्रागग्रावधिश्रितमाज्यं तेनागच्छ । प्रोक्षण्यासादनादिकमन्येन कारयितुं कामयेत तदा एतत्संप्रैषवाक्यं ब्रूयात् । यदि तु स्वयमेव कुर्यामिति कामयेत ॥२१॥ द्विषतो बध इति मन्त्रेण स्फ्यं बहिर्वेद्युदङ्ङिरस्यति ॥२२॥ तत्खल्वस्या वेदेः खननादिकं क्रूरं कर्माभूत्तदनेन स्फ्यस्य निरसनेनास्या वेदेरहार्षीन्निरास्यत् तस्मात्पाण्योः क्रूरकर्मसंश्लेषादवनेजनेन शुद्धिः कार्या ॥२३॥ शृतानां हविषां यागात्प्राक् निर्मिताया वेदेश्च बर्हिःस्तरणात्पूर्वं स्पर्शनिषेधं विधित्सुः तत्सिद्ध्यर्थमितिहासमाचष्टे । अवमर्शं अवमृश्य संस्पृश्य । इतोऽस्माल्लोकात्प्रदीयमानं यद्धविः तस्मात् ॥२४॥ ह आ इत्येति पदच्छेदनम् आगत्य ॥२५॥ यत्खलु देवानामर्थं परिषूतं परिगृहितं शुश्रुम तदेतदात्मक एष यज्ञः ॥ बर्हिषः स्तरणात्पूर्वमशान्ता सती सा वेदिः स्तीर्यमाणेन बर्हिषा खलु शान्ता भवति अतो बर्हिषः स्तरणात्पूर्वं यदि वेदिमध्ये किंचित्तृणादिकमापद्येत तदा तन्निरासार्थमपि तामशान्तां न स्पृशेत् किं तु स्तरणसमये बर्हिषः स्तरणं कुर्वन्नेव तत्तृणादिकं निरस्येत् तस्मिन्समयेऽध्वर्यवः पादेनापि तामभितिष्ठन्ति ॥२६॥ ५ ॥२॥

प्रोक्षणीरासादयेतिप्रैषमन्त्रानुसारेण [२. ५. २१.] प्रथमं प्रोक्षणीनामासादनमुक्तम् इध्मबर्हिषोरुपसादनं विशेषवक्तव्याभावात्सिद्धमित्यभिप्रेत्य क्रमप्राप्तं स्रुक्संमार्जनं विधत्ते ॥ मनुष्याणां भोज्यान्ने सूपशाकादौ पक्वे सति भोजनस्थाने च शोधिते तत्परिवेषणसाधनानि दव्यादीनि (दर्व्या?) पात्राणि अद्भिः प्रक्षालनेन शोध्यन्ते अतो मानुषव्यवहारविदानवादेव (निदा°?) व्यवहारस्य देवानामन्ते हविषि पद्ये (पक्वे?) वेद्याव (वेद्यां च?) संस्कृतायां तत्परिवेषणसाधनानां स्रुचां संमार्जनं युक्तमिति यत्स्रुच इत्येवमन्तस्य वाक्यसंदर्भस्याभिप्रेतोऽर्थः ॥१॥ देवपात्राणां स्रुचां न मानुषपात्रवदद्भिः प्रक्षालनं केवलं करोति किं तु संमार्जनेनैव सहितं प्रक्षालनम् निर्णिक्ताभिः स्रुग्भिः प्रचराणीत्यनेनाभिप्रायेण । आपो हि कुशाः see १. ३. ५. अतः कुशैः संमार्जने यज्ञियाभिरद्भिरेव प्रक्षालनं कृतवान्भवति ॥३॥ प्रथमं स्रुवस्य संमार्जनं विधातुं तस्यादानप्रतपने विधत्ते ॥४॥ see १. २. ३. ॥५॥ स्रुवस्यान्तरतो बिलमध्ये वेदाग्रैरिति प्राक् संमार्ष्टि संमार्जनप्रकाराभिनयार्थ इतशब्दः । अनुपरतः उपरतिमप्राप्तः सन् । वाजो हविर्लक्षणमन्नं तदेव यज्ञः तदर्हत्वेन तद्वन्तम् वाजस्यान्नस्येन्धनं दीपनं भूयःकरणमनेन क्रियतऽइतिवाजेध्या यज्ञः ॥ जुह्वादीनां स्रुचां संमार्जनं विधत्तऽएतेनैवेति । प्राशित्रान्त्यो भागः ह्रियतेऽनेनेति प्राशित्रहरणं गोकर्णाकृति पात्रम् ॥६॥ अनेन प्रकारेण प्रागपवर्गं वेदाग्रैर्बिलमध्ये संमार्जनमनेन प्रकारेण प्रत्यगपवर्गमात्माभिमुखं बाह्यतः पृष्ठभागे वेदाग्रमूलैः । अयं प्राणवृत्त्यात्मको वायुः इतीव अनेन प्रकारेण प्राक्संचरति उदानवृत्त्यात्मकश्च इतीव अनेनैव खलु प्रकारेण प्रत्यक्संचरति इतिशब्दोऽत्राप्यभिनयार्थः अतः प्राक्प्रत्यक्सं-

मार्जनाभ्यां स्रुक्षु प्राणापानावेव स्थापयति ॥ यस्माच्च स्रुचामुपरिभागस्य संमार्जनं प्राचीनं पृष्ठभागस्य च प्रतीचीनं तस्मादरत्नेः उपरिभागस्य लोमानीतीव एवमेव प्राचीनानि भवन्ति पृष्ठभागस्य चेतीव इत्थं प्रतीचीनानि ॥७॥ स खल्वाग्नीध्रः तत्तत्संमार्गानन्तरमेव संमृष्टं पात्रं पुनरग्नौ प्रतप्याध्वर्यवे दद्यात् तदेतत्पुनः प्रतपनं लौकिकदृष्टान्तेनोपपादयति । यथा खलु कांस्यादिकं लौकिकं पात्रमवमृश्यावमृश्य निर्णिज्य प्रक्षाल्य उत्तमं चरमं क्रियाविशेषणमेतत् अन्ततः अनवमर्शमवमर्शनमकृत्वैव केवलमुदकेनैव परितः अन्तरतो बाह्यतश्च सर्वतः क्षालयेत् एवं तत्संमार्जनानन्तरं पुनः प्रतपनम् ॥८॥ प्राङ्मुख-इवाग्नेः सकाशाद्वा अग्नेरुपरि यथा संमार्जनसाधनं कुशोदकादिकं न पतति तथा संमृजीत ॥१०॥ स्रुक्संमार्जनानां वेदाग्राणामाहवनीये प्रहरणं शाखान्तराभिमतमुपन्यस्यति । यज्ञसाधनो हि वेदः संमार्जनादावुपयुक्तत्वात् एतानि च (वेदाग्राणि) तस्यावयवा अभूवन् अहेत्यवधारणे न केवलं वेदावयवत्वादेव वेदाग्राणां यज्ञियत्वमपि तु एभिर्वेदाग्रैः स्रुचः संमृष्टवन्त ऋत्विजः अतः इदं वेदाग्रजातं यज्ञसंबन्धि किंचिदङ्गम् यदि तदग्नेरन्यत्र निरस्येत्तदा तत् यज्ञाद्बाह्यतो भवेदग्नौ प्रक्षिप्तं हि यज्ञेऽन्तर्भवति । नैवेत्थं भवेदिति । तदेकीयमतं निषेधति । होमात्प्राक्संमार्जनतृणानामग्नौ प्रहरणमयुक्तं तस्मादेतान्युत्करे प्रक्षिपेत् ॥११॥ प्रैषक्रमप्राप्तं पत्नीसंनहनं विधत्ते । गार्हपत्यानुष्ठेयेषु पत्नीसंयाजादिषु पत्न्याः संबन्धात्सा यज्ञस्यापरार्धः । मदीयो यज्ञः प्रागपवर्गं विस्तीर्यमाणो गच्छेत् अतः परार्धमारभ्य यज्ञो विस्तारयितव्यः । अतो रथेऽश्वादीनामिव पत्न्या यज्ञेन सार्धं बन्धनम् युक्ता सा मदीयं यज्ञमनुलक्ष्य यज्ञसमाप्तिपर्यन्तमासीत न ह्ययुक्तोऽश्वादी रथे नियमेनास्ते ॥१२॥ युगस्य धुरि बलीवर्दादियोजनार्थं दाम योक्त्रम् योग्यं योजनीयमनडुदश्वादिकम् । अयज्ञियस्य पत्न्या नाभेरधोभागस्य यज्ञियस्योपरिभागस्य मध्ये संनहनेन सांकर्यनिवारणात् यज्ञियेनैवोपरिभागेन विधास्यमानमाज्यावेक्षणं [see k. १८.] साधुकृतं भविष्यति ॥१३॥ परिहितस्य वाससः उपरि ॥१४॥ तत्तस्मात्पृथिव्या इवास्याः रास्नां रशनामलंकारार्थां मणिमुक्तादिखचितां मेखलामेव बध्नाति । हिरशब्दो मेखलापर्यायः ॥१५॥ योक्त्रस्य मूलाग्रे संयोज्यैकीकृत्य उपरिष्टाल्लम्बयेन्नेद्ग्रन्थिकरणाभावे योक्त्रं विस्रस्तं स्यात् ॥ संनहनसमये गार्हपत्यस्य नैरृत्यां दिशि पत्न्या अन्वासनं विधित्सुः साक्षात्पश्चात्प्राङ्मुखोपवेशनं निषेधति । देवानां हि पत्नी गार्हपत्यस्य पश्चात्प्राङ्मुखी सर्वदा उपविशति अतस्तत्रान्वासीना पत्नीमामेव देवपत्नीमभ्यारोहेत्ततश्चाल्पकाले म्रियेत तत्स्थानवर्जनेन तु तां प्रीणयति तस्माद्देवपत्नीस्थानाद्दक्षिणभागेऽन्वासीत ॥१७॥ रेतसः पुरुषोपभुक्ताज्यपरिणामत्वात्कारणकार्ययोरभेदोपचारात्तादात्म्यं विहितम् ॥१८॥ आर्त्तिर्हिंसा तद्रहितेन ॥१९॥ आहवनीये हविःश्रपणपक्षश्चेत् [see १.२.२३.] आज्यं प्रथमतो गार्हपत्येऽधिश्रित्य पत्न्या सार्द्धं विलाप्य च पत्न्यवेक्षणानन्तरं ततः पुरस्तात् हृत्वा आहवनीयसमीपं च नीत्वा पुनस्तस्मिन्नधिश्रयति आज्यपुरोडाशादिलक्षणं सर्वमपि मदीयं हविः आहवनीये संस्कृतं भवेदित्यभिप्रायेण । अस्मिन्नपि पक्षे पत्न्यवेक्षणार्हेतोस्तत्संनिधानाय अग्रे प्रथमतः पशुपुरोडाशाधिश्रयणकाले अमुत्र गार्हपत्येऽधिश्रयणं कर्तव्यमन्यथा [यदि पुरोडाशाधिश्रयणकाले एवाहवनीये आज्यमधिश्रयेत् तदा] गार्हपत्यसमीपे अन्वासीनायाः पत्न्यास्तदवेक्षणस्यानुपपत्तेः भिन्नदेशत्वात् यदि च पत्नीमवेक्षयिष्यामीति तदर्थं सामि संस्कारमध्ये तत्प्रत्यक् पश्चात्पत्न्याः समीपं हरेत्तदा सं-

स्कारविघातः स्यादिति तस्याप्ययुक्तत्वात् यदि तु एतद्दोषपरिजिहीर्षया पत्नीं तत्रावेक्षयेत्तदास्याः पत्न्या यज्ञादन्तरायो भविष्यतीति तस्याः तदवेक्षणस्य प्रार्थनीयत्वात् । यस्य तु पत्न्या रजोदर्शनादिनिमित्तवशेन असंनिधानात्तदीयकर्माण्याज्यावेक्षणादीनि न क्रियन्ते तस्योक्तदोषाभावात्प्रथमत एवाहवनीये आज्याधिश्रयणं कार्यम् ॥२०॥ अतोऽस्मादेव खल्वाज्याद्देवपत्नीनां यागः अतस्तत्संबद्धस्याज्यस्यान्तर्वेद्यासादने सति तथैव पत्नीरेवसभाः अवगतजनसमूहाः करोति यष्टव्यदेवसंघस्य वेद्यामवस्थानात् अहेति निपातो विनिग्रहे देवपत्नीनां तु सभाप्रापणादस्य यजमानस्य पत्न्यपि परःपुंसा स्वपुरुषादन्यत्र राजवीथ्यादौ पुरुषसमूहं प्राप्ता भवति ॥ तेषां मतं याज्ञवल्क्यमतेन दूषयति यथादिष्टं यथादेशनं यथाशास्त्रं पत्न्याः संबन्धि कार्यं भवतु ॥२१॥ see १. ३. ३-६. ॥२२-२४॥ जग्ध्वा भक्षयित्वा see पा° २. ४. ३६. । यस्मादेवं गव्यं पयः परम्परया उदकरसपरिणामरूपं तस्मात्तत्कार्यस्याज्यस्यापां च यदुत्पवने संसर्जनं तद्रसस्यैव संपूर्णत्वाय कार्त्स्न्याय ॥२५॥ ख्यातिरत्र पश्यतिकर्मा ॥ ये एवं यजमानमवेक्षयन्ति ते स्वकीये यज्ञे कस्मादेव स्वयं यजमाना एव सन्तः अध्वर्यवो न भवन्ति कथं वा स्वयमेव होतारो भूत्वा याज्यानुवाक्यादीनि नानुब्रूयुः तत्परित्यज्य तेषां शाखिनामत्रैवावेक्षणं यजमानेनैव कर्तव्यमिति कस्मात्कारणात् अज्ञा जाता । एवं तां अज्ञां प्रहस्य अध्वर्युणैव तदवेक्षणं कार्यमिति प्रतिपादयति । दक्षिणाभिः परिक्रीतत्वादृत्विग्भिः यत्फलमाशास्यते तद्यजमानस्यैवेति न तेन पृथगाशासनं कार्यम् ॥२६॥ अवेक्षणस्य करणं हि चक्षुः तच्च यथाभूतमेव वस्तु विषयीकरोतीति सत्यमेव देवलोकरूपमस्ति ॥२७॥ १ ॥३॥

अथ जुहूपभृद्ध्रुवास्वेतस्याज्यस्य स्रुवेण ग्रहणं विधित्सुस्तत्समुदायस्य पुरुषावयवकल्पनया स्तुत्यर्थं तत्साध्यस्य यज्ञस्य पुरुषतादात्म्यमाह ॥१॥ तादृगवयवक्लृप्तिमभिनयेन दर्शयति । या जुहूः सेयमयं दक्षिणो बाहुः योपभृत्सेयं वामबाहुः ध्रुवा आत्मा देहमध्यः । तस्माद्ध्रुवास्थस्याज्यस्य सर्वयागसाधारण्यम् ॥२॥ जुह्वादिषु सर्वासु स्रुक्षु स्रुवस्य संचरणमुपपादयितुं तस्य प्राणरूपतामाह ॥३॥ स्रुवस्य वायुरूपत्वाल्लोकत्रयात्मिकासु स्रुक्षु संचरणं युक्तम् ॥५॥ तासु स्रुक्षु आज्यग्रहणं विधित्सुः तस्य पुरोडाशादिहविरन्तरवत्प्रसक्तं देवतादेशनपूर्वकत्वं निवारयति । विस्तीर्यमाणो यज्ञः प्रथममग्न्यादिभ्यः प्रधानभूतेभ्यो देवेभ्यो विस्तीर्यते तत ऋतुभ्यः प्रयाजदेवताभ्यः छन्दोभ्यश्चानुयाजदेवताभ्यः ॥६॥ अथ तस्मिन्यज्ञे यदाज्यग्रहणं तत्प्रयाजानुयाजदेवतार्थं चशब्दादेव स्विष्टकृद्यागार्थं च तथा सति तदाज्यं देवतानामानादिश्य अनुक्त्वा आज्यस्वरूपसंबन्धिनैव रूपेण देवताया अनादेशनेन (see २. १. २२.) गृह्णन्ति ॥ जुह्वां चतुर्वारं स्रुवेणाज्यं गृह्णीयात् ॥७॥ जामितादोषराहित्याय । हविर्ग्रहणाज्यग्रहणयोर्देवतादेशने सत्येकरूप्येणा (°ण!) जामिता स्यात्तमिमं दोषं विपक्षे दर्शयति जामि हेति ॥८॥ जुहूमनु भागी तस्य जुहूर्भाग इत्यर्थः see पा° १. ४. ९०. । तथा भोक्तृभोग्यस्य च क्रमेण भागौ ॥११॥ सार्वभौमो राजापारां निरवधिकां विशं राज्यं प्रावसाय प्राप्यापि एकगृहात्मनैव जयति स्वाधीनं करोति तत्र च एकमेकं वस्तु यथा कामयते तथा सर्वमेवेति प्राप्नोति तदेतद्राज्ञः सामर्थ्यमेतेनैव वीर्येण जनितं यद्वीर्यं जुह्वा ग्रहणेन भोक्तुर्निष्पन्नम् ॥१४॥ अन्तृराज्ञः सकाशात्पृथक् स्वतन्त्रा एव भवेयुः । रक्षार्थं क्षत्रियाधीनत्वे सत्येव वैश्यस्य धनसमृद्धिर्भवति । परः परस्तादन्यत्र गोप्यस्थाने निहितं यजनमस्ति ॥१५॥ सर्वे-

षां छन्दसामनुष्टुप्सकाशात्सृष्टेराम्नातत्वात्सा वागात्मिका वाचश्च सर्वजगदुत्पत्तिहेतुत्वमाम्नातम् ॥१६॥ शाखिनां समन्त्रकग्रहणस्य प्रत्येकं त्रिरावृत्तत्वमुपन्यस्य सकृत्त्वपक्षं निगमयति तदु न्विति अत्रापि हि ग्रहणस्य त्रित्वसंख्या समाहारेण संपद्यते ॥१८॥ २ ॥३॥

पूर्वभागे संनहनरज्ज्वोर्ग्रन्थिर्यथा भवति तथा ॥३॥ पूर्वदिग्भागे प्रस्तरमुष्टिं गृह्णीयात् आहवनीयनिकटे तद्ग्रहणात्क्षिप्रमेव तस्मिन्स्थापयति । पिण्डीभावेन बद्धो मानुषः स्तुपः केशसंघातः शिरसः पूर्वभागे हि भवति अतो यज्ञस्यापि पूर्वभागे स्तुपधारणाय पुरस्ताद्ग्रहणं युज्यते ॥५॥ संनहनस्य विस्रंसने सति यजमानस्य स्त्री प्रकर्षेण क्लृप्तं दशमाससं पूर्णावयवमपत्यं प्रसूयते । अस्य यज्ञमानस्यैषा रज्जुर्नीविरिव भवति लोके हि वाससः परिधाने दक्षिणपार्श्वऽएव नीविः परिकल्प्यते तस्माद्दक्षिणश्रोणौ संनहनरज्जुनिधानं नीविपरिकल्पनमेव भवति । संनहनस्योपरि दर्भान्तरैश्छादनम् उपरिवाससा आवृतेव हि लौकिका नीविर्भवति ॥६॥ बर्हिषा वेदिं छादयति । योऽयं प्रस्तरः स ऊर्ध्वबद्धः केशसंघातात्मकः स्तुपः अथ तद्व्यतिरिक्तानि श्मश्रुप्रभृतीनि यान्यवाङ्मुखानि लोमानि स्तीर्यमाणेन बर्हिषा अस्य यज्ञस्य तान्येव संपाद्यन्ते ॥७॥ हविर्ग्रहणायागता ये देवा वेदेरुपरि तऽउपविशन्ति ये च शुश्रुवांसः प्रयोगाभिज्ञा अनूचानाः अनुष्ठातृरूपा ऋत्विजः समीपे वर्तन्ते ॥८॥ बर्हिष आहर्तरि यजमाने तद्बह्वलस्तरणं कृतमुपजीवनीयतमवलक्षणं फलं भवति अधिशब्दो विभक्त्यर्थानुवादो ॥ एकं मुष्टिं वेदेः पूर्वभागे स्तीर्त्वा द्वितीयं मुष्टिं तन्मध्यमभागे पूर्वमुष्टिनासंबद्धं ततस्तृतीयं मुष्टिं वेदेरपरार्धे द्वितीयमुष्टिनासंबद्धं स्तृणीयादित्येकः पक्षः पक्षान्तरमाहाथो इति । प्रवृह्य प्रवृह्य प्रथममुष्टिं वेद्यपरार्धे स्तीर्त्वा तस्याग्रमुद्यम्याधस्तात्तत्संबद्धं द्वितीयमुष्टिं स्तृणीयादेवमेव तृतीयमपि एवं मुष्टित्रयस्य परस्परसंबन्धमृक्पादेन दृढयति (see वाजस° स° ७.३२.) ॥१०॥ आहवनीयं क्लृप्तं हविर्दहनसमर्थं करोति । वेदेः पूर्वभागेऽवस्थानादाहवनीयो यज्ञस्य शिरः ॥१२॥ परितो धीयतऽइति परिधयः पा° ३.३.९२. इति कर्मणि किः । प्राधन्विषुः प्रागमन्प्रामृषत see २.३.१. । अवकल्पयत मूर्तिसामर्थ्ययुक्तान्कुरुत ॥१॥ प्रवर्क्ष्यति हिंसिष्यति ॥२॥ युङ्क्थ युक्तान्कुरुत ॥३॥ परिधीनां बाह्यदेशे । अत्रिष्यति तृप्तान्करिष्यति । हविः स्कन्नमिति यत्तदागः स अपराधो न भवति ॥१६॥ तत्तत्रैवं नामोद्देशेनाभिमर्शने कृते सति यथा वषट्कारेण प्रत्तं हविः तस्यै देवतायै हुतं भवति एवमेवास्य यजमानस्य एतेषु भुवपत्यादिनामकेषु परिधिरूपाग्निषु तत्स्कन्नं हविर्हुतमेव भवतीत्यर्थः ॥१७॥ इध्मस्येत्यवयवावयविसंबन्धार्था षष्ठी इध्मस्य अवयवभूतान् । अग्निसमिन्धनाय ह्येध्मः क्रियते अतस्तदवयवानां समिन्धनसामर्थ्यमेव न तु परिधानसामर्थ्यमस्ति तस्मादिध्मान्तरैतानन्यानेव परिधीनध्वर्यव आहरेयुः ॥१८॥ अग्निवायुवादित्यरूपेण हिरण्यगर्भस्य ब्रह्मण एवावस्थानादग्निरपि ब्रह्मात्मकः ॥१९॥२०॥ ३ ॥३॥

मन्त्रः स्पष्टार्थ इत्यभिप्रेत्य ब्राह्मणेन न व्याख्यायते ॥२॥ पूर्वाघारसमिधोऽभ्याधानं विधत्ते । वायव्यां दिशमारभ्याग्नेयदिग्भागपर्यन्तमविच्छिन्नधारया होमः पूर्वाघारः स च यत्र परिसमाप्यते तत्रैकं समिधमादध्यात् तत्र धर्मविशेषमाह अभ्याधानात्पूर्वं मध्यमं परिधिं तया समिधा संस्पृशेत् ॥५॥ उत्तराघारसमिधोऽभ्याधानं विधत्ते । द्वितीयाघारो नैर्ऋतीं दिशमारभ्यैशानीं दिशं प्रति वर्तते ॥७॥ अदःशब्दो विप्रकृष्टार्थवाची विप्रकृष्टेऽनुयाजप्राक्काले ऽभ्या-

धानायैका समिदवशेषितव्या तस्या अभिधास्यमानमभ्याधानमनूद्य प्रसंगात्तस्य प्रयोजनमाह ॥९॥ एवमाहवनीये कर्तव्याः परिधिपरिधानादयो विहिताः अथ वेद्यां हविरासादनार्थं प्रस्तरस्तरणं विधित्सुस्तदर्थं विधृत्योः सादनं विधत्ते । आहवनीयसमीपाद्बर्हिषा स्तीर्णां वेदिमुपावृत्य बर्हिषः सकाशाद्द्वे तृणे आदाय बर्हिष उपरि तिर्यगग्रे निदधाति । प्रस्तरो हि यज्ञस्य स्तुपः केशसंघातः बर्हींषि श्मश्रुप्रभृतीनि लोमानि तथा च प्रस्तरबर्हिषोर्मध्ये तिर्यङ्निहिते एते तृणे भ्रूस्थानीये ॥ विधृत्यै विविधं धारणाय इतरथा हि प्रस्तरबर्हिषोः सांकर्यात् क्षत्रियवैश्ययोरपि सांकर्यः स्यात् ॥१०॥ तत्तत्र विधृत्योरुपरि ॥११॥ प्रस्तरस्योपरि सव्यं हस्तं निदध्यात् जुह्वादीनां सादनपर्यन्तम् ॥१२॥ जुह्वमादाय प्रस्तरे सादयेत् न तु ग्रहणमात्रं मन्त्रस्य सादनलिङ्गत्वात् ॥ ततः स्रुगाज्यव्यतिरिक्तं हविः पुरोडाशादिकं सादयेत् ॥१४॥ प्रस्तरस्य ॥१५॥ आसन्नानि हवींषि ॥१५॥ ४ ॥ ३॥

अथेध्मेनाग्निसमिन्धनहेतुभूताः सामिधेनीर्विधास्यन् तासां नाम निर्वक्ति । सामिधेनीभिः प्र वो वाजा इत्यादिभिर्ऋग्भिः ॥१॥ इध्मेन संदीप्यमानायाग्नये तत्समिन्धनार्था या ऋचो वक्तव्याः ताः सामिधेनीरनुब्रूहीत्यध्वर्युसंप्रैषार्थः ॥२॥ प्रवरात्पूर्वं सामिधेनीरनुब्रुवाणस्य होतृत्वं नास्ति यदा खल्वेनं प्रवृणीते अग्निर्देवो दैव्यो होतेति [see ५.१.५.] अथानन्तरमेवासौ होता भवति अतः सामिधेन्यनुवचनसमये होतृत्वाभावात् होतरनुब्रूहीत्यपार्थकम् ॥३॥ अग्निदेवत्या ऋचः सामिधेनीरनुब्रूयात् ॥४॥ त्रिवृता हि देवा इति श्रुतेस्तदीया यज्ञाः प्रारम्भपरिसमाप्त्योस्त्रिरावृत्तियुक्ताः । यज्ञलिङ्गत्वादत्रापि ॥६॥ पञ्चदशस्तोमस्येन्द्रस्य च सह प्रजापतिबाहुसकाशादुत्पत्तिः इन्द्रसंबन्धाद्वज्रोऽपि पञ्चदशस्तोमात्मकः ॥ सामिधेनीरभीति अभिरभागऽइति [पा° १.४.९१.] लक्षणे अभिः कर्मप्रवचनीयः कर्मेति [पा° २.३.८.] द्वितीया ॥७॥ भवन्वर्धमानः ॥८॥ उपरिष्टाद्दर्शपूर्णमासयोरिति [k. ११.] विशेषणात् वाक्यशेषे च तं काममनपराधं राध्नोतीति कामप्राप्तिश्रवणात्तद्विकृतिभूता काम्येष्टिरत्रेष्टिशब्देन विवक्षिता अत एवापस्तम्बो दर्शपूर्णमासव्यतिरिक्तेष्टिपशुबन्धानां सामिधेनीसाप्तदश्यं सूत्रयामास ॥ अथ तासां कामेष्टीनां प्रधानयागस्योपांशुत्वं विधत्ते ॥ हेमन्तशिशिरयोरेकीकरणेन संवत्सरस्य पञ्चऽर्तवः । अनपराधमविकलम् ॥ उपांशूच्चारणस्य पार्श्वस्थानामर्थविशेषाप्रत्ययकत्वादनिरुक्तत्वम् अनिरुक्तं च विशेषनिरुक्तिविरहात्सर्वात्मकम् ॥१०॥ दर्शपूर्णमासयोरिव पक्षान्तरं विधाय प्रशंसति । मासापेक्षया य एकविंशः सूर्यः तमेव गतिप्रतिष्ठात्मरूपं सामिधेनीनामेकविंशतिसंख्यया प्राप्नोति ॥११॥ इमं च पक्षमधिकारिविशेषे नियच्छति । गता प्राप्ता यस्य श्रीः तस्यैव यजमानस्य नान्यस्य ॥ गतश्रीव्यतिरिक्तस्यापीमं पक्षं कर्तव्यत्वेनाशंक्य निरस्यति । यो यजमानः श्रैष्ठ्यं नैकृष्ट्यं च न कामयेत स तादृङ् तत्प्रकारविशिष्ट एव भवति यादृशाय यथोपलब्धप्रकारेण नियतेन ते होतारः सामिधेनीरन्वाहुः । यस्य खल्वेवमनियतमनुवचनप्रकारं विदुषो यजमानस्य एता एकविंशतिसामिधेनीरन्वाहुः स पापीयान्वा श्रेयान्वा भवति ॥ य इच्छेन्न श्रेयानित्यादिना योऽर्थः प्रतिपादितः सो विचार एव केवलं न तु तथानुवचनं कार्यम् ॥१२॥ कथं तर्ह्यनुवक्तव्यमित्यत आह त्रिरिति । अनवानन्ननुच्छ्वसन् । तत्तिसृणामृचां संतानं लोकत्रयसंतत्यै भवति । संतनोति संदधाति । स्पृणुते प्रीणयति बलयति वा ॥१३॥ अस्य होतुः यावदनुवक्तुं स्ववशः शक्तिः स्यात् । सामि ऋङ्मध्ये । यथाशक्त्य-

नुवचनपक्षे एषैव निन्दा ॥१४॥ एतद्यथाशक्त्यनुवचनं निन्दायुक्तत्वात्स होता यदा न कामयेत तदा एकैकामृचमनुक्रुसन्ननुब्रूयात् ॥१५॥ छिद्रान्वेषणशीलाय राक्षसादये प्रवेशोपायभूतं द्वारं न प्रयच्छन्ति । उपतिष्ठते प्राप्नोत्यनेनेत्युपस्थानं प्राप्तिसाधनद्वारम् ॥१६॥ ५॥ ३॥

तस्मिन्सामिधेन्यनुवचने धर्मविशेषं विधत्ते । हिं इति शब्दमुच्चार्य ॥ सामरहितस्यायज्ञत्वाद्धिंकारप्रणवयोः सामावयवत्वात्सामिधेनीषु तत्करणेन सामिधेनीयुक्तः सर्वोऽपि सामवान्यज्ञः संपद्यते । ओमोमिति वीप्सया सर्वासु सामिधेनीषु स्थितस्य प्रणवस्यानुकरणम् ॥१॥ सामिधेनीनां लिङ्गविशेषं विधत्ते स वाऽएतीति । आ इति एति प्र इति प्रेति आङुपसर्गयुक्ताः प्रोपसर्गयुक्ताश्चर्चोऽनुब्रूयादित्यर्थः । आङुपसर्गो ह्याभिमुख्ये वर्तते प्रशब्दस्य पराङ्मुखत्वेऽपि वृत्तिरस्ति । देवयजनान्निष्क्रम्य पराङ्मुखी प्रवर्तमानैव गायत्री द्युलोकं प्रति यज्ञं वोढुं शक्नोति नावीची । सा तु संनिधानान्मनुष्यान्रक्षितुं शक्नोति अतो लिङ्गद्वययुक्ता एवानुवक्तव्याः ॥४॥ प्राणस्य परागवृत्तित्वात् उदानस्यान्तःप्रवेशवृत्तिरूपत्वात् ॥५॥ पशूनां तृणादिभक्षणाय यद्वनं प्रति परागमनं तत्प्रशब्दार्थः यच्च सायमागमनं तदाकारस्यार्थः । सर्वजगत्प्रगमनस्वभावमावर्तनस्वभावं च ॥६॥ आयाहीत्यनेन यदस्मान्प्रत्याभिमुख्यगमनं प्रतिपादितं तत्स्वर्गवासिदेवापेक्षया परागमनमेवेत्येतिलिङ्गमपि प्रेतिलिङ्गं संपद्यतऽइत्येकीयमताभिप्रायः । तदेतद्दूऽरधिगममायाहीत्युक्ते यस्मादागमनमेव शीघ्रं ब्रुद्यावरोहति न तु प्रगमनम् ॥८॥ द्युशब्दो दिनवचनः [निघ° १.९.] दिवसानभि गता इति व्युत्पत्त्या अभिद्यव अर्धमासाः ॥ नोरदध्यात्यादिहविर्जनकत्वात्तद्वत्तः ॥९॥ घृतशब्दोच्चारणस्याग्निसमिन्धनेऽतिशयितमानुकूल्यमाख्यायिकया दर्शयति ॥ माधवो मधुनाम्नः पुत्रः विदेघो नाम राजा स्वमुखे विश्वनरहितमग्निं धारयामास ॥१०॥ ऋङ्मन्त्रैस्तस्य मुखगतमग्निं स्तुवन् तं विदेघमाह्वातुं निश्चितवान् ॥११॥ विदेघा३ इति प्लुतिः असूयार्था ॥१२॥ तस्मिन्समये माधवश्च तापशमनाय सरस्वत्यां नद्यां निमग्नोऽभूत् सोऽग्निस्तस्मात्स्थानादारभ्य प्राङ् दहन्निमां सर्वां पृथिवीमभितो व्याप्नोत् । प्राचीनं दहतोऽस्य पुरस्तात्सदानीरा नाम नदी उत्तरा उदक्प्रवाहा एति गच्छति तया च व्यवहितः सोऽग्निः एनमग्निं सापि निःशेषेण धारयति इतस्ततो गमनं निवार्य धारितवती स चाग्निस्तां नदीमितरनदीवन्नातिददाह न अतिशयेन ददाह शोषयामास । अत एव सदा सर्वदा नीरं जलमस्यामस्तीति व्युत्पत्त्या सदानीरेत्युच्यते । तथा च निघण्टुः [अमर° १.२.४७. see Wilson Vishnupur. p.183.] करतोया सदानीरा बाहुदा सैतवाहिनीति । तां ह नदीं पुरा तद्दहनोत्तरकाले ब्राह्मणा न तरन्ति न स्पृशन्ति अग्निदाहाभावेनाविशुद्धत्वात् ॥१४॥ तस्या नद्याः प्राग्देशः सर्वोऽपीदानीं ब्राह्मणावासः । तच्च स्थानमतिशयेन निवासायोग्यं बभूव तथा स्रावितरं भग्नभाण्डे निक्षिप्तनीरवत्तद्देशेऽनुष्ठितं यज्ञदानादिकमतिशयेन स्रवणशीलं फलप्रदानासमर्थम् यतो वैश्वानराग्निनानास्वादितमतस्तत्स्थानमपवित्रम् ॥१५॥ जघन्ये निकृष्टे सर्वरसवर्जिते नैदाघे ग्रीष्मसंबन्धिकालेऽपि संयक्तु कोपयति बहुजलतया प्रकुपिता भवति ॥१६॥ स च माधवः अग्निं प्रतीत्योवाच ॥ इति पृष्टे सोऽप्यग्निरेनमुवाच ॥ यस्मादेवं माधवायाग्निरदात्तस्मात्ते विदेहदेशाः अपि माथवा (माधवा!) इत्युच्यन्ते ॥१७॥ यस्माद्घृतशब्दोच्चारणेनाग्निः प्रज्वलितो बभूव तस्मात्कारणात्सामिधेनीषु यत् घृतप्रातिपदिकयुक्तं पदं तत्सामिधेनीनामेवाग्निसमिन्धनहेतुर्भवति ॥२०॥ त-

स्माद्घृताच्ये[त्ये]तत्पदं सामिधेनीषु युक्ततरमिति निगमयति ॥ सुम्नं सुखं स्वर्गादिलक्षणमात्मन इच्छतीति सुम्नयुः । गा स्तुतौ । जिगीषति जेतुमिच्छति । देवान् स्तुत्या जिघांसति हन्तुं प्राप्तुमिच्छति । हन्तिरत्र गत्यर्थः तस्माज्जिगीषतीति व्याख्यानं युज्यते । अच्छनगमां सनोति [पा° ६.४.१६.] सनि दीर्घत्वम् ॥ यन्नामविशेषैरनिरुक्तं तत्सर्वात्मकम् ॥२१॥ वीतय इति पदं व्याख्यातुमितिहासमाह ॥ यथोर्ध्वबाहुना शाखाग्रं स्पृश्यत इति एवमेव द्यौरपि हस्तस्पृश्येव बभूव ॥२२॥ वितरामतिशयेन विप्रकृष्टाः । विश्लिष्टा इतिः वीतिः । तथा च वीतय इत्यस्य विविधमानायेत्यर्थो भवति ॥ एतां वीतय इति पदेन युक्तामग्न आयाहीत्यादिकाम् ॥२३॥ हविषो दाता हव्यदातिः ॥२४॥ तृतीयां सामिधेनीमनूद्य व्याचष्टे । अङ्गिरसो महर्षयो यदग्निं समिद्धमकुर्वन् तस्मादग्निरप्यङ्गिर इति संबोध्यते ॥ इतरे येऽङ्गारा आसुस्तेऽङ्गिरसोऽभवन्निति अङ्गिरसामङ्गारपरिणामरूपत्वादङ्गिरःशब्दाभिधेयता अङ्गिरोऽप्यङ्गाररूप इति युक्तं तस्याप्यङ्गिरस्त्वम् ॥२५॥ यविष्ठो युवतमः नित्यं तरुण अजरणः ॥२६॥ अदः विप्रकृष्टं द्युस्थानं यस्मिन्देवाः सर्वे वसन्ति । श्रवणीयं प्रशस्यम् । देवेषितं द्युलोकरूपं स्थानमच्छ अभिलक्ष्य विवावसि प्रकाशय ॥२७॥ ईडेन्यः स्तोतव्यः नमस्यो नमस्कर्तव्यः । तमांसि तिरस्कृत्य ॥२८॥ ऋङ्मन्त्रे यन्नेति पदं तदोमिति अङ्गीकारार्थतया प्रतिपत्तव्यम् ॥३०॥ ईड स्तुतौ ॥३१॥ दीदेतिः दीप्तिकर्मा छान्दसो धातुः दीदयेव दिदीप इव ॥३२॥ अग्निविशेषणभूतेनापि वृषंकब्देनेन्द्रोऽप्युपस्थाप्यते वृषंकब्दस्य तन्नामधेयत्वात् अतो वृषंकब्दयुक्तस्य तृचस्यानुवचनादितरयज्ञवत्सामिधेनीनामपीन्द्रसंबन्धः सिध्यति ॥३३॥ योत्स्यमानांस्तान्निवारयितुं गायत्री मध्ये प्रादुर्भूता सेयं पृथिव्येव । मेरोरग्रभागे हि अमरावती नाम नगरी तस्यां हि देवाः तथा मेरोरधस्ताद्भागे च यत् इरामुखं नाम नगरं तस्मिन्नसुरा निवसन्ति तयोर्मध्ये पृथिवी वर्तत इति ह्शब्दद्योतितशास्त्रप्रसिद्धिः । मत्रि गुप्तभाषणे धा° ३३.६. । असुररक्षसमसुरविरोधि रक्षः समासान्त अप्रत्ययः रक्षःशब्दस्य नियतनपुंसकत्वात्तत्समासान्तस्यापि तथात्वम् ॥३४॥ यद्यपि होतारमिति होतृशब्दो द्वितीयान्तः तथापि होता अरमित्यपि श्रुतिसामान्यात्प्रतीयते स च अरंशब्दो यशब्दपर्यायः [!ऽलंश°] बालमूललघ्वलमङ्गुलीनामिति [पा° ८.२.८. वा° २.] लत्वस्य विकल्पितत्वात् स च शब्दोऽत्र निवारणार्थः आत्मानं निवारणविशिष्टं नैव ब्रवाणीति पाठान्तरमनुब्रुवतामभिप्रायः तं दूषयति । होतारमित्यार्षं पाठं परित्यज्य होता य इति पाठविपरिणामस्य मनुष्यबुद्धिप्रभवतया मानुषत्वम् ॥३५॥ निदानेन मूलकारणेन विचार्यमाणा ॥३६॥ यत्र सप्तदश सामिधेन्यः तत्र पृथुपाजास्तं सबाध इति द्वे धाय्याख्ये ऋचौ सामिधेनीषु प्रक्षेप्तव्ये तयोः स्थानं पूर्वोत्तरपक्षाभ्यां दर्शयति । पुरस्तादष्टम्याः पूर्वम् । अन्नं च तदाद्यं च अन्नाद्यमिदं धाय्यारूपं मुखप्रदेश एव धारयाम इति वदन्तः । अनवक्लृप्ता असमर्था । ऊर्ध्वं द्वयोर्धाय्ययोः प्रक्षेपात् अग्निं दूतमित्यष्टमी दशमी संपद्यते तथा चाष्टमीत्वभङ्गेन गायत्री वा एषा निदानेनेति प्रतिपादितं गायत्रीत्वमसमर्थं स्यात् तस्मात् समिध्यमानवतीसमिद्धवत्योर्मध्ये धाय्ये प्रक्षेप्तव्ये सा च समिध्यमानवती पाञ्चदश्ये नवमी साप्तदश्ये अष्टम्या सहोत्कर्षात् एकादशी संपद्यते ॥ उभयत्र वाशब्दश्चार्थे ॥ उक्तमापस्तम्बेन समिध्यमानवतीं समिद्धवतीं चान्तरेण पृथुपाजवत्यौ धाय्ये दधातीति ॥३७॥ तस्या दशम्याः सामिधेन्याः प्राक् अनुयाजार्थायाः समिधः यदन्यत्सर्वम् अस्मिन्नेव समये

इध्मशेषस्य सर्वस्याभ्याधानम् एतर्हि हि होता अग्नेः समिन्धनं परिसमापयतीव समिद्ध इत्यनेन समिन्धनस्य भूतत्वप्रतिपत्तेः ॥ अतिरिक्तं शत्रुवर्धनहेतुः ॥३८॥ अन्तिमां सामिधेनीमनूद्य व्याचष्टे ॥३९॥ अध्वरशब्दो हि सोमयागे रूढः स चात्र दर्शपूर्णमासविषये मन्त्रेण प्रस्तूयतऽइति सोमयागेन यावदेव फलं प्राप्नोति तावद्दर्शपूर्णमासयागेनापि ॥४०॥ १ ॥४॥

सामिधेन्यनुवचनानन्तरमग्ने महां असीति निगदस्यानुवचनं विधित्सुस्तत्प्रतिपाद्यायाः प्रशंसायाः कर्तव्यतां तदुपोद्घातत्वेन प्रतिपादयति ॥ हविर्वहनार्थं गुरुतमे तस्मिन्होतृत्वे अग्निं योजयित्वा तस्योत्साहं जनयितुमस्तुवन्ननया च स्तुत्या तमग्निं वीर्ये संयक्स्थापितवन्तः ॥१॥ स त्रेधात्मानं व्याकुरुताग्निं तृतीयं वायुं तृतीयमित्यादिश्रुतेः ॥२॥ होतृकर्तृप्रवरो विधीयते ॥३॥ तत्र धर्मविशेषमाह परस्तादिति । तस्मिन्नार्षेयप्रवरणे कूटस्थमृषिमारभ्य तत्पुत्रपौत्रादिक्रमेणार्वाचीनं वरणं कर्तव्यम् यथा आङ्गिरस बार्हस्पत्य भारद्वाजेत्यादि तथा च ज्यैष्ठ्यस्य पतये एवैतं निह्नुते अनेन प्रवरणेन निवेदयति ॥४॥ देवेद्ध इत्यादिनिवित्पदानां स्पष्टोऽर्थः ॥५॥ आस्यरूपं पात्रमास्पात्रम् । अग्नौ प्रक्षिप्तस्य हविषो देवैरद्यमानत्वादग्नेरेव पात्रत्वम् । यस्य खलु भोज्यस्य वस्तुनः संबन्धि पात्रं प्राप्तुमिच्छति तत्प्राप्नोत्येवंवेदिता ॥१३॥ निवित्पदानन्तरमावाहननिगदमप्यनूद्य पदशो व्याचष्टे ॥१६॥ दर्शपूर्णमासयोरुभयत्र योऽग्निः पुरोडाशदेवता तदावाहनानन्तरं निर्वापसमये यस्यै देवतायै येन क्रमेण निरुप्तं तेनैव क्रमेण तस्याः अग्नीषोमावावहेत्यादिवाक्यैरावाहनं कार्यम् ॥ कर्मवाचिना प्रयाजानुयाजशब्देन तत्सम्बन्धिनो देवा लक्ष्यन्ते तेषामाज्यमेव हि भागाः जौहवौपभृतयोराज्ययोस्तद्धविष्ट्वश्रवणात् ॥ अग्निं होत्रायेत्यनेन स्विष्टकृतोऽग्नेरावाहनं विवक्षितम् ॥ आ च वहेति वाक्येन प्राक्प्रतिपादितस्याज्यभागादिदेवतानां सर्वासामावाहनस्य निगमनम् ॥ अमुष्या अनुक्रमेण सम्यक् ॥१७॥ अनुवाक्या हि द्युलोकरूपा तिष्ठंश्च द्युलोकसंबन्धो भवति अतोऽनुवाक्या तावत्तिष्ठतैवानुवक्तुं योग्या अनुवचनसाम्यात्सामिधेन्यादिकमपि तिष्ठतैव पठितुं युक्तम् ॥१८॥ इयं पृथिव्यात्मिकैव याज्या ॥१९॥ २ ॥४॥

सामिधेनीभिर्ऋग्भिः समिद्धस्याग्नेः लौकिकाग्निसकाशादतिशयमाह । राक्षसादिभिर्धर्षितुं स्प्रष्टुमशक्यः ॥१॥ अथैताः सामिधेनीः प्रत्येकं तत्तल्लिङ्गोपन्यासेन प्राणापानश्रोत्रादिकरणग्रामविशिष्टात्मसंस्कारहेतुतया प्रशंसति । प्रगमनयुक्तत्वात्प्राणः प्रशब्दवान् प्राणवृत्तिर्हि इडापिङ्गलाभ्यां प्राचीनं निर्गच्छति । बहिर्निर्गतस्य वायोरात्माभिमुखी वृत्तिर्ह्यपानः उदानवायुर्देहस्योत्क्षेपणादधिकतेजोयुक्तः ॥३॥ वनीवाह्यते भृशं वहति देवान् शीघ्रं प्रापयति ॥६॥ अन्तस्था अन्तरवस्थिता । प्राणापानादिपञ्चवृत्त्याश्रयभूतो यः क्रियाशक्त्यात्मको देहमध्येऽवस्थितः प्राणः तमनया दीपयति अस्माच्च प्राणादारभ्य अन्ये प्राणाश्चक्षुःश्रोत्रादय ऊर्ध्वाश्चरन्ति अन्ये पायूपस्थयोन्यादयोऽवाञ्चः ॥८॥ अभिलषितस्त्रीविरहे अतिशयेन शोकहेतुत्वात् शोचिष्केशशब्देन पुंव्यञ्जनं लक्ष्यते तथा च एतच्छब्दवत्यैतयर्चा आनन्दव्यापारस्य उपस्थाख्यस्येन्द्रियस्य समिन्धनं कृतं भवति ॥९॥ तत अनन्तरमेकादश सामिधेनीः तदनुवचनसमये शपतो द्वेष्यस्य प्राणापानादिवियोजनहेतुत्वेन प्रशंसति । प्रथमायामनूच्यमानायामेनं होतारं यदि द्वेष्यः शपेत् अनुव्याहारः शाप इति हि धूर्तस्वामी भाष्यकारः तं प्रति होता ब्रूयात् एतर्हि आत्मनः स्वसंबधिनं प्राणं हे शत्रो अग्नौ निहितवानसि तेन च प्राणेन नि-

मित्तेन पीडां प्राप्स्यसीति ॥११॥ मनसो मोषणं विपरिलोपस्तेन गृहीतः अत एवातिशयेन मूढः [मूल्ढः B. गूढः A. गूढः C.] ॥१६॥ उध्मायेति [उध्मा C.] उध्मनम् [उध्मानम् A. उध्मानम् C.] ऊर्ध्वश्वसनं [! ऊर्ध्वश्वस° A. C. ऊर्ध्वं वंस° B.] तत्प्राप्येत्यर्थ. ॥१८॥ अपिनज्ञो बन्धुयुक्तः ॥२०॥ न्येति नितरां प्राप्नोति ॥२२॥ ३ ॥४॥

अथाघाराख्यौ होमौ विधातुं सिद्धमर्थमनुवदति ॥१॥ चनशब्दोऽप्यर्थे । स्वाहेत्यपि शब्दं न ब्रूयात् ॥५॥ उपवहं वहप्रदेशोपरिश्लिष्टमौन्नत्यकरं दारु लौकिकाः कुर्वन्ति ॥७॥ आहवनीयस्य दक्षिणभागे असुरान्प्रति उच्छ्रितवन्तः । उच्छ्रितं पर्वतादिकमिव वीर्यमपि डरासदम् । आघारयोर्दक्षिणोत्तरपरिधिसंधिमारभ्योभयतः कारणम् ॥८॥ यद्वृक्षादीनां मूलं तन्तूष्णीमिव हि अदृश्यमानत्वात् ॥१०॥ एवमाघारयोः प्रतिनियतधर्मान्विधायानुष्ठानक्रमं विधत्ते । पूर्वाघारानन्तरं नोत्तराघार अपि तु अग्निमग्नीदित्याग्नीध्रं प्रति संप्रैषं ब्रूयात् अग्निमाहवनीयम् रथादिवहने अनडुदश्वादिकं योच्यमाणास्तदीयस्कन्धस्योपरि युगधुरमध्युह्य पश्चात्पाशैर्युञ्जन्ति बध्नन्ति अतो धुरोऽध्यूहनस्थानीयः पूर्वाघारहोमः ॥१३॥ परिक्रम्य परिक्रम्य तत्तत्परिधिदेशं गत्वा तदनुसारेणाग्निं संमार्ष्टि । एकैकस्मिन्परिधौ संमार्जनस्य त्रिरावृत्तिं विधत्ते ॥१४॥ परिधित्रयानुसारेण परितोऽग्निं संमृज्य तदनन्तरमग्नेरुपरिष्टात्तूष्णीं त्रिः संमृज्यात् प्राजेत्प्रेरयेत आघारयोर्मध्ये संमार्जनस्य करणात्तद्व्यवधाने सति मनश्च वाक्चैतदुभयं समानविषयं समानाश्रयमपि भिन्नमिव भवति ॥१५॥ ४ ॥४॥

स्रुक्प्रभृतोः पूर्वभागे । तदतिक्रमजनितमपराधं तन्नमस्कारेण शमयति ॥१॥ हवीरूपेण वेद्यामवस्थितो यज्ञोऽत्र विष्णुशब्देन विवक्षितः दक्षिणातिक्रमवेलायां तस्यातिक्रमशंका मा भूदित्यर्थः ॥२॥ यत्र स्थित्वाध्वर्युर्जुहोति तत्र तस्यान्तिकमिति नेदीयस्त्वव्यपदेशः ॥३॥ विदश्चानऽइत्यस्माच्छान्दसो लङ् सिपि दश्चेति [पा° ८.२.७५.] दकारस्य रुत्वे वेरिति रूपम् । स्विष्टकृत् शोभनयागस्य कर्ता ॥४॥ होमानन्तरं प्रत्याक्रम्य ध्रुवासमञ्जनम् । ध्रुवयेति ध्रुवामित्यर्थः ध्रुवास्थस्याज्यस्य सर्वयज्ञसाधारण्याद्यज्ञस्य मध्यदेह एव ध्रुवा । आघारशेषस्य तस्यां समञ्जनाच्छिर एव तस्मिन्प्रति दधाति । अर्धस्य देशभागस्य ग्रामादेः ॥५॥ ध्रुवामनु ध्रुवाभागी यजमानः उपभृद्भागः शत्रुः । उपभृतेति द्वितीयार्थे तृतीया ॥६॥ ध्रुवापेक्षया इतरा स्रुक्ः ॥७॥ प्राजापत्यस्य पूर्वाघारस्योपांशुत्वं प्रतिपादयितुं मनोवाग्भ्यां कृतं संवादमुपन्यस्यति । अहमेव भद्रः अहमेव भद्र इति स्वस्वोत्कर्षविषये ॥८॥ प्रश्नं प्रति प्रजापतिं जग्मतुः ॥११॥ विसिष्मिये विगतस्मया भग्नवीर्या बभूव । गर्भः देवमनुष्यादीनामुत्पत्तिहेतुः । अहव्यवाट् हव्यवहनस्याहेतुभूतैव ॥१२॥ तत्र एतत् वाचः सकाशात्पतितं रेतः चर्मणि अन्यस्मिन्वा यस्मिन्कस्मिंश्चित्पात्रे देवा धृतयन्तः भृत्वा च तत्प्रतिदिवसं पृच्छन्ति अत्रास्मिन्पात्रे किमेतत्प्रसिद्धं रेतः कथम्भूतमिति विचारयन्तः । विचार्यमाणानामिति [पा° ८.२.९७.] प्लुतः । अत्रैव त्या३दिति यस्माद्देवैर्विचारितं ततस्तस्मात्स गर्भोऽत्रिः संबभूव । यतो गर्भाशयात्सृतो गर्भोऽत्रिः संपन्नः तस्मात्सृतगर्भा रजस्वला स्त्रीनाम्नात्रेयीत्याख्यायते तया योषिता सह संभाषणादिकं कुर्वन्पुरुष एनस्वी [एव स्त्री ABC] भवति । तैत्तिरीयकेऽप्याम्नातम् तन्मलवद्वाससा न संवदेत न सहासीतेति ॥ ननु यस्या गर्भोऽत्रिः संजातः सैव वागात्रेयी सर्वस्त्रीणां कथमात्रेयीत्वमित्यत आह स्त्रीरूपधारिण्या एतस्याः खलु वाग्देवतायाः एते लौकिकाः सर्वे गर्भाः सं-

भूताः गर्भाशयलक्षणे चर्मणि धृतं रेतो हि गर्भात्मना परिणमति तच्च वाक्संबन्धयेवेति सिद्धं सर्वासामात्रेयीत्वम् ॥१३॥ ५ ॥४॥

चतुर्थे सामिधेन्यादिराघारान्तः प्रदर्शितः प्रयोगः पञ्चमेऽथास्मिन्प्रवरादिर्निरूप्यते । तत्र दैवहोत्रार्षेयमानुषहोतॄणां वरणं विवक्षुरादौ तदङ्गतयाश्रावणं विधत्ते ॥१॥ आश्रावणाङ्गतये- ध्मबन्धनदर्भाणां ग्रहणं विधत्ते । एवकारो वक्ष्यमाणपक्षद्वयनिरासार्थः । वेपनः कम्पनशी- लः ॥२॥ स्तरणसमिन्धनलक्षणस्य कार्यस्य करणादिदं बर्हिरादिकं यज्ञस्य किंचिदङ्गम् ॥ तन्निराकरोति इध्मसंनहनाग्निसंमार्जनलक्षणकार्यद्वयकरणादेतदिध्मसंनहनात्मकमेव यज्ञस्य किंचित्प्रशस्तमङ्गम् अतस्तत्धारणपक्ष एव श्रेयान् ॥३॥ अथे देवहोतुरग्नेर्वरणं विधत्ते अग्रे आ- र्षेयवरणमानुषहोतृवरणाभ्यां पूर्वम् ॥४॥ विद्वानित्यनेन यष्टव्यदेवतापरिज्ञानम् चिकिवानि- ति परिज्ञातस्यार्थस्याविस्मरणम् अनुष्ठा अनुक्रमेण ॥६॥ नभोऽङ्गिरोमनुषां वत्युपसंख्यानमि- ति [पा° १.४.१८. वा° २.] भसंज्ञया रुत्वाभावः ॥७॥ ऋषीणां संबन्धिनमध्वर्युर्होतारं वृणीते ॥९॥ ब्रह्म परिवृढं कर्म तत्साधकवादग्निरपि ब्रह्म स यथा आवहति तद्वत् ॥११॥ साङ्गवे- दाध्ययिनोऽनूचानाः प्रावितारः कर्तारः अवतिस्तत्क्रियावचनः ॥१२॥ असावित्यत्र होतुर्नाम प्रथमान्तं निर्दिशेत् ॥ see ३.५.३. ॥१३॥ हे सवितः सकलकर्मानुज्ञातर्देव एतदेतेन मम वरणेन मद्व्याजेन त्वामेव वृणतेऽध्वर्यवः । तेन मन्त्रपाठेन सवितुरनुज्ञा लब्धा भवति । होतुः कर्म होत्रम् इह हौत्रं कर्तुमग्निं वृणते न तु मामित्यर्थः ॥१५॥ होता ह्यनुवाक्याः प- ठिष्यन्याज्याभिर्यक्ष्यंश्च भवति ॥१६॥ रातिर्दानं धनं लभेम । उर्व्यायामुरुत्वे महत्त्वे । सुप्रीता- दित्या वयमदितये देवमात्रे अपापिनः अनपराधिनो भवेम अथ वा दितिः खण्डनं नाशः तदभावाय चिरकालजीवनाय भवेम ॥१७॥ अनुब्रुवदनुब्रूयात् ॥१८॥ यथा सर्वेऽपि नरा आ सर्वतः शंसन्ति तथाविधशंसनाय प्रियाम् । अथ साधारण्येन नराणां यो जोष आशंसितः स युक्त एव न हि केवलं तज्जोत्रज्ञानामेव संलापोऽपेक्षितः अपि तु यो जुष्टां वाचं जानाति यश्च न सर्वैरप्ययं साधु उक्तवानित्येवंरूपा वाचो (पया वाचा ABC.) विसृज्यन्ते उच्चार्यन्ते॥ होतृवर्ये होतृवरणे । अमायि हिंसितमभूत् ॥२०॥ अग्न्यादीनामुरुत्वं लोकसिद्धम् ॥२२॥ सं- मर्शनदेशाद्धोतृषदनं प्रत्यागच्छेत् । परागतं वसु यज्ञाख्यं धनं यस्मात्स ॥२३॥ अर्वा अर्वाक् अभिमुखं धनं यस्य स ॥२४॥ हे विश्वकर्मन्महादेव त्वं शरीरस्य पाता भवसि ॥ उपवेश- नस्थानादीषदुत्तरतश्चलनं समन्त्रकं विधत्ते हे उभावग्नी युवां मा मामुत्कृष्टमाधिक्येन मौषि- ष्टं दाहं मा कार्ष्टम् उष दाहे यतो लोकः स्थानं त्वां संबन्धी अतो हेतोर्मा मा हिंसिष्टमिति प्रार्थना युक्ता । होतृषदनादुदङ्मुखमेजति एजृ कंपने ॥२५॥ the explication of यथेह - भा- गधेयं is wanting in ABC. । यथा लोके कश्चित्पाचकः तत्स्वामिनं पृच्छति पक्वमन्नं यथा आनेष्यामि यथा वा आनीतं पात्रे समर्पयामीति ॥२६॥ १ ॥५॥

अथ स्रुगादापननिगदं नवधा विभज्य व्याचिख्यासुराद्यं भागमनूद्य तस्यार्थमाह । वेदि- तव्यस्य मन्त्रे अनिर्देशात् इदमिति तत्कर्मप्रदर्शनम् इदमनुष्ठेयं कर्म वेत्तु जानातु । तस्य हौत्रेण प्रतिनियतं संबन्धमाह तस्यो हि तस्यैव हि स च संबन्धनियम एवकारार्थेन उश- ब्देन द्योत्यते । प्रकर्षेणावतीति प्रावित्रो यज्ञः । घृतपूर्णा स्रुचमास्यस्व हस्ते धारय उपस- र्गादस्यत्यूह्योर्वेति [पा° १.३.२९. वा° ३.] आत्मनेपदम् ॥१॥ मन्त्रे स्रुचमित्येकस्या एव नि-

देशं द्विवनिर्देशपच्चनिन्दापुरःसरं द्रूढयति । प्रत्युद्यामिनं प्रतिकूलोद्योगवन्तम् ॥२॥ देवानि- च्छतीति देवयुः विश्वैरपि देवैर्वरणीया विश्ववारा । कुशलादिस्तुतिमात्रेण प्रायेण परितोषादी- डेन्या मनुष्याः । हविःप्रदानमन्त्रेणापरितोषाद्देवा यज्ञियाः ॥३॥ देवमनुष्यात्मकासु प्रजासु मध्ये याः प्रजा यष्टव्यत्वेन यज्ञमन्वभजन् तं प्रकारमाह । यज्ञसंस्पर्शवतां न कदाचित्पराभ- वोऽस्ति तदसंस्पृष्टं च न किंचिदस्तीति यज्ञस्तुतिः ॥४॥ निगदविभागगतां नवसंख्यां प्र- शंसति । व्याहृतय उक्तवाक्यानि तानि च नव सप्त शीर्षण्या द्वाववाञ्चाविति ॥५॥ अथा- श्रावणप्रत्याश्रावणे विधातुमाख्यायिकामाह ॥६॥ अध्वर्युकर्तृकमाश्रावणमाग्नीध्रकर्तृकं प्रत्या- श्रावणम् । स्वर्गाख्यफलोदयात् वीजत्वं यज्ञस्य । अध्वर्य्वादयः सम्यक् प्रदाय-प्रदाय एको ऽन्यस्मै सोऽप्यन्यस्मा इत्येवं प्रकारेण यज्ञमनुतिष्ठन्ति यजमानमनपेक्ष्य तस्य तत्र व्यापारा- भावात् । यथा जलैरापूर्णं घटादिपात्रं गृहान्तर्गतप्रभूतभाण्डपूरणसमये परस्परहस्तेन संचरन्ति तद्वत् ॥७॥ अथ संग्रहेणोक्तं यज्ञसंप्रदानं विशिंषन्नध्वर्य्वादेः स्वस्वकालेषु मौनं विधत्ते । होतारं प्रत्यनुब्रूहीत्युक्त्वा प्रस्तुतानुपयोगि वचनं न ब्रूयात् होताप्यनुवचनद्वारेण वाग्रूपयज्ञ- स्य स्वस्मिन् (ज्ञः स्त्रस्व° B. ज्ञः स्व AC.) समावेशात् न व्याहरेत् ॥८॥ स वषट्कारे- णेति सोऽध्वर्युः होतृकृतेन वषट्कारेण हविःप्रदानसाधनेन अग्नौ योनिभूते रेतोभूतं हविः सिञ्चति ॥ अथ सोमविषयं वाङ्नियमं प्रतिजानीतेऽथेति ॥११॥ यदा उद्गातार स्तोत्रं प्रार- भेरन् तावदध्वर्युर्ग्रहणादनन्तरं नापव्याहरेत् ॥१२॥ तऽउद्गातारोऽपि यदाध्वर्युरुपावर्तध्वमिति ब्रू- यात्तदानीं तस्य यज्ञस्तान्प्राप्नोति अतः प्रभृति उत्तमास्तोत्रियापर्यन्तं न वदेयुः ॥१३॥ होता- पि यैषान्तिमा च स्तोत्रियेति यदा प्रज्ञापयन्ति तदा प्रभृति न वदेत् ॥१४॥ यथा पूर्णपात्रम- भिमतप्रदेशे घटादिषु प्रक्षेपमकृत्वा अन्यत्र परासिञ्चेत् । संविदानाः ऐकमत्यं प्राप्ताः स्वस्व- कर्तव्यमेकाग्रेण जानन्तः । एवं सत्येकोऽप्यृत्विङ्न मुह्यति स्वानुष्ठेयं न विस्मरति । भर्तव्यः पोषयितव्यः ॥१५॥ आश्रावणादिपंचकमनूद्य प्रशंसति । यज्ञोऽपि पाङ्क्तः धानाः करम्भ इ- त्यादिहविर्गतपञ्चसंख्यायोगात् पाङ्क्तः पशुः चत्वारः पादाः शिर एकमिति वा लोमत्वङ्मां- सास्थिमज्जभेदेन वा ॥१६॥ समप्लावयन् सर्वत्र व्याप्तानकुर्वन् ॥१८॥ यदीच्छा सौर्यादिक- या फलान्तरसाधनभूतया यजेत तत्र वा ॥१९॥ चरुपुरोडाशादिना विशेषेण राजतऽइति वि- राट् वेद्यात्मिका पृथिवी सा धेनुत्वेन प्रकल्प्यते । स्तनपानाय वत्सस्य कण्ठगतं पाशं व्य- श्लेषयन् । अपरिवीतं वत्समूर्ध्वमूधसोऽभिमुखमनयन् । उपासीदन् दोहाय गो समीपे स्थि- ताः । य एतदाश्रावणादिकमेवं दोहात्मकतया जानाति ॥२०॥ २ ॥५॥

प्रयाजान्विधित्सुर्निर्वचनद्वारेण तान्प्रशंसितुमाख्यायिकामाह । एतस्मिन्दर्शपूर्णमासात्म- के यज्ञे प्रजापतौ आश्रावयास्तु श्रौषडित्यादिसप्तदशात्मकस्य प्रजापतेर्यज्ञरूपत्वात् यज्ञे प्रजा- पताविति सामानाधिकरण्यम् ॥२॥ स्वं पयः प्रतिनियतधनरूपं क्षीरं । पयःकार्यत्वादाज्यम- पि पयः गोमहिष्यादीनां संवत्सरपर्यन्तप्रायेण दोहात्मत्वम् ॥५॥ अभितरामु वै शत्रोरत्यन्तम- भिमुखं खलु अग्नावपि ईषदीषत्पुरस्तादाक्रम्य जुहुयात् ॥६॥ आश्रावणस्य प्रदानाङ्गतया त- योः प्रदेशैक्यलाभादित्यभिप्रायात्पक्षान्तरमाह यत्रोऽएवेति । आहवनीयमध्ये यस्मिन्नेव प्रदेशे ऽग्निं प्रज्वलितं मन्येत तत्र पश्चाप्याहुतीर्जुहुयात् यस्मात्समिद्धाग्निदेशहोमादाहुतयोऽपि प्र- दीप्ताः फलजननसमर्थाः स्युः ॥७॥ हे होतः समिन्नामिका अग्निमूर्तीः प्रति तासां यागाय या-

ज्यां पठेति प्रैषार्थः ॥८॥ ऋतवो ह वाऽइत्यत्र [k.१.] संघशो विहिताः पञ्च प्रयाजाः तेष्वे-कैकं विधाय प्रशंसति । अवृञ्जत स्वैर्लब्धवादसुरेभ्यस्तं वर्जितमकुर्वन् । वसन्ते निखिलवृक्षाणां कुसुमाद्युद्गमेन प्रदीप्तताऽस्ति ॥१॥ यदिदं क्षुद्रकं प्राणिजातं सरीसृपं कृकलासगोधा-दिकं ग्रीष्महेमन्ताभ्यां नितरां परित्यक्तं शरीरक्षीणं भवति तत्सर्वं वर्षाः द्वितीयाबहुवचनं ताः प्रति ईडितमिव अहो विनष्टप्रायं सत् इदानीं पुनश्चेष्टतऽइति सर्वैः प्रशंसितमिव अन्नं स्वोचितं तृणजलादिरूपमिच्छमानमिच्छां कुर्वत् इतस्ततश्चरति वर्षासु तृणजलादिसमृद्धिसंभ-वात् ॥११॥ आस्तृतदर्भवद्वेरे शेरते ॥१२॥ परार्ध्यः परस्मिन्नर्धभागे भवः ॥१३॥ प्रयाजमन्त्रे-षु । एकस्य पुंसो जायाबहुत्वं संभवति स्त्रियाश्चैक एव पतिः ॥१५॥ चतुर्थे बर्हिराख्ये प्र-याजे होतव्ये सति उपभृतः सकाशाज्जुह्वां समानयत्याज्यम् । अभ्यावृत्याभ्यावृत्य कर्मव-शाद्देहसंबन्धं प्राप्नुवन्ति ॥१६॥ संयत्तयोः युद्धाय प्रयतमानयोः ॥१७॥ उपभृतः सकाशादा-ज्यस्यानेताध्वर्युः शत्रोः सकाशात् बलिमुपायनद्रव्यम् यजमानाय प्रदापयति ॥१८॥ उत्तरामु-पभृदुपरीतनीं कृत्वा जुहूं विधारयेत् ॥२०॥ हन्त विज्ञितमेव । अनु तदनुसृत्य एतस्मिन्नेवा-न्तप्रयाजे सर्वप्रयाजव्यतिरिक्तं सकलमपि यज्ञं संस्थापयाम नेदस्माकं यज्ञं समापनात्प्रागेव असुरा आगच्छेयुः ॥२१॥ उभयत्राच्युतः अमावास्यायां च पौर्णमास्यां च नित्यः ॥२२॥ पौर्ण-मास्याममावास्यायां च विष्णुरग्नीषोमौ प्रजापतिश्चेति विकल्पिता उपांशुयाजदेवताः एकाद-शकपालदेवता अग्नीषोमौ अमावास्यायां चोभयत्र साधारणोऽष्टाकपालदेवोऽग्निः इन्द्राग्नी ए-कादशकपालदेवता दधिपयोदेवते इन्द्रमहेन्द्राविति या दर्शपूर्णमासप्रधानदेवताः सन्ति ता अनतिक्रम्य तत्तद्देवताकं यागं समस्थापयन्नित्यर्थः अत्र देवतानामनियतत्वाद्यथादेवतमिति संग्रहेणाभिधानम् । यातयामा निर्गतसारः ॥२३॥ स इत्यनर्थको वाक्यालंकारार्थः । प्रयाज-होमेभ्योऽवशिष्टमाज्यम् । यथापूर्वमित्याग्नेयोऽग्नीषोमीयादिति हविषां पूर्वं पूर्वमनतिक्रम्य । पशोः पुरोडाशस्य वाज्यव्यतिरिक्तस्य हविषोऽवत्तम् ॥२५॥ ३ ॥५॥

अथ प्रयाजान्प्रकारान्तरेणानूद्य प्रशंसति । प्राणोपाध्यभावे शरीरसंबन्धायोगात्तेषां पुरुषस-मिन्धनहेतुत्वम् । समिधः प्राणत्वसमर्थनाय प्रासङ्गिकं नैमित्तिकमभिमर्शनमाह तस्मादिति । यजमानो ज्वरादिनोपतापवान्यदि स्यात्तदाध्वर्युः समिद्यागसमये प्राणप्राबल्यायात्मनाभिमृशे-ति यजमानं ब्रूयात् यावदाशंसेत अस्योपतापः शाम्यतु ॥१॥ हेमन् हेम्नि हेमन्ते । प्रतित-रामिव अत्यन्तं प्रतिकूला-इव हिमोपहतपल्लवाद्युपक्षीणा-इव । अर्धे भागे देशे ॥५॥ इत्थं प्र-याजान्प्रशस्य तदनुमन्त्रणमन्त्रान्विधातुमाख्यायिकामाह । वाग्रूपऽएव मन्त्रे विवदमाना जे-तुमिच्छामहे । नोऽस्माकं वाचमस्माभिरुक्तं पुल्लिङ्गवचनं मिथुनेन स्त्रीलिङ्गान्तप्रतिवचनाभिधा-नेन मिथुनं कृत्वा यः अनुक्रमेण नितरां न आक्रामति स सर्वं पराजयं प्राप्नुयात् ॥६॥ एकः पुत्रः एका पुत्री ॥७॥ उक्तार्थज्ञानं प्रशंसति पञ्च-पञ्चेत्येवेति ॥१६॥ ४ ॥५॥

अथ वसन्तादिप्रयाजदेवेषु कथमग्नेः संबन्ध इति तदुपपादनायाख्यायिकामाह । ईर्षिरे ऐच्छन् ॥१॥ तेषु यामृद्धिं देवाः ध्रुवा व्यथन्ते तादृशीमेधतुमृद्धिमसुरेषु प्रवर्धयां चक्रुः तेषु प्र-वर्धितेषु सत्सु असुराः के चन वपनात्पूर्वं वृष्टिबाहुल्यात्कृषन्तो यन्ति किल के चन कृष्टे क्षेत्रे बीजानि वपन्तो यन्ति उप्तबीजाश्च के चन सस्यानि सम्यक्फलितानीति परस्परमुच्चारय-न्तः परिणतानि सस्यानि लुनन्तो यन्ति के चन लूनानि व्रीहिफलानि मृणन्तः प्रहरन्तः खले

बलीवर्दाक्रमणादिना स्तम्बाद्यान्यं पृथक्कुर्वन्तः । तथा असुरदेशे कंलुखर्षानपेक्षिता [! BC. सुरदेशोकेलुख A?] नीवारादयो मुञ्जमुञ्जः सर्वदा परिपक्वा आसन् ॥३॥ अतोऽस्माद्व्रतिक्रमाउतेतोः असुरसंघो देवसंघाय शात्रवमाचरितुमिच्छति एतत्कनीय इन्नु निकृष्टं खलु अतः प्रवृद्धैः सह कलहो न कार्यः किं तु यथा इदमृवतिक्रमलक्षणं विच्छिन्नं कार्यमन्यथा भवेत् एतावन्मात्रमबन्नुध्यध्वम् ॥४॥ अस्य ज्ञातुरहं समान इति स्वात्मानं ब्रुवाणः कश्चित्पुरुषो यत्पुण्यं कर्म दर्शपूर्णमासादिकं करोति तत्रासावपि भागवान्भवति ॥८॥ आवाहनक्रमेणैव सर्वत्र यागो दृष्ट अत्र कथं वैलक्षण्यमिति ब्रह्मवादिनामाशयः तैर्दृष्टं तत्कारणं दर्शयति उत्तमान्होति । यस्मात्प्रथमभागकल्पनासमये एनानुत्तमान् चरमभाविन एव देवाः कल्पितवन्तः पश्चादपगतानां तेषां पुनरागमनाय यतो युष्मान्प्रथमान्यज्ञामेत्यब्रुवन् तस्माद्धक्तविधं वैलक्षण्यं संजातमिति अत्रैषामावाहनान्तिमत्वं देवानाज्यपानावहेत्यभिधानाद्दृष्टव्यं (see ४. २.१७.) आज्यपाः खलु प्रयाजानुयाजदेवाः ॥१॥ आदिमध्यावसानेष्वनुष्ठेयानामाज्यभागप्रधानस्विष्टकृद्यागानामग्निदेवताकत्वमभिधातुमाह । चतुर्थप्रयाजेनैव पुरा देवाः दर्शपूर्णमासाख्यं यज्ञमाप्त्वा तं पञ्चमेन समस्थापयन् तत्र यष्टव्यान्देवान्क्रमेणोद्दिश्य स्वाहाकृतवान् । यदत ऊर्ध्वं यज्ञस्यावशिष्टमाज्यभागाद्यस्ति तेन स्वर्गं लोकं समाश्नुवत ॥१०॥ आसिसंज्ञत्नासङ्गं प्रतिबन्धमैच्छन् ॥१२॥ एतं यजमानं प्रति यदि निन्दको यज्ञस्य पूर्वभागे वैकल्यविषयं वाक्यं ब्रूयात्तं प्रति स यजमानोऽपि ब्रूयात् ॥१६॥ स्वद्वेषकात्स्वयं परः उत्कृष्टो भवति ॥१८॥ संवत्सरं खलु जयति प्रयाजैः जयन् जितप्रकारः पूर्वाध्याये उक्तः । योऽस्य संवत्सरस्य द्वाराणि जानाति स खल्वेवैनं जयति नानभिज्ञः । यान्प्रयाजानन्तरतः मध्यतो हि न व्यवजानाति ते च यथा येन प्रकारेण अस्योपकारका भवन्ति (न व्यवजानाति) सोऽनुष्ठाता तैर्गच्छमाणैरनुष्ठेयैः प्रयाजैः किं साधयेत् । the explanation of तस्य - प्रपद्यते is wanting ॥१९॥ आज्यद्रव्यं प्राजापत्यत्वेन प्रशंसति । प्रजापतेः सकलदेवतासमष्ट्यात्मकत्वेन अयमसाविति निर्वक्तुमशक्यत्वादनिरुक्तत्वम् ॥२०॥ अध्वर्युः पुरोडाशस्थापनदेशमाज्येनास्तृतं कृत्वा हविःपुरोडाशाद्द्विरवदायावत्तस्योपरि आज्यमभिघारयति । यथैव खलु अत्ते सदः सदसो देवयजनस्य संनिधाविष्टं साङ्गं स्यात् एवमाज्यस्य यजमानदेवत्यत्वप्रकारं जानतो यजमानस्य देशान्तरस्थस्यापि भवति व्यवधानदोषो नास्तीत्यर्थः । पापमङ्गभ्रंशादिलक्षणं ॥२१॥ १ ॥६॥

आग्नेयं पुरोडाशं विधातुमाख्यायिकामाह । इमां क्षितिमिदानीं परिदृश्यमानप्रकारं स्वर्गजयम् । धीत्वा पीत्वा यथा सरघा मधु निःशेषेणास्वाद्य गतसारं परिशेषयन्ति एवं यज्ञं विदोहं कृत्वा तं यूपेनाच्छाद्य तिरोहिता अभवन् ॥१॥ अनुश्रुतप्रकारं पुनरनुवदति । see ऐतरेयब्राह्म° २.१. शतपथब्रा° ३.२.२.१२. । तं यूपेन योपितं यज्ञमृषयोऽन्वेष्टुमन्वेषणे मतिं कृत्वा ॥२॥ तदन्वेषणेन अन्वेष्टव्यं पूजयन्तोऽन्वेषणप्रयासेनात्मानं खेदयन्तः इतस्ततः संचेरुः देवा ऋषयश्च हि पूर्वं जेतुं शक्यमर्थं श्रमेणैव जयन्ति । अथ तदन्वेषणे एतेषां देवा अपि रुच्युत्पादनमकुर्वन् (? शुध्युत्पा° A. B. C.) तेऽपि स्वयमपि तदर्थं मतिं कृत्वा परस्परं यूपं प्रगत्कामेत्युक्त्वा किं तव मतं किं तव मतमिति ब्रुवाणाश्चेरुः परिभ्रम्य च कूर्मरूपं धृत्वा सर्पन्तं पुरोडाशमा इत् आजग्मुः आ इत्युपसर्गश्रुतेर्योगक्रियाध्याहारः । ते सर्वेऽपि अयं कूर्म एव अस्माभिरन्वेष्टव्यो यज्ञ इति निश्चिताः ॥३॥ प्रारोचत रुचिमुदपादयत् । तमसृजन्त उदपादयन्

तमेवाङ्गकलापैर्विस्तारितवन्तः ॥ यथा पराभावी सन्कस्यचिदुपादिष्टः सन्मुखादन्यस्योपदेशनात् अयमेव अवरः पश्चाद्भावी भवति तथानुक्रमेणोच्यते । उपनीतस्यैव वेदविद्याधिकाराद्ब्रह्मचारिणऽइत्युक्तम् ॥४॥ पुरोडाशं नामनिर्वचनद्वारेण स्तौति । यतः स कूर्मरूपेणाच्छन्नो मनुष्यैर्दृष्टस्ततः यागसमये पुरः पूर्वस्मिन्काले यज्ञमुखे अदाशयत् फलमदापयत् तथा यः पुरोडाशः एभ्यो मनुष्येभ्योऽर्थं यज्ञं प्रारोचयत् ॥ स उभयत्र दर्शे पौर्णमास्यां च नित्यं कर्तव्यो भवति ॥५॥ उभयसाधारण्यमेव स्थापयति । यज्ञसाधनत्वात्पुरोडाशो यज्ञ एव स उभयकालेऽपि तयोः पूर्वकाले क्रियते ॥६॥ अस्या आग्नेयेष्टेर्ऋद्धिफलार्थं पृथक्प्रयोक्तव्यतामाह । एनमध्वर्युः (र्युम्?) एतयैव आग्नेयेष्ट्यैव । तमग्निं बहुधा प्रशंसति यस्यै कस्याऽइति ॥७॥ अज्ञातमामतिशयेन प्रत्यक्षफलदम् ॥९॥ अथ पृथक्प्रयोक्तव्याया आग्नेयेष्टेर्वैशेषिकमङ्गजातमाह । यदीष्टिं दर्शपूर्णमासात्पृथगेव कुर्वीत । see ३.५.१०. । प्रधानदेवता उपांशु यजेत तदुपांशुत्वं काम्येष्टिरूपं खलु । मूर्धन्वत्यौ (see पा° ४.४.१२७.) अग्निर्मूर्धा भुवो यज्ञस्येत्येते [वाजस° स° १३.१४.१५.] मूर्धन्शब्दवत्यौ प्रधानस्य याज्ये । स्विष्टकृद्याज्यापुरोऽनुवाक्ये विराजौ विराट्छन्दस्के प्रेद्धोऽअग्नऽइमो(?)ऽअग्नऽइत्येते [वाज° स° १७.७६. and ?] भवतः ॥१२॥
२ ॥६॥

अग्नीषोमीयमेकादशकपालं विधातुमाख्यायिकामाह । see शतप° ५.५.४.२-८. ॥१॥ त्वदेकस्मिन्नङ्गे घृतविन्दवः परिदृश्यन्ते त्वत् एकत्र अङ्गे मधोर्विन्दव इव पर्णेषु चटकपक्षेषु आश्चुतिताः आक्षरं (?) प्राप्ताः । जठरमावयत् अवतिरवगत्यर्थः (! अयति° A.B.C.) अगमयत् ॥५॥ असाविन्द्रो मे पुत्रं कुवित् बहुप्रकारमवधीदिति क्रुद्धो भूत्वा अपेन्द्रमेव इन्द्रेण विरहितमेव सोममाजह्रे स च सोमो यथापेन्द्रः प्रसुतः प्रदानेऽप्यपेन्द्र एवाभूत् ॥६॥ शुक्रः शोधितः सोमः ॥७॥ अथ स त्वष्टा मम सोममतिप्रसुतमनाकारित एवापिबदिति क्रुद्धः सन् स्वयमेव नष्टस्य यज्ञस्य यज्ञवेशसं यज्ञहिंसापरिहारं कृतवान् प्रवर्तयामास हुतवान् स च हुतः सोमः अग्निप्राप्तिसमकालऽएव पुरुषरूपेण संबभूव । केचित्प्रवर्तनसामर्थ्यात् अग्निमस्पृशन्नेव मध्ये संबभूवेत्याहुः । स च संभवन्नग्नीषोमावेवाभि व्याप्नुवन्भक्षयन् संबभूव न केवलं जगत्कारणभूतौ तावेव किं तु लोके या विद्या यद्यशो यददनीयमन्नं या च श्रीः तानि सर्वाण्यभिलक्ष्य भक्षयन् संबभूव ॥८॥ सर्वं व्याप्य वर्ततऽइति वृत्रः । सर्पसाम्यादहिः । रक्षणाय परिजगृहतुः ॥९॥ स त्वष्टा ग्रहप्रवारसमये (ग्रहप्रचार° C.) इन्द्रशत्रुरिति पूर्वपदोदात्ततयेन्द्रः शत्रुर्यस्येति बहुव्रीहिसमासं कृत्वा मन्त्रं प्रयुक्तवानतस्तमिन्द्रो जघान । यद्यसौ अन्तोदात्ततया तत्पुरुषसमासेन वा इन्द्रस्य शत्रुरिति व्यस्तंनिर्देशेन वा ब्रूयात्तदा निश्चितमेव स इन्द्रं हन्यात् ॥१०॥ इषुमात्रं धनुषः सकाशाद्बलात्प्रमुक्तेषुर्यावद्दूरं गच्छति तावन्मात्रं प्रतिक्षणं तिर्यक् उभयपार्श्वतः अवर्धत । प्राक्पश्चात्समुद्रावपि शरीरवृद्ध्या अवाक्चकार । यावद्यावत्प्रवृद्धं आस तावत्तावत्प्रवृद्धान्नभक्षक एवाभूत् ॥११॥ इन्द्रस्तु वृत्रशरीरवृद्धिक्रमानुसारेणैवेषदीषत्प्रणुन्नो दूरऽएव चरन्नोदनमसहमानो वृत्रमनुगतावग्नीषोमावित्थमुपमन्त्रयामास ॥१३॥ ततो वृत्रवदननिर्गमनादावयोः किं फलं लब्धं स्यात् ॥१४॥ तावनु सर्वेऽपि वृत्रमुखान्तर्गता देवाः निरीयुः । यदिदमिदानीं परिदृश्यमानप्रकारमिन्द्रस्य सर्वाधिपत्यमस्ति तदग्नीषोमीयैकादशकपालयागेनेष्टाभवत् । एष एव त्वष्टेह वेत्युपक्रम्य पौर्णमा-

स्यामसाधारण्येनानुष्ठेयस्य हविषो बन्धुः बन्धकोऽर्थनियामकः एतदेव ब्राह्मणमित्यर्थः ॥१५॥ दृतिस्त्विव चर्मनिर्मितपात्रमिव स यथा संह्लीनः संकुचितकुक्षितनुः पतति एवं संह्लीनो (संप्लीनो B.) भूमावशयिष्ट। तथा निर्धूतसक्तुका (निर्ध° A.) भस्त्रा चर्ममयी संलीना (संह्लीना B.) तद्वत्संलीनः (संह्लीनः B.) शेते कुक्षिगतानां सक्तुस्थानीयानां देवानामुदकस्थानीयानामसृगादीनां च स्रावात् ॥१६॥ इदानीमेतत्सर्वं त्वं भवसि पूर्वं यदहमभवम् अतो व्याकुर्वेव शरीरं द्विविधमा सर्वतो भग्नं कुरु विदारय। अमुया इदानीमनुभूयमानप्रकारया स्थित्या मा भूवं सर्वदा न भवामीति। यद्वस्तु सौम्यं श्रेष्ठं स्तुतमासीत्तं चन्द्रमसं चकार प्रतिनिर्देशापेक्षया पुंलिङ्गता यदसुर्यमसुरेभ्यो हितमुच्छिष्टमासीत्तेनेमाः सर्वा अपि प्रजाः उदरप्रदेशेन अयुध्यत् (B. अयुध्ययत् A. C.) तद्रूपेणोपस्थापयामास। तस्माद्यः कश्चिद्यदि बह्वन्नं भक्षयेत्तर्हि तदा सर्वेऽपि जना इदानीं वृत्र एतर्हि अन्नाद आसीदित्याहुः। असौ चन्द्रः पूर्वपक्षे चन्द्रस्याप्यायनप्रकार उपरिष्टाद्वक्ष्यते see ६.४.१५. ॥१७॥ प्रयाजानन्तरं वक्तव्यौ तावाज्यभागौ अग्नीषोमीयपुरोडाशप्रसङ्गेन विधातुमाह। यतो वृत्रदेहान्निर्गतयोर्युवयोरिदं पुरोडाशद्रव्यं प्रातिस्विकमभूदतो युवामेव प्रभूतभागभाजौ भवथः युवयोर्मध्येऽस्मानपि अन्वाभजतम् ॥१८॥ निर्वपान् निर्वपेयुः यष्टारः तत्र च निरुप्तप्रधानदेवताभ्यः पूर्वमाज्यभागं यजेयुः। निर्वापाभावादेव पशुसोमयोरप्राप्तस्याज्यभागस्य पुनर्निषेधेनैष्टिकमाज्यभागविधानं स्तूयते यथा दशमाध्यायस्याष्टमे पादे द्वितीयाधिकरणे (but where? in the Mîmânsâsûtra?) न सौम्येऽध्वरऽइत्यत्र किं निषिध्यते उत पर्युदस्यते अथार्थवाद इति त्रेधा विकल्प्यार्थवाद इति सिद्धान्तितम् ॥१९॥ एतद्वैतेनैव खलु कारणेन सर्वेऽपि देवास्त्रेधा त्रिप्रकारेणाग्निसोमेन्द्रात्मका एकदेवत्या एकैकदेवतार्था अभवन्। अग्न्यादीनामेकदेवत्वलक्षणश्रेष्ठत्वपरिज्ञानेन स्वयमपि स्वकीयानां मध्ये एक एव श्रेष्ठो भवति ॥२२॥ आज्यभागोपांशुयाजपुरोडाशानां यदग्नीषोमदेवताकत्वमस्ति तत्प्रशंसति। किमेतावद्बहु क्रियते। एतावदिति संग्रहेणोक्तस्य विवरणमग्नीषोमयोरिति। एतावती सूर्यचन्द्रादिभेदेन त्रैधा विभूतिः विभावो (विभवो A.) बहुभावः विभूतिरित्यस्य व्याख्यानं प्रजातिरिति प्रजातिः प्रकर्षेणोत्पत्तिः ॥२३॥ सूर्यादियुगलत्रयस्याग्नीषोमात्मकतां विभज्य योजयति। सूर्योह्नश्चन्द्ररात्र्योश्चाग्निसोमात्मकतायामुष्णत्वशीतत्वे हेतू। आपूर्यमाणपक्षस्याग्नेयत्वमग्नेर्भिन्नस्य सवितुः किरणानामनुक्रमेण चन्द्रमस्यनुप्रवेशात् अपक्षीयमाणपक्षस्य सौम्यत्वं च क्रमेण सूर्यांशापनये सति स्वकीयकारणोपवापात् (°यकिर°?) ॥२४॥ अतस्त्रिविधविभूत्याप्तये त्रयाणामपि यागानामग्नीषोमीयत्वं युक्तम् ॥२५॥ आसुरिराचार्यस्त्वेवं मन्यते। उभयेषु (?) त्रिषु यागेषु आज्यभागाभ्यामेव सूर्याहोऽर्धमासयुगलत्रयात्मकासु (°यात्सकलासु the mspts.) त्रिविधासु विभूतिषु द्वे वस्तुनी यतमे वाहोरात्ररूपे वा शुक्लकृष्णपक्षरूपे वा द्वे आप्नोति। वीप्सया त्रिविधान्यपि युगलानि परिगृह्यन्ते। त्रिष्वपि यागेषु एकैकेनैव त्रिविधामप्यग्नीषोमयोर्विभूतिमाप्तवान्भवति ॥२६॥ अथाज्यभागादियागत्रयद्रव्ययोराज्यपुरोडाशयोरेकदेवतात्वप्रयुक्तं जामितादोषमाक्षिप्य द्रव्यमन्त्रधर्माणां भेदेन त्रेधा तत्परिहरति। आज्यपुरोडाशस्य प्रदानमिति शेषः। अथवा आज्यस्य पुरोडाशस्य वा पश्चादप्यग्नीषोमयोरेव दीयतऽइत्यर्थः। कथमेतावता जामितेति। तत्राह यदिति। एकरूपं यद्वस्तुद्वयं तद्विलक्षणेन वस्त्वन्तरेणाव्यव-

हितं तेनाव्यवधानेन तद्वस्तु जामि भवति अत्र तु व्यवधानम् आग्नेयेन अनेन वक्ष्यमाणेन च खल्वजामि । केनेति । उच्यते । आज्यस्य द्रव्यस्येतरम् इतरत्कर्म उपांशुयाजाख्यं तथा पुरोडाशस्येतरं धानाख्यम् अन्योन्यापेक्षयोभयोरितरत्वम् अन्यदिवेति द्रव्यभेदादेकदेवत्यमपि कर्मद्वयमन्यदिवान्यदिव भवति अतोऽन्ययोर्न जामितास्ति ॥ मन्त्रभेदेन चाज्यभागप्रधानद्वययोरजामित्वम् प्रधानद्वययोर्जुषाण इत्यस्यासंभवात् यद्यप्याज्यभागप्रधानयोर्देवतैक्यं तथाप्याज्यभागस्य ऋचमग्निर्वृत्राणि [वाज° स° ३३.१.] त्वं से प्रासीत्यादिकामनुवाक्यां [वाज° स° १९.५२.] कृत्वा जुषाणोऽअग्निराज्यस्य वेतु जुषाणः सोम इति जुषाणेन यजति । प्रधानाभ्यां तु क्रमेण अग्नीषोमा योऽअद्य वाम् अग्नीषोमा सवेदसेत्यनूच्यऽर्चमान्यं दिवो मातरिश्वा जभार युवमेतानीत्यृग्भ्यां [ऋक्स° १.१४.१.२.१.६.५.] यजति ॥ तथाज्यपुरोडाशयोरुपांशु उच्चैश्च भेदादजामित्वम् । उपांशोः प्रजापतिरूपत्वात्तस्य प्रजापतिरुचितामनुष्टुप्छन्दस्कामग्नीषोमा योऽअद्य वामित्येतामनुवाक्यामनुब्रूते ॥२७॥ उपत्सर्य उप पार्श्वेन गवा ॥२८॥ आज्यभागोपांशुयाजयोर्जामितापरिहाराय याज्यापुरोऽनुवाक्ययोर्विलक्षणत्वमुक्त्वा प्रशंसति । उदाहृतौ जुषाणशब्दयुक्तौ मन्त्रौ तत्ताद्दगनुष्ठानमनु तत्सामर्थ्यात् । अन्यत्र ऋक्करणादेतत्कर्मान्यतरतोऽस्थि अस्थिवद्दृढं करोति तस्मादन्यतरत ऋक्करणं युक्तम् ॥२९॥ द्विविधप्रजाव्यतिरेकेण प्रजान्तराभावात्सर्वप्रजालाभाय याज्यानुवाक्यायुगलयोरुक्तं वैलक्षण्यम् ॥३०॥ The explanation of ३१. ३२. is wanting in ABC. । पक्षान्तरमाह । न पूर्वां पौर्णमासीमुपवसेत् उत्तरामेव । तस्मिन्पक्षे गुणमाह । यथा कश्चित्परराष्ट्रं प्राप्य प्रतिमुखं पलायमानं हननोद्योगरहितं सम्यक्चूर्णितं करोति ॥३३॥ इत्थं पक्षान्तरं सोपपत्तिकमभिधाय प्रथमं पक्षं सिद्धान्तयितुं पुनरुपादत्ते । यथा कश्चिन्मन्दोऽन्येन पूर्वमेव पातितं पुनः स्वयं पिंष्यात् । उत्तरानादरे कारणान्तरमाह सोऽन्यस्येति । उत्तरोपवासी अन्येन यत्कृतं कार्यं तस्यानुकारी अन्येनाध्यवसितस्य पुनरध्यवसायी भवति । संप्रत्युपवसन्तं दृष्ट्वा तदनुकर्तुं स्वयमपि परेद्युरसावुपवसतीत्येवं प्रतिभवनात् ॥३४॥ संप्रतिपक्षं सिद्धान्तयितुमाख्यायिकामाह । संधयः विस्रस्ता आसन् । ऋतुमुखानि वसन्तादीनि ॥३५॥ संहातुं संगतो भवितुम् । सोमव्यतिरिक्तपुरोडाशादिसाध्या हविर्यज्ञाः ॥३६॥ स एव प्रजापतिः कालात्मकः दृढपर्वा संवत्सरमध्ये यदन्नं व्रीह्यादिरूपं पक्वं भवति तत्सर्वमभिलक्ष्य भोक्तुमुत्थितवान् कालावयवानां विच्छेदाभावात्तत्तत्कालोचितमन्नं भोगायोग्यमासीत् (भोगयो° the mspts.) । इदानीमुपवासयोग्यं पर्व विधत्ते संप्रति हैव पर्वविस्रंसनसमकालऽएव प्रजापतेः पर्व संप्रत्युपवसन् चिकित्सितवान्भवति । प्रजापतिवत्स्वयमपि सर्वान्नादो भवति ॥३७॥ आज्यभागस्थाननियममाह ॥३८॥ अथ केषांचित्पक्षमाह । अविज्ञान्यमिव विज्ञानेन हीनमिव वैषम्याभावेन साक्षात्स्थानविज्ञानस्याशक्यत्वात् ॥ तस्य कस्य पुरस्तादित्यत आह हवींषीति । उक्तहविःपुरोभागे विशेषमाह यत्रोऽइति ॥३९॥ आज्यभागयाज्यानुवाक्ययोर्यादृग्जुषाणवैलक्षण्यं पूर्वमुक्तं [क° २७.] तदपि तयोश्चक्षुष्ट्वप्रयुक्तम् । अस्थन्नस्थनि मुखे अस्थिमये सति ऋग्यजुषोः [ऋग्जुषयोः A. ऋग्जुषाणयोः?] काठिन्यमृदुत्वात्साम्यादस्थ्यनस्थ्यात्मता ॥४०॥ आग्नेयसौम्ययोराज्यभागयोर्यज्ञचक्षुष्ट्वं लौकिकचक्षुःसाम्येन समर्थयति । अन्वायत्ते अनुप्राप्ते । आजरसं वयोहानिपर्यन्तं चक्षुर्मोघं न भवति अमुष्मिन् स्वर्गलोकेऽपि सचक्षुरेव संभवत्याज्यभागयोश्चक्षुष्ट्ववेदिता ॥४१॥ ३ ॥ ६॥

अथामावास्यानि हवींषि विधातुमाख्यायिकामाह । अबलीयानहमिति मत्वा नास्तृषि स्तृङ् हिंसायां लुङ् अहं न हिंसितवानस्मीति भीतः सन्पुनर्बाधशङ्कया निलीनोऽभूत् । अत्यन्तं विप्रकृष्टदेशं गतवान् परावदिति दूरनाम [निघ° ३.२६.] तस्योपसर्गाच्छन्दसि धात्वर्थ इति [पा° ५.१.११८.] मतुप् ॥१॥ लब्धेनेन्द्रेण सह एतां रात्रिं रात्रिशब्दो दिनस्योपलक्षणः कृष्णमप्यमावास्यादिवसं सहोषितवान् । स इन्द्रो देवानां धनरूपो वासयिता वा यत एवं यतश्च देवानां मध्ये वीरः अतस्तदागमनायाग्नेर्विलम्बो युक्तः ॥२॥ अस्माकं य इन्द्रः प्रवासमकरोत्स नो वसुरस्मामा अग्निना सह वसतीत्युक्त्वा ताभ्यां सन्निभावेन सह वसद्भ्यामिन्द्राग्निभ्यामेतद्द्वादशकपालं हविरिति शेषः प्रयच्छाम इत्यर्थः । मानुषं मनुष्येभ्यः कर्तव्यं सत्करणम् ॥३॥ व्यस्मये विस्मितोऽभवं विगतप्रबले स्मयदर्शनात् अतः कृशोऽस्मि तस्मादिदं कठिनं पुरोडाशं मां न प्रीणयति अतः मम प्रीतिकरं हविः संपादयत ॥४॥ स एवोभयतश्चन्द्रदर्शनरहितायां संपूर्णामावास्यायां भूलोकमागत्याप्स्वोषधीषु च प्रविशति स प्रविष्ट एव चन्द्रमा देवधनं यत एषां व्रीहियवसोमादिरूपेणान्नं भवति । इह भूलोके ओषधिषु ॥५॥ तमनुप्रविष्टं सोमं गोभिरनुक्रमेण विविधं स्थापयित्वा धारयित्वैव समभरन् । तत्प्रकारमाह यदोषधीरभक्षयन्गावस्तेन ओषधिभ्यः सोममभरन् तथानुप्रविष्टसोमा अपः पिबन्ति गावस्तेनाद्भ्यः ॥६॥ न श्रयते न तिष्ठति न सात्म्यं भजते । शृतेन पक्वक्षीरेणैव तमश्रयन् ॥७॥ यद्यपि तैत्तिरीयके प्रथमं शृतं पश्चाद्दधीति क्रमस्तथाप्यत्र सायंप्रातर्दोहाभ्यां दधिपयसोः संभवादनेन क्रमेणाभिधानमिति द्रष्टव्यं तत्प्रशंसति तत्प्रथमतश्चन्द्रात्मकमेतद्धतरूपेण परिणतं वस्तुतः समानमेकरूपमेव । the explanation of the rest of the kandikâ is wanting in ABC. ॥८॥ अंशुः सोमः यथाप्याययेदेवं सांनाय्यमपि तथा पीतवतां पाप्मानं हरिमाणं शरीरहरितत्वमपहन्ति ॥९॥ विहितस्य सांनाय्यस्याधिकारितां निश्चेतुं केषांचिन्मतमाह । अनवरुद्धा न संपन्ना ॥१०॥ स्वाभिमतं पक्षमाह । नन्वत्र विषये अन्तरेण मध्ये एव श्रुतवन्तः स्म इन्द्रेणोक्तं वचनम् तत्प्रमाणत्वेन पुनः श्रावयन्निगमयति ॥११॥ अमावास्योपवासस्य कालं विधित्सुः पुरा कल्पमाह । पौर्णमास्यां क्रियमाणं यज्ञविरस्ति तद्वृत्रहननसंबन्धि वृत्रहननाय तदन्तर्गतनिगमनावसरे एकादशकपालोपांशुयाजहविषोः प्रदानात् आमावास्यं तु हविर्वृत्रहत्यमेव वृत्रं हतवत इन्द्रस्याप्यायनार्थं कृतवात् । वृत्रस्य चन्द्रत्वं प्रागुक्तम् see ६.३.१७. । एनं वृत्रमेतेन हविषा । अतः सर्वपापक्षयाय चन्द्रदर्शनरहितायां शुद्धामावास्यायामेवोपवसेदित्यर्थः ॥१३॥ उपवासतिथिविषये केषांचित्पक्षमाह । ते चन्द्रदर्शनयुक्तायां चतुर्दशीयुक्तामावास्यायामेवोपवसन्ति परस्मिन्नहनि अव्यवहिते एव भविष्यति काले उदयं न प्राप्नोतीति अदो अविप्रकृष्टं प्रत्यक्षं (विप्रकृष्टमप्रत्यक्षं?) चन्द्रारथं (?थ A.?) खलु देवानामविक्षीणमन्नं भवति अथ चन्द्रक्षयसमनन्तरमेवैभ्यो देवेभ्यः वयमितो लोकात्प्रदास्याम इति । दृष्टोपवासपक्षदोषाभिधानपुरःसरमदर्शनोपवासमेव समर्थयते असोमयाजी त्वित्यादिना तुशब्दः पक्षं व्यावर्तयति असोमयाजी क्षीरयाजी भवति समेव नयेदिति निगमितवात् अदो हैव क्रतं क्षीरमेव लोकान्तरवर्ति सत् सोमो राजा भवति ॥१४॥ अस्तु । ततः किमित्यत आह । यथा पुरा आमावास्यातः पूर्वदिवसे गावः केवलाश्चन्द्रानुप्रवेशरहिता ओषधीरपश्चाहारं कृत्वा केवलं चन्द्ररहितमेव पयो उद्रे उहते एवं तत्क्षीरयजनं चन्द्रानुप्रवेशरहितं

केवलं भवति अतो दृष्टोपवासे चन्द्रस्यौषधीष्वननुप्रवेशेन केवलत्वात्तदानीं क्षीरस्य चन्द्रात्मकान्नत्वाभावात्स पक्षो न युक्त इत्यर्थः। अस्तु। को दोष इत्याशङ्क्यावश्यं चन्द्रानुप्रवेशवता क्षीरेणभवितव्यमित्याह एष वाऽइति एतत्सांनाय्यब्राह्मणवद्व्याख्येयम्। तममावास्यायामस्वोषधीष्वनुप्रविष्टं ताभ्य' क्षीररूपेण संभृत्य आहुतिभ्यः सकाशात्पुनरुत्पादयति क्षीरयाजी। स एषोऽमुं लोकमागतः पुनराहुतिद्वारेणान्तरिक्षेऽउत्पन्नः प्रतीच्यां दिशि दृश्यते ॥१५॥ तदेतच्चन्द्राख्यमन्नं परिभ्रमति ॥१६॥ चन्द्रोपक्षयऽएवान्नप्रच्यवः च्युतस्य च भूलोकप्रवेश उक्तः। निष्ट्या नीचाः उक्तार्थज्ञान्निकृष्टतराः ॥१७॥ तपन्नादित्य एवेन्द्रः परमैश्वर्ययोगात् चन्द्रस्य वृत्रत्वं प्रतिपादितम् पुरा अमावास्यातः पूर्वदिवसेष्वत्यन्तं दूरमुदितोऽपि अथैनं सूर्याख्यमिन्द्रं प्रत्यमुममावास्यादिवसं प्रति समीपे एव आगच्छति अथ इन्द्रस्य विवृतं मुखं प्राप्नोति ॥१८॥ तं ग्रिरन् सूर्य उदेति ॥१९॥ पूर्वस्यां दिशि भक्षितः पश्चाद्भागे निर्गतो रेखामात्रो दृश्यते स च पुनः कलाक्रमेण तस्यैव सूर्यस्यान्वाय प्रवर्धते ॥२०॥ विजिग्यानः शत्रून्जित्वा ॥२१॥ ४ ॥६॥

प्रधानयागः सकलः साख्यानः संप्रकीर्तितः। प्राधान्येनाथ तद्धर्मा निरूप्यन्तेऽथ सप्तमे॥ तत्रादौ संनिहितत्वात्सांनाय्यधर्माः प्रथममुच्यन्ते। तत्र वत्सापाकरणार्थशाखाछेदं विधास्यन् तदुचितं शाखायाः पर्णत्वं सार्थवादमाह। यत्र यस्मिन्देशे गायत्री पक्षिरूपेण सोममभिलक्ष्यानयनायागच्छन्नाहरन्त्या (°च्छन्तदाह°?) अपाधस्ता (?°वस्ता AC.) अधस्तात्प्रदेशेऽभ्यायत्य पर्णं प्रचिच्छेद वाशब्दश्चार्थे गायत्र्याः सोमस्य च। पतितात्पर्णादुत्पन्नः पलाशः तस्मात्सोमांशस्यैव संपादितप्रायत्वात्तस्यैव शाखाच्छेदनम् ॥१॥ समवार्जन्ति संयोजयन्ति। वायोर्गवां वर्धकत्वसमर्थनाय सर्वजगद्वर्धकतामाह॥ शाखान्तरे पठितं मन्त्रमनूद्य निराचष्टे see तैत्तिरीयस° १.१.१.। यदेनं भागं ब्रूयाद्यजमानस्य द्वितीयः शत्रुरुपागच्छति अतो न ब्रूयात् ॥३॥ व्याकृत्य पृथक्कृत्य। यज्ञं यज्ञसाधनं क्षीरं संभरेयुः ॥४॥ अदः अग्नये हविर्ग्रहणादौ see १.२. १७. ॥६॥ तद्ब्राह्मणत्व एतन्मन्त्रपाठेन शाखायै पशूनां परिदानम् तदधीनत्वेन रक्षणार्थम् ॥८॥ दोहनार्थं तस्यां पवित्रं कुशद्वयात्मकं त्रिवृद्वा बध्नीयात् ॥९॥ अमावास्यायां रात्रौ संनयतः क्षीरस्यान्यार्थत्वेन नियोगात् अग्निहोत्रस्य द्रव्यान्तरं विधत्ते। इन्द्रार्थस्य दुग्धस्याग्न्यर्थत्वस्यायुक्तत्वात्॥ दोहकालापलक्षणार्थं जुह्वति समकालं तद्धोमे परिसमाप्तऽएव उखा सांनाय्यस्थाली अध्वर्युणा श्रपणप्रदेशे उपकॢप्ता भवति तस्याः समानयनानन्तरं उपसृष्टां वत्सेन संगतां प्रब्रूतादिति दोग्धारं प्रत्यध्वर्युराह यदा उपसृष्टा तदा उपसृष्टेति दोग्धा ब्रूयात् स च शूद्रव्यतिरिक्तो भवेत् ॥१०॥ यज्ञे यथा घर्मं प्रवर्ग्यं प्रवृञ्ज्यात् एवं स्थाल्यधिश्रयणेन प्रवृणक्ति प्रवर्ग्यं कृतवान्भवति अतो यज्ञसंपादनम्। ह्वला नाशः ॥११॥ प्रागग्रं स्थाल्यां निदध्यात्। पवते गच्छति ॥१२॥ सांनाय्यस्य सोमात्मकत्वात्तत्पवनसाधनदशापवित्रवदस्याप्युदगग्रत्वं युक्तम् ॥१३॥ वाचा मन्त्रेण साध्यत्वाद्वाग्यज्ञः ॥१५॥ पयस आसेचनसमयेऽध्वर्युर्जपति ॥१६॥ अतः परं वाङ्नियमं विसृजेदथ काममिति ॥१७॥ दोहनपात्रक्षालनोदकस्य पुनः क्षीरे सन्तर्पणमाह। उदस्तोकमुदकविन्दुधाराम् पल्यङ्ग्य परितो गमयित्वा दोहपात्रेऽउदकमासिच्य प्रक्षाल्य। पयसोऽवशिष्टं यदहायि हतमभूत् तदपि इह भवेत्। क्षीरस्य कात्स्न्र्याय। उदकस्यापि क्षीरोपादानतामाह। तीव्रीकरणं सारत्वकरणम्। आतञ्चनद्रव्यं सूत्रकार आह

[कात्य° ४.२.३३.] प्रागुतशेषेणेति यवागवेत्यर्थः ॥१८॥ सोमस्य देवानामतिप्रियत्वात्कीर्तितेनैव [°नैतदद्र° A.] द्रव्यं तेभ्यः स्वादु करोति ॥१९॥ नेत्वीरमुपरिभागे अवमृशेयुः ॥२० ॥२१॥ १ ॥७॥

अवदानस्वरूपं विवक्षुराख्यायिकामाह । ऋणवे जननमेव निमित्तम् ॥१॥ संग्रहेणोक्तं विवृणोति ॥२॥ अनुब्रुवीत अनुवचनं कुर्यात् अधीयेत । ऋषीणां संबन्धी वेदाख्यो निधिः ॥३॥ वासयेत गृहान्नादिप्रदानेनेदानीमवकाशं प्रयच्छेत् ॥५॥ अवदयते दयतिर्दानार्थः । अवप्रत्यर्पणं देवानां स्वभूतमृणं विभज्य दत्तवान्भवति । यत्किं च चरुपुरोडाशादिकमग्नौ जुह्वति तदवत्तं हविरवदानमिति प्रसिद्धं भवति ॥६॥ अनुवाक्यात्मकमिदं खलु प्रथमम् । एवं क्रमेण पुरोऽनुवाक्याद्याश्चतस्रो देवताः क्रमेण चत्वार्यवदानान्यनुप्राप्ताः हिशब्दश्चार्थे । कस्मै प्रयोजनाय पञ्चममवद्येत्तदभिमानिन्याः पञ्चम्या देवताया अभावात् ॥७॥ अथ पुनश्चतुरवत्तमेव स्थापयति एतदिति । एतदेव कुरुपञ्चालदेशे प्रसिद्धम् अतस्तत्र प्रज्ञातत्वादनुष्ठानसंप्रदायानुरोधेन चतुरवत्तमेव कर्तव्यम् ॥८॥ अवदानस्येयत्तां विधत्ते । इवशब्दोऽनर्थको वाक्यालंकारे । यावन्मात्रमेव अङ्गुष्ठपर्वमात्रमेव । आधिक्यदोषमाह ॥९॥ इदानीं चतुरवदानप्रकारं दर्शयति । पुरोडाशांशौ द्वौ तदध उपरि चोपस्तृताभिघारिताज्याभ्यां चतुरवत्तम् पुरोडाशस्योभयत आज्यकरणं प्रशंसति द्वे वाऽइति । सर्वाप्याहुतिः सोमाज्यभेदेन द्विविधा तत्र सोमस्य स्वरूपेणाहुतित्वादाज्यापेक्षैव नास्ति अवशिष्टौ हविर्यज्ञपशुयज्ञावाज्याहुतिकौ भवितव्यौ ॥१०॥ अनुवाक्यायाज्ययोः क्रमेण देवताह्वानहविःप्रदानसाधनत्वं वक्ष्यते आह्वातव्यानां देवानां द्युलोकसंबन्धात्तयोः क्रमेण द्युभ्वात्मकता तयोः स्त्रीलिङ्गत्वाद्द्वन्द्वे वषट्कारस्य पुंलिङ्गत्वात्सह मिथुनतास्ति ॥११॥ पुरोऽनुवाक्यादीनां द्युवात्मकताभिधानस्य प्रयोजनमाह । तयोः समनन्तरं वषट्कुर्यात् । वौषडित्युच्चारणकाले वा समनन्तरं वा प्रदानमस्तु सर्वथा वषट्कारात्प्राक् न जुहुयात् ॥१२॥ प्रदानस्य वषट्कारानन्तरत्वं प्रकारान्तरेणोपपादयति तत्पात्रोद्धारपूर्वकप्रदानमिव भवति । उक्तवैपरीत्ये दोषमाह । भूमौ निदग्धं प्रास्तं दुष्टत्वेनोपयोगाभावाद्दग्धम् । अमुया अनेन वषट्कारात्पूर्वकालहोमेन दग्धं स्यात् ॥१३॥ पुरोऽनुवाक्यायाज्ये गायत्रीत्रिष्टुभौ कर्तव्ये इति विधातुमाह । असौ द्युलोकः । अनुवाक्याया गायत्रीत्वे द्यावापृथिव्यावुभेऽअपि योनितत्वान्भवति ॥१५॥ अमुष्या अधि द्युलोकस्योपरि । एने द्यावापृथिव्यौ । तस्मात्सायुज्यादिमे सहाभ्यवहरतः द्यावापृथिवीभ्यां स्वाहेति सह प्रदानात् अथवा वृष्ट्यन्नयोः परस्परसापेक्षत्वात्सह भोगः ॥१६॥ अनुवाक्याया उच्चारणधर्ममाह । अह्वयन्निव वर्णानालोडयन्निव शनैः अह्नतिर्गत्यर्थः ॥ कार्यभेदं चाह अनुवाक्यया यष्टव्यदेवानाह्वयति याज्यया हविःप्रदानसाधनम् ॥१७॥ पुरस्तात् मन्त्रस्य पुरोभागे लक्षणं यष्टव्यदेवनाम (°वानाम AC.) [य]स्यां सा पुरोऽनुवाक्या । अमुष्या अधस्ताल्लक्ष्माणीव अधोभागे तेषां परिभ्रमणात् ॥१८॥ उक्तं पुरस्तादुपरिष्टाल्लक्ष्मत्व विशिनष्टि । यस्या अनुवाक्यायाः प्रथमात्पदादग्निः प्रत्नेन सोम गीर्भिरित्यादिलक्षणां यष्टव्यदेवतां ब्रूयात्सैव समृद्धानुवाक्या याज्या तु सा समृद्धा यस्या उत्तमात्पदाज्जिह्वा अग्ने चकृषऽइत्यादिकादभिहितायाः देवताया उपरि वषट्करोति ॥२०॥ याज्यानन्तरभाविनं वषट्कारं विभज्य विधाय प्रशंसति । वौगित्युच्चारणं कुर्यात् वौगित्येतदौकारस्थाने आकारे कृते वागिति भवति । तस्मादेवं वौषडिति

वषट्कुर्यात् ॥२१॥ इत्थं दर्शपूर्णमासोभयसाधारणमवदानादिकं वषट्कारान्तं धर्ममभिधाय न (!) तत्प्रसङ्गाद्यवादिशब्दाभिधानद्वारेण दर्शपूर्णमासयागं प्रशंसति । दायं पैतृकं वित्तम् ॥२२॥ संवृञ्जीमहि अपहरेमहि । समवृञ्जत स्वाधीनं कृतवन्तः ॥२३॥ यौतीति यवः तस्य यवेति नाम । तेनापूर्यमाणपक्षेण समसृज्यन्त ॥२५॥ अयवनाद मिश्रणादयवा शुक्लपक्षः । अहोरात्रमाससंवत्सराणामपि नाम दर्शयति । यवशब्दाभिधेयान् शुक्लकृष्णपक्षान[य]तीति मासो यव्यः । सुष्ठु एकः स्वेकः सर्वस्यापि कालस्य तत्रैवान्तर्भावात्संवत्सर एक एव कालः मकारोप[यु]ञ्जनेन सुमेक इति परोक्षनाम संपन्नम् । प्रसङ्गादहरादिनामाभिधाय प्रकृतमुपसंहरति यवा चेति यवा अयवा च हि यवनीवायवेत्येव (!?) भवति यवनस्योभयानुगतत्वात् अथवा देवैरेवायवात्मकस्य कृष्णपक्षस्यापि यवनात्पक्षद्वयमपि यवा । अत एतेषां यवादीनां मध्ये येन निमित्तेन ना (!) होता भवेत् तत्कार्यं याविहोत्रम् [°र्यां यादि° A.B.C.]। तैत्तिरीयकेऽपि अतव्या उपदधातीत्यत्र [५.४.२.] चयनप्रकरणे यवादयो व्याख्याताः ॥२६॥ २॥७॥

अथाग्नये स्विष्टकृद्यागं तस्य प्रधानयागसमानन्तर्यं च विधातुमाख्यायिकामाह । पश्वभिमानी देवो रुद्र इह यज्ञवास्तावुषिवा [°°स्तवरोषि° A.B.C.] द्युलोकाद्धीनोऽभूत् अत एव वास्तावेव स्थितत्वाद्रुद्रो वास्तव्य इति वेदविदः कथयन्ति ॥१॥ स्वयं यज्ञप्रदेशं (यज्ञाप्र° B. यज्ञं विप्र° A.) प्रत्युत्तमा (°त्युच्चक्राम?) स क्रुद्धो (?सत्तद्धा B. सेत्तद्धो AC.) भूवोत्तरस्यां दिशि स्विष्टकृत्काले यज्ञं प्रतिरोद्धुमुत्तस्थौ ॥३॥ अमुं यज्ञं विसृष्टं मा कार्षीः । यज्ञं समबृहत् ऊर्ध्वं प्रापयत् न च हविरादिकं बहिः क्षिप्तवान् तथा किमपि यज्ञावयवानां न हिंसितवान् ॥४॥ तेषां सर्वेषामाहुतिर्हुता ॥५॥ यावन्तः प्रदानशेषास्तेष्वेकैकमवदानं कुरु ॥६॥ अवशिष्टभाक्त्वेन रुद्रस्य वास्तव्यत्वप्रसिद्धिमाह ॥७॥ प्राच्यादिदेशभेदेन शर्वादिनामभेदेऽपि देवतैकैव ॥८॥ स्विष्टकृतऽइति विशेषणस्य कारणमाह । त्वयि अमुत्राहवनीयदेशे आहुत्याधारभूते सति ॥९॥ अथ स्विष्टकृन्निगदमभिदधाति (till to k. १५.) स होता स्विष्टकृदनुवाक्यानन्तरं ये आन र्येण प्रयाजाज्यभागादिदेवा स्विष्टाः तान् तं स्विष्टकृतमग्निं च संपश्यति संस्मरेत् संभूयानुवदेत् संदर्शनप्रकारमनूद्य क्रमेण व्याचष्टे अयालग्निरित्यादिना (ल A.B.C.) अयं स्विष्टकृदग्निः प्रथमाज्यभागदेवस्य प्रियाणि धामानि निःशेषाण्ययाट् इष्टवान् तत्तेनैतद्भागपाठेन प्रथमाज्यभागं स्विष्टं कृतवानित्युक्तवान्भवति । एष स्विष्टकृन्निगदः आवाहननिगदेनैव व्याख्यातप्रायः see ४.२.१६. ॥१०॥ एनेन यक्षदग्नेरिति भागेन भूयसीं प्रीतिमुदपादयन् । सर्वथाग्नेः संतुष्टत्वाय स्विष्टकृत्त्वकरणस्य प्रकाशनादेवं संपश्येत् ॥११॥ देवतां देवतानाम पूर्वामयाड्कारात्प्राक् । तद्विरुद्धं स्विष्टीकरणस्यैवानभ्यर्हितत्वेन (°त्वात° BC.) प्रथमं निर्देष्टव्यत्वात् ॥१२॥ यक्षद्यजेत । स्विष्टकृत इदानीमपि अकृतत्वाद्याडिति नोच्यते । यथा आवाहिता देवताः सर्वा अपीष्टा एवं स्वं महिमार्थमपि यष्टव्यं । यत इतः प्राक् किं चन स्वाय महिम्नऽइदं हविरिति न क्रियते तस्मादत्र स्विष्टकृन्निगदाभिधानसमये तत्तेन स्वं महिमानमित्यनेन तं प्रीणितवान्भवति ॥१३॥ इडशब्देनान्नमुच्यते तदुपजीवित्वात्प्रजा अपोषः । एज्याः पुनः पुनरिज्याः (?इष्ट्य B. यष्टा CA.) । यायजूकाः इज्याशीलाः ॥१४॥ जातवेदा आहुत्याधारः स्विष्टकृदग्निः हविः सौविष्टकृतं सेवताम् ॥१५॥ इत्थं स्वि-

ष्टकृन्निगदं व्याख्याय तस्य याज्यां पुरोऽनुवाक्यां चाह । अवक्लृप्ततमे अत्यन्तं योग्ये । अयं स्विष्टकृद्यागः तृतीयसवनस्थानीयः अन्तिमत्वसाम्यात् ॥१६॥ स्विष्टकृतो हुतावशिष्टत्वरूपवादेतद्यज्ञस्य वास्तुस्थानीयं । प्रजापतेः बलवद्भ्यः उरोबाहुभ्यः सकाशादिन्द्रेण सहोत्पन्नत्वान्निष्टिबिन्द्रियम् ॥१७॥ पेसुकमभिवर्धनशीलम् पिस्यति अतिवृद्धो भवति ॥१८॥ पतन्नेकं बाहुं भूमौ प्रसारितवान् स बाहुर्विस्रस्तोऽभूत् । अपत् प्राप्तमभूत् । सछन्दसौ समानछन्दस्के ॥१९॥ स्विष्टकृदवदानहोमप्रदेशयोर्विशेषमाह । उत्तरदिशो (°रपूर्वदिशो ABC.) लोकपालत्वेन रुद्रसंबन्धः सर्वशास्त्रप्रसिद्धः ॥२०॥ उत्तरदेशे प्रदानेऽपि प्रधानहविषा सहासंस्पर्शं विधत्ते । प्रधानाहुतिभ्यः सकाशादभ्यर्धे संनिहितप्रदेशऽएव न तासां स्थाने । विपक्षे बाधमाह इतरा इति । इतराः पशुफलजनकाः । यदि ताभिः सह स्विष्टकृदाहुतिमासञ्जयेत् तदा रुद्रेण सह पशून्योजयेत् अत यजमानस्य गृहावस्थिताः पशवः समीपऽएव म्रियमाणाः प्राप्नुयुः ॥२१॥ आहवनीयगार्हपत्ययोरन्यतरस्मिन्हविःश्रपणं विधास्यति तदर्थं तयोराधानप्रदेशपरिमाणं विधातुमाह । यस्त्विह भूमावेवावशिष्टः स गार्हपत्यः तस्मादिदानीमपि दिवं गन्तुकामा एतमाहवनीयं यज्ञसाधनं गार्हपत्यात्प्राग्देशं यजमानायोजयेयुः ॥२२॥ विक्रम्यतेऽनेनेति एकपादप्रक्षेपपरिमितः अंशो विक्रमः । गार्हपत्यमवधीकृत्य ॥२३॥ गार्हपत्ये अपयेयुरिति यत्सोऽपस्खलः अपस्खलनाम च हविषां भवति । फलितानां व्रीह्यादीनां तुषविमोकादिसंपादनप्रदेशः खलः यथा व्रीह्यादिराशिः खलाद्बहिरपि प्राप्तो व्यर्थो भवति एवमन्यत्रश्रपणमपि ॥२६॥ अन्येषां पक्षमाह । यस्मादेष आहवनीयः आहवनार्हः अथ एष पक्वस्य हविषो होमाय योग्यो न बामस्य पाकाय ॥२७॥ अग्नेः परिस्तरणं विधातुमाह । एवकारेण स्वतर्पणादपि ब्राह्मणतर्पणमेव श्रेय इत्ययमर्थो द्योत्यते । यजमानो ब्रूयात् ॥२८॥ ३ ॥७॥

The commentary of *Harisvâmin*, the extracts out of which are now beginning, is much shorter, than that of *Sâyaṇa*, and leaves the greater part of the text unexplained. प्राशित्रावदानविध्यर्थमाख्यायिकामाह । प्रजापतिः प्राणपिण्डलोककालयज्ञात्मा । अभिध्यातवान् लोकात्मना दिवं कालात्मना उषसं प्राणपिण्डात्मना ऋक्षेभ्यो मृगोरोहितं (?) रोहिणीनाम नक्षत्रं यज्ञात्मना वाचम् । मिथुनी मिथुनवान् ॥१॥ दुहिता न गन्तव्येति संधां संधानं मर्यादामतीत्य । व्याध ताडने ताडयेषुणा । इच्छब्दोऽवधारणार्थः नूनंशब्दो यस्मादर्थे यस्मात्तथैव तदास ॥३॥ क्षमया क्षमायां (क्षमयां ABC.) पृथिव्याम् । तदाग्निमारुतं नाम शस्त्रं तस्मिन् तद्भिज्ञ्याख्यायते see ऋक्संहि° ८. १. २७. २. ॥४॥ यदिदमिषोरनीकं यज्ञरसविलिप्तं तद्यथा न वृथा स्याद्यथा च प्रधानाहुतेः न महत्स्यात्तथा उपायं जानीत ॥५॥ प्रसन्नः एव ब्राह्मणशेषः किं चित्तु वक्ष्यामः ॥ नो इति प्रतिषेधः नु इति वाक्यपूरणः । दतः दन्तान् ॥७॥ ततो बृहस्पतिप्राशनादर्वाक् ॥८॥ संसारस्वभावाद्यदत्र किंचिदशान्तं तन्निर्मिमीते बहिः करोति निष्कर्षति । पशुत्वमिडायाः प्रसिद्धं पशवश्च रुद्राद्रक्षणीया अतो रुद्रिये प्राशित्रे दत्तेऽप उपस्पृश्येडावदेया ॥९॥ खदत् (°दन् C. °दम B. °दच A.) खद स्थैर्ये हिंसायां च [धातु° ३. १३.] अल्पतरत्वादस्थिरमगाढबलं निःसरणवद्भवति इतरथा तु चतुर्गृहीतं महत्त्वाद्गाढं स्यात् ॥१०॥ तिर्यक् प्रजहीत (!) ओहाङ् गतौ [धा° २५.

७.] प्रागश्नीयात्प्राशित्रम् ॥१२॥ तत्प्रतिगृह्णातीत्यत आरभ्य ब्रह्मैवं प्राह (प्राय AC. प्राशिय B.) आध्यायसमाप्तेः ॥१३॥ अथ परिक्षाल्य पात्रं नाभिमालभतऽइति शाखान्तरात् इति छेदः ॥१७॥ अथास्मै ब्रह्मभागमित्याध्वर्यवम् । प्रतिविदानः जानन् एष मे भाग इत्याशयः ॥१८॥ आ एतस्मादध्वर्युवचनात् । पाकयज्ञार्हया इडया पाकयज्ञेषु हुतशेषो भक्ष्यते तेन पाकयज्ञार्हेत्युच्यते । ब्रह्मा हि प्रायश्चित्तैर्यज्ञं भिषज्यति ॥१९॥ अनुयाजप्रसवविधिः । यस्मात्तुभ्यमेतेऽध्वर्यवो यज्ञं प्राहुर्बृहस्पतये च न मर्त्यं मनुष्याय तेन कारणेन त्वमनुज्ञया यज्ञादीनवपालय ॥२१॥ सूतिर्गन्त्री ॥२२॥४॥७॥

इडाब्राह्मणमेतत् तत्रेडाया मानवीमिडां देवतां वक्तुं मानवी घृतपदी मैत्रावरुणीत्येतानि च निगदपदानि व्याख्यातुमितिहासः प्रवृत्तः । स चेतिहासः प्रसन्न एव किंचित्तु दर्शयामः । अवनेज्यते हस्ताद्यनेनेति अवनेग्यं करणे कृत्यः । परिचारकाः आनीतवन्तः । भाविनोऽर्थस्य सिद्ध्यर्थं देवतैव मत्स्यरूपेणाजगाम ॥१॥ पाल रक्षणे । वहतीत्यौघः उदकसंघातः स इमा भरतवर्षनिवासिनीः प्रजा निःशेषं वोढा देशान्तरं प्रापयिता ॥२॥ क्षुल्लकाः क्षुद्रकाः अल्पकाः । गॄ निगरणे निगरति । बिभरासि बिभ्रियाः पुष्णियाः । अतिवर्धै अतिरिच्य वर्धितास्मि । कर्षूः खातिका ॥३॥ शश्वच्छब्दोऽत्र सामर्थ्यात्क्षिप्रवचनः कषो महामत्स्यः । ज्येष्ठं वृद्धतमम् । इतिथीमित्यभिनयः तेन संख्येयाः समादर्शितवान् इयतीनां दशानां द्वादशानां वा पूरणीतिथी इयतिथीं यावतिथीं तावतिथीमिति प्राप्ते छान्दसो यशब्दावशब्दलोपः । समा संवत्सरः मामुपासासै उपासीथाः ॥४॥ नावमुपकल्प्य मत्स्यमुपासितवान् ओघे चोत्थिते नावमधिरूढः । शृङ्गे भवितव्यतयैव निष्पादिते । उत्तरं गिरिं हिमवन्तम् ॥५॥ समवायात् एकीभावाय अधः गच्छेत् अवतरेत् ॥६॥ पिब्दमाना पिवद [°वधृ AC.] क्षरणे घृतप्रभवत्वात् घृतं स्रवन्ती सुस्निग्धा उदकादुत्थिता ॥७॥ आवयोर्दुहितेति ब्रूष्वेत्यूचतुः । अपित्वं भागः तं प्रार्थितवन्तौ । तच्च भागित्वं वा नेत्तौ वाशब्दश्चशब्दार्थे जानातिश्च प्रतिपूर्वो द्रष्टव्यः प्रतिज्ञातवती च न च प्रतिज्ञातवतीति यावता मैत्रावरुणीति व्यपदिश्यते तावत्प्रतिज्ञातवती यन्न तस्याः किंचित्ताभ्यां ह्वयेतेत्येवं न प्रतिज्ञातवती ॥८॥ अजीजनथाः जनितवानसि । मया हेतुभूतया मय्युपह्वयमानायामुपह्वतो यजमान इत्येतेन हेतृवचनेन यामाशिषमाशासिष्यसे ॥९॥ उपस्तरणादिविशेषः शाखान्तरात् पशुप्रभवघृतादिप्रभवत्वात्पशव इडा ॥१२॥ इहेत्यभिनयेन प्रदेशिनीपर्व मध्यमं दर्शयति । शाखान्तरात् ॥१४॥ द्वेवन्तरं शाखान्तरादेव ओष्ठयोरित्यत्राविशेषेण निलिम्पेदिति श्रुतम् शाखान्तरे अधरमधरऽउत्तरमुत्तरे । किं पुनर्निलिम्पते द्रवत्वात्संनिधानाददनीयत्वाच्च आज्यम् तत्राज्ये तदेवैनां प्रापयतऽइति इडानिष्क्रयवचनादिडमेवाज्यमिति गम्यते ॥१५॥ निलेपार्थवादोऽयम् तनिष्ठं तनुतमम् पाकयज्ञार्हा मनुष्यप्रधानत्वान्मन्दतरवीर्या । इह तनिष्ठे देशे । एतामिडामेतयदोष्ठयोर्निलिम्पते तत्पुरा रक्षोभ्यो यावदेवोच्चैरुपह्वानं श्रुत्वा नागच्छन्ति रक्षांसि तावत्प्रापयते प्राणेष्वेव ह्वयतऽइति वक्ष्यते तं प्राणदेशं प्रापितवान् ॥१६॥ अवान्तरेडावदानमेतत् ॥१७॥ अत ऊर्ध्वं हौत्रमिडोपह्वानं विधीयते । तदपि द्विविधमुपांशु चोच्चैश्च तत्र प्रथमं तावदुपांशूपह्वानं युज्यते । उपपूर्वो ह्वयतिरभ्यनुज्ञायां वर्तते । इयमिडा सर्वैर्ऋत्विग्यजमानैर्विभज्य भक्षणीया तत्र वोऽनतिरेकं (नातिरेकां B.) शङ्कानिवृत्तये परस्परमनुज्ञातव्यम् तद्धै तत्साधारणमेवानुज्ञानं मध्यावस्थानीयो (म-

ध्यव° BC. मध्यक A.) होता सर्वैरन्वारब्धः करोति ॥१८॥ इडाया एवैतानि रथन्तरादीनि पृथिव्यादीनि च रूपाणि ततश्च तस्यामुपहूतायां तान्युपहूतानि भवन्ति तेषु चोपहूतेषु सा उपहूता भवति देवतानामननुज्ञातां मनुष्या भक्षयितुं नार्हन्ति अतः सानुज्ञाप्यते। मामित्येतच्च तुल्यहेतुत्वात्सर्वेषामृत्विग्यजमानानां प्रदर्शनार्थम् ॥१९॥ अथोपांशूपह्वयतऽइति यदुक्तं (k. १८.) तस्य विच्छेदार्थमथ प्रतिपद्यतऽइत्याह तेनेत ऊर्ध्वं यथाप्राप्तमुच्चैर्वक्तव्यम् ॥२४॥ वत्सा वै दैव्या अध्वर्यव इति सांनाय्यं हविः संभवत्यध्वर्युवदित्यभिप्रायः ॥२७॥ सामान्यरूपेण यजमान इति वाच्यं न विशेषरूपेण देवदत्तो यज्ञदत्त इति ॥२९॥ यो मनोरथो यजमानस्य तस्मिन्नयमनुज्ञातः समृध्यताम् ॥३७॥ वकब्दः समुच्चयार्थः। अन्ये तु प्रत्यक्षमेव प्राशिष्यन्ति। ब्रह्माग्नीध्रोरपि ग्रहणे पञ्चसंख्या संपन्ना ॥३९॥ यत्र काले होता प्रतिपद्यते इडोपहूतेत्येतं निगदं तदा चतुर्धा कृत्वा पुरोडाशमाग्नेयं शाखान्तरात् बर्हिषि सादयति ॥४०॥ यत्र काले आशिषमुपहूतो यजमान इति होता आशास्ते तदा यजमानो जपति ॥४२॥ पवित्रयोः पवित्राभ्यामिति विभक्तिव्यत्ययः पवित्रपूतास्तनवामहऽइति वाक्यशेषात् मार्जयन्ते आत्मानं शोधयन्ति ॥४३॥ अपिसृजति संसृजति ॥४४॥ १ ॥८॥

अनुयाजब्राह्मणमेतत् अथाग्निं कल्पयतीत्यस्मिन्क्रमे (see ३.३.१२.) उल्मुके द्वे ऊर्ध्वं नयन्त्यग्नितः पृथक्कुर्वन्त्यृत्विग्यजमानाः साक्षादध्वर्युरितरे तदनुज्ञानेन। यातयामा गतरसो गतवीर्यः एतत् एतस्मिन्ननुयाजकाले अग्निर्भवति देवेभ्यो यज्ञमूढवान्भवति ततश्च गतवीर्यत्वादनुयाजेष्वक्षमः स्यादाभ्यां तु प्रागुन्नीताभ्यां पुनः संसृष्टाभ्यामगतवीर्यो भविष्यति ॥१॥ अनु यागे नीते पश्चात्सगमयन्ति ॥२॥ उल्मुकसमासेन पुनर्नवीकृतोऽग्निः समिधा सामिधेनीस्थानीयया चैषा तऽइत्यनयर्चा समिध्यते ॥३॥ see ४.४.१५. ससृवान् ससृतवानिति प्राप्ते तकारलोपः ॥५॥ उत्तरस्यां कण्डिकायां बर्हिषो जगतीत्वं वक्ष्यते अस्यां तु जगत्या अनुयाजेषु प्राथम्यकारणमाह। तद्वै तत्र सामिधेनीषु स्थानविपर्यासं मन्यते विद्वांसः यज्जगत्यां परिमाणतो ज्येष्ठायामेव तिष्ठमानायामल्पाक्षरा गायत्री प्रथमं युज्यते तद्यथायथं कर्तुमिहानुयाजेषु देवा जगतीं प्रथमामकल्पयन् सा च जगती बर्हिः। पापं ज्येष्ठापेक्षया कनिष्ठं नेत्पापमेव सत् वस्यः प्रशस्यतरं यज्ञेनेदमसत् तदनुकाराच्च प्रजास्वपि यत्पापं वित्तबन्धुकर्मादिना तद्वस्यः वसुतरं प्रशस्यतरमितरस्माद्पापान्मा भूत् ॥१०॥ येयं बर्हिराख्या देवतात्रेज्यते एषा अयं लोकः परिवृढो हि सः ॥११॥ नरः प्रजाः शंसन्ति वदन्त्यस्मिन्नित्यन्तरिक्षं नराशंसः। अन्तरिक्षमु वै त्रिष्टुप् मध्यमत्वादेकादशभागत्वाच्च दश दिश आत्मनैकादश रुद्रसंबन्धाद्वा ॥१२॥ बर्हिरादिषु यष्टव्येषु बर्हिर्यजेत्यादिना होतापि सर्वत्र देवं देवमित्याह न बर्हिरायेव केवलम्। यस्माच्छन्दोदेवत्या अनुयाजाश्छन्दांसि च देवानां देवाः तस्माद्देवान्यजेत्येवाध्वर्युराह गृहभोगाः पशुमन्त (°मत ABC.) एवेति गृहाः पशवः ॥१४॥ सर्वत्रैव यागे देवतायाऽएव होत्रा वषट्क्रियते अध्वर्युणा च हूयते अत्र तु अनुयाजेषु न प्रसिद्धा देवतास्ति बर्हिर्नराशंसयोर्देवतात्वेनाप्रसिद्धेरग्नेश्च गायत्रीप्रधानत्वात् तेन वसुवने वसुधेयस्येति शब्दाभ्यामग्निमिन्द्रं चोपादाय ताभ्यां बर्हिरादीनुपलक्ष्य इन्द्राग्न्यात्मकेभ्यो बर्हिरादिभ्यो वषट्करोति होताध्वर्युश्च तदात्मकेभ्यो जुहोति। वसु हविर्लक्षणं भजति वसुवनिः। वसूनि हवींषि धीयन्तेऽस्मिन्निति वसुधेयः ॥१५॥ वसुवने इत्यामन्त्रितान्तं [against the ac-

cent] वसुधेयस्येति षष्ठ्युक्तं ते कथं बर्हिर्वेविति प्रथमान्तेन बर्हिरादिना संबध्येते। नैष दोषः। एवमु हैतदिति ध्रुवं द्वेऽअप्येते विभक्ती व्यत्ययेन चतुर्थ्यर्थवृत्ते दर्शयति। तस्यापि यास्काचार्येण [यस्का° ACB.] वसुवननाय च वसुधानाय चेति [निरुक्त° १.४२.४३.] तादर्थ्ये चतुर्थ्या एकवाक्यता दर्शिता ॥१६॥१७॥२॥८॥

ऊह वितर्के प्रेरणे वात्र द्रष्टव्यः अन्योन्यविपरीतं नामयति ॥१॥ यस्मादेतत्समाने अभिन्ने व्यूहनकर्मणि विलक्षणमाक्रियतेऽभिव्यज्यते भोक्तृत्वं भोग्यत्वं च तस्माद्यज्ञानुकारेण भूतेष्वपि समानादभिन्नात्पुरुषात् भोक्ता पतिः भोग्यश्च भार्या जायेते यथा समाने कर्मणि जुहूपभृतौ। तथा च ननु (च न AC. च ननु च B.) समानजातीययोर्विवाह एव नास्ति कुतो भोक्तृभोग्यभावः (°ग्ये भागः B.) पशुन्यायेन श्चिद्वर्तेत (°न श्चिद्वा व° A. °न कश्चिद्वा वर्तते C.) न स यज्ञानुकारः स्यात्किं तर्हि यजमानैकतानुकारः स्यात् सत्यम् एवं व्यवहारस्य यज्ञमूलवादन्याय्यस्यापि तमेव व्यवहारं दर्शयति। इदं हि अधुनापि ज्ञात्याः [समा]नजातीयाः दीव्यमाना रममाणाः परितुष्टान्तःकरणाः नाकार्यकारिण-इवापरिघूनाः (-इव प° C. -दव प° A.) आसते। कथं दीव्यमानाः। विदेवम्। दिवेर्व्यवहा[रा]र्थस्य अन्योऽन्यं भोक्तारो भोग्यैः सह भोग्या भोक्तृभिः सह दीव्यामहे व्यवहृत्य [व्य]वहृत्य। व्यवहर्तॄणामभिप्रायेण व्यवहारं दर्शयति इदं प्रत्यक्षमेव विवाहेन वयं संगच्छामहे एकस्मादेव पुरुषान्मूलभूतादुत्पद्य पुनरेककुटुम्बारम्भेण समानापत्यारम्भेण च संयुज्यामहे इति भर्तॄणां योषितां चाभिप्रायवचनम्। एवं व्यवहारं दीव्यमाना आसतेऽथ के (तन्नेके B. तेत्यात्क A. तैत्क C.) पुनः संगच्छामहऽइत्याहः किमनन्तरऽएव पुरुषे नेत्याह चतुर्थे तृतीये वा वाशब्दोऽत्र लुप्तनिर्दिष्टो द्रष्टव्यः चतुर्थे वा तृतीये वा। तथा च काण्वानां तृतीये पुरुषे संगच्छामहऽइति श्रूयते चतुर्थे संगच्छामहऽइति सौराष्ट्राणां व्यवहारः तृतीये संगच्छामहऽइति दाक्षिणात्यानां ते हि मातुलदुहितृषु (°हितुः त्रिषु ABC.) पितृष्वसृपुत्रेषु संगच्छन्ते ते च मूलपुरुषाद्गण्यमानास्तृतीया भवन्ति ॥ एतस्मादेव स्रुग्व्यूहनात्कारणात्तत्तथा भवति ॥६॥ जुहूगतेनाज्येन संस्नेहयति। परिधयोऽपि ह्यग्नयो देवास्तेऽपि देवपात्रेण देवान्नमर्हन्ति पलायिवा तु न समग्रम् ॥७॥ त्वयि पार्थिवाग्न्यात्मके तृप्ते पार्थिवा वसवस्तृप्यन्ते वस्वर्थं त्वामनज्मि ॥८॥ अभिपद्याभिगम्य हस्तेनालभ्य ॥१॥ स्वगा अव्ययमेतत्स्वस्थानगामिवचनं स्वस्थानगामिनं करोति। अगन् अगमत् गतः अपिनयति संनयति ॥११॥ व्यन्तु खादन्तु इमं प्रस्तरं देवाः येभ्यो होष्यते कीदृशम् वयः पक्षिभूतम् Here is the conclusion of B. ॥१४॥ यथा पृथिवी मूल्यमूलान्नसंस्पृष्टा पृश्निस्तद्योगाच्च वशा वश्या काम्या ॥१५॥ तं प्रकृतं प्रस्तरं प्राग्रं सूक्तवाके उक्ते पश्चात्समग्रमेव प्रक्षिपति। युप रुप लुप विमोहने [धा° २६.१२४.] मूर्छ्येयुः। ऋषी गतौ नयनेऽत्र द्रष्टव्यः विस्तारयन्ति (विस्मा° A.C.) सुदग्धत्वाय ॥१८॥ संवदस्वेत्यादीनां व्याहृतीनां ब्राह्मणस्तावदर्थः। अग्नीदध्वर्युं प्रेष्यति संवदस्व त्वं मया सह शम्युवाकप्रैषार्थमिति। तमध्वर्युः पृच्छति किमगमत्प्रस्तरशरीरो यजमानः स्वर्गलोकम् किं दग्धः प्रस्तर इत्यर्थः। अग्नीदगन्निति प्रतिवचनमाह गतो यजमानो दग्धः प्रस्तर इत्यर्थः। अध्वर्युस्त्वाह यद्येवं ततः शम्युवाकपरि[धि]प्रहरणयोः कालो वर्तते ततश्चाश्रावय होतारमाकर्णय। अग्नीचाह श्रौषट् (°हा वौ AC.) शृणोत्येवायमपिवाहितो (अणेत्यो A. अणोत्यो C.) ब्रूहि

वं यद्दिवन्तितमिति । स्वगा दैव्या होतृभ्य इति शम्युवाकप्रैषः हे होतः शम्योर्ब्रूहि अस्य ऋषेरार्षं ब्रूहि स्वगा स्वस्थानगामिभ्यो (°मिर्वा AC.) दैव्या देवेभ्यो होतृभ्यः परिधिशरीरेभ्यो ह्रूयताम् मानुषेभ्यस्तु होतृभ्यः स्वस्तिरविनाशोऽस्त्वित्येवंरूपं वा ब्रूहीति ॥ श्रुतिस्तु सांकेतिकं नूतनतरमर्थं व्याचष्टे तत्र च यथैव प्रहरणसंबन्धसूक्तवाकप्रैषसंबन्धमाश्रावणमनुषङ्गतः परिधीनामुपकारकमित्युक्तम् तथेहापि परिधिप्रहरणसंबन्धशम्युवाकप्रैषसंबद्धा व्याहृतयोऽनुषङ्गात्प्रस्तरवृत्तान्तं प्रकाशयन्तीति (°यतीति AC.) दर्शयति संवादयैनं देवैरिति प्रियमिवातिथिमागतैर्देवैः संभाषय ॥२०॥ बह्वनां मानुषाणां होतॄणामभावादेकवचनस्थानऽएवैतद्बहुवचनम् ॥२१॥ संप्रगृह्णाति संगते उद्गृह्णाति संस्रवहोमाय आज्यशेषस्य स्वगाकाराय च ॥२३॥ अपित्विन्यो भागिन्योऽत्र वयमपीत्येवं मन्यन्ते ॥२४॥ स यन्निधायावद्येदिति प्रसङ्गेनार्थप्राप्तं चरकश्रुतिप्राप्तं च निधायावदानं प्रतिषेधति वाहनमश्वादि यथा तदवार्क्षेत् अधः पतेत् एवं निधानं स्रुचोः प्राग्विमोकात् अधश्चलनं तद्यज्ञस्य स्यात् । विमुच्यतेऽस्मिन्निति विमोचनं स्थानम् ते तत्र सादयत्यध्वर्युः विश्रमार्थं विमुञ्चति । गतिमध्वानम् ॥२७॥३॥८॥

आध्वर्यवः सूक्तवाकप्रैषः शम्युवाकप्रैषश्चाधस्तादुक्तास्तत्प्रसङ्गात्सूक्तवाकशम्युवाकयोरितद्ब्राह्मणम् तत्रापि सूक्तवाकस्य प्रयोजनं विवक्षुः कालसंबन्धगतमुपादाय (!) प्रयोजनमाह । यस्मिन्काले अध्वर्युराहेषिता इत्यादि (see ८.३.१०.) अतस्तत इति सर्वनामव्यत्ययो द्रष्टव्यः तत ऊर्ध्वं होता यदाह इदं द्यावापृथिवी इत्यादि (k. ४.) तत्सूक्तान्याहेति सूक्तवाकशब्दनिर्वचनम् ॥१॥ वक्शब्दः समुच्चये । देवान्प्रीत्वा तर्पयित्वा शास्त्रपरिषदीव संतप्रश्ने (!) संदत्वा (!) तेषु देवेषु तेषां मध्ये अपित्वी भागी भवति । अप्रैषीत्तर्पितवान् ॥३॥ प्रतिपद्यते होता वक्तुमारभते । आधर्म ऋजवतः । नमोवाकमन्त्रदानवचनम् । त्वं सूक्तानां वक्तासि नाहं मानुष इति वेदित्वा मामधिष्ठातुमर्हसि । उपश्रृणोतीत्युपश्रुतिः ततः सप्तमी द्विवचनमुपश्रुत्योरिति प्राप्तं ततश्छान्दसः पूर्वसवर्णः । अवति तर्पयति इत्योमा ॥४॥ शंगवी शं च ते गावौ च शंगव्याविति प्राप्ते पूर्वसवर्णः । जीवनस्य दात्र्यौ । अत्रसनशीले ते देवते उपासीनो न त्रस्यतीति देवधर्मं यजमाने दर्शयति नाहेति । नास्ति प्रवेदनं प्रलाभः एतयोः दुर्लभे ॥५॥ गावः अवन्ति तृप्यन्त्यस्यामिति गव्यूतिः गोप्रचारः सा च क्षेमऽउर्वी भवति । व्याघ्रादिभये त्रसन्ति न दूरं ग्रामाद्गावो गच्छन्तीत्यनुर्वी गव्यूतिर्भवति तेन गवां क्षेमहेतू स्तामित्यर्थः । वृष्टेर्दात्र्यौ ददातेर्वनिप् यकारश्चागमः वृष्टिदातारौ । रीतिस्तृप्तिस्तामापतऽइति रीत्यापा सुष्ठुवर्षवत्यौ ॥६॥ ऊर्जः मतुपि असुगागमः वकारस्य च भवम् ॥७॥ आवेदनमावित् ॥८॥ महो मंहनं पूजा विभूतिः ॥११॥ see ८.१.२१. ॥१२॥ अमुत्र see ८.१.३० ॥१३॥ अमुत्र see ८.१.३३. ॥१४॥ सजाता भ्रातरः आत्मिकास्तु प्राणाः तेषां च तस्य संभक्तिस्तैरवियोगः सजातवनस्या वन[स]शब्दः कण्ड्वादिषु द्रष्टव्यः कण्ड्वादिभ्यो यक् [पा° ३.१.२७.] वननं वनस्या ॥१५॥ अश्यात् अशू व्याप्तौ प्राप्नोतु ॥१६॥ तिस्र इडायाम् see ८.१.३०.३३. ३७. ॥१७॥ शाखान्तराधीतानां प्रतिषेधः ॥१८॥ रासन्ताम् रासृ (!) दाने । वनु याचने याचताम् वयं च मानुषा होतारः आत्मनि बहुवचनम् अधिशब्दोऽग्नेरित्यस्य पञ्चम्यन्तत्वद्योतनार्थं अनेकपञ्चम्यर्थसंभावेऽपादानार्थद्योतकः [पा° २.३.२८.] ॥१९॥ अञ्जसा ऋजु सम्यक् । तत्तदा तद्विज्ञानं भवितव्यतावशादेव अन्तर्हितं विच्छिन्नं मनुष्येभ्यो बभूव ॥२४॥ संस्थानं श-

म्युना दृष्टं प्रार्थयामहे ॥२६॥ अनया दक्षिणस्य पाणेः कनिष्ठिकया इति एवम् इत्यभिनयेन पृथिव्या उपदर्शनं दर्शयति । अथ कनिष्ठिकया पृथिवीमुपस्पृशतीति काण्वश्रुत्युपरोधः (!)। अग्निर्देवो दैव्यो होतेति [५.१.५.] व्रियमाणोऽग्निर्भवं चित्तेनोपगतः स पृथिवीस्पर्शनेनाभिनयेन मानुषायतनं पृथिवीमुपगतोऽस्ति ॥ एव प्रासङ्गिकं होतृब्राह्मणं समाप्तम् ॥२९॥१॥१॥

पत्नीसंयाजब्राह्मणमेतत् ॥ देवानां पत्नीः देवैः सह संगता याजयिष्यन्तः । आहवनीयात्परास्तमभिमुखमायन्ति ॥१॥ गार्हपत्यमुत्तरेणातीत्य पत्नीं चापरेण पत्नीदक्षिणपार्श्वे स्थितो यजेदिति (यज्ञा° A. C.) अपरे शाखिन आहुः । भसदुत्सर्गायतनं यथा भसदि शिरः संयोजयेत्तच्चायुक्तमित्यभिप्रायः ॥३॥ चरणशब्दे सर्वं हौत्राध्वर्यवमश्राव्यम् । तिरोऽन्तर्हितमप्रकाशं मिथुनेन लिङ्गद्वयेन चर्यते लोके ॥८॥ आहवनीयात्ताभ्य एवैतत्तिरः करोति अन्तर्धानेनादर्शनमिच्छन्ति । पुंसः अन्तर्हिता पुंसश्चादृश्यमाना (पुंसश्च दृश्यमाना C.) जिघत्सन्ति भक्षयितुमिच्छन्ति तस्माद्यज्ञाङ्गानुकारात् क्षुद्वयोषितस्तु पुंसः समक्षमप्यन्ते अश्नन्ति ॥१२॥ परिधिप्रस्तरसंबन्धौ सूक्तवाकशम्युवाकौ तदभावेऽनुपपन्नौ । उयसशब्दोऽवसानवचनः काण्वादिषु पठ्यते अवसानमवसादं पत्न्याः कुर्यात् रूपं प्रतिनिधिः ॥१४॥ प्रैषसामर्थ्यान्न सूक्तवाकमाह ॥१८॥ अशीतमः भोक्तृतमः । आत्मनि अग्नौ दक्षिणाग्निहोमादि शाखान्तरात् ॥२०॥ बर्हिराहुतिं यज्ञादतिरिक्तां जुहोति । समिष्टयजुर्हि देवताविसर्जनार्थम् ॥३०॥ अध्वर्युरुत्तरपार्श्वाद्दक्षिणपार्श्वं वेदेर्गत्वा स्वदेशेऽवस्थिता एव प्रणीता नोच्चैर्नयति भूमौ पर्यस्यति । प्रक्षिणीयात् हिंस्यात् ॥३२॥ फलीक्रियन्ते तण्डुला एभिरिति फलीकरणाः ॥३३॥ संवृज्य समाप्तिपूर्वं संहृत्य । निरभजन् बहिर्यज्ञात्कृतवन्तः । अस्ना लोहितेन । भागिनं स्वल्पभागेनापि भक्तम् । अभागं भागमदत्त्वा यं निर्भजन्ति स आशंसत एव । अबलो हि बलवतो वशे भवति लब्ध्वा आसाद्य कुतश्चित्कालपर्यायात् किं त्वं मां बभक्थ मनसि किं मह्यं त्वया दत्तम् । तेदनी (तेमनी A C.) लोहितम् ॥३५॥ २ ॥१॥

याजमानकर्माभिधायि ब्राह्मणमेतत् । अध्वर्युर्निनयति । दक्षतेः समृद्ध्यर्थस्य दक्षिणा रूपम् यज्ञसमृद्ध्यर्थं यज्ञमनु विलग्ना दक्षिणैति । दक्षिणामन्वारभ्य सा हि परिक्रयार्थे ऋत्विङ्निष्पादिता परिक्रीयते यथान्यत्रापि परिक्रयसंबन्धः परिक्रेता एवमत्रापि ॥१॥ यः अकृतकृत्यः तमोषतः यस्तु कृतनियतकर्मा तमतिसृजतः ॥२॥ यद्वै यज्ञस्य मिथ्या क्रियते अकरणमन्यथाकरणं च ॥४॥ अध्वर्योर्निनयने व्यापृतत्वान्मन्त्रस्याशीर्लिङ्गत्वाद्यजमानः प्रतिगृह्णाति ॥६॥ सर्वमेवातः परं याजमानम् ॥७॥ तद्वै तत्र इत एव लोकात्पराचीनमूर्ध्वमन्तरिक्षं दिवमित्येवं बहुतमाः क्रमन्ते ॥९॥ आदित्यस्य ये रश्मयः कदम्बकेसरवदनन्तभेदास्ते सुकृतो ये पूर्वे यजमानाः तेजःशरीराः उपरित[न]मेव तद्यज्ञरूपो प्रजापतिः । स्वर्गो वा लोकः अज्ञानानां कर्मकर्तॄणाम् प्रजानां पतिः ज्ञानिनामुपभोग्यं स्थानम् तत्र ते गच्छन्तीत्यभिप्रायः । भाः प्रकाशमात्रं सूर्यरूपम् ॥१०॥ प्राङ्निरीक्षणेन संतर्पिता गच्छन्तो देवा निरीक्षिता भवन्तीत्यभिप्रायः ॥१३॥ उपगम्य उदता (!) पितुरुपोदिता स्त्रीभ्यो ढक् [पा° ४.१.१२०.] ॥१६॥ प्रदक्षिणमावर्तते ॥१७॥ असहायो वाच्यः स्थूरः तत्रासहायमात्रं लक्ष्यते स्थूरोऽस्मिन्नस्तीति स्थूरी न स्थूरी अस्थूरी । ससहायानि ॥१९॥ पुत्ररहितश्चेन्मृतपुत्रो वा तथा इदं मे कर्मेदं वीर्यं देवदत्तोऽहं संतनवानीति नामग्रहणम् ॥२१॥ see १.१.६. ॥२३॥ समाप्तोऽयं पौर्णमासिकः

सर्वास्विष्टिषु पशुबन्धेषु यागेषु सौत्रामण्यां प्रकृतिभूतः । यद्यप्ययं (?यथोक्तोयं A. यथायंयं C.) कृताधानस्य भवति तथापि आधानेष्टीनां तनूहविःसंज्ञकानां पौर्णमासिको यागः प्रकृतिः तस्मात्पूर्वमुपदेश्यः । ननु तर्हि तनूहविषामेव सर्वेष्टिप्रकृतित्वं (°तत्वं A. C.) कृत्वा तान्येव पूर्वं कस्मान्नोपदिष्टानि सत्यम् किं तु तेष्वितिकर्तव्यतावैकृत्यदर्शनात्सर्वप्रकृतित्वं न संभवति तस्मात्पौर्णमासयाग एव पूर्वमुपदिष्टः ॥ ॥ आचार्यहरिस्वामिनः कृतौ शतपथभाष्ये हविर्यज्ञेषु नवमो (अष्टमो AC.) ऽध्यायः समाप्तः ॥ ॥

VARIOUS READINGS AND CORRECTIONS OF THE PRESS.

अध्याये १ ब्राह्मणे १ कण्डिकायाम् १ M. B. C read प्राङ्गिष्ठ° instead of °ङ्क्ति° and so is the general usage of Vedic manuscripts: see Benfey »die Hymnen des Sâmaveda Leipzig 1848. Brockhaus« p. XLVIII. I have retained this manner of writing only in the Nomin. mascul. of the themata terminating in ञ्. - ३ न्वेवो M apograph. - १० °डुपचं Sây. - १७ निर्दहन्ति M. - २. ७ निर्ममे Sây. B. निर्ममे Sây. A. C. but निर्मिमा ३. १. २१. - ८ °र्व्यध-धस्ताडु° Sây. - १२ °ताद्रात° MBC. °ताड्रात° Sây. which reading I now prefer: see ४. ३. १८. - ३. ५ °तिपप्लुविरि Sây. - ४. १ °वत्साया° M. - ११ वर्धयति M. B. C unaccented against पा° ८. १. ५६. — अध्या° २. ब्रा° १. क° ८. रुद्रामप° M. - १५ दिनसाव M. °सातऽङ्ु°? - २. ७ प्रवृन्याद्° M. - ९ तन्न I. ११ न्तएवन्ति MBC. न्निएवन्ति Sây. see ७. ४. १९. and ९. ३. ६. - ३. १ अप्रदनव७ I. देवा अन्विष्य Sây. - ४. १६ क्रूरं कु° Sây. - ५. ५ °मनुरिति M. - ६ निपात्य Sây. - ९ पाश्चिद्यङ्गुलामिव M apograph. - २० वध्रो ह I - २२ प्रहरामीति M apogr. - २३ अस्याः क्रूरमभूत्तद्यस्या एतद° Sây. — अध्या° ३. ब्रा° १. क° ७. °रतः संमा° B

prima manu. °रतः संमा° B sec. manu. C. M. See पा° ८. १. ६३. - ११ °ङ्ववे-दिति Sây. - २० °दाय प्राङुदाद्रवति M. °दाह्रति coni. °त्पत्नी नात्तरेति M apogr. - २५ रसस्यो वैव I. B prima m. - २. ७ °भृति चतुर्ध्रुवायाम् coni. - ३. ३ प्रयच्छति M. B. C. °च्छति I. - ११ पूर्वार्धा वै M apogr. - ५. १२ स ते Sây. against the accent, for the mspts have ह्वैव, not ह्वैव; सते is Datif Part. Praes. — अध्या° ४. ब्रा° १. क° १०. विदेच° M. माधव° Sây. - १३ निष्वेदे M apogr. - १४ सदा-नीरेत्युत्तरेनं निर्धारयति Sây.! - २१ जिगाथसति M apogr. °घांसति Sây. - २५ °तिर्व्वृणा° M. B. C sec. manu. = र्घृ? - २९ इडे° M apogr. ईडेन्य° Sây. see ४. ३. ५. - ३३ तृच° Sây. त्रिच° MBC. - ३५ सुक्रतुर्य° BC. M sec. m. सुक्रतुर्य° M prima m. - ३९ °न्धिढ्वं instead of °न्धिड्ढ्वं see ४. ३. १८. - २. १७ °नुध्या C. B. and Sây. - ३. १६ °मुगश्च° M. °मुयश्च° I. B. C. घ is my coniecture. - १८ उध्नाय M. B. C. and Sây. उद्माय I. उद्ध्माय is my coniecture. द्ध्म is very often given in the mspts by घ्नः see Benfey p. XLVII. - ४. १३ °ढ्रीति and ५. १२ °ढ्रि in all the manuscripts: see Benfey p. XXXIV. - ५. ११ the accent allows to consider प्रतिप्रश्नं either as a bahuvrîhi, or as an avyayîbhâva: the latter menning is understood by Sâyana. - १३ वा यस्मिन्वा in all the mspts. Sâyana seems to read वान्यस्मिन्वा. — अध्या° ५. ब्रा° १. क° ६. and २६ अनुध्या C. and Sây. - २० होत्रवर्ये I. - २५ उदोषिष्टं has lost the augment after मा, else it should be read उदौषिष्टं. - २. १ वेव° M. B. C. होत्र° Sây. - ११ °रात्स वषट्कारेणा° Sây. - ३. ६ वै संक्रा° M apogr. संगतयोः Sây. - ११. Sây. reads नुष्टकं. - १७ मित्र आग° Sây. — अध्या° ६. ब्रा° १. क° १. अत्तयात I. - ४ इन्वतो M. B. C. - १९ ज्ञयं ज्ञयति M. B. C. The final न् is changed very

often in the manuscripts into Anusvâra: see Benfey p. XXXVII. XXXVIII. वेदह M. °च्चथा यथास्य M. apogr. - २१ सतः is Gen. Part. praes., Sây. reads सदः. - ७.२ यय्यमास M. C prima manu. ञय्यमास C sec. m. B.I. - ४ सस-र्प्यैवा° M. सर्प्यै B.C. समर्थै I. The mspts use to have र्कु. र्त्त. र्प्य instead of र्क. र्त. र्प. - तमसृजन्त M. apogr. तम° is my coniecture. - ३.१ दनायुः Sây. - १६ संवलीनः M. संवलीनः I. संह्लीनः Sây. संलीनः Sây. and my coni. - १७ मा आकुरु Sây. against the accent. उदरेणायुध्यन्त° Sây. - १८ °ञतऽइति M. ञत-मिति C.B.I. - २२ इन्द्रज्येष्ठा दे° Sây. — अध्या° ७. ब्रा° १. क° १. अपाधस्ता Sây. अपादस्ता means either: *the archer Apâd*, or: *an insidiator* from the root दसु उपक्षये धा° २६. १०४. - ३ द्वितीयोऽवतीति M. apogr. ऽयती° is my coni. - १० °खा भवत्य° M. - २.१३ निदग्धं Sây. - १८ अधस्ताच्छा° Sây. - ३.१० °मया-लग्नि° Sây. - ११ सस्रे Sây. आपदीति M. apogr. अपदिति Sây. - २१ °क्रुद्रेण प-शू° Sây. - ४.१२ प्रजह्नीत Harisv. — अध्या° ८. ब्रा° १. क° १. अवनेन्यमुः Har. - ७ चकार M. चचार I.B. पिव्दमाना Har. - ६ याममुया M. apogr. यामु मया coni. - २५ °त्येवोपह्वयेतोपह्वतेडोपह्वतेंडेति वे°? coni. - २.५ ससृवान् Har. - ३.२१ होतृद्कलामा° M. होत्रे दकलामा° I. होत्रेऽद्व° coni. see ७.१.११. - २२ ने न व° M. नेव° I. C. नेत्र° coni. see Benfey p. XLVII. - २६ यत्तो होवं M. apogr. - २७ तत्सादयति coni. — अध्या° ९. ब्रा° १. क° १ सूक्तानि तदाह Har.? - २ च्युत्का M. apogr. च्युत्त्का coni. - ४ दिवस्पथिव्योरि° M against पा° ६.२.१४२. दिव° coni. - ५ शंघवी M on both times. शंगवी I.C. नाह Harisv. - २.२० °ध-वित्यशी° M. against the rule. - ३.११ ञयं ञयति the mspts. see ६.१.११. -

१६ वाव see शान्तनाचार्य° ३.१४ वावादीनामुभावुदात्तौ. Boehtlingk »über den Accent im Sanscrit §. 2« reads erroneously वाचा. —

Read: पत्र १. पङ्क्ति १३ °मानुष-इव. २. १४ यन्नमेवै°. २० ऽइति. २२ तत. ३. १५ °लानि च. ४.१ स्मऽर्षयो. १० एव गृ°. ११ °स्ताद्व°. १३ ऽएन°. १७ ह्रैनमे°. १८ तद्-भ्याह्. २१ °ताद्गातमनसो. ६.५ ऽ-इवै°. १६ ऽभिप्रसुस्राव सर्वत-इव. ७.२२ यज्ञाः. ८.८ ऽअस्यै. किं च. ९ संज्ञानीते. ९.६ °मेवैत°. १०.३ °तऽ-सं°. ५ वर्धयति. १० किं च. ११ °ष्क एव. २२ ऽउपालभतऽउपेव. १२.१ वेतराणि. ४ °देवमभ्यू°. १४ साव इ°? १५ °ह्म्यया. १३.७ °मेकं. १४.३ ऽउभा°. ५ ज्ञायते. १३ ज्ञएवन्ति. १८ वा. २२ भैषी°? १५.१८ ऽउ. २२ देवाः. १६.६ हविर्हविरेव. २०.२२ पशुम°. २१. १० °यँश्चन्द्र°. २२ °जिरे. २२.१५ निर्णि°. २७.२ and ४ °ह्वैव. ९.१०.१४ ध्रु°. १५ तु? २८.४ °स्रऽ-. १६ न्वृषि°? २९.४ स्यां. ३०.१०.१२.१३.१४.१९ °न्द्धि. ३१.१४ °त्र-मेवै°. २० °न्द्धे. ३२.२ ब्रूह्रीत्येव. ३.४.६ °न्द्धि. ९ °भि संपा°. १५.१९ °चऽर्त°. १८ °धेनीः. ३३.४ वशः. ३४.२१ स्मैतां? ३७.४ °वऽर्चा°. ३८.१८ °ह्ऽर्षि°. ४०.४ प्र व इति. ४२.१६ युञ्जन्ति. ४४.१२ °त्रैव. ४६.२२ मोदोषिष्टं. ४७.१ मो-. ४९.७ °दनय-न्ये. २२ वि स क्राम°. ५०.१ °रामेव. २ कुर्यात्‌ । ६.७ यज्ञ-य°. ५१.२ °तु-व्य°. °तु-वे°. २२ and ५२.१९ °ह्ना-स्वा°. ५३.७ °नाऽ ह्नि. १० तन्मि°. १२ and १९ °स्व-प°. ५८.११ वाभि सं°. ६०.१६ ये-यम°. ७०.८ य एष. ७२.१० वि स. ७९.१६ ज्ञुता°. ८५. १७ यन्नि°? ९०.१० °घत्स°. १४ °यसितऽ. ९४.९ °दर्वाङ् क्रमेत. —

ओम् । स यद्वा इतश्चेतश्च सम्भरति । तत्सम्भाराणाꣳ सम्भारत्वं यत्र-यत्राग्नेर्न्यक्तं ततस्ततः सम्भरति तद्यशसैव त्वदेवैनमेतत्समर्धयति पशुभिरिव त्वन्मिथुनेनेव त्वत्सम्भरन् ॥१॥ अथोल्लिखति । तद्यदेवास्यै पृथिव्या अभिष्ठितं वाभिष्ठ्यूतं वा तदेवास्या एतदुद्धन्त्यथ यज्ञियायामेव पृथिव्यामाधत्ते तस्माद्वा उल्लिखति ॥२॥ अथाद्भिरभ्युक्षति । एष वा अपाꣳ सम्भारो यदद्भिरभ्युक्षति तद्यदपः सम्भरत्यन्नं वा आपोऽन्नꣳ हि वा आपस्तस्माद्यदेमं लोकमाप आगच्छन्त्यथेहान्नाद्यं जायते तदन्नाद्येनैवैनमेतत्समर्धयति ॥३॥ योषा वा आपः । वृषाग्निर्मिथुनेनैवैनमेतत्प्रजननेन समर्धयत्यद्भिर्वा इदꣳ सर्वमाप्तमद्भिरेवैनमेतदाप्त्वाधत्ते तस्मादपः सम्भरति ॥४॥ अथ हिरण्यꣳ सम्भरति । अग्निर्ह वा अपोऽभिदध्यौ मिथुन्याभिः स्यामिति ताः सम्बभूव तासु रेतः प्रासिञ्चत्तद्धिरण्यमभवत्तस्मादेतदग्निसंकाशमग्नेर्हि रेतस्तस्मादप्सु विन्दन्त्यप्सु हि प्रासिञ्चत्तस्मादेनेन न धावयति न किं चन करोत्यथ यशो देवरेतसꣳ हि तद्यशसैवैनमेतत्समर्धयति सरेतसमेव कृत्स्नमग्निमाधत्ते तस्माद्धिरण्यꣳ सम्भरति ॥५॥ अथोषान्त्सम्भरति । असौ ह वै द्यौरस्यै पृथिव्या एतान्पशून्प्रददौ तस्मात्पशव्यमूषरमित्याहुः पशवो ह्येवैते साक्षादेव तत्पशुभिरेवैनमेतत्समर्धयति तेऽमुत आगता अस्यां पृथिव्यां प्रतिष्ठितास्तमनयोर्द्यावापृथिव्यो रसं मन्यन्ते तदनयोरेवैनमेतद्द्यावापृथिव्यो रसेन समर्धयति तस्मादूषान्त्सम्भरति ॥६॥ अथाखुकरीषꣳ सम्भरति । आखवो ह वा अस्यै पृथिव्यै रसं विदुस्तस्मात्तेऽधोऽध इमां पृथिवीं चरन्तः पीविष्ठा अस्यै हि रसं विदुस्ते यत्र तेऽस्यै पृथिव्यै रसं

विदुस्तत उत्किरन्ति तदस्याऽएवैनमेतत्पृथिव्यै रसेन समर्धयति तस्मादाखुकरीषꣳ
सम्भरति पुरीष्य इति वै तमाहुर्यः श्रियं गच्छति समानं वै पुरीषं च करीषं च
तदेतस्यैवावरुद्ध्यै तस्मादाखुकरीषꣳ सम्भरति ॥७॥ अथ शर्कराः सम्भरति । दे-
वाश्च वाऽअसुराश्चोभये प्राजापत्याः पस्पृधिरे सा हेयं पृथिव्यलेलायद्यथा पुष्कर-
पर्णमेवं ताꣳ ह स्म वातः संवहति सोपैव देवाञ्जगामोपासुरान्त्सा यत्र देवा-
नुपजगाम ॥८॥ तद्धोचुः । हन्तेमां प्रतिष्ठां दृꣳहामहै तस्यां ध्रुवायामशिथिलाया-
मग्नीऽआदधामहै ततोऽस्यै सपत्नान्निर्भक्ष्याम इति ॥९॥ तद्यथा शङ्कुभिश्चर्म वि-
हन्यात् । एवमिमां प्रतिष्ठाꣳ पर्यबृꣳहन्त सेयं ध्रुवाशिथिला प्रतिष्ठा तस्यां ध्रुवा-
यामशिथिलायामग्नीऽआदधत ततोऽस्यै सपत्नान्निरभजन् ॥१०॥ तथोऽएवैष ए-
तत् । इमां प्रतिष्ठाꣳ शर्कराभिः परिबृꣳहते तस्यां ध्रुवायामशिथिलायामग्नीऽआ-
धत्ते ततोऽस्यै सपत्नान्निर्भजति तस्माच्छर्कराः सम्भरति ॥११॥ तान्वाऽएतान् ।
पञ्च सम्भारान्त्सम्भरति पाङ्क्तो यज्ञः पाङ्क्तः पशुः पञ्चऽर्तवः संवत्सरस्य ॥१२॥ त-
दाहुः । षडेवऽर्तवः संवत्सरस्येति न्यूनमु तर्हि मिथुनं प्रजननं क्रियते न्यूनाद्वा
ऽइमाः प्रजाः प्रजायन्त इत्युत्तरवत्तस्मात्पञ्च भवन्ति यद्यु षडेवऽर्तवः संव-
त्सरस्येत्यग्निरेवैतेषाꣳ षष्ठस्तथोऽएवैतदन्यूनं भवति ॥१३॥ तदाहुः । नैवैकं चन
सम्भारꣳ सम्भरेदित्यस्यां वाऽएते सर्वे पृथिव्यां भवन्ति स यदेवास्यामाधत्ते तत्स-
र्वान्सम्भारानाप्नोति तस्मान्नैवैकं चन सम्भारꣳ सम्भरेदिति तदु समेव भरेद्यद्धे-
वास्यामाधत्ते तत्सर्वान्त्सम्भारानाप्नोति यदु सम्भारैः सम्भृतैर्भवति तदु भवति त-
स्मादु समेव भरेत् ॥१४॥ ब्राह्मणम् ॥१॥

कृत्तिकास्वग्नीऽआदधीत । एता वाऽअग्निनक्षत्रं यत्कृत्तिकास्तद्वै सलोम यो
ऽग्निनक्षत्रेऽग्नी आदधातै तस्मात्कृत्तिकास्वादधीत ॥१॥ एकं द्वे त्रीणि । चत्वा-
रीति वाऽअन्यानि नक्षत्राण्यथैता एव भूयिष्ठा यत्कृत्तिकास्तद्भूमानमेवैतदुपैति

तस्मात्कृत्तिकास्वादधीत ॥२॥ एता ह वै प्राच्यै दिशो न च्यवन्ते । सर्वाणि ह
वाऽअन्यानि नक्षत्राणि प्राच्यै दिशश्च्यवन्ते तत्प्राच्यामेवास्यैतद्दिश्याहितौ भवत-
स्तस्मात्कृत्तिकास्वादधीत ॥३॥ अथ यस्मान्न कृत्तिकास्वादधीत । ऽऋक्षाणां ह
वाऽएता अग्रे पत्न्य आसुः सप्तऽर्षीनु ह स्म वै पुरऽर्क्षा इत्याचक्षते ता मिथु-
नेन व्यार्ध्यन्तामी ह्युत्तराहि सप्तऽर्षय उद्यन्ति पुर एता अशमिव वै तद्यो मि-
थुनेन व्यृद्धः स नेन्मिथुनेन व्यृध्याऽइति तस्मान्न कृत्तिकास्वादधीत ॥४॥ तद्धैव
दधीत । अग्निर्वाऽएतासां मिथुनमग्निनैता मिथुनेन समृद्धास्तस्माद्धैव दधीत ॥५॥
रोहिण्यामग्नीऽआदधीत । रोहिण्यां ह वै प्रजापतिः प्रजाकामोऽग्नीऽआदधे स
प्रजा असृजत ता अस्य प्रजाः सृष्टा एकरूपा उपस्तब्धास्तस्थू रोहिण्य इवैव तद्धि
रोहिण्यै रोहिणीत्वं बह्वेव प्रजया पशुभिर्भवति य एवं विद्वान्रोहिण्यामाधत्ते
॥६॥ रोहिण्यामु ह वै पशवः । अग्नीऽआदधिरे मनुष्याणां कामं रोहेमेति ते
मनुष्याणां काममरोहन्यमु हैव तत्पशवो मनुष्येषु काममरोहंस्तमु हैव पशुषु
कामं रोहति य एवं विद्वान्रोहिण्यामाधत्ते ॥७॥ मृगशीर्षेऽग्नीऽआदधीत । ए-
तद्धि प्रजापतेः शिरो यन्मृगशीर्षं श्रीर्वै शिरः श्रीर्हि वै शिरस्तस्माद्योऽर्धस्य श्रे-
ष्ठो भवत्यसावमुष्यार्धस्य शिर इत्याहुः श्रियं ह गच्छति य एवं विद्वान्मृगशीर्षे
ऽआधत्ते ॥८॥ अथ यस्मान्न मृगशीर्षऽआदधीत । प्रजापतेर्वाऽएतच्छरीरं यत्र वा
ऽएनं तदविध्यंस्तदिषुणा त्रिकाण्डेनेत्याहुः स एतच्छरीरमजहाद्वास्तु वै शरीरमय-
ज्ञियं निर्वीर्यं तस्मान्न मृगशीर्षऽआदधीत ॥९॥ तद्धैव दधीत । न वाऽएतस्य दे-
वस्य वास्तु नायज्ञियं न शरीरमस्ति यत्प्रजापतेस्तस्माद्धैव दधीत पुनर्वस्वोः पु-
नराधेयमादधीतेति ॥१०॥ फल्गुनीष्वग्नीऽआदधीत । एता वाऽइन्द्रनक्षत्रं यत्फ-
ल्गुन्योऽप्यस्य प्रतिनाम्न्योऽर्जुनो ह वै नामेन्द्रो यदस्य गुह्यं नामार्जुन्यो वै ना-
मैतास्ता एतत्परोऽक्षमाचक्षते फल्गुन्य इति को ह्येतस्यार्हति गुह्यं नाम ग्र-

हीतुमिन्द्रो वै यजमानस्तत्स्वऽएवैतन्नक्षत्रेऽग्नी आधत्तऽइन्द्रो यज्ञस्य देवतैतेनो
हास्यैतत्सेन्द्रमग्न्याधेयं भवति पूर्वयोरादधीत पुरस्तात्क्रतुर्हैवास्मै भवत्युत्तरयो-
रादधीत श्वःश्रेयसꣳ हैवास्माऽउत्तरावद्भवति ॥११॥ हस्तेऽग्नीऽआदधीत । य इ-
च्छेत्प्र मे दीयेतेति तद्धाऽअनुष्ठ्या यद्धस्तेन प्रदीयते प्र हैवास्मै दीयते ॥१२॥ चि-
त्रायामग्नीऽआदधीत । देवाश्च वा असुराश्चोभये प्राजापत्याः पस्पृधिरे तऽउभयऽए-
वामुं लोकꣳ समारुरुक्षां चक्रुर्दिवमेव ततोऽसुरा रौहिणमित्यग्निं चिक्यिरेऽने-
नामुं लोकꣳ समारोक्ष्याम इति ॥१३॥ इन्द्रो ह वाऽईक्षां चक्रे । इमं चेद्वाऽइमे
चिन्वते तत एव नोऽभिभवन्तीति स ब्राह्मणो ब्रुवाण एकेष्टकां प्रबध्येयाय
॥१४॥ स होवाच । हन्ताहमिमामप्युपदधाऽइति तथेति तामुपाधत्त तेषामल्प-
कादिवाग्निरसंचित आस ॥१५॥ अथ होवाच । अन्वाऽअहं तां दास्ये या ममेहे-
ति तामभिपद्याबवर्ह तस्यामावृढायामग्निर्व्यवशशादग्निर्व्यवशादमन्वसुरा व्यवशे-
रुः स ता एवेष्टका वज्रान्कृत्वा ग्रीवाः प्रचिच्छेद ॥१६॥ ते ह देवाः समेत्योचुः ।
चित्रं वाऽअभूम यऽइयतः सपत्नानवधिष्मेति तद्वै चित्रायै चित्रात्वꣳ चित्रꣳ ह भ-
वति हन्ति सपत्नान्हन्ति द्विषन्तं भ्रातृव्यं य एवं विद्वांश्चित्रायामाधत्ते तस्मादेतत्क्ष-
त्रिय एव नक्षत्रमुपेत्सेज्जिघाꣳसतीव ह्येष सपत्नान्वीव जिगीषते ॥१७॥ नाना
ह वाऽएतान्यग्रे क्षत्राण्यासुः । यथैवासौ सूर्य एवं तेषामेष उद्यन्नेव वीर्यं क्षत्र-
मादत्त तस्मादादित्यो नाम यदेषां वीर्यं क्षत्रमादत्त ॥१८॥ ते ह देवा ऊचुः ।
यानि वै तानि क्षत्राण्यभूवन्न वै तानि क्षत्राण्यभूवन्निति तद्वै नक्षत्राणां नक्षत्रत्वं
तस्मादु सूर्यनक्षत्रऽएव स्यादेष ह्येषां वीर्यं क्षत्रमादत्त यद्यु नक्षत्रकामः स्यादे-
तद्वाऽअनपराद्धं नक्षत्रं यत्सूर्यः स एतेनैव पुण्याहेन यदेतेषां नक्षत्राणां कामयेत
तदुपेत्सेत्तस्मादु सूर्यनक्षत्रऽएव स्यात् ॥१९॥ ब्राह्मणम् ॥२॥

वसन्तो ग्रीष्मो वर्षाः । ते देवा ऋतवः शरद्धेमन्तः शिशिरस्ते पितरो य ए-

वापूर्यतेऽर्धमासः स देवा योऽपक्षीयते स पितरोऽहरेव देवा रात्रिः पितरः पुनरह्नः पूर्वाह्णो देवा अपराह्णः पितरः ॥१॥ ते वाऽएतऽऋतवः । देवाः पितरः स यो हैवं विद्वान्देवाः पितर इति ह्वयत्या हास्य देवा देवहूयं गच्छन्त्या पितरः पितृहूयमवन्ति हैनं देवा देवहूयेऽवन्ति पितरः पितृहूये य एवं विद्वान्देवाः पितर इति ह्वयति ॥२॥ स यत्रोदगावर्तते । देवेषु तर्हि भवति देवांस्तर्ह्यभिगोपायत्यथ यत्र दक्षिणावर्तते पितृषु तर्हि भवति पितॄंस्तर्ह्यभिगोपायति ॥३॥ स यत्रोदगावर्तते । तर्ह्यग्नीऽआदधीतापहतपाप्मानो देवा अप पाप्मानꣳ हतेऽमृता देवा नामृतत्वस्याशास्ति सर्वमायुरेति यस्तर्ह्याधत्तेऽथ यत्र दक्षिणावर्तते यस्तर्ह्याधत्तेऽनपहतपाप्मानः पितरो न पाप्मानमपहते मर्त्याः पितरः पुरा हायुषो म्रियते यस्तर्ह्याधत्ते ॥४॥ ब्रह्मैव वसन्तः । क्षत्रं ग्रीष्मो विडेव वर्षास्तस्माद्ब्राह्मणो वसन्तऽआदधीत ब्रह्म हि वसन्तस्तस्मात्क्षत्रियो ग्रीष्मऽआदधीत क्षत्रꣳ हि ग्रीष्मस्तस्माद्वैश्यो वर्षास्वादधीत विड्ढि वर्षाः ॥५॥ स यः कामयेत । ब्रह्मवर्चसी स्यामिति वसन्ते स आदधीत ब्रह्म वै वसन्तो ब्रह्मवर्चसी हैव भवति ॥६॥ अथ यः कामयेत । क्षत्रꣳ श्रिया यशसा स्यामिति ग्रीष्मे स आदधीत क्षत्रं वै ग्रीष्मः क्षत्रꣳ हैव श्रिया यशसा भवति ॥७॥ अथ यः कामयेत । बहुः प्रजया पशुभिः स्यामिति वर्षासु स आदधीत विड्वै वर्षा अन्नं विशो बहुर्हैव प्रजया पशुभिर्भवति य एवं विद्वान्वर्षास्वाधत्ते ॥८॥ ते वाऽएतऽऋतवः । उभयऽएवापहतपाप्मानः सूर्य एवैषां पाप्मनोऽपहन्ताग्निरेवैषामुभयेषां पाप्मानमपहन्ति तस्माद्यदैवैनं कदा च यज्ञ उपनमेदथाग्नीऽआदधीत न श्वःश्वमुपासीत को हि मनुष्यस्य श्वो वेद ॥९॥ ब्राह्मणम् ॥३॥

यदहरस्य श्वोऽग्न्याधेयꣳ स्यात् । दिवैवाश्नीयान्मनो ह वै देवा मनुष्यस्याजानन्ति तेऽस्यैतच्छ्वोऽग्न्याधेयं विदुस्तेऽस्य विश्वे देवा गृहानागच्छन्ति तेऽस्य गृहे-

षूपवसन्ति स उपवसथः ॥१॥ तन्न्वेवानवक्लृप्तं यो मनुष्येष्वनश्नत्सु पूर्वो ऽश्नीयादथ
किमु यो देवेष्वनश्नत्सु पूर्वो ऽश्नीयात्तस्मादु दिवैवाश्नीयात्तद्वपि काममेव नक्तमश्नी-
यान्नो ह्यनाहिताग्नेर्व्रतचर्यास्ति मानुषो ह्येवैष तावद्भवति यावदनाहिताग्निस्त-
स्माद्वपि काममेव नक्तमश्नीयात् ॥२॥ तद्धैके ऽजमुपबध्नन्ति । आग्नेयो ऽजो ऽग्नेरेव
सर्वत्वायेति वदन्तस्तदु तथा न कुर्याद्यद्यस्याजः स्यादग्नीध ऽएवैनं प्रातर्दद्यात्तेनैव
तं काममाप्नोति तस्मादु तन्नाद्रियेत ॥३॥ अथ चातुष्प्राश्यमोदनं पचन्ति । छ-
न्दांस्यनेन प्रीणीम इति यथा येन वाहनेन स्यन्त्स्यन्त्स्यात्तत्सुहितं कर्तवै ब्रूया-
देवमेतदिति वदन्तस्तदु तथा न कुर्याद्यदा ऽअस्य ब्राह्मणाः कुले वसन्त्यृत्विजश्चा-
नृत्विजश्च तेनैव तं काममाप्नोति तस्मादु तन्नाद्रियेत ॥४॥ तस्य सर्पिरासेचनं कृ-
त्वा । सर्पिरासिच्याश्वत्थीस्तिस्रः समिधो घृतेनान्वज्य समिद्वतीभिर्घृतवतीभिर्ऋग्भि-
रभ्यादधति शमीगर्भमेतदाप्नुम इति वदन्तः स यः पुरस्तात्संवत्सरमभ्यादध्यात्स ह
तं काममाप्नुयात्तस्मादु तन्नाद्रियेत ॥५॥ तदु होवाच भाल्लवेयः । यथा वा ऽअन्य-
त्करिष्यन्त्सो ऽन्यत्कुर्याद्यथान्यद्वदिष्यन्त्सो ऽन्यद्वदेद्यथान्येन पथैष्यन्त्सो ऽन्येन प्रति-
पद्येतैवं तद्य एतं चातुष्प्राश्यमोदनं पचेदपराद्धिरेव सेति न हि तदवकल्पते य-
स्मिन्नग्नावृचा वा साम्ना वा यजुषा वा समिधं वाभ्यादध्यादाहुतिं वा जुहुयाद्यत्तं
दक्षिणा वा हरेयुरनु वा गमयेयुर्दक्षिणा वा ह्येनं हरन्त्यन्वाहार्यपचनो भवि-
ष्यतीत्यनु वा गमयन्ति ॥६॥ अथ जाग्रति जाग्रति देवाः । तद्देवानेवैतदुपावर्त-
ते स सदेवतरः शान्ततरस्तपस्वितरो ऽग्नी ऽआधत्ते तद्वपि काममेव स्वप्यान्नो ह्य-
नाहिताग्नेर्व्रतचर्यास्ति मानुषो ह्येवैष तावद्भवति यावदनाहिताग्निस्तस्माद्वपि का-
ममेव स्वप्यात् ॥७॥ तद्धैके ऽनुदिते मथित्वा । तमुदिते प्राञ्चमुद्धरन्ति तदु नेदुभे
ऽअहोरात्रे परिगृह्णीमः प्राणोदानयोर्मनसश्च वाचश्च पर्याप्त्या ऽइति वदन्तस्तदु त-
था न कुर्यादुभौ हैवास्य तथानुदित ऽआहितौ भवतो ऽनुदिते हि मथित्वा तमु-

दिते प्राञ्चमुद्धरन्ति स य उदितऽआहवनीयं मन्थेत्स ह तत्पर्याप्नुयात् ॥८॥ अ-
हवै देवाः । अनपहतपाप्मानः पितरो न पाप्मानमपहते मर्त्याः पितरः पुरा
ह्यायुषो म्रियते योऽनुदिते मन्थत्यपहतपाप्मानो देवा अप पाप्मानꣳ हतेऽमृता
देवा नामृतत्वस्याशास्ति सर्वमायुरेति श्रीर्देवाः श्रियं गच्छति यशो देवा यशो ह
भवति य एवं विद्वानुदिते मन्थति ॥९॥ तदाहुः । यन्नऽर्चा न साम्ना न यजुषा-
ग्निराधीयतेऽथ केनाधीयतऽइति ब्रह्मणो हैवैष ब्रह्मणाधीयते वाग्वै ब्रह्म तस्यै
वाचः सत्यमेव ब्रह्म ता वाऽएताः सत्यमेव व्याहृतयो भवन्ति तदस्य सत्येनै-
वाधीयते ॥१०॥ भूरिति वै प्रजापतिः । इमामजनयत भुव इत्यन्तरिक्षꣳ स्वरिति
दिवमेतावद्वाऽइदꣳ सर्वं यावदिमे लोकाः सर्वेणैवाधीयते ॥११॥ भूरिति वै प्र-
जापतिः । ब्रह्माजनयत भुव इति क्षत्रꣳ स्वरिति विशमेतावद्वाऽइदꣳ सर्वं याव-
द्ब्रह्म क्षत्रं विट् सर्वेणैवाधीयते ॥१२॥ भूरिति वै प्रजापतिः । आत्मानमजनयत
भुव इति प्रजाꣳ स्वरिति पशूनेतावद्वाऽइदꣳ सर्वं यावदात्मा प्रजा पशवः सर्वे-
णैवाधीयते ॥१३॥ स वै भूर्भुव इति । एतावतैव गार्हपत्यमादधात्यथ यत्सर्वै-
रादध्यात्केनाहवनीयमादध्याद्द्वेऽअक्षरे परिशिनष्टि तेनोऽएतान्ययातयामानि भ-
वन्ति तैः सर्वैः पञ्चभिराहवनीयमादधाति भूर्भुवः स्वरिति तान्यष्टावक्षराणि स-
म्पद्यन्तेऽष्टाक्षरा वै गायत्री गायत्रमग्नेश्छन्दः स्वेनैवैनमेतच्छन्दसाधत्ते ॥१४॥ दे-
वान्ह वाऽअग्नीऽआधास्यमानान् । तानसुररक्षसानि ररक्षुर्नाग्निर्जनिष्यते नाग्नी
आधास्यध्वऽइति तद्यद्रक्षंस्तस्माद्रक्षाꣳसि ॥१५॥ ततो देवा एतं वज्रं ददृशुः ।
यदश्वं तं पुरस्तादुदश्रयंस्तस्याभयेऽनाष्ट्रे निवातेऽग्निरजायत तस्माद्यत्राग्निं मन्थि-
ष्यन्त्स्यात्तदश्वमानेतवै ब्रूयात्स पूर्वेणोपतिष्ठते वज्रमेवैतदुच्छ्रयति तस्याभयेऽनाष्ट्रे
निवातेऽग्निर्जायते ॥१६॥ स वै पूर्ववाट् स्यात् । स ह्यपरिमितं वीर्यमभिवर्धते
यदि पूर्ववाहं न विन्देदपि य एव कश्चाश्वः स्याद्यद्यश्वं न विन्देदप्यनड्वानेव

स्यादेष ह्येवानडुहो बन्धुः ॥१७॥ तं यत्र प्राञ्चꣳ हरन्ति । तत्पुरस्तादश्वं नयन्ति तत्पुरस्ताद्वैतन्नाष्ट्रा रक्षाꣳस्यपघ्नन्नेत्यथाभयेनानाष्ट्रेण हरन्ति ॥१८॥ तं वै तथैव हरेयुः । यथैनमेष प्रत्यङ्ङुपाचरेदेष वै यज्ञो यदग्निः प्रत्यङ् हैवैनं यज्ञः प्रविशति तं क्षिप्रे यज्ञ उपनमत्यथ यस्मात्पराङ् भवति पराङ् हैवास्माद्यज्ञो भवति स यो हैनं तत्रानुव्याहरेत्पराङस्माद्यज्ञोऽभूदितीश्वरो ह यत्तथैव स्यात् ॥१९॥ एष उ वै प्राणः । तं वै तथैव हरेयुर्यथैनमेष प्रत्यङ्ङुपाचरेत्प्रत्यङ् हैवैनं प्राणः प्रविशत्यथ यस्मात्पराङ् भवति पराङ् हैवास्मात्प्राणो भवति स यो हैनं तत्रानुव्याहरेत्पराङस्मात्प्राणोऽभूदितीश्वरो ह यत्तथैव स्यात् ॥२०॥ ॥ शतम् १०० ॥

॥ अयं वै यज्ञो योऽयं पवते । तं वै तथैव हरेयुर्यथैनमेष प्रत्यङ्ङुपाचरेत्प्रत्यङ् हैवैनं यज्ञः प्रविशति तं क्षिप्रे यज्ञ उपनमत्यथ यस्मात्पराङ् भवति पराङ् हैवास्माद्यज्ञो भवति स यो हैनं तत्रानुव्याहरेत्पराङस्माद्यज्ञोऽभूदितीश्वरो ह यत्तथैव स्यात् ॥२१॥ एष उ वै प्राणः । तं वै तथैव हरेयुर्यथैनमेष प्रत्यङ्ङुपाचरेत्प्रत्यङ् हैवैनं प्राणः प्रविशत्यथ यस्मात्पराङ् भवति पराङ् हैवास्मात्प्राणो भवति स यो हैनं तत्रानुव्याहरेत्पराङस्मात्प्राणोऽभूदितीश्वरो ह यत्तथैव स्यात्तस्मादु तथैव हरेयुः ॥२२॥ अथाश्वमाक्रमयति । तमाक्रमय्य प्राञ्चमुन्नयति तं पुनरावर्तयति तमुदञ्चं प्रमुञ्चति वीर्यं वाऽअश्वो नेदस्मादिदं पराग्वीर्यमसदिति तस्मात्पुनरावर्तयति ॥२३॥ तमश्वस्य पदऽआधत्ते । वीर्यं वाऽअश्वो वीर्यऽएवैनमेतदाधत्ते तस्मादश्वस्य पदऽआधत्ते ॥२४॥ स वै तूष्णीमिवाग्रऽउपस्पृशति । अथोद्यच्छत्यथोपस्पृशति भूर्भुवः स्वरित्येव तृतीयेनादधाति त्रयो वाऽइमे लोकास्तदिमानेवैतल्लोकानाप्नोत्येतन्न्वेकम् ॥२५॥ अथेदं द्वितीयं । तूष्णीमिवाग्रऽउपस्पृशत्यथोद्यच्छति भूर्भुवः स्वरित्येव द्वितीयेनादधाति यो वाऽअस्यामप्रतिष्ठितो भारमुद्यच्छति नैनꣳ शक्नोत्युद्यन्तुꣳ सꣳ हैनꣳ शृणाति ॥२६॥ स यत्तूष्णीमुपस्पृशति ।

तदस्यां प्रतिष्ठायां प्रतितिष्ठन्ति सोऽस्यां प्रतिष्ठित आधत्ते तथा न व्यथते तदु हैतत्पञ्चैव दध्रिरऽआसुरिः पाञ्चिर्माधुकिः सर्वं वाऽअन्यदियसितमिव प्रथमेनैवोद्यत्याद्ध्याद्भूर्भुवः स्वरिति तदेवानियसितमित्यतो यतमथा कामयेत तथा कुर्यात् ॥२७॥ अथ पुरस्तात्परीत्य । पूर्वार्धमुल्मुकानामभिपद्य जपति द्यौरिव भूम्ना पृथिवीव वरिम्णेति यथासौ द्यौर्बह्वी नक्षत्रैरेवं बहुर्भूयासमित्येवैतदाह यदाह द्यौरिव भूम्नेति पृथिवीव वरिम्णेति यथेयं पृथिव्युर्व्येवमुरुर्भूयासमित्येवैतदाह तस्यास्ते पृथिवि देवयजनि पृष्ठऽइत्यस्यै ह्येनं पृष्ठऽआधत्तेऽग्निमन्नादमन्नाद्यायादधऽइत्यन्नादोऽग्निरन्नादो भूयासमित्येवैतदाह सैषाशीरेव स यदि कामयेत जपेदेतद्यद्यु कामयेतापि नाद्रियेत ॥२८॥ अथ सर्पराज्ञ्या ऋग्भिरुपतिष्ठते । आयं गौः पृश्निरक्रमीदसदन्मातरं पुरः । पितरं च प्रयन्त्स्वः ॥ अन्तश्चरति रोचनास्य प्राणादपानती । व्यख्यन्महिषो दिवम् ॥ त्रिꣳशद्धाम विराजति वाक्पतङ्गाय धीयते । प्रति वस्तोरह द्युभिरिति तद्यदेवास्यात्र सम्भारैर्वा नक्षत्रैर्वऽर्तुभिर्वाधानेन वानाप्तं भवति तदेवास्यैतेन सर्वमाप्तं भवति तस्मात्सर्पराज्ञ्या ऋग्भिरुपतिष्ठते ॥२९॥ तदाहुः । न सर्पराज्ञ्या ऋग्भिरुपतिष्ठेतेतीयं वै पृथिवी सर्पराज्ञी स यदेवास्यामाधत्ते तत्सर्वान्कामानाप्नोति तस्मान्न सर्पराज्ञ्या ऋग्भिरुपतिष्ठेतेति ॥३०॥ ब्राह्मणम् ॥४॥ अध्यायः ॥१[१०.]॥ ॥

उद्धृत्याहवनीयं पूर्णाहुतिं जुहोति । तद्यत्पूर्णाहुतिं जुहोत्यन्नादं वाऽएतमात्मनो जनयते यदग्निं तस्माऽएतदन्नाद्यमपिदधाति यथा कुमाराय वा जाताय वत्साय वा स्तनमपिदध्यादेवमस्माऽएतदन्नाद्यमपिदधाति ॥१॥ स एतेनान्नेन शान्तः । उत्तराणि हवीꣳषि श्रप्यमाणान्युपरमति शश्वद्ध वाऽअध्वर्युं वा यजमानं वा प्रदहेत्तौ ह्यस्य नेदिष्ठं चरतो यदस्मिन्नेतामाहुतिं न जुहुयात्तस्माद्वाऽएतामाहुतिं जुहोति ॥२॥ तां वै पूर्णां जुहोति । सर्वं वै पूर्णꣳ सर्वेणैवैनमेतच्छमयति

स्वाहाकारेण जुहोत्यनिरुक्तो वै स्वाहाकारः सर्वं वा ऽ अनिरुक्तᳪ सर्वेणैवैनमे-
तच्छमयति ॥३॥ यां वै प्रजापतिः । प्रथमामाहुतिमजुहोत्स्वाहेति वै तामजुहो-
त्सो स्विदेषा निदानेन तस्मात्स्वाहेति जुहोति तस्यां वरं ददाति सर्वं वै वरः
सर्वेणैवैनमेतच्छमयति ॥४॥ तदाहुः । एतामेवाहुतिᳪ हुत्वाथोत्तराणि हवीᳪषि
नाद्रियेतैतयैव तं काममाप्नोति यमभिकाममुत्तराणि हवीᳪषि निर्वपतीति ॥५॥
स वा ऽ अग्नये पवमानाय निर्वपति । प्राणो वै पवमानः प्राणमेवास्मिन्नेतद्दधाति
तद्वेतयैवास्मिंस्तद्दधात्यन्नᳪ हि प्राणो ऽन्नमेषाहुतिः ॥६॥ अथाग्नये पावकाय नि-
र्वपति । अन्नं वै पावकमन्नमेवास्मिन्नेतद्दधाति तद्वेतयैवास्मिंस्तद्दधात्येषा ह्येव
प्रत्यक्षमन्नमाहुतिः ॥७॥ अथाग्नये शुचये निर्वपति । वीर्यं वै शुचि यद्वा ऽ अस्यैत-
दुज्ज्वलत्येतदस्य वीर्यᳪ शुचि वीर्यमेवास्मिन्नेतद्दधाति तद्वेतयैवास्मिंस्तद्दधाति य-
दा ह्येवास्मिन्नेनामाहुतिं जुहोत्यथास्यैतद्वीर्यᳪ शुच्युज्ज्वलति ॥८॥ तस्मादाहुः ।
एतामेवाहुतिᳪ हुत्वाथोत्तराणि हवीᳪषि नाद्रियेतैतयैव तं काममाप्नोति यमभि-
काममुत्तराणि हवीᳪषि निर्वपतीति तद्व निर्वपेदेवोत्तराणि हवीᳪषि परो ऽक्ष-
मिव वा ऽ एतद्यददस्तदिदमितीव ॥९॥ स यदग्नये पवमानाय निर्वपति । प्राणो
वै पवमानो यदा वै जायते ऽथ प्राणो ऽथ यावन्न जायते मातुर्हैव तावत्प्राणमनु
प्राणिति यथा वा तज्जात ऽ एवास्मिन्नेतत्प्राणं दधाति ॥१०॥ अथ यदग्नये पाव-
काय निर्वपति । अन्नं वै पावकं तज्जात ऽ एवास्मिन्नेतदन्नं दधाति ॥११॥ अथ य-
दग्नये शुचये निर्वपति । वीर्यं वै शुचि यदा वा ऽ अन्नेन वर्धते ऽथ वीर्यं तदन्नेनै-
वैनमेतद्वर्धयित्वाथास्मिन्नेतद्वीर्यᳪ शुचि दधाति तस्मादग्नये शुचये ॥१२॥ तद्वैतदेव
सद्विपर्यस्तमिव । अग्निर्ह यत्र देवेभ्यो मनुष्यानभ्युपाववर्त तद्धेक्षां चक्रे मैव सर्वे-
णैवात्मना मनुष्यानभ्युपावृतमिति ॥१३॥ स एतास्तिस्रस्तनूरेषु लोकेषु विन्य-
धत्त । यदस्य पवमानᳪ रूपमासीत्तदस्यां पृथिव्यां न्यधत्ताथ यत्पावकं तदन्तरिक्षे

ऽथ यच्छुचि तद्दिवि तद्वाऽऋषयः प्रतिबुबुधिरे यऽउ तर्ह्यृषय आसुरसर्वेण वै न आत्मनाग्निरभ्युपावृतदिति तस्माऽएतानि हवीꣳषि निरवपन् ॥ १४ ॥ स यदग्नये पवमानाय निर्वपति । यदेवास्यास्यां पृथिव्याꣳ रूपं तदेवास्यैतेनाप्नोत्यथ यदग्नये पावकाय निर्वपति यदेवास्यान्तरिक्षे रूपं तदेवास्यैतेनाप्नोत्यथ यदग्नये शुचये निर्वपति यदेवास्य दिवि रूपं तदेवास्यैतेनाप्नोत्येवमु कृत्स्नमेवाग्निमनपनिहितमाधत्ते तस्मादु निर्वपेदेवोत्तराणि हवीꣳषि ॥ १५ ॥ केवलबर्हिः प्रथमꣳ हविर्भवति । समानबर्हिषीऽउत्तरेऽअयं वै लोकः प्रथमꣳ हविरथेदमन्तरिक्षं द्वितीयं द्यौरेव तृतीयं बहुलेव वाऽइयं पृथिवी लेलयेवान्तरिक्षं लेलयेवासौ द्यौरुभे चिदेनां प्रत्युद्यामिनी स्तामिति तस्मात्समानबर्हिषी ॥ १६ ॥ अष्टाकपालाः सर्वे पुरोडाशा भवन्ति । अष्टाक्षरा वै गायत्री गायत्रमग्नेश्छन्दः स्वेनैवैनमेतच्छन्दसाधत्ते तानि सर्वाणि चतुर्विꣳशतिः कपालानि सम्पद्यन्ते चतुर्विꣳशत्यक्षरा वै गायत्री गायत्रमग्नेश्छन्दः स्वेनैवैनमेतच्छन्दसाधत्ते ॥ १७ ॥ अथादित्यै चरुं निर्वपति । प्रच्यवतऽइव वाऽएषोऽस्माल्लोकाद्य एतानि हवीꣳषि निर्वपतीमान्हि लोकान्त्समारोहन्नेति ॥ १८ ॥ स यददित्यै चरुं निर्वपति । इयं वै पृथिव्यदितिः सेयं प्रतिष्ठा तदस्यामेवैतत्प्रतिष्ठायां प्रतितिष्ठति तस्माददित्यै चरुं निर्वपति ॥ १९ ॥ तस्यै विराजौ संयाज्ये स्यातामित्याहुः । विराड्ढीयमित्यथो त्रिष्टुभौ त्रिष्टुब्भीयमित्यथो जगत्यौ जगती हीयमिति विराजावित्येव स्याताम् ॥ २० ॥ तस्यै धेनुर्दक्षिणा । धेनुरिव वाऽइयं मनुष्येभ्यः सर्वान्कामान्दुहे माता धेनुर्मातेव वाऽइयं मनुष्यान्बिभर्ति तस्माद्धेनुर्दक्षिणैतन्न्वेकमयनम् ॥ २१ ॥ अथेदं द्वितीयम् । आग्नेयमेवाष्टाकपालं पुरोडाशं निर्वपति परोऽक्षमिव वाऽएतद्यदग्नये पवमानायाग्नये पावकायाग्नये शुचयऽइतीवाथाञ्जसैवैनमेतत्प्रत्यक्षमाधत्ते तस्मादग्नयेऽथादित्यै चरुं निर्वपति स य एव चरोर्बन्धुः स बन्धुः ॥ २२ ॥ ब्राह्मणम् ॥ ५ [२. १.] ॥ ॥

घ्नन्ति वा ऽएतद्यज्ञं । यदेनं तन्वते यन्न्वेव राजानमभिषुण्वन्ति तत्तं घ्नन्ति यत्पशुꣳ संज्ञपयन्ति विशासति तत्तं घ्नन्त्युलूखलमुसलाभ्यां दृषदुपलाभ्याꣳ हविर्यज्ञं घ्नन्ति ॥१॥ स एष यज्ञो हतो न ददक्षे । तं देवा दक्षिणाभिरदक्षयंस्तद्यदेनं दक्षिणाभिरदक्षयंस्तस्माद्दक्षिणा नाम तद्यदेवात्र यज्ञस्य हतस्य व्यथते तदेवास्यैतद्दक्षिणाभिर्दक्षयत्यथ समृद्ध एव यज्ञो भवति तस्माद्दक्षिणा ददाति ॥२॥ ता वै षड्दद्यात् । षड्वा ऽऋतवः संवत्सरस्य संवत्सरो यज्ञः प्रजापतिः स यावानेव यज्ञो यावत्यस्य मात्रा तावतीभिर्दक्षयति ॥३॥ द्वादश दद्यात् । द्वादश वै मासाः संवत्सरस्य संवत्सरो यज्ञः प्रजापतिः स यावानेव यज्ञो यावत्यस्य मात्रा तावतीभिर्दक्षयति ॥४॥ चतुर्विꣳशतिं दद्यात् । चतुर्विꣳशतिर्वै संवत्सरस्यार्धमासाः संवत्सरो यज्ञः प्रजापतिः स यावानेव यज्ञो यावत्यस्य मात्रा तावतीभिर्दक्षयत्येषा मात्रा दक्षिणानां दद्यात्त्वेव यथाश्रद्धं भूयसीस्तद्यद्दक्षिणा ददाति ॥५॥ द्वया वै देवा देवाः । अहैव देवा अथ ये ब्राह्मणाः शुश्रुवाꣳसो ऽनूचानास्ते मनुष्यदेवास्तेषां द्वेधा विभक्त एव यज्ञ आहुतय एव देवानां दक्षिणा मनुष्यदेवानां ब्राह्मणानाꣳ शुश्रुवुषामनूचानानामाहुतिभिरेव देवान्प्रीणाति दक्षिणाभिर्मनुष्यदेवान्ब्राह्मणाञ्छुश्रुवुषो ऽनूचानांस्त ऽएनमुभये देवाः प्रीताः सुधायां दधति ॥६॥ तद्यथा योनौ रेतो दध्यात् । एवमेवैतदृत्विजो यजमानं लोके दधति तद्यदेभ्य एतद्ददाति ये मेदꣳ सम्प्रापिपन्निति नु दक्षिणानाम् ॥७॥ देवाश्च वा ऽअसुराश्च । उभये प्राजापत्याः पस्पृधिरे त ऽउभय ऽएवानात्मान आसुर्मर्त्या ह्यासुरनात्मा हि मर्त्यस्तेषूभयेषु मर्त्येष्वग्निरेवामृत आस तꣳ ह स्मोभये ऽमृतमुपजीवन्ति स यꣳ ह स्मैषां घ्नन्ति तद्ध स्म वै स भवति ॥८॥ ततो देवाः । तनीयाꣳस इव परिशिशिषिरे ते ऽर्चन्तः श्राम्यन्तश्चेरुरुतासुरान्त्सपत्नान्मर्त्यानभिभवेमेति त ऽएतदमृतमग्न्याधेयं ददृशुः ॥९॥ ते होचुः । हन्तेदममृतमन्तरात्मन्नादधामहै त ऽइदममृतमन्तरात्मन्नाधा-

यामृता भूत्वास्तर्या भूत्वा स्तर्यान्त्सपत्नान्मर्त्यानभिभविष्याम इति ॥१०॥ ते हो-
चुः । उभयेषु वै नोऽयमग्निः प्र वेवासुरेभ्यो ब्रवामेति ॥११॥ ते होचुः । आ वै
वयमग्नी धास्यामहेऽथ यूयं किं करिष्यथेति ॥१२॥ ते होचुः । अथैनं वयं न्येव
धास्यामहेऽत्र तृणानि दहात्र दारूणि दहात्रौदनं पचात्र माꣳसं पचेति स यं त-
मसुरा न्यदधत तेनानेन मनुष्या भुञ्जते ॥१३॥ अथैनं देवाः । अन्तरात्मन्नादधत
तऽइमममृतमन्तरात्मन्नाधायामृता भूत्वास्तर्या भूत्वा स्तर्यान्त्सपत्नान्मर्त्यानभ्यभवंस्त-
थोऽएवैष एतदमृतमन्तरात्मन्नाधत्ते नामृतत्वस्याशास्ति सर्वमायुरेत्यस्तर्यो हैव भ-
वति न हैनꣳ सपत्नस्तुस्तूर्षमाणश्चन स्तृणुते तस्माद्यदाहिताग्निश्चानाहिताग्निश्च
स्पर्धेतेऽआहिताग्निरेवाभिभवत्यस्तर्यो हि खलु स तर्हि भवत्यमृतः ॥१४॥ त-
द्यत्रैनमदो मन्थन्ति । तज्जातमभिप्राणिति प्राणो वाऽअग्निर्जातमेवैनमेतत्सन्तं ज-
नयति स पुनरपानिति तदेनमन्तरात्मन्नाधत्ते सोऽस्यैषोऽन्तरात्मन्नग्निराहितो भ-
वति ॥१५॥ तमुद्दीप्य समिन्द्धे । इह यक्ष्यऽइह सुकृतं करिष्यामीत्येवैनमेतत्स-
मिन्द्धे योऽस्यैषोऽन्तरात्मन्नग्निराहितो भवति ॥१६॥ अन्तरेणागाद्यवृतदिति । न
ह वाऽअस्यैतं कश्चनान्तरेणैति यावज्जीवति योऽस्यैषोऽन्तरात्मन्नग्निराहितो भव-
ति तस्मादु तन्नाद्रियेत यदनुगच्छेन्न ह वाऽअस्यैषोऽनुगच्छति यावज्जीवति योऽस्यै-
षोऽन्तरात्मन्नग्निराहितो भवति ॥१७॥ ते वाऽएते प्राणा एव यदग्नयः । प्राणो-
दानावेवाहवनीयश्च गार्हपत्यश्च व्यानोऽन्वाहार्यपचनः ॥१८॥ तस्य वाऽएत-
स्याग्न्याधेयस्य । सत्यमेवोपचारः स यः सत्यं वदति यथाग्निꣳ समिद्धं तं घृतेना-
भिषिञ्चेदेवꣳ हैनꣳ स उद्दीपयति तस्य भूयो-भूय एव तेजो भवति श्वः-श्वः श्रे-
यान्भवत्यथ योऽनृतं वदति यथाग्निꣳ समिद्धं तमुदकेनाभिषिञ्चेदेवꣳ हैनꣳ स जा-
समयति तस्य कनीयः-कनीय एव तेजो भवति श्वः-श्वः पापीयान्भवति तस्मादु
सत्यमेव वदेत् ॥१९॥ तदु हाप्यरुणमौपवेशिं ज्ञातय ऊचुः । स्थविरो वाऽअ-

स्यग्नीऽआधत्स्वेति स होवाच ते मैतद्ब्रूथ वाचंयम एवैधि न वाऽआहिताग्निनानृतं वदितव्यं न वदन्जातु नानृतं वदेत्तावत्सत्यमेवोपचार इति ॥२०॥ ब्राह्मणम् ॥ ६ [२.२.] ॥ प्रथमः प्रपाठकः ॥ ॥ कण्डिकासंख्या ११४ ॥ ॥

वरुणो हैनद्राज्यकाम आदधे । स राज्यमगच्छत्तस्माद्यश्च वेद यश्च न वरुणो राजेत्येवाहुः सोमो यशस्कामः स यशोऽभवत्तस्माद्यश्च सोमे लभते यश्च नोभावेवागच्छतो यश एवैतद्द्रष्टुमागच्छन्ति यशो ह भवति राज्यं गच्छति य एवं विद्वानाधत्ते ॥१॥ अग्नौ ह वै देवाः । सर्वाणि रूपाणि निदधिरे यानि च ग्राम्याणि यानि चारण्यानि विजयं वोपप्रैष्यन्तः कामचारस्य वा कामायायं नो गोपिष्ठो गोपायदिति वा ॥२॥ तान्यु हाग्निर्निचक्रमे । तैः संगृह्यऽर्तून्प्रविवेश पुनरेम इति देवा एदग्निं तिरोभूतं तेषाꣳ हेयसेवास किमिह कर्तव्यं केह प्रज्ञेति वा ॥३॥ तत एतत्त्वष्टा पुनराधेयं ददर्श । तदादधे तेनाग्नेः प्रियं धामोपजगाम सोऽस्माऽउभयानि रूपाणि प्रतिनिःससर्ज यानि च ग्राम्याणि यानि चारण्यानि तस्मादाहुस्त्वाष्ट्राणि वै रूपाणीति त्वष्टुर्ह्येव सर्वꣳ रूपमुप ह त्वेवान्याः प्रजा यावत्सो-यावत्स इव तिष्ठन्ते ॥४॥ तस्मै कं पुनराधेयमादधीत । एवꣳ हैवाग्नेः प्रियं धामोपगच्छति सोऽस्माऽउभयानि रूपाणि प्रतिनिःसृजति यानि च ग्राम्याणि यानि चारण्यानि तस्मिन्नेतान्युभयानि रूपाणि दृश्यन्ते परमता वै सा स्पृहयन्त्यु हास्मै तथा पुष्यति लोक्यमेवापि ॥५॥ आग्नेयोऽयं यज्ञः । ज्योतिरग्निः पाप्मनो दग्धा सोऽस्य पाप्मानं दहति स इह ज्योतिरिव श्रिया यशसा भवति ज्योतिरमुत्र पुण्यलोकत्वेतन्नु तद्यस्मादादधीत ॥६॥ स वै वर्षास्वादधीत । वर्षा वै सर्वऽऋतवो वर्षा हि वै सर्वऽऋतवोऽथादो वर्षमकुर्मादो वर्षमकुर्मेति संवत्सरान्त्संपश्यन्ति वर्षा ह त्वेव सर्वेषामृतूनाꣳ रूपमुत हि तद्वर्षासु भवति यदाहुर्ग्रीष्मऽइव वाऽअद्येत्युतो तद्वर्षासु भवति यदाहुः शिशिरऽइव वाऽअद्येति वर्षादिद्वर्षाः ॥७॥

अथैतदेव परोऽक्षꣳ रूपं । यदेव पुरस्ताद्धाति तद्वसन्तस्य रूपं यत्स्तनयति तद्ग्री-
ष्मस्य यद्वर्षति तद्वर्षाणां यद्विद्योतते तच्छरदो यद्वृष्ट्वोद्गृह्णाति तद्धेमन्तस्य वर्षाः सर्व
ऽऋतव ऋतून्प्राविशदृतुभ्य एवैनमेतन्निर्मिमीते ॥८॥ आदित्यस्त्वेव सर्वऽऋतवः ।
यदैवोदेत्यथ वसन्तो यदा संगवोऽथ ग्रीष्मो यदा मध्यन्दिनोऽथ वर्षा यदापराह्णो
ऽथ शरद्यदैवास्तमेत्यथ हेमन्तस्तस्मादु मध्यन्दिनऽएवादधीत तर्हि ह्येषोऽस्य
लोकस्य नेदिष्ठं भवति तन्नेदिष्ठादेवैनमेतन्मध्यान्निर्मिमीते ॥९॥ छायेव वाऽअ-
यं पुरुषः । पाप्मनानुषक्तः सोऽस्यात्र कनिष्ठो भवत्यधस्पदमिवेयस्यते तत्कनिष्ठ-
मेवैतत्पाप्मानमवबाधते तस्मादु मध्यन्दिनऽएवादधीत ॥१०॥ तं वै दर्भैरुद्धरति ।
दारुभिर्वै पूर्वमुद्धरति दारुभिः पूर्वं दारुभिरपरं जामि कुर्यात्समदं कुर्यादापो दर्भा
आपो वर्षा ऋतून्प्राविशदद्भिरेवैनमेतदद्भ्यो निर्मिमीते तस्माद्दर्भैरुद्धरति ॥११॥
अर्कपलाशाभ्यां । व्रीहिमयमपूपं कृत्वा यत्र गार्हपत्यमाधास्यन्भवति तन्निदधाति
तद्गार्हपत्यमादधाति ॥१२॥ अर्कपलाशाभ्यां । यवमयमपूपं कृत्वा यत्राहवनीयमा-
धास्यन्भवति तन्निदधाति तदाहवनीयमादधाति पूर्वाभ्यामेवैनावेतदग्निभ्यामन्तर्दध्म
इति वदन्तस्तदु तथा न कुर्याद्रात्रिभिर्ह्येवान्तर्हितौ भवतः ॥१३॥ आग्नेयमेव प-
ञ्चकपालं पुरोडाशं निर्वपति । तस्य पञ्चपदाः पङ्क्त्यो याज्यानुवाक्या भवन्ति पञ्च
वाऽऋतव ऋतून्प्राविशदृतुभ्य एवैनमेतन्निर्मिमीते ॥१४॥ सर्व आग्नेयो भवति ।
एवꣳ हि त्वष्टाग्नेः प्रियं धामोपागच्छत्तस्मात्सर्व आग्नेयो भवति ॥१५॥ तेनोपाꣳशु
चरन्ति । यद्वै ज्ञातये वा सख्ये वा निष्केवल्यं चिकीर्षति तिर इवैतेन बोभवद्वै-
श्वदेवोऽन्यो यज्ञोऽथैष निष्केवल्य आग्नेयो यद्वै तिर इव तदुपाꣳशु तस्मादुपाꣳशु
चरन्ति ॥१६॥ उच्चैरुत्तममनुयाजं यजति । कृतकर्मेव हि स तर्हि भवति सर्वो
हि कृतमनुबुध्यते ॥१७॥ स आश्राव्याह । समिधो यजेति तदाग्नेयꣳ रूपं परोऽक्षं
त्वग्नीन्यजेति त्वेव ब्रूयात्तदेव प्रत्यक्षमाग्नेयꣳ रूपꣳ ॥१८॥ स यजति । अग्नऽआज्य-

स्य व्यन्तु वौ३षगग्निमाज्यस्य वेतु वौ३षगग्निराज्यस्य व्यन्तु वौ३षगग्निराज्यस्य वेतु वौ३षगिति ॥१९॥ अथ स्वाहाग्निमित्याह । आग्नेयमाज्यभागꣳ स्वाहाग्निं पवमानमिति यदि पवमानाय ध्रियेरन्त्स्वाहाग्निमिन्दुमन्तमिति यद्यग्नयऽइन्दुमते ध्रियेरन्त्स्वाहाग्निꣳ स्वाहाग्नीनाज्यपान्जुषाणोऽअग्निराज्यस्य वेत्विति यजति ॥२०॥ अथाहाग्नयेऽनुब्रूहीति । आग्नेयमाज्यभागꣳ सोऽन्वाहाग्निꣳ स्तोमेन बोधय समिधानोऽअमर्त्यम् । हव्या देवेषु नो दधदिति स्वपितीव खलु वाऽएतद्यदुद्वासितो भवति सम्प्रबोधयत्येवैनमेतत्समुदीर्ययति जुषाणोऽअग्निराज्यस्य वेत्विति यजति ॥२१॥ अथ यद्यग्नये पवमानाय ध्रियेरन् । अग्नये पवमानायानुब्रूहीति ब्रूयात्सोऽन्वाहाग्नऽआयूꣳषि पवसऽआसुवोर्जमिषं च नः । आरे बाधस्व दुच्छुनामिति तथाहाग्नेयो भवति सोमो वै पवमानस्तदु सौम्यादाज्यभागान्नयन्ति जुषाणोऽअग्निः पवमान आज्यस्य वेत्विति यजति ॥२२॥ अथ यद्यग्नयऽइन्दुमते ध्रियेरन् । अग्नयऽइन्दुमतेऽनुब्रूहीति ब्रूयात्सोऽन्वाहेह्यू षु ब्रवाणि तेऽग्नऽइत्थेतरा गिरः । एभिर्वर्धासऽइन्दुभिरिति तथा हाग्नेयो भवति सोमो वाऽइन्दुस्तदु सौम्यादाज्यभागान्नयन्ति जुषाणोऽअग्निरिन्दुमानाज्यस्य वेत्विति यजत्येवमु सर्वमाग्नेयं करोति ॥२३॥ अथाहाग्नयेऽनुब्रूहीति हविषः । अग्निं यजाग्नये स्विष्टकृतेऽनुब्रूह्यग्निꣳ स्विष्टकृतं यजेत्यथ यद्देवान्यजेत्यग्नीन्यजेत्येवैतदाह ॥२४॥ स यजति । अग्नेर्वसुवने वसुधेयस्य वेतु वौ३षगग्नाऽउ वसुवने वसुधेयस्य वेतु वौ३षड्देवोऽअग्निः स्विष्टकृदिति स्वयमाग्नेयस्तृतीय एवम्वाग्नेयाननुयाजान्करोति ॥२५॥ ता वाऽएताः । षड्भिर्व्याहृतीर्यजति चतस्रः प्रयाजेषु द्वेऽअनुयाजेषु षड्वाऽऋतव ऋतून्प्राविशदृतुभ्य एवैनमेतन्निर्मिमीते ॥२६॥ द्वादश वा त्रयोदश वाहुतयो भवन्ति । द्वादश वा वै त्रयोदश वा संवत्सरस्य मासाः संवत्सरमृतून्प्राविशदृतुभ्य एवैनमेतत्संवत्सरान्निर्मिमीते न द्वे चन सहाजामितायै जामि ह कुर्याद्यद्द्वे चित्सह स्यातां व्यन्तु वे-

विन्येव प्रयाजानाꣳ रूपं वसुवने वसुधेयस्येत्यनुयाजानाम् ॥२७॥ तस्य हिरण्यं दक्षिणा । आग्नेयो वाऽएष यज्ञो भवत्यग्ने रेतो हिरण्यं तस्माद्धिरण्यं दक्षिणानड्वान्वा स हि वहेनाग्नेयोऽग्निदग्धमिव ह्यस्य वहं भवति देवानाꣳ हव्यवाहनो ऽग्निरिति वहति वाऽएष मनुष्येभ्यस्तस्मादनड्वान्दक्षिणा ॥२८॥ ब्राह्मणम् ॥१ [२.३.] ॥ ॥

प्रजापतिर्ह वाऽइदमग्रऽएक एवास । स ऐक्षत कथं नु प्रजायेयेति सोऽश्राम्यत्स तपोऽतप्यत सोऽग्निमेव मुखाज्जनयां चक्रे तद्यदेनं मुखादजनयत तस्मादन्नादोऽग्निः स यो हैवमेतमग्निमन्नादं वेदान्नादो हैव भवति ॥१॥ तद्वाऽएनमेतदग्रे देवानामजनयत । तस्मादग्निरग्रिर्ह वै नामैतद्यदग्निरिति स जातः पूर्वः प्रेयाय यो वै पूर्व एत्यग्रऽएतीति वै तमाहुः सोऽएवास्याग्रिता ॥२॥ स ऐक्षत प्रजापतिः । अन्नादं वाऽइममात्मनोऽजीजने यदग्निं न वाऽइह मदन्यदन्नमस्ति यं वाऽअयं नाद्यादिति कल्वालीकृता हैव तर्हि पृथिव्यास नौषधय आसुर्न वनस्पतयस्तदेवास्य मनस्यास ॥३॥ अथैनमग्निर्व्यात्तेनोपपर्यावर्त । तस्य भीतस्य स्वो महिमापचक्राम वाग्वाऽअस्य स्वो महिमा वागस्यापचक्राम स आत्मन्नेवाहुतिमीषे स उदमृष्ट तद्यदुदमृष्ट तस्मादिदं चालोमकमिदं च तत्र विवेद घृताहुतिं वैव पयआहुतिं वोभयꣳ ह त्वेव तत्पय एव ॥४॥ सा हैनं नाभिराधयां चकार । केशमिश्रेव हास तां व्यौक्षदोष धयेति तत ओषधयः समभवंस्तस्मादोषधयो नाम स द्वितीयमुदमृष्ट तत्रापरामाहुतिं विविद घृताहुतिं वैव पयआहुतिं वोभयꣳ ह त्वेव तत्पय एव ॥५॥ सा हैनमभिराधयां चकार । स व्यचिकित्सज्जुहवानी३ मा हौषा३मिति तꣳ स्वो महिमाभ्युवाद जुहुधीति स प्रजापतिर्विदां चकार स्वो वै मा महिमाहेति स स्वाहेत्येवाजुहोत्तस्मादु स्वाहेत्येव हूयते तत एष उदियाय य एष तपति ततोऽयं प्रबभूव योऽयं पवते तत एवाग्निः पराङ्

पर्यावववर्त ॥६॥ स हुत्वा प्रजापतिः । प्र चाजायतात्स्यतश्चाग्नेर्मृत्योरात्मानमत्रायत
स यो हैवं विद्वानग्निहोत्रं जुहोत्येताꣳ हैव प्रजातिं प्रजायते यां प्रजापतिः प्रा-
जायतैवमु हैवात्स्यतोऽग्नेर्मृत्योरात्मानं त्रायते ॥७॥ स यत्र म्रियते । यत्रैनमग्ना-
वभ्यादधति तदेषोऽग्नेरधिजायतेऽथास्य शरीरमेवाग्निर्दहति तद्यथा पितुर्वा मातुर्वा
जायेतैवमेषोऽग्नेरधिजायते शश्वद्ध वाऽएष न सम्भवति योऽग्निहोत्रं न जुहोति
तस्माद्वाऽअग्निहोत्रꣳ होतव्यम् ॥८॥ तद्वाऽएतत् । एव विचिकित्सायै जन्म य-
त्प्रजापतिर्व्यचिकित्सत्स विचिकित्सञ्छ्रेयस्यध्रियत यः प्र चाजायतात्स्यतश्चाग्नेर्मृ-
त्योरात्मानमत्रायत स यो हैवमेतद्विचिकित्सायै जन्म वेद यद्ध किं च विचिकि-
त्सति श्रेयसि हैव ध्रियते ॥९॥ स हुत्वा न्यमृष्ट । ततो विकङ्कतः समभवत्तस्मा-
देष यज्ञियो यज्ञपात्रीयो वृक्षस्तत एते देवानां वीरा अजायन्ताग्निर्योऽयं पवते
सूर्यः स यो हैवमेतान्देवानां वीरान्वेदाहास्य वीरो जायते ॥१०॥ तऽउ हैत
ऽऊचुः । वयं वै प्रजापतिं पितरमनु स्मो हन्त वयं तत्सृजामहै यदस्मानन्वसदि-
ति ते परिश्रित्य गायत्रेणापहिङ्कारेण तुष्टुविरे तद्यत्पर्यश्रयन्त्स समुद्रोऽथेयमेव
पृथिव्यास्तावः ॥११॥ ते स्तुत्वा प्राञ्च उच्चक्रमुः । पुनरेम इति देवा एताꣳ सम्भू-
ताꣳ सा हैनानुदीक्ष्य हिंचकार ते देवा विदां चक्रुरेष साम्नो हिंकार इत्यपहिं-
कारꣳ हैव पुरा ततः सामास स एष गवि साम्नो हिंकारस्तस्मादेषोपजीवनीयो-
पजीवनीयो ह वै भवति य एवमेतं गवि साम्नो हिंकारं वेद ॥१२॥ ते होचुः ।
भद्रं वाऽइदमजीजनामहि ये गामजीजनामहि यज्ञो ह्येवेयं नो ह्यृते गोर्यज्ञस्ता-
यतेऽन्नꣳ ह्येवेयं यद्धि किं चान्नं गौरेव तदिति ॥१३॥ तद्वाऽएतदेवैतासां नाम ।
एतद्यज्ञस्य तस्मादेतत्परिहरेत्साधु पुण्यमिति वदन्व्यो ह वाऽअस्यैता भवन्त्युपना-
मुक एनं यज्ञो भवति य एवं विद्वानेतत्परिहरति साधु पुण्यमिति ॥१४॥ तामु
हाग्निरभिदध्यौ । मिथुन्यनया स्यामिति ताꣳ सम्बभूव तस्याꣳ रेतः प्रासिञ्चत्तत्प-

योऽभवत्तस्मादेतदामायां गवि सत्याꣳ शृतमग्नेर्हि रेतस्तस्माद्यदि कृष्णायां यदि रोहिण्याꣳ शुक्लमेव भवत्यग्निसंकाशमग्नेर्हि रेतस्तस्मात्प्रथमदुग्धमुष्णं भवत्यग्नेर्हि रेतः ॥१५॥ ते होचुः । हन्तेदं जुहवामहाऽइति कस्मै न इदं प्रथमाय होष्यन्तीति मह्यमिति हैवाग्निरुवाच मह्यमिति योऽयं पवते मह्यमिति सूर्यस्ते न सम्पादयां चक्रुस्ते हासम्पाद्योचुः प्रजापतिमेव पितरं प्रत्ययाम स यस्मै न इदं प्रथमाय होतव्यं वक्ष्यति तस्मै न इदं प्रथमाय होष्यन्तीति ते प्रजापतिं पितरं प्रतीत्योचुः कस्मै न इदं प्रथमाय होष्यन्तीति ॥१६॥ स होवाच । अग्नयेऽग्निरनुष्वा स्वꣳ रेतः प्रजनयिष्यते तथा प्रजनिष्यध्वऽइत्यथ तुभ्यमिति सूर्यमथ यदेव हूयमानस्य व्यश्नुते तदेवैतस्य योऽयं पवतऽइति तदेभ्य इदमप्येतर्हि तथैव जुहृत्यग्नयऽएव सायꣳ सूर्याय प्रातरथ यदेव हूयमानस्य व्यश्नुते तदेवैतस्य योऽयं पवते ॥१७॥ ते हुत्वा देवाः । इमां प्रजातिं प्राजायन्त यैषामियं प्रजातिरिमां विजितिं व्यजयन्त येयमेषां विजितिरिममेव लोकमग्निरजयदन्तरिक्षं वायुर्दिवमेव सूर्यः स यो हैवं विद्वानग्निहोत्रं जुहोत्येताꣳ हैव प्रजातिं प्रजायते यामेतऽएतत्प्राजायन्तैतां विजितिं विजयते यामेतऽएतद्व्यजयन्तैतैरु हैव सलोको भवति य एवं विद्वानग्निहोत्रं जुहोति तस्माद्वाऽअग्निहोत्रꣳ होतव्यम् ॥१८॥ ब्राह्मणम् ॥२ [२.४.]॥ अध्यायः ॥२[११.]॥ ॥

सूर्यो ह वाऽअग्निहोत्रं । तद्यदेतस्या अग्रऽआहुतेरुदैत्तस्मात्सूर्योऽग्निहोत्रꣳ ॥१॥ स यत्सायमस्तमिते जुहोति । य इदं तस्मिन्निह सति जुहवानीत्यथ यत्प्रातरनुदिते जुहोति य इदं तस्मिन्निह सति जुहवानीति तस्माद्वै सूर्योऽग्निहोत्रमित्याहुः ॥२॥ ॥ शतम् १००० ॥ ॥ अथ यदस्तमेति । तदग्नावेव योनौ गर्भो भूत्वा प्रविशति तं गर्भं भवन्तमिमाः सर्वाः प्रजा अनु गर्भा भवन्तीलिता हि शेरे संजानाना अथ यद्रात्रिस्तिर एवैतत्करोति तिर इव हि गर्भाः ॥३॥ स यत्सा-

यमस्तमिते जुहोति । गर्भमेवैतत्सन्तमभिजुहोति गर्भं सन्तमभिकरोति स यद्गर्भं सन्तमभिजुहोति तस्मादिमे गर्भा अनश्नन्तो जीवन्ति ॥४॥ अथ यत्प्रातरनुदिते जुहोति । प्रजनयत्येवैनमेतत्सोऽयं तेजो भूत्वा विभ्राजमान उदेति शश्वद्ध वै नोदियाद्यदस्मिन्नेतामाहुतिं न जुहुयात्तस्माद्वाऽएतामाहुतिं जुहोति ॥५॥ स यथाहिस्त्वचो निर्मुच्येत । एवं रात्रेः पाप्मना निर्मुच्यते यथा ह वाऽअहिस्त्वचो निर्मुच्येतैवं सर्वस्मात्पाप्मनो निर्मुच्यते य एवं विद्वानग्निहोत्रं जुहोति तदेतस्यैवानु प्रजातिमिमाः सर्वाः प्रजा अनु प्रजायन्ते वि हि सृज्यन्ते यथार्थं ॥६॥ स यः पुरादित्यस्यास्तमयात् । आहवनीयमुद्धरत्येते वै विश्वे देवा रश्मयोऽथ यत्परं भाः प्रजापतिर्वा स इन्द्रो वैतद्ध ह वै विश्वे देवा अग्निहोत्रं जुह्वतो गृहानागच्छन्ति स यस्यानुद्धृतमागच्छन्ति तस्माद्देवा अपप्रयन्ति तद्वाऽअस्मै तद्व्यृध्यते यस्माद्देवा अपप्रयन्ति तस्यानु व्यृद्धिं यश्च वेद यश्च नानुद्धृतमभ्यस्तमगादित्याहुः ॥७॥ अथ यः पुरादित्यस्यास्तमयात् । आहवनीयमुद्धरति यथा श्रेयस्यागमिष्यत्यावसथेनोपक्लृप्तेनोपासीतैवं तत्स यस्योद्धृतमागच्छन्ति तस्याहवनीयं प्रविशन्ति तस्याहवनीये निविशन्ते ॥८॥ स यत्सायमस्तमिते जुहोति । अग्नावेवैभ्य एतत्प्रविष्टेभ्यो जुहोत्यथ यत्प्रातरनुदिते जुहोत्यप्रेतेभ्य एवैभ्य एतज्जुहोति तस्मादुदितहोमिनां विच्छिन्नमग्निहोत्रं मन्यामहऽइति ह स्माहासुरिर्यथा शून्यमावसथमाहरेदेवं तदिति ॥९॥ द्वयं वाऽइदं जीवनं । मूलि चैवामूलं च तदुभयं देवानां सन्मनुष्या उपजीवन्ति पशवो मूला ओषधयो मूलिन्यस्ते पशवो मूला ओषधीर्मूलिनीर्जग्ध्वापः पीत्वा तत एष रसः सम्भवति ॥१०॥ स यत्सायमस्तमिते जुहोति । अस्य रसस्य जीवनस्य देवेभ्यो जुहवानि यदेषामिदं सदुपजीवाम इति स यत्ततो रात्र्याश्नाति हुतोच्छिष्टमेव तन्निरवत्तबल्यश्नाति हुतोच्छिष्टस्य ह्येवाग्निहोत्रं जुह्वदशिता ॥११॥ अथ यत्प्रातरनुदिते जुहोति । अस्य रसस्य जीवनस्य देवेभ्यो

जुह्वानि यदेषामिदꣳ सदुपजीवाम इति स यत्ततोऽह्नाश्नाति हुतोच्छिष्टमेव तन्नि-
रवत्तबल्यश्नाति हुतोच्छिष्टस्य ह्येवाग्निहोत्रं जुह्वदशिता ॥ १२ ॥ तदाहुः । समे-
वान्ये यज्ञास्तिष्ठन्तेऽग्निहोत्रमेव न संतिष्ठतेऽपि द्वादशसंवत्सरमन्तवदेवाथैतदे-
वानन्तꣳ सायꣳ हि हुत्वा वेद प्रातर्होष्यामीति प्रातर्हुत्वा वेद पुनः सायꣳ हो-
ष्यामीति तदेतदनुपस्थितमग्निहोत्रं तस्यानुपस्थितिमन्वनुपस्थिता इमाः प्रजाः प्र-
जायन्तेऽनुपस्थितो ह वै श्रिया प्रजया प्रजायते य एवमेतदनुपस्थितमग्निहोत्रं वे-
द ॥ १३ ॥ तद्दुग्धाधिश्रयति । शृतमसदिति तदाहुर्यर्ह्युदन्तं तर्हि जुहुयादिति तद्वै
नोदन्तं कुर्यादुप ह दहेद्यदुदन्तं कुर्यादप्रजज्ञि वै रेत उपदग्धं तस्मान्नोदन्तं कुर्यात्
॥ १४ ॥ अधिश्रित्यैव जुहुयात् । यन्न्वैतदग्रे रेतस्तेन न्वेव शृतं यदेनदग्नावधिश्रय-
न्ति तेनोऽएव शृतं तस्मादधिश्रित्यैव जुहुयात् ॥ १५ ॥ तदवज्योतयति । शृतं वे-
दानीत्यथापः प्रत्यानयति शान्त्यै न्वेव रसस्यो चैव सर्वत्वायेदꣳ हि यदा वर्षत्य-
थौषधयो जायन्तऽओषधीर्जग्ध्वापः पीत्वा तत एष रसः सम्भवति तस्मादु रसस्यो
चैव सर्वत्वाय तस्माद्यद्येनं क्षीरं केवलं पानेऽभ्याभवेदुदस्तोकमाश्चोतयितवै ब्रू-
याच्छान्त्यै न्वेव रसस्यो चैव सर्वत्वाय ॥ १६ ॥ अथ चतुरुन्नयति । चतुर्धाविहितꣳ
ह्वीदं पयोऽथ समिधमादायोदाद्रवति समिद्धहोमायैव सोऽनुपसाद्य पूर्वामाहुतिं
जुहोति स यदुपसादयेद्यथा यस्माऽअशनमाहरिष्यन्त्स्यात्तदन्तरा निदध्यादेवं तदथ
यदनुपसाद्य यथा यस्माऽअशनमाहरेत्तस्माऽआहृत्यैवोपनिदध्यादेवं तदुपसाद्यो-
त्तरां नानावीर्येऽएवैनेऽएतत्करोति मनश्च ह वै वाक्चैतेऽआहुती तन्मनश्चैवैत-
द्वाचं च व्यावर्तयति तस्मादिदं मनश्च वाक्च समानमेव सन्नानेव ॥ १७ ॥ स वै
द्विरग्नौ जुहोति । द्विरुपमार्ष्टि द्विः प्राश्नाति चतुरुन्नयति तद्दश दशाक्षरा वै वि-
राड्विराड्वै यज्ञस्तद्विराजमेवैतद्यज्ञमभिसम्पादयति ॥ १८ ॥ स यदग्नौ जुहोति । तद्दे-
वेषु जुहोति तस्माद्देवाः सन्त्यथ यदुपमार्ष्टि तत्पितृषु चौषधीषु च जुहोति त-

स्मात्पितरश्चौषधयश्च सन्त्यथ यद्धुत्वा प्राश्नाति तन्मनुष्येषु जुहोति तस्मान्मनुष्याः सन्ति ॥१९॥ या वै प्रजा यज्ञेऽनन्वाभक्ताः । पराभूता वै ता एवमेवैतद्या इमाः प्रजा अपराभूतास्ता यज्ञमुखऽआभजति तेनो ह पशवोऽन्वाभक्ता यन्मनुष्याननु पशवः ॥२०॥ तदु होवाच याज्ञवल्क्यः । न वै यज्ञ इव मन्तवै पाकयज्ञ इव वाऽइतीदꣳ हि यदन्यस्मिन्यज्ञे स्रुच्यवद्यति सर्वं तदग्नौ जुहोत्यथैतदग्नौ हुत्वोत्सृप्याचामति निर्लेढि तदस्य पाकयज्ञस्येवेति तदस्य तत्पशव्यꣳ रूपं पशव्यो हि पाकयज्ञः ॥२१॥ सैषैकाहुतिरेवाग्रे । यामिवामूं प्रजापतिरजुहोदथ यदेतऽएतत्पश्चेवाधियन्ताग्निर्योऽयं पवते सूर्यस्तस्मादेषा द्वितीयाहुतिर्हूयते ॥२२॥ सा या पूर्वाहुतिः । साग्निहोत्रस्य देवता तस्मात्तस्यै जुहोत्यथ योत्तरा स्विष्टकृद्भाजनमेव सा तस्मात्तामुत्तरार्धे जुहोत्येषा हि दिक् स्विष्टकृतस्तन्मिथुनायैवैषा द्वितीयाहुतिर्हूयते द्वन्द्वꣳ हि मिथुनं प्रजननम् ॥२३॥ तद्द्वयमेवैतेऽआहुती । भूतं चैव भविष्यच्च जातं च जनिष्यमाणं चागतं चाशा चाद्य च श्वश्च तद्द्वयमेवानु ॥२४॥ आत्मैव भूतं । अद्धा हि तद्यद्भूतमद्धो तद्यदात्मा प्रजैव भविष्यदनद्धा हि तद्यद्भविष्यदनद्धो तद्यत्प्रजा ॥२५॥ आत्मैव जातम् । अद्धा हि तद्यज्जातमद्धो तद्यदात्मा प्रजैव जनिष्यमाणमनद्धा हि तद्यज्जनिष्यमाणमनद्धो तद्यत्प्रजा ॥२६॥ आत्मैवागतम् । अद्धा हि तद्यदागतमद्धो तद्यदात्मा प्रजैवाशानद्धा हि तद्यदाशानद्धो तद्यत्प्रजा ॥२७॥ आत्मैवाद्य । अद्धा हि तद्यदद्याद्धो तद्यदात्मा प्रजैव श्वोऽनद्धा हि तद्यच्छ्वोऽनद्धो तद्यत्प्रजा ॥२८॥ सा या पूर्वाहुतिः । सात्मानमभि हूयते तां मन्त्रेण जुहोत्यद्धा हि तद्यन्मन्त्रोऽद्धो तद्यदात्माऽथ योत्तरा सा प्रजामभि हूयते तां तूष्णीं जुहोत्यनद्धा हि तद्यत्तूष्णीमनद्धो तद्यत्प्रजा ॥२९॥ स जुहोति । अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेत्यथ प्रातः सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहेति तत्सत्येनैव हूयते यदा ह्येव सूर्योऽस्तमेत्यथाग्निर्ज्योतिर्यदा सूर्य उदेत्यथ सूर्यो

ज्योतिर्यद्धि सत्येन हूयते तद्देवान्गच्छति ॥३०॥ तदु हैतदेवारुणये ब्रह्मवर्चसका-
माय तन्नानूवाचाग्निर्वर्चो ज्योतिर्वर्चः सूर्यो वर्चो ज्योतिर्वर्च इति ब्रह्मवर्चसी हैव
भवति य एवं विद्वानग्निहोत्रं जुहोति ॥३१॥ तद्वस्त्येव प्रजननस्येव रूपम् । अ-
ग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेति तदुभयतो ज्योती रेतो देवतया परिगृह्णात्युभयतः-
परिगृहीतं वै रेतः प्रजायते तदुभयत एवैतत्परिगृह्य प्रजनयति ॥३२॥ अथ प्रा-
तः । सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहेति तदुभयतो ज्योती रेतो देवतया परिगृ-
ह्णात्युभयतःपरिगृहीतं वै रेतः प्रजायते तदुभयत एवैतत्परिगृह्य प्रजनयति त-
त्प्रजननस्य रूपम् ॥३३॥ तदु होवाच जीवलश्चैलकिः । गर्भमेवारुणिः करोति
न प्रजनयतीति स एतेनैव सायं जुहुयात् ॥३४॥ अथ प्रातः । ज्योतिः सूर्यः सूर्यो
ज्योतिः स्वाहेति तद्बहिर्धा ज्योती रेतो देवतया करोति बहिर्धा वै रेतः प्रजातं
भवति तदेनत्प्रजनयति ॥३५॥ तदाहुः । अग्नावेवैतत्सायꣳ सूर्यं जुहोति सूर्ये प्रा-
तरग्निमिति तद्धि तदुदितहोमिनामेव यदा ह्येव सूर्योऽस्तमेत्यथाग्निर्ज्योतिर्यदा सूर्य
उदेत्यथ सूर्यो ज्योतिर्नास्य सा परिचक्षेयमेव परिचक्षा यत्तस्यै नाद्धा देवतायै हू-
यते याग्निहोत्रस्य देवताग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेति तत्र नाग्नये स्वाहेत्यथ प्रा-
तः सूर्यो ज्योतिज्योतिः सूर्यः स्वाहेति तत्र न सूर्याय स्वाहेति ॥३६॥ अनेनैव
जुहुयात् । सजूर्देवेन सवित्रेति तत्सवितृमत्प्रसवाय सजू रात्र्येन्द्रवत्येति तद्रात्र्या
मिथुनं करोति सेन्द्रं करोतीन्द्रो हि यज्ञस्य देवता जुषाणोऽअग्निर्वेतु स्वाहेति
तदग्नये प्रत्यक्षं जुहोति ॥३७॥ अथ प्रातः । सजूर्देवेन सवित्रेति तत्सवितृमत्प्र-
सवाय सजूरुषसेन्द्रवत्येत्यह्नेति वा तदह्नां वोषसां वा मिथुनं करोति सेन्द्रं क-
रोतीन्द्रो हि यज्ञस्य देवता जुषाणः सूर्यो वेतु स्वाहेति तत्सूर्याय प्रत्यक्षं जुहो-
ति तस्मादेवमेव जुहुयात् ॥३८॥ ते होचुः । को न इदꣳ होष्यतीति ब्राह्मण
एवेति ब्राह्मणेदं नो जुहुधीति किं मे ततो भविष्यतीत्यग्निहोत्रोच्छिष्टमेवेति स

यत्स्रुचि परिशिनष्टि तदग्निहोत्रोच्छिष्टमथ यत्स्थाल्यां यथा परीणह्यो निर्वपेदेवं तत्तस्मात्तस्य एव कश्च पिबेत्तद्धि नाब्राह्मणः पिबेदग्नौ ह्यधिश्रयन्ति तस्मान्नाब्राह्मणः पिबेत् ॥३१॥ ब्राह्मणम् ॥३ [३.१.]॥ ॥

एता ह वै देवता योऽस्ति। तस्मिन्वसन्तीन्द्रो यमो राजा नडो नैषिधोऽनश्नत्सांगमनोऽसन्पाꣳसवः ॥१॥ तद्वाऽएष एवेन्द्रः। यदाहवनीयोऽथैष एव गार्हपत्यो यमो राजाथैष एव नडो नैषिधो यदन्वाहार्यपचनस्तद्यदेतमहरहर्दक्षिणत आहरन्ति तस्मादाङ्कुरहरहर्वै नडो नैषिधो यमꣳ राजानं दक्षिणत उपनयतीति ॥२॥ अथ य एष सभायामग्निः। एष एवानश्नत्सांगमनस्तद्यदेतमनशित्वेवोपसंगच्छन्ते तस्मादेषोऽनश्ननथ यदेतद्भस्मोद्धृत्य परावपन्त्येष एवासन्पाꣳसवः स यो हैवमेतद्वेदैवं मय्येता देवता वसन्तीति सर्वान्हैवैतांल्लोकान्नयति सर्वाल्लोकाननुसंचरति ॥३॥ तेषामुपस्थानं। यदेव सायं प्रातराहवनीयमुप च तिष्ठत उप चास्ते तदेव तस्योपस्थानमथ यदेव प्रतिपरेत्य गार्हपत्यमास्ते वा शेते वा तदेव तस्योपस्थानमथ यत्रैव संव्रजन्नन्वाहार्यपचनमुपस्मरेत्तदेव तं मनसोपतिष्ठेत तदेव तस्योपस्थानम् ॥४॥ अथ प्रातः। अनशित्वा मुहूर्तꣳ सभायामासित्वापि कामं पल्ययेत तदेव तस्योपस्थानमथ यत्रैव भस्मोद्धृतमुपनिगच्छेत्तदेव तस्योपस्थानमेवमु हास्यैता देवता उपस्थिता भवन्ति ॥५॥ यजमानदेवत्यो वै गार्हपत्यः। अथैष भ्रातृव्यदेवत्यो यदन्वाहार्यपचनस्तस्मादेतं नाहरहराहरेयुर्न ह वाऽअस्य सपत्ना भवन्ति यस्यैवं विदुष एतं नाहरहराहरन्त्यन्वाहार्यपचनो वाऽएषः ॥६॥ उपवसथऽएवैनमाहरेयुः। यत्रैवास्मिन्पक्ष्यन्तो भवन्ति तथो हास्यैषोऽमोघायाहृतो भवति ॥७॥ नवावसिते वैनमाहरेयुः। तस्मिन्पचेयुस्तद्ब्राह्मणा अश्नीयुर्यद्यु तन्न विन्देद्यत्पचेदपि गोरेव दुग्धमधिश्रयितवै ब्रूयात्तस्मिन्ब्राह्मणान्याययितवै ब्रूयात्पापीयाꣳसो ह वाऽअस्य सपत्ना भवन्ति यस्यैवं विदुष एवं

कुर्वन्ति तस्मादिवमेव चिकीर्षेत् ॥ ८॥ तद्यत्रैतत्प्रथमꣳ समिद्धो भवति । धूप्यत ऽइव तर्हि हैष भवति रुद्रः स यः कामयेत यथेमा रुद्रः प्रजा अश्रद्धयेव बत्सह-सेव बन्निघातमिव बत्सचतऽएवमन्नमद्यामिति तर्हि ह स जुहुयात्प्राप्नोति हैवैतदन्नाद्यं य एवं विद्वांस्तर्हि जुहोति ॥ ९॥ अथ यत्रैतत्प्रदीप्ततरो भवति । तर्हि हैष भवति वरुणः स यः कामयेत यथेमा वरुणः प्रजा गृह्णन्निव बत्सहसेव बन्निघातमिव बत्सचतऽएवमन्नमद्यामिति तर्हि ह स जुहुयात्प्राप्नोति हैवैतदन्नाद्यं य एवं विद्वांस्तर्हि जुहोति ॥ १०॥ अथ यत्रैतत्प्रदीप्तो भवति । उच्चैर्धूमः परमया जूत्या बल्बलीति तर्हि हैष भवतीन्द्रः स यः कामयेतेन्द्र इव श्रिया यशसा स्यामिति तर्हि ह स जुहुयात्प्राप्नोति हैवैतदन्नाद्यं य एवं विद्वांस्तर्हि जुहोति ॥ ११॥ अथ यत्रैतत्प्रतितरामिव । तिरश्चीवार्चिः संशाम्यतो भवति तर्हि हैष भवति मित्रः स यः कामयेत मैत्रेणेदमन्नमद्यामिति यमाहुः सर्वस्य वाऽअयं ब्राह्मणो मित्रं न वाऽअयं कं चन हिनस्तीति तर्हि ह स जुहुयात्प्राप्नोति हैवैतदन्नाद्यं य एवं विद्वांस्तर्हि जुहोति ॥ १२॥ अथ यत्रैतदङ्गाराश्चाकश्यन्तऽइव । तर्हि हैष भवति ब्रह्म स यः कामयेत ब्रह्मवर्चसी स्यामिति तर्हि ह स जुहुयात्प्राप्नोति हैवैतदन्नाद्यं य एवं विद्वांस्तर्हि जुहोति ॥ १३॥ एतेषामेकꣳ संवत्सरमुपेप्सेत् । स्वयं जुहुयाद्यदि वास्यान्यो जुहुयादथ योऽन्यथान्यथा जुहोति यथापो वाभिखनन्नन्यद्वान्नाद्यꣳ स सामि निवर्ततैवं तदथ यः सार्धं जुहोति यथापो वाभिखनन्नन्यद्वान्नाद्यं तत्क्षिप्रेऽभितृन्द्यादेवं तत् ॥ १४॥ अभयो ह वाऽएता अन्नाद्यस्य यदाहुतयः । अभि हैवैतदन्नाद्यं तृणत्ति य एवं विद्वानग्निहोत्रं जुहोति ॥ १५॥ सा या पूर्वाहुतिः । ते देवा अथ योत्तरा ते मनुष्या अथ यत्स्रुचि परिशिनष्टि ते पशवः ॥ १६॥ स वै कनीय इव पूर्वामाहुतिं जुहोति । भूय इवोत्तरां भूय इव स्रुचि परिशिनष्टि ॥ १७॥ स यत्कनीय इव पूर्वामाहुतिं जुहोति ।

कनीयाꣳसो हि देवा मनुष्येभ्योऽथ यद्भूयऽइवोत्तरां भूयाꣳसो हि मनुष्या देवे-
भ्योऽथ यद्भूय इव स्रुचि परिशिनष्टि भूयाꣳसो हि पशवो मनुष्येभ्यः कनीयाꣳसो
ह वाऽअस्य भार्या भवन्ति भूयाꣳसः पशवो य एवं विद्वानग्निहोत्रं जुहोति तद्धि
समृद्धं यस्य कनीयाꣳसो भार्या असन्भूयाꣳसः पशवः ॥१८॥ ब्राह्मणम् ॥४ [३.२.]॥
॥ द्वितीयः प्रपाठकः ॥ ॥ कण्डिकासंख्या १०३ ॥ ॥

यत्र वै प्रजापतिः प्रजाः ससृजे । स यत्राग्निꣳ ससृजे स इदं जातः सर्वमेव द-
ग्धुं दध्रऽइत्येवाबिलमेव ता यास्तर्हि प्रजा आसुस्ता हैनꣳ सम्पेष्टुं दध्रिरे सो
ऽतितिक्षमाणः पुरुषमेवाभ्येयाय ॥१॥ स होवाच । न वाऽअहमिदं तितिक्षे
हन्त त्वा प्रविशानि तं मा जनयित्वा बिभृहि स यथैव मां त्वमस्मिंल्लोके जनयि-
त्वा भरिष्यस्येवमेवाहं त्वाममुष्मिंल्लोके जनयित्वा भरिष्यामीति तथेति तं जनयि-
त्वाबिभः ॥२॥ स यदग्नीऽआधत्ते । तदेनं जनयति तं जनयित्वा बिभर्ति स यथा
हैवैष एतमस्मिंल्लोके जनयित्वा बिभर्त्येवमु हैवैष एतममुष्मिंल्लोके जनयित्वा बि-
भर्ति ॥३॥ तन्न साम्युद्वासयेत । सामि हास्मै स ग्लायति स यथा हैवैष एतस्मा
ऽअस्मिंल्लोके सामि ग्लायत्येवमु हैवैष एतस्माऽअमुष्मिंल्लोके सामि ग्लायति
तस्मान्न साम्युद्वासयेत ॥४॥ स यत्र म्रियते । यत्रैनमग्नावभ्यादधति तदेषोऽग्नेरधि-
जायते स एष पुत्रः सन्पिता भवति ॥५॥ तस्मादेतदृषिणाभ्यनूक्तꣳ । शतमिन्नु
शरदोऽअन्ति देवा यत्रा नश्चक्रा जरसं तनूनाम् । पुत्रासो यत्र पितरो भवन्ति मा
नो मध्या रीरिषतायुर्गन्तोरिति पुत्रो ह्येष सन्त्स पुनः पिता भवत्येतन्नु तद्यस्मा-
दग्नीऽआदधीत ॥६॥ तद्वाऽएष एव मृत्युः । य एष तपति तद्यदेष एव मृत्यु-
स्तस्माद्या एतस्मादर्वाच्यः प्रजास्ता म्रियन्तेऽथ याः पराच्यस्ते देवास्तस्मादु तेऽमृ-
तास्तस्येमाः सर्वाः प्रजा रश्मिभिः प्राणेष्वभिहितास्तस्मादु रश्मयः प्राणानभ्यवतताय-
न्ते ॥७॥ स यस्य कामयते । तस्य प्राणमादायोदेति स म्रियते स यो हैतं मृत्युम-

नतिमुच्याथामुं लोकमेति यथा हैवास्मिंल्लोके न संयतमाद्रियते यदा यदेव का-
मयतेऽथ मारयत्येवमु हैवामुष्मिंल्लोके पुनःपुनरेव प्रमारयति ॥८॥ स यत्साय-
मस्तमिते द्वेऽआहुती जुहोति । तदेताभ्यां पूर्वाभ्यां पद्भ्यामेतस्मिन्मृत्यौ प्रतिति-
ष्ठत्यथ यत्प्रातरनुदिते द्वेऽआहुती जुहोति तदेताभ्यामपराभ्यां पद्भ्यामेतस्मिन्मृत्यौ
प्रतितिष्ठति स एनमेष उद्यन्नेवादायोदेति तदेतं मृत्युमतिमुच्यते सैषाग्निहोत्रे
मृत्योरतिमुक्तिरति ह वै पुनर्मृत्युं मुच्यते य एवमेतामग्निहोत्रे मृत्योरतिमुक्तिं
वेद ॥९॥ यथा वाऽइषोरनीकम् । एवं यज्ञानामग्निहोत्रं येन वाऽइषोरनीकमे-
ति सर्वा वै तेनेषुरेत्येतेनो हास्य सर्वे यज्ञक्रतव एतं मृत्युमतिमुक्ताः ॥१०॥ अ-
होरात्रे ह वाऽअमुष्मिंल्लोके परिप्लवमाने । पुरुषस्य सुकृतं क्षिणुतोऽर्वाचीनं वा
ऽअतोऽहोरात्रे तयो हास्याहोरात्रे सुकृतं न क्षिणुतः ॥११॥ स यथा रथोपस्थे
तिष्ठन् । उपरिष्टाद्रथचक्रे पल्ययमानेऽउपावेक्षेतैवं परस्तादर्वाचीनोऽहोरात्रेऽउ-
पावेक्षते न ह वाऽअस्याहोरात्रे सुकृतं क्षिणुतो य एवमेतामहोरात्रयोरतिमुक्तिं
वेद ॥१२॥ पूर्वेणाहवनीयं परीत्य । अन्तरेण गार्हपत्यं चैति न वै देवा मनुष्यं
विदुस्तऽएनमेतदन्तरेणातियन्तं विदुरयं वै न इदं जुहोतीत्यग्निर्वै पाप्मनोऽपह-
न्ता तावस्याहवनीयश्च गार्हपत्यश्चान्तरेणातियतः पाप्मानमपहतः सोऽपहतपा-
प्मा ज्योतिरिव श्रिया यशसा भवति ॥१३॥ उत्तरतो वाऽअग्निहोत्रस्य द्वारम् ।
स यथा द्वारा प्रपद्येतैवं तदथ यो दक्षिणत एत्यास्ते यथा बहिर्धा चरेदेवं तत्
॥१४॥ नौर्ह वाऽएषा स्वर्ग्या । यदग्निहोत्रं तस्याऽएतस्यै नावः स्वर्ग्याया आह-
वनीयश्चैव गार्हपत्यश्च नौमण्डेऽअथैष एव नावाजो यत्क्षीरहोता ॥१५॥ स य-
त्प्राङुपोदेति । तदेनां प्राचीमभ्यजति स्वर्गं लोकमभि तया स्वर्गं लोकम् सम-
श्नुते तस्या उत्तरत आरोहणम् सैनम् स्वर्गं लोकम् समापयत्यथ यो दक्षिणत
एत्यास्ते यथा प्रतीर्णायामागच्छेत्स विहीयेत स तत एव बहिर्धा स्यादेवं तत् ॥१६॥

अथ यामेतांᳪं समिधमभ्यादधाति सेष्टका येन मन्त्रेण जुहोति तद्यजुर्यै नैतामिष्टकामुपदधाति यदा वाऽइष्टकोपधीयतेऽथाहुतिर्हूयते तदस्योपहितास्वेवेष्टकास्वेता आहुतयो हूयन्ते या एता अग्निहोत्राहुतयः ॥१७॥ प्रजापतिर्वाऽअग्निः। संवत्सरो वै प्रजापतिः संवत्सरे-संवत्सरे ह वाऽअस्याग्निहोत्रं चित्येनाग्निना संतिष्ठते संवत्सरे-संवत्सरे चित्यमग्निमाप्नोति य एवं विद्वानग्निहोत्रं जुहोत्येतद्ध ह्यस्याग्निहोत्रं चित्येनाग्निना संतिष्ठते चित्यमग्निमाप्नोति ॥१८॥ सप्त च वै शतान्यशीतीनामृचः। विᳪंशतिश्च स यत्सायं प्रातरग्निहोत्रं जुहोति ते द्वेऽआहुती ता अस्य संवत्सरऽआहुतयः सम्पद्यन्ते ॥१९॥ सप्त चैव शतानि विᳪंशतिश्च। संवत्सरे-संवत्सरे ह वाऽअस्याग्निहोत्रं महतोक्थेन सम्पद्यते संवत्सरे-संवत्सरे महदुक्थमाप्नोति य एवं विद्वानग्निहोत्रं जुहोत्येतद्ध ह्यस्याग्निहोत्रं महतोक्थेन सम्पद्यते महदुक्थमाप्नोति ॥२०॥ ब्राह्मणम् ॥१[३.३.]॥ ॥

अग्नौ ह वै देवाः। सर्वान्पशून्निदधिरे ये च ग्राम्या ये चारण्या विजयं वोपप्रैष्यन्तः कामचारस्य वा कामायायं नो गोपिष्ठो गोपायदिति वा ॥१॥ तानु हाग्निर्निचकमे। तैः संगृह्य रात्रिं प्रविवेश पुनरेम इति देवा एदग्निं तिरोभूतं ते ह विदां चक्रुरिह वै प्राविक्षद्रात्रिं वै प्राविक्षदिति तमेतत्प्रत्यायत्याᳪं रात्रौ सायमुपातिष्ठन्त देहि नः पशून्पुनर्नः पशून्देहीति तेभ्योऽग्निः पशून्पुनरददात् ॥२॥ तस्मै कमग्नीऽउपतिष्ठेत। अग्नी वै दातारौ तावेवैतद्याचते सायमुपतिष्ठेत सायᳪं हि देवा उपातिष्ठन्त दत्तो हैवास्माऽएतौ पशून्य एवं विद्वानुपतिष्ठते ॥३॥ अथ यस्मान्नोपतिष्ठेत। उभये ह वाऽइदमग्रे सहासुर्देवाश्च मनुष्याश्च तद्यद्ध स्म मनुष्याणां न भवति तद्ध स्म देवान्याचन्तऽइदं वै नो नास्तीदं नोऽस्त्विति ते तस्याऽएव याच्ञायै द्वेषेण देवास्तिरोभूता नेद्धिनसानि नेद्द्वेष्योऽसानीति तस्मान्नोपतिष्ठेत ॥४॥ अथ यस्मादुपैव तिष्ठेत। यज्ञो वै देवानामाशीर्यजमानस्य त-

ह्यऽएष एव यज्ञो यदाहुतिराशीरेव यजमानस्य तद्यदेवास्यात्र तदेवैतदुपतिष्ठ-
मानः कुरुते तस्मादुपैव तिष्ठेत ॥५॥ अथ यस्मान्नोपतिष्ठेत । यो वै ब्राह्मणं वा
शꣳसमानोऽनुचरति क्षत्रियं वायं मे दास्यत्ययं मे गृहान्करिष्यतीति यो वै तं
वाच्येन वा कर्मणा वाभिरिराधयिषति तस्मै वै स देयं मन्यतेऽथ य आह किं नु
त्वं ममासि यो मे न ददासीतीश्वर एनं द्वेष्टोरीश्वरो निर्वेदं गन्तोस्तस्मान्नोपतिष्ठे-
तैतद्ध्वेवैष एत याचते यदिन्द्धे यज्जुहोति तस्मान्नोपतिष्ठेत ॥६॥ अथ यस्मादु-
पैव तिष्ठेत । उत वै याचन्दातारं लभतऽएवोतो भर्ता भार्यं नानुबुध्यते स य-
देवाह भार्यो वै तेऽस्मि बिभृह्हि मेत्यथैनं वेदाथैनं भार्यं मन्यते तस्मादुपैव ति-
ष्ठेतेदमित्तु समस्तं यस्मादुपतिष्ठेत ॥७॥ प्रजापतिर्वाऽएष भूत्वा । यावत ईष्टे या-
वदेनमनु तस्य रेतः सिञ्चति यदग्निहोत्रं जुहोतीदमेवैतत्सर्वमुपतिष्ठमानोऽनुवि-
करोतीदꣳ सर्वमनुप्रजनयति ॥८॥ स वाऽउपवत्या प्रतिपद्यते । इयं वाऽउप ह-
येनेयमुप यद्धीदं किं च जायतेऽस्यां तदुपजायतेऽथ यन्मृक्त्यस्यामेव तदुपोप्यते
तदह्ना रात्र्या भूयो-भूय एवाक्षय्यं भवति तदक्षय्येणैवैतद्भूम्ना प्रतिपद्यते ॥९॥ स
आह । उपप्रयन्तोऽअध्वरमित्यध्वरो वै यज्ञ उपप्रयन्तो यज्ञमित्येवैतदाह मन्त्रं वो-
चेमाग्नयऽइति मन्त्रमु ह्यस्माऽएतद्वक्ष्यन्भवत्यारेऽअस्मे च शृण्वतऽइति यद्यप्य-
स्मदारकादस्यथ न एतच्छृण्वेवैवमेवैतन्मन्यस्वेत्येवैतदाह ॥१०॥ अग्निर्मूर्धा दिवः ।
ककुत्पतिः पथिव्या अयम् । अपाꣳ रेताꣳसि जिन्वतीत्यन्वेव धावति तद्यथा या-
चन्कल्याणं वदेदामुष्यायणो वै त्वमस्यलं वै त्वमेतस्माऽअसीत्येवमेषा ॥११॥ अ-
थैन्द्राग्नी । उभा वामिन्द्राग्नीऽआहुवध्याऽउभा राधसः सह मादयध्यै । उभा दाता-
राविषाꣳ रयीणामुभा वाजस्य सातये हुवे वामित्येष वाऽइन्द्रो य एष तपति स
यदस्तमेति तदाहवनीयं प्रविशति तदुभावेवैतत्सह सन्ताऽउपतिष्ठतऽउभौ मे स-
ह सन्तौ दत्तामिति तस्मादैन्द्राग्नी ॥१२॥ अयं ते योनिर्ऋत्वियः । यतो जातोऽअ-

रोचयाः । तं जानन्नग्न ऽआरोहाथा नो वर्धया रयिमिति पुष्टं वै रयिर्भूयो-भूय ए-
व न इदं पुष्टं कुर्वित्येवैतदाह ॥१३॥ अयमिह प्रथमः । धायि धातृभिर्होता य-
जिष्ठो ऽअध्वरेष्वीड्यः । यमप्नवानो भृगवो विरुरुचुर्वनेषु चित्रं विभ्वं विशे-विशऽइ-
त्यन्वेव धावति तद्यथा याचन्कल्याणं वदेदामुष्यायणो वै त्वमस्यलं वै त्वमेतस्मा
ऽअसीत्येवमेषा यथो ऽएवैष तथो ऽएवैनमेतदाह यदाह विभ्वं विशे-विशऽइति वि-
भूर्ह्येष विशे-विशे ॥१४॥ अस्य प्रत्नाम् । अनु द्युतꣳ शुक्रं दुदुह्रे ऽअह्रयः । पयः
सहस्रसामृषिमिति परमा वा ऽएषा सनीनां यत्सहस्रसनिस्तदेतस्यैवावरुद्ध्यै तस्मा-
दाह पयः सहस्रसामृषिमिति ॥१५॥ तदेतत्समाहार्यꣳ षडृचं । तस्योपवती प्रथ-
मा प्रत्नवत्युत्तमावोचाम तद्यस्मादुपवत्यथाद एव प्रत्नं यावन्तो ह्येव सनाग्रे दे-
वास्तावन्त एव देवास्तस्माददः प्रत्नं तदिमे ऽएवान्तरेण सर्वे कामास्ते ऽअस्मा ऽइमे
संजानाने सर्वान्कामान्त्संनमतः ॥१६॥ स वै त्रिः प्रथमां जपति । त्रिरुत्तमां त्रि-
वृत्प्रायणा हि यज्ञास्त्रिवृदुदयनास्तस्मात्त्रिः प्रथमां जपति त्रिरुत्तमाम् ॥१७॥ यद्ध
वाऽअत्राग्निहोत्रं जुह्वत् । वाचेन वा कर्मणा वा मिथ्या करोत्यात्मनस्तद्वय-
त्यायुषो वा वर्चसो वा प्रजायै वा ॥१८॥ तद्ध खलु तनूपा अग्नेऽसि । तन्वं मे
पाह्यायुर्दा अग्नेऽस्यायुर्मे देहि वर्चोदा अग्नेऽसि वर्चो मे देहि । अग्ने यन्मे तन्वा
ऊनं तन्मऽआपृणेति ॥१९॥ यद्ध वाऽअत्राग्निहोत्रं जुह्वत् । वाचेन वा कर्मणा
वा मिथ्या करोत्या नस्तद्वयत्यायुषो वा वर्चसो वा प्रजायै वा तन्मे पुनरा-
प्याययेत्येवैतदाह तथो हास्यैतत्पुनराप्यायते ॥२०॥ इन्धानास्त्वा । शतꣳ हिमा
द्युमन्तꣳ समिधीमहीति शतं वर्षाणि जीव्यास्मेत्येवैतदाह तावत्त्वा महान्तꣳ स-
मिधीमहीति यदाह द्युमन्तꣳ समिधीमहीति वयस्वन्तो वयस्कृतꣳ सहस्वन्तः स-
हस्कृतमिति वयस्वन्तो वयं भूयास्म वयस्कृत्त्वं भूया इत्येवैतदाह सहस्वन्तो वयं
भूयास्म सहस्कृत्त्वं भूया इत्येवैतदाहाग्ने सपत्नदम्भनमदब्धासो ऽअदाभ्यमिति त्वया

वयꣳ सपत्नान्पापीयसः क्रियास्मेत्येवैतदाह ॥२१॥ चित्रावसो स्वस्ति ते पारम-
शीयेति । त्रिरेतज्जपति रात्रिर्वै चित्रावसुः सा हीयꣳ संगृह्येव चित्राणि वसति
तस्मान्नारकाच्चित्रं ददृशे ॥२२॥ एतेन ह स्म वाऽऋषयः । रात्रेः स्वस्ति पारꣳ स-
मश्नुवतऽएतेनो ह स्मैनान्रात्रेर्नाष्ट्रा रक्षाꣳसि न विन्दन्त्येतेनोऽएवैष एतद्रात्रेः
स्वस्ति पारꣳ समश्नुतऽएतेनोऽएनꣳ रात्रेर्नाष्ट्रा रक्षाꣳसि न विन्दन्त्येतावन्नु ति-
ष्ठञ्जपति ॥२३॥ अथासीनः । सं त्वमग्ने सूर्यस्य वर्चसा गथा इति तद्यदस्तं यन्ना-
दित्य आहवनीयं प्रविशति तेनैतदाह समृषीणाꣳ स्तुतेनेति तद्यदुपतिष्ठते तेनै-
तदाह सं प्रियेण धाम्नेत्याहुतयो वाऽअस्य प्रियं धामाहुतिभिरेव तदाह समह-
मायुषा सं वर्चसा सं प्रजया सꣳ रायस्पोषेण ग्मिषीयेति यथा त्वमेतैः समगथा
एवमहमायुषा वर्चसा प्रजया रायस्पोषेणेति यद्भूम्नेति तदेवमहमेतैः संगच्छाऽइत्ये-
वैतदाह ॥२४॥ अथ गामभ्येति । अन्ध स्थान्धो वो भक्षीय मह स्थ महो वो
भक्षीयेति यानि वो वीर्याणि यानि वो महाꣳसि तानि वो भक्षीयेत्येवैतदा-
होर्ज स्थोर्जं वो भक्षीयेति रस स्थ रसं वो भक्षीयेत्येवैतदाह रायस्पोष स्थ रा-
यस्पोषं वो भक्षीयेति भूमा स्थ भूमानं वो भक्षीयेत्येवैतदाह ॥२५॥ ॥ शतम्
११०० ॥ ॥ रेवती रमध्वमिति रेवन्तो हि पशवस्तस्मादाह रेवती रमध्वमित्य-
स्मिन्योनावस्मिन्गोष्ठेऽस्मिंलोकेऽस्मिन्क्षये । इहैव स्त मापगातेत्यात्मन एवैत-
दाह मदेव मापगातेति ॥२६॥ अथ गामभिमृशति । सꣳहितासि विश्वरूपीति
विश्वरूपा इव हि पशवस्तस्मादाह विश्वरूपीत्यूर्जा माविश गौपत्येनेत्यूर्जेति य-
दाह रसेनेति तदाह गौपत्येनेति यदाह भूम्नेति तदाह ॥२७॥ अथ गार्हपत्यम-
भ्येति । स गार्हपत्यमुपतिष्ठतऽउप त्वाग्ने दिवे-दिवे दोषावस्तर्धिया वयम् । नमो
भरन्त एमसीति नम एवास्माऽएतत्करोति यथैनं न हिꣳस्यात् ॥२८॥ राजन्तम-
ध्वराणां । गोपामृतस्य दीदिविम् । वर्धमानꣳ स्वे दमऽइति स्वं वै तऽइदं यन्मम

तन्नो भूयो-भूय एव कुर्वित्येवैतदाह ॥२९॥ स नः पितेव सूनवे । अग्ने सूपाय-
नो भव । सचस्वा नः स्वस्तयऽइति यथा पिता पुत्राय सूपचरो नैवैनं केन चन
हिनस्त्येवं नः सूपचर एधि मैव त्वा केन चन हिꣳसिष्मेत्येवैतदाह ॥३०॥ अथ
द्विपदाः । अग्ने त्वं नोऽअन्तम उत त्राता शिवो भवा वरूथ्यः । वसुरग्निर्वसुश्रवा
अच्छा नक्षि द्युमत्तमꣳ रयिं दाः ॥ तं त्वा शोचिष्ठ दीदिवः सुम्नाय नूनमीमहे स-
खिभ्यः । स नो बोधि श्रुधी हवमुरुष्या णोऽअघायतः समस्मादिति ॥३१॥ यद्वा
ऽआहवनीयमुपतिष्ठते । पशूꣳस्तद्याचते तस्मात्तमुच्चावचैश्छन्दोभिरुपतिष्ठतऽउच्चा-
वचा इव हि पशवोऽथ यद्गार्हपत्यं पुरुषाꣳस्तद्याचते तद्गायत्रं प्रथमं त्रिचं गायत्रं
वाऽअग्नेश्छन्दः स्वेनैवैनमेतच्छन्दसोपपरैति ॥३२॥ अथ द्विपदाः । पुरुषच्छन्दसं वै
द्विपदा द्विपाद्वाऽअयं पुरुषः पुरुषानेवैतद्याचते पुरुषान्हि याचते तस्माद्द्विपदाः
पशुमान्ह वै पुरुषवान्भवति य एवं विद्वानुपतिष्ठते ॥३३॥ अथ गामभ्यैति । इ-
डऽएह्यदितऽएहीतीडा हि गौरदितिर्हि गौस्तामभिमृशति काम्या एतेति मनु-
ष्याणाꣳ ह्येतासु कामाः प्रविष्टास्तस्मादाह काम्या एतेति मयि वः कामधरणं
भूयादित्यहं वः प्रियो भूयासमित्येवैतदाह ॥३४॥ अथान्तरेणाहवनीयं च गार्ह-
पत्यं च । प्राङ् तिष्ठन्नग्निमीक्षमाणो जपति सोमानꣳ स्वरणं कृणुहि ब्रह्मणस्प-
ते । कक्षीवन्तं य औशिजः ॥ यो रेवान्योऽअमीवहा वसुवित्पुष्टिवर्धनः । स नः
सिषक्तु यस्तुरः ॥ मा नः शꣳसोऽअररुषो धूर्तिः प्रणङ्मर्त्यस्य । रक्षा णो ब्रह्मण-
स्पतऽइति ॥३५॥ यद्वाऽआहवनीयमुपतिष्ठते । दिवं तदुपतिष्ठतेऽथ यद्गार्हपत्यं
पृथिवीं तदथैतदन्तरिक्षमेषा हि दिग्बृहस्पतेरेताꣳ ह्येतद्दिशमुपतिष्ठते तस्माद्बा-
र्हस्पत्यं जपति ॥३६॥ महि त्रीणामवोऽस्तु । द्युक्षं मित्रस्यार्यम्णः । दुराधर्षं व-
रुणस्य ॥ न हि तेषाममा चन नाध्वसु वारणेषु । ईशे रिपुरघशꣳसः ॥ ते हि
पुत्रासोऽअदितेः प्र जीवसे मर्त्याय । ज्योतिर्यच्छन्त्यजस्रमिति तत्रास्ति नाध्वसु वा-

रणेष्वित्येते ह वाऽअध्वानो वारणा यऽइमेऽन्तरेण द्यावापृथिवीऽएतान्ह्येतदुप-
तिष्ठते तस्मादाह नाध्वसु वारणेष्विति ॥३७॥ अथैन्द्री । इन्द्रो वै यज्ञस्य देवता
सेन्द्रमेवैतदग्न्युपस्थानं कुरुते कदा चन स्तरीरसि नेन्द्र सश्चसि दाशुषऽइति य-
जमानो वै दाश्वान्न यजमानाय द्रुह्यसीत्येवैतदाहोपोपेन्नु मघवन्भूय इन्नु ते दानं
देवस्य पृच्यतऽइति भूयो-भूय एव न इदं पुष्टं कुर्वित्येवैतदाह ॥३८॥ अथ सा-
वित्री । सविता वै देवानां प्रसविता तथो हास्माऽएते सवितृप्रसूता एव सर्वे
कामाः समृध्यन्ते तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदया-
दिति ॥३९॥ अथाग्नेयी । तदग्नयऽएवैतदात्मानमन्ततः परिददाति गुप्त्यै परि ते
दूडभो रथोऽस्माँ॥३ऽअश्नोतु विश्वतः । येन रक्षसि दाशुष इति यजमाना वै दा-
श्वाꣳसो यो ह वाऽअस्यानाधृष्यतमो रथस्तेनैष यजमानानभिरक्षति स यस्तेऽना-
धृष्यतमो रथो येन यजमानानभिरक्षसि तेन नः सर्वतोऽभिगोपायेत्येवैतदाह त्रि-
रेतज्जपति ॥४०॥ अथ पुत्रस्य नाम गृह्णाति । इदं मेऽयं वीर्यं पुत्रोऽनुसंतनव-
दिति यदि पुत्रो न स्यादप्यात्मन एव नाम गृह्णीयात् ॥४१॥ ब्राह्मणम् ॥२[३.
४]॥ अध्यायः ॥३[१२]॥ ॥

अथ हुतेऽग्निहोत्रऽउपतिष्ठते । भूर्भुवः स्वरिति तत्सत्येनैवैतद्वाचꣳ समर्धय-
ति यदाह भूर्भुवः स्वरिति तया समृद्धयाशिषमाशास्ते सुप्रजाः प्रजाभि स्यामिति
तत्प्रजामाशास्ते सुवीरो वीरैरिति तद्वीरानाशास्ते सुपोषः पोषैरिति तत्पुष्टिमा-
शास्ते ॥१॥ यद्वाऽअदो दीर्घमग्न्युपस्थानम् । आशीरेव साशीरियं तदेतावतैवै-
तत्सर्वमाप्नोति तस्मादेतेनैवोपतिष्ठेतैतेन न्वेव वयमुपचराम इति ह स्माहासु-
रिः ॥२॥ अथ प्रवत्स्यन् । गार्हपत्यमेवाग्रऽउपतिष्ठतेऽथाहवनीयꣳ ॥३॥ स गा-
र्हपत्यमुपतिष्ठते । नर्य प्रजां मे पाहीति प्रजाया ह्येष ईष्टे तत्प्रजामेवास्माऽएत-
त्परिददाति गुप्त्यै ॥४॥ अथाहवनीयमुपतिष्ठते । शꣳस्य पशून्मे पाहीति पशूनाꣳ

ह्येष ईष्टे तत्पशूनेवास्माऽएतत्परिददाति गुप्त्यै ॥५॥ अथ प्र वा व्रजति प्र वा धावयति । स यत्र वेलां मन्यते तत्स्थित्वा वाचं विसृजतेऽथ प्रोष्य परेत्य यत्र वेलां मन्यते तद्वाचं यच्छति स यद्यपि राजान्तरेण स्यान्नैव तमुपेयात् ॥६॥ स आहवनीयमेवाग्रऽउपतिष्ठते । अथ गार्हपत्यं गृहा वै गार्हपत्यो गृहा वै प्रतिष्ठा तद्गृहेष्वेवैतत्प्रतिष्ठायां प्रतितिष्ठति ॥७॥ स आहवनीयमुपतिष्ठते । आगन्म विश्ववेदसमस्मभ्यं वसुवित्तमम् । अग्ने सम्राडभि द्युम्नमभि सह आयच्छस्वेत्यथोपविश्य तृणान्यपलुम्पति ॥८॥ अथ गार्हपत्यमुपतिष्ठते । अयमग्निर्गृहपतिर्गार्हपत्यः प्रजाया वसुवित्तमः । अग्ने गृहपतेऽभि द्युम्नमभि सह आयच्छस्वेत्यथोपविश्य तृणान्यपलुम्पत्येतन्नु जपेनैतेन न्वेव भूयिष्ठा इवोपतिष्ठन्ते ॥९॥ स वै खलु तूष्णीमेवोपतिष्ठेत । इदं वै यस्मिन्वसति ब्राह्मणो वा राजा वा श्रेयान्मनुष्यो न्वेव तमेव नार्हति वक्तुमिदं मे त्वं गोपाय प्राहं वत्स्यामीत्यथास्मिन्नेते श्रेयाꣳसो वसन्ति देवा अग्नयः क उ तानर्हति वक्तुमिदं मे यूयं गोपायत प्राहं वत्स्यामीति ॥१०॥ मनो ह वै देवा मनुष्यस्याजानन्ति । स वेद गार्हपत्यः परिदां मेदमुपागादिति तूष्णीमेवाहवनीयमुपतिष्ठते स वेदाहवनीयः परिदां मेदमुपागादिति ॥११॥ अथ प्र वा व्रजति प्र वा धावयति । स यत्र वेलां मन्यते तत्स्थित्वा वाचं विसृजतेऽथ प्रोष्य परेत्य यत्र वेलां मन्यते तद्वाचं यच्छति स यद्यपि राजान्तरेण स्यान्नैव तमुपेयात् ॥१२॥ स आहवनीयमेवाग्रऽउपतिष्ठते । अथ गार्हपत्यं तूष्णीमेवाहवनीयमुपतिष्ठते तूष्णीमुपविश्य तृणान्यपलुम्पति तूष्णीमेव गार्हपत्यमुपतिष्ठते तूष्णीमुपविश्य तृणान्यपलुम्पति ॥१३॥ अथातो गृहाणामेवोपचारः । एतद्ध वै गृहपतेः प्रोषुष आगताद्गृहाः समुत्त्रस्ता इव भवन्ति किमयमिह वदिष्यति किं वा करिष्यतीति स यो ह तत्र किंचिद्वदति वा करोति वा तस्माद्गृहाः प्रत्रसन्ति तस्येश्वरः कुलं विक्षोब्धोरथ यो ह तत्र न वदति न किं चन क-

रोति तं गृह्या उपसꣳश्रयन्ते न वाऽअयमिह्यावादीन्न किं चनाकरदिति स यदिह्या-
पि सुक्रुद्ध इव स्याक्रू एव ततस्तत्कुर्याद्यद्वदिष्यन्वा करिष्यन्वा स्यादेष उ गृह्या-
णामुपचारः ॥१४॥ ब्राह्मणम् ॥३ [४. १.]॥ ॥

प्रजापतिं वै भूतान्युपासीदन् । प्रजा वै भूतानि वि नो धेहि यथा जीवामेति ततो देवा यज्ञोपवीतिनो भूत्वा दक्षिणं जान्वाच्योपासीदꣳस्तानब्रवीद्यज्ञो वोऽन्नममृतत्वं व ऊर्ग्वः सूर्यो वो ज्योतिरिति ॥१॥ अथैनं पितरः । प्राचीनावीतिनः सव्यं जान्वाच्योपासीदꣳस्तानब्रवीन्मासि-मासि वोऽशनꣳ स्वधा वो मनोजवो वश्चन्द्रमा वो ज्योतिरिति ॥२॥ अथैनं मनुष्याः । प्रावृता उपस्थं कृत्वोपासीदꣳस्तानब्रवीत्सायं प्रातर्वोऽशनं प्रजा वो मृत्युर्वोऽग्निर्वो ज्योतिरिति ॥३॥ अथैनं पशव उपासीदन् । तेभ्यः स्वैरमेव चकार यदैव यूयं कदा च लभाध्वै यदि काले यद्यनाकालेऽथैवाश्नाथेति तस्मादेते यदैव कदा च लभन्ते यदि काले यद्यनाकालेऽथैवाश्नन्ति ॥४॥ अथ हैनꣳ शश्वदप्यसुरा उपसेदुरित्याहुः । तेभ्यस्तमश्च मायां च प्रददावस्त्यहैवासुरमायेतीव पराभूता ह त्वेव ताः प्रजास्ता इमाः प्रजास्तथैवोपजीवन्ति यथैवाभ्यः प्रजापतिर्व्यदधात् ॥५॥ नैव देवा अतिक्रामन्ति । न पितरो न पशवो मनुष्या एवैकेऽतिक्रामन्ति तस्माद्यो मनुष्याणां मेद्यत्यशुभे मेद्यति विहूर्छति हि न ह्ययनाय चन भवत्यनृतꣳ हि कृत्वा मेद्यति तस्मादु सायंप्रातराश्येव स्यात्स यो हैवं विद्वान्त्सायंप्रातराशी भवति सर्वꣳ हैवायुरेति यदु ह किं च वाचा व्याहरति तदु हैव भवत्येतद्धि देवसत्यं गोपायति तद्वैतत्तेजो नाम ब्राह्मणं य एतस्य व्रतꣳ शक्नोति चरितुम् ॥६॥ तद्वाऽएतत् । मासि-मास्येव पितृभ्यो ददतो यदैवैष न पुरस्तान्न पश्चाद्ददृशेऽथैभ्यो ददात्येष वै सोमो राजा देवानामन्नं यच्चन्द्रमाः स एतꣳ रात्रिं क्षीयते तस्मिन्क्षीणे ददाति तथैभ्योऽसमदं करोत्यथ यत्क्षीणे दद्यात्समदꣳ ह कुर्याद्देवेभ्यश्च पितृभ्यश्च तस्माद्यदैवैष न पुर-

स्तान्न पश्चाद्ददृशे ऽथैभ्यो ददाति ॥ ७॥ स वा ऽअपराह्णे ददाति । पूर्वाह्णो वै देवानां मध्यन्दिनो मनुष्याणामपराह्णः पितॄणां तस्मादपराह्णे ददाति ॥ ८॥ स जघनेन गार्हपत्यं । प्राचीनावीती भूत्वा दक्षिणासीन एतं गृह्णाति स तत एवोपोत्थायोत्तरेणान्वाहार्यपचनं दक्षिणा तिष्ठन्नवहन्ति सकृत्फलीकरोति सकृदु ह्येव पराञ्चः पितरस्तस्मात्सकृत्फलीकरोति ॥ ९॥ तꣳ श्रपयति । तस्मिन्नधिश्रित ऽआज्यं प्रत्यानयत्यग्नौ वै देवेभ्यो जुह्वत्युद्धरन्ति मनुष्येभ्यो ऽथैव पितॄणां तस्मादधिश्रित ऽआज्यं प्रत्यानयति ॥ १०॥ स उद्वास्याग्नौ द्वे ऽआहुती जुहोति देवेभ्यः । देवान्वा ऽएष उपावर्तते य ऽआहिताग्निर्भवति यो दर्शपूर्णमासाभ्यां यजते ऽथैतत्पितृयज्ञेनेवाचारीत्तदु देवेभ्यो निह्नुते स देवैः प्रसूतो ऽथैतत्पितृभ्यो ददाति तस्मादुद्वास्याग्नौ द्वे ऽआहुती जुहोति देवेभ्यः ॥ ११॥ स वा ऽअग्नये च सोमाय च जुहोति । स यदग्नये जुहोति सर्वत्र ह्येवाग्निरन्वाभक्तो ऽथ यत्सोमाय जुहोति पितृदेवत्यो वै सोमस्तस्मादग्नये च सोमाय च जुहोति ॥ १२॥ स जुहोति । अग्नये कव्यवाहनाय स्वाहा सोमाय पितृमते स्वाहेत्यग्नौ मेक्षणमभ्यादधाति तत्स्विष्टकृद्भाजनमथ दक्षिणेनान्वाहार्यपचनꣳ सकृदुल्लिखति तद्वेदिभाजनꣳ सकृदु ह्येव पराञ्चः पितरस्तस्मात्सकृदुल्लिखति ॥ १३॥ अथ परस्तादुल्मुकं निदधाति । स यदनिधायोल्मुकमथैतत्पितृभ्यो दद्यादसुररक्षसानि हैषामेतद्विमथ्नीरंस्तथो हैतत्पितॄणामसुररक्षसानि न विमथ्नते तस्मात्परस्तादुल्मुकं निदधाति ॥ १४॥ स निदधाति । ये रूपाणि प्रतिमुञ्चमाना असुराः सन्तः स्वधया चरन्ति । परापुरो निपुरो ये भरन्त्यग्निष्टांल्लोकात्प्रणुदात्यस्मादित्यग्निर्हि रक्षसामपहन्ता तस्मादेवं निदधाति ॥ १५॥ अथोदपात्रमादायावनेजयति । असाववनेनिक्ष्वेत्येव यजमानस्य पितरमसाववनेनिक्ष्वेति पितामहमसाववनेनिक्ष्वेति प्रपितामहं तद्यथाशिष्यते ऽभिषिञ्चेदेवं तत् ॥ १६॥ अथ सकृदाच्छिन्नान्युपमूलं दिनानि भवन्ति । अग्रमिव वै देवानां मध्यमिव

मनुष्याणां मूलमिव पितृणां तस्मादुपमूलं दिनानि भवन्ति सकृदाछिन्नानि भवन्ति सकृदु ह्येव पराञ्चः पितरस्तस्मात्सकृदाछिन्नानि भवन्ति ॥१७॥ तानि दक्षिणोपस्तृणाति । तत्र ददाति स वाऽइति ददातीतीव वै देवेभ्यो जुह्वत्युद्धरन्ति मनुष्येभ्योऽथैवं पितृणां तस्मादिति ददाति ॥१८॥ स ददाति । असावेतत्तऽइत्येव यजमानस्य पित्रे ये च त्वामन्वित्यु हैकऽआहुस्तदु तथा न ब्रूयात्स्वयं वै तेषां सह येषां सह तस्माद् ब्रूयादसावेतत्तऽइत्येव यजमानस्य पित्रेऽसावेतत्तऽइति पितामहायासावेतत्तऽइति प्रपितामहाय तद्यदितः पराग्ददाति सकृदु ह्येव पराञ्चः पितरः ॥१९॥ तत्र जपति । अत्र पितरो मादयध्वं यथाभागमावृषायध्वमिति यथाभागमश्नीतेत्येवैतदाह ॥२०॥ अथ पराङ् पर्यावर्तते । तिर-इव वै पितरो मनुष्येभ्यस्तिर-इवैतद्भवति स वाऽआ तमितोरासीतेत्याहुरेतावान्ह्यसुरिति स वै मुहूर्तमेवासित्वा ॥२१॥ अथोपपल्यय्य जपति । अमीमदन्त पितरो यथाभागमावृषायिषतेति यथाभागमाशिषुरित्येवैतदाह ॥२२॥ अथोदपात्रमादायावनेजयति । असाववनेनिक्ष्वेत्येव यजमानस्य पितरमसाववनेनिक्ष्वेति पितामहमसाववनेनिक्ष्वेति प्रपितामहं तद्यथा जक्षुषेऽभिषिञ्चेदेवं तत् ॥२३॥ अथ नीविमुद्वृह्य नमस्करोति । पितृदेवत्या वै नीविस्तस्मान्नीविमुद्वृह्य नमस्करोति यज्ञो वै नमो यज्ञियानेवैनानेतत्करोति षट् कृत्वो नमस्करोति षड्वाऽऋतव ऋतवः पितरस्तस्मात्षट् कृत्वो नमस्करोति गृहान्नः पितरो दत्तेति गृहाणां ह पितर ईशतऽएषोऽएतस्याशीः कर्मणोऽथावजिघ्रति प्रत्यवधाय पिण्डान्त्स यजमानभागोऽग्नौ सकृदाछिन्नान्यभ्यादधाति पुनरुल्मुकमपि सृजति ॥२४॥ ब्राह्मणम् ॥४[४. २.]॥ ॥

तदु होवाच कहोडः कौषीतकिः । अनयोर्वाऽअयं द्यावापृथिव्यो रसोऽस्य रसस्य हुत्वा देवेभ्योऽथेममश्नामेति तस्माद्वाऽआग्रयणेष्ट्या यजतऽइति ॥१॥ तदु

होवाच याज्ञवल्क्यः । देवाश्च वाऽअसुराश्चोभये प्राजापत्याः पस्पृधिरे ततोऽसुरा उभयीरोषधीर्याश्च मनुष्या उपजीवन्ति याश्च पशवः कृत्ययेव त्वद्विषेणेव त्वत्प्रलिलिपुरुतैवं चिद्देवानभिभवेमेति ततो न मनुष्या आशुर्न पशव आलिलिशिरे ता हेमाः प्रजा अनाशकेन नोत्पराबभूवुः ॥२॥ तद्ध देवाः शुश्रुवुः । अनाशकेन ह वाऽइमाः प्रजाः पराभवन्तीति ते होचुर्हन्तेदमासामपजिघाꣳसामेति केनेति यज्ञेनैवेति यज्ञेन ह स्म वै तद्देवाः कल्पयन्ते यदेषां कल्पमासऽर्षयश्च ॥३॥ ते होचुः । कस्य न इदं भविष्यतीति ते मम-ममेत्येव न सम्पादयां चक्रुस्ते हासम्पाद्योचुराजिमेवास्मिन्नजामहै स यो न उज्जेष्यति तस्य न इदं भविष्यतीति तथेति तस्मिन्नाजिमाजन्त ॥४॥ ताविन्द्राग्नीऽउदजयतां । तस्मादैन्द्राग्नो द्वादशकपालः पुरोडाशो भवतीन्द्राग्नी ह्यस्य भागधेयमुदजयतां तौ यत्रेन्द्राग्नीऽउज्जिगीवाꣳसौ तस्थतुस्तद्विश्वे देवा अन्वाजग्मुः ॥५॥ क्षत्रं वाऽइन्द्राग्नी । विशो विश्वे देवा यत्र वै क्षत्रमुज्जयत्यन्वाभक्ता वै तत्र विट्तद्विश्वान्देवानन्वाभजतां तस्मादेष वैश्वदेवश्चरुर्भवति ॥६॥ तं वै पुराणानां कुर्यादित्याहुः । क्षत्रं वाऽइन्द्राग्नी नेत्क्षत्रमभ्यारोहयाणीति तौ वाऽउभावेव नवानाꣳ स्यातां यद्धि पुरोडाश इतरश्चरुरितरस्तेनैव क्षत्रमनभ्यारूढꣳ तस्मादुभावेव नवानाꣳ स्याताम् ॥७॥ तऽउ ह विश्वे देवा ऊचुः । अनयोर्वाऽअयं द्यावापृथिव्यो रसो हन्तेमऽअस्मिन्नाभजामेति ताभ्यामेतं भागमकल्पयन्नेतं द्यावापृथिव्यमेककपालं पुरोडाशं तस्माद्द्यावापृथिव्य एककपालः पुरोडाशो भवति तस्येयमेव कपालमेकेव हीयं तस्मादेककपालो भवति ॥८॥ तस्य परिचक्षा । यस्यै वै कस्यै च देवतायै हविर्गृह्यते सर्वत्रैव स्विष्टकृदन्वाभक्तोऽथैतꣳ सर्वमेव जुहोति न स्विष्टकृतेऽवद्यति सा परिचक्षोतो हुतः पर्यावर्तते ॥९॥ तदाहुः । पर्याभूद्वाऽअयमेककपालो मोहिष्यति राष्ट्रमिति नास्य सा परिचक्षाहवनीयो वाऽआहुतीनां प्रतिष्ठा स यदाहवनीयं प्राप्यापि

दश कृत्वः पर्यावर्तेत न तदाद्रियेत यदीत्वन्ये वदन्ति कस्तत्संधमुपेयात्तस्मादाज्यस्यैव यजेदाज्यꣳ ह वाऽअनयोर्द्यावापृथिव्योः प्रत्यक्षꣳ रसस्तत्प्रत्यक्षमेवैनेऽएतत्स्वेन रसेन मेधेन प्रीणाति तस्मादाज्यस्यैव यजेत् ॥१०॥ एतेन वै देवाः । यज्ञेनेष्ट्वोभयीनामोषधीनां याश्च मनुष्या उपजीवन्ति याश्च पशवः कृत्यामिव त्वद्विषमिव त्वदपजघ्नुस्तत आश्नन्मनुष्या आलिशन्त पशवः ॥११॥ अथ यदेष एतेन यजते । तन्नाह न्वेवैतस्य तथा कश्चन कृत्ययेव त्वद्विषेणेव त्वत्प्रलिम्पतीति देवा अकुर्वन्निति न्वेवैष एतत्करोति यमु चैव देवा भागमकल्पयन्त तमु चैवैभ्य एष एतद्भागं करोतीमा उ चैवैतदुभयीरोषधीर्याश्च मनुष्या उपजीवन्ति याश्च पशवस्ता अनमीवा अकिल्बिषाः कुरुते ता अस्यानमीवा अकिल्बिषा इमाः प्रजा उपजीवन्ति तस्माद्वाऽएष एतेन यजते ॥१२॥ तस्य प्रथमजो गौर्दक्षिणा । अग्र्यमिव ह्येतद्ꣳ स यदीजानः स्याद्दर्शपूर्णमासाभ्यां वा यजेताथैतेन यजेत यद्युऽअनीजानः स्याच्चातुष्प्राश्यमेवैतमोदनमन्वाहार्यपचने पचेयुस्तं ब्राह्मणा अश्नीयुः ॥१३॥ द्वया वै देवा देवाः । अहैव देवा अथ ये ब्राह्मणाः शुश्रुवाꣳसोऽनूचानास्ते मनुष्यदेवास्तद्यथा वषट्कृतꣳ हुतमेवमस्यैतद्भवति तत्रो यद्यद्धुयात्तद्ध्यान्नादक्षिणꣳ हविः स्यादिति ह्याहुर्नाग्निहोत्रे जुहुयात्समदꣳ ह कुर्याद्यदग्निहोत्रे जुहुयादन्यद्वाऽआग्रयणमन्यदग्निहोत्रं तस्मान्नाग्निहोत्रे जुहुयात् ॥१४॥ ब्राह्मणम् ॥५ [४.३.]॥

तृतीयः प्रपाठकः ॥ ॥ कण्डिकासंख्या ११३ ॥ ॥

प्रजापतिर्ह वाऽएतेनाग्रे यज्ञेनेजे । प्रजाकामो बहुः प्रजया पशुभिः स्याꣳ श्रियं गच्छेयं यशः स्यामन्नादः स्यामिति ॥१॥ स वै दक्षो नाम । तद्यदेनेन सोऽग्रेऽयजत तस्माद्दाक्षायणयज्ञो नामैतेनमेके वसिष्ठयज्ञ इत्याचक्षतऽएष वै वसिष्ठ एतमेव तदन्वाचक्षते स एतेन यज्ञेनेजे स एतेन यज्ञेनेष्ट्वा येयं प्रजापतेः प्रजातिर्या श्रीरेतद्बभूवैताꣳ ह वै प्रजातिं प्रजायतऽएताꣳ श्रियं गच्छति य एवं विद्वाने-

तेन यज्ञेन यजते तस्माद्वाऽएतेन यजेत ॥२॥ तेनो ह तत ईजे । प्रतीदर्शः श्वै-
क्नः स ये तं प्रत्यासुस्तेषां विवचनमिवास विवचनमिव ह वै भवति य एवं
विद्वानेतेन यज्ञेन यजते तस्माद्वाऽएतेन यजेत ॥३॥ तमाजगाम । सुप्ला सार्ञ्जयो
ब्रह्मचर्यं तस्मादेतं च यज्ञमनूचेऽन्यमु च सोऽनूच्य पुनः सृञ्जयाञ्जगाम ते ह सृ-
ञ्जया विदां चक्रुर्यज्ञं वै नोऽनूच्यागन्निति ते होचुः सह वै नस्तद्देवैरागन्यो नो
यज्ञमनूच्यागन्निति स वै सहदेवः सार्ञ्जयस्तदप्येतन्निवचनमिवास्त्यथन्यद्वाऽअग्रे सु-
प्ला नाम दधऽइति स एतेन यज्ञेनेजे स एतेन यज्ञेनेष्ट्वा येयं सृञ्जयानां प्रजातिर्या
श्रीरेतद्बभूवैतां ह वै प्रजातिं प्रजायतऽएतां श्रियं गच्छति य एवं विद्वानेतेन
यज्ञेन यजते तस्माद्वाऽएतेन यजेत ॥४॥ तेनो ह तत ईजे । देवभागः श्रौतर्षः
स उभयेषां कुरूणां च सृञ्जयानां च पुरोहित आस परमता वै सा यो न्वेवैकस्य
राष्ट्रस्य पुरोहितोऽसत्सा न्वेव परमता किमु यो द्वयोः परमतामिव ह वै गच्छ-
ति य एवं विद्वानेतेन यज्ञेन यजते तस्माद्वाऽएतेन यजेत ॥५॥ तेनो ह तत
ईजे । दक्षः पार्वतिस्तऽइमेऽप्येतर्हि दाक्षायणा राज्यमिवैव प्राप्ता राज्यमिव ह वै
प्राप्नोति य एवं विद्वानेतेन यजते तस्माद्वाऽएतेन यजेत स वाऽएकैक एवानू-
चीनाहं पुरोडाशो भवत्येतेनो हास्यासपत्नानुपबाधा श्रीर्भवति स वै द्वे पौर्ण-
मास्यौ यजते द्वेऽअमावास्ये द्वे वै मिथुनं मिथुनमेवैतत्प्रजननं क्रियते ॥६॥ अथ
यत्पूर्वेद्युः । अग्नीषोमीयेण यजते पौर्णमास्यां ते द्वे देवते द्वे वै मिथुनं मिथुनमे-
वैतत्प्रजननं क्रियते ॥७॥ अथ प्रातः । आग्नेयः पुरोडाशो भवत्यैन्द्रं सांनाय्यं
ते द्वे देवते द्वे वै मिथुनं मिथुनमेवैतत्प्रजननं क्रियते ॥८॥ अथ यत्पूर्वेद्युः । ऐ-
न्द्राग्नेन यजतेऽमावास्यायां ते द्वे देवते द्वे वै मिथुनं मिथुनमेवैतत्प्रजननं क्रियते
॥९॥ अथ प्रातः । आग्नेयः पुरोडाशो भवति मैत्रावरुणी पयस्या नेत्प्रजादयानी-
ति न्वेवाग्नेयः पुरोडाशोऽथैतावेव मित्रावरुणौ द्वे देवते द्वे वै मिथुनं मिथुनमे-

वैतत्प्रजननं क्रियतऽएतद्ध ह्यस्य तद्रूपं येन बहुर्भवति येन प्रजायते ॥१०॥ अथ यत्पूर्वेद्युः । अग्नीषोमीयेण यजते पौर्णमास्यां यमेवामुमुपवसथेऽग्नीषोमीयं पशुमालभते स एवास्य सः ॥११॥ अथ प्रातः । आग्नेयः पुरोडाशो भवत्यैन्द्रꣳ सांनाय्यं प्रातःसवनमेवास्याग्नेयः पुरोडाश आग्नेयꣳ हि प्रातःसवनमथैन्द्रꣳ सांनाय्यं माध्यन्दिनमेवास्य तत्सवनमैन्द्रꣳ हि माध्यन्दिनꣳ सवनम् ॥१२॥ अथ यत्पूर्वेद्युः । ऐन्द्राग्नेन यजतेऽमावास्यायां तृतीयसवनमेवास्य तद्वैश्वदेवं वै तृतीयसवनमिन्द्राग्नी वै विश्वे देवाः ॥१३॥ अथ प्रातः । आग्नेयः पुरोडाशो भवति मैत्रावरुणी पयस्या नेद्यज्ञादयानीति न्वेवाग्नेयः पुरोडाशोऽथ यामेवामूं मैत्रावरुणीं वशामनूबन्ध्यामालभते सैवास्य मैत्रावरुणी पयस्या स पौर्णमासेन चामावास्येन चेष्ट्वा यावत्सौम्येनाध्वरेणेष्ट्वा जयति तावज्जयति तद्ध खलु महायज्ञो भवति ॥१४॥ अथ यत्पूर्वेद्युः । अग्नीषोमीयेण यजते पौर्णमास्यामेतेन वाऽइन्द्रो वृत्रमहन्नेतेनोऽएव व्यजयत यास्येयं विजितिस्तां तथोऽएवैष एतेन पाप्मानं द्विषन्तं भ्रातृव्यꣳ हन्ति तथोऽएव विजयतेऽथ यत्संनयत्यामावास्यं वै सांनाय्यं दूरे तद्यदमावास्येति क्षिप्रऽएवैतद्वृत्रं जघ्नुषे तमेतेन रसेनाप्रीणन्क्षिप्रे ह वै पाप्मानमपहते य एवं विद्वान्पौर्णमास्याꣳ संनयत्येष वै सोमो राजा देवानामन्नं यच्चन्द्रमास्तमेतत्पूर्वेद्युरभिषुण्वन्ति प्रातर्भक्षयिष्यन्तस्तमेतद्भक्षयन्ति यदपक्षीयते ॥१५॥ अथ यत्पूर्वेद्युः । अग्नीषोमीयेण यजते पौर्णमास्यामभिषुणोत्येवैनमेतत्तस्मिन्नभिषुतऽएतꣳ रसं दधात्येतेन रसेन तीव्रीकरोति स्वदयति ह वै देवेभ्यो हव्यꣳ स्वदते हास्य देवेभ्यो हव्यं य एवं विद्वान्पौर्णमास्याꣳ संनयति ॥१६॥ अथ यत्पूर्वेद्युः । ऐन्द्राग्नेन यजतेऽमावास्यायां दर्शपूर्णमासयोर्वै देवते स्त इन्द्राग्नीऽएव तेऽएवैतदञ्जसा प्रत्यक्षं यजत्यञ्जसा ह वाऽअस्य दर्शपूर्णमासाभ्यामिष्टं भवति य एवमेतद्वेद ॥१७॥ अथ प्रातः । आग्नेयः पुरोडाशो भवति मैत्रावरुणी पयस्या नेद्यज्ञादयानी-

ति न्वेवाग्नेयः पुरोडाशोऽथैतावेवार्धमासौ मित्रावरुणौ य एवापूर्यते स वरुणो
योऽपक्षीयते स मित्रस्तावेताꣳ रात्रिमुभौ समागच्छतस्तदुभावेवैतत्सह सन्तौ प्री-
णाति सर्वꣳ ह वाऽअस्य प्रीतं भवति सर्वमाप्तं य एवमेतद्वेद ॥१८॥ तद्वाऽए-
ताꣳ रात्रिं । मित्रो वरुणे रेतः सिञ्चति तदेतेन रेतसा प्रजायते यदापूर्यते तस्य-
देषात्र मैत्रावरुणी पयस्यावक्लृप्ततमा भवति ॥१९॥ सांनाय्यभाजना वाऽअमावा-
स्या । तददस्तत्पौर्णमास्यां क्रियते स यद्वात्रापि संनयेज्जामि कुर्यात्समदं कुर्यात्त-
देनमद्य ओषधिभ्यः सम्भृत्याक्कृतिभ्योऽधिजनयति स एष आक्कृतिभ्यो जातः प-
श्चाद्ददृशे ॥२०॥ मिथुनादिद्वाऽएनमेतत्प्रजनयति । योषा पयस्या रेतो वाजिनं त-
द्वाऽअनुष्ठ्या यन्मिथुनाज्जायते तदेनमेतस्मान्मिथुनात्प्रजननात्प्रजनयति तस्मादेषा-
त्र पयस्या भवति ॥२१॥ अथ वाजिभ्यो वाजिनं जुहोति । ऋतवो वै वाजिनो
रेतो वाजिनं तदनुष्ठ्यैवैतद्रेतः सिच्यते तदृतवो रेतः सिक्तमिमाः प्रजाः प्रजनय-
न्ति तस्माद्वाजिभ्यो वाजिनं जुहोति ॥२२॥ स वै पश्चादिव यज्ञस्य जुहोति । प-
श्चाद्वै परीत्य वृषा योषामधिद्रवति तस्याꣳ रेतः सिञ्चति स वै प्रागेवाग्रे जुहो-
त्यग्ने वीहीत्यनुवषट्करोति तत्स्विष्टकृद्भाजनꣳ स वै प्रागेव जुहोति ॥२३॥ अथ
दिशो व्याघारयति । दिशः प्रदिश आदिशो विदिश उद्दिशो दिग्भ्यः स्वाहेति
पञ्च दिशः पञ्चऽर्तवस्तदृतुभिरेवैतद्दिशो मिथुनीकरोति ॥२४॥ तद्वै पञ्चैव भक्ष-
यन्ति । होता चाध्वर्युश्च ब्रह्मा चाग्नीच्च यजमानः पञ्च वाऽऋतवस्तदृतूनामेवैतद्रूपं
क्रियते तदृतुष्वेवैतद्रेतः सिक्तं प्रतिष्ठापयति प्रथमो यजमानो भक्षयति प्रथमो रेतः
परिगृह्णानीत्यथोऽअप्युत्तमो मय्युत्तमे रेतः प्रतितिष्ठादित्युपह्वत उपह्वयस्वेति सो-
ममेवैतत्कुर्वन्ति ॥२५॥ ब्राह्मणम् ॥१[४.४.]॥ अध्यायः ॥४[१३.]॥ ॥

प्रजापतिर्ह वाऽइदमग्रऽएक एवास । स ऐक्षत कथं नु प्रजायेयेति सोऽश्रा-
म्यत्स तपोऽतप्यत स प्रजा असृजत ता अस्य प्रजाः सृष्टाः पराबभूवुस्तानीमानि

वयाꣳसि पुरुषो वै प्रजापतेर्नेदिष्ठं द्विपाद्वा ऽअयं पुरुषस्तस्माद्विपादो वयाꣳसि
॥१॥ स ऐक्षत प्रजापतिः । यथा न्वेव पुरैकोऽभूवमेवमु न्वेवाप्येतर्ह्येक एवास्मी-
ति स द्वितीयाः ससृजे ता अस्य परैव बभूवुस्तदिदं क्षुद्रꣳ सरीसृपं यदन्यत्सर्पे-
भ्यस्तृतीयाः ससृजऽइत्याहुस्ता अस्य परैव बभूवुस्तऽइमे सर्पा एता ह न्वेव
द्वयीर्याज्ञवल्क्य उवाच त्रयीरु तु पुनरृचा ॥२॥ सोऽर्चञ्छ्राम्यन्प्रजापतिरीक्षां च-
क्रे । कथं नु मे प्रजाः सृष्टाः पराभवन्तीति स हैतदेव ददर्शानशनतया वै मे प्र-
जाः पराभवन्तीति स आत्मन एवाग्रे स्तनयोः पय आप्याययां चक्रे स प्रजा अ-
सृजत ता अस्य प्रजाः सृष्टा स्तनावेवाभिपद्य तास्ततः सम्बभूवुस्ता इमा अपरा-
भूताः ॥३॥ तस्मादेतदृषिणाभ्यनूक्तं । प्रजा ह तिस्रोऽअत्यायमीयुरिति तद्याः प-
राभूतास्ता एवैतदभ्यनूक्तं न्यन्या अर्कमभितो विविश्रऽइत्यग्निर्वाऽअर्कस्तद्या इ-
माः प्रजा अपराभूतास्ता अग्निमभितो निविष्टास्ता एवैतदभ्यनूक्तम् ॥४॥ महद्ध
तस्थौ भुवनेष्वन्तरिति । प्रजापतिमेवैतदभ्यनूक्तं पवमानो हरित आविवेशेति दि-
शो वै हरितस्ता अयं वायुः पवमान आविष्टस्ता एवैषऽर्गभ्यनूक्ता ता इमाः प्र-
जास्तथैव प्रजायन्ते यथैव प्रजापतिः प्रजा असृजतेदꣳ हि यदेव स्त्रियै स्तनावा-
प्यायेतेऽऊधः पशूनामथैव यज्जायते तज्जायते तास्तत स्तनावेवाभिपद्य सम्भव-
न्ति ॥५॥ तद्धि पय एवान्नम् । एतद्ध्यग्रे प्रजापतिरन्नमजनयत तद्वाऽअन्नमेव प्रजा
अन्नाद्धि सम्भवन्तीदꣳ हि यासां पयो भवति स्तनावेवाभिपद्य तास्ततः सम्भव-
न्त्यथ यासां पयो न भवति जातमेव ता अथादयन्ति तदु ता अन्नादेव सम्भवन्ति
तस्मादन्नमेव प्रजाः ॥६॥ स यः प्रजाकामः । एतेन हविषा यजतऽआत्मानमेवै-
तद्यज्ञं विधत्ते प्रजापतिं भूतꣳ ॥७॥ ॥ शतम् १२०० ॥ ॥ स वाऽआग्नेयोऽष्टाक-
पालः पुरोडाशो भवति । अग्निर्वै देवतानां मुखं प्रजनयिता स प्रजापतिस्तस्मा-
दाग्नेयो भवति ॥८॥ अथ सौम्यश्चरुर्भवति । रेतो वै सोमस्तदग्नौ प्रजनयितरि

सोमꣳ रेतः सिञ्चति तत्पुरस्तान्मिथुनं प्रजननम् ॥ ९॥ अथ सावित्रः । द्वादशक-
पालो वाष्टाकपालो वा पुरोडाशो भवति सविता वै देवानां प्रसविता प्रजाप-
तिर्मध्यतः प्रजनयिता तस्मात्सावित्रो भवति ॥ १०॥ अथ सारस्वतश्चरुर्भवति ।
पौष्णश्चरुर्योषा वै सरस्वती वृषा पूषा तत्पुनर्मिथुनं प्रजननमेतस्माद्वाऽउभयतो
मिथुनात्प्रजननात्प्रजापतिः प्रजाः ससृजऽइतश्चोर्ध्वा इतश्चावाचीस्तथोऽएवैष एत-
स्मादुभयत एव मिथुनात्प्रजननात्प्रजाः सृजतऽइतश्चोर्ध्वा इतश्चावाचीस्तस्माद्वाऽए-
तानि पञ्च हवीꣳषि भवन्ति ॥ ११॥ अथातः पयस्याया एवायतनं । मारुतस्तु स-
प्तकपालो विशो वै मरुतो देवविशस्ता हेदमनिषेद्धा-इव चेरुस्ताः प्रजापतिं य-
जमानमुपेत्योचुर्वि वै ते मथिष्यामहऽइमाः प्रजा या एतेन हविषा स्रक्ष्यसऽइति
॥ १२॥ स ऐक्षत प्रजापतिः । परा मे पूर्वाः प्रजा अभूवन्निमा उ चेदिमे विमथ्नते
न ततः किं चन परिशेक्ष्यतऽइति तेभ्य एतं भागमकल्पयदेतं मारुतꣳ सप्तकपा-
लं पुरोडाशꣳ स एष मारुतः सप्तकपालस्तस्मात्सप्तकपालो भवति सप्त-सप्त हि
मारुतो गणास्तस्मान्मारुतः सप्तकपालः पुरोडाशो भवति ॥ १३॥ तं वै स्वतवो-
भ्य इति कुर्यात् । स्वयꣳ हि तऽएतं भागमकुर्वतेतो स्वतवोभ्यो याज्यानुवाक्ये
न विन्दन्ति स उ खलु मारुत एव स्यात्स वाऽएष प्रजाभ्य एवाहिꣳसायै क्रियते
तस्मान्मारुतः ॥ १४॥ अथातः पयस्यैव । पयसो वै प्रजाः सम्भवन्ति पयसः सम्भू-
तास्तद्यत एव सम्भूता यतः सम्भवन्ति तदेवाभ्य एतत्करोति तद्याः पूर्वैर्हविर्भिः
प्रजाः सृजते ता एतस्मात्पयस एतस्यै पयस्यायै सम्भवन्ति ॥ १५॥ तस्यां मिथुनम-
स्ति । योषा पयस्या रेतो वाजिनं तस्मान्मिथुनाद्विश्वमसंमितमनु प्राजायत तद्य-
देतस्मान्मिथुनाद्विश्वमसंमितमनु प्राजायत तस्माद्वैश्वदेवी भवति ॥ १६॥ अथ द्या-
वापृथिव्य एककपालः पुरोडाशो भवति । एतैर्वै हविर्भिः प्रजापतिः प्रजाः सृष्ट्वा
ता द्यावापृथिवीभ्यां पर्यगृह्णात्ता इमा द्यावापृथिवीभ्यां परिगृहीतास्तथोऽएवैष

एतद्य एतैर्हविर्भिः प्रजाः सृजते ता द्यावापृथिवीभ्यां परिगृह्णाति तस्माद्द्यावा-
पृथिव्य एककपालः पुरोडाशो भवति ॥१७॥ अथात आवृदेव । नोपकिरत्युत्तर-
वेदिं विसृष्टमसत्सर्वमसद्वैश्वदेवमसदिति त्रेधा बर्हिः संनद्धं भवति तत्पुनरेकधे-
तद्धि प्रजननस्य रूपं प्रजननमु ह्येदं पिता माता यज्जायते तत्तृतीयं तस्मात्त्रेधा
तत्पुनरेकधा प्रस्व उपसंनद्धा भवन्ति तं प्रस्तरं गृह्णाति प्रजननमु ह्येदं प्रजनन-
मु हि प्रस्वस्तस्मात्प्रसूः प्रस्तरं गृह्णाति ॥१८॥ आसाद्य हवींष्यग्निं मन्थन्ति ।
अग्निं ह वै जायमानमनु प्रजापतेः प्रजा जज्ञिरे तथोऽएवैतस्याग्निमेव जायमान-
मनु प्रजा जायन्ते तस्मादासाद्य हवींष्यग्निं मन्थन्ति ॥१९॥ नवप्रयाजं भवति ।
नवानुयाजं दशाक्षरा वै विराडथैतामुभयतो न्यूनां विराजं करोति प्रजननायैत-
स्माद्वाऽउभयतो न्यूनात्प्रजननात्प्रजापतिः प्रजाः ससृजऽइतश्चोर्ध्वा इतश्चावाचीस्त-
थोऽएवैष एतस्मादुभयत एव न्यूनात्प्रजननात्प्रजाः सृजतऽइतश्चोर्ध्वा इतश्चावा-
चीस्तस्मान्नवप्रयाजं भवति नवानुयाजम् ॥२०॥ त्रीणि समिष्टयजूंषि भवन्ति ।
ज्याय इव ह्येदं हविर्यज्ञाद्यत्र नवप्रयाजं नवानुयाजमथोऽअप्येकमेव स्याद्धविर्य-
ज्ञो हि तस्य प्रथमजो गौर्दक्षिणा ॥२१॥ एतेन वै प्रजापतिः यज्ञेनेष्ट्वा । येयं प्र-
जापतेः प्रजातिर्या श्रीरेतद्बभूवैतां ह वै प्रजातिं प्रजायतऽएतां श्रियं गच्छति य
एवं विद्वानेतेन यज्ञेन यजते तस्माद्वाऽएतेन यजेत ॥२२॥ ब्राह्मणम् ॥ २ [५.१.] ॥ ॥

वैश्वदेवेन वै प्रजापतिः । प्रजाः ससृजे ता अस्य प्रजाः सृष्टा वरुणस्य यवा-
ञ्जक्षुर्वरुण्यो ह वाऽअग्रे यवस्तद्यन्नेव वरुणस्य यवान्प्रादस्तस्माद्वरुणप्रघासा
नाम ॥१॥ ता वरुणो जग्राह । ता वरुणगृहीताः परिदीर्णा अनत्यश्च प्राणत्य-
श्च शिश्यिरे च निषेदुश्च प्राणोदानौ हैवाभ्यो नापचक्रमतुरथान्याः सर्वा देवता
अपचक्रमुस्तयोर्हैवास्य हेतोः प्रजा न पराबभूवुः ॥२॥ ता एतेन हविषा प्रजा-
पतिरभिषज्यत् । तद्याश्चैवास्य प्रजा जाता आसन्याश्चाजातास्ता उभयीर्वरुणपाशा-

त्प्रामुञ्चत्ता अस्यानमीवा अकिल्बिषाः प्रजाः प्राजायत ॥३॥ अथ यदेष एतैश्चतु-
र्थे मासि यजते । तन्नाह न्वेवैतस्य तथा प्रजा वरुणो गृह्णातीति देवा अकुर्व-
न्निति न्वेवैष एतत्करोति याश्च न्वेवास्य प्रजा जाता याश्चाजातास्ता उभयीर्वरु-
णपाशात्प्रमुञ्चति ता अस्यानमीवा अकिल्बिषाः प्रजाः प्रजायते तस्माद्वा ऽएष ए-
तैश्चतुर्थे मासि यजते ॥४॥ तद्वै द्वे वेदी द्वावग्नी भवतः । तद्यद्द्वे वेदी द्वावग्नी भ-
वतस्तदुभयत एवैतद्वरुणपाशात्प्रजाः प्रमुञ्चतीतश्चोर्ध्वा इतश्चावाचीस्तस्माद्द्वे वेदी
द्वावग्नी भवतः ॥५॥ स उत्तरस्यामेव वेदौ । उत्तरवेदिमुपकिरति न दक्षिणस्यां
क्षत्रं वै वरुणो विशो मरुतः क्षत्रमेवैतद्विश उत्तरं करोति तस्मादुपर्यासीनं क्ष-
त्रियमधस्तादिमाः प्रजा उपासते तस्मादुत्तरस्यामेव वेदा ऽउत्तरवेदिमुपकिरति न
दक्षिणस्याम् ॥६॥ अथैतान्येव पञ्च हवीꣳषि भवन्ति । एतैर्वै हविर्भिः प्रजाप-
तिः प्रजा असृजतैतैरुभयतो वरुणपाशात्प्रजाः प्रामुञ्चदितश्चोर्ध्वा इतश्चावाचीस्त-
स्माद्वा ऽएतानि पञ्च हवीꣳषि भवन्ति ॥७॥ अथैन्द्राग्नो द्वादशकपालः पुरोडाशो
भवति । प्राणोदानौ वा ऽइन्द्राग्नी तद्यथा पुण्यं चक्रुषे पुण्यं कुर्यादेवं तत्तयोर्हि-
दास्य हेतोः प्रजा न पराबभूवुस्तत्प्राणोदानाभ्यामेवैतत्प्रजा भिषज्यति प्राणोदा-
नौ प्रजासु दधाति तस्मादैन्द्राग्नो द्वादशकपालः पुरोडाशो भवति ॥८॥ उभयत्र
पयस्ये भवतः । पयसो वै प्रजाः सम्भवन्ति पयसः सम्भूतास्तद्यत एव सम्भूता
यतः सम्भवन्ति तत एवैतदुभयतो वरुणपाशात्प्रजाः प्रमुञ्चतीतश्चोर्ध्वा इतश्चावा-
चीस्तस्मादुभयत्र पयस्ये भवतः ॥९॥ वारुण्युत्तरा भवति । वरुणो ह वा ऽअस्य
प्रजा अगृह्णात्तत्प्रत्यक्षं वरुणपाशात्प्रजाः प्रमुञ्चति मारुती दक्षिणाजामितायै न्वे-
व मारुती भवति जामि ह कुर्याद्यदुभे वारुण्यौ स्यातामतो ह वा ऽअस्य दक्षि-
णतो मरुतः प्रजा अजिघाꣳसंस्तानेतेन भागेनाशमयत्तस्मान्मारुती दक्षिणा ॥१०॥
तयोरुभयोरेव करीराण्यावपति । कं वै प्रजापतिः प्रजाभ्यः करीरैरकुरुत कमु वै-

ष एतत्प्रजाभ्यः कुरुते ॥११॥ तयोरुभयोरेव शमीपलाशान्यावपति । शं वै प्रजापतिः प्रजाभ्यः शमीपलाशैरकुरुत शम्वेवैष एतत्प्रजाभ्यः कुरुते ॥१२॥ अथ काय एककपालः पुरोडाशो भवति । कं वै प्रजापतिः प्रजाभ्यः कायेनैककपालेन पुरोडाशेनाकुरुत कम्वेवैष एतत्प्रजाभ्यः कायेनैककपालेन पुरोडाशेन कुरुते तस्मात्काय एककपालः पुरोडाशो भवति ॥१३॥ अथ पूर्वेद्युः । अन्वाहार्यपचने ऽतुषानिव यवान्कृत्वा तानीषदिवोपतप्य तेषां करम्भपात्राणि कुर्वन्ति यावन्तो गृह्याः स्युस्तावन्त्येकेनातिरिक्तानि ॥१४॥ तत्रापि मेषं च मेषीं च कुर्वन्ति । तयोर्मेषे च मेष्यां च यद्यनैडकीरूर्णा विन्देत्ताः प्रणिह्य निश्लेषयेद्यद्युऽअनैडकीर्न विन्देदथोऽअपि कुशोर्णा एव स्युः ॥१५॥ तद्यन्मेषश्च मेषी च भवतः । एष वै प्रत्यक्षं वरुणस्य पशुर्यन्मेषस्तत्प्रत्यक्षं वरुणपाशात्प्रजाः प्रमुञ्चति यवमयौ भवतो यवान्हि जक्षुषीर्वरुणोऽगृह्णान्मिथुनौ भवतो मिथुनादेवैतद्वरुणपाशात्प्रजाः प्रमुञ्चति ॥१६॥ स उत्तरस्यामेव पयस्यायां मेषीमवदधाति । दक्षिणस्यां मेषमेवमिव हि मिथुनं क्लृप्तमुत्तरतो हि स्त्री पुमाꣳसमुपशेते ॥१७॥ स सर्वाण्येव हवीꣳष्यध्वर्युः । उत्तरस्यां वेदावासादयत्यथैतामेव पयस्यां प्रतिप्रस्थाता दक्षिणस्यां वेदावासादयति ॥१८॥ आसाद्य हवीꣳष्यग्निं मन्थति । अग्निं मन्थित्वानुप्रहृत्याभिजुहोत्यथाध्वर्युरेवाहाग्नये समिध्यमानायानुब्रूहीति ताऽउभावेवेध्मावभ्याधत्त उभौ समिधौ परिशिꣳष्टऽउभौ पूर्वावाघारावाघारयतोऽथाध्वर्युरेवाहाग्निमग्नीत्संमृड्ढीत्यसंमृष्टमेव भवति सम्प्रेषितम् ॥१९॥ अथ प्रतिप्रस्थाता प्रतिपरैति । स पत्नीमुदानेष्यन्पृच्छति केन चरसीति वरुण्यं वाऽएतत्स्त्री करोति यदन्यस्य सत्यन्येन चरत्यथो नेन्मेऽन्तःशल्या जुहवदिति तस्मात्पृच्छति निरुक्तं वाऽएनः कनीयो भवति सत्यꣳ हि भवति तस्मादेव पृच्छति सा यन्न प्रतिजानीत ज्ञातिभ्यो हास्यै तदहितꣳ स्यात् ॥२०॥ तां वाचयति । प्रघासिनो हवामहे मरुतश्च रिशादसः ।

करम्भेण सजोषस इति यथा पुरोऽनुवाक्यैवमेषैतयैवैनानेतेभ्यः पात्रेभ्यो ह्वयति
॥२१॥ तानि वै प्रतिपुरुषं । यावन्तो गृह्याः स्युस्तावन्त्येकेनातिरिक्तानि भवन्ति
तत्प्रतिपुरुषमेवैतदेकैकेन या अस्य प्रजा जातास्ता वरुणपाशात्प्रमुञ्चत्येकेनाति-
रिक्तानि भवन्ति तद्या एवास्य प्रजा अजातास्ता वरुणपाशात्प्रमुञ्चति तस्मादेके-
नातिरिक्तानि भवन्ति ॥२२॥ पात्राणि भवन्ति पात्रेषु ह्यशनमश्यते यवमयानि
भवन्ति यवान्हि जक्षुषीर्वरुणोऽगृह्णाच्छूर्पेण जुहोति शूर्पेण ह्यशनं क्रियते पत्नी
जुहोति मिथुनादेवैतद्वरुणपाशात्प्रजाः प्रमुञ्चति ॥२३॥ पुरा यज्ञात्पुराहुतिभ्यो जु-
होति । अहुतादो वै विशो विशो वै मरुतो यत्र वै प्रजापतेः प्रजा वरुणगृहो-
ताः परिदीर्णा अनत्यश्च प्राणत्यश्च शिश्यिरे च निषेदुश्च तद्धासां मरुतः पाप्मानं
विमेथिरे तथोऽएवैतस्य प्रजानां मरुतः पाप्मानं विमथ्नते तस्मात्पुरा यज्ञात्पुराहु-
तिभ्यो जुहोति ॥२४॥ स वै दक्षिणेऽग्नौ जुहोति । यद्ग्रामे यदरण्यऽइति ग्रामे
वा ह्यरण्ये वैनः क्रियते यत्सभायां यदिन्द्रियऽइति यत्सभायामिति यन्मानुषऽइ-
ति तदाह यदिन्द्रियऽइति यद्देवत्रेति तदाह यदेनश्चकृमा वयमिदं तदवयजामहे
स्वाहेति यत्किं च वयमेनश्चकृमेदं वयं तस्मात्सर्वस्मात्प्रमुच्यामहऽइत्येवैतदाह
॥२५॥ अथैन्द्रीं मरुत्वतीं जपति । यत्र वै प्रजापतेः प्रजानां मरुतः पाप्मानं वि-
मेथिरे तद्धेन्द्रं चक्रऽइमे ह मे प्रजा न विमथ्नीरन्निति ॥२६॥ स एतामैन्द्रीं म-
रुत्वतीमजपत् । क्षत्रं वाऽइन्द्रो विशो मरुतः क्षत्रं वै विशो निषेद्धा निषिद्धा
असन्निति तस्मादैन्द्री ॥२७॥ मो षू णः । इन्द्रात्र पृत्सु देवैरस्ति हि ष्मा ते शु-
ष्मिन्नवयाः । महश्चिद्यस्य मीढुषो यव्या हविष्मतो मरुतो वन्दते गीरिति ॥२८॥
अथैनां वाचयति । अक्रन्कर्म कर्मकृत इत्यक्रन्हि कर्म कर्मकृतः सह वाचा म-
योभुवेति सह हि वाचाक्रन्देवेभ्यः कर्म कृत्वेति देवेभ्यो हि कर्म कृत्वास्तं प्रेत
सचाभुव इत्यन्यतो ह्योऽया सह भवति तस्मादाह सचाभुव इत्यस्तं प्रेतेति ज-

घनार्धो वाऽएष यज्ञस्य यत्पत्नी तामेतत्प्राचीं यज्ञं प्रासीषदद्गृहा वाऽअस्त्यै गृहाः प्रतिष्ठा तद्गृहेष्वेवैनामेतत्प्रतिष्ठायां प्रतिष्ठापयति ॥२९॥ प्रतिपराणीयोदैति प्रतिप्रस्थाता । संमृजन्त्यग्निं संमृष्टेऽग्नौ ताऽउभावेवोत्तरावाघारावाघारयतोऽथाध्वर्युरेवाश्राव्य होतारं प्रवृणीते प्रवृतो होतोत्तरस्यै वेदेर्होतृषदनऽउपविशत्युपविश्य प्रसौति ताऽउभावेव प्रसूतौ स्रुच आदायातिक्रामतोऽतिक्रम्याश्राव्याध्वर्युरेवाह समिधो यजेति यज-यजेति चतुर्थे-चतुर्थे प्रयाजे समानयमानौ नवभिः प्रयाजैश्चरतः ॥३०॥ अथाध्वर्युरेवाहाग्नयेऽनुब्रूहीति । आग्नेयमाज्यभागं ता उभावेव चतुराज्यस्यावदायातिक्रामतोऽतिक्रम्याश्राव्याध्वर्युरेवाहाग्निं यजेति ताऽउभावेव वषट्कृते जुहुतः ॥३१॥ अथाध्वर्युरेवाह सोमायानुब्रूहीति । सौम्यमाज्यभागं ताऽउभावेव चतुराज्यस्यावदायातिक्रामतोऽतिक्रम्याश्राव्याध्वर्युरेवाह सोमं यजेति ताऽउभावेव वषट्कृते जुहुतः ॥३२॥ तद्यत्किं च वाचा कर्तव्यम् । अध्वर्युरेव तत्करोति न प्रतिप्रस्थाता तद्यदध्वर्युरेवाश्रावयतीहेव यत्र वषट्क्रियते ॥३३॥ कृतानुकर एव प्रतिप्रस्थाता । क्षत्रं वै वरुणो विशो मरुतस्तत्क्षत्रायैवैतद्विशं कृतानुकरामनुवर्त्मानं करोति प्रत्युद्यामिनीं ह क्षत्राय विशं कुर्याद्यदपि प्रतिप्रस्थाताश्रावयेत्तस्मान्न प्रतिप्रस्थाताश्रावयति ॥३४॥ पाणावेव प्रतिप्रस्थाता । स्रुचौ कृत्वोपास्तेऽथाध्वर्युरेवैतैर्हविर्भिः प्रचरत्याग्नेयेनाष्टाकपालेन पुरोडाशेन सौम्येन चरुणा सावित्रेण द्वादशकपालेन वाष्टाकपालेन वा पुरोडाशेन सारस्वतेन चरुणा पौष्णेन चरुणैन्द्राग्नेन द्वादशकपालेन पुरोडाशेन ॥३५॥ अथैताभ्यां पयस्याभ्यां प्रचरिष्यन्तौ विपरिहरतः । स यो मेषो भवति मारुत्यां तं वारुण्यामवदधाति या मेषी भवति वारुण्यां तां मारुत्यामवदधाति तद्यदेवं विपरिहरतः क्षत्रं वै वरुणो वीर्यं पुमान्वीर्यमेवैतत्क्षत्रे धत्तोऽवीर्या वै स्त्री विशो मरुतस्तदवीर्यामेवैतद्विशं कुरुतस्तस्मादेवं विपरिहरतः ॥३६॥ अथाध्वर्युरेवाह वरुणाया-

AA

नुब्रूहीति । स उपस्तृणीतऽआज्यमथास्यै वारुण्यै पयस्यायै द्विरवद्यति सोऽन्य-
तरेणावदानेन सह मेषमवदधात्यथोपरिष्टादाज्यस्याभिघारयति प्रत्यनक्त्यवदाने
ऽअतिक्रामत्यतिक्रम्याश्राव्याह वरुणं यजेति वषट्कृते जुहोति ॥३७॥ सव्ये पा-
णावध्वर्युः । स्रुचौ कृत्वा दक्षिणेन प्रतिप्रस्थातुर्वा सोऽन्वारभ्याह मरुद्भ्योऽनुब्रू-
हीत्युपस्तृणीतऽआज्यं प्रतिप्रस्थाताथास्यै मारुत्यै पयस्यायै द्विरवद्यति सोऽन्यत-
रेणावदानेन सह मेषीमवदधात्यथोपरिष्टादाज्यस्याभिघारयति प्रत्यनक्त्यवदाने
ऽअतिक्रामत्यथाध्वर्युरेवाश्राव्याह मरुतो यजेति वषट्कृते जुहोति ॥३८॥ अथा-
ध्वर्युरेव कायेन । एककपालेन पुरोडाशेन प्रचरति कायेनैककपालेन पुरोडाशेन
प्रचर्याध्वर्युरेवाहाग्नये स्विष्टकृतेऽनुब्रूहीति स सर्वेषामेव हविषामध्वर्युः सकृत्स-
कृदवद्यत्यथैतस्याऽएव पयस्यायै प्रतिप्रस्थाता सकृदवद्यत्यथोपरिष्टाद्द्विराज्यस्या-
भिघारयतस्ताऽउभावेवातिक्रामतोऽतिक्रम्याश्राव्याध्वर्युरेवाहाग्निं स्विष्टकृतं यजे-
ति ताऽउभावेव वषट्कृते जुहुतः ॥३९॥ अथाध्वर्युरेव प्राशित्रमवद्यति । इडां
समवदाय प्रतिप्रस्थात्रेऽतिप्रजिहीते तत्रापि प्रतिप्रस्थाता मारुत्यै पयस्यायै द्विर-
भ्यवद्यत्यथोपरिष्टाद्द्विराज्यस्याभिघारयत्युपह्वय मार्जयन्ते ॥४०॥ अथाध्वर्युरेवाह ब्र-
ह्मन्प्रस्थास्यामि । समिधमाधायाग्निमग्नीत्संमृड्ढीति स स्रुचोरेवाध्वर्युः पृषदाज्यं व्या-
नयतेऽथ यदि प्रतिप्रस्थातुः पृषदाज्यं भवति तत्स द्वेधा व्यानयतऽउतो तत्र पृष-
दाज्यं न भवति स यदेवोपभृत्याज्यं तत्स द्वेधा व्यानयते ताऽउभावेवातिक्रामतो
ऽतिक्रम्याश्राव्याध्वर्युरेवाह देवान्यजेति यज-यजेति चतुर्थे-चतुर्थेऽनुयाजे समानय-
मानौ नवभिरनुयाजैश्चरतस्तद्यन्नवप्रयाजं भवति नवानुयाजं तदुभयत एवैतद्वरु-
णपाशात्प्रजाः प्रमुञ्चतीतश्चोर्ध्वा इतश्चावाचीस्तस्मान्नवप्रयाजं भवति नवानुयाजम्
॥४१॥ ताऽउभावेव सादयित्वा स्रुचौ व्यूहतः । स्रुचौ व्युह्य परिधीन्त्समज्य परि-
धिमभिपद्याश्राव्याध्वर्युरेवाहेषिता दैव्या होतारो भद्रवाच्याय प्रेषितो मानुषः सू-

न्नवाकायेति सूक्तवाकꣳ होता प्रतिपद्यतेऽथैताऽउभाविव प्रस्तरौ समुल्लुम्पतऽउ-
भावनुप्रहरत उभौ तृणेऽअपगृह्योपासाते यदा होता सूक्तवाकमाह ॥४२॥ अ-
थाग्नीदाहानुप्रहरेति । ताऽउभावेवानुप्रहरत उभावात्मानाऽउपस्पृशेते ॥४३॥
अथाह संवदस्वेति । अगानग्नीदगञ्छ्रावय श्रौषट् स्वगा दैव्या होतृभ्यः स्वस्तिर्मा-
नुषेभ्यः शं योर्ब्रूहीत्यध्वर्युरेवैतदाह ताऽउभाविव परिधीननुप्रहरत उभौ स्रुचः स-
म्प्रगृह्य स्फ्ये सादयतः ॥४४॥ अथाध्वर्युरेव प्रतिपरेत्य । पत्नीः संयाजयत्युपास्त
ऽएव प्रतिप्रस्थाता पत्नीः संयाज्योदैत्यध्वर्युः ॥४५॥ त्रीणि समिष्टयजूꣳषि जुहो-
ति । तूष्णीमेव प्रतिप्रस्थाता स्रुचं प्रगृह्णाति तद्ये वैश्वदेवेन यजमानयोर्वाससी
परिहिते स्यातां तेऽएवात्रापि स्यातामथास्यै वारुण्यै पयस्यायै ह्वामकर्षमिश्रमा-
दायावभृथं यन्ति वरुण्यं वाऽएतन्निर्वरुणतायै तत्र न साम गीयते न ह्यत्र साम्ना
किं चन क्रियते तूष्णीमेवेत्याभ्यवेत्योपमारयति ॥४६॥ अवभृथ निचुम्पुण । नि-
चेरुरसि निचुम्पुणः । अव देवैर्देवकृतमेनोऽयासिषमव मर्त्यैर्मर्त्यकृतं पुरुराव्णो
देव रिषस्पाहीति कामꣳ हैते यस्मै कामयेत तस्मै दद्यान्न हि दीक्षितवसने भ-
वतः स यथाहिस्त्वचो निर्मुच्येतैवꣳ सर्वस्मात्पाप्मनो निर्मुच्यते ॥४७॥ अथ केश-
श्मश्रूप्त्वा । समारोह्याग्नीऽउद्वसायैव ह्येतेन यजते न हि तदवकल्पते यदुत्तर-
वेदावग्निहोत्रं जुहुयात्तस्मादुद्वस्यति गृहानित्वा निर्मथ्याग्नी पौर्णमासेन यजत
ऽउत्सन्नयज्ञ-इव वाऽएष यच्चातुर्मास्यान्यथैष कॢप्तः प्रतिष्ठितो यज्ञो यत्पौर्णमासं
तत्कॢप्तेनैवैतद्यज्ञेनान्ततः प्रतितिष्ठति तस्मादुद्वस्यति ॥४८॥ ब्राह्मणम् ॥३ [५.
२.]॥ ॥

वरुणप्रघासैर्वै प्रजापतिः । प्रजा वरुणपाशात्प्रामुञ्चत्ता ऽस्यानमीवा अकि-
ल्बिषाः प्रजाः प्राजायन्ताथैतैः साकमेधैरेतैर्वै देवा वृत्रमघ्नन्नेतैर्वेव व्यजयन्त ये-
यमेषां विजितिस्तां तथोऽएवैष एतैः पाप्मानं द्विषन्तं भ्रातृव्यꣳ हन्ति तथोऽएव

विजयते तस्माद्वाऽएष एतैश्चतुर्थे मासि यजते स वै त्र्यहमनूचीनाह्नं यजते ॥१॥
स पूर्वेद्युः । अग्नयेऽनीकवतेऽष्टाकपालं पुरोडाशं निर्वपत्यग्निꣳ ह वै देवा अ-
नीकं कृत्वोपप्रेयुर्वृत्रꣳ हनिष्यन्तः स तेजोऽग्निर्नाव्यथत तथोऽएवैष एतत्पाप्मानं
द्विषन्तं भ्रातृव्यꣳ हनिष्यन्नग्निमेवानीकं कृत्वोपप्रैति स तेजोऽग्निर्न व्यथते तस्माद-
ग्नयेऽनीकवते ॥२॥ अथ मरुद्भ्यः सांतपनेभ्यः । मध्यन्दिने चरुं निर्वपति मरुतो
ह वै सांतपना मध्यन्दिने वृत्रꣳ संतेपुः स संतप्तोऽनन्नेव प्राणन्परिदीर्णः शिश्ये
तथोऽएवैतस्य पाप्मानं द्विषन्तं भ्रातृव्यं मरुतः सांतपनाः संतपन्ति तस्मान्मरुद्भ्यः
सांतपनेभ्यः ॥३॥ अथ मरुद्भ्यो गृहमेधिभ्यः । शाखया वत्सानपाकृत्य पवित्रवति
संदोह्य तं चरुꣳ श्रपयति चरुरु ह्येव स यत्र क्व च तण्डुलानावपन्ति तन्मेधो
देवा दधिरे प्रातर्वृत्रꣳ हनिष्यन्तस्तथोऽएवैष एतत्पाप्मानं द्विषन्तं भ्रातृव्यꣳ ह-
निष्यन्मेधो धत्ते तद्यत्क्षीरौदनो भवति मेधो वै पयो मेधस्तण्डुलास्तमुभयं मेध-
मात्मन्धत्ते तस्मात्क्षीरौदनो भवति ॥४॥ तस्यावृत् । सैव स्तीर्णा वेदिर्भवति
या मरुद्भ्यः सांतपनेभ्यस्तस्यामेव स्तीर्णायां वेदौ परिधींश्च शकलांश्चोपनिदधति
तथा संदोह्य चरुꣳ श्रपयति श्रपयित्वाभिघार्योद्वासयति ॥५॥ अथ द्वे पिशीले वा
पात्र्यौ वा निर्णेनिजति । तयोरेनं द्वेधोद्धरन्ति तयोर्मध्ये सर्पिरासेचनं कृत्वा स-
र्पिरासिञ्चति स्रुवं च स्रुचं च संमार्ष्ट्येतौऽओदनावादायोदेति स्रुवं च स्रुचं चा-
दायोदेति स इमामेव स्तीर्णां वेदिमभिमृश्य परिधीन्परिधाय यावतः शकलान्का-
मयते तावतोऽभ्यादधात्यथैतौऽओदनावासादयति स्रुवं च स्रुचं चासादयत्युपवि-
शति होता होतृषदने स्रुवं च स्रुचं चाददान आह ॥६॥ अग्नयेऽनुब्रूहीति ।
आग्नेयमाज्यभागꣳ स दक्षिणस्यौदनस्य सर्पिरासेचनाच्चतुराज्यस्यावदायातिक्रामत्य-
तिक्रम्याश्राव्याहाग्निं यजेति वषट्कृते जुहोति ॥७॥ अथाह सोमायानुब्रूहीति ।
सौम्यमाज्यभागꣳ स उत्तरस्यौदनस्य सर्पिरासेचनाच्चतुराज्यस्यावदायातिक्रामत्यति-

क्रम्याश्राव्याह सोमं यजेति वषट्कृते जुहोति ॥ ८॥ अथाह मरुद्भ्यो गृहमेधिभ्यो ऽनुब्रूहीति । स दक्षिणस्यौदनस्य सर्पिरासेचनात्तत आज्यमुपस्तृणीते तस्य द्विरवद्यत्यथोपरिष्टादाज्यस्याभिघारयत्यतिक्रामत्यतिक्रम्याश्राव्याह मरुतो गृहमेधिनो यजेति वषट्कृते जुहोति ॥ ९॥ अथाहाग्नये स्विष्टकृतेऽनुब्रूहीति । स उत्तरस्यौदनस्य सर्पिरासेचनात्तत आज्यमुपस्तृणीते तस्य द्विरवद्यत्यथोपरिष्टादाज्यस्याभिघारयत्यतिक्रामत्यतिक्रम्याश्राव्याहाग्निं स्विष्टकृतं यजेति वषट्कृते जुहोत्यथेडामेवावद्यति न प्राशित्रमुपहूय मार्जयन्तऽएतन्न्वेकमयनम् ॥ १०॥ अथेदं द्वितीयं । सैव स्तीर्णा वेदिर्भवति या मरुद्भ्यः सांतपनेभ्यस्तस्यामेव स्तीर्णायां वेदौ परिधींश्च शकलांश्चोपनिदधति तथा संदोह्य चरुं श्रपयति नेदेव प्रतिविशमाज्यमधिश्रयति श्रपयित्वाभिघार्योद्वास्यानक्ति स्थाल्यामाज्यमुद्वासयति स्रुवं च स्रुचं च संमार्ष्ट्यथैतं सोखमेव चरुमादायोदेति स्थाल्यामाज्यमादायोदेति स्रुवं च स्रुचं चादायोदेति स इमामेव स्तीर्णां वेदिमभिमृश्य परिधीन्परिधाय यावतः शकलान्कामयते तावतोऽभ्यादधात्यथैतं सोखमेव चरुमासादयति स्थाल्यामाज्यमासादयति स्रुवं च स्रुचं चासादयत्युपविशति होता होतृषदने स्रुवं च स्रुचं चाददान आह ॥ ११॥ अग्नयेऽनुब्रूहीति । आग्नेयमाज्यभागं स स्थाल्यै चतुराज्यस्यावदायातिक्रामत्यतिक्रम्याश्राव्याहाग्निं यजेति वषट्कृते जुहोति ॥ १२॥ अथाह सोमायानुब्रूहीति । सौम्यमाज्यभागं स स्थाल्याऽएव चतुराज्यस्यावदायातिक्रामत्यतिक्रम्याश्राव्याह सोमं यजेति वषट्कृते जुहोति ॥ १३॥ अथाह मरुद्भ्यो गृहमेधिभ्योऽनुब्रूहीति । स उपस्तृणीतऽआज्यमथास्य चरोर्द्विरवद्यत्यथोपरिष्टादाज्यस्याभिघारयति प्रत्यनक्त्यवदानेऽअतिक्रामत्यतिक्रम्याश्राव्याह मरुतो गृहमेधिनो यजेति वषट्कृते जुहोति ॥ १४॥ अथाहाग्नये स्विष्टकृतेऽनुब्रूहीति । स उपस्तृणीतऽआज्यमथास्य चरोः सकृदवद्यत्यथोपरिष्टाद्विराज्यस्याभिघारयति न प्रत्यन-

न्यवदानमतिक्रामत्यतिक्रम्याश्राव्याहाग्निᳪ स्विष्टकृतं यजेति वषट्कृते जुहोति
॥ १५ ॥ अथेडामेवावद्यति न प्राशित्रम् । उपहूय प्राश्नन्ति यावन्तो गृह्या हविरु-
च्छिष्टाशाः स्युस्तावन्तः प्राश्नीयुरथोऽअप्यृत्विजः प्राश्नीयुरथोऽअप्यन्ये ब्राह्मणाः प्रा-
श्नीयुर्यदि बहुरोदन स्यादथैतामनिरशितां कुम्भीमपिधाय निदधाति पूर्णदर्वाय मा-
तृभिर्वत्सान्त्समवार्जन्ति तदु पशवो मेधमात्मन्दधते यवाग्वैताᳪ रात्रिमग्निहोत्रं
जुहोति निवान्यां प्रातर्दुहन्ति पितृयज्ञाय ॥ १६ ॥ अथ प्रातर्हुते वाहुते वा । य-
तरथा कामयेत सोऽस्याऽअनिरशितायै कुम्भ्यै दर्व्योपहन्ति पूर्णा दर्वि परापत
सुपूर्णा पुनरापत । वस्नेव विक्रीणावहाऽइषमूर्जᳪ शतक्रताविति यथा पुरोऽनु-
वाक्यैवमेषैतयैवैनमेतस्मै भागाय ह्वयति ॥ १७ ॥ अथऽर्षभमाह्वयितवै ब्रूयात् । स
यदि रुयात्स वषट्कार इत्यु हैकऽआहुस्तस्मिन्वषट्कारे जुहुयादित्यथोऽइन्द्रमेवैत-
त्स्वेन रूपेण ह्वयति वृत्रस्य बधायैतद्वाऽइन्द्रस्य रूपं यदृषभस्तत्स्वेनैवैनमेतद्रूपे-
ण ह्वयति वृत्रस्य बधाय स यदि रुयादा मऽइन्द्रो यज्ञमगन्त्सेन्द्रो मे यज्ञ इति
ह विद्याद्यद्यु न रुयाद्ब्राह्मण एव दक्षिणत आसीनो ब्रूयाज्जुहुधीति सैवैन्द्री
वाक् ॥ १८ ॥ स जुहोति । देहि मे ददामि ते नि मे धेहि नि ते दधे । निहारं
च हरासि मे निहारं निहराणि ते स्वाहेति ॥ १९ ॥ अथ मरुद्भ्यः क्रीडिभ्यः । स-
प्तकपालं पुरोडाशं निर्वपति मरुतो ह वै क्रीडिनो वृत्रᳪ हनिष्यन्तमिन्द्रमागतं
तमभितः परिचिक्रीडुर्महयन्तस्तथोऽएवैतं पाप्मानं द्विषन्तं भ्रातृव्यᳪ हनिष्यन्तम-
भितः परिक्रीडन्ते महयन्तस्तस्मान्मरुद्भ्यः क्रीडिभ्योऽथातो महाहविष एव तद्य-
था महाहविषस्तथो तस्य ॥ २० ॥ ब्राह्मणम् ॥ ४ [५. ३.] ॥ चतुर्थः प्रपाठकः समा-
प्तः ॥ कण्डिकासंख्या १०५ ॥ ॥

महाहविषा ह वै देवा वृत्रं जघ्नुः । तेनोऽएव व्यजयन्त येयमेषां विजिति-
स्तां तथोऽएवैष एतेन पाप्मानं द्विषन्तं भ्रातृव्यᳪ हन्ति तथोऽएव विजयते त-

स्माद्वाऽएष एतेन यजते ॥१॥ तस्यावृत् । उपकिरन्त्युत्तरवेदिं गृह्णन्ति पृषदाज्यं मन्थन्त्यग्निं नवप्रयाजं भवति नवानुयाजं त्रीणि समिष्टयजूꣳषि भवन्त्यथैतान्येव पञ्च हवीꣳषि भवन्ति ॥२॥ स यदाग्नेयोऽष्टाकपालः पुरोडाशो भवति । अग्निना ह वाऽएनं तेजसाघ्नंस्त तेजोऽग्निर्नाव्यथत तस्मादाग्नेयो भवति ॥३॥ अथ यत्सौम्यश्चरुर्भवति । सोमेन ह वाऽएनꣳ राज्ञाघ्नन्त्सोमराजान एव तस्मात्सौम्यश्चरुर्भवति ॥४॥ अथ यत्सावित्रः । द्वादशकपालो वाष्टाकपालो वा पुरोडाशो भवति सविता वै देवानां प्रसविता सवितृप्रसूता हैवैनमघ्नंस्तस्मात्सावित्रो भवति ॥५॥ अथ यत्सारस्वतश्चरुर्भवति । वाग्वै सरस्वती वागु हैवानुममाद प्रहर जहीति तस्मात्सारस्वतश्चरुर्भवति ॥६॥ अथ यत्पौष्णश्चरुर्भवति । इयं वै पृथिवी पूषेयꣳ हैवैनं बधाय प्रतिप्रददावनया हैवैनं प्रतिप्रत्तं जघ्नुस्तस्मात्पौष्णश्चरुर्भवति ॥७॥ अथैन्द्राग्नो द्वादशकपालः पुरोडाशो भवति । एतेन हैवैनमघ्नंस्तेजो वाऽअग्निरिन्द्रियं वीर्यमिन्द्र एताभ्यामेनमुभाभ्यां वीर्याभ्यामघ्नन्ब्रह्म वाऽअग्निः क्षत्रमिन्द्रस्तेऽउभे सꣳरभ्य ब्रह्म च क्षत्रं च सयुजौ कृत्वा ताभ्यामेनमुभाभ्यां वीर्याभ्यामघ्नंस्तस्मादैन्द्राग्नो द्वादशकपालः पुरोडाशो भवति ॥८॥ अथ माहेन्द्रश्चरुर्भवति । इन्द्रो वाऽएष पुरा वृत्रस्य बधादथ वृत्रꣳ हत्वा यथा महाराजो विजिग्यान एवं महेन्द्रोऽभवत्तस्मान्माहेन्द्रश्चरुर्भवति महान्तमु चैवैनमेतत्खलु करोति वृत्रस्य बधाय तस्माद्वेव माहेन्द्रश्चरुर्भवति ॥९॥ अथ वैश्वकर्मण एककपालः पुरोडाशो भवति । विश्वं वाऽएतत्कर्म कृतꣳ सर्वं जितं देवानामासीत्साकमेधैरीजानानां विजिग्यानानां विश्वमु हैवैतस्यैतत्कर्म कृतꣳ सर्वं जितं भवति साकमेधैरीजानस्य विजिग्यानस्य तस्माद्वैश्वकर्मण एककपालः पुरोडाशो भवति ॥१०॥ एतेन वै देवाः । यज्ञेनेष्ट्वा येयं देवानां प्रजातिर्या श्रीरेतद्बभूवुरेताꣳ ह वै प्रजातिं प्रजा-

यतऽएताꣳ श्रियं गच्छति य एवं विद्वानेतेन यज्ञेन यजते तस्माद्वाऽएतेन यजेत ॥ ११ ॥ ब्राह्मणम् ॥ [५. ४.] ॥ अध्यायः ॥ ५ [१४.] ॥ ॥

महाहविषा ह वै देवा वृत्रं जघ्नुः । तेनोऽएव व्यजयन्त येयमेषां विजितिस्तामथ यानेवैषां तस्मिन्त्संग्रामेऽघ्नंस्तान्पितृयज्ञेन समैरयन्त पितरो वै तऽआसंस्तस्मात्पितृयज्ञो नाम ॥ १ ॥ तद्वसन्तो ग्रीष्मो वर्षाः । एते ते ये व्यजयन्त शरद्धेमन्तः शिशिरस्तऽउ ते यान्पुनः समैरयन्त ॥ २ ॥ अथ यदेष एतेन यजते । तन्नाह न्वेवैतस्य तथा कं चन घ्नन्तीति देवा अकुर्वन्निति न्वेवैष एतत्करोति यमु चैवेभ्यो देवा भागमकल्पयंस्तमु चैवेभ्य एष एतद्भागं करोति यानु चैव देवाः समैरयन्त तानु चैवैतदवति स्वानु चैवैतत्पितॄंछ्रेयाꣳसं लोकमुपोन्नयति यदु चैवास्यात्रात्मनोऽचरणेन हन्यते वा मीयते वा तदु चैवास्यैतेन पुनराप्यायते तस्माद्वाऽएष एतेन यजते ॥ ३ ॥ स पितृभ्यः सोमवद्भ्यः । षट्कपालं पुरोडाशं निर्वपति सोमाय वा पितृमते षड्वाऽऋतव ऋतवः पितरस्तस्मात्षट्कपालो भवति ॥ ४ ॥ अथ पितृभ्यो बर्हिषद्भ्यः । अन्वाहार्यपचने धानाः कुर्वन्ति ततोऽर्धाः पिꣳषन्त्यर्धा इत्येव धाना अपिष्टा भवन्ति ता धानाः पितृभ्यो बर्हिषद्भ्यः ॥ ५ ॥ अथ पितृभ्योऽग्निष्वात्तेभ्यः । निवान्यायै दुग्धे सकृदुपमथित एकशलाकया मन्थो भवति सकृदु ह्येव पराञ्चः पितरस्तस्मात्सकृदुपमथितो भवत्येतानि हवीꣳषि भवन्ति ॥ ६ ॥ ॥ शतम् १३०० ॥ ॥ तद्ये सोमेनेजानाः । ते पितरः सोमवन्तोऽथ ये दत्तेन पक्वेन लोकं जयन्ति ते पितरो बर्हिषदोऽथ ये ततो नान्यतरच्चन यानग्निरेव दहन्त्स्वदयति ते पितरोऽग्निष्वात्ता एतऽउ ते ये पितरः ॥ ७ ॥ स जघनेन गार्हपत्यम् । प्राचीनावीती भूत्वा दक्षिणासीन एताꣳ षट्कपालं पुरोडाशं गृह्णाति स तत एवोपोत्थायोत्तरेणान्वाहार्यपचनं दक्षिणा तिष्ठन्नवहन्ति सकृत्फलीकरोति सकृदु ह्येव पराञ्चः पितरस्तस्मात्सकृत्फलीकरोति ॥ ८ ॥ स दक्षिणेव दृषदुपलेऽउपदधाति ।

दक्षिणार्धे गार्हपत्यस्य षट्कपालान्युपदधाति तद्ध्येतां दक्षिणां दिशꣳ सचन्तऽएषा हि दिक्पितॄणां तस्मादेतां दक्षिणां दिशꣳ सचन्ते ॥९॥ अथ दक्षिणेनान्वाहार्यपचनं । चतुःस्रक्तिं वेदिं करोत्यवान्तरदिशोऽनु स्रक्तीः करोति चतस्रो वाऽअवान्तरदिशोऽवान्तरदिशो वै पितरस्तस्मादवान्तरदिशोऽनु स्रक्तीः करोति ॥१०॥ तन्मध्येऽग्निꣳ समादधाति । पुरस्ताद्धि देवाः प्रत्यञ्चो मनुष्यानभ्युपावृत्तास्तस्मात्तेभ्यः प्राङ् तिष्ठञ्जुहोति सर्वतः पितरोऽवान्तरदिशो वै पितरः सर्वत-इव हीमा अवान्तरदिशस्तस्मान्मध्येऽग्निꣳ समादधाति ॥११॥ स तत एव प्राक् स्तम्बयजुर्हरति । स्तम्बयजुर्हृत्वाथेत्येवाग्रे परिगृह्णात्यथेत्यथेति पूर्वेण परिग्राहेण परिगृह्य लिखति हरति यद्धार्यं भवति स तथैवोत्तरेण परिग्राहेण परिगृह्णात्युत्तरेण परिग्राहेण परिगृह्य प्रतिमृज्याह प्रोक्षणीरासादयेत्यासादयन्ति प्रोक्षणीरिध्मं बर्हिरुपसादयन्ति स्रुचः संमार्ष्ट्याज्येनोदेति स यज्ञोपवीती भूत्वाज्यानि गृह्णाति ॥१२॥ तदाहुः । द्विरुपभृति गृह्णीयाद्द्वौ ह्यत्रानुयाजौ भवत इति तदष्टावेव कृत्व उपभृति गृह्णीयान्नेद्यज्ञस्य विधाया अयानीति तस्मादष्टावेव कृत्व उपभृति गृह्णीयादाज्यानि गृहीत्वा स पुनः प्राचीनावीती भूत्वा ॥१३॥ प्रोक्षणीरध्वर्युरादत्ते । स इध्ममेवाग्रे प्रोक्षत्यथ वेदिमथास्मै बर्हिः प्रयच्छन्ति तत्पुरस्ताद्ग्रन्थ्यासादयति तत्प्रोक्ष्योपनिनीय विस्रꣳस्य ग्रन्थिं न प्रस्तरं गृह्णाति सकृदु ह्येव पराञ्चः पितरस्तस्मान्न प्रस्तरं गृह्णाति ॥१४॥ अथ संनहनमनुविस्रꣳस्य । अपसलवि त्रिः परिस्तृणन्पर्येति सोऽपसलवि त्रिः परिस्तीर्य यावत्प्रस्तरभाजनं तावत्परिशिनष्ट्यथ पुनः प्रसलवि त्रिः पर्येति यत्पुनः प्रसलवि त्रिः पर्येति तद्ध्यानेवामूंस्त्रयान्पितॄनन्ववागात्तेभ्य एवैतत्पुनरपोदेतीमꣳ स्वं लोकमभि तस्मात्पुनः प्रसलवि त्रिः पर्येति ॥१५॥ स दक्षिणैव परिधीन्परिदधाति । दक्षिणा प्रस्तरꣳ स्तृणाति नान्तर्दधाति विधृती सकृदु ह्येव पराञ्चः पितरस्तस्मान्नान्तर्दधाति विधृती ॥१६॥ स

तत्र जुहूमासादयति । अथ पूर्वामुपभृतमथ ध्रुवामथ पुरोडाशमथ धाना अथ म-
न्थमासाद्य हवीꣳषि संमृशति ॥१७॥ ते सर्वऽएव यज्ञोपवीतिनो भूत्वा । इत्या-
ध्यजमानश्च ब्रह्मा च पश्चात्परीतः पुरस्तादग्नीत् ॥१८॥ तेनोपाꣳशु चरन्ति । तिर-
इव वै पितरस्तिर-इवैतद्यदुपाꣳशु तस्मादुपाꣳशु चरन्ति ॥१९॥ परिवृते चरन्ति ।
तिर-इव वै पितरस्तिर-इवैतद्यत्परिवृतं तस्मात्परिवृते चरन्ति ॥२०॥ अथेध्म-
मभ्यादधदाह । अग्नये समिध्यमानायानुब्रूहीति स एकामेव होता सामिधेनीं त्रि-
रन्वाह सकृदु ह्येव पराञ्चः पितरस्तस्मादेकाꣳ होता सामिधेनीं त्रिरन्वाह ॥२१॥
सोऽन्वाह । उशन्तस्त्वा निधीमह्युशन्तः समिधीमहि । उशन्नुशत आवह पितॄन्ह-
विषेऽअत्तवऽइत्यथाग्निमावह सोममावह पितॄन्त्सोमवत आवह पितॄन्बर्हिषद
आवह पितॄनग्निष्वात्तानावह देवाꣳ३ऽआज्यपाꣳ३ऽआवहाग्निꣳ होत्रायावह स्वं म-
हिमानमावहेत्यावाह्योपविशति ॥२२॥ अथाश्राव्य न होतारं प्रवृणीते । पि-
तृयज्ञो वाऽअयं नेद्धोतारं पितृषु दधानीति तस्मान्न होतारं प्रवृणीते सीद हो-
तरित्येवाहोपविशति होता होतृषदनऽउपविश्य प्रसौति प्रसूतोऽध्वर्युः स्रुचावा-
दाय प्रत्यङ्ङतिक्रामत्यतिक्रम्याश्राव्याह समिधो यजेति सोऽपबर्हिषश्चतुरः प्रयाजा-
न्यजति प्रजा वै बर्हिर्नेत्प्रजाः पितृषु दधानीति तस्मादपबर्हिषश्चतुरः प्रयाजान्य-
जत्यथाज्यभागाभ्यां चरत्याज्यभागाभ्यां चरित्वा ॥२३॥ ते सर्वऽएव प्राचीनावी-
तिनो भूत्वा । एतैर्वै हविर्भिः प्रचरिष्यन्त इत्याध्यजमानश्च ब्रह्मा च पुरस्तात्प-
रीतः पश्चादग्नीत्तदुताश्रावयत्योꣳ३ स्वधेत्यस्तु स्वधेति प्रत्याश्रावणꣳ स्वधा नम
इति वषट्कारः ॥२४॥ तदु होवाचासुरिः । आश्रावयेयुरेव प्रत्याश्रावयेयुर्वषट्कुर्यु-
र्नेद्यज्ञस्य विधाया अयामेति ॥२५॥ अथाह पितृभ्यः सोमवद्भ्योऽनुब्रूहीति । सो-
माय वा पितृमते स द्वे पुरोऽनुवाक्येऽअन्वाहैकया वै देवान्प्रच्यावयन्ति द्वाभ्यां
पितॄन्त्सकृदु ह्येव पराञ्चः पितरस्तस्माद्द्वे पुरोऽनुवाक्येऽअन्वाह ॥२६॥ स उप-

स्तृणीतऽआज्यम् । अथास्य पुरोडाशस्यावद्यति स तेनैव सह धानानां तेन सह
मन्थस्य तत्सकृदवदधात्यथोपरिष्टाद्द्विराज्यस्याभिघारयति प्रत्यनक्त्यवदानानि ना-
तिक्रामतीत एवोपोत्थायाश्राव्याह पितॄन्त्सोमवतो यजेति वषट्कृते जुहोति ॥२७॥
अथाह पितृभ्यो बर्हिषद्भ्योऽनुब्रूहीति । स उपस्तृणीतऽआज्यमथासां धानानाम-
वद्यति स तेनैव सह मन्थस्य तेन सह पुरोडाशस्य तत्सकृदवदधात्यथोपरिष्टा-
द्द्विराज्यस्याभिघारयति प्रत्यनक्त्यवदानानि नातिक्रामतीत एवोपोत्थायाश्राव्याह
पितॄन्बर्हिषदो यजेति वषट्कृते जुहोति ॥२८॥ अथाह पितृभ्योऽग्निष्वात्तेभ्योऽनु-
ब्रूहीति । स उपस्तृणीतऽआज्यमथास्य मन्थस्यावद्यति स तेनैव सह पुरोडाश-
स्य तेन सह धानानां तत्सकृदवदधात्यथोपरिष्टाद्द्विराज्यस्याभिघारयति प्रत्यनक्त्य-
वदानानि नातिक्रामतीत एवोपोत्थायाश्राव्याह पितॄनग्निष्वात्तान्यजेति वषट्कृते
जुहोति ॥२९॥ अथाहाग्नये कव्यवाहनायानुब्रूहीति । तत्स्विष्टकृते हव्यवाहनो
वै देवानां कव्यवाहनः पितॄणां तस्मादाहाग्नये कव्यवाहनायानुब्रूहीति ॥३०॥
स उपस्तृणीतऽआज्यम् । अथास्य पुरोडाशस्यावद्यति स तेनैव सह धानानां ते-
न सह मन्थस्य तत्सकृदवदधात्यथोपरिष्टाद्द्विराज्यस्याभिघारयति न प्रत्यनक्त्यव
दानानि नातिक्रामतीत एवोपोत्थायाश्राव्याहाग्निं कव्यवाहनं यजेति वषट्कृते
जुहोति ॥३१॥ स यन्नातिक्रामति । इत एवोपोत्थाय जुहोति सकृदु ह्येव परा-
ञ्चः पितरोऽथ यत्सकृत्सकृत्सर्वेषाꣳ हविषाꣳ समवद्यति सकृदु ह्येव पराञ्चः पि-
तरोऽथ यद्व्यतिषङ्गमवदानान्यवद्यत्यृतवो वै पितर ऋतूनेवैतद्व्यतिषजत्यृतून्त्संद-
धाति तस्माद्व्यतिषङ्गमवदानान्यवद्यति ॥३२॥ तद्धैके । एतमेव होत्रे मन्थमाद-
धति तꣳ होतोपह्वयावेव जिघ्रति तं ब्रह्मणे प्रयच्छति तं ब्रह्मावेव जिघ्रति तम-
ग्नीधे प्रयच्छति तमग्नीदवेव जिघ्रत्येतन्न्वेवैतत्कुर्वन्ति यथा ह्येवेतरस्य यज्ञस्येडाप्रा-
शित्रꣳ समवद्यन्त्येवमेवैतस्यापि समवद्येयुस्तामुपह्वयावेव जिघ्रन्ति न प्राश्नन्ति प्रा-

शितव्य इत्येव वयं मन्यामहऽइति ह स्माह्वासुरिर्यस्य कस्य चाग्नौ जुह्वतीति ॥३३॥
अथ यतरो दास्यन्भवति । यद्यध्वर्युर्वा यजमानो वा स उदपात्रमादायापसलवि
त्रिः परिषिञ्चन्पर्येति स यजमानस्य पितरमवनेजयत्यसाववनेनिक्ष्वेत्यसाववने-
निक्ष्वेति पितामहमसाववनेनिक्ष्वेति प्रपितामहं तद्यथाशिष्यतेऽभिषिञ्चेदेवं तत्
॥३४॥ अथास्य पुरोडाशस्यावदाय । सव्ये पाणौ कुरुते धानानामवदाय सव्ये पा-
णौ कुरुते मन्थस्यावदाय सव्ये पाणौ कुरुते ॥३५॥ स येमामवान्तरदिशमनु स्र-
क्तिः । तस्यां यजमानस्य पित्रे ददात्यसावेतत्तऽइत्यथ येमामवान्तरदिशमनु स्रक्ति-
स्तस्यां यजमानस्य पितामहाय ददात्यसावेतत्तऽइत्यथ येमामवान्तरदिशमनु स्र-
क्तिस्तस्यां यजमानस्य प्रपितामहाय ददात्यसावेतत्तऽइत्यथ येमामवान्तरदिशमनु
स्रक्तिस्तस्यां निमृष्टेऽत्र पितरो मादयध्वं यथाभागमावृषायध्वमिति यथाभागमश्नीते-
त्येवैतदाह तद्यदेवं पितृभ्यो ददाति तेनो स्वान्पितॄनेतस्माद्यज्ञान्नान्तरेति ॥३६॥
ते सर्वऽएव यज्ञोपवीतिनो भूत्वा । उदञ्च उपनिष्क्रम्याहवनीयमुपतिष्ठन्ते देवा-
न्वाऽएष उपावर्तते य आहिताग्निर्भवति यो दर्शपूर्णमासाभ्यां यजतेऽथैतत्पितृ-
यज्ञेनेवाचारिषुस्तद्व देवेभ्यो निह्नुवते ॥३७॥ ऐन्द्रीभ्यामाहवनीयमुपतिष्ठन्ते । इ-
न्द्रो ह्याहवनीयोऽक्षन्नमीमदन्त ह्यव प्रिया अधूषत । अस्तोषत स्वभानवो वि-
प्रा नविष्ठया मती योजा न्विन्द्र ते हरी ॥ सुसंदृशं त्वा वयं मघवन्वन्दिषीमहि ।
प्र नूनं पूर्णबन्धुर स्तुतो यासि वशाँ२ऽअनु योजा न्विन्द्र ते हरीऽइति ॥३८॥
अथ प्रतिपरेत्य गार्हपत्यमुपतिष्ठन्ते । मनो न्वाह्वामहे नाराशꣳसेन स्तोमेन । पि-
तॄणां च मन्मभिः ॥ आ न एतु मनः पुनः क्रत्वे दक्षाय जीवसे । ज्योक्च सूर्यं दृशे ॥
पुनर्नः पितरो मनो ददातु दैव्यो जनः । जीवं व्रातꣳ सचेमहीति पितृयज्ञेनेव
वाऽएतदचारिषुस्तद्व खलु पुनर्जीवानपिपद्यन्ते तस्मादाह जीवं व्रातꣳ सचेमही-
ति ॥३९॥ अथ यतरो ददाति । स पुनः प्राचीनावीती भूत्वाभिप्रपद्य जपत्यमीम-

दत्त पितरो यथाभागमावृषायिषतेति यथाभागमाशिषुरित्येवैतदाह ॥४०॥ अथो-
दपात्रमादाय । पुनः प्रसलवि त्रिः परिषिञ्चन्पर्येति स यजमानस्य पितरमवनेज-
यत्यसाववनेनिक्ष्वेत्यसाववनेनिक्ष्वेति पितामहमसाववनेनिक्ष्वेति प्रपितामहं त-
द्यथा जक्षुषेऽभिषिञ्चेदेवं तत्तद्यत्पुनः प्रसलवि त्रिः परिषिञ्चन्पर्येति प्रसलवि न
इदं कर्मानुसंतिष्ठाताऽइति तस्मात्पुनः प्रसलवि त्रिः परिषिञ्चन्पर्येति ॥४१॥ अथ
नीविमुद्वृह्य नमस्करोति । पितृदेवत्या वै नीविस्तस्मान्नीविमुद्वृह्य नमस्करोति
यज्ञो वै नमो यज्ञियानेवैनानेतत्करोति षट्कृत्वो नमस्करोति षड्वाऽऋतव ऋत-
वः पितरस्तदृतुष्वेवैतद्यज्ञं प्रतिष्ठापयति तस्मात्षट्कृत्वो नमस्करोति गृहान्नः पि-
तरो दत्तेति गृहाणां ह पितर ईशतऽएषोऽएतस्याशीः कर्मणः ॥४२॥ ते सर्व
ऽएव यज्ञोपवीतिनो भूत्वा । अनुयाजाभ्यां प्रचरिष्यन्त इत्याद्यजमानश्च ब्रह्मा च
पश्चात्परीतः पुरस्तादग्नीदुपविशति होता होतृषदने ॥४३॥ अथाह ब्रह्मन्प्रस्था-
स्यामि । समिधमाधायाग्निमग्नीत्संमृड्ढीति स्रुचावादाय प्रत्यङ्ङतिक्रामत्यतिक्रम्याश्रा-
व्याह देवान्यजेति सोऽपबर्हिषौ द्वावनुयाजौ यजति प्रजा वै बर्हिर्नेत्प्रजाः पि-
तृषु दधानीति तस्मादपबर्हिषौ द्वावनुयाजौ यजति ॥४४॥ अथ सादयित्वा स्रुचौ
व्यूहति । स्रुचौ व्युह्य परिधीन्त्समज्य परिधिमभिपद्याश्राव्याहेषिता दैव्या होता-
रो भद्रवाच्याय प्रेषितो मानुषः सूक्तवाकायेति सूक्तवाकं होता प्रतिपद्यते ना-
ध्वर्युः प्रस्तरं समुच्छुम्पतीत्येवोपास्ते यदा होता सूक्तवाकमाह ॥४५॥ अथाग्नी-
दाहानुप्रहरेति । स न किं चनानुप्रहरति तूष्णीमेवात्मानमुपस्पृशति ॥४६॥ अ-
थाह संवदस्वेति । अगानग्नीदगंछ्रावय श्रौषट् स्वगा दैव्या होतृभ्यः स्वस्तिर्मानुषे-
भ्यः शं योर्ब्रूहीत्युपस्पृशत्येव परिधीन्नानुप्रहरत्यथैतद्बर्हिरनुसमस्यति परिधींश्च ॥४७॥
तद्धैके । हविरुच्छिष्टमनुसमस्यन्ति तदु तथा न कुर्याद्धुतोच्छिष्टं वाऽएतन्नेद्धुतोच्छिष्टम-
ग्नौ जुहवामेति तस्मादपो वैवाभ्यवहरेयुः प्राश्नीयुर्वा ॥४८॥ ब्राह्मणम् ॥२[६.१.]॥॥

महाहविषा ह वै देवा वृत्रं जघ्नुः । तेनोऽएव व्यजयन्त येयमेषां विजितिस्ता-
मथ यानेवैषां तस्मिन्त्संग्रामऽइषव आर्द्धस्तानेतैरेव शल्यान्निरहरन्त तान्व्यवृहन्त
यत्त्र्यम्बकैरयजन्त ॥१॥ अथ यदेष एतैर्यजते । तन्नाह न्वेवैतस्य तथा कं चनेषु-
रर्हतीति देवा अकुर्वन्निति न्वेवैष एतत्करोति याश्च न्वेवास्य प्रजा जाता याश्चा-
जातास्ता उभयी रुद्रियात्प्रमुञ्चति ता अस्यानमीवा अकिल्बिषाः प्रजाः प्रजायन्ते
तस्माद्वाऽएष एतैर्यजते ॥२॥ ते वै रौद्रा भवन्ति । रुद्रस्य ह्येषुस्तस्माद्रौद्रा भव-
न्त्येककपाला भवन्त्येकदेवत्या असन्निति तस्मादेककपाला भवन्ति ॥३॥ ते वै
प्रतिपुरुषं । यावन्तो गृह्याः स्युस्तावन्त एकेनातिरिक्ता भवन्ति तत्प्रतिपुरुषमे-
वैतदेकैकेन या अस्य प्रजा जातास्ता रुद्रियात्प्रमुञ्चत्येकेनातिरिक्ता भवन्ति तद्या
एवास्य प्रजा अजातास्ता रुद्रियात्प्रमुञ्चति तस्मादेकेनातिरिक्ता भवन्ति ॥४॥ स
जघनेन गार्हपत्यं । यज्ञोपवीती भूत्वोदङ्ङासीन एतान्गृह्णाति स तत एवोपोत्था-
योदङ्ङिश्रन्नवहन्त्युदीच्यौ दृषदुपलेऽउपदधात्युत्तरार्धे गार्हपत्यस्य कपालान्युपदधा-
ति तद्यदेव तामुत्तरां दिशꣳ सचन्तऽएषा ह्येतस्य देवस्य दिक्तस्मादेतामुत्तरां दि-
शꣳ सचन्ते ॥५॥ ते वा अक्ताः स्युः । अक्तꣳ हि हविस्तऽउ वाऽअनक्ता एव
स्युरभिमानुको ह रुद्रः पशून्त्स्याद्यदञ्ज्यात्तस्मादनक्ता एव स्युः ॥६॥ तान्त्सार्धं पा-
त्र्याꣳ समुद्वास्य । अन्वाहार्यपचनादुल्मुकमादायोदङ् परेत्य जुहोत्येषा ह्येतस्य
देवस्य दिक् पथि जुहोति पथा हि स देवश्चरति चतुष्पथे जुहोत्येतद्ध वाऽअस्य
जांधितं प्रज्ञातमवसानं यच्चतुष्पथं तस्माच्चतुष्पथे जुहोति ॥७॥ पलाशस्य पला-
शेन मध्यमेन जुहोति । ब्रह्म वै पलाशस्य पलाशं ब्रह्मणैवैतज्जुहोति स सर्वे-
षामेवावद्यत्येकस्यैव नावद्यति य एषोऽतिरिक्तो भवति ॥८॥ स जुहोति । एष
ते रुद्र भागः सह स्वस्राम्बिकया तं जुषस्व स्वाहेत्यम्बिका ह वै नामास्य स्वसा
तयास्यैष सह भागस्तद्यदस्यैष स्त्रिया सह भागस्तस्मात्त्र्यम्बका नाम तद्या अस्य

प्रजा ज्ञातास्ता रुद्रियात्प्रमुञ्चति ॥९॥ अथ य एष एको ऽतिरिक्तो भवति । तमाखूत्कर उपकिरत्येष ते रुद्र भाग आखुस्ते पशुरिति तदस्मा आखुमेव पशूनामनुदिशति तेनो ऽइतरान्पशून्न हिनस्ति तद्यदुपकिरति तिर इव वै गर्भास्तिर इवैतद्यदुपकीर्णं तस्मादा उपकिरति तथो एवास्य प्रजा अज्ञातास्ता रुद्रियात्प्रमुञ्चति ॥१०॥ अथ पुनरेत्य जपन्ति । अव रुद्रमदीमह्यव देवं त्र्यम्बकम् । यथा नो वस्यसस्करद्यथा नः श्रेयसस्करद्यथा नो व्यवसाययात् ॥ भेषजमसि भेषजं गवे ऽश्वाय पुरुषाय भेषजं सुखं मेषाय मेष्या इत्याशीरेवैषैतस्य कर्मणः ॥११॥ अथापसलवि त्रिः परियन्ति । सव्यानूरूनुपाघ्नानास्त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् । उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतादित्याशीरेवैषैतस्य कर्मण आशिषमेवैतदाशासते तदु ह्येव शमिव यो मृत्योर्मुच्यातै नामृतात्तस्मादाह मृत्योर्मुक्षीय मामृतादिति ॥१२॥ तदु हापि कुमार्यः परीयुः । भगस्य भजामहा इति या ह वै सा रुद्रस्य स्वसाम्बिका नाम सा ह वै भगस्येष्टे तस्मादु हापि कुमार्यः परीयुर्भगस्य भजामहा इति ॥१३॥ तासामु तासां मन्त्रो ऽस्ति । त्र्यम्बकं यजामहे सुगन्धिं पतिवेदनम् । उर्वारुकमिव बन्धनादितो मुक्षीय मामुत इति सा यदित इत्याह ज्ञातिभ्यस्तदाह मामुत इति पतिभ्यस्तदाह पतयो ह्येव स्त्रियै प्रतिष्ठा तस्मादाह मामुत इति ॥१४॥ अथ पुनः प्रसलवि त्रिः परियन्ति । दक्षिणानूरूनुपाघ्नाना एतेनैव मन्त्रेण तद्यत्पुनः प्रसलवि त्रिः परियन्ति प्रसलवि न इदं कर्मानुसंतिष्ठाता इति तस्मात्पुनः प्रसलवि त्रिः परियन्ति ॥१५॥ अथैतान्यजमानो ऽञ्जलौ समोप्य । ऊर्ध्वानुदस्यति यथा गौर्नोदाप्नुयात्तदात्मभ्य एवैतद्भल्यान्निर्मिमते तान्विलिप्सन्त उपस्पृशन्ति भेषजमेवैतत्कुर्वते तस्माद्विलिप्सन्त उपस्पृशन्ति ॥१६॥ तान्द्वयोर्मूतकयोरुपनह्य । वेणुयष्ट्यां वा कुपे वोभयत आबध्योदङ् परेत्य यदि वृक्षं वा स्थाणुं वा वेणुं वा वल्मीकं वा विन्देत्तस्मिन्नासजत्येतत्ते

रुद्रावसं तेन परो मूजवतोऽतीहीत्यवसेन वाऽअध्वानं यन्ति तदेनꣳ सावसमेवान्ववार्जति यत्र-यत्रास्य चरणं तदन्वत्र ह वाऽअस्य परो मूजवद्भ्यश्चरणं तस्मादाह परो मूजवतोऽतीहीत्यवततधन्वा पिनाकावस इत्यहिꣳसन्नः शिवोऽतीहीत्येवैतदाह कृत्तिवासा इति निष्वापयत्येवैनमेतत्स्वपन्नु हि न कं चन हिनस्ति तस्मादाह कृत्तिवासा इति ॥१७॥ अथ दक्षिणान्बाहूनन्वावर्तन्ते । ते प्रतीक्षं पुनरायन्ति पुनरेत्याप उपस्पृशन्ति रुद्रियेणेव वाऽएतदचारिषुः शान्तिरापस्तदद्भिः शान्त्या शमयन्ते ॥१८॥ अथ केशश्मश्रूप्त्वा । समारोह्याग्नीऽउदवसायैव ह्येतेन यजते न हि तदवकल्पते यदुत्तरवेदावग्निहोत्रं जुहुयात्तस्मादुदवस्यति गृहानित्वा निर्मथ्याग्नी पौर्णमासेन यजतऽउत्सन्नयज्ञ-इव वाऽएष यच्चातुर्मास्यान्यथैष क्लृप्तः प्रतिष्ठितो यज्ञो यत्पौर्णमासं तत्क्लृप्तेनैवैतद्यज्ञेनान्ततः प्रतितिष्ठति तस्मादुदवस्यति ॥१९॥ ब्राह्मणम् ॥३ [६.२.]॥ ॥

अक्षय्यꣳ ह वै सुकृतं चातुर्मास्ययाजिनो भवति । संवत्सरꣳ हि जयति तेनास्याक्षय्यं भवति तं वै त्रेधा विभज्य यजति त्रेधा विभज्य प्रजयति सर्वं वै संवत्सरः सर्वं वाऽअक्षय्यमेतेनो हास्याक्षय्यꣳ सुकृतं भवत्यृतुरु हैवैतद्भूत्वा देवानप्येत्यक्षय्यमु वै देवानामेतेनो हैवास्याक्षय्यꣳ सुकृतं भवत्येतन्नु तद्यस्माच्चातुर्मास्यैर्यजते ॥१॥ अथ यस्माच्छुनासीर्येण यजेत । या वै देवानाꣳ श्रीरासीत्साकमेधैरीजानानां विजिग्यानानां तच्छुनमथ यः संवत्सरस्य प्रजितस्य रस आसीत्तत्सीरꣳ सा या चैव देवानाꣳ श्रीरासीत्साकमेधैरीजानानां विजिग्यानानां य उ च संवत्सरस्य प्रजितस्य रस आसीत्तमेवैतदुभयं परिगृह्यात्मन्कुरुते तस्माच्छुनासीर्येण यजते ॥२॥ तस्यावृत् । नोपकिरन्त्युत्तरवेदिं न गृह्णन्ति पृषदाज्यं न मन्थन्त्यग्निं पञ्च प्रयाजा भवन्ति त्रयोऽनुयाजा एकꣳ समिष्टयजुः ॥३॥ अथैतान्येव पञ्च हवीꣳषि भवन्ति । एतैर्वै हविर्भिः प्रजापतिः प्रजा असृजतैतैरुभयतो वरुणपाशा-

त्प्रजाः प्रामुच्यन्त तैर्वै देवा वृत्रमघ्नंस्तैरेव व्यजयन्त येयमेषां विजितिस्तां तथोऽए-
वैष एतैर्या चैव देवानाꣳ श्रीरासीत्साकमेधैरीजानानां विजिग्यानानां य उ च सं-
वत्सरस्य प्रजितस्य रस आसीत्तमेवैतदुभयं परिगृह्यात्मन्कुरुते तस्माद्वाऽएतानि
पञ्च हवीꣳषि भवन्ति ॥४॥ अथ शुनासीर्यो द्वादशकपालः पुरोडाशो भवति ।
स बन्धुः शुनासीर्यस्य यं पूर्वमवोचाम ॥५॥ अथ वायव्यं पयो भवति । पयो ह
वै प्रजा जाता अभिसंजानते विजिग्यानं मा प्रजाः श्रियै यशसेऽन्नाद्यायाभिसंजा-
नान्ताऽइति तस्मात्पयो भवति ॥६॥ तद्वायव्यं भवति । अयं वै वायुर्योऽयं प-
वतऽएष वाऽइदꣳ सर्वं प्रप्याययति यदिदं किं च वर्षति वृष्टादोषधयो जायन्त
ऽओषधीर्जग्ध्वापः पीत्वा तत एतद्रसोऽधि पयः सम्भवत्येष हि वाऽएतज्जनयति
तस्माद्वायव्यं भवति ॥७॥ अथ सौर्य एककपालः पुरोडाशो भवति । एष वै सूर्यो
य एष तपत्येष वाऽइदꣳ सर्वमभिगोपायति साधुना त्वदसाधुना त्वदेष इदꣳ सर्वं
विदधाति साधौ त्वदसाधौ त्वदेष मा विजिग्यानं प्रीतः साधुना त्वदभिगोपायत्सा-
धौ त्वद्विदधदिति तस्मात्सौर्य एककपालः पुरोडाशो भवति ॥८॥ तस्याश्वः श्वेतो
दक्षिणा । तदेतस्य रूपं क्रियते य एष तपति यद्यश्वꣳ श्वेतं न विन्देदपि गौरेव
श्वेतः स्यात्तदेतस्य रूपं क्रियते य एष तपति ॥९॥ स यत्रैव साकमेधैर्यजते । त-
च्छुनासीर्येण यजेत यदि त्रिः संवत्सरस्य यजते तेनैव संवत्सरमाप्नोति तस्माद्यदैव
कदा चैतेन यजेत ॥१०॥ तदु हैके । रात्रीरापिपयिषन्ति स यदि रात्रीरापिपयिषेत्
पुरस्तात्फाल्गुन्यै पौर्णमास्याऽउद्दृष्टं तच्छुनासीर्येण यजेत ॥११॥ अथ दीक्षेत ।
तं नानीजानं पुनः फाल्गुनी पौर्णमास्यभिपर्येयात्पुनःप्रयोगरूप-इव ह स यदेन-
मनीजानं पुनः फाल्गुनी पौर्णमास्यभिपर्येयात्तस्मादेनं नानीजानं पुनः फाल्गुनी
पौर्णमास्यभिपर्येयादिति नूत्सृजमानस्य ॥१२॥ अथ पुनः प्रयुञ्जानस्य । पूर्वेद्युः फा-
ल्गुन्यै पौर्णमास्यै शुनासीर्येण यजेताथ प्रातर्वैश्वदेवेनाथ पौर्णमासेनैतदु पुनः प्र-

CC

युञ्जानस्य ॥१३॥ अथातः । परिवर्तनस्यैव सर्वतोमुखो वाऽअसावादित्य एष वाऽइदꣳ सर्वं निर्धयति यदिदं किं च शुष्यति तेनैष सर्वतोमुखस्तेनान्नादः ॥१४॥ सर्वतोमुखोऽयमग्निः । यतो ह्येव कुतश्चाग्नावभ्यादधति तत एव प्रदहति तेनैष सर्वतोमुखस्तेनान्नादः ॥१५॥ अथायमन्यतोमुखः पुरुषः । स एतत्सर्वतोमुखो भवति यत्परिवर्तयते स एवमेवान्नादो भवति यथैतावेतस्य एवं विद्वान्परिवर्तयते तस्माद्वै परिवर्तयेत ॥१६॥ तदु होवाचासुरिः । किं नु तत्र मुखस्य यदपि सर्वाण्येव लोमानि वपेत यद्वै त्रिः संवत्सरस्य यजते तेनैव सर्वतोमुखस्तेनान्नादस्तस्मान्नाद्रियेत परिवर्तयितुमिति ॥१७॥ ब्राह्मणम् ॥४ [६. ३.]॥ ॥

तद्यदाहुः । साकमेधैर्वै देवा वृत्रमघ्नंस्तैर्वेव व्यजयन्त येयमेषां विजितिस्तामिति सर्वैर्हु त्वेव देवाश्चातुर्मास्यैर्वृत्रमघ्नन्त्सर्वैर्वेव व्यजयन्त येयमेषां विजितिस्ताम् ॥१॥ ते होचुः । केन राज्ञा केनानीकेन योत्स्याम इति स हाग्निरुवाच मया राज्ञा मयानीकेनेति तेऽग्निना राज्ञाग्निनानीकेन चतुरो मासः प्राजयंस्तान्ब्रह्मणा च त्रय्या च विद्यया पर्यगृह्णन् ॥२॥ ते होचुः । केनैव राज्ञा केनानीकेन योत्स्याम इति स ह वरुण उवाच मया राज्ञा मयानीकेनेति ते वरुणेनैव राज्ञा वरुणेनानीकेनापरांश्चतुरो मासः प्राजयंस्तान्ब्रह्मणा चैव त्रय्या च विद्यया पर्यगृह्णन् ॥३॥ ते होचुः । केनैव राज्ञा केनानीकेन योत्स्याम इति स हेन्द्र उवाच मया राज्ञा मयानीकेनेति तऽइन्द्रेणैव राज्ञेन्द्रेणानीकेनापरांश्चतुरो मासः प्राजयंस्तान्ब्रह्मणा चैव त्रय्या च विद्यया पर्यगृह्णन् ॥४॥ स यद्वैश्वदेवेन यजते । अग्निनैवैतद्राज्ञाग्निनानीकेन चतुरो मासः प्रजयति तच्छ्येनी शलली भवति लोहः क्षुरः सा या श्येनी शलली सा त्रय्यै विद्यायै रूपं लोहः क्षुरो ब्रह्मणो रूपमग्निर्हि ब्रह्म लोहित-इव ह्यग्निस्तस्माल्लोहः क्षुरो भवति तेन परिवर्तयते तद्ब्रह्मणा चैवैनमेतत्त्रय्या च विद्यया परिगृह्णाति ॥५॥ अथ यद्वरुणप्रघासैर्यजते । वरुणेनैवैतद्रा-

ह्ना वरुणेनानीकेनापरांश्चतुरो मासः प्रजयति तच्छ्येनी शलली भवति लोहः क्षुरस्तेन परिवर्तयते तद्ब्रह्मणा चैवैनमेतत्त्रय्या च विद्यया परिगृह्णाति ॥६॥ अथ यत्साकमेधैर्यजते । इन्द्रेणैवैतद्वाग्निनेन्द्रेणानीकेनापरांश्चतुरो मासः प्रजयति तच्छ्येनी शलली भवति लोहः क्षुरस्तेन परिवर्तयते तद्ब्रह्मणा चैवैनमेतत्त्रय्या च विद्यया परिगृह्णाति ॥७॥ स यद्वैश्वदेवेन यजते । अग्निरेव तर्हि भवत्यग्नेरेव सायुज्यꣳ सलोकतां जयत्यथ यद्वरुणप्रघासैर्यजते वरुण एव तर्हि भवति वरुणस्यैव सायुज्यꣳ सलोकतां जयत्यथ यत्साकमेधैर्यजतऽइन्द्र एव तर्हि भवतीन्द्रस्यैव सायुज्यꣳ सलोकतां जयति ॥८॥ स यस्मिन्हऽर्तावमुं लोकमेति । स एनमृतुः परस्माऽऋतवे प्रयच्छति पर उ परस्माऽऋतवे प्रयच्छति स परममेव स्थानं परमां गतिं गच्छति चातुर्मास्ययाजी तदाहुर्न चातुर्मास्ययाजिनमनुविन्दन्ति परमꣳ ह्येव खलु स स्थानं परमां गतिं गच्छतीति ॥९॥ ब्राह्मणम् ॥५ [६.४.]॥ पञ्चमः प्रपाठकः ॥ कण्डिकासंख्या १०४ ॥ षष्ठोऽध्यायः [१५.] ॥ अस्मिन्काण्डे कण्डिकासंख्या ५४९ ॥ ॥

इति माध्यन्दिनीये शतपथब्राह्मणे एकपादिकानाम द्वितीयं काण्डं समाप्तम् ॥२॥

EXTRACTS MADE FROM THE COMMENTARY OF SÂYAṆÂCÂRYA.

आद्ये काण्डे प्रपञ्चेन पौर्णमासेष्टिरीरिता । सा सम्पूर्णोपदेशत्वादन्यासां प्रकृतिर्मता ॥ पवमानेष्ट्यादिकानां द्वितीये त्वग्निसिद्धये । आधानं पवमानेष्टिरग्निहोत्रमुपस्थितिः । चातुर्मास्यादिकः सर्वो हविर्यज्ञोऽत्र वर्ण्यते ॥ तत्र तावत्सर्वेष्टिप्रकृतित्वेन प्राक् प्रतिपादिताया दर्शपूर्णमासेष्टेर्विधास्यमानानामग्निहोत्रादिकर्मणां च त्रेताग्निसाध्यत्वात्तद्धेतुभूतमाधानं प्रतिपाद्यते । तत्र चोदकहिरण्यादिसम्भाराणां पञ्चानां सम्भरणं विधित्सुः सम्भारनामनिर्वचनं करोति स यद्वाऽइति । यस्मिन्यस्मिन्पदार्थेऽग्नेः सम्बन्धि तेजो न्यक्तं निलीनं भवति तस्मात्सर्वस्मादपि सम्भरणं कार्यमित्यर्थः ॥१॥ यस्मादाग्नेयं हिरण्यं तस्मादेनेन दत्तान्न (?? तस्माद्धैनं न दत्तां Cod.) धावयेत् तथा यदन्यत्किमपि याल्यिहीतं (?) कर्म तदपि तेन न कुर्यात् ॥५॥ ऊषरमिति ऊषसुषिमुष्कमधो र इति [पा° ५. २. १०७.] मत्वर्थीयो रः । अमुतोऽमुष्माद्

युलोकात् ॥६॥ आखुभिः खननेन विलाद्बहिर्नीताः पांसव आखुकरीषम् । पुरीषकरीषश-ब्दावत्र समानार्थावित्यर्थः अतः करीषसम्बन्धादग्निः श्रियं प्राप्नोति ॥७॥ मृन्मिश्रिताः सूक्ष्मपाषाणाः शर्कराः । अश्लेलायत् चाश्लल्यं प्राप्नोति ॥८॥ निर्भक्ष्यामो निर्भक्तान्भागरहितान्कुर्याम ॥९॥ एवमिमां पृथिवीं शर्कराभिः पर्यबृंहन्त एवं परितः शर्करास्थापनेन दृढीकृतवन्तः ॥१०॥ तर्हि तथा सत्यृतुषट्के मिथुनत्रयसम्पत्तिः पञ्चके तु तन्मिथुनत्रयमेकेन न्यूनं भवति तच्चाप्रजननसाधनम् अत्र लोकप्रसिद्धिमाह न्यूनादिति स्त्रीपुंसयोर्वीर्यस्य परस्परनृत्वे (?) सति तस्मान्न्यूनान्मिथुनात्स्त्रीपुंसलक्षणान्यपत्यानि जायन्ते यस्मादेवं लोके तस्मात्पञ्चसम्भारसम्भरणेन यन्मिथुनस्य न्यूनत्वं तच्छ्वःश्रेयसं श्वः परदिवसे (°स Cod.) श्रेयसो जनकम् श्वसोऽवसीयःश्रेयस इति [पा° ५. ४. ८०.] अच् समासान्तः तथा उत्तरावत् उत्तरा आगामिन्यभिवृद्धिः (आगामिनाभि° Cod.) तयोपेतमित्यर्थः । एवमृतूनां षट्केऽपि सम्भाराणां पञ्चसंख्याकत्वमुपपाद्याथापि न्यूनत्वं नाम कश्चिन्मन्येतेत्याशङ्क्य (? कश्चिसषे इति त्याश° Cod.) परिहरति यद्विति षडृतुत्वं संवत्सरस्य संख्यास्ति तर्ह्येतेषां (? °ख्याचितस्त्येमेतषां Cod.) सम्भाराणामाधीयमानोऽग्निरेव षष्ठः षट्संख्यापूरकः ॥१३॥१॥१॥

कर्मणः कालसापेक्षत्वादाधानस्य नक्षत्राणि (°क्षत्रांव Cod.) विधत्ते । अग्नी गार्हपत्याहवनीयौ । सलोम सदृशं योग्यम् ॥१॥ कृत्तिकास्तु षट्संख्याकाधिष्ठानयोगात् भूयिष्ठा बहुतराः ॥३॥ पुर ऋक्षा (पुरर्क्षा Cod.) इति प्रकृतिभावो ह्रस्वश्च । व्यार्ध्यन्त विगतर्द्धिका अभवन् । व्यृद्धिमिव देशभेदोदयेन स्पष्टयति अमो होति अमी खलु सप्तऽर्षयः उत्तराहि दूरदेशे उत्तरदिग्भागे उद्यन्ति एतास्तु कृत्तिकाः पुरः पूर्वस्यां दिशि अत एवातीवसम्भिन्नदेशावस्थानेन पुरुषसम्भोगविरहान्मिथुनव्यृद्धिः तच्चासमीचीनमित्याह अशमिव वै तदिति ॥४॥ उपस्तब्धाः प्रतिबद्धजातयो (°द्धवा° Cod.) विनाशरहिताः पुत्रपौत्रादिरूपेणैकरूपाः अविच्छिन्नप्रवाहाः तस्थुः स्थितवन्तः ताश्च रोहिण्यः स्वर्गादिलोकारोहणसाधना इति स्थिताः ॥६॥ पुरा खलु प्रजापतिः कृष्णमृगरूपमास्थाय मृगीभूतां (ताव्य Cod.) स्वदुहितरमेवोपागमत् (? °रामाबापगमत् Cod.) एतद्वाऽइति एतज्ज्ञात्वा प्रजापतेरकार्यकारिणः शिरश्छेत्तुं देवाः कंचित्क्रोधमयं पुरुषं निर्माय प्रत्यतिष्ठिपन् स चेषुणा तस्य शिरश्चिच्छेद गवशेने (?) इषु[ः] शिरश्चेत्येतदुभयमन्तरिक्षमुत्प्लुत्य नक्षत्रात्मनावस्थितं संदृश्यते (सदृ° Cod.) तथा चैतरेयके [३. ३३.] प्रजापतिर्ह वै स्वां दुहितरमभिदध्यौ (मभ्यिधौ Cod.) इत्युपक्रम्य सोऽएवेषुस्त्रिकाण्डेत्यन्तेनायमर्थः (सोपनोविषु त्रि° Cod.) प्रतिपादितः ईदृशी श्रुत्यन्तरप्रसिद्धिरत्र वैशब्देन द्योत्यते ॥८॥ यस्मिन्समये एनं प्रजापतिं कृष्णमृगरूपं तत्तेन स्वदुहितृगमनरूपेण दोषेण हेतुना देवा अविध्यन् तत्तदानीं पत्रदारुशल्यरूपावयवत्रयोपेतेनेषुणा खलु तच्छिरश्छिन्नमित्याहुर्ब्रह्मवादिनः (? तस्थिरः शिश्छिनन्ति निस्पात्याहु° Cod.) स च प्रजापतिस्तदानीमेतच्छरीरं त्यक्तवान् । वास्तु शून्यस्थानम् शरीरं विशरणशालम् ॥९॥ अर्जुन इति हीन्द्रस्य रहस्यं नाम अत एव खलु तत्पुत्रे पाण्डवमध्यमे प्रवृत्तिः । पुरस्तात्क्रतुरिति पूर्वस्मिन्नागामिनि काले (स्मिन्नोगामितिनि कालि Cod.) अग्निष्टोमादिलक्षणः क्रतुः शीघ्रं सिध्यतीत्यर्थः ॥११॥ अनुष्ठ्या अनुष्ठानेन समीचीनम् ॥१२॥ आरुरुक्षां चक्रुरिति आरोढुमिच्छां कृतवन्त इत्यर्थः । अमुमित्यदस्शब्देन परोक्ष्येण यो लोको निर्दिष्टस्तं विशिनष्टि दिवमेवेति । ततो

ऽनन्तरमसुराः रौहिणमित्येतन्नामकं रोहणस्य साधनमग्निं चिक्ये व्यत्ययेनैकवचनं चिक्यिरे चितवन्तः ॥१३॥ स इन्द्रो ब्राह्मणो भूत्वा (!) असुरहितं ब्रुवाण एव (!) एकामिष्टकां प्रवध्य गृहीत्वा ॥१४॥ आववर्ह उद्ययाम तस्मात्स्थानादचालयत् वृह्न उद्यमने । सोऽग्निर्व्यवत्ससाद् (!) विशीर्णो बभूव । व्यवसेदुः (!) व्यावत्सन्ना (!) शिथिला बभूवुः ॥१६॥ (उपेत्सेत्) स्वीकुर्यात् ॥१७॥ तस्मादेव कारणात्सूर्यात्मकऽएव तेजस्विनि नक्षत्रे आधानं स्यात् । अनपराद्धं तेजोवियोगलक्षणापराधरहितम् ॥१९॥२॥१॥

अथाधानस्य वसन्ताद्यृतुविध्यर्थं (°न्तात्वृ° Cod.) ऋत्वादीनां देवपित्रात्मना द्वेधा विभागमाह वसन्त इति ॥१॥ य एवमृतूनां देवत्वं पितृत्वं च विद्वांस्तानृतून् देवाः पितर इति ह्वयति व्यवहरेत् अस्याह्वातुः देवत्वह्वयं देवाह्वानं प्रति देवा आगच्छन्ति आगताश्च ते स्वसम्बद्धे कर्मणि एनमवन्ति ॥२॥ स सूर्यः ॥३॥ एवमयनविशेषमृतुविशेषं चाभिधाय पश्चात्तरं वक्तुं सर्वेषामप्यृतूनां पापसम्बन्धराहित्यमाह ते वाऽइति । न श्वःश्वमुपासीत श्वः करवाणीत्येवं कालान्तरप्रतीक्षां न कुर्यात् ॥१॥३॥१॥

अग्न्याधेयात्पूर्वस्मिन्नुपवसथदिवसे कर्तव्यं व्रतमुपदिशति यदिति । see १, १, १, ७. ८. ॥१॥ उपवसथदिवसस्य रात्रौ गार्हपत्यागारे कस्यचिदजस्य बन्धनं कार्यमित्येकेषां मतम् । अग्निना सह प्रजापतिमुखजातत्वादज आग्नेयः । तथा च का° ४, ८, १. २. ॥३॥ चातुष्प्राश्यं चतुर्भिरध्वर्युब्रह्मादिभिर्ऋत्विग्भिः प्राशितव्यम् । स्यन्द[प्र]स्रवणे ॥४॥ सर्पिरासिच्यतेऽस्मिन्निति सर्पिरासेचनं घृतधारणार्थमोदनं (वृत° Cod.) निम्नं कुर्वेत्यर्थः । समिद्वद्युक्ताभिर्घृतशब्दयुक्ताभिश्चेत्यर्थः ताश्च का° उदाजहार [४. ८. ५.] । शमीगर्भो योऽश्वत्थस्तत्रस्थो योऽग्निः तमेतेनाश्वत्थसमिदाधानेन प्राप्नुम इति ब्रुवाणाः । तस्मात् समिदाधानार्थ एवौदनो न प्राशनार्थ इति तत् प्राशनं नादरणीयम् ॥५॥ तस्यां रात्रौ यजमानस्य जागरणं विधत्तेऽथ जाग्रतीति व्यत्ययेन बहुवचनं जागर्तीत्यर्थः । सदेवतरः अतिशयेन देवसहितः ॥६॥ ब्रह्मणः सम्बन्धि यद्ब्रह्म तेनाधानं कार्यम् ॥१०॥ भूर्भुव इति द्वाभ्यामेव व्याहृतिभ्यां गार्हपत्यमादध्यात् तिसृभिरपि व्याहृतिभिर्गार्हपत्याधाने आहवनीयाधानस्य मन्त्रो न स्यात् अतः सुवरिति द्वे अक्षरे परिशिषयेत् । आहवनीयाधाने तिसृणां व्याहृतीनां विनियोगमाह सर्वैरिति ॥१४॥ अग्निमन्थनसमये तस्य पुरस्तादश्वस्याधारणं विधित्सुरितिहासं दर्शयति देवानिति ॥१५॥ पूर्वे वयसि वहतीति पूर्ववाट् [पूर्ववयस्कः] ॥१७॥ आहवनीयदेशं प्रत्यग्नेर्हरणसमये ऽश्वस्यापि पुरस्तान्नयनं विधत्ते तमिति ॥१८॥ हरणे विशेषमाह तमिति यथैनं यजमानमेषोऽग्निः प्रत्यङ् उपाचरेत् अभिमुखमुपावर्तेत तमग्निं तथैव हरेयुः आहवनीयायतनस्य पूर्वभागं प्रापयेयुरित्यर्थः । सोऽग्निर्यस्माद्यजमानात्पराङ्मुखो भवति तर्ह्यस्माद्यज्ञोऽपि पराङ्मुख एव भवति तत्र तथा सति यः कश्चिद्द्वेष्य एनं यजमानमनु व्याहरेत् किमिति यज्ञोऽस्मात्पराङ्भूदिति स यजमानस्तथैव भवितुमीश्वरः स्यात् ॥१९॥ एवमग्नेर्हरणप्रकारं प्रतिपाद्यानन्तरकर्तव्यतामाहाहार्येति आहवनीयायतने सम्भारान्निधाय दक्षिणपूर्वपादेनाश्वमाक्रमयति । आवर्तयति आवृत्य स्थापयति । see का° ४. ९. १४. ॥२३॥ आहृतस्याग्नेराधानं विधत्ते तमिति आहवनीयायतने यदश्वस्य पदं तस्मिंस्तमग्निं मन्त्रेण स्थापयति ॥२४॥ अग्रे प्रथममश्वस्य पदमग्निना तूष्णीमुपस्पृशति तमग्निमुद्यम्य पुनरप्युपस्पृशति एवं द्विरुपस्पृश्य तृतीयनापस्पर्श-

नेन व्याहृतिभिस्तमग्निं तस्मिन्पदे स्थापयति । एतत्खल्वाहवनीयाधानस्यैकं विधानम् ॥२५॥ यस्तु भूम्यां प्रतिष्ठाय भारमुद्यच्छति स भारं वोढुं शक्नोति तत्समानमेवैतद्भूमेः सकृदुपस्पर्शनम् ॥२६॥ आसुरिप्रभृतयस्त्रयो मुनयस्तदेतत् उपस्पृश्योद्यम्य द्वितीयस्पर्शनेनाधानं पश्चेव पश्चाद्धृतमिव दध्रिरे अधारयन् एतावता को दोष इति अग्निनोपस्पृश्य पुनस्तस्योद्यमनेन तद्व्यतिरिक्तं सर्वमायतनस्थं सम्भारादिकमियसितमियत्तया परिच्छिन्नं व्यक्तमिव भवति अतोऽग्निमुद्यम्य प्रथमेनैवोद्यमनेन व्याहृतिभिरादध्यात् तथा सति अनियसितमव्यक्तमेव सर्वं भवति उक्तानां पक्षाणामिच्छया विकल्पमाह यतमथेति तत्पक्षत्रयमपि सूत्रितम् [का° ४. १. १६.] ॥२७॥ आहितस्याग्नेः पूर्वभागस्थमुल्मुकमन्वारभ्य मन्त्रस्य जपं विधत्तेऽथेति । आशीः फलप्रार्थनमेव ॥२८॥ सर्पणशीलानां प्राणिनां राज्ञी सर्पराज्ञी तत्सम्बन्धिनीभिस्तद्दृष्टाभिर्ऋग्भिः । तत्सर्वमाप्यते सर्पराज्ञ्यः सर्वाधिष्ठानभूतत्वात् अत एव तन्नामनिर्वचनमन्यत्राम्नातम् इयं वै सर्पराज्ञी देवा वै सर्पाः तेषामियं राज्ञीति ॥२९॥४॥१॥

आदित आरभ्यैतावत्पर्यन्तं तात्पर्यार्थाभिधानविनियोगादिप्रदर्शनपुरःसरं वाक्ययोजनं कृतम् तत्राध्यायगतानि (? तना° Cod.) यानि वाक्यानि तानि सोमानंघायतया (?) पूर्ववदेव योजयितुं शक्यानीति ग्रन्थविस्तरभयात्केवलं प्रकटार्थकथनं विषमपदविवरणं च क्रियते । एवं गार्हपत्याद्यग्निषु स्वरूपेण सिद्धेषु (°पोण सद्धेवु Cod.) क्षुधितस्याग्नेः शमनाय पूर्णाहुतिं विधत्तेऽउद्धृत्येति ॥१॥ शश्वत् ध्रुवम् ॥२॥ मन्त्ररहितेन स्वाहाकारमात्रेण होममुपपादयति यामिति पुरा खलु प्रजापतिः पश्वादिसर्वजगत्सर्जनहेतुभूतां (पुराश्वादि° Cod.) प्रथमामाहुतिं स्वाहाकारेणैवाजुहोत् एषापि पूर्णाहुतिः तथा क्रियमाणा (°णो Cod.) [निदानेन] निगदभूतेन कारणेन सो स्वित् सैव प्रजापतिना हुता प्रथमाहुतिः खल्वित्यर्थः ॥४॥ यदद्‌ः प्राणान्नवीर्यधारणं पूर्णाहुत्याग्नौ क्रियते एतत्परोऽक्षमिव पवमानेष्टिभिस्तत इदमितीव प्रत्यक्षत एव क्रियते पवमानपावकशुचिशब्दैः प्राणान्नवीर्याणां प्रतिपादनात् अतस्ता इष्टयो नियमेन कर्तव्याः ॥९॥ तदेतत्सर्वं पूर्णाहुतिपक्षे सत् विद्यमानमपि विपर्यस्तमिव भवति अतो नासौ पक्षो युक्त इत्यर्थः न केवलमेतावदिष्टीनां (°वदे° Cod.) प्रयोजनं (°याजन Cod.) अपि तु मनुष्यैराधीयमानस्याग्नेः कार्त्स्न्यमप्याभिः (°द्याभिः Cod.) सम्पद्यतऽइत्याख्यायिकापुरःसरमाहाग्निरिति । अभ्युपावृतम् अभ्युपागमम् वृतेर्लङ्युत्तमैकवचने द्युतादिभ्यो लुङ् ॥१३॥ अग्निर्हि मनुष्यान्प्रत्यागमनसमये पवमानपावकशुच्याख्यास्तिस्र आत्मीयास्तनूः पृथिव्यन्तरिक्षद्युलोकेषु यथाक्रमं निधाय न सर्वेण कृत्स्नेनैवात्मना स्वरूपेण अस्मानभिलक्ष्य (?° लक्षा तु Cod.) उपावृतत् उपागमदितीममर्थमृषयोऽबुध्यन्त तस्माऽअग्नये कार्त्स्न्यसम्पादनाय पवमानहवींषि निरवपन्नित्यर्थः ॥१४॥ ललयेव लीनमिव । अत एते उभे अप्येनां पृथिवीं प्रति उद्यामिनी स्तां वाधितुमुद्युक्ते भवेतां (भवेत । Cod.) अतः प्रथमं हविः पृथक्तन्त्रं कार्यमुत्तरे समानतन्त्रे कार्ये ॥१६॥ यागान्तरेष्वा हि पुरोऽनुवाक्या गायत्री याज्यात्रिष्टुप् अत्र तु पुरोऽनुवाक्यायाज्याः सर्वा गायत्र्यः कर्तव्याः ॥१७॥ पृथिव्यन्तरिक्षद्युलोकात्मकानि पवमानहवींषि क्रमेण निर्वपंस्तद्द्वारा (°मेणाग्निर्व° Cod.) इमानेव पृथिव्यादिलोकान्सोपानक्रमेण सम्यगारोहन्नस्माल्लोकात्प्रच्यवते अतस्तत्परिहारायादित्येष्टिः कर्तव्येत्यर्थः ॥१८॥ विराजौ संयाज्येऽइति प्रेद्धोऽअग्ने [१७. ७६.] इमा अग्न (?) ऽइत्येते स्विष्टकृतो या-

ज्यानुवाक्ये स्यातामित्यर्थः । विराजाविन्त्वेवेति तुशब्देन त्रिष्टुब्जगतीपक्षौ व्यावर्त्येते ॥२०॥ एतन्त्वेकमयनमिति पवमानेष्टिं यजतामेतदेकमनुष्ठानस्य विधानम् ॥२१॥ आग्नेयमेवेति न तु पवमानादिविशेषणमादरणीयमित्येवकारार्थः । पवमानादिविशेषणैर्विशेष्यमाणोऽग्निः तत्र वैशिष्ट्यद्वारा परोक्ष्यमापद्यते अतस्तत्परिहारेण अञ्जसा ऋजुनैव मार्गेण केवलाग्नये निर्वपन् तं प्रत्यक्षत एव स्वीकरोति ॥२२॥१॥२॥॥

षड्द्वादशादिदक्षिणा आधानस्य विधास्यन् तन्नामनिर्वक्तुं प्रस्तौति घ्नतीति ॥१॥ न ददक्षे फलं जनयितुं न शशाक ॥२॥ एष मात्रेति एतद्दक्षिणानां परिमाणम् इतोऽधिकमपि यथाविभवमिच्छानुसारेण देयमिति विधत्ते दद्यात्त्वेवेति ॥५॥ सम्प्रापिपन् सम्यक् प्रापितवन्तः ॥७॥ आधानस्य भ्रातृव्यजयहेतुत्वं वक्तुमाख्यायिकामाह देवा इति । एषां देवानां मध्ये यमेवासुरा घ्नन्ति तत् तत्र स स्म (? मूर्व Cod.) हत एव भवति ॥८॥ नन्वग्निर्गार्हपत्याद्यायतने (न वग्नि° Cod.) बहिराधीयते (? लार्हिवाधो° Cod.) कथं तस्यान्तर्धारणमिति तत्राह तदिति अभिप्राणितीति मन्थनाज्जातं तमग्निमभ्युपरि प्राणनं करोति स पुनरपानितीति अग्नेर्ह (? अग्नेहा Cod.) परिश्वासमुत्सृज्य तमेव श्वासं पुनरन्तरनयत् तेन सार्धमग्निरपि अतः प्रविशन् यजमानस्य हृदये आहितो भवति ॥१५॥ नियतस्य (? °तस्वा Cod.) बाह्यस्याग्नेरुद्दीपनं समिन्धनं विधत्ते तमिति उद्दीपनं काष्ठप्रक्षेपः समिन्धनं सम्यक् प्रज्वलनम् तदुभयमान्तराग्नौ दर्शयति इहेति इहास्मिन्बाह्येऽग्नौ यक्ष्ये यागं करिष्ये तत्फलं च सम्पादयिष्यामीति यौ मनोव्यापारौ संकल्पौ तेऽएवान्तराहितस्याग्नेरुद्दीपनसमिन्धने ॥१६॥ एवमन्तरग्निमादधानस्य (माब्दधानाथ Cod.) व्यवायादिदोषोऽपि नास्तीति प्रतिपादयत्यन्तरेणेति अग्नियजमानयोर्मध्ये देवदत्तादिरागतिनवव्यवायादिभिर्व्यवृतत् व्यावृत्तो विमुखो भूदिति यो दोषः सोऽप्यत्र नास्ति । एवं विदुषोऽग्न्यनुगमनशङ्कापि न कार्येत्याह तस्मादिति ॥१७॥ एतत्सत्यवदनस्याग्निसमिन्धनहेतुत्वमृषिवाक्यसम्बन्धेन द्रढयति तदिति । उपवेशो नाम कश्चित्तस्य पुत्रमरुणं तदीया ज्ञातय उक्तवन्तः हे अरुण स्थविरो वृद्धोऽसि अतः आमुष्मिकसिद्धये अग्न्याधानं कुर्विति ॥२०॥२॥२॥

अथ पुनराधेयं विधित्सुः स्वपक्षातिभूतमुक्तमग्न्याधेयं (स्वष° Cod.) प्रकृतिरूपार्थवादेन राज्ययशोहेतुत्वेन प्रशंसति वरुण इति ॥१॥ निधाने कारणानि वैकल्पिकानि त्रीण्युपन्यस्यति विजयं वेति । असुरानितुष (?) विजेतुमुपगमनसमये पूर्वसिद्धाग्न्याधानस्याथमथनिधानमित्येकः पक्षः (? पूर्वस्मिर्ङस्मर्धानस्याक्षमार्थानधा° Cod.) । कामचारस्य कामाय यथेष्टं (यक्षे Cod.) क्रीडितुं संचरणस्य यः कामः तदर्थं वा तन्निधानमिति द्वितीयः । गृहऽएव स्थितानां नोऽस्माकं देवानां मध्ये अयमग्निर्गोपिष्ठो गोपायितृतमो रक्षणकुशलोऽस्मदीयं धनं गोपायत् रक्षितुं शक्नोतीत्यनेनाभिप्रायेण वा तन्निधानमिति तृतीयः पक्षः ॥२॥ ऋतून् चागादिः पर्वतमिव प्रविष्टवान् अन्तर्दधे । अप्यस्मदीयं स्थानं पुनरागच्छाम इत्यनेनाभिप्रायेण तं तिरोभूतमग्निमागच्छन् पूर्वं यस्मिन्स्थाने सोऽग्निः स्थितस्तत्र तमपश्यतां तेषां देवानां वित्तं हीनावस्था प्राप ॥३॥ यावाङ्क (!) यावत्प्रकारविशिष्टं (कावत्प्रकारावि° Cod.) राष्ट्रं रूपमन्याः प्रजा उपतिष्ठन्ते तावत्यो जायन्तऽइत्यर्थः वीप्सा तु सर्वसंग्रहार्था ॥४॥ प्रथममाहितस्याग्नेर्विधानान्तरेण पुनस्तेष्वायतनेषु स्थापनं पुनराधेयम् । येयं ग्राम्यारण्योभयप्राप्तिः सा प-

रमता परमत्वं सर्वोत्कृष्टता । किं च अस्मै पुनराधेयं कृतवते सर्वे जनाः स्पृहयन्ति आद्रियन्ते स्पृहेरीप्सितप्रमितिसम्प्रदानसंज्ञा (°तस्मि° Cod.) । तथा अयमपि लोक्यं लोकनीयमुत्कर्षं प्राप्य पुष्यति प्रवृद्धो भवति ॥५॥ यस्मै फलायादधीत एतत् उक्तविधिफलं खलु तत् ॥६॥ यस्मादेवं वर्षर्तुः सर्वात्मकः तस्मात्समुदायात्मकं संवत्सरं वर्षशब्देन लोको व्यवहरतीति दर्शयति अथेति । ग्रीष्मशिशिरधर्मयोः प्रकाशशैत्ययोर्वर्षासु सद्भावात् पृथियोगाच्च (?) वर्षर्तोस्तावदुभयात्मकत्वम् ततः ग्रीष्मे वसन्तस्य वर्षासु शरदः शिशिरे हेमन्तस्य समानधर्मतयान्तर्भावात्सर्वर्तुरूपत्वं सिद्धम् ॥७॥ एवं प्रत्यक्षविषयं प्रकाशादिधर्मयोगेन सर्वत्वमभिधाय परोक्षधर्मवशादपि तत्प्रतिपादयति अथेति । इत्यादयो हि वसन्तादीनां परोक्षभूता धर्माः तेषां च वर्षासु सद्भावात्सर्वर्तुरूपतेत्यर्थः । यस्मादग्निः प्रागुक्तरीत्या ऋतून्प्राविशत्तस्मादेनं वर्षास्वादधानस्तेभ्य एवर्तुभ्यः पुनरुत्पादयति ॥८॥ तच्च पुनराधानमहनि मध्यन्दिने कार्यमिति विधित्सुस्तदर्थमादित्यस्य सर्वर्तुरूपतामाह आदित्य इति ॥९॥ प्रकारान्तरेण तन्मध्यन्दिनाधानं प्रशंसति छाययेति । स च [पाप्मा] पुरुषरूपस्य पादयोरधस्तादिव इयस्यते प्रयौति इ गताविति धातुः (!) ॥१०॥ तस्य पुनराधित्सितस्याग्नेर्दर्भैरुद्धरणं कार्यं विधत्ते तमिति । आधानवत्पुनराधानेऽपि दारुभिरुद्धरणे दोषमाह दारुभिः पूर्वमिति उभयोरैक्यरूप्ये जामितादोषः स्यात् । आपो दर्भाः see १. १. ३. ५. ॥११॥ व्रीहियवमययोरपूपयोरर्कपर्णद्वयसंगृहीतयोर्गार्हपत्याहवनीयायतनयोर्निधानं विधत्तेऽर्केति । अत एवोक्तं का° ४. ११. ६-८. ॥१२॥ पूर्वाभ्याम् पूर्वमाहितौ यौ गार्हपत्याहवनीयौ ताभ्याम् । रात्रिभिर्व्येवेति अनुगतयो(:) रात्रिभिरिव व्यवधानात् नापूपव्यवधानेन प्रयोजनमित्यर्थः ॥१३॥ यदग्न्याधेये पवमानादिकार्यं (यवमानेविका° Cod.) तदाग्नेय एव [पञ्च]कपालः करोतीति न पृथक्ता कर्तव्येत्येवकारार्थः ॥१४॥ अस्यां पञ्चकपालेष्टौ आज्यभागादिः सर्वोऽपि यागोऽग्निदेवत्यः कार्यः ॥१५॥ अग्निष्केवल्यम् इतरेभ्यो निष्कृष्य केवलं तदेकभागं कर्तुमिच्छति तिरोहितं परोक्षमेव तत्प्रदीयते ॥१६॥ उत्तमं तृतीयम् ॥१७॥ प्रयाजादिषु सर्वाग्नेयकरणं (रस्मं Cod.) प्रतिपादयति स इति । प्रथमप्रयाजे यत्समिधो यजेति प्राकृतं बन्धनं तदाग्नेयं रूपं समिन्धनप्रत्यभिज्ञानात् किं तु तत्परोक्षम् अतः समिध इत्येतस्य स्थाने अग्नीन्यजेत्येव ब्रूयात् ॥१८॥ प्रयाजयाज्यास्वपि क्रमेणाग्निविभक्तियोजनं प्रतिपादयति (? °जयत्समिधायति Cod.) स इति । प्रकृतिषु याज्यासु आज्यशब्दात्पूर्वं यथाक्रममग्ने अग्निमग्निना अग्निरेताश्चतस्रो विभक्तीः सहिता (?) एताभिर्यजेदित्यर्थः । an explanation of वौकक् is not given: I conjecture it to be a transformation of वषट्, the अ being changed into औ (see १. ७. २. २१.), the ष into क, and the ट् (resp. त्) into क् (compare: साविषक् instead of साविषत्) ॥१९॥ पञ्चमप्रयाजानुयाज्यायां विशेषमाहाग्नेति । प्रकृतिवत्प्रथमामाज्यभागदेवतां [सं]कीर्त्य द्वितीयाज्यभागदेवतायाः सोमस्य स्थानेऽग्निः पवमानोऽग्निरिन्दुमान्वा अध्वर्युप्रयोगानुसारेण विकल्पेन निर्देष्टव्य इत्यर्थः । स्वाहा देवां आज्यपानिति प्रयाजदेवतानिर्देशेऽपि (°जदेवतार्देव्रतानिदे° Cod.) स्वाहाग्नीनाज्यपानिति प्रयोक्तव्यम् ॥२०॥ प्रथमाज्यभागस्याग्निं स्तोमेन बोधयेति बुधिधातुयुक्तामनुवाक्यां (वुविधा° Cod.) दर्शयित्वा तस्याः पुनराधेयानुकल्पमाह स्वपितीति । समुदीर्ययति समुद्गमयति ॥२१॥ द्वितीयाज्यभागस्य प्रागुक्तपक्षद्वा-

ळूर्याय (? °ह्र्याय Cod.) याज्यानुवाक्ये दर्शयति अथेति । निगदसिद्धोऽर्थः ॥२२॥ एवमु सर्वमिति उक्तरीत्या प्रयाजानामाज्यभागयोः सोऽग्निसम्बन्धकरणात् (! °योश्चाग्नि° ?) तत्सर्वमाग्नेयं भवतीत्यर्थः ॥२३॥ अधुना स्विष्टकृतोऽप्यग्निसम्बन्ध इति (? °तो स्वग्निसंबंधस्वबंध इति Cod.) दर्शयति अथाहेति । प्रथमप्रयाजवत्प्रथमानुयाजेऽपि देवान्यजेत्यस्य स्थानेऽग्नीन्यजेत्यग्निविभक्तिः कार्या ॥२४॥ एवं प्रयाजानुयाजेषु प्रक्षिप्ताः (प्राक्षि° Cod.) सम्भूयानूद्य प्रशंसति ता वाऽइति ॥२६॥ तासां विभक्तीनामक्षरसंख्यामुपजीव्य प्रशंसति द्वादशेति । अग्नाउ इत्यत्रान्तिमाक्षरत्यागे सति द्वादशाक्षराणि भवन्ति तेन सह त्रयोदश भवन्तीत्यर्थः । न द्वे चनेति चनशब्दोऽप्यर्थे द्वेऽअपि वक्ष्यमाणे न सह प्रयुञ्जीत किमर्थम् अजामितायै जामितादोषराहित्याय व्यतिरिके तत्सद्भावमाह जामि हेति के पुनस्ते द्वेऽइति ते विभज्य दर्शयति व्यत्तु वेवित्यादिना ॥२७॥ वहेन स्कन्धेन see १. १. २. ९. ॥२८॥३॥२॥

एवमाधानपुनराधाने विधाय तन्निष्पन्नानामग्नीनां फलवत्कर्मार्थत्वात्तत्साधनचतुष्टयमग्निहोत्राख्यं (°त्तत्साधंसानरतु° Cod.) कर्म विधित्सुस्तदर्थमाख्या[यिकामाह प्रजापतिरिति ॥१॥] काल्वालीकृतेति तर्हि तस्मिन्समये यदन्येव (?) पृथिवी बभूव ॥३॥ व्यात्तेन विवृतेन मुखेन । उदमृष्ट हस्ताभ्यां स्वाङ्गस्योन्मार्जनं कृतवान् । तस्मात् इदं चोभयमपि पाणितलमलोमकं रोमरहितं दृश्यते । उन्मार्जनेन तत्राज्यतिं विवेद लेभे ॥४॥ तां चाज्यतिं तस्मिन्नग्नौ व्यौक्षत् अत्यजत् इदमाज्यतिद्रव्यमोषं पक्वं कृत्वा धय पिबेति एवमग्नौ प्रक्षिप्तात्तस्मादोषधयः पृथिव्यां समभवन् ॥५॥ एवमनयोरुत्पन्नयोः सतोः सोऽग्निरपि प्रजापतिसकाशात् भक्षणादुपरतः पराङ्मुखः सन्पर्यावृत्तो बभूव ॥६॥ अत्स्यतो भक्षणं करिष्यतः ॥७॥ होमद्रव्यस्य पयस उत्पत्तिं वक्ष्यन्गोरुत्पत्तिमाह तऽउ हेति । तस्य स्तोत्रदेशस्य यत्परिश्रयणं स समुद्रोऽभवत् यश्च स्ताव (!) स्तोत्रदेशः सा पृथिवी जातेत्यर्थः ॥११॥ पुनरागक्राम इति स्तोत्रदेशात्प्रागुत्क्रम्य तस्मात्स्तोत्रात्सम्भूतां गां ते देवाः प्राप्नुवन् ॥१२॥ तासां गवां यज्ञस्य च साधारणमेकं नामोपदिश्य प्रशंसति तद्वाऽइति ॥१४॥ इमे यजमानाः नोऽस्माकं मध्ये कस्मै प्रथमाय होष्यन्ति ॥१६॥ अग्निर्हि अनुष्ठया अनुष्ठानेन प्रयत्नेन स्वकीयं रेतो गवि पयोरूपेण निवेर्तयन् (! वर्तयति ?) । हूयमानस्य च पयसो यद्व्यश्नुते विशुद्धिमेति ॥१७॥४॥२॥

सायंप्रातर्होमयोः कालविशेषं विधित्सुरग्निहोत्रं सूर्यात्मना प्रशंसति सूर्य इति ॥१॥ तासां गर्भसाम्यमाह ईलिता होति रात्री हि सर्वाः प्रजाः संज्ञानानाः समानमेकविधं ज्ञानं प्राप्ता ईलिता (? प्राप्रहोलि° Cod.) स्तुताः हृष्टाः [शेरे] शेरते लोपस्त आत्मनेपदेष्विति तलोपः । पुनरपि गर्भसाम्यमाह अथ यदिति गर्भरूपेणाग्नाववस्थितं सूर्यं रात्रिस्तिर एव तिरोहितमाच्छादितं करोति यस्मादेवं तस्मादसौ गभः ॥३॥ यथार्थं यथाप्रयोजनं सर्वाः प्रजा विसृज्यन्ते प्रवर्तन्ते ॥६॥ सायमग्निहोत्रस्याहवनीयविहरणमस्तमयात्प्रागेव कर्तव्यम् । गार्हपत्यादाहवनीयं प्रणीयोद्धरन्ति । अनुद्धृतमाहवनीयमभिलक्ष्य सूर्योऽस्तमगादिति सर्वे निन्दन्ति ॥७॥ आवसत्यस्मिन्नित्यावसथमासनम् ॥८॥ यथा गते अतिथौ गृहादपगते सति शून्यं तदावासस्थानं प्रति पंतर्व्याणयात्रयादिकमाहरेत् (?) ॥९॥ एतावेवास्तमितानुदितहोमौ प्रकारान्तरेण प्रशंसति द्वयमिति ॥१०॥ मूल्यमूलोभयनिष्पन्नस्य सर्वप्राणिजीवनहेतोः शारात्मक-

स्य (?) रसस्य भागं प्रथमं देवेभ्यस्तत्स्वामिभ्यो जुहवानि पश्चात्तदुपभुक्तशेषैः सर्वे वयमुपजीवाम इत्यनेनाभिप्रायेण पयसाग्निहोत्रं जुहुयात्। अतो होमानन्तरं रात्र्या[ः] काले तदाशितं (यदशि°?) भवति (भबाति Cod.) तत्सर्वहुतशिष्टमेवमुक्तं भवति निरवत्तबलीति निष्कृष्यावत्तो बलिर्देवभागो यस्मात्तन्निरवत्तबलि। एवमग्निहोत्रं जुह्वत्पुरुषः हुतोच्छिष्टस्यैव रात्रावशिता भोक्ता भवति ॥११॥ अनुपस्थितः अपरिसमाप्तः सर्वदा तद्युक्तः ॥१३॥ शृतमसत् पक्वं भवेत्। कियदवधिः (? वाक Cod.) पाक इत्याशङ्क्य तत्रैकं मतमुपन्यस्यति तदाहुरिति। उदन्तं पाकवशादुद्गतान्तं बुद्बुदवत्। रेतःसंस्तुतं ह्येतत्पयः तच्चोपदग्धमप्रजज्ञि अप्रजननशीलं प्रजोत्पादनं न भवति ॥१४॥ कथं तर्हि दग्धव्यमिति (दोतव्य° Cod.) अधिश्रित्यैव अधिश्रयणानन्तरमेव जुहुयात् ॥१५॥ तदवज्योतयतीति ज्वालायुक्तेन (? द्वा° Cod.) मार्गेणावाङ्मुखं (? दमागे° Cod.) प्रकाशयतीत्यर्थः। उदकस्य विन्दुराश्चोतयितव्य आसेक्तव्य इति ब्रूयात् ॥१६॥ चतुर्भ्यः स्तनेभ्यो दुग्धवाच्चतुर्धाविहितत्वम्। समिद्धहोमायैवेति समिद्धेऽग्नौ होमार्थमुन्नीतपयस्काय। (? स्काया Cod.) वैकङ्कत्यां स्रुचि एकां समिधमुपरि निधाय गार्हपत्यदेशादाहवनीयं प्रतिसृत्यैव (धृत्यैव Cod.) पूर्वामाहुतिं जुहुयात्। होष्यन्नुपसादयतीति यदुपसादनं तैत्तिरीयके आम्नातं तदनूद्य तस्यायुक्ततां (तस्य यु° Cod.) दृष्टान्तेनोपपादयति स यदिति। अन्तरा निदध्यादिति भोक्तुमुपविष्टस्य पुरः स्थितं पात्रमप्राप्य मध्योमार्गादिसितमन्नादिकं (! मध्ये मार्गेऽशनमन्ना° ?) निदध्यात् एवं तत् ॥१७॥ देवाः सन्तीति अग्नौ प्रक्षिप्तेनाग्निहोत्रहविषोपचिता[व]यवाः सन्तः सर्वदा विद्यन्ते ॥१९॥ मनुष्याननु मनुष्याधीनतया तिष्ठन्ति ॥२०॥ अस्याग्निहोत्रस्य याज्ञवल्क्याभिमतं पाकयज्ञत्वमुपन्यस्यति तदु इति। न खल्वग्निहोत्रहोमो दर्शपूर्णमासादियज्ञकेवलयज्ञत्वेन मन्तव्यः अयं खलु पाकयज्ञ इव भवति। उत्सृप्य (उत्पृष्ठ Cod.) बहिर्निर्गत्य। पशव्यं पशुभ्यो हितं पशुप्राप्तिसाधनम् ॥२१॥ अमूं विप्रकृष्टां यामाहुतिं प्रजापतिः सृष्टिकाले प्रथममजुहोत् सैषा एकाग्निहोत्रस्य पूर्वाहुतिः अनन्तरं च यदतो (यदेतो Cod.) ऽग्निवायुसूर्याः पश्चादिवाध्रियन्त अवस्थिताः ॥२२॥ द्वितीया तु स्विष्टकृत्स्थानीयेत्याह अथ येति ॥२३॥ आशा गोचरं प्राप्तव्यम् ॥२४॥ अनद्धा अप्रत्यक्षम् ॥२५॥ यत्तु स्थाल्यामवशिष्यते तत् नाग्निहोत्रोच्छिष्टं (? तत्तुर्नग्निहोत्रोच्छिष्टो Cod.) तत्र दृष्टान्तः यथा परिणह (!) इति परितो नद्धं परिवीतं (°श्रेतं Cod.) धान्यपूर्णं शकटस्योपरि स्थानम् यथा तस्माद्धविषो (षे?) निर्वापयितुं तद्गतं धान्यं न शेषः किं तु पुनरपि यागान्तरयोग्यमेवमेव तत्स्थाल्यां (ततत् स्था° Cod.) पयः ॥३१॥१॥३॥

अथाग्न्युपस्थानं विधित्सुस्तेषामग्नीनां व (?) दैवतत्नूपतामाह एता इति। योऽस्ति यो यजमानो विद्यते नलो (!) नैषध (!) इति निषिधदेशाधिपतिर्नलः प्रसिद्धो राजा ॥१॥ अन्वाहार्यपचनोऽग्निः एष एव नलो (!) नैषिध इति निर्दिष्टः। निषिधराजस्य च नलस्य (!) दक्षिणाग्नेश्च साम्यमाह तद्यदिति अग्निहोत्रहोमकाले एतमन्वाहार्यपचनं यत् यस्माद्दक्षिणतः अहरह[राह]रन्ति तस्मादेव नैषदो (!) नलो (!) ऽपि यमस्य राज्ञो दक्षिणत उपगच्छतीति लोकप्रसिद्धिः ॥२॥ भस्मोद्धृत्येति गार्हपत्याहवनीयादिगतं भस्मोद्गृह्य यत्प्रातरावसथे परावपन्ति ॥३॥ आहवनीयस्य समीपे यत्स्थानमासनं शयनं वा क्रियते तत्तस्योपस्थानम्। प्रतिपरेत्याहवनीयागारात्प्रतिनिवर्त्य ॥४॥ पल्ययेत परिगमनं करोति ॥५॥ उपवसथेऽहनि ॥७॥

का° ४. १३. ७-१०. ॥८॥ [धूप्यतऽइव] धूमा[यमा]न-इव भवति । अअज्ञयेव वत् अप्रियेणैव एकवारम् ॥९॥ बल्बलीति (वत्येलोवं Cod.) शब्दायते ॥११॥ काष्ठेषु दग्धेषु संशाम्यतोऽग्नेरर्चिः प्रतितरां निकृष्टतरामिव ऊर्ध्वाधोगमन[रहित-इव भवति?] ॥१२॥ सर्वासु ज्वालासु निद्दचासु (?) केवलमङ्गारा अत्यर्थं दीप्यन्ते ॥१३॥ एतेषां रुद्राद्यवस्थाविशेषाणां मध्ये एकं सवत्सरपर्यन्तं निरन्तरमनुतिष्ठेत् यदि यजमानः स्वयमेवाग्निहोत्रं जुहोति भवति अन्यो वाध्वर्युर्जुहुयात् उभयोरप्येष संवत्सरनियमः । अपोऽभिलक्ष्य वापीकूपादिकं खनन्नन्यद्व्रीहियवाद्यन्नं सम्पादयन् [वा] सामि अर्धकृते यथा निवर्तेत एवमेव तदन्यथाग्निहोत्रहवनम् (? थाहवनीयम् Cod.) । सार्धं सह नैरन्तर्येण ॥१४॥ अन्नाद्यमभितृणत्ति उत्पादयति ॥१५॥ भार्याः भर्तव्याः प्रजाः । यत्र खलु भोक्तॄणामल्पीयस्त्वं भोग्यसम्पत्तिर्भूयसी तत्खलु समृद्धम् ॥१८॥२॥३॥

अथैतयोर्गार्हपत्याहवनीययोरग्न्योरुपस्थानं विधित्सुः प्राग्विहिते आधानाग्निहोत्रे समुच्चित्य क्रमेण स्तौति यत्रेति । दध्रे उद्युक्तो बभूव । इतीदं सर्वं जगद्व्याकुलमभूत् । अतितिक्षमाणः प्रजाभिश्चिकीर्षितं पेषणमसहमानः ॥१॥ तितिक्षे सोढुं शक्नोमि ॥२॥ एवमग्न्याधानेन जनितस्याग्नेर्भरणं विधाय तस्य भरणात्प्रागुद्वासनं निषेधति तन्नेति । सामि मध्येऽपयन्नाग्निमुद्वासयेत् (?) विसर्ज[ये]त् तर्ह्यस्मै यजमानाय सोऽग्निः सामि अर्धग्लानियुक्तो भवति। तस्मादामरणान्तमग्निर्धार्य इति नियमयति तस्मादिति ॥४॥ ऋषिणा मन्त्रेण [ऋक्स° १. ८९. ९.] । हे देवाः अन्ति अन्तिके मनुष्याणां समीपे आयुष्ट्वेन परिकल्पिताः शतसंख्याका एव शरदः संवत्सराः खलु यत्र यस्मिन्नायुषि शतसंवत्सरे तनूनां शरीराणां जरसं जरां चक्रा कर्तारस्था (?) यत्र च पुत्रासः सन्तोऽप्यपत्योत्पादनेन पितरो भवन्ति नोऽस्माकं तदायुर्गन्तोर्गमनात्पूर्वं मध्ये (!) मा रीरिषत हिंसत (हिसतं Cod.) प्राक्कृक्मिति (?) ॥६॥ अग्निहोत्रहोमस्यामृतत्वप्राप्तिसाधनत्वं वक्तुं सूर्यस्य मृत्युरूपतां प्रतिपादयति । सूर्यस्य किरणैः प्राणेषु बद्धा इत्यर्थः । अश्वोऽभिधीयते बध्यतेऽनयेत्यश्वाभिधाना तया अभीशवोऽन्या रज्जवस्ताभिर्वा । प्राणानभिलक्ष्य अवतायन्ते अवसार्यन्ते ॥७॥ यदा तु विद्वानुदीरितरीत्या सूर्यमतिक्रम्य वर्तते तदाहोरात्रे एवातोऽर्वाचीने भवतः तथा चाहोरात्रानाक्रान्तत्वाद्विदुषः सुकृतं न क्षीयते ॥११॥ रथोपस्थे रथस्योत्सङ्गे । पल्यङ्गयमाने पर्यावर्तमाने । अर्वाचीनोऽवाङ्मुखः ॥१२॥ आहवनीयस्य पुरस्तात्परिक्रम्य गार्हपत्याहवनीययोर्मध्ये गच्छेत् । तथा च सूत्रितं का° ४. १३. १२-१३. ॥१३॥ यदेतद्दक्षिणेन वेति कात्यायनेन विकल्पेनोक्तं तद्दूषयति अथ य इति ॥१४॥ स्वर्ग्यायाः स्वर्गप्राप्तिहेतुभूतायाः । नौमण्डे उभे पार्श्वे भित्ती । नावमजति क्षिपति प्रेरयतीति नावाजः ॥१५॥ आरुह्यतेऽनेनेत्यारोहणं प्रवेशद्वारम् ॥१६॥ अथैतदग्निहोत्रं चित्याग्निसम्पत्त्या स्तौति अथ यामिति ॥१७॥ अथ चित्यस्याग्नेः संवत्सररूपतां ब्रुवन् तावत्कालसाध्यस्याग्निहोत्रहोमस्य तत्सम्पत्तिमुपपादयति प्रजापतिरिति । चित्योऽग्निः प्रजापतिना सृष्टत्वात्तदात्मकः प्रजापतिश्च संवत्सरकालात्मकः अतः संवत्सरपर्यन्तमनुष्ठितमग्निहोत्रं (? °न्तं उममितिष्ठतमग्नि° Cod.) चित्येनाग्निना समानं सत् संतिष्ठते समाप्तं भवति तथा च एकैकसंवत्सराग्निहोत्रानुष्ठानेन चित्याग्न्यनुष्ठानं कृतं भवति ॥१८॥ अथैतदग्निहोत्रं महदुक्थसम्पादनेन स्तौति सप्तेति । चित्योऽग्निर्महाव्रतं साम बृहतीसहस्रात्मकं बृहदुक्थं चैतानि त्रीणि सहचरा-

णि तत्र चित्याग्निसम्पत्तिरुक्ता महदुक्थसम्पत्तिस्त्वेवमवगन्तव्या तत्र हि गायत्रीतृचाशीतिरौष्णिहो तृचाशीतिर्बार्हतो तृचाशीतिरिति तिस्रस्तृचाशीतयो विहिताः । अतश्चैकस्मिन्संवत्सरे अस्य यजमानस्याग्निहोत्रं तृचाशीतित्रयात्मकमहदुक्थेन सम्पन्नं भवति ॥११॥२०॥३॥३॥

अथ सायंकालीनमग्न्युपस्थानं विधित्सुस्तदर्थमाख्यायिकामाह अग्नाविति । एतच्च पुनराधानब्राह्मणे [२. ३.] व्याख्यातम् तत्र ऋतुप्रवेशः (ध्यनुप्र° Cod.) अत्र तु रात्रौ (? त्रि । Cod.) इत्येतावान्विशेषः ॥१॥ कमिति वाक्यप्रतिपूरणे (? °क्यमिति° Cod.) ॥३॥ अग्निरपि उपस्थानेन याच्यमानस्तिरो भवति याचितफलस्याप्रदानेन नैव यजमानं हिनसानि अत एव द्वेष्योऽपि न भवानि ॥४॥ वाद्येन वदनीयेन स्तुतिशब्देन कर्मणा वा परिचरणलक्षणेन । यस्तु एवं निष्ठुरं भाषते स एनं ब्राह्मणादिं प्रभुं द्वेष्टोरीश्वरः विद्वेषणं कर्तुं समर्थः स्यात् तथा निर्वेदं मनस्तापं गन्तुमीश्वरः स्यात् निष्ठुरभाषणप्रकारमाह किं न्विति हे देवदत्त यस्त्वं मह्यं न (त Cod.) ददासि स त्वं मम किं चासि न किंचिदपि भवसि त्वया किं प्रयोजनमित्यर्थः । तदुपस्थानं तु फलप्रार्थनरूपत्वेन निष्ठुरभाषणवदपराधहेतुरिति न कर्तव्यमित्याह एतदिति होमसमिन्धनाभ्यामग्निं प्राप्य पुनरुपस्थानेनैव याचते याचनं चायुक्तमित्यनुपस्थानपक्षो ज्यायान् ॥६॥ समस्तं सम्पूर्णम् ॥७॥ उपवत्या उपशब्दयुक्तया ऋचा । योऽयमुपेत्युपसर्गः इयं भूमिरेव सः । द्वयेन द्विप्रकारेणेयं भूमिरुपशब्दवाच्या । न्यृच्छति नितरामार्तिं प्राप्नोति । क्षयरहितेनैव भूम्ना प्रतिपद्यते उपस्थानं प्रारभतऽइत्यर्थः ॥९॥ क्रमेणोपस्थानमन्त्रान्विधित्सुस्तावदुपवतीमृचं विधाय प्रशंसति स आहेति ॥१०॥ अनुधावति अनुसरति प्रशंसतीति यावत् ॥११॥ सनीनां दानानाम् ॥१५॥ समाहार्यम् एकैकामृचं प्रदेशान्तरे पठितां समाहृत्य समुदायीकृतमेतत्षडृचं सूक्तम् । अदो द्युलोक एव प्रत्नम् तस्य प्रत्नशब्दनामधेयतामुपपादयति यावन्त इति । सनेति निपातः पुरेत्यस्यार्थे । इमे द्यावापृथिव्यावन्तरेण अग्निर्मूर्धेत्यादिमन्त्रप्रतिपाद्याः सर्वे कामा अवस्थिताः ॥१६॥ यतो यज्ञास्त्रिवृत्प्रायणाः त्रिवृत्प्रारम्भाः निर्वापप्रोक्षणसामिधेन्यनुवचनादिषु त्रिरावृत्तिदर्शनात् ॥१७॥ ग्रहनक्षत्रादीनि चित्राणि ॥२२॥ एतेन चित्रावसोऽइति मन्त्रेण रात्रेः पारमवसानं स्वस्ति क्षेमेण (°मेन Cod.) समश्नुवते स्म ते सम्प्राप्नुवन् । एतावन्निति उपप्रयन्त इत्यारभ्य चित्रावसोऽइत्येतावत्पर्यन्तमाहवनीयसमीपे तिष्ठञ्जपेत् ॥२३॥ अग्निहोत्रहोमार्थस्य पयसो दोग्ध्री या गौः तामन्ध स्थेति मन्त्रेणाभिगच्छेत् अन्धःशब्दोऽन्नवाची तेन च तज्जनितं वीर्यं लक्ष्यतऽइति व्याचष्टे यानीति । भक्षीय सम्भजेय ॥२५॥ एवमाहवनीयस्य समन्त्रकमुपस्थानं सम्प्रपन्नं (? °पचं Cod.) विधाय गार्हपत्ये तद्विधत्ते अथेति । अतिक्रमजनितापराधनिवृत्तयेऽस्मै गार्हपत्याय नमस्कारमेव करोति इतरथा हि प्रथमाग्निं गार्हपत्यमतिक्रम्याहवनीयस्योपस्थानकरणात्स गार्हपत्यः क्रुद्धः सन् य[थै]नं न हिंस्यात् तथा नमस्कारः क्रियते ॥२८॥ अनेन सोमानमिति तृचस्य जपेन द्यावापृथिव्योर्मध्यवर्तिनोऽन्तरिक्षस्योपस्थानं कृतं भवति । नन्वेतत्तृचं ब्राह्मणस्पत्यम् कथं बार्हस्पत्यमिति नैष दोषः तयोर्भेदाभावात् अत एव दाशतय्यां गणानां त्वेत्यादिषु (ऋक्सं° म° २. २३. १.) ब्राह्मणस्पत्यसूक्तेषु (°क्त्योषु Cod.) तत्र बृहस्पतिः स्तूयते ॥३६॥ एतदपि सूक्तमन्तराग्नी तिष्ठञ्जपेत् । अस्य तृचस्य प्रयोजनमाह तत्रास्तीति तत्र तस्मिंस्तृचे नाध्वसु वारणेष्वित्यस्ति तस्याभिप्रायो वर्ण्यतऽइति शेषः एते ह

वाऽइत्यादि ॥३७॥ स्तरीर्हिंसकः ॥३८॥ अनुसंतनवत् अनुक्रमेण संतनुयात् संततमनवच्छिन्नं कुर्यात् ॥४१॥४॥३॥

एवमग्निहोत्रहोमे महोपस्थानं विधाय लघूपस्थानमत्रापि दर्शयति अथेति । अग्निहो[त्रहो]मानन्तरं भूर्भुवः स्वः सुप्रजा इत्यनेनैव मन्त्रेणाहवनीयमुपतिष्ठेतेत्यर्थः । पूर्वोक्तादुपस्थानमन्त्रगणादस्य (? न्नतातादस्य Cod.) मन्त्रस्यातिशयमाह तत्सत्येनेति सत्यरूपा एता व्याहृतयः त्रयीसारत्वात् एवं च व्याहृतिरूपेण सत्येनैव इमां मन्त्ररूपां वाचं समर्धयति तया च समृद्धया वाचा प्रागुक्तां सर्वामप्याशिषमाशास्ते प्रार्थयते । तदाशासनप्रकारं दर्शयति सुप्रजा इति ॥१॥ प्रागुक्तोपस्थानेनास्य समानकार्यकरणवाद्विकल्पमाह यद्वाऽइति । अदः पूर्वोक्तं दीर्घं बहुकर्तव्योपेतं बहुमन्त्रसाध्यं यदग्न्युपस्थानं सा आशीः फलप्रार्थनम् तथा भूर्भुवःस्वरिति मन्त्रसाध्यमुपस्थानमिति तादृगाशीर्युक्तम् अत एतावतैवोपस्थानेन तत् प्रागुक्तं सर्वं फलं प्राप्नोति ॥२॥ अथ प्रवासं करिष्यता यजमानेन कर्तव्यमुपस्थानं दर्शयति अथेति ॥३॥ वाहनसहितश्चेदश्वरथादीन्प्रधावयति प्रगमयति । स च गच्छन्यस्मिन्देशे वेलां स्वनिवासग्राममर्यादां मन्यते तत्स्थानप्राप्तिपर्यन्तं वाचंयमो गत्वा तदनन्तरं वाचं विसृजेत् । प्रोष्य प्रवासं कृत्वा पुनरागत्य । वागयतस्य यजमानस्याग्न्यागारस्य च मध्ये ॥६॥ समिदाधानं विधत्ते अथेति उपस्थानानन्तरमाहवनीयसमीपे उपविश्य तृणोपलक्षितानि समिदादीनि प्रच्छिद्य तस्मिन्नग्नौ प्रक्षिपेत् लुपु छेदने ॥८॥ इत्थं प्रवत्स्यदुपस्थानमागतोपस्थानं च समन्त्रकं विधाय तयोरमन्त्रकपक्षमप्याह स वाऽइति ॥१०॥ परिदां परिदानं रक्षणम् ॥११॥ एवं प्रवासादागतस्य यजमानस्याग्निविषयं कर्तव्यमुपदिश्य गृहविषयमपि (°मतिपद Cod.) वक्तुं प्रतिजानीतेऽथात इति उपचरणमुपचारः । तस्य यजमानस्य कुलं वंशं विक्षोब्धोः विनष्टं कर्तुमीश्वरः व्यत्ययेनैकवचनं गृहाः समर्था भवन्ति ॥१४॥१॥४॥

अथामावास्यायां पिण्डपितृयज्ञस्य मासि-मासि कर्तव्यतां विधित्सुस्तदर्थमाख्यायिकामाह प्रजापतिमिति ॥१॥ स्वधाकारोऽपि वः । मनस-इव जवो मनोजवः सोऽपि युष्माकम् ॥२॥ प्रावृताः उत्तरवाससा संवृताः केवलवीतवाससो (° लवित Cod.) निवीतिन इत्यर्थः ॥३॥ शश्वद्बहुकृत्वः । परेषां दृष्ट्याकादकसामर्थ्यं (? दष्टाद्याद° Cod.) तमः अघटितघटनशक्तिर्माया ॥५॥ मेद्यति स्निह्यति पुष्यति । विह्वर्छति अधः पतति । यदपि किंचिद्वाचा व्याहरति भाषते तथैव यथार्थं (? प्रसार्थं Cod.) भवति हि यस्मादसौ एतद्देवसत्यं देवेन प्रजापतिना कल्पितं सत्यं गोपायति रक्षति । एतस्य प्रजापतेरुच्चरितरूपं व्रतं चरितुं यो यजमानः शक्नोति स देवसत्यं गोपायति ॥६॥ जीवतां हि मनुष्याणां सायंप्रातरशनं विहितम् मरणादूर्ध्वं वस्वादिरूपपितृभावं (!) प्राप्तेभ्यस्तेभ्यो मासि-मास्येव पितृयज्ञरूपमशनं दातव्यम् स च पितृयज्ञोऽमावास्यायामेव कर्तव्यः यस्मिन्नेव काले इन्दुः (इन्द्रः Cod.) पूर्वस्यां दिशि पश्चिमायामपि न दृश्यते । कलहं कुर्यात् सोमस्य देवानामन्नत्वेन (? देवा अत्रत्वेन Cod.) भोक्तुं देवैरपि संनिधानात् दीयमान विविषयः कलहो भवेत् ॥७॥ गार्हपत्यस्य पश्चिमदेशे व्रीहिपूर्णस्य निर्वापार्थस्य शकटस्य दक्षिणत आसीनः प्राचीनावीती एतं (एवं Cod.) पितृयज्ञार्थं हविर्गृह्णीयात् । ततस्तस्माद्धविर्ग्रहणस्थानात् । ऐष्टिकहविष (ऐष्टि° Cod.) इव फलीकरणस्य त्रित्वं प्रसक्तमपवदितुं सकृत्त्वं विधत्ते । हि यस्मात् सकृदेकवा-

रमेव पराञ्चः पराञ्चो गताः प्रेताः पितरोऽभवन् न तेषां पुनरावृत्तिरस्ति अतस्तेषां सकृत्त्वमसाधारणो धर्मः ॥१॥ सकृत्फलीकृतांस्तण्डुलान्स्थाल्यां प्रक्षिप्य तं चरुं दक्षिणाग्नौ अपयेदित्यर्थः उद्वासनात्प्रागेव तस्मिंश्चरावभिघारणं विधत्ते तस्मिन्निति अधिश्रिते अग्नेरुपरि स्थापिते एतस्मिंश्चरौ पक्वे सत्याज्यं प्रत्यानयति प्रतिक्षिपति। देवेभ्यो यदाज्यं देयं तद्धोमेनैव दीयते मनुष्येभ्यो देयं यत्तत्तेषां पुरस्ताद्भोजनपात्रेषूद्धरन्ति उद्धृत्य पुरतः स्थापयन्ति पितॄणां तु एवमधिश्रितावस्थायामेव चरौ आज्यमवनेयम् (चरो अज्य° Cod.) ॥१०॥ चरुमालोड्य येन काष्ठेन गृहीत्वा ह्रियते तन्मेक्षणं तदभ्यादानं (? °दभ्रा° Cod.) स्विष्टकृद्भाजनं अस्य होमस्य स्विष्टकृत्स्थानीयम्। अथ पिण्डप्रदानाय स्थानविशेषं तत्संस्कारं विधाय प्रशंसति अथेति दक्षिणाग्नेरुत्तरेण देशे स्फ्येन (स्यचेन Cod.) सकृदुल्लिखति एकयत्नेन दक्षिणाप्राचीं लेखां कुर्यात् तदुल्लिखितं स्थलं वेदिभाजनं वेदिस्थानीयं तत्कार्यकरमित्यर्थः ॥१३॥ उल्लिखितदेशस्यान्तेऽग्नेर्निधानं विधत्तेऽथेति परस्तात् परस्मिन्विप्रकृष्टे पर्यन्ते। विमथ्नीरन् अपहरेयुः ॥१४॥ अदःशब्दस्थाने सम्बुद्ध्यन्तं पित्रादीनां यथाक्रमं नाम निर्देष्टव्यम् हे यज्ञशर्मन् मम पितः अवनेनिक्ष्व दास्यमानं पिण्डं भोक्तुमात्मीयौ पाणी शोधयेति। अशिष्यते भोक्ष्यमाणाय ॥१६॥ सकृदाच्छिन्नानि एकयत्नेन क्षिप्तानि (?) उपमूलं मूलसमीपे दिनानि खण्डितानि बर्हींषि पितृयज्ञार्थानि भवन्ति एवंगुणविशिष्टानि बर्हींष्याहर्तव्यानीत्यर्थः ॥१७॥ दक्षिणा दक्षिणत उल्लिखितप्रदेशे तानि बर्हींष्युपस्तृणाति। तत्र तस्मिन्बर्हिषा स्तीर्णे देशे पिण्डान्दद्यात् तत्र प्रकारविशेषमभिनयेन विधत्ते स वाऽइतीति इति अनेन प्रकारेण अङ्गुष्ठतर्जन्योर्मध्येन पित्र्येण (? पीत्यन Cod.) तीर्थेनेत्यर्थः देवमनुष्यसम्प्रदानके दाने तद्वैपरीत्यकथनेनोपपादयति इतीव वाऽइति इतीव अनेन खलु प्रकारेण अङ्गुल्यग्रेण देवतीर्थेन (? दवार्थेन Cod.) देवेभ्यो हवींषि जुह्वति मनुष्येभ्यस्तु(? स्त्व Cod.)यथायोगं भोक्तव्यमन्नमुद्धरन्ति उद्धृत्य पात्रान्तरे स्थापयन्ति न तु तत्र देवपित्रादितीर्थविशेषोऽपेक्षितः ॥१८॥ शाखान्तराभिमतमन्त्रशेषनिरासार्थ एवकारः। पित्रनन्तरभाविनां यच्छब्दनिर्दिष्टानां तेषां स्वयं पिण्डदाता सहभावी भवति। तथा च एव एषा (येषां?) स्वयं [सह]भावी तेभ्यः पिण्डदाने स्वात्मने पिण्डं दत्तवान्भवति। तद्यदित इत्यादि अनेन हि क्रमेण पितृत्वं प्राप्ताः प्रथमं प्रपितामहः पश्चात्पितामहस्ततः पितेति इमं क्रमं परित्यज्य पिण्डदाने इतः पितृत आरभ्य प्रपितामहान्तं पराक् पराचीनं पिण्डान्दद्यात् यतस्ते पितरः सकृत्त्वपराक्त्वधर्मयुक्ताः ॥१९॥ पराङ्मुखः सन्पिण्डाभिमुख्यं विहाय (?) पर्यावर्तेत। पर्यावर्तनकालस्य परिमाणं विधत्ते स वाऽइति यावत्तमनं ग्लानिर्भवति पक्षान्तरमाह स वाऽइति द्वादशक्षणात्मको यो मुहूर्तसंज्ञकः कालः एवकारः पूर्वोक्तपक्षव्यवच्छेदार्थः ॥२१॥ उपपल्यय्य पिण्डसमीपं परिप्राप्य ॥२२॥ नीविः परिधानीयस्य वाससो दशा तामुद्वृह्य विस्रंस्य। ऋतवः पितर इति वसन्ताद्यृतुषु प्रमीतस्य तत्तदनुरूपत्वप्राप्तेस्तादात्म्यव्यपदेशः तथा चान्यत्र श्रूयते यस्मिन्नृतौ पुरुषः प्रमीयते सोऽस्यामुष्मिंलोके भवति यदि वसन्ता(!) प्रमीयते वसन्तो भवतीत्यादिना। नमस्कारमन्त्रो निगदव्याख्यात इत्यभिप्रेत्य तच्छेषमुपादाय व्याचष्टे गृहान्न इति। पिण्डशेषस्याघ्राणं विधत्ते अथेति अवघ्राणं पिण्डान्पात्रे प्रत्यवधाय प्रतिक्षिप्य कर्तव्यं तच्चावघ्राणं यजमानस्य स्वकीया

ंशः । स्तीर्णस्य बर्हिषः प्रतिपत्तिं विधत्ते अग्नाविति अभ्यादधाति प्रक्षिपति । उल्मुकस्यापि संसर्जनं विधत्ते पुनरिति ॥२४॥२॥४॥

अथ विधित्सिताया आग्रयणेष्टेर्मतभेदेन प्रयोजनं दर्शयंस्तावत्कहोलस्य (!) मतमुपन्यस्यति तद्ध इति । अयं व्रीहियवाद्योषध्यात्मको रसः । अस्य रसस्य कर्मणि षष्ठी इमं रसं देवेभ्यः प्रथमं हुत्वा अथानन्तरं हुतशिष्टमिममश्नाम भुनजामहै ॥१॥ केवलमनाशनेन (!) ता इमाः सर्वाः प्रजाः पराबभूवुः पराभूता अभवन् । I do not know how to explain the नेत् : all the mss. of the text give it ॥२॥ यज्ञेनैवेति निश्चित्य एषां मनुष्यादीनां यत्कल्प्यं कल्पनीयं सम्पादयामास तत् [अ]कल्पयन् । न केवलं देवा एव ऋषयोऽप्येवमेवाकल्पयन् ॥३॥ आङ्गिरभिगन्तव्यावधिभूतः पदार्थः तमजामहै धावाम ॥४॥ पुराणानां पुरातनानां व्रीहीणां सम्बन्धिनं तं वैश्वदेवं चरुं कुर्यात् । नेत् क्षत्रियजातेरुपरि वैश्यजातिं तत्समवेनारोहयाणि आक्रान्तां करवाणि ॥७॥ अथ तस्यामेवाग्रयणेष्टौ तृतीयं द्यावापृथिव्यं हविर्विधातुमाह तद्ध इति । नवधान्यरूपं हविरनयोर्द्यावापृथिव्योः रसः । तस्य इयं भूमिरेव कपालम् ॥८॥ सर्वेषु यागेषु स्विष्टकृद्यागोऽन्वाभक्तोऽनुप्राप्तोऽस्ति शेषात्स्विष्टकृतेऽवद्यतीतीष्टशिष्टप्रतिपत्तित्वेन तस्य विहितत्वात् अत्रैककपालं पुरोडाशं सर्वहुतमेव जुहोति हविरन्तरवन्नाग्नि (?) ऽग्नये ना[व]द्यति अतोऽस्यैककपालस्य स्विष्टकृद्यागाभावात्सैव परिचक्षा निन्दा । दोषान्तरमप्याह उतो हुत इति अपि च अग्नौ हुतः सन्नेककपालः पुरोडाशो यदि पर्यावर्तेत ॥९॥ तत्र विषये आहुर्ब्रह्मवादिनः कथयन्ति अयमेककपालः पर्यावृत्तोऽभूत् तेन पर्यावर्तनेन राष्ट्रमेव पर्यावृत्तं मोहिष्यति मूढं भविष्यतीति । आहवनीयो हि सर्वाहुतीनामाधारभूतः तत्प्राप्तेः पूर्वं पर्यावर्तने दोषः तदुत्तरकालं तु अपि दश कृत्वो दशवारं पर्यावर्तेत तत्रादरो नैव कर्तव्यः देवतोद्देशेन हविषश्चोदितद्वारे (? धारे Cod.) प्रक्षिप्तत्वात् । तस्मात्स्विष्टकृद्यागाभावकृतैव निन्दा परिशिष्यते तत्परिहाराय पक्षान्तरमाह यदीति यदि चान्ये शाखिनो वदन्ति को नाम तदुक्तदोषसंधानं कर्तुमुपेयाडुपगच्छेत् अतो दोषसहित एककपालपक्षः परित्यज्यः किं तर्हि द्यावापृथिव्यस्य यागस्य द्रव्यम् तदाह तस्मादिति यदेतद्ध्रुवास्थमाज्यं (? ध्रुवाज्यस्थमाज्यं Cod.) सर्वयज्ञसाधारणं तस्यैव सकाशादादाय द्यावापृथिव्यो यजेत । आज्यस्य द्रवत्वरूपयोगात्प्रत्यक्षरसत्वम् व्रीहियवादेस्तु धान्यस्य काठिन्यपरोक्षत्वम् । मेधेनेति सारभूतेनेत्यर्थः ॥१०॥ आलिशन्त अभक्षयन् लिश अल्पीयोभावे इत्ययं धातुरत्र तृणादेरल्पीभवनहेतौ भक्षणे वर्तते ॥११॥ किल्विषं रोगनिदानं पापम् ॥१२॥ अग्रियमिवेति अग्रे भवमग्रियम् अग्राद्घकौ चेति (अघाघको वेति Cod.) । ईजानानीजानयोराग्रयणविषयां व्यवस्थां दर्शयति स यदिति यदि स यजमानः ईजानः सोमयागेनेष्टवान्स्यात् केवलं हविर्यज्ञयाजी सन्दर्शपूर्णमासाभ्यामेव यजेत अथानन्तरमेव एतेनाग्रयणेन यजेत न प्रागित्यर्थः [दर्शपूर्णमासायागपक्षे तु to add?] किं तर्हि तदा कुर्यादिति तदाह यद्यु इति यदि तु दर्शपूर्णमासादिभिरनीजानोऽनिष्टवान्स्यात् तदा स यजमानः चातुष्प्राश्यं चतुर्भिर्ब्राह्मणैः प्राशितव्यमोदनमन्नं दक्षिणाग्नौ पक्त्वा ब्राह्मणेभ्यो दद्यात् (दत्त्वा Cod.) ब्राह्मणाश्च तं भुञ्जीरन् ॥१३॥ ब्राह्मणभोजनस्यापि यागोत्पादकत्वमुपपादयति द्वया वा इति । तत्तथा सति यथा

वषट्कारेण देवेभ्यो दत्तं स्वाहाकारेण हुतं च भवति एवमेवास्यानीजानस्य यजमानस्य एतद्ब्राह्मणभोजनं भवति । यागऽइव भोजनेऽपि दक्षिणादानं विधत्ते तत्रोऽइति । केचित्त्वाग्रयणेष्टावधिकृतस्यानीजानस्य नवधान्येनाग्निहोत्रहोममभिधीयते (!) अत एव सूत्रितं कात्यायनेन (४. ६. ११.) नवैः सायं प्रातरग्निहोत्रहोम इति आपस्तम्बेनाप्युक्तम् अपि वा नवानां यवानां सायं प्रातर्जुहुयादिति तदत्र निराकरोति नाग्निहोत्रऽइति अग्निहोत्रकर्मणि नवं हविर्न जुहुयात् यदि जुहुयादिन्द्राग्न्यादीनामाग्रयणदेवतानामग्निहोत्रदेवतया (तण Cod.) सह समदं कलहं कुर्यात् ॥१४॥३॥४॥

आवृत्तिगुणविकृतौ दर्शपूर्णमासयो[ग]प्रयोग एव दाक्षायणयज्ञः तं विधित्सुराख्यायिकामाह प्रजापतिरिति ॥१॥ एके शाखिनः । एष एव खलु प्रजापतिर्वसिष्ठो नान्यः (?) सर्वश्रेष्ठत्वात् ॥२॥ श्वैक्नः श्विक्नस्य पुत्रः । स एतमिति (!) एतं प्रतीदर्शं स इति व्यत्ययेनैकवचनम् (!) ते तत्रत्या (?तत्तत्र° Cod.) जनाः प्रत्यासुः केनचित्कारणेन प्रतिचिक्षिपुः तेन च दाक्षायणयज्ञेनेष्टे सति तेषां जनानां विवचनं विशिष्टवचनं पक्षपातवचनमेवास अस्मिन्बहुमानं कृतवन्तः ॥३॥ सृञ्जयपुत्रः सुप्रा नाम । तत्तस्मात्कारणात् एतत् एतर्हीदानीमपि निर्वचनं निरन्तरवचनमस्ति व्यवहारलोके विद्यते ॥४॥ श्रुतर्षेः पुत्रो देवभागो नाम ॥५॥ पर्वतो नाम कश्चित् तस्य पुत्रः पार्वतिः । असपत्नानुपबाधा शत्रुभिरबाधिता ॥६॥ तप्तं पयो दध्ना संस्कृतं सत्पयस्या भवति ॥१०॥ अस्य दाक्षायणयज्ञस्य सोमयागरूपतां प्रतिपादयति अथेति । अमुमुपवसथऽइति सुत्यादिवसात्पूर्वमहरुपवसथः । प्रकरणान्तरे विहितत्वेन विप्रकर्षादमुमिति विप्रकृष्टवाचिना अदःशब्देनाग्नीषोमीयस्य पशोः परामर्शः ॥११॥ इत्थं दाक्षायणयज्ञस्य सोमयागसाम्यं सम्पाद्य तत एव हेतोः फलसाम्यमाह स पौर्णमासेन चेति ॥१४॥ प्राणापानरूपयोरग्नीषोमयोर्हविषा तृप्तयोर्निष्क्रमणाद्धि वृत्रो मृतः तथा चाम्नायते तस्माज्जक्षभ्यमानादग्नीषोमौ निरक्रामतां प्राणापानौ वाऽएताविति ॥१५॥ अभिषुणोत्येवैनमिति पूर्वेद्युः कर्तव्याभिषवस्थानीयोऽयमग्नीषोमीययाग इत्यर्थः । तीव्रीकरोति तीव्रमतिशयेन मदकरं करोति ॥१६॥ सांनाय्यभाजना सांनाय्ययागस्य स्थानभूता ह्यमावास्या । एनं सोमम् । स एष चन्द्रः प्रतिपदि पश्चाद्ददृशे कलारूपेण दृश्यते ॥२०॥ तस्य वाजिनहोमस्य कालं विधातुं स्तौति स वाऽइति । यज्ञस्य पश्चाद्भागे प्रस्तरपरिधिप्रहरणोत्तरकालं वाजिनहोमः कर्तव्यः । अध्वर्युरग्रे प्रथमं प्रागेव प्रागपवर्गमिल्पं वाजिनं जुहोति अग्रे वीहीति यदा होतानुवषट्करोति तदा स्विष्टकृत्स्थानीयं वाजिनशेषमुत्तरपूर्वस्यां दिशि जुहोति ॥२३॥ हुतशिष्टेन वाजिनेन दिग्व्याघारणं विधत्तेऽथ दिश इति ॥२४॥ एवं च सति एतद्वाजिनमृत्विजः सोममेव सोमसदृशमेव कुर्वन्ति ॥२५॥४॥४॥

अथ चातुर्मास्यानि विधित्सुस्तत्र वैश्वदेवस्य प्रजासृष्टिहेतुतामाख्यायिकया प्रतिपादयति प्रजापतिरिति ॥१॥ यस्मादग्रे एवमासीत् तस्मात्कारणात्तदुक्तमर्थजातमृषिणा मन्त्रेणाभ्यनूक्तं प्रतिपादितम् [ऋक्सं° ८.१०.१४.] । अत्याममत्यर्यं विनाशम् । अर्कमर्चनीयमग्निम् ॥४॥ अथानन्तरमेव यज्जायते तदेव जायते अन्यदजायमानं (? °दाज° Cod.) विपद्यते ॥५॥ आदयन्ति भाजयन्ति ॥६॥ आयतनं स्थानम् । मारुतस्तु इति तुशब्दः पयस्यायागस्य न्यायप्राप्तं षष्ठस्थानत्वं व्यावर्तयति मारुतः सप्तकपाल एव षष्ठेऽनुष्ठेय इत्यर्थः । अनिषेधा (!) इव अ-

निषेधुकः (!) नियन्तृरहिता इव । विमथिष्यामः हिंसिष्यामः ॥१२॥ यदि तु स्वतवोभ्यः प्रतिपादिके याज्यानुवाक्ये न लभते तदा स एव प्रागुक्तः केवलमारुत एव यागो भवति ॥१४॥ दध्ना संस्कृतः पयोविकारः पयस्या असौ चामिक्षाशब्देनान्यत्राप्याम्नायते तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनमिति ॥१५॥ अन्तिमं हविर्विधत्ते अथेति ॥१७॥ तत्र यानि वैशिष्ट्यकाण्यङ्गानि तानीदानीं विधातुं प्रतिजानीते अथात आवृदेवेति आवृच्छब्दः प्रकारवाची चोदकप्राप्तायामितिकर्तव्यतायां प्रकारविशेषः कथ्यते । अग्निमन्थनादेर्वैशिष्ट्यकस्याङ्गस्य विधास्यमानत्वात्तत्सहवाचितमुत्तरवेद्यावपनमपि (? °त्सहवचि° Cod.) प्रसक्तं निषेधति नोपकिरतीति सत्यां ह्युत्तरवेदौ तत्रानुष्ठीयमानमेतत्कर्म तया निरुद्धगति स्यात् तदभावे तु तत्कृतनिरोधाभावात्क्रियमाणं कर्म विसृष्टं व्यापनशीलमसद्भवेत् अत एव परिच्छेदाभावात्सर्वं कृत्स्नं सम्पूर्णमसत् कार्त्स्न्याद्विश्वदेवसम्बन्धयोग्यमसत् न ह्यसर्वस्य सर्वदेवसम्बन्धो घटते अतो विसृष्टत्वादिसिद्धये उत्तरवेदिर्न कार्येत्यभिप्रायः । बर्हिराहरणे विशेषं विधत्ते त्रेधेति त्रेधा त्रिविधं बर्हिः प्रथमं संनह्य तदेव पुनरेकधा एकविधं संनह्यति । तस्मिन्नेव बर्हिषि धर्मविशेषं विधत्ते प्रस्व इति प्रसुवते फलानीति प्रस्वः पुष्पिताङ्कुराः (°शः Cod.) । प्रसूतयुक्तानां कुशानां प्रस्तरत्वेन ग्रहणं विधत्ते तमिति तैः प्रसूभिः कुशैः प्रस्तराख्यं मुष्टिं सम्भरेत् ॥१८॥ प्रकृतितोऽप्राप्तकालविशिष्टमग्निमन्थनं (? °प्तचातकालचिशि° Cod.) विधत्ते आसाद्येति प्रकृतिवद्धविरासादनान्तं कृत्वाग्निमन्थनं कुर्यात् ॥१९॥ चोदकप्राप्तानां प्रयाजानां संख्यान्तरमाह नवेति ॥२०॥ चोदकप्राप्तस्य समिष्टयजुषोऽपि संख्यान्तरमाह त्रीणीति । तद्धि प्रकृतेर्ज्यायो भवति प्रकृतौ (त्यै Cod.) प्रयाजानां पञ्चत्वादनुयाजानां त्रित्वाच्च । यजमानस्य गोष्ठे प्रथमं जातः प्रथमजः ॥२१॥१॥५॥

विधित्सितस्य वरुणप्रघासाख्यस्य द्वितीयस्य पर्वणो वरुणपाशविमोचनहेतुत्वमाख्यायिकया प्रतिपादयंस्तद्विधिमुपनयति (धिमुन° Cod.) वैश्वदेवेनेति पुरा वैश्वदेवयागेन प्रजापतिना सृष्टाः प्रजाः वरुणसम्बन्धिनो यवान्जक्षुर्भक्षयामासुः तस्माद्वरुणसम्बन्धियवप्रघासनात्प्रजा वरुण्यप्रघासाः तत्पाशगृहीतानां तासां पाशविमोचनाय क्रियमाणा यागा अप्युपचारेण वरुणप्रघासाख्याः संजाताः ॥१॥ वैश्वदेवानन्तरं चतुर्थे मासि सम्पूर्णे सति ॥४॥ वैश्वदेवपर्वण्यादितो यान्याग्नेयादीनि पञ्च हवींषि तान्यत्रापि ॥७॥ अध्वर्युकर्तृकायामुत्तरस्यां वेद्यां प्रतिप्रस्थातृकर्तृकायां दक्षिणस्यां च द्वे पयस्ये हविषी भवतः ॥९॥ उभयोः पयस्ययोः करीराणि प्रक्षिपेत् मधुराः फलविशेषाः करीराणि तानि चोत्तरापथे प्रसिद्धानि । कं सुखम् ॥११॥ शमीपलाशानि शम्याः पर्णानि ॥१२॥ अतुषान् तुषरहितान् । करम्भपात्राणि पिष्टचूर्णाः (? प्रष्टचचू° Cod.) करम्भाः तन्मयानि पात्राणि ॥१४॥ यद्यनैलकोरिति (!) एलको (!) मेषः तत्सम्बन्धरहिता अनैलक्य ऊर्णाः कंबलोपादानभूतानि तज्जातीयरोममयाणि सूत्राणि । प्रणिज्य प्रक्षाल्य । कुशमया एवोर्णाः ॥१५॥ तावध्वर्युप्रतिप्रस्थातारौ उभौ ॥१९॥ प्रतिपरेति निवर्तते पत्नी यत्रास्ते तं देशं प्रति गच्छेत् । केन जारेण चरसि वर्तसे । अन्तःशल्या शरीरमध्ये दुश्चरितजनितेन पापरूपेण शल्येन युक्ता । प्रतिजानीत प्रतिब्रूयात् ॥२०॥ एतयैव मरुतः होष्यमाणं करम्भपात्रलक्षणं हविर्भोक्तुमाह्वयति ॥२१॥ जुह्वादिपात्रं विहाय शूर्पेणैव तानि जुहुयात् तेन हि शूर्पेण लुप्तपवनद्वारा (?) अन्नं क्रियते ॥२३॥ स्रुवाघारहोमादेः (?)

पूर्वभावित्वं कारम्भपात्रहोमस्य विधत्ते पुरेति यज्ञो वषट्कारप्रदानो यजतिचोदित आग्नेयादिः आहुतयः स्वाहाकारप्रदानाः जुहोतिचोदिताः । अहुतं होमसंस्काररहितमदन्ति भक्षयन्ति अहुतादः । मरुतां वैश्यजातित्वेन । विमेथिरे विलोलयन्ति स्म संश्लेषितवन्तः । पाशविमोचनात्प्रागेव विमथ्नते संविश्लेषयन्ति (!) तस्माद्वरुणपाशविमोचनार्थाद्यज्ञादाहुतिभ्यश्च पूर्वमेव करम्भपात्राणां होमेन मरुतां शमनं युक्तम् ॥२४॥ तेनेन्द्रेण निषिद्धाः निवारिता मरुतो भवेयुः ॥२६॥ हे इन्द्र अत्र एषु पृत्सु नोऽस्मदीयाः प्रजाः मो मा उ हिंसीः हे बलवन्निन्द्र देवैः मरुद्भिः सहितः ते तव अवयाः अवयजमानरूपकरम्भपात्रहोमोऽस्ति यव्या यवमयैर्हविर्भिर्हविष्मतो यस्येन्द्रस्य मरुतो देवाः (!) अनुचराः (!) गीः स्तुतिरूपा वाक् वन्दते स्तौति ॥२७॥ हे यजमानस्यामात्या ऋत्विजश्च यूयं यजमानस्य गृहान्पत्न्या सह भवन्तः प्रगच्छत अन्यस्माद्देशात्पत्न्यासनलक्षणात् ऊढया (!) आहवनीयसमीपं प्रापितया पत्न्या सह खल्विदानीं वर्तन्ते । यज्ञस्यापरभागेऽवस्थितां तामेतदेतर्हि प्राचीं प्रागच्छन्तीं पूर्वभागसम्बन्धिनीं यज्ञं प्रासीषदत् प्रापिपत् प्रतिप्रस्थाता ॥२८॥ संमृजन्ति एकस्मिन्नप्याग्नीध्रे पूजार्थं बहुवचनम् । स्रुच आदायेति अध्वर्युप्रतिप्रस्थात्रोरुभयोरपि प्रत्येकं जुह्वूपभृतौ स्तः तदभिप्रायेण स्रुच इति बहुवचनम् ॥३०॥ ध्रौवस्याज्यस्य चतुरवदाय ॥३१॥ उपास्ते उपविशति आ पयस्याप्रचरणकालात् ॥३५॥ कृत्स्नं मेषं स्रुचि अवदधाति ॥३७॥ प्रधानयागानन्तरमनुष्ठेयं स्विष्टकृदादिप्रयोगजातं सर्वमनुक्रमति अध्वर्युरेवाह्ाग्नयऽइत्यादिना अनुब्रूहीति स्विष्टकृद्यागस्य पुरोऽनुवाक्याप्रैषः अनुष्ठितं प्रधानयागं न्यूनातिरेकदोषपरिहारेण स्विष्टं शोभनयज्ञं करोतीति स्विष्टकृत् ॥३९॥ इडां समवदाय सर्वेभ्यो हविर्भ्यः सम्भूयैकस्मिन्निडापात्रे अवदधित्यर्थः (?) अतिप्रज्ञिहोते उत्तरा वेदिमतिक्रमय्य (? °मेंध्य Cod.) तदिडापात्रं प्रगमयेत् ॥४०॥ अथाध्वर्युरिति इडोपह्वानादिकं प्रकृतिवदेव कृत्वा अनुयाजार्थमभ्यनुज्ञापकमिमं प्रैषमध्वर्युरेव ब्रूयात् । पृषदाज्यं दधिमिश्रमाज्यम् पृषदाज्यधानीगतं पृषदाज्यं जुह्वामर्धमासिच्य शिष्टमाज्यमुपभृत्यानयेत् । देवान्यजेति प्रथमोऽनुयाजप्रैषः ॥४१॥ समुद्युम्पतः समुच्छिन्दन्तः । अनुप्रहरतः स्वस्वप्रस्तरमग्नौ प्रक्षिपतः ॥४२॥ प्रतिपरेत्य आहवनीयदेशात्प्रतिनिवृत्य गार्हपत्यसमीपं गत्वा । उपास्ते तूष्णीमुपविशति ॥४५॥ यजमानयोर्यजमानपत्न्योः । क्षामकर्षमिश्रं क्षामोऽतिपाकेन दग्धः पात्रे संसक्तः (? सस° Cod.) कृषि विलिष्यत (?) ऽइति कर्षः क्षामश्चासौ कर्षश्चेति क्षामकर्षः तेन मिश्रं हविरादाय अवभृथमुदकं प्रति यन्ति एतत् [हि] क्षामकर्षमिश्रं हविः वरुण्यम् । सौमिकावभृथवत्प्रसक्तसामगानं निषेधति तत्र न सामेति न ह्यत्र वरुणप्रघासे साम्ना किमपि प्रयोजनं क्रियते । अवभृथसमीपमभ्यवेत्य हविरुपमारयति अप्सु प्रक्षिपति ॥४६॥ काममिति स्नानानन्तरमन्ये वाससी परिधापयेत् ॥४७॥ उप्त्वा वापयित्वा । वरुणप्रघासार्थं निमित्तायामुत्तरवेद्यां यदग्निहोत्रहवनं न तद्धुज्यते यस्मादेवं तस्मात्कारणात् वरुणप्रघासस्थानादुदवसानं [निष्क्रमणं] कर्तव्यम् । दर्शपूर्णमासवच्चातुर्मास्यानामनुष्ठानबाहुल्याभावादुत्सन्नयज्ञत्वमतस्तेषामप्रतिष्ठितत्वेन तदनुष्ठाने यजमानस्याप्यप्रतिष्ठा सम्भाव्येत अतस्तस्य प्रतिष्ठायै स्वयंप्रतिष्ठितः पौर्णमासयागः सम्पद्यते ॥४८॥२॥५॥

अथ साकमेधाख्यस्य विधित्सितस्य तृतीयस्य पर्वणः पापरूपशत्रुजयहेतुत्वं वक्तुं वृत्तान्तं संकीर्तयति वरुणेति । अनूचीनं नैरन्तर्येण वर्तमानमहरनूचीनाहम् ॥१॥ मेधः सारम् ।

क्षीरौदन इति पयसि तण्डुलान्प्रक्षिप्य श्रपणे सति क्षीरेण संस्कृत ओदनो निष्पद्यते । ब-लकरः सारांशो मेधशब्दार्थः ॥४॥ तस्य गृहमेधीययागस्य आवृत् क्रियाप्रयोगः क्रमोऽभिधी-यते । सांतपनीयेष्टौ (? °निष्टौ Cod.) या वेदिर्बर्हिषा स्तीर्णाभूत् गृहमेधीयस्यापि सैवोपकरो-ति । इध्मस्य स्थाने शकलानेव संमृज्य परिधिभिः सह तान्सादयेत् ॥५॥ पिशीलशब्दः श-रावावाची । एनं चरुं द्वेधा विभज्य तयोर्निदध्यात् । पात्रस्थयोस्तयोरोदनयोर्मध्ये सर्पिःपूर्णा-यावटौ कृत्वा ॥६॥ तत्तदानीमेव प्रतिवेशं (श Cod.) समापनार्थं प्रतिनिधिवेन (? धेवेन Cod.) निवेशनस्थानं प्रतिवेशः तत्स्थानीयमाज्यं दक्षिणाग्रावाज्यस्थाल्यामधिश्रयेत् (? ता-स्तावाज्य° Cod.) । सोखमेवेति यस्यां स्थाल्यां चरुः श्रप्यते तत्सहितमेव ॥११॥ अनिरशि-तां शेषसहितां कुम्भीं पात्रान्तरेणापिधाय । हविषा पूर्णा यस्मिन्कर्मणि तत्पूर्णदर्वम् ॥१६॥ पूर्णदर्वाख्यस्य कर्मणः कालं विधत्ते अथेति प्रातरग्निहोत्रे हुते वाहुते वा कुम्भ्याः सका-शात् दर्व्या आधानेनोपहत्य गृह्णीयात् ॥१७॥ साकमेधेषु प्रधानभूताया महाहविराख्याया इ-ष्टेरारम्भं प्रतिजानीते अथात इति । वरुणप्रघासतन्त्रं तत्रातिदिशति तद्यथेति तस्य पूर्वोक्तस्य [महाहविषो] वरुणप्रघासस्य हविषो यथानुष्ठानं तथैव महाहविषो वक्ष्यमाणस्यापि ॥२०॥ ३॥५॥

अथ तस्य महाहविषः प्रयोगक्रमं विधित्सुः प्रागेतेन देवैर्विजितं (? प्रागेतैर्वैर्दिदिवा Cod.) प्रति[पादयति] महाहविषा हेत्यादिना ॥१॥ वरुणप्रघासवत् ॥२॥ ॥११॥४॥५॥

अथ पितृयज्ञं विधित्सुः पितॄणामुत्पत्तिमाह महाहविषा हेति । यानेवासुरा अघ्नन् अ-मारयन् ॥१॥ अत्रास्मिन्कर्मणि अस्य यजमानस्यात्मनः स्वस्य अनुचरणेन (!) अनुगमनेन च यदेव प्राणिजातं हन्यते वा ताड्यते यद्वा मीयते मिद् हिंसायाम् ॥३॥ इत्येव एवमेव ॥५॥ तस्याः पयसि प्रक्षिप्ता मथिता धानाचूर्णाः एकशलाकया एकयैव शलाकया एकवार-मालोलिता हविर्भवति ॥६॥ पक्वेन पाकसंस्कृतेन चरुपुरोडाशादिहविषा देवेभ्यो दत्तेन केवलं हविर्यज्ञयागिन एव सन्तः ॥७॥ चतस्रः कोणा यस्याः सा चतुःस्रक्तिः ॥१०॥ पूर्वस्यां दिशि आहवनीयसमीपे प्रत्यङ्मुखाः सन्तो देवा मनुष्यानभि (°तृतो Cod.) यजमानानभि-लक्ष्य उपागता भवन्ति तस्मात्कारणात्तेभ्यो देवेभ्यः प्राङ्मुखस्तिष्ठन्नध्वर्युर्जुहोति ॥११॥ तत एव तस्या वेदेः सकाशादेव सोऽध्वर्युः प्राक् प्राच्यां दिशि स्तम्बयजुर्हरेत् । तस्या वेदेः प-रिग्रहमभिनयेन (प्रतिग्र° Cod.) दर्शयति अथेत्येवाग्रऽइति अग्रे प्रथममित्येवमेव पश्चाद्भागे दक्षिणापवर्गं स्फ्यया परिगृह्णीयात् । हार्यं हरणीयम् ॥१२॥ यावद्बर्हिः प्रस्तरभाजनं प्रस्तरस्य योग्यं पर्याप्तं भवति तावत्परिशिनष्टि अवशेषयेत् । प्रसलवि प्रदक्षिणम् । अन्ववागात् अ-नुप्राप्नोत् । अपेदेति अपगच्छति ॥१५॥ इत्यादित्यभिनयदर्शनी (°ने ?) अनेन प्रकारेण ब्रह्मय-जमानौ आहवनीयस्य पुरतो गत्वा अप्रदक्षिणं पर्यापत्य (!) पितृयज्ञवेदेः पश्चाद्देशं परीतः परिक्रामतः ॥१८॥ परिवृते परिवेष्टिते स्थाने ॥२०॥ अपबर्हिषः बर्हिश्चतुर्थः प्रयाजः तद्वर्जं चतुरः प्रयाजान्यजेत ॥२३॥ व्यतिषङ्गं परस्परसंसृष्टं यथा भवति तथा ॥३२॥ प्राशनपञ्चम-प्याह प्राशितव्यं वेवेति इडावदानं प्राशित्रावदानं च यज्ञान्तरवदत्रापि प्राशितव्यम् यस्येति इडां प्राश्नन्त ऋत्विजो यस्य कस्यचिदात्मनः सम्बन्धिन्यग्नौ वैश्वानरे तज्जुहोति अतः प्रा-शने न शेष इत्यनेनाभिप्रायेण ॥३३॥ दास्यन् पिण्डदाता । अपसलवि अप्रदक्षिणम् ॥३४॥

स येमामिति इदंशब्देन उत्तरापदिशमभिनयेन दर्शयति । हस्तगलेपं निमृष्टे निमृजीत ॥३६॥ देवसम्बन्धिनोऽस्य यजमानस्य देवान्परित्यज्य यत्पितृयज्ञाचरणं तेन देवानां मनसि क्रोधोऽभूत् पुनरावृत्याहवनीयोपस्थानेन तदौदासीन्यजनितमपराधं देवेभ्यो निह्नुते शमयति ॥३७॥ अपबर्हिषौ बर्हिः प्रथमोऽनुयाजः तद्वर्जितौ द्वावनुयाजौ यजति ॥४४॥ एतच्चतुःस्रक्त्यां वेद्यां स्तीर्णं बर्हिः परिधींश्चादाय युगपदग्नावनुसमस्यति प्रक्षिपति ॥४७॥१॥६॥

अथ विधित्सितानां त्रैयम्बकहविषां शल्पनिर्हरणहेतुत्वमितिहासेनोपपादयति महाहविषेति । तान्देवान् तस्मात्कल्पात् निरहरत् वियोजितवान् निर्हरणे प्रकारमाह तान्व्यवृहन्नेति वृह्र उद्यमने शल्पप्रोतांस्तानस्मात्कल्पादुद्धृतवन्तः (°द्धृत° ?) ॥१॥ अक्ताः आज्येनाभिघारिताः । अभिमानुक इति पशुप्रभवेनाज्येन यदि रौद्रान्पुरोडाशानञ्ज्यात् ततः स रुद्र आज्यसम्बन्धद्वारा (री Cod.) तत्कारणभूतान्पशूनभिमंसुकः (!) अभिमन्तुं बाधितुं शक्तः स्यात् ॥६॥ जाधितं (जाथितं Cod.) जनैः परिकल्पितम् । अत एवोक्तमभियुक्तैः वटे वटे वैश्रवणः चत्वरे चत्वरे शिव (शिप Cod.) इति ॥७॥ पलाशवृक्षस्य पर्णेन ॥८॥ उर्वारुकं कर्कटीफलम् (!) ॥१२॥ भगस्य सौभाग्यस्य ॥१३॥ एतान्पुरोडाशानुत्क्षिपति यथा गौः पृथिवीनामैतत् पृथिवी तान्नोदाप्नुयात् यथा भूमौ न पतन्ति तथान्तरिक्षे पुनरञ्जलिना धारयेत् । निर्मिमते निर्हरन्ति । पुनर्ग्रहणाशक्तौ स्पर्शनं विधत्ते तान्विलिप्सेरन् इति लब्धुमिच्छन्तो लिप्सन्तः तद्विपरीता विलिप्सन्तः लब्धुमशक्ताः सन्तः भूमौ पतितांस्तान्पुरोडाशान्पश्चादुपस्पृशन्ति ॥१६॥ यत्र तृणमये आवपने धान्यं वध्यते तन्मूतम् मूतमेव मूतकम् । वेणुमय्यां यष्ट्यामुभयतः बद्धा (? वधा Cod.) यद्वा कुपे उभयतः शिक्याभ्यामाबध्य (? भ्यांमा Cod.) वेणुनिर्मिता भाजनयुक्तो दारुविशेषो वा परपर्यायः क्रुपः (!) तस्मिन्नुभयतः उभयपार्श्वयोर्वैणवभाजनयोः तानौद्वानाबध्य । मूजवान्नामोदीच्यः पर्वतः । अस्मात्स्थानादन्ववार्जति अनुगमयति यस्मिन्यस्मिन्स्थाने अस्य देवस्य चरणं वर्तनमस्ति तत्स्थानमनुलक्ष्य । अस्य रुद्रस्य अत्रास्मिन्मूजवत्पर्वतसम्बन्धिनि परः परस्ताद्भागे चरणं वर्तनं भवति । नितरां स्वापयत्येनम् कृत्तेर्मृदुत्वेन सुखकरत्वात् ॥१७॥ अप्रतीक्षमप्रतीक्ष्य ॥१८॥२॥६॥

अथ शुनासीरीयं विधित्सुः तस्य शुनासीर्यस्य चतुर्थपर्वणः संवत्सरसलक्षणफलसाधनत्वं प्रतिपादयिष्यंस्तावदुपोद्घातत्वेन चातुर्मास्यानामक्षय्यफलसाधनत्वमाह अक्षय्यमिति । एतेन चातुर्मास्ययज्ञेन 'वसन्ताद्यृत्वात्मक एव भूत्वा देवानप्येति चातुर्मास्ययाजी अपिगच्छति ॥१॥ तच्छुनम् सुखनामैतत् सुखहेतुत्वाच्छुनमित्युच्यते । यो रस आसीत् सुखहेतुः सारभूतो ऽशोऽभवत् तत्सीरमित्युच्यते ॥२॥ उक्तं वाक्यशेषमत्राप्यतिदिशति स बन्धुरिति कृत्स्नस्य कर्मणः फलप्रतिपादनसमये पूर्वं यं वाक्यशेषं या वै देवानामित्यादिकमवोचाम उक्तवन्तः स एव अन्यापि शुनासीर्यस्य हविषः स्तावकः उक्तविधयोरिव (°रेवा Cod.) वाय्वादित्यरूपेणावस्थितत्वादिति भावः ॥५॥ अभिलक्ष्य संजानते संज्ञानाना भवन्ति । अतः पयसः संमतिहेतुत्वात् विनियानं साकमेधैर्विजितवन्तमेनं यजमानं श्रियै सर्वाः प्रजाः अभिसंजानातै अभिसंजानीरन् अनुमन्यन्तामिति अनेनाभिप्रायेण पयसः करणम् ॥६॥ तत् तदानीं तदनन्तरकालमेव स यजमानः शुनासीर्येण यजेत ॥१०॥ सोमेन यक्ष्यमाणस्य पक्षान्तरमाह तद्वैक ऽइति । तत्र खलु शुनासीर्यानुष्ठाने एके शाखिनो रात्रीरापपयिषन्ति अनेन च (!) यागेन

कतिचिद्रात्रीराप्तुमिच्छन्ति । आगामिनीभ्यां फाल्गुनीभ्यां युक्ता पौर्णमासी फाल्गुनी षष्ठ्यर्थे चतुर्थी फाल्गुन्याः पौर्णमास्याः पुरस्तात् यत् अदो विप्रकृष्टे उत् ऊर्ध्वं चन्द्रमाः अस्मिन्दृश्यत ऽइत्युद्दृष्टं शुक्लपक्षः तत् तत्र प्रथमाद्यन्यतमस्यां तिथौ शुनासीर्येण यजेत ॥११॥ अथानन्तरमेव सोमयागार्थं दीक्षेत कालविलम्बो न कार्यः । दैवान्मानुषाद्वा विघ्नाद्विलम्बेऽपि तस्यावधिमाह तन्नेति तं तभो (तन्नतो?) नानोज्ञानमपरा फाल्गुनी वर्पतयात् (!) । अयं च पक्षोऽधिकारिविशेषस्यैवेति निगमयति इति न्विति द्विविधा हि चातुर्मास्ययाजिनो सकृदनुष्ठायोत्सृजमानः पुनः प्रयुञ्जानश्च ॥१२॥ चातुर्मास्याङ्गभूतं वपनं मीमांस्यते अथात इति । परिवर्तनस्य परितः केशश्मश्र्वादीनां वर्तनस्य वपनस्य विकारो (विवारो Cod.) ऽधिक्रियते । निर्धयति रसं निष्कृष्य पिबति ॥१४॥ यत् यस्मात् परितः शिरो वर्तयते केशान्वापयति ॥१६॥३॥६॥

वैश्वदेवादिषु सर्वेषु परिवर्तनं सेतिकर्तव्यताकं विधित्सुस्तेषां वैषां वृत्रबधहेतुत्वं विजयहेतुत्वं च समानमिति प्रतिपादयति तदिति । तत् तत्रोक्तविषये साकमेधानामेव वृत्रबधहेतुत्वं जयहेतुत्वं चेति यदाहुः कथयन्ति तन्न तथा सर्वैरेव हि चातुर्मास्यैः वृत्रहननं विजयं च प्राप्तवन्तो देवाः ॥१॥ आषाढ्यादीन् ॥३॥ कार्त्तिक्यादीन् ॥४॥ त्र्येनीति त्रिषु स्थानेषु एतं (? एन Cod.) श्वेतं वर्णो यस्याः सा त्र्येनी वर्णादनुदात्तादिति [पा° ४.१.३९.] एतशब्दात् ङीप् तकारस्य च नकारादेशः । श्वाविन्नामकस्य मृगस्य लोम शललो उत्कालक्षणा सा वक्ष्यमाणपरिवर्तनहेतुत्वेन स्वीकार्या । लोहितवर्णः ताम्रमयः क्षुरः । शलल्या केशान्विभज्य क्षुरेण परितो वापयेत् (? वापेत् Cod.) ॥५॥ चातुर्मास्येनेष्टवन्तं यजमानमन्विष्यन्तो जनाः ब्रह्मलोकादर्वाचीनेषु लोकेषु न विन्दन्ति न लभन्ते ॥१॥४॥६॥ इति सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे माध्यन्दिनशतपथब्राह्मणभाष्ये द्वितीये काण्डे षष्ठो ऽध्यायः पञ्चमश्च प्रपाठकः ॥ ॥ समाप्तं द्वितीयं काण्डमेकपादिकानाम ॥ ॥

VARIOUS READINGS.

Adhyâya १.२.४ पुरऽग्रन्ना Say. - १३ चिक्ये Say. - १६ °वव्रर्द°, °वृता° A., and व्यवत्ससाद (!), व्यवसिद्धः Say. - ११ अनपराद्धं A. - ३.३ भवति दे° A - ५ विह्नि A. - ४.२ °त्तद्वपि A. - ३ तं ना° A.B.*) - ५ सर्पिरासि° A. - ७ स सदेव°

*) B (Chambers 39) is not accented. — The readings of M (Mill) are marked but occasionally.

A. - ११ प्रत्यङु A प्रत्यंङु B. - २० तं वै तथैव A. - २५ °तन्वेकं AB. - २९ पुरः A. —

Adhyâya २.१.१ ज्ञनयते यदग्निं A. - २ ह्वीᲂषि A. - ९ °येतैतयैव A. - १५ तस्माडु A. - १६ प्रत्युद्यामिनी A: the printed accent under *pra* is an addition, but I am not certain if I have been right to do so. - २० °ह्वी° A. - २१ तन्वेक° AB. - २.१ यन्वेव and ह्विर्यज्ञं A. - ३ स स यावानेव. - ५ दध्यान्वेव A. - ६ द्वेधा A. - ८ स्मैष A. स्मैषं B. एषां Sây. - १३ अथैन वयं नेव A. - २० ऊचु । A., which might be indeed the correct reading. - २० न वदं ज्ञातू A. - ३.४ यावड्डो - यावड्ड B. Sây. and second hand in M. I am not certain if I have been right to print यावत्सो; it is indeed maintained by A and M, but there are occurring here in A several instances, where either *ts* is written instead of *ch* (*dutsunâm*) and of *ç* (*âditso*, *puroḍâtsasya*), or in the contrary where *ts* is given by *ch* (*enachaha*) and by *ç* (*âsîçâkamedhair*, *tasmâçaurya*). - ४ डपति° Sây. - ७ वर्षा ह्वि A. - २० धियेर स्वाह्वा A °रंन्स्वाह्वा B, and °न्यपां नु° AB. - २२ डुत्सु° A डुस्छु° B. - ४.४ °त्मन्येवा° B. Sây. - ६ योऽयं पवते तत A. - ८ तद्वेषो A. - ११ स्तावः Sây.

Adhyâya ३.१.३ The ल of ईलित is remarkable enough, as it is else in the Mâdhyandinaçâkhâ regularly given by ड. - १४ °ज्ञग्नि A. - १५ यन्वेवि A. - २४ °मेवानु A, and this is the correct reading. २.४ प्रातराह्व° A. - ९ धूप्यत A. - ११ बल्बली° M. बल्वली AB. - ३.६ संतस्य A. - ८ संम्रियते AB., and यदा यदेव A. (! instead of यदा-यदेव; the accent under the व is wan-

ting by a misprint). - ४.६ यदिंधि A. - ९ यन्पृह्छ° A. - १२ एष तपति A. - २३ नाविन्दन् Sây. - २८ यथैनं न A. - ३१ the Saṃhitâ (३.२६) reads सूम्नाय. - ३१ श्रुधि A. —

Adhyâya ४.१.६ and १२ तत्स्यत्वा AB. - २.४ अश्नीत Sây. - १३ सद्गुरुक्षोव A. - ३.१ कल्होल° Sây. - १० व्यदीवने A यदीवन्ये B. - ११ देवा। A. - १२ तन्नाद्दावोवितस्य A. - १३ अग्रियं Sây. - १४ वषट्कृत७ A (the correct reading is वषट्कृत७). - ४.३ स एतं Sây. स ये तं A prima manu. - ३ विवचनमेव Sây. - ४ निवचनं Sây. - १८ °वैनह्ह A. - २४ आदित्सो A. —

Adhyâya ५.१.५ The Ṛiksaṃhitâ reads बृह्द. - ५ °प्यपते Sây. - १२ °निषेधा AB. - ११ जग्मिरे A. - २.३ and ७ प्रामुचत् A and this is the correct reading. - ८ नच्चथरत्पुण्यं (!) A. - १५ °नैलकीः Sây. - २४ शिश्यिरे A. - २७ निद्दिद्या अस° A. - २८ °वयाः। A. - २९ °व्या सह भवति AB. - ३८ °स्यातुर्वा A. - ४५ °ड्योदिन्याध्वर्युः A. - ४७ भवतः A. - ३.१ °तैर्व्येव A. - ११ संमार्ष्टयेत७ सोषमेव A., and शकलान्वामयते तावतो न्यादधात्यथैत७ सोषमेव A. - १२ चपुराड्यस्या° A. - १७ The Saṃhitâ (३.४९) reads परापत. - ४.९ विजिग्यपान A. - १० एतत्कर्म क्रात७ A. —

Adhyâya ६.१.१ जग्म७। तेनो A. - ३ त्वेवैष AB. - ३ °त्मनोऽचरणेन A.B.M. त्मनोऽनुचरणेन Sây. - ३ मीया A. मीयते B. मीयते Sây. - १८ इष्टाय्य° A. - २० चरंति A. - २२ देवां३ऽआज्यपां३ऽआ° A. - २८ पुरोडात्तस्य A. - ३३ तमग्नीद्वेव A. - ३७ निह्नुते Sây. - ३९ वशां३ऽअनु A. - २.४ न्वेवैष and न्वेवास्य A, which seems indeed the correct reading, see ६.१.३. - १७ तां द्वयो° AB (Final n standing before any dental is almost regularly

given by anusvâra, whereas final anusvâra in the same case is expressed by n). - १७ आनध्यो॒° A. - १७ °ह्यश्व॒नृणां! A. - ३.२ ओरा॒सीशाकमे° A. - ४ °तै॒र्व्यै॒व A. - ६ विज्ञिग्यानमेनं Sây. - ८ त॒स्माशौर्य A. - १२ तन्ना॒नी° and °स्मादेतन्ना॒नी° A. - ४.१ °स्तै॒र्व्यै॒व and °वैर्व्यै॒व A. - ६ खलु॒ A. —

ओम् । देवयजनं जोषयन्ते । स यदेव वर्षिष्ठꣳ स्यात्तज्जोषयेरन्यदन्यद्भूमेर्ना-
भिशयीतातो वै देवा दिवमुपोदक्रामन्देवान्वाऽएष उपोत्क्रामति यो दीक्षते स
सदेवे देवयजने यजते स यद्धान्यद्भूमेरभिशयीतावरतरऽइव हेष्ट्वा स्यात्तस्माद्यदेव
वर्षिष्ठꣳ स्यात्तज्जोषयेरन् ॥१॥ तद्वर्ष्म सत्समꣳ स्यात् । समꣳ सदविभ्रꣳशि स्या-
दविभ्रꣳशि सत्प्राक्प्रवणꣳ स्यात्प्राची हि देवानां दिगथोऽउदक्प्रवणमुदीची हि
मनुष्याणां दिग्दक्षिणतः प्रत्युच्छ्रितमिव स्यादेषा वै दिक् पितॄणाꣳ स यद्दक्षिणा-
प्रवणꣳ स्यात्क्षिप्रे ह यजमानोऽमुं लोकमियात्तथो ह यजमानो ज्योग्जीवति त-
स्माद्दक्षिणतः प्रत्युच्छ्रितमिव स्यात् ॥२॥ न पुरस्ताद्देवयजनमात्रमतिरिच्येत । द्वि-
षन्तꣳ हास्य तद्भ्रातृव्यमभ्यतिरिच्यते कामꣳ ह दक्षिणतः स्यादेवमुत्तरत एतद्ध
त्वेव समृद्धं देवयजनं यस्य देवयजनमात्रं पश्चात्परिशिष्यते क्षिप्रे हैवैनमुत्तरा दे-
वयज्योपनमतीति नु देवयजनस्य ॥३॥ तदु होवाच याज्ञवल्क्यः । वार्ष्णाय दे-
वयजनं जोषयितुमैम तत्सात्ययज्ञोऽब्रवीत्सर्वा वाऽइयं पृथिवी देवी देवयजनं
यत्र वाऽअस्यै क्व च यजुषैव परिगृह्य याजयेदिति ॥४॥ ऋत्विजो हैव देवयज-
नम् । ये ब्राह्मणाः शुश्रुवाꣳसोऽनूचाना विद्वाꣳसो याजयन्ति सैवाह्वलैतन्नेदिष्ठ-
मामिव मन्यामहऽइति ॥५॥ तच्छालां वा विमितं वा प्राचीनवꣳशं मिन्वन्ति ।
प्राची हि देवानां दिक् पुरस्ताद्धि देवाः प्रत्यञ्चो मनुष्यानुपावृत्तास्तस्मात्तेभ्यः प्रा-
ङ्तिष्ठञ्जुहोति ॥६॥ तस्मादु ह न प्रतीचीनशिराः शयीत । नेद्देवानभिप्रसार्य श-
याऽइति या दक्षिणा दिक् सा पितॄणां या प्रतीची सा सर्पाणां यतो देवा उच्च-

क्रमुः सैषाद्धीना योदीची दिक् सा मनुष्याणां तस्मान्मानुषऽउदीचीनवꣳशामेव शालां वा विमितं वा मिन्वन्त्युदीची हि मनुष्याणां दिग्दीक्षितस्यैव प्राचीनवꣳशा नादीक्षितस्य ॥७॥ तां वाऽएतां परिश्रयन्ति । नेदभिवर्षादिति न्वेव वर्षा देवान्वाऽएष उपावर्तते यो दीक्षते स देवतानामेको भवति तिर-इव वै देवा मनुष्येभ्यस्तिर-इवैतद्यत्परिश्रितं तस्मात्परिश्रयन्ति ॥८॥ तन्न सर्व-इवाभिप्रपद्येत । ब्राह्मणो वैव राजन्यो वा वैश्यो वा ते हि यज्ञियाः ॥९॥ स वै न सर्वेणेव संवदेत । देवान्वाऽएष उपावर्तते यो दीक्षते स देवतानामेको भवति न वै देवाः सर्वेणेव संवदन्ते ब्राह्मणेन वैव राजन्येन वा वैश्येन वा ते हि यज्ञियास्तस्माद्यद्येनꣳ शूद्रेण संवादो विन्देदेतेषामेवैकं ब्रूयादिममिति विचक्ष्वेममिति विचक्ष्वेत्येष उ तत्र दीक्षितस्योपचारः ॥१०॥ अथारणी पाणौ कृत्वा । शालामध्यवस्यति स पूर्वार्ध्यꣳ स्थूणाराजमभिपद्यैतद्यजुराहेदमगन्म देवयजनं पृथिव्या यत्र देवासोऽअजुषन्त विश्वऽइति तदस्य विश्वैश्च देवैर्जुष्टं भवति ये चेमे ब्राह्मणाः शुश्रुवाꣳसोऽनूचाना यद्धास्य तेऽक्षिभ्यामीक्षन्ते ब्राह्मणाः शुश्रुवाꣳसस्तद्धास्य तैर्जुष्टं भवति ॥११॥ यद्वाह । यत्र देवासोऽअजुषन्त विश्वऽइति तदस्य विश्वैर्देवैर्जुष्टं भवत्यृक्सामाभ्याꣳ संतरन्तो यजुर्भिरित्यृक्सामाभ्यां वै यजुर्भिर्यज्ञस्योदृचं गच्छन्ति यज्ञस्योदृचं गच्छानीत्येवैतदाह रायस्पोषेण समिषा मदेमेति भूमा वै रायस्पोषः श्रीर्वै भूमाशिषमेवैतदाशास्ते समिषा मदेमेतीषं मदतीति वै तमाहुर्यः श्रियमश्नुते यः परमतां गच्छति तस्मादाह समिषा मदेमेति ॥१२॥ ब्राह्मणम् ॥१॥ ॥

अपराह्णे दीक्षेत । पुरा केशश्मश्रोर्वपनाद्यत्कामयेत तदश्नीयाद्यद्वा सम्पद्येत व्रतꣳ ह्येवास्यातोऽशनं भवति यद्यु नाशिशिषेदपि कामं नाश्नीयात् ॥१॥ ॥ शतं १४०० ॥ ॥ अथोत्तरेण शालां परिश्रयन्ति । तदुदकुम्भमुपनिदधति तन्नापित उपतिष्ठते तत्केशश्मश्रु च वपते नखानि च निकृन्ततेऽस्ति वै पुरुषस्यामेध्यं य-

त्रास्यापो नोपतिष्ठन्ते केशश्मश्रौ च वाऽअस्य नखेषु चापो नोपतिष्ठन्ते तद्यत्के-
शश्मश्रु च वपते नखानि च निकृन्तते मेध्यो भूत्वा दीक्षाऽइति ॥२॥ तद्धैके ।
सर्वऽएव वपन्ते सर्वऽएव मेध्या भूत्वा दीक्षिष्यामहऽइति तदु तथा न कुर्याद्यद्वै
केशश्मश्रु च वपते नखानि च निकृन्तते तदेव मेध्यो भवति तस्मादु केशश्मश्रु
चैव वपेत नखानि च निकृन्तेत ॥३॥ स वै नखान्येवाग्रे निकृन्तते । दक्षिण-
स्यैवाग्रे सव्यस्य वाऽअग्रे मानुषेऽथैवं देवत्राङ्गुष्ठयोरेवाग्रे कनिष्ठिकयोर्वाऽअग्रे
मानुषेऽथैवं देवत्रा ॥४॥ स दक्षिणमेवाग्रे गोदानं वितारयति । सव्यं वाऽअग्रे
मानुषेऽथैवं देवत्रा ॥५॥ स दक्षिणमेवाग्रे गोदानमभ्युनत्ति । इमा आपः शमु मे
सन्तु देवीरिति स यदाहेमा आपः शमु मे सन्तु देवीरिति वज्रो वाऽआपो वज्रो
हि वाऽआपस्तस्माद्येनैता यन्ति निम्नं कुर्वन्ति यत्रोपतिष्ठन्ते निर्दहन्ति तत्तदेतमे-
वैतद्वज्रꣳ शमयति तथो हैनमेष वज्रः शान्तो न हिनस्ति तस्मादाहेमा आपः श-
मु मे सन्तु देवीरिति ॥६॥ अथ दर्भतरुणकमन्तर्दधाति । ओषधे त्रायस्वेति वज्रो
वै क्षुरस्तथो हैनमेष वज्रः क्षुरो न हिनस्त्यथ क्षुरेणाभिनिदधाति स्वधिते मैनꣳ
हिꣳसीरिति वज्रो वै क्षुरस्तथो हैनमेष वज्रः क्षुरो न हिनस्ति ॥७॥ प्रच्छिद्योद-
पात्रे प्रास्यति । तूष्णीमेवोत्तरं गोदानमभ्युनत्ति तूष्णीं दर्भतरुणकमन्तर्दधाति तू-
ष्णीं क्षुरेणाभिनिधाय प्रच्छिद्योदपात्रे प्रास्यति ॥८॥ अथ नापिताय क्षुरं प्रयच्छति ।
स केशश्मश्रु वपति स यदा केशश्मश्रु वपति ॥९॥ अथ स्नाति । अमेध्यो वै पु-
रुषो यदनृतं वदति तेन पूतिरन्तरतो मेध्या वाऽआपो मेध्यो भूत्वा दीक्षाऽइति
पवित्रं वाऽआपः पवित्रपूतो दीक्षाऽइति तस्माद्वै स्नाति ॥१०॥ स स्नाति । आ-
पोऽअस्मान्मातरः शुन्धयन्त्वित्येतद्याह शुन्धयन्त्विति घृतेन नो घृतप्वः पुनन्त्विति
तद्वै सपूतं यं घृतेनापुनंस्तस्मादाह घृतेन नो घृतप्वः पुनन्त्विति विश्वꣳ हि रिप्रं
प्रवहन्ति देवीरिति यद्वै विश्वꣳ सर्वं तद्यदमेध्यꣳ रिप्रं तत्सर्वꣳ ह्यस्मादमेध्यं प्रव-

हन्ति तस्मादाह विश्वꣳ हि रिप्रं प्रवहन्ति देवीरिति ॥ ११॥ अथ प्राङिवोदङ्-ङुत्क्रामति । उदिदाभ्यः शुचिरा पूत एमीत्युद्धाभ्यः शुचिः पूत एति ॥ १२॥ अथ वासः परिधत्ते । सर्वत्वायैव स्वामेवास्मिन्नेतत्त्वचं दधाति या ह वाऽइयं गोस्त्वक्पुरुषे हैषाग्रऽआस ॥ १३॥ ते देवा अब्रुवन् । गौर्वाऽइदꣳ सर्वं बिभर्ति हन्त येयं पुरुषे त्वगग्व्येतां दधाम तयैषा वर्षन्तं तया हिमं तया घृणिं तितिक्षिष्यतऽइति ॥ १४॥ तेऽवछाय पुरुषम् । गव्येतां त्वचमदधुस्तयैषा वर्षन्तं तया हिमं तया घृणिं तितिक्षते ॥ १५॥ अवछितो हि वै पुरुषः । तस्मादस्य यत्रैव क्व च कुशो वा यद्वा विकृन्तति तत एव लोहितमुत्पतति तस्मिन्नेतां त्वचमदधुर्वास एव तस्मान्नान्यः पुरुषाद्वासो बिभर्त्येताꣳ ह्यस्मिंस्त्वचमदधुस्तस्मादु सुवासा एव बुभूषेत्स्वया त्वचा समृध्याऽइति तस्मादप्यश्लीलꣳ सुवाससं दिदृक्षन्ते स्वया हि त्वचा समृद्धो भवति ॥ १६॥ नो हान्ते गोर्नग्नः स्यात् । वेद ह गौरहमस्य त्वचं बिभर्मीति सा बिभ्यती त्रसति त्वचं मऽआदास्यतऽइति तस्मादु गावः सुवाससमुपैव निश्रयन्ते ॥ १७॥ तस्य वाऽएतस्य वाससः । अग्नेः पर्यासो भवति वायोरनुछादो नीविः पितृणाꣳ सर्पाणां प्रघातो विश्वेषां देवानां तन्तव आरोका नक्षत्राणामेवꣳ हि वाऽएतत्सर्वे देवा अन्वायत्तास्तस्माद्दीक्षितवसनं भवति ॥ १८॥ तद्वाऽअहतꣳ स्यात् । अयातयामतायै तद्धि निष्पेष्टवै ब्रूयाद्यद्वास्यात्रामेध्या कृणत्ति वा वयति वा तदस्य मेध्यमसदिति यद्युऽअहतꣳ स्यादद्भिरभ्युक्षेन्मेध्यमसदित्यथो यदिदꣳ स्नातवस्यं निहितमपल्पूलनकृतं भवति तेनो हापि दीक्षेत ॥ १९॥ तत्परिधत्ते । दीक्षातपसोस्तनूरसीत्यदीक्षितस्य वाऽअस्यैषाग्रे तनूर्भवत्यथात्र दीक्षातपसोस्तस्मादाह दीक्षातपसोस्तनूरसीति तां त्वा शिवाꣳ शग्मां परिदधऽइति तां त्वा शिवाꣳ साध्वीं परिदधऽइत्येवैतदाह भद्रं वर्णं पुष्यन्निति पाप वाऽएषोऽग्रे वर्णं पुष्यति यममुमदीक्षितोऽथात्र भद्रं तस्मादाह भद्रं वर्णं पुष्य-

न्निति ॥२०॥ अथैनꣳ शालां प्रपादयति । स धेन्वै चानडुहश्च नाश्नीयाद्धेन्वनडुहौ वाऽइदꣳ सर्वं बिभृतस्ते देवा अब्रुवन्धेन्वनडुहौ वाऽइदꣳ सर्वं बिभृतो हन्त यदन्येषां वयसां वीर्यं तद्धेन्वनडुहयोर्दधामेति स यदन्येषां वयसां वीर्यमासीत्तद्धेन्वनडुहयोरदधुस्तस्माद्धेनुश्चैवानड्वांश्च भूयिष्ठं भुङ्क्तस्तद्धैतत्सर्वाश्यमिव यो धेन्वनडुहयोरश्नीयादन्तगतिरिव तꣳ हाद्भुतमभिजनितोर्जायायै गर्भं निरबधीदिति पापमकदिति पापी कीर्तिस्तस्माद्धेन्वनडुहयोर्नाश्नीयात्तदु होवाच याज्ञवल्क्योऽश्नाम्येवाहमꣳसलं चेद्भवतीति ॥२१॥ ब्राह्मणम् ॥२॥

अपः प्रणीय । आग्नावैष्णवमेकादशकपालं पुरोडाशं निर्वपत्यग्निर्वै सर्वा देवता अग्नौ हि सर्वाभ्यो देवताभ्यो जुह्वत्यग्निर्वै यज्ञस्यावरार्ध्यो विष्णुः परार्ध्यस्तत्सर्वाश्चैवैतद्देवताः परिगृह्य सर्वं च यज्ञं परिगृह्य दीक्षाऽइति तस्मादाग्नावैष्णव एकादशकपालः पुरोडाशो भवति ॥१॥ तद्धैके । आदित्येभ्यश्चरुं निर्वपन्ति तदस्ति पर्युदितमिवाष्टौ पुत्रासोऽअदितेर्ये जातास्तन्वस्परि । देवाꣳ२॥ऽउप प्रैत्सप्तभिः परा मार्ताण्डमास्यदिति ॥२॥ अष्टौ ह वै पुत्रा अदितेः । यांस्त्वेतद्देवा आदित्या इत्याचक्षते सप्त हैव तेऽविकृतꣳ हाष्टमं जनयां चकार मार्ताण्डꣳ संदेघो हैवास यावानेवोर्ध्वस्तावांस्तिर्यङ् पुरुषसंमित इत्यु हैकऽआहुः ॥३॥ तऽउ हैतऽऊचुः । देवा आदित्या यदस्मानन्वजनिमा तदमुयेव भूदन्तेमं विकरवामेति तं विचक्रुर्यथायं पुरुषो विकृतस्तस्य यानि माꣳसानि संकृत्य संन्यासुस्ततो हस्ती समभवत्तस्मादाहुर्न हस्तिनं प्रतिगृह्णीयात्पुरुषाजानो हि हस्तीति यमु ह तद्विचक्रुः स विवस्वानादित्यस्तस्येमाः प्रजाः ॥४॥ स होवाच । राध्नवान्मे स प्रजायां य एतमादित्येभ्यश्चरुं निर्वपादिति राध्नोति हैव य एतमादित्येभ्यश्चरुं निर्वपत्ययं त्वेवाग्नावैष्णवः प्रज्ञातः ॥५॥ तस्य सप्तदश सामिधेन्यो भवन्ति । उपाꣳशु देवते यजति पञ्च प्रयाजा भवन्ति त्रयोऽनुयाजाः संयाजयन्ति पत्नीः सर्वत्वायैव समिष्टयजुरेव न

जुहोति नेदिदं दीक्षितवसनं परिधाय पुरा यज्ञस्य संस्थाया अन्तं गच्छानीत्यन्तो हि यज्ञस्य समिष्टयजुः ॥६॥ अथाग्रेण शालां तिष्ठन्नभ्यङ्क्ते । अरुर्वै पुरुषोऽवच्छितोऽनरुरेवैतद्भवति यदभ्यङ्क्ते गवि वै पुरुषस्य त्वग्गोर्वाऽएतन्नवनीतं भवति स्वयैवैनमेतत्त्वचा समर्धयति तस्माद्वाऽअभ्यङ्क्ते ॥७॥ तद्वै नवनीतं भवति । घृतं वै देवानां फाण्टं मनुष्याणामथैतन्नाहैव घृतं नो फाण्टं स्यादेव घृतं स्यात्फाण्टमयातयामताया तदेनमयातयाम्नैवायातयामानं करोति ॥८॥ तमभ्यनक्ति । शीर्षतोऽग्रेऽआ पादाभ्यामनुलोमं महीनां पयोऽसीति मह्य इति ह वाऽएतासामेकं नाम यद्गवां तासां वाऽएतत्पयो भवति तस्मादाह महीनां पयोऽसीति वर्चोदा असि वर्चो मे देहीति नात्र तिरोहितमिवास्ति ॥९॥ अथाक्ष्यावानक्ति । अरुर्वै पुरुषस्याक्षि प्रशान्ममेति ह स्माह याज्ञवल्क्यो दुरक्ष-इव ह्यास पूयो हैवास्य दूषीका तेऽएवैतदनरुष्करोति यदक्ष्यावानक्ति ॥१०॥ यत्र वै देवाः । असुररक्षसानि जघ्नुस्तच्छुष्णो दानवः प्रत्यङ् पतित्वा मनुष्याणामक्षीणि प्रविवेश स एष कनीनकः कुमारक-इव परिभासते तस्माऽएवैतद्यज्ञमुपप्रयन्सर्वतोऽश्मपुरां परिदधात्यश्मा ह्याञ्जनम् ॥११॥ त्रैककुदं भवति । यत्र वाऽइन्द्रो वृत्रमहंस्तस्य यदक्ष्यासीत्तं गिरिं त्रिककुदमकरोत्तद्यत्त्रैककुदं भवति चक्षुष्येवैतच्चक्षुर्दधाति तस्मात्त्रैककुदं भवति यदि त्रैककुदं न विन्देदप्यत्रैककुदमेव स्यात्समानी ह्येवाञ्जनस्य बन्धुता ॥१२॥ शरेषीकयानक्ति । वज्रो वै शरो विरक्षस्तायै सतूला भवत्यमूलं वाऽइदमुभयतः परिच्छिन्नं रक्षोऽन्तरिक्षमनुचरति यथायं पुरुषोऽमूल उभयतः परिच्छिन्नोऽन्तरिक्षमनुचरति तद्यत्सतूला भवति विरक्षस्तायै ॥१३॥ स दक्षिणमेवाग्रेऽआनक्ति । सव्यं वाऽअग्रे मानुषेऽथैवं देवत्रा ॥१४॥ स आनक्ति । वृत्रस्यासि कनीनक इति वृत्रस्य ह्येष कनीनकश्चक्षुर्दा असि चक्षुर्मे देहीति नात्र तिरोहितमिवास्ति ॥१५॥ स दक्षिणं सकृद्यजुषानक्ति । सकृत्तूष्णीमथोत्तरं स-

कृत्वो यजुषानक्ति द्विस्तूष्णीं तदुत्तरमेवैतदुत्तरावत्करोति ॥१६॥ तद्यत्पञ्च कृत्व आनक्ति । संवत्सरसंमितो वै यज्ञः पञ्च वाऽऋतवः संवत्सरस्य तं पञ्चभिराप्नोति तस्मात्पञ्च कृत्व आनक्ति ॥१७॥ अथैनं दर्भपवित्रेण पावयति । अमेध्यो वै पुरुषो यदनृतं वदति तेन पूतिरन्तरतो मेध्या वै दर्भा मेध्यो भूत्वा दीक्षाऽइति पवित्रं वै दर्भाः पवित्रपूतो दीक्षा इति तस्मादेनं दर्भपवित्रेण पावयति ॥१८॥ तद्वाऽएकं स्यात् । एको ह्येवायं पवते तदेतस्यैव रूपेण तस्मादेकं स्यात् ॥१९॥ अथोऽअपि त्रीणि स्युः । एको ह्येवायं पवते सोऽयं पुरुषेऽन्तः प्रविष्टस्त्रेधाविहितः प्राण उदानो व्यान इति तदेतस्यैवानु मात्रां तस्मात्त्रीणि स्युः ॥२०॥ अथोऽअपि सप्त स्युः । सप्त वाऽइमे शीर्षन्प्राणास्तस्मात्सप्त स्युस्त्रिःसप्तान्येव स्युरेकविंशतिरेषैव संपत् ॥२१॥ तं सप्तभिः-सप्तभिः पावयति । चित्पतिर्मा पुनात्विति प्रजापतिर्वै चित्पतिः प्रजापतिर्मा पुनात्वित्येवैतदाह वाक्पतिर्मा पुनात्विति प्रजापतिर्वै वाक्पतिः प्रजापतिर्मा पुनात्वित्येवैतदाह देवो मा सविता पुनात्विति तद्धि सुपूतं यं देवः सवितापुनात्तस्मादाह देवो मा सविता पुनात्वित्यच्छिद्रेण पवित्रेणेति यो वाऽअयं पवतऽएषोऽच्छिद्रं पवित्रमेतेनैतदाह सूर्यस्य रश्मिभिरित्येते वै पवितारो यत्सूर्यस्य रश्मयस्तस्मादाह सूर्यस्य रश्मिभिरिति ॥२२॥ तस्य ते पवित्रपतऽइति । पवित्रपतिर्हि भवति पवित्रपूतस्येति पवित्रपूतो हि भवति यत्कामः पुने तच्छकेयमिति यज्ञस्योदृचं गच्छानीत्येवैतदाह ॥२३॥ अथाशिषामारम्भं वाचयति । आ वो देवास ईमहे वामं प्रयत्यध्वरे । आ वो देवास आशिषो यज्ञियासो हवामहऽइति तदस्मै स्वाः सतीर्ऋत्विज आशिष आशासते ॥२४॥ अथाङ्गुलीर्न्यचति । स्वाहा यज्ञं मनसऽइति द्वे स्वाहोरोरन्तरिक्षादिति द्वे स्वाहा द्यावापृथिवीभ्यामिति द्वे स्वाहा वातादारभऽइति मुष्टीकरोति न वै यज्ञः प्रत्यक्षमिवारभे यथायं दण्डो वा वासो वा परोऽक्षं वै देवाः परोऽक्षं य-

ज्ञः ॥२५॥ स यदाह । स्वाहा यज्ञं मनसऽइति तन्मनस आरभते स्वाहोरोरन्तरिक्षादिति तदन्तरिक्षादारभते स्वाहा द्यावापृथिवीभ्यामिति तदाभ्यां द्यावापृथिवीभ्यामारभते ययोरिदꣳ सर्वमधि स्वाहा वातादारभऽइति वातो वै यज्ञस्तद्यज्ञं प्रत्यक्षमारभते ॥२६॥ अथ यत्स्वाहा-स्वाहेति करोति । यज्ञो वै स्वाहाकारो यज्ञमेवैतदात्मन्धत्तेऽथोऽएव वाचं यच्छति वाग्वै यज्ञो यज्ञमेवैतदात्मन्धत्ते ॥२७॥ अथैनꣳ शालां प्रपादयति । स जघनेनाहवनीयमेत्यग्रेण गार्हपत्यꣳ सोऽस्य संचरो भवत्या सुत्यायै तद्यदस्यैष संचरो भवत्या सुत्यायाऽअग्निर्वै योनिर्यज्ञस्य गर्भो दीक्षितोऽन्तरेण वै योनिं गर्भः संचरति स यत्स तत्रेजति व्युत्परि व्युदावर्तते तस्मादिमे गर्भा एजन्ति व्युत्परि व्युदावर्तन्ते तस्मादस्यैष सचरो भवत्या सुत्यायै ॥२८॥ ब्राह्मणम् ॥३॥

सर्वाणि ह वै दीक्षाया यजूꣳष्यौद्ग्रभणानि । उद्गृभ्णीते वाऽएषोऽस्माल्लोकाद्देवलोकमभि यो दीक्षतऽएतैरेव तद्यजुर्भिरुद्गृभ्णीते तस्मादाहुः सर्वाणि दीक्षाया यजूꣳष्यौद्ग्रभणानीति तत्र एतान्यवान्तरमाचक्षतऽऔद्ग्रभणानीत्याहुतयो ह्येता आहुतिर्हि यज्ञः परोऽक्षं वै यजुर्जपत्यथैष प्रत्यक्षं यज्ञो यदाहुतिस्तदेतेन यज्ञेनोद्गृभ्णीतेऽस्माल्लोकाद्देवलोकमभि ॥१॥ ततो यानि त्रीणि स्रुवेण जुहोति । तान्याधीतयजूꣳषीत्याचक्षते सम्पदऽएव कामाय चतुर्थꣳ हूयतेऽथ यत्पञ्चमꣳ स्रुचा जुहोति तदेव प्रत्यक्षमौद्ग्रभणमनुष्टुभा हि तज्जुहोति वाग्ध्यनुष्टुब्वाग्घि यज्ञः ॥२॥ यज्ञेन वै देवाः । इमां जितिं जिग्युर्यैषामियं जितिस्ते होचुः कथं न इदं मनुष्यैरनभ्यारोह्यꣳ स्यादिति ते यज्ञस्य रसं धीत्वा यथा मधु मधुकृतो निर्धयेयुर्विदुह्य यज्ञं यूपेन योपयित्वा तिरोऽभवन्नथ यदेनेनायोपयंस्तस्माद्यूपो नाम ॥३॥ तद्वाऽऋषीणामनुश्रुतमास । ते यज्ञꣳ समभरन्यथायं यज्ञः सम्भृत एवं वाऽएष यज्ञꣳ सम्भरति यदेतानि जुहोति ॥४॥ तानि वै पञ्च जुहोति । संवत्सरसंमितो

वै यज्ञः पञ्च वाऽऋतवः संवत्सरस्य तं पञ्चभिराप्नोति तस्मात्पञ्च जुहोति ॥५॥
अथातो होमस्यैव । आकूत्यै प्रयुजेऽग्नये स्वाहेत्या वाऽअग्रे कुर्वते यजेयेति त-
द्यदेवात्र यज्ञस्य तदेवैतत्संभृत्यात्मन्कुरुते ॥६॥ मेधायै मनसेऽग्नये स्वाहेति । मे-
धया वै मनसाभिगच्छति यजेयेति तद्यदेवात्र यज्ञस्य तदेवैतत्संभृत्यात्मन्कुरुते ॥७॥
दीक्षायै तपसेऽग्नये स्वाहेति । अन्वेवैतदुच्यते नेत्तु हूयते ॥८॥ सरस्वत्यै पूष्णे
ऽग्नये स्वाहेति । वाग्वै सरस्वती वाग्यज्ञः पशवो वै पूषा पुष्टिर्वै पूषा पुष्टिः प-
शवः पशवो हि यज्ञस्तद्यदेवात्र यज्ञस्य तदेवैतत्सम्भृत्यात्मन्कुरुते ॥९॥ तदाहुः ।
अनद्धैता आकूतयो हूयन्तेऽप्रतिष्ठिता अदेवकास्तत्र नेन्द्रो न सोमो नाग्निरिति
॥१०॥ आकूत्यै प्रयुजेऽग्नये स्वाहेति । नात एकं चनाग्निर्वाऽअद्धेवाग्निः प्रतिष्ठि-
तः स यदग्नौ जुहोति तेनैवैता अद्धेव तेन प्रतिष्ठितास्तस्मादु सर्वास्वेवाग्नये स्वा-
हेति जुहोति तत एतान्याधीतयजूꣳषीत्याचक्षते ॥११॥ आकूत्यै प्रयुजेऽग्नये स्वा-
हेति । आत्मना वाऽअग्रऽआकुर्वते यजेयेति तमात्मनऽएव प्रयुङ्क्ते यत्तनुते ते
ऽअस्यैतेऽआत्मन्देवतेऽआधीते भवत आकूतिश्च प्रयुक्च ॥१२॥ मेधायै मनसेऽग्नये
स्वाहेति । मेधया वै मनसाभिगच्छति यजेयेति तेऽअस्यैतेऽआत्मन्देवतेऽआधीते
भवतो मेधा च मनश्च ॥१३॥ सरस्वत्यै पूष्णेऽग्नये स्वाहेति । वाग्वै सरस्वती
वाग्यज्ञः सास्यैषात्मन्देवताधीता भवति वाक्पशवो वै पूषा पुष्टिर्वै पूषा पुष्टिः
पशवः पशवो हि यज्ञस्तेऽस्यैतऽआत्मन्पशव आधीता भवन्ति तद्यदस्यैता आ-
त्मन्देवता आधीता भवन्ति तस्मादाधीतयजूꣳषि नाम ॥१४॥ अथ चतुर्थीं जुहो-
ति । आपो देवीर्बृहतीर्विश्वशम्भुवो द्यावापृथिवीऽउरोऽअन्तरिक्ष । बृहस्पतये
हविषा विधेम स्वाहेत्येषा ह नेदीयो यज्ञस्यापाꣳ हि कीर्तयत्यापो हि यज्ञो
द्यावापृथिवीऽउरोऽअन्तरिक्षेति लोकानाꣳ हि कीर्तयति बृहस्पतये हविषा वि-
धेम स्वाहेति ब्रह्म वै बृहस्पतिर्ब्रह्म यज्ञ एतेनो हैषा नेदीयो यज्ञस्य ॥१५॥

अथ यां पञ्चमीᳫं स्रुचा जुहोति । सा हैव प्रत्यक्षं यज्ञोऽनुष्टुभा हि तां जुहोति वाग्घ्यनुष्टुब्वाग्घि यज्ञः ॥१६॥ अथ यद्ध्रुवायामाज्यं परिशिष्टं भवति । तज्जुह्वामानयति त्रिः स्रुवेणाज्यविलापन्याऽअधि जुह्वां गृह्णाति यत्तृतीयं गृह्णाति तत्स्रुवमभिपूरयति ॥१७॥ स जुहोति । विश्वो देवस्य नेतुर्मर्तो वुरीत सख्यम् । विश्वो राय इषुध्यति द्युम्नं वृणीत पुष्यसे स्वाहेति ॥१८॥ सैषा देवताभिः पङ्क्तिर्भवति । विश्वो देवस्येति वैश्वदेवं नेतुरिति सावित्रं मर्तो वुरीतेति मैत्रं द्युम्नं वृणीतेति बार्हस्पत्यं द्युम्नᳫं हि बृहस्पतिः पुष्यसऽइति पौष्णᳫं ॥१९॥ सैषा देवताभिः पङ्क्तिर्भवति । पाङ्क्तो यज्ञः पाङ्क्तः पशुः पञ्चऽर्तवः संवत्सरस्यैतमेवैतयाप्नोति यद्देवताभिः पङ्क्तिर्भवति ॥२०॥ तां वाऽअनुष्टुभा जुहोति । वाग्वाऽअनुष्टुब्वाग्यज्ञस्तद्यज्ञं प्रत्यक्षमाप्नोति ॥२१॥ तदाहुः । एतामेवैकां जुहुयाद्यस्मै कामयेतरा ध्नुयात्तऽएतयैव तं काममाप्नोतीति तां वै यद्येकां जुहुयात्पूर्णां जुहुयात्सर्वं वै पूर्णᳫं सर्वमेवैनयैतदाप्नोत्यथ यत्स्रुवमभिपूरयति स्रुचं तदभिपूरयति तां पूर्णां जुहोत्यन्वेवैतदुच्यते सर्वास्त्वेव हूयन्ते ॥२२॥ तां वाऽअनुष्टुभा जुहोति । सैषानुष्टुप्सत्येकत्रिᳫंशदक्षरा भवति दश पाण्या अङ्गुलयो दश पाद्या दश प्राणा आत्मैकत्रिᳫंशो यस्मिन्नेते प्राणाः प्रतिष्ठिता एतावान्वै पुरुषः पुरुषो यज्ञः पुरुषसंमितो यज्ञः स यावानेव यज्ञो यावत्यस्य मात्रा तावन्तमेवैनयैतदाप्नोति यदनुष्टुभैकत्रिᳫंशदक्षरया जुहोति ॥२३॥ ब्राह्मणं ॥४॥ अध्यायः ॥१ [१६.]॥ ॥

दक्षिणेनाहवनीयं प्राचीनग्रीवे कृष्णाजिनेऽउपस्तृणाति । तयोरेनमधि दीक्षयति यदि द्वे भवतस्तदनयोर्लोकयो रूपं तदेनमनयोर्लोकयोरधि दीक्षयति ॥१॥ संबद्धान्ते भवतः । संबद्धान्ताविव हीमौ लोकौ तर्ह्यसमुते पश्चाद्भवतस्तदिमावेव लोकौ मिथुनीकृत्य तयोरेनमधि दीक्षयति ॥२॥ यद्युऽएकं भवति । तदेषां लोकानाᳫं रूपं तदेनमेषु लोकेष्वधि दीक्षयति यानि शुक्लानि तानि दिवो रूपं या-

नि कृष्णानि तान्यस्यै यदि वेतरथा यान्येव कृष्णानि तानि दिवो रूपं यानि शुक्लानि तान्यस्यै यान्येव बभ्रूणीव हरीणि तान्यन्तरिक्षस्य रूपं तदेनमेषु लोकेष्वधि दीक्षयति ॥३॥ अन्तकमु तर्हि पश्चात्प्रत्यस्येत् । तदिमानेव लोकान्मिथुनीकृत्य तेष्वेनमधि दीक्षयति ॥४॥ अथ जघनेन कृष्णाजिने पश्चात् प्राङ् जान्वाक्न उपविशति स यत्र शुक्लानां च कृष्णानां च संधिर्भवति तदेवमभिमृश्य जपत्यृक्सामयोः शिल्पे स्थऽइति यद्वै प्रतिरूपं तच्छिल्पमृचां च साम्नां च प्रतिरूपे स्थ इत्येवैतदाह ॥५॥ ते वामारभऽइति । गर्भो वाऽएष भवति यो दीक्षते स छन्दाꣳसि प्रविशति तस्मान्न्यक्नाङ्गुलिरिव भवति न्यक्नाङ्गुलय-इव हि गर्भाः ॥६॥ स यदाह । ते वामारभऽइति ते वां प्रविशामीत्येवैतदाह ते मा पातमास्य यज्ञस्योदृच इति ते मा गोपायतमास्य यज्ञस्य सꣳस्थाया इत्येवैतदाह ॥७॥ अथ दक्षिणेन जानुनारोहति । शर्मासि शर्म मे यच्छेति चर्म वाऽएतत्कृष्णस्य तदस्य तन्मानुषꣳ शर्म देवत्रा तस्मादाह शर्मासि शर्म मे यच्छेति नमस्तेऽअस्तु मा मा हिꣳसीरिति श्रेयाꣳसं वाऽएष उपाधिरोहति यो यज्ञं यज्ञो हि कृष्णाजिनं तस्माऽएवैतन्निह्नुते तथो हैनमेष यज्ञो न हिनस्ति तस्मादाह नमस्तेऽअस्तु मा मा हिꣳसीरिति ॥८॥ स वै जघनार्धऽइवैवाग्रऽआसीत । अथ यदग्रऽएव मध्यऽउपविशेद्धैनं तत्रानुष्ठ्या हरेद्द्रुष्यति वा प्र वा पतिष्यतीति तथा हैव स्यात्तस्माज्जघनार्धऽइवैवाग्रऽआसीत ॥९॥ अथ मेखलां परिहरते । अङ्गिरसो ह वै दीक्षितानबल्यमविन्दत्ते नान्यद्व्रतादशनमवाकल्पयꣳस्तऽएतामूर्जमपश्यन्त्समाप्तिं तां मध्यत आत्मन ऊर्जमदधत समाप्तिं तया समाप्नुवꣳस्तथोऽएवैष एतां मध्यत आत्मन ऊर्जं धत्ते समाप्तिं तया समाप्नोति ॥१०॥ सा वै शाणी भवति । मृद्वसदिति न्वेव शाणी यत्र वै प्रजापतिरजायत गर्भो भूत्वैतस्माद्यज्ञात्तस्य यन्नेदिष्ठमुल्बमासीत्ते शणास्तस्मात्ते पूतयो वान्ति यदस्य जराय्वासीत्तद्दीक्षितवसनमन्तरं वाऽउ-

ल्बं जरायुणो भवति तस्मादेषोत्तरा वाससो भवति स यथैवातः प्रजापतिरजायत गर्भो भूत्वैतस्माद्यज्ञादेवमेवैषोऽतो जायते गर्भो भूत्वैतस्माद्यज्ञात् ॥११॥ सा वै त्रिवृद्भवति । त्रिवृद्ध्यन्नं पशवो ह्यन्नं पिता माता यज्जायते तत्तृतीयं तस्मात्त्रिवृद्भवति ॥१२॥ मुञ्जवल्शेनान्वस्ता भवति । वज्रो वै शरो विरक्षस्तायै स्तुकासर्गं सृष्टा भवति सा यत्प्रसलवि सृष्टा स्याद्यथेदमन्या रज्जवो मानुषी स्याद्यदपसलवि सृष्टा स्यात्पितृदेवत्या स्यात्तस्मात्स्तुकासर्गं सृष्टा भवति ॥१३॥ तां परिहरते । ऊर्गस्याङ्गिरसीत्यङ्गिरसो ह्येतामूर्जमपश्यन्नूर्णम्रदा ऊर्जं मयि धेहीति नात्र तिरोहितमिवास्ति ॥१४॥ अथ नीविमुद्गूहते । सोमस्य नीविरसीत्यदीक्षितस्य वाऽअस्यैषाग्रे नीविर्भवत्यथात्र दीक्षितस्य सोमस्य तस्मादाह सोमस्य नीविरसीति ॥१५॥ अथ प्रोर्णुते । गर्भो वाऽएष भवति यो दीक्षते प्रावृता वै गर्भा उल्बेनेव जरायुणेव तस्माद्धि प्रोर्णुते ॥१६॥ स प्रोर्णुते । विष्णोः शर्मासि शर्म यजमानस्येत्युभयं वाऽएषोऽत्र भवति यो दीक्षते विष्णुश्च यजमानश्च यदह दीक्षते तद्विष्णुर्भवति यद्यजते तद्यजमानस्तस्मादाह विष्णोः शर्मासि शर्म यजमानस्येति ॥१७॥ अथ कृष्णविषाणां सिचि बध्नीते । देवाश्च वाऽअसुराश्चोभये प्राजापत्याः प्रजापतेः पितुर्दायमुपेयुर्मन एव देवा उपायन्वाचमसुरा यज्ञमेव तद्देवा उपायन्वाचमसुरा अमूमेव देवा उपायन्निमामसुराः ॥१८॥ ते देवा यज्ञमब्रुवन् । योषा वाऽइयं वागुपमन्त्रयस्व ह्वयिष्यते वै त्वेति स्वयं वा हैवैक्षत योषा वाऽइयं वागुपमन्त्रयै ह्वयिष्यते वै मेति तामुपामन्त्रयत सा हास्माऽआरकादिवैवाग्रऽआसूयत्तस्मादु स्त्री पुंसोपमन्त्रितारकादिवैवाग्रेऽसूयति स होवाचारकादिव वै मऽआसूयीदिति ॥१९॥ ते होचुः । उपैव भगवो मन्त्रयस्व ह्वयिष्यते वै त्वेति तामुपामन्त्रयत सा हास्मै निपलाशमिवोवाद तस्मादु स्त्री पुंसोपमन्त्रिता निपलाशमिवैव वदति स होवाच निपलाशमिव वै मेऽवादीदिति ॥२०॥ ते होचुः ।

उपैव भगवो मन्त्रयस्व क्षयिष्यते वै त्वेति तामुपामन्त्रयत सा हैनं जुजुषे तस्मादु स्त्री पुमाꣳसꣳ ह्वयतऽइवोत्तमꣳ स होवाचाह्वत वै मेति ॥२१॥ ते देवा ईक्षां चक्रिरे । योषा वाऽइयं वाग्यदेनं न युवितेहैव मा तिष्ठन्तमभ्येहीति ब्रूहि तां तु न आगतां प्रतिप्रब्रूतादिति सा हैनं तदेव तिष्ठन्तमभ्येयाय तस्मादु स्त्री पुमाꣳसꣳ संस्कृते तिष्ठन्तमभ्येति ताꣳ हैभ्य आगतां प्रतिप्रोवाचेयं वाऽआगादिति ॥२२॥ तां देवाः । असुरेभ्योऽन्तरायंस्ताꣳ स्वीकृत्याग्नावेव परिगृह्य सर्वहुतमजुहवुराहुतिर्हि देवानाꣳ स यामेवामूमनुष्टुभाजुहवुस्तदेवैनां तद्देवाः स्व्यकुर्वत तेऽसुरा आत्तवचसो हेऽलवो हेऽलव इति वदन्तः पराबभूवुः ॥२३॥ तत्रैतामपि वाचमूदुः । उपजिज्ञास्याꣳ स म्लेच्छस्तस्मान्न ब्राह्मणो म्लेच्छेदसुर्या हैषा वा नैवैष द्विषताꣳ सपत्नानामादत्ते वाचं तेऽस्यात्तवचसः पराभवन्ति य एवमेतद्वेद ॥२४॥ सोऽयं यज्ञो वाचमभिदध्यौ । मिथुन्येनया स्यामिति ताꣳ संबभूव ॥२५॥ इन्द्रो ह वाऽईक्षां चक्रे । महद्वाऽइतोऽभ्वं जनिष्यते यज्ञस्य च मिथुनाद्वाचश्च यन्मा तन्नाभिभवेदिति स इन्द्र एव गर्भो भूत्वैतन्मिथुनं प्रविवेश ॥२६॥ स ह संवत्सरे जायमान ईक्षां चक्रे । महावीर्या वाऽइयं योनिर्या मामदीधरत यद्वै मेतो महदेवाभ्वं नानुप्रजायेत यन्मा तन्नाभिभवेदिति ॥२७॥ तां प्रतिपरामृश्यावेष्ट्याच्छिनत् । तां यज्ञस्य शीर्षन्प्रत्यदधाद्यज्ञो हि कृष्णः स यः स यज्ञस्तत्कृष्णाजिनं यो सा योनिः सा कृष्णविषाणाथ यदेनामिन्द्र आवेष्ट्याच्छिनत्तस्मादावेष्टितेव स यथैवात इन्द्रोऽजायत गर्भो भूत्वैतस्मान्मिथुनादेवमेवैषोऽतो जायते गर्भो भूत्वैतस्मान्मिथुनात् ॥२८॥ तां वाऽउत्तानामिव बध्नाति । उत्तानेव वै योनिर्गर्भं बिभर्त्यथ दक्षिणां भ्रुवमुपर्युपरि ललाटमुपस्पृशतीन्द्रस्य योनिरसीतीन्द्रस्य ह्येषा योनिरतो वा ह्येनां प्रविशन्प्रविशत्यतो वा जायमानो जायते तस्मादाहेन्द्रस्य योनिरसीति ॥२९॥ ॥ शतम् १५०० ॥ ॥ अथोल्लिखति । सुसस्याः कृषीस्कृधीति यज्ञमेवै-

तज्जनयति यदा वै सुषमं भवत्यथालं यज्ञाय भवति यदो दुःषमं भवति न तर्ह्यात्मने चनालं भवति तद्यज्ञमेवैतज्जनयति ॥३०॥ अथ न दीक्षितः । काष्ठेन वा नखेन वा कण्डूयेत गर्भो वाऽएष भवति यो दीक्षते यो वै गर्भस्य काष्ठेन वा नखेन वा कण्डूयेदपास्यन्म्रियेत्ततो दीक्षितः पामनो भवितोर्दीक्षितं वाऽअनु रेताꣳसि ततो रेताꣳसि पामनानि जनितोः स्वा वै योनी रेतो न हिनस्त्येषा वाऽएतस्य स्वा योनिर्भवति यत्कृष्णविषाणा तथो हैनमेषा न हिनस्ति तस्माद्दीक्षितः कृष्णविषाणयैव कण्डूयेत नान्येन कृष्णविषाणायाः ॥३१॥ अथास्मै दण्डं प्रयच्छति । वज्रो वै दण्डो विरक्षस्तायै ॥३२॥ औदुम्बरो भवति । अन्नं वाऽऊर्गुदुम्बर ऊर्जोऽन्नाद्यस्यावरुद्ध्यै तस्मादौदुम्बरो भवति ॥३३॥ मुखसंमितो भवति । एतावद्धि वीर्यꣳ स यावदेव वीर्यं तावांस्तद्भवति यन्मुखसंमितः ॥३४॥ तमुच्छ्रयति । उच्छ्रयस्व वनस्पतऽऊर्ध्वो मा पाह्यꣳहस आस्य यज्ञस्योदृच इत्यूर्ध्वो मा गोपायास्य यज्ञस्य सꣳस्थाया इत्येवैतदाह ॥३५॥ अत्र हैके । अङ्गुलीश्च न्यचन्ति वाचं च यच्छन्त्यतो हि किं च न जपिष्यन्भवतीति वदन्तस्तदु तथा न कुर्याद्यथा पराञ्चं धावन्तमनुलिप्सेत तं नानुलभेतैवꣳ ह स यज्ञं नानुलभते तस्मादमुत्रैवाङ्गुलीर्न्यचेदमुत्र वाचं यच्छेत् ॥३६॥ अथ यद्दीक्षितः । ऋचं वा यजुर्वा साम वाभिव्याहरत्यभिस्थिरमभिस्थिरमेवैतद्यज्ञमारभते तस्मादमुत्रैवाङ्गुलीर्न्यचेदमुत्र वाचं यच्छेत् ॥३७॥ अथ यद्वाचं यच्छति । वाग्वै यज्ञो यज्ञमेवैतदात्मन्धत्तेऽथ यद्वाचंयमो व्याहरति तस्मादु हैष विसृष्टो यज्ञः पराङावर्तते तत्रो वैष्णवीमृचं वा यजुर्वा जपेद्यज्ञो वै विष्णुस्तद्यज्ञं पुनरारभते तस्यो हैषा प्रायश्चित्तिः ॥३८॥ अथैक उद्वदति । दीक्षितोऽयं ब्राह्मणो दीक्षितोऽयं ब्राह्मण इति निवेदितमेवैनमेतत्सन्तं देवेभ्यो निवेदयत्ययं महावीर्यो यो यज्ञं प्रापदित्ययं युष्माकैकोऽभूत्तं गोपायतेत्येवैतदाह त्रिष्कृत्व आह त्रिवृद्धि यज्ञः ॥३९॥ अथ यद्ब्राह्मण इत्याह ।

अनड्वेव वाऽअस्यातः पुरा जातं भवतीदꣳ ह्याह्न रत्नाꣳसि योषितमनुसंचरन्ति तद्वुत रत्नाꣳस्येव रेत आदधतीत्यथात्राह्वा जायते यो ब्रह्मणो यो यज्ञाज्जायते तस्मादपि राजन्यं वा वैश्यं वा ब्राह्मण इत्येव ब्रूयाद्ब्रह्मणो हि जायते यो यज्ञाज्जायते तस्मादाहुर्न सवनकृतꣳ हन्यादेनस्वी हैव सवनकृतेति ॥४०॥ ब्राह्मणम् ॥५ [२.१]॥ ॥ प्रथमः प्रपाठकः ॥ कण्डिकासंख्या १२४ ॥ ॥

वाचं यच्छति । स वाचंयम आस्तेऽआस्तमयात्तद्यद्वाचं यच्छति ॥१॥ यज्ञेन वै देवाः । इमां जितिं जिग्युर्यैषामियं जितिस्ते होचुः कथं न इदं मनुष्यैरनभ्यारोह्यꣳ स्यादिति ते यज्ञस्य रसं धीत्वा यथा मधु मधुकृतो निर्धयेयुर्विदुह्य यज्ञं यूपेन योपयित्वा तिरोऽभवन्नथ यदेनेनायोपयंस्तस्माद्यूपो नाम ॥२॥ तद्वाऽऋषीणामनुश्रुतमास । ते यज्ञꣳ समभरन्यथायं यज्ञः सम्भृत एवं वाऽएष यज्ञꣳ सम्भरति यो दीक्षते वाग्वै यज्ञः ॥३॥ तामस्तमिते वाचं विसृजते । संवत्सरो वै प्रजापतिः प्रजापतिर्यज्ञोऽहोरात्रे वै संवत्सर एते ह्येनं परिप्लवमाने कुरुतः सोऽह्नन्दीक्षिष्ट स रात्रिं प्रापत्स यावानेव यज्ञो यावत्यस्य मात्रा तावन्तमेवैतदाप्त्वा वाचं विसृजते ॥४॥ तद्धैके । नक्षत्रं दृष्ट्वा वाचं विसर्जयन्त्यत्रानुष्यास्तमितो भवतीति वदन्तस्तदु तथा न कुर्यात्ह्व ते स्युर्यन्मेघः स्यात्तस्माद्यत्रैवानुष्यास्तमितं मन्येत तदेव वाचं विसर्जयेत् ॥५॥ अनेनो हैके वाचं विसर्जयन्ति । भूर्भुवः स्वरिति यज्ञमाप्याययामो यज्ञꣳ संदध्म इति वदन्तस्तदु तथा न कुर्यान्न ह स यज्ञमाप्याययति न संदधाति य एतेन वाचं विसर्जयति ॥६॥ अनेनैव वाचं विसर्जयेत् । व्रतं कृणुत व्रतं कृणुताग्निर्ब्रह्माग्निर्यज्ञो वनस्पतिर्यज्ञिय इत्येष ह्यस्यात्र यज्ञो भवत्येतद्धविर्यथा पुराग्निहोत्रं तद्यज्ञेनैवैतद्यज्ञꣳ सम्भृत्य यज्ञे यज्ञं प्रतिष्ठापयति यज्ञेन यज्ञꣳ संतनोति संततꣳ ह्येवास्यैतद्व्रतं भवत्या सुत्याये त्रिष्कृत्व आह त्रिवृद्धि यज्ञः ॥७॥ अथाग्निमभ्यावृत्य वाचं विसृजते । न ह स यज्ञमाप्याययति न सं-

दधाति योऽतोऽन्येन वाचं विसृजते स प्रथमं व्याहरन्त्सत्यं वाचोऽभिव्याहरति ॥८॥ अग्निर्ब्रह्मेति । अग्निर्ह्येव ब्रह्माग्निर्यज्ञ इत्यग्निर्ह्येव यज्ञो वनस्पतिर्यज्ञिय इति वनस्पतयो हि यज्ञिया न हि मनुष्या यजेरन्यद्वनस्पतयो न स्युस्तस्मादाह वनस्पतिर्यज्ञिय इति ॥९॥ अथास्मै व्रतꣳ श्रपयन्ति । देवान्वाऽएष उपावर्तते यो दीक्षते स देवतानामेको भवति शृतं वै देवानाꣳ हविर्नाशृतं तस्माच्छ्रपयन्ति तदेष एव व्रतयति नाग्नौ जुहोति तद्यदेष एव व्रतयति नाग्नौ जुहोति ॥१०॥ यज्ञेन वै देवाः । इमां जितिं जिग्युर्यैषामियं जितिस्ते होचुः कथं न इदं मनुष्यैरनभ्यारोह्यꣳ स्यादिति ते यज्ञस्य रसं धीत्वा यथा मधु मधुकृतो निर्धयेयुर्विदुह्य यज्ञं यूपेन योपयित्वा तिरोऽभवन्नथ यदेनेनायोपयंस्तस्माद्यूपो नाम ॥११॥ तद्वाऽऋषीणामनुश्रुतमास । ते यज्ञꣳ समभरन्यथायं यज्ञः सम्भृत एष वाऽअत्र यज्ञो भवति यो दीक्षतऽएष ह्येनं तनुतऽएष एनं जनयति तद्यदेवात्र यज्ञस्य निर्धीतं यद्विदुग्धं तदेवैतत्पुनराप्याययति यदेष एव व्रतयति नाग्नौ जुहोति न ह्याप्याययेद्यदग्नौ जुहुयाज्जुह्वदु हैव मन्येत नाजुहुत् ॥१२॥ इमे वै प्राणाः । मनोजाता मनोयुजो दक्षक्रतवो वागेवाग्निः प्राणोदानौ मित्रावरुणौ चक्षुरादित्यः श्रोत्रं विश्वे देवा एतासु हैवास्यैतद्देवतासु हुतं भवति ॥१३॥ तद्वैके । प्रथमे व्रतऽउभौ व्रीहियवावावपन्त्युभाभ्याꣳ रसाभ्यां यदेवात्र यज्ञस्य निर्धीतं यद्विदुग्धं तत्पुनराप्याययाम इति वदन्तो यद्यु व्रतदुघा न दुह्नीत यस्यैवातः कामयेत तस्य व्रतं कुर्यादितु ह्येवास्यैताऽउभौ व्रीहियवावन्वारब्धौ भवत इति तदु तथा न कुर्यान्न ह स यज्ञमाप्याययति न संदधाति य उभौ व्रीहियवावावपति तस्मादन्यतरमेवावपेद्धविर्वाऽअस्यैताऽउभौ व्रीहियवौ भवतः स यदेवास्यैतौ हविर्भवतस्तदेवास्यैतावन्वारब्धौ भवतो यद्यु व्रतदुघा न दुह्नीत यस्यैवातः कामयेत तस्य व्रतं कुर्यात् ॥१४॥ तद्वैके । प्रथमे व्रते सर्वौषधꣳ सर्वसुरभ्यावपन्ति यदि दीक्षितमार्ति-

विन्देद्येनैवातः कामयेत तेन भिषज्येद्यथा व्रतेन भिषज्येदिति तदु तथा न कुर्या-
न्मानुषꣳ ह ते यज्ञे कुर्वन्ति व्यृद्धं वै तद्यज्ञस्य यन्मानुषं नेद्व्यृद्धं यज्ञे करवाणीति
यदि दीक्षितमार्तिर्विन्देद्येनैवातः कामयेत तेन भिषज्येत्समाप्तिर्ह्येव पुण्या ॥१५॥
अथास्मै व्रतं प्रयच्छति । अतिनीय मानुषं कालꣳ सायंदुग्धमपररात्रे प्रातर्दुग्धमप-
राह्णे व्याकृत्याऽएव दैवं चैवैतन्मानुषं च व्याकरोति ॥१६॥ अथास्मै व्रतं प्रदा-
स्यन्नप उपस्पर्शयति । दैवीं धियं मनामहे सुमृडीकामभिष्टये वर्चोधां यज्ञवाहसꣳ
सुतीर्था नोऽअसद्वशाऽइति मानुषाय वाऽएष पुराशनायावनेनिक्तेऽथात्र दैव्यै धि-
ये तस्मादाह दैवीं धियं मनामहे सुमृडीकामभिष्टये वर्चोधां यज्ञवाहसꣳ सुतीर्था
नोऽअसद्वशाऽइति स यावत्कियच्च व्रतं व्रतयिष्यन्नप उपस्पृशेदेतेनैवोपस्पृशेत् ॥१७॥
अथ व्रतं व्रतयति । ये देवा मनोजाता मनोयुजो दक्षक्रतवस्ते नोऽवन्तु ते नः
पान्तु तेभ्यः स्वाहेति तद्यथा वषट्कृतꣳ हुतमेवमस्यैतद्भवति ॥१८॥ अथ व्रतं
व्रतयित्वा नाभिमुपस्पृशते । श्वात्राः पीता भवत यूयमापोऽअस्माकमन्तरुदरे सु-
शेवाः । ता अस्मभ्यमयक्ष्मा अनमीवा अनागसः स्वदन्तु देवीरमृता ऋतावृध इ-
ति देवान्वाऽएष उपावर्तते यो दीक्षते स देवतानामेको भवत्यनुत्सिक्तं वै दे-
वानाꣳ हविरथैतद्व्रतप्रदो मिथ्या करोति व्रतमुपोत्सिञ्चन्व्रतं प्रमीणाति तस्यो है-
षा प्रायश्चित्तिस्तथो हास्यैतन्न मिथ्याकृतं भवति न व्रतं प्रमीणाति तस्मादाह
श्वात्राः पीता भवत यूयमापोऽअस्माकमन्तरुदरे सुशेवाः । ता अस्मभ्यमयक्ष्मा अ-
नमीवा अनागसः स्वदन्तु देवीरमृता ऋतावृध इति स यावत्कियच्च व्रतं व्रतयि-
त्वा नाभिमुपस्पृशेदेतेनैवोपस्पृशेत्कस्तद्वेद यद्व्रतप्रदो व्रतमुपोत्सिञ्चेत् ॥१९॥ अथ
यत्र मेक्ष्यन्भवति । तत्कृष्णविषाणया लोष्टं वा किंचिद्वोपहन्तीयं ते यज्ञिया त-
नूरितीयं वै पृथिवी देवी देवयजनी सा दीक्षितेन नाभिमिह्या तस्या एतदु कृच्छ्रै-
व यज्ञियां तनूमथायज्ञियꣳ शरीरमभिमेहत्यपो मुञ्चामि न प्रजामित्युभयं वाऽअत

एत्यापश्च रेतश्च स एतदप एव मुञ्चति न प्रजामᳪहोमुचः स्वाहाकृता इत्यᳪहस इव ह्येता मुञ्चन्ति यदुदरे गुष्टितं भवति तस्मादाहाᳪहोमुच इति स्वाहाकृताः पृथिवीमाविशतेत्याहुतयो भूत्वा शान्ताः पृथिवीमाविशतेत्येवैतदाह ॥ २० ॥ अथ पुनर्लोष्टं न्यस्यति । पृथिव्या सम्भवेतीयं वै पृथिवी देवी देवयजनी सा दीक्षितेन नाभिमिच्या तस्या एतदुद्धृत्येव यज्ञियां तनूमथायज्ञियᳪ शरीरमभ्यमिहन्तामेवा-स्यामेतत्पुनर्यज्ञियां तनूं दधाति तस्मादाह पृथिव्या सम्भवेति ॥ २१ ॥ अथाग्नये परिदाय स्वपिति । देवान्वाऽएष उपावर्तते यो दीक्षते स देवतानामेको भवति न वै देवाः स्वपन्त्यनवरुद्धो वाऽएतस्यास्वप्नो भवत्यग्निर्वै देवानां व्रतपतिस्त-स्माऽएवैतत्परिदाय स्वपित्यग्ने त्वᳪ सु जागृहि वयᳪ सु मन्दिषीमहीत्यग्ने त्वं जागृहि वयᳪ स्वप्स्याम इत्येवैतदाह रक्षा णोऽअप्रयुछन्निति गोपाय नोऽप्रमत्त इ-त्येवैतदाह प्रबुधे नः पुनस्कृधीति यथेतः सुप्त्वा स्वस्ति प्रबुध्यामहाऽएवं नः कु-र्वित्येवैतदाह ॥ २२ ॥ अथ यत्र सुप्त्वा पुनर्नावद्रास्यन्भवति । तद्वाचयति पुनर्मनः पुनरायुर्मऽआगन्पुनः प्राणः पुनरात्मा मऽआगन्पुनश्चक्षुः पुनः श्रोत्रं मऽआगन्नि-ति सर्वे ह वाऽएते स्वपतोऽपक्रामन्ति प्राण एव न तैरेवैतत्सुप्त्वा पुनः संगछते तस्मादाह पुनर्मनः पुनरायुर्मऽआगन्पुनः प्राणः पुनरात्मा मऽआगन्पुनश्चक्षुः पुनः श्रोत्रं मऽआगन् । वैश्वानरोऽअदब्धस्तनूपा अग्निर्नः पातु दुरितादवद्यादिति त-द्यदेवात्र स्वप्नेन वा येन वा मिथ्याकर्म तस्मान्नः सर्वस्मादग्निर्गोपायत्वित्येवैतदाह तस्मादाह वैश्वानरो अदब्धस्तनूपा अग्निर्नः पातु दुरितादवद्यादिति ॥ २३ ॥ अथ यद्दीक्षितः । अव्रत्यं वा व्याहरति क्रुध्यति वा तन्मिथ्याकरोति व्रतं प्रमीणात्य-क्रोधो ह्येव दीक्षितस्याग्निर्वै देवानां व्रतपतिस्तमेवैतदुपधावति त्वमग्ने व्रतपा अ-सि देवऽआ मर्त्येष्वा । त्वं यज्ञेष्वीड्यऽइति तस्यो हैषा प्रायश्चित्तिस्तथो हास्यैतन्न मिथ्याकृतं भवति न व्रतं प्रमीणाति तस्मादाह त्वमग्ने व्रतपा असि देवऽआ म-

त्र्येषा । त्वं यज्ञध्रीऽस इति ॥२४॥ अथ यद्दीक्षितायाभिहरन्ति । तस्मिन्वाचयति शस्वेयत्सोमा भूयो भरेति सोमो ह वाऽअस्माऽएतच्छुते यद्दीक्षितायाभिहरन्ति स यदाह शस्वेयत्सोमेति शस्व न इयत्सोमेत्येवैतदाहा भूयो भरेत्या नो भूयो हरेत्येवैतदाह देवो नः सविता वसोर्दाता वस्वदादिति तथो हास्माऽएतत्सवितृप्रसूतमेव दानाय भवति ॥२५॥ पुरास्तमयादाह । दीक्षित वाचं यच्छेति तामस्तमिते वाचं विसृजते पुरोदयादाह दीक्षित वाचं यच्छेति तामुदिते वाचं विसृजते संतत्याऽएवाहरेवैतद्रात्र्या संतनोत्यह्ना रात्रिम् ॥२६॥ नैनमन्यत्र चरन्तमभ्यस्तमियात् । न स्वपन्तमभ्युदियात्स यदेनमन्यत्र चरन्तमभ्यस्तमियाद्रात्रेरेनं तदन्तरियाद्यत्स्वपन्तमभ्युदियादह्न एनं तदन्तरियान्नात्र प्रायश्चित्तिरस्ति प्रतिगुप्यमेवैतस्मात् न पुरावभृथादपोऽभ्यवेयान्नैनमभिवर्षेदनवक्लृप्तꣳ ह तद्यत्पुरावभृथादपोऽभ्यवेयाद्यद्वैनमभिवर्षेदथ परिह्वालं वाचं वदति न मानुषीं प्रसृतां तद्यत्परिह्वालं वाचं वदति न मानुषीं प्रसृताम् ॥२७॥ यज्ञेन वै देवाः । इमां जिति जिग्युर्यैषामियं जितिस्ते होचुः कथं न इदं मनुष्यैरनभ्यारोह्यꣳ स्यादिति ते यज्ञस्य रसं धीत्वा यथा मधु मधुकृतो निर्धयेयुर्विदुह्य यज्ञं यूपेन योपयित्वा तिरोऽभवन्नथ यदेनेनायोपयंस्तस्माद्यूपो नाम ॥२८॥ तद्वाऽऋषीणामनुश्रुतमास । ते यज्ञꣳ समभरन्यथायं यज्ञः सम्भृत एवं वाऽएष यज्ञꣳ सम्भरति यो दीक्षते वाग्वै यज्ञस्तद्यदेवात्र यज्ञस्य निर्धीतं यद्विदुग्धं तदेवैतत्पुनराप्याययति यत्परिह्वालं वाचं वदति न मानुषीं प्रसृतां न ह्याप्याययेद्यत्प्रसृतां मानुषीं वाचं वदेत्तस्मात्परिह्वालं वाचं वदति न मानुषीं प्रसृताꣳ ॥२९॥ स वै धीक्षते । वाचे हि धीक्षते यज्ञाय हि धीक्षते यज्ञो हि वाग्धीक्षितो ह वै नामैतद्यद्दीक्षित इति ॥३०॥ ब्राह्मणम् ॥१[२.२]॥ ॥

आदित्यं चरुं प्रायणीयं निर्वपति । देवा ह वाऽअस्यां यज्ञ तन्वाना इमां य-

ज्ञादन्तरीयुः सा हैषामियं यज्ञं मोहयां चकार कथं नु मयि यज्ञं तन्वाना मां य-
ज्ञादन्तरीयुरिति तꣳ ह यज्ञं न प्रजज्ञुः ॥ १ ॥ ते होचुः । यन्न्वस्यामेव यज्ञमतꣳस्म-
हि कथं नु नोऽमुहत्कथं न प्रजानीम इति ॥ २ ॥ ते होचुः । अस्यामेव यज्ञं त-
न्वाना इमां यज्ञादन्तरगाम सा न इयमेव यज्ञममूमुहदिमामेवोपधावामेति ॥ ३ ॥
ते होचुः । यन्नु त्वय्येव यज्ञमतꣳस्महि कथं नु नोऽमुहत्कथं न प्रजानीम इति
॥ ४ ॥ सा होवाच । मय्येव यज्ञं तन्वाना मां यज्ञादन्तरगात सा वोऽहमेव यज्ञ-
ममूमुहं भागं नु मे कल्पयताथ यज्ञं द्रक्ष्यथाथ प्रज्ञास्यथेति ॥ ५ ॥ तथेति देवा
अब्रुवन् । तवैव प्रायणीयस्तवोदयनीय इति तस्मादेष आदित्य एव प्रायणीयो
भवत्यादित्य उदयनीय इयꣳ ह्येवादितिस्ततो यज्ञमपश्यंस्तमतन्वत ॥ ६ ॥ स य-
दादित्यं चरुं प्रायणीयं निर्वपति । यज्ञस्यैव दृष्ट्यै यज्ञं दृष्ट्वा क्रीणानि तं तनवा
ऽइति तस्मादादित्यं चरुं प्रायणीयं निर्वपति तद्धि निरुप्तꣳ हविरासीदनिष्टा देव-
ता ॥ ७ ॥ अथैभ्यः पथ्या स्वस्तिः प्रारोचत । तामयजन्वाग्वै पथ्या स्वस्तिर्वाग्यज्ञ-
स्तद्यज्ञमपश्यंस्तमतन्वत ॥ ८ ॥ अथैभ्योऽग्निः प्रारोचत । तमयजन्स यदाग्नेयं यज्ञ-
स्यासीत्तदपश्यन्यद्धि शुष्कं यज्ञस्य तदाग्नेयं तदपश्यंस्तदतन्वत ॥ ९ ॥ अथैभ्यः सोमः
प्रारोचत । तमयजन्स यत्सौम्यं यज्ञस्यासीत्तदपश्यन्यद्धाऽआर्द्रं यज्ञस्य तत्सौम्यं
तदपश्यंस्तदतन्वत ॥ १० ॥ अथैभ्यः सविता प्रारोचत । तमयजन्पशवो वै सविता
पशवो यज्ञस्तद्यज्ञमपश्यंस्तमतन्वताथ यस्यै देवतायै हविर्निरुप्तमासीत्तामयजन्
॥ ११ ॥ ता वाऽएताः । पञ्च देवता यजति यो वै स यज्ञो मुग्ध आसीत्पाङ्क्तो वै
स आसीत्तमेताभिः पञ्चभिर्देवताभिः प्राजानन् ॥ १२ ॥ ऋतवो मुग्धा आसन्पञ्च ।
तानेताभिरेव पञ्चभिर्देवताभिः प्राजानन् ॥ १३ ॥ दिशो मुग्धा आसन्पञ्च । ता ए-
ताभिरेव पञ्चभिर्देवताभिः प्राजानन् ॥ १४ ॥ उदीचीमेव दिशम् । पथ्यया स्वस्त्या
प्राजानंस्तस्मादत्रोत्तराहि वाग्वदति कुरुपञ्चालत्रा वाग्घ्येषा निदानेनोदीचीꣳ ह्ये-

तया दिशं प्राजानन्नुदीची ह्येतस्यै दिक् ॥१५॥ प्राचीमेव दिशम् । अग्निना प्राजानंस्तस्मादग्निं पश्चात्प्राञ्चमुद्धृत्योपासते प्राचीं ह्येतेन दिशं प्राजानन्प्राची ह्येतस्य दिक् ॥१६॥ दक्षिणामेव दिशं । सोमेन प्राजानंस्तस्मात्सोमं क्रीतं दक्षिणा परिवहन्ति तस्मादाहुः पितृदेवत्यः सोम इति दक्षिणां ह्येतेन दिशं प्राजानन्दक्षिणा ह्येतस्य दिक् ॥१७॥ प्रतीचीमेव दिशं । सवित्रा प्राजानन्नेष वै सविता य एष तपति तस्मादेष प्रत्यङ्ङेति प्रतीचीं ह्येतेन दिशं प्राजानन्प्रतीची ह्येतस्य दिक् ॥१८॥ ऊर्ध्वामेव दिशम् । अदित्या प्राजानन्नियं वाऽअदितिस्तस्मादस्यामूर्ध्वा ओषधयो जायन्तऽऊर्ध्वा वनस्पतय ऊर्ध्वां ह्येतया दिशं प्राजानन्नूर्ध्वा ह्येतस्यै दिक् ॥१९॥ शिरो वै यज्ञस्यातिथ्यम् । बाहू प्रायणीयोदयनीयावभितो वै शिरो बाहू भवतस्तस्मादभित आतिथ्यमेते हविषी भवतः प्रायणीयश्चोदयनीयश्च ॥२०॥ तदाहुः । यदेव प्रायणीये क्रियेत तदुदयनीये क्रियेत यदेव प्रायणीयस्य बर्हिर्भवति तदुदयनीयस्य बर्हिर्भवतीति तदपोद्धृत्य निदधाति तां स्थालीं सहामकर्षां प्रमृज्य मेक्षणं निदधाति यऽएव प्रायणीयस्यऽर्त्विजो भवन्ति तऽउदयनीयस्यऽर्त्विजो भवन्ति तद्यदेतत्समानं यज्ञे क्रियते तेन बाहू सदृशौ तेन सरूपौ ॥२१॥ तदु तथा न कुर्यात् । काममेवैतद्बर्हिरनुप्रहरेदेवं मेक्षणं निर्णिज्य स्थालीं निदध्याद्यऽएव प्रायणीयस्यऽर्त्विजो भवन्ति तऽउदयनीयस्यऽर्त्विजो भवन्ति यद्यु ते विप्रेताः स्युरप्यन्यऽएव स्युः स यद्धि समानीर्देवता यजति समानानि हवींषि भवन्ति तेनैव बाहू सदृशौ तेन सरूपौ ॥२२॥ स वै पञ्च प्रायणीये देवता यजति । पञ्चोदयनीये तस्मात्पञ्चेत्थादङ्गुलयः पञ्चेत्थात्तद्ध्रस्व्यन्तं भवति न पत्नीः संयाजयन्ति पूर्वार्धं वाऽअन्वात्मनो बाहू पूर्वार्धमेवैतद्यज्ञस्याभिसंस्करोति तस्माद्ध्रस्व्यन्तं भवति न पत्नीः संयाजयन्ति ॥२३॥ ब्राह्मणम् ॥२[२.३.]॥ ॥

दिवि वै सोम आसीत् । अथेह देवास्ते देवा अकामयन्ता नः सोमो गच्छेते-

नागतेन यजेमहीति त॑ऽएते॒ मायेऽअसृजन्त सुपर्णी॒ च कद्रू॒ च तद्धि॒ष्ण्यानां ब्रा॒ह्मणे व्या॒ख्यायते सौपर्णीकाद्रवं य॒था तदा॒स ॥१॥ ते॒भ्यो गायत्री सो॒मम॒च्छाप॑तत् । त॒स्याऽआह॒रन्त्यै गन्धर्वो॒ विश्वावसुः॑ पर्य॒मुष्णात्ते॒ दे॒वा॒ अविदुः॒ प्रच्युतो॒ वै॒ प॒रस्तात्सोमो॒ऽथ नो ना॒गच्छति गन्धर्वा वै प॒र्यमोषिषुरि॒ति ॥२॥ ते॒ होचुः । यो॒षित्कामा वै॒ गन्धर्वा वा॒चमे॒वैभ्यः प्र॒हिणवाम सा॒ नः सह सो॒मेनागमिष्यतीति ते॒भ्यो वाचं प्रा॒हिणव॒न्त्सैनान्त्सह सो॒मेनाग॒च्छत् ॥३॥ ते॒ गन्धर्वा॒ अन्वागत्याब्रु॒वन् । सोमो युष्माकं॒ वा॒गेवास्माकमि॒ति त॒थेति देवा॒ अब्रुवन्नि॒हो चेदा॒गान्मैना॒मभीषहेव नैष्ट वि॒ह्वयामहाऽइ॒ति तां॒ व्यह्वयन्त ॥४॥ त॒स्यै गन्धर्वा॒ः । वे॒दानेव प्रो॒चिरऽइ॒ति वै॒ वय॒ं विद्मेति वय॒ं विद्मेति ॥५॥ अ॒थ दे॒वाः । वी॒णामिव॒ सृष्ट्वा॒ वादय॒न्तो निगा॒यन्तो नि॒षेदुरि॒ति वै॒ ते वय॒ं गास्याम इ॒ति त्वा प्र॒मोदयिष्यामह ऽइ॒ति सा॒ दे॒वानु॒पाववर्त सा वै सा तन्मोघमुपाववर्त या॒ स्तुवद्भ्यः श॒ꣳसद्भ्यो नृत्तं॒ गीत॒मुपाववर्त त॒स्माद॒प्येतर्हि मोघसꣳहिता एव यो॒षा एवꣳ हि वा॒गुपा॒वर्तत ता॒मु ह्यन्या अ॒नु यो॒षास्तस्माद्य एव नृत्यति यो गा॒यति त॒स्मिन्नेवैता नि॒मिश्लतमा-इव ॥६॥ तद्वाऽएत॒दुभयं॒ दे॒वेष्वासीत् । सो॒मश्च वा॒क्च स यत्सो॒मं क्री॒णात्यागत्याऽएवा॒गतेन यजाऽइत्यनागतेन ह वै स सो॒मेन यजते यो॒ऽक्रीतेन य॒जते ॥७॥ अ॒थ य॒द्ध्रुवा॒यामाज्यं प॒रिशिष्टं भ॒वति । त॒ज्जुह्वां चतु॒ष्कृत्वो विगृ॒ह्णा॒ति बर्हि॒षा हि॒रण्यं प्रबध्याव॒धाय जुहोति कृ॒त्स्नेन पयसा जुहवानीति समानज॒न्म वै पयश्च॒हिरण्यं चोभय॒ꣳ ह्यग्निरेतसꣳ ॥८॥ स हि॒रण्यमवदधाति । एषा॒ ते॒ शुक्र तनू॒रेतद्वर्च इ॒ति व॒र्चो वा॒ऽएतद्यद्धि॒रण्यं त॒या सम्भव भ्रा॒जं गच्छेति स यदा॒ह त॒या सम्भवेति त॒या स॒म्पृच्यस्वे॒त्येवैतदाह भ्रा॒जं गच्छेति सोमो वै भ्रा॒ट् सो॒मं॒ गच्छ॒त्येवैत॒दाह ॥९॥ तां य॒थैवादो॒ दे॒वाः । प्रा॒हिणव॒न्त्सोमम॒च्छैवम॒वैनामेष एत॒त्प्र॒हिणोति सो॒मम॒च्छ वा॒ग्वै॒ सोमक्रयणी नि॒दानेन ता॒मेतया॒ऽऽकूत्या प्रीणाति प्री-

तया सोमं क्रीणानीति ॥१०॥ स जुहोति । जूरसीत्येतद्ध वा अस्या एकं नाम यज्जूरसीति धृता मनसेति मनसा वाऽइयं वाग्धृता मनो वाऽइदं पुरस्ताद्वाच इत्थं वद मैतद्वादीरित्यलग्लमिव ह वै वाग्वदेद्यन्मनो न स्यात्तस्मादाह धृता मनसेति ॥११॥ जुष्टा विष्णवऽइति । जुष्टा सोमायेत्येवैतदाह यमहैम इति तस्यास्ते सत्यसवसः प्रसवऽइति सत्यप्रसवा न एधि सोमं नोऽहेह्नीत्येवैतदाह तन्वो यन्त्रमशीय स्वाहेति स ह वै तन्वो यन्त्रमश्नुते यो यज्ञस्योदृचं गच्छति यज्ञस्योदृचं गच्छानीत्येवैतदाह ॥१२॥ अथ हिरण्यमपोद्धरति । तन्मनुष्येषु हिरण्यं करोति स यत्सहिरण्यं जुहुयात्परागु हैवैतन्मनुष्येभ्यो हिरण्यं प्रवृञ्ज्यात्तन्न मनुष्येषु हिरण्यमभिगम्येत ॥१३॥ सोऽपोद्धरति । शुक्रमसि चन्द्रमस्यमृतमसि वैश्वदेवमसीति कृत्स्नेन पयसा ह्युवा यदेवैतत्तदाह शुक्रमसीति शुक्रं ह्येतच्चन्द्रमसीति चन्द्रं ह्येतदमृतमसीत्यमृतं ह्येतद्वैश्वदेवमसीति वैश्वदेवं ह्येतत्प्रमुच्य तृणं बर्हिष्यपिसृजति सूत्रेण हिरण्यं प्रबध्नाति ॥१४॥ अथापरं चतुर्गृहीतमाज्यं गृहीत्वा । अन्वारभस्व यजमानेत्याहापोर्णुवन्ति शालायै द्वारे दक्षिणतः सोमक्रयण्युपतिष्ठते तत्प्रहितामेवैनामेतत्सतीं प्राहैषीद्वाग्वै सोमक्रयणी निदानेन तामेतयाहुत्याप्रैषीत्प्रीतया सोमं क्रीणानीति ॥१५॥ अथोपनिष्क्रम्याभिमन्त्रयते । चिदसि मनासीति चित्तं वाऽइदं मनो वागनुवदति धीरसि दक्षिणेति धिया-धिया ह्येतया मनुष्या जुज्यूषन्त्यनूक्तेनेव प्रकामोद्येनेव गाथाभिरिव तस्मादाह धीरसीति दक्षिणेति दक्षिणा ह्येषा क्षत्रियासि यज्ञियासीति क्षत्रिया ह्येषा यज्ञिया ह्येषादितिरस्युभयतःशीर्ष्णीति स यदेनया समानं सद्विपर्यासं वदति यदपरं तत्पूर्वं करोति यत्पूर्वं तदपरं तेनोभयतःशीर्ष्णी तस्मादाहादितिरस्युभयतःशीर्ष्णीति ॥१६॥ सा नः सुप्राची सुप्रतीच्येधीति । सुप्राची न एधि सोमं नोऽहेह्नीत्येवैतदाह सुप्रतीची त एधि सोमेन नः सह पुनरेह्नीत्येवैतदाह तस्मादाह सा नः सुप्राची सुप्र-

तीच्येधीति ॥१७॥ मित्रस्त्वा पदि बध्नीतामिति । वरुण्या वाऽएषा यद्रज्जुः सा यद्रज्ज्वाभिहिता स्याद्वरुण्या स्याद्यद्ध्यनभिहिता स्यादयतेव स्यादितद्वाऽअवरुण्यं यन्मैत्रꣳ सा यथा रज्ज्वाभिहिता यतैवमस्यै तद्भवति यदाह मित्रस्त्वा पदि बध्नीतामिति ॥१८॥ पूषाध्वनस्पात्विति । इयं वै पृथिवी पूषा यस्य वाऽइयमध्वन्गोप्त्री भवति तस्य न का चन ह्वला भवति तस्मादाह पूषाध्वनस्पात्विति ॥१९॥ इन्द्रायाध्यक्षायेति । स्वध्यक्षासदित्येवैतदाह यदाहेन्द्रायाध्यक्षायेत्यनु त्वा माता मन्यतामनु पितानु भ्राता सगर्भ्योऽनु सखा सयूथ्य इति सा यत्ते जन्म तेन नोऽनुमता सोममच्छेहीत्येवैतदाह सा देवि देवमच्छेहीति देवी ह्येषा देवमच्छैति यद्वाक्सोमं तस्मादाह सा देवि देवमच्छेहीतीन्द्राय सोममितीन्द्रो वै यज्ञस्य देवता तस्मादाहेन्द्राय सोममिति रुद्रस्त्वावर्तयत्वित्यप्रणाशायैतदाह रुद्रꣳ हि नाति पशवः स्वस्ति सोमसखा पुनरेहीति स्वस्ति नः सोमेन सह पुनरेहीत्येवैतदाह ॥२०॥ तां यथैवादो देवाः । प्राहिण्वन्त्सोममच्छ सैनान्त्सह सोमेनागच्छदेवमेवैनामेष एतत्प्रहिणोति सोममच्छ सैनꣳ सह सोमेनागच्छति ॥२१॥ तां यथैवादो देवाः । व्यह्वयन्त गन्धर्वैः सा देवानुपावर्ततैवमेवैनामेतद्यजमानो विह्वयते सा यजमानमुपावर्तते तामुदीचीमत्याकुर्वन्त्युदीची हि मनुष्याणां दिक्सोऽएव यजमानस्य तस्मादुदीचीमत्याकुर्वन्ति ॥२२॥ ब्राह्मणम् ॥३ [२.४]॥ द्वितीयोऽध्यायः [१७.]॥ ॥

सप्त पदान्यनुनिष्क्रामति । वृङ्क्तऽएवैनामेतत्तस्मात्सप्त पदान्यनुनिष्क्रामति यत्र वै वाचः प्रजातानि छन्दाꣳसि सप्तपदा वै तेषां परार्ध्या शक्वरी तामेवैतत्परस्तादर्वाचीं वृङ्क्ते तस्मात्सप्त पदान्यनुनिष्क्रामति ॥१॥ स वै वाच एव रूपेणानुनिष्क्रामति । वस्व्यस्यदितिरस्यादित्यासि रुद्रासि चन्द्रासीति वस्वी ह्येषादितिर्ह्येषादित्या ह्येषा रुद्रा ह्येषा चन्द्रा ह्येषा बृहस्पतिष्ट्वा सुम्ने रम्णात्विति ब्रह्म वै

बृहस्पतिर्बृहस्पतिष्ट्वा साधुनावर्तयत्वित्येवैतदाह रुद्रो वसुभिराचकऽइत्यप्रणाशा-
यैतदाह रुद्रꣳ हि नाति पशवः ॥२॥ अथ सप्तमं पदं पर्युपविशन्ति । स हिरण्यं
पदे निधाय जुहोति न वाऽअनग्नावाहुतिर्हूयतेऽग्निरेतसं वै हिरण्यं तथो हा-
स्यैषाग्निमत्येवाहुतिर्हुता भवति वज्रो वाऽआज्यं वज्रेणैवैतदाज्येन स्पृणुते ताꣳ
स्पृत्वा स्वीकुरुते ॥३॥ स जुहोति । अदित्यास्त्वा मूर्धन्नाजिघर्मीतीयं वै पृथिव्य-
दितिरस्यै हि मूर्धन्जुहोति देवयजने पृथिव्याऽइति देवयजने हि पृथिव्यै जुहो-
तीडायास्पदमसि घृतवत्स्वाहेति गौर्वाऽइडा गोर्हि पदे जुहोति घृतवत्स्वाहेति
घृतवद्ध्येतदभिहुतं भवति ॥४॥ अथ स्फ्यमादाय परिलिखति । वज्रो वै स्फ्यो
वज्रेणैवैतत्परिलिखति त्रिष्कृत्वः परिलिखति त्रिवृतैवैतद्वज्रेण समन्तं परिगृह्णा-
त्यनतिक्रमाय ॥५॥ स परिलिखति । अस्मे रमस्वेति यजमाने रमस्वेत्येवैतदा-
हाथ समुल्लिख्य पदꣳ स्थाल्याꣳ संवपत्यस्मे ते बन्धुरिति यजमाने ते बन्धुरित्ये-
वैतदाह ॥६॥ अथाप उपनिनयति । यत्र वाऽअस्यै खनन्तः क्रूरीकुर्वन्त्यपघ्नन्ति
शान्तिरापस्तदद्भिः शान्त्या शमयति तदद्भिः संदधाति तस्मादप उपनिनयति ॥७॥
अथ यजमानाय पदं प्रयच्छति । त्वे राय इति पशवो वै रायस्त्वयि पशव इत्येवै-
तदाह तद्यजमानः प्रतिगृह्णाति मे राय इति पशवो वै रायो मयि पशव इत्ये-
वैतदाह ॥८॥ अथाध्वर्युरात्मानमुपस्पृशति । मा वयꣳ रायस्पोषेण वियौष्मेति त-
थो हाध्वर्युः पशुभ्य आत्मान नान्तरेति ॥९॥ अथ पत्न्यै पदं प्रतिपराहरन्ति । गृ-
हा वै पत्न्यै प्रतिष्ठा तद्गृहेष्वेवैनामेतत्प्रतिष्ठायां प्रतिष्ठापयति तस्मात्पत्न्यै पदं प्र-
तिपराहरन्ति ॥१०॥ तां नेष्टा वाचयति । तोतो राय इत्यथैनाꣳ सोमक्रयण्या
संख्यापयति वृषा वै सोमो योषा पत्न्येष वाऽअत्र सोमो भवति यत्सोमक्रयणी
मिथुनमेवैतत्प्रजननं क्रियते तस्मादेनां सोमक्रयण्या संख्यापयति ॥११॥ स सं-
ख्यापयति । समख्ये देव्या धिया सं दक्षिणयोरुचक्षसा । मा मऽआयुः प्रमोषीर्मो

ऽग्रहं तव वीरं विदेय तव देवि संदृशीत्याशिषमेवैतदाशास्ते पुत्रो वै वीरः पुत्रं विदेय तव संदृशीत्येवैतदाह ॥१२॥ सा या बभ्रुः पिङ्गाक्षी । सा सोमक्रयणी यत्र वाऽइन्द्राविष्णू त्रेधा सहस्रं व्यैरयेतां तदेकात्यरिच्यत तां त्रेधा प्राजनयतां तस्माद्योऽप्येतर्हि त्रेधा सहस्रं व्याकुर्यादेकैवातिरिच्येत ॥१३॥ सा या बभ्रुः पिङ्गाक्षी । सा सोमक्रयण्यथ या रोहिणी सा वार्त्रघ्नी यामिदꣳ राजा संग्रामं जित्वोदाकुरुतेऽथ या रोहिणी श्येताक्षी सा पितृदेवत्या यामिदं पितृभ्यो घ्नन्ति ॥१४॥ ॥ शतम् १६०० ॥ ॥ सा या बभ्रुः पिङ्गाक्षी । सा सोमक्रयणी स्याद्यदि बभ्रुं पिङ्गाक्षीं न विन्देदरुणा स्याद्यद्यरुणां न विन्देद्रोहिणी वार्त्रघ्नी स्याद्रोहिण्यै ह्वेव श्येताक्ष्याऽआशां नेयात् ॥१५॥ सा स्यादप्रवीता । वाग्वाऽएषा निदानेन यत्सोमक्रयण्ययातयाम्नी वाऽइयं वागयातयाम्न्यप्रवीता तस्मादप्रवीता स्यात्सा स्यादवण्डाकूटाकाणाकर्णालक्षितासप्तशफा सा ह्येकरूपैकरूपा हीयं वाक् ॥१६॥ ब्राह्मणम् ॥४ [३. १.] ॥ ॥

पदꣳ समुप्य पाणीऽअवनेनिक्ते । तद्यत्पाणीऽअवनेनिक्ते वज्रो वाऽआज्यꣳ रेतः सोमो नेद्वज्रेणाज्येन रेतः सोमꣳ हिनसानीति तस्मात्पाणीऽअवनेनिक्ते ॥१॥ अथास्याꣳ हिरण्यं बध्नीते । द्वयं वाऽइदं न तृतीयमस्ति सत्यं चैवानृतं च सत्यमेव देवा अनृतं मनुष्या अग्निरेतसं वै हिरण्यꣳ सत्येनाꣳशूनुपस्पृशानि सत्येन सोमं पराहणानीति तस्माद्वाऽअस्याꣳ हिरण्य बध्नीते ॥२॥ अथ सम्प्रेष्यति । सोमोपनहनमाहर सोमपर्याणहनमाहरोष्णीषमाहरेति स यदेव शोभनꣳ तत्सोमोपनहनꣳ स्याद्वासो ह्यस्यैतद्भवति शोभनꣳ ह्येतस्य वासः स यो हैनꣳ शोभनेनोपचरति शोभते हाथ य आह यदेव किं चेति यद्वैव किं च भवति तस्माद्यदेव शोभनं तत्सोमोपनहनꣳ स्याद्यदेव किं च सोमपर्याणहनम् ॥३॥ यद्युष्णीषं विन्देत् । उष्णीषः स्याद्यद्युष्णीषं न विन्देत्सोमपर्याणहनस्यैव ह्यङ्गुलं

वा त्र्यङ्गुलं वावकृन्तेदुष्णीषभाजनमध्वर्युर्वा यजमानो वा सोमोपनहमादत्ते य एव
कश्च सोमपर्याणहनम् ॥४॥ अथाग्रेण राजानं विचिन्वन्ति । तदुदकुम्भ उपनि-
हितो भवति तद्ब्राह्मण उपास्ते तदभ्यायन्ति प्राञ्चः ॥५॥ तदायत्सु वाचयति ।
एष ते गायत्रो भाग इति मे सोमाय ब्रूतादेष ते त्रैष्टुभो भाग इति मे सोमाय
ब्रूतादेष ते जागतो भाग इति मे सोमाय ब्रूताच्छन्दोनामानाꣳ साम्राज्यं गच्छेति
मे सोमाय ब्रूतादित्येकं वाऽएष क्रीयमाणोऽभिक्रीयते छन्दसामेव राज्याय छन्द-
साꣳ साम्राज्याय घ्नन्ति वाऽएनमेतद्यदभिषुण्वन्ति तमेतदाह छन्दसामेव त्वा रा-
ज्याय क्रीणामि छन्दसाꣳ साम्राज्याय न वधायेत्यथेत्य प्राङुपविशति ॥६॥ सो
ऽभिमृशति । अस्माकोऽसीति स्व-इव ह्यस्यैतद्भवति यदागतस्तस्माद्वाहास्माको
ऽसीति शुक्रस्ते ग्रह्य इति शुक्रꣳ ह्यस्माद्ग्रहं ग्रहीष्यन्भवति विचितस्त्वा विचि-
न्वन्त्विति सर्वत्वायैतदाह ॥७॥ अत्र हैके । तृणं वा काष्ठं वा विचित्यापास्यन्ति
तदु तथा न कुर्यात्क्षत्रं वै सोमो विडन्या ओषधयोऽन्नं वै क्षत्रियस्य विट् स
यथा ग्रसितमनुद्धायाहिंस्य परास्येदेवं तत्तस्मादभ्येव मृशेद्विचितस्त्वा विचिन्वन्त्वि-
ति तद्यऽएवास्य विचेतारस्तऽएनं विचिन्वन्ति ॥८॥ अथ वासः । द्विगुणं वा
चतुर्गुणं वा प्राग्दशं वोदग्दशं वोपस्तृणाति तद्राजानं मिमीते स यद्राजानं मि-
मीते तस्मान्मात्रा मनुष्येषु मात्रो यो चाप्यन्या मात्रा ॥९॥ सावित्र्या मिमीते ।
सविता वै देवानां प्रसविता तथो हास्माऽएष सवितृप्रसूत एव क्रयाय भवति
॥१०॥ अतिछन्दसा मिमीते । एषा वै सर्वाणि छन्दाꣳसि यदतिछन्दास्तथा हा-
स्यैष सर्वैरेव छन्दोभिर्मितो भवति तस्मादतिछन्दसा मिमीते ॥११॥ स मि
मीते । अभि त्यं देवꣳ सवितारमोण्योः कविक्रतुमर्चामि सत्यसवꣳ रत्नधामभि
प्रियं मतिं कविम् । ऊर्ध्वा यस्यामतिर्भा अदिद्युतत्सवीमनि हिरण्यपाणिरमिमीत
सुक्रतुः कृपा स्वरिति ॥१२॥ एतया सर्वाभिः । एतया चतसृभिरेतया तिसृभिरे-

तया द्वाभ्यामेतयैकयैतयैवैकयैतया द्वाभ्यामेतया तिसृभिरेतया चतसृभिरेतया सर्वाभिः समस्याञ्जलिनाध्यावपति ॥१३॥ स वाऽउदाचं न्याचं मिमीते । स यदुदाचं न्याचं मिमीतऽइमा एवैतदङ्गुलीर्नानाज्ञानाः करोति तस्मादिमा नाना ज्ञायन्तेऽथ यत्सह सर्वाभिर्मिमीते सᳪश्लिष्टा-इव ह्येवेमा जायेरंस्तस्माद्वाऽउदाचं न्याचं मिमीते ॥१४॥ यद्वेवोदाचं न्याचं मिमीते । इमा एवैतन्नानावीर्याः करोति तस्मादिमा नानावीर्यास्तस्माद्वाऽउदाचं न्याचं मिमीते ॥१५॥ यद्वेवोदाचं न्याचं मिमीते । विराजमेवैतदर्वाचीं च पराचीं च युनक्ति पराच्यह देवेभ्यो यज्ञं वहत्यर्वाची मनुष्यानवति तस्माद्वाऽउदाचं न्याचं मिमीते ॥१६॥ अथ यद्दश कृत्वो मिमीते । दशाक्षरा वै विराड्वैराजः सोमस्तस्माद्दश कृत्वो मिमीते ॥१७॥ अथ सोमोपनहनस्य समुत्पार्यान्तान् । उष्णीषेण विग्रथ्नाति प्रजाभ्यस्त्वेति प्रजाभ्यो ह्येनं क्रीणाति स यदेवेदᳪ शिरस्तऽअसौ चान्तरोपेनितमिव तदेवास्यैतत्करोति ॥१८॥ अथ मध्येऽङ्गुल्याकाशं करोति । प्रजास्त्वानुप्राणन्त्विति तमयतीव वाऽएनमेतत्समायच्छन्नप्राणमिव करोति तस्यैतदत एव मध्यतः प्राणमुत्सृजति तं ततः प्राणन्तं प्रजा अनुप्राणन्ति तस्मादाह प्रजास्त्वानुप्राणन्त्विति तᳪ सोमविक्रयिणे प्रयच्छत्यथातः पणनस्यैव ॥१९॥ ब्राह्मणम् ॥५[३.२.]॥ ॥

स वै राजानं पणते । स यद्राजानं पणते तस्मादिदᳪ सकृत्सर्वं पण्यᳪ स आह सोमविक्रयिन्क्रय्यस्ते सोमो राजा३इति क्रय्य इत्याह सोमविक्रयी तं वै ते क्रीणानीति क्रीणीहीत्याह सोमविक्रयी कलया ते क्रीणानीति भूयो वाऽअतः सोमो राजार्हतीत्याह सोमविक्रयी भूय एवातः सोमो राजार्हति महांस्त्वेव गोर्महिमेत्यध्वर्युः ॥१॥ गोर्वै प्रतिधुक् । तस्यै शृतं तस्यै शरस्तस्यै दधि तस्यै मस्तु तस्याऽआतञ्चनं तस्यै नवनीतं तस्यै घृतं तस्याऽआमिक्षा तस्यै वाजिनᳪ ॥२॥ शफेन ते क्रीणानीति । भूयो वाऽअतः सोमो राजार्हतीत्याह सोमविक्रयी भूय

एवातः सोमो राजार्हति महांस्त्वेव गोर्महिमेत्यध्वर्युरेतान्येव दश वीर्याण्युदाख्या-
याह पदा तेऽर्धेन ते गवा ते क्रीणामीति क्रीतः सोमो राजेत्याह सोमविक्रयी
वयाँसि प्रब्रूहीति ॥३॥ स आह । चन्द्रं ते वस्त्रं ते छागा ते धेनुस्ते मिथुनौ
ते गावौ तिस्रस्तेऽन्या इति स यदर्वाक्पणन्ते परः सम्पादयन्ति तस्मादिदँ सकृ-
त्सर्वं पण्यमर्वाक्पणन्ते परः सम्पादयन्त्यथ यदध्वर्युरेव गोर्वीर्याण्युदाचष्टे न सोम-
स्य सोमविक्रयी महितो वै सोमो देवो हि सोमोऽथैतदध्वर्युर्गां महयति तस्यै
पश्यन्वीर्याणि क्रीणादिति तस्मादध्वर्युरेव गोर्वीर्याण्युदाचष्टे न सोमस्य सोम-
विक्रयी ॥४॥ अथ यत्पञ्च कृत्वः पणते । संवत्सरसंमितो वै यज्ञः पञ्च वाऽऋत-
वः संवत्सरस्य तं पञ्चभिराप्नोति तस्मात्पञ्च कृत्वः पणते ॥५॥ अथ हिरण्ये वा-
चयति । शुक्रं त्वा शुक्रेण क्रीणामीति शुक्रँ ह्येतच्छुक्रेण क्रीणाति यत्सोमँ हि-
रण्येन चन्द्रं चन्द्रेणेति चन्द्रँ ह्येतच्चन्द्रेण क्रीणाति यत्सोमँ हिरण्येनामृतममृ-
तेनेत्यमृतँ ह्येतदमृतेन क्रीणाति यत्सोमँ हिरण्येन ॥६॥ अथ सोमविक्रयि-
णमभिप्रकम्पयति । सग्मे ते गोरिति यजमाने ते गौरित्येवैतदाह तद्यजमानम-
भ्याहृत्य न्यस्यत्यस्मे ते चन्द्राणीति स आत्मन्येव वीर्यं धत्ते शरीरमेव सोमवि-
क्रयी हरते तत्ततः सोमविक्रय्यादत्ते ॥७॥ अथाजायां प्रतीचीनमुख्यां वाचयति ।
तपसस्तनूरसीति तपसो ह वाऽएषा प्रजापतेः सम्भूता यदजा तस्मादाह तपस-
स्तनूरसीति प्रजापतेर्वर्ण इति सा यत्त्रिः संवत्सरस्य विजायते तेन प्रजापतेर्वर्णः
परमेण पशुना क्रीयसऽइति सा यत्त्रिः संवत्सरस्य विजायते तेन परमः पशुः स-
हस्रपोषं पुषेयमित्याशिषमेवैतदाशास्ते भूमा वै सहस्रं भूमानं गच्छानीत्येवैतदाह
॥८॥ स वाऽअनेनैवाजां प्रयच्छति । अनेन राजानमादत्तऽआजा ह वै नामैषा
यदजैतया ह्येनमत्तत आजति तामेतत्परोऽक्षमजेत्याचक्षते ॥९॥ अथ राजानमा-
दत्ते । मित्रो न एहि सुमित्रध इति शिवो नः शान्त एहीत्येवैतदाह तं यजमा-

नस्य दक्षिणऽऊरौ प्रत्युह्य वासो निदधातीन्द्रस्योरुमाविश दक्षिणमित्येष वा ऽअत्रेन्द्रो भवति यद्यजमानस्तस्मादाहेन्द्रस्योरुमाविश दक्षिणमित्युशन्नुशन्तमिति प्रियः प्रियमित्येवैतदाह स्योनः स्योनमिति शिवः शिवमित्येवैतदाह ॥१०॥ अथ सोमक्रयणाननुदिशति । स्वान भ्राजाङ्घारे बम्भारे हस्त सुहस्त कृशानवेते वः सोमक्रयणास्तान्रक्षध्वं मा वो दभन्निति धिष्ण्यानां वाऽएते भाजनेनैतानि वै धिष्ण्यानां नामानि तान्येवैभ्य एतदन्वदिक्षत ॥११॥ अथात्रापोर्णुते । गर्भो वाऽएष भवति यो दीक्षते प्रावृता वै गर्भा उल्बेनेव जरायुणेव तमत्राजीजनत तस्मादपोर्णुतऽएष वाऽअत्र गर्भो भवति तस्मात्परिवृतो भवति परिवृता-इव हि गर्भा उल्बेनेव जरायुणेव ॥१२॥ अथ वाचयति । परि माग्ने दुश्चरिताद्बाधस्वा मा सुचरिते भजेत्यासीनं वाऽएनमेष आगच्छति स आगतऽउत्तिष्ठति तन्मिथ्याकरोति व्रतं प्रमीणाति तस्यो हैषा प्रायश्चित्तिस्तथो हास्यैतन्न मिथ्याकृतं भवति न व्रतं प्रमीणाति तस्मादाह परि माग्ने दुश्चरिताद्बाधस्वा मा सुचरिते भजेति ॥१३॥ अथ राजानमादायोत्तिष्ठति । उदायुषा स्वायुषोदस्थाममृतां२॥ऽअन्वित्यमृतं वाऽएषो ऽनूत्तिष्ठति यः सोमं क्रीतं तस्मादाहोदायुषा स्वायुषोदस्थाममृतां२॥ऽअन्विति ॥१४॥ अथ राजानमादायारोहणमभिप्रैति । प्रति पन्थामपद्महि स्वस्ति गामनेहसम् । येन विश्वाः परि द्विषो वृणक्ति विन्दते वस्विति ॥१५॥ देवा ह वै यज्ञं तन्वानाः । तेऽसुररक्षसेभ्य आसङ्गाद्बिभयां चक्रुस्तऽएतद्यजुः स्वस्त्ययनं ददृशुस्तऽएतेन यजुषा नाष्ट्रा रक्षाᳬस्यपहत्यैतस्य यजुषोऽभयेऽनाष्ट्रे निवाते स्वस्ति समाश्नुवत तथोऽएवैष एतेन यजुषा नाष्ट्रा रक्षाᳬस्यपहत्यैतस्य यजुषोऽभयेऽनाष्ट्रे निवाते स्वस्ति समश्नुते तस्मादाह प्रति पन्थामपद्महि स्वस्ति गामनेहसम् । येन विश्वाः परि द्विषो वृणक्ति विन्दते वस्विति ॥१६॥ तं वाऽइति हरन्ति । अनसा परिवहन्ति महयन्त्येवैनमेतत्तस्माच्छीर्ष्णा वीजᳬ हरन्त्यनसोदावहन्ति ॥१७॥

अथ यदपामन्ते क्रीणाति । रसो वाऽआपः सरसमेवैतत्क्रीणात्यथ यद्धिरण्यं भवति सशुक्रमेवैतत्क्रीणात्यथ यद्वासो भवति सत्वचसमेवैतत्क्रीणात्यथ यदजा भवति सतपसमेवैतत्क्रीणात्यथ यद्धेनुर्भवति साशिरमेवैतत्क्रीणात्यथ यन्मिथुनौ भवतः समिथुनमेवैतत्क्रीणाति तं वै दशभिरेव क्रीणीयान्नादशभिर्दशाक्षरा वै विराड्विराजः सोमस्तस्माद्दशभिरेव क्रीणीयान्नादशभिः ॥१८॥ ब्राह्मणम् ॥६[३.३.]॥

द्वितीयः प्रपाठकः ॥ कण्डिकासंख्या १२८ ॥ ॥

नीडे कृष्णाजिनमास्तृणाति । अदित्यास्त्वगसीति सोऽसावेव बन्धुरथैनमासादयत्यदित्यै सद आसीदेतीयं वै पृथिव्यदितिः सेयं प्रतिष्ठा तदस्यामेवैनमेतत्प्रतिष्ठायां प्रतिष्ठापयति तस्मादाहादित्यै सद आसीदेति ॥१॥ अथैवमभिपद्य वाचयति । अस्तभ्नाद्द्यां वृषभोऽअन्तरिक्षमिति देवा ह वै यज्ञं तन्वानास्तेऽसुररक्षसेभ्य आसङ्गाद्बिभयां चक्रुस्तऽएनमेतज्ज्यायाꣳसमेव बधाच्चक्रुर्यदाहास्तभ्नाद्द्यां वृषभोऽअन्तरिक्षमिति ॥२॥ अमिमीत वरिमाणं पृथिव्या इति । तदेनेनेमाँल्लोकानास्पृणोति तस्य हि न हन्तास्ति न बधो येनेमे लोका आस्पृतास्तस्मादाहामिमीत वरिमाणं पृथिव्या इति ॥३॥ आसीदद्विश्वा भुवनानि सम्राडिति । तदेनेनेदꣳ सर्वमास्पृणोति तस्य हि न हन्तास्ति न बधो येनेदꣳ सर्वमास्पृतं तस्मादाहासीदद्विश्वा भुवनानि सम्राडिति ॥४॥ विश्वेत्तानि वरुणस्य व्रतानीति । तदस्माऽइदꣳ सर्वमनुवर्त्म करोति यदिदं किं च न कं चन प्रत्युद्यामिनं तस्मादाह विश्वेत्तानि वरुणस्य व्रतानीति ॥५॥ अथ सोमपर्याणहनेन पर्याणह्यति । नेदेनं नाष्ट्रा रक्षाꣳसि प्रमृशानिति गर्भो वाऽएष भवति तिर-इव वै गर्भास्तिर-इवैतत्पर्याणद्धं तिर-इव वै देवा मनुष्येभ्यस्तिर-इवैतद्यत्पर्याणद्धं तस्माद्धि पर्याणह्यति ॥६॥ स पर्याणह्यति । वनेषु व्यन्तरिक्षं ततानेति वनेषु हीदमन्तरिक्षं विततं वृक्षाग्रेषु वाजमर्वत्सु पय उस्रियास्विति वीर्यं वै वाजाः पुमाꣳसोऽर्वन्तः

पुंस्वेवैतद्वीर्यं दधाति पय उस्रियास्विति पयो ह्यदमुस्रियासु हितं हृत्सु क्रतुं वरुणो विक्ष्वग्निमिति हृत्सु ह्ययं क्रतुर्मनोजवः प्रविष्टो विक्ष्वग्निमिति विक्षु ह्ययं प्रजास्वग्निर्दिवि सूर्यमदधात्सोममद्राविति दिवि ह्यसौ सूर्यो हितः सोमम-द्राविति गिरिषु हि सोमस्तस्मादाह दिवि सूर्यमदधात्सोममद्राविति ॥७॥ अथ यदि द्वे कृष्णाजिने भवतः । तयोरन्यतरत्प्रत्यानह्यति प्रतीनाहभाजनं यद्युऽएकं भवति कृष्णाजिनग्रीवा एवावकृत्य प्रत्यानह्यति प्रतीनाहभाजनं सूर्यस्य चक्षु-रारोहाग्नेरक्ष्णः कनीनकम् । यत्रैतशेभिरीयसे भ्राजमानो विपश्चितेति सूर्यमेवैत-त्पुरस्तात्करोति सूर्यः पुरस्तान्नाष्ट्रा रक्षाᳬस्यपघ्नन्नेत्यथाभयेनानाष्ट्रेण परिवहन्ति ॥८॥ उद्धते प्रऽउग्ये फलके भवतः । तदन्तरेण तिष्ठन्सुब्रह्मण्यः प्राजति अथा-न्वाऽएषोऽभ्यारोहाद्भवति को ह्येतमर्हत्यभ्यारोढुं तस्मादन्तरेण तिष्ठन्प्राजति ॥९॥ पलाशशाखया प्राजति । यत्र वै गायत्री सोममच्छापतत्तदस्याऽआहरन्त्याऽअपाद-स्ताभ्यायत्य पर्णं प्रचिच्छेद गायत्र्यै वा सोमस्य वा राज्ञस्तत्पतित्वा पर्णोऽभवत्त-स्मात्पर्णो नाम तद्यदेवात्र सोमस्य न्यक्तं तदिहाप्यसदिति तस्मात्पलाशशाखया प्राजति ॥१०॥ अथानड्वाहावाजन्ति । तौ यदि कृष्णौ स्यातामन्यतरो वा कृष्णस्त-त्र विद्याद्वर्षिष्यत्यैषमः पर्जन्यो वृष्टिमान्भविष्यतीत्येतद्व विज्ञानम् ॥११॥ अथ युनक्ति । उस्रावेतं धूर्षाहावित्युस्रौ हि भवतो धूर्षाहाविति धूर्वाहौ हि भवतो युज्येथामनश्रूऽइति युज्येते ह्यनश्रूऽइत्यनार्ताविति तद्वीरहणावित्यपापकृताविति तद्ब्रह्मचोदनाविति ब्रह्मचोदनौ हि भवतः स्वस्ति यजमानस्य गृहान्गच्छत-मिति यथैनावन्तरा नाष्ट्रा रक्षाᳬसि न हिᳬस्युरेवमेतदाह ॥१२॥ अथ पश्चात्प-रिक्रम्य । अपालम्बमभिपद्याह सोमाय क्रीतायानुब्रूहीति सोमाय पर्युह्यमाणायेति वातो यतरथा कामयेत ॥१३॥ अथ वाचयति । भद्रो मेऽसि प्रच्यवस्व भुव-स्पतऽइति भद्रो ह्यस्यैष भवति तस्मान्नान्यमाद्रियतेऽप्यस्य राजानः सभागा आ-

गच्छन्ति पूर्वा राज्ञोऽभिवदति भद्रो हि भवति तस्मादाह भद्रो मेऽसीति प्रच्यवस्व भुवस्पतऽइति भुवनानाꣳ ह्येष पतिर्विश्वान्यभि धामानीत्यङ्गानि वै विश्वानि धामान्यङ्गान्येवैतदभ्याह मा त्वा परिपरिणो विदन्मा त्वा परिपन्थिनो विदन्मा त्वा वृका अघायवो विदन्निति यथैनमन्तरा नाष्ट्रा रक्षाꣳसि न विन्देयुरेवमेतदाह ॥१४॥ श्येनो भूत्वा परापतेति । वय एवैनमेतद्भूतं प्रपातयति यद्वाऽअग्रं तन्नाष्ट्रा रक्षाꣳसि नान्ववयन्त्येतद्धि वयसामोजिष्ठं बलिष्ठं यच्छ्येनस्तमेवैतद्भूतं प्रपातयति यदाह श्येनो भूत्वा परापतेति ॥१५॥ अथ शरीरमेवान्ववच्छन्ति । यजमानस्य गृहान्गच्छ तन्नौ सꣳस्कृतमिति नात्र तिरोहितमिवास्ति ॥१६॥ अथ सुब्रह्मण्यामाह्वयति । यथा येभ्यः पक्ष्यन्त्स्यात्तान्ब्रूयादित्यहे वः पक्तास्मीत्येवमेवैतद्देवेभ्यो यज्ञं निवेदयति सुब्रह्मण्यो३ꣳ सुब्रह्मण्यो३मिति ब्रह्म हि देवान्प्रच्यावयति त्रिष्कृत्व आह त्रिवृद्धि यज्ञः ॥१७॥ इन्द्रागच्छेति । इन्द्रो वै यज्ञस्य देवता तस्मादाहेन्द्रागच्छेति हरिव आगच्छ मेधातिथेर्मेष वृषणश्वस्य मेने । गौरावस्कन्दिन्नहल्यायै जारेति तद्यान्येवास्य चरणानि तैरेवैनमेतत्प्रमुमोदयिषति ॥१८॥ कौशिक ब्राह्मण गौतम ब्रुवाणेति । शश्वद्धैतदारुणिनाधुनोपज्ञातं यद्गौतम ब्रुवाणेति स यदि कामयेत ब्रूयादेतद्यद्यु कामयेतापि नाद्रियेतेत्यहे सुत्यामिति यावदहे सुत्या भवति ॥१९॥ देवा ब्रह्माण आगच्छतेति । तद्देवांश्च ब्राह्मणांश्चाहैतैर्ह्यत्रोभयैरर्थो भवति यद्देवैश्च ब्राह्मणैश्च ॥२०॥ अथ प्रतिप्रस्थाता । अग्रेण शालामग्नीषोमीयेण पशुना प्रत्युपतिष्ठतेऽग्नीषोमौ वाऽएतमन्तर्जम्भऽआदधाते यो दीक्षतऽआग्नावैष्णवꣳ ह्यदो दीक्षणीयꣳ हविर्भवति यो वै विष्णुः सोमः स हविर्वाऽएष भवति यो दीक्षते तदेनमन्तर्जम्भऽआदधाते तत्पशुनात्मानं निष्क्रीणीते ॥२१॥ तद्धैके । आहवनीयादुल्मुकमाहरन्त्ययमग्निरयꣳ सोमस्ताभ्याꣳ सह सह्यां निष्क्रेष्यामहऽइति वदन्तस्तदु तथा न कुर्याद्यत्र वाऽएतौ क्व च तत्सहैव ॥२२॥ स

वै द्विरूपो भवति । द्विदेवत्यो ह्वि भवति देवतयोरसमर्दे कृष्णसारंग स्यादित्याहुरेतद्ध्येनयो रूपतममिवेति यदि कृष्णसारंगं न विन्देदथोऽअपि लोहितसारंग स्यात् ॥२३॥ तस्मिन्वाचयति । नमो मित्रस्य वरुणस्य चक्षसे महो देवाय तदृतꣳ सपर्यत । दूरे दृशे देवजाताय केतवे दिवस्पुत्राय सूर्याय शꣳसतेति नम एवास्माऽएतत्करोति मित्रधेयमेवैनेनैतत्कुरुते ॥२४॥ अथाध्वर्युरारोहणं विमुञ्चति । वरुणस्योत्तम्भनमसीत्युपस्तम्भनेनोपस्तभ्नाति वरुणस्य स्कम्भसर्जनी स्थ इति शम्येऽउद्वृहति स यदाह वरुणस्य स्कम्भसर्जनी स्थ इति वरुण्यो ह्येष एतर्हि भवति यत्सोमः क्रीतः ॥२५॥ अथ चत्वारो राजासन्दीमाददते । द्वौ वाऽअस्मै मानुषाय राज्ञऽआददातेऽअथैतां चत्वारो योऽस्य सकृत्सर्वस्येष्टे ॥२६॥ औदुम्बरी भवति । अन्नं वाऽऊर्गुदुम्बर ऊर्जोऽन्नाद्यस्यावरुद्ध्यै तस्मादौदुम्बरी भवति ॥२७॥ नाभिदघ्ना भवति । अत्र वाऽअन्नं प्रतितिष्ठत्यन्नꣳ सोमस्तस्मान्नाभिदघ्ना भवत्यत्रोऽएव रेतस आशयो रेतः सोमस्तस्मादत्रदघ्ना भवति ॥२८॥ तामभिमृशति । वरुणस्यऽऋतसदन्यसीत्यथ कृष्णाजिनमास्तृणाति वरुणस्यऽऋतसदनमसीत्यथैनमासादयति वरुणस्यऽऋतसदनमासीदेति स यदाह वरुणस्यऽऋतसदनमासीदेति वरुण्यो ह्येष एतर्हि भवति ॥२९॥ अथैनꣳ शालां प्रपादयति । स प्रपादयन्वाचयति या ते धामानि हविषा यजन्ति ता ते विश्वा परिभूरस्तु यज्ञम् । गयस्फानः प्रतरणः सुवीरोऽवीरहा प्रचरा सोम दुर्यानिति गृहा वै दुर्या गृहान्नः शिवः शान्तोऽपापकृत्प्रचरेत्येवैतदाह ॥३०॥ अत्र हैके । उदपात्रमुपनिनयन्ति यथा राज्ञऽआगतायोदकमाहरेदेवमेतदिति वदन्तस्तदु तथा न कुर्यान्मानुषꣳ ह ते यज्ञे कुर्वन्ति व्यृद्धं वै तद्यज्ञस्य यन्मानुषं नेद्व्यृद्धं यज्ञे करवाणीति तस्मान्नोपनिनयेत् ॥३१॥ ब्राह्मणम् ॥१[३.४]॥ तृतीयोऽध्यायः [१८] ॥ ॥

शिरो वै यज्ञस्यातिथ्यं बाहू प्रायणीयोदयनीयौ । अभितो वै शिरो बाहू भ-

वतस्तस्मादभित आतिथ्यमेते हविषी भवतः प्रायणीयश्चोदयनीयश्च ॥१॥ अथ यस्मादातिथ्यं नाम । अतिथिर्वा ऽएष एतस्यागच्छति यत्सोमः क्रीतस्तस्मा ऽएतद्यथा राज्ञे वा ब्राह्मणाय वा महोक्षं वा महाजं वा पचेत्तदह मानुषꣳ हविर्देवानामेवमस्मा ऽएतदातिथ्यं करोति ॥२॥ तदाहुः । पूर्वो ऽतीत्य गृह्णीयादिति यत्र वा ऽअर्हन्तमागतं नापचायन्ति क्रुध्यति वै स तत्र तथा हापचितो भवति ॥३॥ तद्वा ऽअन्यतर एव विमुक्तः स्यात् । अन्यतरो ऽविमुक्तो ऽथ गृह्णीयात्स यदन्यतरो विमुक्तस्तेनागतो यदन्यतरो ऽविमुक्तस्तेनापचितः ॥४॥ तदु तथा न कुर्यात् । विमुच्यैव प्रपाद्य गृह्णीयाद्यथा वै देवानां चरणं तद्वा ऽअनु मनुष्याणां तस्मान्मानुषे यावन्न विमुञ्चते नैवास्मै तावदुदकꣳ हरन्ति नापचितिं कुर्वन्त्यनागतो हि स तावद्भवत्यथ यदैव विमुञ्चते ऽथास्मा ऽउदकꣳ हरन्त्यथापचितिं कुर्वन्ति तर्हि हि स आगतो भवति तस्माद्विमुच्यैव प्रपाद्य गृह्णीयात् ॥५॥ स वै संवरमाण-इव गृह्णीयात् । तथा हापचितो भवति तत्पत्न्यन्वारभते पर्युह्यमाणं वै यजमानो ऽन्वारभते ऽथात्र पत्न्युभयत एवैतन्मिथुनेनान्वारभेते यत्र वा ऽअर्हन्नागच्छति सर्वगृह्या-इव वै तत्र चेष्टन्ति तथा हापचितो भवति ॥६॥ स वा ऽअन्येनैव ततो यजुषा गृह्णीयात् । येनो चान्यानि हवीꣳष्येकं वा ऽएष भागं क्रीयमाणो ऽभिक्रीयते छन्दसामेव राज्याय छन्दसाꣳ साम्राज्याय तस्य छन्दाꣳस्यभितः साचयानि यथा राज्ञो ऽराजानो राजकृतः सूतग्रामण्य एवमस्य छन्दाꣳस्यभितः साचयानि ॥७॥ न वै तदवकल्पते । यच्छन्दोभ्य इति केवलं गृह्णीयाद्यत्र वा ऽअर्हते पचन्ति तदभितः साचयो ऽन्वाभक्ता भवन्त्यराजानो राजकृतः सूतग्रामण्यस्तस्माद्यत्रैवैतस्यै गृह्णीयात्तदेव छन्दाꣳस्यन्वाभजेत् ॥८॥ स गृह्णाति । अग्नेस्तनूरसि विष्णवे त्वेत्यग्निर्वै गायत्री तद्गायत्रीमन्वाभजति ॥९॥ सोमस्य तनूरसि विष्णवे त्वेति । क्षत्रं वै सोमः क्षत्रं त्रिष्टुप्तत्त्रिष्टुभमन्वाभजति ॥१०॥ अतिथेरातिथ्यमसि विष्णवे त्वेति ।

सोऽस्योद्धारो यथा श्रेष्ठस्योद्धार एवमस्यैषऽऋते छन्दोभ्यः ॥११॥ श्येनाय त्वा सोमभृते विष्णवे त्वेति । तद्गायत्रीमन्वाभजति सा यद्गायत्री श्येनो भूत्वा दिवः सोममाहरत्तेन सा श्येनः सोमभृत्तेनैवैनामेतद्वीर्येण द्वितीयमन्वाभजति ॥१२॥ अग्नये त्वा रायस्पोषदे विष्णवे त्वेति । पशवो वै रायस्पोषः पशवो जगती तज्जगतीमन्वाभजति ॥१३॥ अथ यत्पञ्च कृत्वो गृह्णाति । संवत्सरसंमितो वै यज्ञः पञ्च वाऽऋतवः संवत्सरस्य तं पञ्चभिराप्नोति तस्मात्पञ्च कृत्वो गृह्णात्यथ यद्विष्णवे त्वा विष्णवे त्वेति गृह्णाति विष्णवे हि गृह्णाति यो यज्ञाय गृह्णाति ॥१४॥ नवकपालः पुरोडाशो भवति । शिरो वै यज्ञस्यातिथ्यं नवाक्षरा वै गायत्र्यष्टौ तानि यान्यन्वाह प्रणवो नवमः पूर्वार्धो वै यज्ञस्य गायत्री पूर्वार्ध एष यज्ञस्य तस्मान्नवकपालः पुरोडाशो भवति ॥१५॥ कार्ष्मर्यमयाः परिधयः । देवा ह वाऽएतं वनस्पतिषु रक्षोघ्नं ददृशुर्यत्कार्ष्मर्यꣳ शिरो वै यज्ञस्यातिथ्यं नेच्छिरो यज्ञस्य नाष्ट्रा रक्षाꣳसि हिनसन्निति तस्मात्कार्ष्मर्यमयाः परिधयो भवन्ति ॥१६॥ आश्ववालः प्रस्तरः । यज्ञो ह देवेभ्योऽपचक्राम सोऽश्वो भूत्वा पराङावववर्त तस्य देवा अनुहाय वालानभिपेदुस्तानालुलुपुस्तानालुप्य सार्धꣳ संन्यासुस्तत एता ओषधयः समभवन्यदश्ववालाः शिरो वै यज्ञस्यातिथ्यं जघनार्धो वाला उभयत एवैतद्यज्ञं परिगृह्णाति यदाश्ववालः प्रस्तरो भवति ॥१७॥ ऐक्षव्यौ विधृती । नेद्बर्हिश्च प्रस्तरश्च संलुभ्यात इत्यथोत्पूयाज्यꣳ सर्वाण्येव चतुर्गृहीतान्याज्यानि गृह्णाति न ह्यत्रानुयाजा भवन्ति ॥१८॥ आसाद्य हवीꣳष्यग्निं मन्थति । शिरो वै यज्ञस्यातिथ्यं जनयन्ति वाऽएनमेतद्यन्मन्थन्ति शीर्षतो वाऽअग्रे जायमानो जायते शीर्षत एवैतदग्रे यज्ञं जनयत्यग्निर्वै सर्वा देवता अग्नौ हि सर्वाभ्यो देवताभ्यो जुह्वति शिरो वै यज्ञस्यातिथ्यꣳ शीर्षत एवैतद्यज्ञꣳ सर्वाभिर्देवताभिः समर्धयति तस्मादग्निं मन्थति ॥१९॥ सोऽधिमन्थनꣳ शकलमादत्ते । अग्नेर्जनित्रमसीत्यत्र ह्यग्निर्जायते

तस्मादाहाग्नेर्जनित्रमसीति ॥२०॥ अथ दर्भतरुणके निदधाति । वृषणौ स्थ इति तद्यावेवेमौ स्त्रियै साकंजावेतावेवैतौ ॥२१॥ अथाधरारणिं निदधाति । उर्वश्यसीत्यथोत्तरारण्याज्यविलापनीमुपस्पृशत्यायुरसीति तामभिनिदधाति पुरूरवा असीत्युर्वशी वाऽअप्सराः पुरूरवाः पतिरथ यत्तस्मान्मिथुनादजायत तदायुरेवमेवैष एतस्मान्मिथुनाद्यज्ञं जनयत्यथाहाग्नये मथ्यमानायानुब्रूहीति ॥२२॥ स मन्थति । गायत्रेण त्वा छन्दसा मन्थामि त्रैष्टुभेन त्वा छन्दसा मन्थामि जागतेन त्वा छन्दसा मन्थामीति तं वै छन्दोभिरेव मन्थति छन्दांसि मथ्यमानायान्वाह छन्दांस्येवैतद्यज्ञमन्वायातयति यथामुमादित्यं रश्मयो जातायानुब्रूहीत्याह यदा जायते प्रह्रियमाणायेत्यनुप्रहरन् ॥२३॥ सोऽनुप्रहरति । भवतं नः समनसौ सचेतसावरेपसौ । मा यज्ञं हिंसिष्टं मा यज्ञपतिं जातवेदसौ शिवौ भवतमद्य न इति शान्तिमेवाभ्यामेतद्वदति यथा नान्योऽन्यं हिंस्याताम् ॥२४॥ अथ स्रुवेणोपहत्याज्यम् । अग्निमभिजुहोत्यग्नावग्निश्चरति प्रविष्ट ऋषीणां पुत्रोऽअभिशस्तिपावा । स नः स्योनः सुयजा यजेह देवेभ्यो हव्यं सदमप्रयुच्छन्स्वाहेत्याहुत्यै वाऽएतमजीजनन्त तमेतयाहुत्याप्रैषीत्तस्मादेवमभिजुहोति ॥२५॥ तदिडान्तं भवति । नानुयाजान्यजन्ति शिरो वै यज्ञस्यातिथ्यं पूर्वार्धो वै शिरः पूर्वार्धमेवैतद्यज्ञस्याभिसंस्करोति स यद्धानुयाजान्यजेद्यथा शीर्षतः पर्याहृत्य पादौ प्रतिदध्यादेवं तत्तस्मादिडान्तं भवति नानुयाजान्यजन्ति ॥२६॥ ब्राह्मणम् ॥२[४.१]॥ ॥

आतिथ्येन वै देवा इष्ट्वा । तान्त्समदविन्दत्ते चतुर्धा व्यद्रवन्नन्योऽन्यस्य श्रियाऽअतिष्ठमाना अग्निर्वसुभिः सोमो रुद्रैर्वरुण आदित्यैरिन्द्रो मरुद्भिर्बृहस्पतिर्विश्वैर्देवैरित्यु हैकऽआहुरेते ह त्वेव ते विश्वे देवा ये ते चतुर्धा व्यद्रवंस्तान्विदुतानसुररक्षसान्यनुव्यवेयुः ॥१॥ तेऽविदुः । पापीयांसो वै भवामोऽसुररक्षसानि वै नोऽनुव्यवागुर्द्विषद्भ्यो वै रध्यामो हन्त संजानामहाऽएकस्य श्रियै तिष्ठामहा

ऽइति तऽइन्द्रस्य श्रियाऽअतिष्ठन्त तस्मादाहुरिन्द्रः सर्वा देवता इन्द्रश्रेष्ठा देवा इति ॥२॥ तस्मादु ह न स्वा अतीयेरन् । य एषां परस्तरामिव भवति स एनाननुव्यवैति ते प्रियं द्विषतां कुर्वन्ति द्विषद्भ्यो रध्यन्ति तस्मान्नऽतीयेरंस्स यो हैवं विद्वान्नऽतीयेतिऽप्रियं द्विषतां करोति न द्विषद्भ्यो रध्यति तस्मान्नऽतीयेत ॥३॥ ते होचुः । हन्तेदं तथा करवामहै यथा न इदमाप्रदिवमेवाजर्यमसदिति ॥४॥ ॥ शतम् १७०० ॥ ॥ ते देवाः । जुष्टास्तनूः प्रियाणि धामानि सार्धꣳ समवददिरे ते होचुरेतेन नः स नानासदेतेन विष्वङ्यो न एतदतिक्रामादिति कस्योपद्रष्टुरिति तनूनप्तुरेव शाक्वरस्येति यो वाऽअयं पवतऽएष तनूनपाच्छाक्वरः सोऽयं प्रजानामुपद्रष्टा प्रविष्टस्ताविमौ प्राणोदानौ ॥५॥ तस्मादाहुः । मनो देवा मनुष्यस्याजानन्तीति मनसा संकल्पयति तत्प्राणमपिपद्यते प्राणो वातं वातो देवेभ्य आचष्टे यथा पुरुषस्य मनः ॥६॥ तस्मादेतदृषिणाभ्यनूक्तम् । मनसा संकल्पयति तद्वातमपिगच्छति । वातो देवेभ्य आचष्टे यथा पुरुष ते मन इति ॥७॥ ते देवाः । जुष्टास्तनूः प्रियाणि धामानि सार्धꣳ समवददिरे ते होचुरेतेन नः स नानासदेतेन विष्वङ्यो न एतदतिक्रामादिति तद्देवा अप्येतर्हि नातिक्रामन्ति के हि स्युर्यदतिक्रामेयुरनृतꣳ हि वदेयुरेकꣳ ह वै देवा व्रतं चरन्ति सत्यमेव तस्मादेषां जितमनपजय्यं तस्माद्यश एवꣳ ह वाऽअस्य जितमनपजय्यमेवं यशो भवति य एवं विद्वान्त्सत्यं वदति तदेतत्तानूनप्त्रं निदानेन ॥८॥ ते देवाः । जुष्टास्तनूः प्रियाणि धामानि सार्धꣳ समवददिरेऽथैतऽआज्यान्येव गृह्णाना जुष्टास्तनूः प्रियाणि धामानि सार्धꣳ समवघ्नन्ते तस्मादु ह न सर्वेणेव समभ्यवेयान्नेदिमे जुष्टास्तन्वः प्रियाणि धामानि सार्धꣳ समभ्यवायानिनिति येनो ह समभ्यवेयान्नास्मै द्रुह्येदिदꣳ ह्याहुर्न सतानूनप्त्रिणे द्रोग्धव्यमिति ॥९॥ अथातो गृह्णात्येव । आपतये त्वा परिपतये गृह्णामीति यो वाऽअयं पवतऽएष आ च पतति परि च प-

तत्येतस्माऽउ हि गृह्णाति तस्मादाहापतये त्वा परिपतये गृह्णामीति ॥१०॥ तनूनप्त्रे शाक्वरायेति । यो वाऽअयं पवतऽएष तनूनप्ता शाक्वर एतस्माऽउ हि गृह्णाति तस्मादाह तनूनप्त्रे शाक्वरायेति ॥११॥ शक्मनऽओजिष्ठायेति । एष वै शक्मौजिष्ठ एतस्माऽउ हि गृह्णाति तस्मादाह शक्मनऽओजिष्ठायेति ॥१२॥ अथातः समवमृशन्त्येव । एतद्ध देवा भूयः समामिरऽइत्थं नः सोऽमुथासद्यो न एतदतिक्रामादिति तथोऽएवैतऽएतत्सममन्तऽइत्थं नः सोऽमुथासद्यो न एतदतिक्रामादिति ॥१३॥ ते समवमृशन्ति । अनाधृष्टमस्यनाधृष्यं देवानामोज इत्यनाधृष्टा हि देवा आसन्ननाधृष्याः सह सन्तः समानं वदन्तः समानं दधाना देवानामोज इति देवानां वै जुष्टास्तन्वः प्रियाणि धामान्यनभिशस्त्यभिशस्तिपा अनभिशस्तेन्यमिति सर्वꣳ हि देवा अभिशस्तिं तीर्णा अञ्जसा सत्यमुपगेषमिति सत्यं वदानि मेदमतिक्रमिषमित्येवैतदाह स्विते मा धा इति स्विते हि तद्देवा आत्मानमदधत यत्सत्यमवदन्यत्सत्यमकुर्वंस्तस्मादाह स्विते मा धा इति ॥१४॥ अथ यास्तद्देवाः । जुष्टास्तनूः प्रियाणि धामानि सार्धꣳ समवददिरे तदिन्द्रे संन्यदधतैष वाऽइन्द्रो य एष तपति न ह वाऽएषोऽग्रे ततापयथा हैवेदमन्यत्कृष्णमेवꣳ हैवास तेनैवैतद्वीर्येण तपति तस्माद्यदि बहवो दीक्षेरन्गृहपतयऽएव व्रतमभ्युत्सिच्य प्रयच्छेयुः स हि तेषामिन्द्रभाजनं भवति यद्यु दक्षिणावता दीक्षेत यजमानायैव व्रतमभ्युत्सिच्य प्रयच्छेयुरिदꣳ ह्याङ्गुरिन्द्रो यजमान इति ॥१५॥ अथ यास्तद्देवाः । जुष्टास्तनूः प्रियाणि धामानि सार्धꣳ समवददिरे तत्सार्धꣳ संजघ्ने तत्सामाभवत्तस्मादाहुः सत्यꣳ साम देवत्रꣳ सामेति ॥१६॥ ब्राह्मणम् ॥३ [४.२]॥ ॥

आतिथ्येन वै देवा इष्ट्वा । तान्त्समदविन्दत्ते तानूनप्त्रैः समशाम्यंस्तऽएतस्य प्रायश्चित्तिमैच्छन्यदन्योऽन्यं पापमवदन्नाह पुरावभृथात्तु दीक्षामवाकल्पयंस्तऽएतामवान्तरां दीक्षामपश्यन् ॥१॥ तेऽग्निमेव त्वचं विपल्याङ्गयन्त । तपो वाऽअ-

ग्निस्तपो दीक्षा तदवान्तरां दीक्षामुपायंस्तद्यदवान्तरां दीक्षामुपायंस्तस्मादवान्तरदीक्षा संतरामङ्गुलीराचक्षत संतरां मेखलां पर्यस्तामिवैनामेतत्सतीं पर्यास्यन्त तथोऽएवैष एतद्यदतः प्राचीनमव्रत्यं वा करोत्यव्रत्यं वा वदति तस्यैवैतत्प्रायश्चित्तिं कुरुते ॥२॥ सोऽग्निनेव त्वचं विपल्यङ्गयते । तपो वाऽअग्निस्तपो दीक्षा तदवान्तरां दीक्षामुपैति संतरामङ्गुलीरचते संतरां मेखलां पर्यस्तामिवैनामेतत्सतीं पर्यस्यते प्रजामु हैव तद्देवा उपायन् ॥३॥ तेऽग्निनेव त्वच विपल्याङ्गयन्त । अग्निर्वै मिथुनस्य कर्ता प्रजनयिता तत्प्रजामुपायन्त्संतरामङ्गुलीराचक्षत संतरां मेखलां तत्प्रजामात्मन्नकुर्वत तथोऽएवैष एतत्प्रजामेवोपैति ॥४॥ सोऽग्निनेव त्वचं विपल्यङ्गयते । अग्निर्वै मिथुनस्य कर्ता प्रजनयिता तत्प्रजामुपैति संतरामङ्गुलीरचते संतरां मेखलां तत्प्रजामात्मन्कुरुते ॥५॥ देवानामु ह स्म दीक्षितानाम् । यः समिद्धारो वा स्वाध्यायं वा विसृजते तꣳ ह स्मेतरस्यैवेतरꣳ रूपेणेतरस्येतरमसुररक्षसानि जिघाꣳसन्ति ते ह पापं वदन्त उपसमेयुरिति वै मां त्वमचिकीर्षीरिति माजिघाꣳसीरित्यग्निर्हैव तथा नान्यमुवादाग्निं तथा नान्यः ॥६॥ ते होचुः । अपीत्थं त्वामग्नेऽवादिषूꣳरिति नैवाहमन्यं न मामन्य इति ॥७॥ तेऽविदुः । अयं वै नो विरद्धास्तमोऽस्यैव रूपमसाम तेन रक्षाꣳस्यतिमोक्ष्यामहे तेन स्वर्गं लोकꣳ समश्नुविष्यामहऽइति तेऽग्नेरेव रूपमभवंस्तेन रक्षाꣳस्यत्यमुच्यन्त तेन स्वर्गं लोकꣳ समाश्नुवत तथोऽएवैष एतदग्नेरेव रूपं भवति तेन रक्षाꣳस्यतिमुच्यते तेन स्वर्गं लोकꣳ समश्नुते स वै समिधमेवाभ्यादधदवान्तरदीक्षामुपैति ॥८॥ स समिधमभ्यादधाति । अग्ने व्रतपास्त्वे व्रतपा इत्यग्निर्हि देवानां व्रतपतिस्तस्मादाहाग्ने व्रतपास्त्वे व्रतपा इति या तव तनूरियꣳ सा मयि यो मम तनूरेषा सा त्वयि । सह नौ व्रतपते व्रतानीति तदग्निना त्वचं विपल्यङ्गयतेऽनु मे दीक्षां दीक्षापतिर्मन्यतामनु तपस्तपस्पतिरिति तदवान्तरां दीक्षामुपैति संतरामङ्गुलीरचते संतरां मे-

खलां पर्यस्तामेवैतत्सतीं पर्यस्यते ॥९॥ अथैनमतो मदन्तीभिरुपचरन्ति । तपो वाऽअग्निस्तपो मदन्त्यस्तस्मादेनं मदन्तीभिरुपचरन्ति ॥१०॥ अथ मदन्तीभिरुपस्पृश्य । राजानमाप्याययन्ति तद्यन्मदन्तीरुपस्पृश्य राजानमाप्याययन्ति वज्रो वाऽआज्यꣳ रेतः सोमो नेद्वज्रेणाज्येन रेतः सोमꣳ हिनसामेति तस्मान्मदन्तीरुपस्पृश्य राजानमाप्याययन्ति ॥११॥ तदाहुः । यस्माऽएतदाप्यायनं क्रियतऽआतिथ्यꣳ सोमाय तमेवाग्रऽआप्याययेयुरथावान्तरदीक्षामथ तानूनप्त्राणीति तदु तथा न कुर्याद्यज्ञस्य वाऽएतं कर्मात्र वाऽएनान्समदविन्दत्ते सꣳशममेव पूर्वमुपायन्नथावान्तरदीक्षामथाप्यायनम् ॥१२॥ तद्यदाप्याययन्ति । देवो वै सोमो दिवि हि सोमो वृत्रो वै सोम आसीत्तस्यैतच्छरीरं यद्गिरयो यदश्मानस्तदेषोशाना नामौषधिर्जायतऽइति ह स्माह श्वेतकेतुरौद्दालकिस्तामेतदाहृत्याभिषुण्वन्ति तां दीक्षोपसद्भिस्तानूनप्त्रैराप्यायनेन सोमं कुर्वन्तीति तथोऽएवैनामेष एतद्दीक्षोपसद्भिस्तानूनप्त्रैराप्यायनेन सोमं करोति ॥१३॥ मधु सारघमिति वाऽआहुः । यज्ञो ह वै मधु सारघमथैतऽएव सरघो मधुकृतो यदृत्विजस्तद्यथा मधु मधुकृत आप्याययेयुरेवमेवैतद्यज्ञमाप्याययन्ति ॥१४॥ यज्ञेन वै देवाः । इमां जितिं जिग्युर्यैषामियं जितिस्ते होचुः कथं न इदं मनुष्यैरनभ्यारोह्यꣳ स्यादिति ते यज्ञस्य रसं धीत्वा यथा मधु मधुकृतो निर्धयेयुर्विदुह्य यज्ञं यूपेन योपयित्वा तिरोऽभवन्नथ यदेनेनायोपयंस्तस्माद्यूपो नाम ॥१५॥ तद्वाऽऋषीणामनुश्रुतमास । ते यज्ञꣳ समभरन्यथायं यज्ञः सम्भृत एवं वाऽएष यज्ञꣳ सम्भरति यो दीक्षते वाग्वै यज्ञस्तद्यद्देवात्र यज्ञस्य निर्धीतं यद्विदुग्धं तदेवैतत्पुनराप्याययति ॥१६॥ ते वै षड्भूत्वाप्याययन्ति । षड्वाऽऋतव ऋतव एवैतद्भूत्वाप्याययन्ति ॥१७॥ तऽआप्याययन्ति । अꣳशुरꣳशुष्टे देव सोमाप्यायतामिति तदस्याꣳशुमꣳशुमेवाप्याययन्तीन्द्रायैकधनविदऽइतीन्द्रो वै यज्ञस्य देवता तस्मादाहेन्द्रायेत्येकधनविदऽइति शतꣳ-शतꣳ ह स्म वाऽएष दे-

वान्प्रत्येकैक एवाऽशुरेकधनानाप्यायते दश-दश वा तुभ्यमिन्द्रः प्यायतामा त्वमि-
न्द्राय प्यायस्वेतीन्द्रो वै यज्ञस्य देवता सा यैव यज्ञस्य देवता तामेवैतदाप्यायय-
त्या त्वमिन्द्राय प्यायस्वेति तदेतस्मिन्नाप्यायनं दधात्याप्याययास्मान्त्सखीन्त्सन्या मे-
धयेति स यत्सनोति तत्तदाह यत्सन्येत्यथ यदनुब्रूते तद्व तदाह यन्मधयेति स्व-
स्ति ते देव सोम सुत्यामशीयेत्येका वाऽएतेषामाशीर्भवत्यृत्विजां च यजमानस्य
च यज्ञस्योदृचं गच्छेमेति यज्ञस्योदृचं गच्छानीत्येवैतदाह ॥१८॥ अथ प्रस्तरे निह्नु-
वते । उत्तरतउपचारो वै यज्ञोऽथैतद्दक्षिणेवान्वित्याप्याययन्त्यग्निर्वै यज्ञस्तद्यज्ञं
पृष्ठतः कुर्वन्ति तन्मिथ्याकुर्वन्ति देवेभ्य आवृश्च्यन्ते यज्ञो वै प्रस्तरस्तद्यज्ञं पुनरार-
भन्ते तस्यो हैषा प्रायश्चित्तिस्तथो हैषामेतन्न मिथ्याकृतं भवति न देवेभ्य आवृ-
श्च्यन्ते तस्मात्प्रस्तरे निह्नुवते ॥१९॥ तदाहुः । अक्ते निह्नुवीरा३ननक्ता३ऽइत्यन-
क्ते हैव निह्नुवीरन्ननुप्रहरणाऽ ह्येवाक्तस्य ॥२०॥ ते निह्नुवते । एष्टा रायः प्रेषे
भगायऽऋतमृतवादिभ्य इति सत्यऽ सत्यवादिभ्य इत्येवैतदाह नमो द्यावापृथि-
वीभ्यामिति तदाभ्यां द्यावापृथिवीभ्यां निह्नुवते ययोरिदऽ सर्वमधि ॥२१॥ अथा-
ह समुह्युप्य प्रस्तरम् । अग्नीन्मदन्त्यापा३इति मदन्तीत्यग्नीदाह ताभिरेहीत्युपर्युप-
र्यग्निमतिहरति स यन्नानुप्रहरत्येतेन ह्यत ऊर्ध्वान्यहानि प्रचरिष्यन्भवत्यथ यदु-
पर्युपर्यग्निमतिहरति तदेवास्यानुप्रहृतभाजनं भवति तमग्नीधे प्रयच्छति तमग्नीन्निद-
धाति ॥२२॥ ब्राह्मणम् ॥४ [४. ३.]॥ ॥

ग्रीवा वै यज्ञस्योपसदः शिरः प्रवर्ग्यः । तस्माद्यदि प्रवर्ग्यवान्भवति प्रवर्ग्येण
प्रचर्यायोपसद्भिः प्रचरन्ति तद्ग्रीवाः प्रतिदधति ॥१॥ तस्याः पूर्वाह्णेऽनुवाक्या भव-
न्ति । ता अपराह्णे याज्या या याज्यास्ता अनुवाक्यास्तद्व्यतिषजति तस्मादिमानि
ग्रीवाणां पर्वाणि व्यतिषक्तानीमान्यस्थीनि ॥२॥ देवाश्च वाऽअसुराश्च । उभये
प्राजापत्याः पस्पृधिरे ततोऽसुरा एषु लोकेषु पुरश्चक्रिरेऽयस्मयीमेवास्मिंल्लोके

रजतामन्तरिक्षे हरिणीं दिवि ॥३॥ तद्धि देवा अस्पृण्वत । तऽएताभिरुपसद्भिरु-
पासीदंस्तद्यदुपासीदंस्तस्मादुपसदो नाम ते पुरः प्राभिन्दन्निमाँल्लोकान्प्राजयंस्तस्मा-
दाहुरुपसदा पुरं जयन्तीति यदह्योपासते तेनेमां मानुषीं पुरं जयन्ति ॥४॥ एता-
भिर्वै देवा उपसद्भिः । पुरः प्राभिन्दन्निमाँल्लोकान्प्राजयंस्तथोऽएवैष एतन्नाद्रियेता-
स्माऽअस्मिंल्लोके कश्चन पुरः कुरुतऽइमानेवैतल्लोकान्प्रभिनत्तीमाँल्लोकान्प्रजयति
तस्मादुपसद्भिर्यजते ॥५॥ ता वाऽआज्यहविषो भवन्ति । वज्रो वाऽआज्यमेतेन
वै देवा वज्रेणाज्येन पुरः प्राभिन्दन्निमाँल्लोकान्प्राजयंस्तथोऽएवैष एतेन वज्रेणा-
ज्येनेमाँल्लोकान्प्रभिनत्तीमाँल्लोकान्प्रजयति तस्मादाज्यहविषो भवन्ति ॥६॥ स वा
ऽअष्टौ कृत्वो जुह्वां गृह्णाति । चतुरुपभृत्यथोऽइतरथाहुश्चतुरेव कृत्वो जुह्वां गृ-
ह्णीयादष्टौ कृत्व उपभृतीति ॥७॥ स वाऽअष्टावेव कृत्वो जुह्वां गृह्णाति । चतुरु-
पभृति तद्वज्रमभिभारं करोति तेन वज्रेणाभिभारिणेमाँल्लोकान्प्रभिनत्तीमाँल्लोका-
न्प्रजयति ॥८॥ अग्नीषोमौ वै देवानाᳫं सयुजौ । ताभ्याᳫं सार्धं गृह्णाति विष्णव
ऽएकाकिनेऽन्यतरमेवाघारमाघारयति यᳫं स्रुवेण प्रतिक्रामति वाऽउत्तरमाघार-
माघार्याभिजित्याऽअभिजयानीति तस्मादन्यतरमेवाघारमाघारयति यᳫं स्रुवेण ॥९॥
अथाश्राव्य न होतारं प्रवृणीते । सीद होतरित्येवाहोपविशति होता होतृष-
दनऽउपविश्य प्रसौति प्रसूतोऽध्वर्युः स्रुचावादत्ते ॥१०॥ स आहातिक्रामन्नग्नयेऽनु-
ब्रूहीति । आश्राव्याहाग्निं यजेति वषट्कृते जुहोति ॥११॥ अथाह सोमायानुब्रू-
हीति । आश्राव्याह सोमं यजेति वषट्कृते जुहोति ॥१२॥ अथ यदुपभृत्याज्यं
भवति । तत्समानयमान आह विष्णवेऽनुब्रूहीत्याश्राव्याह विष्णुं यजेति वषट्-
कृते जुहोति ॥१३॥ स यत्समानत्र तिष्ठञ्जुहोति । न यथेदं प्रचरन्त्संचरत्यभि-
जित्याऽअभिजयानीत्यथ यदेता देवता यजति वज्रमेवैतत्सᳫंस्करोत्यग्निमनीकᳫं सो-
मᳫं शल्यं विष्णुं कुल्मलᳫं ॥१४॥ संवत्सरो हि वज्रः । अग्निर्वाऽअहः सोमो रा-

त्रिरथ यदन्तरेण तद्विष्णुरेतद्वै परिप्लवमानꣳ संवत्सरं करोति ॥१५॥ संवत्सरो वज्रः । एतेन वै देवाः संवत्सरेण वज्रेण पुरः प्राभिन्दन्निमांल्लोकान्प्राजयंस्तथोऽएवैष एतेन संवत्सरेण वज्रेणेमांल्लोकान्प्रभिनत्तीमांल्लोकान्प्रजयति तस्मादेता देवता यजति ॥१६॥ स वै तिस्र उपसद उपेयात् । त्रयो वाऽऋतवः संवत्सरस्य संवत्सरस्यैवैतद्रूपं क्रियते संवत्सरमेवैतत्संस्करोति द्विरेकया प्रचरति द्विरेकया ॥१७॥ ताः षट्सम्पद्यन्ते । षड्वाऽऋतवः संवत्सरस्य संवत्सरस्यैवैतद्रूपं क्रियते संवत्सरमेवैतत्संस्करोति ॥१८॥ यद्यु द्वादशोपसद उपेयात् । द्वादश वै मासाः संवत्सरस्य संवत्सरस्यैवैतद्रूपं क्रियते संवत्सरमेवैतत्संस्करोति द्विरेकया प्रचरति द्विरेकया ॥१९॥ ताश्चतुर्विंशतिः सम्पद्यन्ते । चतुर्विंशतिर्वै संवत्सरस्यार्धमासाः संवत्सरस्यैवैतद्रूपं क्रियते संवत्सरमेवैतत्संस्करोति ॥२०॥ स यत्सायम्प्रातः प्रचरति । तथा ह्येव सम्पत्सम्पद्यते स यत्पूर्वाह्णे प्रचरति तज्जयत्यथ यदपराह्णे प्रचरति सुजितमसदित्यथ यज्जुहोतीदं वै पुरं युध्यन्ति तां जित्वा स्वाꣳ सतीं प्रपद्यन्ते ॥२१॥ स यत्प्रचरति । तद्युध्यत्यथ यत्संतिष्ठते तज्जयत्यथ यज्जुहोति स्वामेवैतत्सतीं प्रपद्यते ॥२२॥ स जुहोति । यया द्विरेकस्याह्नः प्रचरिष्यन्भवति या तेऽअग्नेऽयःशया तनूर्वर्षिष्ठा गह्वरेष्ठा । उग्रं वचोऽअपावधीत्त्वेषं वचोऽअपावधीत्स्वाहेत्येवꣳरूपा हि सासीदयस्मयी हि सासीत् ॥२३॥ अथ जुहोति । यया द्विरेकस्याह्नः प्रचरिष्यन्भवति या तेऽअग्ने रजःशया तनूर्वर्षिष्ठा गह्वरेष्ठा । उग्रं वचोऽअपावधीत्त्वेषं वचोऽअपावधीत्स्वाहेत्येवꣳरूपा हि सासीद्रजता हि सासीत् ॥२४॥ अथ जुहोति । ययाद्विरेकस्याह्नः प्रचरिष्यन्भवति या तेऽअग्ने हरिशया तनूर्वर्षिष्ठा गह्वरेष्ठा । उग्रं वचो अपावधीत्त्वेषं वचोऽअपावधीत्स्वाहेत्येवꣳरूपा हि सासीद्धरिणी हि सासीद्यद्यु द्वादशोपसद उपेयाच्चतुरह्णमेकया प्रचरेच्चतुरहमेकया ॥२५॥ अथातो व्रतोपसदामेव । परउर्वीर्वाऽअन्या उपसदः परोऽह्वीर-

न्याः स यासामेकं प्रथमाह्नं दोग्ध्यथ द्वावथ त्रींस्ताः परऽउर्वीरथ यासां त्रीन्प्रथमाह्नं दोग्ध्यथ द्वावथैकं ताः परोऽह्वीर्या वै परोऽह्वीस्ताः परऽउर्वीर्याः परऽउर्वीस्ताः परोऽह्वीः ॥२६॥ तपसा वै लोकं जयन्ति । तदस्यैतत्परः-पर एव वरीयस्तपो भवति परः-परः श्रेयाꣳसं लोकं जयति वसीयानु हैवास्मिंलोके भवति य एवं विद्वान्परोऽह्वीरुपसद उपैति तस्मादु परोऽह्वीरेवोपसद उपेयाद्यद्यु द्वादशोपसद उपेयात्त्रींश्चतुरह्नं दोहयेद्द्वौ चतुरह्नमेकं चतुरह्नम् ॥२७॥ ब्राह्मणम् ॥५[४.४]॥ तृतीयः प्रपाठकः ॥ कण्डिकासंख्या १२१ ॥ ॥ चतुर्थोऽध्यायः [११] ॥–॥

तद्य एष पूर्वार्ध्यो वर्षिष्ठ स्थूणाराजो भवति । तस्मात्प्राङ् प्रक्रामति त्रीन्विक्रमांस्तच्छङ्कुं निहन्ति सोऽन्तःपातः ॥१॥ तस्मान्मध्यमाच्छङ्कोः । दक्षिणा पञ्चदश विक्रमान्प्रक्रामति तच्छङ्कुं निहन्ति सा दक्षिणा श्रोणिः ॥२॥ तस्मान्मध्यमाच्छङ्कोः । उदङ् पञ्चदश विक्रमान्प्रक्रामति तच्छङ्कुं निहन्ति सोत्तरा श्रोणिः ॥३॥ तस्मान्मध्यमाच्छङ्कोः । प्राङ् षट्त्रिꣳशतं विक्रमान्प्रक्रामति तच्छङ्कुं निहन्ति स पूर्वार्धः ॥४॥ तस्मान्मध्यमाच्छङ्कोः । दक्षिणा द्वादश विक्रमान्प्रक्रामति तच्छङ्कुं निहन्ति स दक्षिणोऽꣳसः ॥५॥ तस्मान्मध्यमाच्छङ्कोः । उदङ् द्वादश विक्रमान्प्रक्रामति तच्छङ्कुं निहन्ति स उत्तरोऽꣳस एषा मात्रा वेदेः ॥६॥ अथ यत्त्रिꣳशद्विक्रमा पश्चाद्भवति । त्रिꣳशदक्षरा वै विराड्विराजा वै देवा अस्मिंलोके प्रत्यतिष्ठंस्तथोऽएवैष एतद्विराजैवास्मिंलोके प्रतितिष्ठति ॥७॥ अथोऽअपि त्रयस्त्रिꣳशत्स्युः । त्रयस्त्रिꣳशदक्षरा वै विराड्विराजैवास्मिंलोके प्रतितिष्ठति ॥८॥ अथ यत्षट्त्रिꣳशद्विक्रमा प्राची भवति । षट्त्रिꣳशदक्षरा वै बृहती बृहत्या वै देवाः स्वर्गं लोकꣳ समाश्नुवत तथोऽएवैष एतद्बृहत्यैव स्वर्गं लोकꣳ समश्नुते सोऽस्य दिव्याहवनीयो भवति ॥९॥ अथ यच्चतुर्विꣳशतिविक्रमा पुरस्ताद्भवति । चतुर्विꣳशत्यक्षरा वै गायत्री पूर्वार्धो वै यज्ञस्य गायत्री पूर्वार्ध एष यज्ञस्य तस्माच्चतुर्विꣳशतिविक्रमा पुरस्ताद्भव-

त्येषा मात्रा वेदेः ॥१०॥ अथ यत्पश्चाद्वरीयसी भवति । पश्चाद्वरीयसी पृथुश्रोणिरिति वै योषां प्रशंसन्ति यद्वेव पश्चाद्वरीयसी भवति पश्चाद्वैतद्वरीयः प्रजननं करोति तस्मात्पश्चाद्वरीयसः प्रजननादिमाः प्रजाः प्रजायन्ते ॥११॥ नासिका ह वाऽएषा यज्ञस्य यदुत्तरवेदिः । अथ यदेनामुत्तरां वेदेरुपकिरति तस्मादुत्तरवेदिर्नाम ॥१२॥ द्वय्यो ह वाऽइदमग्रे प्रजा आसुः । आदित्याश्चैवाङ्गिरसश्च ततोऽङ्गिरसः पूर्वे यज्ञꣳ समभरंस्ते यज्ञꣳ सम्भृत्योचुरग्निमिमां नः श्वःसुत्यामादित्येभ्यः प्रब्रूह्यनेन नो यज्ञेन याजयतेति ॥१३॥ ते हादित्या ऊचुः । उपजानीत यथास्मानिवाङ्गिरसो याजयान्न वयमङ्गिरस इति ॥१४॥ ते होचुः । न वाऽअन्येन यज्ञादपक्रमणमस्त्यन्तरामेव सुत्यां ध्रियामहाऽइति ते यज्ञꣳ संजह्रुस्ते यज्ञꣳ सम्भृत्योचुः श्वःसुत्यां वै त्वमस्मभ्यमग्ने प्रावोचोऽथ वयमद्यसुत्यामेव तुभ्यं प्रब्रूमोऽङ्गिरोभ्यश्च तेषां नस्त्वꣳ होतासीति ॥१५॥ तेऽन्यमेव प्रतिप्रजिघ्युः । अङ्गिरसोऽह ते हाप्यङ्गिरसोऽग्नयेऽन्वागत्य चुक्रुधुरिव कथं नु नो दूतश्चरन्न प्रत्यादृथा इति ॥१६॥ स होवाच । अनिन्द्या वै मावृषत सोऽनिन्द्यैर्वृतो नाशकमपक्रमितुमिति तस्माद्व हानिन्द्यस्य वृतो नापक्रामेत्तऽएतेन सद्यःक्रियाङ्गिरस आदित्यानयाजयन्त्स सद्यःक्रीः ॥१७॥ तेभ्यो वाचं दक्षिणामानयन् । तां न प्रत्यगृह्णन्हास्यामहे यदि प्रतिग्रहीष्याम इति तद्व तद्यज्ञस्य कर्म न व्यमुच्यत यद्दाक्षिणमासीत् ॥१८॥ अथैभ्यः सूर्यं दक्षिणामानयन् । तं प्रत्यगृह्णंस्तस्माद्व ह स्माहुरङ्गिरसो वयं वाऽआर्त्विजीनाः स्मो वयं दक्षिणीया अपि वाऽअस्माभिरेष प्रतिगृहीतो य एष तपतीति तस्मात्सद्यःक्रियोऽश्वः श्वेतो दक्षिणा ॥१९॥ तस्य रुक्मः पुरस्ताद्भवति । तदेतस्य रूपं क्रियते य एष तपति यद्यश्वं श्वेतं न विन्देदपि गौरेव श्वेतः स्यात्तस्य रुक्मः पुरस्ताद्भवति तदेतस्य रूपं क्रियते य एष तपति ॥२०॥ तेभ्यो ह वाक्चुक्रोध । केन मदेष श्रेयान्बन्धुना३ केना३ यदेतं प्रत्यग्रहीष्ट न मामिति सा हैभ्योऽपचक्रा-

स सोभयानन्तरेण देवासुरान्त्संयत्तान्त्सिꣳही भूत्वाददाना चचार तामुपैव देवा अ-
मन्त्रयन्तोपासुरा अग्निरेव देवानां दूत आस सहरक्षा इत्यसुररक्षसमसुराणाꣳ ॥२१॥
सा देवानुपावर्त्स्यन्त्युवाच । यद्व उपावर्तेय किं मे ततः स्यादिति पूर्वामेव त्वाग्ने-
राहुतिः प्राप्स्यतीत्यथ हैषा देवानुवाच यां मया कां चाशिषमाशासिष्यध्वे सा वः
सर्वा समर्धिष्यतऽइति सैवं देवानुपाववर्त ॥२२॥ स यद्धार्यमाणेऽग्नौ । उत्तरवे-
दिं व्याघारयति यदेवैनामदो देवा अब्रुवन्पूर्वा त्वाग्नेराहुतिः प्राप्स्यतीति तदेवै-
नामेतत्पूर्वामग्नेराहुतिः प्राप्नोति वाग्घ्येषा निदानेनाथ यदुत्तरवेदिमुपकिरति य-
ज्ञस्यैव सर्वत्वाय वाग्घि यज्ञो वागु ह्येषा ॥२३॥ तां वै युगशम्येन विमिमीते ।
युगेन यत्र हरन्ति शम्यया यतो हरन्ति युगशम्येन वै योग्यं युञ्जन्ति सा यदेवादः
सिꣳही भूत्वाशान्तेवाचरत्तदेवैनामेतद्यज्ञे युनक्ति ॥२४॥ तस्मान्निवृत्तदक्षिणां न
प्रतिगृह्णीयात् । सिꣳही हैनं भूत्वा क्षिणोति नो क्षामाकुर्वीत सिꣳही हैवैनं भू-
त्वा क्षिणोति नो हान्यस्मै दद्याद्यद्यन्यं तदन्यत्रात्मनः कुर्वीत तस्माद्योऽस्यापि पा-
प-इव समानबन्धुः स्यात्तस्माऽएनां दद्यात्स यद्ददाति तदेनꣳ सिꣳही भूत्वा न
क्षिणोति यदु समानबन्धवे ददाति तदु नान्यत्रात्मनः कुरुतऽएषो निवृत्तदक्षि-
णायै प्रतिष्ठा ॥२५॥ अथ शम्यां च स्फ्यं चादत्ते । तस्य एष पूर्वार्ध्यः उत्तरार्ध्यः
शङ्कुर्भवति तस्मात्प्रत्यङ् प्रक्रामति त्रीन्विक्रमांस्तच्चात्वालं परिलिखति सा चात्वा-
लस्य मात्रा नात्र मात्रास्ति यत्रैव स्वयं मनसा मन्येताग्रेणोत्करं तच्चात्वालं प-
रिलिखेत् ॥२६॥ स वेद्यन्तात् । उदीचीꣳ शम्यां निदधाति स परिलिखति त-
प्तायनी मेऽसीतीमामेवैतदाहास्याꣳ हि तप्त एति ॥२७॥ अथ पुरस्तात् । उदीचीꣳ
शम्यां निदधाति स परिलिखति वित्तायनी मेऽसीतीमामेवैतदाहास्याꣳ हि वि-
विदान एति ॥२८॥ अथानुवेद्यन्तम् । प्राचीꣳ शम्यां निदधाति स परिलिखत्य-
वतान्मा नाथितादितीमामेवैतदाह यत्र नाथितन्मावतादिति ॥२९॥ अथोत्तरतः ।

प्राचीꣳ शम्यां निदधाति स परिलिखत्यवतान्मा व्यथितादितीमामेवैतदाह यत्र व्यथेतन्मावतादिति ॥३०॥ अथ हरति । यत्र हरति तदग्नीदुपसीदति स वाऽअग्नीनामेव नामानि गृह्णन्हरति यान्वाऽअमून्देवा अग्रेऽग्नीन्होत्राय प्रावृणत ते प्राधन्वंस्तऽइमा एव पृथिवीरुपासर्पन्निमामह्येव द्वेऽअस्याः परे तेनैवैतान्नदानेन हरति ॥३१॥ स प्रहरति । विदेदग्निर्नभो नामाग्नेऽअङ्गिर आयुना नाम्नेहीति स यत्प्राधन्वंस्तदायुर्दधाति तत्समीरयति योऽस्यां पृथिव्यामसीति योऽस्यां पृथिव्यामसीति ह्येवा निदधाति यत्तेऽनाधृष्टं नाम यज्ञियं तेन त्वादधऽइति यत्तेऽनाधृष्टꣳ रक्षोभिर्नाम यज्ञियं तेन त्वादधऽइत्येवैतदाहानु त्वा देववीतयऽइति चतुर्थꣳ हरति देवेभ्यस्त्वा जुष्टꣳ हरामीत्येवैतदाह तां वै चतुःस्रक्तेश्चात्वालाद्धरति चतस्रो वै दिशः सर्वाभ्य एवैनामेतद्दिग्भ्यो हरति ॥३२॥ अथानुव्यूहति । सिꣳह्यसि सपत्नसाही देवेभ्यः कल्पस्वेति सा यद्देवाद: सिꣳही भूत्वाशान्तेवाचरत्तदेवैनामेतदाह सिꣳह्यसीति सपत्नसाहीति त्वया वयꣳ सपत्नान्पापीयसः क्रियास्मेत्येवैतदाह देवेभ्यः कल्पस्वेति योषा वाऽउत्तरवेदिस्तामेवैतद्देवेभ्यः कल्पयति ॥३३॥ तां वै युगमात्रीं वा सर्वतः करोति । यजमानस्य वा दश-दश पदानि दशाक्षरा वै विराड्वाग्वै विराड्वाग्यज्ञो मध्ये नाभिकामिव करोति समानत्रासीनो व्याघारयाणीति ॥३४॥ तामद्भिरभ्युक्षति । सा यद्देवाद: सिꣳही भूत्वाशान्तेवाचरच्छान्तिरापस्तामद्भिः शमयति योषा वाऽउत्तरवेदिस्तामेवैतद्देवेभ्यो हिन्दति तस्मादद्भिरभ्युक्षति ॥३५॥ सोऽभ्युक्षति । सिꣳह्यसि सपत्नसाही देवेभ्यः शुन्धस्वेत्यथ सिकताभिरनुविकिरत्यलंकारो न्वेव सिकता आजन्तऽइव हि सिकता अग्नेर्वाऽएतद्वैश्वानरस्य भस्म यत्सिकता अग्निं वाऽअस्यामाधास्यन्भवति तथो हैनामग्निर्न हिनस्ति तस्मात्सिकताभिरनुविकिरति सोऽनुविकिरति सिꣳह्यसि सपत्नसाही देवेभ्यः शुम्भस्वेत्यथैनां छादयति सा छन्नैताꣳ रात्रिं वसति ॥३६॥ ब्राह्मणम् ॥१[५.१]॥ ॥

इध्ममभ्यादधति । उपयमनीरुपकल्पयन्त्याज्यमधिश्रयति स्रुवं च स्रुचं च संमा-
र्ष्ट्यथोत्पूयाज्यं पञ्चगृहीतं गृह्णीते यदा प्रदीप्त इध्मो भवति ॥१॥ अथोपयच्छन्ती-
ध्मम् । उपयच्छन्त्युपयमनीरथाहाग्नये प्रह्रियमाणायानुब्रूह्येकस्फ्ययानूदेहीत्यनूदेति
प्रतिप्रस्थातैकस्फ्ययैतस्मान्मध्यमाच्छङ्कोर्य एष वेदेर्जघनार्धे भवति तद्यदेवात्रान्तःपा-
तेन गार्हपत्यस्य वेदेर्व्यवच्छिन्नं भवति तदेवैतदनुसंतनोति ॥२॥ तद्धैके । ओत्त-
रवेदेरनूदायन्ति तदु तथा न कुर्याद्दैवैतस्मान्मध्यमाच्छङ्कोरनूदियात्तऽआयन्त्यागच्छन्त्यु-
त्तरवेदिम् ॥३॥ ॥ शतम् १८०० ॥ ॥ प्रोक्षणीरध्वर्युरादत्ते । स पुरस्तादेवाग्रे प्रो-
क्षत्युदङ् तिष्ठन्निन्द्रघोषस्त्वा वसुभिः पुरस्तात्पात्वितीन्द्रघोषस्त्वा वसुभिः पुरस्ता-
द्गोपायत्वित्येवैतदाह ॥४॥ अथ पश्चात्प्रोक्षति । प्रचेतास्त्वा रुद्रैः पश्चात्पात्विति
प्रचेतास्त्वा रुद्रैः पश्चाद्गोपायत्वित्येवैतदाह ॥५॥ अथ दक्षिणतः प्रोक्षति । मनो-
जवास्त्वा पितृभिर्दक्षिणतः पात्विति मनोजवास्त्वा पितृभिर्दक्षिणतो गोपायत्वित्ये-
वैतदाह ॥६॥ अथोत्तरतः प्रोक्षति । विश्वकर्मा त्वादित्यैरुत्तरतः पात्विति विश्व-
कर्मा त्वादित्यैरुत्तरतो गोपायत्वित्येवैतदाह ॥७॥ अथ याः प्रोक्षण्यः परिशिष्य-
न्ते । तद्यऽएते पूर्वे स्रक्ती तयोर्या दक्षिणा ता न्यक्तेन बहिर्वेदि निनयतीदमहं
तप्तं वार्बहिर्धा यज्ञान्निःसृजामीति सा यदेवादः सिंही भूत्वाशान्तेवाचरत्तामेवा-
स्या एतच्छुचं बहिर्धा यज्ञान्निःसृजति यदि नाभिचरेद्यद्युऽअभिचरेदादिशेदिदमहं
तप्तं वारमुमभि निःसृजामीति तमेतया शुचा विध्यति स शोचन्नेवामुं लोकमेति
॥८॥ स यद्धार्यमाणेऽग्नौ । उत्तरवेदिं व्याघारयति यदेवैनामदो देवा अब्रुवन्पूर्वा
त्वाग्नेराहुतिः प्राप्स्यतीति तदेवैनामेतत्पूर्वामग्नेराहुतिः प्राप्नोति यद्वेषा देवानब्र-
वीद्यां मया कां चाशिषमाशासिष्यध्वे सा वः सर्वा समर्धिष्यतऽइति तामिनयात्र
ऽर्त्विजो यजमानायाशिषमाशासते सास्मै सर्वा समृध्यते ॥९॥ तद्वाऽएतदेकं कुर्व-
न्द्वयं करोति । यदुत्तरवेदिं व्याघारयत्यथ यैषां मध्ये नाभिकेव भवति तस्यै ये

पूर्वे स्रक्ती तयोर्या दक्षिणा ॥१०॥ तस्यामाघारयति । सिꣳह्यसि स्वाहेत्यथापरयोरुत्तरस्याꣳ सिꣳह्यस्यादित्यवनिः स्वाहेत्यथापरयोर्दक्षिणस्याꣳ सिꣳह्यसि ब्रह्मवनिः क्षत्रवनिः स्वाहेति बह्वी वै यजुःष्वाशीस्तद्ब्रह्म च क्षत्रं चाशास्त ऽउभे वीर्ये ॥११॥ अथ पूर्वयोरुत्तरस्याꣳ । सिꣳह्यसि सुप्रजावनी रायस्पोषवनिः स्वाहेति तत्प्रजामाशास्ते यदाह सुप्रजावनिरिति रायस्पोषवनिरिति भूमा वै रायस्पोषस्तद्भूमानमाशास्ते ॥१२॥ अथ मध्य ऽआघारयति । सिꣳह्यस्यावह देवान्यजमानाय स्वाहेति तद्देवान्यजमानायावाहयत्यथ स्रुचमुद्यच्छति भूतेभ्यस्त्वेति प्रजा वै भूतानि प्रजाभ्यस्त्वेत्येवैतदाह ॥१३॥ अथ परिधीन्परिदधाति । ध्रुवोऽसि पृथिवीं दृꣳहेति मध्यमं ध्रुवक्षिदस्यन्तरिक्षं दृꣳहेति दक्षिणमच्युतक्षिदसि दिवं दृꣳहेत्युत्तरमग्नेः पुरीषमसीति सम्भारानुपनिवपति तद्यत्सम्भारा भवन्त्यग्नेरेव सर्वत्वाय ॥१४॥ शरीरꣳ हैवास्य पीतुदारु । तद्यत्पैतुदारवाः परिधयो भवन्ति शरीरेणैवैनमेतत्समर्धयति कृत्स्नं करोति ॥१५॥ माꣳसꣳ हैवास्य गुल्गुलु । तद्यद्गुल्गुलु भवति माꣳसेनैवैनमेतत्समर्धयति कृत्स्नं करोति ॥१६॥ गन्धो हैवास्य सुगन्धितेजनम् । तद्यत्सुगन्धितेजनं भवति गन्धेनैवैनमेतत्समर्धयति कृत्स्नं करोति ॥१७॥ अथ यद्वृष्णे स्तुका भवति । वृष्णेर्ह वै विषाणेऽअन्तरेणाग्निरेकाꣳ रात्रिमुवास तद्यदेवात्राग्नेर्न्यक्तं तदिहाप्यसदिति तस्माद्वृष्णे स्तुका भवति तस्माद्या शीर्ष्णो नेदिष्ठꣳ स्यात्तामाच्छिद्याहरेद्यद्यु तां न विन्देदपि यामेव कां चाहरेत्तद्यत्परिधयो भवन्ति गुप्त्या ऽएव दूर ऽइव ह्येनमुत्तरे परिधय आगच्छन्ति ॥१८॥ ब्राह्मणम् ॥२[५.२]॥ ॥

पुरुषो वै यज्ञः । पुरुषस्तेन यज्ञो यदेनं पुरुषस्तनुत ऽएष वै तायमानो यावानेव पुरुषस्तावान्विधीयते तस्मात्पुरुषो यज्ञः ॥१॥ शिर एवास्य हविर्धानम् । वैष्णवं देवतयाथ यदस्मिन्त्सोमो भवति हविर्वै देवानाꣳ सोमस्तस्माद्धविर्धानं नाम ॥२॥ मुखमेवास्याहवनीयः । स यदाहवनीये जुहोति यथा मुख ऽआसि-

श्चेदेवं तत् ॥३॥ स्तुप एवास्य यूपः । बाहू एवास्याग्नीध्रीयश्च मार्जालीयश्च ॥४॥ उदरमेवास्य सदः । तस्मात्सदसि भक्षयन्ति यद्धीदं किं चाश्नन्त्युदर एवेदꣳ सर्वं प्रतितिष्ठत्यथ यदस्मिन्विश्वे देवा असीदंस्तस्मात्सदो नाम तऽउऽएवास्मिन्नेते ब्राह्मणा विश्वगोत्राः सीदन्ति ॥५॥ अथ यावेतौ जघनेनाग्नी । पादावेवास्यैतावेष वै तायमानो यावानेव पुरुषस्तावान्विधीयते तस्मात्पुरुषो यज्ञः ॥६॥ उभयतोद्वारꣳ हविर्धानं भवति । उभयतोद्वारꣳ सदस्तस्मादयं पुरुष आलꣳ संतृण्णः प्रणिक्तो हविर्धानेऽउपतिष्ठते ॥७॥ ते समववर्तयन्ति । दक्षिणेनैव दक्षिणामुत्तरेणोत्तरं यद्यन्यतरदत्तराद्दक्षिणाꣳ स्यात् ॥८॥ तयोः समववृत्तयोः । छदिरधिनिदधति यदि छदिर्न विन्देयुश्छदिःसंमितां भित्तिं प्रत्यानह्यन्ति रराट्यां परिश्रयन्त्युच्छ्रायेभ्यां छदिः पश्चादधिनिदधति छदिःसंमितां वा भित्तिम् ॥९॥ अथ पुनः प्रपद्य । चतुर्गृहीतमाज्यं गृहीत्वा सावित्रं प्रसवाय जुहोति सविता वै देवानां प्रसविता सवितृप्रसूताय यज्ञं तनवामहाऽइति तस्मात्सावित्रं जुहोति ॥१०॥ स जुहोति । युञ्जते मन उत युञ्जते धिय इति मनसा च वै वाचा च यज्ञं तन्वते स यदाह युञ्जते मन इति तन्मनो युनक्त्युत युञ्जते धिय इति तद्वाचं युनक्ति धिया-धिया ह्येतया मनुष्या जुजुषन्त्यनूक्तेनैव प्रकामोद्येनैव गाथाभिरिव ताभ्यां युक्ताभ्यां यज्ञं तन्वते ॥११॥ विप्रा विप्रस्य बृहतो विपश्चित इति । ये वै ब्राह्मणाः शुश्रुवाꣳसोऽनूचानास्ते विप्रास्तानेवैतदभ्याह बृहतो विपश्चित इति यज्ञो वै बृहन्विपश्चिद्यज्ञमेवैतदभ्याह वि होत्रा दधे वयुनाविदेक इदिति वि हि होत्रा दधते यज्ञं तन्वाना मही देवस्य सवितुः परिष्टुतिः स्वाहेति तत्सावित्रं प्रसवाय जुहोति ॥१२॥ अथापरं चतुर्गृहीतमाज्यं गृहीत्वा । उपनिष्क्रामति दक्षिणया द्वारा पत्नीं निष्क्रामयन्ति स दक्षिणस्य हविर्धानस्य दक्षिणायां वर्तन्याꣳ हिरण्यं निधाय जुहोतीदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् । समूढमस्य पाꣳसुरे स्वाहेति

सꣳस्रवं पत्न्यै पाणावानयति साऽक्षस्य संतापमुपानक्ति देवश्रुतौ देवेष्वाघोषतमिति प्रयच्छति प्रतिप्रस्थात्रे स्रुचं चाज्यविलापनीं च पर्याणयन्ति पत्नीमुभौ जघनेनाग्नी ॥१३॥ चतुर्गृहीतमाज्यं गृहीत्वा । प्रतिप्रस्थातोत्तरस्य हविर्धानस्य दक्षिणायां वर्तन्याꣳ हिरण्यं निधाय जुहोतीरावती धेनुमती हि भूतꣳ सूयवसिनी मनवे दशस्या । व्यस्कभ्ना रोदसी विष्णवेते दाधर्थ पृथिवीमभितो मयूखैः स्वाहेति सꣳस्रवं पत्न्यै पाणावानयति साऽक्षस्य संतापमुपानक्ति देवश्रुतौ देवेष्वाघोषतमिति तद्यदेवं जुहोति ॥१४॥ देवा ह वै यज्ञं तन्वानाः । तेऽसुररक्षसेभ्य आसङ्गाद्बिभयां चक्रुर्वज्रो वाऽआज्यं तऽएतेन वज्रेणाज्येन दक्षिणतो नाष्ट्रा रक्षाꣳस्यवाघ्नंस्तथैषां नियानं नान्ववायंस्तथोऽएवैष एतेन वज्रेणाज्येन दक्षिणतो नाष्ट्रा रक्षाꣳस्यवहन्ति तथास्य नियानं नान्ववयन्ति तद्वैष्णवीभ्यामृग्भ्यां जुहोति वैष्णवꣳ हि हविर्धानम् ॥१५॥ अथ यत्पत्न्यक्षस्य संतापमुपानक्ति । प्रजननमेवैतत्क्रियते यदा वै स्त्रियै च पुꣳसश्च संतप्यतेऽथ रेतः सिच्यते तत्ततः प्रजायते परागुपानक्ति पराग्घ्येव रेतः सिच्यतेऽथाह हविर्धानाभ्यां प्रवर्त्यमानाभ्यामनुब्रूहीति ॥१६॥ अथ वाचयति । प्राची प्रेतमध्वरं कल्पयन्तीऽइत्यध्वरो वै यज्ञः प्राची प्रेतं यज्ञं कल्पयन्तीऽइत्येवैतदाहोर्ध्वं यज्ञं नयतं मा जिह्वरतमित्यूर्ध्वमिमं यज्ञं देवलोकं नयतमित्येवैतदाह मा जिह्वरतमिति तदेतस्माऽअह्वलामाशास्ते समुदूह्येव प्रवर्तयेयुर्यथा नोत्सर्जेतामसुर्या वाऽएषा वाग्याक्षे नेदिह्यासुर्या वाग्वदादिति यद्युत्सर्जेताम् ॥१७॥ एतद्वाचयेत् । स्वं गोष्ठमावदतं देवी दुर्ये आयुर्मा निर्वादिष्टं प्रजां मा निर्वादिष्टमिति तस्यो हैषा प्रायश्चित्तिः ॥१८॥ तदाहुः । उत्तरवेदेः प्रत्यङ् प्रक्रामेत्त्रीन्विक्रमांस्तद्धविर्धाने स्थापयेत्सा हविर्धानयोर्मात्रेति नात्र मात्रास्ति यत्रैव स्वयं मनसा मन्येत नाहैव सत्रात्यन्तिके नो दूरे तत्स्थापयेत् ॥१९॥ तेऽअभिमन्त्रयते । अत्र रमेथां वर्ष्मन्पृथिव्याऽइति वर्ष्म ह्येतत्पृथिव्यै भवति दि-

वि ह्यस्याहवनीयो भवति नभ्यस्थं करोति तद्धि नेमस्य रूपम् ॥२०॥ अथोत्त-
रेण पर्येत्याध्वर्युः । दक्षिणꣳ हविर्धानमुपस्तभ्नाति विष्णोर्नु कं वीर्याणि प्रवोचं
यः पार्थिवानि विममे रजाꣳसि । यो ऽअस्कभायदुत्तरꣳ सधस्थं विचक्रमाणस्त्रेधो-
रुगायो विष्णवे त्वेति मेथीमुपनिहन्तीतरतस्ततो यद्व च मानुषे ॥२१॥ अथ प्र-
तिप्रस्थाता । उत्तरꣳ हविर्धानमुपस्तभ्नाति दिवो वा विष्ण ऽउत वा पृथिव्या म-
हो वा विष्ण ऽउरोरन्तरिक्षात् । उभा हि हस्ता वसुना पृणस्वा प्रयच्छ दक्षिणा-
दोत सव्याद्विष्णवे त्वेति मेथीमुपनिहन्तीतरतस्ततो यद्व च मानुषे तद्यद्वैष्णवैर्यजु-
र्भिरुपचरन्ति वैष्णवꣳ हि हविर्धानम् ॥२२॥ अथ मध्यमं छदिरुपस्पृश्य वाचयति ।
प्र तद्विष्णु स्तवते वीर्येण मृगो न भीमः कुचरो गिरिष्ठाः । यस्योरुषु त्रिषु विक्र-
मणेष्वधिक्षियन्ति भुवनानि विश्वेतीदꣳ ह्येवास्यैतच्छीर्षकपालं यदिदमुपरिष्टादधीव
ह्येतत्क्षियन्त्यन्यानि शीर्षकपालानि तस्मादाहाधिक्षियन्तीति ॥२३॥ अथ रराट्या-
मुपस्पृश्य वाचयति । विष्णो रराटमसीति ललाटꣳ ह्येवास्यैतदथोच्छ्राय्याऽ उपस्पृ-
श्य वाचयति विष्णोः श्नप्त्रे स्थ इति स्रक्के ह्येवास्यैते ऽअथ यदिदं पश्चाच्छदिर्भव-
तीदꣳ ह्येवास्यैतच्छीर्षकपालं यदिदं पश्चात् ॥२४॥ अथ लस्पूजन्या स्यून्यया प्रसी-
व्यति । विष्णोः स्यूरसीत्यथ ग्रन्थिं करोति विष्णोर्ध्रुवोऽसीति नेद्व्यवपद्याताऽइति
तं प्रकृते कर्मन्विष्यति तथो हाध्वर्युं वा यजमानं वा ग्राहो न विन्दति तन्निष्ठि-
तमभिमृशति वैष्णवमसीति वैष्णवꣳ हि हविर्धानम् ॥२५॥ ब्राह्मणम् ॥३ [५.३]॥ ॥

द्वयं वाऽअभ्युपरवाः खायन्ते । शिरो वै यज्ञस्य हविर्धानं तस्य ऽइमे शीर्षंश्च-
त्वारः कूपा इमावह द्वाविमौ द्वौ तानेवैतत्करोति तस्मादुपरवान्खनति ॥१॥ दे-
वाश्च वाऽअसुराश्च । उभये प्राजापत्याः पस्पृधिरे । ततोऽसुरा एषु लोकेषु कृत्यां
वलगान्निचख्नुरुतैवं चिद्देवानभिभवेमेति ॥२॥ तद्वै देवा अस्पृण्वत । तऽएतैः
कृत्या वलगानुदखनन्यदा वै कृत्यामुत्खनन्त्यथ सालसा मोघा भवति तथोऽए-

वैष एतद्यस्माऽअत्र कश्चिद्द्विषन्भ्रातृव्यः कृत्यां वलगान्निखनति तानेवैतदुत्किरति तस्मादुपरवान्खनति स दक्षिणस्य हविर्धानस्याधोऽधः प्रउगं खनति ॥३॥ सोऽभ्रिमादत्ते । देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे नार्यसीति समान एतस्य यजुषो बन्धुर्योषा वाऽएषा यदभ्रिस्तस्मादाह नार्यसीति ॥४॥ तान्प्रादेशमात्रं विना परिलिखति । इदमहꣳ रक्षसां ग्रीवा अपिकृन्तामीति वज्रो वाऽअभ्रिर्वज्रेणैवैतन्नाष्ट्राणाꣳ रक्षसां ग्रीवा अपिकृन्तति ॥५॥ तद्यावेतौ पूर्वौ । तयोर्दक्षिणमेवाग्रे परिलिखेदथापरयोरुत्तरमथापरयोर्दक्षिणमथ पूर्वयोरुत्तरम् ॥६॥ अथोऽइतरथाहुः । अपरयोरेवाग्रऽउत्तरं परिलिखेदथ पूर्वयोर्दक्षिणमथापरयोर्दक्षिणमथ पूर्वयोरुत्तरमित्यथोऽअपि समीच एव परिलिखेदेतं त्वेवोत्तमं परिलिखेद्य एष पूर्वयोरुत्तरो भवति ॥७॥ तान्यथापरिलिखितमेव यथापूर्वं खनति । बृहन्नसि बृहद्रवा इत्युपस्तौत्येवैनानेतन्महयत्येव यदाह बृहन्नसि बृहद्रवा इति बृहतीमिन्द्राय वाचं वदेतीन्द्रो वै यज्ञस्य देवता वैष्णवꣳ हविर्धानं तत्सेन्द्रं करोति तस्मादाह बृहतीमिन्द्राय वाचं वदेति ॥८॥ रक्षोहणं वलगहनमिति । रक्षसाꣳ ह्येते वलगानां बधाय खायन्ते वैष्णवीमिति वैष्णवी हि हविर्धाने वाक् ॥८॥ तान्यथाखातमेवोत्किरति । इदमहं तं वलगमुत्किरामि यं मे निष्ट्यो यममात्यो निचखानेति निष्ट्यो वा वाऽअमात्यो वा कृत्यां वलगान्निखनति तानेवैतदुत्किरति ॥९॥ इदमहं तं वलगमुत्किरामि । यं मे समानो यमसमानो निचखानेति समानो वा वाऽअसमानो वा कृत्यां वलगान्निखनति तानेवैतदुत्किरति ॥१०॥ इदमहं तं वलगमुत्किरामि । यं मे सबन्धुर्यमसबन्धुर्निचखानेति सबन्धुर्वा वाऽअसबन्धुर्वा कृत्यां वलगान्निखनति तानेवैतदुत्किरति ॥११॥ इदमहं तं वलगमुत्किरामि । यं मे सजातो यमसजातो निचखानेति सजातो वा वाऽअसजातो वा कृत्यां वलगान्निखनति तानेवैतदु-

त्किरत्युत्कृत्यां किरामीत्यन्तत उद्वपति तत्कृत्यामुत्किरति ॥ १२॥ तान्बाहुमात्रा-
न्खनेत् । अन्तो वा ऽ एषो ऽन्तेनैवैतत्कृत्यां मोहयति तानक्ष्णया संतृणत्ति यद्य-
क्ष्णया न शक्नुयादपि समीचस्तस्मादिमे प्राणाः परः संतृण्णाः ॥ १३॥ तान्यथाखा-
तमेवावमर्शयति । स्वराडसि सपत्नहा सत्रराडस्यभिमातिहा जनराडसि रक्षोहा
सर्वराडस्यमित्रहेत्याशीरेवैषैतस्य कर्मण आशिषमेवैतदाशास्ते ॥ १४॥ अथाध्वर्युश्च
यजमानश्च संमृशेते । पूर्वयोर्दक्षिणेऽध्वर्युर्भवत्यपरयोरुत्तरे यजमानः सोऽध्वर्युः पृ-
च्छति यजमान किमत्रेति भद्रमित्याह तन्नौ सहेत्युपांश्वध्वर्युः ॥ १६॥ अथापरयोर्द-
क्षिणेऽध्वर्युर्भवति । पूर्वयोरुत्तरे यजमानः स यजमानः पृच्छत्यध्वर्यो किमत्रेति भद्र-
मित्याह तन्म इति यजमानस्तद्यदेवं संमृशेते प्राणानेवैतत्सयुजः कुरुतस्तस्मा-
दिमे प्राणाः परः संविद्रेऽथ यत्पृष्टो भद्रमिति प्रत्याह कल्याणमेवैतन्मानुष्यै वा-
चो वदति तस्मात्पृष्टो भद्रमिति प्रत्याहाथ प्रोक्षत्येको वै प्रोक्षणस्य बन्धुर्मेध्या-
नेवैतत्करोति ॥ १७॥ स प्रोक्षति । रक्षोहणो वो वलगहन इति रक्षोहणो
ह्येते वलगहनो ह्येते प्रोक्षामि वैष्णवानिति वैष्णवा ह्येते ॥ १८॥ अथ याः प्रो-
क्षण्यः परिशिष्यन्ते । ता अवटेष्ववनयति तद्या इमाः प्राणेष्वापस्ता एवैतद्दधाति
तस्मादेषु प्राणेष्विमा आपः ॥ १९॥ सोऽवनयति । रक्षोहणो वो वलगहनोऽव-
नयामि वैष्णवानित्यथ बर्हींषि प्राचीनाग्राणि चोदीचीनाग्राणि चावस्तृणाति
यानीमानि प्राणेषु लोमानि तान्येवैतद्दधाति तस्मादेषु प्राणेष्विमानि लोमा-
नि ॥ २०॥ सोऽवस्तृणाति । रक्षोहणो वो वलगहनोऽवस्तृणामि वैष्णवानि-
त्यथ बर्हींषि तनूनीवोपरिष्टात्प्रच्छादयति केशा हैवास्यैते ॥ २१॥ अथाधिषवणे
फलकेऽउपदधाति । रक्षोहणौ वां वलगहनाऽउपदधामि वैष्णवीऽइति हनू है-
वास्यैतेऽथ पर्यूहति रक्षोहणौ वां वलगहनौ पर्यूहामि वैष्णवीऽइति दृंह-
त्येवैनेऽएतदशिथिले करोति ॥ २२॥ अथाधिषवणं परिकृत्तं भवति । सर्वरोहितं

जिह्वा ह्येवास्यैषा तद्यत्सर्वरोहितं भवति लोहिनीव हीयं जिह्वा तन्निदधाति वैष्णवमसीति वैष्णवꣳ ह्येतत् ॥२३॥ अथ ग्राव्ण उपावहरति । दन्ता ह्येवास्य ग्रावाणस्तद्यद्ग्रावभिरभिषुण्वन्ति यथा दद्भिः प्सायादेवं तत्तान्निदधाति वैष्णवा स्थेति वैष्णवा ह्येतऽएतद्ध यज्ञस्य शिरः सꣳस्कृतम् ॥२४॥ ब्राह्मणम् ॥४ [५.४]॥ ॥ पञ्चमोऽध्यायः [२०] ॥ ॥

उदरमेवास्य सदः । तस्मात्सदसि भक्षयन्ति यद्धीदं किं चाश्नन्त्युदरऽएवेदꣳ सर्वं प्रतितिष्ठत्यथ यदस्मिन्विश्वे देवा असीदंस्तस्मात्सदो नाम तऽउऽएवास्मिन्नेते ब्राह्मणा विश्वगोत्राः सीदन्त्यैन्द्रं देवतया ॥१॥ तन्मध्यऽऔदुम्बरीं मिनोति । अन्नं वाऽऊर्गुदुम्बर उदरमेवास्य सदस्तन्मध्यतोऽन्नाद्यं दधाति तस्मान्मध्यऽऔदुम्बरीं मिनोति ॥२॥ अथ य एष मध्यमः शङ्कुर्भवति । वेदेर्जघनार्धे तस्मात्प्राङ् प्रक्रामति षड्विक्रमान्दक्षिणा सप्तममपक्रामति सम्पदः कामाय तदवटं परिलिखति ॥३॥ सोऽभ्रिमादत्ते । देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे नार्यसीति समान एतस्य यजुषो बन्धुर्योषा वाऽएषा यदभ्रिस्तस्मादाह नार्यसीति ॥४॥ अथावटं परिलिखति । इदमहꣳ रक्षसां ग्रीवा अपिकृन्तामीति वज्रो वाऽअभ्रिर्वज्रेणैवैतन्नाष्ट्राणाꣳ रक्षसां ग्रीवा अपिकृन्तति ॥५॥ अथ खनति । प्राञ्चमुत्करमुत्किरति यजमानेन संमायौदुम्बरीं परिवासयति तामग्रेण प्राचीं निदधात्येतावन्मात्राणि बर्हीꣳष्युपरिष्टादधिनिदधाति ॥६॥ अथ यवमत्यः प्रोक्षण्यो भवन्ति । आपो ह वाऽओषधीनाꣳ रसस्तस्मादोषधयः केवल्यः खादिता न धिन्वन्त्योषधय उ हापाꣳ रसस्तस्मादापः पीताः केवल्यो न धिन्वन्ति यदैवोभय्यः सꣳसृष्टा भवन्त्यथैव धिन्वन्ति तर्हि हि सरसा भवन्ति सरसाभिः प्रोक्षाणीति ॥७॥ देवाश्च वाऽअसुराश्च । उभये प्राजापत्याः पस्पृधिरे ततो देवेभ्यः सर्वा एवौषधय ईयुर्यवा हैवैभ्यो नेयुः ॥८॥ तद्वै देवा अस्पृण्वत । तऽएतैः सर्वाः सपत्नानामो-

षधीरयुवत यदयुवत तस्माद्यवा नाम ॥ ९॥ ते होचुः । हन्त यः सर्वासामोष-
धीनाꣳ रसस्तं यवेषु दधामेति स यः सर्वासामोषधीनाꣳ रस आसीत्तं यवेष्वदधुस्त-
स्माद्यत्रान्या ओषधयो म्लायन्ति तदेते मोदमाना वर्धन्तऽएवꣳ ह्येषु रसमदधुस्त-
थोऽएवैष एतैः सर्वाः सपत्नानामोषधीर्युते तस्माद्यवमत्यः प्रोक्षण्यो भवन्ति ॥ १०॥
स यवानावपति । यवोऽसि यवयास्मद्द्वेषो यवयारातीरिति नात्र तिरोहितमि-
वास्त्यथ प्रोक्षत्येको वै प्रोक्षणस्य बन्धुर्मेध्यामेवैतत्करोति ॥ ११॥ स प्रोक्षति ।
दिवे त्वान्तरिक्षाय त्वा पृथिव्यै त्वेतीमानेवैतल्लोकानूर्ज्जा रसेन भाजयत्येषु लोके-
षूर्जꣳ रसं दधाति ॥ १२॥ अथ याः प्रोक्षण्यः परिशिष्यन्ते । ता अवटेऽवनयति
शुन्धन्तां लोकाः पितृषदना इति पितृदेवत्यो वै कूपः खातस्तमेवैतन्मेध्यं करो-
ति ॥ १३॥ अथ बर्हीꣳषि । प्राचीनाग्राणि चोदीचीनाग्राणि चावस्तृणाति पितृ-
षदनमसीति पितृदेवत्य वाऽअस्याऽएतद्भवति यन्निखातꣳ सा यथानिखातौषधिषु
मिता स्यादेवमेतास्वोषधिषु मिता भवति ॥ १४॥ तामुच्छ्रयति । उद्दिवꣳ स्तभाना-
न्तरिक्षं पृण दृꣳहस्व पृथिव्यामितीमानेवैतल्लोकानूर्ज्जा रसेन भाजयत्येषु लोकेषू-
र्जꣳ रसं दधाति ॥ १५॥ अथ मिनोति । द्युतानस्त्वा मारुतो मिनोत्विति यो वा
ऽअयं पवतऽएष द्युतानो मारुतस्तदेनमेतेन मिनोति मित्रावरुणौ ध्रुवेण धर्म-
णेति प्राणोदानौ वै मित्रावरुणौ तदेनं प्राणोदानाभ्यां मिनोति ॥ १६॥ अथ
पर्यूहति । ब्रह्मवनि त्वा क्षत्रवनि रायस्पोषवनि पर्यूहामीति बह्वी वै यजुःष्वा-
शीस्तद्ब्रह्म च क्षत्रं चाशास्तऽउभे वीर्ये रायस्पोषवनीति भूमा वै रायस्पोषस्तद्भू-
मानमाशास्ते ॥ १७॥ अथ पर्युषति । ब्रह्म दृꣳह क्षत्रं दृꣳहायुर्दृꣳह प्रजां दृꣳहे-
त्याशीरेवैषैतस्य कर्मण आशिषमेवैतदाशास्ते समम्भूमि पर्युषणं करोति गर्तस्य
वाऽउपरिभूम्यथैवं देवत्रा तथा हागर्तमिद्भवति ॥ १८॥ अथाप उपनिनयति । यत्र
वाऽअस्यै खनन्तः क्रूरीकुर्वन्त्यपघ्नन्ति शान्तिरापस्तदद्भिः शान्त्या शमयति तदद्भिः

संदधाति तस्मादप उपनिनयति ॥१९॥ अथैवमभिपद्य वाचयति । ध्रुवासि ध्रुवो ऽयं यजमानोऽस्मिन्नायतने प्रजया भूयादिति पशुभिरिति वैवं यं कामं कामयते सोऽस्मै कामः समृध्यते ॥२०॥ अथ स्रुवेणोपहत्याज्यम् । विष्टपमभि जुहोति घृतेन द्यावापृथिवी पूर्येथामिति तदिमे द्यावापृथिवीऽऊर्जा रसेन भाजयत्यनयो-रूर्जꣳ रसं दधाति ते रसवत्याऽउपजीवनीये इमाः प्रजा उपजीवन्ति ॥२१॥ अथ छदिरधिनिदधाति । इन्द्रस्य छदिरसीत्यैन्द्रꣳ हि सदो विश्वजनस्य छायेति विश्व-गोत्रा ह्यस्मिन्ब्राह्मणा आसते तदुभयतश्छदिषीऽउपदधात्युत्तरतस्त्रीणि परस्त्रीणि तानि नव भवन्ति त्रिवृद्धि यज्ञो नव वै त्रिवृत्तस्मान्नव भवन्ति ॥२२॥ तदुदीची-नवꣳशꣳ सदो भवति । प्राचीनवꣳशꣳ हविर्धानमेतद्धि देवानां निष्केवल्यं यद्ध-विर्धानं तस्मात्तत्र नाश्नन्ति न भक्षयन्ति निष्केवल्यꣳ ह्येतद्देवानाꣳ स यो ह त-त्राश्नीयाद्वा भक्षयेद्वा मूर्धा हास्य विपतेदथैते मिश्रे यदाग्नीध्रं च सदश्च तस्मात्तयो-रश्नन्ति तस्माद्भक्षयन्ति मिश्रे ह्येतेऽउदीची वै मनुष्याणां दिक्तस्मादुदीचीनवꣳशꣳ सदो भवति ॥२३॥ तत्परिश्रयन्ति । परि त्वा गिर्वणो गिर इमा भवन्तु विश्वतः । वृद्धायुमनु वृद्धयो जुष्टा भवन्तु जुष्टयऽइतीन्द्रो वै गिर्वा विशो गिरो विशैवैत-त्क्षत्रं परिबृꣳहति तदिदं क्षत्रमुभयतो विशा परिबृढम् ॥२४॥ अथ लस्पूजन्या स्पन्द्यया प्रसीव्यति । इन्द्रस्य स्यूरसीत्यथ ग्रन्थिं करोतीन्द्रस्य ध्रुवोऽसीति नेद्य-वपद्याताऽइति प्रकृते कर्मन्विष्यति तयो हाध्वर्युं वा यजमानं वा ग्राहो न वि-न्दति तन्निष्ठितमभिमृशत्यैन्द्रमसीत्यैन्द्रꣳ हि सदः ॥२५॥ अथ हविर्धानयोः । ज-घनार्धꣳ समन्वीक्ष्योत्तरेणाग्नीध्रं मिनोति तस्यार्धमन्तर्वेदि स्यादर्धं बहिर्वेद्यथोऽअ-पि भूयोऽर्धादन्तर्वेदि स्यात्कनीयो बहिर्वेद्यथोऽअपि सर्वमेवान्तर्वेदि स्यात्तन्नि-ष्ठितमभिमृशति वैश्वदेवमसीति ह्येनैतद्वैश्वदेवं यदस्मिन्पूर्वेद्युर्विश्वे देवा वसती-वरीषूपवसन्ति तेन वैश्वदेवम् ॥२६॥ देवा ह वै यज्ञं तन्वानाः । तेऽसुररक्षसे-

भ्य आसङ्गाद्बिभयां चक्रुस्तान्दक्षिणतोऽसुररक्षसान्यासेदुस्तान्त्सदसो जिग्युस्तेषामे-
तान्धिष्ण्यानुद्वापयां चक्रुर्य एतेऽन्तःसदसꣳ ॥२७॥ सर्वे ह स्म वाऽएते पुरा ज्वल-
न्ति । यथायमाहवनीयो यथा गार्हपत्यो यथाग्नीध्रीयस्तद्यत एनानुदवापयंस्तत
एवैतन्न ज्वलन्ति तानाग्नीध्रमभि सꣳरुरुधुस्तानप्यर्धमाग्नीध्रस्य जिग्युस्ततो विश्वे दे-
वा अमृतत्वमपाजयंस्तस्माद्विश्वदेवम् ॥२८॥ तान्देवाः प्रतिसमैन्धत । यथा प्रत्यव-
स्येत्तस्माद्दिनात्सवने-सवनऽएव प्रतिसमिन्धते तस्माद्यः समृद्धः स आग्नीध्रं कुर्या-
द्यो वै ज्ञातोऽनूचानः स समृद्धस्तस्मादग्नीधे प्रथमाय दक्षिणां नयन्त्यतो हि वि-
श्वे देवा अमृतत्वमपाजयंस्तस्माद्यं दीक्षितानामबल्यं विन्देदाग्नीध्रमेनं नयतेति ब्रू-
यात्तदनार्तं तन्नारिष्यतीति तद्यदतो विश्वे देवा अमृतत्वमपाजयंस्तस्माद्विश्वदेवम्
॥२९॥ ब्राह्मणम् ॥५ [६. १]॥ चतुर्थः प्रपाठकः ॥ कण्डिकासंख्या १३२ ॥ ॥

विजामानो हैवास्य धिष्ण्याः । इमे समञ्चा ये वै समञ्चास्ते विजामान एतऽउ
हैवास्यैतऽआत्मनः ॥१॥ दिवि वै सोम आसीत् । अथेह देवास्ते देवा अकाम-
यन्ता नः सोमो गच्छेत्तेनागतेन यजेमहीति तऽएते माये असृजन्त सुपर्णीं च कद्रूं
च वागेव सुपर्णीयं कद्रूस्ताभ्याꣳ समदं चक्रुः ॥२॥ ते हऽर्षीयमाणेऽऊचतुः ।
यतरा नौ दवीयः परापश्यादात्मानं नौ सा जयादिति तथेति सा ह कद्रूरुवाच
परेक्षस्वेति ॥३॥ सा ह सुपर्ण्युवाच । अस्य सलिलस्य पारेऽश्वः श्वेत स्थाणौ
सेवते तमहं पश्यामीति तमेव त्वं पश्यसीति तꣳ हीत्यथ ह कद्रूरुवाच तस्य
वालो न्यषञ्जि तमम्ु वातो धूनोति तमहं पश्यामीति ॥४॥ सा यत्सुपर्ण्युवाच ।
अस्य सलिलस्य पारऽइति वेदिर्वै सलिलं वेदिमेव सा तदुवाचाश्वः श्वेत स्थाणौ
सेवतऽइत्यग्निर्वाऽअश्वः श्वेतो यूप स्थाणुरथ यत्कद्रूरुवाच तस्य वालो न्यषञ्जि
तमम्ु वातो धूनोति तमहं पश्यामीति रशना हैव सा ॥५॥ सा ह सुपर्ण्युवा-
च । एहीदं पताव वेदितुं यतरा नौ जयतीति सा ह कद्रूरुवाच त्वमेव पत त्वं

वै न आख्यास्यसि यतरा नौ जयतीति ॥६॥ सा ह सुपर्णी पपात । तद्ध तथैवास यथा कद्रूरुवाच तामागतामभ्युवाद त्वमजैषीः३ऽहा३मिति त्वमिति होवाचैतद्व्याख्यानꣳ सौपर्णीकाद्रवमिति ॥७॥ ॥ शतम् ११०० ॥ ॥ सा ह कद्रूरुवाच । आत्मानं वै त्वाजैषं दिव्यसौ सोमस्तं देवेभ्य आहर तेन देवेभ्य आत्मानं निष्क्रीणीष्वेति तथेति सा छन्दाꣳसि ससृजे सा गायत्री दिवः सोममाहरत् ॥८॥ हिरण्मय्योर्ह कुश्योरन्तरवहित आस । ते ह स्म क्षुरपव्यौ निमेषं-निमेषमभिसंधत्तो दीक्षातपसौ हैव तेऽआसतुस्तमेते गन्धर्वाः सोमरक्षा जुगुपुरिमे धिष्ण्या इमा होत्राः ॥९॥ तयोरन्यतरां कुशीमाचिच्छेद । तां देवेभ्यः प्रददौ सा दीक्षा तया देवा अदीक्षन्त ॥१०॥ अथ द्वितीयां कुशीमाचिच्छेद । तां देवेभ्यः प्रददौ तत्तपस्तया देवास्तप उपायन्नुपसदस्तपो ह्युपसदः ॥११॥ खदिरेण ह सोममाचखाद । तस्मात्खदिरो यदेनेनाखिदत्तस्मात्खादिरो यूपो भवति खादिरः स्फ्योऽच्छावाकस्य हैनं गोपनायां जहार सोऽच्छावाकोऽहीयत ॥१२॥ तमिन्द्राग्नीऽअनुसमतनुताम् । प्रजानां प्रजात्यै तस्मादैन्द्राग्नोऽच्छावाकः ॥१३॥ तस्माद्दीक्षिता राजानं गोपायन्ति । नेन्नोऽपहरानिति तस्मात्तत्र सुगुप्तं चिकीर्षेद्यस्य ह गोपनायामपहरन्ति हीयते ह ॥१४॥ तस्माद्ब्रह्मचारिण आचार्यं गोपायन्ति । गृहान्पशून्नेन्नोऽपहरानिति तस्मात्तत्र सुगुप्तं चिकीर्षेद्यस्य ह गोपनायामपहरन्ति हीयते ह तेनैतेन सुपर्णी देवेभ्य आत्मानं निरक्रीणीत तस्मादाहुः पुण्यलोक ईजान इति ॥१५॥ ऋणꣳ ह वै पुरुषो जायमान एव । मृत्योरात्मना जायते स यद्यजते यथैव तत्सुपर्णी देवेभ्य आत्मानं निरक्रीणातैवमेवैष एतन्मृत्योरात्मानं निष्क्रीणीते ॥१६॥ तेन देवा अयजन्त । तमेते गन्धर्वाः सोमरक्षा अन्वाजग्मुस्तेऽन्वागत्याब्रुवन्ननु नो यज्ञऽआभजत मा नो यज्ञादन्तर्गातास्त्वेव नोऽपि यज्ञे भाग इति ॥१७॥ ते होचुः । किं नस्ततः स्यादिति यथैवास्यामुत्र गोप्तारोऽभूमैवमेवास्या-

पीह गोप्तारो भविष्याम इति ॥१८॥ तथेति देवा अब्रुवन् । सोमक्रयणा व इ-
ति तानेभ्य एतत्सोमक्रयणाननुदिशत्यथैनानब्रुवंस्तृतीयसवने वो घृताहुतिः प्रा-
प्स्यति न सौम्याप्रहुतो हि युष्मत्सोमपीथस्तेन सोमाहुतिं नार्हथेति सैनानेषा
तृतीयसवनऽएव घृताहुतिः प्राप्नोति न सौम्या यच्छालाकैर्धिष्ण्यान्व्याघारयति
॥१९॥ अथ यदग्नौ होष्यन्ति । तद्वोऽविष्यतीति स यदग्नौ जुहोति तदेनानवत्यथ
यद्वः सोमं बिभ्रत उपर्युपरि चरिष्यन्ति तद्वोऽविष्यतीति स यदेनान्त्सोमं बिभ्रत
उपर्युपरि चरन्ति तदेनानवति तस्मादध्वर्युः समया धिष्ण्यान्नातीयादध्वर्युर्हि सोमं
बिभर्ति तमेते व्यात्तेन प्रत्यासते स एतेषां व्यात्तमापद्येत तमग्निर्वाभिदह्येद्यो वा-
यं देवः पशूनामीष्टे स वा हैनमभिमन्येत तस्माद्यद्यध्वर्योः शालायामर्थः स्यादु-
त्तरेणैवाग्नीध्रीयꣳ संचरेत् ॥२०॥ ते वाऽएते । सोमस्यैव गुप्त्यै न्युप्यन्तऽआहव-
नीयः पुरस्तान्मार्जालीयो दक्षिणत आग्नीध्रीय उत्तरतोऽथ ये सदसि ते पश्चात्
॥२१॥ तेषां वाऽअर्धाननुपकिरन्ति । अर्धाननुदिशन्त्येतऽउ हैवैतद्दध्रिरेऽर्धान्न उप-
किरन्त्वर्धाननुदिशन्तु तथा यस्माल्लोकादागताः स्मो दिवस्तथा तं लोकं प्रतिप्र-
ज्ञास्यामस्तथा न जिह्मा एष्याम इति ॥२२॥ स याननुपकिरन्ति । तेनास्मिंल्लोके
प्रत्यक्षं भवन्त्यथ याननुदिशन्ति तेनामुष्मिंल्लोके प्रत्यक्षं भवन्ति ॥२३॥ ते वै द्वि-
नामानो भवन्ति । एतऽउ हैवैतद्दध्रिरे न वाऽएभिर्नामभिररात्स्म येषां नः सो-
ममपाहार्षुर्हन्त द्वितीयानि नामानि करवामहाऽइति ते द्वितीयानि नामान्यकु-
र्वत तैरराध्नुवन्यानपहृतसोमपीथात्सतोऽथ यज्ञऽआभजंस्तस्माद्द्विनामानस्तस्माद्ब्रा-
ह्मणोऽनृध्यमाने द्वितीयं नाम कुर्वीत राध्नोति हैव य एवं विद्वान्द्वितीयं नाम
कुरुते ॥२४॥ स यदग्नौ जुहोति । तद्देवेषु जुहोति तस्माद्देवाः सन्त्यथ यत्सदसि
भक्षयन्ति तन्मनुष्येषु जुहोति तस्मान्मनुष्याः सन्त्यथ यद्धविर्धानयोर्नाराशꣳसाः
सीदन्ति तत्पितृषु जुहोति तस्मात्पितरः सन्ति ॥२५॥ या वै प्रजा यज्ञेऽनन्वाभ-

क्ताः । पराभूता वै ता एवमेवैतद्या इमाः प्रजा अपराभूतास्ता यज्ञ आभजति मनुष्याननु पशवो देवाननु वयाꣳस्योषधयो वनस्पतयो यदिदं किं चैवमु तत्सर्वं यज्ञ आभक्तं ते ह स्मैत उभये देवमनुष्याः पितरः सम्पिबन्ते सैषा सम्पा ते ह स्म दृश्यमाना एव पुरा सम्पिबन्त उतैतर्ह्यदृश्यमानाः ॥२६॥ ब्राह्मणम् ॥१[६. २.]॥ ॥

सर्वं वा एषोऽभि दीक्षते । यो दीक्षते यज्ञꣳ ह्यभि दीक्षते यज्ञꣳ ह्येवेदꣳ सर्वमनु तं यज्ञꣳ सम्भृत्य यमिममभि दीक्षते सर्वमिदं विसृजते ॥१॥ यद्वैसर्जिनानि जुहोति । स यदिदꣳ सर्वं विसृजते तस्माद्वैसर्जिनानि नाम तस्माद्योऽपिव्रतः स्यात्सोऽन्वारभेत यद्यु अन्यत्र चरेन्नाद्रियेत यद्वै जुहोति तदेवेदꣳ सर्वं विसृजते ॥२॥ यद्वेव वैसर्जिनानि जुहोति । यज्ञो वै विष्णुः स देवेभ्य इमां विक्रान्तिं विचक्रमे यैषामियं विक्रान्तिरिदमेव प्रथमेन पदेन पस्पाराथेदमन्तरिक्षं द्वितीयेन दिवमुत्तमेनैतामेवैष एतस्मै विष्णुर्यज्ञो विक्रान्तिं विक्रमते यज्जुहोति तस्माद्वैसर्जिनानि जुहोति ॥३॥ सोऽपराह्णे वेदिꣳ स्तीर्त्वा । अर्धव्रतं प्रदाय सम्प्रपद्यन्त इध्ममभ्यादधत्युपयमनीरुपकल्पयन्त्याज्यमधिश्रयति स्रुचः संमार्ष्ट्युपस्थे राजानं यजमानः कुरुतेऽथ सोमक्रयण्यै पदं जघनेन गार्हपत्यं परिकिरति पदा वै प्रतितिष्ठति प्रतिष्ठित्या एव ॥४॥ तद्धैके । चतुर्धा कुर्वन्ति यत्राहवनीयमुद्धरन्ति तासूपयमनीषु चतुर्भागमत्तं चतुर्भागेणोपाञ्जन्त्येतासूपयमनीषु चतुर्भागं जघनेन गार्हपत्यं चतुर्भागं परिकिरति ॥५॥ तदु तथा न कुर्यात् । सार्धमेव परिकिरेज्जघनेन गार्हपत्यमथोत्पूयाज्यं चतुर्गृहीतं जुह्वां चोपभृति च गृह्णाति पञ्चगृहीतं पृषदाज्यं ज्योतिरसि विश्वरूपं विश्वेषां देवानाꣳ समिदिति वैश्वदेवꣳ हि पृषदाज्यं धारयन्ति स्रुचो यदा प्रदीप्त इध्मो भवति ॥६॥ अथ जुहोति । त्वꣳ सोम तनूकृद्भ्यो द्वेषोभ्योऽन्यकृतेभ्य उरु यन्तासि वरूथꣳ स्वाहेति तदेतेनैवास्यां पृथिव्यां प्र-

तिष्ठायां प्रतितिष्ठत्येतेनेमं लोकᳲ स्पृणुते ॥७॥ अथापरां द्वितीयामाहुतिं जुहोति । जुषाणोऽअप्तुराज्यस्य वेतु स्वाहेत्येष उ हैवैतदुवाच रक्षोभ्यो वै बिभेमि यथा मात्र नाष्ट्रा रक्षाᳲसि न हिनसन्नेवं मा कनीयाᳲसमेव बधात्कृत्वातिनयत स्तोकमेव स्तोको ह्यप्तुरिति तमेतत्कनीयाᳲसमेव बधात्कृत्वात्यनयत्स्तोकमेव स्तोको ह्यप्सू रक्षोभ्यो भीषा तस्मादपरां द्वितीयामाहुतिं जुहोति ॥८॥ उद्यच्छन्तीध्मम् । उपयच्छन्त्युपयमनीरथाहाग्नये प्रह्रियमाणायानुब्रूहि सोमाय प्रणीयमानायेति वाग्नये प्रह्रियमाणायानुब्रूहीति त्वेव ब्रूयात् ॥९॥ आददते ग्रावाणः । द्रोणकलशं वायव्यानीध्मं कार्ष्मर्यमयान्परिधीनाश्ववालं प्रस्तरमैक्षव्यौ विधृती तद्बर्हिरुपसंनद्धं भवति वपाश्रपण्यौ रशनेऽअरणीऽअधिमन्थनः शकलो वृषणौ तत्समादाय प्राञ्च आयन्ति स एष ऊर्ध्वो यज्ञ एति ॥१०॥ तदायत्सु वाचयति । अग्ने नय सुपथा रायेऽअस्मान्विश्वानि देव वयुनानि विद्वान् । युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नमउक्तिं विधेमेत्यग्निमेवैतत्पुरस्तात्करोत्यग्निः पुरस्तान्नाष्ट्रा रक्षाᳲस्यपघ्नन्नेत्यथाभयेनानाष्ट्रेण हरन्ति तेऽआयन्त्यागच्छन्त्याग्नीध्रं तमाग्नीध्रे निदधाति ॥११॥ स निहिते जुहोति । अयं नोऽअग्निर्वरिवस्कृणोत्वयं मृधः पुर एतु प्रभिन्दन् । अयं वाजाञ्जयतु वाजसातावयᳲ शत्रूञ्जयतु जर्हृषाणः स्वाहेति तदेतेनैवैतस्मिन्नन्तरिक्षे प्रतिष्ठायां प्रतितिष्ठत्येतेनेतं लोकᳲ स्पृणुते ॥१२॥ तदेव निदधति ग्राव्णः । द्रोणकलशं वायव्यान्यथेतरमादायायन्ति तदुत्तरेणाहवनीयमुपसादयन्ति ॥१३॥ प्रोक्षणीरध्वर्युरादत्ते । स इध्ममेवाग्रे प्रोक्षत्यथ वेदिमथास्मै बर्हिः प्रयच्छन्ति तत्पुरस्ताद्ग्रन्थ्यासादयति तत्प्रोक्ष्योपनिनीय विस्रᳲस्य ग्रन्थिमाश्ववालः प्रस्तर उपसंनद्धो भवति तं गृह्णाति गृहीत्वा प्रस्तरमेकवृद्बर्हि स्तृणाति स्तीर्त्वा बर्हिः कार्ष्मर्यमयान्परिधीन्परिदधाति परिधाय परिधीन्त्समिधावभ्यादधात्यभ्याधाय समिधौ ॥१४॥ अथ जुहोति । उरु विष्णो विक्रमस्वोरु क्षयाय न-

स्कृधि। घृतं घृतयोने पिब प्र-प्र यज्ञपतिं तिर स्वाहेति तदेतेनैवैतस्यां दिवि प्रतिष्ठायां प्रतितिष्ठत्येतेनैनं लोकꣳ स्पृणुत यदेतया जुहोति ॥१५॥ यद्वेव वैष्णव्यर्चा जुहोति। कनीयाꣳस वाऽएनमेतद्धात्कृत्वात्यनैषु स्तोकमेव स्तोको ह्यपुस्तमेतदभय प्राप्य य एवैष तं करोति यज्ञमेव यज्ञो हि विष्णुस्तस्माद्वैष्णव्यर्चा जुहोति ॥१६॥ अथासाद्य स्रुचः। अप उपस्पृश्य राजान प्रपादयति तद्यदासाद्य स्रुचोऽप उपस्पृश्य राजानं प्रपादयति वज्रो वाऽआज्यꣳ रेतः सोमो नेद्वज्रेणाज्येन रेतः सोमꣳ हिनसानीति तस्मादासाद्य स्रुचोऽप उपस्पृश्य राजान प्रपादयति ॥१७॥ स दक्षिणस्य हविर्धानस्य नीडे कृष्णाजिनमास्तृणाति। तदेनमासादयति देव सवितरेष ते सोमस्तꣳ रक्षस्व मा त्वा दभन्निति तदेनं देवायैव सवित्रे परिददाति गुप्त्यै ॥१८॥ अथानुसृज्योपतिष्ठते। एतत्त्वं देव सोम देवो देवाꣳ२ऽउपागा इदमहं मनुष्यान्त्सह रायस्पोषेणेत्यग्नीषोमौ वाऽएतमन्तर्जम्भऽआदधाते यो दीक्षतेऽआग्नावैष्णवꣳ ह्यदो दीक्षणीयꣳ हविर्भवति यो वै विष्णुः सोमः स हविर्वाऽएष देवानां भवति यो दीक्षते तदेनमन्तर्जम्भऽआदधाते तत्प्रत्यक्षꣳ सोमान्निर्मुच्यते यदाहैतत्त्वं देव सोम देवो देवाꣳ२॥ऽउपागा इदमहं मनुष्यान्त्सह रायस्पोषेणेति भूमा वै रायस्पोषः सह भूम्नेत्येवैतदाह ॥१९॥ अथोपनिष्क्रामति। स्वाहा निर्वरुणस्य पाशान्मुच्यऽइति वरुणपाशे वाऽएषोऽन्तर्भवति योऽन्यस्यासंस्तत्प्रत्यक्षं वरुणपाशान्निर्मुच्यते यदाह स्वाहा निर्वरुणस्य पाशान्मच्यऽइति ॥२०॥ अथेत्याहवनीये समिधमभ्यादधाति। अग्ने व्रतपास्त्वे व्रतपा इत्यग्निर्हि देवानां व्रतपतिस्तस्मादाहाग्ने व्रतपास्त्वे व्रतपा इति या तव तनूर्मय्यभूदेषा सा त्वयि यो मम तनूस्त्वय्यभूदियꣳ सा मयि। यथायथं नौ व्रतपते व्रतान्यनु मे दीक्षां दीक्षापतिरमꣳस्तानु तपस्तपस्पतिरिति तत्प्रत्यक्षमग्नेर्निर्मुच्यते स स्वेन सतात्मना यजते तस्मादस्यात्राश्नन्ति मानुषो हि भवति तस्मादस्यात्र नाम गृह्णन्ति

मानुषो हि भवत्यथ यत्पुरा नाश्नन्ति यथा हविषोऽहुतस्य नाश्नीयादेवं तत्तस्माद्दीक्षितस्य नाश्नीयादथात्राङ्गुलीर्विसृजते ॥२१॥ ब्राह्मणम् ॥२[६.३]॥ ॥

यूपं व्रश्च्यन्वैष्णव्यर्चा जुहोति । वैष्णवो हि यूपस्तस्माद्वैष्णव्यर्चा जुहोति ॥१॥ यद्वेव वैष्णव्या जुहोति । यज्ञो वै विष्णुर्यज्ञेनैवैतद्यूपमच्छैति तस्माद्वैष्णव्यऽर्चा जुहोति ॥२॥ स यदि स्रुचा जुहोति । चतुर्गृहीतमाज्यं गृहीत्वा जुहोति यद्यु स्रुवेण स्रुवेणैवोपहत्य जुहोत्युरु विष्णो विक्रमस्वोरु क्षयाय नस्कृधि । घृतं घृतयोने पिब प्र प्र यज्ञपतिं तिर स्वाहेति ॥३॥ यदाज्यं परिशिष्टं भवति । तदादत्ते यत्तक्ष्णः शस्त्रं भवति तत्तदादत्ते तऽआयन्ति स यं यूपं जोषयन्ते ॥४॥ तमेवमभिमृश्य जपति । पश्चाद्धैव प्राङ् तिष्ठन्नभिमन्त्रयतेऽत्यन्याँ२ऽअगां नान्याँ२ऽउपागामित्यति ह्यन्यानेति नान्यानुपैति तस्मादाहात्यन्याँ२ऽअगां नान्याँ२ऽउपागामिति ॥५॥ अर्वाक्त्वा परेभ्योऽविदं परोऽवरेभ्य इति । अर्वाग्घ्येनं परेभ्यो वृश्चति यऽएतस्मात्पराञ्चो भवन्ति परोऽवरेभ्य इति परो ह्येनमवरेभ्यो वृश्चति यऽएतस्मादर्वाञ्चो भवन्ति तस्मादाहार्वाक्त्वा परेभ्योऽविदं परोऽवरेभ्य इति ॥६॥ तं त्वा जुषामहे देव वनस्पते देवयज्यायाऽइति । तद्यथा बहूनां मध्यात्साधवे कर्मणे जुषेत स रातमनास्तस्मै कर्मणे स्यादेवमेवैनमेतद्बहूनां मध्यात्साधवे कर्मणे जुषते स रातमना व्रश्चनाय भवति ॥७॥ देवास्त्वा देवयज्यायै जुषन्तामिति । तद्धि समृद्धं यं देवाः साधवे कर्मणे जुषान्तै तस्मादाह देवास्त्वा देवयज्यायै जुषन्तामिति ॥८॥ अथ स्रुवेणोपस्पृशति । विष्णवे त्वेति वैष्णवो हि यूपो यज्ञो वै विष्णुर्यज्ञाय ह्येनं वृश्चति तस्मादाह विष्णवे त्वेति ॥९॥ अथ दर्भतरुणकमन्तर्दधाति । ओषधे त्रायस्वेति वज्रो वै परशुस्तथो हैनमेष वज्रः परशुर्न हिनस्त्यथ परशुना प्रहरति स्वधिते मैनꣳ हिꣳसीरिति वज्रो वै परशुस्तथो हैनमेष वज्रः परशुर्न हिनस्ति ॥१०॥ स यं प्रथमꣳ शकलमपछिनत्ति । तमादत्ते

तं वा ऽअनक्षस्तम्भं वृश्चेदुत ह्येनमनसा वहन्ति तथानो न प्रतिबाधते ॥११॥
तं प्राञ्चं पातयेत् । प्राची हि देवानां दिगथो ऽउदञ्चमुदीची हि मनुष्याणां दिग-
थो प्रत्यञ्चं दक्षिणायै त्वेवैनं दिशः परिबिबाधिषेतैषा वै दिक् पितॄणां तस्मादेनं
दक्षिणायै दिशः परिबिबाधिषेत ॥१२॥ तं प्रच्यवमानमनुमन्त्रयते । द्यां मा ले-
खीरन्तरिक्षं मा हिꣳसीः पृथिव्या सम्भवेति वज्रो वा ऽएष भवति यं यूपाय वृश्च-
न्ति तस्माद्वज्रात्प्रच्यवमानादिमे लोकाः सꣳरेजन्ते तदेभ्य एवैनमेतल्लोकेभ्यः शम-
यति तथेमाँल्लोकाञ्छान्तो न हिनस्ति ॥१३॥ स यदाह । द्यां मा लेखीरिति दि-
वं मा हिꣳसीरित्येवैतदाहान्तरिक्षं मा हिꣳसीरिति नात्र तिरोहितमिवास्ति पृ-
थिव्या सम्भवेति पृथिव्या संज्ञानीष्वेत्येवैतदाहायꣳ हि त्वा स्वधितिस्तेतिजानः
प्रणिनाय महते सौभगायेत्येष ह्येनꣳ स्वधितिस्तेतिजानः प्रणयति ॥१४॥ अथा-
व्रश्चनमभिजुहोति । नेदतो नाष्ट्रा रक्षाꣳस्यन्वत्तिष्ठानिति वज्रो वा ऽआज्यं तद्वज्रे-
णैवैतन्नाष्ट्रा रक्षाꣳस्यवबाधते तथातो नाष्ट्रा रक्षाꣳसि नान्वत्तिष्ठन्त्यथो रेतो वा
ऽआज्यं तद्वनस्पतिष्वेवैतद्रेतो दधाति तस्माद्रेतस आव्रश्चनाद्वनस्पतयो ऽनु प्रजाय-
न्ते ॥१५॥ स जुहोति । अतस्त्वं देव वनस्पते शतवल्शो विरोह सहस्रवल्शा
वि वयꣳ रुहेमेति नात्र तिरोहितमिवास्ति ॥१६॥ तं परिवासयति । स याव-
न्तमेवाग्रे परिवासयेत्तावान्त्स्यात् ॥१७॥ पञ्चारत्निं परिवासयेत् । पाङ्क्तो यज्ञः पा-
ङ्क्तः पशुः पञ्च ऽर्तवः संवत्सरस्य तस्मात्पञ्चारत्निं परिवासयेत् ॥१८॥ षडरत्निं प-
रिवासयेत् । षड्वा ऽऋतवः संवत्सरस्य संवत्सरो वज्रो वज्रो यूपस्तस्मात्षडरत्निं
परिवासयेत् ॥१९॥ अष्टारत्निं परिवासयेत् । अष्टाक्षरा वै गायत्री पूर्वार्धो वै य-
ज्ञस्य गायत्री पूर्वार्ध एष यज्ञस्य तस्मादष्टारत्निं परिवासयेत् ॥२०॥ नवारत्निं प-
रिवासयेत् । त्रिवृद्धि यज्ञो नव वै त्रिवृत्तस्मान्नवारत्निं परिवासयेत् ॥२१॥ एका-
दशारत्निं परिवासयेत् । एकादशाक्षरा वै त्रिष्टुब्वज्रस्त्रिष्टुब्वज्रो यूपस्तस्मादेकाद-

शारत्निं परिवासयेत् ॥२२॥ द्वादशारत्निं परिवासयेत् । द्वादश वै मासाः संवत्सरस्य संवत्सरो वज्रो वज्रो यूपस्तस्माद्द्वादशारत्निं परिवासयेत् ॥२३॥ त्रयोदशारत्निं परिवासयेत् । त्रयोदश वै मासाः संवत्सरस्य संवत्सरो वज्रो वज्रो यूपस्तस्मात्त्रयोदशारत्निं परिवासयेत् ॥२४॥ पञ्चदशारत्निं परिवासयेत् । पञ्चदशो वै वज्रो वज्रो यूपस्तस्मात्पञ्चदशारत्निं परिवासयेत् ॥२५॥ सप्तदशारत्निर्वाजपेययूपः । अपरिमित एव स्यादपरिमितेन वा ऽएतेन वज्रेण देवा अपरिमितमजयंस्तथो ऽएवैष एतेन वज्रेणापरिमितेनैवापरिमितं जयति तस्मादपरिमित एव स्यात् ॥२६॥ स वा ऽअष्टाश्रिर्भवति । अष्टाक्षरा वै गायत्री पूर्वार्धो वै यज्ञस्य गायत्री पूर्वार्ध एष यज्ञस्य तस्मादष्टाश्रिर्भवति ॥२७॥ ब्राह्मणम् ॥३ [६.४]॥ षष्ठोऽध्यायः [२१.] ॥ ॥

अभ्रिमादत्ते । देवस्य त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे नार्यसीति समान एतस्य यजुषो बन्धुर्योषो वा ऽएषा यदभ्रिस्तस्मादाह नार्यसीति ॥१॥ अथावटं परिलिखति । इदमहꣳ रक्षसां ग्रीवा अपिकृन्तामीति वज्रो वा ऽअभ्रिर्वज्रेणैवैतन्नाष्ट्राणाꣳ रक्षसां ग्रीवा अपिकृन्तति ॥२॥ अथ खनति । प्राञ्चमुत्करमुत्किरत्युपरेण संमायावटं खनति तदग्रेण प्राञ्चं यूपं निदधात्येतावन्मात्राणि बर्हीꣳष्युपरिष्टादधिनिदधाति तदेवोपरिष्टाद्यूपशकलमधिनिदधाति पुरस्तात्पार्श्वतश्चषालमुपनिदधात्यथ यवमत्यः प्रोक्षण्यो भवन्ति सोऽसावेव बन्धुः ॥३॥ स यवानावपति । यवोऽसि यवयास्मद्द्वेषो यवयारातीरिति नात्र तिरोहितमिवास्त्यथ प्रोक्षत्येको वै प्रोक्षणस्य बन्धुर्मेध्यमेवैतत्करोति ॥४॥ स प्रोक्षति । दिवे त्वान्तरिक्षाय त्वा पृथिव्यै त्वेति वज्रो वै यूप एषां लोकानामभिगुप्त्या ऽएषां त्वा लोकानामभिगुप्त्यै प्रोक्षामीत्येवैतदाह ॥५॥ अथ याः प्रोक्षण्यः परिशिष्यन्ते । ता अवटे ऽवनयति शुन्धन्तां लोकाः पितृषदना इति पितृदेवत्यो वै कूपः खा-

तस्तमेवैतन्मेध्यं करोति ॥ ६॥ अथ बर्हीꣳषि । प्राचीनाग्राणि चोदीचीनाग्राणि चावस्तृणाति पितृषदनमसीति पितृदेवत्यं वाऽअस्यैतद्भवति यन्निखातꣳ स यथानिखात ओषधिषु मितः स्यादेवमेतास्वोषधिषु मितो भवति ॥ ७॥ अथ यूपशकलं प्रास्यति । तेजो ह वाऽएतद्वनस्पतीनां यद्बाह्याशकलस्तस्माद्यदा बाह्याशकलमपतक्ष्णुवन्त्यथ शुष्यन्ति तेजो ह्येषामेतत्तस्माद्यूपशकलं प्रास्यति सतेजसं मिनवानीति तद्यदेष एव भवति नान्य एष हि यजुष्कृतो मेध्यस्तस्माद्यूपशकलं प्रास्यति ॥ ८॥ स प्रास्यति । अग्रेणीरसि स्वावेश उन्नेतॄणामिति पुरस्ताद्वाऽअस्मादेषोऽपच्छिद्यते तस्मादाहाग्रेणीरसि स्वावेश उन्नेतॄणामित्येतस्य वित्तादधि त्वा स्थास्यतीत्यधि ह्येनं तिष्ठति तस्मादाहैतस्य वित्तादधि त्वा स्थास्यतीति ॥ ९॥ अथ स्रुवेणोपहत्याज्यम् । अवटमभिजुहोति नेदधस्तान्नाष्ट्रा रक्षाꣳस्युपोत्तिष्ठानिति वज्रो वाऽआज्यं तद्वज्रेणैवैतन्नाष्ट्रा रक्षाꣳस्यवबाधते तथाधस्तान्नाष्ट्रा रक्षाꣳसि नोपोत्तिष्ठन्त्यथ पुरस्तात्परीत्योदङ्ङासीनो यूपमनक्ति स आह यूपायाज्यमानायानुब्रूहीति ॥ १०॥ सोऽनक्ति । देवस्त्वा सविता मध्वानक्त्विति सविता वै देवानां प्रसविता यजमानो वाऽएष निदानेन यद्यूपः सर्वं वाऽइदं मधु यदिदं किं च तदेनमनेन सर्वेण सꣳस्पर्शयति तदस्मै सविता प्रसविता प्रसौति तस्मादाह देवस्त्वा सविता मध्वानक्त्विति ॥ ११॥ अथ चषालमुभयतः प्रत्यज्य प्रतिमुञ्चति । सुपिप्पलाभ्यस्त्वौषधीभ्य इति पिप्पलꣳ ह्येवास्यैतद्यन्मध्ये संगृहीतमिव भवति तिर्यग्वाऽइदं वृक्षे पिप्पलमाहितꣳ स यदेवेदꣳ संबन्धनं चान्तरोपेनितमिव तदेवैतत्करोति तस्मान्मध्ये संगृहीतमिव भवति ॥ १२॥ आन्तमग्निष्ठामनक्ति । यजमानो वाऽअग्निष्ठा रस आज्यꣳ रसेनैवैतद्यजमानमनक्ति तस्मादान्तमग्निष्ठामनक्त्यथ परिव्ययणं प्रतिसमन्तं परिमृशत्यथाहोच्छ्रीयमाणायानुब्रूहीति ॥ १३॥ स उच्छ्रयति । द्यामग्रेणास्पृक्ष आन्तरिक्षं मध्येनाप्राः पृथिवीमुपरेणादृꣳहीरिति वज्रो वै यूप एषां

लोकानामभिजित्यै तेन वज्रेणेमांल्लोकान्त्स्पृणुतऽएभ्यो लोकेभ्यः सपत्नान्निर्भजति ॥१४॥ अथ मिनोति । या ते धामान्युश्मसि गमध्यै यत्र गावो भूरिशृङ्गा अयासः । अत्राह तदुरुगायस्य विष्णोः परमं पदमवभारि भूरीत्येतया त्रिष्टुभा मिनोति वज्रस्त्रिष्टुब्वज्रो यूपस्तस्मात्त्रिष्टुभा मिनोति ॥१५॥ सम्प्रत्यग्निमग्निष्ठां मिनोति । यजमानो वाऽअग्निष्ठाग्निरु वै यज्ञः स यदग्नेरग्निष्ठाꣳ ह्वलयेद्ध्वलेद्ध यज्ञाद्यजमानस्तस्मात्सम्प्रत्यग्निमग्निष्ठां मिनोत्यथ पर्यूहत्यथ पर्यृषत्यथाप उपनिनयति ॥१६॥ अथैवमभिपद्य वाचयति । विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे । इन्द्रस्य युज्यः सखेति वज्रं वाऽएष प्राहार्षीद्यो यूपमुदशिश्रियद्विष्णोर्विजितिं पश्यतेत्येवैतदाह यदाह विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे । इन्द्रस्य युज्यः सखेतीन्द्रो वै यज्ञस्य देवता वैष्णवो यूपस्तꣳ सेन्द्रं करोति तस्मादाहेन्द्रस्य युज्यः सखेति ॥१७॥ अथ चषालमुदीक्षते । तद्विष्णोः परमं पदꣳ सदा पश्यन्ति सूरयः । दिवीव चक्षुराततमिति वज्रं वाऽएष प्राहार्षीद्यो यूपमुदशिश्रियत्तां विष्णोर्विजितिं पश्यतेत्येवैतदाह यदाह तद्विष्णोः परमं पदꣳ सदा पश्यन्ति सूरयः । दिवीव चक्षुराततमिति ॥१८॥ अथ परिव्ययति । अनग्नताया न्वेव परिव्ययति तस्मादत्रेव परिव्ययत्यत्रेव ह्रीदं वासो भवत्यन्नाद्यमेवास्मिन्नेतद्दधात्यत्रेव ह्रीदमन्नं प्रतितिष्ठति तस्मादत्रेव परिव्ययति ॥१९॥ त्रिवृता परिव्ययति । त्रिवृद्ध्यन्नं पशवो ह्यन्नं पिता माता यज्जायते तत्तृतीयं तस्मात्त्रिवृता परिव्ययति ॥२०॥ स परिव्ययति । परिवीरसि परि त्वा दैवीर्विशो व्ययन्तां परीमं यजमानꣳ रायो मनुष्याणामिति तद्यजमानायाशिषमाशास्ते यदाह परीमं यजमानꣳ रायो मनुष्याणामिति ॥२१॥ अथ यूपशकलमवगूहति । दिवः सूनुरसीति प्रजा हैवास्यैषा तस्माद्यदि यूपैकादशिनी स्यात्स्वꣳ-स्वमेवावगूहेदविपर्यासं तस्य हैषामुग्धानुव्रता प्रजा जायतेऽथ यो विपर्यासमवगूहति न स्वꣳ-स्वं तस्य हैषा मुग्धाननुव्रता प्रजा

जायते तस्मादु स्वरुꣳ-स्वमेवावगूहेदविपर्यासꣳ ॥ २२ ॥ स्वर्गस्यो ह्येष लोकस्य स-
मारोहणः क्रियते । यद्यूपशकल इयꣳ रशना रशनायै यूपशकलो यूपशकला-
च्चषालं चषालात्स्वर्गं लोकꣳ समश्नुते ॥ २३ ॥ अथ यस्मात्स्वरुर्नाम । एतस्माद्वा
ऽएषोऽपच्छिद्यते तस्यैतत्स्वमेवारुर्भवति तस्मात्स्वरुर्नाम ॥ २४ ॥ तस्य यन्निखा-
तम् । तेन पितृलोकं जयत्यथ यदूर्ध्वं निखातादा रशनायै तेन मनुष्यलोकं जय-
त्यथ यदूर्ध्वꣳ रशनाया आ चषालात्तेन देवलोकं जयत्यथ यदूर्ध्वं चषालाद्व्यङ्गुलं
वा त्र्यङ्गुलं वा साध्या इति देवास्तेन तेषां लोकं जयति सलोको वै साध्यैर्दे-
वैर्भवति य एवमेतद्वेद ॥ २५ ॥ तं वै पूर्वार्धे मिनोति । वज्रो वै यूपो वज्रो दण्डः
पूर्वार्धं वै दण्डस्याभिपद्य प्रहरति पूर्वार्ध एष यज्ञस्य तस्मात्पूर्वार्धे मिनोति ॥ २६ ॥
यज्ञेन वै देवाः । इमां जितिं जिग्युर्यैषामियं जितिस्ते होचुः कथं न इदं मनुष्यै-
रनभ्यारोह्यꣳ स्यादिति ते यज्ञस्य रसं धीत्वा यथा मधु मधुकृतो निर्धयेयुर्विदुह्य
यज्ञं यूपेन योपयित्वा तिरोऽभवन्नथ यदेनेनायोपयंस्तस्माद्यूपो नाम पुरस्ताद्धि प्र-
ज्ञा पुरस्तान्मनोजवस्तस्मात्पूर्वार्धे मिनोति ॥ २७ ॥ स वाऽअष्टाश्रिर्भवति । अष्टा-
क्षरा वै गायत्री पूर्वार्धो वै यज्ञस्य गायत्री पूर्वार्ध एष यज्ञस्य तस्मादष्टाश्रिर्भव-
ति ॥ २८ ॥ तꣳ ह स्मैतं देवा अनुप्रहरन्ति । यथेदमप्येतर्ह्येकेऽनुप्रहरन्तीति देवा
अकुर्वन्निति ततो रक्षाꣳसि यज्ञमनूदपिबन्त ॥ २९ ॥ ते देवा अध्वर्युमब्रुवन् । यूप-
शकलमेव जुहुधि तद्ध्येष स्वगाकृतो भविष्यति तथो रक्षाꣳसि यज्ञं नानूत्पा-
स्यन्तेऽयं वै वज्र उद्यत इति ॥ ३० ॥ सोऽध्वर्युः । यूपशकलमेवाजुहोत्तद्ध्येष स्व-
गाकृत आसीत्तथो रक्षाꣳसि यज्ञं नानूदपिबन्तायं वै वज्र उद्यत इति ॥ ३१ ॥ त-
थोऽएवैष एतत् । यूपशकलमेव जुहोति तद्ध्येष स्वगाकृतो भवति तथो रक्षाꣳ-
सि यज्ञं नानूत्पिबन्तेऽयं वै वज्र उद्यत इति स जुहोति दिवं ते धूमो गच्छतु
स्वर्ज्योतिः पृथिवीं भस्मनापृण स्वाहेति ॥ ३२ ॥ ब्राह्मणम् ॥ ४ [७. १.] ॥

यावतो वै वेदिस्तावती पृथिवी । वज्रा वै यूपास्तदिमामेवैतत्पृथिवीमेतैर्वज्रैः स्पृणुतेऽस्यै सपत्नान्निर्भजति तस्माद्यूपैकादशिनी भवति द्वादश उपशयो भवति वितष्टस्तं दक्षिणत उपनिदधाति तद्यद्द्वादश उपशयो भवति ॥१॥ ॥ शतम् २००० ॥ ॥ देवा ह वै यज्ञं तन्वानाः । तेऽसुररक्षसेभ्य आसङ्गाद्बिभयां चक्रुस्तद्य एतऽउच्छ्रिता यथेषुरस्ता तया वै स्तृणुते वा न वा स्तृणुते यथा दण्डः प्रहृतस्तेन वै स्तृणुते वा न वा स्तृणुतेऽथ य एष द्वादश उपशयो भवति यथेषुरायतानस्ता यथोद्यतमप्रहृतमेवमेष वज्र उद्यतो दक्षिणतो नाष्ट्राणां रक्षसामपहत्यै तस्माद्द्वादश उपशयो भवति ॥२॥ तं निदधाति । एष ते पृथिव्यां लोक आरण्यस्ते पशुरिति पशुश्च वै यूपश्च तदस्माऽआरण्यमेव पशूनामनुदिशति तेनो ऽएष पशुमान्भवति तद्धयं यूपैकादशिन्यै संमयनमाहुः श्वःसुत्यायै ह न्वेवैके संमिन्वन्ति प्रकुब्रतायै चैव श्वःसुत्यायै यूपं मिन्वन्तीत्यु च ॥३॥ तदु तथा न कुर्यात् । अग्निष्ठमेवोच्छ्रयेदिदं वै यूपमुच्छ्रित्याध्वर्युरा परिव्ययणान्नान्वर्जत्यपरिवीता वाऽएतऽएतां रात्रिं वसन्ति सा न्वेव परिचक्षा पशवे वै यूपमुच्छ्रयन्ति प्रातर्वै पशूनालभन्ते तस्मादु प्रातरेवोच्छ्रयेत् ॥४॥ स य उत्तरोऽग्निष्ठात्स्यात् । तमेवाग्रऽउच्छ्रयेदथ दक्षिणमथोत्तरं दक्षिणार्ध्यमुत्तमं तथोदीची भवति ॥५॥ अथोऽइतरऽआहुः । दक्षिणमेवाग्रेऽग्निष्ठादुच्छ्रयेदथोत्तरमथ दक्षिणमुत्तरार्ध्यमुत्तमं तथो ह्यस्योदगेव कर्मानुसंतिष्ठतऽइति ॥६॥ स यो वर्षिष्ठः स दक्षिणार्ध्यः स्यात् । अथ ह्रसीयानथ ह्रसीयानुत्तरार्ध्यो ह्रसिष्ठस्तथोदीची भवति ॥७॥ अथ पत्नीभ्यः पत्नीयूपमुच्छ्रयन्ति । सर्वत्वाय न्वेव पत्नीयूप उच्छ्रयते तद्वाष्ट्रं पशुमालभते त्वष्टा वै सिक्तꣳ रेतो विकरोति तदेष एवैतत्सिक्तꣳ रेतो विकरोति मुष्करो भवत्येष वै प्रजननायता यन्मुष्करस्तस्मान्मुष्करो भवति तं न सꣳस्थापयेत्पर्यग्निकृतमेवोत्सृ-

नेत्स यत्सꣳस्थापयेत्प्रजायै हान्तमियात्तत्प्रजामुत्सृजति तस्मान्न सꣳस्थापयेत्पर्यग्नि-
कृतमेवोत्सृजेत् ॥ ८ ॥ ब्राह्मणम् ॥ ५ [७. २] ॥ ॥

पशुश्च वै यूपश्च । न वा ऽऋते यूपात्पशुमालभन्ते कदा चन तद्यत्तथा न ह वा ऽएतस्मा ऽअग्रे पशवश्चक्षमिरे यदन्नमभविष्यन्यथेदमन्नं भूता यथा हैवायं द्विपात्पुरुष ऽउच्छ्रित एवꣳ हैव द्विपाद ऽउच्छ्रिताश्चेरुः ॥ १ ॥ ततो देवा ऽएतं वज्रं ददृशुः । यद्यूपं तमुच्छिश्रियुस्तस्माद्भीषा प्राव्लीयन्त ततश्चतुष्पादा ऽअभवंस्ततोऽन्नमभवन्यथेदमन्नं भूता एतस्मै हि वा ऽएते ऽतिष्ठन्त तस्माद्यूप ऽएव पशुमालभन्ते न ऽर्ते यूपात्कदा चन ॥ २ ॥ अथोपाकृत्य पशुम् । अग्निं मथित्वा नियुनक्ति तद्यत्तथा न ह वा ऽएतस्मा ऽअग्रे पशवश्चक्षमिरे यद्धविरभविष्यन्यथैनानिदꣳ हविर्भूतानग्नौ जुह्वति तान्देवा ऽउपनिरुरुधुस्त ऽउपनिरुद्धा नोपाविवुः ॥ ३ ॥ ते होचुः । न वा ऽइमे ऽस्य यामं विदुर्यदग्नौ हविर्जुह्वति नैतां प्रतिष्ठामुपरुध्यैव पशूनग्निं मथित्वाग्नावग्निं जुहवाम ते वेदिष्यन्त्येष वै किल हविषो याम एषा प्रतिष्ठाग्नौ वै किल हविर्जुह्वतीति ततोऽभ्यवैष्यन्ति ततो रातमनस ऽआलम्भाय भविष्यन्तीति ॥ ४ ॥ त ऽउपरुध्यैव पशून् । अग्निं मथित्वाग्नावग्निमजुहवुस्ते ऽविदुरेष वै किल हविषो याम एषा प्रतिष्ठाग्नौ वै किल हविर्जुह्वतीति ततोऽभ्यवायंस्ततो रातमनस ऽआलम्भायाभवन् ॥ ५ ॥ तथो ऽएवैष एतत् । उपरुध्यैव पशुमग्निं मथित्वाग्नावग्निं जुहोति स वेदैष वै किल हविषो याम एषा प्रतिष्ठाग्नौ वै किल हविर्जुह्वतीति ततोऽभ्यवैति ततो रातमना ऽआलम्भाय भवति तस्मादुपाकृत्य पशुमग्निं मथित्वा नियुनक्ति ॥ ६ ॥ तदाहुः । नोपाकुर्यान्नाग्निं मन्थेद्रशनामिवादायाञ्जसोपपरेत्याभिधाय नियुञ्ज्यादिति तदु तथा न कुर्याद्यथाधर्मं तिरश्चया चिकीर्षेदेवं तत्तस्मादेतदेवानुपरीयात् ॥ ७ ॥ अथ तृणमादायोपाकरोति । द्वितीयवान्निरुणधा ऽइति द्वितीयवान्हि वीर्यवान् ॥ ८ ॥ स तृणमादत्ते । उपावीरसीत्युप हि द्वितीयोऽवति

तस्मादाहोपावीरसीत्युप देवान्दैवीर्विशः प्रागुरिति दैव्यो वाऽएता विशो यत्पशवोऽस्थिषत देवेभ्य इत्येवैतदाह यदाहोप देवान्दैवीर्विशः प्रागुरिति ॥ ९॥ उशिजो वह्नितमानिति । विद्वाꣳसो हि देवास्तस्मादाहोशिजो वह्नितमानिति ॥१०॥ देव त्वष्टर्वसु रमेति । त्वष्टा वै पशूनामीष्टे पशवो वसु तानेतद्देवा अतिष्ठमानांस्त्वष्टारमब्रुवन्नुपनिमदेति यदाह देव त्वष्टर्वसु रमेति ॥११॥ हव्या ते स्वदन्तामिति । यदा वाऽएतऽएतस्माऽअधियन्त यद्धविरभविष्यंस्तस्मादाह हव्या ते स्वदन्तामिति ॥१२॥ रेवती रमधमिति । रेवन्तो हि पशवस्तस्मादाह रेवती रमधमिति बृहस्पते धारया वसूनीति ब्रह्म वै बृहस्पतिः पशवो वसु तानेतद्देवा अतिष्ठमानान्ब्रह्मणैव परस्तात्पर्यदधुस्तन्नात्यायंस्तथोऽएवैनानेष एतद्ब्रह्मणैव परस्तात्परिदधाति तन्नातियन्ति तस्मादाह बृहस्पते धारया वसूनीति पाशं कृत्वा प्रतिमुञ्चत्यथातो नियोजनस्यैव ॥१३॥ ब्राह्मणम् ॥ ६ [७.३]॥ ॥ पञ्चमः प्रपाठकः ॥ कण्डिकासंख्या १२७ ॥ ॥

पाशं कृत्वा प्रतिमुञ्चति । ऋतस्य त्वा देवहविः पाशेन प्रतिमुञ्चामीति वरुण्या वाऽएषा यद्रज्जुस्तदेनमेतदृतस्यैव पाशेन प्रतिमुञ्चति तथो हैनमेषा वरुण्या रज्जुर्न हिनस्ति ॥१॥ धर्षा मानुष इति । न वाऽएतमग्रे मनुष्योऽधृष्णोत्स यदेवर्तस्य पाशेनैतद्देवहविः प्रतिमुञ्चत्यथैनं मनुष्यो धृष्णोति तस्मादाह धर्षा मानुष इति ॥२॥ अथ नियुनक्ति । देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामग्नीषोमाभ्यां जुष्टं नियुनज्मीति तद्यथैवादो देवतायै हविर्गृह्णन्नादिशत्येवमेवैतद्देवताभ्यामादिशत्यथ प्रोक्षत्येको वै प्रोक्षणस्य बन्धुर्मेध्यमेवैतत्करोति ॥३॥ स प्रोक्षति । अद्भ्यस्त्वौषधीभ्य इति तद्यत एव सम्भवति तत एवैतन्मेध्यं करोतीदꣳ हि यदा वर्षत्यथौषधयो जायन्तऽओषधीर्जग्ध्वापः पीत्वा तत एष रसः सम्भवति रसाद्रेतो रेतसः पशवस्तद्यत एव सम्भवति यतश्च जायते तत एवैत-

न्मेध्यं करोति ॥४॥ अनु त्वा माता मन्यतामनु पितेति । स हि मातुश्चाधि पितुश्च जायते तत्र तत एव जायते तत एवैतन्मेध्यं करोत्यनु भ्राता सगर्भ्योऽनु सखा सयूथ्य इति स यत्ते जन्म तेन त्वानुमतमारभऽइत्येवैतदाहाग्नीषोमाभ्यां त्वा जुष्टं प्रोक्षामीति तद्याभ्यां देवताभ्यामारभते ताभ्यां मेध्यं करोति ॥५॥ अथोपगृह्णाति । अपां पेरुरसीति तदेनमन्तरतो मेध्यं करोत्यथाधस्तादुपोक्षत्यापो देवीः स्वदन्तु स्वात्तं चित्सद्देवहविरिति तदेनं सर्वतो मेध्यं करोति ॥६॥ अथाहाग्नये समिध्यमानायानुब्रूहीति । स उत्तरमाघारमाघार्यासंस्पर्शयन्त्स्रुचौ पर्येत्य जुह्वा पशुं समनक्ति शिरो वै यज्ञस्योत्तर आघार एष वाऽअत्र यज्ञो भवति यत्पशुस्तद्यज्ञ ऽएवैतच्छिरः प्रतिदधाति तस्माज्जुह्वा पशुं समनक्ति ॥७॥ स ललाटे समनक्ति । सं ते प्राणो वातेन गच्छतामिति समङ्गानि यजत्रैरित्यंसयोः सं यज्ञपतिराशिषेति श्रोण्योः स यस्मै कामाय पशुमालभन्ते तत्प्राप्नुहीत्येवैतदाह ॥८॥ इदं वै पशोः संज्ञप्यमानस्य । प्राणो वातमपिपद्यते तत्प्राप्नुहि यत्ते प्राणो वातमपिपद्याता ऽइत्येवैतदाह समङ्गानि यजत्रैरित्यङ्गैर्वाऽअस्य यजन्ते तत्प्राप्नुहि यत्तेऽङ्गैर्यजान्ता ऽइत्येवैतदाह सं यज्ञपतिराशिषेति यजमानाय वाऽएतेनाशिषमाशास्ते 'तत्प्राप्नुहि यत्त्वया यजमानायाशिषमाशासान्ताऽइत्येवैतदाह स्रादयति स्रुचावथ प्रवरायाश्रावयति सोऽसावेव बन्धुः ॥९॥ अथ द्वितीयमाश्रावयति । द्वौ ह्यत्र होतारौ भवतः स मैत्रावरुणायाहैवाश्रावयति यजमानं त्वेव प्रवृणीतेऽग्निर्ह दैवीनां विशां पुरएतेत्यग्निर्हि देवतानां मुखं तस्मादाहाग्निर्ह दैवीनां विशां पुरएतेत्ययं यजमानो मनुष्याणामिति तं हि सोऽन्वर्धो भवति यस्मिन्नर्धे यजते तस्मादाहायं यजमानो मनुष्याणामिति तयोरस्थूरि गार्हपत्यं दीदयच्छतं हिमा द्वा यूऽइति तयोरनार्तानि गार्हपत्यानि शतं वर्षाणि सन्त्वित्येवैतदाह ॥१०॥ राधांसीत्सम्पृञ्चानावसम्पृञ्चानौ तन्व इति । राधांस्येव सम्पृञ्चाथां मापि तनूरित्येवैतदाह तौ

ह यत्तनूरपि सम्पृञ्चीयातां प्राग्निर्यजमानं दहेत्स यदग्नौ जुहोति तदेषोऽग्नये प्रयच्छत्यथ यामेवात्रऽर्त्विजो यजमानायाशिषमाशासते तामस्मै सर्वामग्निः समर्धयति तद्राधाꣳस्येव सम्पृच्याते नापि तनूस्तस्मादाह राधाꣳसीत्सम्पृच्यानावसम्पृच्यानौ तन्व इति ॥११॥ ब्राह्मणम् ॥१ [७.४.]॥ सप्तमोऽध्यायः [२२.] ॥ ॥

तद्यत्रैतत्प्रवृतो होता होतृषदनऽउपविशति । तदुपविश्य प्रसौति प्रसूतोऽध्वर्युः स्रुचावादत्ते ॥१॥ अथाप्रीभिश्चरन्ति । तद्यदाप्रीभिश्चरन्ति सर्वेणेव वाऽएष मनसा सर्वेणेवात्मना यज्ञꣳ सम्भरति सं च जिहीर्षति यो दीक्षते तस्य रिरिचान-इवात्मा भवति तमेताभिराप्रीभिराप्याययन्ति तद्यदाप्याययन्ति तस्मादाप्रियो नाम तस्मादाप्रीभिश्चरन्ति ॥२॥ ते वाऽएतऽएकादश प्रयाजा भवन्ति । दश वाऽइमे पुरुषे प्राणा आत्मैकादशो यस्मिन्नेते प्राणाः प्रतिष्ठिता एतावान्वै पुरुषस्तदस्य सर्वमात्मानमाप्याययन्ति तस्मादेकादश प्रयाजा भवन्ति ॥३॥ स आश्राव्याह । समिधः प्रेष्येति प्रेष्य-प्रेष्येति चतुर्थे-चतुर्थे प्रयाजे समानयमानो दशभिः प्रयाजैश्चरति दश प्रयाजानिष्ट्वाह शासमाहरेत्यसिं वै शास इत्याचक्षते ॥४॥ अथ यूपशकलमादत्ते । तावग्रे जुह्वा अक्त्वा पशोर्ललाटमुपस्पृशति घृतेनाक्तौ पशूंस्त्रायेथामिति वज्रो वै यूपशकलो वज्रः शासो वज्र आज्यं तमेवैतत्कृत्स्नं वज्रꣳ सम्भृत्य तमस्याभिगोप्तारं करोति नेदेनं नाष्ट्रा रक्षाꣳसि हिनसन्निति पुनर्यूपशकलमवगूहत्येषा ते प्रज्ञाताश्रिरस्त्वित्याह शासं प्रयच्छन्त्सादयति स्रुचौ ॥५॥ अथाह पर्यग्नयेऽनुब्रूहीति । उल्मुकमादायाग्नीत्पर्यग्निं करोति तद्यत्पर्यग्निं करोत्यह्निङ्गमेवैनमेतदग्निना परिगृह्णाति नेदेनं नाष्ट्रा रक्षाꣳसि प्रमृशानित्यग्निर्हि रक्षसामपहन्ता तस्मात्पर्यग्निं करोति तद्यत्रैनꣳ श्रपयन्ति तदभिपरिहरति ॥६॥ तदाहुः । पुनरेतदुल्मुकꣳ हरेदथात्रान्यमेवाग्निं निर्मथ्य तस्मिन्नेनꣳ श्रपयेयुराहवनीयो वाऽएष न वाऽएष तस्मै यदस्मिन्नशृतꣳ श्रपयेयुस्तस्मै वाऽएष यदस्मिञ्छृतं

जुहुयुरिति ॥७॥ तदु तथा न कुर्यात् । यथा वै ग्रसितमेवमस्यैतद्भवति यदेनेन पर्यग्निं करोति स यथा ग्रसितमनुव्हायाच्छिद्य तदन्यस्मै प्रयच्छेदेवं तत्तस्मादेतस्यैवोल्मुकस्याङ्गारान्निमृह्य तस्मिन्नेनं श्रपयेयुः ॥८॥ अथोल्मुकमादायाग्नीत्पुरस्तात्प्रतिपद्यते । अग्निमेवैतत्पुरस्तात्करोत्यग्निः पुरस्तान्नाष्ट्रा रक्षाꣳस्यपघ्नन्नेत्यथाभयेनानाष्ट्रेण पशुं नयन्ति तं वपाश्रपणीभ्यां प्रतिप्रस्थातान्वारभते प्रतिप्रस्थातारमध्वर्युरध्वर्युं यजमानः ॥९॥ तदाहुः । नैष यजमानेनान्वारभ्यो मृत्यवे ह्येतं नयन्ति तस्मान्नान्वारभेतेति तदन्वेवारभेत न वाऽएतं मृत्यवे नयन्ति यं यज्ञाय नयन्ति तस्मादन्वेवारभेत यज्ञादु हैवात्मानमन्तरियाद्यन्नान्वारभेत तस्मादन्वेवारभेत तत्परोऽक्षमन्वारब्धं भवति वपाश्रपणीभ्यां प्रतिप्रस्थाता प्रतिप्रस्थातारमध्वर्युरध्वर्युं यजमान एतदु परोऽक्षमन्वारब्धं भवति ॥१०॥ अथ स्तीर्णायै वेदेः । द्वे तृणे ऽध्वर्युरादत्ते स आश्राव्याहोपप्रेष्य होतर्हव्या देवेभ्य इत्येतदु वैश्वदेवं पशौ ॥११॥ अथ वाचयति । रेवति यजमानऽइति वाग्वै रेवती सा यद्वाग्बहु वदति तेन वाग्रेवती प्रियं धा आविशेत्यनार्तिमाविशेत्येवैतदाहोरोरन्तरिक्षात्सजूर्देवेन वातेनेत्यन्तरिक्षं वाऽअनु रक्षश्चरत्यमूलमुभयतः परिच्छिन्नं यथायं पुरुषोऽमूल उभयतः परिच्छिन्नोऽन्तरिक्षमनुचरति तद्वातेनैतꣳ संविदानान्तरिक्षाद्गोपायेत्येवैतदाह यदाहोरोरन्तरिक्षात्सजूर्देवेन वातेनेति ॥१२॥ अस्य हविषस्त्मना यजेति । वाचमेवैतदाहानार्तस्यास्य हविष आत्मना यजेति समस्य तन्वा भवेति वाचमेवैतदाहानार्तस्यास्य हविषस्तन्वा सम्भवेति ॥१३॥ तद्यत्रैनं विशसन्ति । तत्पुरस्तात्तृणमुपास्यति वर्षो वर्षीयसि यज्ञे यज्ञपतिं धा इति बर्हिरेवास्माऽएतत्स्तृणात्यस्कन्नꣳ हविरसदिति तद्यदेवास्यात्र विशस्यमानस्य किंचित्स्कन्दति तदेतस्मिन्प्रतितिष्ठति तथा नामुया भवति ॥१४॥ अथ पुनरेत्याहवनीयमभ्यावृत्यासते । नेदस्य संज्ञप्यमानस्याध्यक्षा असामेति तस्य न कूटेन प्रघ्नन्ति मानुषꣳ

हि तन्नोऽएव पश्चात्कर्णं पितृदेवत्यꣳ हि तदपिगृह्य वैव मुखं नमयन्ति विष्कं
वा कुर्वन्ति तन्नाह जहि मारयेति मानुषꣳ हि तत्संज्ञपयान्वगन्निति तद्धि देवत्रा
स यदाहान्वगन्नित्येतर्हि ह्येष देवाननुगच्छति तस्मादाहान्वगन्निति ॥१५॥ तद्य-
त्रैनं निविध्यन्ति । तत्पुरा संज्ञपनाज्जुहोति स्वाहा देवेभ्य इत्यथ यदा प्राह सं-
ज्ञप्तः पशुरित्यथ जुहोति देवेभ्यः स्वाहेति पुरस्तात्स्वाहाकृतयो वाऽअन्ये देवा
उपरिष्टात्स्वाहाकृतयोऽन्ये तानेवैतत्प्रीणाति तऽएनमुभये देवाः प्रीताः स्वर्गं
लोकमभिवहन्ति ते वाऽएते परिपशव्येऽइत्याहुती स यदि कामयेत जुहुयादेते
यद्यु कामयेतापि नाद्रियेत ॥१६॥ ब्राह्मणम् ॥२ [८.१.]॥ ॥

यदा प्राह संज्ञप्तः पशुरिति । अथाध्वर्युराह नेष्टः पत्नीमुदानयेत्युदानयति नेष्टा
पत्नीं पान्नेजनं बिभ्रतीम् ॥१॥ तां वाचयति । नमस्तऽआतानेति यज्ञो वाऽआ-
तानो यज्ञꣳ हि तन्वते तेन यज्ञ आतानो जघनार्धो वाऽएष यज्ञस्य यत्पत्नी
तामेतत्प्राचीं यज्ञं प्रसादयिष्यन्भवति तस्माऽएवैतद्यज्ञाय निह्नुते तथो हैनामेष
यज्ञो न हिनस्ति तस्मादाह नमस्तऽआतानेति ॥२॥ अनर्वा प्रेहीति । असप-
त्नेन प्रेहीत्येवैतदाह घृतस्य कुल्या उपऽऋतस्य पथ्या अन्विति साधूपेत्येवैतदाह
देवीरापः शुद्धा वोढ्वꣳ सुपरिविष्टा देवेषु सुपरिविष्टा वयं परिवेष्टारो भूयास्मे-
त्यप एवैतत्पावयति ॥३॥ अथ पशोः प्राणानद्भिः पत्न्युपस्पृशति । तद्यदद्भिः प्रा-
णानुपस्पृशति । जीवं वै देवानाꣳ हविरमृतममृतानामथैतत्पशुं घ्नन्ति यत्संज्ञप-
यन्ति यद्विशासत्यापो वै प्राणास्तदस्मिन्नेतान्प्राणान्दधाति तथैतज्जीवमेव देवानाꣳ
हविर्भवत्यमृतममृतानाम् ॥४॥ अथ यत्पत्न्युपस्पृशति । योषा वै पत्नी योषायै
वाऽइमाः प्रजाः प्रजायन्ते तदेनमेतस्यै योषायै प्रजनयति तस्मात्पत्न्युपस्पृशति
॥५॥ सोपस्पृशति । वाचं ते शुन्धामीति मुखं प्राणं ते शुन्धामीति नासिके च-
क्षुस्ते शुन्धामीत्यक्ष्यौ श्रोत्रं ते शुन्धामीति कर्णौ नाभिं ते शुन्धामीति योऽयम-

निरुक्तः प्राणो मेढ्रं ते शुन्धामीति वा पायुं ते शुन्धामीति योऽयं पश्चात्प्राणस्तत्प्राणान्दधाति तत्समीरयत्यथ सꣳहृत्य पदश्चरित्रांस्ते शुन्धामीति पद्भिर्वै प्रतितिष्ठति प्रतिष्ठित्याऽएव तदेनं प्रतिष्ठापयन्ति ॥६॥ अथ या आपः परिशिष्यन्ते । अर्धा वा यावत्यो वा ताभिरेनं यजमानश्च शीर्षतोऽग्रेऽनुषिञ्चतस्तत्प्राणांश्चैवास्मिंस्तत्तौ धत्तस्तच्चैनमतः समीरयतः ॥७॥ तद्यत्क्रूरीकुर्वन्ति । यदास्थापयन्ति शान्तिरापस्तदद्भिः शान्त्या शमयतस्तदद्भिः संधत्तः ॥८॥ तावनुषिञ्चतः । मनस्तऽआप्यायतां वाक्तऽआप्यायतां प्राणस्तऽआप्यायतां चक्षुस्तऽआप्यायताꣳ श्रोत्रं तऽआप्यायतामिति तत्प्राणान्धत्तस्तत्समीरयतो यत्ते क्रूरं यदास्थितं तत्तऽआप्यायतां निष्ट्यायतामिति ॥९॥ तद्यत्क्रूरीकुर्वन्ति । यदास्थापयन्ति शान्तिरापस्तदद्भिः शान्त्या शमयतस्तदद्भिः संधत्तस्तत्ते शुध्यन्त्विति तन्मेध्यं कुरुतः शमहोभ्य इति जघनेन पशुं निनयतः ॥१०॥ तद्यत्क्रूरीकुर्वन्ति । यदास्थापयन्ति नेदेतदन्वशान्तान्यहोरात्राण्यसन्निति तस्माच्छमहोभ्य इति जघनेन पशुं निनयतः ॥११॥ अथोत्तानं पशुं पर्यस्यन्ति । स तृणमन्तर्दधात्योषधे त्रायस्वेति वज्रो वाऽअसिस्तथो हैनमेष वज्रोऽसिर्न हिनस्त्यथासिनाभिनिदधाति स्वधिते मैनꣳ हिꣳसीरिति वज्रो वाऽअसिस्तथो हैनमेष वज्रोऽसिर्न हिनस्ति ॥१२॥ सा या प्रज्ञाताग्रिः । तयाभिनिदधाति सा हि यजुष्कृता मेध्या तद्यदग्रं तृणस्य तत्सव्ये पाणौ कुरुतेऽथ यद्बुध्नं तद्दक्षिणेनादत्ते ॥१३॥ स यत्राच्छ्यति । यत एतल्लोहितमुत्पतति तदुभयतोऽनक्ति रक्षसां भागोऽसीति रक्षसाꣳ ह्येष भागो यदसृक् ॥१४॥ तदुपास्याभितिष्ठति । इदमहꣳ रक्षोऽभितिष्ठामीदमहꣳ रक्षोऽवबाधऽइदमहꣳ रक्षोऽधमं तमो नयामीति तद्यज्ञेनैवैतन्नाष्ट्रा रक्षाꣳस्यवबाधते तद्यदमूलमुभयतः परिच्छिन्नं भवत्यमूलं वाऽइदमुभयतः परिच्छिन्नꣳ रक्षोऽन्तरिक्षमनुचरति यथायं पुरुषोऽमूल उभयतः परिच्छिन्नोऽन्तरिक्षमनुचरति तस्मादमूलमुभयतः परिच्छिन्नं भवति ॥१५॥ अथ वपामु-

त्खिदन्ति । तया वपाश्रपण्यौ प्रोर्णौति घृतेन द्यावापृथिवी प्रोर्णुवाथामिति तदिमे द्यावापृथिवीऽऊर्जा रसेन भाजयत्यनयोरूर्जꣳ रसं दधाति ते रसवत्याऽउपजीवनीयेऽइमाः प्रजा उपजीवन्ति ॥१६॥ कार्ष्मर्यमय्यौ वपाश्रपण्यौ भवतः । यत्र वै देवा अग्रे पशुमालेभिरे तदुदीचः कृष्यमाणस्यावाङ्मेधः पपात स एष वनस्पतिरजायत तद्यत्कृष्यमाणस्यावाङपतत्तस्मात्कार्ष्मर्यस्तेनैवैनमेतन्मेधेन समर्धयति कृत्स्नं करोति तस्मात्कार्ष्मर्यमय्यौ वपाश्रपण्यौ भवतः ॥१७॥ तां परिवासयति । तां पशुश्रपणे प्रतपति तथो हास्यात्रापि शृता भवति पुनरुल्मुकमग्नीदादत्ते ते जघनेन चात्वालं यन्ति तऽआयत्यागह्ल्याहवनीयꣳ स एतत्तृणमध्वर्युराहवनीये प्रास्यति वायो वे स्तोकानामिति स्तोकानाꣳ ह्येषा समित् ॥१८॥ अथोत्तरतस्तिष्ठन्वपां प्रतपति । अत्येष्यन्वाऽएषोऽग्निं भवति दक्षिणतः परीत्य श्रपयिष्यंस्तस्माऽएवैतन्निह्नुते तथो हैनमेषोऽतियन्तमग्निर्न हिनस्ति तस्मादुत्तरतस्तिष्ठन्वपां प्रतपति ॥१९॥ तामन्तरेण यूपं चाग्निं च हरन्ति । तद्यत्समया न हरन्ति येनान्यानि हवीꣳषि हरन्ति नेदशृतया समया यज्ञं प्रसजामेति यदु बाह्येन न हरन्त्यग्रेण यूपं बहिर्धा यज्ञात्कुर्युस्तस्मादन्तरेण यूपं चाग्निं च हरन्ति दक्षिणतः परीत्य प्रतिप्रस्थाता श्रपयति ॥२०॥ अथ स्रुवेणोपहत्याज्यम् । अध्वर्युर्वपामभिजुहोत्यग्निराज्यस्य वेतु स्वाहेति तथो हास्यैते स्तोकाः शृताः स्वाहाकृता आहुतयो भूत्वाग्निं प्राप्नुवन्ति ॥२१॥ अथाह स्तोकेभ्योऽनुब्रूहीति । स आग्नेयी स्तोकेभ्योऽन्वाह तद्यदाग्नेयी स्तोकेभ्योऽन्वाहेतःप्रदाना वै वृष्टिरितो ह्यग्निर्वृष्टिं वनुते स एतैः स्तोकैरेतान्स्तोकान्वनुते तऽएते स्तोका वर्षन्ति तस्मादाग्नेयी स्तोकेभ्योऽन्वाह यदा शृता भवति ॥२२॥ अथाह प्रतिप्रस्थाता शृता प्रचरेति । स्रुचावादायाध्वर्युरतिक्रम्याश्राव्याह स्वाहाकृतिभ्यः प्रेष्येति वषट्कृते जुहोति ॥२३॥ हुत्वा वपामेवाग्रेऽभिघारयति । अथ पृषदाज्यं तदु ह चरकाध्वर्यवः पृषदाज्यमे-

वाग्रेऽभिघारयन्ति प्राणः पृषदाज्यमिति वदन्तस्तद्ध ह याज्ञवल्क्यं चरकाध्वर्युरनुव्याजहारैवं कुर्वन्तं प्राणं वाऽअयमन्तरगादध्वर्युः प्राण एनꣳ हास्यतीति ॥ २४ ॥ स ह स्म बाहूऽअन्ववेक्ष्याह । इमौ पलितौ बाहू क्व स्विद्ब्राह्मणस्य वचो बभूवेति न तदाद्रियेतोत्तमो वाऽएष प्रयाजो भवतीदं वै हविर्यज्ञ उत्तमे प्रयाजे ध्रुवामेवाग्रेऽभिघारयति तस्यै हि प्रथमावाज्यभागौ होष्यन्भवति वपां वाऽअत्र प्रथमाꣳ होष्यन्भवति तस्माद्वपामेवाग्रेऽभिघारयेदथ पृषदाज्यमथ यत्पशुं नाभिघारयति नेदशृतमभिघारयाणीत्येतद्वेवास्य सर्वः पशुरभिघारितो भवति यद्वपामभिघारयति तस्माद्वपामेवाग्रेऽभिघारयेदथ पृषदाज्यम् ॥ २५ ॥ अथाज्यमुपस्तृणीते । अथ हिरण्यशकलमवदधात्यथ वपामवद्यन्नाहाग्नीषोमाभ्यां छागस्य वपायै मेदसोऽनुब्रूहीत्यथ हिरण्यशकलमवदधात्यथोपरिष्टाद्धिराज्यस्याभिघारयति ॥ २६ ॥ तद्यद्धिरण्यशकलावभितो भवतः । घ्नन्ति वाऽएतत्पशुं यदग्नौ जुह्वत्यमृतमायुर्हिरण्यं तदमृतऽआयुषि प्रतितिष्ठति तथोत उदेति तथा संजीवति तस्माद्धिरण्यशकलावभितो भवत आश्राव्याहाग्नीषोमाभ्यां छागस्य वपां मेदः प्रेष्येति न प्रस्थितमित्याह प्रमुते प्रस्थितमिति वषट्कृते जुहोति ॥ २७ ॥ हुत्वा वपाꣳ समीच्यौ । वपाश्रपण्यौ कृत्वानुप्रास्यति स्वाहाकृतेऽऊर्ध्वनभसं मारुतं गच्छतमिति नेदिमेऽअमुया सतो याभ्यां वपामशिश्रपामेति ॥ २८ ॥ तद्यद्वपया चरन्ति । यस्यै वै देवतायै पशुमालभन्ते तामेवैतद्देवतामेतेन मेधेन प्रीणाति सैषा देवतैतेन मेधेन प्रीता शान्तोत्तराणि हवीꣳषि श्रप्यमाणान्युपरमति तस्माद्वपया चरन्ति ॥ २९ ॥ अथ चात्वाले मार्जयन्ते । क्रूरी वाऽएतत्कुर्वन्ति यत्संज्ञपयन्ति यद्विशासति शान्तिरापस्तदद्भिः शान्त्या शमयन्ते तदद्भिः संदधते तस्माच्चात्वाले मार्जयन्ते ॥ ३० ॥ ब्राह्मणम् ॥ ३ [८.२.] ॥ ॥

यद्देवत्यः पशुर्भवति । तद्देवत्यं पुरोडाशमनुनिर्वपति तद्यत्पुरोडाशमनुनिर्व-

पति सर्वेषां वाऽएष पशूनां मेधो यद्व्रीहियवौ तेनैवैनमेतन्मेधेन समर्धयति कृ-
त्स्नं करोति तस्मात्पुरोडाशमनुनिर्वपति ॥ १॥ अथ यद्वपया प्रचर्य । एतेन पुरो-
डाशेन प्रचरति मध्यतो वाऽइमां वपामुत्खिदन्ति मध्यत एवैनमेतेन मेधेन स-
मर्धयति कृत्स्नं करोति तस्माद्वपया प्रचर्यैतेन पुरोडाशेन प्रचरन्त्येष न्वेवैतस्य
बन्धुर्यत्र क्व चैष पशुं पुरोडाशोऽनुनिरुप्यते ॥ २॥ अथ पशुं विशास्ति । त्रिः प्र-
च्यावयतात्त्रिःप्रच्युतस्य हृदयमुत्तमं कुरुतादिति त्रिवृद्धि यज्ञः ॥ ३॥ अथ शमिता-
रᳪ सᳪशास्ति । यत्त्वा पृच्छाच्छृतᳪ हविः शमिता३रिति शृतमित्येव ब्रूतान्न शृतं
भगवो न शृतᳪ हीति ॥ ४॥ अथ जुह्वा पृषदाज्यस्योपहत्य । अध्वर्युरुपनिष्क्रम्य
पृच्छति शृतᳪ हविः शमिता३रिति शृतमित्याह तद्देवानामित्युपाᳪश्वध्वर्युः ॥ ५॥
तद्यत्पृच्छति । शृतं वै देवानाᳪ हविर्नाशृतᳪ शमिता वै तद्वेद यदि शृतं वा भ-
वत्यशृतं वा ॥ ६॥ तद्यत्पृच्छति । शृतेन प्रचराणीति तद्यद्यशृतं भवति शृतमेव
देवानाᳪ हविर्भवति शृतं यजमानस्यानेना अध्वर्युर्भवति शमितरि तदेनो भवति
त्रिष्कृत्वः पृच्छति त्रिवृद्धि यज्ञोऽथ यदाह तद्देवानामिति तद्धि देवानां यच्छृतं त-
स्मादाह तद्देवानामिति ॥ ७॥ स हृदयमेवाग्रेऽभिघारयति । आत्मा वै मनो हृ-
दयं प्राणः पृषदाज्यमात्मन्येवैतन्मनसि प्राणं दधाति तथैतज्जीवमेव देवानाᳪ ह-
विर्भवत्यमृतममृतानाᳪ ॥ ८॥ सोऽभिघारयति । सं ते मनो मनसा सं प्राणः प्रा-
णेन गच्छतामिति न स्वाहाकरोति न ह्येषाहुतिरुद्वासयन्ति पशुम् ॥ ९॥ तं जघ-
नेन चात्वालमन्तरेण यूपं चाग्निं च हरन्ति । तद्यत्समया न हरन्ति येनान्यानि
हवीᳪषि हरन्ति शृतᳪ सन्तं नेदञ्जसो विकृत्तेन क्रूरीकृतेन समया यज्ञं प्रसजामि-
ति यदु बाह्येन न हरन्त्यग्रेण यूपं बहिर्धा ह यज्ञात्कुर्युस्तस्मादन्तरेण यूपं चा-
ग्निं च हरन्ति दक्षिणतो निधाय प्रतिप्रस्थातावद्यति प्लक्षशाखा उत्तरबर्हिर्भवन्ति
ता अध्यवद्यति तद्यत्प्लक्षशाखा उत्तरबर्हिर्भवन्ति ॥ १०॥ यत्र वै देवाः । अग्रे प-

पशुमालेभिरे तं त्वष्टा शीर्षतोऽग्रेऽभ्युवामोतैवं चिन्नालभेरन्निति त्वष्टुर्हि पशवः
स एष शीर्षन्मस्तिष्कोऽनूक्यश्च मज्जा तस्मात्स वान्त-इव त्वष्टा ह्येतमभ्यवमत्त-
स्मात्तं नाश्नीयात्त्वष्टुर्ह्येतदभिवान्तम् ॥११॥ तस्यावाङ् मेधः पपात । स एष वन-
स्पतिरजायत तं देवाः प्रापश्यंस्तस्मात्प्लक्षः प्रख्यो ह वै नामैतद्यत्प्लक्ष इति ते-
नैवैनमेतन्मेधेन समर्धयति कृत्स्नं करोति तस्मात्प्लक्षशाखा उत्तरबर्हिर्भवन्ति ॥१२॥
अथाज्यमुपस्तृणीते । जुह्वां चोपभृति च वसाहोमहवन्याꣳ समवत्तधान्यामथ हि-
रण्यशकलाववदधाति जुह्वां चोपभृति च ॥१३॥ अथ मनोतायै हविषोऽनुवाच
आह । तद्यन्मनोतायै हविषोऽनुवाच आह सर्वा ह वै देवताः पशुमालभ्यमा-
नमुपसंगच्छन्ते मम नाम ग्रहीष्यति मम नाम ग्रहीष्यतीति सर्वासाꣳ हि देवता-
नाꣳ हविः पशुस्तासाꣳ सर्वासां देवतानां पशौ मनाꣳस्योतानि भवन्ति तान्येवै-
तत्प्रीणाति तथो हामोघाय देवतानां मनाꣳस्युपसंगतानि भवन्ति तस्मान्मनो-
तायै हविषोऽनुवाच आह ॥१४॥ स हृदयस्यैवाग्रेऽवद्यति । तद्यन्मध्यतः सतो
हृदयस्याग्रेऽवद्यति प्राणो वै हृदयमतो ह्ययमूर्ध्वः प्राणः संचरति प्राणो वै पशु-
र्यावद्ध्येव प्राणेन प्राणिति तावत्पशुरथ यदास्मात्प्राणोऽपक्रामति दार्विव तर्हि
भूतोऽनर्थ्यः शेते ॥१५॥ हृदयमु वै पशुः । तदस्यात्मन एवाग्रेऽवद्यति तस्मा-
द्यदि किंचिदवदानꣳ हीयेत न तदाद्रियेत सर्वस्य हैवास्य तत्पशोरवत्तं भवति
यद्धृदयस्याग्रेऽवद्यति तस्मान्मध्यतः सतो हृदयस्यैवाग्रेऽवद्यत्यथ यथापूर्वम् ॥१६॥
अथ जिह्वायै । सा हीयं पूर्वार्धात्प्रतिष्ठत्यथ वक्षसस्तद्धि ततोऽथैकचरस्य दोष्णो
ऽथ पार्श्वयोरथ तनिम्नोऽथ वृक्क्योः ॥१७॥ गुदं त्रेधा करोति । स्थविमोपयड्भ्यो
मध्यं जुह्वां द्वेधा कृत्वावद्यत्यणिम त्र्यङ्गेष्वेकचरायै श्रोणेरेतावन्नु जुह्वामवद्यति
॥१८॥ अथोपभृति । त्र्यङ्ग्यस्य दोष्णो गुदं द्वेधा कृत्वावद्यति त्र्यङ्ग्यायै श्रोणेरथ
हिरण्यशकलाववदधात्यथोपरिष्टादाज्यस्याभिघारयति ॥१९॥ अथ वसाहोमं गृ-

ह्णाति । रेडसीति लेलयेव हि गूस्तस्मादाह रेडसीत्यग्निष्ट्वा श्रीणात्वित्यग्निर्ह्येत-च्छ्रपयति तस्मादाहाग्निष्ट्वा श्रीणात्वित्यापस्त्वा समरिणन्नित्यापो ह्येतमङ्गेभ्यो रसꣳ सम्भरन्ति तस्मादाहापस्त्वा समरिणन्निति ॥२०॥ वातस्य त्वा ध्राज्या इति । अन्तरिक्षं वा ऽअग्रमनुपवते योऽयं पवते ऽन्तरिक्षाय वै गृह्णाति तस्मादाह वातस्य त्वा ध्राज्या इति ॥२१॥ पूष्णो रꣳह्या इति । एष वै पूष्णो रꣳहिरेतस्मा ऽउ हि गृह्णाति तस्मादाह पूष्णो रꣳह्या इति ॥२२॥ ऊष्मणो व्यथिषदिति । एष वा ऽऊष्मैतस्मा ऽउ हि गृह्णाति तस्मादाहोष्मणो व्यथिषदित्यथोपरिष्टाद्द्विराज्यस्याभिघारयति ॥२३॥ ॥ शतम् २१०० ॥ ॥ अथ पार्श्वेन वासिना वा प्रयौति । प्रयुतं द्वेष इति तन्नाष्ट्रा एवैतद्रक्षाꣳस्यतोऽपहन्ति ॥२४॥ अथ यद्गूष्परिशिष्यते । तत्समवत्तधान्यामानयति तद्धृदयं प्रास्यति जिह्वां वक्षस्तनिम मतस्ने वनिष्ठुमथोपरिष्टाद्द्विराज्यस्याभिघारयति ॥२५॥ तद्यद्धिरण्यशकलावभितो भवतः । घ्नन्ति वा ऽएतत्पशुं यदग्नौ जुह्वत्यमृतमायुर्हिरण्यं तदमृत ऽआयुषि प्रतितिष्ठति तथात उदेति तथा संजीवति तस्माद्धिरण्यशकलावभितो भवतः ॥२६॥ अथ यदक्ष्णयावद्यति । सव्यस्य च दोष्णो दक्षिणायाश्च श्रोणेर्दक्षिणस्य च दोष्णः सव्यायाश्च श्रोणेस्तस्मादयं पशुरक्ष्णया पदो हरत्यथ यत्सम्यगवद्येत्समीचो हैवायं पशुः पदो हरेत्तस्मादक्ष्णयावद्यत्यथ यन्न शीर्ष्णोऽवद्यति नाꣳसयोर्नानूकस्य नापरसक्थ्ययोः ॥२७॥ असुरा ह वा ऽअग्रे पशुमालेभिरे । तद्देवा भीषा नोपावेयुस्तान्हेयं पृथिव्युवाच मैतदादृढ्वमहं व एतस्याध्यक्षा भविष्यामि यथा-यथैत ऽएतेन चरिष्यन्तीति ॥२८॥ सा होवाच । अन्यतरामेवाहुतिमहौषुरन्यतरां पर्यशिषन्निति स यां पर्यशिꣳषस्तानीमान्यवदानानि ततो देवाः स्विष्टकृते त्र्यङ्गाण्यपाभजंस्तस्मात्त्र्यङ्गाण्यथासुरा अवाद्यञ्छीर्ष्णोऽꣳसयोरनूकस्यापरसक्थ्ययोस्तस्मात्तेषां नावद्येद्यन्न्वेव त्वष्टानूकमभ्यवमत्तस्मादनूकस्य नावद्येद्यथाहाग्नीषोमाभ्यां छागस्य हविषोऽनुब्रूहीत्याश्राव्या-

ह्याग्नीषोमाभ्यां छागस्य हविः प्रेष्येति न प्रस्थितमित्याह प्रसुते प्रस्थितमिति ॥२९॥ अन्तरेणार्धर्चौ याज्यायै वसाहोमं जुहोति । इतो वाऽअयमूर्ध्वो मेध उत्थितो यमस्या इमꣳ रसं प्रजा उपजीवन्त्यर्वाचीनं दिवो रसो वै वसाहोमो रसो मेधो रसेनैवैतद्रसं तीव्रीकरोति तस्मादयꣳ रसोऽद्यमानो न क्षीयते ॥३०॥ तद्यदन्तरेण । अर्धर्चौ याज्यायै वसाहोमं जुहोतीयं वाऽअर्धर्चोऽसौ द्यौरर्धर्चो ऽन्तरा वै द्यावापृथिवीऽअन्तरिक्षमन्तरिक्षाय वै जुहोति तस्मादन्तरेणार्धर्चौ याज्यायै वसाहोमं जुहोति ॥३१॥ स जुहोति । घृतं घृतपावानः पिबत वसां वसापावानः पिबतान्तरिक्षस्य हविरसि स्वाहेत्येतेन वैश्वदेवेन यजुषा जुहोति वैश्वदेवं वाऽअन्तरिक्षं तद्यदेनेनेमाः प्रजाः प्राणत्यश्चोदानत्यश्चान्तरिक्षमनुचरन्ति तेन वैश्वदेवं वषट्कृते जुहोति यानि जुह्वामवदानानि भवन्ति ॥३२॥ अथ जुह्वा पृषदाज्यस्योपघ्नन्नाह । वनस्पतयेऽनुब्रूहीत्याश्राव्याह वनस्पतये प्रेष्येति वषट्कृते जुहोति तद्यद्वनस्पतये जुहोत्येतमेवैतद्यज्ञं यूपं भागिनं करोति सोमो वै वनस्पतिः पशुमेवैतत्सोमं करोति तद्यदन्तरेणोभेऽआहुती जुहोति तयोभयं व्याप्नोति तस्मादन्तरेणोभेऽआहुती जुहोति ॥३३॥ अथ यान्युपभृत्यवदानानि भवन्ति । तानि समानयमान आहाग्नये स्विष्टकृतेऽनुब्रूहीत्याश्राव्याहाग्नये स्विष्टकृते प्रेष्येति वषट्कृते जुहोति ॥३४॥ अथ यद्वसाहोमस्य परिशिष्यते । तेन दिशो व्याघारयति दिशः प्रदिश आदिशो विदिश उद्दिशो दिग्भ्यः स्वाहेति रसो वै वसाहोमः सर्वास्वेवैतद्दिक्षु रसं दधाति तस्मादयं दिशि-दिशि रसोऽभिगम्यते ॥३५॥ अथ पशुं संमृशति । एतर्हि संमर्शनस्य कालोऽथ यत्पुरा समृशति यऽइमऽउपतिष्ठन्ते ते विमथिष्यन्तऽइति शङ्कमानो यद्यु विमाथान्न शङ्केतात्रैव संमृशेत् ॥३६॥ ऐन्द्रः प्राणः । अङ्गेऽअङ्गे निदीध्यदैन्द्र उदानोऽअङ्गेऽअङ्गे निधीत इति यदङ्गशो विकृत्तो भवति तत्प्राणोदानाभ्याꣳ संदधाति देव त्वष्टर्भूरि ते सꣳ-

समेतु सलक्ष्मा यद्विषुरूपं भवातीति कृत्स्नवृतमेवैतत्करोति देवत्रा यन्तमवसे स-
खायोऽनु त्वा मातापितरो मदन्त्विति तद्यत्रैनमहौषीत्तदेनं कृत्स्नं कृत्वानुसमस्य-
ति सोऽस्य कृत्स्नोऽमुष्मिँल्लोकऽआत्मा भवति ॥३७॥ ब्राह्मणम् ॥४ [८.३]॥ ॥

त्रीणि ह वै पशोरेकादशानि । एकादश प्रयाजा एकादशानुयाजा एकादशो-
पयजो दश पाण्या अङ्गुलयो दश पाद्या दश प्राणाः प्राण उदानो व्यान इत्ये-
तावान्वै पुरुषो यः परार्ध्यः पशूनां यꣳ सर्वेऽनु पशवः ॥१॥ तदाहुः । किं त-
द्यज्ञे क्रियते येन प्राणाः सर्वेभ्योऽङ्गेभ्यः शिव इति ॥२॥ यदेव गुदं त्रेधा करो-
ति । प्राणो वै गुदः सोऽयं प्राङाततस्तमयं प्राणोऽनुसंचरति ॥३॥ स यदेव गु-
दं त्रेधा करोति । तृतीयमुपयड्भ्यस्तृतीयं जुह्वां तृतीयमुपभृति तेन प्राणः सर्वे-
भ्योऽङ्गेभ्यः शिवः ॥४॥ स ह त्वेव पशुमालभेत । य एनं मेधमुपनयेद्यदि कृशः
स्याद्यद्युदर्यस्य मेदसः परिशिष्येत तद्गुदे न्यृषेत्प्राणो वै गुदः सोऽयं प्राङाततस्त-
मयं प्राणोऽनुसंचरति प्राणो वै पशुर्यावद्ध्येव प्राणेन प्राणिति तावत्पशुरथ य-
दास्मात्प्राणोऽपक्रामति दार्वेव तर्हि भूतोऽनर्थ्यः शेते ॥५॥ गुदो वै पशुः । मे-
दो वै मेधस्तदेनं मेधमुपनयति यद्युऽअꣳसलो भवति स्वयमुपेत एव तर्हि मेधं
भवति ॥६॥ अथ पृषदाज्यं गृह्णाति । द्वयं वाऽइदꣳ सर्पिश्चैव दधि च द्वन्द्वं वै
मिथुनं प्रजननं मिथुनमेवैतत्प्रजननं क्रियते ॥७॥ तेनानुयाजेषु चरति । पशवो
वाऽअनुयाजाः पयः पृषदाज्यं तत्पशुष्वेवैतत्पयो दधाति तदिदं पशुषु पयो हितं
प्राणो हि पृषदाज्यमन्नꣳ हि पृषदाज्यमन्नꣳ हि प्राणः ॥८॥ तेन पुरस्तादनुयाजे-
षु चरति । स योऽयं पुरस्तात्प्राणस्तमेवैतद्दधाति तेन पश्चादुपयजति स योऽयं
पश्चात्प्राणस्तमेवैतद्दधाति ताविमाऽउभयतः प्राणौ हितौ यश्चायमुपरिष्टाद्यश्चाध-
स्तात् ॥९॥ तद्वाऽएतदेको द्वाभ्यां वषट्करोति । अध्वर्युर्वै च यश्चैष उपयजत्यथ
यद्यजत्तमुपयजति तस्मादुपयजो नामाथ यदुपयजति प्रैवैतज्जनयति पश्चाद्ध्युपयज-

ति पश्चाद्धि योषायै प्रजाः प्रजायन्ते ॥१०॥ स उपयजति । समुद्रं गच्छ स्वाहेत्यापो वै समुद्र आपो रेतो रेत एवैतत्सिञ्चति ॥११॥ अन्तरिक्षं गच्छ स्वाहेति । अन्तरिक्षं वाऽअनु प्रजाः प्रजायन्तेऽन्तरिक्षमेवैतदनु प्रजनयति ॥१२॥ देवꣳ सवितारं गच्छ स्वाहेति सविता वै देवानां प्रसविता सवितृप्रसूत एवैतत्प्रजनयति ॥१३॥ मित्रावरुणौ गच्छ स्वाहेति । प्राणोदानौ वै मित्रावरुणौ प्राणोदानावेवैतत्प्रजासु दधाति ॥१४॥ अहोरात्रे गच्छ स्वाहेति । अहोरात्रे वाऽअनु प्रजाः प्रजायन्तेऽहोरात्रेऽएवैतदनु प्रजनयति ॥१५॥ छन्दाꣳसि गच्छ स्वाहेति । सप्त वै छन्दाꣳसि सप्त ग्राम्याः पशवः सप्तारण्यास्तानेवैतदुभयान्प्रजनयति ॥१६॥ द्यावापृथिवी गच्छ स्वाहेति । प्रजापतिर्वै प्रजाः सृष्ट्वा ता द्यावापृथिवीभ्यां पर्यगृह्णात्ता इमा द्यावापृथिवीभ्यां परिगृहीतास्तथोऽएवैष एतत्प्रजाः सृष्ट्वा ता द्यावापृथिवीभ्यां परिगृह्णाति ॥१७॥ अथात्युपयजति । स यन्नात्युपयजेद्यावत्यो हैवाग्रे प्रजाः सृष्टास्तावत्यो हैव स्युर्न प्रजायेरन्नथ यदत्युपयजति प्रैवैतज्जनयति तस्मादिमाः प्रजाः पुनरभ्यावर्तं प्रजायन्ते ॥१८॥ ब्राह्मणम् ॥५[८.४]॥ ॥ षष्ठः प्रपाठकः ॥ कण्डिकासंख्या ११२ ॥ ॥

सोऽत्युपयजति । यज्ञं गच्छ स्वाहेत्यापो वै यज्ञ आपो रेतो रेत एवैतत्सिञ्चति ॥१॥ सोमं गच्छ स्वाहेति । रेतो वै सोमो रेत एवैतत्सिञ्चति ॥२॥ दिव्यं नभो गच्छ स्वाहेति । आपो वै दिव्यं नभ आपो रेतो रेत एवैतत्सिञ्चति ॥३॥ अग्निं वैश्वानरं गच्छ स्वाहेति । इयं वै पृथिव्यग्निर्वैश्वानरः सेयं प्रतिष्ठामेवैतत्प्रतिष्ठामभिप्रजनयति ॥४॥ अथ मुखं विमृष्टे । मनो मे हार्दि यच्छेति तथो होपयष्टात्मानं नानुप्रवृणक्ति ॥५॥ अथ जाघन्या पत्नीः संयाजयन्ति । जघनार्धो वै जाघनी जघनार्धाद्धि योषायै प्रजाः प्रजायन्ते तत्प्रैवैतज्जनयति यज्जाघन्या पत्नीः संयाजयन्ति ॥६॥ अन्तरतो देवानां पत्नीभ्योऽवद्यति । अन्तरतो वै योषायै प्रजाः

प्रजायन्तऽउपरिष्टादग्नये गृहपतयऽउपरिष्टाद्धि वृषा योषामधिद्रवति ॥७॥ अथ हृदयशूलेनावभृथं यन्ति । पशोर्ह वाऽआलभ्यमानस्य हृदयꣳ शुक्समभ्यवैति हृदयाद्धृदयशूलमथ यच्छृतस्य परितृन्दन्ति तदलंजुषं तस्माद्ध परितृद्यैव शूलाकुर्यात्त्रिःप्रच्युते पशौ हृदयं प्रवृह्योत्तमं प्रत्यवदधाति ॥८॥ अथ हृदयशूलं प्रयच्छति । तन्न पृथिव्यां परास्येन्नाप्सु स यत्पृथिव्यां परास्येदोषधीश्च वनस्पतींश्चैषा शुक्प्रविशेद्यदप्सु परास्येदप एषा शुक्प्रविशेत्तस्मान्न पृथिव्यां नाप्सु ॥९॥ अप एवाभ्यवेत्य । यत्र शुष्कस्य चार्द्रस्य च संधिः स्यात्तदुपगूहेद्यद्युऽअभ्यवायनाय ग्लायेदग्रेण यूपमुदपात्रं निनीय यत्र शुष्कस्य चार्द्रस्य च संधिर्भवति तदुपगूहति मापो मौषधीर्हिꣳसीरिति तथा नापो नौषधीर्हिनस्ति धाम्नो-धाम्नो राजंस्ततो वरुण नो मुञ्च । यदाहुरघ्न्या इति वरुणेति शपामहे ततो वरुण नो मुञ्चेति तदेनꣳ सर्वस्माद्वरुणपाशात्सर्वस्माद्वरुण्यात्प्रमुञ्चति ॥१०॥ अथाभिमन्त्रयते । सुमित्रिया न आप ओषधयः सन्तु दुर्मित्रियास्तस्मै सन्तु योऽस्मान्द्वेष्टि यं च वयं द्विष्म इति यत्र वाऽएतेन प्रचरन्त्यापश्च ह वाऽअस्मात्तावदोषधयश्चापक्रम्येव तिष्ठन्ति तदु ताभिर्मित्रधेयं कुरुते तथो हैनं ताः पुनः प्रविशन्त्येषो तत्र प्रायश्चित्तिः क्रियते स वै नाग्नीषोमीयस्य पशोः करोति नाग्नेयस्य वशायाऽएवानूबन्ध्यायै ताꣳ हि सर्वोऽनु यज्ञः संतिष्ठतऽएतद्ध ह्यस्याग्नीषोमीयस्य च पशो ग्नेयस्य च हृदयशूलेन चरितं भवति यद्वशायाश्चरन्ति ॥११॥ ब्राह्मणम् ॥१ [८. ५.]॥ अष्टमोऽध्यायः [२३.] ॥ ॥

प्रजापतिर्वै प्रजाः ससृजानो रिरिचान-इवामन्यत । तस्मात्पराच्यः प्रजा आसुर्नास्य प्रजाः श्रियेऽन्नाद्याय तस्थिरे ॥१॥ स ऐक्षतारिच्यहम् । अस्माऽउ कामायासृक्षि न मे स कामः समार्धि पराच्यो मत्प्रजा अभूवन्न मे प्रजाः श्रियेऽन्नाद्यायास्थिषतेति ॥२॥ स ऐक्षत प्रजापतिः । कथं नु पुनरात्मानमाप्याययेयोप मा

प्रजाः समावर्तेरंस्तिष्ठेरन्मे प्रजाः श्रियेऽन्नाद्यायेति ॥३॥ सोऽर्चञ्छ्राम्यंश्चचार प्रजाकामः । स एतामेकादशिनीमपश्यत्स एकादशिन्येष्ट्वा प्रजापतिः पुनरात्मानमाप्याययतोपैनं प्रजाः समावर्तन्तातिष्ठन्तास्य प्रजाः श्रियेऽन्नाद्याय स वसीयानेवेष्ट्वाभवत् ॥४॥ तस्मै कमेकादशिन्या यजेत । एवꣳ हैव प्रजया पशुभिराप्यायतऽउपैनं प्रजाः समावर्तन्ते तिष्ठन्तेऽस्य प्रजाः श्रियेऽन्नाद्याय स वसीयानेवेष्ट्वा भवत्येतस्मै कमेकादशिन्या यजते ॥५॥ स आग्नेयं प्रथमं पशुमालभते । अग्निव देवतानां मुखं प्रजनयिता स प्रजापतिः स उऽएव यजमानस्तस्मादाग्नेयो भवति ॥६॥

अथ सारस्वतम् । वाग्वै सरस्वती वाचैव तत्प्रजापतिः पुनरात्मानमाप्याययत वागेनमुपसमावर्तत वाचमनुकामात्मनोऽकुरुत वाचोऽएवैष एतदाप्यायते वागेनमुपसमावर्तते वाचमनुकामात्मनः कुरुते ॥७॥ अथ सौम्यम् । अन्नं वै सोमोऽन्नेनैव तत्प्रजापतिः पुनरात्मानमाप्याययतान्नमेनमुपसमावर्ततान्नमनुकमात्मनोऽकुरुतान्नेनोऽएवैष एतदाप्यायतऽन्नमेनमुपसमावर्ततेऽन्नमनुकमात्मनः कुरुते ॥८॥ तद्यत्सारस्वतमनु भवति । वाग्वै सरस्वत्यन्नꣳ सोमस्तस्माद्यो वाचा प्रसाम्यन्नादो हैव भवति ॥९॥ अथ पौ म् । पशवो वै पूषा पशुभिरेव तत्प्रजापतिः पुनरात्मानमाप्याययत पशव एनमुपसमावर्तन्त पशूननुकानात्मनोऽकुरुत पशुभिर्वैवैष एतदाप्यायते पशव एनमुपसमावर्तन्ते पशूननुकानात्मनः कुरुते ॥१०॥

अथ वार्हस्पत्यम् । ब्रह्म वै बृहस्पतिर्ब्रह्मणैवैतत्प्रजापतिः पुनरात्मानमाप्याययत ब्रह्मैनमुपसमावर्तत ब्रह्मानुकमात्मनोऽकुरुत ब्रह्मणोऽएवैष एतदाप्यायते ब्रह्मैनमुपसमावर्तते ब्रह्मानुकमात्मनः कुरुते ॥११॥ तद्यत्पौष्णमनु भवति । पशवो वै पूषा ब्रह्म बृहस्पतिस्तस्माद्ब्राह्मणाः पशूनभिधृष्णुतमः पुराहिता ह्यस्य भवन्ति मुखऽआहितास्तस्मादु तत्सर्वं द्वाजिनवासी चरति ॥१२॥ अथ वैश्वदेवꣳ । सर्वं वै विश्वे देवाः सर्वेणैव तत्प्रजापतिः पुनरात्मानमाप्याययत सर्वमेनमुपसमावर्त-

त सर्वमनुकमात्मनोऽकुरुत सर्वेणोऽएवैष एतदाप्यायते सर्वमेनमुपसमावर्तते सर्वमनुकमात्मनः कुरुते ॥१३॥ तद्यद्बार्हस्पत्यमनु भवति । ब्रह्म वै बृहस्पतिः सर्वमिदं विश्वे देवा अस्यैवैतत्सर्वस्य ब्रह्म मुखं करोति तस्मादस्य सर्वस्य ब्राह्मणो मुखम् ॥१४॥ अथैन्द्रम् । इन्द्रियं वै वीर्यमिन्द्र इन्द्रियेणैव तद्वीर्येण प्रजापतिः पुनरात्मानमाप्याययतेन्द्रियमेनं वीर्यमुपसमावर्ततेन्द्रियं वीर्यमनुकमात्मनोऽकुरुतेन्द्रियेणोऽएवैष एतद्वीर्येणाप्यायतऽइन्द्रियमेनं वीर्यमुपसमावर्ततऽइन्द्रियं वीर्यमनुकमात्मनः कुरुते ॥१५॥ तद्यद्वैश्वदेवमनु भवति । क्षत्रं वाऽइन्द्रो विशो विश्वे देवा अन्नाद्यमेवास्माऽएतत्पुरस्तात्करोति ॥१६॥ अथ मारुतम् । विशो वै मरुतो भूमो वै विड्भूम्नैव तत्प्रजापतिः पुनरात्मानमाप्याययत भूमैनमुपसमावर्तत भूमानमनुकमात्मनोऽकुरुत भूम्नोऽएवैष एतदाप्यायते भूमैनमुपसमावर्तते भूमानमनुकमात्मनः कुरुते ॥१७॥ तद्यदैन्द्रमनु भवति । क्षत्रं वाऽइन्द्रो विशो विश्वे देवा विशो वै मरुतो विशैवैतत्क्षत्रं परिबृंहति तदिदं क्षत्रमुभयतो विशा परिबृढम् ॥१८॥ अथैन्द्राग्नम् । तेजो वाऽअग्निरिन्द्रियं वीर्यमिन्द्र उभाभ्यामेव तद्वीर्याभ्यां प्रजापतिः पुनरात्मानमाप्याययतोभेऽएनं वीर्येऽउपसमावर्तेतामुभे वीर्येऽअनुकेऽआत्मनोऽकुरुतोभाभ्यामेवैष एतद्वीर्याभ्यामाप्यायतऽउभेऽएनं वीर्येऽउपसमावर्तेतेऽउभे वीर्येऽअनुकेऽआत्मनः कुरुते ॥१९॥ अथ सावित्रं । सविता वै देवानां प्रसविता तथो ह्यस्माऽएते सवितृप्रसूता एव सर्वे कामाः समृध्यन्ते ॥२०॥ अथ वारुणमन्तत आलभते । तदेनं सर्वस्माद्वरुणपाशात्सर्वस्माद्वरुण्यात्प्रमुञ्चति ॥२१॥ तस्माद्यदि यूपैकादशिनी स्यात् । आग्नेयमेवाग्निष्ठे नियुञ्ज्यादथेतरान्व्युपनयेयुर्यथापूर्वम् ॥२२॥ यद्यु पश्वेकादशिनी स्यात् । आग्नेयमेव यूपऽआलभेरन्नथेतरान्यथापूर्वम् ॥२३॥ तान्यत्रोदीचो नयन्ति । आग्नेयमेव प्रथमं नयन्त्यथेतरान्यथापूर्वम् ॥२४॥ तान्यत्र निविध्यन्ति । आग्नेयमेव प्रथमं दक्षिणार्ध्ये

निविध्यन्त्यथेतरानुदीचोऽतिनीय यथापूर्वम् ॥२५॥ तेषां यत्र वपाभिः प्रचरन्ति । आग्नेयस्यैव प्रथमस्य वपया प्रचरन्त्यथेतरेषां यथापूर्वम् ॥२६॥ तैर्यत्र प्रचरन्ति । आग्नेयेनैव प्रथमेन प्रचरन्त्यथेतरैर्यथापूर्वम् ॥२७॥ ब्राह्मणम् ॥२[१.१.]॥ ॥

यत्र वै यज्ञस्य शिरोऽच्छिद्यत । तस्य रसो द्रुत्वापः प्रविवेश तेनैवैतद्रसेनापः स्यन्दन्ते तमेवैतद्रसꣳ स्यन्दमानं मन्यन्ते ॥१॥ स यद्वसतीवरीरच्छैति । तमेवैतद्रसमाहृत्य यज्ञे दधाति रसवन्तं यज्ञं करोति तस्माद्वसतीवरीरच्छैति ॥२॥ ता वै सर्वेषु सवनेषु विभजति । सर्वेष्वेवैतत्सवनेषु रसं दधाति सर्वाणि सवनानि रसवन्ति करोति तस्मात्सर्वेषु सवनेषु विभजति ॥३॥ ता वै स्यन्दमानानां गृह्णीयात् । ऐद्धि स यज्ञस्य रसस्तस्मात्स्यन्दमानानां गृह्णीयात् ॥४॥ गोपीथाय वा ऽएता गृह्यन्ते । सर्वं वाऽइदमन्यदिलयति यदिदं किं चापि योऽयं पवतेऽथैता एव नेलयन्ति तस्मात्स्यन्दमानानां गृह्णीयात् ॥५॥ दिवा गृह्णीयात् । पश्यन्यज्ञस्य रसं गृह्णानीति तस्माद्दिवा गृह्णीयादेतस्मै वै गृह्णाति य एष तपति विश्वेभ्यो ह्येना देवेभ्यो गृह्णाति रश्मयो ह्यस्य विश्वे देवास्तस्माद्दिवा गृह्णीयाद्दिवेव वा ऽएष तस्माद्वेव दिवा गृह्णीयात् ॥६॥ एतद्ध वै विश्वे देवाः । यजमानस्य गृहानागच्छन्ति स यः पुरादित्यस्यास्तमयाद्वसतीवरीर्गृह्णाति यथा श्रेयस्यागमिष्यत्यावसथेनोपक्लृप्तेनोपासीतैवं तत्तऽएतद्धविः प्रविशन्ति तऽएतासु वसतीवरीषूपवसन्ति स उपवसथः ॥७॥ स यस्यागृहीता अभ्यस्तमियात् । तत्र प्रायश्चित्तिः क्रियते यदि पुरेजानः स्यान्निनाह्याद्गृह्णीयाद्दिवा हि तस्य ताः पुरा गृहीता भवन्ति यद्युऽअनीजानः स्याद्य एनमीजान उपावसितो वा पर्यवसितो वा स्यात्तस्य निनाह्याद्गृह्णीयाद्दिवा हि तस्य ताः पुरा गृहीता भवन्ति ॥८॥ यद्युऽएतदुभयं न विन्देत् । उल्कुषीमिवादायोपपर्यावर्त्तामुपर्युपरि धारयन्गृह्णीयाद्धिरण्यं वोपर्युपरि धारयन्गृह्णीयात्तदेतस्य रूपं क्रियते य एष तपति ॥९॥ अथातो गृह्णात्येव । ह-

विष्मतीरिमा आप इति यज्ञस्य ह्यासु रसः प्राविशत्तस्मादाह हविष्मतीरिमा आप इति हविष्माँ३ऽआविवासतीति हविष्मान्ह्येना यजमान आविवासति तस्मादाह हविष्माँ३ऽआविवासतीति ॥१०॥ हविष्मान्देवोऽअध्वर इति । अध्वरो वै यज्ञस्तदस्मै यज्ञाय गृह्णाति तꣳ हविष्मन्तं करोति तस्मादाह हविष्मान्देवोऽअध्वर इति ॥११॥ हविष्माँ३ऽअस्तु सूर्य इति । एतस्मै वै गृह्णाति य एष तपति विश्वेभ्यो ह्येना देवेभ्यो गृह्णाति रश्मयो ह्यस्य विश्वे देवास्तस्मादाह हविष्माँ३ऽअस्तु सूर्य इति ॥१२॥ ता आहृत्य जघनेन गार्हपत्यꣳ सादयति । अग्नेर्वोऽपन्नगृहस्य सदसि सादयामीत्यग्नेर्वोऽनार्तगृहस्य सदसि सादयामीत्येवैतदाहाथ यदाग्नीषोमीयः पशुः संतिष्ठतेऽथ परिहरति व्युत्क्रामतेत्याहाग्रेण हविर्धाने यजमान आस्ते ता आदत्ते ॥१३॥ स दक्षिणेन निष्क्रामति । ता दक्षिणायाꣳ श्रोणौ सादयतीन्द्राग्न्योर्भागधेयी स्थेति विश्वेभ्यो ह्येना देवेभ्यो गृह्णातीन्द्राग्नी हि विश्वे देवास्ताः पुनराहृत्याग्रेण पत्नीꣳ सादयति स जघनेन पत्नीं पर्येत्य ता आदत्ते ॥१४॥ स उत्तरेण निष्क्रामति । ता उत्तरायाꣳ श्रोणौ सादयति मित्रावरुणयोर्भागधेयी स्थेति नैवꣳ सादयेदतिरिक्तमेतन्नैवꣳ सम्पत्सम्पद्यतऽइन्द्राग्न्योर्भागधेयी स्थेत्येव ब्रूयात्तदेवानतिरिक्तं तथा सम्पत्सम्पद्यते ॥१५॥ गुप्त्यै वाऽएताः परिह्रियन्ते । अग्निः पुरस्तादथैताः समन्तं पल्यङ्ग्यन्ति नाष्ट्रा रक्षाꣳस्यपघ्नन्त्यस्ता आग्नीध्रे सादयति विश्वेषां देवानां भागधेयी स्थेति तदासु विश्वान्देवान्संवेशयत्येते वै वसतां वरं तस्माद्वसतीवर्यो नाम वसताꣳ ह वै वरं भवति य एवमेतद्वेद ॥१६॥ तानि वाऽएतानि सप्त यजूꣳषि भवन्ति । चतुर्भिर्गृह्णात्येकेन जघनेन गार्हपत्यꣳ सादयत्येकेन परिहरत्येकेनाग्नीध्रे तानि सप्त यत्र वै वाचः प्रजातानि छन्दाꣳसि सप्तपदा वै तेषां परार्ध्या शक्वर्येतामभिसम्पदं तस्मात्सप्त यजूꣳषि भवन्ति ॥१७॥ ब्राह्मणम् ॥३ [१.२.]॥ ॥

तान्त्सम्प्रबोधयन्ति । तेऽप उपस्पृश्याग्नीध्रमुपसमायन्ति तऽआज्यानि गृह्णते गृहीत्वाज्यान्यायन्त्यासाद्याज्यानि ॥१॥ अथ राजानमुपावहरति । इयं वै प्रतिष्ठा जनूरासां प्रजानामिमामेवैतत्प्रतिष्ठामभ्युपावहरति तमस्यै तनुते तमस्यै जनयति ॥२॥ अन्तरेणेषेऽउपावहरति । यज्ञो वाऽअनस्तन्न्वेव यज्ञान्न बहिर्धा करोति ग्रावसु संमुखेष्वधिनिदधाति क्षत्रं वै सोमो विशो ग्रावाणः क्षत्रमेवैतद्विश्यध्यूहति तद्यत्संमुखा भवन्ति विशमेवैतत्संमुखां क्षत्रियमभ्यविवादिनीं करोति तस्मात्संमुखा भवन्ति ॥३॥ स उपावहरति । हृदे त्वा मनसे त्वेति यजमानस्यैतत्कामायाह हृदयेन हि मनसा यजमानस्तं कामं कामयते यत्काम्या यजते तस्मादाह हृदे त्वा मनसे त्वेति ॥४॥ दिवे त्वा सूर्याय त्वेति । देवलोकाय त्वेत्येवैतदाह यदाह दिवे त्वेति सूर्याय त्वेति देवेभ्यस्त्वेत्येवैतदाहोर्ध्वमिममध्वरं दिवि देवेषु होत्रा यच्छेत्यधरो वै यज्ञ ऊर्ध्वमिमं यज्ञं दिवि देवेषु धेहीत्येवैतदाह ॥५॥ सोम राजन्विश्वास्त्वं प्रजा उपावरोहेति । तदेनमासां प्रजानामाधिपत्याय राज्यायोपावहरति ॥६॥ अथानुसृज्योपतिष्ठते । विश्वास्त्वां प्रजा उपावरोहन्त्वित्ययथायथमिव वाऽएतत्करोति यदाह विश्वास्त्वं प्रजा उपावरोहेति क्षत्रं वै सोमस्तत्पापवस्यसं करोति तद्धेदमनु पापवस्यसं क्रियतेऽथात्र यथायथं करोति यथापूर्वं यदाह विश्वास्त्वां प्रजा उपावरोहन्त्विति तदेनमाभिः प्रजाभिः प्रत्यवरोहयति तस्मादु क्षत्रियमायन्तमिमाः प्रजा विशः प्रत्यवरोहन्ति तमधस्तादुपासतऽउपसन्नो होता प्रातरनुवाकमनुवक्ष्यन्भवति ॥७॥ अथ समिधमभ्यादधदाह । देवेभ्यः प्रातर्यावभ्योऽनुब्रूहीति छन्दांसि वै देवाः प्रातर्यावाणश्छन्दांस्यनुयाजा देवेभ्यः प्रेष्य देवान्यजेति वाऽअनुयाजैश्चरन्ति ॥८॥ तदु हैकऽआहुः । देवेभ्योऽनुब्रूहीति तदु तथा न ब्रूयाच्छन्दांसि वै देवाः प्रातर्यावाणश्छन्दांस्यनुयाजा देवेभ्यः प्रेष्य देवान्यजेति वाऽअनुयाजैश्चरन्ति तस्मादु ब्रूयाद्देवेभ्यः प्रातर्यावभ्योऽनुब्रूहीत्येव ॥९॥

अथ यत्समिधमभ्यादधाति । छन्दाᳬस्येवैतत्समिन्द्धेऽथ यद्धोता प्रातरनुवाकमन्वाह छन्दाᳬस्येवैतत्पुनराप्याययत्ययातयामानि करोति यातयामानि वै देवैश्छन्दाᳬसि छन्दोभिर्हि देवाः स्वर्गं लोकᳬ समाश्नुवत न वाऽअत्र स्तुवते न शᳬसन्ति तच्छन्दाᳬस्येवैतत्पुनराप्याययत्ययातयामानि करोति तैरयातयामैर्यज्ञं तन्वते तस्माद्धोता प्रातरनुवाकमन्वाह ॥१०॥ तदाहुः । कः प्रातरनुवाकस्य प्रतिगर इति जाग्रद्धैवाध्वर्युरुपासीत स यन्निमिषति स ह्वैवास्य प्रतिगरस्तदु तथा न कुर्याद्यदि निद्रायादपि कामᳬ स्वप्यात्स यत्र होता प्रातरनुवाकं परिदधाति तत्प्रचरणीति स्रुग्भवति तस्यां चतुर्गृहीतमाज्यं गृहीत्वा जुहोति ॥११॥ यत्र वै यज्ञस्य शिरोऽछिद्यत । तस्य रसो द्रुत्वापः प्रविवेश तमदः पूर्वेद्युर्वसतीवरीभिराहरत्यथ योऽत्र यज्ञस्य रसः परिशिष्टस्तमेवैतदाहैति ॥१२॥ यद्वैवैतामाहुतिं जुहोति । एतमेवैतद्यज्ञस्य रसमभिप्रस्तृणीते तमारुन्द्धे याभ्य उ चैवैतां देवताभ्य आहुतिं जुहोति ता एवैतत्प्रीणाति ता अस्मै तृप्ताः प्रीता एतं यज्ञस्य रसᳬ संनमन्ति ॥१३॥ ॥ शतम् २२०० ॥ ॥ स जुहोति । शृणोत्वग्निः समिधा हवं मऽइति शृणोतु मऽइदमग्निरनु मे जानात्वित्येवैतदाह शृण्वन्त्वापो धिषणाश्च देवीरिति शृण्वन्तु मऽइदमापोऽनु मे जानन्त्वित्येवैतदाह श्रोता ग्रावाणो विदुषो न यज्ञमिति शृण्वन्तु मऽइदं ग्रावाणोऽनु मे जानन्त्वित्येवैतदाह विदुषो न यज्ञमिति विद्वाᳬसो हि ग्रावाणः शृणोतु देवः सविता हवं मे स्वाहेति शृणोतु मऽइदं देवः सवितानु मे जानात्वित्येवैतदाह सविता वै देवानां प्रसविता तत्सवितृप्रसूत एवैतद्यज्ञस्य रसमाहैति ॥१४॥ अथापरं चतुर्गृहीतमाज्यं गृहीत्वा । उदङ् प्रयन्नाहाप इष्य होतरित्यप इष होतरित्येवैतदाह तद्यदतो होतान्वाहैतमेवैतद्यज्ञस्य रसमभिप्रस्तृणीते तमारुन्द्धऽएतानु चैवैतदनुतिष्ठते नेदेनानन्तरा नाष्ट्रा रक्षाᳬसि हिनसन्निति ॥१५॥ अथ सम्प्रेष्यति । मैत्रावरुणस्य चमसाध्वर्यवेहि ने-

ष्टः पत्नीरुदानयैकधनिन एतानग्नीधावाले वसतीवरीभिः प्रत्युपतिष्ठासै होतृचमसेन चेति सम्प्रैष एवैषः ॥१६॥ त उदञ्चो निष्क्रामन्ति । जघनेन चात्वालमग्रेणाग्नीध्रꣳ स यस्यां ततो दिश्यापो भवन्ति तद्यन्ति ते वै सह पत्नीभिर्यन्ति तद्यत्सह पत्नीभिर्यन्ति ॥१७॥ यत्र वै यज्ञस्य शिरोऽच्छिद्यत । तस्य रसो द्रुत्वापः प्रविवेश तमेते गन्धर्वाः सोमरक्षा जुगुपुः ॥१८॥ ते ह देवा ऊचुः । इयमु न्वेवेह नाष्ट्रा यदिमे गन्धर्वाः कथं न्विममभयेऽनाष्ट्रे यज्ञस्य रसमाहरेमेति ॥१९॥ ते होचुः । योषित्कामा वै गन्धर्वाः सह पत्नीभिरयाम ते पत्नीष्वेव गन्धर्वा गर्धिष्यन्त्यथैतमभयेऽनाष्ट्रे यज्ञस्य रसमाहरिष्याम इति ॥२०॥ ते सह पत्नीभिरीयुः । ते पत्नीष्वेव गन्धर्वा जगृधुरथैतमभयेऽनाष्ट्रे यज्ञस्य रसमाजह्रुः ॥२१॥ तथोऽएवैष एतत् । सहैव पत्नीभिरेति ते पत्नीष्वेव गन्धर्वा गृध्यन्त्यथैतमभयेऽनाष्ट्रे यज्ञस्य रसमाहरति ॥२२॥ सोऽपोऽभिजुहोति । एताꣳ ह वाऽआहुतिꣳ हुतामेष यज्ञस्य रस उपसंनमति तां प्रत्युत्तिष्ठति तमेवैतदाविष्कृत्य गृह्णाति ॥२३॥ यद्वेवैतामाहुतिं जुहोति । एतमेवैतद्यज्ञस्य रसमभिप्रस्तृणीते तमारुन्द्धे तमपो याचति याभ्य उ चैवैतां देवताभ्य आहुतिं जुहोति ता एवैतत्प्रीणाति ता अस्मै तृप्ताः प्रीता एतं यज्ञस्य रसꣳ संनमन्ति ॥२४॥ स जुहोति । देवीरापोऽअपांनपादिति देव्यो ह्यापस्तस्मादाह देवीरापोऽअपांनपादिति यो व ऊर्मिर्हविष्य इति यो व ऊर्मिर्यज्ञिय इत्येवैतदाहेन्द्रियावान्मदिन्तम इति वीर्यवानित्येवैतदाह यदाहेन्द्रियावानिति मदिन्तम इति स्वादिष्ठ इत्येवैतदाह तं देवेभ्यो देवत्रा दत्तेत्येतदेना अयाचिट यदाह तं देवेभ्यो देवत्रा दत्तेति शुक्रपेभ्य इति सत्यं वै शुक्रꣳ सत्यपेभ्य इत्येवैतदाह येषां भाग स्थ स्वाहेति तेषामु ह्येष भागः ॥२५॥ अथ मैत्रावरुणचमसेनैतामाहुतिमपप्लावयति । कार्षिरसीति यथा वाऽअङ्गारोऽग्निना प्सातः स्यादेवमेषाहुतिरेतया देवतया प्साता भवति राजानं वाऽएताभिरद्भिरुप-

स्वद्यन्भवति या एता मैत्रावरुणचमसे वज्रो वाऽआज्यꣳ रेतः सोमो नेद्वज्रेणाज्येन रेतः सोमꣳ हिनसानीति तस्माद्वाऽअपप्लावयति ॥२६॥ अथ गृह्णाति । समुद्रस्य त्वाक्षित्याऽउन्नयामीत्यापो वै समुद्रोऽप्स्वेवैतदक्षितिं दधाति तस्मादाप एतावति भोगे भुज्यमाने न क्षीयन्ते तदन्वेकधनानुन्नयन्ति तदनु पान्नेजनान् ॥२७॥ तद्यन्मैत्रावरुणचमसेन गृह्णाति । यत्र वै देवेभ्यो यज्ञोऽपाक्रामत्तमेतद्देवाः प्रैषैरेव प्रैषमैच्छन्पुरोरुग्भिः प्रारोचयन्निविद्भिर्न्यवेदयंस्तस्मान्मैत्रावरुणचमसेन गृह्णाति ॥२८॥ तऽआयन्ति । प्रत्युपतिष्ठतेऽग्नीच्चात्वाले वसतीवरीभिश्च होतृचमसेन च स उपर्युपरि चात्वालꣳ संस्पर्शयति वसतीवरीश्च मैत्रावरुणचमसं च समापोऽअद्भिरग्मत समोषधीभिरोषधीरिति यश्चासौ पूर्वेद्युराहृतो यज्ञस्य रसो यश्चाद्याहृतस्तमेवैतदुभयꣳ संसृजति ॥२९॥ तद्धैके । एव मैत्रावरुणचमसे वसतीवरीर्नयन्त्या मैत्रवरुणचमसाद्वसतीवरीषु यश्चासौ पूर्वेद्युराहृतो यज्ञस्य रसो यश्चाद्याहृतस्तमेवैतदुभयꣳ संसृजाम इति वदन्तस्तदु तथा न कुर्याद्यद्वाऽआधवनीये समवनयति तदेवैष उभयो यज्ञस्य रसः संसृज्यतेऽथ होतृचमसे वसतीवरीर्गृह्णाति निग्राभ्याभ्यस्तद्यदुपर्युपरि चात्वालꣳ संस्पर्शयत्यतो वै देवा दिवमुपोदक्रामंस्तद्यजमानमेवैतत्स्वर्ग्यं पन्थानमनुसंख्यापयति ॥३०॥ तऽआयन्ति । तꣳ होता पृच्छत्यध्वर्योऽवेरपा३ऽइत्यविदोऽपा३ऽइत्येवैतदाह तं प्रत्याहोतेव नंनमुरित्यविदमथो मेऽनꣳसतेत्येवैतदाह ॥३१॥ स यद्यग्निष्टोमः स्यात् । यदि प्रचरण्याꣳ संस्रवः परिशिष्टोऽलꣳ होमाय स्यात्तं जुहुयाद्यद्यु नालꣳ होमाय स्यादपरं चतुर्गृहीतमाज्यं गृहीत्वा जुहोति यमग्ने पृत्सु मर्त्यमवा वाजेषु यं जुनाः । स यन्ता शश्वतीरिषः स्वाहेत्याग्नेय्या जुहोत्यग्निर्वाऽअग्निष्टोमस्तदग्नावग्निष्टोमं प्रतिष्ठापयति मर्तवत्या पुरुषसंमितो वाऽअग्निष्टोम एवं जुहुयाद्यद्यग्निष्टोमः स्यात् ॥३२॥ यद्युक्थ्यः स्यात् । मध्यमं परिधिमुपस्पृशेत्त्रयः परिधयस्त्रीण्युक्थान्येतैरु हि तर्हि य-

ज्ञः प्रतितिष्ठति यद्युऽअतिरात्रो वा षोडशी वा स्यान्नैव जुहुयान्न मध्यमं परिधि मुपस्पृशेत्समुह्यैव तूष्णीमेत्य प्रपद्येत तद्यथायथं यज्ञक्रतून्व्यावर्तयति ॥ ३३ ॥ अयुग्मा-अयुग्मा एकधना भवन्ति । त्रयो वा पञ्च वा पञ्च वा सप्त वा सप्त वा नव वा नव वैकादश वैकादश वा त्रयोदश वा त्रयोदश वा पञ्चदश वा द्वन्द्वमह् मिथुनं प्रजननमथ य एष एकोऽतिरिच्यते स यजमानस्य श्रियमभ्यतिरिच्यते स वाऽएषाꣳ सधनं यो यजमानस्य श्रियमभ्यतिरिच्यते तद्यदेषाꣳ सधनं तस्मादेक-धना नाम ॥ ३४ ॥ ब्राह्मणम् ॥ ४ [१. ३] ॥ ॥

अथाधिषवणे पर्युपविशन्ति । अथास्याꣳ हिरण्यं बध्नीते द्वयं वाऽइदं न तृतीयमस्ति सत्यं चैवानृतं च सत्यमेव देवा अनृतं मनुष्या अग्निरेतसं वै हिरण्यꣳ सत्येनाꣳशूनुपस्पृशानि सत्येन सोमं पराहणानीति तस्माद्वाऽअस्याꣳ हिरण्यं बध्नीते ॥ १ ॥ अथ ग्रावाणमादत्ते । ते वाऽएतेऽश्ममया ग्रावाणो भवन्ति देवो वै सोमो दिवि हि सोमो वृत्रो वै सोम आसीत्तस्यैतच्छरीरं यद्गिरयो यदश्मानस्तच्छरीरेणैवैनमेतत्समर्धयति कृत्स्नं करोति तस्मादश्ममया भवन्ति घ्नन्ति वाऽएनमेतद्यदभिषुण्वन्ति तमेतेन घ्नन्ति तथात उदेति तथा संजीवति तस्मादश्ममया ग्रावाणो भवन्ति ॥ २ ॥ तमादत्ते । देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे रावासीति सविता वै देवानां प्रसविता तत्सवितृप्रसूत एवैनमेतदादत्तेऽश्विनोर्बाहुभ्यामित्यश्विनावध्वर्यू तत्तयोरेव बाहुभ्यामादत्ते न स्वाभ्यां पूष्णो हस्ताभ्यामिति पूषा भागदुघस्तत्तस्यैव हस्ताभ्यामादत्ते न स्वाभ्यां वज्रो वाऽएष तस्य न मनुष्यो भर्ता तमेताभिर्देवताभिरादत्ते ॥ ३ ॥ आददे रावासीति । यदा वाऽएनमेतेनाभिषुण्वन्त्यथाहुतिर्भवति यदाहुतिं जुहोत्यथ दक्षिणा ददात्येतद्ध्येष द्वयꣳ रासतऽआहुतीश्च दक्षिणाश्च तस्मादाह रावासीति ॥ ४ ॥ गभीरमिममध्वरं कृधीति । अध्वरो वै यज्ञो महान्तमिमं यज्ञं कृधीत्येवैतदाहेन्द्राय सुषूतम-

मितीन्द्रो वै यज्ञस्य देवता तस्मादाहेन्द्रायेति सुषूतममिति सुसुतममित्येवैतदा-
होत्तमेन पवित्रेणेत्येष वाऽउत्तमः पवित्रं यत्सोमस्तस्मादाहोत्तमेन पवित्रेणेत्यूर्जस्वन्तं
मधुमन्तं पयस्वन्तमिति रसवन्तमित्येवैतदाह यदाहोर्जस्वन्तं मधुमन्तं पयस्वन्तमिति
॥५॥ अथ वाचं यच्छति । देवा ह वै यज्ञं तन्वानास्तेऽसुररक्षसेभ्य आसङ्गाद्बिभ-
यां चक्रुस्ते होचुरुपांशु यजाम वाचं यच्छामेति तऽउपांश्वयजन्वाचमयच्छन् ॥६॥
अथ निग्राभ्या आहरति । तास्वेनं वाचयति निग्राभ्या स्थ देवश्रुतस्तर्पयत मा
मनो मे तर्पयत वाचं मे तर्पयत प्राणं मे तर्पयत चक्षुर्मे तर्पयत श्रोत्रं मे तर्पय-
तात्मानं मे तर्पयत प्रजां मे तर्पयत पशून्मे तर्पयत गणान्मे तर्पयत गणा मे मा
वितृषन्निति रसो वाऽआपस्तास्वेवैतामाशिषमाशास्ते सर्वं च मऽआत्मानं तर्प-
यत प्रजां मे तर्पयत पशून्मे तर्पयत गणान्मे तर्पयत गणा मे मा वितृषन्निति स
य एष उपांशुसवनः स विवस्वानादित्यो निदानेन सोऽस्यैष व्यानः ॥७॥ त-
मभिमिमीते । घ्नन्ति वाऽएनमेतद्यदभिषुण्वन्ति तमेतेन घ्नन्ति तथात उदेति तथा
संजीवति यद्वेव मिमीते तस्मान्मात्रा मनुष्येषु मात्रो यो चाप्यन्या मात्रा ॥८॥
स मिमीते । इन्द्राय त्वा वसुमते रुद्रवतऽइतीन्द्रो वै यज्ञस्य देवता तस्मादाहे-
न्द्राय त्वेति वसुमते रुद्रवतऽइति तदिन्द्रमेवानु वसूंश्च रुद्रांश्चाभजतीन्द्राय त्वादि-
त्यवतऽइति तदिन्द्रमेवान्वादित्यानाभजतीन्द्राय त्वाभिमातिघ्नऽइति सपत्नो वा
ऽअभिमातिरिन्द्राय त्वा सपत्नघ्नऽइत्येवैतदाह सोऽस्योद्धारो यथा श्रेष्ठ गोद्धार ए-
वमस्यैषऽऋते देवेभ्यः ॥९॥ श्येनाय त्वा सोमभृतऽइति । तद्गायत्र्यै मिमीतेऽग्नये
त्वा रायस्पोषदऽइत्यग्निर्वै गायत्री तद्गायत्र्यै मिमीते स यद्गायत्री श्येनो भूत्वा दि-
वः सोममाहरत्तेन सा श्येनः सोमभृत्तेनैवास्या एतद्वीर्येण द्वितीयं मिमीते ॥१०॥
अथ यत्पञ्च कृत्वो मिमीते । संवत्सरसंमितो वै यज्ञः पञ्च वाऽऋतवः संवत्सर-
स्य तं पञ्चभिराप्नोति तस्मात्पञ्च कृत्वो मिमीते ॥११॥ तमभिमृशति । यत्ते सोम

दिवि ज्योतिर्यत्पृथिव्यां यदुरावन्तरिक्षे । तेनास्मै यजमानायोरु राये कृध्यधि दात्रे वोच इति यत्र वाऽएषोऽग्रे देवानाᳪ हविर्बभूव तद्वैतां चक्रे मैव सर्वेणैवात्मना देवानाᳪ हविर्भूवमिति स एतास्तिस्रस्तनूरेषु लोकेषु विन्यधत्त ॥ १२ ॥ तद्वै देवा अस्पृण्वत । तेऽस्यैतेनैवैतास्तनूराप्नुवन्त्स कृत्स्न एव देवानाᳪ हविरभवत्तथोऽएवास्यैष एतेनैवैतास्तनूराप्नोति स कृत्स्न एव देवानाᳪ हविर्भवति तस्मादेवमभिमृशति ॥ १३ ॥ अथ निग्राभ्याभिरुपसृजति । आपो ह वै वृत्रं जघ्नुस्तेनैवैतद्वीर्येणापः स्यन्दन्ते तस्मादेनाः स्यन्दमाना न किं चन प्रतिधारयति ता ह स्वमेव वशं चेरुः कस्मै नु वयं तिष्ठामहे याभिरस्माभिर्वृत्रो हत इति सर्वं वाऽइदमिन्द्राय तस्थानमास यदिदं किं चापि योऽयं पवते ॥ १४ ॥ स इन्द्रोऽब्रवीत् । सर्वं वै मऽइदं तस्थानं यदिदं किं च तिष्ठध्वमेव मऽइति ता होचुः किं नस्ततः स्यादिति प्रथमभक्ष एव वः सोमस्य राज्ञ इति तथेति ता अस्माऽअतिष्ठन्त तास्तस्थाना उरसि न्यगृह्णीत तद्यदेना उरसि न्यगृह्णीत तस्मान्निग्राभ्या नाम तथैवैता एतद्यजमान उरसि निगृह्णीते स आसामेष प्रथमभक्षः सोमस्य राज्ञो यन्निग्राभ्याभिरुपसृजति ॥ १५ ॥ स उपसृजति । श्वात्रा स्थ वृत्रतुर इति शिवा ह्यापस्तस्मादाह श्वात्रा स्थेति वृत्रतुर इति वृत्रᳪ ह्येता अघ्नन्राधोगूर्ता अमृतस्य पत्नीरित्यमृता ह्यापस्ता देवीर्देवत्रेमं यज्ञं नयतेति नात्र तिरोहितमिवास्त्युपहूताः सोमस्य पिबतेति तदुपहूता एव प्रथमभक्षᳪ सोमस्य राज्ञो भक्षयन्ति ॥ १६ ॥ अथ प्रहरिष्यन् । यं द्विष्यात्तं मनसा ध्यायेदमुष्माऽअहं प्रहरामि न तुभ्यमिति यो न्वेवेमं मानुषं ब्राह्मणᳪ हन्ति तं न्वेव परिचक्षतेऽथ किं य एतं देवो हि सोमो घ्नन्ति वाऽएनमेतद्यदभिषुण्वन्ति तमेतेन घ्नन्ति तथात उदेति तथा संजीवति तथानेनस्यं भवति यद्यु न द्विष्यादपि तृणमेव मनसा ध्यायेत्तथोऽअनेनस्यं भवति ॥ १७ ॥ स प्रहरति । मा भेर्मा संविक्था इति मा त्वं भैषीर्मा संविक्था अमुष्मा

ऽअहं प्रहरामि न तुभ्यमित्येवैतदाहोर्जं धत्स्वेति रसं धत्स्वेत्येवैतदाह धिषणे वीड्वी सती वीडयेथामूर्जं दधाथामितीमेऽएवैतत्फलकेऽआहुरित्यु हैकऽआहुः किं नु तत्र योऽप्येते फलके भिन्द्यादिमे ह वै द्यावापृथिवीऽएतस्माद्वज्रादुद्यतात्संरेजेते तदाभ्यामेवैनमेतद्द्यावापृथिवीभ्यां शमयति तथेमे शान्ते न हिनस्त्यूर्जं दधाथामिति रसं दधाथामित्येवैतदाह पाप्मा हतो न सोम इति तदस्य सर्वं पाप्मानं हन्ति ॥१८॥ स वै त्रिरभिषुणोति । त्रिः सम्भरति चतुर्निग्राभमुपैति तद्दश दशाक्षरा वै विराड्वैराजः सोमस्तस्माद्दश कृत्वः सम्पादयति ॥१९॥ अथ यन्निग्राभमुपैति । यत्र वाऽएषोऽग्रे देवानां हविर्बभूव तद्धेमा दिशोऽभिदध्यावाभिर्दिग्भिर्मिथुनेन प्रियेण धाम्ना संस्पृशेयेति तमेतद्देवा आभिर्दिग्भिर्मिथुनेन प्रियेण धाम्ना समस्पर्शयन्यन्निग्राभमुपायंस्तथोऽएवैनमेष एतदाभिर्दिग्भिर्मिथुनेन प्रियेण धाम्ना संस्पर्शयति यन्निग्राभमुपैति ॥२०॥ स उपैति । प्रागपागुदगधराक्सर्वतस्त्वा दिश आधावन्त्विति तदेनमाभिर्दिग्भिर्मिथुनेन प्रियेण धाम्ना संस्पर्शयत्यम्ब निष्पर समरीर्विदामिति योषा वाऽअम्बा योषा दिशस्तस्मादाहाम्ब निष्परेति समरीर्विदामिति प्रजा वाऽअरीः सं प्रजा जानतामित्येवैतदाह तस्माद्या अपि विदूरमिव प्रजा भवन्ति समेव ता जानते तस्मादाह समरीर्विदामिति ॥२१॥ अथ यस्मात्सोमो नाम । यत्र वाऽएषोऽग्रे देवानां हविर्बभूव तद्धेक्षां चक्रे मैव सर्वेणैवात्मना देवानां हविर्भूवमिति तस्य या जुष्टतमा तनूरास तामपनिदधे तद्ध देवा अस्पृण्वत ते होचुरुपैवैतां प्रवृहस्व सहैव न एतया हविरेधीति तां दूरऽइवोपप्रावृहत स्वा वै मऽएषेति तस्मात्सोमो नाम ॥२२॥ अथ यस्माद्यज्ञो नाम । घ्नन्ति वाऽएनमेतद्यदभिषुण्वन्ति तद्यदेनं तन्वते तदेनं जनयन्ति स तायमानो जायते स यञ्जायते तस्माद्यञ्जो यज्ञो ह वै नामैतद्यद्यज्ञ इति ॥२३॥ तत्रैतामपि वाचमुवाद । त्वमङ्ग प्रशंसिषो देवः शविष्ठ मर्त्यम् ।

न त्वदन्यो मघवन्नस्ति मर्डितेन्द्र ब्रवीमि ते वच इति मर्त्यो ह्येवैतद्गवन्नुवाच त्वमेवेतो जनयितासि नान्यस्त्वदिति ॥२४॥ अथ निग्राभ्याभ्यो ग्रहान्विगृह्णते । आपो ह वै वृत्रं जघ्नुस्तेनैवैतद्वीर्येणापः स्यन्दन्ते स्यन्दमानानां वै वसतीवरीर्गृह्णाति वसतीवरीभ्यो निग्राभ्या निग्राभ्याभ्यो ग्रहान्विगृह्णते तेनैवैतद्वीर्येण ग्रहान्विगृह्णते होतृचमसाद्योषा वाऽऋग्घोता योषायै वाऽइमाः प्रजाः प्रजायन्ते तदेनमेतस्यै योषायाऽऋचो होतुः प्रजनयति तस्माद्धोतृचमसात् ॥२५॥ ब्राह्मणम् ॥५[१.४]॥ सप्तमः प्रपाठकः ॥ कण्डिकासंख्या ११४ ॥ नवमोऽध्यायः [२४.] ॥ ॥ अस्मिन्काण्डे कण्डिकासंख्या ८५१ ॥ ॥

इति माध्यन्दिनीये शतपथब्राह्मणे अध्वरनाम तृतीयं काण्डं समाप्तम् ॥३॥ ॥

EXTRACTS MADE FROM THE COMMENTARY OF SÂYANÂCÂRYA.

आधानपुनराधानेऽअग्निहोत्रं ततः परम् । चातुर्मास्यानि च पशुर्द्वितीयकाण्डऽईरितम् ॥ अथ तृतीयचतुर्थाभ्यामेकाहाहीनसत्त्रलक्षणसकलसोमयागप्रकृतिभूतोऽग्निष्टोमोऽभिधीयते । तत्र तृतीयकाण्डस्य प्रथमाध्याये शालानिर्माणप्रभृति दीक्षाङ्गतिपर्यन्तं प्रतिपाद्यते । तत्रादौ शालानिर्माणार्थं देवयजनपरिग्रहं विधत्ते देवयजनमिति । प्राचीनवंशसदोहविर्धानादिनिर्माणपर्याप्तं देवयजनस्थानम् तज्जोषयन्ते सेवन्ते स्वार्थिको णिच् परिगृह्णीयुर्यजमानपुरुषाः । स इति प्रसिद्धौ यच्छब्दविशेषणमेतत् प्रसिद्धं यद्देवयजनं तद्वर्षिष्ठमतिशयेन वृद्धमुच्छ्रितं जोषयितव्यम् । यद्यस्य (स्या Cod.) उपरि गृहीताया भूमेः अन्यत् परिसरस्थलं नातिशयीत अतिशयितमुच्छ्रितं न स्यात् (न च Cod.) । निम्ने देवयजने इष्ट्वा स्वयमेवात्यन्तं नीच एव स्यात् । see कात्या° ७. १. १०. ॥१॥ वर्ष्मोन्नतम् ॥२॥ देवयजनप्राग्देशे देवयजनान्तरपरिमितप्रदेशस्याधिक्यं निषेधति न पुरस्तादिवेति । स देशातिरेको यजमानभ्रातृव्यातिरेकाय भवति । दक्षिणोत्तरयोरतिरेकः स्वैच्छिकः । पश्चाद्भागे पुनरन्यस्य देवयजनस्य पर्याप्तप्रदेशोपेतं देवयजनं समृद्धिकरम् ॥३॥ वार्ष्णर्यमृषिं याज्ञवल्क्य उवाच यदा वयं देवयजनपरिग्रहाय गतास्तदानीं सात्ययज्ञ आह । अतो यत्र क्व च मन्त्रेण परिग्रहे सति तदुक्तलक्षणमेव भवेदित्यर्थः ॥४॥ याज्ञवल्क्यस्तु वक्ष्यमाणलक्षणैर्ऋत्विग्भिः परिग्रह एवोक्तलक्षणदेवयजनपरिग्रह इत्याह ऋत्विज इति ॥५॥ शाला दीर्घचतुरस्रं गृहम् विमितं सर्वतः समपरिमाणम् । यस्मात्प्राग्दिग्गतानृत्विग्यजमानान्प्रति (? प्रात्यक्दिगंतान्दविग्य° Cod.) पुरोदेशाद्धविर्भाजनाः प्रत्यङ्मुखोपावृत्ताः (? प्रात्यक्मुखायावृत्ताः Cod.) ॥६॥ सा प्राच्यहीना समृद्धा ।

मानुषे मनुष्यार्हकर्मणि ॥७॥ वृष्ट्यादिपरिहाराय सर्वतः परिश्रयणं कर्तव्यम् दीक्षितस्येतरेभ्यो व्यवधानाय च ॥८॥ तत्रात्रैवर्णिकानां शूद्रादीनामभिप्राप्तिं निषेधति ॥९॥ इति एवम् मयेदानीमुक्तप्रकारेण ॥१०॥ समन्त्रकं शालाप्रवेशं विधत्ते अथेति । अध्यवस्यति शालां प्रविश्य मन्त्रेणैतद्देवयजनमिति निश्चिनुयात् । स्थूणाराजो मध्ये स्थित (? दित Cod.) उन्नतस्तम्भः तस्य पूर्वार्धमभिपद्य गृहीत्वा ॥११॥ मदति मोदते ॥१२॥१॥१॥

अथ दीक्षान्तकालं विधत्तेऽपराह्णइति ॥१॥ शालाया उत्तरभागे क्षौरार्थं परिश्रयणं विधत्ते अथेति ॥२॥ सर्वऽएव सर्वस्मिन्नपि देहे ॥३॥ गोदानं नाम कर्णस्योपरि प्रदेशः । वितारयति विभजेत् ॥५॥ परितस्तिर्यगस्यतऽइति पर्यासस्तिर्यक्कं च संदर्भः । अनु अनुलोममाक्काय्यतऽइति पर्यासस्तिर्यक्कं तु संदर्भः (! repetition) तानः । नीविराद्यन्तप्रदेशः । प्रघातः सर्वहननस्थानं (? सवहस° Cod.) निविडीभूतप्रदेशः । अरोका मध्ये छिद्राणि ॥१८॥ अयातयामतायै अशिथिलत्वाय । निष्पेष्टवै क्षालयितुम् । अस्य वस्त्रस्य यदमेध्यमाकृणत्ति आश्लिष्टं करोति निर्माणकाले सहैव वयति च । पक्षान्तरमाह अथो यदिति स्नातेन पुरुषेणाच्छाद्यं धार्यमपल्पूलनकृतं क्षारद्रव्यसहितेनाधौतम् (? °तेनध्येतं Cod.) प्रतिदिनं प्रक्षाल्य यदेव धार्यते तदित्यर्थः तेन वा दीक्षेत ॥१९॥ स धेन्वै चेति धेनोः क्षीरादिकम् अनडुहः सम्बन्धि कर्षणसाध्यम् । अनयोः सर्वोपकारकत्वं विज्ञाय देवैर्वयसामन्येषां पशूनां वीर्यसारमादाय धेन्वनडुह्योः स्थापितत्वात्तदश्नतः (? त्वादश्वंत Cod.) सर्वाशनं भवति तस्य च जायायां (? तस्य वयां Cod.) गर्भसम्भवे सति तत्सर्वाशनं तं (त Cod.) रेतोरूपेण परिणतं गर्भं (गभी Cod.) हिंस्यात् तत्पापकीर्तिः स्यात्तदुभयोरन्नं नाश्नीयात् । यस्मादुभयाशने शरीरमंसलं भवति तस्मात्तयोरन्नमश्नीयाम् । एकहायनप्रभृत्यापञ्चहायना गावो वयांसि ॥२१॥२॥१॥

अपः (!) प्रणयनानन्तरं दीक्षाङ्गभूताया आग्नावैष्णवेष्टेः प्रयोगं विधत्ते अप इति । अग्निरपरार्ध्यः अपरार्धे पूर्वार्धे भव आदिमः ॥१॥ आदित्येभ्योऽदितेः पुत्रेभ्यो धात्रर्यमादिभ्यः सप्तभ्यः । तं परिवादं मन्त्रोदाहरणेन प्रदर्शयति (see ऋक्संहि° १०. ७२. ८.) अष्टौ पुत्रा धात्रादिविवस्वदन्ताः तेषु मध्ये सप्तभिः पुत्रैः सह देवानुपागात् (?°याणत् Cod.) मार्तण्डं मृताण्डसम्बन्धिनमष्टममास्यत् परितत्याज ॥२॥ सप्त हैव विवस्वद्व्यतिरिक्ता अविकृतं कारचरणादि विकार इति तद्रहितं (? कृतचरणादि तिकार इति कार इति ह तं Cod.) मार्ताण्ड जनयामासुः व्यत्ययेनैकवचनम् संदेहः सम्यगुपचितः सासमः (del.!) सर्वतः समएवासीत् केचित्पुरुषवदूर्ध्वत्वमात्रविशिष्टोऽभूदित्याहुः ॥३॥ पुरुषाज्जानः पुरुषप्रकृतिकः ॥४॥ मे मम प्रजायां प्रजासु मध्ये यः कश्चिदादित्येभ्यश्चरुं निर्वपेत् स राध्नुयात् (!) । प्रज्ञातः सर्वैः प्रसिद्धः ॥५॥ देवते प्रधानसम्बन्धिन्यौ अग्नाविष्णू ॥६॥ शालायाः पुरोदेशे (? पुरो Cod.) तिष्ठन्सर्वाङ्गे नवनीताभ्यञ्जनं कुर्यात् । अरुर्व्रणात्मकः ॥७॥ यस्मान्नवनीतं फाण्टघृतयोरन्तरालवर्ति तस्मादन्यदनन्यच्च भवति ॥८॥ इतरावयववत्संस्पर्शासहिष्णुत्वादक्ष्यरुर्व्रणो भवति । मम प्रशान् प्रशाम्येत् । इषीका (!) नेत्रयोर्मलं सास्य पुरुषस्याक्षणः भूय (!) एव अर्ते (!) दुरक्षत्वमेव ततोऽञ्जनेन नाशयति ॥१०॥ तस्य यज्ञमुपगच्छन्दीक्षितोऽश्मपुरीं रक्षार्थं कृतवान्भवति ॥११॥ शरस्तृणविशेषः तस्य शलाका इषीका ॥१३॥ उत्तरावत् उत्कर्षवत् ॥१६॥

तदस्माऽइति तत्तेनाशिषामारम्भवाचनेन सर्वासामाशिषामादावेव यजमानेन परिगृहीतत्वात्स्वकीया एव सतीः ता एवाशिषः सर्वे ऋत्विजः (पंवदविजः Cod.) तन्मन्त्रेषु यजमानार्थमाशासते ॥२४॥ एकैकेन मन्त्रेण हस्तद्वयेऽपि कनिष्ठिकादिक्रमेण द्वे अङ्गुली संकोचयति। यज्ञस्य वासोदण्डादिवद्धस्ते धारयितुमशक्यत्वात् अत एव पोऽन्तानमन्त्रेण मुष्टिबन्धनमेव प्रत्यक्षधारणमित्यर्थः ॥२५॥ वातेन प्राणेन व्याप्रियमाणत्वाद्वातो यज्ञः। वैशब्देन वाताद्यज्ञः प्रयुज्यतामित्यादिमन्त्रप्रसिद्धिर्द्योत्यते ॥२६॥ दीक्षाहुत्यर्थं शालाप्रवेशनम् ॥२८॥३॥१॥

अथ दीक्षाहुतीर्विधातुमाह सर्वाणीति ॥१॥ सम्पद्यतऽइति सम्पत् काम्यते कामः सम्पाद्याय स्वर्गफलाय। यथा लोके किंचित्फलं सिसाधयिषुः आदौ तज्ज्ञात्वा पश्चात्कामयित्वा तत्साधनमनुष्ठायान्ते तल्लभते एवं त्रिभिः स्वर्गफलमाध्याय चतुर्थेन तत्साधनमनुष्ठाय पञ्चमेन तदुद्गृहीतवान्भवति ॥२॥ अथ पुरातनवृत्तान्तप्रदर्शनमुखेनैतेषां स्वर्गोद्ग्रहणे साधनतामुपपादयति यज्ञेनेति। see १. ६. २. १. ॥३॥ यथायमिति येन प्रकारेण देवानुष्ठितप्रकारं जानद्भिर्ऋषिभिरयं यज्ञः औद्ग्रभणहोमेन सम्भृतः एवमेतेषामनुष्ठानेनैष यजमानोऽपि यज्ञं सम्भृतवान्भवति ॥४॥ अथातो होमस्यैवेति मन्त्रा व्याख्यायन्तऽइति शेषः। अग्रे यागानुष्ठानात्पूर्वमाकुवते (°क्रर्वते Cod.) खलु कुतूशब्देन तत्प्राग्भावी मनोव्यापारो लक्ष्यते यजेयेति (°तेति Cod.) संकल्पयतीत्यर्थः ॥६॥ अनूच्यतऽएवेति एवकारयावत्यमाह (? °याव° Cod.) न विति (विति Cod.) ॥८॥ अनद्धेव अप्रत्यक्षमिव। अतोऽस्मात् आकूत्याऽइत्येवमादिकाद्वाक्यात् (कात् कात् वाक्या Cod.) एकमपीन्द्रादिकं देवं नोपलभामहे इति वदन्तः ॥११॥ आधीते आध्यानेन विषयीकृते ॥१२॥ दीक्षणीयेष्टेः सम्बन्धि यदाज्यं ध्रुवायामवशिष्टं तत्पञ्चमाहुत्यर्थं जुहूमवनयेत् एतदेकमवत्तम् अथाज्यस्थाल्याः सकाशात्स्रुवेण जुहूमुपरि त्रिरानयति (त्रिपाशनयति Cod.) एवं चतुरवत्तं भवति ॥१७॥ विश्वो देवस्येति विश्वदेवशब्दश्रवणात् इदं मन्त्रवाक्यं वैश्वदेवम्। नयनस्य सवितृव्यापारत्वात् नेतृशब्दश्रवणात्सावित्रम्। मर्तो वुरीतेत्येनेन मनुष्यैर्वरणीयत्वाभिधानात् मित्रस्य वरणीयत्वं प्रसिद्धम् ॥१९॥४॥१॥

दीक्षाहुतीर्विधायाथ कृष्णाजिनदीक्षामाह दक्षिणेनेति ॥१॥ तर्दसमुते इति यथोभयोर्मांसप्रदेशयोः सम्बन्धो भवति यथा च तर्दनप्रदेशेषु पश्चाद्भागे उते परस्परं स्यूते भवतः तथैकस्योपर्यपरमास्तृणुयात् ॥२॥ तर्हि तस्मिन्नेककृष्णाजिनपक्षे अन्तकमु अन्तप्रदेशमेव पश्चाद्भागे प्रत्यस्येत् संकोचयेत् संधिप्रदेशेन द्विगुणीकुर्यात् (णी Cod.) ॥४॥ जान्वाक्न उपविशेत् जानुकऽआरुह्योपविशेत् (°रुह्यो° Cod.) दक्षिणं जान्वाच्य ॥५॥ दूप्स्यति दृप्तः कुत्सितगातर्भविष्यति (कुसित° Cod.) ॥९॥ परिहरति (!) मध्ये परितो वेष्टयेत्। बल्यं बलार्हं बलकरं वसु नाविन्दन् (!)। व्रतात् तत्साधनात्पयसः ॥१०॥ शाणी शणमयी। पूतयो वान्ति दुर्गन्धा भवन्ति ॥११॥ तस्याः मुञ्जशाखाभिः मिश्रितत्वं विधत्ते मुञ्जेति। स्तुका केशवेणी सा यथा सृज्यते तथा सृष्टा निर्मिता भवेत् ॥१३॥ वस्त्रान्तस्य समन्त्रकमुद्गूहनमाह अथेति। अग्रे सोमयागात्पूर्वम् ॥१५॥ वासस आच्छादनं विधत्ते अथेति। शिरः प्रोर्णुते ॥१६॥ सिग्वस्त्रान्तः। कृष्णविषाणोत्पत्त्यर्थमाख्यायिकामाह देवाश्च वाऽइति ॥१८॥ निपलाशमिव निपतितपर्णं वृक्षादिकमिव तद्यथा केवलं कम्पते एवं शिरश्चलते नोवाच ॥२०॥ मत् यस्मा-

देनं यज्ञं न युविता न मिलितवती (मितितावती Cod.) अतो न विश्वसितव्यम् ॥२२॥ अथ तेऽसुराः आत्तवचसो देवैः स्वीकृतवचसो हे अरयो हे अरय इत्युच्चारयितुमशक्ता हे अलवो हे अलव इति वदन्तः पराभूताः ॥२३॥ प्रसङ्गात्किंचिद्वाग्विषयं नियममाह तत्रेति । उपजिज्ञास्यां ज्ञातव्यां संदिग्धां वाचमूदुरुक्तवन्तोऽसुराः । स म्लेच्छः संदिग्धार्थस्यापभ्रंशरूपस्य वचसो भाषणं यत् म्लेच्छनमित्यर्थः यद्वा य ईदृशीं वाचं वदति स म्लेच्छः तस्मान्न म्लेच्छेत् म्लेच्छो न भवेत् ॥२४॥ अभ्वमपत्यम् (सं Cod.) ॥२६॥ यज्ञो हि कृष्ण इति हिशब्देन यज्ञो देवेभ्यो निलायत कृष्णो रूपं (!) कृत्वेत्यादिश्रुतिप्रसिद्धिरभिधीयते ॥२८॥ तया भूमेरुपरि समन्त्रकं लेखनं विधत्ते अथेति ॥३०॥ तदा स गर्भोऽपगाच्छन्मृतिं प्राप्नुयात् । पामा विचर्चिका मवर्थीयो नः तद्वान्भवितुं समर्थो भवति । न केवलं दीक्षितः स्वयमेव पामनो भवति किंतु तदुत्पन्नाः पुत्रा अपि तादृशा भवन्तीत्याह दीक्षितं वाऽअन्विति ॥३१॥ अथ दण्डेन दीक्षां विधत्ते अथेति ॥३२॥ मुखपर्यन्तं प्रत्यङ्गे वीर्यसम्भवात्ततोऽधःकण्ठादिसंमितं न कुर्यात् ॥३४॥ अतो हि अस्माद्दण्डग्रहणकालादूर्ध्वकाले किंचिदपि न ज्ञपिष्यन्भवति । अमुत्रैव प्रागुक्ते [१, ३, २५. २७] काले दर्भपावनानन्तरमेव ॥३६॥ उद्वदति उच्चैर्वदयति । अयं ब्राह्मणो दीक्षणीयेष्टिकृष्णाजिनादिदीक्षासंस्कारेण संस्कृतः ॥३९॥ सवनकृता निमित्तेन तद्वधेनेत्यर्थः ॥४०॥१॥२॥

गृहीतस्य वचसो विसर्गकालविधानाय पुनरनुवदति वाचमिति ॥१॥ स उक्तलक्षणः प्रजापतिः पुरा स्वयज्ञसमये अहन् अहनि अदीक्षिष्ट लुङ् दीक्षितवान् कृतदीक्षः प्रजापतिः रात्रिं प्राप्तवान् दीक्षितोपलक्षितां वाचं रात्रिपर्यन्तमन्ववर्तयत् अतस्तावत्पर्यन्तं वाग्यमनं कुर्वन्दीक्षितो यावान्यज्ञः संवत्सरप्रजापत्यात्मकोऽस्ति अस्य च यावती मात्रा परिमितिरस्ति तावन्तं सकलमप्येतदेतेन नियमेनाप्त्वा वाचं विसृष्टवान्भवति ॥४॥ अनुष्ठुया सम्यक् ॥५॥ व्याकृतिर्व्याकरणं दैवमानुषयोर्विभागः ॥१६॥ प्रकरणात्पयोव्रतऽएव हस्तप्रक्षालनेऽयं मन्त्र इति प्राप्तौ सर्वव्रतावनेजनसाधारणतामाह स यावदिति ॥१७॥ सर्वत्रकर्तव्यत्वे कारणमाह कास्तद्वेदेति ॥१९॥ उपहन्ति उपाददीत ॥२०॥ प्राण एव न अपक्रामतीति शेषः ॥२३॥ अभिहरन्ति धनं प्रयच्छन्ति ॥२५॥ दैवीमेव वाचं वदेत् अर्थपरिस्खलनपरिणीतां (?अर्थपरिस्खलनपं° Cod.) संस्कृताम् । प्रसृता सर्वत्र व्याप्ता ॥२७॥ प्रसङ्गाद्दीक्षितशब्दं निर्वक्ति ॥३०॥२॥२॥

एवं वाग्यमनादयो दीक्षितधर्मा उक्ताः अवसितासु दीक्षास्वनुष्ठेयां (दीक्षितास्वनुष्ठेयी Cod.) प्रायणीयेष्टिं संविधत्ते आदित्यमिति । अदितिर्देवता अस्येत्यादित्यः न त्वादित्या देवता अस्येति ॥१॥ एवं प्रायणीयेष्टौ चरुसाध्यमादित्ययागं विधायान्यांश्चतुरो यागान्विधित्सुस्तेषां कालमाह तद्वै निरुप्तमिति निरुप्तमिति हविःसंस्कारोपलक्षणम् आदित्यस्य हविषो निर्वापप्रोक्षणाद्यासादनान्ताः संस्काराः कृता भवेयुः प्रधानदेवता च अनिष्टा (अतिकृष्टा Cod.) अकृतयागा भवति तस्मिन्काले वक्ष्यमाणाश्चतस्रो देवता यष्टव्या इत्यर्थः ॥७॥ अथ तान्यागान्पूर्ववदाख्यायिकया विधित्सुस्तत्र प्रथमयागस्य विधिमर्थवादेनोन्नयति अथेति । पथोऽनपेता पथ्या धर्मपथ्यर्थन्यायादनपेता । स्वस्तिः शोभनरूपा ॥८॥ एवमाज्यहविष्कांश्चतुरः प्रधानयागान्कृत्वा प्रथमनिरुप्तेन हविषादितिर्यष्टव्येत्याह अथ यस्याऽइति यस्मादेवं देवाः पञ्चमीमदितिमयजन् तस्मादिदानींतनोऽपि यजमानो यागसमये अदितियागं पञ्चमं कुर्यात्

॥११॥ पञ्चसंख्यामनूद्य प्रशंसति ता वाऽइति । धानाः करम्भः परिवापः पुरोडाशः पयस्या तेन पङ्क्तिराप्यते तद्यज्ञस्य पाङ्क्तत्वमिति तैत्तिरीयकम् ॥१२॥ तस्मादत्रास्मिन्लोके कुरुपञ्चालाख्येषु जनपदेषु उत्तरा उच्चतरा वागवदति भृशं शब्दायते अत्युन्नतभाषणस्य (अत्युन्नेत° Cod.) तत्रोपलम्भात् । देवमनुष्येत्यादौ [पा° ५.४.५६.] परिगणनाभावेऽपि बहुलग्रहणात्कुरुपञ्चालशब्दादपि त्राप्रत्ययः ॥१५॥ तस्मात्पश्चादवस्थितमग्निमाहवनीयरूपेण प्राञ्चमुद्धृत्योपासते अग्निहोत्रहोमादिरूपमुपासनं कुर्वन्ति ॥१६॥ आतिथ्यायाः प्राक् प्रायणीयं (प्राक् यणीयं Cod.) कर्तव्यमित्यभिधातुं प्रायणीयोदयनीययोर्बाहुरूपतामातिथ्यायाः शिरोरूपतां चाह शिर इति । एते हविषी एतौ यागावित्यर्थः यागस्य हविःप्रधानत्वात् ॥२०॥ स्थालीमेक्षणयोरप्युदयनीयार्थमवस्थानमाह तां स्थालीमिति या प्रायणीयचरुस्थाली तां सक्षामकर्षाम् अग्निसंयोगेनान्तरीषद्दग्धश्चरुः (? °दाधश्चरुः Cod.) क्षामः तस्य कर्षो लेपः तत्सहिताम् क्षायो म इति [पा° ८.२.५३.] निष्ठातकारस्य मत्वम् मेक्षणं चरुनिष्पादनसाधनं काष्ठम् तत्प्रमृज्य चरुणा लेपयित्वा स्थाल्यां सह निदध्यात् ॥२१॥ एवं मेक्षणमिति बर्हिर्वदग्नौ प्रहरेदित्यर्थः । विप्रेताः विविधदेशं प्राप्ताः ॥२२॥ इत्थात् इत्थमनेनेदानीं परिदृश्यमानेन प्रकारेण पञ्चाङ्गुलयो लभ्यन्ते हस्तद्वयमभिनीय प्रदर्शयितुं द्विरभिधानम् । प्रकृतिभूतदर्शपूर्णमासेष्टिवत्साकल्येनानुष्ठानप्रसक्तौ तत्प्रतिषेधति तद्धम्ब्वन्तमिति ॥२३॥३॥२॥

सोमक्रयं विधातुमाख्यायिकामाह दिवीति । परव्यामोहनकारी शक्तिर्माया । गन्धर्वाणां व्यामोहाय सृष्टवन्तः । होतृमैत्रावरुणादीनां शंसनप्रदेशेषु पुरतः स्थापिता अग्नयो धिष्ण्याः होत्रीयादयः ते खलु पुरा दिवि सोमरक्षकाः पश्चात्सोमे आहृते सति तेन सह भूमावागत्य देवेभ्यो लब्धवराः सन्तोऽत्रापि सोमरक्षणा[°णाय?] धिष्ण्यतां प्राप्ताः । see ६.२.२-२०. ॥१॥ तेभ्यो देवेभ्योऽर्थाय [र्थीव Cod.] सुपर्ण्या निर्मिता गायत्री छन्दोदेवता पक्षिरूपेण दिवि स्थितं सोममच्छाभिमुखमगमत् । आहरन्त्यै आहरन्त्यास्तस्याः स्वभूतं सोममपजहार । परस्तात् द्युलोकात् ॥२॥ अभिषहनमभीषट् अभिभवः तेन बलात्कारेण मा नैष्ट मा प्रहार्ष्ट । विह्वयामहै यूयं वयं च वाचं विविधमाकारयाम ॥३॥ निमिश्लमा (!) इव विशेषेणैकीभूता अत्यन्तमनुरक्ताः ॥६॥ सिद्धार्थमनूद्य सोमक्रयं विदधाति तद्वाऽइति ॥७॥ सोमक्रयात्प्राक्कर्तव्यं च कंचिद्धोमं विदधाति अथेति प्रायणीयार्थमुपयुज्य यद्धृतं ध्रुवायामवशिष्टं (?यद्धृतायामव° Cod.) तद्गुल्फां चतुर्वारं गृहीत्वा दर्भेण हिरण्यं प्रबध्य तद्गुल्फामवधाय जुहुयात् ॥८॥ अलग्नमिव (!) वक्तव्यपदार्थेन सहासंसृष्टमिव ॥११॥ हिरण्ये बद्धं तृणं विमुच्य बर्हिष्यपिसृज्य पुनः सूत्रेण बध्नीयात् ॥१४॥ अध्वर्योरनुस्पर्शोऽन्वारम्भः । शालायै शालाया अपोर्ण्वन्ति द्वाराणीति शेषः । द्वारे आहवनीयात्प्राक्तने । सोमक्रयणी गौः ॥१५॥ अनूक्तेन अनुवचनेन वेदाध्ययनेन प्रकामोद्यमिकया लौकिकभाषणम् गाथा गद्यपद्यगीत्याद्यात्मिका । स वक्ता यत् यस्मादेनया अदित्या उभयशिरस्कया निमित्तभूतया समानमेकमेव सद्वाक्यं विपर्यासं व्यत्यासेन वदति तथा हि भुङ्क्ष्व देवदत्त तिष्ठ विष्णुमित्रेत्यादौ यदेवापरं वचनं देवदत्त[विष्णुमित्रेत्यादिकं तत्पूर्वं देवदत्त भुङ्क्ष्वे]त्येवमादिरूपेण पूर्वं करोति उक्तवैपरीत्येन यत्पूर्वं भुङ्क्ष्व-तिष्ठेत्यादिकं तदपरं देवदत्त भुङ्क्ष्वेत्यादिरूपेणापरं च करोति त-

स्माद्रूपां सोमक्रयणीमुभयतःशीर्ष्ण्यादितिरसीत्याह मन्त्रः ॥१६॥ द्वारदक्षिणदेशस्थायाः सोमक्रयण्या उदक्प्रायणं सार्थवादं विधत्ते तामुदीचोमिति ॥२२॥४॥२॥

तृतीयाध्याये सोमक्रयण्यनुगमाद्युपसदन्तः प्रयोगो निरूप्यते तत्र सोमक्रयण्या अनुक्रमणं विधत्ते सप्तेति । केवलोऽपि वृद्धिराङ्पूर्वो द्रष्टव्यः आवर्जितवान्भवति । परार्धे उपरिभागे भवा परार्ध्या । पदादिक्रमेण परस्तादवस्थितां गायत्र्याद्यन्तर्भावेन सर्वच्छन्दोरूपां शक्वरीं स्वाभिमुखमावर्जितवान्भवति (?°वर्तित° Cod.) ॥१॥ स्पृणुते हिनस्ति पदप्रदेशस्थां मृदमित्यर्थः ॥३॥ पदे समन्त्रकं होमं विधत्ते स इति ॥४॥ पदस्य परिलेखनं सार्थवादं विधत्ते अथेति ॥५॥ सप्तमपदपांसोः स्थाल्यां स्थापनं समन्त्रकं विधत्ते अथेति ॥६॥ परिलिखितप्रदेशे अपां निनयनं विधाय प्रशंसति यत्रेति ॥७॥ पदं स्थालीस्थं पदपांसुम् ॥८॥ प्रतिपराहरन्ति प्रयच्छेयुः ॥१०॥ तोत इति तोकसमानार्थः (समामार्थः Cod.) रायो धनानि तोतः पुत्रः स्वीकरोत्वित्यर्थः यद्वा तोतः वत्सः त्वयि रायः सन्त्विति शेषः ॥११॥ त्रेधा बभ्रुरुणरोहिणीरूपेण त्रिविधाम् ॥१३॥ परकीयाद्राष्ट्राद्यां रोहिणीं वशीकुरुते (वशकु° Cod.) स्वीकरोति सा वार्त्रघ्नी । श्येताक्षी कृष्णलोचना ॥१४॥ अरुणा अव्यक्तरागा ॥१५॥ अप्रवीता अगृहीतगर्भा । चण्डा (!) आवर्धिष्णुः (!स्रावयिष्णुः?) अचण्डा (!) तद्विपरीता । एवमुत्तरत्रापि । कूटा एकशृङ्गी काणा एकाक्षी कर्णा छिन्नकर्णी लक्षिता तप्तायःशलाकया विहिता सप्तशफा एकस्मिन्पदे एकेन शफेन हीना । उक्तदोषवर्जितत्वमेवैकरूप्यम् सम्पूर्णावयवेत्यर्थः ॥१६॥१॥३॥

प्रासङ्गिकमभिधायेदानीमध्वर्योः पात्रे पांसुप्रक्षेपणानन्तरं हस्तप्रक्षालनं विधत्ते पदमिति ॥१॥ अस्यामिति अनामिकाङ्गुल्याम् अभिनयेन प्रदर्शनम् ॥२॥ सोम उपनह्यते येन तत्सोमोपनहनं सोमबन्धनवस्त्रम् सोमपर्याणहनं शकटेन सह सोमस्य परितो बन्धनवासः उष्णीषं सोमोपनहने स्थापितस्य सोमस्य बन्धनार्थं वासः । यत्किंचिद्वासोमात्रमानयेति ब्रुवन्स्वयं यत्किंचिद्भवति लोकैरविदितप्रभासो (?°त आभासो Cod.) भवति ॥३॥ उष्णीषभाजनमुष्णीषस्थाने भवति ॥४॥ अग्रेण प्राचीनवंशस्य पुरोदेशे उपरवप्रदेशे (नुपर° Cod.) । विचिन्वन्ति साधयन्ति अनुपादेयांशमपनयन्ति । तत् तत्र क्रयप्रदेशे निहितोदकुम्भसमीपे ब्राह्मणः सोमविक्रयी निवसेत् तत्स्थानं प्रत्यभिगच्छन्ति प्राञ्चः सोमक्रयप्रदेशाभिमुखाः ॥५॥ ऋत्विग्यजमानेषु क्रयदेशं समागच्छत्सु अध्वर्युर्यजमानमेष इत्यमुं वाचयेत् । इत्येवंरूपं सोमस्तुत्यात्मकमेव वचनं मे सोमाय वा (!) अध्वर्यो ब्रूहि । छन्दोमाश्चतुर्विंशश्चतुश्चत्वारिंशाः (!) तेषां छन्दोमानां (!गानां Cod.) साम्राज्यं गच्छ स्तोमगतचतुर्विंशत्यादिसंख्यासाम्याद्गायत्र्यादयः छन्दोमाः (!) । एष क्रीयमाणः क्रयेण सम्पाद्यमानः सोम एकं वै एकं खलु प्रयाजनमभिलक्ष्य विक्रियते (!) अभिषवादिता (!दिना?) च सात्मना (!) संस्क्रियते ॥६॥ विचितः विचयनस्य शोधनस्य कर्तारः ॥७॥ ग्रसितं ग्रस्तं भुजितमनुहाय गृहीत्वा आच्छिद्य पृथक्कृत्य परास्यत बहिः प्रक्षिपेत् । यस्मात्सोमान्तर्गतं तृणादिकं सोमस्यान्नं तस्मात्स्वयमविवेचयन्यजमानोऽभ्यवमर्शनमेव कुर्यात् शोधनार्थं तु विचिन्वन्त्वेति पठेत् ॥८॥ तत् तत्र वाससि । तस्मात्सोमोन्मानाद्धेतोः मनुष्येषु मात्रा षरामवत्यङ्गुल्यादिरूपा (?षणव°?) इदानीं वर्ततऽइत्यर्थः । पात्रो (!) यै (!) एवात्र सोमे सा मनुष्येषु सोमस्याखिलजगत्कार-

णत्वात् न केवलं मनुष्यगतैव अपि तु यो चापि यैव खल्वन्या पक्षिमृगवृक्षादिगता सापि सोममात्रात्मिकेव ॥१॥ एतया अभि त्यं देवमित्यनयैव सर्वाभिरङ्गुलोभिः पञ्चभिर्मिमोते। एवं दशवारमुन्मायानन्तरं पाणिद्वयं समस्याञ्जलिं कृत्वा तेनैकवारमधि मितस्य सोमस्योपरि आवपति शिष्टं सर्वं प्रक्षिपेत् ॥१३॥ अधः प्रसारितस्य वस्त्रस्य पर्यन्तप्रदेशानेकत्रोच्चं संगृह्य उष्णोषेण ग्रन्थिं कुर्यात्। शिरस अंसयोश्चान्तरालप्रदेशो यथा विलग्न-इव वर्तते एवं ग्रन्थिकरणेन कृतवान्भवति ॥१८॥ ग्रन्थिमध्ये सुषिरं समन्त्रकं विधत्ते अथेति ॥१९॥२॥३॥

सोमक्रयार्थं व्यवहारं विधत्ते स इति। कलया गैरिकदेशेन ॥१॥ प्रतिधुक् सद्यो दुग्धम् शृतं पक्वं पयः शरः पक्वक्षीरस्योपरि सारभूतम् घनोभूतं वस्तु दधि दधिभवं सारभूतमुदकं मस्तु (the explanation of नवनीत and घृत is wanting) आतञ्चनं दधिभावकारणम् आमिक्षा तप्ते पयसि दध्यानयने सति यद्घनीभूतं वस्तु जायते सामिक्षा द्रवात्मकं वाजिनम् ॥२॥ अथ वयांसि प्रब्रूहीति सोमविक्रयी ब्रूयात् ॥३॥ अर्वाक् सम्पादनात्प्राक्। महितो महत्त्वोपेतः ॥४॥ एकहायन्या सह देयेषु हिरण्यवस्त्रछागादिदशसु द्रव्येषु मध्ये हिरण्ये दीयमाने सति यजमानं वाचयति शुक्रं त्वेति मन्त्रम् ॥६॥ अभिप्रकम्पयति हिरण्येन प्रलोभयति। सखिभिः सह गच्छति तत्तत्कर्मस्विति सग्मो यजमानः। तदभिप्रकम्पनसाधनं हिरण्यं यजमानं प्रत्यानीयास्मे तऽइति मन्त्रेण स्थापयेत् हिरण्यस्य वीर्यरूपत्वात्तत्स्वीकारिणात्मनि वीर्यधारणम् ॥७॥ क्रयाय दत्तामजां प्रतीचीनमुखीं कृत्वा ॥८॥ सव्येनाजां प्रयच्छन्दक्षिणेन सोममादत्ते। यस्मादेतयाजया सोमम्नतो (!) आजदाभिमुख्येनागच्छत् (!) ॥९॥ तत्रान्तर्धायकं वासः प्रत्युह्य प्रसार्य ॥१०॥ सोमक्रयणान्क्रयसाधनपदार्थान्। भाजयतीति भाजनं स्थानम् तेन तत्स्थानेनोपाधिना एते स्वानादयो धिष्ण्यानां सम्बन्धिनः ॥११॥ see २.१.१६. ॥१२॥ एनं यजमानमेष सोमो राजा। श्रेष्ठस्यागमनात्प्रागेवोत्थानेन भवितव्यम् अत्र तद्वैपरीत्यान्मिथ्याकरणं तच्च व्रतं कर्म प्रमोणाति प्रहिनस्ति ॥१३॥ आरोहन्त्यत्रेति आरोहणं शकटम् ॥१५॥ इतीति हरणप्रकारोऽभिनोयते इति अनेन प्रकारेण शिरसा धृत्वेत्यर्थः। हरन्ति प्रथमं क्रयात्प्राक् पर्वतात् पश्चात्तु अनसा परिवहन्ति। तस्मादिदानीमपि आवापसमये कृष्टक्षेत्रं प्रति वीजं शिरसा हरन्ति पश्चात्फलितानामानयनसमये अनसोदावहन्ति ॥१७॥ धेन्वामाशिरस्य क्षीरादेः सम्भवात्तया क्रये सति सोमः साशिरो भवति ॥१८॥३॥३॥

शकटमध्ये सोमस्थापनाय कृष्णाजिनास्तरणं समन्त्रकं विधत्ते नीडऽइति उन्नतप्रयुगफलकद्वयोपेतस्यानसो नीडे परितः प्रावृतः शकटमध्यदेशो नीडं तस्मिन्। एनं सोमम् ॥१॥ एनं सोमभभिपद्यालभ्य ॥२॥ आस्पृणोति सर्वतो बलिनः (वलितः Cod.) कारयति। आस्पृता वलितः (!) कृताः ॥३॥ दीक्षायां यदि द्वे कृष्णाजिने स्वीकृते तयेरेकं प्रतिनाहभाजनं (!) भवति नजस्य (?) पुरोदेशप्रसारितो ध्वजः प्रतिनाहः तद्भाजनं तत्स्थानीयं भवति ॥८॥ प्रयुगसम्बन्धिफलके (?°संधिफ° Cod.) उन्नते प्रयुगादप्युन्नते चुबुकप्रमाणे भवतः तत्तयोः फलकयोरन्तरेण मध्ये सुब्रह्मण्यः(!) भूमिष्ठ एव सन्प्राजति प्रेरयत्यनड्वाहौ ॥९॥ यदेव सोमस्याङ्गं न्यक्तमवाक्पतितमासोत्तत्तदङ्गमिहापि अस्मिन्सोमऽएवासद्भवेत्। see १.७.२.१ ॥१०॥ ऐषमः अस्मिन्संवत्सरे ॥११॥ अपकृष्यालंब्यतऽइति अपालम्बः शकटस्य पश्चाद्भागः

॥१३॥ हे सोम त्वं भद्रोऽसि ॥१४॥ वय एवैनमेतद्भूतं प्रपादयतीति (!) एतेन पाठेन पक्षिरूपमेव संत्त (!) प्रापितवान्भवति ॥१५॥ यदि प्रमादात्सोमं (प्रमान्सेमं Cod.) रक्षआदिर्हन्यात् (?रक्षआ° Cod.) तदानीं श्येनो भूत्वेति मन्त्रसामर्थ्येन श्येनोभावाउपादेयस्य सारांशस्याबध्यभावाउक्ता शरीरमेवानुगत्य हन्ति नात्मानम् ॥१६॥ ब्रह्म देवानामाह्वानसाधनो मन्त्रः शोभनं ब्रह्म सुब्रह्म तदर्हतीति सुब्रह्मण्या काचन देवता तां सुब्रह्मण्योमित्यादिनिगदेनाह्वयेत् ॥१७॥ the explanation of क° १९. is wanting ॥१९॥ शालायाः पुरोदेशे अग्नीषोमीयं पशुमादाय गच्छतः सोमस्याभिमुखं स्थापयेत् । अन्तर्जम्भे (अंतदंति Cod.) खादनस्थानं जम्भः दन्तपङ्क्त्योरन्तरालः ॥२१॥ सारंगः शबलवर्णः । सारंगवर्णस्य सोमयोग्यत्वम् । लोहितस्याग्निवर्णसाम्यम् ॥२३॥ तस्मिन्नन्ते आगतऽइति शेषः ॥२४॥ उपस्तभ्यते प्रतिबध्यतऽइत्युपस्तम्भनं शकटाग्राधारकाष्ठं तेनोपस्तभ्नाति शकटाग्रम् । वरुणस्योपनह्य स्थापितस्य सोमस्योत्तम्भनमसि शकटस्योत्तम्भकत्वात्तद्द्वारा वरुणस्याप्युत्तम्भकत्वम् ॥२५॥ नाभिप्रमाणा भवेत् (पा° ५.२.३७) । अत्रेति नाभिदेशस्याभिनयः ॥२८॥ प्राग्वंशस्य पुरोदेशे आसन्द्यां स्थापितं सोममासन्द्या सह प्राचीनवंशं गमयेत् । अध्वर्योः प्राधान्यात्तदपेक्षया प्रपादयतीत्येकवचनं वस्तु[°तस्तु] चत्वारः प्रपादयन्ति ॥३०॥४॥३॥

आतिथ्यस्य प्रायणीयानन्तर्यं विधत्ते शिर इति ॥१॥ यत्र वाऽअर्हन्तमागतं नापचायन्तीति (!) अर्हन्तं पूज्यं गृहमागतमात्रं नापचायन्त चायतेर्लटि (!) अडभावः छान्दसः (!) पूजां न कुर्युः स तत्र तस्मिन्नपचितिविषये क्रुध्यति । तथा ह तथा सति सोमप्रवेशात्प्रागेव हविर्ग्रहणे सति ॥३॥ अभितः साचयानि पुरः पश्चाच्च सहागन्तारः (सहानंतारः Cod.) प्रधानपुरुषाः । राजकृतः राजत्वसम्पादकाः पटभिषेकस्य (!) कर्तारः ॥७॥ कार्ष्मर्यो भद्रपर्णी प्रकृतौ पलाशवैकङ्कतादीनामैच्छिकत्वादत्र नियमविधिः ॥१६॥ सार्धं संन्यासुः एकीकृत्य सम्यग्भूमौ प्रचिक्षिपुः ॥१७॥ बर्हिःप्रस्तरयोरन्तराले तिर्यक् प्रसार्यमाणौ दर्भौ विधृती ते अत्र रज्जुपत्ररूपे स्याताम् सलुन्याते (!) पञ्चमलकार अकारः संलोभनमाकुलोभावो मिश्रणम् तद्वयादेच्छव्यौ कर्तव्ये ॥१८॥ यूपतक्षणोत्पन्न अधरारण्या अधः स्थाप्यमानः शकलोऽग्निमन्थनशकलो यस्योपरि मथ्यते ॥२०॥ दर्भतरुणके कोमलौ परस्परसदृशौ दर्भौ । स्त्रियै स्त्रियाः सकाशात्सहोत्पन्नौ याविमौ परस्परसदृशौ पुत्रौ एतौ दर्भौ एतावेव युगलौ पुत्रावेव (°त्रानेव Cod.) रूपकोपन्यासेनात्यन्तसादृश्यमभिमतमिति द्रष्टव्यम् ॥२१॥ आज्यं विलाप्यते यस्यां सा आज्यविलापनी स्थाली ॥२२॥ रश्मयोऽन्वायत्ता इति शेषः । प्रह्रियमाणाय आहवनीये प्रक्षिप्यमाणाय अनुब्रूहीत्यनुषज्यते ॥२३॥ हे आहवनीयनिर्मन्थ्यौ उभावग्नी ॥२४॥ अप्रैषीत्तर्पितवान्भवति ॥२५॥ प्रकृतदर्शपूर्णमासेष्टिवत्समापनप्रसक्तावाह तदिति ॥२६॥१॥४॥

अथ तानूनप्त्रं विधातुमाख्यायिकामाह आतिथ्येनेति । अन्योन्यस्य श्रियै ज्योतिष्टोमफलरूपायै श्रियै त्वात्मन (!) अभिप्रायमप्रकाशयन्तः तामसहमानाः प्रकाशनेति (पा° १.३.२३) तिष्ठतेरात्मनेपदं श्लाघेति (पा° १.४.३४.) श्रिया ज्ञापयितुमिष्टत्वात् । शाखान्तरप्रसिद्धं पञ्चमं गणमुदाहृत्य सोपपत्तिकं पराचष्टे बृहस्पतिरिति ॥१॥ रध्यामः रध्यतिर्वशगमकर्मा वशं प्राप्ताः ॥२॥ यः शत्रुरेषां विश्लिष्टानां परस्तरामिव अत्यन्तं दूरदेशस्थो भवति स एनाननुप्रविशति ॥३॥ यथा न इदमैकमत्यं कर्म आप्रदिवमेव द्युलोकावस्थित्यवसानमजर्यमविना-

श्यसद्भवेत् ॥४॥ सार्धमेकत्र समवददिरे विभज्य स्थापितवन्तः । एतेन स्थापितेन शरीरेण नोऽस्माकं मध्ये स समयातिक्रमकारी नानासत् विना भवेत् एतदेव व्याचष्टे एतेन विष्वङ् सर्वतो भवेत् विशीर्णो भवत्वित्यर्थः । उपद्रष्टा साक्षी । तन्वो देहस्य न पातयिता रक्षको देवस्तनूनप्त्रा अथवा सर्वतनूरात्मा प्रजापतिः तस्याकाशः पुत्रः तत्पुत्रो वायुरिति तनूनप्त्रा स च शाक्वरः शक्तः सर्वं कर्तुम् ॥५॥ सर्वेण बहुजनेन सह समवगतिं शपथपूर्वकं समयं न कुर्यात् । [नित्] सर्वैः साकं समभ्यवायान् संगता न भवेयुः । सतनूनप्त्रिणे सम्भूय शपथकारिणे ॥१॥ गृहीतस्याज्यस्य सर्वैरवमर्शनं विधत्ते अथेति । स्पर्शकाले देवैः कृतमन्यसंकेतं दर्शयति एतदिति एतद्वक्ष्यमाणं भूयः समामिरे पूर्वोक्तसंगतमन्तरेण पुनः संगता अभवन् अम गत्यादिषु । स इत्थं देवभूत एव सन् अमुथा अन्यथा प्रकारेणासत् देवभावाद्विनश्येदित्यर्थः ॥१३॥ अत्युत्सिच्य उपरि तदाज्यमासिच्य । इन्द्रभाजनमिन्द्रस्थानीयः । दक्षिणावता दक्षिणायुक्तेनैकाहादिना सोमयागेन ॥१५॥ तदवत्तं सार्धं [सं]जघ्ने तदाज्येन साकं प्रक्षिप्तं शरीरकदम्बकं संहतमेकमभूत् ॥१६॥२॥४॥

अवान्तरदीक्षां विधातुमाह आतिथ्येनेति । एतस्य तानूनप्त्रस्य शपथात्मकस्य परिहाराय । पापमवदन्निति सत्यं वदामि मेदमतिक्रमिषमित्येवंरूपम् ॥१॥ अग्निनैव त्वचं विविधं परि परितः आङ्ग्यन्त अवेष्टयन् अग्निमेव त्वचमकुर्वन् । संतरामाश्चन्त अतिशयेन संश्लिष्टा अङ्गुलीरकुर्वन् तथा मेखलामपि पूर्वं शिथिलाबद्धां (वद्धां Cod.) पुनः संलग्नामकुर्वन् ॥२॥ अवान्तरदीक्षां प्रजासाधनत्वेन प्रशंसति प्रजामु हैवेति ॥३॥ समिधं हरतीति समिद्धारः । स्वाध्यायं वा विसृजते उच्चारयति । तं ह समिदाहर्तारं वा ऋत्विजं मन्त्रोत्स्रष्टारं वा उपलक्षणमेतत् ऋत्विजां मध्ये यं कंचिन्न व्यापृतम् (धापृतं Cod.) । समिदाहर्तृरूपेण समिदाहर्तारम् । तथा सति देवाः इति खलु मां ब्रमचिकीर्षीः कर्तुमैक्षः इति जिघांसोः हन्तुमैक्षः इति पापं वदन्तः उपसमेयुरन्योऽन्यं प्राप्नुवन्ति ॥६॥ अस्येव रूपमसामेत्यादि स्पष्टम् । यद्यपि मेखलाकृष्णाजिनधारणादिकमपि दीक्षाङ्गं तथाप्यवान्तरदीक्षायां समिदाधानस्य मुख्यत्वात्समिधमेवेत्युक्तम् (मुख्यत्वात्समि° Cod.) ॥८॥ एनं सोमं यजमानं वा । तस्मा आपो मदन्त्यः ॥१०॥ मदन्त्युपस्पर्शनपूर्वकं राजाप्यायनं विधत्ते अथेति ॥११॥ यस्मै सोमायैतदातिथ्यं क्रियते तमेवाग्रे आप्यायनादिभिः सत्कर्तुं युक्तम् । सोमसम्बन्धाभिप्रायेण चोद्यऽउद्भाविते यागसम्बन्धेन परिहरति यज्ञस्येति एवंप्रकारक्रमविशिष्टं कर्मजातं यज्ञस्य खलु क्रियते । अत्र खलु एनान्कलहः प्राप्नोत् ते च देवाः पूर्वं संशममेवोपायन् कलहोपशमनरूपं तानूनप्त्रं कृतवन्तः शपथदोषपरिहारायानन्तरमेवावान्तरदीक्षा कार्या अतः परिशेषादाप्यायनस्यात्र निवेशः ॥१२॥ तस्येन्द्रेण हतस्य वृत्रस्य शरीरं गिरयोऽश्मानश्चाभवन् सोमाख्यं वस्त्वेव सोमशरीरभूतेषु गिर्यादि[षु] वर्तते दूषानाख्या (! उशानाख्या) ओषधिर्जायते इत्येवं श्वेतकेतुराह अतस्तामेव गिरावुत्पन्नामेवा (°मेतत् !) इदानींतना यजमाना अभिषुण्वन्ति न साक्षात्सोमम् अतस्तामोषधिं दीक्षादिभिः संस्कारैः साक्षात्सोमं कुर्वन्ति ॥१३॥ सरघसारत्वमधुकल्पनया (!) प्रशंसति मधु सारघमिति (!) वाऽआङ्गरित्यादिना ॥१४॥ एतदेवाप्यायनं गतसारत्वपरिहारात्मना प्रशंसति यज्ञेनेति ॥१५॥ एक एव सोमादिरूपो हविःपदार्थ एकं (एवं Cod.) धनं येषां ते देवा एकधनाः तान्विन्दति यज्ञे सोमपानाय लभते इतीन्द्रः एकधनवित् तस्मादेकैक एवांशुः

शतशो दशशो वा एकधनान्देवानाप्यायते वर्धयति शरीरोपचयं करोति अत उक्तप्रकारेण सोमाख्यैकधनेन देवानामेकधनवान्मन्त्र इन्द्रायैकधनविद ऽइत्याह । सुत्यां सोमाभिषवम् । तदुपरिभाविनी ऋगृदृक् तया समाप्तिर्लक्ष्यते ॥१८॥ प्रस्तरस्योपरि पाणी सम्पुटीकृत्य । निह्नवोऽपलापे प्रसिद्धो लोके इहापि देवानां नमस्कारादिना सान्त्वनं विहितम् निह्नवं सोमाप्यायनकाले सम्भावितस्याऽन्यतिक्रमस्य परिहाररूपेण प्रशंसति उत्तरतउपचारो वै यज्ञ इति ॥१९॥ अक्तास्याविलम्बेनाग्नौ प्रहरणादनक्तऽएव प्रस्तरे कर्तव्यम् ॥२०॥ तं प्रस्तरमग्निमुपर्युपरि अग्नेरूर्ध्वोर्ध्वभावे अतिहरति न प्रहरेत् । एतेन आतिथ्यार्थप्रस्तरेण । तमध्वर्युणा दत्तं प्रस्तरमाग्नीध्रः सुरक्षिते देशे स्थापयेत् ॥२२॥३॥४॥

इत्थमातिथ्यमभिधायाथोपसदस्तत्कालं चाह ग्रीवा इति । न प्रथमयज्ञे प्रवृञ्ज्यादिति निषेधसम्भवाद्यदि प्रवर्ग्यवानित्युक्तम् ॥१॥ अतिभारं (!) मुखप्रदेशभारयुक्तं करोति ॥८॥ समानत्र एकस्मिन्नेवाहवनीयदक्षिणदेशे । यथेतं (!) प्रचरन् यथा दर्शपूर्णमासेष्ट्यां यथेतं (!) येन मार्गेण गतस्तेनैव पुनरपि हविरवदानाय गच्छति तथात्र न कर्तव्यम् तथाविध एकत्रैव होम अभिजित्यै भवति । अनीकं वज्रस्य मुखप्रदेशः कल्पं (!) ततः पूर्वो भागः कुल्मलं तत्पुच्छभागः ॥१४॥ यासूपसत्सु यजमानो व्रतयति पयस्ता व्रतोपसदः । उपयुपार एकद्व्यादिस्तनवृद्ध्या व्रतवृद्धिर्यास्वस्ति ताः परउर्वोरुपसदः ताः केचनानुष्ठातारोऽनुतिष्ठन्ति । उक्तवैपरीत्ययुक्ताः परोऽह्व्यः उपर्युपरि ह्रसीयस्यः ताः केचनोपतिष्ठन्ति । तद्द्विविधानामप्युपसदां स्वरूपतो विचार्यमाणे पर्यवसानस्यैकरूप्यान्न भेदोऽस्ति ॥२६॥ परोऽह्नीषु उपर्युपरि स्तनह्रासेन पयोह्रासात्तपोवृद्धिरुपर्युपरि भवति । प्रथमेषु चतुर्षु दिनेषु प्रतिदिनं त्रींस्त्रीन्स्तनान्दोहयेत् द्वितीये चतुरहे द्वौ द्वौ तृतीये चैकैकम् ॥२७॥४॥४॥

आतिथ्या तानूनप्त्रं च सोमाप्यायननिह्नवौ । उपसच्चेति पञ्चार्थाः चतुर्थेऽध्याये निरूपिताः ॥ अथ पञ्चमे सौमिकवेदिकरणादिकं निरूप्यते । य एष प्राचीनवंशस्य पूर्वभागे आहवनीयपुरोदेशे वर्तमानः पृथुस्तम्भोऽस्ति । सोऽन्तःपातः ऐष्टिकवेदेर्महावेदेश्चान्तरालसंचरः ॥१॥ सार्थवादमुत्तरवेदिनिर्माणं विधत्ते नासिकेति ॥१२॥ उत्तरवेदिव्याघारणविध्यर्थमाख्यायिकामाह द्व्य इति । श्वःसुत्यां परेद्युः क्रियमाणमभिषवम् । त्वमप्यनेन सोमयागेनास्मान्यायेति (!) ॥१३॥ धियामहै (!) अवस्थापयिष्यामः ॥१५॥ दीक्षासोमक्रयादीनां सद्य एव क्रियमाणत्वात्सद्यःक्रीरिति नाम ॥१७॥ न व्यमुच्यत विमुक्तं नासीत् सम्पूर्णं नाभवत् ॥१८॥ तस्य पुरोदेशे रुक्मो हिरण्यफलको वर्तुलाकारः ॥२०॥ आददाना जिन्वमाना (? जिन्वत्सषा Cod.) ममोपस्थं सर्वं स्वीकुर्वती ॥२१॥ इदानीमुत्तरवेदिव्याघारणं विधत्ते स यदिति । अग्नौ उत्तरवेदेरुपरि धार्यमाणे सति ॥२३॥ युगशम्येन युगेन शम्यया च ॥२४॥ अन्येन परित्यक्तां दक्षिणाममा मह स्वात्मनि न कुर्वीत । अस्य यजमानस्य समानबन्धुरेकविधिनिबन्धनः एकविषयः ॥२५॥ सौमिकवेदेरुत्तरांसस्य शङ्कुः । सा चावालस्य मात्रा यैवोत्तरवेदेरुक्ता सैवेत्यर्थः चावालखननोत्पन्नयैव मृदोत्तरवादेकरणात् ॥२६॥ चावालस्य सर्वतः परिलेखनप्रकारं तन्मन्त्रांश्च दर्शयति स इति । दक्षिणश्रोणिरूपवेद्यन्तात् । स परिलिखति शम्यानुगुण्येन लेखनं कुर्यात् अनेनैव पश्चादवधिनिर्देशः कृतो भवति । हे भूमे । तप्तः पुरुषः दारिद्र्येण दुःखितः सन्धनादिसाधनेच्छया ॥२७॥ विविदानः धनादिकं लब्धवान् ॥२८॥ अ-

नेन चावालस्य दक्षिणसीमोच्यते । यत्र नाथेयावेधनादिकम् (?) ॥२१॥ चावालस्योत्तरावधिपरिलेखने ॥३०॥ तत्रोत्तरवेदिदेशेऽग्नीदुपविशति । see १. २. ३. १. । निदानेन मूलकारणेन ॥३१॥ स मृदो हर्ता अध्वर्युः स्फ्येन प्रहरति खनेत् । तदवदारितं (!) समीरयति उत्तरवेदिं प्रति सम्यगीरयति । आनीताया मृदो वेद्याकारेण स्थापनं समन्त्रकं विधत्ते ह्वेति ॥३२॥ अनुक्रमेण व्यूहनं मृत्प्रसारणं (मारणं Cod.) कुर्यात् ॥३३॥ षडशीत्यङ्गुलपरिमिता युगमात्री । अल्पा नाभिर्नाभिका । एकत्र स्थित्वा सर्वत्रोत्तरवेद्यां व्याघारणस्याशक्यत्वात्तत्सिद्धये मध्ये नाभिकरणम् ॥३४॥ हिन्वतिः प्रीणनकर्मा ॥३५॥ यज्ञियवृक्षशाखया प्रच्छादयति ॥३६॥१॥५॥

उत्तरवेदिनिर्माणमभिधायाथोत्तरवेद्यामग्निप्रणयनप्रयोग (°याष्वोत्त° Cod.) इत्युच्यते इध्ममिति । आहवनीयेऽग्नौ प्रणीयमानानामङ्गाराणां सम्पादनाय काष्ठसमूहं स्थापयेयुः । उप अग्नेरधस्ताद्यम्यत्व इत्युपयमन्यः सिकताः । व्याघारणार्थमाज्यमग्नावधिश्रयति विलापयेत् । आज्यमुत्पूतं कृत्वा स्रुवेण स्रुचि पञ्चवारं गृह्णीयात् ॥१॥ इध्मे प्रदीप्ते सत्यथ अनन्तरमेवेध्ममङ्गारतां प्राप्तमूर्ध्वं धारयेत् इध्मपात्रस्याध उपयमनीरुपयच्छेत् अग्नये प्रह्रियमाणाय उत्तरवेदिं प्रति नीयमानाय तदनुकूलं सूक्तं पठेति होतारं ब्रूयात् एकस्फ्यया एक स्फ्यो यस्यां रेखायां सा तथोक्ता तया मामनुगच्छ (मागनु Cod.) स्फ्येन रेखां कुर्वन्ननुगच्छेति प्रतिप्रस्थातारं ब्रूयात् । यतः प्रणयति स गार्हपत्य इति न्यायादाहवनीयाद्उत्तरवेदिं प्रति प्रणयनस्योक्तत्वादाहवनीय एव गार्हपत्य इत्युच्यते रेखाकर्षणेनान्तःपात्यच्छूपो व्यवच्छेदः परिहृतो भवति ॥२॥ रेखानुगतिविषये केषांचित्पक्षमुपन्यस्य व्यवच्छेदपरिहाराय प्रयोजनाभावाभिप्रायेण निराचष्टे तदिति ॥३॥ अध्वर्योः प्रोक्षण्यादानविधानादग्निप्रणेताग्नीदेव ॥४॥ ताः प्रोक्षणीर्न्यन्तेन अत्यन्तान्तदेशेन ॥८॥ उत्तरवेदिनाभिदेशे गुग्गुलुसुगन्धितेजनादिसम्भाराणां (°भावारं Cod.) प्रक्षेपं समन्त्रकं विधत्ते अग्नेः पुरीषमिति ॥१४॥ अस्य अग्नेः । पीतुदारुरुदुम्बरविशेषः ॥१५॥ सुगन्धितेजनाख्यौषधिविशेषे अग्नेर्गन्धः संक्रान्तः ॥१७॥ वृष्णिर्मेषस्तस्य स्तुका रोम ॥१८॥२॥५॥

उत्तरत्र सदोहविर्धानादिकं विधास्यति तदुपोद्घातत्वेन तेषां पुरुषाकारसंनिवेशतामाह पुरुष इति । अत्र यज्ञशब्देन तदाधारभूतसदोहविर्धानादिक (°भूतास° Cod.) उच्यते ॥१॥ हविर्धानस्य यज्ञशिरस्त्वे द्वारमाह वैष्णवमिति विष्णुदेवताकैर्मन्त्रैर्निर्मितत्वाद्वैष्णवत्वम् विष्णोः सर्वदेवतानामुत्तरत्वाच्छिरसोऽप्यङ्गानामुत्तमत्वाद्युक्तं हविर्धानस्य शिरस्त्वम् ॥२॥ स्तुपः केशनिचयः । हविर्धानस्योत्तरस्यामाग्नीध्रीयः दक्षिणस्यां मार्जालीयः ॥४॥ सौमिकवेदेः पश्चाद्भागे अग्नी आहवनीयगार्हपत्यौ ॥६॥ अन्तपर्यन्तं सुषिरवान्भवति ॥७॥ छदिः तृणमयं कटम् । रराट्यां हविर्धानयोर्मुखप्रदेशे उच्छ्रायीभ्यां तोरणकाष्ठाभ्यामन्तराले (? °काव्याभ्या° and in an repetition काष्ठाभ्या° Cod.) परिश्रये पश्चात्पृष्ठभागेऽपि छदिरधिनिदध्यात् ॥९॥ व्याघारणायाज्यं ग्रहीतुं पूर्वमाहवनीयं प्रति गतत्वात् पुनः प्रपद्येत्युच्यते ॥१०॥ see २. ४. १६. ॥११॥ हविर्धानशकटस्य दक्षिणचक्ररेखायाम् । संतप्यते चक्रसंघर्षणेनेति संतापः चक्रवलयसंस्पर्शप्रदेशः ॥१३॥ असक्तन्नियात्यत्रेति नियानो मार्गः ॥१५॥ उत्तरवेदेः पश्चात्संचराय विक्रमत्रयं परित्यज्य ॥१६॥ यथा नाभ्याधारफलके भूमिष्ठे भवतस्तथा कुर्यात् उत्तरत्र प्रदेशस्य भूस्पर्शे भ्रंशः कदाचिद्भवेत् ॥२०॥ उपस्तभ्नाति यथाधो न पतेत् । मेथीं स्तम्भम् ॥२१॥ रराट्यां रराटीम् । अनप्त्रे

सृक्किणी ओष्ठे संधौ ॥२४॥ लस्पूजनी नाम सीवनसाधनः सूच्यादिः तत्र सम्बद्धया रज्ज्वा। द्वारशाखां दर्भैरावेष्ट्य रज्ज्वा विष्णोः स्यूरिति मन्त्रेण सीव्येत्। तं ग्रन्थिं प्रकृते कर्मन् कर्मणि प्रकर्षेण कृते परिसमाप्ते विष्यति विमुञ्चेत्। ग्राहि गृह्णाति विश्लेषे सति स न भवति। निष्ठितं सीवनेन सुनिष्पन्नम् ॥२५॥३॥५॥

सोमाभिषवायोपरवाणां खननं विवक्षुः खननस्योभयार्थतामाह द्वयमिति। कर्णच्छिद्रे द्वे नासिकाच्छिद्रे द्वे ॥१॥ द्वेष्यबधार्थं भूमौ स्थापिताः कृत्याविशेषा वलगाः ॥२॥ अस्पृण्वत हिंसितवन्तः ॥३॥ मध्ये-मध्ये प्रादेशमात्रान्तरालं विहाय समचतुरस्रे खननप्रदेशे चतुरोऽवटान्प्रादेशमात्रान्परिलिखेत् ॥५॥ खननमपि परिलिखनक्रमेण कर्तव्यम् ॥८॥ खाताया मृद उद्वपनेऽपि खननक्रम एव ॥९॥ अङ्गुलिप्रादेशाद्यपेक्षया बाहुप्रमाणस्यान्तवान्ततोऽधिकात्प्रदेशान्मृदुद्धर[ण]स्याशक्यत्वाद्बाहुमात्रस्यान्तवम् (°त्रव्यांत Cod.)। तानदक्षणया संतृन्दन्ति पूर्वयोर्दक्षिणस्यापरयोरुत्तरस्य चान्तरालदेशम् ॥१३॥ अन्तःप्रदेशनिर्भिन्नत्वपरिहाराय संमृशेत् ॥१४॥ संमृशेते परस्परं हस्तसंस्पर्शं कुर्यातान् ॥१५॥ सँविद्रे संविद्रुते सगता भवन्ति लोपस्त इति (पा° ७. १. ४१.) तलोपः वेत्तेर्विभाषेति (पा° ७. १. ७.) रुट् ॥१७॥ अधि उपरि सूयते सोमोऽनयोरित्यधिषवणे। पर्यूहति परिंहति परितो मृदा (मृद्ग Cod.) दृढीकुर्यात् ॥२२॥ अधिषवणचर्मणि अभिषवसाधनान्पाषाणान्पश्चाहरन्ति ॥२४॥४॥५॥

यज्ञशिरस्त्वं हविर्धानस्योक्त्वा तत्समर्थ्येदानीं सदसो यज्ञोदरत्वं प्रतिपादयितुं पूर्वोक्तमनुवदति उदरमिति ॥१॥ खातं मृन्निचयं (°तांमृ° Cod.) प्राञ्चमवटस्य समीपे प्राग्देशे उत्किरति। यजमानप्रमाणां कृत्वा परिवासयति अवशिष्टमंशं छिनत्ति। औदुम्बरीप्रमाणानि बर्हींषि औदुम्बर्या उप।रे निदधाति आच्छादयेत् ॥६॥ अस्पृण्वत सर्वा ओषधीर्वधितवन्तः (!)। अयुवत अमिश्रयन् ॥९॥ वनेऽनिखाता दृढमूला स्वभावेनोत्पन्ना। यथा ओषधिषु सहोत्पन्नेषु तृणगुल्मादिषु मध्ये मिता भवति सबर्हिष्के गर्ते मिता शाखाप्येवं भवति ॥१४॥ उच्छ्रयति ऊर्ध्वं स्थापयेत् ॥१५॥ मिनोतु अवटे प्रक्षिपतु ॥१६॥ पर्यषति परितः संघट्टयेत्। भूमिसाम्ये सति अगर्ते मिता भवति मिनोतेः कर्मणि क्विप् ॥१८॥ अभिपद्य शाखामालम्भ्य ॥२०॥ विष्टपं विशाखमभि विष्टपस्यायभागस्याभिगर्भतः (??) यथा शाखाया अग्रमूलभागौ मध्यदेशश्चान्ता भवन्ति एवमाज्यं जुहोति ॥२१॥ स्तोत्रशस्त्रपाठाश्रयत्वादेवं भक्षणसम्भवान्मानुषं चेति मिश्रे ॥२३॥ आग्नीध्रमाग्नीध्रीयं मं[ड]पं कुर्यात् ॥२६॥ द्वितीयं प्रकारमाह देवा इति। सदोनिविष्टान्देवान्सदसो निष्काशितवन्तः न केवलं तान्देवानपि (ता च देव अपि Cod.) तु अन्तःसदसं सदोमध्येऽवस्थितान्धिष्ण्यानग्नीन् ॥२७॥ सदसो निष्काशिता आग्नीध्रप्रविष्टाः तत्राप्यसुरैः संरुद्धाः ते देवा आग्नीध्रधिष्ण्यगतस्याग्नेर्ध्वं (°धीष्म° Cod.) समीपं प्राप्य तानसुरान्जिग्युः ॥२८॥ तानुद्घातितान्धिष्ण्यान्पुनरदीपयन् यथा प्रत्यवस्येत् प्रतितिष्ठेत् यद्वा प्रत्यवसानं भोजनं यथा आहुत्याधारो भवेत् ॥२९॥१॥६॥

धिष्ण्योपधानपदार्थविधानार्थमाख्यायिकामाह (धिष्णोपदार्थ° Cod.) विजामान इति। भ्रातरो बान्धवाः। समङ्काः समानचिह्नाः। एते खलु अस्य यज्ञस्यात्यारः (°त्मानः ?!) ॥१॥ न्यषक्ति स्थाणौ निषक्तामभूत् ॥४॥ see २. ४. १. ॥७॥ कृश्योरायुधयोः। क्षुरपवी क्षुरधारे तीक्ष्णाग्रे। निमेषं-निमेषं सर्वदा। ते के इमे सदसि वर्तमाना धिष्ण्याः इमे (!) होत्रकाः

(°त्राकाः Cod.!) होतृमैत्रावरुणादयः ॥१॥ खदिरस्यातिसारवत्त्वं साधनं कृत्वा सोमं भक्षितवती । अच्छावाकस्य गोपनायाम् होत्रकाणामेव सोमरक्षकगन्धर्वरूपवादच्छावाकाख्यो होत्रको यदा सोमरक्षकेषु मध्ये रक्षितवान् तदा । अतोऽच्छावाको हीनो निकृष्टोऽभूत् ॥१८॥ अत एवेतरहोत्रकवत्प्रथमत एव सदःप्रवेशमपि [न] समालभत तमिन्द्राग्नी ऐन्द्राग्नशस्त्रपाठेन संतुष्टौ अनुसमतनुतां संतानमनुप्रवेशमकुरुताम् ॥१३॥ यद्यया‍ङ्गत्या शालाकैस्तृणसमूहैर्विहृतान्धिष्ण्यान्घृतेन व्याघारयति ॥१९॥ अभिमानो हिंसेच्छा । शालायां प्राग्वंशे ॥२०॥ द्युलोकं सर्वथा परित्यज्य भूमौ कृतनिवासानां पुनः द्युगमने सति जिह्मता स्यात् सर्वेषां केवलमनुदेशने भूलोके प्रत्यक्षता न स्यात् ॥२२॥ सक्ति आत्मानं लभते इदानीमप्यपराभूता अपरिनष्टा वर्तन्ते । हविर्धानशकटस्य दक्षिणभागे चमसेषु (चामा° Cod.) ये सोमाङ्गताववशिष्टा (°तावशि° Cod.) भक्षिता (!) पुनराप्यायिताश्च (°राव्यापि° Cod.) वर्तन्ते ते नाराशंसाः ॥२५॥ सम्पा सहपीतिः । प्रथमं देवैरग्निमुखेन पानं पश्चान्मनुष्यैः सदसि शेषपानम् पश्चान्नाराशंसेन (°सन) पितॄणामिति ॥२६॥२॥६॥

वैसर्जनीयानि विधातुमाह सर्वमिति ॥१॥ अपिव्रतः व्रतं भोजनं यजमानेन सह प्राप्तभोजनः बन्धुवर्गः ॥२॥ इत्थं वैसर्जिनानि विधाय तद्धोमकालं मन्त्रं च विधास्यन्नन्तरालवर्तिनमग्नीषोमीयप्रयोगमाह स इति । तस्मिन्दिने एकस्वानव्रतार्धस्य (?) प्रातर्व्रतार्थमुपयुक्तावादर्धव्रतं प्रदायेत्युक्तम् । सप्तमपदपांसुम् see ३.१.३-१०. । प्राचीनवंशगतस्याहवनीयस्य पश्चाद्भागे प्रक्षिपेत् ॥४॥ पदपांसु चतुर्धा विभज्य ॥५॥ इदानीं समन्त्रकमाहवनीये वैसर्जिनहोमं विधत्ते अथेति ॥७॥ अप्सुः सूक्ष्मरूपः सोमः । कनीयःशब्दार्थमाह स्तोकमेवेति ॥८॥ द्रोणकलशः सोमाधारः प्रभूतः पात्रविशेषः । वायव्यानि ग्रहाः । परिध्याद्याः पश्चर्थाः ॥१०॥ तम् प्रणीतमग्निम् ॥११॥ इतरमिध्मबर्हिरादिकमग्नीषोमीयार्थम् ॥१३॥ समिदाधानपर्यन्तं पश्चर्थमङ्गजातं कृत्वा पश्चाद्वैसर्जनीयं होमं तुरीयं जुहोति उर्विति ॥१५॥ एष सोमः पूर्वं य एव यादृग्यज्ञरूपः तं तादृग्रूपं करोति ॥१६॥ सोमं हविर्धानं प्रवेशयति ॥१७॥ अनुसृज्य विसृज्य ॥१९॥ हविर्धानात् ॥२०॥३॥६॥

अथ यूपप्रयोग उच्यते यूपमिति । व्रश्च्यन् छेत्स्यन् ॥१॥ रातमनाः दत्तचित्तः कर्मार्थमङ्गीकृतमनस्कः ॥७॥ न विद्यतेऽक्षस्य शकटाङ्गस्य स्तम्भो यस्मिन्व्रश्चनकर्मणि तदनक्षस्तम्भम् अक्षसंस्पर्शी यथा न स्यादेवं सर्वं वृश्चेत् ॥११॥ परिवासयति आच्छिनत्ति ॥१७॥ ४॥६॥

यूपस्यानाष्टो (!°तष्टो?) मूलभाग उपरः । एतावन्मात्राणि मुष्टिपरिमितानि । see ६.१.४-१४. ॥१-७॥ गर्ते प्रास्यति । एष हि यजुषा स्वधिते मैनमिति मन्त्रेण निष्पादितः अत एव मेध्यः ॥८॥ चषालो यूपस्योपरि प्रतिमोक्तव्याष्टाश्रिमाव्रसन्नातो (°श्रिर्मध्ये संगृहीता?) वलयो (°लभो?) । प्रतिमुञ्चति उपरि बध्नाति । यदेवेदं सम्बन्धनं सम्यक् बन्धनसाधनं वृत्तं (वृत्तं Cod.) फलं चात्तरा वृक्षफलयोर्मध्ये उपेनितमिव उपनितमाल्यपरिमाणम् (?°मल्पप°?) ॥१२॥ अग्निष्ठा अग्नेरभिमुखाश्रिः । परिव्ययणं रशनावेष्टनप्रदेशः तं प्रतिसमन्तमाज्येन परिमृशेत् ॥१३॥ अग्नेः सकाशात् ॥१६॥ अत्रैव नाभिप्रदेशे ॥१९॥ रशनायास्त्रैगुण्यमाह त्रिवृतेति ॥२०॥ यूपशकलं स्वरुम् ॥२२॥ अभिपद्य गृहीत्वा ॥२६॥ यूपे निगूढस्य स्वरोरुत्त-

रत्र प्रतिपत्तिकर्मत्वेन यूपप्रतिनिध्यात्मना होममभिधातुमाह तमिति ॥२१॥ तत् तेनैव खल्वेष यज्ञः स्वगाकृतः स्वं स्थानं प्राप्तः कृतप्रतिपत्तिक आसीत् ॥३१॥१॥७॥

अग्नीषोमीययूपप्रसङ्गाद्यूपैकादशिनीं विधातुमुपोद्घातयति यावतीति । यूपानां समीपे शेतऽइत्युपशयः । वितष्टः विशेषेणोपरप्रदेशेऽपि तष्टः ॥१॥ श्वः परेद्युः क्रियमाणायाः सुत्यायाः पूर्वस्मिन्दिने अग्निष्ठप्रमुखान्सर्वान्यूपान्निखनन्ति। the explanation of प्रकृन्नतायै to the end of the kaṇḍikâ is wanting: the immediately following words are: तं पक्षं निराचष्टे तदु तथेति । तस्मिन्काले अग्निष्ठमेकमेव उत्तरवेदेः पुरोदेशस्थमेवाग्नीषोमीयपश्वर्थमुङ्क्ष्येत् इतरेषामपि पूर्वेद्युरुच्छ्रयणे दोषमाह इदं वाऽइत्यादिना इदं वक्ष्यमाणं भवतीत्यर्थः । नान्वर्च्छति नैव हस्तस्पर्शं परित्यजेत् । प्रातः परेद्युः ॥४॥ प्रसङ्गात्पात्नीवतपशुप्रयोजनमाह अथेति ॥८॥२॥७॥

पशुनियोजनाय सर्वथा यूपेनैव भवितव्यमित्यमुमर्थमाख्यानेनोपपादयति पशुरिति अविनाभूतावित्यर्थः (?°नाधूता° Cod.) ॥१॥ प्राप्नोयन्त (!) प्रकर्षेण प्नोना अवनता अभवन् ॥२॥ प्रासङ्गिकं यूपैकादशिनीपक्षं परिसमाप्य प्रकृतमग्नीषोमीयपशुप्रयोगमाह अथेति । नोपावेयुः नोपगताः ॥३॥ यानं (!) प्रायम् । अभ्यवैष्यन्ति अवगतिं प्राप्स्यन्ति ॥४॥ पशोर्निरोधं करवाणि । असहायस्य व्यापाराक्षमत्वात् ॥८॥ परस्तात्परोदेशे ॥१३॥३॥७॥

समन्त्रकं बन्धनमाह पाशमिति ॥१॥ उपगृह्णाति प्रोक्षणीशेषं पानार्थं मुखसमीपे धारयेत् ॥६॥ तयोरग्नियजमानयोः ॥११॥४॥७॥

होत्रादिप्रवरणानन्तरभाविनं प्रयोगमाह तदिति । होतृषदनं वेदेरुत्तरा श्रोणिः ॥१॥ समित्तनूनपादित्याद्येकादश प्रयाजा आप्रियः ॥२॥ पर्यग्निं पशोः परितोऽग्निं करोति। तत्स्थानमभिलक्ष्येनमुल्मुकं (!) पाकार्थमाहरेत् ॥६॥ तेषां शामित्रं प्रति गमनम् ॥१॥ तस्मिन्समये प्रतिप्रस्थाता वपाश्रपणीभ्यां पशुमन्वारभते ॥१०॥ अमुया अमुत्रान्तरिक्षे अनभिमतप्रदेशे न भवति न विनश्यति ॥१४॥ कूटेन शृङ्गेण शृङ्गं गृहीत्वा । नैव कर्णस्य पश्चाद्भागमग्रभागं गृहीत्वा । वेष्कं मुखवेष्टनं वा शब्दाभावाय कुर्यात् । हे शमितः संज्ञपयासौ तु अन्वगन् अनुगतोऽभूत् ॥१५॥१॥८॥

संज्ञपनानन्तरप्रयोगमाह यदेति ॥१॥ विशसनप्रयोगमाह अथोत्तानमिति ॥१२॥ आछ्यन्ति आछिनन्ति । तत् तृणम् ॥१४॥ समया सांमुख्येनैव सामीप्येन ॥२०॥ इतःप्रदाना वै वृष्टिः अस्माल्लोकात्प्रदाता । ते अग्निना भक्षिता एते [घृतस्तोकाः] पुनरुदकात्मना परिणताः पृथिव्यां वर्षन्ति ॥२२॥ चरकशास्त्रोक्ताध्वर्यवप्रयोगकर्तारः चरकाध्वर्यवः । दधिमिश्रमाज्यं पृषदाज्यम् ॥२४॥ एतावान्कालो वपाप्रथमाभिघारणेनैव गतः अथापि प्राणश्च न निर्गत इत्यर्थः ॥२५॥ समीच्यौ परस्पराभिमुखे ॥२८॥२॥८॥

अनुनिर्वाप्यपुरोडाशं तद्देवतां च विधत्ते यद्देवत्य इति ॥१॥ पशुपुरोडाशस्य पशुच्छिद्रपूर्तिरूपप्रयोजनं सर्वेषु पशुष्वतिदिशति एष इति ॥२॥ शमिता । तदा शमितुरेवमनुशासनं कुर्यात् हे शमितः त्रिः प्रच्यावयतात् प्रधानस्विष्टकृद्भेदेन (?) त्रिविधमङ्गानि त्रिविधचिह्नानि यथा स्युः तथा प्रच्यावय त्रिःप्रच्युतस्य पशोः हृदयमवयवं सर्व (!) उत्तममुपरिभावं कुरु ॥३॥ मस्तिष्कः कपालः अनूकश्च तन्मांसम् मज्जा तदाश्रितः सारः ॥११॥ ए-

कचरस्य दोष्णः सव्यात्। तनिम्नि यकृतः। वृक्कयोः वृष्ट्यं (!वृश्च्यं?) कुच्युभयपार्श्वस्थं (कुचूभ° Cod.) ग्रामकारमांसद्वयम् (?°ाका°?) ॥१७॥ गुदाङ्गेषु यदतिस्थूलम्। त्र्यङ्गेषु मध्ये ऽवद्येत्। एकचरायै श्रोणेर्दक्षिणायाः ॥१८॥ स्विष्टकृदर्थमाह अथेति। त्रीण्यङ्गानि यस्येति त्र्यङ्गं सौविष्टकृतं हविः तान्येवाह दोष्ण इति सव्यस्य प्रधानार्थमभिहितत्वाद्दक्षिणस्य दोष्णः सकाशादित्यर्थः। त्र्यङ्ग्यायै श्रोणेः स्विष्टकृदर्थायाः श्रोणेः सकाशात् सव्यायाः श्रोणेरित्यर्थः ॥१९॥ लेलयेवेति द्रवद्रव्यत्वादितस्ततश्चलनं विवक्षितत्वा[द्]व्याख्यातम् ॥२०॥ पार्श्वेन पार्श्वास्थिना ॥२४॥ मतस्ने वृक्कौ ॥२५॥ अक्ष्णया पादश्रोण्योर्व्यत्यासेन। अंसौ बाह्वोरुपरिप्रदेशौ। अनूको वङ्क्र्याधारः आयतः पृष्ठ्यास्थिविशेषः। ऊर्वोरुपरिभूतौ उच्छ्रितावयवौ सक्थ्यौ (°क्थ्यो Cod.) ॥२७॥ इतः पृथिव्याः सकाशात् ॥३०॥ ये च राक्षसा मे (!) मदीयं यज्ञमुपतिष्ठन्ते प्राप्नुवन्ति ते पशुं विमथिष्यन्ते ॥३६॥३॥८॥

प्राणस्य श्रेष्ठत्वकरणाभिधानमुखेन गुदस्य प्रधानस्विष्टकृदुपयडिष्ट्यर्थं (°यडुष्टार्थ Cod.) त्रेधा विभज्य विनियोगं प्रशंसन्प्रयाजादीनामितराङ्गत्वमाह त्रीणीति। अनुयाजानन्तरं यष्टव्या एकादशोपयज उपरिष्टादाम्नास्यन्ते ॥१॥ शिवः श्रेष्ठः ॥२॥ यो यजमान एनं मेधं मेधार्हं प्रवृजमुपनयेत् उपगच्छेत्प्राप्नुयात् ॥५॥ अंसलः प्रवृद्धांसः पुष्टाङ्गः ॥६॥ एको होता। अध्वर्यवे उपयष्ट्रे प्रतिप्रस्थात्रे च ॥१०॥ अत्युपयड्होमकाश्चत्वार उपयागसप्तकानामनन्तरमाधिक्येन यष्टव्याः ॥१८॥४॥८॥

अत्युपयाजमन्त्रान्विधाय पुनः सृष्ट्यभिवृद्धिहेतुतया (सृष्वाभि° Cod.) प्रशंसति स इति ॥१॥ जाघनी वालदण्डः ॥५॥ तज्जोषाय भक्षणायालं पर्याप्तं भवति शुगनुविद्धत्वान्न यागार्हं स्यादित्यर्थः तस्मात्पाकात्पूर्वं शूल (!) परितृद्य पाकं कुर्यात् शूलात्पाक इति (पा° ५.४.६५.) डाजन्तः (डाच अंतः Cod.) पाकात्पूर्वं शूलेन परितर्दनाच्छुग्घृदयशूलं प्राप्नोतीत्यर्थः। पाकोत्तरकालं हृदयं शूलात्प्रवृह्य इतरावयवानामुपरि स्थापयेत् ॥८॥ शूलोपगूहने (हनी Cod.) विषयविशेषं निषेधति स वै नेति ॥११॥५॥८॥

अथ पश्वेकादशिनीं विधातुमाख्यायिकामाह प्रजापतिरिति। रिरिचान इवामन्यत आत्मानं रिक्तमिव अबुध्यत ॥१॥ अरिक्षि अतिरिक्तोऽभूवम् असृक्षि प्रजासृष्टिमकार्षम् ॥२॥ तस्माद्यः पुमान्प्रस्वामि (!) अनल्पः (?अतल्पः Cod.) सोऽन्नादो भवति ॥१॥ यस्माद्ब्राह्मणस्य पशुषु स्वामित्वमस्ति तस्मादेव कारणात्सर्व ब्राह्मणेभ्यो दत्त्वा अजिनमाच्छाद्य संचरति ॥३२॥१॥१॥

अथ सोमाभिषवार्थं वसतीवरीग्रहणं विधातुमाह यत्रेति ॥१॥ ऐत् अस्रवत् ॥४॥ इलयति इतस्ततश्चलति। नेलयन्ति न प्रति विवर्तन्ते ॥५॥ निनाल्यात् स्वगृहस्थितप्रभूतघटादेः सकाशात्। उपावसिते (!) समीपे गृहेऽवस्थितः पर्यवसितो वा दूरगृहस्थितो वा ॥८॥ संतिष्ठते पत्नीसंयाजान्तः समाप्तो भवति। अथ तदा परिहरति वसतीवरीर्वेदेः परितो नयेत् ॥१३॥ दक्षिणेन द्वारेण प्राग्वंशान्निष्क्रम्योत्तरवेद्या दक्षिणश्रोणौ सादयति ॥१४॥ उत्तरवेदेरुत्तरश्रोणौ सादनं कंचिन्मन्त्रं निर्दिश्य तस्य वक्ष्यमाणसम्पदतिरेकेण प्रातिकूल्यमभिधाय दक्षिणवेदिश्रोणिसादनमन्त्रमेव सम्पदनुकूलत्वात्सिद्धान्तयति मित्रावरुणयोरित्यादिना यस्मादयं मन्त्रोऽतिरिक्तोऽधिकः अतो वक्ष्यमाणा सप्तपदोपेतशक्वरीछन्दःप्राप्तिलक्षणा सम्पन्न स-

न्पद्यते इन्द्राग्न्योरित्यनेनैव चेदनतिरेकात्सम्पद्यते (?वेदन° Cod.) ॥१५॥ परितोऽङ्ग्यन्ते ह्रियन्ते (ह्रि° Cod.) ॥१६॥ परार्ध्या परार्धे भवा श्रेष्ठा ॥१७॥२॥१॥

अथ सुत्यादिवसप्रातःकालीनं सवनीयपश्वर्थप्रयोगमाह तानिति । ऋत्विजः ॥१॥ अधिषवणचर्मोपरिप्रदेशं प्रत्यधो नयति । जनूर्जन्मभूमिः ॥२॥ ईषे आयतौ (त्यै Cod.) शकटदण्डौ ॥३॥ अनुसृज्य वेष्टितं वस्त्रं विसृज्य । पापवस्यसं पापं च वसीयश्च पापवस्यसं साध्वसाधुमिश्रणम् ॥७॥ स निमेषव्यापार एव प्रतिगरस्थानीयः । निद्राभङ्गं निमेषं च न कुर्यात् । प्रचरन्त्यनया स्रुक्प्रभृतीर्व्यापारदशायामिति प्रचरणी सा स्रुग्भवति तया चतुर्गृहीतमाज्यं स्रुञ्ज्यात् ॥११॥ अपः प्रति इष्य इक् अपः प्रतिगमनोचितं प्र देवत्रेत्यापोनप्त्रीयमनुब्रूहि (देवत्रेत्या°?) । एताद्र (!) उ चैवैतदिति उशब्दोऽप्यर्थे अपि च एता (!) एकधनाख्या अप उद्दिश्य एतदनुतिष्ठते । नेदेना (!) इति । एता (!) अपो नाष्ट्रा नाशकानि रक्षांसि हिनसन् हिंस्युः ॥१५॥ दश चमसाध्वर्यवश्चमसप्रयोक्तारः तेषु यो मैत्रावरुणस्य चमसाध्वर्युः स सम्बोध्यते एहि उदकानयनार्थमागच्छ । एकधना उदकानि तेषां धारकाः कुम्भा वा प्रत्यगेकधनानयुग्मानित्यासादनाभिधानात्तेषां ग्रहीतार एकधनिनः एत आगच्छत । चात्वालदेशे यावदागमनं प्रत्युपतिष्ठ ॥१६॥ तेषां जलानयनार्थं निर्गमनमार्गमाह तऽइति ॥१७॥ प्सातो भक्षितः । उपस्रव्यन् अभिषवकाले सोमस्य संसर्गं करिष्यन् ॥२६॥ एतेन मैत्रावरुणाख्येन ऋत्विजा प्रैषैस्तत्कृति(°तैः?)गमनसाधनैराह्वानवाक्यैः प्रैषं यज्ञस्य गमनमैच्छन् । निविद्भिर्निवेदनसाधनैरग्निर्देव इत्यादिभिर्वाक्यैर्न्यवेदयन् परस्परं निवेदितवन्तः । पुरो याज्यानुवाक्याभ्यां पुरस्ताद्रुचिमिच्छां जनयन्ति देवताया इति पुरोरुचः पापराथेगा (?) इत्याद्याः ताभिः प्रारोचयन् प्ररोचनामजनयन् । अतो मैत्रावरुणस्य प्रैषादिसाधनवात्तदीयश्चमसः प्रशस्तः ॥२८॥ अप्सम्भरणानन्तरमनुष्ठेयं विधत्ते तऽइति पुनर्देवयजनं प्रति आगच्छेयुः । आपः मैत्रावरुणचमसगता अद्भिः होतृचमसस्थाभिर्वसतीवरीभिः ॥२९॥ एव नयन्तीति सम्बन्धः आनयन्त्येवेत्यर्थः । आ मैत्रावरुणचमसाद्वसतीवरीषु उपसर्गवशान्नयन्तीत्यनुषज्यते । आग्नीध्रहस्तस्थं होतृचमसमध्वर्युरादाय पूर्वेद्युराहृता वसतीवरीरध्वर्युः गृह्णाति कस्माऽउपयोगाय निग्राभ्याभ्यः होतृचमसे निगृह्यमाणत्वान्निग्राभ्या इति संज्ञा ॥३०॥ अवेः लब्धवानसि । नंनमुः अत्यर्थमानता अभवन् ॥३१॥ स वर्तमानः क्रतुरग्निष्टोमसंस्थश्चेत् । मन्त्रे यन्मर्तलिङ्गकत्वं तत्प्रशंसति मर्तवत्येति ॥३२॥ अग्निष्टोमादुपर्युक्थ्यसंस्थे क्रतौ । समुद्येव यमग्ने पृत्स्विति मन्त्रमुक्त्वैव तूष्णीमेत्य देवयजनं प्रपद्येत । यज्ञक्रतूनग्निष्टोमादिकान्परस्परव्यावृत्तान्कातिति ॥३३॥ इदानीमेकधनघटानामयुग्मसंख्याविकल्पमाह (°धनमघटा° Cod.) अयुज्ञा इति । सधनं समानमेकमेव धनम् । तस्मादयुग्मसंख्याका उदकविशेषा एकधननामकाः सम्पन्नाः ॥३४॥३॥१॥

इत्थमभिषवसाधनानामपां ग्रहणमभिधायाथ सोमाभिषवप्रयोगं वक्तुमुपक्रमते अथेति । अधिषवणे दारुमये फलके । अस्यामनामिकाङ्गुल्याम् ॥१॥ रासते ददाति ॥४॥ तासु आगतासु एनं यजमानम् । उपांशुग्रहार्थः सोमोऽभिषूयते येन स उपांशुसवनः पाषाणः स निदानेन मूलकारणविचारेण विवस्वत्संज्ञक आदित्य एव तस्यैवैतदात्मनावस्थानात् ॥७॥ तमुपांशुसवनमभि तस्योपरि सोमं मिमीते क्रयकालीनमानेन सोमं संस्कुर्यात् । मानं प्रशंस-

ति यद्वेवेति उशब्दोऽप्यर्थे यापि मात्रा सोमे कृता तस्मात्सोमस्य मितत्वात् (त्. त Cod.) मनुष्येषु व्यवहारार्थं प्रस्थकुडवाढकद्रोणादिमात्रा सम्पन्ना यो चापि उकारप्रश्लेषः अपि च या चान्या मात्रा एकद्वि-इत्यादिसंख्याप्रयुक्ता सापि सोममानप्रयुक्ता ॥८॥ न किंचन वस्तु लोष्टकाष्ठपाषाणादिकं प्रतिधारयते (!) प्रतिबध्नाति । तस्थानं तिष्ठतेः कानचि रूपम् ॥१४॥ अनेनस्यं न विद्यते एनः पापं यस्य स अनेनास्तस्य भावः ॥१७॥ अतो यत्परम्परया आ-ज्ञतिभावं गच्छन् जायते पुनः सम्भवति अतो यन् जायतऽइति यन्जः अतो वस्तुतो यंज्ञ इ-ति तस्य नाम तद्यज्ञ इति परोऽक्षेण व्यवहरति ॥२३॥ अस्य मन्त्रस्य तात्पर्यमाह मर्त्यो हैवैतद्भगवन्नुवाच (!) त्वमेवेत्यादिना स्पष्टोऽर्थः ॥२४॥ तच्च ग्रहणं होतृचमससकाशाद्भवति होतृचमसं दशापवित्रस्योपरि धारयित्वा तत्र सोमरसमासिच्य धारां सम्पाद्य ग्रहणात् ॥२५ ॥४॥१॥

इति सायणाचार्यविरचिते माधवीयवेदार्थप्रकाशे माध्यन्दिनीयशतपथभाष्ये तृतीये काण्डे नवमोऽध्यायः सप्तमश्च प्रपाठकः ॥ ॥ समाप्तं चेदमध्वरनाम तृतीयं काण्डम् ॥३॥ ॥

VARIOUS READINGS.

Adhyâya १. १. १ नातिशयीत Sây. - ४ Read: याजयेदिति. - ५ Read: °न्ने-दिष्ठतमामिव. - ६ Read: तच्छालां वा. - २. ११ यं घृतेन पुनस्तस्मादाह A. - १९ अमेध्यमाकृणत्ति Sây. - Read: मेध्यमसदिति. - २१ निरवधीदिति A. - ३. १ यज्ञ-स्यापराध्यै Sây. - ३ संदेह्यो Sây. - ५ राध्नुवात् Sây. - ७ यदभ्यङ्क्ते A. यदभ्यङ्क्ते B. - १० यदद्याव° AB. - ४. १ उद्गृह्णीते Sây. —

Adhyâya २. १. १० दीक्षिता न बल्यमविन्दन् Sây. but see also ४, २, १. ३, १. and ६, १, २१. - २२ संस्कृते AB. - ३१ °दुपास्यं म्रित्त्ये° AB. - २. २७ प्रतिगु-ह्य° Sây. - २१ सम्भवति AB. - ३. १५ उत्तरा वाक् Sây. - २१ निदधति ता७ A. - २३ संस्करोति AB. - ४. ११ अलग्नमिव Sây. —

Adhyâya ३. १. १५ आशन्नियात् AB. - २. ४ वा त्र्यङ्गुलं B. - ६ छन्दोमा-

नां Sây. - ८ विवा AB. भित्वा Sây. - ९ पात्रे A pr. m. पात्रो A sec. m. B. Sây. - १२ कविं । AB. The last word of a quoted *ric* is generally left unaccented. - १४ °र्मिमीत A. - ३. १ राजा३इति AB. - ९ आजत् Sây. - ११ तान्मा दभन् Sây. - ४. २ अथैनमभिपद्य Sây. against the accent. - ८ प्रतिनाह्व° Sây. - ९ °ब्रह्मण्यः Sây. °ब्रह्मण्या AB. which reading I now prefer, see ४, ३, ४, २२. - १३ अपालव° A अपालंब° B. - १५ प्रपायतयति B the first time. प्रपादयति Sây. - १६ संस्कृत° AB. - १९ °नोपज्ञातं AB. °तेत्यह्वे AB. —

Adhyâya ४. १. ३ नापचायन्त Sây. - १८ संल्कुम्प्यते B सलुन्याति Sây. - २६ संस्करो° AB. - ३. ६ विसृज्यते AB विसृजन्ते Sây. - ८ समाम्नवत AB. - ९ व्रघास्वे व्रतया A. - १२ तमेवाग्रे Sây. तमेवाय A. तमेवाग्र B. - २२ °दल्यापा३इति AB, see ३. ३. १. - ४. ८ अतिभारं Sây. - १४ यथेदं B. यथेतं Sây. - २२. २३. २४ गह्वरेष्ठा । AB. —

Adhyâya ५. १. २३ याजयेति Sây. - १५ धियाम° Sây. ध्रियाम° AB. - २. ८ तां न्यक्तेन A. ता न्यक्तेन the schol. at Kâtyây. ५. ४. १२. - १६ गुग्गुलु Sây. - ३. ९ Read: भित्तिं प्रत्या°. - १४ दशस्या । AB. - क्वेतत्द्वियत्यन्यानि AB. - २५ तं निष्ठित° AB. - The fifth adhyâya is reckoned by Sâya*n*a as containing five brâhma*n*as and accordingly the sixth as having three only. —

Adhyâya ६. १. २५. २६ तं निष्ठि° AB. - २७ तां दद्मि° AB. तां धिष्ण्या° AB. - २८ °त्वमयाजय° AB. - २९ This passage shows clearly, (what is manifest too from the Padapâ*t*ha, wherever the words occur,) that आर्ति (आऽऋति in the Pada) and आर्त are not be derived from अर्द्, but from ऋ + आः see also १, ४, ३, ११-२२. ५, १, २. ६, १, १६. - २. १ आत्मानः Sây. (?) - ८ निष्क्रिणीषेति

AB. - ९ इमे ह्णेत्रकाः Sây. - २२ जिह्या A. - ३. १० Read: विधृती. - ११ वि-द्वान्। AB. - १९ °मन्तर्जभ A. - ४. ५ अगान्ना° A. - ११ Read: तथानो. - १६ °व-ल्ह्शो, °वल्हशा A. —

Adhyâya ७. १. ८ बाह्यशकल° Sây. - १६ Read: सम्प्रत्य°. - २. ३ ?प्रकुब्क्र° A pr. m. प्रकुब्क्र° A sec. m. प्रकुव्र° B: this line is omitted in the commentary. - ८ सर्वत्वाय त्वेव B. and Sây. तन्न सऽस्था° AB. - ३. २ प्राप्नीयन्त Sây. - ४ यानं विद्व° Sây. - ४. २ स यदेव AB. —

Adhyâya ८. २. ६ सऽहत्य A. - ११ °आएयसन्नि° A. °आएयेसन्नि° B. - ३. २ °शेन प्रचरति मध्य° AB. - १५ प्राणः संभवति Sây. - नर्ध्या A pr. m. मर्ध्यः B. - ३२ Are we to read: प्राणात्यश्चोदनत्यश्चा°? see २, ५, २, २. ४, १, २, १६. - ३६ ये म ऽउपति° Sây. - ब्राह्मणं ॥५॥ संलग्ननाम B. —

Adhyâya ९. १. ८ प्रस्वामि (?) Sây. - २. १० and १२ ह्विष्मांऽ३ऽ A. - ३. १५ एता उ and नेंदेना अन्तरा Sây. - ३० °मुपोदक्रा° AB. - ३४ Read सधनं यो. - ४. १४ प्रतिधारयते Sây. - १७ तन्नेव AB. - २३ यंज्ञायते तस्माद्यंज्ञो यंज्ञो ह AB. - २४ °द्गगवन्नुवाच Sây.

ओम् । प्राणो ह वाऽअस्योपाꣳशुः । व्यान उपाꣳशुसवन उदान एवान्तर्यामः ॥१॥ अथ यस्मादुपाꣳशुर्नाम । अꣳशुर्वै नाम ग्रहः स प्रजापतिस्तस्यैष प्राणस्तद्यदस्यैष प्राणस्तस्मादुपाꣳशुर्नाम ॥२॥ तं बर्हिष्पवित्राद्गृह्णाति । पराञ्चमेवास्मिन्नेतत्प्राणं दधाति सोऽस्यायं पराङेव प्राणो निरर्दति तमꣳशुभिः पावयति पूतोऽसदिति षड्भिः पावयति षड्वाऽऋतव ऋतुभिरेवैनमेतत्पावयति ॥३॥ तदाहुः । यदꣳशुभिरुपाꣳशुं पुनाति सर्वे सोमाः पवित्रपूता अथ केनास्याꣳशवः पूता भवन्तीति ॥४॥ तानुपनिवपति । यत्ते सोमादाभ्यं नाम जागृवि तस्मै ते सोम सोमाय स्वाहेति तदस्य स्वाहाकारेणैवाꣳशवः पूता भवन्ति सर्वं वाऽएष ग्रहः सर्वेषाꣳ हि सवनानाꣳ रूपम् ॥५॥ देवा ह वै यज्ञं तन्वानाः । तेऽसुररक्षसेभ्य आसङ्गाद्बिभयां चक्रुस्ते होचुः सꣳस्थापयाम यज्ञं यदि नोऽसुररक्षसान्यासजेयुः सꣳस्थित एव नो यज्ञः स्यादिति ॥६॥ ते प्रातःसवनऽएव । सर्वं यज्ञꣳ समस्थापयन्नेतस्मिन्नेव ग्रहे यजुष्टः प्रथमे स्तोत्रे सामतः प्रथमे शस्त्रऽऋक्तस्तेन सꣳस्थितेनैवात ऊर्ध्वं यज्ञेनाचरन्त्स एषोऽप्येतर्हि तथैव यज्ञः संतिष्ठतऽएतस्मिन्नेव ग्रहे यजुष्टः प्रथमे स्तोत्रे सामतः प्रथमे शस्त्रऽऋक्तस्तेन सꣳस्थितेनैवात ऊर्ध्वं यज्ञेन चरति ॥७॥ स वाऽअष्टौ कृत्वोऽभिषुणोति । अष्टाक्षरा वै गायत्री गायत्रं प्रातःसवनं प्रातःसवनमेवैतत्क्रियते ॥८॥ स गृह्णाति । वाचस्पतये पवस्वेति प्राणो वै वाचस्पतिः प्राण एष ग्रहस्तस्मादाह वाचस्पतये पवस्वेति वृष्णोऽअꣳशुभ्यां गभस्तिपूत इति सोमाꣳशुभ्याꣳ ह्येनं पावयति तस्मादाह वृष्णोऽअꣳशुभ्यामिति

गभस्तिपूत इति पाणी वै गभस्ती पाणिभ्याᳫं ह्येनं पावयति ॥ ९ ॥ अथैकादश कृत्वोऽभिषुणोति । एकादशाक्षरा वै त्रिष्टुप्त्रैष्टुभं माध्यन्दिनᳫं सवनं माध्यन्दिनमेवैतत्सवनं क्रियते ॥ १० ॥ स गृह्णाति । देवो देवेभ्यः पवस्वेति देवो ह्येष देवेभ्यः पवते येषां भागोऽसीति तेषामु ह्येष भागः ॥ ११ ॥ अथ द्वादश कृत्वोऽभिषुणोति । द्वादशाक्षरा वै जगती जागतं तृतीयसवनं तृतीयसवनमेवैतत्क्रियते ॥ १२ ॥ स गृह्णाति । मधुमतीर्न इषस्कृधीति रसमेवास्मिन्नेतद्दधाति स्वदयत्येवैनमेतद्देवेभ्यस्तस्मादेष हुतो न पूयत्यथ यज्जुहोति सᳫंस्थापयत्येवैनमेतत् ॥ १३ ॥ अष्टावष्टौ कृत्वः । ब्रह्मवर्चसकामस्याभिषुणुयादित्याहुरष्टाक्षरा वै गायत्री ब्रह्म गायत्री ब्रह्मवर्चसी हैव भवति ॥ १४ ॥ तच्चतुर्विᳫंशतिं कृत्वोऽभिषुतं भवति । चतुर्विᳫंशतिर्वै संवत्सरस्यार्धमासाः संवत्सरः प्रजापतिः प्रजापतिर्यज्ञः स यावानेव यज्ञो यावत्यस्य मात्रा तावन्तमेवैतत्सᳫंस्थापयति ॥ १५ ॥ पञ्च-पञ्च कृत्वः । पशुकामस्याभिषुणुयादित्याहुः पाङ्क्ताः पशवः पशून्हैवावरुन्द्धे पञ्च वाऽऋतवः संवत्सरस्य संवत्सरः प्रजापतिः प्रजापतिर्यज्ञः स यावानेव यज्ञो यावत्यस्य मात्रा तावन्तमेवैतत्सᳫंस्थापयति सोऽएषा मीमाᳫंसैवेतरं त्वेव क्रियते ॥ १६ ॥ तं गृहीत्वा परिमार्ष्टि । नेद्व्यवश्चोतदिति तं न सादयति प्राणो ह्यस्यैष तस्मादयमसन्नः प्राणः संचरति यदीत्वभिचरेदथैनᳫं सादयेदमुष्य त्वा प्राणᳫं सादयामीति तथाह तस्मिन्न पुनरस्ति यन्नानुसृजति तेनोऽअध्वर्युश्च यजमानश्च ज्योग्जीवतः ॥ १७ ॥ अथोऽअप्येवैनं दध्यात् । अमुष्य त्वा प्राणमपिदधामीति तथाह तस्मिन्न पुनरस्ति यन्न सादयति तेनो प्राणान्न लोभयति ॥ १८ ॥ स वाऽअन्तरेव सन्स्वाहेति करोति । देवा ह वै बिभयां चक्रुर्यद्वै नः पुरेवास्य ग्रहस्य होमादसुररक्षसानीमं ग्रहं न हन्युरिति तमन्तरेव सन्तः स्वाहाकारेणाजुहवुस्तᳫं हुतमेव सन्तमग्नावजुहवुस्तथोऽएवैनमेष एतदन्तरेव सन्स्वाहाकारेण जुहोति तᳫं हुतमेव सन्तमग्नौ जुहो-

ति ॥१९॥ अथोपनिष्क्रामति । उर्वन्तरिक्षमन्वेमीत्यन्तरिक्षं वाऽअनु रक्षश्चरत्य-
मूलमुभयतः परिच्छिन्नं यथायं पुरुषोऽमूल उभयतः परिच्छिन्नोऽन्तरिक्षमनुचरत्येतद्वै
यजुर्ब्रह्म रक्षोहा स एतेन ब्रह्मणान्तरिक्षमभयमनाष्ट्रं कुरुते ॥२०॥ अथ वरं वृ-
णीते । बलवद्ध वै देवा एतस्य ग्रहस्य होमं प्रेप्सन्ति तेऽस्माऽएतं वरꣳ समर्ध-
यन्ति क्षिप्रं न इमं ग्रहं जुहवदिति तस्माद्वरं वृणीते ॥२१॥ स जुहोति । स्वां-
कृतोऽसीति प्राणो वाऽअस्यैष ग्रहः स स्वयमेव कृतः स्वयं जातस्तस्मादाह स्वां-
कृतोऽसीति विश्वेभ्य इन्द्रियेभ्यो दिव्येभ्यः पार्थिवेभ्य इति सर्वाभ्यो ह्येष प्रजा-
भ्यः स्वयं जातो मनस्त्वाष्टिति प्रजापतिर्वै मनः प्रजापतिष्ट्वाश्नुतामित्येवैतदाह स्वा-
हा त्वा सुभव सूर्यायेति तदवरꣳ स्वाहाकारꣳ करोति परां देवताम् ॥२२॥ अमु-
ष्मिन्वाऽएतमहौषीत् । य एष तपति सर्वं वाऽएष तदेनꣳ सर्वस्यैव परार्ध्यं क-
रोत्यथ यदवरां देवतां कुर्यात्परꣳ स्वाहाकारꣳ स्यादु हैवामुष्मादादित्यात्परं त-
स्मादवरꣳ स्वाहाकारं करोति परां देवताम् ॥२३॥ अथ स्रुवोर्ध्वं ग्रहमुन्मार्ष्टि ।
पराञ्चमेवास्मिन्नेतत्प्राणं दधात्यथोत्तानेन पाणिना मध्यमे परिधौ प्रागुपमार्ष्टि प-
राञ्चमेवास्मिन्नेतत्प्राणं दधाति देवेभ्यस्त्वा मरीचिपेभ्य इति ॥२४॥ अमुष्मिन्वा
ऽएतं मण्डलेऽहौषीत् । य एष तपति तस्य ये रश्मयस्ते देवा मरीचिपास्ताने-
वैतत्प्रीणाति तऽएनं देवाः प्रीताः स्वर्गं लोकमभिवहन्ति ॥२५॥ तस्य वाऽए-
तस्य ग्रहस्य । नानुवाक्यास्ति न याज्या तं मन्त्रेण जुहोत्येतेनो हास्यैषोऽनुवा-
क्यवान्भवत्येतेन याज्यवानथ यद्यभिचरेद्योऽस्याꣳशुराश्लिष्टः स्याद्बाह्वोर्वीरणि वा
वाससि वा तं जुहुयाद्देवाꣳशो यस्मै त्वेडे तत्सत्यमुपरिप्रुता भङ्गेन हतोऽसौ फ-
डिति यथा ह वै हन्यमानानामपधावेदेवमेषोऽभिषूयमाणानाꣳ स्कन्दति तथा
ह तस्य नैव धावन्नापधावत्परिशिष्यते यस्माऽएवं करोति तꣳ सादयति प्राणाय
त्वेति प्राणो ह्यस्यैषः ॥२६॥ दक्षिणार्धे हैके सादयन्ति । एताꣳ ह्येष दिशमनु

संचरतीति तद्व तथा न कुर्यादुत्तरार्धऽएवैनꣳ सादयेन्नो ह्येतस्या आहुतेः काचन परास्ति तꣳ सादयति प्राणाय त्वेति प्राणो ह्यस्यैषः ॥२७॥ अथोपाꣳशुसवनमादत्ते । तं न दशाभिर्न पवित्रेणोपस्पृशति यथा ह्यद्भिः प्रणिक्तमेवं तद्यद्यꣳशुराश्लिष्टः स्यात्पाणिनैव प्रध्वꣳस्योदञ्चमुपनिपादयेद्व्यानाय त्वेति व्यानो ह्यस्यैषः ॥२८॥ ब्राह्मणम् ॥१॥ ॥

प्राणो ह वाऽअस्योपाꣳशुः । व्यान उपाꣳशुसवन उदान एवान्तर्यामः ॥१॥ अथ यस्मादन्तर्यामो नाम । यो वै प्राणः स उदानः स व्यानस्तमेवास्मिन्नेतत्पराञ्चं प्राणं दधाति यदुपाꣳशुं गृह्णाति तमेवास्मिन्नेतत्प्रत्यञ्चमुदानं दधाति यदन्तर्यामं गृह्णाति सोऽस्यायमुदानोऽन्तरात्मन्यतस्तद्यदस्यैषोऽन्तरात्मन्यतो यद्धेनेनेमाः प्रजा यतास्तस्मादन्तर्यामो नाम ॥२॥ तमन्तःपवित्राद्गृह्णाति । प्रत्यञ्चमेवास्मिन्नेतदुदानं दधाति सोऽस्यायमुदानोऽन्तरात्मन्हित एतेनो हास्याप्युपाꣳशुरन्तःपवित्राद्गृहीतो भवति समानꣳ ह्येतद्यदुपाꣳश्वन्तर्यामौ प्राणोदानौ ह्येतेनो हैवास्यैषोऽपीतरेषु ग्रहेष्वनाह्निद्भवति ॥३॥ अथ यस्मात्सोमं पवित्रेण पावयति । यत्र वै सोमः स्वं पुरोहितं बृहस्पतिं जिन्यौ तस्मै पुनर्ददौ तेन सꣳशशाम तस्मिन्पुनर्दद्युष्यासैवातिशिष्टमेनो यदीन्नूनं ब्रह्म ज्यानायाभिदध्यौ ॥४॥ तं देवाः पवित्रेणापावयन् । स मेध्यः पूतो देवानाꣳ हविरभवत्तथोऽएवैनमेष एतत्पवित्रेण पावयति स मेध्यः पूतो देवानाꣳ हविर्भवति ॥५॥ तद्यदुपयामेन ग्रहा गृह्यन्ते । इयं वाऽअदितिस्तस्या अदः प्रायणीयꣳ हविरसावादित्यश्चरुस्तद्धि तत्पुरेव सुत्यायै सा हेयं देवेषु सुत्यायामपित्वमीषेऽस्त्वेव मेऽपि प्रसुते भाग इति ॥६॥ त ह देवा ऊचुः । व्यादिष्टोऽयं देवताभ्यो यज्ञस्त्वय्येव ग्रहा गृह्यन्तां देवताभ्यो हूयन्तामिति तथेति सोऽस्या एष प्रसुते भागः ॥७॥ तद्यदुपयामेन ग्रहा गृह्यन्ते । इयं वाऽउपयाम इयं वाऽइदमन्नाद्यमुपयच्छति पशुभ्यो मनुष्येभ्यो वनस्पतिभ्य इतो वाऽऊ-

र्धा देवा दिवि हि देवाः ॥८॥ तद्यदुपयामेन ग्रहा गृह्यन्ते । अनयैव तद्गृह्यन्ते
ऽथ यद्योनौ सादयतीयं वाऽअस्य सर्वस्य योनिरस्यै वाऽइमाः प्रजाः प्रजाताः
॥९॥ तं वाऽएतꣳ । रेतो भूतꣳ सोममृत्विजो बिभ्रति यद्वाऽअयोनौ रेतः सिच्य-
ते प्र वै तन्मीयतेऽथ यद्योनौ सादयत्यस्यामेव तत्सादयति ॥१०॥ प्राणोदानौ
ह वाऽअस्यैतौ ग्रहौ । तयोरुदितेऽन्यतरं जुहोत्यनुदितेऽन्यतरं प्राणोदानयो-
र्व्याकृत्यै प्राणोदानावेवैतद्व्याकरोति तस्मादेतौ समानावेव सन्तौ नानेवाचक्षते
प्राण इति चोदान इति च ॥११॥ अहोरात्रे ह वाऽअस्यैतौ ग्रहौ । तयोरुदिते
ऽन्यतरं जुहोत्यनुदितेऽन्यतरमहोरात्रयोर्व्याकृत्याऽअहोरात्रेऽएवैतद्व्याकरोति ॥१२॥
अहः सत्वमुपाꣳशुम् । तꣳ रात्रौ जुहोत्यहरेवैतद्रात्रौ दधाति तस्मादपि सुतमि-
स्रायामुपैव किंचित्ख्यायते ॥१३॥ रात्रिꣳ सत्वमन्तर्यामम् । तमुदिते जुहोति रात्रि-
मेवैतदहन्दधाति तेनो हासावादित्य उद्यन्नेवेमाः प्रजा न प्रदहति तेनेमाः प्रजा-
स्त्राताः ॥१४॥ अथातो गृह्णात्येव । उपयामगृहीतोऽसीत्युक्त उपयामस्य बन्धुर-
न्तर्यच्छ मघवन्पाहि सोममितीन्द्रो वै मघवानिन्द्रो यज्ञस्य नेता तस्मादाह मघ-
वन्निति पाहि सोममिति गोपाय सोममित्येवैतदाहोरुष्य राय एषो यजस्वेति
पशवो वै रायो गोपाय पशूनित्येवैतदाहेषो यजस्वेति प्रजा वाऽइषस्ता एवैत-
द्यायजूकाः करोति ता इमाः प्रजा यजमाना अर्चन्त्यः श्राम्यन्त्यश्चरन्ति ॥१५॥ अ-
न्तस्ते द्यावापृथिवी दधामि । अन्तर्दधाम्युर्वन्तरिक्षम् सजूर्देवेभिरवरैः परैश्चेति त-
देनं वैश्वदेवं करोति तद्यदेनेनेमाः प्रजाः प्राणन्त्यश्चोदनन्त्यश्चान्तरिक्षमनुचरन्ति ते-
न वैश्वदेवोऽन्तर्यामे मघवन्मादयस्वेतीन्द्रो वै मघवानिन्द्रो यज्ञस्य नेता तस्मा-
दाह मघवन्नित्यथ यदन्तरन्तरिति गृह्णात्यन्तस्त्वात्मन्दधऽइत्येवैतदाह ॥१६॥ तं गृ-
हीत्वा परिमार्ष्टि । नेद्व्यवश्चोतदिति तं न सादयत्युदानो ह्यस्यैष तस्मादयमसन्न
उदानः संचरति यदीत्वभिचरेदथैनꣳ सादयेदमुष्य त्वोदानꣳ सादयामीति ॥१७॥ स

यद्युपांशुꣳ सादयेत् । अथैनꣳ सादयेद्यद्युपांशुं न सादयेन्नैनꣳ सादयेद्यद्युपांशुमपिदध्यादप्येनं दध्याद्यद्युपांशुं नापिदध्यान्नैनमपिदध्याद्यथोपांशोः कर्म तथैतस्य समानꣳ ह्येतद्यदुपांश्वन्तर्यामौ प्राणोदानौ हि ॥१८॥ ताꣳउ ह चरकाः । नानैव मन्त्राभ्यां जुह्वति प्राणोदानौ वाऽअस्यैतौ नानावीर्यौ प्राणोदानौ कुर्म इति वदन्तस्तदु तथा न कुर्यान्मोहयन्ति ह ते यजमानस्य प्राणोदानावपीद्वाऽएनं तूष्णीं जुहुयात् ॥१९॥ स यद्वाऽउपांशुं मन्त्रेण जुहोति । तदेवास्यैषोऽपि मन्त्रेण हुतो भवति किमु तत्तूष्णीं जुहुयात्समानꣳ ह्येतद्यदुपांश्वन्तर्यामौ प्राणोदानौ हि ॥२०॥ स येनैवोपांशुं मन्त्रेण जुहोति । तेनैवैतं मन्त्रेण जुहोति स्वांकृतोऽसि विश्वेभ्य इन्द्रियेभ्यो दिव्येभ्यः पार्थिवेभ्यो मनस्त्वाष्टु स्वाहा सुभव सूर्यायेत्युक्तो यजुषो बन्धुः ॥२१॥ अथ स्रुवावाञ्चं ग्रहमवमार्ष्टि । इदं वाऽउपांशुꣳ स्रुवोर्ध्वमुन्मार्ष्टि यथात्रावाञ्चमवमार्ष्टि प्रत्यञ्चमेवास्मिन्नेतदुदानं दधाति ॥२२॥ अथ नीचा पाणिना । मध्यमे परिधौ प्रत्यगुपमार्ष्टीदं वा उपांशुꣳ स्रुवोत्तानेन पाणिना मध्यमे परिधौ प्रागुपमार्ष्टि यथात्र नीचा पाणिना मध्यमे परिधौ प्रत्यगुपमार्ष्टि प्रत्यञ्चमेवास्मिन्नेतदुदानं दधाति देवेभ्यस्त्वा मरीचिपेभ्य इति सोऽसावेव बन्धुः ॥२३॥ तं प्रत्याक्रम्य सादयति । उदानाय त्वेत्युदानो ह्यस्यैष तानि वै सꣳस्पृष्टानि सादयति प्राणोदानावेवैतत्सꣳस्पर्शयति प्राणोदानान्त्संदधाति ॥२४॥ तानि वाऽअनिङ्ग्यमानानि शेरे । आ तृतीयसवनात्तस्मादिमे मनुष्याः स्वपन्ति तानि पुनस्तृतीयसवने प्रयुज्यन्ते तस्मादिमे मनुष्याः सुप्त्वा प्रबुध्यन्ते तेऽनिशिताश्चराचरा यज्ञस्यैवैतद्विधामनु वय-इव ह वै यज्ञो विधीयते तस्योपांश्वन्तर्यामाविव पक्षावात्मोपांशुसवनः ॥२५॥ तानि वाऽअनिङ्ग्यमानानि शेरे । आ तृतीयसवनात्तायते यज्ञ एति वै तद्यत्तायते तस्मादिमानि वयाꣳसि विगृह्य पक्षावनायुवानानि पतन्ति तानि पुनस्तृतीयसवने प्रयुज्यन्ते तस्मादिमानि वयाꣳसि समासं पक्षावा-

युवानानि पतन्ति यज्ञस्यैवैतद्विधामनु ॥२६॥ ॥ शतम् २३०० ॥ ॥ इयꣳ ह वा ऽउपाꣳशुः । प्राणो ह्युपाꣳशुरिमाꣳ ह्येव प्राणन्नभिप्राणित्यसावेवान्तर्याम उदानो ह्यन्तर्यामोऽमुꣳ ह्येव लोकमुदनन्नभ्युदनित्यन्तरिक्षमेवोपाꣳशुसवनो व्यानो ह्युपाꣳशुसवनोऽन्तरिक्षꣳ ह्येव व्यनन्नभिव्यनिति ॥२७॥ ब्राह्मणम् ॥२॥ ॥

वाग्घ वाऽअस्यैन्द्रवायवः । एतन्न्वध्यात्ममिन्द्रो ह यत्र वृत्राय वज्रं प्रजहार सोऽबलीयान्मन्यमानो नास्तृषीतीव बिभ्यन्निलयां चक्रे तदेवापि देवा अपन्यलयन्त ॥१॥ ते ह देवा ऊचुः । न वै हतं वृत्रं विद्म न जीवꣳ हन्त न एको वेत्तु यदि हतो वा वृत्रो जीवति वेति ॥२॥ ते वायुमब्रुवन् । अयं वै वायुर्योऽयं पवते वायो त्वमिदं विद्धि यदि हतो वा वृत्रो जीवति वा त्वं वै न आशिष्ठोऽसि यदि जीविष्यति त्वमेव क्षिप्रं पुनरागमिष्यसीति ॥३॥ स होवाच । किं मे ततः स्यादिति प्रथमवषट्कार एव ते सोमस्य राज्ञ इति तथेत्येयाय वायुरैद्धतं वृत्रꣳ स होवाच हतो वृत्रो यद्धते कुर्यात तत्कुरुतेति ॥४॥ ते देवा अभ्यसृज्यन्त । यथा वित्तिं वेत्स्यमाना एवꣳ स यमेकोऽलभत स एकदेवत्योऽभवद्यं द्वौ स द्विदेवत्यो यं बहवः स बहुदेवत्यस्तंयदेनं पात्रैर्व्यगृह्णत तस्माद्ग्रहा नाम ॥५॥ स एषामापूयत् । स एनांश्छुक्तः पूतिरभिववौ स नालमाहुत्याऽआस नालं भक्षाय ॥६॥ ते देवा वायुमब्रुवन् । वायविमं नो विवाहीमं नः स्वदयेति स होवाच किं मे ततः स्यादिति त्वय्येवैतानि पात्राण्याचक्षीरन्निति तथेति होवाच यूयं तु मे सच्युपवातेति ॥७॥ तस्य देवाः । यावन्मात्रमिव गन्धस्यापजघ्नुस्तं पशुष्वदधुः स एष पशुषु कुणपगन्धस्तस्मात्कुणपगन्धान्नापिगृह्णीत सोमस्य ह्येष राज्ञो गन्धः ॥८॥ नोऽएव निष्ठीवेत् । तस्माद्यद्यप्यासक्त-इव मन्येताभिवातं परीयाच्छ्रीर्वै सोमः पाप्मा यक्ष्मः स यथा श्रेयस्यायति पापीयान्प्रत्यवरोहेदेवꣳ हास्माद्यक्ष्मः प्रत्यवरोहति ॥९॥ अथेतरं वायुर्व्यवात् । तदस्वदयत्ततोऽलमाहुत्या

ऽश्रासान्नं भक्ताय तस्मादेतानि नानादेवत्यानि सन्ति वायव्यानीत्याचक्षते सो ऽस्यैष प्रथमवषट्कारश्च सोमस्य राज्ञ एतान्यु ऽएनेन पात्राण्याचक्षते ॥१०॥ इन्द्रो ह वाऽईक्षां चक्रे । वायुर्वै नोऽस्य यज्ञस्य भूयिष्ठभाग्यस्य प्रथमवषट्कारश्च सोमस्य राज्ञ एतान्यु ऽएनेन पात्राण्याचक्षते हन्तास्मिन्नपित्वमिच्छाऽइति ॥११॥ स होवाच । वायवा मास्मिन्ग्रहे भजेति किं ततः स्यादिति निरुक्तमेव वाग्वदेदिति निरुक्तं चेद्वाग्वदेदा त्वा भजामीति तत एष ऐन्द्रवायवो ग्रहोऽभवद्वायव्यो हैव ततः पुरा ॥१२॥ स इन्द्रोऽब्रवीत् । अर्धं मेऽस्य ग्रहस्येति तुरीयमेव तऽइति वायुरर्धमेव मऽइतीन्द्रस्तुरीयमेव तऽइति वायुः ॥१३॥ तौ प्रजापतिं प्रतिप्रश्नमेयतुः । स प्रजापतिर्ग्रहं द्वेधा चकार स होवाचेदं वायोरित्यथ पुनरर्धं द्वेधा चकार स होवाचेदं वायोरितीदं तवेतीन्द्रं तुरीयमेव भाजयां चकार यद्वै चतुर्थं तत्तुरीयं तत एष ऐन्द्रतुरीयो ग्रहोऽभवत् ॥१४॥ तस्य वाऽएतस्य ग्रहस्य । द्वे पुरोरुचौ वायव्यैव पूर्वैन्द्रवायव्युत्तरा द्वेऽअनुवाक्ये वायव्यैव पूर्वैन्द्रवायव्युत्तरा द्वौ प्रैषौ वायव्य एव पूर्व ऐन्द्रवायव उत्तरो द्वे याज्ये वायव्यैव पूर्वैन्द्रवायव्युत्तरैवमेनं तुरीयं-तुरीयमेव भाजयां चकार ॥१५॥ स होवाच । तुरीयं-तुरीयं चेन्मामबीभजुस्तुरीयमेव तर्हि वाङ्निरुक्तं वदिष्यतीति तदेतत्तुरीयं वाचो निरुक्तं यन्मनुष्या वदन्त्यथैतत्तुरीयं वाचोऽनिरुक्तं यत्पशवो वदन्त्यथैतत्तुरीयं वाचोऽनिरुक्तं यद्वयाꣳसि वदन्त्यथैतत्तुरीयं वाचोऽनिरुक्तं यदिदं क्षुद्रꣳ सरीसृपं वदति ॥१६॥ तस्मादेतदृषिणाभ्यनूक्तम् । चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः । गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्तीति ॥१७॥ अथातो गृह्णात्येव । आ वायो भूष शुचिपा उप नः सहस्रं ते नियुतो विश्ववार । उपो तेऽअन्धो मद्यमयामि यस्य देव दधिषे पूर्वपेयं वायवे त्वेति ॥१८॥ अथापगृह्य पुनरानयति । इन्द्रवायूऽइमे सुता उप प्रयोभिरागतम् । इन्दवो वामु-

शन्ति हि । उपयामगृहीतोऽसि वायवऽइन्द्रवायुभ्यां त्वैष ते योनिः सजोषोभ्यां त्वेति सादयति स यदाह सजोषोभ्यां त्वेति यो वै वायुः स इन्द्रो य इन्द्रः स वायुस्तस्मादाहैष ते योनिः सजोषोभ्यां त्वेति ॥ ११ ॥ ब्राह्मणम् ॥ ३ ॥ ॥

क्रतूदक्षौ ह वाऽअस्य मित्रावरुणौ । एतन्न्वध्यात्मं स यदेव मनसा कामयतऽइदं मे स्यादिदं कुर्वीयेति स एव क्रतुरथ यदस्मै तत्समृध्यते स दक्षो मित्र एव क्रतुर्वरुणो दक्षो ब्रह्मैव मित्रः क्षत्रं वरुणोऽभिगन्तैव ब्रह्म कर्ता क्षत्रियः ॥ १ ॥ ते हैतेऽअग्रे नानेवासतुः । ब्रह्म च क्षत्रं च ततः शशाकैव ब्रह्म मित्र ऋते क्षत्राद्वरुणात्स्थातुम् ॥ २ ॥ न क्षत्रं वरुणः । ऋते ब्रह्मणो मित्राद्यद्ध किं च वरुणः कर्म चक्रेऽप्रसूतं ब्रह्मणा मित्रेण न हैवास्मै तत्समानृधे ॥ ३ ॥ स क्षत्रं वरुणः । ब्रह्म मित्रमुपमन्त्रयां चक्रऽउप मावर्तस्व संसृजावहै पुरस्त्वा करवै त्वत्प्रसूतः कर्म करवाऽइति तथेति तौ समसृजेतां तत एष मैत्रावरुणो ग्रहोऽभवत् ॥ ४ ॥ सोऽएव पुरोधा । तस्मान्न ब्राह्मणः सर्वस्येव क्षत्रियस्य पुरोधां कामयेत संह्येतौ सृजेते सुकृतं च दुष्कृतं च नोऽएव क्षत्रियः सर्वमिव ब्राह्मणं पुरोदधीत संह्येवैतौ सृजेते सुकृतं च दुष्कृतं च स यत्ततो वरुणः कर्म चक्रे प्रसूतं ब्रह्मणा मित्रेण सं हैवास्मै तदानृधे ॥ ५ ॥ तत्तदवक्लृप्तमेव । यद्ब्राह्मणोऽराजन्यः स्याद्यद्यु राजानं लभेत समृद्धं तदेतद्ध त्वेवानवक्लृप्तं यत्क्षत्रियोऽब्राह्मणो भवति यद्ध किं च कर्म कुरुतेऽप्रसूतं ब्रह्मणा मित्रेण न हैवास्मै तत्समृध्यते तस्मादु क्षत्रियेण कर्म करिष्यमाणेनोपसर्तव्य एव ब्राह्मणः सं हैवास्मै तद्ब्रह्मप्रसूतं कर्मऽर्ध्यते ॥ ६ ॥ अथातो गृह्णात्येव । अयं वां मित्रावरुणा सुतः सोम ऋतावृधा । ममेदिह श्रुतं हवम् । उपयामगृहीतोऽसि मित्रावरुणाभ्यां त्वेति ॥ ७ ॥ तं पयसा श्रीणाति । तद्यत्पयसा श्रीणाति वृत्रो वै सोम आसीत्तं यत्र देवा अघ्नंस्तं मित्रमब्रुवंस्त्वमपि जहीति स न चकमे सर्वस्य वाऽअहं मि-

त्रमस्मि न मित्रꣳ सन्नमित्रो भविष्यामीति तं वै वा यज्ञादन्तरेष्याम इत्यहमपि हन्मीति होवाच तस्मात्पशवोऽपाक्रामन्नमित्रꣳ सन्नमित्रोऽभूदिति स पशुभिर्व्यार्ध्यत तमेतद्देवाः पशुभिः समार्धयन्यत्पयसाश्रीणंस्तथोऽएवैनमेष एतत्पशुभिः समर्धयति यत्पयसा श्रीणाति ॥८॥ तदाहुः । शश्वद्ध नैव चकमे हन्तुमिति तस्माद्देवात्र पयस्तन्मित्रस्य सोम एव वरुणस्य तस्मात्पयसा श्रीणाति ॥९॥ स श्रीणाति । राया वयꣳ ससवाꣳसो मदेम हव्येन देवा यवसेन गावः । तां धेनुं मित्रावरुणा युवं नो विश्वाहा धत्तमनपस्फुरन्तीमेष ते योनिर्ऋतायुभ्यां त्वेति सादयति स यदाहऽर्तायुभ्यां त्वेति ब्रह्म वाऽऋतं ब्रह्म हि मित्रो ब्रह्मो ह्यृतं वरुण एवायुः संवत्सरो हि वरुणः संवत्सर आयुस्तस्मादाहैष ते योनिर्ऋतायुभ्यां त्वेति ॥१०॥ ब्राह्मणम् ॥४॥ ॥

श्रोत्रꣳ ह वाऽअस्याश्विनः । तस्मात्सर्वतः परिहारं भक्षयति सर्वतो ह्यनेन श्रोत्रेण शृणोति यत्र वै भृगवो वाङ्गिरसो वा स्वर्गं लोकꣳ समाश्नुवत तच्च्यवनो वा भार्गवश्च्यवनो वाङ्गिरसस्तदेव जीर्णिः कृत्यारूपो जहे ॥१॥ शर्यातो ह वाऽइदं मानवो ग्रामेण चचार । स तदेव प्रतिवेशो निविविशे तस्य कुमाराः क्रीडन्त इमं जीर्णिं कृत्यारूपमनर्थ्यं मन्यमाना लोष्टैर्विपिपिषुः ॥२॥ स शार्यातेभ्यश्चक्रोध । तेभ्योऽसंज्ञां चकार पितैव पुत्रेण युयुधे भ्राता भ्रात्रा ॥३॥ शर्यातो ह वाऽईक्षां चक्रे । यत्किमकरं तस्मादिदमापदीति स गोपालांश्चाविपालांश्च सꣳह्वयितवाऽउवाच ॥४॥ स होवाच । को वोऽद्येह किंचिदद्राक्षीदिति ते होचुः पुरुष एवायं जीर्णिः कृत्यारूपः शेते तमनर्थ्यं मन्यमानाः कुमारा लोष्टैर्व्यपिक्षन्निति स विदां चकार स वै च्यवन इति ॥५॥ स रथं युक्त्वा । सुकन्याꣳ शार्यातीमुपाधाय प्रसिष्यन्द स आजगाम यत्रऽर्षिरास तत् ॥६॥ स होवाच । ऋषे नमस्ते यन्नावेदिषं तेनाहिꣳसिषमियꣳ सुकन्या तया तेऽपह्नुवे संजानीतां मे

ग्राम इति तस्य ह तत एव ग्रामः संजज्ञे स ह तत एव शर्यातो मानव उच्चु-
युजे नेदपरं हिनसानीति ॥७॥ अश्विनौ ह वा ऽइदं भिषज्यन्तौ चेरतुः । तौ सु-
कन्यामुपेयतुस्तस्यां मिथुनमीषाते तन्न जज्ञौ ॥८॥ तौ होचतुः । सुकन्ये कमिमं
जीर्णिं कृत्यारूपमुपशेषे ऽआवामनुप्रेहीति सा होवाच यस्मै मां पिताऽदान्नैवाहं
तं जीवन्तं हास्यामीति तद्धायमृषिराजज्ञौ ॥९॥ स होवाच । सुकन्ये किं वैत-
द्वोचतामिति तस्मा ऽएतद्व्याचचक्षे स ह व्याख्यात उवाच यदि त्वैतत्पुनर्ब्रुवतः
सा त्वं ब्रूतान्न वै सुसर्वाविव स्थो न सुसमृद्धाविवाथ मे पतिं निन्दथ इति तौ
यदि त्वा ब्रवतः केनावमसर्वौ स्वः केनासमृद्धाविति सा त्वं ब्रूतात्पतिं नु मे पु-
नर्युवाणं कुरुतमथ वां वक्ष्यामीति तां पुनरुपेयतुस्तां हैतदेवोचतुः ॥१०॥ सा
होवाच । न वै सुसर्वाविव स्थो न सुसमृद्धाविवाथ मे पतिं निन्दथ इति तौ
होचतुः केनावमसर्वौ स्वः केनासमृद्धाविति सा होवाच पतिं नु मे पुनर्युवाणं
कुरुतमथ वां वक्ष्यामीति ॥११॥ तौ होचतुः । एतं ह्रदमभ्यवहर स येन व-
यसा कमिष्यते तेनोदैष्यतीति तं ह्रदमभ्यवजहार स येन वयसा चकमे तेनो-
देयाय ॥१२॥ तौ होचतुः । सुकन्ये केनावमसर्वौ स्वः केनासमृद्धाविति तौ ह-
र्षिरेव प्रत्युवाच कुरुक्षेत्रेऽमी देवा यज्ञं तन्वते ते वां यज्ञादन्तर्यन्ति तेनासर्वौ
स्थस्तेनासमृद्धाविति तौ ह तत एवाश्विनौ प्रेयतुस्तावाजग्मतुर्देवान्यज्ञं तन्वाना-
न्स्तुते बहिष्पवमाने ॥१३॥ तौ होचतुः । उप नौ ह्वयध्वमिति ते ह देवा ऊ-
चुर्न वामुपह्वयिष्यामहे बहु मनुष्येषु संसृष्टमचारिष्टं भिषज्यन्ताविति ॥१४॥
तौ होचतुः । विशीर्ष्णा वै यज्ञेन यजध्व ऽइति कथं विशीर्ष्णेत्युप नु नौ ह्वयध्वमथ
वो वक्ष्याव इति तथेति ताऽउपाह्वयन्त ताभ्यामेतमाश्विनं ग्रहमगृह्णंस्तावध्वर्यू य-
ज्ञस्याभवतां तावेतद्यज्ञस्य शिरः प्रत्यधत्तां तददस्तद्दिवाकीर्त्यानां ब्राह्मणे व्या-
ख्यायते यथा तद्यज्ञस्य शिरः प्रतिदधतुस्तस्मादेष स्तुते बहिष्पवमाने ग्रहो गृ-

ह्यते स्तुते हि बहिष्पवमानऽआगछताम् ॥१५॥ तौ होचतुः । मुख्यौ वाऽआवां यज्ञस्य स्वो यावदध्वर्यूऽइह नाविमं पुरस्ताद्ग्रहं पर्याहरताभि द्विदेवत्यानिति ताभ्यामेतं पुरस्ताद्ग्रहं पर्याजह्रुरभि द्विदेवत्यांस्तस्मादेष दशमो ग्रहो गृह्यते तृतीय एव वषट्क्रियतेऽथ यदश्विनावितीमे ह वै द्यावापृथिवी प्रत्यक्षमश्विनाविमे हीदꣳ सर्वमाश्नुवातां पुष्करस्रजावित्यग्निरेवास्यै पुष्करमादित्योऽमुष्यै ॥१६॥ अथातो गृह्णात्येव । या वां कशा मधुमत्यश्विना सूनृतावती । तया यज्ञं मिमिक्षतम् । उपयामगृहीतोऽस्यश्विभ्यां त्वैष ते योनिर्माध्वीभ्यां त्वेति सादयति तं वै मधुमत्यऽर्चा गृह्णाति माध्वीभ्यां त्वेति सादयति तद्यन्मधुमत्यऽर्चा गृह्णाति माध्वीभ्यां त्वेति सादयति ॥१७॥ दध्यङ् ह वाऽआभ्यामाथर्वणः । मधु नाम ब्राह्मणमुवाच तदेनयोः प्रियं धाम तदेवैनयोरेतेनोपगछति तस्मान्मधुमत्यऽर्चा गृह्णाति माध्वीभ्यां त्वेति सादयति ॥१८॥ तानि वाऽएतानि । श्लक्ष्णानि पात्राणि भवन्ति रास्नावदैन्द्रवायवपात्रं तत्तस्य द्वितीयꣳ रूपं तेन तद्द्विदेवत्यमज्ञकावं मैत्रावरुणपात्रं तत्तस्य द्वितीयꣳ रूपं तेन तद्द्विदेवत्यमौष्ठमाश्विनपात्रं तत्तस्य द्वितीयं रूपं तेन तद्द्विदेवत्यमथ यदश्विनाविति मुख्यौ वाऽअश्विनावौष्ठमिव वाऽइदं मुखं तस्मादौष्ठमाश्विनपात्रं भवति ॥१९॥ ब्राह्मणम् ॥५॥ प्रथमोऽध्यायः [२५.] ॥ ॥

चक्षुषी ह वाऽअस्य शुक्रामन्थिनौ । तद्वाऽएष एव शुक्रो य एष तपति तद्यदेष एतत्तपति तेनैष शुक्रश्चन्द्रमा एव मन्थी ॥१॥ तꣳ सक्तुभिः श्रीणाति । तदेनं मन्थं करोति तेनोऽएष मन्थ्येतौ ह वाऽआसां प्रजानां चक्षुषी स यद्धैतौ नोदियातां न हैवेह स्वौ चन पाणी निर्ज्ञानीयुः ॥२॥ तयोरत्त्वेवान्यतरः । आद्योऽन्यतरोऽत्त्येव शुक्र आद्यो मन्थी ॥३॥ तयोरत्त्वेवान्यतरमनु । आद्योऽन्यतरमन्वत्त्येव शुक्रमन्वाद्यो मन्थिनमनु तौ वाऽअन्यस्मै गृह्येतेऽअन्यस्मै हूयेते शण्डामर्कावित्यसुररक्षसे ताभ्यां गृह्येते देवताभ्यो हूयेते तद्यत्तथा ॥४॥ यत्र वै

देवाः । असुररक्षसान्यपजघ्निरे तदेतावेव न शेकुरपहन्तुं यद्ध स्म देवाः किं च कर्म कुर्वते तद्ध स्म मोहयित्वा क्षिप्रऽएव पुनरपद्रवतः ॥५॥ ते ह देवा ऊचुः । उपजानीत यथेमावपहनामहाऽइति ते होचुर्ग्रहावेवाभ्यां गृह्णाम तावभ्यवैष्यतस्तौ स्वीकृत्यापहनिष्यामहऽइति ताभ्यां ग्रहौ जगृहुस्तावभ्यवैतां तौ स्वीकृत्यापाघ्नत तस्माच्छण्डामर्काभ्यामिति गृह्येते देवताभ्यो हूयेते ॥६॥ अपि होवाच याज्ञवल्क्यः । नो स्विद्देवताभ्य एव गृह्णीयामा३ विजितरूपमिव हीदमिति तद्वै स तन्मीमाꣳसामेव चक्रे नेत्तु चकार ॥७॥ इमामु हैके शुक्रस्य पुरोरुचं कुर्वन्ति । अयं वेनश्चोदयत्पृश्निगर्भा ज्योतिर्जरायू रजसो विमानऽइति तदेतस्य रूपं कुर्मो य एष तपतीति यदाह ज्योतिर्जरायुरिति ॥८॥ इमां त्वेव शुक्रस्य पुरोरुचं कुर्यात् । तं प्रत्नथा पूर्वथा विश्वथेमथा ज्येष्ठतातिं बर्हिषदꣳ स्वर्विदमित्यत्ता ह्येतमन्वत्ता हि ज्येष्ठस्तस्मादाह ज्येष्ठतातिं बर्हिषदꣳ स्वर्विदम् प्रतीचीनं वृजनं दोहसे धुनिमाशुं जयन्तमनु यासु वर्धसे । उपयामगृहीतोऽसि शण्डाय त्वैष ते योनिर्वीरतां पाहीति सादयत्यत्ता ह्येतमन्वत्ता हि वीरस्तस्मादाहैष ते योनिर्वीरतां पाहीति दक्षिणार्धे सादयत्येताꣳ ह्येष दिशमनु संचरति ॥९॥ अथ मन्थिनं गृह्णाति । अयं वेनश्चोदयत्पृश्निगर्भा ज्योतिर्जरायू रजसो विमाने । इममपाꣳ संगमे सूर्यस्य शिशुं न विप्रा मतिभी रिहन्ति । उपयामगृहीतोऽसि मर्काय त्वेति ॥१०॥ तꣳ सक्तुभिः श्रीणाति । तद्यत्सक्तुभिः श्रीणाति वरुणो ह वै सोमस्य राज्ञोऽभीवाक्षि प्रतिपिपेष तदश्वयत्ततोऽश्वः समभवत्तद्यच्छ्वयथात्समभवत्तस्मादश्वो नाम तस्याश्रु प्रास्कन्दत्ततो यवः समभवत्तस्मादाहुर्वारुण्यो यव इति तद्यदेवास्यात्र चक्षुषोऽमीयत तेनैवैनमेतत्समर्धयति कृत्स्नं करोति तस्मात्सक्तुभिः श्रीणाति ॥११॥ स श्रीणाति । मनो न येषु हवनेषु तिग्मं विपः शच्या वनुथो द्रवन्ता । आ यः शर्याभिस्तुविनृम्णोऽअस्याश्रीणीतादिशं गभस्तावेष ते

योनिः प्रजाः पाहीति सादयत्याद्यो ह्येतमन्वाद्या हीमाः प्रजा विशस्तस्मादाहैष
ते योनिः प्रजाः पाहीति ॥१२॥ द्वौ प्रोक्षितौ यूपशकलौ भवतः । द्वावप्रोक्षितौ
प्रोक्षितं चैवाध्वर्युरादत्तेऽप्रोक्षितं चैवमेव प्रतिप्रस्थाता प्रोक्षितं चैवादत्तेऽप्रोक्षितं
च शुक्रमेवाध्वर्युरादत्ते मन्थिनं प्रतिप्रस्थाता ॥१३॥ सोऽध्वर्युः । अप्रोक्षितेन यूप-
शकलेनापमार्ष्ट्यपमृष्टः शण्ड इत्येवमेव प्रतिप्रस्थातापमृष्टो मर्क इति तदाददा-
नाविवासुररक्षसेऽअपहतो देवास्त्वा शुक्रपाः प्रणयन्त्वित्येवाध्वर्युर्निष्क्रामति देवा-
स्त्वा मन्थिपाः प्रणयन्त्विति प्रतिप्रस्थाता तदेतौ देवताभ्य एव प्रणयतः ॥१४॥
तौ जघनेनाहवनीयमरत्नी संधत्तः । ताऽउत्तरवेदौ सादयतो दक्षिणायामेव श्रो-
णावध्वर्युः सादयत्युत्तरायां प्रतिप्रस्थातानानुसृजन्तावेवानाधृष्टासीति तद्रक्षोभिरेवै-
तदुत्तरवेदिमनाधृष्टां कुरुतो विपर्येष्यन्तौ वाऽएतावग्निं भवतोऽत्येष्यन्तौ तस्मा
ऽएवैतन्निह्नुवाते तथो हैनौ विपरियन्तावग्निर्न हिनस्ति ॥१५॥ सोऽध्वर्युः पर्ये-
ति । सुवीरो वीरान्प्रजनयन्परीहीत्यत्ता ह्येतमन्वत्ता हि वीरस्तस्मादाह सुवीरो
वीरान्प्रजनयन्परीहीत्यभि रायस्पोषेण यजमानमिति तद्यजमानायाशिषमाशास्ते
यदाहाभि रायस्पोषेण यजमानमिति ॥१६॥ अथ प्रतिप्रस्थाता पर्येति । सुप्रजाः
प्रजाः प्रजनयन्परीहीत्याद्यो ह्येतमन्वाद्या हीमाः प्रजा विशस्तस्मादाह सुप्रजाः
प्रजाः प्रजनयन्परीहीत्यभि रायस्पोषेण यजमानमिति तद्यजमानायाशिषमाशास्ते
यदाहाभि रायस्पोषेण यजमानमिति ॥१७॥ तावपिधाय निष्क्रामतः । तिर ए
वैनावेतत्कुरुतस्तस्मादिमौ सूर्याचन्द्रमसौ प्राञ्चौ यन्तौ न कश्चन पश्यति तौ पु-
रस्तात्परीत्यापोर्णुतः पुरस्तात्तिष्ठन्तौ जुह्वत आविरेवैनावेतत्कुरुतस्तस्मादिमौ सू-
र्याचन्द्रमसौ प्रत्यञ्चौ यन्तौ सर्व एव पश्यति तस्मात्पराग्रेतः सिच्यमानं न कश्चन
पश्यति तदु पश्चात्प्रजायमानꣳ सर्व एव पश्यति ॥१८॥ तौ जघनेन यूपमरत्नी
संधत्तः । यद्यग्निर्नोद्बाधेत यद्युऽअग्निरुद्बाधेताप्यग्रेणैव यूपमरत्नी संदध्याताꣳ संज-

ग्मानो दिवा पृथिव्या शुक्रः शुक्रशोचिषेत्येवाध्वर्युः संजग्मानो दिवा पृथिव्या म-
न्थी मन्थिशोचिषेति प्रतिप्रस्थाता चक्षुषोरेवैतेऽआरमणे कुरुतश्चक्षुषीऽएवैत-
त्संधत्तस्तस्मादिमेऽअभितोऽस्थिनी चक्षुषी सꣳहिते ॥१९॥ सोऽध्वर्युः । अप्रोक्षितं
यूपशकलं निरस्यति निरस्तः शण्ड इत्येवमेव प्रतिप्रस्थाता निरस्तो मर्क इति
तत्पुराङ्कतिभ्योऽसुररक्षसेऽअपहतः ॥२०॥ अथाध्वर्युः । प्रोक्षितं यूपशकलमाहव
नीये प्रास्यति शुक्रस्याधिष्ठानमसीत्येवमेव प्रतिप्रस्थाता मन्थिनोऽधिष्ठानमसीति
चक्षुषोरेवैते समिधौ चक्षुषीऽएवैतत्समिन्द्धे तस्मादिमे समिद्धे चक्षुषी ॥२१॥ त-
त्र जपति । अच्छिन्नस्य ते देव सोम सुवीर्यस्य रायस्पोषस्य ददितारः स्यामेत्याशी-
रेवैषैतस्य कर्मण आशिषमेवैतदाशास्ते ॥२२॥ अथाश्राव्याह । प्रातः-प्रातः स-
वस्य शुक्रवतो मधुश्चुत इन्द्राय सोमान्प्रस्थितान्प्रेष्येति वषट्कृतेऽध्वर्युर्जुहोति त-
दनु प्रतिप्रस्थाता तदनु चमसाध्वर्यवः ॥२३॥ तौ वै पुरस्तात्तिष्ठन्तौ जुहुतः । च-
क्षुषी वाऽएतौ तत्पुरस्तादेवैतच्चक्षुषी धत्तस्तस्मादिमे पुरस्ताच्चक्षुषी ॥२४॥ अ-
भितो यूपं तिष्ठन्तौ जुहुतः । यथा वै नासिकैवं यूपस्तस्मादिमेऽअभितो नासिकां
चक्षुषी ॥२५॥ तौ वै वषट्कृतौ सन्तौ मन्त्रेण हूयेते । एतेनो हैतौ तदुदश्नुवाते
यदेनौ सर्वꣳ सवनमनुहूयते यद्धैवैतौ सर्वꣳ सवनमनुहूयतऽएतौ वै प्रजापतेः
प्रत्यक्षतमां चक्षुषी ह्येतौ सत्यं वै चक्षुः सत्यꣳ हि प्रजापतिस्तस्मादेनौ सर्वꣳ
सवनमनुहूयते ॥२६॥ स जुहोति । सा प्रथमा संस्कृतिर्विश्ववारा स प्रथमो व-
रुणो मित्रोऽअग्निः । स प्रथमो बृहस्पतिश्चिकित्वांस्तस्माऽइन्द्राय सुतमाजुहोत
स्वाहेति ॥२७॥ स यज्जुहोति । सा प्रथमा स प्रथम इति शश्वद्ध वै रेतसः सि-
क्तस्य चक्षुषीऽएव प्रथमे सम्भवतस्तस्माज्जुहोति सा प्रथमा स प्रथम इति ॥२८॥
अथ सम्प्रेष्यति । प्रैतु होतुश्चमसः प्र ब्रह्मणः प्रोद्गातॄणां प्र यजमानस्य प्रयन्तु
सदस्यानाꣳ होत्राणां चमसाध्वर्यव उपावर्तध्वꣳ शुक्रस्याभ्युन्नयध्वमिति सम्प्रैष एवैष

पर्येत्य प्रतिप्रस्थाताध्वर्योः पात्रे सꣳस्रवमवनयत्यत्रऽएवैतदाग्रं बलिꣳ हारयति तमध्वर्युर्होतृचमसेऽवनयति भक्षाय वषट्कर्तुर्हि भक्षः प्राणो वै वषट्कारः सोऽस्मादेतद्वषट्कुर्वतः पराङिवाभूत्प्राणो वै भक्षस्तत्प्राणं पुनरात्मन्धत्ते ॥२९॥ अथ यदेते प्रतीची पात्रे न हरन्ति । हरन्त्यन्यान्ग्रहांश्चक्षुषी ह्येते सꣳस्रवमेव होतृचमसेऽवनयति ॥३०॥ अथ होत्राणां चमसानभ्युन्नयन्ति । हुतोच्छिष्टा वाऽएते सꣳस्रवा भवन्ति नालमाहुत्यै तानेवैतत्पुनराप्याययन्ति तथालमाहुत्यै भवन्ति तस्माद्धोत्राणां चमसानभ्युन्नयन्ति ॥३१॥ अथ होत्राः संयाजयन्ति । होत्रा ह वै युक्ता देवेभ्यो यज्ञं वहन्ति ता एवैतत्संतर्पयन्ति तृप्ताः प्रीता देवेभ्यो यज्ञं वहानिति तस्माद्धोत्राः संयाजयन्ति ॥३२॥ स प्रथमायां वा होत्रायाम् । इष्टायामुत्तमायां वानुमन्त्रयते तृम्पन्तु होत्रा मधो याः स्विष्टा याः सुप्रीताः सुहुता यत्स्वाहेति होत्राणामेवैषा तृप्तिरथेत्य प्रत्यङ्ङुपविशत्ययाडग्नीदित्यग्नीद्यत्र यजतामुत्तमः संयजति तस्मादाहायाडग्नीदिति ॥३३॥ ब्राह्मणम् ॥६[२.१.]॥ प्रथमः प्रपाठकः ॥ कण्डिकासंख्या १३६ ॥ ॥

आत्मा ह वाऽअस्याग्रयणः । सोऽस्यैष सर्वमेव सर्वꣳ ह्ययमात्मा तस्मादनया गृह्णात्यस्यै हि स्थाली भवति स्थाल्या ह्येनं गृह्णाति सर्वं वाऽइयꣳ सर्वमेष ग्रहस्तस्मादनया गृह्णाति ॥१॥ पूर्णं गृह्णाति । सर्वं वै पूर्णꣳ सर्वमेष ग्रहस्तस्मात्पूर्णं गृह्णाति ॥२॥ विश्वेभ्यो देवेभ्यो गृह्णाति । सर्वं वै विश्वे देवाः सर्वमेष ग्रहस्तस्माद्विश्वेभ्यो देवेभ्यो गृह्णाति ॥३॥ सर्वेषु सवनेषु गृह्णाति । सर्वं वै सवनानि सर्वमेष ग्रहस्तस्मात्सर्वेषु सवनेषु गृह्णाति ॥४॥ स यदि ग्रहोपदस्येत् । तमत एव तन्वीरन्नतः प्रभावयेयुरात्मा वाऽआग्रयण आत्मनो वाऽइमानि सर्वाण्यङ्गानि प्रभवन्त्येतस्मादन्ततो हारियोजनं ग्रहं गृह्णाति तदात्मन्येवास्यां प्रतिष्ठायामन्ततो यज्ञः प्रतितिष्ठति ॥५॥ अथ यस्मादाग्रयणो नाम । यां वाऽअमूं ग्रा-

वाणमाददानो वाचं यच्छत्यत्र वै साग्रेऽवदत्तद्यत्सात्राग्रेऽवदत्तस्मादाग्रयणो नाम ॥ ६ ॥ रक्षोभ्यो वै तां भीषा वाचमयच्छन् । षड्वाऽअतः प्राचो ग्रहान्गृह्णात्यथैष सप्तमः षड्वाऽऋतवः संवत्सरस्य सर्वं वै संवत्सरः ॥ ७ ॥ तां देवाः । सर्वस्मिन्विजितेऽभयेऽनाष्ट्रेऽत्राग्रे वाचमवदंस्तथोऽएवैष एताꣳ सर्वस्मिन्विजितेऽभयेऽनाष्ट्रेऽत्राग्रे वाचं वदति ॥ ८ ॥ अथातो गृह्णात्येव । ये देवासो दिव्येकादश स्थ पृथिव्यामध्येकादश स्थ । अप्सुक्षितो महिनैकादश स्थ ते देवासो यज्ञमिमं जुषध्वम् । उपयामगृहीतोऽस्याग्रयणोऽसि स्वाग्रयण इति वाचमेवैतदयातयाम्नीं करोति तस्मादनया समानꣳ सद्विपर्यासं वदत्यजामितायै जामि ह कुर्याद्यदाग्रयणोऽस्याग्रयणोऽसीति गृह्णीयात्तस्मादाहाग्रयणोऽसि स्वाग्रयण इति ॥ ९ ॥ पाहि यज्ञं पाहि यज्ञपतिमिति । वाचमेवैतदुत्सृष्टामाह गोपाय यज्ञमिति पाहि यज्ञपतिमिति वाचमेवैतदुत्सृष्टामाह गोपाय यजमानमिति यजमानो हि यज्ञपतिर्विष्णुस्त्वामिन्द्रियेण पातु विष्णुं त्वं पाहीति वाचमेवैतदुत्सृष्टामाह यज्ञो वै विष्णुर्यज्ञस्त्वां वीर्येण गोपायत्विति विष्णुं त्वं पाहीति वाचमेवैतदुत्सृष्टामाह यज्ञं त्वं गोपायेत्यभि सवनानि पाहीति तदेतं ग्रहमाह सर्वाणि ह्येष सवनानि प्रति ॥ १० ॥ अथ दशापवित्रमुपगृह्य हिङ्करोति । सा हैषा वागनुद्यमाना तताम तस्यां देवा वाचि तान्तायाꣳ हिङ्कारेणैव प्राणमदधुः प्राणो वै हिङ्कारः प्राणो हि वै हिङ्कारस्तस्मादपिगृह्य नासिके न हिङ्कर्तुꣳ शक्नोति सैतेन प्राणेन समजिहीत यदा वै तान्तः प्राणं लभतेऽथ स संजिहीते तथोऽएवैष एतद्वाचि तान्तायाꣳ हिङ्कारेणैव प्राणं दधाति सैतेन प्राणेन संजिहीते त्रिष्कृत्वो हिङ्करोति त्रिवृद्धि यज्ञः ॥ ११ ॥ अथाह सोमः पवतऽइति । स यामेवामूं भीषासुररक्षसेभ्यो न निरब्रुवंस्तामेवैतत्सर्वस्मिन्विजितेऽभयेऽनाष्ट्रेऽत्र निराह तामाविष्करोति तस्मादाह सोमः पवतऽइति ॥ १२ ॥ अस्मै ब्रह्मणेऽस्मै क्षत्रायेति । तद्ब्रह्मणे च क्षत्राय चाहास्मै सुन्वते

यजमानाय पवतऽइति तद्यजमानायाह ॥ १३ ॥ तदाहुः । एतावद्देवोक्त्वा सादयेदेतावद्वाऽइद७ सर्वं यावद्ब्रह्म क्षत्रं विडिन्द्राग्नी वाऽइद७ सर्वं तस्मादेतावद्देवोक्त्वा सादयेदिति ॥ १४ ॥ तदु ब्रूयादेव भूयः । इषऽऊर्जे पवतऽइति वृष्ट्यै तदाह यदाहेषऽइत्यूर्जऽइति यो वृष्टादूर्ग्रसो जायते तस्मै तदाहाद्भ्य ओषधीभ्यः पवतऽइति तदद्भ्यश्चौषधिभ्यश्चाह द्यावापृथिवीभ्यां पवतऽइति तदाभ्यां द्यावापृथिवीभ्यामाह ययोरिद७ सर्वमधि सुभूताय पवतऽइति साधवे पवतऽइत्येवैतदाह ॥ १५ ॥ तदु हैकऽआहुः । ब्रह्मवर्चसाय पवतऽइति तदु तथा न ब्रूयाद्यद्वाऽआहास्मै ब्रह्मणऽइति तदेव ब्रह्मवर्चसायाह विश्वेभ्यस्त्वा देवेभ्य एष ते योनिर्विश्वेभ्यस्त्वा देवेभ्य इति सादयति विश्वेभ्यो ह्येनं देवेभ्यो गृह्णाति तं वै मध्ये सादयत्यात्मा ह्यस्यैष मध्यऽइव ह्ययमात्मा दक्षिणोक्थ्यस्थाली भवत्युत्तरादित्यस्थाली ॥ १६ ॥ ब्राह्मणम् ॥ १ [२. २.] ॥ ॥

अथ७ ह वाऽअस्यैषोऽनिरुक्त आत्मा यदुक्थ्यः । सोऽस्यैष आत्मैवात्मा ह्ययमनिरुक्तः प्राणः सोऽस्यैष आयुरेव तस्मादनया गृह्णात्यस्यै हि स्थाली भवति स्थाल्या ह्येनं गृह्णात्यजरा ह्ययममृताजर७ ह्यमृतमायुस्तस्मादनया गृह्णाति ॥ १ ॥ तं वै पूर्णं गृह्णाति । सर्वं वै तद्यत्पूर्ण७ सर्वं तद्यदायुस्तस्मात्पूर्णं गृह्णाति ॥ २ ॥ ॥ शतम् २४०० ॥ ॥ तस्यासावेव ध्रुव आयुः । आत्मैवास्यैतेन स७हितः पर्वाणि संततानि तद्वाऽअगृहीत एवैतस्मादच्छावाकायोत्तमो ग्रहो भवति ॥ ३ ॥ अथ राजानमुपावहरति । तृतीयं वसतीवरीणामवनयति तत्पर्व समेति प्रथममहोत्तरस्य सवनस्य करोत्युत्तमं पूर्वस्य स यदुत्तरस्य सवनस्य तत्पूर्वं करोति यत्पूर्वस्य तदुत्तमं तद्व्यतिषजति तस्मादिमानि पर्वाणि व्यतिषक्तानीदमित्थमतिहानमिदमित्थम् ॥ ४ ॥ एवमेव माध्यन्दिने सवने । अगृहीत एवैतस्मादच्छावाकायोत्तमो ग्रहो भवत्यथ तृतीयं वसतीवरीणामवनयति तत्पर्व समेति प्रथममहोत्तरस्य

सवनस्य करोत्युत्तमं पूर्वस्य स यदुत्तरस्य सवनस्य तत्पूर्वं करोति यत्पूर्वस्य तदुत्तमं तद्यतिषजति तस्मादिमानि पर्वाणि व्यतिषक्तानीदमित्थमतिष्ठानमिदमित्थं तद्यदस्यैतेनात्मा सꣳहितस्तेनास्यैष आयुः ॥ ५ ॥ सैषा कामदुघैवेन्द्रस्योद्गारः । त्रिभ्य एवैनं प्रातःसवनऽउक्थेभ्यो विगृह्णाति त्रिभ्यो माध्यन्दिने सवने तत्षट् कृत्वः षड्वाऽऋतव ऋतवो वाऽइमान्त्सर्वान्कामान्पचन्त्येतेनो हैषा कामदुघैवेन्द्रस्योद्गारः ॥ ६ ॥ तं वाऽअपुरोरुक्कं गृह्णाति । उक्थꣳ हि पुरोरुगृग्घि पुरोरुगृग्घ्युक्थꣳ साम ग्रहोऽथ यदन्यच्छन्दपति तद्यनुस्ता हैता अभ्यर्ध एवाग्रऽऋग्भ्य आसुरभ्यर्धो यजुर्भ्योऽभ्यर्धः सामभ्यः ॥ ७ ॥ ते देवा अब्रुवन् । हन्तेमा यजुःषु दधाम तथेयं बहुलतरेव विद्या भविष्यतीति ता यजुःषदधुस्तत एषा बहुलतरेव विद्याभवत् ॥ ८ ॥ तं यदपुरोरुक्कं गृह्णाति । उक्थꣳ हि पुरोरुगृग्घि पुरोरुगृग्घ्युक्थꣳ स यदेवैनमुक्थेभ्यो विगृह्णाति तेनो हास्यैष पुरोरुङ्मान्भवति तस्मादपुरोरुक्कं गृह्णाति ॥ ९ ॥ अथातो गृह्णात्येव । उपयामगृहीतोऽसीन्द्राय त्वा बृहद्वते वयस्वतऽइतीन्द्रो वै यज्ञस्य देवता तस्मादाहेन्द्राय त्वेति बृहद्वते वयस्वतऽइति वीर्यवतऽइत्येवैतदाह यदाह बृहद्वते वयस्वतऽइत्युक्थाव्यं गृह्णामीत्युक्थेभ्यो ह्येनं गृह्णाति यत्तऽइन्द्र बृहद्वय इति यत्तऽइन्द्र वीर्यमित्येवैतदाह तस्मै त्वा विष्णवे त्वेति यज्ञस्य ह्येनमायुषे गृह्णाति तस्मादाह तस्मै त्वा विष्णवे त्वेत्येष ते योनिरुक्थेभ्यस्त्वेति सादयत्युक्थेभ्यो ह्येनं गृह्णाति ॥ १० ॥ तं विगृह्णाति । देवेभ्यस्त्वा देवाव्यं यज्ञस्यायुषे गृह्णामीति प्रशासनꣳ स कुर्याद्य एवं कुर्याद्यथादेवतं त्वेव विगृह्णीयात् ॥ ११ ॥ मित्रावरुणाभ्यां त्वा । देवाव्यं यज्ञस्यायुषे गृह्णामीत्येव मैत्रावरुणाय मैत्रावरुणीषु हि तस्मै स्तुवते मैत्रावरुणीरनुशꣳसति मैत्रावरुण्या यजति ॥ १२ ॥ इन्द्राय त्वा । देवाव्यं यज्ञस्यायुषे गृह्णामीत्येव ब्राह्मणाच्छꣳसिन ऽऐन्द्रीषु हि तस्मै स्तुवतऽऐन्द्रीरनुशꣳसत्यैन्द्र्या यजति ॥ १३ ॥ इन्द्राग्निभ्यां त्वा ।

देवाव्यं यज्ञस्यायुषे गृह्णामीत्येवाह्वावाकायेन्द्राग्नीषु हि तस्मै स्तुवतऽऐन्द्राग्नीर-
नुशꣳसत्यैन्द्राग्न्या यजतीन्द्राय त्वेत्येव माध्यन्दिने सवनऽऐन्द्रꣳ हि माध्यन्दिनꣳ
सवनम् ॥ १४ ॥ तद्ध चरकाध्वर्यवो विगृह्णन्ति । उपयामगृहीतोऽसि देवेभ्यस्त्वा
देवाव्यमुक्थेभ्य उक्थाव्यं मित्रावरुणाभ्यां जुष्टं गृह्णाम्येष ते योनिर्मित्रावरुणाभ्यां
त्वेति सादयति पुनर्हविरसीति स्थालीमभिमृशति ॥ १५ ॥ उपयामगृहीतोऽसि ।
देवेभ्यस्त्वा देवाव्यमुक्थेभ्य उक्थाव्यमिन्द्राय जुष्टं गृह्णाम्येष ते योनिरिन्द्राय त्वेति
सादयति पुनर्हविरसीति स्थालीमभिमृशति ॥ १६ ॥ उपयामगृहीतोऽसि । देवे-
भ्यस्त्वा देवाव्यमुक्थेभ्य उक्थाव्यमिन्द्राग्निभ्यां जुष्टं गृह्णाम्येष ते योनिरिन्द्राग्निभ्यां
त्वेति सादयति नात्र पुनर्हविरसीति स्थालीमभिमृशतीन्द्राय त्वेन्द्राय त्वेत्येव मा-
ध्यन्दिने सवनऽऐन्द्रꣳ हि माध्यन्दिनꣳ सवनं द्विर्ह पुनर्हविरसीति स्थालीमभि-
मृशति तूष्णीं तृतीयं निदधाति ॥ १७ ॥ तं वै नोपयामेन गृह्णीयात् । न योनौ
सादयेदग्रे ह्येवैष उपयामेन गृहीतो भवत्यग्रे योनौ सन्नोऽजामितायै जामि ह
कुर्याद्यदेनमत्राप्युपयामेन गृह्णीयाद्यद्योनौ सादयेदथ यत्पुनर्हविरसीति स्थालीम-
भिमृशति पुनर्ह्यस्यै ग्रहं ग्रहीष्यन्भवति न तदाद्रियेत तूष्णीमेव निदध्यात् ॥ १८ ॥
ब्राह्मणम् ॥ २ [२. ३.] ॥ ॥

अयꣳ ह वाऽअस्यैष प्राणः । योऽयं पुरस्तात्स वै वैश्वानर एवाथ योऽयं प-
श्चात्स ध्रुवस्तौ ह स्मैतौ द्वाविवाग्रे ग्रहौ गृह्णन्ति ध्रुववैश्वानराविति तयोरयमप्ये-
तर्ह्यन्यतर एव गृह्यते ध्रुव एव स यदि तं चरकेभ्यो वा यतो वानुब्रुवीत यज-
मानस्य तं चमसेऽवनयेदथैतमेव होतृचमसे ॥ १ ॥ यद्वाऽअस्यावाचीनं नाभेः ।
तदस्यैष आत्मनः सोऽस्यैष आयुरेव तस्मादनया गृह्णात्यस्यै हि स्थाली भवति
स्थाल्या ह्येनं गृह्णात्यजरा ह्ययममृताजरꣳ ह्यमृतमायुस्तस्मादनया गृह्णाति ॥ २ ॥
तं वै पूर्णं गृह्णाति । सर्वं वै तद्यत्पूर्णꣳ सर्वं तद्यदायुस्तस्मात्पूर्णं गृह्णाति ॥ ३ ॥

वैश्वानराय गृह्णाति । संवत्सरो वै वैश्वानरः संवत्सर आयुस्तस्माद्वैश्वानराय गृ-
ह्णाति ॥४॥ स प्रातःसवने गृहीतः । एतस्मात्कालादुपशेते तदेनꣳ सर्वाणि स-
वनान्यतिनयति ॥५॥ तं न स्तूयमानेऽवनयेत् । न ह संवत्सरं यजमानोऽति-
जीवेद्यत्स्तूयमानेऽवनयेत् ॥६॥ तꣳ शस्यमानेऽवनयति । तदेनं द्वादशꣳ स्तोत्र-
मतिनयति तथा परम्परमायुः समश्नुते तथो ह यजमानो ज्योग्जीवति तस्माद्ब्रा-
ह्मणोऽग्निष्टोमसत्स्यादेतस्य होमान्न सर्पेन्न प्रस्रावयेत तथा सर्वमायुः समश्नुत
ऽआयुर्वाऽअस्यैष तथा सर्वमायुरेति ॥७॥ यद्वाऽअस्यावाचीनं नाभेः । तदस्यैष
आत्मनः स यत्पुरैतस्य होमात्सर्पेद्वा प्र वा स्रावयेत ध्रुवꣳ हावमेहेनेद्ध्रुवमव-
मेहानीति तस्माद्वाऽअग्निष्टोमसद्भवति तद्वै तद्यजमान एव यजमानस्य ह्येष त-
दात्मनः ॥८॥ स वाऽअग्निष्टोमसद्भवति । यशो वै सोमस्तस्माद्यश्च सोमं लभते
यश्च नोभावेवागच्छतो यश एवैतद्द्रष्टुमागच्छन्ति तद्वाऽएतद्यशो ब्राह्मणाः सम्प्रसृ-
प्यात्मन्दधते यद्भक्षयन्ति स ह यश एव भवति य एवं विद्वान्भक्षयति ॥९॥ ते
वाऽएते । सर्पन्त एवाग्निष्टोमसद्येतद्यशः संनिधाय सर्पन्ति ते पराञ्चो यशसो भ-
वन्ति तदेष परिगृह्यैव पुनरात्मन्यशो धत्ते तेषाꣳ ह्येष एव यशस्वितमो भूत्वा
प्रैति य एवं विद्वानग्निष्टोमसद्भवति ॥१०॥ देवाश्च वाऽअसुराश्च । उभये प्राजा-
पत्याः पस्पृधिरेऽएतस्मिन्यज्ञे प्रजापतौ पितरि संवत्सरेऽस्माकमयं भविष्यत्यस्मा-
कमयं भविष्यतीति ॥११॥ ततो देवाः । अर्चन्तः श्राम्यन्तश्चेरुस्तऽएतदग्निष्टोमसद्यं
ददृशुस्तऽएतेनाग्निष्टोमसद्येन सर्वं यज्ञꣳ समवृञ्जतान्तरायन्नसुरान्यज्ञात्तथोऽएवैष
एतेनाग्निष्टोमसद्येन सर्वं यज्ञꣳ संवृङ्क्तेऽन्तरेति सपत्नान्यज्ञात्तस्माद्वाऽअग्निष्टोमसद्भ-
वति ॥१२॥ तं गृहीत्वोत्तरे हविर्धाने सादयति प्राणा वै ग्रहा नेत्प्राणान्मोह-
यानीत्युपकीर्णे वाऽइतरान्ग्रहान्सादयत्यथैतं व्युह्य न तृणं चनान्तर्धाय ॥१३॥
यद्वाऽअस्योर्ध्वं नाभेः । तदस्यैतऽआत्मन उपरीव वै तद्यदूर्ध्वं नाभेरुपरीवैतद्यदुप-

कीर्णं तस्मादुपकीर्णे सादयत्यथैतं व्युह्य न तृणं चनान्तर्धाय ॥ १४ ॥ यद्वाऽअस्या-
वाचीनं नाभेः । तदस्यैष आत्मनोऽध-इव वै तद्यदवाचीनं नाभेरध-इवैतद्य-
द्व्युह्य न तृणं चनान्तर्धाय तस्मादेतं व्युह्य न तृणं चनान्तर्धाय सादयति ॥ १५ ॥
एष वै प्रजापतिः । य एष यज्ञस्तायते यस्मादिमाः प्रजाः प्रजाता एतम्वेवाप्ये-
तर्ह्यनु प्रजायन्ते स यानुपकीर्णे सादयति तस्माद्यास्तानानु प्रजाः प्रजायन्ते ता अ-
न्येनात्मनोऽस्यां प्रतितिष्ठन्ति या वै शफैः प्रतितिष्ठन्ति ता अन्येनात्मनोऽस्यां
प्रतितिष्ठन्त्यथ यदेतं व्युह्य न तृणं चनान्तर्धाय सादयति तस्माद्या एतमनु प्रजाः
प्रजायन्ते ता आत्मनैवास्यां प्रतितिष्ठन्ति मनुष्याश्च श्वापदाश्च ॥ १६ ॥ तद्वाऽएतत्
। अस्या एवान्यदुत्तरं करोति यदुपकिरति स यानुपकीर्णे सादयति तस्माद्यास्ता-
ननु प्रजाः प्रजायन्ते ता अन्येनैवात्मनोऽस्यां प्रतितिष्ठन्ति शफैः ॥ १७ ॥ तद्वाऽए-
तत् । आहवनीये जुह्वति पुरोडाशं धानाः करम्भं दध्यामिक्षामिति तद्यथा मुख
ऽआसिञ्चेदेवं तदथैष एकरूप उपशेतऽआप इवैव तस्माद्यदनेन मुखेन नानारू-
पमशनमश्नात्यथैतेन प्राणेनैकरूपमेव प्रस्रावयतेऽप इवैवाथ यस्माद्ध्रुवो नाम
॥ १८ ॥ देवा ह वै यज्ञं तन्वानाः । तेऽसुररक्षसेभ्य आसङ्गाद्बिभयां चक्रुस्तान्द-
क्षिणतोऽसुररक्षसान्यासेदुस्तेषामेतान्दक्षिणान्यक्षानुज्जघ्नुरथैतद्दक्षिणꣳ हविर्धान-
मुज्जघ्नुरथैतमेव न शेकुरुद्धन्तुं तदुत्तरमेव हविर्धानं दक्षिणꣳ हविर्धानमदृꣳहन्त-
यदेतं न शेकुरुद्धन्तुं तस्माद्ध्रुवो नाम ॥ १९ ॥ तं वै गोपायन्ति । शिरो वाऽएष
एतस्यै गायत्र्यै यज्ञो वै गायत्री द्वादश स्तोत्राणि द्वादश शस्त्राणि तच्चतुर्विꣳश-
तिश्चतुर्विꣳशत्यक्षरा वै गायत्री तस्याऽएष शिरः श्रीर्वै शिरः श्रीर्हि वै शिरस्त-
स्माद्योऽर्धस्य श्रेष्ठो भवत्यसावमुष्यार्धस्य शिर इत्याहुः श्रेष्ठो ह व्यथेत यदेष
व्यथेत यजमानो वै श्रेष्ठो नेद्यजमानो व्यथाताऽइति तस्माद्धि गोपायन्ति ॥ २० ॥
वत्सो वाऽएष । एतस्यै गायत्र्यै यज्ञो वै गायत्री द्वादश स्तोत्राणि द्वादश शस्त्रा-

णि तच्चतुर्विꣳशतिश्चतुर्विꣳशत्यक्षरा वै गायत्री तस्या एष वत्सस्तं यन्नोपायन्ति गोपायन्ति वाऽइमान्वत्सान्दोहाय यदिदं पयो दुह्रऽएवमियं गायत्री यजमानाय सर्वान्कामान्दोहाताऽइति तस्माद्धि गोपायन्ति ॥ २१ ॥ अथ यदध्वर्युश्च प्रतिप्रस्थाता च । निश्च क्रामतः प्र च पद्येते यथा बडवत्सोपाचरेदेवमेतं ग्रहमुपाचरतस्तमवनयति गायत्रीमेवैतत्प्रस्नावयति प्रत्तेयं गायत्री यजमानाय सर्वान्कामान्दोहाताऽइति तस्माद्वाऽअवनयति ॥२२॥ सोऽवनयति । ध्रुवं ध्रुवेण मनसा वाचा सोममवनयामीति गृह्णामीति वाथा न इन्द्र इद्विशोऽसपत्नाः समनसस्करदिति यथा न इन्द्र इमाः प्रजा विशः श्रियै यशसेऽन्नाद्यायासपत्नाः संमनसः करवदित्येवैतदाह ॥२३॥ अथातो गृह्णात्येव । मूर्धानं दिवोऽअरतिं पृथिव्या वैश्वानरमृतऽआ जातमग्निम् । कविꣳ सम्राजमतिथिं जनानामासन्ना पात्रं जनयन्त देवाः । उपयामगृहीतोऽसि ध्रुवोऽसि ध्रुवक्षितिर्ध्रुवाणां ध्रुवतमोऽच्युतानामच्युतक्षित्तम एष ते योनिर्वैश्वानराय त्वेति सादयति व्युह्य न तृणं चनान्तर्धाय वैश्वानराय ह्येनं गृह्णाति ॥२४॥ ब्राह्मणम् ॥ ३ [२.४.] ॥॥

ग्रहान्गृहीत्वा । उपनिष्क्रम्य विप्रुषाꣳ होमं जुहोति तद्यद्विप्रुषाꣳ होमं जुहोति या एवास्यात्र विप्रुष स्कन्दन्ति ता एवैतदाहवनीये स्वगाकरोत्याहवनीयो ह्याहुतीनां प्रतिष्ठा तस्माद्विप्रुषाꣳ होमं जुहोति ॥ १ ॥ स जुहोति । यस्ते द्रप्स स्कन्दति यस्तेऽअꣳशुरिति यो वै स्तोक स्कन्दति स द्रप्सस्तत्तमाह यस्तेऽअꣳशुरिति तदꣳशुमाह ग्रावच्युतो धिषणयोरुपस्थादिति ग्राव्णा हि च्युतोऽधिषवणाभ्याꣳ स्कन्दत्यध्वर्योर्वा परि वा यः पवित्रादित्यध्वर्योर्वा हि पाणिभ्याꣳ स्कन्दति पवित्राद्वा तं ते जुहोमि मनसा वषट्कृतꣳ स्वाहेति तद्यथा वषट्कृतꣳ हुतमेवमस्यैतद्भवति ॥२॥ अथ स्तीर्णायै वेदेः । द्वे तृणेऽअध्वर्युरादत्ते तावध्वर्यू प्रथमौ प्रतिपद्येते प्राणोदानौ यज्ञस्याथ प्रस्तोता वागेव यज्ञस्याथोद्गातात्मैव प्रजा-

पतिर्यज्ञस्याथ प्रतिहर्ता भिषग्वा व्यानो वा ॥ ३ ॥ तान्वाऽएतान् । पञ्चऽर्त्विजो यजमानोऽन्वारभतऽएतावान्वै सर्वो यज्ञो यावन्त एते पञ्चऽर्त्विजो भवन्ति पाङ्क्तो वै यज्ञस्तद्यज्ञमेवैतद्यजमानोऽन्वारभते ॥ ४ ॥ अथान्यतरत्तृणम् । चात्वालमभिप्रास्यति देवानामुत्क्रमणमसीति यत्र वै देवा यज्ञेन स्वर्गं लोकꣳ समाश्नुवत तऽएतस्माच्चात्वालादूर्ध्वाः स्वर्गं लोकमुपोदक्रामंस्तद्यजमानमेवैतत्स्वर्ग्यं पन्थानमनुसंख्यापयति ॥ ५ ॥ अथान्यतरत्तृणम् । पुरस्ताडुद्गातॄणामुपास्यति तूष्णीमिव स्तोमो वाऽएष प्रजापतिर्यदुद्गातारः स इदꣳ सर्वं युतऽइदꣳ सर्वꣳ सम्भवति तस्माऽएवैतत्तृणमपिदधाति तथो हाध्वर्यु न युते नैनꣳ सम्भवत्यथ यदा जपन्ति जपन्ति ह्यत्रोद्गातारः ॥ ६ ॥ अथ स्तोत्रमुपाकरोति । सोमः पवतऽइति स वै पराङिव स्तोत्रमुपाकरोति पराञ्च स्तुवते देवान्वाऽएतानि स्तोत्राण्यभ्युपावृत्तानि यत्पवमानाः पराञ्चो ह्येतैर्देवाः स्वर्गं लोकꣳ समाश्नुवत तस्मात्पराङिव स्तोत्रमुपाकरोति पराञ्च स्तुवते ॥ ७ ॥ उपावर्तध्वमिति वाऽअन्यानि स्तोत्राणि । अभ्यावर्तं धुर्यैं स्तुवतऽइमा वै प्रजा एतानि स्तोत्राण्यभ्युपावृत्तास्तस्मादिमाः प्रजाः पुनरभ्यावर्तं प्रजायन्ते ॥ ८ ॥ अथ यदत्र बहिष्पवमानेन स्तुवते । अत्र ह वाऽअसावग्रऽआदित्य आस तमृतवः परिगृह्यैवात ऊर्ध्वाः स्वर्गं लोकमुपोदक्रामन्त्स एष ऋतुषु प्रतिष्ठितस्तपति तथो एवैतदृत्विजो यजमानं परिगृह्यैवात ऊर्ध्वाः स्वर्गं लोकमुपोत्क्रामन्ति तस्मादत्र बहिष्पवमानेन स्तुवते ॥ ९ ॥ नौर्ह वाऽएषा स्वर्ग्या । यद्बहिष्पवमानं तस्या ऋत्विज एव स्फ्याश्चारित्राश्च स्वर्गस्य लोकस्य सम्पारणास्तस्या एक एव मज्जयिता य एव निन्द्यः स यथा पूर्णामभ्यारुह्य मज्जयेदेवꣳ हैनाꣳ स मज्जयति तद्धि सर्व एव यज्ञो नौः स्वर्ग्या तस्मादु सर्वस्मादेव यज्ञान्निन्द्यं परिबिबाधिषेत ॥ १० ॥ अथ स्तुतऽएतां वाचं वदति । अग्नीदग्नीन्विहर बर्हि स्तृणीहि पुरोडाशाँ२ऽअलंकुरु पशुनेहीति विहरत्यग्नीदग्नीन्त्समिन्द्ध

ऽएवैनानेतत्स्तृणाति बर्हि स्तीर्णे बर्हिषि समिद्धे देवेभ्यो जुहवानीति पुरोडा-
शाँ२॥ऽअलंकुर्विति पुरोडाशैर्हि प्रचरिष्यन्भवति पशुनेहीति पशुꣳ ह्युपाकरि-
ष्यन्भवति ॥ ११ ॥ अथ पुनः प्रपद्य । आश्विनं ग्रहं गृह्णात्याश्विनं ग्रहं गृहीत्वोप-
निष्क्रम्य यूपं परिव्ययति परिवीय यूपं पशुमुपाकरोति रसमेवास्मिन्नेतद्दधाति
॥ १२ ॥ स प्रातःसवनऽआलब्धः । आ तृतीयसवनाच्छ्रप्यमाण उपशेते सर्वस्मिन्ने-
वैतद्यज्ञे रसं दधाति सर्वं यज्ञꣳ रसेन प्रसजति ॥ १३ ॥ तस्मादाग्नेयमग्निष्टोमऽआ-
लभेत । तद्धि सलोम यदाग्नेयमग्निष्टोमऽआलभेत यद्युक्थ्यः स्यादैन्द्राग्नं द्वितीय-
मालभेतैन्द्राग्नानि ह्युक्थ्यानि यदि षोडशी स्यादैन्द्रं तृतीयमालभेतैन्द्रो हि षो-
डशी यद्यतिरात्रः स्यात्सारस्वतं चतुर्थमालभेत वाग्वै सरस्वती योषा वै वाग्यो-
षा रात्रिस्तद्यथायथं यज्ञक्रतून्व्यावर्तयति ॥ १४ ॥ अथ सवनीयैः पुरोडाशैः प्रचर-
ति । देवो वै सोमो दिवि हि सोमो वृत्रो वै सोम आसीत्तस्यैतच्छरीरं यद्गिरयो
यदश्मानस्तदेषोशाना नामौषधिर्जायतऽइति ह स्माह श्वेतकेतुरौद्दालकिस्तामे-
तदाहृत्याभिषुण्वन्तीति ॥ १५ ॥ स यत्पशुमालभते । रसमेवास्मिन्नेतद्दधात्यथ य-
त्सवनीयैः पुरोडाशैः प्रचरति मेधमेवास्मिन्नेतद्दधाति तथो हास्यैष सोम एव
भवति ॥ १६ ॥ सर्वऽऐन्द्रा भवन्ति । इन्द्रो वै यज्ञस्य देवता तस्मात्सर्वऽऐन्द्रा
भवन्ति ॥ १७ ॥ अथ यत्पुरोडाशः धानाः करम्भो दध्यामिक्षेति भवति या यज्ञस्य
देवतास्ताः सुप्रीता असन्निति ॥ १८ ॥ इदं वाऽअपूपमशित्वा कामयते । धानाः
खादेयं करम्भमश्नीयां दध्यश्नीयामामिक्षामश्नीयामिति ते सर्वे कामा या यज्ञस्य दे-
वतास्ताः सुप्रीता असन्नित्यथ यदेषा प्रातःसवनऽएव मैत्रावरुणी पयस्यावक्लृप्ता
भवति नेतरयोः सवनयोः ॥ १९ ॥ गायत्री वै प्रातःसवनं वहति । त्रिष्टुम्माध्य-
न्दिनꣳ सवनं जगती तृतीयसवनं तद्वाऽअनेकाकिन्येव त्रिष्टुम्माध्यन्दिनꣳ सवनं
वहति गायत्र्या च बृहत्या चानेकाकिनी जगती तृतीयसवनं गायत्र्योष्णिहक-

कुब्ध्याऽनुष्टुभा ॥२०॥ गायत्र्यैवैकाकिनी प्रातःसवनं वहति । सैताभ्यां पङ्क्तिभ्याᳪ स्तोत्रपङ्क्त्या च हविष्पङ्क्त्या च चत्वार्यन्यानि बहिष्पवमानं पञ्चमं पञ्चपरा पङ्क्तिः सैतया स्तोत्रपङ्क्त्यानेकाकिनी गायत्री प्रातःसवनं वहति ॥२१॥ इन्द्रस्य पुरोडाशः । हर्योर्धानाः पूष्णः करम्भः सरस्वत्यै दधि मित्रावरुणयोः पयस्या पञ्चपदा पङ्क्तिः सैतया हविष्पङ्क्त्यानेकाकिनी गायत्री प्रातःसवनं वहत्येतस्या एव पङ्क्तेः सम्पदः कामाय प्रातःसवनऽ एवैषा मैत्रावरुणी पयस्यावक्लृप्ता भवति नेतरयोः सवनयोः ॥२२॥ ब्राह्मणम् ॥४ [२.५.] ॥ द्वितीयोऽध्यायः [२६] ॥ ॥

भक्षयित्वा समुपहूताः स्म इत्युक्त्वोत्तिष्ठति । पुरोडाशबृगलमादाय तद्यत्रैतदुपसन्नोऽच्छावाकोऽन्वाह तदस्मै पुरोडाशबृगलं पाणावादधदाहाच्छावाक वदस्व यत्ते वाद्यमित्यह्वयत वाऽअच्छावाकः ॥१॥ तमिन्द्राग्नीऽअनुसमतनुताम् । प्रज्ञानां प्रज्ञात्यै तस्मादैन्द्राग्नोऽच्छावाकः स एतेन च हविषा यदस्माऽएतत्पुरोडाशबृगलं पाणावादधात्येतेन चार्षेयेण यदेतदन्वाह तेनानुसमश्नुते ॥२॥ स वै सन्नेऽच्छावाके । ऋतुग्रहैश्चरति तद्यत्सन्नेऽच्छावाकऽऋतुग्रहैश्चरति मिथुनं वा अच्छावाक ऐन्द्राग्नो ह्यच्छावाको द्वौ हीन्द्राग्नी द्वन्द्वᳪ हि मिथुनं प्रजननᳪ स एतस्मान्मिथुनात्प्रजननादृतूत्संवत्सरं प्रजनयति ॥३॥ यद्वेव सन्नेऽच्छावाके । ऋतुग्रहैश्चरति सर्वं वाऽऋतवः संवत्सरः सर्वमेवैतत्प्रजनयति तस्मात्सन्नेऽच्छावाकऽऋतुग्रहैश्चरति ॥४॥ तान्वै द्वादश गृह्णीयात् । द्वादश वै मासाः संवत्सरस्य तस्माद्द्वादश गृह्णीयादथोऽअपि त्रयोदश गृह्णीयादस्ति त्रयोदशो मास इति द्वादश त्वेव गृह्णीयादेषैव सम्पत् ॥५॥ द्रोणकलशाद्गृह्णाति । प्रजापतिर्वै द्रोणकलशः स एतस्मात्प्रजापतेर्ऋतूत्संवत्सरं प्रजनयति ॥६॥ उभयतोमुखाभ्यां पात्राभ्यां गृह्णाति । कुतस्तयोरन्ता यऽउभयतोमुखे तस्मादयमनन्तः संवत्सरः परिप्लवते तं गृहीत्वा न सादयति तस्मादयमसन्नः संवत्सरः ॥७॥ नानुवाक्यामन्वाह । ह्वयति वा

ऽअनुवाक्ययागतो ह्येवायमृतुर्यदि दिवा यदि नक्तं नानुवषट्करोति नेदृतूनपवृ-
णजाऽइति सहैव प्रथमौ ग्रहौ गृह्णीतः सहोत्तमाविदमेवैतत्सर्वꣳ संवत्सरेण
परिगृह्णीतस्तदिदꣳ सर्वꣳ संवत्सरेण परिगृहीतम् ॥ ८॥ निरेवान्यतरः क्रामति ।
प्रान्यतरः पद्यते तस्मादिमेऽन्वञ्चो मासा यन्त्यथ यदुभौ वा सह निष्क्रामेतामु-
भौ वा सह प्रपद्येयातां पृथगु हैवेमे मासा ईयुस्तस्मान्निरेवान्यतरः क्रामति प्रा-
न्यतरः पद्यते ॥ ९॥ तौ वाऽऋतुनेति षट् प्रचरतः । तद्देवा अहरसृजन्तऽर्तुभि-
रिति चतुस्तद्रात्रिमसृजन्त स यद्धैतावदेवाभविष्यद्रात्रिर्हैवाभविष्यन्न व्यवत्स्यत्
॥ १०॥ तौ वाऽऋतुनेत्युपरिष्टाद्द्विश्चरतः । तद्देवाः परस्तादहरदधुस्तस्मादिदमद्या-
हरथ रात्रिरथ श्वोऽहर्भविता ॥ ११॥ ऋतुनेति वै देवाः । मनुष्यानसृजन्तऽर्तुभि-
रिति पशूंत्स यत्तन्मध्ये येन पशूनसृजन्त तस्मादिमे पशव उभयतः परिगृहीता
वशमुपेता मनुष्याणाम् ॥ १२॥ तौ वाऽऋतुनेति षट् प्रचर्य । इतरथा पात्रे वि-
पर्यस्यतेऽऋतुभिरिति चतुश्चरित्वेतरथा पात्रे विपर्यस्यतेऽन्यतरत एव तद्देवा
अहरसृजन्तान्यतरतो रात्रिमन्यतरत एव तद्देवा मनुष्यानसृजन्तान्यतरतः पशून्
॥ १३॥ अथातो गृह्णात्येव । उपयामगृहीतोऽसि मधवे त्वेत्येवाध्वर्युर्गृह्णात्युपया-
मगृहीतोऽसि माधवाय त्वेति प्रतिप्रस्थातैतावेव वासन्तिकौ स यद्वसन्तऽओषधयो
जायन्ते वनस्पतयः पच्यन्ते तेनो हैतौ मधुश्च माधवश्च ॥ १४॥ उपयामगृहीतो
ऽसि । शुक्राय त्वेत्येवाध्वर्युर्गृह्णात्युपयामगृहीतोऽसि शुचये त्वेति प्रतिप्रस्थातैतावेव
ग्रैष्मौ स यदेतयोर्बलिष्ठं तपति तेनो हैतौ शुक्रश्च शुचिश्च ॥ १५॥ उपयामगृही-
तोऽसि नभसे त्वेत्येवाध्वर्युर्गृह्णात्युपयानगृहीतोऽसि नभस्याय त्वेति प्रतिप्रस्थातै-
तावेव वार्षिकावमुतो वै दिवो वर्षति तेनो हैतौ नभश्च नभस्यश्च ॥ १६॥ उप-
यामगृहीतोऽसि । इषे त्वेत्येवाध्वर्युर्गृह्णात्युपयामगृहीतोऽस्यूर्जे त्वेति प्रतिप्रस्था-
तैतावेव शारदौ स यच्छरद्यूर्ग्रस ओषधयः पच्यन्ते तेनो हैताविषश्चोर्जश्च ॥ १७॥

उपयामगृहीतोऽसि सहसे त्वेत्येवाध्वर्युर्गृह्णात्युपयामगृहीतोऽसि सहस्याय त्वेति प्रतिप्रस्थातैतावेव हैमन्तिकौ स यद्धेमन्त इमाः प्रजाः सहसेव स्वं वशमुपनयते तेनो हैतौ सहश्च सहस्यश्च ॥१८॥ उपयामगृहीतोऽसि तपसे त्वेत्येवाध्वर्युर्गृह्णात्युपयामगृहीतोऽसि तपस्याय त्वेति प्रतिप्रस्थातैतावेव शैशिरौ स यदेतयोर्बलिष्ठं श्यायति तेनो हैतौ तपश्च तपस्यश्च ॥१९॥ उपयामगृहीतोऽसि । अꣳहसस्पतये त्वेति त्रयोदशं ग्रहं गृह्णाति यदि त्रयोदशं गृह्णीयादथ प्रतिप्रस्थाताध्वर्योः पात्रे सꣳस्रवमवनयत्यध्वर्युर्वा प्रतिप्रस्थातुः पात्रे सꣳस्रवमवनयत्याहरति भक्षम् ॥२०॥ अथ प्रतिप्रस्थाताभक्षितेन पात्रेण । ऐन्द्राग्नं ग्रहं गृह्णाति तद्यदभक्षितेन पात्रेणैन्द्राग्नं ग्रहं गृह्णाति न वाऽऋतुग्रहाणामनुवषट्कुर्वन्त्येतेभ्यो वाऽऐन्द्राग्नं ग्रहं ग्रहीष्यन्भवति तदस्यैन्द्राग्नेनैवानुवषट्कृता भवन्ति ॥२१॥ यद्वेवैन्द्राग्नं ग्रहं गृह्णाति । सर्वं वाऽइदं प्राजीजनद्य ऋतुग्रहानग्रहीत्स इदꣳ सर्वं प्रजनय्येदमेवैतत्सर्वं प्राणोदानयोः प्रतिष्ठापयति तदिदꣳ सर्वं प्राणोदानयोः प्रतिष्ठितमिन्द्राग्नी हि प्राणोदानाविमे हि द्यावापृथिवी प्राणोदानावनयोर्हीदꣳ सर्वं प्रतिष्ठितम् ॥२२॥ यद्वेवैन्द्राग्नं ग्रहं गृह्णाति । सर्वं वाऽइदं प्राजीजनद्य ऋतुग्रहानग्रहीत्स इदꣳ सर्वं प्रजनय्यास्मिन्नेवैतत्सर्वस्मिन्प्राणोदानौ दधाति ताविमावस्मिन्त्सर्वस्मिन्प्राणोदानौ हितौ ॥२३॥ अथातो गृह्णात्येव । इन्द्राग्नीऽआगतꣳ सुतं गीर्भिर्नभो वरेण्यम् । अस्य पातं धियेषिता । उपयामगृहीतोऽसीन्द्राग्निभ्यां त्वैष ते योनिरिन्द्राग्निभ्यां त्वेति सादयतीन्द्राग्निभ्याꣳ ह्येनं गृह्णाति ॥२४॥ अथ वैश्वदेवं ग्रहं गृह्णाति । सर्वं वाऽइदं प्राजीजनद्य ऋतुग्रहानग्रहीत्स यद्धैतावदेवाभविष्यद्यावत्या हैवाग्रे प्रजाः सृष्टास्तावत्यो हैवाभविष्यन्न प्राजनिष्यन्त ॥२५॥ अथ यद्वैश्वदेवं ग्रहं गृह्णाति । इदमेवैतत्सर्वमिमाः प्रजा यथायथं व्यवसृजति तस्मादिमाः प्रजाः पुनरभ्यावर्तं प्रजायन्ते शुक्रपात्रेण गृह्णात्येष वै शुक्रो य एष तपति तस्य

ये रश्मयस्ते विश्वे देवास्तस्माच्छुक्रपात्रेण गृह्णाति ॥ २६ ॥ अथातो गृह्णात्येव । ओमासश्चर्षणीधृतो विश्वे देवास आगत । दाश्वाꣳसो दाशुषः सुतम् । उपयामगृहीतोऽसि विश्वेभ्यस्त्वा देवेभ्य एष ते योनिर्विश्वेभ्यस्त्वा देवेभ्य इति सादयति विश्वेभ्यो ह्येनं देवेभ्यो गृह्णाति ॥ २७ ॥ ब्राह्मणम् ॥ ५ [३. १.] ॥ ॥

गृणाति ह वा एतद्धोता यच्छꣳसति । तस्मा एतद्गृणते प्रत्येवाध्वर्युरागृणाति तस्मात्प्रतिगरो नाम ॥ १ ॥ तं वै प्राञ्चमासीनमाह्वयते । सर्वे वा अन्य उद्गातुः प्राञ्च आर्त्विज्यं कुर्वन्ति तथो हास्यैतत्प्रागेवार्त्विज्यं कृतं भवति ॥ २ ॥ प्रजापतिर्वा उद्गाता । योषर्ग्घोता स एतत्प्रजापतिरुद्गाता योषायामृचि होतरि रेतः सिञ्चति यत्स्तुते तद्धोता शस्त्रेण प्रजनयति तच्छ्यति यथायं पुरुषः शितस्तद्यदेनच्छ्यति तस्माच्छस्त्रं नाम ॥ ३ ॥ तदुपपल्यय्य प्रतिगृणाति । इदमेवैतद्रेतः सिक्तमुपनिमदत्यथ यत्पराङ् तिष्ठन्प्रतिगृणीयात्पराग्घैवैतद्रेतः सिक्तं प्रणश्येत्तन्न प्रजायेत सम्यञ्चा उ चैवैतद्भूत्वैतद्रेतः सिक्तं प्रजनयतः ॥ ४ ॥ यातयामानि वै देवैश्छन्दाꣳसि । छन्दोभिर्हि देवाः स्वर्गं लोकꣳ समाश्नुवत मदो वै प्रतिगरो यो वा ऋचि मदो यः सामन्रसो वै स तच्छन्दःस्वेवैतद्रसं दधात्ययातयामानि करोति तैरयातयामैर्यज्ञं तन्वते ॥ ५ ॥ तस्माद्यद्यर्धर्चशः शꣳसेत् । अर्धर्चेऽर्धर्चे प्रतिगृणीयाद्यदि पच्छः शꣳसेत्पदे-पदे प्रतिगृणीयाद्यत्र वै शꣳसन्नवानिति तदसुररक्षसानि यज्ञमन्ववचरन्ति तत्प्रतिगरेण संदधाति नाष्ट्राणाꣳ रक्षसामनन्ववचाराय यजमानस्यो चैवैतद्भ्रातृव्यलोकं छिनत्ति ॥ ६ ॥ चतुरक्षराणि ह वा अग्रे छन्दाꣳस्यासुः । ततो जगती सोममच्छापतत्सा त्रीण्यक्षराणि हित्वाजगाम ततस्त्रिष्टुप्सोममच्छापतत्सैकमक्षरꣳ हित्वाजगाम ततो गायत्री सोममच्छापतत्सैतानि चाक्षराणि हरन्त्यागच्छत्सोमं च ततोऽष्टाक्षरा गायत्र्यभवत्तस्मादाहुरष्टाक्षरा गायत्रीति ॥ ७ ॥ तया प्रातःसवनमतन्वत । तस्माद्गायत्रं प्रातःसवनं तयैव माध्यन्दिनꣳ सवनम-

तन्वत ता॑७ ह त्रिष्टुबुवाचोप त्वाहमायानि त्रिभिरक्षरैरुप मा ह्वयस्व मा मा यज्ञादन्तर्गा इति तथेति तामुपाह्वयत तत एकादशाक्षरा त्रिष्टुबभवत्तस्मादाहुस्त्रैष्टुभं माध्यन्दिन७ सवनमिति ॥ ८॥ तथैव तृतीयसवनमतन्वत । ता॑७ ह जगत्युवाचोप त्वाहमायान्येकेनाक्षरेणोप मा ह्वयस्व मा मा यज्ञादन्तर्गा इति तथेति तामुपाह्वयत ततो द्वादशाक्षरा जगत्यभवत्तस्मादाहुर्जागतं तृतीयसवनमिति ॥ ९॥ तदाहुः । गायत्राणि वै सर्वाणि सवनानि गायत्री ह्येवैतदुपसृज्यमानैदिति तस्मात्स७सिद्धं प्रातःसवने प्रतिगृणीयात्स७सिद्धा हि गायत्र्यागछत्सकृन्मध्यन्माध्यन्दिने सवनऽएक७ हि साक्षर७ हिवागछत्तेनैवैनामेतत्समर्धयति कृत्स्नां करोति ॥ १०॥ यत्र त्रिष्टुभः शस्यन्ते । त्रिमध्यत्तृतीयसवने त्रीणि हि साक्षराणि हिवागछत्तैरेवैनामेतत्समर्धयति कृत्स्नां करोति ॥ ११॥ ॥ शतम् २५०० ॥ ॥ यत्र द्यावापृथिव्य७ शस्यते । इमे ह वै द्यावापृथिवीऽइमाः प्रजा उपजीवन्ति तदनयोरेवैतद्द्यावापृथिव्यो रसं दधाति ते रसवत्याऽउपजीवनीयेऽइमाः प्रजा उपजीवन्ति स वाऽओ३मित्येव प्रतिगृणीयात्तद्धि सत्यं तद्देवा विदुः ॥ १२॥ तद्धैके । ओथामोदैव वागिति प्रतिगृणन्ति वाक्प्रतिगर एतद्वाचमुपाप्नुम इति वदन्तस्तदु तथा न कुर्याद्यथा वै कथा च प्रतिगृणात्युपाप्तैवास्य वाग्भवति वाचा हि प्रतिगृणाति तस्मादो३मित्येव प्रतिगृणीयात्तद्धि सत्यं तद्देवा विदुः ॥ १३ ॥ ब्राह्मणम् ॥ ६
[३. २.] ॥ ॥

इहा३ऽइहा३ऽइत्यभिषुणोति । इन्द्रमेवैतदाच्यावयति बृहद्बृहदितीन्द्रमेवैतदाच्यावयति ॥ १॥ स शुक्रामन्थिनौ प्रथमौ गृह्णाति । शुक्रवद्ध्येतत्सवनमथाग्रयणा७ सर्वेषु ह्येष सवनेषु गृह्यतेऽथ मरुत्वतीयमथोक्थ्यमुक्थानि ह्यत्रापि भवन्ति ॥ २॥ तद्धैके । उक्थ्यं गृहीत्वाथ मरुत्वतीयं गृह्णन्ति तदु तथा न कुर्यान्मरुत्वतीयमेव गृहीत्वाथोक्थ्यं गृह्णीयात् ॥ ३॥ तान्वाऽएतान् । पञ्च ग्रहान्गृह्णात्येष

वै वज्रो यन्माध्यन्दिनः पवमानस्तस्मात्पञ्चदशः पञ्चसामा भवति पञ्चदशो हि वज्रः स एतैः पञ्चभिर्ग्रहैः पञ्च वाऽइमा अङ्गुलयोऽङ्गुलिभिर्वै प्रहरति ॥ ४ ॥ इन्द्रो वृत्राय वज्रं प्रजहार । स वृत्रं पाप्मानꣳ हत्वा विजितेऽभयेऽनाष्ट्रे दक्षिणा निनाय तस्मादप्येतर्हि यदैवैतेन माध्यन्दिनेन पवमानेन स्तुवतेऽथ विजितेऽभये ऽनाष्ट्रे दक्षिणा नीयन्ते तथोऽएवैष एतैः पञ्चभिर्ग्रहैः पाप्मने द्विषते भ्रातृव्याय वज्रं प्रहरति स वृत्रं पाप्मानꣳ हत्वा विजितेऽभयेऽनाष्ट्रे दक्षिणा नयति तस्माद्वाऽएतान्पञ्च ग्रहान्गृह्णाति ॥ ५ ॥ तद्यन्मरुत्वतीयान्गृह्णाति । एतद्वाऽइन्द्रस्य निष्केवल्यꣳ सवनं यन्माध्यन्दिनꣳ सवनं तेन वृत्रमजिघाꣳसत्तेन व्यजिगीषत मरुतो वाऽइत्यश्वत्थेऽपक्रम्य तस्थुः क्षत्रं वाऽइन्द्रो विशो मरुतो विशा वै क्षत्रियो बलवान्भवति तस्मादाश्वत्थेऽऋतुपात्रे स्यातां कार्ष्मर्यमये त्वेव भवतः ॥ ६ ॥ तानिन्द्र उपमन्त्रयां चक्रे । उप मावर्तध्वं युष्माभिर्बलेन वृत्रꣳ हनानीति ते होचुः किं नस्ततः स्यादिति तेभ्य एतौ मरुत्वतीयौ ग्रहावगृह्णात् ॥ ७ ॥ ते होचुः । अपनिधायैनमोज उपावर्तामहाऽइति तऽएनमपनिधायैवौज उपाववृतुस्तद्वाऽइन्द्रो ऽस्पृणुतापनिधाय वै मौज उपावृतन्निति ॥ ८ ॥ स होवाच । सहैव मौजसोपावर्तध्वमिति तेभ्यो वै नस्तृतीयं ग्रहं गृहाणेति तेभ्य एतं तृतीयं ग्रहमगृह्णादुपयामगृहीतोऽसि मरुतां त्वौजसऽइति तऽएनꣳ सहैवौजसोपावर्तन्त तैर्व्यजयत तैर्वृत्रमहन्क्षत्रं वाऽइन्द्रो विशो मरुतो विशा वै क्षत्रियो बलवान्भवति तत्क्षत्रऽएवैतद्बलं दधाति तस्मान्मरुत्वतीयान्गृह्णाति ॥ ९ ॥ स वाऽइन्द्रायैव मरुत्वते गृह्णीयात् । नापि मरुद्भ्यः स यद्धापि मरुद्भ्यो गृह्णीयात्प्रत्युद्यामिनीꣳ ह क्षत्राय विशं कुर्यादथैतदिन्द्रमेवानु मरुत आभजति तत्क्षत्रायैवैतद्विशं कृतानुकरामनुवर्त्मानं करोति तस्मादिन्द्रायैव मरुत्वते गृह्णीयान्नापि मरुद्भ्यः ॥ १० ॥ अपक्रमाद्ध हैवैषामेतद्बिभयां चकार । यदिमे मन्नापक्रामेयुर्यन्नान्यङ्क्रियेरन्निति तानेवैतदनपक्र-

मिणोऽकुरुत तस्मादिन्द्रायैव मरुत्वते गृह्णीयान्नापि मरुद्भ्यः ॥११॥ ऋतुपात्राभ्यां गृह्णाति । ऋतवो वै संवत्सरो यज्ञस्तेऽदः प्रातःसवने प्रत्यक्षमवकल्पयन्ते यदृतुग्रहान्गृह्णात्यथैतत्परोऽक्षं माध्यन्दिने सवनेऽवकल्पयन्ते यदृतुपात्राभ्यां मरुत्वतीयान्गृह्णाति विशो वै मरुतोऽन्नं वै विश ऋतवो वाऽइदꣳ सर्वमन्नाद्यं पचन्ति तस्मादृतुपात्राभ्यां मरुत्वतीयान्गृह्णाति ॥१२॥ अथातो गृह्णात्येव । इन्द्र मरुत्व इह पाहि सोमं यथा शार्यातेऽअपिबः सुतस्य । तव प्रणीती तव शूर शर्मन्नाविवासन्ति कवयः सुयज्ञाः । उपयामगृहीतोऽसीन्द्राय त्वा मरुत्वतऽएष ते योनिरिन्द्राय त्वा मरुत्वते ॥१३॥ मरुत्वन्तं वृषभम् । वावृधानमकवारिं दिव्यꣳ शासमिन्द्रम् । विश्वासाहमवसे नूतनायोग्रꣳ सहोदामिह तꣳ हुवेम । उपयामगृहीतोऽसीन्द्राय त्वा मरुत्वतऽएष ते योनिरिन्द्राय त्वा मरुत्वते । उपयामगृहीतोऽसि मरुतां त्वौजसऽइति तृतीयं ग्रहं गृह्णाति ॥१४॥ अथ माहेन्द्रं ग्रहं गृह्णाति । पाप्मना वाऽएतदिन्द्रः सꣳसृष्टोऽभूद्यद्विशा मरुद्भिः स यथा विजयस्य कामाय विशा समाने पात्रेऽश्नीयादेवं तद्यदस्माऽएतं मरुद्भिः समानं ग्रहमगृह्णन् ॥१५॥ तं देवाः । सर्वस्मिन्विजितेऽभयेऽनाष्ट्रे यथेषीकां मुञ्जाद्विवृहेदेवꣳ सर्वस्मात्पाप्मनो व्यवृहन्यन्माहेन्द्रं ग्रहमगृह्णंस्तथोऽएवैष एतद्यथेषीका विमुञ्जा स्यादेवꣳ सर्वस्मात्पाप्मनो निर्मुच्यते यन्माहेन्द्रं ग्रहं गृह्णाति ॥१६॥ यद्वेव माहेन्द्रं ग्रहं गृह्णाति । इन्द्रो वाऽएष पुरा वृत्रस्य बधादथ वृत्रꣳ हत्वा यथा महाराजो विजिग्यान एवं महेन्द्रोऽभवत्तस्मान्माहेन्द्रं ग्रहं गृह्णाति महान्तमु चैवैनमेतत्खलु करोति वृत्रस्य बधाय तस्माद्वेव माहेन्द्रं ग्रहं गृह्णाति श पात्रेण गृह्णात्येष वै शुक्रो य एष तपत्येष उऽएव महांस्तस्माच्छुक्रपात्रेण गृह्णाति ॥१७॥ अथातो गृह्णात्येव । महाꣳ२ऽइन्द्रो नृवदा चर्षणिप्रा उत द्विबर्हा अमिनः सहोभिः । अस्मद्र्यग्वावृधे वीर्यायोरुः पृथुः सुकृतः कर्तृभिर्भूत् । उपयामगृहीतोऽसि महेन्द्राय

त्वैष ते योनिर्महेन्द्राय त्वेति सादयति महेन्द्राय ह्येनं गृह्णाति ॥१८॥ अथोपा-
कृत्यैतां वाचं वदति । अभिषोतारोऽभिषुणुतौलूखलानुद्वादयताग्नीदाशिरं विनय
सौम्यस्य वित्तादिति ते वै तृतीयसवनायैवाभिषोतारोऽभिषुण्वन्ति तृतीयसवना-
यौलूखलानुद्वादयन्ति तृतीयसवनायाग्नीदाशिरं विनयति तृतीयसवनाय सौम्यं
चरुꣳ श्रपयत्येते वै शुक्रवती रसवती सवने यत्प्रातःसवनं च माध्यन्दिनं च स-
वनमथैतन्निर्धीतशुक्रं यत्तृतीयसवनं तदेवैतस्मान्माध्यन्दिनात्सवनान्निर्मिमीते तथो
हास्यैतच्छुक्रवद्रसवत्तृतीयसवनं भवति तस्मादेतामत्र वाचं वदति ॥१९॥ ब्राह्म-
णाम् ॥ ७ [३. ३.] ॥ द्वितीयः प्रपाठकः ॥ कण्डिकासंख्या १३१ ॥ ॥

घ्नन्ति वाऽएतद्यज्ञम् । यदेनं तन्वते यन्न्वेव राजानमभिषुण्वन्ति तत्तं घ्नन्ति यत्पशुꣳ संज्ञपयन्ति विशासति तत्तं घ्नन्त्युलूखलमुसलाभ्यां दृषदुपलाभ्याꣳ हविर्यज्ञं घ्नन्ति ॥१॥ स एष यज्ञो हतो न ददक्षे । तं देवा दक्षिणाभिरदक्षयंस्तद्यदेनं दक्षिणाभिरदक्षयंस्तस्माद्दक्षिणा नाम तद्यदेवात्र यज्ञस्य हतस्य व्यथते तदेवास्यैतद्दक्षिणाभिर्दक्षयत्यथ समृद्ध एव यज्ञो भवति तस्माद्दक्षिणा ददाति ॥२॥ तद्वै षड्द्वादशेत्येव हविर्यज्ञे ददति । न ह त्वेवाशतदक्षिणः सौम्योऽध्वरः स्यादेष वै प्रत्यक्षं यज्ञो यत्प्रजापतिः पुरुषो वै प्रजापतेर्नेदिष्ठꣳ सोऽयꣳ शतायुः शततेजाः शतवीर्यस्तꣳ शतेनैव दक्षयति नाशतेन तस्मान्नाशतदक्षिणः सौम्योऽध्वरः स्यान्नो हैवाशतदक्षिणेन यजमानस्यऽर्त्विक्स्यान्नेदस्याक्षिभूरसानि यमिमे हनिष्यन्त्येव न दक्षयिष्यन्तीति ॥३॥ द्वया वै देवा देवाः । अहैव देवा अथ ये ब्राह्मणाः शुश्रुवाꣳसोऽनूचानास्ते मनुष्यदेवास्तेषां द्वेधाविभक्त एव यज्ञ आहुतय एव देवानां दक्षिणा मनुष्यदेवानां ब्राह्मणानाꣳ शुश्रुवुषामनूचानानामाहुतिभिरेव देवान्प्रीणाति दक्षिणाभिर्मनुष्यदेवान्ब्राह्मणाञ्छुश्रुवुषोऽनूचानांस्तऽएनमुभये देवाः प्रीताः स्वर्गं लोकमभिवहन्ति ॥४॥ ता वाऽएताः । हविर्जामेव द-

क्षिणा अन्नं वा एतदेतस्यात्मानꣳ संस्कुर्वन्त्येतं यज्ञमृङ्मयं यजुर्मयꣳ साममयमाहुतिमयꣳ सोऽस्यामुष्मिंल्लोकऽआत्मा भवति तद्ये मानीजनन्तीति तस्माद्दक्षिणा एव दक्षिणा दद्यान्नानृत्विग्भ्यः ॥५॥ अथ प्रतिपरेत्य गार्हपत्यम् । दाक्षिणानि जुहोति स दशाहोमीये वाससि हिरण्यं प्रबध्यावधाय जुहोति देवलोके मेऽप्यसदिति वै यजते यो यजते सोऽस्यैष यज्ञो देवलोकमेवाभिप्रैति तदनूची दक्षिणा यां ददाति सैति दक्षिणामन्वारभ्य यजमानः ॥६॥ चतस्रो वै दक्षिणाः । हिरण्यं गौर्वासोऽश्वो न वै तदवकल्पते यदश्वस्य पादमवदध्याद्यद्वा गोः पादमवदध्यात्तस्माद्दशाहोमीये वाससि हिरण्यं प्रबध्यावधाय जुहोति ॥७॥ सौरीभ्यामृग्भ्यां जुहोति । तमसा वाऽअसौ लोकोऽन्तर्हितः स एतेन ज्योतिषा तमोऽपहत्य स्वर्गं लोकमुपसंक्रामति तस्मात्सौरीभ्यामृग्भ्यां जुहोति ॥८॥ स जुहोति । उदु त्यं जातवेदसं देवं वहन्ति केतवः । दृशे विश्वाय सूर्यꣳ स्वाहेत्येतया गायत्र्या गायत्री वाऽइयं पृथिवी सेयं प्रतिष्ठा तदस्यामेवैतत्प्रतिष्ठायां प्रतितिष्ठति ॥९॥ अथ द्वितीयां जुहोति । चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः । आप्रा द्यावापृथिवीऽअन्तरिक्षꣳ सूर्य आत्मा जगतस्तस्थुषश्च स्वाहेत्येतया त्रिष्टुभा लोकमेवैतयोपप्रैति ॥१०॥ अथाग्नीध्रे । द्वे वैकां वा जुहोति तद्यदग्नावाग्नीध्रे द्वे वैकां वा जुहोत्यग्निर्वै पशूनामीष्टे तऽएनमभितः परिणिविशन्ते तमेतयाहुत्या प्रीणाति सोऽस्मै प्रीतोऽनुमन्यते तेनानुमतां ददाति ॥११॥ स जुहोति । अग्ने नय सुपथा रायेऽअस्मान्विश्वानि देव वयुनानि विद्वान् । युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नमऽउक्तिं विधेम स्वाहेत्यथ यद्यश्वं युक्तं वायुक्तं वा दास्यन्त्स्यादथ द्वितीयां जुहुयाद्यद्यु न नाद्रियेत ॥१२॥ स जुहोति । अयं नोऽअग्निर्वरिवस्कृणोत्वयं मृधः पुर एतु प्रभिन्दन् । अयं वाजाञ्जयतु वाजसातावयꣳ शत्रूञ्जयतु जर्हृषाणः स्वाहेति वाजसा ह्यश्वः ॥१३॥ अथ हिरण्यमादाय शालामभ्येति । दक्षि-

णेन वेदिं दक्षिणा उपतिष्ठन्ते सोऽग्रेण शालां तिष्ठन्नभिमन्त्रयते रूपेण वो रूपमभ्यागामिति न ह वाऽअग्रे पशवो दानाय चक्षमिरे तेऽपनिधाय स्वानि रूपाणि शरीरैः प्रत्युपातिष्ठन्त तानेतद्देवाः स्वैरेव रूपैर्यज्ञस्यार्धादुपायंस्ते स्वानि रूपाणि जानाना अभ्यवायंस्ते रातमनसोऽलं दानायाभवंस्तथोऽएवैनानेष एतत्स्वैरेव रूपैर्यज्ञस्यार्धादुपैति ते स्वानि रूपाणि जानाना अभ्यवायन्ति ते रातमनसोऽलं दानाय भवन्ति ॥१४॥ तुथो वो विश्ववेदा विभजत्विति । ब्रह्म वै तुथस्तदेना ब्रह्मणा विभजति ब्रह्म वै दक्षिणीयं चादक्षिणीयं च वेद तथो हास्यैता दक्षिणीयायैव दत्ता भवन्ति नादक्षिणीयाय ॥१५॥ ऋतस्य पथा प्रेतेति । यो वै देवानां पथैति स ऋतस्य पथैति चन्द्रदक्षिणा इति तदेतेन ज्योतिषा यन्ति ॥१६॥ अथ सदोऽभ्यैति । वि स्वः पश्य व्यन्तरिक्षमिति वि त्वया दक्षिणया लोकं ख्येषमित्येवैतदाह ॥१७॥ अथ सदः प्रेक्षते । यतस्व सदस्यैरिति मा त्वा सदस्या अतिरिक्षतेत्येवैतदाह ॥१८॥ अथ हिरण्यमादायाग्नीध्रमभ्यैति । ब्राह्मणमद्य विदेयं पितृमन्तं पैतृमत्यमिति यो वै ज्ञातो ज्ञातकुलीनः स पितृमान्पैतृमत्यो यो वै ज्ञातायापि कतिपयीर्दक्षिणा ददाति ताभिर्महज्जयत्यृषिमार्षेयमिति यो वै ज्ञातोऽनूचानः स ऋषिरार्षेयः सुधातुदक्षिणमिति स हि सुधातुदक्षिणः ॥१९॥ अथैवमुपसद्य । अग्नीधि हिरण्यं ददात्यस्मद्राता देवत्रा गच्छतेति यां वै रातमना अविचिकित्सन्दक्षिणां ददाति तया महज्जयति देवत्रा गच्छतेति देवलोके मेऽप्यसदिति वै यजते यो यजते तद्देवलोकऽएवैनमेतदपित्विनं करोति प्रदातारमाविशतेति मामाविशतेत्येवैतदाह तथो हास्मादेताः पराच्यो न प्रणश्यन्ति तद्यदग्नीधे प्रथमाय दक्षिणां ददात्यतो हि विश्वे देवा अमृतत्वमपाजयंस्तस्मादग्नीधे प्रथमाय दक्षिणां ददाति ॥२०॥ अथैवमेवोपसद्य । आत्रेयाय हिरण्यं ददाति यत्र वाऽअदः प्रातरनुवाकमन्वाहुस्तद्ध स्मैतत्पुरा शꣳसत्यत्रिर्वाऽऋषीणाꣳ होतासा-

यैतत्सदो ऽसुरतमसमभिपुप्रुवे तऽ ऋषयो ऽत्रिमब्रुवन्नेहि प्रत्यङिदं तमो ऽपजहीति स एतत्तमो ऽपाहन्नयं वै ज्योतिर्य इदं तमो ऽपाबधीदिति तस्मा ऽएतज्ज्योतिर्हिरण्यं दक्षिणामनयञ्ज्योतिर्हि हिरण्यं तद्धि स तत्तेजसा वीर्येणऽर्षिस्तमो ऽपजघानाथैष एतेनैवैतज्ज्योतिषा तमो ऽपहन्ति तस्मादात्रेयाय हिरण्यं ददाति ॥२१॥

अथ ब्रह्मणे । ब्रह्मा हि यज्ञं दक्षिणतो ऽभिगोपायत्यथोद्गात्रे ऽथ होत्रे ऽथाध्वर्युभ्यां हविर्धान ऽआसीनाभ्यामथ पुनरेत्य प्रस्तोत्रे ऽथ मैत्रावरुणायाथ ब्राह्मणाच्छंसिने ऽथ पोत्रे ऽथ नेष्ट्रे ऽथाच्छावाकायाथोन्नेत्रे ऽथ ग्रावस्तुते ऽथ सुब्रह्मण्याये प्रतिहर्त्र ऽउत्तमाय ददाति प्रतिहर्ता वा ऽएष सो ऽस्मा ऽएतदन्ततः प्रतिहरति तथो हास्मादेताः पराच्यो न प्रणश्यन्ति ॥२२॥ अथाहेन्द्राय मरुत्वते ऽनुब्रूहीति । यत्र वै प्रजापतिरग्रे ददौ तदिन्द्र ईक्षां चक्रे सर्वं वा ऽअयमिदं दास्यति नास्मभ्यं किं चन परिशेक्ष्यतीति स एतं वज्रमुदयच्छदिन्द्राय मरुत्वते ऽनुब्रूहीत्यदानाय ततो नाददात्स एषो ऽप्येतर्हि तथैव वज्र उद्यम्यत ऽइन्द्राय मरुत्वते ऽनुब्रूहीत्यदानाय ततो न ददाति ॥२३॥ चतस्रो वै दक्षिणाः । हिरण्यमायुरेवैतेनात्मनस्त्रायत ऽआयुर्हि हिरण्यं तदग्नय ऽआग्नीध्रं कुर्वते ऽददात्तस्मादप्येतर्ह्याग्नीध्रे हिरण्यं दीयते ॥२४॥ अथ गौः । प्राणमेवैतयात्मनस्त्रायते प्राणो हि गौरन्नं हि गौरन्नं हि प्राणस्तां रुद्राय होत्रे ऽददात् ॥२५॥ अथ वासः । त्वचमेवैतेनात्मनस्त्रायते त्वग्घि वासस्तद्बृहस्पतय ऽउद्गायते ऽददात् ॥२६॥ अथाश्वः । वज्रो वा ऽअश्वो वज्रमेवैतत्पुरोगां कुरुते यमलोके मे ऽप्यसदिति वै यजते यो यजते तद्यमलोक ऽएवैनमेतदपिविनं करोति तं यमाय ब्रह्मणे ऽददात् ॥२७॥ स हिरण्यं प्रत्येति । अग्नये त्वा मह्यं वरुणो ददात्वित्यग्नये ह्येतद्वरुणो ऽददात्सो ऽमृतत्वमशीयायुर्दात्र ऽएधि मयो मह्यं प्रतिग्रहीत्र ऽइति ॥२८॥ अथ गां प्रत्येति । रुद्राय त्वा मह्यं वरुणो ददात्विति रुद्राय ह्येतां वरुणो ऽददात्सो ऽमृतत्वमशीय प्राणो दात्र ऽएधि वयो

मह्यं प्रतिग्रहीत्रऽइति ॥२९॥ अथ वासः प्रत्येति । बृहस्पतये त्वा मह्यं वरुणो ददाविति बृहस्पतये ह्येतद्वरुणोऽददात्सोऽमृतत्वमशीय त्वग्दात्रऽएधि मयो मह्यं प्रतिग्रहीत्रऽइति ॥३०॥ अथाश्वं प्रत्येति । यमाय त्वा मह्यं वरुणो ददाविति यमाय ह्येतं वरुणोऽददात्सोऽमृतत्वमशीय हयो दात्रऽएधि वयो मह्यं प्रतिग्रहीत्रऽइति ॥३१॥ अथ यदन्यद्ददाति । कामेनैव तद्ददातीदं मेऽप्यमुत्रासदिति तत्प्रत्येति कोऽदात्कस्माऽअदात्कामोऽदात्कामायादात् । कामो दाता कामः प्रतिग्रहीता कामैतत्तऽइति तद्देवतायाऽअतिदिशति ॥३२॥ तदाहुः । न देवतायाऽअतिदिशेदिदं वै यां देवताꣳ समिन्द्धे सा दीप्यमाना श्वः-श्वः श्रेयसी भवतीदं वै यस्मिन्नग्नावभ्यादधति स दीप्यमान एव श्वः-श्वः श्रेयान्भवति श्वः-श्वो ह वै श्रेयान्भवति य एवं विद्वान्प्रतिगृह्णाति तद्यथा समिद्धे जुहुयादेवमेतां जुहोति यामधीयते ददाति तस्मादधीयन्नातिदिशेत् ॥३३॥ ब्राह्मणम् ॥ १ [३. ४.] ॥ ॥

त्रया वै देवाः । वसवो रुद्रा आदित्यास्तेषां विभक्तानि सवनानि वसूनामेव प्रातःसवनꣳ रुद्राणां माध्यन्दिनꣳ सवनमादित्यानां तृतीयसवनं तद्वाऽअमिश्रमेव वसूनां प्रातःसवनममिश्रꣳ रुद्राणां माध्यन्दिनꣳ सवनं मिश्रमादित्यानां तृतीयसवनम् ॥१॥ ते हादित्या ऊचुः । यथेदममिश्रं वसूनां प्रातःसवनममिश्रꣳ रुद्राणां माध्यन्दिनꣳ सवनमेवं न इमं पुरा मिश्राद्ग्रहं जुहुयेति तथेति देवा अब्रुवंस्ते सꣳस्थितऽएव माध्यन्दिने सवने पुरा तृतीयसवनादेतमजुहवुः स एषोऽप्येतर्हि तथैव ग्रहो हूयते सꣳस्थितऽएव माध्यन्दिने सवने पुरा तृतीयसवनात् ॥२॥ ते हादित्या ऊचुः । नेव वाऽइतरस्मिन्त्सवने स्मो नेवेतरस्मिन्यद्धि नो रक्षाꣳसि न हिꣳस्युरिति ॥३॥ ते ह द्विदेवत्यानूचुः । रक्षोभ्यो वै बिभीमो हन्त युष्मान्प्रविशामेति ॥४॥ ते ह द्विदेवत्या ऊचुः । किमस्माकं ततः स्यादित्यस्माभिरनुवषट्कृता भविष्यथेत्यु हादित्या ऊचुस्तथेति ते द्विदेवत्यान्प्राविशन् ॥५॥

स यत्र प्रातःसवने । द्विदेवत्यैः प्रचरति तत्प्रतिप्रस्थातादित्यपात्रेण द्रोणकलशा-
त्प्रतिनिगृह्णीत उपयामगृहीतोऽसीत्येतावताध्वर्युरेवाश्रावयत्यध्वर्योरनु होमं जु-
होति प्रतिप्रस्थातादित्येभ्यस्त्वेति सꣳस्रवमवनयत्येतावत्तैवमेव सर्वेषु ॥ ६॥ तद्य-
त्प्रतिप्रस्थाता प्रतिनिगृह्णीते । द्विदेवत्यान्वै प्राविशन्नस्माभिरनुवषट्कृता भवि-
ष्यथेत्यु हादित्या ऊचुर्यां वाऽअमूं द्वितीयामाहुतिं जुहोति स्विष्टकृते वै तां जु-
होति स्विष्टकृतो वाऽएतेऽनुवषट्क्रियन्ते तथो हास्यैतेऽनुवषट्कृता इष्टस्विष्ट-
कृतो भवन्त्युत्तरार्धे जुहोत्येषा ह्येतस्य देवस्य दिक्तस्मादुत्तरार्धे जुहोति ॥ ७॥
यद्वेव प्रतिप्रस्थाता प्रतिनिगृह्णीते । द्विदेवत्यान्वै प्राविशन्त्स यानेव प्राविशंस्ते-
भ्य एवैतन्निर्मिमीतेऽथापिदधाति रक्षोभ्यो ह्यबिभयुर्विष्णऽउरुगायैष ते सोमस्तꣳ
रक्षस्व मा त्वा दभन्निति यज्ञो वै विष्णुस्तद्यज्ञायैवैतत्परिददाति गुप्त्याऽअथाह
सꣳस्थितऽएव माध्यन्दिने सवने पुरा तृतीयसवनादेहि यजमानेति ॥ ८॥ ते
सम्प्रपद्यन्ते । अध्वर्युश्च यजमानश्चाग्नीध्रश्च प्रतिप्रस्थाता चोन्नेताथ योऽन्यः परिचरो
भवत्युभे द्वारेऽअपिदधति रक्षोभ्यो ह्यबिभयुरथाध्वर्युरादित्यस्थालीं चादित्यपात्रं
चादत्ते स उपर्युपरि पूतभृतं विगृह्णाति नेद्यवश्चोतदिति ॥ ९॥ अथ गृह्णाति । क-
दा चन स्तरीरसि नेन्द्र सश्चसि दाशुषे । उपोपेन्नु मघवन्भूय इन्नु ते दानं देवस्य
पृच्यतऽआदित्येभ्यस्त्वेति ॥ १०॥ तं वै नोपयामेन गृह्णीयात् । अग्रे ह्येवैष उप-
यामेन गृहीतो भवत्यजामितायै जामि ह कुर्याद्यदेनमत्राप्युपयामेन गृह्णीयात्
॥ ११॥ अथापगृह्य पुनरानयति । कदा चन प्रयुच्छस्युभे निपासि जन्मनी । तुरी-
यादित्य सवनं तऽइन्द्रियमातस्थावमृतं दिव्यादित्येभ्यस्त्वेति ॥ १२॥ अथ दधि गृ-
ह्णाति । आदित्यानां वै तृतीयसवनमादित्यान्वाऽअनु पशवस्तत्पशुष्वेवैतत्पयो
दधाति तदिदं पशुषु पयो हितं मध्यत-इव गृह्णीयादित्याहुर्मध्यत-इव हीदं प-
शूनां पय इति पश्चादिव त्वेव गृह्णीयात्पश्चादिव हीदं पशूनां पयः ॥ १३॥ यद्वेव

दधि गृह्णाति । कुतोच्छिष्टा वाऽएते सꣳस्रवा भवन्ति नालमाहुत्यै तानेवैतत्पुन-
राप्याययति तथालमाहुत्यै भवन्ति तस्माद्दधि गृह्णाति ॥१४॥ स गृह्णाति । यज्ञो
देवानां प्रत्येति सुम्नमादित्यासो भवता मृडयन्तः । आ वोऽर्वाची सुमतिर्ववृत्या-
दꣳहोश्चिद्या वरिवोवित्तरासदादित्येभ्यस्त्वेति ॥१५॥ तमुपाꣳशुसवनेन मेक्षयति
। विवस्वान्वाऽएष आदित्यो निदानेन यदुपाꣳशुसवन आदित्यग्रहो वाऽएष भ-
वति तदेनꣳ स्वऽएव भागे प्रीणाति ॥१६॥ तं न दशाभिर्न पवित्रेणोपस्पृशति
एते वै शुक्रवती रसवती सवने यत्प्रातःसवनं च माध्यन्दिनं च सवनमथैतन्नि-
र्धीतशुक्रं यत्तृतीयसवनꣳ स यन्न दशाभिर्न पवित्रेणोपस्पृशति तेनो हास्यैतच्छु-
क्रवद्रसवत्तृतीयसवनं भवति तस्मान्न दशाभिर्न पवित्रेणोपस्पृशति ॥१७॥ स
मेक्षयति । विवस्वन्नादित्यैष ते सोमपीथस्तस्मिन्मत्स्वेत्यथोन्नेत्रऽउपाꣳशुसवनं
प्रयच्छत्यथाहोन्नेतारमासृज ग्राव्ण इति तानाधवनीये वासृजति चमसे वा ॥१८॥
राजानमुन्नीय । आदित्यानां वै तृतीयसवनमादित्यान्वाऽअनु ग्रावाणस्तदेनान्त्स्व
ऽएव भागे प्रीणात्यपोर्णुवन्ति द्वारे ॥१९॥ अथापिधायोपनिष्क्रामति । रक्षोभ्यो
ह्यबिभयुरथाहादित्येभ्योऽनुब्रूहीत्यत्र सम्पश्येद्यदि कामयेताश्राव्य त्वेव सम्पश्ये-
दादित्येभ्यः प्रेष्य प्रियेभ्यः प्रियधामभ्यः प्रियव्रतेभ्यो महस्वसरस्य पतिभ्य उरोर-
न्तरिक्षस्याध्यक्षेभ्य इति वषट्कृते जुहोति नानुवषट्करोति नेत्पशूनग्नौ प्रवृणजा-
नीति प्रयच्छति प्रतिप्रस्थात्रे सꣳस्रवौ ॥२०॥ अथ पुनः प्रपद्य । आग्रयणमादत्त
ऽउदीचीनदशं पवित्रं वितन्वन्ति प्रस्कन्दयत्यध्वर्युराग्रयणस्य सम्प्रगृह्णाति प्रतिप्र-
स्थाता सꣳस्रवावानयत्युन्नेता चमसेन वोदञ्चनेन वा ॥२१॥ तं चतसृणां धारा-
णामाग्रयणं गृह्णाति । आदित्यानां वै तृतीयसवनमादित्यान्वाऽअनु गावस्तस्मा-
दिदं गवां चतुर्धाविहितं पयस्तस्माच्चतसृणां धाराणामाग्रयणं गृह्णाति ॥२२॥ त-
द्यत्प्रतिप्रस्थाता सꣳस्रवौ सम्प्रगृह्णाति । आदित्यग्रहो वाऽएष भवति न वा

ऽआदित्यग्रहस्यानुवषट्करोत्येतस्माद्धि सावित्रं ग्रहं ग्रहीष्यन्भवति तदस्य सावित्रेणैवानुवषट्कृतो भवति ॥२३॥ यद्वेव प्रतिप्रस्थाता सꣳस्रवौ सम्प्रगृह्णाति । पुरा वाऽएभ्य एतन्मिश्राद्ग्रहमग्रहैषुः पुरा तृतीयसवनात्तृतीयसवनाय वाऽएष ग्रहो गृह्यते तदादित्यास्तृतीयसवनमपियन्ति तथा न बहिर्धा यज्ञाद्भवन्ति तस्मात्प्रतिप्रस्थाता सꣳस्रवौ सम्प्रगृह्णाति ॥२४॥ ब्राह्मणम् ॥ २ [३. ५.] ॥ तृतीयोऽध्यायः [२७.] ॥ ॥

मनो ह वाऽअस्य सविता । तस्मात्सावित्रं गृह्णाति प्राणो ह वाऽअस्य सविता तमेवास्मिन्नेतत्पुरस्तात्प्राणं दधाति यदुपाꣳशुं गृह्णाति तमेवास्मिन्नेतत्पश्चात्प्राणं दधाति यत्सावित्रं गृह्णाति ताविमाऽउभयतः प्राणौ हितौ यश्चायमुपरिष्टाद्यश्चाधस्तात् ॥१॥ ऋतवो वै संवत्सरो यज्ञः । तेऽदः प्रातःसवने प्रत्यक्षमवकल्पयन्ते यदृतुग्रहान्गृह्णात्यथैतत्परोऽक्षं माध्यन्दिने सवनेऽवकल्पयन्ते यदृतुपात्राभ्यां मरुत्वतीयान्गृह्णाति न वाऽअत्रऽर्तुभ्य इति कं चन ग्रहं गृह्णन्ति नऽर्तुपात्राभ्यां कश्चन ग्रहो गृह्यते ॥२॥ एष वै सविता य एष तपति । एष उऽएव सर्वऽऋतवस्तदृतवः संवत्सरस्तृतीयसवने प्रत्यक्षमवकल्पयन्ते तस्मात्सावित्रं गृह्णाति ॥३॥ तं वाऽउपाꣳशुपात्रेण गृह्णाति । मनो ह वाऽअस्य सविता प्राण उपाꣳशुस्तस्मादुपाꣳशुपात्रेण गृह्णात्यन्तर्यामपात्रेण वा समानꣳ ह्येतद्यदुपाꣳश्वन्तर्यामौ प्राणोदानौ हि ॥४॥ आग्रयणाद्गृह्णाति । मनो ह वाऽअस्य सवितात्माग्रयण आत्मन्येवैतन्मनो दधाति प्राणो ह वाऽअस्य सवितात्माग्रयण आत्मन्येवैतत्प्राणं दधाति ॥५॥ अथातो गृह्णात्येव । वाममद्य सवितर्वाममु श्वो दिवे-दिवे वाममस्मभ्यꣳ सावीः । वामस्य हि क्षयस्य देव भूरेरया धिया वामभाजः स्याम । उपयामगृहीतोऽसि सावित्रोऽसि चनोधाश्चनोधा असि चनो मयि धेहि । जिन्व यज्ञं जिन्व यज्ञपतिं भगायेति ॥६॥ तं गृहीत्वा न सादयति । मनो ह वा

ऽअस्य सविता तस्मादिदमसन्नं मनः प्राणो ह वाऽअस्य सविता तस्मादयमसन्नः
प्राणः संचरत्यथाह देवाय सवित्रेऽनुब्रूहीत्याश्राव्याह देवाय सवित्रे प्रेष्येति व-
षट्कृते जुहोति नानुवषट्करोति मनो ह वाऽअस्य सविता नेन्मनोऽग्नौ प्रवृण-
जानीति प्राणो ह वाऽअस्य सविता नेत्प्राणमग्नौ प्रवृणजानीति ॥७॥ अथाभ-
ह्नितेन पात्रेण । वैश्वदेवं ग्रहं गृह्णाति तद्यदभह्नितेन पात्रेण वैश्वदेवं ग्रहं गृ-
ह्णाति न वै सावित्रस्यानुवषट्करोत्येतस्माद्धि वैश्वदेवं ग्रहं ग्रहीष्यन्भवति तदस्य
वैश्वदेवेनैवानुवषट्कृतो भवति ॥८॥ यद्वेव वैश्वदेवं ग्रहं गृह्णाति । मनो ह
वाऽअस्य सविता सर्वमिदं विश्वे देवा इदमेवैतत्सर्वं मनसः कृतानुकरमनुवर्त्म
करोति तददिꣳ सर्वं मनसः कृतानुकरमनुवर्त्म ॥९॥ यद्वेव वैश्वदेवं ग्रहं गृह्णा-
ति । प्राणो ह वाऽअस्य सविता सर्वमिदं विश्वे देवा अस्मिन्नेवैतत्सर्वस्मिन्प्रा-
णोदानौ दधाति ताविमावस्मिन्त्सर्वस्मिन्प्राणोदानौ हि तौ ॥१०॥ यद्वेव वैश्व-
देवं ग्रहं गृह्णाति । वैश्वदेवं वै तृतीयसवनं तदुच्यतऽएव सामतो यस्माद्वैश्वदेवं
तृतीयसवनमुच्यतऽऋक्तोऽथैतदेव यजुष्टः पुरश्चरणातो यदेतं महावैश्वदेवं गृह्णाति
॥११॥ तं वै पूतभृतो गृह्णाति । वैश्वदेवो वै पूतभृदतो हि देवेभ्य उन्नयन्त्यतो
मनुष्येभ्योऽतः पितृभ्यस्तस्माद्वैश्वदेवः पूतभृत् ॥१२॥ तं वाऽअपुरोरुक्कं गृह्णाति
। विश्वेभ्यो ह्येनं देवेभ्यो गृह्णाति सर्वं वै विश्वे देवा यदृचो यजूꣳषि यत्सामा-
नि स यदेवैनं विश्वेभ्यो देवेभ्यो गृह्णाति तेनो हास्यैष पुरोरुग्वान्भवति तस्मा-
दपुरोरुक्कं गृह्णाति ॥१३॥ अथातो गृह्णात्येव । उपयामगृहीतोऽसि सुशर्मासि सु-
प्रतिष्ठान इति प्राणो वै सुशर्मा सुप्रतिष्ठानो बृहदुक्षाय नम इति प्रजापतिर्वै
बृहदुक्षः प्रजापतये नम इत्येवैतदाह विश्वेभ्यस्त्वा देवेभ्य एष ते योनिर्विश्वेभ्य-
स्त्वा देवेभ्य इति सादयति विश्वेभ्यो ह्येनं देवेभ्यो गृह्णात्यथेत्य प्राङुपविशति
॥१४॥ स यत्रैताꣳ होता शꣳसति । एकया च दशभिश्च स्वभूते द्वाभ्यामिष्टये

विꣳशती च । तिसृभिश्च वहसे त्रिꣳशता च नियुद्भिर्वायविह ता विमुञ्चेति तदेतस्यां वायव्यायामृचि पात्राणि विमुच्यन्ते वायुप्रणेत्रा वै पशवः प्राणो वै वायुः प्राणेन हि पशवश्चरन्ति ॥१५॥ स ह देवेभ्यः पशुभिरपचक्राम । तं देवाः प्रातःसवनेऽन्वमन्त्रयन्त स नोपाववर्त तं माध्यन्दिने सवनेऽन्वमन्त्रयन्त स ह नैवोपाववर्त तं तृतीयसवनेऽन्वमन्त्रयन्त ॥१६॥ स होपावर्त्स्यन्नुवाच । यद्व उपावर्तेय किं मे ततः स्यादिति त्वयैवैतानि पात्राणि युञ्ज्येरंस्त्वया विमुच्येरन्निति तदेनेनैतत्पात्राणि युज्यन्ते यदैन्द्रवायवाग्रान्प्रातःसवने गृह्णात्यथैनेनैतत्पात्राणि विमुच्यन्ते यदाह नियुद्भिर्वायविह ता विमुञ्चेति पशवो वै नियुतस्तत्पशुभिरेवैतत्पात्राणि विमुच्यन्ते ॥१७॥ स यत्प्रातःसवनऽउपावर्त्स्यत् । गायत्रं वै प्रातःसवनं ब्रह्म गायत्री ब्राह्मणेषु ह पशवोऽभविष्यन्नथ यन्माध्यन्दिने सवनऽउपावर्त्स्यदैन्द्रं वै माध्यन्दिनꣳ सवनं क्षत्रमिन्द्रः क्षत्रियेषु ह पशवोऽभविष्यन्नथ यत्तृतीयसवनऽउपावर्तत वैश्वदेवं वै तृतीयसवनꣳ सर्वमिदं विश्वे देवास्तस्मादिमे सर्वत्रैव पशवः ॥१८॥ ब्राह्मणम् ॥ ३ [४. १.] ॥ ॥

सौम्येन चरुणा प्रचरति । सोमो वै देवानाꣳ हविरथैतत्सोमायैव हविष्क्रियते तथातः सोमोऽनन्तर्हितो भवति चरुर्भवति चरुर्वै देवानामन्नमोदनो हि चरुरोदनो हि प्रत्यक्षमन्नं तस्माच्चरुर्भवति ॥१॥ तेन न प्रातःसवने प्रचरति । न माध्यन्दिने सवनऽएते वै देवानां निष्केवल्ये सवने यत्प्रातःसवनं च माध्यन्दिनं च सवनं पितृदेवत्यो वै सोमः ॥२॥ स यत्प्रातःसवने वा प्रचरेत् । माध्यन्दिने वा सवने समदꣳ ह कुर्याद्देवेभ्यश्च पितृभ्यश्च तेन तृतीयसवने प्रचरति वैश्वदेवं वै तृतीयसवनं तथा हासमदं करोति नानुवाक्यामन्वाह सकृदु ह्येव पराञ्चः पितरस्तस्मान्नानुवाक्यामन्वाह ॥३॥ अथ चतुर्गृहीतमाज्यं गृहीत्वा । आश्राव्याह घृतस्य यजेति वषट्कृते जुहोति तद्या अतः प्राच्य आहुतयो

हुता भवन्ति ताभ्य एवैतदन्तर्दधाति तथा ह्यसमदं करोति ॥४॥ ॥शतम् २६००॥॥
स आज्यस्योपस्तीर्य । द्विश्चरोरवद्यत्यथोपरिष्टादाज्यस्याभिघारयत्याश्राव्याह सौ-
म्यस्य यजेति वषट्कृते जुहोति ॥५॥ अथापरं चतुर्गृहीतमाज्यं गृहीत्वा । आ-
श्राव्याह घृतस्य यजेति वषट्कृते जुहोति तद्या अत ऊर्ध्वा आहुतीर्होष्यन्भवति
ताभ्य एवैतदन्तर्दधाति तथा ह्यसमदं करोति स यदि कामयेतोभयतः परियजेद्य-
द्यु कामयेतान्यतरतः परियजेत् ॥६॥ अथ प्रचरणीति स्रुग्भवति । तस्यां चतुर्गृ-
हीतमाज्यं गृहीत्वाध्वर्युः शालाकैर्धिष्ण्यान्व्याघारयति तद्यच्छालाकैर्धिष्ण्यान्व्याघा-
रयति यद्वेनानदो देवा अब्रुवंस्तृतीयसवने वो घृत्याहुतिः प्राप्स्यति न सौ-
म्यापहृतो हि युष्मत्सोमपीथस्तेन सोमाहुतिं नार्हथेति सैनानेषा तृतीयसवन
एव घृत्याहुतिः प्राप्नोति न सौम्या यच्छालाकैर्धिष्ण्यान्व्याघारयति तानेतैरेव
यजुर्भिर्यथोपकीर्णं यथापूर्वं व्याघारयति मार्जालीय एवोत्तमम् ॥७॥ तद्धेके ।
आग्नीध्रीये पुनराघारयन्त्युदङ्ङ इदं कर्मानुसंतिष्ठाता इति तदु तथा न कुर्यान्मा-
र्जालीय एवोत्तमं ॥८॥ स यत्राध्वर्युः । शालाकैर्धिष्ण्यान्व्याघारयति तत्प्रतिप्र-
स्थाता पात्नीवतं ग्रहं गृह्णाति यज्ञाद्धि प्रजाः प्रजायन्ते यज्ञात्प्रजायमाना मिथुनात्प्र-
जायन्ते मिथुनात्प्रजायमाना अन्ततो यज्ञस्य प्रजायन्ते तदेना एतदन्ततो यज्ञस्य मि-
थुनात्प्रजननात्प्रजनयति तस्मान्मिथुनात्प्रजननादन्ततो यज्ञस्येमाः प्रजाः प्रजायन्ते
तस्मात्पात्नीवतं गृह्णाति ॥९॥ तं वा उपांशुपात्रेण गृह्णाति । यदि सावित्रमुपां-
शुपात्रेण गृह्णीयादन्तर्यामपात्रेणैतं यदि सावित्रमन्तर्यामपात्रेण गृह्णीयादुपांशुपा-
त्रेणैतं समानं ह्येतद्यदुपांश्वन्तर्यामौ प्राणो हि यो वै प्राणः स उदानो वृषा
वै प्राणो योषा पत्नी मिथुनमेवैतत्प्रजननं क्रियते ॥१०॥ तं वा अपुरोरुक्कं गृ-
ह्णाति । वीर्यं वै पुरोरुक्स्त्रीषु वीर्यं दधानीति तस्मादपुरोरुक्कं गृह्णाति ॥११॥
अथातो गृह्णात्येव । उपयामगृहीतोऽसि बृहस्पतिसुतस्य देव सोम त इति ब्रह्म

वै बृहस्पतिर्ब्रह्मप्रसूतस्य देव सोम तऽइत्येवैतदाहेन्दोरिन्द्रियावत इति वीर्य-
वत इत्येवैतदाह यदाहेन्दोरिन्द्रियावत इति पत्नीवतो ग्रहां२॥ऽऋध्यासमिति न
सम्प्रति पत्नीभ्यो गृह्णाति नेत्स्त्रीषु वीर्यं दधानीति तस्मान्न सम्प्रति पत्नीभ्यो गृ-
ह्णाति ॥१२॥ अथ यः प्रचरण्याꣳ सꣳस्रवः परिशिष्टो भवति । तेनैनꣳ श्रीणाति
समर्धयति वाऽअन्यान्ग्रहाञ्छ्रीणन्नथैतं व्यर्धयति वज्रो वाऽआज्यमेतेन वै देवा
वज्रेणाज्येनाघ्नन्नेव पत्नीर्निराह्णुवंस्ता हता निरष्टा नात्मनश्चनैशत न दायस्य
चनैशत तथोऽएवैष एतेन वज्रेणाज्येन घ्नन्त्येव पत्नीर्निरह्णोति ता हता नि-
रष्टा नात्मनश्चनेशते न दायस्य चनेशते ॥१३॥ स श्रीणाति । अहं परस्तादह-
मवस्ताद्यदन्तरिक्षं तदु मे पिताभूत् । अहꣳ सूर्यमुभयतो ददर्शाहं देवानां परमं
गुहा यदिति स यदहमहमिति श्रीणाति पुꣳस्वेवैतद्वीर्यं दधाति ॥१४॥ अथाहा-
ग्नीत्पात्नीवतस्य यजेति । वृषा वाऽअग्नीद्योषा पत्नी मिथुनमेवैतत्प्रजननं क्रियते
स जुहोत्यग्ना३ऽइ पत्नीवन्निति वृषा वाऽअग्निर्योषा पत्नी मिथुनमेवैतत्प्रजननं
क्रियते ॥१५॥ सजूर्देवेन त्वष्ट्रेति । त्वष्टा वै सिक्तꣳ रेतो विकरोति तदेष एवै-
तत्सिक्तꣳ रेतो विकरोति सोमं पिब स्वाहेत्युत्तरार्धे जुहोति या इतरा आहुत-
यस्ते देवा अथैताः पत्न्य एवमिव हि मिथुनं क्लृप्तमुत्तरतो हि स्त्री पुमाꣳसमुपशे-
तऽआहरत्यध्वर्युरग्नीधे भक्षꣳ स आहाध्वर्यऽउप मा ह्वयस्वेति तं न प्रत्युपह्वयेत
को हि हतस्य निरष्टस्य प्रत्युपह्ववस्तं वै प्रत्येवोपह्वयेत जुह्वत्यस्याग्नौ वषट्कु-
र्वन्ति तस्मात्प्रत्येवोपह्वयेत ॥१६॥ अथ सम्प्रेष्यति । अग्नीन्नेष्टुरुपस्थमासीद नेष्टः
पत्नीमुदानयोद्गात्रा संख्यापयोन्नेतर्होतुश्चमसमनून्नय सोमं मातिरीरिच इति यद्य-
ग्निष्टोमः स्यात् ॥१७॥ यद्युक्थ्यः स्यात् । सोमं प्रभावयेति ब्रूयात्स बिभ्रदेवैत-
त्पात्रमग्नीन्नेष्टुरुपस्थमासीदत्यग्निर्वाऽएष निदानेन यदाग्नीध्रो योषा नेष्टा वृषा वा
ऽअग्नीद्योषा नेष्टा मिथुनमेवैतत्प्रजननं क्रियतऽउदानयति नेष्टा पत्नीं तामुद्गात्रा

संख्यापयति प्रजापतिर्वृषासि रेतोधा रेतो मयि धेहीति प्रजापतिर्वाऽउद्गाता यो-
षा पत्नी मिथुनमेवैतत्प्रजननं क्रियते ॥१८॥ ब्राह्मणम् ॥ ४ [४. २.] ॥ ॥

पशवो वै देवानां छन्दाᳬसि । तद्यथेदं पशवो युक्ता मनुष्येभ्यो वहन्त्येवं छन्दाᳬसि युक्तानि देवेभ्यो यज्ञं वहन्ति तद्यत्र छन्दाᳬसि देवान्त्समतर्पयन्नथ छन्दाᳬसि देवाः समतर्पयंस्तदतस्तत्प्रागभूद्यच्छन्दाᳬसि युक्तानि देवेभ्यो यज्ञमवाक्षुर्यदेनान्त्समतीतृपन् ॥१॥ अथ हारियोजनं गृह्णाति । छन्दाᳬसि वै हारियोजनश्छन्दाᳬस्येवैतत्संतर्पयति तस्माद्धारियोजनं गृह्णाति ॥२॥ तं वाऽअतिरिक्तं गृह्णाति । यदा हि शम्योराहाथैनं गृह्णातीदं वै देवा अथ छन्दाᳬस्यतिरिक्तान्यथ मनुष्या अथ पशवोऽतिरिक्तास्तस्मादतिरिक्तं गृह्णाति ॥३॥ द्रोणकलशे गृह्णाति । वृत्रो वै सोम आसीत्तं यत्र देवा अघ्नंस्तस्य मूर्धोद्ववर्त स द्रोणकलशोऽभवत्तस्मिन्यावान्वा यावान्वा रसः समस्रवदतिरिक्तो वै स आसीदतिरिक्त एष ग्रहस्तदतिरिक्तऽएवैतदतिरिक्तं दधाति तस्माद्द्रोणकलशे गृह्णाति ॥४॥ तं वाऽअपुरोरुक्कं गृह्णाति । छन्दोभ्यो ह्येनं गृह्णाति स यदेवैनं छन्दोभ्यो गृह्णाति तेनो हास्यैष पुरोरुग्मान्भवति तस्मादपुरोरुक्कं गृह्णाति ॥५॥ अथातो गृह्णात्येव । उपयामगृहीतोऽसि हरिरसि हारियोजनो हरिभ्यां त्वेत्यृक्सामे वै हरीऽऋक्सामाभ्याᳬ ह्येनं गृह्णाति ॥६॥ अथ धाना आवपति । हर्योर्धाना स्थ सहसोमा इन्द्रायेति तद्यदेवात्र मितं च छन्दोऽमितं च तदेवैतत्सर्वं भक्षयति ॥७॥ तस्योन्नेताश्रावयति । अतिरिक्तो वाऽउन्नेता न ह्येषोऽन्यस्याश्रावयत्यतिरिक्त एष ग्रहस्तदतिरिक्तऽएवैतदतिरिक्तं दधाति तस्मादुन्नेताश्रावयति ॥८॥ मूर्धन्नभिनिधायाश्रावयति । मूर्धा ह्यस्यैषोऽथाह धानासोमेभ्योऽनुब्रूहीत्याश्राव्याह धानासोमान्प्रस्थितान्प्रेष्येति वषट्कृते जुहोत्यनुवषट्कृतेऽथ धाना विलिप्सन्ते भक्षाय ॥९॥ तद्धैके । होत्रे द्रोणकलशं प्रतिपराहरन्ति वषट्कर्तुर्भक्ष इति वदन्तस्तदु तथा न

कुर्याद्यथाचमस वाऽअन्ये भक्षा अथैषोऽतिरिक्तस्तस्मादेतस्मिन्त्सर्वेषामेव भक्षस्त-
स्माद्धाना विलिप्सन्ते भक्षाय ॥१०॥ ता न दद्भिः खादेयुः । पशवो वाऽएते ने-
त्पशून्प्रमृदं करवामहाऽइति प्राणैरेव भक्षयन्ति यस्तेऽअश्वसनिर्भक्षो यो गोस-
निरिति पशवो ह्येते तस्मादाह यस्तेऽअश्वसनिर्भक्षो यो गोसनिरिति तस्य त
ऽइष्टयजुष स्तुतस्तोमस्येतीष्टानि हि यजूꣳषि भवन्ति स्तुता स्तोमाः शस्तोक्थ-
स्येति शस्तानि ह्युक्थानि भवन्त्युपहूतस्योपहूतो भक्षयामीत्युपहूतस्य ह्येतदु-
पहूतो भक्षयति ॥११॥ ता नाग्नौ प्रकिरेयुः । नेदुच्छिष्टमग्नौ जुहवामेत्युत्तरवेदा-
वेव निवपन्ति तथा न बहिर्धा यज्ञाद्भवन्ति ॥१२॥ अथ पूर्णपात्रान्त्समवमृशन्ति
। यानि केऽप्सुषोमा इत्याचक्षते यथा वै युक्तो वहेदेवमेते यऽआर्त्विज्यं कुर्वन्त्युत
वै युक्तः क्षणुते वा वि वा लिशते शान्तिरापो भेषजं तद्यदेवात्र क्षण्वते वा वि
वा लिशन्ते शान्तिरापस्तदद्भिः शान्त्या शमयन्ते तदद्भिः संदधते तस्मात्पूर्णपात्रान्त्स-
मवमृशन्ति ॥१३॥ ते समवमृशन्ति । सं वर्चसा पयसा सं तनूभिरगन्महि मनसा
सꣳ शिवेन । त्वष्टा सुदत्रो विदधातु रायोऽनुमार्ष्टु तन्वो यद्विलिष्टमिति यद्विवृढं
तत्संदधते ॥१४॥ अथ मुखान्युपस्पृशन्ते । द्वयं तद्यस्मान्मुखान्युपस्पृशन्तेऽमृतं वा
ऽआपोऽमृतेनैवैतत्सꣳस्पृशन्तऽएतदु चैवैतत्कर्मात्मन्कुर्वते तस्मान्मुखान्युपस्पृश-
न्ते ॥१५॥ ब्राह्मणम् ॥५ [४. ३.] ॥ ॥

तानि वाऽएतानि । नव समिष्टयजूꣳषि जुहोति तद्यन्नव समिष्टयजूꣳषि जु-
होति नव वाऽअमूर्बहिष्पवमाने स्तोत्रिया भवन्ति सैषोभयतो न्यूना विराड्
प्रजननायैतस्माद्वाऽउभयतो न्यूनात्प्रजननात्प्रजापतिः प्रजाः ससृजऽइतश्चोर्ध्वा इत-
श्चावाचीस्तथोऽएवैष एतस्मादुभयत एव न्यूनात्प्रजननात्प्रजाः सृजत इतश्चोर्ध्वा
इतश्चावाचीः ॥१॥ हिङ्कार स्तोत्रियाणां दशमः । स्वाहाकार एतेषां तथो हा-
स्यैषा न्यूना विराड्दशंदशिनी भवति ॥२॥ अथ यस्मात्समिष्टयजूꣳषि नाम । या

वाऽएतेन यज्ञेन देवता ह्वयति याभ्य एष यज्ञस्तायते सर्वा वै तत्ताः समिष्टा भवन्ति तद्यत्तासु सर्वासु समिष्टास्वथैतानि जुहोति तस्मात्समिष्टयजूꣳषि नाम ॥३॥ अथ यस्मात्समिष्टयजूꣳषि जुहोति । रिरिचानऽइव वाऽएतदीजानस्यात्मा भवति यद्ध्यस्य भवति तस्य हि ददाति तमेवातस्त्रिभिः पुनराप्याययति ॥४॥ अथ यान्युत्तराणि त्रीणि जुहोति । या वाऽएतेन यज्ञेन देवता ह्वयति याभ्य एष यज्ञस्तायतऽउप हैव ता आसते यावन्न समिष्टयजूꣳषि जुह्वतीमानि नु नो जुह्वतीति ता एवैतद्यथायथं व्यवसृजति यत्र-यत्रासां चरणं तदनु ॥५॥ अथ यान्युत्तमानि त्रीणि जुहोति । यज्ञं वाऽएतदजीजनत यदेनमतत तं जनयित्वा यत्रास्य प्रतिष्ठा तत्प्रतिष्ठापयति तस्मात्समिष्टयजूꣳषि जुहोति ॥६॥ स जुहोति । समिन्द्र णो मनसा नेषि गोभिरिति मनसेति तन्मनसा रिरिचानमाप्याययति गोभिरिति तद्गोभी रिरिचानमाप्याययति सꣳ सूरिभिर्मघवन्त्सꣳ स्वस्त्या । सं ब्रह्मणा देवकृतं यदस्तीति ब्रह्मणेति तद्ब्रह्मणा रिरिचानमाप्याययति सं देवानाꣳ सुमतौ यज्ञियानाꣳ स्वाहा ॥७॥ सं वर्चसा । पयसा सं तनूभिरिति वर्चसेति तद्वर्चसा रिरिचानमाप्याययति पयसेति रसो वै पयस्तत्पयसा रिरिचानमाप्याययत्यगन्महि मनसा सꣳ शिवेन । त्वष्टा सुदत्रो विदधातु रायोऽनुमार्ष्टु तन्वो यद्विलिष्टमिति विवृढं तत्संदधाति ॥८॥ धाता रातिः । सवितेदं जुषन्तां प्रजापतिर्निधिपा देवोऽअग्निः । त्वष्टा विष्णुः प्रजया सꣳरराणा यजमानाय द्रविणं दधात स्वाहेति तद्देव रिरिचानं पुनराप्याययति यदाह यजमानाय द्रविणं दधात स्वाहेति ॥९॥ सुगा वो देवाः । सदना अकर्म यऽआजग्मेदꣳ सवनं जुषाणा इति सुगानि वो देवाः सदनान्यकर्म यऽआगन्तेदꣳ सवनं जुषाणा इत्येवैतदाह भरमाणा वहमाना हवीꣳषीति तद्देवता व्यवसृजति भरमाणा अह ते यन्तु येऽवाहना वहमाना उ ते यन्तु ये वाहनवन्त इत्येवैतदाह तस्मादाह भरमाणा वहमाना हवीꣳष्यस्मे

धत्त वसवो वसूनि स्वाहा ॥१०॥ यां२॥ऽआवहः । उशतो देव देवांस्तान्प्रेरय स्वेऽअग्ने सधस्थऽइत्यग्निं वाऽआहामून्देवानावहामून्देवानावहेति तमेवैतदाह यान्देवानावाक्षीस्तान्गमय यत्र-यत्रैषां चरणं तदन्विति जक्षिवाꣳसः पपिवाꣳसश्च विश्वऽइति जक्षिवाꣳसो हि पशुं पुरोडाशं भवन्ति पपिवाꣳस इति पपिवाꣳसो हि सोमꣳ राजानं भवन्ति तस्मादाह जक्षिवाꣳसः पपिवाꣳसश्च विश्वेऽसुं घर्मꣳ स्वरातिष्ठतानु स्वाहेति तद्धैव देवता व्यवसृजति ॥११॥ वयꣳ हि त्वा । प्रयति यज्ञेऽअस्मिन्नग्ने होतारमवृणीमहीह । ऋधगया ऋधगुताशमिष्ठाः प्रजानन्यज्ञमुपयाहि विद्वान्स्वाहेत्यग्निमेवैतया विमुञ्चत्यग्निं व्यवसृजति ॥१२॥ देवा गातुविद इति । गातुविदो हि देवा गातुं वित्त्वेति यज्ञं वित्त्वेत्येवैतदाह गातमितेति तदेतेन यथायथं व्यवसृजति मनसस्पतऽइमं देव यज्ञꣳ स्वाहा वाते धा इत्ययं वै यज्ञो योऽयं पवते तदिमं यज्ञꣳ सम्भृत्यैतस्मिन्यज्ञे प्रतिष्ठापयति यज्ञेन यज्ञꣳ संदधाति तस्मादाह स्वाहा वाते धा इति ॥१३॥ यज्ञ यज्ञं गच्छ । यज्ञपतिं गच्छ स्वां योनिं गच्छ स्वाहेति तत्प्रतिष्ठितमेवैतद्यज्ञꣳ सन्तꣳ स्वायां योनौ प्रतिष्ठापयत्येष ते यज्ञो यज्ञपते सहसूक्तवाकः सर्ववीरस्तं जुषस्व स्वाहेति तत्प्रतिष्ठितमेवैतद्यज्ञꣳ सन्तꣳ सहसूक्तवाकꣳ सर्ववीरं यजमानेऽन्ततः प्रतिष्ठापयति ॥१४॥ ब्राह्मणम् ॥ ६ [४. ४.] ॥ ॥तृतीयः प्रपाठकः॥ कण्डिकासंख्या १२२॥॥

स वाऽअवभृथमभ्यवैति । तद्यदवभृथमभ्यवैति यो वाऽअस्य रसोऽभूदाहुतिभ्यो वाऽअस्य तमजीजनदथैतच्छरीरं तस्मिन्न रसोऽस्ति तन्न परास्यं तदपोऽभ्यवहरन्ति रसो वाऽआपस्तदस्मिन्नेतꣳ रसं दधाति तदेनमेतेन रसेन संगमयन्ति तदेनमतो जनयति स एनं जात एव सञ्जनयति तद्यदपोऽभ्यवहरन्ति तस्मादवभृथः ॥१॥ अथ समिष्टयजूꣳषि जुहोति । समिष्टयजूꣳषि ह्येवान्तो यज्ञस्य स जुह्वैव समिष्टयजूꣳषि यदेतमभितो भवति तेन चावालमुपसमायन्ति स कृष्णविषा-

णां च मेखलां च चात्वाले प्रास्यति ॥२॥ माहिर्भूर्मा पृदाकुरिति । असौ वा
ऽऋजीषस्य स्वगाकारो यदेनदपोऽभ्यवहरन्त्यथैष एवैतस्य स्वगाकारो रज्जुरिव
हि सर्पाः कूपा-इव हि सर्पाणामायतनान्यस्ति वै मनुष्याणां च सर्पाणां च वि-
भ्रातृव्यमिव नेत्सदतः सम्भवदिति तस्मादाह माहिर्भूर्मा पृदाकुरिति ॥३॥ अथ
वाचयति । उरुꣳ हि राजा वरुणश्चकार सूर्याय पन्थामन्वेतवाऽउऽइति यथायमु-
रुरभयोऽनाष्ट्रः सूर्याय पन्था एवं मेऽयमुरुरभयोऽनाष्ट्रः पन्था अस्त्वित्येवैतदाह
॥४॥ अपदे पादा प्रतिधातवेऽकरिति । यदि ह वाऽअप्यपाद्भवत्यलमेव प्रतिक्र-
मणाय भवत्युतापवक्ता हृदयाविधश्चिदिति तदेनꣳ सर्वस्माद्धृद्यादेनसः पाप्मनः
प्रमुञ्चति ॥५॥ अथाह साम गायेति । साम ब्रूहीति वा गायेति त्वेव ब्रूयाद्गाय-
न्ति हि साम तद्यत्साम गायति नेदिदं बहिर्धा यज्ञाच्छरीरं नाष्ट्रा रक्षाꣳसि हि-
नसन्निति साम हि नाष्ट्राणाꣳ रक्षसामपहन्ता ॥६॥ अग्नियां गायति । अग्निर्हि
रक्षसामपहन्तातिच्छन्दसि गायत्येषा वै सर्वाणि छन्दाꣳसि यदतिच्छन्दास्तस्मादति-
च्छन्दसि गायति ॥७॥ स गायति । अग्निष्टपति प्रतिदहत्यहावोऽहावऽइति त-
न्नाष्ट्रा एवैतद्रक्षाꣳस्यतोऽपहन्ति ॥८॥ तऽउदञ्चो निष्क्रामन्ति । जघनेन चात्वा-
लमग्रेणाग्नीध्रꣳ स यस्यां ततो दिश्यापो भवन्ति तद्यन्ति ॥९॥ स यः स्यन्दमाना-
नाꣳ स्थावरो ह्रदः स्यात् । तमपोऽभ्यवेयादेता वाऽअपां वरुणगृहीता याः स्य-
न्दमानानां न स्यन्दन्ते वरुण्यो वाऽअवभृथो निर्वरुणतायै यद्यु ता न विन्देदपि
या एव काश्चापोऽभ्यवेयात् ॥१०॥ तमपोऽवक्रमयन्वाचयति । नमो वरुणाया-
भिष्ठितो वरुणस्य पाश इति तदेनꣳ सर्वस्माद्वरुणपाशात्सर्वस्माद्वरुण्यात्प्रमुञ्चति
॥११॥ अथ चतुर्गृहीतमाज्यं गृहीत्वा । समिधं प्रास्याभिजुहोत्यग्नेरनीकमप आ-
विवेशापां नपात्प्रतिरक्षन्नसुर्यम् । दमे-दमे समिधं यक्ष्यग्ने प्रति ते जिह्वा घृतमु-
च्चरण्यत्स्वाहेति ॥१२॥ अग्नेर्ह वै देवाः । यावद्वा यावद्वाप्सु प्रवेशयां चक्रुर्नेदतो

नाष्ट्रा रक्षाꣳस्युपोत्तिष्ठानित्यग्निर्हि रक्षसामपहन्ता तमेतया च समिधैतया चाहु-त्या समिन्द्धे समिद्धे देवेभ्यो जुहवानीति ॥१३॥ अथापरं चतुर्गृहीतमाज्यं गृहीत्वा । आश्राव्याह समिधो यजेति सोऽपबर्हिषश्चतुरः प्रयाजान्यजति प्रजा वै बर्हिर्वरुण्यो वाऽअवभृथो नेत्प्रजा वरुणो गृह्णादिति तस्मादपबर्हिषश्चतुरः प्रयाजान्यजति ॥१४॥ अथ वारुण एककपालः पुरोडाशो भवति । यो वाऽअस्य रसोऽभूदाहुतिभ्यो वाऽअस्य तमजीजनदथैतच्छरीरं तस्मिन्न रसोऽस्ति रसो वै पुरोडाशस्तदस्मिन्नेतꣳ रसं दधाति तदेनमेतेन रसेन संगमयति तदेनमतो जनयति स एनं जात एव सञ्जनयति तस्माद्वारुण एककपालः पुरोडाशो भवति ॥१५॥ स आज्यस्योपस्तीर्य । पुरोडाशस्यावद्यन्नाह वरुणायानुब्रूहीत्यत्र हैक ऽऋजीषस्य द्विरवद्यन्ति तदु तथा न कुर्याच्छरीरं वाऽएतद्भवति नालमाहुत्यै द्विरवद्यति सकृदभिघारयति प्रत्यनक्त्यवदानेऽआश्राव्याह वरुणं यजेति वषट्कृते जुहोति ॥१६॥ अथाज्यस्योपस्तीर्य । पुरोडाशमवद्यदाहाग्नीवरुणाभ्यामनुब्रूहीति तत्स्विष्टकृते स यन्नाग्नयऽइत्याह नेदग्निं वरुणो गृह्णादिति स यद्यमुत्रऽर्जीषस्य द्विरवद्येदथात्र सकृद्यद्यु न नाद्रियेताथोपरिष्टाद्विराज्यस्याभिघारयत्याश्राव्याहाग्नीवरुणौ यजेति वषट्कृते जुहोति ॥१७॥ ता वाऽएताः । षडाहुतयो भवन्ति षड्वाऽऋतवः संवत्सरस्य संवत्सरो वरुणस्तस्मात्षडाहुतयो भवन्ति ॥१८॥ एतदादित्यानामयनम् । आदित्यानीमानि यजूꣳषीत्याहुः स यावदस्य वशः स्यादेवमेव चिकीर्षेद्यद्युऽएनमितरथा यजमानः कर्तवै ब्रूयादितरथो तर्हि कुर्यादेतानेव चतुरः प्रयाजानपबर्हिषो यजेद्द्वावाज्यभागौ वरुणमग्नीवरुणौ द्वावनुयाजावपबर्हिषौ तद्दश दशाक्षरा वै विराड्विराडु यज्ञस्तद्विराजमेवैतद्यज्ञमभिसम्पादयति ॥१९॥ एतदङ्गिरसामयनम् । अतोऽन्यतरत्कृत्वा यस्मिन्कुम्भऽऋजीषं भवति तं प्रप्लावयति समुद्रे ते हृदयमप्स्वन्तरित्यापो वै समुद्रो रसो वाऽआपस्तदस्मिन्नेतꣳ रसं दधाति

तदेनमेतेन रसेन संगमयति तदेनमतो जनयति स एनं जात एव सञ्जनयति सं त्वा विशन्त्वोषधीरुताप इति तदस्मिन्नुभयꣳ रसं दधाति यश्चौषधिषु यश्चाप्सु यज्ञस्य त्वा यज्ञपते सूक्तोक्तौ नमोवाके विधेम यत्स्वाहेति तद्यदेव यज्ञस्य साधु तदेवास्मिन्नेतद्दधाति ॥२०॥ अथानुसृज्योपतिष्ठते । देवीराप एष वो गर्भ इत्यपाꣳ ह्येष गर्भस्तꣳ सुप्रीतꣳ सुभृतं बिभृतेति तदेनमद्भ्यः परिददाति गुप्त्यै देव सोमैष ते लोक इत्यापो ह्येतस्य लोकस्तस्मिञ्छं च वक्ष्व परि च वक्ष्वेति तस्मिन्नः शं चैधि सर्वाभ्यश्च न आर्तिभ्यो गोपायेत्येवैतदाह ॥२१॥ अथोपमारयति । अवभृथ निचुम्पुण निचेरुरसि निचुम्पुणः । अव देवैर्देवकृतमेनो यासिषमव मर्त्यैर्मर्त्यकृतमित्यव ह्येतद्देवैर्देवकृतमेनोऽयासीत्सोमेन राज्ञाव मर्त्यैर्मर्त्यकृतमित्यव ह्येतन्मर्त्यैर्मर्त्यकृतमेनोऽयासीत्पशुना पुरोडाशेन पुरुराव्णो देव रिषस्पाहीति सर्वाभ्यो मार्तिभ्यो गोपायेत्येवैतदाह ॥२२॥ अथाभ्यवेत्य स्नातः । अन्योऽन्यस्य पृष्ठे प्रधावतस्तावन्ये वाससी परिधायोदेतः स यथाहिस्त्वचो निर्मुच्येतेवꣳ सर्वस्मात्पाप्मनो निर्मुच्यते तस्मिन्न तावच्चनैनो भवति यावत्कुमारेऽदति स येनैव निष्क्रामन्ति तेन पुनरायन्ति पुनरेत्याहवनीये समिधमभ्यादधाति देवानाꣳ समिदसीति यजमानमेवैतया समिन्द्धे देवानाꣳ हि समिद्धिमनु यजमानः समिध्यते ॥२३॥ ब्राह्मणम् ॥ १ [४. ५.] ॥ ॥ चतुर्थोऽध्यायः ॥२८॥ ॥

आदित्येन चरुणोदयनीयेन प्रचरति । तद्यदादित्यश्चरुर्भवति यद्वैनामदो देवा अब्रुवंस्त्वय्येव प्रायणीयस्त्वय्युदयनीय इति तमेवास्या एतदुभयत्र भागं करोति ॥१॥ स यदमुत्र राजानं क्रेष्यन्नुपप्रैष्यन्यजते । तस्मात्तत्प्रायणीयं नामाथ यदत्रावभृथादुदेत्य यजते तस्मादेतदुदयनीयं नाम तद्वा एतत्समानमेव हविरदित्या एव प्रायणीयमदित्या उदयनीयमियꣳ ह्येवादितिः ॥२॥ स वै पथ्यामेवाग्रे स्वस्तिं यजति । तद्देवा अप्रज्ञायमानं वाचैव प्रत्यपद्यन्त वाचा हि मुग्धं प्रज्ञायते

ऽथात्र प्रजाते यथापूर्वं करोति ॥३॥ सोऽग्निमेव प्रथमं यजति । अथ सोममथ सवितारमथ पथ्यां स्वस्तिमथादितिं वाग्वै पथ्या स्वस्तिरियमदितिरस्यामेव तद्देवा वाचं प्रत्यष्ठापयन्त्सेयं वागस्यां प्रतिष्ठिता वदति ॥४॥ अथ मैत्रावरुणीं वशामनूबन्ध्यामालभते । स एषोऽन्य एव यज्ञस्तायते पशुबन्ध एव समिष्टयजूंषि ह्येवान्तो यज्ञस्य ॥५॥ तद्यन्मैत्रावरुणी वशा भवति । यद्वाऽईजानस्य स्विष्टं भवति मित्रोऽस्य तद्गृह्णाति यद्वस्य दुरिष्टं भवति वरुणोऽस्य तद्गृह्णाति ॥६॥ तदाहुः । क्वेजानोऽभूदिति तद्यदेवास्यात्र मित्रः स्विष्टं गृह्णाति तदेवास्माऽएतया प्रीतः प्रत्यवसृजति यदु चास्य वरुणो दुरिष्टं गृह्णाति तच्चैवास्माऽएतया प्रीतः स्विष्टं करोति तदु चास्मै प्रत्यवसृजति सोऽस्यैष स्व एव यज्ञो भवति स्वं सुकृतम् ॥७॥ तद्यन्मैत्रावरुणी वशा भवति । यत्र वै देवा रेतः सिक्तं प्राजनयंस्तदाग्निमारुतमित्युक्थं तस्मिंस्तद्व्याख्यायते यथा तद्देवा रेतः प्राजनयंस्ततोऽङ्गाराः समभवन्नङ्गारेभ्योऽङ्गिरसस्तदन्वन्ये पशवः ॥८॥ अथ यदासाः पांसवः पर्यशिष्यन्त । ततो गर्दभः समभवत्तस्माद्यत्र पांसुलं भवति गर्दभस्थानमिव बतेत्याहुरथ यदा न कश्चन रसः पर्यशिष्यत तत एषा मैत्रावरुणी वशा समभवत्तस्मादेषा न प्रजायते रसाद्धि रेतः सम्भवति रेतसः पशवस्तद्यदन्ततः समभवत्तस्मादन्तं यज्ञस्यानुवर्तते तस्माद्वाऽएषात्र मैत्रावरुणी वशावक्लृप्ततमा भवति यदि वशां न विन्देदप्युक्षवश एव स्यात् ॥९॥ अथैतरं विश्वे देवा अमरीमृत्स्यन्त । ततो वैश्वदेवी समभवदथ बार्हस्पत्या सोऽन्तोऽन्तो हि बृहस्पतिः ॥१०॥ स यः सहस्रं वा भूयो वा दद्यात् । स एनाः सर्वा आलभेत सर्वं वै तस्याप्तं भवति सर्वं जितं यः सहस्रं वा भूयो वा ददाति सर्वमेता एवमेव यथापूर्वं मैत्रावरुणीमेवाग्रेऽथ वैश्वदेवीमथ बार्हस्पत्याम् ॥११॥ अथो ये दीर्घसत्त्रमासीरन् । संवत्सरं वा भूयो वा तऽएनाः सर्वा आलभेरन्त्सर्वं वै तेषामाप्तं भवति सर्वं जितं

ये दीर्घसत्त्रमासते संवत्सरं वा भूयो वा सर्वमेता एवमेव यथापूर्वम् ॥१२॥ अथोदवसानीययेष्ट्या यजते । स आग्नेयं पञ्चकपालं पुरोडाशं निर्वपति तस्य पञ्चपदाः पङ्क्तयो याज्यानुवाक्या भवन्ति यातयामेव वाऽएतदीजानस्य यज्ञो भवति सोऽस्मात्पराङिव भवत्यग्निर्वै सर्वे यज्ञा अग्नौ हि सर्वान्यज्ञांस्तन्वते ये च पाक यज्ञा ये चेतरे तद्यज्ञमेवैतत्पुनरारभते तथास्यायातयामा यज्ञो भवति तथोऽअस्मान्न पराङ् भवति ॥१३॥ तद्यत्पञ्चकपालः पुरोडाशो भवति । पञ्चपदाः पङ्क्तयो याज्यानुवाक्याः पाङ्क्तो वै यज्ञस्तद्यज्ञमेवैतत्पुनरारभते तथास्यायातयामा यज्ञो भवति तथोऽअस्मान्न पराङ् भवति ॥१४॥ तस्य हिरण्यं दक्षिणा । आगेयो वाऽएष यज्ञो भवत्यग्ने रेतो हिरण्यं तस्माद्धिरण्यं दक्षिणानड्वान्वा स हि वहेनाग्नेयोऽग्निदग्धमिव ह्यस्य वहं भवति ॥१५॥ अथो चतुर्गृहीतमेवाज्यं गृहीत्वा । वैष्णव्यर्चा जुहोत्युरु विष्णो विक्रमस्वोरु क्षयाय नस्कृधि । घृतं घृतयोने पिब प्र-प्र यज्ञपतिं तिर स्वाहेति यज्ञो वै विष्णुस्तद्यज्ञमेवैतत्पुनरारभते तथास्यायातयामा यज्ञो भवति तथोऽअस्मान्न पराङ् भवति तन्नो यद्धकुर्यात्तद्ध्यानादक्षिणꣳ हविः स्यादिति ह्याहुरथ यदेवैषोदवसानीयेष्टिः संतिष्ठतेऽथ सायमाहुतिं जुहोति कालऽएव प्रातराहुतिम् ॥१६॥ ब्राह्मणम् ॥२ [५. १.] ॥ ॥

वशामालभन्ते । तामालभ्य संज्ञपयन्ति संज्ञप्याह वपामुत्खिदेत्युत्खिद्य वपामनुमर्शं गर्भमिष्टवै ब्रूयात्स यदि न विन्दन्ति किमाद्रियेरन्यद्यु विन्दन्ति तत्र प्रायश्चित्तिः क्रियते ॥१॥ न वै तदवकल्पते । यदेकां मन्यमाना एकयेवैतया चरेयुर्यद्वे मन्यमाना द्वाभ्यामिव चरेयु स्थालीं चैवोष्णीषं चोपकल्पयितवै ब्रूयात् ॥२॥ अथ वपया चरन्ति । यथैव तस्यै चरणं वपया चरित्वाध्वर्युश्च यजमानश्च पुनरेतः स आहाध्वर्युर्निरूहैतं गर्भमिति तꣳ ह नोदरतो निरूहेदार्ताया वै मृताया उदरतो निरूहन्ति यदा वै गर्भः समृद्धो भवति प्रजननेन वै स तर्हि प्रत्यैतीति

तमपि विरुह्य श्रोणी प्रत्यञ्चं निरूहतेत्वै ब्रूयात् ॥३॥ तं निरुह्यमाणमभिमन्त्रयते । एजतु दशमास्यो गर्भो जरायुणा सहेति स यदाहैजत्विति प्राणमेवास्मिन्नेतद्दधाति दशमास्य इति यदा वै गर्भः समृद्धो भवत्यथ दशमास्यस्तमेतदप्यदशमास्यꣳ सन्तं ब्रह्मणैव यजुषा दशमास्यं करोति ॥४॥ जरायुणा सहेति । तद्यथा दशमास्यो जरायुणा सहेयादेवमेतदाह यथायं वायुरेजति यथा समुद्र एजतीति प्राणमेवास्मिन्नेतद्दधात्येवायं दशमास्योऽअस्रज्जरायुणा सहेति तद्यथा दशमास्यो जरायुणा सह स्रꣳसेतैवमेतदाह ॥५॥ तदाहुः । कथमेतं गर्भं कुर्यादित्यङ्गादङ्गाद्धैवास्यावद्येयुर्यथैवेतरेषामवदानानामवदानं तदु तथा न कुर्यादुत ह्येषोऽविकृताङ्गो भवत्यधस्तादिव ग्रीवा अपिकृत्यैतस्याꣳ स्थाल्यामेतं मेधꣳ श्चोतयेयुः सर्वेभ्यो वाऽअस्यैषोऽङ्गेभ्यो मेध श्चोतति तदस्य सर्वेषामेवाङ्गानामवत्तं भवत्यवद्यन्ति वशाया अवदानानि यथैव तेषामवदानम् ॥६॥ तानि पशुश्रपणे श्रपयन्ति । तदेवैतं मेधꣳ श्रपयन्त्युष्णीषेणाविष्ट्य गर्भं पार्श्वतः पशुश्रपणस्योपनिदधाति यदा शृतो भवत्यथ समुद्यावदानान्येवाभिजुहोति नैतं मेधमुद्वासयन्ति पशुं तदेवैतं मेधमुद्वासयन्ति ॥७॥ तं जघनेन चात्वालमन्तरेण यूपं चाग्निं च हरन्ति । दक्षिणतो निधाय प्रतिप्रस्थातावद्यत्यथ स्रुचोरुपस्तृणीतेऽथ मनोतायै हविषोऽनुवाच आहावद्यन्ति वशाया अवदानानां यथैव तेषामवदानम् ॥८॥ अथ प्रचरणीति स्रुग्भवति । तस्यां प्रतिप्रस्थाता मेधायोपस्तृणीते द्विरवद्यति सकृदभिघारयति प्रत्यनक्त्यवदानेऽअथानुवाच आहाश्रावयाह प्रेष्येति वषट्कृतेऽध्वर्युर्जुहोत्यध्वर्योरनु होमं जुहोति प्रतिप्रस्थाता ॥९॥ यस्यै ते यज्ञियो गर्भ इति । अयज्ञिया वै गर्भास्तमेतद्ब्रह्मणैव यजुषा यज्ञियं करोति यस्यै योनिर्हिरण्ययीत्यदो वाऽएतस्यै योनिं विच्छिन्दन्ति यददो निष्कर्षन्त्यमृतमायुर्हिरण्यं तामेवास्या एतदमृतां योनिं करोत्यङ्गान्यहुता यस्य तं मात्रा समजीगमꣳ स्वाहेति यदि पुमान्त्स्याद्यद्यु स्त्री स्यादङ्गा

न्यक्ता यस्यै तां मात्रा समज्ञीगमं स्वाहेति यद्युऽअविज्ञातो गर्भो भवति पुं-
स्कृत्यैव जुहुयात्पुमांसो हि गर्भो अङ्गान्यक्ता यस्य तं मात्रा समज्ञीगमं स्वा-
हेत्यदो वाऽएतं मात्रा विष्वञ्चं कुर्वन्ति यददो निष्कर्षन्ति तमेतद्ब्रह्मणैव यजुषा
समर्ध्य मध्यतो यज्ञस्य पुनर्मात्रा सङ्गमयति ॥ १० ॥ अथाध्वर्युर्वनस्पतिना चरति ।
वनस्पतिनाध्वर्युश्चरित्वा यान्युपभृत्यवदानानि भवन्ति तानि समानयमान आहा-
ग्नये स्विष्टकृतेऽनुब्रूहीत्यत्याक्रामति प्रतिप्रस्थाता स एतं सर्वमेव मेधं गृह्णीते
ऽथोपरिष्टाद्द्विराज्यस्याभिघारयत्याश्राव्याह प्रेष्येति वषट्कृतेऽध्वर्युर्जुहोत्यध्वर्योरनु
होमं जुहोति प्रतिप्रस्थाता ॥ ११ ॥ पुरुदस्मो विषुरूप इन्दुरिति । बहुदान इति
हैतद्यदाह पुरुदस्म इति विषुरूप इति विषुरूपा-इव हि गर्भा इन्दुरन्तर्महिमा-
नमानञ्ज धीर इत्यन्तर्ह्येष मातर्यक्तो भवत्येकपदीं द्विपदीं त्रिपदीं चतुष्पदीमष्टा-
पदीं भुवनानु प्रथन्तां स्वाहेति प्रथयत्येवैनामेतत्सुभूयो ह जयत्यष्टापद्येष्ट्वा यदु
चानष्टापद्या ॥ १२ ॥ तदाहुः । क्वैतं गर्भं कुर्यादिति वृक्षऽएवैनमुद्दध्युरन्तरिक्षाय-
तना वै गर्भा अन्तरिक्षमिवैतद्यद्वृक्षस्तदेनं स्वऽएवायतने प्रतिष्ठापयति तदु वा
ऽआहुर्य एनं तत्रानुव्याहरेद्वृक्षऽएनं मृतमुद्वास्यन्तीति तथा हैव स्यात् ॥ १३ ॥
अप एवैनमभ्यवहरेयुः । आपो वाऽअस्य सर्वस्य प्रतिष्ठा तदेनमप्स्वेव प्रतिष्ठा-
पयति तदु वाऽआहुर्य एनं तत्रानुव्याहरेदप्स्वेव मरिष्यतीति तथा हैव स्यात्
॥ १४ ॥ आखूत्करऽएवैनमुपकिरेयुः । इयं वाऽअस्य सर्वस्य प्रतिष्ठा तदेनमस्या-
मेव प्रतिष्ठापयति तदु वाऽआहुर्य एनं तत्रानुव्याहरेत्क्षिप्रेऽस्मै मृताय श्म-
शानं करिष्यन्तीति तथा हैव स्यात् ॥ १५ ॥ पशुश्रपणऽएवैनं मरुद्भ्यो जुहुयात् ।
अहुतादो वै देवानां मरुतो विडहुतमिवैतद्यदशृतो गर्भ आहवनीयाद्वाऽएष
आहृतो भवति पशुश्रपणात्तथाह न बहिर्धा यज्ञाद्भवति न प्रत्यक्षमिवाहवनीये
देवानां वै मरुतस्तदेनं मरुत्स्वेव प्रतिष्ठापयति ॥ १६ ॥ स हुत्वैव समिष्टयजूंषि ।

प्रथमावशान्तेष्वङ्गारेष्वेतꣳ सोष्णीषं गर्भमादत्ते तं प्राङ् तिष्ठञ्जुहोति मारुत्यर्चा मरुतो यस्य हि क्षये पाथा दिवो विमहसः स सुगोपातमो जन इति न स्वाहाकरोत्यहुतादो वै देवानां मरुतो विडहुतमिवैतद्यदस्वाहाकृतं देवानां वै मरुतस्तदेनं मरुत्स्वेव प्रतिष्ठापयति ॥१७॥ अथाङ्गारैरभिसमूहति । मही द्यौः पृथिवी च न इमं यज्ञं मिमिक्षताम् । पिपृतां नो भरीमभिरिति ॥१८॥ ब्राह्मणम् ॥ ३ [५. २.] ॥ ॥ शतम् २७०० ॥ ॥

इन्द्रो ह वै षोडशी । तं नु सकृदिन्द्रं भूतान्यत्यरिच्यन्त प्रजा वै भूतानि ता हैनेन सदृग्भवमिवासुः ॥१॥ इन्द्रो ह वाऽईक्षां चक्रे । कथं न्वहमिदꣳ सर्वमतितिष्ठेयमर्वागेव मदिदꣳ सर्वꣳ स्यादिति स एतं ग्रहमपश्यत्तमगृह्णीत स इदꣳ सर्वमेवात्यतिष्ठदर्वागेवास्मादिदꣳ सर्वमभवत्सर्वꣳ ह वाऽइदमतितिष्ठत्यर्वागेवास्मादिदꣳ सर्वं भवति यस्यैवं विदुष एतं ग्रहं गृह्णन्ति ॥२॥ तस्मादेतदृषिणाभ्यानूक्तम् । न ते महित्वमनुभूदध द्यौर्यदन्यया स्फिग्या क्षामवस्था इति न ह वाऽअस्यासौ द्यौरन्यतरां चन स्फिगीमनुबभूव तथेदꣳ सर्वमेवात्यतिष्ठदर्वागेवास्मादिदꣳ सर्वमभवत्सर्वꣳ ह वाऽइदमतितिष्ठत्यर्वागेवास्मादिदꣳ सर्वं भवति यस्यैवं विदुष एतं ग्रहं गृह्णन्ति ॥३॥ तं वै हरिवत्यर्चा गृह्णाति । हरिवतीषु स्तुवते हरिवतीरनुशꣳसति वीर्यं वै हर इन्द्रोऽसुराणाꣳ सपत्नानाꣳ समवृङ्क्त तथोऽएवैष एतद्वीर्यꣳ हरः सपत्नानाꣳ संवृङ्क्ते तस्माद्धरिवत्यर्चा गृह्णाति हरिवतीषु स्तुवते हरिवतीरनुशꣳसति ॥४॥ तं वाऽअनुष्टुभा गृह्णाति । गायत्रं वै प्रातःसवनं त्रैष्टुभं माध्यन्दिनꣳ सवने जागतं तृतीयसवनमथातिरिक्तानुष्टुबत्येवैनमेतद्रेचयति तस्मादनुष्टुभा गृह्णाति ॥५॥ तं वै चतुःस्रक्तिना पात्रेण गृह्णाति । त्रयो वाऽइमे लोकास्तदिमानेव लोकांस्तिसृभिः स्रक्तिभिराप्नोत्यत्येवैनं चतुर्थ्या स्रक्त्या रेचयति तस्माच्चतुःस्रक्तिना पात्रेण गृह्णाति ॥६॥ तं वै प्रातःसवने गृह्णी-

यात् । आग्रयणं गृहीत्वा स प्रातःसवने गृहीत ऐतस्मात्कालादुपशेते तदेनᳪ
सर्वाणि सवनान्यतिरेचयति ॥७॥ माध्यन्दिने वैनᳪ सवने गृह्णीयात् । आग्रयणं
गृहीत्वा सोऽ एषा मीमाᳪसैव प्रातःसवनऽ एवैनं गृह्णीयादाग्रयणं गृहीत्वा स प्रा-
तःसवने गृहीत ऐतस्मात्कालादुपशेते ॥८॥ अथातो गृह्णात्येव । आतिष्ठ वृत्र-
हन्रथं युक्ता ते ब्रह्मणा हरी । अर्वाचीनᳪ सु ते मनो ग्रावा कृणोतु वग्नुना ।
उपयामगृहीतोऽसीन्द्राय त्वा षोडशिनऽ एष ते योनिरिन्द्राय त्वा षोडशिनऽ इति
॥९॥ अनया वा । युक्ष्वा हि केशिना हरी वृषणा कक्ष्यप्रा । अथा न इन्द्र
सोमपा गिरामुपश्रुतिं चर । उपयामगृहीतोऽसीन्द्राय त्वा षोडशिनऽ एष ते यो-
निरिन्द्राय त्वा षोडशिनऽ इति ॥१०॥ अथैतस्य स्तोत्रमुपाकरोति । सोमोऽत्यरे-
च्युपावर्तध्वमित्यत्येवैनमेतद्रेचयति तं वै पुरास्तमयादुपाकरोत्यस्तमितेऽनुशᳪसति
तदेनेनाहोरात्रे सन्दधाति तस्मात्पुरास्तमयादुपाकरोत्यस्तमितेऽनुशᳪसति ॥११॥
ब्राह्मणम् ॥४ [५. ३.] ॥ ॥

सर्वे ह वै देवाः । अग्रे सदृशा आसुः सर्वे पुण्यास्तेषाᳪ सर्वेषाᳪ सदृशानाᳪ
सर्वेषां पुण्यानां त्रयोऽकामयन्तातिष्ठावानः स्यामेत्यग्निरिन्द्रः सूर्यः ॥१॥ तेऽर्चन्तः
श्राम्यन्तश्चेरुः । तऽ एतानतिग्राह्यान्ददृशुस्तानत्यगृह्णत तद्यदेनानत्यगृह्णत तस्मा-
दतिग्राह्या नाम तेऽतिष्ठावानोऽभवन्यथैतऽ एतदतिष्ठेवातिष्ठेव ह वै भवति य-
स्यैवं विदुष एतान्ग्रहान्गृह्णन्ति ॥२॥ नो ह वाऽ इदमग्रेऽग्नौ वर्च आस । यदिद-
मस्मिन्वर्चः सोऽकामयतेदं मयि वर्चः स्यादिति स एतं ग्रहमपश्यत्तमगृह्णीत त-
तोऽस्मिन्नेतद्वर्च आस ॥३॥ नो ह वाऽ इदमग्रऽ इन्द्रऽ ओज आस । यदिदमस्मि-
न्नोजः सोऽकामयतेदं मय्योजः स्यादिति स एतं ग्रहमपश्यत्तमगृह्णीत ततोऽस्मि-
न्नेतदोज आस ॥४॥ नो ह वाऽ इदमग्रे सूर्ये भ्राज आस । यदिदमस्मिन्भ्राजः सो
ऽकामयतेदं मयि भ्राजः स्यादिति स एतं ग्रहमपश्यत्तमगृह्णीत ततोऽस्मिन्नेतद्भ्राज

असितानि ह वै तेजाᳪस्येतानि वीर्याण्यात्मन्धत्ते यस्यैवं विदुष एतान्ग्रहान्गृह्णन्ति ॥५॥ तान्वै प्रातःसवने गृह्णीयात् । आग्रयणं गृहीत्वात्मा वाऽआग्रयणो बहु वाऽइदमात्मन एकैकमतिरिक्तं क्लोमहृदयं वय्यन्वत् ॥६॥ माध्यन्दिने वैनान्त्सवने गृह्णीयात् । उक्थ्यं गृहीत्वोपाकरिष्यन्वा पूतभृतोऽयᳪ ह वाऽअस्यैषोऽनिरुक्त आत्मा यदुक्थ्यः सोऽएषा मीमाᳪसैव प्रातःसवनऽएवैनान्गृह्णीयादाग्रयणं गृहीत्वा ॥७॥ ते माहेन्द्रस्यैवानु होमᳪ हूयन्ते । एष वाऽइन्द्रस्य निष्केवल्यो ग्रहो यन्माहेन्द्रोऽप्यस्यैतन्निष्केवल्यमेव स्तोत्रं निष्केवल्यᳪ शस्त्रमिन्द्रो वै यजमानो यजमानस्य वाऽएते कामाय गृह्यन्ते तस्मान्माहेन्द्रस्यैवानु होमᳪ हूयन्ते ॥८॥ अथातो गृह्णात्येव । अग्ने पवस्व स्वपा अस्मे वर्चः सुवीर्यम् । दधद्रयिं मयि पोषम् । उपयामगृहीतोऽस्यग्नये त्वा वर्चसऽएष ते योनिरग्नये त्वा वर्चसे ॥९॥ उत्तिष्ठन्नो जसा । सह पीत्वी शिप्रेऽअवेपयः । सोममिन्द्र चमू सुतम् । उपयामगृहीतोऽसीन्द्राय त्वौजसऽएष ते योनिरिन्द्राय त्वौजसे ॥१०॥ अदृश्रमस्य केतवः । वि रश्मयो जनाँ२॥ऽअनु । भ्राजन्तो अग्नयो यथा । उपयामगृहीतोऽसि सूर्याय त्वा भ्राजायैष ते योनिः सूर्याय त्वा भ्राजायेति ॥११॥ तेषां भक्षः । अग्ने वर्चस्विन्वर्चस्वांस्त्वं देवेष्वसि वर्चस्वानहं मनुष्येषु भूयासमिन्द्रौजिष्ठौजिष्ठस्त्वं देवेष्वस्योजिष्ठोऽहं मनुष्येषु भूयासᳪ सूर्य भ्राजिष्ठ भ्राजिष्ठस्त्वं देवेष्वसि भ्राजिष्ठोऽहं मनुष्येषु भूयासमित्येतानि ह वै भ्राजाᳪस्येतानि वीर्याण्यात्मन्धत्ते यस्यैवं विदुष एतान्ग्रहान्गृह्णन्ति ॥१२॥ तान्वै पृष्ठ्ये षडहे गृह्णीयात् । पूर्वे त्र्यहऽआग्नेयमेव प्रथमेऽहन्नैन्द्रं द्वितीये सौर्यं तृतीयऽएवमेवान्वहम् ॥१३॥ तानु हैकऽउत्तरे त्र्यहे गृह्णन्ति । तदु तथा न कुर्यात्पूर्वऽएवैनांस्त्र्यहे गृह्णीयाद्यद्युत्तरे त्र्यहे ग्रहीष्यन्त्स्यात्पूर्वऽएवैनांस्त्र्यहे गृहीत्वाथोत्तरे त्र्यहे गृह्णीयादेवमेव यथापूर्वं विश्वजिति सर्वपृष्ठऽएकाहऽएव गृह्यन्ते ॥१४॥ ब्राह्मणम् ॥ ५ [५. ४.] ॥॥

एष वै प्रजापतिः । य एष यज्ञस्तायते यस्मादिमाः प्रजाः प्रजाता एतम्वेवाप्येतर्ह्यनु प्रजायन्ते ॥१॥ उपांशुपात्रमेवान्वजाः प्रजायन्ते । तद्धि तत्पुनर्यज्ञे प्रयुज्यते तस्मादिमाः प्रजाः पुनरभ्यावर्तं प्रजायन्ते ॥२॥ अन्तर्यामपात्रमेवान्ववयः प्रजायन्ते । तद्धि तत्पुनर्यज्ञे प्रयुज्यते तस्मादिमाः प्रजाः पुनरभ्यावर्तं प्रजायन्ते ॥३॥ अथ यदेतयोरुभयोः । सह सतोऽपांशुं पूर्वं जुहोति तस्माडु सह सतोऽजाविकस्योभयस्यैवाजाः पूर्वा यन्त्यनूच्योऽवयः ॥४॥ अथ यदुपांशुं हुत्वा । ऊर्ध्वमुन्मार्ष्टि तस्मादिमा अजा अरा डीतरा आक्रममाणा-इव यन्ति ॥५॥ अथ यदन्तर्यामं हुत्वा । अवाञ्चमवमार्ष्टि तस्मादिमा अवयोऽवाचीनशीर्ष्ण्यः खनन्त्य-इव यन्त्येता वै प्रजापतेः प्रत्यक्षतमां यदजावयस्तस्मादेतास्त्रिः संवत्सरस्य विजायमाना द्वौ त्रीनिति जनयन्ति ॥६॥ शुक्रपात्रमेवानु मनुष्याः प्रजायन्ते । तद्धि तत्पुनर्यज्ञे प्रयुज्यते तस्मादिमाः प्रजाः पुनरभ्यावर्तं प्रजायन्तऽएष वै शुक्रो य एष तपत्येष उऽएवेन्द्रः पुरुषो वै पशूनामिन्द्रस्तस्मात्पशूनामीष्टे ॥७॥ ऋतुपात्रमेवान्वेकशफं प्रजायते । तद्धि तत्पुनर्यज्ञे प्रयुज्यते तस्मादिमाः प्रजाः पुनरभ्यावर्तं प्रजायन्त ऽइतीव वाऽऋतुपात्रमितीवैकशफस्य शिर आग्रयणपात्रमुक्थ्यपात्रमादित्यपात्रमेतान्येवानु गावः प्रजायन्ते तानि वै तानि पुनर्यज्ञे प्रयुज्यन्ते तस्मादिमाः प्रजाः पुनरभ्यावर्तं प्रजायन्ते ॥८॥ अथ यदजाः । कनिष्ठानि पात्राण्यनु प्रजायन्ते तस्मादेतास्त्रिः संवत्सरस्य विजायमाना द्वौ त्रीनिति जनयन्त्यः कनिष्ठाः कनिष्ठानि हि पात्राण्यनु प्रजायन्ते ॥९॥ अथ यद्गावः । भूयिष्ठानि पात्राण्यनु प्रजायन्ते तस्मादेताः सकृत्संवत्सरस्य विजायमाना एकैकं जनयन्त्यो भूयिष्ठा भूयिष्ठानि हि पात्राण्यनु प्रजायन्ते ॥१०॥ अथ द्रोणकलशे । अन्ततो हारियोजनं ग्रहं गृह्णाति प्रजापतिर्वै द्रोणकलशः स इमाः प्रजा उपावर्तते ता अवति ता अभिजिघ्रत्येतद्वाऽएना भवति यदेनाः प्रजनयति ॥११॥ पञ्च ह त्वेव तानि पात्राणि । यानी-

माः प्रजा अनु प्रजायन्ते समानमुपाꣳश्वन्तर्यामयोः शुक्रपात्रमृतुपात्रमाग्रयणपात्रमुक्थ्यपात्रं पञ्च वाऽऋतवः संवत्सरस्य संवत्सरः प्रजापतिः प्रजापतिर्यज्ञो यद्यु षडेवऽर्तवः संवत्सरस्येत्यादित्यपात्रमेवैतेषाꣳ षष्ठम् ॥१२॥ एकꣳ ह त्वेव तत्पात्रम् । यदिमाः प्रजा अनु प्रजायन्तऽउपाꣳशुपात्रमेव प्राणो ह्युपाꣳशुः प्राणो हि प्रजापतिः प्रजापतिꣳ ह्येवेदꣳ सर्वमनु ॥१३॥ ब्राह्मणम् ॥ ६ [५. ५.] ॥

एष वै प्रजापतिः । य एष यज्ञस्तायते यस्मादिमाः प्रजाः प्रजाता एतम्वेवाप्येतर्ह्यनु प्रजायन्ते स आश्विनं ग्रहं गृहीत्वावकाशानवकाशयति ॥१॥ स उपाꣳशुमेव प्रथममवकाशयति । प्राणाय मे वर्चोदा वर्चसे पवस्वेत्यथोपाꣳशुसवनं व्यानाय मे वर्चोदा वर्चसे पवस्वेत्यथान्तर्याममुदानाय मे वर्चोदा वर्चसे पवस्वेत्यथैन्द्रवायवं वाचे मे वर्चोदा वर्चसे पवस्वेत्यथ मैत्रावरुणं क्रतूदक्षाभ्यां मे वर्चोदा वर्चसे पवस्वेत्यथाश्विनꣳ श्रोत्राय मे वर्चोदा वर्चसे पवस्वेत्यथ शुक्रामन्थिनौ चक्षुर्भ्यां मे वर्चोदसौ वर्चसे पवेथामिति ॥२॥ अथाग्रयणम् । आत्मने मे वर्चोदा वर्चसे पवस्वेत्यथोक्थ्यमोजसे मे वर्चोदा वर्चसे पवस्वेत्यथ ध्रुवमायुषे मे वर्चोदा वर्चसे पवस्वेत्यथाम्भृणौ विश्वाभ्यो मे प्रजाभ्यो वर्चोदसौ वर्चसे पवेथामिति वैश्वदेवौ वाऽअम्भृणावतो हि देवेभ्य उन्नयन्त्यतो मनुष्येभ्योऽतः पितृभ्यस्तस्माद्वैश्वदेवावम्भृणौ ॥३॥ अथ द्रोणकलशम् । कोऽसि कतमोऽसीति प्रजापतिर्वै कः कस्यासि को नामासीति प्रजापतिर्वै को नाम यस्य ते नामामन्महीति मनुते ह्यस्य नाम यं त्वा सोमेनातीतृपामेति तर्पयति ह्येनꣳ सोमेन स आश्विनं ग्रहं गृहीत्वान्वङ्गमाशिषमाशास्ते सुप्रजाः प्रजाभिः स्यामिति तत्प्रजामाशास्ते सुवीरो वीरैरिति तद्वीरानाशास्ते सुपोषः पोषैरिति तत्पुष्टिमाशास्ते ॥४॥ तान्वै न सर्वमिवावकाशयेत् । यो न्वेव ज्ञातस्तमवकाशयेद्यो वास्य प्रियः स्याद्यो वानूचानोऽनूक्तेनैनान्प्राप्नुयात्स आश्विनं ग्रहं गृहीत्वा कृत्स्नं यज्ञं

जनयति तं कृत्स्नं यज्ञं जनयित्वा तमात्मन्धत्ते तमात्मन्कुरुते ॥५॥ ब्राह्मणम् ॥७ [५. ६.] ॥

ता वा ऽ एताः । चतुस्त्रिंशदाहुतयो भवन्ति प्रायश्चित्तयो नामैष वै प्रजापतिर्य एष यज्ञस्तायते यस्मादिमाः प्रजाः प्रजाता एतम्वेवाप्येतर्ह्यनु प्रजायन्ते ॥१॥ अष्टौ वसवः । एकादश रुद्रा द्वादशादित्या इमे ऽ एव द्यावापृथिवी त्रयस्त्रिंश्यौ त्रयस्त्रिंशद्वै देवाः प्रजापतिश्चतुस्त्रिंशस्तदेनं प्रजापतिं करोत्येतद्वा ऽ अस्त्येतद्ध्यमृतं यद्ध्यमृतं तद्ध्यस्त्येतदु तद्यन्मर्त्यं स एष प्रजापतिः सर्वं वै प्रजापतिस्तदेनं प्रजापतिं करोति तस्मादेताश्चतुस्त्रिंशदाहुतयो भवन्ति प्रायश्चित्तयो नाम ॥२॥ ता हैके । यज्ञतन्व इत्याचक्षते यज्ञस्य ह्येवैतानि पर्वाणि स एष यज्ञस्तायमान एता एव देवता भवन्निति ॥३॥ सा यदि घर्मदुघा ह्वलेत् । अन्यामुपसंक्रामेयुः स यस्यामेवैनं वेलायां पुरा पिन्वयन्ति तद्धैवैनामुदीचीं स्थापयेदग्रेण वा शालां प्राचीम् ॥४॥ तस्यै ऽ एते ऽ अभितः । पुच्छकाण्डं शिखण्डास्ये ऽ उह्यते तयोर्यद्दक्षिणं तस्मिन्नेताश्चतुस्त्रिंशतमाज्याहुतीर्जुहोत्येतावान्वै सर्वो यज्ञो यावत्य एताश्चतुस्त्रिंशदाहुतयो भवन्ति तदस्यां कृत्स्नमेव सर्वं यज्ञं दधात्येषा ह्यतो घर्मं पिन्वत ऽ एषो तत्र प्रायश्चित्तिः क्रियते ॥५॥ अथ यद्यज्ञस्य ह्वलेत् । तत्समन्वीक्ष्य जुहुयादाग्नीध्रोपसत्स्वाहवनीये प्रसुत ऽ आग्नीध्रे वि वा ऽ एतद्यज्ञस्य पर्व स्रंसते यद्ध्वलति सा यैव तर्हि तत्र देवता भवति तयैवैतद्भिषज्यति तया संदधाति ॥६॥ अथ यदि स्कन्देत् । तदद्भिरुपनिनयेदद्भिर्वा ऽ इदं सर्वमाप्तं सर्वस्यैवाप्त्यै वैष्णववारुण्य ऽ र्चा यद्वा ऽ इदं किं चार्हति वरुण एवेदं सर्वमार्पयति ययोरोजसा स्कभिता रजांसि वीर्येभिर्वीरतमा शविष्ठा । या पत्येते ऽ अप्रतीता सहोभिर्विष्णू ऽ अगन्वरुणा पूर्वहूताविति यज्ञो वै विष्णुस्तस्यैतदार्हति वरुणो वा ऽ आर्पयिता तद्यस्याश्चैवैतद्देवताया आर्हति यो च देवतार्पयति ताभ्यामेवैतदुभाभ्यां

भिषज्यत्युभाभ्याᳪ संदधाति ॥७॥ अथोऽअभ्येव मृशेत् । देवान्दिवमगन्यज्ञस्ततो मा द्रविणमष्टु मनुष्यानन्तरिक्षमगन्यज्ञस्ततो मा द्रविणमष्टु पितॄन्पृथिवीमगन्यज्ञस्ततो मा द्रविणमष्टु यं कं च लोकमगन्यज्ञस्ततो मे भद्रमभूदित्येवैतदाह ॥८॥ तद्ध स्मैतदारुणिराह । किᳪ स यजेत यो यज्ञस्य व्यृद्ध्या पापीयान्मन्येत यज्ञस्य वाऽअहं व्यृद्ध्या श्रेयान्भवामीत्येतद्ध स्म स तदभ्याह यदेता आशिष उपगच्छति ॥९॥ ब्राह्मणम् ॥८ [५. ७.] ॥ ॥

तद्यत्रैतत्त्रिरात्रे सहस्रं ददाति । तदेषा साहस्री क्रियते स प्रथमेऽहंस्त्रीणि च शतानि नयति त्रयस्त्रिᳪशतं चैवमेव द्वितीयेऽहंस्त्रीणि चैव शतानि नयति त्रयस्त्रिᳪशतं चैवमेव तृतीयेऽहंस्त्रीणि चैव शतानि नयति त्रयस्त्रिᳪशतं चयैषा साहस्र्यतिरिच्यते ॥१॥ सा वै त्रिरूपा स्यादित्याहुः । एतद्ध्यस्यै रूपतममिवेति रोहिणी ह त्वेवोपधस्ता स्यादेतद्वेवास्यै रूपतममिव ॥२॥ सा स्यादप्रवीता । वाग्वाऽएषा निदानेन यत्साहस्र्ययातयाम्नी वाऽइयं वागयातयाम्न्यप्रवीता तस्मादप्रवीता स्यात् ॥३॥ तां प्रथमेऽहन्नयेत् । वाग्वाऽएषा निदानेन यत्साहस्री तस्या एतत्सहस्रं वाचः प्रजातं पूर्वा हैषैति पश्चादेनां प्रजातमन्वेत्युत्तमे वैनामहन्नयेत्पूर्वमहास्यै प्रजातमेति पश्चादेषान्वेति सोऽएषा मीमाᳪसैवोत्तमऽएवैनामहन्नयेत्पूर्वमहास्यै प्रजातमेति पश्चादेषान्वेति ॥४॥ तामुत्तरेण हविर्धाने । दक्षिणेनाग्नीध्रं द्रोणकलशमवघ्रापयति यज्ञो वै द्रोणकलशो यज्ञमेवैनामेतद्दर्शयति ॥५॥ आजिघ्र कलशम् । मह्या त्वा विशन्त्विन्दव इति रिरिचान-इव वाऽएष भवति यः सहस्रं ददाति तमेवैतद्रिरिचानं पुनराप्याययति यदाहाजिघ्र कलशं मह्या त्वा विशन्त्विन्दव इति ॥६॥ पुनरूर्जा निवर्तस्वेति । तद्वेव रिरिचानं पुनराप्याययति यदाह पुनरूर्जा निवर्तस्वेति ॥७॥ सा नः सहस्रं धुक्ष्वेति । तत्सहस्रेण रिरिचानं पुनराप्याययति यदाह सा नः सहस्रं धुक्ष्वेति ॥८॥ उरु-

धारा पयस्वती पुनर्माविशताद्रयिरिति । तद्देव रिरिचानं पुनराप्याययति यदाह पुनर्माविशताद्रयिरिति ॥ ९॥ अथ दक्षिणे कर्णऽआजपति । इडे रन्ते हव्ये काम्ये चन्द्रे ज्योतेऽदिति सरस्वति महि विश्रुति । एता तेऽअघ्न्ये नामानि देवेभ्यो मा सुकृतं ब्रूतादिति वोचेरिति वैतानि ह वाऽअस्यै देवत्रा नामानि सा यानि ते देवत्रा नामानि तैर्मा देवेभ्यः सुकृतं ब्रूतादित्येवैतदाह ॥ १०॥ तामवार्जन्ति । सा यद्यपुरुषाभिवीता प्राचीयात्तत्र विद्यादरात्सीदयं यजमानः कल्याणं लोकमजैषीदिति यद्युदीचीयाच्छ्रेयानस्मिंल्लोके यजमानो भविष्यतीति विद्याद्यदि प्रतीचीयादिभ्यतिल्विल-इव धान्यतिल्विलो भविष्यतीति विद्याद्यदि दक्षिणायात्क्षिप्रेऽस्माल्लोकाद्यजमानः प्रैष्यतीति विद्यादेतानि विज्ञानानि ॥ ११॥ तस्या एतास्तिस्रस्तिस्रस्त्रिꣳशत्यधि भवन्ति । तास्वेतामुपसमाकुर्वन्ति वि वाऽएतां विराजं वृहन्ति यां व्याकुर्वन्ति विछिन्नोऽएषा विराज्ञा विवृढा दशाक्षरा वै विराट्कृत्स्नां विराजꣳ संदधाति ताꣳ होत्रे दद्याद्धोतः हि साहसस्तस्मात्ताꣳ होत्रे दद्यात् ॥ १२॥ द्वौ वोन्नेतारौ कुर्वीत । तयोर्यतरो नाश्रावयेत्तस्माऽएनां दद्याद्व्यृद्धो वाऽएष उन्नेता य ऋत्विक्सन्नाश्रावयति व्यृद्धोऽएषा विराज्ञा विवृढा तद्व्यृद्धऽएवैतद्व्यृद्धं दधाति ॥ १३॥ तदाहुः । न सहस्रेऽधि किं चन दद्यात्सहस्रेण ह्येव सर्वान्कामानाप्नोतीति तदु होवाचासुरिः काममेव दद्यात्सहस्रेणाह सर्वान्कामानाप्नोति कामिनोऽअस्येतरद्दत्तं भवतीति ॥ १४॥ अथ यदि रथं वा युक्तं दास्यन्त्स्यात् । यद्वा वशायै वा वपायाꣳ हुतायां दद्यादुदवसानीयायां वेष्टौ ॥ १५॥ स वै दक्षिणा नयन् । अन्यूना दशतो नयेद्यस्माऽएकां दास्यन्त्स्याद्दशभ्यस्तेभ्यो दशतमुपावर्तयेद्यस्मै द्वे दास्यन्त्स्यात्पञ्चभ्यस्तेभ्यो दशतमुपावर्तयेद्यस्मै तिस्रो दास्यन्त्स्यात्त्रिभ्यस्तेभ्यो दशतमुपावर्तयेद्यस्मै पञ्च दास्यन्त्स्याद्द्वाभ्यां ताभ्यां दशतमुपावर्तयेदेवमा शतात्तथो हास्यैषान्यूना विराडमुष्मिंल्लोके कामदुघा भवति ॥ १६॥

ब्राह्मणम् ॥ ६ [५. ८.] ॥ चतुर्थः प्रपाठकः ॥ कण्डिकासंख्या १२५ ॥ ॥

तद्यत्रैतद्द्वादशाहेन व्यूढछन्दसा यजते । तद्ग्रहान्व्यूहति व्यूहत उद्गाता च होता च छन्दाꣳसि स एष प्रज्ञात एव पूर्वस्त्र्यहो भवति समूढछन्दास्तदैन्द्रवायवाग्रान्गृह्णाति ॥१॥ अथ चतुर्थेऽहन्व्यूहति । ग्रहान्व्यूहन्ति छन्दाꣳसि तदाग्रयणाग्रान्गृह्णाति प्राजापत्यं वाऽएतच्चतुर्थमहर्भवत्यात्मा वाऽआग्रयण आत्मा वै प्रजापतिस्तस्मादाग्रयणाग्रान्गृह्णाति ॥२॥ तं गृहीत्वा न सादयति । प्राणा वै ग्रहा नेत्प्राणान्मोहयानीति मोहयेद्ध प्राणान्यत्सादयेत्तं धारयन्त एवोपासतेऽथ ग्रहान्गृह्णात्यथ यदा ग्रहान्गृह्णात्यथ यत्रैवैतस्य कालस्तदेनꣳ हिंकृत्य सादयत्यथैतत्प्रज्ञातमेव पञ्चममहर्भवति तदैन्द्रवायवाग्रान्गृह्णाति ॥३॥ अथ षष्ठेऽहन्व्यूहति । ग्रहान्व्यूहन्ति छन्दाꣳसि तच्छुक्राग्रान्गृह्णात्यैन्द्रं वाऽएतत्षष्ठमहर्भवत्येष वै शुक्रो य एष तपत्येष उऽएवेन्द्रस्तस्माच्छुक्राग्रान्गृह्णाति ॥४॥ तं गृहीत्वा न सादयति । प्राणा वै ग्रहा नेत्प्राणान्मोहयानीति मोहयेद्ध प्राणान्यत्सादयेत्तं धारयन्त एवोपासतेऽथ ग्रहान्गृह्णात्यथ यदा ग्रहान्गृह्णात्यथ यत्रैवैतस्य कालस्तदेनꣳ सादयति ॥५॥ अथ सप्तमेऽहन्व्यूहति । ग्रहान्व्यूहन्ति छन्दाꣳसि तच्छुक्राग्रान्गृह्णाति बार्हतं वाऽएतत्सप्तममहर्भवत्येष वै शुक्रो य एष तपत्येष उऽएव बृहंस्तस्माच्छुक्राग्रान्गृह्णाति ॥६॥ तं गृहीत्वा न सादयति । प्राणा वै ग्रहा नेत्प्राणान्मोहयानीति मोहयेद्ध प्राणान्यत्सादयेत्तं धारयन्त एवोपासतेऽथ ग्रहान्गृह्णात्यथ यदा ग्रहान्गृह्णात्यथ यत्रैवैतस्य कालस्तदेनꣳ सादयत्यथैतत्प्रज्ञातमेवाष्टममहर्भवति तदैन्द्रवायवाग्रान्गृह्णाति ॥७॥ अथ नवमेऽहन्व्यूहति । ग्रहान्व्यूहन्ति छन्दाꣳसि तदाग्रयणाग्रान्गृह्णाति जागतं वाऽएतन्नवममहर्भवत्यात्मा वाऽआग्रयणः सर्वं वाऽइदमात्मा जगत्तस्मादाग्रयणाग्रान्गृह्णाति ॥८॥ तं गृहीत्वा न सादयति । प्राणा वै ग्रहा नेत्प्राणान्मोहयानीति मोहयेद्ध प्राणान्यत्सादयेत्तं

धारयन्त एवोपासतेऽथ ग्रहान्गृह्णात्यथ यदा ग्रहान्गृह्णात्यथ यत्रैवैतस्य कालस्त-
देनꣳ हिंकृत्य सादयति ॥ ९ ॥ तदाहुः । न व्यूहेद्ग्रहान्प्राणा वै ग्रहा नेत्प्राणा-
न्मोहयानीति मोहयेद्ध प्राणान्यद्व्यूहेत्तस्मान्न व्यूहेत् ॥ १० ॥ तदु व्यूहेदेव । अ-
ङ्गानि वै ग्रहाः कामं वाऽइमान्यङ्गानि व्यत्यासꣳ शेते तस्मादु व्यूहेदेव ॥ ११ ॥
तदु नैव व्यूहेत् । प्राणा वै ग्रहा नेत्प्राणान्मोहयानीति मोहयेद्ध प्राणान्यद्व्यू-
हेत्तस्मान्न व्यूहेत् ॥ १२ ॥ किं नु तत्राध्वर्योः । यदुद्गाता च होता च छन्दाꣳसि
व्यूहत एतद्वाऽअध्वर्युर्व्यूहति ग्रहान्यदैन्द्रवायवाग्रान्प्रातःसवने गृह्णाति शुक्राग्रा-
न्माध्यन्दिने सवनऽआग्रयणाग्रांस्तृतीयसवने ॥ १३ ॥ ब्राह्मणम् ॥ १ [५. १.] ॥

यदि सोममपहरेयुः । विधावतेच्छतेति ब्रूयात्स यदि विन्दन्ति किमाद्रियेरन्यद्यु
न विन्दन्ति तत्र प्रायश्चित्तिः क्रियते ॥ १ ॥ द्वयानि वै फाल्गुनानि । लोहितपु-
ष्पाणि चारुणपुष्पाणि च स यान्यरुणपुष्पाणि फाल्गुनानि तान्यभिषुणुयादेष
वै सोमस्य न्यङ्गो यदरुणपुष्पाणि फाल्गुनानि तस्मादरुणपुष्पाण्यभिषुणुयात् ॥ २ ॥
यद्यरुणपुष्पाणि न विन्देयुः । श्येनहृतमभिषुणुयाद्यत्र वै गायत्री सोममच्छापत-
त्तस्याऽआहरन्त्यै सोमस्याꣳशुरपतत्तच्छ्येनहृतमभवत्तस्माच्छ्येनहृतमभिषुणुयात् ॥ ३ ॥
यदि श्येनहृतं न विन्देयुः । आदारानभिषुणुयाद्यत्र वै यज्ञस्य शिरोऽच्छिद्यत तस्य
यो रसो व्यप्रुष्यत्तत आदाराः समभवंस्तस्मादादारानभिषुणुयात् ॥ ४ ॥ यद्यादारान्न
विन्देयुः । अरुणदूर्वा अभिषुणुयादेष वै सोमस्य न्यङ्गो यदरुणदूर्वास्तस्मादरुण-
दूर्वा अभिषुणुयात् ॥ ५ ॥ यद्यरुणदूर्वा न विन्देयुः । अपि यानेव कांश्च हरिता-
न्कुशानभिषुणुयात्तत्राप्येकामेव गां दद्यादथावभृथादुदेत्य पुनर्दीक्षेत पुनर्यज्ञो
ह्येव तत्र प्रायश्चित्तिरिति नु सोमापहृतानाम् ॥ ६ ॥ अथ कलशदिराम् । यदि
कलशो दीर्येतानुलिप्सध्वमिति ब्रूयात्स यद्यनुलभेरन्प्रसृतमात्रं वाञ्जलिमात्रं वा
तदन्यैरेकधनैरभ्युन्नीय यथाप्रभावं प्रचरेयुर्यद्यु नानुलभेरन्नाग्रयणस्यैव प्रस्कन्द्या-

न्यैरेकधनैरभ्युन्नीय यथाप्रभावं प्रचरेयुः स यद्यनीतासु दक्षिणासु कलशो दीर्येत तत्राप्येकामेव गां दद्यादथावभृथादेवोदेत्य पुनर्दीक्षेत पुनर्यज्ञो ह्येव तत्र प्रायश्चित्तिरिति नु कलशदीराम् ॥७॥ अथ सोमातिरिक्तानाम् । यद्यग्निष्टोममतिरिच्येत पूतभृत एवोक्थ्यं गृह्णीयाद्युक्थ्यमतिरिच्येत षोडशिनमुपेयुर्यदि षोडशिनमतिरिच्येत रात्रिमुपेयुर्यदि रात्रिमतिरिच्येताहरुपेयुर्नेत्त्वेवातीरेकोऽस्ति ॥८॥ ब्राह्मणम् ॥२ [५. १०.]॥ पञ्चमोऽध्यायः [२१.] ॥॥

प्रजापतिर्वाऽएष यदꣳशुः । सोऽस्यैष आत्मैवात्मा ह्ययं प्रजापतिस्तदस्यैतमात्मानं कुर्वन्ति यत्रैतं गृह्णन्ति तस्मिन्नेतान्प्राणान्दधाति यथा-यथैते प्राणा ग्रहा व्याख्यायन्ते स ह सर्वतनूरेव यजमानोऽमुष्मिंलोके सम्भवति ॥१॥ तदारम्भणवत् । यत्रैतं गृह्णन्त्यथैतदनारम्भणमिव यत्रैतं न गृह्णन्ति तस्माद्वाऽअꣳशुं गृह्णाति ॥२॥ तं वाऽऔदुम्बरेण पात्रेण गृह्णाति । प्रजापतिर्वा एष प्राजापत्य उदुम्बरस्तस्मादौदुम्बरेण पात्रेण गृह्णाति ॥३॥ तं वै चतुःस्रक्तिना पात्रेण गृह्णाति । त्रयो वाऽइमे लोकास्तदिमानेव लोकांस्त्रिभिराप्नोति प्रजापतिर्वाऽअतीमांलोकांश्चतुर्थस्तत्प्रजापतिमेव चतुर्थ्याप्नोति तस्माच्चतुःस्रक्तिना पात्रेण गृह्णाति ॥४॥ स वै तूष्णीमेव ग्रावाणमादत्ते । तूष्णीमꣳशून्निवपति तूष्णीमप उपसृजति तूष्णीमुद्यत्य सकृदभिषुणोति तूष्णीमेनमनवानञ्जुहोति तदेनं प्रजापतिं करोति ॥५॥ अथास्याꣳ हिरण्यं बद्धं भवति । तदुपजिघ्रति स यदेवात्र क्षणुते वा वि वा लिशतेऽमृतमायुर्हिरण्यं तदमृतमायुरात्मन्धत्ते ॥६॥ तद्ध होवाच राम औपतस्विनिः । काममेव प्राण्यात्काममुदन्याद्यद्धि तूष्णीं जुहोति तदेवैनं प्रजापतिं करोतीति ॥७॥ अथास्याꣳ हिरण्यं बद्धं भवति । तदुपजिघ्रति स यदेवात्र क्षणुते वा वि वा लिशतेऽमृतमायुर्हिरण्यं तदमृतमायुरात्मन्धत्ते ॥८॥ तद्ध होवाच बुडिल आश्वतराश्विः । उद्यत्यैव गृह्णीयान्नाभिषुणुयादभिषुण्वन्ति वाऽअन्याभ्यो

देवताभ्यस्तदन्यथा ततः करोति यथो चान्याभ्यो देवताभ्योऽथ यदुच्छति तदे-
वास्याभिषुतं भवतीति ॥९॥ तदु होवाच याज्ञवल्क्यः । अभ्येव षुणुयान्न सोम
इन्द्रमसुतो ममाद नाब्रह्माणो मघवानꣳ सुतास इत्यृषिणाभ्यनूक्तं न वाऽअन्य-
स्यै कस्यै चन देवतायै सकृदभिषुणोति तदन्यथा ततः करोति यथो चान्याभ्यो
देवताभ्यस्तस्मादभ्येव षुणुयादिति ॥१०॥ तस्य द्वादश प्रथमगर्भाः । पष्ठौह्यो
दक्षिणा द्वादश वै मासाः संवत्सरस्य संवत्सरः प्रजापतिः प्रजापतिरꣳशुस्तदेनं
प्रजापतिं करोति ॥११॥ ॥शतम् २८००॥ तासां द्वादश गर्भाः । ताश्चतुर्विꣳशति-
श्चतुर्विꣳशतिर्वै संवत्सरस्यार्धमासाः संवत्सरः प्रजापतिः प्रजापतिरꣳशुस्तदेनं प्र-
जापतिं करोति ॥१२॥ तदु ह कौकूस्तः । चतुर्विꣳशतिमेवैताः प्रथमगर्भाः पष्ठौ-
ह्योर्दक्षिणा ददावृषभं पञ्चविꣳशꣳ हिरण्यमेतदु ह स ददौ ॥१३॥ स वाऽएष
न सर्वस्येव ग्रहीतव्यः । आत्मा ह्यस्यैष यो न्वेव ज्ञातस्तस्य ग्रहीतव्यो यो वा-
स्य प्रियः स्याद्यो वानूचानोऽनूक्तेनैनं प्राप्नुयात् ॥१४॥ सहस्रे ग्रहीतव्यः । सर्वं
वै सहस्रꣳ सर्वमेष सर्ववेदसे ग्रहीतव्यः सर्वं वै सर्ववेदसꣳ सर्वमेष विश्वजिति
सर्वपृष्ठे ग्रहीतव्यः सर्वं वै विश्वजित्सर्वपृष्ठः सर्वमेष वाजपेये राजसूये ग्रहीतव्यः
सर्वꣳ हि तत्सत्त्रे ग्रहीतव्यः सर्वं वै सत्त्रꣳ सर्वमेष एतानि ग्रहणानि ॥१५॥
ब्राह्मणम् ॥३ [६. १.] ॥॥

एतं वाऽएते गछन्ति । षड्भिर्मासैर्य एष तपति ये संवत्सरमासते तदुच्यत
ऽएव सामतो यथैतस्य रूपं क्रियतऽउच्यतऽऋक्तोऽथैतदेव यजुष्टः पुरश्चरणातो य-
देतं गृह्णन्त्येतेनोऽएवैनं गछन्ति ॥१॥ अथातो गृह्णात्येव । उदु त्यं जातवेदसं
देवं वहन्ति केतवः । दृशे विश्वाय सूर्यम् । उपयामगृहीतोऽसि सूर्याय त्वा भ्रा-
जायैष ते योनिः सूर्याय त्वा भ्राजायेति ॥२॥ ब्राह्मणम् ॥४ [६. २.] ॥॥

अथातः पश्वयनस्यैव । पश्वेकादशिन्यैवैयात्स आग्नेयं प्रथमं पशुमालभतेऽथ

वारुणमथ पुनराग्नेयमेवमेवैतया पश्वेकादशिन्येयात् ॥१॥ अथोऽअप्यैन्द्राग्नमेवाह-
रहः पशुमालभेत । अग्निर्वै सर्वा देवता अग्नौ हि सर्वाभ्यो देवताभ्यो जुह्वती-
न्द्रो वै यज्ञस्य देवता तत्सर्वाश्चैवैतद्देवता नापराध्नोति यो च यज्ञस्य देवता तां
नापराध्नोति ॥२॥ अथात स्तोमायनस्यैव । आग्नेयमग्निष्टोमऽआलभेत तद्धि स-
लोम यदाग्नेयमग्निष्टोमऽआलभेत यद्युक्थ्यः स्यादैन्द्राग्नं द्वितीयमालभेतैन्द्राग्नानि
ह्युक्थानि यदि षोडशी स्यादैन्द्रं तृतीयमालभेतैन्द्रो हि षोडशी यद्यतिरात्रः
स्यात्सारस्वतं चतुर्थमालभेत वाग्वै सरस्वती योषा वै वाग्योषा रात्रिस्तद्यथा-
यथं यज्ञक्रतून्व्यावर्तयत्येतानि त्रीण्ययनानि तेषां यतमत्कामयेत तेनेयाद्वाऽउपा-
लम्भ्यौ पशू सौर्यं द्वितीयं पशुमालभते वैषुवतेऽहन्प्राजापत्यं महाव्रते ॥३॥ ब्रा-
ह्मणम् ॥५ [६.३.] ॥॥

अथातो महाव्रतीयस्यैव । प्रजापतेर्ह वै प्रजाः ससृजानस्य पर्वाणि विसस्रꣳसुः
स विस्रस्तैः पर्वभिर्न शशाक सꣳहातुं ततो देवा अर्चन्तः श्राम्यन्तश्चेरुस्तऽएतं
महाव्रतीयं ददृशुस्तमस्माऽअगृह्णंस्तेनास्य पर्वाणि समदधुः ॥१॥ स सꣳहितैः
पर्वभिः । इदमन्नाद्यमभ्युत्तस्थौ यदिदं प्रजापतेरन्नाद्यं यद्धि मनुष्याणामशनं तद्देवा-
नां व्रतं महद्वाऽइदं व्रतमभूद्येनायꣳ समहास्तेति तस्मान्महाव्रतीयो नाम ॥२॥
एवं वाऽएते भवन्ति । ये संवत्सरमासते यथैव तत्प्रजापतिः प्रजाः ससृजान आ-
सीत्स यथैव तत्प्रजापतिः संवत्सरेऽन्नाद्यमभ्युदतिष्ठदेवमेवैतऽएतत्संवत्सरेऽन्नाद्य-
मभ्युत्तिष्ठन्ति येषामेवं विदुषामेतं ग्रहं गृह्णन्ति ॥३॥ तं वाऽइन्द्रायैव विमृधे गृ-
ह्णीयात् । सर्वा वै तेषां मृधो हता भवन्ति सर्वं जितं ये संवत्सरमासते तस्मा-
द्विमृधे वि न इन्द्र मृधो जहि नीचा यच्छ पृतन्यतः । योऽअस्मां२ऽअभिदासत्य-
धरं गमया तमः । उपयामगृहीतोऽसीन्द्राय त्वा विमृधऽएष ते योनिरिन्द्राय त्वा
विमृधऽइति ॥४॥ अथो विश्वकर्मणे । विश्वं वै तेषां कर्म कृतं सर्वं जितं भवति

ये संवत्सरमासते तस्माद्विश्वकर्मणे वाचस्पतिं विश्वकर्माणमूतये मनोजुवं वाजे ऽअद्या हुवेम । स नो विश्वानि हवनानि जोषद्विश्वशम्भूरवसे साधुकर्मा । उपयामगृहीतोऽसीन्द्राय त्वा विश्वकर्मणऽएष ते योनिरिन्द्राय त्वा विश्वकर्मणऽइति ॥५॥ यद्युऽऐन्द्रीं वैश्वकर्मणीं विद्यात् । तथैव गृह्णीयाद्विश्वकर्मन्हविषा वर्धनेन त्रातारमिन्द्रमकृणोरवध्यम् । तस्मै विशः समनमन्त पूर्वीरयमुग्रो विहव्यो यथासत् । उपयामगृहीतोऽसीन्द्राय त्वा विश्वकर्मणऽएष ते योनिरिन्द्राय त्वा विश्वकर्मणऽइति ॥६॥ ब्राह्मणम् ॥ ६ [६. ४.] ॥॥

एष वै ग्रहः । य एष तपति येनेमाः सर्वाः प्रजा गृहीतास्तस्मादाहुर्ग्रहान्गृह्णीम इति चरन्ति ग्रहगृहीताः सन्त इति ॥१॥ वागेव ग्रहः । वाचा हीदꣳ सर्वं गृहीतं किमु तद्यद्वाग्ग्रहः ॥२॥ नामैव ग्रहः । नाम्ना हीदꣳ सर्वं गृहीतं किमु तद्यन्नाम ग्रहो बहूनां वै नामानि विद्माथ नस्तेन ते न गृहीता भवन्ति ॥३॥ अन्नमेव ग्रहः । अन्नेन हीदꣳ सर्वं गृहीतं तस्माद्यावन्तो नोऽशनमश्नन्ति ते नः सर्वे गृहीता भवन्त्येषैव स्थितिः ॥४॥ स य एष सोमग्रहः । अन्नं वाऽएष स यस्यै देवतायाऽएतं ग्रहं गृह्णाति सास्मै देवतैतेन ग्रहेण गृहीता तं कामꣳ समर्धयति यत्काम्या गृह्णाति स उद्यन्तं वादित्यमुपतिष्ठतेऽस्तं यन्तं वा ग्रहोऽस्यमुमनयार्त्या गृहाणासावदो मा प्रापदिति यं द्विष्यादसावस्मै कामो मा समर्धीति वा न हैवास्मै स कामः समृध्यते यस्माऽएवमुपतिष्ठते ॥५॥ ब्राह्मणम् ॥ ७ [६. ५.] ॥॥

देवा ह वै यज्ञं तन्वानाः । तेऽसुररक्षसेभ्य आसङ्गाद्बिभयां चक्रुस्ते होचुः को नो दक्षिणत आसिष्यतेऽथाभयेऽनाष्ट्रऽउत्तरतो यज्ञमुपचरिष्याम इति ॥१॥ ते होचुः । य एव नो वीर्यवत्तमः स दक्षिणत आस्तामथाभयेऽनाष्ट्रऽउत्तरतो यज्ञमुपचरिष्याम इति ॥२॥ ते होचुः । इन्द्रो वै नो वीर्यवत्तम इन्द्रो दक्षिणत

आस्तामथाभयेऽनाष्ट्रऽउत्तरतो यज्ञमुपचरिष्याम इति ॥३॥ ते हेन्द्रमूचुः । त्वं वै नो वीर्यवत्तमोऽसि त्वं दक्षिणत आस्वाथाभयेऽनाष्ट्रऽउत्तरतो यज्ञमुपचरिष्याम इति ॥४॥ स होवाच । किं मे ततः स्यादिति ब्राह्मणाछꣳस्या ते ब्रह्मसाम तऽइति तस्माद्ब्राह्मणाछꣳसिनं प्रवृणीतऽइन्द्रो ब्रह्मा ब्राह्मणादितीन्द्रस्य ह्येषा स इन्द्रो दक्षिणत आस्ताथाभयेऽनाष्ट्रऽउत्तरतो यज्ञमुपाचरंस्तस्माद्य एव वीर्यवत्तमः स्यात्स दक्षिणत आसीताथाभयेऽनाष्ट्र उत्तरतो यज्ञमुपचरेयुर्यो वै ब्राह्मणानामनूचानतमः स एषां वीर्यवत्तमोऽथ यदिदं य एव कश्च ब्रह्मा भवति कुवित्तूष्णीमास्तऽइति तस्माद्य एव वीर्यवत्तमः स्यात्स दक्षिणत आसीताथाभयेऽनाष्ट्रऽउत्तरतो यज्ञमुपचरेयुस्तस्माद्ब्राह्मणा दक्षिणत आसतेऽथाभयेऽनाष्ट्रऽउत्तरतो यज्ञमुपचरन्ति ॥५॥ स यत्राह । ब्रह्मन्त्स्तोष्यामः प्रशास्तरिति तद्ब्रह्मा जपत्येतं ते देव सवितर्यज्ञं प्राहुर्बृहस्पतये ब्रह्मणे । तेन यज्ञमव तेन यज्ञपतिं तेन मामव । स्तुत सवितुः प्रसवऽइति सोऽसावेव बन्धुरेतेन न्वेव भूयिष्ठा-इवोपचरन्ति ॥६॥ अनेन त्वेवोपचरेत् । देव सवितरेतद्बृहस्पते प्रेति तत्सवितारं प्रसवायोपधावति स हि देवानां प्रसविता बृहस्पते प्रेति बृहस्पतिर्वै देवानां ब्रह्मा तद्य एव देवानां ब्रह्मा तस्माऽएवैतत्प्राह तस्मादाह बृहस्पते प्रेति ॥७॥ अथ मैत्रावरुणो जपति । प्रसूतं देवेन सवित्रा जुष्टं मित्रावरुणाभ्यामिति तत्सवितारं प्रसवायोपधावति स हि देवानां प्रसविता जुष्टं मित्रावरुणाभ्यामिति मित्रावरुणौ वै मैत्रावरुणस्य देवते तद्येऽएव मैत्रावरुणस्य देवते ताभ्यामेवैतत्प्राह तस्मादाह जुष्टं मित्रावरुणाभ्यामिति ॥८॥ ब्राह्मणम् ॥ ८ [६. ६.] ॥ ॥

त्रयी वै विद्या । ऋचो यजूꣳषि सामानीयमेवर्चोऽस्याꣳ ह्यर्चति योऽर्चति स वागेवर्चो वाचा ह्यर्चति योऽर्चति सोऽन्तरिक्षमेव यजूꣳषि द्यौः सामानि सैषा त्रयी विद्या सौम्येऽध्वरे प्रयुज्यते ॥१॥ इममेव लोकमृचा जयति । अन्तरिक्षं

यजुषा दिवमेव साम्ना तस्माद्यस्यैका विद्यानूक्ता स्यादन्वेवापीतरयोर्निर्मितं वि-
वक्षेतेममेव लोकमृचा जयत्यन्तरिक्षं यजुषा दिवमेव साम्ना ॥२॥ तद्वा ऽ एतत् ।
सहस्रं वाचः प्रजातं द्वे ऽ इन्द्रस्तृतीये तृतीयं विष्णुर्ऋचश्च सामानि चेन्द्रो यजूंषि
विष्णुस्तस्मात्सदस्यृक्सामाभ्यां कुर्वन्त्यैन्द्रं हि सदः ॥३॥ अथैतं विष्णुं यज्ञम् ।
एतैर्यजुर्भिः पुर-इवैव बिभ्रति तस्मात्पुरश्चरणं नाम ॥५॥ वागेव ऽ र्चश्च सामानि
च । मन एव यजूंषि सा यत्रेयं वागासीत्सर्वमेव तत्राक्रियत सर्वं प्राज्ञायताथ
यत्र मन आसीन्नैव तत्र किं चनाक्रियत न प्राज्ञायत नो हि मनसा ध्यायतः
कश्चनाजानाति ॥५॥ ते देवा वाचमब्रुवन् । प्राची प्रेहीदं प्रज्ञपयेति सा हो-
वाच किं मे ततः स्यादिति यत्किं चावषट्कृतं स्वाहाकारेण यज्ञे हूयते तत्ते
ऽ इति तस्माद्यत्किं चावषट्कृतं स्वाहाकारेण यज्ञे हूयते तद्वाचः सा प्राची
प्रेत्यैतत्प्राज्ञपयदितीदं कुरुतेतीदं कुरुतेति ॥६॥ तस्मादु कुर्वन्त्येव ऽ र्चा हविर्धाने
। प्रातरनुवाकमन्वाह सामिधेनीरन्वाह ग्राव्णो ऽ भिष्टौत्येवं हि सयुजावभव-
ताम् ॥७॥ तस्मादु कुर्वन्त्येव सदसि । यजुषौदुम्बरीमुच्छ्रयन्ति सदः संमिन्वन्ति
धिष्ण्यानुपकिरन्त्येवं हि सयुजावभवताम् ॥८॥ तद्वा ऽ एतत्सदः परिश्रयन्ति । ए-
तस्मै मिथुनाय तिर-इवेदं मिथुनं चर्याता ऽ इति व्यृद्धं वा ऽ एतन्मिथुनं यदन्यः प-
श्यति तस्माद्यद्यपि जायापती मिथुनं चरन्तौ पश्यन्ति व्येव द्रवत आग एव कु-
र्वाते तस्माद्द्वारेण सदः प्रेक्षमाणं ब्रूयान्मा प्रेक्षथा इति यथा ह मिथुनं चर्यमा-
णं पश्येदेवं तत्कामं द्वारेण देवकृतं हि द्वारम् ॥९॥ एवमेवैतद्धविर्धानं परिश्र-
यन्ति । एतस्मै मिथुनाय तिर-इवेदं मिथुनं चर्याता ऽ इति व्यृद्धं वा ऽ एतन्मिथुनं
यदन्यः पश्यति तस्माद्यद्यपि जायापती मिथुनं चरन्तौ पश्यन्ति व्येव द्रवत आग
एव कुर्वाते तस्माद्द्वारेण हविर्धानं प्रेक्षमाणं ब्रूयान्मा प्रेक्षथा इति यथा ह मि-
थुनं चर्यमाणं पश्येदेवं तत्कामं द्वारेण देवकृतं हि द्वारम् ॥१०॥ तद्वा ऽ एतद्ध-

षा साम । योषामृचꣳ सदस्यध्येति तस्मान्मिथुनादिन्द्रो जातस्तेजसो वै तत्तेजो जातं यदृचश्च साम्नश्चेन्द्र इन्द्र इति ह्येतमाचक्षते य एष तपति ॥११॥ अथैतद्वृषा सोमः । योषा अपो हविर्धानेऽध्येति तस्मान्मिथुनाच्चन्द्रमा जातोऽन्नाद्धि तदन्नं जातं यदद्भ्यश्च सोमाच्च चन्द्रमाश्चन्द्रमा ह्येतस्यान्नं य एष तपति तद्यजमानं चैवैतज्जनयत्यन्नाद्यं चास्मै जनयत्यृचश्च साम्नश्च यजमानं जनयत्यद्भ्यश्च सोमाच्चास्माऽअन्नाद्यम् ॥१२॥ यजुषा ह वै देवाः । अग्रे यज्ञं तेनिरेऽथर्चाथ साम्ना तदिदमप्येतर्हि यजुषैवाग्रे यज्ञं तन्वतेऽथर्चाथ साम्ना यजो ह वै नामैतद्यद्यजुरिति ॥१३॥ यत्र वै देवाः । इमा विद्याः कामान्दुदुह्रे तद्ध यजुर्विद्यैव भूयिष्ठान्कामान्दुदुहे सा निर्धीततमेवास सा नेतरे विद्ये प्रत्यास नान्तरिक्षलोक इतरौ लोकौ प्रत्यास ॥१४॥ ते देवा अकामयन्त । कथं न्वियं विद्येतरे विद्ये प्रतिस्यात्कथमन्तरिक्षलोक इतरौ लोकौ प्रतिस्यादिति ॥१५॥ ते होचुः । उपांश्वेव यजुर्भिश्चराम तत एषा विद्येतरे विद्ये प्रतिभविष्यति ततोऽन्तरिक्षलोक इतरौ लोकौ प्रतिभविष्यतीति ॥१६॥ तैरुपांश्वचरन् । आप्याययन्नेवैनानि तत्तत एषा विद्येतरे विद्ये प्रत्यासीत्ततोऽन्तरिक्षलोक इतरौ लोकौ प्रत्यासीत्तस्माद्यजूꣳषि निरुक्तानि सन्त्यनिरुक्तानि तस्मादयमन्तरिक्षलोको निरुक्तः सन्ननिरुक्तः ॥१७॥ स य उपांशु यजुर्भिश्चरति । आप्याययत्येवैनानि स तान्येनमापीनान्याप्याययन्त्यथ य उच्चैश्चरति रूक्षयत्येवैनानि स तान्येनꣳ रूक्षाणि रूक्षयन्ति ॥१८॥ वागेवऽर्चश्च सामानि च । मन एव यजूꣳषि स यऽऋचा च साम्ना च चरन्ति वाक्ते भवन्त्यथ ये यजुषा चरन्ति मनस्ते भवन्ति तस्मान्नानभिप्रेषितमध्वर्युणा किं चन क्रियते यद्वेवाध्वर्युराहानुब्रूहि यजेत्यथैव ते कुर्वन्ति यऽऋचा कुर्वन्ति यदेवाध्वर्युराह सोमः पवतऽउपावर्तध्वमित्यथैव ते कुर्वन्ति ये साम्ना कुर्वन्ति नो ह्यनभिगतं मनसा वाग्वदति ॥१९॥ तद्वाऽएतन्मनोऽध्वर्युः । पुरऽइवैव चरति तस्मात्पु-

रश्चरणं नाम पुर-इव ह वै श्रिया यशसा भवति य एवमेतद्वेद ॥२०॥ तद्वाऽए-
तदेव पुरश्चरणम् । य एष तपति स एतस्यैवावृता चरेद्ग्रहं गृह्णीतैतस्यैवावृतम-
न्वावर्तेत प्रतिगीर्यैतस्यैवावृतमन्वावर्तेत ग्रहꣳ जुह्वैतस्यैवावृतमन्वावर्तेत स
हैष भर्ता स यो हैवं विद्वानेतस्यावृता शक्नोति चरितुꣳ शक्नोति हैव भार्या-
न्भर्तुम् ॥२१॥ ब्राह्मणम् ॥ १ [६. ७.] ॥

या वै दीक्षा सा निषत् । तत्सत्त्रं तस्मादेनानासतऽइत्याहुरथ यत्ततो यज्ञं
तन्वते तद्यन्ति तन्नयति यो नेता भवति स तस्मादेनान्यन्तीत्याहुः ॥१॥ या ह
दीक्षा सा निषत् । तत्सत्त्रं तदयनं तत्सत्त्रायणमथ यत्ततो यज्ञस्योदृचं गत्वोत्ति-
ष्ठन्ति तदुत्थानं तस्मादेनानुदस्थुरित्याहुरिति नु पुरस्तादुदयनम् ॥२॥ अथ दीक्षि-
ष्यमाणाः समवस्यन्ति । ते यद्यग्निं चेष्यमाणा भवन्त्यरणिष्वेवाग्नीन्त्समारोह्योपस-
मायन्ति यत्र प्राजापत्येन पशुना यक्ष्यमाणा भवन्ति मथित्वोपसमाधायोद्धृत्याहव-
नीयं यजन्तऽएतेन प्राजापत्येन पशुना ॥३॥ तस्य शिरो निदधति । तेषां यदि
तदहर्दीक्षा न समैत्यरणिष्वेवाग्नीन्त्समारोह्य यथायथं विपरेत्य जुह्वति ॥४॥ अथ
यदहरेषां दीक्षा समैति । अरणिष्वेवाग्नीन्त्समारोह्योपसमायन्ति यत्र दीक्षिष्यमाणा
भवन्ति गृहपतिरेव प्रथमो मन्थते मध्यं प्रति शालाया अथेतरेषामर्धा दक्षिणत
उपविशन्त्यर्धा उत्तरतो मथित्वोपसमाधायैकैकमेवोल्मुकमादायोपसमायन्ति गृह-
पतेर्गार्हपत्यं गृहपतेरेव गार्हपत्यादुद्धृत्याहवनीयं दीक्षन्ते तेषाꣳ समान आह-
वनीयो भवति नाना गार्हपत्या दीक्षोपसत्सु ॥५॥ अथ यदहरेषां क्रयो भवति
। तदहर्गार्हपत्यां चितिमुपदधात्यथेतरेभ्य उपवसथे धिष्ण्यान्वैसर्जिनानां काले
प्राच्यः पत्न्य उपसमायन्ति प्रजहत्येतानपरानग्नीन्कृतऽएव वैसर्जिने ॥६॥ राजानं
प्रणयति । उद्यत एवैष आग्नीध्रीयोऽग्निर्भवत्यथैतऽएकैकमेवोल्मुकमादाय यथा-
धिष्ण्यं विपरायन्ति तैरेव तेषामुल्मुकैः प्रघ्नन्तीति ह स्माह याज्ञवल्क्यो ये तथा

कुर्वन्तीत्येतन्न्वेकमयनम् ॥७॥ अथेदं द्वितीयम् । अरणिष्वेवाग्नीन्त्समारोह्योपसमायन्ति यत्र प्राजापत्येन पशुना यक्ष्यमाणा भवन्ति मथित्वोपसमाधायोद्धृत्याहवनीयं यजन्त एतेन प्राजापत्येन पशुना ॥८॥ तस्य शिरो निदधति । तेषां यदि तदहर्दीक्षा न समेत्यरणिष्वेवाग्नीन्त्समारोह्य यथायथं विपरेत्य जुह्वति ॥९॥ अथ यदहरेषां दीक्षा समैति । अरणिष्वेवाग्नीन्त्समारोह्योपसमायन्ति यत्र दीक्षिष्यमाणा भवन्ति गृहपतिरेव प्रथमो मन्थतेऽथेतरे पर्युपविश्य मन्थन्ते ते जातं-जातमेवानुप्रहरन्ति गृहपतेर्गार्हपत्ये गृहपतेरेव गार्हपत्यादुद्धृत्याहवनीयं दीक्षन्ते तेषाꣳ समान आहवनीयो भवति समानो गार्हपत्यो दीक्षोपसत्सु ॥१०॥ अथ यदहरेषां क्रयो भवति । तदहर्गार्हपत्यां चितिमुपदधात्यथेतरेभ्य उपवसथे धिष्ण्यान्वैसर्जिनानां काले प्राच्यः पत्न्य उपसमायन्ति प्रजहत्येतमपरमग्निꣳ हुत एव वैसर्जिने ॥११॥ राजानं प्रणयति । उद्यत एवैष आग्नीध्रीयोऽग्निर्भवत्यथैत एकैकमेवोल्मुकमादाय यथाधिष्ण्यं विपरायन्ति समदमु हैव ते कुर्वन्ति समद्धैनान्विन्दत्यर्तुका ह भवन्त्यपि ह तमर्धꣳ समद्विन्दति यस्मिन्नर्धे यजन्ते ये तथा कुर्वन्त्येतद्द्वितीयमयनम् ॥१२॥ अथेदं तृतीयम् । गृहपतेरेवारण्योः संवदन्ते य इतोऽग्निर्जनिष्यते स नः सह यदनेन यज्ञेन जेष्यामोऽनेन पशुबन्धेन तन्नः सह सह नः साधुकृत्या य एव पापं करवत्तस्यैव तदित्येवमुक्त्वा गृहपतिरेव प्रथमः समारोहयतेऽथेतरेभ्यः समारोहयति स्वयं वैव समारोहयन्ते तऽआयन्ति यत्र प्राजापत्येन पशुना यक्ष्यमाणा भवन्ति मथित्वोपसमाधायोद्धृत्याहवनीयं यजन्त एतेन प्राजापत्येन पशुना ॥१३॥ तस्य शिरो निदधति । तेषां यदि तदहर्दीक्षा न समेत्यरणिष्वेवाग्नीन्त्समारोह्य यथायथं विपरेत्य जुह्वति ॥१४॥ अथ यदहरेषां दीक्षा समैति । गृहपतेरेवारण्योः संवदन्ते य इतोऽग्निर्जनिष्यते स नः सह यदनेन यज्ञेन जेष्यामोऽनेन सत्रेण तन्नः सह सह नः साधुकृत्या य एव पापं करवत्तस्यैव

तदित्येवमुक्त्वा गृहपतिरेव प्रथमः समारोहयतेऽथेतरेभ्यः समारोहयति स्वयं वैव समारोहयन्ते तऽआयन्ति यत्र दीक्षिष्यमाणा भवन्ति मथित्वोपसमाधायाहुत्याहवनीयं दीक्षन्ते तेषाꣳ समानऽआहवनीयो भवति समानो गार्हपत्यो दीक्षोपसत्सु ॥१५॥ अथ यदहरेषां क्रयो भवति । तदहर्गार्हपत्यां चितिमुपदधात्यथेतरेभ्य उपवसथे धिष्ण्यान्विसर्जिनानां काले प्राच्यः पत्न्य उपसमायन्ति प्रज्ञात्येतमपरमग्निꣳ कृतऽएव वैसर्जिने ॥१६॥ राजानं प्रणयति । उद्यत एवैष आग्नीध्रीयोऽग्निर्भवत्यथैतऽएकैकमेवोल्मुकमादाय यथाधिष्ण्यं विपरायन्ति तत्तत्कृतं नाकृतं यन्नानाधिष्ण्या भवन्ति वरीयानाकाशोऽसत्परिचरणायेत्यथ यन्नानापुरोडाशा भूयो हविरुच्छिष्टमसत्समाप्त्याऽइति ॥१७॥ अथ येन सत्त्रेण देवाः । क्षिप्रऽएव पाप्मानमपाघ्नतेमां जितिमजयन्यैषामियं जितिस्तदुत उद्यतऽएकगृहपतिका वै देवा एकपुरोडाशा एकधिष्ण्याः क्षिप्रऽएव पाप्मानमपाघ्नत क्षिप्रे प्राजायन्त तथोऽएवैतऽएकगृहपतिका एकपुरोडाशा एकधिष्ण्याः क्षिप्रऽएव पाप्मानमपघ्नते क्षिप्रे प्रजायन्ते ॥१८॥ अथादः पूर्वस्मिन्नुदीचीनवꣳशा शाला भवति । तन्मानुषꣳ समान आहवनीयो भवति नाना गार्हपत्यास्तद्विकृष्टं गृहपतेरेव गार्हपत्ये जाघन्या पत्नीः संयाजयन्त्यान्ये नेतरे प्रतियजन्तऽआसते तद्विकृष्टम् ॥१९॥ अथात्र प्राचीनवꣳशा शाला भवति । तद्देवत्रा समान प्राहवनीयो भवति समानो गार्हपत्यः समान आग्नीध्रीयस्तदेतत्सत्त्रꣳ समृद्धं यथैकाहः समृद्ध एवं तस्य न ह्वलास्ति तस्यैषैव समान्यावृद्यदन्यद्धिष्ण्येभ्यः ॥२०॥ ब्राह्मणम् ॥१० [६. ८.] ॥ ॥

देवा ह वै सत्त्रमासत । श्रियं गछेम यशः स्यामान्नादाः स्यामेति तेभ्य एतदन्नाद्यमभिजितमपाचिक्रमिषत्पशवो वाऽअन्नं पशवो हैवैभ्यस्तदपाचिक्रमिषन्यद्वै न इमे श्रान्ता न हिꣳस्युः कथमिव स्विन्नः सद्युन्तऽइति ॥१॥ तऽएते गार्हपत्ये द्वेऽआहुतीऽअनुद्रुवुः । गृहा वै गार्हपत्यो गृहा वै प्रतिष्ठा तदेनान्गृहेष्वेव

न्ययच्छꣳस्तेभ्य एतदन्नाद्यमभिजितं नापाक्रामत् ॥२॥ तथोऽएवेमे सत्त्रमासते । ये सत्त्रमासते श्रियं गच्छेम यशः स्यामान्नादाः स्यामेति तेभ्य एतदन्नाद्यमभिजितमपचिक्रमिषति पशवो वाऽअन्नं पशवो हैवैभ्यस्तदपचिक्रमिषन्ति यद्वै न इमे श्रान्ता न हिꣳस्युः कथमिव स्विन्नः सद्यन्तऽइति ॥३॥ तऽएते गार्हपत्ये द्वेऽआहुती जुह्वति । गृहा वै गार्हपत्यो गृहा वै प्रतिष्ठा तदेनान्गृहेष्वेव नियच्छन्ति तथैभ्य एतदन्नाद्यमभिजितं नापक्रामति ॥४॥ तथोऽएवैतस्मात् । एतदन्नाद्यमुपाहृतमपचिक्रमिषति यद्वै मायं न हिꣳस्यात्कथमिव स्विन्ना सद्यतऽइति ॥४॥ तस्य परस्तादेवाग्रेऽल्पश-इव प्राश्नाति । तदेनदुपनिमदति तद्वद न वै तथाभूच्यथामꣳसि न वै माहिꣳसीदिति तदेनमुपावश्रयते स ह प्रिय एवान्नस्यान्नादो भवति य एवं विद्वानेतस्य व्रतꣳ शक्नोति चरितुम् ॥५॥ तद्वाऽएतत् । दशमेऽहन्त्सत्त्रोत्थानं क्रियते तेषामेकैक एव वाचंयम आस्ते वाचमाप्याययꣳस्तयापीनयायातयाम्न्योत्तरमहस्तन्वतेऽथेतरे विसृज्यन्ते समिद्धारा वा स्वाध्यायं वा तत्राप्यश्नन्ति ॥६॥ तेऽपराह्णेऽउपसमेत्य । अप उपस्पृश्य पत्नीशालꣳ सम्प्रपद्यन्ते तेषु समन्वारब्धेष्वेतेऽआहुती जुहोतीह रतिरिह रमध्वमिह धृतिरिह स्वधृतिः स्वाहेति पशूनेवैतदाह पशूनेवैतदात्मन्नियच्छन्ते ॥८॥ अथ द्वितीयां जुहोति । उपसृजन्धरुणं मात्रऽइत्यग्निमेवैतत्पृथिव्याऽउपसृजन्नाह धरुणो मातरं धयन्नित्यग्निमेवैतत्पृथिवीं धयन्तमाह रायस्पोषमस्मासु दीधरत्स्वाहेति पशवो वै रायस्पोषः पशूनेवैतदात्मन्नियच्छन्ते ॥९॥ ते प्राञ्च उपनिष्क्रामन्ति । ते पश्चात्प्राञ्चो हविर्धाने सम्प्रपद्यन्ते पुरस्ताद्धि प्रत्यञ्चस्तꣳस्यमाना अथैवꣳ सत्रोत्थाने ॥१०॥ तऽउत्तरस्य हविर्धानस्य । जघन्यायां कूबर्याꣳ सामाभिगायन्ति सत्त्रस्यऽऋद्धिरिति राद्धिमेवैतदभ्युत्तिष्ठन्त्युत्तरवेदेर्वोत्तरायाꣳ श्रोणावितरं तु कृततरम् ॥११॥ यद्दक्षिणस्य हविर्धानस्य । जघन्यायां कूबर्यामगन्म ज्योतिरमृता अभूमेति ज्योतिर्वाऽएते भवन्त्य-

मृता भवन्ति ये सत्त्रमासते दिवं पृथिव्या अध्यारुहामेति दिवं वाऽएते पृथिव्या अध्यारोहन्ति ये सत्त्रमासतेऽविदाम देवानिति विन्दन्ति हि देवान्त्स्वर्ज्योतिरिति त्रिर्निधनमुपावयन्ति स्वर्ज्योति ज्योतिर्ज्योति भवन्ति तद्यदेवैतस्य साम्नो रूपं तदेवैते भवन्ति ये सत्त्रमासते ॥ १२ ॥ ते दक्षिणस्य हविर्धानस्य । अधोऽधोऽक्षꣳ सर्पन्ति स यथाहिस्त्वचो निर्मुच्येतैवꣳ सर्वस्मात्पाप्मनो निर्मुच्यन्तेऽतिच्छन्दसा सर्पन्त्येषा वै सर्वाणि छन्दाꣳसि यदतिच्छन्दास्तथैनान्पाप्मा नान्वत्येति तस्मादतिच्छन्दसा सर्पन्ति ॥ १३ ॥ घ्नन्ते सर्पन्ति । युवं तमिन्द्रापर्वता पुरोयुधा यो नः पृतन्यादप तं-तमिद्धतं वज्रेण तं-तमिद्धतम् । दूरे चत्ताय छन्त्सद्गहने यदिनक्षत् । अस्माकꣳ शत्रून्परि शूर विश्वतो दर्मा दर्षीष्ट विश्वत इति ॥ १४ ॥ ते प्राञ्च उपनिष्क्रामन्ति । ते पुरस्तात्प्रत्यञ्चः सदः सम्प्रपद्यन्ते पश्चाद्धि प्राञ्चस्तꣳस्यमाना अथैवꣳ सत्रोत्थाने ॥ १५ ॥ ते यथाधिष्ण्यमेवोपविशन्ति । देवेभ्यो ह वै वाचो रसोऽभिजितोऽपचिक्रमिषां चकार स इमामेव पराङत्यसिसृप्सदियं वै वाक्तस्या एष रसो यदोषधयो यद्वनस्पतयस्तमेतेन साम्नाप्नुवन्त्स एनानाप्तोऽभ्यावर्तत तस्मादस्यामूर्ध्वा ओषधयो जायन्तऽऊर्ध्वा वनस्पतयस्तथोऽएवैतेभ्य एतद्वाचो रसोऽभिजितोऽपचिक्रमिषति स इमामेव पराङतिसिसृप्सतीयं वै वाक्तस्या एष रसो यदोषधयो यद्वनस्पतयस्तमेतेन साम्नाप्नुवन्ति स एनानाप्तोऽभ्यावर्तते तस्मादस्यामूर्ध्वा ओषधयो जायन्तऽऊर्ध्वा वनस्पतयः ॥ १६ ॥ सर्पराज्ञ्या ऋक्षु स्तुवते । इयं वै पृथिवी सर्पराज्ञी तदनयैवैतत्सर्वमाप्नुवन्ति स्वयम्प्रस्तुतमनुपगीतं यथा नान्य उपशृणुयादति ह रेचयेद्यदन्यः प्रस्तुयादतिरेचयेद्यदन्य उपगायेदतिरेचयेद्यदन्य उपशृणुयात्तस्मात्स्वयम्प्रस्तुतमनुपगीतम् ॥ १७ ॥ चतुर्होतॄन्होता व्याचष्टे । एतदेवैतत्स्तुतमनुशꣳसति यदि होता न विद्याद्गृहपतिर्व्याचक्षीत होतुस्त्वेव व्याख्यानम् ॥ १८ ॥ अथाध्वर्योः प्रतिगरः । अरात्सुरिमे यजमाना भद्रमेभ्योऽभूदिति कल्याणमेवैतन्मानुष्यै

वाचो वदति ॥१९॥ अथ वाकोवाक्यं ब्रह्मोद्यं वदन्ति । सर्वं वै तेषामाप्तं भवति सर्वं जितं ये सत्रमासतेऽचारिषुर्यजुर्भिस्तत्तान्यापंस्तदवारुत्सताशꣳसिषुर्ऋचस्तत्ता आपंस्तदवारुत्सतास्तोषत सामभिस्तत्तान्यापंस्तदवारुत्सताथैषामेतदेवानाप्तमनवरुद्धं भवति यद्वाकोवाक्यं ब्राह्मणं तदेवैतेनाप्नुवन्ति तदवरुन्धते ॥२०॥ औदुम्बरीमुपसꣳसृप्य वाचं यच्छन्ति । विदुहन्ति वाऽएते यज्ञं निर्धयन्ति ये वाचा यज्ञं तन्वते वाग्घि यज्ञस्तामेषां पुरैकैक एव वाचंयम आस्ते वाचमाप्याययंस्तयापीनयायातयाम्न्योत्तरमहस्तन्वतेऽथात्र सर्वैव वागाप्ता भवत्यपवृक्ता ताꣳ सर्व ऽएव वाचंयमा वाचमाप्याययन्ति तयापीनयायातयाम्न्यातिरात्रं तन्वते ॥२१॥ औदुम्बरीमन्वारभ्यासते । अन्नं वाऽऊर्गुदुम्बर ऊर्ज्जैवैतद्वाचमाप्याययन्ति ॥२२॥ तेऽस्तमिते प्राञ्च उपनिष्क्रामन्ति । ते जघनेनाहवनीयमासतेऽग्रेण हविर्धाने तान्वाचंयमानेव वाचंयमः प्रतिप्रस्थाता वसतीवरीभिरभिपरिहरति ते यत्कामा आसीरंस्तेन वाचं विसृजेरन्कामैर्ह स्म वै पुरऽर्षयः सत्रमासतेऽसौ नः कामः स नः समृध्यतामिति यद्युऽअनेककामाः स्युर्लोककामा वा प्रजाकामा वा पशुकामा वा ॥२३॥ अनेनैव वाचं विसृजेरन् । भूर्भुवः स्वरिति तत्सत्येनैवैतद्वाचꣳ समर्धयन्ति तया समृद्धयाशिष आशासते सुप्रजाः प्रजाभिः स्यामेति तत्प्रजामाशासते सुवीरा वीरैरिति तद्वीरानाशासते सुपोषाः पोषैरिति तत्पुष्टिमाशासते ॥२४॥ अथ गृहपतिः सुब्रह्मण्यामाह्वयति । यं वा गृहपतिर्ब्रूयात्पृथगु हैवैके सुब्रह्मण्यामाह्वयन्ति गृहपतिस्त्वेव सुब्रह्मण्यामाह्वयेद्यं वा गृहपतिर्ब्रूयात्तस्मिन्त्समुपहवमिष्ट्वा समिधोऽभ्यादधति ॥२५॥ ब्राह्मणम् ॥११ [६. १.] ॥ पञ्चमः प्रपाठकः ॥ कण्डिकासंख्या१२६ ॥ ॥ षष्ठोऽध्यायः [३०.] ॥ ॥ अस्मिन्काण्डे कण्डिकासंख्या६४८ ॥ ॥

इति माध्यन्दिनीये शतपथब्राह्मणे ग्रहनाम चतुर्थं काण्डं समाप्तम् ॥४॥

VARIOUS READINGS.

Adhyâya १. १. २८ तन्न दशाभिर्न AB. - २. १४ °तद्द्वंदधाति AB. प्राज्ञा न प्र° A. - १६ Are we to read प्राणात्यश्वोदनत्य° ? - १७ तन्न साद° AB. - २६ प्रत्युद्यन्ते A. - ३. १७ see *Ri*k १. १६४. ४५. - ४. १ we exspect ऽभिगत्नेव. —

Adhyâya २. १. २६ °मनुह्वयते यद्देवै° AB. Read: यद्देवैनौ. - २७ संस्कृ° AB, and thus is to be read, not सꣳस्कृ° as I have given in the preceding books. - २. २६ °त्यस्थाली AB. - ३. ७ °भ्यर्द्ध AB. - ४. १ °त्सद्ध्रुवस्तौ A. - २४ °मग्निं । AB. देवाः । AB. —

Adhyâya ३. १. २४ °षिता । AB. - २७ सुतं । AB. - २. १२ see Kâtyây. ९. १३. २१. - ४. १ तत्तँ AB. सँज्ञ° AB. - ३३ समिन्द्धे AB. - ५. ५ and ७ भविष्यथेत्यु ह्वादित्या AB. - ७ Read: ह्वादित्या. - २० मह्वस्वसरस्य is either मह्वः स्वसरस्य with elision of the visarga or it contains the obsolete मह्व = मह्वा The mss. at Kâty. १०. ४. १३ read मह्वस्वसदस्य. —

Adhyâya ४. १ A has at the close ॥ ३ ॥ पिण्ड ॥. - ४. १४ °स्तं जुषस्व is the reading also in the Sa*m*hitâ ८. २२, where the तञ्जुषस्व of the Edition is a misprint. - ५. ३ संभवदिति AB. संभवेदिति is my conjecture, but I prefer now the reading of the mss. - १६ °षस्य द्विरवद्यन्ति AB. —

Adhyâya ५. १. १ आसाः भस्माः marginal gloss. in A. - १२ (and whereever the word occurs) सत्र AB.: the reading सत्त्र is given on account of

the etymology. - The beginning of ५. २ is preceded in A by the following words: गर्भप्रसूतिसमये पठन इदं ब्राह्मणं । द्वौ कण्डिका वर्जित । आखूत्कर ॥१॥ पशुश्रपण ॥२॥. - २. १० पुस्कृत्यैव AB. - १७ तच्चद्स्वाहाकृतं AB. - ३. ३ see *Rik*. ३. ३२. ११. - ४. ६ त्वच्चवत् AB. - ५. ५ डीङ् विहायसां गतौ अतिशयपेन (!) उच्चैर्गच्छन्ति marginal gloss. in A. - ७. २ °त्येतद्वाऽअस्त्ये° AB. - ८. १० ऽदिति AB. The Saṃhitâ ८. ४३ reads ऽदिते. - ११ तिल चलने तिल-इव शाखाभिः पुष्पफलैर्विवृद्धः तिल्विलः हस्तिपकः marginal gloss. in A. - १३ तद्यृद्ध एवै° AB. - ९. ११ कामन्वाऽइमा° AB. —

Adhyâya ६. ६. ४ A. has at the close ॥४॥ एकांडीने नाम । कुर्वा ॥. - ७. ११ सदस्यझोति AB. - १२ °र्धानेऽझोति AB. - २१ A has at the close ॥९॥ एब्राह्मणानि नाम । घटसर्प. - ८. २ पुरस्ताद्वदनम् A prima m. - ५ सामान आह्व° A. - २० A has at the close ॥१०॥ एब्राह्मणाने नाम बालसर्प. - ९. १४ त्संत्सद्रहनं B. - २३ समृझता° AB. —

ओम् । देवाश्च वाऽअसुराश्च । उभये प्राजापत्याः पस्पृधिरे ततोऽसुरा अतिमानेनैव कस्मिन्नु वयं जुहुयामेति स्वेष्वेवास्येषु जुह्वतश्चेरुस्तेऽतिमानेनैव पराबभूवुस्तस्मान्नातिमन्येत पराभवस्य हैतन्मुखं यदतिमानः ॥१॥ अथ देवाः । अन्योऽन्यस्मिन्नेव जुह्वतश्चेरुस्तेभ्यः प्रजापतिरात्मानं प्रददौ यज्ञो हैषामास यज्ञो हि देवानामन्नम् ॥२॥ ते होचुः । कस्य न इदं भविष्यतीति ते मम ममेत्येव न सम्पादयां चक्रुस्ते हासम्पाद्योचुराजिमेवास्मिन्नजामहै स यो न उज्जेष्यति तस्य न इदं भविष्यतीति तथेति तस्मिन्नाजिमाजन्त ॥३॥ स बृहस्पतिः । सवितारमेव प्रसवायोपाधावत्सविता वै देवानां प्रसवितेदं मे प्रसुव त्वत्प्रसूत इदमुज्जयानीति तदस्मै सविता प्रसविता प्रासुवत्तत्सवितृप्रसूत उदजयत्स इदꣳ सर्वमभवत्स इदꣳ सर्वमुदजयत्प्रजापतिꣳ ह्युदजयत्सर्वमु ह्येवेदं प्रजापतिस्तेनेष्ट्वैतामेवोर्ध्वां दिशमुदक्रामत्तस्माद्यश्च वेद यश्च नैषोर्ध्वा बृहस्पतेर्दिगित्येवाहुः ॥४॥ तद्ध ह स्म पुरा वाजपेयेन यजन्ते । एताꣳ ह स्मैवोर्ध्वां दिशमुत्क्रामन्ति तत औपाविनैव जानश्रुतेयेन प्रत्यवरूढं ततोऽर्वाचीनं प्रत्यवरोहन्ति ॥५॥ तेनेन्द्रोऽयजत । स इदꣳ सर्वमभवत्स इदꣳ सर्वमुदजयत्प्रजापतिꣳ ह्युदजयत्सर्वमु ह्येवेदं प्रजापतिस्तेनेष्ट्वैतामेवोर्ध्वां दिशमुदक्रामत् ॥६॥ ॥शतम् २१००॥ ॥ तद्ध ह स्म पुरा वाजपेयेन यजन्ते । एताꣳ ह स्मैवोर्ध्वां दिशमुत्क्रामन्ति तत औपाविनैव जानश्रुतेयेन प्रत्यवरूढं ततोऽर्वाचीनं प्रत्यवरोहन्ति ॥७॥ स यो वाजपेयेन यजते । स इदꣳ सर्वं भवति स इदꣳ सर्वमुज्जयति प्रजापतिꣳ ह्युज्जयति सर्वमु ह्येवेदं प्रजापतिः

॥८॥ तदाहुः । न वाजपेयेन यजेत सर्वं वा ऽएष इदमुज्जयति यो वाजपेयेन
यजते प्रजापतिं ह्युज्जयति सर्वमु ह्येवेदं प्रजापतिः स इह न किं चन परिशि-
नष्टि तस्येश्वरः प्रजा पापीयसी भवितोरिति ॥९॥ तद्वै यजेतैव । य ऽएवमेतं
यज्ञं क्लृप्तं विद्युर्ऋक्तो यजुष्टः सामतो ये प्रजज्ञयस्त ऽएनं याजयेयुरेषा ह त्वेवैतस्य
यज्ञस्य समृद्धिर्यदेनं विद्वांसो याजयन्ति तस्माद्यजेतैव ॥१०॥ स वा ऽएष ब्रा-
ह्मणस्यैव यज्ञः । यदेनेन बृहस्पतिरयजत ब्रह्म हि बृहस्पतिर्ब्रह्म हि ब्राह्मणो
ऽथो राजन्यस्य यदेनेनेन्द्रोऽयजत क्षत्रं हीन्द्रः क्षत्रं राजन्यः ॥११॥ राज्ञ एव
राजसूयं । राजा वै राजसूयेनेष्ट्वा भवति न वै ब्राह्मणो राज्यायालमवरं वै रा-
जसूयं परं वाजपेयं ॥१२॥ राजा वै राजसूयेनेष्ट्वा भवति । सम्राड्वाजपेयेनावरं
हि राज्यं परं साम्राज्यं कामयेत वै राजा सम्राड् भवितुमवरं हि राज्यं परं
साम्राज्यं न सम्राट्कामयेत राजा भवितुमवरं हि राज्यं परं साम्राज्यं ॥१३॥
स यो वाजपेयेनेष्ट्वा सम्राड् भवति । स इदं सर्वं संवृङ्क्ते स कर्मणः-कर्मणः पु-
रस्तादेतां सावित्रीमाहुतिं जुहोति देव सवितः प्रसुव यज्ञं प्रसुव यज्ञपतिं भ-
गायेति ॥१४॥ तद्यथैवादो बृहस्पतिः । सवितारं प्रसवायोपाधावत्सविता वै
देवानां प्रसवितेदं मे प्रसुव त्वत्प्रसूत इदमुज्जयानीति तदस्मै सविता प्रसविता
प्रासुवत्तत्सवितृप्रसूत उदजयदेवमेवैष एतत्सवितारमेव प्रसवायोपधावति सवि-
ता वै देवानां प्रसवितेदं मे प्रसुव त्वत्प्रसूत इदमुज्जयानीति तदस्मै सविता प्र-
सविता प्रसौति तत्सवितृप्रसूत उज्जयति ॥१५॥ तस्मादाह । देव सवितः प्रसुव
यज्ञं प्रसुव यज्ञपतिं भगाय । दिव्यो गन्धर्वः केतपूः केतं नः पुनातु वाचस्पति-
र्वाजं नः स्वदतु स्वाहेति प्रजापतिर्वै वाचस्पतिरन्नं वाजः प्रजापतिर्न इदमद्यान्नं
स्वदत्वित्येवैतदाह स एतामेवाहुतिं जुहोत्या श्वःसुत्याया एतद्ध्यस्यैतत्कर्मारब्धं
भवति प्रसन्न एतं यज्ञं भवति ॥१६॥ ब्राह्मणम् ॥१॥

अꣳशुं गृह्णाति । सर्ववायैव तस्माद्वाऽअꣳशुं गृह्णात्यथैतान्प्रज्ञातानेवाग्निष्टोमि-
कान्ग्रहान्गृह्णात्याग्रयणात् ॥१॥ अथ पृष्ठ्यान्गृह्णाति । तद्यद्देवैतैर्देवा उदजयंस्तद्दे-
वैष एतैरुज्जयति ॥२॥ अथ षोडशिनं गृह्णाति । तद्यद्देवैतेनेन्द्र उदजयत्तद्देवैष
एतेनोज्जयति ॥३॥ अथैतान्पञ्च वाजपेयग्रहान्गृह्णाति । ध्रुवसदं त्वा नृषदं मनः-
सदमुपयामगृहीतोऽसीन्द्राय त्वा जुष्टं गृह्णाम्येष ते योनिरिन्द्राय त्वा जुष्टतममि-
ति सादयत्येषां वै लोकानामयमेव ध्रुव इयं पृथिवीममेवैतेन लोकमुज्जयति
॥४॥ अप्सुषदं त्वा घृतसदं व्योमसदमुपयामगृहीतोऽसीन्द्राय त्वा जुष्टं गृह्णाम्येष
ते योनिरिन्द्राय त्वा जुष्टतममिति सादयत्येषां वै लोकानामयमेव व्योमेदमन्त-
रिक्षमन्तरिक्षलोकमेवैतेनोज्जयति ॥५॥ पृथिविसदं त्वान्तरिक्षसदं दिविसदं देव-
सदं नाकसदमुपयामगृहीतोऽसीन्द्राय त्वा जुष्टं गृह्णाम्येष ते योनिरिन्द्राय त्वा जु-
ष्टतममिति सादयत्येष वै देवसन्नाकसदेष एव देवलोको देवलोकमेवैतेनोज्ज-
यति ॥६॥ अपाꣳ रसमुद्वयसꣳ सूर्ये सन्तꣳ समाहितमपाꣳ रसस्य यो रसस्तं वो
गृह्णाम्युत्तममुपयामगृहीतोऽसीन्द्राय त्वा जुष्टं गृह्णाम्येष ते योनिरिन्द्राय त्वा जु-
ष्टतममिति सादयत्येष वाऽअपाꣳ रसो योऽयं पवते स एष सूर्ये समाहितः सू-
र्यात्पवतऽएतमेवैतेन रसमुज्जयति ॥७॥ ग्रहा ऊर्जाहुतयः । व्यन्तो विप्राय मतिं
तेषां विशिप्रियाणां वोऽहमिषमूर्जꣳ समग्रभमुपयामगृहीतोऽसीन्द्राय त्वा जुष्टमेष
ते योनिरिन्द्राय त्वा जुष्टतममिति सादयत्यूर्ग्वै रसो रसमेवैतेनोज्जयति ॥८॥
तान्वाऽएतान् । पञ्च वाजपेयग्रहान्गृह्णाति प्रजापतिं वाऽएष उज्जयति यो वा-
जपेयेन यजते संवत्सरो वै प्रजापतिः पञ्च वाऽऋतवः संवत्सरस्य तत्प्रजापति-
मुज्जयति तस्मात्पञ्च वाजपेयग्रहान्गृह्णाति ॥९॥ अथ सप्तदश सोमग्रहान्गृह्णाति
। सप्तदश सुराग्रहान्प्रजापतेर्वाऽएतेऽअन्धसी यत्सोमश्च सुरा च ततः सत्यं श्री-
र्ज्योतिः सोमोऽनृतं पाप्मा तमः सुरैतेऽएवैतदुभेऽअन्धसीऽउज्जयति सर्वं वाऽएष

इदमुज्जयति यो वाजपेयेन यजते प्रजापतिꣳ ह्युज्जयति सर्वमु ह्येवेदं प्रजापतिः ॥१०॥ स यत्सप्तदश । सोमग्रहान्गृह्णाति सप्तदशो वै प्रजापतिः प्रजापतिर्यज्ञः स यावानेव यज्ञो यावत्यस्य मात्रा तावतैवास्यैतत्सत्यꣳ श्रियं ज्योतिरुज्जयति ॥११॥ अथ यत्सप्तदश । सुराग्रहान्गृह्णाति सप्तदशो वै प्रजापतिः प्रजापतिर्यज्ञः स यावानेव यज्ञो यावत्यस्य मात्रा तावतैवास्यैतदनृतं पाप्मानं तम उज्जयति ॥१२॥ तऽउभये चतुस्त्रिꣳशद्ग्रहाः सम्पद्यन्ते । त्रयस्त्रिꣳशद्वै देवाः प्रजापतिश्चतुस्त्रिꣳशस्तत्प्रजापतिमुज्जयति ॥१३॥ अथ यत्र राजानं क्रीणाति । तद्दक्षिणतः प्रतिवेशतः केशवात्पुरुषात्सीसेन परिस्रुतं क्रीणाति न वाऽएष स्त्री न पुमान्यत्केशवः पुरुषो यदह पुमांस्तेन न स्त्री यदु केशवस्तेन न पुमान्नैतदयो न हिरण्यं यत्सीसं नैष सोमो न सुरा यत्परिस्रुत्तस्मात्केशवात्पुरुषात्सीसेन परिस्रुतं क्रीणाति ॥१४॥ अथ पूर्वेद्युः । द्वौ खरौ कुर्वन्ति पुरोऽक्षमेवान्यं पश्चादक्षमन्यं नेत्सोमग्रहांश्च सुराग्रहांश्च सह सादयामेति तस्मात्पूर्वेद्युर्द्वौ खरौ कुर्वन्ति पुरोऽक्षमेवान्यं पश्चादक्षमन्यम् ॥१५॥ अथ यत्र पूर्वया द्वारा । वसतीवरीः प्रपादयन्ति तदपरया द्वारा नेष्टा परिस्रुतं प्रपादयति दक्षिणतः पात्राण्यभ्यवहरन्ति पुरोऽक्षमेव प्रत्यङ्ङासीनोऽध्वर्युः सोमग्रहान्गृह्णाति पश्चादक्षं प्राङासीनो नेष्टा सुराग्रहान्त्सोमग्रहमेवाध्वर्युर्गृह्णाति सुराग्रहं नेष्टा सोमग्रहमेवाध्वर्युर्गृह्णाति सुराग्रहं नेष्टैवमेवैनाव्यत्यासं गृह्णीतः ॥१६॥ न प्रत्यञ्चमक्षमध्वर्युः । सोमग्रहमतिहरति न प्राञ्चमक्षं नेष्टा सुराग्रहं नेज्ज्योतिश्च तमश्च सꣳसृजावेति ॥१७॥ उपर्युपर्येवाक्षमध्वर्युः । सोमग्रहं धारयत्यधोऽधोऽक्षं नेष्टा सुराग्रहꣳ सम्पृचौ स्थः सं मा भद्रेण पृङ्क्तमिति नेत्पापमिति ब्रवावेति तौ पुनर्विहरतो विपृचौ स्थो वि मा पाप्मना पृङ्क्तमिति तद्यथेषीकां मुञ्जाद्विवृहेदेवमेनꣳ सर्वस्मात्पाप्मनो विवृहतस्तस्मिन्न तावच्चनैनो भवति यावत्तृणस्याग्रं तौ सादयतः ॥१८॥ अथाध्वर्युः । हिरण्यपात्रेण मधुग्रहं

गृह्णाति तं मध्ये सोमग्रहाणाꣳ सादयत्यथोक्थ्यं गृह्णात्यथ ध्रुवमेवैतान्त्सोमग्रहा-
नुत्तमे स्तोत्रऽऋत्विजां चमसेषु व्यवनीय जुह्वति तान्भक्षयन्त्यथ माध्यन्दिने सवने
मधुग्रहस्य च सुराग्रहाणां चोद्यते तस्यातः ॥११॥ ब्राह्मणम् ॥२॥

आग्नेयमग्निष्टोमऽआलभते । अग्निर्वाऽअग्निष्टोमोऽग्निष्टोममेवैतेनोज्जयत्यैन्द्रा-
ग्नमुक्थेभ्य आलभतऽऐन्द्राग्नानि वाऽउक्थान्युक्थान्येवैतेनोज्जयत्यैन्द्रꣳ षोडशिन
ऽआलभतऽइन्द्रो वै षोडशी षोडशिनमेवैतेनोज्जयति ॥१॥ सारस्वतꣳ सप्तद-
शाय स्तोत्रायालभते । तदेतदनतिरात्रे सति रात्रे रूपं क्रियते प्रजापतिं वाऽएष
उज्जयति यो वाजपेयेन यजते संवत्सरो वै प्रजापतिस्तदेतेन सारस्वतेन रात्रि-
मुज्जयति तस्मादेतदनतिरात्रे सति रात्रे रूपं क्रियते ॥२॥ अथ मरुद्भ्य उज्जेषेभ्यः
। वशां पृश्निमालभतऽइयं वै वशा पृश्निर्यदिदमस्यां मूलि चामूलं चान्नाद्यं प्रति
ष्ठितं तेनेयं वशा पृश्निरन्नं वाऽएष उज्जयति यो वाजपेयेन यजतेऽन्नपेयꣳ ह वै
नामैतद्यद्वाजपेयं विशो वै मरुतोऽन्नं वै विश उज्जेषेभ्य इत्युज्जित्याऽएव दुर्वे-
देऽउज्जेषवत्यौ याज्यानुवाक्ये यद्युज्जेषवत्यौ न विन्देदपि येऽएव के च मारु-
त्यौ स्यातां दुर्वेदोऽएव वशा पृश्निर्यदि वशां पृश्निं न विन्देदपि यैव का च व-
शा स्यात् ॥३॥ तस्या आवृत् । यत्र होता माहेन्द्रं ग्रहमनुशꣳसति तदस्यै व-
पया प्रचरेयुरेष वाऽइन्द्रस्य निष्केवल्यो ग्रहो यन्माहेन्द्रोऽप्यस्यैतन्निष्केवल्यमे-
व स्तोत्रं निष्केवल्यꣳ शस्त्रमिन्द्रो वै यजमानस्तन्मध्यत एवैतद्यजमाने वीर्यं द-
धाति तस्मादस्याऽअत्र वपया प्रचरेयुः ॥४॥ द्वेधावदानानि श्रपयन्ति । ततोऽर्धानां
जुह्वामुपस्तीर्य द्विर्द्विरवद्यति सकृदभिघारयति प्रत्यनक्त्यवदानान्यथोपभृति सकृ-
त्सकृदवद्यति द्विरभिघारयति न प्रत्यनक्त्यवदानानि तद्यदर्धानां द्विर्द्विरवद्यन्ति
तथैषा कृत्स्ना भवत्यथ यदेतैः प्रचरति तेन दैवीं विशमुज्जयत्यथार्धानि मानुष्यै
विशऽउपहरति तेनो मानुषीं विशमुज्जयति ॥५॥ तदु तथा न कुर्यात् । हल-

ति वाऽएष यो यज्ञपथादेत्येति वाऽएष यज्ञपथाद्य एवं करोति तस्माद्यत्रैवैतरेषां पशूनां वपाभिः प्रचरन्ति तदेवैतस्यै वपया प्रचरेयुरेकधावदानानि श्रपयन्ति न मानुष्यै विशऽउपहरन्ति ॥६॥ अथ सप्तदश प्राजापत्यान्पशूनालभते । ते वै सर्वे तूपरा भवन्ति सर्वे श्यामाः सर्वे मुष्कराः प्रजापतिं वाऽएष उज्जयति यो वाजपेयेन यजतेऽन्नं वै प्रजापतिः पशुर्वाऽअन्नं तत्प्रजापतिमुज्जयति सोमो वै प्रजापतिः पशुर्वै प्रत्यक्षꣳ सोमस्तत्प्रत्यक्षं प्रजापतिमुज्जयति सप्तदश भवन्ति सप्तदशो वै प्रजापतिस्तत्प्रजापतिमुज्जयति ॥७॥ ते वै सर्वे तूपरा भवन्ति । पुरुषो वै प्रजापतेर्नेदिष्ठꣳ सोऽयं तूपरोऽविषाणस्तूपरो वाऽअविषाणः प्रजापतिः प्राजापत्या एते तस्मात्सर्वे तूपरा भवन्ति ॥८॥ सर्वे श्यामाः । द्वे वै श्यामस्य रूपे शुक्लं चैव लोम कृष्णं च द्वन्द्वं वै मिथुनं प्रजननं प्रजननं प्रजापतिः प्राजापत्या एते तस्मात्सर्वे श्यामा भवन्ति ॥९॥ सर्वे मुष्कराः । प्रजननं वै मुष्करः प्रजननं प्रजापतिः प्राजापत्या एते तस्मात्सर्वे मुष्करा भवन्ति दुर्वेदा एवꣳसमृद्धाः पशवो यद्येवꣳसमृद्धान्न विन्देदपि कतिपया एवैवꣳसमृद्धाः स्युः सर्वमु ह्येवेदं प्रजापतिः ॥१०॥ तद्वैके । वाचऽउत्तममालभन्ते यदि वै प्रजापतेः परमस्ति वागेव तदेतद्वाचमुज्जयाम इति वदन्तस्तदु तथा न कुर्यात्सर्वं वाऽइदं प्रजापतिर्यदिमे लोका यदिदं किं च सा यदेवैषु लोकेषु वाग्वदति तद्वाचमुज्जयति तस्मादु तन्नाद्रियेत ॥११॥ तेषामावृत् । यत्र मैत्रावरुणो वामदेव्यमनुशꣳसति तदेषां वपाभिः प्रचरेयुः प्रजननं वै वामदेव्यं प्रजननं प्रजापतिः प्राजापत्या एते तस्मादेषां वपाभिरत्र प्रचरेयुः ॥१२॥ अथेष्टा अनुयाजा भवन्ति । अव्यूढे स्रुचावथैषाꣳ हविर्भिः प्रचरन्ति सोऽन्तोऽन्तो वै प्रजापतिस्तदन्तत एवैतत्प्रजापतिमुज्जयत्यथ यत्पुरा प्रचरेद्यथा यमध्वानमेष्यन्त्स्यात्तं गत्वा स क्व ततः स्यादेवं तत्तस्मादेषामत्र हविर्भिः प्रचरन्ति ॥१३॥ तदु तथा न कुर्यात् । ह्वलति वाऽएष यो यज्ञपथादेत्येति वा

ऽएष यज्ञपथाद्य एवं करोति तस्माद्यत्रैवेतरेषां पशूनां वपाभिः प्रचरन्ति तदेवै-
तेषां वपाभिः प्रचरेयुर्यत्रैवेतरेषां पशूनाᳫं हविर्भिः प्रचरन्ति तदेवैतेषाᳫं हविषा
प्रचरेयुरेकानुवाक्या एका याज्यैकदेवत्या हि प्रजापतयऽइत्युपाᳫंशूक्त्वा छागानाᳫं
हविषोऽनुब्रूहीति प्रजापतयऽइत्युपाᳫंशूक्त्वा छागानाᳫं हविः प्रस्थितं प्रेष्येति व-
षट्कृते जुहोति ॥ १४ ॥ ब्राह्मणम् ॥ ३ ॥

तं वै माध्यन्दिने सवनेऽभिषिञ्चति । माध्यन्दिने सवनऽआजिं धावन्त्येष वै प्रजापतिर्य एष यज्ञस्तायते यस्मादिमाः प्रजाः प्रजाता एतम्वेवाप्येतर्ह्यनु प्रजायन्ते तन्मध्यत एवैतत्प्रजापतिमुज्जयति ॥ १ ॥ अगृहीते माहेन्द्रे । एष वाऽइन्द्रस्य निष्केवल्यो ग्रहो यन्माहेन्द्रोऽप्यस्यैतन्निष्केवल्यमेव स्तोत्र निष्केवल्यᳫं शस्त्रमिन्द्रो वै यजमानस्तदेनᳫं स्वऽएवायतनेऽभिषिञ्चति तस्मादगृहीते माहेन्द्रे ॥ २ ॥ अथ रथमुपावहरति । इन्द्रस्य वज्रोऽसीति वज्रो वै रथ इन्द्रो वै यजमानस्तस्मादाहेन्द्रस्य वज्रोऽसीति वाजसा इति वाजसा हि रथस्त्वयायं वाजᳫं सेदित्यन्नं वै वाजस्त्वयायमन्नमुज्जयत्वित्येवैतदाह ॥ ३ ॥ तं धूर्गृहीतमन्तर्वेद्यभ्यववर्तयति । वाजस्य नु प्रसवे मातरं महीमित्यन्नं वै वाजोऽन्नस्य नु प्रसवे मातरं महीमित्येवैतदाहादितिं नाम वचसा करामहऽइतीयं वै पृथिव्यदितिस्तस्मादाहादितिं नाम वचसा करामहऽइति यस्यामिदं विश्वं भुवनमाविवेशेत्यस्याᳫं हीदᳫं सर्वं भुवनमाविष्टं तस्यां नो देवः सविता धर्म साविषदिति तस्यां नो देवः सविता यजमानᳫं सवतामित्येवैतदाह ॥ ४ ॥ अथाश्वानद्भिरभ्युक्षति । स्नपनायाभ्यवनीयमानान्स्नपितान्वोदानीतानद्भ्यो ह वाऽअग्रेऽश्वः सम्बभूव सोऽद्भ्यः सम्भवन्नसर्वः समभवदसर्वो हि वै समभवत्तस्मान्न सर्वैः पद्भिः प्रतितिष्ठत्येकैकमेव पादमुदच्य तिष्ठति तद्यदेवास्यात्रास्वहीयत तेनैवैनमेतत्समर्धयति कृत्स्नं करोति तस्मादश्वानद्भिरभ्युक्षति स्नपनायाभ्यवनीयमानान्स्नपितान्वोदानीतान् ॥ ५ ॥ सोऽभ्युक्ष-

ति । अप्स्वन्तरमृतमप्सु भेषजमपामुत प्रशस्तिष्वश्वा भवत वाजिन इत्यनेनापि देवीरापो यो व ऊर्मिः प्रतूर्तिः ककुन्मान्वाजसास्तेनायं वाजꣳ सेदित्यन्नं वै वाजस्तेनायमन्नमुज्जयत्वित्येवैतदाह ॥६॥ अथ रथं युनक्ति । स दक्षिणायुग्यमेवाग्रे युनक्ति सव्यायुग्यं वाऽअग्रे मानुषेऽथैवं देवत्रा ॥७॥ स युनक्ति । वातो वा मनो वेति न वै वातात्किं चनाशीयोऽस्ति न मनसः किं चनाशीयोऽस्ति तस्मादाह वातो वा मनो वेति गन्धर्वाः सप्तविꣳशतिस्तेऽग्रेऽश्वमयुञ्जन्निति गन्धर्वा ह वाऽअग्रेऽश्वं युयुजुस्तय्येऽग्रेऽश्वमयुञ्जंस्ते त्वा युञ्जन्त्वित्येवैतदाह तेऽअस्मिञ्जवमादधुरिति तय्येऽस्मिञ्जवमादधुस्ते त्वयि जवमादधत्वित्येवैतदाह ॥८॥ अथ सव्यायुग्यं युनक्ति । वातरꣳहा भव वाजिन्युज्यमान इति वातजवो भव वाजिन्युज्यमान इत्येवैतदाहेन्द्रस्येव दक्षिणः श्रियैधीति यथेन्द्रस्य दक्षिणः श्रियैवं यजमानस्य श्रियैधीत्येवैतदाह युञ्जन्तु त्वा मरुतो विश्ववेदस इति युञ्जन्तु त्वा देवा इत्येवैतदाहा ते त्वष्टा पत्सु जवं दधात्विति नात्र तिरोहितमिवास्त्यथ दक्षिणाप्रष्टिं युनक्ति सव्याप्रष्टिं वाऽअग्रे मानुषेऽथैवं देवत्रा ॥९॥ स युनक्ति । जवो यस्ते वाजिन्निहितो गुहा यः श्येने परीत्तोऽअचरच्च वातऽइति जवो यस्ते वाजिन्नप्यन्यत्रापनिहितस्तेन न इमं यज्ञं प्रजापतिमुज्जयेत्येवैतदाह तेन नो वाजिन्बलवान्बलेन वाजजिच्च भव समने च पारयिष्णुरित्यन्नं वै वाजोऽन्नजिच्च न एध्यस्मिंश्च नो यज्ञे देवसमनऽइमं यज्ञं प्रजापतिमुज्जयेत्येवैतदाह ॥१०॥ ते वाऽएतऽएव त्रयो युक्ता भवन्ति । त्रिवृद्धि देवानां तद्धि देवत्राधिप्रष्टियुग एव चतुर्थोऽन्वेति मानुषो हि स तं यत्र दास्यन्भवति तच्चतुर्थमुपयुज्य ददाति तस्मादपीतरस्मिन्यज्ञऽएतऽएव त्रयो युक्ता भवन्ति त्रिवृद्धि देवानां तद्धि देवत्राधिप्रष्टियुग एव चतुर्थोऽन्वेति मानुषो हि स तं यत्र दास्यन्भवति तच्चतुर्थमुपयुज्य ददाति ॥१२॥ अथ बार्हस्पत्यं चरुं नैवारꣳ सप्तदशशरावं निर्वपति । अन्नं वाऽएष उज्जयति

यो वाजपेयेन यजतेऽन्नपेयꣳ ह वै नामैतद्यद्वाजपेयं तद्यदेवैतदन्नमुदजैषीत्तदेवा-
स्माऽएतत्करोति ॥१२॥ अथ यद्बार्हस्पत्यो भवति । बृहस्पतिर्ह्येतमग्रऽउदजय-
त्तस्माद्बार्हस्पत्यो भवति ॥१३॥ अथ यन्नैवारो भवति । ब्रह्म वै बृहस्पतिरेते
वै ब्रह्मणा पच्यन्ते यन्नीवारास्तस्मान्नैवारो भवति सप्तदशशरावो भवति सप्तदशो
वै प्रजापतिस्तत्प्रजापतिमुज्जयति ॥१४॥ तमश्वानवघ्रापयति । वाजिन इति वाजि-
नो ह्यश्वास्तस्मादाह वाजिन इति वाजजित इत्यन्नं वै वाजोऽन्नजित इत्येवैत-
दाह वाजꣳ सरिष्यन्त इत्याजिꣳ हि सरिष्यन्तो भवन्ति बृहस्पतेर्भागमवजिघ्रतेति
बृहस्पतेर्ह्येष भागो भवति तस्मादाह बृहस्पतेर्भागमवजिघ्रतेति तद्यदश्वानवघ्रा-
पयतीममुज्जयानीति तस्माद्वाऽअश्वानवघ्रापयति ॥१५॥ ब्राह्मणम् ॥४॥ ॥

तद्यदाजिं धावन्ति । इममेवैतेन लोकमुज्जयत्यथ यद्ब्रह्मा रथचक्रे साम गा-
यति नाभिदघ्नऽउद्धितेऽन्तरिक्षलोकमेवैतेनोज्जयत्यथ यद्यूपꣳ रोहति देवलोकमे-
वैतेनोज्जयति तस्माद्वाऽएतत्त्रयं क्रियते ॥१॥ स ब्रह्मा रथचक्रमधिरोहति । ना-
भिदघ्नऽउद्धितं देवस्याहꣳ सवितुः सवे सत्यसवसो बृहस्पतेरुत्तमं नाकꣳ रुहेय-
मिति यदि ब्राह्मणो यजते ब्रह्म हि बृहस्पतिर्ब्रह्म हि ब्राह्मणः ॥२॥ अथ यदि
राजन्यो यजते । देवस्याहꣳ सवितुः सवे सत्यसवस इन्द्रस्योत्तमं नाकꣳ रुहेय-
मिति क्षत्रꣳ हीन्द्रः क्षत्रꣳ राजन्यः ॥३॥ त्रिः सामाभिगायति । त्रिरभिगीयावरो-
हति देवस्याहꣳ सवितुः सवे सत्यप्रसवसो बृहस्पतेरुत्तमं नाकमरुहमिति यदि
ब्राह्मणो यजते ब्रह्म हि बृहस्पतिर्ब्रह्म हि ब्राह्मणः ॥४॥ अथ यदि राजन्यो
यजते । देवस्याहꣳ सवितुः सवे सत्यप्रसवस इन्द्रस्योत्तमं नाकमरुहमिति क्षत्रꣳ
हीन्द्रः क्षत्रꣳ राजन्यः ॥५॥ अथ सप्तदश दुन्दुभीननुवेद्यन्तꣳ समिन्वन्ति । प्रतीच
आग्नीध्रात्प्रजापतिं वाऽएष उज्जयति यो वाजपेयेन यजते वाग्वै प्रजापतिरेषा
वै परमा वाग्या सप्तदशानां दुन्दुभीनां परमामेवैतद्वाचं परमं प्रजापतिमुज्जयति

सप्तदश भवन्ति सप्तदशो वै प्रजापतिस्तत्प्रजापतिमुज्जयति ॥६॥ अथैतेषां दुन्दुभीनाम् । एकं यजुषाहन्ति तत्सर्वे यजुषाहता भवन्ति ॥७॥ स आहन्ति । बृहस्पते वाजं जय बृहस्पतये वाचं वदत बृहस्पतिं वाजं जापयतेति यदि ब्राह्मणो यजते ब्रह्म हि बृहस्पतिर्ब्रह्म हि ब्राह्मणः ॥८॥ अथ यदि राजन्यो यजते । इन्द्र वाजं जयेन्द्राय वाचं वदतेन्द्रं वाजं जापयतेति क्षत्रꣳ हीन्द्रः क्षत्रꣳ राजन्यः ॥९॥ अथैतेष्वाजिसृत्सु रथेषु । पुनरासृतेष्वेतेषां दुन्दुभीनामेकं यजुषोपावहरति तत्सर्वे यजुषोपावहृता भवन्ति ॥१०॥ स उपावहरति । एषा वः सा सत्या संवागभूद्यया बृहस्पतिं वाजमजीजपताजीजपत बृहस्पतिं वाजं वनस्पतयो विमुच्यध्वमिति यदि ब्राह्मणो यजते ब्रह्म हि बृहस्पतिर्ब्रह्म हि ब्राह्मणः ॥११॥ अथ यदि राजन्यो यजते । एषा वः सा सत्या संवागभूद्ययेन्द्रं वाजमजीजपताजीजपतेन्द्रं वाजं वनस्पतयो विमुच्यध्वमिति क्षत्रꣳ हीन्द्रः क्षत्रꣳ राजन्यः ॥१२॥ अथ वेद्यन्तात् । राजन्य उदङ् सप्तदश प्रव्याधान्प्रविध्यति यावान्वाऽएकः प्रव्याधस्तावांस्तिर्यङ् प्रजापतिरथ यावत्सप्तदश प्रव्याधास्तावानन्वङ् प्रजापतिः ॥१३॥ तद्यद्राजन्यः प्रविध्यति । एष वै प्रजापतेः प्रत्यक्षतमां यद्राजन्यस्तस्मादेकः सन्बहूनामीष्टे यद्वेव चतुरक्षरः प्रजापतिश्चतुरक्षरो राजन्यस्तस्माद्राजन्यः प्रविध्यति सप्तदश प्रव्याधान्प्रविध्यति सप्तदशो वै प्रजापतिस्तत्प्रजापतिमुज्जयति ॥१४॥ अथ यं यजुषा युनक्ति । तं यजमान आतिष्ठति देवस्याहꣳ सवितुः सवे सत्यप्रसवसो बृहस्पतेर्वाजजितो वाजं जेषमिति ॥१५॥ तद्यथैवादो बृहस्पतिः । सवितारं प्रसवायोपाधावत्सविता वै देवानां प्रसवितेदं मे प्रसुव त्वत्प्रसूत इदमुज्जयानीति तदस्मै सविता प्रसविता प्रासुवत्तत्सवितृप्रसूत उदजयदेवमेवैष एतत्सवितारमेव प्रसवायोपधावति सविता वै देवानां प्रसवितेदं मे प्रसुव त्वत्प्रसूत इदमुज्जयानीति तदस्मै सविता प्रसविता प्रसौति तत्सवितृप्रसूत उज्जयति ॥१६॥ अथ

यद्यध्वर्योः । अन्तेवासी वा ब्रह्मचारी वैतद्यजुरधीयात्सोऽन्वाख्याय वाचयति वाजिन इति वाजिनो ह्यश्वास्तस्मादाह वाजिन इति वाजजित इत्यन्नं वै वाजोऽन्नजित इत्येवैतदाहाध्वन स्कभ्नुवन्त इत्यध्वनो हि स्कभ्नुवन्तो धावन्ति योजना मिमाना इति योजनशो हि मिमाना अध्वानं धावन्ति काष्ठां गच्छतेति यथैनानन्तरा नाष्ट्रा रक्षांसि न हिंस्युरेवमेतदाह धावन्त्याजिमाघ्नन्ति दुन्दुभीनभि साम गायति ॥१७॥ अथैताभ्यां जगतीभ्याम् । जुहोति वानु वा मन्त्रयते यदि जुहोति यद्यनुमन्त्रयते समान एव बन्धुः ॥१८॥ स जुहोति । एष स्य वाजी क्षिपणिं तुरण्यति ग्रीवायां बद्धोऽअपिकक्षऽआसनि । क्रतुं दधिक्रा अनु संसनिष्यदत्पथामङ्कांस्यन्वापनीफणत्स्वाहा ॥१९॥ उत स्म । अस्य द्रवतस्तुरण्यतः पर्णं न वेरनुवाति प्रगर्धिनः । श्येनस्येव ध्रजतोऽअङ्कसं परि दधिक्राव्णः सहोर्जा तरित्रतः स्वाहेति ॥२०॥ अथोत्तरेण त्रिचेन । जुहोति वानु वा मन्त्रयते द्वयं तद्यस्माज्जुहोति वानु वा मन्त्रयते यदि जुहोति यद्यनुमन्त्रयते समान एव बन्धुरेतानेवैतदश्वान्धावत उपवाजयत्येतेषु वीर्यं दधाति तिस्रो वाऽइमाः पृथिव्य इयमहैका द्वेऽअस्याः परे ता एवैतदुज्जयति ॥२१॥ सोऽनुमन्त्रयते । शं नो भवन्तु वाजिनो हवेषु देवताता मितद्रवः स्वर्काः । जम्भयन्तोऽहिं वृकं रक्षांसि सनेम्यस्मद्युयवन्नमीवाः ॥२२॥ ते नोऽअर्वन्तः । हवनश्रुतो हवं विश्वे शृण्वन्तु वाजिनो मितद्रवः । सहस्रसा मेधसाता सनिष्यवो महो ये धनं समिथेषु जभ्रिरे ॥२३॥ वाजे-वाजेऽवत । वाजिनो नो धनेषु विप्रा अमृता ऋतज्ञाः । अस्य मध्वः पिबत मादयध्वं तृप्ता यात पथिभिर्देवयानैरिति ॥२४॥ अथ बार्हस्पत्येन चरुणा प्रत्युपतिष्ठते । तमुपस्पृशत्यन्नं वाऽएष उज्जयति यो वाजपेयेन यजतेऽन्नपेयं ह वै नामैतद्यद्वाजपेयं तद्यदेवैतदन्नमुदजैषीत्तेनैवैतदेतां गतिं गत्वा संस्पृशते तदात्मन्कुरुते ॥२५॥ स उपस्पृशति । आ मा वाजस्य प्रसवो जगम्यादित्यन्नं वै वाज

आ मान्नस्य प्रसवो जगम्यादित्येवैतदाहेमे द्यावापृथिवी विश्वरूपेऽइति द्यावापृ-
थिवी हि प्रजापतिरा मा गन्तां पितरामातरा चेति मातेव च हि पितेव च
प्रजापतिरा मा सोमोऽअमृतत्वेन गम्यादिति सोमो हि प्रजापतिः ॥२६॥ तमश्वा-
नवघ्रापयति । वाजिन इति वाजिनो ह्यश्वास्तस्मादाह वाजिन इति वाजजित
इत्यन्नं वै वाजोऽन्नजित इत्येवैतदाह वाजꣳ ससृवाꣳस इति सरिष्यन्त इति वा
ऽअग्रऽआह सरिष्यन्त इव हि तर्हि भवन्त्यथात्र ससृवाꣳस इति ससृवाꣳस इव
ह्यत्र भवन्ति तस्मादाह ससृवाꣳस इति बृहस्पतेर्भागमवजिघ्रतेति बृहस्पतेर्ह्येष
भागो भवति तस्मादाह बृहस्पतेर्भागमवजिघ्रतेति निमृजाना इति तद्यजमाने
वीर्यं दधाति तद्यदश्वानवघ्रापयतीममुज्जयानीति वाऽअग्रेऽवघ्रापयत्यथात्रेममुदजै-
षमिति तस्माद्वाऽअश्वानवघ्रापयति ॥२७॥ अथैतेषामाजिसृताꣳ रथानाम् । एक-
स्मिन्वैश्यो वा राजन्यो वोपास्थितो भवति स वेदेरुत्तरायाꣳ श्रोणाऽउपविश-
त्यथाध्वर्युश्च यजमानश्च पूर्वया द्वारा मधुग्रहमादाय निष्क्रामतस्तं वैश्यस्य वा रा-
जन्यस्य वा पाणावाधत्तोऽथ नेष्टापरया द्वारा सुराग्रहानादाय निष्क्रामति स ज-
घनेन शालां पर्येत्यैकं वैश्यस्य वा राजन्यस्य वा पाणावादधदाहानेन तऽइमं
निष्क्रीणामीति सत्यं वै श्रीर्ज्योतिः सोमोऽनृतं पाप्मा तमः सुरा सत्यमेवैतच्छ्रियं
ज्योतिर्यजमाने दधात्यनृतेन पाप्मना तमसा वैश्यं विध्यति तैः स यं भोगं काम-
यते तं कुरुतेऽथैतꣳ सहिरण्यपात्रमेव मधुग्रहं ब्राह्मणे ददाति तं ब्राह्मणे दददमृ-
तमायुरात्मन्धत्तेऽमृतꣳ ह्यायुर्हिरण्यं तेन स यं भोगं कामयते तं कुरुते ॥२८॥
ब्राह्मणम ॥५॥ ॥ प्रथमोऽध्यायः [३१.] ॥॥

अथ स्रुवं चाज्यविलापनीं चादाय । आहवनीयमभ्येति स एता द्वादशाप्तीर्जु-
होति वा वाचयति वा यदि जुहोति यदि वाचयति समान एव बन्धुः ॥१॥ स
जुहोति । आपये स्वाहा स्वापये स्वाहापिजाय स्वाहा क्रतवे स्वाहा वसवे

स्वाहार्यपतये स्वाहाह्ने मुग्धाय स्वाहा मुग्धाय वैनꣳशिनाय स्वाहा विनꣳशिन
ꣳआन्त्यायनाय स्वाहान्त्याय भौवनाय स्वाहा भुवनस्य पतये स्वाहाधिपतये स्वा-
हेत्येता द्वादशाप्तीर्जुहोति द्वादश वै मासाः संवत्सरस्य संवत्सरः प्रजापतिः प्रजा-
पतिर्यज्ञस्तद्यैवास्याप्तिर्या सम्पत्तामेवैतदुज्जयति तामात्मन्कुरुते ॥२॥ अथ षट् कॢ-
प्तीः । जुहोति वा वाचयति वा यदि जुहोति यदि वाचयति समान एव बन्धुः
॥३॥ स वाचयति । आयुर्यज्ञेन कल्पतां प्राणो यज्ञेन कल्पतां चक्षुर्यज्ञेन कल्प-
ताꣳ श्रोत्रं यज्ञेन कल्पतां पृष्ठं यज्ञेन कल्पतां यज्ञो यज्ञेन कल्पतामित्येताः षट्
कॢप्तीर्वाचयति षड्वाऽऋतवः संवत्सरस्य संवत्सरः प्रजापतिः प्रजापतिर्यज्ञस्तद्यै-
वास्य कॢप्तिर्या सम्पत्तामेवैतदुज्जयति तामात्मन्कुरुते ॥४॥ अष्टाश्रिर्यूपो भवति ।
अष्टाक्षरा वै गायत्री गायत्रमग्नेश्छन्दो देवलोकमेवैतेनोज्जयति सप्तदशभिर्वासो-
भिर्यूपो वेष्टितो वा विग्रथितो वा भवति सप्तदशो वै प्रजापतिस्तत्प्रजापतिमुज्ज-
यति ॥५॥ गौधूमं चषालं भवति । पुरुषो वै प्रजापतेर्नेदिष्ठꣳ सोऽयमत्वगेते वै
पुरुषस्यौषधीनां नेदिष्ठतमां यद्गोधूमास्तेषां न त्वगस्ति मनुष्यलोकमेवैतेनोज्जय-
ति ॥६॥ गर्तन्वान्यूपोऽतीक्ष्णाग्रो भवति । पितृदेवत्यो वै गर्तः पितृलोकमेवै-
तेनोज्जयति सप्तदशारत्निर्भवति सप्तदशो वै प्रजापतिस्तत्प्रजापतिमुज्जयति ॥७॥
अथ नेष्टा पत्नीमुदानेष्यन् । कौशं वासः परिधापयति कौशं वा चण्डातकमन्तरं
दीक्षितवसनाज्जघनार्धो वाऽएष यज्ञस्य यत्पत्नी तामेतत्प्राचीं यज्ञं प्रसादयिष्य-
न्भवत्यस्ति वै पत्न्या अमेध्यं यदवाचीनं नाभेर्मेध्या वै दर्भास्तद्यदेवास्या अमेध्यं
तदेवास्या एतद्दर्भैर्मेध्यं कृत्वाथैनां प्राचीं यज्ञं प्रसादयति तस्मान्नेष्टा पत्नीमुदाने-
ष्यन्कौशं वासः परिधापयति कौशं वा चण्डातकमन्तरं दीक्षितवसनात् ॥८॥
अथ निश्रयणीं निश्रयति । स दक्षिणत उदङ् रोहेदुत्तरतो वा दक्षिणा दक्षि-
णतस्त्वेवोदङ् रोहेत्तथा ह्युदग्भवति ॥९॥ स रोहन्जायामामन्त्रयते । जायऽएहि

स्वो रोहावेति रोहावेत्याह जाया तद्यज्जायामामन्त्रयतेऽर्धो ह वाऽएष आत्मनो यज्जाया तस्माद्यावज्जायां न विन्दते नैव तावत्प्रजायतेऽसर्वो हि तावद्भवत्यथ यदैव जायां विन्दतेऽथ प्रजायते तर्हि हि सर्वो भवति सर्व एतां गतिं गच्छानीति तस्माज्जायामामन्त्रयते ॥१०॥ स रोहति । प्रजापतेः प्रजा अभूमेति प्रजापतेर्ह्येष प्रजा भवति यो वाजपेयेन यजते ॥११॥ अथ गोधूमानुपस्पृशति । स्वर्देवा अगन्मेति स्वर्ह्येष गच्छति यो वाजपेयेन यजते ॥१२॥ तद्यद्गोधूमानुपस्पृशति । अन्नं वै गोधूमा अन्नं वाऽएष उज्जयति यो वाजपेयेन यजतेऽन्नपेयꣳ ह वै नामैतद्यद्वाजपेयं तद्यदेवैतदन्नमुदजैषीत्तेनैवैतदेतां गतिं गत्वा सꣳस्पृशते तदात्मन्कुरुते तस्माद्गोधूमानुपस्पृशति ॥१३॥ अथ शीर्ष्णा यूपमत्युज्जिहीते । अमृता अभूमेति देवलोकमेवैतेनोज्जयति ॥१४॥ ॥ शतम् ३००० ॥ ॥ अथ दिशोऽनुवीक्षमाणो जपति । अस्मे वोऽअस्त्विन्द्रियमस्मे नृम्णमुत क्रतुरस्मे वर्चाꣳसि सन्तु व इति सर्वं वाऽएष इदमुज्जयति यो वाजपेयेन यजते प्रजापतिꣳ ह्युज्जयति सर्वमु ह्येवेदं प्रजापतिः सोऽस्य सर्वस्य यश इन्द्रियं वीर्यꣳ संवृज्य तदात्मन्धत्ते तदात्मन्कुरुते तस्माद्दिशोऽनुवीक्षमाणो जपति ॥१५॥ अथैनमूषपुटैरनूदस्यन्ति । पशवो वाऽऊषा अन्नं वै पशवोऽन्नं वाऽएष उज्जयति यो वाजपेयेन यजतेऽन्नपेयꣳ ह वै नामैतद्यद्वाजपेयं तद्यदेवैतदन्नमुदजैषीत्तेनैवैतदेतां गतिं गत्वा सꣳस्पृशते तदात्मन्कुरुते तस्मादेनमूषपुटैरनूदस्यन्ति ॥१६॥ आश्वत्थेषु पलाशेषूपनद्धा भवन्ति । स यदेवादोऽश्वत्थे तिष्ठत इन्द्रो मरुत उपामन्त्रयत तस्मादाश्वत्थेषु पलाशेषूपनद्धा भवन्ति विशोऽनूदस्यन्ति विशो वै मरुतोऽन्नं विशस्तस्माद्विशोऽनूदस्यन्ति सप्तदश भवन्ति सप्तदशो वै प्रजापतिस्तत्प्रजापतिमुज्जयति ॥१७॥ अथेमामुपावेक्षमाणो जपति । नमो मात्रे पृथिव्यै नमो मात्रे पृथिव्याऽइति बृहस्पतेर्ह वाऽअभिषिषिचानात्पृथिवी बिभयां चकार महद्वाऽअयमभूद्योऽभ्यषेचि

यद्वै मायं नावदृणीयादिति बृहस्पतिर्ह पृथिव्यै बिभयां चकार यद्वै मेयं नावधून्वीतेति तदनयैवैतन्मित्रधेयमकुरुत न हि माता पुत्रꣳ हिनस्ति न पुत्रो मातरम् ॥१८॥ बृहस्पतिसवो वाऽएष यद्वाजपेयम् । पृथिव्यु हैतस्माद्बिभेति महद्वाऽअयमभूद्योऽभ्यषेचि यद्वै मायं नावदृणीयादित्येष उ हास्यै बिभेति यद्वै मेयं नावधून्वीतेति तदनयैवैतन्मित्रधेयं कुरुते न हि माता पुत्रꣳ हिनस्ति न पुत्रो मातरम् ॥१९॥ अथ हिरण्यमभ्यवरोहति । अमृतमायुर्हिरण्यं तदमृतऽआयुषि प्रतितिष्ठति ॥२०॥ अथाजर्षभस्याजिनमुपस्तृणाति । तदुपरिष्टाद्रुक्मं निदधाति तमभ्यवरोहतीमां वैव ॥२१॥ अथास्माऽआसन्दीमाहरन्ति । उपरिसद्यं वाऽएष जयति यो जयत्यन्तरिक्षसद्यं तदेनमुपर्यासीनमधस्तादिमाः प्रजा उपासते तस्मादस्माऽआसन्दीमाहरन्ति ॥२२॥ औदुम्बरी भवति । अन्नं वाऽऊर्गुदुम्बर ऊर्जोऽन्नाद्यस्यावरुद्ध्यै तस्मादौदुम्बरी भवति तामग्रेण हविर्धाने जघनेनाहवनीयं निदधाति ॥२३॥ अथाजर्षभस्याजिनमास्तृणाति । प्रजापतिर्वाऽएष यदजर्षभ एता वै प्रजापतेः प्रत्यक्षतमां यदजास्तस्मादेतास्त्रिः संवत्सरस्य विजायमाना द्वौ त्रीनिति जनयन्ति तत्प्रजापतिमेवैतत्करोति तस्मादजर्षभस्याजिनमास्तृणाति ॥२४॥ स आस्तृणाति । इयं ते राडिति राज्यमेवास्मिन्नेतद्दधात्यथैनमासादयति यन्तासि यमन इति यन्तारमेवैनमेतद्यमनमासां प्रजानां करोति ध्रुवोऽसि धरुण इति ध्रुवमेवैनमेतद्धरुणमस्मिंलोके करोति कृष्यै त्वा क्षेमाय त्वा रय्यै त्वा पोषाय त्वेति साधवे त्वेत्येवैतदाह ॥२५॥ ब्राह्मणम् ॥ ६ [२. १.] ॥ ॥ प्रथमः प्रपाठकः ॥ कण्डिकासंख्या११७॥ ॥

बार्हस्पत्येन चरुणा प्रचरति । तस्यानिष्ट एव स्विष्टकृद्भवत्यथास्माऽअन्नꣳ सम्भरत्यन्नं वाऽएष उज्जयति यो वाजपेयेन यजतेऽन्नपेयꣳ ह वै नामैतद्यद्वाजपेयं तद्यदेवैतदन्नमुदजैषीत्तदेवास्माऽएतत्सम्भरति ॥१॥ औदुम्बरे पात्रे । अन्नं

वा ऽऊर्गुदुम्बर ऊर्जो ऽन्नाद्यस्यावरुद्ध्यै तस्मादौदुम्बरे पात्रे सो ऽप एव प्रथमाः सम्भरत्यथ पयो ऽथ यथोपस्मारमन्नानि ॥२॥ तद्धैके । सप्तदशान्नानि सम्भरन्ति सप्तदशः प्रजापतिरिति वदन्तस्तदु तथा न कुर्यात्प्रजापतेर्न्वेव सर्वमन्नमनवरुद्धं क उ तस्मै मनुष्यो यः सर्वमन्नमवरुन्धीत तस्मादु सर्वमेवान्नं यथोपस्मारꣳ सम्भरेन्नैकमन्नं न सम्भरेत् ॥३॥ स यन्न सम्भरति । तस्योद्ब्रुवीत तस्य नाश्नीयाद्यावज्जीवं तथा नान्तमेति तथा ज्योग्जीवति स एतस्य सर्वस्यान्नाद्यस्य सम्भृतस्य स्रुवेणोपघातं वाजप्रसवीयानि जुहोति तद्याभ्य एवैतद्देवताभ्यो जुहोति ता अस्मै प्रसुवन्ति ताभिः प्रसूत उज्जयति तस्माद्वाजप्रसवीयानि जुहोति ॥४॥ स जुहोति । वाजस्येमं प्रसवः सुषुवे ऽग्रे सोमꣳ राजानमोषधीष्वप्सु । ता अस्मभ्यं मधुमतीर्भवन्तु वयꣳ राष्ट्रे जागृयाम पुरोहिताः स्वाहा ॥५॥ वाजस्येमाम् । प्रसवः शिश्रिये दिवमिमा च विश्वा भुवनानि सम्राट् । अदित्सन्तं दापयति प्रजानन्त्स नो रयिꣳ सर्ववीरं नियच्छतु स्वाहा ॥६॥ वाजस्य नु । प्रसव आबभूवेमा च विश्वा भुवनानि सर्वतः । सनेमि राजा परियाति विद्वान्प्रजां पुष्टिं वर्धयमानो ऽअस्मे स्वाहा ॥७॥ सोमꣳ राजानम् अवसे ऽग्निमन्वारभामहे । आदित्यान्विष्णुꣳ सूर्यं ब्रह्माणं च बृहस्पतिꣳ स्वाहा ॥८॥ अर्यमणं बृहस्पतिम् । इन्द्रं दानाय चोदय । वाचं विष्णुꣳ सरस्वतीꣳ सवितारं च वाजिनꣳ स्वाहा ॥९॥ अग्ने ऽअच्छा । वदेह नः प्रति नः सुमना भव । प्र नो यच्छ सहस्रजित्त्वꣳ हि धनदा असि स्वाहा ॥१०॥ प्र नः । यच्छत्वर्यमा प्र पूषा प्र बृहस्पतिः । प्र वाग्देवी ददातु नः स्वाहेति ॥११॥ अथैनं परिशिष्टेनाभिषिञ्चति । अन्नाद्येनैवैनमेतदभिषिञ्चत्यन्नाद्यमेवास्मिन्नेतद्दधाति तस्मादेनं परिशिष्टेनाभिषिञ्चति ॥१२॥ सो ऽभिषिञ्चति । देवस्य त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामिति देवहस्तैरेवैनमेतदभिषिञ्चति सरस्वत्यै वाचो यन्तुर्यन्त्रियै दधामीति वाग्वै सरस्वती तदेनं वाच एव

यन्तुर्यन्त्रिये दधाति ॥१३॥ तदु हैकऽआहुः । विश्वेषां त्वा देवानां यन्तुर्यन्त्रिये दधामीति सर्वं वै विश्वे देवास्तदेनꣳ सर्वस्यैव यन्तुर्यन्त्रिये दधाति तदु तथा न ब्रूयात्सरस्वत्यै त्वा वाचो यन्तुर्यन्त्रिये दधामीत्येव ब्रूयाद्वाग्वै सरस्वती तदेनं वाच एव यन्तुर्यन्त्रिये दधाति बृहस्पतेष्ट्वा साम्राज्येनाभिषिञ्चाम्यसाविति नाम गृह्णाति तद्बृहस्पतेरेवैनमेतत्सायुज्यꣳ सलोकतां गमयति ॥१४॥ अथाह । सम्राडयमसौ सम्राडयमसाविति निवेदितमेवैनमेतत्सन्तं देवेभ्यो निवेदयत्ययं महावीर्यो योऽभ्यषेचीत्ययं युष्माकैकोऽभूत्तं गोपायतेत्येवैतदाह त्रिष्कृत्व आह त्रिवृद्धि यज्ञः ॥१५॥ अथोज्जितीः । जुहोति वा वाचयति वा यदि जुहोति यदि वाचयति समान एव बन्धुः ॥१६॥ स वाचयति । अग्निरेकाक्षरेण प्राणमुदजयत्तमुज्जेषं प्रजापतिः सप्तदशाक्षरेण सप्तदशꣳ स्तोममुदजयत्तमुज्जेषमिति तद्यदेवैताभिरेता देवता उदजयंस्तदेवैष एताभिरुज्जयति सप्तदश भवन्ति सप्तदशो वै प्रजापतिस्तत्प्रजापतिमुज्जयति ॥१७॥ अथाहाग्नये स्विष्टकृतेऽनुब्रूहीति । तद्यदन्तरेणाहुतीऽएतत्कर्म क्रियतऽएष वै प्रजापतिर्य एष यज्ञस्तायते यस्मादिमाः प्रजाः प्रजाता एतम्वेवाप्येतर्ह्यनु प्रजायन्ते तन्मध्यत एवैतत्प्रजापतिमुज्जयति तस्मादन्तरेणाहुतीऽएतत्कर्म क्रियतऽआश्राव्याहाग्निꣳ स्विष्टकृतं यजेति वषट्कृते जुहोति ॥१८॥ अथेडामादधाति । उपहूतायामिडायामप उपस्पृश्य माहेन्द्रं ग्रहं गृह्णाति माहेन्द्रं ग्रहं गृहीत्वा स्तोत्रमुपाकरोति तꣳ स्तोत्राय प्रमीवति स उपावरोहति सोऽन्ते स्तोत्रस्य भवत्यन्ते शस्त्रस्य ॥१९॥ तद्धैके । एतत्कृत्वाथैतत्कुर्वन्ति तदु तथा न कुर्यादात्मा वै स्तोत्रं प्रजा शस्त्रमेतस्माद्ध स यजमानं प्रणाशयति स जिह्म एति स ह्वलति तस्मादेतदेव कृत्वाथैतत्कुर्यात् ॥२०॥ अथेडामादधाति । उपहूतायामिडायामप उपस्पृश्य माहेन्द्रं ग्रहं गृह्णाति माहेन्द्रं ग्रहं गृहीत्वा स्तोत्रमुपाकरोति तꣳ स्तोत्राय प्रमीवति स उपावरोहति सोऽन्ते स्तोत्रस्य भवत्यन्ते शस्त्रस्य

॥२१॥ ब्राह्मणम् ॥१ [२. २.] ॥॥

पूर्णाहुतिं जुहोति । सर्वं वै पूर्णँ सर्वं परिगृह्य सूयाऽइति तस्यां वरं ददाति सर्वं वै वरः सर्वं परिगृह्य सूयाऽइति स यदि कामयेत जुहुयादेतां यद्यु कामयेतापि नाद्रियेत ॥१॥ अथ श्वो भूते । अनुमत्यै हविरष्टाकपालं पुरोडाशं निर्वपति स ये जघनेन शम्यां पिष्यमाणानामवशीयन्ते पिष्टानि वा तण्डुला वा तान्स्रुवे सार्धँ संवपत्यन्वाहार्यपचनादुल्मुकमाददते तेन दक्षिणा यन्ति स यत्र स्वकृतं वेरिणं विन्दति श्वभ्रप्रदरं वा ॥२॥ तदग्निँ समाधाय जुहोति । एष ते निर्ऋते भागस्तं जुषस्व स्वाहेतीयं वै निर्ऋतिः सा यं पाप्मना गृह्णाति तं निर्ऋत्या गृह्णाति तद्यदेवास्या अत्र नैर्ऋतँ रूपं तदेवैतच्छमयति तथो हैनँ सूयमानं निर्ऋतिर्न गृह्णात्यथ यत्स्वकृते वेरिणे जुहोति श्वभ्रप्रदरे वैतदु ह्यस्यै निर्ऋतिगृहीतम् ॥३॥ अथाप्रतीक्षं पुनरायन्ति । अथानुमत्याऽअष्टाकपालेन पुरोडाशेन प्रचरतीयं वाऽअनुमतिः स यस्तत्कर्म शक्नोति कर्तुं यच्चिकीर्षतीयँ हास्मै तदनुमन्यते तदिमामेवैतत्प्रीणात्यनयानुमत्यानुमतः सूयाऽइति ॥४॥ अथ यदष्टाकपालो भवति । अष्टाक्षरा वै गायत्री गायत्री वाऽइयं पृथिव्यथ यत्समानस्य हविष उभयत्र जुहोत्येषा ह्येवैतदुभयं तस्य वासो दक्षिणा यद्वै सवासा अरण्यं नोदाशँसते निधाय वै तद्वासोऽतिमुच्यते तथो हैनँ सूयमानमासङ्गो न विन्दति ॥५॥ अथ श्वो भूते । आग्नावैष्णवमेकादशकपालं पुरोडाशं निर्वपति तेन यथेष्ट्यैवं यजते तद्यदेवादः प्रज्ञातमाग्नावैष्णवं दीक्षणीयँ हविस्तदेवैतदग्निर्वै सर्वा देवता अग्नौ हि सर्वाभ्यो देवताभ्यो जुह्वत्यग्निर्वै यज्ञस्यावरार्ध्यो विष्णुः परार्ध्यस्तत्सर्वाश्चैवैतद्देवताः परिगृह्य सर्वं च यज्ञं परिगृह्य सूयाऽइति तस्मादाग्नावैष्णव एकादशकपालः पुरोडाशो भवति तस्य हिरण्यं दक्षिणाग्नेयो वाऽएष यज्ञो भवत्यग्ने रेतो हिरण्यं यो वै विष्णुः स यज्ञोऽग्निरु वै यज्ञ एव तदु तदाग्नेयमेव

तस्माद्धिरण्यं दक्षिणा ॥ ६॥ अथ श्वो भूते । अग्नीषोमीयमेकादशकपालं पुरोडाशं निर्वपति तेन यथेष्ट्यैवं यजतऽएतेन वाऽइन्द्रो वृत्रमहन्नेतेनोऽएव व्यजयत यास्येयं विजितिस्तां तथोऽएवैष एतेन पाप्मानं द्विषन्तं भ्रातृव्यं हन्ति तथोऽएव विजयते विजितेऽभयेऽनाष्ट्रे सूयाऽइति तस्मादग्नीषोमीय एकादशकपालः पुरोडाशो भवति तस्योत्सृष्टो गौर्दक्षिणोत्सर्जं वाऽअमुं चन्द्रमसं घ्नन्ति पौर्णमासेनाह घ्नन्त्यामावास्येनोत्सृजन्ति तस्मादुत्सृष्टो गौर्दक्षिणा ॥ ७॥ अथ श्वो भूते । ऐन्द्राग्नं द्वादशकपालं पुरोडाशं निर्वपति तेन यथेष्ट्यैवं यजते यत्र वाऽइन्द्रो वृत्रमहंस्तदस्य भीतस्येन्द्रियं वीर्यमपचक्राम स एतेन हविषेन्द्रियं वीर्यं पुनरात्मन्नधत्त तथोऽएवैष एतेन हविषेन्द्रियं वीर्यमात्मन्धत्ते तेजो वाऽअग्निरिन्द्रियं वीर्यमिन्द्र उभे वीर्ये परिगृह्य सूयाऽइति तस्मादैन्द्राग्नो द्वादशकपालः पुरोडाशो भवति तस्यऽर्षभोऽनड्वान्दक्षिणा स हि वहेनाग्नेय आण्डाभ्यामैन्द्रस्तस्मादृषभोऽनड्वान्दक्षिणा ॥ ८॥ अथाग्रयणेष्ट्या यजते । सर्वान्वाऽएष यज्ञक्रतूनवरुन्द्धे सर्वा इष्टीरपि दर्विहोमान्यो राजसूयेन यजते देवसृष्टो वाऽएषेष्टिर्यदाग्रयणेष्टिरनया मेऽपीष्टमसदनयापि सूयाऽइति तस्मादाग्रयणेष्ट्या यजतऽओषधीर्वाऽएष सूयमानोऽभि सूयते तदोषधीरेवैतदनमीवा अकिल्विषाः कुरुतेऽनमीवा अकिल्विषा ओषधीरभि सूयाऽइति तस्य गौर्दक्षिणा ॥ ९॥ अथ चातुर्मास्यैर्यजते । सर्वान्वाऽएष यज्ञक्रतूनवरुन्द्धे सर्वा इष्टीरपि दर्विहोमान्यो राजसूयेन यजते देवसृष्टो वाऽएष यज्ञक्रतुर्यच्चातुर्मास्यान्येभिर्मेऽपीष्टमसदेभिरपि सूयाऽइति तस्माच्चातुर्मास्यैर्यजते ॥ १०॥ ब्राह्मणम् ॥ २ [२. ३.] ॥ ॥

वैश्वदेवेन यजते । वैश्वदेवेन वै प्रजापतिर्भूमानं प्रजाः ससृजे भूमानं प्रजाः सृष्ट्वा सूयाऽइति तथोऽएवैष एतद्वैश्वदेवेनैव भूमानं प्रजाः सृजते भूमानं प्रजाः सृष्ट्वा सूयाऽइति ॥ १॥ अथ वरुणप्रघासैर्यजते । वरुणप्रघासैर्वै प्रजापतिः प्रजा व-

रुणपाशात्प्रामुञ्चत्ता अस्यानमीवा अकिल्बिषाः प्रजा प्राजायन्तानमीवा अकिल्बिषाः प्रजा अभि सूयाऽइति तथो एवैष एतद्वरुणप्रघासैरेव प्रजा वरुणपाशात्प्रमुञ्चति ता अस्यानमीवा अकिल्बिषाः प्रजाः प्रजायन्तेऽनमीवा अकिल्बिषाः प्रजा अभि सूयाऽइति ॥२॥ अथ साकमेधैर्यजते । साकमेधैर्वै देवा वृत्रमघ्नंस्तैर्वेव व्यजयन्त येयमेषां विजितिस्तां तथोऽएवैष एतैः पाप्मानं द्विषन्तं भ्रातृव्यꣳ हन्ति तथोऽएव विजयते विजितेऽभयेऽनाष्ट्रे सूयाऽइति ॥३॥ अथ शुनासीर्येण यजते । उभौ रसौ परिगृह्य सूयाऽइत्यथ पञ्चवातीयꣳ स पञ्चधाहवनीयं व्युह्य स्रुवेणोपघातं जुहोति ॥४॥ स पूर्वार्धे जुहोति । अग्निनेत्रेभ्यो देवेभ्यः पुरःसद्भ्यः स्वाहेत्यथ दक्षिणार्धे जुहोति यमनेत्रेभ्यो देवेभ्यो दक्षिणासद्भ्यः स्वाहेत्यथ पश्चार्धे जुहोति विश्वदेवनेत्रेभ्यो देवेभ्यः पश्चात्सद्भ्यः स्वाहेत्यथोत्तरार्धे जुहोति मित्रावरुणनेत्रेभ्यो वा मरुन्नेत्रेभ्यो वा देवेभ्य उत्तरासद्भ्यः स्वाहेत्यथ मध्ये जुहोति सोमनेत्रेभ्यो देवेभ्य उपरिसद्भ्यो दुवस्वद्भ्यः स्वाहेति ॥५॥ अथ सार्धꣳ समुह्य जुहोति । ये देवा अग्निनेत्राः पुरःसदस्तेभ्यः स्वाहा ये देवा यमनेत्रा दक्षिणासदस्तेभ्यः स्वाहा ये देवा विश्वदेवनेत्राः पश्चात्सदस्तेभ्यः स्वाहा ये देवा मित्रावरुणनेत्रा वा मरुन्नेत्रा वोत्तरासदस्तेभ्यः स्वाहा ये देवाः सोमनेत्रा उपरिसदो दुवस्वन्तस्तेभ्यः स्वाहेति तद्यदेवं जुहोति ॥६॥ यत्र वै देवाः । साकमेधैर्व्यजयन्त येयमेषां विजितिस्तां तद्धोचुरुत्पिबन्ते वाऽइमानि दिक्षु नाष्ट्रा रक्षाꣳसि हन्तेभ्यो वज्रं प्रहरामेति वज्रो वाऽआज्यं तऽएतेन वज्रेणाज्येन दिक्षु नाष्ट्रा रक्षाꣳस्यवाघ्नंस्ते व्यजयन्त येयमेषां विजितिस्तां तथोऽएवैष एतेन वज्रेणाज्येन दिक्षु नाष्ट्रा रक्षाꣳस्यवहन्ति तथोऽएव विजयते विजितेऽभयेऽनाष्ट्रे सूयाऽइति ॥७॥ अथ यदेता अपराः पञ्चाहुतीर्जुहोति । क्षण्वन्ति वाऽएतदग्नेर्विवृहन्ति यत्पञ्चधाहवनीयं व्यूहन्ति तद्देवास्यैतेन संदधाति तस्मादेता अपराः पञ्चाहुतीर्जुहोति

॥८॥ तस्य प्रष्टिवाहनोऽश्वरथो दक्षिणा । त्रयोऽश्वा द्वौ सव्यष्ठसारथी ते पञ्च प्राणा यो वै प्राणः स वातस्तद्यदेतस्य कर्मण एषा दक्षिणा तस्मात्पञ्चवातीयं नाम ॥९॥ स हैतेनापि भिषज्येत् । अयं वै प्राणो योऽयं पवते यो वै प्राणः स आयुः सोऽयमेक इवैव पवते सोऽयं पुरुषेऽन्तः प्रविष्टो दशधा विहितो दश वाऽएता आहुतीर्जुहोति तदस्मिन्दश प्राणान्कृत्स्नमेव सर्वमायुर्दधाति स यदिहापि गतासुरिव भवत्या हैवैनेन हरति ॥१०॥ अथेन्द्रतुरीयम् । आग्नेयोऽष्टाकपालः पुरोडाशो भवति वारुणो यवमयश्चरू रौद्रो गावेधुकश्चरुरनडुह्यै वहलायाऽऐन्द्रं दधि तेनेन्द्रतुरीयेण यजतऽइन्द्राग्नीऽउ हैवैतत्समूदातेऽउत्पिबन्ते वाऽइमानि दिक्षु नाष्ट्रा रक्षाꣳसि हन्तेभ्यो वज्रं प्रहरावेति ॥११॥ स हाग्निरुवाच । त्रयो मम भागाः सन्त्वेकस्तवेति तथेति तावेतेन हविषा दिक्षु नाष्ट्रा रक्षाꣳस्यवाहतां तौ व्यजयेतां येनयोरियं विजितिस्तां तथोऽएवैष एतेन हविषा दिक्षु नाष्ट्रा रक्षाꣳस्यवहन्ति तथोऽएव विजयते विजितेऽभये नाष्ट्रे सूयाऽइति ॥१२॥ स य एष आग्नेयोऽष्टाकपालः पुरोडाशो भवति । सोऽग्नेरेको भागोऽथ यद्वारुणो यवमयश्चरुर्भवति यो वै वरुणः सोऽग्निः सोऽग्नेर्द्वितीयो भागोऽथ यद्रौद्रो गावेधुकश्चरुर्भवति यो वै रुद्रः सोऽग्निः सोऽग्नेस्तृतीयो भागोऽथ यद्गावेधुको भवति वास्तव्यो वाऽएष देवो वास्तव्या गवेधुकास्तस्माद्गावेधुको भवत्यथ यदनडुह्यै वहलायाऽऐन्द्रं दधि भवति स इन्द्रस्य चतुर्थो भागो यद्वै चतुर्थं तत्तुरीयं तस्मादिन्द्रतुरीयं नाम तस्यैषैवानडुही वहला दक्षिणा सा हि वहेनाग्नेय्यग्निदग्धमिव ह्यस्यै वहं भवत्यथ यत्स्त्री सती वहत्यधर्मेण तदस्यै वारुणꣳ रूपमथ यद्रौस्तेन रौद्र्यथ यदस्याऽऐन्द्रं दधि तेनैन्द्र्येषा हि वाऽएतत्सर्वं व्यश्नुते तस्मादेषैवानडुही वहला दक्षिणा ॥१३॥ अथापामार्गहोमं जुहोति । अपामार्गैर्वै देवा दिक्षु नाष्ट्रा रक्षाꣳस्यपामृजत ते व्यजयन्त येयमेषां विजितिस्तां तथोऽएवैष

एतदपामार्गैरेव दिक्षु नाष्ट्रा रक्षाᳪस्यपमृष्ट्वा तथोऽएव विजयते विजितेऽभयेऽनाष्ट्रे भूयाऽइति ॥१४॥ स पालाशे वा स्रुवे वैकङ्कते वा । अपामार्गतण्डुलानादत्तेऽन्वाहार्यपचनादुल्मुकमाददते तेन प्राञ्चो वोदञ्चो वा यन्ति तदग्निᳪ समाधाय जुहोति ॥१५॥ स उल्मुकमादत्ते । अग्ने सहस्व पृतना इति युधो वै पृतना युधः सहस्वेत्येवैतदाहाभिमातीरपास्येति सपत्नो वाऽअभिमातिः सपत्नमपजहीत्येवैतदाह दुष्टरस्तरन्नरातीरिति दुस्तरो ह्येष रक्षोभिर्नाष्ट्राभिस्तरन्नरातीरिति सर्वᳪ ह्येष पाप्मानं तरति तस्मादाह तरन्नरातीरिति वर्चो धा यज्ञवाहसीति साधु यजमाने दधदित्येवैतदाह ॥१६॥ तदग्निᳪ समाधाय जुहोति । देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामुपाᳪशोर्वीर्येण जुहोमीति यज्ञमुखं वाऽउपाᳪशुर्यज्ञमुखेनैवैतन्नाष्ट्रा रक्षाᳪसि हन्ति हतᳪ रक्षः स्वाहेति तन्नाष्ट्रा रक्षाᳪसि हन्ति ॥१७॥ स यदि पालाशः स्रुवो भवति । ब्रह्म वै पलाशो ब्रह्मणैवैतन्नाष्ट्रा रक्षाᳪसि हन्ति यद्यु वैकङ्कतो वज्रो वै विकङ्कतो वज्रेणैवैतन्नाष्ट्रा रक्षाᳪसि हन्ति रक्षसां त्वा बधायेति तन्नाष्ट्रा रक्षाᳪसि हन्ति ॥१८॥ स यदि प्राङित्वा जुहोति । प्राञ्चᳪ स्रुवमस्यति यद्युदङित्वा जुहोत्युदञ्चᳪ स्रुवमस्यत्यबधिष्म रक्ष इति तन्नाष्ट्रा रक्षाᳪसि हन्ति ॥१९॥ अथाप्रतीक्षं पुनरायन्ति । स हैतेनापि प्रतिसरं कुर्वीत स यस्यां ततो दिशि भवति तत्प्रतीत्य जुहोति प्रतीचीनफलो वाऽअपामार्गः स यो हास्मै तत्र किंचित्करोति तमेव तत्प्रत्यग्धूर्वति तस्य नामादिशेदबधिष्मामुमसौ हत इति तन्नाष्ट्रा रक्षाᳪसि हन्ति ॥२०॥ ब्राह्मणम् ॥३ [२. ४.] ॥॥

आग्नावैष्णवमेकादशकपालं पुरोडाशं निर्वपति । ऐन्द्रावैष्णवं चरुं वैष्णवं त्रिकपालं वा पुरोडाशं चरुं वा तेन त्रिषंयुक्तेन यजते पुरुषानेतद्देवा उपायंस्तथो ऽएवैष एतत्पुरुषानेवोपैति ॥१॥ स यदाग्नावैष्णवः । एकादशकपालः पुरोडाशो

भवत्यग्निर्वै दाता वैष्णवाः पुरुषास्तदस्माऽअग्निर्दाता पुरुषान्ददाति ॥२॥ अथ यदैन्द्राविष्णवः । चरुर्भवतीन्द्रो वै यजमानो वैष्णवाः पुरुषास्तदस्माऽअग्निर्दाता पुरुषान्ददाति तैरेवैतत्सꣳस्पृशते तानात्मन्कुरुते ॥३॥ अथ यद्वैष्णवः । त्रिकपालो वा पुरोडाशो भवति चरुर्वा यानेवास्माऽअग्निर्दाता पुरुषान्ददाति तेष्वेवैतदन्ततः प्रतितिष्ठति यद्धि पुरुषवान्कर्म चिकीर्षति शक्नोति वै तत्कर्तुं तत्पुरुषानेवैतदुपैति पुरुषवान्त्सूयाऽइति तस्य वामनो गौर्दक्षिणा स हि वैष्णवो यद्वामनः ॥४॥ अथापरेण त्रिषंयुक्तेन यजते । स आग्नापौष्णमेकादशकपालं पुरोडाशं निर्वपत्यैन्द्रापौष्णं चरुं पौष्णं चरुं तेन त्रिषंयुक्तेन यजते पशूनेव तद्देवा उपायंस्तथोऽएवैष एतत्पशूनेवोपैति ॥५॥ स यदाग्नापौष्णः । एकादशकपालः पुरोडाशो भवत्यग्निर्वै दाता पौष्णाः पशवस्तदस्माऽअग्निरेव दाता पशून्ददाति ॥६॥ अथ यदैन्द्रापौष्णः । चरुर्भवतीन्द्रो वै यजमानः पौष्णाः पशवः स यानेवास्माऽअग्निर्दाता पशून्ददाति तैरेवैतत्सꣳस्पृशते तानात्मन्कुरुते ॥७॥ अथ यत्पौष्णः । चरुर्भवति यानेवास्माऽअग्निर्दाता पशून्ददाति तेष्वेवैतदन्ततः प्रतितिष्ठति यद्धि पशुमान्कर्म चिकीर्षति शक्नोति वै तत्कर्तुं तत्पशूनेवैतदुपैति पशुमान्त्सूयाऽइति तस्य श्यामो गौर्दक्षिणा स हि पौष्णो यच्छ्यामो द्वे वै श्यामस्य रूपे शुक्लं चैव लोम कृष्णं च द्वन्द्वं वै मिथुनं प्रजननं प्रजननं वै पूषा पशवो हि पूषा पशवो हि प्रजननं मिथुनमेवैतत्प्रजननं क्रियते तस्माच्छ्यामो गौर्दक्षिणा ॥८॥ अथापरेण त्रिषंयुक्तेन यजते । सोऽग्नीषोमीयमेकादशकपालं पुरोडाशं निर्वपत्यैन्द्रासौम्यं चरुꣳ सौम्यं चरुं तेन त्रिषंयुक्तेन यजते वर्च एव तद्देवा उपायंस्तथोऽएवैष एतद्वर्च एवोपैति ॥९॥ स यदग्नीषोमीयः । एकादशकपालः पुरोडाशो भवत्यग्निर्वै दाता वर्चः सोमस्तदस्माऽअग्निरेव दाता वर्चो ददाति ॥१०॥ अथ यदैन्द्रासौम्यः । चरुर्भवतीन्द्रो वै यजमानो वर्चः सोमः स यदेवास्माऽअग्निर्दाता वर्चो ददाति तेनैवैत-

त्सꣳस्पृशते तदात्मन्कुरुते ॥ ११ ॥ अथ यत्सौम्यः । चरुर्भवति यद्वास्माऽअग्निर्दाता वर्चो ददाति तस्मिन्नेवैतदन्ततः प्रतितिष्ठति यद्वै वर्चस्वी कर्म चिकीर्षति शक्नोति वै तत्कर्तुं तद्वर्च एवैतदुपैति वर्चस्वी सूयाऽइति नो ह्यवर्चसो व्याख्याचनार्थोऽस्ति तस्य बभ्रुर्गौर्दक्षिणा स हि सौम्यो यद्बभ्रुः ॥ १२ ॥ अथ श्वो भूते । वैश्वानरं द्वादशकपालं पुरोडाशं निर्वपति वारुणं यवमयं चरुं ताभ्यामनूचीनाह्नं वेष्टिभ्यां यजते समानबर्हिर्भ्यां वा ॥ १३ ॥ स यद्वैश्वानरो भवति । संवत्सरो वै वैश्वानरः संवत्सरः प्रजापतिः प्रजापतिरिव तद्भूमानं प्रजाः ससृजे भूमानं प्रजाः सृष्ट्वा सूयाऽइति तथोऽएवैष एतद्भूमानं प्रजाः सृजते भूमानं प्रजाः सृष्ट्वा सूयाऽइति ॥ १४ ॥ अथ यद्द्वादशकपालो भवति । द्वादश वै मासाः संवत्सरस्य संवत्सरो वैश्वानरस्तस्माद्द्वादशकपालो भवति ॥ १५ ॥ अथ यद्वारुणो यवमयश्चरुर्भवति । तत्सर्वस्मादेवैतद्वरुणपाशात्सर्वस्माद्वरुण्यात्प्रजाः प्रमुञ्चति ता अस्यानमीवा अकिल्बिषाः प्रजाः प्रजायन्तेऽनमीवा अकिल्बिषाः प्रजा अभि सूयाऽइति ॥ १६ ॥ ऋषभो वैश्वानरस्य दक्षिणा । संवत्सरो वै वैश्वानरः संवत्सरः प्रजापतिर्ऋषभो वै पशूनां प्रजापतिस्तस्मादृषभो वैश्वानरस्य दक्षिणा कृष्णं वासो वारुणस्य तद्धि वारुणं यत्कृष्णं यदि कृष्णं न विन्देदपि यदेव किं च वासः स्याद्ग्रन्थिभिर्हि वासो वारुणं वरुण्यो हि ग्रन्थिः ॥ १७ ॥ ब्राह्मणम् ॥ ४ [२. ५.] ॥ द्वितीयोऽध्यायः [३२.] ॥ ॥

अरण्योरग्नी समारोह्य । सेनान्यो गृहान्परेत्याग्नयेऽनीकवतेऽष्टाकपालं पुरोडाशं निर्वपत्यग्निर्वै देवतानामनीकꣳ सेनाया वै सेनानीरनीकं तस्मादग्नयेऽनीकवतऽएतद्वाऽअस्यैकꣳ रत्नं यत्सेनानीस्तस्माऽएवैतेन सूयते तꣳ स्वमनपक्रमिणं कुरुते तस्य हिरण्यं दक्षिणाग्नेयो वाऽएष यज्ञो भवत्यग्ने रेतो हिरण्यं तस्माद्धिरण्यं दक्षिणा ॥ १ ॥ अथ श्वो भूते । पुरोहितस्य गृहान्परेत्य बार्हस्पत्यं

चरुं निर्वपति बृहस्पतिर्वै देवानां पुरोहित एष वाऽएतस्य पुरोहितो भवति तस्माद्बार्हस्पत्यो भवत्येतद्वाऽअस्यैकꣳ रत्नं यत्पुरोहितस्तस्माऽएवैतेन सूयते तꣳ स्वमनपक्रमिणं कुरुते तस्य शितिपृष्ठो गौर्दक्षिणैषा वाऽऊर्ध्वा बृहस्पतेर्दिक्तदेष उपरिष्टादर्यम्णः पन्थास्तस्माच्छितिपृष्ठो बार्हस्पत्यस्य दक्षिणा ॥२॥ अथ श्वो भूते । सूयमानस्य गृहऽऐन्द्रमेकादशकपालं पुरोडाशं निर्वपति क्षत्रं वाऽइन्द्रः क्षत्रꣳ सूयमानस्तस्मादैन्द्रो भवति तस्यऽर्षभो दक्षिणा स ह्यैन्द्रो यदृषभः ॥३॥ अथ श्वो भूते । महिष्यै गृहान्परेत्य । आदित्यं चरुं निर्वपतीयं वै पृथिव्यदितिः सेयं देवानां पत्न्येषा वाऽएतस्य पत्नी भवति तस्मादादित्यो भवत्येतद्वाऽअस्यैकꣳ रत्नं यन्महिषी तस्याऽएवैतेन सूयते ताꣳ स्वामनपक्रमिणीं कुरुते तस्यै धेनुर्दक्षिणा धेनुरिव वाऽइयं मनुष्येभ्यः सर्वान्कामान्दुहे माता धेनुर्मातेव वाऽइयं मनुष्यान्बिभर्ति तस्माद्धेनुर्दक्षिणा ॥४॥ अथ श्वो भूते । सूतस्य गृहान्परेत्य वारुणं यवमयं चरुं निर्वपति सवो वै सूतः सवो वै देवानां वरुणस्तस्माद्वारुणो भवत्येतद्वाऽअस्यैकꣳ रत्नं यत्सूतस्तस्माऽएवैतेन सूयते तꣳ स्वमनपक्रमिणं कुरुते तस्याश्वो दक्षिणा स हि वारुणो यदश्वः ॥५॥ अथ श्वो भूते । ग्रामण्यो गृहान्परेत्य मारुतꣳ सप्तकपालं पुरोडाशं निर्वपति विशो वै मरुतो वैश्यो वै ग्रामणीस्तस्मान्मारुतो भवत्येतद्वाऽअस्यैकꣳ रत्नं यद्ग्रामणीस्तस्माऽएवैतेन सूयते तꣳ स्वमनपक्रमिणं कुरुते तस्य पृषन्गौर्दक्षिणा भूमा वाऽएतद्रूपाणां यत्पृषतो गौर्विशो वै मरुतो भूमो वै विट्तस्मात्पृषन्गौर्दक्षिणा ॥६॥ अथ श्वो भूते । क्षत्तुर्गृहान्परेत्य सावित्रं द्वादशकपालं वाष्टाकपालं वा पुरोडाशं निर्वपति सविता वै देवानां प्रसविता प्रसविता वै क्षत्ता तस्मात्सावित्रो भवत्येतद्वाऽअस्यैकꣳ रत्नं यत्क्षत्ता तस्माऽएवैतेन सूयते तꣳ स्वमनपक्रमिणं कुरुते तस्य श्येतोऽनड्वान्दक्षिणैष वै सविता य एष तपत्येति वाऽएष एत्यनड्वान्युक्तस्तस्माच्छ्येतो भवति

श्येत-इव ह्येष उच्चैश्चास्तं च यन्भवति तस्माछ्येतोऽनड्वान्दक्षिणा ॥७॥ अथ श्वो
भूते । संग्रहीतुर्गृहान्परेत्याश्विनं द्विकपालं पुरोडाशं निर्वपति सयोनी वाऽअ-
श्विनौ सयोनी सव्यष्टृसारथी समानꣳ हि रथमधितिष्ठतस्तस्मादाश्विनो भवत्येत-
द्वाऽअस्यैकꣳ रत्नं यत्संग्रहीता तस्माऽएवैतेन सूयते तꣳ स्वमनपक्रमिणं कुरुते
तस्य यमौ गावौ दक्षिणा तौ हि सयोनी यद्यमौ यदि यमौ न विन्देदप्यनूची-
नगर्भाविव गावौ दक्षिणा स्यातां ताऽउ ह्यपि समानयोनी ॥८॥ अथ श्वो भूते
। भागदुघस्य गृहान्परेत्य पौष्णं चरुं निर्वपति पूषा वै देवानां भागदुघ एष
वाऽएतस्य भागदुघो भवति तस्मात्पौष्णो भवत्येतद्वाऽअस्यैकꣳ रत्नं यद्भागदुघस्त-
स्माऽएवैतेन सूयते तꣳ स्वमनपक्रमिणं कुरुते तस्य श्यामो गौर्दक्षिणा तस्या-
साविव बन्धुर्योऽसौ त्रिषंयुक्तेषु ॥९॥ अथ श्वो भूते । अक्षावापस्य च गृहेभ्यो
गोविकर्तस्य च गवेधुकाः सम्भृत्य सूयमानस्य गृहे रौद्रं गावेधुकं चरुं निर्वपति
ते वाऽएते द्वे सती रत्नेऽएकं करोति सम्पदः कामाय तद्यदेतेन यजते यां वा
ऽइमाꣳ सभायां घ्नन्ति रुद्रो हैतामभिमन्यतेऽग्निर्वै रुद्रोऽधिदेवनं वाऽअग्निस्तस्यैते
ऽङ्गारा यदक्षास्तमेवैतेन प्रीणाति तस्य ह वाऽएषानुमता गृहेषु हन्यते यो वा
राजसूयेन यजते यो वैतदेवं वेदैतद्वाऽअस्यैकꣳ रत्नं यदक्षावापश्च गोविकर्तश्च
ताभ्यामेवैतेन सूयते तौ स्वावनपक्रमिणौ कुरुते तस्य द्विरूपो गौर्दक्षिणा शि-
तिबाहुर्वा शितिवालो वासिर्नखरो वालदाम्नाक्षावपनं प्रबद्धमेतद्धि तयोर्भ-
वति ॥१०॥ अथ श्वो भूते । पालागलस्य गृहान्परेत्य चतुर्गृहीतमाज्यं गृहीत्वा-
ध्वन आज्यं जुहोति जुषाणोऽध्वाज्यस्य वेतु स्वाहेति प्रहेयो वै पालागलोऽध्वानं
वै प्रहित एति तस्मादध्वन आज्यं जुहोत्येतद्वाऽअस्यैकꣳ रत्नं यत्पालागलस्त-
स्माऽएवैतेन सूयते तꣳ स्वमनपक्रमिणं कुरुते तस्य दक्षिणा प्युक्षणवेष्टितं धनु-
श्चर्ममया वाणवन्तो लोहित उष्णीष एतद्धि तस्य भवति ॥११॥ तानि वा

ऽएतानि । एकादश रत्नानि सम्पादयत्येकादशाक्षरा वै त्रिष्टुब्वीर्यं त्रिष्टुब्वीर्यमे-
वैतद्रत्नान्यभिसम्पादयति तद्यद्रत्निनां हविर्भिर्यजत ऽएतेषां वै राजा भवति ते-
भ्य एवैतेन सूयते तान्स्वाननपक्रमिणः कुरुते ॥१२॥ अथ श्वो भूते । परिवृत्त्यै
गृहान्परेत्य नैर्ऋतं चरुं निर्वपति या वा अपुत्रा पत्नी सा परिवृत्ती स कृष्णानां
व्रीहीणां नखैर्निर्भिद्य तण्डुलान्नैर्ऋतं चरुं श्रपयति स जुहोत्येष ते निर्ऋते भा-
गस्तं जुषस्व स्वाहेति या वाऽअपुत्रा पत्नी सा निर्ऋतिगृहीता तद्यदेवास्याऽअत्र
नैर्ऋतं रूपं तदेवैतच्छमयति तथो हैनं सूयमानं निर्ऋतिर्न गृह्णाति तस्य दक्षि-
णा कृष्णा गौः परिमूर्णी पर्यारिणी सा ह्यपि निर्ऋतिगृहीता तामाह मा मेऽद्ये-
शायां वात्सीदिति तत्पाप्मानमपादत्ते ॥१३॥ ब्राह्मणम् ॥५ [३. १.] ॥॥

उपरिष्टाद्रत्नानां सौमारौद्रेण यजते । स श्वेतायै श्वेतवत्सायै पयसि शृतो
भवति तद्यदुपरिष्टाद्रत्नानां सौमारौद्रेण यजते ॥१॥ स्वर्भानुर्ह वाऽआसुरः ।
सूर्यं तमसा विव्याध स तमसा विद्धो न व्यरोचत तस्य सोमारुद्रावेवैतत्तमो
ऽपाहतां स एषोऽपहतपाप्मा तपति तथोऽएवैष एतत्तमः प्रविशत्येतं वा त-
मः प्रविशति यदयज्ञियान्यज्ञेन प्रसजत्ययज्ञियान्वाऽएतद्यज्ञेन प्रसजति शूद्रांस्त्व-
द्यांस्त्वत्तस्य सोमारुद्रावेवैतत्तमोऽपहतः सोऽपहतपाप्मैव दीक्षते तद्यच्छ्वेतायै श्वे-
तवत्सायै पयसि शृतो भवति कृष्णं वै तमस्तत्तमोऽपहन्ति तस्यैषैव श्वेता श्वेत-
वत्सा दक्षिणा ॥२॥ स हैतेनापि यजेत । योऽलं यशसे सन्न यशो भवति यो
वाऽअनूचानः सोऽलं यशसे सन्न यशो भवति यो न यशो भवति स तमसा वै
स तत्प्रावृतो भवति तस्य सोमारुद्रावेवैतत्तमोऽपहतः सोऽपहतपाप्मा ज्योति-
रेव श्रिया यशसा भवति ॥३॥ अथ मैत्राबार्हस्पत्यं चरुं निर्वपति । ह्वलति
वाऽएष यो यज्ञपथादेत्येति वाऽएष यज्ञपथाद्यदयज्ञियान्यज्ञेन प्रसजत्ययज्ञियान्वा
ऽएतद्यज्ञेन प्रसजति शूद्रांस्त्वद्यांस्त्वन्मित्राबृहस्पती वै यज्ञपथो ब्रह्म हि मित्रो

ब्रह्म हि यज्ञो ब्रह्म हि बृहस्पतिर्ब्रह्मा हि यज्ञस्तत्पुनर्यज्ञपथमपिपद्यते सोऽपि-पद्येव यज्ञपथं दीक्षते तस्मान्मैत्राबार्हस्पत्यं चरुं निर्वपति ॥४॥ तस्यावृत् । या स्वयम्प्रशीर्णाश्वत्थी शाखा प्राची वोदीची वा भवति तस्यै मैत्रं पात्रं करोति वरुण्या वाऽएषा या परशुवृक्णाथैषा मैत्री या स्वयम्प्रशीर्णा तस्मात्स्वयम्प्रशी-र्णायै शाखायै मैत्रं पात्रं करोति ॥५॥ अथातच्य दधि । विनाटऽआसिच्य रथं युक्त्वाबध्य देदीयितवाऽआह तद्यत्स्वयमुदितं नवनीतं तदाज्यं भवति वरुण्यं वा ऽएतद्यन्मथितमथैतन्मैत्रं यत्स्वयमुदितं तस्मात्स्वयमुदितमाज्यं भवति ॥६॥ द्वे-धा तण्डुलान्कुर्वन्ति । स येऽणीयाꣳसः परिभिन्नास्ते बार्हस्पत्या अथ ये स्थवी-याꣳसोऽपरिभिन्नास्ते मैत्रा न वै मित्रः कं चन हिनस्ति न मित्रं कश्चन हिन-स्ति नैनं कुशो न कण्टको विभिनत्ति नास्य व्रणश्चनास्ति सर्वस्य ह्येव मित्रो मित्रम् ॥७॥ अथ बार्हस्पत्यं चरुमधिश्रयति । तं मैत्रेण पात्रेणापिदधाति तदा-ज्यमानयति तत्तण्डुलानावपति स एष ऊष्मणैव श्रप्यते वरुण्यो वाऽएष यो ऽग्निना शृतोऽथैष मैत्रो य ऊष्मणा शृतस्तस्मादूष्मणा शृतो भवति तयोरुभयो-रवद्यन्नाह मित्राबृहस्पतिभ्यामनुब्रूहीत्याश्राव्याह मित्राबृहस्पती यजेति वषट्कृ-ते जुहोति ॥८॥ ब्राह्मणम् ॥ ६ [३. २.] ॥॥ शतम् ३२०० ॥॥

स वै दीक्षते । स उपवसथेऽग्नीषोमीयं पशुमालभते तस्य वपया प्रचर्याग्नी-षोमीयमेकादशकपालं पुरोडाशं निर्वपति तदनु देवस्वाꣳ हवीꣳषि निरुप्यन्ते ॥१॥ सवित्रे सत्यप्रसवाय । द्वादशकपालं वाष्टाकपालं वा पुरोडाशं निर्वपति प्लाशुकानां व्रीहीणाꣳ सविता वै देवानां प्रसविता सवितृप्रसूतः सूयाऽइत्यथ यत्प्लाशुकानां व्रीहीणां क्षिप्रे मा प्रसुवानिति ॥२॥ अथाग्नये गृहपतये । अष्टा-कपालं पुरोडाशं निर्वपत्याशूनाꣳ श्रीर्वै गार्हपतं यावतो-यावत ईष्टे तदेनमग्निरे-व गृहपतिर्गार्हपतमभि परिणयत्यथ यदाशूनां क्षिप्रे मा परिणयानिति ॥३॥

अथ सोमाय वनस्पतये । श्यामाकं चरुं निर्वपति तदेनꣳ सोम एव वनस्पति-
रोषधिभ्यः सुवत्यथ यच्छ्यामाको भवत्येते वै सोमस्यौषधीनां प्रत्यक्षतमां यच्छ्यामा-
कास्तस्माच्छ्यामाको भवति ॥४॥ अथ बृहस्पतये वाचे । नैवारं चरुं निर्वपति
तदेनं बृहस्पतिरेव वाचे सुवत्यथ यन्नैवारो भवति ब्रह्म वै बृहस्पतिरेते वै
ब्रह्मणा पच्यन्ते यन्नीवारास्तस्मान्नैवारो भवति ॥५॥ अथेन्द्राय ज्येष्ठाय । हायन-
नानां चरुं निर्वपति तदेनमिन्द्र एव ज्येष्ठो ज्यैष्ठ्यमभि परिणयत्यथ यद्धायनानां
भवत्यतिष्ठा वाऽएता ओषधयो यद्धायना अतिष्ठो वाऽइन्द्रस्तस्माद्धायनानां भ-
वति ॥६॥ अथ रुद्राय पशुपतये । रौद्रं गावेधुकं चरुं निर्वपति तदेनꣳ रुद्र एव
पशुपतिः पशुभ्यः सुवत्यथ यद्गावेधुको भवति वास्तव्यो वाऽएष देवो वास्तव्या
गवेधुकास्तस्माद्गावेधुको भवति ॥७॥ अथ मित्राय सत्याय । नाम्बानां चरुं नि-
र्वपति तदेनं मित्र एव सत्यो ब्रह्मणे सुवत्यथ यन्नाम्बानां भवति वरुण्या वा
ऽएता ओषधयो याः कृष्टे जायन्तेऽथैते मैत्रा यन्नाम्बास्तस्मान्नाम्बानां भवति
॥८॥ अथ वरुणाय धर्मपतये । वारुणं यवमयं चरुं निर्वपति तदेनं वरुण एव
धर्मपतिर्धर्मस्य पतिं करोति परमता वै सा यो धर्मस्य पतिरसद्यो हि परमतां ग-
च्छति तꣳ हि धर्मऽउपयन्ति तस्माद्वरुणाय धर्मपतये ॥९॥ अथाग्नीषोमीयेन पुरो-
डाशेन प्रचरति । तस्यानिष्ट एव स्विष्टकृद्भवत्यथैतैर्हविर्भिः प्रचरति यदेतैर्हवि-
र्भिः प्रचरति ॥१०॥ अथैनं दक्षिणे बाहावभिपद्य जपति । सविता त्वा सवानाꣳ
सुवतामग्निर्गृहपतीनाꣳ सोमो वनस्पतीनाम् । बृहस्पतिर्वाचऽइन्द्रो ज्यैष्ठ्याय
रुद्रः पशुभ्यो मित्रः सत्यो वरुणो धर्मपतीनाम् ॥११॥ इमं देवाः । असपत्नꣳ
सुवधमितीमं देवा अभ्रातृव्यꣳ सुवधमित्येवैतदाह महते क्षत्राय महते ज्यैष्ठ्या-
येति नात्र तिरोहितमिवास्ति महते जानराज्यायेति महते जनानाꣳ राज्यायेत्ये-
वैतदाहेन्द्रस्येन्द्रियायेति वीर्यायेत्येवैतदाह यदाहेन्द्रस्येन्द्रियायेतीमममुष्य पुत्रम-

मुष्यै पुत्रमिति तद्यद्वास्य जन्म तत एवैतदाहास्यै विशऽइति यस्यै विशो राजा भवत्येष वोऽमी राजा सोमोऽस्माकं ब्राह्मणानाꣳ राजेति तदस्माऽइदꣳ सर्वमाद्यं करोति ब्राह्मणमेवापोद्धरति तस्माद्ब्राह्मणोऽनाद्यः सोमराजा हि भवति ॥१२॥ एता ह वै देवाः सवस्येशते । तस्माद्देवस्वो नाम तदेनमेता एव देवताः सुवते ताभिः सूतः श्वः सूयते ॥१३॥ ता वै द्विनाम्न्यो भवन्ति । द्वन्द्वं वै वीर्यं वीर्यवत्यः सुवान्ताऽइति तस्माद्द्विनाम्न्यो भवन्ति ॥१४॥ अथाहाग्नये स्विष्टकृतेऽनुब्रूहीति । तद्यदन्तरेणाहुतीऽएतत्कर्म क्रियतऽएष वै प्रजापतिर्य एष यज्ञस्तायते यस्मादिमाः प्रजाः प्रजाता एतम्वेवाप्येतर्ह्यनु प्रजायन्ते तदेनं मध्यत एवैतस्य प्रजापतेर्दधाति मध्यतः सुवति तस्मादन्तरेणाहुतीऽएतत्कर्म क्रियत ऽआश्राव्याहाग्नये स्विष्टकृते प्रेष्येति वषट्कृते जुहोति ॥१५॥ ब्राह्मणम् ॥ ७ [३. ३.] ॥ ॥ द्वितीयः प्रपाठकः ॥ कण्डिकासंख्या१०४ ॥ ॥

स वाऽअपः सम्भरति । तद्यदपः सम्भरति वीर्यं वाऽआपो वीर्यमेवैतद्रसमपाꣳ सम्भरति ॥१॥ औदुम्बरे पात्रे । अन्नं वाऽऊर्गुदुम्बर ऊर्जोऽन्नाद्यस्यावरुद्ध्यै तस्मादौदुम्बरे पात्रे ॥२॥ स सारस्वतीरेव प्रथमा गृह्णाति । अपो देवा मधुमतीरगृभ्णन्नित्यपो देवा रसवतीरगृह्णन्नित्येवैतदाहोर्जस्वती राजस्वश्चितानाइति रसवतीरित्येवैतदाह यदाहोर्जस्वतीरिति राजस्वश्चितानाइति याः प्रज्ञाता राजस्व इत्येवैतदाह याभिर्मित्रावरुणावभ्यषिञ्चन्नित्येताभिर्हि मित्रावरुणावभ्यषिञ्चन्याभिरिन्द्रमनयन्नत्यरातीरित्येताभिर्हीन्द्रं नाष्ट्रा रक्षाꣳस्यत्यनयंस्ताभिरभिषिञ्चति वाग्वै सरस्वती वाचैवैनमेतदभिषिञ्चत्येता वाऽएका आपस्ता एवैतत्सम्भरति ॥३॥ अथाध्वर्युः । चतुर्गृहीतमाज्यं गृहीत्वापोऽभ्यवैति तद्याऽऊर्मी व्युदतः पशौ वा पुरुषे वाभ्यवेते तौ गृह्णाति ॥४॥ स यः प्राङुदेति । तं गृह्णाति वृष्ण ऊर्मिरसि राष्ट्रदा राष्ट्रं मे देहि स्वाहा वृष्ण ऊर्मिरसि राष्ट्रदा राष्ट्रममुष्मै देहीति

॥५॥ अथ यः प्रत्यङ्ङुदर्दति । तं गृह्णाति वृषसेनोऽसि राष्ट्रदा राष्ट्रं मे देहि स्वाहा वृषसेनोऽसि राष्ट्रदा राष्ट्रममुष्मै देहीति ताभिरभिषिञ्चति वीर्यं वाऽएतदपामुदर्दति पशौ वा पुरुषे वाभ्यवेते वीर्येणैवैनमेतदभिषिञ्चत्येता वाऽएका आपस्ता एवैतत्सम्भरति ॥६॥ अथ स्यन्दमाना गृह्णाति । अर्थेत स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहार्थेत स्थ राष्ट्रदा राष्ट्रममुष्मै दत्तेति ताभिरभिषिञ्चति वीर्येण वाऽएताः स्यन्दन्ते तस्मादेनाः स्यन्दमाना न किंचन प्रतिधारयते वीर्येणैवैनमेतदभिषिञ्चत्येता वाऽएका आपस्ता एवैतत्सम्भरति ॥७॥ अथ याः स्यन्दमानानां प्रतीपꣳ स्यन्दन्ते । ता गृह्णात्योजस्वती स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहौजस्वती स्थ राष्ट्रदा राष्ट्रममुष्मै दत्तेति ताभिरभिषिञ्चति वीर्येण वाऽएताः स्यन्दमानानां प्रतीपꣳ स्यन्दन्ते वीर्येणैवैनमेतदभिषिञ्चत्येता वाऽएका आपस्ता एवैतत्सम्भरति ॥८॥ अथापयतीर्गृह्णाति । आपः परिवाहिणी स्थ राष्ट्रदा राष्ट्रममुष्मै दत्तेति ताभिरभिषिञ्चत्येतस्यै वाऽएषापह्नियैषैव पुनर्भवत्यपि ह वाऽअस्यान्यराष्ट्रीयो राष्ट्रे भवत्यप्यन्यराष्ट्रीयमवहरते तथास्मिन्भूमानं दधाति भूम्नैवैनमेतदभिषिञ्चत्येता वाऽएका आपस्ता एवैनत्सम्भरति ॥९॥ अथ नदीपतिं गृह्णाति । अपां पतिरसि राष्ट्रदा राष्ट्रं मे देहि स्वाहापां पतिरसि राष्ट्रदा राष्ट्रममुष्मै देहीति ताभिरभिषिञ्चत्यपां वाऽएष पतिर्यन्नदीपतिर्विशामेवैनमेतत्पतिं करोत्येता वाऽएका आपस्ता एवैतत्सम्भरति ॥१०॥ अथ निवेष्यं गृह्णाति । अपां गर्भोऽसि राष्ट्रदा राष्ट्रं मे देहि स्वाहापां गर्भोऽसि राष्ट्रदा राष्ट्रममुष्मै देहीति ताभिरभिषिञ्चति गर्भं वाऽएतदाप उपनिवेष्टन्ते विशामेवैनमेतद्गर्भं करोत्येता वाऽएका आपस्ता एवैतत्सम्भरति ॥१२॥ अथ यः स्यन्दमानानाꣳ स्थावरो ह्रदो भवति । प्रत्यातापे ता गृह्णाति सूर्यत्वचस स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा सूर्यत्वचस स्थ राष्ट्रदा राष्ट्रममुष्मै दत्तेति ताभिरभिषिञ्चति वर्चसैवैनमेतदभिषिञ्चति सूर्यत्वचसमे-

वैनमेतत्करोति वरुण्या वा ऽ एता आपो भवन्ति याः स्यन्दमानानां न स्यन्दन्ते
वरुणसवो वा ऽ एष यद्राजसूयं तस्मादेताभिरभिषिञ्चत्येता वा ऽ एका आपस्ता ए-
वैतत्सम्भरति ॥ १२ ॥ अथ या आतपति वर्षन्ति । ता गृह्णाति सूर्यवर्चस स्थ रा-
ष्ट्रदा राष्ट्रं मे दत्त स्वाहा सूर्यवर्चस स्थ राष्ट्रदा राष्ट्रममुष्मै दत्तेति ताभिरभिषिञ्च-
ति वर्चसैवैनमेतदभिषिञ्चति सूर्यवर्चसमेवैनमेतत्करोति मेध्या वा ऽ एता आपो
भवन्ति या आतपति वर्षन्त्यप्राप्ता ह्रीमां भवन्त्यथैना गृह्णाति मेध्यमेवैनमेतत्क-
रोत्येता वा ऽ एका आपस्ता एवैतत्सम्भरति ॥ १३ ॥ अथ वैशन्तीर्गृह्णाति । मान्दा
स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा मान्दा स्थ राष्ट्रदा राष्ट्रममुष्मै दत्तेति ताभिरभि-
षिञ्चति विशमेवास्मा ऽ एतत्स्थावरामनपक्रामिणीं करोत्येता वा एका आपस्ता
एवैतत्सम्भरति ॥ १४ ॥ अथ कूप्या गृह्णाति । व्रजक्षित स्थ राष्ट्रदा राष्ट्रं मे दत्त
स्वाहा व्रजक्षित स्थ राष्ट्रदा राष्ट्रममुष्मै दत्तेति ताभिरभिषिञ्चति तय्या इमां परे-
णापस्ता एवैतत्सम्भरत्यपामु चैव सर्वत्वाय तस्मादेताभिरभिषिञ्चत्येता वा ऽ एका
आपस्ता एवैतत्सम्भरति ॥ १५ ॥ अथ प्रुष्वा गृह्णाति । वाशा स्थ राष्ट्रदा राष्ट्रं मे
दत्त स्वाहा वाशा स्थ राष्ट्रदा राष्ट्रममुष्मै दत्तेति ताभिरभिषिञ्चत्यन्नाद्येनैवैनमेत-
दभिषिञ्चत्यन्नाद्यमेवास्मिन्नेतद्दधातीदं वा ऽ असावादित्य उद्यन्नेव यथायमग्निर्निर्दहे-
देवमोषधीरन्नाद्यं निर्दहति तदेता आपोऽभ्यवयत्यः शमयन्ति न ह वा ऽ इहा-
न्नाद्यं परिशिष्येत यदेता आपो नाभ्यवेयुरन्नाद्येनैवैनमेतदभिषिञ्चत्येता वा ऽ एका
आपस्ता एवैतत्सम्भरति ॥ १६ ॥ अथ मधु गृह्णाति । शविष्ठा स्थ राष्ट्रदा राष्ट्रं मे
दत्त स्वाहा शविष्ठा स्थ राष्ट्रदा राष्ट्रममुष्मै दत्तेति ताभिरभिषिञ्चत्यपां चैवैनमे-
तदोषधीनां च रसेनाभिषिञ्चत्येता वा ऽ एका आपस्ता एवैतत्सम्भरति ॥ १७ ॥
अथ गोर्विजायमानाया उल्ब्या गृह्णाति । शक्वरी स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वा-
हा शक्वरी स्थ राष्ट्रदा राष्ट्रममुष्मै दत्तेति ताभिरभिषिञ्चति पशुभिरेवैनमेतदभि-

षिञ्चत्येता वाऽएका आपस्ता एवैतत्सम्भरति ॥१८॥ अथ पयो गृह्णाति । जनभृत स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा जनभृत स्थ राष्ट्रदा राष्ट्रममुष्मै दत्तेति ताभिरभिषिञ्चति पशुभिरेवैनमेतदभिषिञ्चत्येता वाऽएका आपस्ता एवैतत्सम्भरति ॥१९॥ अथ घृतं गृह्णाति । विश्वभृत स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा विश्वभृत स्थ राष्ट्रदा राष्ट्रममुष्मै दत्तेति ताभिरभिषिञ्चति पशूनामेवैनमेतद्रसेनाभिषिञ्चत्येता वाऽएका आपस्ता एवैतत्सम्भरति ॥२०॥ अथ मरीचीः । अञ्जलिना संगृह्यापिसृजत्यापः स्वराज स्थ राष्ट्रदा राष्ट्रममुष्मै दत्तेत्येता वाऽआपः स्वराजो यन्मरीचयस्ता यत्स्यन्दन्तऽइवान्योऽन्यस्या एवैतच्छ्रियाऽअतिष्ठमाना उत्तराधरा-इव भवन्त्यो यन्ति स्वाराज्यमेवास्मिन्नेतद्दधात्येता वाऽएका आपस्ता एवैतत्सम्भरति ॥२१॥ ता वाऽएताः । सप्तदशापः सम्भरति सप्तदशो वै प्रजापतिः प्रजापतिर्यज्ञस्तस्मात्सप्तदशापः सम्भरति ॥२२॥ षोडश ता आपो या अभिजुहोति । षोडशाहुतीर्जुहोति ता द्वात्रिꣳशद्भूयीषु न जुहोति सारस्वतीषु च मरीचिषु च ताश्चतुस्त्रिꣳशत्त्रयस्त्रिꣳशद्वै देवाः प्रजापतिश्चतुस्त्रिꣳशस्तदेनं प्रजापतिं करोति ॥२३॥ अथ यद्धुत्वा-हुत्वा गृह्णाति । वज्रो वाऽआज्यं वज्रेणैवैतदाज्येन स्पृत्वा-स्पृत्वा स्वीकृत्य गृह्णाति ॥२४॥ अथ यत्सारस्वतीषु न जुहोति । वाग्वै सरस्वती वज्र आज्यं नेद्वज्रेणाज्येन वाचꣳ हिनसानीति तस्मात्सारस्वतीषु न जुहोति ॥२५॥ अथ यन्मरीचिषु न जुहोति । नेदनद्धैवैतामाहुतिं जुहवानीति तस्मान्मरीचिषु न जुहोति ॥२६॥ ताः सार्धमौदुम्बरे पात्रे समवनयति । मधुमतीर्मधुमतीभिः पृच्यन्तामिति रसवती रसवतीभिः पृच्यन्तामित्येवैतदाह महि क्षत्रं क्षत्रियाय वन्वाना इति तत्परोऽक्षं क्षत्रं यजमानायाशिषमाशास्ते यदाह महि क्षत्रं क्षत्रियाय वन्वाना इति ॥२७॥ ता अग्रेण मैत्रावरुणस्य धिष्ण्यꣳ सादयति । अनाधृष्टाः सीदत सहौजस इत्यनाधृष्टाः सीदत रक्षोभिरित्येवैतदाह सहौजस इति सवीर्या इ-

त्यैवैतदाह महि क्षत्रं क्षत्रियाय दधतीरिति तत्प्रत्यक्षं क्षत्रं यजमानायाशिषमाशास्ते यदाह महि क्षत्रं क्षत्रियाय दधतीरिति ॥२८॥ ब्राह्मणम् ॥१ [३.४.] ॥॥

तं वै माध्यंदिने सवनेऽभिषिञ्चति । एष वै प्रजापतिर्य एष यज्ञस्तायते यस्मादिमाः प्रजाः प्रजाता एतम्वेवाप्येतर्ह्यनु प्रजायन्ते तदेनं मध्यत एवैतस्य प्रजापतेर्दधाति मध्यतः सुवति ॥१॥ अगृहीते माहेन्द्रे । एष वाऽइन्द्रस्य निष्केवल्यो ग्रहो यन्माहेन्द्रोऽप्यस्यैतन्निष्केवल्यमेव स्तोत्रं निष्केवल्यं शस्त्रमिन्द्रो वै यजमानस्तदेनꣳ स्वऽएवायतनेऽभिषिञ्चति तस्मादगृहीते माहेन्द्रे ॥२॥ अग्रेण मैत्रावरुणस्य धिष्ण्यꣳ । शार्दूलचर्मोपस्तृणाति सोमस्य त्विषिरसीति यत्र वै सोम इन्द्रमत्यपवत स यत्ततः शार्दूलः समभवत्तेन सोमस्य त्विषिस्तस्मादाह सोमस्य त्विषिरसीति तवेव मे त्विषिर्भूयादिति शार्दूलत्विषिमेवास्मिन्नेतद्दधाति तस्मादाह तवेव मे त्विषिर्भूयादिति ॥३॥ अथ पार्थानि जुहोति । पृथी ह वै वैन्यो मनुष्याणां प्रथमोऽभिषिषिचे सोऽकामयत सर्वमन्नाद्यमवरुन्धीयेति तस्माऽएतान्यजुह्वुः स इदꣳ सर्वमन्नाद्यमवरुरुधेऽपि ह स्मास्माऽआरण्यान्पशूनभिह्वयन्त्यसावेहि राजा त्वा पक्ष्यतऽइति तथेदꣳ सर्वमन्नाद्यमवरुरुधे सर्वꣳ ह वाऽअन्नाद्यमवरुन्द्धे यस्यैवं विदुष एतानि हूयन्ते ॥४॥ तानि वै द्वादश भवन्ति । द्वादश वै मासाः संवत्सरस्य तस्माद्द्वादश भवन्ति ॥५॥ षट् पुरस्तादभिषेकस्य जुहोति । षडुपरिष्टात्तदेनं मध्यत एवैतस्य प्रजापतेर्दधाति मध्यतः सुवति ॥६॥ स यानि पुरस्तादभिषेकस्य जुहोति । बृहस्पतिस्तेषामुत्तमो भवत्यथ यान्युपरिष्टादभिषेकस्य जुहोतीन्द्रस्तेषां प्रथमो भवति ब्रह्म वै बृहस्पतिरिन्द्रियं वीर्यमिन्द्र एताभ्यामेवैनमेतद्वीर्याभ्यामुभयतः परिबृꣳहति ॥७॥ स जुहोति । यानि पुरस्तादभिषेकस्य जुहोत्यग्नये स्वाहेति तेजो वाऽअग्निस्तेजसैवैनमेतदभिषिञ्चति सोमाय स्वाहेति क्षत्रं वै सोमः क्षत्रेणैवैनमेतदभिषिञ्चति सवित्रे स्वाहेति सविता वै

देवानां प्रसविता सवितृप्रसूत एवैनमेतदभिषिञ्चति सरस्वत्यै स्वाहेति वाग्वै सरस्वती वाचैवैनमेतदभिषिञ्चति पूष्णे स्वाहेति पशवो वै पूषा पशुभिरेवैनमेतदभिषिञ्चति बृहस्पतये स्वाहेति ब्रह्म वै बृहस्पतिर्ब्रह्मणैवैनमेतदभिषिञ्चत्येतानि पुरस्तादभिषेकस्य जुहोति तान्येतान्यग्निनामानीत्याचक्षते ॥८॥ ग्रथ जुहोति । यान्युपरिष्टादभिषेकस्य जुहोतीन्द्राय स्वाहेति वीर्यं वाऽइन्द्रो वीर्येणैवैनमेतदभिषिञ्चति घोषाय स्वाहेति वीर्यं वै घोषो वीर्येणैवैनमेतदभिषिञ्चति श्लोकाय स्वाहेति वीर्यं वै श्लोको वीर्येणैवैनमेतदभिषिञ्चत्यꣳशाय स्वाहेति वीर्यं वाऽग्रꣳशो वीर्येणैवैनमेतदभिषिञ्चति भगाय स्वाहेति वीर्यं वै भगो वीर्येणैवैनमेतदभिषिञ्चत्यर्यम्णे स्वाहेति तदेनमस्य सर्वस्यार्यमणं करोत्येतान्युपरिष्टादभिषेकस्य जुहोति तान्येतान्यादित्यनामानीत्याचक्षते ॥९॥ ग्रग्रेण मैत्रावरुणस्य धिष्ण्यम् । ग्रभिषेचनीयानि पात्राणि भवन्ति यत्रैता ग्रापोऽभिषेचनीया भवन्ति ॥१०॥ पालाशं भवति । तेन ब्राह्मणोऽभिषिञ्चति ब्रह्म वै पलाशो ब्रह्मणैवैनमेतदभिषिञ्चति ॥११॥ ग्रौदुम्बरं भवति । तेन स्वोऽभिषिञ्चत्यन्नं वाऽऊर्गुदुम्बर ऊर्ग्वै स्वं यावद्धि पुरुषस्य स्वं भवति नैव तावदशनायति तेनोर्क्स्वं तस्मादौदुम्बरेण स्वोऽभिषिञ्चति ॥१२॥ नैयग्रोधपादं भवति । तेन मित्र्यो राजन्योऽभिषिञ्चति पद्भिर्वै न्यग्रोधः प्रतिष्ठितो मित्रेण वै राजन्यः प्रतिष्ठितस्तस्मान्नैयग्रोधपादेन मित्र्यो राजन्योऽभिषिञ्चति ॥१३॥ ग्राश्वत्थं भवति । तेन वैश्योऽभिषिञ्चति स यदेवादोऽश्वत्थे तिष्ठत इन्द्रो मरुत उपामन्त्रयत तस्मादाश्वत्थेन वैश्योऽभिषिञ्चत्येतान्यभिषेचनीयानि पात्राणि भवन्ति ॥१४॥ ग्रथ पवित्रे करोति । पवित्रे स्थो वैष्णव्याविति सोऽसावेव बन्धुस्तयोर्हिरण्यं प्रवयति ताभ्यामेता ग्रभिषेचनीया ग्रप उत्पुनाति तद्यद्धिरण्यं प्रवयत्यमृतमायुर्हिरण्यं तदा स्वमृतमायुर्दधाति तस्माद्धिरण्यं प्रवयति ॥१५॥ स उत्पुनाति । सवितुर्वः प्रसव

ऽउत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिरिति सोऽसावेव बन्धुरनिभृष्टमसि वाचो बन्धुस्तपोजा इत्यनाधृष्टा स्थ रक्षोभिरित्येवैतदाह यदाहानिभृष्टमसीति वाचो बन्धुरिति यावद्धि प्राणेष्वापो भवन्ति तावद्वाचा वदति तस्मादाह वाचो बन्धुरिति ॥१६॥ तपोजा इति । अग्नेर्वै धूमो जायते धूमादभ्रमभ्राद्वृष्टिरग्नेर्वा एता जायन्ते तस्मादाह तपोजा इति ॥१७॥ सोमस्य दात्रमसीति । यदा वा एनमेताभिरभिषुण्वन्त्यथाहुतिर्भवति तस्मादाह सोमस्य दात्रमसीति स्वाहा राजस्व इति तदेनाः स्वाहाकारेणैवोत्पुनाति ॥१८॥ ता एतेषु पात्रेषु व्यानयति । सधमादो द्युम्निनीराप एता इत्यनतिमानिन्य इत्येवैतदाह यदाह सधमाद इति द्युम्निनीराप एता इति वीर्यवत्य इत्येवैतदाहानाधृष्टा अपस्यो वसाना इत्यनाधृष्टा स्थ रक्षोभिरित्येवैतदाह यदाहानाधृष्टा अपस्यो वसाना इति पस्त्यासु चक्रे वरुणः सधस्थमिति विशो वै पस्त्या विक्षु चक्रे वरुणः प्रतिष्ठामित्येवैतदाहापाꣳ शिशुर्मातृतमास्वन्तरित्यपां वा एष शिशुर्भवति यो राजसूयेन यजते तस्मादाहापाꣳ शिशुर्मातृतमास्वन्तरिति ॥१९॥ अथैनं वासाꣳसि परिधापयति । तत्तार्प्यमिति वासो भवति तस्मिन्त्सर्वाणि यज्ञरूपाणि निष्यूतानि भवन्ति तदेनं परिधापयति क्षत्रस्योल्बमसीति तद्यदेव क्षत्रस्योल्बं तत एवैनमेतज्जनयति ॥२०॥ अथैनं पाण्ड्वं परिधापयति । क्षत्रस्य जराय्वसीति तद्यदेव क्षत्रस्य जरायु तत एवैनमेतज्जनयति ॥२१॥ अथाधीवासं प्रतिमुञ्चति । क्षत्रस्य योनिरसीति तद्यैव क्षत्रस्य योनिस्तस्या एवैनमेतज्जनयति ॥२२॥ अथोष्णीषꣳ सꣳहृत्य । पुरस्तादवगूहति क्षत्रस्य नाभिरसीति तद्यैव क्षत्रस्य नाभिस्तामेवास्मिन्नेतद्दधाति ॥२३॥ तद्धैके । समन्तं परिवेष्टयन्ति नाभिर्वा अस्यैषा समन्तं वा इयं नाभिः पर्येतीति वदन्तस्तदु तथा न कुर्यात्पुरस्तादेवावगूहेत्पुरस्ताद्धीयं नाभिस्तद्यदेनं वासाꣳसि परिधापयति जनयत्येवैनमेतज्जातमभिषिञ्चानीति तस्मादेनं वासाꣳसि परिधापयति ॥२४॥ तद्धै-

के । निदधत्येतानि वासाꣳस्यथैनं पुनर्दीक्षितवसनं परिधापयन्ति तद्ध तथा न कुर्यादङ्गानि वाऽअस्य तनूर्वासाꣳस्यङ्गैर्हैनꣳ सतन्वा तन्वा व्यर्धयन्ति वरुण्यं दीक्षितवसनꣳ स एतेषामेवैकं वाससां परिदधीत तदेनमङ्गैस्तन्वा तन्वा समर्धयति वरुण्यं दीक्षितवसनं तदेनं वरुण्याद्दीक्षितवसनात्प्रमुञ्चति ॥२५॥ स यत्रावभृथमभ्यवैति । तदेतदभ्यवहरन्ति तत्सलोम क्रियते स एतेषामेवैकं वाससां परिधायोदेति तानि वशायै वा वपायाꣳ हुतायां दद्यादुदवसानीयायां वेष्टौ ॥२६॥ अथ धनुरधितनोति । इन्द्रस्य वार्त्रघ्नमसीति वार्त्रघ्नं वै धनुरिन्द्रो वै यजमानो द्वयेन वाऽएष इन्द्रो भवति यच्च क्षत्रियो यदु च यजमानस्तस्मादाहेन्द्रस्य वार्त्रघ्नमसीति ॥२७॥ अथ बाहू विमार्ष्टि । मित्रस्यासि वरुणस्यासीति बाहोर्वै धनुर्बाहुभ्यां वै राजन्यो मैत्रावरुणस्तस्मादाह मित्रस्यासि वरुणस्यासीति तदस्मै प्रयच्छति त्वयायं वृत्रं बधेदिति त्वयायं द्विषन्तं भ्रातृव्यं बधेदित्येवैतदाह ॥२८॥ अथास्मै तिस्र इषूः प्रयच्छति । स यया प्रथमया समर्पयेन पराभिनत्ति सैका सेयं पृथिवी सैषा दृबा नामाथ यया विद्धः शयित्वा जीवति वा म्रियते वा सा द्वितीया तदिदमन्तरिक्षꣳ सैषा रुजा नामाथ ययापैव राध्नोति सा तृतीया सासौ द्यौः सैषा क्षुमा नामैता हि वै तिस्र इषवस्तस्मादस्मै तिस्र इषूः प्रयच्छति ॥२९॥ ताः प्रयच्छति । पातैनं प्राञ्चं पातैनं प्रत्यञ्चं पातैनं तिर्यञ्चं दिग्भ्यः पातेति तदस्मै सर्वा एव दिशोऽशरव्याः करोति तद्यदस्मै धनुः प्रयच्छति वीर्यं वाऽएतद्राजन्यस्य यद्धनुर्वीर्यवन्तमभिषिञ्चानीति तस्माद्वाऽअस्माऽआयुधं प्रयच्छति ॥३०॥ अथैनमाविदो वाचयति । आविर्मर्या इत्यनिरुक्तं प्रजापतिर्वाऽअनिरुक्तस्तदेनं प्रजापतयऽआवेदयति सोऽस्मै सवमनुमन्यते तेनानुमतः सूयते ॥३१॥ आवित्तोऽअग्निर्गृहपतिरिति । ब्रह्म वाऽअग्निस्तदेनं ब्रह्मणऽआवेदयति तदस्मै सवमनुमन्यते तेनानुमतः सूयते ॥३२॥ आवित्तोऽइन्द्रो वृद्धश्रवा इति । क्षत्रं वाऽइन्द्रस्तदेनं क्षत्रा-

यावेदयति तदस्मै सवमनुमन्यते तेनानुमतः सूयते ॥३३॥ आवित्तौ मित्रावरुणौ धृतव्रताविति । प्राणोदानौ वै मित्रावरुणौ तदेनं प्राणोदानाभ्यामावेदयति तावस्मै सवमनुमन्येते ताभ्यामनुमतः सूयते ॥३४॥ आवित्तः पूषा विश्ववेदा इति । पशवो वै पूषा तदेनं पशुभ्य आवेदयति तेऽस्मै सवमनुमन्यन्ते तैरनुमतः सूयते ॥३५॥ आवित्ते द्यावापृथिवी विश्वशम्भुवाविति । तदेनमाभ्यां द्यावापृथिवीभ्यामावेदयति तेऽअस्मै सवमनुमन्येते ताभ्यामनुमतः सूयते ॥३६॥ आवित्तादितिरुरुशर्मेति । इयं वै पृथिव्यदितिस्तदेनमस्यै पृथिव्याऽआवेदयति सास्मै सवमनुमन्यते तयानुमतः सूयते तद्याभ्य एवैनमेतद्देवताभ्य आवेदयति ता अस्मै सवमनुमन्यन्ते ताभिरनुमतः सूयते ॥३७॥ ब्राह्मणम् ॥ २ [३. ५.] ॥ ॥ तृतीयोऽध्यायः [३३.] ॥ ॥

केशवस्य पुरुषस्य । लोहायसमास्यऽआविध्यत्यवेष्टा दन्दशूका इति सर्वान्वाऽएष मृत्यूनतिमुच्यते सर्वान्बधान्यो राजसूयेन यजते तस्य जरैव मृत्युर्भवति तद्यो मृत्युर्यो बधस्तमेवैतदतिनयति यद्दन्दशूकान् ॥१॥ अथ यत्केशवस्य पुरुषस्य । न वाऽएष स्त्री न पुमान्यत्केशवः पुरुषो यदह पुमांस्तेन न स्त्री यदु केशवस्तेनो न पुमान्नैतदयो न हिरण्यं यल्लोहायसं नैते क्रिमयो नाक्रिमयो यद्दन्दशूका अथ यल्लोहायसं भवति लोहिता-इव हि दन्दशूकास्तस्मात्केशवस्य पुरुषस्य ॥२॥ अथैनं दिशः समारोहयति । प्राचीमारोह गायत्री त्वावतु रथन्तरꣳ साम त्रिवृत्स्तोमो वसन्त ऋतुर्ब्रह्म द्रविणम् ॥३॥ दक्षिणामारोह । त्रिष्टुप्त्वावतु बृहत्साम पञ्चदश स्तोमो ग्रीष्म ऋतुः क्षत्रं द्रविणम् ॥४॥ प्रतीचीमारोह । जगती त्वावतु वैरूपꣳ साम सप्तदश स्तोमो वर्षा ऋतुर्विड् द्रविणम् ॥५॥ उदीचीमारोह । अनुष्टुप्त्वावतु वैराजꣳ सामैकविꣳश स्तोमः शरदृतुः फल द्रविणम् ॥६॥ ऊर्ध्वामारोह । पङ्क्तिस्त्वावतु शाक्वररैवते सामनी त्रिणवत्रयस्त्रिꣳशौ स्तोमौ हेमन्तशि-

शिरावृत् वर्चो द्रविणमिति ॥७॥ तद्यदेनं दिशः समारोहयति । ऋतूनामेवैतद्रू
पमृतूनेवैनमेतत्संवत्सरꣳ समारोहयति स ऋतूंत्संवत्सरꣳ समारुह्य सर्वमिदमु-
पर्युपरि भवत्यर्वागिवास्मादिदꣳ सर्वं भवति ॥८॥ शार्दूलचर्मणो जघनार्धे । सीसं
निहितं भवति तत्पदा प्रत्यस्यति प्रत्यस्तं नमुचेः शिर इति नमुचिर्ह वै नामा-
सुर आस तमिन्द्रो निविव्याध तस्य पदा शिरोऽभितष्ठौ स यदभिष्ठित उदबाधत
स उच्छ्वङ्कस्तस्य पदा शिरः प्रचिच्छेद ततो रक्षः समभवत्तद्धस्मैनमनुभाषते क्व ग-
मिष्यसि क्व मे मोक्ष्यसऽइति ॥९॥ तत्सीसेनापजघान । तस्मात्सीसं मृदु सृतज-
वꣳ हि सर्वेण हि वीर्येणापजघान तस्माद्धिरण्यरूपꣳ सन्न कियच्चनार्हति सृतज-
वꣳ हि सर्वेण हि वीर्येणापजघान तद्वै स तन्नाष्ट्रा रक्षाꣳस्यपजघान तथोऽएवै-
ष एतन्नाष्ट्रा रक्षाꣳस्यतोऽपहन्ति ॥१०॥ अथैनꣳ शार्दूलचर्मारोहयति । सोमस्य
त्विषिरसीति यत्र वै सोम इन्द्रमत्यपवत स यत्ततः शार्दूलः समभवत्तेन सोमस्य
त्विषिस्तस्मादाह सोमस्य त्विषिरसीति तवेव मे त्विषिर्भूयादिति शार्दूलत्विषिमेवा-
स्मिन्नेतद्दधाति तस्मादाह तवेव मे त्विषिर्भूयादिति ॥११॥ अथ रुक्ममधस्तादुपा-
स्यति । मृत्योः पाहीत्यमृतमायुर्हिरण्यं तदमृतऽआयुषि प्रतितिष्ठति ॥१२॥ अथ
रुक्मः शतवितृण्णो वा भवति । नववितृण्णो वा स यदि शतवितृण्णः शतायुर्वा
ऽअयं पुरुषः शततेजाः शतवीर्यस्तस्माच्छतवितृण्णो यद्यु नववितृण्णो नवेमे पुरुषे
प्राणास्तस्मान्नववितृण्णः ॥१३॥ तमुपरिष्टाच्छीर्ष्णो निदधाति । ओजोऽसि सहो
ऽस्यमृतमसीत्यमृतमायुर्हिरण्यं तदस्मिन्नमृतमायुर्दधाति तद्यद्रुक्माऽउभयतो भवतो
ऽमृतमायुर्हिरण्यं तदमृतेनैवैनमेतदायुषोभयतः परिबृꣳहति तस्माद्रुक्माऽउभयतो
भवतः ॥१४॥ अथ बाहूऽउद्गृह्णाति । हिरण्यरूपाऽउषसो विरोकऽउभाविन्द्रो
ऽउदिथः सूर्यश्च । आरोहतं वरुण मित्र गर्तं ततश्चक्षाथामदितिं दितिं चेति बाहू
वै मित्रावरुणौ पुरुषो गर्तस्तस्मादाहारोहतं वरुण मित्र गर्तमिति ततश्चक्षाथा-

मदितिं दितिं चेति ततः पश्यतꣳ स्वं चारणं चेत्येवैतदाह ॥१५॥ नैतेनोद्गृह्णीयात् । मित्रोऽसि वरुणोऽसीत्येवोद्गृह्णीयाद्बाहू वै मित्रावरुणौ बाहुभ्यां वै राजन्यो मैत्रावरुणस्तस्मान्मित्रोऽसि वरुणोऽसीत्येवोद्गृह्णीयात् ॥१६॥ तद्यदेनमूर्ध्वबाहुमभिषिञ्चति । वीर्यं वाऽएतद्राजन्यस्य यद्बाहू वीर्यं वाऽएतदपाꣳ रसः सम्भृतो भवति येनैनमेतदभिषिञ्चति नेन्मऽइदं वीर्यं वीर्यमपाꣳ रसः सम्भृतो बाहू व्लिनादिति तस्मादेनमूर्ध्वबाहुमभिषिञ्चति ॥१७॥ ब्राह्मणम् ॥३ [४. १.] ॥॥

तं वै प्राञ्चं तिष्ठन्तमभिषिञ्चति । पुरस्ताद्ब्राह्मणोऽभिषिञ्चत्यध्वर्युर्वा यो वास्य पुरोहितो भवति पश्चादितरे ॥१॥ सोमस्य त्वा द्युम्नेनाभिषिञ्चामीति । वीर्येणैतदाहाग्नेर्भ्राजसेति वीर्येणैवैतदाह सूर्यस्य वर्चसेति वीर्येणैवैतदाहेन्द्रस्येन्द्रियेणेति वीर्येणैवैतदाह क्षत्राणां क्षत्रपतिरेधीति राज्ञामधिराज एधीत्येवैतदाहाति दिद्यून्पाहीतीषवो वै दिद्यव इषुबधमेवैनमेतदतिनयति तस्मादाहाति दिद्यून्पाहीति ॥२॥ इमं देवाः । असपत्नꣳ सुवध्वमितीमं देवा अभ्रातृव्यꣳ सुवध्वमित्येवैतदाह महते क्षत्राय महते ज्यैष्ठ्यायेति नात्र तिरोहितमिवास्ति महते जानराज्यायेति महते जनानाꣳ राज्यायेत्येवैतदाहेन्द्रस्येन्द्रियायेति वीर्यायेत्येवैतदाह यदाहेन्द्रस्येन्द्रियायेतीमममुष्य पुत्रममुष्यै पुत्रमिति तद्यदेवास्य जन्म तत एवैतदाहास्यै विशऽइति यस्यै विशो राजा भवत्येष वोऽमी राजा सोमोऽस्माकं ब्राह्मणानाꣳ राजेति तदस्माऽइदꣳ सर्वमाद्यं करोति ब्राह्मणमेवापोद्धरति तस्माद्ब्राह्मणोऽनाद्यः सोमराजा हि भवति ॥३॥ ॥ शतम् ३२०० ॥॥ अथैतमभिषिक्तम् । कृष्णविषाणयानुविमृष्टे वीर्यं वाऽएतदपाꣳ रसः सम्भृतो भवति येनैनमेतदभिषिञ्चतीदं मे वीर्यꣳ सर्वमात्मानमुपस्पृशादिति तस्माद्वाऽअनुविमृष्टे ॥४॥ सोऽनुविमृष्टे । प्र पर्वतस्य वृषभस्य पृष्ठादिति यथायं पर्वतोऽतिष्ठावा यथऽर्षभः पशूनतिष्ठावेवं वाऽएष इदꣳ सर्वमतितिष्ठत्यर्वागेवास्मादिदꣳ सर्वं भवति यो

राजसूयेन यजते तस्मादाह प्र पर्वतस्य वृषभस्य पृष्ठान्नावश्चरन्ति स्वसिच इयानाः । ता आववृत्रन्नधरागुदक्ता अहिं बुध्न्यमनु रीयमाणा इति ॥५॥ अथैनमन्तरेव शार्दूलचर्मणि विष्णुक्रमान्क्रमयति । विष्णोर्विक्रमणमसि विष्णोर्विक्रान्तमसि विष्णोः क्रान्तमसीतीमे वै लोका विष्णोर्विक्रमणं विष्णोर्विक्रान्तं विष्णोः क्रान्तं तदिमानेव लोकान्त्समारुह्य सर्वमेवेदमुपर्युपरि भवत्यर्वागेवास्मादिदꣳ सर्वं भवति ॥६॥ अथ ब्राह्मणस्य पात्रे । सꣳस्रवान्त्समवनयति तद्ब्राह्मणꣳ राजानमनु यशः करोति तस्माद्ब्राह्मणो राजानमनु यशः ॥७॥ तद्योऽस्य पुत्रः प्रियतमो भवति । तस्माऽएतत्पात्रं प्रयच्छतीदं मेऽयं वीर्यं पुत्रोऽनुसंतनवदिति ॥८॥ अथ प्रतिपरेत्य गार्हपत्यमन्वारब्धे जुहोति । प्रजापते न त्वदेतान्यन्यो विश्वा रूपाणि परि ता बभूव । यत्कामास्ते जुहुमस्तन्नोऽअस्त्वयममुष्य पितेति तद्यः पुत्रस्तं पितरं करोति यः पिता तं पुत्रं तदेनयोर्वीर्ये व्यतिषजत्यसावस्य पितेति तद्यः पिता तं पितरं करोति यः पुत्रस्तं पुत्रं तदेनयोर्वीर्ये व्यतिषज्य पुनरेव यथायथं करोति वयꣳ स्याम पतयो रयीणाꣳ स्वाहेत्याशीरेवैषैतस्य कर्मण आशिषमेवैतदाशास्ते ॥९॥ अथ य एष सꣳस्रवोऽतिरिक्तो भवति । तमाग्नीध्रीये जुहोत्यतिरिक्तो वाऽएष सꣳस्रवो भवत्यतिरिक्त आग्नीध्रीयो गार्हपत्ये हवीꣳषि श्रपयन्त्याहवनीये जुह्वत्यथैषोऽतिरिक्तस्तदतिरिक्तऽएवैतदतिरिक्तं दधात्युत्तरार्धे जुहोत्येष ह्येतस्य देवस्य दिक्तस्मादुत्तरार्धे जुहोति स जुहोति रुद्र यत्ते क्रिवि परं नाम तस्मिन्हुतमस्यमेष्टमसि स्वाहेति ॥१०॥ ब्राह्मणम् ॥४ [४. २.] ॥॥

तद्योऽस्य स्वो भवति । तस्य शतं वा परःशता वा गा उत्तरेणाहवनीयꣳ स्थापयति तद्यदेवं करोति ॥१॥ वरुणाद्ध वाऽअभिषिषिचानात् । इन्द्रियं वीर्यमपचक्राम शश्वद्ध एषोऽपाꣳ रसः सम्भृतो भवति येनैनमेतदभिषिञ्चति सोऽस्येन्द्रियं वीर्यं निर्जघान तत्पशुष्वन्वविन्दत्तस्मात्पशवो यशो यदेष्वन्वविन्दत्तत्पशु-

ष्वनुविद्येन्द्रियं वीर्यं पुनरात्मन्नधत्त तथोऽएवैष एतन्नाद्धैवास्मान्निन्द्रियं वीर्यमपक्रामति वरुणसवो वाऽएष यद्राजसूयमिति वरुणोऽकरोदिति त्वेवैष एतत्करोति ॥२॥ अथ रथमुपावहरति । यद्वै राजन्यात्पराग्भवति रथेन वै तदनुयुङ्क्ते तस्माद्रथमुपावहरति ॥३॥ स उपावहरति । इन्द्रस्य वज्रोऽसीति वज्रो वै रथ इन्द्रो वै यजमानो द्वयेन वाऽएष इन्द्रो भवति यच्च क्षत्रियो यदु च यजमानस्तस्मादाहेन्द्रस्य वज्रोऽसीति ॥४॥ तमन्तर्वेद्यभ्यववर्त्य युनक्ति । मित्रावरुणयोस्त्वा प्रशास्त्रोः प्रशिषा युनज्मीति बाहू वै मित्रावरुणौ बाहुभ्यां वै राजन्यो मैत्रावरुणस्तस्मादाह मित्रावरुणयोस्त्वा प्रशास्त्रोः प्रशिषा युनज्मीति ॥५॥ तं चतुर्युजं युनक्ति । स जघनेन सदोऽग्रेण शालां येनैव दक्षिणा यन्ति तेन प्रतिपद्यते तं जघनेन चात्वालमग्रेणाग्नीध्रमुद्यच्छति ॥६॥ तमातिष्ठति । अव्यथायै त्वा स्वधायै त्वेत्यनार्त्यै त्वेत्येवैतदाह यदाहाव्यथायै त्वेति स्वधायै त्वेति रसाय त्वेत्येवैतदाहारिष्टोऽअर्जुन इत्यर्जुनो ह वै नामेन्द्रो यदस्य गुह्यं नाम द्वयेन वाऽएष इन्द्रो भवति यच्च क्षत्रियो यदु च यजमानस्तस्मादाहारिष्टोऽअर्जुन इति ॥७॥ अथ दक्षिणायुग्यमुपार्षति । मरुतां प्रसवेन जयेति विशो वै मरुतो विशा वै तत्क्षत्रियो जयति यज्जिगीषति तस्मादाह मरुतां प्रसवेन जयेति ॥८॥ अथ मध्ये गवामुद्यच्छति । आपाम मनसेति मनसा वाऽइदꣳ सर्वमाप्तं तन्मनसैवैतत्सर्वमाप्नोति तस्मादाहापाम मनसेति ॥९॥ अथ धनुरार्त्न्या गामुपस्पृशति । समिन्द्रियेणेतीन्द्रियं वै वीर्यं गाव इन्द्रियमेवैतद्वीर्यमात्मन्धत्तेऽथाह जिनामीमाः कुर्वऽइमा इति ॥१०॥ तद्यत्स्वस्य गोषूद्यच्छति । यद्वै पुरुषात्पराग्भवति यशो वा किंचिद्वा स्वꣳ हैवास्य तत्प्रतमामिवाभ्यपक्रामति तत्स्वादेवैतदिन्द्रियं वीर्यं पुनरात्मन्धत्ते तस्मात्स्वस्य गोषूद्यच्छति ॥११॥ तस्मै तावन्मात्रीर्वा भूयसीर्वा प्रतिददाति । न वाऽएष क्रूरकर्मणे भवति यद्यजमानः क्रूरमिव वाऽएतत्करोति यदाह

जिनामीमाः कुर्वऽइमा इति तथो हास्यैतदक्रूरं कृतं भवति तस्मात्तावन्मात्रीर्वा भूयसीर्वा प्रतिददाति ॥ १२ ॥ अथ दक्षिणानायछति । सोऽग्रेण यूपं दक्षिणेन वेदिं येनैव दक्षिणा यन्ति तेन प्रतिपद्यते तं जघनेन सदोऽग्रेण शालामुच्छति ॥ १३ ॥ मा न इन्द्र ते वयं तुराषाट् । अयुक्तासोऽअब्रह्मता विदसाम । तिष्ठा रथमधि यं वज्रहस्ता रश्मीन्देव यमसे स्वश्वानित्युच्छत्यैवैतयाभीशवो वै रश्मयस्तस्मादाह रश्मीन्देव यमसे स्वश्वानित्यथ रथविमोचनीयानि जुहोति प्रीतो रथो विमुच्याताऽइति तस्माद्रथविमोचनीयानि जुहोति ॥ १४ ॥ स जुहोति । अग्नये गृहपतये स्वाहेति स यदेवाग्नेयꣳ रथस्य तदेवैतेन प्रीणाति वहा वाऽआग्नेया रथस्य वहानेवैतेन प्रीणाति श्रीर्वै गार्हपतं यावतो-यावत ईष्टे तच्छ्रियमेवास्यैतद्गार्हपतꣳ राज्यमभिविमुच्यते ॥ १५ ॥ सोमाय वनस्पतये स्वाहेति । द्वयानि वै वानस्पत्यानि चक्राणि रथ्यानि चानसानि च तेभ्यो न्वेवैतदुभयेभ्योऽरिष्टिं कुरुते सोमो वै वनस्पतिः स यदेव वानस्पत्यꣳ रथस्य तदेवैतेन प्रीणाति दारूणि वै वानस्पत्यानि रथस्य दारूण्येवैतेन प्रीणाति क्षत्रं वै सोमः क्षत्रमेवास्यैतद्राज्यमभिविमुच्यते ॥ १६ ॥ मरुतामोजसे स्वाहेति । स यदेव मारुतꣳ रथस्य तदेवैतेन प्रीणाति चत्वारोऽश्वा रथः पञ्चमो द्वौ सव्यष्ठसारथी ते सप्त सप्त-सप्त व मारुतो गणः सर्वमेवैतेन रथं प्रीणाति विशो वै मरुतो विशमेवास्यैतद्राज्यमभिविमुच्यते ॥ १७ ॥ इन्द्रस्येन्द्रियाय स्वाहेति । स यदेवैन्द्रꣳ रथस्य तदेवैतेन प्रीणाति सव्यष्ठा वाऽऐन्द्रो रथस्य सव्यष्ठारमेवैतेन प्रीणातीन्द्रियं वै वीर्यमिन्द्र इन्द्रियमेवास्यैतद्वीर्यꣳ राज्यमभिविमुच्यते ॥ १८ ॥ अथ वाराह्याऽउपानहाऽउपमुञ्चते । अग्नौ ह वै देवा घृतकुम्भं प्रवेशयां चक्रुस्ततो वराहः सम्बभूव तस्माद्वराहो मेदुरो घृताद्धि सम्भूतस्तस्माद्वराहे गावः संजानते स्वमेवैतद्रसमभिसंजानते तत्पशूनामेवैतद्रसे प्रतितिष्ठति तस्माद्वाराह्याऽउपानहाऽउपमुञ्चते ॥ १९ ॥ अथेमां

प्रत्यवेक्षमाणो जपति । पृथिवि मातर्मा मा हिꣳसीर्मो ऽअहं त्वामिति वरुणाद्ध वा ऽअभिषिषिचानात्पृथिवी बिभयां चकार महद्वा ऽअयमभूद्यो ऽभ्यषेचि यद्वै मायं नावदृणीयादिति वरुण उ ह पृथिव्यै बिभयां चकार यद्वै मेयं नावधून्वीतेति तदनयैवैतन्मित्रधेयमकुरुत न हि माता पुत्रꣳ हिनस्ति न पुत्रो मातरम् ॥२०॥ वरुणसवो वा ऽएष यद्राजसूयम् । पृथिव्यु हैतस्माद्बिभेति महद्वा ऽअयमभूद्यो ऽभ्यषेचि यद्वै मायं नावदृणीयादित्येष उ हास्यै बिभेति यद्वै मेयं नावधून्वीतेति तदनयैवैतन्मित्रधेयं कुरुते न हि माता पुत्रꣳ हिनस्ति न पुत्रो मातरं तस्मादेवं जपति ॥२१॥ सोऽवतिष्ठति । हꣳसः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् । नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहदित्येतामतिच्छन्दसं जपन्नेषा वै सर्वाणि छन्दाꣳसि यदतिच्छन्दास्तथैनं पाप्मा नान्ववतिष्ठति ॥२२॥ तं न संग्रहीतान्ववतिष्ठेत् । नेत्तं लोकमन्ववतिष्ठाद्यꣳ सुषुवाणोऽन्ववास्थादिति तꣳ सरथमेव रथवाहन ऽआदधाति ततोऽवाङ्पप्रवर्ते तथा तं लोकं नान्ववतिष्ठति यꣳ सुषुवाणोऽन्ववास्थात् ॥२३॥ उत्तरेणाहवनीयं पूर्वाग्निरुद्धृतो भवति । स रथवाहनस्य दक्षिणमन्वनुष्यन्दꣳ शतमानौ प्रवृत्तावाबध्नाति ॥२४॥ औदुम्बरीꣳ शाखामुपगूहति । तयोरन्यतरमुपस्पृशतीयदस्यायुरस्यायुर्मयि धेहि युङ्ङसि वर्चोऽसि वर्चो मयि धेहीति तदायुर्वर्च आत्मन्धत्ते ॥२५॥ अथौदुम्बरीꣳ शाखामुपस्पृशति । ऊर्गस्यूर्जं मयि धेहीति तदूर्जमात्मन्धत्ते तस्यैतस्य कर्मण एतावेव शतमानौ प्रवृत्तौ दक्षिणा तौ ब्रह्मणे ददाति ब्रह्मा हि यज्ञं दक्षिणतोऽभिगोपायति तस्मात्तौ ब्रह्मणे ददाति ॥२६॥ अग्रेण मैत्रावरुणस्य धिष्ण्यम् । मैत्रावरुणी पयस्या निहिता भवति तामस्य बाहू ऽअभ्युपावहरतीन्द्रस्य वां वीर्यकृतो बाहू ऽअभ्युपावहरामीति पशूनां वा ऽएष रसो यत्पयस्या तत्पशूनामेवास्यैतद्रसं बाहू ऽअभ्युपावहरति तद्यन्मैत्रावरुणी भवति मित्रावरुणा ऽउ

हि बाह तस्मान्मैत्रावरुणी भवति ॥२७॥ ब्राह्मणम् ॥५ [४. ३.] ॥ तृतीयः प्रपाठकः ॥ कण्डिकासंख्या ११९ ॥ ॥

मैत्रावरुण्या पयस्यया प्रचरति । तस्या अनिष्ट एव स्विष्टकृद्भवत्यथास्मा ऽआसन्दीमाहरत्युपरिसद्यं वा ऽएष जयति यो जयत्यन्तरिक्षसद्यं तदेनमुपर्यासीनमधस्तादिमाः प्रजा उपासते तस्मादस्मा ऽआसन्दीमाहरन्ति सैषा खादिरी वितृण्णा भवति येयं वर्ध्रव्युता भरतानाम् ॥१॥ तामग्रेण । मैत्रावरुणस्य धिष्ण्यं निदधाति स्योनासि सुषदासीति शिवामेवैतत्सुग्मां करोति ॥२॥ अथाधीवासमास्तृणाति । क्षत्रस्य योनिरसीति तद्यैव क्षत्रस्य योनिस्तामेवैतत्करोति ॥३॥ अथैनमासादयति । स्योनामासीद सुषदामासीदेति शिवाꣳ सुग्मामासीदेत्येवैतदाह क्षत्रस्य योनिमासीदेति तद्यैव क्षत्रस्य योनिस्तस्यामेवैनमेतद्दधाति ॥४॥ अथान्तराꣳसेऽभिमृश्य जपति । निषसाद धृतव्रत इति धृतव्रतो वै राजा न वा ऽएष सर्वस्मा ऽइव वदनाय न सर्वस्मा ऽइव कर्मणे यदेव साधु वदेद्यत्साधु कुर्यात्तस्मै वा ऽएष च श्रोत्रियश्चैतौ ह वै द्वौ मनुष्येषु धृतव्रतौ तस्मादाह निषसाद धृतव्रत इति वरुणः पस्त्यास्वेति विशो वै पस्त्या विक्ष्वित्येवैतदाह साम्राज्याय सुक्रतुरिति राज्यायेत्येवैतदाह यदाह साम्राज्याय सुक्रतुरिति ॥५॥ अथास्मै पञ्चाक्षान्पाणावावपति । अभिभूरस्येतास्ते पञ्च दिशः कल्पन्तामित्येष वा ऽअयानभिभूर्यत्कलिरेष हि सर्वानयानभिभवति तस्मादाहाभिभूरसीत्येतास्ते पञ्च दिशः कल्पन्तामिति पञ्च वै दिशस्तदस्मै सर्वा एव दिशः कल्पयति ॥६॥ अथैनं पृष्ठतस्तूष्णीमिव दण्डैर्घ्नन्ति । तं दण्डैर्घ्नन्तो दण्डवधमतिनयन्ति तस्माद्राजादण्ड्यो यदेनं दण्डवधमतिनयन्ति ॥७॥ अथ वरं वृणीते । यꣳ ह वै कं च सुषुवाणो वरं वृणीते सोऽस्मै सर्वः समृध्यते तस्माद्वरं वृणीते ॥८॥ स ब्रह्मन्नित्येव प्रथममामन्त्रयते । ब्रह्म प्रथममभिव्याहराणि ब्रह्मप्रसूतां वाचं वदानीति तस्माद्ब्रह्मन्नि-

त्येव प्रथममामन्त्रयते त्वं ब्रह्मासीतीतरः प्रत्याह सवितासि सत्यप्रसव इति वी-
र्यमेवास्मिन्नेतद्दधाति सवितारमेव सत्यप्रसवं करोति ॥९॥ ब्रह्मन्नित्येव द्विती-
यमामन्त्रयते । त्वं ब्रह्मासीतीतरः प्रत्याह वरुणोऽसि सत्यौजा इति वीर्यमेवा-
स्मिन्नेतद्दधाति वरुणमेव सत्यौजसं करोति ॥१०॥ ब्रह्मन्नित्येव तृतीयमामन्त्र-
यते । त्वं ब्रह्मासीतीतरः प्रत्याहेन्द्रोऽसि विशौजा इति वीर्यमेवास्मिन्नेतद्दधा-
तीन्द्रमेव विशौजसं करोति ॥११॥ ब्रह्मन्नित्येव चतुर्थमामन्त्रयते । त्वं ब्रह्मासी-
तीतरः प्रत्याह रुद्रोऽसि सुशेव इति तद्वीर्याण्येवास्मिन्नेतत्पूर्वाणि दधात्यथैनमे-
तच्छमयत्येव तस्मादेष सर्वस्येशानो मृडयति यदेनꣳ शमयति ॥१२॥ ब्रह्मन्नित्येव
पञ्चममामन्त्रयते । त्वं ब्रह्मासीतीतरोऽनिरुक्तं प्रत्याह परिमितं वै निरुक्तं तत्प-
रिमितमेवास्मिन्नेतत्पूर्वं वीर्यं दधात्यथात्रानिरुक्तं प्रत्याहापरिमितं वाऽअनिरुक्तं
तदपरिमितमेवास्मिन्नेतत्सर्वं वीर्यं दधाति तस्मादत्रानिरुक्तं प्रत्याह ॥१३॥ अथ
सुमङ्गलनामानꣳ ह्वयति । बङ्कार श्रेयस्कर भूयस्करेति य एवंनामा भवति
कल्याणमेवैतन्मानुष्यै वाचो वदति ॥१४॥ अथास्मै ब्राह्मण स्फ्यं प्रयच्छति । अ-
ध्वर्युर्वा यो वास्य पुरोहितो भवतीन्द्रस्य वज्रोऽसि तेन मे रध्येति वज्रो वै स्फ्यः
स एतेन वज्रेण ब्राह्मणो राजानमात्मनोऽबलीयाꣳसं कुरुते यो वै राजा ब्राह्म-
णादबलीयानमित्रेभ्यो वै स बलीयान्भवति तदमित्रेभ्य एवैनमेतद्बलीयाꣳसं क-
रोति ॥१५॥ तꣳ राजा राजभ्रात्रे प्रयच्छति । इन्द्रस्य वज्रोऽसि तेन मे रध्येति ते-
न राजा राजभ्रातरमात्मनोऽबलीयाꣳसं कुरुते ॥१६॥ तꣳ राजभ्राता सूताय वा
स्थपतये वा प्रयच्छति । इन्द्रस्य वज्रोऽसि तेन मे रध्येति तेन राजभ्राता सूतं वा
स्थपतिं वात्मनोऽबलीयाꣳसं कुरुते ॥१७॥ तꣳ सूतो वा स्थपतिर्वा ग्रामण्ये प्र-
यच्छति । इन्द्रस्य वज्रोऽसि तेन मे रध्येति तेन सूतो वा स्थपतिर्वा ग्रामण्यमा-
त्मनोऽबलीयाꣳसं कुरुते ॥१८॥ तं ग्रामणीः सजाताय प्रयच्छति । इन्द्रस्य वज्रो

ऽसि तेन मे रध्येति तेन ग्रामणीः सजातमात्मनोऽबलीयाꣳसं कुरुते तद्यदेवꣳ सम्प्रयच्छते नेत्पापवस्यसमसद्यथापूर्वमसदिति तस्मादेवꣳ सम्प्रयच्छते ॥१९॥ अथ सजातश्च प्रतिप्रस्थाता च । एतेन स्फ्येन पूर्वाग्नौ शुक्रस्य पुरोरुचाधिदेवनं कुरुतोऽत्ता वै शुक्रोऽत्तारमेवैतत्कुरुतः ॥२०॥ अथ मन्थिनः पुरोरुचा विमितं विमिनुतः । आद्यो वै मन्थी तदत्तारमेवैतत्कृत्वाथास्माऽएतदाद्यं जनयतस्तस्मान्मन्थिनः पुरोरुचा विमितं विमिनुतः ॥२१॥ अथाध्वर्युः । चतुर्गृहीतमाज्यं गृहीत्वाधिदेवने हिरण्यं निधाय जुहोत्यग्निः पृथुर्धर्मणस्पतिर्जुषाणोऽअग्निः पृथुर्धर्मणस्पतिराज्यस्य वेतु स्वाहेति ॥२२॥ अथाक्षान्निवपति । स्वाहाकृताः सूर्यस्य रश्मिभिर्यतध्वꣳ सजातानां मध्यमेष्ठ्यायेत्येष वाऽअग्निः पृथुर्यदधिदेवनं तस्यैतेऽङ्गारा यदक्षास्तमेवैतेन प्रीणाति तस्य ह वाऽएषानुमता गृहेषु हन्यते यो वा राजसूयेन यजते यो वैतदेवं वेदैतेष्वक्षेष्वाह गां दीव्यध्वमिति पूर्वाग्निवाहौ दक्षिणा ॥ २३ ॥ अथाहाग्नये स्विष्टकृतेऽनुब्रूहीति । तद्यदन्तरेणाहुतीऽएतत्कर्म क्रियतऽएष वै प्रजापतिर्य एष यज्ञस्तायते यस्मादिमाः प्रजाः प्रजाता एतम्वेवाप्येतर्ह्यनु प्रजायन्ते तदेनं मध्यत एवैतस्य प्रजापतेर्दधाति मध्यतः सुवति तस्मादन्तरेणाहुतीऽएतत्कर्म क्रियतऽआश्राव्याहाग्निꣳ स्विष्टकृतं यजेति वषट्कृते जुहोति ॥२४॥ अथेडामादधाति । उपहूतायामिडायामप उपस्पृश्य माहेन्द्रं ग्रहं गृह्णाति माहेन्द्रं ग्रहं गृहीत्वा स्तोत्रमुपाकरोति तꣳ स्तोत्राय प्रमीवति स उपावरोहति सोऽन्ते स्तोत्रस्य भवत्यन्ते शस्त्रस्य ॥२५॥ ब्राह्मणम् ॥ १ [४. ४.] ॥ ॥

वरुणाद्ध वाऽअभिषिषिचानाद्भर्गोऽपचक्राम । वीर्यं वै भर्ग एष विष्णुर्यज्ञः सोऽस्मादपचक्राम शश्वद्ध एषोऽपाꣳ रसः सम्भृतो भवति येनैनमेतदभिषिञ्चति सोऽस्य भर्ग निर्जघान ॥१॥ तमेताभिर्देवताभिरनुसमसर्पत् । सवित्रा प्रसवित्रा सरस्वत्या वाचा त्वष्ट्रा रूपैः पूष्णा पशुभिरिन्द्रेणास्मे बृहस्पतिना ब्रह्मणा वरुणे-

नौजसाग्निना तेजसा सोमेन राज्ञा विष्णुनैव दशम्या देवतयान्वविन्दत् ॥२॥ त-
द्यदेनमेताभिर्देवताभिरनुसमसर्पत् । तस्मात्सꣳसृपो नामाथ यद्दशमेऽहन्प्रसुतो
भवति तस्माद्दशपेयोऽथो यद्दश-दशैकैकं चमसमनुप्रसृप्ता भवन्ति तस्माद्वेव दश-
पेयः ॥३॥ तदाहुः । दश पितामहान्त्सोमपान्त्संख्याय प्रसर्पेत्तथो हास्य सोम-
पीथमश्नुते दशपेयो हीति तद्वै ज्या द्वौ त्रीनित्येव पितामहान्त्सोमपान्विन्दन्ति
तस्मादेता एव देवताः संख्याय प्रसर्पेत् ॥४॥ एताभिर्वै देवताभिर्वरुण एतस्य
सोमपीथमाश्नुत । तथोऽएवैष एताभिरेव देवताभिरेतस्य सोमपीथमश्नुते तस्मा-
देता एव देवताः संख्याय प्रसर्पेदथ यदेवैषोदवसानीयेष्टिः संतिष्ठतऽएतस्या-
भिषेचनीयस्य ॥५॥ अथैतानि हवीꣳषि निर्वपति । सावित्रं द्वादशकपालं वा-
ष्टाकपालं वा पुरोडाशꣳ सविता वै देवानां प्रसविता सवितृप्रसूत एव तद्वरु-
णोऽनुसमसर्पत्तथोऽएवैष एतत्सवितृप्रसूत एवानुसꣳसर्पति तत्रैकं पुण्डरीकं प्र-
यच्छति ॥६॥ अथ सारस्वतं चरुं निर्वपति । वाग्वै सरस्वती वाचैव तद्वरुणो
ऽनुसमसर्पत्तथोऽएवैष एतद्वाचैवानुसꣳसर्पति तत्रैकं पुण्डरीकं प्रयच्छति ॥७॥ अ-
थ त्वाष्ट्रं दशकपालं पुरोडाशं निर्वपति । त्वष्टा वै रूपाणामीष्टे त्वष्ट्रैव तद्रूपैर्वरु-
णोऽनुसमसर्पत्तथोऽएवैष एतत्त्वष्ट्रैव रूपैरनुसꣳसर्पति तत्रैकं पुण्डरीकं प्रयच्छति
॥८॥ अथ पौष्णं चरुं निर्वपति । पशवो वै पूषा पशुभिरेव तद्वरुणोऽनुसमसर्प-
त्तथोऽएवैष एतत्पशुभिरेवानुसꣳसर्पति तत्रैकं पुण्डरीकं प्रयच्छति ॥९॥ अथैन्द्र-
मेकादशकपालं पुरोडाशं निर्वपति । इन्द्रियं वै वीर्यमिन्द्र इन्द्रियेणैव तद्वीर्येण
वरुणोऽनुसमसर्पत्तथोऽएवैष एतदिन्द्रियेणैव वीर्येणानुसꣳसर्पति तत्रैकं पुण्डरी-
कं प्रयच्छति ॥१०॥ अथ बार्हस्पत्यं चरुं निर्वपति । ब्रह्म वै बृहस्पतिर्ब्रह्मणैव
तद्वरुणोऽनुसमसर्पत्तथोऽएवैष एतद्ब्रह्मणैवानुसꣳसर्पति तत्रैकं पुण्डरीकं प्रयच्छति
॥११॥ अथ वारुणं यवमयं चरुं निर्वपति । स येनैवौजसेमाः प्रजा वरुणोऽगृ-

ह्यात्तेनैव तदोजसा वरुणोऽनुसमसर्पत्तेनो एवैष तदोजसानुसꣳसर्पति तत्रैकं पुण्डरीकं प्रयच्छति ॥१२॥ उपसदो दशम्यो देवताः । तत्र पञ्च पुण्डरीकाण्युपप्रयच्छति तां द्वादशपुण्डरीकाꣳ स्रजं प्रतिमुञ्चते सा दीक्षा तया दीक्षया दीक्षते ॥१३॥ अथ यद्द्वादश भवन्ति । द्वादश वै मासाः संवत्सरस्य सर्वं वै संवत्सरः सर्वेणैवैनमेतद्दीक्षयति यानि पुण्डरीकाणि तानि दिवो रूपं तानि नक्षत्राणाꣳ रूपं ये वधकास्तेऽन्तरिक्षस्य रूपं यानि बिसानि तान्यस्यै तदेनमेषु लोकेष्वधि दीक्षयति ॥१४॥ अथ राजानं क्रीत्वा । द्वेधोपनह्य परिवहन्ति ततोऽर्धमासन्धामासाद्य प्रचरत्यथ य एषोऽर्धो ब्रह्मणो गृहे निहितो भवति तमासन्धामासाद्यातिथ्येन प्रचरति यदातिथ्येन प्रचरत्यथोपसद्भिः प्रचरति यदोपसद्भिः प्रचरति ॥१५॥ अथैतानि हवीꣳषि निर्वपति । आग्नेयमष्टाकपालं पुरोडाशꣳ सौम्यं चरुं वैष्णवं त्रिकपालं वा पुरोडाशं चरुं वा तेन यथेष्ट्यैवं यजते ॥१६॥ तदु तथा न कुर्यात् । ह्वलति वा एष यो यज्ञपथादेत्येति वा एष यज्ञपथाद्य उपसत्पथादेति तस्मादुपसत्पथादेव नेयात् ॥१७॥ स यदग्निं यजति । अग्निनैवैतत्तेजसानुसꣳसर्पत्यथ यत्सोमं यजति सोमेनैवैतद्राज्ञानुसꣳसर्पत्यथ यद्विष्णुं यजति यज्ञो वै विष्णुस्तद्यज्ञं प्रत्यक्षमाप्नोति तं प्रत्यक्षमात्स्वात्मन्कुरुते ॥१८॥ स एष सप्तदशोऽग्निष्टोमो भवति । सप्तदशो वै प्रजापतिः प्रजापतिर्यज्ञस्तद्यज्ञं प्रत्यक्षमाप्नोति तं प्रत्यक्षमात्स्वात्मन्कुरुते ॥१९॥ तस्य द्वादश प्रथमगर्भाः पष्ठौह्यो दक्षिणा । द्वादश वै मासाः संवत्सरस्य संवत्सरः प्रजापतिः प्रजापतिर्यज्ञस्तद्यज्ञं प्रत्यक्षमाप्नोति तं प्रत्यक्षमात्स्वात्मन्कुरुते ॥२०॥ तासां द्वादश गर्भाः । ताश्चतुर्विꣳशतिश्चतुर्विꣳशतिर्वै संवत्सरस्यार्धमासाः संवत्सरः प्रजापतिः प्रजापतिर्यज्ञस्तद्यज्ञं प्रत्यक्षमाप्नोति तं प्रत्यक्षमात्स्वात्मन्कुरुते ॥२१॥ ता ब्रह्मणे ददाति । ब्रह्मा हि यज्ञं दक्षिणतोऽभिगोपायति तस्मात्ता ब्रह्मणे ददाति हिरण्मयीꣳ स्रजमुद्गात्रे रुक्मꣳ होत्रे हि-

रण्मयौ प्राकाशावध्वर्युभ्यामश्वं प्रस्तोत्रे वशां मैत्रावरुणायऽर्षभं ब्राह्मणाछꣳसिने वाससी नेष्टापोतृभ्यामन्यतरतोयुक्तं यवाचितमछावाकाय गामग्नीधे ॥२२॥ ता वाऽएताः । द्वादश वा त्रयोदश वा दक्षिणा भवन्ति द्वादश वा वै त्रयोदश वा संवत्सरस्य मासाः संवत्सरः प्रजापतिः प्रजापतिर्यज्ञस्तद्यज्ञं प्रत्यक्षमाप्नोति तं प्रत्यक्षमास्वात्मन्कुरुते ॥२३॥ ब्राह्मणम् ॥ २ [४. ५.] ॥ चतुर्थोऽध्यायः [३४.] ॥ ॥

आग्नेयोऽष्टाकपालः पुरोडाशो भवति । तं पूर्वार्धऽआसादयत्यैन्द्र एकादशकपालः पुरोडाशो भवति सौम्यो वा चरुस्तं दक्षिणार्धऽआसादयति वैश्वदेवश्चरुर्भवति तं पश्चार्धऽआसादयति मैत्रावरुणी पयस्या भवति तामुत्तरार्धऽआसादयति बार्हस्पत्यश्चरुर्भवति तं मध्यऽआसादयत्येष चरुः पञ्चबिलस्तद्यत्पञ्च हवीꣳषि भवन्ति तेषां पञ्च बिलानि तस्माच्चरुः पञ्चबिलो नाम ॥१॥ तद्यदेतेन राजसूययाजी यजते । यद्वैनं दिशः समारोहयति यदृतून्यत्स्तोमान्यच्छन्दाꣳसि तस्माद्वैनमेतेन निष्क्रीणाति स यद्धैतेन राजसूययाजी न यजेतोद्वा ह माद्येत्प्र वा पतेत्तस्माद्वाऽएतेन राजसूययाजी यजते ॥२॥ स यदाग्नेयेनाष्टाकपालेन पुरोडाशेन प्रचरति । यद्वैनं प्राचीं दिशꣳ समारोहयति यदृतून्यत्स्तोमान्यच्छन्दाꣳसि तस्माद्वैनमेतेन निष्क्रीणाति सꣳस्रवं बार्हस्पत्ये चराववनयति ॥३॥ अथ यदैन्द्रेणैकादशकपालेन पुरोडाशेन प्रचरति । सौम्येन वा चरुणा यद्वैनं दक्षिणां दिशꣳ समारोहयति यदृतून्यत्स्तोमान्यच्छन्दाꣳसि तस्माद्वैनमेतेन निष्क्रीणाति सꣳस्रवं बार्हस्पत्ये चराववनयति ॥४॥ अथ यद्वैश्वदेवेन चरुणा प्रचरति । यद्वैनं प्रतीचीं दिशꣳ समारोहयति यदृतून्यत्स्तोमान्यच्छन्दाꣳसि तस्माद्वैनमेतेन निष्क्रीणाति सꣳस्रवं बार्हस्पत्ये चराववनयति ॥५॥ अथ यन्मैत्रावरुण्या पयस्यया प्रचरति । यद्वैनमुदीचीं दिशꣳ समारोहयति यदृतून्यत्स्तोमान्यच्छन्दाꣳसि तस्माद्वैनमेतेन निष्क्रीणाति सꣳस्रवं बार्हस्पत्ये चराववनयति तद्यत्सꣳस्रवा-

न्बार्हस्पत्ये चराववनयति सर्वत एवास्मिन्नेतदन्नाद्यं दधाति तस्मादु दिशो-दिश एव राज्ञेऽन्नाद्यमभिह्रियते ॥ ६॥ अथ यद्बार्हस्पत्येन चरुणा प्रचरति । यद्वेवैनमूर्ध्वां दिशꣳ समारोहयति यदृतून्यत्स्तोमान्यच्छन्दाꣳसि तस्माद्वेवैनमेतेन निष्क्रीणाति ॥ ७॥ स य एष आग्नेयोऽष्टाकपालः पुरोडाशो भवति । तस्य हिरण्यं दक्षिणाग्नेयो वाऽएष यज्ञो भवत्यग्ने रेतो हिरण्यं तस्माद्धिरण्यं दक्षिणा तदग्नीधे ददात्यग्निर्वाऽएष निदानेन यदाग्नीध्रस्तस्मात्तदग्नीधे ददाति ॥ ८॥ अथ य एष ऐन्द्र एकादशकपालः पुरोडाशो भवति । तस्यर्षभो दक्षिणा स हैन्द्रो यदृषभो यद्धु सौम्यश्चरुर्भवति तस्य बभ्रुर्गौर्दक्षिणा स हि सौम्यो यद्बभ्रुस्तं ब्रह्मणे ददाति ब्रह्मा हि यज्ञं दक्षिणतोऽभिगोपायति तस्मात्तं ब्रह्मणे ददाति ॥ ९॥ अथ य एष वैश्वदेवश्चरुर्भवति । तस्य पृषन्गौर्दक्षिणा भूमा वाऽएतद्रूपाणां यत्पृषतो गोर्विशो वै विश्वे देवा भूमा वै विट्तस्मात्पृषन्गौर्दक्षिणा तꣳ होत्रे ददाति होता हि भूमा तस्मात्तꣳ होत्रे ददाति ॥ १०॥ अथ यैषा मैत्रावरुणी पयस्या भवति । तस्यै वशा दक्षिणा सा हि मैत्रावरुणी यद्वशा यदि वशां न विन्देदपि यैव का चाप्रवीता स्यात्सर्वा ह्येव वशाप्रवीता तामध्वर्युभ्यां ददाति प्राणोदानौ वाऽअध्वर्यू प्राणोदानौ मित्रावरुणौ तस्मात्तामध्वर्युभ्यां ददाति ॥ ११॥ अथ य एष बार्हस्पत्यश्चरुर्भवति । तस्य शितिपृष्ठो गौर्दक्षिणैषा वाऽऊर्ध्वा बृहस्पतेर्दिक्तदेष उपरिष्टादर्यम्णः पन्थास्तस्माच्छितिपृष्ठो बार्हस्पत्यस्य दक्षिणा तं ब्रह्मणे ददाति बृहस्पतिर्वै देवानां ब्रह्मैष वाऽएतस्य ब्रह्मा भवति तस्मात्तं ब्रह्मणे ददाति स हैतेनापि विष्टाव्राज्यन्नाद्यकामो यजेत तदस्मिन्त्सर्वतोऽन्नाद्यं दधाति स हान्नाद एव भवति ॥ १२॥ ब्राह्मणम् ॥ ३ [५. १.] ॥॥

स वै प्रयुजाꣳ हविर्भिर्यजते । तद्यत्प्रयुजाꣳ हविर्भिर्यजतऽऋतून्वाऽएतत्सुषुवाणो युङ्क्ते तऽएनमृतवो युक्ता वहन्त्यृतून्वा प्रयुक्ताननुचरति तस्मात्प्रयुजाꣳ

हविर्भिर्यजते ॥१॥ तानि वै द्वादश भवन्ति । द्वादश वै मासाः संवत्सरस्य तस्माद्द्वादश भवन्ति मासि-मासि यजेतेत्याहुः को वेद मनुष्यस्य तस्मान्न मासि-मासि यजेत शम्यापराव्याधे-शम्यापराव्याधऽएव षड्भिर्यजते प्राङ् यानथ पुनरावृत्तः शम्यापराव्याधे-शम्यापराव्याधऽएव षड्भिर्यजते ॥२॥ तद्ध तथा न कुर्यात् । षडेवैतानि पूर्वाणि हवीꣳषि निर्वपति समानबर्हीꣳषि तासां देवतानाꣳ रूपं यथा शिशिरे युक्ता प्राञ्च आप्रावृषं यायुस्तत्षडृतून्युङ्क्ते तऽएनꣳ षडृतवो युक्ताः प्राञ्च आप्रवृषं वहन्ति षड्वऽर्तून्प्रयुक्तानाप्रावृषमनुचरति पूर्वाग्निवाहौ द्वौ दक्षिणा ॥३॥ षडेवोत्तराणि हवीꣳषि निर्वपति । समानबर्हीꣳषि तासां देवतानाꣳ रूपं यथा पुनरावर्तेरन्वार्षिकमभि तत्षडृतून्युङ्क्ते तऽएनꣳ षडृतवो युक्ता वार्षिकमभि वहन्ति षड्वऽर्तून्प्रयुक्तान्वार्षिकमनुचरति पूर्वाग्निवाहौ द्वौ दक्षिणा तद्यत्पूर्वाग्निवाहो दक्षिणऽर्तून्वाऽएतत्सुषुवाणो युङ्क्ते वहन्ति वाऽअनड्वाहस्तस्मात्पूर्वाग्निवाहो दक्षिणा ॥४॥ तद्ध स्मैतत्पुरा कुरुपञ्चाला आहुः । ऋतवो वाऽअस्मान्युक्ता वहन्त्यृतून्वा प्रयुक्ताननुचराम इति यदेषाꣳ राजानो राजसूययाजिन आसुस्तद्ध स्म तदभ्याहुः ॥५॥ आग्नेयोऽष्टाकपालः पुरोडाशो भवति । सौम्यश्चरुः सावित्रो द्वादशकपालो वाष्टाकपालो वा पुरोडाशो बार्हस्पत्यश्चरुस्त्वाष्ट्रो दशकपालः पुरोडाशो वैश्वानरो द्वादशकपाल एतानि षट् पूर्वाणि हवीꣳषि भवन्ति ॥६॥ ॥शतम् ३३०० ॥ ॥ षडेवोत्तरे चरवः । सारस्वतश्चरुः पौष्णश्चरुर्मैत्रश्चरुः क्षेत्रपत्यश्चरुर्वारुणश्चरुरादित्यश्चरुरेतऽउ षडुत्तरे चरवः ॥७॥ अथ श्येनीं विचित्रगर्भामदित्याऽआलभते । तस्या एषैवावृद्यष्टापद्यै वशायाऽइयं वाऽअदितिरस्या एवैनमेतद्गर्भं करोति तस्या एतादृश्येव श्येनी विचित्रगर्भा दक्षिणा ॥८॥ अथ पृषतीं विचित्रगर्भां मरुद्भ्य आलभते । तस्या एषैवावृद्विशो वै मरुतो विशामेवैनमेतद्गर्भं करोति तस्या एतादृश्येव पृषती विचित्रगर्भा दक्षिणा ॥९॥ एतौ पशु-

बन्धौ । तदेताविव सन्तावन्यथेवालभन्ते यामदित्याऽआलभन्तऽआदित्येभ्यस्तामालभन्ते सर्वं वाऽआदित्याः सर्वस्यैवैनमेतद्गर्भं करोति यां मरुद्भ्य आलभन्ते विश्वेभ्यस्तां देवेभ्य आलभन्ते सर्वं वै विश्वे देवाः सर्वस्यैवैनमेतद्गर्भं करोति ॥१०॥ ब्राह्मणम् ॥४ [५. २.] ॥ ॥

अभिषेचनीयेनेष्ट्वा । केशान्न वपते तद्यत्केशान्न वपते वीर्यं वाऽएतदपाꣳ रसः सम्भृतो भवति येनैनमेतदभिषिञ्चति तस्याभिषिक्तस्य केशान्प्रथमान्प्राप्नोति स यत्केशान्वपेतैताꣳ श्रियं जिह्मां विनाशयेद्व्युदुह्यात्तस्मात्केशान्न वपते ॥१॥ संवत्सरं न वपते । संवत्सरसंमिता वै व्रतचर्या तस्मात्संवत्सरं न वपते स एष व्रतविसर्जनीयोपयोगो नाम स्तोमो भवति केशवपनीयः ॥२॥ तस्यैकविꣳशं प्रातःसवनꣳ । सप्तदशं माध्यन्दिनꣳ सवनं पञ्चदशं तृतीयसवनꣳ सहोक्थैः सह षोडशिना सह रात्र्या ॥३॥ त्रिवृद्राथन्तरः संधिर्भवति । एष एवैकविꣳशो य एष तपति स एतस्मादेकविꣳशादयुङ्क्ते स सप्तदशमभिप्रत्यवैति सप्तदशात्पञ्चदशं पञ्चदशादस्यामेव त्रिवृति प्रतिष्ठायां प्रतितिष्ठति ॥४॥ तस्य रथन्तरं पृष्ठं भवति । इयं वै रथन्तरमस्यामेवैतत्प्रतिष्ठायां प्रतितिष्ठत्यतिरात्रो भवति प्रतिष्ठा वाऽअतिरात्रस्तस्मादतिरात्रो भवति ॥५॥ स वै न्येव वर्तयते । केशान्न वपते वीर्यं वाऽएतदपाꣳ रसः सम्भृतो भवति येनैनमेतदभिषिञ्चति तस्याभिषिक्तस्य केशान्प्रथमान्प्राप्नोति स यत्केशान्वपेतैताꣳ श्रियं जिह्मां विनाशयेद्व्युदुह्यादथ यन्निवर्तयते तदात्मन्न्येवैताꣳ श्रियं नियुनक्ति तस्मान्न्येव वर्तयते केशान्न वपते तस्यैषैव व्रतचर्या भवति यावज्जीवं नास्यां प्रतितिष्ठति ॥६॥ आसन्द्या उपानहाऽउपमुञ्चते । उपानद्भ्यामधि यदस्य यानं भवति रथो वा किंचिद्वा सर्वं वाऽएष इदमुपर्युपरि भवत्यर्वागेवास्मादिदꣳ सर्वं भवति यो राजसूयेन यजते तस्मादस्यैषैव व्रतचर्या भवति यावज्जीवं नास्यां प्रतितिष्ठति ॥७॥ ब्राह्मणम् ॥५ [५. ३.] ॥ ॥

०००

श्येत आश्विनो भवति । श्येताविव ह्यश्विनावविर्मल्हा सारस्वती भवत्यृषभमिन्द्राय सुत्राम्णऽआलभते दुर्वेदा एवं समृद्धाः पशवो यद्येवं समृद्धान्न विन्देदप्यजानेवालभेरंस्ते हि सुश्रपतरा भवन्ति स यद्यजानालभेरंल्लोहित आश्विनो भवति तद्यदेतया यजते ॥१॥ त्वष्टुर्ह वै पुत्रः । त्रिशीर्षा षडक्ष आस तस्य त्रीण्येव मुखान्यासुस्तद्यदेवंरूप आस तस्माद्विश्वरूपो नाम ॥२॥ तस्य सोमपानमेवैकं मुखमास । सुरापाणमेकमन्यस्माऽअशनायैकं तमिन्द्रो दिद्वेष तस्य तानि शीर्षाणि प्रचिच्छेद ॥३॥ स यत्सोमपानमास । ततः कपिञ्जलः समभवत्तस्मात्स बभ्रुक-इव बभ्रुरिव हि सोमो राजा ॥४॥ अथ यत्सुरापाणमास । ततः कलविङ्कः समभवत्तस्मात्सोऽभिमाद्यत्क-इव वदत्यभिमाद्यन्निव हि सुरां पीत्वा वदति ॥५॥ अथ यदन्यस्माऽअशनायास । ततस्तित्तिरिः समभवत्तस्मात्स विश्वरूपतम-इव सन्त्येव घृतस्तोका-इव त्वन्मधुस्तोका-इव त्वत्पर्णेष्वाश्चुतिता एवंरूपमिव हि स तेनाशनमावयत् ॥६॥ स त्वष्टा चुक्रोध । कुविन्मे पुत्रमवधीदिति सोऽपेन्द्रमेव सोममाजह्रे स यथायं सोमः प्रसुत एवमपेन्द्र एवास ॥७॥ इन्द्रो ह वाऽईक्षां चक्रे । इदं वै मा सोमादन्तर्यन्तीति स यथा बलीयानबलीयस एवमनुपहूत एव यो द्रोणकलशे शुक्र आस तं भक्षयां चकार स हैनं जिहिंस सोऽस्य विष्वङ्ङेव प्राणेभ्यो दुद्राव मुखाद्धैवास्य न दुद्राव तस्मात्प्रायश्चित्तिरास स यद्धापि मुखाद्द्रोष्यन्न हैव प्रायश्चित्तिरभविष्यत् ॥८॥ चत्वारो वै वर्णाः । ब्राह्मणो राजन्यो वैश्यः शूद्रो न हैतेषामेकश्चन भवति यः सोमं वमति स यद्धैतेषामेकश्चित्स्यात्स्याद्धैव प्रायश्चित्तिः ॥९॥ स यन्नस्तोऽद्रवत् । ततः सिंहः समभवदथ यत्कर्णाभ्यामद्रवत्ततो वृकः समभवदथ यदवाचः प्राणादद्रवत्ततः शार्दूलज्येष्ठाः श्वापदाः समभवन्नथ यदुत्तरात्प्राणादद्रवत्सा परिस्रुदथ त्रिर्निरष्ठीवत्ततः कुवलं कर्कन्धु बदरमिति समभवत्स सर्वेणैव व्यार्ध्यत सर्वं हि सोमः ॥१०॥ स सोमातिपूतो

मङ्कुरिव चचार । तमेतयाश्विनावभिषज्यतां तꣳ सर्वेणैव समार्धयतां सर्वꣳ हि सोमः स वसीयानेवेष्ट्वाभवत् ॥११॥ ते देवा अब्रुवन् । सुत्रातं बतैनमत्रासतामिति तस्मात्सौत्रामणी नाम ॥१२॥ स हैतयापि सोमातिपूतं भिषज्येत् । सर्वेण वा एष व्यृध्यते यꣳ सोमोऽतिपवते सर्वꣳ हि सोमस्तꣳ सर्वेणैव समर्धयति सर्वꣳ हि सोमः स वसीयानेवेष्ट्वा भवति तस्मादु हैतयापि सोमातिपूतं भिषज्येत् ॥१३॥ तद्यदेतया राजसूययाजी यजते । सर्वान्वा एष यज्ञक्रतूनवरुन्द्धे सर्वा इष्टीरपि दर्विहोमान्यो राजसूयेन यजते देवसृष्टो वा एषेष्टिर्यत्सौत्रामण्यनया मेऽपीष्टमसदनयापि सूया इति तस्माद्वा एतया राजसूययाजी यजते ॥१४॥ अथ यदाश्विनो भवति । अश्विनौ वा एनमभिषज्यतां तथो एवैनमेष एतदश्विभ्यामेव भिषज्यति तस्मादाश्विनो भवति ॥१५॥ अथ यत्सारस्वतो भवति । वाग्वै सरस्वती वाचा वा एनमश्विनावभिषज्यतां तथो एवैनमेष एतद्वाचैव भिषज्यति तस्मात्सारस्वतो भवति ॥१६॥ अथ यदैन्द्रो भवति । इन्द्रो वै यज्ञस्य देवता तयैवैनमेतद्भिषज्यति तस्मादैन्द्रो भवति ॥१७॥ एतेषु पशुषु । सिꣳहलोमानि वृकलोमानि शार्दूललोमानीत्यावपत्येतद्वै ततः समभवद्यदेनꣳ सोमोऽत्यपवत तेनैवैनमेतत्समर्धयति कृत्स्नं करोति तस्मादेतान्यावपति ॥१८॥ तदु तथा न कुर्यात् । उल्कया ह स नखिन्या पशूननुषुवति य एतानि पशुष्वावपति तस्मादु परिस्रुत्येवावपेत्तथा होल्कया नखिन्या पशून्नानुषुवति तथो एवैनꣳ समर्धयति कृत्स्नं करोति तस्मादु परिस्रुत्येवावपेत् ॥१९॥ अथ पूर्वेद्युः । परिस्रुतꣳ संदधात्यश्विभ्यां पच्यस्व सरस्वत्यै पच्यस्वेन्द्राय सुत्राम्णे पच्यस्वेति सा यदा परिस्रुद्भवत्यथैनया प्रचरति ॥२०॥ द्वावग्नी उद्धरन्ति । उत्तरवेदावेवोत्तरमुद्धते दक्षिणं नेत्सोमाहुतीश्च सुराहुतीश्च सह जुहवामेति तस्माद्द्वावग्नी उद्धरन्त्युत्तरवेदावेवोत्तरमुद्धते दक्षिणमथ यदा वपाभिः प्रचरत्यथैतया परिस्रुता प्रचरति ॥२१॥ तां दर्भैः

पावयति । पूतासदिति वायुः पूतः पवित्रेण प्रत्यङ् सोमोऽअतिस्रुतः । इन्द्रस्य युज्यः सखेति तत्कुवलसक्तून्कर्कन्धुसक्तून्बदरसक्तूनित्यावपत्येतद्धि ततः समभवच्छत्रिर्निरष्ठीवत्तेनैवैनमेतत्समर्धयति कृत्स्नं करोति तस्मादेतानावपति ॥२२॥ अथ ग्रहान्गृह्णाति । एकं वा त्रीन्वैकस्त्वेव ग्रहीतव्य एका ह्रि पुरोरुग्भवत्येकानुवाक्यैका याज्या तस्मादेक एव ग्रहीतव्यः ॥२३॥ स गृह्णाति । कुविदङ्ग यवमन्तो यवं चिद्यथा दान्त्यनुपूर्वं वियूय । इहेहैषां कृणुहि भोजनानि ये बर्हिषो नमउक्तिं यजन्ति । उपयामगृहीतोऽस्यश्विभ्यां त्वा सरस्वत्यै त्वेन्द्राय त्वा सुत्राम्णऽइति यद्यु त्रीन्गृह्णीयादेतयैव गृह्णीयादुपयामैस्तु तर्हि नाना गृह्णीयादथाहाश्विभ्याꣳ सरस्वत्याऽइन्द्राय सुत्राम्णोऽनुब्रूहीति ॥२४॥ सोऽन्वाह । युवꣳ सुराममश्विना नमुचावासुरे सचा । विपिपाना शुभस्पतीऽइन्द्रं कर्मस्वावतमित्याश्राव्याहाश्विनौ सरस्वतीमिन्द्रꣳ सुत्रामाणं यजेति ॥२५॥ स यजति । पुत्रमिव पितरावश्विनोभेन्द्रावथुः काव्यैर्दꣳसनाभिः । यत्सुरामं व्यपिबः शचीभिः सरस्वती त्वा मघवन्नभिष्णगिति द्विर्होता वषट्करोति द्विरध्वर्युर्जुहोत्याहरति भक्षं यद्यु त्रीन्गृह्णीयादेतस्यैवानु होममितरौ हूयेते ॥२६॥ अथ कुम्भः । शतवितृण्णो वा भवति नववितृण्णो वा स यदि शतवितृण्णः शतायुर्वाऽअयं पुरुषः शततेजाः शतवीर्यस्तस्माच्छतवितृण्णो यद्यु नववितृण्णो नवेमे पुरुषे प्राणास्तस्मान्नववितृण्णः ॥२७॥ तꣳ शिक्योद्युतम् । उपर्युपर्याहवनीयं धारयन्ति सा या परिशिष्टा परिस्रुद्भवति तामासिञ्चति तां विक्षरन्तीमुपतिष्ठते पितृणाꣳ सोमवतां तिसृभिर्ऋग्भिः पितृणां बर्हिषदां तिसृभिर्ऋग्भिः पितृणामग्निष्वात्तानां तिसृभिर्ऋग्भिस्तद्यदेवमुपतिष्ठते यत्र वै सोम इन्द्रमत्यपवत स यत्पितॄनगच्छत्तया वै पितरस्तेनैवैनमेतत्समर्धयति कृत्स्नं करोति तस्मादेवमुपतिष्ठते ॥२८॥ अथैतानि हवीꣳषि निर्वपति । सावित्रं द्वादशकपालं वाष्टाकपालं वा पुरोडाशं वारुणं यवमयं चरुमैन्द्रमेकादशकपालं

पुरोडाशम् ॥२९॥ स यत्सावित्रो भवति । सविता वै देवानां प्रसविता सवितृप्रसूत एवैतद्भिषज्यति तस्मात्सावित्रो भवति ॥३०॥ अथ यद्वारुणो भवति । वरुणो वाऽआर्पयिता तस्य एवार्पयिता तेनैवैतद्भिषज्यति तस्माद्वारुणो भवति ॥३१॥ अथ यदैन्द्रो भवति । इन्द्रो वै यज्ञस्य देवता सा यैव यज्ञस्य देवता तयैवैतद्भिषज्यति तस्मादैन्द्रो भवति ॥३२॥ स यदि क्रैतयापि सोमातिपूतं भिषज्येत् । इष्टा अनुयाजा भवन्त्यव्यूढे स्रुचावथैतैर्हविर्भिः प्रचरति पश्चाद्धि सोमोऽतिपवते पश्चादेवैनमेतेन मेधेनापिदधात्याश्विनमु तर्हि द्विकपालं पुरोडाशं निर्वपेदथ यदा वपाभिः प्रचरत्यथैतेनाश्विनेन द्विकपालेन पुरोडाशेन प्रचरति ॥३३॥ तदु तथा न कुर्यात् । ह्वलति वाऽएष यो यज्ञपथादेत्येति वाऽएष यज्ञपथाद्य एवं करोति तस्माद्यत्रैवैतेषां पशूनां वपाभिः प्रचरन्ति तदेवैतैर्हविर्भिः प्रचरेयुर्नो तर्ह्याश्विनं द्विकपालं पुरोडाशं निर्वपेत् ॥३४॥ तस्य नपुꣳसको गौर्दक्षिणा । न वाऽएष स्त्री न पुमान्यन्नपुꣳसको गौर्यदह पुमांस्तेन न स्त्री यदु स्त्री तेनो न पुमांस्तस्मान्नपुꣳसको गौर्दक्षिणाश्वा वा रथवाही सा हि न स्त्री न पुमान्यदश्वा रथवाही यदह रथं वहति तेन न स्त्री यदु स्त्री तेनो न पुमांस्तस्मादश्वा रथवाही दक्षिणा ॥३५॥ ब्राह्मणम् ॥ ६ [५. ४.] ॥ ॥

ऐन्द्रवैष्णवं द्वादशकपालं पुरोडाशं निर्वपति । तद्यदेतया यजते वृत्रे ह वाऽइदमग्रे सर्वमास यदृचो यद्यजूꣳषि यत्सामानि तस्माऽइन्द्रो वज्रं प्राजिहीर्षत् ॥१॥ स ह विष्णुमुवाच । वृत्राय वै वज्रं प्रहरिष्याम्यनु मा तिष्ठस्वेति तथेति ह विष्णुरुवाचानु त्वा स्थास्ये प्रहरेति तस्माऽइन्द्रो वज्रमुद्ययाम स उद्यताद्वज्राद्वृत्रो बिभयां चकार ॥२॥ स होवाच । अस्ति वाऽइदं वीर्यं तन्नु ते प्रयच्छानि मा तु मे प्रहार्षीरिति तस्मै यजूꣳषि प्रायच्छत्तस्मै द्वितीयमुद्ययाम ॥३॥ स होवाच । अस्ति वाऽइदं वीर्यं तन्नु ते प्रयच्छानि मा तु मे प्रहार्षीरिति तस्माऽऋ-

चः प्रायच्छत्तस्मै तृतीयमुच्चयाम ॥४॥ अस्ति वाऽइदं वीर्यं तन्नु ते प्रयच्छानि मा तु मे प्रहार्षीरिति तस्मै सामानि प्रायच्छत्तस्मादप्येतर्ह्येवमेवैतैर्वेदैर्यज्ञं तन्वते यजुर्भिरेवाग्रेऽथऽर्ग्भिरथ सामभिरेवꣳ ह्यस्माऽएतत्प्रायच्छत् ॥५॥ तस्य यो योनिराशय आस । तमनुपरामृश्य संलुप्याछिनत्सैषेष्टिरभवत्तद्यदेतस्मिन्नाशये त्रिधातुरिवैषा विद्याशेत तस्मात्त्रैधातवी नाम ॥६॥ अथ यदैन्द्राविष्णवꣳ हविर्भवति । इन्द्रो हि वज्रमुदयच्छद्विष्णुरन्वतिष्ठत ॥७॥ अथ यद्द्वादशकपालो भवति । द्वादश वै मासाः संवत्सरस्य संवत्सरसंमितैषेष्टिस्तस्माद्द्वादशकपालो भवति ॥८॥ तमुभयेषां व्रीहियवाणां गृह्णाति । व्रीहिमयमेवाग्रे पिण्डमधिश्रयति तद्यजुषाꣳ रूपमथ यवमयं तदृचाꣳ रूपमथ व्रीहिमयं तत्साम्नाꣳ रूप तदेतत्त्रय्यै विद्यायै रूपं क्रियते सैषा राजसूययाजिन उदवसानीयेष्टिर्भवति ॥९॥ सर्वान्वाऽएष यज्ञक्रतूनवरुन्द्धे । सर्वा इष्टीरपि दर्विहोमान्यो राजसूयेन यजते तस्य यातयामेव यज्ञो भवति सोऽस्मात्पराङिव भवत्येतावान्वै सर्वो यज्ञो यावानेष त्रयो वेदस्तस्यैतद्रूपं क्रियतऽएष योनिराशयस्तदेतेन त्रयेण वेदेन पुनर्यज्ञमारभते तथास्यायातयामा यज्ञो भवति तथोऽअस्मान्न पराङ् भवति ॥१०॥ सर्वान्वाऽएष यज्ञक्रतूनवरुन्द्धे । सर्वा इष्टीरपि दर्विहोमान्यो राजसूयेन यजते देवसृष्टो वाऽएषेष्टिर्यत्त्रैधातव्यनया मेऽपीष्टमसदनयापि सूयाऽइति तस्माद्वाऽएषा राजसूययाजिन उदवसानीयेष्टिर्भवति ॥११॥ अथो यः सहस्रं वा भूयो वा दद्यात् । तस्य हाप्युदवसानीया स्याद्रिरिचान इव वाऽएष भवति यः सहस्रं वा भूयो वा ददात्येतद्धि सहस्रं वाचः प्रजातं यदेष त्रयो वेदस्तत्सहस्रेण रिरिचानं पुनराप्याययति तस्मादु ह तस्याप्युदवसानीया स्यात् ॥१२॥ अथो ये दीर्घसत्त्रमासीरन् । संवत्सरं वा भूयो वा तेषाꣳ हाप्युदवसानीया स्यात्सर्वं वै तेषामाप्तं भवति सर्वं जितं ये दीर्घसत्त्रमासते संवत्सरं वा भूयो वा सर्वमेषा तस्मादु ह तेषामप्युदवसानीया

स्यात् ॥१३॥ अथो हैनयाप्यभिचरेत् । एतया वै भद्रसेनमाजातशत्रवमारुणिरभिचचार क्षिप्रं किलास्तृणुतेति ह स्माह याज्ञवल्क्योऽपि ह वाऽएनयेन्द्रो वृत्रस्यास्थानमछिनदपि ह वाऽएनयास्थानं छिनत्ति य एनयाभिचरति तस्माद्ध हैनयाप्यभिचरेत् ॥१४॥ अथो हैनयापि भिषज्येत् । यं न्वेवैकयऽर्चा भिषज्येदेकेन यजुषैकेन साम्ना तं न्वेवागदं कुर्यात्किमु यं त्रयेण वेदेन तस्माद्ध हैनयापि भिषज्येत् ॥१५॥ तस्यै त्रीणि शतमानानि हिरण्यानि दक्षिणा । तानि ब्रह्मणे ददाति न वै ब्रह्मा प्रचरति न स्तुते न शꣳसत्यथ स यशो न वै हिरण्येन किं चन कुर्वन्त्यथ तद्यशस्तस्मात्त्रीणि शतमानानि ब्रह्मणे ददाति ॥१६॥ तिस्रो धेनूर्होत्रे । भूमा वै तिस्रो धेनवो भूमा होता तस्मात्तिस्रो धेनूर्होत्रे ॥१७॥ त्रीणि वासाꣳस्यध्वर्यवे । तनुते वाऽअध्वर्युर्यज्ञं तन्वते वासाꣳसि तस्मात्त्रीणि वासाꣳस्यध्वर्यवे गामग्नीधे ॥१८॥ ता वाऽएताः । द्वादश वा त्रयोदश वा दक्षिणा भवन्ति द्वादश वा वै त्रयोदश वा संवत्सरस्य मासाः संवत्सरसंमितैषेष्टिस्तस्माद्द्वादश वा त्रयोदश वा दक्षिणा भवन्ति ॥१९॥ ब्राह्मणम् ॥ ७ [५. ५.] ॥ चतुर्थः प्रपाठकः ॥ कण्डिकासंख्या१३१ ॥ पञ्चमोऽध्यायः [३५.] ॥ ॥ अस्मिन्काण्डे कण्डिकासंख्या ४७१ ॥ ॥

इति माध्यन्दिनीये शतपथब्राह्मणे सवनाम पञ्चमं काण्डं समाप्तम् ॥५॥ ॥

EXTRACTS FROM THE COMMENTARY OF SÂYAṆÂCÂRYA.

काश्चित्संस्थाः समुदितास्तुर्येऽग्निष्टोमपूर्विकाः । काण्डे तु पञ्चमे वाजपेयः प्रस्तूयते ततः ॥ राजसूयः सम्पन्न(श्च) मन्त्राम्नानक्रमेण तु । प्रकृतावुपदिष्टत्वादङ्गजातस्य नो वचः ॥ वैशेषिकास्तु वक्ष्यन्ते यज्ञद्वयगता गुणाः । व्याख्यायते तन्निपुणं ब्राह्मणं तद्विधायकम् ॥ तत्र वाजपेयं विधातुं प्रस्तौति देवाश्च वाऽइति ॥१॥ आजिमाजन्त अधावन् अज गतिक्षेपणयोः आजिर्नाम धावनप्रदेशस्यावधिर्भूमिविशेषः ॥३॥ यद्वाऽउत्तरत्र यूपरोहणं स्वो रोहावेति म-

त्वलिङ्गात्स्वर्गारोहणप्रतिनिधित्वेन वक्ष्यते ततः स्वर्गादूपाप्युपादवरोहणं जानश्रुतेयपूर्वकमित्यर्थः प्रत्यवरोहलिङ्गादनुमीयतऽइत्याह तद्धे हेति । अथवा वाजपेययाजिनोऽग्नेष्ट्वा (? °नो सश्वा Cod.) साम्राज्येनाभिषिञ्चामीत्याद्यैर्मन्त्रलिङ्गैरग्न्यादिसाम्राज्येऽभिषिक्तत्वादेव [°देव च देव Cod.] सोऽपि मनुष्यं प्रति गजादिवाहनान्न प्रत्यवरोहेदिति प्रत्यवरोहणनिषेधो विहितस्तैत्तिरीयके तस्माद्वाजपेययाजी न कं चन प्रत्यवरोहतीति न च प्रत्यवरोहणं विहितम् आपस्तम्बेन तु तन्निषेधस्तदुपायश्च दर्शितः यावज्जीवं न कं चन प्रत्यवरोहेद्बृहस्पतिसवेन वा प्रत्यवरोहणीयेन यजेतेति तस्मादुभयत्रानुग्राहकमिदं ब्राह्मणमित्याह । जानश्रुतेः पुत्रेण औपाविनाम्नैकेन राजर्षिणा प्रत्यवरूढं प्रत्यवरोहः कृतः भावे निष्ठा इतश्चानिञ इति (पा° ४. १. १२२) जनश्रुतेः प्रत्ययः ॥५॥ तस्मात्तस्य यजमानस्य प्रजा पापीयसी अतिशयेन दारिद्र्यवती भवितोर्भवितुमीश्वरा समर्थेत्यतो हेतोर्वाजपेयो न कर्तव्यः ॥१॥ तत्र विदुष एव यष्टृत्वं विदुषामेव याजयितृत्वमित्युभयमुपपादयति य एवमेतमिति यः पुमानेतं वाजपेययज्ञमृगादिवेदत्रयेण क्लृप्तं सेतिकर्तव्यत्वेन विहित इति विद्यात् जानीयात् ये च प्रजज्ञयः प्रज्ञातवन्तः साङ्गोपाङ्गकर्मज्ञानवन्तः ऋत्विजः तऽएनमन्वादिष्टं विद्वांसं यष्टारं याजयेयुः । अतः साधारणैर्वाजपेययागो न कर्तव्य इत्यभिप्रायेण न वाजपेयेन यजेतेत्युक्तम् ॥१०॥ संवृङ्क्ते संवर्जयति वशीकरोति ॥१४॥ आङ् मयादायाम् श्वःसुत्यायाः सुत्यादिनात्पूर्वं नोत्तरत्रेत्यर्थः ॥१६॥१॥१॥

एवं विहिते वाजपेये ग्रहविशेषा द्वितीयब्राह्मणेऽभिधीयन्ते प्राकृतास्त्वतिदिश्यन्ते तत्र तावदंशुग्रहं विधत्ते अंशुमिति अंशुं सोमग्रहं सोमद्रव्येण गृह्णीयात् अंश्वदाभ्ययोरप्राकृतत्वेन चोदकादप्राप्तयोरिह विधानं युक्तम् अत एवापस्तम्बः भ्रातृव्यवतादाभ्यो ग्रहीतव्यो बुभूषतांशुस्तौ न सर्वत्र ग्रहीतव्यौ वाजपेये राजसूये सत्रे सह (?) इति । अथ प्रकृतिगतानुपांश्वन्तर्यामादीनतिदिशति अथैतानिति प्रज्ञातान्प्रसिद्धानाग्निष्टोमिकानग्निष्टोमे विहितान्ग्रहानाग्रयणपर्यन्तान्गृह्णीयात् उपांश्वन्तर्यामौ ऐन्द्रवायवमैत्रावरुणाश्विनान् शुक्रामन्थिनौ आग्रयणं च ॥१॥ पृष्ठ्यान् अतिग्राह्यान् ते हि पृष्ठस्तोत्रसम्बन्धात्पृष्ठ्या इत्यर्थः पृष्ठ्ये (ष्ठ्य Cod.) षडहे प्रतिदिवसमेकैकस्य विश्वजिति सर्वपृष्ठे चैकाहे ग्रहणात्पृष्ठ्यसंज्ञा see ४, ४, ५, २-१३. ॥२॥ उपयामगृहीतोऽसि पृथिव्यात्मकेन पात्रेण गृहीतोऽस्मि ते तव एष खरप्रदेशो योनिः स्थानम् ॥४॥ अन्धसी अन्ने ॥१०॥ प्राकृतं सोमक्रयणविधिमनूद्य परिस्रुत्क्रयणं विधत्ते अथ यत्रेति यत्र प्रदेशे राजानं सोमलतां क्रीणीयात् तस्य दक्षिणे प्रतिवेशे स्थाने केशवात्पुरुषात्सीसद्रव्येण परिस्रुतं क्रीणीयात् लोके हि सुरा तत्साधनभूतैः (? सुतरांत्सा° Cod.) परिपक्वद्रव्यैः क्रियते अत्र तु (रु Cod.) सुरासाधनाय (°याः Cod.) पर्याप्तपरिपाकैः शष्पैर्निष्पन्नो (°कैः शष्पो नि° Cod.) रसः परिस्रुदित्युच्यते । पुमान् पुंलक्षणवान् श्मश्रुयुक्तः । केशबाहुल्यवत्त्वेन पुमांश्च न भवति केशबाहुल्यं तु स्त्रीलक्षणम् अतः केशवः क्लीवः पुरुषस्त्रिया अधिकः पुरुषान्न्यूनः । सीसमप्ययसोऽधिकं हिरण्यात्तु न्यूनम् ॥१४॥ पुरोऽक्षं शकटस्याधस्तादक्षस्य पुरोभागे एकम् पश्चादक्षमक्षस्य पश्चाद्भागे अपरम् ॥१५॥ नेष्टा नाम ऋत्विगध्वर्युवर्गे तृतीयः । प्रपादयति [हविर्धानं] प्रवेशयेत् । हविर्धानस्य दक्षिणतो द्वारं कृत्वा तेन सोमग्रहपात्राणि सुराग्रहपात्राणि च प्रवेशयन्ति । व्यत्यासं व्यत्यस्य व्यत्यस्य ॥१६॥ अक्षस्य

पश्चाद्भागं प्रति सोमग्रहमध्वर्युर्नातिक्रामयेत् एवं नेष्टापि सुराग्रहं शकटाक्षस्य पुरोदेशं नातिहरेत् ॥१७॥ उपर्युपर्येवाक्षमक्षस्य संनिकृष्टोपरिभागऽएव see पा° ८. १. ७. । यथा मुञ्जतृणादिषीकां मध्यवर्ति तृणं विवृहेत्पृथक्कुर्यात् ॥१८॥ अथ प्राकृतावुक्थ्यध्रुवग्रहौ दर्शयति अथोक्थ्यमिति । द्विविधग्रहाणां होमकालं भक्षणं च विधत्ते अथैतानिति तान्प्रातःसवने गृहीतान्सोमग्रहानुत्तमे स्तोत्रे तृतीयसवने बृहत्स्तोत्रे वाजपेयसंस्थापननिमित्ते स्तुते सति ऋत्विक्चमसेष्ववनयनं कृत्वा जुहुयुः भक्षयेयुश्च तत्प्रसङ्गात्सुराग्रहाणां मधुग्रहस्य (च) माध्यन्दिनसवनमध्ये विनियोगो भविष्यतीत्याह अथ माध्यन्दिनऽइति उद्यतऽइति वद व्यक्तायां वाचि कर्मणि यकि सम्प्रसारणम् एतेषां होमस्तावत्तद्विनियोगप्रकारोऽस्मिन्नेवाध्याये (५. २८.) वक्ष्यतऽइत्यर्थः । अतः सोमग्रहहोमभक्षणप्रतिपादनानन्तरं तस्याम्नातस्य सुराग्रहविनियोगप्रतिपादकवाक्यस्य पाठानुसंधानं कार्यम् ॥१९॥२॥१॥

तृतीये पशुतन्त्रमभिधीयते तत्र तावद्वाजपेयस्याग्निष्टोमोक्थ्यषोडश्यतिरात्रसंस्थालक्षणसद्भावेन सर्वक्रत्ववरोधकत्वमस्तीति वैदिकत्वप्रसिद्धिः तत्तत्क्रत्वसाधारणपशुसद्भावे सत्युपपद्यते नान्यथा अतस्तानग्निष्टोमादिगतानाग्नेयादिसवनीयपशून्विधत्ते आग्नेयमिति । तत्राग्निष्टोमस्य द्वादश स्तोत्रशस्त्राणि उक्थ्यस्य (उकथ Cod.) उकथत्रयेण पञ्चदश षोडशिनः षोडशिस्तोत्रेण सह षोडश वाजपेयस्य बृहत्स्तोत्रेण सह सप्तदश अतिरात्रपर्यायत्रयेण सह षोडशिपक्षे एकोनत्रिंशत् अन्यदा अष्टाविंशतिः पशूनाम् तत्तत्क्रत्वसाधारण्यं द्योतयितुमग्निष्टोमादिपदाभिधानम् अग्निः स्तूयतेऽस्मिन्नित्यग्निष्टोमो नाम साम तस्मिन्विषयभूते आग्नेयमालभते एतेन पशुनास्मिन्वाजपेये अग्निष्टोमसंस्थं क्रतुमेवानुष्ठितवान्भवतीत्यर्थः एवमुत्तरत्रापि योज्यम् । उक्थेभ्यः (उक्थ्ये° Cod.) तृतीयसवने स्तूयमानेभ्यो ऽन्येभ्यस्त्रिभ्य उक्थ्यस्तोत्रेभ्यः । षोडशिस्तोत्राय ॥१॥ सप्तदशसंख्यापूरकाय बृहत्स्तोत्राय अत्तिममिदं बृहत्स्तोत्रं वाजपेयस्यासाधारणं लिङ्गम् । कथं वाजपेयेऽतिरात्रान्तर्भाव इत्याशङ्क्यानेन सारस्वतालम्भनेनातिरात्रस्यान्तर्भावं दर्शयति तदेतदिति ॥२॥ अथास्य यज्ञस्यासाधारणं पशुं विधत्ते अथ मरुद्भ्य इति । दुर्वेदं लब्धुमशक्ये ॥३॥ आवृत् तन्त्रम् अनुशंसति अनुशंसितवान्भवतीति भूतार्थपरत्वेन व्याख्येयम् एष वै इन्द्रस्यासाधारणो ग्रहः ग्रहणमन्त्रे केवलेन्द्रस्यैव देवतात्वेन प्रतिपादनात् निःशेषेण केवलमिन्द्रस्यैवायमिति निष्केवल्यो ग्रहः माध्यन्दिने सवने हि माहेन्द्रग्रहग्रहणम् तच्च सवनमिन्द्रस्येति नियतम् ॥४॥ पशुवदानानामथैकध्येन श्रपणं सिद्धान्तयितुं द्वैध्यं (द्वैविध्यं Cod.) पूर्वपक्षयति द्वेधावदानानि श्रपयन्तीति कात्यायनस्तु उक्तं वपाप्रचरणमवदानानां द्वेधा श्रपणं च विकल्पेन सूत्रयामास (का° १४, २, १६, २१-२३.) । हृदयं जिह्वा वक्षो यकृद्वृक्कौ सव्यो (°त्या Cod.) दोरुभे पार्श्वे दक्षिणा श्रोणिर्गुदतृतीयमिति दैवतानि दक्षिणो (°णां Cod.) दोः सव्या श्रोणिः गुदतृतीयमिति सौविष्टकृतानीत्येतानि सर्वाण्यवदानानि द्विधा (!) पृथक् श्रपयन्ति पक्वानि कुर्युः दैवतानां हृदयादीनां सौविष्टकृतानां त्र्यङ्गानां च पृथक् श्रपणमित्यर्थः । हविषामवदानप्रकारमाह ततोऽर्धानामिति अथ जुह्वामाज्येनोपस्तरणं कृत्वा अर्धानां प्रधानहविषां हृदयादीनां मध्ये एकैकस्माद्द्विर्द्विःवद्येत् एवमेकादशावदानान्यवदाय पुनराज्येनैकवारमभिघारणं कुर्यात् एवमुपस्तरणद्विरवदानपुनरभिघारणैर्हविषां चतुरवत्तत्वं सम्पादितम् अनन्तरं

स्विष्टकृदर्थान्यवदानानि घृतेन प्रत्यञ्ज्यात् अथोपभृतीति वाक्यं स्पष्टार्थम् अत्र उपस्तरणावदाने सकृत्सकृद्द्विरभिघारणमिति चतुरवदानसम्पत्तिः अपात्रस्थितानि अवत्तशेषाणि न प्रत्यञ्ज्यादुत्तरत्र विनियोगाभावात् अर्धानां हृदयादीनां प्रत्येकं देवतार्थं स्विष्टकृदर्थं च द्विरवद्यतीति यत् तेन द्विरवदानेन सा वशा कृत्स्ना सम्पूर्णा भवति यथेतरः पशुस्तथेत्यर्थः । अथार्धानीति यागार्थार्धहविषः पृथक्पक्वानि त्र्यङ्गानि मनुष्यसम्बन्धिन्यै प्रजायै ददाति ॥५॥ तदिदं माहेन्द्रान्ते वपाचरणं हविषां द्विधा (!) श्रपणं च दूषयति तदु तथेति । अथ प्राकृतपशुवपाप्रचरणकाले [=प्रातःसवने] मारुतीवपाप्रचरणं हविषामैकध्येन श्रपणं च विधत्ते तस्माद्यत्रैवेत्यादिना ॥६॥ पशूत्तराणि विधत्ते अथ सप्तदशेति । तूपरा अविषाणाः । श्यामाः शुक्लकृष्णवर्णाः । मुष्कराः मुष्कवृद्धिः सर्वाङ्गवृद्धिमन्तरेण न घटतऽइति पुष्टाङ्गाः ॥७॥ न हि प्रजापतेः परमुत्कृष्टं पूर्वभावि किंचिदप्यस्ति यदर्थं पशुरालभ्यते यद्यस्ति वागेवास्ति तस्या अव्यक्तशब्दब्रह्मत्वेन पूर्वमवस्थानादिति भावः ॥११॥ उक्तानां प्राजापत्यपशूनां वपाप्रचरणस्य हविर्यागस्य च प्राकृतपशुवपाहविर्भिः सह होमकालं विधास्यति तत्र तावत्पूर्वपक्षमाह तेषामावृद्यत्रेति । वामदेव्यं सामानुशंसति अनुशंसितवान्भवति ॥१२॥ तृतीयसवने अनुयाजयागानन्तरं स्रुक्प्रभृतीर्व्यूहनादर्वागेषां प्राजापत्यानां हविर्यागः कर्तव्यः स एव कालोऽन्तः सवनीये कर्तव्यानां यागानामवधिः प्रजापतेः सर्वोत्तमत्वादन्तत्वम् (सर्वोत्तम° Cod.) तस्मादन्तरूपे तस्मिन्काले क्रियमाणेन हविर्होमेन प्रजापतिमेवोज्जितवान्भवति । यत् यदि उक्तकालात्पुरा प्राकृतऽएव काले वपाहविर्भिः प्रचरेत् तर्हि मध्य (ब्राध्य Cod.) ऽएव प्रजापतिप्राप्तेरुत्तरकर्मकलापकरणमयुक्तमितीममर्थं प्रदर्शयितुं दृष्टान्तः यथायमिति यथा लोके पुरुषो यं मार्गं गमिष्यन्भवेत्तं लक्ष्यं देशं प्राप्य क्व कुत्र गच्छति लक्ष्यप्राप्तेः सिद्धत्वात् (?सद्धन्वात् Cod.) एवमेतत्काले होमकरणफलरूपप्रजापतिप्राप्तेः (°णं°-तिंप्राप्तेः Cod.) सिद्धत्वादुपरितनकर्मानुष्ठानं निःफलं स्यात् तस्मादनुयाजान्ते स्रुग्व्यूहनात्प्राक्पशुहविर्होम इति केषांचिन्मतम् ॥१३॥ तद्दूषयन्सिद्धान्तयति तदु तथेति । एतेषां पशूनां सप्तदशयागात्मकत्वात्प्रतियागं याज्यापुरोऽनुवाक्याभेदमाशङ्क्य देवतैक्यात्सह प्रदानमिति मन्वानो याज्यापुरोऽनुवाक्ययोरैक्यमाह एकानुवाक्येति । अनुवाक्यापाठात्प्रागध्वर्युणा कर्तव्येऽनुवचनप्रैषे विशेषं विधत्ते प्रजापतयऽइति । हे मैत्रावरुण प्रजापतये देवतायै छागानां पशूनां हविषोऽवदीयमानस्यार्थाय अनुवचनं कुरु । आश्रावणानन्तरकर्तव्यप्रैषेऽपि विशेषं विधत्ते प्रजापतयऽइति अत्रापि मैत्रावरुणः सम्बोध्यः । अथ होतुः कर्तव्यं दर्शयति वषट्कृतमिति होत्रा याज्यान्ते वषट्कारे कृते सति जुहोति अध्वर्युरिति शेषः ॥१४॥३॥१॥॥

अथ माध्यन्दिनसवने कर्तव्यः प्रयोगोऽभिधीयते तत्र यजमानाभिषेकमाजिधावनं(च) प्राधान्येन विधत्ते तं वाऽइति ॥१॥ माहेन्द्रग्रहात्पूर्वम् ॥२॥ पूर्वं रथवाहने काष्ठविशेषे स्थापितमाजिधावनाय सज्जीकर्तुं तस्य रथस्य तस्मात्काष्ठादवहरणं समन्त्रकं विधत्ते अथ रथमिति ॥३॥ धूरित्यश्वबन्धनस्थानं युगम् । अन्तर्वेदि सौमिकवेदिमध्ये प्रादक्षिण्येनानयेत् ॥४॥ उदच्य उद्यम्य ॥५॥ ककुद्मान् (!) ककुच्छब्देन वृषभस्कन्धे उन्नतप्रदेश उच्यते तत्समानैरुदकनिचयैस्तद्वान् । सेत् सिनुयात्साधयतु वेति ॥६॥ दक्षिणा दक्षिणतो युग्यं युगस्य वोढारम् । सव्यायुग्यं सव्यभागयोजनीयम् दीर्घश्छान्दसः ॥७॥ गन्धर्वाः नक्षत्राणीत्यर्थः

॥८॥ इन्द्रस्याश्व-इव दक्षिणः प्रवृद्धः पुष्टाङ्गः श्रिया शोभया युक्त एधि भव । प्रष्टिर्नाम पादत्रयोपेतो भोजनपात्रादिकाधारः (°दिवाधारः Cod.) तद्वदश्वैस्त्रिभिर्युक्तं रथं कुर्यात् अत्र पूर्वमश्वद्वयस्य युक्तत्वात्तृतीयस्य प्रष्टित्वमुक्तम् ॥९॥ चतुर्थस्याश्वस्यानुगमनं विधत्ते अधिप्रष्टीति तृतीयस्याश्वस्य युगप्रदेशे अधिः सप्तम्यर्थो वृवादीमत्रेणायुक्तः (ग्रीवादिबध्रेणायुक्तः?) सन्नेवानुगच्छेत् । यदैष यजुर्युक्तो रथोऽध्वर्यवे दीयते तस्मिन्प्रदानसमये चतुर्थस्य रथयोजनं दर्शयति तं यत्रेति ॥१२॥४॥१॥

विहितमाजिधावनमनूद्य प्रशंसति तद्यदाजिमिति । नाभिदघ्ने नाभिमात्रे उच्छ्रिते उन्नते ॥१॥ सप्तदशदुन्दुभीननुवेद्यन्तं वेदिसमीपे प्रतीचः आग्नीध्रीयपश्चिमप्रदेशे स्थितान्संमिन्वन्ति वादयितुमाबध्नन्ति (वेद° Cod.) ॥६॥ संवाक् समुदिता वाक् ॥११॥ प्रव्याधान् प्रकर्षेण बलाधिक्येन विमुक्तो वाणो (षानाणो Cod.) यावति देशे लक्ष्यं विध्यति ता॰ ानेकः प्रव्याधः । तिर्यङ् स्थौल्येन विस्तारवान् अन्वङ् आयामवान् ॥१३॥ राजन्योऽपि निय इत्यक्षरविश्लेषाच्चतुरक्षरः ॥१४॥ अदः अमुष्मिन्विप्रकृष्टे काले ॥१६॥ अथ यजमानस्य रथारोहणानन्तरमध्वर्युशिष्यो वा अन्यो ब्रह्मचारी वा एतत् वक्ष्यमाणं मन्त्रमधीयात्स्मरेत् स तमेव रथमन्वास्थाय तूष्णीमारुह्य वाजिन इति मन्त्रं वाचयति यजमानमिति शेषः । काष्ठामाजिधावनस्यावधिभूतां सप्तदशप्रव्याधान्ते निर्मितामौदुम्बरीं शाखां लक्ष्यभूतस्वर्गात्मिकां स्वर्गो वै लोकः काष्ठेति श्रुतेः वेगेन गच्छत ॥१७॥ प्रत्युपतिष्ठते आजिधावनं कृत्वा तीर्थदेशं प्रत्यागच्छतोऽश्वान्प्रति नैवारचरुणा सह गच्छेत् ॥२५॥ सुराग्रहाणां मधुग्रहस्य च विनियोगप्रकारो माध्यन्दिने सवने वक्ष्यतऽइति द्वितीयब्राह्मणे (२.१९.) प्रतिज्ञातम् तमिदानीमवसरप्राप्तं दर्शयितुमाह अथैतेषामिति । आजिं प्रति सरिष्यतां रथानां यजमानरथव्यतिरिक्तानामेकस्मिन्रथे वैश्यराजन्ययोरन्यतरः सुराग्रहान्प्रतिग्रहीतुमासीनो भवति स रथादवरुह्योत्तरस्यां श्रोणावुपविशेत् । हविर्धानस्य पूर्वद्वारेण । शालां जघनेन पत्नीशालायाः पश्चिमप्रदेशादागत्योत्तरस्यां वेदिश्रोणावुपविश्य उक्तयोरन्यतरस्य पाणावेकं सुराग्रहं प्रयच्छन् । इमं मधुग्रहम् । सुराग्रहप्रतिग्रहीतारं वैश्यं विध्यति बाधते । प्रतिगृहीतानां तु सुराग्रहाणामैहिकव्यवहारं दर्शयति तैः स यं भोगमिति । ब्रह्मप्रतिगृहीतस्य मधुग्रहस्य च स यमिति ॥२८॥५॥१॥

अथ यूपारोहणमुच्यते । तत्र प्रथममाप्तिहोमं विधित्सुराह अथ स्रुवमिति आज्यं विलाप्यते अस्यामित्याज्यविलापनी स्थाली स्रुववचनं जुह्वपभृन्निवृत्त्यर्थम् । आपये स्वाहेत्याप्तिलिङ्गसमवायात् प्राणभृत उपदधातीतिवदाद्यनाप्तिसमुदाये आप्तिशब्दः ॥१॥ संवत्सरस्य यज्ञात्मप्रजापतेरेतानि नामानि ॥२॥ क्लृपिधातुनिष्पन्नशब्दयुक्तमन्त्रकरणिका आहुतीः ॥३॥ वेष्टितः यथा यूपो न दृश्यते तदाच्छादनं वा कार्यम् विग्रथितः यूपस्यैकत्र प्रदेशे वाससां ग्रन्थनं वा कार्यम् ॥५॥ दारुमयत्वापवादाय गौधूममिति गोधूमपिष्टमयम् । अवक् अश्वत्थादिवृक्ष-इव बाह्यत्वग्रहितः ॥६॥ यूपस्याग्रे निम्नप्रदेशः कार्यः । गर्तवान् अनो नुडिति (पा° ८.२.१६.) अन्नन्तात्परस्य मतुपो नुडागमो विहितः व्यत्ययेनाकारान्तादपि भवति । अतीक्ष्णाग्रः अतनूकृताग्रः स्थूलाग्रप्रदेशः । चतुर्विंशत्यङ्गुलपरिमितोऽरत्निः ॥७॥ उदानेष्यन् शालातो निर्गमयिष्यन् । कौशं कुशमयं दर्भमयं वासः अत्रापस्तम्बः क्षत्रस्य योनिरसीति दर्भमयं पत्नीमिति श्रुतिश्च भवति दर्भम॰यं परिधापयतीति यद्वा क्रिमिकोशविकारभूतं वा-

सः तेन परित आच्छादयेत् । यद्वा कौशं कुशमयं (? यद्वा कौशमयं Cod.) चण्डातकं चलनमुच्यते एवं ह्यभियुक्तोपदेशः अर्धोरुकं विलासिन्या वासश्चण्डातकं स्मृतमिति नृत्तोपायिकत्वेनाच्छादनीयमूरुकञ्चुकमर्धोरुकं (नृत्तोपयिक° Cod.) वासः (see अमर° २. ६. ११६.) । वसनस्य प्रदेशं विधत्ते अन्तरमिति दीक्षाकाले यद्वस्त्रं परिहितं तस्माद्बहिःप्रदेशे इत्यर्थः अन्तरशब्दो बहिर्योगे वर्तते । दर्भैरेव वासः कर्तव्यमित्यत्रोपपत्तिं दर्शयति जघनार्ध इत्यादिना पूर्वदेशस्थाहवनीयसाध्यत्वाद्यज्ञः प्राच्यां दिश्यवस्थितः तस्य यज्ञस्य पश्चिमभागे पत्नी यज्ञस्य जघनार्ध इति निरूप्यते तां पत्नीमेतर्हि प्राचीं प्राङ्मुखीं पूर्वदिगवस्थितं यज्ञं प्रापयिष्यन्भवति तदुपायत्वेन दर्भमयवासःपरिधापनस्य मेध्यत्वापादकत्वमाह अस्ति वाऽइति ॥८॥ अथ निश्रेणीमिति निश्रेणी (!) यूपारोहणार्थं सोपानसदृशः काष्ठनिर्मितपदार्थः । निश्रयति यूपे निदध्यात् । तुशब्दः पक्षान्तरव्यावृत्त्यर्थः तथा हि एवं कृते सति उदग्भवति कर्मण उदगपवर्गता सिध्यति ॥९॥ शिरसा यूपमत्युज्जिहीते अतिक्रम्योद्गमयति यूपं शिरसा स्पृशन् तमतिक्रम्य स्वशिर उन्नमयेत् ॥१४॥ ऊषपुटैः ऊषक्षेत्रपांसव ऊषाः तानश्वत्थपत्रैः पुटीकृत्य तैः पुटैः यूपेऽवस्थितं यजमानमभिलक्ष्योदस्यन्ति ऊर्ध्वान्प्रतिदिशं प्रक्षिपेयुः । अतः पशुद्वारा ऊषाणामन्नत्वादूषपुटहननेन यजमानेऽन्नमेव निहितवान्भवति ॥१६॥ उपनद्धाः सम्बद्धाः । अश्वत्थेऽवस्थितान्मरुतः ॥१७॥ अवदृणीयादवदारयेत् अवधून्वीत विचालयेत् ॥१८॥ हिरण्यमभिलक्ष्य यूपादवरोहेत् ॥२०॥ यो यूपारोहणेनान्तरिक्षसद्यमाकाशे उपवेशनं जयति ॥२२॥ हविर्धाने इति द्वितीयाद्विवचनान्तं पदम् ते अग्रेण तयोरग्रप्रदेशम् ॥२३॥ आसन्द्या अजाजिनेनाच्छादनं विधत्ते अथेति । विज्ञायमानाः सुवानाः ॥२४॥१॥२॥॥

नैवारचरुप्रचारं विधत्ते बार्हस्पत्येनेति । प्रधाननैवाराहुतेरनन्तरं कर्तव्यं वाजप्रसवीयहोमं विधातुं कालं विधत्ते तस्यानिष्ट इति तस्य नैवारस्य स्विष्टकृदनिष्टः अकृतो (°ष्टं अकृतो Cod.) भवति प्रधानयागादूर्ध्वं स्विष्टकृतः प्रागित्यर्थः । होमार्थमन्नसम्भरणं विधत्ते अथास्माऽइति अस्मै यजमानाय तदभिषेकार्थमन्नं सम्भरेत ॥१॥ यथोपस्मारमुपस्मृतिमनतिक्रम्य यानि तदा स्मृतिपथमवतरन्ति तानि । तत्र ग्राम्यारण्यभेदेन चतुर्दशान्नान्यापस्तम्बेन सूत्रितानि तान्यपि यथोपस्मारपदेन ग्राह्याणि तिलमाषा व्रीहियवाः प्रियङ्गवणवो गोधूमा वेणुः श्यामाकनीवाराः जर्तिलाश्च (लश्च Cod.) गवीधुका आरणजा (?) मर्कटका विज्ञेया गार्मुतसप्तमा (?) कुलत्थसप्तमा वेति बुद्धिस्थानि यानि वा तानि सम्भरेत् यथोपस्मारमन्नानि सम्बिभृयादित्यत्र संख्याया अनुक्तेर्यावन्ति स्मर्यमाणानि तावन्ति सम्भरेदित्यर्थो भवति ॥२॥ संख्याविशेषं पूर्वपक्षयति तद्धैकऽइति । बुद्धिस्थानामपि सर्वेषां सम्भरणे प्राप्ते एकस्य निषेधति एकमन्नमिति ॥३॥ यदन्न न सम्भरेत्तस्य उद्ब्रुवीत (°वी Cod.) न सम्भृतमित्युच्चैस्तन्नाम ब्रूयात् । मिलितस्य सर्वस्यान्नाद्यस्यैकदेशं स्रुवेणोपघातमुपहत्योपहत्य गृहीत्वा वाजप्रसवशब्दयुक्तमन्त्रकरणकहोमान्कुर्यात् ॥४॥ यन्त्र्ये (!) नियमे अभ्यनुज्ञायाम् ॥१३॥ अत्र तु सरस्वत्यै वाच इत्यस्य स्थाने सरस्वत्यै वा वाच इति युष्मच्छब्दं प्रक्षिप्य प्रयोक्तव्यमिति विधातुं पूर्वपक्षं सोपपत्तिकमुद्भावयति तदु हैकऽइति ॥१४॥ उज्जयलिङ्गयुक्तमन्त्रकरणिका आज्ञतय उज्जितयः ॥१६॥ अत्राग्निरेकाक्षरेणेति प्रजापतिः सप्तदशाक्षरेणेत्याद्यन्तयोर्ग्रहणेन सर्वेऽपि [सप्तदश मन्त्राः] गृह्यन्ते । तेषां संग्रहेणायमर्थः आश्रावयेति चतुरक्षरम् अस्तु

श्रौषडिति चतुरक्षरम् यजेति द्व्यक्षरम् ये यजामहऽइति पञ्चाक्षरम् द्व्यक्षरो वषट्कारः स एष सप्तदशः प्रजापतिरिति (see १, ५, २, १६. १७.) सप्तदशाक्षराणि विद्यन्ते तत्राग्न्यादिसप्तदशदेवाः एकाक्षरप्रभृत्येकैकाक्षरवृद्धियुक्तैः प्राणमनुष्यादीञ्जितवन्तः ॥१७॥ नैवारहविषः प्रधानस्विष्टकृतोर्मध्येऽनुष्ठेयं कर्मजातमुपदर्श्य चोदकप्राप्तं स्विष्टकृद्यागादिकमनुसंधत्ते अथाहेत्यादि । अनुब्रूहि अनुवाक्यां पठेति सम्बोध्यो होता । नैवारहविःस्विष्टकृदाहुत्योर्मध्ये क्रियमाणेनान्नसम्भरणवाजप्रसवीयहोमादिना यज्ञरूपं प्रजापतिं जितवान्भवति । अनुवचनानन्तरमाश्रावणादिकं प्रकृतिवत्स्विष्टकृतः कार्यमित्यनुक्रामति आश्राव्येति वषट्कृते होत्रा याज्यान्ते वषट्कारे प्रयुक्ते सति जुहोति सौविष्टकृतं हविः ॥१८॥ माहेन्द्रग्रहानन्तरं तदीयं पृष्ठस्तोत्रमुपाकरोति आरम्भयेत् । तमासन्द्यामधिष्ठितमभिषिक्तं यजमानं स्तोत्राय प्रमीवति ज्ञापयेत् आह्वयेत् । स सुन्वन्नुपावरोहति आसन्द्याः सकाशात् स एवं स्तोत्रशस्त्रयोरन्ते समीपस्थितो भवेत् ॥१९॥ अत्र केचिदुज्जितिवाचनानन्तरं माहेन्द्रग्रहणं स्तोत्रशस्त्रे च कृत्वा स्विष्टकृदादिकं यजमानस्य पश्चादवरोहणमिच्छन्ति तद्दूषयितुमनुवदति तद्वैकऽइति एतत् माहेन्द्रग्रहणादिहोमान्तं तत्कर्म कृत्वा अथानन्तरं तदुक्तं स्विष्टकृदिडोपह्वानान्तं कर्म कुर्वन्ति तद्दूषयति तदु तथेति यद्यासन्द्यामासीनऽएव यजमाने सत्येव आत्मप्रजारूपे स्तोत्रशस्त्रे कुर्यात् तर्हि यजमानमात्मप्रजाहीनं कुर्यात् असांनिध्यकरणेनेत्यर्थः (असान्निध्य॰ Cod.) ॥२०॥ अत उक्त एव पक्षः श्रेयानिति दर्शयितुं पुनः पठति अथेडामिति ॥ २१ ॥ २ ॥ २ ॥ ॥

ब्राह्मणक्षत्रियोभयकर्तृकसंख्यारूपो वा (?) वाजपेय उक्तः अथैकतरकर्तृको विकृतिभूतो राजसूयो विधास्यते । तत्राकृतवाजपेयस्य राजन्यस्यैव राजसूयेऽधिकारः न तु तेनेष्टवतः राज्यफलादपि साम्राज्यफलस्यातिशयितत्वेनोत्तमफलसाधनयागानन्तरमवरफलहेतुक्रतुकरणस्यायुक्तत्वात् । इष्टिपशुसोमदर्विहोमैः शतप्रधानो (?) राजसूयः तत्र श्वो भूतेऽनुमत्यै पुरोडाशमष्टाकपालमित्यादिना (२. ३. २) विहिता इष्टयः अथ श्येनीं विचित्रगर्भामदित्याऽआलभत इत्यादिना (५. २. ८) विहिताः पशवः पवित्राभिषेचनीयदशपेयकेशवपनीयव्युष्टिद्विरात्रक्षत्रधृतिसंज्ञकाः सप्त सोमयागाः पञ्चवातीयादयो (२. ४. ४) दर्विहोमाः । तत्र पवित्रनामके प्रथमसोमयागे प्रवृत्तिसमानत्वेन वक्तव्याभावात्तं परित्यज्य तदवसाने कर्तव्यं तत्र (? तु त्र Cod.) पूर्णाहुतिप्रभृति वैशेषिकमुत्तरतन्त्रमभिधीयते । पूर्णाहुतेः कालं कात्यायनः सूत्रयामास (१५, १, ४-७) पवित्रश्चतुर्दीक्षः सहस्रदक्षिणो माघीपक्षयजनीये दीक्षा तदन्ते पूर्णाहुतिर्गृहेष्विष्टिकृत इति तद्विधत्ते पूर्णाहुतिमिति आज्यपूर्णया जुह्वा ह्रयतऽइति पूर्णाहुतिः सा अनाम्नातमन्त्रत्वात्प्राजापत्या यत्तूष्णीं तत्प्राजापत्यमिति श्रुतेः । सूयै अभिषिक्तो भूयासम् ॥१॥ आरम्भणीयस्थानीयात्पवित्राख्यादग्निष्टोमादङ्गः परस्मिन्नहनि कर्तव्यं विधत्ते अथ श्व इति । यागानुष्ठानस्याधारत्वेनानुज्ञाकरणादनुमतिः पृथिवी । दृषदमभ्याधातुमधः स्थापितायाः शम्यायाः पश्चाद्ये तण्डुलपिष्टलेशा अवशीयन्ते अधः पतन्ति । इरिणमूषरक्षेत्रम् । श्वभ्रप्रदरे गर्ताकारणे (॰रे ?) विदीर्णप्रदेशे ॥२॥ भूमिर्द्विविधा शालिगोधूमादिसर्वसस्याढ्या तदयोग्या च तत्राद्यभूमिरूपानुमतिः द्वितीयभूमिरूपा निर्ऋतिः सैवानिष्टकारिणी पापदेवता ॥३॥ यथा लोके पुरुषो वस्त्रसहितः सन्नरण्यगमनं चोरादिभयान्न कामयते तद्वस्त्रं भयरहिते स्थाने निधाय चेद्गच्छति तदा अतिमुच्यते भयाद्विमुक्तो भवति तद्वद्वासोदानेन सूयमानमेनं यजमा-

[नमा]सङ्गो भयं न प्राप्नोति ॥५॥ तं यथेष्टीति प्रकृतीष्टिवदेवैषेष्टिः (प्राकृतीष्टि॰ Cod.) कार्या तेनानुमतीष्टिवत्तन्मध्ये वैकृतं तन्त्रं किंचिदपि न विद्यतऽइति भावः तद्यदेवेति अदः अमुष्मिन्विप्रकृष्टे सोमप्रकरणे प्रज्ञातं दीक्षणीयं दीक्षायां निरुप्तमाग्नावैष्णवं हविः तदेवेदानीं निरुप्यमाणं हविरिति तत्तादात्म्येन प्रशंसा । अवरार्ध्यः आदौ स्थितः परार्ध्यः यज्ञस्य चरमभागेऽवस्थितः ॥६॥ यथेष्टीति सर्वेष्टीनां पौर्णमासेष्टिः प्रकृतिभूता तद्वदत्रापि तदीयमङ्गजातं कुर्यात् । उत्सृष्टो गौरिति कियन्तं कालं शकटवहनादौ विनियोज्य पश्चाद्य उत्सृज्यते स उत्सृष्टः । अमुमन्तरिक्षे दृश्यमानं चन्द्रमसमुत्सर्गमुत्सृज्योत्सृज्य घ्नन्ति पौर्णमासीं खल्वारभ्य देवाः घ्नन्ति प्रतिदिनमेकैककलापकार एव तस्य हननम् अमावास्याकालमारभ्योत्सृजन्ति प्रतिदिनं तस्यैकैककलावृद्धेः तस्मादस्य हविषः सोमदेवतासम्बन्धादेतादृशो गौर्दक्षिणात्वेन युक्तः ॥७॥ वहं नाम युगवहनदेशः ककुत्प्रदेशः । आण्डाभ्यामिन्द्रः सेचनसमर्थत्वात् ॥८॥ इष्टिपशुसोमदर्विहोमात्मकत्वाद्राजसूयस्य तदनुष्ठानेन यज्ञक्रविष्ठ्यादयः सर्वेऽनुष्ठिता भवन्ति आग्रयणेष्टिरपि देवसृष्टत्वेन प्रशस्तत्वादत्रावरोद्धव्या ॥९॥ चातुर्मास्याख्यो यज्ञक्रतुरप्यवरोद्धव्य इत्यनेनाभिप्रायेण तदनुष्ठानम् ॥१०॥३॥२॥

एवं चातुर्मास्यानि सामान्येन विधाय वैश्वदेवाख्यं प्रथमं पर्व विधत्ते वैश्वदेवेनेति । भूमानं भूयसीः प्रजाः ॥१॥ शुनी वायुः सीर आदित्यः । उभौ रसाविति see २, ६, ३. ४. । शुनासीरीयप्रयोगकालः सूत्रितः [का॰ १५. १. ११.] पवित्रदीक्षास्थाने शुनासीरीयमिति पवित्राख्यस्य सोमयागस्य (॰गत Cod.) संवत्सरे यस्यां तिथौ दीक्षा कृता तस्यां फाल्गुनशुक्लप्रतिपदि चतुर्थं पर्व कार्यम् अर्थात्पवित्रशुनासीर्ययोर्मध्ये वैश्वदेवादीनि त्रीणि पर्वाणि क्रमेण चतुर्षु मासेषु कार्याणि । आहवनीयमग्निं पञ्चधा व्युह्य प्रतिदिशं मध्ये च पृथक् कृत्वा आज्यस्थाल्याः स्रुवेणोपघातमुपहत्योपहत्य गृहीत्वा जुहोति ॥४॥ तत्र पूर्वादिक्रमेण पञ्चस्वग्निषु समन्त्रकं हवनं विधत्ते स पूर्वार्ध्यऽइति पूर्वार्धे भवः पूर्वार्ध्योऽग्निः ॥५॥ उत्पिबन्ते उत्कटं पिबन्ति प्राणिनो भक्षयन्ति ॥७॥ क्षण्वन्ति हिंसन्ति क्षणु हिंसायाम् विवृहन्ति विश्लेषयन्ति ॥८॥ रथस्य सव्यभागे तिष्ठन्नेकः सारथिश्चैक इति द्वौ ॥९॥ आरोग्यकामस्यापीमं होमं विधत्ते स हैतेनेति । यस्तु गतासुरिव भवति तमप्यनेन होमेनाहरत्येव पुनर्जीवयत्येव ॥१०॥ इन्द्रस्तुरीयश्चतुर्थहविर्देवता यस्मिन्कर्मणि तदिन्द्रतुरीयम् । गवीधुका (!) आरण्यगोधूमाः । वहलायै वहं नाम ककुत्प्रदेशः तद्वत्यै षष्ठ्यर्थे चतुर्थी ॥११॥ वरुणो रुद्रश्चोभावप्यग्निरेव तथाच तैत्तिरीयके ते देवा अग्निमब्रुवन्निति प्रस्तुत्य स त्रेधात्मानं व्यकुरुताग्निं तृतीयं रुद्रं तृतीयं वरुणं तृतीयमिति । वास्तव्य इति रुद्रः खलु वास्तुभवः ग्रामाद्बाह्यो यज्ञभूमिश्मशानादिर्वास्तुः । गवीधुका अपि वास्तुभवाः अतो गवीधुकहविषो रुद्रदेवत्यत्वं युक्तम् । स्त्रीत्वे सत्यप्यधर्मेण त्रिया अयोग्येनानोवहनेन वारुणी ॥२३॥ तं राज्ञो विजितिसाधनत्वेन प्रशंसति अपामार्गैर्वाऽइति । अपामृजत अपमार्जनं कृतवन्तः ॥१४॥ एतेनापामार्गहोमेनापि न केवलं पञ्चवातीयहोमेन प्रतिसरं स्वस्त्वामभिचार्यमाणः कुर्यात् । प्रतीचीनफलः स्वात्मानं प्रति गतैरवाङ्मुखैः (॰र्वा॰?) फलैर्युक्तः । योऽभिचारकोऽस्मै यजमानाय किंचित्पीडादिकं कुर्यात् तमेवैतेनापामार्गहोमेन प्रतिमुखं धूर्वति हिनस्ति तत्कृतोऽभिचारस्तमेव प्रतिनिवृत्य (॰त्यंपि Cod.) हिनस्ति ॥२०॥४॥२॥

अथ त्रिषंयुक्तेष्टित्रयं विधित्सुः प्रथमं त्रिषंयुक्तमनुक्रामति आग्नावैष्णवमिति । त्रिभिर्हविर्भिः संयुक्तं तेन यजेत । देवा एतेन त्रिषंयुक्तेन सहायभूतान्कर्मकरान्पुरुषान्प्राप्तवन्तः ॥१॥ विष्णोरवतारस्वीकारेण मनुष्यसम्बन्धान्मनुष्याः सर्वे वैष्णवाः विष्ण्वधिष्ठिताः ॥२॥ पुरुषवान् पुरुषसहायवान् । वामनो ह्रस्वाङ्गः ॥४॥ वर्चो ब्राह्मं तेजः ॥१॥ अवर्चसः अतेजस्कस्य यद्यपि व्याप्तिः सर्वपदार्थव्यापनशक्तिरस्ति तथापि तया व्याप्त्यापि न खल्वर्थः प्रयोजनं विद्यते ॥१२॥ अथानन्तरदिवसकर्तव्यं द्विहविष्कं यागं विधत्ते अथ श्व इति । अनूचीने पूर्वापरीभूते अहनी अनूचीनाहम् क्रियाविशेषणमेतत् वैश्वानरेष्ट्या पूर्वस्मिन्दिने यजेत वारुण्यापरस्मिन्दिने एवं भिन्नतन्त्रेणैतौ यागौ कार्यौ एकस्मिन्नेवाहनि वा समानतन्त्राभ्यां यष्टव्यमित्याह समानबर्हिर्भ्यामिति बर्हिरुपलक्षितं कृत्स्नं तन्त्रं समानं साधारणं ययोः ते समानबर्हिषी ॥१३॥ ग्रन्थिर्नाम पाशः । अयं दक्षिणाभेद इष्ट्योर्भिन्नतन्त्रत्वे वेदितव्यः समानतन्त्रत्वे हि एकेनैव द्रव्येण परिक्रीता ऋत्विजः कृत्स्नं प्रयोगजातं कुर्वन्ति ॥१७॥५॥२॥

प्रथमब्राह्मणे द्वादश रत्नहवींष्यनुदिनं क्रमेण कर्तव्यान्युच्यन्ते । अग्नी गार्हपत्याहवनीयौ अरण्योः पृथक् पृथक् संरोप्य प्रतिदिवसं तत्तद्गृहं गत्वा तत्र तत्र निर्मथ्य यष्टव्यमिति सर्वेष्टिसाधारणमिदम् । रत्नं रत्नवत्प्रशस्तं गवेषणीयं वस्तु । तस्मै सेनान्यै सूयते तेनानुज्ञायते । तद्गृहगमनेन तं सेनान्यं स्वमात्मीयमनपक्रमिणमनतिलङ्घिनं कृतवान्भवति ॥१॥ शितिपृष्ठः श्वेतपृष्ठः । तस्या उपरिभागे अर्यम्णः सूर्यस्य एष परिदृश्यमानः पन्था मार्गः स च किरणसम्बन्धाङ्कितः ॥२॥ सूयमानस्येति सुन्वतो यजमानस्यैव ॥३॥ कृताभिषेकस्य राज्ञो मुख्या स्त्री महिषी । दुहे दुग्धे लोपस्त आत्मनेपदेष्विति (पा°·७.१.४१.) तलोपः ॥४॥ ग्रामं नयतीति ग्रामणीः वैश्यानां महत्तरः । पृषन् विन्दुमान् श्वेतरक्तकृष्णविन्दुयुतः । पृषतो गोर्यदस्ति एतद्रूपाणां भूमेति पदयोजना ॥६॥ क्षत्ता नाम यष्टिहस्तोऽन्तःपुराध्यक्षः सर्वेषां नियन्ता प्रतिहारापरपर्यायः । श्वेतः (!) शुक्लवर्णः ॥७॥ संग्रहीता नाम रथयोजिता । सव्यष्टृपदेन संग्रहीतोच्यते । सयोनी समानस्थानौ । यमौ सहैवैकस्या मातुर्गर्भादुत्पन्नौ अनूचीनगर्भौ अनुक्रमेण पौर्वापर्येण जातगर्भौ ॥८॥ राज्ञः प्राप्तं षष्ठं भागं प्रजाभ्यो गृहीत्वा राज्ञे दोग्धि प्रयच्छतीति भागदुघः । पूषा नाम मार्गसंरक्षको देवः देवानां भागदुघः भागं दोग्धि स हि यजमानदत्तानि हवींषि माग रक्षोभ्यः संरक्ष्य तांस्तान्देवान्गमयति । see २. ५. ८. ॥१॥ अक्षावापो नामाक्षाणां क्षेप्ता अक्षगोप्ता वा द्यूतकारः । गोविकर्तः मृगयासहायभूतो गोहिंसको व्याधः । गवीधुकाः (!) अरण्यगोधूमान् । सम्पदः कामाय समृद्ध्यभिलाषसिद्ध्यर्थम् । सभायां सभास्थले द्यूतस्थाने यामिमां पणत्वेन कृतां गां घ्नन्ति कितवाः (see ४. ५. २३.) तत्र तामेतां (°मेतं Cod.) रुद्रोऽभिमन्यते क्रूरकर्मत्वात् स नस्य (?) रुद्रः परम्पर[य]ाधिदेवनात्मक इत्याह अग्निर्वै रुद्र इति स चाग्निरधिदेवनं द्यूताधिकरणं स्थानम् अधिदेवनात्मकस्याग्नेः अक्षावापाङ्गाराः (!?) तमेवमधिदेवनात्मकं रुद्रमेतेनाक्षावापगृहसम्भृतगवीधुकनिष्पन्नहविषा प्रीणाति तर्पयति । तस्य गृहेषु अनुमता अध्वर्युप्रभृतिभिरनुज्ञाता सती गौर्हन्यते गोविकर्तेन हिंस्यते अतो गोविकर्तगृहादानीतगवीधुका हननाभिमानिनो रुद्रस्य हविष्ट्वे योज्या इत्यर्थः । नखरो निःकोशोऽसिः कृपाणः । वालदाम्ना रोमस्रजा प्रबद्धमक्षावपनं पात्रम् अक्षा उप्यन्तेऽस्मिन्नित्यक्षावपनमक्षस्थानावपनपात्रम् । एतदु होति तयोस्तद्द्वयं स्वं भ-

वति एकैकस्यैकैकमस्ति ॥१०॥ पालागलो नाम दूतः आपस्तम्बेन तु दूतविशेषपरत्वेन व्याख्यातः अध्वने स्वाहेति पालागलस्य गृहे जुहोत्यनृतकृतं ब्रुवतऽइति पालागलमनृतवादिनं दूतमिति ब्रुवते आचार्या इत्यर्थः । प्रहेयः राज्ञा प्रेष्यः प्रस्थापनीयः । तस्य दक्षिणेति उक्ष्णावेष्टितम् उक्ष्णशब्देन स्नाय्वभिधीयते उक्षविकारैः स्नायुभिः वेष्टितं स्यूतं धनुः । चर्ममया वाणवन्त इषुधयः । लोहितवर्ण उष्णीषः शिरोवेष्टनम् ॥११॥ परिवृक्तिगृहे । परिवृक्तिशब्दस्यार्थमाह या वाऽइति अपुत्रा राजपत्नी केवलं भोगार्था परिवृक्तिः (!) । स जुहोतीति जुहोतिचोदितत्वात्स्वाहाकारप्रदानवाचायं होमो दर्विहोमः । परिमूर्णी मुर्छा मोहसमुच्छ्राययोः अस्मात्क्तिनि राल्लोप इति (पा॰ ६. ४. २१.) छस्य लोपे निष्ठानत्वे च कृते रूपम् परिमूर्णा अक्षमा पर्यारिणी परित आर्तिमती व्याधिगृहीता केनचिदङ्गेनापहृता वा कृष्णा गौर्दक्षिणा । इच्छन्ते तां परिवृक्तिमाह (!) वदेत् अद्य इदानीमितः परं मे मम ईशायां स्वाम्ये मा वात्सीः मद्भोग्या मा भूरित्यर्थः ॥१३॥१॥३॥

रत्नहविषामुपरि स्वगृहे सौमारुद्रयागः कर्तव्यः । शृतः पक्वः ॥१॥ आसुरोऽसुरपुत्रः । विव्याधाच्छादितवान् । अयज्ञार्हान्सेनान्यादीन् । तमो वा कर्त एनं सुन्वन्तं प्रविशति । वदित्येकपर्यायः एकदा शूद्रान् सेनान्यादीन् वदेकदा यान्कांश्चन गोविकर्तादीन्हीनजातीनपि । ततः पापलेशासंस्पृष्टः सन्दीक्षते दीक्षार्हो भवति ॥२॥ प्रसङ्गात्फलान्तरायास्य होमस्य बाह्यप्रयोगं दर्शयति स हैतेनेति । अपिर्भिन्नक्रमः सोऽपि एतेन सौमारौद्रेण यजेत सः कः यः पुरुषो यशसे यशसः प्राप्तये अलं सन् समर्थो योग्यो भवन्नपि अयशः (!) कीर्तिरहितो भवति । यच्छब्दार्थं विशिनष्टि यो वाऽअनूचान इति साङ्गवेदाध्यायी अनूचानः स यशसे अलं योग्यो भवन्नपि अयशो यशोरहितो भवति यस्तु यशोरहितः स तमसा प्रावृतः तस्यैतेन हविषा सोमारुद्रौ कीर्त्यभावरूपं तमोऽपहत्य कीर्तिमन्तं कुरुतः स यजमानः अयशोरूपतमसा वियुक्तः सन् ज्योतिरात्मको भूत्वा श्रिया सम्पदा यशसा चोपलक्षितो भवति ॥३॥ दीक्षते दीक्षां कर्तुमर्हति ॥४॥ स्वयंप्रशीर्णा स्वयमेव भग्ना । मित्रसम्बन्धिचरुपाकार्थं पात्रम् ॥५॥ पयः आतच्य आतञ्चनद्रव्येण दधि कृत्वा विनाटे चर्ममये पात्रे दृतौ आसिच्य रथमश्वैः संयोज्य दधिपूर्णं विनाटं रथे सम्बध्य देदीयितवै रथधावनाय आह नियुञ्जीत दीतेर्वा गतिकर्मणो यङ्लुगन्तात्कृत्यार्थे तवैप्रत्ययः । स्वयमुदितं मथनमन्तरेण निष्पन्नं नवनीतम् तदेव स्वयमेव विलीनं सदाज्यं भवति ॥६॥ अणीयांसः अणुतराः परिभिन्नाश्छिन्नाग्रास्तण्डुलाः अपरिभिन्नाः अच्छिन्नाग्राः अचूर्णीकृताः ॥७॥ बार्हस्पत्यं चरुमधिश्रित्य अग्निमध्ये स्थाल्यामधिश्रितायां बृहस्पत्यर्थांस्तण्डुलानोप्य तं चरुमश्वत्थशाखानिर्मितेन मैत्रेण पात्रेणापिदध्यात् तत्तस्मिन्पात्रे स्वयमुत्पन्नमाज्यमानयति आसिञ्चेत् तत्र स्थविष्ठानपरिभिन्नान्मैत्रांस्तण्डुलानावपेत् स एव मैत्रश्चरुरूष्मणैव अप्यते पच्यते । अग्निना पक्वो वरुणयो दाहप्रयुक्तहिंसासम्बन्धात् । उभयोश्चर्वोः दधिपयसोर्दार्शिकयोरिव एकैकस्माद्द्विर्द्विरवद्यन् जुह्वां सहावदानं कुर्वन् मित्राबृहस्पतिभ्यामनुब्रूहीत्येवं संस्तुत्यानुवाक्याप्रैषं (संयुत्या॰ Cod.) ब्रूयात् एवं यजेति याज्याप्रैषेऽपि वषट्कृते सहैव प्रक्षेपः ॥८॥२॥३॥

एवं पवित्राख्यात्प्रथमसोमयागादनन्तरभावीन्यानुमतादीनोष्टिदर्विहोमात्मकानि संवत्सरपर्यन्तमनुष्ठेयानि कर्माण्यनुक्रान्तानि । अथ द्वितीयस्याभिषेचनीयाख्यस्य सोमयागस्य प्रयोगो

ऽभिधास्यते । तत्राभिषेचनीयस्य चोदकप्राप्तां दीक्षामाह स वाऽइति । तत्कालः सूत्रे दर्शितः (का° १५. ३. ३४.) फाल्गुनीपक्षयजनीयेऽभिषेचनीयाय दीक्षतऽइति । देवसुवां (!) हवींषि विधित्सुस्तेषामग्नीषोमीयपशुपुरोडाशानन्तरभावित्वं वक्तुमाह उपवसथऽइति उपवसथः सुत्यादिवसात्पूर्वमहः । तदनु देवसुवां (!) हवींषि निर्वपेत् सुवन्त्यनुजानन्तीति सुवः देवाश्च ते सुवश्चेति देवसुवः तेषां देवस्वाम् ओः सुपीति (पा° ६. ४. ८३.) यणादेशः प्रसवितृत्वं चैषामाम्नायते देवसुवामेतानि (!) हवींषि भवन्ति एतावन्तो वै देवानां सवाः तऽएवास्मै सवान्प्रयच्छन्ति तऽएनं सुवतऽइति ॥१॥ प्लाशुकानाम् प्रकर्षेण आशु शीघ्रं पच्यमानानां पुनःप्ररूढानां व्रीहीणाम् रेफस्य छान्दसो लत्वनिर्देशः । प्रसुवान् प्रसुवन्तु प्रेरयन्तु ॥२॥ प्लाशुकाः पुनःप्ररूढा व्रीहय इत्युक्तम् ततोऽप्यधिककाले पक्षत्रये पच्यमानाः षष्टिका व्रीहयः आशवः तेषामाशुत्वं च त्रिचतुरमासनियतपरिपाकव्रीह्यपेक्षम् । अग्निः खलु गार्हपतं गृहपतित्वमेव तस्माद्यजमानो यावतो धनस्येष्टे ईश्वरो भवति तद्गार्हपतं गृहपतिसम्बन्धि सर्वं वस्तुजातमभि एनं यजमानं गृहपतिगुणकोऽग्निः प्रापयति ॥३॥ ज्येष्ठत्वगुणकायेन्द्राय हायनानां संवत्सरपक्वानां रक्तशालीनां चरुं निर्वपेत् । अतिष्ठा अतीत्य तिष्ठन्त्य ओषधयः चिरकालेन पाकात् इन्द्रोऽप्यतिष्ठाः सर्वानतिक्रम्य तिष्ठति ॥६॥ नाम्बा नाम अकृष्टपच्याः स्वयंजाता व्रीहयः । कृष्टक्षेत्रोत्पन्ना ओषधयो वरुण्याः कर्षणादिलक्षणहिंसासम्बन्धात् ॥८॥ अथ देवसुवां हविर्यागानन्तरं स्विष्टकृतः पूर्वम् । अभिपद्य गृहीत्वा । मित्रः सत्य इति सत्यशब्दाच्चतुर्थ्यर्थे सुः सत्यायेत्यर्थः ॥११॥ अमी इत्यस्य स्थाने भरतपदं प्रक्षिप्य पठितं (पतितं Cod.) बौधायनेन अथैनं रत्निभ्य आवेदयति एष वो भरता राजेति आपस्तम्बेन तु राजविशेषेण जनपदनामग्रहणमुक्तम् अथैनं रत्निभ्य आवेदयति एष वो भरता राजेत्येष वः कुरवो राजेति कौरव्यमेष वः पञ्चाला राजेति पाञ्चालमेष वः कुरुपाञ्चाला राजेति वा कुरुपञ्चालमेष वो जनता (!) राजेत्यन्यान्राज्ञ इति । आद्यं भोग्यम् । तस्माद्ब्राह्मणो क्षत्रियेणानाद्यः (! °येणानाद्यः) । सोमराजा सोमो राजा यस्येति बहुव्रीहिः ॥१२॥ सुवते अनुजानन्ति । देवसूहविःप्रचारस्याग्नीषोमीयदिवसकर्तव्यत्वात् श्व इत्यनेन सुत्यादिनं विवक्ष्यते ॥१३॥ सुवान्ताऽइति पञ्चमलकारान्तपदम् ॥१४॥ अग्नीषोमीयपशुपुरोडाशप्रधानाङ्गेतरेनन्तरं कर्तव्यं विधाय प्राकृतं स्विष्टकृद्यागमनुवदति अथाहेति । प्रधानस्विष्टकृदाङ्गयोर्मध्ये देवसूहविःप्रचारेण यज्ञरूपप्रजापतिमध्यऽएव यजमानं निहितवान्भवति ॥१५॥३॥३॥

चतुर्थब्राह्मणे यजमानाभिषेकार्थं सप्तदशसंख्याकानामपां सम्भरणमुच्यते । आतपवर्ष्याद्यान्युदकानि यूपस्योत्तरप्रदेशे निधाय गृह्णीयात् इतराः सम्भविनीरपस्तु तत्र तत्र गत्वा गृह्णीयात् ॥१॥ सारस्वतीरेवेति सरस्वत्यां नद्यां भवाः अपः एवशब्दोऽन्ययोगव्यवच्छेदार्थः । एता वाऽएका इति सारस्वत्य आप एका एकमुदकम् एवं सारस्वतीरपो गृहीत्वा षोडशापो गृह्णीयात् ॥३॥ अभ्यवेते अवगाढे सति । व्यर्दतः विविधं पूर्वापरभावेन गच्छतः ॥४॥ उदर्दति उद्गच्छेत् । स्वाहान्तो हवनमन्त्रः द्वितीयो ग्रहणमन्त्रः ॥५॥ प्रतीपं प्रतिकूलम् ॥६॥ नदीप्रवाहं परित्यज्य पृथक्प्रवाहरूपेण याः स्यन्दन्ते अपयत्यः ताः । एतस्यै वाऽइति एषा परिणदी एतस्या महानद्याः सकाशादवच्छिद्य (!) पृथक्कृत्य परिवहति तत एषैव पुनर्भवति संसृष्टा परिणदी पुनरेषैव महानदी भवति । यस्मादपच्छिन्ना नदी पुनस्तां महानदीं प्रा-

प्नोति तस्मादस्यैताभिरद्भिरभिषिक्तस्यान्यराष्ट्रीयः पुरुषः राष्ट्रे स्वराष्ट्रे भवति । अवहरते वशयति । यथा महानदी परिणदीसंसर्गेण भूयसी जाता तथा तस्मिन्राज्ञि अन्यराष्ट्रीयसमवधानेन भूमानं भूयस्त्वं दधाति ॥९॥ अथ समुद्रोदकग्रहणं विधत्ते अथ नदीपतिमिति ॥१०॥ निवेष्यते (!) आवर्त्यतेऽस्मिंस्तृणादिकमिति निवेष्य आवर्तः । गर्भोऽपत्यम् ॥११॥ सूर्यवचसं सूर्यसमानतेजस्कम् ॥१२॥ सूर्ये आतपति सति । इमां भूमिमप्राप्ता भूमौ न पतिता भवन्ति ॥१३॥ वेशन्तोऽल्पसरः तत्र भवाः । प्रवाहाभावान्मन्दस्वभावाः ॥१४॥ कूपे भवाः कूप्याः । तथा इमामिति इमां भूमिं परेण भूमेरधस्तादतिप्रकृष्टे देशे कूपे स्थिताः ॥१५॥ प्रुष्वा नीहाराः । सस्यानामातपजातम्लानिशमाय (? समघ्ने Cod.) नीहारगता आपोऽभ्यवयत्यः ॥१६॥ प्रसूयमानायाः गोरुल्ब्याः उल्बे गर्भवेष्टने भवाः अपः ॥१७॥ एतदेव सारस्वतवर्जं चतुर्गृहीताज्येन पूर्वं कृत्वा-कृत्वा पञ्चदशानामपां ग्रहणं विहितम् अथान्तिमस्य जलस्य ग्रहणं सविशेषं विधत्ते अथेति । मरीचीरञ्जलिना पात्रेण संगृह्य गृहीत्वा अपिसृजति सर्वासु गृहीतास्वप्सु संसृजेत् । अत्र होमाभावात्स्वाहान्तः पूर्वो मन्त्रो न पठितः । कथं मरीचीनामप्त्वेन परिगणनमिति तदुपपादयति एता वाऽआप इति यस्मात्ता मरीचयः स्यन्दन्तऽइव प्रवहन्तीव इवशब्दोऽल्पार्थे (?परपार्थे Cod.) साक्षात्प्रवहणाभावात् यथा जलसंघा उपर्युपरिभावेन वर्तन्ते तद्वदेता मरीचयः अन्योऽन्यस्यं मरीचेः श्रिये (!) शोभायै अतिष्ठमानाः स्थातुमसहिष्णवः उत्तराधरा-इव भवन्त्यो गच्छन्ति अतो जलसाम्यादप्त्वेन परिगणनम् ॥२१॥ ताः षोडश ऊर्मिद्वयस्य विवेके षोडशसंख्याका भवन्ति ॥२३॥ होमपूर्वकं ग्रहणं प्रशंसति अथ यद्ध्रुवेति । वज्ररूपेणाज्येन स्पृत्वा स्पृत्वा हिंसित्वा हिंसित्वा ततः स्वीकृत्य स्वाधीनं कृत्वा गृह्णन्तो भवेत् ॥२४॥ मरीचिष्वपि अनजा अस्थाने तासां होमाधिकरणत्वासम्भवान्न होतव्यम् ॥२६॥४॥३॥

पञ्चमे ब्राह्मणे यजमानाभिषेकस्तत्रत्या धर्माश्च विधीयन्ते ॥१॥ माहेन्द्रे ग्रहे अगृहीते सोमरसेनापूर्णे मरुत्वतीयान्ते इत्यर्थः । माहेन्द्रग्रहणात्पूर्वं यजमानाभिषेकं स्वायतननिधानरूपेण प्रशंसति एष वाऽइति see १.४.२. ॥२॥ पूर्वमिन्द्रेण पीयमानः सोमः तमत्यपवत शरीरादधो निगच्छन् स सोमो यदात्यपवत ततः सोऽतिपवितः सोमः शार्दूलः सम्भूतवान् see ५.४.१०. ॥३॥ अथाभिषेकस्य पुरस्तात्पश्चाच्च क्रियमाणान्पार्थहोमान्विधत्ते अथ पार्थानीति । वेनो नाम राजा तस्य पुत्रः पृथी नाम । सर्वमन्नाद्यं स्वाधीनं कुर्यामिति कामयमानाय पृथये (!) एतानि पार्थान्यजुहवुः अध्वर्यवः । अस्मै यजमानाय असाविति तत्तन्मृगनाम्नः सम्बुद्ध्यन्तस्य सामान्यनिर्देशः हे पशो एहि आगच्छ अयं राजा त्वां पच्यते भोक्तुं पक्वं करिष्यतीति सोऽयं पशुः तद्वचः श्रुत्वा तत्समीपं स्वयमेवागच्छति ॥४॥ अर्यमणं नियन्तारमधिपतिम् ॥९॥ स्वः ज्ञातिर्भ्राता ॥१२॥ न्यग्रोधो नाम वटः तस्य पादः शाखावरोहः तेन निमितं नैयग्रोधपादम् तेन मित्र्यः सखिकर्माणि सात्त्रियोऽपि (?) न बहुभाषी (°षां Cod.) नासाधुकर्मकारी सखा (धुः सख्य Cod.) राजन्योऽभिषिञ्चेत् । न्यग्रोधस्य पादैरेव प्रतिष्ठा दृश्यते राजापि हितोपदेशकैरामात्यैः सखिभिः प्रतिष्ठितो भवति नान्यथा अतस्तेन पात्रेण मित्रकर्तृकमभिषेककरणं युक्तम् ॥१३॥ प्रवयति वेञ् तन्तुसंताने संग्रथ्नीयात् ॥१५॥ हे उदक अनिभृष्टम् भ्रज पाके यवादिवद्वह्निसंयोगेऽपि नितरां भृष्टं न विनश्यतीति यावत् रक्षोभिरनिबाधितमसीत्यर्थः ॥१६॥ उदकसम्बन्धादेव सोमरसनिष्पत्तिः तादृशो रस एव हूयते

अतः सोमस्य दानसाधनभूता भवथ ॥१८॥ एनं यजमानं वासांसि तार्प्यपाण्ड्वाधिवासोष्णीषाणि परिधापयेत् तत् तत्रे तेषु प्रथमं तार्प्यमिति वासः न त्वन्यत्कम्बलादिकम् अत एव का° (१५. ५. ७-१०) तार्प्यं परिधापयति क्षौमं त्रिपाणं वा घृतोन्नमेकऽइति तृपा नामौषधिविशेषः तत्तन्तुनिर्मितं क्षौमं वस्त्रं तार्प्यं त्रिःकृत्वः पायितं वा घृतोन्नमुन्दी क्लेदने घृतसिक्तमित्येके आचार्या वदन्ति । यज्ञरूपाणि स्रुक्चमसादीनि तत्र स्यूतानि भवेयुः ॥२०॥ पाण्ड्वं पाण्डुरं श्वेतं कम्बलं तार्प्यस्योपरि प्रावृणुयात् ॥२१॥ अधि उपरि वसनीयमाच्छादनीयं वस्तु अधिवासं (!) तत्प्रतिमुञ्चेत् तार्प्यमुपसंव्याय (°धाय ?) पाण्डरमुत्तरीयवदाच्छाद्य अधीवासककञ्चुकादिकमुपरि प्रतिमुञ्चेत् ॥२२॥ उष्णीषं संहृत्य निवीतरूपेण कण्ठेऽवसज्य पुरस्तात्पूर्वभागे नाभिदेशे अवगूहति उष्णीषान्तं नीविस्थाने ग्रथयेत् ॥२३॥ एके शाखान्तरानुसारिणः तदुष्णीषं समन्तं सर्वतो नाभिदेशे परिवेष्टयन्ति । अस्य क्षत्रियस्य उष्णीषरूपा नाभिरपि समन्तं पर्येति परिवेष्टिता भवति ॥२४॥ पूर्वं निहितस्य दीक्षितवसनस्य परित्यागं विधित्सुरेकेषां मतमुपन्यस्यति यद्वा विहितानां (विदि° Cod.) तार्प्यादीनां परिधापनादिकमेव द्रढयितुं पूर्वपक्षयति तद्वैकऽइति । एके शाखिन एकवारं परिधापितानि एतानि वासांसि निदधति विसृज्य निदध्युः अथ तदानीमेव तार्प्यादिवसनकाले निहितं दीक्षितवसनमेनं यजमानं पुनः परिधापयति । तनूरङ्गानि सहोत्पन्नानि बभ्रूपाण्यङ्गानि see ३, १, २, १३-१६ । अतो वासोभिः परिधापनेन जन्वा तन्वा सहोत्पन्नैः शरीररूपैरङ्गैः समर्धितवान्भवति ॥२५॥ निहितस्य दीक्षितवसनस्यावभृथे प्रासनं विधत्ते स यत्रेति अवभृथमभ्यवहरन्ति आहरेयुरप्सु प्रक्षिपेयुः । सलोम प्रकृतिगतमनुसृतम् प्रकृतौ दीक्षितवसनस्यावभृथे परित्याग उक्तः । अवसाने कर्तव्या उदवसानीयेष्टिः ॥२६॥ बाहुद्वयं विमृज्यत् कर्कोपाध्यायेन तु बाहुशब्दस्य धनुष्कोटिपरत्वं व्याख्यातम् (का° १५. ५. १८.) ॥२८॥ दृ विदारणे दृणातीति दृबा विदारिका दृप्यतेर्वा रूपम् । रुजा भङ्गहेतुः । क्षुमा क्षुप विधूनने क्षुपतीति क्षुपा पकारस्य स्थाने मकारः शत्रुक्षपणकारिणी (!) । समर्पणेन परित्यागमात्रेण यया परान्भिनत्ति (!) शत्रून्विदारयति । यया विद्धस्य ताडितस्य जीवने संदेहः । यया राजा शत्रुमपराध्नोति हिनस्त्येव ॥२९॥ अशरव्याः अहिंसकाः शरव्यं शरलक्ष्यं तद्रहिताः करोति अनेन सर्वास्वपि दिक्षु परकीयशरलक्ष्यत्वं निवर्त्यते ॥३०॥ आवित्तपदयुक्ताः सप्त मन्त्रा आविदः । आवेदयन्ति ज्ञापयन्ति देवतान्य एनं यजमानमिति । अनिरुक्तं साक्षाद्देवतावाचकपदरहितं मन्त्रं वाचयेत् । हे मर्या मरणयोग्या मनुष्याः आविः प्रकाशोऽभूत् । सवमभिषेकम् ॥३१॥ आवित्तः आवेदितः ज्ञापितः वित्तो भोगप्रत्यययोरिति (पा° ८. २. ५८.) निपातितः अग्नये यजमानं ज्ञापितवानित्यर्थः ॥३२॥५॥३॥

सदसो मध्यऽउपविष्टस्य केशवस्य क्लीबस्य वदने लोहायसं ताम्रमर्पयेत् । दंशनशीला मृत्यव इहाभिप्रेताः । अवपूर्वो यजिर्नाशार्थे ॥१॥ केशवलोहायसदन्दशूकानामन्तरालवर्तित्वमुपपादयति अथ यदिति ॥२॥

The explanation of ४. १. ३ — ४. ४. ५ is wanting in AB.

यजमानहस्ते पञ्चाक्षावपनं विधत्ते अथेति अक्षा नाम कृपर्दकाः सुवर्णनिर्मिताः विभीदकफलानि सौवर्णा वा । ते चाक्षा द्यूतस्थाने निवपनीयाः तेषां चतुर्णामक्षाणां कृतसंज्ञा पञ्चा-

नां (!) कलिसंज्ञा तथा च शाखान्तरे स्तोमसंख्यायां कृतादिव्यवहारः कृतः ये वै चत्वारः स्तोमाः कृतं तत् अथ ये पञ्च कलिः स इति यदा पञ्चाप्यत्ता उत्ताना (? उत्पन्ना Cod.) भवन्ति तदा देवितुर्जयो भवति पञ्चसु वेकत्तूपासु (!) जय एव भविष्यतीत्यन्यत्रोक्तम् अतः कलेः सर्वाक्षाभिभावुकत्वात्सुन्वतोऽपि जयापेक्षित्वात्पश्चात्ततनिवाप इत्यर्थः । अयशब्दोऽक्षवाची ॥६॥ दण्डैर्यज्ञियवृक्षकाष्ठैः एनं सुन्वन्तं पृष्ठतः पश्चाद्भागे तूष्णीममन्त्रकं घ्नन्ति हन्युः । तस्माद्राज्ञोऽदण्ड्यभावः यथा राजा स्वा अपराद्धाः प्रजा दण्डयति एवं स्वयं न दण्ड्यः ॥७॥ रध्य रध्यतिर्वशगमने मदीयाय यजमानाय सर्वं वशीकुरु यद्वा द्यूतस्थानपरिलेखनरूपं कार्यं साधय ॥१५॥ पापवस्यसं पापिष्ठं कर्म नेदसत् न भवेत् ॥१९॥ आहवनीयस्योत्तरप्रदेशे स्थापितः स पूर्वाग्निः तस्मिन् तत्संस्पृष्टम् अधिदीव्यन्त्यत्रेति अधिदेवनं द्यूतभूमिः तां शुक्रग्रहस्य पुरोरुचा तं प्रत्नथा पूर्वथा विश्वथेमथेत्यनया कुरुतः । ४, २, १, ३-१० ॥२०॥ मन्थिग्रहपुरोरुचा अयं वेन इत्यनया विमितं विमिन्वन्त्यत्रेति विमितं चतुर्द्वारं चतुरस्रं मण्डपम् तद्विमिनुतः कुरुतः ॥२१॥ तस्मात्तेनाक्षनिधानेनाग्निमेव प्रीणितवान्भवति । देवनकाले यामेव पणत्वेन कृत्वा गां दीव्यध्वमिति द्यूतकरणप्रैषं ब्रूयात् ततोऽस्य पणत्वेनाङ्गीकृतां गामानीय घ्नन्ति हन्तिश्चा[ह]ननमात्रार्थो न मारणार्थः । पूर्वाग्निमाहवनीयं वहत इति पूर्वाग्निवाही तावनड्वाही दक्षिणा । तदिदं देवनं संनिधिबलादभिषेचनीयाख्यसोमयागमध्यगतमपि महाप्रकरणबलादिष्टिपशुसोमयागात्मकराजसूयशेष इति गम्यते प्रकरणेन संनिधेर्बा इति सिद्धान्तितम् ॥२३॥ अथ पय यास्विष्टकृदिडादिकं दर्शयति अथाहेति प्रधानसौविष्टकृतहविषोर्मध्ये यद्देवनादिकं कृतं तत्प्रजापतिमध्यनिधानरूपेण प्रशंसति ॥ २४ ॥ ४ ॥ ४ ॥

पञ्चमे ब्राह्मणे संसृपां हवींषि दशसंख्याकानि दशपेयाख्यसोमयागस्य दीक्षा उपसद्यागः ऋत्विग्विशेषेण दक्षिणाश्च विधीयन्ते । भर्गो यज्ञरूपं वीर्यम् ॥१॥ तमपसृतं गर्भमेताभिर्वक्ष्यमाणाभिः सावित्रादिभिरनुसमसर्पत् अनुक्रमेण प्राप्तवान् ॥२॥ सम्यक् सृप्यते प्राप्यते वीर्यमाभिरग्न्यादिभिर्देवताभिरिति संसृपो देवताः तासां हवींष्यपि तन्नामानि प्रत्येकमेकैकदिने कर्तव्यानि । अयमत्र क्रमः दशानां संसृपां हविषां मध्ये सप्त हवींषि प्रतिदिनं क्रमेणैकैकं कृत्वा सप्तमे दिने सप्तम्यामिष्टावतीतायामष्टमं हविर्निर्वपेत् अष्टपराह्णे (?) दशपेयस्य द्वादशपुण्डरीकस्रक्प्रतिमोकलक्षणां दीक्षां कृत्वा तदानीमेव प्रथमामुपसदं कृत्वा तदन्ते संसृपामष्टमं (!) नविानवपेत् अष्टमे दिने उपसदन्ते संसृपां नवमं हविर्निरुप्य नवमे दिवसे तृतीयोपसदन्ते संसृपां दशमं हविर्निरुप्य तस्मिन्नेवाहनि अग्नीषोमीयपशुप्रचारं कुर्यात् ततो दशमेऽहनि सोमोऽभिषूयते हुतशेषश्च पीयतऽइति दशपेयत्वम् । एकैकस्मिन्पात्रे दशभिर्ब्राह्मणैः पातव्यः सोमरसो यस्मिन् (स) दशपेयः ॥३॥ अत्र यदुक्तं सूत्रकृता (का° १५ ८. १५-१६) अस्यार्थः भक्षणार्थं सदःप्रसर्पणकाले सोम्यानां शतसंख्याकब्राह्मणानां मध्ये एकैकस्य पात्रस्य भक्षयितारो दश दश पुरुषाः यजमानस्य दश सोमपान्पितामहान्यजमानस्य पितामहस्तत्पितामह इत्येवं पितामहदशगणं संख्याय गणयित्वा प्रसर्पेयुः यद्वा सवित्रा प्रसवित्रेति संहितोक्तमन्त्रेण प्रसर्पणं कुर्यादित्यर्थः । अत्र पितामहगणनेन प्रसर्पणं पूर्वपक्षयति तदाहुरिति तद्दूषयति यद्वै (!) ज्येति ज्या ज्यानिर्निकृष्ट इत्यर्थः अत्रोपपत्तिमाह द्वौ त्रीनिति यदि पितामहाञ्जानीयुः तर्हि द्वौ त्रीनेव जानीयुः न सर्वान् तस्मात्सवित्रादिदशदेवताः

संख्याय प्रसर्पणं कुर्यात् ॥४॥ संसृप्शब्दवाच्यहविर्निर्वापकालं दर्शयति अभिषेचनीयाख्य-सोमयागस्योदवसानीयेष्टिर्यदा समाप्यते तदनन्तरमेतानि हवींषि निर्वपेत् ॥५॥ तत्प्रकारः कात्यायनेन (१५, ८, ४-९. १४) स्पष्टीकृतः सप्त हवींषि पूर्वमिष्टितन्त्रेण कृत्वा सप्त हिरण्मयपुण्डरीकानि दत्त्वा उत्तरासु तिसृषु पञ्च दत्त्वा द्वादशपुण्डरीकस्रक्प्रतिमोकदक्षिणां दशपेयदीक्षां कृत्वा सप्तम्यां संसृप्यागसम्बन्धिन्यां (सृप्र Cod.) सप्तमदिने क्रियमाणायां वारुण्यामिष्टावतीतायां पूर्वमेवाभिषेचनीयदशपेययोरपि द्विधा (!) सोमं क्रीत्वा दशपेयार्थं ब्रह्मागारे स्थापितं सोममाहृत्यासन्द्यभिमर्शनाद्यातिथ्यान्तं कृत्वा संसृपां हविषां मध्येऽन्त्यान्याग्नेयसौम्यवैष्णवानि त्रीणि हवींष्युपसत्प्रतिनिधित्वेन कर्तव्यानि उपसदामप्यग्निसोमविष्णुदेवता अन्तिमत्वात् (! °तास्वन्ति° ??)। तथाप्यग्निसोमयोरेकस्याप्यभावे दशसंख्यापूरणाभावात्तयोरपि दशमत्वमुच्यते तत्र तिसृषु देवतासु तद्देवत्यहविः[षु] पञ्च पुण्डरीकाणि देयानि भवन्ति । दत्तानि सप्त अन्तिमहविस्त्रये दास्यमानानि पञ्चेति द्वादश पुण्डरीकाणि भवन्ति । प्रकृतावप्सु स्नात्यपोऽस्नातीत्यादिना यद्दीक्षामात्रं विहितं तदत्रापवदितुं दत्तदास्यमानपुण्डरीकस्रक्प्रतिमोको विहितः ॥ ६-१३॥ पद्मगतपत्रनालविसानां स्वर्गान्तरिक्षभूम्याख्यलोकत्रयात्मकत्वात्तत्प्रतिमोकलक्षणदीक्षाकरणेनैनं यजमानमेषु त्रिषु लोकेषु दीक्षितवान्भवति ॥१४॥ पूर्वमभिषेचनीयदीक्षान्ते राजानं क्रीत्वा द्वैधमुपनह्य तत्रैकं दशपेयार्थं पर्युह्य ब्रह्मागारे स्थापयित्वा एकेनाभिषेचनीये प्रचारः कृतः अथ दशपेये तं ब्रह्मगृहे स्थापितं सोममाहृत्यासन्द्यामासद्यातिथ्यया प्रचरेयुः तदनन्तरमुपसद्यागः तत्राग्निसोमविष्णुदेवताकोपसत्प्रतिनिधित्वेन संसृप्यागसम्बन्धिनामुत्तमानां (संसृपया° Cod.) त्रयाणामाग्नेयसौम्यवैष्णवानामेव निर्वापं पूर्वपक्षयति यदोपसद्भिरिति ॥१५॥ तेन यथेष्टीति एकैकोपसत्स्थाने तेन एकेन हविषा यथेष्टि इष्टितन्त्रेण कुर्यात् उपसत्त्रयार्थमेतद्धविस्त्रयं कर्तव्यमिति शाखान्तरीयः पक्षः तमिमं निराकरोति तदु तथेति । नेयात् न प्रच्युतो भवेत् तत उपसदः पृथक्कुर्यात्तदन्तऽएतानि संसृपामन्तिमानि त्रीणि हवींषि चेष्टितन्त्रेण पृथक्कुर्यात् ॥१६॥१७॥ स एष दशपेयः क्रतुः सप्तदशस्तोमसाध्योऽग्निष्टोमसंस्थो भवति ॥१८॥ प्राकाशौ दीपस्तम्भावित्येके स्वर्णमयदर्पणावित्यपरे । वशां वन्ध्याम् । एकेनानडुहा युक्तस्य यवपूर्णस्य शकटस्य दानं विधत्ते अन्यतरत इति ॥२२॥ द्वादश चैत्रादयोऽधिकमासेन सह त्रयोदश वा मासाः ॥२३॥५॥४॥

अथ पञ्चमाध्याये पञ्चबिलसंज्ञकचरुः द्वादश प्रयुजां°हवींषि पशुद्वयं केशवपनीयातिरात्रः सौत्रामणीप्रयोगो राजसूयसमाप्त्युदवसानीयेष्टिर्विधीयते । वेदिमध्ये पूर्वार्धे पूर्वभागे ॥१॥ दिगादिभ्यः सकाशात्पुनर्निष्क्रीणाति स्वाधीनं कृतवान्भवति ॥२॥ प्रत्येकहविःप्रचारादनन्तरं बार्हस्पत्ये चरौ संस्रवानयनं विधत्ते संस्रवमिति ॥३॥ निदानेन कारणेन निरूपणे सति ॥८॥ पृषन् विन्दुयुक्तश्चित्रवर्णः ॥१०॥ वशा वन्ध्या । अप्रवीता वेतः प्रजननार्थान्निष्ठा अप्रजाता अगृहीतगर्भा ॥११॥ शितिपृष्ठः श्वेतपृष्ठः । अर्यमणः सूर्यस्य । अथैतस्य हविःपञ्चकस्य फलान्तराय राजसूयाद्बहिःप्रयोगं दर्शयति स हैतेनेति । विष्ठाव्राजी (!) एकत्र संनिविष्टाः (!) इतस्ततः पर्यटनमकुर्वन् अन्नाद्यकामः एकत्र (? एवन्न Cod.) स्थित्वैव सर्वतो मेऽन्नं स्यादिति कामयमानः ॥१२॥१॥५॥

द्वितीये प्रयुजां हवींषि विधीयन्ते । एष यष्टा ऋतून्मासान्प्रयुङ्क्ते कर्मणि योजयति ।

ऋतवोऽप्येनं युक्ताः सन्तो वहन्ति प्रापयन्तीष्टं फलम् इदानीमनुष्ठातापि प्रयुक्तानृतूननुलक्ष्य चरति अनुसरति तत्तदनुजनितफलं प्राप्तुकामः ॥१॥ मनुष्यस्यायुःपरिमाणस्यावगन्तुमशक्यत्वान्मासि-मासि यजनं न कर्तव्यम् । हविःषट्कस्यैकीकृत्य यागकरणेऽपि कंचिद्विशेषं पूर्वपक्षत्वेनोपन्यस्यति शम्यापराव्याधऽइति शम्या परास्ता विध्यति निपतति यत्रेति स शम्यापराव्याधो देशः तत्र देशे पूर्वैः षड्भिः प्राङ्मुखो यान्गाकन्यजेत आहवनीयात्पूर्वदेशे एकैकशम्याप्रासे षट् कर्तव्यानि पुनरावृत्तेन एकैकशम्याप्रासप्रदेशे अपराणि षट् कर्तव्यानि ॥२॥ तं पक्षं निराकृत्य पक्षान्तरं विधत्ते तड तथेति । समानबर्हींषि बर्हिःशब्दस्तन्त्रोपलक्षकः एकतन्त्राणि कर्तव्यानि । तासां पूर्वहविःषट्कस्य देवतानामग्निषोमादीनां षण्णां रूपमेतत् यथा शिशिरऽर्तौ युक्ताश्वा राजानः प्राञ्चः सन्त आप्रावृषं प्रावृट्कालपर्यन्तं यायुः गच्छेयुः तदिदं प्राङ्मुखं यानं पूर्वपूर्वशम्याप्रासेषु यष्टव्यानामग्न्यादिदेवतानां सम्बन्धि रूपम् । तैत्तिरीयके शिशिरादिषु षट्सु मासेषु राजभेदेन प्राङ्मुखा यात्रा प्रतिमासं व्यापारभेदश्च स्पष्टमाम्नातः आग्नेयमष्टाकपालं निर्वपति तस्माच्छिशिरे कुरुपाञ्चालाः प्राञ्चो यान्ति सौम्यं चरुं तस्माद्वसन्तं व्यवसायादयन्ति सावित्रं द्वादशकपालं तस्मात्पुरस्ताद्यवानां सवित्रा विरुन्धन्ते (°ते)

बार्हस्पत्यं चरुं सवित्रैव विरुध्य ब्राह्मणा (?) यवानादधते त्वाष्ट्रमष्टाकपालं रूपाण्येव तेन कुर्वते वैश्वानरं द्वादशकपालं तस्माज्जघन्ये नैदाघे प्रत्यञ्चं (!) कुरुपाञ्चाला यान्तीति । पूर्वाग्निमाहवनीयं वहन्तीति पूर्वाग्निवाहोऽनड्वाहः तेषां मध्ये द्वौ दक्षिणात्वेन देयौ ॥३॥ वार्षिकमभि वर्षऽर्तुसम्बन्धिनं प्रथममासमभिलक्ष्य पुनरावर्तेरन् शिशिरे दिग्विजयाय प्राञ्चः प्रयाताः कुरुपञ्चालादयो निदाघऽर्तुद्वितीयमासे परकीयं राष्ट्रं सर्वात्मना विनाश्य स्वदेशं प्रति प्रत्यङ्मुखा निवर्तन्ते तदेतत्सरस्वत्यादिदेवतानां प्रतिनिवृत्य (त्या° Cod.) यष्टव्यानां रूपम् । तेनोत्तरहविःषट्कयागेन प्रावृडादीन्षण्मासान्योजितवान्भवति ॥४॥ उक्तं द्वादशप्रयुग्घविःकरणेनऽर्तुप्रयोगं कुरुपञ्चालवृत्तान्तमुखेन द्रढयति तद्ध स्मैतदिति पूर्वं कुरुपञ्चाला आङ्गर्वदन्ति विचारयन्ति अस्मानृतवो युक्ताः सन्तो वहन्ति युक्तानृतूननुलक्ष्य चरामोऽनुसराम इति आशंसमा[ना]नामेषां राज्ञां मध्ये राजान आसुः ते राजसूययाजिनः प्रयुग्घविःकरणमृतुप्रयोगरूपमिति प्रत्यूचुरिति तस्यार्थः ॥५॥ तानि द्वादश हवींष्युद्दिशति आग्नेय इति ॥६॥ श्येनीं श्वेतवर्णाम् विचित्रगर्भी प्रज्ञातगर्भाम् । see ४. ५. २. १ ॥८॥ पृषतीं विन्दुयुक्तां विचित्रवर्णां गर्भिणीम् ॥९॥ शाखाभेदेन देवतान्तरसम्बन्धः ॥१०॥२॥५॥

तृतीये केशवपनीयातिरात्रस्य वैशेषिका धर्मा उच्यन्ते । पशुबन्धद्वयादनन्तरं केशवपनीयातिरात्रयागः कर्तव्यः । अभिषेचनीयसोमयागं कृत्वा संवत्सरपर्यन्तं केशवपनाकरणलक्षणं व्रतमाचर्यम् ततस्तद्व्रतविसर्जनार्थमेकः सोमयागः पौर्णमासीसुत्यः कार्यः स एव केशवपनीयातिरात्र उच्यते रात्रिमतीत्य वर्ततऽइत्यतिरात्रः अतिरात्रसंस्थया कार्य इत्यर्थः । विदुह्यात् (!) गतसारोऽपि भवेत् ॥१॥ केशवपनार्थमुपयुज्यमानः क्रियमाणः स्तोमः एकविंशादिस्तोमवान्यागः केशवपनीयः ॥२॥ तत्र सामगैर्गीयमानेषु स्तोत्रेषु चोदकेन प्रातःसवनादिषु त्रिवृदादिस्तोमप्राप्तौ तानपवदितुं विशेषं दर्शयति तस्यैकविंशमिति । प्रातःसवनमेकविंशस्तोमयुक्तं कर्तव्यम् माध्यन्दिनं सप्तदशस्तोमकम् अस्य सोमयागस्यातिरात्रसंस्था[ना]तृतीयसवनेऽग्निष्टोमवद्द्वादश स्तोत्राणि तत उत्तरं त्रीण्युक्थस्तोत्राणि एकं षोडशि-

स्तोत्रं रात्रिपर्यायस्तोत्राणि द्वादश तानि सर्वाण्यपि पञ्चदशस्तोमकानि कर्तव्यानि ॥३॥ स्तोमत्रिवृत्प्रचारस्तु (तृत्यिप्रचारतस्तु Cod.) प्राचीमारोहेत्यत्र (४.१.३.) दिक्समारोहणमन्त्रव्याख्यावसरे दर्शितः किं च पूर्वदिवसरात्रिशेषे उत्तरदिवसस्योषःकाले यज्ञसंस्थापकमेकं चरमं स्तोत्रं तृतीयपर्यायस्यान्ते रथन्तरसाम्ना गातव्यम् तत्संधिस्तोत्रमित्युच्यते तत्स्तोत्रं त्रिवृत्स्तोत्रयुक्तं कार्यम् । एकविंशादवरोहणं (ण Cod.) त्रिवृत्पर्यन्तं यत्स्तोमकरणमुक्तं तत्सूर्यलोकादिक्रमाद्भूम्यवस्थानात्मना प्रशंसति एष एवैकविंश इति य एष तपति स एकविंशः सूर्य इत्यर्थः तस्मादप्ययुञ्जन्तो अवरोहतीत्यर्थः सोऽवरुह्यावरुह्य (भोवरु° Cod.) त्रिवृद्रूपायामस्यां (अत्रवद्रू° Cod.) भूमिलक्षणायां प्रतिष्ठायां प्रतिष्ठितवान्भवति ॥४॥ माध्यन्दिनसवने रथन्तरं बृहत्साम वा पृष्ठस्तोत्रं प्रकृतौ विकल्पितम् अत्रैकं (°त्रैकं) नियमयति तस्य रथन्तरमिति । अस्य सोमयागस्यातिरात्रसंस्थात्वं प्रतिष्ठात्मना प्रशंसति अतिरात्र इति अतिरात्रसंस्थात्मना कृत एष क्रतुः प्रतिष्ठारूपः ॥५॥ अस्य क्रतोः केशावापव्रतविसर्जनार्थं (कशवा° Cod.) क्रियमाणत्वात्तदन्ते केशवापः कार्यः । तत्र कंचिद्विशेषं विधत्ते स वै न्येवेति स यजमानो निवर्तयते केशान्निकृन्तेदेव न वपेत् वपनं नाम मुण्डनं तन्न कुर्यात् निवर्तनं कर्तनं तत्कुर्यात् । एषा केशकर्तनलक्षणा व्रतचर्या यावज्जीवनं (वन Cod.) कर्तव्या न केशमुण्डनं कार्यम् कदाचिदप्यनुपानद्कोऽपादुकोऽस्यां (? चिदप्यपि उपानहो पादुके स्यां Cod.) भूमौ न प्रतितिष्ठति अवस्थानं न कुर्यात् ॥६॥ आसन्द्या अवरोहणसमयेऽपि उपानहौ पादुके उपमुञ्चेत इतस्ततः संचरणसमये रथं वा यानं वारोहेत् ॥७॥३॥५॥

समप्रधाने राजसूये सप्त सोमयागाः । तत्र पवित्राख्यसोमयागे विशेषाभावे स नोक्तः । अभिषेचनीयदशपेयकेशवपनीयातिरात्रेषु केषुचिद्वैशेषिका धर्मा उक्ताः । व्युष्टिद्विरात्रोऽग्निष्टोमातिरात्रः (त्रो Cod.) क्षत्रधृतिरिति सोमयागत्रयं केशवपनीयादनन्तरं कर्तव्यम् तेषां सोमयागविकृतित्वादग्निष्टोमवत्सर्वमङ्गजातं कर्तव्यम् तत्र विशेषाभावादत्र नोक्ताः । तदनन्तरकर्तव्या सौत्रामण्यभिधीयते तत्र पशुत्रयं (तत्पशु° Cod.) देवतासम्बन्धविशिष्टं विधत्ते त्वयेत इति । मल्हा (यूह्ला Cod.) मणिला (?) गलस्तनयुता अविर्मेषी । सुअपतराः सुखेन अपयितुमर्हाः ॥१॥ अवयत् (!) वेतेः खादनार्थाच्छान्दसः शप् (शव् Cod.) ॥६॥ कुवित् व्यर्थं मम पुत्रमबधीदिति क्रुद्धः सन् इन्द्रवर्जितमेव सोमयागमाजह्रे अनुष्ठितवान् यथा सोम इन्द्रवर्जितः सुतोऽभिषुतः स्यात्तथेत्यर्थः ॥७॥ विषङ् सर्वतः । तस्मादिन्द्रः प्रायश्चित्तियोग्य आस प्रायो विनाशः तस्य चित्तिः संधानं यस्येति तथाविधो बभूव ॥८॥ अवाचः अधोमुखादपानद्वारात् उत्तरात्प्राणाद्गुह्यच्छिद्रात् । कुवलकर्कन्धुबदराणि सूक्ष्मतरस्थूलमध्यपरिमाणानि बदरजातिफलानि । व्यार्ध्यत व्यृद्धो विहीनो बभूव ॥१०॥ सोमातिपूतः अपानद्वारादिभ्यः स्रुतसोमः । मङ्कुः मकि प्रतिबन्धे संचलद्गतिः (? सवल° Cod.) पङ्गुरिव । वसीयान्वसुमत्तरः ॥११॥ बतेति हर्षे ॥१२॥ इयं राजसुयाद्बहिरपि प्रयोक्तव्या ॥१३॥ नखिन्या कण्टकवत्या । अनुषुवति प्रेरितवान्भवति ॥१९॥ उत्तरवेद्यामेकमग्निं तद्दक्षिणभागे उद्धते प्रदेशे एकम् ॥२१॥ तां दर्भैः पावयेत् ॥२२॥ होत्रा द्विवारं वषट्कारः कर्तव्यः अध्वर्युणापि द्विवारं हवनं कार्यम् हवनानन्तरं भक्षार्थमाहरेयुः । एतस्य होममन्वितरौ द्वौ परिस्रुद्धोमौ होतव्यौ एष परिस्रुद्धोमो दक्षिणेऽग्नाविति प्रागुक्तः ॥२६॥ हुतायाः सुरायाः शेषं रु-

कमवति शतछिद्रे नवछिद्रे वा कुम्भे आसिच्य तं कुम्भं दक्षिणस्याहवनोयस्योपरि शिक्ये कृत्वा स्रवन्तं सोमवदादिपितॄणां त्रिभिस्तृचैरुपतिष्ठेत । अथ कुम्भ शतवितृष्ण इति रुक्मब्राह्मणे व्याख्यातम् (४. १. १३.) ॥२७॥ आहवनीयस्योपरि उन्नते प्रदेशे परिस्रुत्प्रचारार्थं दक्षिणत स्थापितस्याग्नेरुपरि '। विक्षरन्तीं कुम्भात्स्रवन्तीम् परिस्रुतम् । सोमदेवतायुतानां पितॄणां याज्यापुरोऽनुवाक्यारूपा उदीरतामवरऽउत्परास इत्याद्यास्तिस्र ऋचः बर्हिषदां पितॄणां बर्हिषद: पितर ऊत्यर्वागित्याद्यास्तिस्र ऋचः अग्निष्वात्तानां पितॄणामायन्तु नः पितरः सोम्यास इत्याद्यास्तिस्र ऋचः इति नवऽर्चः संहितायां क्रमेणाम्नाताः (१९, ४१-५१. ५५-६०.) ताभिरुपस्थानं कर्तव्यम् ॥२८॥ अथ पशुपुरोडाशार्थं सावित्रवारुणैन्द्राख्यं हविस्त्रयं विधत्ते अथैतानीति ॥२९॥ कात्यायनस्य (१५, १०, १९-२१) अयमर्थः एषा सौत्रामणी सोमातिपूतस्यापि भैषज्यार्थं कर्तव्येति राजसूयाद्बहिः प्रयोगः तत्र पशुपुरोडाशार्थं विहितान्येतानि सावित्रादिहवींषि अनुयाजान्ते यष्टव्यानि तदा छिद्रपिधानार्थं पशुवपाचरणानन्तरमवदानात्पुराश्विनेन पुरोडाशेन यागः कर्तव्य इत्येकः शाखान्तरीयः पक्षः पशुवपाप्रचरणानन्तरमेवैतैः सावित्रादिभिर्हविर्भिर्यागः करणीयः तदा यज्ञपतिछिद्रपिधानार्थमेतेषामिष्टत्वादाश्विनहविर्निर्वापो न कर्तव्य इत्यपरः पक्षः । तत्र पूवपक्षमाह स यदि हैतयापीति । भिषज्येत्समादध्यात् । तर्हि अनुयाजयागान्ते स्रुग्व्यूहनात्पुरस्तादेतैः सावित्रादिहविर्भिः प्रचरणं कर्तव्यम् पश्चाद्वा ऽइति सोमः पश्चाद्भागेऽतिपूतः अत एतस्मिन्काले यज्ञस्य पश्चाद्भागे एतद्धविःप्रचरणेन (एकीन Cod.) तं सोमातिपूतं पुरुषमपिहितवान्भवतीति तत्पक्षे हविरन्तरं विधत्ते आश्विनमु तह (!) इति तस्य प्रचारकालमाह अथ यदेति ॥३३॥ तं पक्षं निराकृत्य स्वमतं दर्शयति तड तथेति । स्पष्टोऽर्थः ॥३४॥४॥५॥

The explanation of ५. ५. १-१४ (किलास्तृणुत) is wanting in AB.

तस्मिन्नर्थे श्रुतिर्याज्ञवल्क्यं प्रमाणयति इति ह स्माहेति इन्द्रोऽप्येतयेष्ट्या वृत्रस्य स्थानं त्रयीविद्याशयमछिनत् तस्मात्परस्य स्थाननाशार्थमेतयाभिचारः कर्तव्यः ॥१४॥ अनयेष्ट्या कथं परकृताभिचारपरिहार इत्याशङ्क्य तत्कैमुतिकन्यायेन समर्थयते । किमु (किल Cod.) किमुत ॥१५॥ शतमानलक्षणमुक्तं पुरस्तात् (४. ३. २४.) । ब्रह्मा हि न प्रचरति हवनादिकमध्वर्युवर्गवन्न कोरोति न स्तुते उद्गातृवन्न स्तोत्रं प्रयुङ्क्ते न शंसति होतृवच्छस्त्रं न पठति । हिरण्यं साधनं कृत्वान्यदन्नादिकमुपभुञ्जते न तु हिरण्यमेव भक्षयन्ति (भक्ष॰ Cod.) अतो व्यवहारादिषु सुवर्णे दत्तेऽपि तस्य स्वरूपहानिर्नास्ति ॥१६॥ तिसृणां सवत्सानां भूयस्त्वम् होतुरपि नानामन्त्रपठनात् अतस्तासां होतृसम्प्रदानकत्वं युक्तम् ॥१७॥ वस्त्राणां सर्वशरीराछादकत्वाद्वासस्त्वम् अध्वर्योरपि यज्ञशरीरविस्तारकत्वमस्ति यज्ञस्य मात्रां विमिमीतऽउ त्व इति मन्त्रवर्णात् तत्र त्व एकोऽध्वर्युरिति यास्कवचनम् (निरु॰ १. ८.) ॥१८॥ त्रीणि शतमानानि तिस्रो धेनवः त्रीणि वासांसीति नव श्रुत्युक्तानि वत्ससहितानां पयस्विनीनां दानस्य सिद्धत्वात्तासां वत्सा अपि त्रय इति द्वादश । अग्नीध्रस्य ब्रह्मणा सह परिगणनाभावात्तद्दक्षिणां विहाय द्वादश दक्षिणाः गामग्नीधऽइति पृथग्दक्षिणाविधानात्तेन सह परिगणनपक्षे त्रयोदश भवन्ति संवत्सरस्यापि यथोक्तं चैत्रादयो (? ॰त्रा सौत्रदिस Cod.) मासा द्वादश यदा मलिम्लुचो भवति तदा त्रयोदश ॥१९॥५॥५॥

इति सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे माध्यन्दिनीयशतपथब्राह्मणभाष्ये पञ्चमकाण्डव्याख्या समाप्ता ॥५॥.॥

VARIOUS READINGS.

Adhyâya १. १. ४ वेद पश्च AB. - ६ ईश्वरा Sây. - १० विद्यात् Sây. - ३. ६ अपयन्ति A. - १४ Read: °नुवाक्या भवत्येका. - ४. ६ ककुद्मान् Sây. —

Adhyâya २. १. ६ निश्रेणीम् Sây. - २. १० अह A. - १३ यत्न्ये Sây. - ३. ६ and ७ पयेष्टि Sây. - ६ Read: प्रज्ञातमा°. - ४. ११ and १३ गावीधुक° Sây. —

Adhyâya ३. १. ७ तस्य श्वेतो Sây. - १० गवीधुकाः Sây. - ११ उद्दणवेष्टितं Sây. - १३ परिवृत्यै ABC. - १३ परिवृत्तिः Sây. - १३ परिमूर्णी वेष्टितमुखी पीतपुच्छी वा पर्यारिणी रोगग्रस्ता marginal gloss in B. - १३ वात्सीर् Sây. २. ३ सन् अयशो Sây. (against the accent). - ३. १ देवसुवां Sây. - ६ अतिष्ठाः Sây. - ६ धर्मा उप° Sây. - १३ क्लीमा भव° ABC. क्लीमां भव° Sây. - २४ सम्भरति ॥२४॥ काण्डस्यार्धं २३६॥ शतपथस्यार्धम् ॥१२०००॥ A. सम्भरति ॥२४॥ शतपथस्यार्धं॥ B. ॥३१२१॥ marginal gloss in B. In C. is no such indication of the Çatapatha's one half here ending, an indication, which I must remark is in direct conflict with the present bulk of the work, but which if it could be proved to be correct might contribute to trace some of its parts to a more modern origin, or at least to a later annexation to the whole, than the rest. - ५. ४ भिषिषिंचे AC. भिषिषिचे B. -

१८ °भिरभिषुणव° ABC. - २३ सण्हत्य A. - २५ सन्नन्वा C. सन्नन्वा AB. - २९ परान्भिनत्ति Sây. (?) —

Adhyâya ४. ३. २ सम्भृतो भवति A. B sec. m. C. सम्भृतो भवति B prima manu. - ५ युनप्मीति AC. - २३ रथवाह्णण° ABC. and thus also the mss. of Kâtyâyana. See पाणि° ८. ४. ८. - २४ °ग्निरुद्धृत्तो C. °ग्निरुद्धृतो A. B sec. m. and a marginal gloss at Kâty. १५. ६. २८. °ग्निरुधृतो B pr. m. from उधृ instead of उद्धृ. - ४. १ भरतानां C. - २३ पूर्वाग्निवाह्णौ Sây. - ५. १ सम्भृतो भवति ABC. - १ सोऽस्य गर्भ A. B pr. m. Sây. सोऽस्य भर्गं B sec. m. C. Bodl. Wils. 452. - १६ यथेष्टि Sây. see २. ३. ७. - °णाय ऋषभं A. B sec. m. —

Adhyâya ५. १. ९ तस्य ऋषभो A. B sec. m. - १० यत्पृषतो गौर्विशो A. see ३. १. ६. - २. ३ शिशिरे युक्ता AB. (युक्ताश्वा Sây.). - ४ दक्षिणा ऋतू° A. B pr. m. - ३. १ विद्युद्यात् Sây. - ४. १ शुश्रयतरा A. - १८ स एतेषु C. - २४ We expect इन्हेतेषां. - २६ आह्वरन्ति ? (आह्वरेयुः Sây.). - ३५ द्वि न स्त्री A. रयं वहति A. - ५. ३ मा नु ABC. - ५ मा नु AB. - ६ यो योनि° B pr. m. C. - ६ संलुप्याह्नि° A. - १० त्रयो वेदस्तस्मै A. - ११ सूया A. - १५ यन्वे° तन्वे ABC. —

ओम्। असद्वाऽइदमग्रऽआसीत्। तदाहुः किं तदसदासीदित्यृषयो वाव तेऽग्रेऽसदासीत्तदाहुः के तऽऋषय इति प्राणा वाऽऋषयस्ते यत्पुरास्मात्सर्वस्मादिदमिच्छन्तः श्रमेण तपसारिषंस्तस्मादृषयः ॥१॥ स योऽयं मध्ये प्राणः। एष एवेन्द्रस्तानेष प्राणान्मध्यत इन्द्रियेणैन्द्ध यदैन्द्ध तस्मादिन्ध इन्धो ह वै तमिन्द्र इत्याचक्षते परोऽक्षं परोऽक्षकामा हि देवास्तऽइद्धाः सप्त नाना पुरुषानसृजन्त ॥२॥ तेऽब्रुवन्। न वाऽइत्थं सन्तः शक्ष्यामः प्रजनयितुमिमान्सप्त पुरुषानेकं पुरुषं करवामेति तऽएतान्सप्त पुरुषानेकं पुरुषमकुर्वन्यदूर्ध्वं नाभेस्तौ द्वौ समौब्जन्यदवाङ्नाभेस्तौ द्वौ पक्षः पुरुषः पक्षः पुरुषः प्रतिष्ठैक आसीत् ॥३॥ अथ यैतेषां सप्तानां पुरुषाणां श्रीः। यो रस आसीत्तमूर्ध्वं समुदौहंस्तदस्य शिरोऽभवद्यच्छ्रियं समुदौहंस्तस्माच्छिरस्तस्मिन्नेतस्मिन्प्राणा अश्रयन्त तस्माद्वेवैतच्छिरोऽथ यत्प्राणा अश्रयन्त तस्मादु प्राणाः श्रियोऽथ यत्सर्वस्मिन्नश्रयन्त तस्मादु शरीरम् ॥४॥ स एव पुरुषः प्रजापतिरभवत्। स यः स पुरुषः प्रजापतिरभवदयमेव स योऽयमग्निश्चीयते ॥५॥ स वै सप्तपुरुषो भवति। सप्तपुरुषो ह्ययं पुरुषो यच्चत्वार आत्मा त्रयः पक्षपुच्छानि चत्वारो हि तस्य पुरुषस्यात्मा त्रयः पक्षपुच्छान्यथ यदेकेन पुरुषेणात्मानं वर्धयति तेन वीर्येणायमात्मा पक्षपुच्छान्युद्यच्छति ॥६॥ अथ यश्चितेऽग्निर्निधीयते। यैवैतेषां सप्तानां पुरुषाणां श्रीर्यो रसस्तमेतदूर्ध्वं समुदूहन्ति तदस्यैतच्छिरस्तस्मिन्नेतस्मिन्त्सर्वे देवाः श्रिता अत्र हि सर्वेभ्यो देवेभ्यो जुह्वति तस्माद्वेवैतच्छिरः ॥७॥ सोऽयं पुरुषः प्रजापतिरकामयत। भूयान्त्स्यां प्रजायेयेति

सोऽश्राम्यत्स तपोऽतप्यत स श्रान्तस्तेपानो ब्रह्मैव प्रथममसृजत त्रयीमेव विद्याꣳ सैवास्मै प्रतिष्ठाभवत्तस्मादाहुर्ब्रह्मास्य सर्वस्य प्रतिष्ठेति तस्मादनूच्य प्रतितिष्ठति प्रतिष्ठा ह्येषा यद्ब्रह्म तस्यां प्रतिष्ठायां प्रतिष्ठितोऽतप्यत ॥८॥ सोऽपोऽसृजत । वाच एव लोकाद्वागेवास्य सासृज्यत सेदꣳ सर्वमाप्नोद्यदिदं किं च यदाप्नोत्तस्मादापो यदवृणोत्तस्माद्वाः ॥९॥ सोऽकामयत । आभ्योऽद्भ्योऽधि प्रजायेयेति सोऽनया त्रय्या विद्यया सहापः प्राविशत्तत आण्डꣳ समवर्तत तदभ्यमृशदस्त्वित्यस्तु भूयोऽस्त्वित्येव तदब्रवीत्ततो ब्रह्मैव प्रथममसृज्यत त्रय्येव विद्या तस्मादाहुर्ब्रह्मास्य सर्वस्य प्रथमजमित्यपि हि तस्मात्पुरुषाद्ब्रह्मैव पूर्वमसृज्यत तदस्य तन्मुखमेवासृज्यत तस्मादनूचानमाहुरग्निकल्प इति मुखꣳ ह्येतदग्नेर्यद्ब्रह्म ॥१०॥ अथ यो गर्भोऽन्तरासीत् । सोऽग्निरसृज्यत स यदस्य सर्वस्याग्रमसृज्यत तस्मादग्रिरग्रिर्ह वै तमग्निरित्याचक्षते परोऽक्षं परोऽक्षकामा हि देवा अथ यदश्रु संक्षरितमासीत्सोऽश्रुरभवदश्रुर्ह वै तमश्व इत्याचक्षते परोऽक्षं परोऽक्षकामा हि देवा अथ यदरसदिव स रासभोऽभवदथ यः कपाले रसो लिप्त आसीत्सोऽजोऽभवदथ यत्कपालमासीत्सा पृथिव्यभवत् ॥११॥ सोऽकामयत । आभ्योऽद्भ्योऽधीमां प्रजनयेयमिति ताꣳ संक्लिश्याप्सु प्राविध्यत्तस्यै यः पराङ् रसोऽत्यक्षरत्स कूर्मोऽभवदथ यदूर्ध्वमुदौक्ष्यतेदं तद्यदिदमूर्ध्वमद्भ्योऽधि जायते सेयꣳ सर्वाप एवानुव्यैत्तदिदमेकमेव रूपꣳ समदृश्यताप एव ॥१२॥ सोऽकामयत । भूय एव स्यात्प्रजायेयेति सोऽश्राम्यत्स तपोऽतप्यत स श्रान्तस्तेपानः फेनमसृजत सोऽवेदन्यद्वाऽएतद्रूपं भूयो वै भवति श्राम्याण्येवेति स श्रान्तस्तेपानो मृदꣳ शुष्कापमूषसिकताꣳ शर्करामश्मानमयो हिरण्यमोषधिवनस्पत्यसृजत तेनेमां पृथिवीं प्राच्छादयत् ॥१३॥ ता वाऽएता नव सृष्टयः । इयमसृज्यत तस्मादाहुस्त्रिवृदग्निरितीयꣳ ह्यग्निरस्यै हि सर्वोऽग्निश्चीयते ॥१४॥ अभूद्वाऽइयं प्रतिष्ठेति । तद्भूमिरभवत्तामप्रथय-

त्सा पृथिव्यभवत्सेयꣳ सर्वा कृत्स्ना मन्यमानागायद्यदगायत्तस्मादियं गायत्र्यथो ऽआङ्गरग्निरिवास्यै पृष्ठे सर्वः कृत्स्नो मन्यमानोऽगायद्यदगायत्तस्मादग्निर्गायत्र इति तस्मादु हैतद्यः सर्वः कृत्स्नो मन्यते गायति वैव गीते वा रमते ॥१५॥ ब्राह्मणम् ॥१॥ ॥

सोऽकामयत प्रजापतिः । भूय एव स्यात्प्रजायेयेति सोऽग्निना पृथिवीं मिथुनꣳ समभवत्तत आण्डꣳ समवर्तत तदभ्यमृशत्पुष्यत्विति पुष्यतु भूयोऽस्त्वित्येव तदब्रवीत् ॥१॥ स यो गर्भोऽन्तरासीत् । स वायुरसृज्यताथ यदश्रु संक्षरितमासीत्तानि वयाꣳस्यभवन्नथ यः कपाले रसो लिप्त आसीत्ता मरीचयोऽभवन्नथ यत्कपालमासीत्तदन्तरिक्षमभवत् ॥२॥ सोऽकामयत । भूय एव स्यात्प्रजायेयेति स वायुनान्तरिक्षं मिथुनꣳ समभवत्तत आण्डꣳ समवर्तत तदभ्यमृशद्यशो बिभृहीति ततोऽसावादित्योऽसृज्यतैष वै यशोऽथ यदश्रु संक्षरितमासीत्सोऽश्मा पृश्निरभवदश्रुर्ह वै तमश्मेत्याचक्षते परोऽक्षं परोऽक्षकामा हि देवा अथ यः कपाले रसो लिप्त आसीत्ते रश्मयोऽभवन्नथ यत्कपालमासीत्सा द्यौरभवत् ॥३॥ सोऽकामयत । भूय एव स्यात्प्रजायेयेति स आदित्येन दिवं मिथुनꣳ समभवत्तत आण्डꣳ समवर्तत तदभ्यमृशद्रेतो बिभृहीति ततश्चन्द्रमा असृज्यतैष वै रेतोऽथ यदश्रु संक्षरितमासीत्तानि नक्षत्राण्यभवन्नथ यः कपाले रसो लिप्त आसीत्ता अवान्तरदिशो ऽभवन्नथ यत्कपालमासीत्ता दिशोऽभवन् ॥४॥ स इमांल्लोकान्त्सृष्ट्वाकामयत । ताः प्रजाः सृजेय या मऽएषु लोकेषु स्युरिति ॥५॥ स मनसा वाचं मिथुनꣳ समभवत् । सोऽष्टौ द्रप्सान्गर्भ्यभवत्तेऽष्टौ वसवोऽसृज्यन्त तानस्यामुपादधात् ॥६॥ स मनसैव । वाचं मिथुनꣳ समभवत्स एकादश द्रप्सान्गर्भ्यभवत्त एकादश रुद्रा असृज्यन्त तानन्तरिक्षऽउपादधात् ॥७॥ स मनसैव । वाचं मिथुनꣳ समभवत्स द्वादश द्रप्सान्गर्भ्यभवत्ते द्वादशादित्या असृज्यन्त तान्दिव्युपादधात् ॥८॥ स मन-

सैव । वाचं मिथुनꣳ समभवत्स गर्भ्यभवत्स विश्वान्देवानसृजत तान्दिक्षूपादधात् ॥९॥ अथोऽआहुः । अग्निमेव सृष्टं वसवोऽन्वसृज्यन्त तानस्यामुपादधाद्वायुꣳ रुद्रास्तानन्तरिक्षऽआदित्यमादित्यास्तान्दिवि विश्वे देवाश्चन्द्रमसं तान्दिक्षूपादधादिति ॥१०॥ अथोऽआहुः । प्रजापतिरेवेमाँल्लोकान्त्सृष्ट्वा पृथिव्यां प्रत्यतिष्ठत्तस्माऽइमा ओषधयोऽन्नमपच्यन्त तदाश्नात्स गर्भ्यभवत्स ऊर्ध्वेभ्य एव प्राणेभ्यो देवानसृजत येऽवाञ्चः प्राणास्तेभ्यो मर्त्याः प्रजा इत्यतो यतमथासृजत तथासृजत प्रजापतिस्त्वेवेदꣳ सर्वमसृजत यदिदं किं च ॥११॥ स प्रजाः सृष्ट्वा । सर्वमाजिमित्वा व्यस्रꣳसत तस्मादु हैतद्यः सर्वमाजिमेति व्येव स्रꣳसते तस्माद्विस्रस्तात्प्राणो मध्यत उदक्रामत्तस्मिन्नेनमुत्क्रान्ते देवा अजहुः ॥१२॥ सोऽग्निमब्रवीत् । त्वं मा संधेहीति किं मे ततो भविष्यतीति त्वया माचक्षान्तै यो वै पुत्राणाꣳ राध्यते तेन पितरं पितामहं पुत्रं पौत्रमाचक्षते त्वया माचक्षान्ताऽअथ मा संधेहीति तथेति तमग्निः समदधात्तस्मादेतं प्रजापतिꣳ सन्तमग्निरित्याचक्षतऽआ ह वाऽएनेन पितरं पितामहं पुत्रं पौत्रं चक्षते य एवं वेद ॥१३॥ तमब्रवीत् । कस्मिंस्त्वोपधास्यामीति हितऽएवेत्यब्रवीत्प्राणो वै हितं प्राणो हि सर्वेभ्यो भूतेभ्यो हितस्तद्यदेनꣳ हितऽउपादधात्तस्मादाहोपधास्याम्युपदधाम्युपाधामिति ॥१४॥ तदाहुः । किꣳ हितं किमुपहितमिति प्राण एव हितं वागुपहितं प्राणे ह्ययं वागुपेव हिता प्राणस्त्वेव हितमङ्गान्युपहितं प्राणे हीमान्यङ्गान्युपेव हितानि ॥१५॥ सोऽस्यैष चित्य आसीत् । चेतव्यो ह्यस्यासीत्तस्माच्चित्यश्चित्य उ एवायं यजमानस्य भवति चेतव्यो ह्यस्य भवति तस्माद्वेव चित्यः ॥१६॥ तदेता वाऽअस्य ताः । पञ्च तन्वो व्यस्रꣳसन्त लोम त्वङ्माꣳसमस्थि मज्जा ता एवैताः पञ्च चितयस्तद्यत्पञ्च चितीश्चिनोत्येताभिरेवैनं तत्तनूभिश्चिनोति यच्चिनोति तस्माच्चितयः ॥१७॥ स यः स प्रजापतिर्व्यस्रꣳसत । संवत्सरः सोऽथ या अस्यैताः पञ्च तन्वो

व्यस्रꣳसन्तर्तवस्ते पञ्च वा ऋतवः पञ्चैताश्चितयस्तद्यत्पञ्च चितीश्चिनोत्यृतुभिरे-
वैनं तच्चिनोति यच्चिनोति तस्माच्चितयः ॥१८॥ स यः स संवत्सरः प्रजापतिर्व्य-
स्रꣳसत । अयमेव स वायुर्योऽयं पवतेऽथ या अस्य ता ऋतवः पञ्च तन्वो व्य-
स्रꣳसन्त दिशस्ताः पञ्च वै दिशः पञ्चैताश्चितयस्तद्यत्पञ्च चितीश्चिनोति दिग्भिरे-
वैनं तच्चिनोति यच्चिनोति तस्माच्चितयः ॥१९॥ अथ यश्चितेऽग्निर्निधीयते । असौ
स आदित्यः स एष एवैषोऽग्निश्चित एतावन्नु तद्यदेनमग्निः समदधात् ॥२०॥ ॥श-
तम् ३४०० ॥॥ अथो आहुः । प्रजापतिरेव विस्रस्तो देवानब्रवीत्सं मा धत्तेति
ते देवा अग्निमब्रुवंस्त्वयीमं पितरं प्रजापतिं भिषज्यामेति स वा अहमेतस्मिन्त्स-
र्वस्मिन्नेव विशानीति तथेति तस्मादेतं प्रजापतिꣳ सन्तमग्निरित्याचक्षते ॥२७॥
तं देवा अग्नावाहुतिभिरभिषज्यन् । ते यां-यामाहुतिमजुहवुः सा-सैनं पक्वेष्टका
भूत्वाप्यपद्यत तद्यदिष्टात्समभवंस्तस्मादिष्टकास्तस्मादग्निनेष्टकाः पचन्त्याहुतीरेवै-
नास्तत्कुर्वन्ति ॥२२॥ सोऽब्रवीत् । यावद्यावद्वै जुहुथ तावत्तावन्म कं भवतीति
तद्यदस्मा इष्टे कमभवत्तस्माद्वेवेष्टकाः ॥२३॥ तद्ध स्माहाक्ताद्यः । य एव यजु-
ष्मतीर्भूयसीरिष्टका विद्यात्सोऽग्निं चिनुयाद्भूय एव तत्पितरं प्रजापतिं भिषज्यती-
ति ॥२४॥ अथ ह स्माह ताण्ड्यः । क्षत्रं वै यजुष्मत्य इष्टका विशो लोकम्पृणा
अत्ता वै क्षत्रियोऽन्नं विड्यत्र वा अत्तुरन्नं भूयो भवति तद्राष्ट्रꣳ समृद्धं भवति
तदेधते तस्माल्लोकम्पृणा एव भूयसीरुपदध्यादित्येतदह तयोर्वचोऽन्या त्वेवात
स्थितिः ॥२५॥ स एष पिता पुत्रः । यदेषोऽग्निमसृजत तेनैषोऽग्नेः पिता यदेत-
मग्निः समदधात्तेनैतस्याग्निः पिता यदेष देवानसृजत तेनैष देवानां पिता यदेतं
देवाः समदधुस्तेनैतस्य देवाः पितरः ॥२६॥ उभयꣳ हैतद्भवति । पिता च पुत्रश्च
प्रजापतिश्चाग्निश्चाग्निश्च प्रजापतिश्च प्रजापतिश्च देवाश्च देवाश्च प्रजापतिश्च य एवं
वेद ॥२७॥ स उपदधाति । तया देवतयेति वाग्वै सा देवताङ्गिरस्वदिति प्राणो

वाऽअङ्गिरा ध्रुवा सीदेति स्थिरा सीदेत्येतदथो प्रतिष्ठिता सीदेति वाचा चैवैनमेतत्प्राणेन च चिनोति वाग्वाऽअग्निः प्राण इन्द्र ऐन्द्राग्नोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतच्चिनोतीन्द्राग्नी वै सर्वे देवाः सर्वदेवत्योऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतच्चिनोति ॥२८॥ तदाहुः । कस्मादस्याऽअग्निश्चीयतऽइति यत्र वै सा देवता व्यस्रꣳसत तदिमामेव रसेनानु व्यक्षरत्तं यत्र देवाः समस्कुर्वꣳस्तदेनमस्याऽएवाधि समभरन्त्सैषैकैवेष्टकेयमेवेयꣳ ह्यग्निरस्यै हि सर्वोऽग्निश्चीयते सेयं चतुःस्रक्तिर्दिशो ह्यस्यै स्रक्तयस्तस्माच्चतुःस्रक्तय इष्टका भवन्तीमाꣳ ह्यनु सर्वा इष्टकाः ॥२९॥ तदाहुः । यदेवमेकेष्टकोऽथ कथं पञ्चेष्टक इतीयं न्वेव प्रथमा मृन्मयीष्टका तद्यत्किं चात्र मृन्मयमुपदधात्येकैव सेष्टकाथ यत्पशुशीर्षाण्युपदधाति सा पश्विष्टकाथ यद्रुक्मपुरुषाऽउपदधाति यद्धिरण्यशकलैः प्रोक्षति सा हिरण्येष्टकाथ यत्स्रुचाऽउपदधाति यदुलूखलमुसले याः समिध आदधाति सा वानस्पत्येष्टकाथ यत्पुष्करपर्णमुपदधाति यत्कूर्मं यद्दधि मधु घृतं यत्किं चात्रान्नमुपदधाति सैवान्नं पञ्चमीष्टकैवमु पञ्चेष्टकः ॥३०॥ तदाहुः । कतरत इष्टकायाः शिर इति यत उपस्पृश्य यजुर्वदतीत्यु हैकऽआहुः स स्वयमातृण्णाया एवार्धादुपस्पृश्य यजुर्वदेत्तथो हास्यैताः सर्वाः स्वयमातृण्णामभ्यावृत्ता भवन्तीति न तथा कुर्यादङ्गानि वाऽअस्यैतानि परूꣳषि यदिष्टका यथा वाऽअङ्गेऽङ्गे पर्वन्पर्वञ्छिरः कुर्यात्तादृक्तद्यो वाव चितेऽग्निर्निधीयते तदेवैतासाꣳ सर्वासाꣳ शिरः ॥३१॥ तदाहुः । कति पशवोऽग्नाऽउपधीयन्तऽइति पञ्चेति न्वेव ब्रूयात्पञ्च ह्येतान्पशूनुपदधाति ॥३२॥ अथोऽएक इति ब्रूयात् । अविरितीयं वाऽअविरियꣳ हीमाः सर्वाः प्रजा अवतीयमु वाऽअग्निरस्यै हि सर्वोऽग्निश्चीयते तस्मादेक इति ब्रूयात् ॥३२॥ अथो द्वाविति ब्रूयात् । अवीऽइतीयं चासौ चेमे हीमाः सर्वाः प्रजा अवतो यन्मृदियं तद्यदापोऽसौ तन्मृच्चापश्चेष्टका भवन्ति तस्माद्द्वाविति ब्रूयात् ॥३३॥ अथो गौरि-

ति ब्रूयात् । इमे वै लोका गौर्यद्धि किं च गच्छतीमांस्तल्लोकान्गच्छतीमऽउ लोका एषोऽग्निश्चितस्तस्माद्गौरिति ब्रूयात् ॥३४॥ तदाहुः । कस्मै कामायाग्निश्चीयतऽइति सुपर्णो मा भूत्वा दिवं वहादित्यु हैकऽआहुर्न तथा विद्यादेतद्वै रूपं कृत्वा प्राणाः प्रजापतिरभवन्नेतद्रूपं कृत्वा प्रजापतिर्देवानसृजतैतद्रूपं कृत्वा देवा अमृता अभवंस्तद्यदेवैतेन प्राणा अभवन्यत्प्रजापतिर्यद्देवास्तदेवैतेन भवति ॥३५॥ ब्राह्मणम् ॥२॥

प्रजापतिर्वाऽइदमग्रऽआसीत् । एक एव सोऽकामयत स्यां प्रजायेयेति सोऽश्राम्यत्स तपोऽतप्यत तस्माच्छ्रान्तात्तेपानादापोऽसृज्यन्त तस्मात्पुरुषात्तप्तादापो जायन्ते ॥१॥ आपोऽब्रुवन् । क्व वयं भवामेति तप्यध्वमित्यब्रवीत्ता अतप्यन्त ताः फेनमसृजन्त तस्मादपां तप्तानां फेनो जायते ॥२॥ फेनोऽब्रवीत् । क्वाहं भवानीति तप्यस्वेत्यब्रवीत्सोऽतप्यत स मृदमसृजतैतद्वै फेनस्तप्यते यदप्स्वावेष्टमानः प्लवते स यदोपहन्यते मृदेव भवति ॥३॥ मृदब्रवीत् । क्वाहं भवानीति तप्यस्वेत्यब्रवीत्सातप्यत सा सिकता असृजतैतद्वै मृत्तप्यते यदेनां विकृषन्ति तस्माद्यद्यपि सुमार्त्स्नं विकृषन्ति सैकतमिवैव भवत्येतावन्नु तद्यत्क्वाहं भवानि क्वाहं भवानीति ॥४॥ सिकताभ्यः शर्करामसृजत । तस्मात्सिकताः शर्करैवान्ततो भवति शर्करया अश्मानं तस्माच्छर्कराश्मैवान्ततो भवत्यश्मनोऽयस्तस्मादश्मनोऽयो धमन्त्ययसो हिरण्यं तस्मादयो बहुध्मातꣳ हिरण्यसंकाशमिवैव भवति ॥५॥ तद्यदसृज्यताक्षरत् । तद्यदक्षरत्तस्मादक्षरं यदष्टौ कृत्वोऽक्षरत्सैवाष्टाक्षरा गायत्र्यभवत् ॥६॥ अभूद्वाऽइयं प्रतिष्ठेति । तद्भूमिरभवत्तामप्रथयत्सा पृथिव्यभवत्तस्यामस्यां प्रतिष्ठायां भूतानि च भूतानां च पतिः संवत्सरायादीक्षन्त भूतानां पतिर्गृहपतिरासीदुषाः पत्नी ॥७॥ तद्यानि तानि भूतानि । ऋतवस्तेऽथ यः स भूतानां पतिः संवत्सरः सोऽथ या सोषाः पत्न्यौषसी सा तानीमानि भूतानि च भू-

तानां च पतिः संवत्सरऽउषसि रेतोऽसिञ्चत्स संवत्सरे कुमारोऽजायत सोऽरोदीत् ॥८॥ तं प्रजापतिरब्रवीत् । कुमार किꣳ रोदिषि यच्छ्रमात्तपसोऽधि जातोऽसीति सोऽब्रवीदनपहतपाप्मा वाऽअस्म्यहितनामा नाम मे धेहीति तस्मात्पुत्रस्य जातस्य नाम कुर्यात्पाप्मानमेवास्य तदपहन्त्यपि द्वितीयमपि तृतीयमभिपूर्वमेवास्य तत्पाप्मानमपहन्ति ॥९॥ तमब्रवीद्रुद्रोऽसीति । तद्यदस्य तन्नामाकरोदग्निस्तद्रूपमभवदग्निर्वै रुद्रो यदरोदीत्तस्माद्रुद्रः सोऽब्रवीज्ज्यायान्वाऽअतोऽस्मि धेह्येव मे नामेति ॥१०॥ तमब्रवीत्सर्वोऽसीति । तद्यदस्य तन्नामाकरोदापस्तद्रूपमभवन्नापो वै सर्वोऽद्भ्यो हीदꣳ सर्वं जायते सोऽब्रवीज्ज्यायान्वाऽअतोऽस्मि धेह्येव मे नामेति ॥११॥ तमब्रवीत्पशुपतिरसीति । तद्यदस्य तन्नामाकरोदोषधयस्तद्रूपमभवन्नोषधयो वै पशुपतिस्तस्माद्यदा पशव ओषधीर्लभन्तेऽथ पतीयन्ति सोऽब्रवीज्ज्यायान्वाऽअतोऽस्मि धेह्येव मे नामेति ॥१२॥ तमब्रवीदुग्रोऽसीति । तद्यदस्य तन्नामाकरोद्वायुस्तद्रूपमभवद्वायुर्वाऽउग्रस्तस्माद्यदा बलवद्वात्युग्रो वातीत्याहुः सोऽब्रवीज्ज्यायान्वाऽअतोऽस्मि धेह्येव मे नामेति ॥१३॥ तमब्रवीदशनिरसीति । तद्यदस्य तन्नामाकरोद्विद्युत्तद्रूपमभवद्विद्युद्वाऽअशनिस्तस्माद्यं विद्युद्धन्त्यशनिरवधीदित्याहुः सोऽब्रवीज्ज्यायान्वा अतोऽस्मि धेह्येव मे नामेति ॥१४॥ तमब्रवीद्भवोऽसीति । तद्यदस्य तन्नामाकरोत्पर्जन्यस्तद्रूपमभवत्पर्जन्यो वै भवः पर्जन्याद्धीदꣳ सर्वं भवति सोऽब्रवीज्ज्यायान्वाऽअतोऽस्मि धेह्येव मे नामेति ॥१५॥ तमब्रवीन्महान्देवोऽसीति । तद्यदस्य तन्नामाकरोच्चन्द्रमास्तद्रूपमभवत्प्रजापतिर्वै चन्द्रमाः प्रजापतिर्वै महान्देवः सोऽब्रवीज्ज्यायान्वाऽअतोऽस्मि धेह्येव मे नामेति ॥१६॥ तमब्रवीदीशानोऽसीति । तद्यदस्य तन्नामाकरोदादित्यस्तद्रूपमभवदादित्यो वाऽईशान आदित्यो ह्यस्य सर्वस्येष्टे सोऽब्रवीदेतावान्वाऽअस्मि मा मेतः परो नाम धा इति ॥१७॥ तान्येतान्यष्टावग्निरूपाणि । कुमारो न-

वमः सैवाग्निस्त्रिवृत्ता ॥१८॥ यद्वेवाष्टावग्निरूपाणि । अष्टाक्षरा गायत्री तस्मादाहुर्गायत्रोऽग्निरिति सोऽयं कुमारो रूपाण्यनुप्राविशन्न वाऽअग्निं कुमारमिव पश्यन्त्येतान्येवास्य रूपाणि पश्यन्त्येतानि हि रूपाण्यनुप्राविशत् ॥१९॥ तमेतꣳ संवत्सर एव चिनुयात् । संवत्सरेऽनुब्रूयाद्द्वयोरित्यु हैकऽआहुः संवत्सरे वै तद्रेतोऽसिच्यत्स संवत्सरे कुमारोऽजायत तस्माद्द्वयोरेव चिनुयाद्द्वयोरनुब्रूयादिति संवत्सरे त्वेव चिनुयात्संवत्सरेऽनुब्रूयाद्यद्वाव रेतः सिक्तं तदेव जायते तत्ततो विक्रियमाणमेव वर्धमानꣳ शेते तस्मात्संवत्सरऽएव चिनुयात्संवत्सरेऽनुब्रूयात्तस्य चितस्य नाम करोति पाप्मानमेवास्य तदपहन्ति चित्रनामानं करोति चित्रोऽसीति सर्वाणि हि चित्राण्यग्निः ॥२०॥ ब्राह्मणम् ॥३॥ प्रथमोऽध्यायः [३६.] ॥ ॥

प्रजापतिरग्निरूपाण्यभ्यध्यायत् । स योऽयं कुमारो रूपाण्यनुप्रविष्ट आसीत्तमन्वैच्छत्सोऽग्निरवेदनु वै मा पिता प्रजापतिरिच्छति हन्त तद्रूपमसानि यन्मऽएष न वेदेति ॥१॥ स एतान्पञ्च पशूनपश्यत् । पुरुषमश्वं गामविमजं यदपश्यत्तस्मादेते पशवः ॥२॥ स एतान्पञ्च पशून्प्राविशत् । स एते पञ्च पशवोऽभवत्तमु वै प्रजापतिरन्वैच्छत् ॥३॥ स एतान्पञ्च पशूनपश्यत् । यदपश्यत्तस्मादेते पशवस्तेष्वेतमपश्यत्तस्माद्वेवैते पशवः ॥४॥ स ऐक्षत । इमे वाऽअग्निरिमानेवात्मानमभिसंस्करवै यथा वाऽअग्निः समिद्धो दीप्यतऽएवमेषां चक्षुर्दीप्यते यथाग्नेर्धूम उद्यतऽएवमेषामूष्मोद्यते यथाग्निरभ्याहितं दहत्येवं बप्सति यथाग्नेर्भस्म सीदत्येवमेषां पुरीषꣳ सीदतीमे वाऽअग्निरिमानेवात्मानमभिसंस्करवाऽइति तान्नाना देवताभ्य आलिप्सत वैश्वकर्मणं पुरुषं वारुणमश्वमैन्द्रमृषभं त्वाष्ट्रमविमाग्नेयमजꣳ ॥५॥ स ऐक्षत । नाना वाऽइदं देवताभ्य आलिप्सेऽग्नेर्वाहꣳ रूपाणि कामये हन्तैनानग्निभ्यः कामायालभाऽइति तानग्निभ्यः कामायालभत तद्यदग्निभ्य इति बहूनि ह्यग्निरूपाण्यभ्यध्यायदथ यत्कामायेति कामेन ह्यालभत तानाप्रीतान्पर्यग्नि-

कृतानुदीचो नीत्वा समज्ञपयत् ॥६॥ स ऐक्षत । या वै श्रीरभ्यधासिषमिमास्ता
शीर्षसु हन्त शीर्षाण्येवोपदधा इति स शीर्षाण्येवोत्कृत्योपाधत्ताथेतराणि कुसि-
न्धान्यप्सु प्राप्लावयद्येन यज्ञꣳ समस्थापयन्नेन्मे यज्ञो विकृष्टोऽसदित्यात्मा वै य-
ज्ञो नेन्मेऽयमात्मा विकृष्टोऽसदित्येतेन पशुनेष्ट्वा तत्प्रजापतिरपश्यद्यथैतस्याग्ने-
रन्तं न पर्यैत् ॥७॥ स ऐक्षत । यमिममात्मानमप्सु प्रापिप्लवं तमन्विच्छानीति त-
मन्वैच्छत्तद्यदेषामप्सु प्रविद्धानां प्रत्यतिष्ठत्ता अपः समभरदथ यदस्यां तां मृदं तदु-
भयꣳ सम्भृत्य मृदं चापश्चेष्टकामकरोत्तस्मादेतदुभयमिष्टका भवति मृच्चापश्च ॥८॥
स ऐक्षत । यदि वा इदमित्थमेव सदात्मानमभिसंस्करिष्ये मर्त्य कुणपोऽनपह-
तपाप्मा भविष्यामि हन्तैतदग्निना पचानीति तदग्निनापचत्तदेनदमृतमकरोदेतद्धि
हविरमृतं भवति यदग्निना पचन्ति तस्मादग्निनेष्टकाः पचन्त्यमृता एवैनास्तत्कुर्व-
न्ति ॥९॥ तद्यदिष्ट्वा पशुनापश्यत् । तस्मादिष्टकास्तस्मादिष्ट्वैव पशुनेष्टकाः कुर्या-
दनिष्टका ह ता भवन्ति याः पुरा पशोः कुर्वन्त्यथो ह तदन्यदेव ॥१०॥ तद्यास्ताः
श्रियः । एतानि तानि पशुशीर्षाण्यथ यानि तानि कुसिन्धान्येतास्ताः पञ्च चित-
यस्तद्यत्पशुशीर्षाण्युपधाय चितीश्चिनोत्येतैरेव तच्छीर्षभिरेतानि कुसिन्धानि संद-
धाति ॥११॥ तऽएते सर्वे पशवो यदग्निः । तस्मादग्नौ पशवो रमन्ते पशुभिरेव
तत्पशवो रमन्ते तस्माद्यस्य पशवो भवन्ति तस्मिन्नग्निराधीयतेऽग्निर्ह्येष यत्पशव-
स्ततो वै प्रजापतिरग्निरभवत् ॥१२॥ तद्धैकऽआहुः । अत्रैवैतैः सर्वैः पशुभिर्यजेत
यद्वाऽएतैरत्र सर्वैः प्रजापतिरयक्ष्यत तद्वाग्नेरन्तं पर्यैष्यत्तद्यदेतैरत्र सर्वैर्यजेत तद्-
वाग्नेरन्तं परीयादिति न तथा कुर्याद्देवानां तदितादियादथो पथस्तदियादथो किं
ततः सम्भरेदेतानि वाऽएतत्कुसिन्धान्येताश्चितीः सम्भरति तस्मात्तथा न कुर्यात्
॥१३॥ यद्वेवैतान्पशूनालभते । आयतनमेवैतदग्नये करोति न ह्यनायतने कश्चन
रमतेऽन्नं वाऽआयतनं तदेतत्पुरस्तान्निदधाति तदेनं पश्यन्नग्निरुपावर्तते ॥१४॥

पुरुषोऽश्वो गौरविरजो भवन्ति । एतावन्तो वै सर्वे पशवोऽन्नं पशवस्तद्यावदन्नं तदेतत्पुरस्तान्निदधाति तदेनं पश्यन्नग्निरुपावर्तते ॥१५॥ पञ्च भवन्ति । पञ्च ह्येतेऽग्नयो यदेताश्चितयस्तेभ्य एतत्पञ्चायतनानि निदधाति तदेनं पश्यन्नग्निरुपावर्तते ॥१६॥ तद्यदग्निभ्य इति । बहवो ह्येतेऽग्नयो यदेताश्चितयोऽथ यत्कामायेति यथा तं काममाप्नुयाद्यजमानो यत्काम एतत्कर्म कुरुते ॥१७॥ पुरुषं प्रथममालभते । पुरुषो हि प्रथमः पशूनामथाश्वं पुरुषꣳ ह्यन्वश्वोऽथ गामश्वꣳ ह्यनु गौरथाविं गाꣳ ह्यन्वविरथाजमविꣳ ह्यन्वजस्तदेनान्यथापूर्वं यथाश्रेष्ठमालभते ॥१८॥ तेषां विषमा रशनाः स्युः । पुरुषस्य वर्षिष्ठाथ ह्रसीयस्यथ ह्रसीयसी तद्यथारूपं पशूनाꣳ रशनाः करोत्यपापवस्यसाय सर्वास्त्वेव समाः स्युः सर्वाः सदृश्यः सर्वे ह्येते समाः सर्वे सदृशा अग्नयो ह्युच्यन्तेऽन्नꣳ ह्युच्यन्ते तेन समास्तेन सदृशाः ॥१९॥ तदाहुः । कथमस्यैषोऽग्निः पञ्चेष्टकः सर्वः पशुष्वारब्धो भवतीति पुरोडाशकपालेषु न्वेवाप्यतऽइयं प्रथमा मृन्मयीष्टकाथ यत्पशुमालभते तेन पश्विष्टकाप्यतेऽथ यद्यूपमभितो हिरण्यशकलौ भवतस्तेन हिरण्येष्टकाप्यतेऽथ यदिध्मो यूपः परिधयस्तेन वानस्पत्येष्टकाप्यतेऽथ यदाज्यं प्रोक्षण्यः पुरोडाशस्तेनान्नं पञ्चमीष्टकाप्यतऽएवमु हास्यैषोऽग्निः पञ्चेष्टकः सर्वः पशुष्वारब्धो भवति ॥२०॥ तेषां चतुर्विꣳशतिः सामिधेन्यः । चतुर्विꣳशत्यर्धमासो वै संवत्सरः संवत्सरोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतत्समिन्द्धे ॥२१॥ यद्वेव चतुर्विꣳशतिः । चतुर्विꣳशत्यक्षरा वै गायत्री गायत्रोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतत्समिन्द्धे ॥२२॥ यद्वेव चतुर्विꣳशतिः । चतुर्विꣳशो वै पुरुषो दश हस्त्या अङ्गुलयो दश पाद्याश्चत्वार्यङ्गानि पुरुषः प्रजापतिः प्रजापतिरग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतत्समिन्द्धे ॥२३॥ उभयीर्गायत्रीश्च त्रिष्टुभश्चान्वाह । प्राणो गायत्र्यात्मा त्रिष्टुप्प्राणमेवास्य गायत्रीभिः समिन्द्धऽआत्मानं त्रिष्टुब्भिर्मध्ये त्रिष्टुभो भवन्त्यभि-

तो गायत्र्यो मध्ये ह्ययमात्माभितः प्राणा भूयसीः पुरस्ताद्गायत्रीरन्वाह कनीयसीरुपरिष्टाद्भूयाꣳसो हीमे पुरस्तात्प्राणाः कनीयाꣳस उपरिष्टात् ॥२४॥ सोऽन्वाह । समास्त्वाग्नऽऋतवो वर्धयन्त्विति प्रजापतिं विस्रस्तं यत्राग्निः समदधात्तमब्रवीद्या मत्संमिताः सामिधेन्यस्ताभिर्मा समिन्त्स्वेति ॥२५॥ स एता अपश्यत् । समास्त्वाग्नऽऋतवो वर्धयन्त्विति समाश्च त्वाग्नऽऋतवश्च वर्धयन्त्वित्येतत्संवत्सरा ऋषयो यानि सत्येति संवत्सराश्च त्वऽऋषयश्च सत्यानि च वर्धयन्त्वित्येतत्सं दिव्येन दीदिहि रोचनेनेत्यसौ वाऽआदित्यो दिव्यꣳ रोचनं तेन संदीदिहीत्येतद्विश्वा आभाहि प्रदिशश्चतस्र इति सर्वा आभाहि प्रदिशश्चतस्र इत्येतत् ॥२६॥ ता एता एकव्याख्यानाः । एतमेवाभि यथैतमेव संस्कुर्यादेतꣳ संदध्यादेतं जनयेत्ता आग्नेय्यः प्राजापत्या यदग्निरपश्यत्तेनाग्नेय्यो यत्प्रजापतिꣳ समैन्द्ध तेन प्राजापत्याः ॥२७॥ द्वादशाप्रियः । द्वादश मासाः संवत्सरः संवत्सरोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतदाप्रीणाति ॥२८॥ यद्वेव द्वादश । द्वादशाक्षरा वै जगतीयं वै जगत्यस्याꣳ हीदꣳ सर्वं जगदियमु वाऽअग्निरस्यै हि सर्वोऽग्निश्चीयते यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतदाप्रीणाति ॥२९॥ यद्वेव द्वादश । द्वादशाक्षरा वै जगती जगती सर्वाणि छन्दाꣳसि सर्वाणि छन्दाꣳसि प्रजापतिः प्रजापतिरग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतदाप्रीणाति ॥३०॥ ता एता ऊर्ध्वा अस्य समिधो भवन्तीति । प्रजापतिं विस्रस्तं यत्राग्निः समदधात्तमब्रवीद्या मत्संमिता आप्रियस्ताभिर्माप्रीणीहीति ॥३१॥ स एता अपश्यत् । ऊर्ध्वा अस्य समिधो भवन्तीत्यूर्ध्वा ह्येतस्य समिद्धस्य समिधो भवन्त्यूर्ध्वा शुक्रा शोचीꣳष्यग्नेरित्यूर्ध्वानि ह्येतस्य शुक्राणि शोचीꣳष्यर्चीꣳषि भवन्ति द्युमत्तमेति वीर्यवत्तमेत्येतत्सुप्रतीकस्येति सर्वतो वाऽअग्निः सुप्रतीकः सूनोरिति यदेनं जनयति तेनास्यैष सूनुः ॥३२॥ ता एता एकव्याख्यानाः । एतमेवाभि यथैतमेव संस्कुर्यादेतꣳ संदध्यादेतं जनयेत्ता

आग्नेय्यः प्राजापत्या यदग्निरपश्यत्तेनाग्नेय्यो यत्प्रजापतिमाप्रीणात्तेन प्राजापत्याः ॥३३॥ ता विषमा विषमपदाः । विषमाक्षरा विषमाणि हि छन्दाꣳस्यथो यान्यस्याध्यात्ममङ्गानि विषमाणि तान्यस्यैताभिराप्रीणाति ॥३४॥ वैश्वानरः पशुपुरोडाशः । वैश्वानरो वै सर्वेऽग्नयः सर्वेषामग्नीनामुपाप्त्यै ॥३५॥ यद्वेव वैश्वानरः । ऋतवो ह्येते यदेताश्चितयोऽग्नयो वाऽऋतव ऋतवः संवत्सरः संवत्सरो वैश्वानरो यदग्नय इति स्यादति तद्रेचयेद्द्वादशकपालो द्वादश मासाः संवत्सरः संवत्सरो वैश्वानर आग्नेय्यो याज्यानुवाक्या अग्निरूपाणामुपाप्त्यै कामवत्यः कामानामुपाप्त्यै ॥३६॥ तद्धैके । इत्यैवैतानि पशुशीर्षाणि विहृत्योपदधत्युभयेनैते पशव इति ते ह ते मर्त्याः कुणपाः सम्भवन्त्यनाप्रीतानि हि तानि तद्ध तथाषाढिः सौश्रोमतेयस्योपदधुः स ह क्षिप्रऽएव ततो ममार ॥३७॥ हिरण्मयान्यु हैके कुर्वन्ति । अमृतेष्टका इति वदन्तस्ता ह ता अनृतेष्टका न हि तानि पशुशीर्षाणि ॥३८॥ मृन्मयान्यु हैके कुर्वन्ति । उत्सन्ना वाऽएते पशवो यद्धि किंचोत्सन्नमियं तस्य सर्वस्य प्रतिष्ठा तद्यत्रैते पशवो गतास्तत एनानधि सम्भराम इति न तथा कुर्याद्यो वाऽएतेषामावृतं च ब्राह्मणं च न विद्यात्तस्यैतऽउत्सन्नाः स्युः स एतानेव पञ्च पशूनालभेत यावदस्य वशः स्यात्तान्हैतान्प्रजापतिः प्रथम आलेभे श्यापर्णः सायकायनोऽन्तमोऽथ ह स्मैतानेवान्तरेणालभन्तेऽथैतर्हि द्वावेवालभ्येते प्राजापत्यश्च वायव्यश्च तयोरेतो ब्राह्मणमुच्यते ॥३९॥ ब्राह्मणम् ॥४ [२. १.] ॥ प्रथमः प्रपाठकः । कण्डिकासंख्या ११० ॥॥

प्राजापत्यं चरका आलभन्ते । प्रजापतिरग्निं चित्वाग्निरभवत्तद्यदेतमालभन्ते तदेवाग्नेरन्तं पर्येतीति ॥१॥ श्यामो भवति । द्वयानि वै श्यामस्य लोमानि शुक्लानि च कृष्णानि च द्वन्द्वं मिथुनं प्रजननं तदस्य प्राजापत्यꣳ रूपं तूपरो भवति तूपरो हि प्रजापतिः ॥२॥ तस्यैकविꣳशतिः सामिधेन्यः । द्वादश मासाः पञ्चर्त-

वस्त्रय इमे लोका असावादित्य एकविꣳश एष प्रजापतिः प्रजापतिरग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतत्समिन्द्धे ॥३॥ यद्वेवैकविꣳशतिः । एकविꣳशो वै पुरुषो दश हस्त्या अङ्गुलयो दश पाद्या आत्मैकविꣳशः पुरुषः प्रजापतिः प्रजापतिरग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतत्समिन्द्धे ॥४॥ उभयीर्गायत्रीश्च त्रिष्टुभश्चान्वाह । तासामुक्तो बन्धुरुक्तम्वेवान्वृचꣳ हिरण्यगर्भवत्याघारमाघारयति प्रजापतिर्वै हिरण्यगर्भः प्रजापतिरग्निर्द्वादशाप्रियस्तासामुक्तो बन्धुरुक्तम्वेवान्वृच प्राजापत्यः पशुपुरोडाशो य एव पशोर्बन्धुः स पुरोडाशस्य द्वादशकपालो द्वादश मासाः संवत्सरः संवत्सरः प्रजापतिः कद्वत्यो याज्यानुवाक्याः को हि प्रजापतिः ॥५॥ अथैतं वायवे नियुत्वते । शुक्लं तूपरमालभते प्रजापतिः प्रजाः सृष्ट्वानुव्यैक्षत तस्यात्यानन्देन रेतः परापतत्सोऽजः शुक्लस्तूपरो लप्सुद्यभवद्रसो वै रेतो यावानु वै रसस्तावानात्मा तद्यदेतमालभते तद्देवाग्नेरत्तं पर्येति शुक्लो भवति शुक्लꣳ हि रेतस्तूपरो भवति तूपरꣳ हि रेतो वायवे भवति प्राणो वै वायुर्नियुत्वते भवत्युदानो वै नियुतः प्राणोदानावेवास्मिन्नेतद्दधाति ॥६॥ यद्वेवैतं वायवे नियुत्वते । शुक्लं तूपरमालभते प्रजापतिं विस्रस्तं यत्र देवाः समस्कुर्वꣳस्स योऽस्मात्प्राणो मध्यत उदक्रामत्तमस्मिन्नेतेन पशुनादधुस्तथैवास्मिन्नयमेतद्दधाति वायवे भवति प्राणो वै वायुर्नियुत्वते भवत्युदानो वै नियुतः प्राणोदानावेवास्मिन्नेतद्दधाति शुक्लो भवति शुक्लो हि वायुस्तूपरो भवति तूपरो हि वायुः ॥७॥ तस्य सप्तदश सामिधेन्यः । सप्तदशो वै संवत्सरो द्वादश मासाः पञ्चर्तवः संवत्सरः प्रजापतिः प्रजापतिरग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतत्समिन्द्धे ॥८॥ यद्वेव सप्तदश । सप्तदशो वै पुरुषो दश प्राणाश्चत्वार्यङ्गान्यात्मा पञ्चदशो ग्रीवाः षोडश्यः शिरः सप्तदशं पुरुषः प्रजापतिः प्रजापतिरग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतत्समिन्द्धे ॥९॥ उभयीर्गायत्रीश्च त्रिष्टुभश्चान्वाह । तासामुक्तो

बन्धुरुक्तम्वेवान्वृचं द्वादशाप्रियस्तासामुक्तो बन्धुरुक्तम्वेवान्वृचं प्राजापत्यः पशुपुरोडाशोऽत्रो स काम उपाप्त इति ह स्माह माहित्थिर्य चरकाः प्राजापत्ये पशावाहुरिति ॥१०॥ यद्वेव वायव्यः पशुर्भवति । प्राजापत्यः पशुपुरोडाशोऽर्धꣳ ह प्रजापतेर्वायुरर्धं प्रजापतिस्तद्यदुभौ वायव्यौ स्यातामुभौ वा प्राजापत्यावर्धꣳ हैवास्य कृतꣳ स्यान्नार्धमथ यद्वायव्यः पशुर्भवति प्राजापत्यः पशुपुरोडाशस्तेन हैवैतꣳ सर्वं कृत्स्नं प्रजापतिꣳ संस्करोति ॥११॥ यद्वेव वायव्यः पशुर्भवति । प्राजापत्यः पशुपुरोडाशः प्रजापतिं विस्रस्तं यत्र देवाः समस्कुर्वन्त्स योऽस्मात्प्राणो मध्यत उदक्रामत्तमस्मिन्नेतेन पशुनादधुरथास्यैतेन पुरोडाशेनात्मानꣳ समस्कुर्वन्त्स यत्प्राजापत्यो भवति प्रजापतिर्ह्यात्मा द्वादशकपालो द्वादश मासाः संवत्सरः संवत्सरः प्रजापतिः कद्वत्यौ याज्यानुवाक्ये को हि प्रजापतिः ॥१२॥ तद्यद्वपां पुरस्ताज्जुहोति । य एवायं पुरस्तात्प्राणस्तमस्मिन्नेतद्दधात्यथ यदेतेन मध्यतश्चरन्ति मध्यतो ह्ययमात्माथ यद्धविषोपरिष्टाच्चरन्ति य एवायमुपरिष्टात्प्राणस्तमस्मिन्नेतद्दधाति शुक्लवत्यो याज्यानुवाक्याः स्युः शुक्लरूपाणामुपाप्त्यै नियुत्वत्यो यदेव नियुत्वद्रूपं तस्योपाप्त्यै ॥१३॥ तदु वाऽआहुः । वपाया एव शुक्लवत्यौ स्यातामेतावद्धि पशौ शुक्लं यद्वपाशुक्लवत्यौ नियुत्वत्यौ हविषो यदेव नियुत्वद्रूपं तस्योपाप्त्याऽइति ॥१४॥ यद्वेवैतं पशुमालभते । एतस्मिन्ह पशौ सर्वेषां पशूनाꣳ रूपं यत्तूपरो लम्सुदी तत्पुरुषस्य रूपं तूपरो हि लम्सुदी पुरुषो यत्तूपरः केसरवांस्तदश्वस्य रूपं तूपरो हि केसरवानश्वो यदष्टाशफस्तद्गो रूपमष्टाशफो हि गौरथ यदस्यावेरिव शफास्तदवे रूपं यदजस्तदजस्य तद्यदेतमालभते तेन हैवास्यैते सर्वे पशव आलब्धा भवन्त्यतो यतमदस्य कर्मोपकल्पेतैते वा पञ्च पशव एष वा प्राजापत्य एष वा नियुत्वतीयः ॥१५॥ तं पौर्णमास्यामालभेत । अमावास्यायामालभेतेत्यु हैकऽआहुरसौ वै चन्द्रः प्रजापतिः स एताꣳ रात्रिमिह वसति तद्य-

यथोपतिष्ठन्तमालभेतैवं तदिति ॥१६॥ तद्वै पौर्णमास्यामेव । असौ वै चन्द्रः पशु-
स्तं देवाः पौर्णमास्यामालभन्ते यत्रैनं देवा आलभन्ते तदेनमालभाऽइति तस्मा-
त्पौर्णमास्यां यद्वेव पौर्णमास्यां पौर्णमासी ह वाव प्रथमा व्युवास तस्माद्वेव पौ-
र्णमास्याम् ॥१७॥ तद्वै फाल्गुन्यामेव । एषा ह संवत्सरस्य प्रथमा रात्रिर्यत्फा-
ल्गुनी पौर्णमासी योत्तरैषोत्तमा या पूर्वा मुखत एव तत्संवत्सरमारभते ॥१८॥
स वाऽइष्ट्वैव पौर्णमासेन । अथ पशुमालभेत पौर्णमासेन वाऽइन्द्रो वृत्रं पा-
प्मानꣳ हत्वापहतपाप्मैतत्कर्मारभत तथैवैतद्यजमानः पौर्णमासेनैव वृत्रं पाप्मा-
नꣳ हत्वापहतपाप्मैतत्कर्मारभते ॥१९॥ तद्वाऽउपाꣳशु भवति । एतद्वैतैः प्रजा-
पतिः पशुभिः कर्मैयेष तद्वात्रानद्धेवेवासानिरुक्तमिव तस्मादुपाꣳशु ॥२०॥ यद्वे-
वोपाꣳशु । प्राजापत्यं वाऽएतत्कर्म प्रजापतिꣳ ह्येतेन कर्मणारभतेऽनिरुक्तो वै
प्रजापतिः ॥२१॥ यद्वेवोपाꣳशु । रेतो वाऽअत्र यज्ञ उपाꣳशु वै रेतः सिच्यते
वपा पशुपुरोडाशो हविरेतावान्हि पशुः ॥२२॥ अष्टकायामुखाꣳ सम्भरति ।
प्राजापत्यमेतदहर्यदष्टका प्राजापत्यमेतत्कर्म यदुखा प्राजापत्यऽएव तदहन्प्राजा-
पत्यं कर्म करोति ॥२३॥ यद्वेवाष्टकायाम् । पर्वैतत्सवत्सरस्य यदष्टका पर्वैतदग्ने-
र्यदुखा पर्वण्येव तत्पर्व करोति ॥२४॥ यद्वेवाष्टकायाम् । अष्टका वाऽउखा नि-
धिर्द्वाऽउद्धी तिरश्ची रास्ना तच्चतुश्चतस्र ऊर्ध्वास्तदष्टावष्टकायामेव तदष्टकां करोति
॥२५॥ ॥शतम् ३५००॥॥ अमावास्यायां दीक्षते । अमावास्यायै वाऽअधि यज्ञस्ता-
यते यतो यज्ञस्तायते ततो यज्ञं जनयानीति ॥२६॥ यद्वेवामावास्यायाꣳ । रेतो
वाऽएतद्भूतमात्मानꣳ सिञ्चत्युखायां योनौ यद्दीक्षते तस्माऽएतं पुरस्ताल्लोकं करो-
ति यद्दीक्षितो भवति तं कृतं लोकमभि जायते तस्मादाहुः कृतं लोकं पुरुषो
ऽभि जायतऽइति ॥२७॥ स यत्कनीयः संवत्सराद्दीक्षितः स्यात् । अलोका इष्ट-
का उपदध्यादिष्टका लोकानतिरिच्येरन्नथ यद्भूयसो लोकान्कृत्वेष्टका नानूपदध्या-

ल्लोका इष्टका अतिरिच्येरन्नथ यदमावास्यायां दीक्षित्वामावास्यायां क्रीणाति त-
द्यावन्तमेव लोकं करोति तावतीरिष्टका उपदधात्यथास्यापूर्यमाणपक्षे सर्वोऽग्नि-
श्चीयते ॥२८॥ तदाहुः । यद्यावत्य एतस्याग्नेरिष्टकास्तावन्ति कर्येऽहोरात्राणि स-
म्पद्यन्तेऽथ यान्यूर्ध्वानि क्रयादहानि कथमस्य ते लोका अनूपहिता भवन्तीति
यद्वाऽअमावास्यायां दीक्षित्वामावास्यायां क्रीणाति तद्यावन्तमेव लोकं करोति
तावतीरिष्टका उपदधात्यथ यान्यूर्ध्वानि क्रयादहानि तस्मिन्नवकाशेऽध्वर्युरग्निं चि-
नोति को हि चिनुयान्न च सोऽवकाशः स्याद्यावन्ति वै संवत्सरस्याहोरात्राणि
तावत्य एतस्याग्नेरिष्टका उप च त्रयोदशो मासस्त्रयोदशो वाऽएष मासो यान्यू-
र्ध्वानि क्रयादहानि तद्या अमूस्त्रयोदशस्य मास इष्टकास्ताभिरस्य ते लोका अनू-
पहिता भवन्ति तत्समा लोकाश्चेष्टकाश्च भवन्ति ॥२९॥ एतद्वै येव प्रथमा पौर्ण-
मासी । तस्यां पशुमालभते या प्रथमाष्टका तस्यामुखां सम्भरति या प्रथमामा-
वास्या तस्यां दीक्षतऽएतद्वै यान्येव संवत्सरस्य प्रथमान्यहानि तान्यस्य तदारभते
तानि च तदाप्नोत्यथातः सम्पदेव ॥३०॥ तदाहुः । कथमस्यैतत्कर्म संवत्सरमग्नि-
माप्नोति कथं संवत्सरेणाग्निना सम्पद्यतऽइत्येतेषां वै पञ्चानां पशूनां चतुर्विं-
शतिः सामिधेन्यो द्वादशाप्रियस्तत्षट्त्रिंशदेकादशानुयाजा एकादशोपयजस्तदष्टा-
पञ्चाशत् ॥३१॥ ततो याष्टाचत्वारिंशत् । साष्टाचत्वारिंशदक्षरा जगतीयं वै
जगत्यस्यां हीदं सर्वं जगदियमु वाऽअग्निरस्यै हि सर्वोऽग्निश्चीयते यावानग्नि-
र्यावत्यस्य मात्रा तावत्तद्भवति ॥३२॥ यद्वेवाष्टाचत्वारिंशत् । अष्टाचत्वारिंशद-
क्षरा वै जगती जगती सर्वाणि छन्दांसि सर्वाणि छन्दांसि प्रजापतिः प्रजापति-
रग्निर्यावानग्निर्यावत्यस्य मात्रा तावत्तद्भवति ॥३३॥ अथ यानि दश । सा दशा-
क्षरा विराड्विराडग्निर्दश दिशो दिशोऽग्निर्दश प्राणाः प्राणा अग्निर्यावानग्निर्यावत्यस्य
मात्रा तावत्तद्भवति ॥३४॥ वपा पशुपुरोडाशः । तत्षष्टिः षष्टिर्मासस्याहोरात्राणि

तन्मासमाप्नोति मास आप्त ऋतुमाप्नोत्यृतुः संवत्सरं तत्संवत्सरमग्निमाप्नोति ये च संवत्सरे कामा अथ यदतोऽन्यद्यदेव संवत्सरेऽन्नं तत्तत् ॥३५॥ अथैतस्य प्राजापत्यस्य । एकविꣳशतिः सामिधेन्यो द्वादशाप्रियस्तत्त्रयस्त्रिꣳशदेकादशानुयाजा एकादशोपयजस्तत्पञ्चपञ्चाशद्वपा पशुपुरोडाशो हविस्तदष्टापञ्चाशत्स यो ऽष्टापञ्चाशति कामो ऽत्रैव तमाप्नोति द्वावाघारौ तत्षष्टिः स यः षष्ट्यां कामो ऽत्रैव तमाप्नोत्यथ यदतोऽन्यद्यदेव संवत्सरेऽन्नं तत्तत् ॥३६॥ अथैतस्य नियुत्वतीयस्य । सप्तदश सामिधेन्यो द्वादशाप्रियस्तदेकान्न त्रिꣳशदेकादशानुयाजा एकादशोपयजस्तदेकपञ्चाशद्वपा पशुपुरोडाशो हविस्तच्चतुष्पञ्चाशद्द्वावाघारौ द्वौ स्विष्टकृतौ तदष्टापञ्चाशत्स यो ऽष्टापञ्चाशति कामो ऽत्रैव तमाप्नोति वनस्पतिश्च वसाहोमश्च तत्षष्टिः स यः षष्ट्यां कामो ऽत्रैव तमाप्नोत्यथ यदतोऽन्यद्यदेव संवत्सरेऽन्नं तत्तदेवमु हास्यैतत्कर्म संवत्सरमग्निमाप्नोत्येवꣳ संवत्सरेणाग्निना सम्पद्यते ॥३७॥

तदाहुः । नैतस्य पशोः समिष्टयजूꣳषि जुहुयान्न हृदयशूलेनावभृथमभ्यवेयादारम्भो वा ऽएषो ऽग्नेः पशुर्व्यवसर्गो देवतानाꣳ समिष्टयजूꣳषि सꣳस्थावभृथो नेदारम्भे देवता व्यवसृजानि नेद्यज्ञꣳ सꣳस्थापयानीति स वै समेव स्थापयेदेतेन पशुनेष्ट्वा तत्प्रजापतिरपश्यद्यथैतस्याग्निरन्तं न पर्यैत्तस्मात्सꣳस्थापयेद्यद्वेव सꣳस्थापयति प्राण एष पशुस्तस्य यदन्तरियात्प्राणस्य तदन्तरियाद्यद्व वै प्राणस्यान्तरियात्तत एवं म्रियेत तस्मात्समेव स्थापयेद्यथातो व्रतानामेव ॥३८॥ तदाहुः । नैतेन पशुनेष्ट्वोपरि शयीत न माꣳसमश्नीयान्न मिथुनमुपेयात्पूर्वदीक्षा वा ऽएष पशुरनवक्लृप्तं वै तद्यद्दीक्षित उपरि शयीत यन्माꣳसमश्नीयाद्यन्मिथुनमुपेयादिति नेत्त्वेवैषा दीक्षा नेव हि मेखलास्ति न कृष्णाजिनमिष्टकां वा ऽएतां कुरुते तस्माद्व काममेवोपरि शयीतैतद्व सर्वमन्नं यदेते पशवस्तदस्यात्राप्तमारब्धं भवति तद्यानि कानि चामधुनो ऽशनानि तेषामस्य सर्वेषां कामाशनं यदि लभेत मिथुनं तु नोपेयात्पुरा

मैत्रावरुण्यै पयस्यायै तस्योपरि बन्धुः ॥३१॥ तदाहुः । दद्यादेतस्मिन्यज्ञे दक्षिणां नेन्मेऽयं यज्ञोऽदक्षिणोऽसद्ब्रह्मणऽआदिष्टदक्षिणां दद्याद्ब्रह्मा वै सर्वो यज्ञस्तदस्य सर्वो यज्ञो भिषज्यितो भवतीति न तथा कुर्यादिष्टकां वाऽएतां कुरुते तद्यथेष्टकायामिष्टकायां दद्यात्तादृक्तदमुर्ह्यैव दद्याद्यदस्योपकल्पेत ॥४०॥ ब्राह्मणम् ॥१ [२. २.] ॥ ॥

एतद्ध देवा अब्रुवन् । चेतयध्वमिति चितिमिच्छतेति वाव तदब्रुवंस्तेषां चेतयमानानां प्रजापतिरिमां प्रथमां स्वयमातृण्णां चितिमपश्यत्तस्मात्तां प्रजापतिनोपदधाति ॥१॥ तमग्निरब्रवीत् । उपाहमायानीति केनेति पशुभिरिति तथेति पश्विष्टकया ह तदुवाचैषा वाव पश्विष्टका यद्दूर्वेष्टका तस्मात्प्रथमायै स्वयमातृण्णायाऽअनन्तर्हिता दूर्वेष्टकोपधीयते तस्मादस्याऽअनन्तर्हिता ओषधयोऽनन्तर्हिताः पशवोऽनन्तर्हितोऽग्निरनन्तर्हितो ह्येष एतयोपैत् ॥२॥ तेऽब्रुवन् । चेतयध्वमेवेति चितिमिच्छतेति वाव तदब्रुवन्नित ऊर्ध्वमिच्छतेति तेषां चेतयमानानामिन्द्राग्नी च विश्वकर्मा चान्तरिक्षं द्वितीयां स्वयमातृण्णां चितिमपश्यंस्तस्मात्तामिन्द्राग्निभ्यां च विश्वकर्मणा चोपदधाति ॥३॥ तान्वायुरब्रवीत् । उपाहमायानीति केनेति दिग्भिरिति तथेति दिश्याभिर्ह तदुवाच तस्माद्द्वितीयायै स्वयमातृण्णायाऽअनन्तर्हिता दिश्या उपधीयन्ते तस्मादन्तरिक्षादनन्तर्हिता दिशोऽनन्तर्हितो वायुरनन्तर्हितो ह्येष एताभिरुपैत् ॥४॥ तेऽब्रुवन् । चेतयध्वमेवेति चितिमिच्छतेति वाव तदब्रुवन्नित ऊर्ध्वमिच्छतेति तेषां चेतयमानानां परमेष्ठी दिवं तृतीयां स्वयमातृण्णां चितिमपश्यत्तस्मात्तां परमेष्ठिनोपदधाति ॥५॥ तमसावादित्योऽब्रवीत् । उपाहमायानीति केनेति लोकम्पृणयेति तथेत्येष वाव लोकम्पृणात्मना ह्येव तदुवाच तस्मात्तृतीया स्वयमातृण्णानन्तर्हिता लोकम्पृणायाऽउपधीयते तस्मादसावादित्योऽनन्तर्हितो दिवोऽनन्तर्हितो ह्येष एतयोपैत् ॥६॥ तदेता वाव

षड् देवताः । इदꣳ सर्वमभवन्यदिदं किं च ते देवाश्चऽर्षयश्चाब्रुवन्निमा वाव षड् देवता इदꣳ सर्वमभूवन्नुप तज्जानीत यथा वयमिहाप्यसामेति तेऽब्रुवंश्चेतयध्वमिति चितिमिच्छतेति वाव तदब्रुवंस्तदिच्छत यथा वयमिहाप्यसामेति तेषां चेतयमानानां देवा द्वितीयां चितिमपश्यन्नृषयश्चतुर्थीम् ॥७॥ तेऽब्रुवन् । उप वयमायामेति केनेति यदेषु लोकेषूपेति तथेति तद्यदूर्ध्वं पृथिव्या अर्वाचीनमन्तरिक्षात्तेन देवा उपायंस्तदेषा द्वितीया चितिरथ यदूर्ध्वमन्तरिक्षादर्वाचीनं दिवस्तेनऽर्षय उपायंस्तदेषा चतुर्थी चितिः ॥८॥ ते यदब्रुवन् । चेतयध्वमिति चितिमिच्छतेति वाव तदब्रुवन्यच्चेतयमाना अपश्यंस्तस्माच्चितयः ॥९॥ प्रजापतिः प्रथमां चितिमपश्यत् । प्रजापतिरेव तस्या आर्षेयं देवा द्वितीयां चितिमपश्यन्देवा एव तस्या आर्षेयमिन्द्राग्नी च विश्वकर्मा च तृतीयां चितिमपश्यंस्तऽएव तस्या आर्षेयमृषयश्चतुर्थीं चितिमपश्यन्नृषय एव तस्या आर्षेयं परमेष्ठी पञ्चमीं चितिमपश्यत्परमेष्ठ्येव तस्या आर्षेयꣳ स यो हैतदेवं चितीनामार्षेयं वेदार्षेयवत्यो हास्य बन्धुमत्यश्चितयो भवन्ति ॥१०॥ ब्राह्मणम् ॥ २ [२. ३.] ॥ द्वितीयोऽध्यायः [३७.] ॥ ॥

एतद्ध देवा अब्रुवन् । चेतयध्वमिति चितिमिच्छतेति वाव तदब्रुवंस्तेषां चेतयमानानाꣳ सवितैतानि सावित्राण्यपश्यद्यत्सवितापश्यत्तस्मात्सावित्राणि स एतामष्टागृहीतामाकूतिमजुहोत्ताꣳ हुत्वेमामष्टधाविहितामषाढामपश्यत्पुरैव सृष्टाꣳ सतीम् ॥१॥ ते यदब्रुवन् चेतयध्वमिति चितिमिच्छतेति वाव तदब्रुवन्यच्चेतयमाना अपश्यंस्तस्माच्चितिराकूतिर्वै यज्ञो यदिष्टापश्यत्तस्मादिष्टका ॥२॥ तां वाऽएताम् । एकाꣳ सतीमष्टागृहीतामष्टाभिर्यजुर्भिर्जुहोति तस्मादियमेका सत्यष्टधाविहिता ॥३॥ तामूर्ध्वामुद्गृह्णञ्जुहोति । इमाꣳ तदूर्ध्वाꣳ रूपैरुद्गृह्णाति तस्मादियमूर्ध्वा रूपैः ॥४॥ ताꣳ संततां जुहोति । एतद्ध देवा अबिभयुर्यद्वै न इह रक्षाꣳसि नाष्ट्रा नान्ववेयुरिति तऽएतꣳ संततहोममपश्यन्रक्षसां नाष्ट्राणामनन्ववायनाय त-

स्मात्संततां जुहोति ॥५॥ यद्वेवैतामाहुतिं जुहोति । सवितैषो ऽग्निस्तमेतयाहुत्या पुरस्तात्प्रीणाति तमिष्ट्वा प्रीत्वाथैनꣳ सम्भरति तद्यदेतया सवितारं प्रीणाति तस्मात्सावित्राणि तस्माद्वा ऽएतामाहुतिं जुहोति ॥६॥ यद्वेवैतामाहुतिं जुहोति । सवितैषो ऽग्निस्तमेतयाहुत्या पुरस्ताद्धितो भूतꣳ सिञ्चति यादृग्वै योनौ रेतः सिच्यते तादृग्जायते तद्यदेतया सवितारꣳ रेतो भूतꣳ सिञ्चति तस्मात्सावित्राणि तस्माद्वा ऽएतामाहुतिं जुहोति ॥७॥ स्रुवश्चात्र स्रुक्च प्रयुज्येते । वाग्वै स्रुक्प्राणः स्रुवो वाचा च वै प्राणेन चैतदग्रे देवाः कर्मान्वैछंस्तस्मात्स्रुवश्च स्रुक्च ॥८॥ यद्वेव स्रुवश्च स्रुक्च । यो वै स प्रजापतिरासीदेष स स्रुवः प्राणो वै स्रुवः प्राणः प्रजापतिरथ या सा वागासीदेषा सा स्रुग्योषा वै वाग्योषा स्रुगथ यास्ता आप आयन्वाचो लोकादेतास्ता यामेतामाहुतिं जुहोति ॥९॥ ताꣳ संततां जुहोति । संतता हि ता आप आयन्नथ यः स प्रजापतिस्त्रय्या विद्यया सहापः प्राविशदेष स यैरेतद्यजुर्भिर्जुहोति ॥१०॥ तद्यानि त्रीणि प्रथमानि । इमे ते लोका अथ यच्चतुर्थं यजुस्त्रयी सा विद्या जगती सा भवति जगती सर्वाणि छन्दाꣳसि सर्वाणि छन्दाꣳसि त्रयी विद्याथ यानि चत्वार्युत्तमानि दिशस्तानीमे च वै लोका दिशश्च प्रजापतिरथैषा त्रयी विद्या ॥११॥ स जुहोति । युञ्जानः प्रथमं मन इति प्रजापतिर्वै युञ्जानः स मन एतस्मै कर्मणे ऽयुङ्क्त तद्यन्मन एतस्मै कर्मणे ऽयुङ्क्त तस्मात्प्रजापतिर्युञ्जानः ॥१२॥ तत्वाय सविता धिय इति । मनो वै सविता प्राणा धियो ऽग्नेर्ज्योतिर्निचाय्येत्यग्नेर्ज्योतिर्दृष्ट्वेत्येतत्पृथिव्या ऽअध्याभरदिति पृथिव्यै ह्येनदध्याभरति ॥१३॥ युक्तेन मनसा वयमिति । मन एवैतदेतस्मै कर्मणे युङ्क्ते न ह्ययुक्तेन मनसा किं चन सम्प्रति शक्नोति कर्तुं देवस्य सवितुः सवऽइति देवेन सवित्रा प्रसूता इत्येतत्स्वर्ग्याय शक्त्येति यथैतेन कर्मणा स्वर्गं लोकमियादेवमेतदाह शक्त्येति शक्त्या हि स्वर्गं लोकमेति ॥१४॥ युक्ताय सविता देवानिति । मनो वै

सविता प्राणा देवाः स्वर्यतो धिया दिवमिति स्वर्गꣳ ह्येनांलोकं यतो धियैतस्मै कर्मणे युयुजे बृहज्ज्योतिः करिष्यत इत्यसौ वाऽआदित्यो बृहज्ज्योतिरेष उऽएषोऽग्निरेतम्वेते संस्करिष्यन्तो भवन्ति सविता प्रसुवाति तानिति सवितृप्रसूता एतत्कर्म करवन्नित्येतत् ॥१५॥ युञ्जते मन उत युञ्जते धिय इति । मनश्चैवैतत्प्राणांश्चैतस्मै कर्मणे युङ्क्ते विप्रा विप्रस्येति प्रजापतिर्वै विप्रो देवा विप्रा बृहतो विपश्चित इति प्रजापतिर्वै बृहन्विपश्चिद्धि होत्रा दधऽइति यद्वाऽएष चीयते तदेष होत्रा विधत्ते चिते ह्येतस्मिन्होत्रा अधिविधीयन्ते वयुनाविदित्येष हीदं वयुनमविन्ददेक इदित्येको ह्येष इदꣳ सर्वं वयुनमविन्दन्मही देवस्य सवितुः परिष्टुतिरिति महती देवस्य सवितुः परिष्टुतिरित्येतत् ॥१६॥ युजे वां ब्रह्म पूर्व्यं नमोभिरिति । प्राणो वै ब्रह्म पूर्व्यमन्नं नमस्तत्तदेषैवाकूतिरन्नमेतयैव तदाकूत्यैतेनान्नेन प्राणानेतस्मै कर्मणे युङ्क्ते वि श्लोक एतु पथ्येव सूरेरिति यथोभयेषु देवमनुष्येषु कीर्तिश्लोको यजमानस्य स्यादेवमेतदाह शृण्वन्तु विश्वेऽअमृतस्य पुत्रा इति प्रजापतिर्वाऽअमृतस्तस्य विश्वे देवाः पुत्रा आ ये धामानि दिव्यानि तस्थुरितीमे वै लोका दिव्यानि धामानि तद्यऽएषु लोकेषु देवास्तानेतदाह ॥१७॥ यस्य प्रयाणमन्वन्यऽइद्ययुरिति । प्रजापतिर्वाऽएतदग्रे कर्माकरोत्तत्ततो देवा अकुर्वन्देवा देवस्य महिमानमोजसेति यज्ञो वै महिमा देवा देवस्य यज्ञं वीर्यमोजसेत्येतद्यः पार्थिवानि विममे स एतश इति यद्वै किं चास्यां तत्पार्थिवं तदेष सर्वं विमिमीते रश्मिभिर्ह्येनदभ्यवतनोति रजाꣳसि देवः सविता महित्वनेतीमे वै लोका रजाꣳस्यसावादित्यो देवः सविता तानेष महिम्ना विमिमीते ॥१८॥ देव सवितः प्रसुव यज्ञं प्रसुव यज्ञपतिं भगायेति । असौ वाऽआदित्यो देवः सविता यज्ञो भगस्तमेतदाह प्रसुव यज्ञं प्रसुव यज्ञपतिं भगायेति दिव्यो गन्धर्वः केतपूः केतं नः पुनात्वित्यसौ वाऽआदित्यो दिव्यो गन्धर्वोऽन्नं केतोऽन्नपूरन्नं नः

पुनात्वित्येतद्वाचस्पतिर्वाचं नः स्वदत्विति वाग्वाऽइदं कर्म प्राणो वाचस्पतिः प्राणो न इदं कर्म स्वदत्वित्येतत् ॥१९॥ इमं नो देव सवितर्यज्ञं प्रणयेति । असौ वाऽआदित्यो देवः सविता यद्व वाऽएष यज्ञियं कर्म प्रणयति तदनार्तꣳ स्वस्त्युदृचमश्नुते देवाव्यमिति यो देवानवदित्येतत्सखिविदꣳ सत्राजितं धनजितꣳ स्वर्जितमिति य एतत्सर्वं विन्दादित्येतदृचेत्यृचा स्तोमꣳ समर्धय गायत्रेण रथन्तरं बृहद्गायत्रवर्तनीति सामानि स्वाहेति यजूꣳषि सैषा त्रयी विद्या प्रथमं जायते यथैवादोऽमुत्राजायतैवमथ यः सोऽग्निरसृज्यतैष स योऽत ऊर्ध्वमग्निश्चीयते ॥२०॥ तान्येतान्यष्टौ सावित्राणि । अष्टाक्षरा गायत्री गायत्रोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतद्रेतो भूतꣳ सिञ्चति तानि नव भवन्ति स्वाहाकारो नवमो नव दिशो दिशोऽग्निर्नव प्राणाः प्राणा अग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतद्रेतो भूतꣳ सिञ्चति तानि दश भवन्त्याकूतिर्दशमी दशाक्षरा विराड्विराडग्निर्दश दिशो दिशोऽग्निर्दश प्राणाः प्राणा अग्निर्यावानग्निर्यावत्यस्य मात्रा तावद्भवति ॥२१॥ एतस्यामाकूत्याꣳ कृतायाम् । अग्निर्देवेभ्य उदक्रामत्तं देवा अब्रुवन्पशुर्वाऽअग्निः पशुभिरिममन्विच्छाम स स्वाय रूपायाविर्भविष्यतीति तं पशुभिरन्वैच्छन्त्स स्वाय रूपायाविरभवत्तस्माद्ध हैतत्पशुः स्वाय रूपायाविर्भवति गौर्वा गवेऽश्वो वाश्वाय पुरुषो वा पुरुषाय ॥२२॥ तेऽब्रुवन् । यद्यह सर्वैरन्वेषिष्यामो यातयामा अनुपजीवनीया भविष्यन्ति यद्युऽअसर्वैरसर्वमनुवेत्स्याम इति तऽएतमेकं पशुं द्वाभ्यां पशुभ्यां प्रत्यपश्यन्रासभं गोश्चावेश्च तद्यदेतमेकं पशुं द्वाभ्यां पशुभ्यां प्रत्यपश्यंस्तस्मादेष एकः सन्द्विरेताः ॥२३। अनद्धापुरुषं पुरुषात् । एष ह वाऽअनद्धापुरुषो यो न देवानवति न पितॄन्न मनुष्यांस्तत्सर्वैर्ह पशुभिरन्वैच्छन्नो यातयामा अनुपजीवनीया अभवन् ॥२४॥ त्रिभिरन्विच्छति । त्रिवृदग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतदन्विच्छति ते पञ्च सम्पदा भवन्ति पञ्चचितिको

ऽग्निः पञ्चर्तवः संवत्सरः संवत्सरोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावत्तद्भवति ॥२५॥ ते मौञ्जीभिरभिधानीभिरभिहिता भवन्ति । अग्निर्देवेभ्य उदक्रामत्स मुञ्जं प्राविशत्तस्मात्स सुषिरस्तस्माद्वेवान्तरतो धूमरक्त-इव सैषा योनिरग्नेर्यन्मुञ्जोऽग्नि-रिमे पशवो न वै योनिर्गर्भꣳ हिनस्त्यहिꣳसायै योनेर्वै जायमानो जायते योने-र्जायमानो जायाताऽइति ॥२६॥ त्रिवृतो भवन्ति । त्रिवृद्ध्यग्निरश्वाभिधानीकृता भ-वन्ति सर्वतो वाऽअश्वाभिधानी मुखं परिशेते सर्वतो योनिर्गर्भं परिशेते योनिरू-पमेतत्क्रियते ॥२७॥ ते प्राञ्चस्तिष्ठन्ति । अश्वः प्रथमोऽथ रासभोऽथाज एवꣳ ह्ये-तेऽनुपूर्वं यद्ध तदग्रे समचरितमासीदेष सोऽश्वोऽथ यत्तदरसदिवैष रासभोऽथ यः स कपाले रसो लिप्त आसीदेष सोऽजोऽथ यत्तत्कपालमासीदेषा सा मृत्पामेत-दाहरिष्यन्तो भवन्त्येतेभ्यो वाऽएष रूपेभ्योऽग्रेऽसृज्यत तेभ्य एवैनमेतज्जनयति ॥२८॥ ते दक्षिणतस्तिष्ठन्ति । एतद्ध देवा अबिभयुर्यद्वै नो यज्ञं दक्षिणतो र-क्षाꣳसि नाष्ट्रा न हन्युरिति तऽएतं वज्रमपश्यन्नमुमेवादित्यमसौ वाऽआदित्य एषोऽश्वस्तऽएतेन वज्रेण दक्षिणतो रक्षाꣳसि नाष्ट्रा अपहत्याभयेऽनाष्ट्रऽएतं य-ज्ञमतन्वत तथैवैतद्यजमान एतेन वज्रेण दक्षिणतो रक्षाꣳसि नाष्ट्रा अपहत्याभ-येऽनाष्ट्रऽएतं यज्ञं तनुते ॥२९॥ दक्षिणत आहवनीयो भवति । उत्तरत एषा-ग्निरुपशेते वृषा वाऽआहवनीयो योषाग्निर्दक्षिणतो वै वृषा योषामुपशेतेऽरत्नि-मात्रेऽरत्निमात्राद्धि वृषा योषामुपशेते ॥३०॥ सा वैणवी स्यात् । अग्निर्देवेभ्य उदक्रामत्स वेणुं प्राविशत्तस्मात्स सुषिरः स एतानि वर्माण्यभितोऽकुरुत पर्वा-ण्यननुप्रज्ञानाय यत्र-यत्र निददाह तानि कल्माषाण्यभवन् ॥३१॥ सा कल्माषी स्यात् । सा ह्याग्नेयी यदि कल्माषीं न विन्देदप्यकल्माषी स्यात्सुषिरा तु स्या-त्सैवाग्नेयी सैषा योनिरग्नेर्यद्वेणुरग्निरियं मृन्न वै योनिर्गर्भꣳ हिनस्त्यहिꣳसायै यो-नेर्वै जायमानो जायते योनेर्जायमानो जायाताऽइति ॥३२॥ प्रादेशमात्री स्यात् ।

प्रादेशमात्रꣳ हीदमभि वाग्वदत्यरत्निमात्री त्वेव भवति बाहुर्वाऽअरत्निर्बाहुना वै वीर्यं क्रियते वीर्यसंमितेव तद्भवति ॥३३॥ अन्यतःक्ष्णुत्स्यात् । अन्यतरतो हीदं वाचः क्ष्णुतमुभयतःक्ष्णुत्त्वेव भवत्युभयतो हीदं वाचः क्ष्णुतं यदेनया दैवं च वदति मानुषं चाथो यत्सत्यं चानृतं च तस्मादुभयतःक्ष्णुत् ॥३४॥ यद्वेवोभयतःक्ष्णुत् । अतो वाऽअग्नेर्वीर्यं यतोऽस्यै क्ष्णुतमुभयत एवास्यामेतद्वीर्यं दधाति ॥३५॥ यद्वेवोभयतःक्ष्णुत् । एतद्वाऽएनं देवा अनुविद्येभ्यो लोकेभ्योऽखनंस्तथैवैनमयमेतदनुविद्येभ्यो लोकेभ्यः खनति ॥३६॥ स यदिति खनति । तदेनमस्माल्लोकात्खनत्यथ यदूर्ध्वाचरति तदमुष्माल्लोकादथ यदन्तरेण संचरति तदन्तरिक्षलोकात्सर्वेभ्य एवैनमेतदेभ्यो लोकेभ्यः खनति ॥३७॥ तामादत्ते । देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे गायत्रेण छन्दसाङ्गिरस्वदिति सवितृप्रसूत एवैनामेतदेताभिर्देवताभिरादत्ते गायत्रेण छन्दसाथोऽअस्यां गायत्रं छन्दो दधाति पृथिव्याः सधस्थादग्निं पुरीष्यमङ्गिरस्वदाभरेति पशवो वै पुरीषं पृथिव्या उपस्थादग्निं पशव्यमग्निवदाभरेत्येतत्त्रैष्टुभेन छन्दसाङ्गिरस्वदिति तदेनां त्रैष्टुभेन छन्दसादत्तेऽथोऽअस्यां त्रैष्टुभं छन्दो दधाति ॥३८॥ अभ्रिरसीति । अभ्रिर्ह्येषा तदेनꣳ सत्येनादत्ते नार्यसीति वज्रो वाऽअभ्रिर्योषा नारी न वै योषा कं चन हिनस्ति शमयत्येवैनामेतदहिꣳसायै त्वया वयमग्निꣳ शकेम खनितुꣳ सधस्थऽएतीदं वै सधस्थं त्वया वयमग्निꣳ शकेम खनितुमस्मिन्त्सधस्थऽइत्येतज्जागतेन छन्दसाङ्गिरस्वदिति तदेनां जागतेन छन्दसादत्तेऽथोऽअस्यां जागतं छन्दो दधाति ॥३९॥ त्रिभिरादत्ते । त्रिवृदग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनामेतदादत्ते त्रिभिरादायाथैनां चतुर्थेनाभिमन्त्रयतऽएतद्वाऽएनां देवास्त्रिभिरादायाथास्यां चतुर्थेन वीर्यमदधुस्तथैवैनामयमेतत्त्रिभिरादायाथास्यां चतुर्थेन वीर्यं दधाति ॥४०॥ हस्तऽआधाय सवितेति । हस्ते ह्यस्याहिता भवति बिभ्रदभ्रिमिति बिभर्ति ह्येनाꣳ

हिरण्ययीमिति हिरण्मयी ह्येषा या छन्दोमय्यग्नेर्ज्योतिर्निचाय्येत्यग्नेर्ज्योतिर्दृष्ट्वेत्येतत्पृथिव्या ऽ अध्याभरदिति पृथिव्यै ह्येनदध्याभरत्यानुष्टुभेन छन्दसाङ्गिरस्वदिति तदेनामानुष्टुभेन छन्दसादत्ते ऽथो ऽ अस्यामानुष्टुभं छन्दो दधाति तान्येतान्येव छन्दाꣳस्येषाभ्रिरारम्भायैवेयं वैणवी क्रियते ॥४१॥ ताꣳ हैके हिरण्मयीं कुर्वन्ति । हिरण्ययीति वा ऽ अभ्युक्तेति न तथा कुर्याद्यद्वा ऽ एषा छन्दाꣳसि तेनैषा हिरण्मयमृतꣳ हिरण्यममृतानि छन्दाꣳसि ॥४२॥ तां चतुर्भिरादत्ते । चतुरक्षरा वै सर्वा वाग्वागित्येकमक्षरमक्षरमिति त्र्यक्षरं तद्यत्तद्वागित्येकमक्षरं येवैषानुष्टुबुत्तमा सा साथ यदक्षरमिति त्र्यक्षरमेतानि तानि पूर्वाणि यजूꣳषि सर्वयैवैतद्वाचाग्निं खनति सर्वया वाचा सम्भरति तस्माच्चतुर्भिः ॥४३॥ यद्वेव चतुर्भिः । चतस्रो वै दिशश्चतसृषु तद्दिक्षु वाचं दधाति तस्माच्चतसृषु दिक्षु वाग्वदति छन्दोभिश्च यजुर्भिश्चादत्ते तदष्टौ चतस्रो दिशश्चतस्रो ऽवान्तरदिशः सर्वासु तद्दिक्षु वाचं दधाति तस्मात्सर्वासु दिक्षु वाग्वदति ॥४४॥ ब्राह्मणम् ॥३ [३. १.] ॥ ॥

हस्त ऽ एषाभ्रिर्भवत्यथ पशूनभिमन्त्रयते । एतद्वा ऽ एषु देवा अन्वेषिष्यन्तः पुरस्ताद्वीर्यमदधुस्तथैवैष्वयमेतदन्वेषिष्यन्पुरस्ताद्वीर्यं दधाति ॥१॥ सो ऽश्वमभिमन्त्रयते । प्रतूर्तं वाजिन्नाद्रवेति यद्वै क्षिप्रं तत्तूर्तमथ यत्क्षिप्रात्क्षेपीयस्तत्प्रतूर्तं वरिष्ठामनु संवतमितीयं वै वरिष्ठा संवदिमामनु संवतमित्येतद्दिवि ते जन्म परममन्तरिक्षे तव नाभिः पृथिव्यामधि योनिरिदिति तदेनमेता देवताः करोत्यग्निं वायुमादित्यं तदश्वे वीर्यं दधाति ॥२॥ अथ रासभम् । युञ्जाथाꣳ रासभं युवमित्यध्वर्यू चैतद्यजमानं चाहास्मिन्यामे वृषण्वसू ऽ इत्यस्मिन्कर्मणि वृषण्वसू ऽ इत्येतदग्निं भरन्तमस्मयुमित्यग्निं भरन्तमस्मत्प्रेषितमित्येतत्तद्रासभे वीर्यं दधाति ॥३॥ अथाजम् । योगे-योगे तवस्तरं वाजे-वाजे हवामह ऽ इत्यन्नं वै वाजः कर्मणि-कर्मणि तवस्तरमन्ने ऽन्ने हवामह ऽ इत्येतत्सखाय ऽ इन्द्रमूतय ऽ इतीन्द्रियवन्तमूतय ऽ इत्येतत्तदजे वीर्यं

दधाति ॥४॥ त्रिभिरभिमन्त्रयते । त्रिवृदग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैष्वेतद्वीर्यं दधाति ॥५॥ अथैनान्प्राच उत्क्रमयति । तदेनमेतैः पशुभिरन्विच्छति नोपस्पृशत्यग्निरेष यत्पशवो नेन्मायमग्निर्हिनसदिति ॥६॥ सोऽश्वमुत्क्रमयति । प्रतूर्वन्नेह्यवक्रामन्नशस्तीरिति पाप्मा वाऽअशस्तिस्त्वरमाण एह्यवक्रामन्पाप्मानमित्येतद्रुद्रस्य गाणपत्यं मयोभूरेहीति रौद्रा वै पशवो या ते देवता तस्यै गाणपत्यं मयोभूरेहीत्येतत्तदेनमश्वेनान्विच्छति ॥७॥ अथ रासभम् । उर्वन्तरिक्षं वीहि स्वस्तिगव्यूतिरभयानि कृण्वन्निति यथैव यजुस्तथा बन्धुः पूष्णा सयुजा सहेतीयं वै पूषानया सयुजा सहेत्येतत्तदेनꣳ रासभेनान्विच्छति ॥८॥ अथाजम् । पृथिव्याः सधस्थादग्निं पुरीष्यमङ्गिरस्वदाभरेति पृथिव्या उपस्थादग्निं पशव्यमग्निवदाभरेत्येतत्तदेनमजेनान्विच्छति ॥९॥ त्रिभिरन्विच्छति । त्रिवृदग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतदन्विच्छति त्रिभिः पुरस्तादभिमन्त्रयते तत्षट् षडृतवः संवत्सरः संवत्सरोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावत्तद्भवति ॥१०॥ ब्राह्मणम् ॥ ४ [३.२.] ॥
द्वितीयः प्रपाठकः ॥ कण्डिकासंख्या १०४ ॥॥

प्रदीप्ता एतेऽग्नयो भवन्ति । अथ मृदमच्छयन्तीमे वै लोका एतेऽग्नयस्ते यदा प्रदीप्ता अथैतऽइमे लोकाः पुरो वाऽएतदेभ्यो लोकेभ्योऽग्रे देवाः कर्मान्वैच्छꣳस्तद्यदेतानग्नीनतीत्य मृदमाहरति तदेनं पुरैभ्यो लोकेभ्योऽन्विच्छति ॥१॥ प्राञ्चो यन्ति । प्राची हि दिगग्नेः स्वायामेवैनमेतद्दिश्यन्विच्छति स्वायां दिशि विन्दति ॥२॥ ते प्रयन्ति । अग्निं पुरीष्यमङ्गिरस्वदच्छेम इत्यग्निं पशव्यमग्निवदच्छेम इत्येतत् ॥३॥ अथानड्वापुरुषमीक्षते । अग्निं पुरीष्यमङ्गिरस्वद्भरिष्याम इत्यग्निं पशव्यमग्निवद्भरिष्याम इत्येतत्तदेनमनड्वापुरुषेणान्विच्छति ॥४॥ अथ वल्मीकवपा सुषिरा व्यधे निहिता भवति । तामन्वीक्षतऽइयं वै वल्मीकवपेयमु वाऽइमे लोका एतद्वाऽएनं देवा एषु लोकेषु विग्राह्मैच्छꣳस्तथैवैनमयमेतदेषु लोकेषु विग्राह्मि-

इति ॥५॥ अन्वग्निरुषसामग्रमख्यदिति । तदेनमुषःस्वैच्छन्नन्वहानि प्रथमो जात-
वेदा इति तदेनमह्नःस्वैच्छन्ननु सूर्यस्य पुरुत्रा च रश्मीनिति तदेनꣳ सूर्यस्य रश्मि-
ष्वैच्छन्ननु द्यावापृथिवीऽआततन्थेति तदेनं द्यावापृथिव्योरैच्छंस्तमविन्दंस्तथैवैनम-
यमेतद्विन्दति तं यदा परापश्यत्यथ तामवास्यत्यागच्छन्ति मृदम् ॥६॥ अथाश्वमभिम-
न्त्रयते । एतद्वै देवा अब्रुवन्पाप्मानमस्यापहनामेति श्रमो वै पाप्मा श्रममस्य पा-
प्मानमपहनामेति तस्य श्रमं पाप्मानमपाघ्नंस्तथैवास्यायमेतच्छ्रमं पाप्मानमपहन्ति
॥७॥ आगत्य वाज्यध्वानमिति । आगतो ह्यस्याध्वा भवति सर्वा मृधो विधूनुत
ऽइति पाप्मा वै मृधः सर्वान्पाप्मनो विधूनुतऽइत्येतत्तस्मादु हैतदश्वः स्यन्त्वा
विधूनुतेऽग्निꣳ सधस्थे महतीति चक्षुषा निचिकीषऽइतीदं वै महत्सधस्थमग्निमस्मि-
न्महति सधस्थे चक्षुषा दिदृक्षतऽइत्येतत् ॥८॥ अथैनमाक्रमयति । एतद्वाऽएष
एतं देवेभ्योऽनुविद्य प्राब्रवीद्यथायमिहेवेत्येवम् ॥९॥ यद्वेवाक्रमयति । एतद्वै
देवा अबिभयुर्यद्वै न इममिह रक्षाꣳसि नाष्ट्रा न हन्युरिति तस्माऽएतं वज्रमु-
परिष्टादभिगोप्तारमकुर्वन्नमुमेवादित्यमसौ वाऽआदित्य एषोऽश्वस्तथैवास्माऽअय-
मेतं वज्रमुपरिष्टादभिगोप्तारं करोति ॥१०॥ आक्रम्य वाजिन् । पृथिवीमग्निमिच्छ
रुचा त्वमिति चक्षुर्वै रुगाक्रम्य त्वं वाजिन्पृथिवीमग्निमिच्छ चक्षुषेत्येतद्भूम्या वृत्वाय
नो ब्रूहि यतः खनेम तं वयमिति भूमेस्तत्स्पाशयित्वाय नो ब्रूहि यत एनं ख-
नेमेत्येतत् ॥११॥ अथैनमुन्मृशति । एतद्वाऽएनं देवाः प्रोचिवाꣳसं वीर्येण स-
मार्धयंस्तथैवैनमयमेतत्प्रोचिवाꣳसं वीर्येण समर्धयति द्यौस्ते पृष्ठं पृथिवी सधस्थ-
मात्मान्तरिक्षꣳ समुद्रो योनिरितीत्थमसीत्थमसीत्येवैतदाह विख्याय चक्षुषा त्वम-
भितिष्ठ पृतन्यत इति विख्याय चक्षुषा त्वमभितिष्ठ सर्वान्पाप्मन इत्येतन्नोपस्पृ-
शति वज्रो वाऽअश्वो नेन्मायं वज्रो हिनसदिति ॥१२॥ अथैनमुत्क्रमयति । एतद्वै
देवा अब्रुवन्किमिममभ्युत्क्रमिष्याम इति महत्सौभगमिति तं महत्सौभगमभ्युद-

क्रमयंस्तथैवैनमयमेतन्महत्सौभगमभ्युत्क्रमयत्युत्क्राम महते सौभगायेत्युत्क्राम म-
हत्ते सौभगमित्येतत्तस्मादु हैतदश्वः पशूनां भगितमोऽस्मादास्थानादिति यत्रैतत्ति-
ष्ठसीत्येतद्द्रविणोदा इति द्रविणꣳ ह्येभ्यो ददाति वाजिन्निति वाजी ह्येष वयꣳ
स्याम सुमतौ पृथिव्या अग्निं खनन्त उपस्थेऽअस्या इति वयमस्यै पृथिव्यै सुमतौ
स्यामाग्निमस्या उपस्थे खनन्त इत्येतत् ॥१३॥ अथैनमुत्क्रान्तमभिमन्त्रयते । एतद्वा
ऽएनं देवाः प्रोचिवाꣳसं यथा ददिवाꣳसं वन्देतैवमुपास्तुवन्नुपामहयंस्तथैवैनमय-
मेतदुपस्तौत्युपमहयत्युदक्रमीदित्युदक्रमीद्द्रविणोदा इति द्रविणꣳ ह्येभ्यो ददाति
वाज्यर्वेति वाजी च ह्येषोऽर्वा चाकः सुलोकꣳ सुकृतं पृथिव्यामित्यकरः सुलो-
कꣳ सुकृतं पृथिव्यामित्येतत्ततः खनेम सुप्रतीकमग्निमिति तत एनं खनेमेत्येतत्सु-
प्रतीकमिति सर्वतो वाऽअग्निः सुप्रतीकः स्वो रुहाणा अधि नाकमुत्तममिति
स्वर्गो वै लोको नाकः स्वर्गं लोकꣳ रोहन्तोऽधि नाकमुत्तममित्येतत्तं दक्षिणो-
पसंक्रमयति यत्रेतरौ पशू भवतस्ते दक्षिणतः प्राञ्चस्तिष्ठन्ति स य एवामुत्र दक्षि-
णात स्थानस्य बन्धुः सोऽत्र ॥१४॥ अथोपविश्य मृदमभिजुहोति । एतद्वै देवा
अब्रुवंश्चेतयध्वमिति चितिमिच्छतेति वाव तदब्रुवंस्ते चेतयमाना एतामाहुतिमप-
श्यंस्तामजुहवुस्ताꣳ हुत्वेमांल्लोकानुखामपश्यन् ॥१५॥ तेऽब्रुवन् । चेतयध्वमेवेति
चितिमिच्छतेति वाव तदब्रुवंस्ते चेतयमाना एतां द्वितीयामाहुतिमपश्यंस्तामजुह-
वुस्ताꣳ हुत्वा विश्वज्योतिषोऽपश्यन्नेता देवता अग्निं वायुमादित्यमेता ह्येव देव-
ता विश्वं ज्योतिस्तथैवैतद्यजमानऽएते आहुती हुत्वेमांश्च लोकानुखां पश्यत्येता-
श्च देवता विश्वज्योतिषो व्यतिषक्ताभ्यां जुहोतीमांश्च तल्लोकानेताश्च देवता व्य-
तिषजति ॥१६॥ यद्वेवैतेऽआहुती जुहोति । मृदं च तदपश्च प्रीणाति तेऽइष्टा
प्रीतावैने सम्भरति व्यतिषक्ताभ्यां जुहोति मृदं च तदपश्च व्यतिषजति ॥१७॥
आज्येन जुहोति । वज्रो वाऽआज्यं वज्रमेवास्माऽएतदभिगोप्तारं करोत्यथो रेतो

वाऽआज्य७ रेत एवैतत्सिञ्चति स्रुवेण वृषा वै स्रुवो वृषा वै रेतः सिञ्चति
स्वाहाकारेण वृषा वै स्वाहाकारो वृषा वै रेतः सिञ्चति ॥१८॥ आ त्वा जि-
घर्मि मनसा घृतेनेति । आ त्वा जुहोमि मनसा च घृतेन चेत्येतत्प्रतिक्षियन्तं
भुवनानि विश्वेति प्रत्यङ् ह्येष सर्वाणि भुवनानि क्षियति पृथुं तिरश्चा वयसा
बृहन्तमिति पृथुर्वाऽएष तिर्यङ्वयसो बृहन्धूमेन व्यचिष्ठमन्नै रभसं दृशानमित्यव-
काशवन्तमन्नैरन्नादं दीप्यमानमित्येतत् ॥१९॥ आ विश्वतः प्रत्यञ्चं जिघर्मीति ।
आ सर्वतः प्रत्यञ्चं जुहोमीत्येतदरक्षसा मनसा तज्जुषेतेत्यहीडमानेन मनसा
तज्जोषयेतेत्येतन्मर्यश्री स्पृहयद्वर्णोऽअग्निरिति मर्यश्रीर्ह्येष स्पृहयद्वर्णोऽग्निर्नाभि-
मृशे तन्वा जर्भुराण इति न ह्येषोऽभिमृशे तन्वा दीप्यमानो भवति ॥२०॥ द्वा-
भ्यामभिजुहोति । द्विपाद्यजमानो यजमानोऽग्निर्यावानग्निर्यावत्यस्य मात्रा ताव-
तैवैनमेतद्रेतो भूत७ सिञ्चत्याग्नेयीभ्यामग्निमेवैतद्रेतो भूत७ सिञ्चति ते यदाग्नेय्यौ
तेनाग्निरथ यत्त्रिष्टुभौ तेनेन्द्र ऐन्द्राग्नोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैन-
मेतद्रेतो भूत७ सिञ्चतीन्द्राग्नी वै सर्वे देवाः सर्वदेवत्योऽग्निर्यावानग्निर्यावत्यस्य
मात्रा तावतैवैनमेतद्रेतो भूत७ सिञ्चति ॥२१॥ ॥ शतम् ३६०० ॥ ॥ अश्वस्य पदे
जुहोति । अग्निरेष यदश्वस्तथो हास्यैतेऽअग्निमत्येवाहुती हुते भवतः ॥२२॥ अ-
थैनं परिलिखति । मात्रामेवास्माऽएतत्करोति यथैतावानसीत्येवम् ॥२३॥ य-
द्वेवैनं परिलिखति । एतद्वै देवा अबिभयुर्यद्वै न इममिह रक्षा७सि नाष्ट्रा न
हन्युरिति तस्माऽएतां पुरं पर्यश्रयंस्तथैवास्माऽअयमेतां पुरं परिश्रयत्यभ्र्या वज्रो
वाऽअभ्रिर्वज्रमेवास्माऽएतदभिगोप्तारं करोति सर्वतः परिलिखति सर्वत एवा-
स्माऽएतं वज्रमभिगोप्तारं करोति त्रिष्कृत्वः परिलिखति त्रिवृतमेवास्माऽएतं व-
ज्रमभिगोप्तारं करोति ॥२४॥ परि वाजपतिः कविः । परि त्वाग्ने पुरं वयं त्वमग्ने
द्युभिरित्यग्निमेवास्माऽएतदुपस्तुत्य वर्म करोति परिवतीभिः परीव हि पुर आ-

ग्नेयीभिरग्निपुरामेवास्माऽएतत्करोति सा हैषाग्निपुरा दीप्यमाना तिष्ठति तिसृभि-
स्त्रिपुरमेवास्माऽएतत्करोति तस्मादु हैतत्पुरां परमꣳ रूपं यत्त्रिपुरꣳ स वै वर्षी-
यसा-वर्षीयसा छन्दसा परां-परां लेखां वरीयसीं करोति तस्मात्पुरां परा-परा
वरीयसी लेखा भवन्ति लेखा हि पुरः ॥२५॥ अथैनमस्यां खनति । एतद्वै देवा
अबिभयुर्यद्वै न इममिह रक्षाꣳसि नाष्ट्रा न हन्युरिति तस्माऽइमामेवात्मानम-
कुर्वन्गुप्त्याऽआत्मात्मानं गोप्स्यतीति सा समंबिला स्यात्तदस्येयमात्मा भवति य-
द्वेव समंबिला योनिर्वाऽइयꣳ रेत इदं यद्वै रेतसो योनिमतिरिच्यतेऽमुया तद्भव-
त्यथ यन्न्यूनं व्यृद्धं तदेतद्वै रेतसः समृद्धं यत्समंबिलं चतुःस्रक्तिरेष कूपो भवति
चतस्रो वै दिशः सर्वाभ्य एवैनमेतद्दिग्भ्यः खनति ॥२६॥ ब्राह्मणम् ॥१ [३. ३.] ॥
तृतीयोऽध्यायः [३८.] ॥॥

अथैनमतः खनत्येव । एतद्वाऽएनं देवा अनुविद्याखनंस्तथैवैनमयमेतदनुविद्य
खनति देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां पृथिव्याः सध-
स्थादग्निं पुरीष्यमङ्गिरस्वत्खनामीति सवितृप्रसूत एवैनमेतदेताभिर्देवताभिः पृथि-
व्या उपस्थादग्निं पशव्यमग्निवत्खनति ॥१॥ ज्योतिष्मन्तं त्वाग्ने सुप्रतीकमिति ।
ज्योतिष्मान्वाऽअयमग्निः सुप्रतीकोऽजस्रेण भानुना दीद्यतमित्यजस्रेणार्चिषा दी-
प्यमानमित्येतच्छिवं प्रजाभ्योऽहिꣳसन्तं पृथिव्याः सधस्थादग्निं पुरीष्यमङ्गिरस्वत्ख-
नाम इति शिवं प्रजाभ्योऽहिꣳसन्तं पृथिव्या उपस्थादग्निं पशव्यमग्निवत्खनाम इ-
त्येतत् ॥२॥ द्वाभ्यां खनति । द्विपाद्यजमानो यजमानोऽग्निर्यावानग्निर्यावत्यस्य
मात्रा तावतैवैनमेतत्खनत्यथो द्वयꣳ ह्येवैतद्रूपं मृच्चापश्च ॥३॥ स वै खनामि
खनाम इति खनति । खनामीति वाऽएतं प्रजापतिरखनत्खनाम इति देवास्त-
स्मात्खनामि खनाम इति ॥४॥ स वाऽअभ्र्या खनन् । वाचा खनामि खनाम
इत्याह वाग्वाऽअभ्रिरारम्भायैवेयं वैणवी क्रियते वाचा वाऽएतमभ्र्या देवा अ-

खनंस्तथैवैनमयमेतद्वाचैवाभ्यां खनति ॥५॥ अथैनं कृष्णाजिने सम्भरति । यज्ञो वै कृष्णाजिनं यज्ञ एवैनमेतत्सम्भरति लोमतश्छन्दाᳪसि वै लोमानि छन्दःस्वेवैनमेतत्सम्भरति तत्तूष्णीमुपस्तृणाति यज्ञो वै कृष्णाजिनं प्रजापतिर्वै यज्ञोऽनिरुक्तो वै प्रजापतिरुत्तरतस्तस्योपरि बन्धुः प्राचीनग्रीवे तद्धि देवत्रा ॥६॥ अथैन पुष्करपर्णे सम्भरति । योनिर्वै पुष्करपर्णं योनौ तद्रेतः सिञ्चति यद्वै योनौ रेतः सिच्यते तत्प्रजननिष्णु भवति तन्मन्त्रेणोपस्तृणाति वाग्वै मन्त्रो वाक्पुष्करपर्णम् ॥७॥ अपां पृष्ठमसि योनिरग्नेरिति । अपाᳪ ह्येतत्पृष्ठं योनिर्ह्येतदग्नेः समुद्रमभितः पिन्वमानमिति समुद्रो ह्येतदभितः पिन्वते वर्धमानो महाꣳ२ऽआ च पुष्करऽइति वर्धमानो महीयस्व पुष्करऽइत्येतद्दिवो मात्रया वरिम्णा प्रथस्वेत्यनुविमार्ष्ट्यसौ वाऽआदित्य एषोऽग्निर्नो हैतमन्यो दिवो वरिमा यन्तुमर्हति द्यौर्भूत्वेनं यच्छेत्येवैतदाह ॥८॥ तदुत्तरं कृष्णाजिनादुपस्तृणाति । यज्ञो वै कृष्णाजिनमियं वै कृष्णाजिनमियमु वै यज्ञोऽस्याᳪ हि यज्ञस्तायते द्यौष्पुष्करपर्णमापो वै द्यौरापः पुष्करपर्णमुत्तरो वाऽअसावस्यै ॥९॥ अथैनेऽअभिमृशति । संज्ञामेवाभ्यामेतत्करोति शर्म च स्थो वर्म च स्थ इति शर्म च ह्यस्यैते वर्म चाछिद्रे बहुलेऽउभेऽइत्यछिद्रे ह्येते बहुलेऽउभे व्यचस्वती संवसाथामित्यवकाशवती संवसाथामित्येतद्भृतमग्निं पुरीष्यमिति बिभृतमग्निं पशव्यमित्येतत् ॥१०॥ संवसाथाᳪ स्वर्विदा । समीचीऽउरसा त्मनेति संवसाथामेनᳪ स्वर्विदा समीचीऽउरसा चात्मना चेत्येतदग्निमन्तर्भरिष्यन्ती ज्योतिष्मन्तमजस्रमिदित्यसौ वाऽआदित्य एषोऽग्निः स एष ज्योतिष्मानजस्रस्तमेतेऽअन्तरा बिभृतस्तस्मादाह ज्योतिष्मन्तमजस्रमिदिति ॥११॥ द्वाभ्यामभिमृशति । द्विपाद्यजमानो यजमानोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवाभ्यामेतत्संज्ञां करोत्यथो द्वयᳪ ह्येवैतद्रूपं कृष्णाजिनं च पुष्करपर्णं च ॥१२॥ ब्राह्मणम् ॥२ [४.१.] ॥॥

अथ मृत्पिण्डमभिमृशति । पुरीष्योऽसीति पशव्योऽसीत्येतद्विश्वभरा इत्येष
हीदꣳ सर्वं बिभर्त्यथर्वा त्वा प्रथमो निरमन्थदग्नऽइति प्राणो वाऽअथर्वा प्राणो
वाऽएतमग्रे निरमन्थत्तद्योऽसावग्रेऽग्निरसृज्यत सोऽसीति तदाह तमेवैनमेतत्क-
रोति ॥१॥ अथैनं परिगृह्णाति । अभ्र्या च दक्षिणतो हस्तेन च हस्तेनैवोत्तर-
तस्त्वामग्ने पुष्करादध्यथर्वा निरमन्थतेत्यापो वै पुष्करं प्राणोऽथर्वा प्राणो वा
ऽएतमग्रेऽद्भ्यो निरमन्थन्मूर्ध्नो विश्वस्य वाघत इत्यस्य सर्वस्य मूर्ध्न इत्येतत् ॥२॥
तमु त्वा दध्यङ्ङृषिः । पुत्र ईधेऽअथर्वण इति वाग्वै दध्यङ्ङाथर्वणः स एनं तत
ऐन्ध वृत्रहणं पुरंदरमिति पाप्मा वै वृत्रः पाप्महनं पुरंदरमित्येतत् ॥३॥ तमु
त्वा पाथ्यो वृषा । समीधे दस्युहन्तममिति मनो वै पाथ्यो वृषा स एनं तत
ऐन्ध धनंजयꣳ रणे-रणऽइति यथैव यजुस्तथा बन्धुः ॥४॥ गायत्रीभिः । प्राणो
गायत्री प्राणमेवास्मिन्नेतद्दधाति तिसृभिस्त्रयो वै प्राणाः प्राण उदानो व्यानस्ता-
नेवास्मिन्नेतद्दधाति तासां नव पदानि नव वै प्राणाः सप्त शीर्षन्नवाञ्चौ द्वौ ता-
नेवास्मिन्नेतद्दधाति ॥५॥ अथैते त्रिष्टुभाऽउत्तरे भवतः । आत्मा वै त्रिष्टुबात्मा-
नमेवास्यैताभ्याꣳ संस्करोति सीद होतः स्वऽउ लोके चिकित्वानित्यग्निर्वै होता
तस्यैष स्वो लोको यत्कृष्णाजिनं चिकित्वानिति विद्वानित्येतत्सादया यज्ञꣳ सुकृ-
तस्य योनाविति कृष्णाजिनं वै सुकृतस्य योनिर्देवावीर्देवान्हविषा यजासीति देवः
सन्देवानवन्हविषा यजासीत्येतदग्ने बृहद्यजमाने वयो धा इति यजमानायाशिष-
माशास्ते ॥६॥ नि होता होतृषदने विदान इति । अग्निर्वै होता कृष्णाजिनꣳ
होतृषदनं विदान इति विद्वानित्येतत्त्वेषो दीदिवाꣳ२ऽअसदत्सुदक्ष इति त्वेषो
दीप्यमानोऽसदत्सुदक्ष इत्येतददब्धव्रतप्रमतिर्वसिष्ठ इत्यदब्धव्रतप्रमतिर्ह्येष वसि-
ष्ठः सहस्रंभरः शुचिजिह्वोऽअग्निरिति सर्वं वै सहस्रꣳ सर्वम्भरः शुचिजिह्वोऽग्नि-
रित्येतद्द्वाभ्यामाग्नेयीभ्यां त्रिष्टुब्भ्यां तस्योक्तो बन्धुः ॥७॥ अथैषा बृहत्युत्तमा भ-

वति । बृहतीं वाऽएष संचितोऽभिसम्पद्यते यादृग्वै योनौ रेतः सिच्यते तादृग्जायते तद्यदेतामत्र बृहतीं करोति तस्मादेष संचितो बृहतीमभिसम्पद्यते ॥८॥ सꣳसीदस्व महाꣳ२॥ऽअसीति । इदमेवैतद्रेतः सिक्तꣳ सꣳसादयति तस्माद्योनौ रेतः सिक्तꣳ सꣳसीदति शोचस्व देववीतम इति दीप्यस्व देववीतम इत्येतद्वि धूममग्नेऽअरुषं मियेध्य सृज प्रशस्त दर्शतमिति यदा वाऽएष समिध्यतेऽथैष धूममरुषं विसृजते दर्शतमिति ददृशऽइव ह्येषः ॥९॥ ताः षट् सम्पद्यन्ते । षड्तवः संवत्सरः संवत्सरोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावत्तद्भवति यद्वेव संवत्सरमभिसम्पद्यते तद्बृहतीमभिसम्पद्यते बृहती हि संवत्सरो द्वादश पौर्णमास्यो द्वादशाष्टका द्वादशामावास्यास्तत्षट्त्रिꣳशत्षट्त्रिꣳशदक्षरा बृहती तं दक्षिणत उदञ्चमाहरति दक्षिणतो वाऽउदग्योनौ रेतः सिच्यतऽएषोऽअस्यैतर्हि योनिरविच्छेदमाहरति रेतसोऽविच्छेदाय ॥१०॥ ब्राह्मणम् ॥ ३ [४. २.] ॥ ॥

अथ तत्राप उपनिनयति । यद्वाऽअस्यै क्षतं यद्विलिष्टमद्भिर्वै तत्संधीयतेऽद्भिरेवास्याऽएतत्क्षतं विलिष्टꣳ संतनोति संदधाति ॥१॥ अपो देवीरुपसृज । मधुमतीरयक्ष्माय प्रजाभ्य इति रसो वै मधु रसवतीरयक्ष्मवाय प्रजाभ्य इत्येतत्तासामास्थानादुज्जिहतामोषधयः सुपिप्पला इत्यपां वाऽआस्थानादुज्जिहतऽओषधयः सुपिप्पलाः ॥२॥ अथैनां वायुना संदधाति । यद्वाऽअस्यै क्षतं यद्विलिष्टं वायुना वै तत्संधीयते वायुनैवास्या एतत्क्षतं विलिष्टꣳ संतनोति संदधाति ॥३॥ सं ते वायुर्मातरिश्वा दधात्विति । अयं वै वायुर्मातरिश्वा योऽयं पवतऽउत्तानाया हृदयं यद्विकस्तमित्युत्तानाया ह्यस्या एतद्धृदयं विकस्तं यो देवानां चरसि प्राणथेनेत्येष हि सर्वेषां देवानां चरति प्राणथेन कस्मै देव वषडस्तु तुभ्यमिति प्रजापतिर्वै कस्तस्माऽएवैतदिमां वषट्करोति नो ह्येतावत्यन्याहुतिरस्ति यथैषा ॥४॥ अथैनां दिग्भिः संदधाति । यद्वाऽअस्यै क्षतं यद्विलिष्टं दिग्भिर्वै तत्संधीयते

दिग्भिरेवास्या एतल्लूनं विलिष्टꣳ संतनोति संदधाति स इमां चेमां च दिशौ संदधाति तस्मादेते दिशौ सꣳहिते ऽअथेमां चेमां च तस्माद्वेवैते सꣳहिते ऽइत्यग्रे ऽथेति अथेत्यथेति तद्दक्षिणावृत्तद्धि देवत्रानयानया वै भेषजं क्रियते ऽनयैवैनामेतद्भिषज्यति ॥५॥ अथ कृष्णाजिनं च पुष्करपर्णं च समुद्गृह्णाति । योनिर्वै पुष्करपर्णं योन्या तद्रेतः सिक्तꣳ समुद्गृह्णाति तस्माद्योन्या रेतः सिक्तꣳ समुद्गृह्यते सुजातो ज्योतिषा सह शर्म वरूथमासदत्स्वरिति सुजातो ह्येष ज्योतिषा सह शर्म चैतद्वरूथं च स्वश्चासीदति ॥६॥ अथैनमुपनह्यति । योनौ तद्रेतो युनक्ति तस्माद्योनौ रेतो युक्तं न निष्पद्यते योक्त्रेण योक्त्रेण हि योग्यं युञ्जन्ति मौञ्जेन त्रिवृता तस्योक्तो बन्धुः ॥७॥ तत्पर्यस्यति । वासो ऽअग्ने विश्वरूपꣳ संव्ययस्व विभावसविति वरुण्या वै यज्ञे रज्जुरवरुण्यमेवैनदेतत्कृत्वा यथा वासः परिधापयेदेवं परिधापयति ॥८॥ अथैनमादायोत्तिष्ठति । असौ वाऽआदित्य एषोऽग्निरमुं तदादित्यमुत्थापयत्युदु तिष्ठ स्वध्वरेत्यध्वरो वै यज्ञ उदु तिष्ठ सुयज्ञियेत्येतदवा नो देव्या धियेति या ते दैवी धीस्तया नोऽवेत्येतद्दृशे च भासा बृहता सुशुक्वनिरिति दर्शनाय च भासा बृहता सुशुक्वनिरित्येतदाग्ने याहि सुशस्तिभिरिति ये वोढारस्ते सुशस्तय आग्ने याहि वोढृभिरित्येतत् ॥९॥ अथैनमित ऊर्ध्वं प्राञ्चं प्रगृह्णाति । असौ वाऽआदित्य एषोऽग्निरमुं तदादित्यमित ऊर्ध्वं प्राञ्चं दधाति तस्मादसावादित्य इत ऊर्ध्वः प्राङ् धीयतऽऊर्ध्व ऊ षु ण ऊतये तिष्ठा देवो न सवितेति यथैव यजुस्तथा बन्धुरूर्ध्वो वाजस्य सनितेत्यूर्ध्वो वाऽएष तिष्ठन्वाजमन्नꣳ सनोति यदञ्जिभिर्वाघद्भिर्विह्वयामहऽइति रश्मयो वाऽएतस्याञ्जयो वाघतस्तानेतदाह परोबाहु प्रगृह्णाति परोबाहु ह्येष इतोऽथैनमुपावहरति तमुपावहृत्योपरिनाभि धारयति तस्योपरि बन्धुः ॥१०॥ ब्राह्मणम् ॥ ४ [४. ३.] ॥ ॥

हस्तऽएष भवत्यथ पशूनभिमन्त्रयते । एतद्वाऽएषु देवाः सम्भरिष्यन्तः पुरस्ता-

द्वीर्यमदधुस्तथैवैषयमेतत्सम्भरिष्यन्पुरस्ताद्वीर्यं दधाति ॥१॥ सोऽश्वमभिमन्त्रयते । स जातो गर्भोऽअसि रोदस्योरितीमे वै द्यावापृथिवी रोदसी तयोरेष जातो गर्भोऽग्ने चारुर्विभृत ओषधीष्विति सर्वासु ह्येष चारुर्विभृत ओषधिषु चित्रः शिशुः परि तमाᳲस्यक्तूनिति चित्रो वाऽएष शिशुः परेण तमाᳲस्यक्तूनतिरोचते प्र मातृभ्योऽअधि कनिक्रदद्गा इत्योषधयो वाऽएतस्य मातरस्ताभ्य एष कनिक्रदत्प्रैति तदश्वे वीर्यं दधाति ॥२॥ अथ रासभᳲ । स्थिरो भव वीड्वङ्ग आशुर्भव वाज्यर्वन्निति स्थिरश्च भव वीड्वङ्गश्चाशुश्च भव वाजी चार्वन्नित्येतत्पृथुर्भव सुषदस्त्वमग्नेः पुरीषवाहण इति पृथुर्भव सुशीमस्त्वमग्नेः पशव्यवाहन इत्येतत्तद्रासभे वीर्यं दधाति ॥३॥ अथाजᳲ । शिवा भव प्रजाभ्यो मानुषीभ्यस्त्वमङ्गिर इत्यङ्गिरा वाऽअग्निराग्नेयोऽजः शमयत्येवैनमेतद्धिᳲसायै मा द्यावापृथिवीऽअभिशोचीर्मान्तरिक्षं मा वनस्पतीनित्येतत्सर्वं मा हिᳲसीरित्येतत्तदजे वीर्यं दधाति ॥४॥ त्रिभिरभिमन्त्रयते । त्रिवृदग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैष्वेतद्वीर्यं दधाति ॥५॥ अथैनमेतेषां पशूनामुपरिष्टात्प्रगृह्णाति । तदेनमेतैः पशुभिः सम्भरति नोपस्पृशति वज्रो वै पशवो रेत इदं नेदिदᳲ रेतो वज्रेण हिनसानीत्यथोऽअग्निरयं पशव इमे नेदयमग्निरिमान्पशून्हिनसदिति ॥६॥ तमश्वस्योपरिष्टात्प्रगृह्णाति । प्रैतु वाजी कनिक्रददिति प्रैतु वाजी कनिक्रद्यमान इत्येतन्नानदद्रासभः पत्वेति तदश्वस्य यजुषि रासभं निराह तद्रासभे शुचं दधाति भरन्नग्निं पुरीष्यं मा पाद्यायुषः पुरेति भरन्नग्निं पशव्यं मोऽअस्मात्कर्मणः पुरा पादीत्येतत्तदेनमश्वेन सम्भरति ॥७॥ अथ रासभस्य । वृषाग्निं वृषणं भरन्निति वृषा वाऽअग्निर्वृषा रासभः स वृषा वृषाणं भरत्यपां गर्भᳲ समुद्रियमित्यपाᳲ ह्येष गर्भः समुद्रियस्तदेनᳲ रासभेन सम्भरति ॥८॥ अथापादत्ते । अग्नऽआयाहि वीतयऽइत्यवितवऽइत्येतत्तदेनं ब्रह्मणा यजुषैतस्माच्छौद्राद्वर्णादपादत्ते ॥९॥ अथाजस्य । ऋतᳲ सत्यमृतᳲ सत्यमित्ययं वा

ऽअग्निर्ऋतमसावादित्यः सत्यं यदि वासावृतमयꣳ सत्यमुभयम्वेतदयमग्निस्तस्मादाह
ऽर्तꣳ सत्यमृतꣳ सत्यमिति तदेनमनेन सम्भरति ॥१०॥ त्रिभिः सम्भरति । त्रिवृद-
ग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतत्सम्भरति त्रिभिः पुरस्तादभिमन्त्रयते
तत्षट् तस्योक्तो बन्धुः ॥११॥ अथैतान्पशूनावर्तयन्ति । तेषामजः प्रथम एत्यथ
रासभोऽथाश्वोऽथेतो यतामश्वः प्रथम एत्यथ रासभोऽथाजः क्षत्रं वाऽअश्वो वै-
श्यं च शूद्रं चानु रासभो ब्राह्मणमजः ॥१२॥ तद्यदितो यताम् । अश्वः प्रथम ए-
ति तस्मात्क्षत्रियं प्रथमं यन्तमितरे त्रयो वर्णाः पश्चादनुयन्त्यथ यदमुत आयताम-
जः प्रथम एति तस्माद्ब्राह्मणं प्रथमं यन्तमितरे त्रयो वर्णाः पश्चादनुयन्त्यथ यन्नेवे-
तो यतां नामुतो रासभः प्रथम एति तस्मान्न कदा चन ब्राह्मणश्च क्षत्रियश्च वै-
श्यं च शूद्रं च पश्चादन्वितस्तस्मादेवं यन्त्यपापवस्यसायाथो ब्रह्मणा चैवैतत्क्षत्रेण
चैतौ वर्णावभितः परिगृह्णीतेऽनपक्रमिणौ कुरुते ॥१३॥ अथानड्वापुरुषमीक्षते ।
अग्निं पुरीष्यमङ्गिरस्वद्भराम इत्यग्निं पशव्यमग्निवद्भराम इत्येतत्तदेनमनड्वापुरुषेण
सम्भरति ॥१४॥ तमजस्योपरिष्टात्प्रगृह्णन्नेति । आग्नेयो वाऽअजः स्वेनैवैनमेत-
दात्मना स्वया देवतया सम्भरत्यथो ब्रह्म वाऽअजो ब्रह्मणैवैनमेतत्सम्भरति
॥१५॥ अथैनमुपावहरति । ओषधयः प्रतिमोदध्वमग्निमेतꣳ शिवमायन्तमभ्यत्र यु-
ष्मा इत्येतद्वैतस्मादायत ओषधयो बिभ्यति यद्वै नोऽयं न हिꣳस्यादिति ताभ्य
एवैनमेतच्छमयति प्रत्येनं मोदध्वꣳ शिवो वोऽभ्येति न वो हिꣳसिष्यतीति व्य-
स्यन्विश्वा अनिरा अमीवा निषीदन्नोऽअप दुर्मतिं जहीति व्यस्यन्विश्वा अनिरा-
श्चामीवाश्च निषीदन्नोऽप सर्वं पाप्मानं जहीत्येतत् ॥१६॥ ओषधयः प्रतिगृभ्णीत
। पुष्पवतीः सुपिप्पला इत्येतद्वैतासाꣳ समृद्धꣳ रूपं यत्पुष्पवत्यः सुपिप्पलाः स-
मृद्धा एनं प्रतिगृह्णीतेत्येतदयं वो गर्भ ऋत्वियः प्रत्नꣳ सधस्थमासददित्ययं वो गर्भ
ऋतव्यः सनातनꣳ सधस्थमासददित्येतत् ॥१७॥ द्वाभ्यामुपावहरति । द्विपाद्यज-

मानो यजमानोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतदुपावहरति तं द-
क्षिणत उदञ्चमुपावहरति तस्योक्तो बन्धुरुद्धतमवोक्षितं भवति यत्रैनमुपावहर-
त्युद्धते वाऽअवोक्षितेऽग्निमादधति सिकता उपकीर्णा भवन्ति तासामुपरि बन्धुः
॥१८॥ परिश्रितं भवति । एतद्ध देवा अबिभयुर्यद्वै न इममिह रक्षाꣳसि नाष्ट्रा
न हन्युरिति तस्माऽएतां पुरं पर्यश्रयंस्तथैवास्माऽअयमेतां पुरं परिश्रयत्यथो यो-
निर्वाऽइयꣳ रेत इदं तिर-इव वै योनौ रेतः सिच्यते योनिरूपमेतत्क्रियते त-
स्मादपि स्वया जायया तिर-इवैव चिचरिषति ॥१९॥ अथैनं विष्यति । तद्यद्दे-
वास्यात्रोपनद्धस्य सꣳशुच्यति तामेवास्मादेतच्छुचं बहिर्धा दधात्यथोऽएतस्या एवै-
नमेतद्योनेः प्रजनयति ॥२०॥ वि पाजसा पृथुना शोशुचान इति । वि पाजसा
पृथुना दीप्यमान इत्येतद्बाधस्व द्विषो रक्षसोऽअमीवा इति बाधस्व सर्वान्पाप्मन
इत्येतत्सुशर्मणो बृहतः शर्मणि स्यामग्नेरहꣳ सुहवस्य प्रणीतावित्याशिषमाशा-
स्ते ॥२१॥ अथाजलोमान्याच्छिद्य । उदीचः प्राचः पशून्प्रसृजन्त्येषा ह्योभयेषां देव-
मनुष्याणां दिग्यदुदीची प्राच्येतस्यां तद्दिशि पशून्दधाति तस्मादुभये देवमनुष्याः
पशूनुपजीवन्ति ॥२२॥ ब्राह्मणम् ॥५ [४. ४.] ॥ चतुर्थोऽध्यायः [३१.] ॥ ॥

पर्णकषायनिष्पक्वा एता आपो भवन्ति । स्थेम्ने न्वेव यद्वेव पर्णकषायेण सो-
मो वै पर्णश्चन्द्रमा उ वै सोम एतदु वाऽएकमग्निरूपमेतस्यैवाग्निरूपस्योपाप्त्यै
॥१॥ ता उपसृजति । आपो हि ष्ठा मयोभुव इति यां वै देवतामृगभ्यनूक्ता यां
यजुः सैव देवता सऽर्क्सो देवता तद्यजुस्ता हैता आप एवैष त्रिचस्तद्या अमू-
राप एकꣳ रूपꣳ समदृश्यन्त ता एतास्तदेवैतद्रूपं करोति ॥२॥ अथ फेनं जनयि-
त्वान्ववदधाति । यदेव तत्फेनो द्वितीयꣳ रूपमसृज्यत तदेवैतद्रूपं करोत्यथ या-
मेव तत्र मृदꣳ संयौति सैव मृद्यत्तत्तृतीयꣳ रूपमसृज्यतैतेभ्यो वाऽएष रूपेभ्यो
ऽग्रेऽसृज्यत तेभ्य एवैनमेतज्जनयति ॥३॥ अथाजलोमैः सꣳसृजति । स्थेम्ने न्वेव

यद्वेवाजलोमैरेतद्वाऽएनं देवाः पशुभ्योऽधि समभरंस्तथैवैनमयमेतत्पशुभ्योऽधि सम्भरति तद्यदजलोमैरेवाजे हि सर्वेषां पशूनाꣳ रूपमथ यल्लोम लोम हि रूपम् ॥४॥ मित्रः सꣳसृज्य । पृथिवीं भूमिं च ज्योतिषा सहेति प्राणो वै मित्रः प्राणो वाऽएतदग्रे कर्माकरोत्सुजातं जातवेदसमयक्ष्माय त्वा सꣳसृजामि प्रजाभ्य इति यथैव यजुस्तथा बन्धुः ॥५॥ अथैतत्त्रयं पिष्टं भवति । शर्कराश्मायोरसस्तेन सꣳसृजति स्थेम्ने न्वेव यद्वेव तेनैतावती वाऽइयमग्रेऽसृज्यत तद्यावतीयमग्रेऽसृज्यत तावतीमेवैनामेतत्करोति ॥६॥ रुद्राः सꣳसृज्य । पृथिवीं बृहज्ज्योतिः समीधिरऽइत्यसौ वाऽआदित्य एषोऽग्निरेतद्वै तद्रुद्राः सꣳसृज्य पृथिवीं बृहज्ज्योतिः समीधिरे तेषां भानुरजस्र इच्छुक्रो देवेषु रोचतऽइत्येष वाऽएषां भानुरजस्रः शुक्रो देवेषु रोचते ॥७॥ द्वाभ्याꣳ सꣳसृजति । द्विपाद्यजमानो यजमानोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतत्सꣳसृजति ॥८॥ अथ प्रयौति । सꣳसृष्टां वसुभी रुद्रैरिति सꣳसृष्टा ह्येषा वसुभिश्च रुद्रैश्च भवति यन्मित्रेण तद्वसुभिर्यद्रुद्रैस्तद्रुद्रैर्धीरैः कर्मण्यां मृदमिति धीरा हि ते कर्मण्योऽइयं मृद्धस्ताभ्यां मृद्वीं कृत्वा सिनीवाली कृणोतु तामिति वाग्वै सिनीवाली सैनाꣳ हस्ताभ्यां मृद्वीं कृत्वा करोत्वित्येतत् ॥९॥ सिनीवाली सुकपर्दा सुकुरीरा स्वौपशेति । योषा वै सिनीवाल्येतद्वै योषायै समृद्धꣳ रूपं यत्सुकपर्दा सुकुरीरा स्वौपशा समर्धयत्येवैनामेतत्सा तुभ्यमदिते मह्योखां दधातु हस्तयोरितीयं वाऽअदितिर्मह्यस्यै तदाह ॥१०॥ उखां कृणोतु । शक्त्या बाहुभ्यामदितिर्धियेति शक्त्या च हि करोति बाहुभ्यां च धिया च माता पुत्रं यथोपस्थे साग्निं बिभर्तु गर्भऽएति यथा माता पुत्रमुपस्थे बिभृयादेवमग्निं गर्भे बिभर्त्वित्येतत् ॥११॥ त्रिभिः प्रयौति । त्रिवृदग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतत्प्रयौति द्वाभ्याꣳ सꣳसृजति तत्पञ्च पञ्चचितिकोऽग्निः पञ्चऽर्तवः संवत्सरः संवत्सरोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावत्त-

ह्वति त्रिभिरप उपसृजति तदष्टावष्टाक्षरा गायत्री गायत्रोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावत्तद्भवत्यथोऽअष्टाक्षरा वाऽइयमग्रेऽसृज्यत तद्यावतीयमग्रेऽसृज्यत तावतीमेवैनामेतत्करोति ॥१२॥ ब्राह्मणम् ॥ ६ [५. १.] ॥

अथ मृत्पिण्डमपादत्ते । यावन्तं निधयेऽलं मन्यते मखस्य शिरोऽसीति यज्ञो वै मखस्तस्यैतच्छिर आहवनीयो वै यज्ञस्य शिर आहवनीयमु वाऽएतं चेष्यन्भवति तस्मादाह मखस्य शिरोऽसीति ॥१॥ यद्वेवाह मखस्य शिरोऽसीति । जायतऽएष एतद्यच्चीयते शीर्षतो वै मुखतो जायमानो जायते शीर्षतो मुखतो जायमानो जायाताऽइति ॥२॥ तं प्रथयति । वसवस्त्वा कृण्वन्तु गायत्रेण छन्दसाङ्गिरस्वदित्ययꣳ ह्येष लोको निधिस्तमेतद्वसवो गायत्रेण छन्दसाकुर्वꣳस्तथैवैनमयमेतद्गायत्रेण छन्दसा करोत्यङ्गिरस्वदिति प्राणो वाऽअङ्गिरा ध्रुवासीति स्थिरासीत्येतदथो प्रतिष्ठितासीति पृथिव्यसीति पृथिवी ह्येष निधिर्धारया मयि प्रजाꣳ रायस्पोषं गौपत्यꣳ सुवीर्यꣳ सजातान्यजमानायेत्येतद्वै वसव इमं लोकं कृत्वा तस्मिन्नेतामाशिषमाशासत तथैवैतद्यजमान इमं लोकं कृत्वा तस्मिन्नेतामाशिषमाशास्ते तां प्रादेशमात्रीं कृत्वाथास्यै सर्वतस्तीरमुन्नयति ॥३॥ अथ पूर्वमुद्धिमादधाति । रुद्रास्त्वा कृण्वन्तु त्रैष्टुभेन छन्दसाङ्गिरस्वदित्यन्तरिक्षꣳ ह्येष उद्धिस्तमेतद्रुद्रास्त्रैष्टुभेन छन्दसाकुर्वꣳस्तथैवैनमयमेतत्त्रैष्टुभेन छन्दसा करोत्यङ्गिरस्वदिति प्राणो वाऽअङ्गिरा ध्रुवासीति स्थिरासीत्येतदथो प्रतिष्ठितासीत्यन्तरिक्षमसीत्यन्तरिक्षꣳ ह्येष उद्धिर्धारया मयि प्रजाꣳ रायस्पोषं गौपत्यꣳ सुवीर्यꣳ सजातान्यजमानायेत्येतद्वै रुद्रा अन्तरिक्षं कृत्वा तस्मिन्नेतामाशिषमाशासत तथैवैतद्यजमानोऽन्तरिक्षं कृत्वा तस्मिन्नेतामाशिषमाशास्ते ताꣳ संलिप्य सꣳश्लक्ष्णय ॥४॥ अथोत्तरमुद्धिमादधाति । आदित्यास्त्वा कृण्वन्तु जागतेन छन्दसाङ्गिरस्वदिति द्यौर्ह्येष उद्धिस्तमेतदादित्या जागतेन छन्दसाकुर्वꣳस्तथैवैनमयमेतज्जागतेन छन्दसा करोत्यङ्गिरस्वदिति

प्राणो वा ऽअङ्गिरा ध्रुवासीति स्थिरासीत्येतदथो प्रतिष्ठितासीति द्यौरसीति द्यौर्ह्ये-
ष उद्धिर्धारया मयि प्रजाꣳ रायस्पोषं गौपत्यꣳ सुवीर्यꣳ सजातान्यजमानायेत्येतद्वा
ऽआदित्या दिवं कृत्वा तस्यामेतामाशिषमाशासत तथैवैतद्यजमानो दिवं कृत्वा
तस्यामेतामाशिषमाशास्ते ॥५॥ अथैतेन चतुर्थेन यजुषा करोति । विश्वे त्वा दे-
वा वैश्वानराः कृण्वन्त्वानुष्टुभेन छन्दसाङ्गिरस्वदिति दिशो ह्येतद्यजुरेतद्धै विश्वे
देवा वैश्वानरा एषु लोकेषूखायामेतेन चतुर्थेन यजुषा दिशोऽदधुस्तथैवैतद्यजमा-
न एषु लोकेषूखायामेतेन चतुर्थेन यजुषा दिशो दधात्यङ्गिरस्वदिति प्राणो वा
ऽअङ्गिरा ध्रुवासीति स्थिरासीत्येतदथो प्रतिष्ठितासीति दिशोऽसीति दिशो ह्येत-
द्यजुर्धारया मयि प्रजाꣳ रायस्पोषं गौपत्यꣳ सुवीर्यꣳ सजातान्यजमानायेत्येतद्धै वि-
श्वे देवा वैश्वानरा दिशः कृत्वा तास्वेतामाशिषमाशासत तथैवैतद्यजमानो दिशः
कृत्वा तास्वेतामाशिषमाशास्ते ॥६॥ तेनैतेनान्तरतश्च बाह्यतश्च करोति । तस्मा-
देषां लोकानामन्तरतश्च बाह्यतश्च दिशाऽपरिमितमेतेन करोत्यपरिमिता हि
दिशः ॥७॥ तां प्रादेशमात्रीमेवोर्ध्वां करोति । प्रादेशमात्रीं तिरश्चीं प्रादेशमात्रो
वै गर्भो विष्णुर्योनिरेषा गर्भसंमितां तद्योनिं करोति ॥८॥ सा यदि वर्षीयसी
प्रादेशात्स्यात् । एतेन यजुषा ह्रसीयसीं कुर्याद्यदि ह्रसीयस्येतेन वर्षीयसीम् ॥९॥
स यद्येकः पशुः स्यात् । एकप्रादेशां कुर्यादथ यदि पञ्च पशवः स्युः पञ्चप्रादेशां
कुर्यादिषुमात्रीं वा वीर्यं वा ऽइषुर्वीर्यसंमितेव तद्भवति पञ्चप्रादेशा ह स्म त्वेव पु-
रेषुर्भवति ॥१०॥ अथ तिरश्चीꣳ रास्नां पर्यस्यति । दिशो हैव सैतद्धै देवा इमांल्लो-
कानुखां कृत्वा दिग्भिरदृꣳहन्दिग्भिः पर्यतन्वंस्तथैवैतद्यजमान इमांल्लोकानुखां कृ-
त्वा दिग्भिर्दृꣳहति दिग्भिः परितनोति ॥११॥ तामुत्तरे वितृतीये पर्यस्यति । अत्र
ह्येषां लोकानामन्ताः समायन्ति तदेवैनांस्तद्दृꣳहति ॥१२॥ अदित्यै रास्नासीति ।
वरुण्या वै यज्ञे रज्जुरवरुण्यामेवैनामेतद्रास्नां कृत्वा पर्यस्यति ॥१३॥ अथ चतस्र

ऊर्ध्वाः करोति । तूष्णीमेव दिशो ह्येव ता एतद्धि देवा इमांल्लोकानुखां कृत्वा दि-
ग्भिः सर्वतोऽदृꣳहंस्तथैवैतद्यजमान इमांल्लोकानुखां कृत्वा दिग्भिः सर्वतो दृꣳह-
ति ॥१४॥ ता एता एतस्यै भवन्ति । एतद्वाऽएता एतामस्तभ्नुवंस्तथैवैनामेतत्स्त-
भ्नुवन्ति तद्यदेत ऊर्ध्वं तदेतया तिरश्च्या दृꣳमथ यदतोऽर्वाक्तदेताभिः ॥१५॥ ता-
सामग्रेषु स्तनानुन्नयन्ति । एतद्धि देवा इमांल्लोकानुखां कृत्वैतैः स्तनैः सर्वान्का-
मानदुह्रत तथैवैतद्यजमान इमांल्लोकानुखां कृत्वैतैः स्तनैः सर्वान्कामान्दुह्रे ॥१६॥
सैषा गौरेव । इमे वै लोका उखेमे लोका गौस्तस्याऽएतदूधो यैषा तिरश्ची
रास्ना सा वितृतीये भवति वितृतीये ह्रि गोरूधः ॥१७॥ तस्यै स्तनानुन्नयति ।
ऊधसस्तत्स्तनानुन्नयति सा चतुस्तना भवति चतुस्तना ह्रि गौः ॥१८॥ ताꣳ
हैके द्विस्तनां कुर्वन्ति । अथोऽअष्टस्तनां न तथा कुर्याद्ये वै गोः कनीयस्तनाः
पशवो ये भूयस्तना अनुपजीवनीयतरा वाऽअस्यैतेऽनुपजीवनीयतराꣳ हैनां ते
कुर्वतेऽथो ह ते न गां कुर्वते शुनीं वाविं वा वडबां वा तस्मात्तथा न कुर्यात्
॥१९॥ अथास्यै बिलमभिपद्यते । अदितिष्टे बिलं गृभ्णात्विति वाग्वाऽअदितिरे-
तद्वाऽएनां देवाः कृत्वा वाचादित्या निरष्ठापयंस्तथैवैनामयमेतत्कृत्वा वाचादित्या
निष्ठापयति ॥२०॥ तां परिगृह्य निदधाति । कृत्वाय सा महीमुखामिति कृत्वाय
सा महतीमुखामित्येतन्मृन्मयीं योनिमग्नयऽइति मृन्मयी ह्येषा योनिरग्नेः पुत्रेभ्यः
प्रायच्छददितिः श्रपयानित्येतद्वाऽएनामदितिः कृत्वा देवेभ्यः पुत्रेभ्यः श्रपणाय प्राय-
च्छत्तथैवैनामयमेतत्कृत्वा देवेभ्यः श्रपणाय प्रयच्छति ॥२१॥ ता हैके तिस्रः कुर्वन्ति
। त्रयो वाऽइमे लोका इमे लोका उखा इति वदन्तोऽथो अन्योऽन्यस्यै प्राय-
श्चित्त्यै यदीतरा भेत्स्यतेऽथेतरस्यां भरिष्यामो यदीतराथेतरस्यामिति न तथा कुर्या-
द्यो वाऽएष निधिः प्रथमोऽयꣳ स लोको यः पूर्व उद्धिरन्तरिक्षं तद्य उत्तरो द्यौः
साथ यदेतच्चतुर्थं यजुर्दिशो ह्येव तदेतावद्वाऽइदꣳ सर्वं यावदिमे च लोका दि-

शश्च स यदत्रोपाहरेदति तद्रेचयेद्यद्ध वै यज्ञेऽतिरिक्तं क्रियते यजमानस्य तद्द्वि-
षन्तं भ्रातृव्यमभ्यतिरिच्यते यदु भिन्नायै प्रायश्चित्तिरुत्तरस्मिंस्तदन्वाख्याने ॥२२॥
ब्राह्मणम् ॥ ७ [५. २.] ॥ तृतीयः प्रपाठकः ॥ कण्डिकासंख्या ११४ ॥ ॥

तस्या एतस्या अषाढां पूर्वां करोति । इयं वाऽअषाढेयमु वाऽएषां लोकानां प्रथमासृज्यत तामेतस्या एव मृदः करोत्येषाꣳ ह्येव लोकानामियं महिषी करोति महिषी हीयं तस्यैव प्रथमा वित्ता सा महिषी ॥१॥ पादमात्री भवति । प्रतिष्ठा वै पाद इयमु वै प्रतिष्ठा त्र्यालिखिता भवति त्रिवृद्धीयम् ॥२॥ अथोखां करोति । इमांस्तल्लोकान्करोत्यथ विश्वज्योतिषः करोत्येता देवता अग्निं वायुमादित्यमेता ह्येव देवता विश्वं ज्योतिस्ता एतस्या एव मृदः करोत्येभ्यस्तल्लोकेभ्य एतान्देवान्निर्मिमीते यजमानः करोति त्र्यालिखिता भवन्ति त्रिवृतो ह्येते देवा इत्यधिदेवतम् ॥३॥ अथाध्यात्मम् । आत्मैवोखा वागषाढा तां पूर्वां करोति पुरस्ताद्धीयमात्मनो वाक्तामेतस्या एव मृदः करोत्यात्मनो ह्येवेयं वाङ्महिषी करोति महिषी हि वाक्त्र्यालिखिता भवति त्रेधाविहिता हि वागृचो यजूꣳषि सामान्यथो यदिदं त्रयं वाचो रूपमुपाꣳशु व्यन्तरामुच्चैः ॥४॥ अथोखां करोति । आत्मानं तत्करोत्यथ विश्वज्योतिषः करोति प्रजा वै विश्वज्योतिः प्रजा ह्येव विश्वं ज्योतिः प्रजननमेवैतत्करोति ता एतस्या एव मृदः करोत्यात्मनस्तत्प्रजां निर्मिमीते यजमानः करोति यजमानस्तदात्मनः प्रजां करोत्यनन्तर्हिताः करोत्यनन्तर्हितां तदात्मनः प्रजां करोत्युत्तराः करोत्युत्तरां तदात्मनः प्रजां करोति त्र्यालिखिता भवन्ति त्रिवृद्धि प्रजातिः पिता माता पुत्रोऽथो गर्भ उल्बं जरायु ॥५॥ ता एता यजुष्कृतायै करोति । अयजुष्कृतायाऽइतरा निरुक्ता एता भवन्त्यनिरुक्ता इतराः परिमिता एता भवन्त्यपरिमिता इतराः ॥६॥ प्रजापतिरेषोऽग्निः । उभयम्वेतत्प्रजापतिर्निरुक्तश्चानिरुक्तश्च परिमितश्चापरिमितश्च तद्या यजुष्कृतायै करोति

यदेवास्य निरुक्तं परिमितꣳ रूपं तदस्य तेन संस्करोत्यथ या अयजुष्कृतायै यदे-
वास्यानिरुक्तमपरिमितꣳ रूपं तदस्य तेन संस्करोति स ह वाऽएतꣳ सर्वं कृत्स्नं
प्रजापतिꣳ संस्करोति य एवं विद्वानेतदेवं करोत्यथोपशयायै पिण्डं परिशिनष्टि
प्रायश्चित्तिभ्यः ॥७॥ ॥शतम् ३७००॥ ॥ अथैनां धूपयति । स्थेम्ने न्वेवाथो कर्मणः
प्रकृततायै यद्वेव धूपयति शिर एतद्यज्ञस्य यदुखा प्राणो धूमः शीर्षंस्तत्प्राणं द-
धाति ॥८॥ अश्वशकैर्धूपयति । प्राजापत्यो वाऽअश्वः प्रजापतिरग्निर्नो वा आत्मा-
त्मानꣳ हिनस्त्यहिꣳसायै तद्वै शक्नेव तद्धि जग्धं यातयाम तथो ह नैवाश्वꣳ हि-
नस्ति नेतरान्पशून् ॥९॥ वसवस्त्वा धूपयन्तु । गायत्रेण छन्दसाङ्गिरस्वद्रुद्रास्त्वा
धूपयन्तु त्रैष्टुभेन छन्दसाङ्गिरस्वदादित्यास्त्वा धूपयन्तु जागतेन छन्दसाङ्गिरस्वद्विश्वे
त्वा देवा वैश्वानरा धूपयन्त्वानुष्टुभेन छन्दसाङ्गिरस्वदिन्द्रस्त्वा धूपयतु वरुणस्त्वा धू-
पयतु विष्णुस्त्वा धूपयत्वित्येताभिरेवैनामेतद्देवताभिर्धूपयति ॥१०॥ सप्ताश्वशकानि
भवन्ति । सप्त यजूꣳषि सप्ततय्य एता देवताः सप्त शीर्षन्प्राणा यद्वु वाऽअपि बहु
कृत्वः सप्त-सप्त सप्तैव तच्छीर्षण्येव तत्सप्त प्राणान्दधाति ॥१७॥ ब्राह्मणम् ॥१
[५. ३] ॥ ॥

अथैनमस्यां खनति । एतद्वै देवा अबिभयुर्यद्वै न इममिह रक्षाꣳसि नाष्ट्रा न
हन्युरिति तस्माऽइमामेवात्मानमकुर्वन्गुप्त्याऽआत्मात्मानं गोप्स्यतीति ॥१॥ तं
वाऽअदित्या खनति । इयं वाऽअदितिर्नो वाऽआत्मात्मानꣳ हिनस्त्यहिꣳसायै
यदन्यया देवतया खनेद्धिꣳस्याद्धैनम् ॥२॥ अदितिष्ट्वा देवी विश्वदेव्यावती । पृ-
थिव्याः सधस्थेऽअङ्गिरस्वत्खनत्ववटेत्यवटो ह्येष देवत्रात्र सा वैणव्यभ्रिरुत्सीदति
चतुःस्रक्तिरेष कूपो भवति चतस्रो वै दिशः सर्वाभ्य एवैनमेतद्दिग्भ्यः खनत्यथ
पचनमवधायाषाढामवदधाति तूष्णीमेव ताꣳ हि पूर्वां करोति ॥३॥ अथोखाम-
वदधाति । देवानां त्वा पत्नीर्देवीर्विश्वदेव्यावतीः पृथिव्याः सधस्थेऽअङ्गिरस्वद्दधतूखे

ऽइति देवानाꣳ ह्यैतामग्रे पत्नीर्देवीर्विश्वदेव्यावतीः पृथिव्याः सधस्थेऽङ्गिरस्वद्द-
धुस्ताभिरेवैनामेतद्दधाति ता ह ता ओषधय एवौषधयो वै देवानां पत्न्य ओष-
धिभिर्हीदꣳ सर्वꣳ हितमोषधिभिरेवैनामेतद्दधात्यथ विश्वज्योतिषोऽवदधाति तू-
ष्णीमेवाथ पचनमवधायाभीन्द्धे ॥४॥ धिषणास्त्वा देवीः । विश्वदेव्यावतीः पृथि-
व्याः सधस्थेऽअङ्गिरस्वदभीन्धतामुखऽइति धिषणा ह्यैतामग्रे देवीर्विश्वदेव्यावतीः
पृथिव्याः सधस्थेऽङ्गिरस्वदभीधिरे ताभिरेवैनामेतदभीन्द्धे सा ह सा वागेव वाग्वै
धिषणा वाचा हीदꣳ सर्वमिद्धं वाचैवैनामेतदभीन्द्धेऽथैतानि त्रीणि यजूꣳषीङ्गमा-
ण एव जपति ॥५॥ वरूत्रीष्ट्वा देवीः । विश्वदेव्यावतीः पृथिव्याः सधस्थेऽअङ्गि-
रस्वद्रूपयन्तूखऽइति वरूत्रीर्ह्यैतामग्रे देवीर्विश्वदेव्यावतीः पृथिव्याः सधस्थेऽङ्गिर-
स्वद्रूपयां चक्रुस्ताभिरेवैनामेतद्रूपयति तानि ह तान्यहोरात्राण्येवाहोरात्राणि
वै वरूत्रयोऽहोरात्रैर्हीदꣳ सर्वं वृतमहोरात्रैरेवैनामेतद्रूपयति ॥६॥ ग्नास्त्वा देवीः
। विश्वदेव्यावतीः पृथिव्याः सधस्थेऽअङ्गिरस्वत्पचन्तूखऽइति ग्ना ह्यैतामग्रे देवीर्वि-
श्वदेव्यावतीः पृथिव्याः सधस्थेऽङ्गिरस्वत्पेचुस्ताभिरेवैनामेतत्पचति तानि ह ता-
नि छन्दाꣳस्येव छन्दाꣳसि वै ग्नाश्छन्दोभिर्हि स्वर्गं लोकं गच्छन्ति छन्दोभिरेवैना-
मेतत्पचति ॥७॥ जनयस्त्वाछिन्नपत्रा देवीः । विश्वदेव्यावतीः पृथिव्याः सधस्थे
ऽअङ्गिरस्वत्पचन्तूखऽइति जनयो ह्यैतामग्रेऽछिन्नपत्रा देवीर्विश्वदेव्यावतीः पृथि-
व्याः सधस्थेऽअङ्गिरस्वत्पेचुस्ताभिरेवैनामेतत्पचति तानि ह तानि नक्षत्राण्येव
नक्षत्राणि वै जनयो ये हि जनाः पुण्यकृतः स्वर्गं लोकं यन्ति तेषामेतानि ज्यो-
तीꣳषि नक्षत्रैरेवैनामेतत्पचति ॥८॥ स वै खनत्येकेन । अवदधात्येकेनाभीन्द्धे
ऽएकेन अपयत्येकेन द्वाभ्यां पचति तस्माद्द्विः संवत्सरस्यान्नं पच्यते तानि षट्
सम्पद्यन्ते षडृतवः संवत्सरः संवत्सरोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावत्तद्भवति
॥९॥ अथ मित्रस्य चर्षणीधृत इति । मैत्रेण यजुषोपन्याचरति यावत्क्रियचो-

पन्याचरति न वै मित्रं कं चन हिनस्ति न मित्रं कश्चन हिनस्ति तथो हैष एतां न हिनस्ति नोऽएतमेषा तां दिवैवोपवपेद्दिवोद्वपेदह्रूर्व्याग्नेयम् ॥१०॥ ताꣳ सावित्रेण यजुषोद्वपति । सविता वै प्रसविता सवितृप्रसूत एवैनामेतदुद्वपति देवस्त्वा सवितोद्वपतु सुपाणिः स्वङ्गुरिः सुबाहुरुत शक्त्येति सर्वं वै ह्येतत्सविता ॥११॥ अथैनां पर्यावर्तयति । अव्यथमाना पृथिव्यामाशा दिश आपृणेत्यव्यथमाना त्वं पृथिव्यामाशा दिशो रसेनापूरयेत्येतत् ॥१२॥ अथैनामुद्गृह्णाति । उत्थाय बृहती भवेत्युत्थाय हीमे लोका बृहन्त उदु तिष्ठ ध्रुवा त्वमित्युदु तिष्ठ स्थिरा त्वं प्रतिष्ठितेत्येतत् ॥१३॥ तां परिगृह्य निदधाति । मित्रैतां तऽउखां परिददाम्यभित्त्याऽएषा मा भेदीत्ययं वै वायुर्मित्रो योऽयं पवते तस्माऽएवैनामेतत्परिददाति गुप्त्यै ते हीमे लोका मित्रगुप्तास्तस्मादेषां लोकानां न किं चन मीयते ॥१४॥ अथैनामातृणत्ति । स्थेम्ने न्वेवाथो कर्मणः प्रकृततायै यद्वेवातृणत्ति शिर एतद्यज्ञस्य यदुखा प्राणः पयः शीर्षंस्तत्प्राणं दधात्यथो योषा वाऽउखा योषायां तत्पयो दधाति तस्माद्योषायां पयः ॥१५॥ अजायै पयसातृणत्ति । प्रजापतेर्वै शोकादजा समभवन्प्रजापतिरग्निर्नो वाऽआत्मात्मानꣳ हिनस्त्यहिꣳसायै यद्वेवाजायाऽअजा ह सर्वा ओषधीरत्ति सर्वासामेवैनामेतदोषधीनाꣳ रसेनातृणत्ति ॥१६॥ वसवस्त्वातृन्दन्तु । गायत्रेण छन्दसाङ्गिरस्वद्रुद्रास्त्वातृन्दन्तु त्रैष्टुभेन छन्दसाङ्गिरस्वदादित्यास्त्वातृन्दन्तु जागतेन छन्दसाङ्गिरस्वद्विश्वे त्वा देवा वैश्वानरा आतृन्दन्त्वानुष्टुभेन छन्दसाङ्गिरस्वदित्येताभिरेवैनामेतद्देवताभिरातृणत्ति स वै याभिरेव देवताभिः करोति ताभिर्धूपयति ताभिरातृणत्ति यो वाव कर्म करोति स एव तस्योपचारं वेद तस्माद्याभिरेव देवताभिः करोति ताभिर्धूपयति ताभिरातृणत्ति ॥१७॥ ब्राह्मणम् ॥२ [५. ४.]॥ पञ्चमोऽध्यायः [४०.] ॥ ॥

भूयाꣳसि हवीꣳषि भवन्ति । अग्निचित्यायां यदु चानग्निचित्यायामतीनि ह

कर्माणि सन्ति यान्यन्यत्कर्माति तान्यतीनि तेषामग्निचित्या राजसूयो वाजपेयो ऽश्वमेधस्तद्यत्तान्यन्यानि कर्माण्यति तस्मात्तान्यतीनि ॥१॥ आग्नावैष्णव एकादश-कपालः । तदध्वरस्य दीक्षणीयं वैश्वानरो द्वादशकपाल आदित्यश्च चरुस्तेऽग्नेः ॥२॥ स यदाग्नावैष्णवमेव निर्वपेत् । नेतरे हविषीऽअध्वरस्यैव दीक्षणीयं कृतꣳ स्यान्नाग्नेरथ यदितरेऽएव हविषी निर्वपेन्नाग्नावैष्णवमग्नेरेव दीक्षणीयं कृतꣳ स्या-न्नाध्वरस्य ॥३॥ उभयानि निर्वपति । अध्वरस्य चाग्नेश्चोभयꣳ ह्येतत्कर्माध्वरकर्म चाग्निकर्म चाध्वरस्य पूर्वमथाग्नेरुपाप्त्यै ह्येतत्कर्म यदग्निकर्म ॥४॥ स य एष आ-ग्नावैष्णवः । तस्य तदेव ब्राह्मणं यत्पुरश्चरणे वैश्वानरो द्वादशकपालो वैश्वानरो वै सर्वेऽग्नयः सर्वेषामग्नीनामुपाप्त्यै द्वादशकपालो द्वादश मासाः संवत्सरः संवत्सरो वैश्वानरः ॥५॥ यद्वेवैतं वैश्वानरं निर्वपति । वैश्वानरं वाऽएतमग्निं जनयिष्यन्भ-वति तमेतत्पुरस्ताद्दीक्षणीयायाꣳ रेतो भूतꣳ सिञ्चति यादृग्वै योनौ रेतः सिच्य-ते तादृग्जायते तद्यदेतमत्र वैश्वानरꣳ रेतो भूतꣳ सिञ्चति तस्मादेषोऽमुत्र वैश्वा-नरो जायते ॥६॥ यद्वेवैते हविषी निर्वपति । क्षत्रं वै वैश्वानरो विडेष आदि-त्यश्चरुः क्षत्रं च तद्विशं च करोति वैश्वानरं पूर्वं निर्वपति क्षत्रं तत्कृत्वा विशं करोति ॥७॥ एक एष भवति । एकदेवत्य एकस्थं तत्क्षत्रमेकस्याꣳ श्रियं करो-ति चरुरितरो बहुदेवत्यो भूमा वाऽएष तण्डुलानां यच्चरुर्भूमोऽएष देवानां य-दादित्या विशि तद्भूमानं दधातीत्यधिदेवतम् ॥८॥ अथाध्यात्मꣳ । शिर एव वै-श्वानर आत्मैष आदित्यश्चरुः शिरश्च तदात्मानं च करोति वैश्वानरं पूर्वं निर्वप-ति शिरस्तत्कृत्वात्मानं करोति ॥९॥ एक एष भवति । एकमिव हि शिरश्चरु-रितरो बहुदेवत्यो भूमा वाऽएष तण्डुलानां यच्चरुर्भूमोऽएषोऽङ्गानां यदात्मात्म-स्तदङ्गानां भूमानं दधाति ॥१०॥ घृत एष भवति । घृतभाजना ह्यादित्याः स्वे नैवैनानेतद्भागेन स्वेन रसेन प्रीणात्युपाꣳश्वेतानि हवीꣳषि भवन्ति रेतो वा

ऽअत्र यज्ञ उपाꣳशु वै रेतः सिच्यते ॥११॥ अथौद्ग्रभणानि जुहोति । औद्ग्रभणैर्वै देवा आत्मानमस्माल्लोकात्स्वर्गं लोकमभ्युदगृह्णत यदुदगृह्णत तस्मादौद्ग्रभणानि तथैवैतद्यजमान औद्ग्रभणैरेवात्मानमस्माल्लोकात्स्वर्गं लोकमभ्युद्गृह्णीते ॥१२॥ तानि वै भूयाꣳसि भवन्ति । अग्निचित्यायां यद्व चानग्निचित्यायां तस्योक्तो बन्धुरुभयानि भवन्ति तस्योक्तोऽध्वरस्य पूर्वाण्यथाग्नेस्तस्योऽएवोक्तः ॥१३॥ पश्चाधरस्य जुहोति । पाङ्क्तो यज्ञो यावान्यज्ञो यावत्यस्य मात्रा तावतैवैनमेतद्रेतो भूतꣳ सिञ्चति सप्ताग्निः सप्तचितिकोऽग्निः सप्तऽर्तवः संवत्सरः संवत्सरोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतद्रेतो भूतꣳ सिञ्चति तान्युभयानि द्वादश सम्पद्यन्ते द्वादश मासाः संवत्सरः संवत्सरोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावत्तद्भवति ॥१४॥ स जुहोति । आकूतिमग्निं प्रयुजꣳ स्वाहेत्याकूताद्वाऽएतदग्रे कर्म समभवत्तदेवैतदेतस्मै कर्मणे प्रयुङ्क्ते ॥१५॥ मनो मेधामग्निं प्रयुजꣳ स्वाहेति । मनसो वाऽएतदग्रे कर्म समभवत्तदेवैतदेतस्मै कर्मणे प्रयुङ्क्ते ॥१६॥ चित्तं विज्ञातमग्निं प्रयुजꣳ स्वाहेति । चित्ताद्वाऽएतदग्रे कर्म समभवत्तदेवैतदेतस्मै कर्मणे प्रयुङ्क्ते ॥१७॥ वाचो विधृतिमग्निं प्रयुजꣳ स्वाहेति । वाचो वाऽएतदग्रे कर्म समभवत्तामेवैतदेतस्मै कर्मणे प्रयुङ्क्ते ॥१८॥ प्रजापतये मनवे स्वाहेति । प्रजापतिर्वै मनुः स हीदꣳ सर्वममनुत प्रजापतिर्वाऽएतदग्रे कर्माकरोत्तमेवैतदेतस्मै कर्मणे प्रयुङ्क्ते ॥१९॥ अग्नये वैश्वानराय स्वाहेति । संवत्सरो वाऽअग्निर्वैश्वानरः संवत्सरो वाऽएतदग्रे कर्माकरोत्तमेवैतदेतस्मै कर्मणे प्रयुङ्क्ते ॥२०॥ अथ सावित्रीं जुहोति । सविता वाऽएतदग्रे कर्माकरोत्तमेवैतदेतस्मै कर्मणे प्रयुङ्क्ते विश्वो देवस्य नेतुर्मर्तो वुरीत सख्यम् विश्वो राय इषुध्यति द्युम्नं वृणीत पुष्यसे स्वाहेति यो देवस्य सवितुः सख्यं वृणीते स द्युम्नं च पुष्टिं च वृणीतऽएष वाऽअस्य सख्यं वृणीते य एतत्कर्म करोति ॥२१॥ तान्यु हैके । उखायामेवैतान्यौद्ग्रभणानि जुह्वति कामेभ्यो

वाऽएतानि हूयन्तऽआत्मोऽएष यजमानस्य यदुखात्मन्यजमानस्य सर्वान्कामान्प्रतिष्ठापयाम इति न तथा कुर्यादेतस्य वै यज्ञस्य सꣳस्थितस्यैतासामाहुतीनां यो रसस्तदेतदर्चिर्यद्दीप्यते तद्यत्सꣳस्थिते यज्ञे हुतेष्वौद्ग्रभणेषूखां प्रवृणक्ति तदेनामेष यज्ञ आरोहति तं यज्ञं बिभर्ति तस्मात्सꣳस्थितऽएव यज्ञे हुतेष्वौद्ग्रभणेषूखां प्रवृञ्ज्यात् ॥२२॥ मुञ्जकुलायेनावस्तीर्णा भवति । आदीप्यादिति न्वेव यद्वेव मुञ्जकुलायेन योनिर्ह्येषाग्नेर्यन्मुञ्जो न वै योनिर्गर्भꣳ हिनस्त्यहिꣳसायै योनेर्वै जायमानो जायते योनेर्जायमानो जायाताऽइति ॥२३॥ शणकुलायमन्तरं भवति । आदीप्यादिति न्वेव यद्वेव शणकुलायं प्रजापतिर्यस्यै योनेरसृज्यत तस्याऽउमा उल्बमासञ्छणा जरायु तस्मात्ते पूतयो जरायु हि ते न वै जरायु गर्भꣳ हिनस्त्यहिꣳसायै जरायुणो वै जायमानो जायते जरायुणो जायमानो जायाताऽइति ॥२४॥ ब्राह्मणम् ॥३ [६. १.] ॥ ॥

तां तिष्ठन्प्रवृणक्ति इमे वै लोका उखा तिष्ठन्तीव वाऽइमे लोका अथो तिष्ठन्वै वीर्यवत्तमः ॥१॥ उदङ् प्राङ् तिष्ठन् । उदङ्वै प्राङ् तिष्ठन्प्रजापतिः प्रजा असृजत ॥२॥ यद्वेवोदङ् प्राङ् तिष्ठन् । एषा ह्युभयेषां देवमनुष्याणां दिग्यदुदीची प्राची ॥३॥ यद्वेवोदङ् प्राङ् तिष्ठन् । एतस्याꣳ ह दिशि स्वर्गस्य लोकस्य द्वारं तस्मादुदङ् प्राङ् तिष्ठन्नाहुतीर्जुहोत्युदङ् प्राङ् तिष्ठन्दक्षिणा नयति द्वारैव तत्स्वर्गस्य लोकस्य वित्तं प्रपादयति ॥४॥ मा सु भित्था मा सु रिष इति । यथैव यजुस्तथा बन्धुरम्ब धृष्णु वीरयस्व स्विति योषा वाऽउखाम्बेति वै योषायाऽआमन्त्रणꣳ स्विव वीरयस्वाग्निश्चेदं करिष्यथ इत्यग्निश्च ह्येतत्करिष्यन्तौ भवतः ॥५॥ दृꣳहस्व देवि पृथिवि स्वस्तयऽइति । यथैव यजुस्तथा बन्धुरासुरी माया स्वधया कृतासीति प्राणो वाऽअसुस्तस्यैषा माया स्वधया कृता जुष्टं देवेभ्य इदमस्तु हव्यमिति या एवैतस्मिन्नग्नावाहुतीर्होष्यन्भवति ता एतदाहाथोऽएवैव

हव्यमरिष्टा त्वमुदिहि यज्ञेऽअस्मिन्निति यथैवारिष्टानार्तैतस्मिन्यज्ञऽउदियादेवमेतदाह ॥ ६॥ द्वाभ्यां प्रवृणक्ति । द्विपाद्यजमानो यजमानोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनामेतत्प्रवृणक्ति गायत्र्या च त्रिष्टुभा च प्राणो गायत्र्यात्मा त्रिष्टुबेतावान्वै पशुर्यावान्प्राणश्चात्मा च तद्यावान्पशुस्तावतैवैनामेतत्प्रवृणक्त्यथोऽअग्निर्वै गायत्रीन्द्रस्त्रिष्टुबैन्द्राग्नोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनामेतत्प्रवृणक्तीन्द्राग्नी वै सर्वे देवाः सर्वदेवत्योऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनामेतत्प्रवृणक्ति तयोः सप्त पदानि सप्तचितिकोऽग्निः सप्तऽर्तवः संवत्सरः संवत्सरोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावत्तद्भवति ॥ ७॥ तां यदाग्निः संतपति । अथैनामर्चिरारोहति योषा वाऽउखा वृषाग्निस्तस्माद्यदा वृषा योषां संतपत्यथास्यां रेतो दधाति ॥ ८॥ तद्धैके । यदि चिरमर्चिरारोहत्यङ्गारानेवावपन्त्युभयेनैषोऽग्निरिति न तथा कुर्यादस्थन्वान्वाव पशुर्जायतेऽथ तं नाग्रऽएवास्थन्वन्तमिव न्युषन्ति रेत-इवैव दधति रेत उऽएतदनस्थिकं यदर्चिस्तस्मादेनामर्चिरेवारोहेत् ॥ ९॥ तां यदार्चिरारोहति । अथास्मिन्त्समिधमादधाति रेतो वाऽएनामेतदापद्यतऽएषोऽग्निस्तस्मिन्नेतां रेतसि सम्भूतिं दधाति ॥ १०॥ सा कार्मुकी स्यात् । देवाश्चासुराश्चोभये प्राजापत्या अस्पर्धन्त ते देवा अग्निमनीकं कृत्वासुरानभ्यायंस्तस्यार्चिषः प्रगृहीतस्यासुरा अग्रं प्रावृश्चंस्तदस्यां प्रत्यतिष्ठत्स कृमुकोऽभवत्तस्मात्स स्वादू रसो हि तस्मादु लोहितोऽर्चिर्हि स एषोऽग्निरेव यत्कृमुकोऽग्निमेवास्मिन्नेतत्सम्भूतिं दधाति ॥ ११॥ प्रादेशमात्री भवति । प्रादेशमात्रो वै गर्भो विष्णुरात्मसंमितामेवास्मिन्नेतत्सम्भूतिं दधाति ॥ १२॥ घृते न्युत्ता भवति । अग्निर्यस्यै योनेरसृज्यत तस्यै घृतमुल्बमासीत्तस्मात्तत्प्रत्युद्दीप्यतऽआत्मा ह्यस्यैष तस्मात्तस्य न भस्म भवत्यात्मैव तदात्मानमप्येति न वाऽउल्बं गर्भं हिनस्त्यहिंसायाऽउल्बाद्धि जायमानो जायतऽउल्बाज्जायमानो जायाताऽइति ॥ १३॥ तामादधाति

। द्रवन्नः सर्पिरासुतिरिति दार्वन्नः सर्पिरशन इत्येतत्प्रत्नो होता वरेण्य इति स-
नातनो होता वरेण्य इत्येतत्सहसस्पुत्रोऽअद्भुत इति बलं वै सहो बलस्य पु-
त्रोऽद्भुत इत्येतत्तिष्ठन्नादधाति स्वाहाकारेण तस्योपरि बन्धुः ॥१४॥ तद्वाऽआ-
त्मैवोखा । योनिर्मुञ्जाः शणा जरायूल्वं घृतं गर्भः समित् ॥१५॥ बाह्योखा भव-
ति । अन्तरे मुञ्जा बाह्यो ह्यात्मान्तरा योनिर्बाह्ये मुञ्जा भवन्त्यन्तरे शणा बाह्या
हि योनिरन्तरं जरायु बाह्ये शणा भवन्त्यन्तरं घृतं बाह्यꣳ हि जरायवन्तरमुल्वं
बाह्यं घृतं भवत्यन्तरा समिद्बाह्यꣳ ह्युल्वमन्तरो गर्भ एतेभ्यो वै जायमानो जा-
यते तेभ्य एवैनमेतज्जनयति ॥१६॥ ब्राह्मणम् ॥ ४ [६. २.] ॥ ॥

अथ वैकङ्कतीमादधाति । प्रजापतिर्या प्रथमामाहुतिमजुहोत्स हुत्वा यत्र न्यमृ-
ष्ट ततो विकङ्कतः समभवत्सैषा प्रथमाहुतिर्यद्विकङ्कतस्तामस्मिन्नेतज्जुहोति तये-
नमेतत्प्रीणाति परस्या अधि संवतोऽवराꣳ२॥ऽअभ्यातर । यत्राहमस्मि ताꣳ२॥ऽअवे-
नि यथैव यजुस्तथा बन्धुः ॥१॥ अथौदुम्बरीमादधाति । देवाश्चासुराश्चोभये
प्राजापत्या अस्पर्धन्त ते ह सर्वऽएव वनस्पतयोऽसुरानभ्युपेयुरुदुम्बरो हैव दे-
वान्न जहौ ते देवा असुराञ्जित्वा तेषां वनस्पतीनवृञ्जत ॥२॥ ते होचुः । हन्त
येषु वनस्पतिषूर्ग्यो रस उदुम्बरे तं दधाम ते यद्यपक्रामेयुर्यातयामा अपक्रामेयुर्य-
था धेनुर्दुग्धा यथानड्वानूढ्वानिति तद्येषु वनस्पतिषूर्ग्यो रस आसीदुदुम्बरे त-
मदधुस्तयैतदूर्जा सर्वान्वनस्पतीन्प्रति पच्यते तस्मात्स सर्वदार्द्रः सर्वदा क्षीरी तदेत-
त्सर्वमन्नं यदुदुम्बरः सर्वे वनस्पतयः सर्वेणैवैनमेतदन्नेन प्रीणाति सर्वैर्वनस्पति-
भिः समिन्धे ॥३॥ परमस्याः परावत इति । या परमा परावदित्येतद्रोहिदश्व इ-
हागहीति रोहितो ह्यग्नेरश्वः पुरीष्यः पुरुप्रिय इति पशव्यो बहुप्रिय इत्येतदग्ने
त्वं तरा मृध इत्यग्ने त्वं तर सर्वान्पाप्मन इत्येतत् ॥४॥ अथापरशुवृक्णमादधाति
। जायतऽएष एतद्यच्चीयते स एष सर्वस्माऽअन्नाय जायतऽएतद्वैकमन्नं यदपरशु-

वृक्णं तेनैनमेतत्प्रीणाति यदग्ने कानि कानि चिदा ते दारूणि दध्मसि । सर्वं
तदस्तु ते घृतं तज्जुषस्व यविष्ठ्येति यथैव यजुस्तथा बन्धुस्तद्यत्किं चापरशुवृक्णं
तदस्माऽएतत्स्वदयति तदस्माऽअन्नं कृत्वापिदधाति ॥५॥ अथाधःशयमादधाति ।
जायतऽएष एतद्यच्चीयते स एष सर्वस्माऽअन्नाय जायतऽएतद्वैकमन्नं यदधःशयं
तेनैनमेतत्प्रीणाति यदत्त्युपजिह्विका यद्वम्रोऽअतिसर्पतीत्युपजिह्विका वा हि त-
दत्ति वम्रो वातिसर्पति सर्वं तदस्तु ते घृतं तज्जुषस्व यविष्ठ्येति यथैव यजुस्तथा
बन्धुस्तद्यत्किं चाधःशयं तदस्माऽएतत्स्वदयति तदस्माऽअन्नं कृत्वापिदधाति ॥६॥
अथैता उत्तराः पालाश्यो भवन्ति । ब्रह्म वै पलाशो ब्रह्मणैवैनमेतत्समिन्द्धे य-
द्वेव पालाश्यः सोमो वै पलाश एषो ह परमाहुतिर्यत्सोमाहुतिस्तामस्मिन्नेतज्जु-
होति तयैनमेतत्प्रीणाति ॥७॥ अहरहरप्रयावं भरन्त इति । अहरहरप्रमत्ता
आहरन्त इत्येतदश्वायेव तिष्ठते घासमस्माऽइति यथाश्वाय तिष्ठते घासमित्येतद्रा-
यस्पोषेण समिषा मदन्त इति रय्या च पोषेण च समिषा मदन्त इत्येतदग्ने मा ते
प्रतिवेशा रिषामेति यथैवास्य प्रतिवेशो न रिष्येदेवमेतदाह ॥८॥ नाभा पृथि-
व्याः समिधानेऽअग्नाविति । एषा ह नाभिः पृथिव्यै यत्रैष एतत्समिध्यते रायस्पो-
षाय बृहते हवामहऽइति रय्यै च पोषाय च बृहते हवामहऽइत्येतदिरंमदमि-
तीरया ह्येष मत्तो बृहदुक्थमिति बृहदुक्थो ह्येष यजत्रमिति यज्ञियमित्येतज्जे-
तारमग्निं पृतनासु सासहिमिति जेता ह्यग्निः पृतना उ सासहिः ॥९॥ याः सेना
अभीत्वरीः । दंष्ट्राभ्यां मलिम्लूनग्ने जनेषु मलिम्लवो योऽअस्मभ्यमरातीयाद्यश्च नो
द्वेषते जनः । निन्दाद्योऽअस्मान्धिप्साच्च सर्वं तं मस्मसा कुर्विति ॥१०॥ एतद्वै
देवाः । यश्चैनानद्वेड्यं चाद्विषुस्तमस्माऽअन्नं कृत्वाप्यदधुस्तेनैनमप्रीणन्नन्नमद्धैतस्या-
भवद्दहन्तु देवानां पाप्मानं तथैवैतद्यजमानो यश्चैनं द्वेष्टि यं च द्वेष्टि तमस्मा
ऽअन्नं कृत्वापिदधाति तेनैनं प्रीणात्यन्नमद्धैतस्य भवति दहत्यु यजमानस्य पाप्मा-

नम् ॥११॥ ता एता एकादशादधात्यक्षत्रियस्य वापुरोहितस्य वा सर्वं वै तद्यदेकादशा सर्वं तद्यदक्षत्रियो वापुरोहितो वा ॥१२॥ द्वादश क्षत्रियस्य वा पुरोहितस्य वा । सर्वं वै तद्यद्द्वादश सर्वं तद्यत्क्षत्रियो वा पुरोहितो वा ॥१३॥ स पुरोहितस्यादधाति । सꣳशितं मे ब्रह्म सꣳशितं वीर्यं बलम् । सꣳशितं क्षत्रं जिष्णु यस्याहमस्मि पुरोहित इति तदस्य ब्रह्म च क्षत्रं च सꣳश्यति ॥१४॥ अथ क्षत्रियस्य । उदेषां बाहूऽअतिरमुद्वर्चोऽअथो बलम् । क्षिणोमि ब्रह्मणामित्राननुन्नयामि स्वाꣳ२ऽअहमिति यथैव क्षिणुयादमित्राननुन्नयेत्स्वानेवमेतदाहोभे एवैतेऽआदध्यादयं वाऽअग्निर्ब्रह्म च क्षत्रं चेममेवैतदग्निमेताभ्यामुभाभ्याꣳ समिन्द्धे ब्रह्मणा च क्षत्रेण च ॥१५॥ तास्त्रयोदश सम्पद्यन्ते । त्रयोदश मासाः संवत्सरः संवत्सरोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतदन्नेन प्रीणाति ॥१६॥ प्रादेशमात्र्यो भवन्ति । प्रादेशमात्रो वै गर्भो विष्णुरन्नमेतदात्मसंमितेनैवैनमेतदन्नेन प्रीणाति यदु वाऽआत्मसंमितमन्नं तदवति तन्न हिनस्ति यद्भूयो हिनस्ति तद्यत्कनीयो न तदवति तिष्ठन्नादधाति तस्योपरि बन्धुः स्वाहाकारेण रेतो वाऽइदꣳ सिक्तमयमग्निस्तस्मिन्यत्काष्ठान्यस्वाहाकृतान्यभ्यादध्याद्धिꣳस्याद्धैनं ता यत्समिधस्तेन नाहुतयो यदु स्वाहाकारेण तेनान्नमन्नꣳ हि स्वाहाकारस्तथो हैनं न हिनस्ति ॥१७॥ ब्राह्मणम् ॥ ५ [६. ३.] ॥ ॥

अथ विष्णुक्रमान्क्रान्त्वा । वात्सप्रेणोपस्थायास्तमितऽआदित्ये भस्मैव प्रथममुद्वपत्येतद्वाऽएनमेतेनान्नेन प्रीणात्येताभिः समिद्भिस्तस्यान्नस्य जग्धस्यैष पाप्मा सीदति भस्म तेनैनमेतद्व्यावर्तयति तस्मिन्नपहतपाप्मन्वाचं विसृजते वाचं विसृज्य समिधमादधाति रात्र्याऽएवैनमेतदन्नेन प्रीणाति रात्रीꣳ-रात्रीमप्रयावं भरन्त इति तस्योक्तो बन्धू रात्र्याऽएवैतामरिष्टिꣳ स्वस्तिमाशास्ते तद्यत्किं चातो रात्र्योपसमादधात्याहुतिकृतꣳ हैवास्मै तदुपसमादधाति ॥१॥ अथ प्रातरुदितऽआदित्ये ।

भस्मैव प्रथममुद्वपत्येतद्वाऽएनमेतेनान्नेन प्रीणात्येतया समिधा यच्च रात्र्योपसमादधाति तस्यान्नस्य जग्धस्यैष पाप्मा सीदति भस्म तेनैनमेतद्व्यावर्तयति तस्मिन्नपहतपाप्मन्वाचं विसृजते वाचं विसृज्य समिधमादधात्यह्नऽएवैनमेतदन्नेन प्रीणात्यहरहरप्रयावं भरन्त इति तस्योक्तो बन्धुरह्नऽएवैतामरिष्टिꣳ स्वस्तिमाशास्ते तद्यत्किं चातोऽह्नोपसमादधात्याहुतिकृतꣳ हैवास्मै तदुपसमादधाति ॥२॥ अहोरात्रे वाऽअभिविवर्तमाने संवत्सरमाप्नुतः संवत्सर इदꣳ सर्वमाप्त्यैवैतामरिष्टिꣳ स्वस्तिमाशास्ते ॥३॥ अथ यदास्मै व्रतं प्रयच्छन्ति । अथ व्रते न्यज्य समिधमादधाति न व्रते न्यञ्ज्यादित्यु हैकऽआहुराहुतिं तज्जुहुयादनवक्लृप्तं वै तद्यद्दीक्षित आहुतिं जुहुयादिति ॥४॥ स वै न्यञ्ज्यादेव । दैवो वाऽअस्यैष आत्मा मानुषोऽयꣳ स यन्न न्यञ्ज्यान्न हैतं दैवमात्मानं प्रीणीयादथ यन्न्यनक्ति तथो हैतं दैवमात्मानं प्रीणाति सा यत्समित्तेन नाहुतिर्यदु व्रते न्यक्ता तेनान्नमन्नꣳ हि व्रतꣳ ॥५॥ स वै समिधमाधायाथ व्रतयति । दैवो वाऽअस्यैष आत्मा मानुषोऽयं देवा उ वाऽअग्रेऽथ मनुष्यास्तस्मात्समिधमाधायाथ व्रतयति ॥६॥ अन्नपतेऽन्नस्य नो देहीति । अशनपतेऽशनस्य नो देहीत्येतदनमीवस्य शुष्मिण इत्यनशनायस्य शुष्मिण इत्येतत्प्र-प्र दातारं तारिष इति यजमानो वै दाता प्र यजमानं तारिष इत्येतदूर्जं नो धेहि द्विपदे चतुष्पदऽइत्याशिषमाशास्ते यदु भिन्नायै प्रायश्चित्तिमाहोत्तरस्मिंस्तदन्वाख्यानऽइति ॥७॥ यद्येषोखा भिद्येत । याभिन्ना नवा स्थाल्युरुबिली स्यात्तस्यामेनं पर्यावपेदार्छति वाऽएषोखा या भिद्यतेऽनार्ताऽइयं देवतानार्तायामिममनार्तं बिभराणीति तत्रोखायै कपालं पुरस्तात्प्रास्यति तथो हैष एतस्यै स्वायै योनेर्न च्यवते ॥८॥ अथ मृदमाहृत्य । उखां चोपशयां च पिष्ट्वा सꣳसृज्योखां करोत्येतयैवावृतानुपहरन्यजुस्तूष्णीमेव पक्त्वा पर्यावपति कर्मणिरेव तत्र प्रायश्चित्तिः पुनस्तत्कपालमुखायामुपसमस्योखां चोपशयां च पिष्ट्वा सꣳ-

सृज्य निदधाति प्रायश्चित्तिभ्यः ॥९॥ अथ यद्येष उख्योऽग्निरनुगच्छेत् । गार्हपत्यं वाव स गच्छति गार्हपत्याद्धि स आहृतो भवति गार्हपत्यादेवैनं प्राञ्चमुद्धृत्योपसमाधायोखां प्रवृञ्ज्यादित्येवावृतानुपहरन्यजुस्तूष्णीमेव तां यदाग्निरारोहति ॥१०॥ अथ प्रायश्चित्ती करोति । सर्वेभ्यो वाऽएष एतं कामेभ्य आधत्ते तद्यदेवास्यात्र कामानां व्यवच्छिद्यतेऽग्नावनुगते तदेवैतत्संतनोति संदधात्युभे प्रायश्चित्ती करोत्यध्वरप्रायश्चित्तिं चाग्निप्रायश्चित्तिं चाध्वरस्य पूर्वामथाग्नेस्तस्योक्तो बन्धुः ॥११॥ स समिधाज्यस्योपहत्य । आसीन आहुतिं जुहोति विश्वकर्मणे स्वाहेत्यथोपोत्थाय समिधमादधाति पुनस्त्वादित्या रुद्रा वसवः समिन्धतां पुनर्ब्रह्माणो वसुनीथ यज्ञैरित्येतास्त्वा देवताः पुनः समिन्धतामित्येतद्घृतेन त्वं तन्वं वर्धयस्व सत्याः सन्तु यजमानस्य कामा इति घृतेनाह त्वं तन्वं वर्धयस्व येभ्य उ त्वां कामेभ्यो यजमान आधत्त तेऽस्य सर्वे सत्याः सन्त्वित्येतत् ॥१२॥ अथ यदि गार्हपत्योऽनुगच्छेत् । अरणी वाव स गच्छत्यरणिभ्यां हि स आहृतो भवत्यरणिभ्यामेवैनं मथित्वोपसमाधाय प्रायश्चित्ती करोति ॥१३॥ अथ यदि प्रसुत आहवनीयोऽनुगच्छेत् । गार्हपत्यं वाव स गच्छति गार्हपत्याद्धि स आहृतो भवति गार्हपत्यादेवैनं प्राञ्चं सांकाशिनेन हृत्वोपसमाधाय प्रायश्चित्ती करोति यस्तस्मिन्कालेऽध्वरः स्यात्तामध्वरप्रायश्चित्तिं कुर्यात्समान्यग्निप्रायश्चित्तिः ॥१४॥ अथ यद्याग्नीध्रीयोऽनुगच्छेत् । गार्हपत्यं वाव स गच्छति गार्हपत्याद्धि स आहृतो भवति गार्हपत्यादेवैनं प्राञ्चमुत्तरेण सदो हृत्वोपसमाधाय प्रायश्चित्ती करोत्यथ यदि गार्हपत्योऽनुगच्छेत्तस्योक्तो बन्धुः ॥१५॥ ब्राह्मणम् ॥ ६ [६.४.] ॥ चतुर्थः प्रपाठकः ॥ कण्डिकासंख्या १०० ॥

षष्ठोऽध्यायः [४१.] ॥ ॥

रुक्मं प्रतिमुच्य बिभर्ति । सत्यं हैतद्यद्रुक्मः सत्यं वाऽएतं यन्तुमर्हति सत्येनैतं देवा अबिभरुः सत्येनैवैनमेतद्बिभर्ति ॥१॥ तद्यत्तत्सत्यम् । असौ स आदित्यः

स हिरण्मयो भवति ज्योतिर्वै हिरण्यं ज्योतिरेषोऽमृतꣳ हिरण्यममृतमेष परिमण्डलो भवति परिमण्डलो ह्येष एकविꣳशतिनिर्बाध एकविꣳशो ह्येष बहिष्टान्निर्बाधं बिभर्ति रश्मयो वाऽएतस्य निर्बाधा बाध्यत उ वाऽएतस्य रश्मयः ॥२॥ यद्वेव रुक्मं प्रतिमुच्य बिभर्ति । असौ वाऽआदित्य एष रुक्मो नो हैतमग्निं मनुष्यो मनुष्यरूपेण यन्तुमर्हत्येतेनैव रूपेणैतद्रूपं बिभर्ति ॥३॥ यद्वेव रुक्मं प्रतिमुच्य बिभर्ति । रेतो वाऽइदꣳ सिक्तमयमग्निस्तेजो वीर्यꣳ रुक्मोऽस्मिंस्तद्धेतसि तेजो वीर्यं दधाति ॥४॥ यद्वेव रुक्मं प्रतिमुच्य बिभर्ति । एतद्वै देवा अबिभयुर्यद्वै न इममिह रक्षाꣳसि नाष्ट्रा न हन्युरिति तस्माऽएतमन्तिकाद्गोप्तारमकुर्वन्नमुमेवादित्यमसौ वाऽआदित्य एष रुक्मस्तथैवास्माऽअयमेतमन्तिकाद्गोप्तारं करोति ॥५॥ कृष्णाजिने निष्यूतो भवति । यज्ञो वै कृष्णाजिनं यज्ञो वाऽएतं यन्तुमर्हति यज्ञेनैतं देवा अबिभरुर्यज्ञेनैवैतमेतद्बिभर्ति लोमतश्छन्दाꣳसि वै लोमानि छन्दाꣳसि वाऽएतं यन्तुमर्हन्ति छन्दोभिरेतं देवा अबिभरुश्छन्दोभिरेवैनमेतद्बिभर्ति ॥६॥ अभि शुक्लानि च कृष्णानि च लोमानि निष्यूतो भवति । ऋक्सामयोर्हैते रूपेऽऋक्सामे वाऽएतं यन्तुमर्हत ऋक्सामाभ्यामेतं देवा अबिभरुर्ऋक्सामाभ्यामेवैनमेतद्बिभर्ति शाणो रुक्मपाशस्त्रिवृत्तस्योक्तो बन्धुः ॥७॥ ॥ शतम् ३८०० ॥ ॥ तमुपरिनाभि बिभर्ति । असौ वाऽआदित्य एष रुक्म उपरिनाभ्यु वाऽएषः ॥८॥ यद्वेवोपरिनाभि । अवाग्वै नाभे रेतः प्रजातिस्तेजो वीर्यꣳ रुक्मो नेन्मे रेतः प्रजातिं तेजो वीर्यꣳ रुक्मः प्रदहादिति ॥९॥ यद्वेवोपरिनाभि । एतद्वै पशोर्मेध्यतरं यदुपरिनाभि पुरीषसꣳहिततरं यदवाङ्नाभेस्तस्माद्यदेव पशोर्मेध्यतरं तेनैनमेतद्बिभर्ति ॥१०॥ यद्वेवोपरिनाभि । यद्वै प्राणस्यामृतमूर्ध्वं तन्नाभेरूर्ध्वैः प्राणैरुच्चरत्यथ यन्मर्त्यं पराक्तन्नाभिमत्येति तद्यदेव प्राणस्यामृतं तदेनमेतदभिसम्पादयति तेनैनमेतद्बिभर्ति ॥११॥ अथैनमासन्द्या बिभर्ति । इयं वाऽआसन्द्यस्याꣳ

हीदꣳ सर्वमासन्नमियं वाऽएतं यन्तुमर्हत्यनयैतं देवा अबिभरुरनयैवैनमेतद्बिभर्ति ॥ १२ ॥ औदुम्बरी भवति । ऊर्ग्वै रस उदुम्बर ऊर्जैवैनमेतद्रसेन बिभर्त्यथो सर्वेऽएते वनस्पतयो यदुदुम्बरः सर्वे वाऽएतं वनस्पतयो यन्तुमर्हन्ति सर्वै रेतं वनस्पतिभिर्देवा अबिभरुः सर्वै रेवैनमेतद्वनस्पतिभिर्बिभर्ति ॥ १३ ॥ प्रादेशमात्र्यूर्ध्वा भवति । प्रादेशमात्रो वै गर्भो विष्णुर्योनिरेषा गर्भसंमितां तद्योनिं करोत्यरत्निमात्री तिरश्ची बाहुर्वाऽअरत्निर्बाहुनो वै वीर्यं क्रियते वीर्यसंमितैव तद्भवति वीर्यं वाऽएतं यन्तुमर्हति वीर्येणैतं देवा अबिभरुर्वीर्येणैवैनमेतद्बिभर्ति ॥ १४ ॥ चतुःस्रक्तयः पादा भवन्ति । चतुःस्रक्तीन्यनूच्यानि चतस्रो वै दिशो दिशो वाऽएतं यन्तुमर्हन्ति दिग्भिरेतं देवा अबिभरुर्दिग्भिरेवैनमेतद्बिभर्ति मौञ्जीभी रज्जुभिर्व्युता भवति त्रिवृद्भिस्तस्योक्तो बन्धुर्मृदा दिग्धा तस्योऽएवोक्तोऽथोऽअनतिदाहाय ॥ १५ ॥ अथैनꣳ शिक्येन बिभर्ति । इमे वै लोका एषोऽग्निर्दिशः शिक्यं दिग्भिर्हीमे लोकाः शक्नुवन्ति स्थातुं यच्छक्नुवन्ति तस्माच्छिक्यं दिग्भिरेवैनमेतद्बिभर्ति षडुद्यामं भवति षड्ढि दिशो मौञ्जं त्रिवृत्तस्योक्तो बन्धुर्मृदा दिग्धं तस्योऽएवोक्तोऽथोऽअनतिदाहाय ॥ १६ ॥ तस्याप एव प्रतिष्ठा । अप्सु हीमे लोकाः प्रतिष्ठिता आदित्य आसञ्जनमादित्ये हीमे लोका दिग्भिरासक्ताः स यो हैतदेवं वेदैतेनैव रूपेणैतद्रूपं बिभर्ति ॥ १७ ॥ यद्वेवैनꣳ शिक्येन बिभर्ति । संवत्सर एषोऽग्निर्ऋतवः शिक्यमृतुभिर्हि संवत्सरः शक्नोति स्थातुं यच्छक्नोति तस्माच्छिक्यमृतुभिरेवैनमेतद्बिभर्ति षडुद्यामं भवति षड्ढ्यृतवः ॥ १८ ॥ तस्याहोरात्रेऽएव प्रतिष्ठा । अहोरात्रयोर्ह्ययꣳ संवत्सरः प्रतिष्ठितश्चन्द्रमा आसञ्जनं चन्द्रमसि ह्ययꣳ संवत्सर ऋतुभिरासक्तः स यो हैतदेवं वेदैतेनैव रूपेणैतद्रूपं बिभर्ति तस्य ह वाऽएष संवत्सरभृतो भवति य एवं वेद संवत्सरोपासितो हैव तस्य भवति य एवं न वेदेत्यधिदेवतम् ॥ १९ ॥ ॥ शतपथस्यार्धम् कण्डिकाः ३८१२ ॥ ॥ अथाध्यात्मम् । आत्मैवाग्निः

प्राणाः शिक्यं प्राणैर्ह्ययमात्मा शक्नोति स्थातुं यच्छक्नोति तस्माच्छिक्यं प्राणैरेवैन-
मेतद्बिभर्ति षडुद्यामं भवति षड्वि प्राणाः ॥२०॥ तस्य मन एव प्रतिष्ठा । मनसि
ह्ययमात्मा प्रतिष्ठितोऽन्नमासज्जनमन्ने ह्ययमात्मा प्राणैरासक्तः स यो हैतदेवं वे-
दैतेनैव रूपेणैतद्रूपं बिभर्ति ॥२१॥ अथैनमुखया बिभर्ति । इमे वै लोका उखे-
मे वाऽएतं लोका यत्तुमर्हन्त्येभिरेतं लोकैर्देवा अबिभरुरेभिरेवैनमेतल्लोकैर्बि-
भर्ति ॥२२॥ सा यदुखा नाम । एतद्वै देवा एतेन कर्मणैतयावृतेमाँल्लोकानुदख-
नन्यदुदखनंस्तस्मादुत्खोत्खा ह वै तामुखेत्याचक्षते परोऽक्षं परोऽक्षकामा हि
देवाः ॥२३॥ तद्वाऽउखेति द्वेऽअक्षरे । द्विपाद्यजमानो यजमानोऽग्निर्यावानग्नि-
र्यावत्यस्य मात्रा तावतैवैनमेतद्बिभर्ति सोऽएव कुम्भी सा स्थाली तत्षट् षडृतवः
संवत्सरः संवत्सरोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावत्तद्भवति ॥२४॥ अथैनमि-
ण्ड्वाभ्यां परिगृह्णाति । असौ वाऽआदित्य एषोऽग्निरहोरात्रेऽइण्ड्वेऽअमुं तदादि-
त्यमहोरात्राभ्यां परिगृह्णाति तस्मादेषोऽहोरात्राभ्यां परिगृहीतः ॥२५॥ यद्वेवैन-
नमिण्ड्वाभ्यां परिगृह्णाति । असौ वाऽआदित्य एषोऽग्निरिमाऽउ लोकाविण्ड्वेऽअ-
मुं तदादित्यमाभ्यां लोकाभ्यां परिगृह्णाति तस्मादेष आभ्यां लोकाभ्यां परिगृहीतः
परिमण्डले भवतः परिमण्डलौ हीमौ लोकौ मौञ्जे त्रिवृती तस्योक्तो बन्धुर्मृ-
दा दिग्धे तस्योऽएवोक्तोऽथोऽअनतिदाहाय ॥२६॥ अथातः सम्पदेव । आसन्दी
चोखा च शिक्यं च रुक्मपाशश्चाग्निश्च रुक्मश्च तत्षट् षडृतवः संवत्सरः संवत्सरो
ऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावत्तद्भवतीण्ड्वे तदष्टावष्टाक्षरा गायत्री गायत्रो
ऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावत्तद्भवति ॥२७॥ अथ सर्वसम्पत् । चत्वारः
पादाश्चत्वार्यनूच्यानि शिक्यं च रुक्मपाशश्च यच्च किं च रज्जव्यꣳ शिक्यं तदनूखा-
ग्नी रुक्मस्तत्त्रयोदश त्रयोदश मासाः संवत्सरः संवत्सरोऽग्निर्यावानग्निर्यावत्यस्य
मात्रा तावत्तद्भवति ॥२८॥ ब्राह्मणम् ॥१ [७. १.] ॥ ॥

तं तिष्ठन्प्रतिमुञ्चते । असौ वाऽआदित्य एष रुक्मस्तिष्ठतीव वाऽअसावादित्योऽथो तिष्ठन्वै वीर्यवत्तर उदङ् प्राङ् तिष्ठंस्तस्योक्तो बन्धुः ॥१॥ दृशानो रुक्म उर्व्या व्यद्यौदिति । दृश्यमानो ह्येष रुक्म उर्व्या विद्योतते दुर्मर्षमायुः श्रिये रुचान इति दुर्मरं वाऽएतस्यायुः श्रियोऽएष रोचतेऽग्निरमृतोऽअभवद्वयोभिरिति सर्वैर्वाऽएष वयोभिरमृतोऽभवद्यदेनं द्यौरजनयदिति द्यौर्वाऽएतमजनयत्सुरेता इति सुरेता ह्येषा यस्या एष रेतः ॥२॥ अथैनमिण्ड्वाभ्यां परिगृह्णाति । नक्तोषासा समनसा विरूपे इत्यहोरात्रे वै नक्तोषासा समनसा विरूपे धापयेते शिशुमेकꣳ समीचीऽइति यद्वै किं चाहोरात्रयोस्तेनैतमेव समीची धापयेते द्यावाक्षामा रुक्मोऽअन्तर्विभातीति हरन्नेतद्यजुर्जपतीमे वै द्यावापृथिवी द्यावाक्षामा तेऽएष यदन्तरा विभाति तस्मादेतद्धरन्यजुर्जपति देवा अग्निं धारयन्द्रविणोदा इति परिगृह्य निदधाति प्राणा वै देवा द्रविणोदास्तऽएतमग्रऽएवमधारयंस्तैरेवैनमेतद्धारयति ॥३॥ अथ शिक्यपाशं प्रतिमुञ्चते । विश्वा रूपाणि प्रतिमुञ्चते कविरित्यसौ वाऽआदित्यः कविर्विश्वा रूपा शिक्यं प्रासावीद्भद्रं द्विपदे चतुष्पदऽइत्युद्यन्वाऽएष द्विपदे चतुष्पदे च भद्रं प्रसौति वि नाकमख्यत्सविता वरेण्य इति स्वर्गो वै लोको नाकस्तमेष उद्यन्नेवानुविपश्यत्यनु प्रयाणमुषसो विराजतीत्युषा वाऽअग्रे व्युच्छति तस्याऽएष व्युष्टिं विराजन्ननूदेति ॥४॥ अथैनमतो विकृत्या विकरोति । इदमेवैतद्रेतः सिक्तं विकरोति तस्माद्योनौ रेतः सिक्तं विक्रियते ॥५॥ सुपर्णोऽसि गरुत्मानिति । वीर्यं वै सुपर्णो गरुत्मान्वीर्यमेवैनमेतदभिसंस्करोति त्रिवृत्ते शिर इति त्रिवृतमस्य स्तोमꣳ शिरः करोति गायत्रं चक्षुरिति गायत्रं चक्षुः करोति बृहद्रथन्तरे पक्षाविति बृहद्रथन्तरे पक्षौ करोति स्तोम आत्मेति स्तोममात्मानं करोति पञ्चविꣳशं छन्दाꣳस्यङ्गानीति छन्दाꣳसि वाऽएतस्याङ्गानि यजूꣳषि नामेति यदेनमग्निरित्याचक्षते तदस्य यजूꣳषि नाम साम ते

तनूर्वामदेव्यमित्यात्मा वै तनूरात्मा ते तनूर्वामदेव्यमित्येतद्यज्ञायज्ञियं पुच्छमिति यज्ञायज्ञियं पुच्छं करोति धिष्ण्याः शफा इति धिष्ण्यैर्वा ऽएषोऽस्मिँल्लोके प्रतिष्ठितः सुपर्णोऽसि गरुत्मान्दिवं गच्छ स्वः पतेति तदेनꣳ सुपर्णं गरुत्मन्तं कृत्वाह देवान्गच्छ स्वर्गं लोकं पतेति ॥६॥ तं वाऽएतम् । अत्र पक्षपुच्छवन्तं विकरोति यादृग्वै योनौ रेतो विक्रियते तादृग्जायते तद्यदेतमत्र पक्षपुच्छवन्तं विकरोति तस्मादेषोऽमुत्र पक्षपुच्छवाञ्जायते ॥७॥ तꣳ हैके । एतया विकृत्याभिमन्त्र्यान्यां चितिं चिन्वन्ति द्रोणचितं वा रथचक्रचितं वा कङ्कचितं वा प्रउगचितं वोभयतःप्रउगं वा समुह्यपुरीषं वा न तथा कुर्याद्यथा पक्षपुच्छवन्तं गर्भं परिवृश्चेत्तादृक्तत्तस्मादेनꣳ सुपर्णचितमेव चिनुयात् ॥८॥ तमेतया विकृत्या । इत ऊर्ध्वं प्राञ्चं प्रगृह्णात्यसौ वाऽआदित्य एषोऽग्निरमुं तदादित्यमित ऊर्ध्वं प्राञ्चं दधाति तस्मादसावादित्य इत ऊर्ध्वः प्राङ् धीयते परोबाहु प्रगृह्णाति परोबाहु ह्येष इतोऽथैनमुपावहरति तमुपावहृत्योपरिनाभि धारयति तस्योक्तो बन्धुः ॥९॥ अथ विष्णुक्रमान्क्रमते । एतद्वै देवा विष्णुर्भूत्वेमाँल्लोकानक्रमन्त यद्विष्णुर्भूत्वाक्रमन्त तस्माद्विष्णुक्रमास्तथैवैतद्यजमानो विष्णुर्भूत्वेमाँल्लोकान्क्रमते ॥१०॥ स यः स विष्णुर्यज्ञः सः । स यः स यज्ञोऽयमेव स योऽयमग्निरुखायामेतमेव तद्देवा आत्मानं कृत्वेमाँल्लोकानक्रमन्त तथैवैतद्यजमान एतमेवात्मानं कृत्वेमाँल्लोकान्क्रमते ॥११॥ उदङ् प्राङ् तिष्ठन् । एतद्वै तत्प्रजापतिर्विष्णुक्रमैरुदङ् प्राङ् तिष्ठन्प्रजा असृजत तथैवैतद्यजमानो विष्णुक्रमैरुदङ् प्राङ् तिष्ठन्प्रजाः सृजते ॥१२॥ विष्णोः क्रमोऽसीति । विष्णुर्हि भूत्वा क्रमते सपत्नहेति सपत्नान्ह्यत्र हन्ति गायत्रं छन्द आरोहेति गायत्रं छन्द आरोहति पृथिवीमनु विक्रमस्वेति पृथिवीमनु विक्रमते प्रहरति पादं क्रमतऽऊर्ध्वमग्निमुद्गृह्णात्यूर्ध्वो हि रोहति ॥१३॥ विष्णोः क्रमोऽसीति । विष्णुर्हि भूत्वा क्रमतेऽभिमातिहेत्यभिमातीर्ह्यत्र हन्ति त्रैष्टुभं छन्द आरोहेति त्रैष्टुभं छन्द आरोहत्यन्त-

रिक्षमनु विक्रमस्वेत्यन्तरिक्षमनु विक्रमते प्रहरति पादं क्रमतऽऊर्ध्वमग्निमुद्गृह्णा-
त्यूर्ध्वो हि रोहति ॥१४॥ विष्णोः क्रमोऽसीति । विष्णुर्हि भूत्वा क्रमतेऽरातीयतो
हन्तेत्यरातीयतो हात्र हन्ति जागतं छन्द आरोहेति जागतं छन्द आरोहति दि-
वमनु विक्रमस्वेति दिवमनु विक्रमते प्रहरति पादं क्रमतऽऊर्ध्वमग्निमुद्गृह्णात्यूर्ध्वो
हि रोहति ॥१५॥ विष्णोः क्रमोऽसीति । विष्णुर्हि भूत्वा क्रमते शत्रूयतो हन्तेति
शत्रूयतो हात्र हन्त्यानुष्टुभं छन्द आरोहेत्यानुष्टुभं छन्द आरोहति दिशोऽनु
विक्रमस्वेति सर्वा दिशोऽनु वीक्षते न प्रहरति पादं नेदिमांल्लोकानतिप्रणश्या-
नीत्यूर्ध्वमेवाग्निमुद्गृह्णाति स्वꣳ ह्यारोहति ॥१६॥ ब्राह्मणम् ॥२ [७. २.] ॥॥

अथैनमिति प्रगृह्णाति । एतद्धि देवा अकामयन्त पर्जन्यो रूपꣳ स्यामेति तऽए-
तेनात्मना पर्जन्यो रूपमभवंस्तथैवैतद्यजमान एतेनात्मना पर्जन्यो रूपं भवति
॥१॥ अक्रन्ददग्नि स्तनयन्निव द्यौरिति । क्रन्दतीव हि पर्जन्य स्तनयन्क्षामा रे-
रिहद्वीरुधः समञ्जन्निति क्षमा वै पर्जन्यो रेरिह्यमाणो वीरुधः समनक्ति सद्यो
जज्ञानो वि हीमिद्धोऽअख्यदिति सद्यो वाऽएष जज्ञान इदꣳ सर्वं विख्यापयत्या
रोदसी भानुना भात्यन्तरितीमे वै द्यावापृथिवी रोदसी तेऽएष भानुनाभाति प-
रोबाहु प्रगृह्णाति परोबाहु हि पर्जन्यः ॥२॥ अथैनमुपावहरति । एतद्वै यो
ऽस्मिंल्लोके रसो यदुपजीवनं तेनैतत्सहोर्ध्व इमांल्लोकान्रोहत्यग्निर्वाऽअस्मिंल्लोके
रसोऽग्निरुपजीवनं तद्यत्तावदेव स्यान्न हास्मिंल्लोके रसो नोपजीवनꣳ स्यादथ
यत्प्रत्यवरोहत्यस्मिन्नेवैतल्लोके रसमुपजीवनं दधाति ॥३॥ यद्वेव प्रत्यवरोहति ।
एतद्वाऽएतदिमांल्लोकानति ऊर्ध्वो रोहति स स पराङिव रोह इयमु वै प्रतिष्ठा
तद्यत्तावदेव स्यात्प्र हास्माल्लोकाद्यजमानश्च्यवेताथ यत्प्रत्यवरोहतीमामेवैतत्प्र-
तिष्ठामभिप्रत्यैत्यस्यामेवैतत्प्रतिष्ठायां प्रतितिष्ठति ॥४॥ यद्वेव प्रत्यवरोहति ।
। एतद्वाऽएतदिमांल्लोकानति ऊर्ध्वो जयति स स पराङिव जयो यो वै पराङिव

जयत्यन्ये वै तस्य जितमन्ववस्यन्त्यथ य उभयथा जयति तस्य तत्र कामचरणं भवति तद्यत्प्रत्यवरोहतीमानेवैतल्लोकानितश्चोर्ध्वानमुतश्चार्वाचो जयति ॥५॥ अग्नेऽभ्यावर्तिन् । अभि मा निवर्तस्वाग्नेऽअङ्गिरः पुनरूर्जा सह रय्येत्येतेन मा सर्वेणाभिनिवर्तस्वेत्येतच्चतुष्कृत्वः प्रत्यवरोहति चतुर्हि कृत्व ऊर्ध्वो रोहति तद्यावत्कृत्व ऊर्ध्वो रोहति तावत्कृत्वः प्रत्यवरोहति तमुपावहृत्योपरिनाभि धारयति तस्योक्तो बन्धुः ॥६॥ अथैनमभिमन्त्रयते । आयुर्वाऽअग्निरायुरेवैतदात्मन्धत्तऽआवाहार्षमित्या ह्येनꣳ हरत्यन्तरभूरित्यायुरेवैनदात्मन्धत्ते ध्रुवस्तिष्ठाविचाचलिरित्यायुरेवैतद्ध्रुवमन्तरात्मन्धत्ते विशस्त्वा सर्वा वाञ्छन्त्वित्यन्नं वै विशोऽन्नं त्वा सर्वं वाञ्छत्वित्येतन्मा त्वद्राष्ट्रमधिभ्रशदिति श्रीर्वै राष्ट्रं मा त्वच्छ्रीरधिभ्रशदित्येतत् ॥७॥ अथ शिक्यपाशं च रुक्मपाशं चोन्मुञ्चते । वारुणो वै पाशो वरुणपाशादेव तत्प्रमुच्यते वारुण्यऽर्चा स्वेनैव तदात्मना स्वया देवतया वरुणपाशात्प्रमुच्यतऽउदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमꣳ श्रथायेति यथैव यजुस्तथा बन्धुरथा वयमादित्य व्रते तवानागसोऽअदितये स्यामेतीयं वाऽअदितिरनागसस्तुभ्यं चास्यै च स्यामेत्येतत् ॥८॥ अथैनमिति प्रगृह्णाति । एतद्वाऽएनमदो विकृत्येत ऊर्ध्वं प्राञ्चं प्रगृह्णाति तं तत इति प्रगृह्णाति तद्यत्तावदेवाभविष्यदत्र हैवैष व्यरꣳस्यताथ यदेनमिति प्रगृह्णाति तस्मादेष इतीवाथेति पुनरैति ॥९॥ अग्रे बृहन्नुषसामूर्ध्वोऽअस्थादिति । अग्रे ह्येष बृहन्नुषसामूर्ध्वस्तिष्ठति निर्जगन्वान्तमसो ज्योतिषागादिति निर्जगन्वान्वाऽएष रात्र्यै तमसोऽह्ना ज्योतिषैत्यग्निर्भानुना रुशता स्वङ्ग इत्यग्निर्वाऽएष भानुना रुशता स्वङ्ग आ जातो विश्वा सद्मान्यप्रा इतीमे वै लोका विश्वा सद्मानि तानेष जात आपूरयति परोबाहु प्रगृह्णाति परोबाहु ह्येष इतोऽथैनमुपावहरतीमामेवैतत्प्रतिष्ठामभिप्रत्यैत्यस्यामेवैतत्प्रतिष्ठायां प्रतितिष्ठति जगत्या जगती हीमांल्लोकानमुतोऽर्वाचो व्यश्नुते ॥१०॥ हꣳसः

शुचिषदिति । असौ वा आदित्यो हंसः शुचिषद्वसुरन्तरिक्षसदिति वायुर्वै वसु-
रन्तरिक्षसद्धोता वेदिषदित्यग्निर्वै होता वेदिषदतिथिर्दुरोणसदिति सर्वेषां वा एष भूता-
नामतिथिर्दुरोणसदिति विषमसदित्येतन्नृषदिति प्राणो वै नृषन्मनुष्या नरस्तद्यो
ऽयं मनुष्येषु प्राणोऽग्निस्तमेतदाह वरसदिति सर्वेषु ह्येष वरेषु सन्न ऋतसदिति
सत्यसदित्येतद्व्योमसदिति सर्वेषु ह्येष व्योमसु सन्नोऽब्जा गोजा इत्यब्जाश्च ह्येष
गोजाश्चर्तजा इति सत्यजा इत्येतदद्रिजा इत्यद्रिजा ह्येष ऋतमिति सत्यमित्येत-
द्बृहदिति निदधाति बृहद्ध्येष तद्यदेष तदेनमेतत्कृत्वा निदधाति ॥११॥ द्वाभ्याम-
क्षराभ्याम् । द्विपाद्यजमानो यजमानोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमे-
तन्निदधाति ॥१२॥ अथैनमुपतिष्ठते । एतद्वा एनमेतल्लघूयतीव यदेनेन सहेति
चेति चेमांल्लोकान्क्रमते तस्मा एवैतन्निह्नुतेऽहिंसायै ॥१३॥ यद्वेवोपतिष्ठते ।
एतद्वै देवा अबिभयुर्यद्वै नोऽयमिमांल्लोकानन्तिकान्न हिंस्यादिति तेभ्य एवैन-
मेतल्लोकेभ्योऽशमयंस्तथैवैनमयमेतदेभ्यो लोकेभ्यः शमयति ॥१४॥ सीद त्वं मा-
तुः । अस्या उपस्थेऽन्तरग्ने रुचा त्वं शिवो भूत्वा मह्यमग्नेऽअथो सीद शिवस्त्व-
मिति शिवः शिव इति शमयत्येवैनमेतदहिंसायै तथो हैष इमांल्लोकाञ्छान्तो
न हिनस्ति ॥१५॥ त्रिभिरुपतिष्ठते । त्रय इमे लोका अथो त्रिवृदग्निर्यावानग्नि-
र्यावत्यस्य मात्रा तावतैवास्मा एतन्निह्नुतेऽथो तावतैवैनमेतदेभ्यो लोकेभ्यः श-
मयति ॥१६॥ ब्राह्मणम् ॥३ [७. ३.] ॥ ॥

अथ वात्सप्रेणोपतिष्ठते । एतद्वै प्रजापतिर्विष्णुक्रमैः प्रजाः सृष्ट्वा ताभ्यो वात्स-
प्रेणायुष्यमकरोत्तथैवैतद्यजमानो विष्णुक्रमैः प्रजाः सृष्ट्वा ताभ्यो वात्सप्रेणायुष्यं
करोति ॥१॥ स हैष दाक्षायणहस्तः । यद्वात्सप्रं तस्माद्यं जातं कामयेत सर्वमा-
युरियादिति वात्सप्रेणैनमभिमृशेत्तदस्मै जातायायुष्यं करोति तथो ह स सर्वमा-
युरेत्यथ यं कामयेत वीर्यवान्त्स्यादिति विकृत्यैनं पुरस्तादभिमन्त्रयेत तथो ह स

वीर्यवान्भवति ॥२॥ दिवस्परि प्रथमं जज्ञेऽअग्निरिति । प्राणो वै दिवः प्राणाद्ध वाऽएष प्रथममजायतास्मद्द्वितीयं परि जातवेदा इति यदेनमदो द्वितीयं पुरुषविधोऽजनयत्तृतीयमप्स्विति यदेनमदस्तृतीयमद्भ्योऽजनयन्नृमणा अजस्रमिति प्रजापतिर्वै नृमणा अग्निरजस्र इन्धान एनं जरते स्वाधीरिति यो वाऽएनमिन्द्धे स एनं जनयते स्वाधीः ॥३॥ विद्मा तेऽअग्ने त्रेधा त्रयाणीति । अग्निर्वायुरादित्य एतानि ह्यस्य तानि त्रेधा त्रयाणि विद्मा ते धाम विभृता पुरुत्रेति यदिदं बहुधा विह्रियते विद्मा ते नाम परमं गुहा यदिति यविष्ठ इति वाऽअस्य तन्नाम परमं गुहा विद्मा तमुत्सं यत आजगन्थेत्यापो वाऽउत्सोऽद्भ्यो वाऽएष प्रथममाजगाम समुद्रे त्वा नृमणा अप्स्वन्तरिति प्रजापतिर्वै नृमणा अप्सु त्वा प्रजापतिरित्येतन्नृचक्षा ईधे दिवोऽअग्नऽऊधन्निति प्रजापतिर्वै नृचक्षा आपो दिव ऊधस्तृतीये त्वा रजसि तस्थिवाꣳसमिति द्यौर्वै तृतीयꣳ रजोऽपामुपस्थे महिषा अवर्धन्निति प्राणा वै महिषा दिवि त्वा प्राणा अवर्धन्नित्येतत् ॥५॥ ता एता एकव्याख्यानाः । एतमेवाभि ता आग्नेय्यस्त्रिष्टुभस्ता यदाग्नेय्यस्तेनाग्निरथ यत्त्रिष्टुभो यदेकादश तेनेन्द्र ऐन्द्राग्नोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतदुपतिष्ठतऽइन्द्राग्नी वै सर्वे देवाः सर्वदेवत्योऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतदुपतिष्ठते ॥६॥ यद्वेव विष्णुक्रमवात्सप्रे भवतः । विष्णुक्रमैर्वै प्रजापतिरिमं लोकमसृजत वात्सप्रेणाग्निं विष्णुक्रमैर्वै प्रजापतिरन्तरिक्षमसृजत वात्सप्रेण वायुं विष्णुक्रमैर्वै प्रजापतिर्दिवमसृजत वात्सप्रेणादित्यं विष्णुक्रमैर्वै प्रजापतिर्दिशोऽसृजत वात्सप्रेण चन्द्रमसं विष्णुक्रमैर्वै प्रजापतिर्भूतमसृजत वात्सप्रेण भविष्यद्विष्णुक्रमैर्वै प्रजापतिर्वित्तमसृजत वात्सप्रेणाशां विष्णुक्रमैर्वै प्रजापतिरहरसृजत वात्सप्रेण रात्रिं विष्णुक्रमैर्वै प्रजापतिः पूर्वपक्षानसृजत वात्सप्रेणापरपक्षान्विष्णुक्रमैर्वै प्रजापतिरर्धमासानसृजत वात्सप्रेण मासान्विष्णुक्रमैर्वै प्रजापतिर्ऋतूनसृजत वात्सप्रेण संवत्सरं तद्यद्विष्णुक्रम-

वात्सप्रे भवत एतदेव तेन सर्वꣳ सृजते ॥७॥ यद्वेव विष्णुक्रमवात्सप्रे भवतः ।
विष्णुक्रमैर्वै प्रजापतिः स्वर्गं लोकमभिप्रायात्स एतदवसानमपश्यद्वात्सप्रं तेना-
वास्यदप्रदाह्याय यद्धि युक्तं न विमुच्यते प्र तद्दह्यति तथैवैतद्यजमानो विष्णुक्रमै-
रेव स्वर्गं लोकमभिप्रयाति वात्सप्रेणावस्यति ॥८॥ स वै विष्णुक्रमान्क्रान्त्वा ।
अथ तदानीमेव वात्सप्रेणोपतिष्ठते यथा प्रयायाथ तदानीमेव विमुञ्चेत्तादृक्तद्दे-
वानां वै विधामनु मनुष्यास्तस्मादु हेदमुत मानुषो ग्रामः प्रयायाथ तदानीमेवा-
वस्यति ॥९॥ तद्वाऽअहोरात्रेऽएव विष्णुक्रमा भवन्ति । अहोरात्रे वात्सप्रमहो-
रात्रेऽएव तद्यात्यहोरात्रे क्षेम्यो भवति तस्मादु हेदमुत मानुषो ग्रामोऽहोरात्रे
यावाहोरात्रे क्षेम्यो भवति ॥१०॥ स वाऽअर्धमेव संवत्सरस्य विष्णुक्रमान्क्रमते
। अर्धं वात्सप्रेणोपतिष्ठते मध्ये ह संवत्सरस्य स्वर्गो लोकः स यत्कनीयोऽर्धा-
त्क्रमेत न हैतꣳ स्वर्गं लोकमभिप्राप्नुयादथ यद्भूयोऽर्धात्पराङ् हैतꣳ स्वर्गं लोक-
मतिप्रणश्येदथ यदर्धं क्रमतेऽर्धमुपतिष्ठते तत्सम्प्रति स्वर्गं लोकमाप्त्वा विमुञ्चते
॥११॥ ताभ्यां वै विपर्यासमेति । यथा महान्तमध्वानं विमोकꣳ समश्नुवीत तादृ-
क्तत्स वै पुरस्ताच्चोपरिष्टाच्चोभे विष्णुक्रमवात्सप्रे समस्यत्यहर्वै विष्णुक्रमा रात्रि-
र्वात्सप्रमेतद्वाऽइदꣳ सर्वं प्रजापतिः प्रजनयिष्यंश्च प्रजनयित्वा चाहोरात्राभ्यामुभयतः
पर्यगृह्णात्तथैवैतद्यजमान इदꣳ सर्वं प्रजनयिष्यंश्च प्रजनयित्वा चाहोरात्राभ्यामुभयतः
परिगृह्णाति ॥१२॥ तदाहुः । यदहर्विष्णुक्रमा रात्रिर्वात्सप्रमथोभेऽएवाहन्भवतो
न रात्र्यां कथमस्यापि रात्र्यां कृते भवत इत्येतद्वाऽएनेऽअदो दीक्षमाणः पुरस्ता-
दपराह्णेऽउभे समस्यति रात्रिर्ह्येतद्यदपराह्णोऽथैनेऽएतत्संनिवप्स्यन्नुपरिष्टात्पूर्वाह्णे
ऽउभे समस्यत्यहर्ह्येतद्यत्पूर्वाह्ण एवमु हास्योभेऽएवाहन्कृते भवत उभे रात्र्याꣳ
॥१३॥ स यदहः संनिवप्स्यन्त्स्यात् तदहः प्रातरुदितऽआदित्ये भस्मैव प्रथममु-
द्वपति भस्मोदुप्य वाचं विसृजते वाचं विसृज्य समिधमादधाति समिधमाधाय भ-

स्मापोऽभ्यवहरति यथैव तस्याभ्यवहरणं तथापादाय भस्मनः प्रत्येत्योखायामो-
प्योपतिष्ठतेऽथ प्रायश्चित्ती करोति ॥१४॥ स यदि विष्णुक्रमीयमहः स्यात् । वि-
ष्णुक्रमान्क्रान्त्वा वात्सप्रेणोपतिष्ठेताथ यदि वात्सप्रीयं वात्सप्रेणोपस्थाय विष्णुक्र-
मान्क्रान्त्वा वात्सप्रमन्ततः कुर्यान्न विष्णुक्रमानन्ततः कुर्याद्यथा प्रयाय न विमुञ्चेत्ता-
दृक्तदथ यद्वात्सप्रमन्ततः करोति प्रतिष्ठा वै वात्सप्रं यथा प्रतिष्ठापयेदवसाययेत्ता-
दृक्तत्तस्मादु वात्सप्रमेवान्ततः कुर्यात् ॥१५॥ ब्राह्मणम् ॥४ [७. ४.] ॥ सप्तमो
ऽध्यायः [४२.] ॥॥

वनीवाह्येताग्निं बिभ्रदित्याहुः । देवाश्चासुराश्चोभये प्राजापत्या अस्पर्धन्त ते दे-
वाश्चक्रमचरञ्छालमसुरा आसंस्ते देवाश्चक्रेण चरन्त एतत्कर्मापश्यंश्चक्रेण हि वै
देवाश्चरन्त एतत्कर्मापश्यंस्तस्मादनस एव पौरोडाशेषु यजूꣳष्यनसोऽग्नौ ॥१॥
स यो वनीवाह्यते । देवान्कर्मणेति दैवꣳ ह्यस्य कर्म कृतं भवत्यथ यो न व-
नीवाह्यतेऽसुरान्कर्मणेत्यसुर्यꣳ ह्यस्य कर्म कृतं भवति ॥२॥ तद्धैकऽआहुः ।
स्वयं वाऽएष वनीवाहितो विष्णुक्रमैर्वाऽएष प्रयाति वात्सप्रेणावस्यतीति न
तथा विद्याद्दैवं वाऽअस्य तत्प्रयाणं यद्विष्णुक्रमा दैवमवसानं यद्वात्सप्रमथास्येदं
मानुषं प्रयाणं यदिदं प्रयाति मानुषमवसानं यदवस्यति ॥३॥ प्रजापतिरेषोऽग्निः ।
उभयम्वेतत्प्रजापतिर्यच्च देवा यच्च मनुष्यास्तद्यद्विष्णुक्रमवात्सप्रे भवतो यद्वास्य
दैवꣳ रूपं तदस्य तेन संस्करोत्यथ यद्वनीवाह्यते यदेवास्य मानुषꣳ रूपं तदस्य
तेन संस्करोति स ह वाऽएतꣳ सर्वं कृत्स्नं प्रजापतिꣳ संस्करोति य एवं वि-
द्वान्वनीवाह्यते तस्मादु वनीवाह्येतैव ॥४॥ स यदहः प्रयास्यन्त्स्यात् । तदह-
रुत्तरतोऽग्नेः प्रागन उपस्थाप्याथास्मिन्त्समिधमादधात्येतद्वाऽएनं देवा एष्यन्तं पुर-
स्तादन्नेनाप्रीणन्नेतया समिधा तथैवैनमयमेतदेष्यन्तं पुरस्तादन्नेन प्रीणात्येतया स-
मिधा ॥५॥ समिधाग्निं दुवस्यतेति । समिधाग्निं नमस्यतेत्येतद्घृतैर्बोधयतातिथिमा-

स्मिन्हव्या जुहोतनेति घृतैरह बोधयतातिथिमोऽअस्मिन्हव्यानि जुहुतेत्येतदुद्बुद्ध-
वत्येत्यापि ह्येनमेतद्बोधयति ॥६॥ अथैनमुद्यच्छति । उदु त्वा विश्वे देवा अग्ने भ-
रन्तु चित्तिभिरिति विश्वे वाऽएतमग्रे देवाश्चित्तिभिरुदभरंस्तद्येषां तदा चित्तमा-
सीत्तथैवैनमयमेतच्चित्तिभिरुद्भरत्येतद्यस्य तदा चित्तं भवति स नो भव शिवस्त्वꣳ
सुप्रतीको विभावसुरिति यथैव यजुस्तथा बन्धुस्तं दक्षिणत उदञ्चमादधाति तस्यो-
क्तो बन्धु स्थाल्यां गार्हपत्यꣳ समुप्यापरमादधाति स यदि कामयेतोपाधिरोहेत्पा-
र्श्वतो वा व्रजेत् ॥७॥ अथानड्वाहौ युनक्ति । दक्षिणमग्रेऽथ सव्यमेवं देवत्रेतरथा
मानुषे स यां कां च दिशं यास्यन्त्स्यात्प्राङ्वाग्रे प्रयायात्प्राची हि दिगग्नेः स्वामे-
व तद्दिशमनु प्रयाति ॥८॥ प्रेदग्ने ज्योतिष्मान्याहि । शिवेभिरर्चिभिष्ट्वमिति प्रेदग्ने
त्वं ज्योतिष्मान्याहि शिवेभिरर्चिभिर्दीप्यमानैरित्येतद्बृहद्भिर्भानुभिर्भासन्मा हिꣳसी-
स्तन्वा प्रजा इति बृहद्भिरर्चिभिर्दीप्यमानैर्मा हिꣳसीरात्मना प्रजा इत्येतत् ॥९॥
स यदाक्ष उत्सर्जेत् । अथैतद्यजुर्जपेदसुर्या वाऽएषा वाग्याक्षस्य तामेतच्छमयति
तामेतद्देवत्रा करोति ॥१०॥ यद्वेवैतद्यजुर्जपति । यस्मिन्वै कस्मिंश्चाहितेऽक्ष उ-
त्सर्जति तस्यैव सा वाग्भवति तद्यदग्नावाहितेऽक्ष उत्सर्जत्यग्नेरेव सा वाग्भव-
त्यग्निमेव तद्देवा उपास्तुवन्नुपामहयंस्तथैवैनमयमेतदुपस्तौत्युपमहयत्यक्रन्ददग्नि
स्तनयन्निव द्यौरिति तस्योक्तो बन्धुः ॥११॥ स यदि पुरा वसत्यै विमुञ्चेत । अ-
नस्यैवाग्निः स्यादथ यदा वसत्यै विमुञ्चेत प्रागन उपस्थाप्योत्तरत उद्धत्यावोक्षति
यत्रैनमुपावहरति तं दक्षिणत उदञ्चमुपावहरति तस्योक्तो बन्धुः ॥१२॥ अथा-
स्मिन्त्समिधमादधाति । एतद्वाऽएनं देवा ईयिवाꣳसमुपरिष्टादन्नेनाप्रीणन्नेतया स-
मिधा तथैवैनमयमेतदीयिवाꣳसमुपरिष्टादन्नेन प्रीणात्येतया समिधा ॥१३॥ प्र-प्रा-
यमग्निर्भरतस्य शृण्वऽइति । प्रजापतिर्वै भरतः स हीदꣳ सर्वं बिभर्ति वि यत्सूर्यो
न रोचते बृहद्भा इति वि यत्सूर्यऽइव रोचते बृहद्भा इत्येतदभि यः पूरुं पृतनासु

तस्थाविति पूरुर्ह नामासुररक्षसमास तमग्निः पृतनास्वभितष्ठौ दीदाय दैव्योऽग्रतिथिः शिवो न इति दीप्यमानो दैवोऽतिथिः शिवो न इत्येतत्स्थितवत्या वसत्यै ह्येनं तत्स्थापयति ॥१४॥ अथातः सम्पदेव । समिधं प्रथमेनादधात्युद्यच्छत्येकेन प्रयात्येकेनाह्वमेकेनानुमन्त्रयते समिधमेव पञ्चमेनादधाति तत्पञ्च पञ्चचितिकोऽग्निः पञ्चऽर्तवः संवत्सरः संवत्सरोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावत्तद्भवति ॥१५॥ ब्राह्मणम् ॥५ [८. १.] ॥

अथातो भस्मन एवाभ्यवहरणस्य । देवा वाऽएतदग्रे भस्मोदवपंस्तेऽब्रुवन्यदि वाऽइदमित्थमेव सदात्मानमभिसंस्करिष्यामहे मर्त्याः कुणपा अनपहतपाप्मानो भविष्यामो यद्यु परावप्स्यामो यदत्राग्नेयं बहिर्धा तदग्नेः करिष्याम उप तज्जानीत यथेदं करवामेति तेऽब्रुवंश्चेतयध्वमिति चितिमिच्छतेति वाव तदब्रुवंस्तदिच्छत यथेदं करवामेति ॥१॥ ते चेतयमानाः । एतदपश्यन्नप एवैनदभ्यवहरामापो वाऽअस्य सर्वस्य प्रतिष्ठा तद्यत्रास्य सर्वस्य प्रतिष्ठा तदेनत्प्रतिष्ठाप्य यदत्राग्नेयं तदद्भ्योऽधि जनयिष्याम इति तदपोऽभ्यवाहरंस्तथैवैनदयमेतदपोऽभ्यवहरति ॥२॥ आपो देवीः । प्रतिगृभ्णीत भस्मैतत्स्योने कृणुध्वꣳ सुरभाऽउ लोकऽइति जग्धं वाऽएतद्यातयाम भवति तदेतदाह स्वभिष्ठऽएनल्लोके कुरुध्वमिति तस्मै नमन्तां जनय इत्यापो वै जनयोऽद्भ्यो हीदꣳ सर्वं जायते सुपत्नीरित्यग्निना वाऽआपः सुपत्न्यो मातेव पुत्रं बिभृताप्स्वेनदिति यथा माता पुत्रमुपस्थे बिभृयादेवमेनद्बिभृतेत्येतत् ॥३॥ अप्स्वग्ने सधिष्टवेति । अप्स्वग्ने योनिष्टवेत्येतत्सौषधीरनुरुध्यसऽइत्योषधीर्ह्येषोऽनुरुध्यते गर्भे सञ्जायसे पुनरिति गर्भे ह्येष सञ्जायते पुनर्गर्भोऽअस्योषधीनां गर्भो वनस्पतीनाम् गर्भो विश्वस्य भूतस्याग्ने गर्भोऽअपामसीति तदेनमस्य सर्वस्य गर्भं करोति ॥४॥ त्रिभिरभ्यवहरति । त्रिवृदग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनदेतदभ्यवहरत्येकेनाग्रेऽथ द्वाभ्यां द्वाभ्यां वाग्रेऽथैकेन द्वि-

स्तु कृत्वोऽभ्यवहरति तस्यै द्विपादः पशवस्तैरेवैनदेतदभ्यवहरति ॥५॥ अथापा-
दत्ते । तद्यदत्राग्नेयं तदेतद्य्योऽधि जनयत्यनयानया वै भेषजं क्रियतेऽनयैवैनमे-
तत्सम्भरति प्रसद्य भस्मना योनिमपश्च पृथिवीमग्नऽइति प्रसन्नो ह्येष भस्मना
योनिमपश्च पृथिवीं च भवति सꣳसृज्य मातृभिष्ट्वं ज्योतिष्मान्पुनरासद इति सं-
गत्य मातृभिष्ट्वं ज्योतिष्मान्पुनरासद इत्येतत्पुनरासद्य सदनं पुनरूर्जा सह रय्ये-
त्येतेन मा सर्वेणाभिनिवर्तस्वेत्येतत् ॥६॥ चतुर्भिरपादत्ते । तस्यै चतुष्पादः प-
शवस्तैरेवैनमेतत्सम्भरत्यथोऽअन्नं वै पशवोऽन्नेनैवैनमेतत्सम्भरति त्रिभिरभ्यव-
हरति तत्सप्त सप्तचितिकोऽग्निः सप्तऽर्तवः संवत्सरः संवत्सरोऽग्निर्यावानग्निर्या-
वत्यस्य मात्रा तावत्तद्भवति ॥७॥ अपादाय भस्मनः प्रत्येत्य । उखायामोप्योपति-
ष्ठतऽएतद्वाऽएतदयथायथं करोति यदग्निमपोऽभ्यवहरति तस्माऽएवैतन्निह्नुते
ऽहिꣳसायाऽआग्नेयीभ्यामग्नयऽएवैतन्निह्नुते बुद्धवतीभ्यां यथैवास्यैतदग्निर्वचो नि-
बोधेत् ॥८॥ बोधा मेऽअस्य वचसो यविष्ठेति । बोध मेऽस्य वचसो यविष्ठेत्ये-
तन्मꣳहिष्ठस्य प्रभृतस्य स्वधाव इति भूयिष्ठस्य प्रभृतस्य स्वधाव इत्येतत्पीयति
त्वोऽअनु त्वो गृणातीति पीयत्येकोऽन्वेको गृणाति वन्दारुष्टे तन्वं वन्देऽअग्न
ऽइति वन्दिता तेऽहं तन्वं वन्देऽग्नऽइत्येतत्स बोधि सूरिर्मघवा वसुपते वसु-
दावन् युयोध्यस्मद्द्वेषाꣳसीति यथैवास्माद्द्वेषाꣳसि युयादेवमेतदाह द्वाभ्यामुपति-
ष्ठते गायत्र्या च त्रिष्टुभा च तस्योक्तो बन्धुः ॥९॥ तानि नव भवन्ति । नव दि-
शो दिशोऽग्निर्नव प्राणाः प्राणा अग्निर्यावानग्निर्यावत्यस्य मात्रा तावत्तद्भवति
॥१०॥ अथ प्रायश्चित्ती करोति । सर्वेभ्यो वाऽएष एतं कामेभ्य आधत्ते तद्यदे-
वास्यात्र कामानां व्यवछिद्यतेऽग्नावपोऽभ्यवह्रियमाणे तदेवैतत्संतनोति संदधा-
त्युभे प्रायश्चित्ती करोति येऽएवाग्नावनुगते तस्योक्तो बन्धुः ॥११॥ तानि दश
भवन्ति । दशाक्षरा विराड्विराडग्निर्दश दिशो दिशोऽग्निर्दश प्राणाः प्राणा अग्निर्या-

वानग्निर्यावत्यस्य मात्रा तावत्तद्भवति ॥ १२॥ ब्राह्मणम् ॥ ६ [८. २.] ॥ पञ्चमः प्रपाठकः ॥ कण्डिकासंख्या १०२ ॥ अष्टमोऽध्यायः [४३.] ॥ अस्मिन्काण्डे कण्डिकासंख्या ५३० ॥ ॥

इति माध्यन्दिनीये शतपथब्राह्मणे उखासम्भरणनाम षष्ठं काण्डं समाप्तम् ॥ ६॥ ॥

VARIOUS READINGS.

Adhyâya १. १. ११ सोऽग्निरसृज्यत ABC first hand. - ३. ११ We expect शर्व instead of सर्व (oxyt.). —

Adhyâya २. २. ३७ °द्कान्न C. द्कान्न AB. - ४०? भिषज्ज्यितो A. भिषज्जियितो B. C first hand. भिषज्जयितो C second hand. —

Adhyâya ३. १. १३ तत्वाय A. - २६ सुखिर° A first hand. - २८ आसोदेष सोऽज्ञो ABC. - ४४ ॥ब्राह्मणम् ॥ ३॥ भारवट ॥ A. - ३. ८? स्यवा ABC see २, ४, १, ६. १२. - ११ वृवाय ABC. - २०? स्पृद्धर्णो A first hand. स्पृह्यद्धर्णो A second hand. BC. —

Adhyâya ४. २. १? °अेऽग्रिरसृज्यत AB. C second hand. - ६ देवः सं देवा° ABC. - ३. ५ ऽथेति । अथे° A. ऽथेति अथे° BC. - ४. ३ सुखदस्त्व° A first hand.—

Adhyâya ५. १. १ पर्णाकखा° A. - २. ५ द्यौर्द्योष C first hand. —

Adhy. ६. ३. ३ °न्प्रतिपद्यते B first hand. - ४. ६? कर्मणिरिव ABC. —

Adhy. ७. २. ८ उभयतःप्रउगं is double-accented! - ३. १० °गन्वां त° ABC.—

ओम् । गार्हपत्यं चेष्यन्पलाशशाखया व्युदूहति । अवस्यति ह्येतद्यद्गार्हपत्यं चिनोति य उ वै के चाग्निचितोऽस्यामेव तेऽवसितास्तद्यद्व्युदूहत्यवसितानेव तद्व्युदूहति नेदवसितानध्यवस्यानीति ॥१॥ अपेत वीत वि च सर्पतात इति । अप चैवेत वि चेत व्यु च सर्पतात इत्येतद्य उदरसर्पिणस्तानेतदाह येऽत्र स्थ पुराणा ये च नूतना इति येऽत्र स्थ सनातना ये चाधुनातना इत्येतत् ॥२॥ अदाद्यमोऽवसानं पृथिव्या इति । यमो ह वाऽअस्या अवसानस्येष्टे स एवास्मा ऽअस्यामवसानं ददाति ॥३॥ अक्रन्निमं पितरो लोकमस्माऽइति । क्षत्रं वै यमो विशः पितरो यस्मा उ वै क्षत्रियो विशा संविदानोऽस्यामवसानं ददाति तत्सुदत्तं तथो हास्मै क्षत्रं यमो विशा पितृभिः संविदानोऽस्यामवसानं ददाति ॥४॥ पलाशशाखया व्युदूहति । ब्रह्म वै पलाशो ब्रह्मणैव तदवसितान्व्युदूहति मन्त्रेण ब्रह्म वै मन्त्रो ब्रह्मणैव तदवसितान्व्युदूहति तामुदीचीमुदस्यति ॥५॥ ॥ शतम् ३१०० ॥॥ अथोषान्निवपति । अयं वै लोको गार्हपत्यः पशव ऊषा अस्मिंस्तल्लोके पशून्दधाति तस्मादिमेऽस्मिँल्लोके पशवः ॥६॥ यद्वेवोषान्निवपति । प्रजापतिः प्रजा असृजत ता नानोल्बा असृजत ता न समजानत सोऽकामयत संजानीरन्निति ताः समानोल्बा अकरोत्तासामूषानुल्बमकरोत्ताः समजानत तस्मादप्येतर्हि समानोल्बाः समिव जानते देवैः समानोल्बोऽसानीत्यु वै यजते यो यजते तद्यदूषान्निवपति देवैरेव तत्समानोल्बो भवति ॥७॥ संज्ञानमसीति । समजानत ह्येतेन कामधरणमिति पशवो वाऽऊषाः पशवः कामधरणं मयि ते

कामधरणं भूयादिति मयि ते पशवो भूयासुरित्येतत्तैः सर्वं गार्हपत्यं प्रच्छादयति योनिर्वै गार्हपत्या चितिरुल्बमूषाः सर्वां तद्योनिमुल्बेन प्रच्छादयति ॥८॥ अथ सिकता निवपति । अग्नेरेतद्वैश्वानरस्य भस्म यत्सिकता अग्निमु वाऽएतं वैश्वानरं चेष्यन्भवति न वाऽअग्निः स्वं भस्मातिदहत्यनतिदाहाय ॥९॥ यद्वेव सिकता निवपति । अग्नेरेतद्वैश्वानरस्य रेतो यत्सिकता अग्निमु वाऽएतं वैश्वानरं चेष्यन्भवति न वाऽअग्नेरेतस्कात्किं चन विक्रियतेऽस्माद्रेतसोऽधि विक्रियाताऽइति ॥१०॥ अग्नेर्भस्मास्यग्नेः पुरीषमसीति । यातयाम वाऽअग्नेर्भस्मायातयाम्न्यः सिकता अयातयाममेवैनदेतत्करोति ताभिः सर्वं गार्हपत्यं प्रच्छादयति योनिर्वै गार्हपत्या चिती रेतः सिकताः सर्वस्यां तद्योनौ रेतो दधाति ॥११॥ अथैनं परिश्रिद्भिः परिश्रयति । योनिर्वै परिश्रित इदमेवैतद्रेतः सिक्तं योन्या परिगृह्णाति तस्माद्योन्या रेतः सिक्तं परिगृह्यते ॥१२॥ यद्वेवैनं परिश्रिद्भिः परिश्रयति । अयं वै लोको गार्हपत्य आपः परिश्रित इमं तं लोकमद्भिः परितनोति समुद्रेण हैनं तत्परितनोति सर्वतस्तस्मादिमं लोकꣳ सर्वतः समुद्रः पर्येति दक्षिणावृत्तस्मादिमं लोकं दक्षिणावृत्समुद्रः पर्येति खातेन तस्मादिमं लोकं खातेन समुद्रः पर्येति ॥१३॥ चित स्थेति । चिनोति ह्येनाः परिचित स्थेति परि ह्येनाश्चिनोत्यूर्ध्वचितः श्रयध्वमित्यूर्ध्वा उपदधदाह तस्मादूर्ध्व एव समुद्रो विक्षतेऽथ यत्तिरश्चीरुपदध्यात्सकृद्वेवेदꣳ सर्वꣳ समुद्रो निर्मृज्यान्न सादयत्यसन्ना ह्यापो न सूददोहसाधिवदति ॥१४॥ अस्थीनि वै परिश्रितः । प्राणः सूददोहा न वाऽअस्थिषु प्राणोऽस्त्येकेन यजुषा बह्वीरिष्टका उपदधात्येकꣳ ह्येतद्रूपं यदापोऽथ यद्बह्व्यः परिश्रितो भवन्ति बह्व्यो ह्यापः ॥१५॥ तद्वै योनिः परिश्रितः । उल्बमूषा रेतः सिकता बाह्याः परिश्रितो भवन्त्यन्तरऽऊषा बाह्या हि योनिरन्तरमुल्बं बाह्यऽऊषा भवन्त्यन्तराः सिकता बाह्यꣳ ह्युल्बमन्तरꣳ रेत एतेभ्यो वै जायमानो जायते तेभ्य एवैनमेत-

ज्जनयति ॥१६॥ अथैनमतश्चिनोति । इदमेवैतद्रेतः सिक्तं विकरोति तस्माद्योनौ रेतः सिक्तं विक्रियते ॥१७॥ स चतस्रः प्राचीरुपदधाति । द्वे पश्चात्तिरश्च्यौ द्वे पुरस्तात्तद्याश्चतस्रः प्राचीरुपदधाति स आत्मा तद्यत्ताश्चतस्रो भवन्ति चतुर्विधो ह्ययमात्माथ ये पश्चात्ते सक्थ्यौ ये पुरस्तात्तौ बाहू यत्र वाऽआत्मा तदेव शिरः ॥१८॥ तं वाऽएतम् । अत्र पक्षपुच्छवन्तं विकरोति यादृग्वै योनौ रेतो विक्रियते तादृग्जायते तद्यदेतमत्र पक्षपुच्छवन्तं विकरोति तस्मादेषोऽमुत्र पक्षपुच्छवाञ्जायते ॥१९॥ तं वै पक्षपुच्छवन्तमिव सन्तम् । न पक्षपुच्छवन्तमिव पश्यन्ति तस्माद्योनौ गर्भं न यथारूपं पश्यन्त्यथैनममुत्र पक्षपुच्छवन्तं पश्यन्ति तस्माज्जातं गर्भं यथारूपं पश्यन्ति ॥२०॥ स चतस्रः पूर्वा उपदधाति । आत्मा ह्येवाग्रे सम्भवतः सम्भवति दक्षिणत उदङ्ङासीन उत्तरार्ध्यां प्रथमामुपदधाति तथो ह्यस्यैषोऽभ्यात्ममेवाग्निश्चितो भवति ॥२१॥ अयं सोऽअग्निः । यस्मिन्त्सोममिन्द्रः सुतं दधऽइत्ययं वै लोको गार्हपत्य आपः सोमः सुतोऽस्मिंस्तल्लोकेऽप इन्द्रोऽधत्त जठरे वावशान इति मध्यं वै जठरं सहस्रियं वाजमत्यं न सप्तिमित्यापो वै सहस्रियो वाजः ससवान्त्सन्त्स्तूयसे जातवेद इति चितः संश्रीयसे जातवेद इत्येतत् ॥२२॥ अग्ने यत्ते दिवि वर्च इति । आदित्यो वाऽअस्य दिवि वर्चः पृथिव्यामित्ययमग्निः पृथिव्यां यदोषधीष्वप्स्वा यजत्रेति य एवौषधिषु चाप्सु चाग्निस्तमेतदाह येनान्तरिक्षमुर्वाततन्थेति वायुः स त्वेषः स भानुरर्णवो नृचक्षा इति महान्त्स भानुरर्णवो नृचक्षा इत्येतत् ॥२३॥ अग्ने दिवोऽअर्णमच्छा जिगासीति । आपो वाऽअस्य दिवोऽर्णास्ता एष धूमेनाच्छेत्यच्छा देवाँ२॥ऽऊचिषे धिष्ण्या यऽइति प्राणा वै देवा धिष्ण्यास्ते हि सर्वा धिय इन्वन्ति या रोचने परस्तात्सूर्यस्य याश्चावस्तादुपतिष्ठन्तऽआप इति रोचनो ह नामैष लोको यत्रैष एतत्तपति तद्याश्चैतं परेणापो याश्चावरेण ता एतदाह ॥२४॥ पुरीष्यासोऽअग्नय इति । पशव्यासोऽग्नय इत्येतत्प्रा-

वर्णोभिः सजोषस इति प्रायणरूपं प्रायणꣳ ह्येतदग्नेर्यद्गार्हपत्यो जुषन्तां यज्ञमद्रुहो ऽनमीवा इषो महीरिति जुषन्तां यज्ञमद्रुहोऽनशनाया इषो महीरित्येतत् ॥२५॥ नानोपदधाति । ये नानाकामा आत्मंस्तांस्तद्दधाति सकृत्सादयत्येकं तदात्मानं करोति सूददोहसाधिवदति प्राणो वै सूददोहाः प्राणेनैवैनमेतत्संतनोति संदधाति ॥२६॥ अथ जघनेन परीत्य । उत्तरतो दक्षिणासीनोऽपरयोर्दक्षिणामग्र ऽउपदधातीडामग्ने पुरुदꣳसꣳ सनिं गोरिति पशवो वाऽइडा पशूनामेवास्माऽएतामाशिषमाशास्ते शश्वत्तमꣳ हवमानाय साधेति यजमानो वै हवमानः स्यान्नः सूनुस्तनयो विजावेति प्रजा वै सूनुरग्ने सा ते सुमतिर्भूत्वस्मेऽइत्याशिषमाशास्ते ॥२७॥ अथोत्तराम् । अयं ते योनिरृत्वियो यतो जातोऽअरोचथा इत्ययं ते योनिरृतव्यः सनातनो यतो जातोऽदीप्यथा इत्येतत्तं जानन्नग्नऽआरोहाथा नो वर्धया रयिमिति यथैव यजुस्तथा बन्धुः ॥२८॥ सक्थ्यावस्यैते । ते नानोपदधाति नाना सादयति नाना सूददोहसाधिवदति नाना हीमे सक्थ्यौ द्वे भवतो द्वे हीमे सक्थ्यौ पश्चादुपदधाति पश्चाद्धीमे सक्थ्यावग्राभ्याꣳ सꣳस्पृष्टे भवत एवꣳ हीमे सक्थ्यावग्राभ्याꣳ सꣳस्पृष्टे ॥२९॥ अथ तेनैव पुनः परीत्य । दक्षिणत उदङ्ङासीनः पूर्वयोरुत्तरामग्रऽउपदधाति चिदसि तया देवतयाङ्गिरस्वद्ध्रुवा सीदेत्यथ दक्षिणां परिचिदसि तया देवतयाङ्गिरस्वद्ध्रुवा सीदेति ॥३०॥ बाहूऽअस्यैते । ते नानोपदधाति नाना सादयति नाना सूददोहसाधिवदति नाना हीमौ बाहू द्वे भवतो द्वौ हीमौ बाहू पूर्वार्धऽउपदधाति पुरस्ताद्धीमौ बाहूऽअग्राभ्याꣳ सꣳस्पृष्टे भवत एवꣳ हीमौ बाहूऽअग्राभ्याꣳ सꣳस्पृष्टौ स वाऽइतीमाऽउपदधातीतीमेऽइतीमे तद्दक्षिणावृत्तद्धि देवत्रा ॥३२॥ अष्टाविष्टका उपदधाति । अष्टाक्षरा गायत्री गायत्रोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतच्चिनोति पञ्च कृत्वः सादयति पञ्चचितिकोऽग्निः पञ्चऽर्तवः संवत्सरः संवत्सरोऽग्निर्यावानग्निर्या-

वत्यस्य मात्रा तावन्तमेवैनमेतच्चिनोत्यष्टाविष्टकाः पञ्च कृत्वः सादयति तत्त्रयोदश
त्रयोदश मासाः संवत्सरस्त्रयोदशाग्नेश्चितिपुरीषाणि यावानग्निर्यावत्यस्य मात्रा ता-
वत्तद्भवति ॥३२॥ अथ लोकम्पृणामुपदधाति । तस्या उपरि बन्धुस्तिस्रः पूर्वास्त्रि-
वृदग्निर्यावानग्निर्यावत्यस्य मात्रा तावन्तमेवैनमेतच्चिनोति दशोत्तरास्तासामुपरि
बन्धुर्द्वे वाग्रेऽथ दशाथैकामेवꣳ हि चितिं चिन्वन्ति तास्त्रयोदश सम्पद्यन्ते तस्यो-
क्तो बन्धुः ॥३३॥ ता उभय्य एकविꣳशतिः सम्पद्यन्ते । द्वादश मासाः पञ्चर्तव-
स्त्रय इमे लोका असावादित्य एकविꣳशोऽमुं तदादित्यमस्मिन्नग्नौ प्रतिष्ठापयति
॥३४॥ एकविꣳशतिर्वेव परिश्रितः । द्वादश मासाः पञ्चर्तवस्त्रय इमे लोका अ-
यमग्निरमुतोऽध्येकविꣳश इमं तदग्निममुष्मिन्नादित्ये प्रतिष्ठापयति तद्यदेता एवमु-
पदधात्येतावेवैतदन्योऽन्यस्मिन्प्रतिष्ठापयति तावेतावन्योऽन्यस्मिन्प्रतिष्ठितौ तौ
वाऽएतावत्र द्वावेकविꣳशौ सम्पादयत्यत्र ह्येवेमौ तदोभौ भवत आहवनीयश्च
गार्हपत्यश्च ॥३५॥ अथ पुरीषं निवपति । तस्योपरि बन्धुस्तच्चात्वालवेलाया आ-
हरत्यग्निरेष यच्चात्वालस्तथो हास्यैतदाग्नेयमेव भवति सा समम्बिला स्यात्तस्यो-
क्तो बन्धुः ॥३६॥ व्याममात्री भवति । व्याममात्रो वै पुरुषः पुरुषः प्रजापतिः प्र-
जापतिरग्निरात्मसंमितां तद्योनिं करोति परिमण्डला भवति परिमण्डला हि यो-
निरथोऽअयं वै लोको गार्हपत्यः परिमण्डल उ वाऽअयं लोकः ॥३७॥ अथै-
नौ संनिवपति । संज्ञामेवाभ्यामेतत्करोति समितꣳ संकल्पेथाꣳ सं वां मनाꣳसि
सं व्रताग्ने त्वं पुरीष्यो भवतं नः समनसाविति शमयत्येवैनावेतदहिꣳसायै यथा
नान्योऽन्यꣳ हिꣳस्याताम् ॥३८॥ चतुर्भिः संनिवपति । तद्ये चतुष्पदाः पशव-
स्तैरेवाभ्यामेतत्संज्ञां करोत्यथोऽअन्नं वै पशवोऽन्नेनैवाभ्यामेतत्संज्ञां करोति
॥३९॥ तां न रिक्तामवेक्षेत । नेद्रिक्तामवेक्षाऽइति यद्रिक्तामवेक्षेत ग्रसेत हैनम्
॥४०॥ अथास्याꣳ सिकता आवपति । अग्ने रेतद्वैश्वानरस्य रेतो यत्सिकता अग्नि-

मेवास्यामेतद्वैश्वानरꣳ रेतो भूतꣳ सिञ्चति सा समम्बिला स्यात्तस्योक्तो बन्धुः ॥४१॥ अथैनां विमुञ्चति । अप्रदाहाय यद्धि युक्तं न विमुच्यते प्र तद्दह्यतऽएतद्वाऽएतद्युक्ता रेतोऽभार्षीदेतमग्निं तमत्राजीजनदथापरं धत्ते योषा वाऽउखा तस्माद्यदा योषा पूर्वꣳ रेतः प्रजनयत्यथापरं धत्ते ॥४२॥ मातेव पुत्रं पृथिवी पुरीष्यमिति । मातेव पुत्रं पृथिवी पशव्यमित्येतदग्निꣳ स्वे योनावभारुखेत्यग्निꣳ स्वे योनावभार्षीदुखेत्येतत्तां विश्वैर्देवैर्ऋतुभिः संविदानः प्रजापतिर्विश्वकर्मा विमुञ्चत्वित्यृतवो वै विश्वे देवास्तदेनां विश्वैर्देवैर्ऋतुभिः संविदानः प्रजापतिर्विश्वकर्मा विमुञ्चति तामुत्तरतोऽग्नेर्निदधात्यरत्निमात्रे तस्योक्तो बन्धुः ॥४३॥ अथास्यां पय आनयति । एतद्वाऽएतद्रेतो धत्तेऽथ पयो धत्ते योषा वाऽउखा तस्माद्यदा योषा रेतो धत्तेऽथ पयो धत्तेऽधराः सिकता भवन्त्युत्तरं पयोऽधरꣳ हि रेत उत्तरं पयस्तन्मध्यऽआनयति यथा तत्प्रति पुरुषशीर्षमुपदध्यात् ॥४४॥ ब्राह्मणम् ॥१॥ ॥

प्रजापतिः प्रजा असृजत । स प्रजाः सृष्ट्वा सर्वमाजिमित्वा व्यस्रꣳसत तस्माद्धिस्रस्तात्प्राणो मध्यत उदक्रामदथास्माद्वीर्यमुदक्रामत्तस्मिन्नुत्क्रान्तेऽपद्यत तस्मात्पन्नादन्नमस्रवद्यच्चक्षुरध्यशेत तस्मादस्यान्नमस्रवन्नो हैह तर्हि का चन प्रतिष्ठास ॥१॥ ते देवा अब्रुवन् । न वाऽइतोऽन्या प्रतिष्ठास्तीममेव पितरं प्रजापतिꣳ संस्करवाम सैव नः प्रतिष्ठा भविष्यतीति ॥२॥ तेऽग्निमब्रुवन् । न वाऽइतोऽन्या प्रतिष्ठास्ति त्वयीमं पितरं प्रजापतिꣳ संस्करवाम सैव नः प्रतिष्ठा भविष्यतीति किं मे ततो भविष्यतीति ॥३॥ तेऽब्रुवन् । अन्नं वाऽअयं प्रजापतिस्त्वन्मुखा एतदन्नमदाम त्वन्मुखानां न एषोऽन्नमसदिति तथेति तस्माद्देवा अग्निमुखा अन्नमदन्ति यस्यै हि कस्यै च देवतायै जुह्वत्यग्नावेव जुह्वत्यग्निमुखा हि तद्देवा अन्नमकुर्वत ॥४॥ स योऽस्मात्प्राणो मध्यत उदक्रामत् । अयमेव स वायुर्योऽयं पवतेऽथ यदस्माद्वीर्यमुदक्रामदसौ स आदित्योऽथ यदस्मादन्नमस्रवद्यदेव संवत्सरेऽन्नं तत्तत्

॥५॥ तं देवा अग्नौ प्रावृञ्जन् । तद्य एनं प्रवृक्तमग्निरारोहद्य एवास्मात्स प्राणो
मध्यत उदक्रामत्स एवैनꣳ स आपद्यत तमस्मिन्नदधुरथ यदस्माद्वीर्यमुदक्रामत्तद-
स्मिन्नदधुरथ यदस्मादन्नमस्रवत्तदस्मिन्नदधुस्तꣳ सर्वं कृत्स्नꣳ संस्कृत्योर्ध्वमुदश्रयंस्तद्य
तमुदश्रयन्निमे स लोकाः ॥६॥ तस्यायमेव लोकः प्रतिष्ठा । अथ योऽस्मिंल्लोके
ऽग्निः सोऽस्यावाङ् प्राणोऽथास्यान्तरिक्षमात्माथ योऽन्तरिक्षे वायुर्य एवायमात्म-
न्प्राणः सोऽस्य स द्यौरेवास्य शिरः सूर्याचन्द्रमसौ चक्षुषी यच्चक्षुरध्यशेत स च-
न्द्रमास्तस्मात्स मीलिततरोऽन्नꣳ हि तस्मादस्रवत् ॥७॥ तदेषा वै सा प्रतिष्ठा
। यां तद्देवाः समस्कुर्वंस्तैवेयमद्यापि प्रतिष्ठा सोऽएवाप्यतोऽधि भविता ॥८॥
स यः स प्रजापतिर्व्यस्रꣳसत । अयमेव स योऽयमग्निश्चीयत तद्यदेषोखा रिक्ता
शेते पुरा प्रवर्जनाद्यथैव तत्प्रजापतिरुत्क्रान्ते प्राणऽउत्क्रान्ते वीर्ये स्रुतेऽन्ने रि-
क्तोऽशयदेतदस्य तद्रूपम् ॥९॥ तामग्नौ प्रवृणक्ति । यथैवैनमदो देवाः प्रावृञ्जंस्त-
द्य एनां प्रवृक्तामग्निरारोहति य एवास्मात्स प्राणो मध्यत उदक्रामत्स एवैनꣳ
स आपद्यते तमस्मिन्दधात्यथ यद्रुक्मं प्रतिमुच्य बिभर्ति यदेवास्माद्वीर्यमुदक्रामत्त-
दस्मिन्दधात्यथ याः समिध आदधाति यदेवास्मादन्नमस्रवत्तदस्मिन्दधाति ॥१०॥
ता वै सायं प्रातरादधाति । अह्नश्च हि तद्रात्रेश्चान्नमस्रवत्तान्येतानि सर्वस्मिन्नेव
संवत्सरे स्युः संवत्सरो हि स प्रजापतिर्यस्मात्तान्युदक्रामंस्तदस्मिन्नेतत्सर्वस्मिन्नेव
सर्वं दधाति यस्मिन्हास्यैतदतो न कुर्यान्न हास्य तस्मिन्नेतद्दध्यान्नासंवत्सरभृतस्ये-
क्षकेण चन भवितव्यमिति ह स्माह वामकक्षायणो नेदिमं पितरं प्रजापतिं वि-
च्छिद्यमानं पश्यानीति तꣳ संवत्सरे सर्वं कृत्स्नꣳ संस्कृत्योर्ध्वमुच्छ्रयति यथैवैनमदो
देवा उदश्रयन् ॥११॥ तस्य गार्हपत्य एवायं लोकः । अथ यो गार्हपत्येऽग्निर्य
एवायमस्मिंल्लोकेऽग्निः सोऽस्य सोऽथ यदन्तराहवनीयं च गार्हपत्यं च तदन्तरि-
क्षमथ य आग्नीध्रीयेऽग्निर्य एवायमन्तरिक्षे वायुः सोऽस्य स आहवनीय एव द्यौ-

एष य आहवनीयेऽग्निस्तौ सूर्याचन्द्रमसौ सोऽस्यैष आत्मैव ॥१२॥ तस्य शिर एवाहवनीयः । अथ य आहवनीयेऽग्निर्य एवायꣳ शीर्षन्प्राणः सोऽस्य स तद्यत्स पक्षपुच्छवान्भवति पक्षपुच्छवान्ह्ययꣳ शीर्षन्प्राणश्चक्षुः शिरो दक्षिणꣳ श्रोत्रं दक्षिणः पक्ष उत्तरꣳ श्रोत्रमुत्तरः पक्षः प्राणो मध्यमात्मा वाक्पुच्छं प्रतिष्ठा तद्यत्प्राणा वाचान्नं जग्ध्वा प्रतितिष्ठन्ति तस्माद्वाक्पुच्छं प्रतिष्ठा ॥१३॥ अथ यदन्तराहवनीयं च गार्हपत्यं च । स आत्माथ य आग्नीध्रीयेऽग्निर्य एवायमन्तरात्मन्प्राणः सोऽस्य स प्रतिष्ठैवास्य गार्हपत्योऽथ यो गार्हपत्येऽग्निः सोऽस्यावाङ् प्राणः ॥१४॥ तꣳ हैके त्रिचितं चिन्वन्ति । त्रयो वाऽइमेऽवाञ्चः प्राणा इति न तथा कुर्यादति ते रेचयन्त्येकविꣳशसम्पदमथोऽअनुष्टुप्सम्पदमथो बृहतीसम्पदं ये तथा कुर्वन्त्येकꣳ ह्येवैतद्रूपं योनिरेव प्रजातिरेव यदेतेऽवाञ्चः प्राणा यद्धि मूत्रं करोति यत्पुरीषं प्रैव तज्जायते ॥१५॥ अथातः सम्पदेव । एकविꣳशतिरिष्टका नव यजूꣳषि तत्त्रिꣳशत्सादनं च सूददोहाश्च तद्द्वात्रिꣳशद्द्वात्रिꣳशदक्षरानुष्टुप्सैषानुष्टुप् ॥१६॥ एकविꣳशतिर्वेव परिश्रितः । यजुर्द्वाविꣳशं व्युद्दूहनस्य यजुरूषाश्च यजुश्च सिकताश्च यजुश्च पुरीषं च यजुश्च चतुर्भिः संनिवपति विमुञ्चति पञ्चमेन ततस्त्रिभिरियं द्वात्रिꣳशदक्षरानुष्टुप्सैषानुष्टुप् ॥१७॥ अथैते द्वे यजुषी । सोऽअनुष्टुबेव वाग्वाऽअनुष्टुप्तद्यदिदं द्वयं वाचो रूपं दैवं च मानुषं चोच्चैश्च शनैश्च तदेते द्वे ॥१८॥ ता वाऽएतास्तिस्रोऽनुष्टुभः । चित एष गार्हपत्यस्तद्यदेता अत्र तिस्रोऽनुष्टुभः सम्पादयन्त्यत्र ह्येवेमे तदा सर्वे लोका भवन्ति ततोऽन्यतरां द्वात्रिꣳशदक्षरामनुष्टुभमाहवनीयꣳ हरन्ति स आहवनीयः सा द्यौस्तच्छिरोऽथैकान्यतरा परिशिष्यते स गार्हपत्यः सा प्रतिष्ठा स उऽअयं लोकः ॥१९॥ अथ येऽएते द्वे यजुषी । एतत्तद्यदन्तराहवनीयं च गार्हपत्यं च तदन्तरिक्षꣳ स आत्मा तद्यत्ते द्वे भवतस्तस्मादेतत्तनीयो यदन्तराहवनीयं च गार्हपत्यं च तस्मादेषां लोकानामन्तरिक्षलोक-

स्तनिष्ठः ॥२०॥ सैषा त्रेधाविहिता वागनुष्टुप् । तामेषोऽग्निः प्राणो भूत्वानुसं-
चरति य आहवनीयेऽग्निः स प्राणः सोऽसावादित्योऽथ य आग्नीध्रीयेऽग्निः स
व्यानः स उऽअयं वायुर्योऽयं पवतेऽथ यो गार्हपत्येऽग्निः स उदानः स उऽअयं
योऽयमस्मिंल्लोकेऽग्निरेवंविद्ध वाव सर्वां वाचं सर्वं प्राणᳫं सर्वमात्मानᳫं संस्कु-
रुते ॥२१॥ सैषा बृहत्येव । ये वै द्वे द्वात्रिᳫंशती द्वात्रिᳫंशदेव तद्यैते द्वे यजु-
षी तच्चतुस्त्रिᳫंशदग्निरेव पञ्चत्रिᳫंशो नाक्षराच्छन्दो व्येत्येकस्मान्न द्वाभ्याᳫं स उ
ह्यक्षरस्तत्षट्त्रिᳫंशत्षट्त्रिᳫंशदक्षरा बृहती बृहतीं वाऽएष संचितोऽभिसम्पद्यते
यादृग्वै योनौ रेतः सिच्यते तादृग्जायते तद्यदेतामत्र बृहतीं करोति तस्मादेष
संचितो बृहतीमभिसम्पद्यते ॥२२॥ तदाहुः । यदयं लोको गार्हपत्योऽन्तरिक्षं
धिष्ण्या द्यौराहवनीयोऽन्तरिक्षलोक उ अस्माल्लोकादनन्तर्हितोऽथ कस्माद्गार्हपत्यं
चित्वाहवनीयं चिनोत्यथ धिष्ण्यानिति सह ह्येवेमावग्रे लोकावासतुस्तयोर्विय-
तोर्योऽन्तरेणाकाश आसीत्तदन्तरिक्षमभवदीक्षᳫं ह्येतन्नाम ततः पुरान्तरा वाऽइद-
मीक्षमभूदिति तस्मादन्तरिक्षं तद्यद्गार्हपत्यं चित्वाहवनीयं चिनोत्येतौ ह्यग्रे लो-
कावसृज्येतामथ प्रत्येत्य धिष्ण्यान्निवपति कर्मण एवानन्तरयायाथोऽअन्तयोर्वाव
संस्क्रियमाणयोर्मध्यᳫं संस्क्रियते ॥२३॥ ब्राह्मणम् ॥२॥ प्रथमोऽध्यायः [४४.] ॥ ॥

अथातो नैर्ऋतीर्हरन्ति । एतद्वै देवा गार्हपत्यं चित्वा समारोहन्नयं वै लोको
गार्हपत्य इममेव तं लोकᳫं संस्कृत्य समारोहंस्ते तम एवानतिदृश्यमपश्यन्
॥१॥ तेऽब्रुवन् । उप तज्जानीत यथेदं तमः पाप्मानमपहनामहाऽइति तेऽब्रु-
वंश्चेतयध्वमिति चितिमिच्छतेति वाव तदब्रुवंस्तदिच्छत यथेदं तमः पाप्मानमपह-
नामहाऽइति ॥२॥ ते चेतयमानाः । एता इष्टका अपश्यन्नैर्ऋतीस्ता उपादधत
ताभिस्तत्तमः पाप्मानमपाघ्नत पाप्मा वै निर्ऋतिस्तद्यदेताभिः पाप्मानं निर्ऋतिम-
पाघ्नत तस्मादेता नैर्ऋत्यः ॥३॥ तद्वाऽएतत्क्रियते । यद्देवा अकुर्वन्निदं नु तत्तमः

स पाप्मा देवैरेवापहतो यद्वेतत्करोति यद्देवा अकुर्वंस्तत्करवाणीत्यथो य एव
पाप्मा या निर्ऋतिस्तमेताभिरपहते तद्यदेताभिः पाप्मानं निर्ऋतिमपहते तस्मादे-
ता नैर्ऋत्यः ॥४॥ यद्वेवैता नैर्ऋतीर्हरन्ति । प्रजापतिं विस्रस्तं यत्र देवाः समस्कुर्वं-
स्तमुखायां योनौ रेतो भूतमसिञ्चन्योनिर्वा ऽउखा तस्मा ऽएतां संवत्सरे प्रति-
ष्ठां समस्कुर्वन्निममेव लोकमयं वै लोको गार्हपत्यस्तस्मिन्नेनं प्राजनयंस्तस्य
यः पाप्मा यः श्लेष्मा यदुल्बं यज्जरायु तदस्यैताभिरपाघ्नंस्तद्यदस्यैताभिः पाप्मानं
निर्ऋतिमपाघ्नंस्तस्मादेता नैर्ऋत्यः ॥५॥ तथैवैतद्यजमानः । आत्मानमुखायां योनौ
रेतो भूतं सिञ्चति योनिर्वा ऽउखा तस्मा ऽएतां संवत्सरे प्रतिष्ठां संस्करोती-
ममेव लोकमयं वै लोको गार्हपत्यस्तस्मिन्नेनं प्रजनयति तस्य यः पाप्मा यः
श्लेष्मा यदुल्बं यज्जरायु तदस्यैताभिरपहन्ति तद्यदस्यैताभिः पाप्मानं निर्ऋतिमप-
हन्ति तस्मादेता नैर्ऋत्यः ॥६॥ पादमात्र्यो भवन्ति । अधस्पदमेव तत्पाप्मानं नि-
र्ऋतिं कुरुते ऽलक्षणा भवन्ति यद्वै नास्ति तदलक्षणमसत्तमेव तत्पाप्मानं निर्ऋतिं
कुरुते तुषपक्वा भवन्ति नैर्ऋता वै तुषा नैर्ऋतैरेव तन्नैर्ऋतं कर्म करोति कृष्णा
भवन्ति कृष्णं हि तत्तम आसीदथो कृष्णा वै निर्ऋतिः ॥७॥ ताभिरेतां दिशं
यन्ति । एषा वै नैर्ऋती दिङ्नैर्ऋत्यामेव तद्दिशि निर्ऋतिं दधाति स यत्र स्वकृतं
वेरिणं श्वभ्रप्रदरो वा स्यात्तदेना उपदध्याद्यत्र वा ऽअस्या ऽअवदीर्यते यत्र वास्या
ऽओषधयो न जायन्ते निर्ऋतिर्हास्यै तद्गृह्णाति नैर्ऋत ऽएव तद्भूमेर्निर्ऋतिं दधाति ताः
पराचीर्लोकभाजः कृत्वोपदधाति ॥८॥ असुन्वन्तमयजमानमिच्छेति । यो वै न सु-
नोति न यजते तं निर्ऋतिर्ऋच्छति स्तेनस्येत्यामन्विच्छ तस्करस्येति स्तेनस्य चेत्या-
मन्विच्छ तस्करस्य चेत्येतदथो यथा स्तेनस्तस्करः प्रलायमेत्येवं प्रलायमिच्छेत्यन्य-
मस्मदिच्छ सा त ऽइत्येत्यनित्यंविद्वांसमिच्छेत्येतन्नमो देवि निर्ऋते तुभ्यमस्त्विति
नमस्कारेणैवैनामपहते ॥९॥ नमः सु ते निर्ऋते तिग्मतेज इति । तिग्मतेजा वै

निर्ऋतिस्तस्याऽएतन्नमस्करोत्ययस्मयं विचृता बन्धमेतमित्ययस्मयेन ह वै तं बन्धेन निर्ऋतिर्बध्नाति यं बध्नाति यमेन त्वं यम्या संविदानेत्यग्निर्वै यम इयं यम्याभ्याꣳ हीदꣳ सर्वं यतमाभ्यां त्वꣳ संविदानेत्येतदुत्तमे नाकेऽअधि रोहयैनमिति स्वर्गो वै लोको नाकः स्वर्गे लोके यजमानमधिरोहयेत्येतत् ॥१०॥ यस्यास्ते घोरऽआसञ्जुहोमीति । घोरा वै निर्ऋतिस्तस्या एतदासञ्जुहोति यत्तद्देवत्यं कर्म करोत्येषां बन्धानामवसर्जनायेति यैर्बन्धैर्बद्धो भवति यां त्वा जनो भूमिरिति प्रमन्दतऽइतीयं वै भूमिरस्यां वै स भवति यो भवति निर्ऋतिं त्वाहं परिवेद विश्वत इति निर्ऋतिरिति त्वाहं परिवेद सर्वत इत्येतदियं वै निर्ऋतिरियं वै तं निर्ऋपयति यो निर्ऋच्छति तद्यथा वै ब्रूयादसावामुष्यायणोऽसि वेद त्वा मा मा हिꣳसीरित्येवमेतदाह नतराꣳ हि विदित आमन्त्रितो हिनस्ति ॥११॥ नोपस्पृशति । पाप्मा वै निर्ऋतिर्नेत्पाप्मना सꣳस्पृशाऽइति न सादयति प्रतिष्ठा वै सादनं नेत्पाप्मानं प्रतिष्ठापयानीति न सूददोहसाधिवदति प्राणो वै सूददोहा नेत्पाप्मानं प्राणेन संतनवानि संदधानीति ॥१२॥ ता हैके परस्तादर्वाचीरुपदधति । पाप्मा वै निर्ऋतिर्नेत्पाप्मानं निर्ऋतिमन्ववायामेति न तथा कुर्यात्पराचीरेवोपदध्यात्पराञ्चमेव तत्पाप्मानं निर्ऋतिमपहते ॥१३॥ तिस्र इष्टका उपदधाति । त्रिवृदग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैव तत्पाप्मानं निर्ऋतिमपहते ॥१४॥ अथासन्दीꣳ शिक्यꣳ । रुक्मपाशमिण्ड्वे तत्परार्धे न्यस्यति नैर्ऋतो वै पाशो निर्ऋतिपाशादेव तत्प्रमुच्यते यं ते देवी निर्ऋतिराबबन्ध पाशं ग्रीवास्वविचृत्यमित्यनेनविदुषा ह्यविचृत्यस्तं ते विष्याम्यायुषो न मध्यादित्यग्निर्वाऽआयुस्तस्यैतन्मध्यं यच्चितो गार्हपत्यो भवत्यचित आहवनीयस्तस्माद्यदि युवाग्निं चिनुते यदि स्थविर आयुषो न मध्यादित्येवाहाथेतं पितुमद्धि प्रसूत इत्यन्नं वै पितुरथैतदन्नमद्धि प्रमुक्त इत्येतत्त्रिष्टुब्भिर्वज्रो वै त्रिष्टुब्वज्रेणैव तत्पाप्मानं निर्ऋतिमपहते ॥१५॥

तिस्र इष्टका भवन्ति । आसन्दी शिक्यꣳ रुक्मपाश इण्ड्वे तदष्टावष्टाक्षरा गायत्री गायत्रोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैव तत्पाप्मानं निर्ऋतिमपहते ॥१६॥ अथान्तरेणोदचमसं निनयति । वज्रो वाऽआपो वज्रेणैव तत्पाप्मानं निर्ऋतिमन्तर्धत्ते नमो भूत्यै येदं चकारेत्युपोत्तिष्ठन्ति भूत्यै वाऽएतदग्रे देवाः कर्माकुर्वत तस्याऽएतन्नमोऽकुर्वन्भूत्याऽउ एवायमेतत्कर्म कुरुते तस्याऽएतन्नमस्करोत्यप्रतीक्षमायन्त्यप्रतीक्षमेव तत्पाप्मानं निर्ऋतिं जहति ॥१७॥ प्रत्येत्याग्निमुपतिष्ठते । एतद्वाऽएतदयथायथं करोति यदग्नौ सामिचितऽएतां दिशमेति तस्माऽएवैतन्निह्नुतेऽहिꣳसायै ॥१८॥ यद्वेवोपतिष्ठते । अयं वै लोको गार्हपत्यः प्रतिष्ठा वै गार्हपत्य इयमु वै प्रतिष्ठाथैतदपथमिवेति यदेतां दिशमेति तस्मादुपतिष्ठतऽइमामेवैतत्प्रतिष्ठामभिप्रत्येत्यस्यामेवैतत्प्रतिष्ठायां प्रतितिष्ठति ॥१९॥ निवेशनः संगमनो वसूनामिति । निवेशनो ह्ययं लोकः संगमनो वसूनां विश्वा रूपाभिचष्टे शचीभिरिति सर्वाणि रूपाण्यभिचष्टे शचीभिरित्येतद्देव-इव सविता सत्यधर्मेन्द्रो न तस्थौ समरे पथीनामिति यथैव यजुस्तथा बन्धुः ॥२०॥ ब्राह्मणम् ॥३ [२.१.] ॥॥

अथ प्रायणीयं निर्वपति । तस्य हविष्कृता वाचं विसृजन्ते वाचं विसृज्य स्तम्बयजुर्हरति स्तम्बयजुर्हृत्वा पूर्वेण परिग्राहेण परिगृह्य लिखित्वाह हर त्रिरिति हरति त्रिराग्नीध्रः ॥१॥ प्रत्येत्य प्रायणीयेन प्रचरति । प्रायणीयेन प्रचर्य सीरं युनक्त्येतद्वाऽएनं देवाः संस्करिष्यन्तः पुरस्तादन्नेन समार्धयंस्तथैवैनमयमेतत्संस्करिष्यन्पुरस्तादन्नेन समर्धयति सीरं भवति सेरꣳ ह्येतद्यत्सीरमिरामेवास्मिन्नेतद्दधाति ॥२॥ औदुम्बरं भवति । ऊर्ग्वै रस उदुम्बर ऊर्जैवैनमेतद्रसेन समर्धयति मौञ्जं परिसीर्यं त्रिवृत्तस्योक्तो बन्धुः ॥३॥ सोऽग्नेर्दक्षिणाꣳ श्रोणिम् । जघनेन तिष्ठन्नुत्तरस्याꣳसस्य पुरस्ताद्युज्यमानमभिमन्त्रयते सीरा युञ्जन्ति कवयो युगा वितन्वते पृथगिति ये विद्वाꣳसस्ते कवयस्ते सीरं च युञ्जन्ति युगानि च

वितन्वते पृथग्धीरा देवेषु सुम्नयेति यज्ञो वै सुम्नं धीरा देवेषु यज्ञं तन्वाना इत्येतत् ॥४॥ युनक्त सीरा वि युगा तनुध्वमिति । युञ्जन्ति हि सीरं वि युगानि तन्वन्ति कृते योनौ वपतेह बीजमिति बीजाय वा एषा योनिष्क्रियते यत्सीता यथा ह वा अयोनौ रेतः सिञ्चेदेवं तद्यदकृष्टे वपति गिरा च श्रुष्टिः सभरा असन्न इति वाग्वै गीरन्नं श्रुष्टिर्नेदीय इत्सृण्यः पक्वमेयादिति यदा वा अन्नं पच्यतेऽथ तत्सृण्योपचरन्ति द्वाभ्यां युनक्ति गायत्र्या च त्रिष्टुभा च तस्योक्तो बन्धुः ॥५॥ स दक्षिणमेवाग्रे युनक्ति । अथ सव्यमेवं देवत्रेतरथा मानुषे षड्गवं भवति द्वादशगवं वा चतुर्विंशतिगवं वा संवत्सरमेवाभिसम्पदम् ॥६॥ अथैनं विकृषति । अन्नं वै कृषिरेतद्वा अस्मिन्देवाः संस्करिष्यन्तः पुरस्तादन्नमदधुस्तथैवास्मिन्नयमेतत्संस्करिष्यन्पुरस्तादन्नं दधाति ॥७॥ स वा आत्मानमेव विकृषति । न पक्षपुच्छान्यात्मंस्तदन्नं दधाति यद्व वा आत्मन्नन्नं धीयते तदात्मानमवति तत्पक्षपुच्छान्यथ यत्पक्षपुच्छेषु नैव तदात्मानमवति न पक्षपुच्छानि ॥८॥ स दक्षिणार्धेनाग्नेः । अन्तरेण परिश्रितः प्राचीं प्रथमां सीतां कृषति शुनं सु फाला विकृषन्तु भूमिं शुनं कीनाशा अभियन्तु वाहैरिति शुनं शुनमिति यद्धि समृद्धं तच्छुनं समर्धयत्येवैनामेतत् ॥९॥ अथ जघनार्धेनोदीचीम् । घृतेन सीता मधुना समज्यतामिति यथैव यजुस्तथा बन्धुर्विश्वैर्देवैरनुमता मरुद्भिरिति विश्वे च वै देवा मरुतश्च वर्षस्येशत ऊर्जस्वती पयसा पिन्वमानेति रसो वै पय ऊर्जस्वती रसेनान्नेन पिन्वमानेत्येतदस्मान्त्सीते पयसाभ्याववृत्स्वेत्यस्मान्त्सीते रसेनाभ्याववृत्स्वेत्येतत् ॥१०॥ अथोत्तरार्धेन प्राचीम् । लाङ्गलं पवीरवदिति लाङ्गलं रयिमदित्येतत्सुशेवं सोमपित्सर्वित्यन्नं वै सोमस्तदुद्वपति गामविं प्रफर्व्यं च पीवरीं प्रस्थावद्रथवाहनमित्येतद्धि सर्वं सीतोद्वपति ॥११॥ अथ पूर्वार्धेन दक्षिणाम् । कामं कामदुघे धुक्ष्व मित्राय वरुणाय च । इन्द्रायाश्विभ्यां पूष्णे प्रजाभ्य ओषधी-

भ्य इति सर्वदेवत्या वै कृषिरेताभ्यो देवताभ्यः सर्वान्कामान्धुक्ष्वेत्येतदित्यग्रे कृषत्यथेति अथेत्यथेति तद्दक्षिणावृत्तद्धि देवत्रा ॥१२॥ चतस्रः सीता यजुषा कृषति । तद्यच्चतसृषु दिक्ष्वन्नं तदस्मिन्नेतद्दधाति तद्धि यजुषाद्धा वै तद्यद्यजुरद्धो तद्यदिमा दिशः ॥१३॥ अथात्मानं विकृषति । तद्यदेव संवत्सरेऽन्नं तदस्मिन्नेतद्दधाति तूष्णीमनिरुक्तं वै तद्यत्तूष्णीꣳ सर्वं वाऽअनिरुक्तꣳ सर्वेणैवास्मिन्नेतदन्नं दधातीत्यग्रे कृषत्यथेति अथेत्यथेति तद्दक्षिणावृत्तद्धि देवत्रा ॥१४॥ तिस्रस्तिस्रः सीताः कृषति । त्रिवृदग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवास्मिन्नेतदन्नं दधाति ॥१५॥ द्वादश सीतास्तूष्णीं कृषति । द्वादश मासाः संवत्सरः संवत्सरोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवास्मिन्नेतदन्नं दधाति ॥१६॥ ता उभय्यः षोडश सम्पद्यन्ते । षोडशकलः प्रजापतिः प्रजापतिरग्निरात्मसंमितमेवास्मिन्नेतदन्नं दधाति यदु वाऽआत्मसंमितमन्नं तदवति तन्न हिनस्ति यद्भूयो हिनस्ति तद्यत्कनीयो न तदवति ॥१७॥ यद्वेवैनं विकृषति । एतद्वाऽअस्मिन्देवाः संस्करिष्यन्तः पुरस्तात्प्राणानदधुस्तथैवास्मिन्नयमेतत्संस्करिष्यन्पुरस्तात्प्राणान्दधाति लेखा भवन्ति लेखासु ह्रीमे प्राणाः ॥१८॥ ॥ शतम् ४००० ॥ ॥ चतस्रः सीता यजुषा कृषति । तयऽइमे शीर्षंश्चत्वारो निरुक्ताः प्राणास्तानस्मिन्नेतद्दधाति तद्धि यजुषाद्धा वै तद्यद्यजुरद्धो तद्यदिमे शीर्षन्प्राणाः ॥१९॥ यद्वेवात्मानं विकृषति । यऽएवेमेऽन्तरात्मन्प्राणास्तानस्मिन्नेतद्दधाति तूष्णीं को हि तद्वेद यावन्त इमेऽन्तरात्मन्प्राणाः ॥२०॥ अथैनान्विमुञ्चति । आप्त्वा तं कामं यस्मै कामायैनान्युङ्क्ते विमुच्यध्वमघ्न्या इत्यघ्न्या ह्येते देवत्रा देवयाना इति देवꣳ ह्येभिः कर्म करोत्यगन्म तमसस्पारमस्येत्यशनाया वै तमोऽगन्मास्याऽअशनायायै पारमित्येतज्ज्योतिरापामेति ज्योतिर्ह्याप्नोति यो देवान्यो यज्ञमथैनानुदीचः प्राचः प्रसृजन्ति तस्योक्तो बन्धुस्तानध्वर्यवे ददाति स हि तैः करोति तांस्तु दक्षिणानां कालेऽनुदिशेत्

॥ २१ ॥ ब्राह्मणम् ॥ ४ [२. २] ॥ प्रथमः प्रपाठकः ॥ कण्डिकासंख्या १०८ ॥ ॥

अथ दर्भस्तम्बमुपदधाति । एतद्वै देवा ओषधीरुपादधत तथैवैतद्यजमान ओषधीरुपधत्ते ॥ १ ॥ यद्वेव दर्भस्तम्बमुपदधाति । जायतऽएष एतद्यच्चीयते स एष सर्वस्माऽअन्नाय जायतऽउभयम्वेतदन्नं यद्दर्भा आपश्च ह्येता ओषधयश्च या वै वृत्राद्बीभत्समाना आपो धन्व दृभन्त्य उदायंस्ते दर्भा अभवन्यद्दृभन्त्य उदायंस्तस्माद्दर्भास्ता हैताः शुद्धा मेध्या आपो वृत्राभिप्रक्षरिता यद्दर्भा यद्वु दर्भास्तेनौषधय उभयेनैवैनमेतदन्नेन प्रीणाति ॥ २ ॥ सीतासमरे । वाग्वै सीतासमरः प्राणा वै सीतास्तासामयꣳ समयो वाचि वै प्राणेभ्योऽन्नं धीयते मध्यतो मध्यत एवास्मिन्नेतदन्नं दधाति तूष्णीमनिरुक्तं वै तद्यत्तूष्णीꣳ सर्वं वाऽअनिरुक्तꣳ सर्वेणैवास्मिन्नेतदन्नं दधाति ॥ ३ ॥ अथैनमभिजुहोति । जायतऽएष एतद्यच्चीयते स एष सर्वस्माऽअन्नाय जायते सर्वस्योऽअस्यैष रसो यदाज्यमपां च ह्येष ओषधीनां च रसोऽस्यैवैनमेतत्सर्वस्य रसेन प्रीणाति यावानु वै रसस्तावानात्मानेनैवैनमेतत्सर्वेण प्रीणाति पञ्चगृहीतेन पञ्चचितिकोऽग्निः पञ्चऽर्तवः संवत्सरः संवत्सरोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतदन्नेन प्रीणाति ॥ ४ ॥ यद्वेवैनमभिजुहोति । एतद्वै यत्रैतं प्राणा ऋषयोऽग्रेऽग्निꣳ समस्कुर्वंस्तदस्मिन्नेतं पुरस्ताद्भागमकुर्वत तस्मात्पुरस्ताद्भागास्तद्यदभिजुहोति यऽएवास्मिंस्ते प्राणा ऋषयः पुरस्ताद्भागमकुर्वत तानेवैतत्प्रीणात्याज्येन पञ्चगृहीतेन तस्योक्तो बन्धुः ॥ ५ ॥ यद्वेवैनमभिजुहोति । एतद्वै यान्येतस्मिन्नग्नौ रूपाण्युपधास्यन्भवति यान्स्तोमान्यानि पृष्ठानि यानि छन्दाꣳसि तेभ्य एतं पुरस्ताद्भागं करोति तान्येवैतत्प्रीणात्याज्येन पञ्चगृहीतेन तस्योक्तो बन्धुः ॥ ६ ॥ यद्वेवैनमभिजुहोति । एतद्वै देवा अबिभयुर्यद्वै नऽइदं कर्म यद्वै न इममिह रक्षाꣳसि नाष्ट्रा न हन्युरिति तऽएतामेतस्य कर्मणः पुरस्तात्सꣳस्थामपश्यंस्तमत्रैव सर्वꣳ समस्थापयन्नत्राचिन्वंस्तथैवैनमयमेतदत्रैव सर्वꣳ

सꣳस्थापयत्यत्र चिनोति ॥७॥ सन्नूरब्द इति चितिः । अयवोभिरिति पुरीषꣳ सन्नूरुषा इति चितिररुणीभिरिति पुरीषꣳ सजोषसावश्विनेति चितिर्दꣳसोभिरिति पुरीषꣳ सन्नूः सूर इति चितिरेतशेनेति पुरीषꣳ सन्नूर्वैश्वानर इति चितिरिडयेति पुरीषं घृतेनेति चितिः स्वेति पुरीषꣳ हेति चितिः ॥८॥ त्रयोदशैता व्याहृतयो भवन्ति । त्रयोदश मासाः संवत्सरस्त्रयोदशाग्नेश्चितिपुरीषाणि यावानग्निर्यावत्यस्य मात्रा तावन्तमेवैनमेतच्चिनोत्याज्येन जुहोत्यग्निरेष यदाज्यमग्निमेवैतच्चिनोति पञ्चगृहीतेन पञ्चचितिकोऽग्निः पञ्चऽर्तवः संवत्सरः संवत्सरोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावन्तमेवैनमेतच्चिनोत्यूर्ध्वामुद्गृह्णन्जुहोत्यूर्ध्वं तदग्निं चितिभिश्चिनोति ॥९॥ ब्राह्मणम् ॥ १ [२. ३.] ॥

अथोदचमसान्निनयति । एतद्वै देवा अब्रुवंश्चेतयध्वमिति चितिमिच्छतेति वाव तदब्रुवंस्ते चेतयमाना वृष्टिमेव चितिमपश्यंस्तामस्मिन्नदधुस्तथैवास्मिन्नयमेतद्दधाति ॥१॥ उदचमसा भवन्ति । आपो वै वृष्टिर्वृष्टिमेवास्मिन्नेतद्दधात्यौदुम्बरेण चमसेन तस्योक्तो बन्धुश्चतुःस्रक्तिना चतस्रो वै दिशः सर्वाभ्य एवास्मिन्नेतद्दिग्भ्यो वृष्टिं दधाति ॥२॥ त्रींस्त्रीनुदचमसान्निनयति । त्रिवृदग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवास्मिन्नेतद्वृष्टिं दधाति ॥३॥ द्वादशोदचमसान्कृष्टे निनयति । द्वादश मासाः संवत्सरः संवत्सरोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवास्मिन्नेतद्वृष्टिं दधाति ॥४॥ स वै कृष्टे निनयति । तस्मात्कृष्टाय वर्षति स यत्कृष्टऽएव निनयेन्नाकृष्टे कृष्टायैव वर्षेन्नाकृष्टायाथ यदकृष्टऽएव निनयेन्न कृष्टेऽकृष्टायैव वर्षेन्न कृष्टाय कृष्टे चाकृष्टे च निनयति तस्मात्कृष्टाय चाकृष्टाय च वर्षति ॥५॥ त्रीन्कृष्टे चाकृष्टे च निनयति । त्रिवृदग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवास्मिन्नेतद्वृष्टिं दधाति ॥६॥ यद्वेवोदचमसान्निनयति । एतद्वाऽअस्मिन्देवाः संस्करिष्यन्तः पुरस्तादपो दधुस्तथैवास्मिन्नयमेतत्संस्करिष्यन्पुरस्तादपो दधाति ॥७॥ त्रींस्त्रीनुद-

चमसान्निनयति । त्रिवृदग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवास्मिन्नेतदपो दधा-
ति ॥८॥ द्वादशोदचमसान्कृष्टे निनयति । द्वादश मासाः संवत्सरः संवत्सरोऽग्नि-
र्यावानग्निर्यावत्यस्य मात्रा तावतैवास्मिन्नेतदपो दधाति ॥९॥ स वै कृष्टे निनय-
ति । प्राणेषु तदपो दधाति स यत्कृष्टऽएव निनयेन्नाकृष्टे प्राणेष्वेवापः स्युर्नेतर-
स्मिन्नात्मन्नथ यदकृष्टऽएव निनयेन्न कृष्टऽआत्मन्नेवापः स्युर्न प्राणेषु कृष्टे चाकृष्टे
च निनयति तस्मादिमा उभयत्रापः प्राणेषु चात्मंश्च ॥१०॥ त्रीन्कृष्टे चाकृष्टे च
निनयति । त्रिवृदग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवास्मिन्नेतदपो दधाति ॥११॥
पञ्चदशोदचमसान्निनयति । पञ्चदशो वै वज्र एतेनैवास्यैतत्पञ्चदशेन वज्रेण सर्वं
पाप्मानमपहन्ति ॥१२॥ अथ सर्वौषधं वपति । एतद्वै देवा अब्रुवंश्चेतयध्वमिति
चितिमिच्छतेति वाव तदब्रुवंस्ते चेतयमाना अन्नमेव चितिमपश्यंस्तामस्मिन्नदधु-
स्तथैवास्मिन्नयमेतद्दधाति ॥१३॥ सर्वौषधं भवति । सर्वमेव तदन्नं यत्सर्वौषधꣳ
सर्वमेवास्मिन्नेतदन्नं दधाति तेषामेकमन्नमुद्धरेत्तस्य नाश्नीयाद्यावज्जीवमौदुम्बरेण
चमसेन तस्योक्तो बन्धुश्चतुःस्रक्तिना चतस्रो वै दिशः सर्वाभ्य एवास्मिन्नेतद्दिग्भ्यो
ऽन्नं दधात्यनुष्टुब्भिर्वपति वाग्वाऽअनुष्टुब्वाचो वाऽअन्नमद्यते ॥१४॥ तिसृभि-
स्तिसृभिर्ऋग्भिर्वपति । त्रिवृदग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवास्मिन्नेतदन्नं द-
धाति ॥१५॥ द्वादशभिर्ऋग्भिः कृष्टे वपति । द्वादश मासाः संवत्सरः संवत्सरो
ऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवास्मिन्नेतदन्नं दधाति ॥१६॥ स वै कृष्टे
वपति । तस्मात्कृष्टेऽन्नं पच्यते यत्कृष्टऽएव वपेन्नाकृष्टे कृष्टऽएवान्नं पच्येत ना-
कृष्टेऽथ यदकृष्टऽएव वपेन्न कृष्टेऽकृष्टऽएवान्नं पच्येत न कृष्टे कृष्टे चाकृष्टे च
वपति तस्मात्कृष्टे चाकृष्टे चान्नं पच्यते ॥१७॥ तिसृभिः कृष्टे चाकृष्टे च वपति
। त्रिवृदग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवास्मिन्नेतदन्नं दधाति ॥१८॥ यद्वेव
सर्वौषधं वपति । एतद्वाऽएनं देवाः संस्करिष्यन्तः पुरस्तात्सर्वेण भेषजेनाभिषज्यं-

स्तथैवैनमयमेतत्संस्करिष्यन्पुरस्तात्सर्वेण भेषजेन भिषज्यति ॥ १९॥ सर्वौषधं भवति । सर्वमेतद्भेषजं यत्सर्वौषधꣳ सर्वेणैवैनमेतद्भेषजेन भिषज्यति ॥ २०॥ तिसृभिस्तिसृभिर्ऋग्भिर्वपति । त्रिवृदग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतद्भिषज्यति ॥ १२॥ द्वादशभिर्ऋग्भिः कृष्टे वपति । द्वादश मासाः संवत्सरः संवत्सरोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतद्भिषज्यति ॥ २२॥ स वै कृष्टे वपति । प्राणांस्तद्भिषज्यति स यत्कृष्टऽएव वपेन्नाकृष्टे प्राणानेव भिषज्येन्नेतरमात्मानमथ यद्कृष्टऽएव वपेन्न कृष्टऽआत्मानमेव भिषज्येन्न प्राणान्कृष्टे चाकृष्टे च वपति प्राणांश्च तदात्मानं च भिषज्यति ॥ २३॥ तिसृभिः कृष्टे चाकृष्टे च वपति । त्रिवृदग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतद्भिषज्यति ॥ २४॥ पञ्चदशोदचमसान्निनयति । पञ्चदशभिर्ऋग्भिर्वपति तत्त्रिꣳशत्त्रिꣳशदक्षरा विराड्विराडु कृत्स्नमन्नꣳ सर्वमेवास्मिन्नेतत्कृत्स्नमन्नं दधाति ॥ २५॥ या ओषधीः पूर्वा जाताः । देवेभ्यस्त्रियुगं पुरेत्यृतवो वै देवास्तेभ्य एतास्त्रिः पुरा जायन्ते वसन्ता प्रावृषि शरदि मनै नु बभ्रूणामहमिति सोमो वै बभ्रुः सौम्या ओषधय ओषधः पुरुषः शतं धामानीति यदिदꣳ शतायुः शतार्घः शतवीर्य एतानि ह्यस्य तानि शतं धामानि सप्त चेति यऽएवेमे सप्त शीर्षन्प्राणास्तानेतदाह ॥ २६॥ शतं वोऽअम्ब धामानि । सहस्रमुत वो रुह इति यदिदꣳ शतधा च सहस्रधा च विरूढा अधा शतक्रत्वो यूयमिमं मेऽअगदं कृतेति यमिमं भिषज्यामीत्येतत् ॥ २७॥ ता एता एकव्याख्यानाः । एतमेवाभि यथैतमेव भिषज्येदेतं पारयेत्ता अनुष्टुभो भवन्ति वाग्वाऽअनुष्टुब्वागु सर्वं भेषजꣳ सर्वेणैवैनमेतद्भेषजेन भिषज्यति ॥ २८॥ अथातो निरुक्तानिरुक्तानामेव । यजुषा द्वावनड्वाहौ युनक्ति तूष्णीमितरान्यजुषा चतस्रः सीताः कृषति तूष्णीमितरास्तूष्णीं दर्भस्तम्बमुपदधाति यजुषाभिजुहोति तूष्णीमुदचमसान्निनयति यजुषा वपति ॥ २९॥ प्रजापतिरेषोऽग्निः । उभयम्वेतत्प्रजापतिर्निरुक्तश्चानिरुक्तश्च

परिमितश्चापरिमितश्च तद्यद्यजुषा करोति यदेवास्य निरुक्तं परिमितꣳ रूपं तदस्य
तेन संस्करोत्यथ यत्तूष्णीं यदेवास्यानिरुक्तमपरिमितꣳ रूपं तदस्य तेन संस्करोति
स ह वाऽएतꣳ सर्वं कृत्स्नं प्रजापतिं संस्करोति य एवं विद्वानेतदेवं करोति
बाह्यानि रूपाणि निरुक्तानि भवन्त्यन्तराण्यनिरुक्तानि पशुरेष यदग्निस्तस्मात्प-
शोर्बाह्यानि रूपाणि निरुक्तानि भवन्त्यन्तराण्यनिरुक्तानि ॥३०॥ ब्राह्मणम् ॥२
[२. ४.] ॥ द्वितीयोऽध्यायः [४५.] ॥ ॥

चितो गार्हपत्यो भवति । अचित आहवनीयोऽथ राजानं क्रीणात्ययं वै
लोको गार्हपत्यो द्यौराहवनीयोऽथ योऽयं वायुः पवतऽएष सोम एतं तदिमौ
लोकावन्तरेण दधाति तस्मादेष इमौ लोकावन्तरेण पवते ॥१॥ यद्वेव चिते
गार्हपत्ये । अचितऽआहवनीयेऽथ राजानं क्रीणात्यात्मा वाऽअग्निः प्राणः सोम
आत्मंस्तत्प्राणं मध्यतो दधाति तस्मादयमात्मन्प्राणो मध्यतः ॥२॥ यद्वेव चिते
गार्हपत्ये । अचितऽआहवनीयेऽथ राजानं क्रीणात्यात्मा वाऽअग्नी रसः सोम
आत्मानं तद्रसेनानुषजति तस्मादयमात्मन्नेवात्मा रसेनानुषक्तः ॥३॥ राजानं क्री-
वा पर्युह्य । अथास्माऽआतिथ्यꣳ हविर्निर्वपति तस्य हविष्कृता वाचं विसृजते
ऽथ वाऽएतद्व्यतिषजत्यध्वरकर्म चाग्निकर्म च कर्मणः समानतायै समानमिदं कर्मा-
सदिति ॥४॥ यद्वेव व्यतिषजति । आत्मा वाऽअग्निः प्राणोऽध्वर आत्मंस्तत्प्राणं
मध्यतो दधाति तस्मादयमात्मन्प्राणो मध्यतः ॥५॥ यद्वेव व्यतिषजति । आत्मा
वाऽअग्नी रसोऽध्वर आत्मानं तद्रसेनानुषजति तस्मादयमात्मन्नेवात्मा रसेनानुष-
क्तोऽथाहवनीयस्यार्धमिति ॥६॥ तद्वैके । उभयत्रैव पलाशशाखया व्युदूहन्त्युभ-
यत्र वै चिनोतीति न तथा कुर्यादवस्यति वाव गार्हपत्येनोर्ध्व एवाहवनीयेन
रोहति तस्मात्तथा न कुर्यात् ॥७॥ अथ गार्हपत्यऽएवोषान्निवपति । नाहव-
नीयेऽयं वै लोको गार्हपत्यः पशव ऊषा अस्मिंस्तल्लोके पशून्दधाति तस्मादि-

मेऽस्मिँल्लोके पशवः ॥ ८॥ अथाहवनीयऽएव पुष्करपर्णमुपदधाति । न गार्हपत्य ऽआपो वै पुष्करपर्णं द्यौराहवनीयो दिवि तदपो दधात्युभयत्र सिकता निवपति रेतो वै सिकता उभयत्र वै विक्रियते तस्माद्रेतसोऽधि विक्रियाताऽइति ॥ ९॥ ता नाना मन्त्राभ्यां निवपति । मनुष्यलोको वै गार्हपत्यो देवलोक आहवनीयो नानो वाऽएतद्यद्दैवं च मानुषं च द्राघीयसा मन्त्रेणाहवनीये निवपति ह्रसीयसा गार्हपत्ये द्राघीयो हि देवायुषꣳ ह्रसीयो मनुष्यायुषꣳ स पूर्वाः परिश्रिद्भ्यो गार्हपत्ये सिकता निवपति रेतो वै सिकता अस्माद्रेतसोऽधीमा विक्रियान्ताऽइति ॥ १०॥ तदाहुः । यद्योनिः परिश्रितो रेतः सिकता अथ पूर्वाः परिश्रिद्भ्यो गार्हपत्ये सिकता निवपति कथमस्यैतद्रेतोऽपरासिक्तं परिगृहीतं भवतीत्युल्बं वाऽऊषास्तद्यदूषान्पूर्वान्निवपत्येतेनो हास्यैतदुल्बेन रेतोऽपरासिक्तं परिगृहीतं भवत्यथाहवनीये परिश्रितोऽभिमन्त्रयते तस्योक्तो बन्धुरथ सिकता निवपति रेतो वै सिकता एतयोऽअस्यैतद्योन्या रेतोऽपरासिक्तं परिगृहीतं भवति ॥ ११॥ अथाहवनीयऽएवाप्यानवतीभ्यामभिमृशति । न गार्हपत्येऽयं वै लोको गार्हपत्यः स्वर्गो लोक आहवनीयोऽद्धो वाऽअयमस्मिँल्लोके जातो यजमानः स्वर्गऽएव लोके प्रजिजनयिषितव्यस्तद्यदाहवनीयऽएवाप्यानवतीभ्यामभिमृशति न गार्हपत्ये स्वर्गऽएवैनं तल्लोके प्रजनयति ॥ १२॥ अथ लोगेष्टका उपदधाति । इमे वै लोका एषोऽग्निर्दिशो लोगेष्टका एषु तल्लोकेषु दिशो दधाति तस्मादिमा एषु लोकेषु दिशः ॥ १३॥ बाह्येनाग्निमाहरति । आप्ता वाऽअस्य ता दिशो या एषु लोकेष्वथ या इमाँल्लोकान्परेण दिशस्ता अस्मिन्नेतद्दधाति ॥ १४॥ बहिर्वेदेरियं वै वेदिः । आप्ता वाऽअस्य ता दिशो या अस्यामथ या इमां परेण दिशस्ता अस्मिन्नेतद्दधाति ॥ १५॥ यद्वेव लोगेष्टका उपदधाति । प्रजापतेर्विस्रस्तस्य सर्वा दिशो रसोऽनु व्यक्षरत्तं यत्र देवाः समस्कुर्वंस्तदस्मिन्नेता-

भिर्लोगेष्टकाभिस्तꣳ रसमदधुस्तथैवास्मिन्नयमेतद्दधाति ॥१६॥ बाह्येनाग्निमाहरति । आपो वाऽअस्य स रसो य एषु लोकेष्वथ य इमांल्लोकान्पराङ्सोऽत्यक्षरत्तमस्मिन्नेतद्दधाति ॥१७॥ बर्हिर्वेदिरियं वै वेदिः । आपो वाऽअस्य स रसो योऽस्यामथ य इमां पराङ्सोऽत्यक्षरत्तमस्मिन्नेतद्दधाति ॥१८॥ स्फ्येनाहरति । वज्रो वै स्फ्यो वीर्यं वै वज्रो वित्तिरियं वीर्येण वै वित्तिं विन्दते ॥१९॥ स पुरस्तादाहरति । मा मा हिꣳसीज्जनिता यः पृथिव्या इति प्रजापतिर्वै पृथिव्यै जनिता मा मा हिꣳसीत्प्रजापतिरित्येतद्यो वा दिवꣳ सत्यधर्मा व्यानडिति यो वा दिवꣳ सत्यधर्मासृजतेत्येतद्यश्चापश्चन्द्राः प्रथमो जजानेति मनुष्या वाऽआपश्चन्द्रा यो मनुष्यान्प्रथमोऽसृजतेत्येतत्कस्मै देवाय हविषा विधेमेति प्रजापतिर्वै कस्तस्मै हविषा विधेमेत्येतत्तामाहृत्यान्तरेण परिश्रित आत्मन्नुपदधाति स यः प्राच्यां दिशि रसोऽत्यक्षरत्तमस्मिन्नेतद्दधात्यथो प्राचीमेवास्मिन्नेतद्दिशं दधाति ॥२०॥ अथ दक्षिणतः । अभ्यावर्तस्व पृथिवि यज्ञेन पयसा सहेति यथैव यजुस्तथा बन्धुर्वपां तेऽअग्निरिषितोऽअरोहदिति यद्वै किं चास्याꣳ सास्यै वपा तामग्निरिषित उपादीप्तो रोहति तामाहृत्यान्तरेण पक्षसंधिमात्मन्नुपदधाति स यो दक्षिणायां दिशि रसोऽत्यक्षरत्तमस्मिन्नेतद्दधात्यथो दक्षिणामेवास्मिन्नेतद्दिशं दधाति ॥२१॥ अथ पश्चात् । अग्ने यत्ते शुक्रं यच्चन्द्रं यत्पूतं यच्च यज्ञियमितीयं वाऽअग्निरस्यै तदाह तद्देवेभ्यो भरामसीति तदस्मै देवाय कर्मणे हराम इत्येतत्तामाहृत्यान्तरेण पुच्छसंधिमात्मन्नुपदधाति स यः प्रतीच्यां दिशि रसोऽत्यक्षरत्तमस्मिन्नेतद्दधात्यथो प्रतीचीमेवास्मिन्नेतद्दिशं दधाति स न सम्प्रति पश्चादाहरेन्नेद्यज्ञपथादसमाहराणीतीत-इवाहरति ॥२२॥ अथोत्तरतः । इषमूर्जमहमित आददमितीषमूर्जमहमित आददऽइत्येतदृतस्य योनिमिति सत्यं वाऽऋतꣳ सत्यस्य योनिमित्येतन्महिषस्य धारामित्यग्निर्वै महिषः स हीदं जातो महान्त्सर्वमैक्षदा मा गोषु विशत्वा तनूषि-

त्यात्मा वै तनूरा मा गोषु चात्मनि च विशत्वित्येतज्जुहोमि सेदिमनिराममीवा-
मिति सिकताः प्रध्वꣳसयति तस्यैव सेदिर्यानिरा यामीवा तामेतस्यां दिशि दधाति
तस्मादेतस्यां दिशि प्रजा अशनायुकास्तामाहृत्यान्तरेण पक्षसंधिमात्मन्नुपदधाति
स य उदीच्यां दिशि रसोऽत्यक्षरत्तमस्मिन्नेतद्दधात्यथोऽउदीचीमेवास्मिन्नेतद्दिश
दधाति ॥२३॥ ता एता दिशः । ताः सर्वत उपदधाति सर्वतस्तद्दिशो दधाति त-
स्मात्सर्वतो दिशः सर्वतः समीचीः सर्वतस्तत्समीचीर्दिशो दधाति तस्मात्सर्वतः
समीच्यो दिशस्ता नानोपदधाति नाना सूदयति नाना सूददोहसाधिवदति ना-
ना हि दिशस्तिष्ठन्नुपदधाति तिष्ठन्तीव हि दिशोऽथो तिष्ठन्वै वीर्यवत्तरः ॥२४॥
ता एता यजुष्मत्य इष्टकाः । ता आत्मन्नेवोपदधाति न पक्षपुच्छेष्वात्मन्ह्येव यजु-
ष्मत्य इष्टका उपधीयन्ते न पक्षपुच्छेषु ॥२५॥ तदाहुः । कथमस्यैताः पक्वाः शृता
उपहिता भवन्तीति रसो वाऽएताः स्वयꣳशृत उ वै रसोऽथो यद्वै किं चैतमग्निं
वैश्वानरमुपनिगच्छति तत एव तत्पक्वꣳ शृतमुपहितं भवति ॥२६॥ अथोत्तरवे-
दिं निवपति । इयं वै वेदिर्द्यौरुत्तरवेदिर्दिशो लोगेष्टकास्तद्यदन्तरेण वेदिं चोत्त-
रवेदिं च लोगेष्टका उपदधातीमौ तल्लोकावन्तरेण दिशो दधाति तस्मादिमौ
लोकावन्तरेण दिशस्तां युगमात्रीं वा सर्वतः करोति चत्वारिꣳशत्पदां वा यतर-
था कामयेताथ सिकता निवपति तस्योक्तो बन्धुः ॥२७॥ ता उत्तरवेदौ निवप-
ति । योनिर्वाऽउत्तरवेदिर्योनौ तद्रेतः सिञ्चति यद्वै योनौ रेतः सिच्यते तत्प्रज-
निष्णु भवति ताभिः सर्वमात्मानं प्रच्छादयति सर्वस्मिंस्तदात्मन्रेतो दधाति तस्मा-
त्सर्वस्मादेवात्मनो रेतः सम्भवति ॥२८॥ अग्ने तव श्रवो वय इति । धूमो वा
ऽअस्य श्रवो वयः स ह्येनममुष्मिंलोके श्रावयति महि भ्राजन्ते अर्चयो विभाव-
सविति महतो भ्राजन्तेऽर्चयः प्रभूवसवित्येतद्बृहद्भानो शवसा वाजमुक्थ्यमिति
बल वै शवो बृहद्भानो बलेनान्नमुक्थ्यमित्येतद्दधासि दाशुषे कवऽइति यजमानो

वै दाश्वान्दधासि यजमानाय कवऽइत्येतत् ॥२९॥ पावकवर्चाः शुक्रवर्चा इति । पावकवर्चा ह्येष शुक्रवर्चा अनूनवर्चा उदियर्षि भानुनेत्यनूनवर्चा उद्दीप्यसे भानुनेत्येतत्पुत्रो मातरा विचरन्नुपावसीति पुत्रो ह्येष मातरा विचरन्नुपावति पृणक्षि रोदसीऽउभेऽइतीमे वै द्यावापृथिवी रोदसी तेऽएष उभे पृणक्ति धूमेनामूं वृष्ट्येमाम् ॥३०॥ ऊर्जो नपाज्जातवेदः सुशस्तिभिरिति । ऊर्जो नपाज्जातवेदः सुष्टुतिभिरित्येतन्मन्दस्व धीतिभिर्हित इति दीप्यस्व धीतिभिर्हित इत्येतत्त्वेऽइषः संदधुर्भूरिवर्पस इति त्वेऽइषः संदधुर्बहुवर्पस इत्येतच्चित्रोतयो वामजाता इति यथैव यजुस्तथा बन्धुः ॥३१॥ इरज्यन्नग्ने प्रथयस्व जन्तुभिरिति । मनुष्या वै जन्तवो दीप्यमानोऽग्ने प्रथस्व मनुष्यैरित्येतदस्मे रायोऽअमर्त्येत्यस्मे रयिं दधदमर्त्येत्येतत्स दर्शतस्य वपुषो विराजसीति दर्शतस्य ह्येष वपुषो विराजति पृणक्षि सानसिं क्रतुमिति पृणक्षि सनातनं क्रतुमित्येतत् ॥३२॥ इष्कर्तारमध्वरस्य प्रचेतसमिति । अध्वरो वै यज्ञः प्रकल्पयितारं यज्ञस्य प्रचेतसमित्येतत्क्षयन्तꣳ राधसो मह इति क्षयन्तꣳ राधसि महतीत्येतद्रातिं वामस्य सुभगां महीमिषमिति रातिं वामस्य सुभगां महतीमिषमित्येतद्दधासि सानसिꣳ रयिमिति दधासि सनातनꣳ रयिमित्येतत् ॥३३॥ ऋतावानमिति । सत्यावानमित्येतन्महिषमित्यग्निर्वै महिषो विश्वदर्शतमिति विश्वदर्शतो ह्येषोऽग्निꣳ सुम्नाय दधिरे पुरो जना इति यज्ञो वै सुम्नं यज्ञाय त्वाऽएतं पुरो दधते श्रुत्कर्णꣳ सप्रथस्तमं त्वा गिरा दैव्यं मानुषा युगेत्याशृण्वन्तꣳ सप्रथस्तमं त्वा गिरा देवं मनुष्या ह्वयामहऽइत्येतत् ॥३४॥ स एषोऽग्निरेव वैश्वानरः । एतत्षडृचमारम्भायैवेमाः सिकता न्युप्यन्तेऽग्निमेवास्मिन्नेतद्वैश्वानरꣳ रेतो भूतꣳ सिञ्चति षडृचेन षडृतवः संवत्सरः संवत्सरो वैश्वानरः ॥३५॥ तदाहुः । यद्वेतः सिकता उप्यन्ते किमासाꣳ रेतो रूपमिति शुक्ला इति ब्रूयाच्छुक्लꣳ हि रेतोऽथो पृश्नय इति पृश्नीव हि रेतः ॥३६॥ तदाहुः । यदार्द्रꣳ

रेतः शुष्काः सिकता निवपति कथमस्यैता आर्द्रा रेतोरूपं भवन्तीति रसो वै
छन्दाꣳस्यार्द्र उ वै रसस्तद्यदेनाश्छन्दोभिर्निवपत्येवमु हास्यैता आर्द्रा रेतोरूपं
भवन्ति ॥३७॥ तदाहुः । कथमस्यैता अहोरात्राभ्यामुपहिता भवन्तीति । द्वे वा
ऽअहोरात्रे शुक्लं च कृष्णं च द्वे सिकते शुक्ला च कृष्णा चैवमु हास्यैता अहोरा-
त्राभ्यामुपहिता भवन्ति ॥३८॥ तदाहुः । कथमस्यैता अहोरात्रैः सम्पन्ना अन्यूना
अनतिरिक्ता उपहिता भवन्तीत्यनन्तानि वाऽअहोरात्राण्यनन्ताः सिकता एवमु
हास्यैता अहोरात्रैः सम्पन्ना अन्यूना अनतिरिक्ता उपहिता भवन्त्यथ कस्मात्स-
मुद्रियं छन्द इत्यनन्तो वै समुद्रोऽनन्ताः सिकतास्तत्समुद्रियं छन्दः ॥३९॥ तदाहुः
। कथमस्यैताः पृथङ्नाना यजुर्भिरुपहिता भवन्तीति मनो वै यजुस्तदिदं मनो
यजुः सर्वाः सिकता अनुविभवत्येवमु हास्यैताः पृथङ्नाना यजुर्भिरुपहिता भवन्ति
॥४०॥ तदाहुः । कथमस्यैताः सर्वैश्छन्दोभिरुपहिता भवन्तीति यद्वैना एतेन
षडृचेन निवपति यावन्ति हि सप्तानां छन्दसामक्षराणि तावन्त्येतस्य षडृचस्या-
क्षराण्येवमु हास्यैताः सर्वैश्छन्दोभिरुपहिता भवन्ति ॥४१॥ यद्वेव सिकता निव-
पति । प्रजापतिरेषोऽग्निः सर्वमु ब्रह्म प्रजापतिस्तद्वैतद्ब्रह्मण उत्सन्नं यत्सिकता
अथ यदनुत्सन्नमिदं तद्योऽयमग्निश्चीयते तद्यत्सिकता निवपति यदेव तद्ब्रह्मण
उत्सन्नं तदस्मिन्नेतत्प्रतिदधाति ता असंख्याता अपरिमिता निवपति को हि त-
द्वेद यावत्तद्ब्रह्मण उत्सन्नꣳ स ह वाऽएतꣳ सर्वं कृत्स्नं प्रजापतिꣳ संस्करोति य
एवं विद्वान्त्सिकता निवपति ॥४२॥ तदाहुः । कैतासामसंख्यातानाꣳ संख्येति
द्वेऽइति ब्रूयाद्द्वे हि सिकते शुक्ला च कृष्णा चाथो सप्त विꣳशतिशतानीति ब्रू-
यादेतावन्ति हि संवत्सरस्याहोरात्राण्यथो द्वे द्वापञ्चाशे शतेऽइत्येतावन्ति ह्येतस्य
षडृचस्याक्षराण्यथो पञ्चविꣳशतिरिति पञ्चविꣳशꣳ हि रेतः ॥४३॥ ता एता य-
जुष्मत्य इष्टकाः । ता आत्मन्नेवोपदधाति न पक्षपुच्छेष्वात्मन्ह्येव यजुष्मत्य इष्टका

उपधीयन्ते न पद्मपुच्छेषु न सादयति नेद्रेतः प्रजातिꣳ स्थापयानीति ॥४४॥ अ-
थैना आप्यानवतीभ्यामभिमृशति । इदमेवैतद्रेतः सिक्तमाप्याययति तस्माद्योनौ
रेतः सिक्तमाप्यायते सौमीभ्यां प्राणो वै सोमः प्राणं तद्रेतसि दधाति तस्माद्रेतः
सिक्तं प्राणमभिसम्भवति पूयेद्ध यदेते प्राणात्सम्भवेदेषो हैवात्र सूददोहाः प्राणो
वै सोमः प्राणः सूददोहाः ॥४५॥ आप्यायस्व समेतु ते । विश्वतः सोम वृष्ण्यमि-
ति रेतो वै वृष्ण्यमाप्यायस्व समेतु ते सर्वतः सोम रेत इत्येतद्भवा वाजस्य सं-
गथऽइत्यन्नं वै वाजो भवान्नस्य संगथऽइत्येतत्सं ते पयाꣳसि समु यन्तु वाजा
इति रसो वै पयोऽन्नं वाजाः सं ते रसाः समु यन्त्वन्नानीत्येतत्सं वृष्ण्यान्यभिमा-
तिषाह इति सꣳ रेताꣳसि पाप्मसह इत्येतदाप्यायमानोऽअमृताय सोमेति प्र-
जात्यां तदमृतं दधाति तस्मात्प्रजातिरमृता दिवि श्रवाꣳस्युत्तमानि धिष्वेति चन्द्र-
मा वाऽअस्य दिवि श्रव उत्तमꣳ स ह्येनममुष्मिंलोके श्रावयति द्वाभ्यामाप्याय-
यति गायत्र्या च त्रिष्टुभा च तस्योक्तो बन्धुः ॥४६॥ अथातः सम्पदेव । चतस्रो
लोगेष्टका उपदधाति षडृचेन निवपति द्वाभ्यामाप्याययति तद्द्वादश द्वादश मा-
साः संवत्सरः संवत्सरोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावत्तद्भवति ॥४७॥ ब्राह्म-
णम् ॥ ३ [३. १.] ॥

आप्यानवतीभ्यामभिमृश्य । प्रत्येत्यातिथ्येन प्रचरत्यातिथ्येन प्रचर्य प्रवर्ग्योप-
सद्भ्यां प्रचरति प्रवर्ग्योपसद्भ्यां प्रचर्याथैतां चर्मणि चितिꣳ समवशमयन्ति तद्यच्चर्म-
णि चर्म वै रूपꣳ रूपाणामुपात्यै लोमतो लोम वै रूपꣳ रूपाणामुपात्यै रोहिते
रोहिते ह सर्वाणि रूपाणि सर्वेषाꣳ रूपाणामुपात्याऽआनडुहेऽग्निरेष यदनड्वा-
नग्निरूपाणामुपात्यै प्राचीनग्रीवे तद्धि देवत्रा ॥१॥ तदग्रेण गार्हपत्यम् । अन्तर्वे-
द्युत्तरलोम प्राचीनग्रीवमुपस्तृणाति तदेतां चितिꣳ समवशमयन्त्यथ प्रोक्षति त-
द्यत्प्रोक्षति शुद्धमेवैतन्मेध्यं करोत्याज्येन तद्धि शुद्धं मेध्यमथोऽअनभ्यारोहाय न

हि किं चनान्यद्धविराज्येन प्रोक्षन्ति तूष्णीमनिरुक्तं वै तद्यत्तूष्णीᳫं सर्वं वाऽअनिरुक्तᳫं सर्वेणैवैतत्कृत्स्नं मेध्यं करोत्यथोऽअनभ्यारोहाय न हि किं चनान्यद्धविस्तूष्णीं प्रोक्षन्ति ॥२॥ यद्वेव प्रोक्षति । हविर्वाऽएतत्तदेतदभिघारयति यद्वै हविरभ्यक्तं यदभिघारितं तज्जुष्टं तन्मेध्यमाज्येनाज्येन हि हविरभिघारयन्ति तूष्णीं तूष्णीᳫं हि हविरभिघारयन्ति दर्भैस्ते हि शुद्धा मेध्या अग्रैरग्रᳫं हि देवानाम् ॥३॥ तदाहुः । यत्प्रथमामेव चितिं प्रोक्षति कथमस्यैष सर्वोऽग्निः प्रोक्षितो भवति कथं चर्मणि प्रणीतः कथमश्मप्रणीत इति यदेवात्र सर्वासां चितीनामिष्टकाः प्रोक्षत्येवमु हास्यैष सर्वोऽग्निः प्रोक्षितो भवत्येवं चर्मणि प्रणीत एवमश्मप्रणीत उपहन्त्येतां चितिम् ॥४॥ अथाहाग्निभ्यः प्रह्रियमाणेभ्योऽनुब्रूहीति । एतद्वै देवानुपप्रेष्यत एतं यज्ञं तᳫंस्यमानान्रक्षाᳫंसि नाष्ट्रा अजिघाᳫंसन्न यक्ष्यध्वे न यज्ञं तᳫंस्यध्वऽइति तेभ्य एतानग्नीनेता इष्टका वज्रान्क्षुरपवीन्कृत्वा प्राहरंस्तैरेनानस्तृण्वत तान्त्स्तृत्वाभयेऽनाष्ट्रऽएतं यज्ञमतन्वत ॥५॥ तद्वाऽएतत्क्रियते । यद्देवा अकुर्वन्निदं नु तानि रक्षाᳫंसि देवैरेवोपहतानि यत्त्वेतत्करोति यद्देवा अकुर्वंस्तत्करवाणीत्यथो यदेव रक्षो यः पाप्मा तेभ्य एतानग्नीनेता इष्टका वज्रान्क्षुरपवीन्कृत्वा प्रहरति तैरेनान्त्स्तृणुते तान्त्स्तृत्वाभयेऽनाष्ट्रऽएतं यज्ञं तनुते ॥६॥ तद्यदग्निभ्य इति । बहवो ह्येतेऽग्नयो यदेताश्चितयोऽथ यत्प्रह्रियमाणेभ्य इति प्र हि हरति ॥७॥ तद्धैकेऽन्वाहुः । पुरीष्यासोऽअग्नयः प्रावणेभिः सजोषस इति प्रायणारूपं न तथा कुर्यादाग्नेयीरेव गायत्रीः कामवतीरनुब्रूयादा ते वत्सो मनो यमत्तुभ्यं ता अङ्गिरस्तमाग्निः प्रियेषु धामस्विति ॥८॥ आग्नेयीरन्वाह । अग्निरूपाणामुपाप्त्यै कामवतीः कामानामुपाप्त्यै गायत्रीर्गायत्रोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतद्धितो भूतᳫं सिञ्चति तिस्रस्त्रिवृदग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतद्धितो भूतᳫं सिञ्चति ताः सप्त सम्पद्यन्ते सह त्रिरनूक्ताभ्याᳫं सप्तचितिकोऽग्निः

सप्तऽर्तवः संवत्सरः संवत्सरोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावत्तद्भवत्युपाᳲश्वन्वाह रेतो वाऽअत्र यज्ञ उपाᳲशु वै रेतः सिच्यते पश्चादनुब्रुवन्नन्वेति छन्दोभिरेवैतद्यज्ञं पश्चादभिरक्षन्नेति ॥९॥ अथाश्वᳲ शुक्लं पुरस्तान्नयन्ति । एतद्वै देवा अबिभयुर्यद्वै न इह रक्षाᳲसि नाष्ट्रा न हन्युरिति तऽएतं वज्रमपश्यन्नमुमेवादित्यमसौ वाऽआदित्य एषोऽश्वस्तऽएतेन वज्रेण पुरस्ताद्रक्षाᳲसि नाष्ट्रा अपहत्याभयेऽनाष्ट्रे स्वस्ति समाश्नुवत तथैवैतद्यजमान एतेन वज्रेण पुरस्ताद्रक्षाᳲसि नाष्ट्रा अपहत्याभयेऽनाष्ट्रे स्वस्ति समश्नुतऽआगच्छत्यग्निं दक्षिणतः पुच्छस्य चितिमुपनिदधत्युत्तरतोऽश्वमाक्रमयन्ति ॥१०॥ तमुत्तरार्धेनाग्नेः । अन्तरेण परिश्रितः प्राञ्चं नयन्ति तत्प्राच्यै दिशः पाप्मानमपघ्नन्ति तं दक्षिणा तद्दक्षिणायै दिशः पाप्मानमपघ्नन्ति तं प्रत्यञ्चं तत्प्रतीच्यै दिशः पाप्मानमपघ्नन्ति तमुदञ्चं तदुदीच्यै दिशः पाप्मानमपघ्नन्ति सर्वाभ्य एवैतद्दिग्भ्यो रक्षाᳲसि नाष्ट्रा अपहत्याथैनमुदञ्चं प्राञ्चं प्रसृजन्ति तस्योक्तो बन्धुः ॥११॥ ॥ शतम् ४१०० ॥ ॥ तं प्रत्यञ्चं यन्तम् । एतां चितिमवघ्रापयत्यसौ वाऽआदित्य एषोऽश्व इमा उ सर्वाः प्रजा या इमा इष्टकास्तद्यदवघ्रापयत्यसावेव तदादित्य इमाः प्रजा अभिजिघ्रति तस्मादु हैतत्सर्वोऽस्मीति मन्यते प्रजापतेर्वीर्येण तद्यत्प्रत्यञ्चं यन्तमवघ्रापयति प्रत्यङ् ह्येवैष यन्निमाः सर्वाः प्रजा अभिजिघ्रति ॥१२॥ यद्वेवावघ्रापयति । असौ वाऽआदित्य एषोऽश्व इमऽउ लोका एताः स्वयमातृण्णास्तद्यदवघ्रापयत्यसावेव तदादित्य इमाँल्लोकान्सूत्रे समावयते तद्यत्तत्सूत्रमुपरि तस्य बन्धुः ॥१३॥ यद्वेवावघ्रापयति । अग्निर्देवेभ्य उदक्रामत्सोऽपः प्राविशत्ते देवाः प्रजापतिमब्रुवंस्त्वमिममन्विच्छ स तुभ्यᳲ स्वाय पित्रऽआविर्भविष्यतीति तमश्वः शुक्लो भूत्वान्विच्छत्तमद्भ्य उपोदासृप्तं पुष्करपर्णे विवेद तमभ्यवेक्षां चक्रे स हैनमुदुवोष तस्मादश्वः शुक्ल उदुष्टमुख-इवाथो ह दुरक्षो भावुकस्तमु वाऽअह्लेव हिᳲसिषिव मेने तᳲ होवाच वरं ते ददामीति

॥१४॥ स होवाच । यस्त्वानेन रूपेणान्विच्छाद्विन्दादेव त्वा स इति स यो हैन-मेतेन रूपेणान्विच्छति विन्दति हैनं वित्त्वा हैवैनं चिनुते ॥१५॥ स शुक्लः स्यात् । तद्ध्येतस्य रूपं य एष तपति यदि शुक्लं न विन्देदप्यशुक्लः स्यादश्वस्त्वेव स्या-द्यद्यश्वं न विन्देदप्यनड्वानेव स्यादाग्नेयो वाऽअनड्वानग्निरु सर्वेषां पाप्मनामप-हन्ता ॥१६॥ अथातोऽधिरोहणस्यैव । तँ हैके पुरस्तात्प्रत्यञ्चमधिरोहन्ति प-श्चाद्वा प्राञ्चं न तथा कुर्यात्पशुरेष यदग्निर्यो वै पशुं पुरस्तात्प्रत्यञ्चमधिरोहति विषाणाभ्यां तँ हन्त्यथ यः पश्चात्प्राञ्चं पद्भ्यां तमात्मन्नेवैनमारोहेद्ध्य्य वाऽआत्म-ना पशुमारोहन्ति स पारयति स न हिनस्त्युत्तरतो यँ ह्यि कं च पशुमारो-हन्त्युत्तरत एवैनमारोहन्त्यारुह्याग्निमौत्तरवेदिकं कर्म कृत्वात्मन्नग्निं गृह्णीतऽआ-त्मन्नग्निं गृहीत्वा सत्यँ साम गायति पुष्करपर्णमुपदधाति तस्यातः ॥१७॥ अथै-तँ साये भूतेऽश्वं परिणयन्ति । एतद्धि देवा अबिभयुर्यद्वै न इममिह रक्षाँसि नाष्ट्रा न हन्युरिति तस्माऽएतं वज्रमभिगोप्तारमकुर्वन्नमुमेवादित्यमसौ वाऽआ-दित्य एषोऽश्वस्तथैवास्माऽअयमेतं वज्रमभिगोप्तारं करोति ॥१८॥ तं वाऽउपा-स्तमयमादित्यस्य परिणयति । एष वाऽअस्य प्रत्यक्षं दिवा गोप्ता भवति रात्रि-साचयान्नु वै रक्षाँसि रात्र्या एवास्माऽएतं वज्रमभिगोप्तारं करोति सर्वतः परि-णयति सर्वत एवास्माऽएतं वज्रमभिगोप्तारं करोति त्रिष्कृत्वः परिणयति त्रिवृ-तमेवास्माऽएतं वज्रमभिगोप्तारं करोत्यथैनमुदञ्चं प्राञ्चं प्रसृजति तस्योक्तो बन्धु-रथ स पुनर्विपल्ययते तस्योपरि बन्धुः ॥१९॥ ब्राह्मणम् ॥ ४ [३. २.] ॥ द्वितीयः प्रपाठकः ॥ कण्डिकासंख्या१०५ ॥ तृतीयोऽध्यायः [४६.] ॥ ॥

आत्मन्नग्निं गृह्णीते चेष्यन् । आत्मनो वाऽएतमधिजनयति यादृशाद्धि जायते तादृङ्ङेव भवति स यदात्मन्नगृहीत्वाग्निं चिनुयान्मनुष्यादेव मनुष्यं जनयेन्मर्त्या-न्मर्त्यमनपहतपाप्मनोऽनपहतपाप्मानमथ यदात्मन्नग्निं गृहीत्वा चिनोति तदग्ने-

रेवाध्यग्निं जनयत्यमृतादमृतमपहतपाप्मनोऽपहतपाप्मानम् ॥१॥ स गृह्णाति ।
मयि गृह्णाम्यग्रेऽअग्निमिति तदात्मन्नेवाग्रेऽग्निं गृह्णाति रायस्पोषाय सुप्रजास्त्वाय
सुवीर्यायेति तदु सर्वा आशिष आत्मन्गृह्णीते मामु देवताः सचन्तामिति तदु स-
र्वान्देवानात्मन्गृह्णीते तद्यत्किं चात्मनोऽधि जनयिष्यन्भवति तत्सर्वमात्मन्गृह्णी-
ते स वै तिष्ठन्नात्मन्नग्निं गृहीत्वानुप्रविश्य चिनोति पशुरेष यदग्निस्तस्मात्पशु-
स्तिष्ठन्गर्भं धित्वानुप्रविश्य विजायते ॥२॥ अथ सत्यꣳ साम गायति । एतद्वै देवा
अब्रुवन्त्सत्यमस्य मुखं करवाम ते सत्यं भविष्यामः सत्यं नोऽनुवर्त्स्यति सत्यो
नः स कामो भविष्यति यत्कामा एतत्करिष्यामहऽइति ॥३॥ तऽएतत्सत्यꣳ साम
पुरस्तादगायन् । तदस्य सत्यं मुखमकुर्वंस्ते सत्यमभवन्त्सत्यमेनानन्ववर्तत सत्य
एषां स कामोऽभवद्यत्कामा एतदकुर्वत ॥४॥ तथैवैतद्यजमानः । यत्सत्यꣳ साम
पुरस्ताद्गायति तदस्य सत्यं मुखं करोति स सत्यं भवति सत्यमेनमनुवर्तते सत्यो
ऽस्य स कामो भवति यत्काम एतत्कुरुते ॥५॥ तद्यत्तत्सत्यम् । आप एव तदा-
पो हि वै सत्यं तस्माद्येनापो यन्ति तत्सत्यस्य रूपमित्याहुरप एव तस्य सर्व-
स्याग्रमकुर्वंस्तस्माद्यदैवापो यन्त्यथेदꣳ सर्वं जायते यदिदं किं च ॥६॥ अथ पुष्क-
रपर्णमुपदधाति । योनिर्वै पुष्करपर्णं योनिमेवैतदुपदधाति ॥७॥ यद्वेव पुष्कर-
पर्णमुपदधाति । आपो वै पुष्करं तासामियं पर्णं यथा ह वाऽइदं पुष्करपर्णम-
प्स्वध्याहितमेवमियमप्स्वध्याहिता सेयं योनिरग्नेरियꣳ ह्यग्निरस्यै हि सर्वोऽग्निश्ची-
यतऽइमामेवैतदुपदधाति तामनन्तर्हिताꣳ सत्यादुपदधातीमां तत्सत्ये प्रतिष्ठापय-
ति तस्मादियꣳ सत्ये प्रतिष्ठिता तस्माद्वियमेव सत्यमियꣳ ह्येषां लोकानामद्धा-
तमाम् ॥८॥ अपां पृष्ठमसि योनिरग्नेरिति । अपाꣳ ह्ययं पृष्ठं योनिर्ह्येयमग्नेः स-
मुद्रमभितः पिन्वमानमिति समुद्रो ह्येमामभितः पिन्वते वर्धमानो महाँ२ऽआ
च पुष्करऽइति वर्धमानो महीयस्व पुष्करऽइत्येतद्दिवो मात्रया वरिम्णा प्रथ-

स्वेत्यनुविमार्ष्ट्यसौ वाऽआदित्य एषोऽग्निर्नो हैतमन्यो दिवो वरिमा यन्तुमर्हति द्यौर्भूत्वैनं यच्छेत्येवैतदाह स्वराजोपदधाति स्वाराज्यꣳ ह्यपाꣳ सादयित्वा सूददोहसाधिवदति तस्योक्तो बन्धुः ॥ ९ ॥ अथ रुक्ममुपदधाति । असौ वाऽआदित्य एष रुक्म एष हीमाः सर्वाः प्रजा अतिरोचते रोचो ह वै तꣳ रुक्म इत्याचक्षते परोऽक्षं परोऽक्षकामा हि देवा अमुमेवैतदादित्यमुपदधाति स हिरण्मयो भवति परिमण्डल एकविꣳशतिनिर्बाधस्तस्योक्तो बन्धुरधस्तान्निर्बाधमुपदधाति रश्मयो वाऽएतस्य निर्बाधा अवस्तादु वाऽएतस्य रश्मयः ॥ १० ॥ तं पुष्करपर्णऽउपदधाति । योनिर्वै पुष्करपर्णं योनावेवैनमेतत्प्रतिष्ठापयति ॥ ११ ॥ यद्वेव पुष्करपर्णऽउपदधाति । प्रतिष्ठा वै पुष्करपर्णमियं वै पुष्करपर्णमियमु वै प्रतिष्ठा यो वाऽअस्यामप्रतिष्ठितोऽपि दूरे सन्नप्रतिष्ठित एव स रश्मिभिर्वाऽएषोऽस्यां प्रतिष्ठितोऽस्यामेवैनमेतत्प्रतिष्ठायां प्रतिष्ठापयति ॥ १२ ॥ यद्वेव पुष्करपर्णऽउपदधाति । इन्द्रो वृत्रꣳ हत्वा नास्तृषीति मन्यमानोऽपः प्राविशत्ता अब्रवीद्बिभेमि वै पुरं मे कुरुतेति स योऽपाꣳ रस आसीत्तमूर्ध्वꣳ समुदौहंस्तामस्मै पुरमकुर्वंस्तद्यदस्मै पुरमकुर्वंस्तस्मात्पूष्करं पूष्करꣳ ह वै तत्पुष्करमित्याचक्षते परोऽक्षं परोऽक्षकामा हि देवास्तद्यत्पुष्करपर्णऽउपदधाति यमेवास्यैतमापो रसꣳ समुदौहन्यामस्मै पुरमकुर्वंस्तस्मिन्नेवैनमेतत्प्रतिष्ठापयति ॥ १३ ॥ ब्रह्म जज्ञानं प्रथमं पुरस्तादिति । असौ वाऽआदित्यो ब्रह्माहरहः पुरस्ताज्जायते वि सीमतः सुरुचो वेन आवरिति मध्यं वै सीमेमे लोकाः सुरुचोऽसावादित्यो वेनो यद्वै प्रजिजनिषमाणोऽवेनत्तस्माद्वेनस्तानेष सीमतो मध्यतो विवृण्वन्नुदेति स बुध्न्या उपमा अस्य विष्ठा इति दिशो वाऽअस्य बुध्न्या उपमा विष्ठास्ता ह्येष उपवितिष्ठते सतश्च योनिमसतश्च विवरितीमे वै लोकाः सतश्च योनिरसतश्च यच्च ह्यस्ति यच्च न तदेभ्य एव लोकेभ्यो जायते त्रिष्टुभोपदधाति त्रैष्टुभो ह्येष सादयित्वा सूददोह-

साधिवदति तस्योक्तो बन्धुः ॥१४॥ अथ पुरुषमुपदधाति । स प्रजापतिः सोऽग्निः स यजमानः स हिरण्मयो भवति ज्योतिर्वै हिरण्यं ज्योतिरग्निरमृतꣳ हिरण्यममृतमग्निः पुरुषो भवति पुरुषो हि प्रजापतिः ॥१५॥ यद्वेव पुरुषमुपदधाति । प्रजापतेर्विस्रस्ताद्रम्या तनूर्मध्यत उदक्रामत्तस्यामेनमुत्क्रान्तायां देवा अजहुस्तं यत्र देवाः समस्कुर्वंस्तदस्मिन्नेताꣳ रम्यां तनूं मध्यतोऽदधुस्तस्यामस्य देवा अरमन्त तद्यदस्यैतस्याꣳ रम्यायां तन्वां देवा अरमन्त तस्माद्धिरम्यꣳ हिरम्यꣳ ह वै तद्धिरण्यमित्याचक्षते परोऽक्षं परोऽक्षकामा हि देवास्तथैवास्मिन्नयमेताꣳ रम्यां तनूं मध्यतो दधाति तस्यामस्य देवा रमन्ते प्राणो वाऽअस्य सा रम्या तनूः प्राणमेवास्मिन्नेतं मध्यतो दधाति ॥१६॥ तꣳ रुक्मऽउपदधाति । असौ वाऽआदित्य एष रुक्मोऽथ य एष एतस्मिन्मण्डले पुरुषः स एष तमेवैतदुपदधाति ॥१७॥ उत्तानमुपदधाति । एतद्ध देवा अब्रुवन्यदि वाऽइमावर्वाञ्चाऽउपधास्यामः सर्वमेवेदं प्रधक्ष्यतो यद्यु पराञ्चौ पराञ्चाविव तप्स्यतो यद्यु सम्यञ्चावन्तरैवैतावेतज्ज्योतिर्भविष्यत्यथोऽअन्योऽन्यꣳ हिꣳसिष्यतऽइति तेऽर्वाञ्चमन्यमुपादधुः पराञ्चमन्यꣳ स एष रश्मिभिरर्वाङ् तपति रुक्मः प्राणैरेष ऊर्ध्वः पुरुषः प्राञ्चमुपदधाति प्राङ् ह्येषोऽग्निश्चीयते ॥१८॥ हिरण्यगर्भः समवर्ततताग्रऽइति । हिरण्यगर्भो ह्येष समवर्तताग्रे भूतस्य जातः पतिरेक आसीदित्येष ह्यस्य सर्वस्य भूतस्य जातः पतिरेक आसीत्स दाधार पृथिवीं द्यामुतेमामित्येष वै दिवं च पृथिवीं च दाधार कस्मै देवाय हविषा विधेमेति प्रजापतिर्वै कस्तस्मै हविषा विधेमेत्येतत् ॥१९॥ द्रप्सश्चस्कन्द पृथिवीमनु द्यामिति । असौ वाऽआदित्यो द्रप्सः स दिवं च पृथिवीं च स्कन्दतीत्यमूमितीमामिमं च योनिमनु यश्च पूर्व इतीमं च लोकममुं चेत्येतदथो यच्चेदमेतर्हि चीयते यच्चादः पूर्वमचीयतेति समानं योनिमनु संचरन्तमिति समानꣳ ह्येष एतं योनिमनु संचरति द्रप्सं जुहोम्यनु सप्त होत्रा इत्यसौ वा

ऽआदित्यो द्रप्सो दिशः सप्त होत्रा अमुं तदादित्यं दिक्षु प्रतिष्ठापयति ॥२०॥ द्वाभ्यामुपदधाति । द्विपाद्यजमानो यजमानोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतदुपदधाति । त्रिष्टुब्भ्यां त्रैष्टुभो ह्येष सादयित्वा सूददोहसाधिवदति तस्योक्तो बन्धुः ॥२१॥ अथ साम गायति । एतद्वै देवाऽएतं पुरुषमुपधाय तमेतादृशमेवापश्यन्यथैतद्रुक्मं फलकम् ॥२२॥ तेऽब्रुवन् । उप तज्जानीत यथास्मिन्पुरुषे वीर्यं दधामेति तेऽब्रुवंश्चेतयध्वमिति चितिमिच्छतेति वाव तदब्रुवंस्तदिच्छत यथास्मिन्पुरुषे वीर्यं दधामेति ॥२३॥ ते चेतयमानाः । एतत्सामापश्यंस्तदगायंस्तदस्मिन्वीर्यमदधुस्तथैवास्मिन्नयमेतद्दधाति पुरुषे गायति पुरुषे तद्वीर्यं दधाति चित्रे गायति सर्वाणि हि चित्राण्यग्निस्तमुपधाय न पुरस्तात्परीयान्नेन्मायमग्निर्हिनसदिति ॥२४॥ अथ सर्पनामैरुपतिष्ठत । ऽइमे वै लोकाः सर्पास्ते हानेन सर्वेण सर्पन्ति यदिदं किं च सर्वेषामु हैष देवानामात्मा यदग्निस्ते देवा एतमात्मानमुपधायाबिभयुर्यद्वै न इमे लोका अनेनात्मना न सर्पेयुरिति ॥२५॥ तऽएतानि सर्पनामान्यपश्यन् । तैरुपातिष्ठन्त तैरस्माऽइमाँल्लोकानस्थापयंस्तैरनमयन्यदनमयंस्तस्मात्सर्पनामानि तथैवैतद्यजमानो यत्सर्पनामैरुपतिष्ठतऽइमानेवास्माऽएतल्लोकान्त्स्थापयतीमाँल्लोकान्नमयति तथो हास्यैतऽएतेनात्मना न सर्पन्ति ॥२६॥ यद्वेव सर्पनामैरुपतिष्ठत । ऽइमे वै लोकाः सर्पा यद्धि किं च सर्पत्येष्वेव तल्लोकेषु सर्पति तद्यत्सर्पनामैरुपतिष्ठते यऽएवैषु लोकेषु नाष्ट्रा यो व्यद्वरो या शिमिदा तदेवैतत्सर्वꣳ शमयति ॥२७॥ नमोऽस्तु सर्पेभ्यो ये के च पृथिवीमनु । ये ऽअन्तरिक्षे ये दिवि तेभ्यः सर्पेभ्यो नम इति यऽएवैषु त्रिषु लोकेषु सर्पास्तेभ्य एतन्नमस्करोति ॥२८॥ या इषवो यातुधानानामिति । यातुधानप्रेषिता ह्येके दशन्ति ये वा वनस्पतीँरनु ये वावटेषु शेरते तेभ्यः सर्पेभ्यो नम इति ये चैव वनस्पतिषु सर्पा ये चावटेषु शेरते तेभ्य एतन्नमस्करोति ॥२९॥ ये वामी

रोचने दिवो । ये वा सूर्यस्य रश्मिषु येषामप्सु सदस्कृतं तेभ्यः सर्पेभ्यो नम
इति यत्र-यत्रैते तदेवैभ्य एतन्नमस्करोति नमो नम इति यज्ञो वै नमो यज्ञेनैवै-
नानेतन्नमस्कारेण नमस्यति तस्मादु ह नायज्ञियं ब्रूयान्नमस्तऽइति यथा हैनं
ब्रूयाद्यज्ञस्तऽइति तादृक्तत् ॥३०॥ त्रिभिरुपतिष्ठते । त्रय इमे लोका अथो त्रि-
वृदग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवास्माऽएतदिमांल्लोकान्त्स्थापयत्यथो ता-
वतैवैतदिदꣳ सर्वꣳ शमयति तिष्ठन्नुपतिष्ठते तिष्ठन्तीव वाऽइमे लोका अथो ति-
ष्ठन्वै वीर्यवत्तरः ॥३१॥ अथैनमुपविश्याभिजुहोति । आज्येन पञ्चगृहीतेन तस्यो-
क्तो बन्धुः सर्वतः परिसर्पꣳ सर्वाभ्य एवैनमेतद्दिग्भ्योऽन्नेन प्रीणाति ॥३२॥ य-
द्वेवैनमभिजुहोति । एतद्वै देवा एतमात्मानमुपधायाबिभयुर्यद्वै न इममिह र-
क्षाꣳसि नाष्ट्रा न हन्युरिति तऽएतान्रक्षोघ्नान्प्रतिसरानपश्यन्कृणुष्व पाजः प्रसि-
तिं न पृथ्वीमिति रक्षोघ्ना वै प्रतिसरास्तऽएतैः प्रतिसरैः सर्वाभ्यो दिग्भ्यो र-
क्षाꣳसि नाष्ट्रा अपहत्याभयेऽनाष्ट्रऽएतमात्मानꣳ समस्कुर्वत तथैवैतद्यजमान एतैः
प्रतिसरैः सर्वाभ्यो दिग्भ्यो रक्षाꣳसि नाष्ट्रा अपहत्याभयेऽनाष्ट्रऽएतमात्मानꣳ सं
स्कुरुते ॥३३॥ आज्येन जुहोति । वज्रो वाऽआज्यं वज्रेणैवैतद्रक्षाꣳसि नाष्ट्रा अ-
पहन्ति पञ्चगृहीतेन पञ्चचितिकोऽग्निः पञ्चऽर्तवः संवत्सरः संवत्सरोऽग्निर्यावा-
नग्निर्यावत्यस्य मात्रा तावतैवैतद्रक्षाꣳसि नाष्ट्रा अपहन्त्याग्नेयीभिरग्निर्वै ज्योती
रक्षोहाग्निनैवैतद्रक्षाꣳसि नाष्ट्रा अपहन्ति त्रिष्टुब्भिर्वज्रो वै त्रिष्टुब्वज्रेणैवैतद्रक्षाꣳ-
सि नाष्ट्रा अपहन्ति सर्वतः परिसर्पꣳ सर्वाभ्य एवैतद्दिग्भ्यो रक्षाꣳसि नाष्ट्रा अ-
पहन्ति ॥३४॥ पश्चादग्नेः प्राङासीनो । ऽथोत्तरतो दक्षिणाथ पुरस्तात्प्रत्यङ्ङथ ज-
घनेन परीत्य दक्षिणत उदङ्ङासीनस्तद्दक्षिणावृत्तद्धि देवत्राथानुपरीत्य पश्चात्प्रा-
ङासीनस्तथो हास्यैतत्प्रागेव कर्म कृतं भवति ॥३५॥ अथ स्रुचाऽउपदधाति ।
बाहू वै स्रुचौ बाहूऽएवास्मिन्नेतत्प्रतिदधाति ते यत्स्रुचौ भवतः स्रुचौ हि बाहू

ऽइदमेव कपुच्छलमयं दण्डो द्वे भवतो द्वौ हीमौ बाहू पार्श्वत उपदधाति पार्श्वतो हीमौ बाहू ॥३६॥ कार्ष्मर्यमयीं दक्षिणत उपदधाति । एतद्वै देवा अबिभयुर्यद्वै नो यज्ञं दक्षिणतो रक्षाꣳसि नाष्ट्रा न हन्युरिति तऽएतꣳ रक्षोहणं वनस्पतिमपश्यन्कार्ष्मर्यं तऽएतेन वनस्पतिना दक्षिणतो रक्षाꣳसि नाष्ट्रा अपहत्याभयेऽनाष्ट्रऽएतं यज्ञमतन्वत तथैवैतद्यजमान एतेन वनस्पतिना दक्षिणतो रक्षाꣳसि नाष्ट्रा अपहत्याभयेऽनाष्ट्रऽएतं यज्ञं तनुतऽआज्येन पूर्णा भवति वज्रो वाऽआज्यं वज्रेणैवैतद्दक्षिणतो रक्षाꣳसि नाष्ट्रा अपहन्ति ॥३७॥ अथौदुम्बरीमुत्तरत उपदधाति । ऊर्ग्वै रस उदुम्बर ऊर्जमेवास्मिन्नेतद्रसं दधाति दध्ना पूर्णा भवति रसो वै दधि रसमेवास्मिन्नेतद्दधाति ॥३८॥ यद्वेव स्रुचाऽउपदधाति । प्रजापतेर्विस्रस्तस्याग्निस्तेज आदाय दक्षिणाकर्षत्सोऽत्रोदरमध्यत्कूष्ट्वोदरमत्तस्मात्कार्ष्मर्योऽथास्येन्द्र ओज आदायोदङ्ङुदक्रामत्स उदुम्बरोऽभवत् ॥३९॥ तावब्रवीत् । उप मेतं प्रति मऽएतद्धत्तं येन मे युवमुदक्रमिष्टमिति ताभ्यां वै नौ सर्वमन्नं प्रयच्छेति तौ वै मा बाहू भूत्वा प्रपद्येथामिति तथेति ताभ्यां वै सर्वमन्नं प्रायच्छत्तावेनं बाहू भूत्वा प्रापद्येतां तस्माद्बाहुभ्यामेवान्नं क्रियते बाहुभ्यामद्यते बाहुभ्याꣳ ह्येष सर्वमन्नं प्रायच्छत् ॥४०॥ स कार्ष्मर्यमयीं दक्षिणत उपदधाति । अग्नेष्ट्वा तेजसा सादयामीति यदेवास्य तदग्निस्तेज आदाय दक्षिणाकर्षत्तदस्मिन्नेतत्प्रतिदधात्यग्निर्मूर्धा दिवः ककुदित्येष उ सोऽग्निर्गायत्र्या गायत्रोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनामेतदुपदधाति घृतेन पूर्णा भवत्याग्नेयं वै घृतꣳ स्वेनैवैनमेतद्भागेन स्वेन रसेन प्रीणाति ॥४१॥ अथौदुम्बरीमुत्तरत उपदधाति । इन्द्रस्य त्वौजसा सादयामीति यदेवास्य तदिन्द्र ओज आदायोदङ्ङुदक्रामत्तदस्मिन्नेतत्प्रतिदधाति भुवो यज्ञस्य रजसश्च नेतेत्येष उ स इन्द्रः सा यदाग्नेय्यग्निकर्म ह्यथ यत्त्रिष्टुप्त्रैष्टुभो हीन्द्र ऐन्द्राग्नोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनामेतदुपदधा-

तौन्द्राग्नी वै सर्वे देवाः सर्वदेवत्योऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनामे-
तदुपदधाति दध्ना पूर्णा भवत्यैन्द्रं वै दधि स्वेनैवैनमेतद्भागेन स्वेन रसेन प्रीणा-
ति ॥४२॥ तावस्यैताविन्द्राग्नीऽएव बाहू । तावेनं तेजसा च वीर्येण च सह
प्रपद्येते स सम्प्रत्युरः पुरुषमाकाश्य यत्राभ्याप्नोति तदालिख्यैनेऽउपदधात्येष है-
तयोर्लोकः ॥४३॥ ते हैके तिरश्च्याऽउपदधति । तिर्यञ्चौ वाऽइमौ बाहूऽइति
न तथा कुर्यात्प्राच्यावेवोपदध्यात्प्राङ् ह्येषोऽग्निश्चीयतेऽथोऽएवं वै बाहू वीर्य-
वत्तरौ ते नानोपदधाति नाना सादयति नाना सूददोहसाधिवदति नाना ह्ली-
मौ बाहू ॥४४॥ तदाहुः । नैतस्य पुरुषस्य बाहू कुर्यादेतौ वाऽअस्य बाहू ये
ऽएते स्रुचौ नेदतिरेचयानीति स वै कुर्यादेवैतौ वाऽअस्य बाहूऽअन्वेते स्रुचा-
वथोऽएतौ पक्षावथो यान्येतस्मिन्नग्नौ रूपाण्युपधास्यन्भवति यान्स्तोमान्यानि पृ
ष्ठानि यानि छन्दाꣳस्येतयोरेव सा संस्कृतिरेतयोर्वृद्धिस्तस्मादु कुर्यादेवैतस्य पु-
रुषस्य बाहू ॥४५॥ ब्राह्मणम् ॥ १ [४. १.] ॥ ॥

स्वयमातृणामुपदधाति । इयं वै स्वयमातृण्णेमामेवैतदुपदधाति तामनन्तर्हितां
पुरुषादुपदधात्यन्नं वै स्वयमातृण्णेयं वै स्वयमातृण्णेयमु वाऽअन्नमस्याꣳ हि सर्व-
मन्नं पच्यतेऽनन्तर्हितमेवास्मादेतदन्न दधात्युत्तरामुत्तरमेवास्मादेतदन्नं दधाति ॥१॥
यद्वेव स्वयमातृणामुपदधाति । प्राणो वै स्वयमातृण्णा प्राणो ह्येवैतत्स्वयमात्मन
ऽआतृन्त्ते प्राणमेवैतदुपदधाति तामनन्तर्हितां पुरुषादुपदधाति प्राणो वै स्वयमा-
तृण्णेयं वै स्वयमातृण्णेयमु वै प्राणो यद्धि किं च प्राणीयं तत्सर्वं बिभर्त्यनन्तर्हि-
तमेवास्मादेतत्प्राणं दधात्युत्तरामुत्तरमेवास्मादेतत्प्राणं दधाति ॥२॥ यद्वेव स्वय-
मातृण्णामुपदधाति । प्रजापतिं विस्रस्तं देवता आदाय व्युदक्रामंस्तासु व्युत्क्रामन्ती-
षु प्रतिष्ठामभिपद्योपाविशत् ॥३॥ स यः स प्रजापतिर्व्यस्रꣳसत । अयमेव स यो
ऽयमग्निश्चीयतेऽथ या सा प्रतिष्ठैषा सा प्रथमा स्वयमातृण्णा तद्यदेतामत्रोपदधाति

यद्वास्यैषात्मनस्तदस्मिन्नेतत्प्रतिदधाति तस्मादेतामत्रोपदधाति ॥४॥ तां वै प्रजापतिनोपदधाति । प्रजापतिर्ह्यवैतत्स्वयमात्मनः प्रत्यधत्त ध्रुवासीति स्थिरासीत्येतदथो प्रतिष्ठितासीति धरुणेति प्रतिष्ठा वै धरुणमास्तृता विश्वकर्मणेति प्रजापतिर्वै विश्वकर्मा तेनास्तृतासीत्येतन्मा त्वा समुद्र उद्वधीन्मा सुपर्ण इति रुक्मो वै समुद्रः पुरुषः सुपर्णस्तौ त्वा मोद्वधिष्टामित्येतदव्यथमाना पृथिवीं दृꣳहेति यथैव यजुस्तथा बन्धुः ॥५॥ प्रजापतिष्ट्वा सादयत्विति । प्रजापतिर्ह्येतां प्रथमां चितिमपश्यदपां पृष्ठे समुद्रस्येमन्नित्यपाꣳ हीयं पृष्ठꣳ समुद्रस्य हीयमेम व्यचस्वतीं प्रथस्वतीमिति व्यचस्वती च हीयं प्रथस्वती च प्रथस्व पृथिव्यसीति प्रथस्व पृथिवी चासीत्येतत् ॥६॥ भूरसीति । भूर्हीयं भूमिरसीति भूमिर्हीयमदितिरसीतीयं वाऽअदितिरियꣳ हीदꣳ सर्वं ददते विश्वधाया इत्यस्याꣳ हीदꣳ सर्वꣳ हितं विश्वस्य भुवनस्य धर्त्रीति सर्वस्य भुवनस्य धर्त्रीत्येतत्पृथिवीं यच्छ पृथिवीं दृꣳह पृथिवीं मा हिꣳसीरित्यात्मानं यच्छात्मानं दृꣳहात्मानं मा हिꣳसीरित्येतत् ॥७॥ विश्वस्मै प्राणायापानाय । व्यानायोदानायेति प्राणो वै स्वयमातृण्णा सर्वस्माऽउ वाऽएतस्मै प्राणः प्रतिष्ठायै चरित्रायेतीमे वै लोकाः स्वयमातृण्णा इमऽउ लोकाः प्रतिष्ठा चरित्रमग्निष्ट्वाभिपात्वित्यग्निष्ट्वाभिगोपायत्वित्येतन्मह्या स्वस्त्येति महत्या स्वस्त्येत्येतच्छर्दिषा शंतमेनेति यच्छर्दिः शंतमं तेनेत्येतत्सादयित्वा सूददोहसाधिवदति तस्योक्तो बन्धुरथ साम गायति तस्योपरि बन्धुः ॥८॥ तदाहुः । कथमेष पुरुषः स्वयमातृण्णयानभिनिहितो भवतीत्यन्नं वै स्वयमातृण्णा प्राणः स्वयमातृण्णानभिनिहितो वै पुरुषोऽन्नेन च प्राणेन च ॥९॥ अथ दूर्वेष्टकामुपदधाति । पशवो वै दूर्वेष्टका पशूनेवैतदुपदधाति तद्यैदोऽग्निरन्तर्हितैः पशुभिरुपैत्तऽएते तानेवैतदुपदधाति तामनन्तर्हिताꣳ स्वयमातृण्णाया उपदधातीयं वै स्वयमातृण्णानन्तर्हितांस्तदस्यै पशून्दधात्युत्तरामुत्तरांस्तदस्यै पशून्दधाति ॥१०॥ यद्वेव

दूर्वेष्टकामुपदधाति । प्रजापतेर्विस्रस्तस्य यानि लोमान्यशीयन्त ता इमा ओषधयोऽभवन्नथास्मात्प्राणो मध्यत उदक्रामत्तस्मिन्नुत्क्रान्तेऽपद्यत ॥ ११ ॥ सोऽब्रवीत् । अयं वाव माधूर्वीदिति यदब्रवीदधूर्वीन्मेति तस्माद्धूर्वा धूर्वा ह वै तां दूर्वेत्याचक्षते परोऽक्षं परोऽक्षकामा हि देवास्तदेतत्क्षत्रं प्राणो ह्येष रसो लोमान्यन्या ओषधय एतामुपदधत्सर्वा ओषधीरुपदधाति ॥ १२ ॥ तं यत्र देवाः समस्कुर्वं । स्तदस्मिन्नेतं प्राणꣳ रसं मध्यतोऽदधुस्तथैवास्मिन्नयमेतद्दधाति तामनन्तर्हिताꣳ स्वयमातृण्णाया उपदधातीयं वै स्वयमातृण्णानन्तर्हितास्तदस्याऽओषधीर्दधात्युत्तरामुत्तरास्तदस्याऽओषधीर्दधाति सा स्यात्समूला साग्रा कृत्स्नतायै यथा स्वयमातृण्णायामुपहिता भूमिं प्राप्नुयादेवमुपदध्यादस्याꣳ ह्येवैता जायन्तऽइमामनु प्ररोहन्ति ॥ १३ ॥ काण्डात्काण्डात्प्ररोहन्ती । परुषः-परुषस्परीति काण्डात्काण्डाद्ध्येषा पर्वणः-पर्वणः प्ररोहत्येवा नो दूर्वे प्रतनु सहस्रेण शतेन चेति यथैव यजुस्तथा बन्धुः ॥ १४ ॥ या शतेन प्रतनोषि । सहस्रेण विरोहसीति शतेन ह्येषा प्रतनोति सहस्रेण विरोहति तस्यास्ते देवीष्टके विधेम हविषा वयमिति यथैव यजुस्तथा बन्धुर्द्वाभ्यामुपदधाति तस्योक्तो बन्धुः सादयित्वा सूददोहसाधिवदति तस्योक्तो बन्धुः ॥ १५ ॥ अथ द्वियजुषमुपदधाति । इन्द्राग्नीऽअकामयेताꣳ स्वर्गं लोकमियावेति तावेतामिष्टकामपश्यतां द्वियजुषमिमामेव तामुपादधातां तामुपधायास्मै प्रतिष्ठायै स्वर्गं लोकमैतां तथैवैतद्यजमानो यद्द्वियजुषमुपदधाति येन रूपेण यत्कर्म कृत्वेन्द्राग्नी स्वर्गं लोकमैतां तेन रूपेण तत्कर्म कृत्वा स्वर्गं लोकमयानीति सा यद्द्वियजुर्नाम द्वे ह्येतां देवतेऽअपश्यतां यद्वेव द्वियजुषमुपदधाति यजमानो वै द्वियजुः ॥ १६ ॥ तदाहुः । यदसावेव यजमानो योऽसौ हिरण्मयः पुरुषोऽथ कतमदस्येदꣳ रूपमिति दैवो वाऽअस्य स आत्मा मानुषोऽयं तद्यत्स हिरण्मयो भवत्यमृतं वाऽअस्य तद्रूपं देवरूपममृतꣳ हिरण्मयमथ यदियं मृदः कृता भवति

मानुषꣳ ह्यस्येदꣳ रूपꣳ ॥१७॥ स यदमूमेवोपदध्यात् । नेमामपशिꣳष्यात्क्षिप्रे हास्माल्लोकाद्यजमानः प्रेयादथ यदिमामपशिनष्टि यदेवास्येदं मानुषꣳ रूपं तदस्यैतदपशिनष्टि तथो हानेनात्मना सर्वमायुरेति ॥१८॥ स यन्नानूपदध्यात् । न हैतं दैवमात्मानमनुप्रजानीयादथ यदनूपदधाति तथो हैतं दैवमात्मानमनुप्रजानाति तामनन्तर्हितां दूर्वेष्टकाया उपदधाति पशवो वै दूर्वेष्टका यजमानं तत्पशुषु प्रतिष्ठापयति ॥१९॥ तदाहुः । कथमस्यैतावात्मानौ प्राणेन संततावव्यवछिन्नौ भवत इति प्राणो वै स्वयमातृण्णा प्राणो दूर्वेष्टका यजमानो द्वियजुः स यदनन्तर्हिताꣳ स्वयमातृण्णायै दूर्वेष्टकामुपदधाति प्राणेनैव तत्प्राणꣳ संतनोति संदधात्यथ यदनन्तर्हितां दूर्वेष्टकायै द्वियजुषमुपदधाति प्राणो वै दूर्वेष्टका यजमानो द्वियजुरेवमु हास्यैतावात्मानौ प्राणेन संततावव्यवछिन्नौ भवतः ॥२०॥ यास्ते ऽग्ने सूर्ये रुचो । या वो देवाः सूर्ये रुच इति रुचꣳ रुचमित्यमृतत्वं वै रुगमृतत्वमेवास्मिन्नेतद्दधाति द्वाभ्यामुपदधाति तस्योक्तो बन्धुरथो द्वयꣳ ह्येवैतद्रूपं मृच्चापश्च सादयित्वा सूददोहसाधिवदति तस्योक्तो बन्धुः ॥२१॥ अथ रेतःसिचा ऽउपदधाति । इमौ वै लोकौ रेतःसिचाविमौ ह्येव लोकौ रेतः सिञ्चत इतो वा ऽअयमूर्ध्वꣳ रेतः सिञ्चति धूमꣳ सामुत्र वृष्टिर्भवति तामसावमुतो वृष्टिं तदिमा अन्तरेण प्रजायन्ते तस्मादिमौ लोकौ रेतःसिचौ ॥२२॥ विराड्ज्योतिरधारयदिति । अयं वै लोको विराट् स इममग्निं ज्योतिर्धारयति स्वराड्ज्योतिरधारयदित्यसौ वै लोकः स्वराट् सो ऽमुमादित्यं ज्योतिर्धारयति विराड्ढेमौ लोकौ स्वराड्ढ नानोपदधाति नाना हीमौ लोकौ सकृत्सादयति समानं तत्करोति तस्मादु ह्यनयोर्लोकयोरन्ताः समायन्ति ॥२३॥ यद्वेव रेतःसिचा ऽउपदधाति । आण्डौ वै रेतःसिचौ यस्य ह्याण्डौ भवतः स एव रेतः सिञ्चति विराड्ज्योतिरधारयत्स्वराड्ज्योतिरधारयदिति विराड्ढेमावाण्डौ स्वराड्ढ तावेतज्ज्योतिर्धारयतो रेत एव प्रजापतिमेव

नानोपदधाति नाना ह्येमावाण्डौ सकृत्सादयति समानं तत्करोति तस्मात्समा-
नसम्बन्धनौ ते ऽअनन्तर्हिते द्वियजुष उपदधाति यजमानो वै द्वियजुरनन्तर्हितौ
तद्यजमानादाण्डौ दधाति ॥२४॥ अथ विश्वज्योतिषमुपदधाति । अग्निर्वै प्रथमा
विश्वज्योतिरग्निर्ह्येवास्मिंल्लोके विश्वं ज्योतिरग्निमेवैतदुपदधाति तामनन्तर्हिताꣳ
रेतःसिग्भ्यामुपदधातीमौ वै लोकौ रेतःसिचावनन्तर्हितं तदाभ्यां लोकाभ्यामग्निं
दधात्यन्तरेणोपदधात्यन्तरेण ह्येमौ लोकावग्निः ॥२५॥ यद्वेव विश्वज्योतिषमुपद-
धाति । प्रजा वै विश्वज्योतिः प्रजा ह्येव विश्वं ज्योतिः प्रजननमेवैतदुपदधाति
तामनन्तर्हिताꣳ रेतःसिग्भ्यामुपदधात्याण्डौ वै रेतःसिचावनन्तर्हितां तदाण्डाभ्यां
प्रजातिं दधात्यन्तरेणोपदधात्यन्तरेण ह्याण्डौ प्रजाः प्रजायन्ते ॥२६॥ प्रजापतिष्ट्वा
सादयत्विति । प्रजापतिर्ह्येतां प्रथमां चितिमपश्यत्पृष्ठे पृथिव्या ज्योतिष्मतीमिति
पृष्ठे ह्ययं पृथिव्यै ज्योतिष्मानग्निः ॥२७॥ विश्वस्मै प्राणायापानाय । व्यानायेति
प्राणो वै विश्वज्योतिः सर्वस्मा ऽउ वा ऽएतस्मै प्राणो विश्वं ज्योतिर्यच्छेति सर्वं
ज्योतिर्यच्छेत्येतदग्निष्टे ऽधिपतिरित्यग्निमेवास्या अधिपतिं करोति सादयित्वा सूददो-
हसाधिवदति तस्योक्तो बन्धुः ॥२८॥ अथर्तव्ये ऽउपदधाति । ऋतव एते यदृत-
व्ये ऽऋतूनेवैतदुपदधाति मधुश्च माधवश्च वासन्तिकावृतू ऽइति नामनी ऽएनयोरेते
नामभ्यामेवैने ऽएतदुपदधाति द्वे ऽइष्टके भवतो द्वौ हि मासावृतुः सकृत्सादयत्येकं
तदृतुं करोति ॥२९॥ तद्यदेते ऽअत्रोपदधाति । संवत्सर एषो ऽग्निरिम ऽउ लोकाः
संवत्सरस्तस्यायमेव लोकः प्रथमा चितिरयमस्य लोको वसन्त ऋतुस्तद्यदेते ऽअ-
त्रोपदधाति यदेवास्यैते ऽआत्मनस्तदस्मिन्नेतत्प्रतिदधाति तस्मादेते ऽअत्रोपदधाति
॥३०॥ यद्वेवैते ऽअत्रोपदधाति । प्रजापतिरेषो ऽग्निः संवत्सर उ प्रजापतिस्तस्य प्र-
तिष्ठैव प्रथमा चितिः प्रतिष्ठो ऽअस्य वसन्त ऋतुस्तद्यदेते ऽअत्रोपदधाति यदेवास्यै-
ते ऽआत्मनस्तदस्मिन्नेतत्प्रतिदधाति तस्मादेते ऽअत्रोपदधाति ते ऽअनन्तर्हिते वि-

श्वज्योतिष उपदधाति प्रजा वै विश्वज्योतिरनन्तर्हितास्तत्प्रजा ऋतुभ्यो दधाति तस्मात्प्रजा ऋतूनेवानुप्रजायन्तऽऋतुभिर्ह्येव गर्भे सन्तꣳ सम्पश्यन्त्यृतुभिर्जातम् ॥३१॥ अथाषाढामुपदधाति । इयं वाऽअषाढेमामेवैतदुपदधाति तां पूर्वार्धऽउपदधाति प्रथमा ह्येयमसृज्यत ॥३२॥ सा यदषाढा नाम । देवाश्चासुराश्चोभये प्राजापत्या अस्पर्धन्त ते देवा एतामिष्टकामपश्यन्नषाढामिमामेव तामुपादधत तामुपधायासुरान्त्सपत्नान्भ्रातृव्यानस्मात्सर्वस्मादसहन्त यदसहन्त तस्मादषाढा तथैवैतद्यजमान एतामुपधाय द्विषन्तं भ्रातृव्यमस्मात्सर्वस्मात्सहते ॥३३॥ यद्वेवाषाढामुपदधाति । वाग्वाऽअषाढा वाचैव तद्देवा असुरान्त्सपत्नान्भ्रातृव्यानस्मात्सर्वस्मादसहन्त तथैवैतद्यजमानो वाचैव द्विषन्तं भ्रातृव्यमस्मात्सर्वस्मात्सहते वाचमेव तद्देवा उपादधत तथैवैतद्यजमानो वाचमेवोपधत्ते ॥३४॥ सेयं वामभृत् । प्राणा वै वामं यद्धि किं च प्राणीयं तत्सर्वं बिभर्ति तेनेयं वामभृद्वाग्घ त्वेव वामभृत्प्राणा वै वामं वाचि वै प्राणेभ्योऽन्नं धीयते तस्माद्वाग्वामभृत् ॥३५॥ तऽएते सर्वे प्राणा यदषाढा । तां पूर्वार्धऽउपदधाति पुरस्तात्तत्प्राणान्दधाति तस्मादिमे पुरस्तात्प्राणास्तान्नान्यया यजुष्मत्येष्टकया पुरस्तात्प्रत्युपदध्यादेतस्यां चितौ नेत्प्राणानपिदधानीति ॥३६॥ यद्वपस्याः पञ्च पुरस्तादुपदधाति । अन्नं वाऽआपोऽनपिहिता वाऽअन्नेन प्राणास्तामनन्तर्हितामृतव्याभ्यामुपदधात्यृतुषु तद्वाचं प्रतिष्ठापयति सेयं वागृतुषु प्रतिष्ठिता वदति ॥३७॥ तदाहुः । यत्प्रजा विश्वज्योतिर्वागषाढाथ कस्मादन्तरेणऽर्तव्येऽउपदधातीति संवत्सरो वाऽऋतव्ये संवत्सरेण तत्प्रजाभ्यो वाचमन्तर्दधाति तस्मात्संवत्सरवेलायां प्रजा वाचं प्रवदन्ति ॥३८॥ अषाढासि सहमानेति । असहन्त ह्येतया देवा असुरान्त्सहस्वारातीः सहस्व पृतनायत इति यथैव यजुस्तथा बन्धुः सहस्रवीर्यासि सा मा जिन्वेति सर्वं वै सहस्रꣳ सर्ववीर्यासि सा मा जिन्वेत्येतत्सादयित्वा सूददोहसाधिवदति तस्योक्तो बन्धुः ॥३९॥ त-

दाहुः । कस्मादभिस्वयमातृणमन्या इष्टका उपधीयन्ते प्राच्य एता इति द्वे वै यो-
नीऽइति ब्रूयाद्देवयोनिरन्यो मनुष्ययोनिरन्यः प्राचीनप्रजनना वै देवाः प्रतीचीन-
प्रजनना मनुष्यास्तद्यदेताः प्राचीरुपदधाति देवयोनेरेवैतद्यजमानं प्रजनयति
॥४०॥ ब्राह्मणम् ॥ २ [४. २.] ॥ तृतीयः प्रपाठकः ॥ कण्डिकासंख्या८५ ॥ चतुर्थो
ऽध्यायः [४७.] ॥ ॥

कूर्ममुपदधाति । रसो वै कूर्मो रसमेवैतदुपदधाति यो वै स एषां लोकाना-
मप्सु प्रविद्धानां पराङ्रसोऽत्यक्षरत्स एष कूर्मस्तमेवैतदुपदधाति यावानु वै रस-
स्तावानात्मा स एष इमऽएव लोकाः ॥१॥ तस्य यदधरं कपालम् । अयꣳ स
लोकस्तत्प्रतिष्ठितमिव भवति प्रतिष्ठित-इव ह्ययं लोकोऽथ यदुत्तरꣳ सा द्यौ-
स्तद्व्यवगृहीतान्तमिव भवति व्यवगृहीतान्तेव हि द्यौरथ यदन्तरा तदन्तरिक्षꣳ स
एष इमऽएव लोका इमानेवैतल्लोकानुपदधाति ॥२॥ तमभ्यनक्ति । दध्ना मधु-
ना घृतेन दधि हैवास्य लोकस्य रूपं घृतमन्तरिक्षस्य मध्वमुष्य स्वेनैवैनमेतद्रूपेण
समर्धयत्यथो दधि हैवास्य लोकस्य रसो घृतमन्तरिक्षस्य मध्वमुष्य स्वेनैवैनमेत-
द्रसेन समर्धयति ॥३॥ मधु वाता ऋतायतऽइति । यां वै देवतामृगभ्यनूक्ता यां
यजुः सैव देवता सऽऋक्सो देवता तद्यजुस्तद्वैतन्मध्वेवैष त्रिचो रसो वै मधु रस-
मेवास्मिन्नेतद्दधाति गायत्रीभिस्तिसृभिस्तस्योक्तो बन्धुः ॥४॥ स यत्कूर्मो नाम ।
एतद्वै रूपं कृत्वा प्रजापतिः प्रजा असृजत यदसृजताकरोत्तद्यदकरोत्तस्मात्कूर्मः क-
श्यपो वै कूर्मस्तस्मादाहुः सर्वाः प्रजाः काश्यप्य इति ॥५॥ स यः स कूर्मोऽसौ
स आदित्यो । ऽमुमेवैतदादित्यमुपदधाति तं पुरस्तात्प्रत्यञ्चमुपदधात्यमुं तदादि-
त्यं पुरस्तात्प्रत्यञ्चं दधाति तस्मादसावादित्यः पुरस्तात्प्रत्यङ् धीयते दक्षिणतो
ऽषाढायै वृषा वै कूर्मो योषाषाढा दक्षिणतो वै वृषा योषामुपशेतेऽरत्निमात्रे
ऽरत्निमात्राद्धि वृषा योषामुपशेते सैषा सर्वासामिष्टकानां महिषी यदषाढैतस्यै

दक्षिणतः सन्त्सर्वासामिष्टकानां दक्षिणतो भवति ॥६॥ यद्वेव कूर्ममुपदधाति । प्राणो वै कूर्मः प्राणो हीमाः सर्वाः प्रजाः करोति प्राणमेवैतदुपदधाति तं पुरस्तात्प्रत्यञ्चमुपदधाति पुरस्तात्तत्प्रत्यञ्चं प्राणं दधाति तस्मात्पुरस्तात्प्रत्यङ् प्राणो धीयते पुरुषमभ्यावृत्तं यजमाने तत्प्राणं दधाति दक्षिणतोऽषाढायै प्राणो वै कूर्मो वागषाढा प्राणो वै वाचो वृषा प्राणो मिथुनम् ॥७॥ ॥ शतम् ४२०० ॥ ॥ अपां गम्भन्त्सीदेति । एतद्वापां गम्भिष्ठं यत्रैष एतत्तपति मा त्वा सूर्योऽभिताप्सीन्माग्निर्वैश्वानर इति मैव त्वा सूर्यो हिंसीन्मोऽग्निर्वैश्वानर इत्येतदच्छिन्नपत्राः प्रजा अनुवीक्षस्वेतीमा वै सर्वाः प्रजा या इमा इष्टकास्ता अरिष्टा अनार्ता अनुवीक्षस्वेत्येतदनु त्वा दिव्या वृष्टिः सचतामिति यथैवैनं दिव्या वृष्टिरनुसचेतैवमेतदाह ॥८॥ अथैनमेजयति । त्रीन्त्समुद्रान्त्समसृपत्स्वर्गानितीमे वै त्रयः समुद्राः स्वर्गा लोकास्तानेष कूर्मो भूत्वानुसंसर्पापां पतिर्वृषभ इष्टकानामित्यपां ह्येष पतिर्वृषभ इष्टकानां पुरीषं वसानः सुकृतस्य लोकऽइति पशवो वै पुरीषं पशून्वसानः सुकृतस्य लोक इत्येतत्तत्र गच्छ यत्र पूर्वे परेता इति तत्र गच्छ यत्रैतेन पूर्वे कर्मणेयुरित्येतत् ॥९॥ मही द्यौः पृथिवी च न इति । महती द्यौः पृथिवी च न इत्येतदिमं यज्ञं मिमिक्षतामितीमं यज्ञमवतामित्येतत्पिपृतां नो भरीमभिरिति बिभृतां नो भरीमभिरित्येतद्द्यावापृथिव्ययोत्तमयोपदधाति द्यावापृथिव्यो हि कूर्मः ॥१०॥ त्रिभिरुपदधाति । त्रय इमे लोका अथो त्रिवृदग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतदुपदधाति त्रिभिरभ्यनक्ति तस्योक्तो बन्धुरवका अधस्ताद्भवन्त्यवका उपरिष्टादापो वाऽअवका अपामेवैनमेतन्मध्यतो दधाति सादयित्वा सूददोहसाधिवदति तस्योक्तो बन्धुः ॥११॥ अथोलूखलमुसलेऽउपदधाति । विष्णुरकामयतान्नादः स्यामिति स एतेऽइष्टकेऽअपश्यदुलूखलमुसले तेऽउपाधत्त तेऽउपधायान्नादोऽभवत्तथैवैतद्यजमानो यदुलूखलमुसलेऽउपदधाति

येन रूपेण यत्कर्म कृत्वा विष्णुरन्नादोऽभवत्तेन रूपेण तत्कर्म कृत्वान्नादोऽसानी-
ति तदेतत्सर्वमन्नं यदुलूखलमुसलेऽउलूखलमुसलाभ्याᳫं ह्येवान्नं क्रियतऽउलू-
खलमुसलाभ्यामद्यते ॥ १२ ॥ ते रेतःसिचोर्वेलयोपदधाति । पृष्टयो वै रेतःसि-
चौ मध्यमु पृष्टयो मध्यत एवास्मिन्नेतदन्नं दधात्युत्तरेऽउत्तरमेवास्मादेतदन्नं दधा-
त्यरत्निमात्रेऽरत्निमात्राद्ध्यन्नमद्यते ॥ १३ ॥ प्रादेशमात्रे भवतः । प्रादेशमात्रो वै
गर्भो विष्णुरन्नमेतदात्मसंमितमेवास्मिन्नेतदन्नं दधाति यदु वाऽआत्मसंमितमन्नं त-
दवति तन्न हिनस्ति यद्भूयो हिनस्ति तद्यत्कनीयो न तदवति ॥ १४ ॥ औदुम्बरे
भवतः । ऊर्ग्वै रस उदुम्बर ऊर्जमेवास्मिन्नेतद्रसं दधात्यथो सर्वऽएते वनस्पतयो
यदुदुम्बर एतेऽउपदधत्सर्वान्वनस्पतीनुपदधाति रेतःसिचोर्वेलयेमे वै रेतःसि-
चावनयोस्तद्वनस्पतीन्दधाति तस्मादनयोर्वनस्पतयश्चतुःस्रक्ति भवति चतस्रो वै
दिशः सर्वासु तद्दिक्षु वनस्पतीन्दधाति तस्मात्सर्वासु दिक्षु वनस्पतयो मध्ये सं-
गृहीतं भवत्युलूखलरूपतायै ॥ १५ ॥ यद्वेवोलूखलमुसलेऽउपदधाति । प्रजापते-
र्विस्रस्तात्प्राणो मध्यत उदचिक्रमिषत्तमन्नेनागृह्णात्तस्मात्प्राणोऽन्नेन गृहीतो यो
ह्येवान्नमत्ति स प्राणिति ॥ १६ ॥ प्राणे गृहीतेऽस्मादन्नमुदचिक्रमिषत्तत्प्राणेनागृ-
ह्णात्तस्मात्प्राणेनान्नं गृहीतं यो ह्येव प्राणिति सोऽन्नमत्ति ॥ १७ ॥ एतयोरुभ-
योर्गृहीतयोः । अस्मादूर्गुदचिक्रमिषत्तामेताभ्यामुभाभ्यामगृह्णात्तस्मादेताभ्यामुभा-
भ्यामूर्ग्गृहीता यो ह्येवान्नमत्ति स प्राणिति तमूर्जयति ॥ १८ ॥ ऊर्जि गृहीतायाम्
। अस्मादेतेऽउभेऽउदचिक्रमिषतां तेऽऊर्जागृह्णात्तस्मादेतेऽउभे ऊर्जा गृहीते यᳫं
ह्येवोर्जयति स प्राणिति सोऽन्नमत्ति ॥ १९ ॥ तान्येतान्यन्योऽन्येन गृहीतानि ।
तान्यन्योऽन्येन गृहीत्वात्मन्प्रापादयत तदेतदन्नं प्रपद्यमानᳫं सर्वे देवा अनुप्राप-
द्यन्तान्नजीवनᳫं हीदᳫं सर्वम् ॥ २० ॥ तदेष श्लोकोऽभ्युक्तः । तद्वै स प्राणोऽभव-
दिति तद्धि स प्राणोऽभवन्महा भूत्वा प्रजापतिरिति महान्हि स तदभवद्यदेन-

मेते देवाः प्रापश्यन्त भुवो भुविष्या विश्वेति प्राणा वै भुवोऽन्नं भुविष्या एतत्सर्वं
विश्वेत्येतद्यत्प्राणान्प्राणयत्पुरीत्यात्मा वै पूर्यद्धि प्राणान्प्राणयत्तस्मात्प्राणा देवा
अथ यत्प्रजापतिः प्राणयत्तस्मादु प्रजापतिः प्राणो यो वै स प्राण एषा सा गाय-
त्र्यथ यत्तदन्नमेष स विष्णुर्देवताथ या सोऽर्गेष स उदुम्बरः ॥२१॥ सोऽब्रवीत् ।
अयं वाव मा सर्वस्मात्पाप्मन उदभार्षीदिति यदब्रवीदुदभार्षीन्मेति तस्मादुदुम्भर
उदुम्भरो ह वै तमुदुम्बर इत्याचक्षते परोऽक्षं परोऽक्षकामा हि देवा उरु मे
करदिति तस्मादुरुकरमुरुकरꣳ ह वै तदुलूखलमित्याचक्षते परोऽक्षं परोऽक्ष-
कामा हि देवाः सैषा सर्वेषां प्राणानां योनिर्यदुलूखलꣳ शिरो वै प्राणानां यो-
निः ॥२२॥ तत्प्रादेशमात्रं भवति । प्रादेशमात्रमिव हि शिरश्चतुःस्रक्ति भवति
चतुःस्रक्तीव हि शिरो मध्ये संगृहीतं भवति मध्ये संगृहीतमिव हि शिरः ॥२३॥
तं यत्र देवाः समस्कुर्वन् । तदस्मिन्नेतत्सर्वं मध्यतोऽदधुः प्राणमन्नमूर्जं तथैवा-
स्मिन्नयमेतद्दधाति रेतःसिचोर्वेलया पृष्टयो वै रेतःसिचौ मध्यमु पृष्टयो मध्यत
एवास्मिन्नेतत्सर्वं दधाति ॥२४॥ विष्णोः कर्माणि पश्यतेति । वीर्यं वै कर्म वि-
ष्णोर्वीर्याणि पश्यतेत्येतद्यतो व्रतानि पस्पशऽइत्यन्नं वै व्रतं यतोऽन्नꣳ स्पाशयां
चक्रऽइत्येतदिन्द्रस्य युज्यः सखेतीन्द्रस्य ह्येष युज्यः सखा द्विदेवत्ययोपदधाति द्वे
ह्युलूखलमुसले सकृत्सादयति समानं तत्करोति समानꣳ ह्येतदन्नमेव सादयि-
त्वा सूददोहसाधिवदति तस्योक्तो बन्धुः ॥२५॥ अथोखामुपदधाति योनिर्वाऽउ-
खा योनिमेवैतदुपदधाति तामुलूखलऽउपदधात्यन्तरिक्षं वाऽउलूखलं यद्धि किं
चास्या ऊर्ध्वमन्तरिक्षमेव तन्मध्यं वाऽअन्तरिक्षं मध्यतस्तद्योनिं दधाति तस्मात्सर्वे-
षां भूतानां मध्यतो योनिरपि वनस्पतीनाम् ॥२६॥ यद्धेवोखामुपदधाति । यो
वै स प्रजापतिर्व्यस्रꣳसतैषा सोखेमे वै लोका उखेमे लोकाः प्रजापतिस्तामु-
लूखलऽउपदधाति तदेनमेतस्मिन्त्सर्वस्मिन्प्रतिष्ठापयति प्राणेऽन्नऽऊर्ज्यथोऽएत-

स्माद्वेवैनमेतत्सर्वस्मादनन्तर्हितं दधाति ॥२७॥ अथोपशयां पिष्ट्वा । लोकभाज-
मुखां कृत्वा पुरस्तादुखाया उपनिवपत्येष ह्येतस्यै लोकस्तथो हास्यैषानन्तरिता
भवति ॥२८॥ तदाहुः । कथमस्यैषा पक्वा शृतोपहिता भवतीति यदेव यजुष्कृ-
ता तेनाथो यद्धि किं चैतमग्निं वैश्वानरमुपनिगच्छति तत एव तत्पक्वꣳ शृतमुप-
हितं भवति ॥२९॥ ध्रुवासि धरुणेति । तस्योक्तो बन्धुरितो जज्ञे प्रथममेभ्यो यो-
निभ्योऽअधि जातवेदा इत्येतेभ्यो हि योनिभ्यः प्रथमं जातवेदा अजायत स गा-
यत्र्या त्रिष्टुभानुष्टुभा च देवेभ्यो हव्यं वहतु प्रजानन्नित्येतैर्वाऽएष छन्दोभिर्दे-
वेभ्यो हव्यं वहति प्रजानन् ॥३०॥ इषे राये रमस्व । सहसे द्युम्नऽऊर्जेऽअप-
त्यायेत्येतस्मै सर्वस्मै रमस्वेत्येतत्सम्राडसि स्वराडसीति सम्राड्ढ्येष स्वराट् सा-
रस्वतौ त्वोत्सौ प्रावतामिति मनो वै सरस्वान्वाक्सरस्वत्येतौ सारस्वताऽउत्सौ
तौ त्वा प्रावतामित्येतद्वाभ्यामुपदधाति तस्योक्तो बन्धुरथो द्वयꣳ ह्येवैतद्रूपं मृच्चा-
पश्च सादयित्वा सूददोहसाधिवदति तस्योक्तो बन्धुः ॥३१॥ अथैनामभिजुहोति ।
एतद्वाऽअस्यामेतत्पूर्वꣳ रेतः सिक्तं भवति सिकतास्तदेतदभिकरोति तस्माद्योनौ
रेतः सिक्तमभिक्रियतऽआज्येन जुहोति स्रुवेण स्वाहाकारेण द्वाभ्यामाग्नेयीभ्यां
गायत्रीभ्यां तस्योक्तो बन्धुः ॥३२॥ अग्ने युक्ष्वा हि ये तव । युक्ष्वा हि देवहू-
तमानिति युक्तवतीभ्यामिदमेवैतद्योनौ रेतो युनक्ति तस्माद्योनौ रेतो युक्तं न
निष्पद्यते ॥३३॥ स यदि संवत्सरभृतः स्यात् । अथाभिजुहुयात्सर्वं वै तद्यत्सं-
वत्सरभृतः सर्वं तद्यदभिजुहोत्यथ यद्यसंवत्सरभृतः स्यादुपैव तिष्ठेतासर्वं वै त-
द्यदसंवत्सरभृतोऽसर्वं तद्यदुपतिष्ठतेऽभि त्वेव जुहुयात् ॥३४॥ पशुरेष यदग्निः ।
सोऽत्रैव सर्वः कृत्स्नः संस्कृतस्तस्यावाङ् प्राणः स्वयमातृण्णा श्रोणी द्वियजुः पृष्ट-
यो रेतःसिचौ कीकसा विश्वज्योतिः ककुदमृतव्ये ग्रीवा अषाढा शिरः कूर्मो ये
कूर्मे प्राणा ये शीर्षन्प्राणास्ते ते ॥३५॥ तं वाऽएतम् । इत ऊर्ध्वं प्राञ्चं चिनो-

त्यसौ वाऽआदित्य एषोऽग्निरमुं तदादित्यमित ऊर्ध्वं प्राञ्चं दधाति तस्मादसावादित्य इत ऊर्ध्वः प्राङ् धीयते ॥३६॥ अथैनं प्रसलव्यावर्तयति । अमुं तदादित्यं प्रसलव्यावर्तयति तस्मादसावादित्य इमांलोकान्प्रसलव्यनुपर्यैति ॥३७॥ उदरमुखा । योनिरुलूखलमुत्तरोखा भवत्यधरमुलूखलमुत्तरꣳ ह्युदरमधरा योनिः शिश्नं मुसलं तद्वृत्तमिव भवति वृत्तमिव हि शिश्नं तद्दक्षिणत उपदधाति दक्षिणतो वै वृषा योषामुपशेते यद्व पशोः संस्कृतस्यान्नं तद्वैवेष्टका तस्य वाऽएतस्योत्तरोऽर्ध उदाह्नितरो भवति पशुरेष यदग्निस्तस्मात्पशोः सुह्नितस्योत्तरः कुक्षिरुन्नततरो भवति ॥३८॥ ब्राह्मणम् ॥ १ [५. १.] ॥ ॥

पशुशीर्षाण्युपदधाति । पशवो वै पशुशीर्षाणि पशूनेवैतदुपदधाति तान्युखायामुपदधातीमे वै लोका उखा पशवः पशुशीर्षाण्येषु तल्लोकेषु पशून्दधाति तस्मादिमऽएषु लोकेषु पशवः ॥१॥ यद्वेवोखायाम् । योनिर्वाऽउखा पशवः पशुशीर्षाणि योनौ तत्पशून्प्रतिष्ठापयति तस्माद्यमानाः पच्यमानाः पशवो न क्षीयन्ते योनौ ह्येनान्प्रतिष्ठापयति ॥२॥ यद्वेव पशुशीर्षाण्युपदधाति । या वै ताः श्रिय एतानि तानि पशुशीर्षाण्यथ यानि तानि कुसिन्धान्येतास्ताः पञ्च चितयस्तद्यास्ताः पञ्च चितय इमे ते लोकास्तद्ये तऽइमे लोका एषा सोखा तद्यदुखायां पशुशीर्षाण्युपदधात्येतैरेव तच्छीर्षभिरेतानि कुसिन्धानि संदधाति ॥ ३ ॥ तान्पुरस्तात्प्रतीच उपदधाति । एतद्ध यत्रैतान्प्रजापतिः पशूनालिप्सत तऽआलिप्स्यमाना उदचिक्रमिषंस्तान्प्राणेषु समगृह्णात्तान्प्राणेषु संगृह्य पुरस्तात्प्रतीच आत्मन्नधत्त ॥४॥ तद्वाऽएतत्क्रियते । यद्देवा अकुर्वन्निदं न्वस्मात्ते पशवो नोच्चिक्रमिषन्ति यत्वेतत्करोति यद्देवा अकुर्वंस्तत्करवाणीत्यथो प्राणेष्वेवैनानेतत्संगृह्य पुरस्तात्प्रतीच आत्मन्धत्ते ॥५॥ यद्वेव पशुशीर्षाण्युपदधाति । प्रजापतिर्वाऽइदमग्रऽआसीदेक एव सोऽकामयतान्नꣳ सृजेय प्रजायेयेति स प्राणेभ्य एवाधि प-

शून्निरमिमीत मनसः पुरुषं चक्षुषोऽश्वं प्राणाद्गां श्रोत्रादविं वाचोऽजं तद्यदे-
नान्प्राणेभ्योऽधि निरमिमीत तस्मादाहुः प्राणाः पशव इति मनो वै प्राणानां
प्रथमं तद्यन्मनसः पुरुषं निरमिमीत तस्मादाहुः पुरुषः प्रथमः पशूनां वीर्यवत्तम
इति मनो वै सर्वे प्राणा मनसि हि सर्वे प्राणाः प्रतिष्ठितास्तद्यन्मनसः पुरुषं
निरमिमीत तस्मादाहुः पुरुषः सर्वे पशव इति पुरुषस्य ह्येवैते सर्वे भवन्ति
॥ ६ ॥ तदेतदन्नं सृष्ट्वा । पुरस्तात्प्रत्यगात्मन्नधत्त तस्माद्यः कश्चान्नं सृजते पुर-
स्तादेवैनत्प्रत्यगात्मन्धत्ते तद्धाऽउखायामुदरं वाऽउखोदरे तदन्नं दधाति ॥ ७ ॥
अथैषु हिरण्यशकलान्प्रत्यस्यति । प्राणो वै हिरण्यमथ वाऽएतेभ्यः पशुभ्यः सं-
ज्ञप्यमानेभ्य एव प्राणा उत्क्रामन्ति तद्यद्धिरण्यशकलान्प्रत्यस्यति प्राणानेवैष्वेतद्द-
धाति ॥ ८ ॥ सप्त प्रत्यस्यति । सप्त वै शीर्षन्प्राणास्तानस्मिन्नेतद्दधात्यथ यदि पञ्च
पशवः स्युः पञ्चैव कृत्वः सप्त-सप्त प्रत्यस्येत्पञ्च वाऽएतान्पशूनुपदधाति सप्त-सप्त
वाऽएकैकस्मिन्पशौ प्राणास्तदेषु सर्वेषु प्राणान्दधाति ॥ ९ ॥ तद्धैकेऽपि । यद्येकः
पशुर्भवति पञ्चैव कृत्वः सप्त-सप्त प्रत्यस्यन्ति पञ्च वाऽएतान्पशूनुपदधाति सप्त-
सप्त वाऽएकैकस्मिन्पशौ प्राणास्तदेषु सर्वेषु प्राणान्दध्म इति न तथा कुर्यादे-
तस्मिन्वै पशौ सर्वेषां पशूनां रूपं तद्यदेतस्मिन्प्रत्यस्यति तदेवैषु सर्वेषु प्रा-
णान्दधाति ॥ १० ॥ मुखे प्रथमं प्रत्यस्यति । सम्यक्स्रवन्ति सरितो न धेना इत्यन्नं
वै धेनास्तदिदं सम्यङ्मुखमभिसंस्रवत्यन्तर्हृदा मनसा पूयमाना इत्यन्तर्वै हृद-
येन मनसा सतान्नं पूतं य ऋजुस्तस्य घृतस्य धारा अभिचाकशीमीति या एवैत-
स्मिन्नग्नावाहुतीर्होष्यन्भवति ता एतदाह हिरण्ययो वेतसो मध्येऽअग्नेरिति य
एवैष हिरण्मयः पुरुषस्तमेतदाह ॥ ११ ॥ ऋचे त्वेति । प्राणो वाऽऋक्प्राणेन
ह्यर्चति रुचे त्वेति प्राणो वै रुक्प्राणेन हि रोचतेऽथो प्राणाय हीदं सर्वं
रोचते भासे त्वेति ज्योतिषे त्वेति भास्वती हीमे ज्योतिष्मती चक्षुषीऽअभू-

दिदं विश्वस्य भुवनस्य वाजिनमग्नेर्वैश्वानरस्य चेतीहाग्निर्ज्योतिषा ज्योतिष्मान्रुक्मो वर्चसा वर्चस्वानितीह विश्वावतीभ्यां विश्वꣳ हि श्रोत्रम् ॥१२॥ अथ पुरुषशीर्षमुद्गृह्णाति । महयत्येवैनदेतत्सहस्रदा असि सहस्राय त्वेति सर्वं वै सहस्रꣳ सर्वस्य दातासि सर्वस्मै त्वेत्येतत् ॥१३॥ अथैनानुपदधाति । पुरुषं प्रथमं पुरुषं तद्वीर्येणाप्त्वा दधाति मध्ये पुरुषमभित इतरान्पशून्पुरुषं तत्पशूनां मध्यतोऽत्तारं दधाति तस्मात्पुरुष एव पशूनां मध्यतोऽत्ता ॥१४॥ अश्वं चाविं चोत्तरत । एतस्यां तद्दिश्येतौ पशू दधाति तस्मादेतस्यां दिश्येतौ पशू भूयिष्ठौ ॥१५॥ गां चाजं च दक्षिणत । एतस्यां तद्दिश्येतौ पशू दधाति तस्मादेतस्यां दिश्येतौ पशू भूयिष्ठौ ॥१६॥ पयसि पुरुषमुपदधाति । पशवो वै पयो यजमानं तत्पशुषु प्रतिष्ठापयत्यादित्यं गर्भं पयसा समङ्ग्धीत्यादित्यो वाऽएष गर्भो यत्पुरुषस्तं पयसा समङ्ग्धीत्येतत्सहस्रस्य प्रतिमां विश्वरूपमिति पुरुषो वै सहस्रस्य प्रतिमा पुरुषस्य ह्येव सहस्रं भवति परिवृङ्धि हरसा माभिमꣳस्था इति पर्येनं वृङ्ग्ध्यर्चिषा मैनꣳ हिꣳसीरित्येतच्छतायुषं कृणुहि चीयमान इति पुरुषं तत्पशूनाꣳ शतायुं करोति तस्मात्पुरुष एव पशूनाꣳ शतायुः ॥१७॥ अथोत्तरतोऽश्वम् । वातस्य जूतिमिति वातस्य वाऽएष जूतिर्यदश्वो वरुणस्य नाभिमिति वारुणो ह्यश्वोऽश्वं जज्ञानꣳ सरिरस्य मध्यऽइत्यापो वै सरिरमप्सुजा उ वाऽअश्वः शिशुं नदीनाꣳ हरिमद्रिबुध्नमिति गिरिर्वाऽअद्रिर्गिरिबुध्ना उ वाऽआपोऽग्ने मा हिꣳसीः परमे व्योमन्नितीमे वै लोकाः परमं व्योमैषु लोकेष्वेनं मा हिꣳसीरित्येतत् ॥१८॥ अथ दक्षिणतो गाम् । अजस्रमिन्दुमरुषमिति सोमो वाऽइन्दुः स ह्येष सोमोऽजस्रो यद्गौर्भुरण्युमिति भर्तारमित्येतदग्निमीडे पूर्वचित्तिं नमोभिरित्याग्नेयो वै गौः पूर्वचित्तिमिति प्राञ्चꣳ ह्यग्निमुद्धरन्ति प्राञ्चमुपचरन्ति स पर्वभिर्ऋतुशः कल्पमान इति यद्वाऽएष चीयते तदेष पर्वभिर्ऋतुशः कल्पते गां मा हिꣳसीरदितिं विराजमिति

विराड्वै गौरन्नं वै विराडन्नमु गौः ॥१९॥ अथोत्तरतोऽविम् । वरूत्रीं त्वष्टुर्वरु-
णस्य नाभिमिति वारुणी च ह्यि त्वाष्ट्री चाविरविं जज्ञानाꣳ रजसः परस्मादिति
श्रोत्रं वै परꣳ रजो दिशो वै श्रोत्रं दिशः परꣳ रजो महीꣳ साहस्रीमसुरस्य मा-
यामिति महतीꣳ साहस्रीमसुरस्य मायामित्येतदग्ने मा हिꣳसीः परमे व्योमन्नि-
तीमे वै लोकाः परमं व्योमैषु लोकेष्वेनं मा हिꣳसीरित्येतत् ॥२०॥ अथ दक्षि-
णतोऽजम् । यो ऽअग्निरग्नेरध्यजायतेत्यग्निर्वाऽएषोऽग्नेरध्यजायत शोकात्पृथिव्या ऽउ-
त वा दिवस्परीति यद्वै प्रजापतेः शोकादजायत तद्दिवश्च पृथिव्यै च शोकादजा-
यत येन प्रजा विश्वकर्मा जजानेति वाग्वाऽअजो वाचो वै प्रजा विश्वकर्मा ज-
जान तमग्ने हेडः परि ते वृणक्त्विति यथैव यजुस्तथा बन्धुः ॥२१॥ तऽएते पश-
वः । नानानोपदधाति नाना सादयति नाना सूददोहसाधिवदति नाना ह्येते
पशवः ॥२२॥ अथ पुरुषशीर्षमभिजुहोति । आहुतिर्वै यज्ञः पुरुषं तत्पशूनां य-
ज्ञियं करोति तस्मात्पुरुष एव पशूनां यजते ॥२३॥ यद्वेवैनदभिजुहोति । शीर्ष-
ण्स्तद्वीर्यं दधात्याज्येन जुहोति वज्रो वाऽआज्यं वीर्यं वै वज्रो वीर्यमेवास्मिन्नेतद्द-
धाति स्वाहाकारेण वृषा वै स्वाहाकारो वीर्यं वै वृषा वीर्यमेवास्मिन्नेतद्दधाति
त्रिष्टुभा वज्रो वै त्रिष्टुब्वीर्यं वै वज्रो वीर्यं त्रिष्टुब्वीर्येणैवास्मिन्नेतद्वीर्यं दधाति
॥२४॥ स वाऽअर्धर्चमनुद्रुत्य स्वाहाकरोति । अस्थि वाऽऋगिदं तच्छीर्षकपालं
विहाप्य यदिदमन्तरतः शीर्ष्णो वीर्यं तदस्मिन्दधाति ॥२५॥ अथोत्तरमर्धर्चमनुद्रुत्य
स्वाहाकरोति । इदं तच्छीर्षकपालꣳ संधाय यदिदमुपरिष्टाच्छीर्ष्णो वीर्यं तदस्मिन्द-
धाति ॥२६॥ चित्रं देवानामुदगादनीकमिति । असौ वाऽआदित्य एष पुरुषस्त-
देतच्चित्रं देवानामुदेत्यनीकं चक्षुर्मित्रस्य वरुणस्याग्नेरित्युभयेषाꣳ ह्येतद्देवमनुष्या-
णां चक्षुराप्रा द्यावापृथिवीऽअन्तरिक्षमित्युद्यन्वाऽएष इमांल्लोकानापूरयति सूर्य
आत्मा जगतस्तस्थुषश्चेत्येष ह्यस्य सर्वस्यात्मा यच्च जगद्यच्च तिष्ठति ॥२७॥ अथो-

त्सर्गैरुपतिष्ठत । ऽएतद्ध यत्रैतान्प्रजापतिः पशूनालिप्सत तऽआलिप्स्यमाना अ-
शोचंस्तेषामेतैरुत्सर्गैः शुचं पाप्मानमपाहंस्तथैवैषामयमेतदेतैरुत्सर्गैः शुचं पाप्मा-
नमपहन्ति ॥२८॥ तद्धैके । यं-यमेव पशुमुपदधति तस्य-तस्य शुचमुत्सृजन्ति ने-
च्छुचं पाप्मानमभ्युपदधामहाऽइति ते ह ते शुचं पाप्मानमभ्युपदधति याꣳ हि
पूर्वस्य शुचमुत्सृजन्ति तामुत्तरेण सहोपदधति ॥२९॥ विपरिक्राममु हैकऽउप-
तिष्ठन्ते । ऊर्ध्वाꣳ शुचमुत्सृजाम इति ते ह ते शुचं पाप्मानमनूद्यन्त्यूर्ध्वा ह्येतेन
कर्मणेत्यूर्ध्वामु शुचमुत्सृजन्ति ॥३०॥ बाह्येनैवाग्निमुत्सृजेत् । इमे वै लोका एषो
ऽग्निरेभ्यस्तल्लोकेभ्यो बहिर्धा शुचं दधाति बहिर्वेदीयं वै वेदिरस्यै तद्बहिर्धा शुचं
दधात्युदङ् तिष्ठन्नेतस्याꣳ ह दिश्येते पशवस्तद्यत्रैते पशवस्तदेवैष्वेतच्छुचं दधाति
॥३१॥ पुरुषस्य प्रथममुत्सृजति । तꣳ हि प्रथममुपदधातीमं मा हिꣳसीर्द्विपादं
पशुमिति द्विपाद्वाऽएष पशुर्यत्पुरुषस्तं मा हिꣳसीरित्येतत्सहस्राक्षो मेधाय ची-
यमान इति हिरण्यशकलैर्वाऽएष सहस्राक्षो मेधायेत्यन्नायेत्येतन्मयुं पशुं मेधमग्ने
जुषस्वेति किम्पुरुषो वै मयुः किम्पुरुषमग्ने जुषस्वेत्येतत्तेन चिन्वानस्तन्वो नि-
षीदेत्यात्मा वै तनूस्तेन चिन्वान आत्मानꣳ संस्कुरुष्वेत्येतन्मयुं ते शुगृच्छतु यं
द्विष्मस्तं ते शुगृच्छत्विति तन्मयौ च शुचं दधाति यं च द्वेष्टि तस्मिंश्च ॥३२॥ अ-
थाश्वस्य । इमं मा हिꣳसीरेकशफं पशुमित्येकशफो वाऽएष पशुर्यदश्वस्तं मा
हिꣳसीरित्येतत्कनिक्रदं वाजिनं वाजिनेष्विति कनिक्रदो वाऽएष वाज्यु वाजि-
नेषु गौरमारण्यमनु ते दिशामीति तदस्मै गौरमारण्यमनुदिशति तेन चिन्वान-
स्तन्वो निषीदेति तेन चिन्वान आत्मानꣳ संस्कुरुष्वेत्येतद्गौरं ते शुगृच्छतु यं द्वि-
ष्मस्तं ते शुगृच्छत्विति तद्गौरे च शुचं दधाति यं च द्वेष्टि तस्मिंश्च ॥३३॥ अथ
गोः । इमꣳ साहस्रꣳ शतधारमुत्समिति साहस्रो वाऽएष शतधार उत्सो यद्गौ-
र्व्यच्यमानꣳ सरिरस्य मध्यऽइतीमे वै लोकाः सरिरमुपजीव्यमानमेषु लोकेष्वि-

त्येतद्घृतं दुहानामदितिं जनायेति घृतं वा एषादितिर्जनाय दुहेऽग्ने मा हिꣳसीः
परमे व्योमन्नितीमे वै लोकाः परमं व्योमैषु लोकेष्वेनं मा हिꣳसीरित्येतद्गवय-
मारण्यमनु ते दिशामीति तदस्मै गवयमारण्यमनुदिशति तेन चिन्वानस्तन्वो
निषीदेति तेन चिन्वान आत्मानꣳ संस्कुरुष्वेत्येतद्गवयं ते शुगृच्छतु यं द्विष्मस्तं
ते शुगृच्छत्विति तद्गवये च शुचं दधाति यं च द्वेष्टि तस्मिंश्च ॥३४॥ अथावेः । इ-
ममूर्णायुमित्यूर्णावलमित्येतद्वरुणस्य नाभिमिति वारुणो ह्यविस्त्वचं पशूनां द्वि-
पदां चतुष्पदामित्युभयेषाꣳ ह्येष पशूनां त्वग्द्विपदां च चतुष्पदां च त्वष्टुः प्रजानां
प्रथमं जनित्रमित्येतद्ध त्वष्टा प्रथमꣳ रूपं विचकाराग्ने मा हिꣳसीः परमे व्योमन्नि-
तीमे वै लोकाः परमं व्योमैषु लोकेष्वेनं मा हिꣳसीरित्येतदुष्ट्रमारण्यमनु ते दि-
शामीति तदस्मा उष्ट्रमारण्यमनुदिशति तेन चिन्वानस्तन्वो निषीदेति तेन चि-
न्वान आत्मानꣳ संस्कुरुष्वेत्येतदुष्ट्रं ते शुगृच्छतु यं द्विष्मस्तं ते शुगृच्छत्विति तदुष्ट्रे
च शुचं दधाति यं च द्वेष्टि तस्मिंश्च ॥३५॥ अथाजस्य । अजो ह्यग्नेरजनिष्ट शो-
कादिति यद्वै प्रजापतेः शोकादजायत तदग्नेः शोकादजायत सोऽअपश्यज्जनिता-
रमग्रऽइति प्रजापतिर्वै जनिता सोऽपश्यत्प्रजापतिमग्रऽइत्येतत्तेन देवा देवता-
मग्रऽआयन्निति वाग्वाऽअजो वाचो वै देवा देवतामग्रमायंस्तेन रोहमायन्नुप
मेध्यास इति स्वर्गो वै लोको रोहस्तेन स्वर्गं लोकमायन्नुप मेध्यास इत्येतच्छ-
रभमारण्यमनु ते दिशामीति तदस्मै शरभमारण्यमनुदिशति तेन चिन्वानस्तन्वो
निषीदेति तेन चिन्वान आत्मानꣳ संस्कुरुष्वेत्येतच्छरभं ते शुगृच्छतु यं द्विष्मस्तं
ते शुगृच्छत्विति तच्छरभे च शुचं दधाति यं च द्वेष्टि तस्मिंश्च ॥३६॥ तदाहुः । यां
वै तत्प्रजापतिरेतेषां पशूनाꣳ शुचं पाप्मानमपाहंस्त एते पञ्च पशवोऽभवंस्त
एतऽउत्क्रान्तमेधा अमेध्या अयज्ञियास्तेषां ब्राह्मणो नाश्नीयात्तानेतस्यां दिशि द-
धाति तस्मादेतस्यां दिशि पर्जन्यो न वर्षुको यत्रैते भवन्ति ॥३७॥ प्रत्येत्याग्निमु-

पतिष्ठते । एतद्वा ऽ एतद्यथायथं करोति यदग्नौ सामिचिते बर्हिर्वेद्येति तस्मा ऽ एवैतन्निह्नुते ऽ र्हि७सायाऽअग्नेय्याग्नय ऽ एवैतन्निह्नुते गायत्र्या गायत्र्यो ऽ ग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवास्मा ऽ एतन्निह्नुते ऽ निरुक्तया सर्वं वा ऽ अनिरुक्त७ सर्वेणैवास्मा ऽ एतन्निह्नुते यविष्ठवत्यैतद्वास्य प्रियं धाम यद्यविष्ठ इति यद्वि जात इद७ सर्वमयुवत तस्माद्यविष्ठः ॥३८॥ त्वं यविष्ठ दाशुष इति । यजमानो वै दाश्वान्नॄं: पाहीति मनुष्या वै नरः शृणुधी गिर इति शृणु न इमा७ स्तुतिमित्येतद्रक्षा तोकमुत त्मनेति प्रजा वै तोक७ रक्ष प्रजां चात्मानं चेत्येतत् ॥३९॥ आहृत्याग्निं जघनेन स्वयमातृण्णां परीत्यापस्या उपदधाति । आप एता यदपस्या अथ वा ऽ एतेभ्यः पशुभ्य आप उत्क्रान्ता भवन्ति तद्यदपस्या उपदधात्येष्वेवैतत्पशुष्वपो दधात्यनन्तर्हिताः पशुभ्य उपदधात्यनन्तर्हितास्तत्पशुभ्यो ऽ पो दधाति पञ्च-पञ्चोपदधाति पञ्च ह्येते पशवः सर्वत उपदधाति सर्वत एवैष्वेतदपो दधाति ॥४०॥ तद्याः पञ्चदश पूर्वाः । ता अपस्या वज्रो वा ऽ आपो वज्रः पञ्चदशस्तस्माद्येनापो यन्त्यपैव तत्र पाप्मानं घ्नन्ति वज्रो हैव तस्यार्धस्य पाप्मानमपहन्ति तस्माद्वर्षत्यप्रावृतो व्रजेदयं मे वज्रः पाप्मानमपहनदिति ॥४१॥ अथ याः पञ्चोत्तराः । ताश्छन्दस्याः पशवो वै छन्दा७स्यन्नं पशवो ऽ न्नमु पशोर्मा७समथ वा ऽ एतेभ्यः पशुभ्यो मा७सान्युत्क्रान्तानि भवन्ति तद्यच्छन्दस्या उपदधात्येष्वेवैतत्पशुषु मा७सानि दधात्यनन्तर्हिताः पशुभ्य उपदधात्यनन्तर्हितानि तत्पशुभ्यो मा७सानि दधात्यन्तरा अपस्या भवन्ति बाह्याश्छन्दस्या अन्तरा ह्यापो बाह्यानि मा७सानि ॥४२॥ तदाहुः । यदिमा आप एतानि मा७सान्यथ क्व त्वक्क्व लोमेत्यन्नं वाव पशोस्त्वगन्नं लोम तद्यच्छन्दस्या उपदधाति सैव पशोस्त्वक्तल्लोमाथो यान्यमून्युखायामजलोमानि तानि लोमानि बाह्योखा भवत्यन्तराणि पशुशीर्षाणि बाह्यानि हि लोमान्यन्तर आत्मा यदीतरेण यदीतरेणेति ह स्माह शाण्डिल्यः सर्वानेव वयं कृ-

त्स्नान्पशूत्संस्कुर्म इति ॥४३॥ यद्वेवापस्या उपदधाति । प्रजापतेर्विस्रस्तादाप आ-
यंस्तास्वितास्वविशद्यदविशत्तस्माद्विꣳशतिस्ता अस्याङ्गुलिभ्यो ऽध्यस्रवन्नन्तो वा
ऽअङ्गुलयो ऽन्तत एवास्मात्ता आप आयन् ॥४४॥ स यः स प्रजापतिर्व्यस्रꣳसत ।
अयमेव स यो ऽयमग्निश्चीयते ऽथ या अस्मात्ता आप आयन्नेतास्ता अपस्यास्तद्यदे-
ता उपदधाति या एवास्मात्ता आप आयंस्ता अस्मिन्नेतत्प्रतिदधाति तस्मादेता
अत्रोपदधाति ॥४५॥ अपां त्वेमन्त्सादयामीति । वायुर्वा ऽअपामेम यदा ह्येवैष इ-
तश्चेतश्च वात्यथापो यन्ति वायौ ताꣳ सादयति ॥४६॥ अपां त्वोद्मन्त्सादयामीति
। ओषधयो वा ऽअपामोद्म यत्र ह्याप उन्दन्त्यस्तिष्ठन्ति तदोषधयो जायन्त ऽओ-
षधिषु ताꣳ सादयति ॥४७॥ अपां त्वा भस्मन्त्सादयामीति । अभ्रं वा ऽअपां भस्मा-
भ्रे ताꣳ सादयति ॥४८॥ अपां त्वा ज्योतिषि सादयामीति । विद्युद्वा ऽअपां ज्यो-
तिर्विद्युति ताꣳ सादयति ॥४९॥ अपां त्वायने सादयामीति । इयं वा ऽअपामय-
नमस्याꣳ ह्यापो यन्त्यस्यां ताꣳ सादयति तद्या अस्यैतेभ्यो रूपेभ्य आप आयंस्ता
अस्मिन्नेतत्प्रतिदधात्यथो ऽएतान्येवास्मिन्नेतद्रूपाणि दधाति ॥५०॥ अर्णवे त्वा स-
दने सादयामीति । प्राणो वा ऽअर्णवः प्राणे ताꣳ सादयति ॥५१॥ समुद्रे त्वा स-
दने सादयामीति । मनो वै समुद्रो मनसो वै समुद्राद्वाचाभ्र्या देवास्त्रयीं विद्यां
निरखनंस्तदेष श्लोको ऽभ्युक्तो ये समुद्रान्निरखनन्देवास्तीक्ष्णाभिरभ्रिभिः सुदेवो
ऽअद्य तद्विद्याद्यत्र निर्वपणं दधुरिति मनः समुद्रो वाक्तीक्ष्णाभ्रिस्त्रयी विद्या नि-
र्वपणमेतदेष श्लोको ऽभ्युक्तो मनसि ताꣳ सादयति ॥५२॥ सरिरे त्वा सदने सा-
दयामीति । वाग्वै सरिरं वाचि ताꣳ सादयति ॥५३॥ अपां त्वा क्षये सादयामी-
ति । चक्षुर्वा ऽअपां क्षयस्तत्र हि सर्वदैवापः क्षियन्ति चक्षुषि ताꣳ सादयति
॥५४॥ अपां त्वा सधिषि सादयामीति । श्रोत्रं वा ऽअपाꣳ सधिः श्रोत्रे ताꣳ सा-
दयति तद्या अस्यैतेभ्यो रूपेभ्य आप आयंस्ता अस्मिन्नेतत्प्रतिदधात्यथो ऽएतान्ये-

वास्मिन्नेतद्रूपाणि दधाति ॥५५॥ अपां त्वा सदने सादयामीति । द्यौर्वाऽअपाꣳ सदनं दिवि ह्यापः सन्ना दिवि ताꣳ सादयति ॥५६॥ अपां त्वा सधस्थे सादयामीति अन्तरिक्षं वा अपाꣳ सधस्थमन्तरिक्षे ताꣳ सादयति ॥५७॥ अपां त्वा योनौ सादयामीति । समुद्रो वाऽअपां योनिः समुद्रे ताꣳ सादयति ॥५८॥ अपां त्वा पुरीषे सादयामीति । सिकता वाऽअपां पुरीषꣳ सिकतासु ताꣳ सादयति ॥५९॥ अपां त्वा पाथसि सादयामीति । अन्नं वाऽअपां पाथोऽन्ने ताꣳ सादयति तद्या अस्यैतेभ्यो रूपेभ्य आप आयंस्ता अस्मिन्नेतत्प्रतिदधात्यथोऽएतान्येवास्मिन्नेतद्रूपाणि दधाति ॥६०॥ गायत्रेण त्वा छन्दसा सादयामि । त्रैष्टुभेन त्वा छन्दसा सादयामि जागतेन त्वा छन्दसा सादयाम्यानुष्टुभेन त्वा छन्दसा सादयामि पाङ्क्तेन त्वा छन्दसा सादयामीति तद्या अस्यैतेभ्यश्छन्दोभ्य आप आयंस्ता अस्मिन्नेतत्प्रतिदधात्यथोऽएतान्येवास्मिन्नेतच्छन्दाꣳसि दधाति ॥६१॥ ता एता अङ्गुलयः । ताः सर्वत उपदधाति सर्वतो ह्येमा अङ्गुलयोऽन्तेषूपदधात्यन्तेषु ह्येमा अङ्गुलयश्चतुर्धोपदधाति चतुर्धा ह्येमा अङ्गुलयः पञ्च-पञ्चोपदधाति पञ्च-पञ्च ह्येमा अङ्गुलयो नानोपदधाति नाना ह्येमा अङ्गुलयः सकृत्सकृत्सादयति समानं तत्करोति तस्मात्समानसम्बन्धनाः ॥६२॥ ब्राह्मणम् ॥ २ [५. २.] ॥ चतुर्थः प्रपाठकः ॥ कण्डिकासंख्या१००॥ पञ्चमोऽध्यायः [४८.] ॥ ॥ अस्मिन्काण्डे कण्डिकासंख्या३१८ ॥ ॥

इति माध्यन्दिनीये शतपथब्राह्मणे हस्तिघटनाम सप्तमं काण्डं समाप्तम् ॥७॥

EXTRACTS FROM THE COMMENTARY OF SÂYAṆÂCÂRYA.

उखासम्भरणाद्यं तु भस्मावहरणान्तकम् । चित्यस्याग्नेर्ब्राह्ममङ्गं प्रोक्तं षष्ठेऽथ सप्तमे ॥ इष्टकाचयनात्पूर्वमग्निस्थानस्य संस्क्रिया । कर्तव्या यासन (?) सेह विस्पष्टमीर्यते ॥ ॥ अग्निं चिनुत इत्यनारभ्य विहितस्याग्निचयनस्याथा नोऽग्निमग्निष्टोमेनानुयजतीत्यादिवाक्येन सोमयागशेषत्वावगतेः साग्निकस्य सम्बन्धिनां गार्हपत्यादिधिष्ण्यानां सर्वेषामेव चयनं सं-

स्कुर्यवान् (AB. सस्कर्तव्यवात्?)। तत्र धिष्ण्येषु गार्हपत्याख्यस्य प्राथम्यात्तत्र प्रथमं चयनं विधित्सुस्ततः प्राच्यान्भूसंस्कारान्विधास्यन् (°च्याभू° AB.) तत्स्थानस्य समन्त्रकं व्युद्गहनं विधत्ते गार्हपत्यं चेष्यन्निति । गृहपतिना संयुक्तोऽग्निर्गार्हपत्यः इह तु तस्याग्नेराधारभूतो भूप्रदेशः आधाराधेययोरभेदोपचारेणाधेयवाचिना शब्देनोच्यते संस्कर्तव्यत्वप्रतिपत्तये। एतत्स्थानं गार्हपत्यस्याग्नेरधिकरणमतश्च चयनेन संस्कर्तव्यम् । यतोऽस्मिन्स्थाने चयनं कतव्यमतो हेतोरेतत्पलाशवृक्षस्य शाखया व्युद्गहति लोष्टतृणादि संमार्जनेनापसारयति । गार्हपत्यस्याग्नेर्यत्स्थानं चयने सस्कराति मयात्र सोमेन यष्टव्यमिति तत्तेन व्युद्गहनेन अवस्यति निश्चिनोत्येव यद्वा गार्हपत्यस्य यच्चयनं तदेव देवयजनाध्यवसानम्   तथा च ये केचिदग्निचितः अग्निं चितवन्तो यजमानाः तेऽस्यामेव पृथिव्यामवसिताः अवसानं प्राप्तास्तत्रैव प्रवर्तन्ते तत्तथा सति पलाशशाखया यत्स्थानं व्युद्गहतीति यत् तत्तेन अवसितानेव तत्र स्थितान्प्राक्तनान्यजमानान्व्युद्गहति विविधं निरस्यति   व्युद्गहनं कुर्वतो यजमानस्याभिप्रायमाह नेदिति अग्निचयनमनुष्ठाय तत्रैवावस्थितान्यजमानानत्रैवाध्यवस्यामि तेषामुपरि अध्यवसानमवस्थानं न करिष्यामि ॥१॥ अवस्यत्यस्मिन्नित्यवसानं स्थानम् ॥३॥ यमः पितॄणां राजेति श्रुतिः । सविदानः संजानानः ऐकमत्यं प्राप्तः सन् ॥४॥ अवसितानवसाय स्थितान् । उदस्यति उत्क्षिपति परित्यजति ॥५॥ क्षारमृत्तिका ऊषाः । ऊषरदेशस्य पशुभिरुपजीव्यत्वाद्बाणां पशुत्वव्यपदेशः ॥६॥ उल्वं गर्भवेष्टनम् ॥७॥ विक्रियते उत्पाद्यते ॥१०॥ यातयाम गतसारम् ॥११॥ एनं गार्हपत्यप्रदेशम् । परिश्रयन्त्येभिरिति परिश्रितः शर्करापर्यायाः सूक्ष्मपाषाणाः तैः परिश्रयन्ति परिवेष्टयन्ति ॥१२॥ दक्षिणावृत् प्रदक्षिणमावृत् आवर्तनं यथा भवति तथा । खाते देशे परिश्रयणं विधाय स्तौति खातेनेति गार्हपत्यायतनस्य परितः खातेन प्रदेशेन परिश्रिद्भिः परिश्रयेत् ॥१३॥ ऊर्ध्व एव विजते व्याप्नोति न तु तिर्यङ् कृत्स्नां भूमिमावृणोति विजतिव्याप्तिकर्मा । युगपदेवेदं सर्वं जगत्समुद्रो निर्मज्ज्यात् (!) निःशेषेण प्रक्षालयेत् स च समुद्रे प्रतिलीयेत । सादनं सूददोहसाधिवदनं चेष्टकाधर्मणा प्रसक्तमत्र निषेधति । उपधानकाले मन्त्रेणोपधाय ततस्तया [देवतये]त्युपहितस्य सादनम् ता अस्य सूददोहस इति मन्त्रः सूददोहाः तेनाधिवदनमुपरिष्टाद्वदनं सर्वेष्टकासाधारणो मन्त्रः तदुभयं परिश्रिदुपधाने न कर्तव्यम् । असन्ना ह्यापः क्वचित्क्वचित्सीदन्ति प्रवहणशीलत्वात् ॥१४॥ प्राण एव सूददोहाः   अस्थिसंस्तुतासु परिश्रित्सु नासौ कर्तव्यः   न खल्वस्थिषु प्राणोऽस्ति नाडीष्वेव हि तस्य संचारः । चित स्थेत्येकेनैव यजुषा बह्वनां परिश्रितां स्थापनम् चोदितत्वात्परिश्रितामिष्टकात्वम् अत एवाहापस्तम्बः स्त्रावो (!) सप्त स्वयमातृण्णाः शर्करा हिरण्येष्टकाः पञ्च घृतेष्टका दूर्वास्तम्बः (पू°) कूर्म उलूखलमुसलं शूर्पमश्मानः पशुशिरांसि सर्पशिरश्चामृन्मयीरिष्टका इति । आप इति यत् एकरूपा एव हि लक्ष्यन्ते अत एकेन यजुषा परिश्रिद्रूपाणामपामुपधानं युक्तम् ॥१५॥ परिश्रितः शर्करा योनिः गर्भनिर्गमणमार्गः ॥१६॥ एनं व्युद्गहनादिभिः संस्कृतं गार्हपत्यदेशमिष्टकाभिश्चिनोति ॥१७॥ गार्हपत्यायतनस्य मध्ये प्रथमं चतस्रः प्रागायता इष्टका उपदध्यात् ततः पश्चाद्भागे तिर्यगायते द्वे तथा चतसृणां पुरस्तादपि । स आत्मा मध्यदेह इत्यर्थः त्वगसृङ्मांसास्थिभेदेन मनोबुद्ध्यहङ्कारचित्तैर्वा जाग्रदवस्थाचतुष्टयेन वा आत्मनश्चातुर्विध्यम् । सक्थिः श्रोणिः तेन च पादो लक्ष्यते ॥१८॥

गर्भाशयेऽवस्थितं रेतो गर्भः यादृशाकारं विक्रियते विशिष्टावयवं क्रियते जननसमयेऽपि तादृगाकारविशिष्टमेवापत्यं जायते । तत् तत्र एतमग्निमत्र गार्हपत्यायतने यद्यस्मात्पक्षपुच्छवन्तं विकरोति सूक्ष्मरूपेण निर्मिमीते तस्मादेषोऽमुत्राहवनीयस्थाने पक्षपुच्छवाञ्जायते जायमान उपलभ्यते ॥ १९ ॥ एनमनभिव्यक्तरूपमग्निममुत्राहवनीयस्थाने अभिव्यक्तावयवं पश्यन्ति ॥ २० ॥ आत्मसंस्तुता इष्टकाः पूर्वमुपदध्यात् । उत्तरार्ध्यामुत्तरार्धे भवामुत्तमभागेऽवस्थिताम् । तथैव खल्वस्य दक्षिणतोऽवस्थितस्याध्वर्योरेषो अग्निः अभ्यात्ममात्माभिमुखमेव चितो भवति ॥ २१ ॥ प्रावणेभिरिति मन्त्रगतः प्रशब्दः प्रायणरूपं प्रायणम्य प्रगमनस्य प्रारम्भस्य रूपम् गार्हपत्यविविश्वाग्नेरग्निचयनस्य (? °चितिश्चा° ?) प्रायणं प्रारम्भः अतः प्रशब्दोपेतो (°शाब्दाप्रवणे) मन्त्रोऽत्र योग्यः ॥ २५ ॥ नाना पृथगेकैकेष्टकामुपदध्यात् ततो यऽआत्मन् आत्मस्थिताः नानाविधाः कामाः तान्सर्वानसंकीर्णं (°न् अत्रकी° AB.) पृथगेव स्थापयति । तया देवतयेति यत्सादनं तच्चतसृणामिष्टकानां सम्भूय सकृदेव कर्तव्यम् । संतनोति संयोजयति ॥ २६ ॥ मध्येष्टकोपधानानन्तर्यमथशब्दार्थः । गार्हपत्यस्थानस्य पश्चात्परिक्रम्य उत्तरस्यां दिशि दक्षिणामुखः आसीनः सन्नपरयोः पश्चात्ययोरिष्टकयोर्दक्षिणां दक्षिणभागस्थामिष्टकां प्रथममुपदधाति इडामग्न इति मन्त्रेण ॥ २७ ॥ सनातन इति ऋतव्यपदव्याख्यानमृतात्मकस्य कालस्य सर्वदा विद्यमानत्वात्तत्र भवोऽग्निः सनातनो नित्यः । यजुर्मन्त्रो यथैव प्रतिपादयति तथैव तस्य बन्धुः वध्नीयं (? बन्धनीयं ?) व्याख्यातः स्पष्टार्थतया न पृथग्व्याख्यायते ॥ २८ ॥ अस्याग्नेः सक्थ्यौ श्रोण्यौ । इमे मनुष्यसम्बन्धिन्यौ । नाना पृथगसंश्लिष्टे । अग्रप्रदेशेन तयोः परस्परसंसर्गं विधत्ते अग्राभ्यामिति आत्मसमीपऽअग्रदेशः तत्रैते संस्पृष्टे भवतः ॥ २९ ॥ येन मार्गेण पश्चात्ययोरुपधाने परिक्रमणं कृतं तेनैव पुनर्दक्षिणतः परिक्रम्य ॥ ३० ॥ दक्षिणावृत्प्रादक्षिण्येन वर्तनम् ॥ ३१ ॥ पञ्च कृत्व इति मध्यऽउपधेयस्येष्टकाचतुष्टयस्यैकं सादनमन्यासां चत्वारीति पञ्च भवन्ति । पञ्चचितिकोऽग्निरिति पञ्च चितयः प्रस्तारा यस्मिन्स तथोक्तः । चित्यस्याग्नेः चितिपुरीषाणि त्रयोदश भवन्ति आदितश्चतस्रश्चितयः पुरीषनिवपनीतः (!) स्तोमभागीता (!) पञ्चमी चितिः तदनन्तरभाव्येकं पुरीषं नाकसत्प्रभृतिपुरीषनिवपनी ता (!) षष्ठी चितिरित्यादिना ॥ ३२ ॥ अवशिष्टे गार्हपत्यचितिस्थाने लोकम्पृणाख्यामिष्टकामुपदधाति । see ८. ७. २. १ । सकृदुच्चारितेन लोकं पृणेति मन्त्रेण तिसृणां युगपदुपधानं विधत्ते तिस्रः पूर्वा इति । अथ तेनैव सकृदुच्चारितेन मन्त्रेण दशानामिष्टकानामुपधानं विधत्ते दशोत्तरा इति उत्तरा उपरिभाविनीः । त्रेधाविभागपक्षमाह द्वे वाग्रऽइति तं लौकिकेन निदर्शनेनोपपादयति (निदेश° Codd.) एवं हीति यत्र हि काष्ठादिभिश्चितिर्निर्मीयते तत्र एवमेव हि चितिं चिन्वन्ति मूलाग्रभागयोर्द्वे काष्ठे प्रथमं तिर्यक्स्थापयन्ति पश्चात्तयोरुपर्युपर्यन्यानि सर्वाणि प्रागग्राण्यवशिष्टानि स्थापयन्ति उपरिष्टाच्चलनाभावायैकं (? वार्व्वेकं Codd.) पुनः स्थापयन्ति ॥ ३३ ॥ गार्हपत्यचितेः परितश्रिताः शर्करा अप्येकविंशतिसंख्याका एव भवन्ति । अयमेव चीयमानोऽग्निरमुतोऽमुत्र परिश्रित्स्वेकविंशः एकविंशतिसंख्यापूरकः अधिः सप्तम्यर्थानुवादी । यस्मादेताः परिश्रित इष्टकाश्च एवं प्रत्येकमेकविंशतिसंख्याका उपदधाति एतेन एतावेव अग्न्यादित्यौ अन्योऽन्यस्मिन्प्रतिष्ठापयति । इमावग्न्यादित्यावुभावप्यत्र चित्याग्नौ संनिहितौ भवतः तत्राहवनीयचितिरूपेणादित्यो वर्तते गार्हपत्यचितिरूपेणाग्निः ॥ ३५ ॥ इष्टकासंधिषु छिद्रपूरणार्थाः

पांसवः पुरीषम् तत्तासामुपरि प्रक्षिपति । उत्तरवेद्यर्थानां पांसूनां निर्हरणस्थानं चात्वालः उत्त-
रवेद्यंसदेशः तस्य या वेला समीपं ततः पुरीषमाहरेत् । आहवनीयाग्याधारोत्तरवेदिहेतुत्वाच्चा-
त्वालस्याग्न्यात्मकता तथैव खलु सति अस्य चित्याग्नेरेतत्पुरीषमप्याग्नेयमग्निसम्बन्धमेव भवति
॥ इत्थं पुरीषान्ता गार्हपत्यचितिरुक्ता अथ तस्याः प्रान्तेषु साम्यमाह समम्बिला समं समा-
नं बाह्याभ्यन्तरभावेन न्यूनाधिकरहितं विलं परितः प्रान्तदेशो यस्याः सा ॥३६॥ चतुर-
रत्निर्व्यामः तिर्यक्प्रसारितौ बाहू यावत्परिमाणौ भवतः तस्य परिमाणस्य माते (!) ऽस्मि-
न्बाहुद्वयमिति व्युत्पत्त्या व्यायाम इति संज्ञा स एवात्र वर्णलोपेन व्याम इत्युच्यते ॥३७॥
गार्हपत्यचितिरूपस्याग्नेरुख्याग्नेश्च (च)तुर्भिर्मन्त्रैः संसर्जनं विधत्ते अथैनाविति चित्योख्यरूपावग्नी
संगमयति इष्टकाभिश्चिते गार्हपत्यधिहत्ये (?) उख्यमग्निं स्थापयति । आभ्यामग्निभ्यां कर्तरि
तृतीया अग्निद्वयकर्तृकं संज्ञानं परस्परैकमत्यम् ॥३८॥ The explanation of k. ३९-४४ is
wanting in AB. । तत्पय उखाया मध्ये आसिञ्चति यथा तत्पयः प्रति उपधानसमये पुरु-
षशीर्षमुपदध्यात्तथेत्यर्थः ॥ ४४ ॥ १ ॥ १ ॥

उख्यरूपेण संस्कृतस्याग्नेर्विराड्रूपप्रजापत्यात्मकतां वक्ष्यन् तस्य प्रजापतिसंस्कृतिवक्तु-
कामस्तच्छरीरविश्लेपं प्रतिपादयति प्रजापतिरिति आन्तः सन्विस्रस्तावयवोऽभवत् । यच्चक्षुर-
ध्यशेत चक्षुरधि चक्षुषोर्मध्ये चक्षुषो ज्योतिरवस्थितमभवत् तस्मात् ज्योतिषोऽस्य प्रजापतेरन्नं
स्रुतमभवत् । प्रतिष्ठास्पदम् ॥१॥ इतोऽस्मात्प्रजापतेः । स च संस्कृतो नोऽस्माकं पुनः
प्रतिष्ठा आश्रयो भविष्यति ॥२॥ यत्खलु संवत्सरस्य मध्ये व्रीहियवादिरूपमन्नं पच्यते त-
दात्मना प्रजापतिविस्रस्तमन्नं परिणतमभवत् ॥५॥ प्रावृञ्जन् प्रतपनेन समस्कुर्वन् एनं प्र-
वृक्तं प्रजापतिं योऽग्निरारोहति संक्रामति तदात्मना प्राङ्गनिष्क्रान्तः प्राण एव एनं प्रजापतिं
पुनरापद्यत प्राप्नोत् । उदश्रयन् उच्छ्रितमकुर्वन् ॥६॥ प्रतिष्ठाशब्देन पादाऽउच्येते । पार्थिवो
ऽग्निस्तस्यावाचीनः प्राणः येन मूत्रपुरीषादिकमुत्सृज्यते । आत्मा मध्यदेहः । यस्मात्तस्माच्च-
क्षुषोऽन्नमस्रवत्तस्मात्कारणात्तच्चक्षूरूपश्चन्द्रमाः अतिशयेन मीलितः सूर्यादल्पप्रकाशो दृश्यते
॥७॥ एषा प्रजापत्यात्मिका । न केवलमतीतकालऽएव प्रजापतेः प्रतिष्ठारूपता वर्तमानभ-
विष्यत्कालयोरपीत्याह सैवेयमिति ॥८॥ योऽयमग्निः गार्हपत्यचितिरूपोऽग्निः । तयोः ता-
दात्म्योपपत्तये प्रजापतेरवस्थाविशेषं तत्रापि दर्शयति तद्यदेषेति तत्तत्र आहवनीये ॥९॥
संस्कारसाम्यमाह तामुखामग्नौ आहवनीये प्रवृणक्ति प्रतपति । एनामुखां प्रतप्तामग्निरारोहति
आक्रमते अन्तर्जायतऽइति यत् । यजमानः सौवर्णं रुक्मं कण्ठे सूत्रेण बद्ध्वा तस्योपरि तमु-
ख्यं बिभर्तीति यत् । उखायामग्न्यारोहणानन्तरं तस्मिन्याः समिध आदधाति ॥१०॥ समिधा-
माधानं तस्मिन्संवत्सरे प्रत्यहं कालत्रयेऽपि कर्तव्यम् । रुक्मप्रतिमोचनोख्यभरणादीनां सं-
वत्सरकालव्याप्तिमाह तान्येतानीति तानि रुक्मप्रतिमोचनोख्यभरणसामिदाधानविष्णुक्रम-
णादीनि पूर्वोक्तानि एतानि प्राणवीर्यान्नरूपेणानुक्रान्तानीत्यर्थः (!) । अत्र प्रतिपुस्तके पत्रकृषं
(°त्रद्वयं A.) गतम् (A. B.) । the explanation of क° ११-१९. is wanting ॥ तयोरेकाम-
नुष्टुभं बुद्ध्वा विविच्याहवनीयस्थानं (विचिव्या°) हरन्ति अनुसंधानाय हरेयुः । इहास्मिन्गार्ह-
पत्यस्थाने ॥१९॥ आहवनीयगार्हपत्ययोर्मध्ये यदस्ति स्थानमाग्नीध्रीयाख्यमेतदेव सा यजुर्द्व-
यात्मिकानुष्टुप् । तनीयः तनुतरोऽल्पपरिमाण एव ॥२०॥ एष उख्योऽग्निः ॥२१॥ सैषा गार्ह-

पत्यचितिर्बृहत्येव सम्पद्यतऽइति शेषः । न चैकस्मादक्षरादविद्यमानाच्छन्दो व्येति विगच्छति अन्यथाभवति न च द्वाभ्यामक्षराभ्याम् एकेन द्वाभ्यां वा न्यूनं छन्दो न वैकल्यं प्राप्नोतीत्यर्थः तथा चैषां पञ्चत्रिंशत्संख्या[याम]पि बृहत्येवेति तत्सम्पत्ति[र]विरुद्धा । यथैव लोकवत्तथैवात्रापि योनिरूपायां गार्हपत्यचितौ यत् यस्मादेतां बृहतीं करोति तस्मादित उत्पद्यमान एष संचितो महाग्निरपि बृहतीमभिसम्पद्यते तां सम्पत्तिं यजुष्मतीनां षष्ठ्यत्तरत्रिशतसंख्यया दश बृहत्यः सम्पद्यन्तऽइति दशमकाण्डे दर्शयिष्यामः ॥२२॥ गार्हपत्याग्नीध्रीयाहवनीयानां क्रमेण पृथिव्यन्तरिक्षद्युलोकात्मत्वात् क्रमेणैव तेषां संस्कारो युक्त इत्याशङ्क्य व्युत्क्रमानुष्ठानमुपपादयति तदाहुरिति । गार्हपत्याहवनीययोरन्तरालवर्तिनः आग्नीध्रीया धिष्ण्याः । गार्हपत्यचयनानन्तरं धिष्ण्यनिवपनमकृत्वा अथ कस्माद्धेतोराहवनीयचयनमेव क्रियते अथानन्तरमेव धिष्ण्यान्निवपति उपसर्गश्रवणाद्योग्यक्रियाध्याहारः (but there is no upasarga here!) । इत्थमनुष्ठाने कारणं वक्तुमाह सह हेति ॥२३॥२॥१॥

अथ गार्हपत्यचयनानन्तरमतोऽस्मात्स्थानान्निर्ऋतिदेवता इष्टका हरन्ति नैर्ऋत्यां दिशि निरस्येयुः । अनतिदृश्यमतिक्रम्य ॥१॥ निर्ऋतिः दक्षिणापरदिगधिदेवता ॥३॥ विंशत्यधिकशताङ्गुलिपरिमितः पुरुषः तस्य दशमोंऽशः पादः । अधस्पदं पादस्याधस्तात् । एतेन पादमात्र इत्यत्र पादशब्दोऽङ्घ्रिपर्यायो न चतुर्थांशवाचकः । आलिखितादिकं लक्षणं तद्रहिताः ॥७॥ इरिणं निस्तृणमूषरस्थानम् श्वभ्रप्रदरो वा श्वभ्राकारेण प्रदीर्णः प्रदेशः । तत् तस्मिन्स्थाने । अवदीर्यते भिद्यते । पराचीः पराञ्चनाः स्वस्वानभिमुखाः लोकभाजः स्थानभाजः ॥८॥ प्रलायं प्रलीय अदृश्यो भूत्वा एति गच्छति प्रलायमिति णमुलन्त्यः एवं त्वमपि प्रलयनमदर्शनं गच्छ ॥९॥ यो निःशेषेण ऋच्छति आर्तिं प्राप्नोति तं निरर्पयति निर्ऋतं प्रयुङ्क्ते ॥११॥ उपहिताया इष्टकायाः प्रथममुपस्पर्शनं कर्तव्यम् पश्चात्तया देवतयेति सादनम् ततस्ता अस्येति मन्त्रेण सूददोहसाधिवदनम् तदेतत्त्रितयमत्र न कर्तव्यम् ॥१२॥ परस्ताद्विप्रकृष्टाद्देशादारभ्यावाचीरात्माभिमुखमुत्तरोत्तरमात्माभिमुखीरुपदधाति ॥१३॥ अथ समिदाधानानन्तरमुख्याग्निधारणार्था या आसन्दी यच्च (? पत्र) भरणसमये उख्यधारणार्थं शिक्यं यश्च सौवर्णस्य रुक्मस्य प्रतिमोचनार्थं पाशः सूत्रं ये च इण्ड्वे अग्निसहिताया उखाया उभयतो धारणाय तृणमयौ पिण्डौ तत्सर्वं नैर्ऋतीनां परार्धे पश्चाद्भागे न्यस्यति क्षिपेत् । आसन्द्यादीनामुख्याग्नितप्तत्वात्प्रासनीयत्वं स्पष्टमित्यभिप्रेत्य रुक्मपाशस्य प्रासनीयत्वमुपपादयति नैर्ऋतौ वाऽइति । आयुषो दातृत्वादग्निर्वायुः । एतं पितुमग्निचयनफलभूतमन्नं प्रसूतो निर्ऋतिदेवतयानुज्ञातः सन्हे यजमान त्वमशान ॥१५॥ स्वात्मन इष्टकानां च मध्ये उदकपूर्णं चमसं निषिञ्चति । भूत्यै श्रिये भवनाय ऐश्वर्याय । प्रतिनिवृत्य नैर्ऋतस्थानस्येक्षणमकृत्वा शालामागच्छन्ति ॥१७॥ गार्हपत्यम् । the explanation of the end of क° १८ to २, २ is wanting in AB. —

एतत् एतर्हि एतस्मिन्नवसरे खलु एनं पितरं प्रजापतिं विस्रस्तावयवं चयनेन संस्करिष्यन्तो देवाः पुरस्तात्ततः प्रागेव सीरलक्षणेनान्नेन समृद्धमकुर्वन् । इरा अन्नम् ॥२॥ परिसीर्य परितः सीरस्य योजनायोपयुज्यमानं दाम मुञ्जतृणैर्निर्मितं त्रिगुणं च कर्तव्यम् ॥३॥ चेष्यमाणस्याग्नेर्यावान्भूभागः शौल्वेन मानेन चतुरश्रीकृतः तस्य दक्षिणां श्रोणिं जघनेन दक्षिणापरकोणस्य (? परमेतस्य) पश्चात्तिष्ठन् उत्तरांसस्याग्निक्षेत्रसम्बन्धिन उत्तरपूर्वकोणस्य

पुरस्ताद्युज्यमानं सीरं युगबलीवर्दादिभिः सह जा (!) बध्यमानं मन्त्रद्वयेनाभिमन्त्रयते । अत्र च सीरयोजनस्य तदभिमन्त्रणस्य(च) भिन्नदेशकर्तव्यतया यौगपद्याय कर्तृभेदोऽवसीयते तत्राभिमन्त्रणसंस्कार्यतया प्रधानत्वात्सीरयोजनमध्वर्युः कुर्यात्तत्संस्कारात्मकमभिमन्त्रणं तद्द्वितीयः प्रतिप्रस्थाता कुर्यात् । सुखहेतुत्वाद्यज्ञः खलु सुखशब्दाभिधेयः ॥४॥ अत्र प्रतिपुस्तके पत्रद्वयं गतत् (AB.) । the explanation of क° ५-१२ is wanting । चतसृषु दिक्षु प्रादक्षिण्येन कृतं कर्षणमभिनयेन स्तौति इत्यग्रऽइति । दक्षिणावृत्प्रादक्षिण्येनावृत्ति ॥१२॥ यजुर्मन्त्रेण कर्षणं प्रकारान्तरेण स्तौति तद्वाऽइति ॥१३॥ सीतानां संवत्सरसम्बन्धिनां मासानां द्वादशसंख्यासाम्यात्कृत्स्ने संवत्सरे यदेव व्रीहियवादिकमन्नं पच्यते तत्सर्वमस्मिन्नग्नौ एतदेतेन द्वादशसीताकर्षणेन दधाति । पूर्ववदत्राप्यभिनयेन कर्षणप्रकारं निर्दिश्य स्तौति इत्यग्रऽइति । इत्यनेन प्रकारेण अग्रे प्रथममात्मनो दक्षिणार्धमारभ्योत्तरार्धपर्यन्तं कर्षणं कुर्यात् अथानन्तरमित्यनेन प्रकारेण दक्षिणां श्रोणिमारभ्योत्तरांसपर्यन्तमक्ष्णया विकृषेत् अथानन्तरमित्यनेन प्रकारेण पश्चाद्भागमारभ्य पूर्वार्धपर्यन्तं विकृषेत् एतदनन्तरमित्यनेन प्रकारेणोत्तरां श्रोणिमारभ्य दक्षिणांसपर्यन्तं विकृषेत् ॥२४॥ स्तोत्रियानवकात्मको हि त्रिवृत्स्तोमः अग्निरपि (ग्नेरपि) रुद्रादिनामाष्टकाभिधेयैरष्टाभिरग्निरूपैः स्वात्मना च नवसंख्योपेतत्वात्त्रिवृत् see ६, १.३.१८. ॥१५॥ षोडशावयवसमुदायो हि स्थूलशरीराभिमानी विराडात्मकः प्रजापतिः ज्ञानेन्द्रियाणि पञ्च तथा कर्मेन्द्रियाणि मन एकं पञ्चभिर्भूतैः (?र्भूतैः) प्राणैर्वा सह तस्य षोडश कलाः ॥१७॥ विकर्षणं प्रकारान्तरेण स्तोतुमनुवदति यद्वेवेति । चक्षुरादिगोलकात्मिकासु रेखासु ॥१८॥ चक्षुः श्रोत्रं नासिका मुखम् ॥१९॥ प्राणाः प्राणवृत्तयः प्राणापानादिलक्षणाः मनोबुद्ध्यादिरूपा अन्तःकरणवृत्तयश्च ॥२०॥ तं कामं कर्षणलक्षणं प्रयोजनम् । ऋत्विक्परिक्रियहेतवो दातव्या गावो दक्षिणाः तासां यः कालो माध्यन्दिनसवनात्मकः तस्मिंस्तानडुहः अनुदिशेत् दद्यात् ॥२१॥२॥२॥

अत्र प्रतिपुस्तके पत्त्रत्रयं गतम् (AB.) । the explanation of ३. १. to ४. १४ is wanting । [ओ]षधिरूपस्य बीजस्य वपनं विधत्ते तेषामेकमिति । उज्जरेत्पृथक्कुर्यात् नावपेत् ॥१४॥ एवमृग्द्वयं व्याख्याय उत्तरासामप्येवमेव व्याख्यानमित्यतिदिशति ता इति ता एता बीजावपनार्था ऋचः एकव्याख्यानाः समानव्याख्यानाः अतो न पृथग्व्याख्यायन्ते अतिदिष्टं व्याख्यानं योजयति एतमेवाभीति इमं मेऽअगदं कृतेति योऽयं पुरुषोऽनुक्रान्तः एतमेव भेषजैर्युक्तं कुर्यात् तेन च भैषज्येन एतं व्याधिग्रस्तं पारयेत् पारमारोग्यं प्रापयेत् । एवं सति एनं पुरुषविधं चेष्यमाणमग्निमेतदेतेनानुष्टुप्छन्दसः प्रयोगेन सर्वेणैव भेषजेन भिषज्यति ॥२८॥ विहितानां कर्मणां समन्त्रकामन्त्रकत्वं सम्भूय स्तौति अथात इति ॥२९॥४॥२॥

साग्निचित्यक्रतौ सोमक्रयस्य कालं विधाय स्तौति चित इति ॥१॥ तस्मादयमात्मा देहः आन्तं शिरःप्रभृति पादपर्यन्तं रसेन व्याप्तो दृश्यते ॥३॥ आतिथ्यहविष्कृदन्ते आहवनीयचितिसंस्कारं विधित्सुः ततः प्राक्तनं चोदकप्राप्तं प्रयोगजातमनुक्रामति । तस्य कर्मणः हविष्कृता हविष्कृदेहीति मन्त्रेण प्राङ्नियमितां वाचं विसृजते । अस्मिन्समये आहवनीयचितिसंस्कारं विधित्सुस्तदुपोद्घातत्वेन सौमिकाग्निकयोः कर्मणोः परस्परं व्यतिषङ्गं विधत्ते अथ वा इति अथ खल्वेतदेव कुर्वन्नध्वर्युर्व्यतिषजति । सौमिकाग्निकभेदेन द्विविधस्य कर्मणः

एकीभवनार्थम् ॥४॥ वाग्विसर्जनानन्तरमाहवनीयसमीपदेशगमनम् ॥६॥ (गार्हपत्यवत्) आहवनीयस्थानस्यापि पलाशशाखया व्युद्दहनं एकीयमतेनोपन्यस्य दूषयति तद्वैकऽइति । गार्हपत्यचयनेन हि यागदेशमध्यवस्यति अध्यवसानसमये भूशोधनार्थं व्युद्दहनमपेक्षितम् ॥७॥ एवकारव्यवच्छेद्यमाह नाहवनीयऽइति । ऊषरप्रदेशस्य पशुभिर्लेह्यमानवादूषाणां पश्वात्मकत्वम् ॥८॥ सितभास्वरवादिरूपसाम्यात्सिकतानां रेतस्त्वम् ॥९॥ भिन्नमन्त्राभ्याम् अग्नेर्भस्मासीति हि मन्त्रेण गार्हपत्ये सिकतानिवपनं विहितम् (१. १. ११.) अग्ने तव श्रव इत्याहवनीये सिकतानिवपनस्य मन्त्रो विधास्यते (क° २१.) । इमाः परिश्रितः विशिष्टरूपाः कृता भवेयुः ॥१०॥ आहवनीयचितौ सिकतानिवपनात्पूर्वं परिश्रित्संज्ञकान् शर्करापरपर्यायक्षुद्रपाषाणानभिमन्त्रयते चित स्थेति मन्त्रेण (१. १. १२.) ॥११॥ आहवनीयस्थानन्युप्तानामेव सिकतानामाप्ययनवतीभ्यां (!) आप्यायतिधातुनिष्पन्नशब्दयुक्ताभ्यामाप्यायस्व सं तऽइत्येताभ्यामृग्भ्यामभिमर्शनं कर्तव्यम् ॥१२॥ लोकसंस्तुताभिः तिसृभिः स्वयमातृण्णाभिर्युक्तत्वात् (भिपु°) लोकसारप्रसिद्धा (? सर्वसिद्धा) लोष्टरूपा इष्टका लोकेष्टकाः (!) ॥१३॥ वेदेर्बाह्यदेशेनेष्टकानामाहरणं विधाय स्तौति बाह्येनेति ॥१४॥ आहरणस्याग्निक्षेत्रापेक्षया बहिर्देशसम्बन्धो वेद्यपेक्षयापि तथात्वं विधत्ते बहिर्वेदेरिति ॥१५॥ समस्कुर्वन् चित्याग्निरूपेण संस्कृतवन्तः ॥१६॥ इयं वेदिलक्षणा भूमिर्विर्त्तिः लब्धव्यधनरूपा ॥१९॥ पूर्वस्या दिशः सकाशाल्लोकेष्टकां स्फ्येनाहरति । शर्कराणामभ्यन्तरदेशे आत्मनि स्थापयेत् ॥२०॥ इषितः प्रेरितः । पक्षसंधिमन्तरेण दक्षिणपक्षस्य आत्मभागस्य च यः संधिप्रदेशस्तस्याभ्यन्तरे आत्मभागे स्थापयेत् ॥२१॥ अत्राग्निशब्देन तदधिष्ठिता भूमिरेवाभेदोपचारेणोच्यते । पक्ष्याकारस्य चित्याग्नेः पुच्छ[स्य]ात्मभागस्य च यः संधिः तमन्तरेण तस्य मध्ये आत्मन्नात्मनि । यज्ञपथः अग्नेः पश्चात्यो देशो हविर्धानादि ततः सकाशात् नेद्रसमाहराणि रसस्याहृतत्वात्तत्र करिष्यमाणो यज्ञो नीरसः स्यात् । इतः प्रतीच्या दिशः इव न तु साक्षात्प्रतीच्या दिशः उत्तरापरस्या दिश आहरेत् ॥२२॥ इदं जातः इदानीं जातमात्र एव महानविवेको भूत्वा सर्वं जगदैक्षणात् व्याप्नोत् । तस्यां दिशि सिकतानां प्रध्वंसनं विधत्ते जहामीति । सेदिः अवसादापरपर्याया हानिः । तस्मादेतस्यामुत्तरस्यां दिशि सर्वाः प्रजाः अशनेच्छा क्षुधा तया पीडिता दृश्यन्ते ॥२३॥ ताः प्राच्यादिदिक्षु क्रमेणोपहिता एता इष्टका दिगात्मिकाः । नाना पृथक् । आसीनात् ॥२४॥ अग्निक्षेत्रस्यात्मभागऽएवोपधानम् । यजुष्मत्यः करणभूतैर्यजुर्मन्त्रैर्युक्ताः । आत्मभागऽएव हि यजुर्मन्त्रोपधेया वक्ष्यमाणा इष्टका उपधीयन्ते ॥२५॥ स्वयंभृतः खलु अग्न्यादिपाकानपेक्षः । तत एव तस्मादेव संसर्गात् ॥२६॥ षडशीत्यङ्गुलपरिमितं युगम् उक्तं ह्यापस्तम्बेन अष्टाशीतिशतमीषा तिर्यगक्षश्चतुःशतं षडशीतिर्युगं वास्येति । सर्वतः सर्वासु दिक्षु तावन्मात्राम् । अनयोः प्रमाणयोर्मध्ये येन प्रकारेण कामयेत । तस्योक्तो बन्धुः (१. १. १०.) ॥२७॥ निखिलयागोत्पत्तिकारणाहवनीयस्थानत्वादुत्तरवेदिरपि योनिः अत एवाग्निप्रणयनीयास्वाम्नायते ऊर्णावन्तं प्रथमः सीद योनिमिति ॥२८॥ इरज्यतिः कण्ड्वादिर्दीप्तिमत्कर्मा । पृणक्षि फलेन संयोजयसि ॥३२॥ इष्कर्तारम् उपसर्गस्यादिलोपश्छान्दसः निष्कर्तारम् तथैव तैत्तिरीयैराम्नायते ॥३३॥ पृश्नयः सूक्ष्मपरिमाणबिन्दुरूपाः ॥३६॥ अथैतदुपधानकरणस्य षड्चस्य यच्छन्दः तस्य समुद्रियमिति नाम कस्मान्निमित्तादिति पृच्छति ॥३९॥ नन्वनन्तानां

सिकतानामुपधानं पृथक्पृथक् कथं समन्त्रकं स्यादिति पृच्छति मनो वाऽइत्युत्तरम्. मन एव हि सर्वासां सिकतानां साधारणं यजुः तदिदं मनोरूपं यजुः सर्वाः सिकता अनुलक्ष्य विभवति प्रत्येकं व्याप्तुं शक्नोति ॥४०॥ शरीरस्य (शनोर) हि प्रकृतिमहदादिचतुर्विंशतितत्त्वात्मवात्तदुत्पन्नं (? शतितत्वात्मतततु°) रेतः पञ्चविंशम् ॥४३॥ सिकतानामपीष्टकात्वादितरेष्टकास्विव प्रसक्तं सादनं निषेधति न सादयतीति तया देवतयेति मन्त्रेण स्थापनं सादनाख्यं न कर्तव्यम् ॥४४॥ आप्यायनवतीभ्याम् (!) । यत्सौमीभ्यामभिमर्शनमेष (न एष) एव सिकतोपधाने सूददोहाः ता अस्य सूददोहस इति मन्त्रकरणकमधिवदनम् ॥४५॥ अस्य लतारूपेण वर्तमानस्य सोमस्य द्युलोके उत्कृष्टं श्रवो नाम चन्द्रमा एवोच्यते । अमुष्मिन्स्वर्गलोके स खलु चन्द्रमाः एनं सोमममृतात्मना पीयमानः सन् श्रावयति प्रख्यापयति ॥ ४६ ॥ १ ॥ ३ ॥

एवमाहवनीयदेशस्य संस्कारसमनन्तरं कर्तव्यं प्राकृतं प्रयोगजातमनुक्रामति प्रागुक्ताग्निकसौमिकयोः कर्मणोर्व्यतिषङ्गं दर्शयितुम् आप्यायनवतीभ्यामित्यादिना । प्रत्येत्य उत्तरवेदिदेशात्प्राग्वंशं प्रत्यागत्य । अनन्तरमाग्निकस्य कर्मणः प्रवेशं दर्शयति अथैतामिति अथशब्दः प्रथमोपसदानन्तर्ये आनडुहे लोहिते चर्मणि एतां प्रथमां चितिं प्रथमचित्यर्थमिष्टकासमूहं समवशमयन्ति सम्यग्घृतावोक्षणेन तप्तानामिष्टकानां शमनं कुर्युः । लोमतः लोमप्रदेशे ॥१॥ गार्हपत्यचितेरग्रेण पूर्वभागे महावेदिमध्ये । तत्तत्र प्रथमचितेः पर्याप्तमिष्टकासंघातं (संघंशं) अवशमयन्ति संशान्तौष्ण्यं (? सौणांत्यौष्णं) कुर्युः । अनतिक्रमणाय श्रैष्ठ्याय । न होति इष्टकाभ्योऽन्यत्पुरोडाशादिकं किमपि हविः आज्यकरणकेन (वद्याध्रकर°) प्रोक्षणेन संस्क्रियते उदकेनैव हि तस्य प्रोक्षणम् । चितेः पादसंस्पर्शविरहरूपानभ्यारोहणाय ॥२॥ अभ्यक्तामभितः सर्वत आज्येन सिक्ताम् अभिघारितमुपरि घृतधारया संस्कृतम् ॥३॥ प्रथमचितिप्रोक्षणसमये द्वितीयतृतीयादिचित्यर्थानामिष्टकानां प्रोक्षणं विधित्सन्ब्रह्मवादिनां प्रश्नमवतारयति तदाहुरिति अस्योत्तरमाह अत्रास्मिन्समये सर्वासां चितीनां सम्बन्धिनीरिष्टकाः आज्येन दर्भाग्रैः प्रोक्षतीति यदस्ति एवमेव अनेनैव प्रकारेण खल्वस्य यजमानस्य एष सर्वः सप्तचितिकोऽग्निः प्रोक्षितो भवति एवमेव चर्माधिकरणं प्रण[यनमश्वसहितं प्रण]यनं चास्मादेव प्रोक्षणात्सिध्यति । उद्यच्छन्तीति चर्मणः इष्टका उद्गृह्णन्ति यजमानपरिचारकाः ॥४॥ अथाहवनीयदेशं प्रति नयनं विधित्सुस्तदर्थं होतारमुद्दिश्याध्वर्योः सम्प्रैषवचनं विधत्ते अथाहेति । बहुवचनात्तेनाग्निशब्देनाग्न्यवयवाश्चितयो विवक्षिताः आहवनीयदेशं प्रति प्राचीनं ह्रियमाणेभ्यः इष्टकारूपेभ्योऽग्न्यवयवेभ्यः हे होतरनुब्रूहि । सम्प्रैषानन्तरं प्रथमचित्यर्थानामिष्टकानां पूर्वस्यां दिशि हरणं विधित्सुस्तदाख्यायिकया स्तौति एतद्वै देवानिति एतत् एतास्मिन्समये । एतान् चितिरूपानग्नीन् ॥६॥ सम्प्रैषं व्याचष्टे । सप्तचित्यभिप्रायेण बहुवचनम् । यस्मादध्वर्युः इमा इष्टकाः प्रहरति पुरस्तादाहवनीयदेशं प्रापयति अतः प्राचीनं ह्रियन्तऽइति प्रह्रियमाणास्तेऽग्नय उच्यन्ते ॥७॥ तत्र होत्रा अनुवक्तव्यामृचमेकीयमतेनोपन्यस्य व्याचष्टे तदेकऽइति एके के चन ऋक्शाखाध्यायिनः । प्रावणेभिरिति पदस्यार्थमाह प्रायणरूपमिति प्रायणस्य प्रगमनकर्मप्रवृत्तेः प्रवणेभिरिति प्रशब्दोपेतं (यश°) पदं सूचकं रूपम् । कामवतीः कामशब्दोपेताः ॥८॥ त्रिस्त्रिवारमनूक्ताभ्यामाद्योत्तमाभ्यां सह । अनुवचनं कुर्वन्होता स्वयम-

पोष्टका अनुगच्छति ॥९॥ इष्टकाहरणसमये श्वेतस्याश्वस्य पुरस्तान्नयनम् । अश्वप्रमुखास्ते अ-ग्रियजमानाः इष्टकाभिः सह अग्निक्षेत्रसमीपमागच्छेयुः आगत्य च अग्निपुच्छस्य दक्षिणभागे चर्मणा चितिमुपनिदधाति चित्यर्थमानीता इष्टका स्थापयन्ति ॥१०॥ अग्निक्षेत्रस्य उत्तरभागे परिश्रितामग्नेश्च मध्यदेशे । प्रसृजति विमुञ्चति ॥११॥ पुच्छस्य दक्षिणतो निहितामेतां चितिम् ॥१२॥ एताः उपधास्यमानाः तिस्रः स्वयमातृणाख्याः शर्कराः क्षुद्रपाषाणाः पृथिव्यादिलोक-त्रयात्मिकाः । मणिवत्समावयते सम्यक्प्रोतान्करोति ॥१३॥ पद्मिनीपत्रे । दुष्टाक्षिभ्यां युक्तो भवितुं शीलवान् । कृत्वा आर्तिं गमयित्वा ॥१४॥ अध्वर्युणा आज्ञतिप्रदानसमये अग्निक्षेत्रस्या-धिरोहणमपेक्षितम् अग्निक्षेत्रस्योपरि पादनिधानलक्षणं क्रमणमधिरोहणम् । आत्मभागेन मध्य-देशेन । आरोहणानन्तरमुत्तरवेदिसंस्काररूपं कर्मजातं कृत्वा अध्वर्युः स्वात्मनि स्वकीयमग्निं गृह्णी-ते यथा बहिश्चित्याग्निप्रदेशे न निष्क्रामति तथा मयि गृह्णामीति मन्त्रपदेन (°पेन) स्वात्मनि धारयेत् । यत्सत्यं सामेति प्रसिद्धं सामवेदे तद्यजमानो गायेत् ॥१७॥ अस्तमयसमीपे । रा-त्रिं सचन्ते समवयन्तीति रात्रिसाचयानि रात्रौ संचरणशीलानि । सोऽश्वः पुनर्विपल्ययते वि-परिवर्तते उपधानकाले कर्मणोऽङ्गभावं प्रतिपद्यतऽइत्यर्थः ॥१९॥२॥३॥

अग्नि(ग्र)हणसत्यसामगानपुष्करपर्णोपधानानि पूर्वस्मिन्ब्राह्मणे संग्रहेण विहितानि इ-दानीं तानि क्रमेण प्रपञ्चयति । चयनं करिष्यन्नध्वर्युः आत्मनि अग्निं गृह्णीते मन्त्रेण धारयेत् ॥१॥ अग्निग्रहणं च तिष्ठता कर्तव्यम् चयनसमयेऽनूपवेशनम् यत्र-यत्रेष्टकामुपदधाति तं देशं गत्वा समीपे उपविश्य चिनुयात् । विज्ञायते प्रसूते ॥२॥ इत्याज्ञः कथयन्ति ब्रह्मवादिनः । तेन सत्यसाम्नोऽग्रतो गानेन अस्य सर्वस्य जगतः अप एवाग्रं मुखमकुर्वन् देवा इत्यर्थः ॥६॥ तमद्य उपोदासृप्त[मित्यादिना] (३. २. १४.) पुष्करपर्णस्याग्नियोनित्वम् ॥७॥ आपो वै पुष्करमित्यादि पुष्करं सर्वतोमुखमित्यादिनिगदप्रसिद्धिद्योतको वैशब्दः । तासामपां प्र-थमसृष्टानामियं पृथिवी पर्णस्थानीया । अस्यै अस्याः पृथिव्याः सकाशात् मृन्मयीभिरिष्टका-भिः कृत्स्नोऽग्निर्व्यायितश्चीयते (!) अतः पृथिवीमुपहितवान्भवतीत्यर्थः । सत्यसामगानादव्य-वहितां तां पुष्करपर्णेष्टकामुपदध्यात् । अज्ञातमां प्रत्यक्षतमामापरोक्ष्येण वर्तमाना (°तमा आ-परोक्षेण वतासमाना) ॥८॥ पिन्वते सिञ्चति । चतुर्थपादावसाने पुष्करपर्णमुपदधानः त-स्यानुलोमेन विमार्जनं कुर्यात् । उत्तरार्धे वैराजपादाभ्यां द्वेऽअक्षरेऽअधिके तदाधिक्यं स्वरा-डाख्यस्य छन्दसो लक्षणम् ॥९॥ आकाशात्मना (!) स्तुतस्य पुष्करपर्णस्य मध्ये सूर्यमण्ड-लात्मना ध्यातव्यस्य रुक्मस्योपधानम् । वर्तुलाकृतिः एकविंशतिसंख्याकैः पुलकैर्युक्तः । उपधानसमये निर्बाधानामधोभागेऽवस्थानं यथा भवति तथा कर्तव्यम् ॥१०॥ पुष्करनाम-निर्वचनेन प्रतिष्ठान्नूपतां ब्रुवन्स्तौति । समुदौहन् समुत्क्षिप्तवन्तः ॥१३॥ प्रजिजनिषमाणः प्रजनितुं प्रादुर्भवितुमुदेतमिच्छन् अवेनत् कान्तियुक्तोऽभवत् वेनति दीप्यतऽइति वेन इति (वेनमिति) सूर्यस्य नाम सम्पन्नम् ॥१४॥ रुक्ममध्ये हिरण्मयपुरुषस्योपधानम् । स प्रजा-पतिः स्थूलप्रपञ्चाभिमानिविराडात्मकः स एवाग्निः सूक्ष्मप्रपञ्चाभिमानिहिरण्यगर्भात्मकः यज-मानस्य तद्रूपप्राप्तेर्यजमानोऽपि सः । यस्माच्चित्याग्निरूपेण संस्कर्तव्यः प्रजापतिः पुरुषविधः तत्प्रतिरूपत्वाद्धिरण्मयस्योपधेयस्य पुरुषाकृतिर्युक्ता ॥१५॥ रम्या रमणीया ज्ञानक्रियाशक्तिरूपा सूक्ष्मा तनूः । चक्षुराद्यभिमानिदेवताः आदित्यादयः अजङ्गरत्यजन् । तं तथाविधं प्रजापतिं

देवास्तत्पुत्राः यस्मिन्देशे चित्याग्निरूपेण संस्कृतवन्तः । पुरा निष्क्रान्ता इन्द्रियदेवताः अरमन्त पुनः प्रविश्याऽतिष्ठन् ॥१६॥ आदित्यमण्डलमध्ये यो हिरण्मयः पुरुषः आस्ते ॥१७॥ उत्तानमुपरिष्टान्मुखम् । इमौ रुक्मपुरुषौ अर्वाञ्चौ अधोमुखौ । पराञ्चौ ऊर्ध्वमुखौ । सम्यञ्चौ परस्पराभिमुखौ । तस्मादेष मण्डलात्मकः सूर्यः किरणैरधोमुखस्तपति स एव रुक्मात्मकः एष प्राणात्मको मण्डलान्तर्वर्ती पुरुषः प्राणिनां प्राणैः सह ऊर्ध्वो वर्तते ॥१८॥ यदिदं चीयते आहवनीयस्य स्थानम् यच्चादो गार्हपत्याख्यं स्थानं पूर्वमचीयत ॥२०॥ नीरसं फलकं काष्ठमयम् ॥२२॥ अयं यजमानः । पुरुषेऽन्वारब्धे तत्साम गातव्यम् चित्रलिङ्गके मन्त्रे चित्रं देवानामित्यादिके । लोके यावन्ति हि चित्राणि विचित्ररूपाणि सन्ति तत्सर्वसमुदायरूपः चित्योऽग्निः ॥२४॥ यजमानकर्तृकं पुरुषस्योपस्थानम् एतमात्मानं हिरण्मयपुरुषमुपधाय ॥२५॥ अस्मै हिरण्मयपुरुषरूपायाग्नये । तैर्लोकैः (!) एनमनमयन् (!) वशीकृतवन्तः ॥२६॥ व्यद्वरो (व्यरो) व्यदनशीलो (ध्यदन॰) दन्दशूकादिः शिमिदा विषहेतुर्लूतात्रिश्चिकादिः ॥२७॥ अयज्ञियं यज्ञानर्हम् ॥३०॥ एनं हिरण्मयपुरुषमभिजुहोति अभितः सर्वासु दिक्षु उपरिहोमेन संस्कुर्यात् । आहुतिपञ्चकार्थं पञ्चगृहीतमाज्यं स्रुचि गृहीत्वा । सर्वासु दिक्षु परिसृप्य-परिसृप्य तां च दिशं परिक्रम्य आभीक्ष्ण्ये णमुल् ॥३२॥ एतान्रक्षोघ्नान्पञ्च मन्त्रान् ॥३३॥ परिसर्पणप्रकारो निरूप्यते प्रथमं प्रतीच्यां दिशि प्राङ्मुख उपविष्टः सन्प्रथमेन मन्त्रेण पुरुषमभिजुहोति । अनुपरीत्य दक्षिणदिक्सकाशात्प्रतीचीं दिशं गत्वा ॥३५॥ जुहूर्दक्षिणो हस्तः उपभृत्सव्यः । स्रुचोर्बाहुरूपताप्रसिद्धिमभिनयेन दर्शयति इदमेवेति इदमेव हस्ताग्रं मुष्टिरूपेण (मुसतिरू॰) दृश्यमानं कपृत्सलं (!) स्रुगग्रस्थानीयं (सृगस्था॰) अयमेव बाहुर्दण्डः अतः स्रुग्रूपता (सृग्रयता) अनयोः प्रत्यक्षसिद्धा । पार्श्वतः दक्षिणोत्तरपार्श्वयोः ॥३६॥ उदरमत् उत्कृष्टमरमत सुखमवाप्सीत् ॥३९॥ तस्मिन्नुपधाने मन्त्रान्तरमपि दर्शयति अग्निर्मूर्धेति ॥४१॥ सोऽध्वर्युः उपहितस्य हिरण्मयपुरुष[स्य] उरः सम्प्रति उरःप्रदेशेन समानं स्रुचावुपदध्यात् (वृचानुप॰) । तं पुरुषमाक्रम्याभिज्ञाप्य(ज्ञाव) यस्मिन्स्थाने उपहितं स्रुग्द्वयं तदुरःप्रदेशमभ्याप्नोति तत्र चिह्नं कृत्वा एने स्रुचावुपदध्यात् एष उरोदेशः (ह्रोदेशः) खलु तयोर्बाहुसंस्तुतयोर्लोकः स्थानम् ॥४६॥ एतस्योपहितस्य हिरण्मयपुरुषस्य । स्रुग्व्यतिरिक्ताबाह्वोरपि करणे अधिकाङ्क्षता स्यात् । अस्य पुरुषस्य सम्बन्धिनौ बाहू अनुलक्ष्यैते (क्षयते) स्रुचौ उपधातव्ये अतो न तत्प्रतिनिधिरि[ति] तयोरनिवृत्तिः । बाह्वोः सद्भावं प्रकारान्तरेणोपपादयति अथोऽएतावितिं अपि च एतौ बाहू पक्षौ पक्ष्यात्मनश्चित्याग्नेः पक्षस्थानीयौ (? पक्षिस्थानांसौ) । संस्कारस्य संस्कार्यमन्तरेणानुपपत्तेः (॰रस्य संस्कारपर्यमन्त॰) संस्कार्यौ बाहू अवश्यं कर्तव्याविन्याह अथो यानीत्यादिना रूपाणि पशुशीर्षादीनि (॰र्षाणिवीनि) स्तोमास्त्रिवृत्पञ्चदशादयः बृहद्रथंतरादीनि पृष्ठानि छन्दांसि गायत्र्यादीनि एते च स्तोमादयः स्वस्वलिङ्गैर्मन्त्रैरिष्टकारूपेणोपधेयाः   यान्येतानि पशुशीर्षादीनि सर्वाण्यध्वर्युरुपधास्यन्भवति (सर्वाएवबर्यु॰) एतयोरेव पक्षसंस्तुतयोर्बाह्वोः सा संस्कृतिः गुणोत्कर्षहेतुः संस्कारः एतयोर्वृद्धिः अभिवृद्धिहेतुः ॥४५॥१॥४॥

अस्मिन्ब्राह्मणे स्वयमातृण्णाद्यैर्वेष्टकाद्युपधानं विधास्यते । या स्वत एव छिद्रयुक्ता शर्करा क्षुद्रपाषाणविशेषः सा स्वयमातृण्णा तां स्वयमातृण्णाख्यामिष्टकां हिरण्मये पुरुषेऽउपद-

ध्यात्। उत्तरां पुरुषस्योपरि ॥१॥ प्राणो नाम शरीरान्तर्वर्तमानो वायुः स हि आत्मनोऽर्थे (!) स्वयमातृन्ने आतर्दनं कुरुते शरीरान्तर्नाडीष्ववकाशं कृत्वा प्रवर्तते ॥२॥ प्रतिष्ठारूपमङ्गं स्व-यमभिपद्य गृहीत्वा ॥३॥ य एष इष्टकासंघातरूपोऽग्निश्चीयते । सा एषा इदानीमुपधीयमाना प्रथमा स्वयमातृण्णा । अस्य पुरुषरूपस्य प्रजापतेरात्मनः स्वस्य यदेतत्प्रतिष्ठालक्षणमङ्गं एष इति पुंलिङ्गव्यत्ययः (!) तदस्मिन्प्रजापतौ प्रतिनिहितवान्भवति (°पते च ते निहि°) ॥४॥ प्रजापतिशब्देन तद्विशिष्टं मन्त्रं लक्षयित्वा तेन लक्षितलक्षणया सर्वे मन्त्रा लक्ष्यन्ते प्रजा-पतिर्न्यैवेत्यनेन लक्षितलक्षणाकारणमुच्यते यतः प्रजापतिः स्वयमात्मनः एतत्प्रतिष्ठालक्षण-मङ्गं प्रत्यधत्त अतस्तत्प्रतिष्ठात्मकस्वयमातृण्णोपधानमन्त्रेऽपि तत्सम्बन्धप्रतीतिर्यथा स्या-दिति प्रजापतिनोपदध्यादित्युक्तम् ॥५॥ इयं पृथिवी ॥६॥ दद दाने ॥७॥ तिस्रः स्वयमा-तृण्णाः पृथिव्यन्तरिक्षद्युलोकात्मिकाः । अस्यां प्रथमायां स्वयमातृण्णायां भूरिति व्याहृत्या साम गायेत् तद्व्याख्यानं तूत्तरत्राष्टमकाण्डावसाने (८.७.४.१.) प्रपञ्च्यते ॥८॥ लोके पुरुषस्यो परि पाषाणे निहि[ते] तस्य महानुपरोधो जायते । स्वयमातृण्णायाः पाषाणात्मकत्वात् ॥९॥ इष्टकाशब्दो मृन्मयेष्टकासु मुख्यः दूर्वायां (पूर्वा°) तूपधानसामान्याद्गौणः । पशुपुष्टिसाधन-त्वेन दूर्वाणामपि पशुत्वात्तदुपधाने पशूनामेवोपधानं कृतम् । अनन्तर्हितैः अव्यवहितैः स्वस्य तेषनुप्रवेशादनन्तर्हितत्वम् तादृशैर्यैः पञ्चभिः पशुभिरन्यत्रोपजगाम ते पशव एते दूर्वेष्टकात्म-काः (see ६.२.१.३.) ॥१०॥ अशोयत अपतन् ॥११॥ यतो द्वे देवते एतामपश्यतामत एव ताभ्यां यजुर्भ्यामुपधीयते ॥१६॥ स हिरण्मयः पुरुषोऽस्य यजमानस्य देवत्वप्रयुक्त आत्मा शरीरम् द्वियजुरिष्टका मनुष्यत्वप्रयुक्त आत्मेत्यर्थः हिरण्मयत्वात्पुरुषस्य दैवशरीरत्वं मृन्मयत्वा-द्द्वियजुषो मानुषशरीरात्मत्वम् ॥१७॥ अमूं हिरण्मयपुरुषलक्षणामिष्टकाम् । नावशेषयेत् । तर्हि मानुषशरीररूपद्वियजुरिष्टकाया अपरिशेषणात् ॥१८॥ यजमानस्य हिरण्मयपुरुषो दैवं शरीरं द्वियजुस्तु मानुषमित्युक्तम् तयोर्मध्ये स्वयमातृण्णादूर्वेष्टकयोरुपधानेन व्यवधानाच्छरीर-द्वयस्यापि प्राणेन कथमव्यवच्छेद इति याज्ञिकानां प्रश्नमवतारयति ॥२०॥ एताभ्यां मन्त्रा-भ्यां द्वियजुषमुपदध्यात् ॥२१॥ अमुत्र द्युलोके ॥२२॥ अण्डशब्दात्स्वार्थिकोऽण्प्रत्ययः आ-ण्डाविति पुरुषसम्बन्धिनो वीजे उच्येते ॥२४॥ स्वयमातृण्णा इव विश्वज्योतिषोऽपि तिस्रो विद्यन्ते । अस्मिन्लोके यत्किं च ज्योतिरस्ति तत्सर्वमग्निमयमेव । अन्तरेव अन्तरा इवेति प-दविभागः इवशब्द एवकारार्थः अनयोर्लोकयोर्मध्ये ॥२५॥ यतः प्रजा ज्ञानशक्त्या पदार्थान्प्र-काशयति तस्मात्प्रजा विश्वज्योतिः ॥२६॥ सर्वस्माऽउ वाऽएतस्मै सर्वस्य खल्वेतस्य लो-कस्य षष्ठ्यर्थे चतुर्थी प्राणः आश्रयो (? आसाऽस्यो) भवतीति शेषः अपानो व्यानश्चेति प्राण एव वृत्तिभेदभिन्नः ॥२८॥ अत्र प्रथमायां चितौ । अस्य प्रजापतेरात्मनः एतदिष्टकाद्वयलक्षणं यदङ्गमस्ति तदस्मिन्नवयवे प्रथमचितिलक्षणे एतेन पुनः प्रदधाति ॥३०॥ चयनस्थलस्य पूर्वभागे ॥३२॥ निर्भर्त्सनादिविशिष्टया वाचैव ॥३४॥ वामं वननीयं वस्तु प्राणाः सर्वैरा-शास्यमानत्वात् । इयं पृथिवी वामभृत्संज्ञा तदात्मिकाप्येषाष्ठा वामभृत्संज्ञा । वाग्वामभृदि-ति तदात्मिकाषाठापि वामभृत् ॥३५॥ तां नान्ययेति पुरस्तात्तामषाढां प्रति अन्यया मन्त्र-वत्येष्टकयोपधानं न सम्पादयेत् ॥३६॥ अपस्यानामनन्त्रात्मकत्वं तद्विधायकब्राह्मणेऽभिधास्यते (८.२.३.६.) ॥३७॥ दूर्वेष्टकादीनां स्वयमातृण्णायाः प्राग्भागऽउपधाने कारणमाह तदाङ्गरिति

। अभिस्वयमातृषं स्वयमातृषामभिलक्ष्य स्वयमातृषाया उपरिभागे अन्या इष्टका इपरि वक्ष्यमाणाः उपधीयन्ते एता इर्वेष्टकादयस्तु तस्याः प्राच्यः प्रागपवर्गाः ॥४०॥२॥४॥

अस्मिन्ब्राह्मणे कूर्मादीनामुपधानं विधास्यते । एषां पृथिव्यादीनां लोकानामप्सु प्रविष्टानां मग्नानाम् ॥१॥ प्रतिष्ठितमधः सर्वत्र पृष्ठतलम् व्यवगृहीतान्तं विविधमवगृहीतो ऽवनतः प्रान्तो यस्य तत् तथोक्तं कूर्मस्योपरिकपालं सर्वतो मण्डलाकारेणावनतप्रान्तमिव भवति ॥२॥ यां देवतामभिलक्ष्य या ऋगनूक्ता तद्देवताप्रतिपादकत्वेनोच्यते (डरेवाताप्रति°) सा ऋक् तत्प्रतिपादकत्वात्सैव प्रतिपाद्या देवता तथा यजुरपि एवं च सत्यत्र तद्देवतास्वरूपमेतन्मधु मधु वाता ऋतायतऽइत्यनया ऋचा प्रतिपाद्यत्वात् ततश्चैष तृचः (!) प्रतिपाद्यत्वेन देवताभूतमध्वात्मकः । तिस्र ऋचो यस्मिन्समुदाये स तृचः ऋचि त्रेरुत्तरपदादिलोपश्छन्दसीति (पा° ६. १. ३७. वा° १.) त्रिशब्दसम्प्रसारणं ऋवर्णस्य च लोपः ऋक्पूरब्धूरिति (पा° ५. ४. ७४.) समासान्तः ॥४॥ करोतेरौणादिकमप्रत्यये बहुलं छन्दसीत्युत्वे (पा° ७. १. १०३.) हलि चेति (पा° ८. २. ७७.) दीर्घे च कृते कूर्म इति रूपम् । कूर्मशब्दस्य करणप्रवृत्तिनिमित्तकत्वात्कश्यपस्य च प्रजापतित्वेन प्रजापतिकारकत्वात्कश्यपः (त्वारकश्यपः) कूर्मः खलु अत एव जनाः सर्वाः प्रजाः काश्याप्य इत्याहुः (त्याह) अतश्च कूर्मस्य कश्यपात्मकत्वात्तदुपधानं प्रशस्तम् ॥५॥ चयनप्रदेशपूर्वभागे प्रत्यङ्मुखत्वेनोपधानम् । उत्तरतो हि स्त्री पुमांसमुपशेत ऽइति श्रुतेः पुमान्दक्षिणभागे योषामुपशेते ॥६॥ The explanation of क° ७-१४ (end) and of १५ (end) -१९ is wanting (AB.) ॥ प्रापादयत प्रापयत् । सर्वे देवा इन्द्रियाणि ॥२०॥ तद्धि तदा अन्नलाभावसरेषु स प्राणोऽभवत् प्राणशब्देनेन्द्रियाण्युच्यन्ते (यानच्यंते) तत एव सेन्द्रियोऽभूदित्यर्थः । महान् (? नु) भूत्वेति यदा एनं प्रजापतिमेते देवा इन्द्रियाणि प्रापयन्त तदा स महानभूत् । वित्त्वा लब्ध्वा । पुरि आत्मनि शरीरे प्राणान्प्राणयत् स्वस्वव्यापारसमर्थानकरोत् यत एवं प्राणयत् तस्माद्देवा इन्द्रियाणि प्राणयन्तऽइति प्राणा इति व्युत्पत्त्या प्राणा अभूवन् । स पूर्वोक्तः प्रजापतिसम्बन्धी यः प्राणोऽस्ति सैषा गायत्री विष्णोः कर्माणीत्यर्थः प्राणो वृत्तिभेदेन त्रिधा भिद्यते गायत्र्यपि पादभेदेन एतत्सादृश्यात्प्राणो गायत्रीत्युक्तम् । अथ यत्प्रजापतिसम्बन्ध्यन्नमस्ति (अष्मष्ठः प्रजा°) स एष विष्णुर्देवता विष्णुरिति यज्ञोऽभिधीयते भोगसाधनत्वसामान्यादन्नस्य विष्णुरूपत्वम् । उदुम्बरस्य बलकाररसत्वादूर्गात्मकत्वम् ॥२१॥ अकरत् अकार्षीत् ॥२२॥ उलूखलस्य शिरःसाधर्म्यसम्पादनं तु उपपाद्यतऽइत्येतत्प्रदर्श्यते तत्प्रादेशमात्रमिति ॥२३॥ तं प्रजापतिम् । अयं यजमानः ॥२४॥ इष्टकाचितिषु विधास्यमानस्याग्नेरुखायां भृत्योत्पादनादुखायोनित्वेन तदुपधाने योनेरेवोपधानं भवति । वनस्पतीनामपि वीजानां मध्यभागत उत्पत्तेर्मध्यतो (? गतिवोपत्तेर्म°) योनिः ॥२६॥ उपशयया नामोखाभेदे सति — the explanation of क° २८ to ३३ is wanting (AB.) । न निष्पद्यते न निष्पतति तत्रैवावतिष्ठते ॥३३॥ सोऽग्निर्यदि उखायां संवत्सरभृतः स्यात् अथैतस्यामभियुञ्ज्यात् । संवत्सरस्य सर्वावच्छेदकत्वात्संवत्सरभृतोऽपि सर्वात्मकः । अभि त्वेव युञ्ज्यादिति एवकारोऽत्र विकल्पद्योतकः ॥३४॥ the explanation of क° ३५-३७ is wanting । प्रकारान्तरेणोखोलूखलयोरौत्तराधर्यं प्रशंसति उदरमुखेति उखायाः शक्तादग्नेरुत्पत्तेरुखा (!) उदरमुलूखलं तु हविर्निष्पादनाद्योनिः । शिश्नस्य वृत्ताकारतया तदाकारवत्त्वे[न]

मुसलमपि शिश्नम् तथाविधमुलूखलस्य दक्षिणभागे उपदध्यात् अस्य वर्षणसमर्थत्वेन वृषत्वादुलूखलस्य योनित्वेन स्त्रीत्वात्तदुपपन्नम् । उक्तमेवाग्नेः पशुरूपत्वं प्रकारान्तरेण द्रढयति यद्वै पशोरिति पशोरग्निरूपस्य संस्कृतस्य पश्ववयवसम्पादनया (नाया) निष्पादितस्य यदन्नं तद्रूद्वेष्टका तस्मात्तस्य द्रूर्वेष्टकारूपेणान्नेन सुहितस्यैषातस्याग्निरूपस्य (!) पशोरुत्तरभाग उदाहिततरः उन्नततरो भवति उत्तरभागऽएवोलूखलमुसलाद्युपधानात् । तस्मादिदानीमपि लोके तृणाद्यभ्यवहारेण तृप्तस्य पशोः ॥३८॥१॥५॥

अथ पशुशीर्षाणामुपधानं विधाय प्रशंसति । पशुशीर्षाणां पश्ववयवत्वेन पशुत्वम् ॥१॥ याः खलु ताः प्रागुक्ताः (६.२.१.७.) श्रियः ता एवैतानि पशुशीर्षाणि अत एतेषामुपधाने श्रियामेवोपधानं भवति । उखायाः परम्परया कवन्धात्मकत्वम् तत्रोपधाने कवन्धशिरसां (°सा) संधानं भवतीति दर्शयति अथ यानीति तानीति अम्भः (!) सम्भरणावसरपरामर्शः यानि तानि कुसिन्धानि कवन्धानि तानि एताः अत्र सम्पद्यमानाः पञ्च चितयः चित्यात्मकत्वं तु कवन्धानां पञ्चत्वसंख्यासामान्यात् ततस्तथा पञ्चविधा याः पञ्च चितयः ता इमे पृथिव्यादयो लोकाः चितीनां प्राजापत्यवयवात्मकत्वाल्लोकानामपि तथाभावात् तथा च य एतयिमे (!) लोकास्ते एषा उखा तस्या (उःखान्तरस्या) लोकत्रयात्मकत्वस्य प्रागुक्तत्वात् अतश्चोखायां पशुशीर्षाणामुपधाने तैः कवन्धानि संश्लेषयति शीर्षभिरिति ॥३॥ उखायामुपधानं पुरस्तादारभ्य प्रत्यगपवर्गं कर्तव्यम् । प्राणेषु शीर्षे गतेषु सर्वप्राणाधारत्वाच्छिरसां प्राणत्वं प्राणा इतीन्द्रियाण्युच्यन्ते पलायने पशूनां (क्रूवनांशूना) शिरांसि गृहीत्वा स्वाभिमुखमाकृष्य वशीकृतवान् ॥४॥ उखायां पशुशीर्षाणामुपधाने प्रजापत्युदरे अन्नं दधातीति दर्शयितुमाख्यायिकामवतारयति यद्वेवेति ॥६॥ एतत्पुरुषादिपशुलक्षणमन्नं सृष्ट्वा । मुखप्रदेशादेवान्नस्य प्रतीचीनमभ्यवहारात् ॥७॥ शिरसि वागेका नेत्रे द्वे श्रोत्रे द्वे नासाविवरे च द्वे इति सप्त प्राणाः ॥९॥ य ऋजुरकुटिलाङ्गः तस्य अन्तः शरीरमध्ये हृदा हृदयदेशेन मनसा च सता (वसता) विद्यमानेनान्नं पूतं भवति सारासारभेदेन विवेचितं भवति हृदयदेशस्य अन्नावतरणप्रदेशत्वात् शोधकत्वम् । चतुर्थपादे अग्निमध्यावस्थितहिरण्यपुरुषाभिधानं क्रियते । तथाविधेऽस्मिन्मुखे शकलं निदधामि निहितं शकलं चेदमग्नेर्मध्ये यो हिरण्ययो वेतसः ॥११॥ ऋचे त्वेतीहेति दक्षिणनासाविवरस्याभिनयेन निर्देशः अनेकार्थत्वाद्धातूनामर्चतिरत्र प्राप्त्यर्थः । रुचे त्वेतीह सव्यनासाविवरे । भासे त्वेतीह दक्षिणनेत्रे ज्योतिषे त्वेतीह सव्यनेत्रे । अभूदिति दक्षिणश्रोत्रे ॥१२॥ अथैतेषां पशूनामुपधानमनूद्य तत्र पुरुषस्य प्राथम्यं विधत्ते ॥१४॥ उखामध्ये पयःपूरिते पुरुषमुपदध्यात् एवं च सति यजमानस्य पुरुषत्वात्पयसः पशुकार्यत्वेन पशुत्वात्तत्र यजमानं प्रतिष्ठापयति । हे अग्ने चीयमानस्त्वमादित्यगर्भरूपं सहस्रस्य सदृशमत एव विश्वरूपं पुरुषं पयसा आर्द्रीकुरु किं च एनं परितो वर्जय अर्चिषा मा हिंसीः शतायुषं च कुरु इति मन्त्रार्थः ॥१७॥ दिग्भ्यश्चावय उत्पद्यन्ते दिशां सर्वोत्पत्तिमन्निमित्तकारणात् । असुरस्य मायां सुवर्भानोः सुतस्य (सुवर्तनीन सुनस्य) सम्बन्धित्वेन निर्मिताम् अत एव तैत्तिरीयके सुवर्भानुना (सुवर्णर्भानुना) सुतः सूर्यं तमसाविध्यत् तस्मै देवाः प्रायश्चित्तिमैच्छन् तस्य यत्प्रथमंतमगो (?) ऽपाघ्नन् सा कृष्णाविरभवदिति श्रूयते ॥२०॥ एषोऽग्निरजोऽग्नेः प्रजापतेरध्यजायत अग्नेः सकाशादुत्पन्नत्वादस्याग्नित्वम् ॥२१॥ ऋचो विभागेन तदिदं पुरुषसम्ब-

न्धि शीर्षकपालं विहाप्य विक्विय (विहिंख) श्रोहाक् त्यागे एयन्तस्य ल्यपि रूपम् ॥२५॥ अभिहोमानन्तरमुपहितानां पुरुषशिरःप्रभृतीनां पशुशिरसामुत्सर्गनामकैर्मन्त्रैरुपस्थानम् ॥२८॥ उत्तरस्यां दिशि वच्यमाणा मयुप्रभृतयः पशवोऽवतिष्ठन्तऽइति तत्र शोकनिधानायोदङ्मुखस्तिष्ठन्नुत्सृजेत् ॥३१॥ गौरः सिंहः ॥३३॥ स्वकीयवचा तेषामाच्छादनात् मनुष्यास्तावन्तनिवारणयाविज्ञमोन (? -॰रणायाविज्ञातेन) कम्बलेन शरीरमाच्छादयन्ति चतुष्पादोऽश्वा बलीवर्दाश्च (पदोश्वान्लीवदर्श) स्वभारवहने मार्दवाय पृष्ठे(थै) कम्बलेताच्छादिता भवन्ति ॥३५॥ शरभो नाम सिंहघातकः कश्चिन्मृगविशेषः ॥३६॥ अनिरुक्तया अविस्पष्टदेवतया यत्र देवताविशेषवाचकं पदं नास्ति तदनिरुक्तम् अनिरुक्तावादेतस्याग्नेयत्वम् अनिरुक्तो मन्त्र आग्नेयः प्राजापत्यो वा भवतीति ॥३८॥ उपस्थानानन्तरमग्निं पश्चाद्भागेनाहृत्य स्वयमातृण्णां प्रदक्षिणीकृत्य गत्वापस्या (पश्चाष्या) इष्टका उपदध्यात् । सर्वतः सर्वासु दिक्षु ॥४०॥ प्रतिदिशं पञ्चानामुपधाने विंशतिः सम्पद्यन्ते तत्र याः पञ्चदश पूर्वा इष्टकास्ता अपस्याख्या भवन्ति ॥४१॥ प्रकारान्तरेण पशूनां लोमसम्पत्तिमाह अथोऽइति कृष्णाजिनलोमानुबद्धया मृदोखाया निर्माणादुखायां यानि लोमानि सन्ति (संतति) तान्येव पशूनां लोमानि भवन्ति । ब्रग्रोमसम्पादने उक्तं पक्षद्वयमपि अभिमतमित्याह यदीति (!) यदि इतरेण अन्येन प्रकारेण तत्सम्पादनं भवति तर्हि तथैवास्तु अथ वा इतरेण प्रकारान्तरेण यदि भवति तर्हि तथैवास्तु । कृत्स्नान्कात्स्न्येन संस्कुर्मः सर्वावयवसम्पादनेन समृद्धान्कुर्मः ॥४३॥ अविशत् उपविष्टवान् अपां निर्ममिमा (मेन) दौर्बल्याद्गन्तुमक्षमो भूत्वा ॥४४॥ उक्तमन्त्रसाध्योपधानाः पञ्चेष्टकाः पूर्वस्यां दिशि उपदध्यात् एवं वच्यमाणमन्त्रसाध्योपधाना अपीष्टका पञ्च-पञ्च दक्षिणादिषु दिक्षूपधेयाः ॥५०॥ क्षियन्ति निवसन्ति ॥५४॥ श्रोत्रस्यान्तरार्द्रीभावात् ॥५५॥ गायत्रेण त्वेत्यादिभिः पञ्चभिर्मन्त्रैः उत्तरस्यां दिशि छन्दस्या उपदध्यात् ॥६१॥ अथासामपस्यानामङ्गुल्यात्मकत्वमाह ता एता इति ता अपस्याः । पञ्चानां-पञ्चानां सकृत्सादनमन्त्रः न तूपधानमन्त्रवत्प्रतीष्टकम् ॥६२॥२॥५॥

इति सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे माध्यन्दिनीयशतपथब्राह्मणभाष्ये सप्तमकाण्डव्याख्या समाप्ता ॥७॥ ॥

VARIOUS READINGS.

Adhyâya १. १. १४ निर्मङ्या॰ A. निर्मिङ्या॰ B. निर्मृङ्या॰ Sây. - २४ देवांऽ॥ ऊचिषे A. ॰वांऽ ऊ॰ B. Read: देवाँ॰. - २. ६ आरोहति Sây. —

Adhyâya २. २. ११ ॰न्नयवाह्णमि॰ AB. - १२ दक्षिणा AB. - १५ Read: मात्रा तावतैवा॰. —

Adhyâya ३. १. १२ °प्यायनवतीभ्यां Sây. (thus also ४४ and २. १.). १३ (and whereever the word occurs) लोकेष्टका Sây. - ३१ °धुर्बङ्गवर्ष° AB. - ३६ Read: रेतोरूपमिति. - ३८ Read: द्वे सिकते. - ४२ Read: °ह्मण उत्सन्नं. - ४५ °द्वेषो ह्वैवात्र A. Sây. (explained by एष). °द्वेषां ह्वैवात्र B. —

Adhyâya ४. १. १३ °स्मात्पूष्करं पूस्कर७ ह्व B. °स्मात्पुष्करं पूष्कर७ ह्व A. - २१ °स्पतीउङ्रनु A. °स्पतींङ्नु B. - ३६ कपुह्लल° A. कपुत्सल B. कपृत्सल Sây. - २. ४ एष आत्मनः Sây. - २२ Read: प्रजाः प्रजायन्ते. - २३ विराड्ढेमौ A1. विराड्ढ हेमौ A2. B. विराट् व ह्वीमौ Sây. - २४ विराड्ढेमा° B. विराड्ढ हेमा° A. विराढ्ढ ह्वीमा° Sây. - २५. २६ दधात्यन्तरे° according to Sâyaṇa's reading अन्तरा + इव. - ३६ Read: °त्प्राणास्तां नान्यथा. - ३१ सर्ववार्या A1. सर्ववीर्या A2. B. —

Adhyâya ५. १. ४ तृचो Sây. - २१ °न्मह्वान्भूवा B. Sây. - २२ Read: उक्ररदिति. - °मुद्रकर७ A. - २३ भवति मध्येसंगृह्वीतमिव A2. B. - २. १४ Read: °र्येणात्याद्धाति. - २५ विह्वाय्य B. - ३१ दाम्यान्नृ पा° A1. दाम्यान्नृः पा° A2. दाम्यान्निः पा° B. See पा° ८. ३. १०. - ४८° यामीति । अश्रं A. यामीत्य । श्रं B. —

ओम् । प्राणभृत उपदधाति । प्राणा वै प्राणभृतः प्राणानेवैतदुपदधाति ताः
प्रथमायां चिताऽउपदधाति पूर्वार्ध एषोऽग्नेर्यत्प्रथमा चितिः पुरस्तात्तत्प्राणान्दधा-
ति तस्मादिमे पुरस्तात्प्राणाः ॥१॥ ता दश-दशोपदधाति । दश वै प्राणा यद्
वाऽअपि बहु कृत्वो दश-दश दशैव तत्पञ्च कृत्वो दश-दशोपदधाति पञ्च वा
ऽएतान्पशूनुपदधाति दश-दश वाऽएकैकस्मिन्पशौ प्राणास्तदेषु सर्वेषु प्राणान्द-
धात्यनन्तर्हिताः पशुभ्य उपदधात्यनन्तर्हितांस्तत्पशुभ्यः प्राणान्दधाति सर्वत उप-
दधाति सर्वत एवैष्वेतत्प्राणान्दधाति ॥२॥ यद्वेव प्राणभृत उपदधाति । प्रजापते-
र्विस्रस्तात्प्राणा उदक्रामन्देवता भूत्वा तानब्रवीदुप मेत प्रति मऽएतद्धत्त येन मे
यूयमुदक्रमिष्टेति स वै तदन्नꣳ सृजस्व यत्ते वयं पश्यन्त उपवसामेति ते वाऽउभ-
ये सृजामहाऽइति तथेति ते प्राणाश्च प्रजापतिश्चैतदन्नमसृजन्तैताः प्राणभृतः ॥३॥
स पुरस्तादुपदधाति । अयं पुरो भुव इत्यग्निर्वै पुरस्तद्यत्तमाह पुर इति प्राञ्चꣳ
ह्यग्निमुद्धरन्ति प्राञ्चमुपचरन्त्यथ यद्भुव इत्याहाग्निर्वै भुवोऽग्नेर्हीदꣳ सर्वं भवति
प्राणो ह्याग्निर्भूत्वा पुरस्तात्तस्थौ तदेव तद्रूपमुपदधाति ॥४॥ तस्य प्राणो भौवा-
यन इति । प्राणं तस्माद्रूपादग्नेर्निरमिमीत वसन्तः प्राणायन इति वसन्तमृतुं प्रा
णान्निरमिमीत गायत्री वासन्तीति गायत्रीं छन्दो वसन्तादृतोर्निरमिमीत गायत्र्यै
गायत्रमिति गायत्र्यै छन्दसो गायत्रꣳ साम निरमिमीत गायत्रादुपाꣳशुरिति गाय-
त्रात्साम्न उपाꣳशुं ग्रहं निरमिमीतोपाꣳशोस्त्रिवृदित्युपाꣳशोर्ग्रहात्त्रिवृतꣳ स्तोमं
निरमिमीत त्रिवृतो रथन्तरमिति त्रिवृत स्तोमाद्रथन्तरं पृष्ठं निरमिमीत ॥५॥

वसिष्ठ ऋषिरिति । प्राणो वै वसिष्ठ ऋषिर्यद्वै नु श्रेष्ठस्तेन वसिष्ठोऽथो यद्वस्तृतमो वसति तेनोऽएव वसिष्ठः प्रजापतिगृहीतया त्वयेति प्रजापतिसृष्टया त्वयेत्येतत्प्राणं गृह्णामि प्रजाभ्य इति प्राणं पुरस्तात्प्रापादयत नानोपदधाति ये नानाकामाः प्राणे तांस्तद्दधाति सकृत्सादयत्येकं तत्प्राणं करोत्यथ यन्नाना सादयेत्प्राणꣳ ह विछिन्द्यात्सैषा त्रिवृदिष्टका यजुः सादनꣳ सूददोहास्तत्त्रिवृत्त्रिवृदग्निर्यावानग्निर्यावत्यस्य मात्रा तावत्तत्कृत्वोपदधाति ॥६॥ अथ दक्षिणतः । अयं दक्षिणा विश्वकर्मेत्ययं वै वायुर्विश्वकर्मा योऽयं पवतऽएष हीदꣳ सर्वं करोति तद्यत्तमाह दक्षिणेति तस्मादेष दक्षिणैव भूयिष्ठं वाति मनो ह वायुर्भूत्वा दक्षिणतस्तस्थौ तदेव तद्रूपमुपदधाति ॥७॥ ॥ शतम्४३०० ॥ ॥ तस्य मनो वैश्वकर्मणमिति । मनस्तस्माद्रूपाद्वायोर्निरमिमीत ग्रीष्मो मानस इति ग्रीष्ममृतुं मनसो निरमिमीत त्रिष्टुब्ग्रैष्मीति त्रिष्टुभं छन्दो ग्रीष्मादृतोर्निरमिमीत त्रिष्टुभः स्वारमिति त्रिष्टुभश्छन्दसः स्वारꣳ साम निरमिमीत स्वारादन्तर्याम इति स्वारात्साम्नोऽन्तर्यामं ग्रहं निरमिमीतान्तर्यामात्पञ्चदश इत्यन्तर्यामाद्ग्रहात्पञ्चदशꣳ स्तोमं निरमिमीत पञ्चदशाद्बृहदिति पञ्चदशात्स्तोमाद्बृहत्पृष्ठं निरमिमीत ॥८॥ भरद्वाज ऋषिरिति । मनो वै भरद्वाज ऋषिरन्नं वाजो यो वै मनो बिभर्ति सोऽन्नं वाजं भरति तस्मान्मनो भरद्वाज ऋषिः प्रजापतिगृहीतया त्वयेति प्रजापतिसृष्टया त्वयेत्येतन्मनो गृह्णामि प्रजाभ्य इति मनो दक्षिणतः प्रापादयत नानोपदधाति ये नानाकामा मनसि तांस्तद्दधाति सकृत्सादयत्येकं तन्मनः करोत्यथ यन्नाना सादयेन्मनो ह विछिन्द्यात्सैषा त्रिवृदिष्टका तस्योक्तो बन्धुः ॥९॥ ब्राह्मणम् ॥१॥

अथ पश्चात् । अयं पश्चाद्विश्वव्यचा इत्यसौ वाऽआदित्यो विश्वव्यचा यदा ह्येवैष उदेत्यथेदꣳ सर्वं व्यचो भवति तद्यत्तमाह पश्चादिति तस्मादेतं प्रत्यञ्चमेव यन्तं पश्यन्ति चक्षुर्ह्यादित्यो भूत्वा पश्चात्तस्थौ तदेव तद्रूपमुपदधाति ॥१॥ तस्य

चक्षुर्वै विश्वव्यचसमिति । चक्षुस्तस्माद्रूपादादित्यान्निरमिमीत वर्षाश्चाक्षुष्य इति वर्षा
ऋतुं चक्षुषो निरमिमीत जगती वार्षीति जगतीं छन्दो वर्षाभ्य ऋतोर्निरमिमीत
जगत्याऽऋक्सममिति जगत्यै छन्दस ऋक्समꣳ साम निरमिमीतऽर्क्समाच्छुक्र इत्यृ-
क्समात्साम्नः शुक्रं ग्रहं निरमिमीत शुक्रात्सप्तदश इति शुक्राद्ग्रहात्सप्तदशꣳ स्तो-
मं निरमिमीत सप्तदशाद्वैरूपमिति सप्तदशात्स्तोमाद्वैरूपं पृष्ठं निरमिमीत ॥२॥ ज-
मदग्निर्ऋषिरिति । चक्षुर्वै जमदग्निर्ऋषिर्यदेनेन जगत्पश्यत्यथो मनुते तस्माच्चक्षुर्ज-
मदग्निर्ऋषिः प्रजापतिगृहीतया त्वयेति प्रजापतिसृष्टया त्वयेत्येतच्चक्षुर्गृह्णामि प्रजाभ्य
इति चक्षुः पश्चात्प्रापादयत नानोपदधाति ये नानाकामाश्चक्षुषि तांस्तद्दधाति स-
कृत्सादयत्येकं तच्चक्षुः करोत्यथ यन्नाना सादयेच्चक्षुर्ह विच्छिन्द्यात्सैषा त्रिवृदिष्ट-
का तस्योक्तो बन्धुः ॥३॥ अथोत्तरतः । इदमुत्तरात्स्वरिति दिशो वाऽउत्तरात्त-
द्यत्ता आहोत्तरादित्युत्तरा ह्यस्मात्सर्वस्माद्दिशोऽथ यत्स्वरित्याह स्वर्गो हि लो-
को दिशः श्रोत्रꣳ ह दिशो भूत्वोत्तरतस्तस्थौ तदेव तद्रूपमुपदधाति ॥४॥ तस्य
श्रोत्रꣳ सौवमिति । श्रोत्रं तस्माद्रूपाद्दिग्भ्यो निरमिमीत शरच्छ्रौत्रीति शरदमृतुꣳ
श्रोत्रान्निरमिमीतानुष्टुप्शारदीत्यनुष्टुभं छन्दः शरद ऋतोर्निरमिमीतानुष्टुभ ऐड-
मित्यनुष्टुभश्छन्दस ऐडꣳ साम निरमिमीतैडान्मन्थीत्यैडात्साम्नो मन्थिनं ग्रहं नि-
रमिमीत मन्थिन एकविꣳश इति मन्थिनो ग्रहादेकविꣳशꣳ स्तोमं निरमिमीतै-
कविꣳशाद्वैराजमित्येकविꣳशात्स्तोमाद्वैराजं पृष्ठं निरमिमीत ॥५॥ विश्वामित्र ऋ-
षिरिति । श्रोत्रं वै विश्वामित्र ऋषिर्यदेनेन सर्वतः शृणोत्यथो यदस्मै सर्वतो
मित्रं भवति तस्माच्छ्रोत्रं विश्वामित्र ऋषिः प्रजापतिगृहीतया त्वयेति प्रजापतिसृष्ट-
या त्वयेत्येतच्छ्रोत्रं गृह्णामि प्रजाभ्य इति श्रोत्रमुत्तरतः प्रापादयत नानोपदधाति
ये नानाकामाः श्रोत्रे तांस्तद्दधाति सकृत्सादयत्येकं तच्छ्रोत्रं करोत्यथ यन्नाना सा-
दयेच्छ्रोत्रꣳ ह विच्छिन्द्यात्सैषा त्रिवृदिष्टका तस्योक्तो बन्धुः ॥६॥ अथ मध्ये । इ-

यमुपरि मतिरिति चन्द्रमा वाऽउपरि तद्यत्तमाहोपरीत्युपरि हि चन्द्रमा अथ यन्मतिरित्याह वाग्वै मतिर्वाचा हीदꣳ सर्वं मनुते वाग्घ चन्द्रमा भूत्वोपरिष्टात्तस्थौ तदेव तद्रूपमुपदधाति ॥७॥ तस्यै वाङ्मात्येति । वाचं तस्माद्रूपाच्चन्द्रमसो निरमिमीत हेमन्तो वाच्य इति हेमन्तमृतुं वाचो निरमिमीत पङ्क्तिर्हैमन्तीति पङ्क्तिं छन्दो हेमन्तादृतोर्निरमिमीत पङ्क्त्यै निधनवदिति पङ्क्त्यै छन्दसो निधनवत्साम निरमिमीत निधनवत आग्रयण इति निधनवतः साम्न आग्रयणं ग्रहं निरमिमीताग्रयणात्त्रिणवत्रयस्त्रिꣳशावित्याग्रयणाद्ग्रहात्त्रिणवत्रयस्त्रिꣳशौ स्तोमौ निरमिमीत त्रिणवत्रयस्त्रिꣳशाभ्याꣳ शाक्वररैवते ऽइति त्रिणवत्रयस्त्रिꣳशाभ्याꣳ स्तोमाभ्याꣳ शाक्वररैवते पृष्ठे निरमिमीत ॥८॥ विश्वकर्म ऽऋषिरिति । वाग्वै विश्वकर्म ऽर्षिर्वाचा हीदꣳ सर्वं कृतं तस्माद्वाग्विश्वकर्म ऽर्षिः प्रजापतिगृहीतया त्वयेति प्रजापतिसृष्टया त्वयेत्येतद्वाचं गृह्णामि प्रजाभ्य इति वाचमुपरिष्टात्प्रापादयत नानोपदधाति ये नानाकामा वाचि तांस्तद्दधाति सकृत्सादयत्येकां तद्वाचं करोत्यथ यन्नाना सादयेद्वाचꣳ ह विच्छिन्द्यात्सैषा त्रिवृदिष्टका तस्योक्तो बन्धुः ॥९॥ एतद्वै तदन्नम् । यत्तत्प्राणाश्च प्रजापतिश्चासृजन्तैतावान्वै सर्वो यज्ञो यज्ञ उ देवानामन्नम् ॥१०॥ ता दश-दशोपदधाति । दशाक्षरा विराड्विराडु कृत्स्नमन्नꣳ सर्वमेवास्मिन्नेतत्कृत्स्नमन्नं दधाति सर्वत उपदधाति सर्वत एवास्मिन्नेतत्कृत्स्नमन्नं दधाति ता हैता विराज एतान्प्राणान्बिभ्रति यत्प्राणान्बिभ्रति तस्मात्प्राणभृतः ॥११॥ ब्राह्मणम् ॥२॥

तदाहुः । किं प्राणाः किं प्राणभृत इति प्राणा एव प्राणा अङ्गानि प्राणभृत्यङ्गानि हि प्राणान्बिभ्रति प्राणास्त्वेव प्राणा अन्नं प्राणभृदन्नꣳ हि प्राणान्बिभर्ति ॥१॥ तदाहुः । कथमस्यैताः सर्वाः प्राजापत्या भवन्तीति यदेव सर्वास्वाह प्रजापतिगृहीतया त्वयेत्येवमु हास्यैताः सर्वाः प्राजापत्या भवन्ति ॥२॥ तदाहुः ।

यद्ग्रहाय गृहीताय स्तुवतेऽथ शꣳसत्यथ कस्मात्पुरस्ताद्ग्रहाणामृचश्च सामानि चो-
पदधातीति सꣳस्था वै कर्मणोऽन्वीक्षितव्यऽर्चा वै प्रतिपदा ग्रहो गृह्यतऽऋचि
साम गीयते तदस्यैतद्यत्पुरस्ताद्ग्रहाणामृचश्च सामानि चोपदधात्यथ यदुपरिष्टाद्ग्र-
हाणाꣳ स्तुतशस्त्रे भवतस्तदस्यैतद्यदुपरिष्टाद्ग्रहाणाꣳ स्तोमांश्च पृष्ठानि चोपदधा-
ति ॥३॥ तदाहुः । यदेतत्त्रयꣳ सह क्रियते ग्रह स्तोत्रꣳ शस्त्रमथात्र ग्रहं चैव स्तो-
त्रं चोपदधाति कथमस्यात्रापि शस्त्रमुपहितं भवतीति यद्वाव स्तोत्रे तच्छस्त्रं यासु
ह्येव स्तुवते ता उऽएवानुशꣳसत्येवमु हास्यात्रापि शस्त्रमुपहितं भवति ॥४॥
तदाहुः । यद्यथा पितुः पुत्रमेवं त्रीणि प्रथमान्याहाथ कस्मादृक्सामयोः संक्राम-
तीति साम वाऽऋचः पतिस्तद्यत्तत्रापि यथा पितुः पुत्रमेवं ब्रूयाद्यथा पतिꣳ सन्तं
पुत्रं ब्रूयात्तादृक्तत्तस्मादृक्सामयोः संक्रामति कस्मादु त्रिः संतनोतीति पितरं पुत्रं
पौत्रं तांस्तत्संतनोति तस्मादु तेभ्य एक एव ददाति ॥५॥ तद्याः पुरस्तादुपद-
धाति । ताः प्राणभृतोऽथ याः पश्चात्ताश्चक्षुर्भृतस्ता अपानभृतोऽथ या दक्षिणत-
स्ता मनोभृतस्ता उ व्यानभृतोऽथ या उत्तरतस्ताः श्रोत्रभृतस्ता उदानभृतोऽथ
या मध्ये ता वाग्भृतस्ता उ समानभृतः ॥६॥ तदु ह चरकाध्वर्यवः । अन्या एवा-
पानभृतो व्यानभृत उदानभृतः समानभृतश्चक्षुर्भृतो मनोभृतः श्रोत्रभृतो वाग्भृत
इत्युपदधति न तथा कुर्यादत्यहैव रेचयन्त्यत्रोऽएवैतानि सर्वाणि रूपाण्युपधी-
यन्ते ॥७॥ स वै पुरस्तादुपधाय पश्चादुपदधाति । प्राणो ह्यपानो भूत्वाङ्गुल्यग्रेभ्य
इति संचरत्यपान उ ह प्राणो भूत्वाङ्गुल्यग्रेभ्य इति संचरति तद्यत्पुरस्तादुपधाय
पश्चादुपदधात्येतावेवैतत्प्राणौ संतनोति संदधाति तस्मादेतौ प्राणौ संततौ सꣳ-
हितौ ॥८॥ अथ दक्षिणत उपधायोत्तरत उपदधाति । व्यानो ह्युदानो भूत्वाङ्गु-
ल्यग्रेभ्य इति संचरत्युदान उ ह व्यानो भूत्वाङ्गुल्यग्रेभ्य इति संचरति तद्यद्दक्षि-
णत उपधायोत्तरत उपदधात्येतावेवैतत्प्राणौ संतनोति संदधाति तस्मादेतौ प्रा-

णौ संततौ सꣳहितौ ॥ ९ ॥ अथ या मध्यऽउपदधाति । स प्राणस्ता रेतःसिचोर्वि-
लयोपदधाति पृष्टयो वै रेतःसिचौ मध्यमु पृष्टयो मध्यत एवास्मिन्नेतत्प्राणं दधा-
ति सर्वत उपदधाति सर्वत एवास्मिन्नेतत्प्राणं दधात्यथोऽएवꣳ ह्येष गुदः प्राणः
समन्तं नाभिं पर्यक्तोऽनूचीश्च तिरश्चीश्चोपदधाति तस्मादिमेऽन्वञ्चश्च तिर्यञ्चश्चात्म-
न्प्राणाः सꣳस्पृष्टा उपदधाति प्राणानेवैतत्संतनोति संदधाति तस्मादिमे प्राणाः
संतताः सꣳहिताः ॥ १० ॥ ब्राह्मणम् ॥ ३ ॥ ॥

ता हैके पुरुषमुपार्प्योपदधति । एष वै प्राणस्तमेता बिभ्रति यत्प्राणं बिभ्रति
तस्मात्प्राणभृत इति न तथा कुर्यादेषोऽहैव प्राणो य एष हिरण्मयः पुरुषस्तस्य
त्वयमात्मा यावदिदमभ्ययमग्निर्विहितस्तद्यद्धास्यैता अङ्गं नाभिप्राप्नुयुः प्राणो ह्यस्य
तदङ्गं नाभिप्राप्नुयाद्यद्वै प्राणोऽङ्गं नाभिप्राप्नोति शुष्यति वा वै तन्म्लायति वा
तस्मादेनाः परिश्रित्स्वेवोपार्प्योपदध्यादथ या मध्यऽउपदधाति नाभिरस्यैष आत्मा
पूर्णास्ता उऽएवैतस्मादनन्तर्हिताः ॥ १ ॥ तदाहुः । यदयं पुरो भुवोऽयं दक्षिणा वि-
श्वकर्मायं पश्चाद्विश्वव्यचा इदमुत्तरात्स्वरियमुपरि मतिरिति सम्प्रति दिशोऽभ्यनू-
च्यन्तेऽथ कस्मादेना अक्ष्णयादेशेषूपदधातीति प्राणा वै प्राणभृतस्ता यत्सम्प्रति
दिश उपदध्यात्प्रागपꣳ हैवायं प्राणः संचरेदथ यदेना एवमभ्यनूक्ताः सतीरक्ष्णया-
देशेषूपदधाति तस्मादयं प्रागपं प्राणः सन्नक्ष्णया सर्वाण्यङ्गानि सर्वमात्मानमनुसं-
चरति ॥ २ ॥ स एष पशुर्यदग्निः । सोऽत्रैव सर्वः कृत्स्नः संस्कृतस्तस्य याः पुर-
स्तादुपदधाति तौ बाहूऽअथ याः पश्चात्ते सक्थ्यावथ या मध्यऽउपदधाति स आ-
त्मा ता रेतःसिचोर्विलयोपदधाति पृष्टयो वै रेतःसिचौ मध्यमु पृष्टयो मध्यतो
ह्ययमात्मा सर्वत उपदधाति सर्वतो ह्ययमात्मा ॥ ३ ॥ तदाहुः । यत्पूर्वेषु गणे-
ष्वेकैकꣳ स्तोममेकैकं पृष्ठमुपदधात्यथ कस्मादत्र द्वौ स्तोमौ द्वे पृष्ठेऽउपदधाती-
त्यात्मा वाऽअस्यैष आत्मानं तदङ्गानां ज्येष्ठं वरिष्ठं वीर्यवत्तमं करोति तस्मा-

दयमात्माङ्गानां ज्येष्ठो वरिष्ठो वीर्यवत्तमः ॥४॥ तदाहुः । कथमस्यैषोऽग्निः सर्वः कृत्स्न इष्टकायामिष्टकायाꣳ संस्कृतो भवतीति मज्जा यजुरस्थीष्टका माꣳसꣳ सादनं त्वक्सूददोहा लोम पुरीषस्य यजुरन्नं पुरीषमेवमु हास्यैषोऽग्निः सर्वः कृत्स्न इष्टकायामिष्टकायाꣳ संस्कृतो भवति ॥५॥ स एष सार्वायुषोऽग्निः । स यो हैतमेवꣳ सार्वायुषमग्निं वेद सर्वꣳ हैवायुरेति ॥६॥ अथातः समञ्चनप्रसारणस्यैव । संचितꣳ हैके समञ्चनप्रसारणेनेत्यभिमृशन्ति पशुरेष यदग्निर्यदा वै पशुरङ्गानि सं चाञ्चति प्र च सारयत्यथ स तैर्वीर्यं करोति ॥७॥ संवत्सरोऽसि परिवत्सरोऽसि । इदावत्सरोऽसीद्वत्सरोऽसि वत्सरोऽसि उषसस्ते कल्पन्तामहोरात्रास्ते कल्पन्तामर्धमासास्ते कल्पन्तां मासास्ते कल्पन्तामृतवस्ते कल्पताꣳ संवत्सरस्ते कल्पताम् प्रेत्याऽएत्यै सं चाञ्च प्र च सारय सुपर्णचिदसि तया देवतयाङ्गिरस्वद्ध्रुवः सीदेति ॥८॥ अपि ह स्माह शाट्यायनिः । स्फोटतोर्हैकः पक्षयोरुपशुश्राव तेनाभिमृष्टस्य तस्मादेनमेतेनाभ्येव मृशेदिति ॥९॥ अथ ह स्माह स्वर्जिन्नाग्नजितः । नग्नजिद्वा गान्धारः प्राणो वै समञ्चनप्रसारणं यस्मिन्वाऽअङ्गे प्राणो भवति तत्सं चाञ्चति प्र च सारयति संचितमेवैनं बहिष्टादभ्यन्यात्तदस्मिन्प्राणꣳ समञ्चनप्रसारणं दधाति तथा सं चाञ्चति प्र च सारयतीति तदु हैव समञ्चनप्रसारणं यत्स तदुवाच राजन्यबन्धुरिव त्वेव तदुवाच यन्नु शतं कृत्वोऽथो सहस्रं बहिष्टादभ्यन्युर्न वै तस्मिंस्ते प्राणं दध्युर्यो वाऽआत्मन्प्राणः स एव प्राणस्तद्यत्प्राणभृत उपदधाति तदस्मिन्प्राणꣳ समञ्चनप्रसारणं दधाति तथा सं चाञ्चति प्र च सारयत्यथ लोकम्पृणेऽउपदधात्यस्याꣳ स्रक्त्यां तयोरुपरि बन्धुः पुरीषं निवपति तस्योपरि बन्धुः ॥१०॥ ब्राह्मणम् ॥४॥ प्रथमोऽध्यायः [४१] ॥ ॥

द्वितीयां चितिमुपदधाति । एतद्वै देवाः प्रथमां चितिं चित्वा समारोहन्नयं वै लोकः प्रथमा चितिरिममेव तल्लोकꣳ संस्कृत्य समारोहन् ॥१॥ तेऽब्रुवन् । चे-

तयध्वमिति चितिमिच्छतेति वाव तदब्रुवन्निति ऊर्ध्वमिच्छतेति ते चेतयमाना एतां द्वितीयां चितिमपश्यन्यदूर्ध्वं पृथिव्या अर्वाचीनमन्तरिक्षात्तेषामेष लोकोऽध्रुव इवाप्रतिष्ठित-इव मनस्यासीत् ॥२॥ तेऽश्विनावब्रुवन् । युवं वै ब्रह्माणौ भिषजौ स्थो युवं न इमां द्वितीयां चितिमुपधत्तमिति किं नौ ततो भविष्यतीति युवमेव नोऽस्याऽअग्निचित्यायाऽअध्वर्यू भविष्यथ इति तथेति तेभ्य एतामश्विनौ द्वितीयां चितिमुपाधत्तां तस्मादाहुरश्विनावेव देवानामध्वर्यूऽइति ॥३॥ स उपदधाति । ध्रुवक्षितिर्ध्रुवयोनिर्ध्रुवासीति यद्वै स्थिरं यत्प्रतिष्ठितं तद्ध्रुवमथ वाऽएषामेष लोकोऽध्रुव-इवाप्रतिष्ठित-इव मनस्यासीत्तमेवैतत्स्थिरं ध्रुवं कृत्वा प्रत्यधत्तां ध्रुवं योनिमासीद साधुयेति स्थिरं योनिमासीद साधुयेत्येतदुख्यस्य केतुं प्रथमं जुषाणेत्ययं वाऽअग्निरुख्यस्तस्यैष प्रथमः केतुर्यत्प्रथमा चितिस्तां जुषाणेत्येतदश्विनाध्वर्यू सादयतामिह त्वेत्यश्विनौ ह्यध्वर्यूऽउपाधत्ताम् ॥४॥ कुलायिनी घृतवती पुरंधिरिति । कुलायमिव वै द्वितीया चितिः स्योने सीद सदने पृथिव्या इति पृथिवी वै प्रथमा चितिस्तस्यै शिवे स्योने सीद सदनऽइत्येतदभि त्वा रुद्रा वसवो गृणन्त्वित्येतास्त्वां देवता अभिगृणन्त्वित्येतदिमा ब्रह्म पीपिहि सौभगायेतीमा ब्रह्माव सौभगायेत्येतदश्विनाध्वर्यू सादयतामिह त्वेत्यश्विनौ ह्यध्वर्यूऽउपाधत्ताम् ॥५॥ स्वैर्दक्षैर्दक्षपितेह सीदेति । स्वेन वीर्येणेह सीदेत्येतद्देवानाꣳ सुम्ने बृहते रणायेति देवानाꣳ सुम्नाय महते रणायेत्येतत्पितेवैधि सूनवऽआ सुशेवेति यथा पिता पुत्राय स्योनः सुशेव एवꣳ सुशेवैधीत्येतत्स्वावेशा तन्वा संविशस्वेत्यात्मा वै तनूः स्वावेशेनात्मना संविशस्वेत्येतदश्विनाध्वर्यू सादयतामिह त्वेत्यश्विनौ ह्यध्वर्यूऽउपाधत्ताम् ॥६॥ पृथिव्याः पुरीषमसीति । पृथिवी वै प्रथमा चितिस्तस्या एतत्पुरीषमिव यद्द्वितीयाप्सो नामेति रसो नामेत्येतत्तां त्वा विश्वेऽअभिगृणन्तु देवा इति तां त्वा सर्वेऽभिगृणन्तु देवा इत्येतत्स्तोमपृष्ठा घृतवतीह

सीदेति यान्त्स्तोमानस्यां ताꣳस्यमानो भवति तैरेषा स्तोमपृष्ठा प्रजावदस्मै द्रविणायजस्वेति प्रजावदस्मै द्रविणमायजस्वेत्येतदश्विनाध्वर्यू सादयतामिह त्वेत्यश्विनौ ह्यध्वर्यूऽउपाधत्ताम् ॥७॥ ता एता दिशः । ता रेतःसिचोर्वेलयोपदधातीमे वै रेतःसिचावनयोस्तद्दिशो दधाति तस्मादनयोर्दिशः सर्वत उपदधाति सर्वतस्तद्दिशो दधाति तस्मात्सर्वतो दिशः सर्वतः समीचीः सर्वतस्तत्समीचीर्दिशो दधाति तस्मात्सर्वतः समीच्यो दिशस्ता नानोपदधाति नाना सादयति नाना सूददोहसाऽधिवदति नाना हि दिशः ॥८॥ अथ पञ्चमीं दिश्यामुपदधाति । ऊर्ध्वा ह सा दिक्सा या सोर्ध्वा दिगसौ स आदित्योऽमुमेवैतदादित्यमुपदधाति तामन्तरेण दक्षिणां दिश्यामुपदधात्यमुं तदादित्यमन्तरेण दक्षिणां दिशं दधाति तस्मादेषोऽन्तरेण दक्षिणां दिशमेति ॥९॥ अदित्यास्त्वा पृष्ठे सादयामीति । इयं वाऽअदितिरस्यामेवैनमेतत्प्रतिष्ठायां प्रतिष्ठापयत्यन्तरिक्षस्य धर्त्रीं विष्टम्भनीं दिशामधिपत्नीं भुवनानामित्यन्तरिक्षस्य ह्येष धर्ता विष्टम्भनो दिशामधिपतिर्भुवनानामूर्मिर्द्रप्सो ऽअपामसीति रसो वाऽऊर्मिर्विश्वकर्मा तऽऋषिरिति प्रजापतिर्वै विश्वकर्मा प्रजापतिसृष्टासीत्येतदश्विनाध्वर्यू सादयतामिह त्वेत्यश्विनौ ह्यध्वर्यूऽउपाधत्ताम् ॥१०॥ यद्वेवैता आश्विनीरुपदधाति । प्रजापतिं विस्रस्तं देवता आदाय व्युदक्रामंस्तस्य यदूर्ध्वं प्रतिष्ठायाऽअवाचीनं मध्यात्तदस्याश्विनावादायोत्क्रम्यातिष्ठताम् ॥११॥ तावब्रवीत् । उप मेतं प्रति मऽएतद्धत्तं येन मे युवमुदक्रमिष्टमिति किं नौ ततो भविष्यतीति युवद्देवत्यमेव मऽएतदात्मनो भविष्यतीनि तथेति तदस्मिन्नेतदश्विनौ प्रत्यधत्ताम् ॥१२॥ तद्या एताः पञ्चाश्विन्यः । एतदस्य तदात्मनस्तद्यदेता अत्रोपदधाति यदेवास्यैता आत्मनस्तदस्मिन्नेतत्प्रतिदधाति तस्मादेता अत्रोपदधाति ॥१३॥ ध्रुवक्षितिर्ध्रुवयोनिर्ध्रुवासीति । यद्धि स्थिरं यत्प्रतिष्ठितं तद्ध्रुवमथ वाऽअस्यैतदस्थिरमिवाध्रुवमिवात्मन आसीत्तदेवैतत्स्थिरं ध्रुवं कृत्वा प्रत्यधत्ताम् ॥१४॥

कुलायिनी घृतवती पुरंधिरिति । कुलायमिव वाऽअस्यैतदात्मनः स्वैर्दक्षैर्दक्षपितेहृ सीदेत्यदक्षयतामेवास्यैतदात्मनः पृथिव्याः पुरीषमसीति पुरीषसꣳहितमिव वाऽअस्यैतदात्मनो रेतःसिचोर्वेलया पृष्ठ्यो वै रेतःसिचौ पृष्टिसाचयमिव वाऽअस्यैतदात्मनः सर्वत उपदधाति सर्वतो ह्यस्यैतदश्विनावात्मनः प्रत्यधत्ताम् ॥१५॥ अथर्तव्येऽउपदधाति । ऋतव एते यदृतव्येऽऋतूनेवैतदुपदधाति शुक्रश्च शुचिश्च ग्रैष्मावृतूऽइति नामनीऽएनयोरेते नामभ्यामेवैनेऽएतदुपदधाति द्वेऽइष्टके भवतो द्वौ हि मासावृतुः सकृत्सादयत्येकं तदृतुं करोति ॥१६॥ तद्यदेतेऽअत्रोपदधाति । संवत्सर एषोऽग्निरिमेऽउ लोकाः संवत्सरस्तस्य यदूर्ध्वं पृथिव्या अर्वाचीनमन्तरिक्षात्तदस्यैषा द्वितीया चितिस्तद्वस्य ग्रीष्म ऋतुस्तद्यदेतेऽअत्रोपदधाति यदेवास्यैतेऽआत्मनस्तदस्मिन्नेतत्प्रतिदधाति तस्मादेतेऽअत्रोपदधाति ॥१७॥ यद्वेवैतेऽअत्रोपदधाति । प्रजापतिरेषोऽग्निः संवत्सर उ प्रजापतिस्तस्य यदूर्ध्वं प्रतिष्ठाया अवाचीनं मध्यात्तदस्यैषा द्वितीया चितिस्तद्वस्य ग्रीष्म ऋतुस्तद्यदेतेऽअत्रोपदधाति यदेवास्यैतेऽआत्मनस्तदस्मिन्नेतत्प्रतिदधाति तस्मादेतेऽअत्रोपदधाति ॥१८॥ ब्राह्मणम् ॥५ [२. १.] ॥ ॥

अथ वैश्वदेवीरुपदधाति । एषा वै सा द्वितीया चितिर्यामिभ्यस्तदश्विनाऽउपाधत्तां तामुपधायेदꣳ सर्वमभवतां यदिदं किं च ॥१॥ ते देवा अब्रुवन् । अश्विनौ वाऽइदꣳ सर्वमभूतामुप तज्जानीत यथा वयमिहाप्यसामेति तेऽब्रुवंश्चेतयध्वमिति चितिमिच्छतेति वाव तदब्रुवंस्तदिच्छत यथा वयमिहाप्यसामेति ते चेतयमाना एता इष्टका अपश्यन्वैश्वदेवीः ॥२॥ तेऽब्रुवन् । अश्विनौ वाऽइदꣳ सर्वमभूतामश्विभ्यामेवाश्विनोश्चितिमनूपदधामहाऽइति तेऽश्विभ्यामेवाश्विनोश्चितिमनूपादधत तस्मादेतामाश्विनी चितिरित्याचक्षते तस्माद्यथैव पूर्वासामुदर्क एवमेतासामश्विभ्याꣳ ह्येवाश्विनोश्चितिमनूपादधत ॥३॥ यद्वेव वैश्वदेवीरुपदधाति । ये वै ते विश्वे

देवा एतां द्वितीयां चितिमपश्यन्ये तऽएतेन रसेनोपायंस्तऽएते तानेवैतदुपद-
धाति ता एताः सर्वाः प्रजास्ता रेतःसिचोर्वेलयोपदधातीमे वै रेतःसिचावनयो-
स्तत्प्रजा दधाति तस्मादनयोः प्रजाः सर्वत उपदधाति सर्वतस्तत्प्रजा दधाति त-
स्मात्सर्वतः प्रजा दिश्या अनूपदधाति दिक्षु तत्प्रजा दधाति तस्मात्सर्वासु दिक्षु
प्रजाः ॥४॥ यद्वेव वैश्वदेवीरुपदधाति । प्रजापतेर्विस्रस्तात्सर्वाः प्रजा मध्यत उद-
क्रामन्नेतस्या अधि योनेस्ता एनमेतस्मिन्नात्मनः प्रतिहिते प्रापद्यन्त ॥५॥ स यः
स प्रजापतिर्व्यस्रꣳसत । अयमेव स योऽयमग्निश्चीयतेऽथ या अस्मात्ताः प्रजा म-
ध्यत उदक्रामन्नेतास्ता वैश्वदेव्य इष्टकास्तद्यदेता उपदधाति या एवास्मात्ताः प्रजा
मध्यत उदक्रामंस्ता अस्मिन्नेतत्प्रपादयति रेतःसिचोर्वेलया पृष्टयो वै रेतःसिचौ
मध्यमु पृष्टयो मध्यत एवास्मिन्नेताः प्रजाः प्रपादयति सर्वत उपदधाति सर्वत ए-
वास्मिन्नेताः प्रजाः प्रपादयति ॥६॥ यद्वेव वैश्वदेवीरुपदधाति । एतद्वै प्रजापतिरे-
तस्मिन्नात्मनः प्रतिहितेऽकामयत प्रजाः सृजेय प्रजायेयेति स ऋतुभिरद्भिः प्राणैः
संवत्सरेणाश्विभ्याꣳ सयुग्भूर्वैताः प्रजाः प्राजनयत्तथैवैतद्यजमान एताभिर्देवताभिः
सयुग्भूर्वैताः प्रजाः प्रजनयति तस्मादु सर्वास्वेव सजूः-सजूरित्यनुवर्तते ॥७॥ सजूर्ऋ-
तुभिरिति । तदृतून्प्राजनयदृतुभिर्वै सयुग्भूर्वा प्राजनयत्सजूर्विधाभिरित्यापो वै वि-
धा अद्भिर्हीदꣳ सर्वं विहितमद्भिर्वै सयुग्भूर्वा प्राजनयत्सजूर्देवैरिति तद्देवान्प्राज-
नयद्यद्देवा इत्याचक्षते सजूर्देवैर्वयोनाधैरिति प्राणा वै देवा वयोनाधाः प्राणैर्ही-
दꣳ सर्वं वयुनं नद्धमथो छन्दाꣳसि वै देवा वयोनाधाश्छन्दोभिर्हीदꣳ सर्वं वयुनं
नद्धं प्राणैर्वै सयुग्भूर्वा प्राजनयदग्नये त्वा वैश्वानरायेति संवत्सरो वाऽअग्निर्वैश्वानरः
संवत्सरेण वै सयुग्भूर्वा प्राजनयदश्विनाध्वर्यू सादयतामिह त्वेत्यश्विभ्यां वै सयुग्भू-
र्वा प्राजनयत् ॥८॥ सजूर्वसुभिरिति दक्षिणतः । तद्वसून्प्राजनयत्सजू रुद्रैरिति प-
श्चात्तद्रुद्रान्प्राजनयत्सजूरादित्यैरित्युत्तरतस्तदादित्यान्प्राजनयत्सजूर्विश्वैर्देवैरित्युप

रिष्टात्तद्विश्वान्देवान्प्राजनयत्ता वै समानप्रभृतयः समानोदर्का नाना मध्यतस्ता यत्समानप्रभृतयः समानोदर्काः समानीभिर्हि देवताभिः पुरस्ताच्चोपरिष्टाच्च सयुग्भूत्वा प्राजनयदथ यन्नाना मध्यतोऽन्या-अन्या हि प्रजा मध्यतः प्राजनयत् ॥१॥ ब्राह्मणम् ॥ ६ [२. २.] ॥ ॥

अथ प्राणभृत उपदधाति । एतद्वै देवा अब्रुवंश्चेतयध्वमिति चितिमिच्छतेति वाव तदब्रुवंस्ते चेतयमाना वायुमेव चितिमपश्यंस्तामस्मिन्नदधुस्तथैवास्मिन्नयमेतद्दधाति ॥१॥ प्राणभृत उपदधाति । प्राणो वै वायुर्वायुमेवास्मिन्नेतद्दधाति रेतःसिचोर्वेलयेमे वै रेतःसिचावनयोस्तद्वायुं दधाति तस्मादनयोर्वायुः सर्वत उपदधाति सर्वतस्तद्वायुं दधाति तस्मात्सर्वतो वायुः सर्वतः समीचीः सर्वतस्तत्सम्यञ्चं वायुं दधाति तस्मात्सर्वतः सम्यङ्भूत्वा सर्वाभ्यो दिग्भ्यो वाति दिश्या अनूपदधाति दिक्षु तद्वायुं दधाति तस्मात्सर्वासु दिक्षु वायुः ॥२॥ यद्वेव प्राणभृत उपदधाति । आस्वेवैतत्प्रजासु प्राणान्दधाति ता अनन्तर्हिता वैश्वदेवीभ्य उपदधात्यनन्तर्हितांस्तत्प्रजाभ्यः प्राणान्दधाति प्राणं मे पाह्यपानं मे पाहि व्यानं मे पाहि चक्षुर्म ऽउर्व्या विभाहि श्रोत्रं मे श्लोकयेत्येतानेवास्वेतत्क्लृप्तान्प्राणान्दधाति ॥३॥ अथापस्या उपदधाति । एतद्वै देवा अब्रुवंश्चेतयध्वमिति चितिमिच्छतेति वाव तदब्रुवंस्ते चेतयमाना वृष्टिमेव चितिमपश्यंस्तामस्मिन्नदधुस्तथैवास्मिन्नयमेतद्दधाति ॥४॥ अपस्या उपदधाति । आपो वै वृष्टिर्वृष्टिमेवास्मिन्नेतद्दधाति रेतःसिचोर्वेलयेमे वै रेतःसिचावनयोस्तद्वृष्टिं दधाति तस्मादनयोर्वर्षति सर्वत उपदधाति सर्वतस्तद्वृष्टिं दधाति तस्मात्सर्वतो वर्षति सर्वतः समीचीः सर्वतस्तत्समीचीं वृष्टिं दधाति तस्मात्सर्वतः सम्यङ्भूत्वा सर्वाभ्यो दिग्भ्यो वर्षति वायव्या अनूपदधाति वायौ तद्वृष्टिं दधाति तस्माद्यां दिशं वायुरेति तां दिशं वृष्टिरन्वेति ॥५॥ यद्वेवापस्या उपदधाति । एष्वेवैतत्प्राणेष्वपो दधाति ता अनन्तर्हिताः प्राणभृद्भ्य उपदधात्यन-

न्तर्हितास्तत्प्राणेभ्योऽपो दधात्यथोऽअन्नं वाऽआपोऽनन्तर्हितं तत्प्राणेभ्योऽन्नं द-
धात्यपः पिन्वौषधीर्जिन्व द्विपादव चतुष्पात्पाहि दिवो वृष्टिमेरयेत्येता एवैत-
तत्क्लृप्ता अपो दधाति ॥६॥ अथ छन्दस्या उपदधाति । एतद्वै देवा अब्रुवंश्चेतय-
ध्वमिति चितिमिच्छतेति वाव तदब्रुवंस्ते चेतयमानाः पशूनेव चितिमपश्यंस्तान-
स्मिन्नदधुस्तथैवास्मिन्नयमेतद्दधाति ॥७॥ छन्दस्या उपदधाति । पशवो वै छन्दाꣳ-
सि पशूनेवास्मिन्नेतद्दधाति सर्वत उपदधाति सर्वतस्तत्पशून्दधाति तस्मात्सर्वतः
पशवोऽपस्या अनूपदधात्यप्सु तत्पशून्प्रतिष्ठापयति तस्माद्यदा वर्षत्यथ पशवः
प्रतितिष्ठन्ति ॥८॥ यद्वेव छन्दस्या उपदधाति । प्रजापतेर्विस्रस्तात्पशव उदक्रामं-
श्छन्दाꣳसि भूत्वा तान्गायत्री छन्दो भूत्वा वयसाप्नोत्तद्यद्गायत्र्याप्नोदेतद्धि छन्द आ-
शिष्ठꣳ सा तद्भूत्वा प्रजापतिरेतान्पशून्वयसाप्नोत् ॥९॥ मूर्धा वय इति । प्रजाप-
तिर्वै मूर्धा स वयोऽभवत्प्रजापतिश्छन्द इति प्रजापतिरेव छन्दोऽभवत् ॥१०॥
क्षत्रं वय इति । प्रजापतिर्वै क्षत्रꣳ स वयोऽभवन्मयंदं छन्द इति यद्वाऽअनिरुक्तं
तन्मयंदमनिरुक्तो वै प्रजापतिः प्रजापतिरेव छन्दोऽभवत् ॥११॥ विष्टम्भो वय
इति । प्रजापतिर्वै विष्टम्भः स वयोऽभवदधिपतिश्छन्द इति प्रजापतिर्वाऽअधि-
पतिः प्रजापतिरेव छन्दोऽभवत् ॥१२॥ विश्वकर्मा वय इति । प्रजापतिर्वै विश्व-
कर्मा स वयोऽभवत्परमेष्ठी छन्द इत्यापो वै प्रजापतिः परमेष्ठी ता हि परमे
स्थाने तिष्ठन्ति प्रजापतिरेव परमेष्ठी छन्दोऽभवत् ॥१३॥ तानि वाऽएतानि ।
चत्वारि वयाꣳसि चत्वारि छन्दाꣳसि तदष्टावष्टाक्षरा गायत्र्येषा वै सा गायत्री या
तद्भूत्वा प्रजापतिरेतान्पशून्वयसाप्नोत्तस्माज्जीर्णं पशुं वयसाप इत्याचक्षते तस्मादु
सर्वास्वेव वयो वय इत्यनुवर्ततेऽथ येऽस्मात्ते पशव उदक्रामन्नेति ते पञ्चदशोत्त-
रे वज्रो वै पशवो वज्रः पञ्चदशस्तस्माद्यस्य पशवो भवन्त्यपैव स पाप्मानꣳ
हते वज्रो ह्येव तस्य पाप्मानमपघ्नन्ति तस्माद्यां कां च दिशं पशुमानेति

वज्रविद्वताॅं ह्वैव तामन्वेति ॥ १४ ॥ ब्राह्मणम् ॥ ७ [२. ३.] ॥ ॥

बस्तो वय इति बस्तं वयसाप्नोद्विवलं छन्द इत्येकपदा वै विवलं छन्द एकपदा ह भूत्वाजा उच्चक्रमुः ॥ १ ॥ वृष्णिर्वय इति । वृष्णिं वयसाप्नोद्विशालं छन्द इति द्विपदा वै विशालं छन्दो द्विपदा ह भूत्वावय उच्चक्रमुः ॥ २ ॥ पुरुषो वय इति । पुरुषं वयसाप्नोत्तन्द्रं छन्द इति पङ्क्तिर्वै तन्द्रं छन्दः पङ्क्तिर्ह भूत्वा पुरुषा उच्चक्रमुः ॥ ३ ॥ व्याघ्रो वय इति । व्याघ्रं वयसाप्नोदनाधृष्टं छन्द इति विराड्वा ऽअन्नमनाधृष्टं छन्दोऽन्नं वै विराडन्नमनाधृष्टं विराड् भूत्वा व्याघ्रा उच्चक्रमुः ॥ ४ ॥ सिॅंहो वय इति । सिॅंहं वयसाप्नोच्छदिश्छन्द इत्यतिछन्दा वै छदिश्छन्दः सा हि सर्वाणि छन्दाॅंसि छादयत्यतिछन्दा ह भूत्वा सिॅंहा उच्चक्रमुरथातो निरुक्तानेव पशून्निरुक्तानि छन्दाॅंस्युपदधाति ॥ ५ ॥ पष्ठवाड्वय इति । पष्ठवाहं वयसाप्नोद्बृहती छन्द इति बृहती ह भूत्वा पष्ठवाह उच्चक्रमुः ॥ ६ ॥ उक्षा वय इति । उक्षाणं वयसाप्नोत्ककुप्छन्द इति ककुब्भ भूत्वोक्षाण उच्चक्रमुः ॥ ७ ॥ ऋषभो वय इति । ऋषभं वयसाप्नोत्सतोबृहती छन्द इति सतोबृहती ह भूत्वऽर्षभा उच्चक्रमुः ॥ ८ ॥ अनड्वान्वय इति । अनड्वाहं वयसाप्नोत्पङ्क्तिश्छन्द इति पङ्क्तिर्ह भूत्वानड्वाह उच्चक्रमुः ॥ ९ ॥ धेनुर्वय इति । धेनुं वयसाप्नोज्जगती छन्द इति जगती ह भूत्वा धेनव उच्चक्रमुः ॥ १० ॥ त्र्यविर्वय इति । त्र्यविं वयसाप्नोत्त्रिष्टुप्छन्द इति त्रिष्टुब्भ भूत्वा त्र्यवय उच्चक्रमुः ॥ ११ ॥ दित्यवाड्वय इति । दित्यवाहं वयसाप्नोद्विराट् छन्द इति विराड भूत्वा दित्यवाह उच्चक्रमुः ॥ १२ ॥ पञ्चाविर्वय इति । पञ्चाविं वयसाप्नोद्गायत्री छन्द इति गायत्री ह भूत्वा पञ्चावय उच्चक्रमुः ॥ १३ ॥ त्रिवत्सो वय इति । त्रिवत्सं वयसाप्नोदुष्णिक्छन्द इत्युष्णिग्घ भूत्वा त्रिवत्सा उच्चक्रमुः ॥ १४ ॥ तुर्यवाड्वय इति । तुर्यवाहं वयसाप्नोदनुष्टुप्छन्द इत्यनुष्टुब्भ भूत्वा तुर्यवाह उच्चक्रमुः ॥ १५ ॥ एते वै ते पशवः । यांस्तत्प्रजापतिर्वयसाप्नोत्स वै पशुं प्रथममाह्वाय

वयोऽथ छन्दो वयसा च श्येनांश्छन्दसा च परिगत्यात्मन्नधत्तात्मन्नकुरुत तथैवै-
नानयमेतद्वयसा चैव छन्दसा च परिगत्यात्मन्धत्तऽआत्मन्कुरुते ॥१६॥ स एष प-
शुर्यदग्निः । सोऽत्रैव सर्वः कृत्स्नः संस्कृतस्तस्य याः पुरस्तादुपदधाति शिरोऽस्य
ता अथ या दक्षिणतश्चोत्तरतश्च स आत्माथ याः पश्चात्तत्पुच्छम् ॥१७॥ स वै पु-
रस्तादेवाग्रऽउपदधाति । शिरो हि प्रथमं जायमानस्य जायतेऽथ दक्षिणत उप-
धायोत्तरत उपदधाति सार्धमयमात्मा जायाताऽइत्यथ पश्चात्पुच्छꣳ ह्यन्ततो जाय-
मानस्य जायते ॥१८॥ तद्यानि वर्षिष्ठानि छन्दाꣳसि । ये स्थविष्ठाः पशवस्तान्म-
ध्यऽउपदधाति मध्यं तत्प्रति पशुं वरिष्ठं करोति तस्मान्मध्यं प्रति पशुर्वरिष्ठोऽथ
ये वीर्यवत्तमाः पशवस्तान्दक्षिणत उपदधाति दक्षिणं तदर्धं पशोर्वीर्यवत्तरं क-
रोति तस्माद्दक्षिणोऽर्धः पशोर्वीर्यवत्तरः ॥१९॥ पूर्वार्धं च जघनार्धं चाणिष्ठौ क-
रोति । यदक्ष्णामूश्चतस्रस्तेनैना अणिष्ठा अथ यदिह ह्रसिष्ठान्पशूनुपदधाति तेनो
ऽएता अणिष्ठाः पूर्वार्धं च तज्जघनार्धं च पशोरणिष्ठौ करोति तस्मात्पूर्वार्धश्च
जघनार्धश्च पशोरणिष्ठौ तस्मात्पूर्वार्धेन च जघनार्धेन च पशुरुच्च तिष्ठति सं च
विशत्यथ लोकम्पृणाऽउपदधात्यस्याꣳ स्रक्त्यां तयोरुपरि बन्धुः पुरीषं निवपति
तस्योपरि बन्धुः ॥२०॥ ब्राह्मणम् ॥ ८ [२. ४.] ॥ द्वितीयोऽध्यायः [५०.] ॥ ॥

तृतीयां चितिमुपदधाति । एतद्वै देवा द्वितीयां चितिं चित्वा समारोहन्यदूर्ध्वं
पृथिव्या अर्वाचीनमन्तरिक्षात्तदेव तत्संस्कृत्य समारोहन् ॥१॥ तेऽब्रुवन् । चेत-
यध्वमिति चितिमिच्छतेति वाव तदब्रुवन्नित ऊर्ध्वमिच्छतेति ते चेतयमाना अन्तरि-
क्षमेव बृहतीं तृतीयां चितिमपश्यंस्तेभ्य एष लोकोऽछन्दयत् ॥२॥ तऽइन्द्राग्नी
ऽअब्रुवन् । युवं न इमां तृतीयां चितिमुपधत्तमिति किं नौ ततो भविष्यतीति
युवमेव नः श्रेष्ठौ भविष्यथ इति तथेति तेभ्य एतामिन्द्राग्नी तृतीयां चितिमुपा-
धत्तां तस्मादाहुरिन्द्राग्नीऽएव देवानाꣳ श्रेष्ठाविति ॥३॥ स वाऽइन्द्राग्निभ्यामुप-

दधाति । विश्वकर्मणा सादयतीन्द्राग्नी च वै विश्वकर्मा चैतां तृतीयां चितिमपश्यं-
स्तस्मादिन्द्राग्निभ्यामुपदधाति विश्वकर्मणा सादयति ॥४॥ यद्वेवेन्द्राग्निभ्यामुपदधा-
ति । विश्वकर्मणा सादयति प्रजापतिं विस्रस्तं देवता आदाय व्युदक्रामंस्तस्येन्द्रा-
ग्नी च विश्वकर्मा च मध्यमादायोत्क्रम्यातिष्ठन् ॥५॥ तानब्रवीत् । उप मेत प्रति
मऽएतद्धत्त येन मे यूयमुदक्रमिष्टेति किं नस्ततो भविष्यतीति युष्मद्देवत्यमेव म
ऽएतदात्मनो भविष्यतीति तथेति तदस्मिन्नेतदिन्द्राग्नी च विश्वकर्मा च प्रत्यदधुः
॥६॥ ॥ शतम् ४४०० ॥ ॥ तद्येषा मध्यमा स्वयमातृण्णा । एतदस्य तदात्मनस्तद्य-
देतामत्रोपदधाति यदेवास्यैषात्मनस्तदस्मिन्नेतत्प्रतिदधाति तस्मादेतामत्रोपदधाति
॥७॥ इन्द्राग्नीऽअव्यथमानाम् । इष्टकां दृꣳहतं युवमिति यथैव यजुस्तथा बन्धुः
पृष्ठेन द्यावापृथिवीऽअन्तरिक्षं च विबाधसऽइति पृष्ठेन ह्येषा द्यावापृथिवीऽअ-
न्तरिक्षं च विबाधते ॥८॥ विश्वकर्मा त्वा सादयत्विति । विश्वकर्मा ह्येतां तृतीयां
चितिमपश्यदन्तरिक्षस्य पृष्ठे व्यचस्वतीं प्रथस्वतीमित्यन्तरिक्षस्य ह्येतत्पृष्ठं व्यच-
स्वत्प्रथस्वदन्तरिक्षं यच्छान्तरिक्षं दृꣳहान्तरिक्षं मा हिꣳसीरित्यात्मानं यच्छात्मानं
दृꣳहात्मानं मा हिꣳसीरित्येतत् ॥९॥ विश्वस्मै प्राणायापानाय । व्यानायोदाना-
येति प्राणो वै स्वयमातृण्णा सर्वस्माऽउ वाऽएतस्मै प्राणः प्रतिष्ठायै चरित्राये-
तीमे वै लोकाः स्वयमातृण्णा इमऽउ लोकाः प्रतिष्ठा चरित्रं वायुष्ट्वाभिपात्विति
वायुष्ट्वाभिगोपायत्वित्येतन्मह्या स्वस्त्येति महत्या स्वस्त्येत्येतच्छर्दिषा शंतमेने-
ति यच्छर्दिः शंतमं तेनेत्येतत्सादयित्वा सूददोहसाधिवदति तस्योक्तो बन्धुरथ
साम गायति तस्योपरि बन्धुः ॥१०॥ अथ दिश्या उपदधाति । दिशो वै दिश्या
दिश एवैतदुपदधाति तद्याभिरदो वायुर्दिग्भिरन्तर्हिताभिरुपैत्ता एतास्ता एवै-
तदुपदधाति ता उऽएवामूः पुरस्ताद्दर्भस्तम्बं च लोगेष्टकाश्चोपदधात्यसौ वाऽआ-
दित्य एता अमुं तदादित्यं दिक्ष्वध्यूहति दिक्षु चिनोति ता यत्तत्रैव स्युर्बहिर्धा

तत्स्युर्बहिर्धा वा ऽ एतद्योनेरग्निकर्म यत्पुरा पुष्करपर्णात्ता यदिहाहृत्योपदधाति तदेना योनौ पुष्करपर्णे प्रतिष्ठापयति तथो हैता अबहिर्धा भवन्ति ता अनन्तर्हिताः स्वयमातृण्णाया उपदधात्यन्तरिक्षं वै मध्यमा स्वयमातृण्णानन्तर्हितास्तदन्तरिक्षाद्दिशो दधात्युत्तरा उत्तरास्तदन्तरिक्षाद्दिशो दधाति रेतःसिचोर्वेलयेमे वै रेतःसिचावनयोस्तद्दिशो दधाति तस्मादनयोर्दिशः सर्वत उपदधाति सर्वतस्तद्दिशो दधाति तस्मात्सर्वतो दिशः सर्वतः समीचीः सर्वतस्तत्समीचीर्दिशो दधाति तस्मात्सर्वतः समीच्यो दिशः ॥११॥ यद्वेव दिश्या उपदधाति । छन्दाꣳसि वै दिशो गायत्री वै प्राची दिक्त्रिष्टुब्दक्षिणा जगती प्रतीच्यनुष्टुबुदीची पङ्क्तिरूर्ध्वा पशवो वै छन्दाꣳस्यन्तरिक्षं मध्यमा चितिरन्तरिक्षे तत्पशून्दधाति तस्मादन्तरिक्षायतनाः पशवः ॥१२॥ यद्वेव दिश्या उपदधाति । छन्दाꣳसि वै दिशः पशवो वै छन्दाꣳस्यन्नं पशवो मध्यं मध्यमा चितिर्मध्यतस्तदन्नं दधाति ता अनन्तर्हिताः स्वयमातृण्णाया ऽ उपदधाति प्राणो वै स्वयमातृण्णानन्तर्हितं तत्प्राणादन्नं दधात्युत्तरा उत्तरं तत्प्राणादन्नं दधाति रेतःसिचोर्वेलया पृष्टयो वै रेतःसिचौ मध्यमु पृष्टयो मध्यत एवास्मिन्नेतदन्नं दधाति सर्वत उपदधाति सर्वत एवास्मिन्नेतदन्नं दधाति ॥१३॥ राज्ञ्यसि प्राची दिक् । विराडसि दक्षिणा दिक्सम्राडसि प्रतीची दिक्स्वराडस्युदीची दिगधिपत्न्यसि बृहती दिगिति नामान्यासामेतानि नामग्राहमेवैना एतदुपदधाति ता नानोपदधाति नाना सादयति नाना सूददोहसाधिवदति नाना हि दिशः ॥१४॥ ब्राह्मणम् ॥१ [३.१.] ॥ प्रथमः प्रपाठकः ॥ कण्डिकासंख्या११५ ॥॥

अथ विश्वज्योतिषमुपदधाति । वायुर्वै मध्यमा विश्वज्योतिर्वायुर्ह्येवान्तरिक्षलोके विश्वं ज्योतिर्वायुमेवैतदुपदधाति तामनन्तर्हितां दिश्याभ्य उपदधाति दिक्षु तद्वायुं दधाति तस्मात्सर्वासु दिक्षु वायुः ॥१॥ यद्वेव विश्वज्योतिषमुपदधाति । प्रजा वै विश्वज्योतिः प्रजा ह्येव विश्वं ज्योतिः प्रजननमेवैतदुपदधाति तामनन्त-

र्हितां दिश्याभ्य उपदधाति दिक्षु तत्प्रजा दधाति तस्मात्सर्वासु दिक्षु प्रजाः ॥२॥
विश्वकर्मा त्वा सादयत्विति । विश्वकर्मा ह्येतां तृतीयां चितिमपश्यदन्तरिक्षस्य पृष्ठे
ज्योतिष्मतीमित्यन्तरिक्षस्य ह्ययं पृष्ठे ज्योतिष्मान्वायुः ॥३॥ विश्वस्मै प्राणाया-
पानाय । व्यानायेति प्राणो वै विश्वज्योतिः सर्वस्माऽउ वाऽएतस्मै प्राणो विश्वं
ज्योतिर्यछेति सर्वं ज्योतिर्यछेत्येतद्वायुष्टेऽधिपतिरिति वायुमेवास्या अधिपतिं क-
रोति सादयित्वा सूददोहसाधिवदति तस्योक्तो बन्धुः ॥४॥ अथऽर्तव्या उपदधाति
। ऋतव एते यदृतव्या ऋतूनेवैतदुपदधाति नभश्च नभस्यश्च वार्षिकावृतूऽइति
नामनीऽएनयोरेते नामभ्यामेवैनेऽएतदुपदधाति द्वेऽइष्टके भवतो द्वौ हि मा-
सावृतुः सकृत्सादयत्येकं तदृतुं करोत्यवकासूपदधात्यवकाभिः प्रछादयत्यापो वा
ऽअवका अपस्तदेतस्मिन्नृतौ दधाति तस्मादेतस्मिन्नृतौ भूयिष्ठं वर्षति ॥५॥ अ-
थोत्तरे । इषश्चोर्जश्च शारदावृतूऽइति नामनीऽएनयोरेते नामभ्यामेवैनेऽएतदु-
पदधाति द्वेऽइष्टके भवतो द्वौ हि मासावृतुः सकृत्सादयत्येकं तदृतुं करोत्यव-
कासूपदधात्यापो वाऽअवका अपस्तदेतस्यऽर्तोः पुरस्ताद्दधाति तस्मादेतस्यऽर्तोः
पुरस्ताद्वर्षति नोपरिष्टात्प्रछादयति तस्मान्न तथैवोपरिष्टाद्वर्षति ॥६॥ तद्यदेता
अत्रोपदधाति । संवत्सर एषोऽग्निरिमऽउ लोकाः संवत्सरस्तस्यान्तरिक्षमेव मध्य-
मा चितिरन्तरिक्षमस्य वर्षाशरदावृतू तद्यदेता अत्रोपदधाति यदेवास्यैता आत्म-
नस्तदस्मिन्नेतत्प्रतिदधाति तस्मादेता अत्रोपदधाति ॥७॥ यद्वेवैता अत्रोपदधाति
। प्रजापतिरेषोऽग्निः संवत्सर उ प्रजापतिस्तस्य मध्यमेव मध्यमा चितिर्मध्यमस्य
वर्षाशरदावृतू तद्यदेता अत्रोपदधाति यदेवास्यैता आत्मनस्तदस्मिन्नेतत्प्रतिदधा-
ति तस्मादेता अत्रोपदधाति ॥८॥ ता वाऽएताः । चतस्र ऋतव्या मध्यमायां चि-
ताऽउपदधाति द्वे-द्वेऽइतरासु चितिषु चतुष्पादा वै पशवोऽन्तरिक्षं मध्यमा चि-
तिरन्तरिक्षे तत्पशून्दधाति तस्मादन्तरिक्षायतनाः पशवः ॥९॥ यद्वेव चतस्रः ।

चतुष्पादा वै पशवोऽन्नं पशवो मध्यं मध्यमा चितिर्मध्यतस्तदन्नं दधाति ॥१०॥ यद्वेव चतस्रः । चतुरक्षरं वाऽअन्तरिक्षं त्र्यक्षरा इतराश्चितयस्तद्यावदन्तरिक्षं तावत्तत्कृत्वोपदधाति ॥११॥ यद्वेव चतस्रः । पशुरेष यदग्निर्मध्यं तत्प्रति पशुं वरिष्ठं करोति तस्मान्मध्यं प्रति पशुर्वरिष्ठः ॥१२॥ ता वाऽएताः । चतस्र ऋतव्यास्तासां विश्वज्योतिः पञ्चमी पञ्च दिश्यास्तद्दश दशाक्षरा विराडन्नं विराण्मध्यं मध्यमा चितिर्मध्यतस्तदन्नं दधाति ता अनन्तर्हिताः स्वयमातृण्णाया उपदधाति प्राणो वै स्वयमातृण्णानन्तर्हितं तत्प्राणादन्नं दधात्युत्तरा उत्तरं तत्प्राणादन्नं दधाति ॥१३॥ अथ प्राणभृत उपदधाति । प्राणा वै प्राणभृतः प्राणानेवैतदुपदधाति ता दश भवन्ति दश वै प्राणाः पूर्वार्धऽउपदधाति पुरस्ताद्धीमे प्राणा आयुर्मे पाहि ज्योतिर्मे यच्छेति प्राणो वै ज्योतिः प्राणं मे यच्छेत्येवैतदाह ता अनन्तर्हिता ऋतव्याभ्य उपदधाति प्राणो वै वायुर्ऋतुषु तद्वायुं प्रतिष्ठापयति ॥१४॥ ब्राह्मणम् ॥ १ [३. २.] ॥ ॥

अथ छन्दस्या उपदधाति । पशवो वै छन्दाꣳस्यन्तरिक्षं मध्यमा चितिरन्तरिक्षे तत्पशुं दधाति तस्मादन्तरिक्षायतनाः पशवः ॥१॥ यद्वेव छन्दस्या उपदधाति । पशवो वै छन्दाꣳस्यन्नं पशवो मध्यं मध्यमा चितिर्मध्यतस्तदन्नं दधाति ॥२॥ ता द्वादश-द्वादशोपदधाति । द्वादशाक्षरा वै जगती पशवो जगत्यन्तरिक्षं मध्यमा चितिरन्तरिक्षे तत्पशून्दधाति तस्मादन्तरिक्षायतनाः पशवः ॥३॥ यद्वेव द्वादश-द्वादश । द्वादशाक्षरा वै जगती पशवो वै जगत्यन्नं पशवो मध्यं मध्यमा चितिर्मध्यतस्तदन्नं दधाति ता अनन्तर्हिताः प्राणभृद्भ्य उपदधात्यनन्तर्हितं तत्प्राणेभ्योऽन्नं दधात्युत्तरा उत्तरं तत्प्राणेभ्योऽन्नं दधाति ॥४॥ मा छन्द इति । अयं वै लोको मायꣳ हि लोको मित-इव प्रमा छन्द इत्यन्तरिक्षलोको वै प्रमान्तरिक्षलोको ह्यस्माल्लोकात्प्रमित-इव प्रतिमा छन्द इत्यसौ वै लोकः प्रतिमैष ह्यन्तरिक्षलो-

के प्रतिमित इवास्मै वयश्छन्द इत्यन्नमस्मै वयस्तद्यदेषु लोकेष्वन्नं तदस्मै वयोऽथो यदेभ्यो लोकेभ्योऽन्नꣳ स्रवति तदस्मै वयोऽथातो निरुक्तान्येव छन्दाꣳस्युपदधाति ॥५॥ पङ्क्तिश्छन्दः । उष्णिक्छन्दो बृहती छन्दोऽनुष्टुप्छन्दो विराट् छन्दो गायत्री छन्दस्त्रिष्टुप्छन्दो जगती छन्द इत्येतानि निरुक्तानि विराडष्टमानि छन्दाꣳस्युपदधाति पृथिवी छन्दोऽन्तरिक्षं छन्द इति यान्येतद्देवत्यानि छन्दाꣳसि तान्येवैतदुपदधात्यग्निर्देवता वातो देवतेत्येता वै देवताश्छन्दाꣳसि तान्येवैतदुपदधाति ॥६॥ स वै निरुक्तानि चानिरुक्तानि चोपदधाति । स यत्सर्वाणि निरुक्तान्युपाधास्यदन्तवद्धान्नमभविष्यदक्षेष्यत हाथ यत्सर्वाण्यनिरुक्तानि परोऽक्षꣳ हान्नमभविष्यन्न हैनदद्रक्ष्यंश्चन निरुक्तानि चानिरुक्तानि चोपदधाति तस्मान्निरुक्तमन्नमद्यमानं न क्षीयते ॥७॥ तानि वाऽएतानि । त्रीणि द्वादशान्युपदधाति तत्षट्त्रिꣳशत्षट्त्रिꣳशदक्षरा बृहत्येषा वै सा बृहती यां तद्देवा अन्तरिक्षं बृहतीं तृतीयां चितिमपश्यंस्तस्याऽएतस्यै देवा उत्तमाः ॥८॥ यद्वेवैता इष्टका उपदधाति । प्रजापतेर्विस्रस्तात्सर्वाणि भूतानि सर्वा दिशोऽनु व्युदक्रामन् ॥९॥ स यः स प्रजापतिर्व्यस्रꣳसत । अयमेव स योऽयमग्निश्चीयतेऽथ यान्यस्मात्तानि भूतानि व्युदक्रामन्नेतास्ता इष्टकास्तद्यदेता उपदधाति यान्येवास्मात्तानि भूतानि व्युदक्रामंस्तान्यस्मिन्नेतत्प्रतिदधाति ॥१०॥ तद्या दश प्रथमा उपदधाति । स चन्द्रमास्ता दश भवन्ति दशाक्षरा विराडन्नं विराडन्नमु चन्द्रमा अथ या उत्तराः षट्त्रिꣳशदर्धमासाश्च ते मासाश्च चतुर्विꣳशतिरर्धमासा द्वादश मासाश्चन्द्रमा वै संवत्सरः सर्वाणि भूतानि ॥११॥ तं यत्र देवाः समस्कुर्वन् । तदस्मिन्नेतानि सर्वाणि भूतानि मध्यतोऽदधुस्तथैवास्मिन्नयमेतद्दधाति ता अनन्तर्हिता ऋतव्याभ्य उपदधात्यृतुषु तत्सर्वाणि भूतानि प्रतिष्ठापयति ॥१२॥ ब्राह्मणम् ॥ २ [३. ३.] ॥ ॥

अथ वालखिल्या उपदधाति । प्राणा वै वालखिल्याः प्राणानेवैतदुपदधाति

ता यद्वालखिल्या नाम यद्वाऽउर्वरयोरसम्भिन्नं भवति खिल इति वै तदाचक्षते
वालमात्राद्ध हीमे प्राणा असम्भिन्नास्ते यद्वालमात्रादसम्भिन्नास्तस्माद्वालखिल्याः
॥१॥ स वै सप्त पुरस्तादुपदधाति । सप्त पश्चात्तद्याः सप्त पुरस्तादुपदधाति यऽए-
वेमे सप्त पुरस्तात्प्राणास्तानस्मिन्नेतद्दधाति ॥२॥ अथ याः सप्त पश्चात् । एषा-
मेवैतत्प्राणानामेतान्प्राणान्प्रतिप्रतीन्करोति तस्माद्यदेभिरन्नमत्ति तदेतैरत्येति
॥३॥ यद्वेव सप्त पुरस्तादुपदधाति । सप्त वाऽइमे पुरस्तात्प्राणाश्चत्वारि दोर्बाह-
वाणि शिरो ग्रीवा यदूर्ध्वं नाभेस्तत्सप्तममङ्गंऽङ्गं हि प्राण एते वै सप्त पुरस्तात्प्रा-
णास्तानस्मिन्नेतद्दधाति ॥४॥ अथ याः सप्त पश्चात् । सप्त वाऽइमे पश्चात्प्राणा-
श्चत्वार्यूर्वष्ठीवानि द्वे प्रतिष्ठे यदवाङ्नाभेस्तत्सप्तममङ्गंऽङ्गं हि प्राण एते वै सप्त प-
श्चात्प्राणास्तानस्मिन्नेतद्दधाति ॥५॥ मूर्धासि राट् । ध्रुवासि धरुणा धर्त्र्यसि धरणी
यन्त्री राड्यन्त्र्यसि यमनी ध्रुवासि धरित्रीत्येतानेवास्मिन्नेतद्ध्रुवान्प्राणान्यच्छति ॥६॥
यद्वेव वालखिल्या उपदधाति । एतद्वै देवा वालखिल्याभिरेवेमांल्लोकान्त्समयु-
रितश्चोर्ध्वानमुतश्चार्वाचस्तथैवैतद्यजमानो वालखिल्याभिरेवेमांल्लोकान्त्संयातीत-
श्चोर्ध्वानमुतश्चार्वाचः ॥७॥ मूर्धासि राडितीमं लोकमरोहन् । ध्रुवासि धरुणेत्य-
न्तरिक्षलोकं धर्त्र्यसि धरणीत्यमुं लोकमायुषे त्वा वर्चसे त्वा कृष्यै त्वा क्षेमाय त्वे-
ति चत्वारश्चतुष्पादाः पशवोऽन्नं पशवस्तऽएतैश्चतुर्भिश्चतुष्पादैः पशुभिरेतेनान्ने-
नामुष्मिंल्लोके प्रत्यतिष्ठंस्तथैवैतद्यजमान एतैश्चतुर्भिश्चतुष्पादैः पशुभिरेतेनान्नेना-
मुष्मिंल्लोके प्रतितिष्ठति ॥८॥ स स पराङिव रोहः । इयमु वै प्रतिष्ठा ते देवा
इमां प्रतिष्ठामभिप्रत्यायंस्तथैवैतद्यजमान इमां प्रतिष्ठामभिप्रत्यैति ॥९॥ यन्त्री रा-
डित्यमुं लोकमरोहन् । यन्त्र्यसि यमनीत्यन्तरिक्षलोकं ध्रुवासि धरित्रीतीमं लो-
कमिषे त्वोर्जे त्वा रय्यै त्वा पोषाय त्वेति चत्वारश्चतुष्पादाः पशवोऽन्नं पशवस्त
ऽएतैश्चतुर्भिश्चतुष्पादैः पशुभिरेतेनान्नेनास्मिंल्लोके प्रत्यतिष्ठंस्तथैवैतद्यजमान ए-

तैश्चतुर्भिश्चतुष्पादैः पशुभिरेतेनान्नेनास्मिंल्लोके प्रतितिष्ठति ॥१०॥ अथातः संस्कृतिरेव । या अमूरेकादशेष्टका उपदधाति योऽसौ प्रथमोऽनुवाकस्तदन्तरिक्षं स आत्मा तद्यत्ता एकादश भवन्त्येकादशाक्षरा वै त्रिष्टुप्त्रैष्टुभमन्तरिक्षमथ या उत्तराः षष्टिः स वायुः स प्रजापतिः सोऽग्निः स यजमानः ॥११॥ तद्याः पुरस्तादुपदधाति । शिरोऽस्य तास्ता दश भवन्ति दश वै प्राणाः प्राणा उ वै शिरः पूर्वार्धऽउपदधाति पुरस्ताद्धीदं शिरः ॥१२॥ अथ या दक्षिणतः । यदूर्ध्वं मध्यादवाचीनं शीर्ष्णस्तदस्य ता अथ याः पश्चाद्यदूर्ध्वं प्रतिष्ठायाऽअवाचीनं मध्यात्तदस्य ताः प्रतिष्ठैवोत्तरतः ॥१३॥ तद्याः सप्त पुरस्ताद्वालखिल्या उपदधाति । यऽएवेमे सप्त पुरस्तात्प्राणास्तानस्मिन्नेतद्दधाति ता अनन्तर्हिता एताभ्यो दशभ्य उपदधात्यनन्तर्हितांस्तच्छीर्ष्णः प्राणान्दधाति ॥१४॥ अथ याः सप्त पश्चात् । यऽएवेमे सप्त पश्चात्प्राणास्तानस्मिन्नेतद्दधाति ता अनन्तर्हिता एताभ्यो द्वादशभ्य उपदधात्यनन्तर्हितांस्तदात्मनः प्राणान्दधाति स एष वायुः प्रजापतिरस्मिंस्त्रैष्टुभेऽन्तरिक्षे समन्तं पर्यक्तस्तद्यत्तृतीयां चितिमुपदधाति वायुं चैव तदन्तरिक्षं च संस्कृत्योपधत्तेऽथ लोकम्पृणेऽउपदधात्यस्यां स्रक्त्यां तयोरुपरि बन्धुः पुरीषं निवपति तस्योपरि बन्धुः ॥१५॥ ब्राह्मणम् ॥३ [३. ४.] ॥ तृतीयोऽध्यायः [५१.] ॥ ॥

चतुर्थीं चितिमुपदधाति । एतद्वै देवास्तृतीयां चितिं चित्वा समारोहन्नन्तरिक्षं वै तृतीया चितिरन्तरिक्षमेव तत्संस्कृत्य समारोहन् ॥१॥ तेऽब्रुवन् । चेतयध्वमिति चितिमिच्छतेति वाव तदब्रुवन्नित ऊर्ध्वमिच्छतेति ते चेतयमाना एतां चतुर्थीं चितिमपश्यन्यदूर्ध्वमन्तरिक्षादर्वाचीनं दिवस्तेषामेष लोकोऽध्रुव-इवाप्रतिष्ठित-इव मनस्यासीत् ॥२॥ ते ब्रह्माब्रुवन् । त्वामिहोपदधामहाऽइति किं मे ततो भविष्यतीति त्वमेव नः श्रेष्ठं भविष्यसीति तथेति तेऽत्र ब्रह्मोपादधत तस्मादाहुर्ब्रह्मैव देवानां श्रेष्ठमिति तदेतया वै चतुर्थ्या चित्येमे द्यावापृथिवी विष्टब्धे ब्रह्म

वै चतुर्थी चितिस्तस्मादाहुर्ब्रह्मणा द्यावापृथिवी विष्टब्धेऽइति स्तोमानुपदधाति प्राणा वै स्तोमाः प्राणा उ वै ब्रह्म ब्रह्मैवैतदुपदधाति ॥३॥ यद्वेव स्तोमानुपदधाति । एतद्धै देवाः प्रजापतिमब्रुवंस्त्वामिहोपदधामहाऽइति तथेति स वै नाब्रवीत्किं मे ततो भविष्यतीति यदु ह किं च प्रजापतिर्देवेष्वीषे किमस्माकं ततो भविष्यतीत्येवोचुस्तस्मादु हैतद्यत्पिता पुत्रेष्विच्छते किमस्माकं ततो भविष्यतीत्येवाहुरथ यत्पुत्राः पितरि तथेत्येवाहैवꣳ हि तदग्रे प्रजापतिश्च देवाश्च समवदन्त स्तोमानुपदधाति प्राणा वै स्तोमाः प्राणा उ वै प्रजापतिः प्रजापतिमेवैतदुपदधाति ॥४॥ यद्वेव स्तोमानुपदधाति । ये वै ते प्राणा ऋषय एतां चतुर्थीं चितिमपश्यन्ये तऽएतेन रसेनोपायंस्तऽएते तानेवैतदुपदधाति स्तोमानुपदधाति प्राणा वै स्तोमाः प्राणा उ वाऽऋषय ऋषीनेवैतदुपदधाति ॥५॥ यद्वेव स्तोमानुपदधाति । प्रजापतिं विस्रस्तं देवता आदाय व्युदक्रामंस्तस्य यदूर्ध्वं मध्यादर्वाचीनꣳ शीर्ष्णस्तदस्य वायुरादायोत्क्रम्यातिष्ठद्देवताश्च भूत्वा संवत्सररूपाणि च ॥६॥ तमब्रवीत् । उप मेहि प्रति मऽएतद्धेहि येन मे त्वमुदक्रमीरिति किं मे ततो भविष्यतीति त्वद्देवत्यमेव मऽएतदात्मनो भविष्यतीति तथेति तदस्मिन्नेतद्वायुः प्रत्यदधात् ॥७॥ तस्या एता अष्टादश प्रथमाः । एतदस्य तदात्मनस्तद्यदेता अत्रोपदधाति यदेवास्यैता आत्मनस्तदस्मिन्नेतत्प्रतिदधाति तस्मादेता अत्रोपदधाति स्तोमानुपदधाति प्राणा वै स्तोमाः प्राणा उ वै वायुर्वायुमेवैतदुपदधाति ॥८॥ स पुरस्तादुपदधाति । आशुस्त्रिवृदिति य एव त्रिवृत्स्तोमस्तं तदुपदधाति तद्यत्तमाहाशुरित्येष हि स्तोमानामाशिष्ठोऽथो वायुर्वाऽआशुस्त्रिवृत्स एषु त्रिषु लोकेषु वर्तते तद्यत्तमाहाशुरित्येष हि सर्वेषां भूतानामाशिष्ठो वायुर्ह भूत्वा पुरस्तात्तस्थौ तदेव तद्रूपमुपदधाति ॥९॥ भान्तः पञ्चदश इति । य एव पञ्चदश स्तोमस्तं तदुपदधाति तद्यत्तमाह भान्त इति वज्रो वै भान्तो वज्रः पञ्चदशोऽथो

चन्द्रमा वै भान्तः पञ्चदशः स च पञ्चदशाहान्यापूर्यते पञ्चदशापक्षीयते तद्यत्तमाह भान्त इति भाति हि चन्द्रमाश्चन्द्रमा ह भूत्वा दक्षिणतस्तस्थौ तदेव तद्रूपमुपदधाति ॥१०॥ व्योमा सप्तदश इति । य एव सप्तदश स्तोमस्तं तदुपदधाति तद्यत्तमाह व्योमेति प्रजापतिर्वै व्योमा प्रजापतिः सप्तदशोऽथो संवत्सरो वाव व्योमा सप्तदशस्तस्य द्वादश मासाः पञ्चऽर्तवस्तद्यत्तमाह व्योमेति व्योमा हि संवत्सरः संवत्सरो ह भूत्वोत्तरतस्तस्थौ तदेव तद्रूपमुपदधाति ॥११॥ धरुण एकविꣳश इति । य एवैकविꣳश स्तोमस्तं तदुपदधाति तद्यत्तमाह धरुण इति प्रतिष्ठा वै धरुणः प्रतिष्ठैकविꣳशोऽथोऽअसौ वाऽआदित्यो धरुण एकविꣳशस्तस्य द्वादश मासाः पञ्चऽर्तवस्त्रय इमे लोका असावेवादित्यो धरुण एकविꣳशस्तद्यत्तमाह धरुण इति यदा ह्येवैषोऽस्तमेत्यथेदꣳ सर्वं ध्रियतऽआदित्यो ह भूत्वा पश्चात्तस्थौ तदेव तद्रूपमुपदधात्यथ संवत्सररूपाण्युपदधाति ॥१२॥ प्रतूर्तिरष्टादश इति । य एवाष्टादश स्तोमस्तं तदुपदधात्यथो संवत्सरो वाव प्रतूर्तिरष्टादशस्तस्य द्वादश मासाः पञ्चऽर्तवः संवत्सर एव प्रतूर्तिरष्टादशस्तद्यत्तमाह प्रतूर्तिरिति संवत्सरो हि सर्वाणि भूतानि प्रतिरति तदेव तद्रूपमुपदधाति ॥१३॥ तपो नवदश इति । य एव नवदश स्तोमस्तं तदुपदधात्यथो संवत्सरो वाव तपो नवदशस्तस्य द्वादश मासाः षडृतवः संवत्सर एव तपो नवदशस्तद्यत्तमाह तप इति संवत्सरो हि सर्वाणि भूतानि तपति तदेव तद्रूपमुपदधाति ॥१४॥ अभीवर्तः सविꣳश इति । य एव सविꣳश स्तोमस्तं तदुपदधात्यथो संवत्सरो वाऽअभीवर्तः सविꣳशस्तस्य द्वादश मासाः सप्तऽर्तवः संवत्सर एवाभीवर्तः सविꣳशस्तद्यत्तमाहाभीवर्त इति संवत्सरो हि सर्वाणि भूतान्यभिवर्तते तदेव तद्रूपमुपदधाति ॥१५॥ वर्चो द्वाविꣳश इति । य एव द्वाविꣳश स्तोमस्तं तदुपदधात्यथो संवत्सरो वाव वर्चो द्वाविꣳशस्तस्य द्वादश मासाः सप्तऽर्तवो द्वेऽअहोरात्रे

संवत्सर एव वर्चो द्वाविꣳशस्तद्यत्तमाह वर्च इति संवत्सरो हि सर्वेषां भूतानां
वर्चस्वितमस्तदेव तद्रूपमुपदधाति ॥१६॥ सम्भरणस्त्रयोविꣳश इति य एव त्रयो-
विꣳश स्तोमस्तं तदुपदधात्यथो संवत्सरो वाव सम्भरणस्त्रयोविꣳसस्तस्य त्रयो-
दश मासा सप्तऽर्तवो द्वेऽअहोरात्रे संवत्सर एव सम्भरणस्त्रयोविꣳशस्तद्यत्तमाह
सम्भरण इति संवत्सरो हि सर्वाणि भूतानि सम्भृतस्तदेव तद्रूपमुपदधाति ॥१७॥
योनिश्चतुर्विꣳश इति । य एव चतुर्विꣳश स्तोमस्तं तदुपदधात्यथो संवत्सरो
वाव योनिश्चतुर्विꣳशस्तस्य चतुर्विꣳशतिरर्धमासास्तद्यत्तमाह योनिरिति संवत्स-
रो हि सर्वेषां भूतानां योनिस्तदेव तद्रूपमुपदधाति ॥१८॥ गर्भाः पञ्चविꣳश इति
। य एव पञ्चविꣳश स्तोमस्तं तदुपदधात्यथो संवत्सरो वाव गर्भाः पञ्चविꣳश-
स्तस्य चतुर्विꣳशतिरर्धमासाः संवत्सर एव गर्भाः पञ्चविꣳशस्तद्यत्तमाह गर्भा इति
संवत्सरो ह त्रयोदशो मासो गर्भो भूत्वऽर्तून्प्रविशति तदेव तद्रूपमुपदधाति ॥१९॥
ओजस्त्रिणव इति । य एव त्रिणव स्तोमस्तं तदुपदधाति तद्यत्तमाहौज इति
वज्रो वाऽओजो वज्रस्त्रिणवोऽथो संवत्सरो वाऽओजस्त्रिणवस्तस्य चतुर्विꣳश-
तिरर्धमासा द्वेऽअहोरात्रे संवत्सर एवौजस्त्रिणवस्तद्यत्तमाहौज इति संवत्सरो
हि सर्वेषां भूतानामोजस्वितमस्तदेव तद्रूपमुपदधाति ॥२०॥ क्रतुरेकत्रिꣳश इति
। य एवैकत्रिꣳश स्तोमस्तं तदुपदधात्यथो संवत्सरो वाव क्रतुरेकत्रिꣳशस्तस्य
चतुर्विꣳशतिरर्धमासाः षडृतवः संवत्सर एव क्रतुरेकत्रिꣳशस्तद्यत्तमाह क्रतुरिति
संवत्सरो हि सर्वाणि भूतानि करोति तदेव तद्रूपमुपदधाति ॥२१॥ प्रतिष्ठा त्र-
यस्त्रिꣳश इति । य एव त्रयस्त्रिꣳश स्तोमस्तं तदुपदधाति तद्यत्तमाह प्रतिष्ठेति
प्रतिष्ठा हि त्रयस्त्रिꣳशोऽथो संवत्सरो वाव प्रतिष्ठा त्रयस्त्रिꣳशस्तस्य चतुर्विꣳश-
तिरर्धमासाः षडृतवो द्वेऽअहोरात्रे संवत्सर एव प्रतिष्ठा त्रयस्त्रिꣳशस्तद्यत्तमाह
प्रतिष्ठेति संवत्सरो हि सर्वेषां भूतानां प्रतिष्ठा तदेव तद्रूपमुपदधाति ॥२२॥

ब्रध्नस्य विष्टपं चतुस्त्रिꣳश इति । य एत चतुस्त्रिꣳश स्तोमस्तं तदुपदधात्यथो संवत्सरो वाव ब्रध्नस्य विष्टपं चतुस्त्रिꣳशस्तस्य चतुर्विꣳशतिरर्धमासाः सप्तऽर्तवो द्वेऽअहोरात्रे संवत्सर एव ब्रध्नस्य विष्टपं चतुस्त्रिꣳशस्तद्यत्तमाह ब्रध्नस्य विष्टपमिति स्वाराज्यं वै ब्रध्नस्य विष्टपꣳ स्वाराज्य चतुस्त्रिꣳशस्तदेव तद्रूपमुपदधाति ॥२३॥ नाकः षट्त्रिꣳश इति । य एव षट्त्रिꣳश स्तोमस्तं तदुपदधात्यथो संवत्सरो वाव नाकः षट्त्रिꣳशस्तस्य चतुर्विꣳशतिरर्धमासा द्वादश मासास्तद्यत्तमाह नाक इति न हि तत्र गताय कस्मै चनाकं भवत्यथो संवत्सरो वाव नाकः संवत्सरः स्वर्गो लोकस्तदेव तद्रूपमुपदधाति ॥२४॥ विवर्तोऽष्टाचत्वारिꣳश इति । य एवाष्टाचत्वरिꣳश स्तोमस्तं तदुपदधात्यथो संवत्सरो वाव विवर्तो ऽष्टाचत्वारिꣳशस्तस्य षड्विꣳशतिरर्धमासास्त्रयोदश मासाः सप्तऽर्तवो द्वेऽअहोरात्रे तद्यत्तमाह विवर्त इति संवत्सराद्धि सर्वाणि भूतानि विवर्तन्ते तदेव तद्रूपमुपदधाति ॥२५॥ धर्त्रं चतुष्टोम इति । य एव चतुष्टोम स्तोमस्तं तदुपदधाति तद्यत्तमाह धर्त्रमिति प्रतिष्ठा वै धर्त्रं प्रतिष्ठा चतुष्टोमोऽथो वायुर्वाव धर्त्रं चतुष्टोमः स आभिश्चतसृभिर्दिग्भि स्तुते तद्यत्तमाह धर्त्रमिति प्रतिष्ठा वै धर्त्रं वायुरु सर्वेषां भूतानां प्रतिष्ठा तदेव तद्रूपमुपदधाति स वै वायुमेव प्रथममुपदधाति वायुमुत्तमं वायुनैव तदेतानि सर्वाणि भूतान्युभयतः परिगृह्णाति ॥२६॥ ता वा ऽएताः । अष्टादशेष्टका उपदधाति । तौ द्वौ त्रिवृतौ प्राणो वै त्रिवृद्वायुरु प्राणो वायुरेषा चितिः ॥२७॥ यद्वेवाष्टादश । अष्टादशो वै संवत्सरो द्वादश मासाः पञ्चऽर्तवः संवत्सर एव प्रजापतिरष्टादशः प्रजापतिरग्निर्यावानग्निर्यावत्यस्य मात्रा तावत्तत्कृत्वोपदधाति ॥२८॥ ब्राह्मणम् ॥४ [४. १.] ॥ ॥

अथ स्पृत उपदधाति । एतद्वै प्रजापतिरेतस्मिन्नात्मनः प्रतिहिते सर्वाणि भूतानि गर्भ्यभवत्तान्यस्य गर्भऽएव सन्ति पाप्मा मृत्युरगृह्णात् ॥१॥ स देवानब्रवीत्

। युष्माभिः सहेमानि सर्वाणि भूतानि पाप्मनो मृत्यो स्पृणवानीति किं नस्ततो भविष्यतीति वृणीध्वमित्यब्रवीत्तं भागी नोऽस्त्वित्येकेऽब्रुवन्नाधिपत्यं नोऽस्त्वित्येके स भागमेकेभ्यः कृत्वाधिपत्यमेकेभ्यः सर्वाणि भूतानि पाप्मनो मृत्योरस्पृणोद्यदस्पृणोत्तस्मात्स्पृतस्तथैवैतद्यजमानो भागमेकेभ्यः कृत्वाधिपत्यमेकेभ्यः सर्वाणि भूतानि पाप्मनो मृत्यो स्पृणोति तस्माद्ध सर्वास्वेव स्पृतꣳ-स्पृतमित्यनुवर्तते ॥२॥ अग्नेर्भागोऽसि । दीक्षाया आधिपत्यमिति वाग्वै दीक्षाग्नये भागं कृत्वा वाचऽआधिपत्यमकरोद्ब्रह्म स्पृतं त्रिवृत्स्तोम इति ब्रह्म प्रजानां त्रिवृता स्तोमेन पाप्मना मृत्योरस्पृणोत् ॥३॥ इन्द्रस्य भागोऽसि । विष्णोराधिपत्यमितीन्द्राय भागं कृत्वा विष्णवऽआधिपत्यमकरोत्क्षत्रꣳ स्पृतं पञ्चदश स्तोम इति क्षत्रं प्रजानां पञ्चदशेन स्तोमेन पाप्मनो मृत्योरस्पृणोत् ॥४॥ नृचक्षसां भागोऽसि । धातुराधिपत्यमिति देवा वै नृचक्षसो देवेभ्यो भागं कृत्वा धात्रऽआधिपत्यमकरोज्जनित्रꣳ स्पृतꣳ सप्तदश स्तोम इति विड्वै जनित्रं विशं प्रजानाꣳ सप्तदशेन स्तोमेन पाप्मनो मृत्योरस्पृणोत् ॥५॥ मित्रस्य भागोऽसि । वरुणस्याधिपत्यमिति प्राणो वै मित्रोऽपानो वरुणः प्राणाय भागं कृत्वापानायाधिपत्यमकरोद्दिवो वृष्टिर्वात स्पृत एकविꣳश स्तोम इति वृष्टिं च वातं च प्रजानामेकविꣳशेन स्तोमेन पाप्मनो मृत्योरस्पृणोत् ॥६॥ वसूनां भागोऽसि । रुद्राणामाधिपत्यमिति वसुभ्यो भागं कृत्वा रुद्रेभ्य आधिपत्यमकरोच्चतुष्पात्स्पृतं चतुर्विꣳश स्तोम इति चतुष्पात्प्रजानां चतुर्विꣳशेन स्तोमेन पाप्मनो मृत्योरस्पृणोत् ॥७॥ आदित्यानां भागोऽसि । मरुतामाधिपत्यमित्यादित्येभ्यो भागं कृत्वा मरुद्भ्य आधिपत्यमकरोद्गर्भा स्पृताः पञ्चविꣳश स्तोम इति गर्भान्प्रजानां पञ्चविꣳशेन स्तोमेन पाप्मनो मृत्योरस्पृणोत् ॥८॥ अदित्यै भागोऽसि । पूष्ण आधिपत्यमितीयं वाऽअदितिरस्यै भागं कृत्वा पूष्णऽआधिपत्यमकरोदोज स्पृतं त्रिणव स्तोम इत्योजः प्रजानां त्रि-

णावेन स्तोमेन पाप्मनो मृत्योरस्पृणोत् ॥९॥ देवस्य सवितुर्भागोऽसि । बृह-
स्पतेराधिपत्यमिति देवाय सवित्रे भागं कृत्वा बृहस्पतयऽआधिपत्यमकरोत्समी-
चीर्दिश स्पृताश्चतुष्टोम स्तोम इति सर्वा दिशः प्रजानां चतुष्टोमेन स्तोमेन पा-
प्मनो मृत्योरस्पृणोत् ॥१०॥ यवानां भागोऽसि । अयवानामाधिपत्यमिति पूर्व-
पक्षा वै यवा अपरपक्षा अयवास्ते हीदꣳ सर्वं युवते चायुवते च पूर्वपक्षेभ्यो
भागं कृत्वापरपक्षेभ्य आधिपत्यमकरोत्प्रजा स्पृताश्चतुश्चत्वारिꣳश स्तोम इति सर्वाः
प्रजाश्चतुश्चत्वारिꣳशेन स्तोमेन पाप्मनो मृत्योरस्पृणोत् ॥११॥ ऋभूणां भागोऽसि
। विश्वेषां देवानामाधिपत्यमित्यृभुभ्यो भागं कृत्वा विश्वेभ्यो देवेभ्य आधिपत्यम-
करोद्भूतꣳ स्पृतं त्रयस्त्रिꣳश स्तोम इति सर्वाणि भूतानि त्रयस्त्रिꣳशेन स्तोमेन
पाप्मनो मृत्योरस्पृणोत्तथैवैतद्यजमानः सर्वाणि भूतानि त्रयस्त्रिꣳशेन स्तोमेन
पाप्मनो मृत्यो स्पृणोति ॥१२॥ ता वाऽएता दशेष्टका उपदधाति । दशाक्षरा वि-
राड्विराडग्निर्दश दिशो दिशोऽग्निर्दश प्राणाः प्राणा अग्निर्यावानग्निर्यावत्यस्य मात्रा
तावतैव तदेतानि सर्वाणि भूतानि पाप्मनो मृत्यो स्पृणोति ॥१३॥ अथर्तव्ये
ऽउपदधाति । ऋतव एते यदृतव्ये ऋतूनेवैतदुपदधाति सहश्च सहस्यश्च हैमन्ति-
कावृतूऽइति नामनीऽएनयोरेते नामभ्यामेवैनेऽएतदुपदधाति द्वेऽइष्टके भवतो
द्वौ हि मासावृतुः सकृत्सादयत्येकं तदृतुं करोति ॥१४॥ तद्यदेतेऽअत्रोपदधाति
। संवत्सर एषोऽग्निरिमऽउ लोकाः संवत्सरस्तस्य यदूर्ध्वमन्तरिक्षादर्वाचीनं दिव-
स्तदस्यैषा चतुर्थी चितिस्तद्धस्य हेमन्त ऋतुस्तद्यदेतेऽअत्रोपदधाति यदेवास्यैते
ऽआत्मनस्तदस्मिन्नेतत्प्रतिदधाति तस्मादेतेऽअत्रोपदधाति ॥१५॥ यद्वेवैतेऽअत्रोपद-
धाति । प्रजापतिरेषोऽग्निः संवत्सर उ प्रजापतिस्तस्य यदूर्ध्वं मध्यादवाचीनꣳ शीर्ष्ण-
स्तदस्यैषा चतुर्थी चितिस्तद्धस्य हेमन्त ऋतुस्त यदेतेऽअत्रोपदधाति यदेवास्यैतेऽआ-
त्मनस्तदस्मिन्नेतत्प्रतिदधाति तस्मादेतेऽअत्रोपदधाति ॥१६॥ ब्राह्मणम् ॥५[४.२.]॥॥

अथ सृष्टीरुपदधाति । एतद्वै प्रजापतिः सर्वाणि भूतानि पाप्मनो मृत्योर्मुक्त्वाकामयत प्रजाः सृजेय प्रजायेयेति ॥१॥ स प्राणानब्रवीत् । युष्माभिः सहेमाः प्रजाः प्रजनयानीति ते वै केन स्तोष्यामहऽइति मया चैव युष्माभिश्चेति तथेति ते प्राणैश्चैव प्रजापतिना चास्तुवत यद्ध ह किं च देवाः कुर्वते स्तोमेनैव तत्कुर्वते यज्ञो वै स्तोमो यज्ञेनैव तत्कुर्वते तस्माद्ध सर्वास्वेवास्तुवतास्तुवतेत्यनुवर्तते ॥२॥ एकयास्तुवतेति । वाग्वाऽएका वाचैव तदस्तुवत प्रजा अधीयन्तेति प्रजा अत्राधीयन्त प्रजापतिरधिपतिरासीदिति प्रजापतिरत्राधिपतिरासीत् ॥३॥ तिसृभिरस्तुवतेति । त्रयो वै प्राणाः प्राण उदानो व्यानस्तैरेव तदस्तुवत ब्रह्मासृज्यतेति ब्रह्मात्रासृज्यत ब्रह्मणस्पतिरधिपतिरासीदिति ब्रह्मणस्पतिरत्राधिपतिरासीत् ॥४॥ पञ्चभिरस्तुवतेति । यऽएवेमे मनःपञ्चमाः प्राणास्तैरेव तदस्तुवत भूतान्यसृज्यन्तेति भूतान्यत्रासृज्यन्त भूतानां पतिरधिपतिरासीदिति भूतानां पतिरत्राधिपतिरासीत् ॥५॥ सप्तभिरस्तुवतेति । यऽएवेमे सप्त शीर्षन्प्राणास्तैरेव तदस्तुवत सप्तऽऋषयोऽसृज्यन्तेति सप्तऽर्षयोऽत्रासृज्यन्त धाताधिपतिरासीदिति धातात्राधिपतिरासीत् ॥६॥ नवभिरस्तुवतेति । नव वै प्राणाः सप्त शीर्षन्नवाञ्चौ द्वौ तैरेव तदस्तुवत पितरोऽसृज्यन्तेति पितरोऽत्रासृज्यन्तादितिरधिपत्न्यासीदित्यदितिरत्राधिपत्न्यासीत् ॥७॥ ॥ शतम् ४५०० ॥ ॥ एकादशभिरस्तुवतेति । दश प्राणा आत्मैकादशस्तेनैव तदस्तुवतऽऋतवोऽसृज्यन्तेत्यृतवोऽत्रासृज्यन्तार्तवा अधिपतय आसन्नित्यार्तवा अत्राधिपतय आसन् ॥८॥ त्रयोदशभिरस्तुवतेति । दश प्राणा द्वे प्रतिष्ठेऽआत्मा त्रयोदशस्तेनैव तदस्तुवत मासा असृज्यन्तेति मासा अत्रासृज्यन्त संवत्सरोऽधिपतिरासीदिति संवत्सरोऽत्राधिपतिरासीत् ॥९॥ पञ्चदशभिरस्तुवतेति । दश हस्त्या अङ्गुलयश्चत्वारि दोर्बाहवाणि यदूर्ध्वं नाभेस्तत्पञ्चदशं तेनैव तदस्तुवत क्षत्रमसृज्यतेति क्षत्रमत्रासृज्यतेन्द्रोऽधिपतिरासीदितीन्द्रोऽत्रा-

धिपतिरासीत् ॥१०॥ सप्तदशभिरस्तुवतेति । दश पाद्या अङ्गुलयश्चत्वार्यूर्वष्ठीवानि
द्वे प्रतिष्ठे यदवाङ्नाभेस्तत्सप्तदशं तेनैव तदस्तुवत ग्राम्याः पशवोऽसृज्यन्तेति ग्रा-
म्याः पशवोऽत्रासृज्यन्त बृहस्पतिरधिपतिरासीदिति बृहस्पतिरत्राधिपतिरासीत्
॥११॥ नवदशभिरस्तुवतेति । दश हस्त्या अङ्गुलयो नव प्राणास्तैरेव तदस्तु-
वत शूद्रार्यावसृज्येतामिति शूद्रार्यावत्रासृज्येतामहोरात्रेऽअधिपत्नीऽआस्तामित्य-
होरात्रेऽअत्राधिपत्नीऽआस्ताम् ॥१२॥ एकविꣳशत्यास्तुवतेति । दश हस्त्या अ-
ङ्गुलयो दश पाद्या आत्मैकविꣳशस्तेनैव तदस्तुवतैकशफाः पशवोऽसृज्यन्तेत्येक-
शफाः पशवोऽत्रासृज्यन्त वरुणोऽधिपतिरासीदिति वरुणोऽत्राधिपतिरासीत् ॥१३॥
त्रयोविꣳशत्यास्तुवतेति । दश हस्त्या अङ्गुलयो दश पाद्या द्वे प्रतिष्ठेऽआत्मा
त्रयोविꣳशस्तेनैव तदस्तुवत क्षुद्राः पशवोऽसृज्यन्तेति क्षुद्राः पशवोऽत्रासृज्यन्त
पूषाधिपतिरासीदिति पूषात्राधिपतिरासीत् ॥१४॥ पञ्चविꣳशत्यास्तुवतेति । दश
हस्त्या अङ्गुलयो दश पाद्याश्चत्वार्यङ्गान्यात्मा पञ्चविꣳशस्तेनैव तदस्तुवतारण्याः
पशवोऽसृज्यन्तेत्यारण्याः पशवोऽत्रासृज्यन्त वायुरधिपतिरासीदिति वायुरत्राधिप-
तिरासीत् ॥१५॥ सप्तविꣳशत्यास्तुवतेति । दश हस्त्या अङ्गुलयो दश पाद्याश्च-
त्वार्यङ्गानि द्वे प्रतिष्ठेऽआत्मा सप्तविꣳशस्तेनैव तदस्तुवत द्यावापृथिवी व्यैतामि-
ति द्यावापृथिवीऽअत्र व्यैतां वसवो रुद्रा आदित्या अनुव्यायन्निति वसवो रुद्रा
आदित्या अत्रानुव्यायꣳस्तऽएवाधिपतय आसन्निति तऽउऽएवात्राधिपतय आसन्
॥१६॥ नवविꣳशत्यास्तुवतेति । दश हस्त्या अङ्गुलयो दश पाद्या नव प्राणा-
स्तैरेव तदस्तुवत वनस्पतयोऽसृज्यन्तेति वनस्पतयोऽत्रासृज्यन्त सोमोऽधिपति-
रासीदिति सोमोऽत्राधिपतिरासीत् ॥१७॥ एकत्रिꣳशतास्तुवतेति । दश हस्त्या
अङ्गुलयो दश पाद्या दश प्राणा आत्मैकत्रिꣳशस्तेनैव तदस्तुवत प्रजा असृज्यन्ते-
ति प्रजा अत्रासृज्यन्त यवाश्चायवाश्चाधिपतय आसन्निति पूर्वपक्षापरपक्षा एवात्राधि-

पतय आसन् ॥१८॥ त्रयस्त्रिꣳशतास्तुवतेति । दश हस्त्या अङ्गुलयो दश पाद्या दश प्राणा द्वे प्रतिष्ठे ऽआत्मा त्रयस्त्रिꣳशस्तेनैव तदस्तुवत भूतान्यशाम्यन्निति सर्वाणि भूतान्यत्राशाम्यन्प्रजापतिः परमेष्ठ्यधिपतिरासीदिति प्रजापतिः परमेष्ठ्यत्राधिपतिरासीत् ॥१९॥ ता वा ऽएताः । सप्तदशेष्टका उपदधाति सप्तदशो वै संवत्सरः प्रजापतिः स प्रजनयिता तदेतेन वै सप्तदशेन संवत्सरेण प्रजापतिना प्रजनयित्रैताः प्रजाः प्राजनयद्यत्प्राजनयदसृजत तद्यदसृजत तस्मात्सृष्टयस्ताः सृष्ट्वात्मन्प्रापादयत तथैवैतद्यजमान एतेन सप्तदशेन संवत्सरेण प्रजापतिना प्रजनयित्रैताः प्रजाः प्रजनयति ताः सृष्ट्वात्मन्प्रपादयते रेतःसिचोर्वेलया पृष्टयो वै रेतःसिचौ मध्यमु पृष्टयो मध्यत एवास्मिन्नेताः प्रजाः प्रपादयति सर्वत उपदधाति सर्वत एवास्मिन्नेताः प्रजाः प्रपादयति ॥२०॥ ब्राह्मणम् ॥ ६ [४. ३.] ॥ द्वितीयः प्रपाठकः ॥ कण्डिकासंख्या १०५ ॥ ॥

अथातोऽन्वावृतम् । त्रिवृद्वतीं पुरस्तादुपदधात्येकविꣳशवतीं पश्चात्पञ्चदशवतीं दक्षिणतः सप्तदशवतीमुत्तरतः ॥१॥ एतद्वै प्रजापतिम् । त्रिवृद्वत्यामुपहितायां पञ्चदशवत्यां मृत्युरसीददिमामत उपधास्यति तमत्र ग्रहीष्यामीति तं प्रापश्यत्तं प्रख्याय परिक्रम्यैकविꣳशवतीमुपाधत्तैकविꣳशवतीं मृत्युरागछत्पञ्चदशवतीमुपाधत्त पञ्चदशवतीं मृत्युरागछत्सप्तदशवतीमुपाधत्त सोऽत्रैव मृत्युं न्यकरोदत्रामोह्यत्तथैवैतद्यजमानोऽत्रैव सर्वान्पाप्मनो निकरोत्यत्र मोहयति ॥२॥ अथोत्तराः । त्रिवृद्वत्यामेव त्रिवृद्वतीमनूपदधात्येकविꣳशवत्यामेकविꣳशवतीं पञ्चदशवत्याꣳ सप्तदशवतीꣳ सप्तदशवत्यां पञ्चदशवतीं ता यदेवं व्यतिहारमुपदधाति तस्मादक्ष्णयास्तोमीया अथो यदेते स्तोमा अतोऽन्यथानुपूर्वं तस्माद्वेवाक्ष्णयास्तोमीया अथो ऽएवं देवा उपादधतेतरथासुरास्ततो देवा अभवन्परासुरा भवत्यात्मना परास्य द्विषन्भ्रातृव्यो भवति य एवं वेद ॥३॥ स एष पशुर्यदग्निः । सोऽत्रैव

सर्वः कृत्स्नः संस्कृतस्तस्य त्रिवृद्वत्यावेव शिरस्ते यत्त्रिवृद्वत्यौ भवतस्त्रिवृद्धि शिरो द्वे भवतो द्विकपालꣳ हि शिरः पूर्वार्धऽउपदधाति पुरस्ताद्धीदꣳ शिरः ॥४॥ प्रतिष्ठैकविꣳशवत्यौ । ते यदेकविꣳशवत्यौ भवतः प्रतिष्ठा ह्येकविꣳशो द्वे भवतो द्वन्द्वꣳ हि प्रतिष्ठा पश्चादुपदधाति पश्चाद्धीयं प्रतिष्ठा ॥५॥ बाहू पञ्चदशवत्यौ । ते यत्पञ्चदशवत्यौ भवतः पञ्चदशौ हि बाहू द्वे भवतो द्वौ हीमौ बाहू पार्श्वत उपदधाति पार्श्वतो हीमौ बाहू ॥६॥ अन्नꣳ सप्तदशवत्यौ । ते यत्सप्तदशवत्यौ भवतः सप्तदशꣳ ह्यन्नं द्वे भवतो द्व्यक्षरꣳ ह्यन्नं तेऽअनन्तर्हिते पञ्चदशवतीभ्यामुपदधात्यनन्तर्हितं तद्बाहुभ्यामन्नं दधाति बाह्ये पञ्चदशवत्यौ भवतोऽन्तरे सप्तदशवत्यौ बाहुभ्यां तदुभयतोऽन्नं परिगृह्णाति ॥७॥ अथ या मध्यऽउपदधाति । स आत्मा ता रेतःसिचोर्वेलयोपदधाति पृष्टयो वै रेतःसिचौ मध्यमु पृष्टयो मध्यतो ह्ययमात्मा सर्वत उपदधाति सर्वतो ह्ययमात्माथ यदतोऽन्यदतिरिक्तं तद्यद्धि देवानामतिरिक्तं छन्दाꣳसि तानि तद्यानि तानि छन्दाꣳसि पशवस्ते तद्ये ते पशवः पुण्यास्ता लक्ष्म्यस्तद्यास्ताः पुण्या लक्ष्म्योऽसौ स आदित्यः स आसामेष दक्षिणतः ॥८॥ ता हैकेऽनन्तर्हितास्त्रिवृद्वतीभ्यामुपदधति । जिह्वाहनूऽइति वदन्तो याश्चतुर्दश ते हनू याः षट् सा जिह्वेति न तथा कुर्यादति ते रेचयन्ति यथा पूर्वयोर्हन्वोरपरे हनूऽअनूपदध्याद्यथा पूर्वस्यां जिह्वायामपरां जिह्वामनूपदध्यात्तादृक्तद्यत्रह्येव शिरस्तदेव हनू तज्जिह्वा ॥९॥ अस्मिन्नु हैकेऽवान्तरदेशऽउपदधति । असौ वाऽआदित्य एता अमुं तदादित्यमेतस्यां दिशि दध्म इति न तथा कुर्यादन्यानि वाव तानि कर्माणि यैरेतमत्र दधाति ॥१०॥ दक्षिणात उ हैकऽउपदधति । तदेताः पुण्या लक्ष्मीर्दक्षिणतो दध्महऽइति तस्माद्यस्य दक्षिणतो लक्ष्म भवति तं पुण्यलक्ष्मीक इत्याचक्षतऽउत्तरत स्त्रिया उत्तरतआयतना हि स्त्री तत्तत्कृतमेव पुरस्तादेवैनाऽउपदध्याद्यत्रह्येव शिरस्तदेव हनू तज्जिह्वा-

थैताः पुण्या लक्ष्मीर्मुखतो धत्ते तस्माद्यस्य मुखे लक्ष्म भवति तं पुण्यलक्ष्मीक इत्याचक्षते ॥११॥ सैषा ब्रह्मचितिः । यद्ब्रह्मोपादधत तस्माद्ब्रह्मचितिः सा प्रजापतिचितिर्यत्प्रजापतिमुपादधत तस्मात्प्रजापतिचितिः सऽर्षिचितिर्यदृषीनुपादधत तस्मादृषिचितिः सा वायुचितिर्यद्वायुमुपादधत तस्माद्वायुचितिः सा स्तोमचितिर्यत्स्तोमानुपादधत तस्मात्स्तोमचितिः सा प्राणचितिर्यत्प्राणानुपादधत तस्मात्प्राणचितिरतो यतमदेव कतमच्च विद्यात्तेन दैवास्यैषार्षेयवती बन्धुमती चितिर्भवत्यथ लोकम्पृणेऽउपदधात्यस्यां स्रक्त्यां तयोरुपरि बन्धुः पुरीषं निवपति तस्योपरि बन्धुः ॥१२॥ ब्राह्मणम् ॥१ [४. ४.] । चतुर्थोऽध्यायः [५२.] ॥ ॥

पञ्चमीं चितिमुपदधाति । एतद्वै देवाश्चतुर्थीं चितिं चित्वा समारोहन्यदूर्ध्वमन्तरिक्षादर्वाचीनं दिवस्तदेव तत्संस्कृत्य समारोहन् ॥१॥ तेऽब्रुवन् । चेतयध्वमिति चितिमिच्छतेति वाव तदब्रुवन्नित ऊर्ध्वमिच्छतेति ते चेतयमाना दिवमेव विराजं पञ्चमीं चितिमपश्यंस्तेभ्य एष लोकोऽच्छन्दयत् ॥२॥ तेऽकामयन्त । असपत्नमिमं लोकमनुपबाधं कुर्वीमहीति तेऽब्रुवन्नुप तज्जानीत यथेमं लोकमसपत्नमनुपबाधं करवामहाऽइति तेऽब्रुवंश्चेतयध्वमिति चितिमिच्छतेति वाव तदब्रुवंस्तदिच्छत यथेमं लोकमसपत्नमनुपबाधं करवामहाऽइति ॥३॥ ते चेतयमानाः । एता इष्टका अपश्यन्नसपत्नास्ता उपादधत ताभिरेतं लोकमसपत्नमनुपबाधमकुर्वत तद्यदेताभिरिमं लोकमसपत्नमनुपबाधमकुर्वत तस्मादेता असपत्नास्तथैवैतद्यजमानो यदेता उपदधात्येतमेवैतल्लोकमसपत्नमनुपबाधं कुरुते सर्वत उपदधाति सर्वत एवैतदेतं लोकमसपत्नमनुपबाधं कुरुते परार्धऽउपदधाति सर्वमेवैतदेतं लोकमसपत्नमनुपबाधं कुरुते ॥४॥ अथ विराज उपदधाति । एषा वै सा विराड्यां तद्देवा विराजं पञ्चमीं चितिमपश्यंस्ता दश-दशोपदधाति दशाक्षरा विराड्विराडेषा चितिः सर्वत उपदधाति यो वाऽएकस्यां दिशि विराजति न वै स विराजति यो वाव

सर्वासु दिक्षु विराजति स एव विराजति ॥५॥ यद्वेवैता असपत्ना उपदधाति । एतद्वै प्रजापतिमेतस्मिन्नात्मनः प्रतिहिते सर्वतः पाप्मोपायतत स एता इष्टका अपश्यदसपत्नास्ता उपाधत्त ताभिस्तं पाप्मानमपाहत पाप्मा वै सपत्नस्तद्यदेताभिः पाप्मानꣳ सपत्नमपाहत तस्मादेता असपत्नाः ॥६॥ तद्वाऽएतत्क्रियते । यद्वेवा अकुर्वन्निदं न्विमꣳ स पाप्मा नोपयतते यद्वेतत्करोति यद्वेवा अकुर्वंस्तत्करवाणीत्यथो य एव पाप्मा यः सपत्नस्तमेताभिरपहते तद्यदेताभिः पाप्मानꣳ सपत्नमपहते तस्मादेता असपत्नाः सर्वत उपदधाति सर्वत एवैतत्पाप्मानꣳ सपत्नमपहते परार्धऽउपदधाति सर्वस्मादेवैतदात्मनः पाप्मानꣳ सपत्नमपहते ॥७॥ स पुरस्तादुपदधाति । अग्ने जातान्प्रणुदा नः सपत्नानिति यथैव यजुस्तथा बन्धुरथ पश्चात्सहसा जातान्प्रणुदा नः सपत्नानिति यथैव यजुस्तथा बन्धुः ॥८॥ सा या पुरस्तादग्निः सा । या पश्चादग्निः साग्निनैव तत्पुरस्तात्पाप्मानमपाहताग्निना पश्चात्तथैवैतद्यजमानोऽग्निनैव पुरस्तात्पाप्मानमपहतेऽग्निना पश्चात् ॥९॥ अथ दक्षिणतः । षोडशी स्तोम ओजो द्रविणमित्येकादशाक्षरा वै त्रिष्टुप्त्रैष्टुभमन्तरिक्षं चतस्रो दिश एष एव वज्रः पञ्चदशस्तस्यासावेवादित्यः षोडशी वज्रस्य भर्ता स एतेन पञ्चदशेन वज्रेणैतया त्रिष्टुभा दक्षिणतः पाप्मानमपाहत तथैवैतद्यजमान एतेन पञ्चदशेन वज्रेणैतया त्रिष्टुभा दक्षिणतः पाप्मानमपहते ॥१०॥ अथोत्तरतः । चतुश्चत्वारिꣳश स्तोमो वर्चो द्रविणमिति चतुश्चत्वारिꣳशदक्षरा वै त्रिष्टुप्त्रैष्टुभो वज्रः स एतेन चतुश्चत्वारिꣳशेन वज्रेणैतया त्रिष्टुभोत्तरतः पाप्मानमपाहत तथैवैतद्यजमान एतेन चतुश्चत्वारिꣳशेन वज्रेणैतया त्रिष्टुभोत्तरतः पाप्मानमपहते ॥११॥ अथ मध्ये । अग्नेः पुरीषमसीति ब्रह्म वै चतुर्थी चितिरग्निरु वै ब्रह्म तस्या एतत्पुरीषमिव यत्पञ्चम्यप्सो नामेति तस्योक्तो बन्धुः ॥१२॥ तां प्राचीं तिरश्चीमुपदधाति । एतद्वैतया प्रजापतिः पाप्मनो मूलमवृश्चत्तथैवैनयायमेतत्पाप्मनो

मूलं वृश्चति दक्षिणतो दक्षिणतउद्यामो हि वज्रोऽन्तरेण दक्षिणां दिश्यामुद्यामाय ह तमवकाशं करोति ॥१३॥ सा या पुरस्तात्प्राणः सा । या पश्चादपानः सा प्राणेनैव तत्पुरस्तात्पाप्मानमपाहतापानेन पश्चात्तथैवैतद्यजमानः प्राणेनैव पुरस्तात्पाप्मानमपहतेऽपानेन पश्चात् ॥१४॥ अथ येऽअभितः । तौ बाहू स योऽस्याभितः पाप्मासीद्बाहुभ्यां तमपाहत तथैवैतद्यजमानो योऽस्याभितः पाप्मा भवति बाहुभ्यामेव तमपहते ॥१५॥ अन्नं पुरीषवती । स योऽस्योपरिष्टात्पाप्मासीदन्नेन तमपाहत तथैवैतद्यजमानो योऽस्योपरिष्टात्पाप्मा भवत्यन्नेनैव तमपहते ॥१६॥ स यद्ध वाऽएवंवित्प्राणिति । योऽस्य पुरस्तात्पाप्मा भवति तं तेनापहतेऽथ यदपानिति तेन तं यः पश्चादथ यद्बाहुभ्यां कर्म कुरुते तेन तं योऽभितोऽथ यदन्नमत्ति तेन तं य उपरिष्टात्सर्वदा ह वाऽएवंवित्पाप्मानमपहतेऽपि स्वपंस्तस्मादेवं विदुषः पापं न कीर्तयेन्नेदस्य पाप्मासानीति ॥१७॥ ब्राह्मणम् ॥२ [५. १.] ॥ ॥

अथ छन्दस्या उपदधाति । एतद्वै प्रजापतिः पाप्मनो मृत्योर्मुक्त्वान्नमैच्छत्तस्मादु हैतदुपतापी वसीयान्भूत्वान्नमिच्छति तस्मिन्नाशाꣳसन्तेऽन्नमिच्छति जीविष्यतीति तस्मै देवा एतदन्नं प्रायच्छन्नेताश्छन्दस्याः पशवो वै छन्दाꣳस्यन्नं पशवस्तान्यस्माऽअच्छदयंस्तानि यदस्माऽअच्छदयंस्तस्माच्छन्दाꣳसि ॥१॥ ता दश-दशोपदधाति । दशाक्षरा विराड्विराडु कृत्स्नमन्नꣳ सर्वमेवास्मिन्नेतत्कृत्स्नमन्नं दधाति सर्वत उपदधाति सर्वत एवास्मिन्नेतत्कृत्स्नमन्नं दधाति ॥२॥ एवश्छन्द इति । अयं वै लोक एवश्छन्दो वरिवश्छन्द इत्यन्तरिक्षं वै वरिवश्छन्दः शम्भूश्छन्द इति द्यौर्वै शम्भूश्छन्दः परिभूश्छन्द इति दिशो वै परिभूश्छन्द आच्छच्छन्द इत्यन्नं वाऽआच्छच्छन्दो मनश्छन्द इति प्रजापतिर्वै मनश्छन्दो व्यचश्छन्द इत्यसौ वाऽआदित्यो व्यचश्छन्दः ॥३॥ सिन्धुश्छन्द इति । प्राणो वै सिन्धुश्छन्दः समुद्रश्छन्द इति मनो

वै समुद्रश्छन्दः सरिरं छन्द इति वाग्वै सरिरं छन्दः ककुप्छन्द इति प्राणो वै ककुप्छन्दस्त्रिककुप्छन्द इत्युदानो वै त्रिककुप्छन्दः काव्यं छन्द इति त्रयी वै विद्या काव्यं छन्दोऽङ्कुपं छन्द इत्यापो वाऽअङ्कुपं छन्दोऽक्षरपङ्क्तिश्छन्द इत्यसौ वै लोकोऽक्षरपङ्क्तिश्छन्दः पदपङ्क्तिश्छन्द इत्ययं वै लोकः पदपङ्क्तिश्छन्दो विष्टारपङ्क्तिश्छन्द इति दिशो वै विष्टारपङ्क्तिश्छन्दः क्षुरो भ्रजश्छन्द इत्यसौ वाऽआदित्यः क्षुरो भ्रजश्छन्द आच्छच्छन्दः प्रच्छच्छन्द इत्यन्नं वाऽआच्छच्छन्दोऽन्नं प्रच्छच्छन्दः ॥४॥ संयच्छन्द इति । रात्रिर्वै संयच्छन्दो वियच्छन्द इत्यहर्वै वियच्छन्दो बृहच्छन्द इत्यसौ वै लोको बृहच्छन्दो रथन्तरं छन्द इत्ययं वै लोको रथन्तरं छन्दो निकायश्छन्द इति वायुर्वै निकायश्छन्दो विवधश्छन्द इत्यन्तरिक्षं वै विवधश्छन्दो गिरश्छन्द इत्यन्नं वै गिरश्छन्दो भ्रजश्छन्द इत्यग्निर्वै भ्रजश्छन्दः सꣳस्तुप्छन्दोऽनुष्टुप्छन्द इति वागेव सꣳस्तुप्छन्दो वागनुष्टुप्छन्द एवश्छन्दो वरिवश्छन्द इति तस्योक्तो बन्धुः ॥५॥ वयश्छन्द इति । अन्नं वै वयश्छन्दो वयस्कृच्छन्द इत्यग्निर्वै वयस्कृच्छन्दो विष्पर्धाश्छन्द इत्यसौ वै लोको विष्पर्धाश्छन्दो विशालं छन्द इत्ययं वै लोको विशालं छन्दश्छदिश्छन्द इत्यन्तरिक्षं वै छदिश्छन्दो दूरोहणं छन्द इत्यसौ वाऽआदित्यो दूरोहणं छन्दस्तन्द्रं छन्द इति पङ्क्तिर्वै तन्द्रं छन्दोऽङ्काङ्कं छन्द इत्यापो वाऽअङ्काङ्कं छन्दः ॥६॥ तद्याः पुरस्तादुपदधाति । प्राणस्तासां प्रथमा व्यानो द्वितीयोदानस्तृतीयोदानश्चतुर्थी व्यानः पञ्चमी प्राणः षष्ठी प्राणः सप्तमी व्यानोऽष्टम्युदानो नवमी यजमान एवात्र दशमी स एष यजमान एतस्यां विराज्यध्यूढः प्रतिष्ठितः प्राणमय्यामर्वाचीश्च पराचीश्चोपदधाति तस्मादिमे प्राणा अर्वाञ्चश्च पराञ्चश्च ॥७॥ अथ या दक्षिणतो । ऽग्निस्तासां प्रथमा वायुर्द्वितीयादित्यस्तृतीयादित्यश्चतुर्थी वायुः पञ्चम्यग्निः षष्ठ्यग्निः सप्तमी वायुरष्टम्यादित्यो नवमी यजमान एवात्र दशमी स एष यजमान एतस्यां विराज्यध्यूढः प्रतितिष्ठितो देवता-

मध्यामर्वाचीश्च पराचीश्चोपदधाति तस्मादेते देवा अर्वाञ्चश्च पराञ्चश्च ॥ ८॥ अथ याः पश्चात् । अयं लोकस्तासां प्रथमान्तरिक्षं द्वितीया द्यौस्तृतीया द्यौश्चतुर्थ्यन्तरिक्षं पञ्चम्ययं लोकः षष्ठ्ययं लोकः सप्तम्यन्तरिक्षमष्टमी द्यौर्नवमी यजमान एवात्र दशमी स एष यजमान एतस्यां विराज्यध्यूढः प्रतिष्ठितो लोकमध्यामर्वाचीश्च पराचीश्चोपदधाति तस्मादिमे लोका अर्वाञ्चश्च पराञ्चश्च ॥ ९॥ अथ या उत्तरतः । ग्रीष्मस्तासां प्रथमा वर्षा द्वितीया हेमन्तस्तृतीया हेमन्तश्चतुर्थी वर्षाः पञ्चमी ग्रीष्मः षष्ठी ग्रीष्मः सप्तमी वर्षा अष्टमी हेमन्तो नवमी यजमान एवात्र दशमी स एष यजमान एतस्यां विराज्यध्यूढः प्रतिष्ठित ऋतुमध्यामर्वाचीश्च पराचीश्चोपदधाति तस्मादेतऽऋतवोऽर्वाञ्चश्च पराञ्चश्च ॥१०॥ अथ पुनरेव । याः पुरस्तादुपदधाति प्राणास्ते ता दश भवन्ति दश वै प्राणाः पूर्वार्धऽउपदधाति पुरस्ताद्धीमे प्राणाः ॥११॥ अथ या दक्षिणतः । एतास्ता देवता अग्निश्च पृथिवी च वायुश्चान्तरिक्षं चादित्यश्च द्यौश्च चन्द्रमाश्च नक्षत्राणि चान्नं चापश्च ॥१२॥ अथ याः पश्चात् । दिशस्ताश्चतस्रो दिशश्चतस्रोऽवान्तरदिश ऊर्ध्वा चेयं च ॥१३॥ अथ या उत्तरतः । मासास्ते वासन्तिकौ द्वौ ग्रैष्मौ द्वौ वार्षिकौ द्वौ शारदौ द्वौ हैमन्तिकौ द्वौ ॥१४॥ अथ पुनरेव । या प्रथमा दशदयꣳ स लोको या द्वितीयान्तरिक्षं तद्या तृतीया द्यौः सेममेव लोकं प्रथमया दशतारोहन्नन्तरिक्षं द्वितीयया दिवं तृतीयया तथैवैतद्यजमान इममेव लोकं प्रथमया दशता रोहत्यन्तरिक्षं द्वितीयया दिवं तृतीयया ॥१५॥ स स पराङिव रोहः । इयमु वै प्रतिष्ठा ते देवा इमां प्रतिष्ठामभिप्रत्यायंस्तथैवैतद्यजमान इमां प्रतिष्ठामभिप्रत्यैत्यथ योत्तमा दशदयꣳ स लोकस्तस्माद्यथैव प्रथमायै दशतः प्रभृतिरेवमुत्तमायै समानꣳ ह्येतद्यदेते दशतावयमेव लोकः ॥१६॥ ता वाऽएताः । चत्वारिꣳशदिष्टकाश्चत्वारिꣳशद्यजूꣳषि तदशीतिरन्नमशीतिस्तद्यदेतदाह तदस्माऽअन्नमशीतिं कृत्वा प्रयच्छति

तेनैनं प्रीणाति ॥१७॥ ब्राह्मणम् ॥ ३ [५. २.] ॥ ॥

अथ स्तोमभागा उपदधाति । एतद्वै प्रजापतेरेतदन्नमिन्द्रोऽभ्यध्यायत्सोऽस्मादुदचिक्रमिषत्तमब्रवीत्क्वथोत्क्रामसि कथा मा जहासीति स वै मेऽस्यान्नस्य रसं प्रयच्छेति तेन वै मा सह प्रपद्यस्वेति तथेति तस्माऽएतस्यान्नस्य रसं प्रायच्छत्तेनैनꣳ सह प्रापद्यत ॥१॥ स यः स प्रजापतिः । अयमेव स योऽयमग्निश्चीयतेऽथ यत्तदन्नमेतास्ताश्छन्दस्या अथ यः सोऽन्नस्य रस एतास्ता स्तोमभागा अथ यः स इन्द्रोऽसौ स आदित्यः स एष एव स्तोमो यद्धि किं च स्तुवतऽएतमेव तेन स्तुवन्ति तस्माऽएतस्मै स्तोमयितं भागं प्रायच्छत्तद्यदेतस्मै स्तोमयितं भागं प्रायच्छत्तस्मात्स्तोमभागाः ॥२॥ रश्मिना सत्याय सत्यं जिन्वेति । एष वै रश्मिरन्नꣳ रश्मिरेतं च तद्रसं च संधायात्मन्प्रपादयते प्रेतिना धर्मणा धर्मं जिन्वेत्येष वै प्रेतिरन्नं प्रेतिरेतं च तद्रसं च संधायात्मन्प्रपादयतेऽन्वित्या दिवा दिवं जिन्वेत्येष वाऽअन्वितिरन्नमन्वितिरेतं च तद्रसं च संधायात्मन्प्रपादयते तद्यदेतदाह तच्च तद्रसं च संधायात्मन्प्रपादयतेऽमुनादो जिन्वादोऽस्यमुष्मै त्वाधिपतिनोर्जोर्जं जिन्वेति त्रेधाविहितास्त्रेधाविहितꣳ ह्यन्नम् ॥३॥ यद्वेव स्तोमभागा उपदधाति । एतद्वै देवा विराजं चितिं चित्वा समारोहंस्तेऽब्रुवंश्चेतयध्वमिति चितिमिच्छतेति वाव तदब्रुवंस्ते चेतयमाना नाकमेव स्वर्गं लोकमपश्यंस्तमुपादधत स यः स नाकः स्वर्गो लोक एतास्ता स्तोमभागास्तद्यदेता उपदधाति नाकमेवैतत्स्वर्गं लोकमुपधत्ते ॥४॥ तद्यास्तिस्रः प्रथमाः । अयꣳ स लोको या द्वितीया अन्तरिक्षं तद्यास्तृतीया द्यौः सा याश्चतुर्थ्यः प्राची सा दिग्याः पञ्चम्यो दक्षिणा सा याः षष्ठ्यः प्रतीची सा याः सप्तम्य उदीची सा ॥५॥ ता वाऽएताः । एकविꣳशतिरिष्टका इमे च लोका दिशश्चेमे च वै लोका दिशश्च प्रतिष्ठेमे च लोका दिशश्चैकविꣳशस्तस्मादाहुः प्रतिष्ठैकविꣳश इति ॥६॥ अथ या अष्टाविष्टका अतियन्ति । सा-

ष्टाक्षरा गायत्री ब्रह्म गायत्री तद्यत्तद्ब्रह्मैतत्तद्यदेतन्मण्डलं तपति तदेतस्मिन्नेकविꣳशे प्रतिष्ठायां प्रतिष्ठितं तपति तस्मान्नावपद्यते ॥७॥ तद्धैके । वेषश्रीः क्षत्राय क्षत्रं जिन्वेति त्रिꣳशत्तमीमुपदधति त्रिꣳशदक्षरा विराड्विराडेषा चितिरिति न तथा कुर्यादति ते रेचयन्त्येकविꣳशसम्पदमथो गायत्रीसम्पदमथोऽइन्द्रलोको ह्येष येषान्यूना विराडिन्द्राय ह तऽइन्द्रलोके द्विषन्तं भ्रातृव्यं प्रत्युद्यामिनं कुर्वन्तीन्द्रमिन्द्रलोकान्नुदन्ते यजमानो वै स्वे यज्ञऽइन्द्रो यजमानाय ह ते यजमानलोके द्विषन्तं भ्रातृव्यं प्रत्युद्यामिनं कुर्वन्ति यजमानं यजमानलोकान्नुदन्ते यं वाऽएतमग्निमाहरन्त्येष एव यजमान आयतनेनैष उऽएवात्र त्रिꣳशत्तमी ॥८॥ ब्राह्मणम् ॥४ [५. ३.] ॥ ॥

ता अषाढयै वेलयोपदधाति । वाग्वाऽअषाढा रस एष वाचि तद्रसं दधाति तस्मात्सर्वेषामङ्गानां वाचैवान्नस्य रसं विजानाति ॥१॥ यद्वेवाषाढयै । इयं वाऽअषाढासावादित्य स्तोमभागा अमुं तदादित्यमस्यां प्रतिष्ठायां प्रतिष्ठापयति ॥२॥ यद्वेवाषाढयै । इयं वाऽअषाढा हृदयꣳ स्तोमभागा अस्यां तद्धृदयं मनो दधाति तस्मादस्याꣳ हृदयेन मनसा चेतयते सर्वत उपदधाति सर्वतस्तद्धृदयं मनो दधाति तस्मादस्याꣳ सर्वतो हृदयेन मनसा चेतयतेऽथो पुण्या हैता लक्ष्म्यस्ता एतत्सर्वतो धत्ते तस्माद्यस्य सर्वतो लक्ष्म भवति तं पुण्यलक्ष्मीक इत्याचक्षते ॥३॥ अथैनाः पुरीषेण प्रच्छादयति । अन्नं वै पुरीषꣳ रस एष तमेतत्तिरः करोति तस्मात्तिर-इवान्नस्य रसः ॥४॥ यद्वेव पुरीषेण । अन्नं वै पुरीषꣳ रस एषोऽन्नं च तद्रसं च संतनोति संदधाति ॥५॥ यद्वेव पुरीषेण । हृदयं वै स्तोमभागाः पुरीतत्पुरीषꣳ हृदयं तत्पुरीतता प्रच्छादयति ॥६॥ यद्वेव पुरीषेण । संवत्सर एषोऽग्निस्तमेतच्चितिपुरीषैर्व्यावर्तयति तद्याश्चतस्रः प्रथमाश्चितयस्ते चत्वार ऋतवोऽथ स्तोमभागा उपधाय पुरीषं निवपति सा पञ्चमी चितिः स पञ्चम ऋतुः ॥७॥

तदाहुः । यल्लोकम्पृणान्ता अन्याश्चितयो भवन्ति नात्र लोकम्पृणामुपदधाति क्वात्र लोकम्पृणेत्यसौ वा आदित्यो लोकम्पृणैष उ एषा चितिः सैषा स्वयं लोकम्पृणा चितिरथ यदत ऊर्ध्वमा पुरीषात्सा षष्ठी चितिः स षष्ठ ऋतुः ॥८॥ अथ पुरीषं निवपति । तत्र विकर्णीं च स्वयमातृण्णां चोपदधाति हिरण्यशकलैः प्रोक्षत्यग्निमभ्यादधाति सा सप्तमी चितिः स सप्तम ऋतुः ॥९॥ ता उ वै षडेव । यद्धि विकर्णी च स्वयमातृण्णा च षष्ठ्या एव तच्चितेः ॥१०॥ ता उ वै पञ्चैव । यजुषान्यासु पुरीषं निवपति तूष्णीमत्र तेनैषा न चितिरथो लोकम्पृणान्ता अन्याश्चितयो भवन्ति नात्र लोकम्पृणामुपदधाति तेनो एवैषा न चितिः ॥११॥ ता उ वै तिस्र एव । अयमेव लोकः प्रथमा चितिर्द्यौरुत्तमाथ या एतास्तिस्रस्तदन्तरिक्षं तद्वा इदमेकमिवैवान्तरिक्षं ता एवं तिस्र एवं पञ्चैवꣳ षडेवꣳ सप्त ॥१२॥ ब्राह्मणम् ॥५ [५. ४.] ॥ ॥ पञ्चमोऽध्यायः [५३.] ॥ ॥

नाकसद उपदधाति । देवा वै नाकसदोऽत्रैष सर्वोऽग्निः संस्कृतः स एषोऽत्र नाकः स्वर्गो लोकस्तस्मिन्देवा असीदंस्तद्यदेतस्मिन्नाके स्वर्गे लोके देवा असीदंस्तस्माद्देवा नाकसदस्तथैवैतद्यजमानो यदेता उपदधात्येतस्मिन्नेवैतन्नाके स्वर्गे लोके सीदति ॥१॥ यद्वेव नाकसद उपदधाति । एतद्वै देवा एतं नाकꣳ स्वर्गं लोकमपश्यन्नेता स्तोमभागास्तेऽब्रुवन्नुप तज्जानीत यथास्मिन्नाके स्वर्गे लोके सीदामेति तेऽब्रुवंश्चेतयध्वमिति चितिमिच्छतेति वाव तदब्रुवंस्तदिच्छत यथास्मिन्नाके स्वर्गे लोके सीदामेति ॥२॥ ते चेतयमानाः । एता इष्टका अपश्यन्नाकसदस्ता उपादधत ताभिरेतस्मिन्नाके स्वर्गे लोकेऽसीदंस्तद्यदेताभिरेतस्मिन्नाके स्वर्गे लोकेऽसीदंस्तस्मादेता नाकसदस्तथैवैतद्यजमानो यदेता उपदधात्येतस्मिन्नेवैतन्नाके स्वर्गे लोके सीदति ॥३॥ दिक्षूपदधाति । दिशो वै स नाकः स्वर्गो लोकः स्वर्ग एवैना एतल्लोके सादयत्यृतव्यानां वेलया संवत्सरो वा ऋतव्याः संवत्स-

एः स्वर्गो लोकः स्वर्गऽएवैना एतल्लोके सादयत्यन्तस्तोमभागमेष वै स नाकः स्वर्गो लोकस्तस्मिन्नेवैना एतत्प्रतिष्ठापयति ॥४॥ स पुरस्तादुपदधाति । राज्ञ्यसि प्राची दिगिति राज्ञी ह नामैषा प्राची दिग्वसवस्ते देवा अधिपतय इति वसवो ह्येतस्यै दिशो देवा अधिपतयोऽग्निर्हेतीनां प्रतिधर्तेत्यग्निर्ह्येवात्र हेतीनां प्रतिधर्ता त्रिवृत्त्वा स्तोमः पृथिव्याꣳ श्रयत्विति त्रिवृता ह्येषा स्तोमेन पृथिव्याꣳ श्रिताज्यमुक्थमव्यथायै स्तभ्नात्वित्याज्येन ह्येषोक्थेनाव्यथायै पृथिव्याꣳ स्तब्धा रथन्तरꣳ साम प्रतिष्ठित्याऽअन्तरिक्षऽइति रथन्तरेण ह्येषा साम्ना प्रतिष्ठितान्तरिक्षऽऋषयस्त्वा प्रथमजा देवेष्विति प्राणा वाऽऋषयः प्रथमजास्तद्धि ब्रह्म प्रथमजं दिवो मात्रया वरिम्णा प्रथन्त्विति यावती द्यौस्तावतीं वरिम्णा प्रथन्त्वित्येतद्विधर्ता चायमधिपतिश्चेति वाक्च तौ मनश्च तौ हीदꣳ सर्वं विधारयतस्ते त्वा सर्वे संविदाना नाकस्य पृष्ठे स्वर्गे लोके यजमानं च सादयन्त्विति यथैव यजुस्तथा बन्धुः ॥५॥ अथ दक्षिणतः । विराडसि दक्षिणा दिगिति विराड् नामैषा दक्षिणा दिग्रुद्रास्ते देवा अधिपतय इति रुद्रा ह्येतस्यै दिशो देवा अधिपतय इन्द्रो हेतीनां प्रतिधर्तेतीन्द्रो ह्येवात्र हेतीनां प्रतिधर्ता पञ्चदशस्त्वा स्तोमः पृथिव्याꣳ श्रयत्विति पञ्चदशेन ह्येषा स्तोमेन पृथिव्याꣳ श्रिता प्रउगमुक्थमव्यथायै स्तभ्नात्विति प्रउगेण ह्येषोक्थेनाव्यथायै पृथिव्याꣳ स्तब्धा बृहत्साम प्रतिष्ठित्याऽअन्तरिक्षऽइति बृहता ह्येषा साम्ना प्रतिष्ठितान्तरिक्षऽऋषयस्त्वा प्रथमजा देवेष्विति तस्योक्तो बन्धुः ॥६॥ अथ पश्चात् । सम्राडसि प्रतीची दिगिति सम्राड् नामैषा प्रतीची दिगादित्यास्ते देवा अधिपतय इत्यादित्या ह्येतस्यै दिशो देवा अधिपतयो वरुणो हेतीनां प्रतिधर्तेति वरुणो ह्येवात्र हेतीनां प्रतिधर्ता सप्तदशस्त्वा स्तोमः पृथिव्याꣳ श्रयत्विति सप्तदशेन ह्येषा स्तोमेन पृथिव्याꣳ श्रिता मरुत्वतीयमुक्थमव्यथायै स्तभ्नात्विति मरुत्वतीयेन ह्येषोक्थेनाव्यथायै पृथिव्याꣳ स्तब्धा वैरूपꣳ साम प्रति-

ष्ठित्याऽअन्तरिक्षऽइति वैरूपेण ह्येषा साम्ना प्रतिष्ठितान्तरिक्षऽऋषयस्त्वा प्रथमजा देवेष्विति तस्योक्तो बन्धुः ॥७॥ अथोत्तरतः स्वराडस्युदीची दिगिति स्वराड् नामैषोदीची दिङ्मरुतस्ते देवा अधिपतय इति मरुतो ह्येतस्यै दिशो देवा अधिपतयः सोमो हेतीनां प्रतिधर्त्तेति सोमो ह्येवात्र हेतीनां प्रतिधर्त्तैकविंशस्त्वा स्तोमः पृथिव्यां श्रयत्वित्येकविंशेन ह्येषा स्तोमेन पृथिव्यां श्रिता निष्केवल्यमुक्थमव्यथायै स्तभ्नात्विति निष्केवल्येन ह्येषोक्थेनाव्यथायै पृथिव्यां स्तब्धा वैराजं साम प्रतिष्ठित्याऽअन्तरिक्षऽइति वैराजेन ह्येषा साम्ना प्रतिष्ठितान्तरिक्षऽऋषयस्त्वा प्रथमजा देवेष्विति तस्योक्तो बन्धुः ॥८॥ अथ मध्ये । अधिपत्न्यसि बृहती दिगित्यधिपत्नी ह नामैषा बृहती दिग्विश्वे ते देवा अधिपतय इति विश्वे ह्येतस्यै दिशो देवा अधिपतयो बृहस्पतिर्हेतीनां प्रतिधर्त्तेति बृहस्पतिर्ह्येवात्र हेतीनां प्रतिधर्त्ता त्रिणवत्रयस्त्रिंशौ त्वा स्तोमौ पृथिव्यां श्रयतामिति त्रिणवत्रयस्त्रिंशाभ्यां ह्येषा स्तोमाभ्यां पृथिव्यां श्रिता वैश्वदेवाग्निमारुतेऽउक्थेऽअव्यथायै स्तभ्नीतामिति वैश्वदेवाग्निमारुताभ्यां ह्येषोक्थाभ्यामव्यथायै पृथिव्यां स्तब्धा शाक्वररैवते सामनी प्रतिष्ठित्याऽअन्तरिक्षऽइति शाक्वररैवताभ्यां ह्येषा सामभ्यां प्रतिष्ठितान्तरिक्षऽऋषयस्त्वा प्रथमजा देवेष्विति तस्योक्तो बन्धुः ॥९॥ एतावान्वै सर्वो यज्ञः । यज्ञ उ देवानामात्मा यज्ञमेव तद्देवा आत्मानं कृत्वैतस्मिन्नाके स्वर्गे लोकेऽसीदंस्तथैवैतद्यजमानो यज्ञमेवात्मानं कृत्वैतस्मिन्नाके स्वर्गे लोके सीदति ॥१०॥ अथ पञ्चचूडा उपदधाति । यज्ञो वै नाकसदो यज्ञ उऽएव पञ्चचूडास्तद्यऽइमे चत्वार ऋत्विजो गृहपतिपञ्चमास्ते नाकसदो होत्राः पञ्चचूडा अतिरिक्तं वै तद्यद्धोत्रा यद्वै वाऽअतिरिक्तं चूडः स तद्यत्पञ्चातिरिक्ता तस्मात्पञ्चचूडाः ॥११॥ यद्वेव नाकसत्पञ्चचूडा उपदधाति । आत्मा वै नाकसदो मिथुनं पञ्चचूडा अर्धमु ह्येतदात्मनो यन्मिथुनं यदा वै सह मिथुनेनाथ सर्वोऽथ कृत्स्नः

कृत्स्नतायै ॥१२॥ यद्वेव नाकसत्पञ्चचूडा उपदधाति । आत्मा वै नाकसदः प्रजा
पञ्चचूडा अतिरिक्तं वै तदात्मनो यत्प्रजा यदु वाऽअतिरिक्तं चूडः स तद्यत्पञ्चा-
तिरिक्तास्तस्मात्पञ्चचूडाः ॥१३॥ यद्वेव नाकसत्पञ्चचूडा उपदधाति । दिशो वै
नाकसदो दिश उऽएव पञ्चचूडास्तद्या अमुष्मादादित्यादर्वाच्यः पञ्च दिशस्ता ना-
कसदो याः पराच्यस्ताः पञ्चचूडा अतिरिक्ता वै ता दिशो या अमुष्मादादित्यात्प-
राच्यो यदु वाऽअतिरिक्तं चूडः स तद्यत्पञ्चातिरिक्तास्तस्मात्पञ्चचूडाः ॥१४॥ य-
द्वेव पञ्चचूडा उपदधाति । एतद्वै देवा अबिभयुर्यद्वै न इमांल्लोकानुपरिष्टाद्रक्षां-
सि नाष्ट्रा न हन्युरिति तऽएतानेषां लोकानामुपरिष्टाद्गोप्तॄनकुर्वत यऽएते हे-
तयश्च प्रहेतयश्च तथैवैतद्यजमान एतानेषां लोकानामुपरिष्टाद्गोप्तॄन्कुरुते यऽएते
हेतयश्च प्रहेतयश्च ॥१५॥ स पुरस्तादुपदधाति । अयं पुरो हरिकेश इत्यग्निर्वै
पुरस्तात्तद्यत्तमाह पुर इति प्राञ्चं ह्यग्निमुद्धरन्ति प्राञ्चमुपचरन्त्यथ यद्धरिकेश इत्याह
हरिरिव ह्यग्निः सूर्यरश्मिरिति सूर्यस्येव ह्यग्ने रश्मयस्तस्य रथगृत्सश्च रथौजाश्च
सेनानीग्रामण्याविति वासन्तिकौ तावृतू पुञ्जिकस्थला च क्रतुस्थला चाप्सरसा-
विति दिक्चोपदिशा चेति ह स्माह माहित्थिः सेना च तु ते समितिश्च दङ्क्ष्ण-
वः पशवो हेतिः पौरुषेयो वधः प्रहेतिरिति यद्वै सेनायां च समितौ चऽर्तीयन्ते
ते दङ्क्ष्णवः पशवो हेतिः पौरुषेयो वधः प्रहेतिरिति यदन्योऽन्यं घ्नन्ति स पौ-
रुषेयो वधः प्रहेतिस्तेभ्यो नमोऽअस्त्विति तेभ्य एव नमस्करोति ते नो मृडय-
न्त्विति तऽएवास्मै मृडयन्ति ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्म इति
यमेव द्वेष्टि यश्चैनं द्वेष्टि तमेषां जम्भे दधात्यमुमेषां जम्भे दधामीति ह ब्रूयाद्यं द्वि-
ष्यात्ततोऽह तस्मिन्न पुनरस्त्यपि तन्नाद्रियेत स्वयंनिर्दिष्टो ह्येव स यमेवंविद्द्वे-
ष्टि ॥१६॥ अथ दक्षिणतः । अयं दक्षिणा विश्वकर्मेत्ययं वै वायुर्विश्वकर्मा योऽयं
पवतऽएष हीदं सर्वं करोति तद्यत्तमाह दक्षिणेति तस्मादेष दक्षिणैव भूयिष्ठं

वाति तस्य रथस्वनश्च रथेचित्रश्च सेनानीग्रामण्याविति ग्रैष्मौ तावृतू मेनका च सहजन्या चाप्सरसाविति दिक्चोपदिशा चेति ह स्माह माहित्थिरिमे तु ते द्यावापृथिवी यातुधाना हेती रक्षाꣳसि प्रहेतिरिति यातुधाना हैवात्र हेती रक्षाꣳसि प्रहेतिस्तेभ्यो नमोऽअस्त्विति तस्योक्तो बन्धुः ॥१७॥ अथ पश्चात् । अयं पश्चाद्विश्वव्यचा इत्यसौ वाऽआदित्यो विश्वव्यचा यदा ह्येवैष उदेत्यथेदꣳ सर्वं व्यचो भवति तद्यत्तमाह पश्चादिति तस्मादेतं प्रत्यञ्चमेव यन्तं पश्यन्ति तस्य रथप्रोतश्चासमरथश्च सेनानीग्रामण्याविति वार्षिकौ तावृतू प्रम्लोचन्ती चानुम्लोचन्ती चाप्सरसाविति दिक्चोपदिशा चेति ह स्माह माहित्थिरहोरात्रे तु ते ते हि प्र च म्लोचतोऽनु च म्लोचतो व्याघ्रा हेतिः सर्पाः प्रहेतिरिति व्याघ्रा हैवात्र हेतिः सर्पाः प्रहेतिस्तेभ्यो नमोऽअस्त्विति तस्योक्तो बन्धुः ॥१८॥ अथोत्तरतः । अयमुत्तरात्संयद्वसुरिति यज्ञो वाऽउत्तरात्तद्यत्तमाहोत्तरादित्युत्तरतउपचारो हि यज्ञोऽथ यत्संयद्वसुरित्याह यज्ञꣳ हि संयन्तीतीदं वस्विति तस्य तार्क्ष्यश्चारिष्टनेमिश्च सेनानीग्रामण्याविति शारदौ तावृतू विश्वाची च घृताची चाप्सरसाविति दिक्चोपदिशा चेति ह स्माह माहित्थिर्वेदिश्च तु ते स्रुक्च वेदिरेव विश्वाची स्रुग्घृताच्यापो हेतिर्वातः प्रहेतिरित्यापो हैवात्र हेतिर्वातः प्रहेतिरतो ह्येवोष्णो वात्यतः शीतस्तेभ्यो नमोऽअस्त्विति तस्योक्तो बन्धुः ॥१९॥ अथ मध्ये । अयमुपर्यर्वाग्वसुरिति पर्जन्यो वाऽउपरि तद्यत्तमाहोपरीत्युपरि हि पर्जन्योऽथ यदर्वाग्वसुरित्याहातो ह्यर्वाग्वसु वृष्टिरन्नं प्रजाभ्यः प्रदीयते तस्य सेनजिच्च सुषेणश्च सेनानीग्रामण्याविति हैमन्तिकौ तावृतूऽउर्वशी च पूर्वचित्तिश्चाप्सरसाविति दिक्चोपदिशा चेति ह स्माह माहित्थिराहुतिश्च तु ते दक्षिणा चावस्फूर्जन्हेतिर्विद्युत्प्रहेतिरित्यवस्फूर्जन्हैवात्र हेतिर्विद्युत्प्रहेतिस्तेभ्यो नमोऽअस्त्विति तस्योक्तो बन्धुः ॥२०॥ एते वै ते हेतयश्च प्रहेतयश्च । यांस्तद्देवा एषां लोकानामुप-

रिष्टाद्गोप्तॄनकुर्वताथ यास्ताः प्रजा एते ते सेनानीग्रामण्योऽथ यत्तन्मिथुनमेतास्ता अप्सरसः सर्वऽएव तद्देवाः कृत्स्ना भूत्वा सह प्रजया सह मिथुनेनैतस्मिन्नाके स्वर्गे लोकेऽसीदंस्तथैवैतद्यजमानः सर्व एव कृत्स्नो भूत्वा सह प्रजया सह मिथुनेनैतस्मिन्नाके स्वर्गे लोके सीदति ॥२१॥ ॥ शतम् ४६०० ॥॥ ता वाऽएताः । दशेष्टका उपदधाति दशाक्षरा विराड्विराडेषा चितिस्ता उ वै पञ्चैव द्वे-द्वे व्युपदधाति ता हैता अग्नेराशिषस्ता उत्तमायां चिताऽउपदधात्यन्त एषोऽग्नेर्यदुत्तमा चितिरन्ततस्तदग्नेराशिषो निराह पञ्च भवन्ति पञ्च हि यज्ञऽआशिषोऽथैनेऽअन्तरा पुरीषं निवपत्यग्नी हैतौ यदेतेऽइष्टके नेदिमावग्नी सᳲशोचात इत्यथोऽअन्नं वै पुरीषमन्नेनैवाभ्यामेतत्संज्ञां करोति ॥२२॥ अथातोऽन्वावृतम् । पुरस्तादुपधाय दक्षिणतः पश्चादुत्तरतो मध्यऽउपदधात्यथोत्तराः पुरस्तादेवाग्रऽउपधाय दक्षिणत उत्तरतो मध्ये पश्चादुपदधात्यवस्तात्प्रपदनो ह स्वर्गो लोक एतद्धि देवा इमांल्लोकान्त्सर्वतः समपिधायावस्तात्स्वर्गं लोकं प्रापद्यन्त तथैवैतद्यजमान इमांल्लोकान्त्सर्वतः समपिधायावस्तात्स्वर्गं लोकं प्रपद्यते ॥२३॥ ब्राह्मणम् ॥ ६ [६. १.] ॥ ॥

छन्दस्या उपदधाति । अत्रैष सर्वोऽग्निः संस्कृतः स एषोऽत्र श्रियमैच्छन्नो हैषोऽतः पुरा तस्माऽअलमास यच्छ्रियमधारयिष्यत्तस्मादिदमप्येतर्ह्याहुर्न वाऽएषोऽलᳲ श्रियै धारणाय राज्याय वा ग्रामणीथ्याय वेति तस्मै देवा एताᳲ श्रियं प्रायच्छन्नेताश्छन्दस्याः पशवो वै छन्दाᳲस्यन्नं पशवोऽन्नमु श्रीः ॥१॥ त्रिचान्युपदधाति । त्रिवृद्धि पशुः पिता माता पुत्रोऽथो गर्भ उल्बं जराय्वथो त्रिवृद्धाऽअन्नं कृषिर्वृष्टिर्बीजमेकैवातिच्छन्दा भवत्येका ह्येव सा सर्वाणि छन्दाᳲस्यति सा या सा श्रीर्महत्तदुक्थं तद्यत्तन्महदुक्थमेतास्ताश्छन्दस्याः ॥२॥ तस्य शिरो गायत्र्यः । आत्मा त्रिष्टुभोऽनूकं जगत्यः पक्षौ पङ्क्तयोऽथैतासां ककुभां चत्वारि-चत्वार्यक्षराण्या-

दायातिछन्दस्युपदधाति सा सातिछन्दा एव भवति गायत्र्य इतराः सम्पद्यन्ते सैव गायत्र्यशीतिर्या बृहत्यः सा बार्हती या उष्णिहः सौष्णिह्यथ यद्दशो यदर्धर्चौ यदैन्द्राग्नं यदावपनं तदतिछन्दा अथ यन्नदो यत्सूददोहा यत्पदनुषङ्गा यत्किंचात्रानुष्टुप्कर्मीणं तदनुष्टुभः ॥३॥ प्रतिष्ठा द्विपदाः । एतावद्वै महदुक्थं महदुक्थꣳ श्रीः सर्वामिवास्माऽएतां देवाः श्रियं प्रायच्छंस्तथैवास्माऽअयमेताꣳ सर्वाꣳ श्रियं प्रयच्छति ॥४॥ यद्वेव छन्दस्या उपदधाति । एतद्वै देवा एतं नाकꣳ स्वर्गं लोकमपश्यन्नेता स्तोमभागास्तस्मिन्नविशंस्तेषां विशतां प्रजापतिरुत्तमोऽविशत्स यः स प्रजापतिरेतास्ताश्छन्दस्याः ॥५॥ तस्य शिरो गायत्र्यः । ता यद्गायत्र्यो भवन्ति गायत्रꣳ हि शिरस्तिस्रो भवन्ति त्रिवृद्धि शिरः पूर्वार्धऽउपदधाति पुरस्ताद्धीदꣳ शिरः ॥६॥ उरस्त्रिष्टुभः । ता रेतःसिचोर्वेलयोपदधाति पृष्टयो वै रेतःसिचाऽउरो वै प्रति पृष्टयः ॥७॥ श्रोणी जगत्यः । स यावति पुरस्तात्स्वयमातृण्णायै त्रिष्टुभ उपदधाति तावति पश्चाज्जगतीर्यो वाऽअयं मध्ये प्राणस्तदेषा स्वयमातृण्णा यावत्यु वाऽएतस्मात्प्राणात्पुरस्तादुरस्तावति पश्चाच्छ्रोणी ॥८॥ सक्थ्यावनुष्टुभः । ता अनन्तर्हिता जगतीभ्य उपदधात्यनन्तर्हिते तच्छ्रोणिभ्यꣳ सक्थ्यौ दधाति ॥९॥ पर्शवो बृहत्यः । कीकसाः ककुभः सोऽन्तरेण त्रिष्टुभश्च ककुभश्च बृहतीरुपदधाति तस्मादिमा उभयत्र पर्शवो बद्धाः कीकसासु च जत्रुषु च ॥१०॥ ग्रीवा उष्णिहः । ता अनन्तर्हिता गायत्रीभ्य उपदधात्यनन्तर्हितास्तच्छीर्ष्णो ग्रीवा दधाति ॥११॥ पक्षौ पङ्क्तयः । ता यत्पङ्क्तयो भवन्ति पाङ्क्तौ हि पक्षौ पार्श्वत उपदधाति पार्श्वतो हीमौ पक्षौ यद्वर्षीयश्छन्दस्तद्दक्षिणत उपदधाति दक्षिणं तदर्धं पशोर्वीर्यवत्तरं करोति तस्माद्दक्षिणोऽर्धः पशोर्वीर्यवत्तरः ॥१२॥ उदरमतिछन्दाः । पशवो वै छन्दाꣳस्यन्नं पशव उदरं वाऽअन्नमत्त्युदरꣳ हि वाऽअन्नमत्ति तस्माद्यदोदरमन्नं प्राप्नोत्यथ तज्जग्धं यातयामरूपं भवति तद्यदेषा पशूꣳश्छन्दाꣳस्यत्ति तस्मादत्तिछन्दा

अतिछन्दा ह वै तामतिछन्दा इत्याचक्षते परोऽक्षं परोऽक्षकामा हि देवाः ॥१३॥ योनिः पुरीषवती । ते सꣳस्पृष्टेऽउपदधाति सꣳस्पृष्टे ह्युदरं च योनिश्च पुरीषसꣳहिते भवतो माꣳसं वै पुरीषं माꣳसेन वाऽउदरं च योनिश्च सꣳहिते पूर्वातिछन्दा भवत्यपरा पुरीषवत्युत्तरꣳ ह्युदरमधरा योनिः ॥१४॥ ते प्राच्याऽउपदधाति । प्राङ् ह्येषोऽग्निश्चीयतेऽथो प्राग्वै प्राच उदरं प्राची योनिर्बहिस्तोमभागꣳ हृदयं वै स्तोमभागा हृदयमु वाऽउत्तममथोदरमथ योनिः ॥१५॥ ते दक्षिणतः स्वयमातृण्णायाऽउपदधाति । अथ प्रथमायां चिताऽउत्तरतः स्वयमातृण्णायाऽउदरं च योनिं चोपदधाति यो वाऽअयं मध्ये प्राणस्तदेषा स्वयमातृण्णैतस्य तत्प्राणस्योभयत उदरं च योनिं च दधाति तस्मादेतस्य प्राणस्योभयत उदरं च योनिश्च ॥१६॥ प्रतिष्ठा द्विपदाः । ता यद्द्विपदा भवन्ति द्वन्द्वꣳ हि प्रतिष्ठा तिस्रो भवन्ति त्रिवृद्धि प्रतिष्ठा पश्चादुपदधाति पश्चाद्धीयं प्रतिष्ठा ॥१७॥ सोऽस्यैष सुकृत आत्मा । तद्यस्य हैतमेवꣳ सुकृतमात्मानं कुर्वन्त्येतꣳ ह स सुकृतमात्मानमभिसम्भवत्यथ यस्य हैतमतोऽन्यथा कुर्वन्ति दुष्कृतꣳ ह तस्यात्मानं कुर्वन्ति स ह स दुष्कृतमेवात्मानमभिसम्भवति ॥१८॥ तदेते सामनिधनेऽअभ्युक्ते । अर्की देवानां परमे व्योमन्नर्कस्य देवाः परमे व्योमन्नित्येतद्धै देवानां विशतां प्रजापतिरुत्तमोऽविशत्तस्मादाहार्की देवानां परमे व्योमन्नित्यथ यदाहार्कस्य देवाः परमे व्योमन्नित्ययं वाऽअग्निरर्कस्तस्यैतउत्तमायां चितौ सर्वे देवा विष्टास्तस्मादाहार्कस्य देवाः परमे व्योमन्निति ॥१९॥ ब्राह्मणम् ॥७ [६. २.] ॥ तृतीयः प्रपाठकः ॥ कण्डिकासंख्या१०८ ॥ ॥

गार्हपत्यमुपदधाति । एतद्वै देवाः प्राप्य राद्धिवामन्यन्त तेऽब्रुवन्केनेदमरात्स्मेति गार्हपत्येनैवेत्यब्रुवन्गार्हपत्यं वै चित्वा समारुह्य प्रथमां चितिमपश्याम प्रथमायै द्वितीयां द्वितीयायै तृतीयां तृतीयायै चतुर्थीं चतुर्थ्यै पञ्चमीं पञ्चम्या इदमिति

॥ १ ॥ तेऽब्रुवन् । उप तज्जानीत यथेयमस्मास्वेव राद्धिरसदिति तेऽब्रुवंश्चेतयध्व-
मिति चितिमिच्छतेति वाव तदब्रुवंस्तदिच्छत यथेयमस्मास्वेव राद्धिरसदिति ॥ २ ॥
ते चेतयमानाः । एतदपश्यन्निहेममाहृत्योपदधामहा इति तमिहाहृत्योपादधत
तस्मिन्व्यवदन्त वसवः पुरस्ताद्रुद्रा दक्षिणत आदित्याः पश्चान्मरुत उत्तरतो विश्वे
देवा उपरिष्टादिहोपदधामेहोपदधामेति ॥ ३ ॥ तेऽब्रुवन् । मध्य एवोपदधामहै
स नो मध्य उपहितः सर्वेषां भविष्यतीति तं मध्य उपादधत तदेताꣳ राद्धिमा-
त्मन्नदधत मध्यतो मध्यत एवैतदेताꣳ राद्धिमात्मन्नदधत तथैवैतद्यजमानो यद्गार्ह-
पत्यमुपदधात्येतामेवैतद्राद्धिमात्मन्धत्ते मध्यतो मध्यत एवैतदेताꣳ राद्धिमात्मन्धत्ते
॥ ४ ॥ यद्वेव गार्हपत्यमुपदधाति । अन्नं वै गार्हपत्योऽत्तायमग्निश्चितोऽत्त्र एवैत-
दन्नमपिदधाति मध्यतो मध्यत एवास्मिन्नेतदन्नं दधाति ॥ ५ ॥ यद्वेव गार्हपत्यमुप-
दधाति । वेदिर्वै देवलोकोऽथ वा एष बहिर्वेदि चितो भवति तं यदिहाहृ-
त्योपदधाति तदेनं वेदौ देवलोके प्रतिष्ठापयति ॥ ६ ॥ यद्वेव गार्हपत्यमुपदधाति
। योनिर्वै पुष्करपर्णमथ वा एष बहिर्योनि चितो भवति बहिर्धा वा एतद्यो-
नेरग्निकर्म यत्पुरा पुष्करपर्णात्तं यदिहाहृत्योपदधाति तदेनं योनौ पुष्करपर्णे प्र-
तिष्ठापयति तथो हैषोऽबहिर्धा भवत्यष्टाविष्टका उपदधाति तस्योक्तो बन्धुस्तं
वा एतैरेव यजुर्भिरेतयावृता चिनोति यो ह्येवासौ स एवायं तेनैवैतदाहृत्ये-
होपदधाति ॥ ७ ॥ अथ पुनश्चितिमुपदधाति । एतद्ध देवा गार्हपत्यं चित्वा तस्मि-
न्राद्धिं नापश्यन्योनिर्वै गार्हपत्या चितिरेषो वै योने राद्धिर्यद्रेतः प्रजातिस्तस्या-
मेतस्यां योनौ रेतः प्रजातिं नापश्यन् ॥ ८ ॥ तेऽब्रुवन् । उप तज्जानीत यथास्यां
योनौ रेतः प्रजातिं दधामेति तेऽब्रुवंश्चेतयध्वमिति चितिमिच्छतेति वाव तदब्रुवं-
स्तदिच्छत यथास्यां योनौ रेतः प्रजातिं दधामेति ॥ ९ ॥ ते चेतयमानाः । एतां पु-
नश्चितिमपश्यंस्तामुपादधत तदेतस्यां योनौ रेतः प्रजातिमदधुर्मध्यतो मध्यत एवै-

तदेतस्यां योनौ रेतः प्रजातिमदधुस्तथैवैतद्यजमानो यत्पुनश्चितिमुपदधात्येतस्यामेवैतद्योनौ रेतः प्रजातिं दधाति मध्यतो मध्यत एवैतदेतस्यां योनौ रेतः प्रजातिं दधाति ॥१०॥ तां हैके जघनार्धऽउपदधति । जघनार्धाद्धि रेतः सिच्यते पुच्छसंधौ पुच्छाद्धि रेतः सिच्यतऽइति न तथा कुर्याद्बहिर्धा ह ते योने रेतः प्रजातिं दधति ये तथा कुर्वन्ति मध्यऽएवोपदध्यात्तत्सम्प्रति योनौ रेतः प्रजातिं दधाति ॥११॥ अष्टाविष्टका उपदधाति । अष्टाक्षरा गायत्री गायत्रोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतद्रेतो भूतं सिञ्चति पञ्च कृत्वः सादयति पञ्चचितिकोऽग्निः पञ्चऽर्तवः संवत्सरः संवत्सरोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतद्रेतो भूतं सिञ्चत्यष्टाविष्टकाः पञ्च कृत्वः सादयति तत्त्रयोदश त्रयोदश मासाः संवत्सरस्त्रयोदशाग्नेश्चितिपुरीषाणि यावानग्निर्यावत्यस्य मात्रा तावत्तद्भवति ॥१२॥

यद्वेव पुनश्चितिमुपदधाति । एतद्वाऽएतदयथायथं करोति यदाहवनीयाद्गार्हपत्यमुत्तरं चिनोति तद्यत्पुनश्चितिमुपदधाति य एवायमग्निश्चितस्तमेवैतदाहृत्यास्योपरिष्टात्पुनश्चिनोति तद्यच्चितं सन्तं पुनश्चिनोति तस्मात्पुनश्चितिः ॥१३॥ तद्वैके । जघनार्धे गार्हपत्यमुपदधति पूर्वार्धे पुनश्चितिमाहवनीयश्च वाऽएतौ गार्हपत्यश्चैवं वाऽएतावग्नीऽइति न तथा कुर्यादयं वै लोको गार्हपत्यो द्यौराहवनीय उत्तरो वाऽअसावस्यै तस्मादेनामुत्तरामेवोपदध्यात् ॥१४॥ यद्वेव गार्हपत्यं च पुनश्चितिं चोपदधाति । वेदिश्च हैतेऽअग्नेरुत्तरवेदिश्चाथ येऽअमू पूर्वे निवपत्यधरस्य तेऽअथ हैतेऽअग्नेस्तद्यदेतेऽउपधायाग्निं निदधाति वेदौ चैवैनमेतदुत्तरवेदौ च प्रतिष्ठापयति ॥१५॥ यद्वेव पुनश्चितिमुपदधाति । पुनर्यज्ञो हैष उत्तरा हैषा देवयज्या पुनर्यज्ञमेवैतदुपधत्तऽउत्तरामेव देवयज्यामुप हैनं पुनर्यज्ञो नमति ॥१६॥
यद्वेव पुनश्चितिमुपदधाति । यं वै तं प्राणा ऋषयोऽग्रेऽग्निं समस्कुर्वंस्त एष तमेवैतत्पुनश्चिनोति तद्यच्चितं सन्तं पुनश्चिनोति तस्माद्वेव पुनश्चितिः ॥१७॥

येनऽऋषयस्तपसा सत्त्रमायन्निति । अमूनेतदृषीनाहेन्धाना अग्निꣳ स्वराभरन्त इ-
तीन्धाना अग्निꣳ स्वर्गं लोकमाहरन्त इत्येतत्तस्मिन्नहं निदधे नाकेऽअग्निमिति
स्वर्गो वै लोको नाको यमाहुर्मनव स्तीर्णबर्हिषमिति ये विद्वाꣳसस्ते मनव
स्तीर्णबर्हिषमिति सर्वदा हैव स स्तीर्णबर्हिः ॥१८॥ तं पत्नीभिरनुगच्छेम देवाः
। पुत्रैर्भ्रातृभिरुत वा हिरण्यैरित्येतेनैनꣳ सर्वेणानुगच्छेमेत्येतन्नाकं गृभ्णानाः सुकृ-
तस्य लोकऽइति स्वर्गो वै लोको नाकः स्वर्गं लोकं गृह्णानाः सुकृतस्य लोक
ऽइत्येतत्तृतीये पृष्ठेऽअधि रोचने दिव इत्येतद्ध तृतीयं पृष्ठं रोचनं दिवो यत्रैष
एतत्तपति ॥१९॥ आ वाचो मध्यमरुहद्भुरण्युरिति । एतद्ध वाचो मध्यं यत्रैष
एतच्चीयते भुरण्युरिति भर्तेत्येतदयमग्निः सत्पतिश्चेकितान इत्ययमग्निः सतां पति-
श्चेतयमान इत्येतत्पृष्ठे पृथिव्या निहितो दविद्युतदिति पृष्ठे पृथिव्या निहितो
दीप्यमान इत्येतदधस्पदं कृणुतां ये पृतन्यव इत्यधस्पदं कुरुताꣳ सर्वान्पाप्मन
इत्येतत् ॥२०॥ अयमग्निर्वीरतमो वयोधा इति । अयमग्निर्वीर्यवत्तमो वयोधा
इत्येतत्सहस्रियो द्योततामप्रयुच्छन्निति सहस्रियो दीप्यतामप्रमत्त इत्येतद्विभ्राज-
मानः सरिरस्य मध्यऽइतीमे वै लोकाः सरिरं दीप्यमान एषु लोकेष्वित्येतदुप
प्रयाहि दिव्यानि धामेत्युप प्रयाहि स्वर्गं लोकमित्येतत् ॥२१॥ सम्प्रच्यवध्वमुप
सम्प्रयातेति । अमूनेतदृषीनाह समेनं प्रच्यवध्वमुप चैनꣳ सम्प्रयातेत्यग्ने पथो दे-
वयानान्कृणुध्वमिति यथैव यजुस्तथा बन्धुः पुनः कृण्वाना पितरा युवानेति वा-
क्च वै मनश्च पितरा युवाना वाक्च मनश्चैतावग्नीऽअन्वाताꣳसीत्त्वयि तन्तुमेत-
मिति योऽसावृषिभिस्तन्तुस्ततस्तमेतदाह ॥२२॥ उद्बुध्यस्वाग्ने प्रतिजागृहि त्वमि-
ति । इममेतदग्निमाहोच्चैनं बुध्यस्व प्रति चैनं जागृहीतीष्टापूर्ते सꣳसृजेथामयं चेति
यथैव यजुस्तथा बन्धुरस्मिन्त्सधस्थेऽअध्युत्तरस्मिन्निति द्यौर्वाऽउत्तरꣳ सधस्थं विश्वे
देवा यजमानश्च सीदतेति तद्विश्वैर्देवैः सह यजमानꣳ सादयति ॥२३॥ येन व-

ह्वसि सहस्रम् । येनाग्ने सर्ववेदसमित्येतद्धास्य प्रतिज्ञाततमं धाम येन सहस्रं वहति येन सर्ववेदसं तेनेमं यज्ञं नो नय स्वर्देवेषु गन्तवऽइति तेन न इमं यज्ञं नय स्वर्गं लोकं देवेषु गन्तवऽइत्येतदयं ते योनिर्ऋत्विय इति तस्योक्तो बन्धुरष्टाविष्टका उपदधाति तस्योऽएवोक्तः ॥२४॥ ब्राह्मणम् ॥ १ [६. ३.] ॥ षष्ठोऽध्यायः [५४.] ॥ ॥

ऋतव्या उपदधाति । ऋतव एते यदृतव्या ऋतूनेवैतदुपदधाति तदेतत्सर्वं यदृतव्याः संवत्सरो वाऽऋतव्याः संवत्सर इदꣳ सर्वमिदमेवैतत्सर्वमुपदधात्यथो प्रजननमेतत्संवत्सरो वाऽऋतव्याः संवत्सरः प्रजननं प्रजननमेवैतदुपदधाति ॥१॥ यद्वेवऽर्तव्या उपदधाति । क्षत्रं वाऽऋतव्या विश इमा इतरा इष्टकाः क्षत्रं तद्विक्ष्वत्तारं दधाति ताः सर्वासु चितिषूपदधाति सर्वस्यां तद्विशि क्षत्रमत्तारं दधाति ॥२॥ यद्वेवऽर्तव्या उपदधाति । संवत्सर एषोऽग्निः स ऋतव्याभिः सꣳहितः संवत्सरमेवैतदृतुभिः संतनोति संदधाति ता वै नानाप्रभृतयः समानोदर्का ऋतवो वाऽअसृज्यन्त ते सृष्टा नानेवासन् ॥३॥ तेऽब्रुवन् । न वाऽइत्थꣳ सन्तः शक्ष्यामः प्रजनयितुꣳ रूपैः समायामेति तऽएकैकमृतुꣳ रूपैः समायंस्तस्मादेकैकस्मिन्नृतौ सर्वेषामृतूनाꣳ रूपं ता यन्नानाप्रभृतयो नाना ह्यसृज्यन्ताथ यत्समानोदर्का रूपैर्हि समायन् ॥४॥ स उपदधाति । तपश्च तपस्यश्च शैशिरावृतूऽइति नामनीऽएनयोरेते नामभ्यामेवैनेऽएतदुपदधात्यसौ वाऽआदित्यस्तपस्तस्मादेतावृतूऽअनन्तर्हितौ तद्यदेतस्मादेतावृतूऽअनन्तर्हितौ तस्मादेतौ तपश्च तपस्यश्च ॥५॥ अग्नेरन्तःश्लेषोऽसीति । संवत्सर एषोऽग्निः स ऋतव्याभिः सꣳहितः संवत्सरमेवैतदृतुभिः संतनोति संदधाति कल्पेतां द्यावापृथिवी कल्पन्तामाप ओषधय इतीदमेवैतत्सर्वमृतुभिः कल्पयति कल्पन्तामग्नयः पृथङ्मम ज्यैष्ठ्याय सव्रता इत्यग्नयो ह्येते पृथग्यदेता इष्टकास्ते यथानयोर्ऋत्वोर्ज्यैष्ठ्याय कल्पेरन्नेवमेतदाह येऽअग्नयः समन-

सोऽन्तरा द्यावापृथिवीऽइमेऽइति यथैव यजुस्तथा बन्धुः शैशिरावृतूऽअभिकल्पमाना इन्द्रमिव देवा अभिसंविशन्त्विति यथेन्द्रं देवा अभिसंविष्टा एवमिमावृतू इन्द्रियायाभिसंविशन्त्वित्येतद्द्वेऽइष्टके भवतो द्वौ हि मासावृतुः सकृत्सादयत्येकं तदृतुं करोति ॥६॥ तद्यदेतेऽअत्रोपदधाति । संवत्सर एषोऽग्निरिमऽउ लोकाः संवत्सरस्तस्य द्यौरेव पञ्चमी चितिर्द्यौरस्य शिशिर ऋतुस्तद्यदेतेऽअत्रोपदधाति यद्वास्यैतेऽआत्मनस्तदस्मिन्नेतत्प्रतिदधाति तस्मादेतेऽअत्रोपदधाति ॥७॥ यद्वेवैतेऽअत्रोपदधाति । प्रजापतिरेषोऽग्निः संवत्सर उ प्रजापतिस्तस्य शिर एव पञ्चमी चितिः शिरोऽस्य शिशिर ऋतुस्तद्यदेतेऽअत्रोपदधाति यद्वास्यैतेऽआत्मनस्तदस्मिन्नेतत्प्रतिदधाति तस्मादेतेऽअत्रोपदधाति ॥८॥ स पुरस्तात्स्वयमातृण्णायै च विश्वज्योतिषश्चऽर्तव्येऽउपदधाति । द्यौर्वाऽउत्तमा स्वयमातृण्णादित्य उत्तमा विश्वज्योतिरर्वाचीनं तद्दिवश्चादित्याच्चऽर्तून्दधाति तस्मादर्वाचीनमेवात ऋतवोऽथो प्रजननमेतदर्वाचीनं तद्दिवश्चादित्याच्च प्रजननं दधाति तस्मादर्वाचीनमेवातः प्रजायते स्थितꣳ ह्येवातः पराक्प्रजननं यावन्तो ह्येव सनाग्रे देवास्तावन्तो देवाः ॥९॥ अथ प्रथमायै स्वयमातृण्णायै प्रथमायै च विश्वज्योतिष उपरिष्टादृतव्येऽउपदधाति । इयं वै प्रथमा स्वयमातृण्णाग्निः प्रथमा विश्वज्योतिस्तदूर्ध्वानृतून्दधाति तस्मादित ऊर्ध्वा ऋतवोऽथो प्रजननमेतदितस्तदूर्ध्वं प्रजननं दधाति तस्मादित ऊर्ध्वमेव प्रजायते ॥१०॥ ता न व्यूहेत् । नेदृतून्व्यूहानीति यो वै म्रियतऽऋतवो ह तस्मै व्युह्यन्ते तस्माद्यत्रैव प्रथमेऽउपदधाति तत्सर्वा उपदध्यात् ॥११॥ अथोऽइमे वै लोका ऋतव्याः । इमांस्तल्लोकानूर्ध्वांश्चितिभिश्चिनोत्यथो क्षत्रं वा ऋतव्याः क्षत्रं तदूर्ध्वं चितिभिश्चिनोत्यथो संवत्सरो वाऽऋतव्याः संवत्सरं तदूर्ध्वं चितिभिश्चिनोति ता नान्यया यजुष्मत्येष्टकयोपरिष्टादभ्युपदध्यान्नेत्क्षत्रं विशाभ्युपदधानीति ॥१२॥ ता ह्येता एव संयान्यः । एतद्वै देवा ऋतव्याभिरेवेमांल्लो-

कान्त्समयुरितश्चोर्ध्वानमुतश्चार्वाचस्तथैवैतद्यजमान ऋतव्याभिरेवेमांल्लोकान्त्संया-
तीतश्चोर्ध्वानमुतश्चार्वाचः ॥१३॥ तदु ह चरकाध्वर्यवः । अन्या एव संयानीरि-
त्युपदधति न तथा कुर्यादत्यहैव रेचयन्त्येता उ एव संयान्यः ॥१४॥ अथ विश्व-
ज्योतिषमुपदधाति । आदित्यो वाऽउत्तमा विश्वज्योतिरादित्यो ह्येवामुष्मिंल्लोके
विश्वज्योतिरादित्यमेवैतदुपदधाति ॥१५॥ यद्वेव विश्वज्योतिषमुपदधाति । प्रजा
वै विश्वज्योतिः प्रजा ह्येव विश्वं ज्योतिः प्रजननमेवैतदुपदधाति ॥१६॥ स पुर-
स्तात्स्वयमातृण्णायै विश्वज्योतिषमुपदधाति । द्यौर्वाऽउत्तमा स्वयमातृण्णादित्य
उत्तमा विश्वज्योतिरर्वाचीनं तद्दिव आदित्यं दधाति तस्मादेषोऽर्वाचीनमेवात-
स्तपत्यथो प्रजननमेतदर्वाचीनं तद्दिवः प्रजननं दधाति तस्मादर्वाचीनमेवातः प्र-
जायते ॥१७॥ अथ प्रथमायै स्वयमातृण्णायै । उपरिष्टाद्विश्वज्योतिषमुपदधातीयं वै
प्रथमा स्वयमातृण्णाग्निः प्रथमा विश्वज्योतिरितस्तदूर्ध्वमग्निं दधाति तस्मादित ऊर्ध्वो
ऽग्निर्दीप्यतेऽथो प्रजननमेतदितस्तदूर्ध्वं प्रजननं दधाति तस्मादित ऊर्ध्वमेव प्रजा-
यते ॥१८॥ अथ मध्यमायै स्वयमातृण्णायै । उपरिष्टाद्विश्वज्योतिषमुपदधात्यन्तरिक्षं
वै मध्यमा स्वयमातृण्णा वायुर्मध्यमा विश्वज्योतिरन्तरिक्षे तद्वायुं दधाति तस्मादय-
मन्तरिक्षे वायुः ॥१९॥ तान्येतानि ज्योतीꣳषि । तद्यदेता एवमुपदधात्येतान्येवै-
तज्ज्योतीꣳषि सम्यञ्चि दधाति तस्मादित ऊर्ध्वोऽग्निर्दीप्यतेऽर्वाङसावादित्यस्तप-
त्यन्तरिक्षेऽयं तिर्यङ् वायुः पवते ॥२०॥ परमेष्ठी त्वा सादयत्विति । परमेष्ठी ह्ये-
तां पञ्चमीं चितिमपश्यद्दिवस्पृष्ठे ज्योतिष्मतीमिति दिवो ह्यसौ पृष्ठे ज्योतिष्मा-
नादित्यः ॥२१॥ विश्वस्मै प्राणायापानाय । व्यानायेति प्राणो वै विश्वज्योतिः
सर्वस्माऽउ वाऽएतस्मै प्राणो विश्वं ज्योतिर्यच्छेति सर्वं ज्योतिर्यच्छेत्येतत्सूर्यस्ते
ऽधिपतिरिति सूर्यमेवास्या अधिपतिं करोति सादयित्वा सूददोहसाधिवदति त-
स्योक्तो बन्धुः ॥२२॥ ता हैता एव संयान्यः । एतद्वै देवा विश्वज्योतिर्भिरेषे-

मांलोकान्त्समयुरितश्चोर्ध्वानमुतश्चार्वाचस्तथैवैतद्यजमानो विश्वज्योतिर्भिरेवेमां-
लोकान्त्संयातीतश्चोर्ध्वानमुतुश्चार्वाचः ॥२३॥ तदु ह चरकाध्वर्यवो । ऽन्या एव
संयानीरित्युपदधति न तथा कुर्यादत्यद्धैव रेचयन्त्येता उऽएव संयान्यः ॥२४॥
ब्राह्मणम् ॥२ [७. १.] ॥ ॥

अथ लोकम्पृणामुपदधाति । असौ वाऽआदित्यो लोकम्पृणैष ह्रीमांलोकान्पू-
रयत्यमुमेवैतदादित्यमुपदधाति ताꣳ सर्वासु चितिषूपदधातीमे वै लोका एताश्चि-
तयोऽमुं तदादित्यमेषु लोकेषु दधाति तस्मादेष सर्वेभ्य एवैभ्यो लोकेभ्यस्तपति
॥१॥ यद्वेव लोकम्पृणामुपदधाति । क्षत्रं वै लोकम्पृणा विश इमा इतरा इष्ट-
काः क्षत्रं तद्विश्यत्तारं दधाति ताꣳ सर्वासु चितिषूपदधाति सर्वस्यां तद्विशि क्ष-
त्रमत्तारं दधाति ॥२॥ सैषैकैव भवति । एकस्थं तत्क्षत्रमेकस्थाꣳ श्रियं करोत्यथ
या द्वितीया मिथुनं तदर्धमु हैतदात्मनो यन्मिथुनं यदा वै सह मिथुनेनाथ सर्वो
ऽथ कृत्स्नः कृत्स्नतायाऽएकेन यजुषा बह्वीरिष्टका उपदधाति क्षत्रं तद्वीर्येणात्या-
दधाति क्षत्रं विशो वीर्यवत्तरं करोत्यथेतराः पृथङ्नाना यजुर्भिरुपदधाति विशं
तत्क्षत्रादवीर्यतरां करोति पृथग्वादिनीं नानाचेतसम् ॥३॥ स वाऽअस्याꣳ स्र-
क्त्यां प्रथमेऽउपदधाति । अमुं तदादित्यमेतस्यां दिशि दधात्यथेतस्तस्मादतोऽनुपर्यै-
त्यथेतस्तस्मादतोऽनुपर्यैत्यथेतस्तस्मादतोऽनुपर्यैत्यथातस्तस्मादतोऽनुपर्यैति ॥४॥
स यत्त्रैव प्रथमेऽउपदधाति । तदुत्तमे अनूपदध्यात्सकृद्धैवासावादित्य इमांलो-
कान्पर्येत्य नातिप्रच्यवेतातिक्रम्य पूर्वेऽउत्तमेऽअनूपदधात्यमुं तदादित्यमिमांलो-
कानतिप्रच्यावयति तस्मादसावादित्य इमांलोकानसꣳस्थितो दक्षिणावृत्पुनः-पु-
नरनुपर्यैति ॥५॥ लोकं पृण छिद्रं पृणेति । लोकं च पूरय छिद्रं च पूरयेत्येत-
द्यो सीद ध्रुवा त्वमित्यथो सीद स्थिरा त्वं प्रतिष्ठितेत्येतदिन्द्राग्नी त्वा बृहस्पति-
रस्मिन्योनावसीषदन्नितीन्द्राग्नी च त्वा बृहस्पतिश्चास्मिन्योनौ प्रत्यतिष्ठिपन्नित्ये-

तदनुष्टुभा वाग्वाऽअनुष्टुब्वागिन्द्र इन्द्रो लोकम्पृणा न सादयत्यसन्नो ह्येष सू-
ददोहसा विदति प्राणो वै सूददोहाः प्राणेनैवैनमेतत्संतनोति संदधाति ॥६॥
तदाहुः । कथमेषा लोकम्पृणायातयाम्नी भवतीत्यसौ वाऽआदित्यो लोकम्पृणा-
यातयामा वाऽएषोऽथो वाग्वै लोकम्पृणायातयाम्न्यु वै वाक् ॥७॥ स वै यजु-
ष्मतीरुपधाय । लोकम्पृणया प्रछादयत्यन्नं वै यजुष्मत्य इष्टका आत्मा लोकम्पृ-
णान्नं तदात्मना परिदधाति तस्मादन्नमात्मना परिहितमात्मैव भवति ॥८॥ स
वाऽआत्मन्नेव । यजुष्मतीरुपदधाति न पक्षपुच्छेष्वात्मंस्तदन्नं दधाति यद्व वाऽआ-
त्मन्नन्नं धीयते तदात्मानमवति तत्पक्षपुच्छान्यथ यत्पक्षपुच्छेषु नैव तदात्मानमव-
ति न पक्षपुच्छानि ॥९॥ उभयीर्यजुष्मतीश्च लोकम्पृणाश्चात्मन्नुपदधाति । तस्माद-
यमात्मा द्विगुणो बहुलतर-इव लोकम्पृणा एव पक्षपुच्छेषु तस्मात्पक्षपुच्छानि
तनीयाꣳसीवानूचीश्च तिरश्चीश्चात्मन्नुपदधात्यस्थीनि वाऽइष्टकास्तस्मादिमान्यन्व-
ञ्चि च तिर्यञ्चि चात्मन्नस्थीनि पराचीरेव पक्षपुच्छेषु न हि किं चन पक्षपुच्छेषु
तिर्यगस्थ्यस्ति तद्वैतदेव चितस्य चाचितस्य च विज्ञानमेवमेव चित इतरथाचितः
॥१०॥ स वै स्वयमातृण्णां लोकम्पृणया प्रछादयति । प्राणो वै स्वयमातृण्णादि-
त्यो लोकम्पृणा प्राणं तदादित्येन समिन्द्धे तस्मादयमुष्णः प्राणस्तया सर्वमात्मानं
प्रछादयति सर्वं तदात्मानमादित्येन समिन्द्धे तस्मादयꣳ सर्व एवात्मोष्णस्तद्वैतदेव
जीविष्यतश्च मरिष्यतश्च विज्ञानमुष्ण एव जीविष्यञ्छीतो मरिष्यन् ॥११॥ स य-
स्याꣳ स्रक्त्यां प्रथमेऽउपदधाति । ततो दशभिर्दशभिः संछादयन्नेत्या स्वयमातृण्णायै
स तेनैव दक्षिणावृज्जघनेन स्वयमातृण्णाꣳ संछादयन्नेत्यानूक्यायाऽअथ पुनरेत्य
तमवधिꣳ संछादयति ॥१२॥ आत्मानमग्रे संछादयति । आत्मा ह्येवाग्रे सम्भवतः
सम्भवत्यथ दक्षिणं पक्षमथ पुच्छमथोत्तरं तद्दक्षिणावृत्तद्धि देवत्राथोऽएवं वाऽअ-
सावादित्य इमाँल्लोकान्दक्षिणावृदनुपर्यैति ॥१३॥ स एष प्राण एव यल्लोकम्पृ-

णा । तया सर्वमात्मानं प्रच्छादयति सर्वस्मिंस्तदात्मन्प्राणं दधाति तद्यद्धास्यैषाङ्गं नाभिप्राप्नुयात्प्राणो हास्य तदङ्गं नाभिप्राप्नुयाद्यद्वै प्राणोऽङ्गं नाभिप्राप्नोति शुष्यति वा वै तन्म्लायति वा तस्मादेनꣳ सर्वमेवैतया प्रच्छादयेत् ॥१४॥ स वाऽआत्मन एवाधि पक्षपुच्छानि चिनोति । आत्मनो ह्येवाध्यङ्गानि प्ररोहत्यथ यत्पुरस्तादर्वाचीरुपदध्याद्यथान्यत आहृत्याङ्गं प्रतिदध्यात्तादृक्तत् ॥१५॥ न भिन्नां न कृष्णामुपदध्यात् । आर्छति वाऽएषा या भिद्यतऽआर्तम्वेतद्रूपं यत्कृष्णं नेदार्तमात्मानमभिसंस्करवाऽइति नाभिन्नां परास्येन्नेदनार्तमात्मनो बहिर्धा करवाणीति धिष्ण्येभ्यः प्रतिसंख्याय या विराजमतिरिच्येरन्नोत्तरामुद्वपेयुस्तद्धि खलु ता आर्छन्ति ता भित्त्वोत्करऽउत्किरेदुत्करो वाऽअतिरिक्तस्य प्रतिष्ठा तद्यत्रातिरिक्तस्य प्रतिष्ठा तदेवैना एतत्प्रतिष्ठापयति ॥१६॥ अथात इष्टकामात्राणामेव । पादमात्रीः प्रथमायां चोत्तमायां च चित्योरुपदध्यात्प्रतिष्ठा वै पादो यो वै पादः स हस्त ऊर्वस्थमात्र्यो वर्षिष्ठाः स्युर्न ह्यूर्वस्थात्किं चन वर्षीयोऽस्त्यस्ति त्र्यालिखितवत्यस्तिस्रश्चितयः स्युस्त्रिवृतो हीमे लोका अपरिमितालिखिते द्वे रसो ह्येते चितीऽअपरिमित उ वै रसः सर्वास्त्वेव त्र्यालिखितवत्यः स्युः सर्वे ह्येवेमे लोकास्त्रिवृतः ॥१७॥ अथात इष्टकानामेवावपनस्य । यां कां च यजुष्मतीमिष्टकां विद्यात्तां मध्यमायां चिताऽउपदध्यादन्तरिक्षं वै मध्यमा चितिरन्तरिक्षमु वै सर्वेषां भूतानामावपनमथोऽअन्नं वै यजुष्मत्य इष्टका उदरं मध्यमा चितिरुदरे तदन्नं दधाति ॥१८॥ तदाहुः । नोपदध्यान्नेदतिरेचयानीति स वाऽउपैव दध्यात्कामेभ्यो वाऽएता इष्टका उपधीयन्ते न वै कामानामतिरिक्तमस्ति स वै नैवोपदध्यादेतावद्वाऽएतद्देवा अकुर्वन् ॥१९॥ ब्राह्मणम् ॥३ [७. २.] ॥ ॥

अथ पुरीषं निवपति । माꣳसं वै पुरीषं माꣳसेनैवैनमेतत्प्रच्छादयतीष्टका उपधायास्थीष्टका अस्थि तन्माꣳसैः संछादयति ॥१॥ स वै स्वयमातृण्णायामावपति ।

प्राणो वै स्वयमातृण्णान्नं पुरीषं प्राणे तदन्नं दधाति तेन सर्वमात्मानं प्रच्छादयति
तस्माद्यत्प्राणेऽन्नं धीयते सर्वमात्मानमवति सर्वमात्मानमनुव्येति ॥२॥ न स्व-
यमातृण्णायामावपेदित्यु हैकऽआहुः । प्राणः स्वयमातृण्णा नेत्प्राणानपिदधानीति
स वाऽएव वपेदन्नेन वै प्राणा विष्टब्धा यो वाऽअन्नं नात्ति सं वै तस्य प्राणा
रोहन्ति तद्यस्य ह तथा कुर्वन्ति यथा शुष्का सूर्मी सुषिरैवꣳ ह सोऽमुष्मिंलोके
सम्भवति तस्मात्स्वयमातृण्णायामेव वपेत् ॥३॥ स्वयमातृण्णायामोप्य । अनूकयया
संछादयन्नेत्या परिश्रिद्भ्यः स तेनैव दक्षिणावृज्जघनेन स्वयमातृण्णाꣳ संछादयन्ने-
त्या पुनरनूकयायै ॥४॥ आत्मानमग्रे संछादयति । आत्मा ह्येवाग्रे सम्भवतः सम्भ-
वत्यथ दक्षिणं पक्षमथ पुच्छमथोत्तरं तद्दक्षिणावृत्तद्धि देवत्रा ॥५॥ स एष प्राण
एव यत्पुरीषम् । तेन सर्वमात्मानं प्रच्छादयति सर्वस्मिंस्तदात्मन्प्राणं दधाति त-
द्यद्धास्यैतदङ्गं नाभिप्राप्नुयात्प्राणो हास्य तदङ्गं नाभिप्राप्नुयाद्यद्वै प्राणोऽङ्गं ना-
भिप्राप्नोति शुष्यति वा वै तन्म्लायति वा तस्मादेनꣳ सर्वमेवैतेन प्रच्छादयेत् ॥६॥
इन्द्रं विश्वा अवीवृधन्निति । इन्द्रꣳ हि सर्वाणि भूतानि वर्धयन्ति समुद्रव्यचसं
गिर इति महिमानमस्यैतदाह रथीतमꣳ रथीनामिति रथितमो ह्येष रथिनां वा-
जानाꣳ सत्पतिं पतिमित्यन्नं वै वाजा अन्नानाꣳ सत्पतिं पतिमित्यैतदैन्द्र्यानुष्टुभा
निवपत्यैन्द्रꣳ हि पुरीषं तदेतदर्धमग्नेर्यत्पुरीषमर्धमैष्टकम् ॥७॥ तदाहुः । यत्सर्वै-
श्छन्दोभिः सर्वाभिर्देवताभिरिष्टका उपदधात्यथैतदेकयैकदेवत्यया निवपति कथमे-
तदर्धमग्नेरितीन्द्रो वै सर्वान्देवान्प्रतिप्रतिस्तद्यदैन्द्र्या निवपति तेनैतदर्धमग्नेरथ य-
दनुष्टुभा वाग्वाऽअनुष्टुब्वागु सर्वाणि छन्दाꣳसि तेनोऽएवार्धम् ॥८॥ अथ वि-
कर्णीं च स्वयमातृण्णां चोपदधाति । वायुर्वै विकर्णी द्यौरुत्तमा स्वयमातृण्णा वा-
युं च तद्दिवं चोपदधात्युत्तमेऽउपदधात्युत्तमे हि वायुश्च द्यौश्च सꣳस्पृष्टे सꣳस्पृष्टे
हि वायुश्च द्यौश्च पूर्वां विकर्णीमुपदधात्यर्वाचीनं तद्दिवो वायुं दधाति तस्मादे-

षोऽर्वाचीनमेव वातः पवते ॥९॥ यद्वेव विकर्णीमुपदधाति । यत्र वाऽअदोऽमुं चितिमवघ्रापयन्ति तदसावादित्य इमांल्लोकान्त्सूत्रे समावयते तद्यत्तत्सूत्रं वायुः स स यः स वायुरेषा सा विकर्णी तद्यदेतामुपदधात्यसावेव तदादित्य इमांल्लोकान्त्सूत्रे समावयते ॥१०॥ यद्वेव विकर्णीं च स्वयमातृण्णां चोपदधाति । आयुर्वै विकर्णी प्राणः स्वयमातृण्णायुश्च तत्प्राणं चोपदधात्युत्तमेऽउपदधात्युत्तमे ह्यायुश्च प्राणश्च सꣳस्पृष्टे सꣳस्पृष्टे ह्यायुश्च प्राणश्च पूर्वामुत्तरां विकर्णीमुपदधात्यायुषा तत्प्राणमुभयतः परिगृह्णाति ॥११॥ प्रोथदश्वो न यवसे । ऽविष्यन्यदा महः संवरणाद्व्यस्थात् आदस्य वातोऽअनुवाति शोचिरध स्म ते व्रजनं कृष्णमस्तीति यदा वाऽएतस्य वातोऽनुवाति शोचिरथैतस्य व्रजनं कृष्णं भवति त्रिष्टुभोपदधाति त्रैष्टुभो हि वायुराग्नेय्याग्निकर्म ह्यनिरुक्तयानिरुक्तो हि वायुरथ यद्वात इत्याह वातो हि वायुः ॥१२॥ ॥शतम्४७०० ॥ ॥ अथ स्वयमातृण्णामुपदधाति । आयोष्ट्वा सदने सादयामीत्येष वाऽआयुस्तस्यैतत्सदनमवत इत्येष हीदꣳ सर्वमवति छायायामित्येतस्य हीदꣳ सर्वं छायायाꣳ समुद्रस्य हृदयऽइति समुद्रस्य ह्येतद्धृदयꣳ रश्मीवतीं भास्वतीमिति रश्मीवती हि द्यौर्भास्वत्या या द्यां भास्या पृथिवीमोर्वन्तरिक्षमित्येवꣳ ह्येष इमांल्लोकानाभाति ॥१३॥ परमेष्ठी त्वा सादयत्विति । परमेष्ठी ह्येतां पञ्चमीं चितिमपश्यत् ॥१४॥ यद्वेव परमेष्ठिनोपदधाति । प्रजापतिं विस्रस्तं देवता आदाय व्युदक्रामंस्तस्य परमेष्ठी शिर आदायोत्क्रम्यातिष्ठत् ॥१५॥ तमब्रवीत् । उप मेहि प्रति मऽएतद्धेहि येन मे त्वमुदक्रमीरिति किं मे ततो भविष्यतीति त्वद्देवत्यमेव मऽएतदात्मनो भविष्यतीति तथेति तदस्मिन्नेतत्परमेष्ठी प्रत्यदधात् ॥१६॥ तद्वैषोत्तमा स्वयमातृण्णा । एतदस्य तदात्मनस्तद्यदेतामत्रोपदधाति यदेवास्यैषात्मनस्तदस्मिन्नेतत्प्रतिदधाति तस्मादेतामत्रोपदधाति ॥१७॥ दिवस्पृष्ठे व्यचस्वतीं प्रथस्वतीमिति । दिवो ह्येतत्पृष्ठं व्यचस्वत्प्रथस्वत्तद्दिवं यच्छ

दिवं दृꣳह दिवं मा हिꣳसीरित्यात्मानं यच्छात्मानं दृꣳहात्मानं मा हिꣳसीरित्येतत् ॥ १८ ॥ विश्वस्मै प्राणायापानाय । व्यानायोदानायेति प्राणो वै स्वयमातृण्णा सर्वस्माऽउ वाऽएतस्मै प्राणः प्रतिष्ठायै चरित्रायेतीमे वै लोकाः स्वयमातृण्णा इमऽउ लोकाः प्रतिष्ठा चरित्रꣳ सूर्यस्त्वाभिपात्विति सूर्यस्त्वाभिगोपायत्वित्येतन्मह्या स्वस्त्येति महत्या स्वस्त्येत्येतच्छर्दिषा शंतमेनेति यच्छर्दिः शंतमं तेनेत्येतत् ॥ १९ ॥ नानोपदधाति । नाना हि वायुश्च द्यौश्च सकृत्सादयति समानं तत्करोति समानꣳ ह्यायुश्च प्राणश्च ते वाऽउभेऽएव शर्करे भवत उभे स्वयमातृण्णे समानꣳ ह्येवायुश्च प्राणश्चाथैने सूददोहसाधिवदति प्राणो वै सूददोहाः प्राणेनैवैने ऽएतत्संतनोति संदधाति ॥ २० ॥ ता अस्य सूददोहस इति । आपो वै सूदोऽन्नं दोहः सोमꣳ श्रीणन्ति पृश्नय इत्यन्नं वै पृश्नि जन्मन्देवानामिति संवत्सरो वै देवानां जन्म विश इति यज्ञो वै विशो यज्ञे हि सर्वाणि भूतानि विष्टानि त्रिष्वा रोचने दिव इति सवनानि वै त्रीणि रोचनानि सवनान्येतदाहानुष्टुभा वाग्वा ऽअनुष्टुब्वागु सर्वे प्राणा वाचा चैवैनेऽएतत्प्राणेन च संतनोति संदधाति सा वाऽएषैका सती सूददोहाः सर्वा इष्टका अनुसंचरति प्राणो वै सूददोहास्तस्माद्यमेक एव प्राणः सन्त्सर्वाण्यङ्गानि सर्वमात्मानमनुसंचरति ॥ २१ ॥ ब्राह्मणम् ॥ ४ [७. ३.] ॥ ॥

अथ स्वयमातृण्णासु सामानि गायति । इमे वै लोकाः स्वयमातृण्णास्ता एताः शर्करास्ता देवा उपधायैतादृशीरेवापश्यन्यथैताः शुष्काः शर्कराः ॥ १ ॥ तेऽब्रुवन् । उप तज्जानीत यथैषु लोकेषु रसमुपजीवनं दधामेति तेऽब्रुवंश्चेतयध्वमिति चितिमिच्छतेति वाव तदब्रुवंस्तदिच्छत यथैषु लोकेषु रसमुपजीवनं दधामेति ॥ २ ॥ ते चेतयमानाः । एतानि सामान्यपश्यंस्तान्यगायंस्तैरेषु लोकेषु रसमुपजीवनमदधुस्तथैवैतद्यजमानो यदेतानि सामानि गायत्येष्वेवैतल्लोकेषु रसमुपजीवनं दधा-

ति ॥३॥ स्वयमातृणासु गायति । इमे वै लोकाः स्वयमातृणा एष्वेवैतल्लोकेषु रसमुपजीवनं दधाति ॥४॥ स वै भूर्भुवः स्वरिति । एतासु व्याहृतिषु गायति भूरिति वाऽअयं लोको भुव इत्यन्तरिक्षलोकः स्वरित्यसौ लोक एष्वेवैतल्लोकेषु रसमुपजीवनं दधाति ॥५॥ तानि वै नानाप्रस्तावानि । समाननिधनानि तानि यन्नानाप्रस्तावानि नाना ह्यपश्यन्नथ यत्समाननिधनान्येका ह्येव यज्ञस्य प्रतिष्ठैकं निधनꣳ स्वर्ग एव लोकस्तस्मात्स्वर्ज्योतिर्निधनानि ॥६॥ अथैनꣳ हिरण्यशकलैः प्रोक्षति । अत्रैष सर्वोऽग्निः संस्कृतस्तस्मिन्देवा एतदमृतꣳ रूपमुत्तममदधुस्तथैवास्मिन्नयमेतदमृतꣳ रूपमुत्तमं दधाति ॥७॥ यद्वेवैनꣳ हिरण्यशकलैः प्रोक्षति । एतद्वाऽअस्मिन्नदोऽमू पुरस्ताद्धम्यां तनू मध्यतो दधाति रुक्मं च पुरुषं चाथैनमेतत्सर्वमेवोपरिष्टाद्धम्यया तन्वा प्रच्छादयति ॥८॥ द्वाभ्यां-द्वाभ्याꣳ शताभ्याम् । द्विपाद्यजमानो यजमानोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवास्मिन्नेतदमृतꣳ रूपमुत्तमं दधाति पञ्च कृत्वः पञ्चचितिकोऽग्निः पञ्चऽर्तवः संवत्सरः संवत्सरोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवास्मिन्नेतदमृतꣳ रूपमुत्तमं दधाति सहस्रेण सर्वं वै सहस्रꣳ सर्वेणैवास्मिन्नेतदमृतꣳ रूपमुत्तमं दधाति ॥९॥ पश्चादग्रे प्राङ् तिष्ठन् । अथोत्तरतो दक्षिणाथ पुरस्तात्प्रत्यङ्ङथ जघनेन परीत्य दक्षिणात उदङ् तिष्ठंस्तद्दक्षिणावृत्तद्धि देवत्राथानुपरीत्य पश्चात्प्राङ् तिष्ठंस्तथो ह्यस्यैतत्प्रागेव कर्म कृतं भवति ॥१०॥ सहस्रस्य प्रमासि । सहस्रस्य प्रतिमासि सहस्रस्योन्मासि साहस्रोऽसि सहस्राय त्वेति सर्वं वै सहस्रꣳ सर्वमसि सर्वस्मै त्वेत्येतत् ॥११॥ अथातश्चितिपुरीषाणामेव मीमाꣳसा । अयमेव लोकः प्रथमा चितिः पशवः पुरीषं यत्प्रथमां चितिं पुरीषेण प्रच्छादयतीमं तल्लोकं पशुभिः प्रच्छादयति ॥१२॥ अन्तरिक्षमेव द्वितीया चितिः । वयाꣳसि पुरीषं यद्द्वितीयां चितिं पुरीषेण प्रच्छादयत्यन्तरिक्षं तद्वयोभिः प्रच्छादयति ॥१३॥ द्यौरेव तृतीया चितिः । नक्षत्राणि पु-

रीषं यत्तृतीयां चितिं पुरीषेण प्रच्छादयति दिवं तन्नक्षत्रैः प्रच्छादयति ॥१४॥ यज्ञ एव चतुर्थी चितिः । दक्षिणाः पुरीषं यच्चतुर्थीं चितिं पुरीषेण प्रच्छादयति यज्ञं तद्दक्षिणाभिः प्रच्छादयति ॥१५॥ यजमान एव पञ्चमी चितिः । प्रजा पुरीषं यत्पञ्चमीं चितिं पुरीषेण प्रच्छादयति यजमानं तत्प्रजया प्रच्छादयति ॥१६॥ स्वर्ग एव लोकः षष्ठी चितिः । देवाः पुरीषं यत्षष्ठीं चितिं पुरीषेण प्रच्छादयति स्वर्गं तल्लोकं देवैः प्रच्छादयति ॥१७॥ अमृतमेव सप्तमी चितिः । तामुत्तमामुपदधात्यमृतं तदस्य सर्वस्योत्तमं दधाति तस्मादस्य सर्वस्यामृतमुत्तमं तस्माद्दिवा अनन्तर्हितास्तस्मादु तेऽमृता इत्यधिदेवतम् ॥१८॥ अथाध्यात्मम् । यैवेयं प्रतिष्ठा यश्चायमवाङ् प्राणस्तत्प्रथमा चितिर्माꣳसं पुरीषं यत्प्रथमां चितिं पुरीषेण प्रच्छादयन्त्येतस्य तदात्मनो माꣳसैः संछादयतीष्टका उपधायास्थीष्टका अस्थि तन्माꣳसैः संछादयति नाधस्तात्संछादयति तस्मादिमे प्राणा अधस्तादसंछन्ना उपरिष्टात्तु प्रच्छादयन्त्येतदस्य तदात्मन उपरिष्टान्माꣳसैः संछादयति तस्मादस्यैतदात्मन उपरिष्टान्माꣳसैः संछन्नं नावकाशते ॥१९॥ यदूर्ध्वं प्रतिष्ठायाऽअवाचीनं मध्यात् । तद्द्वितीया चितिर्माꣳसं पुरीषं यद्द्वितीयां चितिं पुरीषेण प्रच्छादयन्त्येतदस्य तदात्मनो माꣳसैः संछादयतीष्टका उपधायास्थीष्टका अस्थि तन्माꣳसैः संछादयति पुरीषऽउपदधाति पुरीषेण प्रच्छादयन्त्येतदस्य तदात्मन उभयतो माꣳसैः संछादयति तस्मादस्यैतदात्मन उभयतो माꣳसैः संछन्नं नावकाशते ॥२०॥ मध्यमेव तृतीया चितिः । यदूर्ध्वं मध्यादवाचीनं ग्रीवाभ्यस्तच्चतुर्थी चितिर्ग्रीवा एव पञ्चमी चितिः शिर एव षष्ठी चितिः प्राणा एव सप्तमी चितिस्तामुत्तमामुपदधाति प्राणांस्तदस्य सर्वस्योत्तमान्दधाति तस्मादस्य सर्वस्य प्राणा उत्तमाः पुरीषऽउपदधाति माꣳसं वै पुरीषं माꣳसेन तत्प्राणान्प्रतिष्ठापयति नोपरिष्टात्प्रच्छादयति तस्मादिमे प्राणा उपरिष्टादसंछन्नाः ॥२१॥ ब्राह्मणम् ॥५ [७. ४.] ॥ चतुर्थः प्रपाठकः ॥ कण्डिकासंख्या १०९

॥ सप्तमोऽध्यायः [५५.] ॥ ॥ अस्मिन्काण्डे कण्डिकासंख्या४३७ ॥ ॥

इति माध्यन्दिनीये शतपथब्राह्मणे चितिनामाष्टमं काण्डं समाप्तम् ॥ ८ ॥ ॥

VARIOUS READINGS.

Adhyâya १. २. ४ भूवोत्तरं तस्थौ B. - ६ वाग्वै विश्वकर्म ऋषि° A1. B. - *Ibid.* तस्माद्वाग्विश्वकर्म ऋषिः A1. B. - ३. १? प्राणभृत्यंगानि A. प्राणभूत्यं-गानि B. - ४. १० बह्निष्ठा° A. बह्निषा° B in the first instance, बह्निष्का° in the second. —

Adhyâya २. ४. ४ विराढ् A. विराड् B. —

Adhyâya ३. १. २ लोको हृंदयत B. - २. २ दिक्षु प्रज्ञा A. - ४. ५ Read: द्वे प्रतिष्ठे. - ६ राज्ञ्यस्ति B. यत्नी is here and १०. (as well as Vâj. S. १४. २२) paroxytonon in the first instance, oxytonon in the second! —

Adhyâya ४. १. ११ तद्यत्तमाह्व A2! B. - २३ °र्धमासाः सप्त AB. - २. ११ युवात चायुवात च A. युवान वायुवते च B. - ३. २० °ष्यत्प्राज्ञनयदसृज्ञत AB.! —

Adhyâya ५. १. २ लोको ह्रदयत् A. हृंदयत् B. - ७ यवेतत्करोति A. यन्वे-तत्करोति B. - २. १ °ह्रदयंस्त° AB. - ५ Vâj. S. १५. ५ reads विवध°. - ३. ८ thus the Kâṇvâs. —

Adhyâya ६. १. ४ i. e. अन्तःस्तोमभागम् - ५ प्रतिह्वर्तेत्य° A. - ६-८ °राढ् AB. - १५ °ष्टाह्नोप्त्रेनकुर्वत and °त्रेन्कुरुते AB. - १६ Vâj. S. १५. १५ adds ते नोऽवन्तु after नमोऽअस्तु. - २१ °ष्टाह्नोप्त्रेनकुर्वत A. °प्रेज्ञकुर्वत B. - २. २ °ष्टि-बेज्ञि° AB. - ३ °ष्टुप्कर्मीणी A. - १५ i. e. बह्निःस्तोमभागम्. - ३. १ राधेवा° AB. —

ओम् । अथातः शतरुद्रियं जुहोति । अत्रैष सर्वोऽग्निः संस्कृतः स एषोऽत्र रुद्रो देवता तस्मिन्देवा एतदमृतं रूपमुत्तममदधुः स एषोऽत्र दीप्यमानोऽतिष्ठदन्नमिच्छमानस्तस्माद्देवा अबिभयुर्यद्वै नोऽयं न हिंस्यादिति ॥१॥ तेऽब्रुवन् । अन्नमस्मै सम्भराम तेनैनं शमयामेति तस्मा एतदन्नं समभरञ्छान्तदेवत्यं तेनैनमशमयंस्तद्यदेतं देवमेतेनाशमयंस्तस्माच्छान्तदेवत्यं शान्तदेवत्यं ह वै तच्छतरुद्रियमित्याचक्षते परोऽक्षं परोऽक्षकामा हि देवास्तथैवास्मिन्नयमेतदमृतं रूपमुत्तमं दधाति स एषोऽत्र दीप्यमानस्तिष्ठत्यन्नमिच्छमानस्तस्मा एतदन्नं सम्भरति शान्तदेवत्यं तेनैनं शमयति ॥२॥ जर्तिलैर्जुहोति । जायत एष एतद्यच्चीयते स एष सर्वस्मा अन्नाय जायत उभयम्वेतदन्नं यज्जर्तिला यच्च ग्राम्यं यच्चारण्यं यदह तिलास्तेन ग्राम्यं यदकृष्टे पच्यन्ते तेनारण्यमुभयेनैवैनमेतदन्नेन प्रीणाति ग्राम्येण चारण्येन च ॥३॥ अर्कपर्णेन जुहोति । अन्नमर्कोऽन्नेनैवैनमेतत्प्रीणाति ॥४॥ परिस्रित्सु जुहोति । अग्नय एते यत्परिस्रितस्तथो हास्यैता अग्निमत्येवाहुतयो हुता भवन्ति ॥५॥ यद्वेवैतच्छतरुद्रियं जुहोति । प्रजापतेर्विस्रस्ताद्देवता उदक्रामंस्तमेक एव देवो नाजहान्मन्युरेव सोऽस्मिन्नन्तर्विततोऽतिष्ठत्सोऽरोदीत्तस्य यान्यश्रूणि प्रास्कन्दंस्तान्यस्मिन्मन्यौ प्रत्यतिष्ठन्त्स एव शतशीर्षा रुद्रः समभवत्सहस्राक्षः शतेषुधिरथ या अन्या विप्रुषोऽपतंस्ता असंख्याता सहस्राणीमांल्लोकाननुप्राविशंस्तद्यद्रुदितात्समभवंस्तस्माद्रुद्राः सोऽयं शतशीर्षा रुद्रः सहस्राक्षः शतेषुधिरधिज्यधन्वा प्रतिहितायी भीषयमाणोऽतिष्ठदन्नमिच्छमा-

नस्तस्माद्दिवा अबिभयुः ॥६॥ ते प्रजापतिमब्रुवन् । अस्माद्वै बिभीमो यद्वै नोऽयं न हिंस्यादिति सोऽब्रवीदन्नमस्मै सम्भरत तेनैनं शमयतेति तस्माऽएतदन्नं समभरञ्छतरुद्रियं तेनैनमशमयंस्तद्यदेतं शतशीर्षाणं रुद्रमेतेनाशमयंस्तस्माच्छतशीर्षरुद्रशमनीयं शतशीर्षरुद्रशमनीयं ह वै तच्छतरुद्रियमित्याचक्षते परोऽक्षं परोऽक्षकामा हि देवास्तथैवास्माऽअयमेतदन्नं सम्भरति शतरुद्रियं तेनैनं शमयति ॥७॥ गवेधुकासक्तुभिर्जुहोति । यत्र वै सा देवता विस्रस्ताशयत्ततो गवेधुकाः समभवन्त्स्वेनैवैनमेतद्भागेन स्वेन रसेन प्रीणाति ॥८॥ अर्कपर्णेन जुहोति । एतस्य वै देवस्याशयादर्कः समभवत्स्वेनैवैनमेतद्भागेन स्वेन रसेन प्रीणाति ॥९॥ परिश्रित्सु जुहोति । लोमानि वै परिश्रितो न वै लोमसु विषं न किं चन हिनस्त्युत्तरार्धेऽग्नेरुदङ् तिष्ठञ्जुहोत्येतस्यां ह दिश्येतस्य देवस्य गृहाः स्वायामेवैनमेतद्दिशि प्रीणाति स्वायां दिश्यवयजते ॥१०॥ स वै जानुदघ्ने प्रथमं स्वाहाकरोति । अध-इव वै तद्यज्जानुदघ्नमध-इव तद्यदयं लोकस्तद्यऽइमं लोकं रुद्राः प्राविशंस्तांस्तत्प्रीणाति ॥११॥ अथ नाभिदघ्ने । मध्यमिव वै तद्यन्नाभिदघ्नं मध्यमिवान्तरिक्षलोकस्तद्येऽन्तरिक्षलोकं रुद्राः प्राविशंस्तांस्तत्प्रीणाति ॥१२॥ अथ मुखदघ्ने । ऽउपरीव वै तद्यन्मुखदघ्नमुपरीव तद्यदसौ लोकस्तद्येऽमुं लोकं रुद्राः प्राविशंस्तांस्तत्प्रीणाति स्वाहाकारेणान्नं वै स्वाहाकारोऽन्नेनैवैनानेतत्प्रीणाति ॥१३॥ नमस्ते रुद्र मन्यवऽइति । य एवास्मिन्त्सोऽन्तर्मन्युर्विततोऽतिष्ठत्तस्माऽएतन्नमस्करोत्युतो तऽइषवे नमो बाहुभ्यामुत ते नम इतीषवा च हि बाहुभ्यां च भीषयमाणोऽतिष्ठत् ॥१४॥ स एष क्षत्रं देवः । यः स शतशीर्षा समभवद्विश इमऽइतरे ये विप्रुड्भ्यः समभवंस्तस्माऽएतस्मै क्षत्रायैता विश एतं पुरस्ताउद्धारमुदहरन्य एष प्रथमोऽनुवाकस्तेनैनमप्रीणंस्तथैवास्माऽअयमेतं पुरस्ताउद्धारमुद्धरति तेनैनं प्रीणाति तस्मादेष एकदेवत्यो भवति रौद्र

एतꣳ ह्येतेन प्रीणाति ॥१५॥ चतुर्दशैतानि यजूꣳषि भवन्ति । त्रयोदश मासाः
संवत्सरः प्रजापतिश्चतुर्दशः प्रजापतिरग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेत-
दन्नेन प्रीणाति नमो नम इति यज्ञो वै नमो यज्ञेनैवैनमेतन्नमस्कारेण नमस्यति
तस्मादु ह नायज्ञियं ब्रूयान्नमस्त ऽइति यथा हैनं ब्रूयाद्यज्ञस्त ऽइति तादृक्तत्
॥१६॥ अथ द्वन्द्विभ्यो जुहोति । नमोऽमुष्मै चामुष्मै चेति तद्यथा वै ब्रूयादसौ
त्वं च न एष च मा हिꣳसिष्टमित्येवमेतदाह नतराꣳ हि विदित आमन्त्रितो
हिनस्ति ॥१७॥ नमो हिरण्यबाहवे । सेनान्ये दिशां च पतये नम इत्येष एव
हिरण्यबाहुः सेनानीरेष दिशां पतिस्तद्यत्किं चात्रैकदेवत्यमेतमेव तेन प्रीणा-
ति क्षत्रमेव तद्विश्यपिभागं करोति तस्माद्यद्विशस्तस्मिन्क्षत्रियोऽपिभागोऽथ या
असंख्याता सहस्राणीमांल्लोकाननुप्राविशन्नेतास्ता देवता याभ्य एतज्जुहोति ॥१८॥
अथ जातिभ्यो जुहोति । एतानि ह जातान्येते रुद्रा अनुप्रविविशुर्यत्र-यत्रैते त-
दैवैनानेतत्प्रीणात्यथो ऽएवꣳ हैतानि रुद्राणां जातानि देवानां वै विधामनु म-
नुष्यास्तस्मादु हेमानि मनुष्याणां जातानि यथाजातमेवैनानेतत्प्रीणाति ॥१९॥
तेषां वाऽउभयतोनमस्कारा अन्ये । ऽन्यतरतोनमस्कारा अन्ये ते ह ते घोरतरा
अशान्ततरा यऽउभयतोनमस्कारा उभयत एवैनानेतद्यज्ञेन नमस्कारेण शमयति
॥२०॥ स वाऽअशीत्यां च स्वाहाकरोति । प्रथमे चानुवाकेऽथाशीत्यामथाशी-
त्यां च यानि चोर्ध्वानि यजूꣳष्यावतानिभ्योऽन्नमशीतयोऽन्नेनैवैनानेतत्प्रीणाति
॥२१॥ अथैतानि यजूꣳषि जपति । नमो वः किरिकेभ्य इत्येतद्धास्य प्रतिज्ञाततमं
धाम यथा प्रियो वा पुत्रो हृदयं वा तस्माद्यत्रैतस्माद्देवाच्छङ्केत तदेताभिर्व्याहृति-
भिर्जुहुयादुप हैवैतस्य देवस्य प्रियं धाम गच्छति तथो हैनमेष देवो न हिनस्ति
॥२२॥ नमो वः किरिकेभ्य इति । एते हीदꣳ सर्वं कुर्वन्ति देवानाꣳ हृदयेभ्य
इत्यग्निर्वायुरादित्य एतानि ह तानि देवानाꣳ हृदयानि नमो विचिन्वत्केभ्य

इत्येते हीदꣳ सर्वं विचिन्वन्ति नमो विक्षिणत्केभ्य इत्येते वै तं विक्षिणन्ति यं विचिक्षीषन्ति नम आनिर्हतेभ्य इत्येते ह्येभ्यो लोकेभ्योऽनिर्हताः ॥२३॥ अथोत्तराणि जपति । द्रापेऽअन्धसस्पतऽइत्येष वै द्रापिरेष वै तं द्रापयति यं दिद्रापयिषत्यन्धसस्पतऽइति सोमस्य पतऽइत्येतद्दरिद्र नीललोहितेति नामानि चास्यैतानि रूपाणि च नामग्राहमेवैनमेतत्प्रीणात्यासां प्रजानामेषां पशूनां मा भेमा रोङ्मो च नः किं चनाममदिति यथैव यजुस्तथा बन्धुः ॥२४॥ स एष क्षत्रं देवः । तस्माऽएतस्मै क्षत्रायैता विशोऽमुं पुरस्तादुद्धारमुद्धरन्त्योऽसौ प्रथमोऽनुवाकोऽथास्माऽएतमुपरिष्टादुद्धारमुद्धरंस्तेनैनमप्रीणंस्तथैवास्माऽअयमेतमुपरिष्टादुद्धारमुद्धरति तेनैनं प्रीणाति तस्मादप्येष एकदेवत्यो भवति रौद्र एवैतꣳ ह्येवैतेन प्रीणाति ॥२५॥ सप्तैतानि यजूꣳषि भवन्ति । सप्तचितिकोऽग्निः सप्तऽर्तवः संवत्सरः संवत्सरोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतदन्नेन प्रीणाति तान्युभयान्येकविꣳशतिः सम्पद्यन्ते द्वादश मासाः पञ्चऽर्तवस्त्रय इमे लोका असावादित्य एकविꣳश एतामभिसम्पदम् ॥२६॥ अथावतानाञ्जुहोति । एतद्वाऽएनान्देवा एतेनान्नेन प्रीत्वाथैषामेतैरवतानैर्धनूꣳष्यवातन्वंस्तथैवैनानयमेतदेतेनान्नेन प्रीत्वाथैषामेतैरवतानैर्धनूꣳष्यवतनोति न ह्यवततेन धनुषा कं चन हिनस्ति ॥२७॥ तद्धि सहस्रयोजनऽइति । एतद्ध परमं दूरं यत्सहस्रयोजनं तद्यदेव परमं दूरं तदेवैषामेतद्धनूꣳष्यवतनोति ॥२८॥ यद्वेवाह सहस्रयोजनऽइति । अयमग्निः सहस्रयोजनं न ह्येतस्मादिति नेत्यन्यत्परमस्ति तद्यदग्नौ जुहोति तदेवैषाꣳ सहस्रयोजने धनूꣳष्यवतनोति ॥२९॥ असंख्याता सहस्राणि । अस्मिन्महत्यर्णवऽइति यत्र-यत्र ते तदेवैषामेतद्धनूꣳष्यवतनोति ॥३०॥ दशैतानवतानाञ्जुहोति । दशाक्षरा विराड्विराडग्निर्दश दिशो दिशोऽग्निर्दश प्राणाः प्राणा अग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैषामेतद्धनूꣳष्यवतनोति ॥३१॥ अथ प्रत्यवरो-

हाञ्जुहोति । एतद्वाऽएतदिमाँल्लोकानित ऊर्ध्वो रोहति स स पराङिव रोह इयमु वै प्रतिष्ठा ते देवा इमां प्रतिष्ठामभिप्रत्यायंस्तथैवैतद्यजमान इमां प्रतिष्ठामभिप्रत्यैति ॥३२॥ यद्वेव प्रत्यवरोहति । एतद्वाऽएनानेतत्प्रीणन्नन्ववैति तत एवैतदात्मानमपोद्धरते जावावै तथा हानेनात्मना सर्वमायुरेति ॥३३॥ यद्वेव प्रत्यवरोहति । एतद्वाऽएतदेतान्रुद्रानित ऊर्ध्वान्प्रीणाति तान्पुनरमुतोऽर्वाचः ॥३४॥ नमोऽस्तु रुद्रेभ्यो ये दिवीति । तद्येऽमुष्मिंल्लोके रुद्रास्तेभ्य एतन्नमस्करोति येषां वर्षमिषव इति वर्षꣳ ह तेषामिषवा वर्षेण ह ते हिꣳसन्ति यं जिहिꣳसिषन्ति ॥३५॥ नमोऽस्तु रुद्रेभ्यो येऽन्तरिक्षऽइति । तद्येऽन्तरिक्षलोके रुद्रास्तेभ्य एतन्नमस्करोति येषां वात इषव इति वातो ह तेषामिषवो वातेन ह ते हिꣳसन्ति यं जिहिꣳसिषन्ति ॥३६॥ नमोऽस्तु रुद्रेभ्यो ये पृथिव्यामिति । तद्येऽस्मिंल्लोके रुद्रास्तेभ्य एतन्नमस्करोति येषामन्नमिषव इत्यन्नꣳ ह तेषामिषवोऽन्नेन ह ते हिꣳसन्ति यं जिहिꣳसिषन्ति ॥३७॥ तेभ्यो दश प्राचीः । दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वा इति दशाक्षरा विराड्विराडग्निर्दश दिशो दिशोऽग्निर्दश प्राणाः प्राणा अग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनानेतदन्नेन प्रीणाति ॥३८॥ यद्वेवाह दश-दशेति । दश वाऽअञ्जलेरङ्गुलयो दिशि-दिश्येवैभ्य एतदञ्जलिं करोति तस्मादु हैतद्भीतोऽञ्जलिं करोति तेभ्यो नमोऽअस्त्विति तेभ्य एव नमस्करोति ते नो मृडयन्त्विति तऽएवास्मै मृडयन्ति ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्म इति यमेव द्वेष्टि यश्चैनं द्वेष्टि तमेषां जम्भे दधात्यमुमेषां जम्भे दधामीति ह ब्रूयाद्यं द्विष्यात्ततोऽह तस्मिन्न पुनरस्त्यपि तन्नाद्रियेत स्वयंनिर्दिष्टो ह्येव स यमेवंविद्द्वेष्टि ॥३९॥ त्रिष्कृत्वः प्रत्यवरोहति । त्रिवृदग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनानेतदन्नेन प्रीणाति स्वाहाकारेणान्नं वै स्वाहाकारोऽन्नेनैवैनानेतत्प्रीणाति त्रिरित ऊर्ध्वो रोहति तत्षट् तस्योक्तो बन्धुः ॥४०॥ यद्वेव

त्रिष्कृत्वः प्रत्यवरोहति । त्रिर्हि कृत्व ऊर्ध्वो रोहति तद्यावत्कृत्व ऊर्ध्वो रोहति तावत्कृत्वः प्रत्यवरोहति ॥४१॥ अथ तदर्कपर्णं चात्वाले प्रास्यति । एतद्वाऽएने- नैतद्रौद्रं कर्म करोति तदेतदशान्तं तदेतत्तिरः करोति नेदिदमशान्तं कश्चिदभिति- ष्ठात्तन्नेद्धिनसदिति तस्माच्चात्वाले यद्वेव चात्वालेऽग्निरेष यच्चात्वालस्तथो हैनद्- षोऽग्निः संदहत्यथातः सम्पदेव ॥४२॥ तदाहुः । कथमस्यैतच्छतरुद्रियꣳ संवत्सर- मग्निमाप्नोति कथꣳ संवत्सरेणाग्निना सम्पद्यतऽइति षष्टिश्च ह वै त्रीणि च श- तान्येतच्छतरुद्रियमथ त्रिꣳशदथ पञ्चत्रिꣳशत्ततो यानि षष्टिश्च त्रीणि च शतानि तावन्ति संवत्सरस्याहानि तत्संवत्सरस्याहान्याप्नोत्यथ यानि त्रिꣳशत्त्रिꣳशन्मा- सस्य रात्रयस्तन्मासस्य रात्रीराप्नोति तदुभयानि संवत्सरस्याहोरात्राण्याप्नोत्यथ या- नि पञ्चत्रिꣳशत्स त्रयोदशो मासः स आत्मा त्रिꣳशदात्मा प्रतिष्ठा द्वे प्राणा द्वे शिर एव पञ्चत्रिꣳशमेतावान्वै संवत्सर एवमु हास्यैतच्छतरुद्रियꣳ संवत्सरमग्नि- माप्नोत्येवꣳ संवत्सरेणाग्निना सम्पद्यतऽएतावत्य उ वै शाण्डिलेऽग्नौ मध्यतो यजुष्मत्य इष्टका उपधीयन्तेऽग्नयो हैते पृथग्यदेता इष्टका एवमु हास्यैतेऽग्नयः पृथक्शतरुद्रियेणाभिहुता भवन्ति ॥४३॥ तदाहुः । कथमस्यैतच्छतरुद्रियं महदुक्थ- माप्नोति कथं महतोक्थेन सम्पद्यतऽइति यान्यमूनि पञ्चविꣳशतिर्यजूꣳष्यभितो ऽशीतीः स पञ्चविꣳश आत्मा यत्र वाऽआत्मा तदेव शिरस्तत्पक्षपुच्छान्यथ या अशीतयः सैवाशीतीनामाप्तिरशीतिभिर्हि महदुक्थमाख्यायतेऽथ यदूर्ध्वमशीतिभ्यो यदेवादो महत उक्थस्योर्ध्वमशीतिभ्य एतदस्य तदेवमु हास्यैतच्छतरुद्रियं महदु- क्थमाप्नोत्येवं महतोक्थेन सम्पद्यते ॥४४॥ ब्राह्मणम् ॥१॥ ॥

अथैनमतः परिषिञ्चति । एतद्वाऽएनं देवाः शतरुद्रियेण शमयित्वाथैनमेतद्रूप एवाशमयंस्तथैवैनमेवमेतच्छतरुद्रियेण शमयित्वाथैनमेतद्रूप एव शमयति ॥१॥ अ- द्भिः परिषिञ्चति । शान्तिर्वाऽआपः शमयत्येवैनमेतत्सर्वतः परिषिञ्चति सर्वत

एवैनमेतच्छमयति त्रिष्कृत्वः परिषिञ्चति त्रिवृदग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतच्छमयति ॥२॥ यद्वेवैनं परिषिञ्चति । इमे वै लोका एषोऽग्निरिमांस्तल्लोकानद्भिः परितनोति समुद्रेण हैनांस्तत्परितनोति सर्वतस्तस्मादिमांल्लोकान्त्सर्वतः समुद्रः पर्येति दक्षिणावृत्तस्मादिमांल्लोकान्दक्षिणावृत्समुद्रः पर्येति ॥३॥

अग्नीत्परिषिञ्चति । अग्निरेष यदाग्नीध्रो नो वाऽआत्मात्मानꣳ हिनस्त्यहिꣳसाया ऽअश्मनोऽध्यश्मनो ह्यापः प्रभवन्ति निकक्षान्निकक्षाद्ध्यापः प्रभवन्ति दक्षिणान्निकक्षाद्दक्षिणाद्धि निकक्षादापः प्रभवन्ति ॥४॥ अश्मन्नूर्जं पर्वते शिश्रियाणामिति । अश्मनि वाऽएषोर्क्पर्वतेषु श्रिता यदापोऽद्भ्य ओषधीभ्यो वनस्पतिभ्योऽअधि सम्भृतं पय इत्येतस्माद्ध्येतत्सर्वस्मादधि सम्भृतं पयस्तां न इषमूर्जं धत्त मरुतः सꣳरराणा इति मरुतो वै वर्षस्येशतेऽश्मंस्ते क्षुदिति निदधाति तदश्मनि क्षुधं दधाति तस्मादश्मानाद्योऽथो स्थिरो वाऽअश्मा स्थिरा क्षुत्स्थिरऽएव तत्स्थिरं दधाति मयि तऽऊर्गित्यपादत्ते तदात्मन्नूर्जं धत्ते तथा द्वितीयं तथा तृतीयम् ॥५॥

निधायोदहरणं त्रिर्विपल्ययते । एतद्वाऽएनमेतच्छघूयतीव यदेनꣳ समन्तं पर्येति तस्माऽएवैतन्निह्नुतेऽहिꣳसायै ॥६॥ यद्वेव विपल्ययते । एतद्वाऽएनमेतदन्ववैति तत्र एवैतदात्मानमपोद्धरते जीवावै तथो ह्यनेनात्मना सर्वमायुरेति ॥७॥ त्रिर्विपल्ययते । त्रिर्हि कृत्वः पर्येति तद्यावत्कृत्वः पर्येति तावत्कृत्वो विपल्ययते ॥८॥ अथ तमश्मानमुदहरणेऽवधाय । एतां दिशꣳ हरन्त्येषा वै नैर्ऋती दिङ्नैर्ऋत्यामेव तद्दिशि शुचं दधाति ॥९॥ एतद्वाऽएनं देवाः । शतरुद्रियेण चाद्भिश्च शमयित्वाथास्यैतेन शुचं पाप्मानमपाघ्नंस्तथैवैनमयमेतच्छतरुद्रियेण चाद्भिश्च शमयित्वाथास्यैतेन शुचं पाप्मानमपहन्ति ॥१०॥ बाह्येनाग्निꣳ हरति । इमे वै लोकाऽएषोऽग्निरेभ्यस्तल्लोकेभ्यो बहिर्धा शुचं दधाति बहिर्वेदीयं वै वेदिरस्यै तद्बहिर्धा शुचं दधाति ॥११॥ स वेदेर्दक्षिणायाꣳ श्रोणौ । प्राङ् तिष्ठन्दक्षिणा निरस्यति

यं द्विष्मस्तं ते शुगृच्छत्विति यमेव द्वेष्टि तमस्य शुगृच्छत्यमुं ते शुगृच्छत्विति ह ब्रू-
यायं द्विष्यात्ततो ह तस्मिन्न पुनरस्त्यपि तन्नाद्रियेत स्वयंनिर्दिष्टो ह्येव स यमे-
वंविद्द्वेष्टि यदि न भिद्येत भेत्तवै ब्रूयाद्यदा ह्येव स भिद्यतेऽथ तं शुगृच्छति यं
द्वेष्ट्यप्रतीक्षमायन्त्यप्रतीक्षमेव तच्छुचं पाप्मानं जहति ॥१२॥ प्रत्येत्येष्टका धेनूः कु-
रुते । एतद्वा ऽएनं देवाः शतरुद्रियेण चाद्भिश्च शमयित्वा शुचमस्य पाप्मानमप-
हत्य प्रत्येत्येष्टका धेनूरकुर्वत तथैवैनमयमेतच्छतरुद्रियेण चाद्भिश्च शमयित्वा शुच-
मस्य पाप्मानमपहत्य प्रत्येत्येष्टका धेनूः कुरुते ॥१३॥ आसीनः कुर्वीतेत्यु हैक
ऽआहुः । आसीनो वै धेनुं दोग्धीति तिष्ठंस्त्वेव कुर्वीतेमे वै लोका एषोऽग्नि-
स्तिष्ठन्तीव वाऽइमे लोका अथो तिष्ठन्वै वीर्यवत्तरः ॥१४॥ उदङ् प्राङ् तिष्ठन्
। पुरस्ताद्वाऽएषा प्रतीची यजमानं धेनुरुपतिष्ठते दक्षिणतो वै प्रतीचीं धेनुं ति-
ष्ठन्तीमुपसीदन्ति ॥१५॥ स यत्राभ्याप्नोति । तदभिमृश्यैतद्यजुर्जपतीमा मेऽअग्नऽइ-
ष्टका धेनवः सन्त्वित्यग्निर्ह्येतासां धेनुकरणस्येष्टे तस्मादेतावतीनां देवतानामग्नि-
मेवामन्त्रयतऽएका च दश चान्तश्च परार्धश्चेत्येष ह्यावरार्ध्यो भूमा यदेका च दश
चाथ ह्येष परार्ध्यो भूमा यदन्तश्च परार्धश्चावरार्धतश्चैवैना एतत्परार्धतश्च परिगृह्य
देवा धेनूरकुर्वत तथैवैना अयमेतदवरार्धतश्चैव परार्धतश्च परिगृह्य धेनूः कुरुते
तस्मादपि नाद्रियेत बह्वीः कर्तुममुत्र वाऽएष एता ब्रह्मणा यजुषा बह्वीः कुरुते
ऽथ यत्संतनोति कामानेव तत्संतनोति ॥१६॥ यद्वेवेष्टका धेनूः कुरुते । वाग्वा
ऽअयमग्निर्वाचा हि चितः स यदाहैका च दश चान्तश्च परार्धश्चेति वाग्वाऽए-
का वाग्दश वागन्तो वाक्परार्धो वाचमेव तद्देवा धेनुमकुर्वत तथैवैतद्यजमानो
वाचमेव धेनुं कुरुतेऽथ यत्संतनोति वाचमेव तत्संतनोत्येता मेऽअग्नऽइष्टका
धेनवः सन्त्वमुत्रामुष्मिंलोकऽइत्येतद्वाऽएना अस्मिंलोके धेनूः कुरुतेऽथैना एत-
दमुष्मिंलोके धेनूः कुरुते तथो हैनमेता उभयोर्लोकयोर्भुञ्जन्त्यस्मिंश्चामुष्मिंश्च ॥१७॥

ऋतव स्थेति । ऋतवो ह्येता ऋतावृध इति सत्यवृध इत्येतदृतुधा स्थ ऋतावृध इत्यहोरात्राणि वाऽइष्टका ऋतुषु वाऽअहोरात्राणि तिष्ठन्ति घृतश्चुतो मधुश्चुत इति तदेना घृतश्चुतश्च मधुश्चुतश्च कुरुते ॥१८॥ विराजो नामेति । एतद्वै देवा एता इष्टका नामभिरुपाह्वयन्त यथा-यथैना एतदाचक्षते ता एनानभ्युपावर्तन्ताथ लोकम्पृणा एव पराच्यस्तस्थुरहितनाम्न्यो निमेमिहत्यस्ता विराजो नामाकुर्वत ता एनानभ्युपावर्तन्त तस्माद्दश-दशेष्टका उपधाय लोकम्पृणयाभिमन्त्रयते तदेना विराजः कुरुते दशाक्षरा हि विराट् कामदुघा अक्षीयमाणा इति तदेनाः कामदुघा अक्षीयमाणाः कुरुते ॥१९॥ अथैनं विकर्षति । मण्डूकेनावकया वेतसशाखयैतद्वाऽएनं देवाः शतरुद्रियेण चाद्भिश्च शमयित्वा शुचमस्य पाप्मानमपहत्याथैनमेतद्भूय एवाशमयंस्तथैवैनमयमेतच्छतरुद्रियेण चाद्भिश्च शमयित्वा शुचमस्य पाप्मानमहत्याथैनमेतद्भूय एव शमयति सर्वतो विकर्षति सर्वत एवैनमेतच्छमयति ॥२०॥ यद्वेवैनं विकर्षति । एतद्वै यत्रैतं प्राणा ऋषयोऽग्रेऽग्निं समस्कुर्वंस्तमद्भिरवोक्षंस्ता आपः समस्कन्दंस्ते मण्डूका अभवन् ॥२१॥ ताः प्रजापतिमब्रुवन् । यद्वै नः कमभूदवाक्तदगादिति सोऽब्रवीदेष व एतस्य वनस्पतिर्वेत्त्विति वेत्तु संवेत्तु सोऽह वै तं वेतस इत्याचक्षते परोऽक्षं परोऽक्षकामा हि देवा अथ यदब्रुवन्नवाङ्नः कमगादिति ता अवाक्का अभवन्नवाक्का ह वै ता अवका इत्याचक्षते परोऽक्षं परोऽक्षकामा हि देवास्ता हैतास्त्रय्य आपो यन्मण्डूकोऽवका वेतसशाखैताभिरेवैनमेतत्त्रयीभिरद्भिः शमयति ॥२२॥ यद्वेवैनं विकर्षति । जायतऽएष एतद्यच्चीयते स एष सर्वस्माऽअन्नाय जायते सर्वम्वेतदन्नं यन्मण्डूकोऽवका वेतसशाखा पशवश्च ह्येता आपश्च वनस्पतयश्च सर्वेणैवैनमेतदन्नेन प्रीणाति ॥२३॥ मण्डूकेन पशूनाम् । तस्मान्मण्डूकः पशूनामनुपजीवनीयतमो यातयामा हि सोऽवकाभिरपां तस्मादवका अपामनुपजीवनीयतमा यातयाम्न्यो हि ता वे-

तसेन वनस्पतीनां तस्माद्धितमो वनस्पतीनामनुपजीवनीयतमो यातयामा हि सः ॥२४॥ तानि वꣳशे प्रबध्य । दक्षिणार्धेनाग्नेरन्तरेण परिश्रितः प्रागग्ने विकर्षति समुद्रस्य त्वावकयाग्ने परिव्ययामसि पावकोऽअस्मभ्यꣳ शिवो भवेति समुद्रियाभिस्त्वाद्भिः शमयाम इत्येतत् ॥२५॥ अथ जघनार्धेनोदक् । हिमस्य त्वा जरायुणाग्ने परिव्ययामसि पावकोऽअस्मभ्यꣳ शिवो भवेति यद्वै शीतस्य प्रशीतं तद्धिमस्य जरायु शीतस्य त्वा प्रशीतेन शमयाम इत्येतत् ॥२६॥ ॥ शतम् ४८०० ॥ ॥ अथोत्तरार्धेन प्राक् । उप ज्मन्नुप वेतसेऽवतर नदीष्वा अग्ने पित्तमपामसि मण्डूकि ताभिरागहि सेमं नो यज्ञं पावकवर्णꣳ शिवं कृधीति यथैव यजुस्तथा बन्धुः ॥२७॥ अथ पूर्वार्धेन दक्षिणा । अपामिदं न्ययनꣳ समुद्रस्य निवेशनम् अन्यांस्तेऽअस्मत्तपन्तु हेतयः पावकोऽअस्मभ्यꣳ शिवो भवेति यथैव यजुस्तथा बन्धुरित्यग्रे विकर्षत्यथेति अथेत्यथेति तद्दक्षिणावृत्तद्धि देवत्रा ॥२८॥ आत्मानमग्रे विकर्षति । आत्मा ह्येवाग्रे सम्भवतः सम्भवत्यथ दक्षिणं पक्षमथ पुच्छमथोत्तरं तद्दक्षिणावृत्तद्धि देवत्रा ॥२९॥ अभ्यात्मं पक्षपुच्छानि विकर्षति । अभ्यात्ममेव तच्छान्तिं धत्ते परस्तादर्वाक्परस्तादेव तदर्वाचीꣳ शान्तिं धत्तेऽग्ने पावक रोचिषेति दक्षिणं पक्षꣳ स नः पावक दीदिव इति पुच्छं पावकया यश्चितयन्त्या कृपेत्युत्तरं पावकं पावकमिति यद्वै शिवꣳ शान्तं तत्पावकꣳ शमयत्येवैनमेतत् ॥३०॥ सप्तभिर्विकर्षति । सप्तचितिकोऽग्निः सप्तऽर्तवः संवत्सरः संवत्सरोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतद्विकर्षति तं वꣳशमुत्करे न्यस्य ॥३१॥ अथैनꣳ सामभिः परिगायति । अत्रैष सर्वोऽग्निः संस्कृतस्तस्मिन्देवा एतदमृतꣳ रूपमुत्तममदधुस्तथैवास्मिन्नयमेतदमृतꣳ रूपमुत्तमं दधाति सामानि भवन्ति प्राणा वै सामान्यमृतमु वै प्राणा अमृतमेवास्मिन्नेतद्रूपमुत्तमं दधाति सर्वतः परिगायति सर्वत एवास्मिन्नेतदमृतꣳ रूपमुत्तमं दधाति ॥३२॥ यद्वेवैनꣳ सामभिः

परिगायति । एतद्वै देवा अकामयन्तानस्थिकमिमममृतमात्मानं कुर्वीमहीति तेऽब्रुवन्नुप तज्जानीत यथेममात्मानमनस्थिकममृतं करवामहाऽइति तेऽब्रुवंश्चेतयध्वमिति चितिमिच्छतेति वाव तदब्रुवंस्तदिच्छत यथेममात्मानमनस्थिकममृतं करवामहाऽइति ॥३३॥ ते चेतयमानाः । एतानि सामान्यपश्यंस्तैरेनं पर्यगायंस्तैरेतमात्मानमनस्थिकममृतमकुर्वत तथैवैतद्यजमानो यदेनꣳ सामभिः परिगायत्येतमेवैतदात्मानमनस्थिकममृतं कुरुते सर्वतः परिगायति सर्वत एवैतदेतमात्मानमनस्थिकममृतं कुरुते तिष्ठन्गायति तिष्ठन्तीव वाऽइमे लोका अथो तिष्ठन्वै वीर्यवत्तरो हिङ्कृत्य गायति तत्र हि सर्वं कृत्स्नꣳ साम भवति ॥३४॥ गायत्रं पुरस्ताद्गायति । अग्निर्वै गायत्रमग्निमेवास्यैतच्छिरः करोत्यथो शिर एवास्यैतदनस्थिकममृतं करोति ॥३५॥ रथन्तरं दक्षिणे पक्षे । इयं वै रथन्तरमियमु वाऽएषां लोकानाꣳ रसतमोऽस्याꣳ हीमे सर्वे रसा रसंतमꣳ ह वै तद्रथन्तरमित्याचक्षते परोऽक्षं परोऽक्षकामा हि देवा इमामेवास्यैतद्दक्षिणं पक्षं करोत्यथो दक्षिणमेवास्यैतत्पक्षमनस्थिकममृतं करोति ॥३६॥ बृहदुत्तरे पक्षे । द्यौर्वै बृहद्द्यौर्हि बर्हिष्ठा दिवमेवास्यैतदुत्तरं पक्षं करोत्यथोऽउत्तरमेवास्यैतत्पक्षमनस्थिकममृतं करोति ॥३७॥ वामदेव्यमात्मन् । प्राणो वै वामदेव्यं वायुरु प्राणः सर्वेषामु ह्येष देवानामात्मा यद्वायुर्वायुमेवास्यैतदात्मानं करोत्यथोऽआत्मानमेवास्यैतदनस्थिकममृतं करोति ॥३८॥ यज्ञायज्ञियं पुच्छम् । चन्द्रमा वै यज्ञायज्ञियं यो हि कश्च यज्ञः संतिष्ठतऽएतमेव तस्याहुतीनाꣳ रसोऽप्येति तद्यदेतं यज्ञो-यज्ञोऽप्येति तस्माच्चन्द्रमा यज्ञायज्ञियं चन्द्रमसमेवास्यैतत्पुच्छं करोत्यथो पुच्छमेवास्यैतदनस्थिकममृतं करोति ॥३९॥ अथ प्रजापतेर्हृदयं गायति । असौ वाऽआदित्यो हृदयꣳ श्लक्ष्ण एष श्लक्ष्णꣳ हृदयं परिमण्डल एष परिमण्डलꣳ हृदयमात्मन्गायत्यात्मन्हि हृदयं निकक्षे निकक्षे हि हृदयं दक्षिणे निकक्षेऽतो हि हृदयं नेदीय आदित्य-

मेवास्यैतद्धृदयं करोत्यथो हृदयमेवास्यैतदनस्थिकममृतं करोति ॥४०॥ प्रजासु च प्रजापतौ च गायति । तद्यत्प्रजासु गायति तत्प्रजासु हृदयं दधात्यथ यत्प्रजापतौ गायति तदग्नौ हृदयं दधाति ॥४१॥ यद्वेव प्रजासु च प्रजापतौ च गायति । अयं वा अग्निः प्रजाश्च प्रजापतिश्च तद्यदग्नौ गायति तदेव प्रजासु च प्रजापतौ च हृदयं दधाति ॥४२॥ ता हैता अमृतेष्टकाः । ता उत्तमा उपदधात्यमृतं तदस्य सर्वस्योत्तमं दधाति तस्मादस्य सर्वस्यामृतमुत्तमं नान्योऽध्वर्योर्गायेदिष्टका वा एता विचितो ह स्याद्यदन्योऽध्वर्योर्गायेत् ॥ ४३ ॥ ब्राह्मणम् ॥ २ ॥ प्रथमोऽध्यायः [५६.] ॥ ॥

उपवसथीयेऽहन्प्रातरुदित आदित्ये । वाचं विसृजते वाचं विसृज्य पञ्चगृहीतमाज्यं गृह्णीते तत्र पञ्च हिरण्यशकलान्प्रास्यत्यथैतत्त्रयꣳ समासिक्तं भवति दधि मधु घृतं पात्र्यां वा स्थाल्यां वोरुबिल्यां तदुपरिष्टाद्दर्भमुष्टिं निदधाति ॥१॥ अथाग्निमारोहति । नमस्ते हरसे शोचिषे नमस्ते अस्त्वर्चिष इत्यत्रैष सर्वोऽग्निः संस्कृतः स एषोऽत्र तस्मा अलं यद्धिꣳस्याद्यं जिहिꣳसिषेद्यमु वा एष हिनस्ति हरसा वैनꣳ शोचिषा वार्चिषा वा हिनस्ति तथो हैनमेष एतैर्न हिनस्त्यन्यांस्ते अस्मत्तपन्तु हेतयः पावको अस्मभ्यꣳ शिवो भवेति यथैव यजुस्तथा बन्धुः ॥२॥ आरुह्याग्निꣳ स्वयमातृण्णां व्याघारयति । आज्येन पञ्चगृहीतेन तस्योक्तो बन्धुः ॥३॥ स्वयमातृण्णां व्याघारयति । प्राणः स्वयमातृण्णा प्राणे तदन्नं दधाति ॥४॥ यद्वेव स्वयमातृण्णां व्याघारयति । उत्तरवेदिर्हैषाग्निरथ याममूं पूर्वां व्याघारयत्यधरस्य साथ हैषाग्निस्तामेतद्व्याघारयति ॥५॥ पश्यंस्तत्र हिरण्यं व्याघारयति । प्रत्यक्षं वै तद्यत्पश्यति प्रत्यक्षꣳ सोत्तरवेदिः प्रास्ता एवेह भवन्ति परोऽक्षं वै तद्यत्प्रास्ताः परोऽक्षमियमुत्तरवेदिः ॥६॥ स्वाहाकारेण तां व्याघारयति । प्रत्यक्षं वै तद्यत्स्वाहाकारः प्रत्यक्षꣳ सोत्तरवेदिर्वषट्कारेणेमां परोऽक्षं वै तद्यद्वषट्कारः

परोऽक्षमियमुत्तरवेदिराज्येनाज्येन ह्युत्तरवेदिं व्याघारयन्ति पञ्चगृहीतेन पञ्चगृहीतेन ह्युत्तरवेदिं व्याघारयन्ति व्यतिहारं व्यतिहारꣳ ह्युत्तरवेदिं व्याघारयन्ति ॥७॥ नृषदे वेडिति । प्राणो वै नृषन्मनुष्या नरस्तद्योऽयं मनुष्येषु प्राणोऽग्निस्तमेतत्प्रीणात्यप्सुषदे वेडिति योऽप्स्वग्निस्तमेतत्प्रीणाति बर्हिषदे वेडिति य ओषधिष्वग्निस्तमेतत्प्रीणाति वनसदे वेडिति यो वनस्पतिष्वग्निस्तमेतत्प्रीणाति स्वर्विदे वेडित्ययमग्निः स्वर्विदिममेवैतदग्निं प्रीणाति ॥८॥ यद्वेवाह । नृषदे वेडप्सुषदे वेडित्यस्यैवैतान्यग्नेर्नामानि तान्येतत्प्रीणाति तानि हविषा देवतां करोति यस्यै वै देवतायै हविर्गृह्यते सा देवता न सा यस्यै न गृह्यतेऽथोऽएतान्येवैतदग्नीनस्मिन्नग्नौ नामग्राहं दधाति ॥९॥ पञ्चैता आहुतीर्जुहोति । पञ्चचितिकोऽग्निः पञ्चऽर्तवः संवत्सरः संवत्सरोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतदन्नेन प्रीणाति ॥१०॥ अथैनꣳ समुक्षति । दध्ना मधुना घृतेन जायतऽएष एतद्यच्चीयते स एष सर्वस्माऽअन्नाय जायते सर्वम्वेतदन्नं यद्दधि मधु घृतꣳ सर्वेणैवैनमेतदन्नेन प्रीणाति सर्वतः समुक्षति सर्वत एवैनमेतत्सर्वेणान्नेन प्रीणाति ॥११॥ यद्वेवैनꣳ समुक्षति । अत्रैष सर्वोऽग्निः संस्कृतस्तस्मिन्देवा एतद्रूपमुत्तमम-दधुस्तथैवास्मिन्नयमेतद्रूपमुत्तमं दधात्यन्नं वै रूपमेतदु परममन्नं यद्दधि मधु घृतं तद्यदेव परमꣳ रूपं तदस्मिन्नेतदुत्तमं दधाति सर्वतः समुक्षत्यपि बाह्येन परिश्रितः सर्वत एवास्मिन्नेतद्रूपमुत्तमं दधाति दर्भैस्ते हि शुद्धा मेध्या अग्रैरग्रꣳ हि देवानाम् ॥१२॥ यद्वेवैनꣳ समुक्षति । एतद्वै यत्रैतं प्राणा ऋषयोऽग्रेऽग्निꣳ समस्कुर्वंस्तदस्मिन्नदोऽमुं पुरस्ताद्भागमकुर्वतादः सन्नूरब्दीयमथास्मिन्नेतꣳ संचितऽउपरिष्टाद्भागमकुर्वत तद्यत्समुक्षति यऽएवास्मिंस्ते प्राणा ऋषयः सचितऽउपरिष्टाद्भागमकुर्वत तानेवैतत्प्रीणाति दध्ना मधुना घृतेन तस्योक्तो बन्धुः ॥१३॥ ये देवा देवानाम् । यज्ञिया यज्ञियानामिति देवा ह्येते देवानां यज्ञिया उ यज्ञियानाꣳ

संवत्सरीणमुप भागमासतऽइति संवत्सरीणꣳ ह्येतऽएतं भागमुपासतेऽहुतादो हविषो यज्ञेऽअस्मिन्नित्यहुतादो हि प्राणाः स्वयं पिबन्तु मधुनो घृतस्येति स्वयमस्य पिबन्तु मधुनश्च घृतस्य चेत्येतत् ॥१४॥ ये देवा देवेषु । अधि देवत्वमायन्निति देवा ह्येते देवेष्वधि देवत्वमायन्ये ब्रह्मणः पुरएतारोऽअस्येत्ययमग्निर्ब्रह्म तस्यैते पुरएतारो येभ्यो नऽऋते पवते धाम किं चनेति न हि प्राणेभ्य ऋते पवते धाम किं चन न ते दिवो न पृथिव्या अधि स्नुष्विति नैव ते दिवि न पृथिव्यां यदेव प्राणभृत्तस्मिंस्तऽइत्येतत् ॥१५॥ द्वाभ्याꣳ समुद्धन्ति । द्विपाद्यजमानो यजमानोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतत्समुद्धन्ति ॥१६॥ अथ प्रत्यवरोहति । प्राणदा अपानदा इति सर्वे ह्येते प्राणा योऽयमग्निश्चितः स यदेतामत्रात्मनः परिदां न वदेतात्र हैवास्यैष प्राणान्वृञ्जीताथ यदेतामत्रात्मनः परिदां वदते तथो हास्यैष प्राणान्न वृङ्क्ते प्राणदा अपानदा व्यानदा वर्चोदा वरिवोदा इत्येतद्वा मेऽसीत्येवैतदाहान्यांस्तेऽअस्मत्तपन्तु हेतयः पावकोऽअस्मभ्यꣳ शिवो भवेति यथैव यजुस्तथा बन्धुः ॥१७॥ प्रत्येत्य प्रवर्ग्योपसद्भ्यां प्रचरति । प्रवर्ग्योपसद्भ्यां प्रचर्याथास्मै व्रतं वार्धव्रतं वा प्रयच्छत्यथ प्रवर्ग्योपसद्भ्यामथ प्रवर्ग्यमुत्सादयत्याप्त्वा तं कामं यस्मै कामायैनं प्रवृणक्ति ॥१८॥ तं वै परिष्यन्दऽउत्सादयेत् । तप्तो वाऽएष शुशुचानो भवति तं यदस्यामुत्सादयेदिमामस्य शुगृच्छेद्यदप्सूत्सादयेदपोऽस्य शुगृच्छेदथ यत्परिष्यन्दऽउत्सादयति तथो ह नैवापो हिनस्ति नेमां यद्ध्याप्सु न प्रास्यति तेनापो न हिनस्त्यथ यत्समन्तमापः परियन्ति शान्तिर्वाऽआपस्तेनोऽइमां न हिनस्ति तस्मात्परिष्यन्दऽउत्सादयेत् ॥१९॥ अग्नौ त्वेवोत्सादयेत् । इमे वै लोका एषोऽग्निरापः परिश्रितस्तं यदग्नाऽउत्सादयति तदेवैनं परिष्यन्दऽउत्सादयति ॥२०॥ यद्वेवाग्नाऽउत्सादयति । इमे वै लोका एषोऽग्निरग्निर्वायुरादित्यस्तदेते प्रवर्ग्याः स यदन्यत्राग्नेरुत्सादयेदेतांस्तद्देवान्बहिर्धैभ्यो

लोकेभ्यो दध्यादथ यदग्नाऽउत्सादयत्येतानेवैतद्देवानेषु लोकेषु दधाति ॥२१॥
यद्वेवाग्नाऽउत्सादयति । शिर एतद्यज्ञस्य यत्प्रवर्ग्य आत्मायमग्निश्चितः स यदन्य-
त्राग्नेरुत्सादयेद्वह्निर्धास्माच्छिरो दध्यादथ यदग्नाऽउत्सादयत्यात्मानमेवास्यैतत्संस्कृत्य
शिरः प्रतिदधाति ॥२२॥ स्वयमातृण्णया सꣳस्पृष्टं प्रथमं प्रवर्ग्यमुत्सादयति । प्राणाः
स्वयमातृण्णा शिरः प्रवर्ग्य आत्मायमग्निश्चितः शिरश्च तदात्मानं च प्राणेन संत-
नोति संदधात्युत्साद्य प्रवर्ग्यं यथा तस्योत्सादनम् ॥२३॥ ब्राह्मणम् ॥ ३ [२. १.]
॥ प्रथमः प्रपाठकः ॥ कण्डिकासंख्या११० ॥ ॥

प्रत्येत्याग्निं प्रहरिष्यन् । आहुतीश्च जुहोति समिधश्चादधात्येतद्वाऽएनं देवा
एष्यन्तं पुरस्तादन्नेनाप्रीणन्नाहुतिभिश्च समिद्भिश्च तथैवैनमयमेतदेष्यन्तं पुरस्तादन्नेन
प्रीणात्याहुतिभिश्च समिद्भिश्च स वै पञ्चगृहीतं गृह्णीते तस्योक्तो बन्धुः ॥१॥ अ-
थ षोडशगृहीतं गृह्णीते । षोडशकलः प्रजापतिः प्रजापतिरग्निरात्मसंमितेनैवैन-
मेतदन्नेन प्रीणाति यद्व वाऽआत्मसंमितमन्नं तदवति तन्न हिनस्ति यद्भूयो हि-
नस्ति तद्यत्कनीयो न तदवति समान्याꣳ स्रुचि गृह्णीते समानो हि स यमेत-
त्प्रीणाति वैश्वकर्मणाभ्यां जुहोति विश्वकर्मायमग्निस्तमेवैतत्प्रीणाति तिस्र आहु-
तीर्जुहोति त्रिवृदग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतदन्नेन प्रीणाति ॥२॥
अथ समिध आदधाति । यथा तर्पयित्वा परिवेविष्यात्तादृक्तदौदुम्बर्यो भवन्त्यूर्ग्वै
रस उदुम्बर ऊर्जैवैनमेतद्रसेन प्रीणात्यार्द्रा भवन्त्येतद्वै वनस्पतीनामनार्तं जीवं
यदार्द्रं तद्यदेव वनस्पतीनामनार्तं जीवं तेनैनमेतत्प्रीणाति घृते न्युत्ता भवन्त्या-
ग्नेयं वै घृतꣳ स्वेनैवैनमेतद्भागेन स्वेन रसेन प्रीणाति सर्वाꣳ रात्रिं वसन्ति तत्र
हि ता रसेन सम्पद्यन्ते तिस्रः समिध आदधाति त्रिवृदग्निर्यावानग्निर्यावत्यस्य मा-
त्रा तावतैवैनमेतदन्नेन प्रीणाति ॥३॥ यद्वेवैता आहुतीर्जुहोति । एतद्वाऽएनं
देवा एष्यन्तं पुरस्तादन्नेन समस्कुर्वन्नेताभिराहुतिभिस्तथैवैनमयमेतदेष्यन्तं पुरस्ता-

दन्नेन संस्करोत्येताभिराहुतिभिः ॥४॥ स वै पञ्चगृहीतं गृह्णीते । पञ्चधाविहितो वाऽअयꣳ शीर्षन्प्राणो मनो वाक् प्राणश्चक्षुः श्रोत्रमेतमेवास्मिन्नेतत्पञ्चधाविहितꣳ शीर्षन्प्राणं दधात्यग्निस्तिग्मेन शोचिषेति तिग्मवत्या शिर एवास्यैतया सꣳश्यति तिग्मतायै ॥५॥ अथ षोडशगृहीतं गृह्णीते । अष्टौ प्राणा अष्टावङ्गान्येतामभिसम्पदꣳ समान्याꣳ स्रुचि गृह्णीते समाने ह्येवात्मन्नङ्गानि च प्राणाश्च भवन्ति नाना जुहोत्यङ्गेभ्यश्च तत्प्राणेभ्यश्च विधृतिं करोति वैश्वकर्मणाभ्यां जुहोति विश्वकर्मायमग्निस्तमेवैतत्संस्करोति तिस्र आहुतीर्जुहोति त्रिवृदग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतदन्नेन संस्करोति सप्तदशभिर्ऋग्भिः सप्तदशः प्रजापतिः प्रजापतिरग्निर्यावानाग्निर्यावत्यस्य मात्रा तावतैवैनमेतत्संस्करोत्येकविꣳशतिगृहीतेन द्वादश मासाः पञ्चऽर्तवस्त्रय इमे लोका असावादित्य एकविꣳश एतामभिसम्पदम् ॥६॥ यद्वेवैताः समिध आदधाति । एतद्वाऽएनं देवाः सर्वं कृत्स्नꣳ संस्कृत्याथैनमेतेनान्नेनाप्रीणन्नेताभिः समिद्भिस्तथैवैनमयमेतत्सर्वं कृत्स्नꣳ संस्कृत्याथैनमेतेनान्नेन प्रीणात्येताभिः समिद्भिरौदुम्बर्यो भवन्त्यार्द्रा घृते न्युत्ता सर्वाꣳ रात्रिं वसन्ति तस्योक्तो बन्धुरुदेनमुत्तरां नयेन्द्रेमं प्रतरां नय यस्य कुर्मो गृहे हविरिति यथा यजुस्तथा बन्धुस्तिस्रः समिध आदधाति त्रिवृदग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतदन्नेन प्रीणाति तिस्र आहुतीर्जुहोति तत्षट् तस्योक्तो बन्धुः ॥७॥
ब्राह्मणम् ॥१ [२. २.] ॥ ॥

अथातः सम्प्रेष्यति । उद्यच्छेध्ममुपयच्छोपयमनीरग्नये प्रह्रियमाणायानुब्रूह्यग्नीदेकस्फ्ययानूदेहि ब्रह्मन्नप्रतिरथं जपेति ॥१॥ एतद्वै देवानुपप्रैष्यतः । एतं यज्ञं तꣳस्यमानान्दक्षिणतोऽसुरा रक्षाꣳसि नाष्ट्रा अजिघाꣳसन्न यक्ष्यध्वे न यज्ञं तꣳस्यध्वऽइति ॥२॥ ते देवा इन्द्रमब्रुवन् । त्वं वै नः श्रेष्ठो बलिष्ठो वीर्यवत्तमोऽसि त्वमिमानि रक्षाꣳसि प्रतियतस्वेति तस्य वै मे ब्रह्म द्वितीयमस्त्विति तथेति तस्मै

वै बृहस्पतिं द्वितीयमकुर्वन्ब्रह्म वै बृहस्पतिस्तऽइन्द्रेण चैव बृहस्पतिना च दक्षिणतोऽसुरान्रक्षाꣳसि नाष्ट्रा अपहत्याभयेऽनाष्ट्रऽएतं यज्ञमतन्वत ॥३॥ तद्वाऽएतत्क्रियते । यद्देवा अकुर्वन्निदं नु तानि रक्षाꣳसि देवैरेवापहतानि यत्त्वेतत्करोति यद्देवा अकुर्वꣳस्तत्करवाणीत्यथोऽइन्द्रेण चैवैतद्बृहस्पतिना च दक्षिणतोऽसुरान्रक्षाꣳसि नाष्ट्रा अपहत्याभयेऽनाष्ट्रऽएतं यज्ञं तनुते ॥४॥ स यः स इन्द्रः । एष सोऽप्रतिरथोऽथ यः स बृहस्पतिरेष स ब्रह्मा तद्यद्ब्रह्माप्रतिरथं जपतीन्द्रेण चैवैतद्बृहस्पतिना च दक्षिणतोऽसुरान्रक्षाꣳसि नाष्ट्रा अपहत्याभयेऽनाष्ट्रऽएतं यज्ञं तनुते तस्माद्ब्रह्माप्रतिरथं जपति ॥५॥ आशुः शिशानो वृषभो न भीम इति । ऐन्द्योऽभिरूपा द्वादश भवन्ति द्वादश मासाः संवत्सरः संवत्सरोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैतद्दक्षिणतोऽसुरान्रक्षाꣳसि नाष्ट्रा अपहन्ति त्रिष्टुब्भिर्वज्रो वै त्रिष्टुब्वज्रेणैवैतद्दक्षिणतोऽसुरान्रक्षाꣳसि नाष्ट्रा अपहन्ति ता द्वाविꣳशतिर्गायत्र्यः सम्पद्यन्ते तदाग्नेय्यो भवन्त्यग्निकर्म हि ॥६॥ अथैनमुद्यच्छति । उदु त्वा विश्वे देवा अग्ने भरन्तु चित्तिभिरिति तस्योक्तो बन्धुः ॥७॥ अथाभिप्रयन्ति । पञ्च दिशो दैवीर्यज्ञमवन्तु देवीरिति देवाश्चासुराश्चोभये प्राजापत्या दिक्ष्वस्पर्धन्त ते देवा असुराणां दिशोऽवृञ्जत तथैवैतद्यजमानो द्विषतो भ्रातृव्यस्य दिशो वृङ्क्ते दैवीरिति तदेना दैवीः कुरुते यज्ञमवन्तु देवीरिति यज्ञमिममवन्तु देवीरित्येतदपामतिं दुर्मतिं बाधमाना इत्यशनाया वाऽअमतिरशनायामपबाधमाना इत्येतद्रायस्पोषे यज्ञपतिमाभजन्तीरिति रय्यां च पोषे च यज्ञपतिमाभजन्तीरित्येतद्रायस्पोषेऽअधि यज्ञोऽअस्थादिति रय्यां च पोषे चाधि यज्ञोऽस्थादित्येतत् ॥८॥ समिद्धेऽअग्नावधि मामहान इति । यजमानो वै मामहान उक्थपत्र इत्युक्थानि ह्येतस्य पत्राणीड्य इति यज्ञियं इत्येतद्गृभीत इति धारित इत्येतत्तप्तं घर्मं परिगृह्यायजन्तेति तप्तꣳ ह्येतं घर्मं परिगृह्यायजन्तोर्जा यद्यज्ञमयजन्त देवा इत्यूर्जा

ह्येतं यज्ञमयजन्त देवाः ॥९॥ दैव्याय धर्त्रे जोष्ट्रऽइति । दैवो ह्येष धर्ता जोषयि-
तृतमो देवश्रीः श्रीमनाः शतपया इति देवश्रीर्ह्येष श्रीमनाः शतपयाः परिगृह्य
देवा यज्ञमायन्निति परिगृह्य ह्येतं देवा यज्ञमायन्देवा देवेभ्योऽअध्वर्यन्तो अस्थु-
रित्यध्वरो वै यज्ञो देवा देवेभ्यो यज्ञियन्तोऽस्थुरित्येतत् ॥१०॥ वीतꣳ हविः श-
मितꣳ शमिता यजध्याऽइति । इष्टꣳ स्विष्टमित्येतत्तुरीयो यज्ञो यत्र हव्यमेती-
त्यध्वर्युः पुरस्ताद्यजूꣳषि जपति होता पश्चादृचोऽन्वाह ब्रह्मा दक्षिणतोऽप्रतिरथं
जपत्येष एव तुरीयो यज्ञस्ततो वाका आशिषो नो जुषन्तामिति ततो नो वा-
काश्चाशिषश्च जुषन्तामित्येतत् ॥११॥ सूर्यरश्मिर्हरिकेशः पुरस्तात् । सविता ज्यो-
तिरुदयाꣳ अजस्रमित्यसौ वाऽआदित्य एषोऽग्निः स एष सूर्यरश्मिर्हरिकेशः पुर-
स्तात्सवितैतज्ज्योतिरुद्यच्छत्यजस्रं तस्य पूषा प्रसवे याति विद्वानिति पशवो वै
पूषा तऽएतस्य प्रसवे प्रेरते सम्पश्यन्विश्वा भुवनानि गोपा इत्येष वाऽइदꣳ
सर्वꣳ सम्पश्यत्येष उऽएवास्य सर्वस्य भुवनस्य गोप्ता ॥१२॥ तस्मा अमुष्मादादि-
त्यादर्वाच्यः पञ्च दिशः । ता एतद्देवा असुराणामवृञ्जताथो ता एवैतत्समारोहꣳ-
स्ता उऽएवैतद्यजमानो द्विषतो भ्रातृव्यस्य वृङ्क्तेऽथो ता एवैतत्समारोहत्यथोऽए-
तद्वाऽएताभिर्देवा आतः सम्प्राप्नुवꣳस्तथैवाभिरयमेतदातः सम्प्राप्नोति ॥१३॥ अ-
थाश्मानं पृश्निमुपदधाति । असौ वाऽआदित्योऽश्मा पृश्निरमुमेवैतदादित्यमुपद-
धाति पृश्निर्भवति रश्मिभिर्हि मण्डलं पृश्नि तमन्तरेणाहवनीयं च गार्हपत्यं चो-
पदधात्ययं वै लोको गार्हपत्यो द्यौराहवनीय एतं तदिमौ लोकावन्तरेण दधा-
ति तस्मादेष इमौ लोकावन्तरेण तपति ॥१४॥ आग्नीध्रवेलायाम् । अन्तरिक्षं
वाऽआग्नीध्रमेतं तदन्तरिक्षे दधाति तस्मादेषोऽन्तरिक्षायतनो व्यद्धे व्यद्धे ह्येष
इतः ॥१५॥ स एष प्राणः । प्राणमेवैतदात्मन्धत्ते तदेतदायुरायुरेवैतदात्मन्धत्ते
तदेतदन्नमायुर्ह्येतदन्नमु वाऽआयुरश्मा भवति स्थिरो वाऽअश्मा स्थिरं तदायुः

कुरुते पृश्निर्भवति पृश्नीव ह्यन्नम् ॥ १६ ॥ स उपदधाति । विमान एष दिवो मध्य ऽआस्तऽइति विमानो ह्येष दिवो मध्यऽआस्तऽआपप्रिवान्रोदसी अन्तरिक्षमित्युद्यन्वाऽएष इमांल्लोकानापूरयति स विश्वाचीरभिचष्टे घृताचीरिति स्रुचश्चैतद्वेदीश्चाह्वान्तरा पूर्वमपरं च केतुमित्यन्तरेमं च लोकममुं चेत्येतदथो यच्चेदमेतर्हि चीयते यच्चादः पूर्वमचीयतेति ॥ १७ ॥ उक्षा समुद्रोऽअरुणः सुपर्ण इति । उक्षा ह्येष समुद्रोऽरुणः सुपर्णः पूर्वस्य योनिं पितुराविवेशेति पूर्वस्य ह्येष एतं योनिं पितुराविशति मध्ये दिवो निहितः पृश्निरश्मेति मध्ये ह्येष दिवो निहितः पृश्निरश्मा विचक्रमे रजसस्पात्यन्ताविति विक्रममाणो वाऽएष एषां लोकानामन्तान्पाति ॥ १८ ॥ द्वाभ्यामुपदधाति । द्विपाद्यजमानो यजमानोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतदुपदधाति त्रिष्टुब्भ्यां त्रैष्टुभो ह्येष न सादयत्यसन्नो ह्येष न सूददोहसाधिवदति प्राणो वै सूददोहाः प्राण एष किं प्राणे प्राणं दध्यामिति तं निधाय यथा न नश्येत् ॥ १९ ॥ अथोपायन्ति । इन्द्रं विश्वा अवीवृधन्निति तस्योक्तो बन्धुर्देवहूर्यज्ञ आ च वक्षत्सुम्नहूर्यज्ञ आ च वक्षदिति देवहूश्चैव यज्ञः सुम्नहूश्च यक्षदग्निर्देवो देवाँ२॥ऽआ च वक्षदिति यक्षच्चैवाग्निर्देवो देवाना च वहत्वित्येतत् ॥ २० ॥ वाजस्य मा प्रसवः । उद्ग्राभेणोदग्रभीत्　अधा सपत्नानिन्द्रो मे निग्राभेणाधरा२॥ऽअकरिति यथैव यजुस्तथा बन्धुः ॥ २१ ॥ उद्ग्राभं च निग्राभं च । ब्रह्म देवा अवीवृधन्　अधा सपत्नानिन्द्राग्नी मे विषूचीनान्व्यस्यतामिति यथैव यजुस्तथा बन्धुः ॥ २२ ॥ तद्वा अमुष्मादादित्यादूर्ध्वाश्चतस्रो दिशः । ता एतद्देवा असुराणामवृञ्जताथो ता एवैतत्समारोहंस्ता उऽएवैतद्यजमानो द्विषतो भ्रातृव्यस्य वृङ्क्तेऽथो ता एवैतत्समारोहत्यथोऽएतद्वाऽएताभिर्देवा आतः सम्प्रापुवंस्तथैवाभिरयमेतदातः सम्प्राप्नोति ॥ २३ ॥ अथाग्निमारोहन्ति । क्रमध्वमग्निना नाकमिति स्वर्गो वै लोको नाकः क्रमध्वमनेनाग्निनेत७ स्वर्गं लोकमित्येतदुख्य७

हस्तेषु बिभ्रत इत्युख्यꣳ ह्येतऽएतꣳ हस्तेषु बिभ्रति दिवस्पृष्ठꣳ स्वर्गत्वा मिश्रा देवेभिराध्वमिति दिवस्पृष्ठꣳ स्वर्गं लोकं गत्वा मिश्रा देवेभिराध्वमित्येतत् ॥२४॥ प्राचीमनु प्रदिशं प्रेहि विद्वानिति । प्राची वै दिगग्नेः स्वामनु प्रदिशं प्रेहि विद्वानित्येतदग्नेरग्ने पुरोऽअग्निर्भवेहेत्यस्य त्वमग्नेरग्ने पुरोऽग्निर्भवेहेत्येतद्विश्वा आशा दीद्यानो विभाहीति सर्वा आशा दीप्यमानो विभाहीत्येतदूर्जं नो धेहि द्विपदे चतुष्पदऽइत्याशिषमाशास्ते ॥२५॥ पृथिव्या अहम् । उदन्तरिक्षमारुहमन्तरिक्षाद्दिवमारुहमिति गार्हपत्याद्धाग्नीध्रीयमागछत्याग्नीध्रीयादाहवनीयं दिवो नाकस्य पृष्ठात्स्वर्ज्योतिरगामहमिति दिवो नाकस्य पृष्ठात्स्वर्गं लोकमगामहमित्येतत् ॥२६॥ स्वर्यन्तो नापेक्षन्ते । आ द्याꣳ रोहन्ति रोदसीऽइति न हैव तेऽपेक्षन्ते ये स्वर्गं लोकं यन्ति यज्ञं ये विश्वतोधारꣳ सुविद्वाꣳसो वितेनिरऽइत्येष एव यज्ञो विश्वतोधार एतऽउऽएव सुविद्वाꣳसो यऽएतं वितन्वते ॥२७॥ अग्ने प्रेहि प्रथमो देवयतामिति । इममेतदग्निमाह त्वमेषां प्रेहि प्रथमो देवयतामिति चक्षुर्देवानामुत मर्त्यानामित्युभयेषाꣳ हैतद्देवमनुष्याणां चक्षुरियक्षमाणा भृगुभिः सजोषा इति यजमाना भृगुभिः सजोषा इत्येतत्स्वर्यन्तु यजमानाः स्वस्तीति स्वर्गं लोकं यन्तु यजमानाः स्वस्तीत्येतत् ॥२८॥ तद्या अमुष्मिंल्लोके पञ्च दिशः । ता एतद्देवा असुराणामवृञ्जताथो ता एवैतत्समारोहंस्ता उऽएवैतद्यजमानो द्विषतो भ्रातृव्यस्य वृङ्क्तेऽथो ता एवैतत्समारोहत्यथोऽएतद्वाऽएताभिर्देवा आतः सम्प्राप्नुवंस्तथैवाभिरयमेतदातः सम्प्राप्नोति ॥२९॥ अथैनमभिजुहोति । एतद्वाऽएनं देवा ईयिवाꣳसमुपरिष्टादन्नेनाप्रीणन्नेतयाहुत्या तथैवैनमयमेतदीयिवाꣳसमुपरिष्टादन्नेन प्रीणात्येतयाहुत्या कृष्णायै शुक्लवत्सायै पयसा रात्रिर्वै कृष्णा शुक्लवत्सा तस्या असावादित्यो वत्सः स्वेनैवैनमेतद्भागेन स्वेन रसेन प्रीणात्युपरि धार्यमाण उपरि हि स यमेतत्प्रीणाति दोहनेन दोहनेन हि पयः प्रदीयते ॥३०॥ यद्वेवैनमभि-

नुहोति । शिर एतद्यज्ञस्य यदग्निः प्राणाः पयः शीर्षंस्तत्प्राणं दधाति यथा स्वय-मातृण्णामभिप्रह्वरेदेवमभिजुहुयात्प्राणाः स्वयमातृण्णा रस एष शिरश्च तत्प्राणं च रसेन संतनोति संदधाति नक्तोषासा समनसा विरूपेऽइति तस्योक्तो बन्धुः ॥३१॥ अग्ने सहस्राक्षेति । हिरण्यशकलैर्वाऽएष सहस्राक्षः शतमूर्धन्निति यददः शतशीर्षा रुद्रोऽसृज्यत शतं ते प्राणाः सहस्रं व्याना इति शतꣳ ह्येव तस्य प्राणाः सहस्रं व्याना यः शतशीर्षा त्वꣳ साहस्रस्य राय ईशिषऽइति त्वꣳ सर्वस्यै रय्याऽईशिषऽइत्येतत्तस्मै ते विधेम वाजाय स्वाहेत्येष वै वाजस्तमेतत्प्रीणाति ॥३२॥ द्वाभ्यामभिजुहोति । द्विपाद्यजमानो यजमानोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतदभिजुहोति ॥३३॥ अथैनं निदधाति । सुपर्णोऽसि गरुत्मानित्येतद्वाऽएनमदो विकृत्या सुपर्णं गरुत्मन्तं विकरोति तꣳ सुपर्णं गरुत्मन्तं चिनोति तꣳ सुपर्णं गरुत्मन्तं कृत्वा ततो निदधाति पृष्ठे पृथिव्याः सीद भासान्तरिक्षमापृण ज्योतिषा दिवमुत्तभान तेजसा दिश उदृꣳहेत्येवꣳ ह्येष एतत्सर्वं करोति ॥३४॥ आजुह्वानः सुप्रतीकः पुरस्तादिति । आजुह्वानो नः सुप्रतीकः पुरस्तादित्येतदग्ने त्वं योनिमासीद साधुयेत्येष वाऽअस्य स्वो योनिस्तꣳ साधासीदेत्येतदस्मिन्त्सधस्थेऽअध्युत्तरस्मिन्निति द्यौर्वाऽउत्तरꣳ सधस्थं विश्वे देवा यजमानश्च सीदतेति तद्विश्वैर्देवैः सह यजमानꣳ सादयति द्वाभ्यां निदधाति तस्योक्तो बन्धुर्वषट्कारेण तस्योपरि बन्धुः ॥३५॥ अथास्मिन्त्समिध आदधाति । एतद्वाऽएनं देवा ईयिवाꣳसमुपरिष्टादन्नेनाप्रीणन्त्समिद्भिश्चाहुतिभिश्च तथैवैनमयमेतदीयिवाꣳसमुपरिष्टादन्नेन प्रीणाति समिद्भिश्चाहुतिभिश्च ॥३६॥ स वै शमीमयीं प्रथमामादधाति । एतद्वाऽएष एतस्यामाहुत्याꣳ हुतायां प्रादीप्यतोदज्वलत्तस्माद्देवा अबिभयुर्यद्वै नोऽयं न हिꣳस्यादिति तऽएताꣳ शमीमपश्यंस्तयैनमशमयंस्तद्यदेतꣳ शम्याशमयंस्तस्माच्छमी तथैवैनमयमेतच्छम्या शमयति शान्त्याऽएव न जग्ध्यै ॥३७॥

ताꣳ सवितुर्वरेण्यस्य । चित्रामाहं वृणे सुमतिं विश्वजन्याम् यामस्य कण्वो ऽअदुहत्प्रपीनाꣳ सहस्रधारां पयसा महीं गामिति कण्वो हैनां ददर्श सा हास्मै सहस्रधारा सर्वान्कामान्दुदुहे तथैवैतद्यजमानाय सहस्रधारा सर्वान्कामान्दुहे ॥३८॥ अथ वैकङ्कतीमादधाति । तस्या उक्तो बन्धुर्विधेम ते परमे जन्मन्नग्नऽइति द्यौर्वाऽअस्य परमं जन्म विधेम स्तोमैरवरे सधस्थ इत्यन्तरिक्षं वाऽअवरꣳ सधस्थं यस्माद्योनेरुदारिथा यजे तमित्येष वाऽअस्य स्वो योनिस्तं यजऽइत्येतत्प्र त्वे हवीꣳषि जुहुरे समिद्धऽइति यदा वाऽएष समिध्यतेऽथैतस्मिन्हवीꣳषि प्रजुह्वति ॥३९॥ अथौदुम्बरीमादधाति । ऊर्ग्वै रस उदुम्बर ऊर्जैवैनमेतद्रसेन प्रीणाति कर्णकवती भवति पशवो वै कर्णकाः पशुभिरेवैनमेतदन्नेन प्रीणाति यदि कर्णकवतीं न विन्देद्दधिद्रप्समुपहत्यादध्यात्तद्धि दधिद्रप्स उपतिष्ठते तदेव पशुरूपं प्रेद्धोऽअग्ने दीदिहि पुरो न इति विराजादधात्यन्नं विराडन्नेनैवैनमेतत्प्रीणाति तिस्रः समिध आदधाति त्रिवृदग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतदन्नेन प्रीणाति ॥४०॥ अथाहुतीर्जुहोति । यथा परिविष्यानुपाययेत्तादृक्तत्स्रुवेण पूर्वे स्रुचोत्तरामग्ने तमद्याश्वं न स्तोमैः क्रतुं न भद्रꣳ हृदिस्पृशम् ऋध्यामा तऽओहैरिति यस्ते हृदिस्पृक्स्तोमस्तं तऽऋध्यासमित्येतत्पङ्क्त्या जुहोति पञ्चपदा पङ्क्तिः पञ्चचितिकोऽग्निः पञ्चऽर्तवः संवत्सरः संवत्सरोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतदन्नेन प्रीणाति ॥४१॥ अथ वैश्वकर्मणीं जुहोति । विश्वकर्मायमग्निस्तमेवैतत्प्रीणाति चित्तिं जुहोमि मनसा घृतेनेति चित्तमेषां जुहोमि मनसा च घृतेन चेत्येतद्यथा देवा इहागमन्निति यथा देवा इहागच्छानित्येतद्वीतिहोत्रा ऋतावृध इति सत्यवृध इत्येतत्पत्ये विश्वस्य भूमनो जुहोमि विश्वकर्मणऽइति योऽस्य सर्वस्य भूतस्य पतिस्तस्मै जुहोमि विश्वकर्मणऽइत्येतद्विश्वाहादाभ्यꣳ हविरिति सर्वदैवाहितꣳ हविरित्येतत् ॥४२॥ अथ पूर्णाहुतिं जुहोति ।

सर्वमेतद्यत्पूर्णꣳ सर्वेणैवैनमेतत्प्रीणाति ॥४३॥ सप्त तेऽअग्ने समिध इति । प्रा-
णा वै समिधः प्राणा ह्येतꣳ समिन्धते सप्त जिह्वा इति यानमून्त्सप्त पुरुषानेकं
पुरुषमकुर्वंस्तेषामेतदाह सप्तऽऋषय इति सप्त हि तऽऋषय आसन्त्सप्त धाम प्रि-
याणीति छन्दाꣳस्येतदाह छन्दाꣳसि वाऽअस्य सप्त धाम प्रियाणि सप्त होत्राः स-
प्तधा त्वा यजन्तीति सप्त ह्येतꣳ होत्राः सप्तधा यजन्ति सप्त योनीरिति चितीरेत-
दाहापृणस्वेत्या प्रजायस्वेत्येतद्घृतेनेति रेतो वै घृतꣳ रेत एवैतदेषु लोकेषु दधा-
ति स्वाहेति यज्ञो वै स्वाहाकारो यज्ञियमेवैतदिदꣳ सकृत्सर्वं करोति ॥४४॥
सप्त सप्तेति । सप्तचितिकोऽग्निः सप्तऽर्तवः संवत्सरः संवत्सरोऽग्निर्यावानग्निर्याव-
त्यस्य मात्रा तावतैवैनमेतत्प्रीणाति तिस्र आहुतीर्जुहोति त्रिवृदग्निर्यावानग्निर्या-
वत्यस्य मात्रा तावतैवैनमेतदन्नेन प्रीणाति तिस्रः समिध आदधाति तत्षट् त-
स्योक्तो बन्धुः ॥४५॥ तिष्ठन्त्समिध आदधाति । अस्थीनि वै समिधस्तिष्ठन्तीव वा
ऽअस्थीन्यासीन आहुतीर्जुहोति माꣳसानि वाऽआहुतय आसतऽइव वै माꣳसा-
न्यन्तराः समिधो भवन्ति बाह्या आहुतयोऽन्तराणि ह्यस्थीनि बाह्यानि माꣳसा-
नि ॥४६॥ अथातः सम्पदेव । षट् पुरस्ताज्जुहोति षडुपरिष्टात्षड्भिराश्मनः पृश्ने-
र्यन्ति द्वाभ्यामश्मानं पृश्निमुपदधाति चतुर्भिराग्नेर्यन्ति पञ्चभिरग्निमारोहन्ति तदेकां-
न त्रिꣳशदाहुतिरेव त्रिꣳशत्तमी द्वाभ्यामग्निं निदधाति तद्द्वात्रिꣳशद्द्वात्रिꣳशदक्षरा-
नुष्टुब्वैषानुष्टुप् ॥४७॥ तद्या अमूस्तिस्रोऽनुष्टुभः । गार्हपत्ये सम्पादयन्ति तासा-
मेतामत्रैकामाहरन्ति तद्यदेतामत्राहरन्त्यत्रैष सर्वोऽग्निः संस्कृतः स एषोऽत्र तस्मै
नालमासीद्यदन्नमात्स्यत् ॥४८॥ सोऽग्निमब्रवीत् । त्वयान्नमदानीति तथेति तस्मा-
द्यदेवैतमत्राहरन्त्यथैषोऽलमन्नायालमाहुतिभ्यो भवति ॥४९॥ अथोऽआहुः । प्र-
जापतिरेवैतं प्रियं पुत्रमुरस्याधत्तऽइति स यो हैतदेवं वेदा हैवं प्रियं पुत्रमुरसि
धत्ते ॥५०॥ यद्वेवैतमत्राहरन्ति । यान्वै तान्त्सप्त पुरुषानेकं पुरुषमकुर्वन्नयमेव स

योऽयमग्निश्चीयतेऽथ यामेषां नामूर्ध्वाꣳ श्रियꣳ रसꣳ समुदौहꣳस्तमेष स यमेतमत्राग्निमाहरन्ति तद्यदेतमत्राहरन्ति यैवैतेषाꣳ सप्तानां पुरुषाणाꣳ श्रीर्यो रसस्तमेतदूर्ध्वꣳ समुद्वहन्ति तदस्यैतच्छिर आत्मायमग्निश्चित आत्मानमेवास्यैतत्संस्कृत्य शिरः प्रतिदधाति ॥५१॥ ब्राह्मणम्॥२ [२. ३.] ॥ द्वितीयोऽध्यायः [५७.] ॥ ॥

अथातो वैश्वानरं जुहोति । अत्रैष सर्वोऽग्निः संस्कृतः स एषोऽत्र वैश्वानरो देवता तस्माऽएतद्धविर्जुहोति तदेनꣳ हविषा देवतां करोति यस्यै वै देवतायै हविर्गृह्यते सा देवता न सा यस्यै न गृह्यते द्वादशकपालो द्वादश मासाः संवत्सरः संवत्सरो वैश्वानरः ॥१॥ यद्वेवैतं वैश्वानरं जुहोति । वैश्वानरं वाऽएतमग्निं जनयिष्यन्भवति तमदः पुरस्ताद्दीक्षणीयायाꣳ रेतो भूतꣳ सिञ्चति यादृग्वै योनौ रेतः सिच्यते तादृग्जायते तद्यत्तत्र वैश्वानरꣳ रेतो भूतꣳ सिञ्चति तस्मादयमिह वैश्वानरो जायतऽउपाꣳशु तत्र भवति रेतो वै तत्र यज्ञ उपाꣳशु वै रेतः सिच्यते निरुक्त इह निरुक्तꣳ हि रेतो जातं भवति ॥२॥ ॥ शतम् ४१०० ॥ ॥ स यः स वैश्वानरः । इमे स लोका इयमेव पृथिवी विश्वमग्निर्नरोऽन्तरिक्षमेव विश्वं वायुर्नरो द्यौरेव विश्वमादित्यो नरः ॥३॥ ते ये तऽइमे लोकाः । इदं तच्छिर इदमेव पृथिव्योषधयः श्मश्रूणि तदेतद्विश्वं वागेवाग्निः स नरः सोपरिष्टादस्य भवत्युपरिष्टाद्ध्यस्या अग्निः ॥४॥ इदमेवान्तरिक्षम् । तस्मादेतदलोमकमलोमकमिव ह्यन्तरिक्षं तदेतद्विश्वं प्राण एव वायुः स नरः स मध्येनास्य भवति मध्येन ह्यन्तरिक्षस्य वायुः ॥५॥ शिर एव द्यौः । नक्षत्राणि केशास्तदेतद्विश्वं चक्षुरेवादित्यः स नरस्तदवस्ताच्छीर्ष्णो भवत्यवस्ताद्धि दिव आदित्यस्तदस्यैतच्छिरो वैश्वानर आत्मायमग्निश्चित आत्मानमेवास्यैतत्संस्कृत्य शिरः प्रतिदधाति ॥६॥ अथ मारुताञ्जुहोति । प्राणा वै मारुताः प्राणानेवास्मिन्नेतद्दधाति वैश्वानरꣳ हुत्वा शिरो वै वैश्वानरः शीर्षंस्तत्प्राणान्दधाति ॥७॥ एक एष भवति । एकमिव हि शिरः

सप्तेतरे सप्तकपाला यद्दु वाऽअपि बहु कृत्वः सप्त-सप्त सप्तैव तच्छीर्षण्येव तत्सप्त
प्राणान्दधाति ॥८॥ निरुक्त एष भवति । निरुक्तमिव हि शिरोऽनिरुक्ता इतरे
ऽनिरुक्ता-इव हि प्राणास्तिष्ठन्नेतं जुहोति तिष्ठतीव हि शिर आसीन इतराना-
सत-इव हि प्राणाः ॥९॥ तद्यौ प्रथमौ मारुतौ जुहोति । इमौ तौ प्राणौ तौ
मध्ये वैश्वानरस्य जुहोति मध्ये हीमौ शीर्ष्णः प्राणौ ॥१०॥ अथ यौ द्वितीयौ ।
इमौ तौ तौ समन्तिकतरं जुहोति समन्तिकतरमिव हीमौ प्राणौ ॥११॥ अथ
यौ तृतीयौ । इमौ तौ तौ समन्तिकतरं जुहोति समन्तिकतरमिव हीमौ प्राणौ
वागेवारण्येऽनूच्यः सोऽरण्येऽनूच्यो भवति बहु हि वाचा घोरं निगच्छति ॥१२॥
यद्वेव वैश्वानरमारुतान्जुहोति । क्षत्रं वै वैश्वानरो विण्मारुताः क्षत्रं च तद्विशं
च करोति वैश्वानरं पूर्वं जुहोति क्षत्रं तत्कृत्वा विशं करोति ॥१३॥ एक एष
भवति । एकस्थं तत्क्षत्रमेकस्थाꣳ श्रियं करोति बहव इतरे विशि तद्भूमानं द-
धाति ॥१४॥ निरुक्त एष भवति । निरुक्तमिव हि क्षत्रमनिरुक्ता इतरेऽनिरु-
क्तेव हि विट् तिष्ठन्नेतं जुहोति तिष्ठतीव हि क्षत्रमासीन इतरानास्तऽइव हि
विट् ॥१५॥ तं वाऽएतम् । पुरोऽनुवाक्यवन्तं याज्यवन्तं वषट्कृते स्रुचा जुहो-
ति हस्तेनैवेतरानासीनः स्वाहाकारेण क्षत्रायैव तद्विशं कृतानुकरामनुवर्त्मानं
करोति ॥१६॥ तदाहुः । कथमस्यैते पुरोऽनुवाक्यवन्तो याज्यवन्तो वषट्कृते
स्रुचा हुता भवन्तीत्येतेषां वै सप्तपदानां मारुतानां यानि त्रीणि प्रथमानि पदा-
नि सा त्रिपदा गायत्री पुरोऽनुवाक्याथ यानि चत्वार्युत्तमानि सा चतुष्पदा त्रिष्टु-
ब्याज्येदमेव कपुच्छलमयं दण्डः स्वाहाकारो वषट्कार एवमु हास्यैते पुरोऽनुवा-
क्यवन्तो याज्यवन्तो वषट्कृते स्रुचा हुता भवन्ति ॥१७॥ तद्यं प्रथमं दक्षिणतो
मारुतं जुहोति । याः सप्त प्राच्यः स्रवन्ति ताः स स सप्तकपालो भवति सप्त हि
ता याः प्राच्यः स्रवन्ति ॥१८॥ अथ यं प्रथममुत्तरतो जुहोति । ऋतवः स स स-

सप्तकपालो भवति सप्त ह्यृतवः ॥१९॥ अथ यं द्वितीयं दक्षिणतो जुहोति । पश-
वः स स सप्तकपालो भवति सप्त हि ग्राम्याः पशवस्तमनन्तर्हितं पूर्वस्माज्जुहो-
त्यप्सु तत्पशून्प्रतिष्ठापयति ॥२०॥ अथ यं द्वितीयमुत्तरतो जुहोति । सप्तऽऋषयः
स स सप्तकपालो भवति सप्त हि सप्तऽर्षयस्तमनन्तर्हितं पूर्वस्माज्जुहोत्यृतुषु त-
दृषीन्प्रतिष्ठापयति ॥२१॥ अथ यं तृतीयं दक्षिणतो जुहोति । प्राणाः स स सप्त-
कपालो भवति सप्त हि शीर्षन्प्राणास्तमनन्तर्हितं पूर्वस्माज्जुहोत्यनन्तर्हितांस्त-
च्छीर्ष्णः प्राणान्दधाति ॥२२॥ अथ यं तृतीयमुत्तरतो जुहोति । छन्दाꣳसि स स
सप्तकपालो भवति सप्त हि चतुरुत्तराणि छन्दाꣳसि तमनन्तर्हितं पूर्वस्माज्जुहो-
त्यनन्तर्हितानि तदृषिभ्यश्छन्दाꣳसि दधाति ॥२३॥ अथ याः सप्त प्रतीच्यः स्रवन्ति
। सोऽरण्येऽनूच्यः स सप्तकपालो भवति सप्त हि ता याः प्रतीच्यः स्रवन्ति सो
ऽस्यैषोऽवाङ् प्राण एतस्य प्रजापतेः सोऽरण्येऽनूच्यो भवति तिर-इव तद्यदरण्यं
तिर-इव तद्यदवाङ् प्राणस्तस्माद्यऽएतासां नदीनां पिबन्ति रिप्रतराः शपनतरा
आहनस्यवादितरा भवन्ति तद्यद्येतदाहेदं मारुता इति तदस्माऽअन्नं कृत्वापिद-
धाति तेनैनं प्रीणाति ॥२४॥ स यः स वैश्वानरो । ऽसौ स आदित्योऽथ ये ते
मारुता रश्मयस्ते ते सप्त सप्तकपाला भवन्ति सप्त-सप्त हि मारुता गणाः ॥२५॥
स जुहोति । शुक्रज्योतिश्च चित्रज्योतिश्च सत्यज्योतिश्च ज्योतिष्मांश्चेति नामान्ये-
षामेतानि मण्डलमेवैतत्संस्कृत्याथास्मिन्नेतान्रश्मीन्नामग्राहं प्रतिदधाति ॥२६॥
ब्राह्मणम् ॥ ३ [३. १.] ॥ ॥

अथातो वसोर्धारां जुहोति । अत्रैष सर्वोऽग्निः संस्कृतः स एषोऽत्र वसुस्त-
स्मै देवा एतां धारां प्रागृह्णंस्तयैनमप्रीणंस्तद्यदेतस्मै वसवऽएतां धारां प्रागृह्णंस्त-
स्मादेनां वसोर्धारेत्याचक्षते तथैवास्माऽअयमेतां धारां प्रगृह्णाति तयैनं प्रीणाति
॥१॥ यद्वेवैतां वसोर्धारां जुहोति । अभिषेक एवास्यैष एतद्वाऽएनं देवाः सर्वं

कृत्स्नꣳ संस्कृत्याथैनमेतैः कामैरभ्यषिञ्चन्नेतया वसोर्धारया तथैवैनमयमेतत्सर्वं कृत्स्नꣳ संस्कृत्याथैनमेतैः कामैरभिषिञ्चत्येतया वसोर्धारयाज्येन पञ्चगृहीतेनौदुम्बर्या स्रुचा तस्योक्तो बन्धुः ॥२॥ वैश्वानरꣳ हुत्वा । शिरो वै वैश्वानरः शीर्ष्णो वाऽअन्नमद्यतेऽथो शीर्षतो वाऽअभिषिच्यमानोऽभिषिच्यते मारुतान्हुत्वा प्राणा वै मारुताः प्राणैरु वाऽअन्नमद्यतेऽथो प्राणेषु वाऽअभिषिच्यमानोऽभिषिच्यते ॥३॥ तद्वाऽअरण्येऽनूच्ये । वाग्वाऽअरण्येऽनूच्यो वाचो वाऽअन्नमद्यतेऽथो वाचा वाऽअभिषिच्यमानोऽभिषिच्यते तदेतत्सर्वं वसु सर्वे ह्येते कामाः सैषा वसुमयी धारा यथा क्षीरस्य वा सर्पिषो वैवमारम्भायैवेयमाज्याहुतिर्हूयते तद्यदेषा वसुमयी धारा तस्मादेनां वसोर्धारेत्याचक्षते ॥४॥ स आह । इदं च मऽइदं च मऽइत्यनेन च त्वा प्रीणाम्यनेन चानेन च त्वाभिषिञ्चाम्यनेन चेत्येतदथोऽइदं च मे देहीदं च मऽइति सा यद्वैषा धाराग्निं प्राप्नुयादथैतद्यजुः प्रतिपद्येत ॥५॥ एतद्वाऽएनं देवाः । एतेनान्नेन प्रीत्वैतैः कामैरभिषिच्यैतया वसोर्धारयाथैनमेतान्कामानयाचन्त तेभ्य इष्टः प्रीतोऽभिषिक्त एतान्कामान्प्रायच्छत्तथैवैनमयमेतदेतेनान्नेन प्रीत्वैतैः कामैरभिषिच्यैतया वसोर्धारयाथैनमेतान्कामान्याचते तस्माऽइष्टः प्रीतोऽभिषिक्त एतान्कामान्प्रयच्छति द्वौ-द्वौ कामौ संयुनक्त्यव्यवच्छेदाय यथा व्योकसौ संयुञ्ज्यादेवं यज्ञेन कल्पन्तामिति ॥६॥ एतद्धि देवा अब्रुवन् । केनेमान्कामान्प्रतिग्रहीष्याम इत्यात्मनैवेत्यब्रुवन्यज्ञो वै देवानामात्मा यज्ञ उऽएव यजमानस्य स यदाह यज्ञेन कल्पन्तामित्यात्मना मे कल्पन्तामित्येवैतदाह ॥७॥ द्वादशसु कल्पयति । द्वादश मासाः संवत्सरः संवत्सरोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतदन्नेन प्रीणात्यथो तावतैवैनमेतदन्नेनाभिषिञ्चति चतुर्दशसु कल्पयत्यष्टासु कल्पयति दशसु कल्पयति त्रयोदशसु कल्पयति ॥८॥ अथार्धेन्द्राणि जुहोति । सर्वमेतद्यदर्धेन्द्राणि सर्वेणैवैनमेतत्प्रीणात्यथो सर्वेणैवैनमेतदभि-

षिञ्चति ॥९॥ अथ ग्रहाञ्जुहोति । यज्ञो वै ग्रहा यज्ञेनैवैनमेतदन्नेन प्रीणात्यथो यज्ञेनैवैनमेतदन्नेनाभिषिञ्चति ॥१०॥ ब्राह्मणम् ॥ ४ [३. २.] ॥ द्वितीयः प्रपाठकः ॥ कण्डिकासंख्या१४ ॥ ॥

अथैतान्यज्ञक्रतूञ्जुहोति । अग्निश्च मे घर्मश्च मऽइत्येतैरेवैनमेतद्यज्ञक्रतुभिः प्रीणात्यथोऽएतैरेवैनमेतद्यज्ञक्रतुभिरभिषिञ्चति ॥१॥ अथायुज स्तोमाञ्जुहोति । एतद्वै देवाः सर्वान्कामानाप्त्वायुग्भि स्तोमैः स्वर्गं लोकमायंस्तथैवैतद्यजमानः सर्वान्कामानाप्त्वायुग्भि स्तोमैः स्वर्गं लोकमेति ॥२॥ तद्वै त्रयस्त्रिꣳशादिति । अन्तो वै त्रयस्त्रिꣳशोऽयुजाꣳ स्तोमानामन्तत एव तद्देवाः स्वर्गं लोकमायंस्तथैवैतद्यजमानोऽन्तत एव स्वर्गं लोकमेति ॥३॥ अथ युग्मतो जुहोति । एतद्वै छन्दाꣳस्यब्रुवन्यातयामा वाऽअयुज स्तोमा युग्मभिर्वयꣳ स्तोमैः स्वर्गं लोकमयामेति तानि युग्मभि स्तोमैः स्वर्गं लोकमायंस्तथैवैतद्यजमानो युग्मभि स्तोमैः स्वर्गं लोकमेति ॥४॥ तद्वाऽअष्टाचत्वरिꣳशादिति । अन्तो वाऽअष्टाचत्वारिꣳशो युग्मनाꣳ स्तोमानामन्तत एव तच्छन्दाꣳसि स्वर्गं लोकमायंस्तथैवैतद्यजमानोऽन्तत एव स्वर्गं लोकमेति ॥५॥ स आह । एका च मे तिस्रश्च मे चतस्रश्च मेऽष्टौ च मऽइति यथा वृक्षꣳ रोहन्नुत्तरामुत्तराꣳ शाखाꣳ समालम्भꣳ रोहेत्तादृक्तद्धैव स्तोमाञ्जुहोत्यन्नं वै स्तोमा अन्नेनैवैनमेतदभिषिञ्चति ॥६॥ अथ वयाꣳसि जुहोति । पशवो वै वयाꣳसि पशुभिरेवैनमेतदन्नेन प्रीणात्यथो पशुभिरेवैनमेतदन्नेनाभिषिञ्चति ॥७॥ अथ नामग्राहं जुहोति । एतद्वै देवाः सर्वान्कामानाप्त्वाथैतमेव प्रत्यक्षमप्रीणंस्तथैवैतद्यजमानः सर्वान्कामानाप्त्वाथैतमेव प्रत्यक्षं प्रीणाति वाजाय स्वाहा प्रसवाय स्वाहेति नामान्यस्यैतानि नामग्राहमेवैनमेतत्प्रीणाति ॥८॥ त्रयोदशैतानि नामानि भवन्ति । त्रयोदश मासाः संवत्सरस्त्रयोदशाग्नेश्चितिपुरीषाणि यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतत्प्रीणाति यद्वेव नामग्राहं

जुहोति नामग्राहमेवैनमेतदभिषिञ्चति ॥ ९ ॥ अथाह । इयं ते राण्मित्राय यन्तासि यमन ऊर्जे त्वा वृष्ट्यै त्वा प्रजानां त्वाधिपत्यायेत्यन्नं वा ऽऊर्गन्नं वृष्टिरन्नेनैवैनमेतत्प्रीणाति ॥ १० ॥ यद्वेवाह । इयं ते राण्मित्राय यन्तासि यमन ऊर्जे त्वा वृष्ट्यै त्वा प्रजानां त्वाधिपत्यायेतीदं ते राज्यमभिषिक्तोऽसीत्येतन्मित्रस्य त्वं यन्तासि यमन ऊर्जे च नोऽसि वृष्ट्यै च नोऽसि प्रजानां च न आधिपत्यायासीत्युपब्रुवत ऽएवैनमेतदेतस्मै नः सर्वस्मा ऽअस्येतस्मै त्वा सर्वस्मा ऽअभ्यषिचामहीति तस्मादु हेदं मानुषꣳ राजानमभिषिक्तमुपब्रुवते ॥ ११ ॥ अथ कल्पाञ्जुहोति । प्राणा वै कल्पाः प्राणानेवास्मिन्नेतद्दधात्यायुर्यज्ञेन कल्पतां प्राणो यज्ञेन कल्पतामित्येतानेवास्मिन्नेतत्क्लृप्तान्प्राणान्दधाति ॥ १२ ॥ द्वादश कल्पाञ्जुहोति । द्वादश मासाः संवत्सरः संवत्सरोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवास्मिन्नेतत्क्लृप्तान्प्राणान्दधाति यद्वेव कल्पाञ्जुहोति प्राणा वै कल्पा अमृतमु वै प्राणा अमृतेनैवैनमेतदभिषिञ्चति ॥ १३ ॥ अथाह । स्तोमश्च यजुश्च ऽऋक्च साम च बृहच्च रथन्तरं चेति त्रयी ह्येषा विद्यान्नं वै त्रयी विद्यान्नेनैवैनमेतत्प्रीणात्यथो ऽअन्नेनैवैनमेतदभिषिञ्चति स्वर्देवा अगन्मामृता अभूमेति स्वर्हि गच्छत्यमृतो हि भवति प्रजापतेः प्रजा अभूमेति प्रजापतेर्हि प्रजा भवति वेट् स्वाहेति वषट्कारो ह्येष परोऽक्षं यद्वेट्कारो वषट्कारेण वा वै स्वाहाकारेण वा देवेभ्योऽन्नं प्रदीयते तदेनमेताभ्यामुभाभ्यां प्रीणाति वषट्कारेण च स्वाहाकारेण चाथो ऽएताभ्यामेवैनमेतदुभाभ्यामभिषिञ्चत्यत्र ताꣳ स्रुचमनुप्रास्यति यदत्राज्यलिप्तं तन्नेद्बहिर्धाग्नेरसदिति ॥ १४ ॥ तस्यै वा ऽएतस्यै वसोर्धारायै । द्यौरेवात्माभ्रमूधो विद्युत्स्तनो धारेव धारा दिवोऽधि गामागच्छति ॥ १५ ॥ तस्यै गौरेवात्मा । ऊध एवोध स्तन स्तनो धारेव धारा गोरधि यजमानम् ॥ १६ ॥ तस्यै यजमान एवात्मा । बाहूधः स्रुक्स्तनो धारेव धारा यजमानादधि देवान्देवेभ्योऽधि गां गोरधि यजमानं तदेतदनन्तमक्षय्यं देवा-

नामन्नं परिप्लवते स यो हैतदेवं वेदैवꣳ हैवास्यैतदनन्तमक्षय्यमन्नं भवत्यथातः सम्पदेव ॥१७॥ तदाहुः । कथमस्यैषा वसोर्धारा संवत्सरमग्निमाप्नोति कथꣳ संवत्सरेणाग्निना सम्पद्यतऽइति षष्टिश्च ह वै त्रीणि च शतान्येषा वसोर्धाराथ षडथ पञ्चत्रिꣳशत्ततो यानि षष्टिश्च त्रीणि च शतानि तावन्ति संवत्सरस्याहानि तत्संवत्सरस्याहान्याप्नोत्यथ यानि षट् षड्वाऽऋतवस्तदृतूनाꣳ रात्रीराप्नोति तदुभयानि संवत्सरस्याहोरात्राण्याप्नोत्यथ यानि पञ्चत्रिꣳशत्स त्रयोदशो मासः स आत्मा त्रिꣳशदात्मा प्रतिष्ठा द्वे प्राणा द्वे शिर एव पञ्चत्रिꣳशमेतावान्वै संवत्सर एवमु हास्यैषा वसोर्धारा संवत्सरमग्निमाप्नोत्येवꣳ संवत्सरेणाग्निना सम्पद्यतऽएतावत्य उ वै शाण्डिलेऽग्नौ मध्यतो यजुष्मत्य इष्टका उपधीयन्तेऽग्नयो हैते पृथग्यदेता इष्टका एवमु हास्यैतेऽग्नयः पृथग्वसोर्धारयाभिहुता भवन्ति ॥१८॥ तदाहुः । कथमस्यैषा वसोर्धारा महदुक्थमाप्नोति कथं महतोक्थेन सम्पद्यतऽइत्येतस्याऽएव वसोर्धाराये यानि नव प्रथमानि यजूꣳषि तत्त्रिवृच्छिरोऽथ यान्यष्टाचत्वारिꣳशत्तौ चतुर्विꣳशौ पक्षावथ यानि पञ्चविꣳशतिः स पञ्चविꣳश आत्माथ यान्येकविꣳशतिस्तदेकविꣳशं पुच्छमथ यानि त्रयस्त्रिꣳशत्स वशोऽथ या अशीतयः सैवाशीतीनामाप्तिरशीतिभिर्हि महदुक्थमाख्यायतेऽथ यदूर्ध्वमशीतिभ्यो यदेवादो महत उक्थस्योर्ध्वमशीतिभ्य एतदस्य तदेवमु हास्यैषा वसोर्धारा महदुक्थमाप्नोत्येवं महतोक्थेन सम्पद्यते ॥१९॥ ब्राह्मणम् ॥१ [३. ३.] ॥ ॥

अथातो वाजप्रसवीयं जुहोति । अन्नं वै वाजोऽन्नप्रसवीयꣳ हास्यैतदन्नमेवास्माऽएतेन प्रसौति ॥१॥ एतद्वाऽएनं देवाः । एतेनान्नेन प्रीवितैः कामैरभिषिच्यैतया वसोर्धारयाथैनमेतद्रूप एवाप्रीणंस्तथैवैनमयमेतदेतेनान्नेन प्रीवितैः कामैरभिषिच्यैतया वसोर्धारयाथैनमेतद्रूप एव प्रीणाति ॥२॥ यद्वेवैतद्वाजप्रसवीयं जुहोति । अभिषेक एवास्यैष एतद्वाऽएनं देवा एतेनान्नेन प्रीवितैः कामैरभिषिच्यैतया व-

सोर्धारयाथैनमेतद्भूय एवाभ्यषिञ्चंस्तथैवैनमयमेतदेतेनान्नेन प्रीतैः कामैरभिषिञ्चैतया वसोर्धारयाथैनमेतद्भूय एवाभिषिञ्चति ॥३॥ सर्वौषधं भवति । सर्वमेतदन्नं यत्सर्वौषधꣳ सर्वेणैवैनमेतदन्नेन प्रीणात्यथो सर्वेणैवैनमेतदन्नेनाभिषिञ्चति तेषामेकमन्नमुद्धरेत्तस्य नाश्नीयाद्यावज्जीवमौदुम्बरेण चमसेनौदुम्बरेण स्रुवेण तयोरुक्तो बन्धुश्चतुःस्रक्ती भवतश्चतस्रो वै दिशः सर्वाभ्य एवैनमेतद्दिग्भ्योऽन्नेन प्रीणात्यथो सर्वाभ्य एवैनमेतद्दिग्भ्योऽन्नेनाभिषिञ्चति ॥४॥ यद्वेवैतद्वाजप्रसवीयं जुहोति । एता ह देवताः सुता एतेन सवेन येनैतत्सोष्यमाणो भवति ता एवैतत्प्रीणाति ताऽअस्माऽइष्टाः प्रीता एतꣳ सवमनुमन्यन्ते ताभिरनुमतः सूयते यस्मै वै राजानो राज्यमनुमन्यन्ते स राजा भवति न स यस्मै न तद्यदग्नौ जुहोति तदग्निमभिषिञ्चत्यथ यदेताभ्यो देवताभ्यो जुहोति तदु तान्देवान्प्रीणाति यऽएतस्य सवस्येशते ॥५॥ अथ वाऽएतत्पार्थान्यपि जुहोति । एतद्वै देवा अकामयन्तात्रैव सर्वैः सवैः सूयेमहीति तेऽत्रैव सर्वैः सवैरसूयन्त तथैवैतद्यजमानोऽत्रैव सर्वैः सवैः सूयते ॥६॥ तद्यानि पार्थानि । तानि राजसूयस्य वाजप्रसवीयं तद्यत्तानि जुहोति तद्राजसूयेन सूयतेऽथ यानि चतुर्दशोत्तराणि ततो यानि सप्त पूर्वाणि तानि वाजपेयस्य वाजप्रसवीयं तद्यत्तानि जुहोति तद्वाजपेयेन सूयतेऽथ यानि सप्तोत्तराणि तान्यग्नेस्तद्यत्तानि जुहोति तदग्निसवेन सूयते ॥७॥ स वै राजसूयस्य पूर्वाणि जुहोति । अथ वाजपेयस्य राजा वै राजसूयेनेष्ट्वा भवति सम्राड्वाजपेयेन राज्यमु वाऽअग्रेऽथ साम्राज्यं तस्माद्वाजपेयेनेष्ट्वा न राजसूयेन यजेत प्रत्यवरोहः स यथा सम्राट् सन्राजा स्यात्तादृक्तत् ॥८॥ अग्नेरुत्तमानि जुहोति । सर्वे ह्येते सवा यदग्निसवः सर्वꣳ ह्येतदग्निसवेन सुतो भवति राजा च सम्राट्च तस्मादग्नेरुत्तमानि जुहोति ॥९॥ अथैनं कृष्णाजिनेऽभिषिञ्चति । यज्ञो वै कृष्णाजिनं यज्ञऽएवैनमेतदभिषिञ्चति लोमतश्छन्दाꣳसि वै लोमानि छन्दःस्वेवैनमेतदभि-

षिञ्चत्युत्तरतस्तस्योपरि बन्धुः प्राचीनग्रीवे तद्धि देवत्रा ॥१०॥ तॐ हैके दक्षिणतोऽग्नेरभिषिञ्चन्ति । दक्षिणतो वाऽअन्नस्योपचारस्तदेनमन्नस्यार्धादभिषिञ्चाम इति न तथा कुर्यादेषा वै दिक्पितृणां क्षिप्रे हैतां दिशं प्रैति यं तथाभिषिञ्चन्ति ॥११॥ आहवनीयऽउ हैकेऽभिषिञ्चन्ति । स्वर्गो वै लोक आहवनीयस्तदेनॐ स्वर्गे लोकेऽभिषिञ्चाम इति न तथा कुर्याद्दैवो वाऽअस्यैष आत्मा मानुषोऽयमनेन हास्य ते मर्त्येनात्मनैतं दैवमात्मानमनुप्रसजन्ति यं तथाभिषिञ्चन्ति ॥१२॥ उत्तरत एवैनमभिषिञ्चेत् । एषा ह्योभयेषां देवमनुष्याणां दिग्यदुदीची प्राची स्वायामेवैनमेतद्दिश्यायत्तं प्रतिष्ठितमभिषिञ्चति न वै स्वऽआयतने प्रतिष्ठितो रिष्यति ॥१३॥ आसीनं भूतमभिषिञ्चेत् । आस्तऽइव वै भूतस्तिष्ठन्तं बुभूषन्तं तिष्ठतीव वै बुभूषन्बस्ताजिने पुष्टिकाममभिषिञ्चेत्कृष्णाजिने ब्रह्मवर्चसकाममुभयोरुभयकामं तदुत्तरतः पुच्छस्योत्तरलोम प्राचीनग्रीवमुपस्तृणाति ॥१४॥ आस्पृष्टं परिश्रितः । तद्यत्कृष्णाजिनमास्पृष्टं परिश्रितो भवति तथो हास्यैष दैव आत्मा कृष्णाजिनेऽभिषिक्तो भवत्यथ यदेनमन्वारब्धमग्निं तिष्ठन्तमभिषिञ्चति तथा हैतस्माद्दैवादभिषेकान्न व्यवच्छिद्यते ॥१५॥ अग्नौ हुत्वाथैनमभिषिञ्चति । दैवो वाऽअस्यैष आत्मा मानुषोऽयं देवा उ वाऽअग्रेऽथ मनुष्यास्तस्मादग्नौ हुत्वाथैनं तस्यैव परिशिष्टेनाभिषिञ्चत्यत्र तॐ स्रुवमनुप्रास्यति ॥१६॥ अथैनं दक्षिणं बाहुमनुपर्यावृत्याभिषिञ्चति । देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याॐ सरस्वत्यै वाचो यन्तुर्यन्त्रेणाग्नेः साम्राज्येनाभिषिञ्चामीति वाग्वै सरस्वती तस्या इदॐ सर्वं यन्त्रॐ सवितृप्रसूत एवैनमेतदनेन सर्वेण सरस्वत्यै वाचो यन्तुर्यन्त्रेणाग्नेः साम्राज्येनाभिषिञ्चत्यत्र तं चमसमनुप्रास्यति यदत्र विलिप्तं तन्नेद्बहिर्धाग्नेरसदिति ॥१७॥ तं वै मध्ये पार्थानामभिषिञ्चति । संवत्सरो वै पार्थानि संवत्सरस्यैवैनमेतन्मध्यत आदधाति षट् पुरस्ताज्जुहोति षडुपरिष्टात्षड्वाऽऋतव ऋतुभिरेवैन-

मेतत्सुषुवाणमुभयतः परिगृह्णाति बृहस्पतिः पूर्वेषामुत्तमो भवतीन्द्र उत्तरेषां प्रथमो ब्रह्म वै बृहस्पतिः क्षत्रमिन्द्रो ब्रह्मणा चैवैनमेतत्क्षत्रेण च सुषुवाणमुभयतः परिगृह्णाति ॥१८॥ ब्राह्मणम् ॥२ [३. ४.] ॥ तृतीयोऽध्यायः [५८.] ॥ ॥

अथातो राष्ट्रभृतो जुहोति । राजानो वै राष्ट्रभृतस्ते हि राष्ट्राणि बिभ्रत्येता ह देवताः सुता एतेन सवेन येनैतत्सोष्यमाणो भवति ता एवैतत्प्रीणाति ता अस्मा इष्टाः प्रीता एतꣳ सवमनुमन्यन्ते ताभिरनुमतः सूयते यस्मै वै राजानो राज्यमनुमन्यन्ते स राजा भवति न स यस्मै न तद्यद्राजानो राष्ट्राणि बिभ्रति राजान उ एते देवास्तस्मादेता राष्ट्रभृतः ॥१॥ यद्वेवैता राष्ट्रभृतो जुहोति । प्रजापतेर्विस्रस्तान्मिथुनान्युदक्रामन्गन्धर्वाप्सरसो भूत्वा तानि रथो भूत्वा पर्यगच्छत्तानि परिगत्यात्मन्नधत्तात्मन्नकुरुत तथैवैनान्ययमेतत्परिगत्यात्मन्धत्त आत्मन्कुरुते ॥२॥ स यः स प्रजापतिर्व्यस्रꣳसत । अयमेव स योऽयमग्निश्चीयतेऽथ यान्यस्मात्तानि मिथुनान्युदक्रामन्नेतास्ता देवता याभ्य एतज्जुहोति ॥३॥ गन्धर्वाप्सरोभ्यो जुहोति । गन्धर्वाप्सरसो हि भूत्वोदक्रामन्नथो गन्धेन च वै रूपेण च गन्धर्वाप्सरसश्चरन्ति तस्माद्यः कश्च मिथुनमुपप्रैति गन्धं चैव स रूपं च कामयते ॥४॥ मिथुनानि जुहोति । मिथुनाद्वा अधि प्रजातिर्यो वै प्रजायते स राष्ट्रं भवत्यराष्ट्रं वै स भवति यो न प्रजायते तद्यन्मिथुनानि राष्ट्रं बिभ्रति मिथुना उ एते देवास्तस्मादेता राष्ट्रभृत आज्येन द्वादशगृहीतेन ता उ द्वादशैवाहुतयो भवन्ति तस्योक्तो बन्धुः ॥५॥ पुꣳसे पूर्वस्मै जुहोति । अथ स्त्रीभ्यः पुमाꣳसं तद्वीर्येणात्यादधात्येकस्मा इव पुꣳसे जुहोति बह्वीभ्य इव स्त्रीभ्यस्तस्मादप्येकस्य पुꣳसो बह्व्यो जाया भवन्त्युभाभ्यां वषट्कारेण च स्वाहाकारेण च पुꣳसे जुहोति स्वाहाकारेणैव स्त्रीभ्यः पुमाꣳसमेव तद्वीर्येणात्यादधाति ॥६॥ ऋताषाडृतधामेति । सत्यसाट्
सत्यधामेत्येतदग्निर्गन्धर्वस्तस्यौषधयोऽप्सरस इत्यग्निर्ह गन्धर्व ओषधिभिरप्सरो-

भिर्मिथुनेन सहोच्चक्राम मुदो नामेत्योषधयो वै मुद ओषधिभिर्हीदꣳ सर्वं मोदते
स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट् ताभ्यः स्वाहेति तस्योक्तो बन्धुः
॥७॥ सꣳहित इति । असौ वाऽआदित्यः सꣳहित एष ह्यहोरात्रे संदधाति वि-
श्वसामेत्येष ह्येव सर्वꣳ साम सूर्यो गन्धर्वस्तस्य मरीचयोऽप्सरस इति सूर्यो ह
गन्धर्वो मरीचिभिरप्सरोभिर्मिथुनेन सहोच्चक्रामायुवो नामेत्यायुवाना-इव हि
मरीचयः प्लवन्ते स न इदं ब्रह्म क्षत्रं पात्विति तस्योक्तो बन्धुः ॥८॥ सुषुम्णा
इति । सुयज्ञिय इत्येतत्सूर्यरश्मिरिति सूर्यस्येव हि चन्द्रमसो रश्मयश्चन्द्रमा गन्ध-
र्वस्तस्य नक्षत्राण्यप्सरस इति चन्द्रमा ह गन्धर्वो नक्षत्रैरप्सरोभिर्मिथुनेन सहो-
च्चक्राम भेकुरयो नामेति भाकुरयो ह नामैते भाꣳ हि नक्षत्राणि कुर्वन्ति स न
इदं ब्रह्म क्षत्रं पात्विति तस्योक्तो बन्धुः ॥९॥ इषिर इति । क्षिप्र इत्येतद्विश्व-
व्यचा इत्येष हीदꣳ सर्वं व्यचः करोति वातो गन्धर्वस्तस्यापोऽअप्सरस इति
वातो ह गन्धर्वोऽद्भिरप्सरोभिर्मिथुनेन सहोच्चक्रामोर्जो नामेत्यापो वाऽऊर्जो
ऽद्भ्यो ह्यूर्ग्जायते स न इदं ब्रह्म क्षत्रं पात्विति तस्योक्तो बन्धुः ॥१०॥ भुज्युः
सुपर्ण इति । यज्ञो वै भुज्युर्यज्ञो हि सर्वाणि भूतानि भुनक्ति यज्ञो गन्धर्वस्तस्य
दक्षिणा अप्सरस इति यज्ञो ह गन्धर्वो दक्षिणाभिरप्सरोभिर्मिथुनेन सहोच्चक्राम
स्तावा नामेति दक्षिणा वै स्तावा दक्षिणाभिर्हि यज्ञ स्तूयतेऽथो यो वै कश्च द-
क्षिणां ददाति स्तूयतऽएव स स न इदं ब्रह्म क्षत्रं पात्विति तस्योक्तो बन्धुः
॥११॥ प्रजापतिर्विश्वकर्मेति । प्रजापतिर्वै विश्वकर्मा स हीदꣳ सर्वमकरोन्मनो
गन्धर्वस्तस्यऽऋक्सामान्यप्सरस इति मनो ह गन्धर्व ऋक्सामैरप्सरोभिर्मिथुनेन
सहोच्चक्रामेष्टयो नामेत्यृक्सामानि वाऽएष्टय ऋक्सामैर्ह्याशासतऽइति नोऽस्त्वि-
त्थं नोऽस्त्विति स न इदं ब्रह्म क्षत्रं पात्विति तस्योक्तो बन्धुः ॥१२॥ अथ र-
थशीर्षे जुहोति । एष वै स सव एतद्वै तत्सूयते यमस्मै तमेता देवताः सवम-

नुमन्यन्ते याभिरनुमतः सूयते यस्मै वै राजानो राज्यमनुमन्यन्ते स राजा भवति
न स यस्मै नास्येन पञ्चगृहीतेन ता उ पञ्चैवाकृतयो कृता भवन्ति तस्योक्तो
बन्धुः ॥१३॥ शीर्षतः । शीर्षतो वाऽअभिषिच्यमानोऽभिषिच्यतऽउपरि धार्यमाण
ऽउपरि हि स यमेतदभिषिञ्चति समानेन मन्त्रेण समानो हि स यमेतदभिषिञ्च-
ति सर्वतः परिहारꣳ सर्वत एवैनमेतदभिषिञ्चति ॥१४॥ यद्वेव रथशीर्षे जुहोति
। असौ वाऽआदित्य एष रथ एतद्वै तद्रूपं कृत्वा प्रजापतिरेतानि मिथुनानि प-
रिगत्यात्मन्नधत्तात्मन्नकुरुत तथैवैनान्ययमेतत्परिगत्यात्मन्धत्तऽआत्मन्कुरुतऽउप-
रि धार्यमाणऽउपरि हि स य एतानि मिथुनानि परिगत्यात्मन्नधत्तात्मन्नकुरुत
समानेन मन्त्रेण समानो हि स य एतानि मिथुनानि परिगत्यात्मन्नधत्तात्मन्नकु-
रुत सर्वतः परिहारꣳ सर्वतो हि स य एतानि मिथुनानि परिगत्यात्मन्नधत्ता-
त्मन्नकुरुत ॥१५॥ स नो भुवनस्य पते प्रजापतऽइति । भुवनस्य ह्येष पतिः प्र-
जापतिर्यस्य तऽउपरि गृहा यस्य वेहेत्युपरि च ह्येतस्य गृहा इह चास्मै ब्रह्म-
णेऽस्मै क्षत्रायेत्ययं वाऽअग्निर्ब्रह्म च क्षत्रं च महि शर्म यच्छ स्वाहेति महच्छर्म
यच्छ स्वाहेत्येतत् ॥१६॥ ब्राह्मणम् ॥३ [४. १.] ॥॥

अथ वातहोमान्जुहोति । इमे वै लोका एषोऽग्निर्वायुर्वातहोमा एषु तल्लो-
केषु वायुं दधाति तस्मादयमेषु लोकेषु वायुः ॥१॥ बाह्येनाग्निमाहरति । आप्तो
वाऽअस्य स वायुर्य एषु लोकेष्वथ य इमांल्लोकान्परेण वायुस्तमस्मिन्नेतद्दधाति
॥२॥ बहिर्वेदेरियं वै वेदिः । आप्तो वाऽअस्य स वायुर्योऽस्यामथ य इमां प-
रेण वायुस्तमस्मिन्नेतद्दधाति ॥३॥ अञ्जलिना । न ह्येतस्येतीवाभिपत्तिरस्ति
स्वाहाकारेण जुहोति ह्यधोऽधो धुरमसौ वाऽआदित्य एष रथोऽर्वाचीनं तदा-
दित्याद्वायुं दधाति तस्मादेषोऽर्वाचीनमेवातः पवते ॥४॥ समुद्रोऽसि नभस्वा-
निति । असौ वै लोकः समुद्रो नभस्वानार्द्रदानुरित्येष ह्यार्द्रं ददाति तद्योऽमु-

ष्मिंल्लोके वायुस्तमस्मिन्नेतद्दधाति शम्भूर्मयोभूरभि मा वाहि स्वाहेति शिवः स्योनोऽभि मा वाहीत्येतत् ॥५॥ मारुतोऽसि मरुतां गण इति । अन्तरिक्षलोको वै मारुतो मरुतां गणस्तस्योऽन्तरिक्षलोके वायुस्तमस्मिन्नेतद्दधाति शम्भूर्मयोभूरभि मा वाहि स्वाहेति शिवः स्योनोऽभि मा वाहीत्येतत् ॥६॥ अवस्यूरसि दुवस्वानिति । अयं वै लोकोऽवस्यूर्दुवस्वांस्तस्योऽस्मिंल्लोके वायुस्तमस्मिन्नेतद्दधाति शम्भूर्मयोभूरभि मा वाहि स्वाहेति शिवः स्योनोऽभि मा वाहीत्येतत् ॥७॥ त्रिभिर्जुहोति । त्रय इमे लोका अथो त्रिवृदग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैव तदेषु लोकेषु वायुं दधाति ॥८॥ यद्वेव वातहोमाञ्जुहोति । एतमेवैतद्रथं युनक्त्येतद्धि देवा एतꣳ रथꣳ सर्वेभ्यः कामेभ्योऽयुञ्जत युक्तेन समश्नवामहाऽइति तेन युक्तेन सर्वान्कामान्त्समाश्नुवत तथैवैतद्यजमान एतꣳ रथꣳ सर्वेभ्यः कामेभ्यो युङ्क्ते युक्तेन समश्नवाऽइति तेन युक्तेन सर्वान्कामान्त्समश्नुते ॥९॥ वातहोमैर्युनक्ति । प्राणा वै वातहोमाः प्राणैरेवैनमेतद्युनक्ति त्रिभिर्युनक्ति त्रयो वै प्राणाः प्राण उदानो व्यानस्तैरेवैनमेतद्युनक्त्यधोऽधो धुरमधोऽधो हि धुरं योग्यं युञ्जन्ति हस्ताभ्याꣳ हस्ताभ्याꣳ हि योग्यं युञ्जन्ति विपरिक्रामं विपरिक्रामꣳ हि योग्यं युञ्जन्ति ॥१०॥ स दक्षिणायुग्यमेवाग्रे युनक्ति । अथ सव्यायुग्यमथ दक्षिणाप्रष्टिमेवं देवत्रेतरथा मानुषे तं नाभियुञ्ज्यान्नेद्युक्तमभियुनजानीति वाहनं तु दद्याद्युक्तेन भुनजाऽइति तमुपर्येव हरन्त्याध्वर्योरावसथादुपरि ह्येष तमध्वर्यवे ददाति स हि तेन करोति तं तु दक्षिणानां कालेऽनुदिशेत् ॥११॥ अथ रुक्मतीर्जुहोति । अत्रैष सर्वोऽग्निः संस्कृतः स एषोऽत्र रुचमैच्छत्तस्मिन्देवा एताभी रुक्मतीभी रुचमदधुस्तथैवास्मिन्नयमेतद्दधाति ॥१२॥ यद्वेव रुक्मतीर्जुहोति । प्रजापतेर्विस्रस्ताद्रुगुदक्रामत्तं यत्र देवाः समस्कुर्वंस्तदस्मिन्नेताभी रुक्मतीभी रुचमदधुस्तथैवास्मिन्नयमेतद्दधाति ॥१३॥ ॥ शतम् ५००० ॥ ॥ यास्तेऽअग्ने सूर्ये रुचः । या

वो देवाः सूर्ये रुचो रुचं नो धेहि ब्राह्मणेष्विति रुचꣳ रुचमित्यमृतत्वं वै रुग-
मृतत्वमेवास्मिन्नेतद्दधाति तिस्र आहुतीर्जुहोति त्रिवृदग्निर्यावानग्निर्यावत्यस्य मात्रा
तावतैवास्मिन्नेतद्रुचं दधाति ॥१४॥ अथ वारुणीं जुहोति । अत्रैष सर्वोऽग्निः
संस्कृतः स एषोऽत्र वरुणो देवता तस्माऽएतद्धविर्जुहोति तदेनꣳ हविषा देव-
तां करोति यस्यै वै देवतायै हविर्गृह्यते सा देवता न सा यस्यै न गृह्यते वा-
रुण्यर्चा स्वेनैवैनमेतदात्मना स्वया देवतया प्रीणाति ॥१५॥ यद्वेव वारुणीं
जुहोति । प्रजापतेर्विस्रस्ताद्वीर्यमुदक्रामत्तं यत्र देवाः समस्कुर्वंस्तदस्मिन्नेतया वी-
र्यमदधुस्तथैवास्मिन्नयमेतद्दधाति वारुण्यर्चा क्षत्रं वै वरुणो वीर्यं वै क्षत्रं वीर्ये-
णैवास्मिन्नेतद्वीर्यं दधाति ॥१६॥ तत्त्वा यामि ब्रह्मणा वन्दमान इति । तत्त्वा याचे
ब्रह्मणा वन्दमान इत्येतत्तदाशास्ते यजमानो हविर्भिरिति तदयमाशास्ते यज-
मानो हविर्भिरित्येतदहेडमानो वरुणेह बोधीत्यक्रुध्यन्नो वरुणेह बोधीत्येतदु-
रुशꣳस मा न आयुः प्रमोषीरित्यात्मनः परिदां वदते ॥१७॥ अथार्काश्वमेधयोः
संततीर्जुहोति । अयं वाऽअग्निरर्कोऽसावादित्योऽश्वमेधस्तौ सृष्टौ नानेवास्तां
तौ देवा एताभिराहुतिभिः समतन्वन्त्समदधुस्तथैवैनावयमेतदेताभिराहुतिभिः सं-
तनोति संदधाति ॥१८॥ स्वर्ण घर्मः स्वाहेति । असौ वाऽआदित्यो घर्मोऽमुं
तदादित्यमस्मिन्नग्नौ प्रतिष्ठापयति ॥१९॥ स्वर्णार्कः स्वाहेति । अयमग्निरर्क इमं
तदग्निममुष्मिन्नादित्ये प्रतिष्ठापयति ॥२०॥ स्वर्ण शुक्रः स्वाहेति । असौ वाऽआ-
दित्यः शुक्रस्तं पुनरमुत्र दधाति ॥२१॥ स्वर्ण ज्योतिः स्वाहेति । अयमग्निर्ज्यो-
तिस्तं पुनरिह दधाति ॥२२॥ स्वर्ण सूर्यः स्वाहेति । असौ वाऽआदित्यः सूर्यो
ऽमुं तदादित्यमस्य सर्वस्योत्तमं दधाति तस्मादेषोऽस्य सर्वस्योत्तमः ॥२३॥ पञ्चै-
ता आहुतीर्जुहोति । पञ्चचितिकोऽग्निः पञ्चऽर्तवः संवत्सरः संवत्सरोऽग्निर्यावा-
नग्निर्यावत्यस्य मात्रा तावतैवैनावेतत्संतनोति संदधाति ॥२४॥ यद्वेवाह । स्वर्ण

घर्मः स्वाहा स्वर्णार्कः स्वाहेत्यस्यैवैतान्यग्नेर्नामानि तान्येतत्प्रीणाति तानि ह-
विषा देवतां करोति यस्यै वै देवतायै हविर्गृह्यते सा देवता न सा यस्यै न
गृह्यतेऽथोऽएतानेवैतदग्नीनस्मिन्नग्नौ नामग्राहं दधाति ॥२५॥ पञ्चैता आहुतीर्जु-
होति । पञ्चचितिकोऽग्निः पञ्चऽर्तवः संवत्सरः संवत्सरोऽग्निर्यावानग्निर्यावत्यस्य
मात्रा तावतैवैनमेतदन्नेन प्रीणाति ॥२६॥ अथात आहुतीनामेवावपनस्य । यां
कां च ब्राह्मणवतीमाहुतिं विद्यात्तामेतस्मिन्काले जुहुयात्कामेभ्यो वाऽएतꣳ
रथं युङ्क्ते तद्यां कां चात्राहुतिं जुहोत्याप्तां ताꣳ सतीं जुहोति ॥२७॥ तदाहुः ।
न जुहुयान्नेदतिरेचयानीति स वै जुहुयादेव कामेभ्यो वाऽएता आहुतयो हू-
यन्ते न वै कामानामतिरिक्तमस्ति ॥२८॥ ब्राह्मणम् ॥ ४ [४. २.] ॥ ॥

अथ प्रत्येत्य धिष्ण्यानां काले धिष्ण्यान्निवपति । अग्नय एते यद्धिष्ण्या अग्नीने-
वैतच्चिनोति ता एता विशः क्षत्रमयमग्निश्चितः क्षत्रं च तद्विशं च करोत्यमुं पूर्वं
चिनोत्यथेमान्क्षत्रं तत्कृत्वा विशं करोति ॥१॥ एक एष भवति । एकस्थं त-
त्क्षत्रमेकस्थाꣳ श्रियं करोति बहुव इतरे विशि तद्भूमानं दधाति ॥२॥ पञ्चचि-
तिक एष भवति । एकचितिका इतरे क्षत्रं तद्वीर्येणात्यादधाति क्षत्रं विशो वी-
र्यवत्तरं करोत्यूर्ध्वमेतं चिनोति क्षत्रं तदूर्ध्वं चितिभिश्चिनोति तिरश्च इतरान्क्षत्राय
तद्विशमधस्तादुपनिषादिनीं करोति ॥३॥ उभाभ्यां यजुष्मत्या च लोकम्पृणया
चैतं चिनोति । लोकम्पृणयैवेमान्क्षत्रमेव तद्वीर्येणात्यादधाति क्षत्रं विशो वी-
र्यवत्तरं करोति विशं क्षत्रादवीर्यतराम् ॥४॥ स यदिमांल्लोकम्पृणयैव चिनोति
क्षत्रं वै लोकम्पृणा क्षत्रं तद्विश्यत्तारं दधात्युभयांश्चिनोत्यधरस्य चाग्नेश्चाधरस्य
पूर्वानथाग्नेस्तस्योक्तो बन्धुर्य-यमेवाधरधिष्ण्यं निवपति तं-तं चिनोत्याग्नीध्रीयं प्र-
थमं चिनोति तꣳ हि प्रथमं निवपति दक्षिणत उदङ्ङासीनस्तस्योक्तो बन्धुः ॥५॥
तस्मिन्नष्टाविष्टका उपदधाति । अष्टाक्षरा गायत्री गायत्रोऽग्निर्यावानग्निर्यावत्यस्य

मात्रा तावत्तमेवैनमेतच्चिनोति तासामश्मा पृश्निर्नवमो नव वै प्राणाः सप्त शीर्षन्न-
वाञ्चौ द्वौ तानेवास्मिन्नेतद्दधाति यश्चितेऽग्निर्निधीयते स दशमो दश वै प्राणा
मध्यमाग्नीध्रं मध्यतस्तत्प्राणान्दधाति मध्ये ह वाऽएतत्प्राणाः सन्त इति चेति चा-
त्मानमनुव्युच्चरन्ति ॥ ६॥ एकविꣳशतिꣳ होत्रीयऽउपदधाति । एकविꣳशतिर्वै
परिश्रितस्तस्योक्तो बन्धुरेकादश ब्राह्मणाच्छꣳस्यऽएकादशाक्षरा वै त्रिष्टुप्त्रैष्टुभ
इन्द्र ऐन्द्रो ब्राह्मणाच्छꣳस्यष्टावष्टावितरेषु तस्योक्तो बन्धुः ॥ ७॥ षण्मार्जालीये
। षड्वाऽऋतवः पितरस्तꣳ हैतमृतवः पितरो दक्षिणतः पर्यूहिरे स एषामेष द-
क्षिणतः स वाऽइतीममुपदधातीतीमानित्यमुं विशं तत्क्षत्रमभिसंमुखां करोति
॥ ८॥ अथैनान्परिश्रिद्भिः परिश्रयति । आपो वै परिश्रितोऽद्भिरेवैनांस्तत्परितनो-
ति स वै पर्येव निदधाति क्षत्रꣳ हैता अपां याः खातेन यन्त्यथ हैता विशो या-
नीमानि वृथोदकानि स यदमुं खातेन परिश्रयति क्षत्रे तत्क्षत्रं दधाति क्षत्रं क्ष-
त्रेण परिश्रयत्यथ यदिमान्पर्येव निदधाति विशि तद्विशं दधाति विशा विशं प-
रिश्रयति तेषां वै यावत्य एव यजुष्मत्यस्तावत्यः परिश्रितो यावत्यो ह्येवामुष्य
यजुष्मत्यस्तावत्यः परिश्रितः क्षत्रायैव तद्विशं कृतानुकरामनुवर्त्मानं करोति ॥ ९॥
अथैषु पुरीषं निवपति । तस्योक्तो बन्धुस्तूष्णीमनिरुक्ता हि विडथाग्नीषोमीयस्य
पशुपुरोडाशमनु दिशामवेष्टीर्निर्वपति दिश एषोऽग्निस्ताभ्य एतानि हवीꣳषि
निर्वपति तदेना हविषा देवतां करोति यस्यै वै देवतायै हविर्गृह्यते सा देवता
न सा यस्यै न गृह्यते पञ्च भवन्ति पञ्च हि दिशः ॥ १०॥ तदाहुः । दशहविष-
मेवैतामिष्टिं निर्वपेत्सा सर्वस्तोमा सर्वपृष्ठा सर्वाणि छन्दाꣳसि सर्वा दिशः सर्व
ऽऋतवः सर्वम्वेतदयमग्निस्तदेनꣳ हविषा देवतां करोति यस्यै वै देवतायै ह-
विर्गृह्यते सा देवता न सा यस्यै न गृह्यते दश भवन्ति दशाक्षरा विराड्विराड-
ग्निर्दश दिशो दिशोऽग्निर्दश प्राणाः प्राणा अग्निर्यावानग्निर्यावत्यस्य मात्रा ताव-

तैर्वैनमेतदन्नेन प्रीणाति ॥११॥ तद्वै देवस्वामेव । एतानि हवीꣳषि निर्वपेदे-
ता ह देवताः सुता एतेन सवेन येनैतत्सोष्यमाणो भवति ता एवैतत्प्रीणाति
ताऽअस्माऽइष्टाः प्रीता एतꣳ सवमनुमन्यन्ते ताभिरनुमतः सूयते यस्मै वै राजा-
नो राज्यमनुमन्यन्ते स राजा भवति न स यस्मै न तद्यदेता देवताः सुता एतेन
सवेन यद्वेनमेता देवता एतस्मै सवाय सुवते तस्मादेता देवस्वः ॥१२॥ ता वै
द्विनाम्न्यो भवन्ति । द्विनामा वै सवेन सुतो भवति यस्मै वै सवाय सूयते येन
वा सवेन सूयते तदस्य द्वितीयं नाम ॥१३॥ अष्टौ भवन्ति । अष्टाक्षरा गायत्री
गायत्रोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतदन्नेन प्रीणाति ॥१४॥ तदा-
हुः । नैतानि हवीꣳषि निर्वपेन्नेदतिरेचयानीति तानि वै निर्वपेदेव कामेभ्यो
वाऽएतानि हवीꣳषि निरुप्यन्ते न वै कामानामतिरिक्तमस्ति यद्वै किं च पशुपु-
रोडाशमनु हविर्निरुप्यते पशावेव स मध्यतो मेधो धीयतऽउभयानि निर्वपत्य-
धरस्य चाग्नेश्चाधरस्य पूर्वमथाग्नेस्तस्योक्तो बन्धुरुच्चैः पशुपुरोडाशो भवत्युपाꣳश्वे-
तानीष्टिर्ह्यनुब्रूहि प्रेष्येति पशुपुरोडाशस्याह्वानुब्रूहि यजेत्येतेषामिष्टिर्हि समानः
स्विष्टकृत्समानीडेष्टा देवता भवन्त्यसमवहितꣳ स्विष्टकृते ॥१५॥ अथैनं पूर्वा-
भिषेकेणाभिमृशति । सविता त्वा सवानाꣳ सुवतामिष वोऽमी राजा सोमोऽस्मा-
कं ब्राह्मणानाꣳ राजेति ब्राह्मणानेवापोद्धरत्यनाद्यान्करोति ॥१६॥ ब्राह्मणम्
॥ ५ [४. ३.] ॥ तृतीयः प्रपाठकः ॥ कण्डिकासंख्या९७ ॥ ॥

अथ प्रातः प्रातरनुवाकमुपाकरिष्यन् । अग्निं युनक्ति युक्तेन समश्नवाऽइति
तेन युक्तेन सर्वान्कामान्त्समश्नुते तं वै पुरस्तात्सर्वस्य कर्मणो युनक्ति तद्यत्किं
चात्र ऊर्ध्वं क्रियते युक्ते तत्सर्वꣳ समाधीयते ॥१॥ परिधिषु युनक्ति । अग्नय एते
यत्परिधयोऽग्निभिरेव तदग्निं युनक्ति ॥२॥ स मध्यमं परिधिमुपस्पृश्य । एतद्य-
जुर्जपत्यग्निं युनज्मि शवसा घृतेनेति बलं वै शवोऽग्निं युनज्मि बलेन च घृतेन

चेत्येतद्दिव्यꣳ सुपर्णं वयसा बृहन्तमिति दिव्यो वाऽएष सुपर्णो वयसो बृहन्धूमेन तेन वयं गमेम ब्रध्नस्य विष्टपꣳ स्वो रुहाणा अधि नाकमुत्तममिति स्वर्गो वै लोको नाकस्तेन वयं गमेम ब्रध्नस्य विष्टपꣳ स्वर्गं लोकꣳ रोहन्तोऽधि नाकमुत्तममित्येतत् ॥३॥ अथ दक्षिणे । इमौ ते पक्षावजरौ पतत्रिणौ याभ्याꣳ रक्षाꣳस्यपहꣳस्यग्ने ताभ्यां पतेम सुकृतामु लोकं यत्रऽऋषयो जग्मुः प्रथमजाः पुराणा इत्यमूनेतदृषीनाह ॥४॥ अथोत्तरे । इन्दुर्दक्षः श्येन ऋतावा हिरण्यपक्षः शकुनो भुरण्युरित्यमृतं वै हिरण्यममृतपक्षः शकुनो भर्तेत्येतन्महाꣳस्सधस्थे ध्रुव आ निषत्तो नमस्तेऽअस्तु मा मा हिꣳसीरित्यात्मनः परिदां वदते ॥५॥ तद्यन्मध्यमं यजुः । स आत्माथ येऽअभितस्तौ पक्षौ तस्मात्ते पक्षवती भवतः पक्षौ हि तौ ॥६॥ त्रिभिर्युनक्ति । त्रिवृदग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतद्युनक्ति ॥७॥ अथ राजानमभिषुत्याग्नौ जुहोति । एष वै स सव एतद्धि तत्सूयते यमस्मै तमेता देवताः सवमनुमन्यन्ते याभिरनुमतः सूयते यस्मै वै राजानो राज्यमनुमन्यन्ते स राजा भवति न स यस्मै न तद्यदग्नौ जुहोति तदग्निमभिषिञ्चति सोऽस्यैष दैव आत्मा सोमाभिषिक्तो भवत्यमृताभिषिक्तोऽथ भक्षयति तदात्मानमभिषिञ्चति सोऽस्यायमात्मा सोमाभिषिक्तो भवत्यमृताभिषिक्तः ॥८॥ अग्नौ हुत्वाथ भक्षयति । दैवो वाऽअस्यैष आत्मा मानुषोऽयं देवा उ वाऽअग्रेऽथ मनुष्यास्तस्मादग्नौ हुत्वाथ भक्षयति ॥९॥ अथैनं विमुञ्चति । आप्त्वा तं कामं यस्मै कामायैनं युङ्क्ते यज्ञायज्ञियꣳ स्तोत्रमुपाकरिष्यन्त्स्वर्गो वै लोको यज्ञायज्ञियमेतस्य वै गत्याऽएनं युङ्क्ते तदाप्त्वा तं कामं यस्मै कामायैनं युङ्क्ते ॥१०॥ तं वै पुरस्तात्स्तोत्रस्य विमुञ्चति । स यदुपरिष्टात्स्तोत्रस्य विमुञ्चेत्पराङ् हैतꣳ स्वर्गं लोकमतिप्रणश्येदथ यत्पुरस्तात्स्तोत्रस्य विमुञ्चति तत्सम्प्रति स्वर्गं लोकमाप्त्वा विमुञ्चति ॥११॥ परिधिषु विमुञ्चति । परिधिषु ह्येनं युनक्ति यत्र वाव योग्यं युञ्जन्ति तदेव

तद्विमुञ्चन्ति ॥१२॥ स संध्योरुपस्पृश्य । एते यजुषी जपति तथा ह्ये यजुषी त्रीन्प-
रिधीननुविभवतो दिवो मूर्धासि पृथिव्या नाभिरिति दक्षिणे विश्वस्य मूर्धन्नधि
तिष्ठसि श्रित इत्युत्तरे मूर्धवतीभ्यां मूर्धा ह्यस्यैषोऽप्सुमतीभ्यामग्नेरेतद्वैश्वानरस्य
स्तोत्रं यद्यज्ञायज्ञियꣳ शान्तिर्वाऽआपस्तस्मादप्सुमतीभ्याम् ॥१३॥ द्वाभ्यां विमुञ्च-
ति । द्विपाद्यजमानो यजमानोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतद्विमु-
ञ्चति त्रिभिर्युनक्ति तत्पञ्च पञ्चचितिकोऽग्निः पञ्चऽर्तवः संवत्सरः संवत्सरोऽग्नि-
र्यावानग्निर्यावत्यस्य मात्रा तावत्तद्भवति ॥१४॥ तꣳ हैके । प्रायणीयऽएवातिरात्रे
युञ्जन्त्युदयनीये विमुञ्चन्ति सꣳस्थारूपं वाऽएतद्यद्विमोचनं किं पुरा सꣳस्थायै सꣳ-
स्थारूपं कुर्यामेति न तथा कुर्यादहरहर्वाऽएष यज्ञस्तायतेऽहरहः संतिष्ठतेऽह-
रहरेनꣳ स्वर्गस्य लोकस्य गत्यै युङ्क्तेऽहरहरेनेन स्वर्गं लोकं गच्छति तस्मादह-
रहरेव युञ्ज्यादहरहर्विमुञ्चेत् ॥१५॥ अथो यथा प्रायणीयेऽतिरात्रे । सामिधेनी-
रनूच्य ब्रूयादुदयनीयऽएवातोऽनुवक्तास्मीति तादृक्तत्तस्मादहरहरेव युञ्ज्यादह-
रहर्विमुञ्चेत् ॥१६॥ तद्धैतच्छाण्डिल्यः । कङ्कतीयेभ्योऽहरहःकर्म प्रदिश्य प्रवव्राजा-
हरहरेव वो युनजानहरहर्विमुञ्चानिति तस्मादहरहरेव युञ्ज्यादहरहर्विमुञ्चेत्
॥१७॥ ब्राह्मणम् ॥१ [४. ४.]॥ चतुर्थोऽध्यायः [५१.] ॥ ॥

अथातः पयोव्रततायै । पयोव्रतो दीक्षितः स्याद्देवेभ्यो ह वाऽअमृतमपचक्रा-
म ॥१॥ ते होचुः । श्रमेण तपसेदमन्विच्छामेति तच्छ्रमेण तपसान्वैच्छंस्ते दीक्षिता
पयोव्रता अभवन्नेतद्धि तपो यो दीक्षिता पयोव्रतोऽसत्तस्य घोषमाशुश्रुवुः ॥२॥
ते होचुः । नेदीयो वै भवति भूयस्तप उपायामेति ते त्रीन्त्स्तनानुपेयुस्तत्परादद-
दृशुः ॥३॥ ते होचुः । नेदीयो वै भवति भूयस्तप उपायामेति ते द्वौ स्तनाऽउ-
पेयुस्तन्नेदीयसः परादददृशुः ॥४॥ ते होचुः । नेदीयो वै भवति भूयस्तप उपाया-
मेति तऽएकꣳ स्तनमुपेयुस्तदधिजगाम न त्वभिपत्तुꣳ शेकुः ॥५॥ ते होचुः ।

अधि वाऽअगन्न त्वभिपत्तुꣳ शक्नुमः सर्वं तप उपायामेति तऽउपवसथेऽनाशक-
मुपेयुरेतद्वै सर्वं तपो यदनाशकस्तस्मादुपवसथे नाश्नीयात् ॥६॥ तत्प्रातरभिपद्य
। अभिषुत्याग्नावजुह्वुस्तदग्नावमृतमदधुः सर्वेषामु ह्येष देवानामात्मा यदग्निस्तद्य-
दग्नावमृतमदधुस्तदात्मन्नमृतमदधत ततो देवा अमृता अभवन् ॥७॥ तद्यत्तदमृ-
तꣳ सोमः स । तद्यापि यजमानः श्रमेण तपसान्विच्छति स दीक्षित्वा पयोव्रतो
भवत्येतद्वै तपो यो दीक्षित्वा पयोव्रतोऽसत्तस्य घोषमाशृणोतीत्यद्धे क्रय इति
॥८॥ स त्रीन्स्तनानुपैति । तत्परापश्यति स द्वौ स्तनाऽउपैति तन्नेदीयसः परा-
पश्यति सऽएकꣳ स्तनमुपैति तदधिगच्छति न त्वभिपत्तुꣳ शक्नोति स उपवसथे
ऽनाशकमुपैत्येतद्वै सर्वं तपो यदनाशकस्तस्मादुपवसथे नाश्नीयात् ॥९॥ तत्प्रा-
तरभिपद्य । अभिषुत्याग्नौ जुहोति तदग्नावमृतं दधात्यथ भक्षयति तदात्मन्नमृतं
धत्ते सोऽमृतो भवत्येतद्वै मनुष्यस्यामृतत्वं यत्सर्वमायुरेति तथो ह्यनेनात्मना
सर्वमायुरेति ॥१०॥ अग्नौ हुत्वाथ भक्षयति । दैवो वाऽअस्यैष आत्मा मानुषो
ऽयं देवा उ वाऽअग्रेऽथ मनुष्यास्तस्मादग्नौ हुत्वाथ भक्षयति ॥११॥ अथातः स-
मिष्टयजुषामिव मीमाꣳसा । देवाश्चासुराश्चोभये प्राजापत्याः प्रजापतेः पितुर्दायमुपे-
युर्वाचमेव सत्यानृते सत्यं चैवानृतं च तऽउभयऽएव सत्यमवदन्नुभयेऽनृतं ते ह
सदृशं वदन्तः सदृशा एवासुः ॥१२॥ ते देवा उत्सृज्यानृतम् । सत्यमन्वालेभिरे
ऽसुरा उ होत्सृज्य सत्यमनृतमन्वालेभिरे ॥१३॥ तद्धेदꣳ सत्यमीक्षां चक्रे । यद्-
सुरेष्वास देवा वाऽउत्सृज्यानृतꣳ सत्यमन्वालप्सत हन्त तदयानीति तद्देवाना-
जगाम ॥१४॥ अनृतमु हेक्षां चक्रे । यद्देवेष्वासासुरा वाऽउत्सृज्य सत्यमनृतमन्वा-
लप्सत हन्त तदयानीति तदसुरानाजगाम ॥१५॥ ते देवाः । सर्वꣳ सत्यमवदन्त्स-
र्वमसुरा अनृतं ते देवा आसक्ति सत्यं वदन्त ऐषावीरतरा-इवासुरनाढ्यतरा-इव
तस्मादु हैतद्य आसक्ति सत्यं वदत्यैषावीरतर-इवैव भवत्यनाढ्यतर-इव स ह

त्वेवान्ततो भवति देवा ह्येवान्ततोऽभवन् ॥१६॥ अथ हासुराः । आसत्त्यनृतं वदन्त ऊष-इव पिपिसुराढ्या-इवासुस्तस्माद्ध हैतद्य आसत्त्यनृतं वदत्यूषऽइवैव पिस्यत्याढ्य-इव भवति परा ह त्वेवान्ततो भवति परा ह्यसुरा अभवन् ॥१७॥ तद्यत्तत्सत्यम् । त्रयी सा विद्या ते देवा अब्रुवन्यज्ञं कृत्वेदꣳ सत्यं तनवामहा ऽइति ॥१८॥ ते दीक्षणीयां निरवपन् । तद्ध हासुरा अनुबुबुधिरे यज्ञं वै कृत्वा तद्देवाः सत्यं तन्वते प्रेत तदाहरिष्यामो यदस्माकं तत्रेति तस्य समिष्टयजुरकृतमासाथाजग्मुस्तस्मात्तस्य यज्ञस्य समिष्टयजुर्न जुह्वति ते देवा असुरान्प्रतिदृश्य समुच्छुप्य यज्ञमन्यत्कर्तुं दध्रिरेऽन्यद्धि कुर्वन्तीति पुनः प्रेयुः ॥१९॥ तेषु प्रेतेषु । प्रायणीयं निरवपंस्तद्ध हासुरा अन्वेव बुबुधिरे तस्य शम्योरकृतमासाथाजग्मुस्तस्मात्स यज्ञः शम्य्वन्तस्ते देवा असुरान्प्रतिदृश्य समुच्छुप्य यज्ञमन्यदेव कर्तुं दध्रिरेऽन्यद्धि कुर्वन्तीति पुनरेव प्रेयुः ॥२०॥ तेषु प्रेतेषु । राजानं क्रीत्वा पर्युह्याथास्मा ऽआतिथ्यꣳ हविर्निरवपंस्तद्ध हासुरा अन्वेव बुबुधिरे तस्येडोपहूतासाथाजग्मुस्तस्मात्स यज्ञ इडान्तस्ते देवा असुरान्प्रतिदृश्य समुच्छुप्य यज्ञमन्यदेव कर्तुं दध्रिरे ऽन्यद्धि कुर्वन्तीति पुनरेव प्रेयुः ॥२१॥ तेषु प्रेतेषु । उपसदोऽतन्वत ते तिस्र एव सामिधेनीरनूच्य देवता एवायजन्न प्रयाजान्नानुयाजानुभयतो यज्ञस्योदसादयन्भूयिष्ठꣳ हि तत्राह्वरन्त तस्मादुपसत्सु तिस्र एव सामिधेनीरनूच्य देवता एव यजति न प्रयाजान्नानुयाजानुभयतो यज्ञस्योत्सादयति ॥२२॥ तऽउपवसथेऽग्नीषोमीयं पशुमालेभिरे । तद्ध हासुरा अन्वेव बुबुधिरे तस्य समिष्टयजूꣳष्यकृतान्यासुरथाजग्मुस्तस्मात्तस्य पशोः समिष्टयजूꣳषि न जुह्वति ते देवा असुरान्प्र° ॥२३॥ तेषु प्रेतेषु । प्रातः प्रातःसवनमतन्वत तद्ध हासुरा अन्वेव बुबुधिरे तस्यैतावत्कृतमास यावत्प्रातःसवनमथाजग्मुस्ते देवा असुरान्प्र° ॥२४॥ तेषु प्रेतेषु । माध्यन्दिनꣳ सवनमतन्वत तद्ध हासुरा अन्वेव बुबुधिरे तस्यैतावत्कृतमास यावन्मा-

ध्यन्दिनमथाजग्मुस्ते देवा असुरान्प्र॰ ॥२५॥ तेषु प्रेतषु । सवनीयेन पशुनाचरंस्तद्ध ह्यासुरा अन्वेव बुबुधिरे तस्यैतावत्कृतमास यावदेतस्य पशोः क्रियतेऽथाजग्मुस्ते देवा असुरान्प्र॰ ॥२६॥ तेषु प्रेतेषु । तृतीयसवनमतन्वत तत्समस्थापयन्यत्समस्थापयंस्तत्सर्वꣳ सत्यमाप्नुवंस्ततोऽसुरा अपपुप्रुविरे ततो देवा अभवन्परासुरा भवत्यात्मना परास्य द्विषन्भ्रातृव्यो भवति य एवं वेद ॥२७॥ ते देवा अब्रुवन् । ये न इमे यज्ञाः सामिसꣳस्थिता यानिमान्विजह्मतोऽगामोप तज्जानीत यथेमान्सꣳस्थापयामेति तेऽब्रुवंश्चेतयध्वमिति चितिमिच्छतेति वाव तदब्रुवंस्तदिच्छत यथेमान्यज्ञान्सꣳस्थापयामेति ॥२८॥ ते चेतयमानाः । एतानि समिष्टयजूꣳष्यपश्यंस्तान्यजुहवुस्तै रेतान्यज्ञान्समस्थापयन्यत्समस्थापयंस्तस्मात्सꣳस्थितयजूꣳष्यथ यत्समयजंस्तस्मात्समिष्टयजूꣳषि ॥२९॥ ते वा एते नव यज्ञाः । नवैतानि समिष्टयजूꣳषि तद्यदेतानि जुहोत्येतानेवैतद्यज्ञान्सꣳस्थापयत्युभयानि जुहोत्यधरस्य चाग्नेश्चाधरस्य पूर्वाण्यथाग्नेस्तस्योक्तो बन्धुः ॥३०॥ द्वे अग्नेर्जुहोति । द्विपाद्यजमानो यजमानोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैतद्यज्ञꣳ सꣳस्थापयतीष्टो यज्ञो भृगुभिरिष्टोऽअग्निराहुतः पिपर्तु न इति ॥३१॥ तान्युभयान्येकादश सम्पद्यन्ते । एकादशाक्षरा त्रिष्टुब्वीर्यं त्रिष्टुब्वीर्यमेवैतद्यज्ञमभिसम्पादयन्ति ॥३२॥ यद्वेवैकादश । एकादशाक्षरा वै त्रिष्टुप्त्रैष्टुभ इन्द्र इन्द्रो यज्ञस्यात्मेन्द्रो देवता तद्य एव यज्ञस्यात्मा या देवता तस्मिन्नेवैतद्यज्ञमन्ततः प्रतिष्ठापयति ॥३३॥ समिष्टयजूꣳषि हुत्वावभृथं यन्ति । अवभृथादुदेत्योदयनीयेन चरित्वानूबन्ध्यस्य पशुपुरोडाशमनु देविकानाꣳ हवीꣳषि निर्वपति ॥३३॥ एतद्धि प्रजापतिः । प्राप्य राद्ध्वेवामन्यत स दिक्षु प्रतिष्ठायेदꣳ सर्वं दधद्विदधदतिष्ठद्यद्दधद्विदधदतिष्ठत्तस्माद्धाता तथैवैतद्यजमानो दिक्षु प्रतिष्ठायेदꣳ सर्वं दधद्विदधत्तिष्ठति ॥३५॥ यद्वेवैतानि हवीꣳषि निर्वपति । दिश एषोऽग्निस्ता उ एवामूः पुरस्ताद्दर्भस्तम्बं च लोगेष्टकाश्चोपदधाति

ताः प्राणभृतः प्रथमायां चितौ सर्वैव द्वितीया सर्वा तृतीया सर्वा चतुर्थ्यथ पञ्चम्यै चितेरसपत्ना नाकसदः पञ्चचूडास्ता ऊर्ध्वा उत्क्रामन्त्य आयंस्ताभ्यः प्रजापतिरबिभेत्सर्वं वाऽइदमिमाः पराच्योऽत्येष्यन्तीति ता धाता भूत्वा पर्यगच्छत्तासु प्रत्यतिष्ठत् ॥३६॥ स यः स धातासौ स आदित्यः । अथ यत्तद्दिशां परमं क्रान्तमेतत्तत्तस्मिन्नेष एतत्प्रतिष्ठितस्तपति ॥३७॥ स यः स धातायमेव स धात्रः । द्वादशकपालः पुरोडाशो द्वादशकपालो द्वादश मासाः संवत्सरः संवत्सरः प्रजापतिः प्रजापतिर्धाताथ यत्तद्दिशां परमं क्रान्तमेतानि तानि पूर्वाणि हवीꣳष्यनुमत्यै चरू राकायै चरुः सिनीवाल्यै चरुः कुह्वै चरुस्तद्यदेतानि निर्वपति यदेव तद्दिशां परमं क्रान्तं तस्मिन्नेवैनमेतत्प्रतिष्ठापयति तꣳ सर्वं जुहोत्येतस्यैव कृत्स्नतायै ॥३८॥ ता वाऽएता देव्यः । दिशो ह्येताश्छन्दाꣳसि वै दिशश्छन्दाꣳसि देव्योऽथैष कः प्रजापतिस्तद्यद्देव्यश्च कश्च तस्माद्देविकाः पञ्च भवन्ति पञ्च हि दिशः ॥३९॥ तदाहुः । नैतानि हवीꣳषि निर्वपेन्नेदतिरेचयानीति तानि वै निर्वपेदेव कामेभ्यो वाऽएतानि हवीꣳषि निरुप्यन्ते न वै कामानामतिरिक्तमस्ति यद्वै किं च पशुपुरोडाशमनु हविर्निरुप्यते पशावेव स मध्यतो मेधो धीयतऽउभयानि निर्वपत्यधरस्य चाग्नेश्चाधरस्य पूर्वमथाग्नेस्तस्योक्तो बन्धुरुच्चैः पशुपुरोडाशो भवत्युपाꣳश्वेतानीष्टिर्ह्येनुब्रूहि प्रेष्येति पशुपुरोडाशस्याह्वानुब्रूहि यजेत्येतेषामिष्टिर्हि समानः स्विष्टकृत्समानीडा ॥४०॥ तस्य वाऽएतस्य पशोः । जुह्वति समिष्टयजूꣳष्यभ्यवयन्ति हृदयशूलेनावभृथꣳ सꣳस्था ह्येष पशुर्हृदयशूलेन चरित्वा ॥४१॥ प्रत्येत्य वैश्वकर्मणानि जुहोति । विश्वानि कर्माण्ययमग्निस्तान्यस्यात्र सर्वाणि कर्माणि कृतानि भवन्ति तान्येतत्प्रीणाति तानि हविषा देवतां करोति यस्यै वै देवतायै हविर्गृह्यते सा देवता न सा यस्यै न गृह्यतेऽथो विश्वकर्मायमग्निस्तमेवैतत्प्रीणाति ॥४२॥ यद्वेव वैश्वकर्मणानि जुहोति । प्रायणं च ह्याग्नेरुदयनं च

सावित्राणि प्रायणं वैश्वकर्मणान्युदयनꣳ स यत्सावित्राण्येव जुहुयान्न वैश्वकर्मणानि यथा प्रायणमेव कुर्यान्नोदयनं तादृक्तदथ यद्वैश्वकर्मणान्येव जुहुयान्न सावित्राणि यथोदयनमेव कुर्यान्न प्रायणं तादृक्तदुभयानि जुहोति प्रायणं च तदुदयनं च करोति ॥४३॥ अष्टावमूनि भवन्ति । एवमिमानि तद्यथा प्रायणं तथोदयनं करोति स्वाहाकारोऽमीषां नवमो भवत्येवमेषां तद्यथा प्रायणं तथोदयनं करोत्याहुतिरमीषां दशमी भवत्येवमेषां तद्यथा प्रायणं तथोदयनं करोति संततां तत्राहुतिं जुहोति रेतो वै तत्र यज्ञो रेतसोऽविच्छेदाय स्रुवेणोह स्वाहाकारं निरुक्तꣳ हि रेतो जातं भवति ॥४४॥ यदाकूतात् । समसुस्रोद्धृदो वा मनसो वा सम्भृतं चक्षुषो वेत्येतस्माद्ध्येतत्सर्वस्मादग्रे कर्म समभवत्तदनु प्रेत सुकृतामु लोकं यत्रऽऋषयो जग्मुः प्रथमजाः पुराणा इत्यमूनेतदृषीनाह ॥४५॥ एतꣳ सधस्थ । परि ते ददामीति स्वर्गो वै लोकः सधस्थस्तदेनꣳ स्वर्गाय लोकाय परिददाति यमावहाच्छेवधिं जातवेदाः अन्वागन्ता यज्ञपतिर्वोऽअत्र तꣳ स्म जानीत परमे व्योमन्निति यथैव यजुस्तथा बन्धुः ॥४६॥ एतं जानाथ । परमे व्योमन्देवाः सधस्था विद रूपमस्य यदागच्छात्पथिभिर्देवयानैरिष्टापूर्ते कृणवथाविरस्माऽइति यथैव यजुस्तथा बन्धुरुद्बुध्यस्वाग्ने येन वहसीति तयोरुक्तो बन्धुः ॥४७॥ प्रस्तरेण परिधिना । स्रुचा वेद्या च बर्हिषा ऋचेमं यज्ञं नो नय स्वर्देवेषु गन्तवऽइत्येतैर्नो यज्ञस्य रूपैः स्वर्गं लोकं गमयेत्येतत् ॥४८॥ यद्दत्तं यत्परादानम् । यत्पूर्तं याश्च दक्षिणाः तदग्निर्वैश्वकर्मणः स्वर्देवेषु नो दधदिति यच्चैव सम्प्रति दद्मो यच्चासम्प्रति तन्नोऽयमग्निर्वैश्वकर्मणः स्वर्गे लोके दधात्वित्येतत् ॥४९॥ यत्र धारा अनपेताः । मधोर्घृतस्य च याः तदग्निर्वैश्वकर्मणः स्वर्देवेषु णो दधदिति यथैव यजुस्तथा बन्धुः ॥५०॥ अष्टौ वैश्वकर्मणानि जुहोति । अष्टाक्षरा गायत्री गायत्रोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतदन्नेन प्रीणाति ॥५१॥ वैश्व-

कर्मणानि कृत्वा नाम करोति । यदा वै सर्वः कृत्स्नो जातो भवत्यथ नाम कुर्वन्त्यत्र वाऽएष सर्वः कृत्स्नो जातो भवति ॥५२॥ ॥ शतम् ५१०० ॥ ॥ नाम कृत्वाथैनमुपतिष्ठते । सर्वेण वाऽएष एतमात्मना चिनोति स यदेतामत्रात्मनः परिदां न वदेतात्र हैवास्यैष आत्मानं वृञ्जीताथ यदेतामत्रात्मनः परिदां वदते तथो हास्यैष आत्मानं न वृङ्क्ते येऽग्नयः पाञ्चजन्या अस्यां पृथिव्यामधि तेषामसि त्वमुत्तमः प्र नो जीवातवे सुवेति ये के चाग्नयः पञ्चचितिका अस्यां पृथिव्यामधि तेषामसि त्वꣳ सत्तमः प्रोऽअस्माञ्जीवनाय सुवेत्येतदनुष्टुभा वाग्वाऽअनुष्टुब्वागु सर्वाणि छन्दाꣳसि सर्वैरेवास्माऽएतच्छन्दोभिर्निह्नुतऽउपस्थायाग्नीꣳ समारोह्य निर्मथ्योदवसानीयया यजते ॥५३॥ अथ मैत्रावरुण्या पयस्यया यजते । देवत्रा वाऽएष भवति य एतत्कर्म करोति दैवम्वेतन्मिथुनं यन्मित्रावरुणौ स यदेतयानिष्ट्वा मानुष्यां चरेत्प्रत्यवरोहः स यथा देवः सन्मानुषः स्यात्तादृक्तदथ यदेतया मैत्रावरुण्या पयस्यया यजते दैवमेवैतन्मिथुनमुपैत्येतयेष्ट्वा कामं यथाप्रतिरूपं चरेत् ॥५४॥ यद्वेवैतया मैत्रावरुण्या पयस्यया यजते । प्रजापतेर्विस्रस्ताद्रेतः परापतत्तत् यत्र देवाः समस्कुर्वंस्तदस्मिन्नेतया मैत्रावरुण्या पयस्यया रेतोऽदधुस्तथैवास्मिन्नयमेतद्दधाति ॥५५॥ स यः स प्रजापतिर्व्यस्रꣳसत । अयमेव स योऽयमग्निश्चीयतेऽथ यदस्मात्तद्रेतः परापतदेषा सा पयस्या मैत्रावरुणी भवति प्राणोदानौ वै मित्रावरुणौ प्राणोदानाऽउ वै रेतः सिक्तं विकुरुतः पयस्या भवति पयो हि रेतो यज्ञो भवति यज्ञो ह्येव यज्ञस्य रेत उपाꣳशु भवत्युपाꣳशु हि रेतः सिच्यतेऽन्ततो भवत्यन्ततो हि रेतो धीयते ॥५६॥ तस्यै वाजिनेन चरन्ति । तस्मिन्दक्षिणां दधाति तूपरौ मिथुनौ दद्यादित्यभ्याज्ञायेनैव मन्यऽइति ह स्माह माहित्थिः स्रवत्यु हैषाग्निचित आहुतिः सोमाहुतिर्यामनिष्टके जुहोति ॥५७॥ स स्वयमातृण्णा एवोपदधीत । इमे वै लोकाः स्वयमातृण्णा इमऽउ लोका एषोऽग्निश्चितः ॥५८॥

ऋतव्या एवोपदधीत । संवत्सरो वाऽऋतव्याः संवत्सर एषोऽग्निश्चितः ॥५९॥ विश्वज्योतिष एवोपदधीत । एता वै देवता विश्वज्योतिष एता उ देवता एषो ऽग्निश्चितः ॥६०॥ पुनश्चितिमेवोपदधीत । पुनर्यज्ञो ह्येष उत्तरा ह्येषा देवयज्या पुनर्यज्ञमेवैतदुपधत्तऽउत्तरामेव देवयज्यामुप हैनं पुनर्यज्ञो नमतीति न तथा कुर्याद्यो वाव चितेऽग्निर्निधीयते तमेवेष्टकामेष सर्वोऽग्निरभिसम्पद्यते तद्यदग्नौ जुहोति तदेवास्य यथा सर्वस्मिञ्छाण्डिलेऽग्नौ संचिते पक्षपुच्छवत्याहुतयो हुताः स्युरेवमस्यैता आहुतयो हुता भवन्ति ॥६१॥ सर्वाणि वाऽएष भूतानि । सर्वान्देवान्गर्भी भवति योऽग्निं बिभर्ति स योऽसंवत्सरभृतं चिनुतऽएतानि ह स सर्वाणि भूतानि गर्भं भूतं निर्हते यो न्वेव मानुषं गर्भं निर्हन्ति तन्वेव परिचक्षतेऽथ किं य एतं देवो ह्येष नासंवत्सरभृतस्यऽर्त्विजा भवितव्यमिति ह स्माह वात्स्यो नेदस्य देवरेतसस्य निर्हण्यमानस्य मेद्यसानीति ॥६२॥ षण्मास्यमन्तमं चिन्वीतेत्याहुः । षण्मास्या वाऽअन्तमा गर्भा जाता जीवन्तीति स यद्यसंवत्सरभृते महदुक्थꣳ शꣳसेदशीतीः शꣳसेदसर्वं वै तद्यदसंवत्सरभृतोऽसर्वं तद्यदशीतयो विकृष्टं त्वेनꣳ स भूयो विकर्षेद्यदि चैव संवत्सरभृतः स्याद्यदि चासंवत्सरभृतः सर्वमेव महदुक्थꣳ शꣳसेत् ॥६३॥ अथ ह शाण्डिल्यायनः प्राच्यां जगाम । तꣳ ह दैयाम्पातिरुवाच शाण्डिल्यायन कथमग्निश्चेतव्यो ग्लायामोऽह संवत्सरभृतायाग्निमु चिकीर्षामहऽइति ॥६४॥ स होवाच । कामं न्वाऽएनꣳ स चिन्वीत येन पुरा संवत्सरं भृतः स्यात्तꣳ ह्येव तं भृतꣳ सन्तं चिनुतऽइति ॥६५॥ कामम्वेवैनꣳ स चिन्वीत । यः संवत्सरमभिषविष्यन्त्स्यादेष वाऽएनं प्रत्यक्षमन्नेन बिभर्त्येताभिराहुतिभिः ॥६६॥ कामम्वेवैनꣳ स चिन्वीत । यः संवत्सरमग्निहोत्रं जुहुयाद्बिभर्ति वाऽएनमेष योऽग्निहोत्रं जुहोति ॥६७॥ कामम्वेवैनꣳ स चिन्वीत । यः संवत्सरं जातः स्यात्प्राणो वाऽअग्निस्तमेतद्बिभर्त्यथ ह वै रेतः

सिक्तं प्राणोऽन्ववरोहति तद्विन्दते तद्यज्जातं-जातं विन्दते तस्माज्जातवेदास्तस्माद्प्येवंवित्कामꣳ सद्योभूतं चिन्वीत यद्व ह वाऽएवंवित्पिबति वा पाययति वा तदेवास्य यथा सर्वस्मिञ्छाण्डिलेऽग्नौ संचिते पक्षपुच्छवत्याहुतयो हुताः स्युरेवमस्यैता आहुतयो हुता भवन्ति ॥ ६८ ॥ ब्राह्मणम् ॥ २ [५. १.] ॥ ॥

इन्द्र एतत्सप्तर्चमपश्यत् । न्यूनस्याप्त्याऽअतिरिक्तस्यानतिरिक्त्यै व्यृद्धस्य समृद्ध्याऽअथ ह वाऽईश्वरोऽग्निं चित्वा किंचिद्दौरितमापत्तोर्वि वा ह्वलितोर्यद्वा यद्ध वा एतच्छ्यापर्णः सायकायनः शुश्रावाथ हैतत्कर्मोपदधर्ष ॥ १ ॥ सैषा त्रयस्य समृद्धिः । अग्नेः समृद्धिर्योऽग्निं चिनुते तस्य समृद्धिर्योऽग्निं चिनोति तस्य समृद्धिः ॥ २ ॥ तद्यदेतेनोपतिष्ठते । यदेवास्यात्र विद्वान्वाविद्वान्वाति वा रेचयति न वाप्याययति तदेवास्यैतेन सर्वमाप्तं भवति यदस्य किं चानाप्तं य उ तस्यामनुष्टुभ्यृचि कामोऽत्रैव तमाप्नोत्यथोऽएतस्मादेवैतत्कर्मणो रक्षाꣳसि नाष्ट्रा अपघ्नन्ति नो हैनमनुव्याहारिण स्तृण्वते तस्मादप्येवंवित्कामं परस्माऽअग्निं चिनुयादीश्वरो ह श्रेयान्भवितोः ॥ ३ ॥ वार्त्रहत्याय शवसे । सहदानुं पुरुहूत क्षियन्तमिति वार्त्रघ्नीभ्यां प्रथमाभ्यामुपतिष्ठतऽएतद्वै देवा वृत्रं पाप्मानꣳ हत्वापहतपाप्मान एतत्कर्माकुर्वत तथैवैतद्यजमानो वृत्रं पाप्मानꣳ हत्वापहतपाप्मैतत्कर्म कुरुते ॥ ४ ॥ वि न इन्द्र मृधो जहि । मृगो न भीमः कुचरो गिरिष्ठा इति वैमृधीभ्यां द्वितीयाभ्यामेतद्वै देवा मृधः पाप्मानꣳ हत्वापहतपाप्मान एतत्कर्माकुर्वत तथैवैतद्यजमानो मृधः पाप्मानꣳ हत्वापहतपाप्मैतत्कर्म कुरुते ॥ ५ ॥ वैश्वानरो न ऊतये । पृष्टो दिवि पृष्टोऽअग्निः पृथिव्यामिति वैश्वानरीभ्यां तृतीयाभ्यामेतद्वै देवा वैश्वानरेण पाप्मानं दग्ध्वापहतपाप्मान एतत्कर्माकुर्वत तथैवैतद्यजमानो वैश्वानरेण पाप्मानं दग्ध्वापहतपाप्मैतत्कर्म कुरुते ॥ ६ ॥ अश्याम तं काममग्ने तवोतीति । एकया कामवत्यैतद्वै देवाः षडृचेन पाप्मानमपहत्यैकया कामवत्यैकधात्मतः

सर्वान्कामानात्मन्नकुर्वत तथैवैतद्यजमानः षडृचेन पाप्मानमपहत्यैकया कामवत्यैकधात्ततः सर्वान्कामानात्मन्कुरुते ॥ ७॥ सप्तर्चं भवति । सप्तचितिकोऽग्निः सप्तऽर्तवः सप्त दिशः सप्त देवलोकाः सप्त स्तोमाः सप्त पृष्ठानि सप्त छन्दाꣳसि सप्त ग्राम्याः पशवः सप्तारण्याः सप्त शीर्षन्प्राणा यत्किं च सप्तविधमधिदेवतमध्यात्मं तदेनेन सर्वमाप्नोति ता अनुष्टुभमभिसम्पद्यन्ते वाग्वाऽअनुष्टुब्वाचैवास्य तदाप्नोति यदस्य किं चानाप्तम् ॥ ८॥ अष्टर्चेनोपतिष्ठेतेत्यु हैकऽआहुः । वयं तेऽअद्य ररिमा हि काममिति द्वितीयया कामवत्या सप्त पूर्वास्तदष्टावष्टाक्षरा गायत्री गायत्रोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवास्य तदाप्नोति यदस्य किं चानाप्तमथोऽएवꣳ समं देवते भजेतेऽइति न तथा कुर्यादेता वाव सप्ताष्टावनुष्टुभो भवन्ति स योऽष्टर्चे कामोऽत्रैव तमाप्नोति ॥ ९॥ ऐन्द्राग्नीभिरुपतिष्ठते । ऐन्द्राग्नोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवास्य तदाप्नोति यदस्य किं चानाप्तमिन्द्राग्नी वै सर्वे देवाः सर्वदेवत्योऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवास्य तदाप्नोति यदस्य किं चानाप्तम् ॥ १०॥ तद्धैके । कर्मणः-कर्मण एवैतां प्रतिपदं कुर्वतेऽपहतपाप्मान एतत्कर्म करवामहाऽइति पुरीषवतीं चितिं कृत्वोपतिष्ठेतेत्यु हैकऽआहुस्तत्र हि सा सर्वा कृत्स्ना भवतीति स यथा कामयेत तथा कुर्यादिति नु चयनस्याथातोऽचयनस्य ॥ ११॥ त्रयो ह वै समुद्राः । अग्निर्यजुषां महाव्रतꣳ साम्नां महदुक्थमृचाꣳ स य एतानि परस्मै करोत्येतान्ह स समुद्राञ्छोषयते ताञ्छुष्यतोऽन्वस्य छन्दाꣳसि शुष्यन्ति छन्दाꣳस्यनु लोको लोकमन्वात्मात्मानमनु प्रजा पशवः स ह श्वः-श्व एव पापीयान्भवति य एतानि परस्मै करोति ॥ १२॥ अथ य एतान्यकृत्वा । परस्माऽअपि सर्वैरन्यैर्यज्ञक्रतुभिर्याजयेदेतेभ्यो हैवास्य समुद्रेभ्यश्छन्दाꣳसि पुनराप्यायन्ते छन्दाꣳस्यनु लोको लोकमन्वात्मात्मानमनु प्रजा पशवः स ह श्वः-श्व एव श्रेयान्भवति य एतानि परस्मै न करोत्यथैष

ह वाऽअस्य दैवोऽमृत आत्मा स य एतानि परस्मै करोत्येतꣳ ह स दैवमात्मानं परस्मै प्रयच्छत्यथ शुष्क एव स्थाणुः परिशिष्यते ॥१३॥ तद्धैके । कृत्वा कुर्वते वा प्रति वा कारयन्तऽएषा प्रायश्चित्तिरिति न तथा कुर्याद्यथा शुष्कꣳ स्थाणुमुदकेनाभिषिञ्चेत्तादृक्तत्पूयेद्वा वै स वि वा म्लायेन्नैतस्य प्रायश्चित्तिरस्तीत्येव विद्यात् ॥१४॥ अथ ह स्माह शाण्डिल्यः । तुरो ह कावषेयः कारोत्यां देवेभ्योऽग्निं चिकाय तꣳ ह देवाः पप्रच्छुर्मुने यदलोक्यामग्निचित्यामाहुरथ कस्मादचैषीरिति ॥१५॥ स होवाच । किं नु लोक्यं किमलोक्यमात्मा वै यज्ञस्य यजमानोऽङ्गान्यृत्विजो यत्र वाऽआत्मा तदङ्गानि यत्रोऽअङ्गानि तदात्मा यदि वाऽऋत्विजोऽलोका भवन्त्यलोक उ तर्हि यजमान उभये हि समानलोका भवन्ति दक्षिणासु त्वेव न संवदितव्यꣳ संवादेनैवऽर्त्विजोऽलोका इति ॥१६॥ ब्राह्मणम् ॥३ [५. २.] ॥ चतुर्थः प्रपाठकः ॥ कण्डिकासंख्या१०७ ॥ पञ्चमोऽध्यायः [६०] ॥ ॥ अस्मिन्काण्डे कण्डिकासंख्या४०२ ॥ ॥

इति माध्यन्दिनीये शतपथब्राह्मणे संचितिनाम नवमं काण्डं समाप्तम् ॥९॥ ॥

EXTRACTS FROM THE COMMENTARY OF SÂYAṆÂCÂRYA.

चितीनामुपधानं हि काण्डेऽष्टमऽउदीरितम् अथास्मिन्नवमे कर्म संचितस्याभिधास्यते ॥ तत्रादौ तावच्छतरुद्रियहोमं विधत्ते । विहितोऽयं होमो रुद्ररूपतापन्नस्याग्नेरुपशमनार्थः ॥१॥ शान्तदेवत्यं शान्तदेवतार्थं देवताशान्त्यर्थम् ॥२॥ जर्तिला आरण्यतिलाः ॥३॥ चितीः परितो निक्षिप्ताः क्षुद्रपाषाणाः परिश्रितः ॥५॥ गवेधुका आरण्या गोधूमाः तेषां पिष्टैः । सा प्रजापतिरूपा देवता ॥८॥ आशयो हृदयदेशः ॥९॥ लोमसु विषसंस्पृष्टेष्वपि बाधाभावात् । अत एतदुत्तरार्धहोमेन स्वस्यामेव (!) दिशि एनं रुद्रं प्रीणाति स्वस्यामेव तमवयजते पृथक्करोति ॥१०॥ स वाऽअशीत्यां च स्वाहाकरोतीत्यादिना (क॰ २१) तिसृष्वशीतिषु स्वाहाकारः क्रियतऽइत्युपरिष्टादुच्यते तत्र कस्मिन्प्रदेशे स्वाहाकार इति तत्राह जानुदघ्नऽइति जानुप्रमाणप्रदेशे सोऽध्वर्युः प्रथमं स्वाहाकरोति ॥११॥ उत्तरं भागम् ॥१५॥ प्रथमानुवाके षोडश मन्त्राः तत्र चतुर्दश मन्त्रानवयुत्य स्तौति ॥१६॥ नमो हिरण्यबाहवऽइत्यादिषु मन्त्रेषु प्रतिपाद्या देवता द्वन्द्विनः तत्र [द्वयो]र्द्वयोर्देवतयोः प्रतिपादनात् । दिशां च पतये नम इत्येतद्धिरण्य-

आहवे सेनान्यऽइत्येतयोर्विशेषणम् ॥१८॥ एतत् मन्त्रचतुष्टयम् ॥२२॥ एतानि देवानां हृद-
यानि यथा हृदयं प्रधानं तद्वदेतेऽपि प्रधानानि । विचिन्वन्ति अभ्यवहारार्थम् अतस्तत्परि-
हाराय तेभ्यो नम इत्याह ॥२३॥ दिद्रापयिषति कुत्सितं कर्तुमिच्छति ॥२४॥ अधिमासापेक्षया
संवत्सरे सप्तऽर्त्तवो भवन्ति । यैषा संख्यासम्पत्तिस्तामभिलक्ष्य भवति तथाविधा संख्यास-
म्पत्तिरत्र सम्पादिता भवति ॥२६॥ एतस्मिन्काले खलु एतेन होमेन इमान्पृथिव्यादीन्लो-
कानित ऊर्ध्वो भूत्वा रोहति स यजमानः ॥३२॥ तमेषां जम्भे दध्म इत्यत्र तमित्यस्य स्थाने
अमुमिति प्रयुञ्ज्यादिति कस्यचिन्मतं पूर्वपक्षयितुमाह अमुमेषामिति । अमुमिति तन्नामनि-
र्देशः । नामधेयग्रहणं तन्निर्देशसिद्ध्यर्थं भवति स च निर्देशो यं द्विष्मो यश्च नो द्वेष्टि तमे-
षामित्यभिधानादेव सिद्ध इति तथा न कुर्यात् ॥३१॥ जान्वादिमुखान्तेषु त्रिषु प्रमाणेषु हो-
मकरणादित ऊर्ध्वं त्रिः कृत्वो रोहत्विति पुनश्च त्रिःकृत्वः प्रत्यवरोहति तथा सति षट्संख्या
सम्पद्यते ॥४०॥ एतच्छतरुद्रियं षष्ट्युत्तराणि त्रीणि शतानि यजूंषि पञ्चात्त्रिंशत्ततः पञ्चत्रिंशत्
। अथावशिष्टानि यानि पञ्चत्रिंशद्विद्यन्ते तानि त्रयोदशो मासः स चाधिको मासः संवत्सर-
स्यात्मा मध्यभागः   द्वे यजुषी पादौ प्रतिष्ठाशब्देन पादावुच्येते   पुनर्द्वे यजुषी प्राणा इ-
न्द्रियाणि यद्यपि ते प्राणा बहवस्तथापि याभि (!) पञ्चत्रिंशद्दिनाधिकमासवत्संवत्सरान्तःपा-
तित्वमभिदधत् (°मासवसंव° !) तन्मासात्मकेन पञ्चत्रिंशता संवत्सरः व्रणावरणादिविशि-
ष्टपुरुषाकारतया (!) प्रदर्श्यते । शाण्डिलदृष्टेऽस्मिन्नग्नौ (स्मिन) मध्यतो मध्यप्रदेशे एतावत्यः
षष्ट्युत्तरशतत्रयसंख्याका इष्टका मन्त्रवत्य उपधीयन्ते ॥४३॥ महदुक्थमिति प्रयहाजर्तसाहव्य-
पदेशं (?) शस्त्रान्तेनानुशंसनीयं स्तोत्रं (?शस्त्रन्तेना°) पक्ष्याकारं भवति तत्र पञ्चविंश स्तोम आ-
त्मभागः अतश्चात्रापि अशीतीनामभितो विद्यमानानि यानि (? तानि) पञ्चविंशतिर्यजूंषि ता-
न्येव महदुक्थे पञ्चविंशस्तोमात्मक आत्मभागः । आत्मभागादेव तेषां सर्वेषामुत्पत्तेः आ-
त्मभागे तानि सर्वाण्यन्तर्भूतानि । अद इति महदुक्थात्परं मन्त्रजातं बुद्धिस्थं परामृश्यते
॥४४॥ ॥१॥१॥

पूर्वस्मिन्ब्राह्मणे शतरुद्रीयहोमोऽभिहितः अथास्मिन्नग्नौ परिषेकधेनुकरणविकर्षणादिकं
कर्माभिधास्यते ॥१॥ कस्मादध्वर्युपरित्यागेनाग्नीध्रः परिगृह्यतऽइत्यत्राह अग्निरेष इति परिषेक्त-
र्यस्याग्नेरशमनेन क्षयदध्वर्यौ (?) परिषेक्तरि नो (!) हिंसा संभाविता स्यात् आग्नीध्रस्य पुनर-
ग्न्यात्मकत्वेन आत्मनैवात्मनो हिंसाया असम्भवादहिंसार्थं तस्य परिग्रहः । निकक्षः कक्षप्रा-
देशः (!) तत्संधिस्थानम् । सर्वतः स्तेरुस्थस्थाने (?) पाषाणं निधाय तत आरभ्य परिषिञ्चेत्
॥४॥ परिषेकानन्तरमश्मंस्तऽइत्यनेन मन्त्रेण पाषाणे कुम्भं निदध्यात् अश्मनि कुम्भस्य नि-
धाने परिषेकेण शान्तस्य रुद्रस्य क्षुधं पाषाणे निहितवान्भवति ॥५॥ विपल्ययते प्रतिपर्येति
। लघूयति लघुमिवाचरति । निह्नुते स्वकृतं तद्विषयमपराधमपमार्ष्टि ॥६॥ साश्मानं कुम्भं
नैर्ऋत्यां दिशि प्रक्षिपेत् । एतां दिशमिति नैर्ऋतीं दिशं हस्तेनाभिनीय दर्शयति ॥१॥ प्रक्षे-
पार्थं हरणावसर अग्नेर्बाह्यभागेन हरेत् ॥११॥ धेनुकरणं नाम वक्ष्यमाणमन्त्रजपपूर्वकं धेनु-
रूपेणानुसंधानम् ॥१३॥ अतश्च पृथिव्यादिलोकत्रयात्मकस्याग्नेरवयवीभूतानामिष्टकानां धेनु-
करणं स्थिरत्वा सम्पाद्यम् यथा धेनवोऽभिमतं पयो (तं या) दुहन्ति तद्वदेवैता अपीष्टकाः स्वा-
भिलषितं दुहन्तीति (हंति) बुद्ध्या धेनुरूपेणानुसंधानं क्रियते   धेनवश्च वीर्यवत्तरेण दुह्यमा-

ना भूयः पयो दुहन्ति न पुनर्दुर्बलेन ॥१४॥ एष यजमानोऽमुष्मिंल्लोके उपलक्षणमेतत् इहलोकेऽपि (? इहालोकेऽपि) ब्रह्मणा बृहता वीर्यवता तेन यजुर्मन्त्रेण एता इष्टका बह्वीः एकादिपरार्धान्तसंख्याकाः कुरुते मन्त्रसामर्थ्यादल्पस्य बहुवचनम् ॥१६॥ भुञ्जन्ति पालयन्ति ॥१७॥ अत्यर्थं मूत्रं विसृजन्त्यः । अन्यासामिष्टकानां स्वयमातृण्णारेतःसिग्विश्वज्योतिरपस्याप्राणभृदित्यादिकानि नामानि विद्यन्ते लोकम्पृणानां तु तथा प्रातिस्विकनामधेयाभावादिष्टकावत्स्वनामानाह्वानेन विमुखा भूता अवस्थिताः पश्चाद्देवास्ता इष्टका विराजनाम्नीरन्कुर्वत ॥१९॥ एनमग्निमग्निस्थलम् ॥२०॥ संस्कारप्रकारस्तु षष्ठकाण्डस्यादावुक्तः ॥२१॥ पक्षादीनां विकर्षणमात्मभागमभिलक्ष्य कुर्यात् अग्न्यात्मानमभि अभ्यात्मम् ॥३०॥ पञ्च चितयो नित्याः इतरे द्वे चिती नैमित्तिके । अधिमासापेक्षया सप्तऽर्तवः ॥३१॥ अभि त्वा शूर नोनुम इत्येतस्यामृच्युत्पन्नं साम रथन्तरम् । अतिशयरसाधारत्वेन रसतमः रसतम एव रसंतमः ॥३६॥ त्वामिद्धि हवामहऽइत्येतस्यामृच्युत्पन्नं साम बृहत् ॥३७॥ कया नश्चित्र आभुवदित्यस्यामृच्युत्पन्नं साम वामदेव्यम् ॥३८॥ यज्ञा यज्ञा वोऽअग्नय इत्यस्यामृच्युत्पन्नं साम यज्ञायज्ञीयम् कस्य ईयादेशः ह्रस्वत्वं छान्दसम् ॥३९॥ प्रजापतेर्हृदयमिति किंचित्साम तदप्यत्र गायेत् । आत्मन् आत्मभागे ॥४०॥ प्रजापतेर्हृदयं गायत्रादिसामवत्कस्यां चिदृचि न गीयते अपि तु केवलं प्रजाशब्दे [प्रजापतिशब्दे] च गीयते अत एवापस्तम्बेन सूत्रितम् प्रजापतेः सामानृचं गायतीति ॥४१॥ एतानि गायत्र्यादीनि सामानीष्टकारूपेण स्तौति ता हैता इति स्त्रीलिङ्गविशेषेयेष्टकापत्ते (!) । वृतस्य (?) गातृत्वे तदुपधानवैधुर्येणाध्वर्युः विजितः पराभूतो भवेत् ॥४३॥२॥१॥

औपवसथ्यदिवसात्प्राचीने दिवसे कर्तव्यं प्रयोगमभिधाय तथा तस्मिन्दिवसे कर्तव्यमभिधत्ते । यजमानस्य वाग्विसर्जनमध्वर्योराज्यग्रहणम् । पात्री शरावाकारा स्थाली तु पिडरांकामु[हवि]ल्यां (!) महामुख्यां व्यत्ययेन ङीप्रत्ययः ॥१॥ व्याघारणं नाम एकस्मात्कोणात्कोणान्तरं प्रत्याज्यधाराक्षारणम् ॥३॥ याममूम् बुद्धौ परामर्शः पूर्वामुत्तरवेदिं व्याघारयति सा पुनः सोमयागस्य ॥५॥ व्यतिहारमित्यनेन पूर्वं दक्षिणांसे व्याघारणं तत उत्तरश्रोणौ पश्चाद्दक्षिणश्रोणौ तत उत्तरांसे तत मध्ये इत्ययं क्रमो विवक्षितः ॥७॥ वेडिति सम्प्रदानार्थीयो निपातः । स्वर्गं लभयतीति स्वर्वित् ॥८॥ तददः काले अदःशब्दस्तस्य कालस्य विप्रकर्षमभिधत्ते । अमुं भागमिति यदुक्तं तदेवाह अतः (!) सजूरब्दीयमिति सजूरब्दोऽअयवोभिरित्येतेन मन्त्रेण प्रतिपादितं होममनूपमन्त्रम् (? पं अत्रं) ॥१३॥ व्रतं पयः । अथ तदानीमेवापराह्णिकाभ्यां प्रवर्ग्योपसद्भ्यां प्रचर्य ॥१८॥ परितः स्यन्दो जलस्रवणं यस्य परिष्यन्दो द्वीपः ॥१९॥ अग्नावुत्सादयतीति लोपः शाकल्यस्येति (पा॰ ८. ३. १९.) वकारलोपः ॥२१॥ तस्य प्रवर्ग्यस्य यथा येन प्रकारेण प्रवर्ग्यकाण्डोक्तप्रकारेण उत्सादनमुक्तं तेन प्रकारेण प्रवर्ग्यमुत्सादयेत् ॥२३॥१॥२॥

प्रवर्ग्योद्वासनानन्तरं संचिते इष्टकासमूहे स्थापनायाग्निं प्रणेतुं तावद्गार्हपत्ये आज्यहोमं समिद्धोमं च विधत्ते । प्रहरिष्यन्प्रणेष्यन् । विहितहोम आहवनीयप्रदेशं समिद्धस्याग्नेः (॰मिध्यताग्नेः) प्रणयनाय पुरस्तादन्नेन (॰दंत्रेन) सम्पाद्यतऽइत्याह एतद्वाऽएनमित्यादिना ॥१॥ अष्टौ प्राणा अष्टावङ्गानीत्येतैः (? ॰त्येग्नेः) षोडशावयवः प्रजापतिः ॥२॥ पूर्वेद्युरात्रौ सर्वस्या-

मेव घृते वसन्ति ॥३॥ विधृतिं विभेदेन धारणमसंकीर्णताम् । अग्निस्तिग्मेनेत्यनया ऋचा पञ्चगृहीतं हूयते य इमा विश्वेत्यादिभिरष्टाभिर्ऋग्भिः षोडशगृहीतार्धं हूयते अवशिष्टं चक्षुषः पितेत्यादिभिरष्टाभिर्हूयते ॥६॥२॥२॥

इत्थमग्निप्रणयनार्थं यथोक्तं होमं विधायाथ तत्प्रयोगौपायिकीः (? तस्मायाणोपयिकीः) क्रियाः कर्तुं तदुचितं सम्प्रैषमाह । प्रणेष्यमाणाग्निसिद्ध्यर्थं गार्हपत्ये प्रक्षिप्तं काष्ठमिध्मस्तदुपक्र (मिकातंड°) अग्निधारणार्थमधस्तात्क्रियमाणाः सिकता उपयमन्यः ताश्चोपयच्छेति एतदुभयं प्रतिप्रस्थातारं प्रत्युच्यते । हे होतः प्रणीयमानायाग्नयेऽनुब्रूहि अग्निप्रणयनीया ऋचोऽनुब्रूहि । हे अग्नीत् यच्यंराव्या (एकस्फ्यया ?) स्फ्यरेखया अनुगच्छ । हे ब्रह्मन् आशुः शिशान इत्येतदप्रतिरथाख्यं सूक्तं जपेति एवं तत्र-तत्र व्यापारे तं-तं सम्प्रेष्यति विनियुञ्ज्यात् ॥१॥ चतुश्चत्वारिंशदक्षरा द्वादश त्रिष्टुभः सम्भूयाष्टाविंशतिपञ्चशताक्षराणि सम्पद्यन्ते चतुर्विंशत्यक्षराणां गायत्रीणां द्वाविंशतिस्तावदक्षरा भवन्ति अतो द्वादश त्रिष्टुभो मिलित्वा द्वाविंशतिर्गायत्र्यस्ताश्चाग्नेय्यो (? °गायत्र्यश्चा°) भवन्ति अग्निना सहोत्पन्नत्वात् ॥६॥ उपयमनानन्तरमध्वर्युप्रभृतीनां चित्यं प्रति [आग्नीध्रपर्यन्तं] गमनम् ॥८॥ अग्नेरुक्थानि स्तोत्रशस्त्राणि पत्रवदङ्गानि भवन्ति ॥१॥ आतः सूर्यावस्थानप्रदेशलक्षणादन्तरिक्षपर्यन्तं सम्प्राप्नुवन् । आतः अन्तरिक्षात्मकाग्नीध्रमण्ड(प)पर्यन्तं सम्प्राप्नोति ॥१३॥ पृश्निशब्देन श्वैत्यमुच्यते (! श्वैत्य° or चैत्र्य° ?) पृश्नेरश्मन उपधानेनादित्यस्यैवोपधानं भवति ॥१४॥ व्यध्व इत्यर्धमार्ग उच्यते तत्रैतस्याश्मन उपधानं क्रियते तस्मादितः प्रदेशादूर्ध्वे (! °शाद्व्यध्वे ?) ऽर्धमार्गे एष सूर्यस्तपति ॥१५॥ एष सूर्यस्त्रिष्टुभोऽन्तरिक्षे वर्तमानत्वात् । एष सूर्यः असन्नः क्वचिदेवावस्थितो न भवति सर्वत्र परिभ्रमणात् ॥१९॥ आहवनीयदेशं प्रति ॥२०॥ चित्याग्निसमीपगमनानन्तरं (गनामंवरं) क्रमध्वमित्यादिभिः पञ्चभिर्मन्त्रैस्तस्यारोहणम् । एतमित्यभिनयेन निर्देशः एतं स्वर्गम् ॥२४॥ चित्याग्निसमारोहणानन्तरमस्मिन्नग्नौ होमं विधत्ते ॥३०॥ प्रोक्षणे विनियुक्तैः (८.७.४.७.) सहस्रसंख्याकैः (हयंख्याकैः) हिरण्यशकलैः ॥३२॥ अभिहोमानन्तरमुख्याग्नेश्चितीनामुपरि निधानम् । विकृत्या विकृतिसाधनभूतेन मन्त्रेण ॥३४॥ निधानानन्तरमस्मिन्नग्नौ समिधामाधानं विधाय ताः समिधश्चित्याग्निं प्राप्तस्याग्नेरुपरिष्टादन्नरूपेण (°ग्नेरूपरितत्रान्नरूपेण) स्तौति ॥३६॥ जग्धिर्भक्षणं भक्षणाभावाय अहिंसायै ॥३७॥ एनां शमीरूपां गाम् ॥३८॥ तस्या वैकङ्कतसमिद्धोमब्राह्मणं प्रागेव षष्ठकाण्डेऽभिहितम् ॥३९॥ कर्णकशब्देनात्र पत्रशाखादिकं विवक्ष्यते । पत्रादीनां पशुपुष्टिसाधनत्वेन (? पशुषुष्टि°) पशुवान्तथाविधायाः समिधो होमेन पशुरूपेणैवैनं प्रीणाति । दधिविन्दुम् ॥४०॥ समिद्धोमानन्तरमाज्याहुतीर्विधत्ते । लोके भुञ्जानस्य यथा शाकसूपौदनादिकं परिविष्य पश्चाज्जलादिकं पेपयायत् (पाययेत्) ॥४१॥ पूर्णा चासावाहुतिश्चेति पूर्णाहुतिः आज्यपूर्णया स्रुचा सम्पाद्यमाना आहुतिः ॥४३॥ अथास्याग्निप्रणयनात्मकस्य कर्मणः सम्पत्तिमभिधातुं प्रतिजानीते अथात इति । तामेव दर्शयति षड् पुरस्तादित्यादिना प्रणयनात्पूर्वं तिस्र आज्याहुतीस्तिस्रः समिदाहुतीश्च जुहोति अतस्तत्र षण्मन्त्रा भवन्ति यद्यपि द्वितीयराज्याहुत्योः (!) षोडश मन्त्राः प्रयुज्यन्ते तथापि आहुत्यनुसारेण ते सर्वेऽपि द्वावेव (? द्वाय) मन्त्राविति परिगण्येते (°ण्यात) । उपरिष्टादग्निनिधानात्पश्चात्तिस्रः समिदाहुतीस्तिस्र आज्याहुतीश्च जुहोतीति तेऽपि षण्मन्त्राः । आग्नीध्रमण्डपेऽपि (? मंड्रेऽपि) पृश्निरश्मोपधी-

यते तात्पर्यं षड्भिर्मन्त्रैर्गच्छन्ति अत्र यद्यपि पञ्च दिशो दैवीरित्यादयः पञ्चैव मन्त्रा गमने विनियुक्ताः तथाप्युद्व वेत्यादिना मन्त्रेण सहैते षड्भवन्ति इति षण्णामपि मन्त्राणां गमनसाधनत्वाभिधानं गमनमन्त्रबाहुल्याभिप्रायम् ॥४७॥ सप्तमकाण्डे गार्हपत्यचयनाभिधाना[न]न्तर तत्र तिस्रोऽनुष्टुभः सम्पाद्य तासां मध्ये एकामाहवनीयं प्रत्यन्तंग्रवंत्युक्ताम् (? see ७.१.२.११.) । अत्रोक्तप्रकारेणानुष्टुभः सम्पादने (°पानने) तासामेकामनुष्टुभमत्राह्वतवन्तो (°मेका सा अनु°) भवन्तीत्याह तद्या अमूरिति । गार्हपत्यात्खल्वग्निराहवनीयस्थानं प्रति प्रणीतोऽतश्चाग्निप्रणयने विद्यमानमन्त्राहुतिसंख्याद्वारास्यानुष्टुभः (!) सम्पादनात् गार्हपत्ये सम्पादितानामनुष्टुभामेकामत्राह्वतवन्तो भवन्तीत्युच्यते ॥४८॥ स चित्याग्निः प्रणेष्यमाणमग्निमब्रवीत् । तस्माद्यस्मिन्नवसरे एतमग्निं गार्हपत्यादत्र चित्याग्नावाहरन्ति अथ पश्चादेष आहुतिरूपायान्नाय समर्थो भवति अग्निप्रणयनानन्तरमेव चित्याग्नेराहुतिसम्बन्धादिति भावः ॥४९॥ चित्याग्निरूपः प्रजापतिः ॥५०॥३॥२॥

पूर्वस्मिन्नध्याये स्वयमातृण्णाया व्याघारणसमुक्षणादि कर्माभिहितम् अथास्मिन्नध्याये वैश्वानरमारुतवसोर्धारादिहोमलक्षणं कर्माभिधास्यते ॥१॥ अदःशब्दो दीक्षणीयेष्टिकालं परामृशति । दीक्षणीयायां वैश्वानरं रेतोरूपेण सिक्तवानिति यत् तस्मादयमग्निरिहापि तदनुरोधेन वैश्वानर एव जायते अतश्च वैश्वानररूपेणोत्पादनाय वैश्वानरदेवत्यं हविर्जुहुयादिति भावः । निरुक्तमुच्चैः प्रकाशम् ॥२॥ इदमिति मुखं श्मश्रुविशिष्टं हस्तेन प्रदर्शने (°र्श्यते ?) ॥४॥ इदमिति मुखादुपरितनं दन्तनेत्रनासिकाललाटस्थानं निर्दिश्यते । अलोमकमिव व्यक्तरिक्तमिति तत्र पृथिवीवत् महोधरमहोरुहादोनामभावात् । स प्राणोऽस्य निर्दिष्टप्रदेशस्य मध्येन वर्तते ॥५॥ शिर एवेति अत्र शिरःशब्देन ललाटादुपरितनं केशोद्गमस्थानमुच्यते इदं तच्छिर इत्यत्र गलादुपरितनं सर्वमपि शिरसा ढसोढन (प्रसिद्धेन ?) विवक्षितम् अन्यथा पूर्वोक्तस्यानुपपत्तेः ॥६॥ वैश्वानरयागानन्तरं मारुतानां होमं विधाय तान्प्राणात्मना प्रशंसति ॥७॥ प्राणयोर्हस्तेन निर्देशः । अनयोः श्रोत्रयोः शिरोमध्येऽवस्थानात् ॥१०॥ इमाविति चक्षुषोर्निर्देशः ॥११॥ इमाविति नासाविवरयोर्निर्देशः । अरण्येऽनूच्यः कश्चिदनुवाकः तेन हूयमानोऽपि पुरोडाशोऽरण्येऽनूच्यो भवति ॥१२॥ प्रजायास्तु तदाज्ञाधीनत्वान्नोचैर्वक्तेरनिरुक्तत्वम् ॥१५॥ पुरोऽनुवाक्यवन्तं याज्यवन्तमिति छान्दसो ह्रस्वः ॥१६॥ एतेषां वै सप्तपदानामित्यत्र मारुतशब्देन तद्धोमसाधनभूताः शुक्रज्योतिश्चेत्यादयो मन्त्रा विवक्ष्यन्ते ते च सप्तपदा भवन्ति । इयमेव चिति (! इदमेवेति) प्रसृतिरभिनयेन प्रदर्श्यते कपुशलामेव (!) वक्ताङ्गमुखमच्यते (? स्रुङ्मु° ?) । अयमिति बाहुदण्डः प्रदर्श्यते एवं बाहुरेव स्रुमित्युक्तं (? स्रुगि° ?) भवति ॥१७॥ अथ होमक्रमेण तान्मारुतान्प्रत्येकं नद्यादिरूपेण प्रशंसति तद्यमिति । प्राच्यः प्राङ्मुखाः पूर्वसमुद्रगामिन्यो गङ्गायमुनादयः सप्त नद्यः ॥१८॥ रिप्रतराः रिप्रमिति पापमुच्यते पापिष्ठाः । शपनमिति व्यत्ययेन पकारस्य फकाध्रुवः (!?) अत्यर्थमुपालम्भनीयाः । आहनमिति प्रीचोक्तिमुच्यते (!?) तस्या अत्यर्थं वादितारो भवन्तीति मूत्ररूपवात्तासां नदोनां पयः पिबन्तो तितरा (!) नीचा भवन्तीत्यर्थः ॥२४॥१॥३॥

अथ पुनस्तामेव वसोर्धारां संस्कृतस्याग्नेरभिषेकात्मना प्रशंसति ॥२॥ इदं च मऽइदं च मऽइति वाजश्च मे प्रसवश्च मऽइत्यादिमन्त्राणां निर्देशः ॥५॥ व्योकसौ विभिन्नदेशस्था-

वाचार्यौ (°र्या) यथा संयुञ्ज्यात् ॥६॥ ननु सर्वत्र द्वादशस्वेव कल्पयेदिति नेत्याह चतुर्दशसु च (!) कल्पयतीति ॥८॥ वाजश्च मे प्रसवश्च मऽइत्यारभ्याष्टाभिरनुवाकैरेषा वसोर्धारा हूयते तत्रैकस्मिन्ननुवाके अग्निश्च मऽइन्द्रश्च मे सोमश्च मऽइन्द्रश्च मऽइत्यादिमन्त्राः समाम्नाताः तत्र द्वौ-द्वौ संयुनक्तीति वचनेन द्वयोर्द्वयोरवसानविधानान्मन्त्रद्वयस्येन्द्रश्च मऽइत्येतदर्ध (त्ये इ र्धे) भवति अतस्ते मन्त्रा अर्धेन्द्रशब्देनोच्यन्ते ॥१॥ अंशुश्च मे रश्मिश्च मऽइत्यादयो मन्त्रा ग्रहप्रतिपादकत्वाद्ग्रहाः तत्साध्यमपि होममनूद्य प्रशंसति ॥१॥२॥३॥

अथ पूर्ववद्यज्ञकर्मक्रतुमन्त्रसाध्यहोमं (°तुर्मन्त्र°) प्रशंसति ॥१॥ एका च मे तिस्रश्च मऽइत्यादयो मन्त्रा अयुज स्तोमाः तत्साध्यं होमं प्रशंसति अथायुज इति । स्तोमशब्द स्तोत्रीया आचष्टे ॥२॥ चतस्रश्च मेऽष्टौ च मऽइत्यादयो मन्त्राः युग्मतः (!) ॥४॥ सप्त चितयः सप्तमचितौ पुरीषाभावात्षडेव पुरीषाणीति मिलित्वा चितिपुरीषाणि त्रयोदश भवन्ति ॥१॥ वाजाय स्वाहेत्यादिमन्त्रहोमानन्तरमियं ते राडिति मन्त्रस्य प्रयोगं विधत्ते ॥१०॥ अथ कल्पहोमं शंसति । क्लृपिधातुसाहित्येन मन्त्राणां कल्पशब्देनाभिधानम् ॥१२॥ अन्तिमं मन्त्रं व्याचष्टे अथाहेति । आज्यलिप्तम् लिप्तमाज्यमाहिताग्न्यादित्वान्निष्ठायां परनिपातः अत्र स्रुचि यल्लिप्तमाज्यम् ॥१४॥ जलधारैव धारा । उक्तप्रकारेण द्युलोके गवाकारा (°रे) वसोर्धारा दिवः सकाशाद्ग्राममध्यागच्छति ॥१५॥ क्षीरधारा । एवं गवि गवाकारा ॥१६॥३॥३॥

अथ वाजप्रसवीयहोमं विधाय तत्प्रयोजनकथनद्वारा तस्य पदस्य प्रवृत्तिनिमित्तं दर्शयति अथात इति । प्रसौति अनुजानाति ॥१॥ वाजप्रसवीयहविः सर्वौषधं सर्वाभिरोषधिभिः सम्पादितं भवति । अत्र सर्वा ओषधय इति सप्त ग्राम्याः सप्तारण्याः परिगृह्यन्ते ॥४॥ येनैतदित्येतच्छब्देनाभिषेककालः परामृश्यते एतस्मिन्काले ॥५॥ यानि सप्त पूर्वाणि वाजस्येममित्यादिमन्त्रसाध्यानि कर्माणि तानि वाजपेयस्य वाजप्रसवीयं कर्म यानि सप्त वाजस्य नु प्रसव इति मन्त्रसाध्यानि कर्माणि तान्यग्निचयनस्य वाजप्रसवीयम् ॥७॥ यजमानस्य कृष्णाजिनेऽभिषेकः । उत्तरतः उत्तरभागे ॥१०॥ अस्य यजमानस्यैव आहवनीयो देवसम्बन्धी आत्मा अग्निचयनेन यजमानस्याग्नित्वप्राप्तेः । अयमिति यजमानो निर्दिश्यते अयं पुनर्मानुष आत्मा । एवं चाहवनीयसमीपेऽभिषिच्यन्तस्ते ऋत्विजोऽस्य यजमानस्य दैवमात्मानं मर्त्येनात्मनानुप्रसजन्ति मेलयन्ति द्वावप्यात्मानौ संकीर्णौ कुर्वन्ति ॥१२॥ भूतः प्राप्तैश्वर्यः ऐश्वर्यं प्रात्मनाप्तुमिच्छन्बुभूषन् ॥१४॥ आस्पृष्टं परिश्रितः तृतीयार्थे षष्ठी आजीषदर्थे परिश्रिता किंचित्स्पृष्टम् । अग्निमन्वारब्धं स्पृष्टवन्तम् ॥१५॥ पार्थादिहोमस्याभिषेकस्य च पौर्वापर्यमुपपादयति ॥१६॥ यजमानस्य दक्षिणबाहुसमीपं गत्वा ॥१७॥४॥३॥

राष्ट्रभृदाख्यान्होमान्कुयात् राष्ट्रभरणसाधारण्येनैतेषां राष्ट्रभृतां राजत्वमाह राजाना वाऽइति ॥१॥ गन्धेन विशतीति (!) गन्धर्वाः अप्रशब्देन (!) रूपमभिधीयते तेन विशिष्टाश्चरन्तीति ॥१॥ स्वाहा वाट् इति शब्दद्वयमपि प्रदानार्थम् ॥७॥ आयुवाना मिश्रयन्त्य-इव अप्सरसः ॥४॥ स्वाहा वाट् इति शब्दद्वयमपि प्रदानार्थम् ॥७॥ आयुवाना मिश्रयन्त्य-इव ॥८॥ भास्तेजांसि (! भां ते°) ॥१॥ इष्यमाणसाधनत्वादिष्टयः आ इष्टयः एष्टयः ॥१२॥ एष रथआहवनीयस्योपरि धार्यमाणो रथः असौ आकाशमध्ये वितयमान (!) आदित्यात्मकः । रथस्यादित्यात्मकत्वमादित्यवन्मण्डलाकाररथाङ्गवत्त्वात् शीघ्रगामित्वाद्वा ॥१५॥१॥४॥

उक्तहोमानन्तरं वातहोमान्कुर्यात् ॥१॥ होष्यमाणो वायुरग्नेर्बाह्यप्रदेशादाहरणीयः । ततो

बहिरवस्थितस्य वायोर्निधानमस्मिन्नग्नौ सम्पाद्यते ॥२॥ इतीवेत्यभिनयेन दर्शनम् एतस्य वायोरितीवाज्यादिवत्स्कन्दनादिविपत्तिर्नास्ति (! °न्नादिवि°) अविपत्तिरिति (!) पदविभागः । उपरि धार्यमाणस्य रथस्य धुरोऽधोऽधोभागे ॥४॥ असौ लोकः स्वर्लोकः सर्वदा वृष्टिप्रदानेन समदानशीलत्वात्समुद्रः । नभ इति नक्षत्रनाम नभस्वान्नक्षत्रविशिष्टः । तेन समुद्रोऽसीत्यादिना मन्त्रप्रयोगेण अमुष्मिन्लोके यो वायुः बहिःप्रदेशादाहृतोऽस्ति तमेवास्मिन्नग्नौ निदधाति ॥५॥ तमश्वं नाभियुञ्ज्यात् अभियोजनं नाम युक्ते पुनर्योजनम् । तं रथमध्वर्युगृहपर्यन्तमुपर्येव हरेयुः ॥११॥ रुक्शब्दसम्बन्धाद्धोमसाधनभूता ऋचो रुक्मत्यः तत्साध्यान्होमान्कुर्यात् ॥१२॥ अयमिदानीं संचितोऽग्निरिवार्कः असाविति दूरदेशवर्ती सूर्यो निर्दिश्यते तस्य चाश्वमेधत्वमश्वमेधसम्बन्धिनोऽश्वस्य तदात्मनानुसंधातव्यत्वात् ॥१८॥ आवपनं प्रक्षेपः तस्य मीमांसात्र क्रियत इति शेषः । ब्राह्मणवतीं ब्राह्मणसंयुक्तां शाखान्तरेष्वग्निचयनब्राह्मणोक्तामनारभ्याधीताम् ॥२७॥२॥४॥

अग्निचयनस्य धिष्ण्यचयनस्य पौर्वापर्यात्पूर्वं क्षत्रं कृत्वाथ विशं कृतवान्भवति ॥१॥ सोमयागसम्बन्धिनोऽग्निचयनसम्बन्धिनश्चेत्युभयानपि धिष्ण्यान् चिनोति ॥५॥ यस्मिन्नृतौ यो म्रियेत स जनः स एवऽर्तुर्भवति अयमर्थस्तैत्तिरीयके श्रूयते यदि वसन्ते प्रमीयते वसन्तो भवतीत्यादिना । ते ऋत्वात्मकाः पितरस्तं मार्जालीयं धिष्ण्यं प्रदक्षिणभागे व्यवस्थापितवन्तः अत इदानीं स एष मार्जालीय एषां देवानां दक्षिणभागेऽवतिष्ठते एवमृत्वात्मकपितृसम्बन्धात्तत्रोपधेयानामिष्टकानामृतुसंख्यानविधानमुपपन्नम् । अथ धिष्ण्यानां चित्याग्नेश्च संस्थानं प्रशंसति स वा इति अ(त्र) इतीति आग्नीध्रदेशं धिष्ण्योपधानप्रकारं हस्तेन दर्शयति इतीमानित्यत्रेतिशब्देन सदसि होत्रीयादिधिष्ण्यानामुपधानप्रकारम् इत्यमुमितीतिशब्देन चित्याग्न्युपधानप्रकारम् ॥८॥ इष्टकाभिश्चितानां धिष्ण्यानां परिश्रिद्भिः परिश्रयणम् । समुद्रगता आपो यथा पृथिवीं परिश्रयन्ति तद्वत्परिश्रितोऽपि धिष्ण्यान्परिश्रयन्ति ॥९॥ दिशामवेष्टीरिति बहुवचनं हविर्बहुत्वापेक्षम् इष्टेरेकत्वात् ॥१०॥ विहितामिष्टिं पूर्वपक्षीकृत्य तत्रेष्ट्यन्तरं विधत्ते तदाहुरिति तत्तत्राग्नीषोमीयस्य पशुपुरोडाशे विहितेष्टिस्थाने दशहविषमेवैतामिष्टिं निर्वपेत् पूर्वोक्तामिष्टिमतिक्रम्यैतदिष्टिस्वीकारे कारणमाह सा सर्वस्तोमेति सेष्टिः त्रिवृदादिभिः सर्वैः स्तोमैः रथन्तरादिभिः सर्वैः पृष्ठैश्च विशिष्टा सर्वाणि च छन्दांसि तद्विशिष्टत्वात् सर्वाश्च दिशः तदीयानां पुरोऽनुवाक्यानां तल्लिङ्गत्वात् सर्वे च ऋतवः तद्विशिष्टत्वात् अत एव तैत्तिरीयके श्रूयते अग्नये गायत्राय त्रिवृते राथन्तराय वासन्तायाष्टाकपाल इत्यादि दिग्वतीः पुरोऽनुवाक्या भवन्ति सर्वासां दिशामभिहित्या (°तित्या) इति च । अयमग्निः एतत्सर्वजगदात्मकः तथा च सर्वात्मकायाग्नये सर्वस्तोमादिविशिष्टेष्टिरुपसम्पन्ना ॥११॥ पूर्ववदेव तामपीष्टिं पक्षीकृत्येष्ट्यन्तरां विधत्ते तद्वै (!) देवस्त्वामेवेति ॥१२॥ अथैतासामग्न्यादिदेवतानां नामद्वयसम्बन्धमुपपादयति ता वै द्विनाम्न्य इति । तदेव द्वितीयं नाम भवति तथा वाजपेययाजीत्येवमादि ॥१३॥ इष्टिर्हौति काम्येष्टिषु प्रधानस्योपांशुत्वमिति व्यवस्थितत्वात् अस्या अपि कामार्थेष्टित्वात् । इष्ट्यामध्वर्युवन्मैत्रावरुणो नास्तीति अनुब्रूहि यजेत्येव ब्रूयात् ॥१५॥ देवतायागानन्तरं स्विष्टकृदत्(?)दानात्पूर्वं (! °दवदा°?) सविता वेत्यादिना पूर्वाभिषेकाख्येन मन्त्रेणैनमग्निमभिमृशेत् ॥१६॥३॥४॥

इत्यमौपवसथ्यदिवसप्रयोगमभिधायाथ सुत्याहःप्रयोगं विवक्षुः प्रथममग्नियोगं विधत्ते । प्रातर्यावभ्यो देवेभ्योऽनुब्रूहीत्येवं सम्प्रैषः प्रातरनुवाकस्योपाकरणम् । यथा लोके नियुक्ताश्वेन रथेन जिगमिषितप्रदेशान्गच्छति तद्वन्नियमितेनानेन सर्वान्कामानाप्नवानीति यजमानोऽध्वर्युमुखेनाग्निं नियच्छति ॥१॥ ऋषिशब्देन षष्ठकाण्डस्यादावभिहितानृषीनाहेति व्याचष्टे अमूनेतदिति ॥४॥ स एषोऽग्निरस्य यजमानस्य दैव आत्मा एवं च यजमानं एवाभिषिक्तो भवति । सोमस्यामृतत्वात्सोमाभिषेकेणामृताभिषिक्तो भवति ॥८॥ संध्योः परिधिसंध्योः । पूर्वैस्त्रिभिर्मन्त्रैस्त्रिष्वपि परिधिष्वग्नेर्युक्तत्वात्तथैव विमोचनमपि कर्तव्यम् अस्याग्नेरेष विमोचनलक्षणः प्रयोगः मूर्धा मूर्धवत्सर्वस्याप्युपरितनो भवति । अप्सुमतीभ्यामित्यत्रोत्तरमन्त्रे अप्सुशब्दप्रयोगादुपचारेण प्रथममन्त्रस्या(प्य)प्सुमत्त्वम् यज्ञायज्ञियं स्तोत्रं वैश्वानरस्याग्नेः सम्बन्धि भवति तद्देवत्यत्वात् अनेनास्याशान्तत्वमुक्तम् आपस्तु शान्तिः तस्माद्यज्ञायज्ञियस्तोत्रे कर्तव्यं विमोचनमप्सुमतीभ्यामृग्भ्यां क्रियते ॥१३॥ यथा सामिधेन्योऽनूच्यन्ते तासां कर्माङ्गत्वेन प्रत्यहं परिसमाप्ये कर्मणि-कर्मण्यनूच्यत्वात् अतस्तत्समानत्वेन योजनविमोचनेऽपि प्रत्यहमेव कुर्यात् ॥१६॥४॥४॥

अथातः शिष्टः कृत्स्नोऽपि योगः प्रकृतिवदेवेति अभिप्रायेण तमनभिधाय पयोव्रतस्य मीमांसा क्रियतऽइति वाक्यशेषः । व्रतशब्देनात्राभ्यवहार उच्यते ॥१॥ आसक्ति सत्यं केवलं सत्यं वदन्तस्तदानीमवीरतरा-इव अनाढ्यतरा-इवाभवन् एषेति (!) शब्दः तदानीमित्यस्मिन्नर्थे वर्तते केवलं सत्यं वदतां कार्यानुरोधेन वचनस्यासम्भवात्तदानीमसमर्था-इवानाढ्या-इव भवन्ति ॥१६॥ पिपिशुः (!) पिशु (!) अवषवे (!) अवयविन-इव बभूवुः पिष्टा-इव (पुष्टा-इव ?) बभूवुरित्यर्थः ॥१७॥ समिष्टयजुषः पूर्वभावि कर्म कृतं समिष्टयजुर्न कृतं तस्मिन्नवसरे आगताः ॥१९॥ The explanation of क° २०-२७. as well as of ३४. ३५. ५७. ६२. and part of ६३. is wanting in AB. । एते असमापिता दीक्षणीयादयो यज्ञा नव भवन्ति ॥३०॥ ताः दिगात्मिका दर्भस्तम्बादिरूपा दिशः इष्टकाः तत्रैव प्रथमायां चितौ प्रागादिक्रमेण पञ्चसु दिक्षु प्राणभृतामुपधापनात् (!) दिगात्मिकाः प्राणभृतश्च द्वितीयादिषु चतुर्थ्यन्तासु तिसृषु चितिषु सर्वासामपीष्टकानां प्रागादिक्रमेणैवोपधानात् तासां दिगात्मकत्वम् ताश्च पञ्चम्याश्चितेः सम्बन्धिन्यः असपत्ना नाकसदः पञ्चचूडा इत्येता अपि तथैवोपधानाद्दिगात्मिकाः ता एताः सर्वा अपि दिग्रूपा इष्टकाः ऊर्ध्वा उत्क्रामन्त्यो गताः ॥३६॥ एतेषां हविषां निर्वापेण दर्भस्तम्बादीष्टकालक्षणासु उत्क्रान्तासु दिक्षु प्रजापतिं प्रतिष्ठापितवान्भवति ॥३८॥ ता एता अनुमत्यादयो देव्यः ॥३९॥ अस्य पशोः समाप्तिरूपत्वात् ॥४१॥. प्रायणं प्रारम्भः उदयनं समापनम् ॥४३॥ पुरस्तात्षष्ठेऽभिहितं तूष्णीमभिधत्तऽइत्याह अमूनेतदिति ॥४५॥ एतं यजमानम् ॥४६॥ सम्प्रति युक्तमन्यूनानतिरिक्तम् [असम्प्रति] न्यूनातिरिक्तम् ॥४९॥ तच्च नाम कात्यायनेनोक्तम् (१८. ६. २३.) नाम करोति चित्योऽसीतीति (चित्रो!) ॥५२॥ यो यजमानः एतदग्निचयनाख्यं कर्म करोति एतेन देवेषु भवति । मानुष्यां स्त्रियाम् ॥५४॥ तर्हि पूर्ववदेव किमग्निचयनं कृत्स्नमपि कुर्यादिति तत्राह स इति सोऽध्वर्युरनन्तरं क्रियमाणे क्रतौ स्वयमातृण्णा एवोपदधीत [न] पुनरिष्टकान्तराम् एतावता कथं तस्याग्नेः सिद्धिरिति तत्राह इमऽइति प्रथममध्यमोत्तमासूपधीयमानास्तिस्रः स्वयमातृण्णाः पृथिव्यादिलोकत्र-

यात्मिका एष संचितोऽग्निरपि प्रजापतिरूपत्वाल्लोकत्रयात्मिकः (!) एवं च स्वयमातृण्णोपधानेनैव स संचितोऽग्निः सेत्स्यति ॥५८॥ अथ वा ऋतव्या वा विश्वज्योतिषो वा पुनश्चितिं वोपदधीतेत्याह ऋतव्या एवेति अत्र सर्वत्र एवकारस्यावधारणार्थत्वादितरनिषेधसिद्धौ स्वयमातृण्णादीनां सर्वासामपि विधिनिषेधे सम्भवात् (ऽस°?) षोडशिग्रहणवद्विकल्पसिद्धिः (°णावद्वि°) ॥५९॥ एता अग्निवाय्वादित्यात्मिका देवता विश्वज्योतिषः ॥६०॥ संचितेऽग्नौ य एवाग्निर्निधीयते तदग्निरूपामेवेष्टकामभिलक्ष्य एष सर्वोऽपि चित्याग्निः सम्पद्यते उपरि निधायमानायामग्निरूपायामिष्टकायामिष्टकासमुच्चयरूपः(°पायामेतिविष्ट°)कृत्स्नोऽप्यग्निरन्तर्भवति ॥६१॥ तदा सर्वदापि सर्वमेव महदुक्थं शंसेत् न ऋगशीतीरेव ॥६३॥ अथाग्निभरणविषये अन्यानपि कांश्चित्पक्षान्दर्शयितुमुपोद्धातयति अथ हेति ॥६४॥ न तस्य संवत्सरभरणनियमः किं तु कानिचिद्दिनानि भृत्वा चयनम् ॥६५॥ गवामयनादौ संवत्सरं सोमस्याभिषवात् ॥६६॥ यः द्वादशसु मासेषु पूर्णेषु जातः स्यात् ॥६८॥१॥५॥

अथ येऽग्नय इत्यस्य मन्त्रस्यानन्तरं वार्त्रहत्यायेत्यादयः सप्त मन्त्राः समाम्नायन्ते तेषामिदानीं विनियोगमभिधातुमुपोद्धातमाह इन्द्र इति । न्यूनस्याकृतस्य कर्मणः प्राप्त्यै आधिक्येन कृतस्यानाधिक्याय अन्यथाकृतस्य चानन्यथाकरणाय । the rest is wanting in AB.

इति माधवीये वेदार्थप्रकाशे माध्यन्दिनीयशतपथब्राह्मणभाष्ये नवमकाण्डव्याख्या समाप्ता ॥१॥ ॥

VARIOUS READINGS.

Adhy. १. १. १० स्वस्याम् Sây. - १६ मूयान्न° B. with a dot in the मू (and thus ब् is generally expressed in B.). - १७ ब्रूयादसौ ABC. - २. ४३ विजितो A 2. Sây. — *Adhy*. २. ३. ३९ इत्येतत्प्र ABC. — *Adhy*. ३. १. १२ नियच्छति Sây. - १७ कपुत्स° A B1. कपुछ° C. B2. इयमेव कपुशा° Sây. - २४ शफन° Sây. (?). - ३. १४ अभूमेति स्वर्द्धि ABC. — *Adhy*. ४. १. १ नामिते! ABC.- Sây. unites the two first brâhma*n*as into one. - २. ४ आविपत्तिः (?) Sây. - ३. १२ तत्वै A. तवै or तन्वै BC. - १७ प्रतीष्य (!) Sây. — *Adhy*. ५. १. १५ Sây. divides ऐषावीर into ऐष and अवीर. - ibid. सद्द् वेवा° A 2. B. C. - १७ पिपिशु° पिश्व° Sây. - ५७ °ज्याये° C. ग्याये B 2. - ६२ तन्वेव ABC. - ६५ कामन्वा ABC. - २. १ °पर्यः A. - १६ °ज्ञो लोका ABC. —

ओम् । अग्निरेष पुरस्ताच्चीयते । संवत्सर उपरिष्टान्महदुक्थꣳ शस्यते प्रजा-
पतेर्विस्रस्तस्याग्रꣳ रसोऽगच्छत् ॥१॥ स यः स प्रजापतिर्व्यस्रꣳसत । संवत्सरः सो
ऽथ यान्यस्य तानि पर्वाणि व्यस्रꣳसन्ताहोरात्राणि तानि ॥२॥ स यः स संवत्स-
रः प्रजापतिर्व्यस्रꣳसत । अयमेव स योऽयमग्निश्चीयतेऽथ यान्यस्य तान्यहोरात्रा-
णि पर्वाणि व्यस्रꣳसन्तेष्टका एव तास्तद्यदेता उपदधाति यान्येवास्य तान्यहोरा-
त्राणि पर्वाणि व्यस्रꣳसन्त तान्यस्मिन्नेतत्प्रतिदधाति तदेतदत्रैव यजुश्चितमत्राप्तम्
॥३॥ अथ योऽस्य सोऽग्रꣳ रसोऽगच्छत् । महत्तदुक्थं तमस्य तꣳ रसमृक्सामा-
भ्यामनुयन्ति तद्यत्तत्र यजुः पुरस्तादेत्यभिनेतेव तदेति यथादो मेऽमुत्रैकं तदाह-
रिष्यामीत्येवं तद्यजुः पुरस्तादेति तꣳ संवत्सरऽआप्नुवन्ति ॥४॥ तमध्वर्युर्ग्रहेण गृ-
ह्णाति । यद्गृह्णाति तस्माद्ग्रहस्तस्मिन्नुद्गाता महाव्रतेन रसं दधाति सर्वाणि हैता-
नि सामानि यन्महाव्रतं तदस्मिन्त्सर्वैः सामभी रसं दधाति तस्मिन्होता महतो-
क्थेन रसं दधाति सर्वा हैता ऋचो यन्महदुक्थं तदस्मिन्त्सर्वाभिर्ऋग्भी रसं दधा-
ति ॥५॥ ते यदा स्तुवते यदानुशꣳसति । अथास्मिन्नेतं वषट्कृते जुहोति तदेन-
मेष रसोऽप्येति न वै महाव्रतमिदꣳ स्तुतꣳ शेतऽइति पश्यन्ति नो महदिदमु-
क्थमित्यग्निमेव पश्यन्त्यात्मा ह्यग्निस्तदेनमेतेऽउभे रसो भूत्वापीत ऋक्च साम च
तदुभेऽऋक्सामे यजुरपीतः ॥६॥ स एष मिथुनोऽग्निः । प्रथमा च चितिर्द्वितीया
च तृतीया च चतुर्थी चाथ पञ्चम्यै चितेर्यश्चितेऽग्निर्निधीयते तन्मिथुनं मिथुन उ
ऽएवायमात्मा ॥७॥ अङ्गुष्ठा इति पुमाꣳसः । अङ्गुलय इति स्त्रियः कर्णाविति

पुमाᳪसौ भ्रुवाविति स्त्रियाऽओष्ठाविति पुमाᳪसौ नासिकेऽइति स्त्रियौ दन्ता इति पुमाᳪसो जिह्वेति स्त्री सर्व एव मिथुनः सोऽनेन मिथुनेनात्मनैतं मिथुनमग्निमप्येति ॥८॥ एषात्रापीतिः । अप्यहैवं मिथुन इत्यᳪ ह त्वेवापि मिथुनो वागेवेयं योऽयमग्निश्चितो वाचा हि चीयतेऽथ यश्चितेऽग्निर्निधीयते स प्राणः प्राणो वै वाचो वृषा प्राणो मिथुनं वाग्वेवायमात्माथ य आत्मन्प्राणस्तन्मिथुनᳪ सोऽनेन मिथुनेनात्मनैतं मिथुनमग्निमप्येति ॥९॥ एषोऽअत्रापीतिः । न ह वाऽअस्यापुत्रताये का चन शङ्का भवति य एवमेतौ मिथुनावात्मानं चाग्निं च वेदान्नᳪ ह वेवायमात्मा दक्षिणान्नं वनुते यो न आत्मेति ह्यप्यृषिणाभ्युक्तम् ॥१०॥ तदिदमन्नं जग्धं द्वेधा भवनि । यदस्यामृतमूर्ध्वं तन्नाभेरूर्ध्वैः प्राणैरुच्चरति तद्वायुमप्येत्यथ यन्मर्त्यं पराक् तन्नाभिमत्येति तद्द्वयं भूत्वेमामप्येति मूत्रं च पुरीषं च तद्यदिमामप्येति योऽयमग्निश्चितस्तं तदप्येत्यथ यद्वायुमप्येति यश्चितेऽग्निर्निधीयते तं तदप्येत्येषोऽएवात्रापीतिः ॥११॥ ब्राह्मणम् ॥१॥

प्रजापतिरिमांल्लोकानैप्सत् । स एतं वयोविधमात्मानमपश्यदग्निं तं व्यधत्त तेनेमं लोकमाप्नोत्स द्वितीयं वयोविधमात्मानमपश्यन्महाव्रतं तद्व्यधत्त तेनान्तरिक्षमाप्नोत्स तृतीयं वयोविधमात्मानमपश्यन्महदुक्थं तद्व्यधत्त तेन दिवमाप्नोत् ॥१॥ अयं वाव लोक एषोऽग्निश्चितः । अन्तरिक्षं महाव्रतं द्यौर्महदुक्थं तस्मादेतानि सर्वाणि सहोपेयादग्निं महाव्रतं महदुक्थᳪ सह हीमे लोका असृज्यन्त तद्यदग्निः प्रथमश्चीयतेऽयᳪ ह्येषां लोकानां प्रथमोऽसृज्यतेत्यधिदेवतम् ॥२॥ अथाध्यात्मम् । मन एवाग्निः प्राणो महाव्रतं वाङ्महदुक्थं तस्मादेतानि सर्वाणि सहोपेयात्सह हि मनः प्राणो वाक्तद्यदग्निः प्रथमश्चीयते मनो हि प्रथमं प्राणानाम् ॥३॥ आत्मैवाग्निः । प्राणो महाव्रतं वाङ् महदुक्थं तस्मादेतानि सर्वाणि सहोपेयात्सह ह्यात्मा प्राणो वाक्तद्यदग्निः प्रथमश्चीयतऽआत्मा हि प्रथमः सम्भ-

वतः सम्भवति ॥४॥ शिर एवाग्निः । प्राणो महाव्रतमात्मा महदुक्थं तस्मादे-
तानि सर्वाणि सहोपेयात्सह हि शिरः प्राण आत्मा तद्यदग्निः प्रथमश्चीयते शि-
रो हि प्रथमं जायमानस्य जायते तस्माद्यत्रैतानि सर्वाणि सह क्रियन्ते महदेवो-
क्थमातमां ख्यायतऽआत्मा हि महदुक्थम् ॥५॥ तदाहुः । यदेतानि सर्वाणि
सह दुरुपापानि कैतेषामुपाप्तिरिति ज्योतिष्टोमऽएवाग्निष्टोमे ज्योतिष्टोमेनैवा-
ग्निष्टोमेन यजेत ॥६॥ तस्य वाऽएतस्य ज्योतिष्टोमस्याग्निष्टोमस्य । त्रिवृद्बहिष्प-
वमानं तद्धैतस्य शिरः पञ्चदशसप्तदशाऽउत्तरौ पवमानौ तौ पक्षौ पञ्चदशꣳ हो-
तुराज्यꣳ सप्तदशं पृष्ठमेकविꣳशं यज्ञायज्ञियं तत्पुच्छम् ॥७॥ तयोर्वाऽएतयोः । पञ्च-
दशसप्तदशयोर्द्वात्रिꣳशत्स्तोत्रियास्ततो याः पञ्चविꣳशतिः स पञ्चविꣳश आत्माथ
याः सप्तातियन्ति ताः परिमादः पशवो हैताः पशवः परिमाद एतावद्वै महाव्रतं
तदेतदत्रैव महाव्रतमाप्नोति ॥८॥ अथ होता सप्त छन्दाꣳसि शꣳसति । चतुरुत्त-
राण्येकर्चानि विराडष्टमानि तेषां तिस्रश्चाशीतयोऽत्तराणि पञ्चचत्वारिꣳशच्च ततो
या अशीतयः सैवाशीतीनामाप्तिरशीतिभिर्हि महदुक्थमाख्यायतेऽथ यानि पञ्च-
चत्वारिꣳशत्ततो यानि पञ्चविꣳशतिः स पञ्चविꣳश आत्मा यत्र वाऽआत्मा तदेव
शिरस्तत्पक्षपुच्छान्यथ यानि विꣳशतिस्तदावपनमेतावद्वै महदुक्थं तदेतदत्रैव
महदुक्थमाप्नोति तानि वाऽएतानि सर्वाणि ज्योतिष्टोमऽएवाग्निष्टोमऽआप्यन्ते
तस्मादु ज्योतिष्टोमेनैवाग्निष्टोमेन यजेत ॥९॥ ब्राह्मणम् ॥२॥

प्रजापतिः प्रजा असृजत । स ऊर्ध्वेभ्य एव प्राणेभ्यो देवानसृजत येऽवाञ्चः प्रा-
णास्तेभ्यो मर्त्याः प्रजा अथोर्ध्वमेव मृत्युं प्रजाभ्योऽत्तारमसृजत ॥१॥ तस्य ह प्र-
जापतेः । अर्धमेव मर्त्यमासीदर्धममृतं तद्यदस्य मर्त्यमासीत्तेन मृत्योरबिभेत्स बि-
भ्यदिमां प्राविशद्द्वयं भूत्वा मृच्चापश्च ॥२॥ स मृत्युर्देवानब्रवीत् । क्व नु सोऽभू-
द्यो नोऽसृष्टेति त्वद्बिभ्यदिमां प्राविक्षदिति सोऽब्रवीत्तं वाऽअन्विच्छाम तꣳ सम्भ-

राम न वा ऽअहं तꣳ हिꣳसिष्यामीति तं देवा अस्या ऽअधि समभरन्यदस्यास्वा-
सीत्ता अपः समभरन्नथ यदस्यां तां मृदं तदुभयꣳ सम्भृत्य मृदं चापश्चेष्टकामकुर्व-
स्तस्मादेतदुभयमिष्टका भवति मृच्चापश्च ॥३॥ तदेता वा ऽअस्य ताः। पञ्च मर्त्या-
स्तन्व आसंलोम त्वङ्माꣳसमस्थि मज्जाथैता अमृता मनो वाक्प्राणश्चक्षुः श्रोत्रम्
॥४॥ स यः स प्रजापतिः । अयमेव स योऽयमग्निश्चीयतेऽथ या अस्य ताः पञ्च
मर्त्यास्तन्व आसन्नेतास्ताः पुरीषचितयोऽथ या अमृता एतास्ता इष्टकाचितयः
॥५॥ ते देवा अब्रुवन् । अमृतमिमं करवामेति तस्यैताभ्याममृताभ्यां तनूभ्यामे-
तां मर्त्यां तनूं परिगृह्यामृतामकुर्वन्निष्टकाचितिभ्यां पुरीषचितिं तथा द्वितीयां त-
था तृतीयां तथा चतुर्थीम् ॥६॥ अथ पञ्चमीं चितिमुपधाय । पुरीषं निवपति
तत्र विकर्णीं च स्वयमातृण्णां चोपदधाति हिरण्यशकलैः प्रोक्षत्यग्निमभ्यादधाति
सा सप्तमी चितिस्तदमृतमेवमस्यैताभ्याममृताभ्यां तनूभ्यामेता मर्त्यां तनूं परिगृह्या-
मृतामकुर्वन्निष्टकाचितिभ्यां पुरीषचितिं ततो वै प्रजापतिरमृतोऽभवत्तथैवैतद्यज-
मान एतममृतमात्मानं कृत्वा सोऽमृतो भवति ॥७॥ ते वै देवास्तं नाविदुः ।
यद्येनꣳ सर्वं वाकुर्वन्न वा सर्वं यद्यति वारेचयन्न वाभ्यापयंस्त ऽएतामृचमपश्य-
न्धामच्छदग्निरिन्द्रो ब्रह्मा देवो बृहस्पतिः सचेतसो विश्वे देवा यज्ञं प्रावन्तु नः
शुभ ऽइति ॥८॥ तस्या अस्त्येवाग्नेयम् । अस्त्यैन्द्रमस्ति वैश्वदेवं तद्यदस्या आग्नेयं
यदेवैतस्याग्नेराग्नेयं तदस्य तेन समस्कुर्वन्यदैन्द्रं तदैन्द्रेण यद्वैश्वदेवं तद्वैश्वदेवेन त-
मत्रैव सर्वं कृत्स्नꣳ समस्कुर्वन् ॥९॥ तद्यदेतयोपतिष्ठते । यदेवास्यात्र विद्वान्वा-
विद्वान्वातिं वा रेचयति न वाभ्यापयति तदेवास्यैतया सर्वमाप्नोति यदस्य किं
चानाप्तमनुष्टुब्धामच्छद्भवति वाग्वा ऽअनुष्टुब्वाग्धामच्छद्वाचैवास्य तदाप्नोति यदस्य
किं चानाप्तं पुरीषवतीं चितिं कृत्वोपतिष्ठेतेत्यु हैक ऽआहुस्तत्र हि सा सर्वा कृ-
त्स्ना भवतीति ॥१०॥ तदु वा ऽआहुः । यविष्ठवत्यैवोपतिष्ठेतैतद्वास्य प्रियं धाम

यद्यविष्ठ इति तद्यदस्य प्रियं धाम तेनास्य तदाप्नोति यदस्य किं चानाप्तमाग्नेय्या-
ग्निकर्म हि गायत्र्या गायत्रोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवास्य तदाप्नोति
यदस्य किं चानाप्तमनिरुक्तया सर्वं वाऽअनिरुक्तꣳ सर्वेणैवास्य तदाप्नोति यदस्य
किं चानाप्तं त्वं यविष्ठ दाशुष इति तस्योक्तो बन्धुः पुरीषवतीं चितिं कृत्वोपति-
ष्ठेत तत्र हि सा सर्वा कृत्स्ना भवति ॥११॥ ब्राह्मणम् ॥३॥ ॥

उभयꣳ हैतदग्रे प्रजापतिरास । मर्त्यं चैवामृतं च तस्य प्राणा एवामृता आसुः
शरीरं मर्त्यꣳ स एतेन कर्मणैतयावृतैकधाजरममृतमात्मानमकुरुत तथैवैतद्यज-
मान उभयमेव भवति मर्त्यं चैवामृतं च तस्य प्राणा एवामृता भवन्ति शरीरं
मर्त्यꣳ स एतेन कर्मणैतयावृतैकधाजरममृतमात्मानं कुरुते ॥१॥ स प्रथमां चि-
तिं चिनोति । सा हास्यैषा प्राण एव तद्धि तदमृतमृतꣳ हि प्राणः सैषामृतचि-
तिरथ पुरीष निवपति तद्धास्यैतन्मज्जैव तद्धि तन्मर्त्यं मर्त्या हि मज्जा तदेतस्मि-
न्नमृते प्रतिष्ठापयति तेनास्यैतदमृतं भवति ॥२॥ द्वितीयां चितिं चिनोति । सा
हास्यैषापान एव तद्धि तदमृतममृतꣳ ह्यपानः सैषामृतचितिस्तदेतन्मर्त्यमुभयतो
ऽमृतेन परिगृह्णाति तेनास्यैतदमृतं भवत्यथ पुरीषं निवपति तद्धास्यैतदस्थ्येव त-
द्धि तन्मर्त्यं मर्त्यꣳ ह्यस्थि तदेतस्मिन्नमृते प्रतिष्ठापयति तेनास्यैतदमृतं भवति
॥३॥ तृतीयां चितिं चिनोति । सा हास्यैषा व्यान एव तद्धि तदमृतममृतꣳ हि
व्यानः सैषामृतचितिस्तदेतन्मर्त्यमुभयतोऽमृतेन परिगृह्णाति तेनास्यैतदमृतं भव-
त्यथ पुरीषं निवपति तद्धास्यैतत्स्नावैव तद्धि तन्मर्त्यं मर्त्यꣳ हि स्नाव तदेतस्मि-
न्नमृते प्रतिष्ठापयति तेनास्यैतदमृतं भवति ॥४॥ चतुर्थीं चितिं चिनोति । सा
हास्यैषोदान एव तद्धि तदमृतममृतꣳ ह्युदानः सैषामृतचितिस्तदेतन्मर्त्यमुभयतो
ऽमृतेन परिगृह्णाति तेनास्यैतदमृतं भवत्यथ पुरीषं निवपति तद्धास्यैतन्माꣳसमेव
तद्धि तन्मर्त्यं मर्त्यꣳ हि माꣳसं तदेतस्मिन्नमृते प्रतिष्ठापयति तेनास्यैतदमृतं भवति

॥५॥ पञ्चमीं चितिं चिनोति । सा हास्यैषा समान एव तद्धि तदमृतममृतꣳ हि
समानः सैषामृतचितिस्तदेतन्मर्त्यमुभयतोऽमृतेन परिगृह्णाति तेनास्यैतदमृतं भव-
त्यथ पुरीषं निवपति तद्धास्यैतन्मेद एव तद्धि तन्मर्त्यं मर्त्यꣳ हि मेदस्तदेतस्मिन्न-
मृते प्रतिष्ठापयति तेनास्यैतदमृतं भवति ॥६॥ षष्ठीं चितिं चिनोति । सा हा-
स्यैषा वागेव तद्धि तदमृतममृतꣳ हि वाक्सैषामृतचितिस्तदेतन्मर्त्यमुभयतोऽमृ-
तेन परिगृह्णाति तेनास्यैतदमृतं भवत्यथ पुरीषं निवपति तद्धास्यैतदसृगेव त्वगेव
तद्धि तन्मर्त्यं मर्त्यꣳ ह्यसृङ्मर्त्या त्वक्तदेतस्मिन्नमृते प्रतिष्ठापयति तेनास्यैतदमृतं
भवति ॥७॥ ता वा एताः । षडिष्टकाचितयः षट् पुरीषचितयस्तद्द्वादश द्वादश
मासाः संवत्सरः संवत्सरोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैव तत्प्रजापतिरे-
कधाजरममृतमात्मानमकुरुत तथैवैतद्यजमान एकधाजरममृतमात्मानं कुरुते ॥८॥
अथ विकर्णीं च स्वयमातृण्णां चोपधाय । हिरण्यशकलैः प्रोक्षत्यग्निमभ्यादधाति
रूपमेव तत्प्रजापतिर्हिरण्मयमन्तत आत्मनोऽकुरुत तद्यदन्ततस्तस्मादिदमन्त्यमा-
त्मनो रूपं तस्मादाहुर्हिरण्मयः प्रजापतिरिति तथैवैतद्यजमानो रूपमेव हिरण्म-
यमन्तत आत्मनः कुरुते तद्यदन्ततस्तस्मादिदमन्त्यमात्मनो रूपं तस्माद्ये चैतद्विदुर्ये
च न हिरण्मयोऽग्निचिदमुष्मिँल्लोके सम्भवतीत्येवाहुः ॥९॥ तद्धैतच्छाण्डिल्यश्च
साप्तरथवाहनिश्च । आचार्यान्तेवासिनौ व्यूदाते रूपमेवास्यैतदिति ह स्माह शा-
ण्डिल्यो लोमानीति साप्तरथवाहनिः ॥१०॥ स होवाच शाण्डिल्यः । रूपं वा-
व लोमवद्रूपमलोमकꣳ रूपमेवास्यैतदिति तद्धि तत्तथा यथा तच्छाण्डिल्य उवाच
संचितेऽग्निः प्रणीयते प्रणीतादूर्ध्वꣳ समिध आहुतय इति हूयन्ते ॥११॥ प्राणेन
वै देवा अन्नमदन्ति । अग्निरु देवानां प्राणस्तस्मात्प्राग्देवेभ्यो जुह्वति प्राणेन हि
देवा अन्नमदन्त्यपानेन मनुष्या अन्नमदन्ति तस्मात्प्रत्यङ्मनुष्येष्वन्नं धीयतेऽपानेन
हि मनुष्या अन्नमदन्ति ॥१२॥ तदाहुः । न वयसोऽग्निचिदश्नीयाद्वयो वा एष

ऽन्नं भवति योऽग्निं चिनुतऽईश्वर आर्तिमार्तोस्तस्मान्न वयसोऽग्निचिदश्नीयादिति तद्वै काममेवैवंविदश्नीयादग्नेर्वाऽएष ऽन्नं भवति योऽग्निं चिनुते सर्वं वाऽइदमग्नेरन्नꣳ सर्वं मऽइदमन्नमित्येवैवंविद्विद्यादिति ॥१३॥ तदाहुः । किं तदग्नौ क्रियते येन यजमानः पुनर्मृत्युमपजयतीत्यग्निर्वाऽएष देवता भवति योऽग्निं चिनुतेऽमृतमु वाऽअग्निः श्रीर्देवाः श्रियं गच्छति यशो देवा यशो ह भवति य एवं वेद ॥१४॥ ब्राह्मणम् ॥४॥ ॥

सर्वे हैते यज्ञा योऽयमग्निश्चितः । स यत्पशुमालभते तदग्न्याधेयमथ यदुखाꣳ सम्भरति तान्यग्न्याधेयहवीꣳष्यथ यद्दीक्षते तदग्निहोत्रमथ यद्दीक्षितः समिधावादधाति तेऽअग्निहोत्राहुती ॥१॥ ते वै सायंप्रातरादधाति । सायंप्रातर्ह्यग्निहोत्राहुती जुहोति समानेन मन्त्रेण समानेन हि मन्त्रेणाग्निहोत्राहुती जुहोत्यथ यद्वनीवाहनं च भस्मनश्चाभ्यवहरणं तौ दर्शपूर्णमासावथ यद्गार्हपत्यं चिनोति तानि चातुर्मास्यान्यथ यदूर्ध्वं गार्हपत्यादा सर्वौषधात्ता इष्टयोऽथ यदूर्ध्वꣳ सर्वौषधात्प्राचीनं चितिभ्यस्ते पशुबन्धा यऽएवैतेषु यज्ञेषु विष्णुक्रमास्ते विष्णुक्रमा यज्जप्यं तद्वात्सप्रम् ॥२॥ सौम्योऽध्वरः प्रथमा चितिः । यत्प्राचीनꣳ सर्वेभ्यो राजसूयो द्वितीया वाजपेयस्तृतीयाश्वमेधश्चतुर्थ्यग्निसवः पञ्चमी यैश्चितꣳ सामभिः परिगायति तन्महाव्रतमथ यत्तत्रोद्गातुः पुरस्ताज्जप्यं तच्छतरुद्रियं वसोर्धारा महदुक्थमथ यदूर्ध्वꣳ सामभ्यः प्राचीनं वसोर्धारायै यदेव तत्र होतुः पुरस्ताज्जप्यं तत्तदथ यदूर्ध्वं वसोर्धारायै ते गृहमेधा एतावन्तो वै सर्वे यज्ञास्तानग्निनाप्नोति ॥३॥ अथातो यज्ञवीर्याणामेव । सायंप्रातर्ह वाऽअमुष्मिंलोकेऽग्निहोत्रहुदश्नाति तावती ह तस्मिन्यज्ञऽऊर्गर्धमासेऽर्धमासे दर्शपूर्णमासयाजी चतुर्षु-चतुर्षु मासेषु चातुर्मास्ययाजी षट्सु-षट्सु पशुबन्धयाजी संवत्सरे-संवत्सरे सोमयाजी शते-शते संवत्सरेष्वग्निचित्काममश्नाति कामं न तद्वैतद्यावच्छतꣳ संवत्सरास्तावदमृतमनन्तमपर्यन्तꣳ स

यो हैतदेवं वेदैवꣳ हैवास्यैतदमृतमनन्तमपर्यन्तं भवति तस्य यदपीषीकयेवोपहन्यात्तदेवास्यामृतमनन्तमपर्यन्तं भवति ॥४॥ ब्राह्मणम् ॥५॥ प्रथमोऽध्यायः [६१.] ॥ ॥

प्रजापतिः स्वर्गं लोकमजिगाꣳसत् । सर्वे वै पशवः प्रजापतिः पुरुषोऽश्वो गौरविरजः स एतै रूपैर्नाशक्नोत्स एतं वयोविधमात्मानमपश्यदग्निं तं व्यधत्त सोऽनुपसमुह्यानुपाधायोदपिपतिषत्स नाशक्नोत्स उपसमुह्योपाधायोदपतत्तस्माद्यप्येतर्हि वयाꣳसि यदेव पक्षाऽउपसमूहन्ते यदा पत्राणि विसृजन्तेऽथोत्पतितुꣳ शक्नुवन्ति ॥१॥ तं वाऽअङ्गुलिभिर्मिमीते । पुरुषो वै यज्ञस्तेनेदꣳ सर्वं मितं तस्यैषावमा मात्रा यदङ्गुलयस्तद्यास्यावमा मात्रा तामस्य तदाप्नोति तयैनं तन्मिमीते ॥२॥ चतुर्विꣳशत्याङ्गुलिभिर्मिमीते । चतुर्विꣳशत्यक्षरा वै गायत्री गायत्रोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनं तन्मिमीते ॥३॥ स चतुरङ्गुलमेवोभयतोऽन्तरत उपसमूहति । चतुरङ्गुलमुभयतो बाह्यतो व्युदूहति तद्यावदेवोपसमूहति तावद्युदूहति तन्नाद्धैवातिरेचयति नो कनीयः करोति तथा पुच्छस्य तथोत्तरस्य पक्षस्य ॥४॥ अथ निर्णामौ पक्षयोः करोति । निर्णामौ हि वयसः पक्षयोर्भवतो वितृतीये वितृतीये हि वयसः पक्षयोर्निर्णामौ भवतोऽन्तरे वितृतीयेऽन्तरे हि वितृतीये वयसः पक्षयोर्निर्णामौ भवतः स चतुरङ्गुलमेव पुरस्तादुदूहति चतुरङ्गुलं पश्चादुपसमूहति तद्यावदेवोदूहति तावदुपसमूहति तन्नाद्धैवातिरेचयति नो कनीयः करोति ॥५॥ स तस्मिन्निर्णामे । एकामिष्टकामुपदधाति तद्येयं वयसः पततो निर्णामादेका नाड्युपशेते तां तत्करोत्यथोऽइदम् ॥६॥ अथ वक्रौ पक्षौ करोति । वक्रौ हि वयसः पक्षौ भवतः स चतुरङ्गुलमेव पश्चादुदूहति चतुरङ्गुलं पुरस्तादुपसमूहति तद्यावदेवोदूहति तावदुपसमूहति तन्नाद्धैवातिरेचयति नो कनीयः करोति ॥७॥ अथ रूपमुत्तमं करोति । अत्रैष

सर्वोऽग्निः संस्कृतस्तस्मिन्देवा एतद्रूपमुत्तममदधुस्तथैवास्मिन्नयमेतद्रूपमुत्तमं दधा-
ति स सहस्रमृग्वालिखिता इष्टकाः करोति सहस्रमित्यालिखिताः सहस्रमित्या-
लिखिताः ॥८॥ अथ पञ्चमीं चितिमुपधाय । त्रेधाग्निं विमिमीते स मध्यमे वि-
तृतीये सहस्रमृग्वालिखिता इष्टका उपदधाति तद्यानीमानि वयसः प्रत्यञ्चि
शीर्ष्ण आ पुच्छादनूनि लोमानि तानि तत्करोति ॥९॥ अथ सहस्रमित्यालिखिता
दक्षिणत उपदधाति । तद्यानीमानि वयसो दक्षिणतो वक्राणि लोमानि तानि
तत्करोति ॥१०॥ अथ सहस्रमित्यालिखिता उत्तरत उपदधाति । तद्यानीमानि
वयस उत्तरतो वक्राणि लोमानि तानि तत्करोति सहस्रेण सर्वं वै सहस्रं
सर्वेणैवास्मिन्नेतद्रूपमुत्तमं दधाति त्रिभिः सहस्रैस्त्रिवृदग्निर्यावानग्निर्यावत्यस्य मा-
त्रा तावतैवास्मिन्नेतद्रूपमुत्तमं दधाति ॥११॥ ब्राह्मणम् ॥ ६ [२. १.] ॥ ॥

यान्वै तान्सप्त पुरुषान् । एकं पुरुषमकुर्वन्त्स प्रजापतिरभवत्स प्रजा असृजत
स प्रजाः सृष्ट्वोर्ध्व उदक्रामत्स एतं लोकमगच्छद्यत्रैष एतत्तपति नो ह तर्ह्यन्य ए-
तस्मादत्र यज्ञिय आस तं देवा यज्ञेनैव यष्टुमध्रियन्त ॥१॥ तस्मादेतदृषिणाभ्यनू-
क्तम् । यज्ञेन यज्ञमयजन्त देवा इति यज्ञेन हि तं यज्ञमयजन्त देवास्तानि धर्माणि
प्रथमान्यासन्निति ते हि धर्माः प्रथमेऽक्रियन्त ते ह नाकं महिमानः सचन्तेति
स्वर्गो वै लोको नाको देवा महिमानस्ते देवाः स्वर्गं लोकं सचन्त ये तं य-
ज्ञमयजन्नित्येतत् ॥२॥ यत्र पूर्वे साध्याः सन्ति देवा इति । प्राणा वै साध्या दे-
वास्तऽएतमग्रऽएवमसाधयन्नेतदेव बुभूषन्तस्तऽउऽएवाप्येतर्हि साधयन्ति पश्चेद्-
मन्यदभवद्यज्जत्रममर्त्यस्य भुवनस्य भूनेति पश्चाद्धैवेदमन्यद्यज्ञियमास यत्किं चामृ-
तम् ॥३॥ सुपर्णोऽअङ्ग सवितुर्गरुत्मान् । पूर्वो जातः स उऽअस्यानु धर्मेति प्र-
जापतिर्वै सुपर्णो गरुत्मानेष सवितेतस्य प्रजापतिरनु धर्ममित्येतत् ॥४॥ स वै
सप्तपुरुषो भवति । सप्तपुरुषो ह्ययं पुरुषो यच्चत्वार आत्मा त्रयः पक्षपुच्छानि च-

त्वारो हि तस्य पुरुषस्यात्मा त्रयः पक्षपुच्छानि ॥५॥ तं वाऽउद्बाहुना पुरुषेण मिमीते । पुरुषो वै यज्ञस्तेनेदꣳ सर्वं मितं तस्यैषा परमा मात्रा यदुद्बाहुस्तद्यास्य परमा मात्रा तामस्य तदाप्नोति तयैनं तन्मिमीते तत्रोप यत्प्रपदेनाभ्युच्छ्रितो भवति तत्परिश्रिद्भिराप्नोति तस्मात्तु बाह्येनेव लेखां परिश्रिद्भ्यः खनेत् ॥६॥ अथ पक्षयोररत्नीऽउपादधाति । पक्षयोस्तद्वीर्यं दधाति बाहू वै पक्षौ बाहुभ्यामु वाऽअन्नमद्यतेऽन्नायैव तमवकाशं करोति तद्यत्पक्षयोररत्नीऽउपादधात्यरत्निमात्राद्ध्यन्नमद्यते ॥७॥ अथ पुच्छे वितस्तिमुपादधाति । प्रतिष्ठायां तद्वीर्यं दधाति प्रतिष्ठा वै पुच्छꣳ हस्तो वितस्तिर्हस्तेन वाऽअन्नमद्यतेऽन्नायैव तमवकाशं करोति तद्यत्पुच्छे वितस्तिमुपादधात्यन्नऽएवैनं तत्प्रतिष्ठापयति तद्यत्तत्र कनीय उपादधात्यन्ने ह्येवैनं तत्प्रतिष्ठापयत्यथोऽएतावद्वाऽइदं मितं भवत्येतावदिदं तद्यदेवं मिमीतऽएतस्यैवाप्त्यै ॥८॥ ब्राह्मणम् ॥७ [२. २.] ॥ ॥

या वाऽइयं वेदिः सप्तविधस्य । एषा वेदेर्मात्रा स देवयजनमध्यवसाय पूर्वया द्वारा पत्नीशालं प्रपद्य गार्हपत्यायोद्धत्यावोक्षति गार्हपत्यस्योद्धतात्सप्त प्राचः प्रक्रमान्प्रक्रामति ततः प्राञ्चं व्यामं विमिमीते तस्य मध्यऽआहवनीयायोद्धत्यावोक्षति पूर्वार्धाद्व्यामस्य त्रीन्प्राचः प्रक्रमान्प्रक्रामति स वेद्यन्तः ॥१॥ ॥शतम्५२००॥॥ ते वाऽएते । व्यामैकादशाः प्रक्रमा अन्तरा वेद्यन्तं च गार्हपत्यं चैकादशाक्षरा त्रिष्टुब्वज्रस्त्रिष्टुब्वीर्यं त्रिष्टुब्वज्रेणैवैतद्वीर्येण यजमानः पुरस्ताद्यज्ञमुखाद्रक्षाꣳसि नाष्ट्रा अपहन्ति ॥२॥ सैषा वेदेर्योनिः । एतस्यै वै योनेर्देवा वेदिं प्राजनयन्नथ य एष व्यामः सा गार्हपत्यस्य योनिरेतस्यै वै योनेर्देवा गार्हपत्यं प्राजनयन्गार्हपत्यादाहवनीयम् ॥३॥ स वेद्यन्तात् । षट्त्रिꣳशत्प्रक्रमां प्राचीं वेदिं विमिमीते त्रिꣳशतं पश्चात्तिरश्चीं चतुर्विꣳशतिं पुरस्तात्तन्नवतिः सैषा नवतिप्रक्रमा वेदिस्तस्याꣳ सप्तविधमग्निं विदधाति ॥४॥ तदाहुः । कथमेष सप्तविध एतया वेद्या सम्प-

द्यत ऽ इति दश वा ऽ इमे पुरुषे प्राणाश्चत्वार्यङ्गान्यात्मा पञ्चदश एवं द्वितीय ऽ एवं तृतीये षट्सु पुरुषेषु नवतिरथैकः पुरुषो ऽत्येति पाङ्क्तो वै पुरुषो लोम त्वङ्माꣳसमस्थि मज्जा पाङ्क्तो ऽ इयं वेदिश्चतस्रो दिश आत्मा पञ्चम्येवमेष सप्तविध एतया वेद्या सम्पद्यते ॥५॥ तद्वैके । उत्तरा विधा विधास्यन्त एतांश्च प्रक्रमानेतां च व्याममनुवर्धयन्ति योनिमनुवर्धयाम इति न तथा कुर्यान्न वै जातं गर्भं योनिरनुवर्धते यावद्वाव योनावन्तर्गर्भो भवति तावदेव योनिर्वर्धत ऽ एतावत्तु वा ऽ अत्र गर्भस्य वृद्धिः ॥६॥ ते ये ह तथा कुर्वन्ति । एतꣳ ह ते पितरं प्रजापतिꣳ सम्पदश्चावयन्ति त ऽ इष्ट्वा पापीयाꣳसो भवन्ति पितरꣳ हि प्रजापतिꣳ सम्पदश्चावयन्ति स यावत्येषा सप्तविधस्य वेदिस्तावतीं चतुर्दश कृत्व ऽ एकशतविधस्य वेदिं विमिमीते ॥७॥ अथ षट्त्रिꣳशत्प्रक्रमाꣳ रज्जुं मिमीते । ताꣳ सप्तधा समस्यति तस्यै त्रीन्भागान्प्राच उपदधाति निःसृजति चतुरः ॥८॥ अथ त्रिꣳशत्प्रक्रमां मिमीते । ताꣳ सप्तधा समस्यति तस्यै त्रीन्भागान्पश्चादुपदधाति निःसृजति चतुरः ॥९॥ अथ चतुर्विꣳशतिप्रक्रमां मिमीते । ताꣳ सप्तधा समस्यति तस्यै त्रीन्भागान्पुरस्तादुपदधाति निःसृजति चतुर इति नु वेदिविमानम् ॥१०॥ अथाग्नेर्विधाः । अष्टाविꣳशतिः प्राञ्चः पुरुषा अष्टाविꣳशतिस्तिर्यञ्चः स आत्मा चतुर्दश पुरुषा दक्षिणः पक्षश्चतुर्दशोत्तरश्चतुर्दश पुच्छं चतुर्दशारत्नीन्दक्षिणे पक्ष ऽ उपदधाति चतुर्दशोत्तरे चतुर्दश वितस्तीः पुच्छ ऽ इति न्वष्टानवतेः पुरुषाणां मात्रा साधिमानानाम् ॥११॥ अथ त्रिपुरुषाꣳ रज्जुं मिमीते । ताꣳ सप्तधा समस्यति तस्यै चतुरो भागानात्मन्नुपदधाति त्रीन्पक्षपुच्छेषु ॥१२॥ अथारत्निमात्रीं मिमीते । ताꣳ सप्तधा समस्यति तस्यै त्रीन्भागान्दक्षिणे पक्ष ऽ उपदधाति त्रीनेवोत्तरे निःसृजति चतुरः ॥१३॥ अथ वितस्तिमात्रीं मिमीते । ताꣳ सप्तधा समस्यति तस्यै त्रीन्भागान्पुच्छ ऽ उपदधाति निःसृजति चतुर एवमेष एकशतविध एतया वेद्या सम्पद्यते

॥१४॥ तदाहुः । यत्त्रयोदश पुरुषा अतियन्ति कथमेते सम्पदो न च्यवन्तऽइति या वाऽएतस्य सप्तमस्य पुरुषस्य सम्पत्सैवैतेषाꣳ सर्वेषाꣳ सम्पत् ॥१५॥ अथो ऽआहुः । प्रजापतिरेवात्मानं विधाय तस्य यत्र-यत्र न्यूनमासीत्तदेतैः समापूरयत तेनोऽएवापि सम्पन्न इति ॥१६॥ तद्वैके । एकविधं प्रथमं विदधत्यथैकोत्तरमा-परिमितविधान्न तथा कुर्यात् ॥१७॥ सप्तविधो वाऽअग्रे प्रजापतिरसृज्यत । स आत्मानं विदधान ऐत्स एकशतविधेऽतिष्ठत स योऽर्वाचीनꣳ सप्तविधाद्विधत्त ऽएतꣳ ह स पितरं प्रजापतिं विच्छिनत्ति स इष्ट्वा पापीयान्भवति यथा श्रेयाꣳसꣳ हिꣳसित्वाथ य एकशतविधमतिविधत्तेऽस्मात्स सर्वस्माद्बहिर्धा निष्पद्यते सर्वमु हीदं प्रजापतिस्तस्मात्तु सप्तविधमेव प्रथमं विदधीताथैकोत्तरमैकशतविधादेकश-तविधं तु नातिविदधीत नाहैतं पितरं प्रजापतिं विच्छिनत्ति नोऽअस्मात्सर्वस्मा-द्बहिर्धा निष्पद्यते ॥१८॥ ब्राह्मणम् ॥८ [२. ३.] ॥ ॥

संवत्सरो वै प्रजापतिः । अग्निरु सर्वे कामाः सोऽयꣳ संवत्सरः प्रजापतिर-कामयताग्निꣳ सर्वान्कामानात्मानमभिसंचिन्वीयेति स एकशतधात्मानं व्यधत्त स एकशतधात्मानं विधायाग्निꣳ सर्वान्कामानात्मानमभिसमचिनुत स सर्वे कामा अभवत्तस्मान्न कश्चन बहिर्धा कामोऽभवत्तस्मादाहुः संवत्सरः सर्वे कामा इति न ह संवत्सरात्कश्चन बहिर्धा कामोऽस्ति ॥१॥ तथैवैतद्यजमानः । एकशतधा-त्मानं विधायाग्निꣳ सर्वान्कामानात्मानमभिसंचिनुते स सर्वे कामा भवति तस्मान्न कश्चन बहिर्धा कामो भवति ॥२॥ स यः स संवत्सरोऽसौ स आदित्यः । स एष एकशतविधस्तस्य रश्मयः शतं विधा एष एवैकशततमो य एष तपत्यस्मिन्त्सर्व-स्मिन्प्रतिष्ठितस्तथैवैतद्यजमान एकशतधात्मानं विधायास्मिन्त्सर्वस्मिन्प्रतितिष्ठति ॥३॥ अथ वाऽएकशतविधः । सप्तविधमभिसम्पद्यतऽएकशतधा वाऽअसावा-दित्यो विहितः सप्तसु देवलोकेषु प्रतिष्ठितः सप्त वै देवलोकाश्चतस्रो दिशस्त्रय

इमे लोका एते वै सप्त देवलोकास्तेष्वेष प्रतिष्ठितस्तथैवैतद्यजमान एकशतधा-
त्मानं विधाय सप्तसु देवलोकेषु प्रतितिष्ठति ॥४॥ यद्वेवैकशतविधः । सप्तविध-
मभिसम्पद्यत ऽएकशतधा वा ऽअसावादित्यो विहितः सप्तस्वृतुषु सप्तसु स्तोमेषु
सप्तसु पृष्ठेषु सप्तसु छन्दःसु सप्तसु प्राणेषु सप्तसु दिक्षु प्रतिष्ठितस्तथैवैतद्यजमान
एकशतधात्मानं विधायैतस्मिन्त्सर्वस्मिन्प्रतितिष्ठति ॥५॥ यद्वेवैकशतविधः । स-
प्तविधमभिसम्पद्यत ऽएकशतधा वा ऽअसावादित्यो विहितः सप्ताक्षरे ब्रह्मन्प्रति-
ष्ठितः सप्ताक्षरं वै ब्रह्म ऽर्गित्येकमक्षरं यजुरिति द्वे सामेति द्वे ऽअथ यदतोऽन्य-
द्ब्रह्मैव तद्द्व्यक्षरं वै ब्रह्म तदेतत्सर्वꣳ सप्ताक्षरं ब्रह्म तस्मिन्नेष प्रतिष्ठितस्तथैवै-
तद्यजमान एकशतधात्मानं विधाय सप्ताक्षरे ब्रह्मन्प्रतितिष्ठति ॥६॥ तस्माद्व स-
प्तभिः-सप्तभिः परिश्रयन्ति । तस्मादेकशतविधः सप्तविधमभिसम्पद्यतेऽथ वै सप्त-
विध एकशतविधमभिसम्पद्यते ॥७॥ सप्तविधो वा ऽअग्रे प्रजापतिरसृज्यत । स
एतमेकशतधात्मानं विहितमपश्यत्प्राणभृत्सु पञ्चाशदिष्टकाः पञ्चाशद्यजूꣳषि त-
त्सादनꣳ सादनं च सूददोहाश्चैकशततमे तत्समानꣳ सादयित्वा हि सूददोहसाधिवद-
ति स एतेनैकशतविधेनात्मनेमां जितिमजयदिमां व्यष्टिं व्याश्नुत तथैवैतद्यजमान
एतेनैकशतविधेनात्मनेमां जितिं जयतीमां व्यष्टिं व्यश्नुत ऽएवमु सप्तविध एकश-
तविधमभिसम्पद्यते स य एवैकशतविधः स सप्तविधो यः सप्तविधः स एकशत-
विध इति नु विधानाम् ॥८॥ ब्राह्मणम् ॥१ [२. ४.] ॥ प्रथमः प्रपाठकः ॥ क-
ण्डिकासंख्या १४ ॥

अथातश्चयनस्यैव । अन्तरोपसदौ चिनोत्येतद्वै देवा अबिभयुर्यद्वै न इममिह
रक्षाꣳसि नाष्ट्रा न हन्युरिति त ऽएताः पुरोऽपश्यन्नुपसद इमानेव लोकानिमे वै
लोकाः पुरस्ताः प्रापद्यन्त ताः प्रपद्याभयेऽनाष्ट्र ऽएतमात्मानꣳ समस्कुर्वत तथैवै-
तद्यजमान एताः पुरः प्रपद्याभयेऽनाष्ट्र ऽएतमात्मानꣳ संस्कुरुते ॥१॥ यद्वेवान्तरो-

पसदौ चिनोति । एतद्धै देवा अबिभयुर्यद्वै न इममिह रक्षाꣳसि नाष्ट्रा न हन्युरिति तऽएतान्वज्रानपश्यन्नुपसदो वज्रा वाऽउपसदस्तान्प्रापद्यन्त तान्प्रपद्याभयेऽनाष्ट्रऽएतमात्मानꣳ समस्कुर्वत तथैवैतद्यजमान एतान्वज्रान्प्रपद्याभयेऽनाष्ट्रऽएतमात्मानꣳ संस्कुरुते ॥२॥ एतद्ध वै यज्ञे तपः । यदुपसदस्तपो वाऽउपसदस्तद्यत्तपसि चीयते तस्मात्तापश्चितस्तद्धै यावदेवोपसद्भिश्चरन्ति तावत्प्रवर्ग्येण संवत्सरमेवोपसद्भिश्चरन्ति संवत्सरं प्रवर्ग्येण ॥३॥ अहोरात्राणि वाऽउपसदः । आदित्यः प्रवर्ग्योऽमुं तदादित्यमहोरात्रेषु प्रतिष्ठापयति तस्मादेषोऽहोरात्रेषु प्रतिष्ठितः ॥४॥ अथ यदि चतुर्विꣳशतिः । चतुर्विꣳशतिर्वाऽअर्धमासा अर्धमासा उपसद आदित्यः प्रवर्ग्योऽमुं तदादित्यमर्धमासेषु प्रतिष्ठापयति तस्मादेषोऽर्धमासेषु प्रतिष्ठितः ॥५॥ अथ यदि द्वादश । द्वादश वै मासा मासा उपसद आदित्यः प्रवर्ग्योऽमुं तदादित्यं मासेषु प्रतिष्ठापयति तस्मादेष मासेषु प्रतिष्ठितः ॥६॥ अथ यदि षट् । षड्वाऽऋतव ऋतव उपसद आदित्यः प्रवर्ग्योऽमुं तदादित्यमृतुषु प्रतिष्ठापयति तस्मादेष ऋतुषु प्रतिष्ठितः ॥७॥ अथ यदि तिस्रः । त्रयो वाऽइमे लोका इमे लोका उपसद आदित्यः प्रवर्ग्योऽमुं तदादित्यमेषु लोकेषु प्रतिष्ठापयति तस्मादेष एषु लोकेषु प्रतिष्ठितः ॥८॥ अथातश्चितिपुरीषाणामिव मीमाꣳसा । मासं प्रथमा चितिर्मासं पुरीषमेतावान्वासन्तिकऽऋतौ कामस्तद्यावान्वासन्तिकऽऋतौ कामस्तं तत्सर्वमात्मानमभिसंचिनुते ॥९॥ मासं द्वितीया । मासं पुरीषमेतावान्ग्रैष्मऽऋतौ कामस्तद्यावान्ग्रैष्मऽऋतौ कामस्तं तत्सर्वमात्मानमभिसंचिनुते ॥१०॥ मासं तृतीया । मासं पुरीषमेतावान्वार्षिकऽऋतौ कामस्तद्यावान्वार्षिकऽऋतौ कामस्तं तत्सर्वमात्मानमभिसंचिनुते ॥११॥ मासं चतुर्थी । मासं पुरीषमेतावाञ्छारदऽऋतौ कामस्तद्यावाञ्छारदऽऋतौ कामस्तं तत्सर्वमात्मानमभिसंचिनुते ॥१२॥ अथ पञ्चम्यै चितेः । असपत्ना विराजश्च प्रथमाहमुपदधाति स्तोमभागा एकैकामन्वहं

ताः सकृत्सादयति सकृत्सूददोहसाधिवदति तूष्णीं मासꣳ स्तोमभागापुरीषमभिह्नरत्येतावान्हैमन्तिकऽऋतौ कामस्तद्यावान्हैमन्तिकऽऋतौ कामस्तं तत्सर्वमात्मानमभिसंचिनुते ॥ १३ ॥ मासꣳ षष्ठी । मासं पुरीषमेतावाञ्छैशिरऽऋतौ कामस्तद्यावाञ्छैशिरऽऋतौ कामस्तं तत्सर्वमात्मानमभिसंचिनुतऽएतावान्वै द्वादशसु मासेषु कामः षट्स्वृतुषु तद्यावान्द्वादशसु मासेषु कामः षट्स्वृतुषु तं तत्सर्वमात्मानमभिसंचिनुते ॥ १४ ॥ अथ त्रीण्यहान्युपातियन्ति । यदहः शतरुद्रियं जुहोति यदहरुपवसथो यदहः प्रसुतस्तद्यत्तेष्वहःसूपसदा चरन्ति तानि तस्य मासस्याहोरात्राण्यथ यत्प्रवर्ग्येण तद्ध तस्मिन्नृतावादित्यं प्रतिष्ठापयत्येतावान्वै त्रयोदशसु मासेषु कामः सप्तस्वृतुषु तद्यावांस्त्रयोदशसु मासेषु कामः सप्तस्वृतुषु तं तत्सर्वमात्मानमभिसंचिनुते ॥ १५ ॥ स संवत्सरं प्रसुतः स्यात् । सर्वं वै संवत्सरः सर्वमेकशतविधः सर्वेणैव तत्सर्वमाप्नोति यदि संवत्सरं न शक्नुयाद्विश्वजिता सर्वपृष्ठेनातिरात्रेण यजेत तस्मिन्त्सर्ववेदसं दद्यात्सर्वं वै विश्वजित्सर्वपृष्ठोऽतिरात्रः सर्वꣳ सर्ववेदसꣳ सर्वमेकशतविधः सर्वेणैव तत्सर्वमाप्नोति ॥ १६ ॥ ब्राह्मणम् ॥ १ [२. ५.] ॥ ॥

संवत्सरो वै प्रजापतिरेकशतविधः । तस्याहोरात्राण्यर्धमासा मासा ऋतवः षष्टिर्मासस्याहोरात्राणि मासि वै संवत्सरस्याहोरात्राण्याप्यन्ते चतुर्विꣳशतिरर्धमासास्त्रयोदश मासास्त्रय ऋतवस्ताः शतं विधाः संवत्सर एवैकशततमी विधा ॥ १ ॥ स ऋतुभिरेव सप्तविधः । षडृतवः संवत्सर एव सप्तमी विधा तस्यैतस्य संवत्सरस्यैतत्तेजो य एष तपति तस्य रश्मयः शतं विधा मण्डलमेवैकशततमी विधा ॥ २ ॥ स दिग्भिरेव सप्तविधः । ये प्राच्यां दिशि रश्मयः सैका विधा ये दक्षिणायाꣳ सैका ये प्रतीच्याꣳ सैका यऽउदीच्याꣳ सैका यऽऊर्ध्वायाꣳ सैका येऽवाच्याꣳ सैका मण्डलमेव सप्तमी विधा ॥ ३ ॥ तस्यैतस्य परस्तात्कामप्रो लोकः । अमृतं

वै कामप्रममृतमेवास्य तत्परस्तात्तद्यत्तदमृतमेतत्तद्यदेतदर्चिर्दीप्यते ॥४॥ तदेतद्वसुचित्रꣳ राधः । तदेष सविता विभक्ताभ्यः प्रजाभ्यो विभजत्यप्योषधिभ्योऽपि वनस्पतिभ्यो भूय-इव ह त्वेकाभ्यः प्रयच्छति कनीय-इवैकाभ्यस्तद्याभ्यो भूयः प्रयच्छति ता ज्योक्तमां जीवन्ति याभ्यः कनीयः कनीयस्ताः ॥५॥ तदेतदृचाभ्युक्तम् । विभक्तारꣳ हवामहे वसोश्चित्रस्य राधसः सवितारं नृचक्षसमिति तदेतत्सर्वमायुर्दीर्घमनन्तꣳ हि तद्यदिदमाहुर्दीर्घं तऽआयुरस्तु सर्वमायुरिहीत्येष ते लोक एतत्तेऽस्त्विति हैवैतत् ॥६॥ पश्यन्ती वाग्वदति । तदेतदेकशतविधेन वैवाप्तव्यꣳ शतायुतया वा य एवैकशतविधं विधत्ते यो वा शतं वर्षाणि जीवति स हैवैतदमृतमाप्नोति तस्माद्ये चैतद्विदुर्ये च न लोक्या शतायुतेत्येवाहुस्तस्मादु ह न पुरायुषः स्वकामी प्रेयादलोक्यꣳ हैतऽउ वाव लोका यदहोरात्राण्यर्धमासा मासा ऋतवः संवत्सरः ॥७॥ तद्येऽर्वाग्विꣳशेषु वर्षेषु प्रयन्ति । अहोरात्रेषु ते लोकेषु सज्यन्तेऽथ ये परोविꣳशेष्वर्वाक्चत्वारिꣳशेष्वर्धमासेषु तेऽथ ये परश्चत्वारिꣳशेष्वर्वाक्षष्टेषु मासेषु तेऽथ ये परःषष्टेष्वर्वागशीतेष्वृतुषु तेऽथ ये परोऽशीतेष्वर्वाक्शतेषु संवत्सरे तेऽथ य एव शतं वर्षाणि यो वा भूयाꣳसि जीवति स हैवैतदमृतमाप्नोति ॥८॥ बह्वीभिर्ह वै यज्ञैः । एकमहरेका रात्रिर्मिता स य एवैकशतविधं विधत्ते यो वा शतं वर्षाणि जीवति स हैवैनदज्ञातमामाप्नोत्येष वाऽएकशतविधं विधत्ते य एनꣳ संवत्सरं बिभर्ति तस्मादेनꣳ संवत्सरभृतमिव चिन्वीतेत्यधिदेवतम् ॥९॥ अथाधियज्ञम् । यानमूनेकशतमुद्बाहून्पुरुषान्मिमीते स विधैकशतविधः स चितिभिरेव सप्तविधः षडृतव्यवत्यश्चितयोऽग्निरेव सप्तमी विधा ॥१०॥ सऽउ वाऽइष्टकैकशतविधः । याः पञ्चाशत्प्रथमा इष्टका याश्चोत्तमास्ताः शतं विधा अथ या एतदन्तरेणेष्टका उपधीयन्ते सैवैकशततमी विधा ॥११॥ स उ एव यजुस्तेजाः । यजुरेकशतविधो यानि पञ्चाशत्प्रथमानि यजूꣳषि यानि

चोत्तमानि ताः शतं विधा अथ यान्येतदन्तरेण यजूꣳषि क्रियन्ते सैवैकशततमी विधैवमु सप्तविध एकशतविधो भवति स यः शतायुतायां कामो य एकशतविधे सप्तविधेन हैव तमेवंविदाप्नोति ॥१२॥ एवं वाव सर्वे यज्ञाः । एकशतविधा अग्निहोत्रादृग्भिर्यजुर्भिः पदैरक्षरैः कर्मभिः सामभिः स यः शतायुतायां कामो य एकशतविधे यः सप्तविधे यज्ञेन यज्ञेन हैव तमेवंविदाप्नोतीत्यु एवाधियज्ञम् ॥१३॥ अथाध्यात्मम् । पञ्चेमाश्चतुर्विधा अङ्गुलयो द्वे कक्नुषी दोरꣳसफलकं चाक्षश्च तत्पञ्चविꣳशतिरेवमिमानीतराण्यङ्गानि ताः शतं विधा आत्मैवैकशततमी विधोक्तꣳ सप्तविधतायै ॥१४॥ स उऽएव प्राणतेजाः । प्राणैकशतविधोऽन्वङ्गमङ्गेऽङ्गे हि प्राणः स यः शतायुतायां कामो य एकशतविधे यः सप्तविधे यः सर्वेषु यज्ञेषु विद्यया हैव तमेवंविदाप्नोति सर्वैर्हि यज्ञैरात्मानꣳ सम्पन्नं विदे ॥१५॥ त्रीणि वाऽइमानि पञ्चविधानि । संवत्सरोऽग्निः पुरुषस्तेषां पञ्च विधा अन्नं पानꣳ श्रीर्ज्योतिरमृतं यदेव संवत्सरेऽन्नं तदन्नं या आपस्तत्पानꣳ रात्रिरेव श्रीः श्रियाꣳ हैतद्रात्र्याꣳ सर्वाणि भूतानि संवसन्त्यहर्ज्योतिरादित्योऽमृतमित्यधिदेवतम् ॥१६॥ अथाधियज्ञम् । यदेवाग्नावन्नमुपधीयते तदन्नं या आपस्तत्पानं परिश्रित एव श्रीस्तद्धि रात्रीणाꣳ रूपं यजुष्मत्यो ज्योतिस्तद्ध्यह्नाꣳ रूपमग्निरमृतं तद्ध्यादित्यस्य रूपमित्युऽएवाधियज्ञम् ॥१७॥ अथाध्यात्मम् । यदेव पुरुषेऽन्नं तदन्नं या आपस्तत्पानमस्थीन्येव श्रीस्तद्धि परिश्रिताꣳ रूपं मज्जानो ज्योतिस्तद्धि यजुष्मतीनाꣳ रूपं प्राणोऽमृतं तद्ध्यग्ने रूपं प्राणोऽग्निः प्राणोऽमृतमित्यु वाऽआहुः ॥१८॥ अन्नाद्वाऽअशनाया निवर्तते । पानात्पिपासा श्रियै पाप्मा ज्योतिषस्तमोऽमृतान्मृत्युर्नि ह वाऽअस्मादेतानि सर्वाणि वर्तन्तेऽप पुनर्मृत्युं जयति सर्वमायुरेति य एवं वेद तदेतदमृतमित्येवामुत्रोपासीतायुरितीह प्राण इति हैकऽउपासते प्राणोऽग्निः प्राणोऽमृतमिति वदन्तो न तथा विद्याद्ध्रुवं वै तद्यत्प्राणस्तं ते विद्याम्यायुषो

न मध्यादिति ह्यपि यजुषाभ्युक्तं तस्मादेनदमृतमित्येवामुत्रोपासीतायुरितीह तथो ह सर्वमायुरेति ॥११॥ ब्राह्मणम् ॥२ [२. ६.] ॥ द्वितीयोऽध्यायः [६२.] ॥ ॥

प्राणो गायत्री । चक्षुरुष्णिग्वागनुष्टुम्मनो बृहती श्रोत्रं पङ्क्तिर्यऽएवायंऽप्रजननः प्राण एष त्रिष्टुबथ योऽयमवाङ् प्राण एष जगती तानि वाऽएतानि सप्त छन्दाᳲसि चतुरुत्तराण्यग्नौ क्रियन्ते ॥१॥ प्राणो गायत्रीति । तस्य एव प्राणस्य महिमा यद्वीर्यं तदेतत्सहस्रं प्राणस्यैवैतद्वीर्यं यद्ध्यस्य चिन्वतः प्राण उत्क्रामेत्तत एवैषोऽग्निर्न चीयेतैतेनैवास्य रूपेण सहस्रमेष गायत्रीः संचितो भवति ॥२॥ चक्षुरुष्णिगिति । तस्य एव चक्षुषो महिमा यद्वीर्यं तदेतत्सहस्रं चक्षुष एवैतद्वीर्यं यद्ध्यस्य चिन्वतश्चक्षुरुत्क्रामेत्तत एवैषोऽग्निर्न चीयेतैतेनैवास्य रूपेण सहस्रमेष उष्णिहः संचितो भवति ॥३॥ वागनुष्टुबिति । तस्य एव वाचो महिमा यद्वीर्यं तदेतत्सहस्रं वाच एवैतद्वीर्यं यद्ध्यस्य चिन्वतो वागुत्क्रामेत्तत एवैषोऽग्निर्न चीयेतैतेनैवास्य रूपेण सहस्रमेषोऽनुष्टुभः संचितो भवति ॥४॥ मनो बृहतीति । तस्य एव मनसो महिमा यद्वीर्यं तदेतत्सहस्रं मनस एवैतद्वीर्यं यद्ध्यस्य चिन्वतो मन उत्क्रामेत्तत एवैषोऽग्निर्न चीयेतैतेनैवास्य रूपेण सहस्रमेष बृहतीः संचितो भवति ॥५॥ श्रोत्रं पङ्क्तिरिति । तस्य एव श्रोत्रस्य महिमा यद्वीर्यं तदेतत्सहस्रᳲ श्रोत्रस्यैवैतद्वीर्यं यद्ध्यस्य चिन्वतः श्रोत्रमुत्क्रामेत्तत एवैषोऽग्निर्न चीयेतैतेनैवास्य रूपेण सहस्रमेष पङ्क्तीः संचितो भवति ॥६॥ यऽएवायं प्रजननः प्राणः । एष त्रिष्टुबिति तस्य एवैतस्य प्राणस्य महिमा यद्वीर्यं तदेतत्सहस्रमेतस्यैवैतत्प्राणस्य वीर्यं यद्ध्यस्य चिन्वत एष प्राण आलुभ्येत्तत एवैषोऽग्निर्न चीयेतैतेनैवास्य रूपेण सहस्रमेष त्रिष्टुभः संचितो भवति ॥७॥ अथ योऽयमवाङ् प्राणः । एष जगतीति तस्य एवैतस्य प्राणस्य महिमा यद्वीर्यं तदेतत्सहस्रमेतस्यैवैतत्प्राणस्य वीर्यं यद्ध्यस्य चिन्वत एष प्राण आलुभ्येत्तत एवैषोऽग्निर्न चीयेतैतेनैवा-

स्य रूपेण सहस्रमेष जगतीः संचितो भवति ॥ ८॥ तानि वाऽएतानि । सप्त छन्दाꣳसि चतुरुत्तराण्यन्योऽन्यस्मिन्प्रतिष्ठितानि सप्तेमे पुरुषे प्राणा अन्योऽन्यस्मिन्प्रतिष्ठितास्तद्यावत्तमेवंविच्छन्दसां गणमन्वाह छन्दसश्छन्दसो हैवास्य सोऽनूक्तो भवति स्तुतो वा शस्तो वोपहितो वा ॥ ९॥ ब्राह्मणम् ॥ ३ [३. १.] ॥ ॥

तदाहुः । किं छन्दः का देवताग्निः शिर इति गायत्री छन्दोऽग्निर्देवता शिरः ॥ १॥ किं छन्दः । का देवता ग्रीवा इत्युष्णिक्छन्दः सविता देवता ग्रीवाः ॥ २॥ किं छन्दः । का देवतानूकमिति बृहती छन्दो बृहस्पतिर्देवतानूकम् ॥ ३॥ किं छन्दः । का देवता पक्षाविति बृहद्रथन्तरे छन्दो द्यावापृथिवी देवते पक्षौ ॥ ४॥ किं छन्दः । का देवता मध्यमिति त्रिष्टुप्छन्द इन्द्रो देवता मध्यम् ॥ ५॥ किं छन्दः । का देवता श्रोणी इति जगती छन्द आदित्यो देवता श्रोणी ॥ ६॥ किं छन्दः । का देवता यस्मादिदं प्राणाद्रेतः सिच्यतऽइत्यतिच्छन्दाश्छन्दः प्रजापतिर्देवता ॥ ७॥ किं छन्दः । का देवता योऽयमवाङ् प्राण इति यज्ञायज्ञियं छन्दो वैश्वानरो देवता ॥ ८॥ किं छन्दः । का देवतोरूऽइत्यनुष्टुप्छन्दो विश्वे देवा देवतोरू ॥ ९॥ किं छन्दः । का देवताष्ठीवन्ताविति पङ्क्तिश्छन्दो मरुतो देवताष्ठीवन्तौ ॥ १०॥ किं छन्दः । का देवता प्रतिष्ठेऽइति द्विपदा छन्दो विष्णुर्देवता प्रतिष्ठे ॥ ११॥ किं छन्दः । का देवता प्राणा इति विच्छन्दाश्छन्दो वायुर्देवता प्राणाः ॥ १२॥ किं छन्दः । का देवतोनातिरिक्तानीति न्यूनाक्षरा छन्द आपो दवतोनातिरिक्तानि सैषात्मविद्यैवैतन्मयो हैवैता देवता एतमात्मानमभिसम्भवति न हात्रान्या लोक्यतायाऽआशीरस्ति ॥ १३॥ ब्राह्मणम् ॥ ४ [३. २.] ॥ ॥

धीरो ह शातपर्णेयः । महाशालं जाबालमुपोत्ससाद तꣳ होवाच किं मा विद्वानुपोदसद इत्यग्निं वेदेति कमग्निं वेत्थेति वाचमिति यस्तमग्निं वेद किꣳ स भवतीति वाग्मी भवतीति होवाच नैनं वाग्जहातीति ॥ १॥ वेत्थाग्निमिति हो-

वाच । किमेव मा विद्वानुपोदसद इत्यग्निं वेदेति कमग्निं वेत्थेति चक्षुरिति य-स्तमग्निं वेद किॅं स भवतीति चक्षुष्मान्भवतीति होवाच नैनं चक्षुर्जहातीति ॥२॥ वेत्थाग्निमिति होवाच । किमेव मा विद्वानुपोदसद इत्यग्निं वेदेति कमग्निं वेत्थेति मन इति यस्तमग्निं वेद किॅं स भवतीति मनस्वी भवतीति होवाच नैनं मनो जहातीति ॥३॥ वेत्थाग्निमिति होवाच । किमेव मा विद्वानुपोदसद इत्यग्निं वेदेति कमग्निं वेत्थेति श्रोत्रमिति यस्तमग्निं वेद किॅं स भवतीति श्रोत्रवान्भवतीति होवाच नैनॅं श्रोत्रं जहातीति ॥४॥ वेत्थाग्निमिति होवाच । किमेव मा विद्वानुपोदसद इत्यग्निं वेदेति कमग्निं वेत्थेति य एतत्सर्वमग्निस्तं वेदेति तस्मिन्होक्तऽउपावरुरोहाधीहि भोस्तमग्निमिति ॥५॥ स होवाच । प्राणो वाव सोऽग्निर्यदा वै पुरुषः स्वपिति प्राणं तर्हि वागप्येति प्राणं चक्षुः प्राणं मनः प्राणॅं श्रोत्रं यदा प्रबुध्यते प्राणादेवाधि पुनर्जायन्तऽइत्यध्यात्मम् ॥६॥ अथाधिदेवतम् । या वै सा वागग्निरेव स यत्तच्चक्षुरसौ स आदित्यो यत्तन्मन एष स चन्द्रमा यत्तच्छ्रोत्रं दिश एव तदथ यः स प्राणोऽयमेव स वायुर्योऽयं पवते ॥७॥ यदा वाऽअग्निरनुगच्छति । वायुं तर्ह्यनूद्वाति तस्मादेनमुदवासीदित्याहुर्वायुॅं ह्यनूद्वाति यदादित्योऽस्तमेति वायुं तर्हि प्रविशति वायुं चन्द्रमा वायौ दिशः प्रतिष्ठिता वायोरेवाधि पुनर्जायन्ते स यदेवंविदस्माल्लोकात्प्रैति वाचैवाग्निमप्येति चक्षुषादित्यं मनसा चन्द्रॅं श्रोत्रेण दिशः प्राणेन वायुॅं स एतन्मय एव भूत्वैतासां देवतानां यां-यां कामयते सा भूत्वेलयति ॥८॥ ब्राह्मणम् ॥५ [३.३.] ॥

श्वेतकेतुर्हारुणेयः । यक्ष्यमाण आस तॅं ह पितोवाच कानृत्विजोऽवृथा इति स होवाचायं न्वेव मे वैश्वावसव्यो होतेति तॅं ह पप्रच्छ वेत्थ ब्राह्मण वैश्वावसव्य ॥१॥ चत्वारि महान्ती३ऽइति । वेद भो३ऽइति होवाच वेत्थ चत्वारि महतां महान्ती३ऽइति वेद भो३ऽइति होवाच वेत्थ चत्वारि व्रतानी३ऽइति वेद

भो३ऽइति होवाच वेत्थ चत्वारि व्रतानां व्रतानी३ऽइति वेद भो३ऽइति होवाच वेत्थ चत्वारि क्यानी३ऽइति वेद भो३ऽइति होवाच वेत्थ चत्वारि क्यानां क्यानी३ऽइति वेद भो३ऽइति होवाच वेत्थ चतुरोऽर्का३निति वेद भो३ऽइति होवाच वेत्थ चतुरोऽर्काणामर्का३निति वेद भो३ऽइति होवाच ॥२॥ वेत्थार्कमिति । अथ वै नो भवान्वक्ष्यतीति वेत्थार्कपर्णेऽइत्यथ वै नो भवान्वक्ष्यतीति वेत्थार्कपुष्पेऽइत्यथ वै नो भवान्वक्ष्यतीति वेत्थार्ककोश्यावित्यथ वै नो भवान्वक्ष्यतीति वेत्थार्कसमुद्गावित्यथ वै नो भवान्वक्ष्यतीति वेत्थार्कधाना इत्यथ वै नो भवान्वक्ष्यतीति वेत्थार्काष्ठीलामित्यथ वै नो भवान्वक्ष्यतीति वेत्थार्कमूलमित्यथ वै नो भवान्वक्ष्यतीति ॥३॥ स ह वै यत्तदुवाच । वेत्थ चत्वारि महान्ति वेत्थ चत्वारि महतां महान्तीत्यग्निर्महांस्तस्य महतो महदोषधयश्च वनस्पतयश्च तद्ध्यस्यान्नं वायुर्महांस्तस्य महतो महदापस्तद्ध्यस्यान्नमादित्यो महांस्तस्य महतो महच्चन्द्रमास्तद्ध्यस्यान्नं पुरुषो महांस्तस्य महतो महत्पशवस्तद्ध्यस्यान्नमेतान्येव चत्वारि महान्त्येतानि चत्वारि महतां महान्त्येतान्येव चत्वारि व्रतान्येतानि चत्वारि व्रतानां व्रतान्येतान्येव चत्वारि क्यान्येतानि चत्वारि क्यानां क्यान्येतऽएव चत्वारोऽर्का एते चत्वारोऽर्काणामर्काः ॥४॥ अथ ह वै यत्तदुवाच । वेत्थार्कमिति पुरुषꣳ हैव तदुवाच । वेत्थार्कपर्णेऽइति कर्णौ हैव तदुवाच वेत्थार्कपुष्पेऽइत्यक्षिणी हैव तदुवाच वेत्थार्ककोश्याविति नासिके हैव तदुवाच वेत्थार्कसमुद्गावित्योष्ठौ हैव तदुवाच वेत्थार्कधाना इति दन्तान्हैव तदुवाच वेत्थार्काष्ठीलामिति जिह्वाꣳ हैव तदुवाच वेत्थार्कमूलमित्यन्नꣳ हैव तदुवाच स एषोऽग्निरर्को यत्पुरुषः स यो हैतमेवमग्निमर्कं पुरुषमुपास्तेऽयमहमग्निरर्कोऽस्मीति विद्यया हैवास्यैष आत्मन्नग्निरर्कश्चितो भवति ॥५॥ ब्राह्मणम् ॥६ [३.४.] ॥॥

अयं वाव यजुर्योऽयं पवते । एष हि यन्नेवेदꣳ सर्वं जनयत्येतं यन्तमिदमनु

प्रजायते तस्माद्वायुरेव यजुः ॥१॥ अयमेवाकाशो जूः । यदिदमन्तरिक्षमेतꣳ ह्याकाशमनु जवते तदेतद्यजुर्वायुश्चान्तरिक्षं च यच्च जूश्च तस्माद्यजुरेष एव यदेष ह्येति तदेतद्यजुर्ऋक्सामयोः प्रतिष्ठितमृक्सामे वहतस्तस्मात्समान एवाध्वर्युर्ग्रहैः कर्म करोत्यन्यान्यन्यानि स्तुतशस्त्राणि भवन्ति यथा पूर्वाभ्याꣳ स्यन्त्वापराभ्यां धावयेत्तादृक्तत् ॥२॥ अग्निरेव पुरः । अग्निꣳ हि पुरस्कृत्येमाः प्रजा उपासत आदित्य एव चरणं यदा ह्येवैष उदेत्यथेदꣳ सर्वं चरति तदेतद्यजुः सपुरश्चरणमधिदैवतम् ॥३॥ अथाध्यात्मम् । प्राण एव यजुः प्राणो हि यन्नेवेदꣳ सर्वं जनयति प्राणं यन्तमिदमनु प्रजायते तस्मात्प्राण एव यजुः ॥४॥ अयमेवाकाशो जूः । योऽयमन्तरात्मन्नाकाश एतꣳ ह्याकाशमनु जवते तदेतद्यजुः प्राणश्चाकाशश्च यच्च जूश्च तस्माद्यजुः प्राण एव यत्प्राणो ह्येति ॥५॥ ॥ शतम् ५३०० ॥ ॥ अन्नमेव यजुः । अन्नेन हि जायतेऽन्नेन जवते तदेतद्यजुरन्ने प्रतिष्ठितमन्नं वहति तस्मात्समान एव प्राणेऽन्यदन्यदन्नं धीयते ॥६॥ मन एव पुरः । मनो हि प्रथमं प्राणानां चक्षुरेव चरणं चक्षुषा ह्ययमात्मा चरति तदेतद्यजुः सपुरश्चरणमधिदैवतं चाध्यात्मं च प्रतिष्ठितꣳ स यो हैतदेवं यजुः सपुरश्चरणमधिदैवतं चाध्यात्मं च प्रतिष्ठितं वेद ॥७॥ अरिष्टो हैवानार्तः । स्वस्ति यज्ञस्योदृचमश्नुते स्वानाꣳ श्रेष्ठः पुरएता भवत्यन्नादोऽधिपतिर्य एवं वेद ॥८॥ य उ हैवंविदꣳ । स्वेषु प्रतिप्रतिर्बुभूषति न हैवालं भार्येभ्यो भवत्यथ य एवैतमनुभवति यो वै तमनु भार्यान्बुभूर्षति स हैवालं भार्येभ्यो भवति ॥९॥ तदेतज्ज्येष्ठं ब्रह्म । न ह्येतस्मात्किं चन ज्यायोऽस्ति ज्येष्ठो ह वै श्रेष्ठः स्वानां भवति य एवं वेद ॥१०॥ तदेतद्ब्रह्मापूर्वमपरवत् । स यो हैतदेवं ब्रह्मापूर्वमपरवद्वेद न हास्मात्कश्चन श्रेयान्त्समानेषु भवति श्रेयाꣳसः-श्रेयाꣳसो हैवास्मादपरपुरुषा जायन्ते तस्माद्योऽस्माज्ज्यायान्त्स्याद्दिशोऽस्मात्पूर्वा इत्युपासीत तथो हैनं न हिनस्ति ॥११॥ तस्य वा एतस्य यजुषः । रस

एवोपनिषत्तस्माद्यावन्मात्रेण यजुषाध्वर्युर्ग्रहं गृह्णाति स उभे स्तुतशस्त्रेऽअनुविभ-
वत्युभे स्तुतशस्त्रेऽअनुव्यश्नुते तस्माद्यावन्मात्र-इवान्नस्य रसः सर्वमन्नमवति सर्व-
मन्नमनुव्येति ॥१२॥ तृप्तिरेवास्य गतिः । तस्माद्यदान्नस्य तृप्यत्यथ स गत-इव
मन्यतऽआनन्द एवास्य विज्ञानमात्मानन्दात्मानो हैव सर्वे देवाः सा हैषैव दे-
वानामद्धाविद्या स ह स न मनुष्यो य एवंविद्देवानाꣳ हैव स एकः ॥१३॥ ए-
तद्ध स्म वै तद्विद्वान्प्रियव्रतो रौहिणायन आह । वायुं वात्मानन्दस्तऽआत्मे-
तो वा वाहीतो वेति स ह स्म तथैव वाति तस्माद्यां देवेष्वाशिषमिच्छेदेतेनै-
वोपतिष्ठेतानन्दो व आत्मासौ मे कामः स मे समृध्यतामिति सꣳ हैवास्मै स
काम ऋध्यते यत्कामो भवत्येताꣳ ह वै तृप्तिमेतां गतिमेतमानन्दमेतमात्मानम-
भिसम्भवति य एवं वेद ॥१४॥ तदेतद्यजुरुपाꣳश्वनिरुक्तम् । प्राणो वै यजुरुपाꣳ-
श्वायतनो वै प्राणस्तद्य एनं निर्ब्रुवन्तं ब्रूयादनिरुक्तां देवतां निरवोचत्प्राण एनꣳ
हास्यतीति तथा हैव स्यात् ॥१५॥ तस्य ह यो निरुक्तमाविर्भावं वेद । आ-
विर्भवति कीर्त्या यशसोपाꣳशु यजुषाध्वर्युर्ग्रहं गृह्णाति गृहीतः सन्न आविर्भव-
त्युपाꣳशु यजुषाग्निं चिनोति चितः संचित आविर्भवत्युपाꣳशु यजुषा हविर्निर्वप-
ति शृतं निष्ठितमाविर्भवत्येवं यत्किं चोपाꣳशु करोति कृतं निष्ठितमाविर्भवति
तस्य ह य एनमेवं निरुक्तमाविर्भावं वेदाविर्भवति कीर्त्या यशसा ब्रह्मवर्चसेन
क्षिप्रꣳउ हैवाविदं गच्छति स ह यजुरेव भवति यजुषैनमाचक्षते ॥१६॥ ब्राह्म-
णम् ॥६ [३. ५.] ॥ तृतीयोऽध्यायः [६३.] ॥ ॥

प्रजापतिं विस्रस्तम् । यत्र देवाः समस्कुर्वस्तमुखायां योनौ रेतो भूतमसिञ्च-
न्योनिर्वाऽउखा तस्माऽएतत्संवत्सरेऽन्नꣳ समस्कुर्वन्योऽयमग्निश्चितस्तदात्मना प-
र्यदधुस्तदात्मना परिहितमात्मैवाभवत्तस्मादन्नमात्मना परिहितमात्मैव भवति
॥१॥ तथैवैतद्यजमानः । आत्मानमुखायां योनौ रेतो भूतꣳ सिञ्चति योनिर्वा

ऽउखा तस्माऽएतत्संवत्सरेऽन्नꣳ संस्करोति योऽयमग्निश्चितस्तदात्मना परिदधा-
ति तदात्मना परिहितमात्मैव भवति तस्मादन्नमात्मना परिहितमात्मैव भवति
॥२॥ तं निदधाति । वौषडिति वौगिति वाऽएष षडितीदꣳ षड्विहितकमन्नं कृ-
त्वास्माऽअपिदधात्यात्मसंमितं यदु वाऽआत्मसंमितमन्नं तदवति तन्न हिनस्ति य-
द्भूयो हिनस्ति तद्यत्कनीयो न तदवति ॥३॥ स एष एवार्कः । यमेतमत्राग्निमा-
हरन्ति तस्यैतदन्नं कं योऽयमग्निश्चितस्तदर्क्यं यजुष्ट एष एव महांस्तस्यैतदन्नं व्र-
तं तन्महाव्रतꣳ सामत एष उऽएवोक्तस्यैतदन्नं थं तदुक्थमृक्तस्तदेतदेकꣳ स-
त्त्रेधाख्यायते ॥४॥ अथेन्द्राग्नी वाऽअसृज्येताम् । ब्रह्म च क्षत्रं चाग्निरेव ब्रह्मेन्द्रः
क्षत्रं तौ सृष्टौ नानैवास्तां तावब्रूतां न वाऽइत्थꣳ सन्तौ शक्ष्यावः प्रजाः प्रजन-
यितुमेकꣳ रूपमुभावसावेति ताविकꣳ रूपमुभावभवताम् ॥५॥ तौ यौ ताविन्द्रा-
ग्नी । एतौ तौ रुक्मश्च पुरुषश्च रुक्म एवेन्द्रः पुरुषोऽग्निस्तौ हिरण्मयौ भवतो
ज्योतिर्वै हिरण्यं ज्योतिरिन्द्राग्नीऽअमृतꣳ हिरण्यममृतमिन्द्राग्नी ॥६॥ तावेता-
विन्द्राग्नीऽएव चिन्वन्ति । यद्धि किं चेष्टकमग्निरेव तत्तस्मात्तदग्निना पचन्ति यद्धि
किं चाग्निना पचन्त्यग्निरेव तदथ यत्पुरीषꣳ स इन्द्रस्तस्मात्तदग्निना न पचन्ति ने-
दग्निरेवासन्नेन्द्र इति तस्मादेताविन्द्राग्नीऽएव चितौ ॥७॥ अथ यश्चितेऽग्निर्निधी-
यते । तदेकꣳ रूपमुभौ भवतस्तस्मात्तावेतेनैव रूपेणेमाः प्रजाः प्रजनयतः सैषैके-
वेष्टकाग्निरेव तामेष सर्वोऽग्निरभिसम्पद्यते सैवेष्टकासम्पत्तदेतदेकमेवाक्षरं वौ-
गिति तदेष सर्वोऽग्निरभिसम्पद्यते सैवाक्षरसम्पत् ॥८॥ तद्धैतत्पश्यन्नृषिरभ्यनूवा-
द । भूतं भविष्यत्प्रस्तौमि महद्ब्रह्मैकमक्षरं बहु ब्रह्मैकमक्षरमित्येतद्ध्येवाक्षरꣳ
सर्वे देवाः सर्वाणि भूतान्यभिसम्पद्यन्ते तदेतद्ब्रह्म च क्षत्रं चाग्निरेव ब्रह्मेन्द्रः क्ष-
त्रमिन्द्राग्नी वै विश्वे देवा विड् विश्वे देवास्तदेतद्ब्रह्म क्षत्रं विट् ॥९॥ एतद्ध स्म
वै तद्विद्वाञ्छ्यापर्णः सायकायन आह । यद्वै मऽइदं कर्म समाप्स्यत ममैव प्रजा

सर्वानाꣳ राजानोऽभविष्यन्मम ब्राह्मणा मम वैश्या यत्तु मऽएतावत्कर्मणः समापि तेन मऽउभयथा सर्वान्प्रजातिरेच्यतऽइति स एष एव श्रीरेष यश एषोऽन्नादः ॥१०॥ एतद्ध वै तच्छाण्डिल्यः । वामकक्षायणाय प्रोच्योवाच श्रीमान्यशस्व्यन्नादो भविष्यसीति श्रीमान्ह वै यशस्व्यन्नादो भवति य एवं वेद ॥११॥ स एषोऽग्निः प्रजापतिरेव । ते देवा एतमग्निं प्रजापतिꣳ संस्कृत्याथास्माऽएतत्संवत्सरेऽन्नꣳ समस्कुर्वन्य एष महाव्रतीयो ग्रहः ॥१२॥ तमध्वर्युर्ग्रहेण गृह्णाति । यद्गृह्णाति तस्माद्ग्रहस्तस्मिन्नुद्गाता महाव्रतेन रसं दधाति सर्वाणि हैतानि सामानि यन्महाव्रतं तदस्मिन्त्सर्वैः सामभी रसं दधाति तस्मिन्होता महतोक्थेन रसं दधाति सर्वा हैता ऋचो यन्महदुक्थं तदस्मिन्त्सर्वाभिर्ऋग्भी रसं दधाति ॥१३॥ ते यदा स्तुवते यदानुशꣳसति । अथास्मिन्नेतं वषट्कृते जुहोति वौगिति वाऽएष षडितीदꣳ षड्विधमन्नं कृत्वास्माऽअपिदधात्यात्मसंमितं यदु वाऽआत्मसंमितमन्नं तदवति तन्न हिनस्ति यद्भूयो हिनस्ति तद्यत्कनीयो न तदवति ॥१४॥ स एष एवार्कः । योऽयमग्निश्चितस्तस्यैतदन्नं कमेष महाव्रतीयो ग्रहस्तदर्क्यं यजुष्ट एष एव महांस्तस्यैतदन्नं व्रतं तन्महाव्रतꣳ सामत एष उऽएवोक्तदन्नं थं तदुक्थमृक्तस्तदेतदेकꣳ सत्त्रेधाख्यायते ॥१५॥ स एष संवत्सरः प्रजापतिरग्निः । तस्यार्धमेव सावित्राण्यर्धं वैश्वकर्मणान्यष्टावेवास्य कलाः सावित्राण्यष्टौ वैश्वकर्मणान्यथ यदेतदन्तरेण कर्म क्रियते स एव सप्तदशः प्रजापतिर्या वै कला मनुष्याणामक्षरं तद्देवानाम् ॥१६॥ तद्वै लोमेति द्वेऽअक्षरे । त्वगिति द्वेऽअसृगिति द्वे मेद इति द्वे माꣳसमिति द्वे स्नावेति द्वेऽअस्थीति द्वे मज्जेति द्वे ताः षोडश कला अथ य एतदन्तरेण प्राणः संचरति स एव सप्तदशः प्रजापतिः ॥१७॥ तस्माऽएतस्मै प्राणाय । एताः षोडश कला अन्नमभिहरन्ति ता यदानभिहर्तुं ध्रियन्तेऽथैता एव जग्धोत्क्रामति तस्मादु हैतदशिशिषतस्तृप्रमिव भवति प्राणैरद्यमानस्य तस्मादु

ह्येतदुपतापी कृश-इव भवति प्राणैर्हि जग्धो भवति ॥१८॥ तस्माऽएतस्मै सप्तदशाय प्रजापतये । एतत्सप्तदशमन्नꣳ समस्कुर्वन्य एष सौम्योऽध्वरोऽथ या अस्य ताः षोडश कला एते ते षोडशऽर्त्विजस्तस्मान्न सप्तदशमृत्विजं कुर्वीत नेदतिरेचयानीत्यथ य एवात्र रसो या आहुतयो हूयन्ते तदेव सप्तदशमन्नम् ॥१९॥ ते यदा स्तुवते यदानुशꣳसति । अथास्मिन्नेतं वषट्कृते जुहोति वौगिति वाऽएष वडितीदꣳ षड्विधमन्नं कृत्वास्माऽअपिदधात्यात्मसंमितं यद्दु वाऽआत्मसंमितमन्नं तदवति तन्न हिनस्ति यद्भूयो हिनस्ति तद्यत्कनीयो न तदवति ॥२०॥ स एष एवार्कः । योऽयमग्निश्चितस्तस्यैतदन्नं क्यमेष सौम्योऽध्वरस्तदर्क्यं यजुष्ट एष एव महांस्तस्यैतदन्नं व्रतं तन्महाव्रतꣳ सामत एष उऽएवोक्तस्यैतदन्नं थं तदुक्थमृक्तस्तदेतदेकꣳ सत्त्रेधाख्यायते स एतेनान्नेन सहोर्ध्व उदक्रामत्स यः स उदक्रामदसौ स आदित्योऽथ येन तेनान्नेन सहोदक्रामदेष स चन्द्रमाः ॥२१॥ स एष एवार्को य एष तपति । तस्यैतदन्नं क्यमेष चन्द्रमास्तदर्क्यं यजुष्ट एष एव महांस्तस्यैतदन्नं व्रतं तन्महाव्रतꣳ सामत एष उऽएवोक्तस्यैतदन्नं थं तदुक्थमृक्तस्तदेतदेकꣳ सत्त्रेधाख्यायतऽइत्यधिदैवतम् ॥२२॥ अथाध्यात्मम् । प्राणो वाऽअर्कस्तस्यान्नमेव क्यं तदर्क्यं यजुष्टः प्राण एव महांस्तस्यान्नमेव व्रतं तन्महाव्रतꣳ सामतः प्राण उऽएवोक्तस्यान्नमेव थं तदुक्थमृक्तस्तदेतदेकꣳ सत्त्रेधाख्यायते स एष एवैषोऽधिदैवतमयमध्यात्मम् ॥२३॥ ब्राह्मणम् ॥ ७ [४. १.] ॥ द्वितीयः प्रपाठकः ॥ कण्डिकासंख्या१०१ ॥ ॥

संवत्सरो वै प्रजापतिरग्निः । सोमो राजा चन्द्रमाः स ह स्वयमेवात्मानं प्रोचे यज्ञवचसे राजस्तम्बायनाय यावन्ति वाव मे ज्योतीꣳषि तावत्यो मऽइष्टका इति ॥१॥ तस्य वाऽएतस्य संवत्सरस्य प्रजापतेः । सप्त च शतानि विꣳशतिश्चाहोरात्राणि ज्योतीꣳषि ता इष्टकाः षष्टिश्च त्रीणि च शतानि परिश्रितः षष्टिश्च

त्रीणि च शतानि यजुष्मत्यः सोऽयꣳ संवत्सरः प्रजापतिः सर्वाणि भूतानि ससृजे यच्च प्राणि यच्चाप्राणमुभयान्देवमनुष्यान्त्स सर्वाणि भूतानि सृष्ट्वा रिरिचान-इव मेने स मृत्योर्बिभयां चकार ॥२॥ स हेक्षां चक्रे । कथं न्वहमिमानि सर्वाणि भूतानि पुनरात्मन्नावपेय पुनरात्मन्दधीय कथं न्वहमेवैषाꣳ सर्वेषां भूतानां पुनरात्मा स्यामिति ॥३॥ स द्वेधात्मानं व्यौहत् । षष्टिश्च त्रीणि च शतान्यन्यतरस्येष्टका अभवन्नेवमन्यतरस्य स न व्याप्नोत् ॥४॥ त्रीनात्मनोऽकुरुत । तिस्रस्तिस्रोऽशीतय एकैकस्येष्टका अभवन्त्स नैव व्याप्नोत् ॥५॥ चतुर आत्मनोऽकुरुत । अशीतिशतेष्टकान्त्स नैव व्याप्नोत् ॥६॥ पञ्चात्मनोऽकुरुत । चतुश्चत्वारिꣳशꣳ शतमेकैकस्येष्टका अभवन्त्स नैव व्याप्नोत् ॥७॥ षडात्मनोऽकुरुत । विꣳशतिशतेष्टकान्त्स नैव व्याप्नोन्न सप्तधा व्यभवत् ॥८॥ अष्टावात्मनोऽकुरुत । नवतीष्टकान्त्स नैव व्याप्नोत् ॥९॥ नवात्मनोऽकुरुत । अशीतीष्टकान्त्स नैव व्याप्नोत् ॥१०॥ दशात्मनोऽकुरुत । द्वासप्ततीष्टकान्त्स नैव व्याप्नोन्नैकादशधा व्यभवत् ॥११॥ द्वादशात्मनोऽकुरुत । षष्टीष्टकान्त्स नैव व्याप्नोन्न त्रयोदशधा व्यभवन्न चतुर्दशधा ॥१२॥ पञ्चदशात्मनोऽकुरुत । अष्टाचत्वारिꣳशदिष्टकान्त्स नैव व्याप्नोत् ॥१३॥ षोडशात्मनोऽकुरुत । पञ्चचत्वारिꣳशदिष्टकान्त्स नैव व्याप्नोन्न सप्तदशधा व्यभवत् ॥१४॥ अष्टादशात्मनोऽकुरुत । चत्वारिꣳशदिष्टकान्त्स नैव व्याप्नोन्नैकान्-न-विꣳशतिधा व्यभवत् ॥१५॥ विꣳशतिमात्मनोऽकुरुत । षट्त्रिꣳशदिष्टकान्त्स नैव व्याप्नोन्नैकविꣳशतिधा व्यभवन्न द्वाविꣳशतिधा न त्रयोविꣳशतिधा ॥१६॥ चतुर्विꣳशतिमात्मनोऽकुरुत । त्रिꣳशदिष्टकान्त्सोऽत्रातिष्ठत पञ्चदशे व्यूहे तद्यत्पञ्चदशे व्यूहेऽतिष्ठत तस्मात्पञ्चदशापूर्यमाणस्य रूपाणि पञ्चदशापक्षीयमाणस्य ॥१७॥ अथ यच्चतुर्विꣳशतिमात्मनोऽकुरुत । तस्माच्चतुर्विꣳशत्यर्धमासः संवत्सरः स एतैश्चतुर्विꣳशत्या त्रिꣳशदिष्टकैरात्मभिर्न व्यभवत्स पञ्चदशाह्नो रूपा-

एयपश्यदात्मनस्तन्वो मुहूर्ताँल्लोकम्पृणाः पञ्चदशैव रात्रेस्तद्यन्मुहु त्रायन्ते तस्मा-
न्मुहूर्ता अथ यत्क्षुद्राः सन्त इमांल्लोकानापूरयन्ति तस्माल्लोकम्पृणाः ॥१८॥ एष
वा ऽइदꣳ सर्वं पचति । अहोरात्रैरर्धमासैर्मासैर्ऋतुभिः संवत्सरेण तदमुना पक्वमयं
पचति पक्वस्य पक्तेति ह स्माह भारद्वाजो ऽग्निममुना हि पक्वमयं पचतीति ॥१९॥
तानि संवत्सरे । दश च सहस्राण्यष्टौ च शतानि समपद्यन्त सो ऽत्रातिष्ठत दश-
सु च सहस्रेष्वष्टासु च शतेषु ॥२०॥ अथ सर्वाणि भूतानि पर्यैक्षत् । स त्रय्या-
मेव विद्यायाꣳ सर्वाणि भूतान्यपश्यदत्र हि सर्वेषां छन्दसामात्मा सर्वेषाꣳ स्तो-
मानाꣳ सर्वेषां प्राणानाꣳ सर्वेषां देवानामेतद्वा ऽअस्त्येतद्ध्यमृतं यद्ध्यमृतं तद्ध्यस्त्ये-
तदु तद्यन्मर्त्यम् ॥२१॥ स ऐक्षत प्रजापतिः । त्रय्यां वाव विद्यायाꣳ सर्वाणि भू-
तानि हन्त त्रयीमेव विद्यामात्मानमभिसंस्करवा ऽइति ॥२२॥ स ऋचो व्यौहत्
। द्वादश बृहतीसहस्राण्येतावत्यो हर्चो याः प्रजापतिसृष्टास्तास्त्रिꣳशत्तमे व्यूहे
पङ्क्तिष्वतिष्ठन्त ता यत्त्रिꣳशत्तमे व्यूहे ऽतिष्ठन्त तस्मात्त्रिꣳशन्मासस्य रात्रयो ऽथ य-
त्पङ्क्तिषु तस्मात्पाङ्क्तः प्रजापतिस्ता अष्टाशतꣳ शतानि पङ्क्तयो ऽभवन् ॥२३॥ अ-
थेतरौ वेदौ व्यौहत् । द्वादशैव बृहतीसहस्राण्यष्टौ यजुषां चत्वारि साम्नामेता-
वद्धैतयोर्वेदयोर्यत्प्रजापतिसृष्टं तौ त्रिꣳशत्तमे व्यूहे पङ्क्तिष्वतिष्ठतां तौ यत्त्रिꣳशत्तमे
व्यूहे ऽतिष्ठतां तस्मात्त्रिꣳशन्मासस्य रात्रयो ऽथ यत्पङ्क्तिषु तस्मात्पाङ्क्तः प्रजापतिस्ता
अष्टाशतमेव शतानि पङ्क्तयो ऽभवन् ॥२४॥ ते सर्वे त्रयो वेदाः । दश च सह-
स्राण्यष्टौ च शतान्यशीतीनामभवन्त्स मुहूर्तेन-मुहूर्तेनाशीतिमाप्नोन्मुहूर्तेन-मुहू-
र्तेनाशीतिः समपद्यत ॥२५॥ स एषु त्रिषु लोकेषूखायाम् । योनौ रेतो भूतमात्मा-
नमसिञ्चच्छन्दोमयꣳ स्तोममयं प्राणमयं देवतामयं तस्यार्धमासे प्रथम आत्मा स-
मस्क्रियत दवीयसि परो दवीयसि परः संवत्सर ऽएव सर्व कृत्स्नः समस्क्रियत
॥२६॥ तद्यत्परिश्रितमुपाधत्त । तद्रात्रिमुपाधत्त तदनु पञ्चदश मुहूर्तान्मुहूर्तानन्

पञ्चदशाशीतीरथ यद्यजुष्मतीमुपाधत्त तदहरुपाधत्त तदनु पञ्चदश मुहूर्तान्मुहूर्ताननु पञ्चदशाशीतीरेवमेतां त्रयीं विद्यामात्मन्नावपतात्मन्नकुरुत सोऽत्रैव सर्वेषां भूतानामात्माभवच्छन्दोमय स्तोममयः प्राणमयो देवतामयः स एतन्मय एव भूत्वोर्ध्व उदक्रामत्स यः स उदक्रामदेष स चन्द्रमाः ॥२७॥ तस्यैषा प्रतिष्ठा । य एष तपत्येतस्मादेवाध्यचीयतैतस्मिन्नध्यचीयतात्मन एवैनं तन्निरमिमीतात्मनः प्राजनयत् ॥२८॥ स यदग्निं चेष्यमाणो दीक्षते । यथैव तत्प्रजापतिरेषु त्रिषु लोकेषूखायां योनौ रेतो भूतमात्मानमसिञ्चदेवमेवैष एतदात्मानमुखायां योनौ रेतो भूतꣳ सिञ्चति छन्दोमयꣳ स्तोममयं प्राणमयं देवतामयं तस्यार्धमासे प्रथम आत्मा संस्क्रियते द्वीयसि परो द्वीयसि परः संवत्सरऽएव सर्वः कृत्स्नः संस्क्रियते ॥२९॥ तद्यत्परिश्रितमुपधत्ते । तद्रात्रिमुपधत्ते तदनु पञ्चदश मुहूर्तान्मुहूर्ताननु पञ्चदशाशीतीरथ यद्यजुष्मतीमुपधत्ते तदहरुपधत्ते तदनु पञ्चदश मुहूर्तान्मुहूर्ताननु पञ्चदशाशीतीरेवमेतां त्रयीं विद्यामात्मन्नावपतऽआत्मन्कुरुते सोऽत्रैव सर्वेषां भूतानामात्मा भवति छन्दोमय स्तोममयः प्राणमयो देवतामयः स एतन्मय एव भूत्वोर्ध्व उत्क्रामति ॥३०॥ तस्यैषा प्रतिष्ठा । य एष तपत्येतस्माद्वेवाधिचीयतऽएतस्मिन्नधिचीयतऽआत्मन एवैनं तन्निर्मितीतऽआत्मनः प्रजनयति स यदेवंविदस्माल्लोकात्प्रैत्यथैतमेवात्मानमभिसम्भवति छन्दोमयꣳ स्तोममयं प्राणमयं देवतामयꣳ स एतन्मय एव भूत्वोर्ध्व उत्क्रामति य एवं विद्वानेतत्कर्म कुरुते यो वैतदेवं वेद ॥३१॥ ब्राह्मणम् ॥ १ [४. २.] ॥ ॥

एष वै मृत्युर्यत्संवत्सरः । एष हि मर्त्यानामहोरात्राभ्यामायुः क्षिणोत्यथ म्रियन्ते तस्मादेष एव मृत्युः स यो हैतं मृत्युꣳ संवत्सरं वेद न हास्यैष पुरा जरसोऽहोरात्राभ्यामायुः क्षिणोति सर्वꣳ हैवायुरेति ॥१॥ एष उऽएवान्तकः । एष हि मर्त्यानामहोरात्राभ्यामायुषोऽन्तं गच्छत्यथ म्रियन्ते तस्मादेष एवान्तकः स यो

हैतमन्तकं मृत्युꣳ संवत्सरं वेद न हास्यैष पुरा जरसोऽहोरात्राभ्यामायुषोऽन्तं गच्छति सर्वꣳ हैवायुरेति ॥२॥ ते देवाः । एतस्मादन्तकान्मृत्योः संवत्सरात्प्रजापतेर्बिभयां चक्रुर्यद्वै नोऽयमहोरात्राभ्यामायुषोऽन्तं न गच्छेदिति ॥३॥ त एतान्यज्ञक्रतूंस्तेनिरे । अग्निहोत्रं दर्शपूर्णमासौ चातुर्मास्यानि पशुबन्धꣳ सौम्यमध्वरं त एतैर्यज्ञक्रतुभिर्यजमाना नामृतत्वमानशिरे ॥४॥ ते हाप्यग्निं चिक्यिरे । तेऽपरिमिता एव परिश्रित उपदधुरपरिमिता यजुष्मतीरपरिमिता लोकम्पृणा यथेदमप्येतर्ह्येक उपदधतीति देवा अकुर्वन्निति ते ह नैवामृतत्वमानशिरे ॥५॥ तेऽर्चन्तः श्राम्यन्तश्चेरुः । अमृतत्वमवरुरुत्समानास्तान्ह प्रजापतिरुवाच न वै मे सर्वाणि रूपाण्युपधत्थाति वैव रेचयथ न वाभ्यापयथ तस्मान्नामृता भवथेति ॥६॥ ते होचुः । तेभ्यो वै नस्त्वमेव तद्ब्रूहि यथा ते सर्वाणि रूपाण्युपदधामेति ॥७॥ स होवाच । षष्टिं च त्रीणि च शतानि परिश्रित उपधत्त षष्टिं च त्रीणि च शतानि यजुष्मतीरधि षट्त्रिꣳशतमथ लोकम्पृणा दश च सहस्राण्यष्टौ च शतान्युपधत्ताथ मे सर्वाणि रूपाण्युपधास्यथाथामृता भविष्यथेति ते ह तथा देवा उपदधुस्ततो देवा अमृता आसुः ॥८॥ स मृत्युर्देवानब्रवीत् । इत्थमेव सर्वे मनुष्या अमृता भविष्यन्त्यथ को मह्य भागो भविष्यतीति ते होचुर्नातोऽपरः कश्चन सह शरीरेणामृतोऽसद्यदेव त्वमेतं भागꣳ हरासाऽअथ व्यावृत्य शरीरेणामृतोऽसद्यो ऽमृतोऽसद्विद्यया वा कर्मणा वेति यद्वै तदब्रुवन्विद्यया वा कर्मणा वेत्येषा हैव सा विद्या यदग्निरेतदु हैव तत्कर्म यदग्निः ॥९॥ ते य एवमेतद्विदुः । ये वैतत्कर्म कुर्वते मृत्वा पुनः सम्भवन्ति ते सम्भवन्त एवामृतत्वमभिसम्भवन्त्यथ य एवं न विदुर्ये वैतत्कर्म न कुर्वते मृत्वा पुनः सम्भवन्ति त एतस्यैवान्नं पुनः-पुनर्भवन्ति ॥१०॥ स यदग्निं चिनुते । एतमेव तदन्तकं मृत्युꣳ संवत्सरं प्रजापतिमग्निमाप्नोति यं देवा आप्नुवन्नेतमुपधत्ते यथैवैनमदो देवा उपादधत ॥११॥ परिश्रिद्भिरे-

वास्य रात्रीराप्नोति । यजुष्मतीभिरहान्यर्धमासान्मासानृतूँल्लोकम्पृणाभिर्मुहूर्तान्
॥१२॥ तद्याः परिश्रितः । रात्रिलोकास्ता रात्रीणामेव साप्तिः क्रियते रात्रीणां प्र-
तिमा ताः षष्टिश्च त्रीणि च शतानि भवन्ति षष्टिश्च ह वै त्रीणि च शतानि
संवत्सरस्य रात्रयस्तासामेकविꣳशतिं गार्हपत्ये परिश्रयति द्वाभ्यां नाशीतिं धि-
ष्ण्येषु द्वे ऽएकषष्टे शते ऽआहवनीये ॥१३॥ अथ यजुष्मत्यः । दर्भस्तम्बो लोगेष्ट-
काः पुष्करपर्णꣳ रुक्मपुरुषौ स्रुचौ स्वयमातृण्णा दूर्वेष्टका द्वियजू रेतःसिचौ वि-
श्वज्योतिर्ऋतव्ये ऽअषाढा कूर्म उलूखलमुसले ऽउखा पञ्च पशुशीर्षाणि पञ्चदशा-
पस्याः पञ्च छन्दस्याः पञ्चाशत्प्राणभृतस्ता द्वाभ्यां न शतं प्रथमा चितिः ॥१४॥
अथ द्वितीया । पञ्चाश्विन्यो द्वे ऽऋतव्ये पञ्च वैश्वदेव्यः पञ्च प्राणभृतः पञ्चापस्या
एकया न विꣳशतिर्वयस्यास्ता एकचत्वारिꣳशद्द्वितीया चितिः ॥१५॥ अथ तृतीया
। स्वयमातृण्णा पञ्च दिश्या विश्वज्योतिश्चतस्र ऋतव्या दश प्राणभृतः षट्त्रिꣳश-
च्छन्दस्याश्चतुर्दश वालखिल्यास्ता एकसप्ततिस्तृतीया चितिः ॥१६॥ अथ चतुर्थी
। अष्टादश प्रथमा अथ द्वादशाथ सप्तदश ताः सप्तचत्वारिꣳशच्चतुर्थी चितिः ॥१७॥
अथ पञ्चमी । पञ्चासपत्नाश्चत्वारिꣳशद्विराज एकया न त्रिꣳशत्स्तोमभागाः पञ्च ना-
कसदः पञ्च पञ्चचूडा एकत्रिꣳशच्छन्दस्या अष्टौ गार्हपत्या चितिरष्टौ पुनश्चितिर्ऋ-
तव्ये विश्वज्योतिर्विकर्णी च स्वयमातृण्णा चाश्मा पृश्निर्यश्चिते ऽग्निर्निधीयते ता अ-
ष्टात्रिꣳशꣳ शतं पञ्चमी चितिः ॥१८॥ ताः सर्वाः पञ्चभिर्न चत्वारि शतानि । त-
तो याः षष्टिश्च त्रीणि च शतान्यहर्लोकास्ता अह्नामेव साप्तिः क्रियते ऽह्नां प्रति-
मा ताः षष्टिश्च त्रीणि च शतानि भवन्ति षष्टिश्च ह वै त्रीणि च शतानि संव-
त्सरस्याहान्यथ याः षट्त्रिꣳशत्पुरीषं तासाꣳ षट्त्रिꣳशी ततो याश्चतुर्विꣳशतिरर्ध-
मासलोकास्ता अर्धमासानामेव साप्तिः क्रियते ऽर्धमासानां प्रतिमाथ या द्वादश मा-
सलोकास्ता मासानामेव साप्तिः क्रियते मासानां प्रतिमा ता उ द्वे-द्वे सहर्तु-

लोका ऋतूनामशून्यतायै ॥ १९ ॥ अथ या लोकम्पृणाः । मुहूर्तलोकास्ता मुहूर्ता-
नामेव साप्तिः क्रियते मुहूर्तानां प्रतिमा ता दश च सहस्राण्यष्टौ च शतानि भ-
वन्त्येतावन्तो हि संवत्सरस्य मुहूर्तास्तासामेकविꣳशतिं गार्हपत्यऽउपदधाति द्वा-
भ्यां नाशीतिं धिष्ण्येष्वाहवनीयऽइतरा एतावन्ति वै संवत्सरस्य रूपाणि तान्य-
स्यात्राप्तान्युपहितानि भवन्ति ॥ २० ॥ तद्धैके । आहवनीयऽएवैताꣳ सम्पदमापि-
पयिषन्त्यन्ये वाऽएतेऽग्नयश्चिताः किमन्यत्रोपहिता इह सम्पश्येमेति न तथा कु-
र्याद्दश वाऽएतानग्नींश्चिनुतेऽष्टौ धिष्ण्यानाहवनीयं च गार्हपत्यं च तस्मादाहु-
र्विराडग्निरिति दशाक्षरा हि विराट् तान्नु सर्वानेकमिवैवाचक्षतेऽग्निरित्येतस्य ह्ये-
वैतानि सर्वाणि रूपाणि यथा संवत्सरस्याहोरात्राण्यर्धमासा मासा ऋतव एवम-
स्यैतानि सर्वाणि रूपाणि ॥ २१ ॥ ते ये ह तथा कुर्वन्ति । एतानि हास्य ते रूपा-
णि बहिर्धा कुर्वन्त्यथो पापवस्यसं कुर्वन्ति क्षत्राय विशं प्रतिप्रतिनीं प्रत्युद्यामि-
नीमाग्नीध्रीये वाऽअश्मानं पृश्निमुपदधात्यथ तꣳ सम्पश्यति किमु तꣳ सम्पश्यन्नि-
तरा न सम्पश्येद्येनैव निर्ऋतिं पाप्मानमपहते स एकादशः ॥ २२ ॥ तदाहुः । क-
थमु ता अत्र न सम्पश्यतीति न ह्येना अभिजुहोत्याकृत्या वाऽइष्टका सर्वा कृ-
त्स्ना भवतीति ॥ २३ ॥ तदाहुः । कथमस्यैता अनतिरिक्ता उपहिता भवन्तीति
वीर्यं वाऽअस्यैता अनतिरिक्तं वै पुरुषं वीर्यꣳ स ह वाऽएतꣳ सर्वं कृत्स्नं प्रजा-
पतिꣳ संस्करोति य एवं विद्वानेतत्कर्म कुरुते यो वैतदेवं वेद ॥ २४ ॥ ब्राह्म-
णम् ॥ २ [४. ३.] ॥ ॥

प्रजापतिं वै प्रजाः सृजमानम् । पाप्मा मृत्युरभिपरिजघान स तपोऽतप्यत
सहस्रꣳ संवत्सरान्पाप्मानं विजिहासन् ॥ १ ॥ तस्य तपस्तेपानस्य । एभ्यो लो-
मगर्तेभ्य ऊर्ध्वानि ज्योतीꣳष्यायꣳस्तद्यानि तानि ज्योतीꣳष्येतानि तानि नक्षत्राणि
यावन्त्येतानि नक्षत्राणि तावन्तो लोमगर्ता यावन्तो लोमगर्तास्तावन्तः सहस्रसं-

वत्सरस्य मुहूर्त्ताः ॥२॥ स सहस्रतमे संवत्सरे । सर्वोऽत्यपवत स यः सोऽत्यपवतायमेव स वायुर्योऽयं पवतेऽथ यं तं पाप्मानमत्यपवतेदं तच्छरीरं क उ तस्मै मनुष्यो यः सहस्रसंवत्सरमवरुन्धीत विद्यया ह वाऽएवंवित्सहस्रसंवत्सरमवरुन्द्धे ॥३॥ सर्वा एवैता इष्टकाः साहस्रीरुपासीत । रात्रिसहस्रेण-रात्रिसहस्रेणैकैकां परिश्रितꣳ सम्पन्नामुपासीताहःसहस्रेणाहःसहस्रेणैकैकामहर्भाजमर्धमाससहस्रेणार्धमाससहस्रेणैकैकामर्धमासभाजं माससहस्रेण-माससहस्रेणैकैकां मासभाजमृतुसहस्रेणऽर्तुसहस्रेणैकैकामृतुभाजं मुहूर्तसहस्रेण-मुहूर्तसहस्रेणैकैकां मुहूर्तभाजꣳ संवत्सरसहस्रेण संवत्सरं ते यऽएतमेवमग्निꣳ संवत्सरेण सम्पन्नं विदुः सहस्रतमीꣳ हास्य ते कलां विदुरथ यऽएनमेवं न विदुर्न हास्य ते सहस्रतमीं चन कलां विदुरथ य एवैवं वेद यो वैतत्कर्म कुरुते स हैवैतꣳ सर्वं कृत्स्नं प्राजापत्यमग्निमाप्नोति यं प्रजापतिराप्नोत्तस्मादेवंवित्तप एव तप्येत यद्व ह वाऽएवंवित्तप तप्यतऽआ मैथुनात्सर्वꣳ हास्य तत्स्वर्ग्यं लोकमभिसम्भवति ॥४॥ तदेतदृचाभ्युक्तम् । न मृषा श्रान्तं यदवन्ति देवा इति न हैवैवं विदुषः किं चन मृषा श्रान्तं भवति तथो हास्यैतत्सर्वं देवा अवन्ति ॥५॥ ब्राह्मणम् ॥३ [४.४.] ॥॥

अथादेशा उपनिषदाम् । वायुरग्निरिति ह शाकायनिन उपासतऽआदित्योऽग्निरित्यु हैकऽआहुरथ ह स्माह श्रौमत्यो वा हालिङ्गवो वा वायुरेवाग्निस्तस्माद्धैवाध्वर्युरुत्तमं कर्म करोत्यथैतमेवाप्येतीति ॥१॥ शाट्यायनिरु ह स्माह । संवत्सर एवाग्निस्तस्य वसन्तः शिरो ग्रीष्मो दक्षिणः पक्षो वर्षा उत्तरः शरदृतुर्मध्यमात्मा हेमन्तशिशिरावृतू पुच्छं प्रतिष्ठा वागग्निः प्राणो वायुश्चक्षुरादित्यो मनश्चन्द्रमाः श्रोत्रं दिश आपो मिथुनं तपः प्रतिष्ठा मासाः पर्वाण्यर्धमासा नाड्योऽहोरात्राणि रजतसुवर्णानि पत्त्राणि स एवं देवानप्येतीति संवत्सरोऽग्निरित्यु हैव विद्यादेतन्मयो भवतीति त्वेव विद्यात् ॥२॥ चेलक उ ह स्माह शाण्डि-

ल्यायनः । इम ऽ एव लोकास्तिस्रः स्वयमातृण्णवत्यश्चितयो यजमानश्चतुर्थी सर्वे कामाः पञ्चमीमांश्च लोकान्त्संस्कुर्वऽ आत्मानं च सर्वांश्च कामानित्येव विद्यादिति ॥३॥ ब्राह्मणम् ॥४ [४. ५.] ॥ चतुर्थोऽध्यायः [६४.] ॥ ॥

तस्य वाऽ एतस्याग्नेः । वागेवोपनिषद्वाचा हि चीयतऽ ऋचा यजुषा साम्नेति नु दैव्याथ यन्मानुष्या वाचाहेतीदं कुरुतेतीदं कुरुतेति तद्व ह तया चीयते ॥१॥ सा वाऽ एषा वाक्त्रेधाविहिता । ऋचो यजूꣳषि सामानि तेनाग्निस्त्रेधाविहित एतेन हि त्रयेण चीयतेऽप्यहैवं त्रेधाविहित इत्यꣳ ह त्वेवापि त्रेधाविहितो यदस्मिंस्त्रेधाविहिता इष्टका उपधीयन्ते पुंनाम्न्य स्त्रीनाम्न्यो नपुꣳसकनाम्न्यस्त्रेधाविहितान्युऽ एवेमानि पुरुषस्याङ्गानि पुंनामानि स्त्रीनामानि नपुꣳसकनामानि ॥२॥ ॥ शततꣳ ५४०० ॥ ॥ सोऽयमात्मा त्रेधाविहित एव । सोऽनेन त्रेधाविहितेनात्मनैतं त्रेधाविहितं दैवममृतमाप्नोति ता उ सर्वा इष्टका इत्येवाचक्षते नेष्टक इति नेष्टकमिति वाचो रूपेण वाग्घ्येवैतत्सर्वं यत्स्त्री पुमान्नपुꣳसकं वाचा ह्येवैतत्सर्वमाप्तं तस्मादेना अङ्गिरस्वद्ध्रुवा सीदेत्येव सर्वाः सादयति नाङ्गिरस्वद्ध्रुवः सीदेति नाङ्गिरस्वद्ध्रुवꣳ सीदेति वाचꣳ ह्येवैताꣳ संस्कुरुते ॥३॥ सा या सा वागसौ स आदित्यः । स एष मृत्युस्तद्यत्किं चार्वाचीनमादित्यात्सर्वं तन्मृत्युनाप्तꣳ स यो हैनमतोऽर्वाचीनं चिनुते मृत्युना हैनꣳ स आप्तं चिनुते मृत्यवे ह स आत्मानमपिदधात्यथ य एनमत ऊर्ध्वं चिनुते स पुनर्मृत्युमपजयति विद्यया ह वाऽ अस्यैषोऽत ऊर्ध्वं चितो भवति ॥४॥ सा वाऽ एषा वाक्त्रेधाविहिता । ऋचो यजूꣳषि सामानि मण्डलमेवर्चोऽर्चिः सामानि पुरुषो यजूꣳष्यथैतदमृतं यदेतदर्चिर्दीप्यतऽ इदं तत्पुष्करपर्णं तद्यत्पुष्करपर्णमुपधायाग्निं चिनोत्येतस्मिन्नेवैतदमृतऽ ऋङ्मयं यजुर्मयꣳ साममयमात्मानꣳ संस्कुरुते सोऽमृतो भवति ॥५॥ ब्राह्मणम् ॥५ [५. १.] ॥ ॥

यदेतन्मण्डलं तपति । तन्महदुक्थं ता ऋचः स ऋचां लोकोऽथ यदेतदर्चि-
र्दीप्यते तन्महाव्रतं तानि सामानि स साम्नां लोकोऽथ य एष एतस्मिन्मण्डले
पुरुषः सोऽग्निस्तानि यजूꣳषि स यजुषां लोकः ॥१॥ सैषा त्रय्येव विद्या तपति
। तद्धैतदप्यविद्वाꣳस आहुस्त्रयी वा एषा विद्या तपतीति वाग्घैव तत्पश्यन्ती
वदति ॥२॥ स एष एव मृत्युः । य एष एतस्मिन्मण्डले पुरुषोऽथैतदमृतं यदे-
तदर्चिर्दीप्यते तस्मान्मृत्युर्न म्रियतेऽमृते ह्यन्तस्तस्मादु न दृश्यतेऽमृते ह्यन्तः ॥३॥
तदेष श्लोको भवति । अन्तरं मृत्योरमृतमित्यवरꣳ ह्येतन्मृत्योरमृतं मृत्यावमृत-
माहितमित्येतस्मिन्हि पुरुष एतन्मण्डलं प्रतिष्ठितं तपति मृत्युर्विवस्वन्तं वस्त
ऽइत्यसौ वा आदित्यो विवस्वानेष ह्यहोरात्रे विवस्ते तमेष वस्ते सर्वतो ह्य-
नेन परिवृतो मृत्योरात्मा विवस्वतीत्येतस्मिन्हि मण्डल एतस्य पुरुषस्यात्मैत-
देष श्लोको भवति ॥४॥ तयोर्वा एतयोः । उभयोरेतस्य चार्चिष एतस्य च पु-
रुषस्यैतन्मण्डलं प्रतिष्ठा तस्मान्महदुक्थं परस्मै न शꣳसेन्नेदेतां प्रतिष्ठां छिनदा
ऽइत्येताꣳ ह स प्रतिष्ठां छिन्त्ते यो महदुक्थं परस्मै शꣳसति तस्मादुक्थशसं भू-
यिष्ठं परिचक्षते प्रतिष्ठाछिन्नो हि भवतीत्यधिदेवतम् ॥५॥ अथाधियज्ञम् । यदे-
तन्मण्डलं तपत्ययꣳ स रुक्मोऽथ यदेतदर्चिर्दीप्यत इदं तत्पुष्करपर्णमापो ह्येता
आपः पुष्करपर्णमथ य एष एतस्मिन्मण्डले पुरुषोऽयमेव स योऽयꣳ हिरण्मयः
पुरुषस्तदेतदेवैतत्त्रयꣳ संस्कृत्येहोपधत्ते तद्यज्ञस्यैवानु सꣳस्थामूर्ध्वमुत्क्रामति तद-
मप्येति य एष तपति तस्मादग्निं नाद्रियेत परिहर्तुममुत्र ह्येष तदा भवतीत्यु
ऽएवाधियज्ञम् ॥६॥ अथाध्यात्मम् । यदेतन्मण्डलं तपति यश्चैष रुक्म इदं तच्छु-
क्लमक्षन्नथ यदेतदर्चिर्दीप्यते यच्चैतत्पुष्करपर्णमिदं तत्कृष्णमक्षन्नथ य एष एतस्मि-
न्मण्डले पुरुषो यश्चैष हिरण्मयः पुरुषोऽयमेव स योऽयं दक्षिणेऽक्षन्पुरुषः ॥७॥
स एष एव लोकम्पृणा । तामेष सर्वोऽग्निरभिसम्पद्यते तस्यैतन्मिथुनं योऽयꣳ

सव्येऽक्षन्पुरुषोऽर्धम् हैतदात्मनो यन्मिथुनं यदा वै सह मिथुनेनाथ सर्वोऽथ
कृत्स्नः कृत्स्नतायै तद्यत्ते द्वे भवतो द्वन्द्वꣳ हि मिथुनं प्रजननं तस्माद्द्वे-द्वे लोक-
म्पृणेऽउपधीयेते तस्माद् द्वाभ्यां चितिं प्रणयन्ति ॥८॥ स एष एवेन्द्रः । योऽयं
दक्षिणेऽक्षन्पुरुषोऽथेयमिन्द्राणी ताभ्यां देवा एतां विधृतिमकुर्वन्नासिकां तस्मा-
ज्जायाया अन्ते नाश्नीयाद्वीर्यवान्हास्माज्जायते वीर्यवन्तमु ह सा जनयति यस्या
अन्ते नाश्नाति ॥९॥ तदेतद्देवव्रतꣳ । राजन्यबन्धवो मनुष्याणामनुतमां गोपायन्ति
तस्मात्तेषु वीर्यवाञ्जायतेऽमृतवाका वयसाꣳ सा क्षिप्रश्येनं जनयति ॥१०॥
तौ हृदयस्याकाशं प्रत्यवेत्य । मिथुनीभवतस्तौ यदा मिथुनस्यान्तं गच्छतोऽथ है-
तत्पुरुषः स्वपिति तद्यथा हैवेदं मानुषस्य मिथुनस्यान्तं गत्वासंविद-इव भवत्ये-
वꣳ हैवैतदसंविद-इव भवति दैवꣳ ह्येतन्मिथुनं परमो ह्येष आनन्दः ॥११॥
तस्मादेवंवित्स्वप्यात् । लोक्यꣳ हैतेऽएव तद्देवते मिथुनेन प्रियेण धाम्ना समर्ध-
यति तस्माद्ध स्वपन्तं धुरेव न बोधयेन्नेदेते देवते मिथुनीभवन्त्यौ हिनसानी-
ति तस्माद्धैतत्सुषुपुषः श्लेष्मणमिव मुखं भवत्येतेऽएव तद्देवते रेतः सिञ्चत-
स्तस्मादेतस इदꣳ सर्वꣳ सम्भवति यदिदं किं च ॥१२॥ स एष एव मृत्युः । य
एष एतस्मिन्मण्डले पुरुषो यश्चायं दक्षिणेऽक्षन्पुरुषस्तस्य हैतस्य हृदये पादाव-
तिहितौ तौ हैतदाच्छिद्योत्क्रामति स यदोत्क्रामत्यथ हैतत्पुरुषो म्रियते तस्माद्ध
हैतत्प्रेतमाहुराच्छेद्यस्येति ॥१३॥ एष उऽएव प्राणः । एष हीमाः सर्वाः प्रजा
प्रणयति तस्यैते प्राणाः स्वाः स यदा स्वपित्यथैनमेते प्राणाः स्वा अपियन्ति त-
स्मात्स्वाप्ययः स्वाप्ययो ह वै तꣳ स्वप्न इत्याचक्षते परोऽक्षं परोऽक्षकामा हि
देवाः ॥१४॥ स एतैः सुप्तः । न कस्य चन वेद न मनसा संकल्पयति न वा-
चान्नस्य रसं विजानाति न प्राणेन गन्धं विजानाति न चक्षुषा पश्यति न श्रो-
त्रेण शृणोत्येतꣳ ह्येते तदापीता भवन्ति स एष एकः सन्प्रजासु बहुधा व्यावि-

ष्टस्तस्मादेका सती लोकम्पृणा सर्वमग्निमनुविभवत्यथ यदेक एव तस्मादेका ॥१५॥ तदाहुः । एको मृत्युर्बहवा३ इत्येकश्च बहवश्चेति ह ब्रूयाद्यदहासावमुत्र तेनैकोऽथ यदिह प्रजासु बहुधा व्याविष्टस्तेनो बहवः ॥१६॥ तदाहुः । अन्तिके मृत्युर्दूरा३ इत्यन्तिके च दूरे चेति ह ब्रूयाद्यदहायमिहाध्यात्मं तेनान्तिकेऽथ यदसावमुत्र तेनो दूरे ॥१७॥ तदेष श्लोको भवति । अन्ने भात्यपश्रितो रसानाꣳ संक्षरेऽमृत इति यदेतन्मण्डलं तपति तदन्नमथ य एष एतस्मिन्मण्डले पुरुषः सोऽत्ता स एतस्मिन्नन्नेऽपश्रितो भातीत्यधिदेवतम् ॥१८॥ अथाध्यात्मम् । इदमेव शरीरमन्नमथ योऽयं दक्षिणेऽक्षन्पुरुषः सोऽत्ता स एतस्मिन्नन्नेऽपश्रितो भाति ॥१९॥ तमेतमग्निरित्यध्वर्यव उपासते । यजुरित्येष हीदꣳ सर्वं युनक्ति सामेति छन्दोगा एतस्मिन्हीदꣳ सर्वꣳ समानमुक्थमिति बह्वृचा एष हीदꣳ सर्वमुत्थापयति यातुरिति यातुविद एतेन हीदꣳ सर्वं यतं विषमिति सर्पाः सर्प इति सर्पविद ऊर्गिति देवा रयिरिति मनुष्या मायेत्यसुराः स्वधेति पितरो देवजन इति देवजनविदो रूपमिति गन्धर्वा गन्ध इत्यप्सरसस्तं यथा-यथोपासते तदेव भवति तद्धैनान्भूत्वावति तस्मादेतमेवंवित्सर्वैरेवैतैरुपासीत सर्वꣳ हैतद्भवति सर्वꣳ हैनमेतद्भूत्वावति ॥२०॥ स एष त्रीष्टकोऽग्निः । ऋगेका यजुरेका सामैका तद्यां काचात्रऽर्चोपदधाति रुक्म एव तस्या आयतनमथ यां यजुषा पुरुष एव तस्या आयतनमथ याꣳ साम्ना पुष्करपर्णमेव तस्या आयतनमेवं त्रीष्टकः ॥२१॥ ते वाऽएते । उभेऽएष च रुक्म एतच्च पुष्करपर्णमेतं पुरुषमपीत उभे ह्यृक्सामे यजुरपीत एवम्वेकेष्टकः ॥२२॥ स एष एव मृत्युः । य एष एतस्मिन्मण्डले पुरुषो यश्चायं दक्षिणेऽक्षन्पुरुषः स एष एवंविद आत्मा भवति स यदैवंविदस्माल्लोकात्प्रैत्यथैतमेवात्मानमभिसम्भवति सोऽमृतो भवति मृत्युर्ह्यस्यात्मा भवति ॥२३॥

ब्राह्मणम् ॥६ [५. २.] ॥ तृतीयः प्रपाठकः ॥ कण्डिकासंख्या ९१ ॥ ॥

नेव वाऽइदमग्रेऽसदासीन्नेव सदासीत्। आसीदिव वाऽइदमग्रे नेवासीत्तद्ध तन्मन एवास ॥१॥ तस्मादेतदृषिणाभ्यनूक्तम्। नासदासीन्नो सदासीत्तदानीमिति नेव हि सन्मनो नेवासत् ॥२॥ तदिदं मनः सृष्टमाविरबुभूषत्। निरुक्ततरं मूर्ततरं तदात्मानमन्वैच्छत्तत्तपोऽतप्यत तत्प्रामूर्छत्तत्षट्त्रिꣳशतꣳ सहस्राण्यपश्यदात्मनोऽग्नीनर्कान्मनोमयान्मनश्चितस्ते मनसैवाधीयन्त मनसाचीयन्त मनसैषु ग्रहा अगृह्यन्त मनसास्तुवत मनसाशꣳसन्यत्किं च यज्ञे कर्म क्रियते यत्किं च यज्ञियं कर्म मनसैव तेषु तन्मनोमयेषु मनश्चित्सु मनोमयमक्रियत तद्यत्किं चेमानि भूतानि मनसा संकल्पयन्ति तेषामेव सा कृतिस्तानेवादधति तांश्चिन्वन्ति तेषु ग्रहान्गृह्णन्ति तेषु स्तुवते तेषु शꣳसन्त्येतावती वै मनसो विभूतिरेतावती विसृष्टिरेतावन्मनः षट्त्रिꣳशत्सहस्राण्यग्नयोऽर्कास्तेषामेकैक एव तावान्यावानसौ पूर्वः ॥३॥ तन्मनो वाचमसृजत। सेयं वाक्सृष्टाविरबुभूषन्निरुक्ततरा मूर्ततरा सात्मानमन्वैच्छत्सा तपोऽतप्यत सा प्रामूर्छत्सा षट्त्रिꣳशतꣳ सहस्राण्यपश्यदात्मनोऽग्नीनर्कान्वाङ्मयान्वाक्चितस्ते वाचैवाधीयन्त वाचाचीयन्त वाचैषु ग्रहा अगृह्यन्त वाचास्तुवत वाचाशꣳसन्यत्किं च यज्ञे कर्म क्रियते यत्किं च यज्ञियं कर्म वाचैव तेषु तद्वाङ्मयेषु वाक्चित्सु वाङ्मयमक्रियत तद्यत्किं चेमानि भूतानि वाचा वदन्ति तेषामेव सा कृतिस्तानेवादधति तांश्चिन्वन्ति तेषु ग्रहान्गृह्णन्ति तेषु स्तुवते तेषु शꣳसन्त्येतावती वै वाचो विभूतिरेतावती विसृष्टिरेतावती वाक्षट्त्रिꣳशत्सहस्राण्यग्नयोऽर्कास्तेषामेकैक एव तावान्यावानसौ पूर्वः ॥४॥ सा वाक्प्राणमसृजत। सोऽयं प्राणः सृष्ट आविरबुभूषन्निरुक्ततरो मूर्ततरः स आत्मानमन्वैच्छत्स तपोऽतप्यत स प्रामूर्छत्स षट्त्रिꣳशतꣳ सहस्राण्यपश्यदात्मनोऽग्नीनर्कान्प्राणमयान्प्राणचितस्ते प्राणेनैवाधीयन्त प्राणेनाचीयन्त प्राणेनैषु ग्रहा अगृह्यन्त प्राणेनास्तुवत प्राणेनाशꣳसन्यत्किं च यज्ञे कर्म क्रियते यत्किं च यज्ञियं

कर्म प्राणेनैव तेषु तत्प्राणमयेषु प्राणचित्सु प्राणमयमक्रियत तद्यत्किं चेमानि भूतानि प्राणेन प्राणन्ति तेषामेव सा कृतिस्तानेवादधति तांश्चिन्वन्ति तेषु ग्रहान्गृह्णन्ति तेषु स्तुवते तेषु शꣳसन्त्येतावती वै प्राणस्य विभूतिरेतावती विसृष्टिरेतावान्प्राणः षट्त्रिꣳश° ॥५॥ स प्राणश्चक्षुरसृजत । तदिदं चक्षुः सृष्टमाविरबुभूषन्निरुक्ततरं मूर्ततरं तदात्मानमन्वैच्छत्तत्तपोऽतप्यत तत्प्रामूर्छत्तत्षट्त्रिꣳशतꣳ सहस्राण्यपश्यदात्मनोऽग्नीनर्कांश्चक्षुर्मयांश्चक्षुश्चितस्ते चक्षुषैवाधीयन्त चक्षुषाचीयन्त चक्षुषैषु ग्रहा अगृह्यन्त चक्षुषास्तुवत चक्षुषाशꣳसन्यत्किं च यज्ञे कर्म क्रियते यत्किं च यज्ञियं कर्म चक्षुषैव तेषु तच्चक्षुर्मयेषु चक्षुश्चित्सु चक्षुर्मयमक्रियत तद्यत्किं चेमानि भूतानि चक्षुषा पश्यन्ति तेषामेव सा कृतिस्तानेवादधति तांश्चिन्वन्ति तेषु ग्रहान्गृह्णन्ति तेषु स्तुवते तेषु शꣳसन्त्येतावती वै चक्षुषो विभूतिरेतावती विसृष्टिरेतावच्चक्षुः षट्त्रिꣳश° ॥६॥ तच्चक्षुः श्रोत्रमसृजत । तदिदꣳ श्रोत्रꣳ सृष्टमाविरबुभूषन्निरुक्ततरं मूर्ततरं तदात्मानमन्वैच्छत्तत्तपोऽतप्यत तत्प्रामूर्छत्तत्षट्त्रिꣳशतꣳ सहस्राण्यपश्यदात्मनोऽग्नीनर्कांछ्रोत्रमयाञ्छ्रोत्रचितस्ते श्रोत्रेणैवाधीयन्त श्रोत्रेणाचीयन्त श्रोत्रेणैषु ग्रहा अगृह्यन्त श्रोत्रेणास्तुवत श्रोत्रेणाशꣳसन्यत्किं च यज्ञे कर्म क्रियते यत्किं च यज्ञियं कर्म श्रोत्रेणैव तेषु तच्छ्रोत्रमयेषु श्रोत्रचित्सु श्रोत्रमयमक्रियत तद्यत्किं चेमानि भूतानि श्रोत्रेण शृण्वन्ति तेषामेव सा कृतिस्तानेवादधति तांश्चिन्वन्ति तेषु ग्रहान्गृह्णन्ति तेषु स्तुवते तेषु शꣳसन्त्येतावती वै श्रोत्रस्य विभूतिरेतावती विसृष्टिरेतावच्छ्रोत्रꣳ षट्त्रिꣳश° ॥७॥ तच्छ्रोत्रं कर्मासृजत । तत्प्राणानभिसममूर्छदिमꣳ संदेहमन्नसंदेहमकृत्स्नं वै कर्मर्ते प्राणेभ्योऽकृत्स्ना उ वै प्राणा ऋते कर्मणः ॥८॥ तदिदं कर्म सृष्टमाविरबुभूषत् । निरुक्ततरं मूर्ततरं तदात्मानमन्वैच्छत्तत्तपोऽतप्यत तत्प्रामूर्छत्तत्षट्त्रिꣳशतꣳ सहस्राण्यपश्यदात्मनोऽग्नीनर्कान्कर्ममयान्कर्मचितस्ते कर्मणैवाधीयन्त कर्म-

णाचीयन्त कर्मणैषु ग्रहा अगृह्यन्त कर्मणास्तुवत कर्मणाशꣳसन्यत्किं च यज्ञे कर्म क्रियते यत्किं च यज्ञियं कर्म कर्मणैव तेषु तत्कर्ममयेषु कर्मचित्सु कर्ममयमक्रियत तद्यत्किं चेमानि भूतानि कर्म कुर्वते तेषामेव सा कृतिस्तानेवादधाति तांश्चिन्वन्ति तेषु ग्रहान्गृह्णन्ति तेषु स्तुवते तेषु शꣳसन्त्येतावती वै कर्मणो विभूतिरेतावती विसृष्टिरेतावत्कर्म षट्त्रिꣳश॰ ॥ ९ ॥ तत्कर्माग्निमसृजत । आविस्तरां वा ऽअग्निः कर्मणः कर्मणा ह्येनं जनयन्ति कर्मणेन्धते ॥ १० ॥ सो ऽयमग्निः सृष्ट आविरबुभूषत् । निरुक्ततरो मूर्ततरः स आत्मानमन्वैक्षत स तपो ऽतप्यत स प्रामूर्छत्स षट्त्रिꣳशतꣳ सहस्राण्यपश्यदात्मनो ऽग्नीनर्कानग्निमयानग्निचितस्ते ऽग्निनैवाधीयन्ताग्निनाचीयन्ताग्निनैषु ग्रहा अगृह्यन्ताग्निनास्तुवताग्निनाशꣳसन्यत्किं च यज्ञे कर्म क्रियते यत्किं च यज्ञियं कर्माग्निनैव तेषु तदग्निमयेष्वग्निचित्स्वग्निमयमक्रियत तद्यत्किं चेमानि भूतान्यग्निमिन्धते तेषामेव सा कृतिस्तानेवादधाति तांश्चिन्वन्ति तेषु ग्रहान्गृह्णन्ति तेषु स्तुवते तेषु शꣳसन्त्येतावती वा ऽअग्नेर्विभूतिरेतावती विसृष्टिरेतावानग्निः षट्त्रिꣳशत्सहस्राण्यग्नयो ऽर्कास्तेषामेकैक एव तावान्यावानसौ पूर्वः ॥ ११ ॥ ते हैते विद्याचित एव । तान्हैतानेवंविदे सर्वदा सर्वाणि भूतानि चिन्वन्त्यपि स्वपते विद्यया हैवैत ऽएवंविदश्चिता भवन्ति ॥ १२ ॥ ब्राह्मणम् ॥ १ [५. ३.] ॥ ॥

अयं वाव लोक एषो ऽग्निश्चितः । तस्याप एव परिश्रितो मनुष्या यजुष्मत्य इष्टकाः सूददोहा ओषधयश्च वनस्पतयश्च पुरीषमाहुतयः समिधो ऽग्निर्लोकम्पृणा तद्वा ऽएतत्सर्वमग्निमेवाभिसम्पद्यते तत्सर्वो ऽग्निर्लोकम्पृणामभिसम्पद्यते स यो हैतदेवं वेद लोकम्पृणामेनं भूतमेतत्सर्वमभिसम्पद्यते ॥ १ ॥ अन्तरिक्षꣳ ह त्वेवैषो ऽग्निश्चितः । तस्य द्यावापृथिव्योरेव संधिः परिश्रितः परेण ह्यन्तरिक्षं द्यावापृथिवी संधत्तस्ताः परिश्रितो वयाꣳसि यजुष्मत्य इष्टका वर्षꣳ सूददोहा मरीचयः

पुरीषमाहुतयः समिधो वायुर्लोकम्पृणा तद्वा ऽएतत्सर्वं वायुमेवाभिसम्पद्यते त-
त्सर्वो ऽग्निर्लो° ॥२॥ द्यौर्ह त्वेवैषो ऽग्निश्चितः । तस्याप एव परिश्रितो यथा ह
वा ऽइदं कोशः समुब्जित एवमिमे लोका अप्स्वन्तस्तद्या इमांल्लोकान्परेणापस्ताः
परिश्रितो देवा यजुष्मत्य इष्टका यदेवैतस्मिंल्लोके ऽन्नं तत्सूददोहा नक्षत्राणि पु-
रीषमाहुतयः समिध आदित्यो लोकम्पृणा तद्वा ऽएतत्सर्वमादित्यमेवाभिसम्पद्यते
तत्सर्वो ऽग्निर्लो° ॥३॥ आदित्यो ह त्वेवैषो ऽग्निश्चितः । तस्य दिश एव परिश्रि-
तस्ताः षष्टिश्च त्रीणि च शतानि भवन्ति षष्टिश्च ह वै त्रीणि च शतान्यादित्यं
दिशः समन्तं परियन्ति रश्मयो यजुष्मत्य इष्टकास्ताः षष्टिश्चैव त्रीणि च शतानि
भवन्ति षष्टिश्च ह वै त्रीणि च शतान्यादित्यस्य रश्मयस्तद्यत्परिश्रित्सु यजुष्मतीः
प्रत्यर्पयति रश्मींस्तद्दिक्षु प्रत्यर्पयत्यथ यदन्तरा दिशश्च रश्मींश्च तत्सूददोहा अथ
यद्दिक्षु च रश्मिषु चान्नं तत्पुरीषं ता आहुतयस्ताः समिधो ऽथ यद्दिश इति च
रश्मय इति चाख्यायते तल्लोकम्पृणा तद्वा ऽएतत्सर्वं दिश इति चैव रश्मय इति
चाख्यायते तत्सर्वो ऽग्निर्लो° ॥४॥ नक्षत्राणि ह त्वेवैषो ऽग्निश्चितः । तानि वा ऽए-
तानि सप्तविंशतिर्नक्षत्राणि सप्तविंशतिः-सप्तविंशतिर्होपनक्षत्राण्येकैकं नक्ष-
त्रमनूपतिष्ठन्ते तानि सप्त च शतानि विंशतिश्चाधि षट्त्रिंशत्ततो यानि सप्त
च शतानि विंशतिश्चेष्टका एव ताः षष्टिश्च त्रीणि च शतानि परिश्रितः षष्टि-
श्च त्रीणि च शतानि यजुष्मत्यो ऽथ यान्यधि षट्त्रिंशत्स त्रयोदशो मासः स आ-
त्मा त्रिंशदात्मा प्रतिष्ठा द्वे प्राणा द्वे शिर एव षट्त्रिंश्यौ तद्यत्ते द्वे भवतो
द्व्यक्षरं हि शिरो ऽथ यदन्तरा नक्षत्रे तत्सूददोहा अथ यन्नक्षत्रेष्वन्नं तत्पुरीषं ता
आहुतयस्ताः समिधो ऽथ यन्नक्षत्राणीत्याख्यायते तल्लोकम्पृणा तद्वा ऽएतत्सर्वं न-
क्षत्राणीत्येवाख्यायते तत्सर्वो ऽग्निर्लो° ॥५॥ ता वा ऽएताः । एकविंशतिर्बृहत्य
एकविंशो वै स्वर्गो लोको बृहती स्वर्गो लोकस्तदेष स्वर्गं लोकमभिसम्प-

द्यतऽएकविᳪशं च स्तोमं बृहतीं च छन्दः ॥ ६॥ छन्दाᳪसि ह त्वेवैषोऽग्निश्चितः । तानि वाऽएतानि सप्त छन्दाᳪसि चतुरुत्तराणि त्रिचानि तेषाᳪ सप्त च शतानि विᳪशतिश्चाक्षराण्यधि षट्त्रिᳪशत्ततो यानि सप्त च शतानि विᳪशतिश्चेष्टका एव ताः षष्टिश्च त्रीणि च शतानि परिश्रितः षष्टिश्च त्रीणि च शतानि यजुष्मत्यो ऽथ यान्यधि षट्त्रिᳪशत्स त्रयोदशो मासः स आत्मा त्रिᳪशदात्मा प्रतिष्ठा द्वे प्राणा द्वे शिर एव षट्त्रिᳪश्यौ तद्यत्ते द्वे भवतो द्व्यक्षरᳪ हि शिरः ॥ ७॥ तस्यै वा ऽएतस्यै षट्त्रिᳪशदक्षरायै बृहत्यै । यानि दश प्रथमान्यक्षराणि सा दशाक्षरैकपदाथ यानि विᳪशतिः सा विᳪशत्यक्षरा द्विपदाथ यानि त्रिᳪशत्सा त्रिᳪशदक्षरा विराडथ यानि त्रयस्त्रिᳪशत्सा त्रयस्त्रिᳪशदक्षराथ यानि चतुस्त्रिᳪशत्सा चतुस्त्रिᳪशदक्षरा स्वराडथ यत्सर्वैश्छन्दोभिरयमग्निश्चितस्तदतिच्छन्दास्ता उ सर्वा इष्टका एवेष्टकेति त्रीण्यक्षराणि त्रिपदा गायत्री तेनैष गायत्रोऽग्निर्मृदाप इति त्रीण्यक्षराणि त्रिपदा गायत्री तेनोऽएवैष गायत्रोऽथ यदन्तरा छन्दसी तत्सूददोहा अथ यच्छन्दःस्वन्नं तत्पुरीषं ता आहुतयस्ताः समिधोऽथ यच्छन्दाᳪसीत्याख्यायते तल्लोकम्पृणा तद्वाऽएतत्सर्वं छन्दाᳪसीत्येवाख्यायते तत्सर्वोऽग्निर्लो० ॥ ८॥ ता वाऽएताः । एकविᳪशतिर्बृहत्य एकविᳪशो वै स्वर्गो लोको बृहती स्वर्गो लोकस्तदेष स्वर्गं लोकमभिसम्पद्यतऽएकविᳪशं च स्तोमं बृहतीं च छन्दः ॥ ९॥ संवत्सरो ह त्वेवैषोऽग्निश्चितः । तस्य रात्रय एव परिश्रितस्ताः षष्टिश्च त्रीणि च शतानि भवन्ति षष्टिश्च ह वै त्रीणि च शतानि संवत्सरस्य रात्रयोऽहानि यजुष्मत्य इष्टकास्ताः षष्टिश्चैव त्रीणि च शतानि भवन्ति षष्टिश्च ह वै त्रीणि च शतानि संवत्सरस्याहान्यथ या अमूः षट्त्रिᳪशदिष्टका अतियन्ति यः स त्रयोदशो मास आत्मार्धमासाश्च ते मासाश्च चतुर्विᳪशतिरर्धमासा द्वादश मासा अथ यदन्तराहोरात्रे तत्सूददोहा अथ यदहोरात्रेष्वन्नं तत्पुरीषं ता आहुतयस्ताः समिधोऽथ

यदहोरात्राणीत्याख्यायते तल्लोकम्पृणा तद्धाऽएतत्सर्वमहोरात्राणीत्येवाख्यायते तत्सर्वोऽग्निर्लो° ॥१०॥ ता वाऽएताः । एकविंशतिर्बृहत्य एकविंशो वै स्वर्गो लोको बृहती स्वर्गो लोकस्तदेष स्वर्गं लोकमभिसम्पद्यत एकविंशं च स्तोमं बृहतीं च छन्दः ॥११॥ आत्मा ह त्वेवैषोऽग्निश्चितः । तस्यास्थीन्येव परिश्रितस्ताः षष्टिश्च त्रीणि च शतानि भवन्ति षष्टिश्च ह वै त्रीणि च शतानि पुरुषस्यास्थीनि मज्जानो यजुष्मत्य इष्टकास्ताः षष्टिश्चैव त्रीणि च शतानि भवन्ति षष्टिश्च ह वै त्रीणि च शतानि पुरुषस्य मज्जानोऽथ या अमूः षट्त्रिंशदिष्टका अतियन्ति यः स त्रयोदशो मास आत्मा प्राणः स तस्य त्रिंशदात्मन्विधाः प्रतिष्ठायां द्वे प्राणेषु द्वे शीर्षन्द्वे तद्यत्ते द्वे भवतो द्विकपालं हि शिरोऽथ येनेमानि पर्वाणि संततानि तत्सूददोहा अथैतत्त्वं येनायमात्मा प्रच्छन्नो लोम त्वङ्मांसमिति तत्पुरीषं यत्पिबति ता आहुतयो यदश्नाति ताः समिधोऽथ यदात्मेत्याख्यायते तल्लोकम्पृणा तद्धाऽएतत्सर्वमात्मेत्येवाख्यायते तत्सर्वोऽग्निर्लो° ॥१२॥ ता वाऽएताः । एकविंशतिर्बृह° ॥१३॥ सर्वाणि ह त्वेव भूतानि । सर्वे देवा एषोऽग्निश्चित आपो वै सर्वे देवाः सर्वाणि भूतानि ता हैता आप एवैषोऽग्निश्चितस्तस्य नाव्या एव परिश्रितस्ताः षष्टिश्च त्रीणि च शतानि भवन्ति षष्टिश्च ह वै त्रीणि च शतान्यादित्यं नाव्याः समन्तं परियन्ति नाव्या उऽएव यजुष्मत्य इष्टकास्ताः षष्टिश्चैव त्रीणि च शतानि भवन्ति षष्टिश्च ह वै त्रीणि च शतान्यादित्यं नाव्या अभिक्षरन्त्यथ यदन्तरा नाव्ये तत्सूददोहा अथ या अमूः षट्त्रिंशदिष्टका अतियन्ति यः स त्रयोदशो मास आत्मायमेव स योऽयं हिरण्मयः पुरुषः ॥१४॥ तस्यैते प्रतिष्ठे । रुक्मश्च पुष्करपर्णं चापश्चादित्यमण्डलं च स्रुचौ बाहू ताविन्द्राग्नी द्वे स्वयमातृण्णेऽइयं चान्तरिक्षं च तिस्रो विश्वज्योतिष एता देवता अग्निर्वायुरादित्य एता ह्येव देवता विश्वं ज्योतिर्द्वादशऽर्तव्याः स

संवत्सरः स आत्मा पञ्च नाकसदः पञ्च पञ्चचूडाः स यज्ञस्ते देवा अथ यद्विकर्णी च स्वयमातृण्णा चाश्मा पृश्निर्यस्मिन्नेतेऽग्निर्निधीयते सा पञ्चत्रिꣳशी लोकम्पृणाया यजुः षट्त्रिꣳशी सोऽस्यैष सर्वस्यात्मैवात्मा स एष सर्वासामपां मध्ये स एष सर्वैः कामैः सम्पन्न आपो वै सर्वे कामाः स एषोऽकामः सर्वकामो न ह्येतं कस्य चन कामः ॥१५॥ तदेष श्लोको भवति । विद्यया तदारोहन्ति यत्र कामाः परागताः न तत्र दक्षिणा यन्ति नाविद्वाꣳसस्तपस्विन इति न हैव तं लोकं दक्षिणाभिर्न तपसानेवंविदश्नुतऽएवंविदाꣳ हैव स लोकः ॥१६॥ अन्नं पुरीषम् । चन्द्रमा आहुतयो नक्षत्राणि समिधो यच्चन्द्रमा नक्षत्रे वसत्याहुतिस्तत्समिधि वसत्येतद्ध वाऽआहुतेरन्नमेषा प्रतिष्ठा तस्मादाहुतिर्न क्षीयतऽएतद्ध्यस्या अन्नमेषा प्रतिष्ठाथ यद्देवा इत्याख्यायते तल्लोकम्पृणा तद्वाऽएतत्सर्वं देवा इत्येवाख्यायते ॥१७॥ तदेतदृचाभ्युक्तम् । विश्वे देवा अनु तत्ते यजुर्गुरिति सर्वाणि ह्यत्र भूतानि सर्वे देवा यजुरेव भवन्ति तत्सर्वोऽग्निर्लोकम्पृणामभिसम्पद्यते स यो हैतदेवं वेद लोकम्पृणामेनं भूतमेतत्सर्वमभिसम्पद्यते ॥१८॥ ता वाऽएताः । एकविꣳशतिर्बृहत्य एकविꣳशो वै स्वर्गो लोको बृहती स्वर्गो लोकस्तदेष स्वर्गं लोकमभिसम्पद्यतऽएकविꣳशं च स्तोमं बृहतीं च छन्दः ॥१९॥ ब्राह्मणम् ॥२ [५.४.] ॥॥

कुश्रिर्ह वाजश्रवसोऽग्निं चिक्ये । तꣳ होवाच सुश्रवाः कौष्यो गौतम यदग्निमचैषीः प्राञ्चमेनमचैषीः प्रत्यञ्चमेनमचैषीर्न्यञ्चमेनमचैषीरुत्तानमेनमचैषीः ॥१॥ यद्यद्धैनं प्राञ्चमचैषीः । यथा पराचऽआसीनाय पृष्ठतोऽन्नाद्यमुपाहरेत्तादृक्तन्न ते हविः प्रतिग्रहीष्यति ॥२॥ यद्यु वाऽएनं प्रत्यञ्चमचैषीः । कस्मादस्य तर्हि पश्चात्पुच्छमकार्षीः ॥३॥ यद्यु वाऽएनं न्यञ्चमचैषीः । यथा नीचः शयानस्य पृष्ठेऽन्नाद्यं प्रतिष्ठापयेत्तादृक्तन्नैव ते हविः प्रतिग्रहीष्यति ॥४॥ यद्यु वाऽएनमुत्तानमचैषीः । न वाऽउत्तानं वयः स्वर्गं लोकमभिवहति न त्वा स्वर्गं लोकमभिवक्ष्यत्यस्वर्ग्य

उ ते भविष्यतीति ॥५॥ स होवाच । प्राञ्चमेनमचैषं प्रत्यञ्चमेनमचैषं न्यञ्चमे-
नमचैषमुत्तानमेनमचैषꣳ सर्वा अनु दिश एनमचैषमिति ॥६॥ स यत्प्राञ्चं पुरुष-
मुपदधाति । प्राच्यौ स्रुचौ तत्प्राङ् चीयतेऽथ यत्प्रत्यञ्चं कूर्ममुपदधाति प्रत्यञ्चि प-
शुशीर्षाणि तत्प्रत्यङ् चीयतेऽथ यन्न्यञ्चं कूर्ममुपदधाति न्यञ्चि पशुशीर्षाणि नीची-
रिष्टकास्तन्न्यङ् चीयतेऽथ यदुत्तानं पुरुषमुपदधात्युत्ताने स्रुचाऽउत्तानमुलूखलमु-
त्तानामुखां तदुत्तानश्चीयतेऽथ यत्सर्वा अनु दिशः परिसर्पमिष्टका उपदधाति त-
त्सर्वतश्चीयते ॥७॥ अथ ह कोषा धावयन्तः । निरूढशिरसमग्निमुपाधावयां चक्रु-
स्तेषाꣳ हैक उवाच श्रीर्वै शिरः श्रियमस्य निरौहीत्सर्वज्यानिं ज्यास्यतऽइति स
ह तथैवास ॥८॥ अथ हैक उवाच । प्राणा वै शिरः प्राणानस्य निरौहीत्क्षिप्रे
ऽमुं लोकमेष्यतीति स उ ह तथैवास ॥९॥ ऊर्ध्वो वाऽएष एतच्चीयते । यद्दर्भ-
स्तम्बो लोगेष्टकाः पुष्करपर्णꣳ रुक्मपुरुषौ स्रुचौ स्वयमातृण्णा दूर्वेष्टका द्वियजू
रेतःसिचौ विश्वज्योतिर्ऋतव्येऽअषाढा कूर्मोऽथ हास्यैतदेव प्रत्यक्षतमाꣳ शिरो
यश्चितेऽग्निर्निधीयते तस्मान्न निरूहेत् ॥१०॥ ब्राह्मणम् ॥ ३ [५. ५.] ॥ पञ्चमो
ऽध्यायः [६५.] ॥ ॥

अथ हैतेऽरुणे । औपवेशौ समाजग्मुः सत्ययज्ञः पौलुषिर्महाशालो जाबालो
बुडिल आश्वतराश्विरिन्द्रद्युम्नो भाल्लवेयो जनः शार्कराक्ष्यस्ते ह वैश्वानरे समा-
सत तेषाꣳ ह वैश्वानरे न समियाय ॥१॥ ते होचुः । अश्वपतिर्वाऽअयं कैकेयः
सम्प्रति वैश्वानरं वेद तं गच्छामेति ते हाश्वपतिं कैकेयमाजग्मुस्तेभ्यो ह पृथगा-
वसथान्पृथगपचितीः पृथक्साहस्रान्त्सोमान्प्रोवाच ते ह प्रातरसंविदाना एव स-
मित्पाणयः प्रतिचक्रमिरऽउप त्वायामेति ॥२॥ स होवाच । यन्नु भगवन्तोऽनू-
चाना अनूचानपुत्राः किमिदमिति ते होचुर्वैश्वानरꣳ ह भगवान्त्सम्प्रति वेद तं
नो ब्रूहीति स होवाच सम्प्रति खलु त्वाऽअहं वैश्वानरं वेदाभ्याधत्त समिध

उपेता स्थेति ॥३॥ स होवाचारुणमौपवेशिम् । गौतम कं त्वं वैश्वानरं वेत्थेति पृथिवीमेव राजन्निति होवाचोमिति होवाचैष वै प्रतिष्ठा वैश्वानर एतꣳ हि वै त्वं प्रतिष्ठां वैश्वानरं वेत्थ तस्मात्त्वं प्रतिष्ठितः प्रजया पशुभिरसि यो वाऽएतं प्रतिष्ठां वैश्वानरं वेदाप पुनर्मृत्युं जयति सर्वमायुरेति पादौ त्वाऽएतौ वैश्वानरस्य पादौ तेऽम्लास्यतां यदि ह नागमिष्य इति पादौ तेऽविदितावभविष्यतां यदि ह नागमिष्य इति वा ॥४॥ अथ होवाच सत्ययज्ञं पौलुषिम् । प्राचीनयोग्य कं त्वं वैश्वानरं वेत्थेत्यप एव राजन्निति होवाचोमिति होवाचैष वै रयिर्वैश्वानर एतꣳ हि वै त्वꣳ रयिं वैश्वानरं वेत्थ तस्मात्त्वꣳ रयिमान्पुष्टिमानसि यो वाऽएतꣳ रयिं वैश्वानरं वेदाप पुनर्मृत्युं जयति सर्वमायुरेति वस्तिस्त्वाऽएष वैश्वानरस्य वस्तिस्त्वाद्धास्यद्यदि ह नागमिष्य इति वस्तिस्तेऽविदितोऽभविष्यद्यदि ह नागमिष्य इति वा ॥५॥ अथ होवाच महाशालं जाबालम् । औपमन्यव कं त्वं वैश्वानरं वेत्थेत्याकाशमेव राजन्निति होवाचोमिति होवाचैष वै बहुला वैश्वानर एतꣳ हि वै त्वं बहुलं वैश्वानरं वेत्थ तस्मात्त्वं बहुः प्रजया पशुभिरसि यो वाऽएतं बहुलं वैश्वानरं वेदाप पुनर्मृत्युं जयति सर्वमायुरेत्यात्मा त्वाऽएष वैश्वानरस्यात्मा त्वाद्धास्यद्यदि ह नागमिष्य इत्यात्मा तेऽविदितोऽभविष्यद्यदि ह नागमिष्य इति वा ॥६॥ अथ होवाच बुडिलमाश्वतराश्विम् । वैयाघ्रपद्य कं त्वं वैश्वानरं वेत्थेति वायुमेव राजन्निति होवाचोमिति होवाचैष वै पृथग्वर्त्मा वैश्वानर एतꣳ हि वै त्वं पृथग्वर्त्मानं वैश्वानरं वेत्थ तस्मात्त्वां पृथग्रथश्रेणयोऽनुयन्ति यो वाऽएतं पृथग्वर्त्मानं वैश्वानरं वेदाप पुनर्मृत्युं जयति सर्वमायुरेति प्राणस्त्वाऽएष वैश्वानरस्य प्राणस्त्वाद्धास्यद्यदि ह नागमिष्य इति प्राणस्तेऽविदितोऽभविष्यद्यदि ह नागमिष्य इति वा ॥७॥ अथ होवाचेन्द्रद्युम्नं भाल्लवेयम् । वैयाघ्रपद्य कं त्वं वैश्वानरं वेत्थेत्यादित्यमेव राजन्निति होवाचोमिति होवाचैष

वै सुततेजा वैश्वानर एतꣳ हि वै त्वꣳ सुततेजसं वैश्वानरं वेत्थ तस्मात्तवैष सु-
तोऽच्यमानः पच्यमानोऽक्षीयमाणो गृहेषु तिष्ठति यो वाऽएतꣳ सुततेजसं वै-
श्वानरं वेदाप पुनर्मृत्युं जयति सर्वमायुरेति चक्षुस्त्वाऽएतद्वैश्वानरस्य चक्षुस्त्वाहा-
स्यद्यदि ह नागमिष्य इति चक्षुस्तेऽविदितमभविष्यद्यदि ह नागमिष्य इति वा
॥ ८॥ अथ होवाच जनꣳ शार्कराक्ष्यम् । सायवस कं त्वं वैश्वानरं वेत्थेति दिव-
मेव राजन्निति होवाचोमिति होवाचैष वाऽअतिष्ठा वैश्वानर एतꣳ हि वै त्व-
मतिष्ठां वैश्वानरं वेत्थ तस्मात्त्वꣳ समानानतितिष्ठसि यो वाऽएतमतिष्ठां वैश्वा-
नरं वेदाप पुनर्मृत्युं जयति सर्वमायुरेति मूर्धा त्वाऽएष वैश्वानरस्य मूर्धा त्वाहा-
स्यद्यदि ह नागमिष्य इति मूर्धा तेऽविदितोऽभविष्यद्यदि ह नागमिष्य इति वा
॥ ९॥ तान्होवाच । एते वै यूयं पृथग्वैश्वानरान्विद्वाꣳसः पृथगन्नमघस्त प्रादेश-
मात्रमिव ह वै देवाः सुविदिता अभिसम्पन्नास्तथा तु व एनान्वक्ष्यामि यथा प्रा-
देशमात्रमेवाभिसम्पादयिष्यामीति ॥ १०॥ स होवाच । मूर्धानमुपदिशन्नेष वा-
ऽअतिष्ठा वैश्वानर इति चक्षुषी उपदिशन्नुवाचैष वै सुततेजा वैश्वानर इति ना-
सिकेऽउपदिशन्नुवाचैष वै पृथग्वर्त्मा वैश्वानर इति मुख्यमाकाशमुपदिशन्नुवाचैष
वै बहुलो वैश्वानर इति मुख्या अप उपदिशन्नुवाचैष वै रयिर्वैश्वानर इति चु-
बुकमुपदिशन्नुवाचैष वै प्रतिष्ठा वैश्वानर इति स एषोऽग्निर्वैश्वानरो यत्पुरुषः स
यो हैतमेवमग्निं वैश्वानरं पुरुषविधं पुरुषेऽन्तः प्रतिष्ठितं वेदाप पुनर्मृत्युं जयति
सर्वमायुरेति न हास्य ब्रुवाणं चन वैश्वानरो हिनस्ति ॥ ११॥ ब्राह्मणम् ॥ ४ [६.१.] ॥

द्वयं वाऽइदमत्ता चैवाद्यं च । तद्यदोभयꣳ समागच्छत्यत्तैवाख्यायते नाद्यम्
॥ १॥ स वै यः सोऽत्ताग्निरेव सः । तस्मिन्यत्किं चाभ्यादधत्याहितय एवास्य ता
आहितयो ह वै ता आहुतय इत्याचक्षते परोऽक्षं परोऽक्षकामा हि देवाः
॥ २॥ आदित्यो वाऽअत्ता । तस्य चन्द्रमा एवाहितयश्चन्द्रमसꣳ ह्यादित्यऽआद-

धतीत्यधिदेवतम् ॥३॥ अथाध्यात्मम् । प्राणो वा ऽअत्ता तस्यान्नमेवाहितयो ऽन्नꣳ
हि प्राण ऽआदधतीति न्वग्नेः ॥४॥ अथार्कस्य । अग्निर्वा ऽअर्कस्तस्याहुतय एव क-
माहुतयो ह्यग्नये कम् ॥५॥ आदित्यो वा ऽअर्कः । तस्य चन्द्रमा एव कं चन्द्रमा
ह्यादित्याय कमित्यधिदेवतम् ॥६॥ अथाध्यात्मम् । प्राणो वा ऽअर्कस्तस्यान्नमेव
कमन्नꣳ हि प्राणाय कमिति न्वेवार्कस्य ॥७॥ अथोक्थस्य । अग्निर्वा ऽउक्थस्या-
हुतय एव थमाहुतिभिर्ह्यग्निरुत्तिष्ठति ॥८॥ आदित्यो वा ऽउक् । तस्य चन्द्रमा
एव थं चन्द्रमसा ह्यादित्य उत्तिष्ठतीत्यधिदेवतम् ॥९॥ अथाध्यात्मम् । प्राणो वा
ऽउक्तस्यान्नमेव थमन्नेन हि प्राण उत्तिष्ठतीति न्वेवोक्थस्य स एषो ऽग्निविधो
ऽर्कविध उक्थविधो यत्पुरुषः स यो हैतमेवमग्निविधमर्कविधमुक्थविधं पुरुषमु-
पास्ते विदुषो हैवास्यैवं भ्रातृव्यो म्लायति ॥१०॥ प्राणेन वा ऽअग्निर्दीप्यते । अ-
ग्निना वायुर्वायुनादित्य आदित्येन चन्द्रमाश्चन्द्रमसा नक्षत्राणि नक्षत्रैर्विद्युदेताव-
ती वै दीप्तिरस्मिꣳश्च लोके ऽमुष्मिꣳश्च सर्वाꣳ हैतां दीप्तिं दीप्यते ऽस्मिꣳश्च लोके ऽमु-
ष्मिꣳश्च य एवं वेद ॥११॥ ब्राह्मणम् ॥ ५ [६. २.] ॥ ॥

सत्यं ब्रह्मेत्युपासीत । अथ खलु क्रतुमयो ऽयं पुरुषः स यावत्क्रतुरयमस्माल्लो-
कात्प्रैत्येवंक्रतुर्हामुं लोकं प्रेत्याभिसम्भवति ॥१॥ स आत्मानमुपासीत । मनो-
मयं प्राणशरीरं भारूपमाकाशात्मानं कामरूपिणं मनोजवसं सत्यसंकल्पꣳ सत्य-
धृतिꣳ सर्वगन्धꣳ सर्वरसꣳ सर्वा अनु दिशः प्रभूतꣳ सर्वमिदमभ्याप्तमवाक्कमनादरं
यथा व्रीहिर्वा यवो वा श्यामाको वा श्यामाकतण्डुलो वैवमयमन्तरात्मन्पुरुषो
हिरण्मयो यथा ज्योतिरधूममेवं ज्यायान्दिवो ज्यायानाकाशाज्ज्यायानस्यै पृथिव्यै
ज्यायान्त्सर्वेभ्यो भूतेभ्यः स प्राणस्यात्मैष म ऽआत्मैतमित आत्मानं प्रेत्याभिसम्भ-
विष्यामीति यस्य स्यादद्धा न विचिकित्सास्तीति ह स्माह शाण्डिल्य एवमेतदि-
ति ॥२॥ ब्राह्मणम् ॥ ६ [६. ३.] ॥ ॥

उषा वाऽअश्वस्य मेध्यस्य शिरः । सूर्यश्चक्षुर्वातः प्राणो व्यात्तमग्निर्वैश्वानरः संवत्सर आत्माश्वस्य मेध्यस्य द्यौष्पृष्ठमन्तरिक्षमुदरं पृथिवी पाजस्यं दिशः पार्श्वेऽअवान्तरदिशः पर्शव ऋतवोऽङ्गानि मासाश्चार्धमासाश्च पर्वाण्यहोरात्राणि प्रतिष्ठा नक्षत्राण्यस्थीनि नभो माꣳसान्यूवध्यꣳ सिकताः सिन्धवो गुदा यकृच्च क्लोमानश्च पर्वता ओषधयश्च वनस्पतयश्च लोमान्युद्यन्पूर्वार्धो निम्लोचञ्जघनार्धो यद्विजृम्भते तद्विद्योतते यद्विधूनुते तत्स्तनयति यन्मेहति तद्वर्षति वागेवास्य वागहर्वाऽअश्वं पुरस्तान्महिमान्वजायत तस्य पूर्वे समुद्रे योनी रात्रिरेनं पश्चान्महिमान्वजायत तस्यापरे समुद्रे योनिरेतौ वाऽअश्वं महिमानावभितः सम्बभूवतुर्हयो भूत्वा देवानवहद्वाजी गन्धर्वानर्वासुरानश्वो मनुष्यान्त्समुद्र एवास्य बन्धुः समुद्रो योनिः ॥ १ ॥ ब्राह्मणम् ॥ ७ [६. ४.]

नैवेह किं चनाग्रऽआसीत् । मृत्युनैवेदमावृतमासीदशनाययाशनाया हि मृत्युस्तन्मनोऽकुरुतात्मन्वी स्यामिति सोऽर्चन्नचरत्तस्यार्चत आपोऽजायन्तार्चते वै मे कमभूदिति तदेवार्क्यस्यार्कत्वं कꣳ ह वाऽअस्मै भवति य एवमेतदर्क्यस्यार्कत्वं वेद ॥ १ ॥ आपो वाऽअर्कः । तद्यदपाꣳ शर आसीत्तत्समहन्यत सा पृथिव्यभवत्तस्यामश्राम्यत्तस्य श्रान्तस्य तप्तस्य तेजो रसो निरवर्तताग्निः ॥ २ ॥ स त्रेधात्मानं व्यकुरुत । आदित्यं तृतीयं वायुं तृतीयꣳ स एष प्राणस्त्रेधाविहितस्तस्य प्राची दिक्शिरोऽसौ चासौ चेर्मावथास्य प्रतीची दिक्पुच्छमसौ चासौ च सक्थ्यौ दक्षिणा चोदीची च पार्श्वे द्यौष्पृष्ठमन्तरिक्षमुदरमियमुरः स एषोऽप्सु प्रतिष्ठितो यत्र क्व चैति तदेव प्रतितिष्ठत्येवं विद्वान् ॥ ३ ॥ सोऽकामयत । द्वितीयो मऽआत्मा जायेतेति स मनसा वाचं मिथुनꣳ समभवदशनायां मृत्युस्तद्यद्रेत आसीत्स संवत्सरोऽभवन्न ह पुरा ततः संवत्सर आस तमेतावन्तं कालमबिभर्यावान्त्संवत्सरस्तमेतावतः कालस्य परस्तादसृजत तं जातमभिव्याददात्स भाणकरोत्सैव

वागभवत् ॥४॥ स ऐक्षत । यदि वा ऽइममभिमꣳस्ये कनीयो ऽन्नं करिष्य ऽइति स तया वाचा तेनात्मनेदꣳ सर्वमसृजत यदिदं किं चर्चो यजूꣳषि सामानि छन्दाꣳसि यज्ञान्प्रजां पशून्त्स यद्यदेवासृजत तत्तदत्तुमध्रियत सर्वं वा ऽअत्तीति तददितेरदितित्वꣳ सर्वस्यात्ता भवति सर्वमस्यान्नं भवति य एवमेतददितेरदितित्वं वेद ॥५॥ सो ऽकामयत । भूयसा यज्ञेन भूयो यजेयेति सो ऽश्राम्यत्स तपो ऽतप्यत तस्य श्रान्तस्य तप्तस्य यशो वीर्यमुदक्रामत्प्राणा वै यशो वीर्यं तत्प्राणेषूत्क्रान्तेषु शरीरꣳ श्वयितुमध्रियत तस्य शरीर ऽएव मन ऽआसीत् ॥६॥ सो ऽकामयत । मेध्यं म ऽइदꣳ स्यादात्मन्व्यनेन स्यामिति ततो ऽश्वः समभवद्यदश्वत्तन्मेध्यमभूदिति तदेवाश्वमेधस्याश्वमेधत्वमेष ह वा ऽअश्वमेधं वेद य एनमेवं वेद ॥७॥ तमनवरुध्येवामन्यत । तꣳ संवत्सरस्य परस्तादात्मन ऽआलभत पशून्देवताभ्यः प्रत्यौहत्तस्मात्सर्वदेवत्यं प्रोक्षितं प्राजापत्यमालभन्त ऽएष वा ऽअश्वमेधो य एष तपति तस्य संवत्सर ऽआत्मायमग्निरर्कस्तस्येमे लोका ऽआत्मानस्तावेतावर्काश्वमेधौ सो पुनरेकैव देवता भवति मृत्युरेवाप पुनर्मृत्युं जयति नैनं मृत्युराप्नोति मृत्युरस्यात्मा भवति सर्वमायुरेत्येतासां देवतानामेको भवति य एवं वेद ॥८॥ ॥ शतम् ५५०० ॥ ॥

अथ वꣳशः । समानमा सांजीवीपुत्रात्सांजीवीपुत्रो माण्डूकायनेर्माण्डूकायनिर्माण्डव्यान्माण्डव्यः कौत्सात्कौत्सो माहित्थेर्माहित्थिर्वामकक्षायणाद्वामकक्षायणो वात्स्याद्वात्स्यः शाण्डिल्याच्छाण्डिल्यः कुश्रेः कुश्रिर्यज्ञवचसो राजस्तम्बायनाद्यज्ञवचा राजस्तम्बायनस्तुरात्कावषेयात्तुरः कावषेयः प्रजापतेः प्रजापतिर्ब्रह्मणो ब्रह्म स्वयम्भु ब्रह्मणे नमः ॥१॥ ब्राह्मणम् ॥८ [६.५.] ॥ चतुर्थः प्रपाठकः ॥ कण्डिकासंख्या ७५ ॥ षष्ठोऽध्यायः [६६.] ॥ अस्मिन्काण्डे कण्डिकासंख्या ३६१ ॥ ॥

इति माध्यन्दिनीये शतपथब्राह्मणेऽग्निरहस्यनाम दशम काण्ड समाप्तम् ॥१०॥ ॥

EXTRACTS FROM THE COMMENTARY OF SÂYAṆÂCÂRYA.

षष्ठादिकाण्डचतुष्टये उखासम्भरणादि संचितकर्मान्तमग्निचयनं साङ्गं निरूपितम् तत्र
कर्मणां भावनापुरःसरमनुष्ठाने फलविशेषो भविष्यतीति प्रतिपादयितुं दशमकाण्डमारभ्यते
। षष्ठादिकाण्डचतुष्टयेन प्रतिपादितकर्मणो भावनोपयोगितया अनुष्ठानाङ्गयुक्तकर्मप्रतिपादक-
तया च सर्वशेषत्वादस्य काण्डस्याग्निरहस्यमिति संज्ञा । रहसि भवं रहस्यम् अग्निविषयं रह-
स्यज्ञानमित्यर्थः । तत्र अग्निशब्देन आहवनीयाधिकरणं सप्तपुरुषाद्येकशतपुरुषपरिमितं चितं
क्षेत्रमभिधीयते इष्टकाभिरग्निं चिनोतीति श्रुतेः तथाग्निमारोहति अग्निं प्रोक्षतीति च आरोहण-
प्रोक्षणे स्थलस्यैवोच्येते तस्य चित्याग्नेरुपरि निधीयमान आहवनीयोऽग्निस्तत्कर्म चाग्निश-
ब्देनोच्यते तद्विषयं पूर्वमनुक्तमग्निमानादिकं तद्रहस्यं च ध्यानभागोऽस्मिन्काण्डे वक्ष्यत
ऽइति अग्निरहस्यमिति नामधेयं युक्तम् ॥ तत्राग्निं चिनुतऽइत्यनारभ्य-विहितस्य अन्तरोपसदौ
चिनोति प्रायणीयेन प्रचर्य सीरं युनक्ति पितो गार्हपत्यो भवत्यचित आहवनीयोऽथ राजानं
क्रीणातीत्येवमादिगुणयोगादग्नेः सोमयागाङ्गत्वेऽपि तस्मादेतानि सर्वाणि सहोपेयादग्निं महा-
व्रतं महदुक्थमिति समाम्नानात् महाव्रतस्य क्रतुविशेषे नियमदर्शनादन्यत्र प्रथमज्योतिष्टो-
माग्निष्टोमसंस्थाव्यतिरिक्तोऽपोक्ष्यानुष्ठानम् । महाव्रतं नाम संवत्सरसाध्यस्य गवामयनस्यो-
पान्त्यमहः तत्राग्निचयनमहाव्रतसामबृहदुक्थानां नियमेन सहप्रयोज्यत्वात्तानि त्रीण्येवं सह-
भावीनीति वक्तुमग्निबृहदुक्थे प्रथममनुवदति अग्निरेष इति आद्यन्तवर्तिचयनोक्थयोर्ग्रहणेन
तन्मध्यपतितं महाव्रतसामापि संगृहीतं भवति एषोऽग्निः संवत्सरात्मकः पुरस्तात्पूर्वं चीयते
इष्टकाभिः अग्नेः संवत्सरात्मकत्वं षष्ठे काण्डे प्रतिपादितम् उपरिष्टान्मरुत्वतीयशस्त्रादनन्तरं म-
हाव्रतसामोद्गात्रा गीयते तस्मादनन्तरं महदुक्थं नाम बृहतीसहस्रात्मकं शस्त्रं होत्रा शस्यते
। संवत्सरात्मकाग्नेः पूर्वं चयनं बृहदुक्थस्यान्ते शंसनमिति यदुक्तं तत्प्रशंसितुमाह प्रजापते-
रिति अग्निचयनं नाम प्रजापतिसंधानार्थमिति षष्ठे प्रपञ्चेन प्रतिपादितम् ॥१॥ प्रजापतेः सं-
वत्सररूपतामाह ॥२॥ चीयमानाग्नेः संवत्सरप्रजापतिरूपतामाह । इष्टकाश्च किंचिदधिकैका-
दशसहस्रसंमिता उपधेयाः अत्र यावत्य इष्टका यजुर्मन्त्रैरुपहिताः तावत्य एव प्रजापत्यव-
यवात्मना प्रतिसंहिता इत्याह तदेतदत्रैवेति अत्रैवाग्नौ एतद्यजुष्मितं यजुर्भिर्मन्त्रैरिष्टकाभिश्च-
यनं कृतं तदत्र प्रजापतौ आप्तं प्रतिसंहितमवयवात्मना युक्तं संवत्सरसम्बन्धिनामहोरात्रा-
णां पर्वरूपाणां यजुष्मतीनामिष्टकानां च संख्यासाम्यात्ताभिरेव कृत्स्नं प्रजापतिशरीरमापद्यत
ऽइत्यभिप्रायः ॥३॥ एवं चित्यमग्निं प्रजापत्यात्मना स्तुत्वा स्तोत्रशस्त्रे स्तोतुमाह अथ यो
ऽस्येति । अत्रोक्थशब्द स्तुतशस्त्रसाधारणः उत्तरत्र द्वयोरपि स्तूयमानत्वात् ग्रहं वा गृहीत्वा
चमसं वोन्नीय स्तोत्रमुपाकुर्यादिति ग्रहग्रहणं वा चमसोन्नयनं वा स्तोत्रप्रारम्भकाल(:) स्तु-
तमनुशंसतीति स्तोत्रादनन्तरं शस्त्रं शसनीयम् अत इदानीं तत्पूर्वभावि ग्रहग्रहणं प्रशंसितुं
तत्र ग्रहे सेव्यमानं च संस्तौति तमस्य तं रसमिति । अनुयन्ति अनुगमयन्ति । लोके यथा
अमुत्र विप्रकृष्टे प्रदेशे अद इष्टं मे मदीयमेकं वस्तु आहरिष्याम्यहमिति पूर्वं गच्छति यद्य-
जुर्मन्त्रः ऋक्सामाभ्यां रसानयनाय प्रथमं गतः तं रसं संवत्सरसाध्यगवामयनोपान्त्यदिवस-

निष्पाद्ये महाव्रते आप्नुवन्ति ॥४॥ तस्मिन्निति निमित्तसप्तमी यजुषा ग्रहे गृहीते । तत्र प्रजननगायत्रबृहद्रथन्तरभद्राख्यानि (!) पञ्च सामानि विद्यन्ते । बृहदुक्थस्य गायत्रौष्णिहबार्हततृचाशीतित्रयात्मकत्वात्सर्वा ऋचो महदुक्थमित्युपपन्नम् ॥५॥ पूर्वं प्रजापते रससंयुक्तता स्यात् अन्यथा रसाभावे शरीरमदृढं भवेदितीमामाशङ्कां रसस्थापनेन व्युदस्यति ते यदेति । यस्मिन्काले स्तुवते उद्गातृप्रस्तोतृप्रतिहर्तारः यदा चानुशंसति स्तोत्रमनुलक्ष्य शस्त्रं पठेत् होता अथ शस्त्रादनन्तरं वषट्कृते शस्त्रयाज्यान्ते वषट्कारे कृते एनं गृहीतं स्तोत्रशस्त्राभ्यां संस्कृतं रसमस्मिन्नग्नौ प्रजापतिरूपे जुहोति तत्तेन होमेन एनं प्रजापतिं एष हुतो रसोऽप्येति अपिगच्छति संयुक्तो भवति । इदानीमस्मिन् चयनप्रदेशे महाव्रतं साम स्तुतं शेते तिष्ठतीति न पश्यन्ति । किं तु अग्निं चितमेव पश्यन्ति अग्निर्हि आत्मा स्थूलं शरीरम् तत्तस्मादेनं चित्याग्निमितेऽउभे महाव्रतबृहदुक्थे रसो भूत्वापीतः अपिगच्छतः एकीभवतः उभे च ऋक्सामे ग्रहग्रहणयजुरपीतः ऋक्सामाभ्यां पुरस्ताद्यजुर्मन्त्रेण ग्रहणात् ॥६॥ चित्याग्निं मिथुनरूपेण प्रशंसति । चिते चित्याग्नौ योऽग्निराहवनीयो निधीयते । अतः पञ्चमी चितिः तस्या उपरि निधीयमान आहवनीयोऽग्निरिति द्वयमेकं मिथुनम् । अयमात्मा स्थूलं शरीरं मिथुनरूप एव भवति ॥७॥ मिथुनत्वं नाम स्त्रीपुंसयुगलम् तच्छरीरे प्रदर्शयति अङ्गुष्ठा इति । स वषट्कारान्ते हुतो रसः अनेन मिथुनेनात्मना शरीरेण एतं चितिद्वन्द्वमिथुनरूपमग्निमपिगच्छति ॥८॥ उक्तमिथुनरूपेणाप्ययनप्रका प्रदर्शितः पुनश्चित्याग्निं मिथुनरूपेण प्रस्तोतुं प्रकारान्तरेण मिथुनत्वं प्रतिजानीते अप्यहैवमिति ॥९॥ मिथुनपरम्परावेदितुः फलमाह न ह वाऽइति । प्रकारान्तरेणाप्ययप्रकारं वक्तुमात्मनोऽन्नरूपत्वमाह अन्नं ह त्वेवेति अयमात्मा अन्नमेव तत्साध्यत्वात् उक्तार्थे मन्त्रं संवादयति (१०. १०७. ७.) ॥१०॥ भूमावग्निश्चीयते अत आधाराधेययोरभेदोपचारेण भूमेरग्नित्वं सम्पन्नम् । चितोऽग्निर्गधान्तस्थविष्ठभागात्मना भावनीयः तस्योपरि निहित आहवनीयोऽग्निरन्नस्याणिष्ठभागात्मना ध्येयः ॥११॥१॥१॥

पूर्वं महाव्रतयज्ञे सह प्रयुक्तानि अग्निचयनमहाव्रतसाममहदुक्थशस्त्राणि त्रीण्यपि पक्ष्याकाराणि अधिदेवं पृथिव्यन्तरिक्षद्युलोकात्मकानि अध्यात्मं मनःप्राणवाग्रूपाणि चेति द्वितीयब्राह्मणे प्रतिपाद्यते ज्योतिष्टोमयज्ञऽएवैतेषां त्रयाणां सम्पादनाप्रकारश्चोच्यते ॥ अग्निं चित्याग्निं व्यधत्त । तृतीयं पक्ष्याकारमात्मानं बृहदुक्थं बृहतीसहस्रात्मकं शस्त्रं व्यधत्त ॥१॥ यस्मादिमे त्रयो लोकाः सहासृज्यन्त तस्मादेतानि त्रीणि अग्निमहाव्रतबृहदुक्थानि सहानुतिष्ठेत् ॥२॥ उत्पद्यमानस्य पुरुषस्य प्रथममात्मा मध्यशरीरं सम्भवति ॥४॥ तत्र महदुक्थमाख्यायते तमां सम्पूर्णमुच्यते बृहतीसहस्रात्मकत्वात्सम्पूर्णोक्तिः । सम्यगुक्तौ युक्त्यन्तरमप्याह आत्मा हीति आत्मनस्तु सर्वाङ्गेभ्योऽपि स्थूलत्वात् ॥५॥ अधुना प्रथमसंस्थारूपज्योतिष्टोमाग्निष्टोमं महाव्रतयज्ञात्मना स्तोतुं तत्रैवाग्निचयनादित्रयस्योपादानाद्ब्रह्मवादिप्रश्नोत्तराभ्यां दर्शयति । सह युगपत् उरुपापानि आप्तुमशक्यानि सर्वेषां महाव्रतयज्ञानुष्ठाने प्रयोगबाहुल्येन ऋत्विक्सम्पादनादेः दुष्करत्वेन चानधिकारात् । तत्राग्निष्टोम इति पदेनाग्निस्तवनोक्तेरग्निचयनमुक्तमिति मन्तव्यम् ॥६॥ पक्ष्याकारस्य महाव्रतसाम्नो हि शिरःपक्षमध्यपुच्छात्मकाः पञ्चावयवाः शिरो गायत्रं रथन्तरं दक्षिणः पक्षः बृहदुत्तरः पक्षः भद्रमस्य पुच्छं राजनसाम (!) ह्यात्मेति तत्सर्वमग्निष्टोमे सम्पादयति तस्य वाऽइति ऋक्त्रयात्मकमेकं सूक्तं तादृशानि त्रीणि

सूक्तानि त्रिवृतोऽवयवा यस्य स्तोमस्य तदिदं त्रिवृद्बहिष्पवमानम् प्रातःसवनिकं तृचसूक्तत्रयात्मकं बहिष्पवमानं महाव्रतस्य शिरो भवति बहिष्पवमानमपि गायत्रीछन्दस्कैस्तृचैर्गातव्यम माध्यन्दिन(:) पञ्चदशस्तोत्रियात्मकः पवमानः तृतीयसवने सप्तदशस्तोत्रियात्मकः ग्रार्भवः पवमानः पक्षस्थानीयौ । होत्रानुशंसनीयं प्रथममाज्यस्तोत्रम् सप्तदशस्तोत्रियात्मकं पृष्ठनामकं होतुः प्रथमं स्तोत्रम् तदुभयं मध्यात्मरूपम् । एकविंशत्यावृत्तिरूपं यज्ञा यज्ञा वोऽग्नय इत्यत्रोत्पन्नं साम पुच्छस्थानीयम् ॥७॥ ग्राज्यं पृष्ठमित्युभयोर्मध्यात्मरूपतामाह । ग्राज्यस्तोत्रं पञ्चदशस्तोत्रियात्मकम् । परिमादः परितो हर्षहेतवः महाव्रते क्रियमाणानि यानि परिमान्नामकानि सामानि तत्स्थानीयास्ताः ॥८॥ महदुकथेऽपि गायत्रबार्हतौष्णिहतृचाशीतयः पक्षमध्यपुच्छात्मकाश्चावयवाः सन्ति तत्सर्वमग्निष्टोमे दर्शयति । प्रातरनुवाके गायत्र्यादीनि सप्त छन्दांसि धाय्यादिषु विराट्छन्दश्चाष्टमं होता शंसति । विराजस्त्रयस्त्रिंशदक्षराणि [५.४.८.] । ता महदुकथगतास्तिस्रोऽशीतयः । बृहदुकथे शिरःपक्षाद्यवयवाः सन्तीत्युक्तं तद्दर्शयति ग्रथ यानि पञ्चचत्वारिंशदिति तत्र यानि पञ्चविंशतिसंख्यान्यक्षराणि तान्यात्मा मध्यशरीरम् ग्रनेन शिरःपक्षद्वयपुच्छान्यवयवा ग्रप्युक्ता वेदितव्याः ग्रथ यान्यवशिष्टानि विंशतिरक्षराणि तदावपनं नाम महदुकथशस्त्रस्योरुभागात्मकत्वेन (शं)सनीयेषु सूक्तेषु वने न वा यो न्यधायि चाकन् (१०.२९.१.) यो जात एव प्रथमो मनस्वान् (२.१२.१.) इत्यनयोः सूक्तयोर्मध्ये ग्रायुष्कामयजमानार्थं तासां कासां चिदृचां शंसनम् ॥१॥२॥१॥

ग्रग्निचयनेष्टकाहेतवो मृदापश्च चित्याग्नेः पञ्चेष्टकाचितयः पञ्च पुरीषचितयः चित्युपस्थानमन्त्रश्च तत्र प्रजापतिरूपेणेष्टकाः पुरीषेष्टकाचितयः प्रजापतेर्मर्त्यामृतशरीरात्मना मन्त्रोपस्थान कृत्स्नशरीरसम्पादकत्वेन च तृतीयब्राह्मणे स्तूयते ॥ मर्त्यप्रजानां भक्षयितारम् ॥१॥ पञ्चम्या इष्टकाचितेरुपरि निहितायाः पञ्चम्याः पुरीषचितेरुपरि विकर्णीनामिकामिष्टकां स्वयमातृण्णानामिकां चोपधाय हिरण्यशकलैः सम्प्रोक्ष्य तत्राहवनीयाग्नेराधानं सप्तमी चितिरिति व्यवह्रियते ग्रतः पञ्चमीसप्तमीभ्यामिष्टकाचितिभ्यां तन्मध्यस्थितायाः पुरीषचितेरमृतीकरणम् ॥७॥ चित्याग्नेर्न्यूनातिरेकपरिहाराय मन्त्रेणोपस्थानं देवाः कृतवन्तः ॥८॥ ऋग्गतमनुष्टुप्छन्दो वाग्रूपेण प्रशंसति धामछदग्निरित्यृगनुष्टुब्वाग्रूपा चतुष्पात्त्वसाम्यात् चत्वारि वाक्परिमिता पदानीति वाचः पादचतुष्टयमाम्नातम् । ग्रन्तिमां पुरीषवतीं चितिं चित्वानेन मन्त्रेणोपस्थानम् ॥१०॥ यविष्ठपदवत्या । ग्रनिरुक्तायास्पष्टाग्निलिङ्गया । निर्वक्तुमनर्हमनिरुक्ताम् । यद्यप्यग्न्यादिपदं स्पष्टतया न प्रतीयते सूक्तस्याग्नेयत्वादस्या ग्रप्याग्नेयत्वं प्रकरणादवसीयते ॥११॥३॥१॥

चतुर्थब्राह्मणे षट्संख्याका इष्टकाचितयः प्रजापतेर्मरणधर्मकस्थूलशरीरगतमज्जास्थिस्नावमांसमेदोऽसृक्त्वग्वाग्रूपत्वेन च एकैकस्या इष्टकाचितेरुपरि निधीयमानाया एकैकस्याः पुरीषचितेरमृतत्वसम्पत्त्यामन्तिमायाश्चितेरुपरि निहितविकर्णीस्वयमातृण्णेष्टकाहिरण्यशकलाहवनीयनिधानं प्रजापतेर्हिरण्यरूपत्वेन प्रणीतेऽग्नौ ह्रियमानाः समिधो देवानामन्नत्वेन स्तूयन्ते ग्रथाग्निचितः पक्षिभक्षणवर्जनं व्रतं च प्रतिपाद्यते ॥ एतेनाग्निकर्मणा एतयावृता क्रियया एकधा एकप्रकारमात्मानं जरामरणधर्मरहितं कृतवान् ॥१॥ ग्रग्निं चितवान्यजमानोऽमुष्मिन्स्वर्गे लोके हिरण्यसमानवर्णः सम्भवति ॥२॥ चित्याग्निमभिलक्ष्य ग्राहवनीयाग्नेः प्राङ्मुखत्वेन प्र-

णायनम् । संचिते इष्टकाचितेऽग्नौ । प्रणीतादूर्ध्वं प्रणीतेऽग्नौ । इत्येवम् ॥११॥ प्राणस्योर्ध्वगतित्वाद्देवेभ्यः प्राक् प्राचा हस्तेनोर्ध्वं होमं कुर्वन्ति । तस्मादग्नेः प्रणयनं देवानां प्राङ्मुखत्वेन हवनमित्यर्थः ॥१२॥४॥१॥

अग्निचयनकर्म अग्न्याधानाग्न्याधेयहविरग्निहोत्रदर्शपूर्णमासेष्टिपशुचातुर्मास्यसोमाध्वरराजसूयादिसर्वयज्ञात्मकमिति पञ्चमब्राह्मणे स्तूयते यज्ञवीर्याणां मीमांसा च वक्ष्यते ॥ सोऽग्निं चिकीर्षमाणः पशुं पुरुषाश्वादीन्पशूनालभते आधानप्रथमकरणसाम्यात्पश्वालम्भनमेवाधानरूपत्वेन स्तूयते ॥१॥ समानेन मन्त्रेण प्रातःकालीन एक एव मन्त्रः सायंतनोऽप्येक एव रात्रिमप्रयावमिति सायंतनो मन्त्रः अहरहरप्रयावमिति प्रातःकालीनो मन्त्रः । देवयजनं प्रत्यग्नेः प्रणयनम् अप्सूख्यभस्मावपनम् । एतेषु दर्शपूर्णमासादियज्ञेषु ये विष्णुक्रमास्तऽएव अग्निचयने क्रियमाणा विष्णुक्रमाः । यज्ञेषु यज्जप्यं तद्वात्सप्रं सूक्तम् ॥२॥ चितमग्निं यैः सामभी रथन्तरादिभिः परिगायति तत्सामजातं महाव्रतम् । तत्र महाव्रतयज्ञे सामगानात्प्राङ्गात्रा पुरस्ताज्जप्यो मन्त्रोऽस्ति तदत्र शतरुद्रियम् । वसोर्धारा नाम चमकसूक्तेन (वाजस° स° १८, १-२७.) हूयमानाज्यधारा सा बृहदुक्थं बृहतीसहस्रात्मकं शस्त्रम् । गृहमेधाः सत्त्रयागाः ॥३॥ पशुबन्धः षट्सु-षट्सु मासेषु क्रियते । वसन्ते वसन्ते ज्योतिषा यजेतेति सोमयागः संवत्सरे विधीयते । उपहन्यात्पृथक्कुर्यात् ॥४॥५॥१॥

एवं पूर्वाध्यायेन महाव्रतयज्ञे अग्निचयनमहाव्रतबृहदुकथानि सह प्रयोक्तव्यानीत्युक्त्वा तानि च सर्वैरग्निष्टोमऽएवाप्तुं शक्यानीत्यग्निष्टोमगतसामशस्त्राण्येव महाव्रतसाममहदुकथात्मना स्तुत्वा चित्याग्निं प्रजापत्यात्मना प्रस्तुत्य पञ्चेष्टकाचितीः पुरीषचितीश्च प्रजापतेर्मर्त्यामृतशरीरात्मना प्रतिपाद्य हिरण्यशकलप्रोक्षणमाहवनीयस्थापनं हिरण्मयरूपत्वेन स्तुत्वा अग्निचितः वयोभक्षणवर्जननियमादनन्तरमग्निचयनस्य पुनर्मृत्युजयरूपं फलं तस्याग्निकर्मणः सर्वयज्ञात्मना स्तुतिरुक्ता । अथ द्वितीयेऽध्याये चित्याग्निविषयो विचारो वक्ष्यते । तत्र प्रथमब्राह्मणे चित्याग्नेः पक्षिरूपत्वं पक्षपुच्छयोः प्रमाणं च विधीयते ॥ पुरुषादिपञ्चपशवः प्रजापतिः सर्वात्मकत्वात्तस्य । अनुपसमुह्य मध्यप्रदेशे अवष्टम्भमकृत्वा अनुपाधाय कांचिदाधारमकृत्वा यद्वा पक्षाभ्यां मध्यभागमनवष्टभ्य पक्षाग्राणि अविस्तीर्य । यदैव पक्षौ उपसमूहन्ते पक्षाभ्यां मध्यभागं समूहन्ते पक्षमूलभागं मध्यभागसमीपे संकोचयन्ति यदा च पक्षाग्राणि विसृजन्ति विकिरन्ति ॥१॥ चित्याग्नेः अङ्गुलिपरिमाणं दर्शयति ॥२॥ अरत्निपरिमाणं विधत्ते । वितस्तिर्द्वादशाङ्गुलः वितस्तिद्वयमरत्निः सा चतुर्विंशत्यङ्गुलिपरिमाणा तया मिमीते ॥३॥ उभयतः पक्षस्य पार्श्वद्वये अन्तरतः चित्याग्नेर्मध्यदेशे । व्युद्गहति अन्ते विवर्धयति ॥४॥ नितरां (!) नामो नमनं निर्नामः । वितृतीयऽइति पक्षभागं त्रेधा विभज्य अन्तरे तृतीयभागे ॥५॥ उद्गहति विकर्षति समूहति संकर्षति ॥७॥ अथ पञ्चेष्टकाचित्युपधानानन्तरमात्ममध्यपक्षद्वयेन ऋज्वालिखितदक्षिणावृत्सव्यावृतः सहस्रत्रयसंख्याका इष्टका उपधेयाः तदुपधानं प्रशंसति अथ रूपमिति उत्तममन्तिमम् अत्रान्तिमे रूपे एष सर्वोऽग्निः संस्कृतः इष्टकाभिश्चितः । ऋज्वालिखिताः ऋजुलेखा अकुटिलरेखाः इत्यालिखिताः इतिशब्दोऽभिनये एवमालिखिता इत्यनेन दक्षिणावृतः द्वितीयेत्यालिखितशब्देन सव्यावृतः ॥८॥ पञ्चमीमिष्टकाचितिमुपधाय अग्निं स-

प्तपुरुषसंमितं त्रेधा विभज्य मध्यमे तृतीयभागे अङ्गुलेखा इष्टका उपदध्यात् ॥१॥ अग्नेस्त्रिवृत्त्वं षष्ठे प्रतिपादितम् (६.१.३.१८.) ॥ ११ ॥ १ ॥ २ ॥

द्वितीयब्राह्मणे चित्याग्नेः सप्तपुरुषप्रमाणतां पक्षपुच्छयोश्च अरत्निवितस्तिप्रमाणतां विधत्ते । वैशब्दः प्रसिद्धिद्योतकः (६.१.१.३.) ॥१॥ स सुपर्णरूपः प्रजापतिः सप्तपुरुषसंमितोऽभवत् ॥५॥ समस्थितेन यजमानेनोर्ध्वबाहुना चित्याग्नेर्मानं कुर्यात् । एवं प्रपदेन पादाग्रेणावस्थानादुन्नतो भवतीति यत्प्रमाणमस्ति तत्परिग्रहिः शर्कराभिराप्तवान्भवति ॥६॥ चित्याग्निः सार्धसप्तपुरुषप्रमाण इत्यापस्तम्बवचनम् अत्र तु सप्तपुरुषप्रमाणमेवोच्यते अधिकमर्धपुरुषप्रमाणं नोक्तमिति तद्विधत्ते अथ पक्षयोरिति पुरुषः पञ्चारत्निक इत्युक्तम् पक्षद्वये अरत्निद्वयं पुच्छे वितस्तिरिति वक्ष्यते उभयं मिलित्वा सार्धमरत्निद्वयमर्धपुरुषप्रमाणं लभ्यते ॥७॥ मणिबन्धादारभ्य साङ्गुलिरग्रकरो वितस्तिः ॥८॥२॥२॥

प्राकृतस्य सप्तविधाग्नेः वैकृतेषन्त्यस्यैकशतविधाग्नेश्च वेदिमानं तृतीयब्राह्मणे विधत्ते ॥ या इयं वेदिः सौमिकी प्रसिद्धा सा सप्तविधस्याग्नेः मात्रा भवति । महावेदेर्मानं विधातुं प्राचीनवंशगतवेदेर्मानं सेतिकर्तव्यताकं विधत्ते स देवयजनमिति सोऽध्वर्युः देवयजनक्षेत्रं निश्चित्य पूर्वद्वारेण पत्नीशालं प्राग्वंशं प्रविश्य गार्हपत्यार्थं खात्वा तत्क्षेत्रं जलेन सिञ्चेत् गार्हपत्यार्थं कल्पितात्प्रदेशात्सप्त प्रक्रमान्प्रागायतान्गृह्णीयात् पञ्चारत्निः पुरुषो दशपदो द्वादशाङ्गुलं पदं प्रक्रमस्त्रिपदः सप्त प्रक्रमा गार्हपत्याहवनीययोर्मध्यम् ततः सप्त प्रक्रमेभ्यः प्राञ्चं व्यामं विमिमीते व्यामश्चतुररत्निप्रमाणः तस्य व्यामस्य मध्ये आहवनीयस्थानं कल्पयेत् एष आहवनीयो वक्ष्यमाणायाश्चयनमहावेदेर्गार्हपत्यो भवति । स प्रक्रमत्रयान्तप्रदेशो महावेदेः पश्चिमभागस्यान्तः ॥१॥ व्यामैकादशप्रक्रमकृतां वेदिं महावेदेर्योनित्वेन प्रशंसति सैषेति । एतस्या व्यामरूपाया योनेर्गार्हपत्यचित्यात्मकमग्निं जनितवन्तः गार्हपत्यादाहवनीयं महावेदिगतमाहवनीयचित्यात्मकमजनयन् ॥३॥ सप्तविधं सप्तपुरुषप्रमाणम् ॥४॥ अथ यथा सप्तविधस्य प्राकृताग्नेर्व्यामैकादशाः प्रक्रमाः एवमष्टविधनवविधादिपुरुषप्रमाणानामेकशतविधपर्यन्तानामग्नीनामेकादशप्रक्रमा प्राकृतो वेदिः किं पुरुषसंख्यया वर्धयितव्या आहोस्विन्नेति संशयं व्युदसितुं पूर्वपक्षयति तद्धैकऽइति । उत्तरा विधाः अष्टविधाद्येकशतपर्यन्ता अग्निप्रकारान्करिष्यन्त । अष्टविधाद्यग्निमहावेदीनां योनिभूतवेदिवृद्धिं विना वृद्धिः कर्तुं न युक्ता । अग्निर्गर्भः स हि सप्तपुरुषप्रमाणमेव प्राकृतेऽष्टविधादीनामपि भवति जातस्यैव तस्याष्टविधादिरूपेण वृद्धिः अतस्तस्य योनिभूता वेदिर्व्यामैकादशप्रक्रममात्रैव । तस्मादष्टविधाद्येकशतविधान्तासु विकृतिषु प्राग्वंशगता वेदिर्गार्हपत्या चितिश्च प्रकृतिभूतसप्तविधैकपरिमाणैव कार्या अग्निक्षेत्रं महावेदीष्टका इत्येतत्सर्वमुत्तरोत्तरं विवर्धते ॥६॥ प्रथमं वेद्यन्तात्प्रागायतषट्त्रिंशत्प्रक्रमा रज्जुर्मिता तां सप्तधा विभज्य तस्या रज्ज्वाः सप्तसु भागेषु मध्ये प्रचत्रीन्भागानुपदधाति इष्टकाभिरुपदध्यात् अवशिष्टांश्चतुरो भागानुपधानार्थं न विनियुञ्जीत किं तु हविर्धानसदःप्रभृत्यर्थं परित्यजेत् ॥८॥ अथ चित्याग्नेः प्रकारान्प्रतिजानीते अथाग्नेरिति विधाः प्रकारा उच्यन्तऽइति शेषः । साधिमानानाम् पक्षपुच्छेष्वाधिक्येन निक्षिप्तारत्निवितस्तिप्रमाणसहितानाम् ॥११॥ सप्तपुरुषाश्चतुर्दशभिर्गुणनेनाष्टानवतिः सम्पद्यते अत्र त्रिपुरुषप्रमाणयोजनेन एकशतविधोऽग्निरुत्पद्यते ॥१२॥ एवमेकशतपुरुषप्रमाणं मध्यपक्षपुच्छेषु दर्शयित्वा

प्राकृताग्निवत्पत्तपुच्छेष्वधिकं योजनीयं प्रमाणमाह ॥१३॥ प्राकृतसप्तविधे सप्तमस्य या संख्यासम्पत्तिरुक्ता अथैकः पुरुषोऽत्येतीत्यादिना (क° ५.) सा सम्पत्तिरितरेषु त्रयोदशसु पुरुषेषु द्रष्टव्या ॥१५॥ प्रकारान्तरेण सम्पत्तिमाह ॥१६॥३॥२॥

चतुर्थब्राह्मणे एकशतविधस्याग्नेः सर्वकामरूपत्वेन आदित्यात्मना स्तुतिः तस्य सप्तविधप्राकृताग्निसंख्यया सम्पत्तिप्रकारः (४-७.) सप्तविधस्य चैकशतविधसंख्यया सम्पत्तिश्च (८.) प्रदर्श्यते ॥१॥ अधिमासेन सह सप्तऽर्तवः । सप्तसु स्तोमेषु त्रिवृत्पञ्चदशसप्तदशैकविंशचतुर्विंशत्रिणवत्रयस्त्रिंशेषु । बृहद्रथन्तरवैरूपवैराजशाक्वरादिषु सप्तसु पृष्ठेषु । सप्तसु शीर्षण्येषु प्राणेषु । प्राच्यादयश्चतस्र ऊर्ध्वावाच्यौ द्वे सूर्यमण्डलमेव सप्तमी दिगिति सप्त दिशः ॥५॥४॥२॥

एवं चित्याग्नेर्वेदेश्च मानमुक्तम् अथ चयनविषयविचारो वक्ष्यते । तत्र कालं विधत्ते पौर्वाह्णिक्यापराह्णिक्योरुपसदोर्मध्ये चिनुयात् । तत्र साग्निकप्रकृतावग्निष्टोमे तिस्र उपसदः साग्निकऽएकाहिके क्रतौ तिस्र उपसदः द्वादशाहगवामयनतापश्चिदादिषु(!) अहीनसत्त्रसंवत्सरेषु द्वादशचतुर्विंशतिषष्ट्युत्तरत्रिशतसंख्या उपसद इति वक्ष्यते ताश्च त्रिवादिपत्तेष्वपि एकैकस्मिन्दिने पूर्वाह्णापराह्णयोः उपसदः कार्याः ॥१॥ यावतीरुपसदः कुर्यात्तावद्भिः प्रवर्ग्यैश्चरितव्यम् उपसदः तापश्चिते चयने संवत्सरसंमिताः ॥३॥ उपसत्सु प्रवर्ग्यचरणं प्रशंसति अहोरात्राणि वाऽइति यतः संवत्सरमिता (?रंश्चिता C. रश्चित्तः A.) उपसदः अतोऽहोरात्राणि तत्र चैकैकस्मिन्दिने द्वे-द्वेऽइति तयोरहोरात्ररूपत्वम् ॥४॥ न केवलमत्रैव तापश्चितीषु किं तु यत्रयत्राधिका न्यूना वाऽउपसदः तत्र-तत्र प्रवर्ग्यचरणेनादित्यस्थापनं कृतं भवति । क्रतुविशेषे चतुर्विंशतिसंख्या उपसदः कार्याः ॥५॥ द्वादशाहे ॥६॥ सामान्येन षट् ॥७॥ प्रकृतौ तिस्रः ॥८॥ तत्रोपसदां मध्येऽनुष्ठातव्यस्य चयनस्येष्टकाचितिपुरीषनिवपनयोरनुष्ठानप्रकारा वक्ष्यन्तऽइति प्रतिजानीते अथात इति । अग्नौ षडिष्टकाचितयः षट् पुरीषचितयः ताश्च तापश्चिते क्रतौ प्रतिमासमेकैका उपधेयाः तथा च वसन्तादिषु षट्स्वृतुषु यो-यः कामः तं सर्वमात्मानमभिलक्ष्य सम्पादितवान्भवति ॥१॥ असपत्नानामधेयाः पञ्च विराट्संज्ञकाश्चवारिंशदिष्टकाः प्रथमदिवसे उपदध्यात् स्तोमभागा नामेष्टका एकोनत्रिंशत् प्रतिदिवसमेकैकामिष्टकामुपदध्यात् मासान्ते सर्वासामेकवारं सादनं तया देवतयेति मन्त्रेण तथा ता अस्य सूददोहस इत्यनेनैतासां सकृदधिवदनम् ॥१३॥ नाकसत्पञ्चचूडादीष्टकाभिः षष्ठी चितिः सम्पादिता ॥१४॥ द्वादशस्य मासस्याष्टाविंशतिसंख्याकैरहोभिः पुरीषनिवपनम् तत उत्तमे द्वे ऽअहनी परिशिष्येते एकमेव सुत्यमहरावृत्त्या (?वृत्या) संवत्सरो भवतीति तदेकमहरतिरिच्यते (? तदेकमहरित्युच्यते A. तदेमहरित्यच्यते C1. तदेतदहत्रयमतिरिच्यते C2.) तानि त्रीण्यहानि पुरीषचितेरतिरिक्तानि भवन्ति तान्यहानि विशिनष्टि यदहरिति । तेष्वहस्सु यत्प्रवर्ग्योपसदामनुष्ठानं तेन तस्य संसपर्याहस्पतिसंज्ञकस्य (?) त्रयोदशमासात्मकस्य सम्बन्धिष्वहोरात्रेषु आदित्यात्मकस्य सप्तमर्तोः स्थापनं कृतं भवति ॥१५॥ सुत्यानां संख्यां विधत्ते स संवत्सरमिति संवत्सरपर्यन्तं प्रसुतः सोमयागः स्यात् प्रतिदिवसमेकैकः सोमयाग इति षष्ट्युत्तरत्रिशतसंख्याकाः सोमयागा भवन्ति । तत्र तापश्चिते कर्तव्यमग्निविशेषं प्रदर्शयन्स्तौति

सर्वमेकशतविध इति अतः सर्वेण संवत्सरपर्यन्तं क्रियमाणेन एकशतविधाग्निमता सोमयागेन सर्वमाप्तवान्भवति । अतिरात्रसंस्थेन सर्वपृष्ठवता विश्वजिदाख्येन ॥१६॥५॥२॥

पूर्वं संवत्सररूपप्रजापतेरेकशतविधाग्नित्वमुक्तम् तस्यादित्यरूपत्वं शतसंख्याकरश्मिभिर्मण्डलेनैकशतसंख्यापूरकेण सम्पन्नमिति चोक्तम् अधुना प्रकारान्तरेणैकशतसंख्याकत्वं सप्तविधाग्निना सम्पत्तिश्च वक्ष्यते चयनस्य अमृतत्वप्राप्तिः फलमिति च ॥ मलिम्लुचसाहित्येन त्रयोदश मासाः । द्वौ-द्वावृतू एकीकृत्य त्रय ऋतवः ॥१॥ सप्तविधाद्येकशतपर्यन्ताग्निचयनस्य सूर्यलोकः फलमिति दर्शयति तस्यैतस्येति एतस्य सवितुर्मण्डलस्य परस्तादुपरिभागे सर्वकामपूरकः मरणधर्मरहितो लोकोऽस्ति । यदेतदर्चिस्तेजो दीप्यते सोऽमृतलोकः ॥४॥ अर्चिषोऽमृतफलत्वं सवितृसम्बन्धित्वं च प्रदर्शयति तदेतदिति ॥५॥ एतदर्थजातं पश्यन्तो विचारयन्तो वाक् दीर्घं तऽआयुरस्त्वित्यादिका वदति । शतायुता शतवर्षजीवनं लोक्या लोकहिता पुण्यलोकहेतुः यस्माच्छतायुर्जीवनं लोकहितं तस्मादायुषः पूर्वं स्वकामी स्वहितमिच्छन् स्वेच्छया न म्रियते तन्मरणमलोक्यममृतत्वरूपलोकसाधनं न भवति । शतादर्वाचीनेषु वर्षेषु मरणं पुण्यलोकसाधनं न भवति ॥७॥ ये विंशतिवर्षादर्वाचीनेषु वर्षेषु म्रियन्ते ते अहोरात्ररूपेषु लोकेषु सज्यन्ते सम्बध्यन्ते ॥८॥ एकदिनजीवनमेकरात्रिजीवनमपि बहुयज्ञफलं किमुत शतं वर्षाणि जीवितवतः अमृतत्वप्राप्तिः । यः पुरुषः एनमुख्याग्निं संवत्सरपर्यन्तं बिभर्ति एष एकशतविधं चित्याग्निं विधातुं योग्यः । संवत्सरभृतमिव इवशब्दोऽप्यवधारणे वर्षपर्यन्तं भृतमेवाग्निं चिन्वीत ॥९॥ विधाभिः पुरुषैरेकशतविधः । प्रतिचिति ऋतव्ये ॥१०॥ याः प्रथमाः प्रथमचितावुपहिताः प्राणभृतः पञ्चाशदिष्टकाः याश्चोत्तमचितावुपहिता विराड्नाकसत्पञ्चचूडाख्याः पञ्चाशत् ताः शतम् आसामाद्यन्तोपहितानां मध्ये या इष्टकाः उपधीयन्ते ताः सर्वा अपि एकशततमी विधा ॥११॥ उपधानमन्त्रसंख्ययाप्येकशतविधत्वम् । यजूंष्येव तेजो यस्याग्नेः स तद्यजुर्मन्त्रैरेकशतसंख्याकः ॥१२॥ एवं सप्तविधस्यैकशतसम्पत्तिन्यायवदेकाहाहीनसत्रादिकाः अग्निहोत्रावसानाः सर्वेऽपि यज्ञा एकशतविधा भवन्ति एतदेव दर्शयति ऋग्भिर्यजुर्भिरिति एकस्मिन्पक्षे आदितः पञ्चाशदृचः अन्ते च पञ्चाशत्तन्मध्यवर्तिनः सर्वा अप्यृचः एकशततमी विधेति एवमेकस्य यज्ञस्यैकशतविधत्वमेवं सर्वेषां यज्ञानां यजुरादिभिरेकशतविधत्वमूह्यम् । तेषामेवमेकशतविधानां सर्वेषां यज्ञानां पूर्वमुक्तं फलमादिशति स य इति यज्ञेन-यज्ञेनेति वीप्सया सर्वैर्यज्ञैरपि उक्तं फलमाप्नोति ॥१३॥ कल्कुषी मणिबन्धारत्नी । अक्षः अंसाग्रे वर्तमानं ग्रीवायामक्षवत्प्रोतमस्थि । एवमेकस्मिन्हस्ते पञ्चविंशतिः तथान्यस्मिन्हस्ते पादद्वये च । आत्मा मध्यदेहः ॥१४॥ अध्यात्मं प्रकारान्तरेणैकशतविधत्वं निरूपयति ॥१५॥ अधिदैवाधियज्ञाध्यात्मत्रयविषये संवत्सरचित्याग्निपुरुषाणां पञ्चविधत्वमाह ॥१६॥६॥२॥

चयने पक्वेष्टकाः किंचिदधिकैकादशसहस्रसंमिताः उपधेयाः । यद्यपि दर्भस्तम्बपुष्करपर्णरुक्मपुरुषाः स्रुगुलूखलपशुशीर्षकूर्मादयो यजुष्मदिष्टकामध्ये परिगणिताः तथापि ते पक्वेष्टका न भवन्तीति न तेषामत्र परिगणनम् तत्रोक्तसंख्यानां पक्वेष्टकानां मध्ये लोकम्पृणेष्टका अष्टशतोत्तरदशसहस्रसंख्याकाः शिष्टा यजुष्मत्यः । प्रथमा चितिः पञ्चाशदूनद्विसहस्रलोकम्पृणेष्टकायुक्ता एवमुत्तरास्तिस्रो द्वितीयाद्याः एवं चतसृणां चितीनां शतद्वयोनाष्टासहस्राणि पञ्चमी चितिः त्रिसहस्रर्जुसव्यदक्षिणरेखावदिष्टकायुक्ता । ताश्च पञ्चम्यां चितावुपधेयाः त्रिस-

LLL LL

हस्रसंमिताः द्वितीयाध्याये (२. १. ८-११.) सुपर्णचित्याग्नेर्मध्यदक्षिणोत्तरभागत्रये लोमरूपत्वेन स्तुता इति तत्सहस्रत्रयं परित्यज्य अवशिष्टानां सप्तानां सहस्राणां शिरःप्रभृति पादपर्यन्तमुपहितानामेव शत्रुरूपत्वेन (? रशनुरू C1. शरीरू C2. शत्रुरू A.) स्थितानां गायत्र्यादिसप्तच्छन्दोवीर्यत्वेन स्तुतिः तृतीयाध्यायप्रथमब्राह्मणे क्रियते । यद्यप्यष्टौ शतान्यतिरिच्यन्ते तथापि सहस्रत्वेन स्तोतुमयोग्यत्वात्तासां स्तुतिरत्र न क्रियते ॥ यद्वा अष्टमकाण्डे चरमचितौ छन्दस्या उपदधातीति (८. ६. २. १.) सप्तानां छन्दसामुपधानमुक्तं तेषां छन्दसां स्तुतिः क्रियते चित्याग्निरूपस्य प्रजापतेः प्राणो गायत्रीति । प्राणः प्राणसंचारस्थानं नासिकोच्यते शीर्षण्याः प्राणाश्चत्वार उक्ताः द्वाववाञ्चावाह य एवायमिति मनस्तु सर्वेन्द्रियसंगतमेकमिति सप्त प्राणाः पूर्वमपि प्रजापतिः सप्तभिः प्राणैः सप्तपुरुषात्मक एकः पुरुषः सृष्ट इति विवक्षया सप्तावयवा उक्ता इति तात्पर्यम् ॥१॥ एवं छन्दसां प्राणाद्यात्मकत्वमुक्तम् तत्र वियुज्यानुवदति प्राण इति ॥२॥ प्रजननः प्राण आलुम्पेदिति प्रजननशक्तिरहितो भवेत् एषोऽग्निर्न चोयेत नपुंसकस्य कर्मानधिकारात् ॥७॥ अवाङ् प्राण आलुम्पेदिति दुश्चिकित्समूलरोगराजयक्ष्मादिगृहीतः पुरुषः कर्मणि नाधिक्रियते ॥८॥ यतः छन्दांसि परस्परमन्योऽन्यस्मिन्प्रतिष्ठितानि गायत्र्यां तावत्तस्याश्चतुर्विंशत्यक्षराणां सर्वछन्दःस्वनुगमात् तथा जगत्यामन्तिमछन्दसि सकलछन्दोऽक्षरसद्भावात् एवं मध्यमानि छन्दांस्यूह्यानि ॥१॥१॥३॥

एवं चित्याग्नेः चक्षुरादिसप्तावयवानां छन्दोमयत्वमुक्तम् अथ शिरोग्रीवादीनां छन्दोमयत्वं वेदवादिप्रश्नोत्तराभ्यां निरूपयति ॥१॥ यज्ञा यज्ञा वोऽअग्नय इत्यत्रोत्पन्नं यज्ञायज्ञियम् तदेव छन्दः बृहतीत्यर्थः ॥८॥ विविधछन्दस्का ऋक् विछन्दाः ॥१२॥ आत्मविद्या आत्मनः उदीरितछन्दोदेवतासमष्टिरूपविराडात्मकस्य सम्बन्धिनः स्वस्य विद्या । स एतन्मयः अत्रोक्तानि (!) सवित्रादिदेवतास्वरूपः एतमात्मानमेवंविधं छन्दोदेवतारूपावयवयुक्तं शरीरमभिलक्ष्य सम्भवत्युत्पद्यते । अत्राग्नौ लोक्यतायै पुण्यलोकावाप्तये अन्या उक्तव्यतिरिक्ता आशीः प्रार्थना नास्ति ॥१३॥२॥३॥

तृतीयब्राह्मणेऽग्नेः सर्वदेवतासमष्टिरूपप्राणवाय्वात्मकत्वं (? वाद्या° AC.) धीरमहाशालनाम्नोर्महर्ष्योः प्रश्नप्रतिवचनाभ्यां प्रतिपाद्यते ॥ उपोत्ससाद समीपमभ्यागतः तस्मात्सकाशाद्विद्यां ग्रहीतुमुपसत्तिं कृतवान् ॥१॥ वागादिसर्वात्मकमग्निमजानानो महाशालस्तस्माद्धीरात्सकाशादग्निं परिजिज्ञासितुमासनादुपावरूढः भो धीर तं सर्वात्मकमग्निमधीहि अध्यापयेति उपसन्नः ॥५॥ अनुगच्छति नश्यति । वायुमनुलक्ष्य उद्वाति नश्यति वायावधिकं वाति सति अग्निर्विनष्टो भवति । सा-सा देवता भूवा एलयति संचरति चेष्टते ॥८॥३॥३॥

उत्तरब्राह्मणे अग्निवाय्वादित्यपुरुषाणामोषधिवनस्पत्युदकचन्द्रपशूनां बहुविधनामव्यपदेश्यत्वेन स्तुतिः तत्रापि पुरुषस्य अर्करूपतया च स्तुतिरनेकैः प्रश्नप्रतिवचनैः प्रतिपद्यते ॥१॥ महान्ति सर्वेभ्योऽपि महान्ति वस्तूनि कः प्रजापतिः तस्मै हितानि क्यानि । अर्काः अर्चनीयाः ॥२॥ वेत्थार्कमिति श्वेतकेतुपित्रा पृष्टो होता स्वयमर्कस्वरूपमजानानस्तस्मात्पितुः सकाशात्संजिज्ञासुराह अथ वै न इति ॥३॥ अर्ककोश्यौ कोश्याकारे फले (A. पुटके C.) । अर्कनमुद्गाविति अर्ककोशाग्रे विदलितौष्ठभागौ । धानापदेन अर्कबीजानि । अर्काष्ठीलामिति अर्ककोशमध्ये विस्तरेण वर्तमाना तूली (C. °ध्ये जिह्वास्तारणवर्तमानः । A.) ॥५॥४॥३॥ ॥

अत्र यजुस्तद्विधायकब्राह्मणयोर्निर्वचनपुरःसरमधिदैवाध्यात्मभेदेनार्थः (? त्मपत्रेनार्थं C1. त्मभेदेनार्थं C2. त्मप्रत्रवेनार्थ A.) मन्त्रब्राह्मणप्रसङ्गाडुपनिपद् स्तुतिः तत्स्वरूपं तद्विडुषः फलमानन्दावाप्तिः फलं यजुषां चोपांश्वनुष्ठानं चेति पञ्चमब्राह्मणप्रतिपादितार्थसंग्रहः ॥ यजुषः शब्देन वायुं निर्ब्रुवन्नधिदैवमर्थमाह अयं वावेति ॥१॥ यजुर्मन्त्रः ऋक्सामयोः प्रतिष्ठितः मध्यस्थितः । अध्वर्युणा याजुषेण समानैरेव ग्रहैः प्रकृतिसोमयागगतैरैन्द्रवायवादिभिर्विकृतिष्वपि कर्म क्रियते सामगबह्वृचैः स्तुतशस्त्राणि स्तोत्रशस्त्राणि अन्यान्यन्यानि प्रकृतिगतव्यतिरिक्तानि क्रियन्ते यथा महाव्रतयज्ञे बृहद्रथन्तरयोर्वैकल्पिकयोः प्राकृतयोः पृष्ठसाम्नोः स्थाने अन्य सामानि निष्केवल्यस्थाने महदुकथम् । यथा पूर्वाभ्यामश्वाभ्यां स्यवा (!) गवा श्रान्तौ तौ विमुच्य पराभ्यामन्याभ्यां धावयेत्तादृक्तत् अन्यस्यान्यस्य स्तुतशस्त्रस्य करणम् स्यवेति स्यन्द् प्रस्रवणे क्त्वाप्रत्यये उदित्त्वादिडभावपक्षे (? उदिवादि उभावपक्षे Codd.) रूपम् (पा° ७. २. ५६.) छान्दसो नकारलोपः (पा° ६. ४. ३१.) ॥२॥ अथ ब्राह्मणापरनामधेयस्य पुरश्चरणशब्दस्य पूर्ववन्निर्वचनपुरःसरमधिदैवमर्थमाह अग्निरेवेति ॥३॥ प्रतिबुभूषति प्रातिकूल्यमाचरितुमिच्छति ॥९॥ न हि हिरण्यगर्भसूत्रात्मनः परस्ताज्ज्यायो वस्वस्ति तस्यैव सर्वजगदाधारत्वात् ॥१०॥ अपूर्वं तस्मात्पूर्वो न विद्यते कारणरहितम् अपरवत्स्रष्टव्यजगद्रूपापरवत् ॥११॥ यजुर्मन्त्रब्राह्मणप्रसङ्गाडुपनिषदोऽर्थं तत्स्वरूपं वेदितुः फलं च दर्शयति तस्य वाऽइति रसः सारः । अवति तर्पयति भोगयोग्यं करोति अनुव्येति व्याप्नोति । अत उपनिषत्सकलं साङ्गं वेदं व्याप्नोति ॥१२॥ अस्य अन्नात्मकस्य यजुषस्तृप्तिरेव गतिः फलावाप्तिः यथा लोके अन्नेन तृप्तः पुरुषः गतः प्राप्तप्रयोजन-इव मन्यते । अस्य उपनिषदात्मकस्य रसस्य आनन्दो विज्ञानमेवात्मा सच्चिदानन्दैकरसमखण्डं वस्तु स्वरूपम् । एषा उपनिषत् अद्धा अपरोक्षविद्या साक्षाद्यन्नरसत्वात् ॥१३॥ उक्तं देवानामानन्दात्मत्वमुपजीव्य यजुरात्मकवायोरानन्त्वपरिज्ञानफलं पुरावृत्तकथनेन दर्शयति एतद्ध स्मेति एतद्देवानामानन्दात्मत्वं यजूरसरूपाया उपनिषद आनन्दविज्ञानरूपं च विद्वान् । स वायुरपि स्वकीयानन्दलक्षणस्वरूपं वेदितुर्वाक्यमनतिलङ्घयन्निदानीमपि तथैव इतस्ततो वाति वायुवशीकरणं तस्य फलम् ॥१४॥ एवं वायुप्राणरूपत्वेन स्तुतस्य यजुष उपांश्वनुष्ठानं विधत्ते तदेतदिति । निर्वक्तुमनर्हमनिरुक्तम् । निर्ब्रुवन्तमुच्चैः पठन्तम् ॥१५॥ अग्नावुपांशु यजुषा कर्तव्यानि संगृह्णाति उपांशु यजुषेति । शृतं पक्वं निष्ठितं प्रयोगार्हमवदानार्हम् । आविदं प्रसिद्धिं गच्छति अयं महान्पुरुष इति ॥१६॥५॥३॥

उत्तरब्राह्मणे आहवनीयाग्निरूपप्रजापतेः (? ग्निरूपप्रक्षिपतेः C1. ग्नेरूषापक्षेपतः C2.) तयोर्भोक्तृभोग्ययोः अग्निचित्ययोर्द्वन्द्वस्यार्क्यमहाचित्याग्निमन्त्रत्वेन परिकल्प्य (? कल्प Codd.) व्रतोक्थनामभिर्ऋग्यजुःसामवेदत्रयपरिभाषासिद्धैर्व्यवहार्यत्वेन स्तुतिः अथ रुक्मपुरुषयोरिष्टकापुरीषचित्योश्चित्याहवनीययोश्चेन्द्राग्न्यात्मना स्तुतिः पश्चात्प्रजापतिरूपाहवनीयस्य तत्र काङ्क्ष्यमानमहाव्रतीयग्रहरसस्य यद्द्वन्द्वं सम्पद्यते तस्यार्क्यव्रतोक्थनामभिर्व्यपदेश्यत्वम् कलाभिः सप्तदशात्मकस्य चित्याग्निरूपस्य प्रजापतेः सप्तदशात्मकः सोमयागोऽन्नं तयोरधिदैवमादित्यचन्द्रात्मना अध्यात्मं प्राणान्नात्मना च स्तुतिः त्रिष्वपि (? स्तुतिविष्वपि Codd.) अथादौ प्रजापतेर्भोक्तृत्वमाहवनीयरूपस्थानेष्वर्क्यादिनामत्रयप्रतिपाद्यत्वमिति प्रतिपाद्यसंग्रहः ॥

एवमाह प्रजापतिमिति । उख्योऽग्निः संवत्सरं धारयितव्यः पश्चादिष्टकाचयनम् ॥१॥ यथा पूर्वं देवैर्विस्रस्तस्य प्रजापतेरुखायां रेतोरूपेण सेकः तस्मै समुत्पन्नाय प्रजापतये चित्याग्नेरन्नत्वेन संस्कारः तस्य चान्नस्य शरीरेण परिहितत्वादात्मत्वम् तत्सर्वमधुनातनानुष्ठातरि योजयति तथैवेति आत्मानं स्वरूपम् ॥२॥ चित्याग्नेरुपरि उख्याग्निनिधानमन्त्रो वौषडिति श्रूयते तस्याक्षरद्वयस्य यथाक्रममग्निचित्याग्निपरतां दर्शयति तमिति वौगिति पूर्वाक्षरेण एषोऽग्निरुच्यते वक्तेर्वौगिति पदनिष्पत्तिरूत्वा षडित्यक्षरेण षड्चितिकोऽग्निः तथा सति वौषडित्यस्यायमर्थः सम्पद्यते अस्माऽआहवनीयाग्नये षड्चितिकमग्निमन्नं कृत्वा आत्मसंमितमपि दधाति कृतवान्भवति ॥३॥ अग्निचित्याग्निद्वन्द्वस्य ऋग्यजुःसामवेदत्रयपरिभाषासिद्धोक्थार्क्यमहाव्रतनामभिर्व्यपदेश्यत्वं तत्तन्नामावयवनिर्वचनेन दर्शयति । योऽग्निराहवनीयोऽत्र षड्चितिकेऽग्नावाह्रियते निधीयते स एषोऽर्क आदित्यः यस्योपरि निहितः स हि तस्यान्नं कम् कः प्रजापतिः तस्मै हितमन्नं चित्याग्निरूपं क्यं भवतीति कृत्वोक्तम् अत अर्कः क्यमिति पदद्वयं यजुष्टो यजुर्वेदे अर्क्यमिति श्लिष्टोच्चारणेन व्यवहृतमित्यर्थः । सामतः सामवेदे । ऋक्तः ऋग्वेदे । बृहतीसहस्रस्योक्थमिति संज्ञा । तदेतदेकमग्निचित्याग्निद्वन्द्वं सत् त्रेधा वेदत्रये अर्क्यमहाव्रतोक्थनामभिराख्यायते ॥४॥ एतदग्निद्वयेन चेन्द्राग्न्यात्मना (?) स्तोतुमादाविन्द्राग्निसृष्टिमाह ॥५॥ प्रथमेष्टकाचितावुपधेयौ रुक्मपुरुषाविन्द्राग्न्यात्मना स्तौति ॥६॥ इष्टकापुरीषचितिद्वयमिन्द्राग्न्यात्मना स्तौति । ऐष्टकमिष्टकासमूहः ॥७॥ ऐकरूप्यमिष्टकासम्पत्त्या अक्षरसम्पत्त्या चोपपादयति ॥८॥ अक्षरस्यैकत्वं मन्त्रसंवादे दृढयति । इन्द्राग्न्योरवयवशो ब्रह्मक्षत्ररूपत्वात्तदुभयरूपस्याग्नेस्तत्तादात्म्यं तयोर्विश्वदेवात्मकत्वाच्च विड्रूपता इन्द्रः सर्वदेवानां परमः अग्निरवमः तयोराद्यन्तवर्तिनोर्ग्रहणेन सर्वे देवाः संगृहीता इति तयोस्तदात्मकत्वम् विश्वदेवानां विट्त्वमिन्द्रप्रजात्वात् अतस्तदेकमग्न्यात्मकमक्षरं ब्रह्मक्षत्रवैश्यरूपम् ॥९॥ उक्तं वर्णत्रयात्मकत्वमुपजीव्य कर्मण(:) श्रीयशोऽन्नादत्वलक्षणं फलं पुरावृत्तकथनेन दर्शयति । एतदग्न्यात्मकमक्षरं वर्णत्रयात्मकं जानानः । सायकपुत्रः । यदुभयथेति तस्यार्थं श्रुतिः स्वयमाह एषोऽग्निः श्रीरूपः तद्धेतुः यशोऽन्नादरूपः तद्धेतुः ॥१०॥ उक्तं श्रीयशःप्रभृतिकं फलं संवादेन दृढयति ॥११॥ अथ प्रजापतिरूपाहवनीयाग्नेः तत्र हूयमानमहाव्रतीयग्रहरसस्य च यद्द्वन्द्वं तस्य पूर्ववदर्क्यमहाव्रतोक्थनामत्रयेणाभिधेयत्वं वक्तुं ग्रहग्रहणं स्तुतशस्त्रपठनं तस्य रसस्य वषट्कारान्ते होमं च क्रमेण दर्शयति । संवत्सरान्ते संवत्सरसाध्यगवामयनादौ [गवामयनोपान्त्यदिवसे] ॥१२॥ प्रथमाध्याये (१. १. ५.) व्याख्यातम् ॥१३॥ एषोऽग्निराहवनीयः । इदं महाव्रतग्रहरसं मधुरादिभेदेन षड्प्रकारमन्नम् । अस्मै प्रजापतिरूपायाग्नये ॥१४॥ पूर्वमाहवनीयाग्नेरर्कत्वमुक्तम् (क° ४.) अत्र तु विशिष्टस्य चित्याहवनीयस्यार्कत्वमिति विशेषः । तदिदमग्निरसद्वयमेकं सत् ॥१५॥ अधियज्ञं प्रजापतिसौम्याध्वर्योर्द्वन्द्वस्य अधिदैवमादित्यचन्द्रद्वयस्य अध्यात्मं प्राणान्नद्वयस्य चार्क्यादिनामत्रयभाक्त्वं (? °भाक्त Codd.) प्रदर्शयिष्यते ॥ स एष प्रजापतिरूपोऽग्निः संवत्सरः सप्तदशावयवः । आदौ युञ्जानः प्रथमं मन इत्यादिभिर्यजुरष्टमाभिर्ऋग्भिः क्रियमाणानि सावित्राण्यष्टौ तदेकमग्नेरर्धम् षोडशगृहीतस्यार्धेन य इमा विश्वा भुवनानीत्यष्टभिर्ऋग्भिरेकाज्जतिः अवशिष्टेनार्धेन चक्षुषः पिता मनसेत्यष्टभिरपरा अतोऽष्टशो विगृहीतत्वादष्टावेव वैश्वकर्मणानि तदपरमर्धम् तयोः सावित्रवैश्वकर्मणहोमयोर्मध्ये

उखासम्भरणादि यत्कर्म क्रियते स एष सप्तदशोऽग्निः प्रजापतिः ॥१६॥ षोडशकलः पुरुष इति मनुष्यसंकेते देवैः षोडशाक्षरः पुरुष इति व्यवह्रियते तान्येवाक्षराणि शरीरे दर्शयति ॥१७॥ यदा ताः कलाः अन्नमाहर्तुं न ध्रियन्ते न समर्थाः तदा प्राण एताः कलाः भक्षयित्वा देहान्निर्गच्छति तस्माल्लोक क्षुधितस्य पुरुषस्य तृप्रमिव भवति सं[दीप्त]तममिव (?) तृप्कि (!) संदीपे (धा° ३४. १३.) इति धातुः बुभुक्षितशरीरे धातुसंक्षयेण सदा व्यग्रो दृश्यते। यतः प्राणैरद्यते तस्माल्लोके उपतापी ज्वरार्दितः कृशो भवति ॥१८॥ सप्तदश ऋत्विक् न कर्तव्यः सप्तदशसंख्यापूरकस्तु सोमरसपुरोडाशाज्याञ्जत्यात्मकः ॥१९॥ अत्रार्कशब्दो मुख्यः ॥२२॥ अधिदैवाध्यात्मद्वये समुदितमर्थमुपसंहरति स एष एवेति एष संतापक आदित्योऽधिदैवतमयं प्राणोऽध्यात्मम् ॥२३॥६॥३॥ [१॥४॥]

चतुर्थाध्याये प्रजापतिरूपचित्याग्नेः कालमन्त्रात्मकत्वं चयनफलं च मृत्युरूपत्वं सकलमुपधेयानामिष्टकानां संख्या तद्विभागश्च प्रतिपाद्यते ॥ तत्र प्रथमब्राह्मणेऽग्नेरिष्टकानां च संवत्सरतदवयवाहोरात्रमुहूर्तात्मकत्वं मन्त्ररूपत्वं च स्पष्टमाम्नायते । अथ प्रथमं संवत्सररूपप्रजापतेरग्नीषोमात्मकत्वमाह । तच्चन्द्रमसो वचनमुत्तरत्र प्रजापतेश्चन्द्रोक्तौ (क° २७.) उपयुज्यते ॥१॥ व्यौहत् व्यभजत् । परिश्रितामपि तया देवतयाऽङ्गिरस्वदिति मन्त्रेणोपधानादिष्टकाशब्दव्यवहार्यत्वम् ॥४॥ सप्तधाविभागं न कृतवान् ॥८॥ द्वित्रिचतुरादयः चतुर्दश व्यूहाः पूर्वस्त्वेक इति पञ्चदश व्यूहाः ॥१७॥ एकस्याहोरात्रस्य षष्टिर्घटिकाः ते द्वे-द्वे एकैको मुहूर्तः क्षुद्राः अल्पपरिमाणाः ॥१८॥ सूर्य एव प्रथमं सर्वं वस्तु पचति पश्चादयमग्निरमुना सूर्येण पक्वं पचति । पक्वस्य पक्तेति हि भरद्वाजेनाग्निर्व्यवह्रतः । अतोऽग्निसूर्ययोः प्राजापत्यात्मनोरभेदादहोरात्रमासादिभिः जगत्परिपाकनिमित्तत्वात्सूर्यगत्यधीनाः संवत्सरावयवा अहोरात्रसम्बन्धिनो मुहूर्ता एव चित्याग्न्यवयवभूतलोकम्पृणेष्टका इति तात्पर्यार्थः ॥१९॥ पर्यैक्षत् (°क्षत् pr. manu) अन्विष्य व्याप्तुमिति शेषः । अस्ति सर्वदा विद्यते । यच्च मर्त्यं मरणधर्मकं मनुष्यादि तदप्येतत्त्रयीरूपमेव । अतो मर्त्यामृतात्मकं सर्वं जगदत्रान्तर्भूतम् ॥२१॥ एवं त्रय्याः अष्टशताधिकदशसहस्रपङ्क्तिरूपत्वसम्पादनया संवत्सरस्य प्रजापतेर्मुहूर्तसंख्यासाम्येन त्रयीशरीरकत्वमुक्तम् ॥२४॥ पङ्क्तिश्चत्वारिंशदक्षरा पङ्क्तिद्वयमेकाशीतिर्भवति । अत उभयोः संख्यासाम्यान्मुहूर्तानामशीत्यात्मना सम्पत्तिः ॥२५॥ उक्तरीत्या प्रजापतेः संवत्सरात्मत्वं स्पष्टमुक्तमिति दर्शयति । त्रयीविद्यायां छन्दःस्तोमप्राणदेवाः सन्तीति प्रागुक्तम् (क° २१.) तन्मयमात्मानं सिक्तवान् । परोऽन्यः आत्मा दवीयसि दूरतरे मासतिथ्यात्मके वेदत्रयस्य त्रिंशज्जाविभागे चतुर्विंशतेर्दूरतरे ॥२६॥ यदुक्तं प्रजापतेः संवत्सरस्याहोरात्रमुहूर्तात्मकत्वं वेदत्रयरूपत्वं तत्सर्वं चित्याग्नौ विभज्य प्रजापतिकर्तृकोपधानवचनव्याजेन दर्शयति । परिश्रितं शर्कराम् । एकस्याः परिश्रितो यजुष्मत्याश्चोपधानेन रात्रिमहश्च त्रिंशल्लोकम्पृणोपधानेन तद्गतांस्त्रिंशन्मुहूर्तांस्त्रिंशतमशीतीश्चोपहितवान् एवं षष्ठ्युत्तरत्रिशतसंख्याकानां परिश्रितां यजुष्मतीनां चोपधानेन संवत्सरगतानहोरात्रान् लोकम्पृणोपधानेन सर्वान्मुहूर्तान्सकलाशीतीश्च चित्याग्नावुपहितवान् । एवमग्निं चितवतः प्रजापतित्वं निदर्शयति स एतन्मय इति ॥२७॥ रुक्मपुरुषात्मकादेतस्मात्सूर्यादुपर्यध्यचीयत अत एतस्मिन्नेवाधारे सर्वोऽग्निश्चितः ॥२८॥१ [२] ॥६॥

अथ संवत्सररूपप्रजापतेर्मर्त्यत्वकर्तृकत्वरूपत्वं तद्रूपोपासनस्य फलम् अग्निचयनस्यामृतलक्षणं फलं परिश्रिद्यजुष्मतीलोकम्पृणेष्टकानां संख्या द्वितीयब्राह्मणे प्रदर्श्यते ॥१॥ गच्छति अन्तर्भावितण्यर्थः गमयति ॥२॥ शरीरेण व्यावृत्य शरीरं विहाय ॥९॥ धिष्ण्या अष्टौ होतृप्रशास्तृब्राह्मणाच्छंस्यच्छावाकपोतृनेष्टॄणां षट् आग्नीध्रीयमार्जालीयौ द्वौ ॥१३॥ दर्भस्तम्बस्य तूष्णीमुपधानात्कथं यजुष्मदिष्टकानाम्ना व्यपदेशः सत्यम् अस्योपरि समन्त्रहोमकरणादस्य यजुष्मत्त्वमुच्यते ॥१४॥ अष्टादश स्तोमाख्या इष्टकाः । दश स्पृतः सहश्च सहस्यश्चेति द्वे ऋतव्ये मिलित्वा अथ द्वादशेत्युक्तम् । सप्तदश सृष्टयः ॥१७॥ सुपर्णचिदसीति वषट्कारान्तमन्त्रेण निहितोऽग्निराहवनीयः इष्टका ॥१८॥ प्रतिमा प्रतिकृतयः । इन्द्रं विश्वा अवीवृधन्निति मन्त्रेण पुरीषमुपधीयते अतस्तस्यापि यजुष्मत्वाद्यजुष्मतीष्विष्टकासु मध्ये परिगणनम् ॥१९॥ के चन आहवनीयएव सकला अपि लोकम्पृणा उपधेया इत्याहुः । सम्पदं लोकम्पृणानां मुहूर्तरूपाणां सम्पत्तिम् । एते अग्नयः गार्हपत्याधिष्ण्यलक्षणाः । इहाहवनीयेऽग्नौ ॥२१॥ एतानि गार्हपत्यधिष्ण्यलक्षणानि रूपाणि । पृश्न्यश्मेति यजुष्मतीमध्ये परिगणितः तस्याग्नीध्रीयेऽग्नावुपधानम् तं सम्पश्यति यजुष्मतीषु मध्ये सम्भूय जानाति तद्वदितरधिष्ण्यगता अपि लोकम्पृणाः कथं न पश्येत् अन्यत्र स्थितानामपि पृश्न्यश्मवत्सम्पश्यत्यन्तर्भावो न विरुध्यते । येनाग्निना निर्ऋतिं पाप्मानमपहते स एकादशोऽग्निः एकादशसंख्यापूरकः ॥२२॥ यद्येवमन्यचितानामिष्टकानां सम्भूय परिगणनं तर्हि निर्ऋतिदेवत्यानां तिसृणामिष्टकानामप्यत्रैव संदर्शनं कर्तव्यम् तद्दूषयति आहुतिभिरिष्टकाः सम्पद्यन्ते नात्राहुतिरस्तीति इष्टकात्वमेव नास्ति कुतस्तासामिष्टकामध्ये परिगणनम् ॥२३॥ वीर्यं वीर्यरूपाः । अनतिरिक्तं वै पुरुष (!) इति पुरुषस्य वीर्यमनधिकम् ॥२४॥२ [३] ॥४॥

उत्तरेणाध्यायद्वयेन अग्निविषया उपासना वक्ष्यन्ते । तत्र प्रथमब्राह्मणे संवत्सररूपाग्नेः तदवयवानां च सहस्ररूपत्वेनोपासनं तत्फलं च प्रदर्श्यते ॥ सहस्रप्रसङ्गं प्रजापतिवृत्तान्तेन प्रस्तौति । विजिहासन् त्यक्तुमिच्छन् ॥१॥ सर्वोऽत्यपवत अत्यक्षरत् बहु संक्षरितः ॥३॥ साहस्रीः सहस्रसंमिताः । मुहूर्तभाजमिति लोकम्पृणाभिप्रायम् । मैथुनान्तव्यापारेषु सर्वेष्वपि एतदुपासनं कर्तुं युज्यते ॥४॥ व्यर्थः श्रमो न भवति ॥५॥१॥५॥ [४॥४॥]

एवं प्राजापत्यात्मकसमष्टिरूपोपासनामभिधाय व्यष्टिरूपाग्निविषयामुपासनां (षष्टि° Cod.) प्रतिजानीते अथात इति उपनिषदां रहस्यार्थानामुपदेशाः । चित्याग्निम् ॥१॥ संवत्सरे शिरःपक्षपुच्छावयवाग्न्युपासनां दर्शयति ॥२॥ स्वयमातृण्णा नाम सहजच्छिद्रयुक्तपाषाणेष्टकाः ताश्च तिसृषु प्रथममध्यमोत्तमासु चितिषूपधीयन्ते ॥३॥२॥५॥ [५ ॥४॥]

पूर्वमादित्योऽग्निरित्युक्तम् त(त्र) त्रयीमयादित्येऽग्न्युपासनास्मिन्ब्राह्मणे वक्ष्यते ॥ अथ तस्याग्नेस्त्रयीमयत्वं दर्शयति । उपनिषद्रहस्यं स्वरूपम् ॥१॥ तेनाग्निस्त्रेधा विहितः अग्निवायुसूर्यात्मनेत्यर्थः । पुंलिङ्गशब्दाभिधेयाः स्तोमाख्याः । नपुंसकशब्दाभिधेयाः शीर्षाख्याः ॥२॥ वाचः स्त्रीलिङ्गत्वं स्फुटम् ॥३॥ एवमग्नेर्वाग्रूपत्वमुक्तम् वाच आदित्यरूपत्वं चाह । अतः सूर्यादूर्ध्वं चयने मृत्युकर्तृकाक्रमणस्याभावात्पुनर्मृत्युजयः फलं भवति तत्कथं सूर्यादूर्ध्वं चयनमसम्भवं परीहतत्वादित्याशङ्क्य तत्राप्युपायं दशयति विद्ययाह वाऽइति यद्यपि वस्तुस्थित्या आदित्यस्योपरि चयनाभावः तथापि ज्ञानेनोर्ध्वं चयनं सम्पादयितुं शक्यते ॥४॥ तद्विशदय-

ति । सूर्यमण्डले वाव त्रीणि विद्यन्ते ज्योतिर्मयमण्डलमर्चीँषि तदन्तर्वर्ती पुरुष इति चयने ऽपि वेदत्रयमस्ति तत्र मण्डलमेव ऋग्रूपत्वेनोपासनीयमर्चिरेव सामरूपत्वेनान्तर्वर्तिपुरुष एव यजूरूपत्वेन ॥५॥३ [१]॥५॥

सूर्यमण्डलार्चिःपुरुषत्रयस्याधिदैवाधियज्ञाध्यात्मपरत्वेनार्थ उच्यते । तत्राधिदैवमयमर्थः चयनगतबृहदुक्थमहाव्रताग्नित्रयं क्रमेण मण्डलार्चिःपुरुषरूपत्वेनोपासनीयमिति अधियज्ञमयमर्थः चयनगतरुक्मपुष्करपर्णहिरण्मयपुरुषाणां मण्डलादित्रयम् एवं दक्षिणाक्षिगतशुक्लकृष्णवर्णतदन्तर्वर्तिपुरुषाणां मण्डलादित्रयरूपत्वेनोपासनमिति लोचने हि शुक्लरूपं कृष्णरूपं चास्ति तदन्तर्वर्ती पुरुषश्च दृश्यते एतत्प्रसङ्गेन सव्यलोचनगतपुरुषस्य मिथुनत्वसम्पादनम् अथ पुरुषस्य मृत्युत्वमुपजीव्यं मृत्युगतैकत्वबहुत्वात्मिकाद्वरवमीमांसा तस्यैव पुरुषस्य बह्मधोपासनं तत्फलमिति मण्डलब्राह्मणप्रतिपादितार्थसंग्रहः ॥ उक्थमहाव्रतचित्याग्नीनां मण्डलार्चिःपुरुषात्मकत्वेन तस्य मण्डलादित्रयस्य ऋग्यजुःसामरूपत्वम् ॥१॥ उक्तामर्थस्वरूपं पश्यन्तो पर्यालोचयन्तो वाग्वदति त्रय्येव विद्या तपतीति ॥२॥ मण्डलस्थपुरुषस्य मृत्युरूपत्वमर्चिषोऽमृतरूपत्वं चाह ॥३॥ अमृतममृतरूपार्चिरधिकरणं मण्डलम् । अहोरात्रे विवासयति इदमहरेषा रात्रिरिति विभजति पुनः-पुनः करोतीति वा विवस्वानादित्यः मण्डलमित्यर्थः । वस्ते आच्छादयति सर्वतः स्वतेजसा परिवृणोति । अवरमधस्ताद्भावम् ॥४॥ परस्मै शंसितारं होतारं लोके बहु निन्दन्ति ॥५॥ तद्रुक्मपुरुषयोरधस्तादुपहितं पुष्करपर्णम् । आपो ह्येताः अर्चिषो ह्यापः सूर्यकिरणानामेव वृष्टिकर्तृकत्वात्कार्यकारणयोरभेदेन अर्चिर्वाऽआप इत्युक्तम् पुष्करपर्णमपि अद्भ्य उत्पन्नत्वात्तदात्मकम् । एतद्रुक्मादित्रयं मण्डलाद्यात्मना संस्कृत्य भावयित्वा इहाग्नावुपधत्ते तदा यज्ञस्य समाप्तिमनु ऊर्ध्वमुत्क्रामन्यजमानः एतं मण्डलादिरूपेण त्रिविधमादित्यमप्येति। यतोऽस्मिन्नग्निं चितवान्परत्रादित्यो भवति अतश्चितमग्निमिष्टकाविशेषेण नाशयितुमादरं न कुर्यात् कुतः एषोऽग्निरमुत्र भवति परलोके यजमानशरीरात्मनोत्पद्यतऽइति यद्वा परिहर्तुं प्राप्तुं स्प्रष्टुम् चित्याग्निस्पर्शने दोषश्रवणात् ॥६॥ स एष सूर्यमण्डलगतपुरुष एव लोकम्पृणा इष्टका (८. ७. २. १.) तामभिलक्ष्य सर्वोऽग्निः सम्पद्यते लोकम्पृणाभिः सर्वोऽग्निः कृत्स्नः सम्पूर्यतऽइत्यर्थः । तस्य सूर्यपुरुषात्मकदक्षिणाक्षिपुरुषस्य सव्याक्षिगतः पुरुषो मिथुनं योषित् मिथुनं हि आत्मनोऽर्धमर्धभागः अर्धो वाऽएष आत्मनो यत्पत्नीति तैत्तिरीयश्रुतेः ॥८॥ विधृतिं व्यवधायकत्वस्त्रस्थानीयाम् ॥९॥ देवव्रतं देवकल्पितं व्रतम् ॥१०॥ लोके मानुषस्य मैथुनस्यान्तं गत्वा असंविदा (!) अज्ञानेनेवात्र स्त्री भवति ॥११॥ क्षुरेव पीडयेव सहसा ॥१२॥ एवं प्रासङ्गिकं परिसमाप्य मण्डलस्य पुरुषात्मनोपासनीयस्य दक्षिणाक्षिपुरुषस्य मृत्युरूपत्वमाह । अभिहतौ व्याप्तौ कीलितौ । तौ यदा पादावाक्रम्योत्क्रामति पुरुषशरीरात् ॥१३॥ प्राणनिर्गमादनन्तरमेव शरीरपात इत्याशङ्क्य तस्यैवाक्षिपुरुषस्य प्राणात्मकतामाह ॥१४॥ वाचा रसनया प्राणेन नासिकया ॥१५॥ असावमुत्र द्युलोके आदित्यमण्डलवर्ती पुरुषः एकः ॥१६॥ अपश्रितः स्थितः ॥१८॥ यः पुरुषः परमात्मा ध्येयत्वेनोक्तः तस्य प्रशंसार्थं नानारूपैरुपासनं दर्शयति । अध्वर्यवः याजुषाः एतं पुरुषमग्निमिष्टकाचयनेन दिव्यादित्येऽग्निरित्युपासते यजुरिति च । सर्पविदः आहितुण्डिकाः ॥२०॥ रुक्मपुष्करपर्णयोः पुरुषाधारत्वमृक्सामयोश्च यजुरधीनत्वं तस्मादेकेष्टकोऽग्निः ॥२२॥४ [२]॥५॥

उत्तरब्राह्मणे सकलपुरुषवर्तिमनोवाक्प्राणचक्षुःश्रोत्रकर्माग्निवृत्तिसम्पाद्यचित्याग्निविषया उपासना वक्ष्यते ॥ सर्वेषामिन्द्रियाणां मनसः प्रामुख्यात्तत्सम्पाद्यमग्निं प्रस्तोतुं मनसः स्वरूपं तत्सृष्टिं चाह ॥१॥ तन्मन आत्मानं स्वकारणं परमात्मानं स्वस्वरूपं वा अन्वैक्षत । ततः पर्यालोचनं कृत्वा प्रामूर्छत् मूर्छा मोहसमुच्छ्रययोः (! धा° ७. ३२.) समुच्छ्रितं बभूव । [पुरुषस्य शतसंवत्सरमितेऽआयुषि षट्त्रिंशत्सहस्राणि दिनानि भवन्ति तत्रैकैकस्मिन्नाग्नेया मनोवृत्तिः तासु चाग्नित्वमारोप्यते] तन्मनः कर्तृ एतावत्संख्याकानर्कानर्चनीयान् मनोमयान्मनउपादानकान् मनश्चितः मनसा चीयमानान्मनःसम्पाद्यानात्मनोऽग्नीनपश्यत् । एतस्य मनश्चितोऽग्नेः क्रियामयाग्निप्रकरणमुपमृद्य (? मृद्य Cod.) स्वातन्त्र्यं प्रतिपत्तुं मनोव्यापारक्रियावयवमनुबध्नाति त मनसेत्यादिना तेऽग्नयो मनसैवाधीयन्त आधाने मनोव्यापार एव कारणम् एवं चयनग्रहणस्तुतशस्त्रादिकारणं केवलं मनोव्यापारसिद्धम् । तेषामग्नीनां सा कृतिः तत्करणं भवति तानग्नीनेवादधति भूतानीति सर्वत्र सम्बध्यते । एतावती वै मनस इति मनोमयषट्त्रिंशत्सहस्रसंख्याकाग्नय एव मनसो विभूतिः महिमा विसृष्टिर्विविधा विभक्ता सृष्टिः । पुनरप्यस्य मनश्चितोऽग्नेः (ग्नि: Cod.) केवलविद्यामयत्वेन स्वातन्त्र्यं वक्तुं क्रियामयस्याग्नेर्माहात्म्यं (त्म्य Cod.) मनोमयेऽतिदिशति तेषामेकैक एवेति असौ पूर्व इति पदाभ्यामिष्टकाचितोऽग्निर्विवक्ष्यते स यावान् परिश्रिद्यजुष्मतीलोकम्पृणाभेदेनाहोरात्रतन्मुहूर्तध्यानेन च यत्परिमाणः तेषां षट्त्रिंशत्सहस्रसंमितानामग्नीनां मध्ये एकैकोऽग्निरपि तावान् तत्परिमाणो ध्येयः अनेन क्रियामयस्याग्नेर्माहात्म्यस्य ज्ञानं (न Cod.) यत्तन्मनोमयऽएवेति सूत्रितम् (सूचितम् ?) । एवमुत्तरे वाक्चिदादयोऽग्निचित्पर्यन्ताः षट् पर्याया व्याख्येयाः तत्र वागादिसम्पाद्यानग्नीन्दर्शयितुं तत्तत्पर्यायादौ तस्य-तस्योत्पत्तिरुक्ता ॥१॥ श्रोत्रेण सृष्टं कर्म प्राणानभिसममूर्छत् अभिव्याप्नोत् इदं संदेह्यमन्नप्राणाश्रयं शरीरमुद्दिश्य समुच्छ्रितं बभूव स्वयमसंदेह्यमशरीरं सत् कर्मप्राणयोरन्योऽन्यसाहचर्यादभिवृद्धिं व्यतिरेकमुखेनाह अकृत्स्नं वा ऽइति ॥८॥ कर्मसकाशादाविस्तरां स्पष्टः ॥१०॥ एतेषां मनश्चित्प्रमुखाग्नीनां सर्वेषां स्वतन्त्रविद्यामयत्वोपोद्बलकानि श्रुतिलिङ्गवाक्यान्युदाहरति । विद्याचित एव विद्ययैव धीयमानाः एवकारश्रुतिः कर्माङ्गत्वं व्यावर्तयति ॥१२॥५[३]॥५॥

उत्तरब्राह्मणे भूम्यादिलोकत्रयादित्यनक्षत्रछन्दःसंवत्सरात्मा[पः] चित्याग्निरूपत्वेनोपासनीया उच्यन्ते । अत एव लोकादेः परिश्रिद्यजुष्मतीपशुपुरीषसमिदादिसामान्यधर्मवर्णनम् । अत्र केवलविद्याविधित्वे शब्दस्य तात्पर्यं लक्ष्यते न शुद्धकर्माङ्गविधित्वे तथा हि अस्मिन्नेव ब्राह्मणे विद्यया तदारोहन्तीत्यनेन श्लोकेन (क° १६.) केवलकर्मनिन्दापुरःसरं विद्याप्रशंसा ॥ अग्निना सर्वे सम्पन्नाः स्वव्यापारदक्षा भवन्ति यथा चित्याग्निर्लोकम्पृणेष्टकाभिः सम्पूर्णः । य एवं भूलोकं चित्याग्निरूपं वेद स लोकम्पृणाभूतमेनं लोकाधिष्ठातारमग्निमेव सम्पद्यते तदात्मको भवति ॥१॥ अन्तरिक्षं परेण परस्तादन्तऽइत्यर्थः द्यावापृथिवी संयुक्तौ (!) भवतः ॥२॥ कोशः पेटिका समुब्जितः सम्पिहितः ॥३॥ त्रिंशन्नक्षत्रः स आत्मा मध्यदेहः । द्वे नक्षत्रे प्रतिष्ठा पादरूपेण । द्वे नक्षत्रे प्राणाः चक्षुरादिप्राणानां द्वन्द्वशोऽवस्थानात् । द्वे नक्षत्रे शिरोरूपम् षट्त्रिंश्याविति स्त्रीलिङ्गवचनमिष्टकाभिप्रायेण ॥५॥ नक्षत्रोपनक्षत्रसंख्यां बृहत्यात्मना स्तौति । स्वर्गस्त्वादित्य इति गम्यते एकविंशतिसंख्यापूरकः । एकविंशतिस्तोत्रि-

यात्मकः एकविंश उच्यते ॥६॥ एवमधिकानां षट्त्रिंशदक्षराणां विभागमुक्त्वा तावद्भिरक्षरैर्बृहतीसम्पाद्यतां नानाछन्दोमयत्वेन सम्पादयति ॥८॥ अथोपासकेन स्वशरीरमेवाग्निरूपत्वेनोपासनीयमिति विधत्ते ॥१२॥ अथाप्सु अग्नित्वेनोपासनं विधित्सुरपां सर्वदेवभूतात्मकत्वमाह। आदित्यमण्डलं परिसरवर्तिन्यो नाव्या नावा तार्याः। अयं हिरण्मयः पुरुषः अधिदैवं मण्डलान्तर्वर्ती पुरुषोऽधियज्ञं प्रथमचितावुपहितः पुरुषोऽग्निरूपाणामपामात्मा ॥१४॥ तद्विभागमाह तस्याधियज्ञं रुक्मपुष्करपर्णाख्ये अधिदैवमापश्चादित्यमण्डलात्मके (!) द्वे इष्टके प्रतिष्ठे पादरूपेण ध्येये। बाहुरूपेण ध्येये द्वे स्रुचौ। भूम्यन्तरिक्षात्मके द्वे स्वयमातृण्णे इष्टके। अग्निवाय्वादित्यात्मना ध्येयास्तिस्रो विश्वज्योतिषः। द्वादशसंख्या ऋतव्येष्टकाः संवत्सररूपात्मत्वेन ध्येयाः। यज्ञात्मना देवात्मना च स्तुताः पञ्च नाकसदः पञ्च पञ्चचूडाः। एवमेकत्रिंशज्जाताः। एवं षट्त्रिंशदिष्टकामयो हिरण्मयः पुरुष आत्मा सर्वभूतदेवात्मनामपामग्न्यात्मना ध्येयानां मध्ये वर्तत इत्याह सोऽस्यैष सर्वस्येति। सर्वात्मनामपां मध्यवर्ती आत्मा सर्वकामसम्पन्नः स्वयमकामः ॥१५॥ तादृग्रूप आत्मा सर्वैर्ज्ञानेन लभ्यो न कर्मशतैरिति मन्त्रसंवादेन प्रतिपादयति ॥१६॥ अब्रूपाग्नेः पुरीषाङ्गतिसमिष्टलोकम्पृणाः सम्पादयति। सर्वाणि भूतानि सर्वे देवा एषोऽग्निश्चित इत्यस्य पर्यायस्यादौ (क॰ १४) उक्तम् अतो देवा इत्याख्यातं लोकम्पृणेष्टका अतः सर्वं परिश्रिद्यजुष्मत्यादिकं देवा इत्युच्यत इत्यर्थः ॥१७॥ अधिदैवाध्यात्मादिभेदेन यद्यजुरात्मकं ब्रह्म प्रागुक्तमतस्तदात्मकाः सर्वे देवाः भवन्ति ॥१८॥ ६ [४] ॥५॥

उत्तरब्राह्मणे चित्याग्नेः सर्वदिगभिमुखत्वं (तिमुखत्व Cod.) पृथक् शिरसो निरूहणाभावः (पणा॰ Cod.) प्रतिपाद्यते ॥ तत्रैकैकदिगभिमुखत्वे दोषमुद्भावयितुं तान्पक्षान्पुरावृत्तेनानुवदति। कौश्यः कुशगोत्रजः ॥१॥ पक्षिरूपस्य चित्याग्नेरिष्टकोपधानक्रमेण कूर्मपशुशिरोऽपरोक्षमाहवनीयाग्निरिव प्रत्यक्षं शिरः न तु पक्षपुच्छवत्पृथक् शिरसः करणम्। कोषा नामऽर्षयः धावयन्तः आविज्याय गच्छन्तः याजयन्तः अग्निं निरूढशिरसमुपाधावयां चक्रुः यस्य कस्य चन यजमानस्य गृहे शिरः पृथक् चितवन्तः ॥८॥ शिरोरहितः स्यादिति मीमांसाशङ्कां परिहर्तुमिष्टकाभिरव परोक्ष शिरः सम्पादयति। एता इष्टकाः यथावयवरूपाः कल्पनीयाः कूर्मो मूर्धस्थानीयः ॥१०॥७[५]॥५॥

षष्ठाध्यायप्रथमब्राह्मणे वैश्वानरविद्या द्वितीयब्राह्मणे पुरुषस्याग्निविधार्कविधोक्थविधनिरूपणा तृतीये शाण्डिल्यविद्या चतुर्थऽउषा वाऽअश्वस्येत्यस्मिन्नश्वस्योपासनम् एवमर्काग्न्युकथोपासना (? मकाग्न्युक्थो॰ Cod.) विद्यासम्प्रदायप्रवर्तकमुनिवंशकथनमिति प्रतिपाद्यसंग्रहः ॥ न समियाय संगतः शक्तो नाभवत् ॥१॥ सम्प्रति इदानीम्। आवसथान्गृहान् अपचितीः पूजाः। सहस्रदक्षिणाकेषु सोमयज्ञेषु युष्मानृत्विजो वृत्वा तत्रैकैकस्य ऋषेः सहस्रं ददामीत्यर्थः। असंविदानाः संकेतमकुर्वाणाः राज्ञे स्वाशयमनाविष्कुर्वन्त एव ॥२॥ अनूचानाः साङ्गवेदाध्यायिनोऽनुष्ठातारः तादृशानां पुत्राः। त्वा इति समुदाय एकार्थवाची तु वा ऽइति तुशब्दस्योकारं वैशब्दे परतो याजुषा लुम्पन्ति (? नु वा इति नु वा स्योभारं वैश प रतो याक्तुषा लुयंति Cod.) ॥३॥ ओमित्यङ्गीकारः। वा इति निपातद्वयं तुशब्दोकारं वैशब्दे त्वप्रचोतो यजुषा लुम्पति (!)। म्लानौ गमनासमर्थावभविष्यताम्। पादौ ते विदितावित

वैश्वानरस्य पादमात्रं त्वया विदितं न तु कृत्स्नो वैश्वानरः ॥४॥ एष रयिरूपोऽबात्मको वैश्वानरः वैश्वानरस्यावयविन ईश्वरस्य वस्तिर्मूत्राशय एव न समस्तमित्यर्थः ॥५॥ आत्मा मध्यशरीरम् ॥६॥ नाना वर्त्म मार्गो यस्य वायोः आवहोद्वहादिभेदेन वर्तमानस्य सोऽयं पृथग्वर्त्मा । रथश्रेणयो रथपङ्क्तयः ॥७॥ सुततेजा इति सुतमभिषुतसोमरूपं तेजो यस्य । सुतोऽभिषुतः सोमरसोऽद्यमानः एतद्रूपलक्षणं पुरोडाशादि पच्यमानः सर्वदा विनाशरहितस्तिष्ठति ॥८॥ अतीत्य सर्वमतिक्रम्य तिष्ठतीत्यतिष्ठाः । समानान्ज्ञातीन् ॥९॥ यदेवं यथोक्तावयवैः पृथिवीपादादिभिः द्युमूर्धान्तैरवयवैः विशिष्टमेकं वस्तु तत्प्रादेशमात्रं प्रादेशप्रमाणमिव देवाः सुविदिताः सम्यक् ज्ञातवन्तोऽभिसम्पन्नाः प्राप्तफला बभूवुः । एनान्वैश्वानरावयवान् ॥१०॥ अस्य वैश्वानराग्नेः व्यत्ययेन कर्मणि षष्ठी ब्रुवाणमुपदेष्टारम् ॥१२॥१॥६॥

द्वितीये पुरुषस्यैवाग्निविधत्वमर्कविधत्वमुकथविधत्वमुच्यते ॥ समागच्छति युक्तमेकीभूतं भवति ॥१॥ कं सुखहेतवः ॥५॥ वायुनादित्योऽवष्टम्भमात्रेण तद्दीपनम् ॥११॥२॥६॥

तृतीये शाण्डिल्यविद्योच्यते ॥ सत्यं ब्रह्मेति वक्ष्यमाणैर्मनोमयत्वादिभिर्गुणैरुपेतमात्मानमुपासीत । क्रतुर्निश्चयोऽध्यवसायः ॥१॥३॥६॥

उषा वाऽइत्यादिकमश्वावयवेषु विराडवयवोपासनापरं ब्राह्मणम् नैवेह किं चनाग्रऽआसीदित्यादिकमुपास्यहिरण्यगर्भस्वरूपप्रतिपादनपरं ब्राह्मणं चेत्येतद्द्वयं काण्वशाखानुसारेण बृहदारण्यकोपनिषदादौ प्रपञ्चेन वार्त्तिककारेणोपबृंहितं व्याख्यातमिति नेह पुनरुच्यते पाठसाम्यात् ॥ उत्तरत्र बृहदारण्यके वंशब्राह्मणसमाम्नास्यमानानां विद्यासम्प्रदायप्रवर्तकानामृषीणां मध्येऽग्निरहस्यविद्याप्रवर्तकमृषिप्रवाहमनुक्रामति अथ वंश इति ॥१॥५॥६॥

इति सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे माध्यन्दिनीयशतपथब्राह्मणभाष्ये दशमकाण्डव्याख्या समाप्ता ॥१०॥ ॥

VARIOUS READINGS.

Adhyâya १. २. १ बृहदुक्थं Sây. (and thus often alternately with महदुक्थ). — २ अधिदैवतं Sây. (thus also २, ६, १. १६. - ३, ३, ७. - ४, १, २३.). — ४. २ Read. तदमृतममृतꣳ. - ४ द्वि स्नाव A. - १० साप्तरथवाहणि° A. B1. B2. see पाणि° ८. ४. ८. - १४ पुनर्मृत्युमपजयतीत्य° A. —

Adhy. २. १. १ विसृजन्ति Sây. - ६ निर्नाम° Sây. - ८ अथ रूपमुपमं करोति A.— २. २ लोकꣳ सचंते ये A. pr. m. B1. pr. m. - ६ तत्रोप यन्प्रप° A. यत्प्रप°

B1. पत्प्रप॰ B2. — ४. ८ पञ्चाशदिष्टकाः पञ्चाश॰ A. - ibid. इति नु विधानामथातश्चयनस्यैव ॥ ८॥ निरवसामन्ब्राह्मणं ॥ ६ ॥ B1. B2. Thus also in A., at the margin. the end of this brahma*n*a and the beginning of the next are joined together: इति नु विधानामथातश्चयनस्यैव. — ६. ७ ॰विधं विधत्ते A. - ibid. चैतद्विदुर्ये च न लोक्या A. - ९ य एवैकशतविधं विधत्ते A. - ibid. संवत्सरभृतमिव Say. - १२ यजुरेकशतविधो A. - १३ Read: यज्ञेन-यज्ञेन. —

Adhy. ३. ३. १ ॰साद स होवाच Say. — ५. २ स्यत्वा A. B1. B2. According to Sâya*n*a's explanation read स्यत्वा. - ibid. पराभ्यां Say. - ३ ॰यजुः पुरश्चरणा॰ Say. - ६ स्वेषु प्रतिबुभूषति Say. - १६ यजुषैवैनमाचक्षते Say. - Sâya*n*a closes this adhyâya with the next brâhma*n*a. —

Adhy. ४. १. १६ प्रजापतिर्यो वै A. - १८ आह्नुतं न ध्रियन्ते Say. - १९ एतत्सप्तदशमन्न्ँ सम - here B1. ends. — २. १३ अष्टाचत्वारिंशदिष्ट॰ A. - १४ पञ्चचत्वारिंशदिष्ट॰ A. - १५ ॰कान्नविंशतिधा A. B2. - १८? ॰न्मुङ्क्त्रायन्ते A. मुङ्क्त्त्रायन्ते B.2. मुङ्क्त्त्रायन्ते Say. - २१ ॰मेतद्धाऽअस्त्येतद्यमृतं यद्यमृतं तद्यस्त्येतद्ध A. - २८ एवैनं तंनिरमि॰ A. — ३. ६? रूपाण्युपधत्ताति A. B.2. Say. - १० ते सम्भवन्त एवामृ॰ A. - १४ लोकेष्टकाः Say. - १५ एकचत्वारिंशद्द्वितीया A. - १६ एकसप्ततिस्तृतीया A. - १७ सप्तचत्वारिंशच्चतुर्थी A. - २४ पुरुषे Say. (? पुरुष इति). - ibid. Sâya*n*a closes here the fourth adhyâya. — ४. २ सकृत्संवत्सरस्य A. - ३ सकृत्संवत्सरमवरुंधीत A. —

Adhy. ५. २. १३ अभिहृतौ Say. - २१ त्रीष्टकः ॥ A. - २२ यजुरपीत A. — ३. ८ ? ॰दिमं संदेह्यमसंदेह्यमकृत्स्नं Say. — ४. १६ तपसानेवंविद॰ A. — ५. १ कौश्यो Say. - ३ ॰त्युहमकार्षीः A. —

Adhy. ६. १. ४-६ अविदित° Sây. against the accent. - ८ चक्षु॒स्त्वा° and चक्षु॒स्ते A. — ३. २ स॒त्यधृतिं A. - ibid. विचिकित्सा॒स्ती॒ति A. — ५. ५ इ॒म॒मभि॒-मंस्ये A. - ६ समान॒मा A. M. - ibid. ब्र॒ह्म॒णो॒ नमः A. M. The accentuation of the proper names too shows some irregularities: we read here कु॑श्रि instead of कुश्रि॒ (१०. ५. ५. १.), का॒वषेय instead of कावषेय॒ (९. ५. २. १५.), रा-ज॒स्तम्बा॒यन instead of राजस्तम्बायन॒ (१०. ४. २. १.), वामकक्षायण instead of वा॒मकक्षायण (७. १. २. ११. १०. ४. १. ११.).

ओम् । संवत्सरो वै यज्ञः प्रजापतिः । तस्यैतद्द्वारं यदमावास्या चन्द्रमा एव द्वारपिधानः ॥१॥ स योऽमावास्यायामग्नीऽआधत्ते । यथा विवृतायां द्वारि द्वारा पुरं प्रपद्येत स तत एव स्वर्गं लोकमियादेवं तद्योऽमावास्यायामाधत्ते ॥२॥ अथ यो नक्षत्रऽआधत्ते । यथापिहितायां द्वार्यद्वारा पुरं प्रपित्सेत्स जिह्मः पुरः स्यादेवं तद्यो नक्षत्रऽआधत्ते तस्मान्न नक्षत्रऽआदधीत ॥३॥ यदहरेवैषः । न पुरस्तान्न पश्चाद्ददृश्येत तदहरुपवसेत्तर्हि ह्येष इमं लोकमागच्छति तस्मिन्निह वसति ॥४॥ सर्वे देवा वसन्ति । सर्वाणि भूतानि सर्वा देवताः सर्वऽऋतवः सर्वे स्तोमाः सर्वाणि पृष्ठानि सर्वाणि छन्दाꣳसि ॥५॥ सर्वेषु ह वाऽअस्य देवेषु । सर्वेषु भूतेषु सर्वासु देवतासु सर्वेष्वृतुषु सर्वेषु स्तोमेषु सर्वेषु पृष्ठेषु सर्वेषु छन्दःस्वग्नीऽआहितौ भवतो योऽमावास्यायामाधत्ते तस्मादमावास्यायामेवाग्नीऽआदधीत ॥६॥ योऽसौ वैशाखस्यामावास्या तस्यामादधीत सा रोहिण्या सम्पद्यतऽआत्मा वै प्रजा पशवो रोहिण्यात्मन्येवैतत्प्रजायां पशुषु प्रतितिष्ठत्यमावास्या वाऽअग्न्याधेयरूपं तस्मादमावास्यायामेवाग्नीऽआदधीत पौर्णमास्यामन्वारभेतामावास्यायां दीक्षेत ॥७॥ ब्राह्मणम् ॥१॥ ॥

घ्नन्ति वाऽएतद्यज्ञम् । यदेनं तन्वते यन्न्वेव राजानमभिषुण्वन्ति तत्तं घ्नन्ति यत्पशुꣳ संज्ञपयन्ति विशासति तत्तं घ्नन्त्युलूखलमुसलाभ्यां दृषदुपलाभ्याꣳ हविर्यज्ञं घ्नन्ति ॥१॥ तꣳ हत्वा यज्ञम् । अग्नावेव योनौ रेतो भूतꣳ सिञ्चत्यग्निर्वै योनिर्यज्ञस्य स ततः प्रजायते तद्दश ता आहुतीः सम्पादयेद्याभ्यो वषट्क्रियते ॥२॥ अयं वै यज्ञो योऽयं पवते । सोऽयमेक-इवैव पवते सोऽयं पुरुषेऽन्तः प्रविष्टो

दशधाविहितः स एवं क्लृप्तैः प्राणैरग्नेर्योनेरधिजायते सैषा दशाक्षरा विराट् सैषा सम्पत्स यज्ञः ॥३॥ अथोऽअपि नव स्युः । तन्न्यूनां विराजं करोति प्रजननाय न्यूनाद्वाऽइमाः प्रजाः प्रजायन्ते सैषा सम्पत्स यज्ञः ॥४॥ अथोऽअप्येकातिरिक्ता स्यात् । सा प्रजापतिमभ्यतिरिच्यते सैषा सम्पत्स यज्ञः ॥५॥ अथोऽअपि द्वेऽअतिरिक्ते स्याताम् । द्वन्द्वं वै मिथुनं प्रजननं मिथुनमेवैतत्प्रजननं क्रियते सैषा सम्पत्स यज्ञः ॥६॥ अथोऽअपि तिस्रोऽतिरिक्ताः स्युः । द्वन्द्वमह मिथुनं प्रजननमथ यज्जायते तत्तृतीयꣳ सैषा सम्पत्स यज्ञः ॥७॥ अथोऽअपि चतस्रोऽतिरिक्ताः स्युः । तद्यथैवैवं चतस्रस्त्रयो वाऽइमे लोकास्तदिमानेव लोकांस्तिसृभिराप्नोति प्रजापतिर्वाऽअतीमांल्लोकांश्चतुर्थस्तत्प्रजापतिमेव चतुर्थ्याप्नोति सैषा सम्पत्स यज्ञः ॥८॥ स यद्द्वाभ्यामूनं तदूनꣳ । सोऽयज्ञो यत्पञ्चभिरतिरिक्तं तदतिरिक्तꣳ सोऽयज्ञः सैषैव दशत्यधि सम्पदेषा विꣳशत्यमिषा सहस्रात् ॥९॥ आर्तिं वाऽएते धावन्ति । ये दर्शपूर्णमासाभ्यां यजन्ते स वै पञ्चदश वर्षाणि यजेत तेषां पञ्चदशानां वर्षाणां त्रीणि च शतानि षष्टिश्च पौर्णमास्यश्चामावास्याश्च त्रीणि च वै शतानि षष्टिश्च संवत्सरस्य रात्रयस्तद्रात्रीराप्नोति ॥१०॥ अथापराणि पञ्चदशैव वर्षाणि यजेत । तेषां पञ्चदशानां वर्षाणां त्रीणि चैव शतानि षष्टिश्च पौर्णमास्यश्चामावास्याश्च त्रीणि च वै शतानि षष्टिश्च संवत्सरस्याहानि तदहान्याप्नोति तद्वैव संवत्सरमाप्नोति ॥११॥ मर्त्या ह वाऽअग्रे देवा आसुः । स यदैव ते संवत्सरमापुरथामृता आसुः सर्वं वै संवत्सरः सर्वं वाऽअक्षय्यमेतेनो हास्याक्षय्यꣳ सुकृतं भवत्यक्षय्यो लोकः ॥१२॥ स आर्तिसृतामिकः । य एवं विद्वांस्त्रिꣳशतं वर्षाणि यजते तस्मादु त्रिꣳशतमेव वर्षाणि यजेत यद्यु दाक्षायणयज्ञी स्यादथोऽअपि पञ्चदशैव वर्षाणि यजेतात्र ह्येव सा सम्पत्सम्पद्यते द्वे हि पौर्णमास्यौ यजते द्वेऽअमावास्येऽअत्रोऽएव खलु सा सम्पद्भवति ॥१३॥ ब्राह्मणम् ॥२॥

पौर्णमासेनेष्ट्वा । इन्द्राय विमृधेऽनुनिर्वपति तेन यथेष्ट्यैवं यजतऽआमावास्ये-
नेष्ट्वादित्यै चरुमनुनिर्वपति तेन यथेष्ट्यैवं यजते ॥ १ ॥ स यत्पौर्णमासेनेष्ट्वा । इ-
न्द्राय विमृधेऽनुनिर्वपतीन्द्रो वै यज्ञस्य देवतायदग्नीषोमीयं पौर्णमासꣳ हविर्भ-
वति तत्र नेन्द्राय वेति किं चन क्रियतऽएतेनो हास्यैतत्सेन्द्रꣳ हविर्भवत्येतेन
सेन्द्रो यज्ञोऽथ यद्विमृधे वेति सर्वा उ हि मृधो नाष्ट्राः पौर्णमासेन हन्ति ॥ २ ॥
अथ यदामावास्येनेष्ट्वा । अदित्यै चरुमनुनिर्वपत्येष वै सोमो राजा देवानामन्नं
यच्चन्द्रमाः स यत्रैष एताꣳ रात्रिं न पुरस्तान्न पश्चाद्ददृशे तेनैतदनद्धेव हविर्भव-
ति तेनाप्रतिष्ठितमियं वै पृथिव्यदितिः सेयमद्धा सेयं प्रतिष्ठितैतेनो हास्यैतदद्धेव
हविर्भवत्येतेन प्रतिष्ठितमेतन्नु तद्यस्मादनुनिर्वपत्यथ यस्मान्नानुनिर्वपेत् ॥ ३ ॥
स यत्पौर्णमासेनेष्ट्वा । इन्द्राय विमृधेऽनुनिर्वपति सेन्द्रो मे यज्ञोऽसदिति सर्वो
वै यज्ञ इन्द्रस्यैव स यत्सर्वो यज्ञ इन्द्रस्यैवैतेनो हास्यैतत्सेन्द्रꣳ हविर्भवत्येतेन
सेन्द्रो यज्ञः ॥ ४ ॥ अथ यदामावास्येनेष्ट्वा । अदित्यै चरुमनुनिर्वपत्यामावास्यं वा
ऽअनुनिर्वाप्यं पौर्णमासेन वाऽइन्द्रो वृत्रमहंस्तस्माऽएतद्वृत्रं जघ्नुषे देवा एतद्ध-
विरनुनिरवपन्यदामावास्यं किमनुनिर्वाप्येऽनुनिर्वपेदिति तस्मान्नानुनिर्वपेत् ॥ ५ ॥
स यत्पौर्णमासेनेष्ट्वा । अथान्यद्धविरनुनिर्वपत्यामावास्येनेष्ट्वाथान्यद्धविरनुनिर्वप-
ति द्विषन्तꣳ ह स भ्रातृव्यं प्रत्युच्छ्रयतेऽथ यः पौर्णमासेनैव पौर्णमासीं यजतऽआ-
मावास्येनामावास्यामसपत्ना हैवास्यानुपबाधा श्रीर्भवति ॥ ६ ॥ पौर्णमासेन वै दे-
वाः । पौर्णमासीं यजमाना आमावास्येनामावास्यां क्षिप्रऽएव पाप्मानमपाघ्नत
क्षिप्रे प्राजायन्त स यो हैवं विद्वान्पौर्णमासेनैव पौर्णमासीं यजतऽआमावास्येना-
मावास्यां क्षिप्रऽएव पाप्मानमपहते क्षिप्रे प्रजायते स यद्यनुनिर्वपेद्दद्याद्दक्षिणां
नादक्षिणꣳ हविः स्यादिति ह्याहुर्दर्शपूर्णमासयोर्ह्येवैषा दक्षिणा यदन्वाहार्य
इति न्वनुनिर्वाप्यस्याथाभ्युदितस्य ॥ ७ ॥ ब्राह्मणम् ॥ ३ ॥

तद्धैके दृष्ट्वोपवसन्ति । श्वो नोदेतेत्यभ्रस्य वा हेतोरनिर्ज्ञाय वाथोतोपवसन्त्यथैनमुताभ्युदेति स यद्यगृहीतं हविरभ्युदियात्प्रज्ञातमेव तद्धैषैव व्रतचर्या यत्पूर्वेद्युर्दुग्धं दधि हविरातञ्चनं तत्कुर्वन्ति प्रतिप्रमुञ्चन्ति वत्सांस्तान्पुनरपाकुर्वन्ति ॥१॥ तानपराह्णे पर्णशाखयापाकरोति । तद्यथैवादः प्रज्ञातमामावास्यं हविरेवमेव तद्यद्यु व्रतचर्यां वा नोदाशंसेत गृहीतं वा हविरभ्युदियादितरथो तर्हि कुर्यादितानेव तण्डुलान्त्सुफलीकृतान्कृत्वा स येऽणीयांसस्तानग्नये दात्रेऽष्टाकपालं पुरोडाशं श्रपयति ॥२॥ अथ यत्पूर्वेद्युः । -दुग्धं दधि तदिन्द्राय प्रदात्रेऽथ तदानींदुग्धे विष्णवे शिपिविष्टायैतांस्तण्डुलाञ्छृते चरुं श्रपयति चरुरु ह्येव स यत्र क्व च तण्डुलानावपन्ति ॥३॥ तद्यदेवं भवति । एष वै सोमो राजा देवानामन्नं यच्चन्द्रमास्तमेतदुपैत्सीत्तमपारात्सीत्तमस्माऽअग्निर्दाता ददातीन्द्रः प्रदाता प्रयच्छति तमस्माऽइन्द्राग्नी यज्ञं दत्तस्तेनेन्द्राग्निभ्यां दत्तेन यज्ञेन यजतेऽथ यद्विष्णवे शिपिविष्टायेति यज्ञो वै विष्णुरथ यच्छिपिविष्टायेति यमुपैत्सीत्तमपारात्सीत्तच्छिपितमिव यज्ञस्य भवति तस्माच्छिपिविष्टायेति तत्रो यच्छक्नुयात्तद्ध्यानादक्षिणं हविः स्यादिति ह्याहुरथ यदेव नोदियादथोपवसेत् ॥४॥ ब्राह्मणम् ॥४॥ ॥

अद्यामावास्येति मन्यमान उपवसति । अथैष पश्चाद्ददृशे स हैष दिव्यः श्वा स यजमानस्य पशूनभ्यवेक्षते तदपशव्यं स्यादप्रायश्चित्तिकृत एतस्माद्ध हैतद्भीषावचन्द्रमसादिति ॥१॥ छायामुपसर्पन्ति । एतेनो हैतदुपतपदाचक्षते श्वलुचितमित्येतमु हैवैतदाचक्षते ॥२॥ शशश्चान्द्रमस इति । चन्द्रमा वै सोमो देवानामन्नं तं पौर्णमास्यामभिषुण्वन्ति सोऽपरपक्षेऽप ओषधीः प्रविशति पशवो वाऽअप ओषधीरदन्ति तदेनमेतां रात्रिं पशुभ्यः संनयति ॥३॥ सोऽद्यामावास्येति मन्यमान उपवसति । अथैष पश्चाद्ददृशे तद्यजमानो यज्ञपथादेति तदाहुः कथं कुर्यादित्वा यज्ञपथाद्यजेता३ न यजेता३ इति यजेत हैव न ह्यन्यदपक्रमणं भवति श्वः-श्व

एवैष ज्यायानुदेति स आमावास्यविधेनैवेष्ट्वाथैष्टिमनुनिर्वपति तदहर्वैव श्वो वा ॥४॥ तस्य त्रीणि हवीꣳषि भवन्ति । अग्नये पथिकृतेऽष्टाकपालं पुरोडाशमिन्द्राय वृत्रघ्न एकादशकपालमग्नये वैश्वानराय द्वादशकपालं पुरोडाशꣳ ॥५॥ स यदग्नये पथिकृते निर्वपति । अग्निर्वै पथः कर्ता स यस्माद्वादो यजमानो यज्ञपथादेति तमेनमग्निः पन्थानमापादयति ॥६॥ अथ यदिन्द्राय वृत्रघ्ने । पाप्मा वै वृत्रो यो भूतेर्वारयित्वा तिष्ठति कल्याणात्कर्मणः साधोस्तमेतदिन्द्रेणैव वृत्रघ्ना पाप्मानं वृत्रꣳ हन्ति तस्मादिन्द्राय वृत्रघ्ने ॥७॥ अथ यदग्नये वैश्वानराय । द्वादशकपालं पुरोडाशं निर्वपति यत्र वाऽइन्द्रो वृत्रमहंस्तमग्निना वैश्वानरेण समदहत्तदस्य सर्वं पाप्मानꣳ समदहत्तथोऽएवैष एतदिन्द्रेणैव वृत्रघ्ना पाप्मानं वृत्रꣳ हत्वा तमग्निना वैश्वानरेण संदहति तदस्य सर्वं पाप्मानꣳ संदहति स यो हैवं विद्वानेतयेष्ट्या यजते न हास्याल्पश्चन पाप्मा परिशिष्यते ॥८॥ तस्यै सप्तदश सामिधेन्यो भवन्ति । उपाꣳशु देवता यजति याः कामयते ता याज्यानुवाक्याः करोत्येवमाज्यभागाविवꣳ संयाज्ये ॥९॥ तिसृधन्वं दक्षिणां ददाति । धन्वना वै श्वानं बाधन्ते तदेतमेवैतद्बाधते यत्तिसृधन्वं दक्षिणां ददाति ॥१०॥ दण्डं दक्षिणां ददाति । दण्डेन वै श्वानं बाधन्ते तदेतमेवैतद्बाधते यद्दण्डं दक्षिणां ददात्येषा न्वादिष्टा दक्षिणा दद्यात्त्वेवास्यामप्यन्यद्याऽइतरा दक्षिणास्तासां यत्सम्पद्येत सा हैषा पशव्येष्टिस्तयाप्यनभ्युदृष्टो यजेतैव ॥११॥ ब्राह्मणम् ॥५॥ ॥

आपो ह वाऽइदमग्रे सलिलमेवास । ता अकामयन्त कथं नु प्रजायेमहीति ता अश्राम्यंस्तास्तपोऽतप्यन्त तासु तपस्तप्यमानासु हिरण्मयमाण्डꣳ सम्बभूवाजातो ह तर्हि संवत्सर आस तदिदꣳ हिरण्मयमाण्डं यावत्संवत्सरस्य वेला तावत्पर्यप्लवत ॥१॥ ततः संवत्सरे पुरुषः समभवत् । स प्रजापतिस्तस्माडु संवत्सरऽएव स्त्री वा गौर्वा वडबा वा विजायते संवत्सरे हि प्रजापतिरजायत स इदꣳ

हिरण्मयमाण्डं व्यरुजन्नाह तर्हि का चन प्रतिष्ठास तदेनमिदमेव हिरण्मयमाण्डं यावत्संवत्सरस्य वेलासीत्तावद्बिभ्रत्पर्यप्लवत ॥२॥ स संवत्सरे व्याजिहीर्षत् । स भूरिति व्याहरत्सेयं पृथिव्यभवद्भुव इति तदिदमन्तरिक्षमभवत्स्वरिति सासौ द्यौरभवत्तस्मादु संवत्सरऽएव कुमारो व्याजिहीर्षति संवत्सरे हि प्रजापतिर्व्याहरत् ॥३॥ स वाऽएकाक्षरद्व्यक्षराण्येव । प्रथमं वदन्प्रजापतिरवदत्तस्मादेकाक्षरद्व्यक्षराण्येव प्रथमं वदन्कुमारो वदति ॥४॥ तानि वाऽएतानि । पञ्चाक्षराणि तान्पञ्चऽर्तूनकुरुत तऽइमे पञ्चऽर्तवः स एवमिमांल्लोकाञ्जातान्त्संवत्सरे प्रजापतिरभ्युदतिष्ठत्तस्मादु संवत्सरऽएव कुमार उत्तिष्ठासति संवत्सरे हि प्रजापतिरुदतिष्ठत् ॥५॥ स सहस्रायुर्जज्ञे । स यथा नद्यै पारं परापश्येदेवꣳ स्वस्यायुषः पारं पराचख्यौ ॥६॥ सोऽर्चञ्छ्राम्यंश्चचार प्रजाकामः । स आत्मन्येव प्रजातिमधत्त स आस्येनैव देवानसृजत ते देवा दिवमभिपद्यासृज्यन्त तद्देवानां देवत्वं यद्दिवमभिपद्यासृज्यन्त तस्मै ससृजानाय दिवेवास तद्वेव देवानां देवत्वं यदस्मै ससृजानाय दिवेवास ॥७॥ अथ योऽयमवाङ् प्राणः । तेनासुरानसृजत तऽइमामेव पृथिवीमभिपद्यासृज्यन्त तस्मै ससृजानाय तम-इवास ॥८॥ सोऽवेत् । पाप्मानं वाऽअसृक्षि यस्मै मे ससृजानाय तम-इवाभूदिति तांस्तत एव पाप्मनाविध्यत्ते तत एव पराभवंस्तस्मादाहुर्नैतदस्ति यद्दैवासुरं यदिदमन्वाख्याने त्वदुद्यतऽइतिहासे त्वत्ततो ह्येव तान्प्रजापतिः पाप्मनाविध्यत्ते तत एव पराभवन्निति ॥९॥ तस्मादेतदृषिणाभ्यनूक्तम् । न त्वं युयुत्से कतमच्चनाहर्न तेऽमित्रो मघवन्कश्चनास्ति मायेत्सा ते यानि युद्धान्याहुर्नाद्य शत्रुं न नु पुरा युयुत्सऽइति ॥१०॥ स यदस्मै देवान्त्ससृजानाय । दिवेवास तदहरकुरुताथ यदस्माऽअसुरान्त्ससृजानाय तम-इवास ताꣳ रात्रिमकुरुत तेऽअहोरात्रे ॥११॥ स ऐक्षत प्रजापतिः । सर्वं वाऽअत्सारिषं य इमा देवता असृक्षीति स सर्वत्सरोऽभवत्सर्वत्सरो ह वै ना-

मेतद्यत्संवत्सर इति स यो हैवमेतत्संवत्सरस्य सर्वत्सरत्वं वेद यो हैनं पाप्मा मायया त्सरति न हैनꣳ सोऽभिभवत्यथ यमभिचरत्यभि हैवैनं भवति य एवमेतत्संवत्सरस्य सर्वत्सरत्वं वेद ॥१२॥ स ऐक्षत प्रजापतिः । इमं वा आत्मनः प्रतिमामसृक्षि यत्संवत्सरमिति तस्मादाहुः प्रजापतिः संवत्सर इत्यात्मनो ह्येतं प्रतिमामसृजत यद्वेव चतुरक्षरः संवत्सरश्चतुरक्षरः प्रजापतिस्तेनो हैवास्यैष प्रतिमा ॥१३॥ ता वा एताः । प्रजापतेरधि देवता असृज्यन्ताग्निरिन्द्रः सोमः परमेष्ठी प्राजापत्यः ॥१४॥ ताः सहस्रायुषो जज्ञिरे । ता यथा नद्यै पारं परापश्येदेवꣳ स्वस्यायुषः पारं पराचख्युः ॥१५॥ ता अर्चन्त्यः श्राम्यन्त्यश्चेरुः । तत एतं परमेष्ठी प्राजापत्यो यज्ञमपश्यद्यद्दर्शपूर्णमासौ ताभ्यामयजत ताभ्यामिष्ट्वाकामयताहमेवेदꣳ सर्वꣳ स्यामिति स आपोऽभवदापो वा इदꣳ सर्वं ता यत्परमे स्थाने तिष्ठन्ति यो हीहाभिखनेदप एवाभिविन्देत्परमाद्धा एतत्स्थानाद्वर्षति यद्दिवस्तस्मात्परमेष्ठी नाम ॥१६॥ स परमेष्ठी प्रजापतिं पितरमब्रवीत् । कामप्रं वा अहं यज्ञमदर्शं तेन त्वा याजयानीति तथेति तमयाजयत्स इष्ट्वाकामयताहमेवेदꣳ सर्वꣳ स्यामिति स प्राणोऽभवत्प्राणो वा इदꣳ सर्वमयं वै प्राणो योऽयं पवते स प्रजापतिस्तस्य दृष्टिर्यदेव वेदेत्याह्वातीति यद्धि किं च प्राणि स प्रजापतिः स यो हैवमेतां प्रजापतेर्दृष्टिं वेदाविरिव हैव भवति ॥१७॥ स प्रजापतिरिन्द्रं पुत्रमब्रवीत् । अनेन त्वा कामप्रेण यज्ञेन याजयानि येन मामिदं परमेष्ठ्ययीयजदिति तथेति तमयाजयत्स इष्ट्वाकामयताहमेवेदꣳ सर्वꣳ स्यामिति स वागभवद्वाग्वा इदꣳ सर्वं तस्मादाहुरिन्द्रो वागिति ॥१८॥ स इन्द्रोऽग्नीषोमौ भ्रातरावब्रवीत् । अनेन वां कामप्रेण यज्ञेन याजयानि येन मामिदं पिता प्रजापतिरयीयजदिति तथेति तावयाजयत्ताविष्ट्वाकामयेतामावमेवेदꣳ सर्वꣳ स्यावेति तयोरन्नाद एवान्यतरोऽभवदन्नमन्यतरोऽन्नाद एवाग्निरभवदन्नꣳ सोमोऽन्नादश्च वा इदꣳ सर्वमन्नं च ॥१९॥

ता वाऽएताः । पञ्च देवता एतेन कामप्रेण यज्ञेनायजन्त ता यत्कामा अयजन्त स आभ्यः कामः समार्ध्यत यत्कामो ह वाऽएतेन यज्ञेन यजते सोऽस्मै कामः समृध्यते ॥२०॥ तऽइष्ट्वा प्राचीं दिशमपश्यन् । तां प्राचीमेवाकुर्वत सेयं प्राच्येव दिक्तस्मादिमाः प्रजाः प्राच्यः सर्पन्ति प्राचीꣳ ह्येतामकुर्वतोपैनामितः कुर्वीमहीति तामूर्ध्वमकुर्वतेमां खलूर्ध्वं पश्येमेति सासौ द्यौरभवत् ॥२१॥ अथ दक्षिणां दिशमपश्यन् । तां दक्षिणामेवाकुर्वत सेयं दक्षिणैव दिक्तस्माद्दक्षिणत एव दक्षिणा उपतिष्ठन्ते दक्षिणतोऽभ्यवाजन्ति दक्षिणाꣳ ह्येतामकुर्वतोपैनामितः कुर्वीमहीति तं लोकमकुर्वतेमं खलु लोकं पश्येमेति तदिदमन्तरिक्षमभवदेष वै लोकः स यथा हैवेयं प्रतिष्ठाविरस्मिंल्लोके पृथिव्येवमु हैवैषा प्रतिष्ठाविरमुष्मिंल्लोकऽइदमन्तरिक्षꣳ स यदिह सन्नमुं लोकं न पश्यति तस्मादाहुः परोऽक्षमसौ लोक इति ॥२२॥ अथ प्रतीचीं दिशमपश्यन् । तामाशामकुर्वत तस्माद्यत्प्राङ् सृत्वा विन्दतऽएतामेव तेन दिशमेत्याशाꣳ ह्येतामकुर्वतोपैनामितः कुर्वीमहीति ताꣳ श्रियमकुर्वतेमां खलु श्रियं पश्येमेति सेयं पृथिव्यभवच्छ्रीर्वाऽइयं तस्माद्योऽस्यै भूयिष्ठं विन्दते स एव श्रेष्ठो भवति ॥२३॥ अथोदीचीं दिशमपश्यन् । तामपोऽकुर्वतोपैनामितः कुर्वीमहीति तं धर्ममकुर्वत धर्मो वाऽआपस्तस्माद्यदेमं लोकमाप आगच्छन्ति सर्वमेवेदं यथाधर्मं भवत्यथ यदावृष्टिर्भवति बलीयानेव तर्ह्यबलीयस आदत्ते धर्मो ह्यापः ॥२४॥ ता वाऽएताः । एकादश देवताः पञ्च प्रयाजा द्वावाज्यभागौ स्विष्टकृत्त्रयोऽनुयाजाः ॥२५॥ ता एकादशाहुतयः । एताभिर्वाऽआहुतिभिर्देवा इमांल्लोकानजयन्नेता दिशस्तथोऽएवैष एताभिराहुतिभिरिमांल्लोकाञ्जयत्येता दिशः ॥२६॥ चतस्रोऽवान्तरदिशः । तऽएव चत्वारः पत्नीसंयाजा अवान्तरदिशो वै देवाश्चतुर्भिः पत्नीसंयाजैरजयन्नवान्तरदिश उऽएवैष एतैर्जयति ॥२७॥ अथेडा । अन्नाद्यमेवैतया देवा अजयंस्तथोऽएवैष एतयान्नाद्यमेव

नयत्येषा नु देवत्रा दर्शपूर्णमासयोः सम्पत् ॥२८॥ अथाध्यात्मम् । पञ्चेमे पुरुषे प्राणा ऋते चक्षुर्भ्यां तऽएव पञ्च प्रयाजा चक्षुषीऽआज्यभागौ ॥२९॥ अयमेवावाङ् प्राणः स्विष्टकृत् । स यत्तमभ्यर्ध-इवेतराभ्य आहुतिभ्यो जुहोति तस्मादेतस्मात्प्राणात्सर्वे प्राणा बीभत्सन्तेऽथ यत्स्विष्टकृते सर्वेषाᳫं हविषामवद्यति तस्माद्यत्किं चेमान्प्राणानापद्यतऽएतमेव तत्सर्वᳫं समवैति ॥३०॥ त्रीणि शिश्नानि । तऽएव त्रयोऽनुयाजाः स योऽयं वर्षिष्ठोऽनुयाजस्तदिदं वर्षिष्ठमिव शिश्नं तं वाऽअनवानन्यजेदित्याहुस्तथो हास्यैतदमृध्रं भवतीति ॥३१॥ स वै सकृदवान्यात् । एकᳫं ह्येतस्य पर्वाथ यदपर्वकᳫं स्यात्प्रतृष्णं वैव तिष्ठेल्लम्बेत वा तस्मादेतदुच्च तिष्ठति पद्यते च तस्मात्सकृदवान्यात् ॥३२॥ द्वौ बाहू द्वाऽऊरू । तऽएव चत्वारः पत्नीसंयाजाः प्रतिष्ठायमेव प्राण इडा यत्तां नाग्नौ जुहोति यत्साप्रदग्धेव तस्मादयमनवतृष्णः प्राणः ॥३३॥ अस्थ्येव याज्यानुवाक्याः । माᳫंसᳫं हविस्तन्मितं छन्दो यद्याज्यानुवाक्यास्तस्मादु समावन्त्येवास्थीनि मेद्यतश्च कृश्यतश्च भवन्त्यथ यद्भूय-इव च हविर्गृह्णाति कनीय-इव च तस्मादु माᳫंसान्येव मेद्यतो मेद्यन्ति माᳫंसानि कृश्यतः कृश्यन्ति तेनैतेन यज्ञेन यां कामयते देवतां तां यजति यस्यै हविर्भवति ॥३४॥ ता वाऽएताः । अनपोद्धार्या आहुतयो भवन्ति स यद्धैतासामपोद्धरेद्यथैकमङ्गᳫं शृणीयात्प्राणं वा निर्हण्यादेवं तदन्यान्येव हवीᳫंष्युप चाक्रियन्तेऽप च क्रियन्ते ॥३५॥ ता वाऽएताः । षोडशाहुतयो भवन्ति षोडशकलो वै पुरुषः पुरुषो यज्ञस्तस्मात्षोडशाहुतयो भवन्ति ॥३६॥ ब्राह्मणम् ॥६॥ ॥

तद्वाऽअदो व्रतोपायनऽउच्यते । यदि नाश्नाति पितृदेवत्यो भवति यद्युऽअश्नाति देवानत्यश्नातीति तदारण्यमश्नीयादिति तत्र स्थापयन्ति ॥१॥ स यदि ग्राम्या ओषधीरश्नाति । पुरोडाशस्य मेधमश्नाति यद्यारण्या ओषधीरश्नाति बर्हिषो मेधमश्नाति यदि वानस्पत्यमश्नातीध्मस्य मेधमश्नाति यदि पयः पिबति सांनाय्यस्य

चान्यस्य च मेधमश्नाति यद्यपः पिबति प्रणीतानां मेधमश्नाति यदि नाश्नाति पितृदेवत्यो भवति ॥२॥ तदाहुः । किमयनमिति स्वयꣳ हैवैते रात्रीऽअग्निहोत्रं जुहुयात्स यद्धुत्वा प्राश्नाति तेनापितृदेवत्यो भवत्याहुतिर्वाऽएषा स यदेवैतामात्मन्नाहुतिं जुहोति तेनोऽएतेषां मेधानां नाश्नाति ॥३॥ एते ह वै रात्री । सर्वा रात्रयः समवयन्ति या आपूर्यमाणपक्षस्य रात्रयस्ताः सर्वाः पौर्णमासीꣳ समवयन्ति या अपक्षीयमाणपक्षस्य रात्रयस्ताः सर्वा अमावास्याꣳ समवयन्ति स यो हैवं विद्वान्त्स्वयमुपवसथे जुहोति सर्वदा हैवास्य स्वयꣳ हुतं भवति ॥४॥ ब्राह्मणम् ॥७॥

देवाश्च वाऽअसुराश्च । उभये प्राजापत्याः पस्पृधिरे ततोऽसुरा अतिमानेनैव कस्मिन्नु वयं जुहुयामेति स्वेष्वेवास्येषु जुह्वतश्चेरुस्तेऽतिमानेनैव पराबभूवुस्तस्मान्नातिमन्येत पराभवस्य हैतन्मुखं यदतिमानः ॥१॥ अथ देवाः । अन्योऽन्यस्मिन्नेव जुह्वतश्चेरुस्तेभ्यः प्रजापतिरात्मानं प्रददौ यज्ञो हैषामास यज्ञो हि देवानामन्नꣳ ॥२॥ स देवेभ्य आत्मानं प्रदाय । अथैतमात्मनः प्रतिमामसृजत यद्यज्ञं तस्मादाहुः प्रजापतिर्यज्ञ इत्यात्मनो ह्येतं प्रतिमामसृजत ॥३॥ स एतेन यज्ञेन । देवेभ्य आत्मानं निरक्रीणीत स यद्व्रतमुपैति यथैव तत्प्रजापतिर्देवेभ्य आत्मानं प्रायच्छदेवमेवैष एतद्देवेभ्य आत्मानं प्रयच्छति तस्माद्ध संयत एवैतꣳ रात्रिं चिचरिषेद्यथा हविषा चरेदेवꣳ हविर्ह्येष देवानां भवति ॥४॥ अथ यद्यज्ञं तनुते । यज्ञेनैवैतद्देवेभ्य आत्मानं निष्क्रीणीते यथैव तत्प्रजापतिर्निरक्रीणीतैवमथ यद्धविर्निर्वपति हविषैवैतद्यज्ञं निष्क्रीणाति हविरनुवाक्ययानुवाक्यामवदानेनावदानं याज्यया याज्यां वषट्कारेण वषट्कारमाहुत्या तस्याहुतिरेवानिष्क्रीता भवति ॥५॥ स यथाग्रप्रशीर्णो वृक्षः । एवमस्यैष यज्ञो भवत्याहुतिमेवान्वाहार्येण निष्क्रीणाति तद्यदेतद्धीनं यज्ञस्यान्वाहरति तस्मादन्वाहार्यो नामैवमु हास्यैष सर्व

एव यज्ञो निष्क्रीतो भवत्येष ह वै यजमानस्यामुष्मिंलोकऽआत्मा भवति यद्यज्ञ स ह सर्वतनूरेव यजमानोऽमुष्मिंलोके सम्भवति य एवं विद्वान्निष्क्रीत्या यजते ॥ ६॥ ब्राह्मणम् ॥ ८॥ प्रथमोऽध्याय [६७.] ॥ ॥

त्रिर्ह वै पुरुषो जायते । एतन्न्वेव मातुश्चाधि पितुश्चाग्रे जायतेऽथ यं यज्ञ उपनमति स यद्यजते तद्द्वितीयं जायतेऽथ यत्र म्रियते यत्रैनमग्नावभ्यादधति स यत्ततः सम्भवति तत्तृतीयं जायते तस्मात्त्रिः पुरुषो जायतऽइत्याहुः ॥ १॥ ता वाऽएताः । एकादश सामिधेनीरन्वाह दश वाऽइमे पुरुषे प्राणा आत्मैकादशो यस्मिन्नेते प्राणाः प्रतिष्ठिता एतावान्वै पुरुषस्तदेनं कृत्स्नं जनयत्यथ यदूर्ध्वꣳ सामिधेनीभ्यः सा प्रतिष्ठा तदेनं जनयित्वा प्रतिष्ठापयति ॥ २॥ नव प्रसवस्य व्याहृतयः । नवेमे पुरुषे प्राणास्तदेनं द्वितीयं जनयत्याश्रावणं प्रत्याश्रावणꣳ सा प्रतिष्ठाथ यद्देवादः सृष्टी जन्मोच्यते तदेनं तृतीयं जनयति पत्नीसंयाजा एव तत्र प्रतिष्ठा ॥ ३॥ त्रिर्ह वै पुरुषो जायते । एवमेवैनमेतद्यज्ञात्त्रिर्जनयति तासामेकादशानां त्रिः प्रथमामन्वाह त्रिरुत्तमाम् ॥ ४॥ ताः पञ्चदश सामिधेन्यः । द्वावाघारौ पञ्च प्रयाजा इडा त्रयोऽनुयाजाः सूक्तवाकश्च शम्योर्वाकश्च तास्त्रयोदशाहुतयोऽथ यद्देवादः पत्नीसंयाजेषु सम्प्रगृह्णाति समिष्टयजुश्च ॥ ५॥ ताः पञ्चदशाहुतयः । तासां पञ्चदशानामाहुतीनामिता अनुवाक्या एताः पञ्चदश सामिधेन्य एतासामनुवाक्यानामेता याज्या य एवात्र मन्त्रो यो निगदस्तद्याज्यारूपमेतेनो हास्यैता आहुतयोऽनुवाक्यवत्यो भवन्त्येताभिः सामिधेनीभिरेताभिराहुतिभिरेता अनुवाक्या याज्यवत्यश्चाहुतिवत्यश्च भवन्ति ॥ ६॥ ब्राह्मणम् ॥ १ [२. १.] ॥ ॥

गायत्रीमनुवाक्यामन्वाह । त्रिपदा वै गायत्री त्रय इमे लोका इमानेवैतल्लोकान्देवाः प्रत्यष्ठापयन् ॥ १॥ अथ त्रिष्टुभा यजति । चतुष्पदा वै त्रिष्टुप्चतुष्पादाः पशवस्तत्पशूनेवैतदेषु लोकेषु प्रतिष्ठितेषु देवाः प्रत्यष्ठापयन् ॥ २॥ द्य-

क्षरो वषट्कारः । द्विपाद्वै पुरुषस्तत्पुरुषमेवैतद्द्विपादमेषु पशुषु प्रतिष्ठितेषु प्रत्यष्ठापयन् ॥३॥ सोऽयं द्विपात्पुरुषः । पशुषु प्रतिष्ठित एवमेवैष एतल्लोकान्प्रतिष्ठापयति लोकेषु प्रतिष्ठितेषु पशून्प्रतिष्ठापयति पशुषु प्रतिष्ठितेष्वात्मानं प्रतिष्ठापयत्येवमेष पुरुषः पशुषु प्रतिष्ठितो यऽएवं विद्वान्यजते ॥४॥ अथ यद्वषट्कृते जुहोति । एष वै वषट्कारो य एष तपति स एष मृत्युस्तदेनमुपरिष्टान्मृत्योः संस्करोति तदेनमतो जनयति स एतं मृत्युमतिमुच्यते यज्ञो वाऽअस्यात्मा भवति तद्यज्ञ एव भूत्वैतन्मृत्युमतिमुच्यतऽएतेनो ह्यस्य सर्वे यज्ञक्रतव एतं मृत्युमतिमुक्ताः ॥५॥ ॥शतम्५६००॥ ॥ अथ यामेतामाहुतिं जुहोति । एषा ह वाऽअस्याहुतिरमुष्मिंल्लोकऽआत्मा भवति स यदेवंविदस्माल्लोकात्प्रैत्यथैनमेषाहुतिरेतस्य पृष्ठे सत्याह्वयत्येह्ययं वै तऽइहात्मास्मीति तद्यदाह्वयति तस्मादाहुतिर्नाम ॥६॥ ब्राह्मणम् ॥१० [२. २.] ॥ ॥

ब्रह्म वाऽइदमग्रऽआसीत् । तद्देवानसृजत तद्देवान्त्सृष्ट्वैषु लोकेषु व्यारोहयदस्मिन्नेव लोकेऽग्निं वायुमन्तरिक्षे दिव्येव सूर्यम् ॥१॥ अथ येऽत ऊर्ध्वा लोकाः । तद्या अत ऊर्ध्वा देवतास्तेषु ता देवता व्यारोहयत्स यथा हैवेमऽआविर्लोका इमाश्च देवता एवमु हैव तऽआविर्लोकास्ताश्च देवता येषु ता देवता व्यारोहयत् ॥२॥ अथ ब्रह्मैव परार्धमगच्छत् । तत्परार्धं गत्वैक्षत कथं न्विमांल्लोकान्प्रत्यवेयामिति तद्द्वाभ्यामेव प्रत्यवैद्रूपेण चैव नाम्ना च स यस्य कस्य च नामास्ति तन्नाम यस्योऽअपि नाम नास्ति यद्वेद रूपेणेदꣳ रूपमिति तद्रूपमेतावद्वाऽइदं यावद्रूपं चैव नाम च ॥३॥ ते हैते ब्रह्मणो महतीऽअभ्वे । स यो हैते ब्रह्मणो महतीऽअभ्वे वेद महद्धैवाभ्वं भवति ॥४॥ ते हैते ब्रह्मणो महती यक्षे । स यो हैते ब्रह्मणो महती यक्षे वेद महद्धैव यक्षं भवति तयोरन्यतरज्ज्यायो रूपमेव यद्ध्यपि नाम रूपमेव तत्स यो हैतयोर्ज्यायो वेद ज्यायान्ह तस्माद्भवति

यस्माज्ज्यायान्बुभूषति ॥५॥ मर्त्या ह वाऽअग्रे देवा आसुः । स यदैव ते ब्रह्मणापुरथामृता आसुः स यं मनसऽआधारयति मनो वै रूपं मनसा हि वेदेदं रूपमिति तेन रूपमाप्नोत्यथ यं वाचऽआधारयति वाग्वै नाम वाचा हि नाम गृह्णाति तेनो नामाप्नोत्येतावद्वाऽइदं सर्वं यावद्रूपं चैव नाम च तत्सर्वमाप्नोति सर्वं वाऽअक्षय्यमेतेनो हास्याक्षय्यं सुकृतं भवत्यक्षय्यो लोकः ॥६॥ तद्वाऽअद आग्नेय्यामिष्टाऽउच्यते । यथा तदृषिभ्यो यज्ञः प्रारोचत तं यथातन्वत तद्यज्ञं तन्वानानृषीन्गन्धर्वा उपनिषेदुस्ते ह स्म संनिदधतीदं वाऽअत्यरीरिचन्निदमूनमक्रन्निति स यदेषां यज्ञः संतस्थेऽथैनांस्तद्दर्शयां चक्रुरिदं वाऽअत्यरीरिचतेदमूनमकर्तेति ॥७॥ स यदतिरेचयां चक्रुः । यथा गिरिरेवं तदास यदूनं चक्रुर्यथा श्वभ्राः प्रदरा एवं तदास ॥८॥ स यत्र शम्योराह । तदभिमृशति यज्ञ नमश्च तऽउप च यज्ञस्य शिवे संतिष्ठस्व स्विष्टे मे संतिष्ठस्वेति स यदतिरेचयति तन्नमस्कारेण शमयत्यथ यदूनं करोत्युप चेति तेन तदन्यूनं भवति यज्ञस्य शिवे संतिष्ठस्वेति यद्वै यज्ञस्यान्यूनातिरिक्तं तच्छिवं तेन तदुभयं शमयति स्विष्टे मे संतिष्ठस्वेति यद्वै यज्ञस्यान्यूनातिरिक्तं तत्स्विष्टं तेनो तदुभयं शमयत्येवमु हास्यैतेन यज्ञेनान्यूनातिरिक्तेनैवेष्टं भवति य एवं विद्वानेवमभिमृशति तस्मादेवमेवाभिमृशेत्ते ह ते गन्धर्वा आसुः शूर्पं यवमान्कृषिरुद्दालवान्धानान्तर्वान् ॥९॥ ब्राह्मणम् ॥११ [२. ३.] ॥ ॥

एष वै पूर्णमाः । य एष तपत्यहरहर्ह्येवैष पूर्णोऽथैष एव दर्शो यच्चन्द्रमा ददृशऽइव ह्येषः ॥१॥ अथोऽइतरथाहुः । एष एव पूर्णमा यच्चन्द्रमा एतस्य ह्यनु पूरणं पौर्णमासीत्याचक्षतेऽथैष एव दर्शो य एष तपति ददृशऽइव ह्येषः ॥२॥ इयमेव पूर्णमाः । पूर्णेव हीयमसावेव द्यौर्दर्शो ददृशऽइव ह्यसौ द्यौः ॥३॥ रात्रिरेव पूर्णमाः । पूर्णेव हीयं रात्रिरहरेव दर्शो ददृशऽइव हीदमहरेषा

नु देवत्रा दर्शपूर्णमासयोर्मीमाꣳसा ॥४॥ अथाध्यात्मम् । उदान एव पूर्णमा उदा-
नेन ह्ययं पुरुषः पूर्यतऽइव प्राण एव दर्शो ददृशऽइव ह्ययं प्राणस्तदेतावन्ना-
दश्चान्नप्रदश्च दर्शपूर्णमासौ ॥५॥ प्राण एवान्नादः । प्राणेन हीदमन्नमद्यतऽउदान
एवान्नप्रद उदानेन हीदमन्नं प्रदीयते स यो हैतावन्नादं चान्नप्रदं च दर्शपूर्णमा-
सौ वेदान्नादो हैव भवति प्र हास्माऽअन्नाद्यं दीयते ॥६॥ मन एव पूर्णमाः ।
पूर्णमिव हीदं मनो वागेव दर्शो ददृशऽइव हीयं वाक्तदेतावध्यात्मं प्रत्यक्षं द-
र्शपूर्णमासौ स यदुपवसथे व्रतोपायनीयमश्नाति तेनैतावध्यात्मं प्रत्यक्षं दर्शपूर्ण-
मासौ प्रीणाति यज्ञेन प्रातर्देवौ ॥७॥ तदाहुः । यन्न पूर्णमासायेति हविर्गृह्यते
न दर्शायेति हविर्गृह्यते न पूर्णमासायानुब्रूहि न दर्शायानुब्रूहि न पूर्णमासं यजन्न
न दर्शं यजेत्यथ केनास्य दर्शपूर्णमासाविष्टौ भवत इति स यं मनसऽआघारयति
मनो वै पूर्णमास्तेन पूर्णमासं यजत्यथ यं वाचऽआघारयति वाग्वै दर्शस्तेनो
दर्शं यजत्येतेनो हास्य दर्शपूर्णमासाविष्टौ भवतः ॥८॥ तद्धैके । चरू निर्वपन्ति
पौर्णमास्याꣳ सरस्वतेऽमावास्यायाꣳ सरस्वत्याऽएतत्प्रत्यक्षं दर्शपूर्णमासौ यजामह
ऽइति वदन्तस्तदु तथा न कुर्यान्मनो वै सरस्वान्वाक्सरस्वती स यदेवैतावा-
घारावाघारयति तदेवास्य दर्शपूर्णमासाविष्टौ भवतस्तस्मादेतौ चरू न निर्वपेत्
॥९॥ तदाहुः आगूर्ती वाऽएष भवति यो दर्शपूर्णमासाभ्यां यजते पौर्णमासेन
हीष्ट्वा वेदामावास्येन यक्ष्यऽइत्यामावास्येनेष्ट्वा वेद पुनः पौर्णमासेन यक्ष्यऽइति
स आगूर्त्यैवामुं लोकमेति यदामुं लोकमेति कथमनागूर्ती भवतीति स यदेवैता
ऽउभयत्राघारावाघारयति तदेवास्य दर्शपूर्णमासौ संतिष्ठेते स संस्थितयोरेव
दर्शपूर्णमासयोरथामुं लोकमेति तथानागूर्ती भवति ॥१०॥ ब्राह्मणम् ॥१२ [२.४.]

॥ प्रथमः प्रपाठकः ॥ कण्डिकासंख्या ११९ ॥ ॥

अपि ह वाऽएतर्हि । देवेभ्योऽश्वमेधमालभन्ते तदाहुः प्राकृतोऽश्वमेध इती-

तर इन्नूनꣳ स तद्वा एष एवाश्वमेधो यच्चन्द्रमाः ॥१॥ तदाहुः । पदे-पदेऽश्वस्य मेध्यस्याहुतिं जुहुतीति स यत्सायंप्रातरग्निहोत्रं जुहोति द्वे सायमाहुती जुहोति द्वे प्रातस्ताश्चतस्र आहुतयश्चतुष्पाद्वा अश्वस्तदस्य पदे-पद एवाहुतिर्हुता भवति ॥२॥ तदाहुः । विवृत्तेऽश्वस्येष्टिं निर्वपतीत्येष वै सोमो राजा देवानामन्नं यच्चन्द्रमाः स यत्रैष एताꣳ रात्रिं न पुरस्तान्न पश्चाद्ददृशे तदिमं लोकमागच्छति सोऽस्मिँल्लोके विवर्तते ॥३॥ स यदामावास्येन यजते । विवृत्त एवास्यैतदिष्टिं निर्वपत्यथ यत्पौर्णमासेन यजतेऽश्वमेधमेवैतदालभते तमालभ्य देवेभ्यः प्रयच्छति संवत्सरे वा इतरमश्वमेधमालभन्त एष वै मासः परिप्लवमानः संवत्सरं करोति तदस्य संवत्सरे-संवत्सर एवाश्वमेध आलब्धो भवति ॥४॥ तं वा एतम् । मासि-मास्येवाश्वमेधमालभन्ते स यो हैवं विद्वानग्निहोत्रं च जुहोति दर्शपूर्णमासाभ्यां च यजते मासि-मासि हैवास्याश्वमेधेनेष्टं भवत्येतदु ह्यस्याग्निहोत्रं च दर्शपूर्णमासौ चाश्वमेधमभिसम्पद्येते ॥५॥ ब्राह्मणम् ॥१ [२.५.] ॥ ॥

शिरो ह वा एतद्यज्ञस्य यत्प्रणीताः । स यत्प्रणीताः प्रणयति शिर एवैतद्यज्ञस्य संस्करोति स विद्याच्छिर एव म एतत्संस्क्रियत इति ॥१॥ प्राण एवास्येध्मः । प्राणेन हीदꣳ सर्वमिङ्गं यत्प्राणभृन्निमिषद्यदेजति स विद्यादहमेवैष इध्म इति ॥२॥ अनूक्तमेवास्य सामिधेन्यः । तस्मात्ता ब्रूयात्संतन्वन्निव मेऽनुब्रूहीति संततमिव हीदमनूक्तं मनश्चैवास्य वाक्चाघारौ सरस्वांश्च सरस्वती च स विद्यान्मनश्चैव मे वाक्चाघारौ सरस्वांश्च सरस्वती चेति ॥३॥ पञ्च प्रयाजाः । इम एवास्य ते शीर्षण्याः पञ्च प्राणा मुखमेवास्य प्रथमः प्रयाजो दक्षिणा नासिका द्वितीयः सव्या नासिका तृतीयो दक्षिणः कर्णश्चतुर्थः सव्यः कर्णः पञ्चमोऽथ यच्चतुर्थे प्रयाजे समानयति तस्मादिदꣳ श्रोत्रमन्तरतः संतृणं चक्षुषी आज्यभागौ स विद्याच्चक्षुषी एव म एताविति ॥४॥ अथ य आग्नेयः पुरोडाशः । अयमेवास्य स

दक्षिणोऽर्धो हृदयमेवास्योपाꣳशुयाजः स यत्तेनोपाꣳशु चरन्ति तस्मादिदं गुहेव हृदयम् ॥५॥ अथ योऽग्नीषोमीयः पुरोडाशः । अयमेवास्य स उत्तरोऽर्ध ऐन्द्रं वा सांनाय्यमन्तराꣳसमेवास्य स्विष्टकृद्धविः प्राशित्रꣳ ॥६॥ स यत्प्राशित्रमवद्यति । यथैव तत्प्रजापतेराविद्धं निरकृन्तन्नेवमेवैतस्यैतद्यद्वेष्टितं यद्ग्रथितं यद्वरुण्यं तन्निष्कृन्तन्ति स विद्याद्यथैव तत्प्रजापतेराविद्धं निरकृन्तन्नेवमेव मऽइदं यद्वेष्टितं यद्ग्रथितं यद्वरुण्यं तन्निष्कृन्तन्तीति ॥७॥ उदरमेवास्येडा । तद्यथैवाद इडायाꣳ समवद्यन्त्येवमेवेदं विश्वरूपमन्नमुदरे समवधीयते ॥८॥ त्रयोऽनुयाजाः । इमऽएवास्य तेऽवाञ्चस्त्रयः प्राणा बाहूऽएवास्य सूक्तवाकश्च शम्योर्वाकश्च चत्वारः पत्नीसंयाजाश्चतस्रो वै प्रतिष्ठा ऊरू द्वावष्ठीवन्तौ द्वौ पादावेवास्य समिष्टयजुः ॥९॥ ता एकविꣳशतिराहुतयः । द्वावाघारौ पञ्च प्रयाजा द्वावाज्यभागावाग्नेयः पुरोडाशस्तद्दशाग्नीषोमीय उपाꣳशुयाजोऽग्नीषोमीयः पुरोडाशोऽग्निः स्विष्टकृदिडा त्रयोऽनुयाजाः सूक्तवाकश्च शम्योर्वाकश्चाथ यदेवादः पत्नीसंयाजेषु सम्प्रगृह्णाति समिष्टयजुश्च ॥१०॥ ता एकविꣳशतिराहुतयः । द्वादश वै मासाः संवत्सरस्य पञ्चर्तवस्त्रयो लोकास्तद्विꣳशतिरेष एवैकविꣳशो य एष तपति सैषा गतिरेषा प्रतिष्ठा तदेतां गतिमेतां प्रतिष्ठां गच्छति ॥११॥ तद्ध स्मैतदारुणिराह । अर्धमासशो वाऽअहममुनादित्येन सलोको भवामि तामहं दर्शपूर्णमासयोः सम्पदं वेदेति ॥१२॥ तदाहुः । आत्मयाजी श्रेया३न्देवयाजी३ऽइत्यात्मयाजीति ह ब्रूयात्स ह वाऽआत्मयाजी यो वेदेदं मेऽनेनाङ्गꣳ संस्क्रियतऽइदं मेऽनेनाङ्गमुपधीयतऽइति स यथाहिस्त्वचो निर्मुच्येतैवमस्मान्मर्त्याच्छरीरात्पाप्मनो निर्मुच्यते स ऋङ्मयो यजुर्मयः साममय आहुतिमयः स्वर्गं लोकमभिसम्भवति ॥१३॥ अथ ह स देवयाजी यो वेद । देवानेवाहमिदं यजे देवान्त्सपर्यामीति स यथा श्रेयसे पापीयान्बलिꣳ हरेद्वैश्यो वा राज्ञे बलिꣳ हरेदेवꣳ स स ह न तावन्तं लोकं जयति या-

वत्तमितरः ॥ १४ ॥ ब्राह्मणम् ॥ २ [२. ६.] ॥ ॥

संवत्सरो यज्ञः । स यो ह वै संवत्सरो यज्ञ इति वेदान्ते हैवास्य संवत्सरस्येष्टं भवत्यथो यत्किं च संवत्सरे क्रियते सर्वं हैवास्य तदाप्तमवरुद्धमभिजितं भवति ॥ १ ॥ ऋतव ऋत्विजः । स यो ह वा ऋतव ऋत्विज इति वेदान्ते हैवास्य ऽर्तूनामिष्टं भवत्यथो यत्किं चर्तुषु क्रियते सर्वं हैवास्य तदाप्तमवरुद्धमभिजितं भवति ॥ २ ॥ मासा हवींषि । स यो ह वै मासा हवींषीति वेदान्ते हैवास्य मासानामिष्टं भवत्यथो यत्किं च मासेषु क्रियते सर्वं हैवास्य तदाप्तमवरुद्धमभिजितं भवति ॥ ३ ॥ अर्धमासा हविष्पात्राणि । स यो ह वा अर्धमासा हविष्पात्राणीति वेदान्ते हैवास्यार्धमासानामिष्टं भवत्यथो यत्किं चार्धमासेषु क्रियते सर्वं हैवास्य तदाप्तमवरुद्धमभिजितं भवति ॥ ४ ॥ अहोरात्रे परिविष्ट्री । स यो ह वा ऽअहोरात्रे परिविष्ट्री ऽइति वेदान्ते हैवास्याहोरात्रयोरिष्टं भवत्यथो यत्किं चाहोरात्रयोः क्रियते सर्वं हैवास्य तदाप्तमवरुद्धमभिजितं भवति ॥ ५ ॥ इयमेव प्रथमा सामिधेनी । अग्निर्द्वितीया वायुस्तृतीयान्तरिक्षं चतुर्थी द्यौष्पञ्चम्यादित्यः षष्ठी चन्द्रमाः सप्तमी मनोऽष्टमी वाङ्नवमी तपो दशमी ब्रह्मैकादश्येता हि वा ऽइदं सर्वं समिन्धत ऽएताभिरिदं सर्वं समिद्धं तस्मात्सामिधेन्यो नाम ॥ ६ ॥ स वै त्रिः प्रथमामन्वाह । स यत्प्रथममन्वाह प्राचीं तेन दिशं जयति यद्द्वितीयं दक्षिणां तेन दिशं जयति यत्तृतीयमूर्ध्वामेव तेन दिशं जयति ॥ ७ ॥ त्रिर्वेवोत्तमामन्वाह । स यत्प्रथममन्वाह प्रतीचीं तेन दिशं जयति यद्द्वितीयमुदीचीं तेन दिशं जयति यत्तृतीयमिमामेव तेन प्रतिष्ठां जयत्येवमु खल्वाभिरिमांल्लोकाञ्जयत्येता दिशः ॥ ८ ॥ ऋतमेव पूर्व आघारः । सत्यमुत्तरोऽव ह वा ऽऋतसत्ये रुन्द्धेऽथो यत्किं चर्तसत्याभ्यां जय्यं सर्वं हैव तज्जयति ॥ ९ ॥ त्विषिरेव प्रथमः प्रयाजः । अपचितिर्द्वितीयो यशस्तृतीयो ब्रह्मवर्चसं चतुर्थोऽन्नाद्यं पञ्चमः ॥ १० ॥ स प्रथमं प्र-

याज्ञमनुमन्त्रयेत । त्विषिमान्भूयासमित्यपचितिमान्भूयासमिति द्वितीयं यशस्वी भूयासमिति तृतीयं ब्रह्मवर्चसी भूयासमिति चतुर्थमन्नादो भूयासमिति पञ्चमं त्विषिमान्ह वाऽअपचितिमान्यशस्वी ब्रह्मवर्चस्यन्नादो भवति य एवमेतद्वेद ॥११॥ एतद्ध स्म वै तद्विद्वानाह । श्वेतकेतुरारुणेयः कꣳ स्विद्देवापरीषु महानागमिवाभिसꣳसारं दिदृक्षितारो य एवमेतत्प्रयाजानां यशो वेदितेति ॥१२॥ भूतमेव पूर्व आज्यभागः । भविष्यदुत्तरोऽव ह वै भूतं च भविष्यच्च रुन्द्धेऽथो यत्किं च भूतेन च भविष्यता च जय्यꣳ सर्वꣳ हैव तज्जयति ॥१३॥ ब्रह्माग्नेयः पुरोडाशः । स यो ह वै ब्रह्माग्नेयः पुरोडाश इति वेदाव ह ब्रह्म रुन्द्धेऽथो यत्किं च ब्रह्मणा जय्यꣳ सर्वꣳ हैव तज्जयति ॥१४॥ क्षत्रमुपाꣳशुयाजः । स यो ह वै क्षत्रमुपाꣳशुयाज इति वेदाव ह क्षत्रꣳ रुन्द्धेऽथो यत्किं च क्षत्रेण जय्यꣳ सर्वं हैव तज्जयति तद्यदुपाꣳशुयाजं कुर्वन्त्येके नैके तस्मादुच्चैश्चोपाꣳशु च क्षत्रायाचक्षते ॥१५॥ विडुत्तरः पुरोडाशः । स यो ह वै विडुत्तरः पुरोडाश इति वेदाव ह विशꣳ रुन्द्धेऽथो यत्किं च विशा जय्यꣳ सर्वꣳ हैव तज्जयति तद्यदाग्नेयश्च पुरोडाश उपाꣳशुयाजश्च पूर्वौ भवतस्तस्मादुभे ब्रह्म च क्षत्रं च विशि प्रतिष्ठिते ॥१६॥ राष्ट्रꣳ सांनाय्यꣳ । स यो ह वै राष्ट्रꣳ सांनाय्यमिति वेदाव ह राष्ट्रꣳ रुन्द्धेऽथो यत्किं च राष्ट्रेण जय्यꣳ सर्वꣳ हैव तज्जयति तद्यत्संनयन्त्येके नैके तस्माद्राष्ट्रꣳ सं चैति वि च ॥१७॥ तपः स्विष्टकृत् । स यो ह वै तपः स्विष्टकृदिति वेदाव ह तपो रुन्द्धेऽथो यत्किं च तपसा जय्यꣳ सर्वꣳ हैव तज्जयति ॥१८॥ लोकः प्राशित्रꣳ । स यो ह वै लोकः प्राशित्रमिति वेदाव ह लोकꣳ रुन्द्धेऽथो यत्किं च लोकेन जय्यꣳ सर्वꣳ हैव तज्जयति नो ह लवेन लोकाद्व्ययते लवेन ह वाऽअमुष्मिंलोके लोकाद्व्ययन्तेऽथ य एवं वेद न ह बहु चन पापं कृत्वा लोकाद्व्ययते ॥१९॥ श्रद्धेडा । स यो ह वै श्रद्धेडेति वेदाव ह श्रद्धाꣳ रुन्द्धेऽथो यत्किं च श्रद्धया

जय्यꣳ सर्वꣳ हैव तज्जयति ॥२०॥ अशनिरेव प्रथमोऽनुयाजः । ह्रादुनिर्द्वितीय उल्कुषी तृतीयः ॥२१॥ स प्रथममनुयाजमनुमन्त्रयेत । अशन्यमुं जहीति यं द्विष्याद्ध्रादुन्यमुं जहीति द्वितीयमुल्कुष्यमुं जहीति तृतीयम् ॥२२॥ स य एष क्षिप्रं म्रियते । अशनिर्ह तमनुयाजो हन्त्यथ यो विस्वन्मिश्रऽइव ह्रादुनिर्ह तमनुयाजो हन्त्यथ योऽभ्युष्टमिश्रऽइवोल्कुषी ह तमनुयाजो हन्तीति ॥२३॥ सैषा यज्ञमेनिः । एतया वै मेन्या देवा असुरान्पराभावयां चक्रुस्तथोऽएवैवंविद्यजमानः पाप्मानं द्विषन्तं भ्रातृव्यं पराभावयति ॥२४॥ स यदनुयाजान्तो यज्ञः स्यात् । अशन्यन्तः स्याद्ध्रादुन्यन्त उल्कुष्यन्तस्तस्माद्धि देवानां यज्ञ इडान्तो वैव शम्य्वन्तो वा ॥२५॥ प्रयाजैर्वै देवाः । स्वर्गं लोकमायंस्तानसुरा अन्वाजिगाꣳसंस्ताननुयाजैः प्रत्यौहंस्तद्यदनुयाजा इज्यन्ते पाप्मानमेव तद्द्विषन्तं भ्रातृव्यं यजमानः प्रत्यूहति ॥२६॥ प्राणा वै प्रयाजाः । अपाना अनुयाजास्तस्मात्प्रयाजाः प्राञ्चो हूयन्ते तद्धि प्राणरूपं प्रत्यञ्चोऽनुयाजास्तदपानरूपमेता ह वै दर्शपूर्णमासयोरुपसदो यदनुयाजास्तस्मात्तऽउपसद्रूपेण प्रत्यञ्चो हूयन्ते ॥२७॥ सꣳस्था सूक्तवाकः । स यो ह वै सꣳस्था सूक्तवाक इति वेदाव ह सꣳस्थाꣳ रुन्द्धेऽथो यत्किं च सꣳस्थया जय्यꣳ सर्वꣳ हैव तज्जयति गच्छति वयसः सꣳस्थाम् ॥२८॥ प्रतिष्ठा शम्योर्वाकः । स यो ह वै प्रतिष्ठा शम्योर्वाक इति वेदाव ह प्रतिष्ठाꣳ रुन्द्धेऽथो यत्किं च प्रतिष्ठया जय्यꣳ सर्वꣳ हैव तज्जयति गच्छति प्रतिष्ठाम् ॥२९॥ ते देवाः । एतान्पत्नीसंयाजान्पश्चात्पर्यौहन्त मिथुनमेवैतदुपरिष्टाद्दधत प्रजात्यै तद्यत्पत्नीसंयाजा इज्यन्ते मिथुनमेवैतदुपरिष्टाद्धत्ते प्रजात्यै देवानाꣳ ह वै प्रजातिमनु प्रजायते मिथुमेन-मिथुनेन ह प्रजायते य एवमेतद्वेद ॥३०॥ अन्नꣳ समिष्टयजुः । स यो ह वाऽअन्नꣳ समिष्टयजुरिति वेदाव हान्नꣳ रुन्द्धेऽथो यत्किं चान्नेन जय्यꣳ सर्वꣳ हैव तज्जयति ॥३१॥ संवत्सरो यजमानः । तमृतवो याजयन्ति वसन्त आग्नीध्रस्तस्मा-

वसन्तो दावाश्चरन्ति तद्ध्यग्निरूपं ग्रीष्मोऽध्वर्युस्तप्त-इव वै ग्रीष्मस्तप्तमिवाध्वर्युर्निष्क्रामति वर्षा उद्गाता तस्माद्यदा बलवद्वर्षति साम्न-इवोपब्दिः क्रियते शरद्ब्रह्मा तस्माद्यदा सस्यं पच्यते ब्रह्मण्वत्यः प्रजा इत्याहुर्हेमन्तो होता तस्माद्धेमन्वषट्कृताः पशवः सीदन्त्येता ह वाऽएनं देवता याजयन्ति स यद्येनमैषावीरा याजयेयुरेता एव देवता मनसा ध्यायेदेता हैवैनं देवता याजयन्ति ॥ ३२॥ अथ हैषैव तुला । यद्दक्षिणो वेद्यन्तः स यत्साधु करोति तदन्तर्वेद्यथ यदसाधु तद्बहिर्वेदि तस्माद्दक्षिणं वेद्यन्तमधिस्पृश्येवासीत तुलायाꣳ ह वाऽअमुष्मिंल्लोकऽआदधति यतरद्यꣳस्यति तदन्वेष्यति यदि साधु वासाधु वेत्यथ य एवं वेदास्मिन्हैव लोके तुलामारोहत्यत्यमुष्मिंल्लोके तुलाधानं मुच्यते साधुकृत्या हैवास्य यच्छति न पापकृत्या ॥ ३३॥ ब्राह्मणम् ॥ ३ [२. ७.] ॥ द्वितीयोऽध्यायः [६८.] ॥ ॥

वाग्घ वाऽएतस्याग्निहोत्रस्याग्निहोत्री । मन एव वत्सस्तदिदं मनश्च वाक्च समानमेव सन्नानेव तस्मात्समान्या रज्ज्वा वत्सं च मातरं चाभिदधति तेज एव श्रद्धा सत्यमाज्यम् ॥ १॥ तद्धैतज्जनको वैदेहः । याज्ञवल्क्यं पप्रच्छ वेत्थाग्निहोत्रं याज्ञवल्क्या३ऽइति वेद सम्राडिति किमिति पय एवेति ॥ २॥ यत्पयो न स्यात् । केन जुहुया इति व्रीहियवाभ्यामिति यद्व्रीहियवौ न स्यातां केन जुहुया इति या अन्या ओषधय इति यदन्या ओषधयो न स्युः केन जुहुया इति या आरण्या ओषधय इति यदारण्या ओषधयो न स्युः केन जुहुया इति वानस्पत्येनेति यद्वानस्पत्यं न स्यात्केन जुहुया इत्यद्भिरिति यदापो न स्युः केन जुहुया इति ॥ ३॥ स होवाच । न वाऽइह तर्हि किं चनासीदथैतदहूयतैव सत्यꣳ श्रद्धायामिति वेत्थाग्निहोत्रं याज्ञवल्क्य धेनुशतं ददामीति होवाच ॥ ४॥ तदप्येते श्लोकाः ।

किꣳ स्विद्विद्वान्प्रवसत्यग्निहोत्री गृहेभ्यः कथꣳ स्विदस्य काव्यं कथꣳ संततोऽग्निभिरिति कथꣳ स्विदस्यानपप्रोषितं भवतीत्येवैतदाह ॥ ५॥ यो जविष्ठो भु-

वनेषु । स विद्वान्प्रवसन्विदे तथा तदस्य काव्यं तथा संततोऽग्निभिरिति मन एवैतदाह मनसैवास्यानपप्रोषितं भवतीति ॥६॥ यत्स दूरं परेत्य । अथ तत्र प्रमाद्यति कस्मिंत्सास्य हुताहुतिर्गृहे यामस्य जुह्वतीति यत्स दूरं परेत्याथ तत्र प्रमाद्यति कस्मिन्नस्य साहुतिर्हुता भवतीत्येवैतदाह ॥७॥ यो जागार भुवनेषु । विश्वा जातानि योऽबिभः तस्मिंत्सास्य हुताहुतिर्गृहे यामस्य जुह्वतीति प्राणमेवैतदाह तस्मादाहुः प्राण एवाग्निहोत्रमिति ॥८॥ ब्राह्मणम् ॥४ [३.१.]॥॥

यो ह वाऽग्निहोत्रे । षण्मिथुनानि वेद मिथुनेन-मिथुनेन ह प्रजायते सर्वाभिः प्रजातिभिर्यजमानश्च पत्नी च तदेकं मिथुनं तस्मादस्य पत्नीवदग्निहोत्रꣳ स्यादेतन्मिथुनमुपाप्नवानीति वत्सश्चाग्निहोत्री च तदेकं मिथुनं तस्मादस्य पुंवत्साग्निहोत्री स्यादेतन्मिथुनमुपाप्नवानीति स्थाली चाङ्गाराश्च तदेकं मिथुनꣳ स्रुक्च स्रुवश्च तदेकं मिथुनमाहवनीयश्च समिच्च तदेकं मिथुनमाहुतिश्च स्वाहाकारश्च तदेकं मिथुनमेतानि ह वाऽग्निहोत्रे षण्मिथुनानि तानि य एवं वेद मिथुनेन-मिथुनेन ह प्रजायते सर्वाभिः प्रजातिभिः ॥१॥ ब्राह्मणम् ॥५ [३.२.]॥॥

ब्रह्म वै मृत्यवे प्रजाः प्रायच्छत् । तस्मै ब्रह्मचारिणमेव न प्रायच्छत्सोऽब्रवीदस्तु मह्यमप्येतस्मिन्भाग इति यामेव रात्रिꣳ समिधं नाहराताऽइति तस्माद्याꣳ रात्रिं ब्रह्मचारी समिधं नाहरत्यायुष एव तामवदाय वसति तस्माद्ब्रह्मचारी समिधमाहरेन्नेदायुषोऽवदाय वसानीति ॥१॥ दीर्घसत्त्रं वाऽएष उपैति । यो ब्रह्मचर्यमुपैति स यामुपयन्त्समिधमादधाति सा प्रायणीया याꣳ स्नास्यन्त्सोदयनीयाथ या अन्तरेण सत्त्या एवास्य ता ब्राह्मणो ब्रह्मचर्यमुपयन् ॥२॥ चतुर्धा भूतानि प्रविशति । अग्निं पदा मृत्युं पदाचार्यं पदात्मन्येवास्य चतुर्थः पादः परिशिष्यते ॥३॥ स यदग्नये समिधमाहरति । य एवास्याग्नौ पादस्तमेव तेन परिक्रीणाति तꣳ संस्कृत्यात्मन्धत्ते स एनमाविशति ॥४॥ अथ यदात्मानं दरिद्रीकृत्येव । अह्रीर्भूत्वा

भिक्षते य एवास्य मृत्यौ पादस्तमेव तेन परिक्रीणाति तꣳ संस्कृत्यात्मन्धत्ते स एनमाविशति ॥५॥ अथ यदाचार्यवचसं करोति । यदाचार्याय कर्म करोति य एवास्याचार्ये पादस्तमेव तेन परिक्रीणाति तꣳ संस्कृत्यात्मन्धत्ते स एनमाविशति ॥६॥ न ह वै स्नात्वा भिक्षेत । अप ह वै स्नात्वा भिक्षां जयत्यप ज्ञातीनामशनायामप पितृणाꣳ स एवं विद्वान्यस्या एव भूयिष्ठꣳ श्लाघेत तां भिक्षेतेत्याहुस्तच्छ्लोक्यमिति स यद्यन्यां भिक्षितव्यां न विन्देदपि स्वामेवाचार्यजायां भिक्षेताथो स्वां मातरं नैनꣳ सप्तम्यभिक्षितातीयात्तमेवं विद्वाꣳसमेवं चरन्तꣳ सर्वे वेदा आविशन्ति यथा ह वाऽअग्निः समिद्धो रोचतऽएवꣳ ह वै स स्नात्वा रोचते य एवं विद्वान्ब्रह्मचर्यं चरति ॥७॥ ब्राह्मणम् ॥६ [३. ३.] ॥ तृतीयोऽध्यायः [६१.] ॥ ॥

उद्दालको हारुणिः । उदीच्यान्वृतो धावयां चकार तस्य निष्क उपाहित आसीतद्ध स्म वै तत्पूर्वेषां वृतानां धावयतामेकधनमुपाहितं भवत्युपवल्हाय बिभ्यतां तान्होदीच्यानां ब्राह्मणान्भीर्विवेद ॥१॥ कौरुपञ्चालो वाऽअयं ब्रह्मा ब्रह्मपुत्रः । यद्वै नोऽयमर्धं न पर्याददीत हन्तैनं ब्रह्मोद्यमाह्वयामहाऽइति केन वीरेणेति स्वैदायनेनेति शौनको ह स्वैदायन आस ॥२॥ ते होचुः । स्वैदायन त्वया वीरेणेमं प्रतिसंयतामहाऽइति स होवाचोपात्र खलु रमताहं न्वेनं वेदानीति तꣳ हाभिप्रपेदे तꣳ हाभिप्रपन्नमभ्युवाद स्वैदायना३ऽइति हो३ गौतमस्य पुत्रेतीतरः प्रतिशुश्राव तꣳ ह तत एव प्रष्टुं दध्रे ॥३॥ स वै गौतमस्य पुत्र वृतो जनं धावयेत् । यो दर्शपूर्णमासयोरष्टौ पुरस्तादाज्यभागान्विद्यात्पञ्च मध्यतो हविर्भागान्षट् प्राजापत्यानष्टाऽउपरिष्टादाज्यभागान् ॥४॥ स वै गौतमस्य पुत्र वृतो जनं धावयेत् । यस्तद्दर्शपूर्णमासयोर्विद्याद्यस्मादिमाः प्रजा अदन्तका जायन्ते यस्मादासां जायन्ते यस्मादासां प्रभिद्यन्ते यस्मादासाꣳ संतिष्ठन्ते यस्मादासां पुनरुत्तमे

वयसि सर्वऽएव प्रभिद्यन्ते यस्मादधरऽएवाग्रे जायन्तेऽथोत्तरे यस्मादणीयाꣳस ए-
वाधरे प्रथीयाꣳस उत्तरे यस्माद्दꣳष्ट्रा वर्षीयाꣳसो यस्मात्समा एव जम्भ्याः ॥५॥
स वै गौतमस्य पुत्र वृतो जनं धावयेत् । यस्तद्दर्शपूर्णमासयोर्विद्याद्यस्मादिमाः
प्रजा लोमशा जायन्ते यस्मादासां पुनरिव श्मश्रूण्यौपपक्ष्याणि दुर्बीरिणानि जा-
यन्ते यस्माच्छीर्षण्येवाग्रे पलितो भवत्यथ पुनरुत्तमे वयसि सर्व एव पलितो भ-
वति ॥६॥ स वै गौतमस्य पुत्र वृतो जनं धावयेत् । यस्तद्दर्शपूर्णमासयोर्विद्या-
द्यस्मात्कुमारस्य रेतः सिक्तं न सम्भवति यस्मादस्य मध्यमे वयसि सम्भवति य-
स्मादस्य पुनरुत्तमे वयसि न सम्भवति ॥७॥ यो गायत्रीꣳ हरिणीम् । ज्योति-
ष्पक्षां यजमानꣳ स्वर्गं लोकमभिवहन्तीं विद्यादिति तस्मै ह निष्कं प्रददावनू-
चानः स्वैदायनासि सुवर्णं वाव सुवर्णविदे ददतीति तꣳ होपगुह्य निश्चक्राम
तꣳ ह पप्रच्छुः किमिवैष गौतमस्य पुत्रोऽभूदिति ॥८॥ स होवाच । यथा ब्रह्मा
ब्रह्मपुत्रो मूर्धास्य विपतेद्य एनमुपवल्हेतेति ते ह तत एव विप्रयुस्तꣳ ह तत
एव समित्पाणिः प्रतिचक्रमऽउप त्वायानीति किमध्येष्यमाण इति यानेव मा प्र-
श्नानप्राक्षीस्तानेव मे विब्रूहीति स होवाचानुपेतायैव तऽएनान्ब्रवाणीति ॥९॥
तस्माऽउ हैतदुवाच । द्वावाघारौ पञ्च प्रयाजा आग्नेय आज्यभागोऽष्टम एतेऽष्टौ
पुरस्तादाज्यभागाः सौम्य आज्यभागो हविर्भागाणां प्रथमो हविर्हि सोम आग्नेयः
पुरोडाशोऽग्नीषोमीय उपाꣳशुयाजोऽग्नीषोमीयः पुरोडाशोऽग्निः स्विष्टकृदेते पञ्च
मध्यतो हविर्भागाः ॥१०॥ प्राशित्रं चेडा च । यच्चाग्नीधऽआदधाति ब्रह्मभागो
यजमानभागोऽन्वाहार्य एते षट् प्राजापत्यास्त्रयोऽनुयाजाश्चत्वारः पत्नीसंयाजाः स-
मिष्टयजुरष्टममेतेऽष्टाऽउपरिष्टादाज्यभागाः ॥११॥ अथ यदपुरोऽनुवाक्यकाः प्रया-
जा भवन्ति । तस्मादिमाः प्रजा अदन्तका जायन्तेऽथ यत्पुरोऽनुवाक्यवन्ति हवीꣳ-
षि भवन्ति तस्मादासां जायन्तेऽथ यदपुरोऽनुवाक्यका अनुयाजा भवन्ति तस्मादा-

सां प्रभिद्यन्तेऽथ यत्पुरोऽनुवाक्यवन्तः पत्नीसंयाजा भवन्ति तस्मादासाꣳ संतिष्ठन्तेऽथ यदपुरोऽनुवाक्यकꣳ समिष्टयजुर्भवति तस्मादासां पुनरुत्तमे वयसि सर्वऽएव प्रभिद्यन्ते ॥१२॥ ॥ शतम् ५७०० ॥ ॥ अथ यदनुवाक्यामनूच्य । याज्यया यजति तस्मादधरऽएवाग्रे जायन्तेऽथोत्तरेऽथ यद्गायत्रीमनूच्य त्रिष्टुभा यजति तस्मादणीयाꣳस एवाधरे प्रथीयाꣳस उत्तरेऽथ यत्प्राञ्चावाघारावाघारयति तस्माद्दꣳष्ट्रा वर्षीयाꣳसोऽथ यत्सछन्दसाविव संयाज्ये भवतस्तस्मात्समा एव जम्भ्याः ॥१३॥ अथ यद्बर्हि स्तृणाति । तस्मादिमाः प्रजा लोमशा जायन्तेऽथ यत्पुनरिव प्रस्तरꣳ स्तृणाति तस्मादासां पुनरिव श्मश्रूण्यौपपद्याणि दुर्बीरिणानि जायन्तेऽथ यत्केवलमेवाग्रे प्रस्तरमनुप्रहरति तस्माच्छीर्षण्येवाग्रे पलितो भवत्यथ यत्सर्वमेव बर्हिरनुप्रहरति तस्मात्पुनरुत्तमे वयसि सर्व एव पलितो भवति ॥१४॥ अथ यदाज्यहविषः प्रयाजा भवन्ति । तस्मात्कुमारस्य रेतः सिक्तं न सम्भवत्युदकमिवैव भवत्युदकमिव ह्याज्यमथ यन्मध्ये यज्ञस्य दध्ना पुरोडाशेनेति यजन्ति तस्मादस्य मध्यमे वयसि सम्भवति द्रप्सीवैव भवति द्रप्सीव हि रेतोऽथ यदाज्यहविष एवानुयाजा भवन्ति तस्मादस्य पुनरुत्तमे वयसि न सम्भवत्युदकमिवैव भवत्युदकमिव ह्याज्यम् ॥१५॥ वेदिरेव गायत्री । तस्यै येऽष्टौ पुरस्तादाज्यभागाः स दक्षिणः पक्षो येऽष्टाऽउपरिष्टादाज्यभागाः स उत्तरः पक्षः सैषा गायत्री हरिणी ज्योतिष्पक्षा यजमानꣳ स्वर्गं लोकमभिवहति य एवमेतद्वेद ॥१६॥ ब्राह्मणम् ॥ ७ [४. १.] ॥ ॥

अथातः स्रुचोरादानस्य । तद्धैतदेके कुशला मन्यमाना दक्षिणेनैव जुहूमाददते सव्येनोपभृतं न तथा कुर्याद्यो हैनं तत्र ब्रूयात्प्रतिप्रतिं न्वाऽअयमध्वर्युर्यजमानस्य द्विषन्तं भ्रातृव्यमकत्प्रत्युद्यामिनमितीश्वरो ह तथैव स्यात् ॥१॥ इत्थमेव कुर्यात् । उभाभ्यामेव पाणिभ्यां जुहूं परिगृह्योपभृत्यधिनिदध्यात्तस्य नोपमीमाꣳसास्ति

तत्पशव्यमायुष्यं तेऽअसꣳशिञ्जयन्नाददीत यत्सꣳशिञ्जयेदयोगक्षेमो यजमानमृच्छेत्त-
स्मादसꣳशिञ्जयन्नाददीत ॥२॥ अथातोऽतिक्रमणस्य । वज्रेण ह वाऽअन्योऽध्वर्यु-
र्यजमानस्य पशून्विधमति वज्रेण ह्यस्माऽअन्य उपसमूहत्येष ह वाऽअध्वर्युर्वज्रेण
यजमानस्य पशून्विधमति य आश्रावयिष्यन्दक्षिणेनातिक्रामति सव्येनाश्राव्याथ
ह्यस्माऽएष उपसमूहति य आश्रावयिष्यन्त्सव्येनातिक्रामति दक्षिणेनाश्राव्यैष
ह्यस्माऽउपसमूहति ॥३॥ अथातो धारणस्य । तद्धैतदेके कुशला मन्यमानाः प्र-
गृह्य बाहू स्रुचौ धारयन्ति न तथा कुर्याद्यो हैनं तत्र ब्रूयाच्छूलौ न्वाऽअयमध्वर्यु-
र्बाहूऽअकृत शूलबाहुर्भविष्यतीतीश्वरो ह तथैव स्यादयं ह्येष मध्यमः प्राणस्त-
स्मादु तमुपन्यच्यैवैव धारयेत् ॥४॥ अथात आश्रावणस्य । षड्ढ वाऽआश्राविता-
नि न्यक्तिर्यगूर्ध्वं कृपणं बहिःश्र्यन्तःश्रि ॥५॥ एतद्ध वै न्यक् । योऽयमुच्चैरादाय
शनैर्निदधाति स यमिच्छेत्पापीयान्त्स्यादिति तस्योच्चैरादाय शनैर्निदध्यात्तेन स पा-
पीयान्भवति ॥६॥ अथ हैतत्तिर्यक् । योऽयं यावतैवादत्ते तावता निदधाति स
यमिच्छेन्नैव श्रेयान्त्स्यान्न पापीयानिति तस्य यावतैवाददीत तावता निदध्यात्तेन
स नैव श्रेयान्न पापीयान्भवति ॥७॥ अथ हैतदूर्ध्वम् । योऽयꣳ शनैरादायोच्चैर्नि-
दधाति स यमिच्छेच्छ्रेयान्त्स्यादिति तस्य शनैरादायोच्चैर्निदध्यात्तेन स श्रेयान्भवति
॥८॥ अथ हैतत्कृपणम् । योऽयमणु दीर्घमस्वरमाश्रावयति यो हैनं तत्र ब्रूया-
त्कृपणं न्वाऽअयमध्वर्युर्यजमानमकर्द्विषतो भ्रातृव्यस्योपावसायिनमितीश्वरो ह त-
थैव स्यात् ॥९॥ अथ हैतद्बहिःश्रि । योऽयमपव्यादायौष्ठाऽउच्चैरस्वरमाश्रावयति
श्रीर्वै स्वरो बाह्यत एव तच्छ्रियं धत्तेऽशनायुको भवति ॥१०॥ अथ हैतदन्तःश्रि
। योऽयꣳ संधायौष्ठाऽउच्चैः स्वरवदाश्रावयति श्रीर्वै स्वरोऽन्तरत एव तच्छ्रियं धत्ते
ऽन्नादो भवति ॥११॥ स वै मन्द्रमिवोरसि । परास्तभ्योभयतोबार्हतमुच्चैरन्ततो
निदध्यात्तस्य नोपमीमाꣳसास्ति तत्पशव्यमायुष्यम् ॥१२॥ अथातो होमस्य । तद्धै-

तदेके कुशला मन्यमानाः प्राचीं स्रुचमुपावहृत्य हुत्वा पर्याहृत्योपभृत्यधिनिदधति न तथा कुर्याद्यो हैनं तत्र ब्रूयादनुयुवं न्वा ऽअयमध्वर्युर्यजमानमकद्विषतो भ्रातृव्यस्यान्ववसायिनमितीश्वरो ह तथैव स्यात् ॥१३॥ पार्श्वत उ हैके । स्रुचमुपावहृत्य हुत्वा पर्याहृत्योपभृत्यधिनिदधति न तथा कुर्याद्यो हैनं तत्र ब्रूयादतीर्थेन न्वा ऽअयमध्वर्युराहुतीः प्रारौत्सीत्सं वा शरिष्यते घुणिर्वा भविष्यतीतीश्वरो ह तथैव स्यात् ॥१४॥ इत्थमेव कुर्यात् । प्राचीमेव स्रुचमुपावहृत्य हुत्वा तेनैवाधिहृत्योपभृत्यधिनिदध्यात्तस्य नोपमीमांसास्ति तत्पशव्यमायुष्यम् ॥१५॥ प्रदग्धाहुतिर्ह वा ऽअन्यो ऽध्वर्युः । आहुतीर्ह्यन्यः संतर्पयत्येष ह वै प्रदग्धाहुतिरध्वर्युर्यो ऽयमाज्यं हुत्वावदानानि जुहोत्येतं ह वै तद्दृश्यमाना वागभ्युवाद प्रदग्धाहुतिर्न्वा ऽअयमध्वर्युरित्यथ हैना एष संतर्पयति यो ऽयमाज्यं हुत्वावदानानि जुहोत्यथ पुनरन्तत आज्येनाभिजुहोत्येष हैनाः संतर्पयति तासां संतृप्तानां देवा हिरण्मयांश्चमसान्पूरयन्ते ॥१६॥ तदु होवाच याज्ञवल्क्यः । यद्वा ऽउपस्तीर्यावदायाभिघारयति तदेवैनाः संतर्पयति तासां संतृप्तानां देवा हिरण्मयांश्चमसान्पूरयन्ते ऽयस्थूणगृहपतीनां वै शौल्बायनो ऽध्वर्युरास ॥१७॥ स होवाच । इदमहेदं सत्त्रं कृशपश्वल्पाज्यमथायं गृहपतिरस्मीति मन्यत ऽइति ॥१८॥ स होवाच । अध्वर्यवा वै नो ऽक्रुद्ध एते वै ते स्रुचौ ये त्वं संवत्सरं नाशक आदातुं यद्वै त्वाहमेतयोरनुशिष्यां प्र प्रजया पशुभिर्जायेथा अभि स्वर्गं लोकं वहेरिति ॥१९॥ स होवाच । उप वायानीति स होवाचात्र वाव खल्वर्हसि यो नः संवत्सरे ऽध्वर्युरभूरनुपेतायैव त ऽएतद्ब्रवाणीति तस्मा ऽउ हैतदेव स्रुचोरादानमुवाच यदेतद्व्याख्याम तस्मादेवंविदमेवाध्वर्युं कुर्वीत नानेवंविदम् ॥२०॥ ब्राह्मणम् ॥८ [४. २.]

॥ द्वितीयः प्रपाठकः ॥ कण्डिकासंख्या १०४ ॥ ॥

प्रजापतिर्वै प्रजाः सृजमानो ऽतप्यत । तस्माच्छ्रान्तात्तपानाच्छ्रीरुदक्रामत्सा दीप्य-

माना भ्राजमाना लेलायन्त्यतिष्ठत्तां दीप्यमानां भ्राजमानां लेलायन्तीं देवा अभ्य-
ध्यायन् ॥१॥ ते प्रजापतिमब्रुवन् । हनामेमामिदमस्या ददामहाऽ३इति स होवाच
स्त्री वाऽएषा यच्छ्रीर्न वै स्त्रियं घ्नन्त्युत वाऽअस्या जीवन्त्याऽएवाददतऽइति ॥२॥
तस्या अग्निरन्नाद्यमादत्त । सोमो राज्यं वरुणः साम्राज्यं मित्रः क्षत्रमिन्द्रो बलं
बृहस्पतिर्ब्रह्मवर्चसꣳ सविता राष्ट्रं पूषा भगꣳ सरस्वती पुष्टिं त्वष्टा रूपाणि ॥३॥
सा प्रजापतिमब्रवीत् । आ वै मऽइदमदिषतेति स होवाच यज्ञेनैनान्पुनर्याच-
स्वेति ॥४॥ सैतां दशहविषमिष्टिमपश्यत् । आग्नेयमष्टाकपालं पुरोडाशꣳ सौम्यं
चरुं वारुणं दशकपालं पुरोडाशं मैत्रं चरुमैन्द्रमेकादशकपालं पुरोडाशं बार्हस्प-
त्यं चरुꣳ सावित्रं द्वादशकपालं वाष्टाकपालं वा पुरोडाशं पौष्णं चरुꣳ सारस्वतं
चरुं त्वाष्ट्रं दशकपालं पुरोडाशम् ॥५॥ तानेतयानुवाक्ययान्ववदत् । अग्निः सो-
मो वरुणो मित्र इन्द्रो बृहस्पतिः सविता यः सहस्री पूषा नो गोभिरवसा
सरस्वती त्वष्टा रूपाणि समनक्तु यज्ञैरिति ते प्रत्युपातिष्ठन्त ॥६॥ तानेतया या-
ज्यया । परस्तात्प्रतिलोमं प्रत्यैत्त्वष्टा रूपाणि ददती सरस्वती पूषा भगꣳ सविता
मे ददातु । बृहस्पतिर्दददिन्द्रो बलं मे मित्रः क्षत्रं वरुणः सोमोऽअग्निरिति ते
पुनर्दानायाध्रियन्त ॥७॥ सैतानुपहोमानपश्यत् । अग्निरन्नादोऽन्नपतिरन्नाद्यमस्मि-
न्यज्ञे मयि दधातु स्वाहेत्याहुतिमेवादायाग्निरुदक्रामत्पुनरस्याऽअन्नाद्यमददात् ॥८॥
सोमो राजा राजपतिः । राज्यमस्मिन्यज्ञे मयि दधातु स्वाहेत्याहुतिमेवादाय सोम
उदक्रामत्पुनरस्यै राज्यमददात् ॥९॥ वरुणः सम्राट् सम्राट्पतिः । साम्राज्यमस्मि-
न्यज्ञे मयि दधातु स्वाहेत्याहुतिमेवादाय वरुण उदक्रामत्पुनरस्यै साम्राज्यमददात्
॥१०॥ मित्रः क्षत्रं क्षत्रपतिः । क्षत्रमस्मिन्यज्ञे मयि दधातु स्वाहेत्याहुतिमेवादाय
मित्र उदक्रामत्पुनरस्यै क्षत्रमददात् ॥११॥ इन्द्रो बलं बलपतिः । बलमस्मिन्यज्ञे
मयि दधातु स्वाहेत्याहुतिमेवादायेन्द्र उदक्रामत्पुनरस्यै बलमददात् ॥१२॥ बृह-

स्पतिर्ब्रह्म ब्रह्मपतिः । ब्रह्मवर्चसमस्मिन्यज्ञे मयि दधातु स्वाहेत्याकूतिमेवादाय बृहस्पतिरुदक्रामत्पुनरस्यै ब्रह्मवर्चसमददात् ॥१३॥ सविता राष्ट्रꣳ राष्ट्रपतिः । राष्ट्रमस्मिन्यज्ञे मयि दधातु स्वाहेत्याकूतिमेवादाय सवितोदक्रामत्पुनरस्यै राष्ट्रमददात् ॥१४॥ पूषा भगं भगपतिः । भगमस्मिन्यज्ञे मयि दधातु स्वाहेत्याकूतिमेवादाय पूषोदक्रामत्पुनरस्यै भगमददात् ॥१५॥ सरस्वती पुष्टिं पुष्टिपतिः । पुष्टिमस्मिन्यज्ञे मयि दधातु स्वाहेत्याकूतिमेवादाय सरस्वत्युदक्रामत्पुनरस्यै पुष्टिमददात् ॥१६॥ त्वष्टा रूपाणां रूपकृद्रूपपतिः । रूपेण पशूनस्मिन्यज्ञे मयि दधातु स्वाहेत्याकूतिमेवादाय त्वष्टोदक्रामत्पुनरस्यै रूपेण पशूनददात् ॥१७॥ ता वाऽएताः । दश देवता दश हवीꣳषि दशाहुतयो दश दक्षिणा दशंदशिनी विराट् श्रीर्विराट् श्रियाꣳ हैतद्विराज्यन्नाद्ये प्रतितिष्ठति ॥१८॥ तस्यै पञ्चदश सामिधेन्यो भवन्ति । उपाꣳशु देवता यजति पञ्च प्रयाजा भवन्ति त्रयोऽनुयाजा एकꣳ समिष्टयजुः पुष्टिमन्तावाज्यभागावग्निना रयिमश्नवत्पोषमेव दिवे-दिवे यशसं वीरवत्तमम् ॥ गयस्फानो अमीवहा वसुवित्पुष्टिवर्धनः सुमित्रः सोम नो भवेति ॥ सहस्रवत्यौ संयाज्ये नू नो रास्व सहस्रवत्तोकवत्पुष्टिमद्वसु द्युमदग्ने सुवीर्यं वर्षिष्ठमनुपक्षितम् ॥ उत नो ब्रह्मन्नविष उक्थेषु देवहूतमः शं नः शोचा मरुद्वृधोऽग्ने सहस्रसातम इति ॥१९॥ ताꣳ हैतां गोतमो राहूगणः । विदां चकार सा ह जनकं वैदेहं प्रत्युत्ससाद ताꣳ हाङ्गजिद्ब्राह्मणेष्वन्विवेष तामु ह याज्ञवल्क्ये विवेद स होवाच सहस्रं भो याज्ञवल्क्य दद्मो यस्मिन्वयं त्वयि मित्रविन्दामन्वविदामेति विन्दते मित्रꣳ राष्ट्रमस्य भवत्यप पुनर्मृत्युं जयति सर्वमायुरेति य एवं विद्वानेतयेष्ट्या यजते यो वैतदेवं वेद ॥२०॥ ब्राह्मणम् ॥१[४.३.]॥॥

अथातो हविषः समृद्धिः । षड् वै ब्रह्मणो द्वारोऽग्निर्वायुरापश्चन्द्रमा विद्युदादित्यः ॥१॥ स य उपदग्धेन हविषा यजते । अग्निना ह स ब्रह्मणो द्वारेण

प्रतिपद्यते सोऽग्निना ब्रह्मणो द्वारेण प्रतिपद्य ब्रह्मणः सायुज्यꣳ सलोकतां ज-
यति ॥२॥ अथ यो विपतितेन हविषा यजते । वायुना ह स ब्रह्मणो द्वारेण
प्रतिपद्यते स वायुना ब्रह्मणो द्वारेण प्रतिपद्य ब्रह्मणः सायुज्यꣳ सलोकतां ज-
यति ॥३॥ अथ योऽशृतेन हविषा यजते । अद्भिर्ह स ब्रह्मणो द्वारेण प्रतिप-
द्यते सोऽद्भिर्ब्रह्मणो द्वारेण प्रतिप° ॥४॥ अथ य उपरक्तेन हविषा यजते । च-
न्द्रमसा ह स ब्रह्मणो द्वारेण प्रतिपद्यते स चन्द्रमसा ब्रह्मणो द्वारेण प्रतिप°
॥५॥ अथ यो लोहितेन हविषा यजते । विद्युता ह स ब्रह्मणो द्वारेण प्रति-
पद्यते स विद्युता ब्रह्मणो द्वारेण प्रतिप° ॥६॥ अथ यः सुशृतेन हविषा यजते
। आदित्येन ह स ब्रह्मणो द्वारेण प्रतिपद्यते स आदित्येन ब्रह्मणो द्वारेण प्र-
तिपद्य ब्रह्मणः सायुज्यꣳ सलोकतां जयति सैषा हविषः समृद्धिः स यो हैवमे-
ताꣳ हविषः समृद्धिं वेद सर्वसमृद्धेन हैवास्य हविषेष्टं भवति ॥७॥ अथातो
यज्ञस्य समृद्धिः । यद्वै यज्ञस्य न्यूनं प्रजननमस्य तदथ यदतिरिक्तं पशव्यमस्य त-
दथ यत्संकसुकꣳ श्रियाऽअस्य तदथ यत्सम्पन्नꣳ स्वर्ग्यमस्य तत् ॥८॥ स यदि म-
न्येत । न्यूनं मे यज्ञोऽभूदिति प्रजननं मऽएतत्प्रजनिष्यऽइत्येव तदुपासीत ॥९॥
अथ यदि मन्येत । अतिरिक्तं मे यज्ञोऽभूदिति पशव्यं मऽएतत्पशुमान्भविष्यामी-
त्येव तदुपासीत ॥१०॥ अथ यदि मन्येत । संकसुकं मे यज्ञोऽभूदिति श्रियै मऽए-
तदा मा श्रीस्तेजसा यशसा ब्रह्मवर्चसेन परिवृता गमिष्यतीत्येव तदुपासीत
॥११॥ अथ यदि मन्येत । सम्पन्नं मे यज्ञोऽभूदिति स्वर्ग्यं मऽएतत्स्वर्गलोको भ-
विष्यामीत्येव तदुपासीत सैषा यज्ञस्य समृद्धिः स यो हैवमेतां यज्ञस्य समृद्धिं
वेद सर्वसमृद्धेन हैवास्य यज्ञेनेष्टं भवति ॥१२॥ ब्राह्मणम् ॥२ [४. ४.] ॥ च-
तुर्थोऽध्यायः [७०.] ॥ ॥

उर्वशी हाप्सराः । पुरूरवसमैडं चकमे तꣳ ह विन्दमानोवाच त्रिः स्म माह्नो

वैतसेन दण्डेन हतादकामाꣳ स्म मा निपद्यासै मो स्म त्वा नग्नं दर्शमेष वै न स्त्रीणामुपचार इति ॥१॥ सा हास्मिन्ज्योगुवास । अपि हास्माद्गर्भिण्यास तावज्ज्योग्घास्मिन्नुवास ततो ह गन्धर्वाः समूदिरे ज्योग्वाऽइयमुर्वशी मनुष्येष्ववात्सीदुपजानीत यथेयं पुनरागच्छेदिति तस्यै हाविर्द्व्युरणा शयनऽउपबद्धास ततो ह गन्धर्वा अन्यतरमुरणं प्रमेथुः ॥२॥ सा होवाच । अवीरऽइव बत मेऽजनऽइव पुत्रꣳ हरन्तीति द्वितीयं प्रमेथुः सा ह तथैवोवाच ॥३॥ अथ हायमीक्षां चक्रे । कथं नु तदवीरं कथमजनꣳ स्याद्यत्राहꣳ स्यामिति स नग्न एवानूत्पपात चिरं तन्मेने यद्वासः पर्यधास्यत ततो ह गन्धर्वा विद्युतं जनयां चक्रुस्तं यथा दिवैवं नग्नं ददर्श ततो हैवेयं तिरोबभूव पुनरैमीत्येत्तिरोभूताꣳ स आध्या जल्पन्कुरुक्षेत्रꣳ समया चचारान्यतःप्लक्षेति बिसवती तस्यै हाध्यन्तेन वव्राज तद्ध ता अप्सरस आतयो भूत्वा परिपुप्लुविरे ॥४॥ तꣳ हेयं ज्ञात्वोवाच । अयं वै स मनुष्यो यस्मिन्नहमवात्समिति ता होचुस्तस्मै वाऽआविरसामेति तथेति तस्मै हाविरासुः ॥५॥ ताꣳ हायं ज्ञात्वाभिपरोवाद । हये जाये मनसा तिष्ठ घोरे वचाꣳसि मिश्रा कृणवावहै नु न नौ मन्त्रा अनुदितास एते मयस्करन्परतरे चनाहन्नित्युप नु रम सं नु वदावहाऽइति हैवैनां तदुवाच ॥६॥ तꣳ हेतरा प्रत्युवाच । किमेता वाचा कृणवा तवाहं प्राक्रमिषमुषसामग्रियेव पुरूरवः पुनरस्तं परेहि दुरापना वात-इवाहमस्मीति न वै त्वं तदकरोर्यदहमब्रवं दुरापा वाऽअहं त्वयेतर्ह्यस्मि पुनर्गृहानिहीति हैवैनं तदुवाच ॥७॥ अथ हायं परिद्यून उवाच । सुदेवोऽअद्य प्रपतेदनावृत्परावतं परमां गन्तवाऽउ अधा शयीत निर्ऋतेरुपस्थेऽधैनं वृका रभसासोऽअद्युरिति सुदेवोऽद्योद्वा बध्नीत प्र वा पतेत्तदेनं वृका वा श्वानो वाद्युरिति हैव तदुवाच ॥८॥ तꣳ हेतरा प्रत्युवाच । पुरूरवो मा मृथा मा प्रपतो मा त्वा वृकासोऽअशिवास उ क्षन् न वै स्त्रैणानि सख्यानि

सन्ति सालावृकाणाꣳ हृदयान्येतेति मैतदादृथा न वै स्त्रैणꣳ सख्यमस्ति पुनर्गृहानिहीति हैवैनं तदुवाच ॥ ९ ॥ यद्विरूपाचरम् । मर्त्येष्ववसꣳ रात्रीः शरदश्चतस्रः घृतस्य स्तोकꣳ सकृदह्न आश्नां तादेवेदं तातृपाणा चरामीति तदेतदुक्तप्रत्युक्तं पञ्चदशर्चं बह्वृचाः प्राहुस्तस्यै ह हृदयमाव्ययां चकार ॥ १० ॥ सा होवाच । संवत्सरतमीꣳ रात्रिमागच्छतात्तन्म ऽ एकाꣳ रात्रिमन्ते शयितासे जात उ ते ऽयं तर्हि पुत्रो भवितेति स ह संवत्सरतमीꣳ रात्रिमाजगामेद्धिरण्यविमितानि ततो हैनमेकमूचुरेतत्प्रपद्यस्वेति तद्धास्मै तामुपप्रजिघ्युः ॥ ११ ॥ सा होवाच । गन्धर्वा वै ते प्रातर्वरं दातारस्तं वृणासा ऽ इति तं वै मे त्वमेव वृणीष्वेति युष्माकमेवैको ऽसानीति ब्रूतादिति तस्मै ह प्रातर्गन्धर्वा वरं ददुः स होवाच युष्माकमेवैको ऽसानीति ॥ १२ ॥ ते होचुः । न वै सा मनुष्येष्वग्नेर्यज्ञिया तनूरस्ति ययेष्ट्वास्माकमेकः स्यादिति तस्मै ह स्थाल्यामोप्याग्निं प्रददुरनेनेष्ट्वास्माकमेको भविष्यसीति तं च ह कुमारं चादायावव्राज सो ऽरण्य ऽ एवाग्निं निधाय कुमारेणैव ग्राममेयाय पुनरैमीत्येत्तिरोभूतं यो ऽग्निरश्वत्थं तं या स्थाली शमीं ताꣳ स ह पुनर्गन्धर्वानेयाय ॥ १३ ॥ ते होचुः । संवत्सरं चातुष्प्राश्यमोदनं पच स एतस्यैवाश्वत्थस्य तिस्रस्तिस्रः समिधो घृतेनान्वज्य समिद्वतीभिर्घृतवतीभिर्ऋग्भिरभ्याधत्तात्स यस्ततो ऽग्निर्जनिता स एव स भवितेति ॥ १४ ॥ ते होचुः । परो ऽक्षमिव वा ऽ एतदाश्वत्थीमेवोत्तरारणिं कुरुष्व शमीमयीमधरारणिꣳ स यस्ततो ऽग्निर्जनिता स एव स भवितेति ॥ १५ ॥ ते होचुः । परो ऽक्षमिव वा ऽ एतदाश्वत्थीमेवोत्तरारणिं कुरुष्वाश्वत्थीमधरारणिꣳ स यस्ततो ऽग्निर्जनिता स एव स भवितेति ॥ १६ ॥ स आश्वत्थीमेवोत्तरारणिं चक्रे । आश्वत्थीमधरारणिꣳ स यस्ततो ऽग्निर्जज्ञे स एव स आस तेनेष्ट्वा गन्धर्वाणामेक आस तस्मादाश्वत्थीमेवोत्तरारणिं कुर्वीताश्वत्थीमधरारणिꣳ स यस्ततो ऽग्निर्जायते स एव स भवति तेनेष्ट्वा गन्धर्वाणामेको भवति

॥१७॥ ब्राह्मणम् ॥३ [५. १.] ॥ ॥

प्रजापतिर्ह चातुर्मास्यैरात्मानं विदधे । स इममेव दक्षिणं बाहुं वैश्वदेवꣳ हविरकुरुत तस्यायमेवाङ्गुष्ठ आग्नेयꣳ हविरिदꣳ सौम्यमिदꣳ सावित्रꣳ ॥१॥ स वै वर्षिष्ठः पुरोडाशो भवति । तस्मादियमासां वर्षिष्ठेदꣳ सारस्वतमिदं पौष्णमथ य एष उपरिष्टाद्भसत्तस्य संधिस्तन्मारुतमिदं वैश्वदेवं दोर्द्यावापृथिवीयं तद्वाऽअनिरुक्तं भवति तस्मात्तदनिरुक्तम् ॥२॥ अयमेव दक्षिण ऊरुर्वरुणप्रघासाः । तस्य यानि पञ्च हवीꣳषि समायीनि ता इमाः पञ्चाङ्गुलयः कुल्फावेवैन्द्राग्नꣳ हविस्तद्धि द्विदेवत्यं भवति तस्मादिमौ द्वौ कुल्फाविदं वारुणमिदं मारुतमनूकं कायस्तद्वाऽअनिरुक्तं भवति तस्मात्तदनिरुक्तम् ॥३॥ मुखमेवास्यानीकवतीष्टिः । मुखꣳ हि प्राणानामनीकमुरः सांतपनीयोरसा हि समिव तप्यतऽउदरं गृहमेधीया प्रतिष्ठा वाऽउदरं प्रतिष्ठित्याऽएव शिश्नान्येवास्य क्रैडिनꣳ हविः शिश्नैर्हि क्रीडतीवायमेवावाङ् प्राण आदित्येष्टिः ॥४॥ अयमेवोत्तर ऊरुर्महाहविः । तस्य यानि पञ्च हवीꣳषि समायीनि ता इमाः पञ्चाङ्गुलयः कुल्फावेवैन्द्राग्नꣳ हविस्तद्धि द्विदेवत्यं भवति तस्मादिमौ द्वौ कुल्फाविदं माहेन्द्रमिदं वैश्वकर्मणं तद्वाऽअनिरुक्तं भवति तस्मात्तदनिरुक्तमथ यदिदमन्तरुदरे तत्पितृयज्ञस्तद्वाऽअनिरुक्तं भवति तस्मात्तदनिरुक्तम् ॥५॥ अयमेवोत्तरो बाहुः शुनासीरीयम् । तस्य यानि पञ्च हवीꣳषि समायीनि ता इमाः पञ्चाङ्गुलयोऽथ य एष उपरिष्टाद्भसत्तस्य संधिस्तच्छुनासीरीयमिदं वायव्यं दोः सौर्यं तद्वाऽअनिरुक्तं भवति तस्मात्तदनिरुक्तम् ॥६॥ तानि वाऽएतानि । चातुर्मास्यानि त्रिषंधीनि द्विसमस्तानि तस्मादिमानि पुरुषस्याङ्गानि त्रिषंधीनि द्विसमस्तानि तेषां वै चतुर्णां द्वयोस्त्रीणि-त्रीणि हवीꣳष्यनिरुक्तानि भवन्ति द्वे-द्वे द्वयोः ॥७॥ तेषां वै चतुर्धाग्निं मन्थन्ति । तस्माच्चतुर्भिरङ्गैरायुते द्वयोः प्रणयन्ति तस्माद्द्वाभ्यामेत्येवमु ह प्रजापतिश्चातुर्मास्यैरात्मानं विदधे

तथोऽएवैवंविद्यजमानश्चातुर्मास्यैरात्मानं विधत्ते ॥८॥ तदाहुः । सर्वगायत्रं वैश्वदेवꣳ हविः स्यात्सर्वं त्रैष्टुभं वरुणप्रघासाः सर्वं जागतं महाहविः सर्वानुष्टुभꣳ शुनासीरीयं चतुष्टोमस्याप्त्याऽइति तदु तथा न कुर्याद्यद्वाऽएतान्यभिसम्पद्यन्ते तेनैवास्य स काम उपाप्तो भवति ॥९॥ तानि वाऽएतानि । चातुर्मास्यानि द्वाषष्टानि त्रीणि शतानि बृहत्यः सम्पद्यन्ते तदेभिः संवत्सरं च महाव्रतं चाप्नोत्यथो द्विप्रतिष्ठो वाऽअयं यजमानो यजमानमेवैतत्स्वर्गे लोकऽआयातयति प्रतिष्ठापयति ॥१०॥ ब्राह्मणम् ॥४ [५. २.] ॥ ॥

शौचेयो ह प्राचीनयोग्यः । उद्दालकमारुणिमाजगाम ब्रह्मोद्यमग्निहोत्रं विविदिषामीति ॥१॥ स होवाच । गौतम का तेऽग्निहोत्री को वत्सः किमुपसृष्टा किꣳ संयोजनं किं दुह्यमानं किं दुग्धं किमाह्रियमाणं किमधिश्रितं किमवज्योत्यमानं किमद्भिः प्रत्यानीतं किमुद्वास्यमानं किमुद्वासितं किमुन्नीयमानं किमुन्नीतं किमुद्यतं किꣳ ह्रियमाणं किं निगृहीतम् ॥२॥ काꣳ समिधमादधासि का पूर्वाहुतिः किमुपासीषदः किमपैद्विष्ठाः कोत्तराहुतिः ॥३॥ किꣳ हुत्वा प्रकम्पयसि । किꣳ स्रुचं परिमृज्य कूर्चे न्यमार्जीः किं द्वितीयं परिमृज्य दक्षिणतो हस्तमुपासीषदः किं पूर्वं प्राशीः किं द्वितीयं किमुत्सृप्यापाः किꣳ स्रुच्यप आनीय निरौक्षीः किं द्वितीयं किं तृतीयमेतां दिशमुदौक्षीः किं जघनेनाहवनीयमपो न्यनैषीः किꣳ समतिष्ठिपो यदि वाऽएतद्विद्वानग्निहोत्रमहौषीरथ ते हुतं यद्यु वाऽअविद्वानहुतमेव तऽइति ॥४॥ स होवाच । इडैव मे मानव्यग्निहोत्री वायव्यो वत्सः सजूरुपसृष्टा विराट् संयोजनमाश्विनं दुह्यमानं वैश्वदेवं दुग्धं वायव्यमाह्रियमाणमाग्नेयमधिश्रितमैन्द्राग्नमवज्योत्यमानं वारुणमद्भिः प्रत्यानीतं वायव्यमुद्वास्यमानं द्यावापृथिव्यमुद्वासितमाश्विनमुन्नीयमानं वैश्वदेवमुन्नीतं महादेवायोद्यतं वायव्यꣳ ह्रियमाणं वैष्णवं निगृहीतम् ॥५॥ अथ याꣳ समिधमादधामि । आहुतीनाꣳ सा प्र-

तिष्ठा या पूर्वाहुतिर्देवांस्तयाप्रैषं यदुपासीषदं बार्हस्पत्यं तद्यदवैक्षिषीमं चामुं च लोकौ तेन समधां योत्तराहुतिर्मां तया स्वर्गे लोकेऽधाम् ॥६॥ अथ यद्हुत्वा प्रकम्पयामि । वायव्यं तद्यत्स्रुचं परिमृज्य कूर्चे न्यमार्क्षिषमोषधिवनस्पतींस्तेनाप्रैषं यद्द्वितीयं परिमृज्य दक्षिणतो हस्तमुपासीषदं पितॄंस्तेनाप्रैषं यत्पूर्वं प्राशिषं मां तेनाप्रैषं यद्द्वितीयं प्रजां तेनाथ यदुत्सृप्यापां पशूंस्तेनाप्रैषं यत्स्रुच्यप आनीय निरौक्षिषᳪं सर्पदेवजनांस्तेनाप्रैषं यद्द्वितीयं गन्धर्वाप्सरसस्तेनाथ यत्तृतीयमेतां दिशमुदौक्षिषᳪं स्वर्गस्य लोकस्य तेन द्वारं व्यवारिषं यज्जघनेनाहवनीयमपो न्यनैषमस्मै लोकाय तेन वृष्टिमदां यत्समतिष्ठिपं यत्पृथिव्या ऊनं तत्तेनापूपुरमित्येतन्नौ भगवन्त्सहेति होवाच ॥७॥ शौचेयो ज्ञप्तः । प्रक्ष्यामि त्वेव भगवन्तमिति पृच्छेव प्राचीनयोग्येति स होवाच यस्मिन्काल उद्धृतास्तेऽग्नयः स्युरुपावहृतानि पात्राणि होष्यन्त्स्या अथ त आहवनीयोऽनुगच्छेद्वेत्थ तद्द्वयं यदत्र जुह्वतो भवतीति वेदेति होवाच पुरा चिरादस्य ज्येष्ठः पुत्रो म्रियेत यस्यैतदविदितᳪं स्याद्विद्याभिस्त्वेवाहमतारिषमिति किं विदितं का प्रायश्चित्तिरिति प्राण उदानमप्यगादिति गार्हपत्य आहुतिं जुहुयाᳪं सैव प्रायश्चित्तिर्न तदागः कुर्वीयेत्येतन्नौ भगवन्त्सहेति होवाच ॥८॥ शौचेयो ज्ञप्तः । प्रक्ष्यामि त्वेव भगवन्तमिति पृच्छेव प्राचीनयोग्येति स होवाच यत्र त एतस्मिन्नेव काले गार्हपत्योऽनुगच्छेद्वेत्थ तद्द्वयं यदत्र जुह्वतो भवतीति वेदेति होवाच पुरा चिरादस्य गृहपतिर्म्रियेत यस्यैतदविदितᳪं स्याद्विद्याभिस्त्वेवाहमतारिषमिति किं विदितं का प्रायश्चित्तिरित्युदानः प्राणमप्यगादित्याहवनीय आहुतिं जुहुयाᳪं सैव प्रायश्चित्तिर्न तदागः कुर्वीयेत्येतन्नौ भगवन्त्सहेति होवाच ॥९॥ शौचेयो ज्ञप्तः । प्रक्ष्यामि त्वेव भगवन्तमिति पृच्छेव प्राचीनयोग्येति स होवाच यत्र त एतस्मिन्नेव कालेऽन्वाहार्यपचनोऽनुगच्छेद्वेत्थ तद्द्वयं यदत्र जुह्वतो भवतीति वेदेति होवाच पुरा चिरादस्य सर्वे पशवो

म्रियेरन्यस्यैतदविदितꣳ स्याद्विद्याभिस्त्वेवाह्मतारिषमिति किं विदितं का प्रायश्चि-
त्तिरिति व्यान उदानमप्यगादिति गार्हपत्यऽआहुतिं जुहुयाꣳ सैव प्रायश्चित्तिर्न
तदागः कुर्वीयेत्येतन्नौ भगवन्त्सहेति होवाच ॥१०॥ शौचेयो ह्नप्तः । प्रक्ष्यामि
त्वेव भगवन्तमिति पृच्छेव प्राचीनयोग्येति स होवाच यत्र तऽएतस्मिन्नेव काले
सर्वेऽग्नयोऽनुगच्छेयुर्वेत्थ तद्भयं यदत्र जुह्वतो भवतीति वेदेति होवाच पुरा चि-
रादस्यादायादं कुलꣳ स्याद्यस्यैतदविदितꣳ स्याद्विद्याभिस्त्वेवाह्मतारिषमिति किं
विदितं का प्रायश्चित्तिरिति पुरा चिरादग्निं मथित्वा यां दिशं वातो वायात्तां दि-
शमाहवनीयमुद्धृत्य वायव्यामाहुतिं जुहुयाꣳ स विद्याꣳ समृद्धं मेऽग्निहोत्रꣳ सर्व-
देवत्यं वायुꣳ ह्येव सर्वाणि भूतान्यपियन्ति वायोः पुनर्विसृज्यन्ते सैव प्रायश्चि-
त्तिर्न तदागः कुर्वीयेत्येतन्नौ भगवन्त्सहेति होवाच ॥११॥ शौचेयो ह्नप्तः । प्र-
क्ष्यामि त्वेव भगवन्तमिति पृच्छेव प्राचीनयोग्येति स होवाच यत्र तऽएतस्मिन्नेव
काले निवाते सर्वेऽग्नयोऽनुगच्छेयुर्वेत्थ तद्भयं यदत्र जुह्वतो भवतीति वेदेति हो-
वाचाप्रियमेवास्मिंल्लोके पश्येताप्रियममुष्मिन्यस्यैतदविदितꣳ स्याद्विद्याभिस्त्वेवाह्-
मतारिषमिति किं विदितं का प्रायश्चित्तिरिति पुरा चिरादग्निं मथित्वा प्राञ्चमाह-
वनीयमुद्धृत्य जघनेनाहवनीयमुपविश्याह्मैवैनत्पिबेयꣳ स विद्याꣳ समृद्धं मेऽग्नि-
होत्रꣳ सर्वदेवत्यं ब्राह्मणꣳ ह्येव सर्वाणि भूतान्यपियन्ति ब्राह्मणात्पुनर्विसृज्यन्ते
सैव प्रायश्चित्तिर्न तदागः कुर्वीयेत्यथ वाऽअहमेतन्नावेदिषमिति होवाच ॥१२॥
शौचेयो ह्नप्तः । इमानि समित्काष्ठान्युपायानि भगवन्तमिति स होवाच यदेवं
नावक्ष्यो मूर्धा ते व्यपतिष्यदेह्युपेहीति तथेति तꣳ होपनिन्ये तस्मै हैताꣳ शो-
कतरां व्याहृतिमुवाच यत्सत्यं तस्मादु सत्यमेव वदेत् ॥१३॥ ब्राह्मणम् ॥५
[५. ३.] ॥ ॥

ब्रह्मचर्यमागामित्याह । ब्रह्मणऽएवैतदात्मानं निवेदयति ब्रह्मचार्यसानीत्याह

ब्रह्मणऽएवैतदात्मानं परिददात्यथैनमाह को नामासीति प्रजापतिर्वै कः प्राजापत्यमेवैनं तत्कृत्वोपनयते ॥१॥ अथास्य हस्तं गृह्णाति । इन्द्रस्य ब्रह्मचार्यस्यग्निराचार्यस्तवाहमाचार्यस्तवासावित्येते वै श्रेष्ठे बलिष्ठे देवते एताभ्यामेवैनꣳ श्रेष्ठाभ्यां बलिष्ठाभ्यां देवताभ्यां परिददाति तथा हास्य ब्रह्मचारी न कां चनार्तिमार्छति न स य एवं वेद ॥२॥ अथैनं भूतेभ्यः परिददाति । प्रजापतये त्वा परिददामि देवाय त्वा सवित्रे परिददामीत्येते वै श्रेष्ठे वर्षिष्ठे देवतेऽएताभ्यामेवैनꣳ श्रेष्ठाभ्यां वर्षिष्ठाभ्यां देवताभ्यां परिददाति तथा हास्य ब्रह्मचारी न कां चनार्तिमार्छति न स य एवं वेद ॥३॥ अद्भ्यस्त्वौषधीभ्यः परिददामीति । तदेनमद्भ्यश्चौषधिभ्यश्च परिददाति द्यावापृथिवीभ्यां त्वा परिददामीति तदेनमाभ्यां द्यावापृथिवीभ्यां परिददाति ययोरिदꣳ सर्वमधि विश्वेभ्यस्त्वा भूतेभ्यः परिददाम्यरिष्ट्याऽइति तदेनꣳ सर्वेभ्यो भूतेभ्यः परिददात्यरिष्ट्यै तथा हास्य ब्रह्मचारी न कां चनार्तिमार्छति न स य एवं वेद ॥४॥ ॥ शतम् ५८०० ॥ ॥ ब्रह्मचार्यसीत्याह । ब्रह्मणऽएवैनं तत्परिददात्यपोऽशानेत्यमृतं वाऽआपोऽमृतमशानेत्येवैनं तदाह कर्म कुर्विति वीर्यं वै कर्म वीर्यं कुर्वित्येवैनं तदाह समिधमाधेहीति समिन्त्स्वात्मानं तेजसा ब्रह्मवर्चसेनेत्येवैनं तदाह मा सुषुप्था इति मा मृथा इत्येवैनं तदाहापोऽशानेत्यमृतं वाऽआपोऽमृतमशानेत्येवैनं तदाह तदेनमुभयतोऽमृतेन परिगृह्णाति तथा हास्य ब्रह्मचारी न कां चनार्तिमार्छति न स य एवं वेद ॥५॥ अथास्मै सावित्रीमन्वाह । ताꣳ ह स्मैतां पुरा संवत्सरेऽन्वाहुः संवत्सरसंमिता वै गर्भाः प्रजायन्ते जातऽएवास्मिंस्तद्वाचं दध्म इति ॥६॥ अथ षट्सु मासेषु । षड्वाऽऋतवः संवत्सरस्य संवत्सरसंमिता वै गर्भाः प्रजायन्ते जातऽएवास्मिंस्तद्वाचं दध्म इति ॥७॥ अथ चतुर्विꣳशत्यहे । चतुर्विꣳशतिर्वै संवत्सरस्यार्धमासाः संवत्सरसंमिता वै गर्भाः प्रजायन्ते जातऽएवास्मिंस्तद्वाचं दध्म इति

॥८॥ अथ द्वादशाहे । द्वादश वै मासाः संवत्सरस्य संवत्सरसं° ॥९॥ अथ षडहे । षड्वाऽऋतवः संवत्सरस्य संवत्सरसं° ॥१०॥ अथ त्र्यहे । त्रयो वाऽऋतवः संवत्सरस्य संवत्सरसं° ॥११॥ तदपि श्लोकं गायन्ति । आचार्यो गर्भी भवति हस्तमाधाय दक्षिणम् तृतीयस्याꣳ स जायते सावित्र्या सह ब्राह्मण इति सद्यो ह वाव ब्राह्मणायानुब्रूयादाग्नेयो वै ब्राह्मणः सद्यो वाऽअग्निर्जायते तस्मात्सद्य एव ब्राह्मणायानुब्रूयात् ॥१२॥ ताꣳ हैतामेके । सावित्रीमनुष्टुभमन्वाहुर्वाग्वाऽअनुष्टुप्तदस्मिन्वाचं दध्म इति न तथा कुर्याद्यो हैनं तत्र ब्रूयादा न्वाऽअयमस्य वाचमदित मूको भविष्यतीतीश्वरो ह तथैव स्यात्तस्मादेतां गायत्रीमेव सावित्रीमनुब्रूयात् ॥१३॥ अथ हैके दक्षिणतः । तिष्ठते वासीनाय वान्वाहुर्न तथा कुर्याद्यो हैनं तत्र ब्रूयाद्बुल्बं न्वाऽअयमिममजीजनत बुल्बो भविष्यतीतीश्वरो ह तथैव स्यात्तस्मात्पुरस्तादेव प्रतीचे समीक्षमाणायानुब्रूयात् ॥१४॥ तां वै पच्छोऽन्वाह । त्रयो वै प्राणाः प्राण उदानो व्यानस्तानेवास्मिंस्तद्दधात्यथार्धर्चशो द्वौ वाऽइमौ प्राणौ प्राणोदानाविव प्राणोदानावेवास्मिंस्तद्दधात्यथ कृत्स्नामेको वाऽअयं प्राणः कृत्स्न एव प्राणमेवास्मिंस्तत्कृत्स्नं दधाति ॥१५॥ तदाहुः । न ब्राह्मणं ब्रह्मचर्यमुपनीय मिथुनं चरेद्गर्भो वाऽएष भवति यो ब्रह्मचर्यमुपैति नेदिमं ब्राह्मणं विषिक्ताद्रेतसो जनयानीति ॥१६॥ तदु वाऽआहुः । काममेव चरेद्द्वय्यो वाऽइमाः प्रजा दैव्यश्चैव मानुष्यश्च ता वाऽइमा मानुष्यः प्रजाः प्रजननात्प्रजायन्ते छन्दाꣳसि वै दैव्यः प्रजास्तानि मुखतो जनयति तत एतं जनयति तस्मादु काममेव चरेत् ॥१७॥ तदाहुः । न ब्रह्मचारी सन्मध्वश्नीयादोषधीनां वाऽएष परमो रसो यन्मधु नेदन्नाद्यस्यान्तं गच्छानीत्यथ ह स्माह श्वेतकेतुरारुणेयो ब्रह्मचारी सन्मध्वश्नंस्त्रय्यै वाऽएतद्विद्यायै शिष्टं यन्मधु स तु रसो यस्येदृक्शिष्टमिति यथा ह वाऽऋचं वा यजुर्वा साम वाभिव्याहरेत्तादृक्तद्य एवं विद्वान्ब्रह्मचारी स-

न्मधश्नाति तस्मादु काममेवाश्नीयात् ॥१८॥ ब्राह्मणम् ॥ ६ [५. ४.] ॥ ॥

देवान्वाऽऊर्ध्वान्त्स्वर्गं लोकं यतः । असुरास्तमसान्तरदधुस्ते होचुर्न वाऽअ-
स्यान्येन सत्त्रादपघातोऽस्ति हन्त सत्त्रमासामहाऽइति ॥१॥ ते शताग्निष्टोमꣳ
सत्त्रमुपेयुः । ते यावदासीनः परापश्येत्तावतस्तमोऽपाघ्नतैवमेव शतोक्थ्येन या-
वत्तिष्ठन्परापश्येत्तावतस्तमोऽपाघ्नत ॥२॥ ते होचुः । अप वाव तमो हन्महे
न त्वेव सर्वमिव हन्त प्रजापतिं पितरं प्रत्ययामेति ते प्रजापतिं पितरं प्रतीत्यो-
चुरसुरा वै नो भगव ऊर्ध्वान्त्स्वर्गं लोकं यतस्तमसान्तरदधुः ॥३॥ ते शताग्निष्टो-
मꣳ सत्त्रमुपेम । ते यावदासीनः परापश्येत्तावतस्तमोऽपाहन्महेवमेव शतो-
क्थ्येन यावत्तिष्ठन्परापश्येत्तावतस्तमोऽपाहन्महि प्र नो भगवञ्छाधि यथासुरां-
स्तमोऽपहत्य सर्वं पाप्मानमपहत्य स्वर्गं लोकं प्रजास्याम इति ॥४॥ स हो-
वाच । असर्वक्रतुभ्यां वै यज्ञाभ्यामगन्त यदग्निष्टोमेन चोक्थ्येन च शतातिरात्रꣳ
सत्त्रमुपेत तेनासुरांस्तमोऽपहत्य सर्वं पाप्मानमपहत्य स्वर्गं लोकं प्रजास्ययेति
॥५॥ ते शतातिरात्रꣳ सत्त्रमुपेयुः । तेनासुरांस्तमोऽपहत्य सर्वं पाप्मानमपहत्य
स्वर्गं लोकं प्रजग्मुस्तेषामर्वाक्पश्चाशेषेवाहःस्वहरभि रात्रिसामानि परीयू रात्रि-
मभ्यहःसामानि ॥६॥ ते होचुः । अमुहाम वै न प्रजानीमो हन्त प्रजापतिमेव
पितरं प्रत्ययामेति ते प्रजापतिमेव पितरं प्रतीत्योचुरहन्नो रात्रिसामानि रात्र्या-
महो भवन्ति नः विपश्चिद्यज्ञान्मुग्धान्विद्वान्धीरोऽनुशाधि न इति ॥७॥ ता-
न्हैतदुपजगौ । महाहिमिव वै ह्रदाद्वलीयानन्ववेत्य अनुक्त स्वादास्थानात्ततः
सत्त्रं न तायतऽइति ॥८॥ आश्विनं वै वः शस्यमानम् । प्रातरनुवाकमास्थाना-
दनुक्त यमास्थानादनुड्वं धीराः सन्तोऽअधीरवत् प्रशाख्वा तमुपेत शनैरप्रतिशꣳ-
सतेति ॥९॥ ते होचुः । कथं नु भगवः शस्तं कथमप्रतिशस्तमिति स होवाच
यत्र होताश्विनꣳ शꣳसन्नाग्नेयस्य क्रतोर्गायत्रस्य छन्दसः पारं गच्छात्तत्प्रतिप्रस्थाता

वसतीवरीः परिहृत्य मैत्रावरुणस्य हविर्धानयोः प्रातरनुवाकमुपाकुरुतादुच्चैर्होता शꣳसति शनैरितरो जञ्जप्यमान इवान्वाह तन्न वाचा वाचं प्रत्येति न छन्दसा छन्दः ॥१०॥ परिहिते प्रातरनुवाके । यथायतनमेवोपाꣳश्वन्तर्यामौ हुत्वा द्रोणकलशे पवित्रं प्रपीड्य निदधाति तिरो ऽह्न्यैश्चरित्वा प्रत्यञ्चः प्रतिपरेत्य तिरोह्न्यानेव भक्षयाध्वा ऽअथानुपूर्वं यज्ञपुच्छꣳ सꣳस्थाप्य य ऽऊर्ध्वा अन्तर्यामाद्ग्रहास्तान्गृहीत्वा विप्रुषाꣳ होमꣳ हुत्वा संततिं च बहिष्पवमानेन स्तुत्वाहरेव प्रतिपद्याध्वा ऽइति ॥११॥ तदेते ऽभि श्लोकाः । चतुर्भिः सैन्धवैर्युक्तैर्धीरा व्यजङ्कस्तमः विद्वाꣳसो ये शतक्रतु देवाः सत्त्रमतन्वतेति ॥१२॥ चत्वारो ह्यत्र युक्ता भवन्ति । द्वौ होतारौ द्वावध्वर्यू पर्वेर्नु शङ्केव हनूनि कल्पयन्नक्ष्णोरन्तौ व्यतिषजन्त धीराः न दानवा यज्ञियं तन्तुमेषां विजानीमो विततं मोहयन्ति नः ॥ पूर्वस्याह्नः परिशिꣳषन्ति कर्म तदुत्तरेणाभिवितन्वते ऽह्ना दुर्विज्ञानं काव्यं देवतानाꣳ सोमाः सोमैर्व्यतिषक्ताः प्लवन्ते ॥ समानात्सदमुद्यन्ति हयान्काष्ठभृतो यथा पूर्णान्परिस्रुतः कुम्भाञ्जनमेजयसादन ऽइत्यसुररक्षसान्यपेयुः ॥१३॥ ब्राह्मणम् ॥ ७ [५. ५.] ॥ ॥

पञ्चैव महायज्ञाः । तान्येव महासत्त्राणि भूतयज्ञो मनुष्ययज्ञः पितृयज्ञो देवयज्ञो ब्रह्मयज्ञ इति ॥१॥ अहरहर्भूतेभ्यो बलिꣳ हरेत् । तथैतं भूतयज्ञꣳ समाप्नोत्यहरहर्दद्यादोदपात्रात्तथैतं मनुष्ययज्ञꣳ समाप्नोत्यहरहः स्वधाकुर्यादोदपात्रात्तथैतं पितृयज्ञꣳ समाप्नोत्यहरहः स्वाहाकुर्यादा काष्ठात्तथैतं देवयज्ञꣳ समाप्नोति ॥२॥ अथ ब्रह्मयज्ञः । स्वाध्यायो वै ब्रह्मयज्ञस्तस्य वा ऽएतस्य ब्रह्मयज्ञस्य वागेव जुहूर्मन उपभृच्चक्षुर्ध्रुवा मेधा स्रुवः सत्यमवभृथः स्वर्गो लोक उदयनं यावन्तꣳ ह वा ऽइमां पृथिवीं वित्तेन पूर्णां ददंल्लोकं जयति त्रिस्तावन्तं जयति भूयाꣳसं चाक्षय्यं य एवं विद्वानहरहः स्वाध्यायमधीते तस्मात्स्वाध्यायो ऽध्येतव्यः ॥३॥

पयस्राहुतयो ह वा ऽएता देवानाम् । यदृचः स य एवं विद्वानृचोऽहरहः स्वाध्यायमधीते पयस्राहुतिभिरेव तद्देवांस्तर्पयति त ऽएनं तृप्तास्तर्पयन्ति योगक्षेमेण प्राणेन रेतसा सर्वात्मना सर्वाभिः पुण्याभिः सम्पद्भिर्घृतकुल्या मधुकुल्याः पितॄन्त्स्वधा अभिवहन्ति ॥४॥ आज्याहुतयो ह वा ऽएता देवानाम् । यद्यजूꣳषि स य एवं विद्वान्यजूꣳष्यहरहः स्वाध्यायमधीत ऽआज्याहुतिभिरेव तद्देवांस्तर्पयति त ऽएनं तृप्तास्तर्पयन्ति योगक्षेमेण प्राणेन रे॰ ॥५॥ सोमाहुतयो ह वा ऽएता देवानाम् । यत्सामानि स य एवं विद्वान्त्सामान्यहरहः स्वाध्यायमधीते सोमाहुतिभिरेव तद्देवांस्तर्पयति त ऽएनं तृप्तास्तर्पयन्ति योगक्षेमेण प्राणेन रे॰ ॥६॥ मेदआहुतयो ह वा एता देवानाम् । यदथर्वाङ्गिरसः स य एवं विद्वानथर्वाङ्गिरसोऽहरहः स्वाध्यायमधीते मेदआहुतिभिरेव तद्देवांस्तर्पयति त ऽएनं तृप्तास्तर्पयन्ति योगक्षेमेण प्राणेन रे॰ ॥७॥ मध्वाहुतयो ह वा ऽएता देवानाम् । यदनुशासनानि विद्या वाकोवाक्यमितिहासपुराणं गाथा नाराशꣳस्यः स य एवं विद्वाननुशासनानि विद्या वाकोवाक्यमितिहासपुराणं गाथा नाराशꣳसीरित्यहरहः स्वाध्यायमधीते मध्वाहुतिभिरेव तद्देवांस्तर्पयति त ऽएनं तृप्तास्तर्पयन्ति योगक्षेमेण प्राणेन रे॰ ॥८॥ तस्य वा ऽएतस्य ब्रह्मयज्ञस्य । चत्वारो वषट्कारा यद्वातो वाति यद्विद्योतते यत्स्तनयति यदवस्फूर्जति तस्मादेवंविद्वाते वाति विद्योतमाने स्तनयत्यवस्फूर्जत्यधीयीतैव वषट्काराणामछम्बट्कारायाति ह वै पुनर्मृत्युं मुच्यते गछति ब्रह्मणः सात्मताꣳ स चेदपि प्रबलमिव न शक्नुयादप्येकं देवपदमधीयीतैव तथा भूतेभ्यो न हीयते ॥९॥ ब्राह्मणम् ॥८ [५. ६.] ॥ तृतीयः प्रपाठकः ॥ कण्डिकासंख्या१११ ॥ ॥

अथातः स्वाध्यायप्रशꣳसा । प्रिये स्वाध्यायप्रवचने भवतो युक्तमना भवत्यपराधीनोऽहरहरर्थान्त्साधयते सुखꣳ स्वपिति परमचिकित्सक आत्मनो भवतीन्द्रि-

यसंयमश्चैकारामता च प्रज्ञावृद्धिर्यशो लोकपक्तिः प्रज्ञा वर्धमाना चतुरो धर्मान्ब्राह्मणमभिनिष्पादयति ब्राह्मण्यं प्रतिरूपचर्यां यशो लोकपक्तिं लोकः पच्यमानश्चतुर्भिर्धर्मैर्ब्राह्मणं भुनक्त्यर्चया च दानेन चाज्येयतया चावध्यतया च ॥१॥ ये ह वै के च श्रमाः । इमे द्यावापृथिवीऽअन्तरेण स्वाध्यायो हैव तेषां परमता काष्ठा य एवं विद्वान्त्स्वाध्यायमधीते तस्मात्स्वाध्यायोऽध्येतव्यः ॥२॥ यद्यद्ध वाऽअयं छन्दसः । स्वाध्यायमधीते तेन-तेन हैवास्य यज्ञक्रतुनेष्टं भवति य एवं विद्वान्त्स्वाध्यायमधीते तस्मात्स्वाध्यायोऽध्येतव्यः ॥३॥ यदि ह वा अप्यभ्यक्तः । अलंकृतः सुहितः सुखे शयने शयानः स्वाध्यायमधीतऽआ हैव स नखाग्रेभ्यस्तप्यते य एवं विद्वान्त्स्वाध्यायमधीते तस्मात्स्वाध्यायोऽध्येतव्यः ॥४॥ मधु ह वाऽऋचः । घृतꣳ ह सामान्यमृतं यजूꣳषि यद्ध वाऽअयं वाकोवाक्यमधीते क्षीरौदनमाꣳसौदनौ हैव तौ ॥५॥ मधुना ह वाऽएष देवांस्तर्पयति । य एवं विद्वानृचोऽहरहः स्वाध्यायमधीते तऽएनं तृप्तास्तर्पयन्ति सर्वैः कामैः सर्वैर्भोगैः ॥६॥ घृतेन ह वाऽएष देवांस्तर्पयति । य एवं विद्वान्त्सामान्यहरहः स्वाध्यायमधीते तऽएनं तृप्ता° ॥७॥ अमृतेन ह वाऽएष देवांस्तर्पयति । य एवं विद्वान्यजूꣳष्यहरहः स्वाध्यायमधीते तऽएनं तृप्ता° ॥८॥ क्षीरौदनमाꣳसौदनाभ्याꣳ ह वाऽएष देवांस्तर्पयति । य एवं विद्वान्वाकोवाक्यमितिहासपुराणमित्यहरहः स्वाध्यायमधीते तऽएनं तृप्ता° ॥९॥ यन्ति वाऽआपः । एत्यादित्य एति चन्द्रमा यन्ति नक्षत्राणि यथा ह वाऽएता देवता नेयुर्न कुर्युरेवꣳ हैव तदहर्ब्राह्मणो भवति यदहः स्वाध्यायं नाधीते तस्मात्स्वाध्यायोऽध्येतव्यस्तस्मादप्यृचं वा यजुर्वा साम वा गाथां वा कुम्व्यां वाभिव्याहरेद्व्रतस्याव्यवच्छेदाय ॥१०॥ ब्राह्मणम् ॥१ [५.७.] ॥॥

प्रजापतिर्वाऽइदमग्रऽआसीत् । एक एव सोऽकामयत स्यां प्रजायेयेति सोऽश्राम्यत्स तपोऽतप्यत तस्माच्छ्रान्तात्तेपानात्त्रयो लोका असृज्यन्त पृथिव्यन्तरिक्षं

द्यौः ॥१॥ स इमांस्त्रींलोकानभितताप । तेभ्यस्तप्तेभ्यस्त्रीणि ज्योतीᳪष्यजायन्ता-
ग्निर्योऽयं पवते सूर्यः ॥२॥ स इमानि त्रीणि ज्योतीᳪष्यभितताप । तेभ्यस्तप्तेभ्य-
स्त्रयो वेदा अजायन्ताग्नेर्ऋग्वेदो वायोर्यजुर्वेदः सूर्यात्सामवेदः ॥३॥ स इमांस्त्रीन्वे-
दानभितताप । तेभ्यस्तप्तेभ्यस्त्रीणि शुक्राण्यजायन्त भूरित्यृग्वेदाद्भुव इति यजुर्वेदा-
त्स्वरिति सामवेदात्तदृग्वेदेनैव होत्रमकुर्वत यजुर्वेदेनाध्वर्यवᳪ सामवेदेनोद्गीथं
यदेव त्रय्यै विद्यायै शुक्रं तेन ब्रह्मत्वमथोच्चक्राम ॥४॥ ते देवाः प्रजापतिमब्रुवन्
। यदि न ऋक्तो वा यजुष्टो वा सामतो वा यज्ञो ह्वलेत्केनैनं भिषज्येमेति ॥५॥
स होवाच । यद्यृक्तो भूरिति चतुर्गृहीतमाज्यं गृहीत्वा गार्हपत्ये जुहवथ यदि
यजुष्टो भुव इति चतुर्गृहीतमाज्यं गृहीत्वाग्नीध्रीये जुहवथान्वाहार्यपचने वा ह-
विर्यज्ञे यदि सामतः स्वरिति चतुर्गृहीतमाज्यं गृहीत्वाहवनीये जुहवथ यद्युऽअ-
विज्ञातमसत्सर्वाण्यनुद्रुत्याहवनीये जुहवथ तदृग्वेदेनैवऽर्ग्वेदं भिषज्यति यजुर्वे-
देन यजुर्वेदᳪ सामवेदेन सामवेदᳪ स यथा पर्वणा पर्व संदध्यादेवᳪ हैव स सं-
दधाति य एताभिर्भिषज्यत्यथ यो ह्वातोऽन्येन भिषज्यति यथा शीर्णेन शीर्णᳪ
संधित्सेद्यथा वा शीर्णे गरमभिनिदध्यादेवं तत्तस्मादेवंविदमेव ब्रह्माणं कुर्वीत
नानेवंविदम् ॥६॥ तदाहुः । यदृचा होत्रं क्रियते यजुषाध्वर्यवᳪ साम्नोद्गीथोऽथ
केन ब्रह्मत्वमित्यनया त्रय्या विद्ययेति ह ब्रूयात् ॥७॥ ब्राह्मणम् ॥२ [५.८.] ॥॥

प्रजापतिर्ह वाऽएष यदᳪशुः । सोऽस्यैष आत्मैवात्मा ह्ययं प्रजापतिर्वागेवा-
दाभ्यः स यदᳪशुं गृहीत्वादाभ्यं गृह्णात्यात्मानमेवास्यैतत्संस्कृत्य तस्मिन्नेतां वाचं
प्रतिष्ठापयति ॥१॥ अथ मनो ह वाऽअᳪशुः । वागदाभ्यः प्राण एवाᳪशुरुदानो
ऽदाभ्यश्चक्षुरेवाᳪशुः श्रोत्रमदाभ्यस्तद्यदेतौ ग्रहौ गृह्णन्ति सर्वत्वायैव कृत्स्नतायै
॥२॥ अथ देवाश्च ह वाऽअसुराश्च । उभये प्राजापत्या अस्पर्धन्त तऽएतस्मिन्नेव
यज्ञे प्रजापतावस्पर्धन्तास्माकमयᳪ स्यादस्माकमयᳪ स्यादिति ॥३॥ ततो देवाः ।

अर्चन्तः श्राम्यन्तश्चेरुस्त ऽएतं ग्रहं ददृशुरेतमदाभ्यं तमगृह्णत ते सवनानि प्रावृञ्जन्त ते सर्वं यज्ञꣳ समवृञ्जतान्तरायन्नसुरान्यज्ञात् ॥४॥ ते होचुः । अदभाम वा ऽएनानिति तस्माददाभ्यो न वै नोऽदभन्निति तस्माददाभ्यो वाग्वाऽअदाभ्यः सेयमदब्धा वाक्तस्माद्वेवादाभ्य एवꣳ ह वै द्विषतो भ्रातृव्यस्य सर्वं यज्ञꣳ संवृङ्क्तऽएवं द्विषन्तं भ्रातृव्यꣳ सर्वस्माद्यज्ञान्निर्भजति बहिर्धा करोति य उऽएवमेतद्वेद ॥५॥ स येनैव पात्रेणाꣳशुं गृह्णाति । तस्मिन्नेव पात्रे निग्राभ्याभ्योऽप आनीय तस्मिन्नेतानꣳशून्गृह्णाति ॥६॥ उपयामगृहीतोऽसि । अग्नये त्वा गायत्रछन्दसं गृह्णामीति गायत्रं प्रातःसवनं तत्प्रातःसवनं प्रवृङ्क्तीन्द्राय त्वा त्रिष्टुप्छन्दसं गृह्णामीति त्रैष्टुभं माध्यन्दिनꣳ सवनं तन्माध्यन्दिनꣳ सवनं प्रवृङ्क्ते विश्वेभ्यस्त्वा देवेभ्यो जगच्छन्दसं गृह्णामीति जागतं तृतीयसवनं तत्तृतीयसवनं प्रवृङ्क्त्यनुष्टुप्तेऽभिगर इति यद्वाऽऊर्ध्वꣳ सवनेभ्यस्तदानुष्टुभं तदेवैतत्प्रवृङ्क्ते तन्नाभिषुणोति वज्रो वै ग्रावा वागदाभ्यो नेद्वज्रेण वाचꣳ हिनसानीति ॥७॥ अꣳशूनेवाधूनोति । त्रेशीनां त्वा पत्मन्नाधूनोमि कुकूननानां त्वा पत्मन्नाधूनोमि भन्दनानां त्वा पत्मन्नाधूनोमि मदिन्तमानां त्वा पत्मन्नाधूनोमि मधुन्तमानां त्वा पत्मन्नाधूनोमीत्येता वै देवीरापस्तद्याश्चैव देवीरापो याश्चेमा मानुष्यस्ताभिरेवास्मिन्नेतदुभयीभी रसं दधाति ॥८॥ शुक्रं त्वा शुक्रऽआधूनोमीति । शुक्रꣳ ह्येतच्छुक्रऽआधूनोत्यह्नो रूपे सूर्यस्य रश्मिष्विति तदह्नश्चैवैनमेतद्रूपे सूर्यस्य च रश्मिष्वाधूनोति ॥९॥ ककुभꣳ रूपं वृषभस्य रोचते-बृहदिति । एतद्वै ककुभꣳ रूपं वृषभस्य रोचते बृहद्य एष तपति शुक्रः शुक्रस्य पुरोगाः सोमः सोमस्य पुरोगा इति तच्छुक्रमेवैतच्छुक्रस्य पुरोगां करोति सोमꣳ सोमस्य पुरोगां यत्ते सोमादाभ्यं नाम जागृवि तस्मै त्वा गृह्णामीत्येतद्ध वाऽअस्यादाभ्यं नाम जागृवि यद्वाक्तद्वाचमेवैतद्वाचे गृह्णाति ॥१०॥ अथोपनिष्क्रम्य जुहोति । तस्मै ते सोम सोमाय स्वाहेति तत्सोममेवैतत्सोमाय जु-

ह्येति तथो वाचमग्नौ न प्रवृणक्त्यथ हिरण्यमभिव्यनित्यसावेव बन्धुस्तस्य तावतीरेव दक्षिणा यावतीरꣳशोः ॥११॥ अथाꣳशून्पुनरप्यर्जति । उशिक्त्वं देव सोमाग्नेः प्रियं पाथोऽपीहि वशी त्वं देव सोमेन्द्रस्य प्रियं पाथोऽपीह्यस्मत्सखा त्वं देव सोम विश्वेषां देवानां प्रियं पाथोऽपीहीति सवनानि वाऽअदः प्रवृहति तान्येवैतत्पुनराप्याययत्ययातयामानि करोति तैरयातयामैर्यज्ञं तन्वते ॥१२॥ ब्राह्मणम् ॥३ [५. ६.] ॥ ॥ पञ्चमोऽध्यायः [७१.] ॥ ॥

भृगुर्ह वै वारुणिः । वरुणं पितरं विद्ययातिमेने तद्ध वरुणो विदां चकाराति वै मा विद्यया मन्यतऽइति ॥१॥ स होवाच । प्राङ् पुत्रक व्रजतात्तत्र यत्पश्येस्तद्दृष्ट्वा दक्षिणा व्रजतात्तत्र यत्पश्येस्तद्दृष्ट्वा प्रत्यग्व्रजतात्तत्र यत्पश्येस्तद्दृष्ट्वोदग्व्रजतात्तत्र यत्पश्येस्तद्दृष्ट्वैतयोः पूर्वयोरुत्तरमन्ववान्तरदेशं व्रजतात्तत्र यत्पश्येस्तन्मऽआचक्षीथा इति ॥२॥ स ह तत एव प्राङ् प्रवव्राज । एद्द पुरुषैः पुरुषान्पर्वाण्येषां पर्वशः संवृश्च्य पर्वशो विभजमानानिदं तवेदं ममेति स होवाच भीष्मं बत भोः पुरुषान्वाऽएतत्पुरुषाः पर्वाण्येषां पर्वशः संवृश्च्य पर्वशो व्यभक्षतेति ते होचुरित्थं वाऽइमेऽस्मानमुष्मिंल्लोकेऽसचन्त तान्वयमिदमिह प्रतिसचामहाऽइति स होवाचास्तीह प्रायश्चित्ती३रित्यस्तीति का-ति पिता ते वेदेति ॥३॥ स ह तत एव दक्षिणा प्रवव्राज । एद्द पुरुषैः पुरुषान्पर्वाण्येषां पर्वशः संकर्तं पर्वशो विभजमानानिदं तवेदं ममेति स होवाच भीष्मं बत भोः पुरुषान्वाऽएतत्पुरुषाः पर्वाण्येषां पर्वशः संकर्तं पर्वशो व्यभक्षतेति ते होचुरित्थं वा इमेऽस्मानमुष्मिंल्लोकेऽसचन्त तान्वयमिदमिह प्रतिसचामहाऽइति स होवाचास्तीह प्रायश्चित्ती३रित्यस्तीति का-ति पितेव ते वेदेति ॥४॥ स ह तत एव प्रत्यङ् प्रवव्राज । एद्द पुरुषैः पुरुषांस्तूष्णीमासीनांस्तूष्णीमासीनैरद्यमानान्स होवाच भीष्मं बत भोः पुरुषान्वाऽएतत्पुरुषास्तूष्णीमासीनांस्तूष्णीमासीना अदन्तीति ते होचुरित्थं

वा ऽ इमे ऽस्मानमुष्मिंल्लोके ऽसचन्त तान्वयमिदमिह प्रतिसचामहा ऽ इति स होवा-
चास्तीह प्रायश्चित्ती३रित्यस्तीति का३ति पितैव ते वेदेति ॥५॥ स ह तत ए-
वोदङ् प्रवव्राज । एतु पुरुषैः पुरुषानाक्रन्दयत आक्रन्दयद्भिरद्यमानान्त्स होवाच
भीष्मं बत भोः पुरुषान्वा एतत्पुरुषा आक्रन्दयत आक्रन्दयन्तो ऽदन्तीति ते हो-
चुरित्थं वा ऽ इमे ऽस्मानमु° ॥६॥ स ह तत एवैतयोः पूर्वयोः । उत्तरमन्ववान्तर-
देशं प्रवव्राजेतु स्त्रियौ कल्याणीं चातिकल्याणीं च ते ऽअन्तरेण पुरुषः कृष्णः
पिङ्गाक्षो दण्डपाणिस्तस्थौ तꣳ हैनं दृष्ट्वा भीर्विवेद स हेत्य संविवेश तꣳ ह
पितोवाचाधीष्व स्वाध्यायं कस्मान्नु स्वाध्यायं नाधीषऽइति स होवाच किमध्येष्ये
न किं चनास्तीति तद्ध वरुणो विदां चकाराद्भृग्वा ऽ इति ॥७॥ स होवाच ।
यान्वै तत्प्राच्यां दिश्यद्राक्षीः पुरुषैः पुरुषान्पर्वाण्येषां पर्वशः संव्रश्च्य पर्वशो वि-
भजमानानिदं तवेदं ममेति वनस्पतयो वै ते ऽअभूवन्त्स यद्वनस्पतीनाꣳ समिध-
मादधाति तेन वनस्पतीनवरुन्द्धे तेन वनस्पतीनां लोकं जयति ॥८॥ अथ या-
नेतद्दक्षिणायां दिश्यद्राक्षीः । पुरुषैः पुरुषान्पर्वाण्येषां पर्वशः संकर्तं पर्वशो वि-
भजमानानिदं तवेदं ममेति पशवो वै ते ऽअभूवन्त्स यत्पयसा जुहोति तेन पशू-
नवरुन्द्धे तेन पशूनां लोकं जयति ॥९॥ अथ यानेतत्प्रतीच्यां दिश्यद्राक्षीः । पु-
रुषैः पुरुषांस्तूष्णीमासीनांस्तूष्णीमासीनैरद्यमानानोषधयो वै ता अभूवन्त्स यत्तृणै-
नावज्योतयति तेनौषधीरवरुन्द्धे तेनौषधीनां लोकं जयति ॥१०॥ अथ यानेत-
दुदीच्यां दिश्यद्राक्षीः । पुरुषैः पुरुषानाक्रन्दयत आक्रन्दयद्भिरद्यमानानापो वै ता
अभूवन्त्स यदपः प्रत्यानयति तेनापो ऽवरुन्द्धे तेनापां लोकं जयति ॥११॥ अथ
ये ऽएते । स्त्रियावद्राक्षीः कल्याणीं चातिकल्याणीं च सा या कल्याणी सा श्रद्धा
स यत्पूर्वामाहुतिं जुहोति तेन श्रद्धामवरुन्द्धे तेन श्रद्धां जयत्यथ यातिकल्याणी
साश्रद्धा स यदुत्तरामाहुतिं जुहोति तेनाश्रद्धामवरुन्द्धे तेनाश्रद्धां जयति ॥१२॥

अथ य एनं सोऽन्तरेण पुरुषः । कृष्णः पिङ्गाक्षो दण्डपाणिरस्थात्क्रोधो वै सोऽभूत्स यत्स्रुच्यप आनीय निनयति तेन क्रोधमवरुन्द्धे तेन क्रोधं जयति स य एवं विद्वानग्निहोत्रं जुहोति तेन सर्वं जयति सर्वमवरुन्द्धे ॥१३॥ ब्राह्मणम् ॥४ [६. १.] ॥ ॥

जनको ह वै वैदेहो । ब्राह्मणैर्धावयद्भिः समाजगाम श्वेतकेतुनारुणेयेन सोमशुष्मेण सात्ययज्ञिना याज्ञवल्क्येन तान्होवाच कथं-कथमग्निहोत्रं जुहुथेति ॥१॥ स होवाच । श्वेतकेतुरारुणेयो घर्मावेव सम्राडहमजस्रौ यशसा विष्यन्दमानावन्योऽन्यस्मिञ्जुहोमीति कथं तदित्यादित्यो वै घर्मस्तꣳ सायमग्नौ जुहोम्यग्निर्वै घर्मस्तं प्रातरादित्ये जुहोमीति किꣳ स भवति य एवं जुहोत्यजस्र एव श्रिया यशसा भवत्येतयोश्च देवतयोः सायुज्यꣳ सलोकतां जयतीति ॥२॥ अथ होवाच सोमशुष्मः सात्ययज्ञिः । तेज एव सम्राडहं तेजसि जुहोमीति कथं तदित्यादित्यो वै तेजस्तꣳ सायमग्नौ जुहोम्यग्निर्वै तेजस्तं प्रातरादित्ये जुहोमीति किꣳ स भवति य एवं जुहोतीति तेजस्वी यशस्व्यन्नादो भवत्येतयोश्चैव देवतयोः सायुज्यꣳ सलोकतां जयतीति ॥३॥ अथ होवाच याज्ञवल्क्यः । यदहमग्निमुद्धराम्यग्निहोत्रमेव तदुद्यच्छाम्यादित्यं वाऽअस्तं यन्तꣳ सर्वे देवा अनुयन्ति ते मऽएतमग्निमुद्धृतं दृष्ट्वोपावर्तन्तेऽथाहं पात्राणि निर्णिज्योपवाप्याग्निहोत्रीं दोहयित्वा पश्यन्पश्यतस्तर्पयामीति त्वं नेदिष्ठं याज्ञवल्क्याग्निहोत्रस्यामीमाꣳसिष्ठा धेनुशतं ददामीति होवाच न त्वेवैनयोस्त्वमुत्क्रान्तिं न गतिं न प्रतिष्ठां न तृप्तिं न पुनरावृत्तिं न लोकं प्रत्युत्थायिनमित्युक्त्वा रथमास्थाय प्रधावयां चकार ॥४॥ ते होचुः । अति वै नोऽयꣳ राजन्यबन्धुरवादीद्धन्तैनं ब्रह्मोद्यमाह्वयामहाऽइति स होवाच याज्ञवल्क्यो ब्राह्मणा वै वयꣳ स्मो राजन्यबन्धुरसौ यद्यमुं वयं जयेम कमजैष्मेति ब्रूयामाथ यद्यसावस्मान्जयेद्ब्राह्मणान्राजन्यबन्धुरजैषीदिति नो ब्रूयुर्मेदमादृढ्व-

मिति तद्धास्य जग्मुरथ ह याज्ञवल्क्यो रथमास्थायानुप्रधावयां चकार तꣳ हान्वाजगाम स होवाचाग्निहोत्रं याज्ञवल्क्य वेदितू३मित्यग्निहोत्रꣳ सम्राडिति ॥५॥ ते वा ऽ एते । ऽआहुती हुते ऽउत्क्रामतः ते ऽन्तरिक्षमाविशतस्ते ऽन्तरिक्षमेवाहवनीयं कुर्वाते वायुꣳ समिधं मरीचीरेव शुक्रामाहुतिं ते ऽन्तरिक्षं तर्पयतस्ते तत उत्क्रामतः ॥६॥ ते दिवमाविशतः । ते दिवमेवाहवनीयं कुर्वाते ऽआदित्यꣳ समिधं चन्द्रमसमेव शुक्रामाहुतिं ते दिवं तर्पयतस्ते तत आवर्तेते ॥७॥ ते ऽइमामाविशतः । ते ऽइमामेवाहवनीयं कुर्वाते ऽग्निꣳ समिधमोषधीरेव शुक्रामाहुतिं ते ऽइमां तर्पयतस्ते तत उत्क्रामतः ॥८॥ ते पुरुषमाविशतः । तस्य मुखमेवाहवनीयं कुर्वाते जिह्वाꣳ समिधमन्नमेव शुक्रामाहुतिं ते पुरुषं तर्पयतः स य एवं विद्वानश्नात्यग्निहोत्रमेवास्य हुतं भवति ते तत उत्क्रामतः ॥९॥ ते स्त्रियमाविशतः । तस्या उपस्थमेवाहवनीयं कुर्वाते धारकाꣳ समिधं धारका ह वै नामैतया ह त्वै प्रजापतिः प्रजा धारयां चकार रेत एव शुक्रामाहुतिं ते स्त्रियं तर्पयतः स य एवं विद्वान्मिथुनमुपैत्यग्निहोत्रमेवास्य हुतं भवति यस्ततः पुत्रो जायते स लोकः प्रत्युत्थाय्येतदग्निहोत्रं याज्ञवल्क्य नातः परमस्तीति होवाच तस्मै ह याज्ञवल्क्यो वरं ददौ स होवाच कामप्रश्न एव मे त्वयि याज्ञवल्क्यासदिति ततो ब्रह्मा जनक आस ॥१०॥ ब्राह्मणम् ॥५ [६. २.] ॥ ॥

जनको ह वैदेहः । बहुदक्षिणेन यज्ञेनेजे स ह गवाꣳ सहस्रमवरुन्धन्नुवाचैता वो ब्राह्मणा यो ब्रह्मिष्ठः स उदजतामिति ॥१॥ स होवाच याज्ञवल्क्यो । ऽर्वाचीरेता इति ते होचुस्त्वꣳ स्विन्नो याज्ञवल्क्य ब्रह्मिष्ठो ऽसी३इति स होवाच नमो ऽस्तु ब्रह्मिष्ठाय गोकामा एव वयꣳ स्म इति ॥२॥ ते होचुः । को न इमं प्रक्ष्यतीति स होवाच विदग्धः शाकल्यो ऽहमिति तꣳ ह प्रतिख्यायोवाच त्वाꣳ स्विच्छाकल्य ब्राह्मणा उल्मुकावक्षयणमक्रता३इति ॥३॥ स होवाच । कति

देवा याज्ञवल्क्येति त्रयश्च त्री च शता त्रयश्च त्री च सहस्रेत्योमिति होवाच
कत्येव देवा याज्ञवल्क्येति त्रयस्त्रिꣳशदित्योमिति होवाच कत्येव देवा याज्ञव-
ल्क्येति त्रय इत्योमिति होवाच कत्येव देवा याज्ञवल्क्येति द्वावित्योमिति हो-
वाच कत्येव देवा याज्ञवल्क्येत्यध्यर्ध इत्योमिति होवाच कत्येव देवा याज्ञव-
ल्क्येत्येक इत्योमिति होवाच कतमे ते त्रयश्च त्री च शता त्रयश्च त्री च सह-
स्रेति ॥४॥ स होवाच । महिमान एवैषामेते त्रयस्त्रिꣳशत्त्वेव देवा इति कतमे
ते त्रयस्त्रिꣳशदित्यष्टौ वसव एकादश रुद्रा द्वादशादित्यास्त ऽएकत्रिꣳशदिन्द्रश्चैव
प्रजापतिश्च त्रयस्त्रिꣳशाविति ॥५॥ कतमे वसव इति । अग्निश्च पृथिवी च वा-
युश्चान्तरिक्षं चादित्यश्च द्यौश्च चन्द्रमाश्च नक्षत्राणि चैते वसव एते हीदꣳ सर्वं
वासयन्ते ते यदिदꣳ सर्वं वासयन्ते तस्माद्वसव इति ॥६॥ कतमे रुद्रा इति । द-
शेमे पुरुषे प्राणा आत्मैकादशस्ते यदास्मान्मर्त्याच्छरीरादुत्क्रामन्त्यथ रोदयन्ति त-
द्यद्रोदयन्ति तस्माद्रुद्रा इति ॥७॥ कतम ऽआदित्या इति । द्वादश मासाः संवत्स-
रस्यैत ऽआदित्या एते हीदꣳ सर्वमाददाना यन्ति ते यदिदꣳ सर्वमाददाना यन्ति
तस्मादादित्या इति ॥८॥ कतम इन्द्रः कतमः प्रजापतिरिति । स्तनयित्नुरेवेन्द्रो
यज्ञः प्रजापतिरिति कतमः स्तनयित्नुरित्यशनिरिति कतमो यज्ञ इति पशव इति
॥९॥ कतमे ते त्रयो देवा इति । इम ऽएव त्रयो लोका एषु हीमे सर्वे देवा
इति कतमौ तौ द्वौ देवावित्यन्नं चैव प्राणश्चेति कतमोऽध्यर्ध इति योऽयं पवत
ऽइति कतम एको देव इति प्राण इति ॥१०॥ स होवाच । अनतिप्रश्न्यां मा
देवतामत्यप्राक्षीः पुरेतिथ्ये मरिष्यसि न तेऽस्थीनि चन गृहान्प्राप्स्यन्तीति स ह
तथैव ममार तस्य हाप्यन्यन्मन्यमानाः परिमोषिणोऽस्थीन्यपजह्रुस्तस्मान्नोपवादी
स्यादुत ह्येवंवित्परो भवति ॥११॥ ब्राह्मणम् ॥ ६ [६. ३.] ॥ षष्ठोऽध्यायः
[७२.] ॥ ॥

पशुबन्धेन यजते । पशवो वै पशुबन्धः स यत्पशुबन्धेन यजते पशुमानसानीति तेन गृहेषु यजेत गृहेषु पशून्बध्नाऽइति तेन सुयवसे यजेत सुयवसे पशून्बध्नाऽइति नीर्यन्ति ह वै जुह्वतो यजमानस्याग्नयोऽग्नीन्नीर्यतोऽनु यजमानो यजमानमनु गृह्याश्च पशवश्च ॥१॥ ॥ शतम् ५१०० ॥ ॥ स यत्पशुबन्धेन यजते । अग्नीनेवैतत्पुनर्णवान्कुरुतेऽग्नीनां पुनर्णवतामनु यजमानो यजमानमनु गृह्याश्च पशवश्चायुष्यो ह वाऽअस्यैष आत्मनिष्क्रयणो भवति माꣳसीयन्ति ह वै जुह्वतो यजमानस्याग्नयस्ते यजमानमेव ध्यायन्ति यजमानꣳ संकल्पयन्ति पचन्ति वाऽअन्येष्वग्निषु वृथामाꣳसमथैतेषां नातोऽन्या माꣳसाशा विद्यते यस्यो चैते भवन्ति ॥२॥ स यत्पशुबन्धेन यजते । आत्मानमेवैतन्निष्क्रीणीते वीरेण वीरं वीरो हि पशुर्वीरो यजमान एतद्ध ह वै परममन्नाद्यं यन्माꣳसꣳ स परमस्यैवान्नाद्यस्यात्ता भवति तं वै संवत्सरो नानीजनमतीयादायुर्वै संवत्सर आयुरेवैतदमृतमात्मन्धत्ते ॥३॥ ब्राह्मणम् ॥७ [७. १.] ॥ ॥

हविर्यज्ञविधो ह वाऽअन्यः पशुबन्धः । सवविधोऽन्यः स हैष हविर्यज्ञविधो यस्मिन्व्रतमुपनयति यस्मिन्नपः प्रणयति यस्मिन्पूर्णपात्रं निनयति यस्मिन्विष्णुक्रमान्क्रमयत्यथ हैष सवविधो यस्मिन्नेतानि न क्रियन्ते ॥१॥ तदाहुः । इष्टिः पशुबन्धा३ महायज्ञा३ इति महायज्ञ इति ह ब्रूयादिष्टिं वै तर्हि पशुबन्धमकर्व्येनमकृत्स्नथा इत्येनं ब्रूयात् ॥२॥ तस्य प्रयाजा एव प्रातःसवनम् । अनुयाजास्तृतीयसवनं पुरोडाश एव माध्यन्दिनꣳ सवनम् ॥३॥ तद्धैके । वपायाꣳ हुतायां दक्षिणा नयन्ति तद्ध तथा न कुर्याद्यो हैनं तत्र ब्रूयाद्धविर्धा न्वाऽअयं प्राणेभ्यो दक्षिणा अनैषीन्न प्राणानदददन्धो वा स्रामो वा बधिरो वा पक्षहतो वा भविष्यतीतीश्वरो ह तथैव स्यात् ॥४॥ इत्थमेव कुर्यात् । पुरोडाशेडायामेवोपहूतायां दक्षिणा नयेदिन्द्रो वाऽअयं मध्यतः प्राण इममेवैतदिन्द्रं मध्यतः प्राणं द-

दक्षिणाभिर्दक्षयत्यैन्द्रं वै माध्यन्दिनꣳ सवनं माध्यन्दिने वै सवने दक्षिणा नीयन्ते तस्मात्पुरोडाशेडायामेवोपहूतायां दक्षिणा नयेत् ॥५॥ तदाहुः । अध्वर्यो यद्दीक्षितस्य नानवभृथोऽवकल्पते क्वैनमदिदीक्ष इत्यावभृथादनूदृꣳहेयुरध्वर्युश्च प्रतिप्रस्थाता च होता च मैत्रावरुणश्च ब्रह्मा चाग्नीध्रश्चैतैर्वा एष षड्ढोता तमनुद्रुत्य षड्ढोतारं जुहोत्येकामाहुतिं कृत्वा पञ्च वान्या द्यौष्पृष्ठमन्तरिक्षमात्माङ्गैर्यज्ञं पृथिवीꣳ शरीरैः वाचस्पतेऽच्छिद्रया वाचाच्छिद्रया जुह्वा दिवि देवावृधꣳ होत्रामेरयत्स्वाहेति सैव दीक्षा ॥६॥ तदाहुः । अध्वर्यो यद्दीक्षितस्य नानवभृथोऽवकल्पते क्वैनमवभृथमवनेष्यसीति स यद्धृदयशूलेन चरन्ति स हैवैतस्यावभृथः ॥७॥ मधुको ह स्माह पैङ्ग्यः । विसोमेन वा एके पशुबन्धेन यजन्ते ससोमेनैके दिवि वै सोम आसीत्तं गायत्री वयो भूत्वाहरत्तस्य यत्पर्णमच्छिद्यत तत्पर्णस्य पर्णत्वमिति न्वा एतद्ब्राह्मणमुद्यते विसोमेन वा एके पशुबन्धेन यजन्ते ससोमेनैके स हैष विसोमेन पशुबन्धेन यजते योऽन्यं पालाशाद्यूपं कुरुतेऽथ हैष ससोमेन पशुबन्धेन यजते यः पालाशं यूपं कुरुते तस्मात्पालाशमेव यूपं कुर्वीत ॥८॥ ब्राह्मणम् ॥८ [७. २.] ॥॥

स य एष बहुसारः । स हापशव्यस्तस्मात्तादृशं पशुकामो यूपं न कुर्वीताथ य एष फल्गुप्रासहः स ह पशव्यस्तस्मात्तादृशं पशुकामो यूपं कुर्वीत ॥१॥ अथ यस्यैतद्वक्रस्य सतः । शूल-इवाग्रं भवति स ह कपोती नाम स यो ह तादृशं यूपं कुरुते पुरा हायुषोऽमुं लोकमेति तस्मात्तादृशमायुष्कामो यूपं न कुर्वीत ॥२॥ अथ य एष आनतः । उपरिष्टादपनतो मध्ये सोऽशनायै रूपꣳ स यो ह तादृशं यूपं कुरुतेऽशनायुका हास्य भार्या भवन्ति तस्मात्तादृशमन्नाद्यकामो यूपं न कुर्वीताथ य एष आनत उपरिष्टादुपनतो मध्ये सोऽन्नाद्यस्य रूपं तस्मात्तादृशमन्नाद्यकामो यूपं कुर्वीत ॥३॥ ब्राह्मणम् ॥१ [७. ३.] ॥॥

स यत्पशुना यक्ष्यमाणः । एकारत्निं यूपं कुरुतऽइममेव तेन लोकं जयत्यथ यद्व्यरत्निमन्तरिक्षलोकमेव तेन जयत्यथ यत्त्र्यरत्निं दिवमेव तेन जयत्यथ यच्चतुररत्निं दिश एव तेन जयति स वाऽएष त्र्यरत्निर्वैव चतुररत्निर्वा पशुबन्धयूपो भवत्यथ योऽत ऊर्ध्वः सौम्यस्यैव सोऽध्वरस्य ॥ १॥ तदाहुः । यजेदाज्यभागौ ना३ इति यजेदित्याहुश्चक्षुषी वाऽएते यज्ञस्य यदाज्यभागौ किमृते पुरुषश्चक्षुर्भ्यां स्यादिति यावद्धि भागिनं स्वेन भागधेयेन न निर्भजत्यनिर्भक्तो वै स तावन्मन्यतेऽथ यदेव तं स्वेन भागधेयेन निर्भजत्यथैव स निर्भक्तो मन्यते स यत्रैतद्धोतान्वाहास्मा रक्षः संसृजतादिति तदेनं स्वेन भागधेयेन निर्भजति ॥ २॥ एतद्धि पशोः संज्ञप्यमानस्य । हृदयं शुक्समवैति हृदयाच्छूलं तद्यत्सह हृदयेन पशुं श्रपयन्ति पुनः पशुं शुगनुविष्यन्दते पार्श्वत एवैनत्काष्ठे प्रवृह्य श्रपयेत् ॥ ३॥ उपस्तृणीतऽआज्यम् । तत्पृथिव्यै रूपं करोति हिरण्यशकलमवदधाति तदग्ने रूपं करोति वपामवदधाति तदन्तरिक्षस्य रूपं करोति हिरण्यशकलमवदधाति तदादित्यस्य रूपं करोत्यथ यदुपरिष्टादभिघारयति तद्दिवो रूपं करोति सा वाऽएषा पञ्चावत्ता वपा भवति पाङ्क्तो यज्ञः पाङ्क्तः पशुः पञ्चऽर्तवः संवत्सरस्य तस्मात्पञ्चावत्ता वपा भवति ॥ ४॥ ब्राह्मणम् ॥ १० [७. ४.] ॥ सप्तमोऽध्यायः [७. ३.] ॥ ॥

तद्यथा ह वै । इदं रथचक्रं वा कौलालचक्रं वाप्रतिष्ठितं क्रन्देदेवं हैवेमे लोका अध्रुवा अप्रतिष्ठिता आसुः ॥ १॥ स ह प्रजापतिरीक्षां चक्रे । कथं न्विमे लोका ध्रुवाः प्रतिष्ठिताः स्युरिति स एभिश्चैव पर्वतैर्नदीभिश्चेमामदृंहद्वयोभिश्च मरीचिभिश्चान्तरिक्षं जीमूतैश्च नक्षत्रैश्च दिवम् ॥ २॥ स मह इति व्याहरत् । पशवो वै महस्तस्माद्यस्यैते बहवो भवन्ति भूयिष्ठमस्य कुले महीयन्ते बहवो ह वाऽअस्यैते भवन्ति भूयिष्ठं हास्य कुले महीयन्ते तस्माद्यएनमापतनाद्वाधेरन्वा प्र वा पापयेयुरग्निहोत्रं हुत्वा मह इत्युपतिष्ठेत प्रति प्रजया

पशुभिस्तिष्ठति नायतनाच्च्यवते ॥३॥ ब्राह्मणम् ॥ ११ [८. १.] ॥ ॥

चत्वारो ह वाऽअग्नयः । आहित उद्धृतः प्रहृतो विहृतोऽयमेव लोक आहितोऽन्तरिक्षलोक उद्धृतो द्यौष्प्रहृतो दिशो विहृतोऽग्निरेवाहितो वायुरुद्धृत आदित्यः प्रहृतश्चन्द्रमा विहृता गार्हपत्य एवाहित आहवनीय उद्धृतोऽथ यमेतमाहवनीयात्प्राञ्चं प्रणयन्ति स प्रहृतोऽथ यमेतमुदञ्चं पशुश्रपणायाहरन्ति यं चोपयड्भ्यः स विहृतस्तस्मात्प्रहृतेऽग्नौ पशुबन्धेन यजेत ॥१॥ ब्राह्मणम् ॥ १२ [८. २.] ॥ ॥

तदाहुः । किंदेवत्य एष पशुः स्यादिति प्राजापत्यः स्यादित्याहुः प्रजापतिर्वाऽएतमग्रेऽभ्यपश्यत्तस्मात्प्राजापत्य एवैष पशुः स्यादिति ॥१॥ अथोऽअप्याहुः । सौर्य एवैष पशुः स्यादिति तस्मादेतस्मिन्नस्तमिते पशवो बध्यन्ते बध्नन्त्येकान्यथागोष्ठमेकऽउपसमायन्ति तस्मात्सौर्य एवैष पशुः स्यादिति ॥२॥ अथोऽअप्याहुः । ऐन्द्राग्न एवैष पशुः स्यादित्येते वै देवतेऽअन्वन्ये देवा यच्चार्तो यजते पारयतऽएव यदि महसा यजते पारयतऽएव तस्मादैन्द्राग्न एवैष पशुः स्यादिति ॥३॥ प्राण एव पशुबन्धः । तस्माद्यावज्जीवति नास्यान्यः पशूनामीष्टे बद्धा ह्यस्मिन्नेते भवन्ति ॥४॥ स ह प्रजापतिरग्निमुवाच । यजै त्वया त्वा लभाऽइति नेति होवाच वायुं ब्रूहीति स ह वायुमुवाच यजै त्वया त्वा लभाऽइति नेति होवाच पुरुषं ब्रूहीति स ह पुरुषमुवाच यजै त्वया त्वा लभा इति नेति होवाच पशून्ब्रूहीति स ह पशूनुवाच यजै युष्माभिरा वो लभाऽइति नेति होचुश्चन्द्रमसं ब्रूहीति स ह चन्द्रमसमुवाच यजै त्वया त्वा लभाऽइति नेति होवाचादित्यं ब्रूहीति स हादित्यमुवाच यजै त्वया त्वा लभाऽइति तथेति होवाच यऽउ तऽएते नाचीकमन्त किमु मऽएतेषु स्यादिति यद्यत्कामयेथा इति तथेति तमालभत सोऽस्यायं पशुरालब्धः संज्ञप्तोऽश्वयत्तमेताभिराप्रीभिराप्रीणात्तच्चदेनमेताभिराप्रीभिराप्रीणात्त-

स्मादाप्रियो नाम तस्माद्य पशुः संज्ञप्तं ब्रूयाद्धितां नु मुहूर्तमिति स यावत्तमश्वमे- धेनेष्ट्वा लोकं जयति तावत्तमेतेन जयति ॥ ५॥ तं प्राची दिक् । प्राणेत्यनुप्राणत्प्राणमेवास्मिंस्तद्दधात्तं दक्षिणा दिग्व्यानेत्यनुप्राणद्व्यानमेवास्मिंस्तद्दधात्तं प्रतीची दिगपानेत्यनुप्राणदपानमेवास्मिंस्तद्दधात्तमुदीची दिगुदानेत्यनुप्राणदुदानमेवास्मिंस्तद्दधात्तमूर्ध्वा दिक्समानेत्यनुप्राणत्समानमेवास्मिंस्तद्दधात्तस्माद्य पुत्रं जातमकृत्तनाभिं पश्च ब्राह्मणान्ब्रूयादित्येनमनुप्राणितेति यद्यु तान्न विन्देदपि स्वयमेवानुपरिक्रामन्ननुप्राण्यात्स सर्वमायुरेत्या हैव जरायै जीवति ॥ ६॥ स प्राणमेवाग्नेरादत्त । तस्मादेष नानुपध्मातो नानुपज्वलितो ज्वलत्यात्तो ह्यस्य प्राण आ ह वै द्विषतो भ्रातृव्यस्य प्राणं दत्ते य एवं वेद ॥ ७॥ रूपमेव वायोरादत्त । तस्मादेतस्य लेलयत इवैवोपशृण्वन्ति न त्वेनं पश्यन्त्यात्तः ह्यस्य रूपमा ह वै द्विषतो भ्रातृव्यस्य रूपं दत्ते य एवं वेद ॥ ८॥ चित्तमेव पुरुषस्यादत्त । तस्मादाहुर्देवचित्तं त्वावतु मा मनुष्यचित्तमित्यात्तः ह्यस्य चित्तमा ह वै द्विषतो भ्रातृव्यस्य चित्तं दत्ते य एवं वेद ॥ ९॥ चक्षुरेव पशूनामादत्त । तस्मादेते चाकश्यमाना इवैव न जानन्त्यथ यदैवोपजिघ्रन्त्यथ जानन्त्यात्तः ह्येषां चक्षुरा ह वै द्विषतो भ्रातृव्यस्य चक्षुर्दत्ते य एवं वेद ॥ १०॥ भामेव चन्द्रमस आदत्त । तस्मादेतयोः सदृशयोः सतोर्नितरां चन्द्रमा भात्यात्ता ह्यस्य भा आ ह वै द्विषतो भ्रातृव्यस्य भां दत्ते य एवं वेद तद्यदादत्त तस्मादादित्यः ॥ ११॥ ब्राह्मणम् ॥ १३ [८. ३.] ॥ ॥

केशिगृहपतीनामु ह । सम्राड्दुघाः शार्दूलो जघान स ह सत्त्रिण आमन्त्रयां चक्रे केह प्रायश्चित्तिरिति ते होचुर्नेह प्रायश्चित्तिरस्ति खण्डिक एवौद्भारिरस्य प्रायश्चित्तिं वेद स उ त्वऽएतादृक्चैव कामयतेऽतश्च पापीय इति ॥ १॥ स होवाच । संग्रहीतर्युङ्ग्धि मे स्यन्त्स्यामि स यद्यह मे वक्ष्यति समास्यामि यद्यु

मा मारयिष्यति यन्नं विकृष्टमनु विक्रन्द्यऽइति ॥२॥ स ह युक्त्वा ययावाजगाम । तꣳ ह प्रतिख्यायोवाच यन्न्वेतान्येवाजिनानि मृगेषु भवन्त्यथैषां पृष्टीरपिशीर्य पचामहे कृष्णाजिनं मे ग्रीवास्वाबद्धमित्येव मेदमधृषोऽभ्यवस्यन्तू३मिति ॥३॥ नेति होवाच । सम्राड्दुघां वै मे भगवः शार्दूलोऽवधीत्स यद्यद्ध मे वक्ष्यसि समाप्स्यामि यद्यु मा मारयिष्यसि यन्नं विकृष्टमनु विक्रन्द्यऽइति ॥४॥ स होवाच । आमन्त्रणीयान्वामन्त्रयाऽइति तान्हामन्त्र्योवाच यद्यस्मै वक्ष्याम्यमुष्यैवेदं प्रजा भविष्यति न मम लोको न्वहं भविष्यामि यद्यु वाऽअस्मै न वक्ष्यामि ममैवेदं प्रजा भविष्यति नामुष्य लोको न्वसौ भविष्यतीति ते होचुर्मा भगवो वोचोऽयं वाव क्षत्रियस्य लोक इति स होवाच वक्ष्याम्येवामूर्वै रात्रयो भूयस्य इति ॥५॥ तस्माऽउ हैतदुवाच । स्पृतीर्ह्वान्यामाजतेति ब्रूतात्सा ते सम्राड्दुघा स्यादिति चन्द्रात्ते मन स्पृणोमि स्वाहा सूर्यात्ते चक्षु स्पृणोमि स्वाहा वातात्ते प्राणान्स्पृणोमि स्वाहा दिग्भ्यस्ते श्रोत्रꣳ स्पृणोमि स्वाहाद्भ्यस्ते लोहितꣳ स्पृणोमि स्वाहा पृथिव्यै ते शरीरꣳ स्पृणोमि स्वाहेत्यथान्यामाजतेति ब्रूतात्सा ते सम्राड्दुघा स्यादिति ततो हैव स उत्ससाद केशिनीर्ह्वेमा अप्येतर्हि प्रजा जायन्ते ॥६॥ ब्राह्मणम् ॥१४ [८.४.] ॥ चतुर्थः प्रपाठकः ॥ कण्डिकासंख्या१०२ ॥ अष्टमोऽध्यायः [७४.] ॥ ॥ अस्मिन्काण्डे कण्डिकासंख्या४३७ ॥ ॥

इति माध्यन्दिनीये शतपथब्राह्मणेऽष्टाध्यायीनामैकादशं काण्डं समाप्तम् ॥११॥ ॥

EXTRACTS FROM THE COMMENTARY OF SÂYANÂCÂRYA.

इत्थं काण्डदशात्मकः शतपथपूर्वभागो व्याख्यातस्तत्र प्रथमद्वितीयकाण्डाभ्यां दर्शपूर्णमासाधानाग्निहोत्रतदुपस्थानादीनि चातुर्मास्यान्तानि प्रतिपादितानि तृतीयचतुर्थाभ्यामेकाहाहीनसत्त्रात्मकसकलसोमयागप्रकृतिभूतश्चतुःसंस्थो ज्योतिष्टोमः प्रत्यपादि पञ्चमेन वाजपेयराजसूयौ षष्ठादिकाण्डचतुष्टयेन प्रकृतिविकृतिभूतसोमयागाश्रितमग्निचयनाख्यं (? योमिया Cod.) कर्म विस्तरेण प्रतिपादितम् दशमे तत्प्रशंसार्थमुखेन तदाश्रितान्युपशमनानि विहितानीति

पूर्वभागार्थसंक्षेपः ॥ उत्तरभागे अष्टाध्यायिसौत्रामण्यश्वमेधाख्यास्त्रयः काण्डाश्चतुर्थस्तु ब्रह्मप्रतिपादको बृहदारण्यकाख्यः (कार्थः Cod.) ॥ तत्र प्रथमे काण्डे पूर्वोक्तमाधानादिकं कर्मानूद्य प्राग्विहितकालाद्यवशिष्टाङ्गकलापविधिः तत्प्रशंसा च क्रियते । तत्र तावदग्निहोत्रदर्शपूर्णमासाग्निष्टोमानां मूलप्रकृतीनां तद्विकृतीनां मासाग्निहोत्रसौर्ययागविश्वजिदादीनां सर्वेषां श्रौतकर्मणां गार्हपत्याद्यग्निसाध्यत्वात्तस्य बाधानपवमानेष्टिभ्यामग्निसिद्धिरिति न्यायेन अनाधानानिष्पाद्यत्वादाधानमेवादौ वक्तव्यम् । तस्य च स्वाभिमतं कालं विसृजन्यज्ञादीन्संवत्सराद्यात्मना निरूपयति । दर्शपूर्णमासादियज्ञात्मकः प्रजापतिः । ओश्रावयेत्यादिसप्तदशाक्षरसाध्यत्वाद्यज्ञस्य प्रजापतित्वम् संवत्सरस्यापि सप्तदशावयवत्वं यस्मात् प्रजापतेस्तस्य च तादात्म्यम् । प्रतिपदादिषु तिथिषु मध्ये यस्यां तिथौ अमा सूर्येण सह चन्द्रो वसति सामावास्या ॥१॥ गार्हपत्याहवनीयाख्यौ अग्नी आदधीत आयतनेषु विधानेन स्थापयेत् । तदिपधायकचन्द्रादर्शनेन विवृतत्वात् । स्वर्गं लोकम् लोक्यतऽइति लोकः सुष्ठु अर्ज्यते शोभनेनार्जनेन गम्यतऽइति वा स्वर्गः ॥२॥ चन्द्रदर्शनेनामावास्यारूपस्य द्वारस्य पिहितत्वात् ॥३॥ तस्मिन्भूम्यां वसति सति तदुपजीविनो देवाद्याः इमं लोकमधिवसन्ति ॥४॥ विशाखानक्षत्रयुक्ता पौर्णमासी यस्मिन्मासे स वैशाखः । रोहिण्या सम्पद्यते रोहिणीनक्षत्रयुक्ता भवति । वैशाख्यां पौर्णमास्यां तावद्विशाखा नक्षत्रं ततः पञ्चदशसु नक्षत्रेषु परिगणितेषु अमावास्यायां रोहिणी भवति । अमावास्यायां पवमानेष्टिभिः सहाधाने परिसमाप्ते यद्यपि दर्शयागः प्राप्तावसरस्तथाप्यागामिन्यां पौर्णमास्यामन्वारभेत अन्वारम्भणीयेष्टिं कृत्वा पूर्णमासयागेनेष्ट्वा आगामिन्याममावास्यायां दर्शयागमपि कृत्वा तस्यामेवामास्यायां दीक्षेत सोमयागं प्रारभेत ॥७॥१॥१॥

एवमाधानस्य अमावास्यालक्षणं प्रारम्भकालं नियम्य (? लानेमम्य Cod.) दर्शपूर्णमासयोरप्युपवसथकालं निर्णेष्यन् आदौ च तत्रत्यानामाहुतीनां संख्याविशेषमुपजीव्य स्तोतुमुपोद्धातयति (टयति Cod.) ॥१॥ दशसंख्यापन्नो वर्गो दशत् वषट्कारप्रदानास्ता आहुतीर्दशतः दशकसंघातरूपाः सम्पादयेत् न न्यूनाधिकसंख्याः ॥२॥ तत्र दर्शपूर्णमासयोः प्रथमं पञ्च (यत्र Cod.) प्रयाजास्ततो द्वावाज्यभागौ आग्नेयोऽग्नीषोमीय उपांशुयाजश्चेति पौर्णमास्यां त्रीणि दर्शे तु (दर्शो नु Cod.) आग्नेयोऽष्टाकपालो वैष्णव उपांशुयाज ऐन्द्रं पय इति त्रीणि एवं दश वषट्कारप्रदाना आहुतयः पशुसोमयोरित्यनेन न्यायेन दशसंख्यासम्पत्तिर्द्रष्टव्या । असोमयाजिनस्तु पौर्णमासे अग्नीषोमीययागो नास्ति अतस्तदपेक्षया नवसंख्योपजीवनेन स्तौति ॥४॥ प्रधानानन्तरभाविस्विष्टकृद्यागापेक्षया स्तौति । वषट्काराहुतिदशकानन्तरं स्विष्टकृद्यागरूपा एका स्विष्टकृदाहुतिरूपा अतिरिक्ता ॥५॥ इत्थमिष्टिविषये स्विष्टकृतः सम्पत्तिमभिधाय पशुयागविषयो विशेषो विद्यतऽइत्यभिप्रेत्य प्रतिपादयति । तत्र हि वनस्पतियागः स्विष्टकृद्यागश्चेति द्वे आहुती अधिके स्याताम् ॥६॥ दर्शपूर्णमासयोरनुयाजसंख्योपजीवनेन सम्पत्तिमाह अनुयाजयागरूपास्तिस्र आहुतयः प्रकृतादाहुतिदशकादधिकाः ॥७॥ स्विष्टकृदनुयाजान्सम्भूय चतस्र आहुतयोऽतिरिक्ता भवेयुः । यद्वा सोमः त्वष्टा देवपत्न्योऽग्निर्गृहपतिरिति चत्वारः पत्नीसंयाजास्तेऽप्युक्तादशकादतिरिच्यन्ते ॥८॥ विंशतिप्रभृतिषु दशकेषु आ सहस्रात् एकैकं दशकं विभज्य एषा विराट्सम्पत्तिर्ज्ञातव्या ॥९॥ यावज्जीवं दर्शपूर्णमासाभ्यां

यजेतेत्येकः पक्षः त्रिंशतं वा वर्षाणीति पक्षान्तरम् तदिदानीं प्रतिपाद्यते ॥१०॥ अतः संवत्सरप्राप्तिरेवामृतत्वप्राप्तिः ॥११॥ स च आश्रितानां जगद्व्यापारनिर्वाहार्थमुदयाचलादिस्थानविशेषं नियमेन प्राप्नुवतां सूर्यादीनां मध्ये स्वयमप्येको भवति । संवत्सररूपप्राप्तिजननाय त्रिंशद्वर्षपर्यन्तं यजेत । दर्शपूर्णमासारम्भकाले आवृत्तिगुणविशिष्टौ तावारभमाणो दाक्षायणयज्ञयाजी । एवं प्रतिपर्व द्विरावृत्त्यानुष्ठिते सति त्रिंशद्वर्षानुष्ठानेन या सम्पद्भवति अत्र दाक्षायणयज्ञयागे पञ्चदशवर्षानुष्ठानेऽपि सा सम्पत्सिध्यति ॥१३॥२॥१॥

पौर्णमासयागे दर्शयागे च वृत्तक्रमेणानुनिर्वाप्यं हविर्विधत्ते ॥ अनु पौर्णमासयागानन्तरमेकादशकपालं पुरोडाशं निर्वपेत् तेन हविषा यथेष्टि येन प्रकारेण प्रयोगकलापेन पूर्णमासेष्टिः क्रियते एवमनेनैव प्रकारेण यजेत ॥१॥ अथानुनिर्वाप्याभावपक्षमभिधत्ते अथ यस्मादिति ॥३॥ उक्तस्य प्रयोजनस्यानुनिर्वाप्यमन्तरेणापि सिद्धिं वक्तुं तदनुवदति स यदिति ॥४॥ इममेव पक्षमुपोद्बलयितुमनुनिर्वाप्यपक्षे दोषमाह ॥६॥ इत्थं पक्षद्वयप्रतिपादनेनानुनिर्वाप्यस्य हविषो विकल्पोऽयं षोडशिग्रहणवत्सिद्धः स यदीति । दर्शपूर्णमासयोरेव दक्षिणा न त्वनुनिर्वाप्यस्य हविषः तस्य बहिस्तन्त्रवर्तित्वेन प्रयाजादिवैलक्षण्यात् । वर्तिष्यमाणप्रयोगजातस्य हविषो नैमित्तिकप्रयोग इतः परं विक्रियतऽइति वृत्तवर्तिष्यमाणसौकर्यपरिहारार्थो विभागनिर्देशः ॥७॥३॥१॥

अभ्युदयनिमित्तं कर्म विधित्सुस्तस्य निमित्तस्य सम्भवमादौ कथयति । चतुर्दशीमिश्रितपर्वणि प्रभातसमये प्राच्यां दिशि चन्द्रं दृष्ट्वा । श्वः परस्मिन्दिवसे यागकाले चन्द्रो नोदेष्यति । मेघचरणनिमित्तात् तिथिनिर्णयमज्ञात्वा वा अकाले यथोपवसथं कर्माग्न्यन्वाधानादिकं करोति अथानन्तरं यागदिवसे एनं यजमानं चन्द्रोऽभ्युदेति चतुर्दशीमिश्रतया चन्द्रकलादर्शनं तस्य भवति । परदिवसे हविर्निर्वापात्पूर्वमकाले कर्म प्रक्रान्तमिति यदि ज्ञायेत तदा प्रज्ञातमेव तावत्तं प्रयोगजातं कृतमिति निश्चित्य ततस्तूष्णीमासीत एषा वक्ष्यमाणैव व्रतचर्या व्रतस्य नियमस्याचरणं कार्यम् । प्रातर्दोहार्थं येऽपाकृता वत्सास्तान्पुनर्मातृभिः संसृजेयुः एवं कृत्वा पुनः सायंदोहार्थे तान्मातृभ्यः पृथक्कुर्युः ॥१॥ उक्तव्रतचर्याकरणाशक्तौ हविर्निर्वापोत्तरकाले च कर्तव्यमुपदिशति यद्यु इति । नेक्षेत् आङः शसिरिक्रियाम् (धा° १६. २८.) ॥२॥ यस्मिन्कस्मिन्दधनि चौरे वा तण्डुलाः प्रक्षिप्यन्ते चरुरेव स भवति ॥३॥ उपांशुमैक्षत । तमपारात्सीत् अकाले कर्मणः प्रारम्भादपराद्धं (भातपराधं Cod.) प्रच्युतमकार्षीत् । तेनान्नभूतस्य चन्द्रमसो ग्रहणाभावान्निरुप्तं हविर्विकलमेव स्यात् तं तथाविधमन्नरूपं चन्द्रमसं दातृगुणविशिष्टोऽग्निरस्मै यजमानाय ददाति । अकाले निरुप्तं हविः शिथितं तदाश्रितो (? °तस्तदा° Cod.) दोषविशेषः तद्युक्तमिव यज्ञस्य शरीरं भवति । यदा चन्द्रो नोदियात् पूर्वस्यां दिशि नाविर्भवति चतुर्दशीसंस्पर्शी यस्मिन्दिने नास्ति तस्मिन्दिवसे ॥४॥४॥१॥

दर्शयागे पुरस्ताच्चन्द्रदर्शनप्र[य]श्चित्तेष्टिरुक्ता अथ पश्चात्तद्दर्शने नैमित्तिकामिष्टिं विधित्सुराह । अथानन्तरं सायंकाले एष चन्द्रमाः पश्चात्प्रतीच्यां दिशि ददृशे दृश्यते । अभ्यवेक्षते अभ्यवहर्तुं पश्यति यथा शालावृको वने संचरतो मेषादीन्पशूनभ्यवजिहीर्षति । एतस्मादेव खलु चन्द्रसम्बन्धिस्वरूपेण पूर्वोक्तात् अतयेनाकारः (?) समासान्तः तस्माच्चन्द्रादिति भीषा

उक्तानूपथा भीत्या छायामुपगच्छन्ति गवाद्याः पशवः तिरोहिता यजमानस्य भवन्तीत्यर्थः पशूनामुपतापकारि यदेतच्चन्द्रदर्शनं तत् खलुचितं शुना रिक्तीकृतमित्याचक्षते ॥ २॥ एतमेव चन्द्रगतं दोषमेवमाचक्षते चन्द्रमसः सम्बन्धी तन्मण्डलमध्यवर्ती शश इति अत एव तस्य शशाङ्क इति प्रसिद्धिः । उपवसथकाष्ठां गतं देवान्नरूपं चन्द्रमसं पौर्णमासीकाले द्रवीकुर्वन्ति । पशव ओषधीर्जग्धा अपश्च पीत्वात्मनि नं चान्द्रमसं कृत्स्नं रसममावास्यायां धारयन्ति तत एनं रसममावास्यासम्बन्धिन्यां रात्रौ पशुभ्यः सकाशात्संनयति सम्यक्प्रापयति तत्संनयनं प्रतिपच्चन्द्रदर्शने सति नोपपद्यते ॥ ३॥ दर्शयागस्यातिक्रान्तकालत्वे दोषमुपन्यस्य तन्त्रानुष्ठानप्रकारमाह । प्रकृतो दर्शयागः शीघ्रं समापनीयः अनन्तरमेवैतद्दोषपरिहाराय प्रायश्चित्तेष्टिः कर्तव्या । स आमावास्यविधेनैवेति यश्चोदितकालेऽनुष्ठितोऽमावास्यायागस्तत्प्रकारेणैव प्रतिपदि प्रक्रान्तां दर्शेष्टिं समाप्य ॥ ४॥ अथास्यामिष्टौ प्रकृतिवद्विकृतिः कर्तव्येति चोदकप्राप्तेष्वङ्गेषु विशेषं विधत्ते । प्रकृतौ पञ्चदश अत्र चोदकप्राप्तास्ताः पृथुवाजवत्यौ धाय्ये द्वेऽइति सप्तदश भवन्ति । प्रकृतौ प्रधानयागे उच्चैर्धर्मः । प्रकृतदेवतालिङ्गयुक्ताश्चतुःषष्ठ्यां दाशतय्यां समाम्नाता या ऋचः कामयते । आज्यभागयोः स्विष्टकृद्यागे च याथाकाम्यम् ॥ ९॥ तिसृभिरिषुभिर्युक्तं धन्व तिसृधन्वम् पूर्ववदकारः समासान्तः । एत चन्द्रात्मकं दिव्यं श्वानम् ॥ १०॥ अदृश्यमानचन्द्रोऽपि ॥ ११॥ ५॥ १॥

अथ दर्शपूर्णमासयोः सर्वात्मकलक्षणवैराजपदप्राप्तिसाधनतां वक्ष्यन् तदुपोद्घातत्वेनाख्यायिकया सृष्टिं प्रतिपादयति ॥ १॥ विजायते विविधशरीरद्वयरूपेणोत्पद्यते । तस्य प्रजापतेः आस्पदं किमपि न बभूव स (!) च निराधारत्वात्स्थातुमशक्नुवन्निदमेव भिन्नं हिरण्मयाण्डं पुनः सवत्सरपर्यन्तं बिभ्रज्जारयन् (!) तास्वेवाप्सु पर्यस्रवत् ॥ २॥ आण्डं विहाय इमान्सृष्टान्पृथिव्यादिलोकान्विलङ्घ्य ऊर्ध्वं स्थितवान् ॥ ५॥ पारमवसानं पराचख्यौ परागतेन दूरगमनशीलेन मनसा ददर्श ॥ ६॥ द्युलोकमभिपद्यावष्टभ्य । दिवेवास आकाश-इव बभूव ॥ ७॥ यत एवं प्रजापतिना सृष्टिसमयऽएव तिरस्कृता असुरास्तस्मादभिज्ञा एव कथयन्ति नैतदस्तीति यद्दैवासुरं देवांश्चासुरांश्चाधिकृत्य प्रवृत्तं (कृतप्रवृत्त Cod.) युद्धादिकं यदस्ति तन्नैवास्ति ॥ ९॥ उक्तार्थदार्ढ्याय ऋचमपि संवादयति । हे इन्द्र युद्धं न कृतवान् प्रतिभटानामसुराणामभावात् किमपि शत्रुसैन्यं नाहः नावधीः तव शत्रुः कोऽपि नास्ति वृत्रादिभिरसुरैः सह यानि तव युद्धान्याहुः तन्मायामात्रं न तु पारमार्थिकम् ॥ १०॥ त्सर छद्मगत्याम् त्सरति कौटिल्येन गच्छति ॥ १२॥ अधिदेवताः आधिक्यगुणोपताः सर्वोत्कृष्टा देवताः ॥ १४॥ ता आपो यस्मात्परमे उत्कृष्टे स्थाने व्योम्नि तिष्ठन्ति । परमात्स्थानात्खल्वेष (!) पर्जन्यो वर्षति ॥ १६॥ कामान्पूरयतीति कामप्रः पृ प्रापण (! धा° २४. ५३.) ऽइति आतोऽनुपसर्गे कः (पा° ३. २. ३.) । प्राणो वाऽइदं सर्वमिति सूत्रात्मतया सर्वाधारत्वात्तस्य सर्वात्मकत्वम् । तस्य प्रजापतेर्दृष्टिः प्राणवायुः शब्दस्पर्शादिविषयसाक्षात्कारहे[तु]त्वात् । यत्खलु वस्तु इत्यात् अनेन प्रकारेणासौ प्राणो वायुर्वाति वर्ततऽइति जानाति किमपि तत्सर्वं प्राणवद्भवति अतः प्राणिसंघः प्रजापतिः । आविर्भवति प्रकाशतऽएव ॥ १७॥ प्राच्यः पूर्वदिगभिमुखाः स्वस्तिपुरःसरा एव सर्पन्ति गच्छन्ति । एनां प्राचीं दिशमुपेत्य इतः परं कुर्वीमहि कार्यान्तरं सृजेमहि । पश्येम साक्षात्कुर्याम ॥ २१॥ ऋत्विक्परिक्रयहेतुतया गन्तव्या गावो दक्षिणाशब्देनाभिधेयाः

॥२२॥ अप्राप्तफलविषयोऽभिलाष आशा । यस्मात्प्राङ्मुखो गत्वा इष्टं फलं लभते तस्मात्प्रतीच्यां दिशि यथास्थानमवस्थितस्य फलप्राप्तिविरहादाशैव केवलम् । उपकुर्वीमहि उपेत्य रूपान्तरेण कुर्याम । अस्याः (!) पृथिव्याः सम्बन्धि बहुतरस्थानं यो लभते ॥२३॥ यदा भूर्लोकमापः वृष्ट्यात्मना प्राप्नुवन्ति ॥२४॥ ता अनुक्रान्ताः प्राची दिग्धुलोकः दक्षिणा दिगन्तरिक्षलोकः प्रतीची दिगाशा श्रीः पृथिवी च उदीची दिगापो धर्म इत्येकादशसंख्याका देवताः एता एव प्रयाजाद्या एकादशात्मतया वर्तन्ते ॥२५॥ आग्नेय्याद्यवान्तरदिशां जयोपायः ॥२७॥ इतराभ्य आहुतिभ्यः प्रधानहविर्भ्यः सकाशादभ्यर्धे अभिगतो अर्धो देशः यथा प्रधानहविर्भिः संसर्गो न भवति तथाभूतदेशे ॥३०॥ आण्डाभ्यां सह त्रिवम् । तं वाऽनवानमिति (!) अनवानमनुच्छ्वसयन् । अमृध्रमविच्छिन्नम् ॥३१॥ प्रतृषमूर्ध्वमुखमेवावतिष्ठेत् । यस्मादेतत्सुपर्वकम् तदात्मकस्य तृतीयानुयाजस्य याज्यामध्ये विच्छेदः अवसानं कृतम् ॥३२॥ अप्रदग्धेव प्रदाहरहितेव । अनवतृषः अविच्छिन्नः ॥३३॥ याज्यानुवाक्या ऋच इति यत् तन्मितं परिमितं छन्दः कदाचिदपि न्यूनाधिकभावो न भवति । समावन्ति समपरिमाणानि ॥३४॥ एषां प्रयाजादीनामध्यात्ममुक्तेष्वङ्गेषु मध्ये यथैकमङ्गं (यप्येक° Cod.) हिंस्यात् । तस्मादेतानि प्रयाजानुयाजादीनि प्राच्योदीच्यान्यङ्गजातानि तत्प्रतिनियतावयवरूपतया यज्ञशरीरनिष्पादकानीति सर्वेष्टि[षु] तत्र साधारणानि । अन्यप्रधानहविषामावापोद्वारयोग्यतां (वायावायोद्वार) चाह अन्यान्येवेति उपाह्रियन्ते आज्यभागानन्तरं स्विष्टकृद्यागात्पूर्वं प्रधानयागस्थाने प्रक्षिप्यन्ते प्रयोगान्तरे अपह्रियन्ते च उद्धार्यन्ते ॥३५॥ पञ्च प्रयाजाः द्वावाज्यभागौ स्विष्टकृदिडा त्रयोऽनुयाजाः चत्वारः पत्नीसंयाजा इति षोडश सर्वत्र साधारण्येन भवन्ति ॥३६॥६॥१॥

अथ तत्रैव दर्शपूर्णमासयोः (योङ्गे Cod.) व्रतोपायनविषयां मीमांसां कर्तुं प्रतिजानीते । अदः अमुष्मिन्व्रतमुपैष्यन्नित्यादौ (१. १. १. १.) । स्थापयन्ति केचिन्निर्णयं कुर्वन्ति ॥१॥ एतदारण्याशनं पूर्वपक्षोक्तुर्वन्सम्भवत्पक्षान्तराण्युपन्यस्य दूषयति । मेध्यं यज्ञियं सारम् ॥२॥ पर्वरात्रौ यजमानः स्वयमेवाग्निहोत्रं जुहुयात् ॥३॥ समवयन्ति सम्प्राप्नुवन्ति एकीभवन्ति । एवंविदुषः स्वयं पर्वणि जुह्वतो यजमानस्य अन्यासु रात्रिषु ऋत्विजा क्रियमाणोऽपि होमः स्वयंहोमः सम्पद्यते ॥४॥७॥१॥

उक्तविधं व्रतमुपेयुषो यजमानस्य हविरूपब्रुवंस्तस्मिन्निष्क्रयणहेतुतां (°पलब्रुवंस्तस्मिन्निमिश्रय° Cod.) दर्शपूर्णमासयागस्य प्रतिपादयितुमाख्यायिकया यज्ञोत्पत्तिमाह ॥ ५. १. १. १. ॥१॥ एतामौपवसथीयदिवसस्य रात्रिं संयत एव संयतेन्द्रियव्यापार एव सन् वर्तितुमिच्छेत् । व्रतमुपेयिवान्यजमानः औपवसथदिवसे देवानां स्वयमेव हविर्भवति ॥४॥ अथानन्तरं परस्मिन्दिवसे यदा दर्शपूर्णमासादियज्ञं तनुते ॥५॥ भग्नाग्रो वृक्ष इव यज्ञो भवति उपर्यवस्थिताया आहुतेरनिष्क्रीतत्वात् । अन्वाहरति पुनः संदधाति दोषजातमनेन शमयतीति करणसाधनो एयत् । आत्मा देही भवति । सर्वतनूरेव सर्वावयवसम्पूर्ण एव । निष्क्रीत्या निष्क्रयणेन दर्शपूर्णमासाभ्याम् ॥६॥८॥१॥

अथ विशिष्टजन्महेतुतया सामिधेनीः प्रशिष्यन् (?) पुरुषस्य जन्मत्रयमाह ॥१॥ त्रीणि जन्मानि प्रदर्श्य यज्ञादेव पुनर्जन्मत्रयं प्रदर्शयन् (? °दशन Cod.) सामिधेनीसंख्याद्वारा प्रथमं जन्म समर्थयति । ताः प्रसिद्धाः प्र वो वाजा इत्याद्याः । सप्त शीर्षण्याः द्वाववाञ्चौ

नाभिर्दशमोति दश शरीरे प्राणाः तेषामात्मा मन (!) एव एकादशसंख्यापूरकः । प्रतिष्ठा जीवनास्पदम् ॥२॥ द्वितीयं जन्म प्रतिपादयति । प्रसवः सामिधेन्यनुवचनप्रेरणम् तद्धेन समिध्यमानायानुब्रूहीत्येवंरूपेण वाक्येन क्रियते तदत्र प्रसवशब्दाभिधेयम् तस्य नवाक्षराणि भवन्ति । यद्वा अग्निं होतावे अग्नेरिति (!) प्रयाजाङ्गभूतो यः स्रुगादापननिगदः सोऽत्र प्रसवशब्दाभिधेयः तत्र विद्यमानानि नव वाक्यानि नव व्याहृतयः । अदःशब्देन प्रथमकाण्डे प्रस्तरप्रहरणविधायकं (८. ३. ११.) ब्राह्मणं परामृश्यते तत्र सृष्टौ यजमानसंस्तुतस्य प्रस्तरस्य स्वर्गलोकात्मके आहवनीये प्रहरणविधानाद्यज्जन्म प्रतिपाद्यते तत्तृतीयं जन्म ॥३॥ एतद्यज्ञसम्बन्धि जन्मत्रयं पूर्वोक्तजन्मत्रयदृष्टान्तेन निगमयति ॥ ४ ॥ इडोपह्वानमपि याग इडाया देवतासम्बन्धिप्रतिपादकवादाहुत्यात्मकः । तच्छंम्योरावृणीमहऽइति शम्युवाकोऽपि परिधिप्रहरणसमकालीनत्वात् (लीमनत्वात्त) आहुतिरूपः । अदः प्रथमकाण्डे पत्नीसंयाजेषु कर्तव्येषु सत्सु यदाहवनीयस्योपरि स्रुचोः सम्प्रग्रहणं विहितं सा संस्रवरूपा एका आहुतिः ॥५॥ तासां पञ्चदश सामिधेन्यः क्रमेणानुवाक्यास्थानीयाः । अत्राऽऽज्याहुतिषु य एव करणमन्त्रो यश्चेडोपह्वानादिनिगदः ता एवासां याज्याः तथा सति आज्याहुतिषु याज्यानुवाक्यवत्त्वं लक्षणं रूपमितरयागवत्सम्पन्नम् । एता[स्व]नुवाक्या एताः (सुताः Cod.) सामिधेन्यः एताभिः करणमन्त्रनिगदसिद्धाभिराहुतिभिः याज्योपेता आहुत्युपेताश्च भवन्ति ॥६॥१॥२॥

अथ प्रसङ्गादनुवाक्यायाज्ययोश्छन्दोविशेषं विधाय स्तौति ॥१॥ वषट्कारानन्तरभाविनं होमविधिमनूद्य प्रशंसति अथ यदिति । अतोऽस्माद्धोमाज्जनयति । आत्मा शरीरम् । यतः सर्वेषु यज्ञक्रतुषु वषट्कृते होमः तेनैव हेतुना अस्य यजमानस्य सर्वे यज्ञक्रतवः वषट्कारात्मकं मृत्युमतिक्रम्यावस्थिताः ॥५॥ पृष्ठे पश्चाद्भागे ॥६॥२॥२॥

इत्थं सामिधेनीप्रसङ्गेनागताननुवाक्या[याज्या]वषट्काराहुतिरूपान्पदार्थानुक्त्वा (? नू वा Cod.) सामिधेन्यनन्तरं भाविनावाघारौ नामरूपात्मकत्वेन (कान Cod.) स्तोतुं तत्सृष्टिमाख्यायिकया प्रतिपादयति ॥ तानेषु पृथिव्यादिलोकेषु विभज्यारोहयत् ॥१॥ एवमुपरितनदेवानामप्यधिष्ठातृदेवतासम्बन्धसद्भावात् लोकत्रयवत्प्रकाशमानत्वं साधारणमित्याह स यथा हैवेति यथैव खल्वेते पृथिव्यादिलोकाः इमा अग्न्यादयो देवता आविः प्रकाशमाना अस्माकमपरोऽक्षा भवन्ति एवमेव खल्वेते ऊर्ध्वादिलोकाः ता अधिष्ठातृदेवताश्च आविः प्रकाशन्त ॥२॥ परार्धम् उत्कृष्टसर्वलोकावधिभूतं सत्यलोकाख्यं स्थानम् । प्रत्यवेया प्रत्येकं प्राप्नुयाम् ॥३॥ ब्रह्मणा नामरूपाभ्यामापुर्व्याप्ताः ॥६॥ अदः अमुत्राध्यानकरणे (१. ६. २, ३.) । संनिदधति स्म संनिधान प्रत्यवेक्षणं कृतवन्तः ॥७॥ ततस्ते ऋषयः एतस्य न्यूनातिरिक्तस्य दोषप्रशमनाय यदभिमर्शनं कृतवन्तः तदिदानीमपि कर्तव्यमिति विधत्ते ॥१॥३॥२॥

अथेमावाघारौ दर्शपूर्णमासनामात्मना स्तोष्यन् अधिदैवमध्यात्मं च दर्शपूर्णमासौ प्रतिपादयति । य एष सूर्यस्तपति एष खलु पूर्णमाः संपूर्णमानः । ददृशऽइव अमावास्यायामविद्यमानः प्रतिपदि पश्चाद्दृश्यमान-इव भवति ॥१॥ एतस्य पूरणमनुलक्ष्य तं कालं पौर्णमासीत्याचक्षते ॥२॥ अध्यात्ममात्मनि शरीरमध्ये ॥५॥ एतौ मनोवाग्रूपौ अपरोक्षेण भासमानौ दर्शपूर्णमासौ । तेनाशनेन एतावध्यात्ममवस्थितौ मनोवाग्रूपौ अपरोक्षौ (अपण्येनोपक्षौ Cod.) दर्शपूर्णमासौ तर्पयति परेद्युः प्रातःकाले (लंनिन) क्रियमाणेन यज्ञेन दैवौ अधिदैवं

प्रागुक्तौ दर्शपूर्णमासौ तर्पयति ॥७॥ आगूर्तीव आगूर्तमागुरणं संकल्पः तद्वानिव । उभयत्र दर्शपूर्णमासयोः । संतिष्ठेते समाप्तौ भवतः ॥१०॥४॥२॥

अथ दर्शपूर्णमासयागमश्वमेधात्मना स्तौति ॥ एतर्हि एतस्मिन्समये । आलभन्ते दर्शपूर्णमासयाजिन इति शेषः । अयमेव दर्शपूर्णमासयागः प्राकृतः प्रकृतिभूतोऽश्वमेधः प्रसिद्धो ऽश्वमेधस्तु इतर इत् वैकृत एव नूनमित्यवधारणे । दर्शपूर्णमासकालविभागनिमित्तभूतश्चन्द्रमाः ॥१॥ मेध्याश्वसादृश्यं चन्द्रमसः प्रश्नपूर्वकं सम्पादयति ॥२॥ अश्वस्य विवृत्ते निवर्तने सति । विवर्तते स्थानान्तरं प्राप्नोति ॥३॥ चन्द्रात्मकमश्वमेधमश्वरूपं पशुमुपवसथे दिवसे आलभ्य संज्ञप्य हवीरूपेण देवेभ्यः प्रातः प्रयच्छति । दीक्षानन्तरमश्वमुत्सृज्य संवत्सरपरिमितकाले समाप्ते इतरं प्रसिद्धमश्वमेधमारभन्ते (!) ॥४॥ मासि-मासि प्रतिपौर्णमासम् ॥५॥५॥२॥

अथोपासनार्थं यज्ञशरीरावयवत्वेन प्रणीतादीनामनुष्ठेयपदार्थानामधियज्ञमध्यात्मं च सम्पत्तिं कथयति ॥१॥ हे होतः त्वं ताः सामिधेनीः परस्परं संयोजयन्निव मध्यमनुब्रूहि । इदं शरीरमध्यावयवसम्बन्धि अनूकं परस्परं संसक्तमिव दृश्यते ॥३॥ समानयति औपभृतमाज्यस्यार्धं जुह्वामानयति । मध्ये संतृषं सच्छिद्रम् ॥४॥ सांनाय्यं दधिपयोलक्षणम् । अन्तरांसमंसमध्यम् । द्विषन् (!) शत्रुरेव प्राशित्रं प्राशित्रे शत्रुबुद्धिः कार्या ॥६॥ अतस्तदवदानं शत्रुनिरसनार्थमिति प्रतिपादयति । आविद्धं शल्यं निरगमयन् । यद्वेष्टितं द्वेषणशीलम् (!) ॥७॥ यथैव खल्विडायां चरुपुरोडाशादीनि सांनाय्यादीनि सर्वाणि हवींषि सहावद्यन्ति । समवधीयते सह धार्यते ॥८॥ अवाङ्मुखास्त्रयः प्राणाः नाभिपायुगुदरूपाः । इदं द्यावापृथिवी भद्रमभूदित्यादि सूक्तवाकः । सोमत्वष्टृदेवपत्न्यग्निगृहपतिदेवताश्चत्वारः पत्नीसंयाजाः । ऊर्वधोभागावष्ठीवत्कब्दवाच्यौ । चरमवर्ती समिष्टयजुराख्यो होमः कृत्स्नाधारत्वं तस्य पादयोश्च साम्यम् ॥९॥ तत्संख्याद्वारेण सूर्यलोकप्राप्तिरूपं फलं वक्ष्यन् ता आहुतीः परिगणयति । अदः अमुत्र पौरोडाशिककाण्डे [१. ९. २. ११.] पत्नीसंयाजेषु कर्तव्येषु सत्सु शम्युवाकानन्तरं यत्स्रुचोः सम्प्रग्रहणं विहितं सा संस्रवाहुतिः परिगणनीया ॥१०॥६॥२॥

अथ यज्ञादीनां संवत्सराद्यात्मनोपासनं विधाय एतद्वैशिष्ट्येन (द्वेतत्त्वद्वै Cod.) दर्शपूर्णमासयागस्य विशिष्टफलसाधनतां प्रतिपादयति ॥१॥ परिवेषणसाधने धृष्टी ॥४॥ त्विषिः शरीरकान्तिः । ब्रह्मवर्चसं श्रुताध्ययनजनितसम्पत्तिः ब्राह्मं तेजः ॥१०॥ वेदिता वेदिष्यति । कांस्विदेव किंचिदेव [ब]ह्वनां (ह्वमां) मध्ये ज्ञानप्रभावेनासाधारणं सन्तं महानागमभ्युद्धृतं (त्युद्धुतं) महासर्पमिव (सयमिव) अभिसंसारमभिगम्याभिगम्य दिदृक्षितारः दिदृक्षन्ते ॥१२॥ उत्तरः अग्नीषोमीयः ॥१६॥ दधिपयोलक्षणं सांनाय्यम् । परस्परं संगच्छति विश्लेष्यति च ॥१७॥ कृच्छ्रचान्द्रायणादि जन्यमदष्टं (!) तपः ॥१८॥ लवो लेशः, अल्पीयस्त्वम् । लोकात् लोक्यमानात्कर्मफलात् । व्यथते कम्पते बिभेति ॥१९॥ अशनिर्दम्भोलिः ह्रादुनिर्विद्युत् उल्कुषी उल्का ॥२१॥ विश्रवन्मिश्र-इव (!) विरवन् (!) भयकम्पादिभिर्मिश्र-इव । अभ्युष्टमिश्र-इव अभित ओषणमभ्युष्टं सर्वतो दाहः तेन मिश्र-इव ॥२३॥ यज्ञरूपा मेनिः आयुधम् ॥२४॥ अनुयाजान्तत्वं यज्ञस्य निषेधति ॥२५॥ अन्वाजिगांसन् (!) देवाननुहिंसितुमैच्छन् । प्रत्यौहन् प्रत्यक्षिपन् ॥२६॥ अग्निसोमविष्णुदेवताकाः तिस्र उपसदः सोमयागे

प्रसिद्धाः ॥२७॥ संस्था समाप्तिः । वयसः आयुषः ॥२८॥ पश्चात् प्रतीच्यां दिशि गार्हपत्यसमीपे पर्यौहन्त परिप्रापयन् एतेन उपरिष्टात् यज्ञस्योपरिभागे मिथुनं स्त्रीपुंसात्मकं प्रजातिहेतुं स्थापितवन्तः । वीप्सया गवाश्वादिसर्वमिथुनस्वीकारः ॥३०॥ अध्वर्युरपि व्यापारबाहुल्यात् अग्निसमीपे संचरन् तापयुक्तं यथा भवति तथा विहारान्निर्गच्छति । साम्न-इवोपघोषः । अन्नवत्त्वहेतुना ब्रह्मण्वत्यः ब्राह्मणजातिविदा वा (?) तद्वत्यो भवन्ति । वषट्कृताः वषट्कारवत् परुषस्वनयुक्ताः (पुरु° Cod.) सन्तः सीदन्ति विशीर्णाङ्गा भवन्ति । ऐषावीराः एषवीरि नाम निन्दितो ब्राह्मणजातिविशेषः तत्सम्बन्धिन ऋत्विजः । वसन्ताद्या देवता ऋत्विक्त्वेन मनसा ध्यायेत् ॥३२॥ अथ यजमानस्य वेदेर्दक्षिणभागे उपवेशनं विधित्सुः दक्षिणवेद्यन्तस्य तुलादण्डरूपतामाह । तत्र स्थितो यजमानो यत्साधु शोभनं विहितं कर्म करोति । सुकृतदुःकृतयोराधिक्यज्ञानार्थम् । यतरत् अनयोर्मध्ये एकतरं यंस्यति उत्थत्वेन नियमनं करिष्यति तदनुगमिष्यति । दक्षिणवेद्यन्तस्य तुलारूपतां जानतो यजमानस्य तु नैतदित्याह अथ य एवं वेदेति ॥३३॥७॥२॥

इत्थं दर्शपूर्णमासावनूद्य (चलव्य Cod.) तत्प्रशंसाव्याजेन तदङ्गावबद्धान्युपासनानि विहितानि ॥ अग्निहोत्रमिति कर्मनामधेयम् अग्नये होत्रं होमोऽस्मिन्निति तद्व्युत्पत्तिः उपचारात्तदर्थं पयोऽप्यग्निहोत्रं तस्य दोग्ध्री धेनुरपि अग्निहोत्रीत्युच्यते । अभिदधाति बध्नाति । दामाधिकरणभूतं यत्तेजः तद्रूजात्मकत्वेन ध्यातव्यम् ॥१॥ अथ प्रवसद्विषयेऽग्निहोत्रहोमस्य मनःप्राणात्मना सांतत्यं श्लोकमन्त्रैः प्रतिपादयति । तत् तस्मिन्नग्निहोत्रविषये । अग्निहोत्री यावज्जीवं संकल्पिताग्निहोत्रवान्यजमानः । काव्यं कविकर्म यावज्जीवमग्निहोत्रं जुहुयादिति वाक्यम् । अग्निभिः गार्हपत्यादिभिः संततः सम्बन्धः (°म्बद्धः ?) । अनपप्रोषितं प्रवासदोषाभावः ॥५॥ यो यजमानः भुवनेषु लोकेषु अनुष्ठेयपदार्थेषु जविष्ठः अतिशयेन जववान् यः कृत्स्नं (मसा कृत्स्न Cod.) दूरवर्त्यपि (त्यमपि Cod.) प्रयोगजातमनुसंधातुं कुशल इत्यर्थः । स विद्वान् विदे लाभाय प्रवसन् प्रवासकारी भवति तथा तेन वेदनेन अस्य तद्यावज्जीववाक्यमपि सार्थकं भवति संततः अव्यवहितसम्बन्धः ॥६॥ प्रमाद्यति अनवधानयुक्तो भवति । यजमानस्य गृहे यामाहुतिमृत्विजो जुह्वति ॥७॥१॥३॥

अथ तस्मिन्नेवाग्निहोत्रे मिथुनवेदनं विधत्ते ॥ पत्नीयुक्तमेव स्यात् न कदाचित्तया विरहितम् । उपाप्नवानि उपगच्छानि ॥१॥२॥३॥

अथाग्निहोत्रादिनियमप्रसङ्गादागतं ब्रह्मचारिधर्मं निरूपयितुमाख्यायिकामाह ॥१॥ दीर्घश्चिरकालसाध्यः सत्रयागो दीर्घसत्रः । ब्रह्मचार्याश्रमविहितं कर्म ब्रह्मचर्यम् । उपयन् गुरुसमीपमुपगच्छन् उपनयनकाले । ताः सत्रियाः (!) सत्रयागसम्बन्धिन्यः ॥२॥ आचार्यं सावित्रीप्रदानपुरःसरमध्यापयितारम् ॥३॥ भिक्षेत (!) वृत्त्यर्थं याचेत ॥५॥ स्नात्वा स्नानेन गुरुकुलात्प्रतिनिवृत्य । यद्धि भूयिष्ठमन्नं भिक्षातो लब्धं तदेव हि स्नानादूर्ध्वमनिबद्धं (!) सत् लोक्यं लोकहितं भवति । सप्तमी रात्रिः भिक्षाचरणरहिता नातिक्रामेत् । स्नात्वा समावर्तनं कृत्वा ॥७॥३॥३॥

इत्थं तृतीयेऽग्निहोत्रं प्रशस्य तत्प्रसङ्गाद्ब्रह्मचारिधर्माश्च निरूपिताः अथ चतुर्थे दर्शपूर्णमासयागस्यैव भावनाविशिष्टाः के चन धर्माः मित्रविन्देष्ट्यादयश्च प्रतिपाद्यन्ते । तत्र प्र-

थमं विजिगीषुकथारूपेण प्रश्नप्रतिवचनाभ्यां दर्शपूर्णमासकर्मैव (? कामेव) सर्वोत्पत्तिनि-मित्तत्वेन स्तोतुकामस्तत्र प्रतिप्रश्नोपायिकां (? पग्निनां Cod.) आख्यायिकामवतारयति ॥ आ-विज्याय वृतः सन् उदग्देशान्जगाम । तस्य निष्कः हिरण्मयो दीनारः उपायनत्वेन चिप्तो (? चिंता Cod.) बभूव । पुरातनानामार्विज्याय वृतानां जनपदं गच्छतां ब्राह्मणानां ग्रीष्मप-रीहार्थं (?) एकधनं मुख्यं धनं निक्षिप्तं भवति स्म । बहूनां मध्ये कस्यचिज्ज्ञानाधिक्यता-रतम्येन जयपराजयाध्यवसानहेतुकं प्रधान्यमुपवल्हः तत्कर्तुं बिभ्यतां भीतिं प्राप्नुवतामुदी-च्यानां केवलं निष्क एवोपहित आस तद्ग्रहणाय परस्परं विवदमानानां ज्ञानाधिक्यं स्व-यमेव ज्ञास्यतऽइत्यनेनाभिप्रायेण ॥१॥ अस्मत्समीपदेशं प्राप्य निष्कं न पर्याददीत ॥२॥ उपपत्तौ बाहुमूलं तत्सम्बन्धीनि । दुर्वीरणानि (!) वीरणास्तृणविशेषः लुप्तोपमानमेतत् दुष्टानि वीरणानीव ॥६॥ स्वस्योपायनत्वेन कल्पितं निष्कं तस्मै स्वैदायनाय प्रददौ । सुष्ठु वर्णनीयमर्थं जानते पुरुषाय । उपगृह्य (!) आलिङ्ग्य ॥८॥ उपवल्हेत प्रधानश्रैष्ठ्यं कुर्यात् वर्ह वल्ह प्राधान्ये (धा° १६. ३८.) ॥१॥१॥४॥

इत्थं दर्शपूर्णमासयोः प्रयाजादियागान् (प्रयजातिता° Cod.) शरीरोत्पत्तिनित्यत्वेन प्रति-पाद्य अथ तेषां यागानां स्रुगादानप्रभृतिहोमान्ताः के चन धर्माः विचार्यन्ते । तत्र स्रुगादान-स्य प्रकारविशेषं दर्शयितुं प्रस्तौति ॥ दक्षिणवामहस्ताभ्यां युगपज्जुहूपभृतौ गृह्णाति । एन-मध्वर्युम् । प्रति[प्रतिं] प्रतिकूलाचरणेन प्रतिपदम् । अकृत् (!) कृतवान् ॥१॥ उपमीमांसा उदीरितदोषोक्तिः नास्ति अपि तु तदादानं पशुवृद्धिकरमायुःकरम् । शिञ्जि अव्यक्तशब्दे प-रस्परं संघटनजनितं शब्दमकुर्वन् ॥२॥ अतिक्रमणविचारं प्रस्तौति । विधमति विगमयति यजमानाद्वियोजयति । उपसमूहति समीपं प्रापयति । दक्षिणेन पदा । सव्येन पादेन ॥३॥ अथ स्रुग्धारणविषयं धर्मविशेषं विधातुं प्रस्तौति । प्रगृह्य प्रकर्षेण समुद्यम्य (? प्रकामेणा-र्धमुप्तस्य Cod.) । अतो यजमानः शूलबाहुर्भविष्यति । वाय्वाधारवात् (? वायाथार° Cod.) प्राणो नाभिः । नीचैःकृत्येव तं मध्यमधा[र]णमुप तस्य मध्यमप्राणस्य समीपे धारयेत् ॥४॥ उच्चैः ऊर्ध्वस्वरेणादाय आश्रावणं प्रारभ्य शनैर्नीचैःस्वरेण निदधाति परिसमापयति । पापीयान् अतिशयेन दरिद्रः ॥६॥ यावत्परिमाणेन स्वरेण ॥७॥ अणु अल्पं कण्ठस्याल्पता यथा भव-ति तथा । अस्वरं स्वररहितं क्षीणस्वरम् । कृपणं नु वै कृपणं दीनमिव । अकृत् (!) कृ-तवान् ॥१॥ अस्वरमुदात्तादिस्वररहितम् केवलमुच्चैर्घोषेण । उदात्तादिलक्षणो यः स्वरः स श्रीः वेदवाक्यस्य सम्पद्रूपः ॥१०॥ स्वरवत् उदात्तादिविविक्तस्वरयुक्ताम् ॥११॥ अस्मिन्ने-वाश्रावणे स्वरविशेषं विधत्ते । उरःप्रदेशे मन्द्रमिव परास्तभ्य गम्भीरध्वनियुक्तमिव पराचीनं (वानं Cod.) संस्तभ्य (स्तंन्य Cod.) । उभयतः आद्यन्तयोः बार्हतं बृहत्सामसम्बन्धी म-ध्यमस्वरो यथा भवति तथा अन्ततः आश्रावणस्यावसाने उच्चैर्निदध्यात् निक्षिपेत् । त्रीणि हि वाचः स्थानानि मन्द्रमध्यताराख्यानि तत्र मन्द्रस्वरेण (मंण्डलस्व° Cod.) आश्रावणं प्रारभ्य मध्यमस्वरगर्भितेन (!) तारस्वरेण परिसमापयेत् ॥१२॥ जुहूं प्रागग्रामुपभृतोऽग्रदेशा-त्प्रागवरोप्य । पर्याहृत्य उपभृन्मूलदेशादुपरि नीत्वा । अनुयुवत्वा (!) इति तुशब्द (!) उप-मार्थः (उपसायार्थः Cod.) अनुयुयन्निव (!) भ्रातृव्येण संमिश्रयन्निव (यतिच Cod.) अयम-ध्वर्युः शत्रोः अनुगमनशीलं यजमानमकत् (!) अकार्षीत् ॥१३॥ पार्श्वतः उपभृतः पार्श्वदेशा-

देव गुह्लमवरोप्य आहवनीये हुत्वा पुनस्तेनैव पर्याहृत्य । अतीर्थेन अमार्गेण । संशीर्णो वा भविष्यति घ्रणिर्वा (!) भ्रान्तो वा भविष्यति ॥१४॥ तेनैव उपभृतोऽग्रदेशेनैव अधिहृत्य ॥१५॥ प्रकर्षेण दग्धा भस्मसात्कृता आहुतयो येन स । पूर्वमिवाज्यस्य हुतत्वाच्छुष्कस्यैव पुरोडाशादेः प्रकर्षेण दह्यमानत्वात् । वाग्देवता स्व[य]मदृश्यमाना सती ॥१६॥ अपस्थूणो (!) गृहपतिर्येषां ते ॥१७॥ हीनद्रव्यकत्वाद्गृहपत्यधिक्षेपः ॥१८॥ आक्रुक्षः आक्रोशं कृतवानसि । ईदृशं स्वदोषमपश्यन्किमित्यस्मदीयं सत्रं निन्दसि ॥१९॥ अर्हसि विद्योपदेशार्हो भवसि ॥१०॥२॥४॥

अथ मित्रविन्दाख्यां काम्यामिष्टिं विधास्यन् तत्र हविरुत्पत्तिक्रममन्नाद्यादिकामेन [त]-स्यामधिकारिविशेषं च दर्शयिष्यन् आख्यायिकां रचयन् (? ख्यत् Cod.) आदौ श्रिय उत्पत्तिमुत्पन्नायाश्च तस्या देवैरभिधानमाह (नं वाह Cod.) ॥ श्रीः सौभाग्यलक्ष्मीः ॥१॥ आददामहै स्वीकरवाम ॥२॥ भगं सौभाग्यम् ॥३॥ अग्न्यादयो देवाः मदीयैर्यज्ञैः यज्ञसाधनैर्हविर्भिः प्रीताः सन्तः अन्नाद्यादिभिर्मां प्रत्येकं समनक्तु संयोजयतु । सहस्री सहस्रसंख्याकधनवान् । पशुसम्बन्धीनि रूपाणि विभ्रार्वन् त्वष्टा ॥६॥ परस्तादन्ततस्त्वष्टारमारभ्य प्रतिलोमं प्रातिलोम्येन अवरोहक्रमेण अग्निपर्यन्तं प्रत्यैत् प्रत्यगच्छत् । ददती पुष्टेः पुनर्दात्री भवतु । पुनः प्रदानायाध्रियन्त अङ्गीकृतवन्तः ॥७॥ प्रधानयागसमीपे स्विष्टकृतः पूर्वं होतव्या होमा उपहोमाः ॥८॥ दशंदशिनीति प्रतिपादं दशभिरक्षरैर्दशसंख्यावती विराट् ॥१८॥ तस्यामिष्टौ चोदकप्राप्तेष्वङ्गेषु क्वचिद्विशेषं दर्शयितुं तान्यनुक्रामति । विकृतिषु अनारभ्याधीतेन सप्तदश सामिधेनीरित्यादिना (दिति Cod.) वाक्येन सामिधेनीसाप्तदश्यं नियमितम् तस्य साप्तदश्यस्य नियमे पाञ्चदश्यमेव प्रतिप्रसवार्थं निधीयते । तद्वाचिनोऽग्न्यादिशब्दानुपांशूच्चरेत् । संयाज्ये स्विष्टकृद्यागस्य याज्यानुवाक्ये ॥११॥ विदां चकार प्रथमं ददर्श । उत्ससाद उत्सन्ना बभूव । तां वेदाङ्गाभिज्ञेषु (°ङ्गानिज्ञेषु Cod.) ब्राह्मणेषु अन्विष्टवान् ॥२०॥३॥४॥

दाहविपतनादिदोषदुष्टस्यापि हविषः समृद्ध्युपायमुपासनां (? यमुपासां Cod.) विधित्सुः प्रतिजानीते ॥ ब्रह्मणो ब्रह्मलोकस्य द्वाराणि ॥१॥ उपरतेन उपान्तस्थितरक्तिमगुणेन ॥५॥ लोहितेन सर्वतो रक्तवर्णेन ॥६॥ सुष्ठु सम्यक् शृतेन ॥७॥ अथ तत्साध्यस्य यज्ञस्यापि न्यूनत्वादिदोषपरिहाराय समृद्धिं वक्तुं प्रतिजानीते । सम्पन्नं सम्यगनुष्ठितम् ॥८॥९॥४॥

इत्थं दर्शपूर्णमासौ प्रशस्य तद्विकृतिभूतांश्चातुर्मास्यादीन्प्रशंसिषन् तत्राग्निमन्थनसद्भावात्तत्साधनभूतयोररण्योरश्वत्थविकृतित्वं विधित्सुस्तदर्थमाख्यायिकां रचयति ॥ शापवशान्मानुषीभावं प्राप्ता उर्वश्याख्या देवस्त्री । दिवसस्य त्रिर्वारं मां वैतसेन दण्डेन पुंव्यञ्जनस्य नाम । अकामां कामरहितां सुरताभिलाषरहितां च मां मा (मस Cod.) निपद्यासै निगृह्य मा प्राप्नुयाः । अस्माकं खलु नोऽस्माकं स्त्रीणां परिचर्या ॥१॥ द्वावुरणौ बालकौ मेषौ उर्वश्या पुत्रत्वेन पालितौ । प्रमेयुः अपजह्रुः ॥२॥ सा खलूर्वशी । वीरपुरुषरहिते देशे यथा चोरादयो गवादिधनमपहरन्ति तथा मदीयं पुत्रत्वेन स्वीकृतमुरणद्वयं गन्धर्वा अपजह्रुः ॥३॥ पुनरैम्यागवनमिति (?) वाचा (? वाणां Cod.) एत् (यन् Cod.) स्वर्गलोकमागच्छत् (च्छेत् Cod.) । विरहजनिता मनःपीडा आधिः तया प्रलपन् कुरुक्षेत्रस्य समीपे उर्वशीं द्रष्टुकामो भ्रमणं कृतवान् । विसवती पद्मिनी (द्मीना Cod.) सरसी तस्यै हाधि तस्याः समीपदेशे

अन्तेन अन्तिकेन तटदेशे (? तटशेदेने) गतवान्। आतयः जलचरपक्षिविशेषस्यैषा संज्ञा तद्रूपा भूत्वा जलक्रीडां कृतवत्यः ॥४॥ आविरासुः पक्षिरूपं विहाय स्वकीयेन रूपेण प्रादुर्बभूवुः ॥५॥ तामभिलक्ष्य परावृत्तः सन्नुवाद ॥६॥ एता एतया त्वदीयया अर्थशून्यया वाचा। समयभङ्गान्निमित्तात्प्रस्थानमकार्षम् सूर्योदये निवर्त्यानामुषसां (नवित्या° Cod.) मध्ये अग्र्या (!) अग्रे भवा पूर्वा उषाः यथा प्रक्रामति न पुनरावर्तते ॥७॥ परिद्यूनः प्राप्तपरिदेवनः (? वेदनाः Cod.)। सुदेवो सुक्रीडोऽयं जनः देहत्यागार्थं पाशेन (? वाशेन Cod.) उद्बन्धनं वा कुर्यात् प्रपतेद्वा प्रपतनं (प्रयपंतनं Cod.) महाप्रस्थानं वा कुर्यात् ॥८॥ एता एतदीयानि स्त्रीसम्बन्धीनि मनांसि शालावृकानां (!) हृदयानि तद्वत्क्रूराणि ॥९॥ इत्थं सहसा प्राप्तकामं पुरूरवसं निराकृत्य उर्वशी स्वप्राप्त्युपायान्तरमुपदेष्टुं तत्कृतमुपकारमाविः-करोति। विरूपा मानुषसंसर्गाद्विगतदेवरूपा सती। लवमप्यल्पभूतं घृतमपिबम्। इदमिदानीं देवान्नेऽपि सति तात् वर्णलोपश्छान्दसः तस्मादेव घृतस्तोकात् तृप्ता सती वसामि अतस्त्वां न विस्मरामि। आव्ययां चकार विगतकाठिन्यं बभूव ॥१०॥ हिरण्यनिर्मितानि सद्मानि (साधानि Cod.) आगमत् तत एनं तत्रत्या जना इदमेकमूचुः तत्सद्म (? त्स्कद्मं Cod.) अरोहेति। तत्र तस्य एतामुर्वशीमुपप्रजिग्युः (!) प्रेषितवन्तः हि गतौ वृद्धौ ॥११॥ आवव्राज स्वस्थानमाजगाम। अन्तर्हितमग्निमा इत् (मा पत् Cod.) आगच्छत्। तमश्वत्थमपश्यत् ॥१३॥ घृतेनाभ्यज्य (!) मूलादारभ्याग्रपर्यन्तमाज्येनाक्त्वा ॥१४॥ ते पुनर्गन्धर्वा विचार्योचुः। यदेतदश्वत्थसमिदाधानेनाग्नेः पुनःसम्पादनम् एतत्परोऽक्षमिव व्यवहितमिव खलु भवति तस्मादन्य उपायः कथ्यते ॥१५॥१॥५॥

यथा ह दर्शपूर्णमासयाजिनः आत्मयाजित्वं देवयाजित्वं वेति (वेदिति Cod.) द्वैविध्यं दर्शितमेवं चातुर्मास्ययाजिनोऽपि तथात्वं दर्शयितुं तत्रत्यैर्यागैः शरीरावयवकल्पनमाख्यायिकया रचयति ॥ इदं सौम्यमित्यादिना अङ्गुलीनामभिनयेन निर्देशः ॥१॥ तृतीयस्य हविषो मध्यमाङ्गुलेश्च सारूप्यमाह। द्वादशसु कपालेषु संस्कार्यतया संख्याधिक्यात् इदं कूर्परस्थानं वैश्वदेवं सप्तमं हविः। तदुपरि दोर्दण्डः ॥२॥ ऊरुशब्दः कृत्स्नस्य पादस्योपलक्षकः। समायीनि पर्वचतुष्टयसंचारीणि आग्नेयादीनि पञ्च हवींषि। जङ्घापादतलयोः संधिः गुल्फः। इदं जङ्घारूपमङ्गं वारुणम् ऊर्वात्मकमिदमङ्गं मारुतम् ॥३॥ साकमेधेषु। अण्डौ लिङ्गं चेति त्रीणि शिश्नानि ॥४॥ महाहविरिति वैश्वदेववरुणप्रघासशब्दवत् साकमेधाख्यस्य प्रधानस्य पर्वणो नामधेयम् ॥५॥ त्रयः संधयोऽन्तरालकालाश्चत्वारश्चत्वारो मासा येषां तानि त्रिसंधीनि (!)। द्विसमस्तानि शुनासीरीयवैश्वदेवयोः फाल्गुनशुक्लचतुर्दश्यां पौर्णमास्यां च पौर्वापर्येणाव्यवहितानुष्ठानात् द्वाभ्यां पर्वभ्यां समस्तानि संश्लिष्टानि (? स्तिष्टानि) पादतलादधस्तनोपरितनसंध्ययोरुभयोः (?) प्रत्यासन्नत्वाद्द्विसमस्तत्वम्। वरुणप्रघाससाकमेधयोः त्रीणि-त्रीणि हतोंपि उपांशुप्रचरणीयानि भवन्ति वैश्वदेवशुनासीरीययोः आद्यन्तपर्वणोः द्वे-द्वे हविषी अनिरुक्ते चतुर्ष्वपि पर्वसु एककपालस्य हविषः सावित्रस्य चोपांशु[त्वं] सिद्धम् मध्यमयोः पर्वणोरन्यदप्येकं हविः उपांशु प्रचरितव्यम् ॥७॥ चतुर्भिः हस्तपादलक्षणैरङ्गैः आयुते समानपरिमाणैः संयुज्यते यु मिश्रणामिश्रणयोः वैश्वदेवशुनासीरीययोर्द्वयोः पर्वणोरुत्तरवेदिनिवपनं परित्यज्य केवलमग्निमेव प्रणयति ॥८॥ अथ गायत्र्यादिसम्पत्तिमेषु पर्वसु दर्शयितुं पूर्वपक्षयति

। सर्वगायत्रम् सर्वैर्याज्यानुवाक्यादिभिर्मन्त्रैर्गायत्रीछन्दस्कैरेव कार्यम् । चतुष्टोमस्य त्रिवृदादिस्तोमचतुष्टयोपेतस्य सोमयागस्य प्राप्त्यै सम्पत्तये । यद्वै (!) यस्मात्खल्वेतानि क्रमेण गायत्र्यादिसूक्तेन सम्पद्यन्ते तस्मात्तेषां सर्वगायत्र्यादिकं न कार्यम् ॥९॥ अथ चातुर्मास्येषु संख्याविशेषवादिना (वदित Cod.) बृहतीसम्पत्तिं दर्शयन् संवत्सरात्मकचित्याग्नेः महाव्रतसाम्नश्च प्राप्तिरूपफलं दर्शयति । द्वाषष्टानि द्विषष्ट्यधिकानि । षष्ट्युत्तरत्रिशतयजुष्मतीष्टकात्मकं संवत्सररूपं चित्याग्निम् ॥१०॥२॥५॥

अथ प्रश्नप्रतिवचनाभ्यां अग्निहोत्रहोमस्य सर्वदेवतातृप्तिकरत्वं प्रतिपादयिष्यन् प्रष्टृप्रतिवक्तारौ दर्शयति । शुचिनाम्नः पुत्रः ॥१॥ उपसृष्टा दोहनार्थं वत्सेन संगता धेनुः । संयोजनं वत्सबन्धनार्थं दाम । गोष्ठाद्गार्हपत्यसमीपं प्रति छुभ्यस्य (? दुग्धस्य ?) पयस आनयनमाहरणम् । गार्हपत्यसमीपादुद्यतम् । निगृहीतमाहवनीयस्य पश्चात्सादितम् ॥२॥ यां समिधं होमात्पूर्वमग्नावादधासि सा किमर्था । यग पूर्वाहुतिरग्निर्ज्योतिरिति हूयमाना सा कस्य देवस्य प्रीत्यर्था । उपासीषदः पूर्वाहुत्यनन्तरं स्रुचमुपसादितवानसि । अपैक्षिष्ठाः गार्हपत्यस्येक्षणं कृतवानसि ॥३॥ द्वितीयामाहुतिं हुत्वा किंकारणं स्रुचं दोलयसि (वोल Cod.) । स्रुङ्मुखलेपस्य परिमार्जनं कृत्वा कुशमयकूर्चे निमृष्टवानसि । दक्षिणवेदेः दक्षिणभागे हस्तमुपसादितवानसि । उत्सृप्य वेदिसमीपादुत्सर्पनं कृत्वापां पानं कृतवानसि । निरौक्षीः निष्कृष्योक्षणं सेचनं कृतवानसि ॥४॥ वायव्यो वायुदेवताकः । सजूर्वायुना संसृष्टा द्यौः । दशाक्षरा विराट् । महादेवो रुद्रः ॥५॥ प्रतिष्ठा आधारः समिदभावे ह्याहुतिद्रव्यं भूमौ पतेत् । अप्रैषं तृप्तानकार्षम् ॥६॥ सर्पदेवजनान् सर्पणशीलानां प्राणिनां मध्ये ये देवजनाः उत्कृष्टाः तान् । एतामुदीचीं दिशम् ॥७॥ उक्ताग्निहोत्रप्रश्ने ब्रह्मो (ब्रमे Cod.) विषये बोधितः । गार्हपत्याउद्धृताः । पात्राणि स्रुक्स्रुवादीनि उपाहृतानि (!) स्वस्वस्थाने आसादितानि । अनुगच्छेत् शाम्येत् । पुरा आगामिनि काले अचिरात् (!) अचिरलंनैवव (° रंतनेऽवसरे ?) । आगोऽपराधम् ॥८॥ पुरा पूर्वस्मिन् आगामिनि काले अचिरात् (!) क्षिप्रं भस्मसमारोपणपूर्वमग्निं मथित्वा । तां दिशमभिलक्ष्य आहवनीयमुद्धृत्य ॥११॥ निवाते वातरहिते देशे । एनत् अग्निहोत्रार्थं पयः ॥१२॥ शोकतरणसमर्थाम् ॥१३॥३॥५॥

तं होपनिन्यऽइत्युपनयनस्य प्रस्तुतत्वात् तद्धर्मा अस्मिन्ब्राह्मणे निरूप्यन्ते ॥ तत्र गुरुं प्रत्युपनयनप्रार्थनपरमुपनेतव्यस्य मन्त्रं विधाय स्तौति । उपनयते स्वसमीपं प्रापयति ॥१॥ असाविति मन्त्रगतादःशब्दस्थाने सम्बुद्ध्यन्तं ब्रह्मचारिणो नाम ग्राह्यम् ॥२॥ सावित्रीं सवितृदेवताकाम् तत्सवितुर्वरेण्यमित्यादिना गायत्रीमाचार्योऽनुब्रूयात् । पुरा पूर्वस्मिन्नुपनयनादूर्ध्वं भाविनि संवत्सरकालेऽतीते सति ॥६॥ तत् तत्र त्र्यहपक्षे श्लोकरूपमन्त्रमपि पठन्ति । तृतीयस्यां रात्रौ । सद्यो ह त्वावेति तुशब्दः प्रागुक्तं कालं च व्यावर्तयति । सद्य उपनयनानन्तरमेव ॥१२॥ अयमाचार्य इमं शिष्यमथ बुल्वं तिरश्चीनं (श्चीनं Cod.) प्राङ्मुखमजीजनत् तथा चायमुल्वः (!) पराङ्मुखो भविष्यतीति । आचार्यात्पूर्वभागे प्रत्यङ्मुखायोपविष्टाय आचार्यं समीक्षमाणाय ॥१४॥४॥५॥

अथ शतातिरात्रं सत्रं विधास्यन्नाख्यायिकामाह ॥१॥ शतसंख्याकाः अग्निष्टोमसंज्ञाः सोमयागा यस्मिन् तच्छताग्निष्टोमं सत्रम् । अग्निष्टोमादप्यधिकसंख्यारूपेण शतोक्थ्यं सत्रम्

॥२॥ अग्निष्टोमोक्थ्यसंज्ञौ सोमयागौ असर्वक्रतू अधिकयोः षोडश्यतिरात्रयोरविद्यमानत्वात् (!) ॥५॥ रात्रिसामानि रात्रौ प्रयोज्यानि बहिष्पवमानादीनि । अतिरात्रसंस्थे हि सोमयागे परदिवसे सूर्योदयादनन्तरमेवाश्विनशस्त्रपरिसमाप्तिः ततस्तिरोऽह्न्यसोमयागः ततो यज्ञपुच्छमिति त्रिचतुर्मुहूर्तकर्तव्यं प्रयोगजातं भवति तथा चैकस्मिन्नहन्यभावात्कालोत्कर्षे सति अहःकर्तव्यं रात्रिं प्राप्नोति रात्रिकर्तव्यमहः ॥६॥ आश्विनेन प्रातरनुवाकस्य स्वस्थानात्प्रच्यावितत्वात्कालोत्कर्षात् युष्माकं सत्रं न विस्तार्यते अतः सत्रवर्तिनामङ्गानां परस्परसांतत्यविरहात्कालोत्कर्षेण भवतामहोरात्रकर्तव्यविपर्ययो जात इति भावः ॥८॥ तं प्रातरनुवाकं होत्राश्विनशस्त्रे शस्यमानएव प्रशास्त्रा मैत्रावरुणेन उपगच्छत शनैः नीचैःस्वरेण अप्रतिशंसता आश्विनस्य प्रतिशंसनं प्रतिध्वनि[:] पराहति[:] यथा न भवति तथा ॥९॥ परस्याह्नः सोमाभिषवार्था वसतीवर्याख्या आपः । अध्वर्योराश्विनशस्त्रप्रतिगरे व्यापृतत्वात्प्रतिप्रस्थातृग्रहणम् । होता उच्चैराश्विनं शस्त्रं शंसति इतरो मैत्रावरुणः अत्यर्थं जपन्निव उपांशुस्वरेण अन्वाह प्रातरनुवाकम् तथा सति तत्र मैत्रावरुणः स्वकीयया वाचा ध्वनिना होतुर्वाचं ध्वनिं न प्रतिगच्छति तथा छन्दसा स्वप्रयोज्येन गायत्र्यादिना होत्रा प्रयुज्यमानं छन्दो न प्रत्येति होतुर्गायत्रस्य छन्दसः परिसमाप्तावुष्णिक्छन्दःप्रारम्भे सत्येव मैत्रावरुणस्य प्रातरनुवाकादिभूतस्य गायत्रछन्दसः प्रारम्भविधानात् ॥१०॥ तिरोऽह्न्यैः तिरोऽहसम्बन्धिभिः सोमैश्चमसगणैः आश्विनशस्त्रानन्तरं भाविभिः । तिरोऽह्न्यान् हुतशिष्टान्पात्रे पर्युषितान्सोमानभक्षयत । अथानन्तरमनुपूर्वं प्रकृतिवत् यज्ञपुच्छं पूर्वस्याह्नः शेषं समाप्य ऐन्द्रवायवादीन्ग्रहान्गृहीत्वा विप्रुड्ढोमं प्रकृतिवदेव कृत्वा अग्निः (!) प्रातःसवने संतन्याख्यं होमं कुर्यात् अथ बहिष्पवमानाख्येन स्तोत्रेण स्तुत्वा उत्तरमहरेव प्रतिपद्यध्वम् एवं पूर्वोत्तरयोरह्नोः आद्यन्तवर्तिनामसपाठान (?) व्यतिषज्य सत्रानुष्ठाने सति अहरभि रात्रिसामानि परीयुरिति प्रागुक्तो दोषो न प्रसज्यते ॥११॥ चतुर्भिः सैन्धवैः होत्रध्वर्युप्रशास्तृप्रतिप्रस्थातृलक्षणैरश्वैः धीरा देवाः तमो विशेषेण त्यक्तवन्तः । शतं क्रतवः सोमयागा यस्मिन् तथाविधं सत्रं समतन्वत (!) अन्ततः परस्परसम्बन्धैरहोभिरकुर्वत ॥१२॥ पवेर्वज्रस्य शक्तेव प्रहरणशक्ता (!) प्रातेर्वर्तिनीधीमिव (!) हनूनि हनुवदहःपार्श्ववर्तीनि प्रातरनुवाकाश्विनादीनि कल्पयन् विभक्तिव्यत्ययः कल्पयन्तः कर्तर्द्वयेव (!) सह (संह Cod.) प्रयुञ्जानाः पूर्वापरवर्तिनीरह्नोरन्तौ धीमन्तो देवाः व्यतिषक्तौ परस्परं संसृष्टावकुर्वन् । देवानां वाक्यम् यज्ञसम्बन्धं विस्तृतमेषामङ्गानां परस्परसंतानप्रकारं प्रजापत्युपदेशाद्वयमिदानीं विशेषेण जानीमः अस्मान्दनोः पुत्रा असुरा इतः परं न मोहयन्ति । एकविधान् आजिधावनं कृतवतोऽश्वान्यथा सदा सिञ्चन्ति जनमेजयो नाम राजा तस्य गृहे परिस्रवणशीलस्य मधुनः कुम्भान् । अयमभिप्रायः यथाल्कृतकार्या अश्वाः स्वादुभिः मधुकुम्भैरासिच्यमानाः स्वाभीष्टं लभन्ते एवं देवा अपि शतातिरात्रं प्रजापत्युपदिष्टमार्गेण सम्यगनुष्ठाय स्वर्लोकान्तरायमासुरं तमो निरस्य अमृतसेवारूपं स्वर्गफलं प्रापुः ॥१३॥५॥५॥

अथ सत्रप्रसङ्गाद्यावज्जीवमनुष्ठेयान्पञ्च महायज्ञान्महासत्रत्वेन निरूपयितुं प्रस्तौति ॥१॥ उदपात्रपर्यन्तम् । प्रत्यहं स्वाहाकारेण देवानुद्दिश्य यत्कामपर्यन्तं (!) विदध्यात् (? °दधान) तेनैनं देवयज्ञमाप्नोति ॥२॥ स्वाध्यायः स्वशाखाध्ययनम् । उदयनं यज्ञस्य समापनम् ॥३॥ सर्वश्चासावात्मा च सर्वात्मा चक्षुरादीन्द्रियसहितः कृत्स्नो देहः । प्रशस्याभिः धनसम्पद्भिः

। स्वधारूपेण वहन्ति अन्नात्मना प्रवहन्ति ॥४॥ अथर्वणा ऋषिणा अङ्गिरसा च दृष्टाः शाखा अथर्वाङ्गिरसः ॥७॥ अनुशिष्यते व्युत्पाद्यतऽएभिरिति अनुशासनानि व्याकरणनिरुक्तादीनि षडङ्गानि न्यायमीमांसादयो विद्याः उक्तिप्रत्युक्तिरूपं प्रकरणं वाकोवाक्यम् इति (!?) इतिहासः पुरावृत्तप्रतिपादकं पुराणं वैष्णवादि नरा मनुष्याः तत्प्रशंसा[प्रति]-पादकाः श्लोकाः (का श्लोको Cod.) नाराशंस्यो गाथाः । अन्ये त्वेवं व्याकुर्वन्ति मन्त्रब्राह्मणवेदभागो द्विविधः तत्र ऋगादिशब्दैर्मन्त्रभागस्याध्ययनं प्रतिपादितम् अधुना ब्राह्मणभागस्याध्ययनं प्रतिपाद्यते तत्र स वै सम्भारान्त्सम्भरतीत्यादीनि विधिवाक्यान्यनुशासनानि उपासनविधिवाक्यानि विद्याः स वै गौतमस्य पुत्र वृतो जनं धावयेदित्युक्तिप्रत्युक्तिरूपं ब्राह्मणं वाकोवाक्यम् आपो ह वाऽइदमग्रे सलिलमेवासेत्यादिकं सृष्टिप्रतिपादकं ब्राह्मणमितिहासः उर्वश्यप्सराः पुरूरवसमैडं चकमऽइत्यादीनि पुरातनपुरुषवृत्तान्तप्रतिपादकानि पुराणम् महाहिमिव वै ह्रदादित्यादयो मन्त्रा गाथाः समानात्सदमुच्चन्ति हयानित्यादिका मनुष्यप्रशंसापरा नाराशंस्यः ॥८॥ विद्योतनं विद्युत् स्तनयित्नुर्मेघगर्जनम् अवस्फूर्जनसानिः (?) । एषां वषट्काराणां वषट्कारं (?) वैयर्थ्यं (र्थ्ये Cod.) तत्परिहाराय । स चाधीयानः पुरुषो यदि प्रबलमिव अधिकमध्येतुं न शक्नुयात् तथापि देवतावाच्येकं वैदिकपदमधीयीतैव न तूष्णीमासीत ॥१॥६॥५॥

अथास्मिन्ब्रह्मयज्ञस्वाध्याये पुरुषाणामादरातिशयं जनयितुं प्रशंसां कर्तुं प्रतिजानीते । फलान्यनुक्रामति । स्वाध्यायः स्वाध्ययनम् प्रवचनमन्यस्याध्ययनम् । युक्तमविच्छिन्नमेकाग्रं मनो यस्य स युक्तमनाः । आत्मनः स्वस्य परमचिकित्सको भवति अन्ये हि भिषज औषध्यादिना शरीरस्यैव तात्कालिकीमेव उदरशिरोरोगादिपीडां निवर्तयन्ति विद्वांस्तु देहव्यतिरिक्तस्यात्मन उक्तेन स्वाध्यायेन पुनर्मृत्युरूपां पीडां सर्वदैव निवर्तयति । एक एव सन् आ समन्ताद्भवतीत्येकारामस्तस्य (°द्रुम°?) भावः । यशः कीर्तिः तद्युक्तो यो लोकः तस्य पक्तिः परिपाको भवति । ब्राह्मण्यं ब्राह्मणभावम् प्रतिरूपचर्या तदनुरूपमाचरणम् । पच्यमानः यशसा युक्तः । भुनक्ति पालयति । अर्चा अर्चनं पूजनम् इष्टसाधनादेः समर्पणं दानम् ज्यानिर्हानिस्तद्विषयत्वमज्येयता । वधं हननमर्हतीति वध्यः ॥१॥ श्रमाः श्रमसाध्यास्तपोविशेषाः । परमता परमत्वमुत्कर्षः तस्यावधिभूमिः ॥२॥ वेदाध्ययनशीलस्य कायिकव्यापारं निवर्त्य यागहोमादिफलमप्ययत्नतः सिध्यति । यद्यत् यस्य-यस्य यज्ञक्रतोः प्रतिपादकं (क Cod.) छन्दसो वेदस्य सम्बन्धिनं स्वाध्यायं स्वशाखासम्बन्धिस्वाध्यायानुवाकादिकमधीते ॥३॥ अध्ययनं कृच्छ्रचान्द्रायणादितपोरूपत्वेन स्तौति । सुहितो यथेष्टभोजनेन तृप्तः सुखे सुखकरे शयने शय्यायां शयानः ॥४॥ क्षीरमिश्रमोदनं क्षीरौदनम् मांसेन मिश्रं शाल्योदनं मांसौदनम् ॥५॥ इतिशब्दः प्रकारवाची कार्यादीनां (?) संग्रहार्थः ॥१॥ कुंभ्याशब्देन (?) एकार्थस्य प्रतिपादकं (परिपदकं Cod.) विध्यर्थवादात्मकं ब्राह्मणवाक्यमुच्यते ॥१०॥७॥५॥

इत्थं सत्रप्रसङ्गात्तत्सारभूताभिर्व्याहृतिभिः सर्वप्रायश्चित्तहोमं विधास्यन् तासामुत्पत्तिमाख्यायिकया प्रतिपादयति ॥१॥ शुक्राणि व्याहृतिरूपाणि तेजांसि । हौत्रं होतृकर्म सामिधेन्यनुवचनयाज्यानुवाक्यापाठशस्त्रसंशनादिकम् (शस्त्रशंस°?) आध्वर्यवं हविःप्रचारादिकम् उद्गीथमुद्गातृकर्म । वेदत्रयस्य यदेव शुक्रं निर्मलं रूपं सारन्वतांशः (?) तेन ब्रह्माणः कर्माकुर्वत ।

अनन्तरं कृत्स्नयज्ञात्मकः सन्प्रजापतिरुत्क्रान्तवान् ॥४॥ सर्वाण्येतान्यनुद्रुत्य उच्चार्य । शीर्णेन भग्नेन ॥६॥ अत एव यजुर्वेदसूत्रवत्सर्वसूत्रेषु परस्परानैरपेक्ष्येण तद्वेदोक्तं ब्रह्मत्वं सूत्रितम् ॥७॥८॥५॥

अथांश्वदाभ्याख्यौ सोमग्रहौ विधित्सुस्तयोरा[त्मवागा]दिरूपतया समुचित्यानुष्ठानं प्रतिपादयति ॥ आत्मैव मध्यशरीरमेव ॥१॥ प्रावृहन्त असुरेभ्यः सकाशात्स्वीकृतवन्तः ॥४॥ अदभाम अहिंसिष्म ॥५॥ निग्राभ्या इति वसतीवरीणां सोमासेकार्थानामपां (सोमसेका°) ग्रहणम् । अंशून् सोमलतासंज्ञान् (? सज्ञान् Cod.) ॥६॥ त्रिभ्यः सवनेभ्य ऊर्ध्वमुक्थ्यषोडशिसंस्थादिरूपम् । ग्रहान्तरवत्प्राप्तमभिषवं निषेधति ॥७॥ अभिषवस्थाने आधूननं विधत्ते । ग्रहस्योपरि निहितांस्त्रीनंशूनेवाधूनोति कम्पयति । व्रेश्यादयः शब्दा देवलोकस्थानामपां संज्ञाः वृश्च्यते सिच्यते आभिरिति व्रेश्यः तासां पतने मार्गे हे सोम कम्पयामि कुत्सितं कूनन्ति शब्दायन्तऽइति कुकूननाः भन्दन्ते भद्रा भवन्तीति भन्दनाः अत्यर्थं मादयन्ति तर्पयन्तीति मादयितृतमा मदिन्तमाः अतिशयेन मा[धु]र्योपेता मधुन्तमाः । तथा सति दैवीभिरद्भिः पात्रगृहीताभिर्मानुषीभिरद्भिश्च एतस्मिन्ग्रहे रसं स्थापयति ॥८॥ सूर्यास्तमयात्पूर्वमेवोपवसथ्ये अहनि वसतीवरीणां ग्रहणादेवमुच्यते ॥९॥ ककुभं प्रशस्यम् । शुक्रो दीप्यमानः सोमः शुक्रस्य दीप्यमानस्य सूर्यस्य पुरोगाः पुरतो गत्वा तथानन्तरं सोमः अमृतेयो (!) भूत्वा सोमस्य दिवि चन्द्रात्मना वसानस्य पुरोगामी भवति ॥१०॥ हविर्धानान्निर्गत्याहवनीयदेशं गत्वाहवनीये जुहुयात् । न प्रवृणक्ति न दहति । अथास्य ग्रहस्य होमकाले क्रियमाणस्य प्रमाणवायो (?) यदि बलान्निःक्रमणं स्यात्तदा हिरण्यस्योपरि प्रश्वासः कार्यः अभिव्यनिति उपर्युपस्थानं करोति । यश्चतुर्थकाण्डे (६. १. ६.) हिरण्यस्योपर्युच्छ्वसनस्य स्तावको वाक्यशेषः सोऽत्रापि द्रष्टव्यः । तावतीर्वत्सतर्यः ॥११॥ होमानन्तरमेनानंशून्प्रतिमन्त्रं राजाशंसगते (नाराशं°?) सोमे पुनः संसृजेत् । अदः अदाभ्यग्रहस्य ग्रहणकाले अंशुत्रयरूपेण त्रीण्येव सवनानि प्रवृहति आदत्ते ॥१२॥१॥५॥

अथ समिदाधानादीनां वनस्पत्यादिरूपफलप्राप्तिसाधनतां विवक्षुराख्यायिकां रचयति ॥१॥ इत् उ इच्छब्दो (? इतनुद्रच्छब्दो Cod.) ऽवधारणे उशब्दश्चार्थे । एषां पुरुषाणां सम्बन्धीनि पर्वाणि वपूंषि अवयवसंधीन् पर्वशः संवृश्च्य पर्वणि-पर्वणि संवृश्च्य संछिद्य पर्वश एकैकं पर्व तवेदं ममेदमित्यन्यैः पुरुषैः विभजमानान्पुरुषान् । भीष्मं भयंकरं खल्वेतत् भो पुरुषाः यूयं अन्यान्पुरुषान्पर्वशः विभक्तवन्तः स्थ एषां पुरुषाणां पर्वाणि पर्वशः संवृश्च्य । सर्वे ते विभक्तार ऊचुः इमे विभज्यमानाः पुरुषाः इत्थमेवास्मान्परस्मिन्लोके सम्प्राप्तवन्तः अतस्तान्वै निर्यातनार्थमिदानीं वयमिहास्मिन्लोके प्रतिसचामहे कृतसंव्रश्चनप्रत्यर्पणेन सम्प्राप्नुमः । पुनः पृच्छति कातीति ॥३॥ कृती छेदने पर्वणि-पर्वणि सम्यक्कर्तनं कृत्वा ॥४॥ आक्रन्दनमाक्रोशनम् ॥६॥ कल्याणीं शोभनाम् अतिकल्याणीमशोभनाम् । पितृगृहं प्राप्य संवेशनं कृतवान् । कस्य वेदस्याध्ययनं करिष्यामि किमपि अनधीतमध्येतव्यं मम नास्ति । विदां चकार ज्ञातवान् । अदृष्टः आवितः (?) खलु वमसि ॥७॥ पयसाग्निहोत्रं जुहोति यत् ॥९॥ स यजमानः अग्निहोत्रे कर्मणि तत्साधनं द्रव्यं तृणेन दर्भात्मकेनावद्योतयति (°द्योत° Cod.) अवाङ्मुखं हविष उपरि द्योतनं (!) करोति ॥१०॥ अग्निहोत्रहोमसाधने तप्ते पयसि

उदकमुपर्यासिञ्चति यत् ॥११॥ अत्रा अतिस्मृत्युदितकर्मस्वभिरतिरूपा देवता । अग्निहोत्रकर्मणि या पूर्वा आहुतिः । निन्दितकर्मविषयामश्रद्धाम् ॥१२॥ अग्निहोत्रकर्मणि आहवनीयहोमानन्तरमग्निहोत्रहवण्यामप आसिच्य निनयति सिञ्चति यत् ॥१३॥१॥६॥

तथा अग्निहोत्रहोमे पूर्वोक्तयोराहुत्योरुत्क्रान्तिगत्यादिविषये (? त्योरूर्वगत्या° Cod.) विद्यां वक्तुमाख्यायिका प्रस्तूयते ॥ धावयद्भिर्देशान्तरादागतैः ॥१॥ विष्पन्दमानौ कृत्स्नं जगद्व्याप्नुवन्तौ ॥२॥ नूनमसावग्निहोत्रं होष्यतीत्यभिप्रायेण पुनरावर्तन्ते । निर्णिज्य प्रक्षाल्य उपवाप्य निधाय । अग्निहोत्रस्य स्वरूपं विचारितवानसि ॥४॥ अस्योक्तार्थजातस्य अवगमनकारणं ज्ञातवन्तः ॥५॥ एते सायम्प्रातःकालीने अग्निहोत्राहुती । शुक्रां निर्मलाम् ॥६॥ उपस्थं स्त्रीसम्बन्धि यत्प्रजननमाहवनीयोऽग्निः तस्य प्रजननस्य धारका श्रोणिः तां समिधं कुर्वीते । एषेत्यभिनयोक्तिः । कामप्रश्नः यथाकामं प्रश्नः । ततो याज्ञवल्क्यवरप्रदानादनन्तरं स जनको ब्रह्मा ब्रह्मिष्ठः सम्बभूव ॥१०॥२॥६॥

अथाग्निहोत्रदर्शपूर्णमासादियागदेवतानां तत्वतः प्राणशब्दाभिधेयपरमात्मरूपतां विजिगीषुकथामुखेन विवक्षुराख्यायिकां प्रस्तौति ॥१॥ अर्वाचीरस्मदभिमुखीरेता गा उदजतामित्यनुषङ्गः ॥२॥ प्रतिख्याय प्रत्यवेक्षया । अर्धदग्धकाष्ठमुल्मुकम् तस्य वहिर्निरसनमवक्षयणं विनाशः ॥३॥३॥६॥

अथ दर्शपूर्णमासवन्नित्यं प्रतिसंवत्सरमेष्टव्यं पशुयागं (प्रतियागं Cod.) विधत्ते । शोभनानि यवसानि तृणानि यस्मिन्नृतौ स कालः सुयवसः ॥१॥ मांसीयन्ति मांसं खादितुमिच्छन्ति । संकल्पयन्ति भक्षयितुमध्यवस्यन्ति । वृथामांसेनैव क्रयलब्धेनाग्नयः न तोषणीयाः । अन्येषु लौकिकाग्निषु वृथामांसं अवैधहिंसायां (?) सम्पादितं मांसं पचन्ति तेन लौकिकाग्नयस्तृप्ता भवन्ति एतेषां तु गार्हपत्यादीनां वैदिकानामग्नीनामतोऽस्माद्दैवाकहविषो (?) ऽन्या मांसकामना न भवति अतस्तं यजमानं हविष्टेन स्वीकर्तुमुत्सुका भवन्ति ॥२॥१॥७॥

अथेष्टिविधवं सोमविधवं चेति पशुबन्धस्य द्वैविध्यं दर्शयति । हविर्यज्ञः दर्शपूर्णमासेष्टिः तत्प्रकारः । सवः अभिषवयुक्तः सोमयागस्तत्प्रकारः ॥१॥ सवविधवं सिद्धान्तयितुं मीमांसामाह । महायज्ञः सोमयागः । तर्हि पशुबन्धस्येष्टिरूपत्वे पशुबन्धं पशुयागं चरुपुरोडाशसाध्यामिष्टिमेव अकः कृतवान्भवसि उतशब्दस्तुशब्दार्थे (!) अपि त्वेनं पशुबन्धमकृक्षथाः (!) आकृष्टवानसि इति एवमेव खलु एनमिष्टिविधं पशुबन्धं कुर्वाणं ब्रूयात् अतो महायज्ञ एव पशुबन्ध इति साधीयान्पक्षः ॥२॥ एकादश प्रयाजाः पशुयागात्पुरस्तादनुष्ठीयन्ते । एकादशानुयाजाः पशुयागस्योपरिष्टात् । प्रयाजादनन्तरमङ्ग्याजात्पूर्वं क्षिप्रविधानार्थं यद्देवत्यः पशुस्तद्देवत्यः पुरोडाशः कार्यः ॥३॥ वपायां हुतायां सत्यां मार्जनं कृत्वा पशुपुरोडाशनिर्वापात्प्रागेव ॥४॥ वपायागानन्तरं क्षिप्रविधानार्थोऽनिरुक्तो यः पुरोडाशस्तस्य या इडा तस्यामेवोपहूतायां मार्जनान्ते ॥५॥ अथ षड्ढोतृहोमं विधित्सुस्तस्य दीक्षान्वयतां (? क्षान्यतां Cod.) सम्पादयितुं प्रश्नमुद्भावयति । हे अध्वर्यो दीक्षया संस्कृतस्य अवभृथाभावो नावकल्पते अवभृथस्य दीक्षामोचनार्थत्वात् (? नयत्वात् Cod.) एनं पशुबन्धयाजिनं च कुत्र दीक्षया संस्कृतवानसि यस्मादेव पशुबन्धयाजिनोऽध्वर्युकृता दीक्षा नास्ति (? दीनस्ति Cod.) तस्मात्तन्मोचनं क्व (? नक्व Cod.) षड्भिर्विभिः (? षड्नविड्भिः) एष वक्ष्यमाणो मन्त्रः षड्ढोता षड् य-

ऽहोतारो होमनिष्पादका यस्मिन्नियान् (त् Cod.) अवभृथादेनमनूद्धरेयुः सर्वे जना इति शेषः । अनुद्रुत्य पठित्वा । पञ्चगृहीतेनाज्येन एकैकेन स्रुवेणोत्तैका आहुतिरिति पञ्च वा आज्याहुतयो होतव्याः । एषैवाहुतिः पशुबन्धस्य दीक्षा अतः पशुबन्धात्मकस्य महायज्ञस्य दीक्षाभावादवभृथो न युक्त इति न चोद्यमित्यर्थः ॥६॥ कः पुनरवभृथ इत्याशङ्क्य उद्भावयति । हृदयलक्षणमवदानं यस्मिन्काष्ठे प्रतृद्य पच्यते तद्धृदयशूलं तेन चरन्ति तस्योद्वासनं कुर्वन्ति ॥७॥ निरूढपशुबन्धयूपस्य पलाशवृक्षत्वं विधित्सुरुपोद्घातयति । पलाशवृक्षस्य सोमविकृतित्वम् । एवमेव खलु पुरा एतद्ब्राह्मणं पलाशोत्पत्तिप्रतिपादकं वाक्यमुच्यते (!) पठ्यते (१. ७. १. १. ३. ३. ४. १०.) ॥८॥२॥७॥

इत्थं यूपस्य पालाशत्वं प्रतिपाद्य तत्रापि बहुसारस्य पशुविरोधित्वमल्पसारस्य पशुसमृद्धिकरणत्वं क्रमेण प्रतिपादयति । प्रकर्षेण सहते अभिभवतीति प्रसहो बलम् फल्गिवति (? फलति) नुद्रनाम (?) अल्पवाचक इत्यर्थः । वक्रः सन्नतीक्ष्णाग्रश्च भवति स कपोतो कपोताख्यस्त्रीपक्षिसंनिवेशसाम्यात् ॥ २ ॥ ३ ॥ ७ ॥

इत्थं यूपार्हत्वाज्ञीतस्वरूप (?) चाभिधायाथ यूपप्रमाणमाह ॥१॥ आज्यभागयोरवश्यकर्तव्यतामाह । पशुविशसनप्रैषमध्ये अस्ना रक्षः संसृजतादिति यः प्रैषभागस्तेन रक्षोभ्यः स्वभागप्रदानं कृतं भवतीति लोकदृष्टान्तेन दर्शयति ॥२॥ पश्चवयवपाकविषयकं विधिविशेषमाह । शुक् मरणजन्यः शोकः ॥३॥ वपावदानस्य पञ्चावत्तत्वप्रकारं सम्पादयति । धानाकरम्भादिपञ्चद्रव्यसाध्यत्वाद्यज्ञः पाङ्क्तः लोमत्वङ्मांसास्थिमज्जाख्यपञ्चधातुमयत्वात्पशुः पाङ्क्तः ॥ ४ ॥ ४ ॥ ७ ॥

अग्निहोत्रे कर्मणि मह इत्युपस्थानं तद्दार्ढ्याय (? र्ध्यय Cod.) कर्तव्यनिमित्तं विधातुमाख्यायिकामाह । यथा लोके रथादिचक्रं आलम्बनकाष्ठादिराहित्येन भूमावस्थितं (!) सद्धलति (? सद्दलति Cod.) ॥१॥ एनमग्निमायतनात्स्थानात् बाधेरन् किंचिदुपद्रवं कुर्युः प्र वा यापयेयुः यजमानादन्यत्र गमयेयुर्वा ॥ ३ ॥ १ ॥ ८ ॥

अथाहवनीयात्प्राक् प्रह्वते (? त्प्राकपह्वते Cod.) औत्तरवेदिकेऽग्नौ (उत्तर° Cod.) पशुयागः कर्तव्य इति विधातुमग्नेराहितादिभेदेन चातुर्विध्यं दर्शयति ॥ १ ॥ २ ॥ ८ ॥

अथास्य पशोः प्रजापतिः सूर्य इन्द्राग्नी वेति त्रयो देवा विकल्पिता इति दर्शयित क्रमेण तं तं पक्षं सोपपत्तिकमाह ॥१॥ पशुबन्धस्य (? पशुवस्य Cod.) प्राणात्मकतां तत्परिज्ञातुः पशुनार्तिहेतुतां (?) समर्थयते ॥४॥ विहितस्य पशोरुक्तप्राणरूपतोपपादनाय तस्यैवाग्न्या[ग्ना]दित्यात्मषड्देवतामयत्वोपपादनायाख्यायिकामाह । तमुक्रूनं पशुमेताभिः प्रसिद्धाभिः समिद्धोऽअग्नेत्यादिभि[राप्रीभि]राप्रीणात् अतर्पयत् ॥५॥ तं निःप्राणत्वेनोक्रूनमादित्यलक्षणं पशुं प्राची दिक् हे गतप्राण पशो प्राणेत्युक्त्वानुप्राणत् । नाभिच्छेदादूर्ध्वं पञ्च ब्राह्मणानेनमनुप्राणितेति ब्रूयात् इतिशब्देन दिक्श्रितप्रकारः (? क्षत्रितप्र° Cod.) प्रदर्श्यते पञ्च ब्राह्मणान्पञ्चदिक्ष्ववस्थाप्य प्रागादिक्रमेण प्राणेत्येवमादिकमुक्त्वा शिशोरुपरि सम्प्रक्षिपतेत्यर्थः (?) । अनेन प्राण एव पशुबन्ध इत्यस्य वासना प्रदर्शिता भवति ॥६॥ यद्यत्कामयेथा इति [क° ५.] प्रजापतिना यद्दत्तं तस्य स्वीकारं दर्शयति ॥७॥ लेलयतश्चपलस्य ॥८॥ चाकश्यमानाः भृशं पश्यन्त इव वर्तमाना अपि ॥१०॥३॥८॥

स्पृत्याख्यान्होमान्पशुप्रायश्चित्ततया विधातुमाख्यायिकामाह । सम्राड्दुघां प्रवर्ग्यदोहनार्थां गाम् । तेन च सहसत्रिण उपेत्यामन्त्रयां चक्रिरे ॥१॥ विकृष्टं विकारं प्राप्तं यज्ञमनु अहमपि विकारं प्राप्स्ये ॥२॥ प्रतिख्याय निराकृत्य । हे केशिन् त्वया घर्मदुघाया गोः अजिनं ग्रीवासु धृतम् एतान्येव एतादृशान्येवाजिनानि मृगेषु भवन्ति उपलभ्यन्ते अथैषां मध्ये पृष्टीः अल्पशरीरा मृगीः अपिशीर्य विशरणं कृत्वा पचामहे तदीयं कृष्णाजिनं मे ग्रीवासु आबद्धम् एवं तेन खण्डिकेनोक्ते स राजा नेति होवाच अयमभिप्रायो न भवतीति किंतु हे भगवन् ॥४॥ अमुष्मै (!) केशिने एवेदं सर्वं प्रजा भविष्यति मम न भविष्यति प्रजा[या] विद्यादिरूपाया (? द्यादशपाया Cod.) अस्मत्तोऽपगतत्वात् परमहं लोकी विद्याप्रदानसुकृतेन परलोकवान् एवं भविष्यामि ॥५॥ सा तऽइति घर्मधुगिति (!) घर्मः प्रवर्ग्यः तदर्थं या दुह्यते सा घर्मदुघा (!) । एवमुपदिष्टः स केशी ततो देशादुत्ससाद विनष्टो[ऽभूत्त]स्मादेतर्हि इदानीमपि वर्तमानाः प्रजाः केशिनीरेव (!) केशवत्यः एव अथवा केशिसम्बन्धिन्यो जायन्ते के[शिना] वृद्धिकरविद्याया लब्धत्वात् ॥६॥४॥८॥

इति सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे माध्यन्दिनीयशतपथब्राह्मणभाष्यऽएकादशमकाण्डव्याख्या समाप्ता ॥११॥ ॥

VARIOUS READINGS.

What regards the edition of this kâṇḍa and the next following two I am greatly indebted to the liberality of the Imperial Government of France, which enabled me to collate here in Berlin during summer 1854 three mss. belonging to the Imperial library of Paris (= P), viz. D. 146 for the eleventh, D. 159 for the twelfth, and D. 160 for the thirteenth kâṇḍa.

Adhyâya १. २. २ दशत आकुतीः Sây. - ८ तद्यथैकेवं AP. - ibid. लोकांस्तिसृभिराप्नोति AP. - ३. १ यथेष्टि Sây. - ३ यस्मान्नानुनिर्वपेत् AP. - ४. २ अपयंति P. - ५. २ ह्वैतदुपतपदा° AP. - ६. २ स इदमेव Sây. - १४ अधिदेवता Sây. as a compound, against the accent. - १६ परमाद्वाऽएष स्थाना° Sây.-

२३ ॅस्या भूयिष्ठं Sây. - २४ Sây. seems to read यदा वृष्टि°, against the accent: he takes अबलीयसः as accus. plur. instead of ablat. singul. - ३. १ अनवानंन्यजे° A. अनवानंत्यजे° P. अनवानम् Sây. (°नमिति). - ३. ५ शृणाया° AP. - ८. ६ सर्वतनुरेव Sây. —

Adhyâya २. ३. ४ अभ्वे । स यो AP. - ibid. अभ्वे वेद मह्हैवाभ्वं AP. - ६ °त्वान्धानांतर्वान AP. - ४. ३ स्त्रीयमसाविव AP. - ५. ४ °मेधमारभन्ते Sây. - ६ °कृद्विषं प्रायश्चित्रं P. °कृद्विषन्प्राशित्रं Sây. - १३ आत्मयाजी श्रेया३न्दे° AP. - ७. २३ विश्रवन्मि° Sây. - २६ °जिघांसन् Sây. —

Adhyâya ३. ३. २ सत्रियाः Sây. —

Adhyâya ४. १. १ उदीच्यांन्वृतो AP. - ६ दुर्वीरिणानि Sây. - १४ पलितो भवत्यथ AP. - १५ यदाज्यह्विषा एवानु° A. - २. १ प्रतिप्रति न्वा AP. - ibid. अकृत् Sây. - २ °संसिंन° Sây. - ६ °त्कृपण न्वा A. °त्कृपणंमन्वा P. कृपणं नु वै Sây. - ibid. अकृत् Sây. - १३ °दनुयुव न्वा AP. Sâyaṇa's explanation is अनुयुयन्निव (instead of °युवन्निव). The Kâṇvaçakhâ reads at १.२.५.१ अनुयुवमिवासुः instead of the अनुव्यमिवासुः of the Mâdhyandinâs. - ३. १८ विराट्ठ्क्रीविराट्ठ्क्रिया७ A. - २० Sây. seems to read अङ्गविद्वा°. —

Adhyâya ५. १. ४ तस्यै ह्याधि—अत्तेन Sâyaṇa against the accent. - ७ अग्र्येव Sây. - ११ °प्रजिग्युः A. - १४ घृतेनाभ्यज्य Sây. - २. ३ गुल्फौ Sây. - ६ कुर्याद्यत्वा AB. यद्वै Sây. - ३. ८ उपाह्नतानि Sây. - ibid. (and in the following kâṇḍikâs) पुरा अचिरात् Sâyaṇa against the accent. - ४. ५ समित्स्वात्मानं AP. Sây. - ६ दघ्म A. दध्म P. - १३ दध्म A. दघ्म P. - १४

बुल्व A. बुल्ब P. Read: बुल्बो॒. - ५. ६ अधीरवत् AP. - १२ सत्रं समतन्वत Sây. - १३ दानवा AP. - ibid. परिशिष्यन्ति Sây. - ६. ७ य॒दथर्वांगिरसः AP. - ibid. विद्वा॒नथर्वांगिरसो॒ A. prima manu. विद्वान॒थर्वांगिरसो॒ A. sec. manu. P. - ८ °ह्वासपुराणं॒ गाथा AP. — ७. १ यशोलोकपक्ति° Sây. as a compound, against the accent. - ibid. The accent shows, that प॒च्यमानः is to be taken as a medium of the fourth class! - २ परमताकाष्ठा Sây. as a compound, against the accent. - १० कुं॒ब्यां A. sec. manu. कुंघ्यां Sây. —

Adhyâya ६. १. ३ भोः पुरु॒षान्वा AP. thus also in the following kâ*n*d*i*kâs, though alternating with °षांन्वा॒. - ७ चकारा॒द्यग्वा A. चकारा॒ग्वा P. — २. १ वै॒ वैदेह्यो P. - २ विष्यं॒दमाना° A. विष्यं॒दमाना° P. —

Adhyâya ७. २. २ Sây. seems to read ङतैनमकृन्नथाः. - ६ वाज्याद्‌द्यौ॒ष्पृ° P. - ८ °ह्मणमुच्यते Sây. — ४. ३ वि॒ष्यंदेत P. —

Adhyâya ८. १. १ Sây. seems to read ह्वलति instead of क्रन्देत्. - ३ °व्यस्यैते पशवो भवन्ति Sây. - ३. २ °कान्यथागो॒ष्ठमेक A. °कात्यथागोष्ठ॒मेक P. prima manu. - ५ आप्रियो instead of आप्यो! — ४. १ ज्ञघान स॒ सत्रिण A. pr. m. ज्ञघान स॒ ह्व ससत्रि॒ण A. sec. m. P., but ससत्रिन् is âdyudâtta at १२. १. १. १! Sây. has: तेन च सह्वसत्रिणा ङपेत्यामन्त्रयां चक्रिरे! - ३ मे॒दमद्दषो A. - ५ आमन्त्रणी॒यान्वा॒म° AP. - ibid. अमुष्मै एवेदं Sây. - ६ सा ते घर्मदुघा Sây. —

ओम्। अयं वै यज्ञो योऽयं पवते। तमेतऽईप्सन्ति ये संवत्सराय दीक्षन्ते तेषां गृहपतिः प्रथमो दीक्षतेऽयं वै लोको गृहपतिरस्मिन्वै लोकऽइदꣳ सर्वं प्रतिष्ठितं गृहपताऽउ वै सत्त्रिणः प्रतिष्ठिताः प्रतिष्ठायामेवैतत्प्रतिष्ठाय दीक्षन्ते ॥१॥ अथ ब्रह्माणं दीक्षयति। चन्द्रमा वै ब्रह्मा सोमो वै चन्द्रमाः सौम्या ओषधय ओषधीस्तदनेन लोकेन संदधाति तस्मादेतावन्तरेणान्यो न दीक्षेत स यद्धैतावन्तरेणान्यो दीक्षेतौषधीस्तदनेन लोकेन नानाकुर्यादुद्दोषुका ह स्युस्तस्मादेतावन्तरेणान्यो न दीक्षेत ॥२॥ अथोद्गातारं दीक्षयति। पर्जन्यो वाऽउद्गाता पर्जन्याद्धि वृष्टिर्जायते वृष्टिं तदोषधिभ्यः संदधाति तस्मादेतावन्तरेणान्यो न दीक्षेत स यद्धैतावन्तरेणान्यो दीक्षेत वृष्टिं तदोषधिभिर्नानाकुर्यादवर्षुको ह स्यात्तस्मादेतावन्तरेणान्यो न दीक्षेत ॥३॥ अथ होतारं दीक्षयति। अग्निर्वै होताधिदैवतं वागध्यात्ममन्नं वृष्टिरग्निं च तद्वाचं चान्नेन संदधाति तस्मादेतावन्तरेणान्यो न दीक्षेत स यद्धैतावन्तरेणान्यो दीक्षेताग्निं च तद्वाचं चान्नेन नानाकुर्यादशनायुका ह स्युस्तस्मादेतावन्तरेणान्यो न दीक्षेतेतांश्चतुरोऽध्वर्युर्दीक्षयति ॥४॥ अथाध्वर्युं प्रतिप्रस्थाता दीक्षयति। मनो वाऽअध्वर्युर्वाग्घोता मनश्च तद्वाचं च संदधाति तस्मादेतावन्तरेणान्यो न दीक्षेत स यद्धैतावन्तरेणान्यो दीक्षेत मनश्च तद्वाचं च नानाकुर्यात्प्रमायुका ह स्युस्तस्मादेतावन्तरेणान्यो न दीक्षेत ॥५॥ अथ ब्रह्मणे ब्राह्मणाच्छꣳसिनं दीक्षयति। तꣳ हि सोऽन्वथोद्गात्रे प्रस्तोतारं दीक्षयति तꣳ हि सोऽन्वथ होत्रे मैत्रावरुणं दीक्षयति तꣳ हि सोऽन्वेतांश्चतुरः प्रतिप्रस्था-

ता दीक्षयति ॥ ६॥ अथाध्वर्यवे प्रतिप्रस्थातारं नेष्टा दीक्षयति । तꣳ हि सोऽन्वे-
तेषां वै नवानां क्लृप्तिमन्वितरे कल्पन्ते नव वै प्राणाः प्राणानेवैष्वेतद्दधाति त-
था सर्वमायुर्यन्ति तथो ह न पुरायुषोऽस्माल्लोकात्प्रयन्ति ॥ ७॥ अथ ब्रह्मणे पो-
तारं दीक्षयति । तꣳ हि सोऽन्वथोद्गात्रे प्रतिहर्तारं दीक्षयति तꣳ हि सोऽन्वथ
होत्रेऽच्छावाकं दीक्षयति तꣳ हि सोऽन्वेतांश्चतुरो नेष्टा दीक्षयति ॥ ८॥ अथा-
ध्वर्यवे नेष्टारमुन्नेता दीक्षयति । तꣳ हि सोऽन्वथ ब्रह्मणऽआग्नीध्रं दीक्षयति तꣳ
हि सोऽन्वथोद्गात्रे सुब्रह्मण्यं दीक्षयति तꣳ हि सोऽन्वथ होत्रे ग्रावस्तुतं दी-
क्षयति तꣳ हि सोऽन्वेतांश्चतुर उन्नेता दीक्षयति ॥ ९॥ अथोन्नेतारꣳ । स्नातको
वा ब्रह्मचारी वान्यो वादीक्षितो दीक्षयति न पूतः पावयेदिति ह्याहुः सैषानु-
पूर्वदीक्षा स यत्र हैवं विद्वाꣳसो दीक्षन्ते दीक्षमाणा हैव ते यज्ञं कल्पयन्ति यज्ञ-
स्य क्लृप्तिमनु सत्त्रिणां योगक्षेमः कल्पते सत्त्रिणां योगक्षेमस्य क्लृप्तिमन्वपि तस्या-
र्धस्य योगक्षेमः कल्पते यस्मिन्नर्धे यजन्ते ॥ १०॥ तेषां वाऽउन्नेतोत्तमो दीक्षते ।
प्रथमोऽवभृथादुदायतामुदेति प्राणो वाऽउन्नेता प्राणमेवैष्वेतदुभयतो दधाति तथा
सर्वमायुर्यन्ति तथो ह न पुरायुषोऽस्माल्लोकात्प्रयन्ति सैषानुपूर्वदीक्षा स यत्र हैवं
विद्वाꣳसो दीक्षेरंस्तदेव दीक्षेत ॥ ११॥ ब्राह्मणम् ॥ १॥

श्रद्धाया वै देवाः । दीक्षां निरमिमतादित्यै प्रायणीयꣳ सोमात्क्रयं विष्णोराति-
थ्यमादित्यात्प्रवर्ग्यꣳ स्वधाया उपसदोऽग्नीषोमाभ्यामुपवसथमस्माल्लोकात्प्रायणीय-
मतिरात्रꣳ ॥ १॥ संवत्सराच्चतुर्विꣳशमहः । ब्रह्मणोऽभिप्लवं क्षत्रात्पृष्ठ्यमग्नेरभिजि-
तमद्भ्यः स्वरसाम्न आदित्याद्विषुवन्तमुक्ताः स्वरसामान इन्द्राद्विश्वजितमुक्तौ पृष्ठ्या-
भिप्लवौ मित्रावरुणाभ्यां गोऽआयुषी विश्वेभ्यो देवेभ्यो दशरात्रं दिग्भ्यो दाशरा-
त्रिकं पृष्ठ्यꣳ षडहमेभ्यो लोकेभ्यश्छन्दोमान् ॥ २॥ संवत्सराद्दशममहः । प्रजापते-
र्महाव्रतꣳ स्वर्गाल्लोकादुदयनीयमतिरात्रं तदेतत्संवत्सरस्य जन्म स यो हैवमेत-

त्संवत्सरस्य जन्म वेद ह्यस्माक्रियाज्जायते सात्मा भवति संवत्सरो भवति संवत्सरो भूत्वा देवानप्येति ॥३॥ ब्राह्मणम् ॥२॥ ॥

यद्वै दीक्षन्ते । अग्नाविष्णूऽएव देवते यजन्तेऽग्नाविष्णू देवते भवन्त्यग्नाविष्ण्वोः सायुज्यꣳ सलोकतां जयन्ति ॥१॥ अथ यत्प्रायणीयेन यजन्ते । अदितिमेव देवतां यजन्तेऽदितिर्देवता भवन्त्यदितेः सायु° ॥२॥ अथ यत्क्रयेण चरन्ति । सोममेव देवतां यजन्ते सोमो देवता भवन्ति सोमस्य सायु° ॥३॥ अथ यदातिथ्येन यजन्ते । विष्णुमेव देवतां यजन्ते विष्णुर्देवता भवन्ति विष्णोः सायु° ॥४॥ अथ यत्प्रवर्ग्येण यजन्ते । आदित्यमेव देवतां यजन्तऽआदित्यो देवता भवन्त्यादित्यस्य सायु° ॥५॥ अथ यदुपसद उपयन्ति । एता एव देवता यजन्ते या एता उपसत्स्वेता देवता भवन्त्येतासां देवतानाꣳ सायु° ॥६॥ अथ यदग्नीषोमीयेण पशुना यजन्ते । अग्नीषोमावेव देवते यजन्तेऽग्नीषोमौ देवते भवन्त्यग्नीषोमयोः सायु° ॥७॥ अथ यत्प्रायणीयमतिरात्रमुपयन्ति । अहोरात्रेऽएव देवते यजन्तेऽहोरात्रे देवते भवन्त्यहोरात्रयोः सायु° ॥८॥ अथ यच्चतुर्विꣳशमहरुपयन्ति संवत्सरमेव देवतां यजन्ते संवत्सरो देवता भवन्ति संवत्सरस्य सायु° ॥९॥ अथ यदभिप्लवꣳ षडहमुपयन्ति । अर्धमासांश्च मासांश्च देवता यजन्तेऽर्धमासाश्च मासाश्च देवता भवन्त्यर्धमासानां च मासानां च सायु° ॥१०॥ अथ यत्पृष्ठ्यꣳ षडहमुपयन्ति । ऋतूनेव देवता यजन्तऽऋतवो देवता भवन्त्यृतूनाꣳ सायु° ॥११॥ अथ यदभिजितमुपयन्ति । अग्निमेव देवतां यजन्तेऽग्निर्देवता भवन्त्यग्नेः सायु° ॥१२॥ अथ यत्स्वरसाम्न उपयन्ति । अप एव देवतां यजन्तऽआपो देवता भवन्त्यपाꣳ सायु° ॥१३॥ अथ यद्विषुवन्तमुपयन्ति । आदित्यमेव देवतां यजन्तऽआदित्यो देवता भवन्त्यादित्यस्य सायुज्यꣳ सलोकतां जयन्त्युक्ताः स्वरसामानः ॥१४॥ अथ यद्विश्वजितमुपयन्ति । इन्द्रमेव देवतां यजन्तऽइन्द्रो देवता भवन्तीन्द्रस्य सायुज्यꣳ सलोकतां जयन्त्युक्तौ पृष्ठ्याभिप्लवौ ॥१५॥

अथ यद्गोऽआयुषी उपयन्ति । मित्रावरुणाविव देवते यजन्ते मित्रावरुणौ देवते भवन्ति मित्रावरुणयोः सायु° ॥१६॥ अथ यद्दशरात्रमुपयन्ति । विश्वानेव देवान्देवतां यजन्ते विश्वे देवा देवता भवन्ति विश्वेषां देवानाᳮ सायु° ॥१७॥ अथ यद्दाशरात्रिकं पृष्ठ्यᳮ षडहमुपयन्ति । दिश एव देवता यजन्ते दिशो देवता भवन्ति दिशाᳮ सायु° ॥१८॥ अथ यच्छन्दोमानुपयन्ति । इमानेव लोकान्देवता यजन्त ऽइमे लोका देवता भवन्त्येषां लोकानाᳮ सायु° ॥१९॥ अथ यद्दशममहरुपयन्ति । संवत्सरमेव देवतां यजन्ते संवत्सरो देवता भवन्ति संवत्सरस्य सायु° ॥२०॥ अथ यन्महाव्रतमुपयन्ति । प्रजापतिमेव देवतां यजन्ते प्रजापतिर्देवता भवन्ति प्रजापतेः सायु° ॥२१॥ अथ यदुदयनीयमतिरात्रमुपयन्ति । संवत्सरमेव तदाप्त्वा स्वर्गे लोके प्रतितिष्ठन्ति तान्यदि पृच्छेयुः कामद्य देवतां यजध्वे का देवता स्थ कस्यां देवतायां वसथेत्यत एवैकतमां ब्रूयुर्यस्यै तु नेदिष्ठᳮ स्युरेते ह वै सति सद एते हि सतीषु देवतासु सीदन्तो यन्ति सत्त्रसदो हैवेतरे स यो हैवं विदुषां दीक्षितानां पापकᳮ सत्त्रे कीर्तयेदेतेभ्यस्त्वा देवताभ्य आवृश्चाम इत्येनं ब्रूयुः स पापीयान्भवति श्रेयाᳮस आत्मना ॥२२॥ स एष संवत्सरस्त्रिमहाव्रतः । चतुर्विᳮशे महाव्रतं विषुवति महाव्रतं महाव्रतऽएव महाव्रतं तᳮ ह स्मैतं पूर्वऽउपयन्ति त्रिमहाव्रतं ते तेजस्विन आसुः सत्यवादिनः सᳮशितव्रता अथ यऽउ हैनमप्येतर्हि तथोपेयुर्यथामपात्रमुदकऽआसिक्तं विम्रित्येदेवᳮ हैव ते विम्रित्येयुरुपर्युपयन्ति तदेषाᳮ सत्येन श्रमेण तपसा श्रद्धया यज्ञेनाहुतिभिरवरुद्धं भवति ॥२३॥ ब्राह्मणम् ॥३॥ ॥

पुरुषो वै संवत्सरः । तस्य पादावेव प्रायणीयोऽतिरात्रः पादाभ्याᳮ हि प्रयन्ति तयोर्यच्छुक्लं तदह्नो रूपं यत्कृष्णं तद्रात्रेर्नखान्येवौषधिवनस्पतीनाᳮ रूपमूरू चतुर्विᳮशमहरुरोऽभिप्लवः पृष्ठं पृष्ठ्यः ॥१॥ अयमेव दक्षिणो बाहुरभिजित् । इम

ऽएव दक्षिणे त्रयः प्राणाः स्वरसामानो मूर्धा विषुवानिमऽएवोत्तरे त्रयः प्राणाः स्वरसामानः ॥२॥ अयमेवोत्तरो बाहुर्विश्वजित् । उक्थ्यौ पृष्ठ्याभिप्लवौ यावर्वाञ्चौ प्राणौ ते गोऽआयुषीऽअङ्गानि दशरात्रो मुखं महाव्रतꣳ हस्तावेवोदयनीयोऽतिरात्रो हस्ताभ्याꣳ ह्युद्यन्ति तयोर्यच्छुक्लं तदह्नो रूपं यत्कृष्णं तद्रात्रेर्नखान्येव नक्षत्राणाꣳ रूपꣳ स एष संवत्सरोऽध्यात्मं प्रतिष्ठितः स यो हैवमेतꣳ संवत्सरमध्यात्मं प्रतिष्ठितं वेद प्रतितिष्ठति प्रजया पशुभिरस्मिंल्लोकेऽमृतत्वेनामुष्मिन् ॥३॥ ब्राह्मणम् ॥४॥ प्रथमोऽध्यायः [७५.] ॥ ॥

समुद्रं वाऽएते प्रतरन्ति । ये संवत्सराय दीक्षन्ते तस्य तीर्थमेव प्रायणीयोऽतिरात्रस्तीर्थेन हि प्रस्नान्ति तद्यत्प्रायणीयमतिरात्रमुपयन्ति यथा तीर्थेन समुद्रं प्रस्नायुस्तादृक्तत् ॥१॥ गाधमेव प्रतिष्ठा चतुर्विꣳशमहः । यथोपपक्षदघ्नं वा कण्ठदघ्नं वा यतो विश्रम्य प्रस्नान्ति प्रस्नेयोऽभिप्लवः प्रस्नेयः पृष्ठ्यः ॥२॥ गाधमेव प्रतिष्ठाभिजित् । यथोपपक्षदघ्नं वा कण्ठदघ्नं वा यतो विश्रम्योत्क्रामन्त्यूरुदघ्न एव प्रथमः स्वरसामा जानुदघ्नो द्वितीयः कुल्फदघ्नस्तृतीयो द्वीपः प्रतिष्ठा विषुवान्कुल्फदघ्न एव प्रथमोऽर्वाक्सामा जानुदघ्नो द्वितीय ऊरुदघ्नस्तृतीयः ॥३॥ गाधमेव प्रतिष्ठा विश्वजित् । यथोपपक्षदघ्नं वा कण्ठदघ्नं वा यतो विश्रम्य प्रस्नान्ति प्रस्नेयः पृष्ठ्यः प्रस्नेयोऽभिप्लवः प्रस्नेये गोऽआयुषी प्रस्नेयो दशरात्रः ॥४॥ गाधमेव प्रतिष्ठा महाव्रतम् । यथोपपक्षदघ्नं वा कण्ठदघ्नं वा यतो विश्रम्योत्स्नान्ति तीर्थमेवोदयनीयोऽतिरात्रस्तीर्थेन ह्युत्स्नान्ति तद्यदुदयनीयमतिरात्रमुपयन्ति यथा तीर्थेन समुद्रं प्रस्नाय तीर्थेनोत्स्नायुस्तादृक्तत् ॥५॥ तदाहुः । कति संवत्सरस्यातिरात्राः कत्यग्निष्टोमाः कत्युक्थ्याः कति षोडशिनः कति षडहा इति द्वावतिरात्रौ षट्शतमग्निष्टोमा द्वे चत्वारिꣳशे शतेऽउक्थ्यानामिति नु यऽउक्थ्यात्स्वरसाम्न उपयन्ति ॥६॥ अथ येऽग्निष्टोमान् । द्वादशशतमग्निष्टोमा द्वे चतुस्त्रिꣳशे शतेऽउक्थ्या-

नां द्वादश षोडशिनः षष्टिः षडहा इति नु संवत्सरस्याप्तिः ॥७॥ द्वादश वै मासाः संवत्सरस्य । तेषामेतत्तेन इन्द्रियं यत्पृष्ठानि तद्यन्मासि-मासि पृष्ठान्युपयन्ति मासश एव तत्संवत्सरस्य तेन आप्नुवन्त्यथ कथं त्रयोदशस्य मासस्य तेन आप्नुवन्तीत्युपरिष्टाद्विषुवतो विश्वजितꣳ सर्वपृष्ठमग्निष्टोममुपयन्त्येवमु त्रयोदशस्य मासस्य तेन आप्नुवन्ति ॥८॥ एतद्ध स्म वै तद्विद्वानाह । श्वेतकेतुरारुणेयः संवत्सराय त्वाऽअहं दीक्षिष्यऽइति तꣳ ह पितोपेक्ष्योवाच वेत्थ त्वायुष्मन्त्संवत्सरस्य गाधप्रतिष्ठा इति वेदेति होवाचेतद्ध तद्विद्वानुवाच ॥९॥ ब्राह्मणम् ॥ ५ [२. १.] ॥

तदाहुः । कस्मादुभयतोज्योतिषोऽभिप्लवा भवन्त्यन्यतोज्योतिः पृष्ठ्य इतीमे वै लोका अभिप्लवा उभयतोज्योतिषो वाऽइमे लोका अग्निनेत आदित्येनामुत ऋतवः पृष्ठ्योऽन्यतोज्योतिषो वाऽऋतव एष एषां ज्योतिर्य एष तपति ॥१॥ देवचक्रे वाऽएते पृष्ठ्यप्रतिष्ठिते । यजमानस्य पाप्मानं तृꣳहती परिप्लवेते स यो हैवं विदुषां दीक्षितानां पापकꣳ सत्रे कीर्तयत्येते हास्य देवचक्रे शिरश्छिन्त्तो दशरात्र उद्धिः पृष्ठ्याभिप्लवौ चक्रे ॥२॥ तदाहुः । यत्समेऽएव चक्रे भवतोऽथैते विषमा स्तोमाः कथमस्यैते समा स्तोमा-स्तोमा उपेता भवन्तीति यदेव षडन्यान्यहानि षडन्यानि तेनेति ब्रूयात् ॥३॥ पृष्ठ्याभिप्लवौ तन्त्रे कुर्वीतेति ह स्माह पैङ्ग्यः । तयो स्तोत्राणि च शस्त्राणि च संचारयेदिति स यत्संचारयति तस्मादिमे प्राणा नाना सन्त एकोतयः समानमूतिमनुसंचरन्त्यथ यन्न संचारयेत्प्रमायुको यजमानः स्यादेष ह वै प्रमायुको योऽन्धो वा बधिरो वा ॥४॥ नवाग्निष्टोमा मासि सम्पद्यन्ते । नव वै प्राणाः प्राणानेवैष्वेतद्दधाति तथा सर्वमायुर्यन्ति तथो ह न पुरायुषोऽस्माल्लोकात्प्रयन्ति ॥५॥ एकविꣳशतिरुक्थ्याः । द्वादश वै मासाः संवत्सरस्य पञ्चऽर्तवस्त्रयो लोकास्तद्विꣳशतिरेष एवैकविꣳशो य एष तपत्येतामभिसम्पदꣳ स एतया सम्पदा मासि-मासि स्वर्गं लोकꣳ रोहति मासशः स्वर्गं

लोकᳬं समश्नुतऽएकविᳬंशं च स्तोमं बृहतीं च छन्दः ॥६॥ चतुस्त्रिᳬंशदग्निष्टो-
मा मासि सम्पद्यन्ते । त्रयस्त्रिᳬंशद्धि देवाः प्रजापतिश्चतुस्त्रिᳬंशः सर्वासां देवताना-
माप्त्याऽएक उक्थ्यः षोडशिमानन्नं वाऽउक्थ्यो वीर्यᳬं षोडशी ॥७॥ एतेन वै
देवाः । वीर्येणान्नेन सर्वान्कामानाप्नुवन्त्सर्वान्कामानाश्नुवत तथोऽएवैष एतेन
वीर्येणान्नेन सर्वान्कामानाप्नोति सर्वान्कामानश्नुते तस्मात्पृष्ठ्याभिप्लवाऽउपेवेया-
त्संवत्सराय दीक्षित एतस्मै कामाय ॥८॥ अथादित्याश्च ह वाऽअङ्गिरसश्च । उ-
भये प्राजापत्या अस्पर्द्धन्त वयं पूर्वे स्वर्गं लोकमेष्यामो वयं पूर्वऽइति ॥९॥ त
ऽआदित्याः । चतुर्भि स्तोमैश्चतुर्भिः पृष्ठैर्लघुभिः सामभिः स्वर्गं लोकमभ्यप्लवन्त
यदभ्यप्लवन्त तस्मादभिप्लवाः ॥१०॥ अन्वञ्च-इवाङ्गिरसः । सर्वै स्तोमैः सर्वैः पृ-
ष्ठैर्गुरुभिः सामभि स्वर्गं लोकमस्पृशन्यदस्पृशंस्तस्मात्पृष्ठ्यः ॥११॥ अभिप्लवः षडहः
। षड्ढ्यहानि भवन्त्यभिप्लवः पञ्चाहः पञ्च ह्यहानि भवन्ति यद्वेव प्रथममहस्त-
दुत्तममभिप्लवश्चतुरहश्चत्वारो हि स्तोमा भवन्ति त्रिवृत्पञ्चदशः सप्तदश एकविᳬंश
इत्यभिप्लवस्त्र्यहस्त्र्यावृद्धि ज्योतिर्गौरायुरभिप्लवो द्व्यहो द्वे ह्येव सामनी भवतो
बृहद्रथन्तरेऽएवाभिप्लव एकाह एकाहस्यो हि स्तोमैस्तायते चतुर्णामुक्थ्यानां
द्वादश स्तोत्राणि द्वादश शस्त्राण्यतियन्ति स सप्तमोऽग्निष्टोम एवमु सप्ताग्निष्टोमाः
सम्पद्यन्ते ॥१२॥ प्रोतिर्ह कौशाम्बेयः । कौसुरुबिन्दिरुद्दालकऽआरुणौ ब्रह्मच-
र्यमुवास तᳬं हाचार्यः पप्रछ कुमार कति ते पिता संवत्सरस्याहान्यमन्यतेति
॥१३॥ ॥शतम् ६००० ॥॥ दशेति होवाच । दश वाऽइति होवाच दशाक्षरा
विराड्वैराजो यज्ञः ॥१४॥ कति त्वेवेति । नवेति होवाच नव वाऽइति होवा-
च नव वै प्राणाः प्राणैरु यज्ञस्तायते ॥१५॥ कति त्वेवेति । अष्टेति होवाचाष्टौ
वाऽइति होवाचाष्टाक्षरा गायत्री गायत्रो यज्ञः ॥१६॥ कति त्वेवेति । सप्तेति
होवाच सप्त वाऽइति होवाच सप्त छन्दाᳬंसि चतुरुत्तराणि छन्दोभिरु यज्ञस्तायते

॥१७॥ कति त्वेवेति । षडिति होवाच षड्वाऽइति होवाच षड्ऋतवः संवत्सरः संवत्सरो यज्ञः समानमेतदहर्यत्प्रायणीयोदयनीयौ ॥१८॥ कति त्वेवेति । पञ्चेति होवाच पञ्च वाऽइति होवाच पाङ्क्तो यज्ञः पाङ्क्तः पशुः पञ्चऽर्तवः संवत्सरस्य संवत्सरो यज्ञः समानमेतदहर्यच्चतुर्वि७शमहाव्रते ॥१९॥ कति त्वेवेति । चत्वारीति होवाच चत्वारि वाऽइति होवाच चतुष्पादाः पशवः पशवो यज्ञः समानमेतदहर्यत्पृष्ठ्याभिप्लवौ ॥२०॥ कति त्वेवेति । त्रीणीति होवाच त्रीणि वाऽइति होवाच त्रीणि छन्दा७सि त्रयो लोकास्त्रिसवनो यज्ञः समानमेतदहर्यदभिजिद्विश्वजितौ ॥२१॥ कति त्वेवेति । द्वेऽइति होवाच द्वे वाऽइति होवाच द्विपाद्वै पुरुषः पुरुषो यज्ञः समानमेतदहर्यत्स्वरसामानः ॥२२॥ कति त्वेवेति । एकमिति होवाचाहरेवेति तदेतदहरहरिति सर्व७ संवत्सर७ सैषा संवत्सरस्योपनिषत्स यो हैवमेता७ संवत्सरस्योपनिषदं वेदा हास्माच्छ्रियाञ्जायते सात्मा भवति संवत्सरो भवति संवत्सरो भूत्वा देवानप्येति ॥२३॥ ब्राह्मणम् ॥ ६ [२. २.] ॥ ॥

स वाऽएष संवत्सरो बृहतीमभिसम्पन्नः । द्वावार्द्यतामह्ना७ षडहौ द्वौ पृष्ठ्याभिप्लवौ गोऽआयुषी दशरात्रस्तत्षट्त्रि७शत्षट्त्रि७शदक्षरा वै बृहती बृहत्या वै देवाः स्वर्गे लोकेऽयतन्त बृहत्या स्वर्गं लोकमाप्नुवंस्तथोऽएवैष एतद्बृहत्यैव स्वर्गे लोके यतते बृहत्या स्वर्गं लोकमाप्नोत्यथ यो बृहत्यां कामस्तमेवैतेनैवंविदवरुन्द्धे ॥१॥ यद्वै चतुर्वि७शमहः । दशरात्रस्य वै तत्सप्तमं वा नवमं वाभिप्लवात्पृष्ठ्यो निर्मितः पृष्ठ्यादभिजिदभिजितः स्वरसामानः स्वरसामभ्यो विषुवान्विषुवतः स्वरसामानः स्वरसामभ्यो विश्वजिद्विश्वजितः पृष्ठ्यः पृष्ठ्यादभिप्लवोऽभिप्लवाद्गोऽआयुषी गोऽआयुर्भ्यां दशरात्रः ॥२॥ अथैतदहरार्द्यत् । यन्महाव्रतं पञ्चवि७शो ह्येतस्य स्तोमो भवति नाक्षराच्छन्दो व्येत्येकस्मान्न द्वाभ्यां न स्तौत्रियया स्तोमः ॥३॥ अभिप्लवं पूर्वं पुरस्ताद्विषुवत उपयन्ति । पृष्ठ्यमुत्तरं पुत्रा वाऽअभि-

प्लवः पिता पृष्ठ्यस्तस्मात्पूर्ववयसे पुत्राः पितरमुपजीवन्ति पृष्ठ्यमुपरिष्टाद्विषुवतः पूर्वमुपयन्त्यभिप्लवमुत्तरं तस्मादुत्तरवयसे पुत्रान्पितोपजीवत्युप ह वाऽएनं पूर्ववयसे पुत्रा जीवन्त्युपोत्तरवयसे पुत्रान्जीवति य एवमेतद्वेद ॥४॥ तदाहुः । यच्चतुर्विंशमहरुपेत्य प्रेयात्कथमनागूर्ती भवतीति यदेवादः प्रायणीयमतिरात्रमुपयन्ति तेनेति ब्रूयात् ॥५॥ तदाहुः । यद्द्वादश मासाः संवत्सरस्याथैतदहरत्येति यद्विषुवतमवरेषामेतात्परेषामित्यवरेषां चैव परेषां चेति ह ब्रूयादात्मा वै संवत्सरस्य विषुवानङ्गानि मासा यत्र वाऽआत्मा तदङ्गानि यत्रोऽअङ्गानि तदात्मा न वाऽआत्माङ्गान्यतिरिच्यते नात्मानमङ्गान्यतिरिच्यन्तऽएवमु हैतदवरेषां चैव परेषां च भवति ॥६॥ अथ ह वाऽएष महासुपर्ण एव यत्संवत्सरः । तस्य यान्पुरस्ताद्विषुवतः षण्मासानुपयन्ति सोऽन्यतरः पक्षोऽथ यान्षडुपरिष्टात्सोऽन्यतर आत्मा विषुवान्यत्र वाऽआत्मा तत्पक्षौ यत्र वा पक्षौ तदात्मा न वाऽआत्मा पक्षावतिरिच्यते नात्मानं पक्षावतिरिच्येते एवमु हैतदवरेषां चैव परेषां च भवति ॥७॥ तदाहुः । यत्पुरस्ताद्विषुवत ऊर्ध्वान्स्तोमान्षण्मासानुपयन्ति षडुपरिष्टादावृत्तान्कथमस्यैतऽऊर्ध्वा स्तोमा उपेता भवन्तीति यमेवामुमूर्ध्वस्तोमं दशरात्रमुपयन्ति तेनेति ब्रूयाद्देवेभ्यो ह वै महाव्रतं न तस्थे कथमूर्ध्वैः स्तोमैर्विषुवन्तमुपागातावृत्तैर्मामिति ॥८॥ ते ह देवा ऊचुः । उप तं यज्ञक्रतुं जानीत य ऊर्ध्वस्तोमो येनेदमाप्नवामेति तऽएतमूर्ध्वस्तोमं दशरात्रमपश्यन्त्संवत्सरविधं तस्य यः पृष्ठ्यः षडहः ऋतवः स इमे लोकाश्छन्दोमाः संवत्सरो दशममहस्तेनैनदाप्नुवंस्तदेभ्योऽतिष्ठत तिष्ठते ह वाऽअस्मै महाव्रतं य एवमेतद्वेद ॥९॥ अथ वाऽअतोऽङ्क्रामभ्यारोहः । प्रायणीयेनातिरात्रेणोदयनीयमतिरात्रमभ्यारोहन्ति चतुर्विंशेन महाव्रतमभिप्लवेन परमभिप्लवं पृष्ठ्येन परं पृष्ठ्यमभिजिता विश्वजितं स्वरसामभिः परान्त्स्वरसाम्नोऽथैतदहरनभ्यारूढं यद्विषुवतमभि ह वै श्रेयांसं रोहति नैन

पापीयानभ्यारोहति य एवमेतद्वेद ॥१०॥ अथ वाऽअतोऽह्नां निवाहः । प्राय-
णीयोऽतिरात्रश्चतुर्विंशायाह्ने निवहति चतुर्विंशमहरभिप्लवायाभिप्लवः पृष्ठ्याय
पृष्ठ्योऽभिजितेऽभिजित्स्वरसामभ्यः स्वरसामानो विषुवते विषुवान्त्स्वरसामभ्यः
स्वरसामानो विश्वजिते विश्वजित्पृष्ठ्याय पृष्ठ्योऽभिप्लवायाभिप्लवो गोऽआयुर्भ्यां गो
ऽआयुषी दशरात्राय दशरात्रो महाव्रताय महाव्रतमुदयनीयायातिरात्रायोदयनीयो
ऽतिरात्रः स्वर्गाय लोकाय प्रतिष्ठायाऽअन्नाद्याय ॥११॥ तानि वाऽएतानि । य-
ज्ञारण्यानि यज्ञकृन्तत्राणि तानि शतं-शतं रथाह्न्यान्यन्तरेण तानि येऽविद्वांस
उपयन्ति यथारण्यान्यां मुग्धांश्चरतोऽशनाया वा पिपासा वा पाप्मानो रक्षांसि
सचन्तेऽथ ये विद्वांसो यथा प्रवाहात्प्रवाहमभयादभयमेवं हैव ते देवताया दे-
वतामुपसंयन्ति ते स्वस्ति स्वर्गं लोकं समश्नुवते ॥१२॥ तदाहुः । कति संवत्स-
रस्याहानि पराञ्चि कत्यर्वाञ्चीति स यानि सकृत्सकृदुपयन्ति तानि पराञ्च्यथ या-
नि पुनः-पुनस्तान्यर्वाञ्च्यर्वाञ्चीति ह त्वेवैनान्युपासीत षडहयोर्ह्यावृत्तिमन्वाव-
र्तते ॥१३॥ ब्राह्मणम् ॥७ [२. ३.] ॥

पुरुषो वै संवत्सरः । तस्य प्राण एव प्रायणीयोऽतिरात्रः प्राणेन हि प्रयन्ति
वागेवारम्भणीयमहर्वाचा ह्यारभन्ते यद्यदारभन्ते ॥१॥ अयमेव दक्षिणो हस्तो
ऽभिप्लवः षडहः । तस्येदमेव प्रथममहस्तस्येदमेव प्रातःसवनमिदं माध्यन्दिनं स-
वनमिदं तृतीयसवनं गायत्र्या आयतने तस्मादियमासां ह्रसिष्ठा ॥२॥ इदमेव
द्वितीयमहः । तस्येदमेव प्रातःसवनमिदं माध्यन्दिनं सवनमिदं तृतीयसवनं त्रि-
ष्टुभ आयतने तस्मादियमस्यै वर्षीयसी ॥३॥ इदमेव तृतीयमहः । तस्येदमेव प्रा-
तःसवनमिदं माध्यन्दिनं सवनमिदं तृतीयसवनं जगत्या आयतने तस्मादियमा-
सां वर्षिष्ठा ॥४॥ इदमेव चतुर्थमहः । तस्येदमेव प्रातःसवनमिदं माध्यन्दिनं
सवनमिदं तृतीयसवनं विराज आयतनेऽन्नं वै विराट्तस्मादियमासामन्नादितमा

॥५॥ इदमेव पञ्चममहः । तस्येदमेव प्रातःसवनमिदं माध्यन्दिनꣳ सवनमिदं तृतीयसवनं पङ्क्तेरायतने पृथुरिव वै पङ्क्तिस्तस्मादयमासां प्रथिष्ठः ॥६॥ इदमेव षष्ठमहः । तस्येदमेव प्रातःसवनमिदं माध्यन्दिनꣳ सवनमिदं तृतीयसवनमतिछन्दस आयतने तस्मादयमासां वर्षिष्ठो गायत्रमेतदहर्भवति तस्मादिदं फलकꣳ ह्रसिष्ठꣳ स इतोऽभिप्लवः षडहः स इतः स इतः स इत आत्मा पृष्ठ्यः ॥७॥ एतद्ध स्म वै तद्विद्वानाह पैङ्ग्यः । प्लवन्तऽइव वाऽअभिप्लवास्तिष्ठतीव पृष्ठ्य इति प्लवतऽइव ह्ययमङ्गैस्तिष्ठतीवात्मनेति ॥८॥ शिर एवास्य त्रिवृत् । तस्मात्तत्त्रिविधं भवति त्वगस्थि मस्तिष्कः ॥९॥ ग्रीवाः पञ्चदशः । चतुर्दश वाऽएतासां कर्कराणि वीर्यं पञ्चदशं तस्मादेताभिरण्वीभिः सतीभिर्गुरुं भारꣳ हरति तस्माद्ग्रीवाः पञ्चदशः ॥१०॥ उरः सप्तदशः । अष्टावन्ये जत्रवोऽष्टावन्यऽउरः सप्तदशं तस्मादुरः सप्तदशः ॥११॥ उदरमेकविꣳशः । विꣳशतिर्वा अन्तरुदरे कुन्तापान्युदरमेकविꣳशं तस्मादुदरमेकविꣳशः ॥१२॥ पार्श्वे त्रिणवः । त्रयोदशान्याः पर्शवस्त्रयोदशान्याः पार्श्वे त्रिणवे तस्मात्पार्श्वे त्रिणवः ॥१३॥ अनूकं त्रयस्त्रिꣳशः । द्वात्रिꣳशद्वाऽएतस्य कर्कराण्यनूकं त्रयस्त्रिꣳशं तस्मादनूकं त्रयस्त्रिꣳशः ॥१४॥ अयमेव दक्षिणः कर्णोऽभिजित् । यदिदमक्ष्णः शुक्लꣳ स प्रथमः स्वरसामा यत्कृष्णꣳ स द्वितीयो यन्मण्डलꣳ स तृतीयो नासिके विषुवान्यदिदमक्ष्णो मण्डलꣳ स प्रथमोऽर्वाक्सामा यत्कृष्णꣳ स द्वितीयो यच्छुक्लꣳ स तृतीयः ॥१५॥ अयमेवोत्तरः कर्णो विश्वजित् । उक्तौ पृष्ठ्याभिप्लवौ याववाञ्चौ प्राणौ ते गोऽआयुषीऽअङ्गानि दशरात्रो मुखं महाव्रतमुदान एवोदयनीयोऽतिरात्र उदानेन ह्युद्यन्ति स एष संवत्सरोऽध्यात्मं प्रतिष्ठितः स यो हैवमेतꣳ संवत्सरमध्यात्मं प्रतिष्ठितं वेद प्रतितिष्ठति प्रजया पशुभिरस्मिँल्लोकेऽमृतत्वेनामुष्मिन् ॥१६॥ ब्राह्मणम् ॥ ८ [२. ४.] ॥ द्वितीयोऽध्यायः [७६.] ॥ ॥

यद्वालाके । इदं त्रिवृदेति सर्वमन्योऽन्यमभिसम्पद्यमानम् । कथꣳ स्विद्यज्ञः पुरुषः प्रजापतिरन्योऽन्यं नातिरिच्यतऽएते ॥१॥ यदूर्ध्वा स्तोमा अनुयन्ति । यज्ञमभ्यावर्तꣳ सामभिः कल्पमानाः । कथꣳ स्वित्ते पुरुषमाविशन्ति कथं प्राणैः सयुजो भवन्ति ॥२॥ प्रायणीयोऽतिरात्रः । चतुर्विꣳशमहश्चत्वारोऽभिप्लवाः पृष्ठ्य इत्येते । कथꣳ स्वित्ते पु° ॥३॥ अभिजिता स्वरसामानः । अभिक्लृप्ता उभयतो विषुवन्तमुपयन्ति । कथꣳ स्वित्ते पु° ॥४॥ त्रिवृत्प्रायाः । सप्तदशाभिक्लृप्तास्त्रयस्त्रिꣳशान्ताश्चतुरुत्तरेण । कथꣳ स्वित्ते पुरुषमाविशन्ति कथं प्राणैः सयुजो भवन्तीति ॥५॥ शिरस्त्रिवृत् । पञ्चदशोऽस्य ग्रीवा उर आहुः सप्तदशाभिक्लृप्तम् । एकविꣳशमुदरं कल्पयन्ति पार्श्वे पर्शूस्त्रिणवेनाभिक्लृप्ते ॥६॥ अभिप्लवा उभयतोऽस्य बाहू । पृष्ठं पृष्ठ्य इति धीरा वदन्ति । अनूकमस्य चतुरुत्तरेण संवत्सरे ब्राह्मणाः कल्पयन्ति ॥७॥ कर्णावस्याभिजिद्विश्वजिच्च । अक्ष्यावाहुः स्वरसामाभिक्लृप्ते । नस्यं प्राणं विषुवन्तमाहुर्ग्रीवाऽआयुषी प्राणावेताववाञ्चौ ॥८॥ अङ्गान्यस्य दशरात्रमाहुः । मुखं महाव्रतꣳ संवत्सरे ब्राह्मणाः कल्पयन्ति । सर्वस्तोमꣳ सर्वसामानमेतꣳ संवत्सरमध्यात्मं प्रविष्टम् । समं धीर आत्मना कल्पयित्वा ब्रध्नस्यास्ते विष्टपेऽजातशोकः ॥९॥ ब्राह्मणम् ॥१ [३. १.] ॥

पुरुषो वै संवत्सरः । पुरुष इत्येकꣳ संवत्सर इत्येकमत्र तत्समं द्वे वै संवत्सरस्याहोरात्रे द्वाविमौ पुरुषे प्राणावत्र तत्समं त्रय ऋतवः संवत्सरस्य त्रय इमे पुरुषे प्राणा अत्र तत्समं चतुरक्षरो वै संवत्सरश्चतुरक्षरोऽयं यजमानोऽत्र तत्समं पञ्चऽर्तवः संवत्सरस्य पञ्चेमे पुरुषे प्राणा अत्र तत्समꣳ षडृतवः संवत्सरस्य षडिमे पुरुषे प्राणा अत्र तत्समꣳ सप्तऽर्तवः संवत्सरस्य सप्तेमे पुरुषे प्राणा अत्र तत्समम् ॥१॥ द्वादश वै मासाः संवत्सरस्य । द्वादशेमे पुरुषे प्राणा अत्र तत्समं त्रयोदश वै मासाः संवत्सरस्य त्रयोदशेमे पुरुषे प्राणा नाभिस्त्रयोदश्यत्र तत्समं

चतुर्विꣳशतिर्वै संवत्सरस्यार्धमासाश्चतुर्विꣳशोऽयं पुरुषो विꣳशत्यङ्गुलिश्चतुरङ्गो
ऽत्र तत्समꣳ षड्विꣳशतिर्वै संवत्सरस्यार्धमासाः षड्विꣳशोऽयं पुरुषः प्रतिष्ठे षड्विꣳ-
श्यावत्र तत्समम् ॥२॥ त्रीणि च वै शतानि षष्टिश्च । संवत्सरस्य रात्रयस्त्रीणि
च शतानि षष्टिश्च पुरुषस्यास्थीन्यत्र तत्समं त्रीणि च शतानि षष्टिश्च संवत्सर-
स्याहानि त्रीणि च शतानि षष्टिश्च पुरुषस्य मज्जानोऽत्र तत्समꣳ ॥३॥ सप्त च
वै शतानि विꣳशतिश्च । संवत्सरस्याहोरात्राणि सप्त च शतानि विꣳशतिश्च पु-
रुषस्यास्थीनि च मज्जानश्चात्र तत्समम् ॥४॥ दश च वै सहस्राण्यष्टौ च शता-
नि । संवत्सरस्य मुहूर्ता यावन्तो मुहूर्तास्तावन्ति पञ्चदश कृत्वः क्षिप्राणि याव-
न्ति क्षिप्राणि तावन्ति पञ्चदश कृत्व एतर्हीणि यावन्त्येतर्हीणि तावन्ति पञ्चदश
कृत्व इदानीनि यावन्तीदानीनि तावन्तः पञ्चदश कृत्वः प्राणा यावन्तः प्राणास्ता-
वन्तोऽना यावन्तोऽनास्तावन्तो निमेषा यावन्तो निमेषास्तावन्तो लोमगर्ता या-
वन्तो लोमगर्तास्तावन्ति स्वेदायनानि यावन्ति स्वेदायनानि तावन्त एते स्तोका
वर्षन्ति ॥५॥ एतद्ध स्म वै तद्विद्वानाह वार्कलिः । सार्वभौमं मेघं वर्षन्तं वेदा-
हमस्य वर्षस्य स्तोकानिति ॥६॥ तदेष श्लोकोऽभ्युक्तः । अमादन्यत्र परिवर्तमा-
नस्तिष्ठन्नासीनो यदि वा स्वपन्नपि । अहोरात्राभ्यां पुरुषः समेन कति कृत्वः प्रा-
णिति चाप चानितीति ॥७॥ तदेष श्लोकः प्रत्युक्तः । शतꣳ शतानि पुरुषः समे-
नाष्टौ शता यन्मितं तद्वदन्ति । अहोरात्राभ्यां पुरुषः समेन तावत्कृत्वः प्राणिति
चाप चानितीति ॥८॥ ब्राह्मणम् ॥१० [३. २.] ॥

देवा ह वै सहस्रसंवत्सराय दिदीक्षिरे । तेषां पञ्च शतानि संवत्सराणां प-
र्यवेतान्यासुरथेदꣳ सर्वमेव शश्राम ये स्तोमा यानि पृष्ठानि यानि छन्दाꣳसि ॥१॥
ततो देवाः । एतद्यज्ञस्यायातयामापश्यंस्तेनायातयाम्ना या वेदे व्युष्टिरासीत्तां व्या-
श्नुवतायातयामा वाऽअस्य वेदा अयातयाम्न्या हास्य त्रय्या विद्ययार्त्विज्यं कृतं भ-

वति य एवमेतद्वेद ॥२॥ तदेतद्यज्ञस्यायातयाम । ओ श्रावयास्तु श्रौषड्यज ये य-
जामहे वौषडिति तासां वा ऽएतासां पञ्चानां व्याहृतीनाꣳ सप्तदशाक्षराण्यो श्रा-
वयेति चतुरक्षरमस्तु श्रौषडिति चतुरक्षरं यजेति द्व्यक्षरं ये यजामहऽइति पञ्चा-
क्षरम् ॥३॥ द्व्यक्षरो वषट्कारः । स एष सप्तदशः प्रजापतिरधिदेवतं चाध्यात्मं च
प्रतिष्ठितः स यो हैवमेतꣳ सप्तदशं प्रजापतिमधिदेवतं चाध्यात्मं च प्रतिष्ठितं
वेद प्रतितिष्ठति प्रजया पशुभिरस्मिंल्लोकेऽमृतत्वेनामुष्मिन् ॥४॥ ते ह देवा ऊ-
चुः । उप तं यज्ञक्रतुं जानीत यः सहस्रसंवत्सरस्य प्रतिमा को हि तस्मै मनुष्यो
यः सहस्रसंवत्सरेण समाप्नुयादिति ॥५॥ ते विश्वजितमेव सर्वपृष्ठम् । पृष्ठ्यस्य ष-
डहस्याञ्जःसवमपश्यंस्ते हि स्तोमा भवन्ति तानि पृष्ठानि तानि छन्दाꣳसि ॥६॥
पृष्ठ्यमेव षडहम् । द्वादशाहस्याञ्जःसवमपश्यंस्ते हि स्तोमा भ॰ ॥७॥ द्वादशाह-
मेव । संवत्सरस्याञ्जःसवमप॰ ॥८॥ संवत्सरमेव । तापश्चितस्याञ्जःसवमप॰ ॥९॥
तापश्चितमेव । सहस्रसंवत्सरस्याञ्जःसवमप॰ ॥१०॥ स वै संवत्सरं दीक्षाभिरेति
। संवत्सरमुपसद्भिः संवत्सरꣳ सुत्याभिः ॥११॥ स यत्संवत्सरं दीक्षाभिरेति । पू-
र्वार्धमेव तेन सहस्रसंवत्सरस्यावरुन्द्धेऽथ यत्संवत्सरमुपसद्भिर्मध्यमेव तेन सहस्र-
संवत्सरस्यावरुन्द्धेऽथ यत्संवत्सरꣳ सुत्याभिरुत्तमार्धमेव तेन सहस्रसंवत्सरस्या-
वरुन्द्धे ॥१२॥ स वै द्वादश मासान्दीक्षाभिरेति । द्वादशोपसद्भिर्द्वादश सुत्याभि-
स्तत्षट्त्रिꣳशत्षट्त्रिꣳशदक्षरा वै बृहती बृहत्या वै देवाः स्वर्गं लोकेऽयतन्त
बृहत्या स्वर्गं लोकमाप्नुवंस्तथो ऽएवैष एतद्बृहत्यैव स्वर्गे लोके यतते बृहत्या
स्वर्गं लोकमाप्नोत्यथ यो बृहत्यां कामस्तमेवैतेनैवंविदवरुन्द्धे ॥१३॥ तद्वा ऽए-
तत् । त्रयꣳ सह क्रियतेऽग्निरर्को महदुक्थꣳ स यत्संवत्सरं दीक्षाभिरेति संवत्स-
रमुपसद्भिस्तेनास्याग्न्यर्कावाप्तौ भवतोऽथ यत्संवत्सरꣳ सुत्याभिरेति तेनो ऽएवास्य
महदुक्थमाप्तं भवति स वा ऽएष एव सहस्रसंवत्सरस्य प्रतिमा यत्तापश्चित एष

प्रजानां प्रजात्यै यत्तापश्चितः ॥१४॥ ब्राह्मणम् ॥ ११ [३. ३.] ॥ प्रथमः प्रपाठकः ॥ कण्डिकासंख्या१३२ ॥ ॥

पुरुषꣳ ह नारायणं प्रजापतिरुवाच । यजस्व-यजस्वेति स होवाच यजस्व-यजस्वेति वाव त्वं मामात्थ त्रिरयन्ति वसवः प्रातःसवनेनागू रुद्रा माध्यन्दिनेन सवनेनादित्यास्तृतीयसवनेनाथ मम यज्ञवास्त्वेव यज्ञवास्ताविवाहमासऽइति ॥१॥ स होवाच । यजस्वैवाहं वै ते तद्वक्ष्यामि यथा तऽउक्थानि मणिरिव सूत्रऽओतानि भविष्यन्ति सूत्रमिव वा मणाविति ॥२॥ तस्माऽउ हैतदुवाच । प्रातःसवने बहिष्पवमानऽउद्गातारमन्वारभासि श्येनोऽसि गायत्रछन्दा अनु त्वारभे स्वस्ति मा सम्पारयेति ॥३॥ अथ माध्यन्दिने पवमाने । उद्गातारमन्वारभासि सुपर्णोऽसि त्रिष्टुप्छन्दा अनु त्वारभे स्वस्ति मा सम्पारयेति ॥४॥ अथ तृतीयसवनऽआर्भवे पवमाने । उद्गातारमन्वारभासाऽऋभुरसि जगच्छन्दा अनु त्वारभे स्वस्ति मा सम्पारयेति ॥५॥ अथ सꣳस्थितेषु-सꣳस्थितेषु सवनेषु जपेः । मयि भर्गो मयि महो मयि यशो मयि सर्वमिति ॥६॥ अयं वै लोका भर्गः । अन्तरिक्षलोको महो द्यौर्यशो येऽन्ये लोकास्तत्सर्वम् ॥७॥ अग्निर्वै भर्गः । वायुर्मह आदित्यो यशो येऽन्ये देवास्तत्सर्वम् ॥८॥ ऋग्वेदो वै भर्गः । यजुर्वेदो महः सामवेदो यशो येऽन्ये वेदास्तत्सर्वम् ॥९॥ वाग्वै भर्गः । प्राणो महश्चक्षुर्यशो येऽन्ये प्राणास्तत्सर्वम् ॥१०॥ तद्विद्यात् । सर्वाँल्लोकानात्मन्नधिषि सर्वेषु लोकेष्वात्मानमधाꣳ सर्वान्देवानात्मन्नधिषि सर्वेषु देवेष्वात्मानमधाꣳ सर्वान्वेदानात्मन्नधिषि सर्वेषु वेदेष्वात्मानमधाꣳ सर्वान्प्राणानात्मन्नधिषि सर्वेषु प्राणेष्वात्मानमधामित्यक्षिता वै लोका अक्षिता देवा अक्षिता वेदा अक्षिताः प्राणा अक्षितꣳ सर्वमक्षिताद्ध वाऽअक्षितमुपसङ्क्रामत्यप पुनर्मृत्युं जयति सर्वमायुरेति य एवमेतद्वेद ॥११॥ ब्राह्मणम् ॥१ [३. ४.] ॥

सावित्रꣳ ह स्मैतं पूर्वे पशुमालभन्ते । अथैतर्हि प्राजापत्यं यो ह्येव सविता स प्रजापतिरिति वदन्तस्तस्मात्संन्युप्याग्नींस्तेन यजेरन्गृहपतेरेवाग्निषु यथेदं जाघन्या पत्नीः संयाजयन्ति तस्यां नोऽप्यसदिति ते ततो यदानिकामं दीक्षन्ते ॥१॥ तदु वाऽआहुः । नानाधिष्ण्या एव स्युर्यदि दीक्षितस्योपतपेत्पार्श्वतोऽग्निहोत्रं जुह्वसेत्स यद्यगदो भवति सꣳसृज्यैनं पुनरुपह्वयन्ते यद्यु म्रियते स्वैरेव तमग्निभिर्दहन्त्यशवाग्निभिरितरे यजमाना आसतऽइति तदह्वैवाहिताग्नेः कर्म समानधिष्ण्यास्त्वेव भवन्ति तस्य तदेव ब्राह्मणं यत्पुरश्चरणे ॥२॥ तदाहुः । यत्संवत्सराय संवत्सरसदो दीक्षन्ते कथमेषामग्निहोत्रमनन्तरितं भवतीति व्रतेनेति ब्रूयात् ॥३॥ तदाहुः । यत्सं° कथमेषां पौर्णमासꣳ हविरनन्तर्हितं भवतीत्याज्येन च पुरोडाशेन चेति ब्रूयात् ॥४॥ तदाहुः । यत्सं° कथमेषां पितृयज्ञोऽनन्तरितो भवतीत्यौपासनैरिति ब्रूयात् ॥५॥ तदाहुः । यत्सं° कथमेषामामावास्यꣳ हविरनन्तरितं भवतीति दध्ना च पुरोडाशेन चेति ब्रूयात् ॥६॥ तदाहुः । यत्सं° कथमेषामाग्रयणेष्टिरनन्तरिता भवतीति सौम्येन चरुणेति ब्रूयात् ॥७॥ तदाहुः । यत्सं° कथमेषां चातुर्मास्यान्यनन्तरितानि भवन्तीति पयस्ययेति ब्रूयात् ॥८॥ तदाहुः । यत्सं° कथमेषां पशुबन्धोऽनन्तरितो भवतीति पशुना च पुरोडाशेन चेति ब्रूयात् ॥९॥ तदाहुः । यत्सं° कथमेषाꣳ सोमोऽनन्तरितो भवतीति सवनैरिति ब्रूयात् ॥१०॥ ते वाऽएवमेते यज्ञक्रतवः । संवत्सरमपियन्ति स यो हैवमेतां यज्ञक्रतूनाꣳ संवत्सरेऽपीतिं वेदाप्यस्य स्वर्गे लोके भवति ॥११॥ संवत्सरस्य समता वेदितव्या । एकं पुरस्ताद्विषुवतोऽतिरात्रमुपयन्त्येकमुपरिष्टात्त्रयःपञ्चाशतं पुरस्ताद्विषुवतोऽग्निष्टोमानुपयन्ति त्रयःपञ्चाशतमुपरिष्टाद्विꣳशतिशतं पुरस्ताद्विषुवत उक्थ्यान्यहान्युपयन्ति विꣳशतिशतमुपरिष्टादिति नु यऽउक्थ्यात्स्वरसाम्न उपयन्ति ॥१२॥ अथ येऽग्निष्टोमान् । षट्पञ्चाशतं पुरस्ताद्विषुवतोऽग्निष्टोमानुपयन्ति षट्-

पञ्चाशतमुपरिष्टात्सप्तदशꣳ शतं पुरस्ताद्विषुवत उक्थ्यान्यह्नान्युपयन्ति सप्तदशमुपरिष्टात्षट् पुरस्ताद्विषुवतः षोडशिन उपयन्ति षडुपरिष्टात्त्रिꣳशतं पुरस्ताद्विषुवतः षडह्नानुपयन्ति त्रिꣳशतमुपरिष्टादेषा ह्यस्य समता समेन ह वा ऽअस्यावृद्धेनान्यूनेनानतिरिक्तेनायनेनेतं भवति य एवमेतद्वेद ॥१३॥ ब्राह्मणम् ॥ २ [३. ५.] ॥ तृतीयोऽध्यायः [७७.] ॥ ॥

दीर्घसत्त्रꣳ ह वा ऽएत ऽउपयन्ति । येऽग्निहोत्रं जुह्वत्येतद्धि जरामर्यꣳ सत्त्रं यदग्निहोत्रं जरया वा ह्येवास्मान्मुच्यन्ते मृत्युना वा ॥१॥ तदाहुः । यदेतस्य दीर्घसत्त्रिणोऽग्निहोत्रं जुह्वतोऽन्तरेणाग्नी युक्तं वा वियायात्सं वा चरेयुः किं तत्र कर्म का प्रायश्चित्तिरिति कुर्वीत हैव निष्कृतिमपीष्ट्या यजेत तदु तन्नाद्रियेतेमान्वा ऽएष लोकाननुवितनुते योऽग्नीऽआधत्ते ॥२॥ तस्यायमेव लोको गार्हपत्यः । अन्तरिक्षलोकोऽन्वाहार्यपचनोऽसौ लोक आहवनीयः कामं न्वा ऽएषु लोकेषु वयाꣳसि युक्तं चायुक्तं च सं चरन्ति स यदि ह्यस्याप्यन्तरेण ग्रामोऽग्नीन्वियायान्निव मे का चनार्तिरस्ति न रिष्टिरिति हैव विद्यात् ॥३॥ त्रयो ह त्वाव पशवो ऽमेध्याः । दुर्वराह ऐडकः श्वा तेषां यद्यधिश्रितेऽग्निहोत्रेऽन्तरेण कश्चित्संचरेत्किं तत्र कर्म का प्रायश्चित्तिरिति तद्धैके गार्हपत्याद्भस्मोपहृत्याहवनीयान्निवपन्तो यन्तीदं विष्णुर्विचक्रम ऽइत्येतयर्चा यज्ञो वै विष्णुस्तद्यज्ञेनैव यज्ञमनुसंतन्मो भस्मनास्य पदमपिवपाम इति वदन्तस्तदु तथा न कुर्याद्यो हैनं तत्र ब्रूयादासान्वा ऽअयं यजमानस्यावाप्सीत्क्षिप्रे परमासानावप्स्यते ज्येष्ठगृह्यꣳ रोत्स्यतीतीश्वरो ह तथैव स्यात् ॥४॥ इत्थमेव कुर्यात् । उदस्थालीं वैवोदकमण्डलुं वादाय गार्हपत्याद्ग्रऽआहवनीयान्निनयन्नियादिदं विष्णुर्विचक्रम ऽइत्येतयैवर्चा यज्ञो वै विष्णुस्तद्यज्ञेनैव यज्ञमनुसंतनोति यद्वै यज्ञस्य रिष्टं यदशान्तमापो वै तस्य सर्वस्य शान्तिरद्भिरेवैनत्तच्छान्त्या शमयत्यतदेव तत्र कर्म ॥५॥ तदाहुः । यस्याग्निहोत्रं

दोह्यमानꣳ स्कन्देत्किं तत्र कर्म का प्रायश्चित्तिरिति स्कन्नप्रायश्चित्तेनाभिमृश्याद्भि-
रुपनिनीय परिशिष्टेन जुहुयाद्यद्यु नीची स्थाली स्याद्यदि वा भिद्येत स्कन्नप्राय-
श्चित्त्यैवाभिमृश्याद्भिरुपनिनीय यदन्यद्विन्देत्तेन जुहुयात् ॥ ६॥ ॥ शतम् ६१०० ॥ ॥
अथ यत्र स्कन्नꣳ स्यात् । तदभिमृशेदस्कन्नधित प्राजनीति यदा वै स्कन्दत्यथ धी-
यते यदा धीयतेऽथ प्रजायते योनिर्वाऽइयꣳ रेतः पयस्तदस्यां योनौ रेतो दधा-
त्यनुष्ठ्या ह्यस्य रेतः सिक्तं प्रजायते य एवमेतद्वेदामुतो वै दिवो वर्षतीद्यौषधयो
वनस्पतयः प्रजायन्ते पुरुषाद्रेत स्कन्दति पशुभ्यस्तत इदꣳ सर्वं प्रजायते तद्विद्या-
द्भूयसी मे प्रजातिरभूद्बहुः प्रजया पशुभिर्भविष्यामि श्रेयान्भविष्यामीति ॥७॥ अथ
यत्रावभिन्नꣳ स्यात् । तदुदस्थालीं वैवोदकमण्डलुं वा निनयेद्यद्वै यज्ञस्य रिष्टं
यदशान्तमापो वै तस्य सर्वस्य शान्तिरद्भिरेवैनत्तच्छान्त्या शमयति भूर्भुवः स्वरित्ये-
ताभिर्व्याहृतिभिरेता वै व्याहृतयः सर्वप्रायश्चित्तीस्तदनेन सर्वेण प्रायश्चित्तिं कु-
रुते तानि कपालानि संचित्य यत्र भस्मोद्धृतꣳ स्यात्तन्निवपेदेतदेव तत्र कर्म ॥८॥
तदाहुः । यस्याग्निहोत्री दोह्यमानोपविशेत्किं तत्र कर्म का प्रायश्चित्तिरिति ताꣳ
हैके यजुषोत्थापयन्त्युदस्थाद्देव्यदितिरितीयं वाऽअदितिरिमामेवास्माऽएतदुत्थाप-
याम इति वदन्त आयुर्यज्ञपतावधादित्यायुरेवास्मिंस्तद्दध्म इति वदन्त इन्द्राय कृ-
ण्वती भागमितीन्द्रियमेवास्मिंस्तद्दध्म इति वदन्तो मित्राय वरुणाय चेति प्राणो-
दानौ वै मित्रावरुणौ प्राणोदानावेवास्मिंस्तद्दध्म इति वदन्तस्तां तस्यामाहुत्यां
ब्राह्मणाय दद्याद्यमनभ्यागमिष्यन्मन्येतार्तिं वाऽएषा पाप्मानं यजमानस्य प्रति-
दृश्योपाविक्षदार्तिमेवास्मिंस्तत्पाप्मानं प्रतिमुञ्चाम इति वदन्तः ॥९॥ तदु हो-
वाच याज्ञवल्क्यः । अश्रद्दधानेभ्यो हैभ्यो गौरपक्रामत्यार्त्यां वाऽआहुतिं विध्य-
तीत्थमेव कुर्याद्दण्डेनैवैनां विपिष्योत्थापयेदिति तद्यथैवादो धावयतोऽश्वो वा-
श्वतरो वा गदायेत बलीवर्दो वा युक्तस्तेन दण्डप्रजितेन तोत्त्रप्रजितेन यमधानꣳ

समीप्सति तꣳ समश्नुतऽएवमेवैतया दण्डप्रजितया तोत्त्रप्रजितया यꣳ स्वर्गं लो-
कꣳ समीप्सति तꣳ समश्नुते ॥१०॥ अथ होवाचारुणिः । द्यौर्वाऽएतस्याग्निहोत्र-
स्याग्निहोत्र्ययमेव वत्सो योऽयं पवतऽइयमेवाग्निहोत्रस्थाली न वाऽएवं विदु-
षोऽग्निहोत्री नश्यति न ह्यसौ नश्येन्नैवं विदुषोऽग्निहोत्रीवत्सो नश्यति न
ह्येष नश्येन्नैवं विदुषोऽग्निहोत्रस्थाली भिद्यते न हीयं भिद्येत श्रियो वै पर्ज-
न्यो वर्षति तद्विद्याच्छ्रेमाणं मे महिमानमधारयमाणोपाविदच्छ्रेयान्भविष्यामीति
तामात्मन्येव कुर्वीतात्मन्येव तच्छ्रियं धत्तऽइति ह स्माहारुणिरेतदेव तत्र कर्म
॥११॥ तदाहुः । यस्याग्निहोत्री दोह्यमाना वाश्येत किं तत्र कर्म का प्रायश्चि-
त्तिरिति स्तम्बमाछिद्य ग्रासयेदेतदेव तत्र कर्म ॥१२॥ ब्राह्मणम् ॥३ [४.१.] ॥ ॥

तदाहुः । यस्याग्निहोत्री लोहितं दुहीत किं तत्र कर्म का प्रायश्चित्तिरिति
व्युत्क्रामतेत्युक्त्वा मेक्षणं कृत्वान्वाहार्यपचनं परिश्रयितवै ब्रूयात्तस्मिन्नेनच्छ्रपयित्वा
तस्मिंस्तूष्णीं जुहुयादनिरुक्तमनिरुक्तो वै प्रजापतिः प्राजापत्यमग्निहोत्रꣳ सर्वं वा
ऽअनिरुक्तं तदनेन सर्वेण प्रायश्चित्तिं कुरुते तां तस्यामाहुत्यां ब्राह्मणाय दद्या-
दनभ्यागमिष्यन्मन्येतार्तिं वाऽएषा पाप्मानं यजमानस्य प्रतिदृश्य दुहे या लो-
हितं दुहऽआर्तिमेवास्मिंस्तत्पाप्मानं प्रतिमुञ्चत्यथ यदन्यद्विन्देत्तेन जुहुयादनार्ते-
नैव तदार्तं यज्ञस्य निष्करोत्येतदेव तत्र कर्म ॥१॥ तदाहुः । यस्याग्निहोत्रं दो-
ह्यमानममेध्यमापद्येत किं तत्र कर्म का प्रायश्चित्तिरिति तद्धैके होतव्यं मन्यन्ते
प्रयतमेतन्नैतस्याहोमोऽवकल्पते न वै देवाः कस्माच्चन बीभत्सन्ते बीभत्सन्ताऽ३इ
तु देवा इत्यमेव कुर्याद्गार्हपत्यादुष्णं भस्म निरूह्य तस्मिन्नेनदुष्णे भस्मंस्तूष्णीं नि-
नयेदद्भिरुपनिनयत्यद्भिरेनदाप्नोत्यथ यदन्यद्विन्देत्तेन जुहुयादेतदेव तत्र कर्म ॥२॥
तदाहुः । यस्याग्निहोत्रं दोहितममेध्यमापद्येत किं तत्र कर्म का प्रायश्चित्तिरिति
यऽएवैतेऽङ्गारा निरूढा येष्वधिश्रयिष्यन्भवति तान्प्रत्युह्य तस्मिन्नेनदुष्णे भस्मंस्तूष्णीं

निनयेदद्भिरुपनिनयत्यद्भिरेनदाप्नोत्यथ यदन्य॰ ॥३॥ तदाहुः । यस्याग्निहोत्रमधिश्रितममेध्यमापद्येत किं तत्र कर्म का प्रायश्चित्तिरिति य ऽ एवैते ऽङ्गारा निरूढा येष्वधिश्रितं भवति तेष्वेनत्तूष्णीं जुहुयात्तद्धुतमहुतं यदहैनत्तेषु जुहोति तेन हुतं यद्वेनांस्तेनैवानुगमयति तेनाहुतमद्भिरुपनिनयत्यद्भिरेनदाप्नोत्यथ यदन्य॰ ॥४॥ तदाहुः । यदधिश्रिते ऽग्निहोत्रे यजमानो म्रियेत किं तत्र कर्म का प्रायश्चित्तिरिति तदेवैनदभिपर्याधाय विष्यन्दयेदथो खल्वाहुरेतावती सर्वस्य हविर्यज्ञस्य प्रायश्चित्तिरित्येतदेव तत्र कर्म ॥५॥ तदाहुः । यस्याग्निहोत्रꣳ स्रुच्युन्नीतꣳ स्कन्देत्किं तत्र कर्म का प्रायश्चित्तिरिति स्कन्नप्रायश्चित्तेनाभिमृश्याद्भिरुपनिनीय परिशिष्टेन जुहुयाद्यद्यु नीची स्रुकस्याद्यदि वा भिद्येत स्कन्नप्रायश्चित्तेनैवाभिमृश्याद्भिरुपनिनीय यत्स्थाल्यां परिशिष्टꣳ स्यात्तेन जुहुयात् ॥६॥ तद्धैके । प्रतिपरेत्य यत्स्थाल्यां परिशिष्टं भवति तेन जुह्वति तदु तथा न कुर्यात्स्वर्ग्यं वा ऽ एतद्यदग्निहोत्रं यो हैनं तत्र ब्रूयात्प्रति न्वा ऽ अयꣳ स्वर्गाल्लोकादवारुक्षन्नास्येदꣳ स्वर्ग्यमिव भविष्यतीतीश्वरो ह तथैव स्यात् ॥७॥ इत्थमेव कुर्यात् । तदेवोपविशेद्यत्स्थाल्यां परिशिष्टꣳ स्यात्तदस्मा ऽ उन्नीयाद्धरेयुस्तद्धैक ऽ उपवल्हन्ते हुतोच्छिष्टं वा ऽ एतद्यातयाम वा ऽ एतन्नैतस्य होतव्यमिति तदु तन्नाद्रियेत यदा वा ऽ एतदयातयामाथैनद्धविरातञ्चनं कुर्वते तस्माद्यत्स्थाल्यां परिशिष्टꣳ स्यात्तदस्मा ऽ उन्नीयाद्धरेयुर्यद्यु तत्र न स्याद्यदन्यद्विन्देत्तदग्नावधिश्रित्यावज्योत्याप: प्रत्यानीयोद्वास्य तदद्दो हैवोन्नेष्यामीत्युक्तं भवत्यथात्र यथोन्नीतमेवास्मा ऽ उन्नीयाद्धरेयुस्तेन कामं जुहुयादेतदेव तत्र कर्म ॥८॥ तदाहुः । यस्याग्निहोत्रꣳ स्रुच्युन्नीतममेध्यमापद्येत किं तत्र कर्म का प्रायश्चित्तिरिति तद्धैके होतव्यं मन्यन्ते प्रयतमेतन्नैतस्याहोमो ऽवकल्पते न वै देवाः कस्माच्चन बीभत्सन्त ऽ इति तद्धैक ऽ उत्सिच्य छर्दयन्ति तदु तथा न कुर्याद्यो हैनं तत्र ब्रूयात्परासिच्चत न्वा ऽ अयमग्निहोत्रं क्षिप्रे ऽयं यजमानः परासे-

ह्यतऽइतीश्वरो ह तथैव स्यादित्थमेव कुर्यादाहवनीये समिधमभ्याधायाहवनीयादेवोष्णं भस्म निरूह्य तस्मिन्नेनदुष्णे भस्मंस्तूष्णीं निनयेदद्भिरुपनिनयत्यद्भिरेनदाप्नोत्यथ यदन्यद्विन्देत्तेन जुहुयादेतदेव तत्र कर्म ॥ ९ ॥ तदाहुः । यस्याग्निहोत्रꣳ स्रुच्युन्नीतमुपरिष्टादववर्षेत्किं तत्र कर्म का प्रायश्चित्तिरिति तद्विद्यादुपरिष्टान्मा शुक्रमागन्नुप मां देवाः प्राभूवञ्छ्रेयान्भविष्यामीति तेन कामं जुहुयादेतदेव तत्र कर्म ॥१०॥ ब्राह्मणम् ॥४ [४. २.] ॥ ॥

तदाहुः । यत्पूर्वस्यामाहुत्याꣳ हुतायामथाग्निरनुगच्छेत्किं तत्र कर्म का प्रायश्चित्तिरिति यं प्रतिवेशꣳ शकलं विन्देत्तमभ्यस्याभिजुहुयाद्दारौ-दारावग्निरिति वदन्दारौ-दारौ ह्येवाग्निर्यद्युऽअस्य हृदयं व्येव लिखेद्धिरण्यमभिजुहुयादग्नेर्वाऽएतद्रेतो यद्धिरण्यं य उ वै पुत्रः स पिता यः पिता स पुत्रस्तस्माद्धिरण्यमभिजुहुयादेतदेव तत्र कर्म ॥१॥ तदाहुः । यस्याहवनीय उद्धृतः पुराग्निहोत्रादनुगच्छेत्किं तत्र कर्म का प्रायश्चित्तिरिति गार्हपत्यादेवैनं प्राञ्चमुद्धृत्योपसमाधायाग्निहोत्रं जुहुयात्स यद्यपि शतमेव कृत्वः पुनः पुनरुद्धृतोऽनुगच्छेद्गार्हपत्यादेवैनं प्राञ्चमुद्धृत्योपसमाधायाग्निहोत्रं जुहुयादेतदेव तत्र कर्म ॥२॥ तदाहुः । यस्य गार्हपत्योऽनुगच्छेत्किं तत्र कर्म का प्रायश्चित्तिरिति तꣳ हैकऽउल्मुकादेव निर्मन्थन्ति यतो वै पुरुषस्यान्ततो नश्यति ततो वै स तस्य प्रायश्चित्तिमिच्छतऽइति वदन्तस्तदु तथा न कुर्यादुल्मुकꣳ ह वै वादाय चरेयुरुल्मुकस्य वावव्रश्चमित्थमेव कुर्यादुल्मुकादङ्गारमादाय तमरण्योरभिविमथ्नीयादुप ह तं काममाप्नोति य उल्मुकमथ्यऽउपो तं योऽरण्योरेतदेव तत्र कर्म ॥३॥ तदाहुः । यस्याग्नावग्निमभ्युद्धरेयुः किं तत्र कर्म का प्रायश्चित्तिरितीश्वरौ वाऽएतौ सम्पद्याशान्तौ यजमानस्य प्रजां च पशूंश्च निर्दहस्तदभिमन्त्रयेत समितꣳ संकल्पेथाꣳ सम्प्रियौ रोचिष्णू सुमनस्यमानौ इषमूर्जमभि संवसानौ ॥ सं वां मनाꣳसि सं व्रता समु चित्तान्याकरम् अग्ने पुरीष्या-

धिपा भव त्वं न इषमूर्जं यजमानाय धेहीति शान्तिमेवाभ्यामेतद्वदति यजमानस्य प्रजायै पशूनामहिंसायै ॥४॥ यद्युऽअस्य हृदयं व्येव लिखेत् । अग्नयेऽग्निमतेऽष्टाकपालं पुरोडाशं निर्वपेत्तस्यावृत्सप्तदश सामिधेनीरनुब्रूयाद्वार्त्रघ्नावाज्यभागौ विराजौ संयाज्येऽअथैते याज्यानुवाक्येऽअग्निनाग्निः समिध्यते कविर्गृहपतिर्युवा हव्यवाड्जुह्वास्य इत्यथ याज्या त्वं ह्यग्नेऽअग्निना विप्रो विप्रेण सन्त्सता सखा सख्या समिध्यसऽइति शान्तिमेवाभ्यामेतद्वदति यजमानस्य प्रजायै पशूनामहिंसायाऽएतदेव तत्र कर्म ॥५॥ तदाहुः । यस्याहवनीयेऽननुगते गार्हपत्योऽनुगच्छेत्किं तत्र कर्म का प्रायश्चित्तिरिति तं हैके तत एव प्राञ्चमुद्धरन्ति प्राणा वाऽअग्नयः प्राणानेवास्माऽएतदुद्धराम इति वदन्तस्तदु तथा न कुर्याद्यो हैनं तत्र ब्रूयात्प्राचो न्वाऽअयं यजमानस्य प्राणान्प्रारौत्सीन्मरिष्यत्ययं यजमान इतीश्वरो ह तथैव स्यात् ॥६॥ अथ हैके प्रत्यञ्चमाहरन्ति । प्राणोदानाविमाविति वदन्तस्तदु तथा न कुर्यात्स्वर्ग्यं वाऽएतद्यदग्निहोत्रं यो हैनं तत्र ब्रूयात्प्रति न्वाऽअयं स्वर्गाल्लोकादवारुत्सतास्येदं स्वर्ग्यमिव भविष्यतीतीश्वरो ह तथैव स्यात् ॥७॥ अथ हैकेऽन्यं गार्हपत्यं मन्थन्ति । तदु तथा न कुर्याद्यो हैनं तत्र ब्रूयादग्नेर्न्वाऽअयमधि द्विषन्तं भ्रातृव्यमजीजनत क्षिप्रेऽस्य द्विषन्भ्रातृव्यो जनिष्यते प्रियतमं रोत्स्यतीतीश्वरो ह तथैव स्यात् ॥८॥ अथ हैकेऽनुगमय्यान्यं मन्थन्ति । तस्याशां नेयादपि यत्परिशिष्टमभूत्तदजीजसत नास्य दायादश्चन परिशेक्ष्यतऽइतीश्वरो ह तथैव स्यात् ॥९॥ इत्थमेव कुर्यात् । अरण्योरग्नी समारोह्योदङुदवसाय निर्मथ्य जुह्वदसेत्तथा ह न कां चन परिचक्षां करोति नवावसानऽउऽअस्याभितोरात्रं कृतं भवति ॥१०॥ ब्राह्मणम् ॥ ५ [४. ३.] ॥ ॥

अथ प्रातर्भस्मान्युद्धृत्य । गोमयेनालिप्यारण्योरेवाग्नी समारोह्य प्रत्यवस्यति मथित्वा गार्हपत्यमुद्धृत्याहवनीयमाहृत्यान्वाहार्यपचनमग्नये पथिकृतेऽष्टाकपालं

पुरोडाशं निर्वपेत्तस्यावृत्ता एव सप्तदश सामिधेनीरनुब्रूयाद्वार्त्रघ्नावाज्यभागौ वि-
राजौ संयाज्येऽअथैते याज्यानुवाक्ये वेत्था हि वेधोऽअध्वनः पथश्च देवाञ्जसा
अग्ने यज्ञेषु सुक्रतवित्यथ याज्या देवानामपि पन्थामगन्म यच्छक्नवाम तदनुप्रवो-
ढुम् अग्निर्विद्वान्त्स यजात्सेदु होता सोऽअध्वरान्त्स ऋतून्कल्पयातीत्यग्निर्वै प-
थिकृत्पथामपिनेता स एवैनं यज्ञपथमपिनयत्येतदेव तत्र कर्म ॥१॥ तदाहुः ।
यस्याग्नयः सꣳसृज्येरन्किं तत्र कर्म का प्रायश्चित्तिरिति स यदि परस्ताद्दहन्नभीयात्त-
द्विद्यात्परस्तान्मा शुक्रमागन्नुप मां देवाः प्राभूवञ्छ्रेयान्भविष्यामीति यद्युऽअस्य
हृदयं व्येव लिखेदग्नये विविचयेऽष्टाकपालं पुरोडाशं निर्वपेत्तस्यावृत्ता एव स-
प्तदश सामिधेनीरनुब्रूयाद्वार्त्रघ्नावाज्यभागौ विराजौ संयाज्येऽअथैते याज्यानुवाक्ये
वि ते विष्वग्वातजूतासोऽअग्ने भामासः शुचे शुचयश्चरन्ति तुविम्रक्षासो दिव्या
नवग्वा वनावनन्ति धृषता रुजन्त इत्यथ याज्या त्वामग्ने मानुषीरीडते विशो हो-
त्राविदं विविचिꣳ रत्नधातमम् गुहा सन्तꣳ सुभग विश्वदर्शतं तुविष्वणसꣳ सु-
यजं घृतश्रियमित्यथो ह यो द्विषतो भ्रातृव्याद्याविवृत्सेत तत्काम एतया यजेत
वि हैवास्माद्वर्तत एतदेव तत्र कर्म ॥२॥ यद्यमितो दहन्नभीयात् । तद्विद्यादभि
द्विषन्तं भ्रातृव्यं भविष्यामि श्रेयान्भविष्यामीति यद्युऽअस्य हृदयं व्येव लिखेदग्नये
संवर्गायाष्टाकपालं पुरोडाशं निर्वपेत्तस्यावृत्ता एव सप्त° ऽअथैते याज्यानु-
वाक्ये परस्याऽअधि संवतोऽवराँ२॥ऽअभ्यानर यत्राहमस्मि ताँ२॥ऽअवेत्यथ या-
ज्या मा नोऽअस्मिन्महाधने परावर्ग्भारभृद्यथा सं वर्गꣳ सꣳ रयिं जयेत्यथो ह
यो द्विषतो भ्रातृव्यात्संविवृक्षेत तत्काम एतया यजेत सꣳ हैवास्माद्वृङ्क्तऽ एतदेव
तत्र कर्म ॥३॥ तदाहुः । यस्य वैद्युतो दहेत्किं तत्र कर्म का प्रायश्चित्तिरिति
तद्विद्यादुपरिष्टान्मा शुक्रमागन्नुप मां देवाः प्राभूवञ्छ्रेयान्भविष्यामीति यद्युऽअस्य
हृदयं व्येव लिखेदग्नयेऽप्सुमतेऽष्टाकपालं पुरोडाशं निर्वपेत्तस्यावृत्ता एव सप्त°

ऽअथैते याज्यानुवाक्येऽअप्स्वग्ने सधिष्टव सौषधीरनुरुध्यसे   गर्भे सन्जायसे पुन-
रित्यथ याज्या गर्भोऽअस्योषधीनां गर्भो वनस्पतीनाम्   गर्भो विश्वस्य भूतस्याग्ने
गर्भोऽअपामसीति शान्तिमेवाभ्यामेतद्वदति यजमानस्य प्रजायै पशूनामहिꣳसाया
ऽएतदेव तत्र कर्म ॥४॥ तदाहुः । यस्याग्नयोऽमेध्यैरग्निभिः सꣳसृज्येरन्किं तत्र कर्म
का प्रायश्चित्तिरित्यग्नये शुचयेऽष्टाकपालं पुरोडाशं निर्वपेत्तस्यावृता एव सप्त°
ऽअथैते याज्यानुवाक्येऽअग्निः शुचिव्रततमः शुचिर्विप्रः शुचिः कविः   शुची रो-
चतऽआहुत इत्यथ याज्योदग्ने शुचयस्तव शुक्रा भ्राजन्त ईरते   तव ज्योतीꣳष्य-
र्चय इति शान्तिमेवा° ॥५॥ तदाहुः । यस्याहवनीयमनुद्धृतमादित्योऽभ्यस्तमिया-
त्किं तत्र कर्म का प्रायश्चित्तिरित्येते वै रश्मयो विश्वे देवास्तेऽस्मादपप्रयन्ति त-
दस्मै व्यृध्यते यस्माद्देवा अपप्रयन्ति तामनु व्यृद्धिं यश्च वेद यश्च न ताऽउभावा-
हतुरनुद्धृतमस्याभ्यस्तमगादिति तत्रेत्थं कुर्याद्धरितꣳ हिरण्यं दर्भे प्रबध्य पश्चाद्धर्तवै
ब्रूयात्तदेतस्य रूपं क्रियते य एष तपत्यहर्वाऽएतदह्नो रूपं क्रियते पवित्रं दर्भाः
पवयत्येवैनं तदथैध्ममादीप्य प्राञ्चꣳ हर्तवै ब्रूयाद्ब्राह्मण आर्षेय उद्धरेद्ब्राह्मणो
वाऽआर्षेयः सर्वा देवताः सर्वाभिरेवैनं तद्देवताभिः समर्धयति तमुपसमाधाय प्र-
तिपरेत्य गार्हपत्यऽआज्यमधिश्रित्योद्वास्योत्पूयावेक्ष्य चतुर्गृहीतमाज्यं गृहीत्वा स-
मिधमुपसंगृह्य प्राङुदाद्रवत्यथाहवनीये समिधमभ्याधाय दक्षिणं जान्वाच्य जुहोति
विश्वेभ्यो देवेभ्यः स्वाहेति स यथा ब्राह्मणमावसथवासिनं क्रुद्धं यन्तमुत्त्वेहतो-
पमन्त्रयेतैवमेवैतद्विश्वान्देवानुपमन्त्रयते जानन्ति हैनमुप हैनमावर्तन्तऽएतदेव तत्र
कर्म ॥६॥ तदाहुः । यस्याहवनीयमनुद्धृतमादित्योऽभ्युदियात्किं तत्र कर्म का प्रा-
यश्चित्तिरित्येते वै रश्मयो विश्वे देवास्तेऽस्माद्रूषिवाꣳसोऽपप्रयन्ति तदस्मै व्यृध्यते
यस्माद्देवा अपप्रयन्ति तामनु व्यृद्धिं यश्च वेद यश्च न ताऽउभावाहतुरनुद्धृतमस्या-
भ्युदगादिति तत्रेत्थं कुर्याद्रजतꣳ हिरण्यं दर्भे प्रबध्य पुरस्ताद्धर्तवै ब्रूयात्तच्चन्द्रमसो

रूपं क्रियते रात्रिर्वै चन्द्रमास्तद्रात्रे रूपं क्रियते पवित्रं दर्भाः पवयत्येवैनं तदथेध्ममादीप्यान्वधꣳ कर्त्तवै ब्रूयाद्ब्राह्मण आर्षेय उद्धरेद्ब्राह्मणो वाऽआर्षेयः सर्वा देवताः सर्वाभिरेवैनं तद्देवताभिः समर्धयति तमुपसमाधाय प्रतिपरेत्य गार्हपत्यऽआज्यमधिश्रित्योद्वास्योत्पूयावेक्ष्य यथागृहीतमाज्यं गृहीत्वा समिधमुपसंगृह्य प्राङुदाद्रवत्यथाहवनीये समिधमभ्याधाय दक्षिणं जान्वाच्य जुहोति विश्वेभ्यो देवेभ्यः स्वाहेति सोऽसावेव बन्धुर्न ह वै तत्र का चनार्तिर्न रिष्टिर्भवति यत्रैषा प्रायश्चित्तिः क्रियतऽएतदेव तत्र कर्म ॥७॥ ब्राह्मणम् ॥६ [४. ४.] ॥ चतुर्थोऽध्यायः [७८.] ॥ ॥

तदाहुः । यदेष दीर्घसत्त्र्यग्निहोत्रं जुह्वत्प्रवसन्म्रियेत जुहुयुरस्मा३इ ना३ऽइति तद्धैके होतव्यं मन्यन्तऽआगन्तोरिति तद्व तथा न कुर्यादतस्थानो वाऽएष तस्मै यदेनꣳ शवदह्यायाऽइव जुहुयुर्यज्ञाय वाऽएष आहुतिभ्यस्तस्थानः स हैनममृष्यमाणास्तृप्रꣳ सचते ॥१॥ अथ हैकऽआहुः । एवमेवान्वाहिता अहूयमानाः शयीरन्निति तद्व तथा न कुर्यादतस्थानो वाऽएष तस्मै यदेनꣳ शवदह्यायाऽइवेन्धीरन्यज्ञाय वाऽएष आहुतिभ्यस्तस्थानः स हैनममृष्यमाणास्तृप्रꣳ सचते ॥२॥ अथ हैकेऽरण्योः । अग्नी समारोह्य निदधति तमाहृते निर्मन्थन्ति तद्व तथा न कुर्यादतस्थानो वाऽएष तस्मै यदेनꣳ शवदह्यायाऽइव निर्मन्थेयुर्यज्ञाय वाऽएष आहुतिभ्यस्तस्थानः स हैनममृष्यमाणास्तृप्रꣳ सचते ॥३॥ इत्थमेव कुर्यात् । निवान्यवत्सामेष्टवै ब्रूयात्तस्यै पयसा जुहुयादार्तं वाऽएतत्पयो यन्निवान्यवत्सायाऽआर्तमेतदग्निहोत्रं यन्मृतस्य तदार्तेनैव तदार्तं निष्कृत्य श्रेयान्भवति ॥४॥ तदप्युपमास्ति । यद्धौ रथौ मृदितौ समागच्छेताꣳ स्यादेवान्यतरः स्यदायेति ॥५॥ तस्य वाऽएतस्याग्निहोत्रस्योपचारः । प्राचीनावीती दोहयति यज्ञोपवीती वै देवेभ्यो दोहयत्यथैवं पितृणाम् ॥६॥ नाङ्गारेष्वधिश्रयति । यदाङ्गारेष्वधिश्रयेद्देवत्रा कुर्याद्गार्ह-

पत्यादुष्णं भस्म दक्षिणा निरुह्य तस्मिन्नेनदधिश्रयति पितृदेवत्यमेवैनत्तत्करोति ॥७॥ नावज्योतयति नापः प्रत्यानयति । यद्वावज्योतयेद्यदपः प्रत्यानयेद्देवत्रा कुर्यान्न त्रिः प्रतिष्ठापꣳ हरति यत्त्रिः प्रतिष्ठापꣳ हरेद्देवत्रा कुर्यात्सकृदेव निकर्षन्हरति पितृदेवत्यमेवैनत्तत्करोति ॥८॥ नोन्नेष्यामीत्याह । न चतुरुन्नयति यद्वोन्नेष्यामीति ब्रूयाद्यच्चतुरुन्नयेद्देवत्रा कुर्यात्सकृदेव तूष्णीं न्यक्पर्यस्यति पितृदेवत्यमेवैनत्तत्करोति ॥९॥ नोपरिष्टात्समिधमभ्यस्य हरति । यद्वोपरिष्टात्समिधमभ्यस्य हरेद्देवत्रा कुर्यादधस्तादुपास्य हरति पितृदेव° ॥१०॥ नोत्तरेण गार्हपत्यमेति । यद्वोत्तरेण गार्हपत्यमियाद्देवत्रा कुर्याद्दक्षिणेन गार्हपत्यमेति पितृदेव° ॥११॥ अथ यान्यमून्युदीचीनाग्राणि तृणानि भवन्ति । दक्षिणाग्राणि तानि करोति पितृदेवत्यमेवैनत्तत्करोत्यथाहवनीये समिधमभ्याधाय सव्यं जान्वाच्य सकृदेव तूष्णीं न्यक्पर्यस्यति पितृदेव° नोदिङ्गयति नोपमृष्टे न प्राश्नाति नोदुह्नाति पितृदेव° ॥१२॥ तदाहुः । यदेष दीर्घसत्त्र्यग्निहोत्री जुह्वत्प्रवसन्म्रियेत कथमेनमग्निभिः कुर्युरिति तꣳ हैके दग्ध्वाहरन्ति तमाहृतमग्निभिः संघ्रापयन्ति तदु तथा न कुर्याद्यथान्यस्यां योनौ रेतः सिक्तं तदन्यस्यां प्रजिजनयिषेत्तादृक्तदस्थीन्येतान्याहृत्य कृष्णाजिने न्युप्य पुरुषविधिं विधायोर्णाभिः प्रच्छाद्याज्येनाभिघार्य तमग्निभिः समुपोषेत्तदेनꣳ स्वाद्योनेः प्रजनयतीति ॥१३॥ तꣳ हैके ग्रामाग्निना दहन्ति । तदु तथा न कुर्यादेष वै विश्वात्क्रव्यादग्निः स हैनमीश्वरः सपुत्रꣳ सपशुꣳ समत्तोः ॥१४॥ अथ हैके प्रदव्येन दहन्ति । तदु तथा न कुर्यादेष वाऽअशान्तोऽग्निः स हैनमीश्वरः सपुत्रꣳ सपशुं प्रदग्धोः ॥१५॥ अथ हैकऽउल्मुक्येन दहन्ति । तदु तथा न कुर्यादेष वै रुद्रियोऽग्निः स हैनमीश्वरः सपुत्रꣳ सपशुमभिमन्तोः ॥१६॥ अथ हैकेऽन्तरेणाग्नीँश्चितिं चित्वा । तमग्निभिः समुपोषन्त्येतद्वै यजमानस्यायतनं यदन्तरेणाग्नीनिति तदु तथा न कुर्याद्यो हैनं तत्र ब्रूयान्मध्ये न्वाऽअयं ग्रामस्या-

शसनमजीजनत द्विषे ऽस्याशसनं जनिष्यते प्रियतमꣳ रोत्स्यतीतीश्वरो ह तथैव स्यात् ॥१७॥ ब्राह्मणम् ॥७ [५. १.] ॥ ॥

अथ ह स्माह नाको मौद्गल्यः । मरिष्यन्तं चेद्यजमानं मन्येत यत्रैवास्मा ऽआशसनं जोषितꣳ स्यात्तदरण्योरग्नी समारोह्य निर्मथ्य जुहुयाद्दहेत्स यदास्माल्लोकाद्यजमानः प्रेयात् ॥१॥ अथैनमन्तरेणाग्नींश्चितिं चित्वा । तमग्निभिः समुपोषेदिति तदु तथा न कुर्यादतस्थानो वा ऽएष तस्मै यदेनꣳ शवदह्याया ऽइव जुहुयुर्यज्ञाय वा ऽएष आहुतिभ्यस्तस्थानः स हैनममृष्यमाणास्तृप्रꣳ सचते ॥२॥ इत्थमेव कुर्यात् । तिस्र एव स्थालीरिष्टवे ब्रूयात्तासु गोमयानि च शुम्बलानि वावधाय नाना त्रिष्वग्निषु प्रवृञ्ज्यात्ते ये ततः संतापादग्नयो जायेरंस्तैरेनं दहेयुस्तथाह तैरेव दग्धो भवति नो प्रत्यक्षमिव ॥३॥ तस्मादप्येतदृषिणाभ्यनूक्तम् । यो अग्निरग्नेरध्यजायत शोकात्पृथिव्या उत वा दिवस्परि येन प्रजा विश्वकर्मा जजान तमग्ने हेडः परि ते वृणक्त्विति यथ ऽर्क्तथा ब्राह्मणम् ॥४॥ अथैनं विपुरीषं कृत्वा । अस्यां पुरीषं प्रतिष्ठापयति पुरीषं वा ऽइयं तत्पुरीष ऽएवैतत्पुरीषं दधाति या ह वा ऽअस्यैषा वृकला सपुरीषा तस्यै ह विदग्धायै सृगालः सम्भवति नेत्सृगालः सम्भवदिति तदु तथा न कुर्यात्क्षोधुका हास्य प्रजा भवति तमन्तरतः प्रक्षाल्याज्येनान्वनक्ति मेध्यमेवैनत्तत्करोति ॥५॥ अथास्य सप्तसु प्राणायतनेषु । सप्त हिरण्यशकलान्प्रत्यस्यति ज्योतिर्वा ऽअमृतꣳ हिरण्यं ज्योतिरेवास्मिंस्तदमृतं दधाति ॥६॥ अथैनमन्तरेणाग्नींश्चितिं चित्वा । कृष्णाजिनमुत्तरलोम प्राचीनग्रीवं प्रस्तीर्य तस्मिन्नेनमुत्तानं निपाद्य जुहूं घृतेन पूर्णां दक्षिणे पाणावादधाति सव्य ऽउपभृतमुरसि ध्रुवां मुखे ऽग्निहोत्रहवणीं नासिकयोः स्रुवौ कर्णयोः प्राशित्रहरणे शीर्षंश्चमसं प्रणीताप्रणयनं पार्श्वयोः शूर्पे ऽउदरे पात्रीꣳ समवत्तधानीं पृषदाज्यवतीꣳ शिश्नस्यान्ते शम्यामाण्डयोरन्ते वृषारवावन्वगुलूखलं च मुसलं चान्तरे-

णोद्रूऽअन्यानि यज्ञपात्राणि दक्षिणे पाणौ स्फ्यम् ॥७॥ स एष यज्ञायुधी यजमानः । यथा बिभ्यदामोषमतीयादेवमेव योऽस्य स्वर्गो लोको जितो भवति तमभ्यत्येति तमेते संताप्या अग्नयो यथा पुत्राः पितरं प्रोषुषमागतꣳ शिवमुपस्पृशन्त्येवꣳ शिवꣳ हैवैतमुपस्पृशन्ति प्र हैवैनं कल्पयन्ति ॥८॥ तं यदि गार्हपत्यः पूर्वः प्राप्नुयात् । तद्विद्यात्प्रतिष्ठ एनमग्निः पूर्वः प्रापत्प्रतिष्ठास्यति प्रत्येव तेऽस्मिंलोके स्थास्यन्ति येऽस्मात्प्रत्यञ्च इति ॥९॥ अथ यद्याहवनीयः । तद्विद्यान्मुख्य एनमग्निः पूर्वः प्रापन्मुखतो लोकानजैषीन्मुखमेव तेऽस्मिंल्लोके भविष्यन्ति येऽस्मात्प्रत्यञ्च इति ॥१०॥ अथ यद्यन्वाहार्यपचनः । तद्विद्यादन्नाद एनमग्निः पूर्वः प्रापदन्नमत्स्यत्यन्नमेव तेऽस्मिंल्लोकेऽत्स्यन्ति येऽस्मात्प्रत्यञ्च इति ॥११॥ अथ यदि सर्वे सकृत् । तद्विद्यात्कल्याणं लोकमजैषीदित्येतान्यस्मिन्विज्ञानानि ॥१२॥ तां वाऽएताम् । यजमानात्माहुतिमन्ततो जुहोति स योऽस्य स्वर्गो लोको जितो भवति तत आहुतिमयोऽमृतः सम्भवति ॥१३॥ अथ यान्यश्ममयानि च मृन्मयानि च भवन्ति । तानि ब्राह्मणाय दद्याद्धवोढ्हमु ह तं मन्यन्ते यस्तानि प्रतिगृह्णात्यप एवैनान्यभ्यवहरेयुरापो वाऽअस्य सर्वस्य प्रतिष्ठा तदेनमप्स्वेव प्रतिष्ठापयति ॥१४॥ अथैतामाहुतिं जुहोति । पुत्रो वा भ्राता वा यो वान्यो ब्राह्मणः स्यादस्मात्त्वमधि जातोऽसि त्वदयं जायतां पुनः असौ स्वर्गाय लोकाय स्वाहेत्यनपेक्षमेत्याप उपस्पृशन्ति ॥१५॥ ब्राह्मणम् ॥८ [५. २.] ॥ द्वितीयः प्रपाठकः ॥ कण्डिकासंख्या ९५ ॥ पञ्चमोऽध्यायः [७९.] ॥ ॥

सोमो वै राजा यज्ञः प्रजापतिः । तस्यैतास्तन्वो या एता देवता या एता आहुतीर्जुहोति ॥१॥ स यद्यज्ञस्यार्छेत् । यां तत्प्रति देवतां मन्येत तामनुसमीक्ष्य जुहुयाद्यदि दीक्षोपसत्स्वाहवनीये यदि प्रसुतऽआग्नीध्रे वि वाऽएतद्यज्ञस्य पर्व स्रꣳसते यद्ध्वलति सा यैव तर्हि तत्र देवता भवति तयैवैतद्देवतया यज्ञं भिषज्यति

तया देवतया यज्ञं प्रतिसंदधाति ॥२॥ स यद्येनं मनसाभिध्यातः । यज्ञो नोपन-
मेत्परमेष्ठिने स्वाहेति जुहुयात्परमेष्ठी हि स तर्हि भवत्यप पाप्मानꣳ हतऽउ-
पैनं यज्ञो नमति ॥३॥ अथ यद्येनं वाचाभिव्याहृतः । यज्ञो नोपनमेत्प्रजापतये
स्वाहेति जुहुयात्प्रजापतिर्हि स तर्हि भवत्यप पा° ॥४॥ अथ यस्य राजानमहृत्वा
। नाहरन्त एयुरन्धसे स्वाहेति जुहुयादन्धो हि स तर्हि भ° ॥५॥ अथ यदि स्नातः
। किंचिदापद्येत सवित्रे स्वाहेति जुहुयात्सविता हि स तर्हि भ° ॥६॥ अथ यदि
दीक्षासु । किंचिदापद्येत विश्वकर्मणे स्वाहेति जुहुयाद्विश्वकर्मा हि स तर्हि भ°
॥७॥ अथ यदि सोमक्रयण्याम् । किंचिदापद्येत पूष्णे स्वाहेति जुहुयात्पूषा हि स
तर्हि भ° ॥८॥ अथ यदि क्रयायोपोत्थितः । किंचिदापद्येतेन्द्राय च मरुद्भ्यश्च स्वा-
हेति जुहुयादिन्द्रश्च हि स तर्हि मरुतश्च भ° ॥९॥ अथ यदि पण्यमानः । किंचि-
दापद्येतासुराय स्वाहेति जुहुयादसुरो हि स तर्हि भ° ॥१०॥ अथ यदि क्रीतः ।
किंचिदापद्येत मित्राय स्वाहेति जुहुयान्मित्रो हि स तर्हि भ° ॥११॥ अथ यद्यू-
रावासन्नः । किंचिदापद्येत विष्णवे शिपिविष्टाय स्वाहेति जुहुयाद्विष्णुर्हि स तर्हि
शिपिविष्टो भ° ॥१२॥ अथ यदि पर्युह्यमाणः । किंचिदापद्येत विष्णवे नरंधिषाय
स्वाहेति जुहुयाद्विष्णुर्हि स तर्हि नरंधिषो भ° ॥१३॥ अथ यद्यागतः । किंचिदा-
पद्येत सोमाय स्वाहेति जुहुयात्सोमो हि स तर्हि भ° ॥१४॥ अथ यद्यासन्द्यामा-
सन्नः । किंचिदापद्येत वरुणाय स्वाहेति जुहुयाद्वरुणो हि स तर्हि भ° ॥१५॥
अथ यद्याग्नीध्रगतः । किंचिदापद्येताग्नये स्वाहेति जुहुयादग्निर्हि स तर्हि भ° ॥१६॥
अथ यदि हविर्धानगतः । किंचिदापद्येतेन्द्राय स्वाहेति जुहुयादिन्द्रो हि स तर्हि
भ° ॥१७॥ अथ यद्युपावह्रियमाणः । किंचिदापद्येताथर्वणे स्वाहेति जुहुयादथर्वा
हि स तर्हि भ° ॥१८॥ अथ यद्यꣳशुषु न्युप्तः । किंचिदापद्येत विश्वेभ्यो देवेभ्यः
स्वाहेति जुहुयाद्विश्वे हि स तर्हि देवा भ° ॥१९॥ अथ यद्याप्याय्यमानः । किंचि-

दापद्येत विष्णवऽआप्रीतपाय स्वाहेति जुहुयाद्विष्णुर्हि स तर्ह्याप्रीतपा भ° ॥२०॥
अथ यद्यभिषूयमाणः । किंचिदापद्येत यमाय स्वाहेति जुहुयाद्यमो .हि स तर्हि
भ° ॥२१॥ अथ यदि सम्भ्रियमाणः । किंचिदापद्येत विष्णवे स्वाहेति जुहुयाद्विष्णु-
र्हि स तर्हि भ° ॥२२॥ अथ यदि पूयमानः किंचिदापद्येत वायवे स्वाहेति जु-
हुयाद्वायुर्हि स तर्हि भ° ॥२३॥ अथ यदि पूतः । किंचिदापद्येत शुक्राय स्वाहेति
जुहुयाच्छुक्रो हि स तर्हि भ° ॥२४॥ अथ यदि क्षीरश्रीः । किंचिदापद्येत शुक्राय
स्वाहेति जुहुयाच्छुक्रो हि स तर्हि भ° ॥२५॥ अथ यदि सक्तुश्रीः । किंचिदापद्येत
मन्थिने स्वाहेति जुहुयान्मन्थी हि स तर्हि भ° ॥२६॥ अथ यदि चमसेषून्नीतः ।
किंचिदापद्येत विश्वेभ्यो देवेभ्यः स्वाहेति जुहुयाद्विश्वे हि स तर्हि देवा भ° ॥२७॥
अथ यदि होमायोद्यतः । किंचिदापद्येतासवे स्वाहेति जुहुयादसुर्हि स तर्हि भ
॥२८॥ अथ यदि हूयमानः । किंचिदापद्येत रुद्राय स्वाहेति जुहुयाद्रुद्रो हि स
तर्हि भ° ॥२९॥ अथ यद्यभ्यावृत्तः । किंचिदापद्येत वाताय स्वाहेति जुहुयाद्वातो
हि स तर्हि भ° ॥३०॥ अथ यदि प्रतिख्यातः । किंचिदापद्येत नृचक्षसे स्वाहेति
जुहुयान्नृचक्षा हि स तर्हि भ° ॥३१॥ अथ यदि भक्ष्यमाणः । किंचिदापद्येत भक्षाय
स्वाहेति जुहुयाद्भक्षो हि स तर्हि भ° ॥३२॥ अथ यदि नाराशꣳसेषु सन्नः । किं-
चिदापद्येत पितृभ्यो नाराशꣳसेभ्यः स्वाहेति जुहुयात्पितरो हि स तर्हि नारा-
शꣳसा भ° ॥३३॥ अथ यद्यवभृथायोद्यतः । किंचिदापद्येत सिन्धवे स्वाहेति जुहु-
यात्सिन्धुर्हि स तर्हि भ° ॥३४॥ अथ यद्यभ्यवह्रियमाणः । किंचिदापद्येत समुद्राय
स्वाहेति जुहुयात्समुद्रो हि स तर्हि भ° ॥३५॥ ॥ शतम् ६२०० ॥ ॥ अथ यदि प्र-
प्लुतः । किंचिदापद्येत सलिलाय स्वाहेति जुहुयात्सलिलो हि स तर्हि भवत्यप
पाप्मानꣳ हतऽउपैनं यज्ञो नमति ॥३६॥ ता वाऽएताः । चतुस्त्रिꣳशतमाज्याहु-
तीर्जुहोति त्रयस्त्रिꣳशद्वै देवाः प्रजापतिश्चतुस्त्रिꣳश एतद्वै सर्वैर्देवैर्यज्ञं भिषज्यति

सर्वैर्दैवैर्यज्ञं प्रतिसंदधाति ॥३७॥ ता ब्रह्मैव जुहुयात् । नाब्रह्मा ब्रह्मा वै य-
ज्ञस्य दक्षिणत आस्ते ब्रह्मा यज्ञं दक्षिणतो गोपायति यदि तु ब्रह्मा न विद्या-
दपि य एव कश्च विद्यात्स जुहुयाद्ब्रह्माणं त्वामन्त्र्य ब्रह्मणातिसृष्टस्तासां वाऽए-
तासां व्याहृतीनां बन्धुता वसिष्ठो ह विराजं विदां चकार ताꣳ हेन्द्रोऽभिदध्यौ
॥३८॥ स होवाच । ऋषे विराजꣳ ह वै वेत्थ तां मे ब्रूहीति स होवाच किं
मम ततः स्यादिति सर्वस्य च ते यज्ञस्य प्रायश्चित्तिं ब्रूयाꣳ रूपं च त्वा दर्शयेयेति
स होवाच यन्नु मे सर्वस्य यज्ञस्य प्रायश्चित्तिं ब्रूयाः किमु स स्याद्यं त्वꣳ रूपं दर्श-
येथा इति जीवस्वर्ग एवास्माल्लोकात्प्रेयादिति ॥३९॥ ततो हैतामृषिरिन्द्राय
विराजमुवाच । इयं वै विराडिति तस्माद्योऽस्यै भूयिष्ठं लभते स एव श्रेष्ठो भ-
वति ॥४०॥ अथ हैतामिन्द्र ऋषये । प्रायश्चित्तिमुवाचाग्निहोत्रादग्रऽआ महत
उक्थात्ता ह स्मैताः पुरा व्याहृतीर्वसिष्ठा एव विदुस्तस्माद्ध स्म पुरा वासिष्ठ एव
ब्रह्मा भवति यतस्त्वेना अप्येतर्हि य एव कश्चाधीते ततोऽप्येतर्हि य एव कश्च
ब्रह्मा भवति स ह वै ब्रह्मा भवितुमर्हति स वा ब्रह्मन्नित्यामन्त्रितः प्रतिशृणु-
याद्य एवमेता व्याहृतीर्वेद ॥४१॥ ब्राह्मणम् ॥ १ [६. १.] ॥ षष्ठोऽध्यायः
[८०.] ॥ ॥

विश्वरूपं वै त्वाष्ट्रमिन्द्रोऽहन् । तं त्वष्टा हतपुत्रोऽभ्यचरत्सोऽभिचरणीयम-
पेन्द्रꣳ सोममाहरत्तस्येन्द्रो यज्ञवेशसं कृत्वा प्रासह्य सोममपिबत्स विष्वङ् व्यार्छ-
त्तस्येन्द्रियं वीर्यमङ्गादङ्गादस्रवत् ॥१॥ तस्याक्षिभ्यामेव तेजोऽस्रवत् । सोऽजः प-
शुरभवद्धूम्रोऽथ यत्पक्ष्मभ्यस्ते गोधूमा यदश्रुभ्यस्तत्कुवलम् ॥२॥ नासिकाभ्यामे-
वास्य वीर्यमस्रवत् । सोऽविः पशुरभवन्मेषोऽथ यच्छ्लेष्मणस्ता उपवाका यत्स्नी-
हा तद्बदरं ॥३॥ मुखादेवास्य बलमस्रवत् । स गौः पशुरभवदृषभोऽथ ये फे-
नास्ते यवा यत्स्नेहस्तत्कर्कन्धु ॥४॥ श्रोत्रादेवास्य यशोऽस्रवत् । तदेकशफमभ-

वदश्वोऽश्वतरो गर्दभः ॥५॥ स्तनाभ्यामेवास्य शुक्रमस्रवत् । तत्पयोऽभवत्पशूनां ज्योतिरुरस एवास्य हृदयात्त्विषिरस्रवत्स श्येनोऽपाष्ठिहाभवद्वयसां राजा ॥६॥ नाभ्या एवास्य शूषोऽस्रवत् । तत्सीसमभवन्नायो न हिरण्यं रेतस एवास्य रूपमस्रवत्तत्सुवर्णं हिरण्यमभवच्छिश्नादेवास्य रसोऽस्रवत्सा परिस्रुदभवत्स्फिगीभ्यामेवास्य भामोऽस्रवत्सा सुराभवदन्नस्य रसः ॥७॥ मूत्रादेवास्यौजोऽस्रवत् । स वृकोऽभवदारण्यानां पशूनां जूतिरूवध्यादेवास्य मन्युरस्रवत्स व्याघ्रोऽभवदारण्यानां पशूनां राजा लोहितादेवास्य सहोऽस्रवत्स सिंहोऽभवदारण्यानां पशूनामीशः ॥८॥ लोमभ्य एवास्य चित्तमस्रवत् । ते श्यामाका अभवंस्त्वच एवास्यापचितिरस्रवत्सोऽश्वत्थो वनस्पतिरभवन्मांसेभ्य एवास्योर्गस्रवत्स उदुम्बरोऽभवदस्थिभ्य एवास्य स्वधास्रवत्स न्यग्रोधोऽभवन्मज्जभ्य एवास्य भक्षः सोमपीथोऽस्रवत्ते व्रीहयोऽभवन्नेवमस्येन्द्रियाणि वीर्याणि व्युदक्रामन् ॥९॥ अथ ह वै तर्हि । नमुचिनैवासुरेण सह चचार स ऐक्षत नमुचिरपुनर्वाऽअयमभूद्धन्तास्येन्द्रियं वीर्यं सोमपीथमन्नाद्यं हराणीति तस्यैतयैव सुरयेन्द्रियं वीर्यं सोमपीथमन्नाद्यमहरत्स ह न्यर्णः शिश्ये तं देवा उपसंजग्मिरे श्रेष्ठो वै नोऽयमभूत्तमिमं पाप्माविदद्धन्तेमं भिषज्यामेति ॥१०॥ तेऽश्विनावब्रुवन् । युवं वै ब्रह्माणौ भिषजौ स्थो युवमिमं भिषज्यतमिति तावब्रूतामस्तु नौ भाग इति तेऽब्रुवन्य एषोऽजः स वां भाग इति तथेति तस्मादाश्विनो धूम्रो भवति ॥११॥ ते सरस्वतीमब्रुवन् । त्वं वै भैषज्यमसि त्वमिमं भिषज्येति साब्रवीदस्तु मे भाग इति तेऽब्रुवन्य एषोऽविः स ते भाग इति तथेति तस्मात्सारस्वतो मेषो भवति ॥१२॥ अथाब्रुवन् । एतावद्वाऽअस्मिन्नेतर्हि यावदयमृषभोऽस्यैवायमस्त्विति तथेति तस्मादैन्द्र ऋषभो भवति ॥१३॥ तावश्विनौ च सरस्वती च । इन्द्रियं वीर्यं नमुचेराहृत्य तदस्मिन्पुनरदधुस्तं पाप्मनोऽत्रायन्त सुत्रातं बतैनं पाप्मनोऽत्रास्महीति

तद्वाव सौत्रामण्यभवत्तत्सौत्रामण्यै सौत्रामणीत्वं त्रायते मृत्योरात्मानमप पाप्मानꣳ हते य एवमेतत्सौत्रामण्यै सौत्रामणीत्वं वेद त्रयस्त्रिꣳशद्दक्षिणा भवन्ति त्रयस्त्रिꣳशद्धि तं देवता अभिषज्यंस्तस्मादाहुर्भेषजं दक्षिणा इति ॥१४॥ ब्राह्मणम् ॥ २ [७. १.] ॥ ॥

अप वाऽएतस्मात् । तेज इन्द्रियं वीर्यं क्रामति यꣳ सोमोऽतिपवतऽऊर्ध्वं चावाञ्चं वा ॥१॥ तदाहुः । अन्नं वाऽएतद्ब्राह्मणस्य यत्सोमो न वै सोमेन ब्राह्मणः सोमवामी स यो वाऽअलं भूत्यै सन्भूतिं न प्राप्नोति यो वालं पशुभ्यः सन्पशून्न विन्दते स सोमवामी पशवो हि सोम इति ॥२॥ स एतमाश्विनं धूम्रमालभेत । सारस्वतं मेषमैन्द्रमृषभमश्विनौ वै देवानां भिषजौ ताभ्यामेवैनं भिषज्यति सरस्वती भेषजं तयैवास्मै भेषजं करोतीन्द्र इन्द्रियं वीर्यं तेनैवास्मिन्निन्द्रियं वीर्यं दधाति ॥३॥ चक्षुर्वाऽअश्विनौ तेजः । यदाश्विनो भवति चक्षुरेवास्मिंस्तत्तेजो दधात्यथो श्रोत्रꣳ समानꣳ हि चक्षुश्च श्रोत्रं च ॥४॥ प्राणः सरस्वती वीर्यम् । यत्सारस्वतो भवति प्राणमेवास्मिंस्तद्वीर्यं दधात्यथोऽअपानꣳ समानꣳ हि प्राणश्चापानश्च ॥५॥ वागिन्द्रो बलम् । यदैन्द्रो भवति वाचमेवास्मिंस्तद्बलं दधात्यथो मनः समानꣳ हि वाक्च मनश्च ॥६॥ आश्विनीरजाः । सारस्वतीरवीरैन्द्रीर्गाव इत्याहुर्यदेते पशव आलभ्यन्तऽएताभिरेव देवताभिरेतान्पशूनवरुन्द्धे ॥७॥ वडबानुशिशुर्भवति । पश एवैकशफमवरुन्द्धऽआरण्यानां पशूनां लोमानि भवन्त्यारण्यानां पशूनामवरुद्ध्यै वृकलोमानि भवन्त्योज एव जूतिमारण्यानां पशूनामवरुन्द्धे व्याघ्रलोमानि भवन्ति मन्युमेव राज्यमारण्यानां पशूनामवरुन्द्धे सिꣳहलोमानि भवन्ति सह एवेशामारण्यानां पशूनामवरुन्द्धे ॥८॥ व्रीहयश्च श्यामाकाश्च भवन्ति । गोधूमाश्च कुवलानि चोपवाकाश्च बदराणि च यवाश्च कर्कन्धूनि शष्पाणि च तोक्मानि चोभयमेव ग्राम्यं चान्नमारण्यं चावरुन्द्धे

ऽथोऽउभयेनैवान्नेन यथारूपमिन्द्रियं वीर्यमात्मन्धत्ते ॥ ९॥ सीसेन शष्पाणि क्रीणाति । ऊर्णाभिस्तोक्मानि सूत्रैर्व्रीहीनुभयोर्वाऽएतद्रूपमयसश्च हिरण्यस्य च यत्सीसमुभयᳫं सौत्रामणीष्टिश्च पशुबन्धश्चोभयस्यावरुद्ध्यै ॥ १०॥ ऊर्णासूत्रेण क्रीणाति । तद्वाऽएतत्स्त्रीणां कर्म यदूर्णासूत्रं कर्म वाऽइन्द्रियं वीर्यं तदेतदुत्सन्नᳫं स्त्रीषु तद्यदेवेन्द्रियं वीर्यमुत्सन्नᳫं स्त्रीषु तदेवावरुन्द्धे ॥ ११॥ तद्धैतदन्येऽध्वर्यवः । सीसेन क्लीबाच्छष्पाणि क्रीणन्ति तत्तदिति न वाऽएष स्त्री न पुमान्यत्क्लीबो नेष्टिर्न पशुबन्धः सौत्रामणीति वदन्तस्तदु तथा न कुर्यादुभयं वै सौत्रामणीष्टिश्च पशुबन्धश्च व्यृद्धमु वाऽएतन्मनुष्येषु यत्क्लीबो यज्ञमुखऽएव ते यज्ञस्य व्यृद्धिं दधति ये तथा कुर्वन्ति सोमविक्रयिण एव क्रीणीयात्सोमो वै सौत्रामणी यज्ञमुखऽएव तत्सोमरूपं करोति यज्ञस्य समृद्ध्यै ॥ १२॥ शतातृण्णा कुम्भी भवति । बहुधेव हि स व्यस्रवदथो शतोन्मानो वै यज्ञो यज्ञमेवावरुन्द्धे सतं भवति सदेवावरुन्द्धे चप्यं भवत्यन्नाद्यस्यैवावरुद्ध्यै पवित्रं भवति पुनन्ति ह्येनं वालो भवति पाप्मनो व्यावृत्त्यै सुवर्णᳫं हिरण्यं भवति रूपस्यैवावरुद्ध्यै शतमानं भवति शतायुर्वै पुरुषः शतेन्द्रिय आयुरेवेन्द्रियं वीर्यमात्मन्धत्ते ॥ १३॥ आश्वत्थं पात्रं भवति । अपचितिमेवावरुन्द्धऽऔदुम्बरं भवत्यूर्जमेवावरुन्द्धे नैयग्रोधं भवति स्वधामेवावरुन्द्धे स्थाल्यो भवन्ति पृथिव्याऽएवान्नाद्यमवरुन्द्धे ॥ १४॥ पालाशान्युपशयानि भवन्ति । ब्रह्म वै पलाशो ब्रह्मणैव स्वर्गं लोकं जयत्यपाष्ठिहस्य पत्रे भवतस्त्विषिमेव राज्यं वयसामवरुन्द्धे षट्त्रिᳫंशदेतानि भवन्ति षट्त्रिᳫंशदक्षरा वै बृहती बार्हताः पशवो बृहत्यैवास्मै पशूनवरुन्द्धे ॥ १५॥ तदाहुः । अन्यदेवत्याः पशवो भवन्त्यन्यदेवत्याः पुरोडाशा विलोमैतत्क्रियते कथमेतत्सलोम भवतीत्यैन्द्रः पशूनामुत्तमो भवत्यैन्द्रः पुरोडाशानां प्रथम इन्द्रियं वै वीर्यमिन्द्र इन्द्रियेणैवास्माऽइन्द्रियं वीर्यᳫं संदधातीन्द्रियेणेन्द्रियं वीर्यमवरुन्द्धे ॥ १६॥ सा-

वित्रः पुरोडाशो भवति । सवितृप्रसूततायै वारुणो भवति वरुणो वाऽएतं गृह्णाति यः पाप्मना गृहीतो भवति वरुणेनैवैनं वरुणयान्मुञ्चत्यन्त्यो भवत्यन्तत एवैनं वरुणपाशात्प्रमुञ्चति ॥१७॥ एकादशकपाल ऐन्द्रो भवति । एकादशाक्षरा वै त्रिष्टुबिन्द्रियमु वै वीर्यं त्रिष्टुबिन्द्रियस्यैव वीर्यस्यावरुद्ध्यै ॥१८॥ द्वादशकपालः सावित्रो भवति। द्वादश वै मासाः संवत्सरस्य संवत्सरं वाऽअन्नाद्यमन्वायत्तꣳ संवत्सरादेवास्माऽअन्नाद्यमवरुन्द्धे ॥१९॥ दशकपालो वारुणो भवति । दशाक्षरा वै विराडन्नं विराड्वरुणोऽन्नपतिर्वरुणेनैवास्माऽअन्नमवरुन्द्धे मध्यत एतैः पुरोडाशैः प्रचरति मध्यं वाऽएतेषां योनिः स्वादेवैनान्योनेः प्रजनयति ॥२०॥ वडबानुशिशुर्दक्षिणा भवति । उभयं वाऽएषा जनयत्यश्वं चाश्वतरं चोभयꣳ सौत्रामणीष्टिश्च पशुबन्धश्चोभयस्यैवावरुद्ध्यै ॥२१॥ ब्राह्मणम् ॥ ३ [७. २.] ॥ ॥

इन्द्रस्येन्द्रियमन्नस्य रसꣳ । सोमस्य भक्षꣳ सुरयासुरो नमुचिरहरत्सोऽश्विनौ च सरस्वतीं चोपाधावच्छेपानोऽस्मि नमुचये न त्वा दिवा न नक्तꣳ हनानि न दण्डेन न धन्वना न पृथेन न मुष्टिना न शुष्केण नार्द्रेणाथ मऽइदमहार्षीदिदं मऽआजिहीर्षयेति ॥१॥ तेऽब्रुवन् । अस्तु नोऽत्राप्यथाहरामेति सह न एतदथाहरतेत्यब्रवीदिति ॥२॥ तावश्विनौ च सरस्वती च अपां फेनं वज्रमसिञ्चन्न शुष्को नार्द्र इति तेनेन्द्रो नमुचेरासुरस्य व्युष्टायाꣳ रात्रावनुदितऽआदित्ये न दिवा न नक्तमिति शिर उदवासयत् ॥३॥ तस्मादेतदृषिणाभ्यनूक्तम् । अपां फेनेन नमुचेः शिर इन्द्रोदवर्तयः विश्वा यदजय स्पृध इति पाप्मा वै नमुचिः पाप्मानं वाव तद्द्विषन्तं भ्रातृव्यꣳ हत्वेन्द्रियं वीर्यमस्यावृङ्क्त स यो भ्रातृव्यवान्त्स्यात्स सौत्रामण्या यजेत पाप्मानमेव तद्द्विषन्तं भ्रातृव्यꣳ हत्वेन्द्रियं वीर्यमस्य वृङ्क्ते तस्य शीर्षश्छिन्ने लोहितमिश्रः सोमोऽतिष्ठत्तस्मादबीभत्सन्त तऽएतदन्धसोर्विपानमपश्यन्त्सोमो राजामृतꣳ सुत इति तेनैनꣳ स्वदयित्वात्मन्नदधत ॥४॥ स्वाद्वीं

त्वा स्वादुनेति सुराँ संदधाति । स्वदयत्येवैनां तीव्रां तीव्रेणेतीन्द्रियमेवास्मिन्दधात्यमृताममृतेनेत्यायुरेवास्मिन्दधाति मधुमतीं मधुमतेति रसमेवास्यां दधाति सृजामि सँ सोमेनेति सोमरूपमेवैनां करोति ॥५॥ सोमोऽस्यश्विभ्यां पच्यस्व । सरस्वत्यै पच्यस्वेन्द्राय सुत्राम्णे पच्यस्वेत्येता वाऽएतं देवता अग्रे यज्ञँ समभरंस्ताभिरेवैनँ सम्भरत्यथोऽएता एवैतद्देवता भागधेयेन समर्धयत्यासुनोति सुत्यायै तिस्रो रात्रीर्वसति तिस्रो हि रात्रीः सोमः क्रीतो वसति सोमरूपमेवैनां करोति ॥६॥ द्वे वेदी भवतः । द्वौ वाव लोकावित्याहुर्देवलोकश्चैव पितृलोकश्चेत्युत्तरान्या भवति दक्षिणान्योत्तरो वै देवलोको दक्षिणः पितृलोक उत्तरयैव देवलोकमवरुन्द्धे दक्षिणया पितृलोकम् ॥७॥ पयश्च सुरा च भवतः । सोमो वै पयोऽन्नँ सुरा पयसैव सोमपीथमवरुन्द्धे सुरयान्नाद्यं क्षत्रं वै पयो विट् सुरा सुरां पूत्वा पयः पुनाति विश एव तत्क्षत्रं जनयति विशो हि क्षत्रं जायते ॥८॥ वायोः पूतः पवित्रेण । प्रत्यङ्क्सोमो अतिद्रुत इति सोमातिपूतस्य पुनाति यथारूपमेवैनं पुनातीन्द्रस्य युज्यः सखेति यदेवास्य तेनेन्द्रियं वीर्यमतिक्रान्तं भवति तदस्मिन्पुनर्दधाति ॥९॥ वायोः पूतः पवित्रेण । प्राङ्क्सोमोऽअतिद्रुत इति सोमवामिनः पुनाति यथारूपमेवैनं पुनातीन्द्रस्य युज्यः सखेति यदेवास्य तेने° ॥१०॥ पुनाति ते परिस्रुतमिति । समृद्धिकामस्य पुनाति समृद्ध्यै सोमँ सूर्यस्य दुहितेति श्रद्धा वै सूर्यस्य दुहिता श्रद्धयैष सोमो भवति श्रद्धयैवैनँ सोमं करोति वारेण शश्वता तनेति वालेन ह्येषा पूयते ॥११॥ ब्रह्म क्षत्रं पवत इति पयः पुनाति । ब्रह्मण एव तत्क्षत्रं जनयति ब्रह्मणो हि क्षत्रं जायते तेज इन्द्रियमिति तेज एवास्मिन्निन्द्रियं वीर्यं दधाति सुरया सोम इति सुरया हि सोमः सुत आसुत इत्यासुताद्धि सूयते मदायेति मदाय वाव सोमो मदाय सुरोभावेव सोममदं च सुरामदं चावरुन्द्धे शुक्रेण देव देवताः पिपृग्धीति शुक्रेण देव देवताः

प्रीणीहीत्येवैतदाह रसेनान्नं यजमानाय धेहीति रसमेवान्नं यजमाने दधाति पूर्वे
पयोग्रहा गृह्यन्तेऽपरे सुराग्रहा विशं तत्क्षत्रस्यानुवर्त्मानं करोति ॥ १२ ॥ कुवि-
दङ्ग यवमन्तो यवं चिदिति । पयोग्रहान्गृह्णाति सोमाꣳशवो वै यवाः सोमः पयः
सोमेनैवैनꣳ सोमं करोत्येकया गृह्णात्येकधैव यजमाने श्रियं दधाति श्रीर्हि पयः
॥ १३ ॥ नाना हि वां देवहितꣳ सदस्कृतमिति । सुराग्रहान्गृह्णाति नाना हि
सोमश्च सुरा च देवहितमिति देवहिते ह्येते नाना सदस्कृतमिति द्वे हि वेदी
भवतो मा सꣳसृक्षाथां परमे व्योमन्निति पाप्मनैवैनं व्यावर्तयति सुरा त्वमसि शु-
ष्मिणीति सुरामेव सुरां करोति सोम एष इति सोममेव सोमं करोति मा मा
हिꣳसीः स्वां योनिमाविशन्तीति यथायोन्यैवैनां व्यावर्तयत्यात्मनोऽहिꣳसायाऽए-
कया गृह्णात्येकधैव यजमाने यशो दधाति यशो हि सुरा ॥ १४ ॥ क्षत्रं वै पयोग्र-
हाः । विट् सुराग्रहा यद्व्यतिषक्तान्गृह्णीयाद्विशं क्षत्राद्व्यवच्छिन्द्यात्क्षत्रं विशः पा-
पवस्यसं कुर्याद्यज्ञस्य व्यृद्धिं व्यतिषक्तान्गृह्णाति विशमेव क्षत्रेण संदधाति क्षत्रं
विशा पापवस्यसस्य व्यावृत्त्यै यज्ञस्य समृद्ध्यै ॥ १५ ॥ प्राणा वै पयोग्रहाः । शरी-
रꣳ सुराग्रहा यद्व्यतिषक्तान्गृह्णीयाच्छरीरं प्राणेभ्यो व्यवच्छिन्द्यात्प्राणाञ्छरीरात्प्रमा-
युको यजमानः स्याद्व्यतिषक्तान्गृह्णाति शरीरमेव प्राणैः संदधाति प्राणाञ्छरीरे-
णाथोऽआयुरेवास्मिन्दधाति तस्मात्सौत्रामण्येजानः सर्वमायुरेत्यथो य एवमेतद्वेद
॥ १६ ॥ सोमो वै पयोग्रहाः । अन्नꣳ सुराग्रहा यत्पयोग्रहाश्च सुराग्रहाश्च गृह्यन्ते
सोमपीथं चैवान्नाद्यं चावरुन्द्धे ॥ १७ ॥ पशवो वै पयोग्रहाः । अन्नꣳ सुराग्रहा
यत्पयोग्रहाश्च सुराग्रहाश्च गृह्यन्ते पशूꣳश्चैवान्नाद्यं चावरुन्द्धे ॥ १८ ॥ ग्राम्या वै प-
शवः पयोग्रहाः । आरण्याः सुराग्रहा यत्पयोग्रहाश्च सुराग्रहाश्च गृह्यन्ते ग्राम्याꣳ-
श्चैव पशूनारण्याꣳश्चावरुन्द्धे ग्राम्येण चान्नेनारण्येन च पयोग्रहाञ्छ्रीणाति तस्मा-
द्ग्राम्याणां पशूनां ग्राम्यं चैवान्नाद्यमारण्यं चावरुद्धम् ॥ १९ ॥ तदाहुः । एतस्यै वा

ऽएतद्यल्लायै देवतायै रूपं यदेते घोरा आरण्याः पशवो यदेतेषां पशूनां लोमभिः पयोग्रहाञ्छ्रीणीयाद्रुद्रस्यास्ये पशूनपिदध्यादपशुर्यजमानः स्याद्यन्न श्रीणीयादनवरुद्धा अस्य पशवः स्यू रुद्रो हि पशूनामीष्टऽइति सुराग्रहानेवैतेषां पशूनां लोमभिः श्रीणाति सुरायामेव तद्रौद्रं दधाति तस्मात्सुरां पीत्वा रौद्रमना अथोऽआरण्येष्वेव पशुषु रुद्रस्य हेतिं दधाति ग्राम्याणां पशूनामहिंसायाऽअवरुद्धा अस्य पशवो भवन्ति न रुद्रस्यास्ये पशूनपिदधाति ॥२०॥ या व्याघ्रं विषूचिका । उभौ वृकं च रक्षति श्येनं पतत्रिणꣳ सिꣳहꣳ सेमं पात्वꣳहसः ॥ यदापिपेष मातरं पुत्रः प्रमुदितो धयन् एतत्तदग्नेऽअनृणो भवाम्यहतौ पितरौ मयेति ॥२१॥ अध्वर्युश्च प्रतिप्रस्थाता च । जघनेन वेदिं प्राञ्चमावृत्तं यजमानꣳ श्येनपत्राभ्यामूर्ध्वं चावाञ्चं च पावयतः प्राणोदानयोस्तद्रूपं प्राणोदानावेवावरुन्द्धऽऊर्ध्वश्च ह्ययमवाङ् च प्राण आत्मानमनुसंचरति सम्पृच स्थ सं मा भद्रेण पृङ्क्तेति पयोग्रहान्त्संमृशति श्रियैवैनं यशसा समर्धयति विपृच स्थ वि मा पाप्मना पृङ्क्तेति सुराग्रहान्पाप्मनैवैनं व्यावर्तयति ॥२२॥ ब्राह्मणम् ॥४ [७. ३.] ॥ सप्तमोऽध्यायः [८१.] ॥ ॥

इन्द्रस्य वै यत्र । इन्द्रियाणि वीर्याणि व्युदक्रामंस्तानि देवा एतेनैव यज्ञेन पुनः समदधुर्यत्पयोग्रहाश्च सुराग्रहाश्च गृह्यन्तऽइन्द्रियाण्येवास्मिंस्तद्वीर्याणि पुनः संदधत्युत्तरेऽग्नौ पयोग्रहाञ्जुह्वति शुक्रेणैवैनं तत्सोमपीथेन समर्धयति ॥१॥ स जुहोति । सुरावन्तं बर्हिषदꣳ सुवीरमिति सुरावान्वाऽएष बर्हिषद्यज्ञो यत्सौत्रामणी बर्हिषैवैनं यज्ञेन समर्धयति यज्ञꣳ हिन्वन्ति महिषा नमोभिरित्यृत्विजो वै महिषा यज्ञो नम ऋत्विग्भिरेव यज्ञꣳ समर्धयति यज्ञेन यजमानं दधानाः सोममिति सोमपीथमेवास्मिन्दधति दिवि देवतास्विति दिव्येवैनं देवतासु दधति मदेमेन्द्रमिति मदाय वाव सोमो मदाय सुरोभाविव सोममदं च सुरामदं चावरुन्द्धे

यजमानाः स्वर्का इत्यर्का वै देवानामन्नमन्नं यज्ञो यज्ञेनैवैनमन्नाद्येन समर्धयति हुत्वा भक्षयन्ति समृद्धमेवास्य तद्वर्धयन्ति ॥२॥ स भक्षयति । यमश्विना नमुचेरासुरादधीत्यश्विनौ ह्येतं नमुचेरध्याहरताꣳ सरस्वत्यसुनोदिन्द्रियायेति सरस्वती ह्येतमसुनोदिन्द्रियायेमं तꣳ शुक्रं मधुमन्तमिन्दुमिति शुक्रो वाऽएष मधुमानिन्दुर्यत्सोमः सोमꣳ राजानमिह भक्षयामीति सोम एवास्य राजा भक्षितो भवति दक्षिणेऽग्नौ सुराग्रहान्जुहोति पाप्मनैवैनं तद्व्यावर्तयन्ति ॥३॥ स जुहोति । यस्ते रसः सम्भृत ओषधीष्वित्यपां च वाऽएष ओषधीनां च रसो यत्सुरापां चैनमेतदोषधीनां च रसेन समर्धयति सोमस्य शुष्मः सुरया सुतस्येति य एव सोमे शुष्मो यः सुरायां तमेवावरुन्द्धे तेन जिन्व यजमानं मदेनेति तेन प्रीणीहि यजमानं मदेनेत्येवैतदाह सरस्वतीमश्विनाविन्द्रमग्निमिति देवताभिरेव यज्ञꣳ समर्धयति देवताभिर्यज्ञेन यजमानꣳ हुत्वा भक्षयन्ति व्यृद्धमेवास्य तत्समर्धयति ॥४॥ स भक्षयति । यदत्र रिप्तꣳ रसिनः सुतस्येति सुतासुतयोरेव रसमवरुन्द्धे यदिन्द्रोऽअपिबच्छचीभिरितीन्द्रो ह्येतदपिबच्छचीभिरहं तदस्य मनसा शिवेनेत्यशिव-इव वाऽएष भक्षो यत्सुरा ब्राह्मणस्य शिवमेवैनमेतत्कृत्वात्मन्धत्ते सोमꣳ राजानमिह भक्षयामीति सोम एवास्य राजा भक्षितो भवति ॥५॥ तद्धैतदन्येऽध्वर्यवः । राजन्यं वा वैश्यं वा परिक्रीणन्ति स एतद्भक्षयिष्यतीति तदु तथा न कुर्याद्यो ह वाऽएतद्भक्षयति तस्य हैवं पितॄन्पितामहानेष सोमपीथोऽन्वेति दक्षिणस्यैवाग्नेस्त्रीनङ्गारान्निर्वर्त्य बहिष्परिधि तदेताभिर्व्याहृतिभिर्जुहुयात् ॥६॥ पितृभ्यः स्वधायिभ्यः स्वधा नम इति । पितॄनेव पितृलोके स्वधायां दधाति पितामहेभ्यः स्वधायिभ्यः स्वधा नम इति पितामहानेव पितामहलोके स्वधायां दधाति प्रपितामहेभ्यः स्वधायिभ्यः स्वधा नम इति प्रपितामहानेव प्रपितामहलोके स्वधायां दधाति ॥७॥ अप आनीय निनयति । अक्षन्पितर इत्यन्नाद्यमेवैषु दधात्यमीमदन्त पितर

इति मदयन्त्येवैनानतीतृपन्त पितर इति तर्पयन्त्येवैनान्पितरः शुन्धध्वमित्यनुपूर्व-
मेवैनान्त्सर्वान्पावयति पवित्रं वै सौत्रामणी ॥८॥ त्रिभिः पवित्रैः पावयन्ति ।
त्रयो वा ऽइमे लोका एभिरेवैनं लोकैः पुनन्ति ॥९॥ पावमानीभिः पावयन्ति ।
पवित्रं वै पावमान्यः पवित्रेणैवैनं पुनन्ति ॥१०॥ तिसृभिस्तिसृभिः पावयन्ति ।
त्रयो वै प्राणाः प्राण उदानो व्यानस्तैरेवैनं पुनन्ति ॥११॥ नवभिः पावयन्ति ।
नव वै प्राणाः प्राणैरेवैनं पुनन्ति प्राणेषु पुनः पूतं प्रतिष्ठापयन्ति ॥१२॥ पवि-
त्रेण पावयन्ति । अजाविकस्य वा ऽएतद्रूपं यत्पवित्रमजाविकेनैवैनं पुनन्ति ॥१३॥
वालेन पावयन्ति । गोऽश्वस्य वा ऽएतद्रूपं यद्वालो गोऽश्वेनैवैनं पुनन्ति ॥१४॥
हिरण्येन पावयन्ति । देवानां वा ऽएतद्रूपं यद्धिरण्यं देवानामेवैनं रूपेण पुनन्ति
॥१५॥ सुरया पावयन्ति । सुरा हि पूता पूतयैवैनं पुनन्ति तद्यथा सुरा पूयमा-
ना बल्कसेन विविच्यत ऽएवमेवैतद्यजमानः सर्वस्मात्पाप्मनो निर्मुच्यते य एवं
विद्वान्त्सौत्रामण्या यजति यो वैतदेवं वेद ॥१६॥ तदाहुः । याजयितव्यꣳ सौत्रा-
मण्या३ न याजयितव्या३मित्यनन्तरायꣳ ह्येवास्मात्सर्वं पाप्मानमपघ्नन्तीति तदु ह
स्माह रेवोत्तरा स्थपतिः पाटवश्चाक्रोऽपि प्रदानं प्रदाय याजयितव्यमेवात्मा वै
यज्ञस्य यजमानोऽङ्गान्यृत्विजो यत्र वा ऽआत्मा पूतः पूतानि तत्राङ्गान्युभय ऽएव पु-
नत ऽउभये पाप्मानमपघ्नते तस्मादपि प्रदानं प्रदाय याजयितव्यमेवेति ॥१७॥ पि-
तृलोकं वा ऽएते ऽन्ववयन्ति । ये दक्षिणेऽग्नौ चरन्त्याज्याहुतिं जुहोति यज्ञो वा
ऽआज्यं यज्ञादेव यज्ञे प्रतितिष्ठन्ति ॥१८॥ स जुहोति । ये समानाः समनसः पि-
तरो यमराज्ये तेषां लोकः स्वधा नमो यज्ञो देवेषु कल्पतामिति पितृनेव
यमे परिददात्यथो पितृलोकमेव जयति सर्वे यज्ञोपवीतानि कृत्वोत्तरमग्निमुपस-
मायन्त्ययं वै लोक उत्तरोऽग्निरस्मिन्नेव लोके प्रतितिष्ठन्त्याज्याहुतिं जुहोति य-
ज्ञो वा ऽआज्यं यज्ञादेव यज्ञे प्रतितिष्ठन्ति ॥१९॥ स जुहोति । ये समानाः समन-

सो जीवा जीवेषु मामकाः तेषाᳫं श्रीर्मयि कल्पतामस्मिंलोके शतᳫं समा इति स्वानामेव श्रियमवरुन्द्धेऽथो इयोग्जीवातुमेवैषु दधाति पयः समन्वारब्धेषु जुहोति प्राणो वाऽअन्नं पयः प्राणऽएवान्नाद्येऽन्ततः प्रतितिष्ठन्ति ॥२०॥ स जुहोति । द्वे सृतीऽअशृणवं पितॄणामहमिति द्वे वाव सृतीऽइत्याहुर्देवानां चैव पितॄणां चेति ताभ्यामिदं विश्वमेजत्समेतीति ताभ्याᳫं हीदᳫं सर्वमेजत्समेति यदन्तरा पितरं मातरं चेत्यसौ वै पितेयं माताभ्यामेव पितॄन्देवलोकमपिनयत्येकाकी हुतोच्छिष्टं भक्षयत्येकधैव श्रियमात्मन्धत्ते श्रीर्हि पयः ॥२१॥ स भक्षयति । इदᳫं हविः प्रजननं मेऽअस्त्विति प्रजननᳫं हि यदि पयो यदि सोमो दशवीरमिति प्राणा वै दश वीराः प्राणानेवात्मन्धत्ते सर्वगणामित्यङ्गानि वै सर्वे गणा अङ्गान्येवात्मन्धत्ते स्वस्तयऽआत्मसनीत्यात्मानमेव सनोति प्रजासनीति प्रजामेव सनोति पशुसनीति पशूनेव सनोति लोकसनीति लोकाय वै यजते तमेव जयत्यभयसनीति स्वर्गो वै लोकोऽभयᳫं स्वर्गऽएव लोकेऽन्ततः प्रतितिष्ठत्यग्निः प्रजां बहुलां मे करोत्वन्नं पयो रेतोऽस्मासु धत्तेति तद्यऽएवैनमेते याजयन्ति तानेतदाहैतन्मयि सर्वं धत्तेति हिरण्येन मार्जयन्तेऽमृतं वै हिरण्यममृतऽएवान्ततः प्रतितिष्ठन्ति ॥२२॥ ब्राह्मणम् ॥५॥ [८. १.] ॥ तृतीयः प्रपाठकः ॥ कण्डिकासंख्या १२० ॥.॥

प्रजापतिर्यज्ञमसृजत । तमाहरत्तेनायजत तेनेष्ट्वा रिरिचान-इवामन्यत स एतं यज्ञक्रतुमपश्यत्सौत्रामणीं तेनायजत ततो वै स पुनराप्यायत रिच्यतऽइव वाऽएष यः सोमेन यजते वीव ह्यस्य वित्तं वेदो हरन्ति ॥१॥ सोमेनेष्ट्वा सौत्रामण्या यजेत । यथा धेनुर्दुग्धा पुनराप्यायेतैवᳫं हैव पुनराप्यायतऽआ प्रजया पशुभिः प्यायते प्रत्यस्मिंलोके तिष्ठत्यभि स्वर्गं लोकं जयति य एवं विद्वान्त्सौत्रामण्या यजते यो वैतदेवं वेद ॥२॥ तद्धैतत्पप्रच्छ । सुप्ला सार्ञ्जयः प्रतीदर्शमैभावतं यन्न दीक्षयेव दीक्षते न सोमाᳫंशव-इव न्युप्यन्तेऽथ कथᳫं सौत्रामणी सोमयज्ञो

भवतीति ॥३॥ स होवाच । शिरो वाऽएतद्यज्ञस्य यद्व्रतमात्मा दीक्षैतत्खलु वै
व्रतस्य रूपं यत्सत्यमेतद्दीक्षायै यच्छ्रद्धा मनो यजमानस्य रूपं वाग्यज्ञस्येति ॥४॥
स यद्वाचा व्रतमुपैति । आत्मन्येवैतद्यज्ञस्य शिरः प्रतिदधाति सत्यꣳ श्रद्धायां द-
धाति यजमानं यज्ञे ॥५॥ तस्मादेतस्य यज्ञस्य । व्रतमेव दीक्षा वृषो वै व्रतं यो-
षा दीक्षा वृषा सत्यं योषा श्रद्धा वृषा मनो योषा वाग्वृषा पत्न्यै यजमानस्त-
स्माद्यत्रैव पतिस्तत्र जायाथो यज्ञमुखऽएव तन्मिथुनानि करोति प्रजात्यै ॥६॥
एते खलु वाऽएतस्य यज्ञस्य । सोमाꣳशव इत्याहुर्यच्छष्पाणि तोक्मानि लाजा
इति ॥७॥ प्रातःसवनस्यैतद्रूपम् । यच्छष्पाण्ययं वै लोकः प्रातःसवनꣳ स आश्विन
आश्विनेन पयसा प्रथमाꣳ रात्रिं परिषिञ्चति स्वेनैवैनमेतल्लोकेन स्वया देवतया
स्वेन रूपेण प्रातःसवनेन समर्धयति ॥८॥ माध्यन्दिनस्यैतत्सवनस्य रूपम् । यत्तो-
क्मान्यन्तरिक्षं वै माध्यन्दिनꣳ सवनं तत्सारस्वतꣳ सारस्वतेन पयसा द्वितीयाꣳ
रात्रिं परिषिञ्चति स्वेनैवैनमेतल्लोकेन स्वया देवतया स्वेन रूपेण माध्यन्दिनेन
सवनेन समर्धयति ॥९॥ तृतीयसवनस्यैतद्रूपम् । यल्लाजा द्यौर्वै तृतीयसवनꣳ
सैन्द्रमैन्द्रेण पयसा तृतीयाꣳ रात्रिं परिषिञ्चति स्वेनैवैनमेतल्लोकेन स्वया देवत-
या स्वेन रूपेण तृतीयसवनेन समर्धयति ॥१०॥ एकस्यै दुग्धेन । प्रथमाꣳ रात्रिं
परिषिञ्चति द्वयोर्दुग्धेन द्वितीयां तिसृणां दुग्धेन तृतीयां यथारूपमेवैनं यथादेवतꣳ
सवनैः समर्धयति ॥११॥ परीतो षिञ्चता सुतमिति । परिषिञ्चति सुत्यायै सोमो
य उत्तमꣳ हविरित्युत्तमं वाऽएतद्धविर्यत्सोम उत्तममेवैनꣳ हविष्करोति दधन्वा
यो नर्योऽअप्स्वन्तरित्यद्भिश्च ह्येषोऽन्तरेण च सूयते सुषाव सोममद्रिभिरित्यद्रि-
भिर्वै सोमः सूयतेऽद्रिभिरेवैनꣳ सुनोति सोमसुत्यायै ॥१२॥ तदाहुः । उभयोर्वा
ऽएतद्रूपꣳ सुतस्य चासुतस्य च यत्सौत्रामण्यपामेष ओषधीनाꣳ रसो यत्पयस्त-
त्सुतस्य रूपमन्नस्यैष रसो यत्परिस्रुत्तदासुतस्य रूपमुभाभ्यामेवैनꣳ सवाभ्याꣳ सु-

नोत्युभाभ्याꣳ सवाभ्यामवरुन्द्धे ॥१३॥ तदाहुः । यद्ग्रावभिः सोमः सूयते ऽथ कथꣳ सौत्रामणीति प्रैषाप्रीभिरिति ब्रूयाद्बार्हता वै प्रैषा बार्हता ग्रावाणो ग्रावभिर्वै सोमः सूयते ग्रावभिरेवैनꣳ सुनोति सोमसुत्यायै ॥१४॥ सर्वे पयस्वन्तो भवन्ति । पयसा हि सूयते सर्वे सोमवन्तो भवन्ति सोमरूपतायै सर्वे परिस्रुन्मन्तो भवन्ति परिस्रुता हि सूयते सर्वे घृतवन्तो भवन्त्येतद्वै प्रत्यक्षाद्यज्ञरूपं यद्घृतं प्रत्यक्षादेवैनं यज्ञरूपं करोति सर्वे मधुमन्तो भवन्त्येतद्वै प्रत्यक्षात्सोमरूपं यन्मधु प्रत्यक्षादेवैनꣳ सोमरूपं करोति ॥१५॥ ॥ शतम् ६३०० ॥ ॥ सर्व ऽआश्विना भवन्ति । भैषज्याय सर्वे सारस्वता अन्नाद्यस्यैवावरुद्ध्यै सर्व ऽऐन्द्रा इन्द्रियस्यैव वीर्यस्यावरुद्ध्यै ॥१६॥ यद्वेव सर्व ऽआश्विना भवन्ति । सर्वे सारस्वताः सर्व ऽऐन्द्रा एता वा ऽएतं देवता अग्रे यज्ञꣳ समभरंस्ताभिरेवैनꣳ सम्भरत्यथो ऽएता एवैतद्देवता भागधेयेन समर्धयति ॥१७॥ संतता याज्यापुरो ऽनुवाक्या भवन्ति । समानदेवत्याः प्रज्ञानाꣳ संतत्या ऽअव्यवच्छेदाय सर्वा आश्विन्यो भवन्ति सर्वाः सारस्वत्यः सर्वा ऐन्द्र्यः समानी बन्धुता ॥१८॥ अनुष्टुभ आप्रियो भवन्ति वाग्वा ऽअनुष्टुब्वाचो वै सोमः सूयते वाचैवैनꣳ सुनोति सोमसुत्यायै सर्वा आश्विन्यो भवन्ति सर्वाः सारस्वत्यः सर्वा ऐन्द्र्यः समानी बन्धुता ॥१९॥ जागता अनुप्रैषा भवन्ति । इयं वै जगत्यनया वै सोमः सूयते ऽनयैवैनꣳ सुनोति सोमसुत्यायै सर्व ऽआश्विना भवन्ति सर्वे सारस्वताः सर्व ऽऐन्द्राः समानी बन्धुता ॥२०॥ स वा ऽएष प्रत्यक्षात्सोमयज्ञ एव यत्सौत्रामणी । तं यद्येकाकी यजमानो भक्षयेदिष्टिर्वैव स्यात्पशुबन्धो वा सर्व ऽऋत्विजो भक्षयन्ति सर्वे वा ऽऋत्विजः सोमं भक्षयन्ति सोमरूपतायै ॥२१॥ आश्विनमध्वर्यवो भक्षयन्ति । अश्विनौ वै देवानामध्वर्यू स्वमेवैतद्भागधेयꣳ स्व ऽआयतने भक्षयन्ति ॥२२॥ सारस्वतꣳ होता ब्रह्मा मैत्रावरुणाः । वाग्वै यज्ञस्य होता हृदयं ब्रह्मा मनो मैत्रावरुणः स्वमेवै° ॥२३॥ ऐन्द्रं यजमानो भक्षयति । ऐन्द्रो

वा ऽएष यज्ञो यत्सौत्रामणीन्द्रायतन एष एतर्हि यो यजते स्वमेवैतद्भागधेयꣳ स्व ऽआयतने भक्षयति ॥२४॥ चक्षुर्वा ऽआश्विनो ग्रहः । प्राणः सारस्वतो वागैन्द्र आश्विनात्सारस्वते ऽवनयति चक्षुरेवास्य तत्प्राणैः संदधाति सारस्वतादैन्द्रे प्राणानेवास्य तद्वाचा संदधात्यथो प्राणानेवास्य तद्वाचि प्रतिष्ठापयति तस्मात्सर्वे प्राणा वाचि प्रतिष्ठिताः ॥२५॥ अथ आश्विनं भक्षयन्ति । अध्वर्युः प्रतिप्रस्थाताग्नीध्रस्त्रिवृद्वा ऽइदं चक्षुः शुक्लं कृष्णं कनीनका यथारूपमेवास्मिंश्चक्षुर्दधाति ॥२६॥ अथ सारस्वतꣳ । होता ब्रह्मा मैत्रावरुणस्त्रेधाविहितो वा ऽअयं प्राणः प्राण उदानो व्यान इति यथारूपमेवास्मिन्प्राणं दधाति ॥२७॥ एकाकैन्द्रं यजमानो भक्षयति । एकधा वा ऽएषा प्राणानाꣳ श्रीर्यद्वागेकधैव वाचꣳ श्रियमात्मन्धत्ते तस्मात्सौत्रामण्येजान एकधा स्वानाꣳ श्रेष्ठो भवत्यथो य एवमेतद्वेद ॥२८॥ ऋतवो वा ऽऋत्विजः । मासा भक्षाः षड्ऋत्विजो भक्षयन्ति षड्वा ऽऋतव ऋत्विग्भिरेव र्तूनवरुन्द्धे ॥२९॥ द्वादश भक्षा भवन्ति । द्वादश मासा भक्षैरेव मासानवरुन्द्धे पुनःपुनरभिनिवर्तमृत्विजो भक्षयन्ति तस्मादृतवश्च मासाश्चान्योऽन्यमभिनिवर्तन्ते ॥३०॥ त्रयोदशं यजमानो भक्षयति । यो ह वा ऽएष त्रयोदशो मास एष एव प्रत्यक्षात्संवत्सर एतमेवाप्त्वावरुन्द्धे स वा ऽएष संवत्सर एव यत्सौत्रामणी तेन सर्वं जयति सर्वमवरुन्द्धे ॥३१॥ त्रयः पशवो भवन्ति । त्रयो वा इमे लोका इमानेव तैर्लोकानवरुन्द्ध ऽइममेव लोकमाश्विनेनान्तरिक्षꣳ सारस्वतेन दिवमैन्द्रेण यथारूपमेव यथादेवतमिमांल्लोकाञ्जयति चाव च रुन्द्धे ॥३२॥ त्रयः पुरोडाशा भवन्ति । त्रयो वा ऽऋतव ऋतूनेवैतैरवरुन्द्धे ग्रीष्ममेवैन्द्रेण वर्षाः सावित्रेण हेमन्तं वारुणेन यथारूपमेव यथादेवतमृतूञ्जयति चाव च रुन्द्धे ॥३३॥ षड्ग्रहा भवन्ति । षड्वा ऽऋतव ऋतूनेवैतैरवरुन्द्धे वसन्तग्रीष्मावेवाश्विनाभ्यां वर्षाशरदौ सारस्वताभ्याꣳ हेमन्तशिशिरावैन्द्राभ्यां यथारूपमेव यथादेवतमृतूञ्जयति चाव च रुन्द्धे ॥३४॥

संतता याज्यापुरोऽनुवाक्या भवन्ति । समानदेवत्या ऽअनूनाꣳ संतत्याऽअव्यवच्छेदाय सर्वाः पुरोऽनुवाक्या भवन्ति सर्वा याज्यास्तस्मादृतवः सर्वे पराञ्चः सर्वे प्रत्यञ्चः सर्वाः प्रथमा भवन्ति सर्वा मध्यमाः सर्वा उत्तमास्तस्मादृतवः सर्वे प्रथमाः सर्वे मध्यमाः सर्वऽउत्तमाः सर्वेषां ग्रहाणां द्वे याज्यापुरोऽनुवाक्ये भवतोऽहोरात्रयोस्तद्रूपमहोरात्रेऽएवावरुन्द्धे तस्मादृतवश्च मासाश्चाहोरात्रयोरेव प्रतिष्ठिताः ॥३५॥ स वाऽएष संवत्सर एव यत्सौत्रामणी । चन्द्रमा एव प्रत्यक्षादादित्यो यजमानस्तस्येयमेव पृथिवी वेदिरन्तरिक्षमुत्तरवेदिर्द्यौर्बर्हिर्दिशऽऋत्विजो वनस्पतय इध्म आप आज्यमोषधय आहुतयोऽग्निरेवाग्निः संवत्सरः सꣳस्था तद्वाऽइदꣳ सर्वꣳ संवत्सर एव यदिदं किं च तस्मात्सौत्रामण्येजानः सर्वं जयति सर्वमवरुन्द्धे ॥३६॥
ब्राह्मणम् ॥१ [८. २.] ॥ ॥

त्वष्टा हतपुत्रः । अभिचरणीयमपेन्द्रꣳ सोममाहरत्तस्येन्द्रो यज्ञवेशसं कृत्वा प्रासहा सोममपिबत्स विष्वङ् व्यार्छत्तस्य मुखात्प्राणेभ्यः श्रीयशसान्यूर्ध्वान्युदक्रामंस्तानि पशून्प्राविशंस्तस्मात्पशवो यशो यशो ह भवति य एवं विद्वान्त्सौत्रामण्याभिषिच्यते ॥१॥ ततोऽस्माऽएतमश्विनौ च सरस्वती च । यज्ञꣳ समभरन्त्सौत्रामणीं भैषज्याय तयैनमभ्यषिञ्चंस्ततो वै स देवानाꣳ श्रेष्ठोऽभवच्छ्रेष्ठः स्वानां भवति य एनयाभिषिच्यते ॥२॥ कृष्णाजिनेऽभिषिञ्चति । यज्ञो वै कृष्णाजिनं यज्ञऽएवैनमेतदभिषिञ्चति लोमतश्छन्दाꣳसि वै लोमानि छन्दःस्वेवैनमेतदभिषिञ्चति ॥३॥ आसन्द्यामभिषिञ्चति । आसन्दीसद्धि साम्राज्यꣳ साम्राज्येनैवैनꣳ साम्राज्यं गमयति ॥४॥ औदुम्बरी भवति । ऊर्ग्वाऽउदुम्बर ऊर्ज्यैवाध्यभिषिच्यते जानुसंमिता भवति जानुसंमितो वाऽअयं लोकोऽस्माऽउ वै लोकाय क्षत्रियोऽभिषिच्यते क्षत्रमु वाऽएष भवति यः सौत्रामण्याभिषिच्यते तस्माज्जानुसंमितापरिमिता तिरश्ची ॥५॥ राष्ट्रं वाऽआसन्दी । अपरिमितसमृद्धमु वै राष्ट्रं मुञ्जविवयना भवति

यज्ञिया हि मुञ्जा द्वाऽउत्तरस्यां वेद्यां पादौ भवतो द्वौ दक्षिणस्यामयं वै लोक उत्तरा वेदिर्दक्षिणा पितृलोकस्तदेनमुभयोर्लोकयोरध्यभिषिञ्चति ॥६॥ एतद्ध स्म वै तद्विद्वानाह । गौरीवितिः शाक्त्यः क्षत्रमिवाह किल वयममुष्मिंलोके भविता स्म इति शश्वद्धास्माऽऋषभो याज्ञतुरः प्रोवाच श्विक्नानाᳬ राजा ॥७॥ स आसन्दीमास्तृणाति । क्षत्रस्य योनिरसि क्षत्रस्य नाभिरसीति क्षत्रस्य वाऽएषा योनिः क्षत्रस्य नाभिः ॥८॥ अथैनां कृष्णाजिनेनास्तृणाति । मा त्वा हिᳬसीन्मा मा हिᳬसीरिति यज्ञो वै कृष्णाजिनं यज्ञस्य चैवात्मनश्चाहिᳬसायै ॥९॥ अथाधिरोहति । वारुण्यर्चा वरुणो वै देवानाᳬ राजा स्वयैवैनमेतद्देवतयाभिषिञ्चति निषसाद धृतव्रतो वरुणः पस्त्यास्वा साम्राज्याय सुक्रतुरिति ॥१०॥ अथ सुवर्णरजतौ रुक्मौ व्युपास्यति । मृत्योः पाहि विद्योत्पाहीति वृष्टिर्वै विराट् तस्या एते घोरे तन्वौ विद्युच्च ह्रादुनिश्च ततः सुवर्ण एव रुक्मो विद्युतो रूपᳬ रजतो ह्रादुनेस्ताभ्यामेवास्मै देवताभ्याᳬ शर्म यच्छति तस्मात्सौत्रामण्येजानस्यैताभ्यां देवताभ्यां न शङ्का भवत्यथो य एवमेतद्वेद ॥११॥ पशूनां वसयाभिषिञ्चति । श्रीर्वै पशूनां वसा श्रियैवैनमेतत्पशूनाᳬ रसेनाभिषिञ्चत्यथो परमं वाऽएतदन्नाद्यं यद्वसा परमेणैवैनमेतदन्नाद्येनाभिषिञ्चति ॥१२॥ शफग्रहा भवन्ति । शफैर्वै पशवः प्रतितिष्ठन्ति प्रतिष्ठामेवैनं गमयति त्रयस्त्रिᳬशद्ग्रहा भवन्ति त्रयस्त्रिᳬशद्वै सर्वा देवताः सर्वाभिरेवैनमेतद्देवताभिरभिषिञ्चति जगतीभिर्जुहोति जागता वै पशवो जगत्यैवास्मै पशूनवरुन्द्धे षोडशभिर्ऋग्भिर्जुहोति षोडशकला वै पशवोऽनुकलमेवास्मिन्निन्द्रियं दधाति ॥१३॥ सीसेन तन्त्रं मनसा मनीषिण इति । द्वौ-द्वौ समासᳬ हुत्वा सते सᳬस्रवात्समवनयत्यहोरात्राण्येवैतदर्धमासान्मासानृतून्त्संवत्सरे प्रतिष्ठापयति तानीमान्यहोरात्राण्यर्धमासा मासा ऋतवः संवत्सरे प्रतिष्ठिताः ॥१४॥ वैतसः सतो भवति । अप्सुयोनिर्वै वेतस आपो वै सर्वा देवताः सर्वाभिरेवैन-

मेतद्देवताभिरभिषिञ्चति ॥ १५ ॥ सर्वसुरभ्युन्मर्दनं भवति । परमो वाऽएष गन्धो यत्सर्वसुरभ्युन्मर्दनं गन्धेनैवैनमेतदभिषिञ्चति ॥ १६ ॥ पुरस्तात्प्रत्यङ्ङभिषिञ्चति । पुरस्ताद्धि प्रत्यगन्नमद्यते शीर्षतः शीर्षतो ह्यन्नमद्यतऽआ मुखादन्ववस्रावयति मुखेन ह्यन्नमद्यते सर्वतः परिक्रामꣳ सर्वाभ्य एवास्मिन्नेतद्दिग्भ्योऽन्नाद्यं दधाति तस्मात्सौत्रामण्येजानस्य सर्वासु दिक्ष्वन्नाद्यमवरुद्धं भवत्यथो य एवमेतद्वेद ॥ १७ ॥ आश्विनेन प्रथमेन यजुषाभिषिञ्चति । अथ सारस्वतेनाथैन्द्रेणैताभिरेवैनमेतद्देवताभिरभिषिञ्चति तꣳ हैकऽएताभिश्च देवताभिरभिषिञ्चन्ति भूर्भुवः स्वरित्येताभिश्च व्याहृतिभिरेता वै व्याहृतय इदꣳ सर्वं तदेनमनेन सर्वेणाभिषिञ्चाम इति न तथा कुर्यादेताभिरेवैनं देवताभिरभिषिञ्चेदेता उ ह्येव देवता इदꣳ सर्वम् ॥ १८ ॥ पुरस्तात्स्विष्टकृतोऽभिषिञ्चति । क्षत्रं वै स्विष्टकृत्क्षत्रेणैवैनमेतदभिषिञ्चत्यन्तरा वनस्पतिं च स्विष्टकृतं चाभिषिञ्चति सोमो वै वनस्पतिरग्निः स्विष्टकृदग्नीषोमाभ्यामेवैनमेतत्परिगृह्याभिषिञ्चति तस्माद्ये चैतद्विदुर्ये च न तऽआहुः क्षत्रियो वाव क्षत्रियस्याभिषेक्तेति ॥ १९ ॥ अथैनं जानुमात्रे धारयन्ति । अथ नाभिमात्रेऽथ मुखमात्रऽएष्वेवास्माऽएतल्लोकेष्वायतनानि कल्पयत्यभिषिक्तो वाऽएष यद्वाजपेयमभिषेकः सौत्रामणी तद्यथैवादो वाजपेये यूपꣳ रोहति तदेवैतद्रूपं क्रियते ॥ २० ॥ तदाहुः । प्रेव वाऽएषोऽस्माल्लोकाच्च्यवते यः सौत्रामण्याभिषिच्यतऽइति कृष्णाजिने प्रत्यवरोहति यज्ञो वै कृष्णाजिनं यज्ञऽएवान्ततः प्रतितिष्ठति ॥ २१ ॥ प्रति क्षत्रे प्रति तिष्ठामि राष्ट्रऽइति । क्षत्रऽएव राष्ट्रे प्रतितिष्ठति क्षत्राद्राष्ट्रादप्रभ्रꣳशाय प्रत्यश्वेषु प्रति तिष्ठामि गोष्विति गोऽश्वऽएव प्रतितिष्ठति गोऽश्वादप्रभ्रꣳशाय प्रत्यङ्गेषु प्रति तिष्ठाम्यात्मन्नित्यङ्गेष्वेवात्मन्प्रतितिष्ठत्यङ्गेभ्य आत्मनोऽप्रभ्रꣳशाय प्रति प्राणेषु प्रतितिष्ठामि पुष्टऽइति प्राणेष्वेव पुष्टे प्रतितिष्ठति प्राणेभ्यः पुष्टादप्रभ्रꣳशाय प्रति द्यावापृथिव्योः प्रतितिष्ठामि यज्ञऽइति तदनयोर्द्यावापृथि-

व्योः प्रतितिष्ठति ययोरिदꣳ सर्वमधि ॥२२॥ अथ साम गायति । क्षत्रं वै साम
क्षत्रेणैवैनमेतदभिषिञ्चत्यथो साम्राज्यं वै साम साम्राज्येनैवैनꣳ साम्राज्यं गमयति
सर्वेषां वाऽएष वेदानाꣳ रसो यत्साम सर्वेषामेवैनमेतद्वेदानाꣳ रसेनाभिषिञ्चति
॥२३॥ बृहत्यां गायति । बृहत्यां वाऽअसावादित्यः श्रियां प्रतिष्ठायां प्रतिष्ठित-
स्तपति बृहत्यामेवैनमेतच्छ्रियां प्रतिष्ठायां प्रतिष्ठापयति ॥२४॥ ऐन्द्र्यां बृहत्यां
गायति । ऐन्द्रो वाऽएष यज्ञो यत्सौत्रामणीन्द्रायतन एष एतर्हि यो यजते स्व
ऽएवैनमेतदायतनेऽभिषिञ्चति ॥२५॥ अथ यस्मात्सꣳशान्तानि नाम । एतैर्वै सा-
मभिर्देवा इन्द्रमिन्द्रियाय वीर्याय समश्यंस्तथोऽएवैतमृत्विजो यजमानमेतैरेव सा-
मभिरिन्द्रियाय वीर्याय सꣳश्यन्ति सꣳश्रवसे विश्रवसे सत्यश्रवसे श्रवसऽइति सा-
मानि भवन्त्येष्वेवैनमेतल्लोकेषु श्रावयन्ति चतुर्निधनं भवति चतस्रो वै दिशः
सर्वास्वेवैनमेतद्दिक्षु प्रतिष्ठापयन्ति सर्वे निधनमुपावयन्ति संविदाना एवास्मि-
ञ्छ्रियं दधति ॥२६॥ तदाहुः । यदेतत्साम गीयतेऽथ क्वैतस्य साम्न उक्थं का
प्रतिष्ठा व्यृद्धꣳ हि तद्यत्स्तुतमननुशस्तमिति ॥२७॥ त्रया देवा एकादशेति ।
एतद्वाऽएतस्य साम्न उक्थमेषा प्रतिष्ठा ॥२८॥ अथो त्रया देवा एकादशेति त्रय-
स्त्रिꣳशं ग्रहं जुहोति त्रया हि देवा एकादश त्रयस्त्रिꣳशाः सुराधस इति त्रयस्त्रिꣳ-
शद्धि देवा बृहस्पतिपुरोहिता इति ब्रह्म वै बृहस्पतिर्ब्रह्मपुरोहिता इत्येवैत-
दाह देवस्य सवितुः सवऽइति देवेन सवित्रा प्रसूता इत्येवैतदाह देवा देवैर-
वन्तु मेति देवा ह्येतं देवैरभिषिञ्चन्ति ॥२९॥ प्रथमा द्वितीयैरिति प्रथमा ह्येतं
द्वितीयैरभिषिञ्चन्ति द्वितीयास्तृतीयैरिति द्वितीया ह्येतं तृतीयैरभिषिञ्चन्ति तृती-
याः सत्येनेति तृतीया ह्येतꣳ सत्येनाभिषिञ्चन्ति सत्यं यज्ञेनेति सत्यꣳ ह्येतं य-
ज्ञेनाभिषिञ्चति यज्ञो यजुर्भिरिति यज्ञो ह्येतं यजुर्भिरभिषिञ्चति यजूꣳषि सामभि-
रिति यजूꣳषि ह्येतꣳ सामभिरभिषिञ्चन्ति सामान्यृग्भिरिति सामानि ह्येतमृग्भिर-

भिषिञ्चन्त्यृचः पुरोऽनुवाक्याभिरित्यृचो ह्येतं पुरोऽनुवाक्याभिरभिषिञ्चन्ति पुरोऽनुवाक्या याज्याभिरिति पुरोऽनुवाक्या ह्येतं याज्याभिरभिषिञ्चन्ति याज्या वषट्कारैरिति याज्या ह्येतं वषट्कारैरभिषिञ्चन्ति वषट्कारा आहुतिभिरिति वषट्कारा ह्येतमाहुतिभिरभिषिञ्चन्त्याहुतयो मे कामान्त्समर्धयन्तु भूः स्वाहेति तदेनमेताभिर्देवताभिः परोऽवरमभिषिच्याथास्माऽआहुतिभिः सर्वान्कामान्त्समर्धयत्यथऽर्त्विजूपहवमिष्ट्वा भक्षयत्यृतवो वाऽऋत्विज ऋतुष्वेवैतदुपहवमिच्छते ॥३०॥ स भक्षयति । लोमानि प्रयतिर्मम त्वङ्मऽआनतिरागतिः मांसं मऽउपनतिर्वस्वस्थि मज्जा मऽआनतिरिति प्रेव वाऽएष लोकांश्च देवताश्च विशति य सौत्रामण्याभिषिच्यते तदेतदवान्तरामात्मानमुपह्वयते तथा कृत्स्न एव सर्वतनूः साङ्गः सम्भवति ॥३१॥ ब्राह्मणम् ॥२ [८. ३.] ॥ अष्टमोऽध्यायः [८२.] ॥ ॥

एतस्माद्धि यज्ञात्पुरुषो जायते । स यद्ध वाऽअस्मिंल्लोके पुरुषोऽन्नमत्ति तदेनममुष्मिंल्लोके प्रत्यत्ति स वाऽएष परिस्रुतो यज्ञस्तायतेऽनाद्या वै ब्राह्मणेन परिस्रुत्स एतस्मादनाद्याज्जायते तं ह्यमुष्मिंल्लोकेऽन्नं न प्रत्यत्ति तस्मादेष ब्राह्मणयज्ञ एव यत्सौत्रामणी ॥१॥ तस्य लोमान्येव शष्पाणि । त्वक्तोक्मानि मांसं लाजा अस्थि कारोतरो मज्जा मासरं रसः परिस्रुन्नग्नहुर्लोहितं रेतः पयो मूत्रं सुरोवध्यं बल्कसम् ॥२॥ हृदयमेवास्यैन्द्रः पुरोडाशः । यकृत्सावित्रः क्लोमा वारुणो मतस्नेऽएवास्याश्वत्थं च पात्रमौदुम्बरं च पित्तं नैयग्रोधमान्त्राणि स्थाल्यो गुदा उपशयानि श्येनपत्त्रे प्लीहासन्दी नाभिः कुम्भो वनिष्ठुः प्लाशिः शतातृण्णा तद्यत्सा बहुधा वितृण्णा भवति तस्मात्प्लाशिर्बहुधा विकृत्तो मुखं सत्यं जिह्वा पवित्रं चष्यं पायुर्वस्तिर्वालः ॥३॥ अङ्गान्येवास्याश्विनः पशुः । आत्मा सारस्वतो रूपमैन्द्र ऋषभस्तस्मादाहुर्गावः पुरुषस्य रूपमित्यायुर्हिरण्यं तच्छतमानं भवति तस्माच्छतायुः पुरुषः ॥४॥ चक्षुषीऽएवास्याश्विनौ ग्रहौ । पक्ष्माणि गोधू-

मसक्तवश्च कुवलसक्तवश्च नासिकेऽएवास्य सारस्वतौ ग्रहावथ यानि नासिकयोर्लोमानि तान्युपवाकसक्तवश्च बदरसक्तवश्च श्रोत्रेऽएवास्यैन्द्रौ ग्रहावथ यानि कर्णयोर्लोमानि यानि च भ्रुवोस्तानि यवसक्तवश्च कर्कन्धुसक्तवश्च ॥ ५ ॥ अथ यान्युपस्थे लोमानि । यानि चाधस्तात्तानि वृकलोमान्यथ यान्युरसि लोमानि यानि च निकक्षयोस्तानि व्याघ्रलोमानि केशाश्च श्मश्रूणि च सिꣳहलोमानि ॥ ६ ॥ त्रयः पशवो भवन्ति । त्रेधाविहितो वाऽअयं पुरुषस्यात्मात्मानमेवास्य तैः स्पृणोति यद्वाङ्भिस्तदाश्विनेन यदूर्ध्वं नाभेरवाचीनꣳ शीर्ष्णस्तत्सारस्वतेन शिर ऐन्द्रेण यथारूपमेव यथादेवतमात्मानं मृत्यो स्पृत्वामृतं कुरुते ॥ ७ ॥ त्रयः पुरोडाशा भवन्ति । त्रेधाविहितं वाऽइदं पुरुषस्य वयो वय एवास्य तैः स्पृणोति पूर्ववयसमेवैन्द्रेण मध्यमवयसꣳ सावित्रेणोत्तमवयसं वारुणेन यथारूपमेव यथादेवतं वयो मृत्यो स्पृत्वामृतं कुरुते ॥ ८ ॥ षड्ग्रहा भवन्ति । षड्वाऽइमे शीर्षन्प्राणाः प्राणानेवास्य तैः स्पृणोति चक्षुषीऽएवाश्विनाभ्यां नासिके सारस्वताभ्याꣳ श्रोत्रेऽऐन्द्राभ्यां यथारूपमेव यथादेवतमात्मानं मृत्यो स्पृत्वामृतं कुरुते ॥ ९ ॥ संतता याज्यापुरोऽनुवाक्या भवन्ति । समानदेवत्याः प्राणानाꣳ संतत्याऽअव्यवच्छेदाय सर्वाः पुरोऽनुवाक्या भवन्ति सर्वा याज्यास्तस्मात्प्राणाः सर्वे पराञ्चः सर्वे प्रत्यञ्चः सर्वाः प्रथमा भवन्ति सर्वा मध्यमाः सर्वा उत्तमास्तस्मात्प्राणाः सर्वे प्रथमाः सर्वे मध्यमाः सर्वऽउत्तमाः सर्वेषां ग्रहाणां द्वे याज्यापुरोऽनुवाक्ये भवतः प्राणोदानयोस्तद्रूपं प्राणोदानावेवावरुन्द्धे तस्मात्सर्वे प्राणाः प्राणोदानयोरेव प्रतिष्ठिताः ॥ १० ॥ स वाऽएष आत्मैव यत्सौत्रामणी । मन एव प्रत्यक्षाद्वाग्यजमानस्तस्यात्मैव वेदिः प्रज्ञोत्तरवेदिः पशवो बर्हिरङ्गान्यृत्विजोऽस्थीनीध्म आज्यं मज्जा मुखमग्निरन्नमाहुतिर्वयः सꣳस्था तस्मात्सौत्रामण्येजानो वय उपगच्छति ॥ ११ ॥ तयौ ह वाऽइमौ पुरुषाविवाक्ष्योः । एतावेवाश्विनावथ यत्कृष्णं तत्सारस्वतं यच्छुक्लं तदैन्द्रं तद्यदा-

श्विने पशौ सत्यथैता देवताः सह यजत्येतान्येवैतत्सार्धं कृत्वात्मन्धत्ते ॥ १२ ॥ मन एवेन्द्रः । वाक्सरस्वती श्रोत्रेऽअश्विनौ यद्धि मनसा ध्यायति तद्वाचा वदति यद्वाचा वदति तत्कर्णाभ्याꣳ शृणोति तद्यत्सारस्वते पशौ सत्यथैता देवताः सह यजत्येतान्येवैतत्सार्धं कृत्वात्मन्धत्ते ॥ १३ ॥ प्राण एवेन्द्रः । जिह्वा सरस्वती नासिकेऽअश्विनौ यद्धि प्राणेनान्नमात्मन्प्रणयते तत्प्राणस्य प्राणत्वं जिह्वया वाऽअन्नस्य रसं विजानाति नासिकेऽउ वै प्राणस्य पन्थास्तद्यदैन्द्रे पशौ सत्यथैता देवताः सह यजत्येतान्येवैतत्सार्धं कृत्वात्मन्धत्ते ॥ १४ ॥ हृदयमेवेन्द्रः । यकृत्सविता क्लोमा वरुणस्तद्यदैन्द्रे पुरोडाशे सत्यथैता देवताः सह यजत्येतान्येवैतत्सार्धं कृत्वात्मन्धत्ते ॥ १५ ॥ प्राण एव सविता । व्यानो वरुणः शिश्नमिन्द्रो यद्धि प्राणेनान्नमत्ति तद्व्यानेन व्यनिति शिश्नेन वाऽअन्नस्य रसꣳ रेतः सिञ्चति तद्यत्सावित्रे पुरोडाशे सत्यथैता देवताः सह यजत्येतान्येवैतत्सार्धं कृत्वात्मन्धत्ते ॥ १६ ॥ योनिरेव वरुणः । रेत इन्द्रः सवितैव रेतसः प्रजनयिता तद्यद्वारुणे पुरोडाशे सत्यथैता देवताः सह यजत्येतान्येवैतत्सार्धं कृत्वात्मन्धत्ते स य एवमेतद्वेदैता एव देवता अनुसम्भवत्येता देवता अनु प्रजायतऽआ प्रजया पशुभिः प्यायते प्रत्यस्मिंलोके तिष्ठत्यभि स्वर्गं लोकं जयति य एवं विद्वान्त्सौत्रामण्या यजते यो वैतदेवं वेद ॥ १७ ॥ ब्राह्मणम् ॥ ३ [१. १.] ॥ ॥

अवभृथमिष्ट्वा यन्ति । अवभृथं वै सोमेनेष्ट्वा यन्ति सोम एष यत्सौत्रामणी ॥ १ ॥ यद्देवा देवहेडनमिति । देवकृतादेवैनमेनसो मुञ्चति यदि दिवा यदि नक्तमिति यदेवाहोरात्राभ्यामेनः करोति तस्मादेवैनं मुञ्चति यदि जाग्रद्यदि स्वप्नऽइति मनुष्या वै जागरितं पितरः सुप्तं मनुष्यकिल्बिषाच्चैवैनं पितृकिल्बिषाच्च मुञ्चति ॥ २ ॥ यद्ग्रामे यदरण्यऽइति । ग्रामे वा ह्यरण्ये वैनः क्रियते तस्मादेवैनं मुञ्चति यत्सभायामिति सभ्यादेवैनमेनसो मुञ्चति यदिन्द्रियऽइति देवादेवैनमेनसो

मुञ्चति यच्छूद्रे यदर्ये यदेनश्चकृमा वयं यदेकस्याधि धर्मणि तस्यावयजनमसीति स-
र्वस्माद्वैनमेतस्मादेनसो मुञ्चति ॥३॥ यदापो अघ्न्या इति । वरुणेति शपामहे
ततो वरुण नो मुञ्चेति वरुण्याद्वैनमेनसो मुञ्चत्यवभृथ निचुम्पुण निचेरुरसि
निचुम्पुण इति यो ह वाऽअयमपामावर्तः स ह्यवभृथः स ह्येष वरुणस्य पुत्रो
वा भ्राता वा तमेवैतत्स्तौत्यव देवैर्देवकृतमेनो यक्षीति देवकृतमेवैनोऽवयजते
ऽव मर्त्यैर्मर्त्यकृतमिति मर्त्यकृतमेवैनोऽवयजते पुरुराव्णो देव रिषस्पाहीति स-
र्वाभ्यो मार्तिभ्यो गोपायेत्येवैतदाह ॥४॥ समुद्रे ते हृदयमप्स्वन्तरिति । आपो
वै समुद्रो रसो वाऽआपस्तदेनमेतेन रसेन सꣳसृजति सं त्वा विशन्त्वोषधीरुताप
इति तदेनमेतेनोभयेन रसेन सꣳसृजति यश्चौषधिषु यश्चाप्सु द्वौ विक्रमाऽउदङ्ङु-
त्क्रामत्येतावती वै मनुष्ये जूतिर्यावान्विक्रमस्तद्यावत्येवास्मिञ्जूतिस्तयैव पाप्मानं
विजहाति ॥५॥ सुमित्रिया न आप ओषधयः सन्त्विति । अञ्जलिनाप उपाचति
वज्रो वाऽआपो वज्रेणैवैतन्मित्रधेयं कुरुते दुर्मित्रियास्तस्मै सन्तु योऽस्मान्द्वेष्टि यं
च वयं द्विष्म इति यामस्य दिशं द्वेष्यः स्यात्तां दिशं परासिञ्चेत्तेनैव तं पराभाव-
यति ॥६॥ द्रुपदादिव मुमुचानः । स्विन्नः स्नातो मलादिव पूतं पवित्रेणेवा-
ज्यमापः शुन्धन्तु मैनस इति वासोऽपप्लावयति यथेषीकां मुञ्जाद्विवृहेदेवमेनꣳ
सर्वस्मात्पाप्मनो विवृहति स्नाति तम एवापहते ॥७॥ उद्वयं तमसस्परीति ।
पाप्मा वै तमः पाप्मानमेव तमोऽपहते स्वः पश्यन्त उत्तरमित्ययं वै लोकोऽद्भ्य
उत्तरोऽस्मिन्नेव लोके प्रतितिष्ठति देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तममिति स्व-
र्गो वै लोकः सूर्यो ज्योतिरुत्तमꣳ स्वर्गऽएव लोकेऽन्ततः प्रतितिष्ठत्यनपेक्षमे-
त्याहवनीयमुपतिष्ठते ॥८॥ अपोऽअद्यान्वचारिषमिति । अपामेव रसमवरुन्द्धे
रसेन समसृक्ष्महीत्यपामेव रसमात्मन्धत्ते पयस्वानग्नऽआगमं तं मा सꣳसृज वर्च-
सा प्रजया च धनेन चेत्याशिषमेवैतदाशास्ते ॥९॥ एधोऽस्येधिषीमहीति समिध-

मादत्ते । एधो ह वाऽअग्नेः समित्समिदसि तेजोऽसि तेजो मयि धेहीत्याहव-
नीये समिधमभ्यादधात्यग्निमेवैतया समिन्द्धे स एनꣳ समिद्धस्तेजसा समिन्द्धे ॥१०॥
आदित्यं चरुं यक्ष्यमाणो निर्वपति । आदित्यमीजान इयं वाऽअदितिरस्यामेव
यज्ञं तनुतेऽस्यामिष्ट्वा प्रतितिष्ठति धेनुर्दक्षिणेयं वै धेनुरिमामेव सर्वान्कामान्दुहे
वत्सं पूर्वस्यां ददाति मातरमुत्तरस्यां यदा वै वत्सो मातरं धयत्यथ सा प्रत्ता दुहे
प्रत्तामिवेमाꣳ सर्वान्कामान्दुहे ॥११॥ तदाहुः । प्रेव वाऽएषोऽस्माल्लोकाच्च्यवते
योऽपोऽवभृथमभ्यवैतीत्यवभृथादुदेत्य मैत्रावरुण्या पयस्यया यजतेऽयं वै लोको
मित्रोऽसौ वरुणो यद्वेदमन्तरेण तत्पयस्या तद्यन्मैत्रावरुण्या पयस्यया यजत
ऽएष्वेवैतल्लोकेषु प्रतितिष्ठति प्राणो वै मित्रोऽपानो वरुणोऽन्नमेव पयस्या त-
द्यन्मैत्रावरुण्या पयस्यया यजते प्राणऽएवान्नाद्येऽन्ततः प्रतितिष्ठति ॥१२॥ ब्राह्म-
णम् ॥ ४ [१. २.] ॥ ॥

दुष्टरीतुर्ह पौꣳसायनः । दशपुरुषꣳराज्यादपरुद्ध आस रेवोत्तरसमु ह पाटवं
चाक्रꣳ स्थपतिꣳ सृञ्जया अपरुरुधुः ॥१॥ स होवाच । दुष्टरीतुं पौꣳसायनꣳ सौ-
त्रामण्या त्वा याजयानि यदिदꣳ सृञ्जयेषु राष्ट्रं तत्त्वयि धास्यामीति तथेति तयैनम-
याजयत् ॥२॥ तद्ध ह बल्हिकः प्रातिपीयः शुश्राव । कौरव्यो राजा यो ह वा
ऽअयं दुष्टरीतुः पौꣳसायनो दशपुरुषꣳराज्यादपरुद्धोऽभूत्तमयं चाक्र स्थपतिः सौ-
त्रामण्या याजयिष्यति यदिदꣳ सृञ्जयेषु राष्ट्रं तद्धास्मिन्धास्यतीति ॥३॥ स होवाच
। तन्वाऽअहं तं वेदिष्यामि यदि स तस्मिन्राष्ट्रं धास्यति बहिर्धा वैनꣳ राष्ट्राद्धा-
स्यतीति स आजगाम यस्यां वेलायां ग्रहा गृह्यन्ते ॥४॥ स होवाच । स्थपते
चाक्र नाहवनीये सुरा होतव्येत्याहुर्नान्यत्राहवनीयाद्यद्याहवनीये सुराꣳ हो-
ष्यसि पापवस्यसं करिष्यसि जामि यज्ञस्य यद्यन्यत्राहवनीयाद्बहिर्धैनꣳ राष्ट्राद्धा-
स्यसि नैनꣳ राष्ट्रे धास्यसि नास्मिन्राष्ट्रं धास्यसीति ॥५॥ स होवाच । नाहव-

नीये सुराꣳ होष्यामि नान्यत्राहवनीयान्न पापवस्यसं करिष्यामि न ज्ञामि यज्ञस्य
नैनं बहिर्धा राष्ट्राद्धास्यामि राष्ट्रऽएनं धास्यामि राष्ट्रमस्मिन्धास्यामीति ॥ ६॥ स
होवाच । कथꣳ हि करिष्यसी३ इति स हैतदुवाचासुरेषु वाऽएषोऽग्रे यज्ञ आ-
सीत्सौत्रामणी स देवानुपप्रैत्सोऽप आगच्छत्तमापः प्रत्यनन्दंस्तस्मादु श्रेयाꣳसमा-
गतं प्रत्येव नन्दन्ति तꣳ होचुरेह्येव भगव इति ॥ ७॥ स होवाच । बिभेमि वै
प्रणयत मेति कस्माद्भगवो बिभेषीत्यसुरेभ्य इति तथेति तमापः प्राणयंस्तस्माद्यो
वधत्रो भवति स बिभ्यतं प्रणयति यदापः प्राणयंस्तस्मादापः प्रणीतास्तत्प्रणीता-
नां प्रणीतात्वं प्रति ह तिष्ठति य एवमेतत्प्रणीतानां प्रणीतात्वं वेद ॥ ८॥ तदि-
ष्टाः प्रयाजा आसुः । अपर्यग्निकृतमथासुरा अन्वाजग्मुस्ते देवाः पर्यग्निनैवासुरान्स-
पत्नान्भ्रातृव्यान्यज्ञादन्तरायंस्तथोऽएवैष एतत्पर्यग्निनैव द्विषन्तं भ्रातृव्यं यज्ञादन्तरे-
ति ॥ ९॥ देवयोनिर्वाऽएष यदाहवनीयः । तस्यैतावमृतपक्षौ यावेतावभितोऽग्नी
तद्यदाहवनीये यज्ञं तन्वते देवयोनावेवैतद्देवेभ्यो यज्ञं तन्वतऽउप हैनं पुन-
र्यज्ञो नमति नास्माद्यज्ञो व्यवच्छिद्यते य एवमेतद्वेद यस्य वैवं विदुष एतत्कर्म
क्रियते ॥ १०॥ उत्तरेऽग्नौ पयोग्रहान्जुह्वति । उत्तरेऽग्नौ पशूञ्छ्रपयन्ति पशूनेव
तन्मर्त्यान्त्सतोऽमृतयोनौ दधाति मर्त्यान्त्सतोऽमृतयोनेः प्रजनयत्युप ह वै पशू-
नां पुनर्मृत्युं जयति नास्माद्यज्ञो व्यवच्छिद्यते य एवमेतद्वेद यस्य वैवं विदुष ए-
तत्कर्म क्रियते ॥ ११॥ दक्षिणेऽग्नौ सुराग्रहान्जुह्वति । दक्षिणेऽग्नौ पावयन्ति प-
वित्राभिस्त्रिषंयुक्ताभिः पितॄनेव तन्मर्त्यान्त्सतोऽमृतयोनौ दधाति मर्त्यान्त्सतोऽमृ-
तयोनेः प्रजनयत्युप ह वै पितॄणां पुनर्मृत्युं जयति नास्माद्यज्ञो व्यवच्छिद्यते य
एवमेतद्वेद यस्य वैवं विदुष एतत्कर्म क्रियते ॥ १२॥ तद्यदेतावग्नीऽआहवनीया-
द्विह्रियेते । तेनाहवनीयावथ यदाहवनीयं पुनर्नाश्नुवाते तेनानाहवनीयौ तेनो-
भौ होमाऽउपाप्नोति यश्चाहवनीये यश्चानाहवनीये यच्च हुतं यच्चाहुतम् पु-

नर्ह्वायमित्वोवाच न तदस्ति यत्सृञ्जयानाꣳ राष्ट्रं दुष्टरीतोस्तदद्य तथायं चाक्र स्थपतिर्यज्ञेऽकरिति ॥१३॥ उत्तरेऽग्नौ पशुभिः पुरोडाशैः पयोग्रहैरिति चरन्ति । यद्वु चान्यत्तेन देवानेव तद्देवलोके प्रीणाति तऽएनं प्रीताः प्रीणन्त्यथो देवलोकमेव नयति ॥१४॥ दक्षिणेऽग्नौ सुराग्रहान्जुह्वति । दक्षिणेऽग्नौ पावयन्ति पवित्राभिस्त्रिषंयुक्ताभिः पितॄनेव तत्पितृलोके प्रीणाति तऽएनं प्रीताः प्रीणन्त्यथो पितृलोकमेव नयति ॥१५॥ स वाऽएष आत्मैव यत्सौत्रामणी । तस्मात्सा निरुक्ता निरुक्तो ह्यात्मा लोको वयोधास्तस्मात्सोऽनिरुक्तोऽनिरुक्तो हि लोक आत्मा वै यज्ञस्य सौत्रामणी बाहूऽऐन्द्रश्च वयोधाश्च तद्यदेतावभितः पशू भवतस्तस्मादिमावात्मानमभितो बाहू यथो वै पशुरेवं यूपस्तद्यदेतꣳ सौत्रामणिकं यूपमेतौ यूपावभितो भवतस्तस्माद्धिमावात्मानमभितो बाहू ॥१६॥ ब्राह्मणम् ॥ ५ [९. ३.] ॥ चतुर्थः प्रपाठकः ॥ कण्डिकासंख्या११२ ॥ नवमोऽध्यायः [८३.] ॥ ॥ अस्मिन्काण्डे कण्डिकासंख्या४५६ ॥ ॥

इति माध्यन्दिनीये शतपथब्राह्मणे मध्यमनाम द्वादशं काण्डं समाप्तम् ॥१२॥ ॥

VARIOUS READINGS.

Adhyâya १. १. १ सस्त्रिणः A. P. M (*). - २ नानाकुर्याद्दुक्षोबुका A. - ३ Read: तदोषधिभिः संदधाति. - ६ ब्राह्मणाद्दाꣳसिनं A. - ९ ऽन्वथोद्गात्रे सुब्रह्मण्यां दीक्षयति ताꣳ हि सो wanting in A. - २. १ ऽग्नीषोमाभ्याशुवसथम°

(*) Collated for me by my learned friend Dr. W. Pertsch, during his temporary stay in Oxford.

A. - २ ग्रायुबी A. - ३. ३ ग्रथत्क्रयेणा A. - १८ यज्ञन्ते शो देवता A. - २३ ते तेज्ञस्विन A.P. ते ते तेज्ञस्विन M. - ४. २ दक्षिणो ङ्गरभि° A. —

Adhyâya २. १. १ संवत्सरायं न्या A. - ibid. तद्विनुवाच A. - २. ७ °शद्दै चाः A. - १४ छिराड्रै यज्ञः A. - १७ सप्त वा इति AP. - ३. १ (and ३) द्वावार्द्ध्यतामङ्गा७ A.P.M. The Aitareya-Brâhma*n*a omits the र्, see Böhtlingk-Roth Sanskrit-Wörterbuch, under ग्राद्ध्यन्त् - ७ य वा पक्षौ A. - ibid. एवमु ह्वैतदपरेषां च A. - १२ ?यज्ञक्षत्राणि is my conjecture. यज्ञक्तंतत्राणि A. M. यज्ञकृंतत्राणि P. - ४. १ धगस्थि A. —

Adhyâya ३. १. ३ इत्येते । AP. - ३. १ दीक्षिरे A. - २ °क्तेनायातयाम्नायातययाम्ना वेदे A. - ५. २ समानधिष्ण्यास्त्वेव AP. Read: °स्त्वेव. —

Adhyâya ४. १. ३ युक्तं चायुक्तं चरंति A. Read: संचरन्ति. - १० °त्यात्त्यी वा A. - ibid. °प्रज्ञितेन, °प्रज्ञितया A.P.M. - ३. ८ ग्रयमधि AP. - ४. २ तुविंग्रद्मासो A.P. - ३ऽवरां३ऽ A. ऽवरां । २॥ P. - ibid. तां३ऽ A. तां२ऽ P. —

Adhyâya ५. १. ३ निर्मंथंति तथा A. - १२ नोद्विंगति A. - १३ प्रज्ञिजनयिषेत्ता° A. P. M. - १४ दद्दृंति A. - ibid. समतोः A. समंतोः P. समत्तोः M. - १७ क्षिप्रे ऽस्याशन A. - २. १ प्रेयात् AP. - ५ कुर्यात्क्षाधुका A. - ७ ?वृषारवावन्व° A.P.M. - ८ योऽस्य स्वर्गो M. - ibid. तमकयत्येति A. - १० तद्विद्यान्मुख्य A. P. M. - १३ एतां । यज्ञमा° A.P. —

Adhyâya ६. १. ३१ तुङ्कयानृचक्षा A. P. - ४१ स वा ब्रह्म° A.P.M. Are we to read स वा or स वाव? —

Adhyâya ७. १. ४ यत्स्तेक्षोस्त° A. P. - ५ and ६ गर्दभः ॥५॥ तनाभ्या° A.M.: see १३. २. २. ४. - १० नमुचिरमुनर्वा M. - २ विंदते स सोम इति A. - ११ स्त्रोषु

तच्चदेवेन्द्रियं वीर्यमुत्सन्नं स्त्रीषु A. P. M. Read both times स्त्रीषु. - १३ व्यावृत्यै A. P. - ३. ३ फेनं वज्रम॰ A. - ८ विश एव तत्क्षत्रं जनयति विशो A. P. - १७. १८ ॰पीथं चै॰ — सुरायक्ष्मा य॰ is wanting in A. - २० पशूनपिदपशुर्य॰ A. Read: ॰दपशुर्य॰. —

Adhyâya ८. १. ११ व्यानस्तैरेवैनंति A. - १७ यत्र वा आत्मा पूतानि त॰ A. - २. १६ भेषज्याय A. M. भेष॰ P. - १९ आप्रियो instead of आप्र्यो! - गोरीविति: A. - ibid. श्वित्कानां A. - १५ वेतसः सतो A. - २७ उत्थं A. - २८ उत्थमे॰ A. —

Adhyâya ९. १. १० अव्यवत्सेदाय A. - ३. ३ कोरव्यो A. —

ओम्। ब्रह्मौदनं पचति। रेत एव तद्धत्ते यदाज्यमुच्छिष्यते तेन रशनामभ्य-
ज्यादत्ते तेजो वाऽआज्यं प्राजापत्योऽश्वः प्रजापतिमेव तेजसा समर्धयत्यपूतो वा
ऽएषोऽमेध्यो यदश्वः ॥१॥ दर्भमयी रशना भवति। पवित्रं वै दर्भाः पुनात्येवैनं
पूतमेवैनं मेध्यमालभते ॥२॥ अश्वस्य वाऽआलब्धस्य। रेत उदक्रामत्तत्सुवर्णꣳ
हिरण्यमभवद्यत्सुवर्णꣳ हिरण्यं ददात्यश्वमेव रेतसा समर्धयति ॥३॥ ॥ शतम् ६४००
॥ ॥ प्रजापतिर्यज्ञमसृजत। तस्य महिमापाक्रामत्स महर्त्विजः प्राविशत्तं मह-
र्त्विग्भिरन्वैच्छत्तं महर्त्विग्भिरन्वविन्दद्यन्महर्त्विजो ब्रह्मौदनं प्राश्नन्ति महिमा-
नमेव तद्यज्ञस्य यजमानोऽवरुन्द्धे ब्रह्मौदने सुवर्णꣳ हिरण्यं ददाति रेतो वा
ऽओदनो रेतो हिरण्यꣳ रेतसैवास्मिंस्तद्रेतो दधाति शतमानं भवति शतायुर्वै
पुरुषः शतेन्द्रिय आयुरेवेन्द्रियं वीर्यमात्मन्धत्ते चतुष्टयीरपो वसतीवरीर्मध्यमा-
याह्नि गृह्णाति ता दिग्भ्यः समाहृता भवन्ति दिक्षु वाऽअन्नमन्नमापोऽन्नेनैवास्मा
ऽअन्नमवरुन्द्धे ॥४॥ ब्राह्मणम् ॥१॥ ॥

व्यृद्धमु वाऽएतद्यज्ञस्य। यदयजुष्केण क्रियतऽइमामगृभ्णन्रशनामृतस्येत्यश्वा-
भिधानीमादत्ते यजुष्कृत्यै यज्ञस्य समृद्ध्यै द्वादशारत्निर्भवति द्वादश मासाः संवत्सरः
संवत्सरमेव यज्ञमाप्नोति ॥१॥ तदाहुः। द्वादशारत्नी रशना कार्या३ त्रयोदशार-
त्नी३रित्यृषभो वाऽएष ऋतूनां यत्संवत्सरस्तस्य त्रयोदशो मासो विष्टपमृषभ एष
यज्ञानां यदश्वमेधो यथा वाऽऋषभस्य विष्टपमेवमेतस्य विष्टपं त्रयोदशमरत्निꣳ
रशनायामुपादध्यात्तद्यथऽऋषभस्य विष्टपꣳ सꣳस्क्रियते तादृक्तत् ॥२॥ अभिधा अ-

सीति । तस्मादश्वमेधयाजी सर्वा दिशोऽभिजयति भुवनमसीति भुवनं तज्जयति यन्तासि धर्तेति यन्तारमेवैनं धर्तारं करोति स त्वमग्निं वैश्वानरमित्यग्निमेवैनं वैश्वानरं गमयति सप्रथसं गच्छेति प्रजयैवैनं पशुभिः प्रथयति स्वाहाकृत इति वषट्कार एवास्यैष स्वगा त्वा देवेभ्य इति देवेभ्य एवैनं स्वगा करोति प्रजापतय ऽइति प्राजापत्योऽश्वः स्वयैवैनं देवतया समर्धयति ॥३॥ ईश्वरो वाऽएषः । आर्तिमार्तोर्यो ब्रह्मणे देवेभ्योऽप्रतिप्रोच्याश्वं बध्नाति ब्रह्मन्नश्वं भन्त्स्यामि देवेभ्यः प्रजापतये तेन राध्यासमिति ब्रह्माणमामन्त्रयते ब्रह्मणऽएवैनं प्रतिप्रोच्य बध्नाति नार्तिमार्छति तं बधान देवेभ्यः प्रजापतये तेन राध्नुहीति ब्रह्मा प्रसौति स्वयैवैनं देवतया समर्धयत्यथ प्रोक्षत्यसावेव बन्धुः ॥४॥ स प्रोक्षति । प्रजापतये त्वा जुष्टं प्रोक्षामीति प्रजापतिर्वै देवानां वीर्यवत्तमो वीर्यमेवास्मिन्दधाति तस्मादश्वः पशूनां वीर्यवत्तमः ॥५॥ इन्द्राग्निभ्यां त्वा जुष्टं प्रोक्षामीति । इन्द्राग्नी वै देवानामोजस्वितमाऽओज एवास्मिन्दधाति तस्मादश्वः पशूनामोजस्वितमः ॥६॥ वायवे त्वा जुष्टं प्रोक्षामीति । वायुर्वै देवानामाशिष्ठो जवमेवास्मिन्दधाति तस्मादश्वः पशूनामाशिष्ठः ॥७॥ विश्वेभ्यस्त्वा देवेभ्यो जुष्टं प्रोक्षामीति । विश्वे वै देवा देवानां यशस्वितमा यश एवास्मिन्दधाति तस्मादश्वः पशूनां यशस्वितमः सर्वेभ्यस्त्वा देवेभ्यो जुष्टं प्रोक्षामीति ॥८॥ तदाहुः । यत्प्राजापत्योऽश्वोऽथ कथाप्यन्याभ्यो देवताभ्यः प्रोक्षतीति सर्वा वै देवता अश्वमेधेऽन्वायत्ता यदाह सर्वेभ्यस्त्वा देवेभ्यः प्रोक्षामीति सर्वा एवास्मिन्देवता अन्वायातयति तस्मादश्वमेधे सर्वा देवता अन्वायत्ताः पाप्मा वाऽएतं भ्रातृव्य ईप्सति योऽश्वमेधेन यजते वज्रो ऽश्वः परो मर्तः परः श्वेति श्वानं चतुरक्षं हत्वाधस्पदमश्वस्योपप्लावयति वज्रेणैवैनमवक्रामति नैनं पाप्मा भ्रातृव्य आप्नोति ॥९॥ ब्राह्मणम् ॥२॥

यथा वै हविषोऽहुतस्य स्कन्देत् । एवमेतत्पशो स्कन्दति यं नियुक्तमनाल-

ब्धमुत्सृजन्ति यत्स्तोकीया जुहोति सर्वहुतमेवैनं जुहोत्यस्कन्दायास्कन्नꣳ हि त-
द्यद्धुतस्य स्कन्दति सहस्रं जुहोति सहस्रसंमितो वै स्वर्गो लोकः स्वर्गस्य लो-
कस्याभिजित्यै ॥१॥ तदाहुः । यन्मिता जुहुयात्परिमितमवरुन्धीतेत्यमिता जुहो-
त्यपरिमितस्यैवावरुद्ध्या ऽउवाच ह प्रजापति स्तोकीयासु वा ऽअहमश्वमेधꣳ सꣳ-
स्थापयामि तेन सꣳस्थितेनैवात ऊर्ध्वं चरामीति ॥२॥ अग्नये स्वाहेति । अग्नय
ऽएवैनं जुहोति सोमाय स्वाहेति सोमायैवैनं जुहोत्यपां मोदाय स्वाहेत्यद्भ्य ए-
वैनं जुहोति सवित्रे स्वाहेति सवित्र ऽएवैनं जुहोति वायवे स्वाहेति वायव
ऽएवैनं जुहोति विष्णवे स्वाहेति विष्णव ऽएवैनं जुहोतीन्द्राय स्वाहेतीन्द्रायैवैनं
जुहोति बृहस्पतये स्वाहेति बृहस्पतय ऽएवैनं जुहोति मित्राय स्वाहेति मित्रा-
यैवैनं जुहोति वरुणाय स्वाहेति वरुणायैवैनं जुहोत्येतावन्तो वै सर्वे देवास्ते-
भ्य एवैनं जुहोति पराचीर्जुहोति पराङिव वै स्वर्गो लोकः स्वर्गस्य लोकस्या-
भिजित्यै ॥३॥ ईश्वरो वा ऽएषः । पराङ् प्रदघोर्यः पराचीराहुतीर्जुहोति पुनरा-
वर्ततेऽस्मिन्नेव लोके प्रतितिष्ठत्येताꣳ ह वाव स यज्ञस्य सꣳस्थितिमुवाचास्कन्दा-
यास्कन्नꣳ हि तद्यद्धुतस्य स्कन्दति ॥४॥ यथा वै हविषोऽहुतस्य स्कन्देत् । ए-
वमेतत्पशो स्कन्दति यं प्रोक्षितमनालब्धमुत्सृजन्ति यद्रूपाणि जुहोति सर्वहुत-
मेवैनं जुहोत्यस्कन्दायास्कन्नꣳ हि तद्यद्धुतस्य स्कन्दति हिङ्काराय स्वाहा हिङ्कृ-
ताय स्वाहेत्येतानि वा ऽअश्वस्य रूपाणि तान्येवावरुन्द्धे ॥५॥ तदाहुः । अना-
हुतिर्वै रूपाणि नैता होतव्या इत्यथो खल्वाहुरत्र वा ऽअश्वमेधः संतिष्ठते यद्रू-
पाणि जुहोति होतव्या एवेति बहिर्धा वा ऽएतमायतनात्करोति भ्रातृव्यमस्मै
जनयति यस्यानायतनेऽन्यत्राग्नेराहुतीर्जुहोति ॥६॥ सावित्र्या एवेष्टेः । पुरस्ता-
दनुद्रुत्य सकृदेव रूपाण्याहवनीये जुहोत्यायतनऽएवाहुतीर्जुहोति नास्मै भ्रा-
तृव्यं जनयति यज्ञमुखे-यज्ञमुखे जुहोति यज्ञस्य संतत्या ऽअव्यवच्छेदाय ॥७॥ त-

दाहुः । यद्यज्ञमुखे-यज्ञमुखे जुहुयात्पशुभिर्व्यृध्येत पापीयान्त्स्यात्सकृदेव होतव्या न पशुभिर्व्यृध्यते न पापीयान्भवत्यष्टाचत्वारिꣳशतं जुहोत्यष्टाचत्वारिꣳशदक्षरा जगती जागताः पशवो जगत्यैवास्मै पशूनवरुन्द्धऽएकमतिरिक्तं जुहोति तस्मादेकः प्रजास्वर्धुकः ॥८॥ ब्राह्मणम् ॥३॥ ॥

प्रजापतिरश्वमेधमसृजत । सोऽस्मात्सृष्टः पराङैत्स दिशोऽनुप्राविशत्तं देवाः प्रैषमैच्छंस्तमिष्टिभिरनुप्रायुञ्जत तमिष्टिभिरन्वैच्छंस्तमिष्टिभिरन्वविन्दन्यदिष्टिभिर्यजते ऽश्वमेव तन्मेध्यं यजमानोऽन्विच्छति ॥१॥ सावित्र्यो भवन्ति । इयं वै सविता यो वाऽअस्यां निलयते योऽन्यत्रेत्यस्यां वाव तमनुविन्दन्ति न वाऽइमां कश्चन तिर्यङ्ङोर्ध्वोऽत्येतुमर्हति यत्सावित्र्यो भवन्त्यश्वस्यैवानुवित्त्यै ॥२॥ तदाहुः । प्र वाऽएतदश्वो मीयते यत्पराङेति न ह्येनं प्रत्यावर्तयन्तीति यत्सायं धृतीर्जुहोति क्षेमो वै धृतिः क्षेमो रात्रिः क्षेमेणैवैनं दाधार तस्मात्सायं मनुष्याश्च पशवश्च क्षेम्या भवन्त्यथ यत्प्रातरिष्टिभिर्यजतऽइच्छन्त्येवैनं तत्तस्माद्दिवा नष्टैष एति यद्वेव सायं धृतीर्जुहोति प्रातरिष्टिभिर्यजते योगक्षेममेव तद्यजमानः कल्पयते तस्माद्यत्रैतेन यज्ञेन यजन्ते क्लृप्तः प्रजानां योगक्षेमो भवति ॥३॥ ब्राह्मणम् ॥४॥

अप वाऽएतस्मात् । श्री राष्ट्रं क्रामति योऽश्वमेधेन यजते यदा वै पुरुषः श्रियं गच्छति वीणास्मै वाद्यते ब्राह्मणौ वीणागाथिनौ संवत्सरं गायतः श्रियै वाऽएतद्रूपं यद्वीणा श्रियमेवास्मिंस्तद्धत्तः ॥१॥ तदाहुः । यदुभौ ब्राह्मणौ गायेतामपास्मात्क्षत्रं क्रामेद्ब्रह्मणो वाऽएतद्रूपं यद्ब्राह्मणो न वै ब्रह्मणि क्षत्रꣳ रमतऽइति ॥२॥ यदुभौ राजन्यौ । अपास्माद्ब्रह्मवर्चसं क्रामेत्क्षत्रस्य वाऽएतद्रूपं यद्राजन्यो न वै क्षत्रे ब्रह्मवर्चसꣳ रमतऽइति ब्राह्मणोऽन्यो गायति राजन्योऽन्यो ब्रह्म वै ब्राह्मणः क्षत्रꣳ राजन्यस्तदस्य ब्रह्मणा च क्षत्रेण चोभयतः श्रीः परिगृहीता भवति ॥३॥ तदाहुः । यदुभौ दिवा गायेतां प्रभ्रꣳशुकास्माच्छ्रीः स्याद्ब्राह्मणो

वाऽएतद्रूपं यदृद्धिर्यदा वै राजा कामयतेऽथ ब्राह्मणं जिनाति पापीयांस्तु भवति ॥४॥ यदुभौ नक्तम् । अपास्माद्ब्रह्मवर्चसं क्रामेत्क्षत्रस्य वाऽएतद्रूपं यद्रात्रिर्न वै क्षत्रे ब्रह्मवर्चसꣳ रमतऽइति दिवा ब्राह्मणो गायति नक्तꣳ राजन्यस्तथो हास्य ब्रह्मणा च क्षत्रेण चोभयतः श्रीः परिगृहीता भवतीति ॥५॥ अयजतेत्यददादिति ब्राह्मणो गायतीष्टापूर्तं वै ब्राह्मणस्येष्टापूर्तेनैवैनꣳ स समर्धयतीत्ययुध्यतेत्यमुꣳ संग्राममजयदिति राजन्यो युद्धं वै राजन्यस्य वीर्यं वीर्येणैवैनꣳ स समर्धयति तिस्रोऽन्यो गाथा गायति तिस्रोऽन्यः षट् सम्पद्यन्ते षडृतवः संवत्सर ऋतुष्वेव संवत्सरे प्रतितिष्ठति ताभ्याꣳ शतं ददाति शतायुर्वै पुरुषः शतेन्द्रिय आयुरेवेन्द्रियं वीर्यमात्मन्धत्ते ॥६॥ ब्राह्मणम् ॥५॥

विभूर्मात्रा प्रभूः पित्रेति । इयं वै मातासौ पिताभ्यामेवैनं परिददात्यश्वोऽसि हयोऽसीति शास्त्येवैनं तत्तस्माच्छिष्टाः प्रजा जायन्तेऽत्योऽसि मयोऽसीत्यत्येवैनं नयति तस्मादश्वः पशूनत्येति तस्मादश्वः पशूनां श्रैष्ठ्यं गच्छत्यर्वासि सप्तिरसि वाज्यसीति यथायजुरेवैतद्वृषासि नृमणा असीति मिथुनत्वाय ययुर्नामासि शिशुर्नामासीत्येतद्वाऽअश्वस्य प्रियं नामधेयं प्रियेणैवैनं नाम्नाभिवदति तस्मादप्यामित्रौ सङ्गत्य नाम्ना चेदभिवदतोऽन्योऽन्यꣳ समेव जानाते ॥१॥ आदित्यानां पत्वान्विहीति । आदित्यानेवैनं गमयति देवा आशापाला एतं देवेभ्योऽश्वं मेधाय प्रोक्षितꣳ रक्षतेति शतं वै तल्प्या राजपुत्रा आशापालास्तेभ्य एवैनं परिददातीह रन्तिरिह रमतामिह धृतिरिह स्वधृतिः स्वाहेति संवत्सरमाहुतीर्जुहोति षोडश नवतीरेता वाऽअश्वस्य बन्धनं ताभिरेवैनं बध्नाति तस्मादश्वः प्रमुक्तो बन्धनमागच्छति षोडश नवतीरेता वाऽअश्वस्य बन्धनं ताभिरेवैनं बध्नाति तस्मादश्वः प्रमुक्तो बन्धनं न जहाति ॥२॥ राष्ट्रं वाऽअश्वमेधः । राष्ट्रऽएते व्यायच्छन्ते येऽश्वꣳ रक्षन्ति तेषां यऽउदृचं गच्छन्ति राष्ट्रेणैव ते राष्ट्रं भवन्त्यथ ये नोदृचं गच्छन्ति राष्ट्रात्ते

व्यवछिद्यन्ते तस्माद्राष्ट्र्यश्वमेधेन यजेत परा वाऽएष सिच्यते योऽबलोऽश्वमेधेन यजते यद्यमित्रा अश्वं विन्देरन्यज्ञोऽस्य विछिद्येत पापीयान्त्स्याच्छतं कवचिनो रक्षन्ति यज्ञस्य संतत्याऽअव्यवच्छेदाय न पापीयान्भवत्यथान्यमानीय प्रोक्षेयुः सैव तत्र प्रायश्चित्तिः ॥३॥ ब्राह्मणम् ॥६॥

प्रजापतिरकामयत । अश्वमेधेन यजेयेति सोऽश्राम्यत्स तपोऽतप्यत तस्य श्रान्तस्य तप्तस्य सप्तधात्मनो देवता अपाक्रामन्त्सा दीक्षाभवत्स एतानि वैश्वदेवान्यपश्यत्तान्यजुहोत्तैर्वै स दीक्षामवारुन्द्ध यद्वैश्वदेवानि जुहोति दीक्षामेव तैर्यजमानोऽवरुन्द्धेऽन्वहं जुहोत्यन्वहमेव दीक्षामवरुन्द्धे सप्त जुहोति सप्त वै ता देवता अपाक्रामंस्ताभिरेवास्मै दीक्षामवरुन्द्धे ॥१॥ अप वाऽएतेभ्यः प्राणाः क्रामन्ति । ये दीक्षामतिरिचयन्ति सप्ताहं प्रचरन्ति सप्त वै शीर्षण्याः प्राणाः प्राणा दीक्षा प्राणैरेवास्मै प्राणान्दीक्षामवरुन्द्धे त्रेधा विभज्य देवतां जुहोति त्र्यावृतो वै देवास्त्र्यावृत इमे लोका ऋद्ध्यामेव वीर्यऽएषु लोकेषु प्रतितिष्ठति ॥२॥ एकविंꣳशतिः सम्पद्यन्ते । द्वादश मासाः पञ्चऽर्तवस्त्रय इमे लोका असावादित्य एकविंꣳशस्तद्दैवं क्षत्रꣳ सा श्रीस्तदाधिपत्यं तद्ब्रध्नस्य विष्टपं तत्स्वाराज्यमश्नुते ॥३॥ त्रिंꣳशतमौद्भणानि जुहोति । त्रिंशदक्षरा विराड्विराडु कृत्स्नमन्नं कृत्स्नस्यैवान्नाद्यस्यावरुद्ध्यै चत्वार्यौद्भणानि जुहोति त्रीणि वैश्वदेवानि सप्त सम्पद्यन्ते सप्त वै शीर्षण्याः प्राणाः प्राणा दीक्षा प्राणैरेवास्मै प्राणान्दीक्षामवरुन्द्धे पूर्णाहुतिमुत्तमां जुहोति प्रत्युत्तब्ध्यै सयुक्त्वाय ॥४॥ ब्राह्मणम् ॥७॥ ॥

प्रजापतिरश्वमेधमसृजत । स सृष्टः प्रऽर्चमम्लीनात्प्र साम तं वैश्वदेवान्युदयच्छन्यद्वैश्वदेवानि जुहोत्यश्वमेधस्यैवोद्यत्यै ॥१॥ काय स्वाहा । कस्मै स्वाहा कतमस्मै स्वाहेति प्राजापत्यं मुख्यं करोति प्रजापतिमुखाभिरेवैनं देवताभिरुद्यच्छति ॥२॥ स्वाहाधिमाधीताय स्वाहा । मनः प्रजापतये स्वाहा चित्तं विज्ञातायेति

यदेव पूर्वासां ब्राह्मणं तदत्र ॥३॥ अदित्यै स्वाहा । अदित्यै मह्यै स्वाहादित्यै सुमृडीकायै स्वाहेतीयं वाऽअदितिरनयैवैनमुद्गच्छति ॥४॥ सरस्वत्यै स्वाहा । सरस्वत्यै पावकायै स्वाहा सरस्वत्यै बृहत्यै स्वाहेति वाग्वै सरस्वती वाचैवैनमुद्गच्छति ॥५॥ पूष्णे स्वाहा । पूष्णे प्रपथ्याय स्वाहा पूष्णे नरंधिषाय स्वाहेति पशवो वै पूषा पशुभिरेवैनमुद्गच्छति ॥६॥ त्वष्ट्रे स्वाहा । त्वष्ट्रे तुरीपाय स्वाहा त्वष्ट्रे पुरुरूपाय स्वाहेति त्वष्टा वै पशूनां मिथुनानाꣳ रूपकृद्रूपैरेवैनमुद्गच्छति ॥७॥ विष्णवे स्वाहा । विष्णवे निभूयपाय स्वाहा विष्णवे शिपिविष्टाय स्वाहेति यज्ञो वै विष्णुर्यज्ञेनैवैनमुद्गच्छति विश्वो देवस्य नेतुरिति पूर्णाहुतिमुत्तमां जुहोतीयं वै पूर्णाहुतिरस्यामेवान्ततः प्रतितिष्ठति ॥८॥ ब्राह्मणम् ॥८॥ ॥

आ ब्रह्मन् । ब्राह्मणो ब्रह्मवर्चसी जायतामिति ब्राह्मणऽएव ब्रह्मवर्चसं दधाति तस्मात्पुरा ब्राह्मणो ब्रह्मवर्चसी जज्ञे ॥१॥ आ राष्ट्रे राजन्यः । शूर इषव्योऽतिव्याधी महारथो जायतामिति राजन्यऽएव शौर्यं महिमानं दधाति तस्मात्पुरा राजन्यः शूर इषव्योऽतिव्याधी महारथो जज्ञे ॥२॥ दोग्ध्री धेनुरिति । धेन्वामेव पयो दधाति तस्मात्पुरा धेनुर्दोग्ध्री जज्ञे ॥३॥ वोढानड्वानिति । अनडुह्येव बलं दधाति तस्मात्पुरानड्वान्वोढा जज्ञे ॥४॥ आशुः सप्तिरिति । अश्वऽएव जवं दधाति तस्मात्पुराश्वः सर्ता जज्ञे ॥५॥ पुरंधिर्योषेति । योषित्येव रूपं दधाति तस्माद्रूपिणी युवतिः प्रिया भावुका ॥६॥ जिष्णू रथेष्ठा इति । राजन्यऽएव जैत्रं महिमानं दधाति तस्मात्पुरा राजन्यो जिष्णुर्जज्ञे ॥७॥ सभेयो युवेति । एष वै सभेयो युवा यः प्रथमवयसी तस्मात्प्रथमवयसी स्त्रीणां प्रियो भावुकः ॥८॥ आस्य यजमानस्य वीरो जायतामिति । यजमानस्यैव प्रजायां वीर्यं दधाति तस्मात्पुरेजानस्य वीरो जज्ञे ॥९॥ निकामे-निकामे नः पर्जन्यो वर्षत्विति । निकामे-निकामे वै तत्र पर्जन्यो वर्षति यत्रैतेन यज्ञेन यजन्ते फलवत्यो न ओषधयः

पच्यन्तामिति फलवत्यो वै तत्रौषधयः पच्यन्ते यत्रैतेन यज्ञेन यजन्ते योगक्षेमो नः कल्पतामिति योगक्षेमो वै तत्र कल्पते यत्रैतेन यज्ञेन यजन्ते तस्माद्यत्रैतेन यज्ञेन यजन्ते क्लृप्तः प्रजानां योगक्षेमो भवति ॥१०॥ ब्राह्मणम् ॥१॥ अध्यायः ॥१ [८४.] ॥ ॥

प्रजापतिर्देवेभ्यो यज्ञान्व्यादिशत् । स आत्मन्नश्वमेधमधत्त ते देवाः प्रजापतिमब्रुवन्नेष वै यज्ञो यदश्वमेधोऽपि नोऽत्रास्तु भाग इति तेभ्य एतानन्नहोमानकल्पयद्यदन्नहोमाञ्जुहोति देवानेव तत्प्रीणाति ॥१॥ आज्येन जुहोति । तेजो वाऽआज्यं तेजसैवास्मिंस्तत्तेजो दधात्याज्येन जुहोत्येतद्वै देवानां प्रियं धाम यदाज्यं प्रियेणैवैनान्धाम्ना समर्धयति ॥२॥ सक्तुभिर्जुहोति । देवानां वाऽएतद्रूपं यत्सक्तवो देवानेव तत्प्रीणाति ॥३॥ धानाभिर्जुहोति । अहोरात्राणां वाऽएतद्रूपं यद्धाना अहोरात्राण्येव तत्प्रीणाति ॥४॥ लाजैर्जुहोति । नक्षत्राणां वाऽएतद्रूपं यल्लाजा नक्षत्राण्येव तत्प्रीणाति प्राणाय स्वाहापानाय स्वाहेति नामग्राहं जुहोति नामग्राहमेवैनांस्तत्प्रीणात्येकस्मै स्वाहा द्वाभ्याꣳ स्वाहा शताय स्वाहैकशताय स्वाहेत्यनुपूर्वं जुहोत्यनुपूर्वमेवैनांस्तत्प्रीणात्येकोत्तरं जुहोत्येकवद्वै स्वर्गो लोक एकधैवैनꣳ स्वर्गं लोकं गमयति पराचीर्जुहोति पराङिव वै स्वर्गो लोकः स्वर्गस्य लोकस्याभिजित्यै ॥५॥ ईश्वरो वाऽएषः । पराङ् प्रदघोर्यः पराचीराहुतीर्जुहोति नैकशतमत्येति यदेकशतमतीयादायुषा यजमानं व्यर्धयेदेकशतं जुहोति शतायुर्वै पुरुष आत्मैकशत आयुष्येवात्मन्प्रतितिष्ठति व्युष्ट्यै स्वाहा स्वर्गाय स्वाहेत्युत्तमेऽआहुती जुहोति रात्रिर्वै व्युष्टिरहः स्वर्गोऽहोरात्रेऽएव तत्प्रीणाति ॥६॥ तदाहुः । यदुभे दिवा वा नक्तं वा जुहुयादहोरात्रे मोहयेद्व्युष्ट्यै स्वाहेत्यनुदितऽआदित्ये जुहोति स्वर्गाय स्वाहेत्युदितेऽहोरात्रयोरव्यतिमोहाय ॥७॥ ब्राह्मणम् ॥१० [२. १.] ॥ ॥

राजा वाऽएष यज्ञानां यदश्वमेधः । यजमानो वाऽअश्वमेधो यजमानो यज्ञो यदश्वे पशून्नियुनक्ति यज्ञऽएव तद्यज्ञमारभते ॥१॥ अश्वं तूपरं गोमृगमिति । तान्मध्यमे यूपऽआलभते सेनामुखमेवास्यैतेन सꣳश्यति तस्माद्राज्ञः सेनामुखं भीष्मं भावुकम् ॥२॥ कृष्णग्रीवमाग्नेयꣳ रराटे पुरस्तात् । पूर्वाग्निमेव तं कुरुते तस्माद्राज्ञः पूर्वाग्निर्भावुकः ॥३॥ सारस्वतीं मेषीमधस्ताद्धन्वोः । स्त्रीरेव तदनुगाः कुरुते तस्मात्स्त्रियः पुꣳसोऽनुवर्त्मानो भावुकाः ॥४॥ आश्विनावधोरामौ बाह्वोः । बाह्वोरेव बलं धत्ते तस्माद्राजा बाहुबली भावुकः ॥५॥ सौमापौष्णꣳ श्यामं नाभ्याम् । प्रतिष्ठामेव तां कुरुतऽइयं वै पूषास्यामेव प्रतितिष्ठति ॥६॥ सौर्ययामौ श्वेतं च कृष्णं च पार्श्वयोः । कवचेऽएव ते कुरुते तस्माद्राजा संनद्धो वीर्यं करोति ॥७॥ त्वाष्ट्रौ लोमशसक्थौ सक्थ्योः । ऊर्वोरेव बलं धत्ते तस्माद्राजोरुबली भावुकः ॥८॥ वायव्यꣳ श्वेतं पुच्छे । उत्सेधमेव तं कुरुते तस्मादुत्सेधं प्रजा भयेऽभिसꣳश्रयन्तीन्द्राय स्वपस्याय वेहतं यज्ञस्य सेन्द्रतायै वैष्णवो वामनो यज्ञो वै विष्णुर्यज्ञऽएवान्ततः प्रतितिष्ठति ॥९॥ ते वाऽएते । पञ्चदश पर्यङ्ग्याः पशवो भवन्ति पञ्चदशो वै वज्रो वीर्यं वज्रो वज्रेणैवैतद्वीर्येण यजमानः पुरस्तात्पाप्मानमपहते ॥१०॥ पञ्चदश-पञ्चदशोऽएवेतरेषु । पञ्चदशो वै वज्रो वीर्यं वज्रो वज्रेणैवैतद्वीर्येण यजमानोऽभितः पाप्मानमपहते ॥११॥ तदाहुः । अपाहैवैतैः पाप्मानꣳ हताऽइत्यकृत्स्नं च वै प्रजापतिꣳ संस्करोति न चेदꣳ सर्वमवरुन्द्धे ॥१२॥ सप्तदशैव पशून्मध्यमे यूपऽआलभेत । सप्तदशो वै प्रजापतिः प्रजापतिरश्वमेधोऽश्वमेधस्यैवाप्त्यै षोडश-षोडशेतरेषु षोडशकलं वाऽइदꣳ सर्वं तदिदꣳ सर्वमवरुन्द्धे ॥१३॥ तान्कथमाप्रीणीयादित्याहुः । समिद्धोऽअञ्जन्कृदरं मतीनामिति बार्हदुक्थीभिराप्रीणीयाद्बृहदुक्थो ह वै वामदेव्योऽश्वो वा सामुद्रिरश्वस्याप्रीर्ददर्श ता एतास्ताभिरेवैनमेतदाप्रीणीम इति वदन्तो न तथा कुर्याज्जामदग्नीभिरेवाप्री-

णीयात्प्रजापतिर्वै जमदग्निः सोऽश्वमेधः स्वयैवैनं देवतया समर्धयति तस्माज्जामदग्नीभिरेवाप्रीणीयात् ॥१४॥ तद्धैके । एतेषां पर्यङ्ग्याणां नाना याज्यापुरोऽनुवाक्याः कुर्वन्ति विन्दाम एतेषामवित्त्येतरेषां न कुर्म इति न तथा कुर्यात्क्षत्रं वाऽअश्वो विडितरे पशवः प्रतिप्रतिनीं ह ते प्रत्युद्यामिनीं क्षत्राय विशं कुर्वन्त्यथोऽआयुषा यजमानं व्यर्धयन्ति ये तथा कुर्वन्ति तस्मात्प्राजापत्य एवाश्वो देवदेवत्या इतरे क्षत्रायैव तद्विशं कृतानुकरामनुवर्त्मानं करोत्यथोऽआयुषैव यजमानं समर्धयति ॥१५॥ हिरण्मयोऽश्वस्य शासो भवति । लोहमयाः पर्यङ्ग्याणामायसा इतरेषां ज्योतिर्वै हिरण्यं राष्ट्रमश्वमेधो ज्योतिरेव तद्राष्ट्रे दधात्यथो हिरण्यज्योतिषैव यजमानः स्वर्गं लोकमेत्यथोऽअनूकाशमेव तं कुरुते स्वर्गस्य लोकस्य समष्ट्यै ॥१६॥ अथो क्षत्रं वाऽअश्वः । क्षत्रस्यैतद्रूपं यद्धिरण्यं क्षत्रमेव तत्क्षत्रेण समर्धयति ॥१७॥ अथ यल्लोहमयाः पर्यङ्ग्याणाम् । यथा वै राज्ञोऽराजानो राजकृतः सूतग्रामण्य एवं वाऽएतेऽश्वस्य यत्पर्यङ्ग्या एवमु वाऽएतद्धिरण्यस्य यल्लोहं स्वैनैवैनांस्तद्रूपेण समर्धयति ॥१८॥ अथ यदायसा इतरेषाम् । विड्वाऽइतरे पशवो विश एतद्रूपं यदयो विशमेव तद्विशा समर्धयति वैतसऽइटसूनऽउत्तरतोऽश्वस्यावस्यन्त्यानुष्टुभो वाऽअश्व आनुष्टुभैषा दिक्स्वायामेवैनं तद्दिशि दधात्यथ यद्वैतसऽइटसूनेऽप्सुयोनिर्वाऽअश्वोऽप्सुजा वेतसः स्वयैवैनं योन्या समर्धयति ॥१९॥ ब्राह्मणम् ॥११ [२. २.] ॥ ॥

देवा वाऽअश्वमेधे पवमाने । स्वर्गं लोकं न प्राजानंस्तमश्वः प्राजानाद्यदश्वमेधेऽश्वेन पवमानाय सर्पन्ति स्वर्गस्य लोकस्य प्रज्ञात्यै पुच्छमन्वारभन्ते स्वर्गस्यैव लोकस्य समष्ट्यै न वै मनुष्यः स्वर्गं लोकमञ्जसा वेदाश्वो वै स्वर्गं लोकमञ्जसा वेद ॥१॥ यदुद्गातोद्गायेत् । यथाक्षेत्रज्ञोऽन्येन पथा नयेत्तादृक्तदथ यदुद्गातारमवरुध्याश्वमुद्गीथाय वृणीते यथा क्षेत्रज्ञोऽञ्जसा नयेदेवमेवैतद्यजमानमश्वः स्वर्गं

लोकमञ्जसा नयति हिङ्करोति सामैव तद्धिङ्करोत्युद्गीथ एव स वडवा उपरुन्धन्ति सꣳशिञ्जति यथोपगातार उपगायन्ति तादृक्तद्धिरण्यं दक्षिणा सुवर्णꣳ शतमानं तस्योक्तं ब्राह्मणम् ॥२॥ ब्राह्मणम् ॥१२ [२.३.] ॥॥

प्रजापतिरकामयत । उभौ लोकावभिजयेयं देवलोकं च मनुष्यलोकं चेति स एतान्पशूनपश्यद्ग्राम्यांश्चारण्यांश्च तानालभत तैरिमौ लोकाववारुन्द्ध ग्राम्यैरेव पशुभिरिमं लोकमवारुन्द्धारण्यैरमुमयं वै लोको मनुष्यलोकोऽथासौ देवलोको यद्ग्राम्यान्पशूनालभतऽइममेव तैर्लोकं यजमानोऽवरुन्द्धे यदारण्यानमुं तैः ॥१॥ स यद्ग्राम्यैः सꣳस्थापयेत् । समध्वानः क्रामेयुः समन्तिकं ग्रामयोर्ग्रामान्तौ स्यातां नऽर्क्षीकाः पुरुषव्याघ्राः परिमोषिण आव्याधिन्यस्तस्करा अरण्येष्वाजायेरन्यदारण्यैर्व्यध्वानः क्रामेयुर्विदूरं ग्रामयोर्ग्रामान्तौ स्यातामृक्षीकाः पुरुषव्याघ्राः परिमोषिण आव्याधिन्यस्तस्करा अरण्येष्वाजायेरन् ॥२॥ तदाहुः । अपशुर्वाऽएष यदारण्यो नैतस्य होतव्यं यज्जुहुयात्क्षिप्रं यजमानमरण्यं मृतꣳ हरेयुररण्यभागा ह्यारण्याः पशवो यन्न जुहुयाद्यज्ञवेशसꣳ स्यादिति पर्यग्निकृतानेवोत्सृजन्ति तन्नैव हुतं नाहुतं न यजमानमरण्यं मृतꣳ हरन्ति न यज्ञवेशसं भवति ॥३॥ ग्राम्यैः सꣳस्थापयति । वि पितापुत्राववस्यतः समध्वानः क्रामन्ति समन्तिकं ग्रामयोर्ग्रामान्तौ भवतो नऽर्क्षीकाः पुरुषव्याघ्राः परिमोषिण आव्याधिन्यस्तस्करा अरण्येष्वाजायन्ते ॥४॥ ब्राह्मणम् ॥१३ [२.४.] ॥॥

प्रजापतिरश्वमेधमसृजत । सोऽस्मात्सृष्टः पराङैत्स पङ्क्तिर्भूत्वा संवत्सरं प्राविशत्तेऽर्धमासा अभवंस्तं पञ्चदशिभिरनुप्रायुङ्क्त तमाप्नोत्तमाप्त्वा पञ्चदशिभिरवारुन्द्धार्धमासानां वाऽएषा प्रतिमा यत्पञ्चदशिनो यत्पञ्चदशिन आलभतेऽर्धमासानेव तैर्यजमानोऽवरुन्द्धे ॥१॥ तदाहुः । अनवरुद्धो वाऽएतस्य संवत्सरो भवति योऽन्यत्र चातुर्मास्येभ्यः संवत्सरं तनुतऽइत्येष वै साक्षात्संवत्सरो यच्चातुर्मास्यानि

यच्चातुर्मास्यान्पशूनालभते साक्षादेव तत्संवत्सरमवरुन्द्धे वि वाऽएष प्रजया प-
शुभिर्ऋध्यतेऽप स्वर्गं लोकᳫं राध्नोति योऽन्यत्रैकादशिनेभ्यः संवत्सरं तनुतऽइ-
येष वै सम्प्रति स्वर्गो लोको यदेकादशिनी प्रजा वै पशव एकादशिनी
यदेकादशिनान्पशूनालभते न स्वर्गं लोकमपराध्नोति न प्रजया पशुभिर्व्यृध्यते
॥२॥ प्रजापतिर्विराजमसृजत । सास्मात्सृष्टा पराच्यैत्साश्वं मेध्यं प्राविशत्तां दशि-
भिरनुप्रायुङ्क्त तामाप्नोत्तामाप्त्वा दशिभिरवारुन्द्ध यद्दशिन आलभते विराजमेव तैर्य-
जमानोऽवरुन्द्धे शतमालभते शतायुर्वै पुरुषः शतेन्द्रिय आयुरेवेन्द्रियं वीर्यमा-
त्मन्धत्ते ॥३॥ एकादश दशत आलभते । एकादशाक्षरा वै त्रिष्टुबिन्द्रियमु वै वीर्यं
त्रिष्टुबिन्द्रियस्यैव वीर्यस्यावरुद्ध्याऽएकादश दशत आलभते दश वै पशोः प्राणा
आत्मैकादशः प्राणैरेव पशूल्त्समर्धयति वैश्वदेवा भवन्ति वैश्वदेवो वाऽअश्वोऽश्व-
स्यैव सर्वत्वाय बहुरूपा भवन्ति तस्माद्बहुरूपाः पशवो नानारूपा भवन्ति तस्मा-
न्नानारूपाः पशवः ॥४॥ ब्राह्मणम् ॥१४ [२.५.] ॥॥

युञ्जन्ति ब्रध्नमरुषं चरन्तमिति । असौ वाऽआदित्यो ब्रध्नोऽरुषोऽमुमेवास्मा
ऽआदित्यं युनक्ति स्वर्गस्य लोकस्य समष्ट्यै ॥१॥ तदाहुः । पराङ्वाऽएतस्माद्यज्ञ
एति यस्य पशुरुपाकृतोऽन्यत्र वेदेरेतीत्येतᳫं स्तोतरनेन पथा पुनरश्वमावर्तया-
सि न इति वायुर्वै स्तोता तमेवास्माऽएतत्परस्ताद्दधाति तथा नात्येति ॥२॥
अप वाऽएतस्मात् । तेज इन्द्रियं पशवः श्रीः क्रामन्ति योऽश्वमेधेन यजते ॥३॥
वसवस्त्वाञ्जन्तु । गायत्रेण छन्दसेति महिष्यभ्यनक्ति तेजो वाऽआज्यं तेजो गायत्री
तेजसीऽएवास्मिन्त्समीची दधाति ॥४॥ रुद्रास्त्वाञ्जन्तु । त्रैष्टुभेन छन्दसेति वावा-
ता तेजो वाऽआज्यमिन्द्रियं त्रिष्टुत्तेजश्चैवास्मिन्निन्द्रियं च समीची दधाति ॥५॥
आदित्यास्त्वाञ्जन्तु । जागतेन छन्दसेति परिवृक्ता तेजो वाऽआज्यं पशवो जगती
तेजश्चैवास्मिन्पशूंश्च समीची दधाति ॥६॥ पत्न्योऽभ्यञ्जन्ति । श्रियै वाऽएतद्रूपं

यत्पत्न्यः श्रियमेवास्मिंस्तद्दधति नास्मात्तेज इन्द्रियं पशवः श्रीरपक्रामन्ति ॥७॥ यथा वै हविषोऽहुतस्य स्कन्देत् । एवमेतत्पशो स्कन्दति यस्य निक्तस्य लोमानि शीयन्ते यत्काचानावयन्ति लोमान्येवास्य सम्भरन्ति हिरण्मया भवन्ति तस्योक्तं ब्राह्मणमेकशतमेकशतं काचानावयन्ति शतायुर्वै पुरुष आत्मैकशत आयुष्येवात्मन्प्रतितिष्ठति भूर्भुवः स्वरिति प्राजापत्याभिरावयन्ति प्राजापत्योऽश्वः स्वयैवैनं देवतया समर्धयन्ति लाजी३ञ्छाची३न्यव्ये गव्यऽइत्यतिरिक्तमन्नमश्वायोपावहरति प्रजामेवान्नादीं कुरुतऽएतदन्नमत्त देवा एतदन्नमद्धि प्रजापतऽइति प्रजामेवान्नाद्येन समर्धयति ॥८॥ अप वाऽएतस्मात् । तेजो ब्रह्मवर्चसं क्रामति योऽश्वमेधेन यजते होता च ब्रह्मा च ब्रह्मोद्यं वदत आग्नेयो वै होता बार्हस्पत्यो ब्रह्मा ब्रह्म बृहस्पतिस्तेजश्चैवास्मिन्ब्रह्मवर्चसं च समीची धत्तो यूपमभितो वदतो यजमानो वै यूपो यजमानमेवैतत्तेजसा च ब्रह्मवर्चसेन चोभयतः परिधत्तः ॥९॥ कः स्विदेकाकी चरतीति । असौ वाऽआदित्य एकाकी चरत्येष ब्रह्मवर्चसं ब्रह्मवर्चसमेवास्मिंस्तद्धत्तः ॥१०॥ क उ स्विज्जायते पुनरिति । चन्द्रमा वै जायते पुनरायुरेवास्मिंस्तद्धत्तः ॥११॥ किंस्विद्धिमस्य भेषजमिति । अग्निर्वै हिमस्य भेषजं तेज एवास्मिंस्तद्धत्तः ॥१२॥ ॥ शतम् ६५०० ॥ ॥ किम्वावपनं महदिति । अयं वै लोक आवपनं महदस्मिन्नेव लोके प्रतितिष्ठति ॥१३॥ का स्विदासीत्पूर्वचित्तिरिति । द्यौर्वै वृष्टिः पूर्वचित्तिर्दिवमेव वृष्टिमवरुन्द्धे ॥१४॥ किंस्विदासीद्बृहद्वय इति । अश्वो वै बृहद्वय आयुरेवावरुन्द्धे ॥१५॥ का स्विदासीत्पिलिप्पिलेति । श्रीर्वै पिलिप्पिला श्रियमेवावरुन्द्धे ॥१६॥ का स्विदासीत्पिशंगिलेति । अहोरात्रे वै पिशंगिलेऽअहोरात्रयोरेव प्रतितिष्ठति ॥१७॥ ब्राह्मणम् ॥१५ [२. ६.] ॥ प्रथमः प्रपाठकः ॥ कण्डिकासंख्या १०८ ॥ ॥

नियुक्तेषु पशुषु । प्रोक्षणीरध्वर्युरादत्तेऽश्वं प्रोक्षिष्यन्नन्वारब्धे यजमानऽआध-

रिक्तं यजुरनुद्रुत्याश्वमेधिकं यजुः प्रतिपद्यते ॥१॥ वायुष्ट्वा पचतैरवत्विति । वायुरेवैनं पचत्यसितग्रीवश्छागैरित्यग्निर्वा ऽअसितग्रीवोऽग्निरेवैन छागैः पचति ॥२॥ न्यग्रोधश्चमसैरिति । यत्र वै देवा यज्ञेनायजन्त तऽएतांश्चमसान्न्यौब्जंस्ते न्यञ्चो ऽरोहंस्तस्मान्न्यञ्चो न्यग्रोधा रोहन्ति ॥३॥ शल्मलिर्वृद्ध्येति । शल्मलौ वृद्धिं दधाति तस्माच्छल्मलिर्वनस्पतीनां वर्षिष्ठं वर्धते ॥४॥ एष स्य राथ्यो वृषेति । अश्वेनैव रथꣳ सम्पादयति तस्मादश्वो नान्यद्रथाद्वहति ॥५॥ षड्भिश्चतुर्भिरिद्गन्निति । तस्मादश्वस्त्रिभिस्तिष्ठंस्तिष्ठत्यथ युक्तः सर्वैः पद्भिः सममायुते ॥ ६ ॥ ब्रह्माकृष्णश्च नोऽवत्विति । चन्द्रमा वै ब्रह्माकृष्णश्चन्द्रमस एवैनं परिददाति नमोऽग्नयऽइत्यग्नयऽएव नमस्करोति ॥७॥ सꣳशितो रश्मिना रथ इति रश्मिनैव रथꣳ सम्पादयति तस्माद्रथः पर्युतो दर्शनीयतमो भवति ॥८॥ सꣳशितो रश्मिना हय इति । रश्मिनैवाश्वꣳ सम्पादयति तस्मादश्वो रश्मिना प्रतिहितो भूयिष्ठꣳ रोचते ॥९॥ सꣳशितोऽअप्स्वप्सुजा इति । अप्सुयोनिर्वाऽअश्वः स्वयैवैनं योन्या समर्धयति ब्रह्मा सोमपुरोगव इति सोमपुरोगवमेवैनꣳ स्वर्गं लोकं गमयति ॥१०॥ स्वयं वाजिंस्तन्वं कल्पयस्वेति । स्वयꣳ रूपं कुरुष्व यादृशमिच्छसीत्येवैनं तदाह स्वयं यजस्वेति स्वाराज्यमेवास्मिन्दधाति स्वयं जुषस्वेति स्वयं लोकꣳ रोचयस्व यावन्तमिच्छसीत्येवैनं तदाह महिमा तेऽन्येन न संनशऽइत्यश्वमेव महिम्ना समर्धयति ॥११॥ न वाऽउऽएतन्म्रियसे न रिष्यसीति । प्रश्वासयत्येवैनं तद्देवाँ२॥ऽइदेषि पथिभिः सुगेभिरिति देवयानानेवैनं पथो दर्शयति यत्रासते सुकृतो यत्र ते ययुरिति सुकृद्भिरेवैनꣳ सलोकं करोति तत्र त्वा देवः सविता दधात्विति सवितैवैनꣳ स्वर्गे लोके दधाति प्रजापतये त्वा जुष्टं प्रोक्षामीत्युपाꣳश्वघोपगृह्णाति ॥१२॥ अग्निः पशुरासीत् । तेनायजन्त स एतं लोकमजयद्यस्मिन्नग्निः स ते लोको भविष्यति तं जेष्यसि पिबैता अप इति यावानग्नेर्विजयो यावांल्लोको

यावदैश्वर्यं तावांस्ते विजयस्तावांल्लोकस्तावदैश्वर्यं भविष्यतीत्येवैनं तदाह ॥१३॥ वायुः पशुरासीत् । तेनायजन्त स एतं लोकमजयद्यस्मिन्वायुः स ते लोको भविष्यति तं जेष्यसि पिबेता अप इति यावान्वायोर्विजयो यावांल्लोको° ॥१४॥ सूर्यः पशुरासीत् । तेनायजन्त स एतं लोकमजयद्यस्मिन्त्सूर्यः स ते लोको भविष्यति तं जेष्यसि पिबेता अप इति यावान्त्सूर्यस्य विजयो यावांल्लोको यावदैश्वर्यं नावांस्ते विजयस्तावांल्लोकस्तावदैश्वर्यं भविष्यतीत्येवैनं तदाह तर्पयित्वाश्वं पुनः संस्कृत्य प्रोक्षणीरितरान्पशून्प्रोक्षति तस्यातः ॥१५॥ ब्राह्मणम् ॥ १ [२.७.] ॥ ॥

देवा वाऽउदञ्चः । स्वर्गं लोकं न प्राजानंस्तमश्वः प्राजानाद्यदश्वेनोदञ्चो यन्ति स्वर्गस्य लोकस्य प्रज्ञात्यै वासोऽधिवासꣳ हिरण्यमित्यश्वायोपस्तृणन्ति यथा नान्यस्मै पशवे तस्मिन्नेनमधि संज्ञपयन्त्यन्यैरेवैनं तत्पशुभिर्व्याकुर्वन्ति ॥१॥ घ्नन्ति वाऽएतत्पशुम् । यदेनꣳ संज्ञपयन्ति प्राणाय स्वाहापानाय स्वाहा व्यानाय स्वाहेति संज्ञप्यमानऽआहुतीर्जुहोति प्राणानेवास्मिन्नेतद्दधाति तथो हास्यैतेन जीवतैव पशुनेष्टं भवति ॥२॥ अम्बेऽअम्बिकेऽम्बालिके । न मा नयति कश्चनेति पत्नीरुदानयत्यह्वतैवैना एतदथो मेध्या एवैनाः करोति ॥३॥ गणानां त्वा गणपतिꣳ हवामहऽइति । पत्न्यः परियन्त्यपह्नुवतऽएवास्माऽएतदतो न्वेवास्मै ह्नुवतेऽथो धुवतऽएवैनं त्रिः परियन्ति त्रयो वाऽइमे लोका एभिरेवैनं लोकैर्धुवते त्रिः पुनः परियन्ति षट् सम्पद्यन्ते षड्वाऽऋतव ऋतुभिरेवैनं धुवते ॥४॥ अप वाऽएतेभ्यः प्राणाः क्रामन्ति । ये यज्ञे धुवनं तन्वते नव कृत्वः परियन्ति नव वै प्राणाः प्राणानेवात्मन्दधते नैभ्यः प्राणा अपक्रामन्त्याहमजानि गर्भधमा त्वमजासि गर्भधमिति प्रजा वै पशवो गर्भः प्रजामेव पशूनात्मन्धत्ते ताऽउभौ चतुरः पदः सम्प्रसारयावेति मिथुनस्यावरुद्ध्यै स्वर्गे लोके प्रोर्णुवाथामित्येष वै स्वर्गो लोको यत्र पशुꣳ संज्ञपयन्ति तस्मादेवमाह वृषा वाजी रेतोधा रेतो द-

धाविति मिथुनस्यैवावरुद्ध्यै ॥५॥ ब्राह्मणम् ॥ २ [२. ८.] ॥ ॥

अप वाऽएतस्मात् । श्री राष्ट्रं क्रामति योऽश्वमेधेन यजते ॥१॥ ऊर्ध्वामेना-मुच्छ्रापयेति । श्रीर्वै राष्ट्रमश्वमेधः श्रियमेवास्मै राष्ट्रमूर्ध्वमुच्छ्रयति ॥२॥ गिरौ भारꣳ हरन्निवेति । श्रीर्वै राष्ट्रस्य भारः श्रियमेवास्मै राष्ट्रꣳ संनह्यत्यथो श्रियमेवास्मि-न्राष्ट्रमधिनिदधाति ॥३॥ अथास्यै मध्यमेधतामिति । श्रीर्वै राष्ट्रस्य मध्यꣳ श्रियमेव राष्ट्रे मध्यतोऽन्नाद्यं दधाति ॥४॥ शीते वाते पुनन्निवेति । क्षेमो वै राष्ट्रस्य शीतं क्षेममेवास्मै करोति ॥५॥ यकासकौ शकुन्तिकेति । विड्वै शकुन्तिकाहल-गिति वञ्चतीति विशो वै राष्ट्राय वञ्चन्त्याहन्ति गभे पसो निगल्गलीति धारके-ति विड्वै गभो राष्ट्रं पसो राष्ट्रमेव विश्याहन्ति तस्माद्राष्ट्री विशं घातुकः ॥६॥ माता च ते पिता च तऽइति । इयं वै मातासौ पितााभ्यामेवैनꣳ स्वर्गं लोकं गमयत्यग्रं वृक्षस्य रोहत इति श्रीर्वै राष्ट्रस्याग्रꣳ श्रियमेवैनꣳ राष्ट्रस्याग्रं गमयति प्रतिलामीति ते पिता गभे मुष्टिमतꣳसयदिति विड्वै गभो राष्ट्रं मुष्टी राष्ट्रमेव वि-श्याहन्ति तस्माद्राष्ट्री विशं घातुकः ॥७॥ यद्धरिणो यवमत्तीति । विड्वै यवो रा-ष्ट्रꣳ हरिणो विशमेव राष्ट्रायाद्यां करोति तस्माद्राष्ट्री विशमत्ति न पुष्टं पशु मन्यतऽइति तस्माद्राजा पशून्न पुष्यति शूद्रा यदर्यजारा न पोषाय धनायतीति तस्माद्वैशीपुत्रं नाभिषिञ्चति ॥८॥ अप वाऽएतेभ्यः प्राणाः क्रामन्ति । ये यज्ञेऽपू-तां वाचं वदन्ति दधिक्राव्णोऽअकारिषमिति सुरभिमतीमृचमन्ततोऽन्वाहुर्वाचमेव पुनते नैभ्यः प्राणा अपक्रामन्ति ॥९॥ ब्राह्मणम् ॥ ३ [२. ९.] ॥ ॥

यदसिपथान्कल्पयन्ति । सेतुमेव तꣳ संक्रमणं यजमानः कुरुते स्वर्गस्य लो-कस्य समष्ट्यै ॥१॥ सूचीभिः कल्पयन्ति । विशो वै सूच्यो राष्ट्रमश्वमेधो विशं चैवास्मिन्राष्ट्रं च समीची दधाति हिरण्मय्यो भवन्ति तस्योक्तं ब्राह्मणम् ॥२॥ त्रय्यः सूच्यो भवन्ति । लोहमय्यो रजता हरिण्यो दिशो वै लोहमय्योऽवान्तर-

दिशो रजता ऊर्ध्वा हरिण्यस्ताभिरेवैनं कल्पयन्ति तिरश्चीभिश्चोर्ध्वाभिश्च बहुरूपा भवन्ति तस्माद्बहुरूपा दिशो नानारूपा भवन्ति तस्मान्नानारूपा दिशः ॥३॥ ब्राह्मणम् ॥४ [२. १०.] ॥ ॥

प्रजापतिरकामयत । महान्भूयान्त्स्यामिति स एतावश्वमेधे महिमानौ ग्रहावपश्यत्तावजुहोत्ततो वै स महान्भूयानभवत्स यः कामयेत महान्भूयान्त्स्यामिति स एतावश्वमेधे महिमानौ ग्रहौ जुहुयान्महान्हैव भूयान्भवति ॥१॥ वपामभितो जुहोति । यजमानो वाऽअश्वमेधो राज्ञा महिमा राज्येनैवैनमुभयतः परिगृह्णाति पुरस्तात्स्वाहाकृतयो वाऽअन्ये देवा उपरिष्टात्स्वाहाकृतयोऽन्ये तानेवैतत्प्रीणाति स्वाहा देवेभ्यो देवेभ्यः स्वाहेति राज्ञा वपां परियजति ये चैवास्मिंल्लोके देवा यऽउ चामुष्मिंस्तानेवैतत्प्रीणाति तऽएनमुभये देवाः प्रीताः स्वर्गं लोकमभिवहन्ति ॥३॥ ब्राह्मणम् ॥ ५ [२.११.] ॥ द्वितीयोऽध्यायः [८५.] ॥ ॥

प्रजापतेरक्ष्यश्वयत् । तत्परापतत्ततोऽश्वः समभवद्यदश्वयत्तदश्वस्याश्वत्वं तद्देवा अश्वमेधेनैव प्रत्यदधुरेष ह वै प्रजापतिꣳ सर्वं करोति योऽश्वमेधेन यजते सर्व एव भवति सर्वस्य वाऽएषा प्रायश्चित्तिः सर्वस्य भेषजꣳ सर्वं वाऽएतेन पाप्मानं देवा अतरन्नपि वाऽएतेन ब्रह्महत्यामतरंस्तरति सर्वं पाप्मानं तरति ब्रह्महत्यां योऽश्वमेधेन यजते ॥१॥ उत्तरं वै तत्प्रजापतेरक्ष्यश्वयत् । तस्मादुत्तरतोऽश्वस्यावद्यन्ति दक्षिणतोऽन्येषां पशूनाम् ॥२॥ वैतसः कटो भवति । अप्सुयोनिर्वाऽअश्वोऽप्सुजा वेतसः स्वयैवैनं योन्या समर्धयति ॥३॥ चतुष्टोम स्तोमो भवति । सरड्ढ वाऽअश्वस्य सक्थ्यावृहत्तद्देवाश्चतुष्टोमेनैव स्तोमेन प्रत्यदधुर्यच्चतुष्टोम स्तोमो भवत्यश्वस्यैव सर्वत्वाय सर्वस्तोमोऽतिरात्र उत्तममहर्भवति सर्वं वै सर्वस्तोमोऽतिरात्रः सर्वमश्वमेधः सर्वस्याप्त्यै सर्वस्यावरुद्ध्यै ॥४॥ ब्राह्मणम् ॥ ६ [३.१.] ॥ ॥

परमेण वाऽएष स्तोमेन जित्वा । चतुष्टोमेन कृतेनायानामुत्तरेऽहन्नेकविꣳशे

प्रतिष्ठायां प्रतितिष्ठत्येकविꣳशात्प्रतिष्ठाया उत्तरमहर्ऋतूनन्वारोहत्यृतवो वै पृ-
ष्ठान्यृतवः संवत्सर ऋतुष्वेव संवत्सरे प्रतितिष्ठति ॥१॥ शक्वर्यः पृष्ठं भवन्ति ।
अन्यदन्यच्छन्दोऽन्येऽन्ये वाऽअत्र पशव आलभ्यन्तऽउतेव ग्राम्या उतेवारण्या य-
च्छक्वर्यः पृष्ठं भवन्त्यश्वस्यैव सर्वत्वायान्ये पशव आलभ्यन्तेऽन्येऽन्ये हि स्तोमाः
क्रियन्ते ॥२॥ तदाहुः । नैते सर्वे पशवो यदजावयश्चारण्याश्चैते वै सर्वे पशवो
यद्गव्या इति गव्या उत्तमेऽहन्नालभतऽएते वै सर्वे पशवो यद्गव्याः सर्वानेव प-
शूनालभते वैश्वदेवा भवन्ति वैश्वदेवो वाऽअश्वोऽश्वस्यैव सर्वत्वाय बहुरूपा भ-
वन्ति तस्माद्बहुरूपाः पशवो नानारूपा भवन्ति तस्मान्नानारूपाः पशवः ॥३॥
ब्राह्मणम् ॥७ [३. २.] ॥ ॥

यत्त्रयोऽनुष्टुभो भवन्ति । तस्मादश्वस्त्रिभिस्तिष्ठंस्तिष्ठति यच्चतस्रो गायत्र्यस्त-
स्मादश्वः सर्वैः पद्भिः प्रतिदधत्पलायते परमं वाऽएतच्छन्दो यदनुष्टुप्परमोऽश्वः
पशूनां परमश्चतुष्टोम स्तोमानां परमेणैवैनं परमतां गमयति ॥१॥ शक्वर्यः पृष्ठं
भवन्ति । अन्यदन्यच्छन्दोऽन्येऽन्ये हि स्तोमाः क्रियन्ते यच्छक्वर्यः पृष्ठं भवन्त्यश्व-
स्यैव सर्वत्वाय ॥१॥ एकविꣳशं मध्यममहर्भवति । असौ वाऽआदित्य एकविꣳशः
सोऽश्वमेधः स्वेनैवैनꣳ स्तोमेन स्वायां देवतायां प्रतिष्ठापयति ॥३॥ वामदेव्यं
मैत्रावरुणसाम भवति । प्रजापतिर्वै वामदेव्यं प्राजापत्योऽश्वः स्वयैवैनं देवतया
समर्धयति ॥४॥ पार्थुरश्मं ब्रह्मसाम भवति । रश्मिना वाऽअश्वो यत ईश्वरो वा
ऽअश्वोऽयतोऽधृतोऽप्रतिष्ठितः परां परावतं गन्तोर्यत्पार्थुरश्मं ब्रह्मसाम भवत्य-
श्वस्यैव धृत्यै ॥५॥ संकृत्यच्छावाकसाम भवति । उत्सन्नयज्ञ-इव वाऽएष यदश्व-
मेधः किं वा ह्येतस्य क्रियते किं वा न यत्संकृत्यच्छावाकसाम भवत्यश्वस्यैव स-
र्वत्वाय सर्वस्तोमोऽतिरात्र उत्तममहर्भवति सर्वं वै सर्वस्तोमोऽतिरात्रः सर्वमश्व-
मेधः सर्वस्याप्त्यै सर्वस्यावरुद्ध्यै ॥६॥ एकविꣳशोऽग्निर्भवति । एकविꣳश स्तोम

एकविꣳशतिर्यूपा यथा वाऽऋषभा वा वृषाणो वा संस्फुरेरन्नेवमेते स्तोमा समृच्छन्ते यदेकविꣳशास्तान्यत्समर्पयेदार्तिमार्छेद्यजमानो हन्येतास्य यज्ञः ॥७॥ द्वादश एवाग्निः स्यात् । एकादश यूपा यद्द्वादशोऽग्निर्भवति द्वादश मासाः संवत्सरः संवत्सरमेव यज्ञमाप्नोति यदेकादश यूपा विराड्वाऽएषा संमीयते यदेकादशिनी तस्यै य एकादश स्तन एवास्यै स दुह्रऽएवैनां तेन ॥८॥ तदाहुः । यद्द्वादशोऽग्निः स्यादेकादश यूपा यथा स्थूरिणा यायात्तादृक्तदित्येकविꣳश एवाग्निर्भवत्येकविꣳश स्तोम एकविꣳशतिर्यूपास्तद्यथा प्रष्टिभिर्यायात्तादृक्तत् ॥९॥ शिरो वाऽएतद्यज्ञस्य यदेकविꣳशः । यो वाऽअश्वमेधे त्रीणि शीर्षाणि वेद शिरो ह राज्ञां भवत्येकविꣳशोऽग्निर्भवत्येकविꣳश स्तोम एकविꣳशतिर्यूपा एतानि वाऽअश्वमेधे त्रीणि शीर्षाणि तानि य एवं वेद शिरो ह राज्ञां भवति यो वाऽअश्वमेधे तिस्रः ककुदो वेद ककुद्ध राज्ञां भवत्येकविꣳशोऽग्निर्भवत्येकविꣳश स्तोम एकविꣳशतिर्यूपा एता वाऽअश्वमेधे तिस्रः ककुदस्ता य एवं वेद ककुद्ध राज्ञां भवति ॥१०॥ ब्राह्मणम् ॥८ [३. ३.] ॥ ॥

सर्वाभ्यो वै देवताभ्योऽश्व आलभ्यते । यत्प्राजापत्यं कुर्याद्या देवता अपिभागास्ता भागधेयेन व्यर्धयेच्छादं दद्भिरवकां दन्तमूलैरित्याज्यमवदाना कृत्वा प्रत्याख्यायं देवताभ्य आहुतीर्जुहोति या एव देवता अपिभागास्ता भागधेयेन समर्धयत्यरण्येऽनूच्यान्हुत्वा द्यावापृथिव्यामुत्तमामाहुतिं जुहोति द्यावापृथिव्योर्वै सर्वा देवताः प्रतिष्ठितास्ता एवैतत्प्रीणाति देवासुराः संयत्ता आसन् ॥१॥ तेऽब्रुवन् । अग्नयः स्विष्टकृतोऽश्वस्य वयमुद्धारमुद्धरामहै तेनासुरानभिभविष्याम इति ते लोहितमुदहरन्त भ्रातृव्याभिभूत्यै यत्स्विष्टकृद्भ्यो लोहितं जुहोति भ्रातृव्याभिभूत्यै भवत्यात्मना परास्य द्विषन्भ्रातृव्यो भवति य एवं वेद ॥२॥ गोमृगकण्ठेन प्रथमामाहुतिं जुहोति । पशवो वै गोमृगा रुद्रः स्विष्टकृत्पशूनेव रुद्रादन्तर्दधाति

तस्माद्यत्रैषाश्वमेधऽआहुतिर्हूयते न तत्र रुद्रः पशूनभिमन्यते ॥३॥ अश्वशफेन द्वितीयामाहुतिं जुहोति । पशवो वाऽएकशफा रुद्रः स्विष्टकृत्पशू॰ ॥४॥ अयस्मयेन चरुणा तृतीयामाहुतिं जुहोति । आयस्यो वै प्रजा रुद्रः स्विष्टकृत्प्रजा एव रुद्रादन्तर्दधाति तस्माद्यत्रैषाश्वमेधऽआहुतिर्हूयते न तत्र रुद्रः प्रजा अभिमन्यते ॥५॥ ब्राह्मणम् ॥९ [३. ४.] ॥ ॥

सर्वेषु वै लोकेषु । मृत्यवोऽन्वायत्तास्तेभ्यो यदाहुतीर्न जुहुयाल्लोके-लोकऽएनं मृत्युर्विन्देद्यन्मृत्युभ्य आहुतीर्जुहोति लोके-लोकऽएव मृत्युमपजयति ॥१॥ तदाहुः । यदमुष्मै स्वाहामुष्मै स्वाहेति जुहुयात्संचक्षीत बहुं मृत्युममित्रं कुर्वीत मृत्यवऽआत्मानमपिदध्यादिति मृत्यवे स्वाहेत्येकस्माऽएवैकामाहुतिं जुहोत्येको ह वाऽअमुष्मिँल्लोके मृत्युरशनायैव तमेवामुष्मिँल्लोकेऽपजयति ॥२॥ ब्रह्महत्यायै स्वाहेति द्वितीयामाहुतिं जुहोति । अमृत्युर्ह वाऽअन्यो ब्रह्महत्यायै मृत्युरेष ह वै साक्षान्मृत्युर्यद्ब्रह्महत्या साक्षादेव मृत्युमपजयति ॥३॥ एतꣳ ह वै मुण्डिभ औदन्यः । ब्रह्महत्यायै प्रायश्चित्तिं विदां चकार यद्ब्रह्महत्यायाऽआहुतिं जुहोति मृत्युमेवाहुत्या तर्पयित्वा परिपाणं कृत्वा ब्रह्मघ्ने भेषजं करोति तस्माद्यस्यैषाश्वमेधऽआहुतिर्हूयतेऽपि योऽस्यापरीषु प्रजायां ब्राह्मणꣳ हन्ति तस्मै भेषजं करोति ॥४॥ ब्राह्मणम् ॥१० [३. ५.] ॥ ॥

अश्वस्य वाऽआलब्धस्य । मेध उदक्रामत्तदश्वस्तोमीयमभवद्यदश्वस्तोमीयं जुहोत्यश्वमेव मेधसा समर्धयति ॥१॥ आज्येन जुहोति । मेधो वाऽआज्यं मेधोऽश्वस्तोमीयं मेधसैवास्मिंस्तन्मेधो दधात्याज्येन जुहोत्येतद्वै देवानां प्रियं धाम यदाज्यं प्रियेणैवैनान्धाम्ना समर्धयति ॥२॥ अश्वस्तोमीयꣳ हुत्वा द्विपदा जुहोति । अश्वो वाऽअश्वस्तोमीयं पुरुषो द्विपदा द्विपाद्वै पुरुषो द्विप्रतिष्ठस्तदेनं प्रतिष्ठया समर्धयति ॥३॥ तदाहुः । अश्वस्तोमीयं पूर्वꣳ होतव्यां३ द्विपदा३ इति पशवो वा

ऽअश्वस्तोमीयं पुरुषो द्विपदा यदश्वस्तोमीयꣳ हुत्वा द्विपदा जुहोति तस्मात्पुरुष उपरिष्टात्पशूनधितिष्ठति ॥४॥ षोडशाश्वस्तोमीया जुहोति । षोडशकला वै पशवः सा पशूनां मात्रा पशूनेव मात्रया समर्धयति यत्कनीयसीर्वा भूयसीर्वा जुहुयात्पशून्मात्रया व्यर्धयेत्षोडश जुहोति षोडशकला वै पशवः सा पशूनां मात्रा पशूनेव मात्रया समर्धयति नान्यामुत्तमामाहुतिं जुहोति यदन्यामुत्तमामाहुतिं जुहुयात्प्रतिष्ठायै च्यवेत द्विपदा उत्तमा जुहोति प्रतिष्ठा वै द्विपदाः प्रत्येव तिष्ठति जुम्बकाय स्वाहेत्यवभृथऽउत्तमामाहुतिं जुहोति वरुणो वै जुम्बकः साक्षादेव वरुणमवयजते शुक्लस्य खलतेर्विक्लिधस्य पिङ्गाक्षस्य मूर्धनि जुहोत्येतद्वै वरुणस्य रूपꣳ रूपेणैव वरुणमवयजते ॥५॥ द्वादश ब्रह्मौदनानुत्थाय निर्वपति । द्वादशभिर्वेष्टिभिर्यजते तदाहुर्यज्ञस्य वाऽएतद्रूपं यदिष्टयो यदिष्टिभिर्यजेतोपनामुक एनं यज्ञः स्यात्पापीयांस्तु स्याद्यातयामानि वाऽएतदीजानस्य छन्दाꣳसि भवन्ति तानि किमेतावदाशु प्रयुञ्जीत सर्वा वै सꣳस्थिते यज्ञे वागाप्यते सात्राप्ता यातयाम्नी भवति क्रूरीकृतेव हि भवत्यरुष्कृता वाग्वै यज्ञस्तस्मान्न प्रयुञ्जीतेति ॥६॥ द्वादशैव ब्रह्मौदनानुत्थाय निर्वपेत् । प्रजापतिर्वाऽओदनः प्रजापतिः संवत्सरः प्रजापतिर्यज्ञः संवत्सरमेव यज्ञमाप्नोत्युपनामुक एनं यज्ञो भवति न पापीयान्भवति ॥७॥ ब्राह्मणम् ॥११ [३. ६.] ॥ ॥

एष वै प्रभूर्नाम यज्ञः । यत्रैतेन यज्ञेन यजन्ते सर्वमेव प्रभूतं भवति ॥१॥ एष वै विभूर्नाम यज्ञः । यत्रैतेन यज्ञेन यजन्ते सर्वमेव विभूतं भवति ॥२॥ एष वै व्यष्टिर्नाम यज्ञः । यत्रैतेन यज्ञेन यजन्ते सर्वमेव व्यष्टं भवति ॥३॥ एष वै विधृतिर्नाम यज्ञः । यत्रैतेन यज्ञेन यजन्ते सर्वमेव विधृतं भवति ॥४॥ एष वै व्यावृत्तिर्नाम यज्ञः । यत्रैतेन यज्ञेन यजन्ते सर्वमेव व्यावृत्तं भवति ॥५॥ एष वै वाऽऊर्जस्वान्नाम यज्ञः । यत्रैतेन यज्ञेन यजन्ते सर्वमेवोर्जस्वद्भवति ॥६॥ एष वै

पयस्वान्नाम यज्ञः । यत्रैतेन यज्ञेन यजन्ते सर्वमेव पयस्वद्भवति ॥७॥ एष वै ब्रह्मवर्चसी नाम यज्ञः । यत्रैतेन यज्ञेन यजन्तऽआ ब्राह्मणो ब्रह्मवर्चसी जायते ॥८॥ एष वाऽअतिव्याधी नाम यज्ञः । यत्रैतेन यज्ञेन यजन्तऽआ राजन्योऽतिव्याधी जायते ॥९॥ एष वै दीर्घो नाम यज्ञः । यत्रैतेन यज्ञेन यजन्तऽआ दीर्घारण्यं जायते ॥१०॥ एष वै क्लृप्तिर्नाम यज्ञः । यत्रैतेन यज्ञेन यजन्ते सर्वमेव क्लृप्तं भवति ॥११॥ एष वै प्रतिष्ठा नाम यज्ञः । यत्रैतेन यज्ञेन यजन्ते सर्वमेव प्रतिष्ठितं भवति ॥१२॥ ब्राह्मणम् ॥१२ [३. ७.] ॥ ॥

अथातः प्रायश्चित्तीनाम् । यद्यश्वो वडवाᳬ स्कन्देद्वायव्यं पयोऽनुनिर्वपेद्वायुर्वै रेतसां विकर्ता प्राणो वै वायुः प्राणो हि रेतसां विकर्ता रेतसैवास्मिंस्तद्रेतो दधाति ॥१॥ अथ यदि स्रामो विन्देत् । पौष्णं चरुमनुनिर्वपेत्पूषा वै पशूनामीष्टे स यस्यैव पशवो यः पशूनामीष्टे तमेवैतत्प्रीणात्यगदो हैव भवति ॥२॥ अथ यद्यन्ततामयो विन्देत् । वैश्वानरं द्वादशकपालं भूमिकपालं पुरोडाशमनुनिर्वपेदियं वै वैश्वानर इमामेवैतत्प्रीणात्यगदो हैव भवति ॥३॥ अथ यद्यक्ष्यामयो विन्देत् । सौर्यं चरुमनुनिर्वपेत्सूर्यो वै प्रजानां चक्षुर्यदा ह्येवैष उदेत्यथेदᳬ सर्वं चरति चक्षुषैवास्मिंस्तच्चक्षुर्दधाति स यच्चरुर्भवति चक्षुषा ह्ययमात्मा चरति ॥४॥ अथ यद्युदके म्रियेत । वारुणं यवमयं चरुमनुनिर्वपेद्वरुणो वाऽएतं गृह्णाति योऽप्सु म्रियते स यैवैनं देवता गृह्णाति तामेवैतत्प्रीणाति सास्मै प्रीतान्यमालम्भायानुमन्यते तयानुमतमालभते स यद्यवमयो भवति वरुण्या हि यवाः ॥५॥ अथ यदि नश्येत् । त्रिहविषमिष्टिमनुनिर्वपेद्द्यावापृथिव्यमेककपालं पुरोडाशं वायव्यं पयः सौर्यं चरुं यद्धि किं च नश्यत्यन्तरैव तद्द्यावापृथिवी नश्यति तद्वायुरुपवात्यादित्योऽभितपति नैताभ्यो देवताभ्य ऋते किं चन नश्यति सैषा पृथगेव नष्टवेदनी स यद्यस्याप्यन्यन्नश्येदेतयैव यजेतानु हैवैनद्विन्दत्यथ यद्यमित्रा अश्वं

विन्देरन्यदि वा म्रियेत यदि वाप्स्वन्यमानीय प्रोक्षेयुः सैव तत्र प्रायश्चित्तिः ॥६॥ ब्राह्मणम् ॥१३ [३. ८.] ॥ तृतीयो ध्यायः [८६.] ॥ ॥

प्रजापतिरकामयत । सर्वान्कामानाप्नुयाꣳ सर्वा व्यष्टीर्व्यश्नुवीयेति स एतमश्वमेधं त्रिरात्रं यज्ञक्रतुमपश्यत्तमाहरत्तेनायजत तेनेष्ट्वा सर्वान्कामानाप्नोत्सर्वा व्यष्टीर्व्याश्नुत सर्वान्ह वै कामानाप्नोति सर्वा व्यष्टीर्व्यश्नुते योऽश्वमेधेन यजते ॥१॥ तदाहुः । कस्मिन्नृतावभ्यारम्भ इति ग्रीष्मेऽभ्यारभेतेत्यु हैकऽआहुर्ग्रीष्मो वै क्षत्रियस्यर्तुः क्षत्रिययज्ञ उ वाऽएष यदश्वमेध इति ॥२॥ तद्वै वसन्तऽएवाभ्यारभेत । वसन्तो वै ब्राह्मणस्यर्तुर्य उ वै कश्च यजते ब्राह्मणीभूयेवैव यजते तस्माद्वसन्तऽएवाभ्यारभेत ॥३॥ सा यासौ फाल्गुनी पौर्णमासी भवति । तस्यै पुरस्तात्षडहे वा सप्ताहे वऽर्त्विज उपसमायन्त्यध्वर्युश्च होता च ब्रह्मा चोद्गाता चैतान्वाऽअन्वन्यऽऋत्विजः ॥४॥ तेभ्योऽध्वर्युश्चातुष्प्राश्यं ब्रह्मौदनं निर्वपति । तस्योक्तं ब्राह्मणं चतुरः पात्रांश्चतुरोऽञ्जलींश्चतुरः प्रसृतान्द्वादशविधं द्वादश मासाः संवत्सरः सर्वꣳ संवत्सरः सर्वमश्वमेधः सर्वस्याप्त्यै सर्वस्यावरुद्ध्यै ॥५॥ तमेते चत्वार ऋत्विजः प्राश्नन्ति । तेषामुक्तं ब्राह्मणं तेभ्यश्चत्वारि सहस्राणि ददाति सर्वं वै सहस्रꣳ सर्वमश्वमेधः सर्वस्याप्त्यै सर्वस्यावरुद्ध्यै चत्वारि च सुवर्णानि शतमानानि हिरण्यानि तस्योऽएवोक्तम् ॥६॥ अथास्माऽअध्वर्युर्निष्कं प्रतिमुञ्चन्वाचयति । तेजोऽसि शुक्रममृतमिति तेजो वै शुक्रममृतꣳ हिरण्यं तेज एवास्मिञ्छुक्रममृतं दधात्यायुष्पा आयुर्मे पाहीत्यायुरेवास्मिन्दधात्यथैनमाह वाचं यच्छेति वाग्वै यज्ञो यज्ञस्यैवाभ्यारम्भाय ॥७॥ चतस्रो जाया उपक्लृप्ता भवन्ति । महिषी वावाता परिवृक्ता पालागली सर्वा निष्किन्योऽलङ्कृता मिथुनस्यैव सर्वत्वाय ताभिः सहाग्न्यगारं प्रपद्यते पूर्वया द्वारा यजमानो दक्षिणया पत्न्यः ॥८॥ सायमाहुत्याꣳ हुतायाम् । जघनेन गार्हपत्यमुदङ्ङावातया सह संविशति तदेवापीतराः संविशन्ति

सोऽन्तरोरूऽअसंवर्तमानः शेतेऽनेन तपसा स्वस्ति संवत्सरस्योदृचꣳ समश्नवाऽइति ॥९॥ प्रातराहुत्याꣳ हुतायाम् । अध्वर्युः पूर्णाहुतिं जुहोति सर्वं वै पूर्णꣳ सर्वमश्वमेधः सर्वस्याप्त्यै सर्वस्यावरुद्ध्यै तस्यां वरेण वाचं विसृजते वरं ददामि ब्रह्मणऽइति सर्वं वै वरः सर्वमश्वमेधः सर्वस्याप्त्यै सर्वस्यावरुद्ध्यै ॥१०॥ ॥ शतम् ६६०० ॥ ॥ अथ योऽस्य निष्कः प्रतिमुक्तो भवति । तमध्वर्यवे ददात्यध्वर्यवे दददमृतमायुरात्मन्धत्तेऽमृतꣳ ह्यायुर्हिरण्यम् ॥११॥ अथाग्नेयीमिष्टिं निर्वपति । पथश्च कामाय यज्ञमुखस्य चाछम्बट्कारायाथोऽअग्निमुखा उ वै सर्वा देवताः सर्वे कामा अश्वमेधे मुखतः सर्वान्देवान्प्रीत्वा सर्वान्कामानाप्नवानीति ॥१२॥ तस्यै पञ्चदश सामिधेन्यो भवन्ति । पञ्चदशो वै वज्रो वीर्यं वज्रो वज्रेणैवैतद्वीर्येण यजमानः पुरस्तात्पाप्मानमपहते वार्त्रघ्नावाज्यभागौ पाप्मा वै वृत्रः पाप्मनोऽपहत्याऽअग्निर्मूर्धा दिवः ककुद्भुवो यज्ञस्य रजसश्च नेतेत्युपांशु हविषो याज्यानुवाक्ये मूर्धन्वत्यन्या भवति सद्वत्यन्यैष वै मूर्धा य एष तपत्येतस्यैवावरुद्ध्याऽअथ यत्सद्वती सदेवावरुन्द्धे विराजौ संयाज्ये सर्वदेवत्यं वाऽएतच्छन्दो यद्विराट् सर्वे कामा अश्वमेधे सर्वान्देवान्प्रीत्वा सर्वान्कामानाप्नवानीति हिरण्यं दक्षिणा सुवर्णꣳ शतमानं तस्योक्तं ब्राह्मणम् ॥१३॥ अथ पौष्णीं निर्वपति । पूषा वै पथीनामधिपतिरश्वायैवैतत्स्वस्त्ययनं करोत्यथोऽइयं वै पूषेमामेवास्माऽएतद्गोप्त्रीं करोति तस्य हि नार्तिरस्ति न ह्वला य।मयमध्वन्गोपायतीमामेवास्माऽएतद्गोप्त्रीं करोति ॥१४॥ तस्यै सप्तदश सामिधेन्यो भवन्ति । सप्तदशो वै प्रजापतिः प्रजापतिरश्वमेधोऽश्वमेधस्यैवाप्त्यै वृधन्वन्तावाज्यभागौ यजमानस्यैव वृद्ध्यै पूषंस्तव व्रते वयं पथस्पथः परिपतिं वचस्येत्युपांशु हविषो याज्यानुवाक्ये व्रतवत्यन्या भवति पथन्वत्यन्या वीर्यं वै व्रतं वीर्यस्याप्त्यै वीर्यस्यावरुद्ध्याऽअथ यत्पथन्वत्यश्वायैवैतत्स्वस्त्ययनं करोत्यनुष्टुभौ संयाज्ये वाग्वाऽअनुष्टुब्वाग्वै प्रजापतिः प्र-

जापतिरश्वमेधोऽश्वमेधस्यैवाप्त्यै वासःशतं दक्षिणा रूपं वाऽएतत्पुरुषस्य यद्वासस्त-
स्माद्यमेव कं च सुवाससमाहुः को न्वयमिति रूपसमृद्धो हि भवति रूपेणैवैनꣳ
समर्धयति शतं भवति शतायुर्वै पुरुषः शतेन्द्रिय आयुरेवेन्द्रियं वीर्यमात्मन्धत्ते
॥ १५ ॥ ब्राह्मणम् ॥ १४ [४. १.] ॥ ॥

एतस्यां तायमानायाम् । अश्वं निक्तोदानयन्ति यस्मिन्त्सर्वाणि रूपाणि भवन्ति
यो वा जवसमृद्धः सहस्रार्हः पूर्व्यो यो दक्षिणायां धुर्यप्रतिधुरः ॥ १ ॥ तद्यत्सर्वरूपो
भवति । सर्वं वै रूपꣳ सर्वमश्वमेधः सर्वस्याप्त्यै सर्वस्यावरुद्ध्याऽअथ यज्जवसमृद्धो
वीर्यं वै जवो वीर्यस्याप्त्यै वीर्यस्यावरुद्ध्याऽअथ यत्सहस्रार्हः सर्वं वै सहस्रꣳ सर्व-
मश्वमेधः सर्वस्याप्त्यै सर्वस्यावरुद्ध्याऽअथ यत्पूर्व्य एष वाऽअपरिमितं वीर्यमभि-
वर्धते यत्पूर्व्योऽपरिमितस्यैव वीर्यस्यावरुद्ध्याऽअथ यद्दक्षिणायां धुर्यप्रतिधुर एष
वाऽएष य एष तपति न वाऽएतं कश्चन प्रतिप्रतिरेतस्यैवावरुद्ध्यै ॥ २ ॥ तदु
होवाच भाल्लबेयो । द्विरूप एवैषोऽश्वः स्यात्कृष्णसारंगः प्रजापतेर्वाऽएषोऽक्ष्णः
समभवद्द्विरूपं वाऽइदं चक्षुः शुक्लं चैव कृष्णं च तदेनꣳ स्वेन रूपेण समर्धयतीति
॥ ३ ॥ अथ होवाच सात्ययज्ञिः । त्रिरूप एवैषोऽश्वः स्यात्तस्य कृष्णः पूर्वार्धः शु-
क्लोऽपरार्धः कृत्तिकाञ्जिः पुरस्तात्तद्यत्कृष्णः पूर्वार्धो भवति यदेवेदं कृष्णमक्ष्णस्त-
दस्य तदथ यच्छुक्लोऽपरार्धो यदेवेदꣳ शुक्लमक्ष्णस्तदस्य तदथ यत्कृत्तिकाञ्जिः पुर-
स्तात्सा कनीनका स एव रूपसमृद्धोऽतो यतमोऽस्योपकल्पेत बहुरूपो वा द्वि-
रूपो वा त्रिरूपो वा कृत्तिकाञ्जिस्तमालभेत जवेन त्वेव समृद्धः स्यात् ॥ ४ ॥ त-
स्यैते पुरस्ताद्रक्षितार उपक्लृप्ता भवन्ति । राजपुत्राः कवचिनः शतꣳ राजन्या नि-
षङ्गिणः शतꣳ सूतग्रामण्यां पुत्रा इषुपर्षिणः शतं क्षात्त्रसंग्रहीतॄणां पुत्रा दण्डिनः
शतमश्वशतं निरष्टं निरमणं यस्मिन्नेनमपिसृज्य रक्षन्ति ॥ ५ ॥ अथ सावित्रीमिष्टिं
निर्वपति । सवित्रे प्रसवित्रे द्वादशकपालं पुरोडाशꣳ सविता वै प्रसविता सवि-

ता मऽइमं यज्ञं प्रसुवादिति ॥६॥ तस्यै पञ्चदश सामिधेन्यो भवन्ति । वार्त्रघ्ना-
वाज्यभागौ यऽइमा विश्वा जातान्या देवो यातु सविता सुरत्न इत्युपाᳫंशु हवि-
षो याज्यानुवाक्ये विराजौ संयाज्ये हिरण्यं दक्षिणा सुवर्णᳫं शतमानं तस्योक्तं
ब्राह्मणम् ॥७॥ तस्यै प्रयाजेषु तायमानेषु । ब्राह्मणो वीणागाथी दक्षिणत उत्त-
रमन्द्रामुदाघ्नंस्तिस्रः स्वयᳫंसम्भृता गाथा गायतीत्ययजतेत्यददादिति तस्योक्तं ब्राह्म-
णम् ॥८॥ अथ द्वितीयां निर्वपति । सवित्रऽआसवित्रे द्वादशकपालं पुरोडाशᳫं
सविता वाऽआसविता सविता मऽइमं यज्ञमासुवादिति ॥९॥ तस्यै सप्तदश सा-
मिधेन्यो भवन्ति । सद्वन्तावाज्यभागौ सदेवावरुन्द्धे विश्वानि देव सवितः स घा
नो देवः सविता सहावेत्युपाᳫंशु हविषो याज्यानुवाक्येऽअनुष्टुभौ संयाज्ये रज-
तᳫं हिरण्यं दक्षिणा नानारूपतायाऽअथोऽउत्क्रमायानपक्रमाय शतमानं भवति
शतायुर्वै पुरुषः शतेन्द्रिय आयुरेवेन्द्रियं वीर्यमात्मन्धत्ते ॥१०॥ तस्यै प्रयाजेषु
तायमानेषु । ब्राह्मणो वीणा° ॥११॥ अथ तृतीयां निर्वपति । सवित्रे सत्यप्रस-
वाय द्वादशकपालं पुरोडाशमेष ह वै सत्यः प्रसवो यः सवितुः सत्येन मे प्रस-
वेनेमं यज्ञं प्रसुवादिति ॥१२॥ तस्यै सप्तदशैव सामिधेन्यो भवन्ति । रयिमन्ता-
वाज्यभागौ वीर्यं वै रयिर्वीर्यस्याप्त्यै वीर्यस्यावरुद्ध्याऽआ विश्वदेवᳫं सत्पतिं न
प्रमिये सवितुर्दैव्यस्य तदित्युपाᳫंशु हविषो याज्यानुवाक्ये नित्ये संयाज्ये नेद्यज्ञ-
पथादयानीति क्लृप्तऽएव यज्ञेऽन्ततः प्रतितिष्ठति त्रिष्टुभौ भवत इन्द्रे वै वीर्यं त्रि-
ष्टुबिन्द्रियस्यैव वीर्यस्यावरुद्ध्यै हिरण्यं दक्षिणा सुवर्णᳫं शतमानं तस्योक्तं ब्राह्म-
णम् ॥१३॥ तस्यै प्रयाजेषु तायमानेषु । ब्राह्मणो वीणा° ॥१४॥ एतस्याᳫं सᳫं-
स्थितायाम् । उपोत्थायाध्वर्युश्च यजमानश्चाश्वस्य दक्षिणे कर्णऽआजपतो विभूर्मात्रा
प्रभूः पित्रेति तस्योक्तं ब्राह्मणमथैनमुदञ्चं प्राञ्चं प्रसृजत एषा ह्युभयेषां देवमनु-
ष्याणां दिग्यदुदीची प्राची स्वायामेवैनं तद्दिशि धत्तो न वै स्वऽआयतने प्रति-

ष्ठितो रिष्यत्यरिष्ट्यै ॥१५॥ स आह देवा आशापालाः । एतं देवेभ्यो ऽश्वं मेधाय प्रोक्षितꣳ रक्षतेत्युक्ता मानुषा आशापाला अथैते देवा आप्याः साध्या अन्वाध्या मरुतस्तमेत ऽउभये देवमनुष्याः संविदाना अप्रत्यावर्तयन्तः संवत्सरꣳ रक्षन्ति तस्य न प्रत्यावर्तयन्त्येष वा ऽएष य एष तपति क उ ह्येतमर्हति प्रत्यावर्तयितुं यद्ध्येनं प्रत्यावर्तयेयुः परागेवेदꣳ सर्वꣳ स्यात्तस्मादप्रत्यावर्तयन्तो रक्षन्ति ॥१६॥ स आहाशापालाः । ये वा ऽएतस्योदृचं गमिष्यन्ति राष्ट्रं ते भविष्यन्ति राजानो भविष्यन्त्यभिषेचनीया अथ य ऽएतस्योदृचं न गमिष्यन्त्यराष्ट्रं ते भविष्यन्त्यराजानो भविष्यन्ति राजन्या विशो ऽनभिषेचनीयास्तस्मान्मा प्रमदत स्नावाच्चैवैनमुदकान्निरुन्धीध्वं वडवाभ्यश्च ते यद्यद्ब्राह्मणजातमुपनिगच्छेत तत्तत्पृच्छेत ब्राह्मणाः कियद्यूयमश्वमेधस्य वित्थेति ते ये न विद्युर्जिनीयात तान्त्सर्वं वा ऽअश्वमेधः सर्वस्यैष न वेद यो ब्राह्मणः सन्नश्वमेधस्य न वेद सो ऽब्राह्मणो ज्येय एव स पानं करवाथ खादं निवपाथाथ यत्किं च जनपदे कृतान्नꣳ सर्वं वस्तत्सुतं तेषाꣳ रथकारकुल ऽएव वो वसतिस्तद्ध्यश्वस्यायतनमिति ॥१७॥ ब्राह्मणम् ॥१५ [४.२.] ॥ द्वितीयः प्रपाठकः ॥ कण्डिकासंख्या ११७ ॥ ॥

प्रमुच्याश्वं दक्षिणेन वेदिꣳ । हिरण्मयं कशिपूपस्तृणाति तस्मिन्होतोपविशति दक्षिणेन होतारꣳ हिरण्मये कूर्चे यजमानो दक्षिणतो ब्रह्मा चोद्गाता च हिरण्मय्योः कशिपुनोः पुरस्तात्प्रत्यङ्ङध्वर्युर्हिरण्मये वा कूर्चे हिरण्मये वा फलके ॥१॥ समुपविष्टेष्वध्वर्युः सम्प्रेष्यति । होतर्भूतान्याचक्ष्व भूतेष्विमं यजमानमध्यूहेति सम्प्रेषितो होताध्वर्युमामन्त्रयते पारिप्लवमाख्यानमाख्यास्यन्नध्वर्यविति हवै होतरित्यध्वर्युः ॥२॥ मनुर्वैवस्वतो राजेत्याह । तस्य मनुष्या विशस्त ऽइम ऽआसत ऽइत्यश्रोत्रिया गृहमेधिन उपसमेता भवन्ति तानुपदिशत्यृचो वेदः सो ऽयमित्यृचाꣳ सूक्तं व्याचक्षाण ऽइवानुद्रवेद्वीणागणगिन उपसमेता भवन्ति तानध्वर्युः सम्प्रे-

ष्यति वीणागणगिन इत्याह पुराणैरिमं यजमानꣳ राजभिः साधुकृद्भिः संगायतेति
तं ते तथा संगायन्ति तद्यदेनमेवꣳ संगायन्ति पुराणैरेवैनं तद्राजभिः साधुकृद्भिः
सलोकं कुर्वन्ति ॥३॥ सम्प्रेष्याध्वर्युः प्रक्रमाञ्जुहोति । अन्वाहार्यपचने वाश्वस्य
वा पदे परिलिख्य यतरथास्य तत्रावृद्भवति पूर्वा त्वेव स्थितिः ॥४॥ सावित्र्या
एवेष्टिः । पुरस्तादनुद्रुत्य सकृदेव रूपाण्याहवनीये जुहोत्यथ सायं धृतिषु हूय-
मानासु राजन्यो वीणागाथी दक्षिणत उत्तरमन्द्रामुदाघ्नंस्तिस्रः स्वयꣳसम्भृता गा-
था गायतीत्ययुध्यतेत्यमुꣳ संग्राममजयदिति तस्योक्तं ब्राह्मणम् ॥५॥ अथ श्वो
भूते द्वितीयेऽहन् । एवमेवैतासु सावित्रीष्विष्टिषु सꣳस्थितास्वेषैवावृदध्वर्यविति
हवै होतरित्येवाध्वर्युर्यमो वैवस्वतो राजेत्याह तस्य पितरो विशस्तऽइमऽआ-
सतऽइति स्थविरा उपसमेता भवन्ति तानुपदिशति यजूꣳषि वेदः सोऽयमिति य-
जुषामनुवाकं व्याचक्षाण-इवानुद्रवेदेवमेवाध्वर्युः सम्प्रेष्यति न प्रक्रमाञ्जुहोति
॥६॥ अथ तृतीयेऽहन् । एवमेवैतास्विष्टिषु सꣳस्थितास्वेषैवावृदध्वर्यविति हवै
होतरित्येवाध्वर्युर्वरुण आदित्यो राजेत्याह तस्य गन्धर्वा विशस्तऽइमऽआसत
ऽइति युवानः शोभना उपसमेता भवन्ति तानुपदिशत्यथर्वाणो वेदः सोऽयमि-
त्यथर्वणामेकं पर्व व्याचक्षाण-इवानुद्रवेदेवमेवाध्वर्युः सम्प्रेष्यति न प्रक्रमाञ्जुहो-
ति ॥७॥ अथ चतुर्थेऽहन् । एवमेवैतास्विष्टिषु सꣳस्थितास्वेषैवावृदध्वर्यविति
हवै होतरित्येवाध्वर्युः सोमो वैष्णवो राजेत्याह तस्याप्सरसो विशस्ता इमा आ-
सतऽइति युवतयः शोभनाः उपसमेता भवन्ति ता उपदिशत्यङ्गिरसो वेदः सो
यमित्यङ्गिरसामेकं पर्व व्याचक्षाण-इवानुद्र० ॥८॥ अथ पञ्चमेऽहन् । एवमेवैता-
स्विष्टिषु सꣳस्थितास्वेषैवावृदध्वर्यविति हवै होतरित्येवाध्वर्युरर्बुदः काद्रवेयो रा-
जेत्याह तस्य सर्पा विशस्तऽइमऽआसतऽइति सर्पाश्च सर्पविदश्चोपसमेता भव-
न्ति तानुपदिशति सर्पविद्या वेदः सोऽयमिति सर्पविद्याया एकं पर्व व्याचक्षाण-

इवानुद्र° ॥९॥ अथ षष्ठेऽहन्। एवमेवैतास्विष्टिषु सꣳस्थितास्वेषैवावृदध्वर्यवि-
ति हवै होतरित्येवाध्वर्युः कुबेरो वैश्रवणो राजेत्याह तस्य रक्षाꣳसि विशस्ता-
नीमान्यासतऽइति सेलगाः पापकृत उपसमेता भवन्ति तानुपदिशति देवजनवि-
द्या वेदः सोऽयमिति देवजनविद्याया एकं पर्व व्याचक्षाण-इवानुद्र° ॥१०॥ अथ
सप्तमेऽहन्। एवमेवैतास्विष्टिषु सꣳस्थितास्वेषैवावृदध्वर्यविति हवै होतरित्ये-
वाध्वर्युरसितो धान्वो राजेत्याह तस्यासुरा विशस्तऽइमऽआसतऽइति कुसीदिन
उपसमेता भवन्ति तानुपदिशति माया वेदः सोऽयमिति कांचिन्मायां कुर्यादेवमे-
वाध्वर्युः सम्प्रेष्यति न प्रक्रमान्जुहोति ॥११॥ अथाष्टमेऽहन्। एवमेवैतास्विष्टिषु
सꣳस्थितास्वेषैवावृदध्वर्यविति हवै होतरित्येवाध्वर्युर्मत्स्यः सांमदो राजेत्याह त-
स्योदकेचरा विशस्तऽइमऽआसतऽइति मत्स्याश्च मत्स्यहनश्चोपसमेता भवन्ति
तानुपदिशतीतिहासो वेदः सोऽयमिति कंचिदितिहासमाचक्षीतैवमेवाध्वर्युः सम्प्रे-
ष्यति न प्रक्रमान्जुहोति ॥१२॥ अथ नवमेऽहन्। एवमेवैतास्विष्टिषु सꣳस्थि-
तास्वेषैवावृदध्वर्यविति हवै होतरित्येवाध्वर्युस्तार्क्ष्यो वैपश्यतो राजेत्याह तस्य
वयाꣳसि विशस्तानीमान्यासतऽइति वयाꣳसि च वायोविद्यिकाश्चोपसमेता भ-
वन्ति तानुपदिशति पुराणं वेदः सोऽयमिति किंचित्पुराणमाचक्षीतैवमेवाध्वर्युः
सम्प्रेष्यति न प्रक्रमान्जुहोति ॥१३॥ अथ दशमेऽहन्। एवमेवैतास्विष्टिषु सꣳ-
स्थितास्वेषैवावृदध्वर्यविति हवै होतरित्येवाध्वर्युर्धर्म इन्द्रो राजेत्याह तस्य देवा
विशस्तऽइमऽआसत इति श्रोत्रिया अप्रतिग्राहका उपसमेता भवन्ति तानुपदि-
शति सामानि वेदः सोऽयमिति साम्नां दशतं ब्रूयादेवमेवाध्वर्युः सम्प्रेष्यति न प्र-
क्रमान्जुहोतीति ॥१४॥ एतत्पारिप्लवम्। सर्वाणि राज्यान्याचष्टे सर्वा विशः स-
र्वान्वेदान्त्सर्वान्देवान्त्सर्वाणि भूतानि सर्वेषाꣳ ह वै स एतेषाꣳ राज्यानाꣳ सायु-
ज्यꣳ सलोकतामश्नुते सर्वासां विशामैश्वर्यमाधिपत्यं गच्छति सर्वान्वेदानवरुन्द्धे

सर्वान्देवान्प्रीत्वा सर्वेषु भूतेष्वन्ततः प्रतितिष्ठति यस्यैवंविदेतद्धोता पारिप्लवमाख्यानमाचष्टे यो वैतदेवं वेदैतदेव समानमाख्यानं पुनः-पुनः संवत्सरं परिप्लवते तद्यत्पुनः-पुनः परिप्लवते तस्मात्पारिप्लवꣳ षट्त्रिꣳशतं दशाहानाचष्टे षट्त्रिꣳशदक्षरा बृहती बार्हताः पशवो बृहत्यैवास्मै पशूनवरुन्द्धे ॥१५॥ ब्राह्मणम् ॥१ [४. ३.] ॥ ॥

संवत्सरे पर्यवेते दीक्षा । प्राजापत्यमालभ्योत्सीदन्तीष्टयः पुरोहितस्याग्निषु यजेतेत्यु हैकऽआहुः किमु दीक्षितो यजेत द्वादश दीक्षा द्वादशोपसदस्तिस्रः सुत्यास्तत्त्रिणवमभिसम्पद्यते वज्रो वै त्रिणवः क्षत्रमश्वः क्षत्रꣳ राजन्यो वज्रेण खलु वै क्षत्रꣳ स्पृतं तद्वज्रेणैव क्षत्रꣳ स्पृणोति ॥१॥ दीक्षणीयायाꣳ सꣳस्थितायाम् । सायं वाचि विसृष्टायां वीणागणगिन उपसमेता भवन्ति तानध्वर्युः सम्प्रेष्यति वीणागणगिन इत्याह देवैरिमं यजमानꣳ संगायतेति तं ते तथा संगायन्ति ॥२॥ अहरहर्वाचि विसृष्टायाम् । अग्नीषोमीयाणामन्ततः सꣳस्थायां परिहृतासु वसतीवरीषु तद्यदेनं देवैः संगायन्ति देवैरेवैनं तत्सलोकं कुर्वन्ति ॥३॥ प्रजापतिना सुत्यासु । एवमेवाहरहः परिहृतास्वेव वसतीवरीषूदवसानीयायामन्ततः सꣳस्थितायां तद्यदेनं प्रजापतिना संगायन्ति प्रजापतिनैवैनं तदन्ततः सलोकं कुर्वन्ति ॥४॥ एकविꣳशतिर्यूपाः । सर्वऽएकविꣳशत्यरत्नयो राज्जुदालोऽग्निष्ठो भवति पैतुदारवावभितः षड्बैल्वास्त्रय इत्थात्त्रय इत्थात्षट् खादिरास्त्रय एवेत्थात्त्रय इत्थात्षट् पालाशास्त्रय एवेत्थात्त्रय इत्थात् ॥५॥ तद्यदेतऽएवं यूपा भवन्ति । प्रजापतेः प्राणेषूत्क्रान्तेषु शरीरꣳ श्वयितुमध्रियत तस्य यः श्लेष्मासीत्स सार्धꣳ समवद्रुत्य मध्यतो नस्त उदभिनत्स एष वनस्पतिरभवद्राज्जुदालस्तस्मात्स श्लेष्मणः श्लेष्मणो हि समभवत्तेनैवैनं तद्रूपेण समर्धयति तद्यत्सोऽग्निष्ठो भवति मध्यं वाऽएतद्यूपानां यदग्निष्ठो मध्यमेतत्प्राणानां यन्नासिके स्वऽएवैनं तदायतने दधाति

॥६॥ अथ यदापोमयं तेज आसीत् । यो गन्धः स सार्धं समवद्रुत्य चक्षुष्ट उद्भिनत्स एष वनस्पतिरभवत्पीतुदारुस्तस्मात्स सुरभिर्गन्धाद्धि समभवत्तस्माद्दु ज्वलनस्तेजसो हि समभवत्तेनैवैनं तद्रूपेण समर्धयति तद्यत्तावभितोऽग्निष्ठं भवतस्तस्मादिमे अभितो नासिकां चक्षुषी स्व एवैनौ तदायतने दधाति ॥७॥ अथ यत्कुन्तापमासीत् । यो मज्जा स सार्धं समवद्रुत्य श्रोत्रत उदभिनत्स एष वनस्पतिरभवद्बिल्वस्तस्मात्तस्यान्तरतः सर्वमेव फलमाद्यं भवति तस्माद्दु हारिद्र-इव भवति हारिद्र-इव हि मज्जा तेनैवैनं तद्रूपेण समर्धयत्यन्तरे पैतुदारवौ भवतो बाह्ये बैल्वा अन्तरे हि चक्षुषी बाह्ये श्रोत्रे स्व एवैनांस्तदायतने दधाति ॥८॥ अस्थिभ्य एवास्य खदिरः समभवत् । तस्मात्स दारुणो बहुसारो दारुणमिव ह्यस्थि तेनैवैनं तद्रूपेण समर्धयत्यन्तरे बैल्वा भवन्ति बाह्ये खादिरा अन्तरे हि मज्जानो बाह्यान्यस्थीनि स्व एवैनांस्तदायतने दधाति ॥९॥ मांसेभ्य एवास्य पलाशः समभवत् । तस्मात्स बहुरसो लोहितरसो लोहितमिव हि मांसं तेनैवैनं तद्रूपेण समर्धयत्यन्तरे खादिरा भवन्ति बाह्ये पालाशा अन्तराणि ह्यस्थीनि बाह्यानि मांसानि स्व एवैनांस्तदायतने दधाति ॥१०॥ अथ यदेकविंशतिर्भवन्ति । एकविंशत्यरत्नय एकविंशो वा एष य एष तपति द्वादश मासाः पञ्चर्तवस्त्रय इमे लोका असावादित्य एकविंशः सोऽश्वमेध एष प्रजापतिरेवमेतं प्रजापतिं यज्ञं कृत्स्नं संस्कृत्य तस्मिन्नेकविंशतिमग्नीषोमीयान्पशूनालभते तेषां समानं कर्मेत्येतत्पूर्वेद्युः कर्म ॥११॥ ब्राह्मणम् ॥२ [४.४.] ॥ चतुर्थोऽध्यायः [८७.] ॥ ॥

अथ प्रातर्गोतमस्य । चतुरुत्तर स्तोमो भवति तस्य चतसृषु बहिष्पवमानमष्टास्वष्टास्वाज्यानि द्वादशसु माध्यन्दिनः पवमानः षोडशसु पृष्ठानि विंशत्यामार्भवः पवमानश्चतुर्विंशत्यामग्निष्टोमसाम ॥१॥ तस्य हैके । ऽग्निष्टोमसाम

चतुःसाम कुर्वन्ति नाग्निष्टोमो नोक्थ्य इति वदन्तस्तद्यदि तथा कुर्युः सार्धꣳ स्तोत्रियꣳ शस्त्वा सार्धमनुरूपꣳ शꣳसेद्रथन्तरं पृष्ठꣳ राथन्तरꣳ शस्त्रमग्निष्टोमो यज्ञस्तेनेमं लोकमृध्नोति ॥२॥ एकविꣳशतिः सवनीयाः पशवः । सर्वऽआग्नेयास्तेषाꣳ समानं कर्मेत्यु हैकऽआहुर्द्वे वेवैतेऽएकादशिन्यावालभेत य एवैकादशिनेषु कामस्तस्य कामस्याप्त्यै ॥३॥ सꣳस्थितेऽग्निष्टोमे । परिहृतासु वसतीवरीष्वध्वर्युरन्नहोमाञ्जुहोति तेषामुक्तं ब्राह्मणं प्राणाय स्वाहापानाय स्वाहेति द्वादशभिरनुवाकैर्द्वादश मासाः संवत्सरः सर्वꣳ संवत्सरः सर्वमश्वमेधः सर्वस्याप्त्यै सर्वस्यावरुद्ध्यै ॥४॥ एकविꣳशं मध्यममहर्भवति । असौ वाऽआदित्य एकविꣳशः सोऽश्वमेधः स्वेनैवैनꣳ स्तोमेन स्वायां देवतायां प्रतिष्ठापयति तस्मादेकविꣳशम् ॥५॥ यद्वेवैकविꣳशम् । एकविꣳशो वै पुरुषो दश हस्त्या अङ्गुलयो दश पाद्या आत्मैकविꣳशस्तदनेनैकविꣳशेनात्मनैतस्मिन्नेकविꣳशे प्रतिष्ठायां प्रतितिष्ठति तस्मादेकविꣳशम् ॥६॥ यद्वेवैकविꣳशम् । एकविꣳशो वै स्तोमानां प्रतिष्ठा बहु खलु वाऽएतदेतस्मिन्नहन्युच्चावचमिव कर्म क्रियते तद्यदेतदेतस्मिन्नहन्युच्चावचं बहु कर्म क्रियते तदेतस्मिन्नेकविꣳशे प्रतिष्ठायां प्रतिष्ठितं क्रियाताऽइति तस्माद्वेवैतदेकविꣳशमहः ॥७॥ तस्य प्रातःसवनम् । अग्निं तं मन्ये यो वसुरिति होता पाङ्क्तमाज्यꣳ शस्त्वैकाहिकमुपसꣳशꣳसति बार्हतं च प्रउगं माधुच्छन्दसं च त्रिचश उभे सꣳशꣳसति यश्च बार्हते प्रउगे कामो य उ च माधुच्छन्दसे तयोरुभयोः कामयोराप्त्यै क्लृप्तं प्रातःसवनम् ॥८॥ अथातो माध्यन्दिनं सवनम् । अतिच्छन्दाः प्रतिपन्मरुत्वतीयस्य त्रिकद्रुकेषु महिषो यवाशिरमित्यतिष्ठा वाऽएषा छन्दसां यदतिच्छन्दा अतिष्ठा अश्वमेधो यज्ञानामश्वमेधस्यैवाप्त्यै सैषैव त्रिः शस्ता त्रिचः सम्पद्यते तेनो तं काममाप्नोति यस्त्रिचऽइदं वसो सुतमन्ध इत्यनुचर एष एव नित्य एकाहातान इत्था हि सोम इन्मदेऽवितासि सुन्वतो वृत्रखादिष इति पङ्क्तीश्च

षट्पदाश्च शस्त्वैकाह्निके निविदं दधातीति मरुत्वतीयम् ॥ ९ ॥ अथातो निष्केवल्यम् । महानाम्न्यः पृष्ठं भवन्ति सानुरूपाः सप्रगाथाः शꣳसति सर्वे वै कामा महानाम्नीषु सर्वे कामा अश्वमेधे सर्वेषां कामानामाप्त्याऽइन्द्रो मदाय वावृधे प्रेदं ब्रह्म वृत्रतूर्येष्वाविथेति पङ्क्तीश्च षट्पदाश्च शस्त्वैकाह्निके निविदं दधाति क्लृप्तं माध्यन्दिनꣳ सवनम् ॥ १० ॥ अथातस्तृतीयसवनम् । अतिछन्दा एव प्रतिपद्वैश्वदेवस्याभि त्यं देवꣳ सवितारमोण्योरिति तस्या एतदेव ब्राह्मणं यत्पूर्वस्या अभि त्वा देव सवितरित्यनुचरोऽभिवानभिभूत्यै रूपमुदु ष्य देवः सविता दमूना इति सावित्रꣳ शस्त्वैकाह्निके निविदं दधाति मही द्यावापृथिवीऽइह ज्येष्ठेऽइति चतुर्ऋचं द्यावापृथिवीयꣳ शस्त्वैकाह्निके निविदं दधात्यृभुर्विभ्वा वाज इन्द्रो नोऽअच्छेत्यार्भवꣳ शस्त्वैकाह्निके निविदं दधाति को नु वां मित्रावरुणावृतायन्निति वैश्वदेवꣳ शस्त्वैकाह्निके निविदं दधातीति वैश्वदेवम् ॥ ११ ॥ अथात आग्निमारुतम् । मूर्धानं दिवोऽअरतिं पृथिव्या इति वैश्वानरीयꣳ शस्त्वैकाह्निके निविदं दधात्या रुद्रास इन्द्रवन्तः सजोषस इति मारुतꣳ शस्त्वैकाह्निके निविदं दधातीममू षु वोऽअतिथिमुषर्बुधमिति नवर्चं जातवेदसीयꣳ शस्त्वैकाह्निके निविदं दधाति तद्यदैकाह्निकानि निविद्धानानि भवन्ति प्रतिष्ठा वै ज्योतिष्टोमः प्रतिष्ठायाऽअप्रच्युत्यै ॥ १२ ॥ तस्यैते पशवो भवन्ति । अश्वस्तूपरो गोमृग इति पञ्चदश पर्यङ्ग्यास्तेषामुक्तं ब्राह्मणमथैतऽआरण्या वसन्ताय कपिञ्जलानालभते ग्रीष्माय कलविङ्कान्वर्षाभ्यस्तित्तिरीनिति तेषाम्वेवोक्तम् ॥ १३ ॥ अथैतानेकविꣳशतये । चातुर्मास्यदेवताभ्य एकविꣳशतिमेकविꣳशतिं पशूनालभतऽएतावन्तो वै सर्वे देवा यावन्तश्चातुर्मास्यदेवताः सर्वे कामा अश्वमेधे सर्वान्देवान्प्रीत्वा सर्वान्कामानाप्नवानीति न तथा कुर्यात् ॥ १४ ॥ सप्तदशैव पशून्मध्यमे यूपऽआलभेत । प्रजापतिः सप्तदशः सर्वꣳ सप्तदशः सर्वमश्वमेधः सर्वस्याप्त्यै सर्वस्यावरुद्ध्यै षोडश-षोडशेतरेषु

षोडशकलं वाऽइदᳪ सर्वᳪ सर्वमश्वमेधः सर्वस्याप्त्यै सर्वस्यावरुद्ध्यै त्रयोदश-त्रयो-
दशारण्यानाकाशेष्वालभते त्रयोदश मासाः संवत्सरः सर्वᳪ संवत्सरः सर्वमश्वमेधः
सर्वस्याप्त्यै सर्वस्यावरुद्ध्यै ॥१५॥ अथ पुरा बहिष्पवमानात् । अश्वं निक्तोदान-
यन्ति तेन पवमानाय सर्पन्ति तस्योक्तं ब्राह्मणᳪ स्तुते बहिष्पवमानेऽश्वमास्ता-
वमाक्रमयन्ति स यद्यव वा जिघ्रेद्वि वा वर्तेत समृद्धो मे यज्ञ इति ह विद्यात्तमु-
पाकृत्याध्वर्युराह होतरभिष्टुहीति तमेकादशभिर्होताभिष्टौति ॥१६॥ यदक्रन्दः प्र-
थमं जायमान इति । त्रिः प्रथमया त्रिरुत्तमया ताः पञ्चदश सम्पद्यन्ते पञ्चदशो
वै वज्रो वीर्यं वज्रो वज्रेणैवैतद्वीर्येण यजमानः पुरस्तात्पाप्मानमपहते तद्धि यज-
मानायैव वज्रः प्रदीयते योऽस्य स्तृत्यस्तᳪ स्तर्तवाऽउप प्रागाच्छसनं वाज्यर्वोप प्रा-
गात्परमं यत्सधस्थमिति ॥१७॥ एतेऽउद्धृत्य । मा नो मित्रो वरुणो अर्यमायुरि-
त्येतत्सूक्तमध्रिगावावपति चतुस्त्रिंशद्वाजिनो देवबन्धोरित्यु हैकऽएतां वङ्क्रीणां
पुरस्ताद्दधति नेदनायतने प्रणवं दधामेत्यथो नेदेकवचनेन बहुवचनं व्यवाया-
मेति न तथा कुर्यात्सार्धमेष सूक्तमावपेदुप प्रागाच्छसनं वाज्यर्वोप प्रागात्परमं
यत्सधस्थमिति ॥१८॥ ब्राह्मणम् ॥३ [५. १.] ॥ ॥

एतेऽउक्त्वा । यदध्रिगोः परिशिष्टं भवति तदाह वासोऽधिवासᳪ हिरण्यमि-
त्यश्वायोपस्तृणन्ति तस्मिन्नेनमधि संज्ञपयन्ति संज्ञप्तेषु पशुषु पत्न्यः पान्नेजनैरुदा-
यन्ति चतस्रश्च जायाः कुमारी पञ्चमी चत्वारि च शतान्यनुचरीणाम् ॥१॥ निष्ठि-
तेषु पान्नेजनेषु । महिषीमश्वायोपनिपादयन्त्यथैनावधिवासेन सम्प्रोर्णुवन्ति स्वर्गे
लोके प्रोर्णुवाथामित्येष वै स्वर्गो लोको यत्र पशुᳪ संज्ञपयन्ति निरायत्याश्वस्य
शिश्नं महिष्युपस्थे निधत्ते वृषा वाजी रेतोधा रेतो दधात्विति मिथुनस्यैव सर्व-
त्वाय ॥२॥ तयोः शयानयोः । अश्वं यजमानोऽभिमेथत्युत्सक्थ्या अव गुदं धेही-
ति तं न कश्चन प्रत्यभिमेथति नेद्यजमानं प्रतिप्रतिः कश्चिदसदिति ॥३॥ अथाध्वर्युः

कुमारीमभिमेथति । कुमारि हये-हये कुमारि यकासकौ शकुन्तिकेति तं कुमारी
प्रत्यभिमेथत्यध्वर्यो हये-हयेऽध्वर्यो यकोऽसकौ शकुन्तक इति ॥४॥ अथ ब्रह्मा
महिषीमभिमेथति । महिषि हये-हये महिषि माता च ते पिता च तेऽग्रं वृक्ष-
स्य रोहत इति तस्यै शतꣳ राजपुत्र्योऽनुचर्यो भवन्ति ता ब्रह्माणं प्रत्यभिमेथन्ति
ब्रह्मन्हये-हये ब्रह्मन्माता च ते पिता च तेऽग्रे वृक्षस्य क्रीडत इति ॥५॥ अथो-
द्गाता वावातामभिमेथति । वावाते हये-हये वावातऽऊर्ध्वामेनामुच्छ्रापयेति तस्यै
शतꣳ राजन्या अनुचर्यो भवन्ति ता उद्गातारं प्रत्यभिमेथन्त्युद्गातर्हये-हयऽउद्गात-
रूर्ध्वमेनमुच्छ्रयतादिति ॥६॥ अथ होता परिवृक्तामभिमेथति । परिवृक्ते हये-हये
परिवृक्ते यदस्या अꣳहुभेद्या इति तस्यै शतꣳ सूतग्रामण्यां दुहितरोऽनुचर्यो भ-
वन्ति ता होतारं प्रत्यभिमेथन्ति होतर्हये-हये होतर्यद्देवासो ललामगुमिति
॥७॥ अथ क्षत्ता पालागलीमभिमेथति । पालागलि हये-हये पालागलि यद्ध-
रिणो यवमत्ति न पुष्टं पशु मन्यतऽइति तस्यै शतं क्षात्त्रसंग्रहीतृणां दुहितरो
ऽनुचर्यो भवन्ति ताः क्षत्तारं प्रत्यभिमेथन्ति क्षत्तर्हये-हये क्षत्तर्यद्धरिणो यवमत्ति
न पुष्टं बहु मन्यतऽइति ॥८॥ सर्वाप्तिर्वाऽएषा वाचः । यदभिमेथिकाः सर्वे का-
मा अश्वमेधे सर्वया वाचा सर्वान्कामानाप्नवामेत्युत्थापयन्ति महिषीं ततस्ता य-
थेतं प्रतिपरायन्त्यथेतरे सुरभिमतीमृचमन्ततोऽन्वाहुर्दधिक्राव्णोऽअकारिषमिति
॥९॥ अप वाऽएतेभ्य आयुर्देवताः क्रामन्ति । ये यज्ञेऽपूतां वाचं वदन्ति वाचमे-
वैतत्पुनते देवयज्यायै देवतानामनपक्रमाय या च गोमृगे वपा भवति या चाजे
तूपरे तेऽअश्वे प्रत्यवधायाद्धरन्ति नाश्वस्य वपास्तीति वदन्तो न तथा कुर्यादश्व-
स्यैव प्रत्यक्षं मेद आहरेत्प्रज्ञाता इतराः ॥१०॥ शृतासु वपासु । स्वाहाकृतिभि-
श्चरित्वा प्रत्यञ्चः प्रतिपरेत्य सदसि ब्रह्मोद्यं वदन्ति पूर्वया द्वारा प्रपद्य यथाधिष्ण्यं
व्युपविशन्ति ॥११॥ स होताध्वर्युं पृच्छति । कः स्विदेकाकी चरतीति तं प्रत्याह

सूर्य एकाकी चरतीति ॥१२॥ अथाध्वर्युर्होतारं पृच्छति । किꣳ स्वित्सूर्यसमं ज्योतिरिति तं प्रत्याह ब्रह्म सूर्यसमं ज्योतिरिति ॥१३॥ अथ ब्रह्मोद्गातारं पृच्छति । पृच्छामि त्वा चितये देवसखेति तं प्रत्याहापि तेषु त्रिषु पदेष्वस्मीति ॥१४॥ अथोद्गाता ब्रह्माणं पृच्छति । केष्वन्तः पुरुष आविवेशेति तं प्रत्याह पञ्चस्वन्तः पुरुष आविवेशेति ॥१५॥ एतस्यामुक्तायामुत्थाय । सदसोऽधि प्राञ्चो यजमानमभ्यायन्त्यग्रेण हविर्धानेऽआसीनमेत्य यथायतनं पर्युपविशन्ति ॥१६॥ स होताध्वर्युं पृच्छति । का स्विदासीत्पूर्वचित्तिरिति तं प्रत्याह द्यौरासीत्पूर्वचित्तिरिति ॥१७॥ अथाध्वर्युर्होतारं पृच्छति । क ईमरे पिशंगिलेति तं प्रत्याहाजारे पिशंगिलेति ॥१८॥ अथ ब्रह्मोद्गातारं पृच्छति । कत्यस्य विष्ठाः कत्यक्षराणीति तं प्रत्याह षडस्य विष्ठाः शतमक्षराणीति ॥१९॥ अथोद्गाता ब्रह्माणं पृच्छति । कोऽअस्य वेद भुवनस्य नाभिमिति तं प्रत्याह वेदाहमस्य भुवनस्य नाभिमिति ॥२०॥ अथाध्वर्युं यजमानः पृच्छति । पृच्छामि त्वा परमन्तं पृथिव्या इति तं प्रत्याहेयं वेदिः परोऽन्तः पृथिव्या इति ॥२१॥ सर्वाप्तिर्वाऽएषा वाचः । यद्ब्रह्मोद्यꣳ सर्वे कामा अश्वमेधे सर्वया वाचा सर्वान्कामानाप्नवामेति ॥२२॥ उदिते ब्रह्मोद्ये । प्रपद्याध्वर्युर्हिरण्मयेन पात्रेण प्राजापत्यं महिमानं ग्रहं गृह्णाति तस्य पुरोरुग्घिरण्यगर्भः समवर्तताग्रऽइत्यथास्य पुरोऽनुवाक्या सुभूः स्वयम्भूः प्रथम इति होता यक्षत्प्रजापतिमिति प्रैषः प्रजापते न त्वदेतान्यन्य इति होता यजति वषट्कृते जुहोति यस्तेऽहन्संवत्सरे महिमा सम्बभूवेति नानुवषट्करोति सर्वहुतꣳ हि जुहोति ॥२३॥ ब्राह्मणम् ॥४ [५. २.] ॥ ॥

अथातो वपानाꣳ होमः । नानेव चरेयुरा वैश्वदेवस्य वपायै वैश्वदेवस्य वपायाꣳ हुतायां तदन्वितरा जुहुयुरिति ह स्माह सत्यकामो जाबालो विश्वे वै सर्वे देवास्तदेनान्यथादेवतं प्रीणातीति ॥१॥ ऐन्द्राग्नस्य वपायाꣳ हुतायाम् ।

तदन्वितरा जुहुयुरिति ह स्माहतुः सौमापौ मानुतन्तव्याविन्द्राग्नी वै सर्वे देवा-
स्तद्देवैनान्यथादेवतं प्रीणातीति ॥२॥ कायस्य वपायाꣳ हुतायाम् । तदन्वितरा
जुहुयुरिति ह स्माह शैलालिः प्रजापतिर्वै कः प्रजापतिमु वाऽअनु सर्वे देवास्त-
द्देवैनान्यथादेवतं प्रीणातीति ॥३॥ एकविꣳशतिं चातुर्मास्यदेवता अनुद्रुत्य ।
एकविꣳशतिधा कृत्वा प्रचरेयुरिति ह स्माह भाल्लबेय एतावन्तो वै सर्वे देवा
यावत्यश्चातुर्मास्यदेवतास्तद्देवैनान्यथादेवतं प्रीणातीति ॥४॥ नानेव चरेयुः । इ-
तीन्द्रोतः शौनकः किमुत वरेरंस्तद्देवैनान्यथादेवतं प्रीणातीत्येतद्ध तेषां वचो
ऽन्या त्वेवात स्थितिः ॥५॥ अथ होवाच याज्ञवल्क्यः । सकृदेव प्राजापत्याभिः
प्रचरेयुः सकृद्द्विदेवत्याभिस्तद्देवैनान्यथादेवतं प्रीणात्यञ्जसा यज्ञस्य सꣳस्थामुपैति
न ह्वलतीति ॥६॥ हुतासु वपासु । प्रपद्याध्वर्यू रजतेन पात्रेण प्राजापत्यं महि-
मानमुत्तरं ग्रहं गृह्णाति तस्य पुरोरुग्यः प्राणतो निमिषतो महित्वेति विपर्यस्ते
याज्यानुवाक्येऽअयातयामतायाऽएष एव प्रैषो वषट्कृते जुहोति यस्ते रात्रौ सं-
वत्सरे महिमा सम्बभूवेति नानुवषट्करोति तस्योक्तं ब्राह्मणम् ॥७॥ नान्येषां
पशूनां तेदन्या अवद्यन्ति । अवद्यन्त्यश्वस्य दक्षिणतोऽन्येषां पशूनामवद्यन्त्युत्तर-
तोऽश्वस्य प्लक्षशाखास्वन्येषां पशूनामवद्यन्ति वैतसशाखास्वश्वस्य ॥८॥ तद्ध हो-
वाच सात्ययज्ञिः । इतरथैव कुर्युः पथ एव नापोदित्यमिति पूर्वा त्वेव स्थितिरु-
क्थ्यो यज्ञस्तेनान्तरिक्षलोकमृध्नोति सर्वस्तोमोऽतिरात्र उत्तममहर्भवति सर्वं वै
सर्वस्तोमोऽतिरात्रः सर्वमश्वमेधः सर्वस्याप्त्यै सर्वस्यावरुद्ध्यै ॥९॥ तस्य त्रिवृद्बहि-
ष्पवमानम् । पञ्चदशान्याज्यानि सप्तदशो माध्यन्दिनः पवमान एकविꣳशानि पृ-
ष्ठानि त्रिणवस्तृतीयः पवमानस्त्रयस्त्रिꣳशमग्निष्टोमसामैकविꣳशान्युक्थ्यान्येकविꣳशः
षोडशी पञ्चदशी रात्रिस्त्रिवृत्संधिर्यद्द्वितीयस्याह्नः पृष्ठ्यस्य षडहस्य तद्रूपमतिरात्रो
यज्ञस्तेनामुं लोकमृध्नोति ॥१०॥ एकविꣳशतिः सवनीयाः पशवः । सर्वऽआग्ने-

यास्तेषाᳫ समानं कर्मेत्यु हैक ऽआहुश्चतुर्विᳫशतिं त्वेवैतान्गव्यानालभेत द्वादश-भ्यो देवताभ्यो द्वादश मासाः संवत्सरः सर्वᳫ संवत्सरः सर्वमश्वमेधः सर्वस्याप्त्यै सर्वस्यावरुद्ध्यै ॥११॥ ॥ शतम् ६७०० ॥ ॥ ब्राह्मणम् ॥ ५ [५. ३.] ॥ ॥

एतेन हेन्द्रोतो दैवापः शौनकः । जनमेजयं पारिक्षितं याजयां चकार तेने-ष्ट्वा सर्वां पापकृत्याᳫ सर्वां ब्रह्महत्यामपजघान सर्वाᳫ ह वै पापकृत्याᳫ सर्वां ब्रह्महत्यामपहन्ति योऽश्वमेधेन यजते ॥१॥ तदेतद्गाथयाभिगीतम् । आसन्दीवति धान्यादᳫ रुक्मिणᳫ हरितस्रजम् । अबध्नादश्वᳫ सारंगं देवेभ्यो जनमेजय इति ॥२॥ एते ऽएव पूर्वेऽअहनी । ज्योतिरतिरात्रस्तेन भीमसेनमेते ऽएव पूर्वेऽअह-नी गौरतिरात्रस्तेनोग्रसेनमेते ऽएव पूर्वेऽअहनीऽआयुरतिरात्रस्तेन श्रुतसेनमि-त्येते पारिक्षितीयास्तदेतद्गाथयाभिगीतं पारिक्षिता यजमाना अश्वमेधैः परोऽव-रम् । अजहुः कर्म पापकं पुण्याः पुण्येन कर्मणेति ॥३॥ एते ऽएव पूर्वेऽअहनी । अभिजिदतिरात्रस्तेन ह पर आट्णार ईजे कौसल्यो राजा तदेतद्गाथयाभिगीत-मट्णारस्य परः पुत्रोऽश्वं मेध्यमबन्धयत् । हैरण्यनाभः कौसल्यो दिशः पूर्णा अमᳫहतेति ॥४॥ एते ऽएव पूर्वेऽअहनी । विश्वजिदतिरात्रस्तेन ह पुरुकुत्सो दौर्गहेणेजऽऐक्ष्वाको राजा तस्मादेतदृषिणाभ्यनूक्तमस्माकमत्र पितरस्तऽआसन्त्स-प्तऽऋषयो दौर्गहे बध्यमानऽइति ॥५॥ एते ऽएव पूर्वेऽअहनी । महाव्रतमतिरा-त्रस्तेन ह मरुत्त आविक्षित ईजऽआयोगवो राजा तस्य ह ततो मरुतः परिवे-ष्टारोऽग्निः क्षत्ता विश्वे देवाः सभासदो बभूवुस्तदेतद्गाथयाभिगीतं मरुतः परिवे-ष्टारो मरुत्तस्यावसन्गृहे । आविक्षितस्याग्निः क्षत्ता विश्वे देवाः सभासद इति मरुतो ह वै तस्य परिवेष्टारोऽग्निः क्षत्ता विश्वे देवाः सभासदो भवन्ति योऽश्व-मेधेन यजते ॥६॥ एते ऽएव पूर्वेऽअहनी । अप्तोर्यामोऽतिरात्रस्तेन हैतेन क्रै-व्य ईजे पाञ्चालो राजा क्रिवय इति ह वै पुरा पञ्चालानाचक्षते तदेतद्गाथया-

भिगीतम् अश्वं मेध्यमालभत क्रिवीणामतिपूरुषः पाञ्चालः परिवक्रायाꣳ सह-
स्रशतदक्षिणमिति ॥७॥ अथ द्वितीयया । सहस्रमासन्नयुता शता च पञ्चविꣳश-
तिः दिक्तो-दिक्तः पञ्चालानां ब्राह्मणा या विभेजिरऽइति ॥८॥ त्रिवृदग्निष्टो-
मः । पञ्चदश उक्थ्यः सप्तदशं तृतीयमहः सोक्थ्यमेकविꣳशः षोडशी पञ्चदशी
रात्रिस्त्रिवृत्संधिरित्येषोऽनुष्टुप्सम्पन्नस्तेन हैतेन ध्वसा द्वैतवन ईजे मात्स्यो राजा
यत्रैतद्द्वैतवनꣳ सरस्तदेतद्गाथयाभिगीतं चतुर्दश द्वैतवनो राजा संग्रामजिद्धयान्
इन्द्राय वृत्रघ्नेऽबध्नात्तस्माद्द्वैतवनꣳ सर इति ॥९॥ चतुर्विꣳशाः पवमानाः । त्रि-
वृदभ्यावर्तं चतुश्चत्वारिꣳशाः पवमाना एकविꣳशमभ्यावर्तमष्टाचत्वारिꣳशाः पव-
मानास्त्रयस्त्रिꣳशमभ्यावर्तमाग्निष्टोमसामादूर्ध्वं त्रिꣳशान्युक्थ्यान्येकविꣳशः षोडशी प-
ञ्चदशी रात्रिस्त्रिवृत्संधिरिति ॥१०॥ एतद्विष्णोः क्रान्तम् । तेन हैतेन भरतो दौः-
षन्तिरीजे तेनेमां व्यष्टिं व्यानशे येयं भरतानां तदेतद्गाथयाभिगीतमष्टासप्ततिं
भरतो दौःषन्तिर्यमुनामनु गङ्गायां वृत्रघ्नेऽबध्नात्पञ्चपञ्चाशतꣳ हयानिति ॥११॥
अथ द्वितीयया । त्रयस्त्रिꣳशꣳ शतꣳ राजाश्वान्बद्ध्वाय मेध्यान् सौद्युम्निरत्यष्ठा-
दन्यानमायान्मायवत्तर इति ॥१२॥ अथ तृतीयया । शकुन्तला नाडपित्यप्सरा
भरतं दधे परःसहस्रानिन्द्रायाश्वान्मेध्यान्य आहरद्विजित्य पृथिवीꣳ सर्वामिति
॥१३॥ अथ चतुर्थ्या । महदद्य भरतस्य न पूर्वे नापरे जनाः । दिवं मर्त्य-इव
बाहुभ्यां नोदापुः पञ्च मानवा इति ॥१४॥ एकविꣳशस्तोमेन । ऋषभो याज्ञ-
तुर ईजे श्विक्नानाꣳ राजा तदेतद्गाथयाभिगीतं याज्ञतुरे यजमाने ब्राह्मणा ऋषभे
जनाः अश्वमेधे धनं लब्ध्वा विभजन्ते स्म दक्षिणा इति ॥१५॥ त्रयस्त्रिꣳशस्तो-
मेन । शोणः सात्रासाह ईजे पाञ्चालो राजा तदेतद्गाथयाभिगीतꣳ सात्रासहे य-
जमानेऽश्वमेधेन तौर्वशाः उदीरते त्रयस्त्रिꣳशाः षट् सहस्राणि वर्मिणामिति
॥१६॥ अथ द्वितीयया । षट्षट् षड्ढा सहस्राणि यज्ञे कोकपितुस्तव उदीरते

त्रयस्त्रिꣳशाः षट् सहस्राणि वर्मिणामिति ॥१७॥ अथ तृतीयया । सात्रासहे यज-
माने पाञ्चाले राज्ञि सुस्रजि   अमाद्यदिन्द्रः सोमेनातृप्यन्ब्राह्मणा धनैरिति ॥१८॥
गोविनतेन शतानीकः । सात्राजित ईजे काश्यस्याश्वमादाय ततो हैतदर्वाक्काश-
योऽग्नीन्नादधतऽआत्तसोमपीथाः स्म इति वदन्तः ॥१९॥ तस्य विधा चतुर्विꣳशाः
पवमानाः । त्रिवृदभ्यावर्तं चतुश्चत्वारिꣳशाः पवमाना एकविꣳशान्यान्यानि त्रि-
णवान्युक्थान्येकविꣳशानि पृष्ठानि षट्त्रिꣳशाः पवमानास्त्रयस्त्रिꣳशमभ्यावर्तमा-
ग्निष्टोमसामादेकविꣳशान्युक्थान्येकविꣳशः षोडशी पञ्चदशी रात्रिस्त्रिवृत्संधिः
॥२०॥ तदेतद्गाथयाभिगीतꣳ । शतानीकः समन्तासु मेध्यꣳ सात्राजितो हयम्
आदत्त यज्ञं काशीनां भरतः सत्वतामिवेति ॥२१॥ अथ द्वितीयया । श्वेतꣳ सम-
न्तासु वशं चरन्तꣳ शतानीको धृतराष्ट्रस्य मेध्यम्   आदाय सह्वा दशमास्यमश्वꣳ
शतानीको गोविनतेन हेजऽइति ॥२२॥ अथ चतुर्थ्या । महदद्य भरतानां न
पूर्वे नापरे जनाः   दिवं मर्त्य-इव पक्षाभ्यां नोदापुः सप्त मानवा इति ॥२३॥
अथातो दक्षिणानाम् । मध्यं प्रति राष्ट्रस्य यदन्यद्भूमेश्च पुरुषेभ्यश्च ब्राह्मणस्य च
वित्तात्प्राची दिग्घोतुर्दक्षिणा ब्रह्मणः प्रतीच्यध्वर्योरुदीच्युद्गातुस्तदेव होतृका अ-
न्वाभक्ताः ॥२४॥ उदयनीयायाꣳ सꣳस्थितायाम् । एकविꣳशतिं वशा अनूबन्ध्या
आलभते मैत्रावरुणीर्वैश्वदेवीर्बार्हस्पत्या एतासां देवतानामाप्त्यै तद्यद्बार्हस्पत्या
न्त्या भवन्ति ब्रह्म वै बृहस्पतिस्तदु ब्रह्मण्येवान्ततः प्रतितिष्ठति ॥२५॥ अथ य-
देकविꣳशतिर्भवन्ति । एकविꣳशो वाऽएष य एष तपति द्वादश मासाः पञ्चर्त-
वस्त्रय इमे लोका असावादित्य एकविꣳश एतामभिसम्पदम् ॥२६॥ उदवसानी-
यायाꣳ सꣳस्थितायाम् । चतस्रश्च जायाः कुमारीं पञ्चमीं चत्वारि च शतान्यनुच-
रीणां यथासमुदितं दक्षिणां ददति ॥२७॥ अथोत्तरꣳ संवत्सरमृतुपशुभिर्यजते ।
षड्भिराग्नेयैर्वसन्ते षड्भिरैन्द्रैर्ग्रीष्मे षड्भिः पार्जन्यैर्वा मारुतैर्वा वर्षासु षड्भिर्मै-

त्रावरुणैः शरदि षड्भिरैन्द्रावैष्णवैर्हेमन्ते षड्भिरैन्द्राबार्हस्पत्यैः शिशिरे षडृतवः संवत्सरः ऋतुष्वेव संवत्सरे प्रतितिष्ठति षट्त्रिꣳशदेते पशवो भवन्ति षट्त्रिꣳशदक्षरा बृहती बृहत्यामधि स्वर्गो लोकः प्रतिष्ठितस्तद्यत्ततो बृहत्यैव छन्दसा स्वर्गे लोके प्रतितिष्ठति ॥२८॥ ब्राह्मणम् ॥ ६ [५. ४.] ॥ तृतीयः प्रपाठकः ॥ कण्डिकासंख्या१०६ ॥ पञ्चमोऽध्यायः [८८.] ॥ ॥

पुरुषो ह नारायणोऽकामयत । अतितिष्ठेयꣳ सर्वाणि भूतान्यहमेवेदꣳ सर्वꣳ स्यामिति स एतं पुरुषमेधं पञ्चरात्रं यज्ञक्रतुमपश्यत्तमाहरत्तेनायजत तेनेष्ट्वात्यतिष्ठत्सर्वाणि भूतानीदꣳ सर्वमभवदतितिष्ठति सर्वाणि भूतानीदꣳ सर्वं भवति य एवं विद्वान्पुरुषमेधेन यजते यो वैतदेवं वेद ॥१॥ तस्य त्रयोविꣳशतिर्दीक्षाः । द्वादशोपसदः पञ्च सुत्याः स एष चत्वारिꣳशद्रात्रः सदीक्षोपसत्कश्चत्वारिꣳशदक्षरा विराड्विराजमभिसम्पद्यते ततो विराडजायत विराजोऽअधि पूरुष इत्येषा वै सा विराडेतस्या एवैतद्विराजो यज्ञं पुरुषं जनयति ॥२॥ ता वाऽएताः । चतस्रो दशतो भवन्ति तद्यदेताश्चतस्रो दशतो भवन्त्येषां चैव लोकानामाप्त्यै दिशां चेममेव लोकं प्रथमया दशताप्नुवन्नन्तरिक्षं द्वितीयया दिवं तृतीयया दिशश्चतुर्थ्या तथैवैतद्यजमान इममे लोकं प्रथमया दशताप्नोत्यन्तरिक्षं द्वितीयया दिवं तृतीयया दिशश्चतुर्थ्यैतावद्वाऽइदꣳ सर्वं यावदिमे च लोका दिशश्च सर्वं पुरुषमेधः सर्वस्याप्त्यै सर्वस्यावरुद्ध्यै ॥३॥ एकादशाग्नीषोमीयाः पशव उपवसथे । तेषाꣳ समानं कर्मैकादश यूपा एकादशाक्षरा त्रिष्टुब्वज्रस्त्रिष्टुब्वीर्यं त्रिष्टुब्वज्रेणैवैतद्वीर्येण यजमानः पुरस्तात्पाप्मानमपहते ॥४॥ ऐकादशिनाः सुत्यासु पशवो भवन्ति । एकादशाक्षरा त्रिष्टुब्वज्रस्त्रिष्टुब्वीर्यं त्रिष्टुब्वज्रेणैवैतद्वीर्येण यजमानः पुरस्तात्पाप्मानमपहते ॥५॥ यद्वेवैकादशिना भवन्ति । एकादशिनी वाऽइदꣳ सर्वं प्रजापतिरेकादशिनी सर्वꣳ हि प्रजापतिः सर्वं पुरुषमेधः सर्वस्याप्त्यै सर्वस्यावरुद्ध्यै ॥६॥

स वा ऽ एष पुरुषमेधः पञ्चरात्रो यज्ञक्रतुर्भवति । पाङ्क्तो यज्ञः पाङ्क्तः पशुः पञ्च ऽर्त-
वः संवत्सरो यत्किं च पञ्चविधमधिदेवतमध्यात्मं तदेनेन सर्वमाप्नोति ॥ ७॥ त-
स्याग्निष्टोमः प्रथममहर्भवति । अथोक्थ्योऽथातिरात्रोऽथोक्थ्योऽथाग्निष्टोमः स वा
ऽ एष उभयतोज्योतिरुभयतउक्थ्यः ॥ ८॥ यवमध्यः पञ्चरात्रो भवति । इमे वै लो-
काः पुरुषमेध उभयतोज्योतिषो वा ऽ इमे लोका अग्निनेत आदित्येनामुतस्तस्मा-
दुभयतोज्योतिरन्नमुक्थ्य आत्मातिरात्रस्तस्माद्देता ऽ उक्थ्यावतिरात्रमभितो भवतस्त-
स्मादयमात्मान्नेन परिवृतोऽथ यदेष वर्षिष्ठोऽतिरात्रोऽह्नाᳪ स मध्ये तस्माद्यव-
मध्यो युते ह वै द्विषन्तं भ्रातृव्यमयमेवास्ति नास्य द्विषन्भ्रातृव्य इत्याहुर्य एवं
वेद ॥ ९॥ तस्यायमेव लोकः प्रथममहः । अयमस्य लोको वसन्त ऋतुर्यदूर्ध्वम-
स्माल्लोकादर्वाचीनमन्तरिक्षात्तद्द्वितीयमहस्तदस्य ग्रीष्म ऋतुरन्तरिक्षमेवास्य मध्य-
ममहरन्तरिक्षमस्य वर्षाशरदावृतू यदूर्ध्वमन्तरिक्षादर्वाचीनं दिवस्तच्चतुर्थमहस्तदस्य
हेमन्त ऋतुर्द्यौरेवास्य पञ्चममहर्द्यौरस्य शिशिर ऋतुरित्यधिदेवतम् ॥ १०॥ अथा-
ध्यात्मम् । प्रतिष्ठैवास्य प्रथममहः प्रतिष्ठोऽस्य वसन्त ऋतुर्यदूर्ध्वं प्रतिष्ठाया अ-
वाचीनं मध्यात्तद्द्वितीयमहस्तदस्य ग्रीष्म ऋतुर्मध्यमेवास्य मध्यममहर्मध्यमस्य वर्षा-
शरदावृतू यदूर्ध्वं मध्यादवाचीनᳪ शीर्ष्णस्तच्चतुर्थमहस्तदस्य हेमन्त ऋतुः शिर ए-
वास्य पञ्चममहः शिरोऽस्य शिशिर ऋतुरेवमिमे च लोका संवत्सर आत्मा च
पुरुषमेधमभिसम्पद्यन्ते सर्वं वा ऽ इमे लोकाः सर्वᳪ संवत्सरः सर्वमात्मा सर्वं पु-
रुषमेधः सर्वस्याप्त्यै सर्वस्यावरुद्ध्यै ॥ ११॥ ब्राह्मणम् ॥ [६. १.] ॥ ॥

अथ यस्मात्पुरुषमेधो नाम । इमे वै लोकाः पूरयमेव पुरुषो योऽयं पवते
सोऽस्यां पुरि शेते तस्मात्पुरुषस्तस्य यदेषु लोकेष्वन्नं तदस्यान्नं मेधस्तद्यदस्यैत-
दन्नं मेधस्तस्मात्पुरुषमेधोऽथो यदस्मिन्मेध्यान्पुरुषानालभते तस्मादेव पुरुषमेधः
॥ १॥ तान्वै मध्यमेऽहन्नालभते । अन्तरिक्षं वै मध्यममहरन्तरिक्षमु वै सर्वेषां

भूतानामायतनमथोऽअन्नं वाऽएते पशव उदरं मध्यममन्नमुदरे तदन्नं दधाति ॥२॥ तान्वै दश-दशालभते । दशाक्षरा विराड्विराडु कृत्स्नमन्नं कृत्स्नस्यैवान्नाद्यस्यावरुद्ध्यै ॥३॥ एकादश दशत आलभते । एकादशाक्षरा त्रिष्टुब्वज्रस्त्रिष्टुब्वीर्यं त्रिष्टुब्वज्रेणैवैतद्वीर्येण यजमानो मध्यतः पाप्मानमपहते ॥४॥ अष्टाचत्वारिꣳशतं मध्यमे यूपऽआलभते । अष्टाचत्वारिꣳशदक्षरा जगती जागताः पशवो जगत्यैवास्मै पशूनवरुन्द्धे ॥५॥ एकादशैकादशेतरेषु । एकादशाक्षरा त्रिष्टुब्वज्रस्त्रिष्टुब्वीर्यं त्रिष्टुब्वज्रेणैवैतद्वीर्येण यजमानोऽभितः पाप्मानमपहते ॥६॥ अष्टाऽउत्तमानालभते । अष्टाक्षरा गायत्री ब्रह्म गायत्री तद्ब्रह्मैवैतदस्य सर्वस्योत्तमं करोति तस्माद्ब्रह्मास्य सर्वस्योत्तममित्याहुः ॥७॥ ते वै प्राजापत्या भवन्ति । ब्रह्म वै प्रजापतिर्ब्राह्मो हि प्रजापतिस्तस्मात्प्राजापत्या भवन्ति ॥८॥ स वै पशूनुपाकरिष्यन् । एतास्तिस्रः सावित्रीराहुतीर्जुहोति देव सवितस्तत्सवितुर्वरेण्यं विश्वानि देव सवितरिति सवितारं प्रीणाति सोऽस्मै प्रीत एतान्पुरुषान्प्रसौति तेन प्रसूतानालभते ॥९॥ ब्रह्मणे ब्राह्मणमालभते । ब्रह्म वै ब्राह्मणो ब्रह्मैव तद्ब्रह्मणा समर्धयति क्षत्राय राजन्यं क्षत्रं वै राजन्यः क्षत्रमेव तत्क्षत्रेण समर्धयति मरुद्भ्यो वैश्यं विशो वै मरुतो विशमेव तद्विशा समर्धयति तपसे शूद्रं तपो वै शूद्रस्तप एव तत्तपसा समर्धयत्येवमेता देवता यथारूपं पशुभिः समर्धयति ता एनꣳ समृद्धाः समर्धयन्ति सर्वैः कामैः ॥१०॥ आज्येन जुहोति । तेजो वाऽआज्यं तेजसैवास्मिंस्तत्तेजो दधात्याज्येन जुहोत्येतद्वै देवानां प्रियं धाम यदाज्यं प्रियेणैवैनान्धाम्ना समर्धयति तऽएनꣳ समृद्धाः समर्धयन्ति सर्वैः कामैः ॥११॥ नियुक्तान्पुरुषान् । ब्रह्मा दक्षिणतः पुरुषेण नारायणेनाभिष्टौति सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपादित्येतेन षोडशर्चेन षोडशकलं वाऽइदꣳ सर्वꣳ सर्वं पुरुषमेधः सर्वस्याप्त्यै सर्वस्यावरुद्ध्याऽइत्थमसीत्थमसीत्युपस्तौत्येवैनमेतन्महयत्येवाथो

यथैष तथैनमेतदाह तत्पर्यग्निकृताः पशवो बभूवुरसंज्ञप्ताः ॥ १२ ॥ अथ हैनं वा-
ग्भ्युवाद । पुरुष मा संतिष्ठिपो यदि सꣳस्थापयिष्यसि पुरुष एव पुरुषमत्स्यती-
ति तान्पर्यग्निकृतानेवोदसृजत्तद्देवत्या आहुतीरजुहोत्ताभिस्ता देवता अप्रीणात्ता
एनं प्रीता अप्रीणन्त्सर्वैः कामैः ॥ १३ ॥ आज्येन जुहोति । तेजो वाऽआज्यं तेज-
सैवास्मिंस्तत्तेजो दधाति ॥ १४ ॥ एकादशिनैः सꣳस्थापयति । एकादशाक्षरा त्रिष्टु-
ब्वज्रस्त्रिष्टुब्वीर्यं त्रिष्टुब्वज्रेणैवैतद्वीर्येण यजमानो मध्यतः पाप्मानमपहते ॥ १५ ॥
उदयनीयायाꣳ सꣳस्थितायाम् । एकादश वशा अनूबन्ध्या आलभते मैत्रावरुणी-
र्वैश्वदेवीर्बार्हस्पत्या एतासां देवतानामाप्त्यै तद्यद्बार्हस्पत्या अन्त्या भवन्ति ब्रह्म
वै बृहस्पतिस्तदु ब्रह्मण्येवान्ततः प्रतितिष्ठति ॥ १६ ॥ अथ यदेकादश भवन्ति ।
एकादशाक्षरा त्रिष्टुब्वज्रस्त्रिष्टुब्वीर्यं त्रिष्टुब्वज्रेणैवैतद्वीर्येण यजमानो मध्यतः पा-
प्मानमपहते त्रैधातव्युदवसानीयासावेव बन्धुः ॥ १७ ॥ अथातो दक्षिणानाम् ।
मध्यं प्रति राष्ट्रस्य यदन्यद्भूमेश्च ब्राह्मणस्य च वित्तात्सपुरुषं प्राची दिग्घोतुर्दक्षि-
णा ब्रह्मणः प्रतीच्यध्वर्योरुदीच्युद्गातुस्तदेव होतृका अन्वाभक्ताः ॥ १८ ॥ अथ यदि
ब्राह्मणो यजेत । सर्ववेदसं दद्यात्सर्वं वै ब्राह्मणः सर्वꣳ सर्ववेदसꣳ सर्वं पुरु-
षमेधः सर्वस्याप्त्यै सर्वस्यावरुद्ध्यै ॥ १९ ॥ अथात्मन्नग्नी समारोह्य । उत्तरनारायणे-
नादित्यमुपस्थायानपेक्षमाणोऽरण्यमभिप्रेयात्तदेव मनुष्येभ्यस्तिरो भवति यद्यु ग्रामे
विवत्सेदरण्योरग्नी समारोह्योत्तरनारायणेनैवादित्यमुपस्थाय गृहेषु प्रत्यवस्येदथ
तान्यज्ञक्रतूनाहरेत यानभ्याप्नुयात्स वाऽएष न सर्वस्माऽअनुवक्तव्यः सर्वꣳ हि
पुरुषमेधो नेत्सर्वस्माऽइव सर्वं ब्रवाणीति यो न्वेव ज्ञातस्तस्मै ब्रूयादथ योऽनू-
चानोऽथ योऽस्य प्रियः स्यान्नेत्त्वेव सर्वस्माऽइव ॥ २० ॥ ब्राह्मणम् ॥ २ [६. २.]

॥ षष्ठोऽध्यायः [८१.] ॥ ॥

ब्रह्म वै स्वयम्भु तपोऽतप्यत । तदैक्षत न वै तपस्यानन्त्यमस्ति हन्ताहं

भूतेष्वात्मानं जुहवानि भूतानि चात्मनीति तत्सर्वेषु भूतेष्वात्मानꣳ हुत्वा भूतानि चात्मनि सर्वेषां भूतानाꣳ श्रैष्ठ्यꣳ स्वाराज्यमाधिपत्यं पर्यैत्तथैवैतद्यजमानः सर्वमेधे सर्वान्मेधान्हुत्वा सर्वाणि भूतानि श्रैष्ठ्यꣳ स्वाराज्यमाधिपत्यं पर्येति ॥१॥ स वाऽएष सर्वमेधो दशरात्रो यज्ञक्रतुर्भवति । दशाक्षरा विराड्विराडु कृत्स्नमन्नं कृत्स्नस्यैवान्नाद्यस्यावरुद्ध्यै तस्मिन्नग्निं परार्ध्यं चिनोति परमो वाऽएष यज्ञक्रतूनां यत्सर्वमेधः परमेणैवैनं परमतां गमयति ॥२॥ तस्याग्निष्टुदग्निष्टोमः प्रथममहर्भवति । अग्निर्वाऽअग्निष्टुदग्निष्टोमोऽग्निमुखा उ वै सर्वे देवाः सर्वेषां देवानामाप्त्यै तस्याग्नेया ग्रहा भवन्त्याग्नेय्यः पुरोरुचः सर्वमाग्नेयमसदिति ॥३॥ इन्द्रस्तुदुक्थ्यो द्वितीयमहर्भवति । इन्द्रो वै सर्वे देवाः सर्वेषां देवानामाप्त्यै तस्यैन्द्रा ग्रहा भवन्त्यैन्द्र्यः पुरोरुचः सर्वमैन्द्रमसदिति ॥४॥ सूर्यस्तुदुक्थ्यस्तृतीयमहर्भवति । सूर्यो वै सर्वे देवाः सर्वेषां देवानामाप्त्यै सौर्या ग्रहा भवन्ति सौर्य्यः पुरोरुचः सर्वꣳ सौर्यमसदिति ॥५॥ वैश्वदेवश्चतुर्थमहर्भवति । विश्वे वै सर्वे देवाः सर्वेषां देवानामाप्त्यै वैश्वदेवा ग्रहा भवन्ति वैश्वदेव्यः पुरोरुचः सर्वं वैश्वदेवमसदिति ॥६॥ आश्वमेधिकं मध्यमं पञ्चममहर्भवति । तस्मिन्नश्वं मेध्यमालभतेऽश्वमेधस्यैवाप्त्यै ॥७॥ पौरुषमेधिकं मध्यमꣳ षष्ठमहर्भवति । तस्मिन्मेध्यान्पुरुषानालभते पुरुषमेधस्यैवाप्त्यै ॥८॥ अप्तोर्यामः सप्तममहर्भवति । सर्वेषां यज्ञक्रतूनामाप्त्यै तस्मिन्त्सर्वान्मेध्यानालभते यच्च प्राणि यच्चाप्राणं वपा वपावतां जुहोति त्वच उत्कर्तमवपाकानाꣳ संत्रश्चमोषधिवनस्पतीनां प्रकिरन्ति शुष्काणां चार्द्राणां चान्नमन्नं जुहोत्यन्नस्यान्नस्याप्त्यै सर्वं जुहोति सर्वस्मै जुहोति सर्वस्याप्त्यै सर्वस्यावरुद्ध्यै प्रातःसवने हुतासु वपास्वेवमत्र तृतीयसवने हुतेषु हविःषु ॥९॥ त्रिणवमष्टममहर्भवति । वज्रो वै त्रिणवो वज्रेण खलु वै क्षत्रꣳ स्पृतं तद्वज्रेणैव क्षत्रꣳ स्पृणोति ॥१०॥ त्रयस्त्रिꣳशं नवममहर्भवति । प्रतिष्ठा वै त्रयस्त्रिꣳशः प्रतिष्ठित्यै ॥११॥ विश्वजित्सर्व-

पृष्ठोऽतिरात्रो दशममहर्भवति । सर्वं वै विश्वजित्सर्वपृष्ठोऽतिरात्रः सर्वꣳ सर्वमेधः सर्वस्याप्त्यै सर्वस्यावरुद्ध्यै ॥१२॥ अथातो दक्षिणानाम् । मध्यं प्रति राष्ट्रस्य यदन्यद्ब्राह्मणस्य वित्तात्सभूमि सपुरुषं प्राची दिग्घोतुर्दक्षिणा ब्रह्मणः प्रतीच्यध्वर्योरुदीच्युद्गातुस्तदेव होतृका अन्वाभक्ताः ॥१३॥ तेन हैतेन विश्वकर्मा भौवन ईजे । तेनेष्ट्वात्यतिष्ठत्सर्वाणि भूतानीदꣳ सर्वमभवदतितिष्ठति सर्वाणि भूतानीदꣳ सर्वं भवति य एवं विद्वान्त्सर्वमेधेन यजते यो वैतदेवं वेद ॥१४॥ तꣳ ह कश्यपो याजयां चकार । तदपि भूमिः श्लोकं जगौ न मा मर्त्यः कश्चन दातुमर्हति विश्वकर्मन्भौवन मन्द आसिथ उपमङ्क्ष्यति स्या सलिलस्य मध्ये मृषैष ते संगरः कश्यपायेति ॥१५॥ ब्राह्मणम् ॥३ [७. १.] ॥ सप्तमोऽध्यायः [१०.] ॥ ॥

अथास्मै कल्याणं कुर्वन्ति ॥ ॥ अथास्मै श्मशानं कुर्वन्ति । गृहान्वा प्रज्ञानं वा यो वै कश्च म्रियते स शवस्तस्माऽएतदन्नं करोति तस्माच्छवान्नꣳ शवान्नꣳ ह वै तच्छ्मशानमित्याचक्षते परोऽक्षꣳ श्मशा उ हैव नाम पितृणामत्तारस्ते हामुष्मिंल्लोकेऽकृतश्मशानस्य साधुकृत्यामुपदम्भयन्ति तेभ्य एतदन्नं करोति तस्माच्छ्मशानꣳ श्मशानꣳ ह वै तच्छ्मशानमित्याचक्षते परोऽक्षम् ॥१॥ तद्वै न क्षिप्रं कुर्यात् । नेन्नवमघं करवाणीति चिरऽएव कुर्यादघमेव तत्तिरः करोति यत्र समा नानु चन स्मरेयुरश्रुतिमेव तदघं गमयति यद्यनुस्मरेयुः ॥२॥ अयुङ्क्षु संवत्सरेषु कुर्यात् । अयुङ्गꣳ हि पितृणामेकनक्षत्रऽएकनक्षत्रꣳ हि पितृणाममावास्यायाममावास्या वाऽएकनक्षत्रमेको हि यदेताꣳ रात्रिꣳ सर्वाणि भूतानि संवसन्ति तेनो तं काममाप्नोति यः सर्वेषु नक्षत्रेषु ॥३॥ शरदि कुर्यात् । स्वधा वै शरत्स्वधो वै पितृणामन्नं तदेनमन्ने स्वधायां दधाति माघे वा मा नोऽघं भूदिति निदाघे वा नि नोऽघं धीयाताऽइति ॥४॥ चतुःस्रक्ति । देवाश्चासुराश्चोभये प्राजापत्या दिक्ष्वस्पर्धन्त ते देवा असुरान्त्सपत्नान्भ्रातृव्यान्दिग्भ्योऽनुदन्त तेऽदिक्काः प-

राभवंस्तस्माद्या दैव्यः प्रजाश्चतुःस्रक्तीनि ताः श्मशानानि कुर्वतेऽथ या आसुर्यः
प्राच्यास्त्वद्वे त्वत्परिमण्डलानि तेऽनुदन्त ह्येनान्दिग्भ्य उभे दिशावन्तरेण विदधा-
ति प्राचीं च दक्षिणां चैतस्याꣳ ह दिशि पितृलोकस्य द्वारं द्वारैवैनं पितृलोकं
प्रपादयति स्रक्तिभिर्दिक्षु प्रतितिष्ठतीतरेणात्मनावान्तरदिक्षु तदेनꣳ सर्वासु दिक्षु
प्रतिष्ठापयति ॥५॥ अथातो भूमिजोषणस्य । उदीचीनप्रवणे करोत्युदीची वै म-
नुष्याणां दिक्तदेनं मनुष्यलोकऽआभजत्येतद्ध वै पितरो मनुष्यलोकऽआभक्ता भ-
वन्ति यदेषां प्रजा भवति प्रजा हास्य श्रेयसी भवति ॥६॥ दक्षिणाप्रवणे कुर्या-
दित्याहुः । दक्षिणाप्रवणो वै पितृलोकस्तदेनं पितृलोकऽआभजतीति न तथा
कुर्यादामीवद्ध नाम तच्छ्मशानकरणं क्षिप्रे हैषामपरोऽनुप्रैति ॥७॥ दक्षिणाप्रव-
णस्य प्रत्यर्षे कुर्यादित्यु हैकऽआहुः । तत्प्रत्युच्छ्रितमघं भवतीति नोऽएव तथा
कुर्याद्यद्वाऽउदीचीनप्रवणे करोति तदेव प्रत्युच्छ्रितमघं भवति ॥८॥ यस्यैव सम-
स्य सतः । दक्षिणतः पुरस्तादाप एत्य सꣳस्थायाप्रप्लुत्य एतां दिशमभिनिष्पद्या-
क्षय्या अपोऽपिपद्येरंस्तत्कुर्यादन्नं वाऽआपोऽन्नाद्यमेवास्माऽएतत्पुरस्तात्प्रत्यग्द-
धात्यमृतमु वाऽआप एषो ह जीवानां दिगन्तरेण सप्तऽर्षीणां चोदयनमादित्यस्य
चास्तमयनममृतमेव तज्जीवेषु दधाति तद्धैतत्प्रतिमीवन्नाम श्मशानकरणं जीवे-
भ्यो हितं यद्वाव जीवेभ्यो हितं तत्पितृभ्यः ॥९॥ कम्वति कुर्यात् । कं मेऽस-
दित्यथो शम्वति शं मेऽसदिति नाधिपथं कुर्यान्नाकाशे नेदाविरघं करवाणीति
॥१०॥ गुहा सद्वतापि स्यात् । यद्गुहा भवत्यघमेव तद्गुहा करोत्यथ यद्व-
ताप्यसौ वाऽआदित्यः पाप्मनोऽपहन्ता स एवास्मात्पाप्मानमपहन्त्यथोऽआदि-
त्यज्योतिषमेवैनं करोति ॥११॥ न तस्मिन्कुर्यात् । यस्येत्थादनूकाशः स्याद्याच-
मानꣳ ह नाम तत्क्षिप्रे हैषामपरोऽनुप्रैति ॥१२॥ चित्रं पश्चात्स्यात् । प्रजा वै
चित्रं चित्रꣳ हास्य प्रजा भवति यदि चित्रं न स्यादापः पश्चाद्वोत्तरतो वा स्युरापो

क्वेव चित्रं चित्रꣳ हैवास्य प्रजा भवति ॥१३॥ ऊषरे करोति । रेतो वाऽऊषाः प्रजननं तदेनं प्रजननऽआभजत्येतद्ध वै पितरः प्रजननऽआभक्ता भवन्ति यदेषां प्रजा भवति प्रजा हास्य श्रेयसी भवति ॥१४॥ समूले । समूलꣳ हि पितॄणां वीरिणमिश्रमेतद्धास्याः पित्र्यमनतिरिक्तमथोऽअघमेव तद्धृ करोति ॥१५॥ न भूमिपाशमभिविदध्यात् । न शरं नाश्मगन्धां नाध्याण्डां न पृश्निपर्णीं नाश्वत्थस्यान्तिकं कुर्यान्न विभीतकस्य न तिल्वकस्य न स्फूर्जकस्य न हरिद्रोर्न न्यग्रोधस्य ये चान्ये पापनामानो मङ्गलोपेप्सया नाम्नामेव परिहाराय ॥१६॥ अथात आवृदेव । अग्निविधयाग्निचितः श्मशानं करोति यद्वै यजमानोऽग्निं चिनुतेऽमुष्मै तल्लोकाय यज्ञेनात्मानꣳ संस्कुरुतऽएतद्ध ह यज्ञियं कर्मासꣳस्थितमा श्मशानकरणात्तद्यदग्निविधयाग्निचितः श्मशानं करोत्यग्निचित्यामेव तत्सꣳस्थापयति ॥१७॥ तद्वै न महत्कुर्यात् । नेन्महदघं करवाणीति यावानपक्षपुच्छोऽग्निस्तावत्कुर्यादित्यु हैकऽआहुः समानो ह्यस्यैष आत्मा यथैवाग्निस्तथेति ॥१८॥ पुरुषमात्रं त्वेव कुर्यात् । तथापरस्माऽअवकाशं न करोति पश्चाद्वरीयः प्रजा वै पश्चात्प्रजामेव तद्वरीयसीं कुरुतऽउत्तरतो वर्षीयः प्रजा वाऽउत्तरा प्रजामेव तद्वर्षीयसीं कुरुते तद्विधायापसलविसृष्टाभि स्पन्द्याभिः पर्यातनोत्यपसलवि पित्र्यꣳ हि कर्म ॥१९॥ अथोद्धन्तवाऽआह । स यावत्येव निवप्स्यन्त्स्यात्तावदुद्धन्यात्पुरुषमात्रं त्वेवोद्धन्यात्तथापरस्माऽअवकाशं न करोत्यथोऽओषधिलोको वै पितर ओषधीनाꣳ ह मूलान्युपसर्पन्त्यथो नेदस्या अन्तर्हितोऽसदिति ॥२०॥ ब्राह्मणम् ॥४ [८. १.] ॥ ॥

अन्तर्धायो हैके निवपन्ति । देवाश्चासुराश्चोभये प्राजापत्या अस्मिंल्लोकेऽस्पर्धन्त ते देवा असुरान्त्सपत्नान्भ्रातृव्यानस्माल्लोकादनुदन्त तस्माद्या दैव्यः प्रजा अनन्तर्हितानि ताः श्मशानानि कुर्वतेऽथ या आसुर्यः प्राच्यास्त्वद्ये त्वदन्तर्हितानि ते चम्वां त्वद्यस्मिंस्त्वत् ॥१॥ अथैनत्परिश्रिद्भिः परिश्रयति । या एवामूः परिश्रितस्ता

एता यजुषा ताः परिश्रयति तूष्णीमिमा दैवं चैव तत्पित्र्यं च व्याकरोत्यपरिमि-
ताभिरपरिमितो ह्यसौ लोकः ॥२॥ अथैनत्पलाशशाखया व्युदूहति । यद्देवादो
व्युदूहनं तदेतदपेतो यन्तु पणयोऽसुम्ना देवपीयव इति पणीनेवैतदसुम्नान्देवपी-
यूनसुररक्षसान्यस्माल्लोकादपहन्त्यस्य लोकः सुतावत इति सुतवान्हि य ईजानो
द्युभिरहोभिरक्तुभिर्व्यक्तमिति तदेनमृतुभिश्चाहोरात्रैश्च सलोकं करोति ॥३॥ यमो
ददात्ववसानमस्मा इति । यमो ह वा अस्यामवसानस्येष्टे तमेवास्मा अस्याम-
वसानं याचति तां दक्षिणोदस्यत्युदगितरां दैवं चैव तत्पित्र्यं च व्याकरोति ॥४॥
अथ दक्षिणतः सीरं युनक्ति । उत्तरत इत्यु हैक आहुः स यथा कामयेत तथा
कुर्याद्युञ्जन्ति सम्प्रेष्याभिमन्त्रयते सविता ते शरीरेभ्यः पृथिव्यां लोकमिच्छत्विति स-
वितैवास्यैतच्छरीरेभ्यः पृथिव्यां लोकमिच्छति तस्मै युज्यन्तामुस्रिया इत्येतस्मा उ
हि कर्मण उस्रिया युज्यन्ते ॥५॥ षड्गवं भवति । षडृतवः संवत्सर ऋतुष्वेवैनमे-
तत्संवत्सरे प्रतिष्ठायां प्रतिष्ठापयति तदपसलवि पर्याहृत्योत्तरतः प्रतीचीं प्रथ-
माꣳ सीतां कृषति वायुः पुनात्विति सविता पुनात्विति जघनार्धेन दक्षिणाग्नेर्भ्रा-
जसेति दक्षिणार्धेन प्राचीꣳ सूर्यस्य वर्चसेत्यग्रेणोदीचीम् ॥६॥ ॥ शतम् ६८०० ॥ ॥
चतस्रः सीता यजुषा कृषति । तद्यच्चतसृषु दिक्ष्वन्नं तस्मिन्नेवैनमेतत्प्रतिष्ठापयति
नद्धि यजुषाद्धा वै तद्यद्यजुरद्धो तद्यदिमा दिशः ॥७॥ अथात्मानं विकृषति । त-
द्यदेव संवत्सरेऽन्नं तस्मिन्नेवैनमेतत्प्रतिष्ठापयति तूष्णीमपरिमिताभिरपरिमितो
ह्यसौ लोकः ॥८॥ अथैनद्विमुञ्चति । कृत्वा तत्कर्म यस्मै कर्मण एनद्युङ्क्ते विमु-
च्यन्तामुस्रिया इत्येतस्मा उ हि कर्मण उस्रिया युज्यन्ते तद्दक्षिणोदस्यत्युदगित-
रद्दैवं चैव तत्पित्र्यं च व्याकरोति ॥९॥ ब्राह्मणम् ॥५ [८. २.] ॥ ॥

अथ सर्वौषधं वपति । यद्देवादः सर्वौषधं तदेतद्दक्षीभिस्तद्वपत्येकयेदं दैवं चैव
तत्पित्र्यं च व्याकरोत्यश्वत्थे वो निषदनं पर्णे वो वसतिष्कृतेति ज्योग्जीवातुम-

वेभ्य एतदाशास्ते तथो ह्येषामेकैकोऽपरो जरसानुप्रैति ॥१॥ अथैनन्निवपति । इयं वै पृथिवी प्रतिष्ठास्यामेवैनमेतत्प्रतिष्ठायां प्रतिष्ठापयति पुरादित्यस्योदयात्तिर-इव वै पितरस्तिर-इव रात्रिस्तिर एव तत्करोति यथा कुर्वतोऽभ्युदियात्तदेनमुभयोरहोरात्रयोः प्रतिष्ठापयति ॥२॥ सविता ते शरीराणि । मातुरुपस्थऽआवपत्विति सवितैवास्यैतच्छरीराण्यस्यै पृथिव्यै मातुरुपस्थऽआवपति तस्यै पृथिवि शं भवेति यथैवास्माऽइयꣳ शꣳ स्यादेवमेतदाह प्रजापतौ त्वा देवतायामुपोदके लोके निदधाम्यसाविति नाम गृह्णात्ययं वै लोक उपोदकस्तदेनं प्रजापतौ देवतायामुपोदके लोके निदधाति ॥३॥ अथ कंचिदाह । एतां दिशमनवानन्त्सृत्वा कुम्भं प्रत्तीयानपेक्षमाण एहीति तत्र जपति परं मृत्योऽअनु परेहि पन्थां यस्तेऽअन्य इतरो देवयानात् चक्षुष्मते शृण्वते ते ब्रवीमि मा नः प्रजाꣳ रीरिषो मोत वीरानिति ज्योग्जीवातुमेवेभ्य एतदाशास्ते तथो ह्येषामेकैकोऽपरो जरसानुप्रैति ॥४॥ अथैनं यथाङ्गं कल्पयति । शं वातः शꣳ हि ते घृणिः शं ते भवन्त्विष्टकाः शं ते भवन्त्वग्नयः पार्थिवासो मा त्वाभिशूशुचन् कल्पन्तां ते दिशस्तुभ्यमापः शिवतमास्तुभ्यं भवन्तु सिन्धवः अन्तरिक्षꣳ शिवं तुभ्यं कल्पन्तां ते दिशः सर्वा इत्येतदेवास्मै सर्वं कल्पयत्येतदस्मै शिवं करोति ॥५॥ अथ त्रयोदश पादमात्र्य इष्टका अलक्षणाः कृता भवन्ति । या एवामूरग्नाविष्टकास्ता एता यजुषा ता उपदधाति तूष्णीमिमा दैवं चैव तत्पित्र्यं च व्याकरोति ॥६॥ त्रयोदश भवन्ति । त्रयोदश मासाः संवत्सर ऋतुष्वेवैनमेतत्संवत्सरे प्रतिष्ठायां प्रतिष्ठापयति ॥७॥ पादमात्र्यो भवन्ति । प्रतिष्ठा वै पादः प्रतिष्ठामेवास्मै करोत्यलक्षणा भवन्ति तिर-इव वै पितरस्तिर-इव तद्यदलक्षणं तिर एव तत्तिरः करोति ॥८॥ तासामेकां मध्ये प्राचीमुपदधाति । स आत्मा तिस्रः पुरस्तान्मूर्धसꣳहितास्तच्छिरस्तिस्रो दक्षिणतः स दक्षिणः पक्षस्तिस्र उत्तरतः स उत्तरः पक्षस्तिस्रः पश्चात्त-

त्युहुं सो ऽस्यैष पक्षपुच्छवानात्मा यथैवाग्नेस्तथा ॥९॥ अथ प्रदरात्पुरीषमाहर्तवा ऽआह । एतद्धास्याः पित्र्यमनतिरिक्तमथाऽअघमेव तद्ध्व करोत्यस्मिन्नु हैकेऽवान्तरदेशे कर्षूं खात्वा ततोऽभ्याहारं कुर्वन्ति परिकृषन्त्यु हैके दक्षिणतः पश्चादुत्तरतस्ततोऽभ्याहारं कुर्वन्ति स यथा कामयेत तथा कुर्यात् ॥१०॥ तद्वै न महत्कुर्यात् । नेन्महदघं करवाणीति यावानुद्बाहुः पुरुषस्तावत्क्षत्रियस्य कुर्यान्मुखदघ्नं ब्राह्मणस्योपस्थदघ्नं स्त्रिया ऊरुदघ्नं वैश्यस्याष्ठीवदघ्नं शूद्रस्यैवंवीर्या ह्येत ऽइति ॥११॥ अधोजान्वु त्वेव कुर्यात् । तथापरस्माऽअवकाशं न करोति तस्य क्रियमाणस्य तेजनीमुत्तरतो धारयन्ति प्रजा ह सा प्रजामेव तदुत्तरतो धारयन्ति तां न न्यस्येद्धृत्वा वैनामूढ्वा वा गृहेषूच्छ्रयेत्प्रजामेव तद्गृहेषूच्छ्रयति ॥१२॥ कृत्वा यवान्वपति । अघं मे यवयानित्यवकाभिः प्रच्छादयति कं मेऽसदिति दर्भैः प्रच्छादयत्यनूक्षतायै ॥१३॥ ब्राह्मणम् ॥६ [८. ३.] ॥ ॥

अथैनच्छङ्कुभिः परिणिहन्ति । पालाशं पुरस्ताद्ब्रह्म वै पलाशो ब्रह्मपुरोगवमेवैनं स्वर्गं लोकं गमयति शमीमयमुत्तरतः शं मेऽसदिति वारणं पश्चादघं मे वारयाताऽइति वृत्रशङ्कुं दक्षिणतोऽघस्यैवानत्ययाय ॥१॥ अथ दक्षिणतः परिवक्रे खनन्ति । ते क्षीरेण चोदकेन च पूरयन्ति ते हैनममुष्मिंलोकेऽक्षिते कुल्ये ऽउपधावतः सप्तोत्तरतस्ता उदकेन पूरयन्ति न ह वै सप्त स्रवन्तीरघमत्येतुमर्हत्यघस्यैवानत्ययाय ॥२॥ अश्मनस्त्रींस्त्रीन्प्रकिरन्ति । ता अभ्युत्तरन्त्यश्मन्वती रीयते संरभध्वमुत्तिष्ठत प्रतरत सखायः अत्रा जहीमोऽशिवा येऽअसञ्छिवान्वयमुत्तरेमाभि वाजानिति यथैव यजुस्तथा बन्धुः ॥३॥ अपामार्गैरपमृजते । अघमेव तदपमृजतेऽपाघमप किल्बिषमप कृत्यामपो रपः अपामार्ग त्वमस्मदप दुःष्वप्न्यं सुवेति यथैव यजुस्तथा बन्धुः ॥४॥ यत्रोदकं भवति तत्स्नान्ति । सुमित्रिया न आप ओषधयः सन्त्वित्यञ्जलिनाप उपाचति वज्रो वाऽआपो वज्रेणैवैतन्मित्रधेयं

कुरुते दुर्मित्रियास्तस्मै सन्तु योऽस्मान्द्वेष्टि यं च वयं द्विष्म इति यामस्य दिशं द्वेष्यः स्यात्तां दिशं परासिञ्चेत्तेनैव तं पराभावयति ॥५॥ स यदि स्थावरा आपो भवन्ति । स्थापयन्त्येषां पाप्मानमथ यदि वहन्ति वहन्त्येवैषां पाप्मानᳫं स्नात्वाहतानि वासाᳫंसि परिधायानडुहः पुच्छमन्वारभ्यायन्त्याग्नेयो वाऽअनड्वानग्निमुखा एव तत्पितृलोकाज्जीवलोकमभ्यायन्त्यथोऽअग्निर्वै पथोऽतिवोढा स एनानतिवहति ॥६॥ उद्वयं तमसस्परीति । एतामृचं जपन्तो यन्ति तत्तमसः पितृलोकादादित्यं ज्योतिरभ्यायन्ति तेभ्य आगतेभ्य आञ्जनाभ्यञ्जने प्रयच्छन्त्येष ह मानुषोऽलङ्कारस्तेनैव तं मृत्युमन्तर्दधते ॥७॥ अथ गृहेष्वग्निᳫं समाधाय । वारणान्परिधीन्परिधाय वारणेन स्रुवेणाग्नयऽआयुष्मतऽआहुतिं जुहोत्यग्निर्वाऽआयुष्मानायुष ईष्टे तमेवैभ्य आयुर्याचत्यग्नऽआयूᳫंषि पवसऽइति पुरोऽनुवाक्याभाजनम् ॥८॥ अथ जुहोति । आयुष्मानग्ने हविषा वृधानो घृतप्रतीको घृतयोनिरेधि घृतं पीत्वा मधु चारु गव्यं पितेव पुत्रमभिरक्षतादिमान्त्स्वाहेति यथैवैनानभिरक्षेद्यथाभिगोपायेदेवमेतदाह ॥९॥ तस्य पुराणोऽनड्वान्दक्षिणा । पुराणा यवाः पुराण्यासन्दी सोपबर्हणैषा न्वादिष्टा दक्षिणा कामं यथाश्रद्धं भूयसीर्दद्यादिति न्वग्निचितः ॥१०॥ अथानग्निचितः । एतदेव भूमिजोषणमेतत्समानं कर्म यदन्यदग्निकर्मणः कुर्यादाहिताग्निः शर्करा इत्यु हैकऽआहुर्या एवामूरग्न्याधेयशर्करास्ता एता इति न कुर्यादित्येकऽईश्वरो हैता अनग्निचितᳫं संतप्तोरिति स यथा कामयेत तथा कुर्यात् ॥११॥ मर्यादायाऽएव लोष्टमाहृत्य । अन्तरेण निदधातीमं जीवेभ्यः परिधिं दधामि मैषां नु गादपरोऽअर्थमेतम् शतं जीवन्तु शरदः पुरूचीरन्तर्मृत्युं दधतां पर्वतेनेति जीवेभ्यश्चैवैतां पितृभ्यश्च मर्यादां करोत्यसम्भेदाय तस्मादु हैतज्जीवाश्च पितरश्च न संदृश्यन्ते ॥१२॥ ब्राह्मणम् ॥७ [८. ४.]॥ चतुर्थः प्रपाठकः ॥ कण्डिकासंख्या१०० ॥ ॥ अष्टमोऽध्यायः [११.] ॥ ॥ अस्मिन्काण्डे कण्डिकासंख्या४३२ ॥ ॥

इति माध्यन्दिनीये शतपथब्राह्मणेऽश्वमेधनाम त्रयोदशमं काण्डं समाप्तम् ॥१३॥ ॥

EXTRACTS FROM THE COMMENTARY OF HARISVÂMIN.

इदानीमश्वमेधस्य यदप्रसन्नं तद्दर्शयिष्यामः । तत्राश्वमेधस्योत्पत्तिः फलं च । पञ्चस्वध्यायेषु तस्य धर्मविधयः आध्वर्यवहौत्रौद्गात्रब्रह्मत्वयाजमानविषयास्तत्र च त्रिभिरध्यायैः सह मन्त्रव्याख्यानेन विशेषधर्मा अनुक्रान्ताः पुनरध्यायद्वयेन तऽएव धर्मान्तरसहिता अनुक्रान्ताः ॥ ब्राह्मणेभ्य ऋत्विग्भ्य[: देय] ओदनः ब्रह्मौदनः ॥१॥१॥१॥

अत्र रशनादिमन्त्रव्याख्यानम् ॥१॥२॥१॥

स्तोकीयाः स्तोकानां प्रस्रवणविन्दूनां निष्क्रयणतया सम्बन्धिनीराहुतीः । सहस्रं जुहोति अग्नये स्वाहेत्येता दशाहुतीः शतकृत्व आवृत्ता जुहोति ॥१॥ प्रदग्धोरिति प्राप्ते तोसुन आदिलोपः हकारस्य घत्वम् ॥४॥ अन्यत्राग्नेरिति अन्वाहार्यपचने वाश्वपदे वा परिलिखिते । वक्ष्यमाणकल्पान्तरनिन्दा (see ४. ३. ४-५.) ॥६॥ अनुद्रुत्य आनुपूर्व्येणोच्चार्य । सकृदेवेति न स्तोकीयावदावर्तयेत् ॥७॥ यज्ञमुखे-यज्ञमुखऽइति दीक्षणीया प्रायणीया आतिथ्या प्रवर्ग्य उपसदोऽग्नीषोमीयाः सुत्या अवभृथ उदयनीया अश्रूवंश्चा (?) उदवसानीयेत्येतेषु । अर्धुकः साधुसमृद्धः ॥८॥३॥१॥

प्रैषं प्रकर्षेणान्विष्यान्विष्य ऐच्छन् । इष्टिभिः सावित्रीभिः ॥१॥ धतोः इह रतिरिह रमतामित्येता आहुतीः । नष्टमन्विच्छति गवेषत इति नष्टैषः ॥३॥४॥१॥

प्रभ्रंशुका प्रकर्षेण भ्रंशनधर्मिका ॥४॥ इति एवममुं चतुर्दन्तकुठयुद्धादिकं संग्राममथवा कुरुसंग्रामं बालसंग्रामं प्राच्यसंग्रामं वालसंग्राममुच्यमपित्यादिकं (?) अजयज्जितवान् ॥६॥५॥१॥

तृतीयायां सावित्र्यामिष्टौ संस्थितायामुपोत्थायेति (४. २. १५.) वक्ष्यत्यत्र तु मन्त्रो व्याख्यायते ॥ तदनुकारेण शिष्टाः स्वकर्मकुशलाः । आमित्रौ अमित्रयोः पुत्रौ ॥१॥ तल्पसाधवस्तल्प्याः । बन्धनम् बध्यतेऽस्मिन्निति बन्धनस्थानम् ॥२॥ विविधमायच्छन्ते व्याप्रियन्ते । उदृचं समाप्तिम् ॥३॥६॥१॥

आत्मा शरीरम् तस्मात्सप्तभेदाच्चक्षुरादिभिः छिद्रैः । प्रजापतिः तस्या अवरोधार्थमेतानि वक्ष्यमाणानि काय स्वाहेत्यादिमन्त्रकाणि अपक्रान्तसप्तदेवताकानि वैश्वदेवानि नामाहवनानि अपश्यत् ॥१॥ त्रेधा त्रीणि विभज्य देवता जुहोति काय स्वाहा कस्मै स्वाहेत्येवमादिना । त्र्यावृतः वसुरुद्रादित्यात्मकैरवयवैस्त्रिगुणा देवाः अग्निः सोम इत्येवमाद्यात्मिका वा । लोका अपि त्रिगुणाः समस्ताः प्रत्येकं चादिमध्यान्तविभागेन त्र्यावृतः ॥२॥ सप्तभिर्दिवसैः कृत एकविंशतिः सम्पद्यतऽइति सम्पदधिकाराच्चवर्यौद्ग्रभणानि जुहोतीति चैकस्मिन्नहनि चतुर्होमवचनाच्च चवर्यौद्ग्रभणानि प्रत्यहं जुहोति प्रागल्भ्येन सप्तमे तु षडाग्निकानि जुहोति ॥४॥७॥१॥

प्रजापतिः अश्वमेधं यजुरात्मकं विग्रहवन्तं सृष्टवान् स एव सृष्टः सन्यजुषामपूर्वाणां बहुत्वाद्बलवत्तर इति कृत्वा ऋचमृग्यजुषमश्वमेधं साम सामयजुषं च प्र अव्लीनात् व्ली वरणे प्रावृणोदवष्टभ्य संकोचितवान् तं यजुरात्मकाश्वमेधमतिगुरुमपक्रामन्ति वैश्वदेवानि होमकर्माणि उत्तम्भनस्थानीयानि भूत्वा उत् (? हन Cod.) ऊर्ध्वमयच्छन् उद्यतवन्ति (अद्यत॰ Cod.) उत्क्षिप्तवन्ति ॥१॥ पूर्वासां व्याहृतीनाम् ॥३॥८॥१॥

समिदाधाना[दि] कृत्वा ब्रह्मन्नित्यध्वर्युर्जपत्याशीरूपत्वात् क्रियान्तरे वा[वि]नियोगात् ॥१॥१॥१॥

अन्नहोमब्राह्मणमेतत् ॥१॥ संततत्वात् ॥३॥ नक्षत्राणां तु लाजा रूपं समर्थत्वात् ॥५॥१॥२॥

तूपरमशृङ्गमजम् गोमृगं मृगाकारं गाम् ॥१॥ उत्सेधमुच्छ्रायं पर्वतादिकम् प्रासादं स्थलं वा। वेहतं गर्भघातिनम् ॥१॥ पञ्चदश पर्यङ्ग्याः द्वौ चाग्नेयावैकादशिनौ एते सप्तदश मध्यमे इतरेषु पञ्चदश-पञ्चदश रोहितादयः एकैकश्चैकादशिनः एवं षोडश-षोडश भवन्ति ॥१३॥ त्रामदय्यः समिद्धोऽअद्य मनुषो दुरोणऽइत्येताः ॥१४॥ प्रति-प्रति वर्ततऽइति प्रतिप्रतिः प्रतिस्पर्ध[:] स अस्यां विद्यतऽइति प्रतिप्रतिनी विट् व्रीह्यादिभ्यश्चेत्येवेनिर्मत्वर्थे द्रष्टव्यः (पा॰ ५. २. ११६.)। प्रत्युद्यामिनी प्रत्युद्यमनशीला ॥१५॥ इतरेषां रोहितादीनाम्। अनूकाशमालोकम् ॥१६॥ वैतसे वेतसविकारे इटसूने इटश्चासौ सूनं (!) च इटसूनं तस्मिन्नेव शाखामये कटे (करे Cod.)। आनुष्टुभः अनुष्टुभा संमितः तस्य हि चत्वारः खुरा भवन्ति अनुष्टुबपि चतुष्पादा। अनुष्टुभा संमिता एषा उत्तरा दिक् एषा हि प्राच्या आरभ्य चतुर्थी भवति ॥१९॥२॥२॥

मध्यमेऽहनि पवमानं प्रातःसवनिकं बहिष्पवमानम्। अश्वो वै स्वर्गं लोकमञ्जसा ऋजुना मार्गेण वेद स हि प्रजापतिरित्यभिप्रायः ॥१॥ यदि उद्गाता स्तोताप्रतिहर्तृभ्यां स(ह) उद्गायेत् स्तोत्रं कुर्यात्। वडवा उपास्याश्वस्य समीपे रुन्धन्ति ॥२॥३॥२॥

क्षेमे सति मनुष्याः सर्वान्देशान्संचरेयुः। समीपे ग्रामयोः सीमान्तौ स्याताम्। ऋक्षा एव ऋक्षीकाः। पुरुषाश्च ते व्याघ्राश्च पुरुषव्याघ्राः ये (?॰घ्राश्येक्षा Cod.) हि व्याघ्ररूपाः पुरुषा वदन्ति (?) ते पुरुषव्याघ्राः। परिमोषिणश्चौराः। आव्याधिन्यः अव्याधिंत्यायुधैः (!) इत्याव्याधिन्यः चोरसेनाः। तस्कराः तत्पापं कुर्वन्तीत्यतोऽन्ये चौराः। स्वदेशऽएव मनुष्याः संचरेयुर्न देशान्तरेऽप्यन्तरालाना[मसं]भिन्नत्वादक्षेमत्वाच्च। प्रविरला ग्रामा भवन्ति तेषां च सीमान्ता दूरे भवन्ति ॥२॥ क्षेमे हि सति वि पृथक् वसतः अक्षेमे तु सम्बद्धौ ॥४॥४॥२॥

पञ्चदशिनश्चातुर्मास्याः ऐकादशिना इत्येव त्रिधा ग्राम्यान्पशूनवस्थाप्य त्रीणि दर्शनानि (? दशनानि Cod.) तेष्वत्रोच्यन्ते। कासुचिदत्र (वाज॰ सं॰ २४.) काण्डिकासु पञ्चदश पशवः पठ्यन्ते कासुचिदधिकाः कासुचिन्न्यूनाः तत्र यासु पञ्चदश पठ्यन्ते तासु ये पशवः ते पञ्चदशिन इत्युच्यन्ते ॥१॥ चातुर्मास्यदेवताकान्पशून् कृष्णग्रीवा आग्नेया बभ्रवः सौम्या उपध्वस्ताः सावित्रा [इत्या]दीन् (वाज॰ सं॰ २४. १४.)। ऐकादशिनान्पशून् आग्नेयः कृष्णग्रीव इत्यादीन् (वाज॰ स॰ २९. ५८.) तेभ्योऽन्यत्र पञ्चदशिभिश्चातुर्मास्यैश्च केवलैः ॥२॥ विराडभिमानिनीं दशावयवां देवताम्। दशसंख्या प्रमाणं येषां ते दशिनः पशवः प्रजापतये च वायवे च गोमृग इत्येवमादयः (वाज॰ सं॰ २४. ३०.) ॥३॥ एकादश दशत इति प्रजापतये चेत्यत (वाज॰स॰ २४. ३०.) आरभ्यैकादशैवैताः काण्डिका यासु दश-दश पशवः ॥४॥५॥२॥

महिषी प्रथममोढा ॥४॥ वावाता प्रिया ॥५॥ परिवित्ता (!) दुर्भगा ॥६॥ काचा मणयः
। एकशतमेकैका पत्नी आवयति आबध्नाति केसरपुच्छेषु भूर्भुवः स्वरित्येताभिः व्याहृतिभिः
यथासंख्यम् प्रथमया महिषी द्वितीयया वावाता तृतीयया परिवृक्ता ॥८॥६॥२॥

आध्वरिकं प्रोक्षणयजुः अद्भ्यस्त्वौषधीभ्य इत्येतदुच्चार्य आश्वमेधिकं वायुष्ट्वेत्यतदारभ्यते यजु-
रिति चैकवचनाच्चतस्रोऽप्येता मन्त्रकाण्डिका एकं (°वं C.) वाक्यमिति दर्शयति ॥१॥ न्यग्रोधः
स्वकार्यैश्चमसैः सोमाङ्गभूतैश्चावव्रिति मन्त्रार्थः प्रसिद्ध एवेति न व्याख्यातः चरकाणां हि नैय-
ग्रोधाश्चमसाः पच्यन्ते । उब्जि आर्जवे अधोमुखांश्चक्रुः ॥३॥ आयुते आगच्छति ॥६॥ अथ उप-
गृह्णाति आध्वरिकं यजुरनुद्रुत्येति वर्तते आध्वरिकमपां पेरुरित्येतदुक्त्वाग्निः पशुरित्याश्वमेधि-
कैरुपगृह्णाति ॥१२॥ तस्य प्रोक्षणीनां पुनः संस्करणस्यातः परं ब्राह्मणं वक्ष्यतऽइति शे-
षः ॥१५॥७॥२॥

धुवते उपवाजयन्ति राजानमिव व्यजनैः ॥४॥८॥२॥

तत्र यास्वभिमेथिकासु किंचिद्दर्शनं गूढमस्ति तासु तदत्र ब्राह्मणमुच्यते ॥१॥९॥२॥

महिमानौ महिमप्राप्त्यर्थौ ग्रहौ हिरण्यगर्भो यः प्राण[त] इत्येतन्मन्त्रकौ ॥१॥१०॥२॥..

तदद्धि देवा अश्वमेधेन क्रतुना तस्मिन्प्रजापतौ प्रतीपं स्थापितवन्तः ॥१॥ स चतुरुत्तरः
स्तोमोऽश्वमेधस्य प्रथमेऽहनि भवति । सरट् कृकलाशः अश्वस्य सक्थ्नि आवृढवान् ॥४॥१॥३॥

कीदृशेन पुनः परमेण स्तोमेनेत्यत आह चतुष्टोमेन चतुरुत्तरेणेत्यर्थः (!) किं च कृतेन
पद्यः (?) कलिद्वापरत्रेताकृताख्यः द्यूतानुरूपेण जयाय पराजयाय द्यूतपरिवर्तायापरिवस्थायंमा-
यन्ति (?) इत्ययाः तेषां मध्ये यश्चातुष्कात्मकः अयः स चतुष्पाद्धर्मकस्य कृतयुगस्य प्रति-
रूपमिति स चतुष्ब(!)सामान्यात्कृतमित्युच्यते (!)लोके अत्र चतुष्क(!)सामान्यादेव च-.
तुरुत्तर स्तोमः कृतमित्युक्तः (!) तेन कृतस्थानीयेन स्तोमेन जित्वा अधियज्ञमुत्तरेऽहनि ए-
कविंशस्तोमके अधिदैवमेकविंशऽआदित्ये सर्वभूतप्रतिष्ठात्मके प्रतितिष्ठति । पृष्ठसाधनानि
रथन्तरादीनि षट्सामान्यादृतवः ॥१॥ शक्वर्यः पृथक्कार्या महानाम्न्यः सीमा इत्येवमाख्या
विदा मघवन्नित्यादयः ताभिरत्र तत्स्थं शाक्वरं नाम साम लक्ष्यते शक्वर्यः स्वसामप्रती-
ताः पृष्ठं भवन्ति शाक्वरं साम गीतं पृष्ठसाधनं भवतीत्यर्थः । शक्तायो हि शक्वर्यस्तासु क्रिय-.
माणासु शक्तिमान्सकलोऽश्वो भवतीत्यभिप्रायः ॥२॥ गव्याः गाव इति प्राप्ते स्वार्थिकतद्धि-
तक्रिया ॥३॥२॥३॥

वामदेवेन दृष्टं साम कया नश्चित्र आभुवदित्येतन्मैत्रावरुणशस्त्रसम्बद्धं स्तोत्रं वाम-
देव्यसामसाधनकं भवति ॥४॥ ब्राह्मणाच्छंसिशस्त्रसम्बद्धं स्तोत्रं पार्थरश्मसाधनकं भवति
॥५॥३॥३॥

अरण्येऽनूच्यानरण्ये पठितव्यानग्निं हृदयेनाशनिं हृदयाग्रेणेत्यादीन्विश्वेभ्यो देवेभ्यः
स्वाहेत्येवमन्तान्होमान् (वाज° सं° ३९. ८-१३.) ॥१॥ देवासुरा संयत्ता इत्यादि तिसृणां लोहि-
ताहुतीनां ब्राह्मणम् । उद्धारम् असाधारणमतिरिक्तं भागम् । अधुनापि यदग्निभ्यः स्विष्टकृद्भ्यः
स्वाहेति लोहितं जुहोति तद्भ्रातृव्याभिभवायैव ॥२॥ गोमृगस्य कण्ठेन पात्रेण प्रथमां लो-
हिताहुतिं जुहोति ॥३॥४॥३॥

अरण्येऽनूच्यांहुवैतत्राहुता (?) मृत्यवे स्वाहेत्याहुतिः ब्रह्महत्यायै स्वाहेति च तयोरे-

तद्दर्शनार्थं ब्राह्मणम् ॥१॥ अमुष्मै पितृलोकाय मृत्यवे इत्येव यदि जुहुयात्संचक्षीत मृत्युं परिगणयेत्। तत्परिहाराय मृत्यवे स्वाहेत्येकस्मिन्नेव एतामाहुतिं जुहोति ॥२॥ अपरीषु अपक्रान्तास्वतीतासु समासु ॥४॥५॥३॥

अश्वस्तोमीयद्विपदाहोमब्राह्मणमेतत्। अश्वस्य स्तुतिः स्तोमोऽस्मिन्सूक्तेऽस्तीत्यश्वस्तोमीयम् मा नो मित्र इति (वा° सं २५. २४-३१.) मतौ छः सूक्तसाम्नोः तत्सम्बन्धा[त्त]त्साध्यं होमजातमप्यश्वस्तोमीयम् ॥१॥ इमा नु कमित्येता ऋचो द्विपदाः (वा° सं २५. ४६-७.) तत्सम्बन्धात्तत्साध्या आहुतयोऽपि द्विपदाः ॥२॥ एताश्च पूर्वा आहुतयो मन्त्रब्राह्मणपाठक्रमेण संलग्ना एव प्राप्नुवन्ति सूत्रकारेण तु शाखान्तरात्क्रमान्तरं लब्धम् (का° २०. ८. ६-१.)। खलतेः पतितकेशस्य विक्लिधस्य दन्तुरस्य ॥५॥६॥३॥

अत्र ब्राह्मणेऽश्वमेधस्य द्वादश नामानि यौगिकानि दर्शनार्थं प्रदर्श्यन्ते ॥१॥७॥३॥

स्नामः (!) प्रतिश्रयः। अगदो अरोगः ॥२॥ अक्षतस्य आमयो रोगी ज्वरादिः। भूमिरिव द्वादशविभागा लोष्ठा वा द्वादश कपालकार्ये यस्य स भूमिकपालः ॥३॥ सा एषा निर्हविरिष्टिः (त्रिह° !) पृथगेव अश्वमेधात्पृथगपि बहिरपि भवति एवशब्दोऽप्यर्थे नष्टं विद्यते ऽनयेति नष्टवेदनी। यदि अस्य आहिताग्नेः अपि अन्यदस्मात् हिरण्यादि किंचित्पुरुषार्थं नश्येत् तत एतयैव निर्हविषा (!) यजेत ॥६॥८॥३॥

स हि तत्राग्नीऽआधत्ते ॥२॥ स हि तत्र आधानोपनयनादि करोति ॥३॥ चत्वारि सहस्राणि गवाम् ॥६॥ यजमानाय निष्कं सौवर्णमलंकारं गले आबध्नन् ॥७॥ उप समीपे क्लृप्ताः (!) स्थिताः ॥८॥ असंवर्तमानः मैथुनमनुपगच्छन् अनेन तपसा संनिहितप्रियानुपगमनेन स्वस्ति क्षेमेण अश्वरक्षणसंवत्सरस्य समाप्तिं प्राप्नुयाम् ॥९॥ पथः यज्ञपथस्य कामाय प्राप्तये न यज्ञपथादयानीति। यज्ञमुखस्य चारम्भस्य आछम्बट्कारा्य (!) अनन्तरा[य] कथं हि यज्ञमुखं यज्ञमूर्न्यं (? मून्यं Cod.) स्यादित्यर्थः ॥१२॥ मूर्धन्वती एव न सद्वती अन्या एका च प्रथमा भवति सद्वतो अन्या भुवो यज्ञस्येत्येषा भुवः (? नुच Cod.) भवसीत्यनेन (?) पादसान्ता (?) भवनमुपात्तं भविता चाग्निस्तेन च सा सद्वती मूर्धन्वत्यपि तु भवत्येव सा मूर्धानं दधिष इत्येतेन मूर्धन्वत्येवान्या भवति न सद्वतीत्येवमवधृतम् न त्वेव सर्वं धार्यतेऽन्यैव मूर्धन्वती भवति तद्वेदेदिति (?) ॥१३॥१॥४॥

निक्त्वा स्नापयित्वा। सहस्रं गवां मूल्यं योऽर्हति सहस्रार्हः। पूर्व्यम् प्रथमे वयसि वर्तमानम् प्रतिधारयिता प्रतिधुरः नास्ति प्रतिधुरः अस्येति अप्रतिधुरः ॥१॥ कृत्तिका शकटपुण्ड्रमक्ष्णि (? मुंद्र Cod.) यस्य स कृत्तिकाक्ष्णिः ॥४॥ राजपुत्राः अभिषिक्तपुत्राः। कवचः संनाहस्तद्वन्तः कावचिनः। राजन्याः क्षत्रियाः। निषङ्गिणः खड्गिनः। इषुपर्षिणः पृषु वृषु मृषु सेचने इष्वनसाधुव (? इषून् ?) प्रवर्षयन्ति अस्यन्तीति इषुपर्षिणः। क्षत्तारः आयव्ययाध्यक्षाः तेषां समूहः क्षात्त्रं। अश्वशतं यस्मिन्नेनमश्वं संसृज्य रक्षन्ति कीदृशं तत् निरष्टम् अश्वस्य दन्तगतानि वयोव्यञ्जनानि भवन्ति तेषामेकैकं त्रीणि-त्रीणि (वर्षाणि) अनुवर्तन्ते तान्यष्टौ व्यञ्जनानि गतान्यस्मादिति निरष्टमतीतचतुर्विंशतिवर्षमित्यर्थः नियता रमत्यस्मिन्निति निरमणम् ॥५॥ नानारूपतायै मध्ये रजतमभितः सुवर्णमित्येवं क्रियमाणे नानारूपास्तिस्रोऽपीष्टयो भवन्ति अथो उत्क्रमाय सुवर्णं प्रथमामिष्टिमुत्क्रम्योत्तमायां वर्तते (°र्णमिच्यमा° Cod.)

॥१०॥ स अध्वर्युराह हे आशापालाः युष्माकं मध्ये एतस्य कर्मणः उदृचं समाप्तिं गमिष्यन्ति [ये] ते राष्ट्रवन्तो भविष्यन्ति । अराजानः अनीश्वराः । .स्नावात् स्नानार्हात्प्रातप्याउदकात् । ब्राह्मणजातं ब्राह्मणसमूहम् । अश्वमेधः सर्वम् सर्वाण्येवैष्टिकपाशुकसौमिकदार्विहोमिकानि कर्माणि तत्रान्तर्गतानि तन्मन्त्रब्राह्मणानि च ततश्चान्ततः सावित्री तत्र विद्यते । अब्राह्मणः व्रात्यः पतितसावित्रीकः । ज्येय एव वित्तमानादिना वैश्यवत् हापनीयः सर्वाधिकारमुपजीव्यः । पानमुदकम् खाद्य-इव खादः यवसादिः यच्च किंचिज्जनपदे असंस्कृतं संस्कृतमन्नं (?) सक्तुतण्डुलादि तत्सर्वं युष्मभ्यमेव स्तुतं (!) तदपि भवदुपयोज्यम् (?स्वयदु° Cod.) ॥१७॥२॥४॥

कशिपु आसनविशेषः कूर्चः कूर्चाकृति पीठमात्रम् ॥१॥ हवै अहमेव वां प्रतिह्वयै सर्ज्जो ऽहं प्रतिगराय ॥२॥ आह होता । अश्रोत्रियाः सकलवेदानध्यायिनः गृहमेधिनः पाकयज्ञयाजिनः । वीणानामलावुवीणा (युवी C.) त्रितन्तिः सप्ततन्तिरित्यादीनां वीणागणः तेन वीणागणसंघातेन (तं Cod.) ये गायन्ति शब्दायन्ति ते वीणागणगास्ते शिष्यभूता येषां गायनाचार्यादीनां गणानां (!) सन्ति ते वीणागणगिनः । संगायन्तीत्युपमानभूतैः पुराणैः सह उपमेयभूतं गायन्ति ॥३॥ सम्प्रेष्य गायनान् (त् C.) अध्वर्युर्न होता प्रक्रमान् हिङ्काराय स्वाहेत्येतान्होमान्जुहोति दक्षिणाग्नौ वाश्वपदे वा परिलिखिते यतरथा एतयोर्यतरेण प्रकारेणास्य यजमानस्य तत्रावृत् कर्मादावङ्गीकृतं भवतीतरथा जुहोति पूर्वैव तु स्थितिः या प्रथमेऽध्याये पठिता (१.३.६-७.) ॥४॥ कासावित्यत आह सावित्र्या एवेष्टेः पुरस्तादनुपूर्वमुच्चार्य सकृदेव प्रथमे दिवसे न प्रतिदिनं रूपाणि हिङ्कारादीनि आज्यमयानि परिकल्प्य आहवनीये जुहोति न पदेऽन्वाहार्यपचने वा ॥५॥ अथर्वणा प्रोक्ता मन्त्रा ब्राह्मणानुवाकाश्च अथर्वाणः ॥७॥ एवमङ्गिरसा प्रोक्ता अङ्गिरसः ॥८॥ सेलं गायन्तीति सेलगाः सालो (!) वंशग्रामरागसदृशो (वंस Cod.) मुखेन आश्वासे (? याश्वासे Cod.) क्रियते गोपालादिभिः । देवजनविद्या भूतविद्या ॥१०॥ धर्मः धर्मवान् इन्द्रः शक्रो राजा तस्य देवा विशः सेवकाः ॥१४॥३॥४॥

संवत्सरे सायने षट्त्रिंशतां दशाहानां वचनात् स चाश्वोत्सर्गदिवसादारभ्य गणनीयो न ब्रह्मौदनदिवसात् । प्राजापत्यमिष्टकापशुं (?शुनं Cod.) वायव्यं पशुं वा पशूनालभ्य स्वकालऽएवोत्तरस्यां फाल्गुन्यां तद्बाधकरणाभावाद्दीक्षा (दीक्षा Cod.) कर्तव्या । सा चाष्टम्यामुखां सम्भृत्येष्टकाः कृत्वोत्तरस्याममावास्यायामामावास्येनेष्ट्वा अन्वेष्टव्या (अंवेष्टव्यः । Cod.) प्रतिदिनं चाग्नावैष्णवमौद्ग्रभणानि आध्वरिकाण्याश्वमेधिकानि कृष्णाजिनदीक्षां च कुर्वद्भिः सप्तम्यां (स्नाम्या Cod.) संस्थापनीयास्तृतीयायां दीक्षां समापद्य पञ्चदश्यामुपवसथः कार्यः प्रतिपदादिषु सुत्यास्ततो ब्रह्मौदन ऋतुपशवश्च कार्याः । उत्सीदन्ति नानुष्ठीयन्ते इष्टयः सावित्रीभिरिष्टिभिः पूर्णेऽपि संवत्सरे ता उत्सीदेयुरित्यन्ये शाखिन आहुः । किमु किं क्षेपे उशब्द[स्तुशब्द]स्य स्थाने किं तु कस्मात्कारणान्न कुतश्चिदपीत्यर्थः । दीक्षितः सावित्रीभिर्विशेषेण विहिताभिर्यजेत दीक्षितस्य हि यागदानहोमाः सामान्येन [द्वा]दशैव दीक्षा उपसदश्च प्राप्ताः सुत्याश्च तिस्रः उत्पत्तावेव सिद्धाः तत्सर्वं दीक्षादि त्रिणवं स्तोममभि सम्पद्यते स च वज्रसंस्तुतः ॥१॥ The explanation of the rest of this brâhmaṇa to ५.१.२. is wanting.

उक्थ्यानुरूपैः सार्धं सह एकीभूयमेव शंसेत् तथा हि त्रीण्यप्याध्वर्यवौद्गात्रहौत्राण्यवि-

लक्षणानि भवन्तीत्यभिप्रायः । रथन्तरं पृष्ठसाधनं तच्च प्रथमेऽहनि भवति न बृहदिति नियमवचनम् राथन्तरं च शस्त्रम् रथन्तरपृष्ठसम्बन्धं यादृशं निष्केवल्यं शस्त्रं तादृशमत्र भवति अग्निष्टोमसंस्थोऽयं यज्ञो भवति नोक्थ्यादिसंस्थः ॥२॥ एकविंशतिः सवनीया आग्नेयाः समानकर्मणात्र प्रथमेऽहनि भवन्तीत्येकऽश्राङ्क्षः । आश्वमेधक(धककि)खिलपरिपठिते एकादशिन्यौ आग्नेयः कृष्णग्रीवः अग्नयेऽनीकवते रोहितास्त्रिरनड्वानित्येते (वाज° सं° २१. ५८-१.) ॥३॥ क्रमार्थमिदं पुनर्वचनम् (see २. १. १.) । अध्वर्युग्रहणमौद्गात्रव्यवधानार्थम् ॥४॥ एतद्दर्शनार्थं पुनरुच्यते । स्वायां देवतायामादित्ये ॥५॥ अनेन एकविंशतिविभागेनात्मना प्राणेन तमेतस्मिन्नादित्ये ॥६॥ उच्चावचं नानारूपम् ॥७॥ तस्य मध्यमाङ्गः हैत्रे प्रातःसवनं विशेषेण कल्पयिष्यऽइति शेषः । अग्निं तमित्येतत्सूक्तं पाङ्क्तं पङ्क्तीनां समूहः आज्यमाज्यशस्त्रात्मकमाश्वमेधिकं शस्त्वा ऐकाहिकं ज्यौतिष्टोमिकमाज्यमाज्यसूक्तमुप उपचिन्वन् स एकार्हादपूर्वेणाश्वमेधिकेन (!) शंसति एष तावदाज्ये प्रथमे शस्त्रे विशेषः । अथ द्वितीये शस्त्रे विशेषमाह बार्हतं च आ नो यज्ञं दिविस्पृशम् बृहतीनां समूहं प्रउगं प्रशस्त्रात्मकम् माधुच्छन्दसं मधुच्छन्दस आर्षं ज्यौतिष्टोमिकं प्रउगं वायुरग्रेगा इत्येतत् तृचं (!) शंसति माधुच्छन्दसे हि वायव्यादयः सप्त तृचाः सप्तैव बार्हतास्तेषामेकं बार्हतमेकं च माधुच्छन्दसं समानेन शंसत्येवं सर्वान् यश्च बार्हते प्रउगे कामो ब्राह्मणे पठितः यश्च माधुच्छन्दसे तयोरुभयोराप्त्यै । क्लृप्तं प्रातःसवनम् एतावानेवात्र विशेषो नान्योऽस्ति इत्यर्थः ॥८॥ मरुत्वतीयस्य शस्त्रस्य त्रिकद्रुकेषु महिष इत्येषातिच्छन्दाः प्रतिपत्प्रथमा च वयति (?) इदं वसो सुतमन्ध इत्यनुचरस्तृचः प्राकृत एव एष एव नित्यः एकाहातानः एकाहोऽतः ¬ ते (!) इन्द्र दीयतऽइत्यादि एकाहातानादूर्ध्वं पङ्क्तीः शंसति ततः षट्पदाः तत ऐकाहिकं सूक्तं शंसति तत्र च प्रागुत्तमायाः ऋचः निविदं दधाति ॥९॥ निष्केवल्यं माहेन्द्रशस्त्रम् । महानाम्न्यः शक्वर्यः ताभिः शाक्वरं लक्ष्यते शाक्वरं मध्यमेऽहनि पृष्ठं भवति ताः महानाम्नीः स्तोत्रियाः सह अनुरूपेण तृचेन स्वादोरित्था विषूवत इति सह च प्रगाथेन होता शंसति । ऐकाहिके इन्द्रस्य नु वीर्याणि प्रवोचमित्येतस्मिन्सूक्ते निविदं दधाति ॥१०॥ इत्यनुचरस्तृचः शत्रूनामभिभवस्य रूपम् । उदु ष्य देव इत्यादीनि च चत्वार्याश्वमेधिकानि (?चार्थाश्व° C.) सूक्तानि ऐकाहिकानां (एकानां C.) पुरस्ताच्छंसनीयान्येव ॥११॥ सप्ताग्निमारुतैर्निर्द्दिलादीनि (?समा° C.) त्रीण्याश्वमेधिकान्यैकाहिकेनैव निविज्ञानीयैः (? विद्वा°) समुच्चिनोति ॥१२॥ तेनाश्वेन सह सर्पन्ति । स्तुते बहिष्पवमाने उद्गातृभिः ॥१६॥ स्तृत्यः हिंसनीयः शत्रुः स्तर्तवे स्तरीतुं हन्तुम् ॥१७॥ एतत्सूक्तं होता आवपति अध्रिगो शमीध्वमित्यस्मात्प्राक् । अत्र सूक्ते उपमाने (?) चतुस्त्रिंशद्वाजिन इत्येतामृचं (१. १६२. १८.) अन्ये स्वस्थानादपनीय वङ्क्रीणां वङ्क्रीवचनस्य पुरस्ताद्दधति । नेदनायतने अस्थाने प्रणवं दधामित्यनेनाभिप्रायेण यदि किलैषा स्वक्रमऽएव सूक्तान्तर्गता पुरस्तात्कृतः (? न्ततः Cod.) प्रणवोऽस्या अन्ते कृतेन प्रणवेनार्थो[त]ः संदध्यात् तस्य च प्रणवस्यानायतनमस्थानमेषा प्रैषात्मिका ह्येषा यथान्यानि प्रैषवचनानि प्रणवस्यानायत[न]मेवमेषा अपीत्यभिप्रायः (मपो° C.) । अथो अपि नेत् एकवचनेन एकस्याश्वस्य (स्वस्य C.) वङ्क्रीवचनमेकवचनम् चतुर्विंशति (!) वाजिन इत्येतत् [ति]- नैकवचनेन बहूनां पशूनां वङ्क्रीवचनं बहुवचनम् षट्त्रिंशतिः (!) षट्त्रिंशतिरिषां (!)

वङ्क्रयः (बहवः C.) ता अनुष्टुप्योच्यावयतादिति एतत् तन्मा (?एतत्रं ता Cod.) व्यवायाम (विंक्रीयाम Cod.) व्यवहितं विछिन्नं करवाम वङ्क्रीयता(?)प्रकाशनमेकदेशमे[व] भवति यद्येषा ऋग्वङ्क्रीवचनस्य पुरस्ताज्जीयते तद्विप्रकृतौ (?) कृतदेशम् एषा तु ऋग्पूर्वा (°देश-मेषानुरूगपूर्वा Cod.) अकृतस्थाना तस्यास्तद्देशता (? स्तदेशता Cod.) युक्ता न विपर्यय इत्यभिप्रायः । न तथा कुर्यात् चतुस्त्रिंशद्वाजिन इत्येतां न सूक्तादपनयेन्न च वङ्क्रीणां पुरस्ताद्ध्यात् सार्धमेव सकलमेव सह तया ऋचा आवपेत् स्थाने प्रसिद्धेऽधीयीत । अत्र प्रैषद्वैषा ऋगनायतनं प्रणवस्येति ऋक्कादायतनं (? ऋत्कदा° Cod.) प्रवोकज्ञात (?) इति वचनादभविष्यत् (? इति चताभवि Cod.) यदप्युक्तं (? यदस्युक्त Cod.) वङ्क्रीप्रकाशनं समानदेशं युक्तमिति तदपि वचनाद्भिन्नदेशं भविष्यतीति श्रुतेरभिप्रायः । एतच्च मा नो मित्र इति सूक्तं परिसमाप्य उप प्रागादित्येवैते च तत्रैवाध्रिगावावपेत् (? °त्येवैाजगवत्रैवा ‾ गावावयेत Cod.) ॥१८॥१॥५॥

उपप्रागादित्येतेऽउक्ता अध्रिगो शमीध्वमित्येतदाह ॥१॥ निरायत्य बहिः आयम्य ॥२॥ हयेशब्दस्य अपूज्यामन्त्रणार्थस्य कुत्सायां द्विर्वचनम् । मेथत्याक्रोशति ॥३॥ यद्यस्यायतनं स तत्रोपविशति न चात्र देशे पूर्वकल्पितान्यायतनानि सन्तीति यथार्थमत एव वचनात्कल्पनीयानि ॥१६॥२॥५॥

एकविंशतिं चातुर्मास्यदेवताः पितृत्रैयम्बकपुनरुक्तावर्जिताः अनुद्रुत्य अनुपूर्वमनुदिश्य एकविंशतिं च वपाराशीः कृत्वा एकैकां राशिं एकैकाः चातुर्मास्यदेवताः संकीर्त्य जुहुयात् ॥४॥ नाना पृथक्पृथक् यथाप्राप्तमेव चरेयुः ॥५॥ तेदनी लोहितम् ॥८॥ अप उत् इत्यम् उत्कर्षेण अपक्रमितव्यम् । उक्थ्यो यज्ञ इति एतदेकविंशं मध्यममहरुपन्यस्तमहरुक्थसंस्थं भवति ॥९॥ चतुर्विंशतिम् आग्नेयः कृष्णग्रीव इत्यादीन्द्वाविंशतिं च द्वौ च प्राजापत्यौ ॥११॥३॥५॥

आसन्दीवति नगरे धान्याशनं बलिनम् रुक्मिणं रुक्मललाटम् हरितस्रजं सुवर्णमालिनम् ॥२॥ एते एव अत आरभ्य तृतीयस्य दिवसस्येदानीं कल्पान्तराण्युच्यन्ते । एते भीमसेनादयः पारिक्षितीयाः परोक्षितस्येमे (!) भ्रातरः पारिक्षितीयाः अश्वमेधविशेषा इत्यपरे । परोऽवरं परे-परे त(त): अवरेऽवरे सततम् ॥३॥ मंहतिर्दानकर्मा ऋत्विग्भ्यो दत्तवान् ॥४॥ दीर्ग्रहा (!) नाम दैर्ग्रहेणाश्वेन (!) संहतेन क्रतुना ईजे अश्वमेधेनेजे इत्यर्थः । तेऽस्माकं पूर्वजाः गोतमादयः अत्र स्थाने आसन् दैग्रहे (!) अश्वे बध्यमाने पुरुकुत्सेन । ते आयजन्त त्रसदस्युमस्या इन्द्रं न वृत्रतुरमर्धदेवम् आभिमुख्येन यातितवन्तः त्रसदस्युं नाम राजानमस्याः पृथिव्या अर्धदेवं पूर्वदेवं नाभागानां देवं ईश्वरं वृत्रस्य च पाप्मनो हन्तारं इन्द्रं न इन्द्रमिव तुरम् (!) ॥५॥ भोजयितारः । क्षत्ता संनिधाता कोशाध्यक्षः । अवसन् उषिताः गृहे ॥६॥ परिचक्रायां (!) नगर्याम् ॥७॥ सहस्रमयुतानि गवा कोटी । विभक्तवन्तः स्वैः स्वैः पुरुषैः सह ॥८॥ अत्र त्रिष्वपि दिवसेषु स्तोमान्तराण्युच्यन्ते । षोडशिस्तोत्रं चैकविंशम् संधिस्तोत्रं त्रिवृत् । एष अश्वमेधः स्तोत्रियाणामनुष्टुब्भिः पञ्चविंशत्या सम्पन्नः अत्र हि सर्वा एव स्तोत्रियाः पि (!) गण्यमानाः सप्तशतान्यष्टानवत्यधिकानि भवन्ति तासां-तासां द्वात्रिंशता भागेऽपह्रते पञ्चविंशतिरनुष्टुभो लभ्यन्ते अन्या नु (!) तत (!) द्वाभ्यामूनानुष्टुब्भवति (!)

तत्रापि नाद्वराच्छन्दो व्येत्येकस्मान्न द्वाभ्यामित्यभिप्रायः (७. १. २. २२.)। ध्वसा प्रापध्वंसनः ॥१॥ कल्पान्तरम्। तत्र प्रथमे तावदहनि त्रयोऽपि पवमानाश्चतुर्विंशाः यत्तु अभ्यावर्तयन्ति अभ्यावर्तं धुर्यैः स्तुवते (see 4. २. ५. ८.) तत्त्रिवृत् पवमानव्यतिरिक्तान्यावृत्तिस्तोत्राणि त्रिवृन्ति भवन्तीत्यर्थः द्वितीये वहनि चतुश्चत्वारिंशाः पवमानाः तृतीये वहनि अष्टाचत्वारिंशाः पवमानाः ॥१०॥ एतन्नस्थमविशेषो (!) वि[ष्णोः] क्रान्तं विक्रमणं विप्रकृष्टान्तरत्वसामान्यात् यथा हि विष्णोः क्रममाणस्य महान्तराणि पदानि भवन्त्येवं (त्योच Cod.) महान्तराः स्तोमाः। यमुनामनु तीरे। गङ्गायां तु गङ्गातीरे पञ्चपञ्चाशतम् ॥११॥ प्रस्नावन्तरः अप्रस्नान् ॥१२॥ शकुन्तला नामाप्सरा नाडपिति (? तामुपलि Cod.) स्थाने कण्वाश्रमे ॥१३॥ तत्र त्रिष्वपि दिवसेषु एकविंशस्तोमेन ऋषभ इष्टवान् ॥१५॥ त्रिष्वपि दिवसेषु त्रयस्त्रिंश स्तोमोऽस्येति त्रयस्त्रिंशस्तोमस्तेन। तैार्वशाः अश्वाः। वर्मिणां राजपुत्राणां कवचिनामश्वपालानाम् ॥१६॥ गोविनती नाम वक्ष्यमाणस्तोमविशेषोऽश्वमेधः। काशयः काशिवास्या राजानः ॥१९॥ तस्य गोविनतस्य विधा विधानं स्तोमप्रकारो वक्ष्यतऽइति शेषः। चतुर्विंशाः पवमाना इत्यादि प्रथमेऽहनि चतुश्चत्वारिंशा इत्यादि द्वितीये षट्त्रिंशा इति तृतीये ॥२०॥ भरतः सत्वतामिव सत्वतो यद्वचः (?) यथा स्वभूतमश्वं भरतः अपहृतवान् एवं शतानीकः काशीनाम् ॥२१॥ वशं वशीनं (!) कामिकं कामतश्चरन्तम्। सह्वा अभिभविता परेषाम् ॥२२॥ तृतीयामपठित्वा चतुर्थी अतिद्रष्टव्या तु तृतीयापि ॥२३॥ होतृकाः महर्त्विग्भ्योऽन्यपुरुषाः मैत्रावरुणादयः होत्रादीननु आभक्ताः ॥२४॥ जाया महिष्यादिकाः। यथासमुदितम् येन सह ययाभिमेथिकाकामुकासं-वादः (? ययामिमिथिकामुका॰ Cod.) कृतः। वचनाच्च भार्याणां सानुचरीणां दानम् पाला-गली तु जन्तुः प्राप्ता वचनान्तरेणाध्वर्यवे दीयते ॥२७॥४॥५॥

अत्राध्याये पुरुषमेध उच्यते ॥१॥ दशतः दशकवर्गाः ॥३॥ काण्डिकाद्वये अङ्गानां संस्था आध्यात्माधिदैवोपासना उच्यन्ते। उभयतोज्योतिरिति अग्निसम्बन्धादग्निष्टोमो ज्योतिरित्यभि-प्रायः उभयतउक्थ्य इति मध्यापेक्षया ॥८॥ यवमध्यः यवस्येव गुरुर्मध्योऽस्येति। इमे वै लोकाः पुरुषमेध इति (आधि)दैववचनम् अन्नमुक्थ्य आत्मातिरात्र इत्याध्यात्मवचनम् अन्न-मुक्थ्यः परिवृंहणभूतत्वात् आत्मातिरात्रः मध्यत्वान्महत्वाच्च ॥१॥१॥६॥

ये दश-दशैकैकस्यां काण्डिकायां ब्राह्मणादयः पठ्यन्ते तानालभत इत्यर्थः न पुनरय-मर्थः दशदशैकस्मिन्यूपऽआलभतऽइति कुतः अष्टशतं मध्यमयूपऽआलभतऽएकादशैकादशे-तरेष्वित्यनेन विरोधात् ॥३॥ सरोभ्यो धैवरमित्येतस्याः काण्डिकायाः (वा॰ सं॰ ३०. १६.) प्रा-ग्या दशतः तासामयं दर्शनार्थोऽनुवादः एतस्यां तु द्वादश पुरुषाः पठ्यन्ते परासु पुनर्दश-दश अन्त्यायां तु अष्टौ पठिताः ॥४॥ अष्टौ विरूपानुत्तमानालभतऽइति दर्शनार्थोऽनुवादः ॥७॥ मागधादयस्तु पूर्वोक्ता एव गुणार्थं पुनः पठिताः पूर्वाः ते वै प्राजापत्या इति मन्त्र-पाठात्प्राप्तानामनुवादो दर्शनार्थः ॥८॥ यदा नारायणः पुरुषमेधेनायजत तदा पर्यग्निकृतेषु पुरुषपशुषु तं नारायणमशरीरा वागुक्तवती ॥१३॥ आत्मनि शरीरे अग्नी समारोप्य (!) अयं ते योनिरित्यनेन मन्त्रेणाष्माणसास्ये (?) कोष्ठे वावेश्य। नारायणार्थः अद्भः सम्भृत इत्यनु-वाको नारायणः स पूर्वस्मान्नारायणाडुत्तर इत्युत्तरनारायणः ॥२०॥२॥६॥

परस्मिन्नर्धे भागे भवः परार्ध्यः एकशतविधोऽग्निः ॥२॥ अग्निष्टुन्नामैकाहः अग्निष्टोमसंस्थः

। ग्रहाः उपयामगृहीतोऽस्यग्नये वा ब्रुष्टं गृह्णामि एष ते योनिरग्नये वेत्येवं यद्गुष्टः । आग्नेय्यः पुरोरुचः अस्याजरासो दमामरित्रा इत्यादयः (वा° सं° ३३. १.) ॥३॥ अप्तोर्यामो नाम क्रतुर्यस्मिन्निरोऽह्नीयेभ्य ऊर्ध्वं रात्रिपर्याय उत्तमो भवति । सर्वेषां यज्ञक्रतूनामिति सर्वाण्यग्निष्टोमोकथ्यषोडश्यतिरात्रनामिं (?) स्तोत्रशस्त्राणि चाप्तोर्यामेऽन्तर्भवन्तीत्यभिप्रायः । तस्मिन्सवान्मेध्यान्यज्ञार्हानालभते होमार्थमुपकल्पयति न बालभतऽइति चोदनासामान्यात्पशुप्रकृतयो यागा एते चोद्यन्ते । उभयोरपि सवनयोर्वपा एव होतव्या न हृदयादीन्यवदानानि । अन्नमन्नं यवादि । सर्वं सर्वजातीयम् । सर्वस्मै सर्वात्मने प्रधानपुरुषहिरण्यगर्भाय ॥१॥ त्रिणवं सप्तविंशस्तोमकम् ॥१०॥ विश्वजिन्नाम एकाहः । सर्वाणि पृष्ठसाधनानि रथन्तरादीनि यस्य सन्ति स सर्वपृष्ठः तेषां तु पवमाने रथन्तरं कुर्वन्त्यार्भवे बृहत् मध्यऽइतराणि ॥१२॥ अस्मै च विश्वकर्मा भूमिं दातुमियेष तत्र च काले भूमिरपीमं श्लोकं गीतववी । वं तु मन्दः मन्दमतिर्जनः आसिथ बभूविथ जात इत्यर्थः । उपशब्दो निशब्दस्यार्थे । यश्चाशक्यं प्रतिजानोते मन्द इत्यभिप्रायः ॥१५॥१॥७॥

अथशब्दोऽधिकारार्थः नानन्तर्यार्थः कुतः सर्वमेधेन श्मशानकरणस्यानन्तर्यानुपपत्तेः कथम् सर्वमेधानन्तर्ये हि गृह्यमाणेऽस्मा इति सर्वमेधयाजी परामृष्टव्यः न च सर्वमेधयाजिने सर्वमेधानन्तरं क्रियते । अस्मै इति मृतः प्रतिनिर्दिश्यते न सर्वमेधयाजी । श्मशानं प्रसिद्धमस्थिसंरक्षपास्तु (? °वास्तु ?) । प्रेतस्य गृहान्वैतत्कुर्वन्ति यथैवेह (°वेद Cod.) तेनास्थीनि (?) रक्ष्यन्ते एवम[य]मत्र तदपूर्वेण आतो (? न्तो ?) रक्ष्यते गृहैरिवेत्यभिप्रायः । प्रज्ञानं वा अमुष्य देवदत्तादेरत्रास्थीनि गुप्तानीत्येतत्प्रज्ञायते येन तत्प्रज्ञानं च कीर्तिवर्धनं करणीयमित्यभिप्रायः । यो वै कश्च म्रियतऽइति प्रयोजनान्तरम् । श्मशा नाम पितॄणां दण्डपाशिकस्यन्नपा (? °पाणि° ?) अत्तारः ते चाकृतश्मशानस्यामुष्मिंलोके पुण्यकृत्यामुपहिंसन्ति ॥१॥ क्षिप्रमचिरमृते । प्रत्यग्रे हि अघे स्मर्यमाणे महद्दुःखं भवतीत्यभिप्रायः । समाः संवत्सरान् ॥२॥ यदि चिरादपि कुर्वतः स्मरेयुरेव समास्ततः अयुग्मेषु संवत्सरेषु । एकनक्षत्रे एकं च नक्षत्रं च (? त्र Cod.) एकनक्षत्रं पुष्यः स्वाति — here the ms. stops.

VARIOUS READINGS.

A. Cod. Mill. — B. Bodl. Wils. 365. — C. Bodl. Wils. 453. — D. Chambers 22. — P. Paris Dev. 160.

Adhyâya १. ४. २ सविता यो AP. - ५. ५ The last इति belongs to the beginning word of the next kaṇḍikâ, which is accordingly left unaccented: see ४, २, ८. ३, ५. - ६. ३ Read: घोऽबलो. - ७. १ सप्तऽआत्मनो A. - ४ Read: शीर्षण्याः. - ८. ७ The Samhitâ (२२, २०.) reads तुरीपाय. —

Adhyâya २. १. ६ Read: नैकशतमत्येति. - २. ४ °स्ताद्धन्वोः । त्रीरिव A. see १२. ७. १. ६. - ११ विश एतद्रूपं AP. - ५. ४ Read: एकादश दशत. - ६. ६ परिवित्ता Harisv. - ७. ६ सर्वैः पड्भिः A. B prima manu. - १० Mahîdhara at Vâj. S. २३. १४. reads सोमपुरोगमं — गमयन्ति. - १२ तद्देवां३ऽइदेषि A. °वां३ऽइ° B. °वा३ऽइ° C. °वां२ऽइ° P. - १५ प्रोक्षणीभिः Harisv. (?). - ८. ४ परियन्त्यप क्रुवत A. P. - ५ अपक्रामन्त्याक्रमणानि A. P. —

Adhyâya ३. १. ५ सक्थ्नि Harisvâmin. - ४. २ °मवदानाय कृत्वा A prima manu. अवदानानि Harisv., but see Pâṇ. ५. ४. ६५-६७, where however a different accent (डाच्) is postulated. - ५. २ एकस्मिन्नेव एतामाकृतिं (?) Harisv. - ४ मुडिंभ A. - ibid. उदमस्यापत्यं (?) Harisv. - ६. ४ होतव्यां३ AP. - ७. ३ व्यष्टं A. P. - ८. ६ विदेरन्यदि A. —

Adhyâya ४. १. १२ चात्संबद्धाराय P., see ११. ५. ६. ९. - १३ The word सद्वती is a most remarkable one, as it implies for the time of its formation the then existence of the grammatical identification of the roots भू and अस्, for the verse is called सद्वती on account of its containing the word भुवस्, as if it were formed from √अस्! - १४ °ह्रोप्त्रीं करोति B.C.P. °त्रीन्क° A. - १५ पथन्वत्यन्या ABC. P. - २. २ यज्ञवसमृद्धो वीर्य AB.P. °द्धो वी° C. - ५ क्षात्रसंग्रहो° A. ज्ञात्रसं° BCP. - १७ I should prefer to read ये व (वः), supported by the explanation of Harisv. युष्माकं मध्ये, but the mss. agree in reading ये वाऽएतस्यो°. - ibid. अकृतान्नं (?) and स्तुतं (?) Harisv. - ३. ६ °ध्वर्युः संप्रेष्यति A. - १० सेलागाः C. - १२ मत्स्याद्धन° A. - १३ वायोविघ्निकाश्चो° A. - ४. ६ एतद्रूपाणां A prima manu. - ८ °त्यन्तरे

(plur.) पैतुदारवौ भवतो (dual.)! - ११ एकविंऽशत्यरत्नय A. P. —

Adhyâya ५. १. १२ °मुखर्बुधमिति A. - २. ८ ज्ञात्रसंग्र° ABCP. - १० आ-युर्देवताः, see आयुः प्रमायुको यजमानः स्यात् १४. २. २. ४५. - ३. १ जाबालो मनो वै सर्वे A prima m. - ४. २ अबध्ना° A. P. - ५ दौर्ग्रह्णेण Harisv. - ६ °न्गृह्णे ABCP. - ७ परिचक्रा° Harisv. - १५ श्वित्कानाऽ A. prima m. - १६ and १८ Read: स्नात्रासाह्णे. - २७ Read: ददाति. —

Adhyâya ६. १. २ °द्गात्रः स दीक्षोपसत्कश्च° A. - २. २० समारोप्य Harisv. - ibid. स्यान्निवेव AP. —

Adhyâya ७. १. ३-६ We expect ग्रह्णा भव°, but the mss. agree in reading भव°. - १५ मँद्व्यति P. मंद्वाति स्या B. मंद्व्यति तस्या C. —

Adhyâya ८. १. १ अथास्मै कल्याणं कुर्वन्ति is wanting in BCD. P., but is given in A prima and tertia manu (obliterated sec. m.) and in the Ṛishitarpaṇa (as the beginning of this adhyâya); from the latter also the accents have been taken, as they are wanting in A. - लोके कृतश्मशानस्य Codd. - ibid. तस्मात्स्मशा° A. secunda manu, तस्मास्मशा° prima manu. - २ कुर्यात् । here the accentuation stops in P. - समा is everywhere else paroxytonon. - ५ द्वारैवेनं D. - ९ सऽस्थायाप्रघ्नत्य ADP. - १५ बीरिणामि° A. - ibid. तद्वंडृ P. द्वधृ A. prima manu द्वन्धृ A. secunda manu. द्वडृ BC. द्वडृ D. - १६ नाश्मगंधान्ना° D. P. - ibid. बिभीत° P. - १८ नेन्मद्धदघं AD. - २. ६ दक्षिणामग्नेर्श्रा° Mahîdhara at Vâj. S. ३५. २. - ३. ४ अनवानंतस्तृवा A. P. °नंतसृवा D. and Kâty. २१. ४. ६, where explained by गत्वा. - १० तद्वधृ A. द्वडृ P.D. - ११ नेन्मद्धदघं A. D. - १२ अ-

धोधोज्ञानु D. अधोज्ञानु A. prima manu. - ibid. न्यस्येधृत्वा ABC. - ४. २. लोके द्विकुल्ये D. - ४ तदपमृज्ञतेत्यपा° A. - ९ °च्यथाभिगोपायेदे° ABCD. - १० सोपबर्द्दणीषान्वादिष्टा AD. - ११ अथानाग्निचितः ABCD. - ibid. शक्वारा A. - १२ अर्थमेतं ABCD.

ओम् । देवा ह वै सत्त्रं निषेदुः । अग्निरिन्द्रः सोमो मखो विष्णुर्विश्वे देवा अन्यत्रैवाश्विभ्याम् ॥१॥ तेषां कुरुक्षेत्रं देवयजनमास । तस्मादाहुः कुरुक्षेत्रं देवानां देवयजनमिति तस्माद्यत्र क्व च कुरुक्षेत्रस्य निगच्छति तदेव मन्यतऽइदं देवयजनमिति तद्धि देवानां देवयजनम् ॥२॥ तऽआसत । श्रियं गच्छेम यशः स्यामान्नादाः स्यामेति तथोऽएवेमे सत्त्रमासते श्रियं गच्छेम यशः स्यामान्नादाः स्यामेति ॥३॥ ते होचुः । यो नः श्रमेण तपसा श्रद्धया यज्ञेनाहुतिभिर्यज्ञस्योदृचं पूर्वोऽवगच्छात्स नः श्रेष्ठोऽसत्तदु नः सर्वेषाꣳ सहेति तथेति ॥४॥ तद्विष्णुः प्रथमः प्राप । स देवानाꣳ श्रेष्ठोऽभवत्तस्मादाहुर्विष्णुर्देवानाꣳ श्रेष्ठ इति ॥५॥ स यः स विष्णुर्यज्ञः सः । स यः स यज्ञोऽसौ स आदित्यस्तद्धेदं यशो विष्णुर्न शशाक संयन्तुं तदिदमप्येतर्हि नैव सर्व इव यशः शक्नोति संयन्तुम् ॥६॥ स तिसृधन्वमादायापचक्राम । स धनुरार्त्न्या शिर उपस्तभ्य तस्थौ तं देवा अनभिधृष्णुवन्तः समन्तं परिण्यविशन्त ॥७॥ ता ह वम्र्य ऊचुः । इमा वै वम्र्यो यदुपदीका योऽस्य ज्यामप्यद्यात्किमस्मै प्रयच्छेतेत्यन्नाद्यमस्मै प्रयच्छेमापि धन्वन्नपोऽधिगच्छेत्तथास्मै सर्वमन्नाद्यं प्रयच्छेमेति तथेति ॥८॥ तस्योपपरासृत्य । ज्यामपिजक्षुस्तस्यां छिन्नायां धनुरार्त्न्यौ विष्फुरन्त्यौ विष्णोः शिरः प्रचिच्छिदतुः ॥९॥ तद्घृङ्ङिति पपात । तत्पतित्वासावादित्योऽभवदथेतरः प्राङेव प्रावृज्यत तद्यद्घृङ्ङित्यपतत्तस्माद्घर्मोऽथ यत्प्रावृज्यत तस्मात्प्रवर्ग्यः ॥१०॥ ते देवा अब्रुवन् । महान्बत नो वीरोऽपादीति तस्मान्महावीरस्तस्य यो रसो व्यक्षरत्तं पाणिभिः संममृजुस्तस्मात्सम्राट् ॥११॥

तं देवा अभ्यमृद्यन्त । यथा वित्तिं वेत्स्यमाना एवं तमिन्द्रः प्रथमः प्राप तमन्वङ्ग-
मनुन्यपद्यत तं पर्यगृह्णंस्तं परिगृह्येदं यशोऽभवद्यदिदमिन्द्रो यशो यशो ह भ-
वति य एवं वेद ॥१२॥ स उ एव मखः स विष्णुः । तत इन्द्रो मखवानभवन्म-
खवान्ह वै तं मघवानित्याचक्षते परोऽक्षं परोऽक्षकामा हि देवाः ॥१३॥ ता-
भ्यो वम्रीभ्योऽन्नाद्यं प्रायच्छन् । आपो वै सर्वमन्नं ताभिर्हीदमभिक्नूयमिवादन्ति
यदिदं किम्वदन्ति ॥१४॥ अथेमं विष्णुं यज्ञं त्रेधा व्यभजन्त । वसवः प्रातःसवनꣳ
रुद्रा माध्यन्दिनꣳ सवनमादित्यास्तृतीयसवनम् ॥१५॥ अग्निः प्रातःसवनम् ।
इन्द्रो माध्यन्दिनꣳ सवनं विश्वे देवास्तृतीयसवनम् ॥१६॥ गायत्री प्रातःसवनम्
। त्रिष्टुम्माध्यन्दिनꣳ सवनं जगती तृतीयसवनं तेनापशीर्ष्णा यज्ञेन देवा अर्चन्तः
श्राम्यन्तश्चेरुः ॥१७॥ दध्यङ् ह वाऽआथर्वणः । एतꣳ शुक्रमेतं यज्ञं विदां चकार
यथा-यथैतद्यज्ञस्य शिरः प्रतिधीयते यथैष कृत्स्नो यज्ञो भवति ॥१८॥ स हेन्द्रेणो-
क्त आस । एतं चेदन्यस्माऽअनुब्रूयास्तत एव ते शिरश्छिन्द्यामिति ॥१९॥ तदु
हाश्विनोरनुश्रुतमास । दध्यङ्ङु ह वाऽआथर्वण एतꣳ शुक्रमेतं यज्ञं वेद यथा-
यथैतद्यज्ञस्य शिरः प्रतिधीयते यथैष कृत्स्नो यज्ञो भवति ॥२०॥ तौ हेत्योचतुः ।
उप त्वायावेति किमनुवक्ष्यमाणावित्येतꣳ शुक्रमेतं यज्ञं यथा-यथैतद्यज्ञस्य शिरः
प्रतिधीयते यथैष कृत्स्नो यज्ञो भवतीति ॥२१॥ स होवाच । इन्द्रेण वाऽउक्तो
ऽस्म्येतं चेदन्यस्माऽअनुब्रूयास्तत एव ते शिरश्छिन्द्यामिति तस्माद्वै बिभेमि यद्वै
मे स शिरो न छिन्द्यान्न वामुपनेष्यऽइति ॥२२॥ तौ होचतुः । आवां त्वा त-
स्मात्त्रास्यावहेऽइति कथं मा त्रास्येथेऽइति यदा नाऽउपनेष्यसेऽथ ते शिरश्छित्त्वा-
न्यत्रापनिधास्यावोऽथाश्वस्य शिर आहृत्य तत्ते प्रतिधास्यावस्तेन नावनुवक्ष्यसि
स यदा नावनुवक्ष्यस्यथ ते तदिन्द्रः शिरश्छेत्स्यत्यथ ते स्वꣳ शिर आहृत्य तत्ते
प्रतिधास्याव इति तथेति ॥२३॥ तौ होपनिन्ये । तौ यदोपनिन्येऽथास्य शिर-

शिरश्छित्त्वान्यत्रापनिदधतुरथाश्वस्य शिर आहृत्य तद्धास्य प्रतिदधतुस्तेन हाभ्यामनूवाच स यदाभ्यामनूवाचाथास्य तदिन्द्रः शिरश्चिच्छेदाथास्य स्वं शिर आहृत्य तद्धास्य प्रतिदधतुः ॥२४॥ तस्मादेतदृषिणाभ्यनूक्तम् । दध्यङ् ह यन्मध्वाथर्वणो वामश्वस्य शीर्ष्णा प्र यदीमुवाचेत्ययं तदुवाचेति हैवैतदुक्तम् ॥२५॥ तन्न सर्वस्मा अनुब्रूयात् । एनस्यं हि तदथो नेन्म इन्द्रः शिरश्छिनददिति यो न्वेव ज्ञातस्तस्मै ब्रूयादथ योऽनूचानोऽथ योऽस्य प्रियः स्यान्न त्वेव सर्वस्मा इव ॥२६॥ संवत्सरवासिनेऽनुब्रूयात् । एष वै संवत्सरो य एष तपत्येष उ प्रवर्ग्यस्तदेतमेवैतत्प्रीणाति तस्मात्संवत्सरवासिनेऽनुब्रूयात् ॥२७॥ तिस्रो रात्रीर्व्रतं चरति । त्रयो वा ऋतवः संवत्सरस्य संवत्सर एष य एष तपत्येष उ प्रवर्ग्यस्तदेतमेवैतत्प्रीणाति तस्मात्तिस्रो रात्रीर्व्रतं चरति ॥२८॥ तप्तमाचामति । तपस्व्यनुब्रवा इत्यमांसाश्यनुब्रूते तपस्व्यनुब्रवा इति ॥२९॥ अमृन्मयपायी । अस्ति वा अस्यां संसृष्टमिव यदस्यामनृतं वदति तस्मादमृन्मयपायी ॥३०॥ अशूद्रोच्छिष्टी । एष वै घर्मो य एष तपति सैषा श्रीः सत्यं ज्योतिरनृतं स्त्री शूद्रः श्वा कृष्णः शकुनिस्तानि न प्रेक्षेत नेच्छ्रियं च पाप्मानं च नेज्ज्योतिश्च तमश्च नेत्सत्यानृते संसृजानीति ॥३१॥ अथैष वाव यशः । य एष तपति तद्यत्तदादित्यो यशो यज्ञो हैव तद्यशस्तद्यत्तद्यज्ञो यशो यजमानो हैव तद्यशस्तद्यत्तद्यजमानो यश ऋत्विजो हैव तद्यशस्तद्यत्तदृत्विजो यशो दक्षिणा हैव तद्यशस्तस्माद्यामस्मै दक्षिणामानयेयुर्न ता इत्सद्योऽन्यस्मा अतिदिशेन्नेद्यन्मेदं यश आगंस्तत्सद्योऽन्यस्मा अतिदिशानीति श्वो वैव भूते ह्यहे वा तदात्मन्येवैतद्यशः कृत्वा यदेव तद्भवति तस्मै ददाति हिरण्यं गां वासोऽश्वं वा ॥३२॥ अथैतद्वा । आयुरेतज्ज्योतिः प्रविशति य एतमनु वा ब्रूते भक्षयति वा तस्य व्रतचर्या नातपति प्रच्छादयेत नेदेतस्मात्तिरोऽसानीति नातपति निष्ठीवेन्नेदेतमभिनिष्ठीवानीति नातपति

प्रस्तावयेत नेदेतमभिप्रस्तावयाऽइति यावद्वाऽएष आतपति तावानेष नेदेतमेतै-र्दिनस्तानीत्यवज्योत्य रात्रावश्नीयात्तदेतदस्य रूपं क्रियते य एष तपति तद्ध स्मो-वाचासुरिरेकꣳ ह वै देवा व्रतं चरन्ति यत्सत्यं तस्मादु सत्यमेव वदेत् ॥ ३३ ॥

ब्राह्मणम् ॥ १ ॥

स वै सम्भारान्त्सम्भरति । स यद्वाऽएनानितश्चेतश्च सम्भरति तत्सम्भारा-णाꣳ सम्भारत्वꣳ स वै यत्र-यत्र यज्ञस्य न्यक्तं ततस्ततः सम्भरति ॥ १ ॥ कृष्णाजि-नꣳ सम्भरति । यज्ञो वै कृष्णाजिनं यज्ञऽएवैनमेतत्सम्भरति लोमतश्छन्दाꣳसि वै लोमानि छन्दःस्वेवैनमेतत्सम्भरत्युत्तरत उदीची हि मनुष्याणां दिक्प्राचीनग्रीवे तद्धि देवत्रा ॥ २ ॥ अभ्र्या । वज्रो वाऽअभ्रिर्वीर्यं वै वज्रो वीर्येणैवैनमेतत्समर्ध-यति कृत्स्नं करोति ॥ ३ ॥ औदुम्बरी भवति । ऊर्ग्वै रस उदुम्बर ऊर्जैवैनमेतद्र-सेन समर्धयति कृत्स्नं करोति ॥ ४ ॥ अथो वैकङ्कती । प्रजापतिर्या प्रथमामाहुति-मजुहोत्स हुत्वा यत्र न्यमृष्ट ततो विकङ्कतः समभवद्यज्ञो वाऽआहुतिर्यज्ञो वि-कङ्कतो यज्ञेनैवैनमेतत्समर्धयति कृत्स्नं करोति ॥ ५ ॥ अरत्निमात्री भवति । बा-हुर्वाऽअरत्निर्बाहुना वै वीर्यं क्रियते वीर्यसंमितेव तद्भवति वीर्येणैवैनमेतत्स-मर्धयति कृत्स्नं करोति ॥ ६ ॥ तामादत्ते । देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहु-भ्यां पूष्णो हस्ताभ्यामाददे नारिरसीत्यसावेव बन्धुः ॥ ७ ॥ ताꣳ सव्ये पाणौ कृ-त्वा । दक्षिणेनाभिमृश्य जपति युञ्जते मन उत युञ्जते धियो विप्रा विप्रस्य बृहतो विपश्चितः । वि होत्रा दधे वयुनाविदेक इन्मही देवस्य सवितुः परिष्टुतिरित्य-सावेव बन्धुः ॥ ८ ॥ अथ मृत्पिण्डं परिगृह्णाति । अभ्र्या च दक्षिणतो हस्तेन च हस्तेनैवोत्तरतो देवी द्यावापृथिवीऽइति यज्ञस्य शीर्षच्छिन्नस्य रसो व्यक्षरत्स इमे द्यावापृथिवीऽअगच्छद्यन्मृदियं तद्यदापोऽसौ तन्मृदश्चापां च महावीराः कृता भ-वन्ति तेनैवैनमेतद्रसेन समर्धयति कृत्स्नं करोति तस्मादाह देवी द्यावापृथिवी

ऽइति मखस्य वामद्य शिरो राध्यासमिति यज्ञो वै मखो यज्ञस्य वामद्य शिरो रा-
ध्यासमित्येवैतदाह देवयजने पृथिव्या इति देवयजने हि पृथिव्यै सम्भरति मखाय
त्वा मखस्य त्वा शीर्ष्णऽइति यज्ञो वै मखो यज्ञाय त्वा यज्ञस्य त्वा शीर्ष्णऽइत्येवैत-
दाह ॥९॥ अथ वल्मीकवपाम् । देव्यो वम्र्य इत्येता वाऽएतदकुर्वत यथा-यथै-
तद्यज्ञस्य शिरोऽच्छिद्यत ताभिरेवैनमेतत्समर्धयति कृत्स्नं करोति भूतस्य प्रथमजा
इतीयं वै पृथिवी भूतस्य प्रथमजा तदनयैवैनमेतत्समर्धयति कृत्स्नं करोति मखस्य
वोऽद्य शिरो राध्यासं देवयजने पृथिव्या मखाय त्वा मखस्य त्वा शीर्ष्णऽइत्यसा-
वेव बन्धुः ॥१०॥ अथ वराहविहतम् । इयत्यग्रऽआसीदितीयती ह वाऽइय-
मग्रे पृथिव्यास प्रादेशमात्री तामेमूष इति वराह उज्जघान सोऽस्याः पतिः प्रजा-
पतिस्तेनैवैनमेतन्मिथुनेन प्रियेण धाम्ना समर्धयति कृत्स्नं करोति मखस्य तेऽद्य
शिरो राध्यासं देवयजने पृथिव्या मखाय त्वा मखस्य त्वा शीर्ष्णऽइत्यसावेव बन्धुः
॥११॥ अथादारान् । इन्द्रस्यौज स्थेति यत्र वाऽएनमिन्द्र ओजसा पर्यगृह्णात्तदस्य
परिगृहीतस्य रसो व्यक्षरत्स पूयन्निवाशेत सोऽब्रवीदादीर्येव बत मऽएष रसो
ऽस्तोषीदिति तस्मादादारा अथ यत्पूयन्निवाशेत तस्मात्पूतीकास्तस्मादग्नावाङ्कृति-
रिवाभ्याहिता ज्वलन्ति तस्मादु सुरभयो यज्ञस्य हि रसात्सम्भूता अथ यदेनं त-
दिन्द्र ओजसा पर्यगृह्णात्तस्मादाहेन्द्रस्यौज स्थेति मखस्य वोऽद्य शिरो राध्यासं
देवयजने पृथिव्या मखाय त्वा मखस्य त्वा शीर्ष्णऽइत्यसावेव बन्धुः ॥१२॥ अथा-
जाक्षीरम् । यज्ञस्य शीर्षच्छिन्नस्य शुगुदक्रामत्ततोऽजा समभवत्तयैवैनमेतच्छुचा सम-
र्धयति कृत्स्नं करोति मखाय त्वा मखस्य त्वा शीर्ष्णऽइत्यसावेव बन्धुः ॥१३॥
तान्वाऽएतान्पञ्च सम्भारान्सम्भरति । पाङ्क्तो यज्ञः पाङ्क्तः पशुः पञ्चऽर्तवः संवत्स-
रस्य संवत्सर एष य एष तपत्येष उ प्रवर्ग्यस्तदेतमेवैतत्प्रीणाति तान्सम्भृतान-
भिमृशति मखाय त्वा मखस्य त्वा शीर्ष्णऽइत्यसावेव बन्धुः ॥१४॥ अथोत्तरतः प-

रिश्रितं भवति । तदभिप्रयन्तो जपन्ति प्रैतु ब्रह्मणस्पतिरित्येष वै ब्रह्मणस्पतिर्य एष तपत्येष उ प्रवर्ग्यस्तदेतमेवैतत्प्रीणाति तस्मादाह प्रैतु ब्रह्मणस्पतिरिति प्र देव्येतु सूनृतेति देवी ह्येषा सूनृताच्छा वीरं नर्यं पङ्क्तिराधसमित्युपस्तौत्येवैनमेतन्महयत्येव देवा यज्ञं नयन्तु न इति सर्वानेवास्माऽएतद्देवानभिगोप्तॄन्करोति ॥१५॥ परिश्रितं भवति । एतद्वै देवा अबिभयुर्यद्वै न इममिह रक्षाꣳसि नाष्ट्रा न हन्युरिति तस्माऽएतां पुरं पर्यश्रयंस्तथैवास्माऽअयमेतां पुरं परिश्रयति ॥१६॥ अथ खरे सादयति । मखाय त्वा मखस्य त्वा शीर्ष्ण इत्यसावेव बन्धुरथ मृत्पिण्डमपादाय महावीरं करोति मखाय त्वा मखस्य त्वा शीर्ष्णऽइत्यसावेव बन्धुः प्रादेशमात्रं प्रादेशमात्रमिव हि शिरो मध्ये संगृहीतं मध्ये संगृहीतमिव हि शिरोऽथास्योपरिष्टात्त्र्यङ्गुलं मुखमुन्नयति नासिकामेवास्मिन्नेतद्दधाति तं निष्ठितमभिमृशति मखस्य शिरोऽसीति मखस्य ह्येतत्सौम्यस्य शिर एवमितरौ तूष्णीं पिन्वने तूष्णीꣳ रौहिणकपाले ॥१७॥ प्रजापतिर्वाऽएष यज्ञो भवति । उभयं वाऽएतत्प्रजापतिर्निरुक्तश्चानिरुक्तश्च परिमितश्चापरिमितश्च तद्यद्यजुषा करोति यदेवास्य निरुक्तं परिमितꣳ रूपं तदस्य तेन संस्करोत्यथ यत्तूष्णीं यदेवास्यानिरुक्तमपरिमितꣳ रूपं तदस्य तेन संस्करोति स ह वाऽएतꣳ सर्वं कृत्स्नं प्रजापतिꣳ संस्करोति य एवं विद्वानेतदेवं करोत्यथोपशयायै पिण्डं परिशिनष्टि प्रायश्चित्तिभ्यः ॥१८॥ अथ गवेधुकाभिर्हिन्वति । यज्ञस्य शीर्षच्छिन्नस्य रसो व्यक्षरत्तत एता ओषधयो जज्ञिरे तेनैवैनमेतद्रसेन समर्धयति कृत्स्नं करोति मखाय त्वा मखस्य त्वा शीर्ष्णऽइत्यसावेव बन्धुरेवमितरौ तूष्णीं पिन्वने तूष्णीꣳ रौहिणकपाले ॥१९॥ अथैनान्धूपयति । अश्वस्य त्वा वृष्णः शक्ना धूपयामीति वृषा वाऽअश्वो वीर्यं वै वृषा वीर्येणैवैनमेतत्समर्धयति कृत्स्नं करोति देवयजने पृथिव्या मखाय त्वा मखस्य त्वा शीर्ष्णऽइत्यसावेव बन्धुरेवमितरौ तूष्णीं पिन्वने तूष्णीꣳ रौहिणकपाले ॥२०॥ अथै-

नाश्रपयति । शृतꣳ हि देवानामिष्टकाभिः श्रपयत्येता वाऽएतदकुर्वत यथा-यथैतद्यज्ञस्य शिरोऽछिद्यत ताभिरेवैनमेतत्समर्धयति कृत्स्नं करोति तदु येनैव सुशृताः स्युस्तेन श्रपयेदथ पचनमवधाय महावीरमवदधाति मखाय त्वा मखस्य त्वा शीर्ष्णऽइत्यसावेव बन्धुरेवमितरौ तूष्णीं पिन्वने तूष्णीꣳ रौहिणकपाले तान्दिवैवोपवपेद्दिवोद्वपेदहर्हि देवानाम् ॥२१॥ स उद्वपति । ऋजवे त्वेत्यसौ वै लोक ऋजुः सत्यꣳ ह्यृजुः सत्यमेष य एष तपत्येष उ प्रथमः प्रवर्ग्यस्तदेतमेवैतत्प्रीणाति तस्मादाहऽर्जवे त्वेति ॥२२॥ साधवे त्वेति । अयं वै साधुर्योऽयं पवतऽएष हीमांल्लोकान्त्सिद्धोऽनुपवतऽएष उ द्वितीयः प्रवर्ग्यस्तदेतमेवैतत्प्रीणाति तस्मादाह साधवे त्वेति ॥२३॥ सुक्षित्यै त्वेति । अयं वै लोकः सुक्षितिरस्मिन्हि लोके सर्वाणि भूतानि क्षियन्त्यथोऽअग्निर्वै सुक्षितिरग्निर्ह्येवास्मिंल्लोके सर्वाणि भूतानि क्षियत्येष उ तृतीयः प्रवर्ग्यस्तदेतमेवैतत्प्रीणाति तस्मादाह सुक्षित्यै त्वेति तूष्णीं पिन्वने तूष्णीꣳ रौहिणकपाले ॥२४॥ अथैनानाछृणत्ति । अजायै पयसा मखाय त्वा मखस्य त्वा शीर्ष्णऽइत्यसावेव बन्धुरेवमितरौ तूष्णीं पिन्वने तूष्णीꣳ रौहिणकपाले ॥२५॥ अथैतद्वै । आयुरेतज्ज्योतिः प्रविशति य एतमनु वा ब्रूते भक्षयति वा तस्य व्रतचर्या या सृष्टौ ॥२६॥ ब्राह्मणम् ॥२॥ ॥

स यदेतदातिथ्येन प्रचरति । अथ प्रवर्ग्येण चरिष्यन्पुरोपसदोऽग्रेण गार्हपत्यं प्राचः कुशान्त्सꣳस्तीर्य द्वन्द्वं पात्राण्युपसादयत्युपयमनीं महावीरं परीशासौ पिन्वने रौहिणकपाले रौहिणहवन्यौ स्रुचौ यदु चान्यद्भवति तद्दश दशाक्षरा वै विराड्विराड्वै यज्ञस्तद्विराजमेवैतद्यज्ञमभिसम्पादयत्यथ यद्द्वन्द्वं द्वन्द्वं वै वीर्यं यदा वै द्वौ सꣳरभेतेऽअथ तौ वीर्यं कुरुतो द्वन्द्वं वै मिथुनं प्रजननं मिथुनेनैवैनमेतत्प्रजननेन समर्धयति कृत्स्नं करोति ॥१॥ अथाध्वर्युः । प्रोक्षणीरादायोपोत्तिष्ठन्नाह ब्रह्मन्प्रचरिष्यामो होतरभिष्टुहीति ब्रह्मा वै यज्ञस्य दक्षिणत आस्तेऽभिगोप्ता

तमेवैतदाहाप्रमत्त आस्स्व यज्ञस्य शिरः प्रतिधास्याम इति होतरभिष्टुहीति यज्ञो वै होता तमेवैतदाह यज्ञस्य शिरः प्रतिधेहीति प्रतिपद्यते होता ॥२॥ ब्रह्म जज्ञानं प्रथमं पुरस्तादिति । असौ वाऽआदित्यो ब्रह्माहरहः पुरस्ताज्जायतऽएष उ प्रवर्ग्यस्तदेतमेवैतत्प्रीणाति तस्मादाह ब्रह्म जज्ञानं प्रथमं पुरस्तादित्यथ प्रोक्षत्यसावेव बन्धुः ॥३॥ स प्रोक्षति । यमाय त्वेत्येष वै यमो य एष तपत्येष हीदꣳ सर्वं यमयत्येतेनेदꣳ सर्वं यतमेष उ प्रवर्ग्यस्तदेतमेवैतत्प्रीणाति तस्मादाह यमाय त्वेति ॥४॥ मखाय त्वेति । एष वै मखो य एष तपत्येष उ प्रवर्ग्यस्तदेतमेवैतत्प्रीणाति तस्मादाह मखाय त्वेति ॥५॥ सूर्यस्य त्वा तपसऽइति । एष वै सूर्यो य एष तपत्येष प्रवर्ग्यस्तदेतमेवैतत्प्रीणाति तस्मादाह सूर्यस्य त्वा तपसऽइति ॥६॥ पूर्वया द्वारा स्थूणां निर्हृत्य । दक्षिणतो निमिन्वन्ति यथैनाꣳ होताभिष्टुवन्परापश्येद्यज्ञो वै होता स एवास्यामेतद्यज्ञं प्रतिदधाति तथैषा घर्मं पिन्वते ॥७॥ अग्रेणाहवनीयꣳ । सम्राडासन्दीं पर्याहृत्य दक्षिणतः प्राचीमासादयत्युत्तराꣳ राजासन्द्यै ॥८॥ औदुम्बरी भवति । ऊर्ग्वै रस उदुम्बर ऊर्जैवैनमेतद्रसेन समर्धयति कृत्स्नं करोति ॥९॥ अꣳसद्घ्ना भवति । अꣳसयोर्वाऽइदꣳ शिरः प्रतिष्ठितं तदꣳसयोरेवैतच्छिरः प्रतिष्ठापयति ॥१०॥ बाल्वजीभी रज्जुभिर्व्युता भवति । यज्ञस्य शीर्षच्छिन्नस्य रसो व्यक्षरत्तत एता ओषधयो जज्ञिरे तेनैवैनमेतद्रसेन समर्धयति कृत्स्नं करोति ॥११॥ अथ यदुत्तरत आसादयति । यज्ञो वै सोमः शिरः प्रवर्ग्य उत्तरं वै शिरस्तस्मादुत्तरत आसादयत्यथो राजा वै सोमः सम्राट् प्रवर्ग्य उत्तरं वै राज्यात्साम्राज्यं तस्मादुत्तरत आसादयति ॥१२॥ स यत्रैताꣳ होतान्वाह । अञ्जन्ति यं प्रथयन्तो न विप्रा इति तदेतं प्रचरणीयं महावीरमाज्येन समनक्ति देवस्त्वा सविता मध्वानक्त्विति सविता वै देवानां प्रसविता सर्वं वाऽइदं मधु यदिदं किं च तदेनमनेन सर्वेण समनक्ति तदस्मै सविता प्रसवि-

ता प्रसौति तस्मादाह देवस्त्वा सविता मध्वानक्त्विति ॥१३॥ ॥ शतम् ६९०० ॥ ॥
अथोत्तरतः सिकता उपकीर्णा भवन्ति । तद्रजतं हिरण्यमधस्तादुपास्यति पृथि-
व्याः संस्पृशस्याहीत्येतद्ध देवा अबिभयुर्यद्वै न इममधस्ताद्रक्षांसि नाष्ट्रा न
हन्युरित्यग्निर्वाऽएतद्रेतो यद्धिरण्यं नाष्ट्राणां रक्षसामपहत्याऽअथो पृथिव्यु ह
वाऽएतस्माद्बिभयां चकार यद्वै मायं तप्तः शुशुचानो न हिंस्यादिति तद्वास्या
ऽएतदन्तर्दधाति रजतं भवति रजतेव हीयं पृथिवी ॥१४॥ स यत्रैतां होतान्वाह
। संसीदस्व महाँ२॥ऽअसीति तदुभयत आदीप्ता मौञ्जाः प्रलवा भवन्ति तानुपा-
स्य तेषु प्रवृणक्ति यज्ञस्य शीर्षच्छिन्नस्य रसो व्यक्षरत्तत एता ओषधयो जज्ञिरे
तेनैवैनमेतद्रसेन समर्धयति कृत्स्नं करोति ॥१५॥ अथ यदुभयत आदीप्ता भव-
न्ति । सर्वाभ्य एवैतद्दिग्भ्यो रक्षांसि नाष्ट्रा अपहन्ति तस्मिन्प्रवृज्यमाने पत्नी
शिरः प्रोर्णुते तप्तो वाऽएष शुशुचानो भवति नेन्मेऽयं तप्तः शुशुचानश्चक्षुः प्र-
मुष्णादिति ॥१६॥ स प्रवृणक्ति । अर्चिरसि शोचिरसि तपोऽसीत्येष वै घर्मो य
एष तपति सर्वं वाऽएतदेष तदेतमेवैतत्प्रीणाति तस्मादाहार्चिरसि शोचिरसि
तपोऽसीति ॥१७॥ अथास्यामाशिष आशास्ते । ऽइयं वै यज्ञोऽस्यामेवैतदाशिष
आशास्ते ता अस्माऽइयं सर्वाः समर्धयति ॥१८॥ अनाधृष्टा पुरस्तादिति । अ-
नाधृष्टा ह्येषा पुरस्ताद्रक्षोभिर्नाष्ट्राभिरग्नेराधिपत्यऽइत्यग्निमेवास्याऽअधिपतिं क-
रोति नाष्ट्राणां रक्षसामपहत्याऽआयुर्मे दा इत्यायुरेवात्मन्धत्ते तथो सर्वमायुरे-
ति ॥१९॥ पत्रवती दक्षिणत इति । नात्र तिरोहितमिवास्तीन्द्रस्याधिपत्यऽइ-
तीन्द्रमेवास्याऽअधिपतिं करोति नाष्ट्राणां रक्षसामपहत्यै प्रजां मे दा इति प्र-
जामेव पशूनात्मन्धत्ते तथो ह पुत्री पशुमान्भवति ॥२०॥ सुषदा पश्चादिति ।
नात्र तिरोहितमिवास्ति देवस्य सवितुराधिपत्यऽइति देवमेवास्यै सवितारमधि-
पतिं करोति नाष्ट्राणां रक्षसामपहत्यै चक्षुर्मे दा इति चक्षुरेवात्मन्धत्ते तथो ह

चक्षुष्मान्भवति ॥२१॥ आश्रुतिरुत्तरत इति । आश्रावयन्नुत्तरत इत्येवैतदाह धातुराधिपत्यऽइति धातारमेवास्याऽअधिपतिं करोति नाष्ट्राणाꣳ रक्षसामपहत्यै रायस्पोषं मे दा इति रयिमेव पुष्टिमात्मन्धत्ते तथो ह रयिमान्पुष्टिमान्भवति ॥२२॥ विधृतिरुपरिष्टादिति । विधारयन्नुपरिष्टादित्येवैतदाह बृहस्पतेराधिपत्यऽइति बृहस्पतिमेवास्याऽअधिपतिं करोति नाष्ट्राणाꣳ रक्षसामपहत्याऽओजो मे दा इत्योज एवात्मन्धत्ते तथौजस्वी बलवान्भवति ॥२३॥ अथ दक्षिणत उत्तानेन पाणिना निह्नुते । विश्वाभ्यो मा नाष्ट्राभ्यस्पाहीति सर्वाभ्यो मार्तिभ्यो गोपायेत्येवैतदाह यज्ञस्य शीर्षच्छिन्नस्य [रसो व्यक्षरत्स] पितॄनगच्छत्त्रया वै पितरस्तैरेवैनमेतत्समर्धयति कृत्स्नं करोति ॥२४॥ अथेमामभिमृश्य जपति । मनोरश्वासीत्यश्वा ह वाऽइयं भूत्वा मनुमुवाह सोऽस्याः पतिः प्रजापतिस्तेनैवैनमेतन्मिथुनेन प्रियेण धाम्ना समर्धयति कृत्स्नं करोति ॥२५॥ अथ वैकङ्कतौ शकलौ परिश्रयति प्राञ्चौ । स्वाहा मरुद्भिः परिश्रीयस्वेत्यवरꣳ स्वाहाकारं करोति परां देवतामेष वै स्वाहाकारो य एष तपत्येष उ प्रवर्ग्यस्तद्देतमेवैतत्प्रीणाति तस्मादवरꣳ स्वाहाकारं करोति परां देवताम् ॥२६॥ मरुद्भिः परिश्रीयस्वेति । विशो वै मरुतो विशैवैतत्क्षत्रं परिबृꣳहति तदिदं क्षत्रमुभयतो विशा परिबृढं तूष्णीमुदञ्चौ तूष्णीं प्राञ्चौ तूष्णीमुदञ्चौ तूष्णीं प्राञ्चौ ॥२७॥ त्रयोदश सम्पादयति । त्रयोदश वै मासाः संवत्सरस्य संवत्सर एष य एष तपत्येष उ प्रवर्ग्यस्तद्देतमेवैतत्प्रीणाति तस्मात्त्रयोदश सम्पादयति ॥२८॥ अथ सुवर्णꣳ हिरण्यमुपरिष्टान्निदधाति । दिवः सꣳस्पृशस्पाहीत्येतद्वै देवा अबिभयुर्यद्वै न इममुपरिष्टाद्रक्षाꣳसि नाष्ट्रा न हन्युरित्यग्नेर्वाऽएतद्रेतो यद्धिरण्यं नाष्ट्राणाꣳ रक्षसामपहत्याऽअथो द्यौर्ह वाऽएतस्माद्बिभयां चकार यद्वै मायं तप्तः शुशुचानो न हिꣳस्यादिति तदेवास्याऽएतदन्तर्दधाति हरितं भवति हरिणीव हि द्यौः ॥२९॥ अथ धवित्रैराधूनोति । मधु मध्विति त्रिः प्राणो वै

मधु प्राणमेवास्मिन्नेतद्दधाति त्रीणि भवन्ति त्रयो वै प्राणाः प्राण उदानो व्यान-
स्तानेवास्मिन्नेतद्दधाति ॥३०॥ अथापसलवि त्रिर्धून्वन्ति । यज्ञस्य शीर्षच्छिन्नस्य
[रसो व्यक्षरत्स] पितॄनगच्छत्त्रया वै पितरस्तैरेवैनमेतत्समीरयति ॥३१॥ अप वा
ऽएतेभ्यः प्राणाः क्रामन्ति । ये यज्ञे धुवनं तन्वते पुनः प्रसलवि त्रिर्धून्वन्ति षट्
सम्पद्यन्ते षड्वाऽइमे शीर्षन्प्राणास्तानेवास्मिन्नेतद्दधाति अपयन्ति रौहिणौ स य-
दार्चिर्जायतेऽथ हिरण्यमादत्ते ॥३२॥ स यत्रैताꣳ होतान्वाह । अभ्रस्वतीमश्विना
वाचमस्मेऽइति तदध्वर्युरुपोत्तिष्ठन्नाह रुचितो घर्म इति स यदि रुचितः स्याच्छ्रे-
यान्यजमानो भविष्यतीति विद्यादथ यद्यरुचितः पापीयान्भविष्यतीति विद्यादथ
यदि नैव रुचितो नारुचितो नैव श्रेयान्न पापीयान्भविष्यतीति विद्याद्यथा न्वेव
रुचितः स्यात्तथा धवितव्यः ॥३३॥ अथैतद्दैं° ॥३४॥ ब्राह्मणम् ॥३॥ ॥

स यदैतदध्वर्युः । उपोत्तिष्ठन्नाह रुचितो घर्म इति तदुपोत्थायावकाशैरुपति-
ष्ठन्ते प्राणा वाऽअवकाशाः प्राणानेवास्मिन्नेतद्दधाति षडुपतिष्ठन्ते षड्वाऽइमे शी-
र्षन्प्राणास्तानेवास्मिन्नेतद्दधाति ॥१॥ गर्भो देवानामिति । एष वै गर्भो देवानां
य एष तपत्येष हीदꣳ सर्वं गृह्णात्येतेनेदꣳ सर्वं गृभीतमेष उ प्रवर्ग्यस्तदेतमेवै-
तत्प्रीणाति तस्मादाह गर्भो देवानामिति ॥२॥ पिता मतीनामिति । पिता ह्येष
मतीनां पतिः प्रजानामिति पतिर्ह्येष प्रजानाꣳ ॥३॥ सं देवो देवेन सवित्राग-
तेति सꣳ हि देवो देवेन सवित्रागत सꣳ सूर्येण रोचतऽइति सꣳ हि सूर्येण
रोचते ॥४॥ समग्निरग्निनागतेति । सꣳ ह्यग्निरग्निनागत सं देवेन सवित्रेति सꣳ
हि देवेन सवित्रागत सꣳ सूर्येणारोचिष्टेति सꣳ हि सूर्येणारोचिष्ट ॥५॥ स्वाहा
समग्निस्तपसागतेति सꣳ ह्यग्निस्तपसागतावरꣳ स्वाहाकारं करोति परां देवता-
मसावेव बन्धुः सं दैव्येन सवित्रेति सꣳ हि दैव्येन सवित्रागत सꣳ सूर्येणारूरु-
चतेति सꣳ हि सूर्येणारूरुचत ॥६॥ ते वाऽएते त्रयोऽवकाशा भवन्ति । त्रयो

वै प्राणाः प्राण उदानो व्यानस्तेनैवास्मिन्नेतद्दधाति ॥७॥ धर्ता दिवो विभाति तपसस्पृथिव्यामिति । धर्ता ह्येष दिवो विभाति तपसस्पृथिव्यां धर्ता देवो देवानाममर्त्यस्तपोजा इति धर्ता ह्येष देवो देवानाममर्त्यस्तपोजा वाचमस्मे नियच्छ देवायुवमिति यज्ञो वै वाग्यज्ञमस्मभ्यं प्रयच्छ येन देवान्प्रीणामेत्येवैतदाह ॥८॥ अपश्यं गोपामनिपद्यमानमिति । एष वै गोपा य एष तपत्येष हीदꣳ सर्वं गोपायत्यथो न निपद्यते तस्मादाहापश्यं गोपामनिपद्यमानमिति ॥९॥ आ च परा च पथिभिश्चरन्तमिति । आ च ह्येष परा च देवैः पथिभिश्चरति स सध्रीचीः स विषूचीर्वसान इति सध्रीचीश्च ह्येष विषूचीश्च दिशो वस्तेऽथो रश्मीनावरीवर्त्ति भुवनेष्वन्तरिति पुनः-पुनर्ह्येष एषु लोकेषु वरीवर्त्यमानश्चरति ॥१०॥ विश्वासां भुवां पते । विश्वस्य मनसस्पते विश्वस्य वचसस्पते सर्वस्य वचसस्पतऽइत्येतस्य सर्वस्य पतऽइत्येतद्देवश्रुत्वं देव घर्म देवो देवान्पाहीति नात्र तिरोहितमिवास्ति ॥११॥ अत्र प्रावीरनु वां देववीतयऽइति । अश्विनावेवैतदाहाश्विनौ वाऽएतद्यज्ञस्य शिरः प्रत्यधत्तां तावेवैतत्प्रीणाति तस्मादाहात्र प्रावीरनु वां देववीतयऽइति ॥१२॥ मधु माध्वीभ्यां मधु माधूचीभ्यामिति । दध्यङ् ह वाऽआभ्यामाथर्वणो मधु नाम ब्राह्मणमुवाच तदेनयोः प्रियं धाम तदेवैनयोरेतेनोपगच्छति तस्मादाह मधु माध्वीभ्यां मधु माधूचीभ्यामिति ॥१३॥ हृदे त्वा मनसे त्वा दिवे त्वा सूर्याय त्वा । ऊर्ध्वोऽअध्वरं दिवि देवेषु धेहीति नात्र तिरोहितमिवास्ति ॥१४॥ पिता नोऽसि पिता नो बोधीति । एष वै पिता य एष तपत्येष उ प्रवर्ग्यस्तदेतमेवैतत्प्रीणाति तस्मादाह पिता नोऽसि पिता नो बोधीति नमस्तेऽअस्तु मा मा हिꣳसीरित्याशिषमेवैतदाशास्ते ॥१५॥ अथ पत्न्यै शिरोऽपवृत्य । महावीरमीक्षमाणां वाचयति त्वष्टृमन्तस्त्वा सपेमेति वृषा वै प्रवर्ग्यो योषा पत्नी मिथुनमेवैतत्प्रजननं क्रियते ॥१६॥ अथैतद्धि° ॥१७॥ ब्राह्मणम् ॥४॥ प्रथमोऽध्यायः [१२.]॥

अथातो रौहिणौ जुहोति । अहः केतुना जुषताꣳ सुज्योतिर्ज्योतिषा स्वाहे-
त्युभावेतेन यजुषा प्राता रात्रिः केतुना जुषताꣳ सुज्योतिर्ज्योतिषा स्वाहेत्युभावे-
तेन यजुषा सायम् ॥१॥ तद्यद्रौहिणौ जुहोति । अग्निश्च ह वाऽआदित्यश्च रौ-
हिणावेताभ्याꣳ हि देवताभ्यां यजमानाः स्वर्गं लोकꣳ रोहन्ति ॥२॥ अथोऽअहो-
रात्रे वै रौहिणौ । आदित्यः प्रवर्ग्योऽमुं तदादित्यमहोरात्राभ्यां परिगृह्णाति त-
स्मादेषोऽहोरात्राभ्यां परिगृहीतः ॥३॥ अथोऽइमौ वै लोकौ रौहिणौ । आदि-
त्यः प्रवर्ग्योऽमुं तदादित्यमाभ्यां लोकाभ्यां परिगृह्णाति तस्मादेष आभ्यां लोका-
भ्यां परिगृहीतः ॥४॥ अथो चक्षुषी वै रौहिणौ । शिरः प्रवर्ग्यः शीर्षंस्तच्चक्षुर्द-
धाति ॥५॥ अथ रज्जुमादत्ते । देवेभ्यस्त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो
हस्ताभ्यामाददे रास्नासीत्यसावेव बन्धुः ॥६॥ अथ गामाह्वयति । जघनेन गार्ह-
पत्यं यन्निडऽएह्यदितऽएहि सरस्वत्येहीतीडा हि गौरदितिर्हि गौः सरस्वती हि
गौरथो तैराह्वयति नाम्नासावेह्यसावेहीति त्रिः ॥७॥ तामागतामभिदधाति । अ-
दित्यै रास्नासीन्द्राण्या उष्णीष इतीन्द्राणी ह वाऽइन्द्रस्य प्रिया पत्नी तस्या उ-
ष्णीषो विश्वरूपतमः सोऽसीति तदाह तमेवैनमेतत्करोति ॥८॥ अथ वत्समुपार्ज-
ति । पूषासीत्ययं वै पूषा योऽयं पवतऽएष हीदꣳ सर्वं पुष्यत्येष उ प्रवर्ग्यस्तदे-
तमेवैतत्प्रीणाति तस्मादाह पूषासीति ॥९॥ अथोन्नयति । घर्माय दीष्वेत्येष वा
ऽअत्र घर्मो रसो भवति यमेषा पिन्वते तस्मै दयस्वेत्येवैतदाह ॥१०॥ अथ पि-
न्वने पिन्वयति । अश्विभ्यां पिन्वस्वेत्यश्विनावेवैतदाहाश्विनौ वाऽएतद्यज्ञस्य
शिरः प्रत्यधत्तां तावेवैतत्प्रीणाति तस्मादाहाश्विभ्यां पिन्वस्वेति ॥११॥ सरस्व-
त्यै पिन्वस्वेति । वाग्वै सरस्वती वाचा वाऽएतदश्विनौ यज्ञस्य शिरः प्रत्यधत्तां
तावेवैतत्प्रीणाति तस्मादाह सरस्वत्यै पिन्वस्वेति ॥१२॥ इन्द्राय पिन्वस्वेति ।
इन्द्रो वै यज्ञस्य देवता स यैव यज्ञस्य देवता तयैवैतदश्विनौ यज्ञस्य शिरः

प्रत्यधत्तां तावेवैतत्प्रीणाति तस्मादाहेन्द्राय पिन्वस्वेति ॥१३॥ अथ विप्रुषोऽभिमन्त्रयते । स्वाहेन्द्रवत्स्वाहेन्द्रवदितीन्द्रो वै यज्ञस्य देवता सा यैव यज्ञस्य देवता तामेवैतत्प्रीणाति तस्मादाह स्वाहेन्द्रवत्स्वाहेन्द्रवदिति त्रिष्कृत्व आह त्रिवृद्धि यज्ञोऽवरं स्वाहाकारं करोति परां देवतामसावेव बन्धुः ॥१४॥ अथास्यै स्तनमभिपद्यते । यस्ते स्तनः शशयो यो मयोभूरिति यस्ते स्तनो निहितो गुहायामित्येवैतदाह यो रत्नधा वसुविद्यः सुदत्र इति यो धनानां दाता वसुवित्पणाय्य इत्येवैतदाह येन विश्वा पुष्यसि वार्याणीति येन सर्वान्देवान्सर्वाणि भूतानि बिभर्षीत्येवैतदाह सरस्वति तमिह धातवेऽकरिति वाग्वै सरस्वती सैषा घर्मदुघा यज्ञो वै वाग्यज्ञमस्मभ्यं प्रयच्छ येन देवान्प्रीणामेत्येवैतदाहाथ गार्हपत्यस्यार्धमित्युर्वन्तरिक्षमन्वेमीत्यसावेव बन्धुः ॥१५॥ अथ शफावादत्ते । गायत्रं छन्दोऽसि त्रैष्टुभं छन्दोऽसीति गायत्रेण चैवैनावेतत्त्रैष्टुभेन च छन्दसादत्ते द्यावापृथिवीभ्यां त्वा परिगृह्णामीतीमे वै द्यावापृथिवी परीशासावादित्यः प्रवर्ग्योऽमुं तदादित्यमाभ्यां द्यावापृथिवीभ्यां परिगृह्णात्यथ मौञ्जेन वेदेनोपमार्ष्ट्यसावेव बन्धुः ॥१६॥ अथोपयमन्योपगृह्णाति । अन्तरिक्षेणोपयच्छामीत्यन्तरिक्षं वा उपयमन्यन्तरिक्षेण हीदं सर्वमुपयतमथो उदरं वा उपयमन्युदरेण हीदं सर्वमन्नाद्यमुपयतं तस्मादाहान्तरिक्षेणोपयच्छामीति ॥१७॥ अथाजाक्षीरमानयति । तप्तो वा एष शुशुचानो भवति तमेवैतच्छमयति तस्मिञ्छान्ते गोक्षीरमानयति ॥१८॥ इन्द्राश्विनेति । इन्द्रो वै यज्ञस्य देवता सा यैव यज्ञस्य देवता तामेवैतत्प्रीणात्यश्विनेत्यश्विनावेवैतदाहाश्विनौ वा एतद्यज्ञस्य शिरः प्रत्यधत्तां तावेवैतत्प्रीणाति तस्मादाहेन्द्राश्विनेति ॥१९॥ मधुनः सारघस्येति । एतद्वै मधु सारघं घर्मं पातेति रसं पातेत्येवैतदाह वसव इत्येते वै वसव एते हीदं सर्वं वासयन्ते यजत वाडिति तद्यथा वषट्कृतं हुतमेवमस्यैतद्भवति ॥२०॥ स्वाहा सूर्यस्य रश्मये वृष्टिवनय

ऽइति । सूर्यस्य ह वाऽएको रश्मिर्वृष्टिवनिर्नाम येनेमाः सर्वाः प्रजा बिभर्ति तमेवैतत्प्रीणाति तस्मादाह स्वाहा सूर्यस्य रश्मये वृष्टिवनयऽइत्यवरं स्वाहाकारं करोति परां देवतामसाविव बन्धुः ॥२१॥ अथैतद्धि° ॥२२॥ ब्राह्मणम् ॥५ [२. १.] ॥ प्रथमः प्रपाठकः ॥ कण्डिकासंख्या१३२ ॥ ॥

स यत्रैतां होतान्वाह । प्रैतु ब्रह्मणस्पतिः प्र देव्येतु सूनृतेति तदध्वर्युः प्राङुदायन्वातनामानि जुहोत्येतद्धि देवा अबिभयुर्यद्वै न इममन्तरा रक्षांसि नाष्ट्रा न हन्युरिति तमेतत्पुरैवाहवनीयात्स्वाहाकारेणाजुहवुस्तं हुतमेव सन्तमग्नाववजुहवुस्तथोऽएवैनमेष एतत्पुरैवाहवनीयात्स्वाहाकारेण जुहोति तं हुतमेव सन्तमग्नौ जुहोति ॥१॥ समुद्राय त्वा वाताय स्वाहेति । अयं वै समुद्रो योऽयं पवतऽएतस्माद्धि समुद्रात्सर्वे देवाः सर्वाणि भूतानि समुद्रवन्ति तस्माऽएवैनं जुहोति तस्मादाह समुद्राय त्वा वाताय स्वाहा ॥२॥ सरिराय त्वा वाताय स्वाहेति । अयं वै सरिरो योऽयं पवतऽएतस्माद्धि सरिरात्सर्वे देवाः सर्वाणि भूतानि सहेरते तस्माऽएवैनं जुहोति तस्मादाह सरिराय त्वा वाताय स्वाहा ॥३॥ अनाधृष्याय त्वा वाताय स्वाहाप्रतिधृष्याय त्वा वाताय स्वाहेति । अयं वाऽअनाधृष्योऽप्रतिधृष्यो योऽयं पवते तस्माऽएवैनं जुहोति तस्मादाहानाधृष्याय त्वा वाताय स्वाहाप्रतिधृष्याय त्वा वाताय स्वाहेति ॥४॥ अवस्यवे त्वा वाताय स्वाहाशिमिदाय त्वा वाताय स्वाहेति । अयं वाऽअवस्युरशिमिदो योऽयं पवते तस्माऽएवैनं जुहोति तस्मादाहावस्यवे त्वा वाताय स्वाहाशिमिदाय त्वा वाताय स्वाहेति ॥५॥ इन्द्राय त्वा वसुमते रुद्रवते स्वाहेति । अयं वाऽइन्द्रो योऽयं पवते तस्माऽएवैनं जुहोति तस्मादाहेन्द्राय त्वेति वसुमते रुद्रवतऽइति तदिन्द्रमेवानु वसूंश्च रुद्रांश्चाभजत्यथो प्रातःसवनस्य चैवैतन्माध्यन्दिनस्य च सवनस्य रूपं क्रियते ॥६॥ इन्द्राय त्वादित्यवते स्वाहेति । अयं वाऽइन्द्रो योऽयं पवते तस्मा

ऽएवैनं जुहोति तस्मादाहेन्द्राय त्वेत्यादित्यवतऽइति तदिन्द्रमेवान्वादित्यानाभजत्यथो तृतीयसवनस्यैवैतद्रूपं क्रियते ॥७॥ इन्द्राय त्वाभिमातिघ्ने स्वाहेति । अयं वाऽइन्द्रो योऽयं पवते तस्माऽएवैनं जुहोति तस्मादाहेन्द्राय त्वेत्यभिमातिघ्न इति सपत्नो वाऽअभिमातिरिन्द्राय त्वा सपत्नघ्नऽइत्येवैतदाह सोऽस्योद्धारो यथा श्रेष्ठस्योद्धार एवमस्यैष ऋते देवेभ्यः ॥८॥ सवित्रे त्वऽऋभुमते विभुमते वाजवते स्वाहेति । अयं वै सविता योऽयं पवते तस्माऽएवैनं जुहोति तस्मादाह सवित्रे त्वेत्यृभुमते विभुमते वाजवतऽइति तदस्मिन्विश्वान्देवानन्वाभजति ॥९॥ बृहस्पतये त्वा विश्वदेव्यावते स्वाहेति । अयं वै बृहस्पतिर्योऽयं पवते तस्माऽएवैनं जुहोति तस्मादाह बृहस्पतये त्वेति विश्वदेव्यावतऽइति तदस्मिन्विश्वान्सर्वान्देवानन्वाभजति ॥१०॥ यमाय त्वाङ्गिरस्वते पितृमते स्वाहेति । अयं वै यमो योऽयं पवते तस्माऽएवैनं जुहोति तस्मादाह यमाय त्वेत्यङ्गिरस्वते पितृमतऽइति यज्ञस्य शीर्षच्छिन्नस्य [रसो व्यक्षरत्स] पितॄनगच्छत्त्रया वै पितरस्तानेवैतदन्वाभजति ॥११॥ द्वादशैतानि नामानि भवन्ति । द्वादश वै मासाः संवत्सरस्य संवत्सर एष य एष तपत्येष उ प्रवर्ग्यस्तदेतमेवैतत्प्रीणाति तस्माद्द्वादश भवन्ति ॥१२॥ अथोपयमन्या महावीरऽआनयति । स्वाहा घर्मायेत्येष वै घर्मो य एष तपत्येष उ प्रवर्ग्यस्तदेतमेवैतत्प्रीणाति तस्मादाह स्वाहा घर्मायेत्यवरं स्वाहाकारं करोति परां देवतामसावेव बन्धुः ॥१३॥ आनीते जपति । स्वाहा घर्मः पित्रऽइति यज्ञस्य शीर्षच्छिन्नस्य [रसो व्यक्षरत्स] पितॄनगच्छत्त्रया वै पितरस्तानेवैतत्प्रीणात्यवरं स्वाहाकारं करोति परां देवतामसावेव बन्धुः ॥१४॥ नानुवाक्यामन्वाह । सकृदु ह्येव पराञ्चः पितरस्तस्मान्नानुवाक्यामन्वाहातिक्रम्याश्राव्याह घर्मस्य यजेति वषट्कृते जुहोति ॥१५॥ विश्वा आशा दक्षिणसदिति सर्वा आशा दक्षिणसदित्येवैतदाह विश्वान्देवानयाडिहेति सर्वान्देवानयाक्षीदिहेत्येवैतदाह

स्वाहाकृतस्य घर्मस्य मधोः पिबतमश्विनेत्यश्विनावेवैतदाहाश्विनौ ह्येतद्यज्ञस्य शिरः प्रत्यधत्तां तावेवैतत्प्रीणात्यवरꣳ स्वाहाकारं करोति परां देवतामसावेव बन्धुः ॥१६॥ अथ स्रुवोर्धमुत्कम्पयति । दिवि धा इमं यज्ञमिमं यज्ञं दिवि धा इत्यसौ वाऽआदित्यो घर्मो यज्ञो दिवि वाऽएष हितो दिवि प्रतिष्ठितस्तमेवैतत्प्रीणाति तस्मादाह दिवि धा इमं यज्ञमिमं यज्ञं दिवि धा इत्यनुवषट्कृते जुहोति ॥१७॥ स्वाहाग्नये यज्ञियायेति । तत्स्विष्टकृद्भाजनमग्निर्हि स्विष्टकृच्छं यजुर्भ्य इति यजुर्भिर्ह्येषोऽस्मिंल्लोके प्रतिष्ठितस्तान्येवैतत्प्रीणात्यवरꣳ स्वाहाकारं करोति परां देवतामसावेव बन्धुः ॥१८॥ अथ ब्रह्मानुमन्त्रयते । ब्रह्मा वाऽऋत्विजां भिषक्तमस्तद्य एवऽर्त्विजां भिषक्तमस्तेनैवैनमेतद्यज्ञं भिषज्यति ॥१९॥ अश्विना घर्मं पातमिति । अश्विनावेवैतदाहाश्विनौ ह्येतद्यज्ञस्य शिरः प्रत्यधत्तां तावेवैतत्प्रीणाति ॥२०॥ ह्वार्द्वानमहर्दिवाभिरूतिभिरिति । अनिरुक्तमनिरुक्तो वै प्रजापतिः प्रजापतिर्यज्ञस्तत्प्रजापतिमेवैतद्यज्ञं भिषज्यति ॥२१॥ तन्त्रायिणऽइति । एष वै तन्त्रायी य एष तपत्येष हीमांल्लोकांस्तन्त्रमिवानुसंचरत्येष उ प्रवर्ग्यस्तदेतमेवैतत्प्रीणाति तस्मादाह तन्त्रायिणऽइति ॥२२॥ नमो द्यावापृथिवीभ्यामिति । तदाभ्यां द्यावापृथिवीभ्यां निह्नुते ययोरिदꣳ सर्वमधि ॥२३॥ अथ यजमानः । यज्ञो वै यजमानो यज्ञेनैवैतद्यज्ञं भिषज्यति ॥२४॥ अपातामश्विना घर्ममिति । अश्विनावेवैतदाहाश्विनौ ह्येतद्यज्ञस्य शिरः प्रत्यधत्तां तावेवैतत्प्रीणाति ॥२५॥ अनु द्यावापृथिवीऽअमꣳसातामिति । तदिमे द्यावापृथिवीऽआह ययोरिदꣳ सर्वमधीहैव रातयः सन्त्वितीहैव नो धनानि सन्त्वित्येवैतदाह ॥२६॥ अथ पिन्वमानमनुमन्त्रयते । इषे पिन्वस्वेति वृष्ट्यै तदाह यदाहेषे पिन्वस्वेत्यूर्जे पिन्वस्वेति यो वृष्टादूर्ग्रसो जायते तस्मै तदाह ब्रह्मणे पिन्वस्वेति तद्ब्रह्मणऽआह क्षत्राय पिन्वस्वेति तत्क्षत्रायाह द्यावापृथिवीभ्यां पिन्वस्वेति तदाभ्यां द्यावापृथिवीभ्या-

माह ययोरिदꣳ सर्वमधि ॥२७॥ स यदूर्ध्वः पिन्वते । तद्यजमानाय पिन्वते यत्प्राङ् तद्देवेभ्यो यद्दक्षिणा तत्पितृभ्यो यत्प्रत्यङ् तत्पशुभ्यो यदुदङ् तत्प्रजायाऽअनपराद्धं न्वेव यजमानस्योर्ध्वो ह्येव पिन्वत्याथ यां दिशं पिन्वते तां पिन्वते यदा शाम्यन्ति विप्रुषः ॥२८॥ अथ प्राङिवोदङ्ङुत्क्रामति । धर्मासि सुधर्मेत्येष वै धर्मो य एष तपत्येष हीदꣳ सर्वं धारयत्येतेनेदꣳ सर्वं धृतमेष उ प्रवर्ग्यस्तदेतमेवैतत्प्रीणाति तस्मादाह धर्मासि सुधर्मेति ॥२९॥ अथ खरे सादयति । अमेन्यस्मे नृम्णानि धारयेत्यक्रुध्यन्तो धनानि धारयेत्येवैतदाह ब्रह्म धारय क्षत्रं धारय विशं धारयेत्येतत्सर्वं धारयेत्येवैतदाह ॥३०॥ अथ शाकलैर्जुहोति । प्राणा वै शाकलाः प्राणानेवास्मिन्नेतद्दधाति ॥३१॥ स्वाहा पूष्णे शरसऽइति । अयं वै पूषा योऽयं पवतऽएष हीदꣳ सर्वं पुष्यत्येष उ प्राणः प्राणमेवास्मिन्नेतद्दधाति तस्मादाह स्वाहा पूष्णे शरसऽइत्यवरꣳ स्वाहाकारं करोति परां देवतामसाविव बन्धुर्हुत्वा मध्यमे परिधाऽउपश्रयति ॥३२॥ स्वाहा ग्रावभ्य इति । प्राणा वै ग्रावाणः प्राणानेवास्मिन्नेतद्दधाति हुत्वा मध्यमे परिधाऽउपश्रयति ॥३३॥ स्वाहा प्रतिरवेभ्य इति । प्राणा वै प्रतिरवाः प्राणान्हीदꣳ सर्वं प्रतिरतं प्राणानेवास्मिन्नेतद्दधाति हुत्वा मध्यमे परिधाऽउपश्रयति ॥३४॥ स्वाहा पितृभ्य ऊर्ध्वबर्हिर्भ्यो घर्मपावभ्य इति । अहुत्वैवोदङ्ङीक्षमाणो दक्षिणार्धे बर्हिष उपगूहति यज्ञस्य शीर्षच्छिन्नस्य [रसो व्यक्षरत्स] पितॄनगच्छत्त्रया वै पितरस्तानेवैतत्प्रीणात्यथ यन्न प्रेक्षते सकृदु ह्येव पराञ्चः पितरः ॥३५॥ स्वाहा द्यावापृथिवीभ्यामिति । प्राणोदानौ वै द्यावापृथिवी प्राणोदानावेवास्मिन्नेतद्दधाति हुत्वा मध्यमे परिधाऽउपश्रयति ॥३६॥ स्वाहा विश्वेभ्यो देवेभ्य इति । प्राणा वै विश्वे देवाः प्राणानेवास्मिन्नेतद्दधाति हुत्वा मध्यमे परिधाऽउपश्रयति ॥३७॥ स्वाहा रुद्राय रुद्रहूतयऽइति । अहुत्वैव दक्षिणेक्षमाणः प्रतिप्रस्थात्रे प्रयच्छति तꣳ स उत्तरतः शालायाऽउदञ्चं निरस्यत्येषा ह्येतस्य देवस्य

दिक्स्वायामेवैनमेतद्दिशि प्रीणात्यथ यन्न प्रेक्षते नेन्मा रुद्रो हिनसदिति ॥३८॥ सप्तैता आकृतयो भवन्ति । सप्त वाऽइमे शीर्षन्प्राणास्तानेवास्मिन्नेतद्दधाति ॥३९॥ अथ महावीरादुपयमन्यां प्रत्यानयति । स्वाहा सं ज्योतिषा ज्योतिरिति ज्योतिर्वाऽइतरस्मिन्पयो भवति ज्योतिरितरस्यां ते ह्येतदुभे ज्योतिषी संगच्छेतेऽअवरꣳ स्वाहाकारं करोति परां देवतामसावेव बन्धुः ॥४०॥ ॥ शतम् ७००० ॥ ॥ अथ रौहिणौ जुहोति । अहः केतुना जुषताꣳ सुज्योतिर्ज्योतिषा स्वाहेत्यसावेव बन्धू रात्रिः केतुना जुषताꣳ सुज्योतिर्ज्योतिषा स्वाहेत्यसावेव बन्धुः ॥४१॥ अथ यजमानाय घर्मोच्छिष्टं प्रयच्छति । स उपहवमिष्ट्वा भक्षयति मधु हुतमिन्द्रतमेऽअग्नाविति मधु हुतमिन्द्रियवत्तमेऽग्नावित्येवैतदाहाश्याम ते देव घर्म नमस्तेऽअस्तु मा मा हिꣳसीरित्याशिषमेवैतदाशास्ते ॥४२॥ अथ दक्षिणतः सिकता उपकीर्णा भवन्ति । तन्मार्जयन्ते य एव मार्जालीये बन्धुः सोऽत्रानुप्रहरति शाकलानथोपसदा चरत्येतद्वै यज्ञस्य शिरः संस्कृतं यथा-यथैनं तदश्विनौ प्रत्यधत्ताम् ॥४३॥ तं न प्रथमयज्ञे प्रवृञ्ज्यात् । एनस्यꣳ हि तदथो नेन्मऽइन्द्रः शिरश्छिनददिति द्वितीये वैव तृतीये वापशीर्ष्णा ह्येवाग्रे यज्ञेन देवा अर्चन्तः श्राम्यन्तश्चेरुस्तस्माद्द्वितीये वैव तृतीये वाथो तप्तो वाऽएष शुशुचानो भवति ॥४४॥ तं यत्प्रथमयज्ञे प्रवृञ्ज्यात् । एषोऽस्य तप्तः शुशुचानः प्रजां च पशूंश्च प्रदहेदथोऽआयुः प्रमायुको यजमानः स्यात्तस्माद्द्वितीये वैव तृतीये वा ॥४५॥ तं न सर्वस्माऽइव प्रवृञ्ज्यात् । सर्वं वै प्रवर्ग्यो नेत्सर्वस्माऽइव सर्वं करवाणीति यो न्वेव ज्ञातस्तस्मै प्रवृञ्ज्याद्यो वास्य प्रियः स्याद्यो वानूचानोऽनूक्तेनैनं प्राप्नुयात् ॥४६॥ सहस्रे प्रवृञ्ज्यात् । सर्वं वै सहस्रꣳ सर्वमेष सर्ववेदसे प्रवृञ्ज्यात्सर्वं वै सर्ववेदसꣳ सर्वमेष विश्वजिति सर्वपृष्ठे प्रवृञ्ज्यात्सर्वं वै विश्वजित्सर्वपृष्ठः सर्वमेष वाजपेये राजसूये प्रवृञ्ज्यात्सर्वꣳ हि तत्सत्त्रे प्रवृञ्ज्यात्सर्वं वै सत्त्रꣳ सर्वमेष एतान्यस्य प्रवर्जनान्यतो

नान्यत्र ॥४७॥ तदाहुः । यदपशिरा अप्रवर्ग्योऽथ केनास्याग्निहोत्रꣳ शीर्षण्वद्भवतीत्याहवनीयेनेति ब्रूयात्कथं दर्शपूर्णमासावित्याज्येन च पुरोडाशेन चेति ब्रूयात्कथं चातुर्मास्यानीति पयस्ययेति ब्रूयात्कथं पशुबन्ध इति पशुना च पुरोडाशेन चेति ब्रूयात्कथꣳ सौम्योऽध्वर इति हविर्धानेनेति ब्रूयात् ॥४८॥ अथोऽआहुः । यज्ञस्य शीर्षच्छिन्नस्य शिर एतद्देवाः प्रत्यदधुर्यदातिथ्यं न ह वाऽअस्यापशीर्ष्णा केन चन यज्ञेनेष्टं भवति य एवमेतद्वेद ॥४९॥ तदाहुः । यत्प्रणीताः प्रणयन्ति यज्ञेऽथ कस्मादत्र न प्रणयन्तीति शिरो वाऽएतद्यज्ञस्य यत्प्रणीताः शिरः प्रवर्ग्यो नेच्छिरसा शिरोऽभ्यारोहयाणीति ॥५०॥ तदाहुः । यत्प्रयाजानुयाजा अन्यत्र भवन्त्यथ कस्मादत्र न भवन्तीति प्राणा वै प्रयाजानुयाजाः प्राणा अवकाशाः प्राणाः शाकला नेत्प्राणैः प्राणानभ्यारोहयाणीति ॥५१॥ तदाहुः । यदाज्यभागावन्यत्र जुह्वत्यथ कस्मादत्र न जुह्वतीति चक्षुषी वाऽएते यज्ञस्य यदाज्यभागौ चक्षुषी रौहिणौ नेच्चक्षुषा चक्षुरभ्यारोहयाणीति ॥५२॥ तदाहुः । यद्वानस्पत्यैर्देवेभ्यो जुह्वत्यथ कस्मादेतं मृन्मयेनैव जुह्वतीति यज्ञस्य शीर्षच्छिन्नस्य रसो व्यक्षरत्स इमे द्यावापृथिवीऽअगच्छद्यन्मृदियं तद्यदापोऽसौ तन्मृदश्चापां च महावीराः कृता भवन्ति तेनैवैनमेतद्रसेन समर्धयति कृत्स्नं करोति ॥५३॥ स यद्वानस्पत्यः स्यात् । प्रदह्येत यद्धिरण्मयः स्यात्प्रलीयेत यल्लोहमयः स्यात्प्रसिच्येत यदयस्मयः स्यात्प्रदहेत्परीशासावथैष एवैतस्माऽअतिष्ठत तस्मादेतं मृन्मयेनैव जुहोति ॥५४॥ अथैतद्वि० ॥५५॥ ब्राह्मणम् ॥१ [२. २.] ॥ द्वितीयोऽध्यायः [१. ३.] ॥ ॥

स वै तृतीयेऽहन् । षष्ठे वा द्वादशे वा प्रवर्ग्योपसदौ समस्य प्रवर्ग्यमुत्सादयत्युत्सन्नमिव ह्येदꣳ शिरस्तद्यदेतमभितो भवति तत्सर्वꣳ समादायाग्रेण शालामन्तर्वेद्युपसमायन्ति ॥१॥ अथाग्नीध्रः । आहवनीये त्रीञ्छलाकानुपकल्पयते तेषामेकमुज्ज्वलय्य मुखदघ्ने धारयमाणो जुहोति यज्ञस्य शीर्षच्छिन्नस्य शुगुदक्रामत्से-

मांल्लोकानाविशत्तथैवैनमेतदृचा समर्धयति कृत्स्नं करोति ॥२॥ अथ यन्मुखदघ्ने । उपरीव वै तद्यन्मुखदघ्नमुपरीव तद्यदसौ लोकस्तद्यामुं लोकꣳ शुगाविशत्तथैवैनमेतदृचा समर्धयति कृत्स्नं करोति ॥३॥ या ते घर्म दिव्या शुगिति । यैव दिव्या शुग्या गायत्र्याꣳ हविर्धानऽइति यैव गायत्र्याꣳ हविर्धाने सा तऽआप्यायतां निष्ट्यायतां तस्यै ते स्वाहेति नात्र तिरोहितमिवास्ति ॥४॥ अथ द्वितीयमुज्ज्वलय्य । नाभिदघ्ने धारयमाणो जुहोति मध्यमिव वै तद्यन्नाभिदघ्नं मध्यमिवान्तरिक्षलोकस्तद्यान्तरिक्षलोकꣳ शुगाविशत्तथैवैनमेतदृचा समर्धयति कृत्स्नं करोति ॥५॥ याते घर्मान्तरिक्षे शुगिति । यैवान्तरिक्षे शुग्या त्रिष्टुभ्याग्नीध्रऽइति यैव त्रिष्टुभ्याग्नीध्रे सा तऽआप्यायतां निष्ट्यायतां तस्यै ते स्वाहेति नात्र तिरोहितमिवास्ति ॥६॥ अथ तृतीयमभ्याधाय । तस्मिन्नासीनो जुहोत्यध-इव वै तद्यदासीनोऽध-इव तद्यदयं लोकस्तद्येमं लोकꣳ शुगाविशत्तथैवैनमेतदृचा समर्धयति कृत्स्नं करोति ॥७॥ या ते घर्म पृथिव्याꣳ शुगिति । यैव पृथिव्याꣳ शुग्या जगत्याꣳ सदस्येति यैव जगत्याꣳ सदस्या सा तऽआप्यायतां निष्ट्यायतां तस्यै ते स्वाहेति नात्र तिरोहितमिवास्ति ॥८॥ अथोपनिष्क्रामति । क्षत्रस्य त्वा परस्पायेत्येतद्वै देवं क्षत्रं य एष तपत्यस्य त्वा मानुषस्य क्षत्रस्य परस्पवायेत्येवैतदाह ब्रह्मणस्त्वं पाहीति ब्रह्मण आत्मानं गोपायेत्येवैतदाह विशस्त्वा धर्मणा वयमिति यज्ञो वै विड्यज्ञस्य त्वारिष्ट्याऽइत्येवैतदाहानुक्रामाम सुविताय नव्यसऽइति यज्ञस्य त्वारिष्ट्याऽअह्वलायाऽइत्येवैतदाह ॥९॥ अथाह साम गायेति । साम ब्रूहीति वा गायेति त्वेव ब्रूयाद्गायन्ति हि साम तद्यत्साम गायति नेदिमान्बहिर्धा यज्ञाच्छरीरान्नाष्ट्रा रक्षाꣳसि हिनसन्निति साम हि नाष्ट्राणाꣳ रक्षसामपहन्ता ॥१०॥ आग्नेय्यां गायति । अग्निर्हि रक्षसामपहन्तातिछन्दसि गायत्येषा वै सर्वाणि छन्दाꣳसि यदतिछन्दास्तस्मादतिछन्दसि गायति ॥११॥ स गायति । अग्निष्टपति प्रतिदहत्य-

ह्वावोऽह्वाव इति तन्नाष्ट्रा वै तद्रक्षाꣳस्यतोऽपहन्ति ॥१२॥ तऽउदञ्चो निष्क्रा-
मन्ति । जघनेन चात्वालमग्रेणाग्नीध्रमेषा हि यज्ञस्य द्वाः स यस्यां ततो दिश्यापो
भवन्ति तद्यन्ति ॥१३॥ तं वै परिष्यन्दऽउत्सादयेत् । तप्तो वाऽएष शुशुचानो
भवति तं यदस्यामुत्सादयेदिमामस्य शुगृच्छेद्यदप्सूत्सादयेदपोऽस्य शुगृच्छेदथ यत्परि-
ष्यन्दऽउत्सादयति तथो ह नैवापो हिनस्ति नेमां यदह्याप्सु न प्रास्यति तेनापो
न हिनस्त्यथ यत्समन्तमापः परियन्ति शान्तिर्वाऽआपस्तेनोऽइमां न हिनस्ति
तस्मात्परिष्यन्दऽउत्सादयेत् ॥१४॥ उत्तरवेदौ त्वेवोत्सादयेत् । यज्ञो वाऽउत्तर-
वेदिः शिरः प्रवर्ग्यो यज्ञऽएवैतच्छिरः प्रतिदधाति ॥१५॥ उत्तरनाभ्या सꣳस्पृष्टम् ।
प्रथमं प्रवर्ग्यमुत्सादयति वाग्वाऽउत्तरनाभिः शिरः प्रवर्ग्यः शीर्षंस्तद्वाचं दधाति
॥१६॥ चतुःस्रक्तिरिति । एष वै चतुःस्रक्तिर्य एष तपति दिशो ह्येतस्य स्रक्तयस्त-
स्मादाह चतुःस्रक्तिरिति ॥१७॥ नाभिर्ऋतस्य सप्रथा इति । सत्यं वाऽऋतꣳ सत्य-
स्य नाभिः सप्रथा इत्येवैतदाह स नो विश्वायुः सप्रथा इति स नः सर्वायुः सप्रथा
इत्येवैतदाह ॥१८॥ अप द्वेषोऽअप ह्वर इति । नात्र तिरोहितमिवास्त्यन्यव्रत-
स्य सश्चिमित्यन्यद्वाऽएतस्य व्रतमन्यन्मनुष्याणां तस्मादाहान्यव्रतस्य सश्चिमित्येव-
मितरौ प्राञ्चौ तत्त्रिवृत्त्रिवृद्धीदꣳ शिरः ॥१९॥ पुरस्तादुपशयां मृदम् । माꣳसमेवा-
स्मिन्नेतद्दधाति तदभितः परीशासौ बाहूऽएवास्मिन्नेतद्दधात्यभितः परे रौहिण-
हवन्यौ स्रुचौ हस्तावेवास्मिन्नेतद्दधाति ॥२०॥ उत्तरतोऽग्निम् । तद्धि तस्याऽआ-
यतनं दक्षिणतः सम्राडासन्दीं तद्धि तस्याऽआयतनमुत्तरतः कृष्णाजिनं तद्धि त-
स्यायतनꣳ सर्वतो धवित्राणि प्राणा वै धवित्राणि प्राणानेवास्मिन्नेतद्दधाति त्री-
णि भवन्ति त्रयो वै प्राणाः प्राण उदानो व्यानस्तानेवास्मिन्नेतद्दधाति ॥२१॥
अथैतद्रज्जुसंदानम् । उपयमन्यामाधाय पश्चात्प्राचीमासादयत्युदरमेवास्मिन्नेतद्दधाति
तदभितः पिन्वनेऽआण्डावेवास्मिन्नेतद्दधात्याण्डाभ्याꣳ हि वृषा पिन्वते पश्चा

त्स्थूणामयूखमूरू एवास्मिन्नेतद्दधाति पश्चाद्दौ दक्षिणकपाले जानुनी एवास्मिन्नेतद्द-
धाति ते यदेककपाले भवत एककपालेऽइव हीमे जानुनी पश्चाद्गृष्टी पादावेवा-
स्मिन्नेतद्दधाति पादाभ्याꣳ हि धृष्टं प्रहरत्युत्तरतः खरौ प्रचरणीयौ तद्धि तयोरा-
यतनं दक्षिणतो मार्जालीयं तद्धि तस्यायतनम् ॥२२॥ अथास्मिन्पय आनयति ।
घर्मैतत्ते पुरीषमित्यन्नं वै पुरीषमन्नमेवास्मिन्नेतद्दधाति तेन वर्धस्व चा च प्याय-
स्वेति नात्र तिरोहितमिवास्ति वर्धिषीमहि च वयमा च प्यासिषीमहीत्याशिषमे-
वैतदाशास्ते ॥२३॥ स वै न सर्वमिवानयेत् । नेद्यजमानात्परागन्नमसदित्यर्धं वा
भूयो वा परिशिनष्टि तस्मिन्नपराह्णे यजमानाय व्रतमभ्युत्सिच्य प्रयच्छति तद्यजमा-
नऽएवैतदन्नाद्यं दधाति तथो ह यजमानान्न परागन्नं भवति ॥२४॥ अथैनमद्भिः
परिषिञ्चति । शान्तिर्वाऽआपः शमयत्येवैनमेतत्सर्वतः परिषिञ्चति सर्वत एवैन-
मेतच्छमयति त्रिष्कृत्वः परिषिञ्चति त्रिवृद्धि यज्ञः ॥२५॥ अथाह वार्षाहरꣳ साम
गायेति । एष वै वृषा हरिर्य एष तपत्येष उ प्रवर्ग्यस्तदेतमेवैतत्प्रीणाति तस्मा-
दाह वार्षाहरꣳ साम गायेति ॥२६॥ अथ चात्वाले मार्जयन्ते । सुमित्रिया न आप
ओषधय सन्त्वित्यञ्जलिनाप उपाचति वज्रो वाऽआपो वज्रेणैवैतन्मित्रधेयं कुरुते
दुर्मित्रियास्तस्मै सन्तु योऽस्मान्द्वेष्टि यं च वयं द्विष्म इति यामस्य दिशं द्वेष्यः
स्यात्तां दिशं परासिञ्चेत्तेनैव तं पराभावयति ॥२७॥ अथ प्राङिवोदङ्ङुत्क्रामति
। उद्वयं तमसस्परीति पाप्मा वै तमः पाप्मानमेव तमोऽपहते स्वः पश्यन्त उत्त-
रमित्ययं वै लोकोऽस्य उत्तरोऽस्मिन्नेव लोके प्रतितिष्ठति देवं देवत्रा सूर्यमगन्म
ज्योतिरुत्तममिति स्वर्गो वै लोकः सूर्यो ज्योतिरुत्तमꣳ स्वर्गऽएव लोकेऽन्ततः
प्रतितिष्ठत्यनपेक्षमेत्याहवनीये समिधमभ्यादधाति समिदसि तेजोऽसि तेजो म-
यि धेहीत्याशिषमेवैतदाशास्ते ॥२८॥ अथ प्रसुते दधिघर्मेण चरन्ति । यज्ञो वै सो-
मः शिरः प्रवर्ग्यो यज्ञऽएवैतच्छिरः प्रतिदधाति माध्यन्दिने सवनऽएतद्वाऽइन्द्रस्य

निष्केवल्यꣳ सवनं यन्माध्यन्दिनꣳ सवनꣳ स्वऽएवैनमेतद्भागे प्रीणाति स्तुते माध्यन्दिने पवमाने प्राणो वै माध्यन्दिनः पवमानः प्राणमेवास्मिन्नेतद्दधात्यग्निहोत्रहवण्या मुखं वाऽएतद्यज्ञानां यदग्निहोत्रꣳ शीर्षंस्तन्मुखं दधाति ॥२९॥ स आनीयमानऽआह । होतर्वदस्व यत्ते वाच्यमिति वदते ह्यत्र होताथोपोत्तिष्ठन्नाह आतꣳ हविरिति आतꣳ हि भवत्यतिक्रम्याश्राव्याह दधिघर्मस्य यजेति वषट्कृते जुहोत्यनुवषट्कृतऽआहरति भक्षं तं यजमानाय प्रयच्छति ॥३०॥ स उपहवमिष्ट्वा भक्षयति । मयि त्यदिन्द्रियं बृहदित्येतद्वाऽइन्द्रियं बृहद्य एष तपति मयि दक्षो मयि क्रतुरिति क्रतूदक्षावेवात्मन्धत्ते घर्मस्त्रिशुग्विराजतीति घर्मो ह्येष त्रिशुग्विराजति विराजा ज्योतिषा सहेति विराजा ह्येष ज्योतिषा सह ब्रह्मणा तेजसा सहेति ब्रह्मणा ह्येष तेजसा सह पयसो रेत आभृतमिति पयसो ह्येतद्रेत आभृतं तस्य दोहमशीमह्युत्तरामुत्तरꣳ समामित्याशिषमेवैतदाशास्तेऽथ चात्वाले मार्जयन्तेऽसावेव बन्धुः ॥३१॥ अथातो दक्षिणानाꣳ । सुवर्णꣳ हिरण्यꣳ शतमानं ब्रह्मणे ददात्यासीनो वै ब्रह्मा यशः शयानꣳ हिरण्यं तस्मात्सुवर्णꣳ हिरण्यꣳ शतमानं ब्रह्मणे ददाति ॥३२॥ अथ यैषा घर्मदुघा । तामध्वर्यवे ददाति तप्त-इव वै घर्मस्तप्तमिवाध्वर्युर्निष्क्रामति तस्मात्तामध्वर्यवे ददाति ॥३३॥ अथ यैषा यजमानस्य व्रतदुघा । ताꣳ होत्रे ददाति यज्ञो वै होता यज्ञो यजमानस्तस्मात्ताꣳ होत्रे ददाति ॥३४॥ अथ यैषा पत्न्यै व्रतदुघा । तामुद्गातृभ्यो ददाति पत्नीकर्मैव वाऽएतेऽत्र कुर्वन्ति यदुद्गातारस्तस्मात्तामुद्गातृभ्यो ददाति ॥३५॥ अथैतद्धि॰ ॥३६॥
ब्राह्मणम् ॥२ [३. १.] ॥

सर्वेषां वाऽएष भूतानाꣳ । सर्वेषां देवानामात्मा यद्यज्ञस्तस्य समृद्धिमनु यजमानः प्रजया पशुभिर्ऋध्यते वि वाऽएष प्रजया पशुभिर्ऋध्यते यस्य घर्मो विदीर्यते तत्र प्रायश्चित्तिः ॥१॥ पूर्णाहुतिं जुहोति । सर्वं वै पूर्णꣳ सर्वेणैवैतद्भिषज्यति

यत्किं च विवृढं यज्ञस्य ॥२॥ स्वाहा प्राणेभ्यः साधिपतिकेभ्य इति । मनो वै प्राणानामधिपतिर्मनसि हि सर्वे प्राणाः प्रतिष्ठितास्तन्मनसैवैतद्भिषज्यति यत्किं च विवृढं यज्ञस्य ॥३॥ पृथिव्यै स्वाहेति । पृथिवी वै सर्वेषां देवानामायतनं तत्सर्वाभिरेवैतद्देवताभिर्भिषज्यति यत्किं च विवृढं यज्ञस्य ॥४॥ अग्नये स्वाहेति । अग्निर्वै सर्वेषां देवानामात्मा तत्सर्वाभिरेवैतद्देवताभिर्भिषज्यति यत्किं च विवृढं यज्ञस्य ॥५॥ अन्तरिक्षाय स्वाहेति । अन्तरिक्षं वै सर्वेषां देवानामायतनं तत्सर्वा° ॥६॥ वायवे स्वाहेति । वायुर्वै सर्वेषां देवानामात्मा तत्सर्वा° ॥७॥ दिवे स्वाहेति । द्यौर्वै सर्वेषां देवानामायतनं तत्सर्वा° ॥८॥ सूर्याय स्वाहेति । सूर्यो वै सर्वेषां देवानामात्मा तत्सर्वा° ॥९॥ दिग्भ्यः स्वाहेति । दिशो वै सर्वेषां देवानामायतनं तत्सर्वा° ॥१०॥ चन्द्राय स्वाहेति । चन्द्रो वै सर्वेषां देवानामात्मा तत्सर्वा° ॥११॥ नक्षत्रेभ्यः स्वाहेति । नक्षत्राणि वै सर्वेषां देवानामायतनं तत्सर्वा° ॥१२॥ अद्भ्यः स्वाहेति । आपो वै सर्वेषां देवानामायतनं तत्सर्वा° ॥१३॥ वरुणाय स्वाहेति । वरुणो वै सर्वेषां देवानामात्मा तत्सर्वा° ॥१४॥ नाभ्यै स्वाहा पूताय स्वाहेति । अनिरुक्तमनिरुक्तो वै प्रजापतिः प्रजापतिर्यज्ञस्तत्प्रजापतिमेवैतद्यज्ञं भिषज्यति ॥१५॥ त्रयोदशैता आहुतयो भवन्ति । त्रयोदश वै मासाः संवत्सरस्य संवत्सरः प्रजापतिः प्रजापतिर्यज्ञस्तत्प्रजापतिमेवैतद्यज्ञं भिषज्यति ॥१६॥ वाचे स्वाहेति । मुखमेवास्मिन्नेतद्दधाति प्राणाय स्वाहा प्राणाय स्वाहेति नासिकेऽएवास्मिन्नेतद्दधाति चक्षुषे स्वाहा चक्षुषे स्वाहेत्यक्षिणीऽएवास्मिन्नेतद्दधाति श्रोत्राय स्वाहा श्रोत्राय स्वाहेति कर्णावेवास्मिन्नेतद्दधाति ॥१७॥ सप्तैता आहुतयो भवन्ति । सप्त वाऽइमे शीर्षन्प्राणास्तानेवास्मिन्नेतद्दधाति पूर्णाहुतिमुत्तमां जुहोति सर्वं वै पूर्णꣳ सर्वेणैवैतद्भिषज्यति यत्किं च विवृढं यज्ञस्य ॥१८॥ मनसः काममाकूतिमिति । मनसा वाऽइदꣳ सर्वमाप्तं तन्मनसैवै-

तद्भिषज्यति यत्किं च विवृढं यज्ञस्य ॥१९॥ वाचः सत्यमशीयेति । वाचा वा ऽइदꣳ सर्वमाप्तं तद्वाचैवैतद्भिषज्यति यत्किं च विवृढं यज्ञस्य पशूनाꣳ रूपमन्नस्य रसो यशः श्रीः श्रयतां मयि स्वाहेत्याशिषमेवैतदाशास्ते ॥२०॥ अथ तं चोपशयां च पिष्ट्वा । मार्त्स्नया मृदा सꣳसृज्यावृता करोत्यावृता पचत्युत्सादनार्थमथ य उपशययोर्दृढः स्यात्तेन प्रचरेत् ॥२१॥ संवत्सरो वै प्रवर्ग्यः । सर्वं वै संवत्सरः सर्वं प्रवर्ग्यः स यत्प्रवृक्तस्तद्वसन्तो यदुद्यतस्तद्ग्रीष्मो यत्पिन्वितस्तद्वर्षा यदा वै वर्षाः पिन्वन्तेऽथैनाः सर्वे देवाः सर्वाणि भूतान्युपजीवन्ति पिन्वन्ते ह वाऽअस्मै वर्षा य एवमेतद्वेद ॥२२॥ इमे वै लोकाः प्रवर्ग्यः । सर्वं वाऽइमे लोकाः सर्वं प्रवर्ग्यः स यत्प्रवृक्तस्तदयं लोको यदुद्यतस्तदन्तरिक्षलोको यत्पिन्वितस्तदसौ लोको यदा वाऽअसौ लोकः पिन्वतेऽथैनꣳ सर्वे देवाः सर्वाणि भूतान्युपजीवन्ति पिन्वते ह वाऽअस्माऽअसौ लोको य एवमेतद्वेद ॥२३॥ एता वै देवताः प्रवर्ग्यः । अग्निर्वायुरादित्यः सर्वं वाऽएता देवताः सर्वं प्रवर्ग्यः स यत्प्रवृक्तस्तदग्निर्यदुद्यतस्तद्वायुर्यत्पिन्वितस्तदसावादित्यो यदा वाऽअसावादित्यः पिन्वतेऽथैनꣳ सर्वे देवाः सर्वाणि भूतान्युपजीवन्ति पिन्वते ह वाऽअस्माऽअसावादित्यो य एवमेतद्वेद ॥२४॥ यजमानो वै प्रवर्ग्यः । तस्यात्मा प्रजा पशवः सर्वं वै यजमानः सर्वं प्रवर्ग्यः स यत्प्रवृक्तस्तदात्मा यदुद्यतस्तत्प्रजा यत्पिन्वितस्तत्पशवो यदा वै पशवः पिन्वन्तेऽथैनान्त्सर्वे देवाः सर्वाणि भूतान्युपजीवन्ति पिन्वन्ते ह वाऽअस्मै पशवो य एवमेतद्वेद ॥२५॥ अग्निहोत्रं वै प्रवर्ग्यः । सर्वं वाऽअग्निहोत्रꣳ सर्वं प्रवर्ग्यः स यदधिश्रितं तत्प्रवृक्तो यदुन्नीतं तदुद्यतो यद्धुतं तत्पिन्वितो यदा वाऽअग्निहोत्रं पिन्वतेऽथैनत्सर्वे देवाः सर्वाणि भूतान्युपजीवन्ति पिन्वते ह वाऽअस्माऽअग्निहोत्रं य एवमेतद्वेद ॥२६॥ दर्शपूर्णमासौ वै प्रवर्ग्यः । सर्वं वै दर्शपूर्णमासौ सर्वं प्रवर्ग्यः स यदधिश्रितं तत्प्रवृक्तो यदासन्नं तदुद्यतो यद्धुतं तत्पि-

न्वितो यदा वै दर्शपूर्णमासौ पिन्वेतेऽथैनौ सर्वे देवाः सर्वाणि भूतान्युपजीवन्ति पिन्वेते ह वाऽअस्मै दर्शपूर्णमासौ य एवमेतद्वेद ॥२७॥ चातुर्मास्यानि वै प्रवर्ग्यः । सर्वं वै चातुर्मास्यानि सर्वं प्रवर्ग्यः स यदधिश्रितं तत्प्रवृक्तो यदासन्नं तदुचितो यद्धुतं तत्पिन्वितो यदा वै चातुर्मास्यानि पिन्वन्तेऽथैनानि सर्वे देवाः सर्वाणि भूतान्युपजीवन्ति पिन्वन्ते ह वाऽअस्मै चातुर्मास्यानि य एवमेतद्वेद ॥२८॥ पशुबन्धो वै प्रवर्ग्यः । सर्वं वै पशुबन्धः सर्वं प्रवर्ग्यः स यदधिश्रितस्तत्प्रवृक्तो यदासन्नस्तदुचितो यद्धुतस्तत्पिन्वितो यदा वै पशुबन्धः पिन्वतेऽथैनꣳ सर्वे देवाः सर्वाणि भूतान्युपजीवन्ति पिन्वते ह वाऽअस्मै पशुबन्धो य एवमेतद्वेद ॥२९॥ सोमो वै प्रवर्ग्यः । सर्वं वै सोमः सर्वं प्रवर्ग्यः स यदभिषुतस्तत्प्रवृक्तो यदुन्नीतस्तदुचितो यद्धुतस्तत्पिन्वितो यदा वै सोमः पिन्वतेऽथैनꣳ सर्वे देवाः सर्वाणि भूतान्युपयुञ्जन्ति पिन्वते ह वाऽअस्मै सोमो य एवमेतद्वेद न ह वाऽअस्याप्रवर्ग्येण केन चन यज्ञेनेष्टं भवति य एवमेतद्वेद ॥३०॥ अथैतद्वै । आयुरेतज्ज्योतिः प्रविशति य एतमनु वा ब्रूते भक्षयति वा तस्य व्रतचर्या या सृष्टौ ॥३१॥ ब्राह्मणम् ॥३ [३. २.] ॥ द्वितीयः प्रपाठकः ॥ कण्डिकासंख्या१२२ ॥ तृतीयोऽध्यायः [१४.] ॥ ॥

द्वया ह प्राजापत्याः । देवाश्चासुराश्च ततः कानीयसा एव देवा ज्यायसा असुरास्तऽएषु लोकेष्वस्पर्धन्त ॥१॥ ते ह देवा ऊचुः । हन्तासुरान्यज्ञऽउद्गीथेनात्ययामेति ॥२॥ ते ह वाचमूचुः । त्वं न उद्गायेति तथेति तेभ्यो वागुदगायद्यो वाचि भोगस्तं देवेभ्य आगायद्यत्कल्याणं वदति तदात्मने तेऽविदुरनेन वै न उद्गात्रात्येष्यन्तीति तमभिद्रुत्य पाप्मनाविध्यन्त्स यः स पाप्मा यदेवेदमप्रतिरूपं वदति स एव स पाप्मा ॥३॥ अथ ह प्राणमूचुः । त्वं न उद्गायेति तथेति तेभ्यः प्राण उदगायद्यः प्राणे भोगस्तं देवेभ्य आगायद्यत्कल्याणं जिघ्रति तदात्मने तेऽविदु-

रेनेन वै न उद्गात्रात्येष्यन्तीति तमभिद्रुत्य पाप्मनाविध्यन्त्स यः स पाप्मा यदेवेदमप्रतिरूपं जिघ्रति स एव स पाप्मा ॥४॥ अथ ह चक्षुरूचुः । त्वं न उद्गायेति तथेति तेभ्यश्चक्षुरुदगायद्यश्चक्षुषि भोगस्तं देवेभ्य आगायद्यत्कल्याणं पश्यति तदात्मने तेऽविदुरनेन वै न उद्गात्रात्येष्यन्तीति तमभिद्रुत्य पाप्मनाविध्यन्त्स यः स पाप्मा यदेवेदमप्रतिरूपं पश्यति स एव स पाप्मा ॥५॥ अथ ह श्रोत्रमूचुः । त्वं न उद्गायेति तथेति तेभ्यः श्रोत्रमुदगायद्यः श्रोत्रे भोगस्तं देवेभ्य आगायद्यत्कल्याणꣳ शृणोति तदात्मने तेऽविदुरनेन वै न उद्गात्रात्येष्यन्तीति तमभिद्रुत्य पाप्मनाविध्यन्त्स यः स पाप्मा यदेवेदमप्रतिरूपꣳ शृणोति स एव स पाप्मा ॥६॥ अथ ह मन ऊचुः । त्वं न उद्गायेति तथेति तेभ्यो मन उदगायद्यो मनसि भोगस्तं देवेभ्य आगायद्यत्कल्याणꣳ संकल्पयति तदात्मने तेऽविदुरनेन वै न उद्गात्रात्येष्यन्तीति तमभिद्रुत्य पाप्मनाविध्यन्त्स यः स पाप्मा यदेवेदमप्रातिरूपꣳ संकल्पयति स एव स पाप्मैवमु खल्वेता देवताः पाप्मभिरुपासृजन्नेवमेनाः पाप्मनाविध्यन् ॥७॥ अथ हेममासन्यं प्राणमूचुः । त्वं न उद्गायेति तथेति तेभ्य एष प्राण उदगायत्तेऽविदुरनेन वै न उद्गात्रात्येष्यन्तीति तमभिद्रुत्य पाप्मनाविव्यत्सन्त्स यथाश्मानमृत्वा लोष्टो विध्वꣳसेतैवꣳ हैव विध्वꣳसमाना विष्वञ्चो विनेशुस्ततो देवा अभवन्परासुरा भवत्यात्मना परास्य द्विषन्भ्रातृव्यो भवति य एवं वेद ॥८॥ ते होचुः । क्व नु सोऽभूद्यो न इत्थमसक्तेत्ययमास्येऽन्तरिति सोऽयास्य आङ्गिरसोऽङ्गानाꣳ हि रसः ॥९॥ सा वा एषा देवता दूः । नाम दूरꣳ ह्यस्या मृत्युर्दूरꣳ ह वा अस्मान्मृत्युर्भवति य एवं वेद ॥१०॥ सा वा एषा देवता । एतासां देवतानां पाप्मानं मृत्युमपहत्य यत्रासां दिशामन्तस्तद्गमयां चकार तदासां पाप्मनो विन्यदधात्तस्मान्न जनमियान्नान्तमियान्नेत्पाप्मानं मृत्युमन्ववायानीति ॥११॥ सा वा एषा देवता । एतासां देवतानां पाप्मानं मृत्युमपहत्याथैना मृत्यु-

मत्यवहत् ॥१२॥ स वै वाचमेव प्रथमामत्यवहत् । सा यदा मृत्युमत्यमुच्यत सोऽग्निरभवत्सोऽयमग्निः परेण मृत्युमतिक्रान्तो दीप्यते ॥१३॥ अथ प्राणमत्यवहत् । स यदा मृत्युमत्यमुच्यत स वायुरभवत्सोऽयं वायुः परेण मृत्युमतिक्रान्तः पवते ॥१४॥ अथ चक्षुरत्यवहत् । तद्यदा मृत्युमत्यमुच्यत स आदित्योऽभवत्सोऽसावादित्यः परेण मृत्युमतिक्रान्तस्तपति ॥१५॥ अथ श्रोत्रमत्यवहत् । तद्यदा मृत्युमत्यमुच्यत ता दिशोऽभवंस्ता इमा दिशः परेण मृत्युमतिक्रान्ताः ॥१६॥ अथ मनोऽत्यवहत् । तद्यदा मृत्युमत्यमुच्यत स चन्द्रमा अभवत्सोऽसौ चन्द्रः परेण मृत्युमतिक्रान्तो भात्येवꣳ ह वाऽएनमेषा देवता मृत्युमतिवहति य एवं वेद ॥१७॥ अथात्मनेऽन्नाद्यमागायत् । यद्धि किं चान्नमद्यतेऽनेनैव तदद्यतऽइह प्रतितिष्ठति ॥१८॥ ॥ शतम् ७१०० ॥ ॥ ते देवा अब्रुवन् । एतावद्वाऽइदꣳ सर्वं यदन्नं तदात्मनऽआगासीरनु नोऽस्मिन्नन्नऽआभजस्वेति ते वै माभिसंविशतेति तथेति तꣳ समन्तं परिण्यविशन्त तस्माद्यदनेनान्नमत्ति तेनैतास्तृप्यन्त्येवꣳ ह वाऽएनꣳ स्वा अभिसंविशन्ति भर्ता स्वानाꣳ श्रेष्ठः पुरएता भवत्यन्नादोऽधिपतिर्य एवं वेद ॥१९॥ य उ हैवंविदꣳ । स्वेषु प्रतिप्रतिर्बुभूषति न हैवालं भार्येभ्यो भवत्यथ य एवैतमनु भवति यो वैतमनु भार्यान्बुभूर्षति स हैवालं भार्येभ्यो भवति ॥२०॥ सोऽयास्य आङ्गिरसो । ऽङ्गानाꣳ हि रसः प्राणो वाऽअङ्गानाꣳ रसः प्राणो हि वाऽअङ्गानाꣳ रसस्तस्माद्यस्मात्कस्माच्चाङ्गात्प्राण उत्क्रामति तदेव तच्छुष्यत्येष हि वाऽअङ्गानाꣳ रसः ॥२१॥ एष उऽएव बृहस्पतिः । वाग्वै बृहती तस्या एष पतिस्तस्मादु बृहस्पतिः ॥२२॥ एष उऽएव ब्रह्मणस्पतिः । वाग्वै ब्रह्म तस्या एष पतिस्तस्मादु ह ब्रह्मणस्पतिः ॥२३॥ एष उऽएव साम । वाग्वै सामैष सा चामश्चेति तत्साम्नः सामत्वं यद्वेव समः प्लुषिणा समो मशकेन समो नागेन सम एभिस्त्रिभिर्लोकैः समोऽनेन सर्वेण तस्माद्वेव सामाश्नुते साम्नः सायुज्यꣳ

सलोकतां य एवमेतत्साम वेद ॥२४॥ एष उ वाऽउद्गीथः । प्राणो वाऽउत्प्राणेन हीदꣳ सर्वमुत्तब्धं वागेव गीथोच्च गीथा चेति स उद्गीथः ॥२५॥ तद्धापि ब्रह्मदत्तश्चैकितानेयो । राजानं भक्षयन्नुवाचायं त्यस्य राजा मूर्धानं विपातयताद्यदितोऽयास्य आङ्गिरसोऽन्येनोदगायदिति वाचा च ह्येव स प्राणेन चोदगायदिति ॥२६॥ तस्य हैतस्य साम्नो यः स्वं वेद । भवति हास्य स्वं तस्य वै स्वर एव स्वं तस्मादार्त्विज्यं करिष्यन्वाचि स्वरमिच्छेत तया वाचा स्वरसम्पन्नयार्त्विज्यं कुर्यात्तस्माद्यज्ञे स्वरवन्तं दिदृक्षन्तऽएवाथो यस्य स्वं भवति भवति हास्य स्वं य एवमेतत्साम्नः स्वं वेद ॥२७॥ तस्य हैतस्य साम्नो यः सुवर्णं वेद । भवति हास्य सुवर्णं तस्य वै स्वर एव सुवर्णं भवति हास्य सुवर्णं य एवमेतत्साम्नः सुवर्णं वेद ॥२८॥ तस्य हैतस्य । साम्नो यः प्रतिष्ठां वेद प्रति ह तिष्ठति तस्य वै वागेव प्रतिष्ठा वाचि हि खल्वेष एतत्प्राणः प्रतिष्ठितो गीयतेऽन्नऽइत्यु हैकऽआहुः ॥२९॥ अथातः पवमानानामेवाभ्यारोहः । स वै खलु प्रस्तोता साम प्रस्तौति स यत्र प्रस्तुयात्तदेतानि जपेदसतो मा सद्गमय तमसो मा ज्योतिर्गमय मृत्योर्मामृतं गमयेति ॥३०॥ स यदाहासतो मा सद्गमयेति । मृत्युर्वाऽअसत्सदमृतं मृत्योर्मामृतं गमयामृतं मा कुर्वित्येवैतदाह ॥३१॥ तमसो मा ज्योतिर्गमयेति । मृत्युर्वै तमो ज्योतिरमृतं मृत्योर्मामृतं गमयामृतं मा कुर्वित्येवैतदाह मृत्योर्मामृतं गमयेति नात्र तिरोहितमिवास्ति ॥३२॥ अथ यानीतराणि स्तोत्राणि । तेष्वात्मनेऽन्नाद्यमागायेत्तस्मादु तेषु वरं वृणीत यं कामं कामयेत तꣳ स एष एवंविदुद्गातात्मने वा यजमानाय वा यं कामं कामयते तमागायति तद्धैतल्लोकजिदेव न हैवालोक्यताया आशास्ति य एवमेतत्साम वेद ॥३३॥ ब्राह्मणम् ॥१ [४. १.] ॥ ॥

आत्मैवेदमग्रऽआसीत् । पुरुषविधः सोऽनुवीक्ष्य नान्यदात्मनोऽपश्यत्सोऽह-

मस्मीत्यग्रे व्याहरत्ततोऽहंनामाभवत्तस्मादप्येतर्ह्यामन्त्रितोऽहमयमित्येवाग्रऽउक्त्वा-
थान्यन्नाम प्रब्रूते यदस्य भवति ॥१॥ स यत्पूर्वोऽस्मात् । सर्वस्मात्सर्वान्पाप्मन
औषत्तस्मात्पुरुष औषति ह वै स तं योऽस्मात्पूर्वो बुभूषति य एवं वेद ॥२॥
सोऽबिभेत् । तस्मादेकाकी बिभेति स हायमीक्षां चक्रे यन्मदन्यन्नास्ति कस्मान्नु
बिभेमीति तत एवास्य भयं वीयाय कस्माद्ध्यभेष्यद्द्वितीयाद्वै भयं भवति ॥३॥ स
वै नैव रेमे । तस्मादेकाकी न रमते स द्वितीयमैच्छत्स हैतावानास यथा स्त्री-
पुमाꣳसौ सम्परिष्वक्तौ ॥४॥ स इममेवात्मानं द्वेधापातयत् । ततः पतिश्च पत्नी
चाभवतां तस्मादिदमर्धवृगलमिव स्व इति ह स्माह याज्ञवल्क्यस्तस्मादयमाकाश
स्त्रिया पूर्यतऽएव ताꣳ समभवत्ततो मनुष्या अजायन्त ॥५॥ सो हेयमीक्षां चक्रे
। कथं नु मात्मनऽएव जनयित्वा सम्भवति हन्त तिरोऽसानीति ॥६॥ सा गौ-
रभवत् । वृषभ इतरस्ताꣳ समेवाभवत्ततो गावोऽजायन्त ॥७॥ वडवेतराभवत् ।
अश्ववृष इतरो गर्दभीतरा गर्दभ इतरस्ताꣳ समेवाभवत्तत एकशफमजायत ॥८॥
अजेतराभवत् । वस्त इतरोऽविरितरो मेष इतरस्ताꣳ समेवाभवत्ततोऽजावयो
ऽजायन्तैवमेव यदिदं किं च मिथुनमा पिपीलिकाभ्यस्तत्सर्वमसृजत ॥९॥ सो
ऽवेत् । अहं वाव सृष्टिरस्म्यहꣳ हीदꣳ सर्वमसृक्षीति ततः सृष्टिरभवत्सृष्ट्याꣳ
हास्यैतस्यां भवति य एवं वेद ॥१०॥ अथेत्यभ्यमन्थत् । स मुखाच्च योनेर्हस्ता-
भ्यां चाग्निमसृजत तस्मादेतदुभयमलोमकमन्तरतोऽलोमका हि योनिरन्तरतः ॥११॥
तद्यदिदमाहुः । अमुं यजामुं यजेत्येकैकं देवमेतस्यैव सा विसृष्टिरेष उ ह्येव सर्वे
देवाः ॥१२॥ अथ यत्किं चेदमार्द्रम् । तद्रेतसोऽसृजत तदु सोम एतावद्वाऽइदꣳ
सर्वमन्नं चैवान्नादश्च सोम एवान्नमग्निरन्नादः ॥१३॥ सैषा ब्रह्मणोऽतिसृष्टिः । य-
च्छ्रेयसो देवानसृजताथ यन्मर्त्यः सन्नमृतानसृजत तस्मादतिसृष्टिरतिसृष्ट्याꣳ हास्यै-
तस्यां भवति य एवं वेद ॥१४॥ तद्धेदं तर्ह्यव्याकृतमासीत् । तन्नामरूपाभ्यामेव

व्याक्रियतासौनामायमिदꣳरूप इति तदिदमप्येतर्हि नामरूपाभ्यामेव व्याक्रियतेऽसौनामायमिदꣳरूप इति ॥१५॥ स एष इह प्रविष्टः । आ नखाग्रेभ्यो यथा क्षुरः क्षुरधानेऽवहितः स्याद्विश्वम्भरो वा विश्वम्भरकुलाये तं न पश्यन्त्यकृत्स्नो हि सः ॥१६॥ प्राणन्नेव प्राणो नाम भवति । वदन्वाक्पश्यꣳश्चक्षुः शृण्वञ्छ्रोत्रं मन्वानो मनस्तान्यस्यैतानि कर्मनामान्येव स योऽत एकैकमुपास्ते न स वेदाकृत्स्नो ह्येषोऽत एकैकेन भवति ॥१७॥ आत्मेत्येवोपासीत । अत्र ह्येते सर्वऽएकं भवन्ति तदेतत्पदनीयमस्य सर्वस्य यदयमात्मानेन ह्येतत्सर्वं वेद यथा ह वै पदेनानुविन्देदेवं कीर्तिꣳ श्लोकं विन्दते य एवं वेद ॥१८॥ तदेतत्प्रेयः पुत्रात् । प्रेयो वित्तात्प्रेयोऽन्यस्मात्सर्वस्मादन्तरतरं यदयमात्मा स योऽन्यमात्मनः प्रियं ब्रुवाणं ब्रूयात्प्रियꣳ रोत्स्यतीतीश्वरो ह तथैव स्यादात्मानमेव प्रियमुपासीत स य आत्मानमेव प्रियमुपास्ते न हास्य प्रियं प्रमायुकं भवति ॥१९॥ तदाहुः । यद्ब्रह्मविद्यया सर्वं भविष्यन्तो मनुष्या मन्यन्ते किमु तद्ब्रह्मावेद्यस्मात्तत्सर्वमभवदिति ॥२०॥ ब्रह्म वाऽइदमग्रऽआसीत् । तदात्मानमेवावेदहं ब्रह्मास्मीति तस्मात्तत्सर्वमभवत्तद्यो-यो देवानां प्रत्यबुध्यत स एव तदभवत्तथऽर्षीणां तथा मनुष्याणाम् ॥२१॥ तद्धैतत्पश्यन्नृषिर्वामदेवः प्रतिपेदे । अहं मनुरभवꣳ सूर्यश्चेति तदिदमप्येतर्हि य एवं वेदाहं ब्रह्मास्मीति स इदꣳ सर्वं भवति तस्य ह न देवाश्चनाभूत्या ईशतऽआत्मा ह्येषाꣳ स भवत्यथ योऽन्यां देवतामुपास्तेऽन्योऽसावन्योऽहमस्मीति न स वेद यथा पशुरेवꣳ स देवानां यथा ह वै बहवः पशवो मनुष्यं भुञ्ज्युरेवमेकैकः पुरुषो देवान्भुनक्त्येकस्मिन्नेव पशावादीयमानेऽप्रियं भवति किमु बहुषु तस्मादेषां तन्न प्रियं यदेतन्मनुष्या विद्युः ॥२२॥ ब्रह्म वाऽइदमग्र आसीत् । एकमेव तदेकꣳ सन्न व्यभवत्तच्छ्रेयो रूपमत्यसृजत क्षत्रं यान्येतानि देवत्रा क्षत्राणीन्द्रो वरुणः सोमो रुद्रः पर्जन्यो यमो मृत्युरीशान इति तस्मात्क्ष-

त्रात्परं नास्ति तस्माद्ब्राह्मणः क्षत्रियमधस्तादुपास्ते राजसूये क्षत्रऽएव तद्यशो दधाति सैषा क्षत्रस्य योनिर्यद्ब्रह्म तस्माद्यद्यपि राजा परमता गच्छति ब्रह्मैवान्तत उपनिश्रयति स्वां योनिं यऽउ एनꣳ हिनस्ति स्वाꣳ स योनिमृच्छति स पापीयान्भवति यथा श्रेयाꣳसꣳ हिꣳसित्वा ॥२३॥ स नैव व्यभवत् । स विशमसृजत यान्येतानि देवजातानि गणश आख्यायन्ते वसवो रुद्रा आदित्या विश्वे देवा मरुत इति ॥२४॥ स नैव व्यभवत् । स शौद्रं वर्णमसृजत पूषणमियं वै पूषेयꣳ हीदꣳ सर्वं पुष्यति यदिदं किं च ॥२५॥ स नैव व्यभवत् । तच्छ्रेयो रूपमत्यसृजत धर्मं तदेतत्क्षत्रस्य क्षत्रं यद्धर्मस्तस्माद्धर्मात्परं नास्त्यथोऽअबलीयान्बलीयाꣳसमाशꣳसते धर्मेण यथा राज्ञैवं यो वै स धर्मः सत्यं वै तत्तस्मात्सत्यं वदन्तमाहुर्धर्मं वदतीति धर्मं वा वदन्तꣳ सत्यं वदतीत्येतद्ध्येवैतदुभयं भवति ॥२६॥ तदेतद्ब्रह्म क्षत्रं विट् शूद्रः । तदग्निनैव देवेषु ब्रह्माभवद्ब्राह्मणो मनुष्येषु क्षत्रियेण क्षत्रियो वैश्येन वैश्यः शूद्रेण शूद्रस्तस्मादग्नावेव देवेषु लोकमिच्छन्ते ब्राह्मणे मनुष्येष्वेताभ्याꣳ हि रूपाभ्यां ब्रह्माभवत् ॥२७॥ अथ यो ह वाऽअस्माल्लोकात्स्वं लोकमदृष्ट्वा प्रैति । स एनमविदितो न भुनक्ति यथा वेदो वाननूक्तोऽन्यद्वा कर्माकृतं यदि ह वाऽअप्यनेवंविन्महत्पुण्यं कर्म करोति तद्धास्यान्ततः क्षीयतऽएवात्मानमेव लोकमुपासीत स य आत्मानमेव लोकमुपास्ते न हास्य कर्म क्षीयते ऽस्माद्ध्येवात्मनो यद्यत्कामयते तत्तत्सृजते ॥२८॥ अथोऽअयं वाऽआत्मा । सर्वेषां भूतानां लोकः स यज्जुहोति यद्यजते तेन देवानां लोकोऽथ यदनुब्रूते तेन ऽर्षीणामथ यत्प्रजामिच्छते यत्पितृभ्यो निपृणाति तेन पितृणामथ यन्मनुष्यान्वासयते यदेभ्योऽशनं ददाति तेन मनुष्याणामथ यत्पशुभ्यस्तृणोदकं विन्दति तेन पशूनां यदस्य गृहेषु श्वापदा वयाꣳस्या पिपीलिकाभ्य उपजीवन्ति तेन तेषां लोको यथा ह वै स्वाय लोकायारिष्टिमिच्छेदेवꣳ हैवंविदे सर्वदा सर्वाणि भूतान्यरि-

ष्टिमिच्छन्ति तद्वाऽएतद्विदितं मीमाᳫंसितम् ॥२९॥ आत्मैवेदमग्रऽआसीत् । एक एव सोऽकामयत जाया मे स्यादथ प्रजायेयाथ वित्तं मे स्यादथ कर्म कुर्वीयेत्येतावान्वै कामो नेच्छंश्चनातो भूयो विन्देत्तस्मादप्येतर्ह्येकाकी कामयते जाया मे स्यादथ प्रजायेयाथ वित्तं मे स्यादथ कर्म कुर्वीयेति स यावदप्येतेषामेकैकं न प्राप्नोत्यकृत्स्न एव तावन्मन्यते तस्यो कृत्स्नता ॥३०॥ मन एवास्यात्मा । वाग्जाया प्राणः प्रजा चक्षुर्मानुषं वित्तं चक्षुषा हि तद्विन्दति श्रोत्रं दैवᳫं श्रोत्रेण हि तच्छृणोत्यात्मैवास्य कर्मात्मना हि कर्म करोति स एष पाङ्क्तो यज्ञः पाङ्क्तः पशुः पाङ्क्तः पुरुषः पाङ्क्तमिदᳫं सर्वं यदिदं किं च तदिदᳫं सर्वमाप्नोति यदिदं किं च य एवं वेद ॥३१॥ ब्राह्मणम् ॥ २ [४. २.] ॥ ॥

यत्सप्तान्नानि मेधया तपसाजनयत्पिता । एकमस्य साधारणं द्वे देवानभाजयत् ॥ त्रीण्यात्मनेऽकुरुत पशुभ्य एकं प्रायच्छत् । तस्मिन्त्सर्वं प्रतिष्ठितं यच्च प्राणिति यच्च न ॥ कस्मात्तानि न क्षीयन्तेऽद्यमानानि सर्वदा । यो वै तामक्षितिं वेद सोऽन्नमत्ति प्रतीकेन । स देवानपिगच्छति स ऊर्जमुपजीवतीति श्लोकाः ॥१॥ यत्सप्तान्नानि मेधया तपसाजनयत्पितेति । मेधया हि तपसाजनयत्पितैकमस्य साधारणमितीदमेवास्य तत्साधारणमन्नं यदिदमद्यते स य एतदुपास्ते न स पाप्मनो व्यावर्तते मिश्रᳫं ह्येतत् ॥२॥ द्वे देवानभाजयदिति हुतं च प्रहुतं च तस्माद्देवेभ्यो जुह्वति च प्र च जुह्वत्यथोऽआहुर्दर्शपूर्णमासाविति तस्मान्नेष्टियाजुकः स्यात् ॥३॥ पशुभ्य एकं प्रायच्छदिति । तत्पयः पयो ह्येवाग्रे मनुष्याश्च पशवश्चोपजीवन्ति तस्मात्कुमारं जातं घृतं वैवाग्रे प्रतिलेहयन्ति स्तनं वानुधापयन्ति ॥४॥ अथ वत्सं जातमाहुः । अतृणाद इति तस्मिन्त्सर्वं प्रतिष्ठितं यच्च प्राणिति यच्च नेति पयसि हीदᳫं सर्वं प्रतिष्ठितं यच्च प्राणिति यच्च न ॥५॥ तद्यदिदमाहुः । संवत्सरं पयसा जुह्वदप पुनर्मृत्युं जयतीति न तथा विद्याद्यदहरेव जुहोति तदहः पुनर्मृत्यु-

मपजयत्येवं विद्वान्त्सर्वꣳ हि देवेभ्योऽन्नाद्यं प्रयच्छति कस्मात्तानि न क्षीयन्तेऽद्य-
मानानि सर्वदेति ॥६॥ पुरुषो वाऽअक्षितिः । स हीदमन्नं पुनः-पुनर्जनयते यो
वै तामक्षितिं वेदेति पुरुषो वाऽअक्षितिः स हीदमन्नं धिया-धिया जनयते कर्म-
भिर्यद्धैतन्न कुर्यात्क्षीयेत ह सोऽन्नमत्ति प्रतीकेनेति मुखं प्रतीकं मुखेनेत्येतत्स
देवानपिगच्छति स ऊर्जमुपजीवतीति प्रशꣳसा ॥७॥ त्रीण्यात्मनेऽकुरुतेति । मनो
वाचं प्राणं तान्यात्मनेऽकुरुतान्यत्रमना अभूवं नादर्शमन्यत्रमना अभूवं नाश्रौप-
मिति मनसा ह्येव पश्यति मनसा शृणोति ॥८॥ कामः संकल्पो । विचिकित्सा
श्रद्धाश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एव तस्मादपि पृष्ठत उपस्पृष्टो
मनसा विजानाति ॥९॥ यः कश्च शब्दो । वागेव सैषा ह्यन्तमायत्तैषा हि न
प्राणोऽपानो व्यान उदानः समानोऽन इत्येतत्सर्वं प्राण एवैतन्मयो वाऽअय-
मात्मा वाङ्मयो मनोमयः प्राणमयः ॥१०॥ त्रयो लोका एतऽएव । वागेवायं
लोको मनोऽन्तरिक्षलोकः प्राणोऽसौ लोकः ॥११॥ त्रयो वेदा एतऽएव । वा-
गेवऽर्ग्वेदो मनो यजुर्वेदः प्राणः सामवेदः ॥१२॥ देवाः पितरो मनुष्या एतऽएव
। वागेव देवा मनः पितरः प्राणो मनुष्याः ॥१३॥ पिता माता प्रजैतऽएव । मन
एव पिता वाङ्माता प्राणः प्रजा ॥१४॥ विज्ञातं विजिज्ञास्यम् । अविज्ञातमेतऽएव
यत्किं च विज्ञातं वाचस्तद्रूपं वाग्घि विज्ञाता वागेनं तद्भूत्वावति ॥१५॥ यत्किं
च विजिज्ञास्यम् । मनसस्तद्रूपं मनो हि विजिज्ञास्यं मन एव तद्भूत्वावति ॥१६॥
यत्किं चाविज्ञातम् । प्राणस्य तद्रूपं प्राणो ह्यविज्ञातः प्राण एव तद्भूत्वावति
॥१७॥ तस्यै वाचः पृथिवी शरीरम् । ज्योती रूपमयमग्निस्तद्यावत्येव वाक्तावती
पृथिवी तावानयमग्निः ॥१८॥ अथैतस्य मनसो । द्यौः शरीरं ज्योती रूपमसा-
वादित्यस्तद्यावदेव मनस्तावती द्यौस्तावानसावादित्यस्तौ मिथुनꣳ समैतां ततः
प्राणोऽजायत स इन्द्रः स एषोऽसपत्नो द्वितीयो वै सपत्नो नास्य सपत्नो भवति

य एवं वेद ॥१९॥ अथैतस्य प्राणस्यापः । शरीरं ज्योती रूपमसौ चन्द्रस्तद्यावानेव प्राणस्तावत्य आपस्तावानसौ चन्द्रः ॥२०॥ तऽएते सर्वऽएव समाः । सर्वेऽनन्ताः स यो हैतानन्तवत उपास्तेऽन्तवन्तꣳ स लोकं जयत्यथ यो हैताननन्तानुपास्तेऽनन्तꣳ स लोकं जयति ॥२१॥ स एष संवत्सरः । प्रजापतिः षोडशकलस्तस्य रात्रय एव पञ्चदश कला ध्रुवैवास्य षोडशी कला स रात्रिभिरेवा च पूर्यतेऽप च क्षीयते सोऽमावास्याꣳ रात्रिमेतया षोडश्या कलया सर्वमिदं प्राणभृदनुप्रविश्य ततः प्रातर्जायते तस्मादेताꣳ रात्रिं प्राणभृतः प्राणं न विच्छिन्द्यादपि कृकलासस्यैतस्या एव देवताया अपचित्यै ॥२२॥ यो वै स संवत्सरः । प्रजापतिः षोडशकलोऽयमेव स योऽयमेवंवित्पुरुषस्तस्य वित्तमेव पञ्चदश कला आत्मैवास्य षोडशी कला स वित्तेनैवा च पूर्यतेऽप च क्षीयते तदेतन्नभ्यं यदयमात्मा प्रधिर्वित्तं तस्माद्यद्यपि सर्वज्यानिं जीयतऽआत्मना चेज्जीवति प्रधिनागादित्याहुः ॥२३॥ अथ त्रयो वाव लोकाः । मनुष्यलोकः पितृलोको देवलोक इति सोऽयं मनुष्यलोकः पुत्रेणैव जय्यो नान्येन कर्मणा कर्मणा पितृलोको विद्यया देवलोको देवलोको वै लोकानाꣳ श्रेष्ठस्तस्माद्विद्यां प्रशꣳसन्ति ॥२४॥ अथातः सम्प्रत्तिः । यदा प्रैष्यन्मन्यतेऽथ पुत्रमाह त्वं ब्रह्म त्वं यज्ञस्त्वं लोक इति स पुत्रः प्रत्याहाहं ब्रह्माहं यज्ञोऽहं लोक इति ॥२५॥ यद्वै किं चानूक्तम् । तस्य सर्वस्य ब्रह्मेत्येकता ये वै के च यज्ञास्तेषाꣳ सर्वेषां यज्ञ इत्येकता ये वै के च लोकास्तेषाꣳ सर्वेषां लोक इत्येकतैतावद्वाऽइदꣳ सर्वमेतन्मा सर्वꣳ सन्नयमितो भुनजदिति तस्मात्पुत्रमनुशिष्टं लोक्यमाहुस्तस्मादेनमनुशासति स यदैवंविदस्माल्लोकात्प्रैत्यथैभिरेव प्राणैः सह पुत्रमाविशति स यद्यनेन किंचिदक्ष्णयाकृतं भवति तस्मादेनꣳ सर्वस्मात्पुत्रो मुञ्चति तस्मात्पुत्रो नाम स पुत्रेणैवास्मिंल्लोके प्रतितिष्ठत्यथैनमेते दैवाः प्राणा अमृता आविशन्ति ॥२६॥ पृथिव्यै चैनमग्नेश्च । दैवी

वागाविशति सा वै दैवी वाग्यया यद्यदेव वदति तत्तद्भवति ॥२७॥ दिवश्चैन-
मादित्याच्च । दैवं मन आविशति तद्वै दैवं मनो येनानन्द्येव भवत्यथो न शो-
चति ॥२८॥ अद्भ्यश्चैनं चन्द्रमसश्च । दैवः प्राण आविशति स वै दैवः प्राणो यः
संचरंश्चासंचरंश्च न व्यथतेऽथो न रिष्यति स एष एवंवित्सर्वेषां भूतानामात्मा
भवति यथैषा देवतैवꣳ स यथैतां देवताꣳ सर्वाणि भूतान्यवन्त्येवꣳ हैवंविदꣳ
सर्वाणि भूतान्यवन्ति यदु किं चेमाः प्रजाः शोचन्त्यमैवासां तद्भवति पुण्यमेवामुं
गच्छति न ह वै देवान्पापं गच्छति ॥२९॥ अथातो व्रतमीमाꣳसा । प्रजापतिर्ह
कर्माणि ससृजे तानि सृष्टान्यन्योऽन्येनास्पर्धन्त वदिष्याम्येवाहमिति वाग्दध्रे द्र-
क्ष्याम्यहमिति चक्षुः श्रोष्याम्यहमिति श्रोत्रमेवमन्यानि कर्माणि यथाकर्म ॥३०॥
तानि मृत्युः श्रमो भूत्वोपयेमे । तान्याप्नोत्तान्याप्त्वा मृत्युरवारुन्ध तस्माछ्राम्यत्येव
वाक्श्राम्यति चक्षुः श्राम्यति श्रोत्रमथेममेव नाप्नोद्योऽयं मध्यमः प्राणः ॥३१॥
तानि ज्ञातुं दध्रिरे । ऽयं वै नः श्रेष्ठो यः संचरंश्चासंचरंश्च न व्यथतेऽथो न रि-
ष्यति हन्तास्यैव सर्वे रूपं भवामेति तऽएतस्यैव सर्वे रूपमभवंस्तस्मादेतऽएते-
नाख्यायन्ते प्राणा इति तेन ह वाव तत्कुलमाख्यायते यस्मिन्कुले भवति य एवं
वेद य उ हैवंविदा स्पर्धतेऽनुशुष्य हैवान्ततो म्रियतऽइत्यध्यात्मम् ॥३२॥ अथा-
धिदेवतम् । ज्वलिष्याम्येवाहमित्यग्निर्दध्रे तप्स्याम्यहमित्यादित्यो भास्याम्यहमि-
ति चन्द्रमा एवमन्या देवता यथादेवतꣳ स यथैषां प्राणानां मध्यमः प्राण एवमे-
तासां देवतानां वायुर्म्लोचन्ति ह्यन्या देवता न वायुः सैषानस्तमिता देवता य-
द्वायुः ॥३३॥ अथैष श्लोको भवति । यतश्चोदेति सूर्योऽस्तं यत्र च गच्छतीति प्रा-
णाद्वाऽएष उदेति प्राणेऽस्तमेति तं देवाश्चक्रिरे धर्मꣳ स एवाद्य स उ श्व इति
यद्वाऽएतेऽमुर्ह्यध्रियन्त तदेवाप्यद्य कुर्वन्ति तस्मादेकमेव व्रतं चरेत्प्राण्याच्चैवा-
पान्याच्च नेन्मा पाप्मा मृत्युराप्नवदिति यद्यु चरेत्समापिपयिषेत्तेनोऽएतस्यै

देवतायै सायुज्यꣳ सलोकतां जयति य एवं वेद ॥३४॥ ब्राह्मणम् ॥ ३ [४. ३.] ॥ ॥

त्रयं वाऽइदं नाम रूपं कर्म । तेषां नाम्नां वागित्येतदेषामुक्थमतो हि सर्वाणि नामान्युत्तिष्ठन्त्येतदेषाꣳ सामैतद्धि सर्वैर्नामभिः सममेतदेषां ब्रह्मैतद्धि सर्वाणि नामानि बिभर्ति ॥१॥ अथ रूपाणाम् । चक्षुरित्येतदेषामुक्थमतो हि सर्वाणि रूपाण्युत्तिष्ठन्त्येतदेषाꣳ सामैतद्धि सर्वै रूपैः सममेतदेषां ब्रह्मैतद्धि सर्वाणि रूपाणि बिभर्ति ॥२॥ अथ कर्मणाम् । आत्मेत्येतदेषामुक्थमतो हि सर्वाणि कर्माण्युत्तिष्ठन्त्येतदेषाꣳ सामैतद्धि सर्वैः कर्मभिः सममेतदेषां ब्रह्मैतद्धि सर्वाणि कर्माणि बिभर्ति तदेतत्त्रयꣳ सदेकमयमात्मात्मोऽएकः सन्नेतत्त्रयं तदेतदमृतꣳ सत्येन छन्नं प्राणो वाऽअमृतं नामरूपे सत्यं ताभ्यामयं प्राणश्छन्नः ॥३॥ ब्राह्मणम् ॥ ४ [४. ४.] ॥ तृतीयः प्रपाठकः ॥ कण्डिकासंख्या१०१ ॥-॥ चतुर्थोऽध्यायः [१५.] ॥ ॥

दृप्तबालाकिर्हानूचानो गार्ग्य आस । स होवाचाजातशत्रुं काश्यं ब्रह्म ते ब्रवाणीति स होवाचाजातशत्रुः सहस्रमेतस्यां वाचि दद्मो जनको जनक इति वै जना धावन्तीति ॥१॥ स होवाच गार्ग्यो । य एवासावादित्ये पुरुष एतमेवाहं ब्रह्मोपासऽइति स होवाचाजातशत्रुर्मा-मैतस्मिन्त्संवदिष्ठा अतिष्ठाः सर्वेषां भूतानां मूर्धा राजेति वाऽअहमेतमुपासऽइति स य एतमेवमुपास्तेऽतिष्ठाः सर्वेषां भूतानां मूर्धा राजा भवति ॥२॥ स होवाच गार्ग्यो । य एवासौ चन्द्रे पुरुष एतमेवाहं ब्रह्मोपासऽइति स होवाचाजातशत्रुर्मा-मैतस्मिन्त्संवदिष्ठा बृहन्पाण्डरवासाः सोमो राजेति वाऽअहमेतमुपासऽइति स य एतमेवमुपास्तेऽहरहर्ह सुतः प्रसुतो भवति नास्यान्नं क्षीयते ॥३॥ स होवाच गार्ग्यो । य एवायं विद्युति पुरुष एतमेवाहं ब्रह्मोपासऽइति स होवाचाजातशत्रुर्मा-मैतस्मिन्त्संवदि-

ष्ठास्तेजस्वीति वाऽअहमेतमुपासऽइति स य एतमेवमुपास्ते तेजस्वी ह भवति तेजस्विनी हास्य प्रजा भवति ॥४॥ स होवाच गार्ग्यो । य एवायमाकाशे पुरुष एतमेवाहं ब्रह्मोपासऽइति स होवाचाजातशत्रुर्मा-मैतस्मिन्त्संवदिष्ठाः पूर्णमप्रवर्तीति वाऽअहमेतमुपासऽइति स य एतमेवमुपास्ते पूर्यते प्रजया पशुभिर्नास्यास्माल्लोकात्प्रजोद्वर्तते ॥५॥ स होवाच गार्ग्यो । य एवायं वायौ पुरुष एतमेवाहं ब्रह्मोपासऽइति स होवाचाजातशत्रुर्मा-मैतस्मिन्त्संवदिष्ठा इन्द्रो वैकुण्ठो ऽपराजिता सेनेति वाऽअहमेतमुपासऽइति स य एतमेवमुपास्ते जिष्णुर्हापराजिष्णुर्भवत्यन्यतस्त्यजायी ॥६॥ स होवाच गार्ग्यो । य एवायमग्नौ पुरुष एतमेवाहं ब्रह्मोपासऽइति स होवाचाजातशत्रुर्मा-मैतस्मिन्त्संवदिष्ठा विषासहिरिति वाऽअहमेतमुपासऽइति स य एतमेवमुपास्ते विषासहिर्ह भवति विषासहिर्हास्य प्रजा भवति ॥७॥ स होवाच गार्ग्यो । य एवायमप्सु पुरुष एतमेवाहं ब्रह्मोपासऽइति स होवाचाजातशत्रुर्मा-मैतस्मिन्त्संवदिष्ठाः प्रतिरूप इति वाऽअहमेतमुपासऽइति स य एतमेवमुपास्ते प्रतिरूपꣳ हैवैनमुपगच्छति नाप्रतिरूपमथो प्रतिरूपोऽस्माज्जायते ॥८॥ स होवाच गार्ग्यो । य एवायमादर्शे पुरुष एतमेवाहं ब्रह्मोपासऽइति स होवाचाजातशत्रुर्मा-मैतस्मिन्त्संवदिष्ठा रोचिष्णुरिति वाऽअहमेतमुपासऽइति स य एतमेवमुपास्ते रोचिष्णुर्ह भवति रोचिष्णुर्हास्य प्रजा भवत्यथो यैः संनिगच्छति सर्वांस्तानतिरोचते ॥९॥ स होवाच गार्ग्यो । य एवायं दिक्षु पुरुष एतमेवाहं ब्रह्मोपासऽइति स होवाचाजातशत्रुर्मा-मैतस्मिन्त्संवदिष्ठा द्वितीयोऽनपग इति वाऽअहमेतमुपासऽइति स य एतमेवमुपास्ते द्वितीयवान्ह भवति नास्माद्गणश्छिद्यते ॥१०॥ स होवाच गार्ग्यो । य एवायं यन्तं पश्चाच्छब्दोऽनूदेत्येतमेवाहं ब्रह्मोपासऽइति स होवाचाजातशत्रुर्मा-मैतस्मिन्त्संवदिष्ठा असुरिति वाऽअहमेतमुपासऽइति स य एतमेवमुपास्ते सर्वꣳ हैवास्मिंल्लो-

कऽआयुरेति नैनं पुरा कालात्प्राणो जहाति ॥११॥ स होवाच गार्ग्यो । य ए-
वायं छायामयः पुरुष एतमेवाहं ब्रह्मोपासऽइति स होवाचाजातशत्रुर्मा-मैत-
स्मिन्त्संवदिष्ठा मृत्युरिति वाऽअहमेतमुपासऽइति स य एतमेवमुपास्ते सर्वꣳ है-
वास्मिंलोकऽआयुरेति नैनं पुरा कालान्मृत्युरागच्छति ॥१२॥ स होवाच गार्ग्यो
। यश्चायमात्मनि पुरुष एतमेवाहं ब्रह्मोपासऽइति स होवाचाजातशत्रुर्मा-मैत-
स्मिन्त्संवदिष्ठा आत्मन्वीति वाऽअहमेतमुपासऽइति स य एतमेवमुपास्तऽआ-
त्मन्वी ह भवत्यात्मन्विनी हास्य प्रजा भवति स ह तूष्णीमास गार्ग्यः ॥१३॥
स होवाचाजातशत्रुः । एतावन्नू३ऽइत्येतावद्धीति नैतावता विदितं भवतीति स
होवाच गार्ग्य उप त्वायानीति ॥१४॥ स होवाचाजातशत्रुः । प्रतिलोमं वै त-
द्यद्ब्राह्मणः क्षत्रियमुपेयाद्ब्रह्म मे वक्ष्यतीति व्येव त्वा ज्ञपयिष्यामीति तं पाणावा-
दायोत्तस्थौ तौ ह पुरुषꣳ सुप्तमाजग्मतुस्तमेतैर्नामभिरामन्त्रयां चक्रे बृहन्पाण्डर-
वासः सोम राजन्निति स नोत्तस्थौ तं पाणिनापेषं बोधयां चकार स होत्तस्थौ
॥१५॥ स होवाचाजातशत्रुः । यत्रैष एतत्सुप्तोऽभूद्य एष विज्ञानमयः पुरुषः क्वैष
तदाभूत्कुत एतदागादिति तदु ह न मेने गार्ग्यः ॥१६॥ स होवाचाजातशत्रुः ।
यत्रैष एतत्सुप्तोऽभूद्य एष विज्ञानमयः पुरुषस्तदेषां प्राणानां विज्ञानेन विज्ञान-
मादाय य एषोऽन्तर्हृदयऽआकाशस्तस्मिञ्छेते ॥१७॥ ॥ शतम्७२०० ॥ ॥ तानि
यदा गृह्णाति । अथ हैतत्पुरुषः स्वपिति नाम तद्गृहीत एव प्राणो भवति गृही-
ता वाग्गृहीतं चक्षुर्गृहीतꣳ श्रोत्रं गृहीतं मनः ॥१८॥ स यत्रैतत्स्वप्न्यया चरति
। ते हास्य लोकास्तदुतेव महाराजो भवत्युतेव महाब्राह्मण उतेवोच्चावचं नि-
गच्छति ॥१९॥ स यथा महाराजो जानपदान्गृहीत्वा स्वे जनपदे यथाकामं परि-
वर्ततैवमेवैष एतत्प्राणान्गृहीत्वा स्वे शरीरे यथाकामं परिवर्तते ॥२०॥ अथ य-
दा सुषुप्तो भवति । यदा न कस्य चन वेद हिता नाम नाड्यो द्वासप्ततिः सहस्राणि

हृदयात्पुरीततमभिप्रतिष्ठन्ते ताभिः प्रत्यवसृप्य पुरीतति शेते ॥२१॥ स यथा कुमारो वा महाब्राह्मणो वा । ऽतिघ्नीमानन्दस्य गत्वा शयीतैवमेवैष एतच्छेते ॥२२॥ स यथोर्णवाभिस्तन्तुनोच्चरेत् । यथाग्नेः क्षुद्रा विष्फुलिङ्गा व्युच्चरन्त्येवमेवास्मादात्मनः सर्वे प्राणाः सर्वे लोकाः सर्वे देवाः सर्वाणि भूतानि सर्वऽएत ऽआत्मानो व्युच्चरन्ति तस्योपनिषत्सत्यस्य सत्यमिति प्राणा वै सत्यं तेषामेष सत्यम् ॥२३॥ ब्राह्मणम् ॥ १ [५. १.] ॥ ॥

यो ह वै शिशुꣳ साधानꣳ सप्रत्याधानꣳ सस्थूणꣳ सदामं वेद सप्त ह द्विषतो भ्रातृव्यानवरुणद्धि ॥१॥ अयं वाव शिशुर्योऽयं मध्यमः प्राणः । तस्येदमेवाधानमिदं प्रत्याधानं प्राण स्थूणान्नं दाम तमेताः सप्ताक्षितय उपतिष्ठन्ते ॥२॥ तद्या इमा अक्षँल्लोहिन्यो राजयः । ताभिरेनꣳ रुद्रोऽन्वायत्तोऽथ या अक्षन्नापस्ताभिः पर्जन्यो या कनीनका तयादित्यो यच्छुक्लं तेनाग्निर्यत्कृष्णं तेनेन्द्रोऽधरयैनं वर्तन्या पृथिव्यन्वायत्ता द्यौरुत्तरया नास्यान्नं क्षीयते य एवं वेद ॥३॥ तदेष श्लोको भवति । अर्वाग्बिलश्चमस ऊर्ध्वबुध्नस्तस्मिन्यशो निहितं विश्वरूपम् । तस्यासतऽऋषयः सप्त तीरे वागष्टमी ब्रह्मणा संविदानेति ॥४॥ अर्वाग्बिलश्चमस ऊर्ध्वबुध्न इति । इदं तच्छिर एष ह्यर्वाग्बिलश्चमस ऊर्ध्वबुध्नस्तस्मिन्यशो निहितं विश्वरूपमिति प्राणा वै यशो निहितं विश्वरूपं प्राणानेतदाह तस्यासतऽऋषयः सप्त तीरऽइति प्राणा वाऽऋषयः प्राणानेतदाह वागष्टमी ब्रह्मणा संविदानेति वाग्घ्यष्टमी ब्रह्मणा संवित्ते ॥५॥ इमावेव गोतमभरद्वाजौ । अयमेव गोतमोऽयं भरद्वाज इमावेव विश्वामित्रजमदग्नीऽअयमेव विश्वामित्रोऽयं जमदग्निरिमावेव वसिष्ठकश्यपावयमेव वसिष्ठोऽयं कश्यपो वागेवात्रिर्वाचा ह्यन्नमद्यतेऽत्तिर्ह वै नामैतद्यदत्रिरिति सर्वस्यात्ता भवति सर्वमस्यान्नं भवति य एवं वेद ॥६॥ ब्राह्मणम् ॥२ [५. २.] ॥ ॥

द्वे वाव ब्रह्मणो रूपे । मूर्तं चैवामूर्तं च मर्त्यं चामृतं च स्थितं च यच्च सच्च त्यं च ॥१॥ तदेतन्मूर्तम् । यदन्यद्वायोश्चान्तरिक्षाच्चैत मर्त्यमेतत्स्थितमेतत्सत् ॥२॥ तस्यैतस्य । मूर्तस्यैतस्य मर्त्यस्यैतस्य स्थितस्यैतस्य सत एष रसो य एष तपति सतो ह्येष रसः ॥३॥ अथामूर्तम् । वायुश्चान्तरिक्षं चैतदमृतमेतद्यदेतत्त्यम् ॥४॥ तस्यैतस्यामूर्तस्य । एतस्यामृतस्यैतस्य यत एतस्य त्यस्यैष रसो य एष एतस्मिन्मण्डले पुरुषस्त्यस्य ह्येष रस इत्यधिदेवतम् ॥५॥ अथाध्यात्मम् । इदमेव मूर्तं यदन्यत्प्राणाच्च यश्चायमन्तरात्मन्नाकाश एतन्मर्त्यमेतत्स्थितमेतत्सत् ॥६॥ तस्यैतस्य मूर्तस्य । एतस्य मर्त्यस्यैतस्य स्थितस्यैतस्य सत ष रसो यच्चक्षुः सतो ह्येष रसः ॥७॥ अथामूर्तम् । प्राणश्च यश्चायमन्तरात्मन्नाकाश एतदमृतमेतद्यदेतत्त्यम् ॥८॥ तस्यैतस्यामूर्तस्य । एतस्यामृतस्यैतस्य यत एतस्य त्यस्यैष रसो योऽयं दक्षिणेऽक्षन्पुरुषस्त्यस्य ह्येष रसः ॥९॥ तस्य हैतस्य पुरुषस्य रूपम् । यथा माहारजनं वासो यथा पाण्ड्वाविकं यथेन्द्रगोपो यथाग्न्यर्चिर्यथा पुण्डरीकं यथा सकृद्विद्युत्तꣳ सकृद्विद्युत्तेव ह वाऽअस्य श्रीर्भवति य एवं वेद ॥१०॥ अथात आदेशो । नेति नेति न ह्येतस्मादिति नेत्यन्यत्परमस्त्यथ नामधेयꣳ सत्यस्य सत्यमिति प्राणा वै सत्यं तेषामेष सत्यम् ॥११॥ ब्राह्मणम् ॥ ३ [५. ३.] ॥ ॥

मैत्रेयीति होवाच याज्ञवल्क्यः । उद्यास्यन्वाऽअरेऽहमस्मात्स्थानादस्मि हन्त तेऽनया कात्यायन्यान्तं करवाणीति ॥१॥ सा होवाच मैत्रेयी । यन्मऽइयं भगोः सर्वा पृथिवी वित्तेन पूर्णा स्यात्कथं तेनामृता स्यामिति नेति होवाच याज्ञवल्क्यो यथैवोपकरणवतां जीवितं तथैव ते जीवितꣳ स्यादमृतत्वस्य तु नाशास्ति वित्तेनेति ॥२॥ सा होवाच मैत्रेयी । येनाहं नामृता स्यां किमहं तेन कुर्यां यदेव भगवान्वेद तदेव मे ब्रूहीति ॥३॥ स होवाच याज्ञवल्क्यः । प्रिया वतारे नः सती प्रियं भाषसऽएह्यास्व व्याख्यास्यामि ते व्याचक्षाणस्य तु मे निदिध्यास-

स्वेति ब्रवीतु भगवानिति ॥४॥ स होवाच याज्ञवल्क्यो । न वाऽअरे पत्युः कामाय पतिः प्रियो भवत्यात्मनस्तु कामाय पतिः प्रियो भवति न वाऽअरे जायायै कामाय जाया प्रिया भवत्यात्मनस्तु कामाय जाया प्रिया भवति न वाऽअरे पुत्राणां कामाय पुत्राः प्रिया भवन्त्यात्मनस्तु कामाय पुत्राः प्रिया भवन्ति न वाऽअरे वित्तस्य कामाय वित्तं प्रियं भवत्यात्मनस्तु कामाय वित्तं प्रियं भवति न वाऽअरे ब्रह्मणः कामाय ब्रह्म प्रियं भवत्यात्मनस्तु कामाय ब्रह्म प्रियं भवति न वाऽअरे क्षत्रस्य कामाय क्षत्रं प्रियं भवत्यात्मनस्तु कामाय क्षत्रं प्रियं भवति न वाऽअरे लोकानां कामाय लोकाः प्रिया भवन्त्यात्मनस्तु कामाय लोकाः प्रिया भवन्ति न वाऽअरे देवानां कामाय देवाः प्रिया भवन्त्यात्मनस्तु कामाय देवाः प्रिया भवन्ति न वाऽअरे भूतानां कामाय भूतानि प्रियाणि भवन्त्यात्मनस्तु कामाय भूतानि प्रियाणि भवन्ति न वाऽअरे सर्वस्य कामाय सर्वं प्रियं भवत्यात्मनस्तु कामाय सर्वं प्रियं भवत्यात्मा वाऽअरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यो मैत्रेय्यात्मनो वाऽअरे दर्शनेन श्रवणेन मत्या विज्ञानेनेदꣳ सर्वं विदितम् ॥५॥ ब्रह्म तं परादात् । यो ऽन्यत्रात्मनो ब्रह्म वेद क्षत्रं तं परादाद्यो ऽन्यत्रात्मनः क्षत्रं वेद लोकास्तं परादुर्यो ऽन्यत्रात्मनो लोकान्वेद देवास्तं परादुर्यो ऽन्यत्रात्मनो देवान्वेद भूतानि तं परादुर्यो ऽन्यत्रात्मनो भूतानि वेद सर्वं तं परादाद्यो ऽन्यत्रात्मनः सर्वं वेदेदं ब्रह्मेदं क्षत्रमिमे लोका इमे देवा इमानि भूतानीदꣳ सर्वं यदयमात्मा ॥६॥ स यथा दुन्दुभेर्हन्यमानस्य । न बाह्याञ्छब्दाञ्छक्नुयाद्ग्रहणाय दुन्दुभेस्तु ग्रहणेन दुन्दुभ्याघातस्य वा शब्दो भवति गृहीतः ॥७॥ स यथा वीणायै वाद्यमानायै । न बाह्याञ्छब्दाञ्छक्नुयाद्ग्रहणाय वीणायै तु ग्रहणेन वीणावादस्य वा शब्दो गृहीतः ॥८॥ स यथा शङ्खस्य ध्मायमानस्य । न बाह्याञ्छब्दाञ्छक्नुयाद्ग्रहणाय शङ्खस्य तु ग्रहणेन शङ्खध्मस्य वा शब्दो गृहीतः

॥९॥ स यथार्द्रैधाग्नेरभ्याहितस्य । पृथग्धूमा विनिश्चरन्त्येवं वाऽअरेऽस्य महतो भूतस्य निश्वसितमेतद्यदृग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरस इतिहासः पुराणं विद्या उपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्यानान्यस्यैवैतानि सर्वाणि निश्वसितानि ॥१०॥ स यथा सर्वासामपाꣳ समुद्र एकायनम् । एवꣳ सर्वेषाꣳ स्पर्शानां त्वगेकायनमेवꣳ सर्वेषां गन्धानां नासिकेऽएकायनमेवꣳ सर्वेषाꣳ रसानां जिह्वैकायनमेवꣳ सर्वेषाꣳ रूपाणां चक्षुरेकायनमेवꣳ सर्वेषाꣳ शब्दानाꣳ श्रोत्रमेकायनमेवꣳ सर्वेषाꣳ संकल्पानां मन एकायनमेवꣳ सर्वेषां वेदानाꣳ हृदयमेकायनमेवꣳ सर्वेषां कर्मणाꣳ हस्तावेकायनमेवꣳ सर्वेषामध्वनां पादावेकायनमेवꣳ सर्वेषामानन्दानामुपस्थ एकायनमेवꣳ सर्वेषां विसर्गाणां पायुरेकायनमेवꣳ सर्वासां विद्यानां वागेकायनꣳ ॥११॥ स यथा सैन्धवखिल्यः । उदके प्रास्त उदकमेवानुविलीयेत नाहास्योद्ग्रहणायेव स्याद्यतो-यतस्त्वाददीत लवणमेवैवं वाऽअरऽइदं महद्भूतमनन्तमपारं विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति न प्रेत्य संज्ञास्तीत्यरे ब्रवीमीति होवाच याज्ञवल्क्यः ॥१२॥ सा होवाच मैत्रेयी । अत्रैव मा भगवानमूमुहन्न प्रेत्य संज्ञास्तीति ॥१३॥ स होवाच याज्ञवल्क्यो । न वाऽअरेऽहं मोहं ब्रवीम्यलं वाऽअरऽइदं विज्ञानाय ॥१४॥ यत्र हि द्वैतमिव भवति । तदितर इतरं पश्यति तदितर इतरं जिघ्रति तदितर इतरमभिवदति तदितर इतरꣳ शृणोति तदितर इतर मनुते तदितर इतरं विजानाति ॥१५॥ यत्र त्वस्य सर्वमात्मैवाभूत् । तत्केन कं पश्येत्तत्केन कं जिघ्रेत्तत्केन कमभिवदेत्तत्केन कꣳ शृणुयात्तत्केन कं मन्वीत तत्केन कं विजानीयाद्येनेदꣳ सर्वं विजानाति तं केन विजानीयाद्विज्ञातारमरे केन विजानीयादिति ॥१६॥ ब्राह्मणम् ॥४ [५.४.] ॥ ॥

इयं पृथिवी । सर्वेषां भूतानां मध्वस्यै पृथिव्यै सर्वाणि भूतानि मधु यश्चायम-

स्यां पृथिव्यां तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मꣳ शारीरस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेदममृतमिदं ब्रह्मेदꣳ सर्वम् ॥१॥ इमा आपः । सर्वेषां भूतानां मध्वासामपाꣳ सर्वाणि भूतानि मधु यश्चायमास्वप्सु तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मꣳ रैतसस्तेजोमयोऽमृत° ॥२॥ अयमग्निः । सर्वेषां भूतानां मध्वस्याग्नेः सर्वाणि भूतानि मधु यश्चायमस्मिन्नग्नौ तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं वाङ्मयस्तेजोमयोऽमृत° ॥३॥ अयमाकाशः । सर्वेषां भूतानां मध्वस्याकाशस्य सर्वाणि भूतानि मधु यश्चायमस्मिन्नाकाशे तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मꣳ हृद्याकाशस्तेजोमयोऽमृत° ॥४॥ अयं वायुः । सर्वेषां भूतानां मध्वस्य वायोः सर्वाणि भूतानि मधु यश्चायमस्मिन्वायौ तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं प्राणस्तेजोमयोऽमृत° ॥५॥ अयमादित्यः । सर्वेषां भूतानां मध्वस्यादित्यस्य सर्वाणि भूतानि मधु यश्चायमस्मिन्नादित्ये तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं चाक्षुषस्तेजोमयोऽमृत° ॥६॥ अयं चन्द्रः । सर्वेषां भूतानां मध्वस्य चन्द्रस्य सर्वाणि भूतानि मधु यश्चायमस्मिꣳश्चन्द्रे तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं मानसस्तेजोमयोऽमृत° ॥७॥ इमा दिशः । सर्वेषां भूतानां मध्वासां दिशाꣳ सर्वाणि भूतानि मधु यश्चायमासु दिक्षु तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मꣳ श्रौत्रः प्रातिश्रुत्कस्तेजोमयोऽमृत° ॥८॥ इयं विद्युत् । सर्वेषां भूतानां मध्वस्यै विद्युतः सर्वाणि भूतानि मधु यश्चायमस्यां विद्युति तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं तैजसस्तेजोमयोऽमृत° ॥९॥ अयꣳ स्तनयित्नुः । सर्वेषां भूतानां मध्वस्य स्तनयित्नोः सर्वाणि भूतानि मधु यश्चायमस्मिन्स्तनयित्नौ तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मꣳ शाब्दः सौवरस्तेजोमयोऽमृत° ॥१०॥ अयं धर्मः । सर्वेषां भूतानां मध्वस्य धर्मस्य सर्वाणि भूतानि मधु यश्चायमस्मिन्धर्मे तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं धार्मस्तेजोमयोऽमृत° ॥११॥ इदꣳ सत्यꣳ । सर्वेषां भूतानां

मध्वस्य सत्यस्य सर्वाणि भूतानि मधु यश्चायमस्मिन्त्सत्ये तेजोमयोऽमृतमयः पुरुषो
यश्चायमध्यात्मꣳ सात्यस्तेजोमयोऽमृत° ॥१२॥ इदं मानुषꣳ । सर्वेषां भूतानां म-
ध्वस्य मानुषस्य सर्वाणि भूतानि मधु यश्चायमस्मिन्मानुषे तेजोमयोऽमृतमयः पुरु-
षो यश्चायमध्यात्मं मानुषस्तेजोमयोऽमृत° ॥१३॥ अयमात्मा । सर्वेषां भूतानां
मध्वस्यात्मनः सर्वाणि भूतानि मधु यश्चायमस्मिन्नात्मनि तेजोमयोऽमृतमयः पुरुषो
यश्चायमात्मा तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेदममृतमिदं ब्रह्मेदꣳ
सर्वम् ॥१४॥ स वाऽअयमात्मा । सर्वेषां भूतानामधिपतिः सर्वेषां भूतानाꣳ राजा
तद्यथा रथनाभौ च रथनेमौ चाराः सर्वे समर्पिता एवमेवास्मिन्नात्मनि सर्वे प्रा-
णाः सर्वे लोकाः सर्वे देवाः सर्वाणि भूतानि सर्वऽएतऽआत्मानः समर्पिताः
॥१५॥ इदं वै तन्मधु । दध्यङ्ङाथर्वणोऽश्विभ्यामुवाच तदेतदृषिः पश्यन्नवोचत्
तद्वां नरा सनये दꣳस उग्रमाविष्कृणोमि तन्यतुर्न वृष्टिम् दध्यङ् ह यन्मध्वाथर्वणो
वामश्वस्य शीर्ष्णा प्र यदीमुवाचेति ॥१६॥ इदं वै तन्मधु । दध्यङ्ङाथर्वणोऽश्विभ्या-
मुवाच तदेतदृषिः पश्यन्नवोचत् आथर्वणायाश्विना दधीचेऽश्व्यꣳ शिरः प्रत्यैर-
यतम् स वां मधु प्रवोचदृतायन्त्वाष्ट्रं यद्दस्रावपिकक्ष्यं वामिति ॥१७॥ इदं वै
तन्मधु । दध्यङ्ङाथर्वणोऽश्विभ्यामुवाच तदेतदृषिः पश्यन्नवोचत् पुरश्चक्रे द्विपदः
पुरश्चक्रे चतुष्पदः पुरः स पक्षी भूत्वा पुरः पुरुष आविशदिति स वाऽअयं पु-
रुषः सर्वासु पूर्षु पुरिशयो नैनेन किं चनानावृतं नैनेन किं चनासंवृतम् ॥१८॥
इदं वै तन्मधु । दध्यङ्ङाथर्वणोऽश्विभ्यामुवाच तदेतदृषिः पश्यन्नवोचत् रूपꣳ-
रूपं प्रतिरूपो बभूव तदस्य रूपं प्रतिचक्षणाय इन्द्रो मायाभिः पुरुरूप ईयते
युक्ता ह्यस्य हरयः शता दशेत्ययं वै हरयोऽयं वै दश च सहस्राणि बहूनि
चानन्तानि च तदेतद्ब्रह्मापूर्वमनपरमनन्तरमबाह्यमयमात्मा ब्रह्म सर्वानुभूरित्य-
नुशासनम् ॥१९॥ अथ वꣳशः । तदिदं वयꣳ शौर्पणाय्याच्छौर्पणाय्यो गौतमाद्गौ-

तमो वात्स्याद्वात्स्यो वात्स्याच्च पाराशर्याच्च पाराशर्यः सांकृत्याच्च भारद्वाजाच्च भारद्वाज औदवाहेश्च शाण्डिल्याच्च शाण्डिल्यो वैजवापाच्च गौतमाच्च गौतमो वैजवापायनाच्च वैष्टपुरेयाच्च वैष्टपुरेयः शाण्डिल्याच्च रौहिणायनाच्च रौहिणायनः शौनकाच्चात्रेयाच्च रैभ्याच्च रैभ्यः पौतिमाष्यायणाच्च कौण्डिन्यायनाच्च कौण्डिन्यायनः कौण्डिन्यात्कौण्डिन्यः कौण्डिन्यात्कौण्डिन्यः कौण्डिन्याच्चाग्निवेश्याच्च ॥२०॥ आग्निवेश्यः सैतवात् । सैतवः पाराशर्यात्पाराशर्यो जातूकर्ण्याज्जातूकर्ण्यो भारद्वाजाद्भारद्वाजो भारद्वाजाच्चासुरायणाच्च गौतमाच्च गौतमो भारद्वाजाद्भारद्वाजो वैजवापायनाद्वैजवापायनः कौशिकायनेः कौशिकायनिर्घृतकौशिकाद्घृतकौशिकः पाराशर्यायणात्पाराशर्यायणः पाराशर्यात्पाराशर्यो जातूकर्ण्याज्जातूकर्ण्यो भारद्वाजाद्भारद्वाजो भारद्वाजाच्चासुरायणाच्च यास्काच्चासुरायणस्त्रैवणेस्त्रैवणिरौपजन्धनेरौपजन्धनिरासुरेरासुरिर्भारद्वाजाद्भारद्वाज आत्रेयात् ॥२१॥ आत्रेयो माण्टेः । माण्टिर्गौतमाद्गौतमो गौतमाद्गौतमो वात्स्याद्वात्स्यः शाण्डिल्याच्छाण्डिल्यः कैशोर्यात्काप्यात्कैशोर्यः काप्यः कुमारहारितात्कुमारहारितो गालवाद्गालवो विदर्भीकौण्डिन्याद्विदर्भीकौण्डिन्यो वत्सनपातो बाभ्रवाद्वत्सनपाद्बाभ्रवः पथः सौभरात्पन्थाः सौभरोऽयास्यादाङ्गिरसादयास्य आङ्गिरस आभूतेस्त्वाष्ट्रादाभूतिस्त्वाष्ट्रो विश्वरूपात्त्वाष्ट्राद्विश्वरूपस्त्वाष्ट्रोऽश्विभ्यामश्विनौ दधीच आथर्वणाद्दध्यङ्ङाथर्वणोऽथर्वणो दैवादथर्वा दैवो मृत्योः प्राध्वंसनान्मृत्युः प्राध्वंसनः प्रध्वंसनात्प्रध्वंसन एकर्षेरेकर्षिर्विप्रजित्तेर्विप्रजित्तिर्व्यष्टेर्व्यष्टिः सनारोः सनारुः सनातनात्सनातनः सनगात्सनगः परमेष्ठिनः परमेष्ठी ब्रह्मणो ब्रह्म स्वयम्भु ब्रह्मणे नमः ॥२२॥ ब्राह्मणम् ॥५ [५. ५.] ॥

पञ्चमोऽध्यायः [१६.] ॥ ॥

जनको ह वैदेहो । बहुदक्षिणेन यज्ञेनेजे तत्र ह कुरुपञ्चालानां ब्राह्मणा अभिसमेता बभूवुस्तस्य ह जनकस्य वैदेहस्य विजिज्ञासा बभूव कः स्विदेषां

ब्राह्मणानामनूचानतम इति ॥१॥ स ह गवाꣳ सहस्रमवरुरोध । दश-दश पा-
दा एकैकस्याः शृङ्गयोराबद्धा बभूवुस्तान्होवाच ब्राह्मणा भगवन्तो यो वो ब्रह्मि-
ष्ठः स एता गा उदजतामिति ते ह ब्राह्मणा न दधृषुः ॥२॥ अथ ह याज्ञवल्क्यः
। स्वमेव ब्रह्मचारिणमुवाचैताः सौम्योदज सामश्रवा३ इति ता होदाचकार ते
ह ब्राह्मणाश्चुक्रुधुः कथं नु नो ब्रह्मिष्ठो ब्रुवीतेति ॥३॥ अथ ह जनकस्य वैदे-
हस्य होताश्वलो बभूव । स हैनं पप्रच्छ त्वं नु खलु नो याज्ञवल्क्य ब्रह्मिष्ठो
ऽसी३ इति स होवाच नमो वयं ब्रह्मिष्ठाय कुर्मो गोकामा एव वयꣳ स्म इति
तꣳ ह तत एव प्रष्टुं दध्रे होताश्वलः ॥४॥ याज्ञवल्क्येति होवाच । यदिदꣳ
सर्वं मृत्युनाप्तꣳ सर्वं मृत्युनाभिपन्नं केन यजमानो मृत्योराप्तिमतिमुच्यतऽइति
होत्रऽर्त्विजाग्निना वाचा वाग्वै यज्ञस्य होता तद्येयं वाक्सोऽयमग्निः स होता
सा मुक्तिः सातिमुक्तिः ॥५॥ याज्ञवल्क्येति होवाच । यदिदꣳ सर्वमहोरात्राभ्या-
माप्तꣳ सर्वमहोरात्राभ्यामभिपन्नं केन यजमानोऽहोरात्रयोराप्तिमतिमुच्यतऽइत्य-
ध्वर्युणऽर्त्विजा चक्षुषादित्येन चक्षुर्वै यज्ञस्याध्वर्युस्तद्यदिदं चक्षुः सोऽसावादित्यः
सोऽध्वर्युः सा मुक्तिः सातिमुक्तिः ॥६॥ याज्ञवल्क्येति होवाच । यदिदꣳ सर्वं पूर्व-
पक्षापरपक्षाभ्यामाप्तꣳ सर्वं पूर्वपक्षापरपक्षाभ्यामभिपन्नं केन यजमानः पूर्वपक्षा-
परपक्षयोराप्तिमतिमुच्यतऽइति ब्रह्मणऽर्त्विजा मनसा चन्द्रेण मनो वै यज्ञस्य
ब्रह्मा तद्यदिदं मनः सोऽसौ चन्द्रः स ब्रह्मा सा मुक्तिः सातिमुक्तिः ॥७॥ या-
ज्ञवल्क्येति होवाच । यदिदमन्तरिक्षमनारम्बणमिवाथ केनाक्रमेण यजमानः स्वर्गं
लोकमाक्रमतऽइत्युद्गात्रऽर्त्विजा वायुना प्राणेन प्राणो वै यज्ञस्योद्गाता तद्योऽयं
प्राणः स वायुः स उद्गाता सा मुक्तिः सातिमुक्तिरित्यतिमोक्षा अथ सम्पदः ॥८॥
याज्ञवल्क्येति होवाच । कतिभिरयमद्यऽर्ग्भिर्होतास्मिन्यज्ञे करिष्यतीति तिसृभि-
रिति कतमास्तास्तिस्र इति पुरोऽनुवाक्या च याज्या च शस्यैव तृतीया किं ता-

भिर्जयतीति पृथिविलोकमेव पुरोऽनुवाक्यया जयत्यन्तरिक्षलोकं याज्यया द्यौर्लो-
कꣳ शस्यया ॥९॥ याज्ञवल्क्येति होवाच । कत्ययमद्याध्वर्युरस्मिन्यज्ञऽआहुतीर्हो-
ष्यतीति तिस्र इति कतमास्तास्तिस्र इति या हुता उज्ज्वलन्ति या हुता अति-
नेदन्ते या हुता अधिशेरते किं ताभिर्जयतीति या हुता उज्ज्वलन्ति देवलोक-
मेव ताभिर्जयति दीप्यतऽइव हि देवलोको या हुता अतिनेदन्ते मनुष्यलोक-
मेव ताभिर्जयत्यतीव हि मनुष्यलोको या हुता अधिशेरते पितृलोकमेव ता-
भिर्जयत्यध-इव हि पितृलोकः ॥१०॥ याज्ञवल्क्येति होवाच । कतिभिरयमद्य
ब्रह्मा यज्ञं दक्षिणतो देवताभिर्गोपायिष्यतीत्येकयेति कतमा सैकेति मन एवे-
त्यनन्तं वै मनोऽनन्ता विश्वे देवा अनन्तमेव स तेन लोकं जयति ॥११॥ याज्ञ-
ज्ञवल्क्येति होवाच । कत्ययमद्योद्गातास्मिन्यज्ञे स्तोत्रिया स्तोष्यतीति तिस्र इति
कतमास्तास्तिस्र इति पुरोऽनुवाक्या च याज्या च शस्यैव तृतीयाधिदेवतमथा-
ध्यात्मं कतमास्ता या अध्यात्ममिति प्राण एव पुरोनुवाक्यापानो याज्या व्यानः
शस्या किं ताभिर्जयतीति यत्किं चेदं प्राणभृदिति ततो ह होताश्वल उपरराम
॥१२॥ ब्राह्मणम् ॥६ [६. १.] ॥

अथ हैनं जारत्कारव आर्तभागः पप्रच्छ । याज्ञवल्क्येति होवाच कति ग्रहाः
कत्यतिग्रहा इत्यष्टौ ग्रहा अष्टावतिग्रहा ये तेऽष्टौ ग्रहा अष्टावतिग्रहाः कतमे
तऽइति ॥१॥ प्राणो वै ग्रहः । सोऽपानेनातिग्रहेण गृहीतोऽपानेन हि गन्धा-
न्जिघ्रति ॥२॥ जिह्वा वै ग्रहः । स रसेनातिग्रहेण गृहीतो जिह्वया हि रसान्वि-
जानाति ॥३॥ वाग्वै ग्रहः । स नाम्नातिग्रहेण गृहीतो वाचा हि नामान्यभि-
वदति ॥४॥ चक्षुर्वै ग्रहः । स रूपेणातिग्रहेण गृहीतश्चक्षुषा हि रूपाणि पश्यति
॥५॥ श्रोत्रं वै ग्रहः । स शब्देनातिग्रहेण गृहीतः श्रोत्रेण हि शब्दाञ्छृणोति
॥६॥ मनो वै ग्रहः । स कामेनातिग्रहेण गृहीतो मनसा हि कामान्कामयते

॥७॥ हस्तौ वै ग्रहः । स कर्मणातिग्रहेण गृहीतो हस्ताभ्याꣳ हि कर्म करोति ॥८॥ त्वग्वै ग्रहः । स स्पर्शेनातिग्रहेण गृहीतस्त्वचा हि स्पर्शान्वेदयत ऽइत्यष्टौ ग्रहा अष्टावतिग्रहाः ॥९॥ याज्ञवल्क्येति होवाच । यदिदꣳ सर्वं मृत्योरन्नं का स्वित्सा देवता यस्या मृत्युरन्नमित्यग्निर्वै मृत्युः सोऽपामन्नमप पुनर्मृत्युं जयति ॥१०॥ याज्ञवल्क्येति होवाच । यत्रायं पुरुषो म्रियते किमेनं न जहातीति नामेत्यनन्तं वै नामानन्ता विश्वे देवा अनन्तमेव स तेन लोकं जयति ॥११॥ याज्ञवल्क्येति होवाच । यत्रायं पुरुषो म्रियत ऽउदस्मात्प्राणाः क्रामन्त्याहो नेति नेति होवाच याज्ञवल्क्योऽत्रैव समवनीयन्ते स उच्छ्वयत्याध्मायत्याध्मातो मृतः शेते ॥१२॥ याज्ञवल्क्येति होवाच । यत्रास्य पुरुषस्य मृतस्याग्निं वागप्येति वातं प्राणश्चक्षुरादित्यं मनश्चन्द्रं दिशः श्रोत्रं पृथिवीꣳ शरीरमाकाशमात्मौषधीर्लोमानि वनस्पतीन्केशा अप्सु लोहितं च रेतश्च निधीयते क्वायं तदा पुरुषो भवतीत्याहर सौम्य हस्तम् ॥१३॥ आर्तभागेति होवाच । आवमेवैतद्वेदिष्यावो न नावेतत्सजन ऽइति तौ होत्क्रम्य मन्त्रयां चक्रतुस्तौ ह यदूचतुः कर्म हैव तदूचतुरथ ह यत्प्रशशꣳसतुः कर्म हैव तत्प्रशशꣳसतुः पुण्यो वै पुण्येन कर्मणा भवति पापः पापेनेति ततो ह जारत्कारव आर्तभाग उपरराम ॥१४॥ ब्राह्मणम् ॥७ [६. २.]

॥ चतुर्थः प्रपाठकः ॥ कण्डिकासंख्या १०४ ॥ ॥

अथ हैनं भुज्युर्लाह्यायनिः पप्रच्छ । याज्ञवल्क्येति होवाच मद्रेषु चरकाः पर्यव्रजाम ते पतञ्चलस्य काप्यस्य गृहानैम तस्यासीद्दुहिता गन्धर्वगृहीता तमपृच्छाम कोऽसीति सोऽब्रवीत्सुधन्वाङ्गिरस इति तं यदा लोकानामन्तानपृच्छामाथैतमब्रूम क्व पारिक्षिता अभवन्क्व पारिक्षिता अभवन्निति तत्त्वा पृच्छामि याज्ञवल्क्य क्व पारिक्षिता अभवन्निति ॥१॥ स होवाच । उवाच वै स तदगच्छन्वै ते तत्र यत्राश्वमेधयाजिनो गच्छन्तीति क्व न्वश्वमेधयाजिनो गच्छन्तीति द्वात्रिꣳशतं वै

देवरथाह्न्यान्ययं लोकस्तꣳ समन्तं लोकं द्विस्तावत्पृथिवी पर्य्येति तां पृथिवीं द्वि-
स्तावत्समुद्रः पर्य्येति तद्यावती क्षुरस्य धारा यावद्वा मक्षिकायाः पत्रं तावानन्त-
रेणाकाशस्तानिन्द्रः सुपर्णो भूत्वा वायवे प्रायच्छत्तान्वायुरात्मनि धित्वा तत्रागम-
यद्यत्र पारिक्षिता अभवन्नित्येवमिव वै स वायुमेव प्रशशꣳस तस्माद्वायुरेव व्य-
ष्टिर्वायुः समष्टिरप पुनर्मृत्युं जयति सर्वमायुरेति य एवं वेद ततो ह भुज्युर्ला-
ह्यायनिरुपरराम ॥२॥ ब्राह्मणम् ॥ १ [६. ३.] ॥

अथ हैनं कहोडः कौषीतकेयः पप्रछ । याज्ञवल्क्येति होवाच यत्साक्षादप-
रोक्षाद्ब्रह्म य आत्मा सर्वान्तरस्तं मे व्याचक्ष्वेत्येष तऽआत्मा सर्वान्तरः कतमो
याज्ञवल्क्य सर्वान्तरो योऽशनायापिपासे शोकं मोहं जरां मृत्युमत्येत्येतं वै त-
मात्मानं विदित्वा ब्राह्मणाः पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्था-
याथ भिक्षाचर्यं चरन्ति या ह्येव पुत्रैषणा सा वित्तैषणा या वित्तैषणा सा लो-
कैषणोभे ह्येतेऽएषणेऽएव भवतस्तस्मात्पाण्डतः पाण्डित्यं निर्विद्य बाल्येन
तिष्ठासेद्बाल्यं च पाण्डित्यं च निर्विद्याथ मुनिरमौनं च मौनं च निर्विद्याथ
ब्राह्मणः स ब्राह्मणः केन स्याद्येन स्यात्तेनेदृश एव भवति य एवं वेद ततो
ह कहोडः कौषीतकेय उपरराम ॥१॥ ब्राह्मणम् ॥२ [६. ४.] ॥ ॥

अथ हैनमुषस्तश्चाक्रायणः पप्रछ । याज्ञवल्क्येति होवाच यत्साक्षादपरोक्षा-
द्ब्रह्म य आत्मा सर्वान्तरस्तं मे व्याचक्ष्वेत्येष तऽआत्मा सर्वान्तरः कतमो याज्ञ-
वल्क्य सर्वान्तरो यः प्राणेन प्राणिति स तऽआत्मा सर्वान्तरो योऽपानेनापानि-
ति स तऽआत्मा सर्वान्तरो यो व्यानेन व्यनिति स तऽआत्मा सर्वान्तरो य उ-
दानेनोदनिति स तऽआत्मा सर्वान्तरो यः समानेन समनिति स तऽआत्मा स-
र्वान्तरः स होवाचोषस्तश्चाक्रायणो यथा वै ब्रूयादसौ गौरसावश्व इत्येवमेवै-
तद्व्यपदिष्टं भवति यदेव साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तरस्तं मे व्याचक्ष्वे-

त्येष त ऽ आत्मा सर्वान्तरः कतमो याज्ञवल्क्य सर्वान्तरो न दृष्टेर्द्रष्टारं पश्येर्न श्रुतेः श्रोतारꣳ शृणुया न मतेर्मन्तारं मन्वीथा न विज्ञातेर्विज्ञातारं विजानीया एष त ऽ आत्मा सर्वान्तरोऽतोऽन्यदार्तं ततो होषस्तश्चाक्रायण उपरराम ॥ १ ॥ ब्राह्मणम् ॥ ३ [६. ५.] ॥ ॥

अथ हैनं गार्गी वाचक्नवी पप्रछ । याज्ञवल्क्येति होवाच यदिदꣳ सर्वमप्स्वोतं च प्रोतं च कस्मिन्न्वाप ओताश्च प्रोताश्चेति वायौ गार्गीति कस्मिन्नु वायुरोतश्च प्रोतश्चेत्याकाश ऽ एव गार्गीति कस्मिन्न्वाकाश ओतश्च प्रोतश्चेत्यन्तरिक्षलोकेषु गार्गीति कस्मिन्न्वन्तरिक्षलोका ओताश्च प्रोताश्चेति द्यौर्लोके गार्गीति कस्मिन्नु द्यौर्लोक ओतश्च प्रोतश्चेत्यादित्यलोकेषु गार्गीति कस्मिन्न्वादित्यलोका ओताश्च प्रोताश्चेति चन्द्रलोकेषु गार्गीति कस्मिन्नु चन्द्रलोका ओताश्च प्रोताश्चेति नक्षत्रलोकेषु गार्गीति कस्मिन्नु नक्षत्रलोका ओताश्च प्रोताश्चेति देवलोकेषु गार्गीति कस्मिन्नु देवलोका ओताश्च प्रोताश्चेति गन्धर्वलोकेषु गार्गीति कस्मिन्नु गन्धर्वलोका ओताश्च प्रोताश्चेति प्रजापतिलोकेषु गार्गीति कस्मिन्नु प्रजापतिलोका ओताश्च प्रोताश्चेति ब्रह्मलोकेषु गार्गीति कस्मिन्नु ब्रह्मलोका ओताश्च प्रोताश्चेति स होवाच गार्गि मातिप्राक्षीर्मा ते मूर्धा व्यपप्तदनतिप्रश्न्या वै देवता अतिपृछसि गार्गि मातिप्राक्षीरिति ततो ह गार्गी वाचक्नव्युपरराम ॥ १ ॥ ब्राह्मणम् ॥ ४ [६. ६.] ॥ ॥

अथ हैनमुद्दालक आरुणिः पप्रछ । याज्ञवल्क्येति होवाच मद्रेष्ववसाम पतञ्चलस्य काप्यस्य गृहेषु यज्ञमधीयानास्तस्यासीद्भार्या गन्धर्वगृहीता तमपृछाम कोऽसीति सोऽब्रवीत्कबन्ध आथर्वण इति ॥ १ ॥ सोऽब्रवीत् । पतञ्चलं काप्यं याज्ञिकाꣳश्च वेत्थ नु त्वं काप्य तत्सूत्रं यस्मिन्नयं च लोकः परश्च लोकः सर्वाणि च भूतानि संदृब्धानि भवन्तीति सोऽब्रवीत्पतञ्चलः काप्यो नाहं तद्भगवन्वेदेति

॥२॥ सोऽब्रवीत् । पतञ्चलं काप्यं याज्ञिकांश्च वेत्थ नु त्वं काप्य तमन्तर्यामिणं
य इमं च लोकं परं च लोकꣳ सर्वाणि च भूतान्यन्तरो यमयतीति सोऽब्रवी-
त्पतञ्चलः काप्यो नाहं तं भगवन्वेदेति ॥३॥ सोऽब्रवीत् । पतञ्चलं काप्यं या-
ज्ञिकांश्च यो वै तत्काप्य सूत्रं विद्यात्तं चान्तर्यामिणꣳ स ब्रह्मवित्स लोकवित्स
देववित्स वेदवित्स यज्ञवित्स भूतवित्स आत्मवित्स सर्वविदिति तेभ्योऽब्रवीत्त-
दहं वेद तच्चेत्त्वं याज्ञवल्क्य सूत्रमविद्वांस्तं चान्तर्यामिणं ब्रह्मगवीरुदजसे मूर्धा
ते विपतिष्यतीति ॥४॥ वेद वाऽअहं गौतम । तत्सूत्रं तं चान्तर्यामिणमिति यो
वाऽइदं कश्च ब्रूयाद्वेद-वेदेति यथा वेत्थ तथा ब्रूहीति ॥५॥ वायुर्वै गौतम त-
त्सूत्रम् । वायुना वै गौतम सूत्रेणायं च लोकः परश्च लोकः सर्वाणि च भूतानि
संदृब्धानि भवन्ति तस्माद्वै गौतम पुरुषं प्रेतमाहुर्व्यस्रꣳसिषतास्याङ्गानीति वायु-
ना हि गौतम सूत्रेण संदृब्धानि भवन्तीत्येवमेवैतद्याज्ञवल्क्यान्तर्यामिणं ब्रूहीति
॥६॥ यः पृथिव्यां तिष्ठन् । पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी श-
रीरं यः पृतिवीमन्तरो यमयति स तऽआत्मान्तर्याम्यमृतः ॥७॥ योऽप्सु तिष्ठन्
। अद्भ्योऽन्तरो यमापो न विदुर्यस्यापः शरीरं योऽपोऽन्तरो यमयति स तऽआ-
त्मान्तर्याम्यमृतः ॥८॥ ॥ शतम्ꣳ३०० ॥ ॥ योऽग्नौ तिष्ठन् । अग्नेरन्तरो यमग्निर्न
वेद यस्याग्निः शरीरं योऽग्निमन्तरो यमयति स तऽआत्मान्तर्याम्यमृतः ॥९॥ य
आकाशे तिष्ठन्। आकाशादन्तरो यमाकाशो न वेद यस्याकाशः शरीरं य आका-
शमन्तरो यमयति स तऽआत्मान्तर्याम्यमृतः ॥१०॥ यो वायौ तिष्ठन् । वायोरन्त-
रो यं वायुर्न वेद यस्य वायुः शरीरं यो वायुमन्तरो यम॰ ॥११॥ य आदित्ये ति-
ष्ठन् । आदित्यादन्तरो यमादित्यो न वेद यस्यादित्यः शरीरं य आदित्यमन्तरो यम॰
॥१२॥ यश्चन्द्रतारके तिष्ठन् । चन्द्रतारकादन्तरो यं चन्द्रतारकं न वेद यस्य चन्द्र-
तारकꣳ शरीरं यश्चन्द्रतारकमन्तरो यम॰ ॥१३॥ यो दिक्षु तिष्ठन् । दिग्भ्योऽन्तरो

यं दिशो न विदुर्यस्य दिशः शरीरं यो दिशोऽन्तरो यम° ॥१४॥ यो विद्युति ति-
ष्ठन् । विद्युतोऽन्तरो यं विद्युन्न वेद यस्य विद्युच्छरीरं यो विद्युतमन्तरो यम°
॥१५॥ य स्तनयित्नौ तिष्ठन् । स्तनयित्नोरन्तरो यꣳ स्तनयित्नुर्न वेद यस्य स्तन-
यित्नुः शरीरं य स्तनयित्नुमन्तरो यमयति स तऽआत्मान्तर्याम्यमृत इत्यधिदेवत-
मथाधिलोकम् ॥१६॥ यः सर्वेषु लोकेषु तिष्ठन् । सर्वेभ्यो लोकेभ्योऽन्तरो यꣳ
सर्वे लोका न विदुर्यस्य सर्वे लोकाः शरीरं यः सर्वाँल्लोकानन्तरो यमयति स
तऽआत्मान्तर्याम्यमृत इत्युऽएवाधिलोकमथाधिवेदम् ॥१७॥ यः सर्वेषु वेदेषु ति-
ष्ठन् । सर्वेभ्यो वेदेभ्योऽन्तरो° °इत्युऽएवाधिवेदमथाधियज्ञम् ॥१८॥ यः सर्वेषु
यज्ञेषु तिष्ठन् । सर्वेभ्यो यज्ञेभ्योऽन्तरो° °इत्युऽएवाधियज्ञमथाधिभूतम् ॥१९॥ यः
सर्वेषु भूतेषु तिष्ठन् । सर्वेभ्यो भूतेभ्योऽन्तरो यꣳ सर्वाणि भूतानि न विदुर्यस्य
सर्वाणि भूतानि शरीरं यः सर्वाणि भूतान्यन्तरो यमयति स तऽआत्मान्त-
र्याम्यमृत इत्युऽएवाधिभूतमथाध्यात्मम् ॥२०॥ यः प्राणे तिष्ठन् । प्राणादन्तरो
यं प्राणो न वेद यस्य प्राणः शरीरं यः प्राणमन्तरो यमयति स त
ऽआत्मान्तर्याम्यमृतः ॥२१॥ यो वाचि तिष्ठन् । वाचोऽन्तरो° ॥२२॥ यश्चक्षुषि
तिष्ठन् । चक्षुषोऽन्तरो° ॥२३॥ यः श्रोत्रे तिष्ठन् । श्रोत्रादन्तरो° ॥२४॥ यो म-
नसि तिष्ठन् । मनसोऽन्तरो° ॥२५॥ यस्त्वचि तिष्ठन् । त्वचोऽन्तरो° ॥२६॥ य-
स्तेजसि तिष्ठन् । तेजसोऽन्तरो° ॥२७॥ यस्तमसि तिष्ठन् । तमसोऽन्तरो° ॥२८॥
यो रेतसि तिष्ठन् । रेतसोऽन्तरो° ॥२९॥ य आत्मनि तिष्ठन् । आत्मनोऽन्तरो°
॥३०॥ अदृष्टो द्रष्टाश्रुतः श्रोता । अमतो मन्ताविज्ञातो विज्ञाता नान्योऽस्ति
द्रष्टा नान्योऽस्ति श्रोता नान्योऽस्ति मन्ता नान्योऽस्ति विज्ञातैष तऽआत्मान्त-
र्याम्यमृतोऽतोऽन्यदार्तं ततो होद्दालक आरुणिरुपरराम ॥३१॥ ब्राह्मणम् ॥
५ [६. ७.] ॥ ॥

अथ ह वाचक्नव्युवाच । ब्राह्मणा भगवन्तो हन्ताहमिमं याज्ञवल्क्यं द्वौ प्रश्नौ प्रक्ष्यामि तौ चेन्मे विवक्ष्यति न वै जातु युष्माकमिमं कश्चिद्ब्रह्मोद्यं जेतेति तौ चेन्मे न विवक्ष्यति मूर्धास्य विपतिष्यतीति पृच्छ गार्गीति ॥१॥ सा होवाच । अहं वै त्वा याज्ञवल्क्य यथा काश्यो वा वैदेहो वोग्रपुत्र उज्ज्यं धनुरधिज्यं कृत्वा द्वौ वाणवन्तौ सपत्नातिव्याधिनौ हस्ते कृत्वोपोत्तिष्ठेदेवमेवाहं त्वा द्वाभ्यां प्रश्नाभ्यामुपोदस्थां तौ मे ब्रूहीति पृच्छ गार्गीति ॥२॥ सा होवाच । यदूर्ध्वं याज्ञवल्क्य दिवो यदवाक्पृथिव्या यदन्तरा द्यावापृथिवीऽइमे यद्भूतं च भवच्च भविष्यच्चेत्याचक्षते कस्मिंस्तदोतं च प्रोतं चेति ॥३॥ स होवाच । यदूर्ध्वं गार्गि दिवो यदवाक्पृथिव्या यदन्तरा द्यावापृथिवीऽइमे यद्भूतं च भवच्च भविष्यच्चेत्याचक्षत ऽआकाशे तदोतं च प्रोतं चेति ॥४॥ सा होवाच । नमस्ते याज्ञवल्क्य यो म ऽएतं व्यवोचोऽपरस्मै धारयस्वेति पृच्छ गार्गीति ॥५॥ सा होवाच । यदूर्ध्वं याज्ञवल्क्य दिवो यदवाक्पृथिव्या यदन्तरा द्यावापृथिवीऽइमे यद्भूतं च भवच्च भविष्यच्चेत्याचक्षते कस्मिन्नेव तदोतं च प्रोतं चेति ॥६॥ स होवाच । यदूर्ध्वं गार्गि दिवो यदवाक्पृथिव्या यदन्तरा द्यावापृथिवीऽइमे यद्भूतं च भवच्च भविष्यच्चेत्याचक्षतऽआकाशऽएव तदोत च प्रोतं चेति कस्मिन्न्वाकाश ओतश्च प्रोतश्चेति ॥७॥ स होवाच । एतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्त्यस्थूलमनण्वह्रस्वमदीर्घमलोहितमस्नेहमच्छायमतमोऽवाय्वनाकाशमसङ्गमस्पर्शमगन्धमरसमचक्षुष्कमश्रोत्रमवागमनोऽतेजस्कमप्राणममुखमनामागोत्रमजरममरमभयममृतमरजोऽशब्दमविवृतमसंवृतमपूर्वमनपरमनन्तरमबाह्यं न तदश्नोति कं चन न तदश्नोति कश्चन ॥८॥ एतस्य वाऽअक्षरस्य । प्रशासने गार्गि द्यावापृथिवी विधृते तिष्ठत एतस्य वाऽअक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठत एतस्य वाऽअक्षरस्य प्रशासने गार्ग्यहोरात्राण्यर्धमासा मासा ऋतवः संवत्सरा विधृतास्ति-

ष्ठन्त्येतस्य वाऽअक्षरस्य प्रशासने गार्गि प्राच्योऽन्या नद्यः स्यन्दन्ते श्वेतेभ्यः पर्व-
तेभ्यः प्रतीच्योऽन्या यां-यां च दिशमेतस्य वाऽअक्षरस्य प्रशासने गार्गि ददतं
मनुष्याः प्रशꣳसन्ति यजमानं देवा दर्व्यं पितरोऽन्वायत्ताः ॥ ९॥ यो वाऽएतदक्ष-
रमविदित्वा गार्गि । अस्मिंलोके जुहोति ददाति तपस्यत्यपि बहूनि वर्षसहस्रा-
ण्यन्तवानेवास्य स लोको भवति यो वाऽएतदक्षरमविदित्वा गार्ग्यस्माल्लोकात्प्रै-
ति स कृपणोऽथ य एतदक्षरं गार्गि विदित्वास्माल्लोकात्प्रैति स ब्राह्मणः ॥१०॥
तद्वाऽएतदक्षरं गार्गि । अदृष्टं द्रष्टृश्रुतꣳ श्रोतृमतं मन्तृविज्ञातं विज्ञातृ नान्यदस्ति
द्रष्टृ नान्यदस्ति श्रोतृ नान्यदस्ति मन्तृ नान्यदस्ति विज्ञात्रेतद्वै तदक्षरं गार्गि य-
स्मिन्नाकाश ओतश्च प्रोतश्चेति ॥११॥ सा होवाच । ब्राह्मणा भगवन्तस्तदेव
बहु मन्यध्वं यदस्मान्नमस्कारेण मुच्याध्वै न वै जातु युष्माकमिमं कश्चिद्ब्रह्मोद्यं
जेतेति ततो ह वाचक्नव्युपरराम ॥१२॥ ब्राह्मणम् ॥ ६ [६. ८.] ॥ ॥

अथ हैनं विदग्धः शाकल्यः पप्रच्छ । कति देवा याज्ञवल्क्येति स हैतयैव
निविदा प्रतिपेदे यावन्तो वैश्वदेवस्य निविद्युच्यन्ते त्रयश्च त्री च शता त्रयश्च त्री
च सहस्रेत्योमिति होवाच ॥१॥ कत्येव देवा याज्ञवल्क्येति । त्रयस्त्रिꣳशदित्यो-
मिति होवाच कत्येव देवा याज्ञवल्क्येति षडित्योमिति होवाच कत्येव देवा
याज्ञवल्क्येति त्रय इत्योमिति होवाच कत्येव देवा याज्ञवल्क्येति द्वावित्योमि-
ति होवाच कत्येव देवा याज्ञवल्क्येत्यध्यर्ध इत्योमिति होवाच कत्येव देवा
याज्ञवल्क्येत्येक इत्योमिति होवाच कतमे ते त्रयश्च त्री च शता त्रयश्च त्री च
सहस्रेति ॥२॥ स होवाच । महिमान एवैषामेते त्रयस्त्रिꣳशत्त्वेव देवा इति क-
तमे ते त्रयस्त्रिꣳशदित्यष्टौ वसव एकादश रुद्रा द्वादशादित्यास्तऽएकत्रिꣳशदिन्द्र-
श्चैव प्रजापतिश्च त्रयस्त्रिꣳशाविति ॥३॥ कतमे वसव इति । अग्निश्च पृथिवी च
वायुश्चान्तरिक्षं चादित्यश्च द्यौश्च चन्द्रमाश्च नक्षत्राणि चैते वसव एतेषु हीदꣳ

सर्वं वसु हितमेते हीद७ सर्वं वासयन्ते तद्यदिद७ सर्वं वासयन्ते तस्माद्वसव इति ॥४॥ कतमे रुद्रा इति । दशेमे पुरुषे प्राणा आत्मैकादशस्ते यदास्मान्मर्त्याच्छरीरादुत्क्रामन्त्यथ रोदयन्ति तद्यद्रोदयन्ति तस्माद्रुद्रा इति ॥५॥ कतमऽआदित्या इति । द्वादश मासाः संवत्सरस्यैतऽआदित्या एते हीद७ सर्वमाददाना यन्ति तद्यदिद७ सर्वमाददाना यन्ति तस्मादादित्या इति ॥६॥ कतम इन्द्रः कतमः प्रजापतिरिति । स्तनयित्नुरेवेन्द्रो यज्ञः प्रजापतिरिति कतमः स्तनयित्नुरित्यशनिरिति कतमो यज्ञ इति पशव इति ॥७॥ कतमे षडिति । अग्निश्च पृथिवी च वायुश्चान्तरिक्षं चादित्यश्च द्यौश्चैते षडित्येते ह्येवेद७ सर्व७ षडिति ॥८॥ कतमे ते त्रयो देवा इतीमऽएव त्रयो लोका एषु हीमे सर्वे देवा इति कतमौ द्वौ देवावित्यन्नं चैव प्राणश्चेति कतमोऽध्यर्ध इति योऽयं पवतऽइति ॥९॥ तदाहुः । यदयमेक एव पवतेऽथ कथमध्यर्ध इति यदस्मिन्निद७ सर्वमध्यार्ध्नोत्तेनाध्यर्ध इति कतम एको देव इति स ब्रह्म त्यदित्याचक्षते ॥१०॥ पृथिव्येव यस्यायतनम् । चक्षुर्लोको मनोज्योतिर्यो वै तं पुरुषं विद्यात्सर्वस्यात्मनः परायण७ स वै वेदिता स्याद्याज्ञवल्क्य वेद वाऽअहं तं पुरुष७ सर्वस्यात्मनः परायणं यमात्थ य एवायं शारीरः पुरुषः स एष वदैव शाकल्य तस्य का देवतेति स्त्रिय इति होवाच ॥११॥ रूपाण्येव यस्यायतनम् । चक्षुर्लोको मनोज्योतिर्यो वै तं पुरुषं विद्यात्सर्वस्यात्मनः परायण७ स वै वेदिता स्याद्याज्ञवल्क्य वेद वाऽअहं तं पुरुष७ सर्वस्यात्मनः परायणं यमात्थ य एवासावादित्ये पुरुषः स एष वदैव शाकल्य तस्य का देवतेति चक्षुरिति होवाच ॥१२॥ आकाश एव यस्यायतनम् । चक्षुर्लोको मनो° °य एवायं वायौ पुरुषः स एष वदैव शाकल्य तस्य का देवतेति प्राण इति होवाच ॥१३॥ काम एव यस्यायतनम् । चक्षुर्लोको मनो° °य एवासौ चन्द्रे पुरुषः स एष वदैव शाकल्य तस्य का देवतेति मन इति हो-

वाच ॥१४॥ तेज एव यस्यायतनम् । चक्षुर्लोको मनो॰ ॰य एवायमग्नौ पुरुषः स एष वदैव शाकल्य तस्य का देवतेति वागिति होवाच ॥१५॥ तम एव यस्यायतनम् । चक्षुर्लोको मनो॰ ॰य एवायं छायामयः पुरुषः स एष वदैव शाकल्य तस्य का देवतेति मृत्युरिति होवाच ॥१६॥ आप एव यस्यायतनम् । चक्षुर्लोको मनो॰ ॰य एवायमप्सु पुरुषः स एष वदैव शाकल्य तस्य का देवतेति वरुण इति होवाच ॥१७॥ रेत एव यस्यायतनम् । चक्षुर्लोको मनो॰ ॰य एवायं पुत्रमयः पुरुषः स एष वदैव शाकल्य तस्य का देवतेति प्रजापतिरिति होवाच ॥१८॥ शाकल्येति होवाच याज्ञवल्क्यः । त्वाꣳ स्विदिमे ब्राह्मणा अङ्गारावक्षयणमक्रता३ इति ॥१९॥ याज्ञवल्क्येति होवाच शाकल्यो । यदिदं कुरुपञ्चालानां ब्राह्मणानत्यवादीः किं ब्रह्म विद्वानिति दिशो वेद सदेवाः सप्रतिष्ठा इति यद्दिशो वेत्थ सदेवाः सप्रतिष्ठाः ॥२०॥ किंदेवतोऽस्यां प्राच्यां दिश्यसीति । आदित्यदेवत इति स आदित्यः कस्मिन्प्रतिष्ठित इति चक्षुषीति कस्मिन्नु चक्षुः प्रतिष्ठितं भवतीति रूपेष्विति चक्षुषा हि रूपाणि पश्यति कस्मिन्नु रूपाणि प्रतिष्ठितानि भवन्तीति हृदयऽइति हृदयेन हि रूपाणि जानाति हृदये ह्येव रूपाणि प्रतिष्ठितानि भवन्तीत्येवमेवैतद्याज्ञवल्क्य ॥२१॥ किंदेवतोऽस्यां दक्षिणायां दिश्यसीति । यमदेवत इति स यमः कस्मिन्प्रतिष्ठित इति दक्षिणायामिति कस्मिन्नु दक्षिणा प्रतिष्ठिता भवतीति श्रद्धायामिति यदा ह्येव श्रद्धत्तेऽथ दक्षिणां ददाति श्रद्धायाꣳ ह्येव दक्षिणा प्रतिष्ठिता भवतीति कस्मिन्नु श्रद्धा प्रतिष्ठिता भवतीति हृदयऽइति हृदयेन हि श्रद्धत्ते हृदये ह्येव श्रद्धा प्रतिष्ठिता भवतीत्येवमेवैतद्याज्ञवल्क्य ॥२२॥ किंदेवतोऽस्यां प्रतीच्यां दिश्यसीति । वरुणदेवत इति स वरुणः कस्मिन्प्रतिष्ठित इत्यप्स्विति कस्मिन्न्वापः प्रतिष्ठिता भवन्तीति रेतसीति कस्मिन्नु रेतः प्रतिष्ठितं भवतीति हृदयऽइति तस्मादपि प्रतिरूपं जा-

तमाहुर्हृदयादिव सृप्तो हृदयादिव निर्मित इति हृदये ह्येव रेतः प्रतिष्ठितं भवतीत्येवमेवैतद्याज्ञवल्क्य ॥२३॥ किंदेवतोऽस्यामुदीच्यां दिश्यसीति । सोमदेवत इति स सोमः कस्मिन्प्रतिष्ठित इति दीक्षायामिति कस्मिन्नु दीक्षा प्रतिष्ठिता भवतीति सत्यऽइति तस्मादपि दीक्षितमाहुः सत्यं वदेति सत्ये ह्येव दीक्षा प्रतिष्ठिता भवतीति कस्मिन्नु सत्यं प्रतिष्ठितं भवतीति हृदयऽइति हृदयेन हि सत्यं जानाति हृदये ह्येव सत्यं प्रतिष्ठितं भवतीत्येवमेवैतद्याज्ञवल्क्य ॥२४॥ किंदेवतोऽस्यां ध्रुवायां दिश्यसीति । अग्निदेवत इति सोऽग्निः कस्मिन्प्रतिष्ठित इति वाचीति कस्मिन्नु वाक्प्रतिष्ठिता भवतीति मनसीति कस्मिन्नु मनः प्रतिष्ठितं भवतीति हृदयऽइति कस्मिन्नु हृदयं प्रतिष्ठितं भवतीति ॥२५॥ अहल्लिकेति होवाच याज्ञवल्क्यो । यत्रैतदन्यत्रास्मन्मन्यासै यत्रैतदन्यत्रास्मत्स्याच्छ्वानो वैनदद्युर्वयाꣳसि वैनद्विमथ्नीरन्निति ॥२६॥ कस्मिन्नु त्वं चात्मा च प्रतिष्ठितौ स्थ इति । प्राणऽइति कस्मिन्नु प्राणः प्रतिष्ठित इत्यपानऽइति कस्मिन्न्वपानः प्रतिष्ठित इति व्यानऽइति कस्मिन्नु व्यानः प्रतिष्ठित इत्युदानऽइति कस्मिन्नूदानः प्रतिष्ठित इति समानऽइति ॥२७॥ स एष नेति नेत्यात्मा । अगृह्यो न हि गृह्यतेऽशीर्यो न हि शीर्यतेऽसङ्गोऽसितो न सज्यते न व्यथतऽइत्येतान्यष्टावायतनान्यष्टौ लोका अष्टौ पुरुषाः स यस्तान्पुरुषान्व्युदुह्य प्रत्युह्यात्यक्रामीत्तं त्वौपनिषदं पुरुषं पृच्छामि तं चेन्मे न विवक्ष्यसि मूर्धा ते विपतिष्यतीति तꣳ ह शाकल्यो न मेने तस्य ह मूर्धा विपपात तस्य हाप्यन्यन्मन्यमानाः परिमोषिणोऽस्थीन्यपजह्रुः ॥२८॥ अथ ह याज्ञवल्क्य उवाच । ब्राह्मणा भगवन्तो यो वः कामयते स मा पृच्छतु सर्वे वा मा पृच्छत यो वः कामयते तं वः पृच्छानि सर्वान्वा वः पृच्छानीति ते ह ब्राह्मणा न दधृषुः ॥२९॥ तान्हैतैः श्लोकैः पप्रच्छ । यथा वृक्षो वनस्पतिस्तथैव पुरुषोऽमृषा । तस्य पर्णानि लोमानि त्वगस्योत्पा-

ठिका बहिः ॥३०॥ त्वच एवास्य रुधिरं प्रस्यन्दि त्वच उत्पटः । तस्मात्तदातुन्नात्प्रैति रसो वृक्षादिवाहतात् ॥३१॥ मांसान्यस्य शकराणि किनाटं स्नाव तत्स्थिरम् । अस्थीन्यन्तरतो दारूणि मज्जा मज्जोपमा कृता ॥३२॥ यद्वृक्षो वृक्णो रोहति मूलान्नवतरः पुनः । मर्त्यः स्विन्मृत्युना वृक्णः कस्मान्मूलात्प्ररोहति ॥३३॥ रेतस इति मा वोचत जीवतस्तत्प्रजायते । जात एव न जायते को न्वेनं जनयेत्पुनः ॥ धानारुह उ वै वृक्षोऽन्यतः प्रेत्य सम्भवः । यत्समूलमुद्वृहेयुर्वृक्षं न पुनराभवेत् ॥ मर्त्यः स्विन्मृत्युना वृक्णः कस्मान्मूलात्प्ररोहति । विज्ञानमानन्दं ब्रह्म रातेर्दातुः परायणम् । तिष्ठमानस्य तद्विद इति ॥३४॥ ब्राह्मणम् ॥७ [६. १.] ॥

जनको ह वैदेह आसां चक्रे । अथ ह याज्ञवल्क्य आवव्राज स होवाच जनको वैदेहो याज्ञवल्क्य किमर्थमचारीः पशूनिच्छन्नण्वन्तानित्युभयमेव सम्राडिति होवाच यत्ते कश्चिदब्रवीत्तच्छृणवामेति ॥१॥ अब्रवीन्म उदङ्कः शौल्वायनः । प्राणो वै ब्रह्मेति यथा मातृमान्पितृमानाचार्यवान्ब्रूयात्तथा तच्छौल्वायनोऽब्रवीत्प्राणो वै ब्रह्मेत्यप्राणतो हि किं स्यादित्यब्रवीत्तु ते तस्यायतनं प्रतिष्ठां न मेऽब्रवीदित्येकपाद्वा एतत्सम्राडिति ॥२॥ स वै नो ब्रूहि याज्ञवल्क्य । स एवायतनमाकाशः प्रतिष्ठा प्रियमित्येनदुपासीत का प्रियता याज्ञवल्क्य प्राण एव सम्राडिति होवाच प्राणस्य वै सम्राट्कामायायाज्यं याजयत्यप्रतिगृह्यस्य प्रतिगृह्णात्यपि तत्र वधाशङ्का भवति यां दिशमेति प्राणस्यैव सम्राट्कामाय प्राणो वै सम्राट् परमं ब्रह्म नैनं प्राणो जहाति सर्वाण्येनं भूतान्यभिक्षरन्ति ॥३॥ देवो भूत्वा देवानप्येति । य एवं विद्वानेतदुपास्ते हस्त्यृषभं सहस्रं ददामीति होवाच जनको वैदेहः स होवाच याज्ञवल्क्यः पिता मेऽमन्यत नाननुशिष्य हरेतेति क एव ते किमब्रवीदिति ॥४॥ अब्रवीन्मे जित्वा शैलिनो । वाग्वै ब्रह्मेति यथा

मातृमान्पितृमानाचार्यवान्ब्रूयात्तथा तच्छैलिनोऽब्रवीद्वाग्वै ब्रह्मेत्यवदतो हि किꣳ स्यादब्रवीत्तु ते तस्यायतनं प्रतिष्ठां न मेऽब्रवीदित्येकपाद्वाऽएतत्सम्राडिति ॥५॥ स वै नो ब्रूहि याज्ञवल्क्य । वागेवायतनमाकाशः प्रतिष्ठा प्रज्ञेत्येनदुपासीत का प्रज्ञता याज्ञवल्क्य वागेव सम्राडिति होवाच वाचा वै सम्राड्बन्धुः प्रज्ञायतऽऋग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरस इतिहासः पुराणं विद्या उपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्यानानि वाचैव सम्राट् प्रज्ञायन्ते वाग्वै सम्राट् परमं ब्रह्म नैनं वाग्जहाति सर्वाण्येनं भूतान्यभिक्षरन्ति ॥६॥ देवो भूत्वा देवानप्येति । य एवं विद्वानेतदुपास्ते हस्त्यृ° ॥७॥ अब्रवीन्मे वर्कुर्वार्ष्णः । चक्षुर्वै ब्रह्मेति यथा मातृमान्पितृमानाचार्यवान्ब्रूयात्तथा तद्वार्ष्णोऽब्रवीच्चक्षुर्वै ब्रह्मेत्यपश्यतो हि किꣳ स्यादब्रवीत्तु ते तस्यायतनं प्रतिष्ठां न मेऽब्रवीदित्येकपाद्वाऽएतत्सम्राडिति ॥८॥ स वै नो ब्रूहि याज्ञवल्क्य । चक्षुरेवायतनमाकाशः प्रतिष्ठा सत्यमित्येनदुपासीत का सत्यता याज्ञवल्क्य चक्षुरेव सम्राडिति होवाच चक्षुषा वै सम्राट् पश्यन्तमाहुरद्राक्षीरिति स आहाद्राक्षमिति तत्सत्यं भवति चक्षुर्वै सम्राट् परमं ब्रह्म नैनं चक्षुर्जहाति सर्वाण्येनं भूतान्यभिक्षरन्ति ॥९॥ देवो भूत्वा देवानप्येति य एवं विद्वानेतदुपास्ते हस्त्यृ° ॥१०॥ अब्रवीन्मे गर्दभीविपीतो भारद्वाजः । श्रोत्रं वै ब्रह्मेति यथा मातृमान्पितृमानाचार्यवान्ब्रूयात्तथा तद्भारद्वाजोऽब्रवीच्छ्रोत्रं वै ब्रह्मेत्यशृण्वतो हि किꣳ स्यादित्यब्रवीत्तु ते तस्यायतनं प्रतिष्ठां न मेऽब्रवीदित्येकपाद्वाऽएतत्सम्राडिति ॥११॥ स वै नो ब्रूहि याज्ञवल्क्य । श्रोत्रमेवायतनमाकाशः प्रतिष्ठानन्त इत्येनदुपासीत कानन्तता याज्ञवल्क्य दिश एव सम्राडिति होवाच तस्माद्वै सम्राड्यां कां च दिशं गच्छति नैवास्या अन्तं गच्छत्यनन्ता हि दिशः श्रोत्रꣳ हि दिशः श्रोत्रं वै सम्राट् परमं ब्रह्म नैनꣳ श्रोत्रं जहाति सर्वाण्येनं भूतान्यभिक्षरन्ति ॥१२॥ देवो भूत्वा देवानप्येति । य एवं विद्वानेतदुपास्ते हस्त्यृ°

xxxxxx*

॥१३॥ अब्रवीन्मे सत्यकामो जाबालो । मनो वै ब्रह्मेति यथा मातृमान्पितृमा-
नाचार्यवान्ब्रूयात्तथा तत्सत्यकामोऽब्रवीन्मनो वै ब्रह्मेत्यमनसो हि किँ स्या-
दित्यब्रवीत्तु ते तस्यायतनं प्रतिष्ठां न मेऽब्रवीदित्येकपाद्वा एतत्सम्राडिति ॥१४॥
स वै नो ब्रूहि याज्ञवल्क्य । मन एवायतनमाकाशः प्रतिष्ठानन्द इत्येनदुपासीत
कानन्दता याज्ञवल्क्य मन एव सम्राडिति होवाच मनसा वै सम्राट् स्त्रियमभि-
हार्यति तस्यां प्रतिरूपः पुत्रो जायते स आनन्दो मनो वै सम्राट् परमं ब्रह्म नैनं
मनो जहाति सर्वाण्येनं भूतान्यभिक्षरन्ति ॥१५॥ देवो भूत्वा देवानप्येति । य
एवं विद्वानेतदुपास्ते हस्त्यृ॰ ॥१६॥ अब्रवीन्मे विदग्धः शाकल्यो । हृदयं वै
ब्रह्मेति यथा मातृमान्पितृमानाचार्यवान्ब्रूयात्तथा तच्छाकल्योऽब्रवीद्धृदयं वै ब्रह्मे-
त्यहृदयस्य हि किँ स्यादित्यब्रवीत्तु ते तस्यायतनं प्रतिष्ठां न मेऽब्रवीदित्येक-
पाद्वा एतत्सम्राडिति ॥१७॥ स वै नो ब्रूहि याज्ञवल्क्य । हृदयमेवायतनमा-
काशः प्रतिष्ठा स्थितिरित्येनदुपासीत का स्थितिता याज्ञवल्क्य हृदयमेव सम्रा-
डिति होवाच हृदयं वै सम्राट् सर्वेषां भूतानां प्रतिष्ठा हृदयेन हि सर्वाणि भू-
तानि प्रतितिष्ठन्ति हृदयं वै सम्राट् परमं ब्रह्म नैनँ हृदयं जहाति सर्वाण्येनं
भूतान्यभिक्षरन्ति ॥१८॥ देवो भूत्वा देवानप्येति । य एवं विद्वानेतदुपास्ते ह-
स्त्यृषभँ सहस्रं ददामीति होवाच जनको वैदेहः स होवाच याज्ञवल्क्यः पिता
मेऽमन्यत नाननुशिष्य हरेतेति ॥१९॥ ब्राह्मणम् ॥ ८ [६. १०.] ॥ ॥

अथ ह जनको वैदेहः कूर्चादुपावसर्पन्नुवाच । नमस्ते याज्ञवल्क्यानु मा शा-
धीति स होवाच यथा वै सम्राण्महान्तमध्वानमेष्यन्रथं वा नावं वा समाददीतै-
वमेवैताभिरुपनिषद्भिः समाहितात्मास्येवं वृन्दारक आढ्यः सन्नधीतवेद उक्तोप-
निषत्क इतो विमुच्यमानः क्व गमिष्यसीति नाहं तद्भगवन्वेद यत्र गमिष्यामी-
त्यथ वै तेऽहं तद्वक्ष्यामि यत्र गमिष्यसीति ब्रवीतु भगवानिति ॥१॥ स होवाच

। इन्धो वै नामैष योऽयं दक्षिणेऽक्षन्पुरुषस्तं वाऽएतमिन्धꣳ सन्तमिन्द्र इत्याचक्षते परोऽक्षेणैव परोऽक्षप्रिया-इव हि देवाः प्रत्यक्षद्विषः ॥२॥ अथैतद्वामेऽक्षिणि पुरुषरूपम् । एषास्य पत्नी विराट् तयोरेष सꣳस्तावो य एषोऽन्तर्हृदयऽआकाशोऽथैनयोरेतदन्नं य एषोऽन्तर्हृदये लोहितपिण्डोऽथैनयोरेतत्प्रावरणं यदेतदन्तर्हृदये जालकमिवाथैनयोरेषा सृतिः सती संचरणी यैषा हृदयादूर्ध्वा नाड्युच्चरति ॥३॥ ता वाऽअस्यैताः । हिता नाम नाड्यो यथा केशः सहस्रधा भिन्न एताभिर्वाऽएतमास्रवदास्रवति तस्मादेष प्रविविक्ताहारतर-इव भवत्यस्माच्छारीरादात्मनः ॥४॥ तस्य वाऽएतस्य पुरुषस्य । प्राची दिक्प्राञ्चः प्राणा दक्षिणा दिग्दक्षिणाः प्राणाः प्रतीची दिक्प्रत्यञ्चः प्राणा उदीची दिगुदञ्चः प्राणा ऊर्ध्वा दिगूर्ध्वाः प्राणा अवाची दिगवाञ्चः प्राणा सर्वा दिशः सर्वे प्राणाः ॥५॥ स एष नेति नेत्यात्मा । अगृह्यो न हि गृह्यतेऽशीर्यो न हि शीर्यतेऽसङ्गोऽसितो न सज्यते न व्यथतेऽभयं वै जनक प्राप्तोऽसीति होवाच याज्ञवल्क्यः स होवाच जनको वैदेहो नमस्ते याज्ञवल्क्याभयं त्वागच्छताद्यो नो भगवन्नभयं वेदयसऽइमे विदेहा अयमहमस्मीति ॥६॥ ब्राह्मणम् ॥१ [६. ११.] ॥ पञ्चमः प्रपाठकः ॥ कण्डिकासंख्या१०७ ॥ षष्ठोऽध्यायः [१७.] ॥ ॥

जनकꣳ ह वैदेहं याज्ञवल्क्यो जगाम । समेनेन वदिष्यऽइत्यथ ह यज्जनकश्च वैदेहो याज्ञवल्क्यश्चाग्निहोत्रे समूदतुस्तस्मै ह याज्ञवल्क्यो वरं ददौ स ह कामप्रश्नमेव वव्रे तꣳ हास्मै ददौ तꣳ ह सम्राडेव पूर्वः पप्रच्छ ॥१॥ याज्ञवल्क्य किंज्योतिरयं पुरुष इति । आदित्यज्योतिः सम्राडिति होवाचादित्येनैवायं ज्योतिषास्ते पल्ययते कर्म कुरुते विपर्येतीत्येवमेवैतद्याज्ञवल्क्य ॥२॥ अस्तमितऽआदित्ये याज्ञवल्क्य । किंज्योतिरेवायं पुरुष इति चन्द्रज्योतिः सम्राडिति होवाच चन्द्रेणैवायं ज्योतिषास्ते पल्ययते कर्म कुरुते विपर्येतीत्येवमेवैतद्याज्ञवल्क्य

॥३॥ अस्तमितऽआदित्ये याज्ञवल्क्य । चन्द्रमस्यस्तमिते किंज्योतिरेवायं पुरुष इत्यग्निर्ज्योतिः सम्राडिति होवाचाग्निनैवायं ज्योतिषास्ते पल्ययते कर्म कुरुते विपर्येतीत्येवमेवैतद्याज्ञवल्क्य ॥४॥ अस्तमितऽआदित्ये याज्ञवल्क्य । चन्द्रमस्य-स्तमिते शान्तेऽग्नौ किंज्योतिरेवायं पुरुष इति वाग्ज्योतिः सम्राडिति होवाच वाचैवायं ज्योतिषास्ते पल्ययते कर्म कुरुते विपर्येतीति तस्माद्वै सम्राडपि यत्र स्वः पाणिर्न विनिर्ज्ञायतेऽथ यत्र वागुच्चरत्युपैव तत्र न्येतीत्येवमेवैतद्याज्ञवल्क्य ॥५॥ अस्तमितऽआदित्ये याज्ञवल्क्य । चन्द्रमस्यस्तमिते शान्तेऽग्नौ शान्तायां वा-चि किंज्योतिरेवायं पुरुष इत्यात्मज्योतिः सम्राडिति होवाचात्मनैवायं ज्योति-षास्ते पल्ययते कर्म कुरुते विपर्येतीति ॥६॥ ॥शतम्७४००॥ ॥ कतम आत्मेति । योऽयं विज्ञानमयः पुरुषः प्राणेषु हृद्यन्तर्ज्योतिः स समानः सन्नुभौ लोकौ सं-चरति ध्यायतीव लेलायतीव सधीः स्वप्नो भूत्वेमं लोकमतिक्रामति ॥७॥ स वा ऽअयं पुरुषो जायमानः । शरीरमभिसम्पद्यमानः पाप्मभिः सꣳसृज्यते स उत्क्रा-मन्म्रियमाणः पाप्मनो विजहाति मृत्यो रूपाणि ॥८॥ तस्य वाऽएतस्य पुरुषस्य । द्वेऽएव स्थाने भवत इदं च परलोकस्थानं च संध्यं तृतीयꣳ स्वप्नस्थानं तस्मि-न्संध्ये स्थाने तिष्ठन्नुभे स्थाने पश्यतीदं च परलोकस्थानं च ॥९॥ अथ यथाक्रमो ऽयं परलोकस्थाने भवति । तमाक्रममाक्रम्योभयान्पाप्मन आनन्दांश्च पश्यति स यत्रायं प्रस्वपित्यस्य लोकस्य सर्वावतो मात्रामपादाय स्वयं विहत्य स्वयं निर्माय स्वेन भासा स्वेन ज्योतिषा प्रस्वपित्यत्रायं पुरुषः स्वयंज्योतिर्भवति ॥१०॥ न तत्र रथा न रथयोगा न पन्थानो भवन्ति । अथ रथान्रथयोगान्पथः सृजते न तत्रानन्दा मुदः प्रमुदो भवन्त्यथानन्दान्मुदः प्रमुदः सृजते न तत्र वेशान्ताः स्रवन्त्यः पुष्करिण्यो भवन्त्यथ वेशान्ताः स्रवन्तीः पुष्करिणीः सृजते स हि कर्ता ॥११॥ तदप्येते श्लोकाः । स्वप्नेन शारीरमभिप्रहत्यासुप्तः सुप्तानभिचाकशीति । शुक्रमा-

दाय पुनरैति स्थानꣳ हिरण्मयः पौरुष एकहꣳसः ॥१२॥ प्राणेन रक्षन्नपरं कु-
लायं बहिष्कुलायादमृतश्चरित्वा । स ईयतेऽमृतो यत्रकामꣳ हिरण्मयः पौरुष
एकहꣳसः ॥१३॥ स्वप्नान्तऽउच्चावचमीयमानो रूपाणि देवः कुरुते बहूनि । उ-
तेव स्त्रीभिः सह मोदमानो जक्षदुतेवापि भयानि पश्यन् ॥१४॥ आराममस्य प-
श्यन्ति । न तं कश्चन पश्यतीति तं नायतं बोधयेदित्याहुर्दुर्भिषज्यꣳ हास्मै भव-
ति यमेष न प्रतिपद्यते ॥१५॥ अथो खल्वाहुः । जागरितदेश एवास्यैष यानि
ह्येव जाग्रत्पश्यति तानि सुप्त इत्यत्रायं पुरुषः स्वयंज्योतिर्भवतीत्येवमेवैतद्याज्ञ-
वल्क्य सोऽहं भगवते सहस्रं ददाम्यत ऊर्ध्वं विमोक्षायैव ब्रूहीति ॥१६॥ स वा
ऽएष एतस्मिन्त्स्वप्नान्ते । रत्वा चरित्वा दृष्ट्वैव पुण्यं च पापं च पुनः प्रतिन्यायं
प्रतियोन्याद्रवति बुद्धान्तायैव स यदत्र किंचित्पश्यत्यनन्वागतस्तेन भवत्यसङ्गो
ह्ययं पुरुष इत्येवमेवैतद्याज्ञवल्क्य सोऽहं भगवते सहस्रं ददाम्यत ऊर्ध्वं विमो-
क्षायैव ब्रूहीति ॥१७॥ तद्यथा महामत्स्यः । उभे कूलेऽअनुसंचरति पूर्वं चापरं
चैवमेवायं पुरुष एताऽउभावन्तावनुसंचरति स्वप्नान्तं च बुद्धान्तं च ॥१८॥ तद्य-
थास्मिन्नाकाशे । श्येनो वा सुपर्णो वा विपरिपत्य श्रान्तः सꣳहत्य पक्षौ संलया-
यैव ध्रियतऽएवमेवायं पुरुष एतस्माऽअन्ताय धावति यत्र सुप्तो न कं चन कामं
कामयते न कं चन स्वप्नं पश्यति ॥१९॥ ता वाऽअस्यैता । हिता नाम नाड्यो
यथा केशः सहस्रधा भिन्नस्तावताणिम्ना तिष्ठन्ति शुक्लस्य नीलस्य पिङ्गलस्य ह-
रितस्य लोहितस्य पूर्णा अथ यत्रैनं घ्नन्तीव जिनन्तीव हस्तीव विच्छाययति गर्त-
मिव पतति यदेव जाग्रद्भयं पश्यति तदत्राविद्यया भयं मन्यतेऽथ यत्र राजेव दे-
व-इवाहमेवेदꣳ सर्वमस्मीति मन्यते सोऽस्य परमो लोकोऽथ यत्र सुप्तो न कं
चन कामं कामयते न कं चन स्वप्नं पश्यति ॥२०॥ तद्वाऽअस्यैतत् । आत्मका-
ममाप्तकाममकामꣳ रूपं तद्यथा प्रियया स्त्रिया सम्परिष्वक्तो न बाह्यं किं चन

वेद नान्तरमेवमेवायꣳ शारीर आत्मा प्राज्ञेनात्मना सम्परिष्वक्तो न बाह्यं किं चन वेद नान्तरम् ॥२१॥ तद्वाऽअस्यैतत्। अतिच्छन्दोऽपहतपाप्माभयꣳ रूपमशोकान्तरमत्र पितापिता भवति मातामाता लोका अलोका देवा अदेवा वेदा अवेदा यज्ञा अयज्ञा अत्र स्तेनोऽस्तेनो भवति भ्रूणहाभ्रूणहा पौल्कसोऽपौल्कसश्चाण्डालोऽचाण्डालः श्रमणोऽश्रमणस्तापसोऽतापसोऽनन्वागतः पुण्येनान्वागतः पापेन तीर्णो हि तदा सर्वाञ्छोकान्हृदयस्य भवति ॥२२॥ यद्वै तन्न पश्यति। पश्यन्वै तद्द्रष्टव्यं न पश्यति न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यत्पश्येत् ॥२३॥ यद्वै तन्न जिघ्रति। जिघ्रन्वै तद्घ्रातव्यं न जिघ्रति न हि घ्रातुर्घ्राणाद्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यज्जिघ्रेत् ॥२४॥ यद्वै तन्न रसयति। विजानन्वै तद्रसं न रसयति न हि रसयितू रसाद्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यद्रसयेत् ॥२५॥ यद्वै तन्न वदति। वदन्वै तद्वक्तव्यं न वदति न हि वक्तुर्वचो विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यद्वदेत् ॥२६॥ यद्वै तन्न शृणोति। शृण्वन्वै तच्छ्रोतव्यं न शृणोति न हि श्रोतुः श्रुतेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यच्छृणुयात् ॥२७॥ यद्वै तन्न मनुते। मन्वानो वै तन्मन्तव्यं न मनुते न हि मन्तुर्मतेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यन्मन्वीत ॥२८॥ यद्वै तन्न स्पृशति। स्पृशन्वै तत्स्प्रष्टव्यं न स्पृशति न हि स्प्रष्टु स्पृष्टेर्विपरिलोपोऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यत्स्पृशेत् ॥२९॥ यद्वै तन्न विजानाति। विजानन्वै तद्विज्ञेयं न विजानाति न हि विज्ञातुर्विज्ञानाद्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यद्विजानीयात् ॥३०॥ सलिल एको द्रष्टाद्वैतो भवति। एष ब्रह्म-

लोकः सम्राडिति हैनमुवाचैषास्य परमा सम्पदेषोऽस्य परमो लोक एषोऽस्य परम आनन्द एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति ॥३१॥ स यो मनुष्याणाꣳ राद्धः समृद्धो भवति । अन्येषामधिपतिः सर्वैर्मानुष्यकैः कामैः सम्पन्नतमः स मनुष्याणां परम आनन्दः ॥३२॥ अथ ये शतं मनुष्याणामानन्दाः । स एकः पितॄणां जितलोकानामानन्दः ॥३३॥ अथ ये शतं पितॄणां जितलोकानामानन्दाः । स एकः कर्मदेवानामानन्दो ये कर्मणा देवत्वमभिसम्पद्यन्ते ॥३४॥ अथ ये शतं कर्मदेवानामानन्दाः । स एक आजानदेवानामानन्दो यश्च श्रोत्रियोऽवृजिनोऽकामहतः ॥३५॥ अथ ये शतमाजानदेवानामानन्दाः । स एको देवलोकऽआनन्दो यश्च श्रोत्रियोऽवृजिनोऽकामहतः ॥३६॥ अथ ये शतं देवलोकऽआनन्दाः । स एको गन्धर्वलोकऽआनन्दो यश्च श्रोत्रियोऽवृजिनोऽकामहतः ॥३७॥ अथ ये शतं गन्धर्वलोकऽआनन्दाः । स एकः प्रजापतिलोकऽआनन्दो यश्च श्रोत्रियोऽवृजिनोऽकामहतः ॥३८॥ अथ ये शतं प्रजापतिलोकऽआनन्दाः । स एको ब्रह्मलोकऽआनन्दो यश्च श्रोत्रियोऽवृजिनोऽकामहत एष ब्रह्मलोकः सम्राडिति हैनमनुशशासैतदमृतꣳ सोऽहं भगवते सहस्रं ददाम्यत ऊर्ध्वं विमोक्षायैव ब्रूहीति ॥३९॥ स वाऽएष एतस्मिन्त्सम्प्रसादे । रत्वा चरित्वा दृष्ट्वैव पुण्यं च पापं च पुनः प्रतिन्यायं प्रतियोन्याद्रवति बुद्धान्तायैव स यदत्र किंचित्पश्यत्यनन्वागतस्तेन भवत्यसङ्गो ह्ययं पुरुष इत्येवमेवैतद्याज्ञवल्क्य सोऽहं भगवते सहस्रं ददाम्यत ऊर्ध्वं विमोक्षायैव ब्रूहीति ॥४०॥ अत्र ह याज्ञवल्क्यो बिभयां चकार । मेधावी राजा सर्वेभ्यो मान्तेभ्य उदरौत्सीदिति स यत्राणिमानं न्येति जरया वोपतपता वाणिमानं निगच्छति यथाम्रं वोदुम्बरं वा पिप्पलं वा बन्धनात्प्रमुच्यतैवमेवायꣳ शारीर आत्मैभ्योऽङ्गेभ्यः सम्प्रमुच्य पुनः प्रतिन्यायं प्रतियोन्याद्रवति प्राणायैव ॥४१॥ तद्यथानः सुसमाहितम् । उत्सर्जद्यायादेवमेवायꣳ

शारीर आत्मा प्राज्ञेनात्मनान्वारूढ उत्सर्जन्याति ॥४२॥ तद्यथा राजानमायन्तम् । उग्राः प्रत्येनसः सूतग्रामण्योऽन्नैः पानैरावसथैः प्रतिकल्पन्तेऽयमायात्ययमागच्छतीत्येवꣳ हैवंविदꣳ सर्वाणि भूतानि प्रतिकल्पन्तऽइदं ब्रह्मायातीदमागच्छतीति ॥४३॥ तद्यथा राजानं प्रयियासन्तम् । उग्राः प्रत्येनसः सूतग्रामण्य उपसमायन्त्येवꣳ हैवंविदꣳ सर्वे प्राणा उपसमायन्ति यत्रैतदूर्ध्वोच्छ्वासी भवति ॥४४॥ ब्राह्मणम् ॥१ [७. १.] ॥ ॥

स यत्रायꣳ शारीर आत्माबल्यं नीत्य । संमोहमिव न्येत्यथैनमेते प्राणा अभिसमायन्ति स एतास्तेजोमात्राः समभ्याददानो हृदयमेवान्ववक्रामति ॥१॥ स यत्रैष चाक्षुषः । पुरुषः पराङ् पर्यावर्ततेऽथारूपज्ञो भवत्येकीभवति न पश्यतीत्याहुरेकीभवति न जिघ्रतीत्याहुरेकीभवति न रसयतीत्याहुरेकीभवति न वदतीत्याहुरेकीभवति न शृणोतीत्याहुरेकीभवति न मनुतऽइत्याहुरेकीभवति न स्पृशतीत्याहुरेकीभवति न विजानातीत्याहुः ॥२॥ तस्य हैतस्य । हृदयस्याग्रं प्रद्योतते तेन प्रद्योतेनैष आत्मा निष्क्रामति चक्षुष्टो वा मूर्ध्नो वान्येभ्यो वा शरीरदेशेभ्यस्तमुत्क्रामन्तं प्राणोऽनूत्क्रामति प्राणमनूत्क्रामन्तꣳ सर्वे प्राणा अनूत्क्रामन्ति संज्ञानमेवान्ववक्रामति स एष ज्ञः सविज्ञानो भवति तं विद्याकर्मणी समन्वारभेते पूर्वप्रज्ञा च ॥३॥ तद्यथा तृणजलायुका । तृणस्यान्तं गत्वात्मानमुपसꣳहरत्येवमेवायं पुरुष इदꣳ शरीरं निहत्याविद्यां गमयित्वात्मानमुपसꣳहरति ॥४॥ तद्यथा पेशस्कारी । पेशसो मात्रामपादायान्यन्नवतरं कल्याणतरꣳ रूपं तनुतऽएवमेवायं पुरुष इदꣳ शरीरं निहत्याविद्यां गमयित्वान्यन्नवतरꣳ रूपं तनुते पित्र्यं वा गान्धर्वं वा ब्राह्मं वा प्राजापत्यं वा दैवं वा मानुषं वान्येभ्यो वा भूतेभ्यः ॥५॥ स वाऽअयमात्मा । ब्रह्म विज्ञानमयो मनोमयो वाङ्मयः प्राणमयश्चक्षुर्मयः श्रोत्रमय आकाशमयो वायुमयस्तेजोमय आपोमयः पृथिवीमयः क्रोधम-

योऽक्रोधमयो हर्षमयोऽहर्षमयो धर्ममयोऽधर्ममयः सर्वमयस्तद्यदेदंमयोऽदोमय
इति यथाकारी यथाचारी तथा भवति साधुकारी साधुर्भवति पापकारी पापो
भवति पुण्यः पुण्येन कर्मणा भवति पापः पापेनेति ॥६॥ अथो खल्वाहुः ।
काममय एवायं पुरुष इति स यथाकामो भवति तथाक्रतुर्भवति यथाक्रतुर्भवति
तत्कर्म कुरुते यत्कर्म कुरुते तदभिसम्पद्यतऽइति ॥७॥ तदेष श्लोको भवति ।
तदेव सक्तः सह कर्मणैति लिङ्गं मनो यत्र निषक्तमस्य । प्राप्यान्तं कर्मणस्तस्य
यत्किंचेह करोत्ययम् । तस्माल्लोकात्पुनरैत्यस्मै लोकाय कर्मणऽइति नु का-
मयमानोऽथाकामयमानो योऽकामो निष्काम आत्मकाम आप्तकामो भवति न
तस्मात्प्राणा उत्क्रामन्त्यत्रैव समवनीयन्ते ब्रह्मैव सन्ब्रह्माप्येति ॥८॥ तदेष श्लो-
को भवति । यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि स्थिताः । अथ मर्त्योऽमृतो
भवत्यत्र ब्रह्म समश्नुतऽइति ॥९॥ तद्यथाहिनिर्ल्वयनी । वल्मीके मृता प्रत्यस्ता
शयीतैवमेवेदꣳ शरीरꣳ शेतेऽथायमनस्थिकोऽशरीरः प्राज्ञ आत्मा ब्रह्मैव लोक
एव सम्राडिति होवाच याज्ञवल्क्यः सोऽहं भगवते सहस्रं ददामीति होवाच
जनको वैदेहः ॥१०॥ तदप्येते श्लोकाः । अणुः पन्था विततः पुराणो माꣳस्पृष्टो
ऽनुवित्तो मयैव । तेन धीरा अपियन्ति ब्रह्मविद उत्क्रम्य स्वर्गं लोकमितो वि-
मुक्ताः ॥११॥ तस्मिञ्छुक्लमुत नीलमाहुः पिङ्गलं हरितं लोहितं च । एष पन्था
ब्रह्मणा हानुवित्तस्तेनैति ब्रह्मवित्तैजसः पुण्यकृच्च ॥१२॥ अन्धं तमः प्रविशन्ति
येऽसम्भूतिमुपासते । ततो भूयऽइव ते तमो यऽउ सम्भूत्याꣳ रताः ॥१३॥ असु-
र्या नाम ते लोकाः । अन्धेन तमसावृताः । ताꣳस्ते प्रेत्यापिगच्छन्त्यविद्वाꣳसोऽबुधा
जनाः ॥१४॥ तदेव सन्तस्तदु तद्वामो न चेदवेदी महती विनष्टिः । ये तद्वि-
दुरमृतास्ते भवन्त्यथेतरे दुःखमेवोपयन्ति ॥१५॥ आत्मानं चेद्विजानीयादयमस्मीति
पुरुषः । किमिच्छन्कस्य कामाय शरीरमनु संचरेत् ॥१६॥ यस्यानुवित्तः प्रतिबुद्ध

आत्मास्मिन्त्संदेहे गहने प्रविष्टः । स विश्वकृत्स हि सर्वस्य कर्ता तस्य लोकः स उ लोक एव ॥१७॥ यदैतमनुपश्यति । आत्मानं देवमञ्जसा ईशानं भूतभव्यस्य न तदा विचिकित्सति ॥१८॥ यस्मिन्पञ्च पञ्चजनाः आकाशश्च प्रतिष्ठितः । तमेव मन्यऽआत्मानं विद्वान्ब्रह्मामृतोऽमृतम् ॥१९॥ यस्मादर्वाक्संवत्सरोऽहोभिः परिवर्तते । तद्देवा ज्योतिषां ज्योतिरायुर्होपासतेऽमृतम् ॥२०॥ प्राणस्य प्राणम् । उत चक्षुषश्चक्षुरुत श्रोत्रस्य श्रोत्रमन्नस्यान्नं मनसो ये मनो विदुः । ते निचिक्युर्ब्रह्म पुराणमग्र्यं मनसैवाप्तव्यं नेह नानास्ति किं चन ॥२१॥ मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति । मनसैवानुद्रष्टव्यमेतदप्रमयं ध्रुवम् ॥२२॥ विरजः पर आकाशात् । अज आत्मा महा ध्रुवः । तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः । नानुध्यायाद्बहूञ्छब्दान्वाचो विग्लापनꣳ हि तदिति ॥२३॥ स वाऽअयमात्मा । सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपतिः सर्वमिदं प्रशास्ति यदिदं किं च स न साधुना कर्मणा भूयान्नोऽएवासाधुना कनीयानेष भूताधिपतिरेष लोकेश्वर एष लोकपालः स सेतुर्विधरण एषां लोकानामसम्भेदाय ॥२४॥ तमेतं वेदानुवचनेन विविदिषन्ति । ब्रह्मचर्येण तपसा श्रद्धया यज्ञेनानाशकेन चैतमेव विदित्वा मुनिर्भवत्येतमेव प्रव्राजिनो लोकमीप्सन्तः प्रव्रजन्ति ॥२५॥ एतद्ध स्म वै तत्पूर्वे ब्राह्मणाः । अनूचाना विद्वाꣳसः प्रजां न कामयन्ते किं प्रजया करिष्यामो येषां नोऽयमात्मायं लोक इति ते ह स्म पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्ति या ह्येव पुत्रैषणा सा वित्तैषणा या वित्तैषणा सा लोकैषणोभे ह्येतेऽएषणे एव भवतः ॥२६॥ स एष नेति नेत्यात्मा । अगृह्यो न हि गृह्यतेऽशीर्यो न हि शीर्यतेऽसङ्गोऽसितो न सज्यते न व्यथतऽइत्यतः पापमकरवमित्यतः कल्याणमकरवमित्युभेऽउभे ह्येष एते तरत्यमृतः साध्वसाधुनी नैनं कृताकृते तपतो नास्य केन चन कर्मणा लोको

मीयते ॥२७॥ तदेतदृचाभ्युक्तम् । एष नित्यो महिमा ब्राह्मणस्य न कर्मणा वर्धते नो कनीयान् । तस्यैव स्यात्पदवित्तं विदित्वा न कर्मणा लिप्यते पापकेनेति तस्मादेवंविच्छान्तो दान्त उपरतस्तितिक्षुः श्रद्धावित्तो भूत्वात्मन्येवात्मानं पश्येत्सर्वमेनं पश्यति सर्वोऽस्यात्मा भवति सर्वस्यात्मा भवति सर्वं पाप्मानं तरति नैनं पाप्मा तरति सर्वं पाप्मानं तपति नैनं पाप्मा तपति विपापो विजरो विजिघत्सोऽपिपासो ब्राह्मणो भवति य एवं वेद ॥२८॥ स वा ऽएष महानज आत्मा । ऽन्नादो वसुदानः स यो हैवमेतं महान्तमजमात्मानमन्नादं वसुदानं वेद विन्दते वसु ॥२९॥ स वा ऽएष महानज आत्मा । ऽजरोऽमरोऽभयोऽमृतो ब्रह्माभयं वै जनक प्राप्तोऽसीति होवाच याज्ञवल्क्यः सोऽहं भगवते विदेहान्ददामि मां चापि सह दास्यायेति ॥३०॥ स वा ऽएष महानज आत्मा । अजरोऽमरोऽभयोऽमृतो ब्रह्माभयं वै ब्रह्माभयꣳ हि वै ब्रह्म भवति य एवं वेद ॥३१॥ ब्राह्मणम् ॥२ [८. २.] ॥ ॥

अथ ह याज्ञवल्क्यस्य द्वे भार्ये बभूवतुः । मैत्रेयी च कात्यायनी च तयोर्ह मैत्रेयी ब्रह्मवादिनी बभूव स्त्रीप्रज्ञेव कात्यायनी सोऽन्यद्वृत्तमुपाकरिष्यमाणः ॥१॥ याज्ञवल्क्यो मैत्रेयीति होवाच । प्रव्रजिष्यन्वा ऽअरेऽहमस्मात्स्थानादस्मि हन्त तेऽनया कात्यायन्यान्तं करवाणीति ॥२॥ सा होवाच मैत्रेयी । यन्नु म ऽइयं भगोः सर्वा पृथिवी वित्तेन पूर्णा स्यात्स्यां न्वहं तेनामृताहो३ नेति नेति होवाच याज्ञवल्क्यो यथैवोपकरणवतां जीवितं तथैव ते जीवितꣳ स्यादमृतत्वस्य तु नाशास्ति वित्तेनेति ॥३॥ सा होवाच मैत्रेयी । येनाहं नामृता स्यां किमहं तेन कुर्यां यदेव भगवान्वेद तदेव मे ब्रूहीति ॥४॥ स होवाच याज्ञवल्क्यः । प्रिया खलु नो भवती सती प्रियमवृतद्धन्त खलु भवति तेऽहं तद्वक्ष्यामि व्याख्यास्यामि ते वाचं तु मे व्याचक्षाणस्य निदिध्यासस्वेति ब्रवीतु भग-

वानिति ॥५॥ स होवाच याज्ञवल्क्यो । न वाऽअरे पत्युः कामाय पतिः प्रियो भवत्यात्मनस्तु कामाय पतिः प्रियो भवति ° ° देवाः प्रिया भवन्ति न वाऽअरे वेदानां कामाय वेदाः प्रिया भवन्त्यात्मनस्तु कामाय वेदाः प्रिया भवन्ति न वाऽअरे यज्ञानां कामाय यज्ञाः प्रिया भवन्त्यात्मनस्तु कामाय यज्ञाः प्रिया भवन्ति न वाऽअरे भूतानां कामाय भूतानि प्रियाणि भवन्त्यात्मनस्तु कामाय भूतानि प्रियाणि भवन्ति न वाऽअरे सर्वस्य कामाय सर्वं प्रियं भवत्यात्मनस्तु कामाय सर्वं प्रियं भवत्यात्मा न्वरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यो मैत्रेय्यात्मनि वाऽअरे दृष्टे श्रुते मते विज्ञातऽइदꣳ सर्वं विदितम् ॥६॥ ब्रह्म तं परादात् । ° ° योऽन्यत्रात्मनो देवान्वेद वेदास्तं परादुर्योऽन्यत्रात्मनो वेदान्वेद यज्ञास्तं परादुर्योऽन्यत्रात्मनो यज्ञान्वेद भूतानि तं परादुर्योऽन्यत्रात्मनो भूतानि वेद सर्वं तं परादाद्योऽन्यत्रात्मनः सर्वं वेदेदं ब्रह्मेदं क्षत्रमिमे लोका इमे देवा इमे वेदा इमे यज्ञा इमानि भूतानीदꣳ सर्वं यदयमात्मा ॥७॥ स यथा दुन्दुभेर्हन्य° ° ° ॥८॥ स यथा वीणायै° ° ॥९॥ स यथा शङ्खस्य° ° ॥१०॥ स यथार्द्रैधाग्नेर° ° सूत्राण्यनुव्याख्यानानि व्याख्यानानि दत्तꣳ हुतमाशितं पायितमयं च लोकः परश्च लोकः सर्वाणि च भूतान्यस्यैवैतानि सर्वाणि निश्वसितानि ॥११॥ स यथा सर्वासामपाꣳ समुद्र एकायन° ° ॥२१॥ स यथा सैन्धवघनो । ऽनन्तरोऽबाह्यः कृत्स्नो रसघन एव स्यादेवं वाऽअरऽइदं महद्भूतमनन्तमपारं कृत्स्नः प्रज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति न प्रेत्य संज्ञास्तीत्यरे ब्रवीमीति होवाच याज्ञवल्क्यः ॥१३॥ सा होवाच मैत्रेयी । अत्रैव मा भगवान्मोहान्तमापीपदन्न वाऽअहमिदं विजानामि न प्रेत्य संज्ञास्तीति ॥१४॥ स होवाच याज्ञवल्क्यो । न वाऽअरेऽहं मोहं ब्रवीम्यविनाशी वाऽअरेऽयमात्मानुच्छित्तिधर्मा मात्रासꣳसर्गस्त्वस्य भवति ॥१५॥ यद्वै तन्न पश्यति° ॥१६॥ यद्वै तन्न जिघ्रति° ॥१७॥ यद्वै

तन्न रसयति° ॥१८॥ यद्वै तन्न वदति° ॥१९॥ यद्वै तन्न शृणोति° ॥२०॥ यद्वै तन्न मनुते° ॥२१॥ यद्वै तन्न स्पृशति° ॥२२॥ यद्वै तन्न विजानाति° ॥२३॥ यत्र वाऽअन्यदिव स्यात् । तत्रान्योऽन्यत्पश्येदन्योऽन्यज्जिघ्रेदन्योऽन्यद्रसयेदन्योऽन्यदभिवदेदन्योऽन्यच्छृणुयादन्योऽन्यन्मन्वीतान्योऽन्यत्स्पृशेदन्योऽन्यद्विजानीयात् ॥२४॥ यत्र त्वस्य सर्वमात्मैवाभूत् । तत्केन कं पश्येत्तत्केन कं जिघ्रेत्तत्केन कꣳ रसयेत्तत्केन कमभिवदेत्तत्केन कꣳ शृणुयात्तत्केन कं मन्वीत तत्केन कꣳ स्पृशेत्तत्केन कं विजानीयाद्येनेदꣳ सर्वं विजानाति तं केन विजानीयाद्विज्ञातारमरे केन विजानीयादित्युक्तानुशासनासि मैत्रेय्येतावदरे खल्वमृतत्वमिति होक्त्वा याज्ञवल्क्यः प्रवव्राज ॥२५॥ अथ वꣳशः । तदिदं वयꣳ शौर्पणाय्याच्छौर्पणाय्यो गौतमाद्गौतमो वात्स्याद्वात्स्यो वात्स्याच्च पाराशर्याच्च पाराशर्यः सांकृत्याच्च भारद्वाजाच्च भारद्वाज औदवाहेश्च शाण्डिल्याच्च शाण्डिल्यो वैजवापाच्च गौतमाच्च गौतमो वैजवापायनाच्च वैष्टपुरेयाच्च वैष्टपुरेयः शाण्डिल्याच्च रौहिणायनाच्च रौहिणायनः शौनकाच्च जैवन्तायनाच्च रैभ्याच्च रैभ्यः पौतिमाष्यायणाच्च कौण्डिन्यायनाच्च कौण्डिन्यायनः कौण्डिन्याभ्यां कौण्डिन्याऽऔर्णवाभेभ्य और्णवाभाः कौण्डिन्यात्कौण्डिन्यः कौण्डिन्यात्कौण्डिन्यः कौण्डिन्याच्चाग्निवेश्याच्च ॥२६॥ आग्निवेश्यः सैतवात् । सैतवः पाराशर्यात्पाराशर्यो जातूकर्ण्याज्जातूकर्ण्यो भारद्वाजाद्भारद्वाजो भारद्वाजाच्चासुरायणाच्च गौतमाच्च गौतमो भारद्वाजाद्भारद्वाजो वलाकाकौशिकाद्वलाकाकौशिकः काषायणात्काषायणः सौकरायणात्सौकरायणस्त्रैवणेस्त्रैवणिरौपजन्धनेरौपजन्धनिः सायकायनात्सायकायनः कौशिकायनेः कौशिकायनिर्घृतकौशिकाद्घृतकौशिकः पाराशर्यायणात्पाराशर्यायणः पाराशर्यात्पाराशर्यो जातूकर्ण्याज्जातूकर्ण्यो भारद्वाजाद्भारद्वाजो भारद्वाजाच्चासुरायणाच्च यास्काच्चासुरायणस्त्रैवणेस्त्रैवणिरौपजन्धनेरौपजन्धनिरासुरेरासुरिर्भारद्वाजाद्भारद्वाज आत्रेयात् ॥२७॥ आत्रेयो माण्टेः । माण्टिर्गौ-

तमाद्गौतमो गौतमाद्गौतमो वात्स्याद्वात्स्यः शाण्डिल्याच्छाण्डिल्यः कैशोर्यात्काप्यात्कैशोर्यः काप्यः कुमारहारितात्कुमारहारितो गालवाद्गालवो विदर्भीकौण्डिन्याद्विदर्भीकौण्डिन्यो वत्सनपातो बाभ्रवाद्वत्सनपाद्बाभ्रवः पथः सौभरात्पन्थाः सौभरोऽयास्यादाङ्गिरसादयास्य आङ्गिरस आभूतेस्त्वाष्ट्रादाभूतिस्त्वाष्ट्रो विश्वरूपात्त्वाष्ट्राद्विश्वरूपस्त्वाष्ट्रोऽश्विभ्यामश्विनौ दधीच आथर्वणाद्दध्यङ्ङाथर्वणोऽथर्वणो दैवादथर्वा दैवो मृत्योः प्राध्वꣳसनान्मृत्युः प्राध्वꣳसनः प्रध्वꣳसनात्प्रध्वꣳसन एकर्षेरेकर्षिर्विप्रजित्तेर्विप्रजित्तिर्व्यष्टेर्व्यष्टिः सनारोः सनारुः सनातनात्सनातनः सनगात्सनगः परमेष्ठिनः परमेष्ठी ब्रह्मणो ब्रह्म स्वयम्भु ब्रह्मणे नमः ॥२८॥ ब्राह्मणम् ॥३ [७. ३.] ॥ सप्तमोऽध्यायः [१८.] ॥ ॥

पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते । पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यत ऽओम् खं ब्रह्म खं पुराणं वायुरं खमिति ह स्माह कौरव्यायणीपुत्रो वेदोऽयं ब्राह्मणा विदुर्वेदैनेन यद्वेदितव्यम् ॥१॥ ब्राह्मणम् ॥४ [८. १.] ॥ ॥

त्रयाः प्राजापत्याः । प्रजापतौ पितरि ब्रह्मचर्यमूषुर्देवा मनुष्या असुराः ॥१॥ उषित्वा ब्रह्मचर्यं देवा ऊचुः । ब्रवीतु नो भवानिति तेभ्यो हैतदक्षरमुवाच द इति व्यज्ञासिष्टा३ इति व्यज्ञासिष्मेति होचुर्दाम्यतेति न आत्थेत्योमिति होवाच व्यज्ञासिष्टेति ॥२॥ ॥ शतम् ७५०० ॥ ॥ अथ हैनं मनुष्या ऊचुः । ब्रवीतु नो भवानिति तेभ्यो हैतदेवाक्षरमुवाच द इति व्यज्ञासिष्टा३ इति व्यज्ञासिष्मेति होचुर्दत्तेति न आत्थेत्योमिति होवाच व्यज्ञासिष्टेति ॥३॥ अथ हैनमसुरा ऊचुः । ब्रवीतु नो भवानिति तेभ्यो हैतदेवाक्षरमुवाच द इति व्यज्ञासिष्टा३ इति व्यज्ञासिष्मेति होचुर्दयध्वमिति न आत्थेत्योमिति होवाच व्यज्ञासिष्टेति तदेतदेवैषा दैवी वागनुवदति स्तनयित्नुर्दद द इति दाम्यत दत्त दयध्वमिति तदेतत्त्रयꣳ शिक्षेद्दमं दानं दयामिति ॥४॥ ब्राह्मणम् ॥५ [८. २.] ॥ ॥

वायुरनिलममृतमथेदं भस्मान्तꣳ शरीरम् । ओ३म् क्रतो स्मर क्लिबे स्मर कृतꣳ स्मर ॥ अग्ने नय सुपथा राये अस्मान्विश्वानि देव वयुनानि विद्वान् युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नमउक्तिं विधेमेति ॥१॥ ब्राह्मणम् ॥६ [८. ३.] ॥ ॥

एष प्रजापतिर्यद्धृदयम् । एतद्ब्रह्मैतत्सर्वं तदेतत्त्र्यक्षरꣳ हृदयमिति हृ इत्येकमक्षरमभिहरन्त्यस्मै स्वाश्चान्ये च य एवं वेद द इत्येकमक्षरं ददत्यस्मै स्वाश्चान्ये च य एवं वेद यमित्येकमक्षरमेति स्वर्गं लोकं य एवं वेद ॥१॥ ब्राह्मणम् ॥७ [८. ४.] ॥ ॥

तद्वै तदेतदेव तदास । सत्यमेव स यो हैवमेतन्महद्यक्षं प्रथमजं वेद सत्यं ब्रह्मेति जयतीमाँल्लोकाञ्जित इन्न्वसावसद्य एवमेतन्महद्यक्षं प्रथमजं वेद सत्यं ब्रह्मेति सत्यꣳ ह्येव ब्रह्म ॥१॥ ब्राह्मणम् ॥८ [८. ५.] ॥ ॥

आप एवेदमग्र आसुः । ता आपः सत्यमसृजन्त सत्यं ब्रह्म प्रजापतिं प्रजापतिर्देवान् ॥१॥ ते देवाः सत्यमित्युपासते । तदेतत्त्र्यक्षरꣳ सत्यमिति स इत्येकमक्षरं तीत्येकमक्षरममित्येकमक्षरं प्रथमोत्तमे अक्षरे सत्यं मध्यतोऽनृतं तदेतदनृतꣳ सत्येन परिगृहीतꣳ सत्यभूयमेव भवति नैवंविद्वाꣳसमनृतꣳ हिनस्ति ॥२॥ तद्यत्तत्सत्यम् । असौ स आदित्यो य एष एतस्मिन्मण्डले पुरुषो यश्चायं दक्षिणेऽक्षन्पुरुषस्तावेतावन्योऽन्यस्मिन्प्रतिष्ठितौ रश्मिभिर्वा एषोऽस्मिन्प्रतिष्ठितः प्राणैरयममुष्मिन्स यदोत्क्रमिष्यन्भवति शुद्धमेवैतन्मण्डलं पश्यति नैनमेते रश्मयः प्रत्यायन्ति ॥३॥ य एष एतस्मिन्मण्डले पुरुषः । तस्य भूरिति शिर एकꣳ शिर एकमेतदक्षरं भुव इति बाहू द्वौ बाहू द्वे एते अक्षरे स्वरिति प्रतिष्ठा द्वे प्रतिष्ठे द्वे एते अक्षरे तस्योपनिषदहरिति हन्ति पाप्मानं जहाति च य एवं वेद ॥४॥ अथ योऽयं दक्षिणेऽक्षन्पुरुषः । तस्य भूरिति शिर एकꣳ शिर एकमेतदक्षरं भुव इति बाहू द्वौ बाहू द्वे एते अक्षरे स्वरिति प्रतिष्ठा द्वे प्रतिष्ठे द्वे एते अक्षरे

तस्योपनिषदहमिति हन्ति पाप्मानं जहाति च य एवं वेद ॥५॥ ब्राह्मणम् ॥९ [८. ६.] ॥ ॥

विद्युद्ब्रह्मेत्याहुः । विदानाद्विद्युद्विद्यत्येनꣳ सर्वस्मात्पाप्मनो य एव वेद विद्युद्ब्रह्मेति विद्युद्ध्येव ब्रह्म ॥१॥ ब्राह्मणम् ॥१० [८. ७.] ॥ ॥

मनोमयोऽयं पुरुषो । भाःसत्यस्तस्मिन्नन्तर्हृदये यथा व्रीहिर्वा यवो वैवमयमन्तरात्मन्पुरुषः स एष सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपतिः सर्वमिदं प्रशास्ति यदिदं किं च य एवं वेद ॥१॥ ब्राह्मणम् ॥११ [८. ८.] ॥ ॥

वाचं धेनुमुपासीत । तस्याश्चत्वार स्तनाः स्वाहाकारो वषट्कारो हन्तकारः स्वधाकारस्तस्यै द्वौ स्तनौ देवा उपजीवन्ति स्वाहाकारं च वषट्कारं च हन्तकारं मनुष्याः स्वधाकारं पितरस्तस्याः प्राण ऋषभो मनो वत्सः ॥१॥ ब्राह्मणम् ॥१२ [८. ९.] ॥ ॥

अयमग्निर्वैश्वानरो । योऽयमन्तः पुरुषे येनेदमन्नं पच्यते यदिदमद्यते तस्यैष घोषो भवति यमेतत्कर्णावपिधाय शृणोति स यदोत्क्रमिष्यन्भवति नैतं घोषꣳ शृणोति ॥१॥ ब्राह्मणम् ॥१३ [८. १०.] ॥ ॥

एतद्वै परमं तपो । यद्व्याहितस्तप्यते परमꣳ हैव लोकं जयति य एवं वेदैतद्वै परमं तपो यं प्रेतमरण्यꣳ हरन्ति परमꣳ हैव लोकं जयति य एवं वेदैतद्वै परमं तपो यं प्रेतमग्नावभ्यादधति परमꣳ हैव लोकं जयति य एवं वेद ॥१॥ ब्राह्मणम् ॥१४ [८. ११.] ॥ ॥

यदा वै पुरुषो । ऽस्माल्लोकात्प्रैति स वायुमागच्छति तस्मै स तत्र विजिहीते यथा रथचक्रस्य खं तेन स ऊर्ध्व आक्रमते स आदित्यमागच्छति तस्मै स तत्र विजिहीते यथाडम्बरस्य खं तेन स ऊर्ध्व आक्रमते स चन्द्रमसमागच्छति तस्मै स तत्र विजिहीते यथा दुन्दुभेः खं तेन स ऊर्ध्व आक्रमते स लोकमागच्छत्यशोक-

महिमं तस्मिन्वसति शश्वतीः समाः ॥१॥ ब्राह्मणम् ॥१५ [८. १२.] ॥ ॥

अन्नं ब्रह्मेत्येकऽआहुः । तन्न तथा पूयति वाऽअन्नमृते प्राणात्प्राणो ब्रह्मेत्येकऽआहुस्तन्न तथा शुष्यति वै प्राण ऋतेऽन्नादेते ह त्वेवे देवते एकधाभूयं भूत्वा परमतां गच्छतः ॥१॥ तद्ध स्माह प्रातृदः पितरम् । किꣳ स्विदेवैवं विदुषे साधु कुर्यात्किमेवास्माऽअसाधु कुर्यादिति स ह स्माह पाणिना मा प्रातृद कस्त्वेनयोरेकधाभूयं भूत्वा परमतां गच्छतीति ॥२॥ तस्माऽउ हैतदुवाच । वीत्यन्नं वै व्यन्ने हीमानि सर्वाणि भूतानि विष्टानि रमिति प्राणो वै रं प्राणे हीमानि सर्वाणि भूतानि रतानि सर्वाणि ह वाऽअस्मिन्भूतानि विशन्ति सर्वाणि भूतानि रमन्ते य एवं वेद ॥३॥ ब्राह्मणम् ॥१६ [८. १३.] ॥ ॥

उक्थम् । प्राणो वाऽउक्थं प्राणो हीदꣳ सर्वमुत्थापयत्युद्धास्माऽउक्थविद्वीरस्तिष्ठत्युक्थस्य सायुज्यꣳ सलोकतां जयति य एवं वेद ॥१॥ यजुः । प्राणो वै यजुः प्राणे हीमानि सर्वाणि भूतानि युज्यन्ते युज्यन्ते हास्मै सर्वाणि भूतानि श्रैष्ठ्याय यजुषः सायुज्यꣳ सलोकतां जयति य एवं वेद ॥२॥ साम । प्राणो वै साम प्राणे हीमानि सर्वाणि भूतानि सम्यञ्चि सम्यञ्चि हास्मिन्त्सर्वाणि भूतानि श्रैष्ठ्याय कल्पन्ते साम्नः सायुज्यꣳ सलोकतां जयति य एवं वेद ॥३॥ क्षत्रम् । प्राणो वै क्षत्रं प्राणो हि वै क्षत्रं त्रायते हैनं प्राणः क्षणितोः प्र क्षत्रमात्रमाप्नोति क्षत्रस्य सायुज्यꣳ सलोकतां जयति य एवं वेद ॥४॥ ब्राह्मणम् ॥१७ [८. १४.] ॥ षष्ठः प्रपाठकः । कण्डिकासंख्या१२१ ॥ ॥

भूमिरन्तरिक्षं द्यौरिति । अष्टावक्षराण्यष्टाक्षरꣳ ह वाऽएकं गायत्र्यै पदमेतदु हास्या एतत्स यावदेषु लोकेषु तावद्ध जयति योऽस्या एतदेवं पदं वेद ॥१॥ ऋचो यजूꣳषि सामानीति । अष्टावक्षराण्यष्टाक्षरꣳ ह वाऽएकं गायत्र्यै पदमेतदु हैवास्या एतत्स यावतीयं त्रयी विद्या तावद्ध जयति योऽस्या एतदेवं पदं वेद

॥ २ ॥ प्राणोऽपानो व्यान इति । अष्टावक्षराण्यष्टाक्षरꣳ ह वाऽएकं गायत्र्यै पदमेतदु हैवास्या एतत्स यावदिदं प्राणि तावद्ध जयति योऽस्या एतदेवं पदं वेद ॥ ३ ॥ अथास्या एतदेव । तुरीयं दर्शतं पदं परोरजा य एष तपति यद्वै चतुर्थं तत्तुरीयं दर्शतं पदमिति ददृशऽइव ह्येष परोरजा इति सर्वमु ह्येष रज उपर्युपरि तपत्येवꣳ हैव श्रिया यशसा तपति योऽस्या एतदेवं पदं वेद ॥ ४ ॥ सैषा गायत्र्येतस्मिंस्तुरीये । दर्शते पदे परोरजसि प्रतिष्ठिता तद्वै तत्सत्ये प्रतिष्ठिता चक्षुर्वै सत्यं चक्षुर्हि वै सत्यं तस्माद्यदिदानीं द्वौ विवदमानावेयातामहमदर्शमहमश्रौषमिति य एवं ब्रूयादहमदर्शमिति तस्माऽएव श्रद्दध्यात् ॥ ५ ॥ तद्वै तत्सत्यं बले प्रतिष्ठितम् । प्राणो वै बलं तत्प्राणे प्रतिष्ठितं तस्मादाहुर्बलꣳ सत्यादोगीय इत्येवम्वेषा गायत्र्यध्यात्मं प्रतिष्ठिता ॥ ६ ॥ सा हैषा गयांस्तत्रे । प्राणा वै गयास्तत्प्राणांस्तत्रे तद्यद्गयांस्तत्रे तस्माद्गायत्री नाम स यामेवामूमन्वाहैषैव सा स यस्माऽअन्वाह तस्य प्राणांस्त्रायते ॥ ७ ॥ ताꣳ हैके । सावित्रीमनुष्टुभमन्वाहुर्वागनुष्टुबेतद्वाचमनुब्रूम इति न तथा कुर्याद्गायत्रीमेवानुब्रूयाद्यदि ह वाऽअपि बह्विव प्रतिगृह्णाति न हैव तद्गायत्र्या एकं चन पदं प्रति ॥ ८ ॥ स य इमांस्त्रींलोकान् । पूर्णान्प्रतिगृह्णीयात्सोऽस्या एतत्प्रथमं पदमाप्नुयादथ यावतीयं त्रयी विद्या यस्तावत्प्रतिगृह्णीयात्सोऽस्या एतद्द्वितीयं पदमाप्नुयादथ यावदिदं प्राणि यस्तावत्प्रतिगृह्णीयात्सोऽस्या एतत्तृतीयं पदमाप्नुयादथास्या एतदेव तुरीयं दर्शतं पदं परोरजा य एष तपति नैव केन चनाप्यं कुत उऽएतावत्प्रतिगृह्णीयात् ॥ ९ ॥

तस्या उपस्थानम् । गायत्र्यस्येकपदी द्विपदी त्रिपदी चतुष्पद्यपदसि न हि पद्यसे

नमस्ते तुरीयाय दर्शताय पदाय परोरजसेऽसावदो मा प्रापदिति यं द्विष्यादसावस्मै कामो मा समर्द्धीति वा न हैवास्मै स कामः समृध्यते यस्माऽएवमुपतिष्ठतेऽहमदः प्रापमिति वा ॥ १० ॥ एतद्ध वै तज्जनको वैदेहो । बुडिलमाश्व-

तराश्विमुवाच यन्नु हो तद्गायत्रीविदब्रूथा अथ कथꣳ हस्ती भूतो वहसीति मुखꣳ ह्यस्याः सम्राण्न विदां चकरेति होवाच ॥११॥ तस्या अग्निरेव मुखम् । यदि ह वाऽअपि बह्विवाग्नावभ्यादधति सर्वमेव तत्संदहत्येवꣳ हैवैवंविद्यद्यपि बह्विव पापं करोति सर्वमेव तत्सम्प्साय शुद्धः पूतोऽजरोऽमृतः सम्भवति ॥१२॥ ब्राह्मणम् ॥१ [८. १५.] ॥ अष्टमोऽध्यायः [९९.] ॥ ॥

श्वेतकेतुर्ह वाऽआरुणेयः । पञ्चालानां परिषदमाजगाम स आजगाम जैवलं प्रवाहणं परिचारयमाणं तमुदीक्ष्याभ्युवाद कुमारा३ऽइति स भो३ऽइति प्रतिशुश्रावानुशिष्टो न्वसि पित्रेत्योमिति होवाच ॥१॥ वेत्थ यथेमाः प्रजाः । प्रयत्यो विप्रतिपद्यान्ता३ऽइति नेति होवाच वेत्थ यथेमं लोकं पुनरापद्यान्ता३ऽइति नेति हैवोवाच वेत्थ यथासौ लोक एवं बहुभिः पुनः-पुनः प्रयद्भिर्न सम्पूर्यता३ऽइति नेति हैवोवाच ॥२॥ वेत्थ यतिथ्यामाहुत्याꣳ हुतायाम् । आपः पुरुषवाचो भूत्वा समुत्थाय वदन्ती३ऽइति नेति हैवोवाच वेत्थो देवयानस्य वा पथः प्रतिपदं पितृयाणस्य वा यत्कृत्वा देवयानं वा पन्थानं प्रतिपद्यते पितृयाणं वा ॥३॥ अपि हि नऽऋषेर्वचः श्रुतम् । द्वे सृतीऽअशृणवं पितृणामहं देवानामुत मर्त्यानाम् ताभ्यामिदं विश्वमेजत्समेति यदन्तरा पितरं मातरं चेति नाहमत एकं चन वेदेति होवाच ॥४॥ अथ हैनं वसत्योपमन्त्रयां चक्रे । अनादृत्य वसतिं कुमारः प्रदुद्राव स आजगाम पितरं तꣳ होवाचेति वाव किल नो भवान्पुरानुशिष्टानवोच इति कथꣳ सुमेध इति पञ्च मा प्रश्नान्राजन्यबन्धुरप्राक्षीत्ततो नैकं चन वेदेति होवाच कतमे तऽइतीमऽइति ह प्रतीकान्युदाजहार ॥५॥ स होवाच । तथा नस्त्वं तात जानीथा यथा यदहं किं च वेद सर्वमहं तत्तुभ्यमवोचं प्रेहि तु तत्र प्रतीत्य ब्रह्मचर्यं वत्स्याव इति भवानेव गच्छत्विति ॥६॥ स आजगाम गौतमो । यत्र प्रवाहणस्य जैवलेरास तस्माऽआसनमाहृत्योदकमा-

हारयां चकाराथ हास्माऽअर्घं चकार ॥७॥ स होवाच । वरं भवते गौतमाय दद्म इति स होवाच प्रतिज्ञातो मऽएष वरो यां तु कुमारस्यान्ते वाचमभाषथास्तां मे ब्रूहीति ॥८॥ स होवाच । दैवेषु वै गौतम तद्वरेषु मानुषाणां ब्रूहीति ॥९॥ स होवाच । विज्ञायते हास्ति हिरण्यस्यापात्तं गोऽअश्वानां दासीनां प्रवराणां परिधानानां मा नो भवान्बहोरनन्तस्यापर्यन्तस्याभ्यवदान्यो भूदिति स वै गौतम तीर्थेनेच्छासाऽइत्युपैम्यहं भवन्तमिति वाचा ह स्मैव पूर्वऽउपयन्ति ॥१०॥ स होपायनकीर्त्याऽउवाच । तथा नस्त्वं गौतम मापराधास्तव च पितामहा यथेयं विद्येतः पूर्वं न कस्मिंश्चन ब्राह्मणऽउवास तां त्वहं तुभ्यं वक्ष्यामि को हि त्वैवं ब्रुवन्तमर्हति प्रत्याख्यातुमिति ॥११॥ असौ वै लोकोऽग्निर्गौतम । तस्यादित्य एव समिद्रश्मयो धूमोऽहरर्चिश्चन्द्रमा अङ्गारा नक्षत्राणि विष्फुलिङ्गास्तस्मिन्नेतस्मिन्नग्नौ देवाः श्रद्धां जुह्वति तस्या आहुतेः सोमो राजा सम्भवति ॥१२॥ पर्जन्यो वाऽअग्निर्गौतम । तस्य संवत्सर एव समिदभ्राणि धूमो विद्युदर्चिरशनिरङ्गारा ह्रादुनयो विष्फुलिङ्गास्तस्मिन्नेतस्मिन्नग्नौ देवाः सोमं जुह्वति तस्या आहुतेर्वृष्टिः सम्भवति ॥१३॥ अयं वै लोकोऽग्निर्गौतम । तस्य पृथिव्येव समिद्वायुर्धूमो रात्रिरर्चिर्दिशोऽङ्गारा अवान्तरदिशो विष्फुलिङ्गास्तस्मिन्नेतस्मिन्नग्नौ देवा वृष्टिं जुह्वति तस्या आहुतेरन्नꣳ सम्भवति ॥१४॥ पुरुषो वाऽअग्निर्गौतम । तस्य व्यात्तमेव समित्प्राणो धूमो वागर्चिश्चक्षुरङ्गाराः श्रोत्रं विष्फुलिङ्गास्तस्मिन्नेतस्मिन्नग्नौ देवा अन्नं जुह्वति तस्या आहुते रेतः सम्भवति ॥१५॥ योषा वाऽअग्निर्गौतम । तस्या उपस्थ एव समिल्लोमानि धूमो योनिरर्चिर्यदन्तः करोति तेऽङ्गारा अभिनन्दा विष्फुलिङ्गास्तस्मिन्नेतस्मिन्नग्नौ देवा रेतो जुह्वति तस्या आहुतेः पुरुषः सम्भवति स जायते स जीवति यावज्जीवत्यथ यदा म्रियतेऽथैनमग्नये हरन्ति ॥१६॥ तस्याग्निरेवाग्निर्भवति । समित्समिद्धूमो धूमोऽर्चिरर्चिरङ्गारा अङ्गारा वि-

ष्फुलिङ्गा विष्फुलिङ्गास्तस्मिन्नेतस्मिन्नग्नौ देवाः पुरुषं जुह्वति तस्या आहुतेः पुरु-
षो भास्वरवर्णः सम्भवति ॥१७॥ ते यऽएवमेतद्विदुः । ये चामीऽअरण्ये श्रद्धाꣳ
सत्यमुपासते तेऽर्चिरभिसम्भवन्त्यर्चिषोऽहरह्न आपूर्यमाणपक्षमापूर्यमाणपक्षाद्या-
न्षण्मासानुदङ्ङादित्य एति मासेभ्यो देवलोकं देवलोकादादित्यमादित्याद्वैद्युतं
तान्वैद्युतात्पुरुषो मानस एत्य ब्रह्मलोकान्गमयति ते तेषु ब्रह्मलोकेषु पराः
परावतो वसन्ति तेषामिह न पुनरावृत्तिरस्ति ॥१८॥ अथ ये यज्ञेन दानेन ।
तपसा लोकं जयन्ति ते धूममभिसम्भवन्ति धूमाद्रात्रिꣳ रात्रेरपक्षीयमाणपक्षमप-
क्षीयमाणपक्षाद्यान्षण्मासान्दक्षिणादित्य एति मासेभ्यः पितृलोकं पितृलोकाच्चन्द्रं
ते चन्द्रं प्राप्यान्नं भवन्ति तांस्तत्र देवा यथा सोमꣳ राजानमाप्यायस्वापक्षीयस्वे-
त्येवमेनांस्तत्र भक्षयन्ति तेषां यदा तत्पर्यवैत्यथेममेवाकाशमभिनिष्पद्यन्तऽआका-
शाद्वायुं वायोर्वृष्टिं वृष्टेः पृथिवीं ते पृथिवीं प्राप्यान्नं भवन्ति तऽएवमेवानुपरि-
वर्तन्तेऽथ यऽएतौ पन्थानौ न विदुस्ते कीटाः पतङ्गा यदिदं दन्दशूकम् ॥१९॥
ब्राह्मणम् ॥२ [९. १.] ॥ ॥

यो ह वै ज्येष्ठं च श्रेष्ठं च वेद । ज्येष्ठश्च श्रेष्ठश्च स्वानां भवति प्राणो वै
ज्येष्ठश्च श्रेष्ठश्च ज्येष्ठश्च श्रेष्ठश्च स्वानां भवत्यपि च येषां बुभूषति य एवं वेद ॥१॥
यो ह वै वसिष्ठां वेद । वसिष्ठः स्वानां भवति वाग्वै वसिष्ठा वसिष्ठः स्वानां
भवति य एवं वेद ॥२॥ यो ह वै प्रतिष्ठां वेद । प्रतितिष्ठति समे प्रतितिष्ठति
दुर्गे चक्षुर्वै प्रतिष्ठा चक्षुषा हि समे च दुर्गे च प्रतितिष्ठति प्रतितिष्ठति समे प्र-
तितिष्ठति दुर्गे य एवं वेद ॥३॥ यो ह वै सम्पदं वेद । सꣳ हास्मै पद्यते यं
कामं कामयते श्रोत्रं वै सम्पच्छ्रोत्रे हीमे सर्वे वेदा अभिसम्पन्नाः सꣳ हास्मै प-
द्यते यं कामं कामयते य एवं वेद ॥४॥ यो ह वाऽआयतनं वेद । आयतनꣳ
स्वानां भवत्यायतनं जनानां मनो वाऽआयतनमायतनꣳ स्वानां भवत्यायतनं

जनानां य एवं वेद ॥५॥ यो ह वै प्रजातिं वेद । प्रजायते प्रजया पशुभी रेतो
वै प्रजातिः प्रजायते प्रजया पशुभिर्य एवं वेद ॥६॥ ते हेमे प्राणाः । अहꣳश्रे-
यसे विवदमाना ब्रह्म जग्मुः को नो वसिष्ठ इति यस्मिन्व उत्क्रान्तऽइदꣳ श-
रीरं पापीयो मन्यते स वो वसिष्ठ इति ॥७॥ वाग्घोच्चक्राम । सा संवत्सरं
प्रोष्यागत्योवाच कथमशकत मदृते जीवितुमिति ते होचुर्यथा कडा अवदन्तो
वाचा प्राणन्तः प्राणेन पश्यन्तश्चक्षुषा शृण्वन्तः श्रोत्रेण विद्वाꣳसो मनसा प्रजाय-
माना रेतसैवमजीविष्मेति प्रविवेश ह वाक् ॥८॥ चक्षुर्होच्चक्राम । तत्संवत्सरं
प्रोष्यागत्योवाच कथमशकत मदृते जीवितुमिति ते होचुर्यथान्धा अपश्यन्तश्चक्षु-
षा प्राणन्तः प्राणेन वदन्तो वाचा शृण्वन्तः श्रोत्रेण विद्वाꣳसो मनसा प्रजायमाना
रेतसैवमजीविष्मेति प्रविवेश ह चक्षुः ॥९॥ श्रोत्रꣳ होच्चक्राम । तत्संवत्सरं
प्रोष्यागत्योवाच कथमशकत मदृते जीवितुमिति ते होचुर्यथा बधिरा अशृण्वन्तः
श्रोत्रेण प्राणन्तः प्राणेन वदन्तो वाचा पश्यन्तश्चक्षुषा विद्वाꣳसो मनसा प्रजाय-
माना रेतसैवमजीविष्मेति प्रविवेश ह श्रोत्रम् ॥१०॥ मनो होच्चक्राम । तत्सं-
वत्सरं प्रोष्यागत्योवाच कथमशकत मदृते जीवितुमिति ते होचुर्यथा मुग्धा अ-
विद्वाꣳसो मनसा प्राणन्तः प्राणेन वदन्तो वाचा पश्यन्तश्चक्षुषा शृण्वन्तः श्रोत्रेण
प्रजायमाना रेतसैवमजीविष्मेति प्रविवेश ह मनः ॥११॥ रेतो होच्चक्राम । त-
त्संवत्सरं प्रोष्यागत्योवाच कथमशकत मदृते जीवितुमिति ते होचुर्यथा क्लीबा
अप्रजायमाना रेतसा प्राणन्तः प्राणेन वदन्तो वाचा पश्यन्तश्चक्षुषा शृण्वन्तः श्रो-
त्रेण विद्वाꣳसो मनसैवमजीविष्मेति प्रविवेश ह रेतः ॥१२॥ अथ ह प्राण उ-
त्क्रमिष्यन् । यथा महासुहयः सैन्धवः पड्वीशशङ्कून्त्संवृहेदेवꣳ हैवेमान्प्राणान्त्सं-
ववर्ह ते होचुर्मा भगव उत्क्रमीर्न वै शक्ष्यामस्त्वदृते जीवितुमिति तस्य वै मे
बलिं कुरुतेति तथेति ॥१३॥ सा ह वागुवाच । यद्वाऽअहं वसिष्ठास्मि त्वं तद्व-

सिष्ठोऽसीति चक्षुर्यद्वाऽअहं प्रतिष्ठास्मि त्वं तत्प्रतिष्ठोऽसीति श्रोत्रं यद्वाऽअहꣳ सम्पदस्मि त्वं तत्सम्पदसीति मनो यद्वाऽअहमायतनमस्मि त्वं तदायतनमसीति रेतो यद्वाऽअहं प्रजातिरस्मि त्वं तत्प्रजातिरसीति तस्यो मे किमन्नं किं वास इति यदिदं किं चा श्वभ्य आ क्रिमिभ्य आ कीटपतङ्गेभ्यस्तत्तेऽन्नमापो वास इति न ह वाऽअस्यानन्नं जग्धं भवति नानन्नं प्रतिगृहीतं य एवमेतदनस्यान्नं वेद ॥१४॥ तद्विद्वाꣳसः श्रोत्रियाः । अशिष्यन्त आचामन्त्यशित्वाचामन्त्येतमेव तदनमनग्नं कुर्वन्तो मन्यन्ते तस्मादेवंविदशिष्यन्नाचामेदशित्वाचामेदेतमेव तदनमनग्नं कुरुते ॥१५॥ ब्राह्मणम् ॥ ३ [१. २.] ॥ ॥

स यः कामयते । महत्प्राप्नुयामित्युदगयनऽआपूर्यमाणपक्षे पुण्याहे द्वादशाहमुपसद्व्रती भूत्वौदुम्बरे कꣳसे चमसे वा सर्वौषधं फलानीति सम्भृत्य परिसमुह्य परिलिप्याग्निमुपसमाधायावृताज्यꣳ संस्कृत्य पुꣳसा नक्षत्रेण मन्थꣳ संनीय जुहोति ॥१॥ यावन्तो देवास्त्वयि जातवेदः । तिर्यञ्चो घ्नन्ति पुरुषस्य कामान् । तेभ्योऽहं भागधेयं जुहोमि ते मा तृप्ताः कामैस्तर्पयन्तु स्वाहा ॥२॥ या तिरश्ची निपद्यसेऽहं विधरणीऽइति । तां त्वा घृतस्य धारया यजे सꣳराधनीमहꣳ स्वाहा । प्रजापते न त्वदेतान्यन्य इति तृतीयां जुहोति ॥३॥ ज्येष्ठाय स्वाहा श्रेष्ठाय स्वाहेति । अग्नौ हुत्वा मन्थे सꣳस्रवमवनयति प्राणाय स्वाहा वसिष्ठायै स्वाहेत्यग्नौ हुत्वा मन्थे सꣳस्रवमवनयति वाचे स्वाहा प्रतिष्ठायै स्वाहेत्यग्नौ॰ चक्षुषे स्वाहा सम्पदे स्वाहेत्यग्नौ॰ श्रोत्राय स्वाहायतनाय स्वाहेत्यग्नौ॰ मनसे स्वाहा प्रजात्यै स्वाहेत्यग्नौ॰ रेतसे स्वाहेत्यग्नौ॰ ॥४॥ भूताय स्वाहेति । अग्नौ॰ भविष्यते स्वाहेत्यग्नौ॰ विश्वाय स्वाहेत्यग्नौ॰ सर्वाय स्वाहेत्यग्नौ॰ ॥५॥ पृथिव्यै स्वाहेति । अग्नौ॰ अन्तरिक्षाय स्वाहेत्यग्नौ॰ दिवे स्वाहेत्यग्नौ॰ दिग्भ्यः स्वाहेत्यग्नौ॰ ब्रह्मणे स्वाहेत्यग्नौ॰ क्षत्राय स्वाहेत्यग्नौ॰ ॥६॥ भूः स्वाहेति । अग्नौ॰ भुवः स्वाहेत्यग्नौ॰ स्वः

स्वाहेत्यग्नौ° भूर्भुवः स्वः स्वाहेत्यग्नौ° ॥७॥ अग्नये स्वाहेति । अग्नौ° सोमाय स्वाहेत्यग्नौ° तेजसे स्वाहेत्यग्नौ° श्रियै स्वाहेत्यग्नौ° लक्ष्म्यै स्वाहेत्यग्नौ° सवित्रे स्वाहेत्यग्नौ° सरस्वत्यै स्वाहेत्यग्नौ° विश्वेभ्यो देवेभ्यः स्वाहेत्यग्नौ° प्रजापतये स्वाहेत्यग्नौ हुत्वा मन्थे सꣳस्रवमवनयति ॥८॥ अथैनमभिमृशति । भ्रमसि ज्वलदसि पूर्णमसि प्रस्तब्धमस्येकसभमसि हिङ्कृतमसि हिङ्क्रियमाणमस्युद्गीथमस्युद्गीयमानमसि श्रावितमसि प्रत्याश्रावितमस्यार्द्रे संदीप्तमसि विभूरसि प्रभूरसि ज्योतिरस्यन्नमसि निधनमसि संवर्गोऽसीति ॥९॥ अथैनमुद्यच्छति । आमोऽस्यामꣳ हि ते मयि स हि राजेशानोऽधिपतिः स मा राजेशानोऽधिपतिं करोत्विति ॥१०॥ अथैनमाचामति । तत्सवितुर्वरेण्यम् मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः माध्वीर्नः सन्त्वोषधीः भूः स्वाहा ॥११॥ भर्गो देवस्य धीमहि । मधु नक्तमुतोषसो मधुमत्पार्थिवꣳ रजः मधु द्यौरस्तु नः पिता भुवः स्वाहा ॥१२॥ धियो यो नः प्रचोदयात् । मधुमान्नो वनस्पतिर्मधुमाꣳ२॥ऽअस्तु सूर्यः माध्वीर्गावो भवन्तु नः स्वः स्वाहेति सर्वां च सावित्रीमन्वाह सर्वाश्च मधुमतीः सर्वाश्च व्याहृतीरहमेवेदꣳ सर्वं भूयासं भूर्भुवः स्वः स्वाहेत्यन्तत आचम्य प्रक्षाल्य पाणी जघनेनाग्निं प्राक्शिराः संविशति ॥१३॥ प्रातरादित्यमुपतिष्ठते । दिशामेकपुण्डरीकमस्यहं मनुष्याणामेकपुण्डरीकं भूयासमिति यथेतमेत्य जघनेनाग्निमासीनो वꣳशं जपति ॥१४॥ तꣳ हैतमुद्दालक आरुणिः । वाजसनेयाय याज्ञवल्क्यायान्तेवासिनऽउक्त्वोवाचापि य एनꣳ शुष्के स्थाणौ निषिञ्चेज्जायेरञ्छाखाः प्ररोहेयुः पलाशानीति ॥१५॥ एतमु हैव वाजसनेयो याज्ञवल्क्यो । मधुकाय पैङ्ग्यायान्तेवा° ॥१६॥ एतमु हैव मधुकः पैङ्ग्यः । चूडाय भागवित्तयेऽन्तेवा° ॥१७॥ एतमु हैव चूडो भागवित्तिः । जानकयऽआयस्थूणायान्तेवा° ॥१८॥ एतमु हैव जानकिरायस्थूणः । सत्यकामाय जाबालायान्तेवा° ॥१९॥ एतमु हैव सत्यकामो

जाबालो । ऽन्तेवासिभ्य उक्तोवाचापि य एनꣳ शुष्के स्थाणौ निषिञ्चेज्जायेरञ्छा-
खाः प्ररोहेयुः पलाशानीति तमेतं नापुत्राय वानन्तेवासिने वा ब्रूयात् ॥२०॥
चतुरौदुम्बरो भवति । औदुम्बरश्चमस औदुम्बर स्रुव औदुम्बर इध्म औदुम्बर्यौ
ऽउपमन्थन्यौ ॥२१॥ दश ग्राम्याणि धान्यानि भवन्ति । व्रीहियवास्तिलमाषा
अणुप्रियङ्गवो गोधूमाश्च मसूराश्च खल्वाश्च खलकुलाश्च तान्त्सार्धं पिष्ट्वा दध्ना
मधुना घृतेनोपसिञ्चत्याज्यस्य जुहोति ॥२२॥ ब्राह्मणम् ॥४ [१. ३.] ॥ ॥

एषां वै भूतानां पृथिवी रसः । पृथिव्या आपोऽपामोषधय ओषधीनां पुष्पा-
णि पुष्पाणां फलानि फलानां पुरुषः पुरुषस्य रेतः ॥१॥ स ह प्रजापतिरीक्षां
चक्रे । हन्तास्मै प्रतिष्ठां कल्पयानीति स स्त्रियꣳ ससृजे ताꣳ सृष्ट्वाध उपास्त त-
स्मात्स्त्रियमध उपासीत श्रीर्ह्येषा स एतं प्राञ्चं ग्रावाणमात्मन एव समुदपारयत्ते-
नैनामभ्यसृजत् ॥२॥ तस्या वेदिरुपस्थो । लोमानि बर्हिश्चर्माधिषवणे समिद्धो
मध्यतस्तौ मुष्कौ स यावान्ह वै वाजपेयेन यजमानस्य लोको भवति तावानस्य
लोको भवति य एवं विद्वानधोपहासं चरत्या स स्त्रीणाꣳ सुकृतं वृङ्क्तेऽथ य इ-
दमविद्वानधोपहासं चरत्यास्य स्त्रियः सुकृतं वृञ्जते ॥३॥ एतद्ध स्म वै तद्विद्वा-
नुद्दालक आरुणिराह । एतद्ध स्म वै तद्विद्वान्नाको मौद्गल्य आहैतद्ध स्म वै त-
द्विद्वान्कुमारहारित आह बहवो मर्या ब्राह्मणायना निरिन्द्रिया विसुकृतोऽस्मा-
ल्लोकात्प्रयन्ति य इदमविद्वाꣳसोऽधोपहासं चरन्तीति ॥४॥ बहु वा इदꣳ सुप्तस्य
वा जाग्रतो वा रेत स्कन्दति । तदभिमृशेदनु वा मन्त्रयेत यन्मेऽद्य रेतः पृथि-
वीमस्कान्त्सीद्यदोषधीरप्यसरद्यदपः इदमहं तद्रेत आददे पुनर्मामैत्विन्द्रियं पुन-
स्तेज पुनर्भगः पुनरग्नयो धिष्ण्या यथास्थानं कल्पन्तामित्यनामिकाङ्गुष्ठाभ्यामादा-
यान्तरेण स्तनौ वा भ्रुवौ वा निमृज्यात् ॥५॥ अथ यद्युदकऽआत्मानं पश्येत् ।
तदभिमन्त्रयेत मयि तेज इन्द्रियं यशो द्रविणꣳ सुकृतमिति ॥६॥ श्रीर्ह वाऽएषा

स्त्रीणाम् । यन्मलोद्वासास्तस्मान्मलोद्वाससं यशस्विनीमभिक्रम्योपमन्त्रयेत सा चेदस्मै न दद्यात्काममेनामपक्रीणीयात्सा चेदस्मै नैव दद्यात्काममेनां यष्ट्या वा पाणिना वोपहत्यातिक्रामेदिन्द्रियेण ते यशसा यश आदद इत्ययशा एव भवति ॥७॥ स यामिच्छेत् । कामयेत मेति तस्यामर्थं निष्ठाप्य मुखेन मुखꣳ संधायोपस्थमस्या अभिमृश्य जपेदङ्गादङ्गात्सम्भवसि हृदयादधि जायसे स त्वमङ्गकषायोऽसि दिग्धविद्धामिव मादयेति ॥८॥ अथ यामिच्छेत् । न गर्भं दधीतेति तस्यामर्थं निष्ठाप्य मुखेन मुखꣳ संधायाभिप्राण्यापान्यादिन्द्रियेण ते रेतसा रेत आदद इत्यरेता एव भवति ॥९॥ ॥ शतम् ७६०० ॥ ॥ अथ यामिच्छेत् । गर्भं दधीतेति तस्यामर्थं निष्ठाप्य मुखेन मुखꣳ संधायापान्याभिप्राण्यादिन्द्रियेण ते रेतसा रेत आदधामीति गर्भिण्येव भवति ॥१०॥ अथ यस्य जायायै जारः स्यात् । तं चेद्द्विष्यादामपात्रेऽग्निमुपसमाधाय प्रतिलोमꣳ शरबर्हिः स्तीर्त्वा तस्मिन्नेतास्तिस्रः शरभृष्टीः प्रतिलोमाः सर्पिषाक्ता जुहुयान्मम समिद्धेऽहौषीराशापराकाशौ त आददे ऽसाविति नाम गृह्णाति मम समिद्धेऽहौषीः पुत्रपशूꣳस्त आददेऽसाविति नाम गृह्णाति मम समिद्धेऽहौषीः प्राणापानौ त आददेऽसाविति नाम गृह्णाति स वा ऽएष निरिन्द्रियो विसुकृदस्माल्लोकात्प्रैति यमेवंविद्ब्राह्मणः शपति तस्मादेवंविच्छ्रोत्रियस्य जायाया उपहासं नेच्छेदुत ह्येवंवित्परो भवति ॥११॥ अथ यस्य जायामार्तवं विन्देत् । त्र्यहं कꣳसे न पिबेदहतवासा नैनां वृषलो न वृषल्युपहन्यात्त्रिरात्रान्त आप्लुत्य व्रीहीनवघातयेत् ॥१२॥ स य इच्छेत् । पुत्रो मे गौरो जायेत वेदमनुब्रुवीत सर्वमायुरियादिति क्षीरौदनं पाचयित्वा सर्पिष्मन्तमश्नीयातामीश्वरौ जनयितवै ॥१३॥ अथ य इच्छेत् । पुत्रो मे कपिलः पिङ्गलो जायेत द्वौ वेदावनुब्रुवीत सर्वमायुरियादिति दध्योदनं पाचयित्वा° ॥१४॥ अथ य इच्छेत् । पुत्रो मे श्यामो लोहिताक्षो जायेत त्रीन्वेदाननुब्रुवीत सर्वमायुरियादित्युदौदनं

पाचयित्वा° ॥१५॥ अथ य इच्छेत् । दुहिता मे पण्डिता जायेत सर्वमायुरियादिति तिलौदनं पाचयित्वा° ॥१६॥ अथ य इच्छेत् । पुत्रो मे पण्डितो विजिगीथः समितिंगमः शुश्रूषितां वाचं भाषिता जायेत सर्वान्वेदाननुब्रुवीत सर्वमायुरियादिति माꣳसौदनं पाचयित्वा सर्पिष्मन्तमश्नीयातामीश्वरौ जनयितवाऽऔक्ष्णेन वार्षभेण वा ॥१७॥ अथाभिप्रातरेव । स्थालीपाकावृताज्यं चेष्टित्वा स्थालीपाकस्योपघातं जुहोत्यग्नये स्वाहानुमतये स्वाहा देवाय सवित्रे सत्यप्रसवाय स्वाहेति हुत्वोद्धृत्य प्राश्नाति प्राश्येतरस्याः प्रयच्छति प्रक्षाल्य पाणीऽउदपात्रं पूरयित्वा तेनैनां त्रिरभ्युक्षत्युत्तिष्ठातो विश्वावसोऽन्यामिच्छ प्रफर्व्यम् सं जायां पत्या सहेति ॥१८॥ अथैनामभिपद्यते । ऽमोऽहमस्मि सा त्वꣳ सा त्वमस्यमोऽअहम् सामाहमस्मि ऽऋक्त्वं द्यौरहं पृथिवी त्वम् तावेहि सꣳरभावहै सह रेतो दधावहै पुꣳसे पुत्राय वित्तयऽइति ॥१९॥ अथास्याऽऊरू विहापयति । विजिहीथां द्यावापृथिवीऽइति तस्यामर्थं निष्ठाप्य मुखेन मुखꣳ संधाय त्रिरेनामनुलोमामनुमार्ष्टि विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिꣳशतु आसिञ्चतु प्रजापतिर्धाता गर्भं दधातु ते ॥ गर्भं धेहि सिनीवालि गर्भं धेहि पृथुष्टुके गर्भं तेऽअश्विनौ देवावाधत्तां पुष्करस्रजौ ॥२०॥ हिरण्मयीऽअरणी । याभ्यां निर्मन्थतामश्विनौ देवौ तं ते गर्भं दधामहे दशमे मासि सूतवे ॥ यथाग्निगर्भा पृथिवी यथा द्यौरिन्द्रेण गर्भिणी वायुर्दिशां यथा गर्भ एवं गर्भं दधामि तेऽसाविति नाम गृह्णाति ॥२१॥ सोष्यन्तीमद्भिरभ्युक्षति । यथा वातः पुष्करिणीꣳ समिङ्गयति सर्वतः एवा ते गर्भ एजतु सहावैतु जरायुणा ॥ इन्द्रस्यायं व्रजः कृतः सार्गडः सपरिश्रयः तमिन्द्र निर्जहि गर्भेण सावरꣳ सहेति ॥२२॥ जातेऽग्निमुपसमाधाय । अङ्कऽआधाय कꣳसे पृषदाज्यमानीय पृषदाज्यस्योपघातं जुहोत्यस्मिन्त्सहस्रं पुष्यासमेधमानः स्वगृहे अस्योपसद्यां मा छैत्सीत्प्रजया च पशुभिश्च स्वाहा मयि प्राणांस्त्वयि मनसा

जुहोमि स्वाहा ॥२३॥ यत्कर्मणात्यरीरिचम् । यद्वा न्यूनमिहाकरम् अग्निष्टत्स्विष्टकृद्विद्वान्त्स्विष्टꣳ सुहुतं करोतु स्वाहेति ॥२४॥ अथास्यायुष्यं करोति । दक्षिणं कर्णमभिनिधाय वाग्वागिति त्रिरथास्य नामधेयं करोति वेदोऽसीति तदस्यैतद्गुह्यमेव नाम स्यादथ दधि मधु घृतꣳ संसृज्यानन्तर्हितेन जातरूपेण प्राशयति भूस्त्वयि दधामि भुवस्त्वयि दधामि स्वस्त्वयि दधामि भूर्भुवः स्वः सर्वं त्वयि दधामीति ॥२५॥ अथैनमभिमृशति । अश्मा भव परशुर्भव हिरण्यमस्तृतं भव आत्मा वै पुत्रनामासि स जीव शरदः शतमिति ॥२६॥ अथास्य मातरमभिमन्त्रयते । इडासि मैत्रावरुणी वीरे वीरमजीजनथाः सा त्वं वीरवती भव यास्मान्वीरवतोऽकरदिति ॥२७॥ अथैनं मात्रे प्रदाय स्तनं प्रयच्छति । यस्ते स्तनः शशयो यो मयोभूर्यो रत्नधा वसुविद्यः सुदत्रः येन विश्वा पुष्यसि वार्याणि सरस्वति तमिह धातवेऽकरिति ॥२८॥ तं वाऽएतमाहुः । अतिपिता बताभूरतिपितामहो बताभूः परमां बत काष्ठां प्राप श्रिया यशसा ब्रह्मवर्चसेन य एवंविदो ब्राह्मणस्य पुत्रो जायतऽइति ॥२९॥ अथ वꣳशः । तदिदं वयं भारद्वाजीपुत्राद्भारद्वाजीपुत्रो वात्सीमाण्डवीपुत्राद्वात्सीमाण्डवीपुत्रः पाराशरीपुत्रात्पाराशरीपुत्रो गार्गीपुत्राद्गार्गीपुत्रः पाराशरीकौण्डिनीपुत्रात्पाराशरीकौण्डिनीपुत्रो गार्गीपुत्राद्गार्गीपुत्रो गार्गीपुत्राद्गार्गीपुत्रो बाडेयीपुत्राद्बाडेयीपुत्रो मौषिकीपुत्रान्मौषिकीपुत्रो हारिकर्णीपुत्राद्धारिकर्णीपुत्रो भारद्वाजीपुत्राद्भारद्वाजीपुत्रः पैङ्गीपुत्रात्पैङ्गीपुत्रः शौनकीपुत्राच्छौनकीपुत्रः ॥३०॥ काश्यपीबालाक्यामाठरीपुत्रात्काश्यपीबालाक्यामाठरीपुत्रः कौत्सीपुत्रात्कौत्सीपुत्रो बौधीपुत्राद्बौधीपुत्रो शालङ्कायनीपुत्राच्छालङ्कायनीपुत्रो वार्षगणीपुत्राद्वार्षगणीपुत्रो गौतमीपुत्राद्गौतमीपुत्र आत्रेयीपुत्रादात्रेयीपुत्रो गौतमीपुत्राद्गौतमीपुत्रो वात्सीपुत्राद्वात्सीपुत्रो भारद्वाजीपुत्राद्भारद्वाजीपुत्रः पाराशरीपुत्रात्पाराशरीपुत्रो वार्कारुणीपुत्राद्वार्कारुणीपुत्र आर्तभागीपुत्रादार्तभागी-

पुत्रः शौङ्गीपुत्राच्छौङ्गीपुत्रः सांकृतीपुत्रात्सांकृतीपुत्रः ॥३१॥ आलम्बीपुत्रात् । आलम्बीपुत्र आलम्बायनीपुत्रादालम्बायनीपुत्रो जायन्तीपुत्राज्जायन्तीपुत्रो माण्डूकायनीपुत्रान्माण्डूकायनीपुत्रो माण्डूकीपुत्रान्माण्डूकीपुत्रः शाण्डिलीपुत्राच्छाण्डिलीपुत्रो राथीतरीपुत्राद्राथीतरीपुत्रः क्रौञ्चिकीपुत्राभ्यां क्रौञ्चिकीपुत्रौ वैदभृतीपुत्राद्वैदभृतीपुत्रो भालुकीपुत्राद्भालुकीपुत्रः प्राचीनयोगीपुत्रात्प्राचीनयोगीपुत्रः सांजीवीपुत्रात्सांजीवीपुत्रः कार्शकेयीपुत्रात्कार्शकेयीपुत्रः ॥३२॥ प्राश्नीपुत्रात् । आसुरिवासिनः प्राश्नीपुत्र आसुरायणादासुरायण आसुरेरासुरिर्याज्ञवल्क्याद्याज्ञवल्क्य उद्दालकादुद्दालकोऽरुणादरुण उपवेशेरुपवेशिः कुश्रेः कुश्रिर्वाजश्रवसो वाजश्रवा जिह्वावतो बाध्योगाज्जिह्वावा बाध्योगोऽसिताद्वार्षगणादसितो वार्षगणो हरितात्कश्यपाद्धरितः कश्यपः शिल्पात्कश्यपाच्छिल्पः कश्यपः कश्यपान्नैध्रुवेः कश्यपो नैध्रुविर्वाचो वागम्भिण्या अम्भिण्यादित्यादादित्यानीमानि शुक्लानि यजूꣳषि वाजसनेयेन याज्ञवल्क्येनाख्यायन्ते ॥३३॥ ब्राह्मणम् ॥५ [१. ४.] ॥ ॥ सप्तमः प्रपाठकः ॥ कण्डिकासंख्या१०१ ॥ नवमोऽध्यायः [१००.] ॥ ॥ अस्मिन्काण्डे कण्डिकासंख्या७१६ ॥ ॥

इति माध्यन्दिनीये शतपथब्राह्मणऽउपनिषन्नाम चतुर्दशं काण्डं समाप्तम् ॥१४॥ ॥

EXTRACTS FROM THE COMMENTARY OF DVIVEḌAGAṆGA.

द्वया ह प्राजापत्या इत्येवमाद्या षडध्यायी माध्यन्दिनीयब्राह्मणोपनिषत् तस्या उपनिषच्छब्देन मुख्यया वृत्त्या ब्रह्मविद्यैव वाच्या उप समी-
मल्पग्रन्था वृत्तिरारभ्यते ॥ उपनिषच्छब्देन मुख्यया वृत्त्या ब्रह्मविद्यैव वाच्या उप समी-
पस्थं प्रत्यगात्मैकत्वं नीति निश्चितं सत् तत्पराणां सहेतुं संसारं सादयतीत्युपनिषदिति
व्युत्पत्तेः । ग्रन्थस्तु विद्यासमर्थकत्वेनोपचाराउपनिषदित्युच्यते । बृहत्वं चास्य ब्रह्मविद्याहे-
तूनामन्तरङ्गबहिरङ्गभूतानां बहूनामिहोपदेशात् अर्थतो ग्रन्थपरिमाणतश्च बहुत्वात् । आरण्यकत्वं
चास्य नियमपूर्वकमरण्येऽनूच्यमानत्वात् ॥ ॥ अथ कर्मकाण्डज्ञानकाण्डयोर्नियतपौर्वापर्ये स-
म्बन्धोऽभिधीयते विद्योत्पत्त्यपेक्षितविवेकवैराग्यशमादिमुमुक्षुत्वसम्पत्तिहेतुसत्वशुद्धिसम्पा-

दकतया (°त्तुत्वं स° Cod.) कर्मकाण्डस्य प्राथम्यम् तज्जनितशुद्ध्यपेक्षया तत्वज्ञानजनकत्वा-ज्ज्ञानकाण्डस्य नियतमुत्तरभावित्वमित्युपायोपेयभावः काण्डयोः सम्बन्ध इति ब्रूमः ॥ ॥ पूर्वमग्निरहस्यकाण्डसमाप्तावश्वमेधाग्निब्राह्मणाभ्यां (१०. ६. ४-५.) समुच्चितयोः केवलयोर्वा ज्ञानकर्मणोर्मृत्य्वात्मभावः परं फलमित्युक्तम् अथेदानीं मृत्य्वात्मभावसाधनभूतयोः कर्मज्ञानयोर्यत उद्भवस्तस्योद्भावकस्योपास्यस्य प्राणस्य स्वरूपनिर्णयार्थमुद्गीथब्राह्मणमारभ्यते । प्राणोपास्तिर्हि ज्ञानकर्मोत्पत्तिप्रतिबन्धकीभूतरागाद्यपध्वस्तिहेतुः तस्याः पाप्ममृत्य्वतिक्रमणावान्तरफलत्वात् । कोऽसौ पाप्मा मृत्युः कुतो वा तस्योद्भवः केन वा तस्यातिक्रमणं कथं चेति वीक्षायामेतत्सर्वं स्पष्टयितुमाख्यायिकामनुसृत्य द्वया हेत्यादिश्रुतिः प्रवर्तते ॥ कानीयसा एव अल्पीयांस एव स्वार्थे वृद्धिः । ज्यायसाः ज्यायांसो बहुतराः ॥१॥ हन्तेदानीमस्मिन्यज्ञे ज्योतिष्टोमाख्ये उद्गीथेनोद्गीथकर्मपदार्थकर्तृप्राणस्वरूपाश्रयणेनासुरानतिगच्छाम । उद्गीथकर्मपदार्थकर्तृस्वरूपाश्रयणं च ज्ञानकर्मभ्यां भवति तत्र कर्म तदेतानि जपेदिति (क° ३०.) विधास्यमानं मन्त्रजपलक्षणम् ज्ञानं विहाख्यायिकया परीक्ष्यमाणमशुद्धवागादिप्रत्याख्यानेन विशुद्धप्राणोपासनरूपमित्यर्थः ॥२॥ इह शुद्धादिगुणविशिष्टप्राणविज्ञानस्य विधित्सितत्वात्तस्य स्वरूपनिर्धारणाय परीक्षाप्रकार आरभ्यते ते ह वाचमित्यादि कण्डिकाषट्केन । ते ह वाचं वागभिमानिनीमग्न्याख्यामेवोद्गानकर्त्रीमसतो मा सद्गमयेत्यादिमन्त्रप्रकाश्यां (क° ३०.) च देवतां मत्वा त्वं नोऽस्मभ्यमुद्गाय औद्गात्रं कर्म कुर्वित्युक्तवन्तः । यथा प्रकृते ज्योतिष्टोमे द्वादशस्तोत्रात्मके उद्गात्रा त्रिषु पवमानाख्येषु स्तोत्रेषु यजमानार्थमुद्गानं क्रियतेऽवशिष्टेषु नवसु स्तोत्रेषु वाचनिकार्त्विज्यफलकं स्वार्थम् तद्वदत्रापि द्विविधमुद्गानम् यो वाचि निमित्तभूतायां सत्यां वागादिसमुदायस्य भोगः सुखविशेषस्तं देवेभ्योऽर्थिभ्योऽर्थाय आगायदागानेन प्रापितवती यत्पुनः कल्याणं शोभनं वदति यथाशास्त्रं वर्णानभिनिर्वर्तयति तदात्मने स्वार्थमेव । तद्ध्यसाधारणं वाग्देवतायाः कर्म यत्सम्यग्वर्णोच्चारणम् । एवं वाग्देवतायाः कल्याणवदनरूपासाधारणविषयासङ्गलक्षणं रन्ध्रस्यावसरं (रन्ध्रं स्वाव°?) प्रतिलभ्यासुराः स्वकार्ययुक्ता ज्ञाता इत्याह तेऽविदुरिति । तमुद्गातारं वाग्रूपमभिद्रुत्य वेगेनाभिगम्य स्वेनासङ्गलक्षणेन पाप्मनाविध्यन् ताडितवन्तः संयोजितवन्त इति यावत् । यः स पाप्मा साधकावस्थस्य प्रजापतेर्वाचि प्रक्षिप्तः स एषोऽनुमानेन प्रत्यक्षीक्रियते कोऽसौ यदेव येनैव प्रयुक्ता सतीयं वागिदमप्रतिरूपमननुरूपं शास्त्रप्रतिषिद्धमसभ्यस्त्रीवर्णनप्रेतादिवर्णनानृतादि वदति स एव ॥३॥ आसन्निं आस्ये भवमासन्यं मुखान्तर्बिलस्थं मुख्यं प्राणम् । ते च दोषासंसर्गिणं सन्तं मुख्यं प्राणं स्वेनासङ्गदोषेण संस्रक्ष्यमाणाः सन्तो विष्वञ्चो नानागतयो विनेशुर्विनष्टा विध्वस्ताः । यथा लोके पाषाणचूर्णनाय प्रक्षिप्तो लोष्टः पांसुपिण्डोऽश्मानं पाषाणमृत्वा गत्वा प्राप्य स्वयं विध्वंसेत विस्रंसेत विचूर्णीभवेत् ॥७॥ ते वागादयः प्रजापतिप्राणाः मुख्येन प्राणेन परिप्रापितदेवस्वरूपाः फलावस्थाः सन्तः । यो नोऽस्मानित्थमसक्त सञ्जितवान् (!) देवभावायात्मत्वेनोपगमितवान् । लोकवदेवोपकारिणं स्मरन्तो विचारयमाणाः सन्तः । यस्मादेवं वागादयः प्राणमास्येऽन्तरुपलभ्यायमास्येऽन्तरिति व्याजह्रुस्तस्मात्स अयास्यः । यस्मादङ्गानां कार्यकरणानां रसः सार आत्मा तस्मादाङ्गिरसः ॥९॥ प्राणस्य स्वतः शुद्धत्वेऽप्यशुद्धवागादिसम्बन्धादशुद्धत्वं स्यादिति शङ्कां वारयितुं पाप्महानिफलासाधारणगुणकं विशिष्टोपासन-

माह सेति यां प्राप्यासुरा विनष्टाः वै इति अयमास्येऽन्तरिति निर्धारिता सा वै एषा वर्तमानोपासकशरीरस्था प्राणरूपा देवता दूर्नाम दूरित्येवं ख्याताऽतः शुद्धा ॥१०॥ शास्त्रीयज्ञानकर्मसंस्कृतजनाधिष्ठितो देशो मध्यदेशस्तस्मादतिरिक्तो देशो दिशां प्राच्यादीनामन्तः परा काष्ठा तत् तत्र दिशामन्ते अन्तस्थे जने च गमयां चकार । तस्मात्तमन्त्यजनं न इयात् दर्शनसम्भाषणादिभिर्न संसृज्येत तथा अन्तं तज्जननिवासस्थानं नेयात् न गच्छेत् ॥११॥ प्राणं नासिकान्तःसंचारिणम् घ्राणम् ॥१४॥ य उपासक एवमध्यात्मकवागादिपञ्चकविशिष्टं प्राणमात्मत्वेन वेद प्राणोऽहमित्युपास्ते तमेवमेवैषा प्राणदेवता मृत्युमतीत्य वहति वैराजं पदं प्रापयतीति यावत् ॥१७॥ उपास्यस्य प्राणस्य कार्यकरणसंघातविधारकत्वं नामगुणान्तरं वक्तुमाह अथेति यथा वागादिभिरात्मार्थमागानं कृतं तथा मुख्योऽपि प्राणस्त्रिषु पवमानेषु सर्वप्राणसाधारणमागानं कृत्वाथानन्तरं शिष्टेषु नवसु स्तोत्रेष्वात्मने आत्मार्थमन्नाद्यमागायत् आगीतवान् अन्नं च तदाद्यं चान्नाद्यमद्यमानमन्नमित्यर्थः । अनेनैवाद्यते अन इति प्राणस्याख्या प्रसिद्धा अनःशब्दः सान्तः शकटवाची यस्त्वन्यः स्वरान्तः स प्राणपर्यायः अनितेर्धातोर्व्युत्पन्नत्वात् एतेन इदंशब्दशङ्काप्यपास्ता । इहान्ने देहाकारपरिणते ॥१८॥ आगासीरागीतवानसि आगानेन आत्मसात्कृतवानसि । आभजस्व आभाजयस्व णिचो लोपश्छान्दसः । तस्माल्लोको यदन्नमनेन प्राणेनात्ति भक्षयति तेनैव प्राणान्नेनैवैता वागादयो देवतास्तृप्यन्ति न स्वातन्त्र्येण वागादीनामन्नसम्बन्धः अतोऽनेनैवेत्यवधारणं (क° १८.) सार्थकम् ॥१९॥ सम्प्रति प्राणविद्यां स्तोतुं तद्विद्यावद्विद्वेषिणो दोषमाह य उ हेति । य एवंविदं प्राणविदं प्रति स्वेषु ज्ञातिषु मध्ये प्रतिः प्रतिकूलो बुभूषति प्रतिस्पर्धी भवितुमिच्छति । अथ प्राणविदनुरक्तस्य लाभं दर्शयति अथेति । एतमेवंविदमन्वेव अनुवर्तयन्नेव ॥२०॥ पूर्वोक्तायास्यत्वेन (°क्तोपा°?) प्रतिज्ञातं यदाङ्गिरसत्वं तदेव सोऽयास्य इत्यनूद्य प्राणो वाऽइति प्रतिज्ञायते । रसः सार आत्मा । तस्मादपास्य वागादीन्प्राण एवोपास्य इति समुदायार्थः ॥२१॥ अथ बृहस्पत्यादिनामराशिधर्मकं प्राणोपासनं वक्तुमेष उ एवेत्यादि कण्डिकाचतुष्टयम् । उरप्यर्थः एष प्रकृत आङ्गिरसः प्राणो बृहस्पतिरपि । प्रसिद्धं देवपुरोहितत्वं व्यावर्तयितुमाह वाग्वै बृहतीति । सप्त गायत्र्यादीनि प्रधानानि छन्दांसि तेषां मध्यमं छन्दो बृहतीत्युच्यते सा च बृहती षट्त्रिंशदक्षरा प्रसिद्धा वाग्वाऽअनुष्टुबिति चयनप्रकरणऽउक्तत्वादनुष्टुभोऽपि वाक्त्वं प्रसिद्धम् सा द्वात्रिंशदक्षरा षट्त्रिंशदक्षरायां बृहत्यामन्तर्भवति एवं वागनुष्टुभोरनुष्टुब्बृहत्योश्चैक्येन वागात्मिका बृहती । स ऋचो व्यौहद्द्वादश बृहतीसहस्राणीति श्रुतेर्बृहत्यां सर्वा ऋचोऽन्तर्भवन्ति तस्या बृहत्याः मध्यमस्थत्वाडुपलक्षणविधया सर्वछन्दस्कऽर्गानुग्राहकाया (? °छन्दस्वर्ग्राहकायाः Cod.) ऋग्रूपाया एष प्राणः पतिः स्थित्युत्पादनहेतुत्वात् तस्माद् बृहस्पतिरित्युपसंहारः ॥२२॥ तथा यजुर्वेदात्मकत्वमाह एष उ एव ब्रह्मणो यजुर्वेदस्य पतिः ॥२३॥ अथास्य सामवेदात्मकत्वमाह । वाग्वै सा अमैषः सर्वस्त्रीलिङ्गशब्दाभिधेयवस्तुविषयो हि सर्वनाम-साशब्दः सा वै वाक् सर्वपुंलिङ्गशब्दाभिधेयवस्तुविषयोऽमःशब्दः अम एष प्राणः । तथा सति प्राणनिर्वर्त्यस्वरपदवाक्यादिसमुदायमात्रगीतिः (त्रं C.) सामशब्देनाभिधीयते । सा चामश्चेत्येतद्व्युत्पत्तेर्वागुपसर्जनः प्राण एव मुख्य(:) सामशब्दवाच्यः । अस्यैव प्राणस्य प्रकारान्तरेण सामत्वमुपासनार्थमाह यद्वेवेति उशब्दो विकल्पार्थः प्रकारान्त-

रयोतकः यद्यस्माद्वायं प्राणः सूत्रात्मा लिङ्गात्मना प्लुषिणा पुत्तिकाशरीरेण समस्तुल्यः मशकेन मशकशरीरेण समो नागेन हस्तिशरीरेण सम एभिस्त्रिभिर्लोकैस्त्रैलोक्यात्मकप्राजापत्यशरीरेण समः अनेन सर्वेण हिरण्यगर्भजगद्रूपेण समस्तुल्य एव पुत्तिकादिशरीरेषु गोवादिवत्कार्त्स्न्येन परिसमाप्तस्तस्माद्व एव साम एवं प्राणस्य समत्वं सिद्धम् । य एवं यथोक्तमेतत्साम सामगुणकं प्राणं वेदोपास्ते स साम्नः प्राणस्य सायुज्यं सयुग्भावं समानदेहेन्द्रियाभिमानतां व्याप्नोति सलोकतां प्राणसमानलोकतां चाश्नुते ॥२४॥ इदं च फलं मध्यप्रदीपन्यायेनोभयतःसम्बन्धमवधेयमितीमामेव फलश्रुतिमनुसृत्य गुणान्तरमाह । एष प्राणो वै उद्गीथः उद्गीथो नाम सामावयवो भक्तिविशेषः नोद्गानम् सामाधिकारात् । उत्तब्धमुत्तम्भितं विधृतम् । वागेव गीथा उद्गीथाभिव्यक्तिरूपा गायतेः शब्दार्थत्वात् । स वागुपसर्जनः प्राण एवोद्गीथः ॥२५॥ उद्गीथदेवता प्राणो न वागादिरित्युक्तार्थदार्ढ्यायाख्यायिकामाह । चिकितानस्यापत्यं चैकितानिः (°नः Cod.) तस्यापत्यं युवा चैकितानेयो ब्रह्मदत्तनामा विश्वसृजां पूर्वे स ऋषीणां सत्रे राजानं सोमं भक्षयन्नुवाच । अत्रायास्याङ्गिरसशब्देनोद्गातोच्यते एतादृक्प्राणोपासकत्वात्तस्य । यदि स उद्गाता विश्वसृजां पूर्वे स ऋषीणां सत्रे इतोऽस्मात्पूर्वोक्ताद्वागुपसर्जनात्प्राणादन्येन देवतान्तरेणोदगायत् उद्गानं कृतवान् तदा त्यस्य तस्य अनृतवादिनो मम मूर्धानं शिरोऽयं चमसस्थो मया भक्ष्यमाणो राजा सोमो विपातयताद्विस्पष्टं पातयतु यद्यहमनृतवादी स्यामित्यर्थः । एवमुद्गीथदेवता प्राण एवेत्याख्यायिकया निर्धारितमर्थं श्रुतिः स्वेन वचसोपसंहरति सोऽयास्य आङ्गिरस उद्गाता वाचा च प्राणप्रधानया प्राणेन च स्वस्यात्मभूतेनोदगायदित्येषोऽर्थः शपथेन निर्धारितः ॥२६॥ एवमुद्गीथदेवता प्राण एवेति निर्धार्य तस्य स्वसुवर्णप्रतिष्ठागुणविधानार्थमुत्तरकण्डिकात्रयमवतारयति । तस्य विशुद्ध्यादिगुणवत्तया प्रकृतस्य ह एतस्य बृहस्पत्यादिगुणवत्तया निरूपितस्य साम्नः सामशब्दवाच्यस्य प्राणस्य स्वं धनं यो वेद अस्य विज्ञातुर्ह स्वं धनं भवति । तस्य वै साम्नः स्वर एव कण्ठगतं माधुर्यमिव स्वम् विभूषणम् तेन हि भूषितमुद्गानमृद्धिमल्लक्ष्यते । स्वरमिच्छेत इच्छामात्रेण सौस्वर्यासम्भवात्तद्धेतु दन्तधावनतैलपानादि कुर्यादित्यर्थादवगम्यते । एतच्च कण्ठनिष्ठं माधुर्यं बाह्यं धनं सौस्वर्यस्य ध्वनिगतत्वात् ॥२७॥ इदानीं लाक्षणिकवर्णज्ञानपूर्वकं वर्णोच्चारणं वर्णनिष्ठत्वादान्तरं धनमित्याह । सुवर्णम् कण्ठ्योऽयं दन्त्योऽयमिति लक्षणज्ञानपूर्वकं सुष्ठु वर्णोच्चारणम् । अस्योपासकस्य सुवर्णं लोकप्रसिद्धमेव हिरण्यं भवति ॥२८॥ तस्य वै साम्नो वागेव जिह्वामूलादान्यष्टौ स्थानानि प्रतिष्ठा । वागिति जिह्वामूलादीनां स्थानानामाख्या सैव प्रतिष्ठा । हि यस्मादेष प्राणो वाचि जिह्वामूलोरःशिरःकण्ठदन्तोष्ठनासिकातालुषु स्थानेषु प्रतिष्ठितः सन्खलु निश्चितमेतद्गानं गीयते गीतिभावमापद्यते तस्मात्साम्नो वागेव प्रतिष्ठेति सम्बन्धः । मतान्तरमाह अन्ने अन्नपरिणामे देहे प्रतिष्ठितो गीयते । इत्येकीयपक्षस्यानिन्दितत्वाद्विकल्पेन प्रतिष्ठागुणविज्ञानं कुर्यात् वाग्वा प्रतिष्ठान्नं वेति ॥२९॥ इदानीमेवं प्राणविज्ञानवतो मन्त्रजपविधित्सयाह अथात इति । अथ प्राणविज्ञानकथनानन्तरं यस्माच्चैवं विदुषा प्रयुज्यमानं जपकर्म देवभावाभ्यारोहफलमतः तस्मात्तद्विधीयते । तस्य चोद्गीथसम्बन्धात्सर्वत्रोद्गानकाले प्राप्तौ पवमानानामेवेति वचनात्पवमानेषु त्रिष्वपि कर्तव्यतायां प्राप्तायाम् पुनः कालसंकोचं करोति स वै खल्विति । स प्रस्तोता यस्मिन्काले

साम प्रस्तुयात्प्रारभेत तस्मिन्काले एतानि जपेत् । अस्य च जपकर्मणोऽभ्यारोह इत्याख्या आभिमुख्येनारोहयत्यनेन जपकर्मणा एवंविद्देवभावमित्यभ्यारोहः । एतानीति बहुवचनात्त्रीणि यजूंषि द्वितीयानिर्देशाद्ब्राह्मणोत्पन्नत्वाच्च यथापठित एव स्वरः प्रयोक्तव्यो न मान्त्रः । एतच्च जपकर्म याजमानम् । मृत्युर्वाऽअसत् स्वाभाविककर्मविज्ञाने मृत्युरित्युच्येते सदमृतम् सच्छास्त्रीये कर्मविज्ञानेऽउच्येते ॥३१॥ तमःशब्देन अशास्त्रीयकर्मज्ञानमूलमज्ञानमुच्यते आवरणात्मकत्वात्तस्य ॥३२॥ प्राणवदुद्गातुरपि स्वार्थं गानमस्तीत्याह अथ त्रिषु पवमानेषु यजमानोद्गानकरणानन्तरं यानीतराण्यवशिष्टानि नव स्तोत्राणि तेषु स्तोत्रेषु प्राणविदुद्गाता आत्मार्थमन्नाद्यमन्नं च तदाद्यं चान्नाद्यमागानेन सम्पादयेत् । अस्योद्गातुः सर्वफलसाधकत्वमाह तस्मादिति यस्मात्स एष उद्गाता एवंवित् यथोक्तप्राणवित् प्राणवदेव आत्मने आत्मार्थं वा यजमानाय वा यं कामं कामयते इच्छति तमागायति आगानेन साधयति तस्मात्तु तस्मादेव यजमानस्तेषु नवसु स्तोत्रेषु प्रयुज्यमानेषु यं कामं कामयेत इच्छेत् तं कामं वरं वृणीत प्रार्थयेदित्यन्वयार्थः ॥ एवं कर्मसमुच्चितादुपासनात्फलसिद्धौ आशङ्कासम्भवाभावेऽपि केवलादुपासनात्तत्सिद्धिशङ्का स्यात्तां निरस्यति कर्मानधिकृतस्यापि तत् ह एतत्प्राणदर्शनं केवलमपि लोकजिदेव लोकसाधनमेव न ह एवालोक्यतायै अलोकार्हत्वाय आशास्ति आशंसनं प्रार्थना नैवास्ति । तथा चोपासनासहितं कर्म सकृदेवानुष्ठितं सददृष्टद्वारा फलसाधनम् केवलोपासनं तु नैरन्तर्येणासकृदनुष्ठितं तत्साधनमित्यर्थः ॥३३॥१॥४॥

एवं ज्ञानकर्मभ्यां समुच्चिताभ्यां प्रजापतित्वप्राप्तिर्व्याख्याता इदानीमस्य प्रजापतेः फलभूतस्य जगत्सर्जनस्थितिसंहारेषु स्वातन्त्र्यादिविभूत्युपवर्णनेन तं स्तोतुं ज्ञानकर्मणोर्वैदिकयोः फलोत्कर्षो वर्णयितव्य इत्येवमर्थमात्मैवेदमग्रऽइति पुरुषविधब्राह्मणमारभ्यते । वक्ष्यमाणब्रह्मविद्याधिकारहेतुभूतवैराग्योत्पादनाय आत्मैवेति तत्रात्मशब्देन प्रजापतिः प्रथमोऽजः शरीरी वैदिकज्ञानकर्मफलभूतोऽभिधीयते । इदं दृश्यमानं शरीरभेदजातं तेन प्रजापतिशरीरेणाविभक्तमग्रे शरीरान्तरोत्पत्तेः प्रागात्मैवासीत् । पुरुषविधः पुरुषाकारः शिरःपाण्यादि लक्षणो मन्वादीनां स्रष्टा विरा[डात्मा] ॥१॥ एवमुपासनार्थं प्रजापतेरहंनामोक्त्वा इदानीं पुरुषनामनिर्वचनमाह । औषददहत् ॥२॥ यदिदं स्तोतुमभिप्रेतं प्राजापत्यलक्षणं ज्ञानकर्मफलं तदपि नैव संसारविषयमत्यक्रामदितीममर्थं प्रदर्शयिष्यन्नाह स इति ॥३॥ एवं प्रजापतेर्भयाद्याविष्टत्वेन संसारान्तर्भूतत्वमुक्तम् इदानीं तत्रैवारत्याविष्टत्वं हेत्वन्तरमाह । द्वितीय त्यपनोदसमर्थं स्त्रीवस्त्वैच्छत् इष्टवान् । तस्य चैवं स्त्रीविषयं गृध्यतोऽतिविषयासक्तस्य स्त्रिया परिष्वक्तस्येवात्मन्यभिमाने संजाते स ह प्रजापतिस्तेनैवाभिमानेन सत्यसंकल्पत्वादेतावत्परिमाणः बभूव यथा लोके स्त्रीपुमांसावरत्यपनोदनाय अन्योऽन्यं गाढमालिङ्गितौ यत्परिमाणौ स्यातां तथा तत्परिमाणो बभूव ॥४॥ स विराडात्मा विराट्स्वरूपानुपमर्देनैव इमं परिष्वक्तस्त्रीपुंसपरिमाणमात्मानं शरीरं एतावत्परिमाणं द्विःप्रकारं पातितवान् । ततस्तस्मात्पातनात्पतिर्मन्वाख्यः पत्नी शतरूपाख्या च बभूवतुः । यस्मात्पतिपत्न्यावेकशरीरविभक्तौ तस्मात्स्वः स्वस्य आत्मनः इदं शरीरं प्राक्स्त्र्युद्वहनादर्धबृगलमिव बृगलं विदलम् अर्धं च तद्बृगलं चार्धबृगलं शुक्त्यादिविभागवत् अर्धविदलमेवेत्यर्थः । अत्राभियुक्तसंमतिमाहेति हेति यज्ञस्य वक्ता यज्ञवल्कस्तस्यापत्यं याज्ञवल्क्यो दैवरातिर्ब्रह्मणो वापत्यम् स ह किल इति इत्थमाह स्मो-

त्तवान् । द्वेधापातने सत्येको भागः पुरुषोऽपरस्तु स्त्रीत्यत्रैव हेवन्तरमाह तस्मादयमिति यस्माडुद्दहनात्प्रागवस्थायामयमाकाशः पुरुषार्धः स्त्र्यर्धशून्योऽसम्पूर्णो वर्तते तस्मात्पुनरुद्दहनादनन्तरं स्त्रिया प्राप्तस्त्र्यर्धेनेतरो भागः पूर्यतऽएव यथा विदलार्धोऽसम्पूर्णः सम्पुटीकरणेन पुनः सम्पूर्णः क्रियते तद्वत् । अथ मिथुनद्वारिकां सृष्टिमाह । स प्रजापतिर्मन्वाख्यस्तां शतरूपाख्यामात्मनो डुहितरं पत्नीत्वेन कल्पितां समभवत् मिथुनभावमुपगतवान् ॥५॥ सेयं शतरूपा उ ह किल न सगोत्रां समानप्रवरां भार्यां विन्देतेति डुहितृगमने स्मार्तं प्रतिषेधमनुस्मरन्ती ॥६॥ एकशफमेकखुरमश्वाश्वतरगर्दभाख्यं त्रयम् ॥८॥ बस्तः छागः ॥९॥ अहं वाव अहमेव सृष्टिरस्मि यन्मया सृष्टं जगत् मद्भिदत्वादहमेवास्मि न मत्तो व्यतिरिच्यते कर्तृक्रिययोरभेदोपचारात् । अस्योपासकस्यैतस्यां सृष्ट्यामेतस्मिञ्जगति स्रष्टृत्वं भवति ॥१०॥ एवमनुग्राह्यसृष्टिमुक्त्वानुग्राहकसृष्टिं प्रस्तौति । इतिशब्दो मन्थनप्रकाराभिनयप्रदर्शनार्थः इत्यनेन प्रकारेण मुखे हस्तौ प्रक्षिप्याभिमुख्येन मन्थनमकरोत् मुखं हस्ताभ्यां मथित्वा स प्रजापतिः मुखाच्च योनेर्हस्ताभ्यां च योनिभ्यामग्निं ब्राह्मणजातेरनुग्रहकर्तारमसृजत । यस्माद्दाहकस्याग्नेर्हस्तौ मुखं च योनिः तस्मादेतडुभयमप्यभ्यन्तरे लोमवर्जितम् या हि स्त्रीणां योनिः सा ह्यन्तरतोऽलोमकेत्येतत्सामान्याडुभयस्याग्नियोनित्वम् ॥११॥ सृज्यस्य स्रष्टुरनन्यत्वात्सृष्टं सर्वं स्रष्टा प्रजापतिरेवेत्युक्तस्यार्थस्य स्तुत्यभिप्रायेणाविद्वन्मतं निन्दितुमुपन्यस्यति तत्तत्र कर्मप्रकरणे केवलयाज्ञिका यागकाले यदिदं वच आङ्गः अमुमग्निं यजामुमिन्द्रं यजेत्यादि नामशस्त्रस्तोत्रकर्मादिभिन्नत्वाद्भिन्नमेवाग्न्यादिदेवमेकैकं मन्यमाना आङ्गरित्यभिप्रायः तन्न तथा विद्यादिति वाक्यशेषः । एतस्यानादरणीयत्वे हेतुं वदन्ननुग्राहकसृष्टिमुपसंहरति एतस्यैवेति [हि] यस्मात् यः सर्वोऽपि देवभेदः प्रजापतेरेव सा विसृष्टिः । प्रजापतिः प्राण एव सर्वे देवाः नान्यद्देवतान्तरमस्ति ॥१२॥ एकस्यैव प्रजापतेर्द्विधोपास्यत्वायाग्निसर्गमुक्त्वा अन्नसर्गमाह । द्रवात्मकश्च सोमः तस्माद्यदार्द्रं प्रजापतिना रेतसः सृष्टं तडु सोम एव ॥१३॥ अनुग्राहकदेवसृष्टिं सृष्ट्वा तडुपासकस्य फलोक्त्यर्थमादौ देवसृष्टिं स्तौति सा एषा सृष्टिः ब्रह्मणः प्रजापतेरतिसृष्टिरात्मनोऽप्यधिकतरा । श्रेयसः प्रशस्यतरानात्मनः सकाशात् । य एवं सृष्ट्यात्मा प्रजापतिरहमेवेति वेदास्योपासकस्यैतस्यामतिसृष्ट्यां देवादिप्रपञ्चे ह किल भवति प्रजापतिवत्स्रष्टृत्वमिति शेषः ॥१४॥ एतावतोक्तस्य व्याकृतस्य जगतोऽव्याकृतावस्थां बीजभूतां सबीजसंसारोज्जरणायाह । तदिदं व्याकृतं जगत्तर्हि तदा उत्पत्तेः (तुल्य° Cod.) प्राक्कालेऽव्याकृतमनभिव्यक्तनामरूपं ह किलासीद्बभूव । तदव्याकृतं जगन्नाम्ना रूपेण च स्वयमेव व्याक्रियत व्याक्रियतेति कर्म कर्तुः प्रयोगादात्मनैव विस्पष्टं नामरूपविशेषावधारणमर्यादं व्यक्तीभावमापद्यत । अयं पुरुषादिपदार्थः असौनामा देवदत्तो यज्ञदत्त इति वा नामास्येत्यसौनामा इदं शुक्लं कृष्णं वा रूपमस्येत्यसाविदंरूप इत्येवं व्याक्रियत असौशब्दः औतोऽव्ययत्वेन ज्ञेयः ॥१५॥ तज्जेदमित्यत्र मूलकारणमुक्त्वा तन्नामरूपाभ्यामित्यादिना तत्कार्यमुक्तम् इदानीं तस्मिन्कार्ये स्रष्टुः प्रवेशमाह । स एष स्रष्टा परमात्मैव इह ब्रह्मादिस्तम्बपर्यन्तेषु देहेषु अव्याकृते नामरूपे व्याकुर्वन्प्रविष्टः । क्षुरधाने नापितोपस्कराधाने । यथा वा जाठरत्वेन विश्वस्य भरणाद्विश्वम्भरोऽग्निः विश्वम्भरकुलाये अग्न्याधारभूतकाष्ठादिलक्षणे नीडे सर्वतो व्याप्यावस्थितः । इदानीं व्याकृताज्जगत आत्मानं पृथक्कर्तुं तन्न (!) पश्यन्तीति वाक्यम् तं

प्राणनादिक्रियाविशिष्टमात्मानं तत्रैवं प्रविष्टं सन्तं पश्यन्तोऽपि केवलं पूर्णमात्मानं न पश्यन्ति नोपलभन्ते यस्मात्स प्राणनादिक्रियाविशिष्ट आत्मा अकृत्स्नः असमर्थः असम्पूर्णः ॥१६॥ कुतः पुनस्तस्याकृत्स्नत्वमित्यत आह । प्राणनक्रियामेव कुर्वन्नात्मा प्राणो नाम प्राणाभिधानो भवति नान्यां क्रियां कुर्वन् तस्मात्क्रियान्तरविशिष्टस्यानुपसंहारादकृत्स्नो हि सः प्राणक्रियाकर्तृत्वाद्धि प्राणः प्राणितीति व्युत्पत्तेः । प्राणवदनाभ्यामनुक्तकर्मेन्द्रियव्यापार उपलक्ष्यते दृष्टिश्रुतिभ्यामनुक्तज्ञानेन्द्रियव्यापार (°क्तकाने° Cod.) उपलक्ष्यते । तान्येतानि प्राणादिनामान्यस्यात्मनः कर्मजानि नामान्येव न वस्तुविषयान्यतो न कृत्स्नवस्त्ववद्योतकानि । अकृत्स्नदर्शी नात्मदर्शीत्याह स यः अतोऽस्मात्प्राणनादिक्रियासमुदायादेकैकम् प्राणमिति वा चक्षुरिति वा विशिष्टमनुपसंहृतेतरक्रियात्मकमात्मानं मनसायमात्मेत्युपास्ते चिन्तयति स न जानाति कृत्स्नमात्मानम् ॥१७॥ कथं पुनर्ब्रह्मात्मतत्वदर्शीत्याकाङ्क्षापूर्वकं विद्यासूत्रमवतारयति आत्मेत्येवेति । पदनीयं गमनीयमन्वेषणीयम् । यथा ह वै लोके गवादिखुराङ्कितो देशः पदमित्युच्यते तेन पदेनान्विष्यमाणो नष्टं विवित्सितं गोसुवर्णादि वस्तु अनुविन्देल्लभेत एवमेनेन प्रकारेण श्रुत्यादिनात्मनि लब्धे सर्वमनुलभते । इदानीं गुणविज्ञानफलमाह कीर्तिमिति कीर्तिं प्रख्यातिं श्लोकं च मित्रैः सह संघातम् ॥१८॥ कुतोऽन्यत्सर्वमनादृत्यात्मतत्वमेव विज्ञेयमित्याशङ्कायां लोकदृष्टिमवष्टभ्याह तदेतदिति । बाह्यात्पुत्रवित्तादेः प्राणपिण्डसमुदायो ह्यन्तरोऽभ्यन्तर आत्मनः संनिकृष्टस्तस्मादप्यन्तरादतिशयेनान्तरमन्तरतरम् । यदयमात्मा यदेतदात्मतत्वम् । किं तव पुत्रादिलक्षणं प्रियमभिमतम् तर्हि मन्दोऽसि यतः तत्प्रियं रोत्स्यति आवरणं प्राणसंरोधं प्राप्स्यति विनङ्क्ष्यतीति यावत् यस्मादेव वक्तुमीश्वरो ह समर्थः पर्याप्त एव तस्मादेवं वदेत् कुतोऽस्येश्वरत्वमवगम्यतऽइत्याशङ्कायां यथाभूतार्थवादित्वादित्याह तथैवेति यस्मात्प्रियत्वेन कल्पितमनात्मवस्तु विनङ्क्ष्यतीति यत्तेनोक्तं तत्तथैव स्यादविसंवाद्येव भवेत् यथाभूतार्थवादी हि सः तस्मादस्येश्वरत्वमवगम्यते । प्रमायुकं प्रमरणशीलम् ॥१९॥ आत्मेत्येवोपासीतेति सूत्रिता ब्रह्मविद्या यदर्था कृत्स्नाप्युपनिषत् तस्यैतस्य सूत्रस्य व्याचिख्यासुः श्रुतिः प्रयोजनाभिधित्सयोपोद्घातं करोति । ब्रह्म परमात्मा तद्यया वेद्यते सा ब्रह्मविद्या तया ब्रह्मविद्यया सर्वं निरवशेषं भविष्यन्तः सर्वात्मका भविष्याम इत्येवं मनुष्या यन्मन्यन्ते सम्भावयन्ति । मनुष्यग्रहणं विशेषतोऽधिकारिज्ञपनार्थम् मनुष्या एव हि विशेषतोऽभ्युदयनिःश्रेयससाधनेऽधिकृताः । तत्र विप्रतिषिद्धं वस्तु लक्ष्यते अतः पृच्छामः किमु तद्ब्रह्मेति तद्ब्रह्म किं यस्य विज्ञानात्सर्वं भविष्यन्तो मनुष्या मन्यन्ते तद्ब्रह्म किमवेत्किमज्ञासीद्यस्माद्विज्ञानात्तद्ब्रह्म सर्वमभवदिति त्रयः प्रश्नाः । तद्ब्रह्म किमात्मस्वरूपमतिरिक्तं वेति प्रथमः किं वावेदिति स्वरूपं तदतिरिक्तं वाज्ञासीदिति द्वितीयः यस्मात्तत्सर्वमभवदिति सर्वभावापत्तिरपि किं विद्यमानैवाभिव्यज्यते नूतनं वोत्पद्यतऽइति तृतीयः ॥२०॥ एतेषां प्रश्नानां क्रमेण सर्वदोषानाघ्रातं प्रतिवचनमाह । अग्रे प्राक्प्रतिबोधादपि इदं शरीरस्थं प्रमात्रादिसाक्षिभूतं त्वंपदलक्ष्यं ब्रह्म वै ब्रह्मैवासीत् । तद्ब्रह्मविद्याविशिष्टतयाधिकारित्वेन (विका° Cod.) व्यवस्थितं नासि त्वं संसारी किं तु सकलधर्मरहितं चिदानन्दैकरसं ब्रह्मैवासीति दयालुनाचार्येण कथंचित्प्रतिबोधितं आत्मानमेव अहं ब्रह्म प्रमात्रादिसाक्ष्यशनायाद्यतीतं नेतिनेत्यस्थूलादिलक्षणमस्मि भवामीत्येवमवेदज्ञासीत् । ब्रह्म-

विद्यायामग्निहोत्रादाविव मनुष्यत्वाद्यधिकारिविशेषणनियमो नास्तीत्याह तद्यो-यो देवानामिति । प्रत्यबुध्यत प्रतिबुद्धवान् आत्मानं यथोक्तेन विधिना । आत्मबोधनादेव स-स देवस्तद्ब्रह्म सर्वात्मकमभवन्न साधनान्तरेण ॥२१॥ अस्या ब्रह्मविद्यायाः सर्वभावापत्तिः फलमित्येतस्यार्थस्य दार्ढ्याय श्रुतिर्मन्त्रमुदाहरति तद्वेति एतस्मादेव ब्रह्मणो दर्शनादृषिर्वामदेवाख्योऽहं मनुरिति मन्त्रं (ऋ° ४. २६. १.) प्रतिपन्नवान् स एतस्मिन्ब्रह्मदर्शनेऽवस्थित एतं मन्त्रं ददर्श । ननु महतां देवादीनां वीर्यातिशयवाद्ब्रह्मविद्यया सर्वभावापत्तिर्युज्यते कथं पुनरिदानीं कलिकाले वर्तिनां मनुष्याणां विशेषतोऽल्पवीर्यत्वात्सर्वभावापत्तिरित्यत आह तदिदमपीति । अभूत्यै सर्वात्मकब्रह्मभावस्याभवनाय न पर्याप्ताः । एवं सोपपत्तिकं विद्यासूत्रमुक्त्वा सम्प्रत्यविद्यासूत्रमाह अथ योऽन्यामिति यः कश्चिदब्रह्मवित्स्वात्मनि कर्तृत्वमङ्गीकृत्यान्यामात्मनो व्यतिरिक्तां देवतामन्योऽहमुपास्यदेवतायाः सकाशादस्म्यन्योऽसौ मन्त्र उपासनीयो देव इत्येवं भेददृष्ट्योपास्ते स्तुतिनमस्कारयागबल्युपाहारप्रणिधानध्यानादिना स उपासको न वेद उपास्योपासकयोस्तत्त्वं न विजानाति । न केवलमेवम्भूतोपासकोऽविद्यादोषवानेव किं तु (तर्हि Cod.) पशुसदृशोऽपि भवति यथा पशुर्गवाश्वादिर्दोहनवाहनाद्युपकारैरुपभुज्यते एवमेव सोऽविद्वान्देवानां मध्ये एकैकस्यापि देवस्य पशुवदनेकैरुपकारैरुपभोग्यो भवति । लोकपशोर्मनुष्यपशौ यथोक्तं विशेषं वक्तुं श्रुतिः स्वयमेवाह यथा ह वा ऽइति यथा ह वै लोके बहवो गोऽश्वादयः पशवो मनुष्यमात्मनोऽधिष्ठातारं स्वामिनं दोहनवाहनादिना भुञ्ज्युः पालयेयुः एवं बहुपशुस्थानीयोऽयं कर्मी पुरुष एकैक एव देवानिन्द्रादीन्स्तुतिनमस्कारादिक्रियया भुनक्ति पालयति । देवग्रहणमृषिपित्रादीनामप्युपलक्षणपरम् । अत एव मनुष्याणां पशुभावाद्व्युत्थानं देवा द्विषन्तीत्याह एकस्मिन्नेवेति यथा लोके बहुपशुमतोऽपि एकस्मिन्नेव पशौ व्याघ्रादिना आदीयमानेऽपह्रियमाणेऽप्रियं भवति तथा बहुषु बहुपशुस्थानीये एकस्मिन्पुरुषे पशुभावाद्व्युत्तिष्ठति सति देवानामप्रियं भवतीति किमु वक्तव्यम् अथ एवाविद्यावतां पशुभावाद्व्युत्थानसाधनं तत्त्वज्ञानमपि देवा द्विषन्तीत्याह तस्मादेषामिति यस्मान्मनुष्याणां पशुभावाद्व्युत्थानं देवानामप्रियं तस्मात्कारणाद्यदेतद्ब्रह्मात्मतत्त्वं मनुष्याः कथं चन विद्युर्विजानीयुस्तदेषां देवानां न प्रियं नेष्टमित्यर्थः ॥२२॥ अथेत्यभ्यमन्थदित्यत्रानुग्राहकदेवतासर्गं प्रक्रम्याग्नेरेव सृष्टिरुक्ता नेन्द्रादीनाम् अत्र च विद्यां प्रस्तुत्य तेषां सृष्टिरुच्यते ब्रह्म वाऽइत्यादिनाविद्वान्कैः कर्मभिः केषां देवानां भोग्य इत्यथोऽअयं वाऽआत्मेत्यादिना (क° २१.) विशेषतो दर्शयितुम् । आत्मैवेदमग्रऽआसीदित्यत्र (क° १.) यदात्मशब्देनोक्तं स्रष्टृ ब्रह्म तदग्निं सृष्ट्वाग्नेऽग्निरूपापन्नं ब्राह्मणजात्यभिमानवदस्मिन्वाक्ये ब्रह्मशब्देनाभिधीयते । एकमभिन्नम् । तद्ब्राह्मणजात्यभिमान्यग्न्यात्मकं ब्रह्मैकं केवलं परिपालयितृक्षत्रादिशून्यं सन्न व्यभवत् न विभूतवत् (°ततत् Cod.) कर्मणे नालमासीत् । तद्ब्रह्म ब्राह्मणोऽस्मि ममेत्थं कर्तव्यमित्यात्मनो ब्राह्मणजातिनिमित्तकर्मकर्तृत्वविभूत्यै श्रेयो रूपं प्रशस्तरूपमत्यसृजत अतिशयेन सृष्टवान् । क्षत्रं क्षत्रियजातिम् तदेव क्षत्रं व्यक्तिभेदेन प्रदर्शयति यान्येतानि प्रसिद्धानि देवत्रा देवेषु क्षत्राणि कानि पुनस्तानि तत्राभिषिक्ता एव विशेषतो निर्दिश्यन्ते इन्द्रो देवानां राजा वरुणो यादसां सोमो ब्राह्मणानां रुद्रः पशूनां पर्जन्यो विद्युदादीनां यमो धर्मराजः पितॄणां मृत्युर्यमदूतो रोगादीना-

मोशान ईश्वरो भासां राजा । तदन्विन्द्रादिक्षत्रदेवताधिष्ठितानि मनुष्यक्षत्राणि सोमसूर्यवंश्यानि पुरूरवःप्रभृतीनि सृष्टान्येव द्रष्टव्यानि तदर्थ एव हि देवक्षत्रसर्गः प्रसृतः । राजसूयाभिषिक्तेनासन्द्यास्थितेन राज्ञा स ब्रह्मन्नित्येव प्रथममामन्त्रयतऽइत्यादिनामन्त्रित ऋत्विक्त्वं ब्रह्मासीतीतरः प्रत्याहेति यत् (५. ८. ८. १.) तदेतदभिधीयते क्षत्रऽएव तद्यशो दधातीति । अन्ततोऽन्ते कर्मपरिसमाप्तौ । एनं स्वयोनिभूतं ब्राह्मणम् । ऋच्छति विच्छिनत्ति ॥२३॥ कर्माङ्गभूतद्रव्योपार्जनार्थं वैश्यसृष्टिमाह । देवजातानि देवजातिभेदाः । वसवोऽष्टसंख्यो गणः तथा एकादश रुद्राः द्वादशादित्याः दश विश्वे देवाः विश्वाया अपत्यानि सर्वे वा देवाः मरुतः सप्तसप्तसंख्याताः सप्त गणाः ॥२४॥ परिचारकसृष्टिमाह । पुष्यतीति पूषा इयं वै पृथिवी पूषा । पुष्यति पुष्णाति ॥२५॥ क्षत्रस्योग्रत्वात्तन्नियन्तृधर्मसर्गमाह । क्षत्रस्य क्षत्रं क्षत्रस्यापि नियन्तृ उग्रादप्युग्रं । यो धर्मश्चेतनभूतो देवतात्मकः । धर्मेण बलेन जेतुमाशंसते कामयते इच्छति ॥२६॥ ननु पुनरुक्तिर्व्यर्थेत्याशङ्कायां पूर्वत्र देवेषु दर्शितस्य वर्णविभागस्य मनुष्येषु योजनार्थमुक्तानुवादपूर्वकं देवसर्गमुपसंहरति तदेतदिति । सृष्टवर्णचतुष्टयनिविष्टमवान्तरविभागमभिधातुमारभते तदग्निनेति तदग्निरूपापन्नं स्रष्टृ ब्रह्माग्निनैव नान्यदेवतान्तरस्वरूपेण क्षत्रादिविकारप्राप्तिमन्तरेण केवलाग्निरूपेणैव देवेषु ब्रह्म ब्राह्मणजातिरभवत् तदेवाग्निरूपापन्नं स्रष्टृ ब्रह्म तेनैव रूपेण मनुष्येषु ब्राह्मणो ब्राह्मणजातिरभवदित्यनुषज्यते । इतरेषु वर्णेषु तु अग्निब्राह्मणलक्षणं विकारान्तरं प्राप्य स्रष्टृ ब्रह्माभवदिति दर्शयति क्षत्रियेणेन्द्रादिदेवक्षत्रियेण नियन्त्रितोऽनुगृहीतश्च क्षत्रियो मनुष्यक्षत्रियः सोमसूर्यवंश्यः पुरूरवइक्ष्वाकुप्रभृतिको देवमानुषब्राह्मणरूपेण विकृतात्स्रष्टृब्रह्मणः सकाशादभवत् तथा वैश्येन वस्वादिदेववैश्येनाधिष्ठितो वैश्यो मनुष्यवैश्योऽभवत् एवं शूद्रेण देवशूद्रेण पूषाधिष्ठितः मनुष्यशूद्रोऽभवत् । यस्मात्क्षत्रादिषु विकारापन्नं स्रष्टृ ब्रह्माग्नौ ब्राह्मणे एव चाविकृतं तस्माद्देवेषु देवानां मध्येऽग्नावेवाग्निसम्बद्धं कर्म कृत्वैव लोकं कर्मफलमिच्छन्ते प्रार्थयन्ते । कर्मफलदानार्थमेव हि तद्ब्रह्म कर्माधिकरणत्वेनाग्निरूपेण व्यवस्थितम् तस्मात्तस्मिन्नग्नौ कर्म कृत्वा तत्फलं प्रार्थयन्ते । मनुष्याणां मध्ये कमपि मनुष्यमवलम्ब्य कर्मफलभोगापेक्षायामग्न्यादिनिमित्तक्रियापेक्षामन्तरेणापि ब्राह्मणे ब्राह्मणजातौ ब्राह्मण्यप्रयुक्तजपादिकर्ममात्रेण लोकमिच्छन्ते । हि यस्माद्यत्स्रष्टृ ब्रह्म तदेताभ्यामग्निब्राह्मणलक्षणाभ्यां रूपाभ्यां साक्षाद्रूपवदभवत् ॥२७॥ केचिदग्न्यादिसाध्यकर्मणा मोक्षमिच्छन्ति तान्प्रत्याह अथेति अथशब्दः पूर्वपक्षव्यावृत्त्यर्थः यः कश्चित्स्वं लोकं परमात्माख्यमहं ब्रह्मास्मीत्यदृष्ट्वास्माल्लोकात्सांसारिकात्पिण्डग्रहणलक्षणात्प्रैति म्रियते तमेनं स स्वो लोकः परमात्माविदितोऽविद्यया व्यवहितः सन् शोकमोहभयादिदोषापनयनेन न भुनक्ति न पालयति । उ पुनः ह किल वै निश्चितं संसारमण्डले यः कश्चिन्महात्मा प्यनेवंविद्यन्महद्बहु अश्वमेधादि पुण्यं कर्म प्रकृष्टफलमेव नैरन्तर्येण करोति अनेनैवानन्त्यं मम भविष्यतीति तत्कर्मास्याविदुषो ह निश्चितमन्ततः फलभोगस्यावसाने क्षीयतऽएव कृतकत्वात् स्वप्नविभूतिवत् । आत्मानमेव लोकं प्रत्यग्ब्रह्मैकत्वलक्षणमुपासीताशेषानात्मदृष्टिपरिहारेण निरन्तरमनुसंदधीत ॥२८॥ अत्राविद्वान्वर्णाश्रमाद्यभिमानी (नौ C.) धर्मेण नियम्यमानो देवादिकर्मकर्तव्यतया पशुवत्परतन्त्र इत्युक्तम् कानि पुनस्तानि कर्माणि यत्कर्तव्यतया परतन्त्रो भवति के वा ते देवादयो येषां कर्मभिः पशुवदुपकरोतीति तदुभयं प्रपञ्चयति । अयं यः

प्रकृतो गृही कर्माधिकृतोऽविद्वाञ्छरीरेन्द्रियसंघातविशिष्टः पिण्ड आत्मेत्युच्यते अयं वै सर्वेषां देवादीनां पिपीलिकान्तानां भूतानां प्राणिनां लोको भोग्यः सर्वेषां वर्णाश्रमादिविहितैः कर्मभिरुपकारित्वात् । कैः पुनः कर्मविशेषैरुपकुर्वन्केषां भूतविशेषाणां लोक इत्याह स यज्जुहोतीति स गृही । यागो देवतामुद्दिश्य द्रव्यपरित्यागः स एवासेचनाधिको होमः तेन होमयागलक्षणेन कर्मणावश्यकर्तव्यत्वेन प्रतिबद्धः सन्पशुवत्परतन्त्रो देवानामिन्द्रादीनां लोको भोग्यः । अनुब्रूते स्वाध्यायमधीतेऽहरहः । निपृणाति पिण्डोदकादिकं प्रयच्छति । गृहे भूम्युदकादिदानेन वासयते । विन्दति लम्भयति । यदस्य कर्मिणो गृहेषु श्वापदा मार्जारादयः वयांसि पक्षिणश्च कणबलिभाण्डप्रक्षालनादिकमुपजीवन्ति । एवमुपकारिणं देवादयोऽप्युपकुर्वन्तीत्याह यथा ह वै लोके स्वाय लोकाय स्वस्मै देहायारिष्टिमविनाशमिच्छेत् पोषणरक्षणादिभिः सर्वतः परिपालयेत् । तदेतदेव यथोक्तानां कर्मणामृणवदवश्यकर्तव्यत्वं भूतयज्ञो मनुष्ययज्ञः पितृयज्ञो देवयज्ञो ब्रह्मयज्ञ इति पञ्चमहायज्ञप्रकरणे विदितं विज्ञातम् ननु श्रुतमप्यविचारितं नानुष्ठेयमित्यत आह मीमांसितमिति ऋणं ह वाऽइत्यादिनार्थवादेन (१. ७. २. १.) एतदवश्यकर्तव्यत्वमवदानप्रकरणे विचारितम् ॥२२॥ ननु येन प्रयुक्तो मनुष्यो ग्रहग्रस्त-इवावशः स्वात्मलोकबहिर्मुखीभूतो दुःखात्मके कर्मण्येव प्रवर्ततऽइति स कः प्रवर्तक इत्यपेक्षायां काम एवेति निर्णयार्थमाह आत्मैवेति अत्रात्मशब्देन स्वाभाविक्याविद्यया युक्तः कार्यकरणसंघातलक्षणो ब्रह्मचार्यभिधीयते । एतावान्वै प्रसिद्धजायापुत्रवित्तकर्माण्येव हि कामः कामयितव्यो विषयः । समस्तानेवैतान्यदा सम्पादयति तदा तस्य कृत्स्नता यदा तु कृत्स्नतां सम्पादयितुं न शक्नोति तदा तस्य कृत्स्नत्वसम्पादनोपायमाह तस्यो कृत्स्नतेति तस्याकृत्स्नत्वाभिमानिनः कृत्स्नतैवं भवति ॥३०॥ अस्याकृत्स्नत्वाभिमानिनो मन एवात्मा मनोऽनुवृत्ति होतरत्सर्वं कार्यकरणजातमिति मनसः प्रधानत्वात् यथा कुटुम्बपतिर्जायादीनामात्मैव जायादिचतुष्टयस्य तदनुकारित्वादेवम् । वाग्जाया वाचो मनोऽनुवृत्तित्वसामान्यात् । वाङ्मनसाभ्यां जायापतिस्थानीयाभ्यां प्रसूयते प्राणः कर्मार्थमिति प्राणः प्रजेव । विज्ञानस्य श्रोत्रा नत्वाच्छ्रोत्रमेव तत् । आत्मैव शरीरमेव आत्मादिवित्तानैर्निर्वर्त्यं कर्म यस्मादात्मना शरीरेण कर्म करोति । एवं कृत्स्नता सम्पन्ना तस्मात्स एष पाङ्क्तः पञ्चभिर्निर्वर्त्तो दर्शनात्मको यज्ञः कथं पुनरस्य पञ्चत्वसम्पत्तिमात्रेणैव यज्ञत्वमित्याशङ्कायां बाह्ययज्ञस्यापि पाङ्क्तत्वमाह पशुः पशुसाध्यो यज्ञः पाङ्क्तः पुरुषः पुरुषसाध्यो यज्ञः पाङ्क्त एव यथोक्तमनआदिपञ्चत्वयोगात् किं बहुना पञ्चभूतात्मकं हैरण्यगर्भं जगदपि पाङ्क्तमेव । य एवमुक्तप्रकारेण पाङ्क्तं यज्ञमात्मानं वेद स इदं सर्वं जगदात्मत्वेनाप्नोति ॥३१॥२॥४॥

एवं कामप्रयुक्तेन गृहस्थेनान्येन वा पाङ्क्तज्ञानकर्मभ्यां वा केवलज्ञानेन वा अद्यमानत्वेन सृष्टस्यान्नभूतस्य जगत उपासनार्थं विभागेन सप्तधा निरूपयितुं च सप्तान्नब्राह्मणं प्रवर्तते तत्र संक्षेपतः सविनियोगान्नप्रकाशकान्सूत्रभूतान्मन्त्रानुदाहरति । पिता क्षेत्रज्ञो ज्ञानकर्माधिकारी । अत्र ज्ञानकर्मणी मेधातपःशब्दवाच्ये । यो वै तामक्षितिमन्नाक्षयकारणं वेद स प्रतीकेन मुख्येन मुख्यया वृत्त्यान्नमत्ति ॥१॥ एतेषां मन्त्राणां तिरोहितार्थत्वेन प्रतीकग्रहणपूर्वकं तदर्थव्याख्यानाय ब्राह्मणं प्रवर्तते । अस्य भोक्तृसमुदायस्य तत्साधारणम् । एतस्य सर्वसाधारणस्यान्नस्यासाधारणीकुर्वतो दोषं दर्शयति स यः कश्चिदेतत्साधारणं

सर्वप्राणभृत्स्थितिकरं भुज्यमानमन्नमुपास्ते तत्परो भवति स्वशरीरस्थित्यर्थान्नोपयोगप्रधानो नादृष्टार्थकर्मप्रधानः स पाप्मनोऽधर्मान्न व्यावर्तते न विमुच्यते हि यस्मादेतदन्नं मिश्रं सर्वप्राणिसाधारणम् ॥२॥ हुतमित्यग्नौ हवनम् प्रहुतं च हुत्वा बलिहरणम् । एतस्य पूर्वपक्षत्वं सूचयितुं पक्षान्तरमाह अथोऽआहुरिति । तस्मात्तयोर्देवार्थत्वाविघाताय इष्टियाजुकः इष्टियजनशीलो न भवेत् इष्टिशब्देन किल काम्या इष्टयः काम्येष्टियजनप्रधानो न स्यात् ॥३॥ पशुभ्यो द्विपाच्चतुष्पाद्यः । त्रैवर्णिका जातकर्मणि जातमुत्पन्नमात्रं कुमारं बालमग्रे घृतं वैव घृतमेव सुवर्णयुक्तयानामिकयाङ्गुल्या प्रतिलेहयन्ति प्राशयन्ति स्तनं वा स्तनं चानुधापयन्ति पश्चात्पाययन्ति अत्रैवर्णिकानां तु यथासम्भवं स्तनमेवाग्रे धापयन्तीति बोद्धव्यम् ॥४॥ द्विपात्पश्वधिकारविच्छेदार्थोऽथशब्दः । जातं वत्सं कियत्प्रमाणो वत्स इत्येवं पृष्टाः सन्तोऽतृणाद इत्याहुः । अग्निहोत्रादिकर्म हि पयःसाधनम् अग्निहोत्राद्याहुतिविपरिणामकं च जगत्कृत्स्नमिति पयसः सर्वजगदाधारत्वं प्रसिद्धम् ॥५॥ सर्वं पयसि प्रतिष्ठितमिति विधित्सितदर्शनस्तुतये मतान्तरं निन्दितुमुद्भावयति । वर्षपर्यन्तं पयसा जुह्वदग्निहोत्रहोमं कुर्वन्पुनर्मृत्युमपजयति पुनर्मरणाय न जायते इतः प्रेत्य देवेषु सम्भूतः पुनर्न म्रियतऽइति यदिदं ब्राह्मणवादा आहुस्तन्न तथा द्रष्टव्यम् तर्हि कथं विद्यात् यदुक्तं पयसि हीदं सर्वं प्रतिष्ठितं पयआहुतिविपरिणामात्मकत्वात्सर्वस्य जगत इत्येवंविद्वान्सन्यस्मिन्नेव दिवसे जुहोति तस्मिन्नेव दिवसे पुनर्मरणमपजयति सकृन्मृत्वा शरीरेण वियुज्य न पुनर्मरणाय परिच्छिन्नं शरीरं गृह्णाति न संवत्सराभ्यासमपेक्षतऽएवंविद्वानेकेनैवाह्ना जगदात्मत्वं प्रतिपद्यते । हि यस्मात्समस्तं देवेभ्यः सर्वेभ्योऽन्नाद्यं सायंप्रातराहुतिप्रक्षेपेण ददाति तस्माद्युक्तम् सर्वमाहुतिमयमात्मानं कृत्वा सर्वदेहान्नरूपेण सर्वैर्देवैरेकात्मभावं गत्वा सर्वदेवमयो भूत्वा पुनर्न म्रियतऽइति भावः ॥६॥ पुरुषो वै योऽन्नानां भोक्ता स एवाक्षितिरन्नाक्षयहेतुः ननु प्रत्युत क्षयहेतुर्भोक्ता कथमस्याक्षयहेतुत्वम् यस्मात्स पुरुषो भोक्तापि इदं भुज्यमानं सप्तविधं कार्यकारणलक्षणं क्रियाफलात्मकमन्नं भूयो-भूयः उत्पादयति । धिया-धिया तत्तत्कालभाविन्या तया-तया प्रज्ञया कर्मभिश्च वाङ्मनःकायचेष्टितैर्जनयते । तर्हि सातत्येन भुज्यमानत्वाद्विच्छियेत किल । यस्माद्यथैवायं पुरुषो नैरन्तर्येणान्नानां भोक्ता यथाप्रज्ञं यथाकर्म चान्नं करोत्यपि ततः सातत्येन कर्तृत्वात्पुरुषोऽक्षितिः तस्माद्भुज्यमानान्यप्यन्नानि न क्षीयन्ते । प्रतीकं मुखं मुख्यत्वं प्राधान्यमिति प्राधान्येनैवान्नानां पितुः पुरुषस्याक्षितित्वं यो वेद स मुखेन मुख्यत्वेन प्राधान्येनान्नमत्ति । मन्त्रे देवात्मभावं प्रतिपद्यते ऊर्जममृतं चोपजीवतीति यदुक्तं सोपासनप्रशंसा प्रशस्तिमात्रं नापूर्वोऽर्थोऽस्तीत्यर्थः (!) ॥७॥ एवं पाठक्रममुल्लङ्घ्यार्थक्रमवशात्साधनभूतमन्नचतुष्टयं व्याख्यायेदानीं पाङ्क्तस्य कर्मणः फलभूतमन्नत्रयं कार्यत्वाद्विस्तीर्णविषयत्वाच्च पूर्वेभ्योऽन्नेभ्यः पृथगुत्कृष्टम् तद्व्याख्यानार्थं उत्तरो ग्रन्थ आ ब्राह्मणपरिसमाप्तेः । मनो वाचं प्राणमित्येवं तानि त्रीण्यन्नानि पिता सृष्ट्वा आदावात्मार्थं कृतवान् तेषां मध्ये मनसोऽस्तित्वं प्रति संशये प्रमाणमाह अन्यत्रमना इति । यस्मात्सर्वो लोक आत्मसाक्षिकं मनसैव पश्यति मनसैव शृणोति तद्व्यग्रत्वे दर्शनाद्यभावात् तस्मात्सिद्धं प्रत्यक्षादिप्रमाणकं मनसोऽस्तित्वम् ॥८॥ किं पुनर्मनसः स्वरूपमित्यतस्तदाह काम इति । कामः स्त्रीव्यतिकराभिलाषादिः संकल्पः प्रत्युपस्थितविषयसंकल्पनं शुक्लनीलादिभेदेन विचिकित्सा संशयज्ञानम् अज्ञादृष्टार्थेषु

कर्मसु देवतादिषु चास्तिक्यबुद्धिः अश्रद्धा तद्विपरीता बुद्धिः धृतिर्धारणं देहाद्यवसादे सत्युत्तम्भनम्। पुनरपि मनसोऽस्तित्वे कारणमाह तस्मादपीति यस्माच्चक्षुषो ऽगोचरे पृष्ठतोऽपि केनचिदुपस्पृष्टः कश्चित् हस्तस्यायं स्पर्शो जानोऽयं स्पर्श इति विवेकेन प्रतिपद्यते तस्मादस्ति विवेकप्रतिपत्तिकारणं मन इति ॥९॥ इह कर्मणां फलभूतानि त्रीण्यन्नानि मनोवाक्प्राणाख्यानि अध्यात्ममधिभूतमधिदैवं च व्याचिख्यासितानि तत्राध्यात्मिकानां वाङ्मनःप्राणानां मनो व्याख्यातमथेदानीमाध्यात्मिकाया वाचः स्वरूपमाह यः कश्चेति । अथ तस्याः कार्यमुच्यते एषा प्रकाशमात्रस्वरूपा वागान्तमभिधेयावसानमभिधेयनिर्णयमायत्तानुगतात एषा पुनः स्वयं नाभिधेयवत्प्रकाश्या किंतु प्रदीपादिवत्प्रकाशात्मकत्वात्प्रकाशिकैव स्वयं प्रकाशिकैव न प्रकाश्या प्रकाश्यात्मकत्वमेव वाचः कार्यमित्यर्थः । अथाध्यात्मिकप्राणविषयं वाक्यमवतारयितुं प्राणास्तित्वे प्रमाणं कथयन्प्राणस्वरूपमाह प्राण इति । प्राणो मुखनासिकाभ्यन्तरचारी हृदयवृत्तिः प्रणयनात्प्राणः मूत्रपुरीषादेरपनयनान्नाभिमर्यादोऽधोवृत्तिरपानः हृदयादारभ्य नाभिपर्यन्तं वर्तमानो व्यायच्छत्कर्मा (?°यमनकर्मा ?) वीर्यवत्कर्महेतुश्च व्यानः प्राणापानयोर्नियमनकर्मा उत्कर्षोर्ध्वगमनादिहेतुरापादतलमस्तकस्थान ऊर्ध्ववृत्तिरुदानः भुक्तस्य पीतस्य च समं नयनात्समानः कोष्ठस्थानोऽन्नपक्ता अन इत्येतेषां वृत्तिविशेषाणां सामान्यभूता सामान्यदेहचेष्टाभिसम्बन्धिनी वृत्तिरुच्यते एतत्सर्वं प्राणादिवृत्तिजातमाध्यात्मिकः साधारणासाधारणवृत्तिमान्प्राण एव वृत्तिवृत्तिमतोरभेदात् । व्याख्यातान्याध्यात्मिकानि मनोवाक्प्राणाख्यान्यन्नानि अतस्तेषां वागादीनां समुच्चितं स्वरूपं दर्शयति एतन्मय इति अयमात्मा प्राजापत्यैर्वाङ्मनःप्राणैरारब्धः कार्यकारणसंघातः पिण्ड एतन्मय एतद्विकारः ॥१०॥ एवं वागादीनामाध्यात्मिकीं विभूतिमुक्त्वा आधिभौतिकीं विस्तृतिमाह त्रय इति ॥११॥ अवति प्रतिपालयति विज्ञातरूपेणैवास्यान्नत्वं भोज्यत्वं प्रतिपद्यते ॥१५॥ एवमाधिभौतिकं विस्तारमुक्त्वाधिदैविकं विस्तारमाह तस्यै वाच इति तस्यै तस्याः प्रजापतेरन्नत्वेन प्रस्तुताया वाचः पृथिवी शरीरं बाह्य आधारः ज्योतीरूपं प्रकाशात्मकं करणमाधेयभूतमयं पार्थिवोऽग्निः ॥१८॥ तत्र मन एवास्यात्मा वाग्जाया प्राणः प्रजेत्यध्यात्मं मन एव पिता वाङ्माता मनः प्रजेत्यधिभूतं (? दैवतं Cod.) च वाङ्मनसयोः प्रजात्वं प्राणस्योक्तम् तथाधिदैवेऽपि प्राणस्य तत्प्रजात्वं वाच्यम् तौ अग्न्यादित्यौ आधिदैविके वाङ्मनसे मातापितरौ मैथुन्यं समगच्छताम् तयोरेव संगमनात्प्राणो वायुरजायत परिस्पन्दनाय कर्मणे जातः । वायोरिन्द्रत्वासपत्नत्वगुणविशिष्टस्योपासनमभिप्रेत्याह स इन्द्र इति ॥१९॥ अथाधिदैविकयोर्वाङ्मनसयोर्विभूतिनिर्देशानन्तरमेतस्य प्रकृतस्य प्राजापत्यान्नस्य प्राणस्यापः शरीरमाधारः पूर्ववत् ॥२०॥ इदानीमेषामाध्यात्मिकाधिभौतिकाधिदैविकानां वाङ्मनःप्राणानां ध्यानार्थं समत्वादिगुणमाह ॥२१॥ ननु फलवज्ज्ञानविषयेऽन्नत्रये व्याख्याते वक्तव्याभावात्किमुत्तरग्रन्थेनेत्याशङ्कायामुच्यते पिता पाङ्क्तेन कर्मणा सप्तान्नानि सृष्ट्वा त्रीण्यन्नान्यात्मार्थमकरोदित्युक्तम् तान्येतानि पाङ्क्तकर्मफलभूतानि व्याख्यातानि तेषु त्रिष्वप्यन्नेषु पाङ्क्तत्वावगतयऽआत्मा जाया प्रजा वित्तं कर्म चेति पञ्चकं संग्रहीतव्यम् तत्र पृथिव्यग्नी माता दिवादित्यौ पिता योऽयमनयोरन्तरा प्राणः स प्रजेति व्याख्यातम् तत्र वित्तकर्मणी सम्भावयितव्येऽइत्येतदर्थमुत्तरो ग्रन्थ आरभ्यते स एष इति योऽयमन्नात्मा प्रजापतिः प्रकृतः स एष संवत्सरात्मना

विशेषतो निर्दिश्यते । रात्रयः अहोरात्राणि तिथय एव प्रतिपदाद्याः । ध्रुवैव नित्यैव व्यवस्थिता । एतासां कलानां वित्तत्वं वक्तुं (?वक्त pr. m. चक्तुत sec.) तत्साधर्म्यमाह स चन्द्रात्मा प्रजापती रात्रिभिरिव प्रतिपदाद्याभिरुपचीयमानाभिः शुक्लपक्षे वर्धते कृष्णपक्षे ताभिरेवापचीयमानाभिः कलाभिरपक्षीयते अमावास्यायां ध्रुवैका कला व्यवस्थिता । एवं कलानां वित्तत्वे सिद्धे तदुपचयापचयौ कर्मेत्यभिप्रेत्याह स कलात्मा प्रजापतिरमावास्यां रात्रिं रात्री या ध्रुवा कला व्यवस्थितेोक्ता एतया षोडश्या कलया सर्वमिदं प्राणिजातं स्थावरजङ्गमात्मकमनुप्रविश्य यदपः पिबति यच्चौषधीरश्नाति तत्सर्वमेवौषध्यात्मना व्याप्यामावास्यां रात्रिमवस्थाय ततोऽपरेद्युः प्रातर्जायते द्वितीयया संयुक्तो भवति । एवमसौ प्रजापतिः पाङ्क्तात्मकः संवृत्तः । एवं प्रजापतेः पाङ्क्तकर्मफलत्वमुक्त्वा प्रासङ्गिकमर्थमाह तस्मादिति प्राणिनं न प्रमापयेत् कृकलासस्यापि सरटस्यापि प्राणं न विच्छिन्द्यात् स हि पापात्मा दृष्टोऽप्यमङ्गल इति कृत्वा स्वभावेनैव प्राणिभिर्हिंस्यते । निषेधप्रयोजनमाह एतस्या एव सोमदेवतायाः पूजार्थम् ॥२२॥ यत्पूर्वमाधिदैविकत्र्यन्नात्मकप्रजापत्युपासनमुक्तं (क अन्ना॰ Cod.) तदहमस्मि प्रजापतिरित्यहंग्रहेण कर्तव्यमित्याह यो वै (सः) परोऽक्षाभिहितः संवत्सरः प्रजापतिः षोडशकलः स नैवात्यन्तं परोऽक्षो मन्तव्यः यस्मादयमेव स प्रत्यक्ष उपलभ्यते कोऽसौ योऽयं पुरुष एवंवित् यो यथोक्तं त्र्यन्नात्मकं (क्तं अन्ना॰ Cod.) प्रजापतिमात्मभूतं (॰तिं स्वात्म॰?) वेत्ति सोऽयं प्रत्यक्षं प्रजापतिः केन सामान्येन प्रजापतिरित्यत आह तस्यैवंविदः पुरुषस्य गवादिवित्तमेव पञ्चदश कलाः कलावदुपचयापचयधर्मित्वात् आत्मैव पिण्ड एव षोडशी कला ध्रुवास्थानीया स विद्वान् चन्द्रवद्वित्तेनेवापूर्यते अपक्षीयते च । आत्मैव ध्रुवा कलेत्युक्तम् तदेव रथचक्रदृष्टान्तेन स्पष्टयति नाभिश्चक्रपिण्डिका नाभ्यै हितं नाभिमर्हतीति वा नभ्यम् तदेतल्लोके प्रसिद्धं चक्रपिण्डिकास्थानीयम् किं तत् यदयमात्मा योऽयं पिण्डः शरीरम् प्रधिः परिवारस्थानीयं बाह्यं वित्तम् चक्रस्येवारनेम्यादि । एवं सति फलितमाह यस्माच्छरीरं रथचक्रपिण्डिकास्थानीयं तस्माद्यद्यपि सर्वज्यानिं सर्वस्यापहरणं जीयते हीयते ग्लानिं प्राप्नोति तथापि चेद्यदि आत्मना शरीरेण नाभिस्थानीयेन जीवति तदा प्रधिना बाह्येन परिवारेणायमगात् (॰मागात् Cod.) क्षीणोऽयम् यथा चक्रमरनेमिविमुक्तमेवमाहुर्लौकिकाः जीवंश्चेदरनेमिस्थानीयेन वित्तेन पुनरुपचीयतऽइति वाक्यार्थः ॥२३॥ नन्वन्नत्रयात्मनि प्रजापतावहंग्रहोपासनस्य सफलस्योक्तत्वात् वक्तव्याभावात् उत्तरग्रन्थवैयर्थ्यमित्याशङ्कायामुच्यते एवं पाङ्क्तेन दैववित्तविद्यासंयुक्तेन कर्मणा त्र्यन्नात्मकप्रजापतिभावो (अन्ना॰ Cod.) व्याख्यातः अनन्तरं च जायादिवित्तं परिवारस्थानीयमित्युक्तम् तत्र पुत्रकर्मापरविद्यानां लोकप्राप्तिसाधनत्वमात्रं सामान्येनावगतम् न पुनः पुत्रादीनां लोकप्राप्तिफलं प्रति विशेषसम्बन्धनियमोऽवगतः स वक्तव्य इति तत्प्रदर्शनार्थमथ त्रयो वावेति कण्डिका प्रणीयते । शास्त्रोक्तसाधनार्हा लोकास्त्रय एव । के ते । केन कः साध्यः । पुत्रेणैव जेतव्यः । कर्मणा अग्निहोत्रादिलक्षणेन । विद्ययापरविद्यया ॥२४॥ एवं साध्यलोकत्रयफलभेदेन विनियुक्तानि पुत्रकर्मविद्याख्यानि त्रीणि साधनानि जाया तु पुत्रकर्मार्थत्वान्न पृथक्साधनमिति पृथङ्नाभिहिता वित्तं च कर्मसाधनत्वान्न पृथक्साधनम् । विद्याकर्मणोर्लोकजयहेतुत्वं स्वात्मप्रतिलाभेनैव भवतीति प्रसिद्धम् पुत्रस्य त्वक्रियात्मकत्वात्केन प्रकारेण लोकजयहेतुत्वमिति न ज्ञायते

ऽतस्तद्वक्तव्यमित्यथानन्तरमारभ्यतेऽथात इति अथ पुत्रकर्मविद्याख्यानां साधनानां साध्यविशेषसम्बन्धकथनानन्तरं यतः पुत्रस्यैतल्लोकसाधनत्वं कथमिति न ज्ञायतेऽतस्तत्कथयितुं सम्प्रत्तिः सम्प्रदानमारभ्यते पुत्रे हि पिता वक्ष्यमाणप्रकारेण स्वात्मव्यापारसम्प्रदानं करोति तेन सम्प्रत्तिसंज्ञकमिदं कर्म । यस्मिन्काले प्रैष्यन् प्रव्रजिष्यामि मरिष्यामीति वारिष्टदुःस्वप्नादिदर्शनेन मन्यते ॥२५॥ एतद्वाक्यत्रयस्यार्थस्तिरोहित इति मन्वाना श्रुतिर्व्याख्यानाय प्रवर्तते । योऽध्ययनव्यापारो मम कर्तव्य आसीदेतावन्तं कालं वेदविषयः स इत ऊर्ध्वं त्वं ब्रह्म त्वत्कर्तृकोऽस्त्विति वाक्यार्थः । मत्कर्तृका यज्ञा यऽआसन् तऽइत ऊर्ध्वं त्वत्कर्तृका भवन्तु तथा ये वै के च लोका मया जेतव्याः सन्तो जिता अजिताश्च तऽइत ऊर्ध्वं त्वं लोकस्त्वया जेतव्याः । एतत्सर्वं सन्नयं पुत्रः सर्वं ह्येमं भारं मदधीनं मत्तोऽपछिद्यात्मनि निधाय इतोऽस्माद्बन्धहेतुभूताल्लोकात् मा मामभुनजत्पालयिष्यति लृडर्थे लङ् । इदानीं पुत्रानुशासनस्य फलवत्त्वमाह तस्मात्पुत्रमिति लोक्यं पितुर्लोकहितम् एनं पुत्रमनुशासति शिक्षयन्ति लोक्योऽयमस्माकं स्यादिति मन्वानाः । कृतसम्प्रत्तिकः पिता किं करोति स यदेति । पुत्रनिर्वचनमाह स पुत्रो यदि अनेन पित्रा अक्ष्णया कोणच्छिद्रतोऽन्तरा कर्तव्यं किंचिदकृतं भवति तस्मादकृतात्कर्तव्यतारूपात्सर्वस्मात्सर्वलोकप्राप्तिप्रतिबन्धरूपादेनं मोचयति तत्सर्वं स्वयमनुतिष्ठन्पितुः छिद्रं पूरयित्वा पितरं त्रायते तस्मात्पुत्रो नाम । इदानीं पितुः पुत्रतादात्म्येनैतल्लोकावस्थानमुक्तं निगमयति स पुत्रेणेति । एवं प्रासङ्गिकं निरूप्य प्रकृतं पितरमेवाधिकृत्याहाथैनमिति एनं कृतसम्प्रत्तिकं पितरमेते वागादयः प्राणा दैवा हैरण्यगर्भा अमरणधर्माण आविशन्ति ॥२६॥ तेषामावेशनप्रकारमाह पृथिव्याऽइति ॥२७॥ यो जङ्गमेषु संचरन् स्थावरेषु चासंचरन्न व्यथते न दुःखनिमित्तेन भयन युज्यते अथो अपि न रिष्यति न विनश्यति न हिंसामापद्यते । एवंविदः फलमाह स एष इति सर्वभूतात्मतया सर्वज्ञः सर्वकृच्च भवति यथैषा पूर्वसिद्धा हिरण्यगर्भदेवता एवम् । किं च स इति दृष्टान्तनिर्देशः यथा एतां हिरण्यगर्भदेवतामिज्यादिभिः सर्वाणि भूतानि पालयन्ति । नन्वस्य विदुषः सर्वप्राणिनामात्मत्वेन तत्कार्यकरणात्मत्वात्सर्वप्राणिदुःखैरस्य सम्बन्धः स्यादित्यत आह यदु किं चेति अमैव सहैव प्रजाभिः तच्छोकादिनिमित्तं दुःखसंयुक्तमासां प्रजानां भवति परिच्छिन्नबुद्धिजनितत्वात् अमुं प्राजापत्ये पदे वर्तमानमेवंविदं पुण्यमेव शुभमेव फलमभिप्रेतं प्राप्नोति । पापं पापफलं दुःखम् ॥२८॥ तऽएते सर्वऽएव समाः सर्वेऽनन्ता इत्यविशेषेण वाङ्मनःप्राणानामुपासनमुक्तं नान्यतमगतो विशेष उक्तः किमेव[मेव] प्रतिपत्तव्यं किं वा विचार्यमाणे व्रतमुपासनं प्रति कश्चिद्विशेषः प्रतिपत्तुं शक्यतऽइति जिज्ञासायामाह अथोपासनोक्त्यनन्तरमत एषां यागादीनां प्राणानां मध्ये कस्य कर्मव्रतत्वेन धारयितव्यमिति मीमांसा उपासनकर्मविचारणा प्रवर्तते । व्रतमित्यवश्यानुष्ठेयं कर्मोच्यते । प्रवृत्तायां मीमांसायां प्राणव्रतमभग्नत्वेन धारणीयमिति निर्धारणार्थमाख्यायिकां प्रणयति । कर्माणि वागादीनि करणानि कर्मार्थानि हि तानीति कर्माणीत्युच्यन्ते ॥३०॥ उपयेमे संजग्राह । अवारुन्द्ध अवरोधं कृतवान्स्वकर्मभ्यः प्रच्यावितवान् ॥३१॥ अधिदैवतं देवताविषयं दर्शनमुच्यते कस्य देवताविशेषस्य व्रतधारणं श्रेय इति मीमांस्यते । म्लोचन्त्यस्तंयन्ति ॥३३॥ उक्तार्थदार्ढ्याय मन्त्रमवतारयति । देवा वागादयोऽग्न्यादयश्च तं धर्मं वायुव्रतं प्राणव्रतं चावश्यानुष्ठेयं चक्रिरे धृतवन्तः स एव प्राण-

वायुव्रतलक्षणो धर्म एवास्य श्रेयोऽपि । अमुर्हि अमुष्मिन्काले एते वागादयोऽग्न्यादयश्च । प्रकरणार्थमुपसंहरति तस्मादिति अध्यात्मं प्राणव्रतमधिदैवं च वायुव्रतमित्येकमेव व्रतं धार्यम् । न हि प्राणनापाननलक्षणस्य प्राणव्यापारस्योपरमोऽस्ति तस्मादिन्द्रियेतरव्यापारं हित्वा तदेवैकं व्रतं चरेत् । आप्नुवत् (!) प्राप्नुयात् । प्राणव्रतस्य सकृदनुष्ठानमाशङ्क्य सर्वेन्द्रियव्यापारनिर्वृत्तिरूपं संन्यासलक्षणं प्राणव्रतमामरणमनुवर्तयेत् यदि कदाचित्प्रारभेत प्राणव्रतं तर्हि समापयितुमिच्छेत् यदि ह्यस्माद्व्रताडपरमेत्प्राणः परिभूतः स्याद्देवाश्च । सर्वभूतेषु वागादयोऽग्न्यादयश्च मदात्मका एवाहं च सूत्ररूपप्राणात्मा परिस्पन्दकृदित्येवमुपासकस्य फलमाह तेनानेन प्राणव्रतेन प्राणात्मप्रतिपत्त्या एतस्या एव प्राणदेवतायाः सयुग्भावमेकात्मकत्वं विज्ञानप्रकर्षापेक्षं सलोकतां चैकस्थानत्वं विज्ञाननिकर्षापेक्षं प्राप्नोति ॥३४॥३॥४॥

अथ योऽन्यां देवतामुपास्तऽइत्यत्र (२. २२.) सूत्रिताया अविद्यायाः साध्यसाधनलक्षणो व्याकृताव्याकृतरूपो विस्तर इयता ग्रन्थेन निरूपितः इदानीं प्रतिपत्तिसौकर्यार्थं तस्यैव नामरूपकर्मात्मत्वेनोपसंहारं वक्तुमुपसंहारब्राह्मणं प्रवर्तते । उक्थं कारणमुपादानं सैन्धवलवणकणानां सैन्धवाचल-इव । समत्वात्साम सामान्यम् । ब्रह्म आत्मा ॥१॥ आत्मा आत्मशब्दवाच्यशरीरनिर्वर्त्यकर्मसामान्यम् आत्मना हि शरीरेण कर्म करोति शरीरे च सर्वं कर्माभिव्यज्यते । एवं नामरूपकर्मात्मत्वेन संक्षिप्तस्यापि जगतः पुनः संक्षेपान्तरमाह तदेतत्त्रयमिति । अयं प्रत्यक्ष आत्मा आत्मकार्यकरणसंघातः पिण्डः । एकः सन्नध्यात्माधिभूताधिदैवभावेन व्यवस्थितमेतदेव नाम रूपं कर्मेति त्रयम् । एकस्मिन्नपि संघाते कार्यकरणरूपेणावान्तरविभागमाह तदेतद्वक्ष्यमाणममृतम् प्राणो वै लिङ्गात्मा करणात्मकोऽन्तरुपष्टम्भक आत्मभूतोऽविनाशी अमृतभूतः स्थूलदेहे गच्छत्यपि यावन्मोक्षस्थायित्वात् नामरूपे पञ्चीकृतभूतात्मके शरीरावस्थे कार्यात्मके सत्यशब्दवाच्ये सच्च त्यच्च सत्यं भूतपञ्चकं तदात्मके । ताभ्यां बाह्याभ्यां शरीरात्मकाभ्यामुपजनापायिधर्मिभ्यां मर्त्याभ्यां नामरूपाभ्यामय क्रियात्मकस्तयोरुपष्टम्भकः प्राणश्छन्नोऽप्रकाशीकृतः अतः प्रत्यगात्मत्वं सुतरां दुर्विज्ञेयमिति तज्ज्ञानेऽवहितैर्भाव्यमिति भावः । एतदेव संसारतत्त्वमविद्याविषयं प्रदर्शितम् ॥३॥४॥४॥

अथ प्रथमेऽध्याये सूत्रितयोर्विद्याविद्ययोरविद्या प्रपञ्चिता सम्प्रति विद्यां प्रपञ्चयितुं श्रुतिर्द्वितीयमध्यायमारभते । तत्र वक्तृश्रोतृरूपाख्यायिकयाविद्याविषयमेव ब्रह्मत्वेनोपागतो (°त्मा° Cod.) गार्ग्यो ब्राह्मणो पूर्वपक्षवादी उपस्थाप्यते मुख्यब्रह्मात्मदर्शी राजाजातशत्रुः श्रोता सिद्धान्तवादी च । दृप्तो सम्यग्ब्रह्मवित्त्वादेव गर्वितो बलाकाया अपत्यं बालाकिः गार्ग्यो गर्गगोत्रापत्यम् । अजातशत्रुनामानं जनकं (! sic) काश्यं काशिराजम् । गवां सहस्रम् । ननु साक्षाद्ब्रह्मकथनमेव सहस्रदाने निमित्तम् कस्मान्नेष्यतऽइत्याशङ्कायां श्रुतौ राज्ञोऽभिप्रायमाह जनको जनक इतीति वैशब्दो जनको दाता जनको श्रोतेति प्रसिद्धद्योतनार्थः जनको दित्सुर्जनकः शुश्रूषुरिति वै ब्रह्मशुश्रूषवो विवक्षवः प्रतिजिघृक्षवश्च जना ब्राह्मणा धावन्ति अभिगच्छन्ति तस्मात्तत्सर्वं मय्यपि सम्भावितवानसीति मुख्यं ब्रह्मकथनं विनैव तद्वचनमात्रेणैव सहस्रं दद्म इति राज्ञोऽभिप्रायः ॥१॥ य एवासावादित्ये चक्षुषि चैकोऽभिमानी पुरुषश्चक्षुर्द्वारेणेह हृदि प्रविष्टोऽहं कर्ता भोक्ता चेत्यवस्थितमेतमेव पुरुषमस्मिन्कार्यकरणसंघाते अहं ब्रह्मोपासे ॥२॥ चन्द्रे मनसि चैकः पुरुषो भोक्ता कर्ता चेति पूर्ववद्विशेषणं बृहन्महान्

पाण्डुरं शुक्लं वासो यस्य स पाण्डुरवासाः (!) चन्द्राभिमानिनः प्राणस्य अप्शरीरत्वात् (अप-श° Cod.) सोमो राजेति चन्द्रमाः लतात्मकश्च सोमो यज्ञे योऽभिषूयते तं बुद्धिनिष्ठं च पुरुषमेकीकृत्य अहं ब्रह्मोपासे ॥३॥ विद्युति त्वचि हृदये चैका देवता तेजस्वीति तस्या विशेषणम् ॥४॥ आकाशे हृद्याकाशे हृदये चैका । अप्रवर्तित्वमप्रवर्तकत्वमक्रियावत्त्वं वा ॥५॥ वायौ प्राणे हृदि चैका । इन्द्रः परमेश्वरः वैकुण्ठोऽप्रसह्यः । अपराजिता सेनेति न परैर्जितपूर्वः मरुतां गणत्वप्रसिद्धेरेकस्मिन्वायावपराजिता सेनेति गुणः सम्भवति । जिष्णुर्जयशीलः अपराजिष्णुर्न परैर्जितस्वभावः अन्यतस्त्यानामन्यमातृतो जातानां सपत्नानां जयशीलः ॥६॥ अग्नौ वाचि हृदि चैका । यद्यद्धविर्विक्षिप्यते क्षिप्यते तत्सर्वं भस्मीकरणेन सहतऽइति विषासहिरग्निः । फलोक्तौ विषासहिः परेषां मर्षयिता ॥७॥ अप्सु रेतसि हृदि चैका । प्रतिरूपोऽनुरूपः श्रुतिस्मृत्यप्रतिकूलः । फलं प्रतिरूपं श्रुतिस्मृतिशासनानुरूपमेवैनमुपासकं प्राप्नोति ॥८॥ आदर्शे प्रसादस्वभावे चान्यत्र खड्गादौ हार्दे सत्त्वशुद्धिस्वाभाव्ये चैका ॥९॥ दिक्षु कर्णयोर्हृदि चैकाश्विनौ देवाववियुक्तस्वभावौ तस्य देवस्य गुणो द्वितीयवत्त्वमनपगत्वमन्योऽन्यमवियुक्तता दिशामश्विनोश्चैवंधर्मित्वात् । गणः समूहः ॥१०॥ गच्छन्तं पश्चात्पृष्ठतो य एवायं शब्दोऽनूदैत्युत्पद्यतेऽध्यात्मं च जीवनहेतुः प्राणस्तमेकीकृत्यैतमेवोपास्ते तस्य विशेषणमसुर्जीवनहेतुः प्राणः । सर्वं सम्पूर्णं यावत्कर्मोपात्तम् । कर्मपरिच्छिन्नकालात्पूर्वम् ॥११॥ छायायां बाह्ये तमसि अध्यात्मं चावरणात्मकेऽज्ञाने हृदि चैका देवता तस्या विशेषणं मृत्युः ॥१२॥ व्यस्तानि ब्रह्माण्युपन्यस्य समस्तं ब्रह्मोपदिशति आत्मनि प्रजापतौ बुद्धौ च हृदि चैका तस्या विशेषणमात्मन्वी वश्य आत्मास्यास्तीत्यात्मन्वी स्वतन्त्रः ॥१३॥ तं गार्ग्यं सलज्जमालक्ष्य विश्रम्भजननाय पाणौ हस्ते गृहीत्वा । तथा च बृहन्पाण्डुरवास (!) इत्यादिप्राणात्मचन्द्रादिनाम्ना सम्बोधनेन गार्ग्याभिमतप्राणदेवतातिरिक्त एवात्मास्मिञ्छरीरे कर्ता भोक्ता न प्राण इति निर्णीतम् अन्यथोच्छ्वासनिःश्वासरूपेण व्याप्रियमाणस्य प्राणस्य सम्बोधनाश्रवणमनुत्थानं च न भवेत् आपेषणेन च प्राणशरीरसंघातमात्रो भोक्ता नेति निश्चितम् अन्यथा संघातमात्राविशेषात्स्पर्शमात्रेणाप्युत्थानं स्यादिति भावः ॥१५॥ संकल्पविकल्पाद्यात्मकमन्तःकरणं बुद्धिर्विज्ञानमुच्यते तन्मयस्तत्प्रायस्तस्मिन्नुपलभ्यस्तेन च उपलभ्यः । यत्र यस्मिन्पाणिपेषणप्रतिबोधात्प्राक्काले । कुत आगतः पाणिपेषोत्तरकालम् । विज्ञानमयस्य पुरुषस्य स्वापे संवेशनस्थानं यतश्च स्थानाज्जागरिते कार्यकरणसंघातचेतयितृत्वेनागमनम् ॥१६॥ जागरिते कर्तृत्वभोक्तृत्वादिकं नात्मनः स्वाभाविकं किंतु वागाद्युपाधिसम्बन्धकृतमेव स्वापे तद्व्यतिरेकेण कर्तृत्वादिव्यतिरेकदर्शनादिति दर्शयितुं प्रश्नानुवादपूर्वकं प्रथमप्रश्नस्योत्तरमाह । तत्तस्मिन्काले एषां प्राणानां वागादीनां विज्ञानं स्वस्वविषयगतप्रतिनियतप्रकाशनसामर्थ्यं विज्ञानेनान्तःकरणोपादानाज्ञानजनितेनान्तःकरणगताभिव्यक्तविशेषविज्ञानेन चैतन्याभासलक्षणेन करणेन गृहीत्वा अन्तर्हृदयं (°दये ?) हृदयस्य मध्ये य आकाशः आकाशशब्देन जीवस्य स्वाभाविकस्वरूपभूतः परमात्मोच्यते तस्मिन्स्वाभाविकेऽसांसारिके परमात्मन्याकाशे शेते लिङ्गोपाधिसम्बन्धकृतं विशेषात्मस्वरूपमुत्सृज्याविशेषस्वाभाविके आत्मन्येव केवलं वर्तते ॥१७॥ यदा शरीरेन्द्रियाध्यक्षतामुत्सृजति तदासौ स्वात्मनि वर्तत ऽइति कथमवगम्यतऽइत्यपेक्षायां नामप्रसिद्धेत्याह । स्वमेवात्मानमप्येत्यपिगच्छतीति स्व-

पितीत्युच्यते । स्वपितीति नाम प्रसिद्धात्मनः संसारधर्मविलक्षणे रूपेऽवगतेऽपि नात्र युक्तिरस्तीत्याशङ्कायामाह तत्तत्र स्वापकाले गृहीत एव प्राणो भवति प्राण इति घ्राणेन्द्रियम् । तथा च वागादिसम्बन्धाभावात्स्वापे कर्तृत्वासम्बन्धः जागरिते च वागादिसम्बन्धात्कर्तृत्वादिकमतोऽन्वयव्यतिरेकाभ्यां वागाद्युपाधिकमात्मनः संसारित्वमिति निश्चितम् ॥१८॥ ननु दर्शनलक्षणायां स्वप्नावस्थायां वागादिसम्बन्धाभावेऽपि कर्तृत्वादिसंसारस्य दर्शनाद्व्यतिरेकासिद्धिरित्याशङ्कायां तत्रापि जाग्रद्वासनायाः सत्वात्परिकल्पितस्य स्वप्नप्रपञ्चस्य च मृषात्वात् न व्यतिरेकासिद्धिरित्यतोऽस्य स्वतःशुद्धत्वमेवेत्यभिप्रेत्याह स प्रकृत आत्मा यस्मिन्काले दर्शनलक्षणया स्वप्नया स्वप्नवृत्त्या वर्तते तदास्यात्मनस्तेऽनन्तरं वक्ष्यमाणा लोकाः कर्मफलानि के ते महाराजत्वमिवास्य सोऽयं लोकः । इवशब्दप्रयोगाद्व्यभिचारदर्शनाच्चैते महाराजत्वादयो लोका मृषैव नास्यात्मभूताः ॥१९॥ कामकर्मभ्यामुद्भासिताः पूर्वानुभूतवस्तुसदृशा वासना अनुभवति । तस्मादसौ विज्ञानमयो द्रष्टा दृश्येभ्यः स्वप्नजागरितलोकेभ्यो ऽन्यो विशुद्धः ॥२०॥ दर्शनवृत्तौ स्वप्ने वासनाराशेर्दृश्यत्वादसंसारधर्मतेत्यात्मनो विशुद्धतावगता तत्र कामवशात्परिवर्तनमुक्तम् द्रष्टृदृश्यसम्भन्धश्चास्य स्वाभाविक इत्यशुद्धतेत्याशङ्कायां तत्सम्बन्धस्य सुषुप्तौ व्यतिरेकदर्शनेनास्वाभाविकत्वाच्छुद्धत्वमेवास्य स्वाभाविकमिति वक्तुमाह यस्मिन्काले जाग्रत्स्वप्नयोर्द्रष्टा दर्शनवृत्तिं स्वप्नं हित्वा सुषुप्तः विशेषज्ञानाभावेन सम्प्रसादं स्वस्वरूपब्रह्मैक्यं गतो भवति । हृदयं नामोदरवक्षःप्रदेशयोर्मध्यस्थितः पुण्डरीकाकारो मांसपिण्डस्तत्परिवेष्टनं पुरीतदित्युच्यते इह पुनस्तदुपलक्षितं शरीरं पुरीतच्छब्देनाभिप्रेतम् तथा च हृदयात्पुरीततं शरीरमभि(प्र)तिष्ठन्तऽइति कृत्स्नं शरीरं व्याप्नुवन्त्योऽश्वत्थपर्णराजय-इव बहिर्मुखाः प्रवृत्ता अभितो निःसरन्ति । ताभिर्नाडीभिः कृत्वा जाग्रद्विषयाया बुद्धेः कर्मवशात्प्रत्यवसर्पणमनु विज्ञानमय आत्मा प्रत्यवसृप्येन्द्रियाण्युपसंहृत्य पुरीतति शेते अग्निवत्तप्तं लोहपिण्डमविशेषेण संव्याप्य वर्तते । ननु पूर्वं विज्ञानमयो हृदयाकाशे ब्रह्मणि शेतऽइत्युक्तेदानीं पुरीतति शयनमाचक्षाणस्य कथं न पूर्वापरविरोधः स्यादिति चेत् सत्यम् स्वाभाविकऽएव स्वात्मनि वर्तमानोऽपि कर्मानुगतबुद्ध्यनुवृत्तित्वात्पुरीतति शेतऽइत्युपचारादुच्यतेऽतो नोक्तविरोधः ॥२१॥ उक्तं शयनं दृष्टान्तपूर्वकमाह । अतिशयेन दुःखं हन्तीत्यतिघ्नी आनन्दस्य सुखस्यावस्था दुःखाननुविद्धसुखस्वाभाव्येऽवतिष्ठेत ॥२२॥ एवं क्वैष तदाभूदित्यस्य पूर्वप्रश्नस्य प्रतिवचनमुक्तमनेन च प्रश्ननिर्णयेन विज्ञानमयस्य स्वभावतो विशुद्धिरसंसारित्वं चोक्तम् इदानीं तस्याद्वितीयत्वं प्रकटयितुं कुत एतदागादिति द्वितीयप्रश्नस्यापाकरणार्थं प्रतिवचनमाह । स इति दृष्टान्तः ऊर्णवाभिरूर्णनाभिर्लूताख्यः कीटविशेषः । क्षुद्रा अल्पा विष्फुलिङ्गा अग्न्यवयवाः । विज्ञानमयस्य प्राक्प्रतिबोधात्स्वापे यत्स्वं रूपं तस्मादेतस्मादात्मनः सकाशात्सर्वे प्राणाः वागादयः सर्वे लोका भूरादयः सर्वकर्मफलभूताः सर्वे देवाः प्राणलोकाद्यधिष्ठातारोऽग्न्यादयः सर्वाणि भूतानि ब्रह्मादिस्तम्बपर्यन्तानि प्राणिजातानि सर्व एतऽआत्मानः उपाधिसम्पर्कजनितप्रबुध्यमानविशेषात्मानो व्युच्चरन्ति । यस्मादात्मनः स्थावरजङ्गममिदं जगदग्निविष्फुलिङ्गवदनिशं व्युच्चरति यस्मिन्नेव च जलबुद्बुदवत्प्रलीयते सदात्मकं च स्थितिकाले वर्तते तस्यात्मनो ब्रह्मण उपनिषदुप समीपं नितरां सादयति गमयति विज्ञानात्मानमिति व्युत्पत्तेरुपनिषदात्मनोऽभिधायकः शब्दः सत्यस्य सत्यमिति

प्राणा वै सत्यं सच्च त्यच्चेति व्युत्पत्तेः प्राणानां मध्ये एष उक्त आत्मा सत्यमबाध्यं रूपम् ॥ २३ ॥ १ ॥ ५ ॥

एवं प्राणा वै सत्यं तेषामेष सत्यमित्यादिब्राह्मणभागेन व्याख्यातायाः अप्युपनिषदो विशेषतोऽर्थप्रकाशनाय ब्राह्मणद्वयम् तत्र प्राणा वै सत्यमित्यंशेनोक्तायाः प्राणोपनिषदो व्याख्यानाय शिशुब्राह्मणं प्रवर्तते । चक्षुर्द्वयं नासिकाद्वयं श्रोत्रद्वयं मुखमिति सप्त द्वेषकर्तॄन् शत्रूनपावृणोति विनाशयति जितेन्द्रियो भवतीत्यर्थः । भ्रातृव्या हि द्विविधाः द्विषन्तोऽद्विषन्तश्च तत्र सप्त शीर्षण्याः प्राणा विषयोपलब्धिद्वाराणि तत्प्रभवा विषयरागाः सहजत्वाद्भ्रातृव्यास्ते स्वस्य स्वात्मस्थां दृष्टिं विषयविषयां कुर्वन्ति तेन प्रत्यगात्मेक्षणप्रतिषेधकरत्वात्ते द्वेष्टारो भ्रातृव्या इति भावः ॥१॥ शिशुरिव शिशुः विषयेष्वितरकरणवदपटुत्वात् योऽयं शरीरमध्यस्थः प्राणो लिङ्गशरीरात्मा पञ्चधा शरीरमाविष्टः तस्य शिशोः प्राणस्य वत्सस्थानीयस्य करणात्मन इदं कार्यात्मकं शरीरमेव आधानम् आधीयतेऽस्मिन्नित्याधानमधिष्ठानम् इदं प्रसिद्धं शिरो मस्तकं प्रत्याधानम् प्रदेशविशेषेषु प्रतिपत्त्याधीयतऽइति प्रत्याधानम् प्राणो बलापरपर्यायान्नपानजनिता शक्तिः स्थूणा अवष्टम्भः बलावष्टम्भो हि प्राणोऽस्मिञ्छरीरेऽवतिष्ठते अन्नं भुक्तमशनं दाम उभयतःपाशं वत्सस्येव बन्धने बन्धनरज्जुः । इदानीं तस्यैव शिशोः प्रत्याधाने शिरस्यारूढस्य चक्षुषि काश्चनोपनिषद उच्यन्ते तं करणात्मकं शरीरेऽन्नबन्धनं चक्षुष्यूढं प्राणमेता वक्ष्यमाणाः सप्त अक्षितयः अक्षितिहेतुत्वादक्षितय [उपतिष्ठन्ते] उपस्थानं कुर्वन्ति ॥२॥ कास्ताः । अक्षाणि नेत्रे लोहिता रेखाः ताभिर्द्वारभूताभिरेनं मध्यमं प्राणं रुद्रोऽनुगतः उपतिष्ठते । अक्षाणि या आपः धूमादिसंयोगेनाभिव्यज्यमानाः । या कनीनका चक्षुषि दृक्शक्तिः । अधस्तन्या वर्तन्या पक्ष्मणा । य एवं प्राणस्यान्नभूताः सप्ताक्षितीर्वेदास्योपासकस्यान्नं न क्षीयते ॥३॥ उक्ता रुद्रादिदेवताः प्राणोपासनाद्वागाद्यात्मका एव संवृत्ता इति वागादय एवात्र रुद्रादिशब्दाभिधेया इत्यभिप्रेत्योक्तेऽर्थे मन्त्रसंमतिमाह ॥४॥ तं मन्त्रं प्रतीकग्रहणपूर्वकं व्याकरोति । प्राणाः श्रोत्रादयः सप्त पूर्वोक्तास्तेषु प्रसृता वागादयश्च विश्वरूपं विषयाणामनेकत्वेनानेकरूपं शब्दादिज्ञानलक्षणं यशः शिरसि निहितम् । तस्य शिरोलक्षणस्य चमसस्य तीरे पार्श्वे सप्त ऋषय आसते वर्तन्ते प्राणाः करणाश्रयाः परिस्यन्दात्मका सप्त वायव ऋषयः प्रसिद्धऋषिवदेषां (!) शब्दादिविषयद्रष्टृत्वात्तदाश्रयत्वेन तद्रूपत्वाद्वा ऋषित्वम् । ब्रह्मणा शब्दराशिना वेदेन सह संविदाना संसर्गं गच्छन्ती शब्दराशिमुच्चारयन्ती ॥५॥ के ते प्राणा ऋषयः । गौतमभरद्वाजौ अयमेव दक्षिणः कर्णो गौतमः ॥ ६ ॥ २ ॥ ५ ॥

अथ कथमेषां प्राणानां सत्यत्वं कथं वा ततोऽप्यात्मनः सत्यत्वमिति जिज्ञासायां कार्यकरणात्मकानां सत्यानां पञ्च भूतानां स्वरूपावधारणार्थं मूर्तामूर्तब्राह्मणं प्रवर्तते । यदपोहद्वारेण नेति नेत्यादिना निर्दिधारयिषितं ब्रह्म तस्य मायामये द्वे एव रूपे रूप्यते ज्ञाप्यते अरूपं परं ब्रह्म याभ्यामविद्याध्यारोप्यमाणाभ्यां रूपाभ्याम् । सत् प्रत्यक्षेणोपलभ्यमानासाधारणधर्मवत् त्यं तद्विपरीतं त्यदित्येव सर्वदा परोक्षाभिधानार्हम् ॥१॥ के ते मूर्तामूर्ते कस्य वा कानि विशेषणानि । मूर्तं मूर्छितावयवमितरेतरानुप्रविष्टावयवं घनं संहतम् ॥२॥ रसः सारः ॥३॥ अथास्य करणात्मनो वासनामयं रूपं निरूपयितुमाह यथा लोके महाराजनं (!) वासः महाराजनं (!) हरिद्रा तया रक्तं माहारजनं वासो वस्त्रम् एवं स्त्र्यादिविषयसंयोगे सति

तादृशं रञ्जनाकारं (रे Cod.) चित्तस्य वासनारूपमुत्पद्यते येनासौ पुरुषो रक्त इत्युच्यते वस्त्रादिवत्। यथा च लोके पाण्डवाविकम् अवेरिदमाविकमूर्णादि आपाण्डुरं भवति तथान्यद्वासनारूपम्। यथा च लोके इन्द्रगोपो वर्षाकाले कीटविशेषः कौसुम्भवदत्यन्तरक्तो भवति एवमेवास्य वासनारूपं क्वचिद्विषयविशेषापेक्षया रागस्य तारतम्यं क्वचित्पुरुषचित्तवृत्त्यपेक्षयेति बोध्यम्। यथा च लोकेऽग्न्यर्चिर्भास्वरं भवति तथा क्वचित्कस्यचिद्वासनारूपम्। यथा च पुण्डरीकं शुक्लम् तद्वदपि कस्यचिद्वासनारूपम्। यथा च लोके सकृद्विद्युत्तं सकृद्विद्योतनं सर्वतःप्रकाशकम् तथा ज्ञानप्रकाशविवृद्ध्यपेक्षया कस्यचिद्धिरण्यगर्भादेर्वासनारूपमुपजायते सत्वादितारतम्यात् ॥१०॥ एवं सत्यस्येति षष्ठ्यन्तस्थूलसूक्ष्मप्रपञ्चात्मकहेयभूतसत्यशब्दार्थं व्याख्यायोपादेयभूतप्रथमान्तसत्यशब्दार्थव्याख्यानायेदमारभ्यतेऽथात आदेश इति अथ सत्यस्वरूपनिर्देशानन्तरं यत्सत्यस्य सत्यं तदेवावशिष्यते यस्मादतस्तस्मात्तस्य सत्यस्य ब्रह्मणो नेति नेतीत्येवादेशो (त्यैमा Cod.) निर्देशः ॥११॥३॥५॥

दृप्तबालाकिर्हेति द्वितीयेऽध्याये ब्रह्मविद्याविषयं प्रत्यगात्मानं ब्रह्म ते ब्रवाणि व्येव त्वा ज्ञपयिष्यामीति च प्रस्तुत्य (! प्र च स्तुत्य Cod.) तद्ब्रह्मैकमद्वयं सर्वविशेषशून्यं क्रियाकारकफलस्वभावसत्यवाच्याशेषभूतधर्मप्रतिषेधद्वारेण नेति नेतीति विज्ञापितम् अस्या ब्रह्मविद्याया अङ्गत्वेन संन्यासविधित्सयैवाख्यायिकारूपं मैत्रेयीब्राह्मणमारभ्यते। अस्मार्द्गार्हस्थ्यात्स्थानादाश्रमात्पारिव्राज्याख्यमाश्रमान्तरं यास्यन्नेवास्मि। अन्तं विच्छेदं द्रव्यविभागम् ॥१॥ उपकरणवतां साधनसम्पत्तियुक्तानाम् ॥२॥ यदेव केवलममृतत्वसाधनं भगवान्वेद ॥३॥ स याज्ञवल्क्योऽमृतत्वसाधनं वैराग्यमुपदिदिक्षुः जायापतिपुत्रादिभ्यः सकलसुखसाधनेभ्यस्तत्संन्यासाय विरागमुत्पादयन्नुवाच ॥५॥ तमयथार्थदर्शिनं पुरुषं ब्रह्म ब्राह्मणजातिः परादात् पराद्ध्यात्पराकुर्यात् कैवल्यासम्बन्धिनं कुर्यात् अयमनात्मस्वरूपेण (नासस्व Cod.) मां पश्यतीत्यपराधात् परमात्मा हि सर्वेषामात्मा (माश्रा Cod.) ॥६॥ कथं पुनरिदानीमिदं सर्वमात्मैवेति ग्रहीतुं शक्यते इत्याशङ्कायां घटः (घरः Cod.) स्फुरतीत्यादिप्रत्ययमाश्रित्य चिन्मात्रानुगमात्सर्वत्र चित्स्वरूपतैवेति गम्यते। यत्स्वरूपव्यतिरेकेण कस्याग्रहणं तस्य तदात्मकत्वमेवेति व्याप्तौ दृष्टान्तत्रयमाह। स इति दृष्टान्तः। दुन्दुभ्याघातविशिष्टस्य शब्दसामान्यस्य ग्रहणेन तु दुन्दुभिशब्दविशेषो गृहीतः स्यात् यथैवं शब्दविशेषाः शब्दसामान्यान्नातिरिच्यन्ते तथा स्फुरणात्मकब्रह्मसामान्यात्स्फोर्यमाणाः पदार्था नातिरिच्यन्ते ॥७॥ एवं स्थितिकाले जगतो ब्रह्मैकत्वमवगमय्योत्पत्तिकालेऽपि तथावगमयितुं कार्याणामुत्पत्तेः प्राक्कारणादभिन्नत्वं दर्शयितुमाह स इति दृष्टान्तः आर्द्रैरेधैः काष्ठैरिद्धोऽग्निरार्द्रैधाग्निः तस्मादभ्याहितादभितः प्रज्वालितात् पृथक् नानाप्रकारम्। तथा ऋग्वेदादिप्रपञ्च उत्पत्तेः प्राक् न ब्रह्मणः पृथगस्ति एवमेव अस्य प्रकृतस्य परमात्मनो महतोऽनवच्छिन्नस्य भूतस्य परमार्थस्वभावस्य एतद्वक्ष्यमाणं निःश्वसितमयत्नोत्पादितं निःश्वसितमिव निःश्वसितम्। अथर्वणा अङ्गिरसा च दृष्टा मन्त्रा अथर्वाङ्गिरसः। इतिहास उर्वशीपुरूरवसोः संवादादिरूपो ब्राह्मणभागो यथा उर्वशी हाप्सरा इत्यादिब्राह्मणमेव (११.५.१.१.) पुराणमसद्वाऽइदमग्रऽआसीदित्यादि (६.१.१.१.) विद्या देवजनविद्या वेदः सोऽयमित्याद्याः (१३.४.३.१०.) उपनिषदः प्रियमित्येनदुपासीतेत्याद्याः (१४.६.१०.३.) श्लोकाः ब्राह्मणप्रभवास्तदप्येते श्लोका इत्या-

दयः (११. ३. १. ५.) सूत्राणि वस्तुसंग्राहकाणि वाक्यानि वेदे यथा आत्मेत्येवोपासीतेत्येवमादीनि (१४. ४. २. १८.) अनुव्याख्यानानि मन्त्रविवरणानि व्याख्यानान्यर्थवादाः अथवानुव्याख्यानानि वस्तुसंग्राहकवाक्यानां विवरणवाक्यानि यथा प्राणा वै सत्यमित्यस्य (१४. ५. १. २३.) शिशुमूर्तामूर्तब्राह्मणे (१४. ५. २-३.) व्याख्यानानि मेधया हि तपसाऽजनयत्पितेत्येवमादीनि (१४. ४. ३. २.) मन्त्रविवरणानि । एतान्युक्तानि ऋग्वेदादीनि मन्त्रब्राह्मणात्मकानि अस्यैवेश्वरस्य निःश्वसितानि ॥१०॥ अथ प्रलयकालेऽप्यस्य प्रपञ्चस्य ब्रह्मात्मकत्वं प्रतिपत्तव्यमिति दृष्टान्तपूर्वकमाह । स इति दृष्टान्तः । एकायनमेकगमनमेकप्रलयोऽविभागप्राप्तिः ॥११॥ एवं प्राकृतिकप्रलयप्रदर्शनेन सर्वं मूलप्रकृतिभूतमद्वयात्मतत्त्वमित्यवगमितम् इदानीं ब्रह्मविद्ययाविद्यानिरोधद्वारेण योऽयमात्यन्तिकः प्रलयस्तं दर्शयितुं दृष्टान्तमुपादत्ते । सैन्धवखिल्यः स्यन्दनात्सिन्धुरुदकं तस्य विकारस्तत्र भवो वा सैन्धवः स चासौ खिल्यो लवणशकलश्चेति सैन्धवखिल्यः । लवणं लवणास्वादमेव । विज्ञानं च तद्घनश्चेति विज्ञानघनः घनशब्दो जात्यन्तरप्रतिषेधार्थः । स विज्ञानघनो विशुद्धज्ञप्तिमात्रैकरस एवात्मा एतेभ्यो भूतेभ्यः कार्यकारणविषयाकारपरिणतेभ्यो नामरूपात्मकेभ्यः सम्यगुत्थाय । अस्यां च कैवल्यावस्थायां विशेषज्ञानं नास्तीत्याह न प्रेत्येति संज्ञा अहमसावमुष्य पुत्रो ममेदं क्षेत्रं धनं सुखीत्येवमादिलक्षणा विशेषसंज्ञा विशेषज्ञानम् ॥१२॥ एकस्मिन्वस्तुनि ब्रह्मणि पूर्वं विज्ञानघन एवेति प्रतिज्ञाय पुनर्न प्रेत्य संज्ञास्तीति विज्ञानघनं संज्ञाभावं च विरुद्धधर्मवमाचक्षाणो भगवान्मा माममूमुहत् ॥१३॥ मोहं मोहनवाक्यम् । विशेषविज्ञानानामभावस्यैवोक्तत्वात् अतः यन्महद्भूतं ज्ञानघनस्वरूपं यथाव्याख्यातम् इदमेव विज्ञातुं पर्याप्तम् ॥१४॥ विशेषविज्ञानाभावमन्वयव्यतिरेकाभ्यां दृढीकुर्वन्नाह यत्र यस्मिन्नविद्याकल्पिते कार्यकरणसंघातोपाधिजनिते विशेषात्मनि खिल्यभावे द्वैतमिव परमार्थतोऽद्वैते ब्रह्मणि भिन्नमिवात्मनो वस्त्वन्तरं भासमानं भवति । इयमविद्यावदवस्था ॥१५॥ यत्र तु ब्रह्मविद्ययाविद्या नाशमुपगमिता तत्रात्मव्यतिरेकेणान्यस्याभाव इति व्यतिरेकं दर्शयितुमाह यत्र त्वस्येति यस्यां विद्यावस्थायामस्य ब्रह्मविदः सर्वं कर्तृकर्मक्रियाफलादिकमात्मन्येव प्रविलापितं सदात्मैवाभूदात्मैव संवृत्तम् ॥१६॥४॥५॥

पूर्वं मैत्रेयीब्राह्मणे इदं सर्वं यदयमात्मेति प्रतिज्ञातस्यात्मोत्पत्तिस्थितिलयहेतुमुक्त्वा प्रतिज्ञातस्यार्थस्य निगमनार्थं मधुब्राह्मणमारभ्यते । मधु कार्यम् मध्विव मधु यथैको मधुपूपोऽनेकैर्मधुकरैर्निर्वर्तित एवमियं पृथिवी सर्वभूतनिर्वर्तिता । तेजोमयश्चिन्मात्रप्रकाशमयः । आत्मानं शरीरमधिकृत्य वर्ततऽइत्यध्यात्मम् शारीरः शरीरे धवः सर्वलिङ्गाभिमानी । एवमुभयविधोऽपि पुरुषः सर्वेषां भूतानामुपकारकत्वात्करणत्वेन मधु सर्वाणि भूतान्यस्य कार्यत्वेन मध्विति च शब्दसामर्थ्याद्व्याख्येयम् । पृथिवी सर्वाणि भूतानि पार्थिवः पुरुषः शारीरश्चेत्येवमेतच्चतुष्टयमेकं मधु सर्वभूतकार्यं सर्वाणि च भूतान्यस्य पृथिव्यादेः कार्यमतोऽस्य पृथिव्यादेः परस्परमुपकार्योपकारकभावः । यस्मादेकस्मात्कारणादेतज्जातं तदेवैकं परमार्थतो ब्रह्म इतरत्कार्यं वाचारम्भणं विकारो नामधेयमात्रमित्याशयेनाह अयमेवेति पूर्वं मैत्रेय्यै इदं सर्वं यदयमात्मेति प्रतिज्ञातः स एवात्मा अयमुक्तश्चतुर्विधमध्वात्मा नान्यः (°त्मनोनान्यः Cod.) । इदं चतुष्टयकल्पनाधिष्ठानब्रह्मविषयं ज्ञानममृतत्वसाधनम् इदमेवात्मतत्त्वं ब्रह्म

ते ब्रवाणि ज्ञपयिष्यामीत्यध्यायादौ प्रकृतं ब्रह्म यद्विषया विद्या ब्रह्मविद्येत्युच्यते इदमेव सर्वं सर्वाप्तिसाधनं यस्माद्ब्रह्मणो विज्ञानात्सर्वं भवति नान्यत्किंचिदस्तीत्यर्थः । एवमन्ये ऽपि मधुपर्याया व्याख्येयाः ॥१॥ रेतसि भवो रैतसः रेतस्यपां विशेषतोऽवस्थानम् आपो रेतो भूत्वा शिश्नं प्राविशन्निति श्रुत्यन्तरात् (ऐत° २.४.) ॥२॥ वाङ्मयो वागभिमानी वाच्यग्नेर्विशेषतोऽवस्थानम् अग्निर्वाग्भूत्वा मुखं प्राविशदिति श्रुतेः ॥३॥ हृद्याकाशो हृदयाकाशः (५.१.१७.) ॥४॥ प्राणो घ्राणेन्द्रियम् वायुः प्राणो भूत्वा नासिके प्राविशदिति श्रुत्यन्तरात् । भूतानां शरीरारम्भकत्वेनोपकारान्मधुत्वम् तदन्तर्गतानां तेजोमयादीनां द्रवणत्वेनोपकारान्मधुत्वम् (? द्रुतण° Cod.) ॥५॥ आदित्यश्चक्षुर्भूत्वाक्षिणी प्राविशदिति श्रुतेः ॥६॥ चन्द्रमा मनो भूत्वा हृदयं प्राविशदिति श्रुतेः ॥७॥ यद्यपि दिशां श्रोत्रमध्यात्मं तथापि शब्दप्रतिश्रवणवेलायां तु विशेषः सन्निहितो भवतीत्यध्यात्मं प्रातिश्रुत्क इति विशेषणम् प्रतिश्रुत्कायां प्रतिश्रवणवेलायां भवः प्रातिश्रुत्कः । दिशः श्रोत्रं भूत्वा कर्णौ प्राविशन्निति श्रुतेः ॥८॥ स्तनयित्नुः पर्जन्यः । स्वरे भवः सौवरः ॥१०॥ पृथिव्यादयो भूतगणा देवतागणाश्च कार्यकरणसंघातात्मनोपकुर्वन्तो मधु भवन्तीत्युक्तम् ते येन प्रयुक्ताः शरीरिभिः सम्बध्यमाना मधुत्वेनोपकुर्वन्ति तद्वक्तव्यमितीदमारभ्यते अयं धर्म इति ॥११॥ धर्मसत्याभिप्रयुक्तोऽयं कार्यकरणसंघातविशेषो येन जातिविशेषेण संयुक्तो भवति तं निर्दिशति ॥१३॥ यः पुनर्मानुषादिजातिविशिष्टः कार्यकरणसंघातस्तस्य मधुत्वमाह अयमात्मोक्तजातिविशिष्टो देहो न तु चेतनः । यश्चायमस्मिन्नात्मनि तेजोमयोऽमृतमयः पुरुषः सोऽमूर्तरसः सर्वात्मकश्चेतनो निर्दिश्यते ॥१४॥ अस्यान्तिमपर्यायोक्तस्यात्मनः स्वरूपमाह । रथनाभौ रथचक्रपिण्डिकायां रथनेमौ च वलयभूतायाम् । एवमेवास्मिन्नात्मनि परमात्मभूते ब्रह्मविदि । सर्वऽएतऽआत्मानो जलचन्द्रवत्प्रतिशरीरानुप्रवेशिनोऽविद्याकल्पिताः ॥१५॥ एवं साकल्येन निरूपिताया ब्रह्मविद्यायाः स्तुत्यर्थं प्रवर्ग्यप्रकरणस्थिताख्यायिकासंक्षेपकौ मन्त्रौ (१४.१.१.२५.) श्रुतिः प्रस्तावपूर्वकमवतारयति । ऋक्स° १. ११६. १२. ॥१६॥ ऋक्स° १. ११७. २२. ॥१७॥ प्रवर्ग्यकर्मार्थयोः प्रथमद्वितोययोरध्याययोरर्थः प्रवर्ग्यसम्बन्ध्याख्यायिकोपसंहर्तृभ्यां मन्त्राभ्यां प्रकाशितः इदानीं ब्रह्मविद्यार्थयोस्तु ततीयचतुर्थाध्याययोरर्थ उत्तराभ्यामृग्भ्यां प्रकाशयितव्यः । ईश्वरोऽव्याकृते नामरूपे व्याकुर्वाणो भूतादिसर्गपुरःसरं पञ्चीकृतेभ्यो भूतेभ्यो भूरादीन्लोकान्सृष्ट्वा पुरः पुराणि शरीराणि द्विपदो द्विपादुपलक्षितानि मनुष्यशरीराणि कृतवान् तथा चतुष्पादुपलक्षितानि पशुशरीराणि नानाविधानि सृष्ट्वा स ईश्वरः पुरः पुरस्तादात्मप्रवेशात्पूर्वं पक्षी लिङ्गशरीरं भूत्वा पुरः शरीराणि पुरुषरूपः सन्प्रविवेश । एनेनानेन परमात्मना अनावृतमनाच्छादितम् असंवृतमन्तरननुप्रवेशितम् । तथा च परमात्मैवान्तर्बहिर्भावेन कार्यकरणरूपेण व्यवस्थितो न ततोऽन्यत्किंचिदस्तीति मन्त्रः सम्प्रक्षेपत आत्मैकत्वमाचष्टे ॥१८॥ एवं शरीरेषु प्रविष्टः परमात्मा किंरूपः (ऋक्स° ६. ४७. १८.) । स ईश्वरो रूपंरूपमुपाधिभेदं देहं प्रति प्रतिरूपो रूपान्तरं प्रतिबिम्बं बभूव । तत्प्रतिबिम्बत्वमस्यात्मनो निरुपाधिकस्य रूपं स्वरूपं प्रतिचक्षणाय आत्मयाथात्म्यप्रतिख्यापनाय शास्त्राचार्यादिभेदेन तत्त्वप्रकाशनाय । यदा हि नामरूपे न व्याक्रियेते तदास्यात्मनो निरुपाधिकं प्रज्ञानघनाख्यं रूपं न प्रतिख्यायेत यदा पुनः कार्यकरणात्मना नामरूपे व्याकृते भवतस्तदास्य रूपं प्रतिख्यायेत । इन्द्रः परमेश्वरो मायाभिः नामरूपविषयमिथ्याभिमानात्मना परिणताभिः बहुरूप ईयते मि-

थ्यैव जलसूर्यवत् । परमात्मनो बहुरूपत्वे किं निमित्तम् रथे युक्ता वाजिन इव हि यस्मादस्य प्रतीचो रथस्थानीये शरीरे युक्ताः हरय इन्द्रियाणि शतानि दश च प्राणिभेदबाहुल्यात् । प्रत्यक्षं स्वविषयान्प्रति (? °यात् प्रति C.) हरन्तीति हरणादिन्द्रियाणि हरयः । अयमेव आत्मा हरयः इन्द्रियादिरूपेणास्यैवाविद्यया भानात् (?) अयमेवात्मा दश च सहस्राणि बहूनि चानन्तानि च हरिशब्दितानीन्द्रियाणि प्राणिभेदस्यानन्त्यात् । इदानीमस्यात्मनः पारमार्थिकं स्वरूपमाह तदेतदिति । न विद्यते पूर्वं कारणं यस्य तदपूर्वम् न विद्यतेऽपरं कार्यं यस्य तदनपरम् । अनुशासनं सर्ववेदान्तोपदेशः ॥१९॥ अथेदानीं ब्रह्मविद्यार्थस्य मधुकाण्डस्य स्तुत्यर्थं स्वाध्यायार्थो जपार्थश्च ब्रह्मविद्याया अयं वंश आरभ्यते । वंश इव वंशः यथा वेणुर्वंशः पर्वणः-पर्वणो भिद्यते तद्वदग्रात्प्रभृत्या मूलप्राप्तेरयं वंशोऽध्यायद्वयस्याचार्यपरम्पराक्रमो वंश इत्युच्यते तत्र प्रथमान्तः शिष्यः पञ्चम्यन्त आचार्यो बोद्धव्यः ॥२०॥ परमेष्ठी विराड् ब्रह्मणो हिरण्यगर्भादधीतवान् हिरण्यगर्भः स्वयम्प्रतिभातवेदः ॥२२॥५॥५॥

एवमागमप्रधानेन मधुकाण्डेनोक्तमेवार्थमुपपत्तिभिर्निरूपयितुमुपपत्तिप्रधानं याज्ञवल्कीयं काण्डमारभ्यते । तत्र प्रस्तावं कर्तुं विज्ञानस्तुत्यर्था विद्याप्राप्त्युपायदानप्रदर्शनार्था वाख्यायिकाश्वलब्राह्मणेनारभ्यते । बहुदक्षिणेन यज्ञेन शाखान्तरप्रसिद्धेन (!) बहुदक्षिणाविशिष्टेनाश्वमेधेन वा ईजे अयजत ॥१॥ अवरुरोध गोष्ठेऽवरोधं कारयामास । पलचतुर्भागः पादः एवम्भूताः सुवर्णस्य दश-दश पादाः । शृङ्गयोरिति द्विवचनादेकैकस्मिन् शृङ्गे पञ्च पञ्च पादाः ॥२॥ सामविधिं शृणोतीति सामश्रवाः यजुर्वेदविदो याज्ञवल्क्यात्सामविधिश्रवणमनुपपन्नमित्यर्थाच्चतुर्वेदो याज्ञवल्क्य इति सिद्धम् ॥३॥ पूर्वत्र व्याख्याते मधुकाण्डे यदुद्गीथप्रकरणं तस्मिन्नासङ्गपाप्मनो मृत्योरत्ययः समुच्चितेन कर्मणा संक्षेपतो व्याख्यातस्तस्यैवोद्गीथदर्शनस्य परीक्षाविषयोऽयं प्रश्नप्रतिवचनरूपो विस्तर आरभ्यते । केन दर्शनलक्षणेन साधनेन यजमानो मृत्योराप्तिमतीत्य मृत्युगोचरत्वमतिक्रम्य मुच्येत स्वतन्त्रो मृत्योरवश्यो भवति । यज्ञो वै यजमान इति (१४. २. २. २४.) श्रुतेर्यज्ञस्य यजमानस्य याध्यात्मं वाक् सैवाधियज्ञं होता तत्तत्रैवं सति या इयं यज्ञस्य यजमानस्य वाक्सोऽयं प्रसिद्धोऽग्निरधिदैवम् । स एव वागैक्यमापन्नोऽग्निर्होता स होताग्निरूपेण दृष्टः सा मुक्तिः मृत्य्वतिक्रमणरूपाया मुक्तेः साधनम् सोक्तरूपा मुक्तिरेवातिमुक्तिः फलभूताया अग्न्यादिभावापत्तिरूपाया अतिमुक्तेः साधनम् तथा चाध्यात्मिकादाधिभौतिकाच्च परिच्छिन्नरूपाद्वाग्घोतृलक्षणात्साधनद्वयादपरिच्छिन्नाधिदेवताग्निरूपेण होतरि दृष्टिमुक्तिसाधनम् ॥५॥ स्वाभाविकादज्ञानासङ्गप्रयुक्तात्कर्मलक्षणान्मृत्योरतिमुक्तिर्व्याख्याता तस्य कर्मणः सासङ्गस्य मृत्योराश्रयभूतानां दर्शपूर्णमासादिकर्मसाधनानां यो विपरिणामहेतुः कालस्तस्मात्कालात्पृथगतिमुक्तिर्वक्तव्येतीदमारभ्यते क्रियानुष्ठानव्यतिरेकेणापि क्रियायाः प्रागूर्ध्वं च साधनविपरिणामहेतुत्वेन कालस्य व्यापारदर्शनात्तस्मात्कालात्पृथगतिमुक्तिः वक्तव्येति स च कालो द्विरूपोऽहोरात्रादिलक्षणस्तिथ्यादिलक्षणश्च तत्राहोरात्रादिलक्षणात्तावदतिमुक्तिमाह । अहोरात्राभ्यां हि सर्वं जायते वर्धते विनश्यति च तथा यज्ञसाधनं यज्ञस्य यजमानस्य चक्षुरध्वर्युश्च ताभ्यां जायते वर्धते विनश्यति च । यजमानस्य चक्षुरध्वर्युश्चेति साधनद्वयमध्यात्माधिभूतपरिच्छेदं हित्वापरिच्छिन्नाधिदैवतादित्यात्मना दृष्टं सन्मुक्तिः । आदित्यात्मभावमापन्नस्य हि नाहोरात्रे सम्भवतः ॥६॥ इदानीं तिथ्यादिल-

क्षणात्कालादतिमुक्तिरुच्यते । आदित्यप्राप्त्याहोरात्रात्ययवचन्द्रप्राप्त्या पूर्वपक्षापरपक्षात्ययः । यज्ञस्य यजमानस्य । मनोऽध्यात्मं चन्द्रमा अधिदैवतमिति प्रसिद्धम् स एव चन्द्रो ब्रह्म ऽर्त्विक् तेन यजमानस्य मनो ब्रह्मेति च साधनद्वयमपरिच्छिन्नाधिदैवतचन्द्रात्मना दृष्टं सन्मुक्तिरित्यर्थः ॥७॥ यजमानस्य कालान्मृत्योरतिमुक्तिर्व्याख्याता सोऽतिमुच्यमानः केनावष्टम्भेन परिच्छेदविषयं मृत्युमतीत्य फलं प्राप्नोतीत्यत आह । अन्तरिक्षमाकाशोऽनारम्बणमनालम्बनमिव । येनाक्रमेणावष्टम्भेन यजमानः कर्मफलं प्रतिपद्यमानोऽतिमुच्यते किं तत् । स्वर्गं लोकं फलं प्राप्नोति अतिमुच्यतऽइत्यर्थः । उद्गातऽर्त्विगधिभूतं परिच्छिन्नं रूपमध्यात्मं च प्राणः एतद्द्वयमपरिच्छिन्नेन वायो रूपेण पश्यति तेन वायुना प्राणेनालम्बनेन कर्मफलं स्वर्गलोकं प्राप्नोति । महतां फलवतामश्वमेधादिकर्मणां कर्मवादिना सामान्येनाल्पीयस्सु कर्मसु त्रिवक्षितफलसिद्ध्यर्थं सम्पत्तिः सम्पदुच्यते यथाशक्त्यग्निहोत्रादिनिर्वर्तनेनाश्वमेधादिकर्म मया निर्वर्त्यतऽइति ध्यानं सम्पत् यद्वा फलस्यैव देवलोकादेरुज्ज्वलवादिसामान्येनाज्याद्याहुतिषु सम्पादनं सम्पत् ॥८॥ करिष्यति. शस्त्रं शंसिष्यति । प्राक्प्रयोगकालाद्धोत्रा प्रयुज्यमाना ऋग्जातिः पुरोऽनुवाक्येत्युच्यते यागार्थं प्रयुज्यमाना ऋग्जातिर्याज्या शस्त्रार्थं प्रयुज्यमाना ऋग्जातिः शस्या याः काश्चन ऋच स्तोत्रिया वा अन्या वा ताः सर्वा एतास्वेव तिसृषु ऋग्जातिष्वन्तर्भवन्ति । पृथिविलोकम् लोकसम्बन्धसामान्यात् । अन्तरिक्षलोकम् मध्यमत्वसामान्यात् । द्यौर्लोकं द्युलोकम् ऊर्ध्वत्वसामान्यात् ॥९॥ एवं ऋग्जातिषु फलसम्पादने विहिते अध्वर्युर्हुताहुतिषु फलसम्पादनजिज्ञासया पृच्छति । या हुताः समिदाज्याहुतयः उज्ज्वलन्ति । या हुता मांसाद्याहुतयोऽतिनेदन्ति अतीव शब्दं कुर्वन्ति । या हुताः पयःसोमाहुतयः अधिशेरते अधि भूमेरधो गत्वा शेरते । अतीवातिकुत्सितशब्द-इव मनुष्यलोकः । उपरितनसाध्यादिलोकापेक्षया पापप्रचुरत्वेन अधोगमनापेक्षया वा पितृलोकोऽध-इव वर्तते ॥१०॥ तस्मात्स उपासकस्तेन मनसि विश्वेदेवदृष्ट्यध्यासेन (? वैश्वदे° Cod.) आनन्त्यसामान्यादनन्तमेव लोकं जयति ॥११॥ स्तोत्रिया नाम गीतिविशिष्टा ऋग्जातयः । अधिदेवतमिति यज्ञाधिकारादधियज्ञमिति बोद्धव्यम् । प्राणपुरोऽनुवाक्ययोः पकारादित्वसामान्यात् (!) । अपानयाज्ययोः प्राणपुरोऽनुवाक्याभ्यामानन्तर्यसामान्यात् । अप्राणन्नपानन्नृचमभिव्याहरतीति श्रुत्यन्तरे शस्त्रप्रयोगस्य प्राणापानव्यतिरेकेण सिद्धत्वाद्व्याने शस्यादृष्टिरिति भावः ॥१२॥१॥६॥

एवं काललक्षणात्कर्मलक्षणाच्च मृत्योरतिमुक्तिर्व्याख्याता इदानीं बन्धज्ञानं विना ततो विश्लेषायोगान्मुमुक्षोः सप्रयोजनकबन्धज्ञानार्थत्वेन ग्रहातिग्रहलक्षणाद्बन्धान्मृत्योरतिमुक्तिं वक्तुमाख्यायिकामनुसृत्यार्तभागब्राह्मणमारभ्यते । जरत्कारुगोत्र ऋतभागस्यापत्यम् ॥१॥ घ्राणाख्यः प्राणो ग्रहवत्परवशताहेतुत्वाद्ग्रहो ऽपानेनेति गन्धेनातिग्रहेण गृहीतः । अपश्वासोऽत्रापानशब्दार्थः अपानसचिवत्वादपानो गन्ध उच्यते । अपानेन अन्तर्मुखश्वासेन । अपानोपकृतं गन्धं प्राणेन सर्वो लोको जिघ्रति ॥२॥ मृत्योरन्नं मृत्युना ग्रहातिग्रहलक्षणेन ग्रस्तम् । ब्रह्मात्मसाक्षात्कारेण सर्वमृत्युना ग्रहातिग्रहलक्षणे मृत्यौ भक्षिते सति विद्वान्पुनर्मृत्युं पुनर्मरणमपजयति निराकरोति पुनर्मरणाय न जायते ॥१०॥ एवं परमात्मदर्शनेन मुक्तस्य किं प्राणा एव समवनीयन्ते आहोस्विन्तत्प्रयोजकमपि सर्वम् अथ प्राणा एव न तत्प्रयोजकं सर्वम् तर्हि प्रयोजके विद्यमाने पुनः प्राणानां प्रसङ्गोऽथ सर्वमेव कामकर्मादिकं ततो मोक्ष

उपपद्यतऽइत्येवमर्थ उत्तरप्रश्नोऽयम्। सर्वं समवनीयते नाममात्रं तु न लीयते । अनन्तं आकृतिसम्बन्धात् नित्यं वै प्रसिद्धं नाम मुक्तो मुक्त इतिवद्व्यवहारपारम्पर्यात् । ब्रह्मविद्यां स्तोतुमाह अनन्ता वै प्रसिद्धा विश्वे देवा अतस्तान्नामानन्त्याधिकृतान्विश्वान्देवान्ब्रह्मास्मीति दर्शनेनात्मत्वेनोपगम्य स विद्वान् तेन दर्शनेनानन्तमेव लोकं जयति ॥११॥ साक्षात्कारज्ञाने जाते विद्वान्न म्रियते न च तस्य प्राणा अत्यन्तं समवनीयन्ते किंतु जीवन्मुक्तत्वेन सर्वदा तिष्ठतीति (!) तन्निराकर्तुमाह । परमात्मसाक्षात्काररूपेण सर्वमृत्युना सविलासाज्ञानमृत्यौ नाशिते सति तद्विद्वान्यस्मिन्काले म्रियते । तदास्मात् प्राणा प्राणादयो ग्रहा गन्धादयश्चातिग्रहा वासनारूपा अत्त(:)स्थाः सप्रयोजका ऊर्ध्वं गच्छन्ति आहोस्विन्नेति पृच्छतिर्विचारणार्था । अत्रैव परब्रह्मण्येकतां गतेऽस्मिन्विदुष्येव समवनीयन्ते एकीभावेन समवसृज्यन्ते प्रविलीयन्ते ऊर्मय-इव समुद्रे । तर्हि मृतप्रसिद्धिः कथमित्यपेक्षायां तस्या देहविषयत्वादित्याह स मुक्तदेह उच्छूनतां प्रतिपद्यते । देहस्यैव मरणधर्मताबन्धनाशे मुक्तस्य न क्वाचिद्गमनमिति वाक्यार्थः ॥१२॥ अथ केन प्रयुक्तं ग्रहातिग्रहलक्षणं बन्धनमित्येतन्निर्दिधारयिषया पृच्छति । आकाशमात्मेत्यत्रात्मशब्देनात्माधिष्ठानं हृदयाकाशमुच्यते । क्व कस्मिन्नाश्रये भवति किमाश्रितः कार्यकरणसंघातमुपादत्तऽइति पृष्ट उत्तरं वक्तुमुपोद्घातमाह आहरेति देहि ॥१३॥ आवमित्यावामेवैकान्ते गवितस्य त्वत्पृष्टस्य वेदितव्यं यत्तत्वं तद्वेदिष्याव निरूपयिष्याव । तौ आवयोरेतदस्तु सजने जनसमुदाये निर्णेतुं न शक्यतेऽत्रानेकवादिविप्रतिपत्तेः । तौ ह विचार्य सर्वानेव पूर्वपक्षान्स्वभाववादादीनपोह्य यदुक्तवन्तौ तच्छृणु कर्म हैवाश्रयं पुनःपुनःकार्यकरणोपादानहेतुं उक्तवन्तौ पुण्येन शास्त्रविहितेन कर्मणा देवादिषु जायमानः पुण्यः पुण्यात्मा भवति पापेन शास्त्रनिषिद्धेन कर्मणा स्थावरादिषु जायमानः पापः पापात्मा भवति ॥१४॥२॥६॥

पुण्यमेव कर्म सर्वपुरुषार्थसाधनमित्युक्तम् तत्र मोक्षस्यापि पुरुषार्थत्वादुत्तमेन पुण्योत्कर्षेण मोक्षो भविष्यतीत्याशङ्कानिरासार्थं विद्यासंयुक्तस्यापि कर्मणो मोक्षारम्भकत्वासम्भवान्न मोक्षार्थानि कर्माणीत्यतः कर्मफलानां संसारत्वप्रदर्शनायैव भुज्युब्राह्मणमारभ्यते । लह्यस्यापत्यं लाह्यस्तदपत्यं लाह्यायनिः । अध्ययनार्थं व्रतचरणाच्चरका विद्यार्थिनोऽध्वर्यवो वा । काप्यस्य कपिगोत्रस्य । गन्धर्वेणामानुषेण केनचित्सत्त्वेन गृहीताविष्टा । अन्तानवसानानि । परितो दुरितं क्षीयते येन स परिक्षिदश्वमेधस्तद्याजिनः पारिक्षिताः । प्रथमा तावत्क्व पारिक्षिता अभवन्नित्युक्तिर्गन्धर्वप्रश्नार्था द्वितीयातु यो हि क्व पारिक्षिता अभवन्निति प्रश्नो गन्धव प्रति कृतस्तस्य प्रत्युक्तिः सर्वं सोऽस्मभ्यमब्रवीदिति विवक्षया तदनुरूपप्रतिवचनार्था तृतीया तु मुनिं प्रति प्रश्नार्थेति विभागो बोद्धव्यः ॥१॥ ते इदानींतनाः पारिक्षितास्तत्रागच्छन्यत्र यस्मिन्पूर्वतना अश्वमेधयाजिनो गच्छन्ति । तेषा गतिविवक्षया तावद्भुवनकोशपरिमाणमाह देव आदित्यस्तस्य रथो देवरथः तस्य गत्या एकेनाह्ना यावद्देशपरिमाणं परिच्छिद्यते तदेकं देवरथाह्न्यम् तद्द्वात्रिंशद्गुणितम् तावत्परिमाणोऽयं लोकः लोकालोकगिरिणा परिक्षिप्तः संसारः (? सप्तागरः Cod. pr. m. ससारः sec. m.) सर्वेषां प्राणिनां कर्मफलोपभोगहेतुभूतः । लोक्यते सूर्यादिभिः प्रकाश्यते इति स (ब Cod.) एष एतावान्लोकोऽतः परमलोकः तं च लोकं समन्तं (संन Cod. pr. m. समं sec. m.) समन्ततः पृथिवी द्विस्तावदिति लोकपरिमाणाद्द्विगुणपरिमाणा पर्येति रविचन्द्रमसोर्यावन्मयूखैरवभास्यते ससमुद्रसरित्शैला तावती पृथि-

वी स्मृतेति स्मृतेः । तां पृथिवीं पृथिवीपरिमाणाद्द्विस्तावदिति द्विगुणपरिमाणः समुद्रः समन्तं पर्येति यं घनोदमाचक्षते (लवणोदं Cod. sec. m.) पौराणिकाः उक्तं हि अण्डस्यास्य समन्तात्तु संनिविष्टोऽमृतोदधिः समन्ताद्घनतोयेन धार्यमाणः स तिष्ठतीति । एवं लोकादिपरिमाणे स्थिते सदृष्टान्तमण्डकपालयोर्विवरपरिमाणमाह यावत्परिमाणा क्षुरस्य धाराग्रम् वाथवा यावत्सौक्ष्म्येण युक्तं मक्षिकायाः पत्रं पक्षः तावत्परिमाणः कपालयोरन्तरेण मध्ये आकाशोऽवकाशः यद्विवक्षयेदं सर्वमुक्तम् तेनाकाशद्वारेण तान्पारिक्षितानश्वमेधयाजिनः प्राप्तानिन्द्रः परमेश्वरः योऽश्वमेधे सुपर्णाकारेण चितोऽग्निः स सुपर्णः पक्षपुच्छाद्यात्मकः पक्षी भूत्वा वायवे प्रदत्तवान् स्वस्य स्थूलत्वेनोक्तच्छिद्रद्वाराण्डाद्बहिर्गमनासम्भवाद्युक्तं वायवे प्रदानम् । वायुः पुनस्तान्पारिक्षितानात्मनि स्वस्मिन्धित्वा स्थापयित्वा स्वात्मभूतान्कृत्वा तत्र तस्मिन्गमितवान्यत्र पूर्वेऽतिक्रान्तकालिकाः पारिक्षिता अश्वमेधयाजिनोऽभवन् । एवमिव वै स गन्धर्वो वायुमेव क्रियाशक्तिप्रधानं सूत्रमेव पारिक्षितानां गतिं तुष्टाव । वायुः स्थावरजङ्गमानां भूतानामन्तरात्मा बहिश्च । व्यष्टिरध्यात्माधिभूताधिदैवभावेन व्यावृत्तिरूपा विविधाष्टिर्व्याप्तिः । समष्टिः समानुगतरूपा केवलेन सूत्रात्मनाष्टिर्व्याप्तिः ॥ २ ॥ ३ ॥ ६ ॥

एवं पुण्यपापप्रयुक्तैर्ग्रहातिग्रहैर्गृहीतः पुनः पुनर्ग्रहातिग्रहांस्त्यजन्नुपाददच्च (दश्चा Cod.) ब्रह्मस्थावरपुण्योत्कर्षादप्यविमुच्यमानः (?प्यपिमु Cod. prima manu) संसरत्येवेति ब्राह्मणत्रयेणोक्तम् इदानीं तस्य बन्धमोक्षसाधनं ससंन्यासमात्मज्ञानं वक्तव्यमिति कहोडब्राह्मणमारभ्यते । साक्षादव्यवहितम् अपरोक्षादिति विभक्तिव्यत्ययेनापरोक्षमगौणम् । य आत्मा प्रत्यगात्मा सर्वस्याभ्यन्तरः । तत्र पिण्ड एकस्तस्याभ्यन्तरे लिङ्गात्मा करणसंघातो द्वितीयो यश्च परमात्मस्वरूपस्तृतीयस्तेषु मध्ये कतमः । एवमुक्तज्ञानाङ्गं पारिव्राज्यं वक्तुमाह एतं वै तमिति । पुत्रैषणा पुत्रोत्पत्तिमुद्दिश्य दारसंग्रहेच्छालक्षणा वित्तं द्विविधं मानुषं गवादि दैवं विद्या तस्य कर्मसाधनस्य गवादेरुपादानरूपा इच्छा वित्तैषणानेन कर्म कृत्वा पितृलोकं जेष्यामीति विद्यासंयुक्तेन वा देवलोककेवलया वा हिरण्यगर्भविद्यया दैवेन वित्तेन देवलोकं जेष्यामीतीच्छा लोकैषणा । एवमेकत्वेऽपि लोकैषणायाः साधनमन्तरेणासिद्धेः साध्यसाधनभेदेन द्वैविध्यमाह उभे हीति । यस्मात्पूर्वे ब्राह्मणास्तमेतमात्मानं विदित्वा सर्वस्मात्साधनफलस्वरूपादेषणालक्षणाद्व्युत्थाय दृष्टादृष्टार्थं कर्म तत्साधनं च हित्वा भिक्षाचर्यं चरन्ति स्म तस्मादद्यतनोऽपि ब्रह्मविद्ब्राह्मण एषणाभ्यो व्युत्थाय पाण्डित्यं शास्त्रोत्था बुद्धिः पण्डा तद्वान्पण्डितस्तस्य कर्म पाण्डित्यं वेदान्तवाक्यविचारलक्षणं श्रवणापरपर्यायं निर्विद्य निःशेषं विदित्वा आत्मविज्ञानं निरवशेषं कृत्वा अनन्तरं बाल्येन तिष्ठासेत् श्रवणज्ञानोत्पन्नाशेषानात्मदृष्टितिरस्कारसामर्थ्यं बलं तस्य भावो बाल्यं तेन बाल्येन बलभावेन (बाल° Cod.!) विषयैरनाकृष्टः सन् तिष्ठासेत् स्थातुमिच्छेत् बाल्यशब्दाभिधेयं मननं कुर्यात् । बाल्यं च पाण्डित्यं च निर्विद्य निःशेषं कृत्वाथानन्तरं मुनिर्मौनवान् धारावाहिकात्मप्रत्ययप्रवाहवान् तिष्ठासेदित्यनुषज्यते निदिध्यासनं कुर्यादित्यर्थः । एवममौनं चोक्तार्थपाण्डित्यबाल्यशब्दाभिधेयं श्रवणमननाख्यं निर्विद्य मौनं चोक्तार्थमुनिशब्दवाच्यं निदिध्यासनाख्यं च निर्विद्याथानन्तरं ब्राह्मणो निरुपचरितब्राह्मण्यवान् साक्षात्कृतब्रह्मैव स्यात् कृतकृत्यो भवेत् । उक्तं ब्राह्मण्यं प्राप्तवतो ब्रह्मविदः समाचारं पृच्छति स इति अनियतं तस्य चरणमित्युक्त-

रमाह येनेति विहितमाचरतो निषिद्धं च त्यजतः शुद्धबुद्धेः श्रुताद्वाक्यात्सम्यक् धीरुत्पद्यते तस्य च वासनावशाद्व्यवस्थितैव चेष्टा नाव्यवस्थितेति न यथेष्टाचरणप्रयुक्तो दोष इति स्तुत्यर्थं येन केनचिच्चरणेनेति बोध्यम् ॥ १ ॥ ४ ॥ ६ ॥

एवं ब्राह्मणत्रयेण सप्रयोजकं बन्धनमुक्तम् चतुर्थे च कहोडब्राह्मणे बन्धध्वंसि ससंन्यासमात्मज्ञानमभिहितम् साम्प्रतं यो बद्धः संसरति सोऽस्ति नास्ति वेत्यस्तित्वे च किंलक्षणो देहादीनामन्यतमस्तेभ्यो विलक्षणो वेति विमर्शे आत्मनो देहादिभ्यो विवेकनाधिगमायोषस्तब्राह्मणमारभ्यते । चक्रस्यापत्यं चाक्रायणः । सर्वाः कार्यकरणसंघातगताः प्राणनादिचेष्टा दारुयन्त्रस्येव येन क्रियन्ते स कार्यकरणसंघातविलक्षणो विज्ञानमयश्चेष्टयितास्ति यतो या खल्वचेतनप्रवृत्तिः सा चेतनाधिष्ठानपूर्विका यथा रथादिप्रवृत्तिरिति बोध्यम् । यथा कश्चिद्गामश्वं वा प्रत्यक्षं दर्शयामीति पूर्वं प्रतिज्ञाय पश्चाद्यश्चलत्यसौ गौर्यो वा धावत्यसावश्व इति चलनादिलिङ्गैर्यथा वै निश्चितं ब्रूयाद्व्यपदिशेत् एवमेव ब्रह्म प्रत्यक्षं दर्शयामीति मत्प्रश्नानुसारेण प्रतिज्ञाय प्राणनादिलिङ्गैरेतद्ब्रह्म व्यपदिष्टं भवति त्वया तथा च तद्व्यपदिशतस्ते प्रतिज्ञाहानिरनवधेयवचनता च स्यादिति भावः । दृष्ट्यादिसाक्षिणोऽन्यत्किंचिद्वास्तवं नास्ति अत एतस्मादुक्तान्नूपादात्मनोऽन्यदार्तं विनाशि रज्जुसर्पादिवन्मिथ्याभूतम् ॥ १ ॥ ५ ॥ ६ ॥

पूर्वब्राह्मणयोर्यत्साक्षादपरोऽक्षाद्ब्रह्म य आत्मा सर्वान्तर इत्यत्र यः सर्वान्तर आत्मोक्तस्तस्य स्वरूपाधिगमाय शाकल्यब्राह्मणात्प्राक्तनं ब्राह्मणत्रयमारभ्यते तत्रानात्मभूतान्सर्वान्पदार्थांन्तावद्गार्गीब्राह्मणे आह । वचक्नोर्दुहिता वाचक्नवी । यदिदं सर्वं भूधरादिकं पार्थिवं धातुजातमप्सूदके स्वकारणे ओतं च दीर्घपटतन्तुवत् प्रोतं च तिर्यक्तन्तुवत्सर्वतोऽन्तर्बहिर्भूताभिरद्भिर्व्याप्तम् अन्यथा सक्तुमुष्टिवद्विशीर्येत । अन्तरिक्षलोकेषु पक्ष्यादिगतिहेतुभूतेषु प्रजापतिलोकाः विराट्शरीरारम्भकपञ्चीकृतपञ्चमहाभूतात्मकाः ब्रह्मलोकेषु हिरण्यगर्भलोकेष्वपञ्चीकृतपञ्चभूतात्मकेषु ओतप्रोतभावेन वर्तन्ते शेषं सुबोधम् । एवं पूर्ववदनुमानेन सूत्रमपि ब्रह्मलोकाश्रयं पृच्छन्तीं गार्गीं प्रतिषेधति । देवतानां स्वः प्रश्न आगमविषयः तं प्रश्नविषयमतिक्रान्तो गार्ग्याः प्रश्न आनुमानिकत्वात् स प्रश्नो यासामिन्द्रादिदेवतानां विद्यते ता अतिप्रश्न्याः एतास्तु न अतिप्रश्न्याः अनतिप्रश्न्याः स्वप्रश्नविषया एव केवलागमगम्याः ॥ १ ॥ ६ ॥ ६ ॥

एवं गार्गीब्राह्मणे सूत्रादर्वाक्तनं व्यापकमुक्तमिदानीमागमैकगम्यं सूत्रं तदन्तर्गतमन्तर्यामिणं च निर्वक्तुमन्तर्यामिब्राह्मणमारभ्यते । यज्ञमधीयाना यज्ञशास्त्राध्ययनं कुर्वाणाः शिष्याः सन्तः ॥१॥ याज्ञिकांश्च तच्छिष्यानस्मान् । संदब्धानि संग्रथितानि स्रगिव सूत्रे विष्टब्धानि ॥२॥ तं सूत्रान्तर्गतमन्तर्यामिणम् । यमयति नियम[य]ति दारुयन्त्रमिव भ्रमयति स्वं-स्वमुचितं व्यापारं कारयति ॥३॥ व्यस्रंसिषत विस्रस्तान्यभवन् सूत्रापगमे हि मण्यादीनां प्रोतानामवस्रंसनं दृष्टमेवं वायुः सूत्रम् ॥६॥ एष (!) ते तव कार्यकरणसंघातस्य सर्वभूतानां चेत्युपलक्षणार्थमेतत् सर्वेषामात्मा यस्त्वयान्तर्यामी पृष्टः एषोऽमृतः सर्वसंसारधर्मवर्जितः ॥७॥ चन्द्रश्च तारकाश्च चन्द्रतारकम् ॥१३॥ लोका भोगस्थानानि ॥१७॥ प्राणे घ्राणाख्ये वायुसहिते ॥२१॥ तेजः प्रकाशः शास्त्रीयं ज्ञानम् ॥२७॥ तमसि बाह्ये आवरणात्मके ॥२८॥ आत्मनि जीवात्मनि ॥३०॥ कस्मात्पुनः कारणान्महाभागाः पृथिव्यादिदेवता मनुष्यादिवदात्मनि तिष्ठन्तमात्मनो नियन्तारमन्तर्यामिणं न विदुरित्यत आह अदृष्ट इति ॥३१॥७॥६॥

पूर्वस्मिन्ब्राह्मणे सूत्रान्तर्यामिणौ प्रश्नप्रत्युक्तिभ्यां निर्धारितौ सम्प्रति अशनायादिविनिर्मुक्तं निरुपाधिकं साक्षादपरोऽक्षात्सर्वान्तरं ब्रह्म वक्तुमक्षरब्राह्मणं प्रवर्तते । विवक्ष्यति विस्पष्टं कथयिष्यति । जातु कदाचित् । ब्रह्मोद्यं ब्रह्मवदनं प्रति ॥१॥ उग्रपुत्रः शूरान्वयः । उद्यमिति उत् ऊर्ध्वं याति गच्छति विस्तृतं भवतीत्युद्यमवतारितज्याकं धनुश्चापं पुनरधिज्यं कृत्वा आरोपितज्याकं विधाय । बाणशब्देन शराग्रे यो वंशखण्डः संधीयते स उच्यते तेन विनापि शरो भवत्यतो बाणवन्ताविति विशिनष्टि सपत्नातिव्याधिनाविति शत्रोरतिशयेन पीडाकरौ ईदृशौ द्वौ शरौ । उपोत्तिष्ठेच्छत्रोः समीपत आत्मानं दर्शयेत् ॥२॥ यत्त्वयोक्तमूर्ध्वं दिव इत्यादि तत्सर्वं यत्सूत्रमाचक्षते तद्व्याकृतजगदात्मकं सूत्रमाकाशेऽव्याकृतशब्दवाच्ये नारायणाख्येऽन्तर्यामिणि ओतं च प्रोतं च उत्पत्तौ स्थितौ लये चेत्येवं त्रिष्वपि कालेषु पृथिवीधातुरप्स्विव वर्तत इत्यर्थः ॥४॥ प्रश्नः प्रतिवचनं चोक्तस्यैवार्थस्यावधारणार्थं पुनरुच्यते न किंचिदपूर्वमर्थान्तरमुच्यते ॥५॥ द्वितीयं प्रश्नमाह कस्मिन्न्वाकाश इति ॥६॥ न क्षरति न क्षीयते वाक्षरं शुद्धं ब्रह्म । अविद्यमानमन्तरं छिद्रं यस्य अनन्तरम् अबाह्यमपरिच्छिन्नम् । अनात्मव्यक्तीनामानन्त्येन प्रत्येकं निषेधाशक्तेर्भोक्तृभोग्यात्मनैकीकृत्य प्रतिषेधति तदक्षरं कं चन कंचिदपि विषयं नाश्नोति नाश्नाति न भुङ्क्ते ॥८॥ प्रशासने आज्ञायाम् । विधृते हस्तन्यस्तपाषाणादिवत्तिष्ठतो वर्तेते । ददतं दुःखार्जितानोहिरण्यादीन्प्रयच्छन्तं पुरुषं मनुष्याः प्रशंसन्ति । पितरोऽर्यमादयो दर्व्यं दर्वीहोममन्वायत्ताः अनुगताः यो न कस्यचित्प्रकृतित्वेन विकृतित्वेन वा वर्तते स दर्विहोमः दर्वीसाध्यो होमो दर्व्यः ॥९॥ यस्याज्ञानेन नियता संसारोपपत्तिर्यद्विज्ञानेन च संसारविच्छेदस्तदस्त्यक्षरमिति साधयितुं कर्मणामेव मोक्षहेतुत्वमिति पक्षं निराकरोति यो वा इति । कृपणः पणक्रीतो दासादिरिव दीनः कर्मफलस्यैव भोक्ता न तु मोक्षस्येत्यर्थः । स ब्राह्मणो ब्रह्मविन्मुक्तः ॥१०॥ अग्नेर्दहनप्रकाशकत्ववत्स्वाभाविकमस्याक्षरस्य प्रशास्तृत्वमित्याह तद्वा इति ॥११॥ तदेव बहुमन्यध्वं बहुमानविषयं कुरुध्वं प्रमाणीकुरुध्वम् । मुच्याध्वै मुच्यध्वम् । जातु कदाचिदपि ॥१२॥८॥६॥

एवं यत्साक्षादित्यादि प्रस्तुत्य सर्वान्तरत्वनिरूपणद्वारा साक्षात्त्वादिकमार्थिकं कहोडादिब्राह्मणत्रयेण निर्धारितम् ततोऽन्तर्यामिब्राह्मणे यः पृथिव्यां तिष्ठन्नित्यादिश्रुत्या व्याकृतविषये सूत्रभेदेषु पृथिव्यादिषु नियम्येषु तस्य नियन्तृत्वमुक्तम् इदानीं नियन्तव्यानां देवताभेदानां प्राणान्तसंकोचानन्त्यपर्यन्तविकाशद्वारा प्रकृतस्यैव ब्रह्मणः साक्षात्त्वापरोक्षत्वेऽअधिगन्तव्येऽइति कृत्वा प्रथमं देवतासंकोचविकाशोक्तिरनन्तरं वस्तुनिर्देश इत्येतदर्थं शाकल्यब्राह्मणमारभ्यते । शकलस्यापत्यं शाकल्यः । यावत्संख्याका देवा वैश्वदेवस्य शस्त्रस्य निविदि उच्यन्ते श्रूयन्ते तावतो देवान्ह किल एतया वक्ष्यमाणया निविदा प्रतिपेदे । निविन्नाम देवतासंख्यावाचकानि मन्त्रपदानि कानिचिद्वैश्वदेवे शस्त्रे शस्यन्ते । तान्येव निवित्संज्ञकानि मन्त्रपदानि दर्शयति त्रयश्च देवा देवानां त्रीणि च शतानि । इयं तेषां मध्यमा संख्या बहुवचनाउत्तमानन्तसंख्याप्युत्तैव वेदितव्या अनन्ता वै विश्वे देवा इति पूर्वमुक्तत्वात् । ओमित्यङ्गीकारे एवमेषां षडधिकत्रिशताधिकत्रिसहस्रलक्षणा मध्यमा संख्या सम्यक्तया ज्ञातेत्यर्थः ॥१॥ त्रयस्त्रिंशत् षट् त्रयो द्वावध्यर्ध एक इति देवतासंकोचविकाशविषयां संख्यां पृष्ट्वा पुनः संख्येयस्वरूपं पृच्छति कतमे त इति ॥२॥ त्रयस्त्रिंशौ त्रयस्त्रिंशतः पूरणौ ॥३॥ दश प्राणाः ज्ञाने-

न्द्रियकर्मेन्द्रियरूपाः आत्मा मनः ॥५॥ यस्मादेते मासाभिमानिनो देवाः पुनः-पुनः परिवर्तमानाः प्राणिनामायूंषि कर्मफलं चेतीदं सर्वमाददाना गृह्णन्त उपाददत एव यन्ति ॥६॥ स्तनयित्नुर्मेघनादाभिमानिनी देवतैवेन्द्रः । पशूनां यज्ञसाधनाश्रयत्वात् यज्ञस्यात्रूपत्वाच्च पशवो यज्ञ इत्युच्यते ॥७॥ यस्मादेषु त्रिषु लोकेषु अग्न्याद्याः सर्वे देवा अन्तर्भवन्ति तेन एत एव त्रयो देवा इत्युक्तम् । योऽयं बाह्यो वायुः पवते वाति ॥९॥ यस्मादस्मिन्वायौ सति इदं सर्वं चराचरमधि आर्ध्नोत् अधिकामृद्धिं प्रापत् । कतम एको देव इति स ब्रह्मेति स इति प्राणः परामृश्यते अष्टाध्याय्यां (११. ६. ३. १०.) तथा दर्शनात् स प्राणो ब्रह्म सर्वदेवात्मकत्वात्सूत्रात्मरूपेण सर्वकार्याणां भरणाच्च कारणभूतो महद्ब्रह्मेत्युच्यते तस्मात्तं प्राणं त्यदिति परोऽक्षाभिधायकेन शब्देनाचक्षते तद्ब्रह्म कथयन्ति प्राणविद इति शेषः साक्षान्निर्देष्टुमशक्यत्वादिति भावः ॥१०॥ तदेवं संकोचविस्तराभ्यां प्राणस्वरूपमुक्तम् इदानीं तस्यैव प्राणस्य ब्रह्मणः पुनरष्टधा भेदो ध्यानार्थमुपदिश्यते । आयतनमाश्रयः शरीरम् । लोकयति अनेनेति लोकः आलोकनसाधनम् चक्षुषा लोकयति पश्यतीति सोऽयं चक्षुर्लोकः । मनसा ज्योतिषा संकल्पविकल्पादि कार्यं करोति यः सोऽयं मनोज्योतिः । पृथिवीशरीरश्चक्षुर्दर्शनो मनसा संकल्पयिता पृथिव्यभिमानी कार्यकरणसंघातवान्देव इत्यर्थः । सर्वस्यात्मनः आध्यात्मिकस्य कार्यकरणसंघातस्यात्मनः परमयनं पर आश्रयस्तं परायणं मातृजेन त्वङ्मांसरुधिररूपेण क्षेत्रस्थानीयेन बीजस्थानीयस्य पितृजस्यास्थिमज्जशुक्ररूपस्य करणात्मनश्च परमयनं विद्यात् । पार्थिवेंऽशे शरीरे भवः शारीरो मातृजकोशत्रयरूप इत्यर्थः स एष देवो यस्त्वया पृष्टः । तस्य शारीरस्य देवस्य का देवता किमुत्पत्तिकारणम् अस्मिन्प्रकरणे यो यस्मान्निष्पद्यते स तस्य देवतेति देवताशब्देन सर्वत्रोत्पत्तिकारणमेव विवक्षितम् । स्त्रीभिर्भुक्तस्यान्नस्य रसो हि मातृजस्य लोहितस्य निष्पत्तिहेतुस्तस्मादन्नरसाल्लोहितं निष्पद्यते स्त्रीणां लोहिताच्च त्वङ्मांसरुधिररूपं बीजस्यास्थिमज्जशुक्रात्मकस्याश्रयभूतं शरीरं भवतीति स्त्रीभ्यो निष्पत्तिरिति भावः ॥११॥ रूपाणि शुक्लकृष्णादीनि । सर्वेषां हि रूपाणां विशिष्टं कार्यमादित्ये पुरुषः । तस्य का देवतेति चक्षुरिति होवाचेति चक्षुषो ह्यध्यात्मन आदि[त्यस्याधि]दैवतस्य निष्पत्तिः ॥१२॥ आकाशायतनस्य हि पुरुषस्य विशिष्टमायतनं बाह्यो वायुः । प्राणादध्यात्मनो वायोरधिदैवतस्य निष्पत्तिः ॥१३॥ स्त्रीव्यतिकराभिलाषः कामः । कामशरीरः पुरुष इत्यर्थः । कामायतनस्य हि देवस्य चन्द्रो विशिष्टं कार्यम् कामिनां हि चन्द्रे प्रीतिविशेषो जायते । मनसो ह्यध्यात्मनश्चन्द्रस्याधिदैवतस्य निष्पत्तिः ॥१४॥ तेजआयतनस्य हि देवस्य अग्नौ विशेषावस्थानम् । वाचो ह्याध्यात्मिक्या अग्नेरधिदैवतस्य निष्पत्तिः ॥१५॥ तम इति शार्वराद्यन्धकारः । अध्यात्मं छायामयोऽज्ञानमयः पुरुषः मृत्युरधिदैवतं तस्य निष्पत्तिकारणम् मृत्युनैवेदमावृतमासीदिति श्रुतेः ॥१६॥ वरुणाद्धि बाप्याद्यपां निष्पत्तिः ॥१७॥ रेतआयतनस्य हि विशेषायतनं पुत्रः । पुत्रमय इति चास्थिमज्जशुक्राणि पितुर्जातानि प्रगृह्यन्ते । प्रजापतिः पितोच्यते पितृतो हि पुत्रस्योत्पत्तिः ॥१८॥ एवमष्टधा देवलोकपुरुषभेदेन त्रिधा-त्रिधात्मानं विभज्यावस्थित एकैको देवः प्राणभेद एवोपासनार्थं व्यपदिष्टः अधुना दिग्विभागेन पञ्चधा विभक्तस्य सर्वस्य जगतो हृदयात्मनि उपसंहारार्थं श्रुतिः प्रवर्तते । अङ्गारावक्षयणम् अङ्गारा अवक्षीयन्ते निरुध्यन्ते यस्मिन्संदंशादौ तत् । त्वमङ्गारस्थानीयेन मया दह्य-

मानमात्मानं न बुध्यसऽइत्यभिप्रायः ॥१९॥ अत्यवादीरत्युक्तवानसि स्वयं भीतास्त्वामङ्गारा-
वक्षयणं कृतवन्त इति । किं ब्रह्म विद्वान्ज्ञानन्सन् एवं ब्राह्मणानधिक्षिपसि । मम दिग्वि-
षयं ब्रह्मविज्ञानं तावदस्तीत्याह दिश इति ॥२०॥ स हि याज्ञवल्क्यो दिक्षु पञ्चधा विभक्तं
दिगात्मभूतं हृदयात्मानं तद्द्वारेण सर्वजगदात्मत्वेनोपगम्याहमस्मि दिगात्मेति पूर्वाभिमुखो
व्यवस्थित आह आदित्यदेवत इति । हृदयमिति बुद्धिमनसोऽएकीकृत्य निर्देशो न तु मां-
सखण्डविषयः ॥२१॥ श्रद्धा नाम भक्तिसहितास्तिक्यबुद्धिर्दित्सुत्वलक्षणा ॥२२॥ अपां हि व-
रुणः कार्यम् श्रद्धा वाऽआपः श्रद्धातो वरुणमसृजतेति श्रुत्यन्तरात् । आपश्च रेतसि प्रतिष्ठिताः
रेतसो ह्यापः सृष्टा इति श्रुत्यन्तरात् । हृदयस्य कार्यं रेतः कामो हृदयस्य वृत्तिः कामिनो
हि हृदयाद्रेतोऽधिस्कन्दति । प्रतिरूपमनुरूपं पुत्रं जातम् सृष्टो विनिःसृतः ॥२३॥ सोमदे-
वत इत्यत्र सोमलतां सोमदेवतां चैकीकृत्य निर्देशः । दीक्षितो हि यजमानः सोमं क्रीणाति
क्रीतेन सोमेनेष्ट्वा ज्ञानवान्सोमदेवताधिष्ठितां सौम्यामुत्तरां दिशं प्रतिपद्यते ॥२४॥ मेरोः स-
मन्ततो वसतामव्यभिचारादूर्ध्वा दिग्ध्रुवेत्युच्यते ॥२५॥ अहल्लिकेति अहनि लीयतऽइति व्यु-
त्पत्तेः नूनं त्वं प्रेतीभूतोऽसीति लक्ष्यते यतो यत्किंचित्प्रेतवद्भाषसऽइति प्रेतनाम्ना शाकल्यं
सम्बोधयन्नाह यत्र यस्मिन्काले एतद्धृदयमयस्य शरीरस्यात्मभूतमस्मदस्मत्त एतस्माच्छरीरा-
दन्यत्र क्वचिद्देशान्तरे वर्ततऽइति यदि मन्यासै मन्यसे यत्र यदा एतद्धृदयमस्मदस्मत्तो
ऽस्माच्छरीरादन्यत्र देशान्तरे स्याद्भवेत्तदा श्वानो वा एनच्छरीरमद्युर्भक्षयेयुः वयांसि वा पक्षिणो
गृध्रादय एनच्छरीरं विमथ्नीरन्विलोडयेयुविकर्षेरन्निति तस्मान्मयि शरीरऽएव हृदयं प्रतिष्ठितं
तच्छरीरमपि नामकर्मरूपात्मकत्वाद्धृदये प्रतिष्ठितमित्यर्थादुक्तमित्यर्थः ॥२६॥ एवं कार्यकर-
णयोर्हृदयशरीरयोरन्योऽन्यप्रतिष्ठोक्तातस्तेऽअपि कुत्र प्रतिष्ठितेऽइति पृच्छति कस्मिन्नु त्वं च
शरीरमात्माच हृदयं चेत्येतौ युवां प्रतिष्ठितौ स्थः । देहात्मानौ ऊर्ध्ववृत्त्यात्मके प्राणे प्रति-
ष्ठितौ सापि प्राणवृत्तिरपानवृत्त्या चेन्न निगृह्यते तर्हि प्रागेव गच्छेत् स चापानो व्याने म-
ध्यस्थवृत्तिरूपे अन्यथोभयोरूर्ध्वाधोगमनमेव भवेत् स च व्यान उदाने नाभिस्थवृत्तिरूपे
कीलकस्थानीये तिस्रोऽपि वृत्तयस्तत्र चेन्न निबद्धाः तर्हि नानागतयो भवेयुः स चोदानः
समाने सूत्रात्मशब्दवाच्ये समानप्रतिष्ठा ह्येताः सर्वा वृत्तयः ॥२७॥ सोऽपि समानोऽन्तर्या-
मिणि सोऽप्यक्षरे कूटस्थे ब्रह्मणीत्यर्थाद्दर्शितमेवेति मत्वा श्रुतिः स्वयमेव ब्रह्मणः स्वरूपमाह
स एष इति यः सूत्राश्रयान्तर्यामित्वकल्पनाधिष्ठानभूतः स परमात्मा एष प्रत्यगात्मैव मूर्ता-
मूर्तब्राह्मणे (५. ३. ११.) नेति नेतीत्येव संकल्पोपाधिनिषेधेन निर्दिष्ट आत्मा । निषेधद्वारा
निर्दिष्टमेव स्पष्टयति अगृह्य इत्यादिना । असङ्गोऽमूर्तः तथासितोऽबद्धः मूर्तान्तरेण सम्बध्य-
मानः सज्यते (!) अयं च तद्विपरीतो न सज्यते (!) तथाबद्धत्वान्न व्यथते । अथ पुनः पू-
र्वामिवाख्यायिकामनुसृत्यायं प्रेतीभूतोऽब्रह्मवित्सन्नेव मां ब्रह्म पृच्छतीति सापराधत्वं सम्पाद-
यितुं याज्ञवल्क्यः पृच्छति एतानीति तान् शारीरप्रभृतीनष्टौ पुरुषान् स यः कश्चिद्ब्रह्मज्ञः
आयतनलोकपुरुषेत्येतत्त्रिकभेदेन व्युदस्य विक्षिप्य लोकस्थितिमुपपाद्य पुनः प्राचीदिगादि-
द्वारेण हृदयात्मनि प्रत्युह्योपसंहृत्य पश्चाद्धृदयाद्यात्मत्वलक्षणमपि समानान्तमुपाधिधर्ममत्य-
क्रामीदतिक्रान्तत्वान् स्वेनैवात्मना व्यवस्थितः तं ब्रह्मज्ञलक्षणमौपनिषदमुपनिषत्स्वेव वि-
ज्ञेयं नान्यप्रमाणगम्यं पुरुषमशनायादिधर्मवर्जितं हे शाकल्य वा त्वां ब्रह्मविद्याभिमानिनं

पृच्छामि । ब्रह्मविद्विरोधे (? द्विषेद्वै Cod.) परलोकविरोधोऽपि स्यादिति दर्शयितुमष्टाध्याय्यां (११. ६. ३. ११.) निर्वृत्ताख्यायिकार्थमिह सूचयति तस्य हेति न केवलमसौ मृत एव किं च तस्य शाकल्यस्य अग्निहोत्रेण संस्कारार्थं शिष्यैर्वस्त्रखण्डेन बद्ध्वा गृहान्प्रति नीयमानान्यस्थीन्यपि परिमोषिणस्तस्करा अन्यद्धनमेतैर्नीयतऽइति मन्यमानाः सन्तोऽपजह्रुवन्तः ॥२८॥ यस्य ब्रह्मणो नेति नेत्यन्यप्रतिषेधद्वारेण निर्देशः कृतस्तस्यैवेदानीं विधिमुखेन निर्देशः कर्तव्यो जगतो मूलं च वक्तव्यम् ॥२९॥ जगत्कारणं प्रष्टुं तावत्पुरुषवृक्षयोः साधर्म्यं श्लोकत्रयेणाह । यथा लोके वृक्षस्तस्य विशेषणं वनस्पतिरिति तच्च वृक्षस्य महत्त्वमाहेत्यपुनरुक्तता । अमृषा न मिथ्या सत्यमेवैतत् । उत्पाटिका सर्वापेक्षया बहिर्भूता नीरसा त्वक् ॥३०॥ उत्पटो वृक्षनिर्यासः । आतृन्नाद्धिंसितात् ॥३१॥ शकराणि शकलानि । किनाटं नाम वृक्षस्य शकलेभ्योऽभ्यन्तरं काष्ठसंलग्नं वल्कलरूपमुच्यते । स्नाव अस्थिसंलग्नो धातुविशेषः । तदुभयं किनाटं स्नाव च स्थिरं दृढम् । मज्जाया उपमा मज्जोपमा । मज्जाशब्देनोभयत्रास्थिकाष्ठगतः सार उच्यते ॥३२॥ अथ वृक्षपुरुषयोर्वैधर्म्यकथनपुरःसरं जगत्कारणं पृच्छति । मृतस्य पुरुषस्य कुतः प्ररोहणमिति युष्मानहं पृच्छामि ॥३३॥ तत्र शङ्कामुद्भाव्य निराचष्टे रेतस इति । यस्माज्जीवतः पुरुषात्तद्रेतः प्रजायते न मृतात् अतो न रेतः कारणम् । यस्तु मृतः स पुनर्नैव जायते जातवादेव । धाना वीजं वटकणिकादि तस्याः सकाशाद्रोहतीति धानारुहः उशब्दोऽप्यर्थः न केवलं काण्डरुह एव किंतु वीजरुहोऽपि वृक्षो भवति । प्रेत्य मृत्वा अन्यतः सम्भवः काण्डात् धानातोऽपि प्रेत्य सम्भवो भवेत् । समूलं सह मूलेन धानया वा उद्वृहेयुरुद्धरेयुरुत्पाटयेयुः । तत्र विजग्मुर्ब्राह्मणा यतो मृतः पुनः प्ररोहति ब्राह्मणैर्जगतो मूलं न विज्ञातमतो ब्रह्मिष्ठत्वाद्याज्ञवल्क्येन गावो हृता ब्राह्मणाश्च जिताः समाप्ताख्यायिका । यज्जगतो मूलं येन च शब्देन साक्षाद्व्यपदिश्यते ब्रह्म यद्याज्ञवल्क्यो ब्राह्मणान्पृष्टवान् तत्स्वेन रूपेण श्रुतिरस्मभ्यमाह विज्ञानमिति विज्ञप्तिर्विज्ञानं कूटस्थचिन्मात्ररूपम् तच्चानन्दं न विषयविज्ञानवद्दुःखानुविद्धं किं तर्हि प्रसन्नं शिवमतुलमनायासं नित्यतृप्तमेकरसमित्यर्थः । गतेर्धनस्य दक्षिणारूपस्य दातुः कर्मकृतो यजमानस्य परायणं परा गतिः । एषणाभ्यो व्युत्थाय तस्मिन्नेव मोहातीते ब्रह्मणि तिष्ठत्यकर्मकृदिति तिष्ठमानः तदेव ब्रह्म वेत्तीति तद्वित् ब्रह्मणि तिष्ठमानस्य ब्रह्मविदश्च परायणम् ॥ ३४ ॥ १ ॥ ६ ॥

एवं शाकल्यब्राह्मणे सच्चिदानन्दं ब्रह्म निर्धारितम् इदानीं तस्यैव प्राणाद्यधिष्ठात्रीषु वाय्वादिदेवतासु (? वाचा C.) ब्रह्मदृष्टिद्वारा निर्णयाय षडाचार्यब्राह्मणं कूर्चब्राह्मणं चेति ब्राह्मणद्वयमारभ्यते । ब्राह्मणद्वयस्य त्वाख्यायिका आचार्यवता अजादिसम्पन्नेन विद्या लब्धव्येत्याचारप्रदर्शनार्था बोद्धव्या । आसां चक्रे आसनं कृतवान् दर्शनकामेभ्य आस्थायिकां दत्तवान् । अचारीरागतोऽसि । अण्वन्तान् सूक्ष्मान्तान्सूक्ष्मवस्तुनिर्णयान्प्रश्नानमन्तः श्रुत्वा तदुत्तरं वक्तुम् । सम्राट् सार्वभौम सम्राडिति वाजपेययाजिनो लिङ्गम् यद्वा हिमवत्सेतुपर्यन्तस्य देशस्य राजेति सूचितम् ॥१॥ शुल्बस्यापत्यं शौल्बायनः । प्राणो वायुर्देवता ब्रह्म । यस्य पुत्रस्य सम्यगनुशास्त्री माता विद्यते स मातृमान् । आयतनं नाम शरीरम् प्रतिष्ठा नाम त्रिष्वपि कालेषु य आश्रयस्तम् । एकपादेकः पादो यस्य ब्रह्मणः तदिदं त्रिभिः पादैः शून्यमुपास्यमानमपि फलाय न भवति ॥२॥ एवमुक्तो मुनिराह प्राण एवेति प्राण एव घ्राणेन्द्रियमेव

प्राणदेवस्य ब्रह्मण आयतनं शरीरम् आकाशोऽव्याकृताख्यः प्रतिष्ठा तस्योत्पत्तिस्थितिलयकालेषु आश्रयः । एतत्प्राणदेवताख्यं ब्रह्म प्रियमित्येतन्नाम्नोपासीत प्रियमितीयमुपनिषद्ब्रह्मणश्चतुर्थः पादः चतुर्भिः पादैः पूर्णत्वेन फलदत्वात्प्रियमिति कृत्वा एतद्ब्रह्मोपासीतेति भावः । प्राणदेवब्रह्मस्वरूपात्प्रियमितीयमुपनिषत्प्रतिष्ठायतनवद्भिन्नाभिन्ना वेति जिज्ञासया पृच्छति हे याज्ञवल्क्य का प्रियतेति हे सम्राट् प्राण एव प्राणदेवब्रह्मैव प्रियता न ततो व्यतिरिक्ता प्रियतेति कथं पुनः प्राण एव प्रियतेत्युच्यते प्राणाभिरक्षणार्थीय हि पुमानयाज्यं पतितादिमपि याजयति तथाप्रतिगृह्यस्योग्रादेः प्रतिगृह्णाति अपि च धनाद्यर्थं यां तस्करादिसंकीर्णामपि दिशमेति गच्छति तत्र तस्यां दिशि वधशङ्का शस्त्रादिहननिमित्ता शङ्का भवति तदेतत्सर्वं प्राणस्यैव कामाय तस्मात्प्राणो वै परमं ब्रह्म । अभिक्षरन्ति बलिदानादिभिः संयोजयन्ति ॥३॥ हस्त्यृषभं हस्तितुल्य ऋषभो यस्मिन्गोसहस्रे तदेवंभूतं सहस्रम् । अननुशिष्य शिक्षामकृत्वा शिष्यं कृतार्थमकृत्वा शिष्याद्धनं न हरेत ॥४॥ शिलिनस्यापत्यं शैलिनः । वागभिमानिनी देवताग्निः । अवदतो मूकस्य ॥५॥ अयमस्माकं बन्धुरित्युक्ते प्रकर्षेण ज्ञायते । ऋग्वेदादीनि व्याख्यानान्तानि मैत्रेयीब्राह्मणे (५. ४. १०.) उक्तार्थानि ॥६॥ वृष्णस्यापत्यं वार्ष्णः । चक्षुरिति तदधिष्ठात्री देवता आदित्यः ॥८॥ सत्यमित्यादित्यब्रह्मण उपनिषत् । यस्त्वन्यो ब्रूयादहमश्रौषमिति तदनृतमपि क्वाचित्स्याद्व्यभिचारात् यत्तु चक्षुषा दृष्टं तदव्यभिचारात्सत्यमेव भवति ॥९॥ श्रोत्रं तदभिमानिनी दिग्देवता ॥११॥ दिग्भागो हि पार्थिवाधिष्ठानावच्छिन्नः श्रोत्रमित्युच्यतेऽतस्तयोरेकत्वमित्युपपन्नम् तस्माद्दिगानन्त्यमेव श्रोत्रस्यानन्त्यम् ॥१२॥ जबालाया अपत्यं जाबालः । मनो वै ब्रह्मेति तदधिष्ठात्री चन्द्रदेवता ॥१४॥ मनसा स्त्रियमभिहर्यति अभिलषति तस्यां स्त्रियां प्रतिरूपः पितृभावनानुरूपः पुत्रो जायते स पुत्र आनन्द आनन्दहेतुत्वात् ॥१५॥ हृदयाभिमानिनी देवता प्रजापतिरुच्यते ॥१७॥ यतो हृदयेन सर्वाणि भूतानि नामरूपकर्मात्मकानि प्रतितिष्ठन्ति तस्माद्धृदयं परमं ब्रह्म ॥१८॥१०॥६॥

पूर्वस्मिन्षडाचार्यब्राह्मणे कानि चिदुपासनानि ज्ञानसाधनान्युक्तानि इदानीं तैर्ज्ञेयस्य ब्रह्मणो जागरादिद्वारा ज्ञानार्थं कूर्चब्राह्मणमारभ्यते । कूर्चादासनविशेषादुत्थायोप समीपमवसर्पन् तत्पादयोः पतन् । मुमुक्षवे द्वयं वाच्यं ज्ञानं तत्साधनं च तत्र ज्ञानसाधनं राज्ञोऽस्तीति दृष्टान्तपूर्वकं कथयति । एताभिः प्रियमित्येवमुपासीतेत्याद्युक्ताभिरुपनिषद्भिः समाहितात्मा संयुक्तात्मा अत्यन्तं संस्कृतान्तःकरणोऽसि वृन्दारकः पूज्यः आढ्यश्चेश्वरो न दरिद्रः । धनादिसम्पन्नोऽपि सन्नधीतवेदः अधीतो वेदो येन । आचार्यैरुक्ता उपनिषदो यस्मै तुभ्यं स उक्तोपनिषत्कः । एवं सर्वविभूतिसम्पन्नोऽपि सन्भयमध्यस्थ एवेति यावत्परं ब्रह्म न विदितं तावदकृतार्थ एवेति बोधयितुं ज्ञानसाध्यां प्रणाड्योपासनफलभूतां मुक्तिं पृच्छतीतो विमुच्यमान इति ॥१॥ इदानीं विश्वतैजसप्राज्ञानुवादेन वक्तव्यतया प्रतिज्ञातं तुरीयं ब्रह्म प्रतिपादयितुमादौ वैश्वानराभिन्नं जाग्रदभिमानिनं विश्वं दर्शयति स होति । इन्धे दीप्यते जागरिते स्थूलार्थभोक्तृत्वेन सदा स्फुरणादितीन्धो नाम वै प्रसिद्ध एष आदित्यान्तर्गतः पुरुषः चक्षुर्वै ब्रह्मेति पुरोक्तः । अधिदैवतं पुरुषमुक्त्वाध्यात्मं तमाह योऽयमिति । परोऽक्षेणेव इन्द्र इत्याचक्षते इवशब्दोऽवधारणार्थः परोऽक्षेणैव कथयन्ति । प्रत्यक्षनामग्रहणं द्विषन्तीति प्रत्यक्षद्विषः ॥२॥ एकस्यैव वैश्वानरस्योपासनार्थं प्रासङ्गिकमिन्द्रश्चेन्द्राणी चेति मिथुनं कल्पयन्ति । अस्यै-

वोक्तस्येन्द्रस्य भोक्तुर्वैश्वानरस्य एषा विराट् पत्नी भोग्यत्वात् तथा च यदेतन्मिथुनं जागरिते विश्वशब्दवाच्यं तदेवैकं स्वप्ने तैजसशब्देन वाच्यमित्यर्थादुक्तमेव । अत एवास्य स्वप्नावस्थस्य मिथुनस्थानमाह तयोरिन्द्रेन्द्राण्योः स्वप्नावस्थामात्रयोरेष संस्तावः सम्भूय यत्रान्योऽन्यं संस्तवं कुर्वाते स एष संस्तावः य एष प्रसिद्धोऽन्तर्हृदये हृदयस्य मांसपिण्डस्यान्तर्मध्ये आकाशः सुषिः । अन्नं भोज्यं स्थितिहेतुः । प्रथमं तावज्जग्धमन्नं द्वेधा परिणमते तत्र यत्स्थूलं तदधो गच्छति यदन्यत्सूक्ष्मं तत्पुनरग्निना पच्यमानं द्वेधा परिणमते तयोर्मध्ये यो मध्यमो रसः स पाञ्चभौतिकं शरीरमुपचिनोति यः पुनरणिष्ठो रसः स एष लोहितपिण्ड इत्युच्यते लोहित एव पिण्डो लोहितपिण्डः । लोके भुक्तवतोः स्वपतोश्च प्रावरणं दृष्टं तथानयोरपि प्रावरणेन भवितव्यम् जालकमिवानेकनाडीच्छिद्रबहुलत्वाज्जालकवत्प्रतिभासमानम् । इदानीं तयोः स्वप्नाज्जागरितदेशागमनमार्गमाह एषा सती शोभना सृतिर्मार्गः संचरणी संचरतः स्वप्नाज्जागरितमनयेति संचरणी ॥३॥ इदानीं विश्वतैजसयोरन्नविवेको भोक्तुश्च सूक्ष्मतेत्येतत्प्रदर्शनार्थमिन्द्रियाश्रितानां नाड्यन्तराणां परिमाणं सदृष्टान्तमाह । एवं सूक्ष्मा अस्य पुरुषस्य देहसम्बन्धिन्य एताः स्वप्नाज्जाग्रद्गमनादिव्यवहारहेतुभूता नाड्यः सिराः अन्तर्हृदये प्रतिष्ठिताः सन्तीति शेषः हृदयाच्च विप्ररूढास्ताः सर्वत्र कदम्बकेसरवद्युगपत्स्थानविशेषेषु प्रसृताः सत्यो व्यवस्थिताः । उक्तनाडीनामुपयोगकथनपूर्वकं सूक्ष्मतमत्वकथनप्रयोजनमाह एताभिरेव एत देहमास्रवत् गच्छच्छरीरं व्याप्नुवत्पूर्वोक्तं सूक्ष्मतरमन्नं कर्तृ आस्रवति करणान्तःकरणक्षेत्रज्ञान्देवतारूपान्व्याप्नोति । यस्मान्नाड्याश्रितं सूक्ष्ममन्नं देवताद्वारा भुञ्जानः सन्नयं लिङ्गात्मा करणदेवता (? ताः Cod.) करणान्यन्तःकरणं च लिङ्गाख्यं प्रीणयति राजस्थानीयेन चिदात्मनानधिष्ठितानां भोगे स्वातन्त्र्याभावात् तस्मादेष तैजसः प्रविविक्ताहारतरः शारीरात्स्थूलशरीरोपाधेर्वैश्वानरादात्मनः सकाशात् तस्य हि मूत्रपुरीषादिस्थूलापेक्षया पिण्डोपचयकरमप्यन्नं प्रविविक्तमेव लिङ्गस्थितिकरं त्वन्नं ततोऽपि सूक्ष्मतरम् ॥४॥ विश्वतैजसयोरेव (वं?) श्रुत्या साक्षान्निर्दिष्टत्वात्तैजसस्य प्राज्ञद्वारा तुरीयब्रह्मात्मनिलयः साक्षादेव निर्देष्टव्य इत्यभिप्रेत्य तुरीये लीनस्य तैजसस्य लयात्प्रागवस्थायां परिच्छेदहेतुभूता ये अध्यात्मं प्राणास्तेषां लयानन्तरसंवृत्तावस्थोपन्यासव्याजेन तैजसस्य प्राज्ञद्वारा तुरीये लयं दर्शयति तस्येति स एष हृदयभूतस्तैजसः सूक्ष्मभूतेन प्राणेन विध्रियमाणः प्राण एव भवति तस्य वै एतस्य पुरुषस्य विदुषः क्रमेण वैश्वानरात्तैजसं प्राप्तस्य तस्य अकार्यकारणाखण्डतुरीयपदाविष्टस्य तैजसस्य ये प्राञ्चः प्राणा नासाद्वारा अग्रतः संचरन्तस्ते प्राची दिगेव संवृत्ताः अध्यात्मादिपरिच्छिन्नाः प्राणाः सर्वासु दिक्षु स्थिताः विदुषस्तुरीयपदं प्राप्तस्य परिच्छेदहेतुनाशात्तस्मिन्नेकीभूताः सन्तस्तत्तद्दिङ्मात्रं संवृत्ताः प्रत्यङ्मात्रे लीना इत्यर्थः । एवं दक्षिणा दिग्दक्षिणाः प्राणा इत्यादि व्याख्येयम् । तथा चोपाधिभूतानां प्राणानां लयं दर्शयन्ती श्रुतिरुपहितस्याप्यात्मनो लयं कारणात्मनि दर्शितवतीति भावः ॥५॥ एवं सर्वोपसंहारं कृत्वावस्थितस्य पुरुषस्य विदुषः किं स्वरूपमित्यपेक्षायामविद्यातत्कार्यभावाभावसाक्षित्वेन तद्विलक्षणं निःप्रपञ्चं स्वरूपमिति दर्शयति स एष नेत्यादिना । इदानीं यत्प्रत्यगात्मस्वरूपज्ञापनार्थं ब्राह्मणद्वयात्मको ग्रन्थ उपदिष्टस्तस्य ज्ञानस्यापरोक्षानुभवरूपस्य फलमाह अभयं वाऽइति अभयं जन्ममरणादिनिमित्तभयाभावम् । गच्छताद्गच्छतु । इमे विदेहास्तव यथेष्टं भोगाय सन्तु अयं चाहं तव दासभावे

स्थितोऽस्मि यथेष्टं मां राज्यं च प्रपद्यस्व । इदं दक्षिणादानं व्यवहारदृष्टिमवष्टभ्यैवोक्तम् तत्त्वतस्तु नास्त्येव दक्षिणेति राज्ञोऽभिप्रायः अद्वितीयब्रह्मात्मैक्यमनुभवतः स्वात्मातिरिक्तस्य वस्तुनोऽभावात् तदुक्तम् अहं ममेत्यविद्याधीः सहेतुर्नाशिता यदा पूर्णात्मनि तदा दृष्टे कः कस्मै किं च दित्सतीति ॥ ६ ॥ ११ ॥ ६ ॥

मधुकाण्डे तावद्बुद्ध्यनुप्रविष्ट ईश्वरोऽविद्ययाकृत्स्नत्वमापन्न इति तं न पश्यत्यकृत्स्नो हि स इत्यादिनोक्तम् (४. २. १६.) पुनस्तस्यैवाविद्यानिरासेन स्वरूपावस्थानं च आगमप्राधान्येन निर्धारितम् एवं मधुकाण्डे निरूपित आत्मा यत्साक्षादपरोक्षादित्यादिलक्षणो जल्पन्यायमवलम्ब्याखण्डप्रत्यक्त्वेन निरूपितस्तस्यैव वादन्यायेन स्वरूपनिर्णयाय वागादिदेवतासु ब्रह्मदृष्टिद्वारा इन्धो ह वाऽइत्यादिना जागराद्यवस्थविश्वादिप्रदर्शनेन तुरीयं नेति नेत्यादिलक्षणं ब्रह्मात्मतत्त्वमुपदिष्टम् इदानीं पूर्वोक्ता जागराद्यवस्था अनुसृत्य महता तर्केणानेकविप्रतिपत्तिनिरासद्वारेण देहादिव्यतिरिक्तशुद्धस्वयम्प्रकाशानतिशयानन्दस्वभावलक्षणं पूर्वोक्तमेवात्मानमधिगमयितुं ज्योतिर्ब्राह्मणमारभ्यते । स गच्छन्याज्ञवल्क्यो राज्ञेऽहं किंचिदपि न वदिष्ये इति मेने विचारयामास यद्वा सम् एनेनेति छेदः एनेन राज्ञा अहं संवदिष्ये । अग्निहोत्रे निमित्ते (११. ६. २. १-१०.) । कामप्रश्नमिच्छाप्रश्नम् ॥ १ ॥ प्रत्यगात्मचैतन्यस्वरूपं जिज्ञासमानः कार्यकरणसंघातात्मा पुरुषो ज्योतिर्निर्वर्त्यमासनगमनादिकार्यं स्वाभिन्नेनैव ज्योतिषानुगृहीतो निर्वर्तयति किं वा स्वव्यतिरिक्तेनेति संदिहानः पृच्छति हे याज्ञवल्क्यायं पुरुषः कार्यकरणसंघातरूपः शिरःपाण्यादिमान्पिण्डः किंज्योतिः किं ज्योतिरस्य विद्यते येन ज्योतिषानुगृहीतोऽयमासनादिव्यवहारं करोति । तत्किं देहादि तदतिरिक्तं वेति प्रष्टुरभिप्रायज्ञो मुनिरयं हि राजा व्यतिरिक्तं ज्योतिरेव पृच्छतीति तथाविधमेवेतरसर्वज्योतीरहितस्वप्नाद्यवस्थायां विविक्ततया बोधयितुकामो जागरिते तावद्दृष्टान्तभूतान्यादित्यादीनि वागन्तानि ज्योतींष्युपन्यस्यतीति दर्शयति आदित्यज्योतिरित्यादिना आदित्येनैव चक्षुषोऽनुग्राहकेण देहकरणाद्यतिरिक्तेनैवायं प्राकृतः पुरुषः पल्ययते पर्येति गच्छति गत्वा क्षेत्रमरण्यं वा तत्र कर्म कुरुते पश्चाद्विपर्येति भूयो निवर्तते । संघातादिव्यतिरिक्तमेव ज्योतिरासनादिकारणम् ॥ २ ॥ यद्यप्येकेनैवादित्यपर्यायेण व्याप्तिग्रहसम्भवस्तथापि बहवो दृष्टान्ता व्याप्तिं द्रढयन्तीति मत्वा प्रश्नप्रतिवचनाभ्यां ज्योतिःपर्यायान्तराणि दर्शयति ॥ ३ ॥ वाचैवायमित्यत्र वाक्पदेन शब्दः परिगृह्यते नेन्द्रियम् ॥ ५ ॥ स्वप्नसुषुप्त्योरपि बन्धुसंगमवियोगदेशान्तरगमनादेरुत्थानस्य च ज्योतिःकार्यस्य दर्शनाद्भवितव्यं तत्राप्यतिरिक्तेन केनचिज्ज्योतिषेत्यनुमानतो ज्योतिर्मात्रे सिद्धे उपन्यस्तानां ज्योतिषां तत्र योग्यानुपलब्धिबाधितत्वात्केन ज्योतिषा तदासौ व्यवहारं करोति । आत्मेति कार्यकरणातिरिक्तं तदवभासकमपराधीनप्रकाशं ज्योतिरभिधीयते ॥ ६ ॥ कोऽसावात्मा किंस्वरूप इति प्रश्नार्थः बुद्ध्यवभासकः स्वयमनवभासमान आत्मेति प्रतिवचनमाह । पुरुषो नित्यपूर्ण इत्यर्थः प्राणेष्विति सामीप्यलक्षणा सप्तमी विज्ञानमयस्य तद्व्यतिरेकप्रदर्शनार्था यो हि येषु भवति स तद्व्यतिरिक्त एव भवति । हृच्छब्दो मांसपिण्डविषयः तात्स्थ्यादत्र हृच्छब्देन लक्षणया बुद्धिरुच्यते हृदि बुद्धावन्तर्वर्तमानं ज्योतिरात्मा । पूर्णो बुद्धिदर्पणाभिव्यक्तः सर्वावभासकः शुभ्रो निरतिशयस्वप्रकाशकस्वभाव आत्मेति वाक्यार्थः । एवमात्मनो नित्यमुक्तस्याविद्यया बुद्ध्यादितादात्म्याध्यासादेव संसारित्वमिति दर्शयितुं

सूक्ष्मदेहातिरिक्ततया आत्मनः शुद्धत्वप्रदर्शनाय वा स्वप्नं प्रक्रमते । स समानः सन् सूक्ष्मशब्द-वाच्याया बुद्धेः प्रकृतत्वात्संनिहितत्वाच्च तया समानः सदृशः अन्योऽन्यधर्माध्यासेन तप्तायः-पिण्डवत्तादात्म्यमापन्नः सन्नुभौ लोकौ इहलोकपरलोकावनुक्रमेणोपात्तदेहेन्द्रियसंघातं त्यजन्नन्यं चोपददत्संचरति परिभ्रमति आत्मा संचरतीति भ्रमो न तस्य स्वतः संचरणमित्यर्थः । एतदेव प्रत्यक्षेणाभिनीय दर्शयति ध्यायतीवेति यतो ध्यानव्यापारवतीं बुद्धिं तत्स्थेन चित्स्वभावज्योतीरूपेणावभासयंस्तत्सदृश आत्मा ध्यायतीव ध्यानं करोतीव तथा लेलायतीव चलतीव बुद्ध्यादिषु करणेषु प्राणादिषु वायुषु च चलत्सु तदवभासकतया तत्समान आत्मापि चलतीव न तु ज्योतीरूपस्यात्मनः परमार्थतो ध्यानं चलनं वेत्यर्थः । सधीः बुद्ध्यैक्यमापन्नः स्वप्नो भूत्वा स्वप्नाकारपरिणतधीवृत्त्यवभासकत्वेन तदाकारो भूत्वा इमं लोकं जागरितलक्षणं लौकिकशास्त्रीयव्यवहारास्पदं कार्यकरणसंघातमतिक्रामति अतीत्य क्रामति तदभिमानं त्यजति ॥७॥ यथैकस्मिन्देहे स्वप्नजागरिते संचरत आत्मनो देहाद्व्यतिरेकस्तथेहलोकपरलोकयोः संचारित्वात्यापि तस्य तद्व्यतिरेक उच्यतऽइति दर्शयति स वाऽइति । पाप्मभिर्धर्माधर्माश्रयैः कार्यकरणैः संयुज्यते । विजहाति परित्यजति तत्राभिमानत्यागमात्रेणैव तैर्वियुज्यते । अतः संचरणादिकं नात्मनः स्वाभाविकं वह्नेरिवौष्ण्यस्वभावः स्वाभाविके सति परित्यागायोगादिति ज्ञेयम् ॥८॥ एवमुत्क्रामन्म्रियमाणः शरीरमभिसम्पद्यमान इत्यागमवशात्परलोकास्तित्वे सिद्धेऽपि प्रत्यक्षेण न तत्सिद्धं परलोकविषयं च प्रत्यक्षं नास्त्यतो नास्ति परलोक इत्याशङ्क्यास्ति परलोकः प्रत्यक्षसिद्ध इति प्रतिपादनाय तस्मिन्त्संध्ये स्थानऽइत्यारभ्य स यत्रायं प्रस्वपितीत्यतः प्राक्तनो ग्रन्थः प्रवर्तिष्यते प्रथमं तदुपोद्घातत्वेन स्थानभेदं दर्शयति तस्य वाऽइति । संधौ भवं संध्यम् । एतदुक्तं भवति आद्ये वयसि यं स्वप्नं पश्यति तं पूर्वजन्मानुभूतविषयमेव तद्वासनावासितः सन्पश्यति तदानीं बालस्यैहिकपुत्राद्यनुभवाभावात् मध्यमे तु वयसीन्द्रियाणां स्थूलार्थग्रहणसामर्थ्यादिह जन्मन्यनुभूतविषयकमेव स्वप्नं प्रायः पश्यति अन्ते (न्त्ये ?) वयसि पुनः परलोकं यियासुर्विद्याकर्मादिसम्भृतो भाविजन्मविषयकं स्वप्नं प्रायः पश्यति तस्मादन्ते वयस्यादौ चेहजन्मन्यसम्भाव्यमानस्य दर्शनं परलोकसद्भावे प्रत्यक्षं प्रमाणयति ॥९॥ ननु स्वप्नस्थानं गत आत्मा किमाश्रितः सन्केन विधिना परलोकं पश्यतीत्यपेक्षायामाह अथेति । आक्रम आश्रयोऽवष्टम्भो विद्याकर्मपूर्वप्रज्ञालक्षणः यादृश आक्रमो यस्य सोऽयं यथाक्रमः । पूर्वमादित्यादिज्योतिरभावेऽपि आसनादिज्योतिःकार्यदर्शनादयं पुमानात्मज्योतिषैव व्यवहरतीत्युक्तम् इदानीमादित्यादिज्योतिर्भिरसंस्पृष्टः चिदात्मा यथा साक्षादेव प्रत्यग्भावेन स्वप्रकाश इत्यवगन्तुं शक्यते तथा प्रदर्शनायाह स यत्रेति संध्याख्यं स्वप्नं प्रतिपद्यमानः किमाश्रयः केन विधिना प्रतिपद्यतऽइत्याकाङ्क्षायामाह अस्य दृष्टस्य लोकस्य जागरितलक्षणस्य स्थूलदेहस्य सर्वावतः सर्वा भूतभौतिकमात्रा अध्यात्मादिविभागयुक्ताः संसर्गकारणभूता अस्य विद्यन्तऽइति सर्ववान् दैर्घ्यं छान्दसम् तस्य मात्रामेकदेशमवयवमपछिद्य गृहीत्वा जाग्रद्दृष्टवासनावासितः सन्नित्यर्थः । अत्रैतस्यां स्वापावस्थायाम् आदित्यादेस्तदानीमभावादिन्द्रियाणां चोपसंहृतत्वान्मनसश्च विषयाकारेणैवोपक्षयात्परिशेषादात्मा स्वयंज्योतिरित्यर्थः ॥१०॥ ननु स्वप्नेऽपि सर्वस्यादित्यादेर्दृश्यमानत्वात्कथं परिशेषात्स्वयंज्योतिष्ट्वसिद्धिरित्याशङ्क्यायां तस्य सर्वस्य वासनामात्रनिर्मि-

तत्वात्तत्रात्मा विविक्तः स्वयंज्योतिरिति निश्चेतुं स्वप्ने बाह्यरथाद्यभावं तावदाह न तत्रेति । रथैर्युज्यन्तऽइति रथयोगा अश्वादयः । मुदः पुत्रादिसम्बन्धनिमित्ता हर्षाः । वेशान्ताः क्षुद्रसरांसि स्रवन्त्यो नद्यः पुष्करिण्यस्तडागाः । हि स यस्मात् आत्मा कर्ता तस्मात्सृजतीति योजना न ह्यत्र कर्तृत्वं वास्तवमात्मनोऽभिप्रेतं किंतु परिणममानवासनासाक्षितामात्रमेव ॥११॥ उक्तेऽर्थे मन्त्राणामपि संमतिरस्तीत्याह तदप्येतेऽइति । तत्र स्वप्नप्रवेशतत्साक्षित्वप्रकाशकं मन्त्रार्धं पठति स आत्मा स्वप्नेन स्वप्नभावेन वासनामात्रोपग्रहेण शारीरमिति स्वार्थे वृद्धिः शरीरमभिप्रहत्य निश्चेष्टमापाद्यालुप्तदृक्शक्तिस्वाभाव्यात्स्वयमसुप्तः सन्सुप्तान्वासनाकारणोद्भूतान् (रेणो Cod.) अन्तःकरणवृत्त्याश्रयान्बाह्याध्यात्मिकान्सर्वानेव भावान्स्वेन रूपेण प्रत्यस्तमितानभिचाकशीति अलुप्तया आत्मदृष्ट्याभितः सर्वात्मना पश्यत्यवभासयति । स्वप्नभोगक्षये पुनर्जागरितमेतीति द्वितीयार्धेन दर्शयति शुक्रं शुद्धं ज्योतिष्मदिन्द्रियादिमात्रारूपं गृहीत्वा पुनः स्वप्नहेतुकर्मोपमरणानन्तरं जाग्रद्भोगहेतुकर्मणा जागरितं स्थानमागच्छति हिरण्मयश्चैतन्यज्योतिःस्वभावः पौरुषः पुरुषः स्वार्थे वृद्धिः एकहंसः एकश्चासौ हंसश्चेत्येकहंसः एक एव जाग्रत्स्वप्नाविहलोकपरलोकौ च हन्ति गच्छति हिनस्तीति वा एकहंस इत्यर्थः ॥१२॥ अपरं निकृष्टमनेकाशुचिसंघातत्वादत्य बीभत्सम् कुलायं नीडं शरीरम् । यत्रकामं यत्र-यत्र विषयेषूद्भूतवृत्तिः कामो भवति तं काममीयते गच्छति प्राप्नोति ॥१३॥ स्वप्नान्ते स्वप्नस्थाने स्वकर्मोद्भासितं वासनामयमुत्कृष्टं निकृष्टं च स्वेनैवात्मना स्वयमीयमानो गम्यमानः प्राप्नुवन् देवो द्योतनात्मकः । जक्षदिव वयस्यादिभिः सह हसन्निव ॥१४॥ एवं स्वप्ने निरूपिते किं पर्यवसितमित्यपेक्षायां तत्रात्मा विविक्तः स्वयंज्योतिः पर्यवसित इति प्रदर्शनाय मन्त्रशेषं पठति अस्यात्मनः आराममाक्रीडनं ग्रामनगरयोषिदन्नाद्ययानमार्गादिलक्षणं वासनानिर्मितमेव पश्यन्ति सर्वे जनाः न तु तमात्मानं तत्र विविक्तदृग्रूपत्वेनाव(भा)सकं कोऽपि पश्यति तस्मादसत्मा स्वप्नेऽदृश्य एव सन्नवभासतऽइति सिद्धमात्मनः स्वयंज्योतिष्ट्वमित्यर्थः । किं च स्वप्नं गत आत्मा विविक्त एवेत्यत्र लोकप्रसिद्धिरप्यस्तीत्याह तं नेति तमात्मानं सुप्तमायतं भृशं न बोधयेदित्याहुः चिकित्सका जनाः जाग्रद्देहगतेन्द्रियद्वारलक्षणाः प्रबोधनाडीः (धंना Cod.) परित्यज्यात्मा स्वप्ननाडीः प्रविष्टो विविक्त एव स्वप्ने वर्तते अत एव नाडीव्यत्यासगमनशङ्कयैव सुप्तं न बोधयेद्भृशम् । सहसा प्रबोधितः कदाचिद्व्यत्यासेनेन्द्रियमात्राः प्रवेशयति ततश्चान्ध्यबाधिर्यादिदोषप्राप्तौ अस्मै देहाय दुःखेन भिषक्कर्म भवति ॥१५॥ इदानीमन्यदीयं मतं स्वयंज्योतिष्ट्वविघातकं दुष्टमित्यस्मान्बोधयितुं स्वमतपरिशुद्धये च तदुपन्यस्यति जागरितदेश एवास्य स्वप्नस्य विषयो न तु संध्यमिदं स्थानान्तरमिहलोकपरलोकाभ्यां व्यतिरिक्तम् । यदि जागरितदेश एवायं स्वप्नो जातस्तदा जागरितऽइव स्वप्नेऽपि कार्यकरणसंघातमिश्रितत्वेन न ततो व्यतिरिक्तः स्वयंज्योतिः सिध्येदिति स्वयंज्योतिष्ट्वं बाधितं स्यात् अयं च पूर्वः पक्षोऽर्थक्रमपरिग्रहेण स यत्रायं प्रस्वपितीत्यतः प्रागेवावगन्तव्यः संध्यस्थानस्य तृतीयत्वाक्षेपत्वेन तत्रोचितत्वात् नैतत्सारम् स यत्रेत्यादिना युक्तितः प्रमाणेन स्वप्नस्य मृषात्वनिरूपणं कृतमित्येतत्सूचयन्ती श्रुतिरुत्तरमाह अत्रायमिति । देहेन्द्रियमनोबुद्धिप्राणाहंकृतिविलक्षणः स्वयंज्योतिरात्मेति निर्णीय मुनिरुपरतः राजा तु कामकर्मादिसकलसंसारधर्मातीतस्वरूपस्याङ्गीभूतस्य विजिज्ञासितस्य मोक्षस्यानिर्धारितत्वात्तन्निश्च-

F FFF FFF

याय मुनिमपृच्छत् । विशिष्टो मोक्षो भवत्यनेनेति विमोक्षः सम्यग्ज्ञानम् यतः स्वयंज्योतिष्ट्वरूपं मोक्षाङ्गमात्रमेव निर्णीतमतः कारणादूर्ध्वमङ्गनिर्णयादनन्तरं विमोक्षायैव मोक्षसाधनभूताद्वितीय-ब्रह्मात्मज्ञानायैव ब्रूहि यथा मोहत्रासादिजनको मृत्युरात्मनः स्वभावो न भवति तथा मा-मुपदिशेत्यर्थः ॥१६॥ एवं राज्ञा नियुक्तो मुनिर्मोहत्रासाद्यभावप्रदर्शनपुरःसरं तत्कारणभूतः कर्मलक्षणो मृत्युर्नात्मनः स्वभाव इति दर्शयितुं प्रवर्तमानस्तावत्स्वप्नस्थानाज्जागरितदे-शागमनमाह य एषः स्वप्ने दर्शितः स्वयंज्योतिः स प्रकृत आत्मा स्वप्नान्ते स्वप्नस्थाने पुनः स्वप्नादूर्ध्वं प्रति पूर्वस्माद्गमनात्प्रातिलोम्येन न्यायं निश्चयेनागमनं यथा स्यात्तथा प्रतियोनि जागरितसर्गाय पूर्वगृहीतवासनामयं स्थानं प्रत्यागच्छति बुद्धान्तायैव जागरणायैव जागरणानु-भवायेत्यर्थः । ननु स्वप्नऽआत्मा रत्यादिकं करोति चेत्तत्फलेनापि सम्बध्यते यथा जागरिते कर्म कुर्वंस्तत्फलेन सम्बध्यतऽइत्याशङ्कां वारयति स यदिति । अनन्वागतोऽननुबद्धः । ननु स्वप्ने इन्द्रियदौर्बल्यात् स्त्रियं दृष्ट्वा जग्धदि रेतःस्खलननिमित्तप्रायश्चित्तविधानमात्मनः स्वप्ने कर्मसम्बन्धभावेनोपपद्यतऽइति चेत् नैतत्स्वप्नसम्भोगनिमित्तं प्रायश्चित्तं किंतु सत्या-देवेन्द्रियलक्षणादाधाराद्रेतसः क्षरणनिमित्तं तस्य जागरिते प्रतिपन्नत्वनिमित्त च अन्यथा पर-नारीसंगमननिमित्तमपि प्रायश्चित्तं विदध्यात् न स्कन्ननिमित्तमात्रम् तस्मान्न स्वप्नकृतेन कर्मणा तत्फलेन चात्मा सम्बध्यते । कर्मप्रविवेकस्यापि मोक्षैकहेतुत्वात् ऊर्ध्वं विमोक्षायैव ब्रूहि ॥१७॥ एवं स्वतन्त्रज्योतिरात्मावस्थाद्वयेऽपि कामकर्मप्रयुक्तस्थानद्वयसंचरणसंसारधर्मैर-संस्पृष्टोऽवशीकृतोऽसङ्गत्वादिति प्रतिपादितम् तत्र संचरन्नपि कथं तेन न वशीक्रियतऽइत्यत्र दृष्टान्त उच्यते यद्वा स्वप्नान्तबुद्धान्तात्मकावस्थाद्वयस्य मिथो व्यभिचारात्तदनुस्यूतस्यात्मनस्त-द्विलक्षणत्वं तद्गतकर्मात्मकादासङ्गान्मृत्योर्विविक्तत्वं च यद्दर्शितं तत्रेदानीं दृष्टान्तमाह । कूले तीरे तटे ॥ अतोऽस्यात्मनः संसारित्वमाविद्यकमेव न स्वतः तस्यां निवृत्तायां तु स्वतः-सिद्धैव तस्य मुक्तिरिति स वाऽअयं पुरुषो जायमान इत्यारभ्य (क° ८.) मत्स्यवाक्यान्तस्य ग्र-न्थस्य समुदायार्थः ॥१८॥ एवं महामत्स्यदृष्टान्तोपन्यासेनावस्थाद्वयेऽपि यद्यपि कार्यकरणा-दिभ्यो व्यतिरिक्तं नित्यशुद्धबुद्धमुक्तस्वभावमात्मस्वरूपं दर्शितम् तथाप्येकैकस्मिन्वाक्ये एकैकव्यतिरेकस्यैव प्रदर्शनान्न पुञ्जीकृत्य तथाविधमात्मस्वरूपं दर्शितम् अतः सुषुप्तौ तथाविधमात्मस्वरूपं सकृदेव सुखं प्रतिपत्तुं शक्यमिति तद्वाऽअस्यैतदात्मकाममित्यादिना (क° २१.) तथा दर्शयितुं तथाविधसुषुप्तिप्राप्तौ दृष्टान्तत्वेन श्येनवाक्यं प्रवर्ततऽइति श्रीमतां शङ्कराचार्याणामवतारिकावार्त्तिककृत् अवतारिका तु एवं स्वप्नबुद्धान्तयोः संचरत आत्मनः संसारविलक्षणत्वे महामत्स्यदृष्टान्त उक्तः इदानीं सुषुप्तावपि तद्विलक्षणत्वं दर्शयितुं श्येनादि-दृष्टान्तमाह । श्येनो महाकायो मन्दवेगः पक्षिविशेषः सुपर्णस्तु वेगवत्तरोऽल्पविग्रहः । पक्षौ संहत्य संगमय्य सम्प्रसार्य सल्लयायैव (!) नीडायैव ध्रियते स्वात्मनैव स्वयं धार्यः सम्यक् लीयतेऽस्मिन्निति सल्लयो (!) नीडः आत्मा जाग्रत्स्वप्नयोः परिभ्रमणेन श्रान्तः सन् तद्रूमहानार्थम् जाग्रत्स्वप्नयोरन्तोऽवसानं यस्मिन्नज्ञाते ब्रह्मणि सोऽन्तः तस्मै अन्ताय अज्ञातब्रह्मलक्षणस्वनी-डाय धावति ॥१९॥ ननु जाग्रत्स्वप्नोपाध्यपगमेन सुषुप्तिं गतस्याप्यात्मनो न ब्रह्मैकत्वं त-त्रापि भेदहेतोरविद्यायाः सत्वादित्याशङ्क्य न तावदविद्या आत्मनः स्वभावः तथा सति चैतन्यवत्तदतिवृत्तेरमोक्षापत्तेः अस्वभावत्वे तु कामकर्मादिवत्तन्निवृत्तेर्मोक्ष उपपद्यतऽइति

विचारपुरःसरमस्वभाववकथनद्वाराविद्याकामकर्मादिहीनतया निरूपितात्मस्वरूपस्य प्रत्यक्षेण प्रदर्शनेच्छयोत्तरा कण्डिका प्रवर्तते । तिष्ठन्ति अर्थाद्धृदयऽइति गम्यते । एताश्च सूक्ष्मा नाड्यो धातुवैषम्यवशाद्भुक्तान्नरसस्य नानाविधैः परिणामैः पूर्यन्ते तासु चैवंविधासु सकलदेहव्यापिनीषु प्रत्यगात्मोपाधिभूतं जाग्रद्दृष्टपदार्थवासनाश्रयं स्फटिकमणिवत्स्वच्छं लिङ्गं तिष्ठतीत्यभिप्रेत्याह शुक्लस्येति । श्लेष्मबाहुल्ये वातपित्तयोर्गुणत्वेन संसर्गाद्भुक्तान्नरसो नाडीस्थः श्वेतो भवति वातभूयस्त्वे सतीतरयोर्गुणवान्नाडीस्थोऽन्नरसो नीलो भवति पित्तबाहुल्यादितरयोरुपसर्जनत्वे सति नाडीस्थो रसः पिङ्गलो भवति वातश्लेष्माधिक्येन पित्ते मन्दे सति नाडीस्थोऽन्नरसो हरितो भवति तेषां च धातूनां साम्ये नाडीस्थो रसो लोहितो भवति एवंविधान्नरसव्याप्तानां नाडीनामपि तादृशा वर्णा जायन्ते तदुक्तं सुश्रुते (शारी॰ अध्या॰ ७.) अरुणाः शिरा वातवहा नीलाः पित्तवहाः सिराः असृग्वहास्तु रोहिण्यो गौर्यः श्लेष्मवहाः सिरा इत्यादि । तथा च तासु नाडीषु पुरुषस्य स्वापकाले धर्मादिनिमित्तवशात्पूर्वोक्तं लिङ्गं स्वगतचिदाभाससहितं मिथ्यैव नानाकारमवभासतऽइति भावः । भवत्वेवं यथोक्तासु नाडीषु यथोक्तस्य लिङ्गस्यावस्थितिः कथमेतावता कार्यद्वाराविद्यासिद्धिरित्याकाङ्क्षायामाह अथ यत्रेति । अथ मूलाविद्याकार्यत्वादविद्यात्मके पूर्वोक्ते लिङ्गे प्रागुक्तनाडीषु व्यवतिष्ठमाने सति यत्र यस्मिन्स्वप्नकाले एनं स्वप्नदृशं के चन शत्रवोऽन्ये वा तस्करादयो घ्नन्तीव अन्ये केचिज्जिनन्तीव वशीकुर्वन्तीव दासादिरूपेण कदाचिदेनं हस्ती विच्छाययतीव विद्रावयतीव विच्छ गतौ गुपूधूपविच्छिपणिपनिभ्य आय इति (पा॰३.१.२८.) स्वार्थे आयप्रत्ययः तथा गर्तं जीर्णकूपादिकं प्रति पततीव वस्तुतो हननादिकारकाभावेऽपि मृषैव स्वप्नदृष्टेरेवंविषयो वासनानिमित्तः प्रत्ययोऽविद्याख्यो जायते सर्वत्रैवशब्दप्रयोगादित्यर्थः निकृष्टाधर्मोद्भासितान्तःकरणवृत्त्याश्रयवासनावशाद्दुःखात्मक एवंविधः प्रतिभासो भवतीति भावः । एवं स्वप्नस्य मिथ्यात्ववर्णने को हेतुरित्यपेक्षायामाह यदेवेति यदेव जागरिते भयं भयहेतुं हस्त्यादिकं पश्यति तदेव भयकारणमत्रास्मिन्स्वप्नेऽविद्यया वासनात्मिकया मृषैवोद्भूतया आत्मा मन्यते पश्यति अतो मृषैव स्वप्न इत्यर्थः । एतेन वाक्येन कार्यद्वाराधर्मसहकारिकानात्मस्वभावाविद्या दर्शिता यतो यदा कदाचिद्विद्यायां तिरोधीयमानायामविद्यायां चोत्कृष्यमाणायामेव घ्नन्तीवेत्यादिनोक्तं प्रत्यक्षत उपलभ्यतऽइति । इदानीं धर्मसहकारिकां च तां शुभवासनात्मिकामनात्मभूतामविद्यां तत्कार्यप्रदर्शनद्वारा निरूपयति अथाविद्यायामपकृष्यमाणायां विद्यायामुत्कृष्यमाणायां सत्यां यत्र स्वप्नकाले राजेव देव-इव स्वात्मानं मन्यते पश्यतीत्यन्वयः एतदपि दर्शनं मृषैव इवशब्दप्रयोगादित्यवगन्तव्यम् । इदानीं सत्येवात्मनि विद्योत्कर्षवशादविद्याया विनश्यमानत्वादपि तस्या अनात्मस्वभावतेत्यभिप्रेत्यात्मविद्योत्कर्षवता सर्वात्मभावलक्षणं मोक्षफलमात्मस्वरूपमपि स्वप्ने प्रत्यक्षतोऽनुभूयतऽइत्याह अहमेवेति स सर्वात्मभावोऽस्यात्मनः पूर्वोक्तान्लोकानपेक्ष्य परमः पूर्णो लोको विद्यया सम्पादितः इदं तु दर्शनं परमार्थविषयमेव न त्वविद्यकं पूर्ववदत्रेवशब्दप्रयोगाभावात् अन्यत्सर्वमाविद्यकं तत्रेवशब्दप्रयोगादित्यर्थः ।। उक्तस्य लोकस्य विषयत्वं दर्शयितुं विशेषणद्वयमाह अथ यत्र सुप्त इत्यादिना ॥२०॥ एवमविद्या आत्मस्वभावो न भवतीति निर्णीतम् यः पुनरेकत्र पुञ्जीकृत्य नित्यशुद्धत्वादिलक्षण आत्मा दर्शयितुमिष्टः स पूर्वकण्डिकामध्येऽहमेवेदं सर्वमित्यादिना संगृहीतः

स एवेदानीं (! तमेवं ?) व्यक्ताविद्याविहीनां सुषुप्त्यवस्थामवलम्ब्य कण्डिकाद्वयेन प्रकटीकुर्वन्नाह तद्वाऽअस्येति अस्य सर्वात्मभावमापन्नस्यात्मनो रूपं स्वरूपम् । आत्मैव कामो यस्मिन्रूपे तदात्मकामम् परमानन्दरूपब्रह्मैकत्वसम्पत्तौ जागरादाविव स्वात्मव्यतिरिक्तस्य काम्यमानस्य पदार्थजातस्याभावात्सुषुप्तावाप्तकामं रूपम् अकामं कामाश्रयत्वरहितम् । सुषुप्तौ भेदाभावादेव विशेषविज्ञानाभावो न त्वात्मनः स्वयंज्योतिष्ट्वाभावात् तस्मात्स्वयंज्योतीरूपस्यात्मनः सुषुप्तौ सर्वैकत्वमेव विशेषविज्ञानाभावे हेतुरिति वक्तुं तावद्दृष्टान्तमाह तद्यथेति । यो भूतमात्रासंसर्गात्सैन्धवखिल्यवत्प्रविभक्तः सञ्जलादौ चन्द्रप्रतिबिम्बवदिह कार्यकरणे प्रविष्ट इवासीत्सोऽयं शारीरः क्षेत्रज्ञ आत्मा जलाद्यपगमे चन्द्रप्रतिबिम्बस्य चन्द्रैकत्ववत्कार्यकरणेषु स्वकारणे विलीनेषु सत्सु भूतमात्रासंसर्गरहितः प्राज्ञेन निरतिशयपरिपूर्णज्ञानरूपेण परमार्थेन स्वाभाविकेन स्वेनात्मना परंज्योतीरूपेणाविद्यासाक्षिणा सम्परिष्वक्तोऽत्यन्तमेकीभूतः सन् ॥२१॥ एवं सुषुप्तिमुपेयुषः पुरुषस्य विशेषविज्ञानाभावे स्वाभाविकात्मत्वमेव हेतुर्न स्वयंज्योतिष्ट्वाभाव इति दृष्टान्तेनोपपादनान्नात्मनः कामादिवत्स्वयंज्योतिष्ट्वमस्वभाव इति प्रासङ्गिकं परिसमाप्येदानीं प्रकृतं रूपं स्पष्टीकरोति तद्वाऽअस्येति यस्मादयं सुषुप्तौ परमात्मना सहैक्यापत्त्या सर्वात्मा संवृत्तस्तस्मादस्यात्मनः तदेतत्पूर्वप्रकृतं रूपं स्वरूपं वक्ष्यमाणलक्षणम् कीदृशं तदित्यपेक्षायां कामकर्मभयशोकहीनमिति विशेषणचतुष्टयेन विशिनष्टि । छन्दः कामोऽतिक्रान्तोऽस्मात्तदतिछन्दः कामवर्जितम् । न विद्यते शोकोऽन्तरे मध्ये यस्य तदशोकान्तर शोकशून्यम् । सुषुप्तौ विक्षेपकाज्ञानाभावात्कूटस्थमेवात्मरूपमवतिष्ठतऽइत्यर्थः । एवमाविद्यककामादिरहितमात्मस्वरूपं प्रत्यक्षतः प्रदर्श्येदानीं तद्धेतुभूतकर्माख्याविद्यासम्बन्धरहितत्वमप्यात्मनः सुषुप्तौ प्रत्यक्षमित्याह अत्र पितेत्यादिना । न केवलं शुभकर्मसम्बन्धातीत आत्मा किं तर्ह्यशुभैरप्यत्यन्तघोरैः कर्मभिरसम्बद्ध एव सुषुप्तौ वर्ततऽइत्याहात्र स्तेन इत्यादिना । षोदशमाषपरिमितं कांचनं सुवर्णं तावत्ततोऽधिकं वा ब्राह्मणस्यापहर्ता स्तेनः । शूद्रायां ब्राह्मणाज्जातो निषादः तस्मात्क्षत्रियायां जातः पुल्कसः पुल्कस एव पौल्कसः । ब्राह्मण्यां शूद्राज्जातो जात्या चण्डालः चण्डाल एव चाण्डालः । श्रमणः परिव्राट् तापसो वानप्रस्थः । अनन्वागतमिति रूपविषयो नपुंसकनिर्देशः । हृदयशब्दो बुद्धिवचनः शोकशब्द इह कामवाची ॥२२॥ कामकर्मादिवत्सुषुप्तौ विशेषविज्ञानाभावान्न स्वयंज्योतिष्ट्वमात्मनः स्वभाव इति चोदिते स्त्रीपुम्परिष्वङ्गदृष्टान्तेनैकत्वापत्तिवशाद्विशेषविज्ञानाभावो न स्वयंज्योतिष्ट्वाभावादेति समाधिरुक्तः तत्र चार्थाद्विशेषाभावादेव विशेषविज्ञानाभाव इत्यपि सूचितम् तदिदानीं चोद्यानुवादपूर्वकमतितरां स्पष्टीकर्तुं प्रवर्तते यद्वै तन्नेत्यादिना तत् तत्र सुषुप्तावात्मा नैव पश्यतीति यज्जानीषे तत्तथा न मंस्थाः यतस्तत्तत्र स्वरूपचैतन्येन सर्वसाक्षित्वात्पश्यन्नेव सन् द्रष्टव्यं पदार्थजातं न पश्यतीत्यपि सम्भवतीति स्वरूपदर्शनं विशेषादर्शनं च प्रतिज्ञायतऽइत्यर्थः । पश्यन्नेवास्तऽइत्यस्यां प्राथमिकप्रतिज्ञायां तावद्धेतुमाह न हीति कूटस्थचिन्मात्रस्य स्वरूपभूता या दृष्टिः तस्या विनाशो न विद्यते अग्निस्वभावभूतौष्ण्यस्येव तस्माज्जाग्रत्स्वप्नवत्सुषुप्तावप्यात्मा स्वयंज्योतिरेवेत्यर्थः अविनाशित्वमपरिणामित्वम् तस्माद्विनाशहेतुभूतपरिणामहीनत्वात् । विशेषविज्ञानाभावप्रतिज्ञायां हेतुमाह न त्विति तत्र द्वितीयं प्रमातृस्वरूपं साभासान्तःकरणलक्षणं न त्वस्ति । तत आत्मस्वरूपादन्यच्चक्षुरा-

दिलक्षणं न वस्ति यत्पश्येत्प्रमाता प्रमाणेन । तथा च स्वरूपचैतन्यस्य सत्त्वेऽप (सचेपि Cod.) प्रमातृकरणविषयकृतवाह्विशेषदृष्टेस्तेषां च सुषुप्तावभावात्तत्कार्यविशेषदृष्टेरप्यभावः अतो विशेषविज्ञानाभावो नात्मनः प्रकाशाभावकृत इति स्वयंज्योतिष्ट्वं तस्यावधार्यतऽइत्यर्थः ॥२३॥ एवं यद्वै तन्न पश्यतीत्यादिविस्तरेणोक्तरूपस्य प्राज्ञेनात्मना सम्परिष्वक्तस्यात्मनः स्वरूपोपसंहारार्थमाह सलिल इति सलिल-इव सलिलः सलिलवच्छुद्धः अनेन विजातीयसम्बन्धशून्यत्वमुक्तम् । सजातीयभेदव्युदासायैक इति विशेषणम् । यस्मात्सजातीयविजातीयभावस्य दृष्टव्यस्याभावस्तस्मादकारकस्वभावत्वा[द]द्रष्टेति पूर्णात्मकं ज्योतिरभिधीयते द्रष्टेति पदच्छेदे उक्तविशेषणद्वयोपलक्षितस्यात्मनो जडत्वशङ्कावारणार्थं द्रष्टेति विशेषणम् । सजातीयविजातीयभेदरहितत्वेऽपि धर्मधर्मिभावलक्षणः स्वगतो भेदः स्यादित्याशङ्क्य तन्निवृत्त्यर्थमद्वैत इति विशेषणम् द्विधा इतं द्वीतं द्वीतस्य भावो द्वैतं तन्न विद्यते यस्मिन्सोऽद्वैत एकरसः । इदानीमत ऊर्ध्वं विमोक्षायैव ब्रूहीति यत्पुनःपुनः पृष्टं तस्योत्तरमुक्तवान्मुनिः एष ब्रह्मलोक इति एष सुषुप्त्यवस्थामापन्नः प्रत्यगात्मा ब्रह्मलोकः लोकनं लोकः ब्रह्मैव लोको ब्रह्मलोकः स्वयंज्योतीरूपं ब्रह्मैव । एषास्य विज्ञानमयस्य सुषुप्तौ परमात्मैक्यमापन्नस्य परमा उत्कृष्टा सम्पद्विभूतिः । परमो मोक्षलक्षणो लोकः स्वयंज्योतिःस्वभावो लोकशब्दस्य मुख्यवृत्तिविषयः स्वाभाविकः । परमः स्वरूपानुभवलक्षणो मुख्यो निरतिशय आनन्दः पूर्णानन्दः । किंच वस्तुतो नास्त्येवात्मसुखातिरिक्तं वैषयिकमपि सुखमित्याह एतस्यैव ब्रह्मानन्दस्य मात्रां कलाम् अन्यानि अविद्यया ब्रह्मणोऽन्यत्वेन परिकल्पितानि ब्रह्मादिस्तम्बपर्यन्तानि भूतान्युपजीवन्ति उपभुञ्जते तावन्मात्रेणैवानन्दीनि भवन्तीत्यर्थः ॥३१॥ मानुषानन्दमारभ्य ब्रह्मानन्दपर्यन्तमुत्तरोत्तरशतगुणितातिशयशालिनां परब्रह्मानन्दावयवानां प्रतिपादनद्वारेणावयविनं निवृत्तगणितभेदमनतिशयं ब्रह्मानन्दं दर्शयितुमुत्तरा श्रुतिः प्रवर्तते तत्र तावत्परमां काष्ठां गतस्य मानुषानन्दस्य स्वरूपमाह । भोगक्षमावयवैराध्यात्मिकैः राद्धः संसिद्धः । समृद्धो बाह्यैश्चोपभोगसाधनैः स्रक्चन्दनालङ्कारादिभिः सम्पन्नः । आनन्दानन्दिनोरभेदादेवंविधः पुमानानन्द इति निर्देशः ॥३२॥ पितृणां दक्षिणमार्गानुयायिनाम् । आज्यपिण्डपितृयज्ञादिकर्मभिः पितृतोषणद्वारा जितो लोको यैस्ते यद्वा जिता लोका येषामिति जितलोकाः ॥३३॥ ये अग्निहोत्रादिश्रौतकर्मणा देवलोकं प्राप्नुवन्ति ते कर्मदेवाः ॥३४॥ स्वाभाविकदेवानाम् मनुष्यादिसर्गस्य प्रवृत्तेः प्रागेव ये देवत्वं प्राप्ताः ते आजानदेवा उच्यन्ते ते तु सूक्ष्मव्यापिशरीरधारिणो महात्मान इत्यर्थः । इदानीमाजानदेवेषूक्त आनन्दः तदुपास्त्यधिकारिण आजानदेवानन्दात्प्राक्तनानन्देषु जातवैराग्यस्याजानदेवाद्यानन्देषु सतृष्णस्य मनुष्यदेहऽएव जीवतः श्रोत्रियस्यापि समान एवेत्याह यश्चेति अर्थज्ञानान्तमेकशाखाविषयमध्ययनं यस्यास्ति स श्रोत्रियशब्देनोच्यते (पाणि° ५. २. ८४.) । वृजिनं पापं पापरहितः कृत्स्नवेदोक्तकारित्वात् । अकामहतः आजानदेवावधिपूर्वानन्देषु वितृष्णः । एवमुत्तरत्रापि श्रोत्रियाणां पूर्वपूर्वानन्देषु वैराग्यमुत्तरोत्तरानन्देष्वभिलाषश्चेत्युभयं तत्तदानन्दसाम्यप्रयोजनं तत्तदुपासकानामिति द्रष्टव्यम् । श्रोत्रियस्य चेहानन्दोपदेश उपास्योपासकयोस्तुल्यानन्दप्रदर्शनद्वारा परब्रह्मविदस्तदानन्दलाभप्रदर्शनार्थमित्यभिप्रायः ॥३५॥ उपास्येन्द्रादिनिवसतिभूमौ तदुपासके च । देवानां सृष्ट्यादिभूतानां यष्टव्यानां निसर्गसिद्धदेवापेक्षयाप्युत्कृष्टानां लोकः स्थानं तस्मिन् ॥३६॥ गन्धर्व-

लोके तदुपासके च । गार्गीब्राह्मणेऽपि (६. ६. १.) देवलोकानां गन्धर्वलोकेष्वेव ओतप्रोतभाव उक्तास्तथैवात्रापि देवलोकानन्तर्यं गन्धर्वलोकस्य युक्तम् ॥३७॥ प्रजापतिलोको विराट्शरीरम् तदुपासके च ॥३८॥ विराडानन्दः शतगुणीकृतो हिरण्यगर्भस्य तदुपासकस्य चैक आनन्दः । ब्रह्मलोको हिरण्यगर्भात्मा तस्मिन् । पूर्वं सलिल इत्युपक्रम्य मात्रामुपजीवन्तीत्यन्तेन (क° ३१.) कार्यकारणविनिर्मुक्तो यः प्रत्यगात्मा निरतिशयानन्दः परिपूर्णः प्रतिज्ञातः स एव स यो मनुष्याणामित्यारभ्य स एक ब्रह्मलोकऽआनन्द इत्यन्तेन प्रतिपादितस्तस्येदानीमुपसंहारमाह एष वितृष्णश्रोत्रियप्रत्यक्षो निरतिशयानन्दो ब्रह्मलोक एतदमृतमिदं मुख्यं मोक्षस्वरूपम् ॥३९॥ तत्र तद्यथेत्यारभ्य (क° १९.) एतदमृतमित्यन्तं (क° ३९.) वाक्यजातं सुषुप्तिविषयं तथा च सुषुप्तिं प्रविष्ट आत्मा स इदानीं संसाररूपदार्ष्टान्तिकप्रदर्शनार्थं जाग्रद्भूमिं प्रापयितव्यः सुषुप्तौ दार्ष्टान्तिकसम्बन्धस्यात्यन्तं स्पष्टयितुमशक्यत्वादित्यभिप्रेत्यात्मनः सुषुप्तिस्थानाज्जागरितस्थानप्राप्तिमाह स वाऽइति । सम्यक्प्रसीदत्यस्मिन्निति सम्प्रसादः सुषुप्तिस्थानम् । बुद्धान्ताय जागरणाय ॥४०॥ ननु कुतोऽस्य मुनेर्भयं किं वक्तृत्वासामर्थ्यादुत्तराज्ञानाद्वेत्याशङ्कायां नैतदुभयमस्य भयकारणं सर्वज्ञत्वात् किंत्वयं राजा मेधाविवात्कामप्रश्नव्याजेन मोक्षफलकज्ञानलक्षणं मदीयं सर्वस्वं ग्रहीष्यतीत्येतद्भयकारणमित्येतदाह मेधावीति अन्तेभ्यः प्रश्ननिर्णयावसानेभ्यः उत् औरत्सीत् आवृणोत्पुनःपुनरवरोधं कृतवान् ॥४०॥ ननु किंज्योतिरेवायमित्याद्युक्ताः प्रश्ना आदित्यज्योतिरित्यादिभिर्निर्णीताश्चेत्किमनिर्णीतमुद्दिश्यात ऊर्ध्वं विमोक्षायैव ब्रूहीति राज्ञः प्रश्न इति चेत् सत्यम् यद्यपि पूर्वं सहेतुकौ संसारमोक्षौ मुनिनोक्तौ तथापि तत्र या चात्मनः स्वप्नजागरणयोः संचरणोक्तिः सा सर्वा तस्य लोकद्वयसंचरणरूपसंसारदृष्टान्तायैवोक्ता या पुनस्तस्य सम्प्रसादोक्तिः सा तु मोक्षदृष्टान्तार्थेत्येवममन्यत राजा अतो दार्ष्टान्तिकजिज्ञासया अत ऊर्ध्वमिति प्रश्न उपपद्यते । तत्र स अणिमानमित्यारभ्य इति नु कामयमान इत्यन्तो (७. २. ८.) ग्रन्थ उभावन्तावनुसंचरतीत्यादौ (क° १८.) सूचितसहेतुसंसाररूपदार्ष्टान्तिककथनपरो बोध्यः अथाकामयमान इत्यारभ्य (७. २. ८.) आ शारीरकब्राह्मणसमाप्तेः ससाधनमोक्षरूपदार्ष्टान्तिककथनपर इति सामान्यसंगतिः । इदानीं स्वप्नाज्जागरणप्राप्तिवल्लोकाल्लोकान्तरं गच्छत्यात्मेत्यस्यार्थस्य सुखप्रतिपत्त्यर्थं तावदाह स यत्रेति स प्रकृतः शिरःपाण्यादिमान्देहो यस्मिन्काले अणिमानमणोर्भावं कार्श्यं न्येति नितरामतिशयेन एति गच्छति प्राप्नोति । उपतपतीत्युपतपज्ज्वरादिरोगः । ततः कथं शरीरं विमुञ्चतीत्यपेक्षायां दृष्टान्तमाह आम्रं फलम् उडुम्बरं वा फलं पिप्पलं वा फलम् । यस्मिन्फलं रसेन बध्यते तद्बन्धनं वृन्तम् । शरीरे स्थूले भवः शारीर आत्मा लिङ्गोपाधिको लिङ्गदेह एव वात्मप्रकाशितः । पुनर्वारंवारं प्रतिन्यायं प्रतिगमनं यथागतं तथा प्रतियोनि योनिं-योनिं प्रति स्थानविशेषं प्रति विद्याकर्मपूर्वसंस्कारवशादाद्रवति गच्छति । यथा स्वप्नाज्जागरितं ततः स्वप्नमिति पुनःपुनः पुमान्प्रतिपद्यते तथैव पुनःपुनर्देहाद्देहान्तरमिति प्रतिपादनार्थः पुनःशब्दः । प्राणाय प्राणव्यूहायैव प्राणानां स्थानविशेषविन्यासेनावस्थानाय देहान्तरग्रहणाय ॥४१॥ इदानीं लोकाल्लोकान्तरं गच्छत्यात्मेत्यस्यार्थस्य सुखप्रतिपत्त्यर्थं दृष्टान्तमाह अनः शकटं सुष्ठु भृशं वा समाहितमुलूखलमुसलशूर्पभाण्डादिगृहोपकरणेनान्नाद्येन च सम्पन्नं भाराक्रान्तं सत् उत्सर्जन्नानाविधं शब्दं कुर्वद्यायाद्गच्छेत् । एवमेवायं शारीरः शरीरे स्थूले भव आत्मा लिङ्गोपाधिकः

स्वप्नबुद्धान्ताविव जन्ममरणाभ्यां कार्यकरणसंयोगवियोगलक्षणाभ्यामिहलोकपरलोकानुसंचारी सन्प्राज्ञेन परेणात्मना स्वयंज्योतिःस्वभावेनान्वारूढोऽधिष्ठितोऽवभास्यमान उत्सर्जन् मरणकाले मर्मकृन्तनसम्भूतवेदनपीडितमानसो हिक्किकालक्षणं शब्दं कुर्वन्याति गच्छति । आत्मज्योतिषावभास्यमाने लिङ्गे प्राणप्रधाने गच्छति सति तदुपाधिक आत्मा गच्छतीव न तु परमार्थतो निरुपाधिक आत्मा गच्छति ॥४२॥ नन्वस्य मुमूर्षोः कुतो देहान्तरं यदसौ गच्छेत् तत्कर्तुरभावात् न तावत्तत्स्वकृतं स्यात् देहेन्द्रियवियुक्तस्य तन्निर्माणेऽसामर्थ्यात् न चान्यकृतं राज्ञो गृहनिर्मातृभृत्यादिवत् अस्य देहनिर्मात्रन्यासम्भवादिति शङ्कायां स्वकर्मोपार्जितान्येव भूतानि तत्कर्मप्रेरितानि तद्विद्याकर्मपूर्वप्रज्ञानुसारतः शुभमशुभं वा देहं कृतकर्मोपभोगार्थं कृत्वा प्रतीक्षन्ते इत्येवं समाधास्यमानेऽर्थे दृष्टान्तमाह । उग्रा जातिविशेषाः यद्वा उग्रे हिंस्रे कर्मणि राज्ञा नियुक्ताः क्रूरकर्माण उग्राः । प्रत्येनसः एनः पापं तद्वानिह एनःशब्देनोच्यते तथा च एन-एनः पापिनं-पापिनं प्रति शासनार्थं नियुक्ताः प्रत्येनस उग्रेभ्यो भिन्नाधिकाराः । सूताः ब्राह्मण्यां क्षत्रियाज्जाताः संकरजातिविशेषा रथवाहनकोविदाः । ग्रामण्यो ग्रामनेतारः । आवसथैः प्रासादगोपुरतोरणादिभिः प्रतिकल्पन्ते निष्पन्नैरेव प्रतीक्षन्ते । एवं ह किल एवंविदं कर्मफलवेदितारं संसारिणं सर्वाणि भूतानि पञ्च भूतानि शरीरकर्तृणि करणानुग्रहीतृणि चादित्यादीनि संसारिकर्मप्रयुक्तानि कृतैरेव कर्मफलोपभोगसाधनैः शरीरादिभिः प्रतीक्षन्ते स्वात्मनि देहाद्याकारपरिणते आत्माभिव्यक्तिं काङ्क्षन्ते इदं ब्रह्म भोक्तृ कर्तृ चास्माकमायात्यादरेण वदन्तः संसारिणि जीवेऽसंसारिब्रह्मशब्दप्रयोगस्तु तस्य वस्तुतो ब्रह्माभिन्नत्वज्ञापनार्थः । एवंविदमित्युक्तकर्मफलोत्क्रान्तिवेदनस्तुत्यर्थ इति ज्ञातव्यम् ॥४३॥ एवमात्मनो वर्तमानदेहं हित्वा देहान्तरं जिगमिषतस्तन्निर्माणे सहायसम्पत्तिरुक्ता इदानीं गच्छन्तं संसारिणं केऽनुगच्छन्ति अनुगच्छन्तोऽपि किं स्वातन्त्र्येण संसारिकर्मप्रयुक्त्या वानुगच्छन्तीति जिज्ञासायां संसारकर्मप्रेरिता एव वागादयोऽनुगच्छन्तीति निर्णेतुं तावद्दृष्टान्तमाह । राज्ञा सह गमनार्थमनाज्ञप्ता एव केवलं तज्जिगमिषाभिज्ञाः । एवंविदं कर्मफलवेदितारं संसारिणम् । अनाकारिता एव सन्तस्तत्कर्मप्रेरिताः सह गमनार्थम् । एवमात्मना सह गच्छन्तः प्राणाः स्वाश्रयेणापञ्चीकृतभूतपञ्चकेन शरीरारम्भकीभूतेन सहैव गच्छन्ति ॥४४॥१॥७॥

प्रस्तुते संसारोपवर्णने अयं शारीर आत्मैभ्योऽङ्गेभ्यः सम्प्रमुच्येत्यादिना (७.१.४१.) साकल्येन सम्प्रमोक्षणादि सूत्रितम् तदिदानीं कस्मिन्काले कथं वेति जिज्ञासायां सविस्तरं संसरणं वर्णयितव्यम् । अबल्यमबलभावमिव दौर्बल्यमिव नीत्य नितरामित्वा प्राप्य संमोहमिव संमूढतामिवाविवेकतामिव । आत्मानं करणस्वामिनं प्रति एते प्राणा वागादयः आभिमुख्येन सम्यक् निर्लेपतया स्वस्थानादायन्ति । स प्रकृतोऽविद्वानात्मा तेजोमात्राः तेजःशब्देन भूतपञ्चकमुच्यते मीयन्ते विषया याभिस्ता मात्रा इति व्युत्पत्तेर्विषयप्रकाशहेतुभूतानि चक्षुरादिकरणानि मात्राः तेजसो मात्रा अंशास्तेजोमात्राः रूपादिप्रकाशकानि करणानि ताः सम्यक् निःशेषमाभिमुख्येनाददान उपसंहरमाणो मृतिकाले हृदयस्थां बुद्धिमेवान्वागच्छति बुद्धावेवाभिव्यक्तविज्ञानो भवति ॥१॥ एवं हृदि करणोपसंहरणेन स्वात्मोपसंहरणे सति किं स्यादित्यपेक्षायां करणानुग्राहकनिवृत्तिनिमित्तकं रूपाद्यदर्शनं स्यादित्याह । यो भोक्तृकर्मप्रयुक्तो यावद्देहधारणं चक्षुषोऽनुग्रहं कुर्वंश्चक्षुषि वर्तते आदित्यपुरुषः स एव चाक्षुषः

पुरुषः आदित्यांशः स्वप्रयोजकभोक्तृकर्मक्षये सति यस्मिन्काले भोक्तुर्भोगेभ्यः पराङ् विमुखः सन्स्वांशिभूतदेवतारूपं प्रति आ समन्ताद्भावेन परिवर्तते अथ तदा मुमूर्षुः रूपं न जानाति । स्वस्य हृदये लिङ्गात्मन्येकीभाव एव मुमूर्षोररूपज्ञव्यवहारे हेतुर्न तु चक्षुरभावः । अत्र पाठक्रमो नोत्क्रान्तिक्रमाभिधायकः कस्यचित् श्रोत्राद्युत्क्रमणस्यैव प्रथमं दर्शनात् अतोऽत्रा-नियत एव क्रमः ॥२॥ इदानीं करणेषूपसंहृतेषु सत्सु निष्क्रमणसाधनीभूतो योऽन्तर्व्यापारो भवति तमाह । हृदयच्छिद्रस्य अग्रं नाडीमुखं प्रकाशते । यथा स्वप्नं प्रतिपित्सोर्जाग्रद्वासना-दानरूपेण स्वेन भासा चैतन्यज्योतिषा च करणव्यतिरेकेण हृदये वासनाप्रकाशात्मकं ज्ञानं भवतीति ज्योतिर्ब्राह्मणे श्रुतं (७. १. १०.) तथा मृतिदशायामपि तेजोमात्रादानकृतेन वासना-रूपेणात्मचैतन्यज्योतिषा च प्राप्य देहादिविषयबुद्धिवृत्त्यात्मना हृदयाग्रप्रद्योतनं भवति । उक्तप्रद्योतनेन कर्मार्जितं लोकं पश्यन्नात्मा मरणकाले हृदयात्केन मार्गेण निर्गच्छति यद्य-स्यादित्यलोकप्राप्तिनिमित्तं ज्ञानं कम वा स्यात्तदासौ चक्षुषः सकाशान्निष्क्रामति यदि ब्रह्मलोकप्राप्तिनिमित्तं ज्ञानं कर्म वा स्यात्तदा मूर्ध्नो द्वारा निष्क्रामति तथा यथाकर्म यथा-ज्ञानमन्येभ्योवाशरीरदेशेभ्यः श्रोत्रादिभ्यः सकाशान्निष्क्रामति । न चात्रानुशब्दः क्रमाव-द्योतकः किं तु विज्ञानमयादेः प्राधान्यद्योतकः लिङ्गावभासकस्यात्मनो लिङ्गस्य चोत्क्रमणे देशकालभेदाभावात् । एवं म्रियमाणस्यार्थसिद्धमर्थमाह संज्ञामिति यथोत्क्रमणात्प्राक्स्वक-र्मानुसारिभाविदेहविज्ञानसहितो भवति तथोत्क्रान्त्यनन्तरं संज्ञानमेव विशेषज्ञानोद्भासितमेव (तामव Cod.) गन्तव्यमनुगच्छति तथा च दुःखहानिमिच्छता मरणकाले स्वातन्त्र्यार्थं तत्साध-नोपनिषद्विहितशमादौ यत्नवता भवितव्यम् किं च सर्वशुभकर्मविधायिवेन अशुभकर्मनिषे-धिवेन च शास्त्रस्येह कर्मभूमौ महानारम्भो दृश्यते सोऽपि मृतिकाले स्वातन्त्र्यार्थं पुण्योप-चयकर्तव्यतां दर्शयति अतस्तदपि यथाधिकारं कर्तव्यमिति प्रकरणार्थः । यदुक्तं हृदयाग्रप्र-द्योतनं तदेव स्पष्टयति स एष मुमूर्षुरात्मा ज्ञो ज्ञातृस्वभाव एव सन् सविज्ञानः पूर्वप्रज्ञा-ख्यभावनाप्रधानेन विज्ञानेन सह वर्तमानो भवति । एतच्च सविज्ञानत्वं कर्मवशादेवास्य भवति न स्वतन्त्रतः स्वातन्त्र्येण हि सविज्ञानत्वे सर्वः कृतकृत्यः स्यान्नैव तु तल्लभ्यते तस्मात्कर्मणोद्भाव्यमानेन भाविदेहविषयकान्तःकरणवृत्त्याश्रितवासनात्मकविशेषज्ञानेन सर्वो लोकोऽन्तकाले सविज्ञानो भवतीति भावः । पूर्वं शकटवत्सम्भृतसम्भार उत्सर्जद्यातीत्युक्तं (७. १. ४२.) तत्रेदानीं किं तस्य परलोकाय प्रस्थितस्य पाथेयं शाकटिकसम्भारस्थानीयं परलोकं गत्वा यद्भुङ्क्ते तत्र शरीराद्यारम्भकं च किमिति जिज्ञासायामाह तमिति । प्रमाणादप्रमाणाद्वा जातं सम्यग्ज्ञानसंशयमिथ्याज्ञानसाधारणं संसारहेतुभूतं ज्ञानमात्रमिह विद्याशब्देनोच्यते । शास्त्रतो लोकतो वा स्वभावतो वा यद्दृष्टादृष्टार्थस्वरूपं वाङ्मनःकायसाध्यं तत्सर्वमिह कर्मशब्देनोच्यते । क्रियमाणस्य कर्मणस्तत्फलस्य च भुक्तस्य यः संस्कारो हृदि संश्रितः सा पूर्वप्रज्ञेत्युच्यते । प्राधान्यं तस्याः भुज्यमानस्य कर्मणः परिशेषरूपत्वाज्जायमानस्य मूल-त्वाच्च ॥३॥ एवं सम्भृतविद्यादिसम्भारो देहान्तरं प्रतिपद्यमानः कथं तत्प्रतिपद्यतऽइत्यत्रार्थे दृष्टान्तमाह । यथा तृणजलायुका तृणजलूका तृणस्यान्तमवसानं गत्वा अर्थान्तृणान्तरमाश्रित्यात्मा-नमात्मनः पूर्वावयवमुपसंहरति एवमेवायं पुरुषो यः प्रकृतः संसारी इदं शरीरं पूर्वोपात्तं निहत्य स्वप्नप्रतिपित्सुरिव पातयित्वा अविद्यां गमयित्वा अचेतनं कृत्वा आत्माभिमानत्यागेन

प्रसारितया वासनया अर्थाच्छरीरान्तरं गृहीत्वा आत्मानमुपसंहरति तत्रैवाहमित्यात्मभावं प्रतिपद्यते न पूर्वदेहे इत्यर्थः। एतेनैतदपास्तं यद्वदन्ति पौराणिकास्तृणजलायुकादृष्टान्ताद्देहान्तरं गृहीत्वा पूर्वदेहं मुञ्चत्यात्मेति स्थूलदेहविशिष्टस्यैव परलोकगमनमिति यस्माद्देहनिर्गमनात्प्रागवस्थायामेव यथोक्ता हृदयस्था वासना विद्याकर्मनिमित्तं भाविदेहं स्पृशति जीवोऽपि तत्राभिमानं करोति पुरस्तु पूर्वदेहं त्यजतीत्येतस्मिन्नर्थे तृणजलायुकादृष्टान्तः श्रुत्या दर्शितस्तस्मात्पूर्वदेहविशिष्टस्यैव परलोकगमनमित्युक्तमिति ॥४॥ एवं जलूकावद्वासनयैव शरीरान्तरं गच्छत आत्मनस्तदारम्भकाणि पञ्च भूतानीति तद्यथा राजानमित्यादावुक्तम् (७. १. ४३.) तत्र किं नित्योपात्तमेव भूतपञ्चकं पूर्वपूर्वदेहद्वयोपमर्देनान्यद्देहद्वयमारभते किं वान्यदन्यदेव भूतपञ्चकमन्यमन्यं देहं जनयतीति संदेहे तत्तद्भूतपञ्चकोत्पत्तावपि कारणान्तरस्य मृग्यत्वान्मायायाः सर्वकारणत्वेऽपि तत्तद्देहारम्भसमये तत्तदुपादानभूतपञ्चकोत्पादकत्वे प्रमाणाभावात्प्रतिदेहारम्भं भूतपञ्चकव्यक्तिभेदे मानाभावाच्च न द्वितीयः पक्षः सम्भवतीत्यभिप्रेत्य प्रथमपक्षमेवाङ्गीकारयितुं दृष्टान्तमाह। तत् तत्र नित्योपात्तमेव मायामयं भूतपञ्चकं प्रतिदेहारम्भमुपादानमित्यस्मिन्नर्थे दृष्टान्तः। पेशस्कारी सुवर्णकारः पेशसः सुवर्णस्य मात्रां पूर्वरचनामपादायापच्छिद्योपमृद्य अन्यत्पूर्वस्माद्रचनाविशेषाद्भिन्नं रूपं तनुते निर्मिनोति (!)। पितृभ्यो हितं पित्र्यं पितृलोकोपभोग्यम्। ब्रह्म हिरण्यगर्भः तल्लोकोपभोग्यम्। प्रजापतिर्विराट्। यथाकर्म यथाश्रुतमन्येभ्यो भूतेभ्यः प्रेततिर्यगादिभ्यः सकाशात् शरीरं तनुते। तस्माद्वर्तमानदेहारम्भकाण्येव भूतानि शरीरान्तरारम्भकाणि तद्वशाच्चास्य संसरणमिति भावः ॥५॥ योऽयमात्मनः संसारसम्बन्धः स वास्तवो न भवति किं त्वौपाधिक एवेति तदुपाधीन्दर्शयितुमात्मनो वास्तवं स्वरूपमाह स वाऽइति स प्रकृतः संसारी अयमविद्यातत्कार्यविनिर्मुक्तः स्वप्रकाशापरोक्ष आत्मा कूटस्थसाक्षिचिज्ज्ञातुरेवम्भूतः सोऽयमात्मा वै ब्रह्म अशनायाद्यतीतपरमात्मैवास्य संसारिणो वास्तवं रूपमित्यर्थः। ब्रह्मैव सन्नयमात्माविद्ययाब्रह्मत्वप्रतिपन्नः पुनः सम्यग्ज्ञानात्तद्ध्वंसे ब्रह्मैवावतिष्ठतऽइति भावः। इदानीं यत्प्रयुक्त एवंविधब्रह्मात्मनो बन्धस्तानुपाधीनाह विज्ञानमय इति विज्ञानं बुद्धिस्तन्मयः तत्प्रायः बुद्ध्यैक्याध्यासाद्धि तद्धर्मस्य कर्तृत्वादेरात्मन्यारोपोऽतस्तत्प्रायः अस्मिन्प्रकरणे सर्वोऽपि मयट् प्रायार्थो न तु विकारार्थः। सर्वमयत्वं साधयति तद्यदेति यदा [य]स्मिन्समयेऽयमात्मा गृह्यमाणविषयादिमयः तदा इदंमय इत्यर्थः तथा कार्येणानुमीयमानभावनात्मकविषयादिमयोऽदोमयः तदिति पदं सर्वमयत्वसाधनोपसंहारार्थं तदिदं सर्वमयत्वं सिद्धमित्यर्थः ॥६॥ पुण्यपापयोरेव संसारासाधारणकारणत्वमिति यदिदमुक्तं तत्पूर्वपक्षीकृत्येदानीं कामस्यैव संसार[सा]धारणकारणत्वमिति सिद्धान्तमभिप्रेत्याह अथो इति कामो विषयादित्सा तन्मयः। न चैवं सत्यविद्यायाः संसारहेतुत्वानुपपत्तिः तस्याः स्वतस्तद्धेतुत्वानुपपत्तेरिष्टत्वात् सहकार्यपेक्षायां तु कामस्यैव प्राधान्यात्काम एवासाधारणं कारणं संसारस्य उक्तयोः पुण्यापुण्ययोरपि तदभावेऽनुदयात्। कया प्रणाड्या कामस्य संसारणत्वमित्यपेक्षामाह स यथाकाम इति। क्रतुर्नामाध्यवसायो यदनन्तरा क्रिया प्रवर्तते काम एव ईषदभिलाषमात्रे यस्मिन्विषयेऽभिव्यक्तो भवति स तस्मिन्विषयेऽविहन्यमानः स्फुटीभवन्क्रतुत्वमापद्यते। तदीयं फलमभिसम्पद्यते प्राप्नोति तस्मात्सर्वमयत्वे काममयत्वं हेतुः ॥७॥ ब्राह्मणोक्तेऽर्थे मन्त्रसंमतिमाह अस्योद्भूताभिलाषस्य लिङ्गं सप्तदशाव-

यवात्मकं मनःप्रधानत्वान्मनःशब्दवाच्यं यद्वा प्रमात्रादिसाक्षी येन साक्ष्येण मनसा लिङ्ग्यते तन्मनो लिङ्गमिति तल्लिङ्गं मनो यत्र यस्मिन्गन्तव्ये फले निषक्तं निश्चयेन सक्तं भवति तन्मनः तत् गन्तव्यफलरूपापन्नं सत्कर्मणा फलारम्भकीभूतकर्मणा सह तदेव गन्तव्यं फलमेति गच्छति । तथा च यदभिलाषाद्यत्कर्म कृतवांस्तत्र मनोऽभिषङ्गवशात्तेन कर्मणा सहास्य तत्फलप्राप्तिरिति वाक्यार्थे स्थिते कामो मूलं संसारस्येत्यवगतम् । ननु कामप्रधानः संसरति चेत्कर्मफलभोगानन्तरं कामाभावान्मुक्तिरेव भविष्यतीत्याशङ्कायामाह प्राप्येति कर्मफलभोगसमाप्तिं गत्वा तस्माल्लोकाद्युक्तभोगादागच्छति अस्मिन्मनुष्यलोके कर्मकरणार्थम् । इदानीमज्ञानकारणकः काम एव संसारासाधारणकारणमित्युक्तमुपसंहरति इति एवं नु खलु कामयमानः संसरतीति शेषः । एवमियता प्रबन्धेनावस्थाद्वयदृष्टान्तस्य दार्ष्टान्तिकभूतः संसारः सकारणको दर्शितः इदानीं योषिदालिङ्गनेनेव पुंसः सुषुप्तिं प्राप्तस्यात्मनः कामादिहीनं रूपं मोक्षदृष्टान्तभूतं यदतिच्छन्दोवाक्येनोक्तं (७. १. २१.) तस्य दार्ष्टान्तिकभूतं सोपायं मोक्षस्वरूपमाह अथाकामयमान इत्यादिना । किमेवंविधस्य भवतीत्यपेक्षायां मोक्ष एव भवतीत्याह न तस्मादिति अत्रैव ब्रह्मस्वरूपऽएव समवनीयन्ते सम्प्रलीयन्ते स चाकामयमानो जीवन्नेव ब्रह्मैव सन्सुषुप्त्यवस्थायामिवापरिच्छिन्ननिर्विशेषाद्वैतालुप्तचिज्ज्योतिःस्वभाव एव सन्ब्रह्म प्राप्नोति ॥८॥ उक्तोऽर्थे मन्त्रमुदाहरति । प्रमुच्यन्ते समूलतो विशीर्यन्ते । मर्त्यो मरणधर्मापि सन्नमृतोऽमरणधर्मा भवति अत्रास्मिन्नेव शरीरे स्थितः सन्ब्रह्मभूतो भवति ब्रह्मभावापत्तिलक्षणो मोक्ष एवामृतत्वं तच्च ज्ञानिशरीरे एव कामनिवृत्त्याभिव्यज्यते स्वतः सिद्धमेवेत्यर्थः ॥९॥ ननु विदुषः सर्वात्मविषयात्ममात्रत्वेन प्राणादिषु बाधितेष्वप्यसौ देहे चेद्वर्तते ततोऽस्य पूर्ववद्देहित्वाद्विद्यावैयर्थ्यमिवेत्याशङ्कायां तन्निराकरणार्थं तावद्दृष्टान्तमाह । अहिः सर्पो यस्यां त्वचि नितरां लीयते सा सर्पत्वगहिनिर्ल्वयनी सा यथा मृता अहिदेहवियुक्ता सर्पाश्रये प्रतिक्षिप्ता सर्पेणानात्मभावेन परित्यक्ता सती वर्तेत सर्पश्च यथा तत्र निर्गमनप्रवेशौ कुर्वन्नपि निर्ममाहंकृतिको वर्तते एवमिदं शरीरं स्थूलं सूक्ष्मं च सर्पस्थानीयेन मुक्तेन परित्यक्तं मृतमिव सम्बन्धवर्जितं शेते विद्यया सम्बन्धहेतोरविद्यायाः समुच्छेदात् । अथ सकारणस्य देहस्य त्यागादयमात्मा आत्मस्वरूपापन्नो विद्वाननस्थिकः अस्थीति मरणधर्मकशरीरगतमज्जास्थिस्नावमांसमेदोऽसृक्त्वचामुपलक्षणम् । अशरीरः अविद्वद्दृष्ट्या शरीरस्थोऽपि स्वदृष्ट्याशरीर एव । अत एव प्राज्ञः साक्षी । स चैतद्विशेषणविशिष्टो विद्वान्ब्रह्मैव अशनायादिवर्जितः परमात्मैव लोक एव स्वप्रकाश एव । यः पूर्वं मुनिना विमोक्षार्थः कामप्रश्नो वरो दत्तः स यद्यपि सहेतुको बन्धमोक्षार्थलक्षणो दृष्टान्तपूर्वको जनकयाज्ञवल्क्या[ख्या]यिकारूपधारिण्या श्रुत्या सविस्तरो निर्णीतः तथापि मोक्षसाधनात्मज्ञानहेतुसंन्यासस्य पूर्वमसकृदुक्तत्वेऽपि ज्ञानोत्पत्त्यन्तरङ्गभूतशमादीनां तत्रानुक्तत्वात्तैः सह भूयोऽपि संन्यासो विद्यासाधनत्वेन विधातव्य इति वक्तव्यशेषसम्भवात्सहस्रदानमेव राज्ञा स्वजिज्ञासानिवृत्त्यभावं सूचयन्प्रतिजज्ञे न सर्वस्वम् ॥१०॥ अथाकामयमान इत्यादिब्राह्मणेन ज्ञानादेव मुक्तिरिति यः संक्षिप्तोऽर्थस्तस्यैव विवरणार्थान्श्लोकानुदाहरति । अणुः स्थूलादिनिखिलविशेषातीतत्वात् विततो वितीर्णो विस्तृतः दुर्विज्ञेयत्वादनन्तात्मावगाहित्वाद्वा पुराणः चिरंतनो नित्यश्रुतिप्रकाशितत्वात् पन्था ऐकात्म्यज्ञानलक्षणो मार्गः मांस्पृष्टः शास्त्राचार्योक्तितो मामनुप्राप्तः यद्वा तृतीयार्थे द्वितीया मया स्पृष्टो

लब्धः मयैव चानुवित्तः अनुवेदनं नाम विद्यायाः परिपाकापेक्षया फलावसानतालक्षणा निष्ठाप्राप्तिर्भुजेरिव तृप्त्यवसानता तथा चानुवित्त उक्तलक्षणां निष्ठां प्रापितः । न केवलं मयैवायं मार्गोऽनुवित्तः किं त्वन्येऽपि प्रज्ञावन्तो सदा निर्द्वन्द्वा जीवन्त एव शरीरपातानन्तरं तेन ब्रह्मविद्यामार्गेण स्वर्गं परमानन्दलक्षणं मोक्षप्रकरणं न तु त्रिविष्टपलक्षणं लोकं स्वप्रकाशमपिगच्छन्ति ॥११॥ तस्मिन्ब्रह्मज्ञानलक्षणे मोक्षमार्गे शुक्लमतिसंशुद्धं ब्रह्मेत्याहुः अपरे शरद्व्योमवद्ब्रह्म नीलम् अन्ये तु वह्निज्वालावत्पिङ्गलम् केचित्पुनर्वैडूर्यमणिवद्धरितम् अपरे तु जपाकुसुमवल्लोहितम् । वस्तुतस्तूपासनामार्ग एवैवंविधो न मोक्षमार्गः उपासको हि नाडीद्वारा आदित्यलोकं प्रतिनिष्क्रामति नाडीनां च शुक्लस्येत्यादिना (७. १. २०.) अनेकवर्णात्मकस्योक्तत्वादुपास्यस्यादित्यादिब्रह्मणः शुक्लादिविशिष्टो मार्ग उपासनामार्ग एव न तु ब्रह्मविद्यालक्षणमोक्षमार्गः निर्गुणश्रुतिविरोधात् तस्मादाप्तकामतया निर्गुणब्रह्मात्मविषयकज्ञानमे[व] मोक्षमार्ग इत्येतदाह एष पन्था इति यथा तैलादिविलये प्रदीपस्य ज्वलनानुपपत्तौ तेजोमात्रे निर्वाणमिष्यते तथा स्थूलसूक्ष्मात्मकस्य सर्वस्यैव कामस्य ज्ञानात्प्रक्षये सति प्रवृत्त्यनुपपत्तौ अत्रैव प्रत्यगात्मनि कार्यकरणानामेकीभावेनावसानमित्येष पन्था ज्ञानमार्गो ब्रह्मणा परमात्मस्वरूपेण ब्राह्मणेन त्यक्तसर्वैषणेनानुवित्तः पूर्वोक्तनिष्ठां प्रापितः । एवं विप्रतिपत्तिनिराकरणपुरःसरं मोक्षमार्गं निश्चित्य तेन धीरा अपियन्तीत्यत्रोक्तं निगमयति तेनैतीति अन्योऽपि ब्रह्मवित्तेन ब्रह्मविद्यामार्गेण मोक्षमेति प्राप्नोति । ब्रह्मवित्त्वे हेतुस्तैजस इति तेजसि शुद्धसत्त्वे भवस्तैजसः आत्मप्रवणबुद्धिः । तैजसत्वे हेतुः पुण्यकृदिति इष्टापूर्तलक्षणं पुण्यं कर्म करोतीति पुण्यकृत् ॥१२॥ प्रस्तुतज्ञानमार्गस्तुत्यर्थं मार्गान्तरं निन्दति । अन्धमदर्शनात्मकं तमो मोहादिपदवाच्यं संसारनियामकम् । सम्भवनं सम्भूतिः तस्या अन्या असम्भूतिः तामव्याकृताख्यां प्रकृतिं कारणमविद्याकामकर्मबीजभूतामदर्शनात्मिकाम् । सम्भूत्यां कार्यब्रह्मणि हिरण्यगर्भाख्ये रताः आसक्ता उपनिषदर्थानपेक्षिणः ॥१३॥ एवं यदि तेऽदर्शनात्मकं तमः प्रविशन्ति तर्हि का क्षतिरित्याशङ्कायामाह । असुर्यास्तीव्रदुःखसमन्विताः (°र्योस्तिवदुः Cod.) असुषु रमन्तऽइति व्युत्पत्तेः परमात्मभावमद्वयमपेक्ष्य देवादयोऽप्यसुराः तेषां स्वभूता असुर्या निकृष्टाः । अबुधा आत्मावगमवर्जिताः ॥१४॥ न केवलं ब्रह्मविदो विद्यया कृतकृत्यत्वे श्रुतिसम्प्रतिपत्तिरेव किं तु स्वानुभवसंवादो (दा Cod.) ऽप्यस्तीत्याह तदेवेति तदेव तत्रैव प्रसिद्धेऽनेकानर्थसंकुले देहे एवाज्ञानदीर्घनिद्राहिताः सन्तो वर्तमाना वयं तद्ध तदानीमेव कथंचित्कल्मषक्षयात्तद्ब्रह्म भवामो वर्तामहे अहो कृतार्था वयमित्यभिप्रायः । ब्रह्मभावज्ञाने सति कृतार्थत्वं श्रुत्यनुभवाभ्यामुक्त्वा तदभावे दोषमाह यद्ब्रह्म भवामस्तद्ब्रह्मतत्त्वं न चेदिहितवन्तः तर्ह्यहमवेदी अविद्वान्भवेयमिति शेषः वेदनं वेदः सोऽस्यास्तीति वेदी न वेदी अवेदी तदा महती अनन्तपरिमाणा जन्ममरणादिलक्षणा विनष्टिर्विनशनं स्यात् ॥१५॥ तदेवं मार्गान्तरनिन्दाव्याजेनात्मज्ञानमार्गः स्तुतः पुनरपि तत्स्तुत्यर्थमेव तन्निष्ठस्य कायक्लेशराहित्यं दर्शयति । शरीरमनुसंचरत् अनुसंगच्छेत् शरीरोपाधिकृतदुःखमनु दुःखी स्यात् ॥१६॥ न केवलमात्मरसिकस्य कायक्लेशराहित्यं किं तु कृतकृत्यता चास्तीत्याह । अस्मिन्प्रसिद्धे संदेहे तेजोऽन्नादिभिर्भूतैः संदिह्यते समुपचीयते इति संदेहो देहः तस्मिन्देहे आध्यात्मिकादीनामर्थानामतिसंकराद्गुणप्रधानभावनपृथक्करणयोग्यतया

गहने दुर्विज्ञेये जलसूर्यवत्प्रविष्ट आत्मा यस्य ब्राह्मणस्य यद्वा येन ब्राह्मणेनानुवित्तोऽनुलब्धः प्रतिबुद्धः अहमस्मि परं ब्रह्मेत्येवं प्रत्यगात्मत्वेन साक्षात्कृतश्च वर्तते स ब्राह्मणो विश्वकृत् विश्वस्य कर्ता कृत्यपूर्णः । तस्य सर्वोऽपि प्रपञ्चो लोक आत्मा सोऽपि सर्वस्य प्रपञ्चस्य लोक एवात्मैव ॥१७॥ किं च विदुषो विहिताकरणादिप्रयुक्तं भयं नास्तीति विद्यां स्तोतुं मन्त्रान्तरमाह । एतं हृदयस्थमात्मानं देवं द्योतनात्मकं यथाकर्मानुरूपं सर्वप्राणिकर्मफलानां दानादेव भूतभव्यस्य कालत्रयस्य स्वामिनमञ्जसा साक्षात्पश्यति अहं ब्रह्मास्मीत्यात्मत्वेन विजानाति तदानीं न विचिकित्सति न संशयानो भवति अहमस्मि सर्वात्मा परं ब्रह्मेति निश्चितमतिर्भवति ॥१८॥ इदानीमस्यात्मनोऽमृतत्वं सर्वाधिष्ठानत्वेन साधयति । पञ्चजनाः पञ्चजनसंज्ञकाः गन्धर्वाः पितरो देवा असुरा रक्षांसि यद्वा प्राणादयो वाक्यशेषादिति न्यायेन (क° २१.) प्राणश्चक्षुः श्रोत्रमन्नं मनश्चेति पञ्चजनाः । आकाशश्च अव्याकृताख्यः ॥१९॥ नन्वीश्वरोऽपि कालावच्छिन्नो न कालत्रयं प्रत्यस्येश्वरत्वसम्भव इत्यत आह अयं संवत्सराख्यः कालः स्वावयवैरहोभिरहोरात्रैः कार्यजातं परिच्छिन्दन्यस्मादीश्वरादर्वागेव परिवर्तते न तमपि परिच्छिनत्ति एवमीश्वरस्य समस्तविक्रियाहेतुका[ला]तिक्रमणोक्त्या जन्मादिविकाराः प्रतिषिद्धा वेदितव्याः एवम्भूतं तदीश्वरात्मकं ज्योतिषामादित्यादीनामपि ज्योतिरवभासकममरणधर्मकमायुरित्येवं हि निश्चितं देवा आ सामस्त्येन उपासते अनुसंदधते ॥२०॥ पूर्व[त]स्मिन्मन्त्रे पञ्चजनप्रतिष्ठाभूतो ब्रह्मविदमृतो भवतीत्युक्तम् कथं पुनरेवंविधब्रह्मविद्योदयः स्यादित्यपेक्षायां तदुदयप्रकारमाह । प्राणः स्वस्यानात्मत्वजडत्वाभ्यां सत्तास्फूर्त्योः स्वतोऽसम्भवान्नित्यसिद्धस्वप्रकाशात्मज्योतिषावभास्यमान एव स्फूर्तिं कुरुते चक्षुरादीनामपि ब्रह्मप्रकाशक्त्येशे (कृत्येशे Cod.) ऽनधिष्ठितानां काष्ठलोष्टादिसमत्वेन दर्शनादिक्रियायामस्वातन्त्र्यात्तदवभासकमात्मज्योतिः । एवं प्राणादिव्यापारानुमितास्तित्वं तद्विलक्षणत्वेन शुद्धं प्रत्यगात्मानं ये विदुः । निचिक्युः निश्चयेन ज्ञातवन्तः । अत एव त्वंपदार्थपरिशोधनप्रकारेण यथोक्तब्रह्मविद्योदयः स्यादिति भावः । एवंविधब्रह्मावाप्तौ श्रवणादिसंस्कृतं मन एव साधनमित्याह उक्तलक्षणं ब्रह्म मनसैवाप्तव्यं प्राप्यं न साधनान्तरेण । नन्वेवमाप्तव्यादिभावेन भेदः स्यादित्याशङ्कायामाह इहावाप्तिविषये किंचिदपि नाना भेदोऽविद्याध्यारोपणव्यतिरेकेण परमार्थतो नास्ति ॥२१॥ इदानीं भेददर्शननिन्दया नानात्वाभावं द्रढयति । इह ब्रह्मणि । मरणात्पुनर्मृत्युमाप्नोति जन्ममरणसंसारचक्रे परिभ्रमति । द्वैताभावे कथमनुद्रष्टव्यमित्यपेक्षायामाह मनसैवेति । अप्रमयमप्रमेयं ध्रुवं नित्यमविचालि ॥२२॥ उक्तं ध्रुवत्वं सोपस्कारमुपपादयति । धर्माधर्मादिलक्षणं रजो विगतं यस्मात्स विरजः । आकाशादव्याकृताख्यात्परो व्यतिरिक्तः । न जायत ऽइत्यजः । महान्परिणामतो महत्तमः । ध्रुवोऽविनाशी । प्रज्ञां वाक्यार्थज्ञानलक्षणामशेषशोकाकाङ्क्षाशान्तिरूपां परमपुरुषार्थहेतुभूतां तत्वमस्यादिवाक्यवशां (? शा Cod.) कुर्वीत सम्पादयेत् । बहुशास्त्राध्ययने दोषमाह विग्लापनं विशेषेण ग्लानिकरं श्रमजनकम् ॥२३॥ पूर्वं तदेव सदित्यादिना मन्त्रेण (क° ८.) स यत्रायमित्यादिब्राह्मणेन च (क° ९.) कामादिहेतुसहितो बन्धो मुमुक्षूणां हेयत्वेनोक्तः यदा सर्वऽइत्यादिमन्त्रेण (क ९.) अथाकामयमान इत्यादिब्राह्मणेन (क° ८.) च नेषामेवाभिलषितः सम्यग्धीहेतुको मोक्ष उक्तः पुनश्च तत्स्वरूपमणुः पन्था इत्यादिश्लोकैः (क° ११.) प्रपञ्चितम् इदानीं विविदिषावाक्येन ब्रह्मात्मनि कृत्स्नस्य

वेदस्य काम्यराशिवर्जितस्य विनियोगकथनार्थमस्मिन्नध्यायऽउक्तं सफलमात्मज्ञानं स वाऽअयमात्मेत्यादिना एषां लोकानामसम्भेदायेत्यन्तेनानूद्यते । सशब्देन ज्योतिर्ब्राह्मणोक्तविज्ञानमयलक्षणं जीवं परामृश्य तस्य विरजः पर इत्यव्यवहितेन परेणात्मनैक्यमयमिति शब्देन श्रुतिर्निर्दिशति । सर्वस्य ब्रह्मेन्द्रादेः । नन्वेवं शासनाल्लोकवज्जर्माधर्मसंयोग ईश्वरात्मनः स्यादित्यत आह स नेति । उदकप्रवाहविष्टम्भकः सेतुः विधरणः विधारकः यथा सेतुः सीमादिव्यवस्थां विधारयति तथा वर्णाश्रमादिव्यवस्थाया विधारयिता । एषां भूरादिब्रह्मलोकान्तानां लोकानामसम्भेदाय (सं)भेदः सांकर्य तदभवाय ॥२४॥ यदर्थमेषास्मिन्नध्याये वाचो विग्लापनं हि तदिति श्लोकान्तेन (क० २३.) विहिता सफला ब्रह्मविद्यानूदिता तं काम्यैकदेशवर्जितस्य कृत्स्नस्य कर्मकाण्डस्यास्यां विद्यायां परम्परया विनियोगं दर्शयति तमेतमिति । वेदो मन्त्रब्राह्मणात्मकोऽनूच्यते गुरूच्चारणानन्तरं पठ्यतऽइति वेदानुवचनं वेदाध्ययनम् । विविदिषन्ति वेदितुमिच्छन्ति । अनाशकेन कामानशनलक्षणेन । मुनिर्मननशीलो योगी । एतमेव प्रकृतमात्मानं स्वं लोकमन्तःकरणशुद्धिद्वारा आप्तुमिच्छन्तः ॥२५॥ आत्मलोकार्थिनां पारिव्राज्ये कारणमुच्यते ॥२६॥ अस्यात्मलोकस्योत्पाद्यादिविलक्षणत्वेन कर्मासम्बन्धान्न कर्म तदर्थिनानुष्ठेयमित्यभिप्रेत्याह एष नेति । ननु य एवं सर्वैषणाविनिवृत्तः स एष नेति नेत्यादिलक्षणमात्मानमात्मत्वेनावगम्य तद्रूपेणैव वर्तते तस्य कर्मानारभमाणस्य ब्रह्मविदः किं स्यादित्यपेक्षायामाह अतः पापमिति इत्येवमुभे द्वे पापपुण्यफले कष्टहर्षरूपे तं न तरत इति शेषः । लोकः पुरुषार्थो न मीयते न हिंस्यते । ब्रह्मविदः कर्मकार्यसम्बन्धाभावान्न कर्मसम्बन्ध इति तात्पर्यार्थः ॥२७॥ एवमुक्ते ब्रह्मविद्याफले मन्त्रं संवादयति । तस्यैव महिम्नः त्वम्पदार्थस्य पदवित् पदस्य वेदिता पद्यते गम्यते ज्ञायतऽइति पदं स्वरूपम् तत्पदार्थभूतं ब्रह्मैव तस्य पदस्य वेदिता स्यात् मुमुक्षुर्वाक्यार्थज्ञानार्थं तत्पदवेदिता भवेत् । तं महिमानं स्वरूपं पदं ज्ञात्वा । तर्ह्येतत्पदसाक्षात्कारः कथं स्यादित्यपेक्षायामाह तस्मादेवंविदिति यस्मादेवमकर्मसम्बन्ध्येष ब्राह्मणस्य महिमा नेति नेत्यादिलक्षणस्तस्मात्कारणादेवंवित् आत्मा कर्मतत्फलसम्बन्धशून्य इत्यापाततो जानन् प्रथमं शान्तः संसारदुःखेन तप्तः खिन्नो वा उपरतबाह्येन्द्रियव्यापारः अनन्तरं दान्तोऽन्तःकरणतृष्णातो निवृत्तः उपरतः सर्वैषणाविनिर्मुक्तो विधिना त्यक्तसर्वकर्मा संन्यासी तितिक्षुर्जीवनविच्छेदहेतुव्यतिरिक्तशीतोष्णयादिद्वन्द्वसहिष्णुः श्रद्धावित्तः श्रद्धा आस्तिक्यबुद्धिरेव वित्तं साधनं यस्य स इन्द्रियान्तःकरणचलनरूपव्यापारव्यावृत्त्या तदैकाग्र्यवान्भूत्वा आत्मन्येव स्वे कार्यकरणसंघाते एवात्मानं प्रत्यक्चेतयितारं पश्येत्साक्षात्कुर्यात् सर्वं समस्तमेनमात्मानं पश्यति नान्यदात्मव्यतिरिक्तं किमपि पश्यति । सर्वं पाप्मानं कृताकृतलक्षणं सर्वात्मदर्शनरूपवह्निना तपति भस्मीकरोति । विगता जिघत्सा अत्तुमिच्छा यस्मात्स विजिघत्सः ॥२८॥ एवं निरुपाधिकब्रह्मज्ञानात्कैवल्यं फलमुक्तम् सम्प्रति सोपाधिकब्रह्मध्यानादभ्युदयफलं दर्शयिष्यंस्तत्स्वरूपमाह स वाऽइति । अन्नादः सर्वभूतस्थः सन् सर्वान्नात्ता । वसु धनं भोगसाधनं सर्वप्राणिकर्मफलं ददातीति वसुदानः । अनया कण्डिकया रातेर्दातुः परायणमित्युक्तस्यैव (६. ९. ३४.) कर्मफलस्योपसंहारः कृत इत्यपौनरुक्त्यं द्रष्टव्यम् ॥२९॥ इदानीं सफलं विद्यां मन्त्रब्राह्मणाभ्यामुपदिष्टामुपसंहरति । अभयं वै अविद्याकार्यरहितमेव ब्रह्म परमात्मतत्त्वं त्वं प्राप्तोऽसि । राजा

तु आत्मीयमशेषविद्यालाभं द्योतयितुं सर्वस्वदानं प्रतिजज्ञे ॥३०॥ इदानीं तिष्ठमानस्य तद्विदः परायणमित्युक्तस्यैव (६.१.३४.) ब्रह्मैक्यज्ञानफलस्योपसंहारार्थमग्रिमा श्रुतिः प्रवर्तते । य इह स वाऽएष महानित्यादिनान्ते संक्षिप्तोऽर्थः स एव सर्वोपनिषत्प्रतिपाद्यः एष एव सर्वस्यास्य शास्त्रस्य तात्पर्यार्थः ॥३१॥२॥७॥

पूर्वमागमप्रधानेन मधुकाण्डेन ब्रह्मात्मतत्वं निर्धारितम् पुनस्तस्यैव तत्वस्यास्तित्वमुपपत्तिप्रधानेन याज्ञवल्कीयेन काण्डेन पक्षप्रतिपक्षपरिग्रहं कृत्वा जयपराजयप्रधानजल्पन्यायतो विचारितम् तदेव चास्मिन्नध्याये शिष्याचार्यसम्बन्धेन तत्वनिर्णयप्रधानेन वादन्यायेन सविस्तरं विचार्योपसंहृतम् अथेदानीमस्य निगमनस्थानीयं मैत्रेयीब्राह्मणमारभ्यते । यद्वा मधुकाण्डे मैत्रेयीब्राह्मणेनागमबलान्मुक्तिसाधनभूता संन्याससहिता आत्मविद्योक्ता सैवाधुना न्यायप्रधाने मुनिकाण्डेऽपि मुक्तिहेतुत्वेन न्यायतो मन्तव्येत्येतदभिप्रायेणेदं ब्राह्मणं प्रवर्तते । ब्रह्मवादिनी ब्रह्मवदनशीला । स्त्रिया उचिता या प्रज्ञा गृहप्रयोजनान्वेषणलक्षणा सैव विद्यते यस्यां सा स्त्रीप्रज्ञेव ॥१॥ अवृतत् अवर्तयत् वर्तितवत्यसि ॥५॥ आशितमन्नदाननिमित्तं पायितं पेयदाननिमित्तं धर्मजातम् । अयं च लोक इदं च जन्म परश्च लोकः प्रतिपत्तव्यं च जन्म ॥११॥ अत्रैव प्रज्ञानघने न प्रेत्य संज्ञास्तीति वदन्भगवान्मा मां मोहान्तं मोहमध्यमापीपदत् आपादितवान् संमोहितवान् अतोऽहमिदमात्मतत्वमुक्तलक्षणं नैव विजानामि ॥१४॥ उच्छित्तिरुच्छेदो विकारः अनुच्छित्तिधर्मा अविक्रियः । तर्ह्यात्मनः कथं संसारादिविक्रियासम्बन्ध इत्यत आह मात्रासंसर्गः चक्षुरादिकरणसम्बन्धः मीयन्ते विषया याभिस्ता मात्रा इति विषयप्रकाशहेतुभूतानि चक्षुरादिकरणानि मात्राः ॥१५॥ यद्वै तन्न पश्यति इदं कण्डिकाष्टकं ज्योतिर्ब्राह्मणे (७.१.२३.) व्याख्यातम् ॥१६॥ एवमविद्योत्थद्वैते सत्येव विशेषविज्ञानमात्मनस्तदभावे तु तदभाव इत्यन्वयव्यतिरेकाभ्यामौपाधिकमात्मनो विशेषविज्ञानमिति दर्शयितुं न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तमिति (क° १६-२३.) व्यतिरेको दर्शितः इदानीमन्वयमाह यत्र वाऽअन्यदिवेत्यादिना यस्मिन्नेव जागरिते स्वप्ने वा अन्यदिवात्मनो वस्त्वन्तरमिवाविद्याप्रत्युपस्थापितं भवेत् तस्मिन्नवस्थाविशेषे अन्योऽविद्याकल्पिताद्वस्त्वन्तराद्भिन्नमिवात्मानं मन्यमानोऽन्यत्स्वस्माद्विभक्तं स्वाविद्योत्थं वस्त्वन्तरं पश्येत् ॥२४॥ एतावता एतेभ्यो भूतेभ्य इत्यत्र (क° १३.) सूचितो भूताविद्योपाधिकः संसार इति व्याख्यातम् इदानीं महद्भूतमनन्तमपारमित्यादि (क° १३.) सूचितं ब्रह्मदर्शनं व्याख्यास्यन्भूतोपाध्यभावेन विशेषविज्ञानलक्षणसंसाराभाव इति पुनर्व्यतिरेकमाह यत्र वस्येत्यादिना । अमृतत्वममृतत्वसाधनमेतावदेव यदेतत्ससंन्यासमात्मपरिज्ञानं न वणिकं किंचिदस्ति ॥२५॥ इदानीं याज्ञवल्कीयकाण्डप्रवर्तकगुरुशिष्यपरम्पराकथनाय वंशप्रतिपादकं कण्डिकात्रितयमारभ्यते । प्रथमान्तः शिष्यः पञ्चम्यन्तो गुरुः ॥२६॥३॥७॥

तदेवं यद्विज्ञानं केवलममृतत्वसाधनं स आत्मा निरुपाधिकोऽशनायाद्यतीतो यदेव साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तरो नेति नेत्यादिलक्षणः काण्डद्वयेन निर्धारितः अधुना तस्यैवोपाधिवैशिष्ट्यमापन्नस्य प्रमाणप्रमेयादिव्यवहारविषयतामुपगतस्याभ्युदयफलानि क्रममुक्तिफलानि कर्मसमृद्ध्यर्थानि चेति त्रिविधोपासनानि पूर्वत्रानुक्तानि वक्तव्यानीत्येतदर्थं खिलकाण्डं प्रवर्तते । पूर्वत्रानुक्तं वक्तव्यत्वेन परिशिष्टं खिलमिति हि खिललक्षणम् । तत्र

सर्वोपास्त्यङ्गभूतान् ओंकारो दमो दानं दयेति पदार्थान्विधित्सन्तो श्रुतिः पूर्वमात्मयाथात्म्यविज्ञानप्रसिद्धये मिथ्याभूतकार्यकारणसम्बन्धमाश्रित्य तात्पर्येण व्याख्यातस्य ब्रह्मणः शुद्धं स्वरूपं पूर्वोपात्तकार्यकारणसम्बन्धस्य हेयत्वं द्योतयितुमनुवदति पूर्णमद इति मन्त्रेण । अद इति परोऽक्षाभिधायि सर्वनाम पूर्णमिति वा दान्तेत्यादिना (पा° ७. २. २७.) कर्तरि निष्ठान्तं निपातितम् अदः परोऽक्षं ब्रह्म पूर्णमाकाशवद्व्यापि निरन्तरं निरुपाधिकं चेत्यर्थः अनेन लक्ष्यं तत्पदार्थं दर्शयित्वा लक्ष्यं त्वंपदार्थं दर्शयति पूर्णमिदमिति यदिदं नामरूपोपाधिविशिष्टव्यवहारापन्नं तदपि केवलेन स्वेन निरुपाध्यात्मना परमात्मस्वरूपेण पूर्णं व्यापि न तूपहितेन विशिष्टेन रूपेण पूर्णम् । एवं लक्ष्यौ तत्त्वंपदार्थावुक्त्वा तावेव वाच्यभूतौ कथयंस्त्वंपदार्थस्य पूर्णत्वे हेतुं दर्शयति पूर्णात्कारणात्मनोऽविद्यासहायात्पूर्णमिवोदच्यते उद्रिच्यते उद्गच्छति । सम्प्रत्यैक्यज्ञानफलमाह पूर्णस्य कार्यात्मनो ब्रह्मणः पूर्णं पूर्णत्वमादाय गृहीत्वा आत्मस्वरूपैकरसत्वमापाद्य अविद्याकृतं भूतमात्रोपाधिसंसर्गजं जन्यत्वावभासं विद्यया तिरस्कृत्य पूर्णमिवानन्तरमबाह्यं प्रज्ञानघनैकरसस्वभावं केवल ब्रह्मावशिष्यते । अधुना ध्यानविधानार्थं तस्मिन्विनियुक्तं मन्त्रं तावदाह ओं खं ब्रह्मेति इह ध्यानसाधनत्वेनैव ओंकारस्योपदेशः अत्र ब्रह्मपदमोंकारालम्बनस्य विशेषस्याभिधानम् तस्य ब्रह्मशब्दस्य बृहद्वस्तुसामान्यवाचिनः सर्वत्र प्रसक्तौ खमिति विशेषणम् नीलमुत्पलमितिवत्खब्रह्मणोः सामानाधिकरण्यात्तयोरेकत्वसिद्धिः तथा च यथा विष्णवङ्गाङ्कितायां शिलादिप्रतिमायां विष्णुबुद्धिः क्रियते तथोंकारे खब्रह्मणः उपासनं (खंब्रह्मेणः त्युपा° Cod.) कर्तव्यमिति वाक्यार्थः । अस्मिन्मन्त्रे खशब्दाद्भौतिकखप्रतीतिर्मा भूदित्यभिप्रायेण मन्त्रविनियोजकं ब्राह्मणं प्रवर्तते खं पुराणमित्यादि पुराणं चिरंतनं खं परमात्माकाशमिति यावत् तथा च खमिति विशेषणेन बृहदर्थसामान्यवाचिनो ब्रह्मशब्दस्यानादिकारणचैतन्यविषयत्वं निश्चितमित्यर्थः । नन्वस्य कारणब्रह्मणोऽतीन्द्रियत्वात्कथमोंकारे तदुपास्यमित्यतः कल्पान्तरमाह वायुरं खमिति हेति वायुर्विद्यते यस्मिंस्तद्वायुरं खं भौतिकाकाशं तदवच्छिन्नं ब्रह्मोंकारालम्बनम् भौतिकाकाशे खशब्दप्रयोगस्य बहुलमुपलम्भादिति कौरव्यायणीपुत्र उक्तवान् । एवं सति कारणब्रह्माकाशब्रह्मपक्षयोरुभयोरपि श्रौतत्वाविशेषादोंकारे दृष्टिद्वयमैच्छिकमिति भावः । एवमोंकारप्रतीकं कार्यकारणोभयविधं ब्रह्म ध्येयमित्युक्तम् । इदानीं प्रणवस्य यथोक्तब्रह्मवाचकत्वं वेति पक्षान्तरमाश्रित्योंकारवाच्यत्वेन ब्रह्म ध्येयमित्यभिप्रेत्योंकारस्य वेदत्वनिरुक्त्या ब्रह्मवाचकत्वं साधयति वेदोऽयमिति यस्माद्यद्वेदितव्यं प्रकाश्यमानमभिधीयमानं ब्रह्म तदेनेनोंकारेण वेद साधकः पुमान्विजानाति उपलभते तस्माद्वेदोऽयमोंकार इति ब्राह्मणा विदुरित्यन्वयः । यद्यपि ब्रह्मात्मशब्दा ब्रह्मणो वाचकाः सन्ति तथापि श्रुतिप्रामाण्यादोंकारो ब्रह्मणो नेदिष्ठमभिधानमतिप्रियतमं नामेत्यवगम्यते । इतरस्यापि वेदत्वं तु वेदितव्यवेदनहेतुत्वादेव तस्माद्विशिष्टोऽयमोंकारो ब्रह्मोपास्तिसाधनत्वेन प्रतिपत्तव्य इत्यर्थः ॥१॥१॥८॥

एवमाभ्यन्तरं सर्वोपास्तिसाधनमोंकार इत्युक्तम् इदानीं बाह्यं दमादि साधनत्रयं विधातव्यम् तेनापि विशिष्ट एव बाह्याभ्यन्तरशुचिः सन्सर्वोपास्तिष्वधिक्रियतेऽतस्तद्विधानायार्थवादमाह । प्रजापतौ विराडात्मनि पितरि ॥१॥ स्वभावतोऽदान्ता यूयमतो दाम्यत दान्ता भवत ॥२॥ स्वभावतो लुब्धा यूयमतो दत्त ॥३॥ एवं क्रूरा यूयं हिंसादिपरा अतो दयध्वं

प्राणिषु दयां कुरुत । शिक्षेउपादयात् प्रजापतेरनुशासनमस्माभिः कर्तव्यमिति मतिं कुर्याद-धुनातनो मनुष्य इत्यर्थः ॥४॥२॥८॥

नन्वेवं दमादियुक्तस्यापि शरीरपाते तु नामृतत्वमाध्यात्मिकवाय्वादिप्रतिबन्धादित्यत आह वायुरनिलमिति । ममामृतस्य सत्यस्य शरीरपाते सति तत्स्थोऽध्यात्मिकप्राणरूपो वायुरनिलं बाह्यं वायुममृतमाधिदैविकं प्रति गच्छत्विति शेषः । एतद्वायुग्रहणमन्येषामपि देवानामुपलक्षणार्थम् अन्येऽपि देवाः स्वां-स्वां प्रकृतिं गच्छन्त्वित्यर्थः । नन्वेवं देहस्थदेवतानामप्रतिबन्धकत्वेऽपि देहस्यैव सूक्ष्मतां गतस्य प्रतिबन्धकत्वान्नामृतत्वसिद्धिरित्यत आह भस्मान्तमिति शरीरमपि भस्मान्तं सत्पृथिवीं प्रति यातु भस्मान्तलिङ्गात्कर्मिणि एवैतदुपस्थानं न संन्यासिनामिति गम्यते तेषां दाहासम्भवादित्यर्थः । एवमुपस्थानमुक्त्वाग्नेरुपस्थानमाह ओं३ क्रतो स्मर क्लिबे (!) स्मरेति ओमिति क्रतोऽइति चाग्निदेवतासम्बोधनार्थावेव शब्दौ । अवतीत्योमीश्वरः सर्वरक्षकः स च जाठरप्रतीकत्वेनोपासितत्वादग्निः । अग्निश्च क्रतुसाध्यत्वेन क्रतुरित्युच्यते । तथा च हे ओं क्रतो अग्ने स्मर इति इष्टां गतिं जिगमिषता मया स्मरणे त्वं नियुज्यसे अन्तकाले हि त्वया स्मरणे कृते सति इष्टा गतिः प्रार्थ्यतेऽतः प्रार्थ्यसे । क्लिबे (!) क्लृप्ताय लोकाय स्मर । पुनरप्यग्निविषयं प्रार्थनान्तरमाह अग्ने नयेति । वयुनानि प्रज्ञानानि ज्ञानवाचि वयुनपदं कर्मपूर्वप्रज्ञयोरुपलक्षणार्थम् । सुपथा शोभनेनोत्तरेण शुक्लेन मार्गेण पुनरावृत्तिरहितेन । राये धनाय कर्मफलभोगाय । जुहुराणं कुटिलं वञ्चनात्मकं देवयानप्राप्तिप्रतिबन्धकमेनः पापं वियोजय विनाशय । वयं तु देहावसानकालेऽन्यत्कर्तुमशक्ता इदानीं तुभ्यं बहुतमां नमउक्तिं नमस्कारवचनं समर्पयेम ॥१॥३॥८॥

इदानीं सोपाधिकस्य ब्रह्मणो निरुपाधिकस्वरूपेऽनधिकृतानां ध्यानभेदोक्त्यर्थमुत्तरं ग्रन्थजातं प्रवर्तते । तत्र प्रजापतिर्देवादीनामनुशास्तेति सामान्यतः श्रवणाद्दक्षादिष्वपि प्रजापतित्वशङ्का मा भूदिति प्रजापतिं विशिनष्टि एष इति । हृदयशब्दस्तत्स्थबुद्धिविषयः यस्मिन्हृदये शाकल्यब्राह्मणे किंदेवतोऽस्यामित्यादिना (६. १. २१.) नामरूपकर्मणां दिग्विभागेनोपसंहार उक्तस्तद्धृदयमेष एव देवाद्यनुशास्ता प्रजापतिर्न तु दक्षादिरित्यर्थः । उक्तहृदयस्योपास्यत्वार्थं ब्रह्मत्वमाह एतद्ब्रह्मेति एतद्धृदयं ब्रह्म ज्ञेयजातस्य हृदयेन व्याप्तत्वात् अतो हृदयं ब्रह्मेत्येव दीर्घकालादरनैरन्तर्येण भावेनोपास्यमित्यर्थः । ननु कथं हृदयस्य प्रजापतिना सहैक्यमुच्यत हृदयस्य सूक्ष्मत्वात्प्रजापतेश्च सर्वात्मकत्वादित्यत आहैतत्सर्वमिति एतद्धृदयं सर्वं सर्वात्मकं शाकल्यब्राह्मणोक्तरीत्यैव । प्रजापतिरपि अन्नब्राह्मणोक्तरीत्या (४. ३. १.) सर्वात्मकः अत उभयोः सर्वात्मकत्वाद्युक्तं तयोरैक्यवचनमित्यर्थः । एवमुपास्यत्वेन सिद्धस्य हृदयस्य स्तुत्यर्थं तन्नामाक्षरैकदेशोपासनमाह तत्त्र्यक्षरमित्यादिना । अस्मै हृदयब्रह्मणे स्वा इन्द्रियाणि अन्ये च विषयाः शब्दादयः स्वं-स्वं कार्यमभिहरन्ति हृदयं च भोक्त्रर्थं स्वविषयसुखादिकमभिहरति तस्माद्धृदयनामाक्षरत्वेन सम्बद्धं हरतेराहरतिकर्मणो हृ इत्येतद्रूपं यो वेद अस्मै विदुषे स्वा ज्ञातयोऽन्ये च सम्बन्धिनोऽभिहरन्ति बलिमिति वाक्यशेषः । यस्मात्पूर्वोक्ताः स्वा अन्ये च हृदयब्रह्मणे स्वं-स्वं वीर्यं ददति ददते प्रयच्छन्ति हृदयं च भोक्त्रे तद्ददाति तस्माद्ददतेर्दानकर्मणो द इत्येतद्रूपं हृदयनामाक्षरत्वेन सम्बद्धं यो वेद अस्मै विदुषे स्वाश्चान्ये च स्वं-स्वं वीर्यं ददति प्रयच्छन्ति दद दाने इत्यस्य धातोरात्मनेप-

दिनोऽपि भौवादिकस्य व्यत्ययेन परस्मैपदं बोद्धव्यम् । यस्मात्स्वा अन्ये च विषया हृदयब्रह्म प्रति यन्ति हृदयं च भोज्यं प्रत्येति तस्मादिणो गत्यर्थस्य यमित्येतद्रूपं हृदयनामाक्षरत्वेन सम्बद्धम् । तथा च हृदयनामाक्षरैकदेशोपासनादपि विशिष्टं फलं प्राप्नोति किमु वक्तव्यं हृदयस्वरूपोपासनादिति हृदयस्तुत्यर्थमेव नामाक्षरोपासनोपन्यासो न तु नामाक्षरोपासनानि त्रीणि हृदयस्वरूपोपासनमपरमिति चत्वार्यत्रोपासनानि विवक्षितानीति बोद्धव्यम् ॥ १ ॥ ४ ॥ ८ ॥

एतस्यैव हृदयाख्यस्य ब्रह्मणः सत्यमित्युपासनान्तरं विधित्सन्ती श्रुतिराह तद्वै तदेतदेव तदासेति अत्र प्रथमस्तच्छब्दो हृदयाख्यब्रह्मपरामर्शी वैशब्दः स्मरणार्थः तदुच्यते विधान्तरेणेत्येवं हृदयाख्यब्रह्मण एव विधान्तरप्रतिज्ञार्थो द्वितीयस्तच्छब्दः किं तद्विधान्तरमित्यपेक्षायां वक्ष्यमाणं विधान्तरमेतदेवेत्यनेन शब्देनोक्त्वा तस्य पूर्वोक्तहृदयब्रह्मणा सामानाधिकरण्यप्रदर्शनार्थस्तृतीयस्तच्छब्दः तथा च तद्वै हृदयं ब्रह्म एतदेव वक्ष्यमाणप्रकारं तदासेति पर्यवसितोऽर्थः । कोऽसौ वक्ष्यमाणः प्रकार इत्यपेक्षायामाह सत्यमेवेति यद्ब्रह्म हृदयात्मनोक्तं तत्सत्यमेव सच्च त्यच्च सत्यं पञ्चभूतात्मकमाधिदैविकं तत्त्वं हिरण्यगर्भात्मकमित्यर्थः । तस्य स्वरूपकथनपूर्वकं तद्विज्ञानफलमाह स य इति महदपरिच्छेद्यं महत्वात् यक्षं पूज्यम् प्रथमजं सर्वस्माद्विराडादेः संसारिणः सकाशात्पूर्वमेवोत्पन्नम् । यथा सत्येन ब्रह्मणा इमे लोका आत्मसात्कृतास्तद्वत् । कैमुतिकन्यायेन फलान्तरमाह इन्नु इत्थं यथा सत्येन ब्रह्मणानृतात्मा शत्रुर्जितस्तथानेनाप्युपासकेनासौ शत्रुर्जितोऽसत् अस्तु भवतु तथा च लोका येन जितास्तस्य शत्रुजये किं वक्तव्यमित्यर्थः । कथमीदृग्विधज्ञानादुपासकस्येदं फलमित्यपेक्षायामुक्तोपासकस्यानुवादपूर्वकं हेतुमाह य एवमित्यादि सत्यं हीत्यन्तम् हि यस्मात्सत्यमेव ब्रह्मोक्तरीत्या लोकजिच्छत्रुजिच्च तस्मात्तदुपासकस्याप्युपासनानुरूपमुक्तं फलं युक्तमेवेत्यर्थः ॥ १ ॥ ५ ॥ ८ ॥

इदानीं सत्यस्य ब्रह्मणः स्तुत्यर्थं तस्य प्रथमजत्वं साधयति आप एवेति । अग्निहोत्रादिकर्मसु हूयमाना आहुतयः पयःसोमादिका अत्रापूशब्देनोच्यन्ते तथा च यथोक्ता आपो जगतो बीजभूता अव्याकृतात्मना अवस्थिता एवेदं सर्वं नामरूपात्मकं विकारजातं जगत् अग्रे सृष्टेः पूर्वमासुः नान्यत्किंचिद्विकारजातमासीदिति वाक्यार्थः । इदानीमप्शब्दोपलक्षितान्मूलकारणात्सूत्रोत्पत्तिमाह उक्तलक्षणाः पुनरापो भूतान्तरसहिताः सत्यं सूत्रात्मकं हिरण्यगर्भं सृष्टवत्यः एतेन सत्यस्य ब्रह्मणः प्रथमजत्वं सिद्धमित्यर्थः । एतस्य पूर्वोपक्रान्ताद्धृदयसत्यब्रह्मणः सकाशाद्भिन्नत्वशङ्कां वारयति सत्यं ब्रह्मेति । एवं सत्यस्य ब्रह्मणः प्रथमजत्वं निरूप्य तस्यैव महत्वं साधयति ब्रह्म प्रजापतिमिति तत्सत्यं ब्रह्म हिरण्यगर्भाख्यं प्रजापतिं विराजमसृजत तथा च सर्वजगदात्मकविराडात्मस्रष्टृत्वात्सूत्रात्मकं सत्यं ब्रह्म महदित्यर्थः । इदानीं तस्य यक्षत्वं निरूपयितुमुत्पन्नाद्विराडात्मनः सकाशादिन्द्रादिदेवतासृष्टिमाह प्रजापतिर्देवानिति । देवतासृष्टिश्रुतिरपि महत्वसाधनायेति वा व्याख्या बोध्या ॥ १ ॥ अथ यक्षत्वमाह यस्मादेवं सृष्टास्ते देवाः पितरमपि विराजमतीत्य सत्यं ब्रह्मोपासते इत्यतो यक्षं तदित्यर्थः तथा चैवं सिद्धं प्रथमजं महद्यक्षं सत्यं ब्रह्म सर्वात्मनोपास्यमिति भावः । हृदयब्रह्मवदस्यापि सत्यस्य ब्रह्मणः स्तुत्यर्थं वर्णत्रयात्मकं नामाह तदेतदिति । अक्षरस्वरूपदर्शनानुरूपं फलं कथयितुं तेषां स्वरूपं तावदाह सकारमकारौ सत्यममृतं मृत्युरूपाभावात् मध्यतो

मध्ये वर्तमानं तोत्यक्षरमनृतं मृत्युरूपं मृत्यनृतयोस्तकारसामान्यात् तदेतदनृतं तोकाराख्यं (!) मृत्युरूपं सत्येन सकारामूकारलक्षणेन परिगृहितं व्याप्तमन्तर्भावितम् अतस्तस्याकिंचित्करत्वात्सत्यभूयमेव सत्यबाङ्गल्यमेव भवति । एवं सत्यबाङ्गल्यमनृतस्य मृत्योरकिंचित्करत्वं च विज्ञानतः फलमाह इत्थं ज्ञानलमनृतं कदाचित्प्रमादोक्तं न हिनस्ति स्वफलदानेन न व्याप्नोति बुद्धिपूर्वकस्यानृतस्य विदुषोऽपि बाधकत्वादित्यर्थः ॥२॥ एवं विशिष्टसत्योपास्तिमुक्त्वेदानीं तस्यैवाध्यात्मिकाधिदैविकसंस्थानभेदवैशिष्ट्यं कल्पयित्वा तदुपास्त्यर्थमाह यत्सत्यं ब्रह्म पूर्वोक्तं तदसौ स प्रसिद्धः कोऽसौ आदित्यः कः पुनरादित्यः य एष पुरुषो मण्डलाभिमानी यश्च दक्षिणेऽक्षिणि पुरुषः । ननु प्रदेशभेदवर्तिनोः स्थानभेदादुपासनाभेदः स्यादित्याशङ्कायामाह तावेतावादित्याक्षिस्थौ पुरुषावेकस्यैव सत्यब्रह्मणः स्थानविशेषौ यस्मात्तस्मादन्योऽन्यस्मिन्नादित्यश्चाक्षुषे चाक्षुषश्चादित्ये प्रतिष्ठितौ अतस्तयोर्भिन्नत्वेनेव प्रतिभासमानत्वेऽपि वस्तुतो भेदाभावान्नोपासनाभेद इत्यर्थः । कथं तावन्योऽन्यस्मिन्प्रतिष्ठिताविंत्यपेक्षायां परस्परोपकार्योपकारकभावेनेत्याह आदित्योऽस्मिंश्चक्षुष्यध्यात्मे रश्मिभिः प्रकाशेनोपकुर्वन्प्रतिष्ठितः अयं च चाक्षुषः प्राणैश्चक्षुरादिभिरिन्द्रियैर्मण्डलं प्रकाशयन्नमुष्मिन्नादित्येऽधिदैवते प्रतिष्ठितः । इदानीं ज्ञातारिष्टः पुमान्कथं नाम हितमाचरेदित्यभिप्रायवती श्रुतिश्चक्षुरादित्यपुरुषप्रसङ्गागतमरिष्टदर्शनमाह सोऽस्मिञ्छरीरे भोक्ता विज्ञानमयो यस्मिन्काले प्राणास्त्यक्ष्यन्भवति तदा स विज्ञानमयश्चाक्षुष एतद्रविमण्डलं शुद्धमेव विरश्म्येव केवलं चन्द्रमण्डलमिव पश्यति उत्क्रमणकाले चाक्षुषादित्ययोरदृष्टनिबन्धनोपकार्योपकारकभावनिवृत्तेरौदासीन्येनावतिष्ठमानत्वादित्यर्थः । संसारिणः परलोकहिताय यत्नकर्तव्यत्वे सावधानार्थं प्रासङ्गिकमरिष्टदर्शनं प्रदर्श्येदानीं प्रकृतयोः परस्परोपकार्योपकारकत्वमुक्तं निगमयति नैनमिति एते रश्मय एनं चाक्षुषं पुरुषं न प्रत्यायन्ति स्वामिकर्मानुरोधेन पूर्वमागच्छन्तोऽपि तत्कर्मक्षये पुनर्नावर्तन्त इत्यर्थः ॥३॥ एवं स्थानद्वयसम्बन्धि सत्यब्रह्मणो ध्यानमुक्त्वा तस्यैव प्रत्येकं व्याहृत्यवयवकत्वेन ध्यानमाह कण्डिकाद्वयेन । प्रतितिष्ठत्यनयेति प्रतिष्ठा पादौ । सुवरिति वर्णविशेषेणैते अक्षरे द्वे । तस्य व्याहृत्यवयवस्य सत्यब्रह्मणोऽहरित्युपनिषद्रहस्यं नाम येनाभिधानेनाभिधीयमानं ब्रह्म लोकवदभिमुखी त्रति तदिदं नामेत्यर्थः उपास्तिफलमाह आङ्पूर्वस्य हन्तेर्जहातेर्वा अस् प्रत्यये कृते ह्रस्वत्वे चोपसर्गस्य टिलोपे च सति सिद्धमहरित्येतद्रूपं हन्तेर्जहातेश्चेति यो वेद स पाप्मानं हन्ति च त्यजति चेत्यर्थः ॥४॥ एवमाधिदैविकं व्याहृत्यवयवं ब्रह्मोक्त्वाध्यात्मिकमाह ॥५॥६॥८॥

तस्यैव सत्यब्रह्मणोऽशेषपापध्वंसकमुपासनान्तरमाह विद्युद्ब्रह्मेतीति । मेघान्धकारस्य विदानादवखण्डनाद्विदारणाद्विद्युत् पापहेत्वज्ञानान्धकारस्य विदारणाद्ब्रह्म विद्युदित्यर्थः । एनमुपासकं समस्तात्पापात् विद्यति अवखण्डयति पृथक्करोति ब्रह्मेति शेषः ॥१॥७॥८॥

उपाधीनामनेकत्वात्प्रत्येकमनेकविशेषणत्वाच्च तस्यैव प्रकृतस्य ब्रह्मणो मनउपाधिकस्योपासनं विधित्सन्ती श्रुतिराह । मनोमयो मनःप्रायो मनस्युपलभ्यमानत्वान्मनसा वोपलभमानत्वाच्च (भ्य Cod.) मनस्यहमित्यभिमानज्ञानवत्त्वाद्वा । भाःसत्यः भा एव सत्यं स्वरूपं यस्य भास्वरः सर्वार्थावभासकमनोमयत्वादित्यर्थः । तस्य ध्यानार्थमौपाधिकं स्वरूपं कथयन्ती स्थानविशेषमाह तस्मिन्प्रसिद्धेऽन्तर्हृदये हृदयमध्ये योगिभिर्दृश्यते । इदं वौपाधिकं परिमाणं

स्वाभाविकं वानन्त्यमेवेत्यभिप्रेत्य दार्ष्टान्तिकमाह एवमयमिति । एवंविधं मनोमयं ब्रह्मोपासतस्तादृग्रूपापत्तिरेव फलम् ॥ १ ॥ ८ ॥ ८ ॥

अथ पुनस्तस्यैव ब्रह्मणो वाङ्मयधेनुसम्बन्धेनोपासनं महाफलार्थमाह वाचमिति । वाक्शब्देनात्र वेदत्रयी ग्राह्या न तु करणम् तत्स्थानं वा तद्देवता वा तदन्यतमेषु स्वाहाकारादीनामसम्भवात् । हन्तशब्दोऽपेक्षितार्थवाचकः । स्वामिभ्यो धेनुः पय-इव वाग्धेनुरेतैश्चतुर्भि स्तनैर्देवेभ्योऽन्नं क्षरति । स्वाहावषड्भ्यां (भ्यो Cod.) हि देवेभ्यो हविर्दीयते हन्तेति हि मनुष्येभ्योऽन्नं प्रयच्छन्ति स्वधेति हि पितृभ्यः कव्यं ददति । कः पुनरस्याः प्रसूतिहेतुः सेक्ता को वा पुन स्तन्यप्रस्रवहेतुर्वत्स इत्यपेक्षायां तावाह तस्याः प्राण इति । प्राणेन हि बललक्षणेन वाक् प्रसूयते अप्राणस्य वागुच्चारणादर्शनात् तथा मनसा ह्यालोच्य वाक् स्वाहाकाराद्यर्थं क्षरति ॥ १ ॥ ९ ॥ ८ ॥

प्रकृतस्यैव ब्रह्मणः कौक्षेयाग्नित्वमापन्नस्यापरोक्षत्वं दर्शयितुं पुनरुपासनान्तरमाह अयमग्निर्वैश्वानर इति यदिदमद्यतेऽन्नं तद्येन पच्यते स विराडात्मा प्रजापतिर्जाठरोऽग्निरित्यर्थः । तत्सद्भावे किं मानमित्यपेक्षायामाह तस्येति तस्याग्नेरन्नं पचमानस्य एष शब्दो भवति । स घोषो यथोक्तवैश्वानरसद्भावे प्रमाणमित्यर्थः । एतं वैश्वानरमग्निं प्रजापतिरूपमुपासतः फलं तु तद्भावापत्तिरेवेति द्रष्टव्यम् प्रासङ्गिकमरिष्टदर्शनमाह स यदेति सोऽत्र शरीरे भोक्ता ॥ १ ॥ १० ॥ ८ ॥

एवं ब्रह्मोपासनानि कानिचित्सफलान्युक्तानि इदानीमब्रह्मोपासनानि कानिचित्फलवन्ति दर्शयति । व्याहितो व्याधियुक्तो ज्वरादिपरिगृहीतः सन् । व्याधिनाभिभूयमानस्तमनिन्दन्नविषीदंश्च संस्तपस्तप्यते मयेति बुद्धिं कुर्यादित्यर्थः । एवं चिन्तयतः किं फलं भवतीत्यपेक्षायामाह परममिति । परमं तपसोऽनुकूलं लोकं प्राप्नोति । तथोपासनान्तरमाह यं प्रेतं मामृत्विजो ज्ञातयो वारण्यं प्रत्यभिहरन्ति एतद्वै परमं तप इति मुमूर्षावस्थायां चिन्तयेत् वानप्रस्थवद्ग्रामादरण्यगमनसामान्यात् स तपोऽनुरूपं लोकं जयति । तथा पुनरुपासनान्तरमाह यं प्रेतं मां ज्ञातयोऽग्नौ प्रक्षिपन्ति एतद्वै परमं तप इति मरणात्प्रागेव चिन्तयेत् अग्निप्रवेशसामान्यात्सोऽग्निप्रवेशानुरूपं लोकं जयति । अत्र परमलोकशब्देन तत्तदुपासनयोग्यफलभेदस्य विवक्षितत्वान्नोपासनैक्यशङ्केति भावः ॥ १ ॥ ११ ॥ ८ ॥

इदानीमस्मिन्प्रकरणे उक्तानां सर्वोपासनानां गतिमनुक्तं फलं च दर्शयितुमिदं ब्राह्मणामारभ्यते । स च वायु स्तिमितरूपस्तिर्यग्भूतोऽभेद्योऽन्तरिक्षे तिष्ठंस्तस्मै सम्प्राप्ताय विदुषे तदर्थं तत्र स्वात्मनि विजिहीते स्वात्मावयवान्विगमयति छिद्रीकरोत्यात्मानमित्यर्थः यावत्प्रमाणं रथचक्रस्य खं छिद्रं तावत्परिमाणेन छिद्रेण स विद्वानूर्ध्व ऊर्ध्वमाक्रमते उपरि गच्छति । डम्बरो वादित्रविशेषः । एवमुपर्युपरि गच्छतः क्वत्र विश्राम इत्यपेक्षायां विराडात्मनीत्याह स लोकमिति ॥ १ ॥ १२ ॥ ८ ॥

इदानीं पुनः प्रकृतब्रह्मोपासनमेवानुवर्तयन्ती श्रुतिर्वि रमिति गुणद्वयविशिष्टान्नप्राणोपाधिकब्रह्मोपासनं विशिष्टफलकं विधातुमादावेतस्यैवोपास्यत्वनिर्णयार्थां युक्तिमाह । एकधाभूयमेकधाभावं भूत्वा गत्वा ॥ १ ॥ अन्नप्राणयोरेकत्वेन ब्रह्मदृष्टिः कार्येत्येतमर्थमितिहासोक्त्या द्रढयति तदेतदन्नप्राणैकत्वब्रह्मदर्शनं विद्वान्ह किल प्रातृदनामा ऋषीश्वरो दृष्टः सन्स्वपितरं प्रत्याह यथा मया ब्रह्म परिकल्पितमेवं ब्रह्म विदुषे साधु शोभनं पूजां किं स्वित्कुर्यात्

न किंचिदस्य कर्तव्यमिष्यतेऽनेन सर्वस्यापि प्राप्तव्यस्य प्राप्तत्वात् तथा अशोभनं वा न किंचिदपि कुर्यात् लोक इति शेषः अस्य निरस्ताशेषासाधुत्वात् । एवमन्नप्राणयोरेकत्वविज्ञानवतो न साधुकरणेन महत्वं नाप्यसाधुकरणेन खण्डितत्वम् किं तु तस्य कृतकृत्यत्वमेवेति पुत्रेणोक्ते सति नैतावन्मात्रविज्ञानात्कृतकृत्यता पुरुषस्य किंवस्ति ज्ञातव्यान्तरमित्यभिप्रेत्य पिता पुत्रं वारयतीत्याह स हेति । हस्तेन वारयन्मैवं वोच इति प्रत्यषेधयत् एनयोरन्नप्राणयोरेकधाभूयं भूत्वा कस्तु को वा विद्वान् परमतां गच्छति न कश्चिदपि तस्मान्नैवं वक्तुमर्हसि कृतकृत्योऽसावितीत्यर्थः ॥२॥ कथं तर्हि ज्ञानात्कृतकृत्यः स्यादित्यपेक्षायामन्नप्राणयोः सशक्तिकयोरेकत्वविज्ञानात्तथा स्यान्न केवलयोरेकत्वविज्ञानादित्याशयवान्पिता तयोः शक्तिभूतं गुणद्वयं क्रमेणोपदिष्टवान् तस्माऽइति तस्मै प्रातृदाय उ ह किल पिता वि रमित्येतदन्नप्राणयोः क्रमेण गुणद्वयमुवाचोपदिष्टवानिति योजना । सर्वभूताश्रयत्वलक्षणविशब्दवाच्यगुणकमन्नं सर्वभूतरतिलक्षणरम्शब्दवाच्यगुणकश्च प्राणस्तथाविधयोरेव तयोरेकत्वमापन्नयोः परमत्वमिति तथाविधमेव ब्रह्मोपासितव्यमिति समुदायार्थः ॥ ३ ॥ १३ ॥ ८ ॥

पुनस्तस्यैव ब्रह्मणः उक्थादिगुणपूगविशिष्टत्वेनोपासनमाह (उत्था° Cod.) । महाव्रताख्ये क्रतौ प्रधानभूतं शस्त्रमुक्थशब्दार्थः (मुत्थ Cod.) । किमात्मकं तदुत्थमित्यत (!) आह प्राण इति प्राणो ह्यध्यात्मेषु मुख्य उत्थं (!) च सर्वशस्त्राणां प्रधानमतः प्राण उत्थगुण (!) उपास्य इत्यर्थः । अप्राणस्योत्थानाशक्तेः अतः प्राण उत्थापनादुत्थमित्यर्थः । उत्थवित् (!) प्राणविद्वीरः पुत्रः । उत्थस्य (!) प्राणस्य सायुज्यम् ॥१॥ इदानीं प्राणस्य योक्तृतागुणवत्त्वेनोपासनमाह । प्राणे सति सर्वाणि भूतानि परस्परं युज्यन्ते अतो युनक्तीति यजुरिति योगवशात्प्राणो यजुरित्यर्थः । श्रैष्ठ्याय श्रेष्ठभावायायं नः श्रेष्ठो भवत्वित्यभिप्रायेण युज्यन्ते उद्यमं कुर्वन्ति ॥२॥ इदानीं प्राणस्य सर्वप्राणिसम्यग्गमनहेतुत्वगुणेनोपासनमाह । सम्यगच्छन्ति संगच्छन्ते इति सम्यञ्चि ॥३॥ इदानीं प्राणस्य पालकगुणत्वेनोपासनमाह । एनं देहपिण्डं प्राणो ह क्षणितोः शस्त्रादिहिंसितात्पुनर्मांसपूरणं कुर्वन्यस्मात्त्रायते पालयति तस्मात्क्षतत्राणात्प्राणो वै प्रसिद्धं क्षत्रम् । क्षत्रमात्रं प्राप्नोति प्राण एव भवतीत्यर्थः मात्रं कार्त्स्न्येऽवधारणे इत्यमरः यद्वा क्षत्रं प्राणं प्राप्नोति किंविशिष्टम् आ सामस्त्येन त्रायते पालयतीत्यात्रस्तम् ॥ ४ ॥ १४ ॥ ८ ॥

पूर्वं हृदयं सत्यमित्यादिबह्वुपाधिसमाश्रयं बहुफलकं ब्रह्मोपासनमुक्तम् इदानीं सर्वोपाध्युपसंहारिगायत्र्युपाधिकब्रह्मोपासनं वक्तुमिदं ब्राह्मणमारभ्यते । गायत्रीछन्दो हि सर्वछन्दसां प्रधानं तत्प्रयोक्तृवागादिप्राणत्राणसामर्थ्यात्सर्वछन्दःस्वरूपभूतप्राणात्मकत्वाच्च । किं च ब्राह्मणस्य गायत्रीतो जन्म श्रूयते श्रुत्यन्तरे तस्माद्गायत्र्याः प्रधानभूतत्वात्तदुपाधिकब्रह्मोपासनविधानायाह भूमिरिति । द्वियैरिति विश्लेषे सति । तत्सवितुर्वरेणियमिति वर्णविश्लेषेण । एकं पदं प्रथमः पादः । गायत्रीप्रथमपादस्य त्रैलोक्यनाम्नश्च संख्यासामान्यप्रयुक्तं कार्यमाह अस्या गायत्र्या एतत्प्रथमपादस्वरूपम् ह खलु एतदेव भूम्यादित्रैलोक्यलक्षणमेवेत्युपासीतेत्यर्थः ॥१॥ एवं प्रथमपादे भूम्यादिलक्षणाशेषरूपराश्युपसंहार उक्त इदानीं द्वितीयपादे नामराश्युपसंहारमभिप्रेत्य तस्य त्रैविद्यात्मकत्वमाह । त्रय्या विद्यया यावत्फलजातमवाप्यते तावद्ध खलु गायत्र्या द्वितीयं पादमेवं विद्वाञ्जयति ॥२॥ अथ तृतीयपादे कर्मोपसंहारमभि-

प्रेत्य तस्य त्रैलोक्यत्रैविद्यात्मकसर्वजगद्विधृतिलक्षणप्राणाद्यात्मकत्वमाह । प्राणः अपानः वियान इति विश्लेषेण । एवं नामरूपकर्मात्मकं जगद्गायत्रीपादत्रयात्मनोपसंहृतम् ॥३॥ इदानीमभिधानरूपायास्त्रिपदाया गायत्र्या अभिधेयभूतादित्यात्मकहिरण्यगर्भाभिधानाय चतुर्थं पादमारभते । अथ शब्दात्मकगायत्रीकथनानन्तरमस्याः प्रकृतायास्त्रिपदाया गायत्र्या अभिधेयभूतमेतदेव वक्ष्यमाणमित्यर्थः । तुरीयादिपदानां गूढार्थत्वात्स्वयमेव तत्तत्प्रतीकग्रहणेन व्याकुर्वन्ती श्रुतिस्तावत्तुरीयपदस्यार्थमाह यद्वाऽइति । अनन्तरं पदं गृहीत्वा व्याकरोति दर्शतमिति एष मण्डलान्तर्गतः पुरुषो हि यस्माद्दृदशऽइव दृश्यते-इव न तु साक्षाद्दृश्यते ईश्वरस्यातीन्द्रियत्वादतस्तद्दर्शतं पदमित्युच्यतऽइत्यर्थः । प्रवृत्तिकारणीभूतः सङ्गात्समुत्पद्यमानो रञ्जनात्मको रागो रज इत्युच्यते यद्वा सर्वे लोका रजःशब्देनोच्यन्ते रज्यमानत्वात् सर्वमिव वै प्रसिद्धं रजोजातमुपर्युपरि हि यस्मादेष सविता तपति रजःशब्दवाच्यात्सर्वस्माडुपरिष्टादेव तपन्वर्ततऽइति यावत् अतो रजसः पर इति परोरजा उच्यतऽइत्यर्थः । श्रिया वसुदोह्या ॥४॥ एवमभिधानाभिधेयात्मिकां गायत्रीं व्याख्यायाभिधानस्याभिधेयतत्त्वमाह सैषा त्रैलोक्यत्रैविद्यसर्वप्राणस्वरूपत्वेनोक्ता त्रिपदा गायत्री एतस्मिन्नुक्तलक्षणे मूर्तामूर्तरसभूते आदित्ये प्रतिष्ठिता । सत्येऽध्यात्मे प्रतिष्ठिता बोद्धव्या । किं पुनस्तत्सत्यमित्यत आह चक्षुरिति । तस्य सत्यत्वं सर्वजनानुभवप्रमाणसिद्धमित्युपपादयति तस्मादिति । सत्यप्रतिपत्तिहेतुत्वाच्चक्षुः सत्यं तस्मिन्सत्ये चक्षुषि त्रिपदा गायत्री प्रतिष्ठितेति वाक्यार्थः ॥५॥ सत्यस्यापि स्वातन्त्र्यं वारयति तदिति । एवं त्रिपदा गायत्र्यधिदैवते आदित्ये प्रतिष्ठिता सा चाध्यात्मं चक्षुर्द्वारा प्राणे प्रतिष्ठितेत्येवं प्रणाड्या गायत्र्याः सूत्रात्मत्वं सिद्धम् अध्यात्ममध्यात्मे सर्वविदाद्यात्मके सूत्रात्मभूते प्राणे प्रतिष्ठिताऽतोऽध्यात्मप्राणरूपा सती जगत आत्मा ॥६॥ इदानीं गायत्रीनामनिर्वचनेन तस्या जगज्जीवनहेतुत्वमाह । सैषा ईश्वरात्मिका गायत्री । गायन्तीति गयाः । तत्रे त्रातवती रक्षितवती । प्राणा वागादयो गयाः शब्दनिष्पत्तिहेतुत्वात् । एवं गायत्र्याः प्राणजीवनत्वमुक्त्वा तस्या (स्मा Cod.) एव ब्राह्मण्यमूलत्वेन स्तुत्यर्थमाह स आचार्योऽष्टवर्षं माणवकमुपनीय याममूं गायत्रीमेव पादशोऽर्धर्चशः समस्तां चान्वाह अनुवक्ति पच्छोऽर्धर्चशः सर्वां च तृतीयेन सहानुवर्तयन्निति गृह्यवाक्यात् (पारस्कर॰ २. ३.) सा माणवकायोपदेष्टव्या प्रसिद्धा एषैवोक्तजगत्प्राणात्मिका गायत्र्येव नान्येत्यर्थः । कुत एषा गायत्र्येवेति निश्चय इत्यत आह स गायत्र्युपासक आचार्यः सादरः सन्यस्मै बटवे इमां गायत्रीमन्वाहानुवक्ति तस्य प्राणान्सा नरकादिपतनाद्यस्मात्त्रायते तस्माद्गायत्र्येवेति निश्चयो नात्र संदेहः ॥७॥ मतान्तरं दृष्ट्वा बटवऽउपदेश्या गायत्री इयमेव भविष्यतीति विभ्रमो मा भूदित्यभिप्रेत्य मतान्तरं दूषयितुमुपन्यस्यति । एके शाखिनः तत्सवितुर्वृणीमहे वयं देवस्य भोजनम् श्रेष्ठं सर्वधातमं तुरं भगस्य धीमहीत्यनुष्टुप्छन्दस्कां तां प्रसिद्धां सावित्रीं सवितृदेवताकामुपनीतायान्वाञ्जनुवदन्ति । वागनुष्टुबिति तद्य एव वातो महिमेत्यग्निरहस्ये (१०. ३. १. ४.) प्रतिपादितत्वादनुष्टुब्वाक् तस्याश्च वाचः साक्षात्सरस्वतीरूपत्वाद्वागात्मिकानुष्टुबेव बटवे वक्तव्या तत्समर्पणे हि सरस्वती समर्पिता स्यादतो वयमेतदनुष्टुब्लक्षणां वाचं सरस्वतीमेवापेक्ष्यमाणां माणवकायानुब्रूम इति वदन्तस्तामेवोपदिशन्ति । तन्मृषैव गायत्रीमेवानुब्रूयात् तदुपदेशे हि सर्वमपि पुमर्थसाधनजातं बटवऽउपदिष्टं स्यात्तस्यास्त्रैलोक्यत्रैविद्यसर्वप्राणात्मकत्वकथनेन

सर्वात्मकत्वस्योक्तत्वात् अनुष्टुब्रुपदेशे तु सरस्वतीमात्रमेवोपदिष्टं स्यात् । एवं प्रसङ्गाद्गायत्रीं निश्चित्येदानीं गायत्रीज्ञानफलकथनाभिप्रायेण तद्विदं स्तौति यदीति यद्यपि उक्तलक्षणगायत्रीवित् बह्विव प्रतिगृह्णाति तथापि तत्प्रतिग्रहजातं गायत्र्या एकमपि पदं प्रति पादविज्ञानफलं प्रति नैव ह किल पर्याप्तम् दूरतस्तु दोषाधायकत्वं तस्येत्यर्थः ॥८॥ एवं गायत्रीविदः प्रतिगृह्णतः सामान्येन दोषाभावमुक्त्वा विशेषतोऽपि तमाह । प्रथमपादविज्ञानफलं तेन भुक्तं स्यान्न त्वधिकदोषोत्पादकः स प्रतिग्रहः । शेषमेवमेव व्याख्येयम् । तथा च त्रैलोक्यावच्छिन्नस्य त्रैविद्यावच्छिन्नस्य सर्वप्राण्यवच्छिन्नस्य च प्रतिग्रहे पादत्रयविज्ञानफलमेवानेन भुक्तं स्यात् नाधिकदोषभाक्त्वं तस्येति गायत्रीविज्ञानस्तुत्यर्थमेव श्रुत्यैवं कल्पयित्वोच्यते न तु वस्तुत एवं दाता प्रतिग्रहीता वा सम्भवति यद्यप्येवं सम्भाव्यते तथापि नासावस्य प्रतिग्रहेऽपराधक्षम इति स्तुतिसिद्धेः एवं च सति न शूद्राद्युपादानकप्रतिग्रहनिषेधकशास्त्रविरोध इत्यर्थः । यथैवं सम्भावितप्रतिग्रहादिना पादत्रयविज्ञानफलक्षय एवं तुरीयपादविज्ञानस्य फलक्षयः सम्भावयितुमपि न शक्यते तत्फलस्यानन्त्यादित्याह अथास्या इति तत्फलं केनापि प्रतिग्रहादिना नैव प्राप्यं तेन न तत्क्षयः स्यादित्यर्थः चतुर्थपादविज्ञानसमानप्रतिग्राह्यस्य वस्तुनोऽसम्भवात् ॥९॥ एवमुक्तगायत्र्युपासनासंग्रहविषयमेव मन्त्रमैहिकफलविशेषोपायकथनार्थमवतारयति । त्रैलोक्यात्मकपादेनैकपदी भवसि त्रैविद्यरूपपादेन त्वं द्विपदी प्राणाद्यात्मकपादेन त्वं त्रिपदी मण्डलान्तर्गतपुरुषलक्षणेन पादेन त्वं चतुष्पदी । परेण निरुपाधिकेन स्वेनात्मनापदसि पद्यसे ज्ञायसे येन तत्पदं न विद्यते यस्याः सा त्वमपदसि कुतः हि यस्मात् केनापि न पद्यसे न ज्ञायसे नेतिनेत्यादिलक्षणत्वात् तादृग्रूपस्य च चक्षुराद्यविषयत्वात् अतस्त्वमपदसीति । अथ पादत्रयापेक्षया चतुर्थपादस्य प्राधान्यमभिप्रेत्य तस्य नमस्करणमुच्यते नम इति । एवं नमस्करणमुक्त्वा शेषेण यथोक्तनमस्कारप्रयोजनमुच्यते असौ शत्रुः पाप्मा त्वत्प्राप्तिविघ्नकरः अदः पाप्मरूपस्य शत्रोर्यत्त्वत्प्राप्तिविघ्नकर्तृत्वं मम तच्च मा प्रापत् मा प्राप्नोतु इतिशब्दः पापक्षयफलोपस्थानमन्त्रपरिसमाप्त्यर्थः । इदानीं प्रवृद्धद्वेषवन्तं प्रत्युक्तोपस्थानमन्त्रे [ऊ]हप्रदर्शनेनाभिचारिकमुपस्थानान्तरमाह असौ शत्रुरमुकनामेति तस्य नाम गृहीत्वा अस्मै अमुकनाम्ने शत्रवे कामोऽभिलषितोऽर्थो मा समर्धि समृद्धिं मा प्राप्नोतु तथा चासावदो मा प्रापदित्यस्य स्थाने असावस्मै कामो मा समर्धीत्यूहं कृत्वा गायत्र्यसीत्यादिपूर्वोक्तेन मन्त्रेणाभिचरन्नुपतिष्ठेतेति वाक्यार्थः । यस्मै यदर्थमेवमुपतिष्ठते तस्मै शत्रवे । कामिनं प्रत्याभ्युदयिकमुपस्थानान्तरमाह अहमदो देवदत्ताभिलषितं मदभिलषितं वा प्रापं प्राप्नुयाम् ॥१०॥ गायत्रीमुखज्ञानमन्तरेण तद्विज्ञानं पूर्णं न भवतीत्यतस्तद्विधानार्थं तत्स्तुतिभूतमर्थवादं तावदाह । यन्नु इति वितर्के हो अहो आश्चर्यमेतत् तदिति यदर्थो यत्त्वं गायत्रीविदस्मीत्यब्रूथा अथ पूर्वापरविरुद्धमिदं तर्हि कथं प्रतिग्रहदोषेण हस्तीभूतो हस्ती भूत्वा वृथाभिमानं वहसि । गायत्रीवित्त्वं प्रतिग्रहवहनं चेति परस्परविरुद्धम् । न विदां चकार नाज्ञासिषम् ॥११॥ एवं वदन्तं प्रति राजा मुखमुपदिशति तस्या इति । एवमुक्तस्य गायत्रीमुखविज्ञानस्य फलं सदृष्टान्तमाह एवंविदुपासकः स्वयमग्निमुखगायत्र्यात्मा सन्यद्यपि बह्विव बह्वेव पापं प्रतिग्रहादिदोषं करोति तत्सर्वं पापजातं सम्प्साय सम्यक् भक्षयित्वाग्निवत् शुद्धः पापस्पर्शरहितः पूतश्च प्रतिग्रहजनितपापफलसम्बन्धरहितः सम्भवति ॥१२॥ १५॥८॥

ओंकारो दमादित्रयं वाय्वादिदेवतायाचनपूर्वकमग्न्युपासनं ब्रह्माब्रह्मोपासनानि तत्फलं तदर्थावगतिरित्येतेऽर्था अस्मिन्निखिलकाण्डे पञ्चमाध्याये निर्वर्त्ताः सम्प्रति प्राधान्येन ब्रह्मोपासनानि सफलानि श्रीमन्थादिकर्म च सर्वं वक्तव्यमित्येतदर्थं षष्ठोऽध्यायः प्रवर्तते । तत्र कर्मकाण्डे ज्ञानकाण्डे वा यद्वस्तु प्राधान्येन नोक्तं तदस्मिन्काण्डे वक्तव्यम् अस्य खिलाधिकारत्वात् तथा च तदुक्तमिदं श्वेतकेतुब्राह्मणमिति सामान्यसंगतिः । पूर्वं द्वया हेत्युद्गीथब्राह्मणे (४. १. १.) स्वाभाविकज्ञानकर्मलक्षणः पाप्मा सूचितः परं तु तस्येदं कार्यमिति विपाकस्तु नोक्तः । तथा शास्त्रीययोरपि ज्ञानकर्मणोः केवलेन कर्मणा पितृलोको विद्यासहितेन विद्यामात्रेण वा देवलोक इति विपाको ब्रह्मविद्यारम्भप्रयोजकीभूतवैराग्यसिद्ध्यर्थं त्र्यन्नात्मप्रतिपत्त्यन्तेन ग्रन्थेन प्रदर्शितः अस्य तु विपाकस्य प्रतिपत्तिमार्गो नोक्तः स च वक्तव्यः । तथा पञ्चमाध्याये च ज्ञानकर्मसमुच्चयकारिणा मुमूर्षुणाग्ने नय सुपथेति (८. ३. १.) मार्गयाचनं कृतम् तत्र सुपथेति विशेषणादनेकेषां पथां सद्भावो मन्त्रेण प्रदर्शितः एतावन्तः कर्मविपाकप्रतिपत्तिमार्गा इति तु नोक्तम् अतो विहितस्य केवलस्य कर्मणस्तत्सहितस्य च ज्ञानस्य निषिद्धयोश्च तयोः क्रमेण दक्षिणोदगधोमार्गा इति कथनायेदं ब्राह्मणं प्रवर्तते इत्येका विशेषसंगतिः । एतावदरे खल्वमृतत्वम् अमृतत्वस्य तु नाशास्ति वित्तेनेत्यत्र (५. ४. २.) कर्मव्युदासेन ज्ञानमेवामृतत्वसाधनमित्युक्तं तत्र हेतुर्नोक्तस्तत्कथनायेदं ब्राह्मणमित्यपरा विशेषसंगतिः । आख्यायिका तु धनं मानं च हित्वा यत्नपूर्वकं वृद्धेन ब्राह्मणेनाब्राह्मणादपीयं पञ्चाग्निविद्या गृहीतेति तस्या स्तुत्यर्थं प्रणीता ॥ पित्रा मत्तः सकाशादधीतविद्यादार्ढ्यार्थं त्वं विद्वज्जनान्प्रति गत्वा परीक्षां कुर्वित्यनुज्ञातः सन् स्वकीयविद्याख्यापनाय विद्वत्सभां पर्यटमानः पञ्चालानां विद्वज्जनविशिष्टत्वेन प्रसिद्धानां देशविशेषाणां सभामाजगाम । आगत्य ब्राह्मणान्विद्योत्कर्षवशाज्जित्वा राजानमपि जेष्यामीति गर्वेण जैवलं जीवलस्यापत्यं पञ्चालानां राजानं परिचारयमाणं स्वभृत्यैरात्मनः परिचर्यां कारयन्तं प्रत्याजगाम । स तु राजा पूर्वमेव तस्य विद्यागर्वं श्रुत्वा शमादिब्राह्मणधर्माद्व्युत्थितत्वात्सन्मार्गप्रवृत्त्यर्थं विनेतव्योऽयमिति मत्वा तमुदीक्ष्योत्प्रेक्ष्यागतमात्रमेव कुमारा३इति बालवत्सम्बोध्याभ्युक्तवान्पुतेर्भर्त्सनार्थत्वाद्भर्त्सितवान् । यद्यपि भो इति प्रतिवचनमाचार्यं प्रत्येवोचितं न क्षत्रियं प्रति तस्य हीनत्वात् तथापि क्रोधवशात्तथा प्रतिवचनं कृतवान् ॥१॥ प्रयत्यो म्रियमाणाः । नाडीरूपेण साधारणेन मार्गेणाभ्युदयं गच्छतां यत्र मार्गे द्वैविध्यप्रतिपत्त्या विप्रतिपत्तिस्तद्विप्रतिपत्तिविषयं मार्गं किं जानासि ॥२॥ आपः पुरुषाकारपरिणताः सत्यः पुरुष इति वाक् वाचकभूता यासां ताः पुरुषवाचः पुरुषशब्दवाच्या भूत्वा सम्यगुत्थायोद्भूताः सत्यो यथा वदनादिव्यापारं कुर्वन्ति । प्रतिपद्यतेऽनयेति प्रतिपत्साधनम् किं तत्प्रतिपच्छब्दवाच्यमित्यपेक्षायां श्रुतिः स्वयमेव तदाह यत्कृत्वेति यत्कर्म कृत्वा ॥३॥ ननु मार्गद्वयमेव नास्ति तत्सद्भावे प्रमाणाभावात्त्वं तूत्प्रेक्षामात्रेण मद्व्यामोहार्थं पृच्छसीत्याशङ्कायामाह अपि हीति । ऋषेर्मन्त्रस्यापि वचो वाक्यं नोऽस्माकं श्रुतमस्ति । मर्त्यानां मनुष्याणां द्वे सृती द्वौ मार्गौ श्रुतवानस्मि तयोर्मध्ये एका पितृलोकप्रापिका द्वितीया तु देवलोकप्रापिका । मध्यमकाण्डे तृतीयप्रपाठकान्त्यब्राह्मणे (१२. ८. १. २१.) द्यावापृथिव्योः पितृमातृत्वमुक्तम् ॥४॥ पुरा समावर्तनकाले । राज्ञः पुत्रा राजन्यास्ते बन्धवो यस्य स राजन्यबन्धुः राजन्याभास इति परिभववचनमेतत् । प्रतीकानि

मुखानि प्रश्नानामेकदेशान् ॥५॥ जीवलस्यापत्यं जैवलिः । पुरोधसा सार्धं मन्त्रपूर्वकमर्घं चकार मधुपर्कं कृतवान् ॥७॥ बहुतरस्यापि हिरण्यस्यापात्तं प्राप्तमस्ति एतत्त्वयापि ह किल विज्ञायते । प्रवाराणां परिवाराणां परिधानानां परिधानयोग्यक्षौमादीनाम् । अन्यस्मिन्नर्थिजने वदान्यो दानशीलो भूत्वा नोऽस्मानेवाभि अभिलक्ष्यास्मान्प्रति अवदान्यः कदर्यो विभवे सत्यदाता मा भूद्भवान् । तीर्थेन उपसदनशास्त्रविहितेन मार्गेण । उपैमि शिष्यत्वेनोपगच्छामि । पूर्वे किल ब्राह्मणा विद्यामर्थयमानाः सन्तः क्षत्रियान्वैश्यान्वा विद्याप्राप्त्यसम्भवावस्थायां शिष्यवृत्त्या वाचैवोपगच्छन्ति स्म नोपायनशुश्रूषादिभिरित्यर्थः ॥१०॥ उपायनमुपगमनं पादोपस्पर्शनं तस्य कीर्त्या कीर्तनमात्रे उक्तवान् नोपायनमकारयदित्यर्थः । तव च पितामहा अस्मत्पितामहेषु यथापराधं क्षमन्ते स्म तथा त्वमपि नोऽस्मान्प्रति मापराधा अपराधं मा कार्षीः अस्मदीयोऽपराधः क्षन्तव्यः पितामहानां वृत्तमस्मास्वपि भवता रक्षणीयमित्यर्थः । सर्वदा क्षत्रियपरम्परयैवेयमागतेति कृत्वा सा स्थितिर्मयापि रक्षणीया यदि शक्यते रक्षितुम् ॥११॥ इदानीं मनुष्यजन्मस्थितिलयानां यतिथ्यामित्यादिचतुर्थप्रश्ननिर्णयाधीनतया तस्य प्राधान्यात्प्राथम्ये सति अर्थक्रममाश्रित्याविवक्षितं पाठक्रमं भङ्क्त्वा चतुर्थप्रश्नस्यैव निर्णयमाह । द्युलोक आहवनीयोऽग्निः । आदित्येन हि द्युलोकः समिध्यतेऽत इन्धनत्वसामान्यादादित्ये समिद्दृष्टिः कार्या । रश्मयो धूमः तयोरादित्यसमिद्भ्यामुद्भवसामान्यात् अहरर्चिरुभयोः प्रकाशात्मत्वसामान्यात् चन्द्रमा मण्डलात्मा अङ्गारः (!) उभयोरुपशान्तत्वसामान्यात् नक्षत्राणि विष्फुलिङ्गा अग्निकणाः विक्षेपात्मत्वसामान्यादल्पप्रकाशकत्वसामान्याद्वा । तस्मिन्नेवं गुणविशिष्टे द्युलोकाग्नौ देवा इन्द्रादयः श्रद्धां द्रव्यस्थानीयां प्रक्षिपन्ति तस्या आहुतेः सकाशात्सोमः पितृणां ब्राह्मणानां च राजाधिपतिः उत्पद्यते । ननु कथं द्युलोकादेराहवनीयाग्नित्वम् कथं च कर्मानधिकारिणामिन्द्रादीनां होमकर्तृत्वम् कथं वा प्रत्ययरूपायाः श्रद्धाया होम्यत्वम् कीदृग्विधो वा तस्य होमः कश्च पुनः सोमः कीदृशो वा तस्य सम्भव इति । उच्यते । यथा जीवदवस्थायामाहवनीयादिविष्फुलिङ्गान्तैः साधनैर्विशिष्टमग्निहोत्रं हुतं तथैव तदग्निहोत्रम् शरीरपातादूर्ध्वमपूर्वीभूतमव्याकृतावस्थमपि प्रातिस्विकशक्तियुक्तैः सूक्ष्मैस्तैः साधनैर्विशिष्टमेव सत् अस्माल्लोकादमुं लोकमुत्क्रम्य तथैवाहवनीयस्थानीयं द्युलोकमारभते ते वाऽएतेऽआहुती हुतेऽइत्याद्यष्टाध्यायोकाण्डे (११. ६. २. ६-७.) श्रुतत्वात् अतो युक्तमसौ वै लोकोऽग्निरिति द्युलोकस्याहवनीयाग्नित्ववचनमिति । यऽएव जीवदवस्थायां यजमानस्याध्यात्मिकाः प्राणा अग्निहोत्रस्य होतारोऽभूवन् तऽएव तच्छरीरान्ते तत्कर्मफलभोगाय द्युलोकपर्जन्यादिसम्बन्धयोग्याकारेण परिणममाना आधिदैविकरूपमापन्ना इन्द्रादिशब्दवाच्याः सन्तोऽग्निहोत्रकर्मफलपरिणामकाले तद्धोतृत्वलक्षणं तत्र-तत्र होतृत्वं प्रतिपद्यन्तऽइति युक्तं देवा जुह्वतीति वचनमिति । तथात्र श्रद्धाशब्देन भूतान्तरसहिता आप एवोच्यन्ते श्रद्धा वाऽआप इति श्रुतेः ताश्च द्रवद्रव्यत्वात्पयःसोमादिलक्षणा एवेत्यवोचाम (८. ६. १.) अतो युक्तं श्रद्धाया होम्यत्ववचनमिति । तासां चापां कर्तुः शरीरारम्भाय द्युलोकं प्रति प्रवेशनमेव होम इत्युच्यतऽइति । सोमो नाम चन्द्रमण्डलवर्ती प्रकाशात्मा पुरुषः ननु चन्द्रसोमयोः को विवेक इति चेत् शृणु चन्द्र इत्यप्रकाशस्वरूपं मण्डलमुच्यते चन्द्रशब्दवाच्याभ्रकेण तुल्यरूपत्वात् प्रकाशस्वभावो वृद्धिक्षयधर्मा श्वेतस्तदन्तर्गतो देवः सोम इत्यभिधीयते सोमशब्दवाच्यलतागतवृद्धिक्षयवत्त्वसामान्यात्

अतो मण्डलात्मत्वेन तदन्तर्गतत्वेन च चन्द्रसोमयोर्विवेक इत्यनवद्यम् कृत्स्नपक्षे क्षीयमाणः सोमोऽमावास्यायामादित्यान्तर्गतः संस्तद्गततेजसा शुक्लपक्षे क्रमेणाप्यायते तदेतदाप्यायनं सोमलोके कर्तृशरीरात्मकस्य सोमस्य सम्भव इति द्रष्टव्यम् ॥१२॥ स सोमः पर्जन्याग्नौ हुतः सन्वृष्टिरूपेण परिणमतऽइत्याह । पर्जन्यो वृष्ट्युपकरणाभिमानिदेवतात्माग्निः स च आहुत्यावृत्तिक्रमेण द्वितीय आहुत्याधारः । तस्य संवत्सर एव समित् संवत्सरेण हि शरदादिग्रीष्मान्तैः स्वावयवैर्विपरिवर्तमानेन पर्जन्याग्निर्दीप्यते । अभ्राणि धूमः तेषां धूमप्रभवत्व-प्रसिद्धेर्धूमवदुपलक्षकत्वाद्वा । विद्युदर्चिः प्रकाशनसामान्यात् अशनिः प्रकाशाश्रयभूतोऽङ्गारः(!) उपशान्तत्वकठिनत्वसामान्याभ्याम् ह्रादुनयः स्तनयित्नुशब्दा विष्फुलिङ्गाः विक्षेपानेकत्वसामान्याभ्याम् ॥१३॥ एवमुत्पन्ना वृष्टिरस्मिँल्लोके हुता सत्यन्नरूपेण परिणमतऽइत्याह । अयं लोकः पृथिव्यभिमानिदेवताया देहभूतः प्राणिजन्मोपभोगाश्रयः क्रियाकारणफलविशिष्टस्तृतीयोऽग्निः । तस्याग्नेः पृथिव्यभिमानिदेवतैव समित् तया ह्ययं लोकोऽनेकप्राणिभोगसम्पन्नतया समिध्यते । वायुर्धूमः उभयोः पार्थिवद्रव्याश्रितत्वेनोत्थानसामान्यात् । रात्रिरर्चिः उभयोः समित्सम्बन्धप्रभवत्वसामान्यात् अग्नेः समित्सम्बन्धेन ह्यर्चिः सम्भवति तथा एतल्लोकरूपाग्नेः पृथिवीरूपसमित्सम्बन्धेन च रात्रिस्तस्याः पृथिवीछायारूपत्वात् । दिशोऽङ्गारा उभयोरुपशान्तत्वसामान्यात् अवान्तरदिशो विष्फुलिङ्गा उभयोर्विक्षेपात्मत्वसामान्यात् ॥१४॥ तदन्नं पुनः पुरुषाग्नौ हुतं सद्रेतोरूपेण परिणमतऽइत्याह । प्रसिद्धः शिरःपाण्यादिमान्पुरुषश्चतुर्थोऽग्निः । तस्य व्यात्तं विवृतं मुखं समित् समिधाग्निरिव पुरुषोऽपि वचनस्वाध्यायादौ विवृतेन मुखेन दीप्यते । प्राणोऽध्यात्मवायुर्धूमः मुखसमिद्भ्यामुत्थानसामान्यात् वाक् शब्दोऽर्चिः उभयोरभिधेयव्यञ्जकत्वसामान्यात् । चक्षुरङ्गारः(!) उपशमसामान्यात्प्रकाशाश्रयत्वसामान्याद्वा । श्रोत्रं विष्फुलिङ्गा विक्षेपसामान्यात् । देवा आध्यात्मिका वागादयस्ते स्वेनाधिदैविकरूपेण देवत्वाद्देवाः ॥१५॥ तत्तु रेतः पुनर्योषाग्नौ हुतं सत्पुरुषाकारेण परिणमतऽइत्याह । योषा स्त्री पञ्चमोऽग्निः । तस्या उपस्थ एव समित् तेन हि योषित्समिध्यते लोमानि रोमाणि धूमः उभयोरुपस्थसमिद्भ्यामुत्थानसामान्यात् योनिरिन्द्रियाश्रयप्रदेशोऽर्चिः वर्णसामान्यात् यत्कर्म अन्तः करोति मैथुनव्यापाररूपं ते अङ्गाराः ते खल्वग्नेरुपशान्तिहेतवस्तथेदमपि कर्म योषिदग्नेः पुरुषस्य च तेजोवीर्यादिनाशकत्वेनोपशान्तिकरमतस्तस्मिन्कर्मण्यङ्गारदृष्टिर्युक्ता । तस्मात्कर्मण उत्पन्ना अभिनन्दाः सुखलवा विष्फुलिङ्गाः क्षुद्रत्वसामान्यात् । एतावता ग्रन्थेन वेत्थ यतिथ्यामिति चतुर्थप्रश्नस्याग्निहोत्रे हुताः पयोघृतादिलक्षणा आपो भूतसूक्ष्मलक्षणा भूतान्तरसहिताः पूर्वोक्ताग्निपरिपाकतः सूक्ष्मत्वं हित्वा करचरणादिरूपेण विपरिणम्य स्थूलतां गच्छन्त्यः पुरुषाख्यां लभन्तऽइत्येतादृशो निर्णय उक्त इत्यर्थः । एवम्भूतस्य स्वाभाविकं व्यापारमाह स जायतऽइति यावत्कालपर्यन्तमस्मिञ्छरीरे स्थितिनिमित्तं कर्म विद्यते तावत्कालं जीवते जीवननिमित्तकर्मक्षये सति यस्मिन्काले म्रियते तदा एनं मृतं पुरुषमग्न्यर्थमन्त्याहुत्यै ऋत्विजो हरन्ति निक्षिपन्ति ॥१६॥ एवं पञ्चाग्निविदो गतिं विवक्षुर्वक्ष्यमाणगत्युपयोगिदेहप्रदर्शनार्थमन्त्येष्टिं निरूपयन्ती श्रुतिरेवमग्निजत्वात्तद्धयत्वाच्च पुरुषस्याहमग्न्यात्मेति ध्यानसिद्धये षष्ठमग्निमन्त्याहुत्यधिकरणं प्रसिद्धमेव प्रसिद्धसमिदादिविशिष्टमनारोपितं दर्शयति तस्याग्निरिति । देवा ऋत्विजः । भास्वरवर्णोऽतिशयदीप्तिमान्सात्त्विकः पुरुषः उत्पद्यते । निषेकादिभिरन्त्याहुत्यन्तैः कर्मभिर्दर्श-

नविशिष्टैः संस्कृतत्वादयं भास्वरवर्णः केवलकर्मिणां राजसानामुभयहीनानां तामसानां च पित्रादिलोककीटादिदेहप्राप्तेर्वक्ष्यमाणत्वादित्यर्थः ॥१७॥ एवं पञ्चाग्निविदो मृतस्य गतिं वक्तुं मार्गविप्रतिपत्तितत्साधनविषययोः प्रथमपञ्चमयोर्निर्णयार्थमाह । ते ये विदुरिति बहुवचनात्त्रैवर्णिका गृहस्था एवाधिकारिणः पञ्चाग्निदर्शने तस्य गृहस्थकर्मसम्बद्धत्वात् अत एव ये चामी अरण्ये वानप्रस्थाः श्रवणाद्यनधिकृता आश्रमधर्ममात्रनिरताः संन्यासिनश्च श्रद्धामितिकर्तव्यतया प्राप्तामनुष्ठाय सत्यं सत्याख्यं ब्रह्मोपासते इति तेषां पृथक्साधनाभिधानम् सम्यग्ज्ञाननिष्ठानां परमहंसानां तु न तस्मात्प्राणा उत्क्रामन्तीति (७. २. ८.) श्रुतिप्रामाण्यात्प्राणोत्क्रमणाभावेन देवयानमार्गप्रवेशाभावात्तत्साधनेऽनधिकारात् नैष्ठिकब्रह्मचारिणामपि गुरुपरतन्त्रतयोपासने स्वातन्त्र्याभावात् तेषां चोत्तरमार्गप्रतिपत्तिस्तु गुरुशुश्रूषापूर्वकगुरुकुलवासादेव सम्भवति । अष्टाशीतिसहस्राणां मुनीनामूर्ध्वरेतसाम् उत्तरेणार्यम्णः पन्थास्ते ऽमृतत्वं हि भेजिरे इति स्मृतेः । अतः परिशेषाद्गृहस्थानामेवाधिकारः । अर्चिःशब्देनात्रार्चिरभिमानिनी देवतोत्तरमार्गलक्षणा गृह्यते न तु ज्वलनात्मनोऽर्चिषो ग्रहणम् तस्यास्थिरत्वात्परिव्राजकानां च साक्षात्तत्सम्बन्धाभावाच्च । अतोऽर्चिरभिमानिदेवतामेवाभिसम्भवन्ति प्रतिपद्यन्तऽइत्यर्थः । ततः क्व गच्छन्तीत्यपेक्षायामहरादिदेवताप्राप्तिक्रमेणापुनरावृत्तिलक्षणं हिरण्यगर्भलोकं गच्छन्तीत्याह अर्चिष इति । अत्राहरादिशब्दैस्तत्तदभिमानिन्यो देवता एव विवक्षिता न तु कालविशेषाः । अनेन क्रमेण विद्युद्देवतां प्राप्तांस्तानुपासकान्वैद्युतात्सकाशान्मानसो ब्रह्मणा मनसा सृष्टो ब्रह्मलोकवासी पुरुषः कश्चिदेत्यागत्य ब्रह्मलोकान्गमयति नयति । ब्रह्मलोकाख्यस्य सूत्रदेहस्य सामान्यविशेषात्मना बहुत्वमपेक्ष्य बहुवचनप्रयोग उपासनातारतम्यात् सायुज्यसमानैश्वर्यसालोक्यापेक्षया वा । ते ब्रह्मलोकान्प्राप्ता उपासकास्तेषु ब्रह्मलोकेषु स्वयं पराः प्रकृष्टाः सन्तः परावतः प्रकृष्टान्ब्राह्ममानमितान्संवत्सरान्ब्रह्मायुरवधिकान्शतसंख्याकान्वसन्ति तेषामुपासकानामिहास्मिन्कल्पे पुनरावृत्तिर्नास्ति कल्पान्तरे त्वावर्तन्तऽएव ॥१८॥ एवं देवयानं मार्गं ससाधनमुक्त्वा पितृयाणं मार्गमाह ये नैवं विदुः केवलकर्मिणः लोकं पितृलोकं जयन्ति प्राप्नुवन्ति । पितृलोकशब्दः प्रसिद्धपित्रधिष्ठितलोकविषयः चन्द्रस्तूक्तलक्षणो मण्डलात्मा । ते कर्मिणश्चन्द्रं प्राप्य गवान्नं भवन्ति भोग्यतामापद्यन्ते । आप्यायस्वापक्षीयस्वेति न मन्त्रः किं तु आप्याय्याप्याय्यापक्षय्यापक्षय्येति प्रकारप्रदर्शनार्थः तथा च यथा यज्ञे ऋत्विजश्चमसस्थं सोमं पुनःपुनराप्याय्यापक्षय्य ह्रासं कृत्वा भक्षयन्ति तथा तत्र भोगभूमौ प्राप्तांस्तानन्नभूतान्देवाः स्वामिन-इवैनान्सोमलोके लब्धशरीरान्कर्मिण उपकरणभूतान्भृत्यानिव कर्मानुरूपफलदानेन विश्रमाभ्यनुज्ञानलक्षणमाप्यायनं कृत्वा स्वनियोगकरणेनाविश्रामलक्षणमपक्षयं च कुर्वन्तो भक्षयन्ति उपभुञ्जते न तु खादन्ति तथा सति चन्द्रलोकप्राप्तेरनर्थार्थत्वेन तत्साधनस्याननुष्ठानप्रसङ्गादित्यर्थः । एवं ते यऽएवमेतदित्यथ ये यज्ञेनेति च दक्षिणोत्तरमार्गप्रतिपत्तिसाधनोक्त्या पञ्चमं प्रश्नं निर्णीय तेऽर्चिरभीत्यादिना च दक्षिणोत्तरमार्गप्रदर्शनेन प्रथमं प्रश्नं च निर्णीयेदानीमेतल्लोकप्राप्तिप्रकारप्रदर्शनेन द्वितीयतृतीयप्रश्नयोर्निर्णयमाह तेषां यदेति । तेषां कर्मिणां यस्मिन्काले तद्यज्ञदानादिलक्षणं सोमलोकप्रापकं कर्म परिगच्छति सर्वात्मना क्षीयते तदा ते इममेव प्रसिद्धमाकाशमभिनिष्पद्यन्ते याभिर्ह्यल्लोकाग्नौ हुताभिः श्रद्धाशब्दवाच्याभिरद्भिः सोमलोके कर्मिणामुपभोगायाम्मयं शरीरमारब्धं ताः पुनः कर्मक्षयाद्धिमपिण्ड-इवातपसम्प-

कीटप्रविलीनाः सत्यः आकाशं प्राप्तास्तद्वदेव सूक्ष्मभावं प्रतिपद्यन्तऽइति भावः । ते पृथिवीं प्राप्य व्रीहियवाद्यन्नं भवन्ति अन्नभावोऽत्र व्रीह्यादिसंश्लेषमात्रं बोद्धव्यम् । ते पुनरन्नभूता रेतःसिक्पुरुषाग्नौ हुता रेतोभूता योषाग्नौ हुताः पुरुषाख्या अग्निहोत्रादिकर्मानुतिष्ठन्तो म्रियमाणास्तेन धूमादिमार्गेण सोमलोकं गच्छन्ति कर्मफलभोगाय ततः कर्मक्षये सतीमं लोकं पुनरागच्छन्तीत्येवमेव कर्मिणोऽनु वारं-वारं कर्मवायुसमीरिता आ ब्रह्मज्ञानाद्घटीयन्त्रवच्चक्रीभूताः परिभ्रमन्ति । एवं स्थानद्वयमावृत्तिसहितमुक्त्वा स्थानान्तरमाह अथ यऽइति कीटाः गोमयादिकुत्सितस्थानेषु कृमयो जायन्ते पतङ्गाः शलभाः दन्दशूकं दशनशीलं दंशमशकपन्नगादिलक्षणम् । अतोऽस्यां गतौ निमग्नस्य पुनरुद्धारदौर्लभ्यादिमां गतिं जुगुप्सद्भिः स्वाभाविकज्ञानकर्मप्रहाणेन शास्त्रीयज्ञानकर्मणी दक्षिणोत्तरमार्गप्रतिपत्तिसाधनभूते समाश्रयणीये ततोऽपि परममुक्तिहेतुभूततत्वज्ञानाय यत्नः कर्तव्य इति वाक्यार्थः । तथा च द्वितीयः प्रश्न आकाशादिद्वारागमनकथनान्निर्णातः परलोकं गतानां पुनरावृत्तिकथनेन तृतीयप्रश्नश्च निर्णीतः ॥ ११ ॥ १ ॥ १ ॥

पूर्वं गायत्रीब्राह्मणे सत्स्वपि वागादिषु प्राणस्यैव गायत्र्यात्मकत्वं किमुक्तमित्याकाङ्क्षायां प्राणस्य ज्येष्ठत्वादिगुणवत्वादिति परिहारमभिप्रेत्य तस्यैव ज्येष्ठत्वादिनिर्दिधारयिषयेदं ब्राह्मणं प्रवर्तते । यद्वा सत्स्वपि चक्षुरादिषूत्थब्राह्मणे (!) उत्थयजुःसामक्षत्रादिभावैः (!) प्राणस्यैवोपासनमभिहितं तत्र हेतुमात्रापेक्षायां ज्येष्ठत्वश्रेष्ठत्वादिहेतुमात्रकथनायेदं ब्राह्मणं प्रवर्तते । इह तु स्वतन्त्रमेव प्राणोपासनं विधीयते वक्ष्यमाणप्राणोपासनस्य गुणभेदात्फलभेदाच्च तत्र तावदुपासकसम्पत्त्यर्थं फलं कथयति यो ह वाऽइति । ननु निषेककाले प्राणस्येव वागादीनामपि शुक्रशोणितसम्बन्धस्याविशिष्टत्वात्कथमवधार्यते प्राणो वै ज्येष्ठश्च श्रेष्ठश्चेति चेत् सत्यम् तथापि नाप्राणं शुक्रं प्ररोहतीति निषेककालादारभ्य प्राणस्यैव गर्भवृद्धिहेतुतया प्रथमो वृत्तिलाभो न चक्षुरादेरतोऽवगम्यते चक्षुरादिषु प्राणस्यैव ज्येष्ठत्वम् ॥ १ ॥ इदानीं प्राणस्यैव वसिष्ठत्वप्रतिष्ठात्वसम्पत्त्वायतनत्वप्रजातिवलक्षणाः पञ्च गुणा इति दर्शयितुं प्रथमं तेषामेकैकस्य क्रमेण वाक्चक्षुःश्रोत्रमनोरेतसां गुणत्वमाह । अतिशयेन वासयतीति वसिष्ठा निवासार्थस्य वसे रूपं वाग्मिनो ह्यतिशयेन वसन्ति वासयन्ति चान्यान् यद्वातिशयेन वस्त ऽइति वसिष्ठा आच्छादनार्थस्य वसे रूपं वग्मिनो हि वाचान्यानभिभवन्ति ॥ २ ॥ मनो वाऽआयतनं विषयाणामिन्द्रियाणां च ॥ ५ ॥ रेतःशब्देनात्र प्रजननेन्द्रियं लक्ष्यते ॥ ६ ॥ एवमुक्त्वा वसिष्ठत्वादिगुणा न वागादिगताः किं तु मुख्यप्राणगता एवेति दर्शयितुं तावदाख्यायिकामधिकरोति । वागादयोऽहंश्रेयसेऽहं श्रेयानित्येतस्मै प्रयोजनाय विवदमाना विरुद्धं भाषमाणा ब्रह्म प्रजापतिं प्रति गतवन्तः । तत् ब्रह्म विराडात्मकं कर्तृभूतं तान्प्रत्युवाच ॥ ७ ॥ कडाः मूकाः ॥ ८ ॥ रेतः प्रजननेन्द्रियम् ॥ १२ ॥ महांश्चासौ सुहयश्च । सिन्धुदेशे भवः सैन्धवः । पड्वीशाश्च ते शङ्कवश्च ते पड्वीशशङ्कवः पादबन्धनशङ्कवस्तान्संवृहेत् उद्यच्छेत् परीक्षणायाश्वारोहे आरूढे सति युगपच्चतुरोऽपि शङ्कूनुत्खनेत् । संववर्ह चिच्छेद स्वस्थानाद्भ्रंशितवान् । बलिं करम् ॥ १३ ॥ वागादयः स्वस्वासाधारण्येनोक्तानेव गुणान्मुख्यप्राणस्य बलित्वेन समर्पयामासुः । यन्मम वसिष्ठत्वं तद्वसिष्ठत्वगुणस्तवैव । एवं वागादिभिर्दत्तं बलिदानमङ्गीकृत्य प्राणः स्वात्मनोऽन्नवाससी पृच्छति तस्योऽइति । भक्ष्यमाणा आपः सर्वास्तव वास

आच्छादनस्थानीयाः । इदानीं तत्स्तुत्यर्थकमर्थवादमाह न हेति यः एतत्सर्वप्राणिभिरद्यमानं सर्वमन्नमनस्य प्राणस्यैवान्नमित्येवं वेद पश्यति अस्य प्राणान्नविदोऽनदनीयं नैव ह किल भक्षितं भवति यद्यपि कदाचिदनेनाभक्ष्यमपि भक्षितं स्यात्तदासौ तद्दोषेण न लिप्यते । तथा यद्यप्ययमप्रतिग्राह्यं हस्त्यादिकं प्रतिगृह्णाति तदप्यन्नमेव भोग्यं वस्तु प्रतिग्राह्यमनेन प्रतिगृहीतं स्यान्न तत्प्रतिग्रहदोषेण लिप्यतऽइति विद्यैव स्तूयते न वस्तुतस्तस्य दोषाभावः अभक्ष्यभक्षणाप्रतिग्राह्यप्रतिग्रहयोर्निषिद्धत्वात् ॥ १४ ॥ आपो वास इत्यनेन भक्ष्यमाणास्वप्सु विहितवासोदृष्टेरर्थवादमाह । आचामन्ति अपो भक्षयन्ति । अनं प्राणमुभयतोऽपां भक्षणेनानग्नमाच्छादितं कुर्वन्तः अपोऽशानलक्षणवासोदानेनानग्नं कुर्म इति श्रोत्रिया मन्यन्ते ॥ १५ ॥ २ ॥ १ ॥

एवं प्राणोपासनसाधनीभूते ज्ञानकर्मणी दर्शिते तत्र ज्ञानं वित्तानपेक्षम् कर्म तु दृष्टादृष्टार्थविषयं वित्तसाध्यम् अतो येनोपायेन प्रत्यवायानुत्पादकेन वित्तोपार्जनं कर्तव्यं तदुपायभूतं श्रीमन्थाख्यं कर्म प्रदर्शयितुं ब्राह्मणान्तरमारभ्यते । अधिकारिनिरूपणपुरःसरं सेतिकर्तव्यताकं सम्भारमाह यः कर्माधिकृतो गृही प्राणविन्महत्वं प्राप्नुयामित्येवं कामयते स पुण्यदिवसमेवारभ्य द्वादशदिवसपर्यन्तमुपसद्व्रतो भूत्वा । उपसदो नाम ज्योतिष्टोमे इष्टिविशेषाः प्रवर्ग्याहस्सु प्रसिद्धाः तासु यद्व्रतं स्तनोपचयापचयाभ्यां पयोभक्षणं भूमिशयनं ब्रह्मचर्यं वाङ्नियमश्चेति चतुष्टयं यजमानस्य प्रसिद्धं तत्सर्वं स्तनोपचयापचयेतिकर्तव्यताशून्यमत्रोपादीयते तथा चोपसत्सु व्रतमुपसद्व्रतं तद्विद्यते यस्य स उपसद्व्रतीति समासः । न तूपसद एव व्रतमिति कर्मधारयः सामान्याधिकरण्यलक्षणः समासः तस्य श्रौतत्वेनेह मन्थाख्ये स्मार्ते कर्मण्युपसद्ग्रहणायोगात् । तस्मात्पयोभक्षणादिमात्रोपसद्व्रती भूत्वा सर्वौषधं सर्वासामोषधीनां समूहं वक्ष्यमाणव्रीह्यादिधान्यदशकमवश्यसम्पाद्यमन्यदपि धान्यविशेषं फलानि चानिषिद्धान्यमादकानि भक्ष्याणि तत्कालतद्देशलभ्यानि अन्यदपि पुष्पादिकं सम्भरणीयं सर्वं सम्भृत्य । पुण्याहे पुण्यदिवसे आत्मनः कर्मसिद्धिकरे पुंसा पुंनामकेन हस्तादिना नक्षत्रेण संयुक्ते व्रतान्त्यदिवसे । परिलेपनादिना दृष्टार्थतया परिशुद्धे देशे स्वगृह्योक्तविधिना परिसमुह्योपलिप्योल्लिख्योद्धृत्याभ्युक्ष्येत्यदृष्टार्थतया पञ्च भूसंस्कारान्कृत्वा । तस्मिन्संस्कृते स्थाने अग्निमुपसमाधायेत्यत्राग्नेरेकवचनश्रवणात्स्मार्तमेवावसथ्याग्निं संस्थाप्याग्नेरुत्तरतो वक्ष्यमाणपात्रासादनं दक्षिणतो ब्रह्मासनं च दत्वा पवित्रकरणाद्याज्यनिर्वपणावधि स्वगृह्योक्तं सर्वं विधाय । आवृतेतिकर्तव्यतया अस्य कर्मणः स्मार्तत्वात्स्थालीपाकोक्तकर्तव्यतया आज्यं संस्कृत्य स्रुवं च प्रतपनादिना संस्कृत्येध्माधानाघारपर्यन्तं तूष्णीमेव सर्वं स्वगृह्योक्तं विधाय । अग्नये स्वाहा सोमाय स्वाहेति मन्त्राभ्यामाज्यभागौ हुत्वा उदुम्बरवृक्षमये कंसे कंसाकारे वर्तुलाकारे चमसे चमसाकारे वा पात्रे मन्थमुक्तसर्वौषधफलानां पिष्टं दधिमधुघृतैरुपसिच्य वक्ष्यमाणोपमन्थनीद्वयमध्ये एकयोपमन्थन्योपमथ्य संनीय अग्नेः स्वस्य च मध्ये दक्षिणश्रिते देशे संस्थाप्यौदुम्बरेण स्रुवेण संस्कृतमाज्यं गृहीत्वा वक्ष्यमाणैर्मन्त्रैर्जुहुयात् ॥ १ ॥ कैर्मन्त्रैराज्यं होतव्यमित्यपेक्षायामाहुतित्रयाङ्गभूतं मन्त्रत्रयं देवताप्रार्थनात्मकं तावदाह । जातं-जातं वेत्ति जाते-जाते प्राणिनि जाठरत्वेन विद्य इति वा जातवेदाः तस्य सम्बुद्धिः त्वयि त्वदधीना यावन्तो देवाः वक्रमतयः सन्तः मम अभीप्सितार्थान्प्रतिबध्नन्ति ॥ २ ॥ भो जातवेदः या देवता तिरश्ची कुटिलमतिर्भूत्वाहमेव विधरणी सर्वस्य धारयित्री इति च

मन्यतऽइति शेषः तां तिरश्चीं देवतां त्वं निपद्यसे व्याप्नोषि । संराधनीं सर्वसाधनीं देवतां तां त्वा त्वामहं यजे । तृतीयाहुतिमन्त्रस्य स्वश्रुतौ विद्यमानत्वात्प्रतीकग्रहणं श्रुत्या कृतम् प्रजापतऽइति । अस्मिन्नाहुतित्रये संस्रवो न धर्तव्योऽश्रुतत्वात् ॥ ३ ॥ एवमाहुतित्रयहोमानन्तरं षड्द्वन्द्वाहुतीः प्रतिद्वन्द्वं संस्रवावनयनयुक्ताः कर्तव्या एकाहुतिश्च रेतसे स्वाहेति संस्रवावनयनयुक्तेत्येवं सप्ताहुतयः कर्तव्या इति तत्साधनभूतान्मन्त्रानाह ज्येष्ठायेति । संस्रवं स्रुवावलिप्तमाज्यं मन्थे सिञ्चेत् । अत्र ज्येष्ठश्रेष्ठादेः प्राणलिङ्गात् ज्येष्ठादिगुणकप्राणविद् एव मन्थकर्मण्यधिकार इति ध्वनितोऽर्थः ॥ ४ ॥ प्रत्येकाहुतिसंस्रवावनयनयुक्ताश्चतस्र आहुतीः समन्त्रका अनुष्ठेया आह ॥ ५ ॥ पूर्वोक्तगुणा एव षडाहुतीराह ॥ ६ ॥ एवं चतस्रः ॥ ७ ॥ एवं नव ॥ ८ ॥ एवमाज्याहुत्यन्ते यत्कर्मणात्यरीरिचमिति वक्ष्यमाणमन्त्रेण (१.४.२४.) स्विष्टकृद्धोमं कृत्वा संस्रवविशिष्टं मन्थद्रव्यमपरोपमन्थन्या पुनर्मन्थनीयं तस्या अन्यत्र विनियोगादर्शनादित्येतावानितिकर्तव्यताविशेषो बोद्धव्यः । एवं संस्कृतं मन्थद्रव्यं किं कर्तव्यमित्यपेक्षायामाह अथैवमालोडनानन्तरमेनं मन्थं मन्त्रं पठन् तदर्थं च स्मरन्सन् हस्तेनाभिमृशति हे मन्थ त्वं भ्रमतीति भ्रम् असि भवसि तव चलनात्मकप्राणदेवताकत्वात्त्वं प्राणरूपेण भ्रमसीत्यभिप्रायः अग्निरूपेण त्वं ज्वलदसि ब्रह्मरूपेण पूर्णम् नभोरूपेण प्रस्तब्धं निःक्रियम् । या खल्वेका सभा जगदात्मिका सा त्वदात्मिकैवेति त्वमेकसभमसि । यज्ञारम्भे प्रस्तोत्रा यद्धिंकृतम् तेनैव च यज्ञमध्ये हिंक्रियमाणम् यज्ञारम्भे उद्गातृकृतमुद्गीथम् तेनैव च यज्ञमध्ये उद्गीयमानम् अध्वर्युणा श्रावितम् आग्नीध्रेण च प्रत्याश्रावितम् त्वमसि । आर्द्रे मेघोदरे सम्यग्विद्युद्रूपेण दीप्तं संदीप्तमसि । विभूर्व्यापकः भाग्यरूपेण प्रभूः समर्थः भोक्तृरूपेणाग्न्यात्मना ज्योतिः भोग्यरूपेण सोमात्मनावस्थितत्वात्त्वमन्नमसि कारणत्वात्त्वमध्यात्माधिदैवयोर्निधनं लयस्थानमसि वागादीनामग्न्यादीनां च संहरणत्वात्त्वं संवर्गोऽसि ॥ ९ ॥ एवं मन्त्रपूतं मन्थद्रव्यं किं कर्तव्यमित्यपेक्षायां तद्विनियोगमाह । उद्यच्छति हस्ते गृह्णाति । मन ज्ञानऽइत्यस्य धातोराङ्पूर्वस्य कृदन्ते डप्रत्यये टिलोपे च कृते सति आम इत्येतद्रूपं सिद्धम् हे मन्थ त्वमाम आमन्ता आ समन्ताद्भावेन ज्ञातासि भवसि ते तव मय्युपासके आममामननमा समन्ताद्भावेन ज्ञानमस्तीति शेषः यतस्त्वं सर्वज्ञोऽसि अतो मामपि ज्ञानासीति वाक्यार्थः । स हि प्राणस्त्वं राजा । एवंगुणविशिष्टः स भवान् मा मामधिपतिं तथाभूतमेव करोतु ॥ १० ॥ ग्रासचतुष्टयं मन्थस्य कृत्वा पृथक्पृथगवस्थाप्य प्रथमो ग्रासो गायत्रीप्रथमपादमधुमतीप्रथमर्कप्रथमव्याहृतिरूपं मन्त्रमुच्चार्य भक्षणीयः ॥ ११ ॥ एतैः सर्वैः सम्पूर्णैर्मन्त्रैश्चतुर्थो ग्रासो भक्षणीय इत्याह सर्वामिति । अन्ततो भक्षणान्ते शुद्ध्यर्थं स्मार्तमाचमनं कृत्वा हस्तौ प्रक्षाल्य शुद्धाचमनं विधाय अग्नेः पश्चिमतः प्राक्शिरा रात्रौ शयीत ॥ १३ ॥ ततः प्रातःसंध्यामुपास्य भक्तिश्रद्धाभ्यां प्रातरुदयसमये आदित्यं वीक्षमाणः संस्तदुपस्थानं मन्त्रेण कुर्यात् एकपुण्डरीकमखण्डश्रेष्ठः । तत एतद्विद्योपदेशकाचार्यपरम्पराख्यस्य वंशस्य जपः कर्तव्य इत्याह यथेतमिति ॥ १४ ॥ तं मन्थमेतमुक्तेतिकर्तव्यताकम् । यः प्राणोपासकः एनमुक्तविधया संस्कृतं मन्थम् । किमु वक्तव्यम् अनेन कर्मणा कामः सिध्येदित्यतो ध्रुवफलमिदं कर्मेति कर्मस्तुत्यर्थमेतदुक्तमित्यर्थः ॥ १५ ॥ एवं वंशे पठिते सति समाप्तमेतत्कर्म । अथैतत्प्राणदर्शनात्मकस्य मन्थविज्ञानस्य शिष्यः श्रोत्रियो मेधावी धनदायी प्रियपुत्रो विद्यार्थं विद्यादातेति प्रसिद्धेषु षट्सु विद्यासम्प्रदानभू-

तेषु मध्ये द्वयमेव सम्प्रदानमिह भवेदित्याह तमेतं नेति तमेतं मन्थं मन्थविज्ञानम् ॥२०॥ पूर्वं सर्वौषधमिति सामान्येनोक्तम् इदमिदमिति विशेषतो वक्तुमनुक्तं स्रुवादिकं च कथयितुमुत्तरं काण्डकाद्वयं प्रवर्तते । उडुम्बरस्य वृक्षस्य विकार औडुम्बरश्चतुःसंख्याको भवति ॥२१॥ मन्थोपादानभूतग्राम्यधान्यग्रहणे नियममाश्रित्याह । अणुशब्दवाच्यं धान्यं मोरिय इति गूर्जरदेशे पल्यां प्रसिद्धम् प्रियङ्गवस्तत्रैव कङ्गुशब्दवाच्यत्वेन प्रसिद्धाः । खल्वा निष्पावा वल्लशब्दवाच्याः । खलकुलाः कुलत्थाः । तान् व्रीह्यादीन् चूर्णयित्वा पात्रे निक्षिप्य दधिमधुभ्यां सार्धं घृतेनोपसिञ्चति दध्यादित्रयात्तं करोति अथ स्वगृह्योक्तविधिनाज्याभागान्तं कृत्वा पूर्वोक्ता आज्याहुतीर्जुहोति ॥२२॥३॥१॥

एवं प्राणोपासकस्य वित्तार्थिनः श्रीमन्थाख्यं कर्मोपदिश्य तस्यैव विशिष्टपुत्रार्थिनः पुत्रमन्थाख्यं कर्म वक्तुमुत्तरं ब्राह्मणं प्रवर्तते । तत्रादौ पुत्रोत्पत्तिहेतु रेतो बीजं स्तोतुमाह एषामिति । रसः सारभूता इयं पृथिवी सर्वेषां भूतानां मध्वित्युक्तत्वात् (५. ५. १.) । पृथिव्या आपो रसः सारभूताः यदिदं सर्वमप्स्वोतं च प्रोतं चेति (६. ६. १.) अपां पृथिवीकारणत्वस्य गार्गीब्राह्मणे श्रुतत्वात् । ओषधीनामप्कार्यत्वादोषधयोऽपां रसः ॥१॥ यत एवं सर्वभूतानां सारमेतद्रेतोऽतस्तदावापस्थानं प्रजापतिर्विचारपूर्वकं सम्पादितवानित्याह स हेति । प्रजापतिर्विराडात्मा । स्त्रियं शतरूपाख्याम् । अधः प्रदेशे योन्याख्ये उपास्त मैथुनाख्यमुपासनं कृतवान् । श्रोर्गुणाख्या । अस्मिन्कर्मण्यभ्युदयफलार्थं वाजपेयदृष्टिविधा अतस्तदङ्गे प्रजननेन्द्रिये सोमाभिषवपाषाणदृष्टिं कठिनत्वसामान्यमाश्रित्याह स एतमिति एतं सोमाभिषवोपलस्थानीयं प्रजननेन्द्रियं समुदपारयत् उत्पूरितवान् (!) स्त्रीव्यञ्जनाभिमुखं कृतवान् तेन पाषाणवत्कठिनेनैनां स्त्रियमभ्यसृजत् अभि समन्ततो मुञ्जर्मुञ्जः संसर्गं कृतवान् ॥२॥ अवाच्ये देशे वेदिदर्शनमाह अवाच्यदेशस्थलोमसु बर्हिर्दृष्टिम् अवाच्यदेशस्थचर्मण्यानडुहचर्मदृष्टिम् । पुरुषवृषणयोः स्त्रीयोन्यन्तर्गतप्रदेशे च क्रमेणाधिषवणफलकवह्निदृष्टी विदधाति मुष्कौ वृषणौ अधिषवणे सोमाभिषवफलके स्त्रीव्यञ्जनस्य मध्यतो मध्यप्रदेशः समिद्धो दीप्तोऽग्निः । नन्वेवमवाच्ये कर्मणि वाजपेयदर्शने कृते सति किं स्यादित्यत आह स यावानिति । एवमुपासतः फलान्तरमप्याह य एवमिति अधोपहासमवाच्यं कर्म । सुकृतं शुभं कर्म आवृङ्क्ते आवर्जयति स्वीकरोति ॥३॥ अविदुषामतिगर्हितमिदं कर्मेत्यत्रानेकाचार्यसंमतिमाह । ब्राह्मणा'अयनं येषां ते ब्राह्मणायनाः ब्राह्मणजातिमात्रोपजीविनो ब्राह्मणाभासाः निरिन्द्रिया विश्लेष्टेन्द्रिया विसुकृतो विगतपुण्याः सन्तोऽस्माल्लोकात्प्रयन्ति परलोकभ्रष्टा अत्यन्तपापहेतुमैथुनकर्मासक्ता नरकं गच्छन्ति ॥४॥ एवं प्राणोपासकस्य श्रीमन्थं कृतवतो न हि यदा कदाचित्पुत्रार्थिनो भार्योपगतिः किं तु ऋतुकाले अतस्तं कालं प्रतीक्षमाणस्य प्रमादाद्रेतःपाते प्रायश्चित्तमाह बह्विति । एवमभिमृष्टमभिमन्त्रितं गृहीतं च रेतः क्व विनियोज्यमित्यपेक्षायां समन्त्रकं तस्य विनियोगमाह पुनरिति । तेजस्त्वग्गता कान्तिः भगः सौभाग्यं ज्ञानं वा । धिष्ण्या अग्नयः शरीराश्रिता देवाः तद्रेतो यथास्थानं स्थानमनतिक्रम्य पुनः कल्पन्तां कल्पयन्तामित्यनेन मन्त्रेण भ्रुवोः स्तनयोर्वा मध्ये निमृज्यात् लेपयेत् संस्पर्शयेत् ॥५॥ एवमयोनौ रेतस्खलने प्रायश्चित्तमुक्त्वा रेतोयोनावुदके रेतःसिचस्तत्र स्वच्छायादर्शने प्रायश्चित्तमाह । यदि कदाचित्प्रमादतः उदके रेतःसिक्त्व आत्मच्छायां पश्येत् । इन्द्रियं रेतो मयि अस्त्वित्यध्याहारः

। इन्द्रियस्य रेतसो विशेषणानि विज्ञानं कीर्तिः वित्तं सत्कर्म तादृग्गुणकपुत्रोत्पादनहेतुत्वात् तथा च रेतःस्वरूपे जले स्वदृष्टिकृतापराधसमाधिरित्यर्थः ॥६॥ रेतःसिचो देशकालावतिक्रम्य ग्रामादिके रेतस्खलनप्रयुक्तं प्रायश्चित्तमभिधायेदानीं प्रकृतेन रेतःसिचा यस्यां पुत्रो जनयितव्यस्तां स्तुवन्ती श्रुतिस्तस्यामृतुकालगमनं विधत्ते । श्रीर्ह्वाणाद्द्या । मलोद्वासा उद्गतमलवद्वस्त्रा तां यशस्विनीं वीर्यवत्पुत्रहेतुत्वात्कीर्तिमतीं वक्ष्यमाणं त्रिरात्रव्रतं कृत्वा चतुर्थेऽह्नि स्नातां सतीम् । तदा एनां स्वपत्नीं वस्त्राभरणभोगयादिदानेन कामं यथाशक्तिवैभवमपक्रीणीयादृशं नयेत् । यष्ट्या दण्डेन उपहत्य संताड्य कामं यथेष्टं भीतिमुत्पाद्यातिक्रामेत् अभिगच्छेत् । एवं बलात्कारसम्भवे शप्स्यामि त्वां दुर्भगां करिष्यामीति प्रख्याप्य तामनेन मन्त्रेणोपगच्छेदिति पुनरुपायान्तरमाह । इन्द्रियेण यशसा यशोहेतुना पञ्चमेन्द्रियेण कृत्वा तव यशो यशोभूतं पुत्रोत्पत्तिकरं रेतोऽहं गृह्णामीति मन्त्रेण रुषा शपेत् सा चैव शप्ता सती अयशा एव अपुत्रैव वन्ध्यैव भवति ॥७॥ एवं भर्तुर्भार्यावशाकरणोपायमुक्त्वा पुरुषद्वेषिण्यास्तस्यास्तद्विषये प्रीतिसम्पत्त्युपायमाह । तस्यां तद्योनौ अर्थं प्रजननेन्द्रियं निष्ठाप्य निक्षिप्य । हे रेतस्त्वं मदीयात्सर्वस्मादङ्गात्समुत्पद्यसे विशेषतश्च हृदयान्नाडीद्वारेण प्रकटीभवसि । एवंविधः स त्वमङ्गानां कषायो रसोऽसि अतो विषलिप्तशरविद्धां मृगीमिव मदीयां भार्यां मयि विषये मादय मद्युक्तां कुरु मद्वशां कुरु ॥८॥ एवं स्ववशमापद्यावाच्यकर्मानुष्ठानदशायामभिप्रायविशेषानुसारेणानुष्ठानविशेषं दर्शयति । रूपभ्रंशयौवनहानिभयात् यां स्वभार्यामिच्छेत् गर्भं न धारयेत् गर्भिणी इयं मा भूदिति । अभिप्राण्यापान्यात् पशुकर्मकाले प्रथमं स्वीयपुंस्त्वद्वारा तदीयस्त्रीत्वे वायुविसर्जनरूपमभिप्राणनं कृत्वा तेनैव द्वारेण ततस्तदादानलक्षणमपाननं च कुर्यात ॥९॥ पुनर्भर्तुरेव पूर्वोक्तविपरीताभिप्राये उपायान्तरमाह । स्वकीयपञ्चमेन्द्रियेण तदीयपञ्चमेन्द्रियाद्रेतः स्वीकृत्य तत्पुत्रोत्पत्तिसमर्थं कृतमिति मत्वा स्वकीयरेतसा सह निक्षिपेत् ॥१०॥ प्रासङ्गिकमाभिचारिकं कर्म प्रवृत्तजारगवतं क्रुध्यन्तमधिकृत्याह । आमपात्रे अपक्वे मृन्मयभाजने उदकादिसम्बन्धे सति विशीर्यमाणतया शत्रुभेदनकर्मणि योग्ये परिसमूहनादिपञ्चभूसंस्कारपूर्वकमग्निमुपसमाधाय एकवचनाऽउपधानवचनाच्चावसथ्याग्निमेव प्रज्वाल्यास्य कर्मणः प्रतिलोमत्वात्प्रतिलोमं पश्चिमाग्रं दक्षिणाग्रं वा यथा स्यात्तथा शरमयं बर्हिः स्तीर्त्वा आस्तीर्य तस्मिन्नग्नौ एताः प्रसिद्धास्त्रिसंख्याकाः शरभृष्टीर्वाणेषीकाः प्रतिलोमाः विपरीताग्राः घृतेनाभ्यक्ताः कृत्वा जुहुयात् । तव आशापराकाशौ आददे फडिति मन्त्रमुच्चार्य मन्त्रान्ते चासावित्यात्मनः शत्रोर्वा नाम गृह्णीयात् आशा प्रार्थना वाचा यत्प्रतिज्ञातं कर्मणा च नोपपादितं तस्य परीक्षा पराकाशः । एवंविन्मन्थकर्मविद्वान्प्राणदर्शी यं ब्राह्मणं (!) शपति स ब्राह्मणो निर्गतेन्द्रियो गतपुण्यकर्मा सन्नस्माल्लोकाद्गच्छति । एवंवित् परदारगमने यथोक्तवक्ष्यमाणदोषवित् श्रोत्रियस्याधीतवेदस्योपासकस्य भार्यया उपहासं नर्मापि न कुर्यात् किमुताधोपहासम् ॥११॥ एवं सफलोऽभिचारः पशुकर्मद्वारा जारप्रसङ्गेनोक्तो न तु प्राधान्येन तस्य सत्पुत्रफलककर्मविरोधित्वात् । इदानीं पूर्वप्रस्तुतऽर्तुकालानुष्ठेयं व्रतकलापमुपदिशति । आर्तवमृतुभावः । दिवसत्रयं कंसे कांस्यपात्रे उदकादिक न पिबेत् न वाश्नीयात् अनुपहतवासाश्च स्यात् एतत्तु स्नानोत्तरकाले बोध्यम् आर्तवपूर्वकालस्य तु ज्ञातुमशक्यत्वात् वृषलः शूद्रो वृषली तज्जार्यान्यो वा पापकृत्कश्चिदपि स्नानात्पूर्वमनन्तरं वा नोपस्पृशेत् एतत्सम्भाषणादीनामप्युपलक्षणम्

अन्यदपि शास्त्रान्तरोक्तं कर्म कुर्यादित्यर्थः । त्रिरात्रान्ते व्रतसमाप्तौ चतुर्थेऽहनि प्रातःकाले आप्लूय स्नात्वा पूर्वोक्तविशेषेणाहतवासाः स्यात् तथा चैवमाप्लुतामहतवस्त्रां तां व्रीहीनवघातयेत् चरुश्रपणार्थं व्रीह्यवघाताय भर्ता तामेव विनियुञ्ज्यात् ॥ १२॥ किं पुनरवघातनिष्पन्नैस्तण्डुलैरनुष्ठेयमित्यपेक्षायां तस्मिन्नेव चतुर्थेऽहनि प्रातश्चरुहोमानन्तरं यथाकामं पक्वा भक्षणीयमिति क्रममभिप्रेत्य कामनाविशेषे पाकादिविशेषणे भक्षणप्रभेदं तावदाह । गौरो बलदेववच्छुभ्रः शुद्धो वा । अनुब्रुवीत पठेत् । सर्वं शतवर्षप्रमितमायुरवाप्नुयात् । क्षीरौदनं स्वभार्ययैव पाचयित्वा घृताप्लुतं तमोदनं कृत्वा ॥ १३॥ कपिलो वर्णतः पिङ्गलः पिङ्गाक्षः । दध्यौदनं(!) दध्ना चरुं श्रपयित्वा ॥ १४॥ उदौदनमुदकेनौदनं पाचयित्वा उदकं विनौदनपाकस्यासम्भवेन तस्य प्राप्तावप्युदकग्रहणं क्षीरादिनिवृत्त्यर्थम् ॥ १५॥ दुहितुः पाण्डित्यं स्त्रीणामुचिते गृहकर्मणि कौशलं न तु वेदादिविषयं स्त्रीणां तत्रानधिकारात् । तिलमिश्रमोदनं कृशरमित्यर्थः ॥ १६॥ विविधं जिगीषं प्रख्यातिरस्य स विजिगीथोऽतिप्रख्यातः । समितिं विद्वत्सभां प्रति पूज्यतया गच्छतीति समितिंगमः प्रगल्भः । श्रोतुमीप्सितां वाणीं भाषिता सुसंस्कृतार्थवद्वचनवक्ता । मांसमिश्रितमोदनम् । तन्नियममाह उक्षा सेचनसमर्थस्तदीयं मांसमौक्षणम् ततोऽप्यधिकवया ऋषभस्तदीयं मांसमार्षभम् अयं तु मांसनियमो देशकालविशेषापेक्षयावगन्तव्यः गोमांसस्य निषिद्धत्वात्कृष्णमृगविषयं छागविषयं वोक्षादिवचनमत्र ग्राह्यम् तन्मांसमप्यनुपहतं क्रीत्वा सम्पाद्यं हिंसायाः प्रतिषिद्धत्वात् ॥ १७॥ कदा पुनरित्थमोदनपाकादि कर्तव्यमित्यपेक्षायां व्रीह्यवघातदिवसे एवेत्यभिप्रेत्य तत्प्राक्कालकर्तव्यमाह । चतुर्थदिवसे प्रातःकालऽएव स्नानाद्यशेषनित्यानुष्ठानानन्तरं भार्ययावघातनिर्वर्त्तांस्तण्डुलानादाय स्थालीपाकेतिकर्तव्यतया आज्यं संस्कृत्याधिश्रयणादिसंस्कारं कृत्वा एतच्चर्वादिसंस्काराणामप्युपलक्षणम् ततश्चरुं श्रपयित्वेद्धास्य स्वगृह्योक्तविधानेनाघारादिनित्याज्याहुतीर्हुत्वा स्थालीपाकस्येति कर्मणि षष्ठी स्थालीपाकस्योपघातं स्थालीपाकमुपहत्योपहत्य स्वल्पं स्वल्पं पौनःपुन्येन गृहीत्वा प्रधानाहुतीर्जुहोति । इति प्रधानाहुतित्रयं हुत्वा स्विष्टकृतं चाग्नये स्विष्टकृते स्वाहेति हुत्वा पश्चात्स्थालीस्थं चरुशेषं पात्रान्तरे उद्धृत्य सर्पिषाक्तं कृत्वा पतिः प्रथमं प्राश्नाति प्राश्य च तदेवोच्छिष्टं पत्न्यै प्रयच्छति ततः शुद्ध्यर्थं स्मार्ताचमनं च कृत्वा उदपात्रं पूरयित्वा तेनोदकेन भार्यां त्रिवारमभ्युक्षति । विश्वावसुर्नाम कन्यानामधिपतिर्देवगन्धर्वः भो विश्वावसो देवगन्धर्व त्वं मद्भार्यातः सकाशादुत्तिष्ठ अन्यां कामपि प्रफर्व्यं प्रथमयुवतिं तरुणीं भर्त्रा सह क्रीडमानामिच्छ फर्वतिर्गतिकर्मा प्रकर्षेण फर्व्या गम्या ताम् । अहं पुनर्जायां स्वीयामिमां भार्यां समिति समुपैमीत्यध्याहारः तत्रावकाशस्त्वया देय इत्यर्थः ॥ १८॥ एवं गन्धर्वं प्रस्थाप्य यथाकामं क्षीरौदनादि भुक्त्वा स्त्रियमालिङ्गेदिति क्रममभिप्रेत्याह । अहं पतिरमः प्राणोऽस्मि त्वं सा वागसि । कथमावयोरुक्तरूपत्वमित्याशङ्क्य वाचः प्राणाधीनत्वं प्राणस्य वागाधीनत्वं च प्रसिद्धमित्यभिप्रेत्य सा त्वमस्यमोऽहमिति पुनर्वचनम् । तथा अहं सामास्मि त्वं च ऋगसि ऋगाधारं हि साम गीयते अस्ति चावाच्यकर्मसमये मदाधारत्वं तवेत्याधाराधेयभावसामान्यात् । द्यौरहं जनयितव्यस्य पितृत्वात् पृथिवी त्वं तस्य मातृत्वात् । तावावां संरम्भमुद्यमं करवावहै एहि त्वमागच्छ सह मिलित्वा रेतोधारणमावाभ्यां कार्यम् पुंस्त्वविशिष्टाय पुत्राय वित्तये लाभाय वीर्यवत्पुत्रलाभाय ॥ १९॥ विहापयति विश्लेषयति । अवाच्यकर्मान्ते कर्तव्यशेषमुपदिशति त्रिरेणामिति

एनां योनौ प्रक्षिप्तरेतोबीजां भार्यामनुलोमं मूर्धानमारभ्य पादान्तं मन्त्रमुच्चरंस्त्रिवारं पाणिनानुमार्ष्टि । विष्णुः व्यापनशीलो भगवान्नारायणः तव योनिं कल्पयतु पुत्रोत्पत्तिसमर्थां करोतु । त्वष्टा सविता तव मम सुतस्य वा रूपाण्यवयवान् पिंशतु विभागशो दर्शनयोग्यान्करोतु । प्रजापतिर्विराडात्मा मदात्मना स्थित्वा । धाता पुनः सूत्रात्मा त्वदीयं गर्भं त्वदात्मना स्थित्वा पुष्णातु । हे सिनीवाली (!) अन्नवती (!) एतत्संज्ञे वा देवी (!) त्वं निषिक्तगर्भं धारय । पृथुर्विस्तीर्णा स्तुका स्तुतिर्यस्याः सा पृथुष्टुका तदात्मना वर्तमाना तस्या सम्बुद्धिर्हे पृथुष्टुके हे महास्तुते त्वं गर्भं धारय । पुष्करस्रजौ स्वर्णकमलाभरणौ ॥२०॥ हिरण्मयी हिरण्मय्यौ ज्योतिर्मय्यौ अरणी प्रागबभूवतुरिति शेषः याभ्यामरणिभ्यां पुरा अमृतरूपं गर्भमश्विनौ निर्मन्थितां निर्मथितवन्तौ तं तथाभूतं गर्भं ते तव जठरे धारयामहे दशमे मासि प्रसोतुम् । इन्द्रेण सूर्येण । असे भर्ता असावहमिति स्वात्मनो नाम गृह्णाति भार्याया वा ॥२१॥ एवं गर्भाधानेतिकर्तव्यताजातमुपदिश्यासन्नप्रसवायां भार्यायां कर्तव्यमुपदिशति । यथा वातः वायुः पुष्करिणीं तडागं समन्ततः समीङ्गयति स्वरूपोपघातमकृत्वैव चालयति । एवा एवमेव । जरायुणा गर्भवेष्टनचर्मणा मांसपेशीरूपेण सह निर्गच्छतु । इन्द्रस्य प्राणस्य गर्भस्य वायं योन्यात्मको व्रजो मार्गः सर्गकाले गर्भाधानकाले वार्गडया निरोधेन सह वर्तमानः सार्गडः कृतः सम्पादितः सपरिश्रयः परिश्रयेण परिवेष्टनेन जरायुणा सहितः तं तथाभूतं मार्गं प्राप्य हे इन्द्र प्राण प्रसूतिमारुतात्म त्वं गर्भेण सह निर्जहि निर्गच्छ तन्निःसरणानन्तरं निर्गम्यिमानमांसपेशी सावरशब्दवाच्या तं सावरं च निर्गमय ॥२२॥ पुत्रजनने सति तस्मिन्नेव दिने यत्कर्तव्यं तदाह । अङ्के उत्सङ्गे संस्थाप्य स्वगृह्योक्तमग्न्युपसमाधानादि कृत्वा कांस्यपात्रे दधिमिश्रितं घृतमवस्थाप्य पृषदाज्यस्योपघातं पृषदाज्यमुपहत्योपहत्य स्वल्पं गृहीत्वा जुहोति । अस्मिन्स्वगृहे अहमेव पुत्ररूपेण वर्धमानो मनुष्याणां सहस्रं पुष्यासमनेकपोषको भूयासम् । अस्य मत्पुत्रस्य उपसंद्यां (!) संततौ प्रजया पशुभिश्च सह श्रीर्मा विच्छिन्ना भूत् स्वाहेति होमः । मयि पितरि ये प्राणाः सन्ति तान्पुत्रे समर्पयामि स्वाहा इति प्रधानाहुतिद्वयम् तृतीयाहुति स्विष्टकृद्धोमः इति विवेकः ॥२३॥ तृतीयाहुतिमन्त्रमाह ॥२४॥ जातस्य शिशोरायुष्यकर्मोपदिशति । स्विष्टकृद्धोमानन्तरमस्य जातस्य शिशोरायुषे हितमायुष्यमायुर्वृद्धिकरं कर्म करोति । जातस्य शिशोर्दक्षिणं कर्णमभि अभिलक्ष्य पिता स्वमुखं निधाय तत्र विलक्षणा (त्रयील° ?) वाक्त्वयि प्रविशत्वित्यभिप्रायवान्वाग्वागिति त्रिवारं जपेत् । एवमायुष्यं कर्म कृत्वा नामधेयं कुर्यात् । वेदोऽनुभवः (अनु° Cod.) सर्वस्य निजं स्वरूपं परमात्मलक्षणमसि । गुह्यं गोप्यमेव स्यान्न तु लोकप्रसिद्धम् । दधि मधु घृतमेकीकृत्य अनन्तर्हितेन वस्त्वन्तराव्यवहितेन जातरूपेण हिरण्येन । भूरिति व्याहृत्युपलक्षितमृग्वेदं त्वयि दधामि धारयामि भुव इत्युपलक्षितं यजुर्वेदं स्वरिति सामवेदम् ॥२५॥ इदानीं जातं कुमारं पिता हृदि स्पृशति । अश्मेव पाषाण-इव दृढः स्थिरश्च भव । परशुरिव वज्र-इव यथा तेजःसंघो वज्रः पर्वतान्भिनत्ति तद्वत्सर्वावयवैरिन्द्रियादिभिश्च दृढः दुरितदुःखदुष्टच्छेदकश्च भव वज्रो वै परशुरिति श्रुतेः (३. ६. ४. १०.) यद्वा परशुः कुठारः सोऽपि लोहमयः । हिरण्यं सुवर्णं यथा अस्तृतम् (!) अच्युतमक्षीणं शुद्धं तेजोमयं तथा त्वमपि अस्तृतो (!) ऽच्युतोऽक्षीणः शुद्धस्तेजोमयश्च भव । आत्मा देहः सन्वै निश्चयेन पुत्रेतिसंज्ञामात्रेण भिन्नोऽसि न तु स्वरूपेण

॥२६॥ इडा भोग्यासि यद्वा इडापात्र्यसि यस्यां पुरोडाशो विभज्यते सा यद्वा इडा पृथिवीरूपा । किं च मैत्रावरुणी मित्रावरुणाभ्यां सम्भूतो मैत्रावरुणो वसिष्ठस्तस्य भार्या मैत्रावरुणी अरुन्धतीत्यर्थः यद्वा मैत्रावरुणी ऋत्विग्विषयिणी यद्वा मित्रावरुणयोरुत्पन्ना । हे वीरे सम्भृतिके (त्नके Cod. 1. त्निके 2.) त्वं वीरं पुत्रमजीजनथाः असौषोः ॥२७॥ अथानन्तरं स्वाङ्कस्थं पुत्रं तन्मात्रे प्रदाय तस्याः स्तनं पिता पुत्रस्य मुखे प्रयच्छति । हे सरस्वति यस्ते स्तनवह्निसुस्थानीयानां प्राणिनामाप्यायनकारी लौकिकवैदिकसुशब्दरूप स्तनः शशयः शशयानस्तव देहे (ह Cod.) वर्तमानोऽन्यैरुपभुक्तः (°रनुप°?) सुप्त-इवास्ते इति शेषः । तं तादृशं सर्वप्राण्युपकारकं स्तनमिह मदीयभार्यास्तने प्रविष्टा सती (सति Cod.) धातवे पानाय अकः कुरु प्रयच्छ धातवऽइति धेट् पाने ॥२८॥ एवं मन्त्रवद्गर्भाधानादिकर्मण्यनुष्ठिते सति किं स्यादित्यपेक्षायां महान्स्तुत्यः पुत्रो भवतीत्याह । बत विस्मये । पितरमतीत्य वर्तसऽइत्यतिपिता बभूः ॥२९॥ इदानीं समस्तस्यापि वेदस्याध्यापकपरम्परामाह । पूर्ववद्विद्याभेदादतीतस्य काण्डद्वयस्य प्रत्येकं वंशभाक्त्वेऽपि नास्य पृथक्त्वभाविबमस्य (भागिब°?) खिलकाण्डत्वेन सर्ववेदशेषत्वात् तथा च समाप्तौ पठितो (°प्तपठीतो Cod.) ऽयं वंशः समस्तस्यैव प्रवचनस्य भवति न व्यवहितखिलकाण्डस्यैव । उक्तवेदार्थविज्ञानस्य साकल्येन प्रतिपत्त्यर्थं सर्वत्र प्रवचनसमाप्तौ वंशः कीर्तनीयः यतः सर्वज्ञानां (नांते Cod.) तेषां स्मरणे सति सम्यक् ज्ञानभानूदयो भवतीति । पुत्रमन्थकर्मणः स्त्रीसंस्कारार्थत्वेनोक्तत्वात्तत्संनिधानदयं वंश स्त्रीप्राधान्येनोच्यते ॥३०॥ आदित्येन सूर्येण प्रोक्तत्वादादित्यानि । वाजिशाखावच्छिन्नानां यजुषां सूर्येणोपदिष्टत्वं याज्ञवल्क्येन प्राप्तत्वं च पुराणेषु प्रसिद्धम् । यद्वा आदित्यात्मत्वादादित्यानीति निरुपचरितेत्यर्थः (?) । आदित्यो हि वेदात्मा हिरण्यगर्भः प्रसिद्धः तत एव हिरण्यगर्भात्सम्प्रदायोक्ततदादिकान्सर्वानेव प्रति पारम्पर्येणागतोऽयं सम्प्रदाय इति युक्तं यजुषामादित्यत्वम् । कथम्भूतानि यजूंषि शुक्लानि शुद्धानि यद्वा ब्राह्मणेनामिश्रितमन्त्रात्मकानि ॥३३॥४॥१॥

इति श्रीविद्वज्जनतिलकद्विवेदश्रीनारायणसूनुना द्विवेदगङ्गेन विरचिता माध्यन्दिनारण्यकव्याख्या मुख्यार्थप्रकाशिका सम्पूर्णा ॥ ॥

VARIOUS READINGS.

To Mr. Thomann of Zürich I am indebted for a collation of E. I. H. 309 (E) concerning several passages in the two first prapâṭhakas, and to my dear and learned friend Dr. W. Pertsch for a very minute collation of M., which beautiful ms. does however not exhibit the whole kâṇḍa — as I have in the Preface (p. IX) erroneously stated — but contains only the Bṛihad-Âraṇyaka portion, beginning with the third prapâṭhaka.

The accentuation of the Bṛihad-Âraṇyaka, especially in its three last adhyâyas, is in a very strange state and offers much cause of perplexity, the accentual signs being frequently either wholly wanting or strangely misplaced. The thorough coincidence of M. with A. (Chambers 15) in almost all these blunders leads me to suspect, that the fault is not exclusively that of the copists, but partly an original one, such as might be ascribed to the later addition of these last chapters to the more ancient body of the work. I feel authorized to this assumption by similar instances in the Pariçishṭas to the several Vedasaṃhitâs as well as in the Nirukti and (as I learn from Dr. Pertsch) in the Taittirîya-Âraṇyaka, and moreover by the fact that the vaṇças which are unquestionably of a late origin particularly abound in such blunders and mistakes (see already the vaṇça at the end of the tenth kâṇḍa p. ८२६.).

The reason of this strange circumstance may be sought for either in a less careful preservation of these portions before their becoming a canonical part of the holy text, or in a partial misapplication of the accentual

rules by their authors themselves. I should like to adopt at once both these views, as I have no doubt, that the codification as well as the composition of these portions reach in part down to a time, when the language of the Brâhma*n*as was no longer the spoken dialect of the people or even of the Brâhmans, but though in common use with the latter as their medium of disputations and literary pursuit still by them even was only learned by exercise and study.

In consequence of the constant fluctuation of these readings some of which bear the appearence of having been produced by a mingling of the different systems of denotation of the sa*m*hitâsvara and the brâhma*n*asvara I have generally thought myself authorized to remove all evident blunders from my text, yet carefully recording as follows all those anomalies from the common mode of accentuation as might be more than mere mistakes of the copists. The exceptions I have made occur in the va*n*ças which I have given throughout in their original form — in some words which in the same passages are constantly accentuated in the same way, though differently from their usual accentuation, as for instance पाप वेद — and finally in a few others which are also likely to have really fluctuated between different accents.

Adhyâya १. १. १ मखो A. — ६ विष्णुरत्यौ A. — ११ मह्णन्मत A. मह्न्वत E. — ibid. °त्सम्राट् A. — १२ बित्तिं A. sec. h. — २३ नावनुवद्मासि स A. — २५ ? °चेत्ययत्तडुवा° A. first h. °चेत्ययतत्तडुवा° sec. h. — २६ तपस्व्यवानुब्रवा A. — ३२ ता इसद्यो A. ता८ सरद्यो E. Read: ता८ सद्यो. — ibid. अतिदिशानीति A. — ३३ °तमभिप्रस्नावया A. — ibid. रात्रावह्लीया° A. — २. १ °नित्या चेत्थाच्च A. — १० तदनयैनमेतत्स° A. — ११ वराह्नविह्नितं

A. E., but see कात्या° २६. १. ३. — ibid. स्योस्याः पतिः A. — १२ वत A. — १५ ब्रह्मणस्पति°, प्रवर्ग्य° A. — १५ °ह्यत्येव देवा A. — ibid. गोप्त्रे करोति A. first h. गोप्त्रेन्क° sec. h. — १९ यन्निरे A. — २१ अथैनांश्छूपयति A. — ibid. पवचमवधाय A. first h. — २३ ह्रीमाछ्लोका° A. Initial *l* after final *n* or *m* is in A. almost throughout doubled, and the nasal changed to anusvâra. The latter is very frequently dropped, but as it seems by mistake. — २४ °स्मिछ्लोके A. — २६ This ka*n*dikâ returns like a burthen at the end of all the following brâhma*n*as as far as the end of the third adhyâya. — ३. १ यद्व वान्य° A. first h. यद्व चान्य° sec. h. — २ आस्व A. आश्व E. — ४ सर्वं यत एष A., but see Mahîdhara at वाज° सं ३७. ११. — ६ स्थूणान्निर्ह्लत्य A. Final *m* standing before *n* or any other dental consonant is in A. usually changed into *n*, whereas final *n* in the same case is replaced by anusvâra (see p. 222). — ९ ऊर्जंनवैतमेतद्रसेन A. — १५. १६ The accent of आदीप्त is remarkable as in contradiction to the general rule. Are we perhaps to read उभयतआदीप्ता or उभयतआदीप्ता as a compound? — १६ प्रमुश्चादिति A. — २४ पितृतमह्त्रया वै A. For the sake of perspicuity I have supplied here (as well as at ३१. and २, १, ११. १४. ३५.) the *galitam* रसो व्यक्षरत्स. — २५ मनुमुह्न A. — ४. ४ and ५ The Pada reads गत at वाज° सं° ३७, १४. १५. — ९ गोपामनिपद्यमान° A. both times. — १३ माधवीभ्यामिति A. first hand, both times. —

Adhyâya २. १. २ स्वर्गछ्लोकऽ A. — ३ तस्मादेषोऽह्वोरात्राभ्यां परिगृह्लीत A. — १६ शफवादते A. — २. १ इममत्त रक्षाऽसि A. — ibid. °तत्पुरैवाह्न°

A. — २ ?समुद्रवत्ति A. E. — २० अश्विना घर्मं A. — २१ According to the Samhitâ (३८. १२.) the accentuation ought to be thus: हार्द्धानमहर्दिवाभिद्रू°. — २९ प्राङ्विवोदङ्° A. — ibid. एष वै धर्मो A. — ३४ The accent of प्रतिरतं is deserving notice. — ३५ and ३८ अकुर्वै° A. — ४५ आयुः प्रमायुको A. See आयुर्देवताः १३. ५. २. १०. — ४८ अपवर्ग्योऽथ A. —

Adhyâya ३. १. ३ °थ्यामुं कछ शुगा° A. — ११ यज्ञाश्छरी° A. — २२ वृषा पिन्वने A. — ibid. पश्चाद्वृषी A. E. — ibid. प्रवरणीयौ A. — २६ वार्षहरछ A. — २७ उपावति A. — २९ प्रसूते A. — ३१ सह ब्रह्मणा and सह पय° A. — ३३ °धर्युर्निक्रामति A. E. but see ११. २. ७. ३२. — २. ४ and ५ तत्सर्वा° — °मात्मा is wanting in A., supplied by conjecture, confirmed by E. — २८ and २९ यत्किं चि वि° A. — २९ ? माल्मया A. मार्त्सया E. मार्त्स्नया is my conjecture, see ६. १. ३. ४. — ibid. दृढ is here paroxytonon! — २५ and २७-२९ यदधिश्रितं! A. —

Adhyâya ४. १. ९ Dvivedagaṅga (D.) derives असक्त from सञ्ज, instead of सच्. — १७ स चन्द्रमभव° A. first h. — २० D. divides erroneously प्रतिप्रतिः into two words. — २. ७ सा गौरभवत् A. M. — २८ Read: यद्व ह वा. — २८ मीमाछसितं A. M. — ३. ७ प्रशछसा A. M. — १० ह्यात्तमायत्तैषा A. आत्तं seems indeed to be the reading also of D., still on account of the accent I prefer to read अत्तं. — १८-२० ज्योती रूप° A. M. The commentary treats these words as a compound, which seems to be demanded also by the sense, but is prohibited by the accent. — २६ अभुनजत् D. against the accent. — ibid. D. divides अद्दणायाकृतं into अद्दणाया

अकृतं· — २७ तत्तद्भवति AM. — ३३ अधिदैवतं D. (?). — ३४ मृत्युरासवदिति A. आप्नुवत् D. — ४. १ and २ बिभर्ति AM. —

Adhyâya ५. १. ३ and १५ पाण्डर° AM. पाण्डुर D. — ७ विषासहिरिति A. — १५ क्षत्रियामुपेया° A. — १७ अन्तर्हृदयं D. (?!). — १८ यदा निगृह्णाति A. — १६ स्वप्नया D. — २. २ स्थूणा is here oxytonon, whereas at १. ३. ७. paroxytonon. — ६ भरद्वाज, जमदग्निरि°, वसिष्ठकश्यपाव° AM. Read: व-सिष्ठक°. — ३. ५ अधिदैवतं D. (?). — ४. १ Are we to read उद्यास्यन्त्वा? — ४ व्याचक्षाणस्य AM. — ५ We expect मैत्रेय्यात्मनो. — ७ भवति? — १० निःश्वसितं D. — ११ स्पर्श is here and ७. ३. १२. oxytonon, whereas paroxytonon at ६. २. १. — ५. १५ समर्थिता A. — २० बैजवापा° R. (*) — ibid. वैष्टपुरे° A. — २१ बैजवापा° R. — ibid. °जंघनेरौपजंघनि° R. — २२ विदर्भी-कौण्डि° A. — ibid. स्वयम्भू R. — ibid. ब्रह्मणे नमः AM. The coincidence of both these mss. in all the other strange accentuations of the vança as given in the text is a thorough one: this observation refers also to both the later vanças.

Adhyâya ६. १. ६ and ११ कतिभिरय° AM. — १० दीप्यतऽइव AM. — १२ व्यानंः शस्या A. — २. २-४ गृहीतो unaccented AM. — ६ गृहीतस्त्वचा AM. — १४ वैत वेदि A. Read: °वैतस्य वेदि. — ibid. यद्रूचतुः unaccent.

(*) For the three vançás I have made use of the Rishitarpaṇa (R.) in Chambers 736 (see my Verzeichniſs der Berliner Sanscrit-Handschriften nro. 206. p. 46.): though the accents are not given in the ms., the little work is still of some importance as confirming the readings themselves and moreover as showing the importance attached in later times to the vanças, whose recital is here forming even a part of the ritual, and the care taken by the Brâhmans to preserve them with their original readings.

AM. — ibid. पाप as parox. AM. see ७, १, १७. २२. २, ६. २७. — ३. १ काप्यस्य AM. — ibid. and २ पारिक्षिता unaccented throughout AM. — २ व्यष्टिर्वा° AM. — ibid. The accent shows द्विस्तावत् to be a compound. — ४. १ मृत्युमत्येत्येतं A. — ibid. तस्माद्ब्राह्मणः पाण्डित्यं D. — ibid. मुनिर° unacc. AM. — ५. १ समानिति AM. — ibid. न दृष्टेर्द्रष्टारं पश्येर्न श्रुतेः श्रोतारं शृणुया न मतेर्मन्तारं मन्वीथा न विज्ञातेर्विज्ञातारं AM. — ६. १ प्रजापतिलोकेषु, प्रजापतिलोका AM. — ibid. We expect मूर्धा व्यपप्त°. — ७. १ काप्यस्य AM. — ४ °गवीरुदन्नसि AM. — ६ °ऊर्व्यसंसिषता° AM. — ७ एष तऽआत्मा D. — ७-१५ °न्तर्याम्य° unacc. AM. — १७ वेद oxytonon AM., see ७, ३, ६. ७. and ६, ४, १४. १५. — २६ यस्त्वचि तिष्ठन् AM. — ८. १ and १२ ज्ञातु parox. AM. (oxyt. २.२.२.२०.). — ३-७ यद्भूतं च भवच्च भविष्यच्चेत्याचक्षते AM. — ५ We expect धारयस्वेति. — ८ °न्त्यस्थूलमनण्वह्रस्वमदीर्घम° AM. — ibid. °मभयम° parox. AM. see ७, २, ३०. ३१. — ibid. °मविवृतमसंवृत° AM. — ibid. न तदश्नोति AM. — १० गार्गि acc. throughout AM. — ibid. ददाति AM. — ९. २० दिशो वेद AM. — २१-२४ हृदये क्वेव - - भव° AM. Read: भव°. — ibid. and २५ किंदेवता AM. — २२ ऽस्यां दक्षिणायां AM. — ibid. इति दक्षिणाया° AM. — ibid. क्वेव दक्षिणा AM. — २३ प्रतिरूपं AM. — ibid. सृप्तो parox.! — २५. २६ भवतीति ॥२५॥ अद्भ्यो° AM. — २६ एनद् acc. AM. — २८ न हि गृह्यते - - न सज्यते (सज्जते A.) AM.: thus also at ११, ६ and ७, २, २७. — ibid. त्वौपनिषदं AM. — २९ मा पृक्ष्य AM. D. पृक्षत is my conjecture. — ३० वृक्षो, ऽमृषा, पर्णाणि, वह्निः AM. — ३१ त्वच उत्पटः AM. — ३२ and ३३ मज्जोपमा कृता ॥३२॥ यद्वृक्षो वृक्णो - पुनः AM. — ३४ मा वो-

चत, ज्ञात एव, जनयेत्पुनः, धानारुह्, प्रेत्य सम्भवः AM. — १०. १ कश्चिद्ब्रवीत्त° A. — २ and ५. ८. ११. १४. १७. हि किं स्यादित्य° AM. — ३ प्राण एवायतन° D. — ibid. प्रतिगृह्णात्यपि AM. — ibid. and ६. ९. १२. १५. १८. वै सम्राट् परमं AM. — ४ and ७. १०. १३. १६. १९. नाननुशिष्य AM. — १२ प्रतिष्ठानन्त इत्येनदुपासीत कानन्तता, गछत्यनन्ता हि दिशः AM. — १५ प्रतिष्ठानन्द इत्येनदुपासीत कानन्दता AM. — ibid. सम्राट् स्त्रियमभि° AM. Read: स्त्रियम° see १. ४. २. — १८ स्थिति oxyt.! — ११. १ सम्राएमद्धान्त° डक्तोपनिषत्क AM. — २ परोऽत्नेणेव A. — ३ सृति paroxyt.! — ६ भगवन्नभयं AM. —

Adhyâya ७. १ १ समेनेन वदिष्य AM. This wrong accentuation is proved as ancient by the interpretation स मेने न given by Çaṅkara (and D.) which appears to be produced by it. — ibid. °ग्निहोत्रे समूदतु° AM. — २ किंज्योतिरयं AM. — ३-६ किंज्योतिरेवायं AM. — ६ शान्ते ग्नौ शान्तायां AM. — ७ लोकमतिक्रामति AM. — १० रथान्रथयोगान्पथः AM. — १२ शारीरमभिप्रहृत्यासुप्तः, पुनरैति, एकहंसः AM. — १३ कुलायं oyxt.! — ibid. बहिष्कुलायादमृत°, एकहंसः AM. — १४ स्त्रीभिः सह AM. — ibid. and २० भय parox.! — १५ आराममस्य पश्यन्ति, बोधयेदित्याहुर्दुर्भिषज्यं हास्मै भवति यमेष न प्रतिपद्यते AM. — १८ अनुसंचरति पूर्वं चापरं च AM. — ५१ सह्णयायिव AMD., see अहच्छिक ६, १, २६. and the note at १. २. २३. — २० नील oxyton.! see ७. २. १२. — अतिछन्दोऽपहतपाप्माभयं रूप° AM. — ibid. भ्रूणहाभ्रूणहा पौल्कसोऽपौल्कसश्चाण्डालोऽचाण्डालः श्रमणोऽश्रमणस्ता° AM. — २३-३० (and ३, १६-२३. where all the same blunders occur) ऽविनाशित्वान्न तु तद्विती° AM. — २३ यत्पश्येत्, २४ यज्जिघ्रेत्, २५ यद्रसयेत्, २६

यद्वदेत् AM. — २५ (३. १८.) यद्वै तन्न रसयति । विजानन्वै AM. — २६ (३. १९.) यद्वै तन्न वदति AM. — ibid. न हि च कुर्वतो विपरिलोपो A. first hand. न हि वक्तुर्वचो विपरि° A. sec. h. M. (and at ३. १९. AM.). I am at a loss to explain the वचो otherwise than by the assumption of its standing instead of वचसो. Perhaps also we are to read वक्तुर्वाचो? — २७ (३. २०.) यद्वै तन्न शृणोति AM. — २८ (३. २१.) यद्वै तन्न मनुते AM. — २९ (३. २२.) यद्वै तन्न स्पृशति । स्पृशन्वै तत्स्प्रष्टव्यं AM. — ३० (३. २३.) यद्वै तन्न विजानाति । विजानन्वै तद्विज्ञेयं न विजानाति AM. — ३१ भवति । एष ब्रह्मलोकः सम्राडिति हैनमुवाचैषास्य AM. — ३२ संपन्नतमः AM. — ३५-३९ श्रोत्रिय oxyt. or parox.! (instead of âdyudâtta). — ३८. ३९ प्रजापतिलोक AM. — ४१ उदरौत्सी° A. — ibid. उदुम्बरं acc.! — ४२ सुसमाहितम् AM. — ४३ (and ४४) उग्र acc.! — ibid. प्रतिकल्पन्तेऽयमायात्ययमागच्छतीत्ये°, इदं ब्रह्मायातीदमागच्छतीति AM. — ४४ उपसमायन्त्येवं AM. — २. २ न विजानातीत्याहुः AM. — ३ प्राणमनूत्क्रामन्तं, संज्ञानमेवान्ववक्रामति स एष ज्ञः सविज्ञानो भवति AM. — ६ पृथ्वीमयः A. first hand. — ibid. यथाचारी तथा, पापकारी पापो, पापः पापेनेति AM. — ७ तथाक्रतुर्भवति यथाक्रतुर्भवति AM. — ८ तदेव सक्तस्सह, निषक्तमस्य, तस्माल्लोकात्पुनरैत्यस्मै, योऽकामो निष्काम, न तस्मात्प्राणा AM. — १० °निर्ल्वयनी AM. D The original reading may have been निर्व्लयनी, see Böhtlingk-Roth, Sanskrit-Wörterbuch sub अहिनि°. — ibid. °नस्थिकोऽशरीरः acc.! — ११ मयैव, अपियन्ति AM. — १२ शुक्लमुत AM. — ibid. नील, पिङ्गल acc.! — १३ अन्धं तमः प्रविशन्ति येऽसम्भूतिमुपा°, सम्भूत्यां रताः AM. — १४ असुर्या नाम ते लोकाः । अन्धेन, तांस्ते

प्रेत्यापिग॰ AM. — १५ न चेद्वेदी मह्ती विनष्टिः AM. see Kenopanishad २. १४. — ibid. ॰मृतास्ते भवन्त्यथेतरे दुःखमेवोपयन्ति AM. — १६ स्मीति, किमिछन्कस्य A. — १७ यस्यानुवित्तः, विश्वकृत्स, स उ लोक एव A. — १९ तमेव मन्यऽत्रात्मानं विद्वान्ब्रह्मा॰ A. — २० ॰पासते AM. — २१ प्राणस्य प्राणम् । । उत, ॰श्चनुरुत AM. — २२ मृत्युमाप्नोति, ॰दप्रमयं ध्रुवं A. — २३ मह्रान् D. — ibid. नानुध्याया॰ AM. — २४ (and ८, ८, २) वशी acc.! — ibid. न साधुना, एवासाधुना AM. — २५ प्रव्राजिनो लोकमी॰ AM. — २६ न कामयन्ते किं प्रजया करिष्यामो येषान्नो AM. — २७ साधसाधुनी AM. — २८ विजिघत्सोऽपिपासो AM. — २९ न्नादो A. — ३० and ३१ मह्रानज, ऽमरोऽभयोऽमृतो ब्रह्माभयं AM. — ३. १ भार्ये acc.! — २ Are we to read ॰जिष्यन्वा? — ५ प्रिया खलु नो भवती, वाचं तु मे व्याचक्ष्णस्य A. — ६. ७ the accent of वेद (in १२ वेद as usually) seems to imply the later addition of the respective passage, which is moreover wanting at ५, ४, ५. ६. — ६ मैत्रेय्या॰ acc.! ibid. मते विज्ञात AM. — १३ सैन्धवघनो । अनन्तरो AM. — १६ ऽयमात्मानु॰ AM. — ibid. भवति acc.! — २४ तत्रान्योऽन्यत्पश्येदन्योऽन्यज्जिघ्रेदन्योऽन्यद्रसयेदन्योऽन्यदभिवदेदन्योऽन्यछृणुयादन्योऽन्यन्मन्वीतान्योऽन्यत्स्पृशेदन्योऽन्यद्विजानीयात् AM. — २५ मैत्रेय्ये॰ acc.! — २६ बैजवा॰ R. — ibid. वैष्टपुरे॰ A. वैष्टपुरे॰ MR. — २७ बलाका॰ R. — ibid. ॰पजंघनेरौपजंघनिः साकायनात्साकायनः R., but ॰जंधनेरौपजंधनिरासुरे॰ R. — २८ विदर्भाकौण्डि॰ A. — ibid. स्वयभू R. — ibid. ब्रह्मणे नमः AM. —

Adhyâya ८. १. १ ॰मिदं पूर्णात्पूर्णमुदच्यते पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यत AM. — ibid. ओं ओम् । M. — ibid. पुराणं वायुरं AM., which rea-

ding is to be restituted in the text. — २. २-४ इति व्यज्ञासिष्टा३इति व्यज्ञासिष्मेति, होवाच व्यज्ञासिष्टेति AM. — २ होचुर्दाम्यतेति AM. — ३ and ४ °रमुवाच द इति AM. — ४ दाम्यत दत्त दयधमिति AM. — ibid. शिक्षेद्दमं acc.! — ३. १ वायुरनिलम° AM. — ibid. ओ३म् क्रतो स्मर AM. — ibid. क्लबे A. क्लिबे MD. — ४. १ तदेतत्त्र्यक्षर७ AM. — ५. १ लोकान्जित AM. Read: लोकान्जित. — ६. २ तदेतत्त्र्यक्षर७ AM. — ४ and ५ अक्षरे स्वरिति AM. — ७. १ °दानाद्विद्युद्विद्यत्ये° AM. — ८. १ वशी acc.! — ९. १ स्वधाकार acc.! — ibid. ऋषभो मनो वत्सः AM. — १०. १ यदेदमघ्यते A. — ११. १ प्रेत acc.! — १२. १ दुन्दुभि acc.! — ibid. शश्वतीः समाः AM. — १३. १ भूत्वा परमतां गच्छतः AM. — २ भूत्वा परमतां गच्छतीति AM. — ३ वीत्यन्नं वै व्यन्ने, विशन्ते AM. — १४. १ उत्थ throughout D. — ४ ज्ञाणितो३ acc.! — १५. ४ एतदेव तुरीयं A. Read: एतदेव। तुरीयं. — ibid. तत्तुरीयं A. — ५ °स्मिंस्तुरीये A. — ७ सा हैषा गयांस्तत्रे AM. — ८ न हैव तद्गायत्र्या एकं चन पदं प्रति AM. — ९ यावदिदं प्राणि AM. — ibid. एतदेव तुरीयं A. Read: एतदेव तुरीयं. — ibid. नैव केन चनाप्यं कुत उ एतावत्प्रतिगृह्णीयात् AM. — १० गायत्र्यस्येकपदी AM. — ibid. तुरीयाय A. Read: तुरीयाय. — ११ माश्वतराश्विमु° AM. — ibid. तद्गायत्रीविद्ब्रूथा, मुख७ ह्यस्याः सम्राएन विदां AM. —

Adhyâya ६. १. १ स भो३इति AM. The accented syllable preceding a pluta generally retains its accentual sign in the mss. — °शिष्टो न्वसि AM. — २ प्रज्ञाः। प्रयत्यो, प्रयद्भिर्न संपूर्यता३ AM. संपूर्यते D. — ३ यतिथ acc.! — ibid. पुरुषवाचो AM. — ibid. देवयानस्य वा पथः प्रतिपदं पितृयाणस्य वा यत्कृत्वा देवयानं वा, पितृयाणं वा AM. — ४ अपि हि न ऋषेर्वचः

AM. न is taken by D. (and Çankara) erroneously and against the accent for नः, see सप्तऋषि, एकऋषि. — ibid. °त्समेति, चेति नाक्रमत AM. — ५ वसति° acc.! — ibid. कुमारः A. — ibid. वाव किल नो भवान्पुरा AM. — ibid. अवोचः acc.! — °रप्राक्षीत्ततो नैकं, इतीमऽइति ह AM. — ibid. प्रतीकान्यु° acc.! — ६ नस्त्वं तात, तत्तुभ्यमवोचं, भवानेव AM. — ७ गौतमः । M. — गौतमो । A. — ८ गौतमाय, यां तु कुमारस्यान्ते वाचमभाषथा° AM.— १० विज्ञायते ह्यास्ति, भवान्वदो° AM. — D. divides अभ्यवदान्य into two words अभि and अव°. — ibid. स वै गौतम AM. The reply of the king beginning with स not with गौतम, this latter ist left unaccented. — ibid. इत्युपैम्यहं, वाचा ह AM. — ११ गौतम मापराधास्तव च पितामहा यथेयं विद्येतः पूर्वं न, तां त्वहं तुभ्यं वक्ष्यामि को हि AM. — १२ देवाः श्रद्धां जुह्वति AM. — १३ धूमो विद्युदर्चिरश° AM. — ibid. सोमं (म A.) जुह्वति AM. सोमं राजानं जुह्वति D. — १४-१७ जुह्वति AM. — १७ धूमोऽर्चिरर्चिरङ्गारा AM. — १८ य चामी (वामी A.) अरण्ये AM. — ibid. °र्चिरभिसम्भवन्त्यर्चिषो A. — ibid. मासेभ्यो देवलोकं AM. — १९ धूमाद्रात्रिं रात्रेरप°, मासेभ्यः पितृलोकं, तेषां यदा तत्पर्यवैत्यथै°, वायोर्वृष्टिं वृष्टेः, एवमेवानुपरिवर्तन्तेऽथ AM. — २. १ °त्यपि च येषां वुभूषति AM. — यो ह वै प्रतिष्ठां वेद, चक्षुषा हि समे AM. — ६ यो ह वै प्रजापतिं वेद A. — ७ आहंश्रेयसे A. — ibid. पापीयो मन्यते AM. — ८ °र्यथा कडा अवदन्तो वाचा, पश्यन्तश्चक्षुषा AM. — ibid. and ९-१२ °वमज्जीविष्मेति AM. — ९ °र्यथान्धा अपश्यन्त°, वदन्तो वाचा AM. — १० °र्यथा वधिरा अशृण्वन्तः AM. — ibid. and ११-१२ वाचा पश्यन्तश्चक्षुषा AM. — ११ °र्यथा मुग्धा अविद्वांसो AM. — १२ °र्यथा क्लीबा अप्रजायमाना AM. — १३

पड्बीशशङ्कूत्संवृह्दे देवं, न वै शल्यामस्त्व° AM. — १४ अहं वसिष्ठास्मि त्वं तद्वसिष्ठो, सम्पदस्मि, °यतनमस्मि AM. — ibid. अहं प्रजापतिरस्मि त्वन्तत्प्रजापति° A. — ibid. आ क्रिमिभ्य आ कीठपतङ्गेभ्यस्तत्ते AM. — १५ तदन्नमनग्नं कुर्वन्तो मन्यन्ते, तदन्नमनग्नं कुरुते AM. — ३. १ °माणपन्ने पुण्याह्ने (!) द्वादशाह्न(!)मुपसद्व्रती भूर्वौदुम्बरे, पुंसा, मन्थं (!) संनीय AM. — २ जातवेदः, तृप्ताः कामैस्तर्पयन्तु AM. — ३ या तिरश्ची निपद्यसेऽहं (अहं M.) विधरणी इति AM. The want of sandhi at the last two words is deserving notice. — ibid. तृतीयां जुह्होति AM. — ४ ज्येष्ठाय स्वाहा श्रेष्ठाय, प्रतिष्ठायै AM. — ibid. and ५-८ मन्थे acc.! — ९ ज्वलत् to संदीप्तम् acc.! AM. — ibid. संवर्गोऽसीति AM. — १० °स्यामं हि ते मयि स हि राजेशानोऽधिपतिः स मा राजेशानो AM. — १२ नक्तमुतोषसो AM. — १३ पाणी AM. — १४ प्रातरादित्यमुपतिष्ठते दिशामेक° AM. — ibid. यथेतम् acc.! — १५-२० °न्तेवासिन (सिष्य २०) प्रोह्युः AM. — ibid. पलाश acc.! — ibid. The accent of the names is printed in the form given by AM.: याज्ञवल्क्य here and ४. ३३ instead of याज्ञवल्क्य! — १९ Read: °रायस्थूणः. — २१ औदुम्बरश्चमस औदुम्बरः स्रुव औदुम्बर इध्म औदुम्बर्या AM. — २२ व्रीहियवास्तिलमाषा अणुप्रियङ्गवो acc.! — ibid. दध्ना मधुना घृतेनोपसिञ्चत्याज्यस्य जु° AM. — ४. १ पृथिव्या आपो AM. — ibid. पुष्प acc.! — २ स स्त्रियं ससृजे तस्मात्स्त्रियमध उपासीत AM. — ३ वेदिरुपस्थो लोमानि, समिद्धो, °मविद्वानधोपहासं चरत्यास्य स्त्रियः AM. — ४ इदमविद्वांसो (सो M.) ऽधोपहासं AM. — ५ यन्मेऽद्य रेतः, °धीरप्यसरद्यदपः, पुनर्मामैत्विन्द्रियं, धिष्ण्या, °न्नामित्यनामिकाङ्गुष्ठाभ्या°, स्तनौ वा भ्रुवौ AM. — ६ सुकृतमिति AM. — ७ एषा स्त्रीणां यन्म°, पाणिना वोपहत्यातिक्रामेदिन्द्रियेण AM. —

८-१० (and २०) अर्थं, मुखेन मुखं AM. — ८ संधायोपस्थमस्या, °यादधिजायसे स त्वमङ्गकषायोऽसि AM. — ९ (is left out in A, but merely by chance as the numeration of the kaṇḍikâs shows) दधीतेति, संधायाभिप्राण्यापान्यादिन्द्रियेण M. — १० दधीतेति, संधायापान्याभिप्राण्यादिन्द्रियेण AM. — ११ जायायै जारः स्यात् AM. — ibid. मम समिद्धेऽहौषीः° AM. throughout. — ibid. य एवंविद्ब्राह्मणः A. यमेवंविद्ब्राह्मणं D. — १२ जायामार्तं°, कंसे न पिबेदहतवासा नैनां वृषलो न वृषल्युप°, व्रीहीनवघातयेत् AM. — १३-१७ पुत्रो मे (दुहिता मे in १६), पाचयित्वा, °मश्नीयातामीश्वरौ जनयितवै AM. — १३ वेदमनुब्रुवीत AM. — ibid. क्षीरौदन acc.! — १४ जायेत द्वौ वेदावनुब्रुवीत AM. — ibid. दध्यौदनं D.? — १५ त्रीन्वेदाननुब्रु° AM. — १७ शुश्रूषितां acc.! — ibid. जायेत सर्वान्वेदाननुब्रु° AM. — ibid. औक्ष्णा acc.! — १८ स्थालीपाकावृताज्यं चेष्टित्वा स्थालीपाकस्यो°, स्वाहानुमतये, पाणी ऽउदपात्रं पूरयित्वा, °ष्ठातो विश्वावसोऽन्यामिच्छ AM. — १९ °मभिपद्यते । ऽमो (अमो M.) ऽहमस्मि सा त्वं, सामाहमस्मि ऽऋक्त्वं द्यौरहं पृथिवी त्वम्, तावेहि, सह रेतो दधावहै पुंसे पुत्राय वित्तयऽइति AM. — ibid. Read दधावहै. — २० ऊरू विहापयति AM.— ibid. त्रिरेणामनु° D. — ibid. °र्योनिं कल्पयतु, पिंशतु, °र्धाता गर्भं, सिनीवालि, पृथुष्टुके, देवावाधत्तां AM. — २१ देवी, दधामहे दशमे, पृथिवी, गर्भिणी, वायुर्दिशां यथा गर्भ एवं गर्भं दधामि AM. — २२ साष्यन्तीमद्भिरभ्युक्षति, पुष्करिणीं समीङ्गयति (°माङ्ग° A), एवा ते, सहावैतु, सपरिस्रयः AM. — २३ कंसे, पुष्यास° AM. — ibid. उपसंख्या D. — ibid. मा हैत्सी° (जैत्सी° M.), मयि प्राणांस्त्वयि AM. — २४ °र्मणात्यरीरिचम् । यद्वा न्यूनमिहाकरम् AM. — २५ आपुष्यं acc.! — ibid. नामधेयं करोति, °स्यैतद्गुह्यमेव नाम स्या°, दधामि स्वस्त्वयि

AM. — २६ ह्रिरण्यमश्नुतं A., °स्तूतं D., °स्नुतं M. and Pâraskara १.१६. — ibid. स्रात्मा वै पुत्रनामासि AM. — २७ मैत्रावरुणी, वीरमज्ञीजनथाः, वीरवती भव या° AM. — २८ मात्रे, स्तनं (स्तनं M first hand) AM. — परमां बत (वत A) काष्ठां प्राप, पुत्रो जायतऽइति AM. — ३० वाडेयीपुत्राद्धा° A. बाडेयीपुत्राद्धा° R. — ३१ वालाक्या A. बालाक्या R. — ibid. वौधीपुत्राद्धौ° A. बौधीपुत्राद्धौ° R. — ३२°लंवी°, °लंवा° A. °लंबी°, °लंबा° R. — ibid. जायतीपुत्राज्जायती° A. जायंतीपुत्राज्जायंती° R. — ibid. माण्डुकीपुत्रान्माण्डुकीपुत्रः R. — ३३ स्रासुरोवासिनः R. — ibid. वाध्यो° A. बाध्यो° R. — ibid. °विर्वाचो! AM. Read °विर्त्राचो. — ibid. याज्ञवल्क्येनाव्यायन्ते AM. —

CORRECTIONS OF THE PRESS.

Besides those already noticed I have met with the following ones: Read: preface VII, 27 (9 and 10 twice. 2-5. 7. 8. — VIII, 19 (and X, 19) Ukhâsambharaṇa. — ibid. 20 530 k. — XII, 11 Bibl. Indica no's 5 foll.—

४. १६ ऽएवैतन्नि-. — ५. ५ °दापन्नं. — ६. १७ °विरे तऽइमे. — ८. २२ वैष्णवीमृचं. — ९. ४ संस्कु°, संस्कृ°. — ibid. २१ यज्ञपात्राणि. — १०. ६ वर्षमु क्ष्वैवै°. — ११. १७ and १९ °त्तडुपदधाति. — ibid. २० and २१ °स्त्तडुपदधाति.— १२. ९ ह्निनसात. — ibid. १० दीचीना°. — १५. १४ तऽउ. — ibid. १९ °न्वाव्हार्य? — १७. १ मनुष्यो. — २०. ९ संवत्सरो. — २१. १७ संमृद्दि. — २३. ९ °त्यनूच्य. — ibid. १६ ऽयादिति. — २५. ९ °दिदानीं. — २९. १९ पलाशो. — ३१. १ विधृती नाम. — ३६. १६ त्रिचम°. — ३९. ७ प्रेप्सति? — ४०. १९ आर्तिमारि°. — ४६. १९ परावसुर्ह्ह. — ibid. १७ and १८ आर्तेर्गी°. — ४८. ८ °त्पुनरध°. — ५०. २० परार्ध्यो. — ५५. ३ and १२ सर्वतो. — ibid. १८ °स्माडु ह्. — ५६. २१ पित्रैव. — ५७. ३ षोमीय. — ibid. ६ समार्ध्यत. — ५८. १० °वान्तरैव. — ibid. १७ स ह्वैव. — ५९. ५ संव्लीनः. — ibid. भस्त्रैवं संव्लीनः — ६०. २ वाप्यं. — ibid. ३ एकतमेनैवेद७? — ६३. ४ यथेदं. — ibid. २१ केवलीरोष°. — ६४. १० °वोदितो. — ६६. ५ °मिमांलो°. — ६८. १५ °याच्यथायोनौ. — ७०. ७ अव्हास्यव्हा°. — ७२. २ भाल्लबेयः ।. — ibid. ३ °मापदोति? — ७६. ८ °मिव्हामि°. — ibid. १५ यामु मया? — ७७. ९ °त्मञ्झितया. — ८४. ३ तं नीचैरिव. — ८९. ९ °त्युपस्पृशति. — १३४. ५ deleas २१ °ड्मातमनसो. — ibid. ७ and ८ deleas १४ साध इ°?. — ibid. ८ deleas ५ ज्ञायते. — ibid. ९ deleas १८ उ. — ibid.

१२ °ब्रूह्ही°. — १४०. १२ भाल्लबेयः ।. — ibid. १४ पचेदपराह्णेरेव. — १४३. १३ ॥२१॥. — १४४. ५ and १२ यमभि काम°. — १४६. १३ द्वेधाविभक्त एव. — १४७. २२ तद्ध ह्याप्यरुण°. — १४८. १४ ह्रो-यावह्र-इव. — ibid. १७ लोकाम्वे°. — ibid. १९ पुण्यलोकत्वे°? — १५१. १० °स्याग्निता? — १५४. १८ पशवोऽमूला both times. — १५६. ७ सैषैकाङ्कतिरेवाग्रे. — १५७. १० तद्बर्हिर्धा and बर्हिर्धा वै. — १६०. ३ भार्या. — १६१. १ यदा-यदेव. — ibid. ११ पल्यङ्ग्यमाने. — १६३. २० थैन्द्राग्नी. — १६५. ६ तद्यदस्तंयन्ना-. — १६८. २ and १५ तत्स्यत्वा. — १७०. ११ पितृदेवत्यो. — १७१. ११ °कमपिसृजति. — १७२. १७ द्यावापृथिव्य° both times.— १७३. १४ वषट्कृतं. — १७४. १३ राज्यमिव ह वै. — १८१. ७ स्युस्ता°. — १८४. २२ धिमभिपद्याश्राव्या°. — १८७. १ तदेव. — १९१. ८ स्तम्बयजुर्ह्रत्वा°. — १९७. १३ तासामु तासां. — १९८. ५ तेऽप्रतीत्तं. — २२०. १८ and १९ del. the note about ईलित. — २२१. २० A.- २. २. — २२७. १६ °न्वजनि मा. — २३३. १६ तत्रानुव्याहरेद्रुस्यति. — २३५. ५ संस्कृते. — २४१. १ सोमोपनहनमादत्ते. — २५५. ८ संस्कृतमिति. — २५९. १५ °भिसंस्क-. — २६४. ८ कुर्वन्ते? (A. sec. m. and B.). — २६५. २१ and २६६. ५. ७. ८. १० °त्संस्करो°. — २७६ and २७७ the numeration of the ka*n*d*i*kâs १-१५ is erroneously given as ८-१४. — २७८. ४ संस्कृतम्. — २८१. ५ सप्तदशा°. — २९५. ३ वञ्चितमानिति. — २९७. ८ तस्मा-द्राप्रियो. — ३०४. २ ऽनूकाश्च. — ibid. ११ °पयड्भ्यो. — ३०६. १ °श्चोदनत्यश्चा°?— ३११. २० पश्चैकादशिनी. — ३१८. ६ वाऽएषां सधनं. — ३१९. १ सुसुततम°. — ३३१. २१ are not to be. — ३४६. १२ °श्चेदं वाऽउपांशु. — ३५२. १० °तेनो-पगछति. — ३५८. २० तस्मादिमाति. — ३५९. ३ and ५ कामदुघैवे°. — ३६७. ७ व्यवत्स्यत्. — ३७३. १४ तद्वै षड्द्वादशे°. — ३७५. ५ अभ्यवयन्ति. — ३८०. ११

and १४ वकल्पन्ते? — ३९२. ११ बार्हस्पत्याम्. — ३९९. २२ एना ग्रवति. — ४०१. १५ ऽस्तंयन्तं वा. — ibid. १७ ब्राह्मणम्. — ४११. ५ नाम ॥४॥. — ४१६. the numeration of the kaṇḍikâs ५-७ is erroneously given as ४-६. — ibid. १ सत्त्वोत्थाने. — ४३२. १० °मात्रिसृताग्नेः. — ४३३. १ अष्टाग्निर्यूपो. — ४४१. ४ दशधाविह्नितो. — ४४२. १८ तन्नाष्ट्रा. — ४४८. १ °तिर्ब्रह्म द्वि. — ibid. १३ य ऊष्मणा. — ४५२. १०. १३. १८. २१ राष्ट्रं मे. — ४५६. १६ पाण्डुं. — ४५९. ३ °र्वागे- वास्मा°. — ४६४. १४ ग्निरुद्धृतो? — ४७४. २ सुत्रामणा. — ४७७. १६ ऐन्द्राविष्णवं. — ४७९. ९ धेनवो. — ४९८. ९ २२ °णाय ऋषभं. — ५०३. ९ ॥२१॥. — ५०४ and ५०५ the kaṇḍikâs ३३-३६ are erroneously numbered as ३२-३५. — ५०६. ६ °दग्निर्वै. — ५०७. १६ and १८ भि संस्कर°. — ५०८. २१ न ह्यनायतने. — ५१०. ११ and १७. ५१२. ६. ५१३. १. ५१५. १५. ५१६. ३ and ७ द्वादशाप्रियस्त°. — ५१३. १५ नियुवत्यौ. — ५१६. २१ यदेते. — ५२६. ८ स्यत्वा. — ५३०. ७ ॥७॥. — ५३५. २२ ऋतव्यः. — ५४२. ११ सप्ताश्व°. — ibid. १३ ॥११॥. — ५५३. १३ प्रसुतऽग्राह्व- नीयो. — ५६९. ७ ॥३॥. — ५७२. २० ॥३१॥. — ५७३. १९ चतुष्पादाः? (B.) — ५७९. २० युवाग्निं. — ५८८. २० and ५८९. ३ °र्वैदे°? — ibid. १२ त्रिणतः ।. — ibid. १९ °ध्वज्ञपथाद्र°. — ५९६. २० ऽएतमधि जनयति. — ६०१. १५ सऽर्क्सो. — ६१६. २ विश्ववतीभ्यां? (B). — ६३१. ५ °शाद्विरूपमिति. — ६५७. ९ द्वे प्र- तिष्ठे. — ६९५. १९ रसमपत्नी°. — ७०१. २० देवो. — ७२०. ९ वै कर्णकाः. — ७२५. ९ वसोर्धारित्याच° — ७४२. २ वदत्यूष-इवैव. — ७६१. १८ येऽवाश्वः. — ७६४. २१ देवा. — ७७५. ५ यज्ञेन-यज्ञेन ह्वैव. — ७७७. १७ देवतोना-. — ७८०. १७ भार्येभ्यो, भार्यान्बु°. — ibid. १८ भार्येभ्यो. — ८०९. ३० शंसनीयम्. — ८३०. १० and १२ °पैत्सर्त्तिम्°. — ८५२. २२ °त्तात्तिपाना°. — ८५८. १ [५. १.] ॥. — ८५९. १९

वैश्वदेवं. — ८६३. १० बुल्बो. — ८६८. ७ °त्के नैनं. — ८७२. १८ °त्क्रान्तिं. — ८७४ (*). १६ देवा. — ९००. ८ तदोषधिभिः. — ९११. ६ स्विते. — ९१५. ७ ह्यास्त्वेव. — ९१६. १२ संचरन्ति. — ९२६. १ °स्तैरेनं. — ९३७. २ °ध्यादपशुर्यज्ञ°. — ९४१ in the title-line अध्या° ६. १. ५. — ९६२. १ योऽबल्लो. — ibid. १७ शीर्षण्याः. — ९६४. १७ नैकशतमत्येति. — ९६८. ८ एकादश. — ९८२. १७ इन्द्रियमु वै वीर्यं?— १००७. १ °ग्नेस्तथा. — १०११. २२ नेन्म्ह्वदघं AD. — १०२३. १८ °युर्न ताऽ सद्यो.— १०५३. १५ यद्व ह वा. — १०५५. ८ पृष्ठत?. — १०६०. ९ प्रतिलोमं?. — १०६१. २० सिष्ठकश्य°. — १०७२. १०७४. १०७६. १०७८ in the title-line प्रपा° ५. — १०७८. १५ भवन्ती°. — १०७९. १ भव-. — ibid. ६ भवती°. — १०९१. १२ [७.२.].— १०९२. १६ ॥१२॥. — १०९४. ११ वायुरं. — १०९५. ९ लोकान्जित. — १०९८. ३ एतदेव । तुरीयं. — ibid. १७ एतदेव तुरीयं. — ibid. २० तुरीयाय. — ११०४. २२ °किरायस्थूणाः. — ११०७. १० दुधावद्दै. — ११०९. ११ °विर्वाचो. —

There are some cases, where I did not venture to use the double stroke beneath the line instead of the simple one given by the mss., being not certain if the word was really a perispomenon (not a paroxytonon): thus for instance अमावास्या is given throughout the first half of the edition as अमावास्या. — The strokes of ¯ ¯ े ै are frequently damaged by the press.

Berlin, August 1855.

(*) Ibid. १९ Çankara at Bṛih. A'r. ३. ९. २६ reads पुरेऽतिष्ये! —